श्रीगणेशाय नमः । श्रीरामाय नमः ।

प्रथमोऽध्यायः

ॐ आदिरामायणं नाम श्रीरामचरितं शुभम् ।
किञ्चित्समाधावालोच्य प्रवक्ष्यामि प्रयत्नतः ॥

ॐ नमः परमहंसास्वादितचिन्मयमकरन्दाय रुचिरनखशिखान्त[1]रत्न-प्ररोहपल्लवितसिंहासनप्रान्तपीठप्रदेशाय मुनिमानसमधुकरप्रमोदाय श्रीरामचन्द्रचरणयुगलाय ।

ब्रह्मोवाच

रामं लोकाभिरामं रघुवरतनयं कोशलामुक्तिपुर्यां
खेलन्तं कामकेलिं सुविमलसरयूतीरकुञ्जे नटन्तम् ।
जानक्या चारुहासच्छविविशदशरच्चन्द्रिकाकान्तिमत्या
संयुक्तं राज्य (ज ?) वेषं ललितरसमयं ब्रह्म पूर्णं नमामि ॥१॥
भक्तानां प्राणनाथं वरदपरिवृढं[2] वंशवर्यं वरेण्यं
शुद्धं श्यामावदातं हरितमणिरुचिं सच्चिदानन्ददेहम् ।
आभीरीनेत्रपद्मप्रकरदिनकरं पूर्णचन्द्राभिरामं
रामं श्यामं प्रकामं निजहृदि कलये कोटिकामावतारम् ॥२॥
मुक्ताहाराभिरामं मणिमुकुटसमाबद्धसद्रत्नगुच्छं
मन्दस्वच्छामृताब्धि[3] प्रतिमविहसितं चारुबिम्बोष्ठकान्तिम् ।
शृङ्गारे कान्तवेषं परमतमरसानन्दसाक्षात्कृताङ्गं
गम्भीरावर्तनाभिं त्रिवलिमदुदरं[4] नौमि रामं रमेशम् ॥३॥
एकं नित्यं स्वसाक्षि स्वमहिमनि सदा संस्थितं स्वानुभावं
स्वाधारं ब्रह्मणोऽप्याश्रयममितगुणं भूरि कल्याणवेषम् ।
महांसेशं (तं रासेशं ?) निरंशं निरवधिमवधिं वस्तुमात्रस्य तत्त्वम्
निस्त्रैगुण्यं महस्तत् स्मरसि न हृदये पूर्णरामाभिधानम् ॥४॥

---

१. °नखरशिखरांतं–रीवां, मथुरा । २. °परिदृढं–अयोध्या । ३. °स्वच्छ°–अयो० । ४. °मुदरं—अयो० ।

मत्स्यं कूर्मं वराहं नृहरिमथ हरिं वामनं हंसरूपं
यज्ञं नारायणाख्यं त्रिभुवनललितं भार्गवं वै हयास्यम् ।
प्रद्युम्नं[1] वासुदेवं कलिमलदमनं[2] रेवतीप्राणनाथं
बुद्धं कल्किं यदन्त्ये न भवति सकलं ब्रह्म रामं स्मरामि[3] ॥५॥
या ते नित्यैव लीला प्रमु(म ?)दवनमहारण्यवृन्दावनादौ
वेदानां गोचरत्वं व्रजति न कथं स्वात्मभाषा स्फुरन्ती ।
सा मे सर्वस्वमास्तां रतिमयसहजानन्दकेलीनिधानं
नान्या प्रेम्णार्थता त्वय्यतिशय[4] वरदेश प्रभो रामभद्र[5] ॥६॥
रक्ताशोकद्रुमालीविरचितसुमहामण्डपान्तर्निषण्णां
सीतासङ्केतकेलीप्रियमत उरसा[6] क्रान्तगोपीकदम्बम् ।
नीलाभ्रश्यामलं[7] तज्जयतु हृदि सदा पूर्णशृङ्गारतत्त्वं
धाम श्रीरामनाम त्रिभुवनसुखदं कोटिकामावतारम् ॥७॥
पद्भ्यां मञ्जीरवद्भ्यां सुललितम(ल ?)वली[8] पल्लवश्रीमुखाभ्यां
क्रीडन् केलीनिकुञ्जे विहसितसहजानन्दिनीशक्तियुक्तः ।
शुष्कं दावाग्निदग्धं द्रुमविटपमहा (हो ?) वंशिकानादवृष्ट्या[9]
पीयूषौघैर्नयन्तं पुनरपि हरित (तां ?) रामचन्द्रं भजेऽहम् ॥८॥
हंहो माधुर्यलक्ष्मीस्तव नयनसुखं वर्धयत्वस्मदीयं
पूर्णा ते राम दृष्टिर्भवतु सकरुणा नित्यमेव प्रसन्ना ।
त्वत्कीर्तिः कण्ठदेशे निवसतु नितरामादिविद्वत्प्रगीता
चित्तेऽन्तर्भातु नित्यं तव पदयुगलं विश्वतापापहन्तृ[10] ॥९॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे
ब्रह्मस्तुतिर्नाम प्रथमोऽध्यायः ।

---

१. इतः पूर्वं = त्रुटिचिह्नं दत्त्वा प्रान्तभागे अधिकं रीवांपुस्तके—
"रामं कृष्णं च बुद्धं यवनवधकरं चक्षते वेदवेदो
यस्यांशं तं परेशं स्मर यदि सततं सन्निधिं वाञ्छसे चेत् ॥"

२. कंसारिकृष्णं–मथु०, अयो० । ३. प्रसिद्धमेतेऽशां रामस्य श्रीरामं परात्परं स्मर—मथु० अयो० । ४. नाना केषार्थतात्वय्यविषय–अयो० । ५. रामचन्द्र–अयो० । ६. °प्रियमन उरसः–अयो० । ७. °श्यामलां–अयो० । ८. °नवली–रीवां, अयो० । ९. °वृष्ट्या–अयो० । १०. °हात्वं—रीवां, अयो० ।

द्वितीयोऽध्यायः

ब्रह्मणो विपुले सत्रे संगता देवतागणाः ।
यजमानं पर्यपृच्छन् वृद्धं विश्वपितामहम् ॥ १ ॥

देवा ऊचुः

भगवन् देवदेवेश ब्रह्मन् लोकपितामह ।
त्वमेव जगतः कर्ता[1] वेदस्य च समाश्रयः ॥ २ ॥
त्वत्तो नान्योऽस्य[2] जगतः प्रवर्तनविधिक्षमः ।
आदिमूर्तिः स्वयम्भूस्त्वं स्वराट् चैव विराट् प्रभुः ॥ ३ ॥
वेत्सि भूतं भवद् भाव्यं दिव्येन ज्ञानचक्षुषा ।
क आश्रयोऽस्य जगतः किं निमित्तं तथा प्रभो ॥ ४ ॥
किं सारमत्र वेद्यं च बहुवल्गिनि चागमे ।
भवतः संमतं किं च लोकेशस्य विधेर्वद ॥ ५ ॥
क आदौ विनियोक्ता च कः स्वभावोऽस्य संततम्[3] ।
किं स्वरूपं क आकारो ब्रह्मापि वद कीदृशम् ॥ ६ ॥
कीदृशं तस्य संस्थानं किं स्थानं परमं पदम् ।
सगुणं निर्गुणं[4] चापि ध्येयं ज्ञेयं च कीदृशम् ॥ ७ ॥
एतदुद्देशतः पृष्टं विरिञ्चे वद विस्तरात् ।
त्वत्तोऽन्यो नास्य प्रश्नस्य प्रतीकर्ता जगत्त्रये ॥ ८ ॥
तस्माद्वद विधे सर्वं दीर्घसत्रेऽत्र तावके ।
श्रोतुं च सक्षणान्विद्धि[5] सभ्यान् नो वेदवेदिनः ॥ ९ ॥
भवांश्च दीक्षितो यज्ञे कं देवं यजसे पुनः ।
एतच्च नो वद ब्रह्मन् परात्परविदुत्तम[6] ॥१०॥
सर्ववेदारविन्दानां मकरन्दरसं परम् ।
नित्यं श्रावय नो ब्रह्मन् सदस्यत्र हविर्भुजाम् ॥११॥

---

१. कुर्याद्—अयो० । २. नान्यस्य—रीवां, अयो० । ३. संततः—अयो० । ४. सगुणं० इति पूर्वार्धम्—मथु० । ५. सक्षणाद्विद्धि—मथु०, सक्षणान्वेद—अयो० । ६. '.....वद ब्रह्मन्.....विदुत्तम'—अयो० ।

हवींषि भुञ्जते देवाः क एकः फलदायकः ।
मखेषु वापि यज्ञेषु तदिदं च वद प्रभो ॥१२॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे
प्रश्नरूपं नाम द्वितीयोऽध्यायः ।

●

तृतीयोऽध्यायः

ब्रह्मोवाच

साधु पृष्टं सभास्तारा[1] लोकोपकृति[2]कारणम् ।
भक्ताः परमहंसाश्च कृतार्थाः स्युर्यतोऽखिलाः ॥ १ ॥
राम एवास्य जगतश्चाश्रयः सर्वभूतभृत्[3] ।
राम एव निमित्तं च निजलीलारसात्मकः ॥ २ ॥
राम एव परं सारं वेद्यं [4]निगममूर्द्धसु ।
ममापि संमतं[5] (तत्त्वं ?) राम एव न संशयः ॥ ३ ॥
मामादौ सर्वजगतो राम एव नियुक्तवान् ।
रामस्य च स्वभावोऽस्ति वेदानामप्यगोचरः ॥ ४ ॥
नीलरूपं चिदाकारः सच्चिदानन्दविग्रहः ।
प्रतिष्ठा ब्रह्मणोऽप्येतत् परं ब्रह्म च तादृशम् ॥ ५ ॥
सगुणं निर्गुणं चापि भेदाभेदविवर्जितम् ।
एकरूपं सदा ध्येयं पूर्णं मायाविवर्जितम् ॥ ६ ॥
चिदानन्दोऽस्य संस्थानं स्थानमस्य सनातनम् ।
सीतालोकं परं स्थानं चिन्मयानन्दलक्षणम् ॥ ७ ॥

---

१. महाभागा—रीवां, सभावद्भिः—अयो० । २. लोकस्योत्पत्ति°—रीवां, कोपप्रकृति°—अयो० । ३. °रूपभृत्—रीवां, मथु० । ४. विगम°—अयो० । ५. संगतं—अयो० ।

कोशलाख्यं पुरं नित्यं चिल्लोक इति कीर्तितम् ।
अहं च विविधैर्यज्ञैः कोशलाधिपतिं यजे[1] ॥ ८ ॥
हविर्भुजां च सर्वेषां राम एव परायणम् ।
हविर्भुजामधिष्ठानं राम एव फलप्रदः ॥ ९ ॥
क्रतुयज्ञमये सत्रे सारभुग् राम एव हि ।
आदिरामायणं नाम श्रीरामचरितं शुभम् ॥१०॥
किंचिन्मूलचरित्रं च पवित्रं मङ्गलालयम् ।
जन्म कर्म च रामस्य वक्ष्ये त्रिभुवनेशितुः ॥
एकैकं विमलं गीतं वर्णितं चैव सूरिभिः ॥१२॥

देवा ऊचुः

को वा भुशुण्डनामासौ वैष्णवप्रवरो मतः[2] ।
तस्मै च कथमाख्यातमादिरामायणं शुभम् ॥१३॥
का च तत्र कथा दिव्या श्रीरामचरितात्मिका ।
अवतारचरित्रं किं किं वा मूलचरित्रकम् ॥१४॥
एतन्नो वद भो ब्रह्मन् संदिहानान् सभासदः ।
रामचन्द्रामृतकथाप्रश्नस्योत्तरमद्भुतम् ॥१५॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे
उपदेशकथनं नाम तृतीयोऽध्यायः ।

---

१. भजे—रीवां । २. प्रवरोत्तमः—अयो० ।

चतुर्थोऽध्यायः

ब्रह्मोवाच

कालस्य भगिनी घोरा नाम्ना या कालकण्टका ।
तस्यां जातः[1] सूर्ययोगाद् भुशण्डो नाम वै द्विजः ॥ १ ॥
काकवेषधरः शूरो लोहतुण्डोऽशनिच्छदः[2] ।
विद्युद्गात्रो[3] मेघरावी प्रलयन्तानलेक्षणः ॥ २ ॥
महासत्त्वो[4] महावीरो महाबलपराक्रमः ।
नीलमेघसमाकारः कालकण्टकिकासुतः ॥ ३ ॥
त्रैलोक्यं स विनिर्जित्य ववृधे बलसंवृतः ।
तुण्डाघातेन नितरामुत्क्षिपन् कुलपर्वतान् ॥ ४ ॥
करालदशनः[5] शूरो नखोदीर्णमहोदधिः ।
पक्षतिद्वयशब्देन ब्रह्माण्डमपि[6] भेदयन् ॥ ५ ॥
गरुडं बलदुर्धर्षं विष्णुवाहनमद्भुतम् ।
बलाद्रणे विनिर्जित्य भुशुण्डो ववृधेतराम् ॥ ६ ॥
ततः सकोपनः कोपात् कृत्वा शब्दं भयानकम् ।
उत्पत्य प्रगतो व्योम्नि चालयन् सर्वखेचरान् ॥ ७ ॥
पक्षवाताहतास्तस्य विमानावलयो पतन् ।
ताराः प्रवेशयामास निजपक्षादिरोमसु ॥ ८ ॥
सूर्यं प्रकम्पयामास भगवन्तं दिवाकरम् ।
चन्द्रं च खण्डयामास तुण्डघातैर्मुहुर्मुहुः ॥ ९ ॥
[7]अत्रासयद् देवगणान् महाबलपराक्रमः ।
पक्षानिलहताम्भोधिः समन्तादुदतिष्ठत ॥१०॥
ततो जवात् समुत्पत्य पद्भ्यां भूमिमकम्पयन् ।
सुमेरुस्तद्बलेनोच्चैरकम्पत सुरालयः ॥११॥

---

१. यातः—अयो०, रीवां । २. सनिछदः—रीवां । ३. विद्युद्दन्तो—अयो० रीवां । ४. महातत्त्वो-अयो०, रीवां । ५. करालवदनः—रीवां । ६. चापि-रीवां, वापि-मधु० । ७. अत्राश°—रीवां ।

[1]विचेलुर्भूरिवेगेन सप्तपातालभूमयः ।
इत्थं त्रिभुवने भीतिं कुर्वन् परमदर्शनः ॥१२॥
स्वर्गं मर्त्यं च पातालमत्रासयत भीषणः ।
ब्रह्मलब्धवरो वीरः काकरूपी दुरासदः ॥१३॥

देवा ऊचुः

त्वया दत्तवरो घोरः काकरूपधरः[2] खरः ॥१४॥
त्रैलोक्यं त्रासयत्येष भुशुण्डो नाम वै द्विजः ।
तत्प्रतीकारकरणे भवानेकः क्षमो विधे ॥१५॥
नो चेदसौ त्रिभुवनं निजपक्षमूले
संपूर्णयिष्यति बली वरलाभदृप्तः ॥
न ह्यस्य[3] वीर्यबलदर्प्पनिवारणाय।
कोऽपि क्षमस्त्रिभुवने नरदेवमध्ये ॥१६॥
इत्युक्तस्त्रिदशैर्ब्रह्मा भुशुण्डस्यालयं ययौ ।
मध्ये मधु[4]समुद्रस्य द्वीपवर्ये महागिरौ ॥१७॥
महाघोरे वने यत्र न देवा नापि मानवाः ।
ब्रह्माणमागतं ज्ञात्वा वृद्धं लोकपितामहम् ॥१८॥
सद्य एवासनात्तूर्णमुदतिष्ठद् द्विजोत्तमः ।
दिव्यासने तं संस्थाप्य कृत्वा पूजां महीयसीम् ॥१९॥
उवाच प्रहसन् प्रीत्या पक्षिराजो विचक्षणः ।

भुशुण्ड उवाच

भगवन् भवतो दृष्ट्वा संपूर्णा मे मनोरथाः ॥२०॥
गृहाश्रमे[5] पवित्रत्वं (-त्वमागतं ?) भवदागमात् ।
महतामागमो लोके केवलं भूतये नृणाम् ॥२१॥

ब्रह्मोवाच

भवता वत्स वीर्येण त्रासितं भुवनत्रयम् ।
नैतत्त्वयोचितं धीमन् यस्मात्त्वं वैष्णवाग्रणीः ॥२२॥

---

१. विखेलु°—रीवां । २. °धरो—अयो० । ३. न त्वस्य—अयो० । ४. सुधा—°मथु० । ५. "सार्थकता" इति टिप्पणी कृता पत्रप्रान्ते—मथुरा० ।

रामेण रचितं विश्वं भक्तानां सुखहेतवे ।
साधवो यदिदुःस्थाः स्युस्तदा रामः प्रकुप्यति ॥२३॥
रामे प्रकुपिते देवे कुतः क्षेमं चराचरे ।
तस्मादुपशमं गच्छ शान्तिरेव सतां मता ॥२४॥
शान्ति विना हरेर्भक्तिर्विफलैव भविष्यति ।
यस्मान्नोद्विजते विश्वं स वै भागवतोत्तमः ॥२५॥
त्वं रामसेवकवरो विद्वान् विदितवेद्यकः ।
जगतो हितमन्विच्छन् सृष्टिरेषा हरेर्यतः ॥२६॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे
भुशुण्डोपशमो नाम[1] चतुर्थोऽध्यायः ॥ ४ ॥

•

पञ्चमोऽध्यायः

भुशुण्ड उवाच—

बलकृष्णादिरूपाणि रामस्य स्युः सहस्रशः ।
तेषां मुख्यतमं किंचिद् ब्रूहि मह्यं पितामह ॥ १ ॥

ब्रह्मोवाच—

सर्वाण्येव स्वरूपाणि श्रीरामस्य श्रियः पतेः[2] ।
ध्येयानि चैव ज्ञेयानि शान्तानि प्रयतात्मभिः ॥ २ ॥
पुरा खलु खगेन्द्रेण गरुडेन मनीषिणा ।
धावन् गच्छन् वायुपुत्रो हनुमानिदमीरितः ॥ ३ ॥

गरुडउवाच—

हनुमन्[3] कुत्र वेगेन यासि त्वं धावनोद्धतः ।
अत्याहितमिदं कार्यं कथमेवं भविष्यति[3] ॥ ४ ॥

---

१. भुशुंडोपशमे—अयो०, मधु०, रीवां, । २. सीतापतेः—अयो०, रीवां ।
३. हनुमान्—मधु०, रीवां ।

[1]हनुमानुवाच

नागान्तक खगाधीश याम्यहं कोशलापुरे ।
अतिकालो भवत्येष त्वं न जानासि किं सखे ॥ ५ ॥
रामदर्शनवेलेयं मध्याह्ने कोशलापुरे ।
तत्र गच्छाम्यहं तूर्णं तेन धावनवेगतः ॥ ६ ॥

गरुडउवाच

कोऽसौ रामस्त्वया प्रोक्तश्चातुर्वर्ण्येऽस्ति कश्चन ।
आहोस्वित् कोप्यसौ देवो दैत्यो गन्धर्व एव वा ॥ ७ ॥

हनुमानुवाच

त्रैलोक्याधिपतिः श्यामो नीलनीरदविग्रहः ।
रामो दाशरथिर्देवो भवतो विदितो न किम् ॥ ८ ॥
आत्मैव वञ्चितस्तेन येन रामो न वीक्षितः ।
न श्रुतो नैव च ध्यातो न प्रेम्णा परिकीर्तितः ॥ ९ ॥
रामोऽस्य जगतो हेतुः सच्चिदानन्दविग्रहः ।
परमात्मा प्रभुः साक्षी स एव च गतिर्नृणाम् ॥१०॥
न तं विना मुक्तिदोऽन्यो नामृतस्याश्रयोऽपि च ।
स एव च परं ब्रह्म वेदमूर्द्धसु गीयते ॥११॥
एको रामः सर्वभूतान्तरात्मा
सर्वावासः सर्वकल्याणभूमा ॥
सर्वांशाद्यो प्रमोदवनधामा
यस्यांशांशा भान्ति सर्वेऽवतारः ॥१२॥

गरुड उवाच

एवं चेत्तर्हि हनुमन् प्रसादाद् भवतो मम ।
तद्दर्शनं किं न भवेत् सर्वकल्याणदं सखे ॥१३॥

---

१. "इदं कार्यं अत्याहितं महाभीतिदं प्राणं त्यक्त्वापि साध्यं भविष्यत्यन्यथा एवं प्रकारेण धावनं कथं भवेत्" इति टिप्पणी (४ श्लोके)–मधु० ।

हनुमानुवाच

आगच्छ खगराज त्वं कोशलाधिपतेः पुरम्[1] ।
तत्र श्रीरामचन्द्रस्य दर्शनं ते भविष्यति ॥१४॥
मत्सार्थं ते न निर्वाहस्त्वमागच्छ दिनान्तरे ।
अहमद्य गमिष्यामि शीघ्रदर्शनलालसः ॥१५॥
इत्युक्त्वा हनुमांस्तूर्णं कोशलां नगरीं ययौ ।
दिनान्तरे च गरुडस्तत्र यातः सकौतुकम् ॥१६॥
गत्वा ददर्श रघुपुङ्गवमभ्रनीलं
सीतायुतं कटिनिषङ्गधनुःशराढ्यम् ॥
केयूरकङ्कणकिरीटसुकुण्डलाढ्यं
पीताम्बरं मधुरहासमुखारविन्दम् ॥१७॥
एवं विलोक्य गरुडः सुमग्नो रूपसागरे ।
ततो हनुमता प्रोक्तो राम एषोऽभिवन्द्यताम् ॥१८॥

गरुड उवाच

गुञ्जास्रजः[2] केकिपिच्छावतंसः[3]
करे रसाला मुरली यदा स्यात् ॥
गोपाङ्गनाश्चेद्विलसन्ति पार्श्वे
सीतापते त्वां प्रणमामि नित्यम् ॥१९॥

हनुमानुवाच

सर्वस्वरूपो भगवानयमेव रघूत्तमः ।
यादृशी भावना यस्य तादृशस्तस्य[4] भासते ॥२०॥
एष एव पुनर्देवः परिवृत्यावलोक्यताम् ।
ततः स गरुडो भूयः परिवृत्य व्यलोकयत् ॥२१॥

---

१. पुरे--मधु० । २. सृजः--अयो०, मधु०, रीवां । ३. °तंसाः--मधु० ।
४. तादृशी--मधु०, अयो० ।

ददर्श रामस्य[1] गुञ्जाकलापं
मयूरपिच्छस्फुरितावतंसम् ।
वंशीकरं गोपदारैः परीतं
कृष्णं त्रिभङ्गीललितं खगेन्द्रः ॥२२॥
वृन्दावनस्थं स्मितपीयूषवर्षैः
सिञ्चन्तमङ्गानि मृगीदृशां च ।
राधान्वितं पीतदुकूलयुग्मं
दृष्ट्वा स तुष्टाव हृदि प्रसन्नः ॥२३॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्ड-संवादे
गरुडाय दर्शनदानं नाम[2] पञ्चमोऽध्यायः ॥ ५ ॥

●

षष्ठोऽध्यायः

गरुड उवाच

तव स्वरूपं भगवन्नप्रमेयं
वेदानामप्यादिसर्गोद्भवानाम् ।
न च भ्रमेन्मा[3]दृश एष जन्तुः
किमद्भुतं नाथ दयासमुद्र ! ॥ १ ॥
तथापि ते भक्तवर्यो हनूमान्
ज्ञात्वा समुद्धार्यतमं शठं माम् ।
प्रदर्शयामास भवन्तमद्भुतं
सर्वावतारांश[4]समूहमूलम् ॥ २ ॥

---

१. रामस्यांशं–मथु०, सुश्यामं–रीवां । २. °दाने पंचमो–अयो०, मथु०, रीवां ।
३. श्रयेन्मा–अयो० । ४. °वतारस्य–अयो० ।

दृष्ट्वैव ते नाथ पदाम्बुजद्वयं
मायादिदोषातिगमद्वितीयम् ।
जातोऽस्मि भाग्येन विमुक्तमोहः
समुद्धृतोऽज्ञानरयात्ततोऽहम् ॥ ३ ॥
अथापि भूयः करुणामृतं मयि
प्रवर्षतस्ते दीनवात्सल्यमेतत् ।
विज्ञातमेव व्यापि वैकुण्ठलोकात्[1]
परं पदं तेऽस्ति विमुक्तभेदम् ॥ ४ ॥
सर्वेऽपि ते बलकृष्णादिसंज्ञा
अनेककार्यप्रभवोऽवताराः ।
तवांशांशा एव ते त्वं च पूर्ण-[2]
श्चिल्लोकेशः सहजानन्दिनीशः ॥ ५ ॥
या ते शक्तिः सहजानन्दिनीयं
सीतेतिनाम्नी जगतां शोकहन्त्री ।
तस्या अंशा एव ते सत्यभामा-
राधारुक्मिण्यादयः कृष्णदाराः ॥ ६ ॥
सर्वेऽशास्ते पूर्णशक्त्या समेताः
पूर्णानन्दाः पूर्णचिच्छक्तिभाजः ।
तथापि दृष्टे त्वयि मूलैकमूले
महोदधौ पल्वलवत् स्फुरन्ति ॥ ७ ॥
प्रमुद्वने त्वं सहजाकेलिरक्तो
नित्यं विभासि प्रभुराभीरिकाभिः ।
संप्रत्यभिज्ञाय निजं स्वरूपं
सर्वां लीलां कृतवानत्र भूताम् ॥ ८ ॥
अतः परं नाथ न मेऽस्ति मोहो
भवत्स्वरूपे सहजानन्दिनीश ।

---

१. वैकुंठो—अयो० रीवां । २. एव पूर्णस्तत्त्वं—मथु० रीवां ।

त्वमेव सीतापतिरद्भुतक्रियः
सहजापतिर्वापि[1] प्रमोदधाम्नि ॥९॥
सदास्तु मे राम रति (र्हि) वै[2] त्वयि
स्वसच्चिदानन्दरसैकसिन्धौ ।
तत्त्वं तव श्रीहयशीर्ष एव
जानाति वागीश उदारचित्तः ॥१०॥
नान्यस्य सामर्थ्यमिहास्ति राम
मनोवचोभ्यामपरिच्छेद्यमूर्तौ ॥११॥
नमस्ते रसिकेन्द्राय शृङ्गाररसमूर्त्तये ।
सीताकटाक्षसंदोहविजिताय परात्मने ॥१२॥
गोसंघ गोप गोपीश गोकुलेश रसालय[3] ।
करुणामृतपाथोधे रामचन्द्र नमोस्तु ते ॥१३॥
न ते परिच्छित्तिरनन्तवेदै-
र्न योगदृष्टिप्रसरैस्तपोभिः ।
स्वेच्छैकमात्रेण चिदेकरूपो
भवान्परिच्छेद्यतमः स्वभक्तैः ॥१४॥
अक्रियस्यापिते गोष्ठे रिङ्गणं बाललीलया ।
जानुभ्यां भूतलस्थायि दैत्यमर्द्दनहेतवे ॥१५॥
तव गोदोहनं राम न वै गोपोचितं भवेत् ।
एता हि सद्गिरस्तासां सारं भक्तिः समुद्धृता[4] ॥१६॥
यद्यत्करोषि नटवेषधरो विलासी
तत्तत्तवैव[5] परमार्थत एव कार्यम् ।
नान्यस्य राम रमणीशतकामरूप
गीतं सदैव निगमत्रितयेन नूनम् ॥१७॥

---

१. वैं-अयो०, °पतित्वं—रीवां । २. रतिर्वैं—अयो०, रीवां, मथु० । ३. गोकुले सुरसालय—रीवां । ४. समुद्भृता—रीवां । ५. त्यथैव—अयो० ।

एवं कृत्वा गरुडो राघवस्य
स्तोत्रं मुहुस्तच्चरणारविन्दे ।
अपीपतत् पुलकितविग्रहोऽय-
मानन्दजाश्रूणि दृग्भ्यां विमुञ्चन् ॥१८॥

श्रीराम उवाच

उत्तिष्ठ वत्स खगराज परं शुभं ते
मद्दर्शनेन गत एव स मोहभावः ।
मद्भक्तिमांस्त्रिभुवने विचर प्रसन्नो
नह्यस्ति तेऽभिलषिताचरणेऽन्तरायः ॥१९॥

ब्रह्मोवाच

इत्थं श्रीरघुनाथस्य प्रसादमुपलभ्य सः ।
कृतबुद्धिः कृतार्थात्मा बभूव बहुनिर्वृतः ॥२०॥
तस्माद् भुशण्ड पक्षीन्द्र रामं भजितुमर्हसि ।
श्री रामचन्द्रं प्रेम्णा वै न[1] पश्यति स वञ्चितः ॥२१॥
तस्यैव सर्वरूपाणि रामस्य परमात्मनः ।
आदिनारायणेशस्य सेव्यानि कृतनिश्चयैः ॥२२॥
एवं स[2] गरुडो दृष्ट्वा राघवेन्द्रं परात्परम् ।
महापुर्य्यां हनुमता सेव्यमानमहर्निशम् ॥२३॥

हनुमानुवाच

पक्षीन्द्र त्वं हि धन्योऽसि राघवेन्द्रस्य दर्शनात् ।
अत्याहितं हि देवानां भवतो वै भविष्यसि ॥२४॥

गरुड उवाच

श्रीमतो राघवेशस्य देवदेवस्य शार्ङ्गिणः ।
दर्शनार्थमागतोऽहमयोध्यां मुक्तिदां पुरीम्[3] ॥२५॥
अद्यैव सफलं जन्म साकेतदर्शनेन मे[4] ।
अद्यैव सफलं ध्यानं प्रमोदवनदर्शनात् ॥२६॥

---

१. न यः–रीवां । २. हि–मथु० । ३. °र्थं प्रागतोहं पुरीमयोध्यां मुक्तिदां–रीवां, मथु० । ४. दर्शने मम–रीवां, मथु० ।

धिग् धिग् जन्म च तेषां वै ये न पश्यन्ति सादरम् ।
प्रमोदवनमध्यस्थां कोसलां सरयूं तथा ॥२७॥
कोटयो ब्रह्मणामत्र रुद्राणां च मरुत्वताम् ।
वसूनां वरुणानां च स्तुवन्तः पुरतः स्थिताः ॥२८॥

हनुमानुवाच

धन्योऽसि कृतकृत्योऽसि गरुड त्वं हि संप्रति ।
सकुलस्त्वं पुनीतोऽसि राघवेन्द्रस्य दर्शनात् ॥२९॥
श्रीरामे देवदेवेशे कोशलायां विराजति ।
अंशावतारा: कृष्णाद्याः प्रणमन्ति ह्य[1]संख्यकाः ॥३०॥
न ततोऽन्यमहं जाने देवदेवं खगेश्वर ।
सर्वावतारनिधेश्च रघुवीराद् गुणाकरात् ॥३१॥

गरुड उवाच

रामस्य बलकृष्णाद्याः सर्वेऽप्यंशाः सनातनाः ।
न ततोऽन्यत्किमप्यस्ति स्थूलं सूक्ष्मं जगत्त्रये[2] ॥३२॥
इत्युक्त्वा तार्क्ष्यः कपीशं गच्छन् कर्त्तुं परिक्रमाम् ।
महावैकुण्ठसेव्याया अयोध्यायाश्च सर्वतः ॥३३॥
अयोध्यादक्षिणे भागे श्रीकृष्णं रुक्मिणीयुतम् ।
ददर्श गरुडस्तं च ननाम विधृताञ्जलिः ॥३४॥
नमन्तं गरुडं दृष्ट्वा रुक्मिणीवल्लभो हि सः ।
उवाच मधुरं वाक्यं प्रहसन् गरुडं तदा ॥३५॥

कृष्णोवाच

अद्य ते सफलं जन्म जीवितं सफलं सखे ।
गरुड त्वं हि धन्योऽसि अयोध्यापुरिदर्शनात्[3] ॥३६॥
अयोध्यां परितो देशे कोटिविष्ण्वादयो वयम् ।
वसामः सततं वत्स रघुवराज्ञाप्रपालकाः[4] ॥३७॥

---

१ चा°—मधु०, अयो० । २. °ल्लये—मधु०, रीवां । ३. पुरीद°···मधु० ।
४. च पालकः—अयो०, मधु० ।

इदमेव विजानन्ति ते वै रघुवरप्रियाः ।
तदितरेऽधमा जीवाः नित्यं स्वजनिदूषकाः ॥३८॥
एवं साकेतमहिमानं रहस्यं परमं सदा ।
स्तुत्वातिहर्षितस्ताक्ष्यों मुमोद च पुनः पुनः ॥३९॥
उवास परया भक्त्या मणिपर्वतसन्निधौ ।
गायन् श्रीराघवेन्द्रस्य चरितं भुक्तिमुक्तिदम् ॥
विष्ण्वादिभिः सदा सेव्यं श्रुतिस्मृति रसं सुखं ॥४०॥
दृष्ट्वा प्रभावमतुलं श्रीराघवस्य
तथैव साकेतपुरस्य नित्यम् ।
नमामि (ननाम ?) रोमाञ्चितप्रेमविह्वलः
स मारुती राघवरत्नमद्भुतम् ॥४२॥
सीतापतिं कटिनिषङ्गणमात्तचापं
रामं पयोदपटलाधिकमेचकाङ्गम् ।
केयूरिणं कनकरत्नकिरीटजुष्टं
श्रीलक्ष्मणेन युतमद्भुतकोशलेशम् ॥४३॥
तुष्टाव हनुमान् प्रीत्या साष्टाङ्गनतविग्रहः ।
[1]सकुर्वन् मुहुरत्यन्तं प्रेम रामे प्रतिक्षणम् ॥४४॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे
हनुमद्दर्शनं नाम[2] षष्ठोऽध्यायः ॥ ६ ॥

---

१. कुर्वन्हि—रीवां । २. °दर्शने–रीवां, मथु०, अयो० ।

सप्तमोऽध्यायः

श्री हनुमानुवाच

नमामि ते नाथ पदारविन्दं
विष्ण्वादिसेव्यं च सुखैकहेतुम् ।
न यत्र सद्यः प्रमितिः श्रुतीनां
तत्रामिते वानरः कोऽस्मि एषः ॥ १ ॥
तव प्रसादो मयि नाथ जात-
स्तथैव धामेश्वरिप्रेमदायाः ।
प्रमुद्वने नित्यनिकुञ्जकेली-
लसन्महामञ्जुलविग्रहायाः ॥ २ ॥
यदंशमात्रेण भवन्ति नित्यशो
लक्ष्म्यादयः शक्तिवराश्च सर्वाः ।
लीलेश्वरी नन्दननन्दिनी सा
मां पातु पादाम्बुजनित्यभक्तम् ॥ ३ ॥
नहि प्रभावा[1]भ्युदिते रुचीनां
तमोभवे[2] दृष्टिपथं प्रयाति ।
तथा त्वयीशे[3] कोटिसूर्यप्रकाशे[4]
श्रीराघवेन्द्रे भक्तजनैकलभ्ये ॥ ४ ॥
यदि[5] त्वमेतत्तिमिरं मोहरूपं
[6]न संहरेदीश निजाश्रितेषु ।
कथं तदैषां गोचरत्वं प्रयाति
रूपं तथैतत् सच्चिदानन्द सान्द्रम् ॥ ५ ॥
गोपालराजस्य च नन्दनस्य[7]
गेहे पुरा वसन् सह लक्ष्मणेन च ।

---

१. प्रभावे–मथु० । २. भवेद्–अयो०, रीवां । ३. त्वयि मे-अयो०, रीवां । ४. प्रकाशके–अयो०, रीवां । ५. त्वमेव–अयो० । ६. नहि–अयो० । ७. नंदनंदनस्य–अयो० ।

[1]अरीरमद्राम भवान् व्रजाङ्गना
उद्धारार्थं श्रुति-ऋष्यादिरूपाः ॥ ६ ॥
[2]तवैव लीला भुवने रसाला
सुधाब्धिवत् पालयत्येव भक्तान् ।
[3]नो चेत् कदाचित् त्वयि संतिरोहिते
[4]विशुष्येयुः पारमहंस्यभाजः[5] ॥ ७ ॥
एवं विचिन्त्य भगवान् व्यतनोद्भवांस्तं
लीलामृतोदधिमुदारमनन्तसारम् ।
यस्यान्तरे परमहंसवराः सदैव
क्रीडन्ति कालशिरसि स्वपदं निधाय ॥ ८ ॥
त्वं भक्तिलभ्योऽसि हरे जनानां
[6]न ज्ञानयोगादितपोभिरुग्रैः ।
कथं तवेदृक् प्रसादोऽपि लभ्यः
कुतस्तरां सन्निधौ दर्शनं ते ॥ ९ ॥
त्वं रामचन्द्रो नृपतेः कुमारो
नित्यं विलासो सरयूतीरवासो ।
तवांश एषः श्रीकृष्णो यशोदा-
गर्भे भविष्यति वै द्वापरान्ते ॥१०॥
अतो ह्यनन्तः शाश्वतस्त्वं पुराणः
पूर्णो नित्यः सच्चिदानन्द एकः ।
व्योमाकारस्त्वं स्वलीलाभिरुच्चैः
विश्वानन्दं जनयन् भासि रामः ॥११॥
नमस्ते रामचन्द्राय मुक्ता[7]हारावतंसिने ।
पञ्चरत्नावतंसाय सीतानेत्रविनोदिने ॥१२॥
नमो गोपीदृगाराम रामनाम शुभावह ।
वंशीधर[8] घनश्याम वनमालिन् व्रजेन्द्र[9] ते ॥१३॥

---

१. आमोदयद्–अयो०, रीवां । २. तथैव–मथु० । ३. नेचित्–अयो०, मथु० रीवां । ४. नास्ति–अयो० । ५. °पारमहंसास्य भाजाः–अयो० । ६. विज्ञानं–अयो० । ७. गुंजा°–मथु० । ८. धनुर्द्धर–रीवां । ९. राघवेन्द्र–रीवां ।

केलिनीकेलिकान्ताय[1] श्रीकान्ताय सुखाब्धये[2] ।
गुणग्रामसमुद्राय[3] सीताकान्ताय ते नमः ॥१४॥
अपराधसहस्रेऽपि सद्य एव प्रसादिने ।
रामाय चैव रामाय नित्यमेव नमोनमः ॥१५॥
एवं स्तुत्वा पदाम्भोजमग्रहीत् रसिकेशितुः ।
प्रेमविह्वलितो[4] भूत्वा हनूमान् रामसेवकः ॥१६॥

श्रीरघुनन्दनोवाच[5]

उत्तिष्ठ वत्स हनूमन् लीलोपासनयानया ।
दृढया ते प्रसन्नोऽस्मि भक्तोऽसि मम सर्वदा ॥१७॥
रामो लीलाविशिष्टोऽहं त्वामानन्दयितुं क्षमः ।
[6]बालक्रीडानुचरितैः पितरौ नन्दयामि च ॥१८॥
दृढलीलोपासनायां मारुते मतिरस्तु ते[7] ।
मम सर्वस्वरूपेण भक्तानां प्रकटत्वतः ॥१९॥
लीलामाधुर्यमात्रं तु स्वमास्वाद्यं रसोत्तरैः ।
भक्तैः परमहंसैश्च साधुभिर्हृदयालुभिः ॥२०॥
रसास्वादाय साधूनां [8]लीला या राघवस्य च ।
आस्वाद्यमाना सा बुद्ध्वा[9] मुक्तिमेव प्रयच्छति ॥२१॥
[10]सामीप्यं तिष्ठ हनुमन् भक्तोऽसि मम सर्वदा ।
भज रामं राघवेन्द्रं [11]पराभक्तिमवाप्नुहि ॥२२॥
[12]गरुड त्वं च देवानां कार्यं साधय गच्छ भोः ।
साकेतस्योत्तरे कूले सरयूतीरयोर्द्वयोः ॥२३॥
नृणां संचरतां मृत्यौ पशुपक्ष्यन्त्यजात्मनाम् ।
भृङ्गकीटपतङ्गानां वत्स त्वं वाहनो भव ॥२४॥
चतुर्भुजांस्तान् मद्रूपानानयस्वेह यत्नतः ।

---

१. केलिनिकेलि°–रीवां, मथु० । २. श्रान्ताय दुस्तरभ्रमैः–मथु० । ३. °निशान्ताय–मथु० । ४. निरस्तसंशयो–मथु० । ५. श्रीभगवानुवाच–मथु० । ६. कृष्णावतारचरितैः गरुडं नन्दयामि च–मथु० । ७. मा ते भूयान्मतिः शठा–मथु० । ८. लीला भगवतो यतः-मथु० । ९. बुद्धिर्–रीवां, शुद्धा-मथु० । १०. स्वालयं गच्छ हनूमन् जातोसिच्छिन्नसंशयः-मथु० । ११. परां मुक्तिमवाप्स्यसि–मथु० । १२. रुद्रत्वं चैव-अयो०, रीवां ।

इत्थं विसृज्य भगवान् गरुडं रघुनन्दनः[1] ॥
रराम परमैश्वर्यभाविते सरयूतटे ॥२५॥
एतद् भुशुण्ड ते प्रोक्तमाख्यानं परमाद्भुतम् ।
[2]रामस्य चापि सीतायाः मिथस्तादात्म्यसूचकम् ॥२६॥
तस्माद् विप्रतिपत्तव्यं[3] न कदाचिन्मनीषिणा ।
यथा रामस्तथा सीता [4]तथा श्रीसहजा मता ॥
अथाहि[5] ते प्रवक्ष्यामि राममाहात्म्यमुत्तमम् ॥२७॥
यस्मात्त्वं रामभक्तोऽसि वैष्णवानां तथाग्रणीः ।
आदिरामायणं नाम श्रीरामचरितं शुभम् ॥२९॥
किंचित्समाधावालोक्य प्रवक्ष्यामि प्रयत्नतः ।
अवतारचरित्रं च मूलं चरितमेव[6] च ॥३०॥
एकीकृत्य लभेद्यत्र प्रवक्ष्यते मया द्विज ।
एवं मया भुशुण्डाय प्रोक्तं तत्संहितामयम् ॥३१॥
आदिरामायणं दिव्यं ब्राह्मे कल्पे विनिर्मितम् ।
तच्छ्रूयतां सुराः सर्वे श्रीरामचरितं शुभम् ॥३२॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे कथावतारो नाम सप्तमोऽध्यायः ॥ ७ ॥

---

१. च मरुत्सुतम्–मथु० । २. श्रीरामसहजा सीता–रीवां, अयो० । ३. हि प्रति°–अयो०, रीवां । ४. यथा सीता तथैव सः-मथु० । ५. तथापि–मथु० । ६. चारित्र°–मथु० ।

अष्टमोऽध्यायः

भुशुण्ड उवाच

जन्म कर्म च मे दिव्यं वद रामस्य विस्तरात् ।
तत्कथामृतपानेन मम चित्तं प्रसीदति ॥ १ ॥

ब्रह्मोवाच

पुरा दशास्यमुख्येषु राक्षसेषु जगत्त्रयम् ।
व्याकुलीकृतमत्यर्थं तदा विधिरचिन्तयत् ॥ २ ॥
अहो मया कृतं विश्वं विष्णुना प्रतिपाल्यते ।
ईशेन ह्रियते भूयः संप्राप्ते भुवनक्षये ॥ ३ ॥
भुवनस्य क्षयश्चापि नाधुनैव भविष्यति ।
कल्पं सारस्वतं नाम युगं त्रेताभिधं तथा ॥ ४ ॥
प्रायेणैषां विनाशाय द्विजधर्मत्रयीद्रुहाम् ।
भविष्यति स्वयं रामः प्रादुर्भूतः क्वचिद्भुवि ॥ ५ ॥
ततः समाधौ प्रबभूव वाणी
स्वयं भविष्यामि कलाभिरन्वितः ।
धर्मस्य संस्थापनहेतवे पुनः
स्वभक्तपक्षप्रतिपालनाय च ॥ ६ ॥
सरयू पुलिने रम्ये कोशला नाम मे पुरी ।
सच्चिदानन्दनवनी शाश्वतं यत्परं पदम् ॥ ७ ॥
पृथिव्यां भारते वर्षे प्रकटं तन्मदाज्ञया ।
अत्रैवाहं स्वरूपेण विहरामि परिच्छदैः ॥ ८ ॥
लीलोपकरणैर्युक्तो नित्यैरप्राकृतैस्तथा ।
सुरा अपि भविष्यन्ति स्वांशेन प्रकटा इह ॥ ९ ॥
इति श्रुत्वा गिरं सूक्ष्मां वेधाः प्रोवाच विस्मितः ।
सर्वान् देवगणान् भूयो रावणाद्यैरुपद्रुतान् ॥१०॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे
कथावतरणं नाम अष्टमोऽध्यायः ॥ ८ ॥

नवमोऽध्यायः

ब्रह्मोवाच

तत्र काकुत्स्थवंशे तु जनिता वो हितप्रदः ।
तस्य सेवार्थममरा अग्रतो यूयमासथ ॥ १ ॥
कोटिब्रह्माण्डलक्ष्मीनामंशिनी ब्रह्मरूपिणी ।
आद्या श्रीर्भविता तस्य तोषणार्थं तु जानकी ॥ २ ॥
स जातो भगवान् रामो राघवेन्द्रो परात्परः ।
हरिष्यति भुवो भारं धर्मं च स्थापयिष्यति ॥ ३ ॥
आदिदेव्याश्च पद्मायाः करिष्यति सुखं महत् ।
देवीनां मानुषीणां च किन्नरीणां तथैव च ॥ ४ ॥
[1]नागीनां च नगीनां च दृङ्मोदं जनयिष्यति ।
प्रमोदविपिने स्थित्वा संप्रयुक्तस्तदाज्ञया ॥ ५ ॥
तदंशभूताः अन्याश्च रामाः[2] संमोदयिष्यति ।
परमा सा स्वयं लक्ष्मीः सीता साकेतपत्तने ।
प्रमोदने तथा राज्ञी सहजानन्दरूपिणी ॥ ६ ॥

भुशुण्ड उवाच

श्रीरामचरितं ब्रूहि ब्रह्मन् संशृण्वतो मम ।
जायते परमानन्दो रोमहर्षश्च गद्गदः ॥ ७ ॥
यस्यांशा मत्स्यकूर्माद्याः बलकृष्णादयस्तथा ।
तं राममपहायान्यं श्रोतुमिच्छामहे कथम् ॥ ८ ॥
यः पश्यतो मे धृतचापहस्तो
भ्रूभङ्गमात्रे जलधिं निवध्य ।
चकार लङ्कां निजदासनाथां
निहत्य वेगेन च राक्षसेन्द्रम् ॥ ९ ॥

---

१. नागीनां चैव नागानां–अयो० । २. रामः–अयो०, रीवां ।

लङ्काधिपः संयति जिष्णुजैत्रो[1]
वरोर्जितो भूरितेजा दशास्यः ।
यद्बाणवह्नेः सहसा पतङ्गतां
जगाम साकं परिवारवर्गैः[2] ॥१०॥
तस्य श्रीरघुवीरस्य चरितं मे निशामय ।
कल्पे कल्पे तु यज्जातं विदितं चैव यत्तव ॥११॥

ब्रह्मोवाच

अनन्तं चरितं तस्य वक्तुं नो पारये द्विज ।
समाधौ तु सकृद्दृष्ट्वा वाल्मीकिः कथयिष्यति ॥१२॥
मयापि भवते वाच्यं समाधावुपलभ्य हि ।
विना समाधिसंयोगं कथं वक्तुं क्षमोऽस्म्यहम् ॥१३॥
वाल्मीकिनोदितं दिव्यं रामायणमुदाहृतम् ।
अन्यत्तु रामानुक्रीडं तद्रामायणमेव हि ॥१४॥
मत्स्योऽस्य हृदयं विष्णुर्योगरूपी जनार्दनः ।
कूर्मोऽस्य धारणाशक्तिर्वराहो भुजयोर्बलम् ॥१५॥
नारसिंहो महान् रोषो वामनः कटिमेखला ।
भार्गवोऽस्य परो धर्मो बलरामश्च संमदः[3] ॥१६॥
बुद्धस्तु करुणा साक्षात् कल्की चैतस्य संस्मृतिः ।
कृष्णोंऽशांशो ह एवास्य[4] वृन्दावनविभूषणः ॥१७॥
एते चांशकलाश्चैव रामस्तु भगवान् स्वयम् ।
ब्रह्मा विष्णुश्च रुद्रश्च महेन्द्रः श्रीस्तथैव च ॥१८॥
सनातनस्तथा धर्मो राम एव स्वयं द्विज ।
न रामात् परतस्तत्त्वं वेदैरपि निचीयते ॥१९॥
वेदान्ता ब्रह्मसूत्राणि चत्वारो निगमास्तथा ।
सेतिहासानि सर्वाणि पुराणानि तथा द्विज[5] ॥२०॥
धर्मः सांङ्ख्यं तथा योगः सर्वं रामस्य सूचकम् ।
तत्संकोचविकाशाभ्यां राम एव प्रतिष्ठितम् ॥२१॥

---

१. विष्णु°–अयो० । २. सर्गैः–अयो० । ३. संपदः–अयो०, रीवां । ४. "कृष्णोंऽशांशः–श्रीरामस्य"–इति मथु० टिप्पणे संशोधितः पाठः । ५. तथांडज–मथु० ।

रकारेण विकाशः स्यात्संकोचस्तु मकारतः ।
वेदशास्त्रपुराणौघैरेकं तत्त्वं विनिश्चितम् ॥२२॥
परं ब्रह्म स्वयं रामः सच्चिदानन्दविग्रहः ।
अहो रामस्य चरितं महानारायणेशितुः ॥२३॥
जिह्वाकोटिशतेनापि मया वक्तुं न शक्यते ।
यस्य लोकः सदा भाति गोलोकात्परतस्तु सः ॥२४॥
महावैकुण्ठमेतद्धि व्यापि वैकुण्ठसंज्ञकम् ।
तत्र[1] तस्य पदाम्भोजद्वयं सम्यक् प्रतिष्ठितम् ॥२५॥
तत्परस्तस्य वै रूपं सीतावैकुण्ठसंज्ञकम् ।
रामवैकुण्ठसंज्ञं तु[2] प्रमोदवनमुदाहृतम् ॥२६॥
यतो विनिर्गताश्चांशा विस्फुलिङ्गा इवारणेः ।
बलकृष्णादयः सर्वेऽप्यवतारपदं मताः ॥२७॥
अवतारी स्वयं रामः सर्वांशानां निधिः परः ।
कस्तस्य महिमानं च वक्तुं शक्नोति दैवतः ॥२८॥
हयग्रीवेण यत्प्रोक्तं यच्च वल्मीकजेन च ।
मया त्वया च यत्प्रोक्तं वसिष्ठेन तथोदितम् ॥२९॥
तदंशमात्रकं विद्धि रामायणमनन्तकम् ।
यदि वालुकरेणूनां गणना स्यान्महामते ॥३०॥
तदा श्रीरामवीर्याणां गणना भवति क्वचित् ।
अन्यदेवहि तद्वीर्यं कल्पे कल्पे युगे युगे ॥३१॥

अथाभवद्दशरथमन्दिरे परे
पुमानसौ भुवनभरोद्धृतिक्षमः ।
मृगीदृशां नयनविमोहनाकृतिः
स राघवः क्षपयतु[3] वाक्यचापलम् ॥३२॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे
महिमवर्णनं नाम नवमोऽध्यायः ॥ ९ ॥

---

१. अत्र-अयो० । २. "तस्मान्महावैकुण्ठात्परं नाम श्रेष्ठं प्रमोदवनं प्रमोदवनस्यैव सीतारामवैकुण्ठसंज्ञा" इति टिप्पणी—मधु० । ३. क्षपयतु-मधु० ।

दशमोऽध्यायः

भुशुण्ड उवाच

कीदृग्रूपधरो रामो जातो दशरथालये ।
किमाचारः कथंभावः तद्वदस्व विधे मम ॥ १ ॥

ब्रह्मोवाच

चैत्रस्य शुक्लपक्षे तु नवम्यां श्रीपुनर्वसौ ।
अभिजिन्नामयोगेऽसौ कौसल्यानन्दनोऽभवत् ॥ २ ॥
स जातमात्रो निविडाम्बुदाकृतिः
पीताम्बरः सुस्मितवक्त्रपङ्कजः ।
भुजद्वयो वाणवरादिचिह्नितः
स्ववामभागे श्रियमुत्तमां दधत् ॥ ३ ॥
अनर्घ्यरत्नाभरणैर्विराजितः
समुल्लसत्कुण्डलशोभिताननः ।
श्रीवत्सलक्ष्म्यार्पितकण्ठकौस्तुभ-
स्त्विषा स्वयं रोचितसूतिकागृहः ॥ ४ ॥
अनङ्गलावण्यपरार्धसम्पदा
संस्पृष्टसर्वाङ्गमनोहरोज्ज्वलः ।
शृङ्गारभङ्गीरससूचकैर्दृशोः
कटाक्षपातैः कमलां प्रमोदयन् ॥ ५ ॥
आसन्नगर्भोद्भवजातनिद्रया
कौशल्यया लक्षितजन्मभूषणः ।
ततश्च संदेशहरैर्ननवेदितो
नृपाय दूर्वादलशोभिपाणिभिः ॥ ६ ॥
स वासुदेवादिभिरात्मजोंऽशै-

श्चतुर्भिरासेवितदिव्यविग्रहः ।
जवात् समागत्य नृपेण वीक्षितो
दृग्भ्यामदृष्टाश्रुतपूर्वलक्षणः ॥ ७ ॥
तमादिपुरुषं ज्ञात्वा परं ब्रह्म स्वरूपिणम् ।
तुष्टाव वैदिकैः शब्दैः स्वयं दशरथो नृपः ॥ ८ ॥
नमो नमस्ते रघुनन्दनाय
रामाय रामाच्युतविक्रमाय ।
रामाय रामाय च राघवाय[1]
स्वयंभुवे श्रीपतये पराय ॥ ९ ॥
नमो हृषीकेश शिवाय तुभ्यं
समस्तदैत्यावलिनिग्रहाय ।
भूभारहर्त्रादिवराहमूर्तये
नृसिंहरूपाय च वामनात्मने ॥१०॥
नमो महामन्दरशैलधारिणे
त्रिविक्रमायातुलविक्रमाय ।
श्रीवत्सलक्ष्माय सकौस्तुभाय
श्रीरामदेवाय रघूद्वहाय ॥११॥
त्वमादिमूर्तिर्भगवान् सनातन-
स्त्रयीमयः शान्तरजस्तमोमयः ।
भक्तेषु कृत्वा करुणां कदाचि-
दिहावतीर्य क्षपयस्यधर्मम् ॥१२॥
न ते विदुस्तेज उदग्रमेतद्
विश्वे भवाद्या अपि दैवतोत्तमाः ।
स्वरूपशक्त्यैव सदावदातया
प्रकाशसे संततसुप्रकाशः ॥१३॥
त्वमादिदेवो विदितोऽसि संप्रति
श्रिया युतः श्रीपुरुषोत्तमो हरिः ।

---

१. रोचकाय—रीवां ।

न चेदिदं विश्वविलक्षणं महः
कथं प्रकाशेत मदक्षिगोचरम् ॥१४॥
दासेषु साधुष्वमरेषु सत्क्रियां
कृत्वावतीर्णोऽसि यदादिपूरुषः ।
तदेव दृश्योऽसि न चेत्तु मादृशै-
र्मर्त्यैः सुखाद् यो[1] भगवान् स्वयंप्रभुः ॥१५॥
नमो नमस्ते भगवन् स्वसाक्षिणे
स्वमायया संवृतविग्रहात्मने ।
त्रिवृत्स्वरूपाय परात्पराय
स्व एव धामन्यनिशं विभास्वते ॥१६॥
रूपं तवैतत् क्षयितोऽवनीभरं
चिदात्मकं भक्तदृशां मनोहरम् ।
पश्यन्ति नैवासुरभावमास्थिताः
कथं चिदेवाविषयीकृतं सुरैः ॥१७॥
स्थानेऽस्मदानन्दकृते भवज्जनु-
र्नं रावणाद्यासुरहन्तवे[2] प्रभो ।
तवोद्भटा अक्षरकालधर्म-
स्वभावसंज्ञा कति सन्ति नो भटाः ॥१८॥
यदक्षरं ब्रह्म सनातनं स्वराट्
सहस्रनेत्राननपादबाहुकम् ।
निरञ्जनं निष्प्रतिमं निरीहं
श्रीराम तत्त्वच्चरणं वदन्ति ॥१९॥
यः कालसंज्ञः परमो नियन्ता
समस्तकर्त्ता भगवान् महोग्रः ।
भूतं भविष्यदथ वर्तमानं
विभ्रत्तदीशास्ति वपुस्त्वदीयम् ॥२०॥

---

१. सुखायो—अयो०, रीवां । २. °हन्यवे–अयो०, मथु० ।

यत् कर्मरूपं प्रतिजीवमाततं
यथोचितं यच्च यावच्च रूपम् ।
फलोन्मुखं स्वव्यतिरेकतोऽफलं
तत्त्वं प्रभो इष्टपूर्त्तादिसाध्यम् ॥२१॥
यत् स्वात्मभक्तेषु दयां विधत्से
दुष्टेषु च क्रूरतया निरीक्षितम्[1] ।
सृष्टिस्थितिक्षयलीलाश्च कुर्वन्
जागर्ष्यसौ ते परमः स्वभावः ॥२२॥
तं जातमात्रं कौशल्या प्रसमीक्ष्य भुजद्वयम् ।
ज्ञात्वा सीतापतिं साक्षादब्रवीन्मधुरैः स्तवैः ॥२३॥
अहो धन्ये दृष्टी पुरुषवर ते रूपममृतं
पिबन्त्यौ स्वानन्दोदधिरसनिमग्नेऽद्य भवतः ।
निमेषोऽसह्यो मे[2] किमिति रचितः कैरवपते-
र्यथा ज्योत्स्नाया ते नयनकरसंमर्शनमभूत् ॥२४॥
अहो अहो धन्यतमं कुलद्वयम्
अहो अहो धन्यतमे उभे दृशौ ।
अहो अहो धन्यतमं महीतलं
यत्रास्ति योगो भवता समं हरे ॥२५॥
अहो इदं रूपमतीवसुन्दरं
न दृष्टपूर्वं धरणीतलस्थैः[3] ।
अनेन लिङ्गेन रमाङ्कितेन
श्रीरामचन्द्रोऽसि मतो नरोत्तम[4] ॥२६॥

---

१. °क्षितां-रीवां, अयो० । २. असहिष्णुः–अयो०, मथु० । ३. °स्थले–अयो० ।
४. २६ श्लोकात्परं रीवां पुस्तकेऽधिकम्—

यदि त्वमेतत्तिमिरं मोहरूपं न संहरेदीश निजाश्रितेषु ।
कथं तदेषां गोचरत्वं प्रयाति रूपं तवैतत्सच्चिनन्द्र सान्द्रम् ॥ १ ॥
गोपालराजस्य च नन्दनस्य गेहे वसंस्त्वं सह लक्ष्मणेन ।
अरीरमद्राम भवान्व्रजाङ्गना उद्धारार्थं श्रुतिऋष्यादिरूपाः ॥ २ ॥
तवैष लीला भुवने रसाला सुधाब्धिवत्पालयत्येव भक्तान् ।
नो चेत्कदाचित्त्वयि संतिरोहिते विशुष्येयुः पारमहंस्यभाजः ॥ ३ ॥
[=अ० ७ श्लो ५–७]

यतो निवृत्ताः खलु वैदिकीर्गिरो
मनस्तथा यद्विषयानुधावनम् ।
अचिन्त्यशक्तिप्रभवमतर्क्यं
तत्त्वं परं ब्रह्म कुलेऽवतीर्यं नः ॥२७॥
कर्ता महन्मङ्गलमीश गोद्विज-
धर्मश्रुतीनां स्वमुपाश्रितानाम् ।
कुलं तथा साधु सुविश्रुतं[1] रवेः ।
स्वपौरुषेणैव महायशो दधत् ॥२८॥
एवमेव कदाचिद्वै द्वापरान्ते यदोः कुले ।
वसुदेवाच्च देवक्यां तवांशो वै भविष्यति ॥२९॥
क्वचित् सुतपसो[2] गेहे पृष्णिगर्भोऽप्यजोजनः ।
तेनैव पृष्णिगर्भेति तव नामानुशुश्रुम ॥३०॥
पुरा भूमेः सजीवाया नेताऽधो वारिधेर्बलात् ।
वराहवपुषा देव हिरण्याक्षस्त्वया हतः ॥३१॥
एवमेव स्वभक्तस्य प्रतिज्ञां रक्षता त्वया ।
निहन्ता श्रुतिधर्माणां हिरण्यकशिपुर्हतः ॥३२॥
प्रलयार्णवमग्नानां वेदानामुद्धृतौ क्षमम् ।
मात्स्यं वपुस्त्वयाऽऽस्थाय हृदयं प्रकटीकृतम् ॥३३॥
पुरा पीयूषमथने मन्थदण्डस्त्वया धृतः ।
मन्दराख्यो महाशैलः कौर्मं वपुरुपाश्रितः ॥३४॥
पुरा वलिं छलयता महामानिनमीश्वरम् ।
मन्ये वपुर्वामनस्य त्वयैव प्रकटीकृतम् ॥३५॥
पुरा लङ्काधिपः कश्चिद्यथेदानीं महाबलः ।
आसीत् स भवता देव रावणाख्यो निराकृतः ॥३६॥
संप्रत्यपि बलैर्वृद्धो राक्षसेन्द्रो दशाननः ।
त्वयैव विनिहन्तव्यः स्तेनो देवपतिश्रियाम्[4] ॥३७॥

---

१. समलंकृतं–अयो०, मथु० । २. क्वचित्तु सुतपोगेहे–रीवां । ३. गर्भोप्य-जीजनत्–अयो०, रीवां । ४. श्रियाः–रीवां ।

पुरा त्वयैव भगवंश्चरता दुश्चरं तपः ।
निराकृताः परशुना सुपुष्टाः क्षत्रियाः प्रभो ॥३८॥
अथ वैदिकजीवेषु कृपां संतन्वता त्वया ।
बुद्धरूपेण भगवन् पूरणीयो महामखः ॥३९॥
जातुचिन्म्लेच्छबहुले जगति त्रिजगत्प्रभो ।
त्वया कल्किस्वरूपेण पालनीयाः श्रुतिद्विजाः ॥४०॥
यौ बलकृष्णाविति विश्रुतिं गतौ
स्वमायययात्तात्मगुणौ नरोत्तमौ ।
वेदेषु शास्त्रेषु तथा पुराणे-
षूद्गीयमानौ खलु तौ त्वदंशौ ॥४१॥
एवं भवान् पूर्णकलाभिरात्मनः
संक्रीडमानोऽभयदो निजानाम् ।
इहावतीर्णोऽसि दिवाकरान्वये
स्वरोचिषा रोचितसर्वविश्वः ॥४२॥
इदं स्वरूपं निजदर्शनोचित-
ममानुषं तावकमीश लिङ्गम् ।
आवां प्रपश्येव न चेतरे जना-
स्त्वया विधेयं भगवंस्तथैव ॥४३॥
इयं च ते श्रीः कमलालया रमा
वामाङ्गसंस्था कमलानपायिनी ।
अम्भोजहस्ता नयनोत्सवप्रदा
धिनोति नो नयनयुगे मृदुस्मितैः ॥४४॥
एवं स्तवं विदधतोः कौशल्याधिपयोर्द्विज ।
आययुः सकला देवा ब्रह्माद्याः सेन्द्रशङ्कराः ॥४५॥
ते दण्डवत् सपदि निपत्य संमुखे
सगद्गदाः पुलकलसत्तनूरुहाः ।
हृष्यन्तो दशमुखवेपितान्तराः
पथ्याभिः[1] स्तुतिभिरथाभिरेभिरे ॥४६॥

१. तथ्याभिः—अयो० ।

ब्रह्मादय ऊचुः

नमो नमो भुवनभयार्तिहारिणे
रिपुच्छिदे द्विजनिगमौघरक्षिणे ।
परात्परामलवपुषे रजस्तमः-
संस्पृष्टप्रबहलसत्त्वमूर्त्तये ॥४७॥

नमो नमो भवजनुषेऽभवाय च
नमो नमो खिलवपुषेऽखिलाय च ।
नमो नमो गुणनिधयेऽगुणाय च
नमो नमोऽखिलदृशेऽदृशाय च ॥४८॥

नमो नमो निजविभवाप्तमूर्त्तये[1]
नमो नमो निजजनचित्तपण्यवे ।
नमो नमो निगमपथातिगामिने
नमो नमो विततभवापवर्गद ॥४९॥

नमो नमो नः कार्यार्थमवतीर्णाय विष्णवे ।
लक्ष्मीशायाखिलद्वेष्टृसंहराय नमो नमः ॥५०॥

नमो नमः पुष्करपुञ्जमालिने
नमो नमः पुष्करलोचनाय ते ।
नमो नमः पुष्करवर्यपाणये
नमो नमः पुष्करमध्यवाससे ॥५१॥

यत्प्रार्थितोऽस्माभिरजस्र[2] दुःखितै-
र्दशास्यकारागृहवासवेपितैः ।
तत्त्वं स्वयाच्ञां सफलां विधातु-
मिहावतीर्णोऽसि नमो नमस्ते ॥५२॥

कस्ते जनो वेत्ति वत प्रवृत्तिं
गुणानुषङ्गव्यतिकरवर्जितात्मनः ।
स्वमायया खिलजनमोहनाकृते-
रमायिनः स्वर्गभवापवर्गद ॥५३॥

---

१. "निजजनैश्वर्यवृद्धये धृतावताराय" इति टिप्पणी–मथु० । २. °र्जनैः सु° रीवां ।

कुर्मः किमीश भवदेकपरायणात्मा-
नो वयं किमपरं समुपाश्रयामः ।
अभ्यर्थयाम उदितेऽनुयुगं विपक्षे
गोविप्रवेदपथधर्मविवर्द्धनाय ॥५४॥
तथापि ते सख्यमिहाचरिष्य-
न्त्येते सुराः उभयतटान्तवासिनः ।
इहापि ते नाथ रमैव सङ्गिनी
भूयान्महामोदकला विवर्द्धिनी ॥५५॥
एषा श्री भवतो नित्या स्वांशैः क्रीडिष्यति त्वया ॥५६॥
रासादिलीला भवतो परात्परा
विभातु नो हृदये नाथ नित्यम् ।
अशोककुञ्जे भवतो रमेश
रमासहस्रेण यथा विलासः ॥५७॥
इहापि ते देव तथैव भूयात्
साकेतवल्लीवनवल्लरीभिः ।
इमाः प्रभो सुरसरितोऽपरे तटे
वनाश्रयाः सुरवर गोपकन्यकाः ।
रमामयास्तव जनिमानमिच्छवः
ससंततस्तव भवितार ईश्वराः ॥५८॥
एवं स्तुवत्सु ब्रह्मादिष्वत्र संमोदसंभ्रमाः
तुष्टुवुः श्रुतयोऽप्येनं समागत्य त्रिपृष्टतः ॥५९॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे
जन्मस्तवो नाम दशमोऽध्यायः ॥ १० ॥

एकादशोऽध्यायः

श्रुतय ऊचुः

जय जय भुवनत्रयसंतापहरण नवाम्बुदाकृते ! सकलकल्याणगुण-निधान निरुपमसौन्दर्य विजितकन्दर्पकोटिदर्प मन्दस्मितमाधुरीसुधारस-धारापराभूतशरच्चन्द्रचन्द्रिकावलेप कमलाकुचकुङ्कुमपिञ्जरीकृतवक्षस्थल-विराजितमहाकौस्तुभमणिमरीचिमालानिराकृतत्रिभुवनतिमिर निरुपम नित्य निरीह निराभास निरञ्जन निर्विकार नित्याकार निर्गुण नित्यानन्द-मयविग्रह निःकिंचनजनप्रिय ब्रह्माण्डकोटिकमलासंसेव्यमानचरणकमल-रजःपरागपवित्रितवसुधातल नवीनवनमालाधर राम श्रीराम राघव मुकुन्द रामचन्द्र जनार्दन जगदीश पुरुषोत्तम द्विभुज धनुर्वाणादिधर श्रीवत्सधर महापुरुष महाकारुणिक महाजिष्णो महेश्वर महाजनाचार-परिपालक सूर्यकुलोत्तम रघुकुलोत्तम समर्यादावतारिन् जगद्विधरणदहर-वेश्मान्तःस्थ व्यापक परमात्मन्ननिर्देश्याप्रमेयातर्क्य कोमलापाङ्गनिर्मुक्त-कटाक्षसंक्षोभितास्मन्मानसमहामदनसंवर्द्धन नमस्ते नमस्ते ॥ १ ॥

त्रिपृष्ठपुरस्थाभिरस्माभिरालोकितुं[1] प्रार्थितो[2] यद्दर्शनसुखमुखं किन्नु त्वदीयं प्रियं करवाम त्रिभुवनसुन्दरमिदं ते रूपमवलोकितवत्यो न वयं क्षणमपीतो विचलितुं शक्ताः अद्यावधि तव चरणधावनी[3]र्दास्य एव भविष्यामः ॥ २ ॥

नमः सुन्दरवर भवतेऽनर्घ्यगुण ब्रह्मादीनामपि वाङ्मनसागोचरा-कृतये निजानन्दरसनिमग्नाय कैशोरवेशशुद्धमूर्त्तये निजलीलावशीकृतलक्ष्मी-सहस्रमहाकेलिमहारसिकाय ब्रह्मण्याय वदान्याय साधुवादनिकेतनाय करिष्यमाणभुवनत्रयमङ्गलपरिणामसूचकमधुरस्मितमण्डितमुखचन्द्राय श्री-रामचन्द्राय ॥ ३ ॥

इत्थं संस्तूय तं नाथं श्रुतयो जातमङ्गलाः ।
सरय्वा अपरे पारेऽवतेरुर्गोपवेश्मसु ॥ ४ ॥

---

१. 'अस्माभि' रिति नास्ति—मथु० । २. ° तोऽद्य दर्शन°—मथु० ।
३. 'धावनीः क्षालिन्यः' इति टि० —मथु० ।

तास्तेषां [1]घोषनाथानामाभीराणां कुले कुले ।
सहस्रशो जनिं कृत्वा रामसेवार्थमुत्सुकाः ॥ ५ ॥
रामो वै[2] भगवान् साक्षात् पूर्णः श्रीपुरुषोत्तमः ।
तत्क्षणात् पश्यतोरेव कौशल्यारघुनाथयोः ॥ ६ ॥
शैशवं रूपमास्थाय व्यरुचज्जातको यथा ।
तं दृष्ट्वा पितरौ तस्य ययतुर्विस्मयं परम् ॥ ७ ॥
अहो ! अस्य महेशस्य लीलाक्रीडनकं वपुः ।
अयं हि नः सुखं दास्यत्युत्तरे वयसिस्थयोः ॥ ८ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे
श्रुतिस्तवो नाम एकादशोऽध्यायः ।

द्वादशोऽध्यायः

अथाहनन् दुन्दुभिवादिनो भुवि
प्रमोदिताः संसदि देवदुन्दुभीन् ।
जगुश्च विद्याधरकिन्नरीगणाः
प्रबन्धजन्मोत्सवगायनोद्धुराः ॥ १ ॥
सुराश्च तूर्यत्रिकनादमोदिताः
सुरद्रुमाणां कुसुमैरवाकिरन्[3] ।
कृताङ्गभूषा ननृतुश्च संभ्रमात्
सुराङ्गनाभिर्गगनाङ्गणस्थिताः ॥ २ ॥
दिशां प्रसादः[4] सहसा तदाभवद्-
ययुः सुखस्पर्शकराः समीरणाः ।
सुरोचिषा रोचित उद्गतो रवि-
र्नभस्तलं दर्पणनिर्मलं बभौ ॥ ३ ॥

---

१. गोपनाथानां–रीवां । २. अपि–मथु० । ३. ववृषुः कुसुमोत्करम्–अयो०, मथु० । ४. प्रमोदः–अयो० ।

प्रदर्शयामास तथैव कालो
निजान् गुणान् संततमाधिदैविकान् ।
विज्ञाय सर्वेश्वरमत्र जातं
रमा निजांशैरवतारमाचरत् ॥ ४ ॥
ततोऽधिकूलौ[1] मधुरौ सरय्वा
रत्नोल्लहेमप्रभवौ बभूवतुः ।
सरिच्च चान्द्री विमला विरेजे
समुल्लसत्काञ्चनबालुकाढ्या ॥ ५ ॥
सर्वे द्रुमास्तत्र सुरद्रुमोपमाः[2]
सर्वे निधीनां निवहा इहासुः ।
सर्वे च ते दिव्यसमृद्ध[3]योगा
ये प्रादुरासुः कमलानिकेतने ॥ ६ ॥
राजा दशरथः स्नात्वा कृत्तश्मश्रु[4]रलङ्कृतः ।
जातकर्म कुमाराणां चकार विधिवद्द्विजैः ॥ ७ ॥
जातकर्मोत्सवे[5] धेनूः कोटिशः समलङ्कृताः ।
ब्राह्मणेभ्यो ददौ राजा युक्तः परमया मुदा ॥ ८ ॥
नृत्यतां गायकानां च वाद्यतां पुरयोषिताम् ।
मनोरथाधिकं प्रादात् पटभूषणधोरणम्[6] ॥ ९ ॥
बन्धुभ्यो ज्ञातिजेभ्यश्च महाराजेभ्य एव च ।
संमाननं चकारोच्चैर्वासोऽलङ्कारसंपदा ॥१०॥
तत्राशिषः प्रयुञ्जानाः प्रेमपूर्णा द्विजातयः ।
कुमाराणां सुभव्याय जन्मस्वस्त्ययनं जगुः ॥११॥
अथास्थाने स्थितं भूपं सदूर्वादलपाणयः ।
पौरा जनाः समाजग्मुरन्योन्यकृतमङ्गलाः ॥१२॥
[7]मण्डिता मण्डमानाश्च जातकौतुकवृद्धयः ।
सुहृदः साधवश्चैव भक्ता देवर्षयस्तथा ॥१३॥

---

१. "द्विकूलावित्यपि, कूलशब्दः पुंलिंगेऽपि" इति-टि०-मथु० । २. °द्रुमा-द्रुमाः-अयो०, मथु० । ३. समृद्धि°-रीवां । ४. कृतस्य श्री°-अयो०, रीवां । ५. कामोत्सवे-अयो०, रीवां । ६. धोरणीं-मथु०, रीवां, "सर्वं स्याद्वाहनं मानं युग्यं पत्त्रं च धोरणम्" इत्यमरः । ७. पण्डिता-रीवां ।

कोटिब्रह्माण्डनाथाश्च देवा ब्रह्मादयोऽखिलाः ।
कोटयश्च महेन्द्राणां यमानां कोटयस्तथा ॥१४॥
कोटयो वरुणानां च कुबेराणां च कोटयः ।
रुद्राणां कोटयश्चैव तस्मिन् जन्ममहोत्सवे ॥१५॥
अनृत्यन्त प्रमोदेन सिद्धगन्धर्वलोकवत् ।
अन्ये खदिग्भूमिचराः प्रमोदरसरञ्जिताः[1] ॥१६॥
ग्रहाश्च सर्वे शुभवेषधारिणः
स्वरूपतः स्वस्वगृहेषु तस्थिरे ।
ब्रह्माण्डकोटिष्वपि याश्च संपद-
स्ता मूर्तिमत्यः सहसाऽऽविरासुः ॥१७॥
राजानश्च महामोदा नानोपायनपाणयः ।
समाजग्मुः शुभं वक्तुं तस्मिन्रामजनोत्सवे ॥१८॥
दूर्वादलसनाथेभ्यस्तेभ्यो राजा भृशं[2] ददौ ।
दिव्यभूषणवासांसि वस्तूनि बहुलानि च ॥१९॥
तोषेण पूर्णचित्तास्ते स्पृहयन्ति परस्परम् ।
नरेन्द्रस्य कुमाराणां भूय आभ्युदयं शुभम् ॥२०॥

प्रजा ऊचुः

अहो दशरथो राजा भाग्यवान् मङ्गलालयः ।
यस्योत्तरं वयः सम्यक् सुतजन्मोत्सवैर्युतम् ॥२१॥
अहो अस्य कुमाराणां दीर्घमायुर्भवत्विति ।
अस्मदीयैर्महाभाग्यैरेते जीयासुरीश्वराः ॥२२॥
अहो विधे धन्यतमोऽसि यत्स्वयं
मनोरथं पूरितवान् नृपस्य नः ।
जातोऽधुना भव्यकरो नृलोकः
समस्तसौभाग्यकलाधिवासितः[3] ॥२३॥
ब्रह्मादयः सुराः सर्वे वसिष्ठाद्याः सुरर्षयः ।
प्रायुञ्जन्नाशिषो याभिर्वृद्धिमन्तः कुमारकाः ॥२४॥

---

१. "अन्ये दिक्चर खचर भूमिचराः समाययुः प्रमुदरसैरलंकृताः" इति भिन्नछन्दसोक्तं-अयो०, मधु०, रीवां । २. दृशं-मधु०, रीवां । ३. °वासतः-रीवां ।

कुमाराः विधिसुस्नाता धात्रीभिः समलङ्कृताः ।
विरेजुः सहसोद्भूता मणयो वारिधेर्यथा ॥२५॥
ते मातृभिः कृतसुमङ्गलसूतिकायां
नीराजितास्तपनबिम्बमहौजसोऽपि ।
[1]नेत्रान्तलग्नकलकज्जलविन्दुजात-
दृष्टिप्रदोषविषया प्रणयं पुपोषुः ॥२६॥
दिने दिनेऽङ्गलावण्यवृद्ध्या रोचन्ति बालकाः ।
अजातदर्शदशना जननीनेत्रसौख्यदाः ॥२७॥
आशीर्भिः पौरलोकानां जनानां च मनोरथैः ।
वर्द्धमानाः प्रतिदिनं व्यूहात्मानो व्यरोचयन् ॥२८॥
तेषां मध्ये महारूपलावण्यवपुषा युतः ।
चिदानन्दमयो रामो व्यरोचत विशेषतः ॥२९॥
द्वितीयश्च सुमित्रायाः सूनुः कञ्जदलेक्षणः ।
व्यराजत विशेषेण रामवत् परमद्युतिः ॥३०॥
अन्यौ भरतशत्रुघ्नौ प्रभामण्डलमण्डितौ ।
विरेजतुः सुवयसौ संपन्नौ परया श्रिया ॥३१॥
दशरथभवनं सदा समृद्धं
सुवितततमूर्जितमिन्दिरानिवासम् ।
रामजनुषि सुमङ्गले च जाते
व्यरुचदतीव मनोज्ञयैव लक्ष्म्या ॥३२॥
तथैवाविर्बभूवुस्ते बाला वै लक्ष्मणादयः ।
बभौ राजा समासाद्य निखिलांश्च मनोरथान् ॥३३॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे
जन्मोत्सवर्णनं नाम द्वादशोऽध्यायः ॥१२॥

---

१. "नेत्रान्ते लग्नं कलं मनोहरं यत्कज्जलं तस्य विन्दुरेव दृष्टिदोषविषयो येषां ते, दृष्टिदोषो कज्जलविन्दौ लगति न तु नेत्रे, तत्कृते नेत्रप्रान्ते कज्जलविन्दु-प्रदानम्" इति टि०–मधु० ।

त्रयोदशोऽध्यायः

ब्रह्मोवाच

अथ त्रयोदशतमे दिने नामविधित्सया ।
कुमाराणां सुजनुषां परमायुश्चिकीर्षया ॥ १ ॥
वसिष्ठो वंशपौरौधाः मुदायुक्तः समाययौ[1] ।
राज्ञो दशरथस्यान्तःपुरे सर्वसमर्द्धने[2] ॥ २ ॥
समायातं मुनिश्रेष्ठं राजा दशरथोऽग्रहीत् ।
अहो मे भाग्यसंपत्त्या संगतोऽद्य पुरोहितः ॥ ३ ॥
प्राजापत्यो मुनिश्रेष्ठः परमानन्ददर्शनः ।
नमस्ते मुनिशार्दूल प्राजापत्य महाप्रभ[3] ॥ ४ ॥

वसिष्ठ उवाच

नरेन्द्र वत ते भाग्यं जातोऽसि तनु पुत्रवान् ॥ ५ ॥
तेषामहं कुमाराणां [4]नामकृत्यं सुखप्रदम् ।
तवाज्ञया विधास्यामि यद्गोप्यममरैरपि ॥ ६ ॥
अहो अमी प्रभोरंशा रामस्यामिततेजसः ।
योऽसौ तव कुमाराणामग्रणी राम एव सः ॥ ७ ॥
अस्य चत्वार एवांशाः ब्रह्मरूपाः सनातनाः ।
वासुदेवः संकर्षणः प्रद्युम्नश्चानिरुद्धकः ॥ ८ ॥
चत्वार एते पुरुषाः स्वस्वकार्यविधायकाः ।
धर्मरूपास्तु रामस्य पुरुषोत्तमरूपिणः ॥ ९ ॥
ततः संस्नातसंस्कारान् मन्त्रितान् विधिवर्त्मना ।
नामानि चक्रे ब्रह्मर्षिः कोटिकल्पविदुत्तमः ॥१०॥

वसिष्ठ उवाच

रामः श्यामो हरिर्विष्णुः केशवः केशिनाशनः ।
नारायणो माधवश्च श्रीधरो मधुसूदनः ॥११॥

---

१. समाजग्मुर्मुदान्विताः–अयो०, रीवां । २. समृद्धने–अयो० । ३. महाप्रभो–अयो०, रीवां । ४. नामकृत्यं सुखप्रदं–अयो० ।

रावणारिः कंसनिहा वकीप्राणनिवर्त्तनः ।
ताडकाहननोद्युक्तो विश्वामित्रप्रियः कृती ॥१२॥
वेदाङ्गो यज्ञवाराहो धर्मज्ञो मेदिनीपतिः ।
वासुदेवोऽरविन्दाक्षो गोविन्दो गोपतिः प्रभुः ॥१३॥
पद्माकान्तो विकुण्ठाभूः कीर्तिकन्यासुखप्रदः ।
जानकीप्राणनाथश्च सीताविश्लेषनाशनः ॥१४॥
मुकुन्दो मुक्तिदाता च कौस्तुभी करुणाकरः ।
खरदूषणनाशी च मारीचप्राणनाशकः ॥१५॥
सुबाहुमारणोत्साही पक्षिश्राद्धविधायकः ।
विहङ्गपितृसंबन्धी क्षणतुष्टो गतिप्रदः ॥१६॥
पूतनामातृगतिदो विनिवृत्ततृणानिलः ।
पावनः परमानन्दः कालिन्दीजलकेलिकृत् ॥१७॥
सरयूजलकेलिश्च साकेतपुरदैवतः ।
मथुरास्थाननिलयो विश्रुतात्मा त्रयीस्तुतः ॥१८॥
कौन्तेयविजयोद्युक्तः सेतुकृत् सिन्धुगर्भवित् ।
सप्ततालप्रभेदी च महास्थिक्षेपणोद्धुरः ॥१९॥
कौशल्यानन्दनः कृष्णः किशोरीजनवल्लभः ।
आभीरीवल्लभो वीरः कोटिकन्दर्पविग्रहः ॥२०॥
गोवर्द्धनगिरिप्राशी गोवर्द्धनगिरीश्वरः ।
गोकुलेशो व्रजेशश्च सहजाप्राणवल्लभः ॥२१॥
भूलीलाकेलिसंतोषी वामाकोटिप्रसादनः ।
भिल्लपत्नीकृपासिन्धुः कैवर्त्तकरुणाकरः ॥२२॥
जाम्बवद्भक्तिदो भोक्ता जाम्बवत्यङ्गनापतिः ।
सीताप्रियो रुक्मिणीशः कल्याणगुणसागरः ॥२३॥
भक्तप्रियो दाशरथिः कैटभारिः कृतोत्सवः ।
कदम्बवनमध्यस्थः शिलासंतारदायकः ॥२४॥
राघवो रघुवीरश्च हनुमत्सख्यवर्द्धनः ।
पीताम्बरोऽच्युतः श्रीमान् श्रीगोपीजनवल्लभः ॥२५॥

भक्तेष्टो भक्तिदाता च भार्गवद्विजगर्वजित् ।
कोदण्डरामः क्रोधात्मा लङ्काविजयपण्डितः ॥२६॥
कुम्भकर्णनिहन्ता च युवा कैशोरसुन्दरः ।
वनमाली घनश्यामो गोचारणपराक्रमी ॥२७॥
काकपक्षधरो वेषी विटो धृष्टः शठः पतिः ।
अनुकूलो दक्षिणश्च तारः कपटकोविदः ॥२८॥
अश्वमेधप्रणेता च राजा दशरथात्मजः ।
राघवेन्द्रो महाराजः श्रीरामानन्दविग्रहः ॥२९॥
क्षत्रः क्षत्रकुलोत्तंसो महातेजाः प्रतापवान् ।
महासैन्यो महाचापो लक्ष्मणैकान्तसुप्रियः ॥३०॥
कैकेयीप्रणनिर्माता वीतराज्यो वनालयः ।
चित्रकूटप्रियस्थानो मृगयाचारतत्परः ॥३१॥
किरातवेषः क्रूरात्मा पशुमांसैकभोजनः ।
फलपुष्पकृताहारः कन्दमूलनिषेवणः ॥३२॥
पयोव्रतो विधानज्ञः सद्धर्मप्रतिपालकः ।
गदाधरो यज्ञकर्त्ता श्राद्धकर्ता द्विजार्चकः ॥३३॥
पितृभक्तो मातृभक्तो[1] बन्धुः[2] स्वजनतोषकृत् ।
मत्स्यः कूर्मो नृसिंहश्च वराहो वामनस्तथा ॥३४॥
रघुरामः परशुरामो बलरामो रमापतिः ।
रामलिङ्गस्थापयिता शिवभक्तिपरायणः[3] ॥३५॥
चण्डिकार्चनकृत्यज्ञश्चण्डीपाठविधानवित् ।
अष्टमीव्रतकर्मज्ञो विजयादशमीप्रियः ॥३६॥
कपिसैन्यसमारम्भी सुग्रीवप्राणदः परः ।
सूर्यवंशध्वजो धीरो ब्रह्मण्यो ब्राह्मणप्रियः ॥३७॥
ब्रह्मार्पणी ब्रह्महोता ब्रह्मकर्मविदुत्तमः ।
ब्रह्मज्ञो ब्राह्मणाचारः कृतकृत्यः सनातनः ॥३८॥

---

१. दीनबन्धुः–रीवां । २. भक्त°–रीवां । ३. 'रुद्रमाहात्म्यवर्धनः' इति पाठान्तरं, टि०–मथु० ।

सच्चिदानन्दरूपश्च निरीहो निर्विकारकः ।
नित्याकारो निराधारो रामो रमयतां वरः ॥३९॥
रकारादिर्मकारादिः रामः कैवल्यमङ्गलः ।
संदर्भो संशयच्छेत्ता शेषशायी सतां गतिः ॥४०॥
पुरुषः पुरुषाकारः प्रमेयः पुरुषोत्तमः ।
वंशीधरो विहारज्ञो रसानन्दीजितस्मरः ॥४१॥
पूर्णातिथिविनोदी च वृन्दावनविलासकृत् ।
रत्नकटकधरो वीरो मुक्ताहारविभूषणः ॥४२॥
नृत्यप्रियो नृत्यकरो नित्यसीताविहारवान् ।
महालक्ष्मीदृढानन्दी प्रमोदवननायकः ॥४३॥
परप्रेमा परानन्दः परभक्तिस्वरूपकः ।
अग्निरूपः कालरूपः प्रलयान्तमहानलः[1] ॥४४॥
सुप्रसन्नः प्रसादात्मा प्रसन्नास्यः परः प्रभुः ।
प्रीतिः (तः ?) प्रीति (त ?)-
मनाः प्रीतिः शकटासुरभञ्जनः ॥४५॥
खट्वासुरवधोद्युक्तः कालरूपो दुरन्तकः ।
हंसः स्मरसहस्रात्मा स्मरणीयो रुचिप्रदः ॥४६॥
पण्डा पण्डितमानी च वेदरूपः सरस्वती ।
गुह्यार्थदो गुरुर्देवो मन्त्रज्ञो मन्त्रदीक्षितः ॥४७॥
योगज्ञो योगविन्नाथः स्वात्मयोगविशारदः ।
अध्यात्मशास्त्रसारज्ञो रसरूपो रसात्मकः ॥४८॥
शृङ्गारवेशो मदनो मानिनीमानवर्द्धनः ।
चन्दनद्रवसंशीतश्चन्दनद्रवलेपनः ॥४९॥
श्रीवत्सलाञ्छनः श्रीमान् मानी मानुषविग्रहः ।
करणं कारणं कर्ताऽऽधारो विधरणो धरः ॥५०॥
धरित्रीधरणो धीरः स्त्र्यधीशः[2] सत्यवाक् प्रियः ।
सत्यकृत् सत्रकर्ता च कर्मी कर्मविवर्द्धनः ॥५१॥

---

१. °महाबलः-अयो० । २. अधीशः-रीवां ।

कार्मुकी विशिखी शक्तिधरो विजयदायकः
ऊर्ज्जस्वलो बली जिष्णुर्लङ्केशप्राणनाशकः ॥५२॥
शिशुपालप्रहन्ता च दन्तवक्त्रविनाशनः ।
परमोत्साहनोऽसह्यः[1] कलिदोषविनाशनः ॥५३॥
जरासन्धमहायुद्धो[2] निःकिंचनजनप्रियः ।
द्वारकास्थाननिर्माता मथुरावासशून्यकृत् ॥५४॥
काकुत्स्थो विनयी वाग्मी मनस्वी दक्षिणाप्रदः ।
प्राच्यवाचीप्रतीच्युक्तदक्षिणो भूरिदक्षिणः ॥५५॥
दक्षयज्ञसमानेता विश्वकेलिः सुरार्चितः ।
देवाधिपो दिवोदासो दिवास्वापी दिवाकरः ॥५६॥
कमलाक्षः कृपावासो द्विजपत्नीमनोहरः ।
विभीषणशरण्यश्च शरणं परमा गतिः ॥५७॥
चाणूरबलनिर्माथी महामातङ्गनाशनः ।
बद्धकक्षो महामल्ली मल्लयुद्धविशारदः ॥५८॥
अप्रमेयः प्रमेयात्मा प्रमाणात्मा सनातनः ।
मर्यादावतरो विज्ञो मर्यादापुरुषोत्तमः ॥५९॥
महाक्रतुविधानज्ञः क्रतुकर्मा क्रतुप्रियः ।
वृषस्कन्धो वृषस्कन्दी वृषध्वजमहासखः ॥६०॥
चक्री शार्ङ्गी गदापाणिः शङ्खभृत् सुस्मिताननः ।
योगध्यानी योगगम्यो योगाचार्यो दृढासनः ॥६१॥
जिताहारो मिताहारः परहा दिग्जयोद्धुरः ।
सुपर्णासनसंस्थाता गजाभो गजमोक्षणः ॥६२॥
गजगामी ज्ञानगम्यो भक्तिगम्यो भयापहः ।
भगवान् सुमहैश्वर्यः परमः परमामृतः ॥६३॥
स्वानन्दी सच्चिदानन्दी नन्दिग्रामनिकेतनः ।
वर्होत्तंसः कलाकान्तः कालरूपः कलाकरः ॥६४॥
कमनीयः कुमाराभो मुचुकुन्दगतिप्रदः ।
मुक्तिभूरिफलाकारः कारुण्यधृतविग्रहः ॥६५॥

---

१. सत्त्वः-अयो० । २° योद्धा-रीवां ।

भूलीलारमणोद्युक्तः शतधाकृतविग्रहः ।
रसास्वादी रसानन्दी रसातलविनोदकृत् ॥६६॥
अप्रतर्क्यः पुनीतात्मा विनीतात्मा विधानवित् ।
भुज्युः सभाजनः सभ्यः पण्डः पण्डुर्विपण्यजः ॥६७॥
चर्षणी उत्कटो वीतो वित्तदः सविताऽविता ।
विभवो विविधाकारो रामः कल्याणसागरः ॥६८॥
सीतास्वयंवरोद्युक्तो हरकार्मुकभञ्जनः ।
रावणोन्मादशमनः सीताविरहकातरः ॥६९॥
कुमारकुशलः कामः कामदः कीर्तिवर्द्धनः ।
दुर्योधनमहावैरी युधिष्ठिरहितप्रदः ॥७०॥
द्रौपदीचीरविस्तारी कुन्तीशोकनिवारणः ।
गान्धारीशोकसंतानः कृपाकोमलमानसः ॥७१॥
चित्रकूटकृतावासो गङ्गासलिलपावनः ।
ब्रह्मचारी सदाचारः कमलाकेलिभाजनः ॥७२॥
दुरासदः कलहकृत् कलिः कलिविनाशनः ।
चारी दण्डाजिनी छत्री[1] पुस्तकी कृष्णमेखलः ॥७३॥
दण्डकारण्यमध्यस्थः पञ्चवटचालयस्थितः ।
परिणामजयानन्दी नन्दिग्रामसुखप्रदः ॥७४॥
इन्द्रारिमानमथनो बद्धदक्षिणसागरः ।
शैलसेतुविनिर्माता कपिसैन्यमहीपतिः ॥७५॥
रथारूढो गजारूढो हयारूढो महाबली ।
निषङ्गी कवची खड्गी खलगर्वनिवर्हणः ॥७६॥
वेदान्तविज्ञो विज्ञानो जानकीब्रह्मदर्शनः ।
लङ्काजेता विमानस्थो नागपाशविमोचकः ॥७७॥
अनन्तकोटिगणभूः कल्याणः केलिनीपतिः ।
दुर्वासापूजनपरो वनवासी महाजवः ॥७८॥

---

१. ब्रह्मचारी दण्डच्छत्री–रीवां ।

सुस्मयः सुस्मितमुखः कालियाहिफणानटः ।
विभुर्विषहरो वत्सो वत्सासुरविनाशनः ॥७९॥
वृषप्रमथनो वेत्ता मरीचिर्मुनिरङ्गिराः ।
वसिष्ठो द्रोणपुत्रश्च द्रोणाचार्यो रघूत्तमः ॥८०॥
रघुवर्यो दुःखहन्ता वनधावनसश्रमः ।
भिल्लग्रामनिवासी च भिल्लभिल्लिहितप्रदः ॥८१॥
रामो रविकुलोत्तंसः वृष्णिगर्भो[1] महामणिः ।
यशोदाबन्धनप्राप्तो यमलार्ज्जुनभञ्जनः ॥८२॥
दामोदरो दुराराध्यो दूरगः प्रियदर्शनः ।
मृत्तिकाभक्षणक्रीडो ब्रह्माण्डावलिविग्रहः ॥८३॥
बाललीलाविनोदी च रतिलीलाविशारदः ।
वसुदेवसुतः श्रीमान् भव्यो दशरथात्मजः ॥८४॥
वलिप्रियो वालिहन्ता विक्रमी केसरी करी ।
सनिग्रहफलानन्दी सनिग्रहनिवारणः ॥८५॥
सीतावामाङ्गसंलिष्टः कमलापाङ्गवीक्षितः ।
स्यमन्तपञ्चकस्थायी भृगुवंशमहायशाः ॥८६॥
अनन्तोऽनन्तमाता च रामो राजीवलोचनः ।
इत्येवं नामसाहस्रं राजेन्द्र तनयस्य ते ॥८७॥
यः पठेत्प्रातरुत्थाय धौतपादः शुचिव्रतः ।
स याति रामसायुज्यं भुक्त्वान्ते केवलं पदम् ॥८८॥
न यत्र त्रिगुणग्रासो न माया न स्मयो मदः ।
तद्याति विरजं स्थानं रामनामानुकीर्तयन् ॥८९॥
न ते पुत्रस्य नामानि संख्यातुमहमीश्वरः ।
संक्षेपेण तु यत्प्रोक्तं तन्मात्रमवधारय ॥९०॥
यावन्ति सन्ति रूपाणि विष्णोरमिततेजसः ।
तावन्ति तव पुत्रस्य परब्रह्मस्वरूपिणः ॥९१॥
पाञ्चभौतिकमेतद्धि विश्वं समुपधारय ।
ततः परं परब्रह्म विद्धि रामं सनातनम् ॥९२॥

---

१. पृश्निगर्भो–रीवां, अयो० ।

नश्वरं सकलं दृश्यं रामं ब्रूमः सनातनम् ।
एतद्धि तव पुत्रत्वं प्राप्तो रामः परात्परः ॥९३॥
सद्वेदैरपि वेदान्तै[1]र्नेति नेतीति गीयते ।
तमेव जलदश्यामं रामं भावय भावय ॥९४॥
य एतत् पठते नित्यं रामसाहस्रकं विभो ।
स याति परमां मुक्तिं रामकैवल्यरूपिणीम् ॥९५॥
मा शङ्किष्ठा नराधीशः श्रीरामरसिकस्य च ।
अनन्तकोटिरूपाणि रामस्तेषां विभावकः ॥९५॥
त्रैलोक्यमेतदखिलं रामवीर्ये प्रतिष्ठितम् ।
विजानन्ति नराः सर्वे नास्य रूपं च नाम च ॥९७॥
य एतस्मिन् महाप्रीतिं कलयिष्यन्ति मानवाः ।
त एव धन्या राजेन्द्र नान्ये स्वजनदूषकाः ॥९८॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे वसिष्ठकृतनाम-सहस्रकथनं नाम त्रयोदशोऽध्यायः ॥१३॥

●

चतुर्दशोऽध्यायः

वसिष्ठ उवाच

या श्रीरेतस्य सहजा सीता नित्याङ्गसङ्गिनी ।
भवित्री जनकस्यैव कुले सर्वाङ्गसुन्दरी ॥ १ ॥
तस्याश्च नामसाहस्रं कथयिष्यामि भूपते ।
यथा रामस्तथैवेयं महालक्ष्मीः सनातनी ॥ २ ॥
नानयोः संमतो भेदः शास्त्रकोटिशतैरपि ।
अस्यैव नित्यरमणी बहुनामस्वरूपतः ॥ ३ ॥
तस्यास्तु नामसाहस्रं यथावदुपधारय ।
ॐ सहजानन्दिनी सीता जानकी राधिका रतिः ॥ ४ ॥

---

१. वेदान्ते-अयो०, रीवां ।

रुक्मिणी कमला कान्ता कान्तिः कमललोचना ।
किशोरी रामललना कामुको करुणानिधिः ॥ ५ ॥
कन्दर्पवर्द्धनी वीरा वरुणालयवासिनी ।
अशोकवनमध्यस्था महाशोकविनाशिनी ॥ ६ ॥
चम्पकाङ्गी तडित्कान्तिर्जाह्नवी जनकात्मजा ।
जानकी जयदा जप्या जयिनी जैत्रपालिका ॥ ७ ॥
परमा परमानन्दा पूर्णिमामृतसागरा ।
सूधासूतिः सुधारश्मिः सुधादीपितविग्रहा ॥ ८ ॥
सुस्मिता सुस्मितमुखी तारका सुखदेक्षणा ।
रक्षणी चित्रकूटस्था वृन्दावनमहेश्वरी ॥ ९ ॥
कन्दर्पकोटिजननी कोटिब्रह्माण्डनायिका ।
शरण्या शारदा श्रीश्च शरत्कालविनोदिनी ॥१०॥
हंसी क्षीराब्धिवसतिर्वासुकी स्थावराङ्गना ।
वराङ्गासनसंस्थाना प्रियभोगविशारदा ॥११॥
वसिष्ठविश्ववसिनी विश्वपत्नी[1] गुणोदया ।
गौरी चम्पकगात्रा च दीपद्योता प्रभावती ॥१२॥
रत्नमालाविभूषा च दिव्यगोपालकन्यका ।
सत्यभामारतिः प्रीता मित्रा चित्तविनोदिनी ॥१३॥
सुमित्रा चैव कौशल्या कैकेयीकुलवर्द्धिनी ।
कुलीना केलिनी दक्षा दक्षकन्या दयावती ॥१४॥
पार्वती शैलकुलजा वंशध्वजपटीरुचिः ।
रुचिरा रुचिरापाङ्गा पूर्णरूपा कलावती ॥१५॥
कोटिब्रह्माण्डलक्ष्मीशा स्थानदात्री स्थितिः सती ।
अमृता मोदिनी मोदा रत्नाचलविहारिणी ॥१६॥
नन्दभानुसुता धीरा वंशीरवविनोदिनी ।
विजया वीजिनी विद्या विद्यादानपरायणा ॥१७॥
मन्दस्मिता मन्दगतिर्मदना मदनातुरा ।
बृंहिणी बृंहती वर्या वरणीया वराङ्गना ॥१८॥

१-'विश्वः भगवान्, तस्य पत्नी' इति टि०-मधु० ।

रामप्रिया रमारूपा रासनृत्यविशारदा ।
गान्धर्विका गीतरम्या सङ्गीतरसवर्द्धिनी ॥१९॥
तालदा तालवक्षोजा तालभेदनसुन्दरी ।
सरयूतीरसन्तुष्टा यमुनातटसंस्थिता ॥२०॥
स्वामिनी स्वामिनिरता कौसुम्भवसनावृता ।
मालिनी तुङ्गवक्षोजा फलिनी फलमालिनी ॥२१॥
वैडूर्यहारसुभगा मुक्ताहारमनोहरा ।
किरातीवेशसंस्थाना गुञ्जामणिविभूषणा ॥२२॥
विभूतिदा विभा वीणा वीणानादविनोदिनी ।
प्रियङ्गुकलिकापाङ्गा कटाक्षा गतितोषिता ॥२३॥
रामानुरागनिलया रत्नपङ्कजमालिनी ।
विभावा विनयस्था च मधुरा पतिसेविता ॥२४॥
शत्रुघ्नवरदात्री च रावणप्राणमोचिनी[1] ।
दण्डकावनमध्यस्था बहुलीला विलासिनी ॥२५॥
शुक्लपक्षप्रिया शुक्ला शुक्लापाङ्गस्वरोन्मुखी ।
कोकिलस्वरकण्ठी च कोकिलस्वरगायिनी ॥२६॥
पञ्चमस्वरसन्तुष्टा पञ्चवक्त्रप्रपूजिता ।
आद्या गुणमयी लक्ष्मीः पद्महस्ता हरिप्रिया ॥२७॥
हरिणी हरिणाक्षी च चकोराक्षी किशोरिका ।
गुणहृष्टा शरज्ज्योत्स्ना स्मितस्नपितविग्रहा ॥२८॥
विरजा सिन्धुगमनी गंगासागरयोगिनी ।
कपिलाश्रमसंस्थाना योगिनी परमाकला ॥२९॥
खेचरी भूचरी सिद्धा वैष्णवी वैष्णवप्रिया ।
ब्राह्मी माहेश्वरी तिग्मा दुर्वारबलविभ्रमा ॥३०॥
रक्तांशुकप्रिया रक्ता नवविद्रुमहारिणी ।
हरिप्रिया हीस्वरूपा हीनभक्तविवर्द्धिनी ॥३१॥
हिताहितगतिज्ञा च माधवी माधवप्रिया ।
मनोज्ञा मदनोन्मत्ता मदमात्सर्यनाशिनी ॥३२॥

१°मोक्षिणी–अयो० ।

निःसपत्नी निरुपमा स्वाधीनपतिका परा ।
प्रेमपूर्णा सप्रणया जनकोत्सवदायिनी ॥३३॥
वेदिमध्या वेदिजाता त्रिवेदी वेदभारती ।
गीर्वाणगुरुपत्नी च नक्षत्रकुलमालिनी ॥३४॥
मन्दारपुष्पस्तवका मन्दाक्षनयवर्द्धिनी ।
सुभगा शुभरूपा च सुभाग्या भाग्यवर्द्धिनी ॥३५॥
सिन्दूराङ्कितमाला च मल्लिकादामभूषिता ।
तुङ्गस्तनी तुङ्गनासा विशालाक्षी विशल्यका ॥३६॥
कल्याणिनी कल्मषहा कृपापूर्णा कृपानदी ।
क्रियावती वेधवती मन्त्रणी मन्त्रनायिका ॥३७॥
कैशोरवेशसुभगा रघुवंशविवर्द्धिनी ।
राघवेन्द्रप्रणयिनी राघवेन्द्रविलासिनी ॥३८॥
तरुणी तिग्मदा तन्वी त्राणा तारुण्यवर्द्धिनी ।
मनस्विनी महामोदा मीनाक्षी मानिनी मनुः ॥३९॥
[1]आग्नेयीन्द्राणिका रौद्री वारुणी वशवर्तिनी ।
वीतरागा वीतरतिर्वीतशोका वरोरुका ॥४०॥
वरदा वरसंसेव्या वरज्ञा वरकाङ्क्षिणी ।
फुल्लेन्दीवरदामा च वृन्दा वृन्दावती प्रिया ॥४१॥
तुलसीपुष्पसंकाशा तुलसीमाल्यभूषिता ।
तुलसीवनसंस्थाना तुलसीवनमन्दिरा ॥४२॥
सर्वाकारा निराकारा[2] रूपलावण्यवर्द्धिनी ।
रूपिणी रूपिका रम्या रमणीया रमात्मिका ॥४३॥
वैकुण्ठपतिपत्नी च वैकुण्ठप्रियवासिनी ।
वद्रिकाश्रमसंस्था च सर्वसौभाग्यमण्डिता ॥४४॥
सर्ववेदान्तगम्या च निष्कला परमाकला ।
कलाभासा तुरीया च तुरीयाश्रममण्डिता ॥४५॥
रक्तोष्ठी च प्रिया रामा रागिनी रागवर्द्धिनी ।
नीलांशुकपरीधाना सुवर्णकलिकाकृतिः ॥४६॥

---

१. अग्राह्मी–रीवां, अयो० । २. नित्याकारा–अयो०, मथु० ।

कामकेलिविनोदा च सुरतानन्दवर्द्धिनी ।
सावित्री व्रतधर्त्री[1] च करामलकनायका ॥४७॥
मराला मोदिनी प्राज्ञा प्रभा प्राणप्रिया परा ।
पुनाना पुण्यरूपा च पुण्यदा पूर्णमात्मिका ॥४८॥
पूर्णकारा व्रजानन्दा व्रजवासा व्रजेश्वरी ।
व्रजराजसुताधारा धारापीयूषवर्षिणी ॥४९॥
राकापतिमुखी मग्ना मधुसूदनवल्लभा ।
वीरिणी वीरपत्नी च वीरचारित्रवर्द्धिनी ॥५०॥
धम्मिल्लमल्लिकापुष्पा माधुरी ललितालया ।
वासन्ती वर्हभूषा च वर्होत्तंसा विलासिनी ॥५१॥
बर्हिणी बहुदा बह्वी बाहुवल्ली मृणालिका ।
शुकनासा शुद्धरूपा गिरीशवरवर्द्धिता ॥५१॥
नन्दिनी च सुदन्ता च वसुधा चित्तनन्दिनी ।
हेमसिंहासनस्थाना चामरद्वयवीजिता ॥५२॥
छत्रिणी छत्ररम्या च महासाम्राज्यसर्वदा ।
संपन्नदा भवानी च भवभीतिविनाशिनी ॥५४॥
द्राविडी द्रविडस्थाना आन्ध्री कार्णाटनागरी ।
महाराष्ट्रैकविषया उदग्देशनिवासिनी ॥५५॥
सुजङ्घा पङ्कजपदा गुम्फगुल्फा गुरुप्रिया ।
रक्तकाञ्चीगुणकटिः सुरूपा बहुरूपिणी ॥५६॥
सुमध्या तरुणश्रीश्च वलित्रयविभूषिता ।
गर्विणी गुर्विणी सीता सीतापाङ्गविमोचनी ॥५७॥
ताटङ्किनी कुन्तलिनी हारिणी हीरकान्विता ।
शैवालमञ्जरीहस्ता मञ्जुला मञ्जुलापिनी ॥५८॥
कवरीकेशविन्यासा मन्दहासमनोरथा ।
मधुरालापसंतोषा कौबेरी दुर्गमालिका ॥५९॥
इन्दिरा परमश्रीका सुश्रीः शैशवशोभिता ।

---

१. °व्रतधात्री–अयो० मधु० ।

शमीवृक्षाश्रया श्रेणी शमिनी शान्तिदा शमा ॥६०॥
कुञ्जेश्वरी कुञ्जगेहा कुञ्जगा कुञ्जदेवता ।
कलविङ्ककुलप्रीता पादाङ्गुलिविभूषिता ॥६१॥
वसुदा वसुपत्नी च वीरसूर्वीरवर्द्धिनी ।
सप्तशृङ्गकृतस्थाना कृष्णा कृष्णप्रिया प्रिया ॥६२॥
गोपीजनगणोत्साहा गोपगोपालमण्डिता ।
गोवर्द्धनधरा गोपी गोधनप्रणयाश्रया ॥६३॥
दधिविक्रयकर्त्री च दानलीलाविशारदा ।
विजना विजनप्रीता विधिजा विधुजा विधा ॥६४॥
अद्वैता द्वैतविच्छिन्ना रामतादाम्यरूपिणी ।
कृपारूपा निष्कलङ्का काञ्चनासनसंस्थिता ॥६५॥
महार्हरत्नपीठस्था राज्यलक्ष्मी रजोगुणा ।
रक्तिका रक्तपुष्पा च ताम्बूलीदलचर्विणी ॥६६॥
विम्बोष्ठी व्रीडिता व्रीडा वनमालाविभूषणा ।
वनमालैकमध्यस्था रामदोर्दण्डसङ्गिनी ॥६७॥
खण्डिता विजितक्रोधा विप्रलब्धा समुत्सुका ।
[1]अशोकवाटिकादेवी कुञ्जकान्तिविहारिणी ॥६८॥
मैथिली मिथिलाकारा मैथिलैकहितप्रदा ।
वाग्वती शैलजा शिप्रा महाकालवनप्रिया ॥६९॥
रेवा कल्लोलसुरता सत्यरूपा सदार्चिता ।
सभ्या सभावती सुभ्रूः कुरङ्गाक्षी शुभानना ॥७०॥
मायापुरी तथायोध्या रङ्गधामनिवासिनी ।
मुग्धा मुग्धगतिर्मोदा प्रमोदा परमोन्नता ॥७१॥
कामधेनुः कल्पवल्ली चिन्तामणिगृहाङ्गणा ।
हिन्दोलिनी महाकेलिः सखीगणविभूषिता ॥७२॥
सुन्दरी परमोदारा रामसान्निध्यकारिणी ।
रामार्द्धाङ्गा महालक्ष्मीः प्रमोदवनवासिनी ॥७३॥

---

१. कुंत° अयो०, रीवां ।

विकुण्ठापत्यमुदिता परदारप्रियाप्रिया[1] ।
रामकैङ्कर्यनिरता जम्भजित्करवीजिता ॥७४॥
कदम्बकाननस्था च कादम्बकुलवासिनी ।
कलहंसकुलारावा राजहंसगतिप्रिया ॥७५॥
कारण्डवकुलोत्साहा ब्रह्मादिसुरसंस्थिता ।
सरसी सरसीकेलिः पम्पाजलविनोदिनी ॥७६॥
करिणीयूथमध्यस्था महाकेलिविधायिनी ।
जनस्थानकृतोत्साहा काञ्चनन्यङ्कुवञ्चिता ॥७७॥
कावेरीजलसुस्नाता तीर्थस्नानकृताश्रया ।
गुप्तमन्त्रा गुप्तगतिर्गोप्या गोपतिगोपिता ॥७८॥
गम्भीरावर्तनाभिश्च नानारसबिलम्बिनी ।
शृङ्गाररससालम्बा कादम्बामोदमादिनी ।
कादम्बिनी पानमत्ता घूर्णिताक्षी स्खलद्गतिः ॥८०॥
सुसाध्या दुःखसाध्या च दम्भिनी दम्भवर्जिता ।
गुणाश्रया गुणाकारा कल्याणगुणयोगिनी ॥८१॥
सर्वमाङ्गल्यसम्पन्ना माङ्गल्या मतवल्लभा ।
सुखितात्मजनिप्राणा प्राणेशी सर्वचेतना ॥८२॥
चैतन्यरूपिणी ब्रह्मरूपिणी मोदवर्द्धिनी ।
एकान्तभक्तसुलभा जयदुर्गा जयप्रिया ॥८३॥
हरचापकृतक्रोधा भङ्गुरोक्षणदायिनी ।
स्थिरा स्थिरगतिः स्थात्री स्थावरस्था वराश्रया ॥८४॥
स्थावरेन्द्रसुता धन्या धनिनी धनदार्चिता ।
महालक्ष्मीर्लोकमाता लोकेशी लोकनायिका ॥८५॥
प्रपञ्चातीतगुणनी प्रपञ्चातीतविग्रहा ।
परब्रह्मस्वरूपा च नित्या भक्तिस्वरूपिणी ॥८६॥
ज्ञानभक्तिस्वरूपा च ज्ञानभक्तिविवर्द्धिनी ।
ब्रह्मसायुज्यसाधुश्च रामसायुज्यसाधना ॥८७॥

---

१. "सहजावरदाप्रिया" इति शोधितः पाठः—मथु० ।

ब्रह्माकारा ब्रह्ममयी ब्रह्मविष्णुस्वरूपिणी ।
महाधम्मिल्लशोभा च कवरीकेशपाशिनी ॥८८॥
चिन्मयानन्दरूपा च चिन्मयानन्दविग्रहा ।
कैवर्तकुलसम्पत्तिः शवरीपरिवारिणी ॥८९॥
कनकाचलसंस्थाना गङ्गा त्रिपथगामिनी ।
त्रिपुटा त्रिवृता विद्या प्रणवाक्षररूपिणी ॥९०॥
गायत्री मुनिविद्या च सन्ध्या पातकनाशिनी ।
सर्वदोषप्रशमनी सर्वकल्याणदायिनी ॥९१॥
रामरामा मनोरम्या स्वयंलक्ष्म्या (क्ष्या ?) स्वसाक्षिणी ।
अनन्तकोटिनामा च अनन्तकोटिरूपिणी ॥९२॥
भूलीला रुक्मिणी राधा रामकेलिविबोधिनी ।
वीरा वृन्दा पौर्णमासी विशाखा ललिता लता ॥९३॥
लावण्यदा लयाकारा लक्ष्मीर्लोकानुबन्धिनी ।
सृष्टिस्थितिलयाकारा तुर्यातुर्यातिगावधिः ॥९४॥
दुर्वासावरलभ्या च विचित्रबलवर्द्धिनी ।
रमणी रामरमणी सारात्सारा परात्परा ॥९५॥
इति श्रीजानकीदेव्याः नामसाहस्रकं स्तवम् ।
नामकर्मप्रसङ्गेन मया तुभ्यं प्रकाशितम् ॥९६॥
गोपनीयं प्रयत्नेन त्रैलोक्येऽप्यतिदुर्लभम् ।
सीतायाः श्रीमहालक्ष्म्याः सद्यः संतोषदायकम् ॥९७॥
यः पठेत्प्रयतो नित्यं स साक्षाद्वैष्णवोत्तमः ।
नित्यं गुरुमुखाल्लब्ध्वा पठनीयं प्रयत्नतः ॥९८॥
सर्वसंपत्करं पुण्यं वैष्णवानां सुखप्रदम् ।
कीर्तिदं कान्तिदं चैव धनदं सौभगप्रदम् ॥९९॥
प्रमुद्वनविहारिण्याः सीतायाः सुखवर्द्धनम् ।
रामप्रियाया जानक्या नामसाहस्रकं परम् ॥१००॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे सीतानाम-
साहस्रकं नाम चतुर्दशोऽध्यायः ॥१४॥

पञ्चदशोऽध्यायः

वसिष्ठ उवाच

इदानीं तव पुत्रस्य द्वितीयस्य महात्मनः ।
नामसाहस्रकं वक्ष्ये सुगोप्यं दैवतैरपि ॥ १ ॥
एष साक्षाद्धरेरंशो देवदेवस्य शार्ङ्गिणः[1] ।
यः शेष इति विख्यातः सहस्रवदनो विभुः ॥ २ ॥
तस्यैतन्नामसाहस्रं वक्ष्यामि प्रयतः शृणु ।
लक्ष्मणः शेषगः शेषः सहस्रवदनोऽनलः ॥ ३ ॥
संकर्षणः कालरूपः सहस्रार्चिर्महानलः ।
कालरूपो दुराधर्षो बलभद्रः प्रलम्बहा ॥ ४ ॥
कृतान्तः कालवदनो विद्युज्जिह्वो विभावसुः ।
कालात्मा कलनात्मा च कलात्मा सकलोऽकलः ॥ ५ ॥
कुमारब्रह्मचारी च रामभक्तः शुचिव्रतः ।
निराहारो जिताहारो जितनिद्रो जितासनः ॥ ६ ॥
महारुद्रो महाक्रोधी इन्द्रजित्प्राणनाशकः ।
सीताहितप्रदाता च रामसौख्यप्रदायकः ॥ ७ ॥
यतिवेशो वीतभयः सुकेशः केशवः कृशः ।
कृष्णांशो[2] विमलाचारः सदाचारः सदाव्रतः ॥ ८ ॥
बर्हावतंसो विरतिर्गुञ्जाभूषणभूषितः ।
शेषाचलनिवासी च शेषाद्रिः शेषरूपधृक् ॥ ९ ॥
अधोहस्तः प्रशान्तात्मा साधूनां गतिदर्शनः ।
सुदर्शनः सुरूपाङ्गो यज्ञदोषनिवर्त्तनः ॥१०॥
अनन्तो वासुकिर्नागो महीभारो महीधरः ।
कृतान्तः शमनत्राता धनुर्ज्याकर्षणोद्भटः ॥११॥

---

१. रामस्य–रीवां, अयो० । २. कृशांशो–मथु०, रीवां । ३. वासुकी–अयो०, रीवां ।

महाबलो महावीरो महाकर्मा महाजवः ।
जटिलस्तापसः प्रह्वः सत्यसन्धः सदात्मकः ॥१२॥
शुभकर्मा च विजयी नरो नारायणाश्रयः ।
वनचारी वनाधारो वायुभक्षो महातपाः ॥१३॥
सुमन्त्रो मन्त्रतत्त्वज्ञः कोविदो राममन्त्रदः ।
सौमित्रेयः प्रसन्नात्मा रामानुव्रत ईश्वरः ॥१४॥
रामातपत्रभृद् गौरः सुमुखः सुखवर्द्धनः ।
रामकेलिविनोदी च रामानुग्रहभाजनः ॥१५॥
दान्तात्मा दमनो दम्यो दासो दान्तो दयानिधिः ।
आदिकालो महाकालः क्रूरात्मा क्रूरनिग्रहः ॥१६॥
वनलीलाविनोदज्ञो विछेत्ता विरहापहः ।
भस्माङ्गरागधवलो यती कल्याणमन्दिरः ॥१७॥
अमन्दो मदनोन्मादी महायोगी महासनः ।
खेचरीसिद्धिदाता च योगविद्योगपारगः ॥१८॥
विषानलो विषह्याश्च[1] कोटिब्रह्माण्डदाहकृत् ।
अयोध्याजनसंगीतो रामैकानुचरः सुधीः ॥१९॥
रामाज्ञापालको रामो रामभद्रः पुनीतपात् ।
अक्षरात्मा भुवनकृद् विष्णुतुल्यः फणाधरः ॥२०॥
प्रतापी द्विसहस्राक्षो ज्वलद्रूपो विभाकरः ।
दिव्यो दाशरथिर्बालो बालानां प्रीतिवर्द्धनः ॥२१॥
वाणप्रहरणो योद्धा युद्धकर्मविशारदः ।
निषङ्गी कवची दृप्तो दृढवर्मा दृढव्रतः ॥२२॥
दृढप्रतिज्ञः प्रणयी जागरूको दिवाप्रियः ।
तामसी तपनस्तापी गुडाकेशो धनुर्द्धरः ॥२३॥
शिलाकोटिप्रहरणो नागपाशविमोचकः ।
त्रैलोक्यांहिंसकर्त्ता च कामरूपः किशोरकः ॥३४॥
कैवर्तकुलविस्तारः[2] कृतप्रीतिः कृतार्थनः ।
कौपीनधारी कुशलः श्रद्धावान् वेदवित्तमः ॥२५॥

---

१. विषूयश्च–अयो० । २. °निस्तारः–मथु० ।

व्रजेश्वरीमहासख्यः कुञ्जालयमहासखः ।
भरतस्याग्रणीर्नेता सेवामुख्यो महामहः ॥२६॥
मतिमान् प्रीतिमान् दक्षो लक्ष्मणो लक्ष्मणान्वितः ।
हनुमत्प्रियमित्रश्च सुमित्रासुखवर्द्धनः ॥२७॥
रामरूपो राममुखो रामश्यामो रमाप्रियः ।
रमारमणसंकेती लक्ष्मीवाँल्लक्ष्मणाभिधः ॥२८॥
जानकीवल्लभो वर्यः सहायः शरणप्रदः ।
वनवासप्रकथनो दक्षिणापथवीतभीः ॥२९॥
विनीतो विनयी विष्णुर्विष्णवो वीतभीः पुमान् ।
पुराणपुरुषो जैत्रो महापुरुषलक्ष्म (क्ष ?) णः ॥३०॥
महाकारुणिको वर्मी राक्षसौघविनाशनः ।
आर्तिहा ब्रह्मचर्यस्थः परपीडानिवर्त्तनः ॥३१॥
पराशयज्ञः सुतपाः सुवीर्यः सुभगाकृतिः ।
वन्यभूषणनिर्माता सीतासंतोषवर्द्धनः ॥३२॥
राघवेन्द्रो रामरतिर्गुप्त[1]सर्वपराक्रमः ।
दुर्द्धर्षणो दुर्विषहः प्रणेता विधिवत्तमः ॥३३॥
त्रयीमयोऽग्निमयः त्रेतायुगविलासकृत् ।
दीर्घदंष्ट्रो महादंष्ट्रो विशालाक्षो विषोल्वणः ॥३४॥
सहस्रजिह्वाललनः सुधापानपरायणः ।
गोदासरित्तरङ्गार्च्यो नर्मदातीर्थपावनः ॥३५॥
श्रीरामचरणसेवी सीतारामसुखप्रदः ।
रामभ्राता रामसमो मार्त्तण्डकुलमण्डितः ॥३६॥
गुप्तगात्रो गिराचार्यो मौनव्रतधरः शुचिः ।
शौचाचारैकनिलयो विश्वगोप्ता विराड् वसुः ॥३७॥
क्रुद्धः सन्निहितो हन्ता रामार्चापरिपालकः ।
जनकप्रेमजामाता सर्वाधिकगुणाकृतिः ॥३८॥

---

१. युक्त०–अयो० ।

सुग्रीवराज्यकाङ्क्षी च सुखरूपी सुखप्रदः ।
आकाशगामी शक्तीशोऽनन्तशक्तिप्रदर्शनः ॥३९॥
द्रोणाद्रिमुक्तिदोऽचिन्त्यः सोपकारजनप्रियः ।
कृतोपकारः सुकृती सुसारः सारविग्रहः ॥४०॥
सुवंशो वंशहस्तश्च दण्डी चाजिनमेखली ।
कुण्डी कुन्तलभृत् काण्डः प्रकाण्डः पुरुषोत्तमः ॥४१॥
सुबाहुः सुमुखः स्वङ्गः सुनेत्रः संभ्रमी क्षमी ।
वीतभीर्वीतसङ्कल्पो रामप्रणयवारणः ॥४२॥
वद्धवर्मा महेश्वासो विरूढः सत्यवाक्तमः ।
समर्पणी विधेयात्मा विनेतात्मा क्रतुप्रियः ॥४३॥
अजिनी ब्रह्मपात्री च कमण्डलुकरो विधिः ।
नानाकल्पलताकल्पो नानाफलविभूषणः ॥४४॥
काकपक्षपरिक्षेपी चन्द्रवक्त्रः स्मितानन्नः ।
सुवर्णवेत्रहस्तश्च अजिह्मो जिह्मगापहः ॥४५॥
कल्पान्तवारिधिस्थानो बीजरूपो महाङ्कुरः ।
रेवतीरमणो दक्षो वाभ्रवी[2]प्राणवल्लभः ॥६६॥
कामपालः सुगौराङ्गो हलभृत् परमोल्वणः ।
कृत्स्नदुःखप्रशमनो विरञ्चिप्रियदर्शनः ॥४७॥
दर्शनीयो महादर्शो जानकीपरिहासदः ।
जानकीनर्मसचिवो रामचारित्रवर्द्धनः ॥४८॥
लक्ष्मीसहोदरोदारो[3] दारुणः प्रभुरूर्जितः ।
ऊर्जस्वलो महाकायः कम्पनो दण्डकाश्रयः ॥४९॥
द्वीपिचर्मपरीधानो दुष्टकुञ्जरनाशनः ।
पुरग्रामसहारण्यवटीद्रुमविहारवान् ॥५०॥
निशाचरो गुप्तचरो दुष्टराक्षसमारणः ।
रात्रिञ्चरकुलच्छेत्ता धर्ममार्गप्रवर्तकः ॥५१॥

---

१. शक्तीष्टो–रीवां, अयो० । २. "भ्रुर्विष्णुस्तस्य प्रिया श्रीः सा प्राणः जीवनं यस्य सः" इति टि०–मथु० । ३. "लक्ष्म्याः सहोदरः कल्पतरुस्तद्वदुदारः" इति टि०–मथु० ।

शेषावतारो भगवान् छन्दोमूर्तिर्महोज्ज्वलः ।
अहृष्टो हृष्टवेदाङ्गो भाष्यकारः प्रभाषणः ॥५२॥
भाष्यो भाषणकर्ता च भाषणीयः सुभाषणः ।
शब्दशास्त्रमयो देवः शब्दशास्त्रप्रवर्त्तकः ॥ ५३॥
शब्दशास्त्रार्थवादी च शब्दज्ञः शब्दसागरः ।
शब्दपारायणज्ञानः शब्दपारायणप्रियः ॥५४॥
प्रातिशाख्यो प्रहरणो गुप्तवेदार्थसूचकः ।
दृप्तवित्तो दाशरथिः स्वाधीनः केलिसागरः ॥५५॥
गैरिकादिमहाधातुमण्डितश्चित्रविग्रहः ।
चित्रकूटालयस्थायी मायी विपुलविग्रहः ॥५६॥
जरातिगो जराहन्ता ऊर्ध्वरेता उदारधीः ।
मायूरमित्रो मायूरो मनोज्ञः प्रियदर्शनः ॥५७॥
मथुरापुरनिर्माता कावेरीतटवासकृत् ।
कृष्णातीराश्रमस्थानो मुनिवेशो मुनीश्वरः ॥५८॥
मुनिगम्यो मुनीशानो भुवनत्रयभूषणः ।
आत्मध्यानकरो ध्याता प्रत्यक्सन्ध्याविशारदः ॥५९॥
वानप्रस्थाश्रमासेव्यः संहितेषुः प्रतापधृक् ।
उष्णीषवान् कञ्चुकी च कटिबन्धविशारदः ॥६०॥
मुष्टिकप्राणदहनो[1] द्विविदप्राणशोषणः ।
उमापतिरुमानाथ उमासेवनतत्परः ॥६१॥
वानरव्रातमध्यस्थो जाम्बुवद्गणसंस्तुतः ।
जाम्बुवद्भक्तसुखदो जाम्बुर्जाम्बुमतीसखः ॥६२॥
जाम्बुवद्भक्तिवश्यश्च जाम्बूनदपरिष्कृतः ।
कोटिकल्पस्मृतिव्यग्रो वरिष्ठो वरणीयभाः ॥६३॥
श्रीरामचरणोत्सङ्गमध्यलालितमस्तकः ।
सीताचरणसंस्पर्शविनीताध्वमहाश्रमः ॥६४॥

---

१. °हननो–मथु० ।

समुद्रद्वीपचारी च रामकैङ्कर्यसाधकः ।
केशप्रसाधनामर्षी महाव्रतपरायणः ॥६५॥
रजस्वलोऽतिमलिनोऽवधूतो धूतपातकः ।
पूतनामा पवित्राङ्गो गङ्गाजलसुपावनः ॥६६॥
हयशीर्षमहामन्त्रविपश्चिन्मन्त्रिकोत्तमः ।
विषज्वरनिहन्ता च कालकृत्याविनाशनः ॥६७॥
मदोद्धतो महायानी कालिन्दीपातभेदनः ।
कालिन्दीभयदाता च खट्वाङ्गी मुखरोऽनलः ॥६८॥
तालाङ्कः कर्मविख्यातिर्धरित्रीभरधारकः ।
मणिमान् कृतिमान् दीप्तो बद्धकक्षो महातनुः ॥६९॥
उत्तुङ्गो गिरिसंस्थानो राममाहात्म्यवर्द्धनः ।
कीर्तिमान् श्रुतिकीर्तिश्च लङ्काविजयमन्त्रदः ॥७०॥
लङ्काधिनाथविषहो विभीषणगतिप्रदः ।
मन्दोदरीकृताश्चर्यो राक्षसीशतघातकः ॥७१॥
कदलीवननिर्माता दक्षिणापथपावनः ।
कृतप्रतिज्ञो वलवान् सुश्रीः संतोषसागरः ॥७२॥
कपर्दी रुद्रदुर्दर्शो विरूपवदनाकृतिः ।
रणोद्धुरो रणप्रश्नी रणघण्टावलम्बनः ॥७३॥
क्षुद्रघण्टानादकटिः कठिनाङ्गो विकस्वरः ।
वज्रसारः सारधरः शार्ङ्गी वरुणसंस्तुतः ॥७४॥
समुद्रलङ्घनोद्योगी रामनामानुभाववित् ।
धर्मजुष्टो घृणिस्पृष्टो वर्मी वर्मभराकुलः ॥७५॥
धर्मयाजी धर्मदक्षो धर्मपाठविधानवित् ।
रत्नवस्त्रो रत्नधौत्रो रत्नकौपीनधारकः ॥७६॥
लक्ष्मणो रामसर्वस्वं रामप्रणयविह्वलः ।
सबलोऽपि सुदामापि सुसखा मधुमङ्गलः ॥७७॥
रामरासविनोदज्ञो रामरासविधानवित् ।
रामरासकृतोत्साहो रामराससहायवान् ॥७८॥

वसन्तोत्सवनिर्माता शरत्कालविधायकः ।
रामकेलीभरानन्दी दूरोत्सारितकण्टकः ॥७९॥
इतीदं तव पुत्रस्य द्वितीयस्य महात्मनः ।
यः पठेन्नामसाहस्रं स याति परमं पदम् ॥८०॥
पीडायां वापि संग्रामे महाभय उपस्थिते
यः पठेन्नामसाहस्रं लक्ष्मणस्य महौजसः ।
स सद्यः शुभमाप्नोति लक्ष्मणस्य प्रसादतः ॥८१॥
सर्वान् दुर्गान् तरत्याशु लक्ष्मणेत्येकनामतः ।
द्वितीयनामोच्चारेण देवं वशयति ध्रुवम् ॥८२॥
पठित्वा नामसाहस्रं शतावृत्या समाहितः ।
प्रतिनामाहुतिं दत्वा कुमारान् भोजयेद्दश ॥८३॥
सर्वान् कामानवाप्नोति रामानुजकृपावशात् ।
लक्ष्मणेति त्रिवर्गस्य महिमा केन वर्ण्यते ॥८४॥
यच्छ्रुत्वा जानकीजानेर्हृदि मोदो विवर्द्धते ।
यथा रामस्तथा लक्ष्मी[1]र्यथा श्रीर्लक्ष्मणस्तथा ॥८५॥
रामद्वयोर्न भेदोऽस्ति रामलक्ष्मणयोः क्वचित् ।
एष ते तनयः साक्षाद्रामेण सह सङ्गतः ॥८६॥
हरिष्यति भुवो भारं स्थाने स्थाने वने वने ।
द्रष्टव्यो निधिरेवासौ महाकीर्तिप्रतापयोः ॥८७॥
रामेण सहितः क्रीडां बह्वीं[2] विस्तारयिष्यति ।
रामस्य कृत्वा साहाय्यं प्रणयं चार्चयिष्यति ॥८८॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे [लक्ष्मणसहस्रनाम-कथनं नाम] पञ्चदशोऽध्यायः ॥१५॥

---

१. लक्ष्म्या–अयो०, मथु० । २. बाह्वीं–रीवां, मथु० ।

षोडशोऽध्यायः

वसिष्ठ उवाच

अथास्य ते तृतीयस्य[1] कुमारस्याग्निवर्चसः ।
शृणु नामानि भूमीश पावनानि युगे युगे ॥ १ ॥
भरणो भरणात्मा च भूभारहरणोत्कटः ।
अयोध्यापुरभर्ता च भरणीयो भरावहः ॥ २ ॥
प्रद्युम्नो मन्मथोऽनङ्गो वीरकर्मा निराकुलः ।
पुष्पधन्वा त्रिलोकीजिच्छंबरारिर्मनोभवः ॥ ३ ॥
परप्रतापनो वंशः सर्वाश्चर्यनिकेतनः ।
मीनकेतुर्महामारः कामिनीजनरोषणः ॥ ४ ॥
पोषणस्तोषणः क्रोशी द्वारकापुरपालकः ।
रामविश्लेषसहनो रामविश्लेषकातरः ॥ ५ ॥
कन्दर्पो दर्पहा दर्पो दर्पणो दर्पनाशनः ।
अयोध्याजनसंस्नेहो रामविश्लेषवारकः ॥ ६ ॥
श्रीराम[2]गमनाकाङ्क्षी प्रजादुर्भिक्षपोषकः ।
प्रजादुःखहरो वीरो धार्मिकः प्रतिपालकः ॥ ७ ॥
वाभ्रवीप्राणदयितो माण्डवीप्राणवल्लभः ।
रामतुल्यो रामबलो रामवत्प्रियसाधकः ॥ ८ ॥
कैकेयीनेत्रसुखदो महासाम्राज्यभाजनः ।
रुक्मिणीनेत्रसुखदो रुक्मिणीप्रीतिवर्द्धनः ॥ ९ ॥
त्यक्तराज्यो रामगतिर्विष्णुर्भरतरूपधृक् ।
अथोच्यन्ते चतुर्थस्य नामानि तनयस्य ते ॥१०॥
शत्रुघ्नः शत्रुहन्ता च मथुरापुरपालकः ।
श्रीमान् मधुवनानन्दी मधुजिज्जयवर्द्धनः ॥११॥
चापहस्तः कुशलधीरनिरुद्धोऽप्युषापतिः ।
श्रुतकीर्तिप्रियाकान्तः कामिनीजनवल्लभः ॥१२॥

---

१. अथ ते तृतीयस्यास्य–अयो०, मथु० । २. श्रीराम०–मथु०, रीवां ।

चित्रलेखाकृतोत्साह उषावरणकामुकः ।
परसद्मप्रवेशी च परपत्तनदाहकृत् ॥१३॥
परदारप्रभोगी च वाणासुरविरोधकृत् ।
वाणजिद् वाणदहनो धर्ममूर्तिः सनातनः ॥१४॥
एतान्यन्यानि च तथा नामानि तनयस्य ते ।
चत्वार एते सदृशा नाम्ना कीर्त्या च मेधया ॥१५॥
अहमेतद्विजानामि भवान् ज्ञास्यसि कालतः ।
एते रविकुलोत्तंसा रघुवंशविभूषणाः ॥१६॥
धर्मसंस्थापनार्थायावतरन्ति युगे युगे ।
एषां प्रभावं ब्रह्मापि न जानाति कुतोऽपरे ॥१७॥
रामस्यैवाखिला देहास्तत्तत्कार्यविधित्सया ।
अवतीर्णस्य पूर्णस्य पूर्णब्रह्मस्वरूपिणः ॥१८॥
रामऽचन्द्रस्य सर्वेऽपि अवतारा: सनातनाः ।
एवं नामविधिं कृत्वा तूष्णींभूते महामुनौ ॥१९॥
राजा दशरथः प्रादाद् द्विजेभ्यः सुमहद्धनम् ।
रामनाममहाकर्मण्यमराः सकला अपि ॥२०॥
शृङ्गारितस्त्रीसहिताः समाजग्मुर्मुदा युताः ।
तेभ्यो दशरथः प्रादादलङ्कारानेकधा ॥२१॥
ते प्रीणिता वहुवसनान्नभूषणैः
कृताशिषो दशरथभूपसूनुषु ।
यथागतं प्रतिययुरात्मनो गृहान्
मनोरथैर्बहुपरिपूरितान्तराः ॥२२॥
ते जातनामान उदाररोचिषो
वर्द्धिष्णवस्तुल्यवयोविभाविताः ।
धनुर्द्धरा बालककेलिकारिणो
बभुर्यथा कुञ्जरराजशावकाः ॥२३॥
दिने दिने पूर्णकलस्तु रामः
प्रभावभृद् दशरथनेत्रनन्दनः ।
व्यरोचत त्रिभुवनशोकनाशनः
शनैः शनैः क्षितितलरिङ्गणादिभिः ॥२४॥

कौशल्या रहसि तमिन्दुशोभिवक्त्रं
क्रीडन्तं क्षितितलरिङ्गणादिरीत्या ।
मायूरीः स्वशिरसि चन्द्रिका वहन्तं
सम्प्रेक्ष्य प्रसभमवाप दृष्टिसौख्यम् ॥२५॥
राजापि प्रणयवशीकृतान्तरो ऽ भूद्
रामस्य स्मितसुभगं मुखं विलोक्य ।
रिङ्गन्तं शिशुकमजातचूडकृत्तं[1]
नो शेकुः स्वमुप[2] विलोक्य संविभर्तुम्[3] ॥२६॥
सुन्दर्यो नरनगनागदेवकन्या
दृग्दोषं शमयितुमात्तराजिकास्ताः ।
चुम्बन्त्यो रहसि मुखं रघूद्वहस्य
श्लिष्यन्त्यो नवघनसुन्दरं वपुश्च ॥२७॥
भूयस्योऽन्तःपुरमुषिताश्चिराय नार्यो
रामेन्द्रं प्रणयवशाद्विलोकयन्त्यः ।
आत्मानं सपदि न सस्मरुः स्वरूपं
सौन्दर्यामृतरससारमापिबन्त्यः ॥२८॥
कौशल्या कैकेयी चैव सुमित्रा च हरेर्मुखम् ।
वीक्ष्य तृप्तिं न चैवाप विधुं कुमुदिनी यथा ॥२९॥
सोऽव्यक्तकलया वाण्या बन्धूनां नाम संगिरन् ।
विततान मुदं भूरि राज्ञो दशरथस्य च ॥३०॥
बालोऽपि रामचन्द्रोऽभूत् स्वानां मोदाय पुष्टिवान् ।
भ्रातृभिर्वयसा तुल्यैर्भूयसीं कान्तिमावहन् ॥३१॥
कमनीयं किशोरस्य श्यामलं कोमलं वपुः ।
विलोक्य मुदमाजग्मुस्त्रैलोक्यस्थानवासिनः ॥३२॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे
बाल्यवर्णनं नाम षोडशोऽध्यायः ॥१६॥

---

१. चूडकृष्णं–रीवां । २. स्वमपि–मथु० । ३. "कौशल्यादशरथौ स्वकमपि बालं रिङ्गन्तं विलोक्यापि हस्ताभ्यां सम्यक् धर्त्तुं न शेकतुः" इति टि०–मथु० ।

सप्तदशोऽध्यायः

ब्रह्मोवाच

एतस्मिन्नेव काले तु देवर्षिर्नारदो मुनिः ।
रावणालयमभ्येत्य शशंसामरगोपितम् ॥ १ ॥
देवगुप्तं परं तत्त्वं रहस्यं नारदो मुनिः ।
शशंसाभ्येत्य दैत्याय दशवक्त्राय साध्वसम् ॥ २ ॥

नारद उवाच

लङ्केश विदितं तेऽस्ति जातस्तव निषूदनः ।
देवानां प्रार्थनेनैव जायमानो युगे पुरा ॥ ३ ॥
पुरा हिरण्यकशिपुस्त्वं येन विनिपातितः ।
हिरण्याक्षस्तव भ्राता स जातः कुम्भकर्णकः ॥ ४ ॥
स इदानीमपि तथा रामस्तव शिरोहरः ।
क्वचिज्जातोऽस्ति धरणौ त्रिदशैः प्रार्थितो भृशम् ॥ ५ ॥
तत्प्रतीकारमतुलमधुनैव विचिन्तय ।
नोचेद्रिपौ गते वृद्धिं पश्चात्समनुतप्स्यसि ॥ ६ ॥
एवमुक्त्वा तु देवर्षौ नारदे निर्गते गृहात् ।
चकम्पे वीरवर्योऽपि राक्षसेन्द्रो महाबलः ॥ ७ ॥
अहो मम बलं देवैर्मर्शितुं नैव शक्यते ।
स्वयं बलविहीनास्ते बलवन्तं गवेषिणः ॥ ८ ॥
सोऽहं शिवस्य चरणे स्वशिरांसि धृत्वा
तत्प्रीतिलब्धबलवीर्यमहाविभूतिः ।
देवान् नयामि सहसा त्रिदिवादधोऽद्य
विस्रंसयन् स्वपदतो वितथप्रभावान् ॥ ९ ॥
धर्मं च हन्मि शिवपूजनतोऽतिरिक्तं
सोऽपि स्वमात्रकृत एव सुखाय मेऽस्तु ।
नोचेच्छिवो यदरिषु प्रणयं विदध्यात्
तेन क्वचिन्मम भवेद्विभवस्य[1] पातः ॥१०॥

---

१. विभवस्य = "संसाररहितस्य समर्थस्य" इति टि०– मधु० ।

विष्णुस्तु धर्मसदनो मम किं करिष्य-
त्यज्ञात[1] एव निगमागमधर्मभेत्तुः ।
ये वैष्णवास्त्रिजगति द्विष एव ते मे
तेषामहं शिवनिषेवणतोऽस्मि जेता ॥११॥

दाम्भिका मोघकर्माणो वृथालापनपण्डिताः ।
वैष्णवास्तु मया क्षेप्यास्त्र[2]यीधर्मवहिर्मुखाः ॥१२॥
ब्रह्मलोकाद् बहिः कार्यो ब्रह्मा चेन्द्रः स्वलोकतः ।
एवमन्येऽपि सूर्याद्या निराकार्या मयाधुना ॥१३॥

तेषां स्थानानि दासेभ्यो दास्यामि स्वाधिकारतः ।
ते तत्र विचरिष्यन्ति राक्षसा मे महाबलाः ॥१४॥
यत्रामी संस्थिता यद्वन्मन्दिरे ग्रामसूकराः ।
मदाज्ञापालनपरान् करिष्यामि भृशं सुरान् ॥१५॥
न मे भुजबलं सोढुं विष्णुः संप्रभविष्यति ।
इतिकृत्वा मतिं क्रूरां पौलस्त्यः कालचोदितः ॥१६॥

चकार भगवद्द्वेषं तदुपाश्रयपीडनः ।
देवाश्च विद्रुतास्तेन प्राप्ता दशरथं नृपम् ॥१५॥
गुप्तभावेन तिष्ठन्ति प्रमोदवनमध्यगाः ।
केचित्तमेव शरणं राक्षसेन्द्रमुपाययुः ॥१८॥
परे गिरिदरीष्वेव निलीय क्वचिदाश्रिताः ।
एवं श्रुत्वा महाकष्टं रावणाल्लोकरावणात् ॥१९॥

राजा दशरथोऽप्यासीत् पुत्ररक्षापरायणः ।
रावणेन विसृष्टाश्च राक्षसा ब्रह्मराक्षसाः ॥२०॥
डाकिन्यः पूतनाद्याश्च कूष्माण्डकुणपास्तथा ।
इतस्ततो घातयन्तो विचेरुर्धरणीतले ॥२१॥
राजापि भयसंत्रस्तः पुत्रप्रणयकातरः ।
धात्रीगृहे कुमाराणां सन्निवेशं चकार सः ॥२२॥

---

१. "स त्ववज्ञातो मया" इति टि०-मधु० । २. छेद्या-मधु० ।

कौशल्यां च सुमित्रां च कैकेयीं च स्ववेश्मतः ।
सरय्वा अपरे पारे गोपराजस्य वेश्मनि ।
सन्निवेश्य द्विजातिभ्यो बालस्वस्त्ययनं व्यधात् ॥२३॥
ते बालकास्तत्र गवेन्द्रधाम-
न्यलङ्कृता हेममयैर्विभूषणैः ।
विचेरुरानन्दितबन्धुलोचनाः
स्वरूपसौन्दर्यलसत्प्रतीकाः ॥२४॥
कदाचिदेका खलु राक्षसी छलाद्-
विधाय रूपं किल[1] लोकवञ्चकम् ।
साक्षादिव श्रीरगमन्निहन्तुं
यत्रास्ति रामः खलु तत्र वेश्मनि ॥२५॥
स गोपवध्वा पयसा प्रपायितः
शंशायितो मृदुशयनेऽति बालकः ।
तूर्णं तयागत्य जनैरदृष्टया
गृहीत एव स्तनदानवाञ्छया ॥२६॥
तस्याः स्तनोत्थं विषहं विषं हरि-
र्गृह्णन् प्राणैः साकमह्लाय देवः ।
प्राणान् पपौ येन तदा तथा व्यसुः
प्रकाशयामास निजं कलेवरम् ॥२७॥
गव्यूतिपञ्चकपदं युगयोजनान्त-
र्विक्षिप्तमध्यमिनयोजन[2] वज्रहस्तम् ।
संचूर्णयन् गिरिनगालयगोव्रजौघान्
दीर्घारवेण निपपात सुघोररूपम् ॥२८॥
तस्याः पतन्त्याः श्वसितानलो मुखा-
न्नियन्[3] सुघोरेण रवेण निर्ययौ ।
वपुश्च संचूर्णितगोव्रजाङ्गणं
पपात लोकैस्तददृष्टपूर्वम् ॥२९॥

---

१. सकल°–अयो०, रीवां । २. इनयोजनं = द्वादशयोजनमित्यर्थः । ३. नियन् = निर्गच्छन् ।

रवं तमाकर्ण्य जना दधाविरे
खेलन्तमस्या उरसि व्यपश्यन् ।
रामं नवेन्दीवरदामकोमलं
बालं भयावेगविवर्जितं तदा ॥३०॥
सहसादाय कौशल्या माङ्गल्या गोपसुन्दरी ।
सविकम्पा परिष्वज्य प्राप्तप्राणमिवाग्रहीत् ॥३१॥
अथाभ्यधावद्दशरथभूपतिर्जवात्
स्वमन्दिराद् भयमाकर्ण्यावरोधे ।
रामं समादाय करेण वक्षसि
जघ्नौ शिरः किमिदमिति व्यशोचयत् ॥३२॥
या राक्षसी शैलदरीविलोचना
शुष्कान्धु[1] नाभिर्द्रुमचरणाङ्गुलीगणा ।
विदीर्णवक्त्रातिभयं चकार
कथं शिशुर्वक्षसि नानया धृतः ॥३३॥

राजोवाच

अहो इयं बहुभयदायिविग्रहा
क्व वा अयं क्व च खलु मामकः शिशुः ।
दिष्ट्या विमुक्तो विधिनैव मोचितः
प्राणो यथा दीनदीनस्य दीनः ॥३४॥
ततः स ब्राह्मणैः साकमकरोत् स्वस्तिवाचनम् ।
देवान् संपूज्य विधिवद्धुत्वाग्नौ स्वाशिषोऽवदन् ॥३५॥
यन्मे व्रतं च दत्तं च यन्मे देवाः कृतार्चनाः ।
यन्मे प्रसादिता विप्रास्तेनायं जीवताच्छिशुः ॥३६॥
यन्मे भाग्यं तथायुश्च यन्मे पुण्यं सनातनम् ।
यन्मे तमः परं किञ्चित्तेनायं जीवि[व?]ताच्छिशुः ॥३७॥
यन्मे शुभाशिषः प्रादात् प्राजापत्यो महामुनिः ।
याज्ञवल्क्यश्च भगवाँस्तेनासौ जीवि[व?]ताच्छिशुः ॥३८॥

---

१. अन्धुः = कूपः ।

चिरं जीवतु मे बालो बन्धुभिर्भ्रातृभिः सह ।
देवतानां प्रसादेन मुनीनां च विशेषतः ॥३९॥
माङ्गल्याद्या महागोप्यः कौशल्याद्याश्च मातरः ।
पितुर्हस्तात् समादाय प्रायुञ्जन् सत्यमाशिषः ॥४०॥
गोविन्दः पातु ते शीर्षं दृशौ पातु चतुर्भुजः ।
कर्णौ दामोदरः पातु नासिके पुरुषोत्तमः ॥४१॥
ओष्ठौ च पातु गोविन्दश्चिबुके देवकीसुतः ।
करौ च पातु वैकुण्ठो वक्षः पातु गदाग्रजः ॥४२॥
कुक्षिं पातु सदा विष्णुर्नाभिं पातु सदा हरिः ।
पादौ सहस्रपात् पातु पातु पादाङ्गुलीर्विभुः ॥४३॥
श्रीशः पादतलं पातु सर्वतः पातु कंसहा ।
इति रामकुमारस्य प्रयुञ्जानाः शुभाशिषः ॥
मुहुः संभावयामासुर्गोपा गोप्यश्च मातरः ॥४४॥
अहो इयं क्रूरमतिर्निजैनसा
मृता विधात्रैव परापकारिणी ।
अस्मद्भगैरेव चिरं रघुप्रियो
रामः सदा मोदमानः स्वलीके ॥४५॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे
पूतनावधो नाम सप्तदशोऽध्यायः ॥१७॥

❁

अष्टादशोऽध्यायः

ब्रह्मोवाच

अपरेद्युश्च माङ्गल्या यापयित्वा स्तनोद्भवम् ।
निधाय दन्तखट्वायां राममस्वापयच्छिशुम् ॥ १ ॥
तत्र कश्चिन्महाघोरो विकटाख्यो महासुरः ।
इयाय खट्वामाविश्य स्थितो रामजयाशया ॥ २ ॥

तं प्रभुः सहसा ज्ञात्वा कामरूपं महासुरम् ।
चूर्णयामास स्वाङ्गस्य भारेण भगवान् प्रभुः ॥ ३ ॥
संचूर्णिते रामशरीरभारै–
व्यभज्यतासौ खलु खट्वाङ्गसङ्घैः ।
स आरवो व्याप्य दिशो नभश्च
प्रभूतवांस्तत्र यथा ययुर्जनाः ॥ ४ ॥
खट्वाङ्गसङ्गं [ङ्गं ?] प्रविलोक्य चूर्णितं
जनाः परं विस्मयमाययुर्हृदि ।
तत्राभवन् साक्षिणः केऽपि बाला
अनेन खट्वेयमहो विचूर्णिता ॥ ५ ॥
तद्बालभाषितं मत्वा नैव श्रद्दधिरे जनाः ।
इत्येवं विकटो नाम चूर्णितः स महासुरः ।
रामेण बालरूपेण रिङ्गता गोकुलाङ्गणे ॥ ६ ॥
अथान्येद्युरुपायातो वात्यारूपो महासुरः ।
भूतलं स्वस्तलं चैव कुर्वन् तिमिरसंकुलम् ॥ ७ ॥
प्रचण्डवेगारवचूर्णितान्त[1] -
स्तृणोच्चयं भूरि समुत्क्षिपन्नितः ।
अतीव वात्यामयकामविग्रहः
कठोरावः प्रसभं समाययौ ॥ ८ ॥
सुदुःसहापूरितशर्कराभरो
विलोपिताशेषजनेक्षणक्रियः ।
दुरन्तपांशुप्रकरप्रवर्षणो
गवेन्द्रधामाकुलमातनोत्तराम् ॥ ९ ॥
तस्मिन् क्षणे तु माङ्गल्या कौशल्या चाङ्कसंस्थितम् ।
रामं कृतमहाभारं न्यवेशयदिलातलम्[2] ॥१०॥

---

१. ° न्तरस् – मथु०, रीवां । २. त्यक्त्वावेशयदिलातले–अयो० रीवां । इलातलं = भूतलम् ।

तं दानवो बहुतरवेगवत्तया
रामं समादाय नभः समास्थितः ।
तावत् प्रसूर्बालमपश्यती स्थले
चकार हा क्रन्दमलब्धजीविता ॥११॥
रामोऽपि नभसा यान्तं वात्यासुरमकारणम् ।
आत्मापहारिणं मत्वा दृढं दध्रे कृकाटिकाम् ॥१२॥
स रामहस्ताग्रनिबद्धघाटा
निर्मुक्तजीवो भृशपीडयाहतः ।
त्यत्याज देहं विकटं महीतले
महाशिलापातविशेषचूर्णितम् ॥१३॥
तस्मिन् रिपोरुरसि पपात राघवः
संचूर्णयन्निजवपुषो भरेण तम् ।
आगत्य व्रजसुदृशो ग्रहीषुरेनं
भाग्येन द्युतलगतं व्युपागतं च ॥१४॥
कौशल्यया भूरि सकम्पया मुहुः
स्वाङ्के समारोप्य भृशं स लालितः ।
माङ्गल्ययागत्य चिरं गृहीतः
शिरस्युपाघ्राय[1] मुखेन चुम्बितः ॥१५॥
एवं बहव उत्पाता आसन् गोपीन्द्रगोकुले ।
रावणस्याज्ञया नित्यं चरद्भिर्घोरराक्षसैः ॥१६॥
ततस्ते मन्त्रणां चक्रुर्गोपालाः सुखितादयः ।
राज्ञो दशरथस्याग्रे निबद्धाञ्जलयोऽखिलाः ॥१७॥

गोपा ऊचुः

राजन्नत्र महोत्पाता दृश्यन्ते प्रतिवासरम् ।
भाग्येन जीविता बालाः प्राणादप्यधिका अमी ॥१८॥
सा राक्षसी मानुषघोरदर्शना
समागता बालकानां जिघांसया ।

---

१. उपादाय-अयो० रीवां ।

दिष्ट्या मृता सा रविवंशजानां[1]
पुण्यप्रभावेन महीयसैव ॥१९॥
ततः परं सातिकठोरखट्वा
स्वयं व्यशीर्यत् पापरूपा परेषाम् ।
तस्यांशया नो नृप रामचन्द्रो
भाग्येन लब्धो व्रजवासिनां नः[2] ॥२०॥
ततः स वात्यासुर उज्जहार
रामं धरण्यां निहितं जनन्या ।
स एव यातो यमसादनं खलो
बालस्तावत् क्लेशभराद् विमुक्तः ॥२१॥
एकदास्य पदस्पृष्टौ शाखिनौ गगनस्पृशौ ।
स्वयं निपतितौ भूम्यां किंचिद्दूरेऽयमत्यगात् ॥२२॥
इत्येवमस्मद्भाग्येन त्वत्पूर्वसुकृतेन च[3] ।
चिरं जीवति रामोऽसौ परं चिन्ताकुला वयम् ॥२३॥
जानीमहेऽमी रमणा[4] निजांश-
विनिर्मितकोटिब्रह्माण्डनाथाः ।
तथापि भूपाल सुरक्षणीयाः
सर्वस्वभूता भवतो नो विशेषात् ॥२४॥
पश्यन्त्य एतान् वनिता व्रजौकसां
जीवन्ति मीनाः सलिलान्तरे यथा ।
गायन्त्य एतान् मधुरस्वनेन
दिवानिशं बिभ्रति मानसे मुदम् ॥२५॥

राजोवाच

जानीमहे महोत्पातान् तदत्रैव विधीयताम् ।
सरय्वाः पुरतः पारे विशालं कामिकावनम् ॥२६॥

---

१. दृष्ट्या मृता सा (मृतानां-अयो०) बकवंशजानां-रीवां, अयो० ।
२. ° नान्तः-अयो० । ३. त्वत्पूर्वजतमेन च-अयो०, रीवां । ४. नीरमण-अयो० ।

तत्र निश्चीयतां गोपा भवद्भिर्वसतिर्निजा ।
नीयतां गोधनान्यग्रे पश्चान्निर्गम्यतां जवात् ॥२७॥
स्वान् स्वान् दारान् समादाय शकटैरनुडुद्युतैः ।
एवं बुद्ध्वा मतं राज्ञो गोपा गोप्यः सगोधनाः ॥२८॥
गोकुलेन्द्रं पुरस्कृत्य प्रययुः कामिकावनम् ।
यत्र संदीपनं नाम वनानामुत्तमं वनम् ॥२९॥
सौगन्धिको नाम गिरिर्महारत्नविभूषितः ।
यत्रासने महारम्याः कतिशो रत्नवापिकाः ॥३०॥
सरयूजलकल्लोलतलस्रोतविभाविताः ।
कदम्बकाननं यत्र सर्वर्तुकुसुमान्वितम् ॥३१॥
यत्र वृक्षाः सदानम्राः पक्वामृतफलान्विताः ।
तत्रावासं चकारोच्चै राजापि स्वयमादरात् ॥
धात्रीगृहे कुमाराणां वर्द्धतां सुखकाम्यया ॥३२॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे रामबालचरित्रवर्णनं नाम अष्टादशोऽध्यायः ॥१८॥

●

एकोनविंशोऽध्यायः

ते तत्र नित्यं परिवर्द्धमानाः[1]
स्वगात्रलक्ष्मीं[2] पुपुषुः कुमाराः ।
संजातदन्ताः स्मितवक्त्रचन्द्राः
श्रिया जनानां हृदयं हरन्तः ॥ १ ॥
धात्रीकराङ्गुलिभरेण वितिष्ठमाना
भूयो रणच्चरणनूपुरजातहर्षाः ।
मध्याङ्गकिङ्किणिकया कृतभूरिनृत्याः
स्वानां मुदं व्यधुरुदारगुणाभिरामाः[3] ॥ २ ॥

---

१. परिवृद्ध°–अयो०, मथु० । २. °लक्ष्मीः–रीवां । ३. व्यधुरपार°–अयो० रीवां ।

गोपालबालनिवहेषु विराजमानाः
सद्रत्नदण्डभररम्यकटाश्चरन्तः ।
गोपाङ्गणेषु नवनीतकराढ्यहस्ताः
श्रीरामलक्ष्मणमुखाः शिशवो विरेजुः ॥ ३ ॥
रामः सलक्ष्मणस्तत्र विचरन् व्रजवीथिषु ।
गोपालबालकैः साकं चिक्रीडे बहुधा प्रभुः ॥ ४ ॥
क्वचिद् वत्सान् समादाय धावमानो व्रजाङ्गणे ।
क्वचिन्मयूरशिशुभिः परिवारितविग्रहः ॥ ५ ॥
क्वचिद्धंसैश्च कादम्बैः कारण्डवकुलैस्तथा ।
चटकैश्च कपोतैश्च चिक्रीडे गोकुले चरन् ॥ ६ ॥
स गोकुलवरस्त्रीणां हृदयानि प्रमोदयन् ।
बालकेलिं चकारोच्चैर्मोहयन् गोपकन्यकाः ॥ ७ ॥
कस्तूरीतिलकविराजिभालदेशो
मुक्तास्रङ्मणिगलचारुकण्ठहारः ।
नासाग्रे पृथुगजमौक्तिकं दधानो
बिभ्राणः करकमलेन मञ्जुवेणुम् ॥ ८ ॥
चूडालः करयुगहेमकङ्कणश्रीः
श्रीखण्डद्रवमकरीविरोचिगात्रः ।
गोपाली मनसि विवर्द्धयन् मनोजं
कुर्वाणो दधिनवनीतचौर्यलीलाम् ॥ ९ ॥
गृहे गृहे विशन् रामो विचरन् बालकैः सह ।
माङ्गल्यां चैव कौशल्यां समुपालम्भयज्जनैः ॥१०॥
ता गोपकन्याः स्मरबाणविद्धा
रामेण विस्रंसयता मनांसि ।
समाययुः कान्तविलोकनार्थं
गृहानुपालम्भमिषेण लुब्धाः ॥११॥

गोप्य ऊचुः

हे माङ्गल्ये गवेन्द्रगेहिनि हे कौशल्ये दशरथमहिषि ।
तव तनया अनयाश्चत्वारस्तेषामेष सुधूर्तो रामः ॥१२॥

कृत्वा बहु नवनीतस्तेयं
भोजयति कपीन् शिशूंश्च शश्वत् ।
दृष्टः सपदि पलायति बालैः
पुनरायाति च गालीं दत्ते ॥१३॥
व्याकुलयति कुलवनिता शश्व-
न्मुखमवगुण्ठनपिहितं पश्यन् ।
आकर्षत्यधुनैव विलज्जो
गोकुलकन्यातरुवसनानि ॥१४॥
उक्तः किमपि पलायति दूरे
साक्षात् काम इवातिजिघांसुः ।
खेदयति मुहुरति[1]विपुलश्रोणीः
कुर्वन् संततमलमपराधम् ॥१५॥
हसति च हासयते च शिशुभ्यः
कुरुते विग्नाः गोकुलरामाः ।
किमपि च वक्तुं न पारयामः
शिक्षय मातर्ननु निजबालम् ॥१६॥
एष स लक्ष्मणमपि शिक्षयति
साधुमिमं स्वसमं च चिकीर्षुः ।
बहिरन्तश्च विजित्य समस्तं
यथार्थनामा राजति रामः ॥१७॥
स्फोटयति प्रसभं दधिभाण्डं
विगुणीभवति निवारित एषः ।
एवमादि वचनानि वदन्त्यः
कान्तविलोकनपूरितकामाः ।
जग्मुरात्मसदनानि तरुण्य-
स्तमेव सततं भावयमानाः ॥१८॥
कदाचिद् बालकैः साकं क्रीडन् रामो व्रजाङ्गणे ।
वर्जितोऽपि जनन्या ऽऽद[2] कुपथ्यं बदरीफलम् ॥१९॥

१. सद्गति–रीवां, मुहुर्–अयो०, मथु० । २. च–रीवां, मथु० ।

बालैर्निवेदिता माता तर्जयामास तं शिशुम् ।
स तर्जितो जनन्या च प्रहसंस्तामुवाच ह ॥२०॥

राम उवाच

मातर्नाहं जघासाद्य[1] कुपथ्यं बदरीफलम् ।
नोचेदुद्घाट्य वदनं मदीयं प्रविलोकय ॥२१॥

ब्रह्मोवाच

एवमुक्त्वा व्यात्तमुखस्तु रामः
प्रदर्शयामास मुखे समस्तम् ।
सजङ्गमं स्थावरमेतदुच्चै-
र्यद्दृश्यजातं वरिवर्ति लोके ॥२२॥
अद्रयः सागरा नद्यो द्वीपाः ग्रामाः पुराणि च ।
नरा देवाश्च गन्धर्वा वनानि भुवनानि च ॥२३॥
सर्वं राममुखेऽपश्यन्माता माङ्गल्यया सह ।
अदृष्टमश्रुतं चैव सर्वाश्चर्यमयं जगत् ॥२४॥

कौशल्योवाच

किमेष जातो मतिविभ्रमो मे
स्वप्नोऽथवा देववरस्य माया ।
किं वाद्य किंचित् कुतुकं प्रदर्शितं
रामेण वोचे स यथा नो वसिष्ठः ॥२५॥
इत्थं मुहुर्भ्रान्तमतिः प्रसूस्त-
मपार्यमाणा वदने विलोकितुम् ।
न्यमीलयन्नेत्रयुगं निजं सा
पुनः समुन्मील्य मुखं ददर्श ॥२६॥
सा रामचन्द्रस्य मुखेन्दुमन्द-
हासावलोकेन पुनः समोहा ।
पुत्रेति मत्वा समपाययत् स्तनं
स्तनन्धयं राममानन्दरूपम् ॥२७॥

---

१. जघासाथ-अयो० ।

एवं स आद्यः पुरुषः पुराणः
स्वमायया बालभावं प्रपद्य ।
अरञ्जयद् गोकुलयोषितस्ता
यथा तदात्मान इमा बभूवुः ॥२८॥
तन्मग्नमनसो नित्यं तदालापनतत्पराः ।
तद्गीतगानमुदिता बभूवुस्तन्मयान्तराः ॥२९॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे विश्वरूपदर्शनं नाम एकोनविंशोऽध्यायः ॥१९॥

❁

विंशोऽध्यायः

एकदा गोपराजस्य पत्नी माङ्गल्यकाभिधा ।
नवनीतप्रियस्यास्य स्वपुत्रस्य प्रियार्थिनी ॥
दधिनिर्मन्थने काले प्रसक्ता शुशुभेतराम् ॥ १ ॥
पट्टाम्बरं कटिविलग्नमिदं दधाना
हस्ताम्बुजद्वयगृहीतसुमन्थनेत्रा[1] ।
आन्दोलनादिरसनागुणकिङ्किणीका
भूयो रणत्कनककङ्कणशोभमाना ॥ २ ॥
धम्मिल्लमोचनचलत्वगलत्प्रसून-
निर्मन्थनश्रमजतोयकणावकीर्णम् ।
संबिभ्रती वदनमिन्दुमिवामृतोत्थं[2]
माङ्गल्यका मणिघटे दधि निर्ममन्थ ॥ ३ ॥
तस्याः स्तन्यं कामयानो रामो मन्थानमग्रहीत् ।
तमङ्के स्थापयित्वा सा ततः स्तन्यमपाययत् ॥ ४ ॥

---

१. सुवर्णनेत्रा–मथु०,–गृहीतनेत्रा–अयो० । २. मिवामृतस्य–अयो०, मथु० ।

निरीक्ष्यती तद्वदनेन्दुमादराद्
दृष्ट्वा तु वात्सल्यरसानुविद्धा ।
मुहुः परिष्वज्य च चुम्बितानना
गोपी परानन्दपदं समभ्यगात् ॥ ५ ॥
विलोक्य पय उत्सेकं कीलया कृष्णवर्त्मनः ।
पिबन्तमेव तं त्यक्त्वा प्रययौ रक्षितुं पयः ॥ ६ ॥
तावत्सुसंजातरुषो जनन्या
बभञ्ज दध्नो[1] दृषदा स भाजनम् ।
गृहान्तरे चाहततक्रभाजनो
जगाम शिक्योपरि पातितुं दधि ॥ ७ ॥
भूमौ घटं निधायाधस्तदुपर्यर्पिताङ्घ्रिणा ।
कृत्वा सूक्ष्मं तु विवरं शिक्यभाण्डस्थितं दधि ॥ ८ ॥
पपे तत्तेन स्तेनेन शेषं बालैश्च वानरैः ।
तस्मिन् स्थाने समागत्य माङ्गल्या दधिभाजनम् ॥ ९ ॥
रामेण स्फोटितं वीक्ष्य न तमीक्ष्य च बालकम् ।
गृहान्तरमगात्तूर्णं तत्रापि न विलोकितः ॥१०॥
ततो गृहान्तरं गत्वा दृष्ट्वा [ष्टः] तादृश एव सः ।
नवनीतकरो यातः पलाय्य सदनान्तरम् ॥११॥
नितान्तमनुमृग्यती दधिकणाङ्किते तत्पदे
निरस्य लकुटीं गताऽस्य भयमीक्ष्य माङ्गल्यका ।
तया स सदनान्तरे सपदि वीक्षितः संरुदन्
मृजन्नुभयपाणिना लुलितकज्जले लोचने ॥१२॥
तस्यापराधान् विविधान् विजानती
बद्धुं समारब्धवती तमीश्वरम् ।
तत्पाणियुग्मं स्वकरे गृहीत्वा
नेत्रेण यावत् प्रकरोति बन्धम् ॥
तावत्तदासीच्चतुरङ्गुलोनकं
ततोऽन्यदादाय बबन्ध नो ममौ ॥१३॥

---

१. जग्ध्वो–रीवां ।

अन्यदन्यदुपादाय सूत्रं बद्धवती सुतम् ।
तत्तन्न्यूनं समभवच्चतुरङ्गुलतोऽधिकम् ॥१४॥
ततो गृहस्थान्यखिलानि नेत्रा-
ण्यानीय खिन्नां जननीं विलोक्य ।
स्वेदावकीर्णां पृथुजघनां भरार्ता-
मेकेनैव स्वमबन्धयद्गुणेन ॥१५॥
सुवर्णनेत्रसूत्रेण स बद्ध्वा करयोस्तथा ।
विबद्धःस्वाङ्गणस्थस्य स्तम्भतः कल्पशाखिनः ॥१६॥
रामो जनन्यां यातायां कर्षयामास नेत्रकम् ।
तत्कृष्टं तेन वृक्षेण साकमेव करेऽवहत् ॥१७॥
वृक्ष उन्मूलने जाते डोरकाकर्षणक्षणे ।
स्वयं स बद्ध एवास पतितेऽपि महीरुहे ॥१८॥
तस्मिन्निपतमाने तु तरौ शब्दो महानभूत् ।
तत एको महाकायः पुरुषः पद्मलोचनः ॥१९॥
सुन्दरः सुमुखः स्वच्छो ददृशे देववद्द्युतिः ।
स साष्टाङ्गं प्रणम्यादौ रामं राजीवलोचनम् ॥२०॥
तुष्टाव हसितो भूत्वा मुक्तः स्थावरभावतः ।

पुरुष उवाच

नमो रामाय रामाय गोविन्दाय नमोनमः ॥२१॥
नमः सत्त्वाय शान्ताय नमः कारुणिकाय ते ।
नमः श्रीरामचन्द्राय दशाकृतिविधायिने ॥२२॥
नमो गोपालवेषाय नमो गोपीविलासिने ।
नमोऽनुग्रहरूपाय नमोऽनुग्रहकारिणे ॥२३॥
नमो रामावतरिणे नमो भक्तिविधायिने ।
नमस्ते फलरूपाय नमस्ते साधनात्मने ॥२४॥
सत्त्वाव्यवहितं रूपं दधते ते नमोनमः ।
सात्त्विकीं मुक्तिमत्येत्य परभक्तिप्रदायिने ॥२५॥

शान्ताय शान्तातीताय[1] गुणलीलाकराय च ।
चिदानन्दस्वरूपाय तस्मै रामाय ते नमः ॥२६॥
मेघश्यामाय रामाय पीतकौशेयवाससे ।
बालरूपाय पद्मायाः कन्यायै तन्नमोनमः ॥२७॥
नमः शुक्लाय रक्ताय पीताय सितिवर्चसे ।
युगलीलाविनोदाय श्रीरामाय नमोममः ॥२८॥
कलात्मने पूर्णकलाय राघव[2]
अंशात्मनेऽशांशकलाश्रयाय[3] ।
नमो नमस्ते पुरुषोत्तमाय
रामाय रामाय च राघवाय ॥२९॥
नमस्ते रूपसंपत्त्या त्रैलोक्यमदनाय च ।
हैयङ्गवीनचौराय रसभोक्त्रे रसात्मने ॥३०॥
नमो रसाय रस्याय नित्यलीलामयाय च ।
अथेदं दर्शितं रूपं त्वयानुग्रहकारिणा ॥३१॥
अद्य मे सफलं ज्ञानं विशेषादर्पितं त्वयि ।
नाहं किञ्चिद्विजानामि स्वात्मानं परमेव वा ॥३२॥
त्वामेकमेव शरणं प्रपद्ये भक्तिभावतः ।
इदं ते कोमलं राम सुन्दरं चरणद्वयम् ॥३३॥
त्वद्भक्तिसंसिद्धिकरं मस्तके मे निधीयताम् ।
इति स्तुत्वा गोपबालैः परिवीतं रघूद्वहम् ॥३४॥
परिक्रम्य त्रिरानम्य कृतकार्यो दिवं ययौ ।

भुशुण्ड उवाच

ब्रह्मन् को नाम पुरुषः समदृश्यत वृक्षतः ॥३५॥
कथं वा स्थावरो जातो यातः कुत्र च तादृशः ।
एतन्मे वद साश्चर्यं चरित्रं श्रीरमापतेः ॥३६॥

---

१. शान्तौ नीताय–अयो०, मथु० । २ राघवे–अयो०, रीवां । ३. सकलांसाश्रयाय–अयो०, मथु० ।

ब्रह्मोवाच

विरजायाः परे पारे सुनीथो नाम वै द्विजः ।
ब्रह्मदर्शी सदाचारो न तु भक्तिपरायणः ॥३७॥
तत्रस्थैरुपदिष्टोऽपि भक्तिमार्गं न मन्यते ।
आत्ममानी स्तम्भगतिर्मुक्तमानी मुनीश्वरः ॥३८॥
ज्ञानेऽस्य योग्यतां दृष्ट्वा नारदो ब्रह्मदर्शनः ।
भक्तिं प्रोवाच सपुनर्ज्ञानमेवाभ्यमन्यत ॥३९॥
का भक्तिर्भजनीयः क एकं ब्रह्मैव केवलम् ।
तत्सत्यमपरं तुच्छं कस्य भक्तिं करिष्यसि[1] ॥४०॥
ज्ञानेन ज्ञातुमन्विच्छ स्वात्मानममृतात्मकम् ।
प्रमेयं सर्वदेवानां कस्तत्र हरिरीश्वरः ॥४१॥
इत्यादिमोहवचनैर्दूषयन् स मुनेर्मतिम् ।
तेनैव मुनिना शप्तो व्रजे जातो महोरुहः ॥४२॥
रामपादस्पर्शमात्राद् द्विजः संजातभक्तिकः ।
प्राग्ज्ञानं समनुप्राप्य भक्तराजो भवत्तराम् ॥४३॥
तस्माद्रामं परित्यज्य येऽन्यानपि भजन्ति ते ।
विहाय सरसः स्रोतः[2] कूपं कुर्वन्ति बालिशाः ॥४४॥
तस्मादेको रामचन्द्रोऽत्र सेव्यः
सर्वैर्लोकैः सर्वभावेन नित्यम् ।
सर्वस्येशः सर्वदेवैकभाव्यः
सर्वाकारः सर्वसर्वश्च सर्वः ॥४५॥
[3]रामो रामो रामरामोऽभिरामो
रामो रामो रामरामश्च रामः ।
रामो रम्यो रामचन्द्रो रमेशः
इत्थं चोक्त्वा मुच्यते चैव बन्धात् ॥४६॥

---

१. करिष्यति–अयो०, रीवां। २. सरस्रोतश्च–अयो०, सरयूस्रोतः–मथु०।
३. अत्र = चिह्नं दत्त्वा—"चतुर्दशवारनाम्ना चतुर्दशलोक-बन्धनान्मुक्तिरिति" टि०–मथु०।

यो राममूर्तिं भजते न मानवो
रामेति वर्णौ कुरुते न कर्णौ ।
स नावमासाद्य महानदीजले
निमज्जनं वाञ्छति मूढमानसः ॥४७॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे
सुनीथमोक्षणं नाम विंशोऽध्यायः ॥२०॥

एकविंशोऽध्यायः

[ब्रह्मोवाच]

माङ्गल्या चैव कौशल्या गोप्यो गोपाश्च मातरः ।
राजा दशरथश्चैव लक्ष्मणाद्यास्तथा सुताः ॥ १ ॥
सुखितश्चैव गोपालः सानुगस्तूर्णमाययुः ।
द्रुमपातरवं श्रुत्वा सर्वे संभ्रान्तचेतसः ॥ २ ॥
अकस्मात् कुत आराव इति चिन्तासमाकुलाः ।
त आगत्य गुणैर्बद्धं रामं तादृशमेव तम् ॥ ३ ॥
वृक्षस्तम्भस्थितं वीक्ष्य विस्मयं परमं ययुः ।
तत्रस्थाः बालकाः सर्वे मुहुरुच्चैर्बभाषिरे ॥ ४ ॥
अनेन कर्षता सूत्रं द्रुम उन्मीलितो जवात् ।
तच्छ्रुत्वा बालवचनं नैव श्रद्दधिरे जनाः ॥ ५ ॥
तद्दिनावधि रामोऽसौ विख्यातो द्रुमभञ्जनः ।
तं तथा विटपिस्तम्भबद्धं दृष्ट्वा तदाहसत् ॥ ६ ॥
उन्मोच्य रामं नृपतिश्चुचुम्ब प्रणयान्मुखम् ।
मैवं कुरुष्व राम त्वं कोमलाङ्गो महाश्रमम् ॥ ७ ॥
अनेन तव खेदेन भृशं खिद्यामहे वयम् ।
नवनीतस्तेयकरो मा भ्रमस्व गृहे गृहे ॥ ८ ॥

यत्तवेष्टं क्रीडनकं तत्तदत्रैव कल्पये ।
भ्रातृभिर्बन्धुलोकैश्च तथा परिजनैर्भृशम् ॥ ९ ॥
बाललीलारसं चक्रे रामो रमणकोविदः ।
एवं केलीरसासक्तो विस्मरन् पानभोजने ॥१०॥
बालैः सह स[1] चिक्रीडे भातॄणां वर्द्धयन् मुदम् ।
हठेन माता माङ्गल्या क्रीडन्तं राममानयत्[2] ॥११॥
शृङ्गारयामास हठात् तथैवापाययद्धठात् ।
एवं ते गोपसदने वर्द्धमानाः कुमारकाः ॥१२॥
वत्सान् संचारयामासुः सह गोपालबालकैः ।
सरयूतीरमासाद्य रत्नाद्रिमभितस्तथा ॥१३॥
प्रमोदवनमासाद्य विचेरुरधिगोकुले ।
क्वचिद्वेणून् वादयन्तो गायन्तश्च तथा क्वचित् ॥१४॥
क्वचिन्मुहुः कूर्दमानाः क्वचिन्नृत्यन्त एव च ।
क्वचिद् गोपालबालाभिः खेलन्तश्च परस्परम् ॥१५॥
फलक्षेपैस्तथा केलीमाचरन्तं क्वचिच्च ते ।
बर्हिधातुविचित्राङ्गाः शुशुभुर्बालरूपिणः ॥१६॥
कदाचित् सरयूतीरे वत्सान् चारयतामुना ।
ददृशे रावणहितो वत्सरूपो महासुरः ॥१७॥
तं दर्शयन् लक्ष्मणाय हसन् रामो महाबलः ।
धृत्वापराभ्यां पादाभ्यां भ्रामयित्वा च भूरिशः ॥१८॥
फलिनां बहुवृक्षाणामग्रेषु समपातयत् ।
तस्य निष्पततः कायो दशयोजनतोऽभवत् ॥१९॥
सरय्वाः पुरतो मध्ये प्रत्यङ्ङ्वितनो महान् ।
वृक्षेभ्यः कम्पमानेभ्यः फलानि बहुशोऽपतन् ॥२०॥
तान्यदुर्बालकाः सर्वे सुरमारणनिर्वृताः ।
एवं वत्सान् पाययितुं नद्यः पुलिन आगतः ॥
तत्रापश्यत् स्थितं रामो बकरूपं महासुरम् ॥२१॥

---

१. च—रीवां, सह चक्रीडे—मथु० । २. माशयत्—अयो० रीवां ।

तावत् स जग्रास जवेन रामं
तीक्ष्णेन तुण्डेन कठोरचित्तः ।
तस्याननेऽसौ ववृधे यथासौ
विदीर्णतुण्डो व्यसुतामुपाययौ ॥२२॥
राममासाद्य ते प्राणसदृशं लक्ष्मणादयः ।
बालका मुमुदुः स्वाङ्गैः परिष्वज्य विसाध्वसाः ॥२३॥
सुराश्च ते परमिकया मुदान्विताः
सुरद्रुमस्तबकभरैर्ववर्षिरे ।
अहो अहो रघुवररूपसागरो
हितप्रदो वत भुवि नः समागतः ॥२४॥
इत्याश्चर्यचरित्राणि कुर्वन् रामः सहानुजः ।
विरेजे नितरां तत्र कल्याणगुणभाजनः ॥२५॥
कदाचिद्वनवीथीषु खेलन्तो बालकैः सह ।
रामादयो विददृशुर्महासर्पं स्थितं पथि ॥२६॥
कन्दराव्याप्तवदनं शैलकायं भुजङ्गमम् ।
दृष्ट्वा तस्यानने सर्वे विविशुः कन्दराधियः[1] ॥२७॥
रामो ज्ञात्वा महासर्पं व्यवर्द्धत तदोदरे ।
बालाश्च ते निर्गमिताः पाटयित्वोदरं बलात् ॥२८॥
यावत् पापच्यमानास्ते न म्रियेरन् विषानलैः ।
कदाचिद्रामचन्द्रस्य जिज्ञासुर्विभुतां विधिः ॥२९॥
हृत्वा निन्ये निजं लोकं वत्सान् बालांश्च लीलया ।
ऋते लक्ष्मणशत्रुघ्नभरतान् सर्वबालकान् ॥३०॥
रामोगवेषयाणस्तान् सरयूतीरमागतः ।
यदा चिरेण नापश्यन्मेने विधिकृतं तदा ॥३१॥
यथासौ वत्सपालानां वत्सानां च विशेषतः ।
रूपाणि स्वयमास्थाय जगाम व्रजमन्दिरे ॥३२॥

---

१. कन्दराधिया–मथु०, "दरीं मन्यमानाः" टि०–मथु० ।

बन्धवो मातरस्तेषां विशेषात् स्नेहपुष्कलाः ।
रामवत्प्रीयमाणास्ते प्रमोदं परमं ययुः ॥३३॥
गावो वत्सान् विजिघ्रन्त्यो बालकांश्चैव मातरः ।
बभूवुस्तृप्तहृदया रामं दृष्ट्वा यथा तथा ॥३४॥
अन्येद्युरपि तान् वेधा जहार जनितस्मयः ।
रामश्चक्रे तथैवान्यान् स्वयंतावत्स्वरूपधृक् ॥३५॥
एवं यावद्दशदिनमुभौ[1] कर्माणि चक्रतुः ।
एको जहार गर्वेण ससृजेऽन्यो[2] निजेच्छया ॥३६॥
ततोऽतिविस्मयं प्राप्य वेधाः संजातसंभ्रमः ।
एकादशेऽह्नि पदयोरपतज्जातकौतुकः ॥३७॥
स दण्डवत्प्रणिपतितस्तदग्रतो
ज्ञात्वा रामं जातमुदग्रविक्रमम् ।
अस्तौत् स्तवैः संजनितातिहर्षो
भक्त्या युक्तो भूरिभाग्यं च जानन् ॥३८॥

ब्रह्मोवाच

नमामि ते राम पदारविन्दं
भक्त्या लभ्यं भक्तिहीनैरचिन्त्यम् ।
स्वरूपशक्त्यैव मुदं वितन्वन्
विक्रीडमानो जयसे सुरान् रणे[3] ॥३९॥
किं वर्णनीयो महिमा तवेश्वर
श्रीर्यत्पदाम्भोजयुगेऽस्ति किङ्करी ।
यतो गिरः सह मनसा सन्निवृत्ता
यं न स्पृशेद् भूरिसिद्धोऽपि योगः ॥४०॥
तस्मै नमस्ते त्रिदशप्रियार्थं
कृतावताराय[4] निरीहणाय ।
स्वमायया मोहितविष्टपाय
स्वसाक्षिणे सेवकवत्सलाय ॥४१॥

१. "उभौ = चतुर्मुखरामौ" टि०–मथु० । ४. "अन्यो रामः" टि०–मथु० ।
३. गणो–रीवां । २. °वतारिणे–अयो० मथु० रीवां ।

ममापराधस्तव वत्सहर्तुः
क्षन्तव्य एषोऽतितरां रमेश ।
अजानतो बालकस्यापराधं
यथैव माता क्षमते मिट्पुरीषम्[1] ॥४२॥
न ज्ञायते महिमा बालकस्य
ब्रह्मस्वरूपस्य हरेर्मयापि ।
अगोचरो वेद वेदांगिरा सः
स्वयं त्वपायः परिदर्शनीयः ॥४३॥
त्वं प्रार्थितः सुरनरैर्दशवक्त्रविघ्नै-
स्तन्निग्रहाय जनिमाप नरेन्द्रगेहे ।
जातोऽधुना विहरसीति मया प्रतीतं
स्वेच्छाविलासभवनाविनयं क्षमस्व ॥४४॥
यत्त्वं पुराणमुनिभिर्बहुधारणाद्यैः
स्वात्मैकयोगनिपुणैर्नितरां दुरापः ।
तत्के वयं निजगृहार्तिधरा वराकाः
श्रीराघवेन्द्र भवतो महिमानमाप्तुम् ॥४५॥
यन्नो मनोरथभराय भवावतीर्णो
प्रमुद्वनाद् भुवननाथ समूहनाथ ।
तत्ते रमा विहरणे क्वचिदन्तरायो
माभूत् कदाचिदिति संततमर्थये त्वाम् ॥४६॥
लोकमातापि भवतोऽनुकूलानि करोतु सा ।
यथा त्वमत्र भुवने चिराय विहरिष्यसि ॥४७॥
निजैः पदैस्तीर्थमयानि कुर्वन्
स्थलानि गङ्गाजलसंमितानि ।
स्ववीर्यगुप्तो विचरन् धरण्यां
धनुर्द्धरः क्षपयन् दुष्टसङ्घान् ॥४८॥

---

१. विट्पुरीषं-अयो० रीवां । "मिह सेचने, मिट् मूत्रं तत्पुरीषं वा पाठः" टि०-मधु० ।

चिरमेध चिरं वर्द्ध चिरमास्व महीतले ।
चिरं कुरु चरित्राणि पालयन् धर्मगोद्विजान् ॥४९॥
नमः पुरुषवर्याय पूर्णाय परमात्मने ।
अदृश्यायाप्रमेयाय निर्गुणाय गुणात्मने ॥५०॥
नमः श्याभाय रामाय रामाय वनमालिने ।
परमानन्दरूपाय गोविन्दाय नमो नमः ॥५१॥
नमोजगद्विधरणविष्टिसेतवे
प्रकाशिने श्रुतिगणगोचरात्मने ।
स्वमायया विरचितलोकसाक्षिणे
अमायिने स्वचितिसुखात्मने नमः ॥५२॥
इत्यभिष्टूय तं देवं पुरुषाकृतिमच्युतम् ।
विधिः पदोः पतित्वास तं प्रोवाच सतां पतिः ॥५३॥

श्रीराम उवाच

गच्छ ब्रह्मन् निजं लोकं स्वकार्यं प्रतिपादय ।
एवं मूढधिया कर्म कुर्वन् मूढयते बुधः ॥५४॥
मा कुरुष्वात्र सन्देहं नित्यो मम परिच्छदः ।
अर्वाग्भिः कालमायाद्यैरुपहन्तुं न शक्यते ॥५५॥
अस्योपघातो न भवेत् कदाचित्
समूढरूपस्य परात्मकस्य ।
सतस्त्रिलोकीविभवातिगस्य
मदीयलोकस्य चिदात्मकस्य ॥५६॥
अहं च यत्रैव निजस्वरूपतः
करोमि दिव्यं रमणं स्वसाधुभिः ।
न तत्र माया न च कालविक्रमो
न लोकपालस्य तव प्रवेशः[1] ॥७५॥

---

१. तवापि संप्रवेशः—अयो०, मधु०; तवापि प्रवेशः—रीवां ।

विभवोऽस्य[1] ह्यनाद्यन्तः सच्चिदानन्दलक्षणः ।
तत्राप्ययोध्यासम्बन्धो प्रकरस्तु मदात्मकः ॥५८॥
त्रैलोक्यनाशेऽपि न नश्यति क्वचित्
तदुद्गमेनोद्गमनं दधाति न ।
नित्योऽयमानन्दपुरोपरिच्छदः,
प्रमोदवल्लीवनकेलिनो मम ॥५९॥
अस्यैव साकेतपुरस्य नित्यशः
समन्ततः पञ्चमुखास्त्रिलोचनाः ।
ब्रह्माहरिश्चात्र गदासिचक्रभृत्
प्रत्यन्तभूरक्षणकारिणोऽभवन् ॥६०॥
कोटिब्रह्माण्डविधयः कोटिब्रह्माण्डशङ्कराः ।
कुर्वन्ति रक्षणं चास्य कोटिब्रह्माण्डविष्णवः ॥६१॥
यत्राहं क्रीडनं कुर्वे साकेतपरितो वने ।
तस्यैव रक्षकाः सर्वे त्रिदशाः सेवका मम ॥६२॥
इत्युक्त्वा स्वस्य लोकस्य[2] महिमानं रघूत्तमः ।
विसृज्य वेधसं सायं स्वगृहान् समुपाययौ ॥६३॥
अग्रे कृत्वा तार्णकं चक्रवालं
सलक्ष्मणः सहभरतः सशत्रुजित् ।
सायं गोकुलमनयद्रघूत्तमो
बभौतरां[3] पशुपतिबालसंगतः ॥६४॥
तमायान्तमनुश्रुत्य वेणुवादनलक्षितम् ।
द्रष्टुं गोकुलनार्यस्ताः प्रेमपूर्णाः समुद्ययुः ॥६५॥
माङ्गल्या चैव कौशल्या दायिनी राजभाजनम् ।
अग्रे समुपतस्थुस्तान् सुमित्राकेकयीयुता ॥६६॥
कृत्वा नीराजनं तेषां कुमाराणां मुहुर्मुहुः ।
स्वं स्वं निर्मञ्छयाञ्चक्रुः[4] प्रेमसंदोहविह्वलाः ॥६७॥

---

१ "अस्य प्रमोदवनस्य मल्लोकस्य" टि०-मधु० । २. "साकेतप्रमोदवनस्य" टि०-मधु० । ३. बभूत्तरां-अयो० मधु० । ४. निर्मन्थयाञ्चक्रुः-रीवां ।

भुशुण्ड उवाच

कथं स राजेन्द्रसुतोऽत्युदार-
श्चकार रामः पशुपालकृत्यम् ।
एतन्मनःसंशयमात्र [मत्र ?] जातं
संछेत्तुमर्हस्यमराधिनाथ ॥६८॥

ब्रह्मोवाच

न गावस्ताः श्रुतयः सर्वरूपाः
न ते वत्साः एकदेशः श्रुतीनाम् ।
न ते गोपा गुरवस्ते किलार्या
न ता नार्यो भक्तयस्तास्तु मूर्ताः ॥६९॥
तेषां मध्ये परब्रह्म रामश्चित्सुखविग्रहः ।
रमते स्वानुभावेन कृतार्थानां विशेषतः ॥७०॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे
रामवत्सचारणलीलानुकथनं नाम
एकविंशोध्यायः

द्वाविंशोऽध्यायः

ब्रह्मोवाच

कदाचिदिन्द्रयजनं कर्तुं नृपतिरुद्यतः ।
तथैव चान्वमोदन्त प्राप्ताः सर्वे द्विजातयः ॥ १ ॥
रामस्तदेव यजनं कर्तुमुद्यतमीश्वरम् ।
उवाच वदतां श्रेष्ठो निजमाहात्म्यवर्द्धनः ॥ २ ॥

राम उवाच

तात त्वया मखाः सर्वे कृताः सर्वेऽपि वैदिकाः ।
अश्वमेधादयो मेध्याः सत्रान्ता दीर्घसत्रकाः ॥ ३ ॥

विधिना च सुसम्पन्ना सुहुता बहुदक्षिणाः ।
वह्वृत्त्विजो बहुगुणा बहुगोद्विजभोजनाः ॥ ४ ॥
बहूत्सृष्टा लब्धपशुका ब्रह्मणापि सुदुष्कराः ।
ते त्वया रचिता यज्ञा पालिताश्च विशेषतः ॥ ५ ॥
अधुना वैष्णवं कर्म कुरु प्रियसुखावहम् ।
येनानुष्ठीयमानेन परो धर्मो विवर्द्धते ॥ ६ ॥
यस्य क्रियाखिला श्रौती कलां नार्हति षोडशीम् ।
कुरु गोविप्रवर्याणां वैष्णवानां विशेषतः ॥ ७ ॥
पूजां सुमहतीं राजन् वासोलङ्कारभोजनैः ।
इयं च सरयू तीरे दीप्यतां दिव्यदीपकैः ॥ ८ ॥

रत्नाद्रिश्च पुरस्यास्य पूजनीयोऽखिलेष्टदः ।
यत्र गावश्च गोपाश्च सततं सुखमासते ॥ ९ ॥
हरित्तृणमयः शैलो गुल्मवीरुल्लताकुलः ।
अर्चनीयोऽयमतुलैर्वासोभिर्भोजनैस्तथा ॥१०॥
वलिभिर्दीपदानैश्च संविधाभिश्च भूरिशः ।
अर्चनीया द्विजा गावो गोपा गोप्यश्च वैष्णवाः ॥
दीना आढ्या नरा नार्यो देवता सकला इमाः ॥११॥

इत्युक्तो दशरथभूपतिः सुतेन,
सन्तुष्टोऽधिकतरधर्मविष्णुगोत्या ।
ओमुक्त्वा सुरपतियागसंविधास्ता
विष्ण्वर्थं व्ययमुपचक्रमे विधातुम् ॥१२॥

बह्वीभिः संविधाभिः स ब्राह्मणान् समपूजयत् ।
सुरभीर्वैष्णवांश्चैव गोपान् गोपीश्च गोकुले ॥
महान्तमुत्सवं चक्रे वलिपूजादिनाद्भुतम् ॥१३॥
सरयूदीपराजीभिः परिवार्य व्यरोचयत् ।
द्रुमान्नीराजयामास प्रमोदवनवासिनः ॥१४॥
अलङ्कारैश्च वासोभिर्मण्डितान् फलपादपान् ।
पटहैर्दुन्दुभीभिश्च भेरीभिश्च मृदङ्गकैः ॥१५॥

अनादयन् दिशः सर्वास्तस्मिन् विष्णुमहोत्सवे ।
स्वयं चाभूषितो राजा परमोत्सवनिर्वृतः ॥१६॥
माङ्गल्या चैव कौशल्या गोपगोपीजनैर्वृता ।
आत्मानं भूषयाञ्चक्रे सुखिता वैष्णवे मखे ॥१७॥
रामश्च लक्ष्मणश्चैव भरतश्चैव शत्रुहा ।
मातृभिर्भूषिता भूरि द्विजेभ्योऽदुर्महाधनम् ॥१८॥
एवं समापयाञ्चक्रे महता संभ्रमेण सः ।
राजा दशरथो यागं वैष्णवं धर्ममुत्तमम् ॥१९॥
श्रुत्वा यागस्य विहतिं शक्रो रोषसमावृतः ।
गोपोपजनपीडार्थं मूढभावान्मनो दधौ ॥२०॥
परब्रह्मस्वरूपं तं रामं कारणमानुषम् ।
अवतीर्णमविज्ञाय पीडयामास गोकुलम् ॥२१॥
साकेतं च वनं चैव गोकुलं च निकेतनम् ।
समाच्छाद्य[1] स्थिता मेघाः शक्रेण प्रेषितास्तदा ॥२२॥
कालजीमूतसङ्घाताः साडम्बरमुपस्थितम् ।
आकालिकं च विज्ञायाज्ञासीद्राजा हरे रुषम् ॥२३॥
ततस्तेऽकालजलदा मुशलासारवर्षिणः ।
रुरुधुर्गोकुलं सर्वं चण्डवातप्रचोदिताः ॥२४॥
प्रचण्डवातप्रकरानुपातिता[2]
महाघनाऽऽसारभराः सविद्युताः ।
वर्षोपलैः पीडितसर्वगोधना
बभूवुरुद्वेगकरा महीपतेः ॥२५॥
एवं यावत्त्रिदिनमपतद् गोकुले भूरिवृष्टि-
र्विद्युत्पातैः खरजवमरुत्सन्ततं वर्षपातैः ॥
अत्यार्तं तद्व्रजपुरमभूत् कं व्रजामः शरण्यम् ।
क्रुद्धे चेन्द्रे दशरथनृपोऽप्यास पीडासचिन्तः ॥२६॥

---

१. समासाद्य–रीवां । २. °रा: सशर्करा–रीवां ।

एवं प्रजानां संक्लेशं ज्ञात्वा रामोऽखिलप्रभुः ।
मेघावरोधकं नाम निजछत्रमथाग्रहीत् ॥२७॥

छत्रं ततं विंशतियोजनात्मकं
सुरक्षकं तोयमुचां समूहतः ।
दृढं न चाभज्यत विद्युदादि-
महाश्मसंपातजवैः सुरेरितैः[1] ॥२८॥

एवं यावत्पक्षसमाप्तिरासीत्
तावत्तस्थौ छत्रमासाद्य लोकान् ।
पक्षस्यान्ते व्यर्थरोषोऽधमोऽभू-
दिन्द्रो ज्ञात्वा देवदेवस्य शक्तिम् ॥२९॥

ततः स वारिदव्यूहं वारयामास वासवः ।
रामचन्द्रानुभावेन संहत्याखिलवैभवैः ॥३०॥

अथाभ्ययाद्राघवेन्द्रं शरण्यं
स्वर्गस्येशो भूरिजातापराधः ।
सस्वर्धेनुः सामरः सेभराजो
रामक्रोधे स्वाशुभं शङ्कमानः ॥३१॥

स प्रमोदवने गत्वा रामं कमललोचनम् ।
अग्रहीत् पादयोस्तूष्णीं शरणार्थी शरण्ययोः ॥३२॥

रामो ज्ञात्वा मघवासौ विशक्ति-
र्मामभ्येत्य स्वाच्च[2]माधावयिष्यन् ।
उत्तिष्ठेन्द्रेत्येवमाज्ञां चकार
प्रोत्थायासौ भूरि तुष्टाव रामम् ॥३३॥

देव क्षमस्व मम पातकमेतदेव
ज्ञातो भवान् न परमो यदिहावतीर्णः ।
रामः स्वयं स भगवान् अखिलांशमूल-
भूतः पुराणपुरुषः पुरुषोत्तमस्त्वम् ॥३४॥

---

१. सुरोदितैः—मधु० । २. "स्वाच्चं स्वापराधं" टि०—मधु० ।

तस्मै नमोऽस्तु भवते पुरुषोत्तमाय
विद्यापि यं स्पृशति नैव महामुनीनाम् ।
स त्वं क्षमस्व भुवनेश ममापराध-
मज्ञस्य तावकमहिम्नि महाल्पबुद्धेः ॥३५॥
भक्तिं निजां वितर नाथ यथाविशुद्ध-
स्त्वत्पादमूलमधुना शरणं व्रजामि ॥३६॥
नमस्ते ब्रह्मरूपाय पुरुषाय महात्मने
त्वामाश्रितानामशुचस्त्वया संरक्षितात्मनाम् ॥३७॥
जानाति यस्ते महिमानमीश
गुरुप्रसादेन विशुद्धचित्तः ।
तस्मै त्वमादर्शयसि स्वरूपं
सच्चिन्मुखं स्वानुभवैकगम्यम् ॥३८॥
इत्थं संस्तूय[1] देवेन्द्रे सुरभिर्जातसंभ्रमा ।
अस्तौषीज्जातमहिमा राममीशं परात्परम् ॥३९॥

सुरभिरुवाच

वत तव महिमानं गोचरीकर्तुमीशा
न खलु विधिशिवाद्याः कोऽयमिन्द्रो वराकः ।
कृतमिममपराधं मार्ष्टुमभ्यागताहं
तव चरणसरोजे राम निर्मञ्छनं[2]स्याम् ॥४०॥
तव पद[3]मनवद्यं भाति गोलोकतोऽर्द्धं
सुविमलमतिमृत्यु ब्रह्मरूपं पुराणम् ।
जनकनृपतिपुत्र्या संततं सेव्यमानः
शुभगुणनिलयस्त्वं भ्राजसे यत्र नित्यम् ॥४१॥
दशरथनृपसूनो श्रीपते श्यामवर्ण
प्रणयरसपयोधे राम हे राघवेन्द्र ।

---

१. "संस्तूय तूष्णीं स्थिते सति" टि०—मधु० । २. निर्मंथनं—रीवां ।
३. "प्रमोदवनरूपं" टि०–मधु० ।

सपदि चरणयोस्ते पातितात्मानमेनां
कृपय कृपय शश्वन्मां निजैकान्तदासीम् ॥४२॥
श्रवणयुगनिपेयं तावकं राम नाम
क्षितितलमवतीर्यानन्तचारित्रजुष्टम् ।
सततमनुगृहाण स्वाङ्घ्रिसेवाभिलाषं
निजपदमतिमायं देहि मे राजसूनो ॥४३॥
नमस्ते ब्रह्मरूपाय नित्यानन्दमयाय च ।
स्वानामभयदानार्थमवतीर्णाय राघव[1] ॥४४॥
इति स्तुत्वा परं देवं स्नेहस्नुतपयोधरा ।
तूष्णीं बभूव सा धेनुस्तवकं कर्तुमक्षमा ॥४५॥
इन्द्रस्तस्यास्तनोद्भूतैः पीयूषैः शीतलामलैः ।
स्नापयित्वा प्रभुं रामं प्रणम्य च मुहुर्मुहुः ॥४६॥
निरुद्धवाष्पनयनः प्रणयोद्रेककातरः ।
कृतभक्तिरनुज्ञातः सधेनुः स्वपदं ययौ ॥४७॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे इन्द्रमान-भञ्जनं नाम द्वाविंशोऽध्यायः ॥२२॥

त्रयोविंशोऽध्यायः

ब्रह्मोवाच

ततस्ते प्रौढवयसः कुमारा मधुरत्विषः ।
धेनुपालनसोत्कण्ठा आसन् रामपुरोगमाः ॥ १ ॥
रामः परमधर्मात्मा गवेन्द्रसदने वसन् ।
धेनूः संपालयामास जनयन् गोकुले मुदम् ॥ २ ॥
गावस्तु ताः पाल्यमाना रामेण नयनोत्सवाः ।
बभूवुः प्रीतमनसस्तदेककृततुष्टयः ॥ ३ ॥

---

१. राघवे–अयो०, रीवां ।

तासां चित्तं समभवद्रामैकाश्रयसंश्रयम् ।
चारणे दोहने ह्वाने बोधने सान्त्वने तथा ॥ ४ ॥
रामहस्ताम्बुजस्पर्शमुधासन्तोषनिर्वृताः ।
नान्यं प्रतीयुस्ता गावो गोपराजस्य गोकुले ॥ ५ ॥
रामः पालयमानस्ता नवत्यर्बुद[1]कोटिगाः ।
शुशुभे राज्य (ज ?) वेषेण त्रैलोक्यस्यापि मोहनः ॥ ६ ॥
अथ प्रातः समुत्थाय मातृभिः कृतमण्डनः ।
आश्रितः सानुजो रामश्चचाल व्रजतो वनम् ॥ ७ ॥
गावः पुरस्कृत्य स जातदोहनाः
शृङ्गारवेशो मधुराकृतिं दधत् ।
गोपैस्तथा भ्रातृभिरात्तवेणुको
ययौ वनस्याभिमुखं वनप्रियः ॥ ८ ॥
स दिव्ये सरयूतीरे प्रसार्य निजगोधनम् ।
हरित्तृणं चारयाणः शुशुभे राज्य (ज ?) वेषभृत् ॥ ९ ॥
स कुर्वन् विविधा लीला गोपालैः समनुव्रतैः ।
वनाद्वनान्तरे गच्छन् मुमुदे केलिपण्डितः ॥१०॥
जलक्रीडां क्वचित्कुर्वन् स्थलक्रीडां तथा क्वचित् ।
क्वचिद्धसन् क्वचिद् गायन् क्वचिद् वेणुरवं दधत्[2] ॥११॥
क्वचिदन्योन्यकं कुर्वन् वयस्यैर्मल्लकर्म च ।
क्वचिद् द्रुमच्छायतले शयानः पुरुषोत्तमः ॥१२॥
वीज्यमानः सेव्यमानः पादसंवाहनादिभिः ।
एवं स्वानां मुदं तन्वन् रेमे प्रमुदकानने ॥१३॥
कदाचित् सरयूतीरे दिव्यमाश्रवनं महत् ।
श्रुत्वा जगाम तत्रैव लीलास्वच्छन्दमानसः ॥१४॥
तत्र कश्चित् खरो[3] नाम राक्षसेन्द्रो हि गर्वितः ।
महाबलो महाकायश्चुक्षुभे श्रुतकाहलः ॥१५॥

---

१. "सवत्सार्बुद°—अयो०, यावत्सर्बुद—रीवां । २. घनात्—अयो०, दधात्—रीवां । ३. जरो°—अयो०, नरो°—मथु० ।

प्रगायतां[1] चालयतां च नृत्यतां
श्रीराघवेन्द्रानुगबालकानाम् ।
श्रुत्वा महान्तं रवमुत्पफाला-
सुरः खराकारधरः सुदारुणः ॥१६॥

स आगत्यामिलद्वेगाल्लक्ष्मणेनामितौजसा ।
मल्लकेलिं वितन्वानो युयुधे बलगर्वितः ॥१७॥

लक्ष्मणस्तमुपादाय पश्चात्पादद्वयेन च ।
शिलायां पातयामास विगतासुरभूत्ततः ॥१८॥

लक्ष्मणेन हते तस्मिन् रासभाकाररक्षसे ।
पुष्पवृष्टिं ददुर्देवा जयेति च गिरं मुदा ॥१९॥

ततो रामः प्रसन्नात्मा सर्वा धेनूः कृताशनाः ।
पानार्थं सरयूं निन्ये प्रमोदवनपार्श्वतः ॥२०॥

तस्याः सरय्वाः सुरसं महाकृष्णाहिदूषितम् ।
पीत्वा ता मूर्छिता भूत्वा गावः पेतुर्महीतले ॥२१॥

हस्तस्पर्शेन रामोऽपि कृत्वा तासां गवां सुखम् ।
महता घोरयुद्धेन कृष्णाहिं निरवारयत् ॥२२॥

ततः प्रभृति स व्यालमर्द्दनः कीर्तितो बुधैः ।
कदाचित् प्रातरशनमकृत्वैव रघूद्वहः ॥२३॥

गतो गोचारणार्थाय भ्रातृभिर्बान्धवैः सह ।
तत्र संक्षुधितो रामः प्रेषयामास बालकान् ॥२४॥

अन्नार्थं सरयूतीरे यजमानद्विजाश्रमे ।
यजन्ते यत्र मुनयो ज्योतिष्टोमादिभिर्मखैः ॥२५॥

ब्राह्मणाः कर्मनिपुणाः प्रमोदवनवासिनः ।
गत्वा तेषां यज्ञवाटं बालकाः रामचोदिताः ॥२६॥

अन्नमभ्यर्थयाञ्चक्रुः स्वयं च क्षुधिता भृशम् ।
नोत्तरं ते ददुस्तेभ्यो यज्ञकाण्डक्रियाकुलाः ॥२७॥

---

१. प्रलापतां—अयो०, रीवां ।

न वा ते नेति चैवोचुर्ब्राह्मणा जातमन्यवः ।
ततो निराशा भूत्वा ते रामस्य सविधे गताः ॥२८॥
न नो ददति विप्रास्ते याचिता अपि भोजनम् ।
रामः स्मित्वाऽभवत्तूष्णीं तावत्तेषां द्विजन्मनाम् ॥२९॥
पत्न्यो बह्वन्नमादाय रामसंदर्शनोत्सुकाः ।
आययुः परमाह्लादाद् वार्यमाणा अपि प्रियैः ॥३०॥
तासां रामो दृष्टिसुखं महद्विश्लेषतापहम् ।
कालेन चात्मसायुज्यं सम्बन्धात् प्रेयसामपि ॥३१॥
कदाचित् कानने रामो ज्वलन्तं दावपावकम् ।
ययौ संरक्षणार्थाय स्वानां व्रजजनौकसाम् ॥३२॥
कदाचिद् गोपतिं रामो माङ्गल्यायाः पतिं विभुः ।
नीतं यमेन संस्नेहादानयत् सकलेश्वरः ॥३३॥
यमस्तं पूजयामास तुष्टाव विविधैस्तवैः ।
गृहीत्वा गोकुलेन्द्रं तं रामो गोकुलमाविशत् ॥३४॥
एवं स लोकपालानामैश्वर्याभिमतिं हरन् ।
विजहे भूरिविभवः प्रमोदविपिनान्तरे ॥३५॥
तत्प्रमोदवनं रेजे सर्वर्तुसुखसंयुतम् ।
रामप्रभावतो नित्यं साक्षाल्लक्ष्मीनिकेतनम् ॥३६॥
तत्रत्या गोपनार्यस्ता रामप्रेमपरायणाः ।
आसन्निरुद्धहृदया वश्यमन्त्रावृता इव ॥३७॥
रामस्य सौन्दर्यमनङ्गकोटिभि-
र्दुरापमाभीरवधूमनःसुखम् ।
विलोक्य रामास्त्रिषु लोकेषु मुग्धा
बभूवुरुच्चैर्विरहाकुलान्तराः ॥३८॥
आभीरवनिताः सर्वा रामदर्शनविह्वलाः ।
तमेव चैवं गायन्त्यो बभूवुः कामपीडिताः ॥३९॥
काश्चित्तु विलपन्त्योऽन्या धावन्त्यः काममोहिताः ।
पश्यन्त्यो विहसन्त्योऽन्या बभूवुर्मत्तमत्तवत् ॥४०॥

तासां विरहदुःखं तन्निवर्तयितुमुत्सुकः ।
रामसंप्राप्तिसिद्ध्यर्थं दुर्वासामन्त्रमादिशत् ॥४१॥
मन्मथार्दि राममन्त्रमात्रेयात् प्राप्य गोपिकाः ।
साधयामासुरत्युग्रव्रतबन्धेन पीडिताः ॥४२॥
शीतवातातपक्लेशं सहमाना व्रजाङ्गनाः ।
मन्त्रमाराधयाञ्चक्रुः प्रियसंप्राप्तिहेतवे ॥४३॥
व्रतदुःखं विलोक्यासां फलरूपो रघूद्वहः ।
स्नातानां सरयूतीरे वरदानार्थमाययौ ॥४४॥
ता मन्त्रसाधनरतास्तपस्नानादिकर्शिताः ।
उवाच रघुशार्दूलः स्मरबाणैर्विमोहयन् ॥४५॥

श्रीराम उवाच

किमर्थं दुश्चरं घोरं तपः कुरुथ कन्यकाः ।
नोचितं कोमलाङ्गीनां भवतीनां सुमध्यमाः ॥४६॥
एषा वृत्तिर्मुनीनां हि कार्मिकाणां द्विजन्मनाम् ।
भवन्त्यः कमलातुल्याः किमिच्छथ मृगेक्षणाः ॥४७॥
यत् त्रैलोक्ये स्थितं वस्तु तदहं दातुमागतः ।
भवतीनां ततः कष्टं दृष्ट्वा प्रक्षुभितान्तरः ॥४८॥

गोपकन्या ऊचुः

त्वं नः परं प्रार्थनीयः कोटिकन्दर्पसुन्दरः ।
स्मितमाधुर्यमात्रेण मोहयन् हृदयानि नः ॥४९॥
त्वत्तोधिकं फलं राम त्रैलोक्येऽपि न दृश्यते ।
त्वमेव सर्वकल्याणमूलभूतो रघूद्वहः ॥५०॥
दासीनां किङ्करीणां नः पूरयस्व मनोरथम् ।
त्वमेव वरदश्चैव वरश्चैव प्रियोत्तम ॥५१॥

रामोवाच

भवतीनां न सुखाय वरोऽयं प्रतिभाति मे ।
नाहमन्याङ्गनासक्तः प्रतिज्ञा विदिता मम ॥५२॥

*स्वात्मानन्दैकनिरतः सर्वस्याहं सुदुर्लभः ।
मदङ्गसङ्गिनी या श्रीः सा मां जानाति नित्यशः ॥५३॥
तस्याः संराधनं कृत्वा मामवाप्स्यथ कालतः ।
इत्युक्त्वा जानकीमन्त्रं तासामाचष्ट राघवः ॥५४॥
दुर्वाससं सुतं लब्ध्वाऽऽराधयाञ्चक्रुरङ्गनाः ।
त्वरितं सा ततः सीता प्रसादमकरोन्निजम् ॥५५॥
निजस्येष्टं वरं रामं ताभ्योऽदाद् व्रततोषिता ।
एवमाराध्य सीताया वरं लब्ध्वा व्रजाङ्गनाः ॥५६॥
सीतावेशधराः सर्वा राममासाद्य निर्वृताः ।
ताभिः सह ततो रामश्चक्रे केलीं मनोहराम् ॥५७॥
निजप्रियाया[1] वशगः सर्वासां प्रीतिमावहत् ।
एकोऽपि बहुधा कृत्वा रूपाणि रसपोषकः ॥५८॥
प्रमोदकानने रेमे कामीव प्रणयाकुलः[2] ॥५९॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे गोपी-
वरदानं नाम त्रयोविंशोऽध्यायः ॥२३॥

चतुर्विंशोऽध्यायः

ब्रह्मोवाच

परार्द्धस्मरलावण्यं बिभ्रत् सुन्दरविग्रहः ।
कामिनीनां कामरसं पोषयन् राघवो बभौ ॥ १ ॥
सीतयार्द्धाङ्गसंगिन्या सह केलिरसं दधत् ।
ज्योत्स्नया चन्द्रवद्रामो रेजे नक्षत्रमण्डले ॥ २ ॥

---

* इतः पूर्वमस्माभिर्बड़ोदास्थं पुस्तकं नोपलब्धमासीदत एतावत्पर्यन्तं तत्रस्थं पाठान्तरादि परिशिष्टे दास्यते, अतः परं तु दीयते। —सम्पादकः।

१. प्रियासंवशगः—रीवाँ। २. प्रणयात्कलाः—अयो०।

मुग्धानां गोकुलस्त्रीणां जानक्याविष्टचेतसाम् ।
समूहं रसयन् रामो बभाराकृतिसौष्ठवम् ॥ ३ ॥
यन्नेति नेतीति वदन्ति वेदाः
ब्रह्मादयो यन्न लेभुस्तपोभिः ।
तत्त्वं परं तच्छ्रुतिमूर्ध्वमृग्यं
व्रजाङ्गनाभिः करयोर्गृहीतम् ॥ ४ ॥
गुञ्जाहारं दधदुरसिलसच्छीर्षमायूरचन्द्रो
वेणुं बिम्बोष्ठदलकलितं बिभ्रदापूर्णनादम् ।
स्निग्धा च श्री[1]र्नट इव लसद्वेश[2]सौन्दर्यसारो
बिभद्रामः प्रमुदविपिनं वल्लवीमोदयानः ॥ ५ ॥
द्विपरार्द्धावसानेऽपि नित्यं क्रीडति राघवः ।
नान्तोऽस्य नित्यलीलानां स्वानन्दरसरूपिणः ॥ ६ ॥
राघवो मोदयन् गोपीस्ता एव सपरिच्छदाः ।
एवं योगी[3] वै रमते रामो रमयतां वरः ॥ ७ ॥
निर्विकारो ब्रह्मणोऽपि प्रतिष्ठा परमास्पदम् ।
नास्य कामेन कोपेन लोभेन च महात्मनः ॥ ८ ॥
मनोविकारः समभूद्यथा संसिद्धियोगिनः ।
इत्येवं रामदेवस्य बाललीलां शृणोति यः ॥ ९ ॥
स याति रामसायुज्यं परमानन्दनिर्वृतिः (तिम् ?) ।
अथाहमभिधास्यामि रामरासं मनोहरम् ॥१०॥
अदृश्यं यत् सुरेन्द्राद्यैश्चकार रघुपुङ्गवः ।
कोटिकन्दर्पलावण्यविजयी रघुपुङ्गवः ॥११॥
रामकण्टकरूपांश्च महादैत्यानजीहनत् ।
तेषां वधेषु संविघ्नं सहसा विनिवारयन् ।
महावीरो रामचन्द्र[4]श्चकारातीव विक्रमम् ॥१२॥

---

१. चाशीर्—अयो०, वंशी—रीवाँ। २. वेग°—अयो०, रीवाँ, मथु०।
३. योगी "नित्यसंबन्धी" टि०—बड़ो०। ४. रामभद्रश्—बड़ो०।

रमणमनुदिनं यो रामचन्द्रस्य पूर्णं
प्रणतमतिरधीते मानवो रामभक्तः ।
स भवति शिवतुल्यो रामभक्त्या प्रपूर्णः
परमसुखनिमग्नश्चिन्मयानन्दरूपः ॥१३॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे [केलिवर्णनं नाम]
चतुर्विंशोऽध्यायः ॥ २४ ॥

पञ्चविंशोऽध्यायः

भुशुण्ड उवाच[1]

श्रुत्वेदं रामचन्द्रस्य कौमारचरितं मम ।
मनः शीतलतामेति यद्वत् पीयूषधारया ॥ १ ॥
दत्त्वा वरं गोपिकानां नित्यमात्मप्रदं विधे ।
यच्चकार रघुश्रेष्ठस्तन्नः शंसितुमर्हसि ॥ २ ॥
चीर्णव्रतानां विप्राणां दण्डकारण्यवासिनाम् ।
यथा वरं ददौ रामस्तथा मे वद विस्तरात् ॥ ३ ॥
द्विपरार्धान्तेऽपि नित्यं सहजानन्दलोकगः[2] ।
रासं चकार रामाभिः परमैश्वर्यभावितः ॥ ४ ॥
तत्रापि दिव्यरासे तु यानि यानि शुभानि च ।
चक्रे रासचरित्राणि तानि मे कथय प्रभो ॥ ५ ॥
एकपत्नीव्रते स्थित्वा सत्यं लोपितवान्न च ।
बहुकान्तारतिं दृष्ट्वा तथा न द्वेष्टि जानकी ॥ ६ ॥
तदेतत् कथयास्माकं रामचारित्रमद्भुतम् ।
शृण्वतो मे महान् हर्षो रोमभेदश्च जायते ॥ ७ ॥

१. "वाल्मीक्यादिनिरूपिता (°पणा–बड़ो०) दृष्यत्यद्भुतं क्वचिद्विरुद्धं भूरिफलदं च श्रुत्वा चकितचमत्कृतमनाः श्रीभुशुण्डो वैष्णवाग्रणीः पुनर्भूयश्चरितश्रवणाय प्रश्नयतीति चित्सुखाचार्याः" टि०—मधु०, बड़ो० ।

२. लोकगः = प्रमोदवनस्थः टि०—बड़ो०,

गद्गदश्च तथा कण्ठे चित्तास्यैव च निर्वृतिः ।
अहो धन्या अमी देवा मदङ्गविनिवासिनः[1] ॥ ८ ॥
ये पिबन्ति शुभं नित्यं रामचन्द्रकथामृतम् ।
धन्योऽहं कृतकृत्यश्च तिर्यग्योनिगतोऽपि सन् ॥ ९ ॥
यत्पिबाम्यमृतं ब्रह्मन् भवद्वदनविच्युतम् ।

ब्रह्मोवाच

अहो परिणता बुद्धिस्तव सम्यग्विभाति मे ॥१०॥
पुनः पुनः प्रश्नयसि यद्राराघवपतेः कथाम् ।
वक्षाम्यहं तु वक्तव्यमवक्तव्यं कदाचन ॥११॥
गोपनीयं शुकेनापि यद् योगीन्द्रेण धीमता ।
कथामृतैककुण्डस्य चत्वारो रक्षका वयम् ॥१२॥
अहं शुकश्च शेषश्च तथा देवी तु जानकी ।
न ब्रूमः सकलं तत्तु गोपनीयं प्रयत्नतः ॥१३॥
वाचकान् घातयिष्यामि मातृजारप्रसङ्गवत् ।
अधिकारिण[2]मालोक्य कथंचित् कथयामहे ॥१४॥
पञ्चाधिकारिणोऽप्यत्र षष्ठो नैवोपलभ्यते ।
त्वमण्डजौत्तरेयश्च धरणी च पतिव्रता ॥१५॥
सौमित्रेयश्चोर्ध्वरेता तथा मारुतनन्दनः ।
तुभ्यं मया समाख्याता कल्पे-कल्पे युगे-युगे ॥१६॥
राममायाप्रभावेण पुनर्विस्मृतवानसि ।
शुकेन चौत्तरेयाय रामचारित्रमीर्यते ॥१७॥

---

१. °वासिताः—बड़ो० ।

"तत्तदिन्द्रियाधिष्ठात्र्यो देवताः, यद्वा अतिरहस्यं श्रीरामचरितं देवान्न श्रावयति भगवान् विरञ्चिरिति केचिद्भक्तिमन्तो देवाः श्री भुशुण्डस्य तनावाविश्य कथामृतपानं कुर्वन्तीति भावः, इति चित्सुखाचार्याः" टि०—मधु०, बड़ो० ।

२. "तेनास्य रामचरितस्य निर्विषयत्वं नास्तीति चित्सुखाचार्याः" टि०—मधु०, बड़ो० ।

इहैव[1] शुद्धसत्त्वाय गोलोके[2] प्रेमभागिने ।
पुनश्च भगवान् शेषो व्याचष्टे धरणीं प्रति ॥१८॥
लक्ष्मणाय तथा देवी जानकी प्रत्युवाच ह ।
तच्छ्रुत्वा सकलं प्रोक्तं लक्ष्मणेन हनूमते ॥१९॥
पञ्चेमाः संहितास्तत्र संक्षेपेण शृणु द्विज ।
भौशुण्डी परमेयं षट्त्रिंशत्साहस्रमीरिता ॥२०॥
चत्वारिंशत्सहस्रं तु लक्षमात्रमुदीरितम् ।
हनुमत्संहितालक्षं वायुलोके विराजते ॥२१॥
समुच्चयस्तु पञ्चानां मयोक्ता ब्रह्मसंहिता[3] ।
इत्येवं रामचरितं शतकोटिप्रविस्तरम् ॥२२॥
प्रतिकल्पं प्रतियुगं अन्यदन्यद् विभाव्यताम् ।
नान्तस्तस्य चरित्राणां कल्पकोटिशतैरपि ॥२३॥
किञ्चित् समाधावालोक्य शृणु पुत्र निगद्यते ।
यत्पृष्टं तु त्वया गोपीरामयोः क्रीडनं परम् ॥२४॥
तत्सुगोप्यं कथं वाच्यं वक्तास्यान्नारकी ध्रुवम् ।
अथापि शुद्धसत्त्वाय भक्ताय विमलात्मने ॥२५॥
वाच्यमाचार्यवर्यैस्तु तच्छ्रुत्वा[4] तत्परो भवेत् ।
सत्यं सत्यं मया नित्यं चिन्त्यते मूलमन्त्रवत् ॥२६॥
तद्ध्यानामृतयोगेन तिष्ठाम्याकल्पमण्डज ।
तपस्तप्तं मया पूर्वं तीव्रात्तीव्रतरं द्विज ॥२७॥
तेन प्रसन्नः सीतेशः सदा मां दर्शनं ददौ ।
स्वलोकं दर्शयामास गोलोकात् परतस्तु यत् ॥२८॥

---

१. "इहेति श्रीभागवते कृष्णचरितं श्रुत्वा प्राप्ताधिकाराय ततो व्यापिवैकुण्ठसाक्षात्कारवते, तत्रैवोत्तरप्रत्युत्तरादिरूपेण प्रादुर्भूता भूलोकेऽप्यागता शुकद्वारेणैवेति, । इति चित्सुखा०" टि०—बड़ो०, मधु०, । २. "गोलोके शुकसंहिता । सपादलक्षमाख्यातं पाद्मे पातालमण्डले, तथा सीतापुराणं तु "शुकसंहितातावदेव पाद्मादिरन्यथाऽप्रसिद्धिरेव स्यादिति चित्सु०" इति टि०—मधु० । ३. "पञ्चलक्षपरिमिता ब्रह्मसंहिता, यत्र भुशुण्डीयादीनां संग्रहः" इति टि०—मधु०, बड़ो० ।
४. यच्छ्रुत्वा—मधु०, °यैः स्वयं श्रुत्वा—बड़ो० ।

तत्र रासविलासादि दृष्टवानहमद्भुतम् ।
प्रमोदविपिने पूर्वं रामश्चक्रे सुक्रीडनम् ॥२९॥
तस्याप्यनुकृतिं कृष्णश्चक्रे वृन्दावने वने ।
श्रीरामो भनवान् पूर्णः कलाभिः पुरुषोत्तमः ॥३०॥
कोटिलक्ष्मीसहस्राणामंशिनी जनकात्मजा ।
एतयोरेव दिव्यांशौ राधाकृष्णात्मकौ व्रजे ॥३१॥
काले-काले समुद्भूय कुरुतः शाश्वतीं रतिम् ।
रामांशो भगवान् कृष्णः सीतांशो राधिकेश्वरी ॥३२॥
अन्याश्च सकला गोप्यस्तदंशांशा उदीरिताः ।
द्वारिकायां रुक्मिणीयं महालक्ष्मो महेश्वरी ॥३३॥
अन्याश्च सत्यभामाद्यास्तदंशाः सहजात्मिकाः ।
क्वचिदावेशरूपेण क्वचिदंशस्वरूपतः ॥३४॥
क्वचित् साक्षात् स्वयं सीता रमते प्रभुणा सह ।
सैव रासेश्वरी तेन रमते रासमण्डले ॥३५॥
एकधा शतधा चैव कृत्वा रूपाणि सन्ततम् ।
तच्चरित्रं महागोप्यं मया ज्ञातुं न शक्यते ॥३६॥
कुरु कल्पशतं तीव्रां तपश्चर्य्यां स्वशोधिकाम् ।
तदा ते तादृशी भक्तिर्भविष्यत्यनपायिनी ॥३७॥
तदा श्रीरामचारित्रं[1] श्रोतुमर्हस्यशेषतः ।
नोचेन्मामेव शप्स्यन्ति योगीन्द्रास्ते शुकादयः ॥३८॥
अनधिकारिणे मा ब्रूयादित्युक्तं प्रभुणापि मे ।
इति ब्रह्मवचः श्रुत्वा भुशुण्डो नाम वै द्विजः ॥३९॥
महतीमार्त्तिमन्वार्च्छत् प्राणान्तेऽपि गरीयसीम् ।
आकाशवाक् समुद्भूता तदा संशृण्वतोस्तयोः ॥४०॥
ब्रूहि ब्रह्मन्नशेषेण मम चारित्रमद्भुतम् ।
रासलीलाविनोदाख्यं भक्तायाण्डजरूपिणे ॥४१॥

---

१ °चरितं—अयो० ।

अयं हि सुमहान् योगी ममैकान्तरतिप्रियः ।
शान्तो दान्तस्तितिक्षश्च कोटिकल्पकृतश्रमः ॥४२॥
मद्भक्तो मत्परः शान्तो मदर्थत्यक्तसंस्मृतिः ।
एकान्तचारी विनयी भक्तानां प्रीतिवर्द्धनः ॥४३॥
ज्ञापयास्मै विशेषेण रामचारित्रमद्भुतम् ।
पीत्वा पीयूषवत् सर्वं नान्यस्मै कथयिष्यति ॥४४॥
इति दैवीं गिरं श्रुत्वा ब्रह्मा संजातसंभ्रमः ।
संपूज्य द्विजमाचष्टे रामलीलां मनोहराम् ॥४५॥
एतामैकान्तिकीं लीलां यो ब्रूयादनधिकारिणे ।
स पच्येत महाघोरे नरके दैवचोदितः ॥४६॥
(यः) कृष्णैकान्ततरो भक्तो रामभक्तिविवर्जितः ।
तस्मै न कथयेदेतां लीलां विश्वस्य पावनीम् ॥४७॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे
रामरासो नाम[1] पञ्चविंशोऽध्यायः ॥२५॥

•

षड्विंशोऽध्यायः

ब्रह्मोवाच

शृणु द्विज प्रमाणज्ञ रामलीलां मनोहराम् ।
दिव्यराससमायुक्तां सीताकौतुकवर्द्धिनीम् ॥ १ ॥
सर्वेऽप्यग्निकुमारास्ते षष्टिसाहस्रसंख्यकाः ।
रामलीलारसाभिज्ञाः प्रापुर्निजतपःफलम्[2] ॥ २ ॥
कल्पं सारस्वतं प्राप्य दण्डकारण्यवासिनः ।
श्रुतयश्चैव संजाता गोपीरूपेण गोकुले ॥ ३ ॥

---

१. रामरासे—अयो०, मथु०, रीवाँ, बड़ो० । २. अयं श्लोको नास्ति—रीवाँ ।

रामरूपमनुप्रापुः सरय्वास्तटयोर्द्वयोः ।
प्रमोदवनवासिन्यो जानक्याश्च[1] महाप्रियाः ॥ ४ ॥
रामतत्त्वमनुप्राप्य मुमुहुः कामभाविताः ।
अन्याश्च दिव्यललना दिव्यरूपसमन्विताः ॥ ५ ॥
कृत्वा तपो, वरं लब्ध्वा दिव्यमापुर्मनोरथम् ।
ततो निजवरं सत्यं कर्त्तुं रामो महामनाः[2] ॥ ६ ॥
कामतत्त्वेन ताः सर्वा रमयामास गोपिकाः ।
अथ प्रादुरभूत् कामः सहजानन्दलक्षणः ॥ ७ ॥
जानकीं वेपयामास सहजानन्दरूपिणीम् ।
सा वेपिता कामशरैः प्रादुर्भूय रघूद्वहात् ॥ ८ ॥
दिव्यवेशधरा भूत्वा क्षोभयामास राघवम् ।
संक्षुब्धः कामबाणेन तामालिङ्गितुमीयिवान् ॥ ९ ॥
तमायान्तं समालोक्य स्वयमन्तर्बभूव सा ।
अथ खिन्नो राजसूनुर्विरहेण मृगीदृशः ॥१०॥
इतस्ततो भ्राम्यमाणो दिशः शून्या विलोकयन् ।
पाण्डुक्षामवपुः साश्रुस्तब्धः पुलकपूरितः ॥११॥
दिने दिने व्यथापूर्णः प्रलीनसकलेन्द्रियः ।
पद्मपत्रविशालाक्षीं तामेव निजवल्लभाम् ॥१२॥
ध्यायमानोऽन्तरा दृष्ट्या बहिः शून्याखिलक्रियः ।
अशुष्यद्राजतनयो दीर्यमाणः स्ववक्षसि[3] ॥१३॥
क्वचिच्चन्द्रमुपालेभे पूर्णबिम्बं सुधामयम् ।
क्वचित् पद्मवनं दृष्ट्वा दुःखी नेत्रे न्यमीलयत् ॥१४॥
क्वचित् कैरविणीं वीक्ष्य बभूव च पराङ्मुखः[4] ।
क्वचिद् रम्भावनं दृष्ट्वा स्पृष्ट्वा प्राद्रवदातुरः ॥१५॥
क्वचित् कुञ्जलतां दृष्ट्वा वक्तुं समुपचक्रमे ।
क्वचिद् वसन्तमालोक्य मेने दावानलं विभुः ॥१६॥

---

१. जनिकाश्च—अयो०, बड़ो० । २. महात्मना—मथु०, रीवाँ । ३. स्तु—मथु० ।
४. °मुखी—अयो०, मथु०, रीवाँ ।

क्वचिदेकान्तसदने तामुपालभत प्रियाम् ।
अये ! कठोरहृदये दृप्ते जनकनन्दिनि ॥१७॥
व्यथमानहृदं दृष्ट्वा नाद्यापि करुणा तव ।
सकृन्मे दर्शनं दत्त्वा महाविरहवर्धनम् ॥१८॥
अन्तर्हिता[1] त्वं किं ब्रूमः[2] प्रेमशून्यकठोरताम्[3] ।
क्वचिदाकाशमालिङ्ग्य प्रियाबुद्ध्या मुमोद सः ॥१९॥
क्वचिन्नवदलं दृष्ट्वा चक्रे चुम्बनगां धियम् ।
क्वचित् खिन्नमनाः श्रान्तो शय्यामालिङ्ग्य संश्रितः॥२०॥
क्वचिद्धसन् क्वचिद्धावन् क्वचित् क्रोडारसं दधत् ।
क्वचिदुन्मत्तवज्जल्पन् क्वचित् कुर्वन् मनोरथान् ॥२१॥
नैव लेभे रतिं क्वापि प्रियाध्यानपरायणः ।
सरयूघोष[4]वासिन्यो [5]दिव्याश्च ललनागणाः ॥२२॥
रामनायकमालोक्य बभूवुः कामपीडिताः ।
काश्चित्तद्गुणमाकर्ण्य[5] बभूवुः काममोहिताः ॥२३॥
काश्चित् साक्षादमुं दृष्ट्वा निपेतुर्भृशमूर्छिताः ।
काश्चिच्चित्रगतं दृष्ट्वा जाताः कामशरार्दिताः ॥२४॥
काश्चित्[6]स्वप्ने समालोक्य पीडामापुः सुदुःसहाम् ।
एवं रामगुणाकृष्टाः समस्ता वामलोचनाः ॥२५॥
विरहार्त्ताः श्रितैकान्ता दूतीभिः संन्यवेदयन् ।
तासां दूत्यो रामसेत्य प्रोचुर्विरहजां व्यथाम् ॥२६॥

दूत्य ऊचुः[7]

अयि सुन्दर राघवोत्तम त्वमसि प्रेमभरैकभाजनम् ।
वनिताः स्मरबाणवेपिताः सदय[8]त्वं परिपालय प्रभो ॥२७॥
तव रूपविमोहिताः स्त्रियः कलिताः कामकरे कृताशयाः ।
कुलशीलविलज्जयातुराः पथि रुद्धाः सरितो यथाभवन् ॥२८॥

---

१. अन्तर्हित्वा—मथु०, रीवाँ। २. किमभूः—अयो०, मथु०, बड़ो०। ३. °कठोरकृत्—बड़ो०। ४. °देश°—मथु०, रीवाँ। ५—५. इयानंशो नास्ति—अयो०, रीवाँ। ६. क्वचित्—मथु०। ७. दूत्युवाच—अयो०, मथु०, बड़ो०। ८. सदयं—मथु० रीवाँ, बड़ो०।

अयि राजकुमार संप्रति व्यथितप्राणविमोचनोद्धुराः ।
न निभालयसे किमीदृशीः करुणावारिनिधिः स्वयं भवान् ॥२९॥
अथ ते कठिनं यदा मनो व्रजरामाननवीक्षणाक्षमम् ।
मरणं तदिमा मृगीदृशः कलयिष्यन्ति विगर्हितं भुवि ॥३०॥
अयि कामपरार्द्धसुन्दर त्रिजगन्मोहनमञ्जुलाकृते ।
मृत एष मृगीदृशीगणः प्रणयश्रीपरिपालक[2]स्तव ॥३१॥
अयि मन्मथमोहनाकृते किमियं ते प्रकृतिर्दुरत्यया ।
यदमूर्ललना निजाधरामृतपानेन न जीवयस्युत ॥३२॥
वनितावधपातकोद्भवं भयमास्ते भवतोऽथवा न वा ।
रघुवंशविभूषणो भवान् कथमत्युग्रमधर्ममाश्रितः ॥३३॥
चरणाम्बुजनिर्गलन्मधुद्रवधारासुखितान्तराश्रयाः ।
मुनयोऽपि भवद्गुणामृतं ननु गायन्ति रजस्तमोलयाः ॥३४॥
अयि राघववर्यधुर्य ते चरणाम्भोजपरागकाङ्क्षिणीः ।
अबला मदनेन घातयन् हृदि चिन्तां महतीमवाप्स्यसि ॥३५॥
शिशुनैव विमोहितान्तरा वनितास्ता व्रतबन्धकर्शिताः ।
भवता वरदाननिर्वृता वचनेनैव न वञ्चिताः किमु ॥३६॥
इदमीदृशबालभाषितं धरणौ संप्रति विश्वसेत कः ।
अथ विश्वसनीयभाषितो दयितो यद्यसि तत् प्रसीद भोः ॥३७॥
निजशैशवकर्मविस्मरन् वरदानं यदि विस्मृतोऽसि भोः ।
तदिमा युवराज संप्रति प्रणयेनैव सुनिर्वृताः कुरु ॥३८॥
यदिचेच्छरणागता अमूः परिपातुं क्षमते न ते मनः ।
भवतः सुचिरस्थिरं व्रतं गतमेव प्रतिभाति मेऽधुना ॥३९॥
शरणागतपालनव्रतं यदि ते सुस्थिरमस्ति राघव ।
तदिमा रघुराज[2] कन्यका विरहाम्भोनिधितः समुद्धर[3] ॥४०॥
प्रभुणा करुणावता त्वया न विलम्बः करणीय एव चेत् ।
परिपालय घोषसुन्दरीर्निजनाथाः स्मरबाणपीडिताः ॥४१॥

---

१. °परिपाकतः—मथु०, बड़ो०, । "प्रणयः स्नेहस्तस्य श्रीस्तस्याः परिपाकात् स्नेहाधिक्यात् दृढतरस्नेहात्" इति टि०—मथु०, बड़ो० । २. बहु राजकन्यका—बड़ो० । ३. °द्धरेः—बड़ो० ।

रघुनाथ भवान् भवार्णवे प्रकटोऽभूर्निजसौख्यहेतवे ।
स कथं निजनाथसुन्दरीनिवहं संव्यथयन् न लज्जते[1] ॥४२॥
इति शुश्रुम देवकार्यकृत् कृतवेशः पुरुषोत्तमो भवान् ।
तदिमाः सुरलोकसुन्दरीः विरहार्ताः परिपालय प्रभो ॥४३॥
परिपालय नाथ सेवकान् निजलावण्यसुधैकसंश्रयात् ।
इति ते विरुदावली यथा न विशीर्येत् करुणारसाम्बुधे ॥४४॥
स्मरसुन्दर कापि मूर्च्छिता प्रमदं कापि तनोति मन्त्रवित् ।
मुहुरेव च कापि धावति त्रपया कापि निरोधिताभवत् ॥४५॥
प्रलपत्यपि कापि भूरिशः करुणां कापि निभालते तनुम् ।
जडवत् प्रणयेन काप्यभूद् बहुशः खिद्यति राम काचन ॥४६॥
पुलकानि बिभर्ति काचन स्वरभङ्गं कुरुते च काचन ।
प्रणयेन च कापि कम्पते मलिनाङ्गी खलु राम काप्यभूत् ॥४७॥
अथ कापि करोति रोदनं पृथुमुक्ताफललोचनाश्रुभिः ।
प्रिय कापि विलीनवृत्तिका भुवनं शून्यमिवैव वीक्ष्यते ॥४८॥
इति नित्यमुपस्थितं महत् कदनं घोषपुरीमृगीदृशाम् ।
कृपया क्षपयातिकोमलप्रकृते राम धनुर्धराग्रणीः ॥४९॥
अयि राम धनुर्धराग्रणीः प्रसभं राजकुमार पालय[2] ।
नहि चेन्निहनिष्यते स्मरो निजनाथाः खलु घोषसुन्दरीः ॥५०॥
महतीं श्रियमाप्तवानसि स्मरसि त्वं किमु धेनुधोरणीः ।
अधुनापि तवैव गोपते हृदि वाञ्छन्ति गवेन्द्रतां प्रभो ॥५१॥
सततोत्सवभूरिभाग्यवानसि साकेतपुरीपतेः सुतः ।
न भवन्तमिह त्यजन्त्यमी स्वसखायः खलु गोपपुत्रकाः ॥५२॥
महती खलु राम वर्तते भवतः श्रीर्गुरुगोपवेश्मसु ।
न तथा हृदयं धिनोत्यसौ नृप संपत्तिरपारकुञ्जरा ॥५३॥
पितृतो[3] भवते प्रदर्शिता कमला कोटिगतौघसेविता ।
किमु विस्मरणे भविष्यति प्रणयावद्धगवेन्द्रवेश्मनः ॥५४॥

---

१. लज्जसे—रीवाँ। २. पालक—रीवाँ। ३. पितृणा—अयो०, बड़ो०।

जननी तव गोपसुन्दरी रघुवर्य त्वयि पुत्रवत्सला ।
त्वमपि स्फुटराज्यसंपदं प्रणयेनैव विधूय संस्थितः ॥५५॥
इति राम विगर्हणं[1] तव प्रकटं प्रेमवशेन कथ्यते ।
नृपपुत्र न चेत् त्वमीश्वरः किमु लोके सुलभो[2]ऽसि मृग्यताम् ॥५६॥
नवनीतसमूहतस्करो व्रजरामापरिरम्भपेशलः ।
सुलभोऽप्यसि घोषभूषण स्वकलीलारसमात्रकौतुकी ॥५७॥
इति दूत्यपरायणाशयैर्व्रजदूतीनिवहैरुदीरितम् ।
वचनं सुनिशम्य राघवः प्रहसन् प्राह[3] मनोज्ञया गिरा ॥५८॥

श्रीराम उवाच

सात्यन्तं मे प्रिया सीता हृद्गता बहिरुद्गता ।
मोहयित्वा सहृदयं[4] हाहा कुत्र गता जवात् ॥५९॥
न तां विना क्षणं स्थास्याम्यहमीशोऽपि संपदाम् ।
सा मे विगर्हणं कुर्याद्यदि क्रीडेयमन्यतः ॥६०॥
तद्भ्रूविजृम्भवशगो बिभेमि व्रजदूतिकाः ।
तत्स्वीकृतिमहं कृत्वा श्रोष्याम्यन्याभिवाञ्छितम् ॥६१॥
जनकस्य गृहे जाता सा मे स्वप्नगताऽब्रवीत् ।
तां त्यक्त्वा कथमन्यासु कुर्वीय प्रणयोत्सवम् ॥६२॥
सा मे यदि प्रकुप्येत तदा किं मे भवेदिति ।
मुहुः संचिन्त्य नान्यासां प्रणयं पालितुं[5] क्षमः ॥६३॥
तद् व्रूत मद्वचस्तत्र गत्वा यूयं सुदूतिकाः ।
आश्वासयत ताः कान्ता भूयो मद्विरहातुराः ॥६४॥
भवतीभ्यो वरं दत्तं स्मरामि व्रजयोषितः ।
तत्र कालं प्रतीक्षध्वं यावत् सीतासमागमः ॥६५॥
तथाहं विधिवत् कृत्वा भूयः परिणयोत्सवम् ।
तस्यै महापदं दत्त्वा महिषीत्वेन भावितम् ॥६६॥

---

१. "अवज्ञां" टि०—बड़ो० । २. "सुलभो नैवासि सर्वेश्वरत्वात् , इत्यर्थः" टि०—मथु०, बड़ो० । ३. प्राज्ञ°—रीवाँ। ४. सा हृदयं—अयो०, मथु०, रीवाँ। ५. पातितुं—मथु०, रीवाँ।

भवतोभिस्ततः संगं करिष्यामि व्रजाङ्गनाः ।
इत्येवं भाषमाणे तु तस्मिन् राघवपुङ्गवे ॥६७॥
आययुर्मुनयः सर्वे दूतीनां पुरतः स्थिताः ।
स्थूलाक्षः शर्कराक्षश्च कम्बुर्मेधातिथिः शुकः ॥६८॥
नारदः पर्वतश्चैव सुधर्मा चैकलो द्विजः ।
मित्रभवनोऽप्यथो धौम्यः[1] शतानन्दो विशारदः ॥६९॥
जमदग्निस्तथा रामो वशिष्ठो वामदेवकः ।
अन्ये चैव तपोवीराः प्रादुरासुर्मुनीश्वराः ॥७०॥
जाबालिः पिप्पलादश्च शाण्डिल्यो लोहितस्तथा ।
उद्दालको देवलश्च लोमशश्च महामुनिः ।
ते तत्र बोधयामासुर्धर्मज्ञं रघुपुङ्गवम् ॥७१॥

मुनय ऊचुः

शृणु राम महाबाहो नैव वक्तुमिहार्हसि ।
त्वदङ्गसङ्गिनी सीता नोद्वाहं समुपेक्षते[2] ॥७२॥
शैशवे शिशुरूपा सा तारुण्ये तरुणाकृतिः ।
तिरोभावे तिरोभूताविर्भावे प्रकटाकृतिः ॥७३॥
चन्द्रेण चन्द्रिकेवासौ त्वयैव सह वर्तते ।
गच्छ राम मनोज्ञं तत् प्रमोदवनमुत्तमम् ॥७४॥
तत्रस्था व्रजदेवीश्च रमयस्व चिरं प्रभो ।
ता एव प्रथमं तस्याः करिष्यन्ति विकैतवम्[3] ॥७५॥
दूत्यं तया भवत्सङ्गं कारयिष्यन्ति योषितः ।
तास्वाविष्टा ततः सीता रंस्यते भवता समम् ॥७६॥
स्वयं च रंस्यते साक्षात् सीता सहजसुन्दरी ।
नात्र त्वया क्वचित् कार्यो विकल्पो रघुनन्दन ॥७७॥
तासामेव हितार्थाय भक्तानां व्रजयोषिताम् ।
त्वत्तः प्रादुरभूदेषा भेदेन दर्शनं गता ॥७८॥

---

१. °भवनोऽथ धौम्यश्च—बड़ो० । २. "त्वां न उपेक्षते" टि०—बड़ो० ।
३. "कपटशून्यं" टि०—मधु०, बड़ो० ।

पुनश्चान्तर्हिता भूत्वा प्रमोदवनमागता ।
तत्र सा शोभते नित्यं सरयूतीरवासिनी ॥७९॥
प्रमोदवनमध्यस्था तद्देवीभिश्च पूजिता[1] ।
तासां मध्येऽनिशं भाति प्रमोदवनदेवता ॥८०॥
रक्ताशोकलताकुञ्जं[2] सीतासौ तत्र कानने ।
त्वं तात गच्छ तत्रैव पूरयस्व मनोरथान् ॥८१॥
नेत्रोत्सवं तथास्माकं देहि राघवपुङ्गव ।
त्रैलोक्ये च महामोदं वर्द्धयस्व महामते ॥८२॥
नातो विलम्बनं कार्यं वयं दूत्यमुपागताः ।
तत्रैव सीतया सार्द्धं शोभन्ते व्रजयोषितः ॥८३॥
श्रुतिरूपा नित्यसिद्धा अग्निपुत्राश्च योगिनः ।
अन्ये च दिव्यमुनयो वाञ्छन्ति भवदागमम् ॥८४॥
योषिद्रूपं विधायैते कामेन क्षुभिताशयाः ।
त्वामेव नित्यं वाञ्छन्ति तत्र गच्छाधुना प्रभो ॥८५॥
इति तेषां वचः श्रुत्वा रामः प्रहसिताननः ।
महान्तमुत्सवं कृत्वा सर्वांस्तान् विससर्ज ह ॥८६॥
ओमित्युक्त्वा दूतिकाश्च विससर्ज नृपात्मजः ।
दूत्योऽपि तेन वाग्वन्धं कृत्वा प्रमुदिताशयाः ॥८७॥
आयाति भवतीनां वै नाथः संजातकौतुकः ।
इति ताभ्यो व्रजस्त्रीभ्यः पृथक् सत्यं न्यवेदयन्[3] ॥८८॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे राम-
रासो[4]नाम षड्विंशोऽध्यायः ॥२६॥

---

१. पूरिता—अयो०, मथु० । २. °कुन्जे—बड़ो० । ३. निवेदयत्—मथु०, वाँ, बड़ो० । ४. रामरासे—मथु०, रीवाँ ।

सप्तविंशोऽध्यायः

अथागमच्छरत्कालः प्रमोदवनमध्यतः ।
उत्फुल्लपङ्कजवनः परागोद्धूलिताम्बरः ॥ १ ॥
सप्तच्छदोग्र[1]सौगन्ध्यसमूहोन्मत्तदिग्गजः ।
मृदुचन्द्रकरस्पर्शसहजोत्फुल्लकैरवः ॥ २ ॥
उत्फुल्लमल्लिकावल्लीकुसुमस्तवकान्वितः ।
खेलत्खञ्जनदाम्पत्यसंभ्रमोद्भूतमन्मथः ॥ ३ ॥
चकोरीवदनान्तःस्थ[2]निशाकरकरामृतः ।
हंसकारण्डवाक्रीडसलिलोद्धरणोद्धुरः[3] ॥ ४ ॥
कञ्जकिञ्जल्कपुञ्जान्तर्लीनप्रचुरषट्पदः ।
काशपुष्पप्रतीकाशचमरीपुच्छमण्डलः ॥ ५ ॥
प्रमोदवनसंफुल्लमालतीसौरभान्वितः ।
संततस्वच्छसरयूसलिलाचितबालुकः ॥ ६ ॥
गोपगोपीहृदुत्साहवर्द्धनः पुष्टिकारकः ।
दृष्ट्वेदृशं तु समयं रामो रमणकोविदः ॥ ७ ॥
गोधोरणीं[4] पुरस्कृत्य प्रमोदवनमागमत् ।
तत्र गत्वा कृताकल्पः सहजोत्सवसुन्दरः ॥ ८ ॥
अङ्गलावण्यसन्दोहप्रकाशितदिगन्तरः ।
गोपानुवाच सकलान् भ्रातॄंश्च लक्ष्मणादिकान् ॥ ९ ॥
हे लक्ष्मण गवां गोष्ठं रच्यतां परितोऽत्र वै ।
गोपैः सार्द्धं शाद्वलानि चार्य्यतां मम धेनवः ॥१०॥
अहमत्र करिष्यामि प्रमोदविपिनान्तरे ।
पूजां कामेश्वरस्याङ्ग देवदेवस्य संततम् ॥११॥

---

१. °छन्दोत्थ°—अयो० मथु०, रीवाँ। २. °वदनाचांत—अयो० बड़ो०।
३. सलिलाण्डवरोद्धुरः—अयो०, बड़ो०। ४. गोधोरधीं—अयो०।

भरतेन च शत्रुघ्न सार्धं त्वं गाश्च चारय ।[1]
अत्र स्यात् कोऽपि चेद्विघ्नः प्रतीकार्यस्तथैव सः ॥१२॥
प्रमोदवनकुञ्जेषु करिष्यामि मनोरथम् ।
ओमित्युक्तवन्तमथो विसृज्य लक्ष्मणं च तान् ॥१३॥
अन्तःप्रमोदविपिनमियाय रघुनन्दनः ।
तत्र गत्वा शशिज्योत्स्ना[2]विसतन्तुपटोज्ज्वलाः ॥१४॥
सुधामयीः शरत्पूर्णा रजनीराजुहाव सः ।
द्विपरार्धान्तेऽपि नित्यास्तास्तस्य पुरतोऽभवन् ॥१५॥
तासु क्रीडनमारेभे दिव्यकेलीविशारदः ।
तत्र स्थित्वा महाकुञ्जे जुगुञ्ज कलवेणुना ॥१६॥
तत्र वेणुरवे गानमकरोदिदमादरात् ।

इत्येहि जनकनन्दिनि मदन्तःसंतापहरणचन्द्रिकावतारविग्रहे मदङ्गसंजातप्रमोदवनलहरीलीलायितगते सहजचिदानन्दमयतारुण्यविलासवैभवाधिवासिते ॥१७॥

चिल्लोकस्वामिनि कामिनीजनगर्वापहारमकरध्वजपताके वेदिमध्ये महामत्तमातङ्गगामिनि राकेशप्रभावलेपनिर्वहणवदनकान्ते कैशोरलीलामतिलङ्घ्यवर्तमाने ॥१८॥

प्रमोदवन - वृन्दावन - मन्दारवन - कदम्बवन - पारिजातवनेश्वरि कुञ्जभुवनेश्वरि रक्ताशोकलतामण्डपमध्यस्थे स्मरमन्त्र-महाविद्ये श्रीमन्त्रविद्ये महामन्त्रविद्ये महाश्रीयन्त्रनायिके महाचक्रनायिके मातङ्गकुलपूजनीयचिन्तामणिचरणनखचन्द्रिके ॥१९॥

चञ्चलापाङ्गसंक्षोभितकोटिकन्दर्पकामिनीहृदये कोटिब्रह्माण्डकमलासमुच्चयरूपविग्रहे मन्दस्मितमात्रनिरस्तविरहशोके हा भामिनि हा चण्डि हात्यन्तकोपने हातिशयदुराराध्यशीले भूलीलादिविविधाकारावान्तरावतारारति[3]निमग्नमानसे क्वासि क्वासीति ॐ ॐ ॐ ॐ आनन्दवल्लिके क्वासि क्वासीति जगौ ॥२०॥

---

१. "हरिततृणभूमौ गोचारणं कर्त्तव्यं" इति टि०–मथु० । २. शिशुज्यो० —अयो० । ३. "भूलीलादिरूपा विविधाकारा ये अवान्तरा अवतारा:" टि०–मथु० ।

ततस्तदाकर्ण्य सुवेणुनिःस्वनं प्रियोदितं मन्मथवेग[1]वर्द्धनम् ।
स्मरोन्मदप्रोद्धतमानसा बहिर्हृदन्तरादाविरभून्नितम्बिनी ॥२१॥[2]
अशोकवल्लीवनमण्डपान्तराद् विनिःसरन्ती सहजारुणांशुका ।
घटस्तनी सन्मणिहारभूषणा स्फुरत्पदन्यासविरञ्चितावनिः ॥२२॥
मरालगत्यञ्चितमञ्जुविग्रहा नितम्बभारोद्वहनाक्षमा रमा ।
मृदुस्मितद्योतविभासितानना मनोहरापाङ्गविभूषितेक्षणा ॥२३॥
अनर्घ्यकाञ्चीगुणनादिघण्टिका मनोज्ञकेयूरविलम्बिदोर्लता ।
त्रपानिमग्ना कलितावगुण्ठना सुवृत्तदीव्यज्जघनप्रभाम्बरा ॥२४॥
सुकण्ठकण्ठी शुभसूत्रशोभिता सभागसौभाग्यसमूहसंगता ।
समानशीलैः प्रचुरैः सखीजनैः सनाथपर्यन्तपुरस्थलस्थिता ॥२५॥
परिस्फुरच्चारुकपोलमण्डनप्रतिष्ठिताटङ्कमणिप्रभाभरा ।
प्रसूनचित्रीकृतचारुवेणिका सुनासिकाशोभिमहामणित्रया ॥२६॥
सुमञ्जुसिन्दूरसमूहसुन्दरप्रसर्पिसीमन्तितरत्नपट्टिका ।
ललाटपर्यन्तविराजिभूषणप्रभासमूहैः परिवेपितानना ॥२७॥
सा राघवेन्द्रस्य जवेन सन्निधौ समेत्य कण्ठे मणिमालिकामधात् ।
तयोर्विनिर्वृत्य विवाहमङ्गलं सखीजनः कुञ्जगृहे विधानवित् ॥२८॥
प्रवर्तयामास मिथो रतिक्रियां नवीनसङ्गोद्यदनङ्गकौतुकाम्[3] ।
ततस्तयोस्तत्र दिने दिनेऽभवन्महोत्सवः पूर्णसखीमनोरथः ॥२९॥
शृङ्गारयामास रघूद्वहः प्रियां प्रियापि तं दिव्ययुवानमादरात् ।
एवं तदन्योन्यमभूत् कुतूहलं दाम्पत्यभावप्रणयेन संचितम् ॥३०॥
परस्परालापनिरीक्षणादिषु प्रवृद्ध उच्चैः प्रणयस्य वारिधिः ।
अभूदमर्यादतरः समन्ततो यथान्यवार्ता धरणीं समाक्रमत्[4] ॥३१॥

साकेतनगरद्वारा रासभूः[5] सहवेश्मसु ।
सरयूतटकुञ्जेषु रत्नपर्वतसानुषु ॥३२॥
क्रीडास्थानेषु दिव्येषु महासाम्राज्यभूतिषु ।
वाटिकातटवापीषु प्रमोदवनमध्यतः ॥३३॥

---

१. वेणु°–बड़ो० । २. अयं श्लोको नास्ति–अयो० । ३. "उद्यत् = प्रादुर्भवत्" टि०—बड़ो० । ४. "लोकवत्" टि०–बड़ो० । ५. "ऽऽरामभूः"–मथु०, बड़ो० ।

दधौ केलिरसं रामो रामया सह संततम् ।
क्वचिद् गुञ्जाविभूषाढ्यो वनमालाविभूषणः ॥३३॥
मयूरचन्द्रिकोत्तंसो वितेने नयनोत्सवम् ।
क्वचिच्चन्दनकाश्मीरमकरीपत्रचित्रितः ॥३५॥
रत्नाकल्पमनोहारी चकारातीव संपदम्[1] ।
क्वचिच्च कनकोष्णीषरत्नस्तवकशोभितः ॥३६॥
हेमकञ्चुकलिप्ताङ्गो रेजे राजोत्तमो यथा ।
क्वचित् पीताम्बरधरः शुभ्रधौत्रविराजितः ॥३७॥
आबद्धचूडाचिकुरश्चकार प्रियया मुदम् ।
क्वचिच्च मल्लकच्छाढ्यः सुवर्णधृतकुण्डलः ॥३८॥
करस्थवलयोल्लासी रराज रघुनन्दनः ।
क्वचिन्नासामणिभ्राजी श्रीमदाननमण्डलः ॥३९॥
प्रियाकल्पितपुंवेशो रेजे श्रीरामचन्द्रमाः ।
क्वचित् किरातवेशेन सन्नद्धललनासखः ॥
मृगयाभिरतिर्वीरो व्यरोचत वनान्तरे ॥४०॥

एवं विचित्ररचनान्वितकेलिकारः
कन्दर्पकोटिकमनीयकलाकलापः ।
दासीजनप्रतिविभूषितदिव्यरामा—
तारुण्यमोदमदिरारसपानमत्तः ॥४१॥
अन्योन्यमुज्ज्वलरसोदधिहावभाव[2]—
रिङ्गत्तरङ्गशतसान्द्रतरार्द्रमूर्त्तिः ।
चक्रे विलासरसिको विविधान् विलासान्
श्रीमत्प्रमोदवनकुञ्जगृहे सुरम्ये ॥४२॥

इत्थं विहरतस्तस्य रामया सीतया सह ।
द्विपरार्द्धान्तमभवद् ब्रह्मणो रजनी हि सा ॥४३॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे
रामरासो[3] नाम सप्तविंशोऽध्यायः ॥२७॥

---

१. "शोभाम्" टि०–बड़ो० । २. हानभाव°–अयो० । ३. रामरासे–अयो०, मथु०, रीवाँ, बड़ो० ।

अष्टाविंशोऽध्यायः

ततः प्रवर्तते घोरं तमो भावपिधायकम् ।
रवेरस्तमभूत्तेजः शशुभे ज्योतिषां गणः ॥ १ ॥
तारकौघाः प्रादुरासन्नुलूकाः[1] संप्रपेदिरे ।
पद्मकोशान्तरे बद्धाः जुगुञ्जुर्न मधुव्रताः ॥ २ ॥
मधुरोल्लाससंशोभि बभौ कैरविणीवनम् ।
विटपेषु च निद्राणाः पतङ्गा न च भाषिरे ।
संवीक्ष्य तामसीं वेलां रामः प्रोवाच जानकीम् ॥ ३ ॥
जनकनन्दिनि संप्रति वर्तते रजनिरुत्सुककोकगणार्तिदा ।
स्फुरदुलूककदम्बकमोदकृत्तिमिरघोरपटावृतकानना ॥ ४ ॥
कटु रटन्ति च संप्रति फेरवाः सुकलहंसरवश्च तिरोहितः ।
श्रवणयोः कुरुते कटुतामसौ किमपि घूकवधू[2]निवहारवः ॥ ५ ॥
न खलु संप्रति वञ्जुलकाननं[3] विकसितं वितनोति दृगुत्सवम् ।
कुमुदिनी प्रबिभर्त्ति विकासितां वितथसौरभसंपदुपेक्षिता ॥ ६ ॥
किमपि गायति च भ्रमरावली विकटकुञ्जलतावनवेश्मसु ।
दधति रत्नगिरेस्तटभूमयस्तिमिरसंघकृतं स्वपराभवम् ॥ ७ ॥
इति निशम्य निशागमवर्णनं जनकजा समभाषत वल्लभम् ।
इयमहो रजनी न निवर्तते प्रलय एष विधेरपि नाशकः[4] ॥ ८ ॥
भजति भूतगणः प्रकृतिं परां प्रकृतिरेति परे पुरुषे लयम् ।
पुरुष एति भवन्तममुं परं निजविलासरतं पुरुषोत्तमम् ॥ ९ ॥
त्वमधुनापि रतेर्न निवर्तसे सहजचित्सुखकेलिकलानिधिः ।
यदपि नाथ गता लयमीदृशाः शतश एव विरञ्चिहरीश्वराः ॥१०॥
त्वमवधिः परमं पुरुषोत्तमः सततकालकलाकलनात्मकः ।
प्रिय भवन्तमुपेत्य गतोऽप्यसावगत[5] एव विवात्यत इत्यहो ॥११॥

---

१. प्रादुरासुरु°—बड़ो० । २. चक्रवधू°—रीवाँ । "उलूकवधूसमूहशब्दः" टि०—मथु० । ३. पंकजका°—बड़ो० । ४. नायकः—अयो, मथु०, रीवाँ । ५. "असौ कालः" टि०—बड़ो० ।

अहमपि प्रभुणा भवता सह प्रमुदकाननकुञ्जविलासिनी ।
न कलये प्रणयेन च संभवं न विरतिं सुखकेलिमहोत्सवे ॥१२॥
अथ यदि स्वपनस्पृहया प्रभो किमपि ते नयनेऽलसपक्ष्मणी ।
तदहमप्यधुना स्वपिमि क्षणं भवदुदारभुजान्तरवर्त्तिनी ॥१३॥
भवदुरोनयनाननना सिकाहृदयपाणिपदावयवाश्रिता ।
विरचयामि सुषुप्तिरिवोच्छ्वस[1]न्निगमशब्दमयीं विरतिं न किम् ॥१४॥
निधुवनान्तमिता श्लथविग्रहा स्वपिमि नाथ कदा भवता समम् ।
स्वदयितस्य सुषुप्तिदशाजुषस्तव मुखेन्दुनिरीक्षणं[2]मक्षमा ॥१५॥
नहि निमीलितलोचनपङ्कजोऽप्यथ भवानपि मां परिमुञ्चसि ।
[3]सुखसुयन्त्रितदोःपरिरम्भणप्रणयकेलिकलाकुलविग्रहः ॥१६॥
अलसलोचन एष सखीजनोऽप्यलमिह स्वपितीति विभाव्यते ।
इह न सोऽपि जनोऽस्ति य एत्य नो[4] दिशति नागलतादलवीटिकाम् ॥१७॥
कथयतो रतिवल्लभयोर्मिथः सपदि कापि सखी सुसमाययौ ।
न युवयोरधुनापि दिनात्यये भवति सुप्तिरतीवविलासिनोः ॥१८॥
नवनिकुञ्जलतावनमण्डपे कुसुमकल्पिततले[5] कुरुथो न किम् ।
निधुवनक्रियया सहजं सुखं स्मरविलासकलाकुशलौ युवाम् ॥१९॥
निधुवनश्रमसंगतनिद्रयो[6]श्चरणवाहनमेत्य करोति या ।
किमु न साप्यहमद्भुतदासिका रहसि दम्पतिसुप्तिरहस्यगा ॥२०॥

इत्थं[7] सखीगिरं श्रुत्वा स्मृत्वा सीतारघूद्वहौ ।
शय्यामन्दिरमत्युच्चैराजग्मतुरनुत्तमम् ॥२१॥
चन्दनागुरुधूपाढ्यं कर्पूरोज्ज्वलदीपकम् ।
शय्यान्तावनिविन्यस्त[8]दिव्यास्तरणगैन्दुकम् ॥२२॥
नानारङ्गसृतानेक[9]दिव्यचित्रविचित्रितम् ।
कुञ्जवल्लीवनान्तःस्थमन्दारद्रुममूलगम् ॥२३॥

---

१. उल्लसन्—बड़ो० । २. "कर्तुमितिशेषः" टि०—बड़ो० । ३. सुदृढयं०—बड़ो० । ४. परात्परो—अयो०, मथु०, रीवाँ । ५. क्षुप्र०—अयो०, मथु०, रीवाँ । ६. संगतिनिष्ठयोः—अयो०, मथु०, रीवाँ । ७. इति—अयो०, मथु०, बड़ो० । ८. °घुन्यस्त—रीवाँ । ९. °गतानेक°—बड़ो० ।

रक्तपीतप्रभाशोभिरत्नवेदचुपरि स्थितम् ।
सुवर्णसंपुटन्यस्ततताम्बूलोदलवोटिकम्[1] ॥२४॥
कल्पद्रुमप्रसूनस्रग्वासोलङ्कारभूषितम् ।
संभोगमल्लयुद्धान्त[2]सुखदव्यजनाञ्चितम्[3] ॥२५॥
सुगन्धिमिष्टमधुरपक्वान्नादिसमायुतम् ।
प्रोद्भासिरत्नचषकोपेतमैरेयभाजनम् ॥२६॥
द्यूतकेलिक्रियोपायचतुष्पद्यादि[4]संयुतम् ।
हेमरत्नचतुष्कस्थपानीयकलशीयुतम् ॥२७॥
रत्नज्योतिसमुद्भासिपृथुदर्पणमण्डलम्[5] ।
वेश्माभ्यन्तरवेश्मान्तज्वलत्सुस्थिरदीपकम् ।
सखीजनकृतान्वीक्षा[6]गवाक्षशतसंकुलम् ॥२८॥
तत्र गत्वा निजालोभिः कृताकल्पां निजां श्रियम् ।
रमयामास रामेन्दुर्नवस्मररतोत्सवे ॥२९॥
सख्यो जाम्बूनदीं मालां दत्त्वा सीताकराम्बुजे ।
रामस्य रोपयामासुः कण्ठे पुलकसुन्दरे ॥३०॥
तस्याः काञ्चीगुणग्रन्थिस्पर्शोत्कम्पिकरे प्रिये ।
सख्यस्तूर्णं विनिर्याताः शय्यामन्दिरतो बहिः ॥३१॥
तत्रैतयोः काकुवचःशताकुलं प्रभूतकन्दर्पशरोद्धुरं रतम् ॥
बभूव भूयो न न नेति कान्तया निवार्यमाणोद्धुरकान्तखेलितम् ॥३२॥
प्रियः परीरभ्य मनोरमां प्रियां स्तनद्वयामर्दनजातसंभ्रमाम् ।
चुचुम्ब बिम्बीफलकोमलेऽधरे रदव्रणारोपणजातवेदनाम् ॥३३॥
बलेन सा तस्य सुबाहुयन्त्रणां[7]निवार्य नीवीं प्रददौ करं हि सा ।
द्वितीयकेन प्रसभं च पाणिना सुदूरयामास युवानमद्भुतम् ॥३४॥
बली स तस्याश्चरणद्वयं जवान्निजांसमारोप्य मुखेन्दुमण्डलम् ।
चुचुम्ब सुस्निग्धकपोलभास्वरं वृतालकालीभ्रमरीशताकुलम् ॥३५॥

१. °वीटिकाम्—अयो०, बड़ो०। २. "संभोगे मल्लयुद्धं तस्यान्तेऽवसाने सुखदव्यजनं तेन युक्तं" टि०—मथु०। ३. °ङ्कितं—अयो०, मथु०। ४. "चतुष्पदी = चौपड़" टि०—मथु०। ५. मंडले—अयो०, मथु०, रीवाँ। ६. °न्वीक्ष्य°—अयो०, मथु०, रीवाँ। ७. यंत्रणं—बड़ो०।

हठात् समाकृष्य पदद्वयेन सा विव्याध वक्षस्थलमस्य कामिनः ।
ततोऽभवन्नूपुरकिङ्किणीरवः प्रसुप्तहंसौघवितीर्णसंभ्रमः ॥३६॥
रामश्च तन्नूपुरयुग्मशिञ्जितैः मनःप्रभूतद्विगुणस्मरार्दितः ।
रदैर्विनिष्पिष्य रदच्छदं पुनः संरम्भतस्तत्परिरम्भमाचरत् ॥३७॥
सा रामचन्द्रस्य भुजद्वयान्तरस्थितार्दिता वक्षसि तेन वक्षसा ।
चचाल नालिङ्गनसंगमोद्भवप्रमोदसंबन्धनिमीलितेक्षणा ॥३८॥
चुचुम्ब तस्याः स्फुटकोरकाकृती दृशोः [शौ ?] सकामी वदनं निभालयन् ।
तस्थौ पुनर्नीविगुणं पिधाय सा करद्वयेनोत्पुलकावलीतनुः ॥३९॥
स तत्करौ पङ्कजकोरकाकृती हठात् समुत्क्षिप्य बभञ्जनीविकाम् ।
तावत्तु सा चोरुयुगं सुवेष्टितं कृत्वा कराभ्यां च वराङ्गमप्यधात् ॥४०॥
स तन्नितम्बद्वितयं मनोरमं लिलेख[1] सूक्ष्मैः करजैः स्मरोद्धतः ।
समालभच्च स्तनकुड्मलद्वयं स्ववक्षसा दीर्यदुदारकञ्चुकम् ॥४१॥
विदीर्यमाणा कुचकञ्चुकी च सा चकार तत्र द्विगुणं श्रियं रतेः ।
स्तनौ सुवेशेन यथा विरासतुः प्रमत्तचक्राविव पद्मिनीदलात् ॥४२॥
उदीर्णभासोः स तयोरुरोजयोर्नखावलीं संनिचखान नायकः ।
स्फुटेन्द्रगोपापयवैः समाचितौ यथा लतायास्तवकौ विरेजतुः ॥४३॥
साप्यस्य वक्षस्थलमुद्धृतैर्नखैः पस्पर्श किंचित्स्मयदुर्मदेक्षणा ।
आवर्जयामास च दुर्लभत्वतः स्मरातुरस्यास्य हठेन वेगिताम् ॥४४॥
स उत्पतन्मन्मथवाणवेपितो मदोद्धतो बाहुबलेन यन्त्रयन् ।
चकार बालां मधुरांशुकच्युतां विस्पष्टदीव्यज्जघन[2]द्वयप्रभाम् ॥४५॥
विलोड्यमाना सुरते प्रियेण सा बभूव सुस्वेदकणान्तविग्रहा ।
तथाप्यमुञ्चत्त्रपया न कर्हिचिन्नितान्तसंशोभिमुखावकुण्ठनम् ॥४६॥
पिधाय योनिं करपद्मसंपुटे परस्परासक्तिसुसंगतोरुकाः[3] ।
अधःस्थिताप्युच्छलतिस्म तस्य सा समानलज्जामदनद्वयाकुला ॥४७॥
तां केनचिद्बन्धबलेन कामुको निबद्ध्य निर्मुच्य तदोरुबन्धनम् ।
आरोपयामास निजोरुयुग्मके वराङ्गसौलभ्यसुनिर्वृतेन्द्रियः ॥४८॥

---

१. लिखत्सु०—अयो०, मधु०, रीवाँ। २. °दिव्य°—अयो०, रीवाँ।
३. °त्सुका—अयो०, रीवाँ।

निजोरुसंस्थामबलां सुयन्त्रितां ततो निबन्धाच्चलितुं च नो क्षमाम् ।
ददर्श वक्त्रे परिचुम्बिताधरे पराङ्मुखी तावदभूज्जवेन सा ॥४९॥
तस्याः सुदीर्घामलकावलीं करे निगृह्य[1] तां संमुखमन्वकूलयन् ।
ततोऽपि सा संमुखवर्त्तिनी प्रिया निमीलिताक्षी न बभाण किंचन ॥५०॥
सामर्षसक्रोधसहर्षसत्रपसहाससोन्मादनसाश्रुलोचना ।
बभूव तूष्णीमवशा सुयन्त्रिता कृताधरस्पन्दलवानुमेयगीः ॥५१॥
ततोऽस्य वक्त्रं शनकैः प्रपश्यती बभाण बाला मृदुवल्गुभाषिता ।
अलं जवेन प्रिय मुञ्च मुञ्च मां न नेति संमर्दविलोलविग्रहा ॥५२॥
स भाष्यमाणोऽपि जवेन योनिं बभञ्ज तस्याः खलु दीनयाचितम् ।
हाहेति वक्त्रे करकुड्मलद्वयं प्रकुर्वती काकुशताकुला च सा ॥५३॥
हठेन तेन व्यथितेव कामिना ररञ्ज शय्यापि यथार्द्रयावकैः ।
कृतोद्धतां निर्दयसौरतक्रियां तत्याज मूर्च्छायितविग्रहां तु ताम् ॥५४॥
सखीजनस्तां प्रथमे रतोत्सवे बालां कथंचित्प्रतिलब्धचेतनाम् ।
संस्नापयामास[2] सुमङ्गलोदकैः विधानविद्भिर्निगमैः प्रबोधिताम् ॥५५॥
इत्थं निशायामतिलङ्घ्य चेतनां चकार रामः प्रियया रतोत्सवान्[3] ।
यावत्स शेते पुरुषो महोदधौ भुजङ्गराजे शयने सुषुप्तिभाक् ॥५६॥
तावच्च तस्य प्रसरन्ति सर्वतो निश्वासरूपा भुजगेन्द्रपालिताः ।
तौ कामिनौ निर्भरकामकेलिभिः संश्रान्तचित्तौ दधतुः स्वलीलाम् ॥५७॥
ततोल्वणा[4] नाम जवेन राक्षसा उत्पेतुरुग्रा बलवत्सहिंस्राः ॥५८॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे रामरासो नाम[5]
अष्टाविंशोऽध्यायः ॥२८॥

१. प्रगृह्य—बड़ो० । २. संस्थापया०—अयो०, मथु०, रीवाँ । ३. रतोत्सवम्—रीवाँ । ४. ततो०—रीवाँ । ५. रामरासे—अयो०, मथु०, रीवाँ, बडो० ।

एकोनत्रिंशोऽध्यायः

अथोत्पेतुः परितः प्रमोदवनमुल्वणा नाम राक्षसाः। सोदरकाः सायुधाः सकवचाः सुतीव्रमतयो मदोद्धतास्तामसा[1]स्तामसीन्त्रपराक्रमा उल्मुकहस्ता अभङ्गलास्तालशतसमुच्छ्रायवपुषो दुर्दर्शनाः प्रज्वलद्दवाग्निदृशो गिरिगण्डसमानांसाः[2] पृथुतरनासाविनिःसरच्छ्वाससभुत्कम्पितद्रुमान् समुन्मूलयन्तः पादविन्यासप्रचालितधरणीभागाः सरागानना: करालजटालकेशाः कृत्तिवाससो गणा इव विकटाटोपताण्डवप्रचण्डाः ॥१॥

तान् लक्ष्मणोऽभिवीक्ष्य[3] श्रीरामाज्ञापरायणस्तदाखिलकार्यप्रसाधनचतुरोऽक्षरब्रह्माकृतिः पुरुषोत्तमस्य द्वितीया मूर्त्तिश्चतुर्मूर्त्तोर्भगवतःसज्जीकृतधनुः सुतीक्ष्णविशिखधारासारैर्निवारितवांस्ते दृष्ट्वा शाद्वले चरन्तं रामधेनुकं संक्षोभयाञ्चक्रुस्ततोवीरः सधेनुकं प्रमोदवनाभ्यन्तरे प्रवेश्य तानापततः प्रचण्डैः काण्डैर्विव्याध[4] ॥२॥

ते विद्धा द्विगुणसंजातरुषो लक्ष्मणं विषममुशलसमूहैरवाकिरन्। स निजकाण्डवर्षेण मुशलान् द्विधाकरोत्। तेन द्विधाकृता[5] मुशला दूरादेव परावृत्ताः बभूवुः। कथंचन रविरिव पांसुप्रचयावकीर्णमारुताण्डवरान्मुशलदुर्दिनात् स्वरूपं प्रकाशयामास। ते पुनरपि तं राजकुमारमाच्छादयन् शक्तिवृन्दैः, संछिन्नः शक्तिवर्षेण मूर्छितो धरण्यां निपपात ॥३॥

ततो हाहाकृतं दिवि देवसैन्यं बभ्रामोवाच चाहो प्रभो लक्ष्मण कथं निर्विराज [ण्ण ?] इवासि संवृत्तः। संप्रति खलु त्वमेव गोधोरणीनायको नान्यमुपलभामहे। प्रभुस्तु योगनिद्रावशंवदोऽधुना शेते क्षीरोदार्णवे प्राणप्रदस्त्वमेवास्य सहजकेलीनां लीलोपधानीकृतसमुद्रतनयैकबाहोः सान्द्रतराश्लेषजपरस्परसुखानुभवरसिकस्य आदेशोऽसौ त्वां प्रमोदवनरक्षायै गवां पालनाय च महाविक्रमोर्जितमेकवीरं स्वानन्दविलाससाधनोपायम् ॥४॥

सखलु त्वं मैवं कार्षीः। भरतशत्रुघ्नावपि संप्रति क्वगताविति न प्रतीमो

---

१. 'तामसा' नास्ति—अयो०, मथु०, रीवाँ। २. °समानाः—अयो०। ३. °णो वीक्ष्य—अयो०, मथु०, रीवाँ। ४. विवाध्यते—अयो०, मथु०, रीवाँ। ५. द्विधास्ततो—बड़ो०।

यतस्त्वमेकाकी महोल्वणैरमीभिर्युद्ध्यसे। संस्मर संस्मर स्वात्मानं समुत्तिष्ठ सज्जीकृतधनुः कोटिराक्षसकुलहन्यवे सौमित्रेयेति ॥५॥

लक्ष्मणस्तत्क्षणे प्रविधूयाङ्गव्यथां निजमहिमसंस्मृतिसुधाराभिस्तूर्णमुत्थाय घोरतरनाराचधाराभिर्दुर्दिनैः समाच्छादितवान् राक्षसमहोदरान्। ते च प्रबलतरभुजगेन्द्रभोगोपमभुजदण्डकुण्डलीकृतकोदण्डनिर्गलत्काण्डाग्रसंछिन्नशिरसो निपेतुः परितः प्रमोदवनम्। तेषां पततां शरीराणि धरणीं कामयामासुस्समभूच्चारवोवज्रनिर्घातघोरः। केचिच्च पलायमानाः क्ष्मां समाकम्पयन्, तेषां पलायमानानां चरणविन्याससंरम्भेण व्यशीर्यन्त भूमिभागाः। एवं निर्दलिताखिलविपक्षसैन्यो महावीरो धनुः प्रतिसंहृत्य गवां धोरणीमपालयत्। तावत् सुखं शेते जानकीकण्ठपाणिः सकललोकेश्वरः श्रीरामः ॥६॥

अथ यामार्धावशिष्टायां रजन्यां प्रभोः प्रबोधनाय वैतालिकवरवेशधारिणो वेदा विद्याधरीवेशधारिण्यश्च महोपनिषद उत्थानकमगायन् ॥७॥

वेदा ऊचुः

जय जय निजजनकरुणां कुरु कञ्जदलनयन[1] स्वयमेवोज्जृम्भमाणा[2]खिलसौभाग्यसदन जड़जीवात्मनां परिणममानस्य तेन तदीयैर्धर्मैः संबन्धः सपदि तदात्मनैव दृश्योऽसि ॥८॥

वयुनं[3] नामैव ते येन परमहंसोऽपि त्वामखिलगुणातीतमहिमानं वेद स्वे महिमनि प्रतिष्ठिततमम् ॥९॥

न खलु त्वमाधेयो[4]* निरपेक्षवृत्तेस्तवैतत्परं पदं यत् सूरयो धिया पश्यन्ति, यत्र काञ्चनी रत्नोपलघटिता भूर्यत्रैरम्मदीयं नाम सरो यत्र स्वानन्दं संविदेव वापी यत्र स्वात्मानन्दप्रसाद एव प्रासादः सबहुविध[5]-भोगसमुचितशिखराग्रनिषण्णसत्त्वात्मकचित्तसमाक्रान्तो यत्र त्वमेवाधिराजो विजयसे ॥१०॥

---

१. करुणांकुर [रु—अयो०, रीवाँ] कन्ददलसनयन—अयो०, मधु०, रीवाँ। २. °वोपजृम्भ०—अयो०, रीवाँ। ३. "त्वं दृश्यः एतदैव त्वद्विषयकं वयुनं ज्ञानं नाम येन ज्ञानेन" टि०—मधु०। ४. समाधेयो—बड़ो०। * इतः परं पञ्चचत्वारिंशाध्यायं यावत् (६०–१०१ पत्राणि) खण्डितोंऽशः मथुरा पुस्तके। ५. °विधि° —अयो०।

अथ दुस्तर्ककलितकलुषीकृतान्तःकरणानामेष लोको दुर्विभावनोऽन्तःसाधनशतं प्रयुञ्जानैरेव ते भवितव्यं मनोमयः प्राणवपुः प्रभारूपः सर्वकामः सर्वगन्धः सर्वरसः स एषोऽ[1]णुरात्मा चेतसा वेदितव्योऽयं तव लोकः सच्चिदानन्दघनो बाह्याभ्यन्तरो न तं कश्चन वेद तव चरणपरागपूतात्मानमृते ॥११॥

जय जय सदेकस्वरूप कलात्मक कालकलनातिग चिदेकप्रतिष्ठितनिखिलप्रपञ्चरचनैकाश्रय वाङ्मनसागोचर स्वानन्दसिन्धुलहरीगणसंनिमग्न[2]निजान्तरानन्दिनीसहजालक्ष्मीपराम्बासंवलित नित्यनिकेतन निरवधिक्रीडार्थं विकल्पमानमिदं विश्वं तद्विशेषमेव विकृतिरपि त्वत्प्रकृतिरेवेति भेदेनापि मनोवाक् त्वामेवावलम्बते[3] यथा नद्यः स्यन्दमानाः[4] समुद्रमेवाभिसंविशन्ति[5] तथैतानि नामानि सर्वाणि पुरुषं त्वामभिसंविशन्ति ॥१२॥

अथेमे विद्वांसः कायवाक्चित्तमलनिर्वर्हणीत्वत्कथामृतधारान्तःकृतावभृथाः कायक्लेशकराणि तपांसि समापयन्ति। ये पुनः सतत एव सुखानुभवनिकेतनं त्वत्पदद्वयं भजमानाः शुद्धात्मस्वरूपस्फुरणेनान्तःकरणं कालप्रभावं सत्वादींश्च निर्जितवन्तः कुतः क्लेशकर्माण्यवरज्येयुः[6] ॥१३॥

यदेतदानन्दमयं यदेतदन्नमयादि च तस्यापि पुच्छप्रतिष्ठा च त्वं तव पृथिवी शरीरमात्मा शरीरमव्यक्तं शरीरमक्षरं शरीरं त्वं सर्वान्तरात्मापहतपाप्मा दिव्यो देव एको रामचन्द्रः ॥१४॥

अथेमे शार्कराक्षा मणिपूरकस्थं ब्रह्मोपासते। सदेकशतनाडीस्थानं ते तदनेनैव[7] वर्त्मना त्वामेत्य न पुनर्दुःखालयमभिसंविशन्ति सोऽसि त्वमेको देवः सर्वभूतेषु स्थानेषु गूढः ॥१५॥

अथामूष्वभिव्यक्तिस्थानेषु संश्चकास्ति सोऽसि त्वं प्रतिहतरजस्तमोविसरः शुद्धसत्त्वैकवपुः स्वकर्मोपार्जितनानापुरेशः कार्यकारणासंवृत्तनिखिलांशाखिलशक्तिपरिवृढः कपीनां नैगमोक्तीनामावपनमसि[8] ॥१६॥

---

१. सर्वरस एवोऽणु—अयो०, रीवाँ। २. °गणनिमग्न°—बड़ो०। ३. विलम्बते—रीवाँ, बड़ो०। ४. नदी स्पन्दमाना—रीवाँ, बड़ो०। ५. संविशति—बड़ो०। ६. °कर्मावरेजुः—रीवाँ। °कर्माचरेयुः—बड़ो०। ७. तदेतेनैव—बड़ो०। ८. आवपनं = 'उत्पत्तिस्थानं' टि०—बड़ो०।

अथातिदुर्लभतरस्वतत्त्वप्रकाशनैकान्ततनौ विचित्रलीलारसामृताकूपारे त्वयि मग्ना मत्तासो जनासः किमिति मुक्ति लवणोदरसदनेशतुल्यां स्पृहयेयुर्यत इमे पारमहंस्यव्रते स्थिताः पदपङ्कजपरागविचित्रितवपुषस्तन्निर्गलन्मकरन्दधारास्वादनिर्वृताः सततमेव विजयन्ते ॥१७॥

अथास्मिंस्त्वत्सेवौपयिके कुलाये परमात्मैकसखायो वत ये न भजन्ति त उरुतरभीतिमहावर्त्ते भवे भ्रमन्त एव तिष्ठन्ति ॥१८॥

अथ ये मनोऽक्षगणं[1] संयम्य दृढभूमिना योगेन हृदि निरुध्य परं तत्त्वं समुपासते त्वद्भावमचिरेणापि यन्ति द्विषन्तोऽपि ते चरणयोः सायुज्यमीयुः प्रमेयबलमदः कतमः स्तोतुं क्षमो भवति ॥१९॥

अथ भगवन् को नु त्वां जानीयादर्वाक् समस्तदैवतप्रसरं यतो साधुधियामखिलजगदादिभूतमृषिमनुजज्ञिरे आध्यात्मिका आधिदैविकाश्च ।२०।

अथ त्वय्यखिलसाम्राज्यसुखाधिकसुखे रसात्मकविग्रहे समधिगते किममीभिः पुत्रापत्यकलत्रादिभिः कुतर्कैः सुदुर्भगैरिति व्यवस्य प्राचीना महाश्लोका महाश्रोत्रा महाशीलाः सर्वं परिहृतवन्तस्त्वयि च रतिं कृतवन्तस्त एवेदं भवात्मकं व्यसनं तीर्णवन्तः ॥२१॥

अथेदं विश्वं सदेव सदुपादानकत्वादितिहेतूपन्यासहतधियां दहनादिभ्य उत्पन्ना प्रभापि दाहिका किं न भवेदिति रघुकुलोत्तंसस्त्वमेव सत्त्वमेव सदिति मन्महे ॥२२॥

अथ यथा भुजगः स्वगतमपि कञ्चुकं गुणबुद्ध्या नाभिमन्यते तथा त्वमजां नहि निरन्तराह्लादिसंवित्कामधेनुवृन्दपतेरजया तव किंचित् कृत्यमस्ति प्रभोः ॥२३॥

अथ यदि भवान् स्वलिङ्गमुपसंहृत्य कार्यं प्रति दृष्टिं मीलयति तदानुशायिनां ज्ञानसाधनं नास्ति न वा स्थूलं न सूक्ष्मं न चोभयम् ॥२४॥

अथास्यासतः प्रपञ्चस्य न जन्म घटते सतो वा दुःखादेर्न नाश आत्मनि भिदावकल्पते कर्म च न संभवति सेयं च नाम तव दृष्टिस्त्वय्येव बोधैकस्वभावे योऽयमबोधनिबन्धनो जीवः सोऽपि भिदया नैव वक्तुमर्हत् सद्विषयत्वाश्रयत्वयोरभावात्त्वयि ॥२५॥

---

१. अक्षगणं = 'इन्द्रियसमुदायं' टि०—बड़ो० ।

अथत्वय्यवर्तमानमपि मनो वर्त [मान ?] मिव भातु ये तु त्वद्वेदितारस्ते इदमशेषं त्वद्रूपतयेवाभिमृषन्ति नहि कनकमात्रदृशां कुण्डलादिकमवभासते ॥२६॥

अथ त्वं स्वत एव व्यावृत्तकार्यकारणाद्युपाधिः सकलकारकशक्त्युपेतः[1] स्वरूपशक्त्यैव राजसे मायया सह तदधीनैरपीड्यमानः ॥२७॥

अथ यदि नित्यलीलस्य ते मायया सह विकृतिर्भवेत् ततः स्थावरा जङ्गमाश्च नानाकृतयो जीवा भवेयुः । सेयमीक्षैव तव परमकारुणिकस्य व्योम्न इव स्वपरभिदा शून्यस्य ॥२८॥

अथ त्वं व्यापको नियन्ता सेव्य एवामी त्वणवो[2] व्याप्या नियम्याः सेवका एव त्वदुपलब्धाखिलवैभवभाजो नान्यथा प्रतिपत्तव्या क्षुद्रविस्फुलिङ्गा इव नाग्निकूटस्य तुलामधिरोहसि ॥२९॥

अथ प्रकृतिपुरुषयोरुभयोरप्यजत्वान्न संबन्धो घटनामेति येनाध्यात्मिकरूपाः सोपाधयो जीवा जायन्ते ततः प्रकृतिविकारप्रलयेन सुप्तवासनत्वाच्छु[3]द्धास्ताः परमात्मनि जीवाख्या शक्तयः सृष्टिसमये विकारिणीं प्रकृतिमासज्य क्षुभितवासनाः सत्यः सोपाधिकावस्थां प्राप्नुवन्त्येत्युच्चरन्ति सोऽयमचिन्त्यस्तवैव महिमा विजयतेतरां रघुवरशार्दूलस्य ।३०।

अथासौ हेतिरपि त्वद्भ्रूभङ्गमात्रनियुक्तः सर्वाण्येव वशयितुं शक्तो विहाय त्वद्भजनामृतधाराशीतलमनसो भक्ताख्यान् परमहंसान् ॥३१॥

अथ कोटिसमीररोधव्यग्रात्मानो न मनो रोद्धुं शक्ताः बहुभिः प्रत्यूहैर्हन्यन्त एव विना भवच्चरणनिदेशकदेशिकम् ॥ ॐ ॥३२॥

इत्यभिष्टूयोपरतेषु वेदपुरुषेषु स्तम्भस्वेदादिविविधभावाकुलिताः स्खलद्गिरः सगद्गदाः पुलकविसरकदम्बायिततनवो बहुतरप्रेमाधौतकुचकुम्भकुङ्कुमाः खिद्यमाना इव भूयसा विप्रलम्भेन महोपनिषदो निर्भरसुरतश्रमशयानयोर्दम्पत्योर्युगलमस्तौषुः ॥३३॥

---

१. कारकपाद्यसत्सुपेतः—रीवाँ, पाद्यत्सुपेतः—बड़ो० । २. त्वया—रीवाँ, बड़ो० । ३. सत्यवासन°—बड़ो० ।

महोपनिषद ऊचुः

जय जय कान्तकेलीरसनिमग्नमनसोः कोटिरतिकन्दर्परूपलावण्यमुखयोः स्वाराज्यसुखसाम्राज्यसंपदाविष्करणवतो[1] रवहेलितवृन्दावनेश्वरीश्रीमद्वृषभानुजाश्रीमद्व्रजेन्द्रनन्दनरसयोर्गोलोकादुपरितनसहजचिल्लोकविलासस्वामिनोः स्वरूपशक्तिमात्राविर्भावितसखिसखीदूतिदूतविटचेटकादिसहायबललब्धकोककला[2]लावण्ययोः श्रीमज्जनकनन्दिनीरघुकुलयोर्युगलाय नमः ॥३४॥

अथ युवाभ्यां दम्पतीभ्यां क्षन्तव्यो नो वैयात्यमदो यत् सुरतान्त—[3]विवसनयोः पुरुषायितविपर्यस्तभूषणवसननयनाञ्जनादिविविधाकल्पयोः परस्परकण्ठाश्लेषप्रभूतद्विगुणितसंक्षुब्धमनोभूपरवशयोः परस्परोन्मर्द्दक्षुभितवक्षसोः पुलकाञ्चितयोरधरबिम्बस्य सुधापानपरायणयोरीदृशनिस्त्रपयोर्युवयोः समीपं भजामहे नर्मसख्य इव निकुञ्जकेलीभवनद्वारोद्घाटनलब्धानन्दकदम्बाः ॥३५॥

अहो क्व वयं[4] बहुतरकर्मठकुलवञ्चितचित्ता अनेकयोगिज्ञानिगुरुजनकृतप्रत्यूहाः कुलाङ्गना इव गुरुलज्जावरुद्धप्रियदर्शनस्पर्शनमुखामृतविधुरा[5] लज्जयैव व्यतीततारुण्याः क्व च तव चेदं महोच्छृङ्खलममेयदिव्यरूपलावण्यवारिधिप्रसरणं सतत[6]प्रियाभ्यामेव समासादिता प्रेम्णः पुरुषस्येव सीमा ॥३६॥

अहो अलौकिकत्वं केलीनां यद्विरञ्चिवराकस्य प्रावीण्यमतिवर्तन्ते।३७।

अहो विचित्रता शोभातिशयस्य यन्निर्भररजनीरङ्गरसिकाभ्यां पूर्णीकृत्य निपीतोऽप्यनुक्षणं वर्धमान एवाविर्भविष्णुः ॥३८॥

अहो युवाभ्यामेव पूजितः परस्परालापपरिरम्भणचुम्बननखरददानमन्दस्मितोन्मर्दनादिभिर्मन्दारकल्पद्रुमकुसुमसमूहैः केलीमनोरथकामतरुः कामदेवः। वत वत कथमप्यसुलभाय मनोमोहैककन्दाय सहजानन्दाय नमो युवयोः सुरताय ॥३९॥

---

१. संपदादिकरण०—बड़ो०। २. कोककलाप०—अयो०, रीवाँ। ३. सुदीप्तविवसनयोः—बड़ो०। ४. क्वहन्त—अयो०, बड़ो०। ५. °दर्शनरसा ननु स्वामृतविधुरा—बड़ो०। ६. प्रसरणं हन्त—अयो०, प्रसररसत°—बड़ो०।

अहो वयं त्रिगुणप्रवाहमार्गपतिताः किं प्राप्स्याम इमां गुणातीतां सच्चिदानन्दैकरसमयीं सहजानन्दिनीरघूत्तमयोः केलिकलामवलोकितुमपि किं नाधिक्रियामहे दैववञ्चिताः ॥४०॥

अथ यद्यमुयोश्चिल्लोकस्वामिनोः सच्चिदानन्दरसदम्पत्योस्तल्पान्तभूमिकाभाजोः बहुकोटिजन्मार्जितसुकृतोद्भूतभाग्या एव वयं[1] तर्हि नातिचिरादेवाभ्यां नित्यनिजविहारस्य भाजनतां प्राप्स्यामहे श्यामा रामा ललिता विशाखा[2] रङ्गविद्या पूर्णमासी चम्पकलता दया नित्यसिद्धा इव वयमपि कोटिजन्मसाधनसिद्धाः ॥४१॥

इत्यभिलाषपूर्वकमभिलष्य ताः सर्वमहोपनिषदोऽतिशयितगुणवर्णनप्राप्तजडिमानस्तूष्णीं बभूवुः ॥४२॥

अथाविरासीच्च निकुञ्जमन्दिरे
जालान्तरप्राप्तनिजावकाशः ।
सूर्यांशुदण्डप्रकरोऽतिकोमलः
प्रोत्फुल्लशोणाम्बुजगर्भबन्धुः ॥४२॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे रामरासोनाम[3]
एकोनत्रिंशोऽध्यायः ॥२९॥

❁

त्रिंशोऽध्यायः

ब्रह्मोवाच

प्रातरौत्थानिकं गीतमिदमाकर्ण्य दम्पती ।
प्रबोधमीयतुस्तूर्णं सुरतोत्थश्रमालसौ ॥ १ ॥
ताम्बूलवीटिकास्वादरञ्जिताधरसुन्दरौ ।
क्वचित्क्वचिन्नखाङ्कालिलिखितोल्लासिविग्रहौ ॥ २ ॥

---

१. एषपर्व—बड़ो० । २. विषमा—बड़ो० । ३. रामरासे—अयो०, रीवाँ, बड़ो० ।

निर्भरस्मरसंमर्दमृदितावयवोद्धुरौ ।
लम्बमानालकस्तोमभ्रमरीमुखपङ्कजौ ॥ ३ ॥
निद्राव[1]शेषसंवीतपतत्पक्ष्मणलोचनौ ।
रजनीसुखसंस्मारस्मयमानमुखाम्बुजौ ॥ ४ ॥
परार्द्धरतिकन्दर्पशोभानिर्मन्थनोचितौ ।
अन्योन्यगण्डफलकप्रतिबिम्बायताननौ ॥ ५ ॥
प्रातरारक्तसूर्यांशुभेदसंकुचदीक्षणौ[2] ।
अन्योन्यविस्फुरद्भूषाङ्कितकण्ठादिविग्रहौ ॥ ६ ॥
स्मरसंमर्दसंक्षोभविपर्यस्तधृताम्बरौ ।
अन्योन्यप्रतिबिम्बाङ्कस्फुरद्दर्पणमन्दिरौ ॥ ७ ॥
कामपूजालब्धरसप्रमादप्रसराविव ।
सहजानन्दिनीसीताश्रीमद्रघुवराभिधौ ॥ ८ ॥
ततो विधाय माङ्गल्यमारात्रिकमनुत्तमम् ।
सखीभिः कृतसंस्कारौ रेजतुर्दम्पती मिथः ॥ ९ ॥
प्रातराशादिकानेकसपर्यासाधनोत्सुकौ ।
सखीगणैः सेव्यमानौ सीतारामौ विरेजतुः ॥१०॥
एवं विहरतोः कोटिकल्पान् प्राप्य क्षणानिव[3] ।
बलकृष्णादयस्तत्रावतारा: कोटिशो ययुः ॥११॥
एकदा सुखमासीनौ सीतारामौ कृतोत्सवौ ।
ता एव दूतिका एत्य प्रोचुर्वचनमादरात् ॥१२॥

दूत्य ऊचुः

अहो प्रियौ वां स्वसुखैकनिर्वृतौ
कच्चित्[4]परस्यापि सुखानि जानथः ।
योऽयं जनः क्लिश्यति कोटिकल्पतो
धृतव्रतो वा कृत आतुरान्तरः ॥१३॥

---

१. निद्रया—रीवाँ, बड़ो० । २. °दक्षिणौ—बड़ो० । ३. च—बड़ो० । ४. क्वचित्—बड़ो० ।

उदारपाणिस्तु स एव गण्यते
योऽन्यस्य दत्ते स्वयमापदं दधत् ।
अथो विभज्यैव वनक्ति यो[1] जनो
न सोऽपि मर्त्यः कृपणान्तरात्मवत् ॥१४॥
इमां समासाद्य निजार्थकोविदां
कथं नु जातो रघुसत्तमाधुना ।
सवं पुनर्विस्मृतवानसि प्रभो
कमाश्रयिष्यन्त्यबलाजनास्तव ॥१॥
अद्य स्मरस्यद्भुतदानमात्मनः
प्रमोदवल्लीविपिने वर्तितुं यत् ।
तर्हि कृतस्त्रीनिवहोऽयमीदृशो[2]
विपत्तिमासादयतीति गर्हितः ॥१६॥
इयं तु सद्वंशभवा भवन्मुखे
लग्नेति लोकस्य महोत्सवोऽभवत् ।
अथान्तराछिन्न[3]गणे विलोक्य स
व्यमुञ्चदासां निजसौख्यहैतवे ॥१७॥
तथापि ते राघववर्य नोचितं
मनो निजानां विषये यदीदृशम् ।
समस्य सर्वोद्धरणक्षमस्य च
प्रपत्तिमात्रेण वरोद्धुरस्य ते ॥१८॥
तासां वताभीरमृगीदृशां कृते
कियन्न पूर्वं विनिवेदितोऽसि भोः ।
तथापि किं ते करणीयमस्ति तन्न
विद्महे स्वैरगतं रघूद्वह ॥११॥
अमूः समाराध्य भृशं सहस्रशः
सदैवताग्र्यं भवतोर्युगं प्रियौ ।
अद्यापि न प्राप्तमनोरथाः कथं
पुरा चिरं दत्तवरा वराङ्गनाः ॥२०॥

---

१. भुवमक्रियो—अयो० । २. ईदृशीं—बड़ो० । ३. °छिद्य°—अयो० ।

इति तासां वदन्तीनां दूतिकानां पुरःस्थिता[1] ।
शनैः श्रीरामरमणी तत्रैवान्तरधीयत ॥२१॥
अयं खलु मदन्यासु संसक्तो धूर्तपुङ्गवः ।
यासां दूत्यमुपानिन्युः सहस्रं दूतिकाजनाः ॥२२॥
इति मानापदेशेन तासामाराधनक्रियाम् ।
जानकी सफलीकर्त्तुं भक्तिरूपा व्यवर्तत ॥२३॥
यदि मर्यादया रामो भक्तानुद्धर्त्तुमिच्छति ।
ज्ञानभक्तिस्वरूपेण तदा सीता विवर्धते ॥२४॥
यदा संत्यज्य मर्यादां स भक्तानुद्विधीर्षति ।
प्रेमभक्तिस्वरूपेण तदा सीतापि दृश्यते ॥२५॥
अन्यदेवमतं ज्ञानमन्यच्च प्रेमलक्षणम् ।
द्वयोरैक्यमिहैवास्ति श्रीरामे फलरूपिणि ॥२६॥
साङ्ख्यस्य योगतपसोर्ज्ञानविज्ञानयोस्तथा ।
परेण ब्रह्मणा कोऽपि संबन्धो घटते नहि ॥२७॥
अयमेव च संबन्धो यः प्रेमाख्य उदाहृतः ।
स एव भक्तिशब्दार्थोऽन्यः स्यादौपचारिकः ॥२८॥
भजन्ते यन्निमित्तेन लक्ष्मीनां कोटयः प्रियम् ।
सा सीता किं भवेल्लक्ष्मीर्नित्यश्रीविग्रहात्मिका ॥२९॥
नित्या तदंशरूपैव राधा वृन्दावनेश्वरी ।
नो चेत् कथं श्रीकृष्णस्य लुठेच्चरणपद्मयोः ॥३०॥
एवं भक्तिस्वरूपेयं सीता राधादिरूपिणी ।
श्रीस्तदाराधनायुक्ता कथं तत्त्वेन गम्यताम् ॥३१॥
प्रिया सत्त्वेऽप्यसत्त्वे च नित्यं सा सुस्थिता प्रभौ ।
ऐकान्तिकी सा विज्ञेया छायेवावयवाश्रया ॥३२॥
न तां विना क्वचिद्रामो दृश्यते भक्तिसंयुतैः ।
दृश्यते चेत् स एवैषा सा सुरोभावहारिता[2] ॥३३॥

---

१. वरस्थिता—रीवाँ, बड़ो० । २. °हारितः—अयो० ।

अथवा विप्रलम्भस्य रसस्यातिभवाय सः ।
तादृशो भाव्यते भक्तैः स्वेच्छाकृतवियोजनः ॥३४॥

अधुना तु व्रजस्त्रीणामाराधनफलात्मिका ।
तास्वाविश्य प्रसन्नात्मा रंस्यते स्वामिना सह ॥३५॥

आविश्य च तथा स्वामिन्यानन्दमयविग्रहम् ।
रंस्यते व्रजवामाभि[1]र्भूत्वा श्रीरामविग्रहा ॥३६॥

द्वात्रिंशच्च सहस्राणि मुख्या व्रजमृगोदृशः ।
तासां षोडशसाहस्रं स्त्रियो मुख्यतराः स्मृताः ॥३७॥

षोडशैव स्युराभीर्यो यासां वै मुख्यसंज्ञिताः ।
दश तासां मुख्यतमा यथावदवधारय ॥३८॥

रासचन्द्रा प्रभा श्यामा कला चन्द्रकला तथा ।
रङ्गविद्या चम्पलता चपला माधवी रमा ॥३९॥

तासां मध्ये मुख्यतमं द्वितयं[2] परिकीर्तितम् ।
यत्राविश्य स्वयं सीता मोदिनीशक्तिरीर्यते ॥४०॥

वृन्दावने ययोरंशौ राधाकृष्णेतिकीर्तितौ ।
अभूदथान्तराविष्टा सहजानन्दिनी प्रिया ॥४१॥

ततो द्विगुणया कान्त्या रेजे श्रीरामचन्द्रमाः ।
अन्तर्हितायां सीतायां द्विगुणो द्योतवानपि ॥४२॥

तां कामयानोऽतिशयाद्बभूव स्मरपीडितः ।
स्मरमार्गणजां पीडां बिभ्रद् दूतीरुवाच सः ॥४३॥

व्रजत स्वामिनीः स्वाः स्वाः संपन्नो वो मनोरथः ।
ता आनयत रात्रीषु ज्योत्स्नोपेतासु[3] दूतिकाः ॥४४॥

रंस्यामि ताभिः कान्ताभिः समेताभिः सहस्रशः ।
मत्तः कश्चिन्न भविता तासां वै विफलोचकः ॥४५॥

---

१. °रामाभिर्—बड़ो० । २. द्वितीयं—अयो०, ३. ज्योत्स्नीभूतासु—अयो० ।

सहजानन्दिनीं शक्तिं तास्वारोप्य रमाम्यहम् ।
इत्युक्त्वा भगवान् रामः सच्चिदानन्दविग्रहः ॥४६॥
दूतीर्विसर्जयामास सर्वाः प्राप्तमनोरथाः ॥४७॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे
त्रिंशोऽध्यायः ॥३०॥

●

एकत्रिंशोऽध्यायः

रामो हि वीक्ष्य शरदागमफुल्लमल्ली-
वल्लीवनावृतमहीरुह[1]शोभिकुञ्जाः ।
ता यामिनीः समदकामिजनावकीर्णा
रन्तुं चिदेकरमणो हि मनश्चकार ॥ १ ॥
स्वां योगशक्तिमवलम्ब्य कृतप्रयत्न-
स्तत्तत्पदार्थविभवं सफलं चिकीर्षुः ।
सच्चित्सुखानुभवरूपरसात्मकोऽपि
चिल्लोकवासिसुखदोऽनुचकार लीलाः ॥ २ ॥
पूर्णस्तदा परिदृढोऽभ्युदगादुडूनां
नाथः स तन्मनस इत्यवदंश्च वेदाः ।
प्राचीदिशो मुखविलिप्तसकुङ्कुमश्री-
दीर्घाः शुचोऽपि विमृजन् भुवि वर्षणीनाम्[2] ॥ ३ ॥
दृष्ट्वा प्रभुः कुमुदबन्धुमखण्डबिम्बं
लक्ष्मीमुखाकृतिधरं नवकुङ्कुमाक्तम् ।
भूयः प्रमोदवनमस्य कलानुरक्तं
रामो जगौ कलपदं सुदृशां मनोज्ञम् ॥ ४ ॥

---

१. °वनामृतमहीरिह—अयो०, रीवाँ । २. चर्षणीनां—अयो०, रीवाँ ।

आकर्ण्य तन्मुरलिकानुरवं मनोऽभूत्
प्रोत्साहवर्द्धनकरं व्रजवामनेत्राः ।
श्रीरामचन्द्रकरमुष्टिनिबद्धचित्ता-
दोयुः[1] प्रमोदवनमस्ति स यत्र कामी ॥ ५ ॥

कामोद्धता जवविलोलकबर्युदार-
केयूरहारमणिकुण्डलमास्यभूषाः ।
नद्यो यथा बलविदारितदोर्घशैला-
स्ता लोकवेदपथलङ्घनपूरिताशाः ॥ ६ ॥

काश्चिद् दुहन्त्य उदिताः[2] परिमुक्तदोहाः
काश्चित् पचन्त्य इनतोऽनवतीर्य पाकम् ।
काश्चित् पतिप्रियसुतान् परिवेषयन्त्यः
काश्चिच्छिशूनथ मुदा परिपालयन्त्यः ॥ ७ ॥

शुश्रूषयन्त्य इतरा पतिनामभाजोऽ-
इनन्त्यश्च काश्चन जवेन विहाय तत्तत् ।
काश्चित्तनौ घुसृणलेपनमाचरन्त्यः
काश्चिन्मृजन्त्य इतरा दृशमञ्जयन्त्यः ॥ ८ ॥

व्यत्यस्तक्लृप्तवसनाभरणाश्च काश्चिद्-
रामान्तिकं ययुरनङ्गशरौघविद्धाः ।
ता वार्यमाणवपुषः पतिभिः सुहृद्भि-
र्मित्रैः सहोदरजनैः खलु बन्धुभिश्च ॥ ९ ॥

श्रीरामवेणुनिनदापहृतान्तरास्ताः
प्रेमैकमोहिहृदया नितरां निवृत्ताः ।
काश्चिद् गृहान्तरगता अनवाप्तयाना
रामं निदध्युरुरुभावनिमीलिताक्षाः ॥१०॥

भूयः सुदुःसहवियोगजतापतप्ता
ध्यानावक्लृप्तपरिरम्भसुखाब्धिमग्नाः ।

---

१. दीप्र०—बड़ो० । २. क्वचिद्...उदितौ—अयो० ।

साक्षात् तमेव परमात्मसुखानुभूतिं
जारेतिभावनजुषोऽपि निवृत्तबन्धाः ॥११॥
हित्वा गुणव्यतिकरात्मकमर्त्यदेहं
प्रापुः प्रमेयबलतो यतिनामलभ्यम् ।
ताः कामिनोर्निशि वने विजने समीप-
मभ्यागताः स्मरशरार्तहृदोऽपि वीक्ष्यः ॥१२॥
ईशः पराशयविदप्यमलेन वाचां
वृन्देन मोहमतुलं जनयन्नुवाच ॥

श्रीराम उवाच

सुस्वागतं व इह दारशिरोमणीनां
मत्तः किमीप्सितमिति ब्रुवतानुरक्ताः ॥१३॥
कश्चिद्व्रजेषु पशुपालनिकेतनेषु
वर्वर्त्ति वार्त्तमभितो सदुपाश्रयेषु ।
तद्व्रूत यद्विसमये यदिहाभ्युपेता
मत्सन्निधौ कुलबधूजनशङ्कनीये ॥१४॥
सौन्दर्यवांश्च तरुणश्च सुविग्रहोऽहं[1]
किं वः प्रभूतवनविश्वसनक्रियार्हः ।
एषा निशा भयकरा भयदातिसंख्य-
सत्त्वाङ्किता शशिकरैर्विशदीकृतात्मा ॥१५॥
गोष्ठं प्रति व्रजत नेह च वर्तितव्यं
स्त्रीभिः परिस्फुरदुरोजभरालसाभिः ।
युष्माकमाप्तसुहृदाः पितृमातृपुत्र—
भ्रातृप्रियप्रमुखबन्धुगणा विमृग्याः ॥१६॥
अप्राप्य वश्च कुलिता[2] भवितार एव
तन्मा कुरुध्वमियतीमतिवृत्तिमुच्चैः ।
दृष्टं प्रमोदवनमृत्वधिराजजुष्टं
पूर्णं निशाकरकरप्रकरावकीर्णम् ॥१७॥

---

१. °विग्रहश्चसोहं—अयो०, रीवाँ, बड़ो० । २. तामकलिता—अयो० ।

नित्योत्तरङ्गसरयूसलिलानिलौघ-
व्यालोलवृज्जतरुपल्लवराजिशोभि ।
तस्माद् व्रजं व्रजत मा चिरमत्र साध्व्यः
शुश्रूषत प्रियतमान् बहुमानपूर्णम् ॥१८॥
क्रन्दन्ति वत्सनिवहाः शिशवश्च वस्तान्[1]
स्तन्यान्निदध्वमनुदुह्यत धैनुकानि ।
मत्स्नेहपाशविनिबद्धहृदो भवत्यः
प्राप्तास्तदेतदुपपन्नतरं समन्तात् ॥१९॥
प्रीयन्त एवमपि केऽपि जना विशेषा
येषामहं स्वजनबन्धुधनादिभूमा ।
यद्भूर्तृसेवनमकैतवतः[2] स्वधर्मः[3]
स्त्रीणामिति प्रसभमाह च वैदिकोर्गीः ॥२०॥
तत्किं प्रबोध्यमितराननुवृत्तिसाध्यं
युष्मासु साहजिकधर्मधिया सतीषु ।
शीलोर्ज्जितोऽपि भगलेशविवर्जितोऽपि
वृद्धोऽपि जातजडिमोऽपि सदामयोऽपि ॥२१॥
श्रीनिर्गतोऽपि पतिरेव परायणं स्यात्
स्त्रीणामिति प्रकथनं भवतीषु किं स्यात् ।
स्वर्गापवर्गकुशलप्रतिकूलभूतं
पूर्वप्रभूतयशसोऽपि विलोपकं च ॥२२॥
दुःसाध्यमस्थिरमतीव भयावहं च
निन्द्यं च जारसुरतं कुलकामिनीनाम् ।
भावो मयि श्रवणकीर्तनचिन्तनाद्यै-
रन्यत्र दर्शनमपि प्रकटं भवेन्नः ॥२३॥
किं सन्निकर्षमितरे भुवने लभेयुः
पूर्वार्जितैः सुकृतकोटिभिरभ्युपेताः ।

---

१. वत्सान्—अयो० । २. °ताः स्वधर्मः—अयो० । ३. °तुः स्वधर्मः—रीवाँ ।

तद्यूयमक्षिभिरिदं मम रूपमुच्चै-
र्दृष्ट्वार्पितप्रणयपर्वतभारखिन्नाः ॥२४॥
मोहात् प्रयात मदनुस्मरणेन तृप्ना-
स्तत्रैव वः सुफलमेष्यति गेहधर्मः ।
इत्यप्रियं निजमनोरथविघ्नभूत-
माकर्ण्य भूपतिकुमारवचोऽप्रमेयम् ॥२५॥
खिन्नप्रभावमनसोऽतिवियोगतप्ना-
श्चिन्तामवापुरुपजात[1]महार्तिमोहाः ।
वक्त्राण्यवाञ्चि बहुदुःखभरानुविद्ध-
श्वासानुशुष्यदधराणि विधाय बध्वः ॥२६॥
अङ्गुष्ठसाग्रचरणेन भुवं लिखन्त्यो
वाष्पैः सकज्जलकणैः कुचलेपमार्गाः ।
तूष्णीं बभूवुरथ तन्नयने विमृज्य
भूयिष्ठरोचनभरोपहते मृगाक्ष्यः ॥२७॥
रामं तदर्थविनिवर्त्तितलोकवेदाः
प्रोचुः सगद्गदगिरः प्रसभं प्रवीणाः ।

गोप्य ऊचुः

नैवं प्रियो वदति कश्चन सुन्दरेन्दो
त्वं यद्व्रवीषि वचनं त्वभिलाषशून्यम् ॥२८॥
जानीमहे ननु कयापि सपत्नभावा-
दस्मद्द्विषद्धृदयया परिशिक्षितोऽसि ।
क्रूरं वचः कथयता भवता हरिण्यो
व्याधोत्तमेन च यथा किममूर्न विद्धाः ॥२९॥
किं कुर्महे वयमनन्यगतिं प्रपन्ना-
स्तत्त्वं न चार्हसि नृशंसतयेति वक्तुम् ।
श्रीरामचन्द्र चरणाम्बुजमूलमाप्तान्
भक्तान् भजस्यविरतं कृपया समेतः ॥३०॥

---

१. °रुपजाति—°रीवाँ, बड़ो० ।

त्वं नस्तितिक्षसि तदेतदतीव नार्हं
देवोत्तमस्य भवतः पुरुषोत्तमस्य ।
प्रेयांस्त्वमेव जगतां निजबन्धुरूपः
स्वात्मा परायणमतः प्रणयं विदध्मः ॥३१॥

किं पत्यपत्यसुतबन्धुसुहृद्भिरन्यै-
स्त्वय्यात्मनि प्रणयिनि प्रियतास्पदैस्तैः ।
किं देहगेहविभवैः परमार्त्तिभूतै-
स्त्वां ये विना निरयशोकभरं जुषन्ति ॥३२॥

त्वं चेत् समग्रमभवः सुखवारिराशेः
सर्वस्वमेव यदिदं नखतः शिखाग्रम् ।
पूर्वं जहार हृदयं हरिणेक्षणानां
हासावलोकनसुधारसलेशदानैः ॥३३॥

श्रीपूर्णचन्द्ररचनावचनैरिदानीं
यन्नो निवारयसि तत्तव नैव युक्तम् ।
बिम्बाधराश्रयसुधारससेचनेन
नो जीवयस्यतनुतापभरेण तृप्ताः ॥४३॥

अस्मान् निजाङ्घ्रिसरसीरुहमध्ययाना
भूयोऽप्यनन्यगतिकाः कतिचिन्मृगाक्षीः ।
नो चेद्वयं विरहपावकमध्यभूरि-
ज्वालावलीवलितविग्रहभस्मभूताः ॥३५॥

ध्यानेन ते चरणयोः प्रतिविष्टचित्ता
भूयास्म योगिन इवात्मनि संविलीनाः ।
सीतापते यदि भवन्तमृतेऽन्यसङ्गं
स्वप्नेऽपि वाञ्छति मनोजवशं मनो नः ॥३६॥

तर्हि त्वदङ्घ्रितलमब्धिसुतासमेतं
सद्यः स्पृहाम निजसत्त्वविशोधनाय ।
यत्ते प्रमोदवननाथ वृतं तुलस्या
योगीन्द्रमानसविभूषितराजहंसम् ॥३७॥

तन्नस्त्रिलोकशरणं चरणारविन्दं
तापत्रयार्त्तिहरणार्थमुपार्थयामः ॥
तस्माद्वयं जनकजारमण त्वयाद्य
कार्या अनन्यगतयस्तु निजानुचर्यः ।
त्याज्या न कर्हिचिदनङ्गखलावसन्ना-
स्त्वादृक्कथं न शरणं शरणागतानाम् ॥३८॥
एतत्तवास्यमलकभ्रमरालिजुष्टं
मध्यस्फुरन्मकरकुण्डलगण्डशोभम् ।
बिम्बाधरं हसितवल्गु विलोकयन्त्यः
कृष्टाःस्म कामकरमुष्टिनिविष्टचित्ताः ॥३९॥
सीताकठोरकुचकुम्भविलिप्तभूयः
काश्मीरकल्करुचिरञ्जनमञ्जु वक्षः ।
भूयो भुजौ च भुजगाधिपभोगभाजौ
बिभ्राण एव हृदयं मदयस्यमन्दम् ॥४०॥
आकर्ण्य ते भुवनभूषण वेणुनादं
नित्यावरुद्धमकरध्वजमूलमन्त्रम् ।
का स्त्री विहाय कठिनानि कुलव्रतानि
दासीभविष्णुहृदया न चलेत् त्रिलोक्याम् ॥४१॥
गावो मृगाश्च विहगाश्च महीरुहाश्च
वल्लीवनानि च निजैर्नयनैर्निरीक्ष्य ।
स्पृष्ट्वा च तावकवपुर्भुवनाद्वितीयं
हर्षोत्करेण विसरत्पुलका बभूवुः ॥४२॥
त्वं सर्वतस्त्रिभुवनार्त्तिसमूहहारी
जातोऽसि संप्रति महापुरुषाङ्कजुष्टः ।
तन्नो निजैकशरणाः करुणां विहाय
विक्रीय मन्मथकरे किमु निर्वृतोऽसि ॥४३॥
इत्याकलय्य करुणानि वचांसि तासां
योगेश्वरेश्वरकिरीटनिघृष्टपादः ।

रामः प्रहृष्य सकलाः व्रजवामनेत्राः
स्वात्माश्रयोऽपि निभृतं रमयाञ्चकार । ४४॥
ताभिर्युतः स भगवान् कमनीयमूर्त्तिः
पारेपरार्द्धशतपञ्चशरावतारी ।
रेजे परस्परितकान्तिविशेषजुष्टो
मध्ये तमाल इव काञ्चनवल्लरीणाम् ॥४५॥
रामः शरत्समयचन्द्रमसं तदंशु-
व्याप्तान्तरं कुमुदकाननमध्यमस्थम् ।
तां कौमुदीं च स जगौ ललनाजनस्तु
श्रीरामनाम विविधस्वरयुक्तमेकम् ॥४६॥
गोपीजनैः स्वरभृतैरुपगीयमान
उद्गायमान उदितस्वरभृत्स्वयं च ।
गोपाङ्गनाशतकयूथपतिः स्रजा च
श्रीवैजयन्त्यभिधया परिशोभमानः ॥४७॥
श्रीमत्प्रमोदवनमण्डलयोग्यलक्ष्मी-
कान्तो व्यरोचत चिरं विचरन् समन्तात् ॥४८॥
ज्योत्स्नामृतप्रविशदं पुलिनं सरय्वा
आविश्य गोकुलनिकेतवराङ्गनाभिः ।
अक्षुब्धधीररमणप्रवराभिकः स
निःशेषकोकजकलाकुशलो रमेशः ॥४९॥
उत्सङ्गसङ्गपरिरम्भणचुम्बनास्य-
हासावलोकननिघर्षणमर्शनाद्यैः ।
नर्मप्रहाससविलासविकर्षणाभिः
संस्तभ्य वीर्यमबला रमयाञ्चकार ॥५०॥
क्वचित् कुञ्जे शय्याशतमव[1]करोद्भोगकृतये
क्वचिद् भूमौ विश्वाधिकरमणमासैककलयन् ।

---

१. सततमकरोद्—बड़ो० ।

क्वचित् कुञ्जावासाङ्गणलसितकौशल्यकलितो
मनोजस्योत्साहं यदि रुचददौ राघववरः ॥५१॥
एवं तास्तेन लोकोत्तरमदनचमत्कारभूम्ना सुखेन
रामेण क्रीड्यमाना व्रजहरिणदृशो भूरिलीलामनोज्ञाः ॥
अन्योन्यं लब्धमानाः कलितरतिकला दर्शयन्त्यः स्वकीयं
प्रावीण्यं भूरि चक्रुः किमपि रघुपतौ कामुके दर्पभावम् ॥५२॥
काचिन्माने रघुपतिं पातयामास पादयोः ।
काचित्प्रणामयामास मुखमध्यकृताञ्जलिम् ॥५३॥
काचित्संस्कारयामास दासीवन्निजविग्रहम् ।
काचिदुद्वर्त्तयामास लेपयामास काचन ॥५४॥
काचित्प्रसादयामास केशान् कङ्कतिकाकरा ।
काचिच्च विततां वेणीं ग्रन्थयामास राघवम् ॥५५॥
काचिच्च गुम्फयामास कटिभूषणमालिकाम् ।
काचिन्नियोजयामास प्रसूनावचये प्रियम् ॥५६॥
काचिद्भूषणसंदोहं देहेष्वर्पयितुं हरिम् ।
काचिच्च कथयामास मां नयस्व वनाद्वनम् ॥५७॥
सर्वासां वचनं चक्रे जानकीव रघूद्वहः ।
ताश्च सर्वा ववृतिरे जानकीवत् प्रियोत्तमे ॥५८॥
अन्योन्यं सुदृढः प्रेमा ववृधे प्रतिवासरम् ।
ततस्ता मेनिरे दृप्ताः स्वात्मानमधिकं प्रियाः ॥५९॥
कदाचिद्राम एकान्ते सीताया रमणेच्छया ।
तासां संजातदर्पाणां मध्ये चान्तरधीयत ॥६०॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे
रामरासो नाम[1] एकत्रिंशोऽध्यायः ॥३१॥

---

१. रामरासे—अयो०, मथु०, बड़ो० ।

द्वात्रिंशोऽध्यायः

अन्तर्हिते रसिकनायकशीर्षरत्ने
रामे रमारमणमात्ररसाभिरामे ।
रामाः प्रभूतविरहार्त्तिभरे निमग्नाः
स्वाङ्गानि वोढुमशकन्नहि तास्तदानीम् ॥ १ ॥
अन्योन्यमीक्षणपराः श्वसितानिलौघ-
चिन्तान्तरस्थविरहानलकीलदग्धाः ।
नो किंचनाभिलपितुं स्मरवाणविद्धाः
शक्या बभूवुरपमृत्युभयात्त्रसन्त्यः ॥ २ ॥
रामस्य मन्मथकलारसिकस्य तास्ता
लीलाः स्मरन्त्य उरुजातवियोगतापाः ।
आभीरिकाः सपदि तन्मयतामवापु-
र्येन प्रियोऽहमिति चेतसि मेनिरेऽमूः ॥ ३ ॥
याश्चावलोकहसितेक्षणभाषणादि-
ष्वैकात्म्यमेत्य रघुवंशविभूषणेन ।
उन्मत्तवत् प्रतिदिनं वनिता विचेरुः
प्रेमोदयेन विपिनाद्विपिनं विशन्त्यः ॥ ४ ॥
क्वचिद्धसन्त्यो गायन्त्यो धावन्त्यः क्वापि संहताः ।
क्वचिदाकाशमालिङ्ग्य भवन्त्यः प्रेमविह्वलाः ॥ ५ ॥
क्वचिदुच्चैः क्रीडमानाः अन्योन्याबद्धबाहवः ।
केचित्परस्परोन्मर्दं विशन्त्यः कुञ्जमन्दिरम्[1] ॥ ६ ॥
इत्येवं सुफलारम्भैर्भ्रमन्त्यो विरहातुराः ।
प्रमोदविपिनान्तःस्थान्[2] प्रपच्छुस्ता वनस्पतीन् ॥ ७ ॥
भो अश्वत्थ महाबाहो वनस्पतिपते त्वया ।
क्वचिद् दृष्टो रघुपतिरस्माकं चित्तातस्करः ॥ ८ ॥

---

१. °मन्दिरे—अयो०, रीवाँ । २. °न्तस्थाः—बड़ो० ।

क्वचिद्वटतरो देव बहुपादविराजित ।
क्वचिद् दृष्टो न वा रामो हृत्वा नो हृदयं व्रजन् ॥ ९ ॥
भो भो अशोकविटपिन् बहुभद्रकारिन्
किंस्विद्वचलोकि भवता रसिकोत्तमः सः ।
यस्याङ्घ्रिपाणिमधुराधरकोमलानि
जानाति संप्रति परं तव पल्लवानि ॥१०॥
भो चम्पकद्रुम किमप्यथ पृच्छमान-
स्त्वं किं धुनोषि करपल्लवसंघमेव ।
पुष्पाणि ते रसिकराघवपुङ्गवस्य
पीताम्बरेण सदृशानि विलोकयामः ॥११॥
भो नागकेशर महीरुहनागभूत
पुन्नाग किन्नु युवयोर्विदितो न वाभूत् ।
व्रीडा मनांसि खलु नः प्रणयेन रामो
विक्रीतवान् मनसिजस्य खलस्य हस्ते ॥१२॥
आम्रातक त्वमपि रक्तदलोऽसि नूनं
मन्ये क्वचिद् रघुवरेण करे गृहीतः ।
कच्चित् परोपकरणेऽपि विचक्षणोऽसि
यन्नाम ते कुरवकेति भुवि प्रसिद्धम् ॥१३॥
योऽन्तःप्रमोदवनवासिनि सेवकानां
कल्याणकारिणि तुलस्यमरेन्द्रवन्द्ये ।
अस्मान्निहत्य तव देवि पतिः स रामो
यातः क्वचिन्न विदितो विपिनान्तरेऽस्मिन् ॥१४॥
हे आलि मालति महासखि मल्लिकेऽस्म-
च्चित्तप्रसादनपरे नवजातिवल्लि ।
अस्मानिव प्रियतरो वत राघवेन्द्रो
युष्मानपि व्यथितवान् विरहं प्रदाय ॥१५॥
भो भो तमालविटपिन् बहुधासि दृष्टः
किं पृच्छनीयमसकृद्ब्रुवते वतेदम् ।

यद्राघवेन्द्रजलदोत्तमसंगमेन
जातोऽसि मेचकवपुः कपटैः प्रवृद्धः[1] ॥१६॥
पनसद्रुम कस्मात्त्वमस्थाने फलितोऽसि भोः ।
जानीमहे राघवेन्द्रसंगात् संजातसंभ्रमः ॥१७॥
रसाल भवतो रम्या मञ्जरीः शिरसा दधत् ।
कौशल्यानन्दनः कान्तः क्व यातस्तद्वदस्व नः ॥१८॥
पीलुप्रियालमधुकासननागरङ्ग-
श्रीरामपूगतरुतालकदम्बसालाः ।
कच्चिद्वनेऽत्र विचरन् जनकात्मजेशो
दृष्टो न वा हृदयहारकतस्करो नः ॥१९॥
धन्ये प्रमोदवनसंततशोभमाने
हे नर्मदे सरयु हे सखि सूर्यकन्ये ।
कामोद्धतस्तव तटान्तनिरीक्षणोत्कः
श्रीरामचन्द्ररसिकोऽत्र किमभ्युपेतः ॥२०॥
मातः प्रमोदवनशोभिनिकुञ्जभूमे
किंनु त्वदीयसुकृतं वयमीरयामः ।
रोमाञ्चितासि नवशाद्वलकैतवेन
रामाङ्गसङ्गसुखिता प्रणयोत्करेण ॥२१॥
हे कृष्णसार ललना न भवादृशीना-
मस्मत्सखी[2]समुचिता ननु वृत्तिरेषा ।
एकान्ततो [3]यदसकृद्विपुलैः कटाक्षैः
कान्तं प्रपश्यथ वधूजनवञ्चिशीलम् ॥२२॥
सख्यो लता न भवतोषु कृतः स्वबुद्ध्या
शाखाशतैर्विटपिभिः परिरम्भ एषः ।
उद्वीक्ष्य किंनु विकसत्कुसुमाक्षिरन्ध्रैः
कान्ताकुचग्रहपरं रसिकेन्द्ररत्नम् ॥२३॥

---

१. सनद्धः—रीवाँ, सवृद्धः—बड़ो० । २. सुखी°—रीवाँ, बड़ो० । ३. यदि —रीवाँ, बड़ो० ।

जानीमहे बहुलसौरभसारिलिङ्गा-
देतास्युपाय[1]पदवीं खलु राघवेन्द्रे[2] ।
तस्य प्रियाकुचविलिप्तसचन्द्रसार-
कालागुरुद्रवगुणैरिह वाति वायुः ॥२४॥
एताः[3] प्रमोदवनवल्लय एव धन्या
या दूतिकाभिरलिनीभिरुपात्तमन्त्राः ।
श्रीराघवेन्द्रविलसत्तनुसङ्गिनीभि-
र्वाञ्छन्ति भोगमतुलं वयमेव यद्वत् ॥२५॥
रे भूरुहाः कथयत क्व गतः स चौरः
श्यामः सुतीक्ष्णनयनेषुधिपूर्णबाणः ।
प्राप्येत चेत्प्रणयरज्जुशतेन बद्ध्वा
स्थाप्योऽधुना निजनिकेतन मध्य एव ॥२६॥
एवं प्रियं विचिन्वन्त्यो गोप्यो विश्लेषभीरवः ।
अपश्यन् भूरिशः पत्युः पदानि विपिनान्तरे ॥२७॥
ता रेखयोर्ध्वगामिन्या उच्चैर्वज्राङ्कुशादिभिः ।
विज्ञाय वल्लभस्यैव प्रोचुर्वचनमादरात् ॥२८॥
तस्यैव तस्करेन्द्रस्य पदान्येतानि कानने ।
शङ्खचक्राम्बुजाद्यङ्कैरङ्कितानि प्रपश्यत ॥२९॥
दक्षिणस्य पदोऽङ्गुष्ठमूले चक्रं विराजते ।
अस्मादृशीनां नम्राणामङ्गोच्छेदन[4]हेतवे ॥३०॥
मध्यमाङ्गुलिमूले[5]तु भाति कमललाञ्छनम् ।
अस्मच्चित्ताद्विरेफाणां लोभनायातिशोभनम् ॥३१॥
पद्मस्याधो ध्वजं भाति सर्वानर्थजयध्वजम् ।
कनिष्ठामूलतो वज्रं भाति पापाद्रिभेदनम् ॥३२॥
पार्ष्णिमध्येऽङ्कुशो भक्तचित्तेभवशकारकः ।
भोगसंपन्नयं[6] धत्ते यवमङ्गुष्ठपर्वणि ॥३३॥

---

१. देत्तामिपाप०—अयो० । २. राघवेंद्रः—अयो० । ३. एषा–रीवाँ । ४. नः प्राणां षट्वगौंक्षिति°—अयो०, न प्राणां षङ्गोक्षेदन°-रीवाँ । ५. मूलं—अयो०, रीवाँ । ६. संपन्मयं—अयो०, रीवाँ ।

अथ वामपदाङ्गुष्ठमूलभक्तोन्मुखं दरम् ।
सर्वविद्याप्रकाशाय दधाति भगवानसौ ॥३४॥
पद्मादीन्यपि चिह्नानि दृश्यन्ते दक्षपादवत् ।
[1]एतत्पदानुसारेण गवेष्यो रघुनन्दनः ॥३५॥
अत्रैव कानने क्वापि प्रियया सह वर्तते ।
इत्युक्त्वा[2] गोपवद्ध्वस्तास्तत्पदानुसृतिं क्रमात् ॥३६॥
अन्वयुः सान्द्रविपिने समस्ता विरहातुराः ।
प्रियापदैः सुपूक्तानि तत्रैक्षन्त व्रजाङ्गनाः ॥३७॥
मध्य एवाविरभवत् कासौ धन्यतमा वधूः ।
अंसे विन्यस्य दोर्वल्लीं सह गच्छति यामुना ॥३८॥
इयं हि सहजानन्दकेलीनिर्वृतमानसा ।
अस्मान् हित्वा यदासक्तः क्रीडते व्रजवल्लभः ॥३९॥
सहजानन्दिनी नाम शक्तिरेषैव कामिनी ।
सा वल्लभमनाश्रान्तं रमयत्यनुरागिणी ॥४०॥
परस्परासक्तबाहुदण्डाभ्यां विधिपूर्वकम् ।
अत्र विक्रीडितं ताभ्यां भ्रमणाक्रीडनाभिधम् ॥४०॥
अत्र भूषासमारोपः प्रियायाः प्रेयसा कृतः ।
परस्परं संमुखस्थौ दृश्येते ललितैः पदैः ॥४२॥
अत्राभ्यां रचिता केलिः पुष्पावचयनाभिधा ।
विना पार्ष्णितलन्यासं पदान्येतानि पश्यत ॥४३॥
अत्र स्थित्वा कृतास्ताभ्यां विचित्राः कुसुमस्रजः ।
स्वं स्वं चातुर्यविभवं दर्शयद्भ्यां परस्परम् ॥४४॥
अत्र प्रियेण प्रेयस्याश्चक्षुषो रञ्जनं कृतम् ।
स्पष्टं[3] पङ्केरुहां पत्रं[4] प्रोञ्छनैर्मलिनीकृतम् ॥४५॥
अत्र प्रियः स्वप्रियायै प्रादात्ताम्बूलवीटिकाम् ।
चूर्णं[5] खदिरसारं च दृश्यतां पतितं भुवि ॥४६॥

---

१. अथवा यत्पदा°—अयो० । २. इत्युक्ता—अयो०, रीवाँ । ३. पृष्टं—रीवाँ । ४. यत्र—बड़ो० । ५. चूर्णे—अयो०, रीवाँ ।

अत्राभ्यां रचितं सौख्यं मन्मथोत्सवदायकम् ।
पद्मपत्रमयी शय्या व्यत्यस्ता दृश्यते स्त्रियः ॥४७॥
अत्र प्रियाभिरुच्यैव प्रेयस्या पुरुषायितम् ।
दृश्यतेऽन्तः प्रियवपुः परितः प्रेयसीपदे ॥४८॥
स्रस्तानि नवपुष्पाणि विग्रन्थिकबरान्तरात् ।
अहो हारलता भग्ना विकीर्णा मणयोऽमलाः ॥४९॥
तां कोमलाङ्घ्रिकमलामिह खिद्यमाना-
मंसे निधाय दयितामिह नीतवान् सः ।
नातः परं परिलसन्ति पदानि यस्याः
स्वाधीनतागुणवशीकृतवल्लभायाः ॥५०॥
धन्याः परं युवतयो रघुनन्दनस्य
भर्तुः पदाम्बुरुहसंभवरेणवोऽमी ।
यां पद्मयोनिरघहन्यव ईश्वरश्च
मूर्ध्ना दधाति कमला च नितान्तभक्ता ॥५१॥
यां कामुको रसितवानितरां विहाय
भूयो वियोगभरकालदवाग्नितप्ताः ।
सात्मान[1]मभ्यधिकमानममंस्त सम्यक्
स्त्रीणां निजायनजुषां प्रमदेतरासाम् ॥५२॥
भूयोऽब्रवीच्च खलु सा प्रिय पारयामि
नो गन्तुमध्वनि निकुञ्जविशीर्णपर्णे ।
आरोप्य संप्रति निजांसमितो नयेश्चे-
त्युक्तः प्रियश्च सहसा विदधौ तथैव ॥५३॥
ततोऽन्तरितवान् रामः सहजानन्दविग्रहः ।
तस्यै निजवियोगोत्थां वेदनामनुभावयन् ॥५४॥
ततस्तु ताः पद्मदृशः समस्ता यावद्रहस्यं दयितस्य मत्वा ।
नाग्रे प्रवृत्ताश्चलितुं साऽपि तावत् प्रियोत्तमाभिर्ददृशे प्रेयसीभिः ॥५५॥

---

१. स्वात्मान°—बड़ो० ।

प्रियस्य विश्लेषभरेण खिन्ना शून्यादिशश्चकितं वीक्ष्यमाणा ।
पुनः पुनः स्वल्पदुरात्मभावं दर्पं च संचिन्त्य विलज्जमाना ॥५६॥
हा नाथ हे रमण सुन्दरवर्यधुर्य ! प्रेष्ठ प्रिय प्रियतम प्रणयामृताब्धे ।
दासीं विहाय ननु मां निविडे निकुञ्जे क्वासीति दीनवचनैरनुनाथमाना ।५७।
सा तान् व्रजाभीरवधूसमूहानापृच्छमानान् स्वपतेरुदन्तम् ।
सर्वस्वहेतुं कथयाञ्चकार श्रीः स्वस्य मानं च तथावमानम् ॥५८॥

तयोक्तमाकर्ण्य मृगोदृशस्ता जग्मुः परं विस्मयमात्रहासाः ।
तया समेताश्च पुनस्तथैव वियोगभारव्यथिता बभूवुः ॥५९॥
उन्मत्तवत्तत्र वनाद्वनान्तरं गवेषयन्त्यो रघुनन्दनं प्रियम् ।
तद्ध्यानतस्तन्मयतामवाप्य तास्तस्यैव लीलां व्यदधुः परात्मनः॥६०॥

कस्याश्चिद्राक्षसीयन्त्या रामायन्त्यपिबत्स्तनम् ।
खट्वायन्तीं परामन्या तोकायित्वा पदाहनत् ॥६१॥
दैत्यायन्ती परा काचित् कृत्वारामार्भभावनाम् ।
जहार जानुसंमर्दैरिङ्गन्तीं नूपुरस्वनैः ॥६२॥
रामायन्ती बभूवान्या गोपायन्त्यश्च काश्चन ।
सर्पायन्तीं खगायन्ती जघान निजविक्रमैः ॥६३॥
वेणुं क्वणन्तीमन्या तु काचिच्चानुजगौ स्वरैः ।
रामायन्त्याजुहावान्या नाम्नान्यां धेनुकायतीम् ॥६४॥
तत्रैका लक्ष्मणायन्ती भरतायन्ती तथा परा ।
शत्रुघ्नायन्त्यथो काचिद्रामेन्दुं परिववृरे ॥६५॥
अन्या माङ्गल्यकायन्ती गवेन्द्रायन्त्यथोऽपराः ।
रामायन्त्यभिशुशुभे व्रजे तं मातरौ यथा ॥६६॥
माभैसुरिन्द्रकोपेन त्राताहं ननु राघवः ।
वर्षर्तुः प्रलयासारा इत्युक्त्वा निदधेऽम्बरम् ॥६७॥
शुचौ[1] पश्यत गोपाला दावाग्निं विश्वतोमुखम् ।
चक्षूंष्यपि[2] दधध्वं चेत् क्षेममाप्तुमिहेच्छथ ॥६८॥

---

१. ऊचे—अयो० । २. चक्षूंष्यथ—अयो० ।

इत्युक्त्वा राममात्मानं मत्वा कोरकिताननाः
पपौ निमेषमात्रेण सर्वानाश्वास्य पावकम् ॥६९॥
काचिद् भुजङ्गमायन्त्याः कस्याश्चिन्मस्तकेऽनटत् ।
समुद्रं गच्छ दुष्टाहे भाषमाणा रुषारुणा[1] ॥७०॥
काचिद्दाम्ना बबन्धान्यां द्रुमायन्त्याश्च मूलतः ।
सा च तां पातयामास स्तुवन्तं विविधैः स्तवैः ॥७१॥
एवं तन्मयतामेत्य तल्लीला व्यदधुः क्रमात् ।
गवेषयन्त्यो विपिनाद्विपिनान्तरमाययुः ॥७२॥
यावद्वनलताकुञ्जे चन्द्रज्योत्स्ना न दृश्यते ।
ततोऽन्धकारगहनं वनं वीक्ष्यातिगह्वरम् ॥
सर्वा निववृतुस्तस्मात्पृच्छ्यमाना लताद्रुमान् ॥७३॥
तमेव कान्तं मनसि स्मरन्त्यस्तमालपन्त्यश्च बहिः समक्षम् ।
तस्यैव चेष्टा विदधन्त्य उच्चैस्तदात्मिका नात्मगृहाणि सस्मरुः ॥७४॥
पुर्नानिवृत्ताः पुलिने सरय्वा यत्र प्रियेणाभिरता पुराभूः ।
समेत्य सर्वाः स्वरमूर्च्छनाभिर्जगुर्यथा किन्नरवर्यवध्वः ॥७५॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे
रामरासो नाम[2] द्वात्रिंशोऽध्यायः ॥३२॥

❁

त्रयस्त्रिंशोऽध्यायः

गोप्य ऊचुः

जयति प्रिय जन्मभूता भवता सरयूतटभूमिरुदञ्चशुभा ।
त्वदुदारमुखेन्दुविलोकनजं परिदीव्यति यत्र मुदां प्रसरः ॥ १ ॥
अथ चेद्बहुलार्तिरिहास्ति पते भवदेकपरास्वबलासु भृशम् ।
रघुनन्दन सापि परं भवता परिहार्यतमा स्मितपूर्वदृशा ॥ २ ॥

---

१. हसारुणा—रीवाँ, बड़ो० । २. रामरासे—अयो०, रीवाँ, बड़ो० ।

अथ याध्वसहस्र[1]वियोगभवा प्रिय नार्त्तिरसौ ह्रियते भवता ।
तदिहैष्यति संततमुज्वलतः करुणारस एव कठोरतरम् ॥ ३ ॥
प्रलयाभ्रगणाद्दववह्निभरात् पवनप्रचयाद्विविधारिभयात् ।
परिरक्षितवानसि नः प्रणयिन् विरहार्तिमहाभयभोगकृतः ॥ ४ ॥
अपि पद्मभवादिभिरर्थित इत्युदयत्वमितोऽसि ककुत्स्थकुले ।
धरणीभरसंहरणाय तथा निजभक्तजनामितदुःखकृते ॥ ५ ॥
तदिदं स्वजनाभयदानदृढं सकलेप्सितपूरणकल्पतरुम् ।
निजपाणिमिमं पुरुषोत्तम नः शिरसि प्रणयेन निधेहितमाम् ॥ ६ ॥
अयि वीरवर व्रजवल्लभ हे रघुवंशविभूषण चारुमते ।
निजदास्यकरीर्भज सुन्दर नः प्रियदर्शनचारुमुखाम्बुरुहम् ॥ ७ ॥
भुवनत्रयसंततितापहरं जनपापहरं कमलासदनम् ।
चरणाब्जयुगं कुरु वक्षसि नः शमय स्मरदुर्जयवाणरुजम् ॥ ८ ॥
तव दर्शनसंगमसंस्पृहिता सुमहार्त्तिकरा विरहादधुना ।
हृदि संमथिताः रघुनन्दन नः कृपयाधरसिन्धुसुधाभिद्रवैः ॥ ९ ॥
रुचिरस्मरण प्रिय संप्रति नस्तव दिव्यकथामृतमेव गतिः ।
विबुधेश न चेद्विरहाग्निभरो भसितोत्तरकं कलयेन्न किमु ॥१०॥
रघुनाथ भवत्परिरम्भभुवः प्रमुदः स्मृतिमात्रमिता अधुना ।
व्यथयन्तितमां हृदयानि न नः प्रतिकूलतया खलु चित्रमिदम् ॥११॥
मृदुलेन पदाब्जयुगेन भवान् यदि नाथ निकुञ्जवनेष्वटसि ।
तदिहेहि कठोरतृणाङ्कुरकैर्भृशमर्द्यत एव मनः खलु नः ॥१२॥
विलुलत्[2]कुटिलालकजालवृतं भ्रमरीगणसेवितमब्जमिव ।
स्मृतिमेति यथा तव नाथ मुखं भवतीव तथा व्यथितं हृदयम् ॥१३॥
कमलाकरसेवनभाजनकं तव चारु पदाब्जयुगं जयति ।
स्तनकोरकयोः कृतमात्रमथो खलु यत् स्मरदुःखहरं भवति ॥१४॥
विरहज्वरसंभवतापहरं विषमेषुभवव्यथनाशमनम् ।
अधरामृतसीधुरसं रुचिरं रघुदेव वितीर्य सुखं वितर ॥१५॥

---

१. यद्यसहस्व०—बड़ो० । २. विलुलित°—बड़ो० ।

यदुदारमनर्घ्यभवद्वदनं प्रविलोक्य रसोढतमो निमिषः ।
अधुना तदनेकदिनान्तरितं स्तवगम्य धिगस्तु दृशौ सुदृशौ ॥१६॥
पतिपुत्रसहोदरबन्धुसुखं स्वजनं परिहृत्य जवात् स्वमितः ।
अबलाः प्रबलात्मभुवा ग्रथिताः क उदार जहातु भवन्तमृते ॥१७॥
तदनेकरहस्यकथावसरे परिरम्भरसाकुलमात्तमुरः[1] ।
तव कान्त तमालसमप्रतिमं स्मरतीः किमु मूर्छयसे वत नः ॥१८॥
मृदुलोपलवत् कठिमानमिमं कुत एव भवानसि शिक्षितवान् ।
यदिमाः स्वगतीरिह नाक्षिकलाकलनादवसि व्रजवामदृशः ॥१९॥
भवतो वपुरङ्गशिरीषमृदुस्पृहया कठिनेषु कुचेषु यथा ।
कलयाम तथा भयमेति मनः पुलकाङ्कुरकण्ठरुगञ्चतु मा ॥२०॥
स भवान् विजने विपिने निशि नः प्रविधाय खलु स्मरहस्तगताः ।
अवधिं गतवानसि किं नितरामितरां भजमान उदारमनाः ॥२१॥
अथ धन्यतमा खलु सा रमणी रमणीनिवहादपकृष्य वने ।
विजनेऽत्र भवन्तमतिप्रणयं प्रिय नीतवती बहुसाहसिका ॥२२॥
अयि धूर्त्तधुरन्धर धीरमते विलपन्तमिमं रमणीनिवहम् ।
नयनेन निभालयसे न कथं कलयन्नपि सन्तमघे रमणम् ॥२३॥
प्रणयेन पुरा खलु यामनयो विलपत्यति सापि सहैव चिरम् ।
प्रणयिन्यबलेयमितोप्यपरा प्रिय कास्ति भवत्सविधे रमणी ॥२४॥
नहि तत्र भवान् विजनेऽस्ति परं स्वयमेव नरेन्द्रकुमारमणे ।
न खलु क्षणमप्यसि केलिकलारहितोऽखिलकोककलैकपटुः[2] ॥२५॥
अथ या भवदङ्गसुसङ्गकरी त्वितरैव विभाति रमा खलु सा ।
नहि नाथ तया रहितोऽस्ति भवान् नहि सा सहते विरहं क्वचन ॥२६॥
वयमीश तथा तव संगमने प्रिय विघ्नलवं कलयाम कदा ।
युगलं खलु तद्भवतोः सुचिरं व्यतिभातु विशेषविलासकरम् ॥२७॥
तनुकान्तिरिव प्रथिता भवतः प्रियसङ्गम एव सदा वसतु ।
इत एव भवत्वनिशं भवते ह्यबलाजनदुःखभरो विदितः ॥२८॥

---

१. प्राप्तमुरः—रीवाँ, पातमुरः—अयो० । २. °रुतैकपटुः—रीवाँ ।

अपि नोदय तं स्पृहणीयुगणे भवती परिवेत्तु दशां खलु नः ।
अथवा विदितेदृशदुःखदशा किमु वेत्स्यति नित्यविलासपरा ॥२९॥
स्वजनेषु तथापि परां करुणां परिपालय लोकपतेर्महिषी ।
निजनित्यविलासयुतं दयितं परिदर्शय नो नयनोत्सवदम् ॥३०॥
जनकस्य जगत्प्रणयैकजुषः करुणारसकोमलितात्महृदः ।
तनया भवतीति मनांसि च नः खलु विश्वसितं भवति त्वधुना ॥३१॥
इह वां सुरतान्तधृतश्रमयोर्मनुवारिकणाञ्चितविग्रहयोः ।
सुखदायि पटुः परिरम्भकरः परिवाति मरुद्बहुभाग्यभृतः ॥३२॥
असकौ ननु सौरभसारभरः परिवाति मुहुर्मरुताकलितः ।
यदिहोदयते कलकल्पलतायुतमल्पतरोरधिकः पटिमा ॥३३॥
अयि वामविधे व्रजवामदृशां कलयिष्यति भूरि कदा नु भवान् ।
सहजं सहजेन मनोत्सवदं युगलं खलु दम्पतिभावयुतम् ॥३४॥
रघुनन्दन दर्शनदानकृते मुनयेऽत्रिसुताय नमोऽस्तु च नः ।
पुनरेव नमोऽस्तु रघूद्वह ते वरदाय निजात्मवरोत्तम हे ॥३५॥
पुनरेव नमोऽस्तु वधूमणये निमिवंशमहोत्सवदायिदृशे ।
इतराभ्य इदं खलु दत्तवती प्रणयेन धनं स्वरहस्यमपि ॥३६॥
त्रिजगल्ललनौघशिखामणये पुनरेव नमोऽस्तु नमोस्तु च नः ।
सहजात्मसुखाकृतये सहजासहजात्मचिदाकृतये हृतये[1] ॥३७॥
सहजामहिषीरतिरात्मसुखा प्रमदा पुरुषां जगदेकजनिः ।
अथ चिल्लतिकापि च चिन्निधिरित्यवगच्छ नवात्मकनाम मनः ।३८॥

श्रीर्माया मदना सरस्वतिपरा तारात्रया पद्मजा
त्रैलोक्येश्वरबृंहिताङ्कसदनस्था सच्चिदानन्दिनी ।
पञ्चात्मा निखिलप्रपञ्चरचनाचातुर्यगा तुर्यगा
तुर्यातीतकला परावरतरा सीता सिता चासिता ॥३९॥

इतिबहुविक्लवातुरहृदो व्रजवामदृशः
प्रसभतरं विलप्य करुणास्मरवाणरुजा ।

---

१. हृदये—बड़ो० ।

वत वत संभ्रमेण बहुवीक्षितशून्यदृशः ।
सुभगतरस्वरेण रुरुदुर्विजने विपिने ॥४०॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे रामरासो नाम[1] त्रयस्त्रिंशोऽध्यायः ॥३३॥

चतुस्त्रिंशोऽध्यायः

ब्रह्मोवाच

तत आविरभूद्रामस्तासां विरहकातरः ।
वामभागसमासक्तसीतालिङ्गितविग्रहः ॥ १ ॥
मधुराननसंशोभिकोटिचन्द्रोज्ज्वलस्मितः ।
तडित्कान्तिचमत्कारिपीताम्बरसमावृतः ॥ २ ॥
नवीनपुष्पग्रथितां पञ्चवर्णस्रजं दधत् ।
अनेकरत्नसंजुष्टहेमचन्द्रावतंसकः ॥ ३ ॥
संभ्रान्तपद्महस्ताभिस्तडिद्वुज्ज्वलकान्तिभिः ।
सम्पन्ननिष्ककण्ठीभिः श्यामाभिः शुभदृष्टिभिः ॥ ४ ॥
रत्नाकल्पमनोज्ञाभिः कान्तपीयूषवृष्टिभिः ।
सहस्राधिकरामाभिः संसेवितशुभाननाम् ॥ ५ ॥
कल्याणकारिणीं दिव्यां दिव्यकेलिविभूषिताम् ।
निजवामांससंसक्तां सहजानन्दरूपिणीम् ॥ ६ ॥
वामभागे प्रियां रामो जुषमाणः सुलोचनः ।
कस्तूरीतिलकोपेतपूर्णभालस्थलप्रभः ॥ ७ ॥
प्रेमासवरसास्वादपूर्णमानहृदुन्मदः ।
वामाक्षिहृदयोल्लासकारिवीक्षणकारकः ॥ ८ ॥
महामारकतोद्योतिमयूराकृतिकुण्डलः ।
दिव्यचूडासमावद्धमल्लीमाल्यमनोहरः ॥ ९ ॥

---

१. रामरासे—अयो०, रीवाँ, बड़ो०।

रत्नकेयूरसुभगबाहुद्वयविराजितः ।
रत्नहारमनोहारिविशालसदुरस्थलः ॥१०॥
रत्नकाञ्चीगुणाबद्धकटिवस्त्रविभूषितः ।
निम्ननाभिह्रदोदग्रवलित्रयविराजितः ॥११॥
वामपादसमाक्रान्तदक्षपादप्रियाकृतिः ।
त्रिभङ्गीललिताश्यामवामकामदविग्रहः ॥१२॥
लसन्नूपुरमञ्जीरकिङ्किणीपादपङ्कजः ।
नासाग्रमिहितोत्तुङ्गनवमौक्तिकमञ्जुलः ॥१३॥
ताम्बूलीदलसंस्निग्धरञ्जिताधरपल्लवः ।
पुरुषायितकामिन्या क्रीडोचितलसद्वपुः ॥१४॥
अश्मश्रुचिबुकोन्नद्धतिलबिन्दुविराजितः ।
महिलाजनदृग्भङ्गपीयमानमुखासवः[1] ॥१५॥
भूयः षोडशवर्षेण वयोमाधुर्यमंजिमा ।
नित्यलीलाचमत्कारि[2]श्रीविग्रहविराजितः ॥१६॥
तं वीक्ष्यं गतिमात्मानं प्रणयोल्लासिलोचनाः ।
सर्वास्ताः सहसा तत्र समुत्तस्थुर्मृगीदृशः ॥१७॥
देवतास्तत्त्वरूपिण्यो यथापूर्वमचेतनाः ।
चैतन्यमुपलभ्याथ प्रविष्टे तु परात्मनि ॥१८॥
काचित् तदीयकरपङ्कजमञ्जुलस्थे
कृत्वा सुखेन निदधाति निजे कपोले ।
काचिच्च संगमयते नयनद्वयेन
काचिच्च वक्षसि च नाभिह्रदे च काचित् ॥१९॥
काचिच्च तस्य भुजदण्डमहीन्द्रभोग-
श्रीखण्डवृक्षविटपप्रतिमं गृहीत्वा ।
अंसे दधाति च कापि च मूर्ध्नि कापि
काचित् सहर्षमुपगृह्य[3] जहाति पापम् ॥२०॥

---

१. °सुखासवः—मधु०, बड़ो० । २. चमत्कारी—रीवाँ, बड़ो० ।
३. °गूह्य—अयो० ।

ताम्बूलचर्वितकमञ्जलिना च काचिद्
गृह्णाति तन्निपतदर्द्धपथे[1] निरुध्य ।
काचित् तदङ्घ्रिकमलं विरहज्वरेण
संतापिनि स्तनयुगे निदधाति तन्वी ॥२१॥
अन्या च काचन[2] निमेषविवर्जिताभ्यां
दृग्भ्यां प्रियस्य वदनाम्बुरुहं पिबन्ती ।
नैवाद्य तृप्तिमबला सुखसिन्धुमग्ना
चित्रार्पितेव विटपार्श्वयिणी बभूव ॥२२॥
काचित् तमीक्षणपथेन हृदि प्रविश्य
नेत्रे निमील्य पुलकौघविसंस्थुलाङ्गी ।
दोर्भ्यां दृढं समवगृह्य निबद्धमौना
योगीव चित्सुखमहोदधिनिर्वृतास्ते ॥२३॥
काचिन्मनोजधनुषा भ्रूकुटिद्वयेन
संयोज्य तीक्ष्णविशिखान् कुटिलान् कटाक्षान् ।
दृष्ट्वा रुषेव दशनैर्दशनच्छदं स्व-
मैक्षिष्ट कान्तमतुलप्रणया घ्नतीव[3] ॥२४॥
अन्ये सुवर्णलतिकेव रुचा स्फुरन्त्यौ
तस्यांसयुग्ममवलम्ब्य विरोचमाने ।
तत्र प्रमोदवनदिव्यतमालकान्ति-
मत्यद्भुतां पुपुषतुः प्रभयानुरूपे ॥२५॥
काचित् तदीयममलं[4] मुकुरायमानं
स्वच्छं कपोलतलमुत्प्रणया चुचुम्ब ।
अन्या तदक्षियुगलं रदनच्छदाभ्यां
ताम्बूलिकादलरसैरनुरज्यमानम् ॥२६॥
एका तदीयमधरं मधुरं सुधायाः
संस्थानमन्दिरमिवापिबदाननेन ।

---

१. °पतदूर्ध्व°—अयो, रीवाँ। २. का क्षण°—अयो०। ३. व्रतीव—अयो०।
४. °मतनोर्—अयो०, अचलोन्—बड़ो०।

अन्या मदेन परिरभ्य निवृत्तलज्जा
स्वानन्दसिन्धुरसवीचिषु निर्ममज्ज ॥२७॥
इत्थं रमण्यस्ताः सर्वाः प्रियदर्शननिर्वृताः ।
संतापं विजहुर्यद्वत्प्राप्यानन्दमयं जनाः ॥२८॥
भूयस्तदङ्गसङ्गिन्यै सच्चिदानन्दशक्तये ।
पश्यन्त्यस्तदभेदेन नाभ्यसूयन् मृगीदृशः ॥२९॥
एषास्य सहजानन्दशक्तिर्लीलाविनोदिनी ।
नानारसासवावासा प्रमोदविपिनेश्वरी ॥३०॥
एषा श्रीः सततं चास्य पुरुषस्य महात्मनः ।
यामाद्यां सहजां शक्तिं मुनयः संप्रचक्षते ॥३१॥
प्राप्स्यामो भूरिदौर्भाग्यमनया रहिता वयम् ।
प्रियोऽपि नास्मत्सविधे संस्थास्यत्यनया विना ॥३२॥
अहो चन्द्रमसः सेयं चंन्द्रिकेव विराजिता ।
कोर्थोऽनया विनास्माकं दासीनां प्रभुतुल्यया ॥३३॥
वयमेनां समाराध्य कामदां कामयामहे[1] ।
पुत्रीं जनकराजस्य प्रमोदविपिनेश्वरीम् ॥३४॥
जय देवि[2] महाराज्ञि यासि त्वन्नः परानिधिः ।
नित्यं परिचरिष्यामस्त्वां वयं दासिका इव ॥३५॥
ततोऽनयाभ्यनुज्ञाताः समस्तास्ता मृगीदृशः ।
व्यरुचन् परितस्तस्य चन्द्रस्योडुगणा इव ॥३६॥
सोऽपि ताभिर्विनिर्धूतविरहामलकान्तिभिः ।
स्वशक्तिभिः समग्राभिः शुशुभे पुरुषोत्तमः ॥३७॥
यूथव्यूहं समादाय वामदक्षिणयोर्विभुः ।
सरय्वाः पुलिनं रामः प्राविशत् केलिकाम्यया ॥३८॥
नित्यं विकसितानन्तदिव्यानेकसुरद्रुमम् ।
गुञ्जद्भ्रमरसंघुष्टनिकुञ्जललिताङ्गणम् ॥३९॥

---

१. सह—अयो० । २ देवमहा°—अयो० ।

वीचीभुजसमास्तीर्णकोमलस्वच्छवालुकम् ।
उपर्यास्तीर्णवनितावेषचन्द्राच्छचन्द्रिकम् ॥४०॥
मन्दारविपिनान्दोलसुरभ्यनिलसेवितम् ।
रत्नवेदीसमुत्थांशुसंव्याप्त[1]गगनान्तरम् ॥४१॥
उदञ्चत्पञ्चमालापविकस्वरपिकस्वरम् ।
राजहंसवधूवृन्दानुकृतप्रमदागणम् ॥४२॥
नानारतिरहस्योत्थशब्दचाटुशुकीरवम् ।
उद्गतानन्दकन्दर्पसपर्यायोग्यसंविधम् ॥४३॥

प्रियेण तास्तत्र समेत्य निर्वृतास्तदाननालोकसुधात्तभोजनाः[2] ।
विधूतविश्लेषरुजो मृगीदृशो निकाममापुः सकलान् मनोरथान् ॥४४॥
निजोत्तरीयैः कुचकुम्भलेपितश्रीखण्डचन्द्रागुरुकुङ्कुमाङ्कितैः ।
अरीरचन्नद्भुत[3]लीलनोत्सुका प्राणेश्वरायातिमहार्हमासनम् ॥४५॥
तत्रास्थितोऽसौ शुशुभे रघूद्वहः प्राणेश्वरो लोचनलास्यलालितः ।
पारे परार्द्धस्मररूपदर्पहा गोपाङ्गनामण्डलमण्डनाकृतिः ॥४६॥
परस्परालापनिरीक्षणस्मितभ्रूविभ्रमाश्लेषकरग्रहादिभिः ।
संपूज्य संस्तुत्य तथात्मनः प्रियं प्रियाः समेताः किमपीदमूचिरे ॥४७॥

गोप्य ऊचुः

ये सेवमाना ननु सेवमाना असेवमानानपि सेवमानाः ।
ये सेवमानान् परितो सेवमाना न सेवमानास्त इमे के वदस्व ॥४८॥
मातृः पितॄन् स्निग्धतमानपत्यभ्रात्रादिकान् सुहृदश्चात्मबन्धून् ।
हित्वा च पादाब्जतलं प्रपद्य त्वं सेवमानान् परिपासि कच्चित् ॥४९॥
किंवा भवैकान्तरतानभव्यान् निन्दापरान् लम्पटान् नीचसत्त्वान् ।
कन्दर्पानुध्यानपथे[4]प्रवृत्तांस्त्वसेव्यमानान् भजसे नाथ कच्चित् ॥५०॥
किंवोभयभ्रष्टहृदः शिलामयान् कुयोगिनो नासि पापेषु निष्ठान् ।
ईदृग्विधान् मानुषाख्यान् पशूंस्त्वं प्रपूर्णरङ्गं भजसे नाथ कच्चित्॥५१॥

---

१. संप्राप्त°—अयो०, बड़ो० । २. सुधोत्तमा जनाः—रीवाँ, बड़ो० । ३. अचिक्लृपन्नद्भुत°—अयो०, अरीरचन्नन्दत—बड़ो० । ४. कदाप्यनुध्यान° —अयो० ।

इत्येवमुक्तो भृशमाभीरदारैः परात्परो भगवान् रामचन्द्रः ।
श्रियायुतः कोटिकन्दर्पकान्तिः स्मित्वा रेभे प्रतिवक्तुं महात्मा ॥५२॥

श्रीराम उवाच

विहाय संसारमपारसान्तरं[1] भवादृशान् भजतः प्राकृतौघान् ।
भजामि नित्यं निजवामाङ्गभागं रामामपि प्रेयसीं संविहाय ॥५३॥

संसारिणो विषयैकान्तलुब्धान् न मां परं भजतो नो भजामि ।
कामानुरूपां गतिमेषां ददामि कुर्वे सुरानासुरीष्वेव भूषु ॥५४॥

नान्यानहं सेवमानान् भजामि जनान् प्रसिद्धोभयधर्महीनान् ।
प्रपद्यन्ते ये यथा मां मनुष्याः प्रपद्येऽहं तांस्तथा भावयुक्तः ॥५५॥

न वस्तुतोऽहं[2] भजतो भजामि कुतश्चैवाभजतो भूमिजन्तून् ।
आत्मारामःसन्निजैकान्तकेलिर्लोकातीतः क्रीडमानश्च नित्यम् ॥५६॥

भजाम्यहं क्वापि भजतोऽपि जन्तून् कृपावशस्तत्कृतमीक्ष्यमाणः ।
स्नेहातुरान् दैवदृष्टचावरार्थान्[3] तथातुरान्[4] मानहीनानशक्तान्[5] ॥५७॥

यत्संगता[6] मद्वपुषोंऽशवः प्रिया यथेयं श्रीर्भाति वामाङ्गसंस्था ।
इतोपि[7] सख्योऽभ्यधिका रासकाले[8] यदेवमन्तर्मयिमानसं[9] वः ॥५८॥

मदङ्गसंगोपचिता शिखावद्[10] यूयं प्राणेभ्योऽपि मे प्रेयसीः स्थः ।
नपारयेऽहं भवतीप्रेमबन्धं निष्कारणं मित्रभावं जुषाणाः ॥५९॥

भवतीनां वै विप्रलम्भानुभूत्यै तिरोहितो भवती[11]स्थो मयात्मा ।
आविर्भावं प्रापितस्तत्क्षणेन[12] मा मा हिंसीज्जातवेदाः स्मरोत्थः ॥६०॥

तन्मेऽसूया नैव कार्या कदाचित् प्रेम्णौदार्यं वीक्ष्यमाणाय शश्वत् ।
लोके प्रेम्णः पदवीं शिक्षयाणः किं किं चित्रं नैव कुर्वे रमण्यः ॥६१॥

लीलावैचित्र्यात् सहजानन्दरूपाप्यन्तर्द्धानं यावदेषा जगाम ।
नैवामुष्यां मद्वियोगः कदाचिद् दृष्टो भूतः स्वप्नभावे सुषुप्तौ ॥६२॥

---

१. °सागरं—अयो० । २. नैवस्तुतो–अयो०, नमः स्तुतो–बड़ो० । ३. वरा-कान्–अयो० । ४. चिन्तातुरान्–अयो० । ५. असक्तान्–रीवाँ, बड़ो० । ६. यूयं गता–अयो० । ७. अतोऽपि–बड़ो० । ८. क्वापिकाले–अयो० । ९. यदेयमन्तर्दधते-मदन्तः–अयो० । १०. शिखोवला–अयो०, शिखांवला–बड़ो० । ११. भवदन्ति-कस्थो—अयो० । १२. °भावो प्रेमबन्धस्तत्—रीवाँ, बड़ो० ।

संपूर्णाःशरदो[1] भजमानाः प्रियं मां धन्या धन्या धन्यधन्याश्च धन्याः ।
प्राप्तं मनागीदृशं प्रेम दिव्यं युष्मास्वेवं प्रियमेकान्तवत्यः[2] ॥६३॥
संसेवनीयः किमुतान्यैर्मयापि पुण्यस्तीर्थो भवतीपादरेणुः[3] ।
स्त्रियो भूत्वा पौरुषं दिव्यमेवं यूयं प्राप्ताः शङ्कराद्यैरलभ्यम् ॥६४॥
प्रेम्णामलेनान्तरात्मप्रसादात् प्रीतः क्रीतो भवतीभिः सदाहम् ।
अविप्रयुक्तः सततं चैव रंस्ये वश्यां वृत्तिं दर्शयानः समग्राम् ॥६५॥
नित्ये धाम्नि दिव्यसाकेतसंज्ञे सरयूपुलिने परे नित्यरम्ये ।
सीतालोके भूरि प्रमुदवने[4] यत्र क्रीडेऽहं तत्र तत्र स्थ यूयम् ॥६६॥
यूयं नित्याः कीर्तिता वेदमूर्ध्नि, नित्यानन्दा नित्यगा नित्यसिद्धाः ।
लोकोऽयं वो नित्यसच्चित्सुखात्मा किञ्चिज्ज्ञात्वा कामितो ब्रह्मविद्भिः॥६७॥
तेऽमी स्थिताः पुरतोऽग्नेः कुमारा ब्रह्म विन्दन्तः षष्टिसाहस्रसंख्याः ।
तद्वत् स्थिताः[5] श्रुतयोऽमूः पुरो[6] वो ब्रह्म विन्दन्तीः सततं कामयानाः॥६८॥
अन्ये च सिद्धा ऋषयो ब्रह्मनिष्ठाः ब्रह्मर्षयो वन्दिता नारदाद्यैः ।
नेमे लोकं प्राप्तुमर्हन्ति सख्यो यद्यप्येते कामतत्त्वेन विद्धाः ॥६९॥
सर्वस्योर्ध्वं भाति वैकुण्ठधाम ऊर्ध्वं वैकुण्ठाद्या[दा]दिवैकुण्ठधाम ।
राधालोकं तस्य चोर्ध्वं विभाति सीतालोकस्तस्यचाप्यूर्ध्व एषः ॥७०॥
नातः परं लोकसंस्थागमेषु दृष्ट्वा क्वचित् सरहस्येषु तेषु ।
चिल्लोकोऽयं मामकीनो मदात्मा पूर्णः सदा पूर्णपूर्णः सुपूर्णः ॥७१॥
आनन्दात्मा स्वे महिम्नि प्रतिष्ठः सत्याकारः सत्यधर्मा[7] सुसत्यः ।
चिद्रूपोऽयं चित्प्रतिष्ठाप्रतिष्ठः कालातीतो मायया चाप्यधृष्यः ॥७२॥
यस्माज्जातः पूरुषः कोऽपि कालः श्रीमान् विष्णुर्लोकलोकेशनाथः ।
जिष्णुर्विष्णुः कृष्ण इत्याद्यनेकैर्नाम्नां वृन्दैः कीर्तितः सोऽपि चांशः ॥७३॥
यल्लोकोऽसौ कीर्तितो रामलोकः सीतालोकस्तत्र चानन्दलोकः ।
ईदृक्प्रेम्णा तमिमं प्राप्य यूयं जाताः सख्यः कृतकृत्या[8] पुरैव ॥७४॥

---

१. यूयंप्रिया—अयो० । २. युष्मावावेशं प्रिया मे करोति–अयो० । ३. किमुतान्यैर्मया विधृतः शीर्षमध्ये दिव्यतीर्थो भवतीनां पादरेणुः–रीवाँ, बड़ो० । ४. प्रमोदवने–बड़ो० । ५. तदास्थिता—रीवाँ। ६. नूपुरो—रीवाँ, बड़ो० । ७. सत्यधर्ता—रीवाँ, बड़ो० । ८. प्रेमसत्या—रीवाँ, बड़ो० ।

न यत्र दुःखं न जरा न मृत्युर्न कालबाधा प्रकृतेर्न प्रभावः ।
नित्ये सत्ये तत्र यूयं रमध्वं रसेन संयुग्विप्रयोगात्मकेन[1] ।।७५।।

संयोगाद्विप्रयोगो मे प्रियो नित्याभिभाषितः ।
रामात्मनाहं संयोगी रामात्मा विप्रयोगवान् ।।७६।।
संयोगरसभोगाय रामोऽहं वै वसे वने[2] ।
विप्रयोगानुभूत्यै तु रामः साकेतपत्तने ।।७७।।
रसनाभा तु रामोऽहं रामोहं रासनायकः ।
उभयोर्नित्यभोगाय प्रमोदवनमास्थितः ।।७८।।
गावो गोपास्तथा गोप्यो नित्यलीलापरिच्छदाः
राजन्ति स्वस्वभावेन प्रमोदविपिने मम ।।७९।।

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डिसंवादे रामरासो नाम चतुस्त्रिंशोऽध्यायः ।।३४।।

पञ्चत्रिंशोऽध्यायः

ब्रह्मोवाच

एवं श्रुत्वा रसिकेन्द्रस्य दिव्यरसात्मनो राघवेन्द्रस्य वाचः ।
गोपाङ्गनास्तुष्टुवुस्ताः[3] समस्तास्त्यक्त्वा वियोगप्रसवं चित्ततापम् ।। १ ।।
अथेप्सितानां व्रजसुन्दरीणां परस्पराबद्धकराम्बुजानाम् ।
मध्ये स्थितो रामचन्द्रो विरेजे तत्कण्ठयोर्विलसद्बाहुयुग्मः ।। २ ।।
इत्थं शतं सहस्रं च मूर्त्तीः[4] कृत्वा निजात्मनः ।
रेमे रामो रसोन्मादचलच्चरणतालदृक् ।। ३ ।।
तासां प्रेयो नाभिमध्योदरान्तर्लोलान्योन्याबद्धहस्ताम्बुजानाम् ।
एको हस्तः खे चलन् भावरीत्या कामाम्भोजे भ्राजिनालो विरेजे ।। ४ ।।
ताः प्रेयसो[5] नूपुरकिङ्किणीनां नादैः स्वाङ्घ्रिस्थायिनां नूपुराणाम् ।
नादान् मुहुर्मेलयित्वा नटन्त्यः स्वारस्यमापुर्ललितं सामरस्यम् ।। ५ ।।

---

१. रामात्माविप्र°—रीवाँ, बड़ो० । २. वै वनेस्म्यहं—अयो०, संविशन् वने—बड़ो° । ३. स्तस्थुस्ताः—रीवाँ, बड़ो० । ४. मूर्तिं—रीवाँ, बड़ो० । ५. प्रेयसीः—रीवाँ, बड़ो० ।

तस्मिंश्च रासे तालशङ्खा मृदङ्गाः सझर्झरा पटहाः झल्लरीश्च[1] ।
भेरीवीणावेणुवाद्यप्रभेदाः संमूर्त्तिकाश्चिन्मयाः प्रादुरासुः ॥ ६ ॥
दृष्ट्वा रासोत्सुकं रामं प्रेयसीश्चापि तस्य ताः ।
वाद्यवादनकारिण्यः प्रादुरासुर्वरस्त्रियः ॥ ७ ॥
तितानां विततानां च छादितानां समन्ततः ।
घनानां सुषिराणां च प्रादुरासीन्महान् ध्वनिः ॥ ८ ॥
तं ध्वानमनुकृत्याभूद्दिवि दुन्दुभिजो ध्वनिः ।
अवाकिरंश्च मन्दारमाल्यानि त्रिदिवौकसः ॥ ९ ॥
चलच्चरणनूपुरैर्ललितकिङ्किणीनां गणै-
रनेकवलयैस्तथा विधुत[2]बाहुवल्लीस्थितैः ।
अभूत् सततकाहलः किमपि तत्र कोलाहलः
सुवर्णमणिभूषणप्रकरसिञ्जितैर्मिश्रितः[3] ॥१०॥
प्रेयसीरनुचकार वल्लभो वल्लभं च ललना अनुचक्रुः ।
ते परस्परविधेयचातुरीवेधसः शुशुभिरे रसरासे ॥११॥
प्रेयसीमधुरकण्ठसुस्वरैः प्रेयसो जयति कण्ठसुस्वरः ।
यत्प्रमोदवनवासिकोकिला मौनमापुरनुसर्तुमक्षमाः[4] ॥१२॥
मध्ये मध्ये कनकलतिकाजातमालैस्तमालै-
र्मध्ये मध्ये विलुलिततडिन्मोदमानैः[5] पयोदैः ।
मध्ये मध्ये कनकमणिभा[6]संगशीलैश्च नीलैः
प्राप्तुं शक्या नखलु रमणं राममासां[7] विलासाः ॥१३॥
एवं स ताभिः शुशुभे रमाभिः कामप्यपूर्वां परमां[8]दधानः ।
वेणुं क्वणन्मध्यगतो दामिनीनां मध्ये तडित्वानिव जातगर्जः ॥१४॥
मुग्धाङ्घ्रीणां विलासै रणरणकरणत्किङ्किणीनूपुराद्यै-
र्दोर्वल्लीनामुदञ्चद्वलयकलकलैः सस्मितै[9]र्भ्रूविजृम्भैः ।

---

१. झालरीः—रीवाँ, बड़ो० । २. विद्युतत्—रीवाँ, बड़ो० । ३. मिश्रितैः—रीवाँ । ४. °मक्षणः—अयो० बड़ो० । ५. °मोदैः—अयो० । ६. °मणिना—रीवाँ, बड़ो० । ७. रामरासं—रीवाँ, बड़ो० । ८. मनसां—अयो० । ९. सुस्मितैः— अयो० ।

सानङ्गैर्मध्यभङ्गैः कुचपटचलनैः कुण्डलैर्गण्डलोलैः ।
काञ्चीवेणीकलापैः श्लथलसदलकग्रन्थिभिस्ता विरेजुः ॥१५॥

स्वेदाञ्चितानि वदनानि विभावतीनाम्
स्वेदाञ्चितानि च वपूंषि विलासलासैः ।
रासोन्मदप्रणयपाणिविकर्षितानां
रेजुर्नितान्तसुरतान्तगतानि यद्वत् ॥१६॥

सीता शीतांशुसीता[1] च सुधा श्रीः कमला कला ।
कामिनी कामदा कामा कमनीया कलावती ॥१७॥
राधा कृष्णानुराधा च सुधाधारा मणीरमा[2] ।
ललनाकोटियूथेषु षोडशैव सुमध्यमाः ॥१८॥
एता मुख्यतमाः प्रोक्ता यथा कान्तस्तथैव ताः ।
स्वामिनीशब्दभाजश्च दामिनीतुल्यकान्तयः ॥१९॥
रामेण सह नृत्यन्त्यो रेजिरे रासमण्डले ।
स्वस्वमण्डलमुख्याश्च प्रेयसा प्रतिलालिताः ॥२०॥
जगुरुच्चैः स्वरेणैताः प्रियकण्ठस्वरोर्जिताः ।
शुद्धमिश्रप्रभेदाश्च स्वरजातीः सलक्षणाः[3] ॥
प्रियेण सह गायन्त्यः पुपुषुः परमां श्रियम् ॥२१॥

काश्चित् परं वेणुरवानुमोहिता[4] प्रमत्तपुंस्कोकिलकण्ठजित्वरैः ।
स्वरैरगायन् वनिता वनान्तरे प्रियेण साकं बहुजातसंभ्रमाः ॥२२॥

काश्चित्स्वयूथमवलम्ब्य सह प्रियेण
गायन्त्य उच्चतरकण्ठरवाप्तमानाः ।
अन्याः सुनृत्यकलया दधतीः पटुत्व-
मौत्सुक्यसंगतहृदो नदयाम्बभूवुः ॥२३॥

कदाचिद् वनिता एव सर्वाः संजगुरुच्चकैः ।
अनृत्यत् प्रिय एकाकी कलाचातुर्यदर्शनैः ॥२४॥

---

१. सीता सुसीता—रीवाँ, बड़ौ० । २. °मिणो°—अयो०, रीवाँ । ३. सलक्ष्मणाः—अयो०, रीवाँ, बड़ो० । ४. °मोदिताः—अयो० ।

कदाचिद् गायतोऽत्युच्चैः प्रेयसस्तुष्टिहेतवे ।
अनृत्यन् वनिताः सर्वाश्चातुर्याञ्चितविग्रहाः ॥२५॥
काचिच्च रामपरिवर्तनजश्रमेण
श्रान्ता[1] गुरुस्तननितम्बभरालसाङ्गी ।
स्विद्यन्मुखी श्लथलसद्रसना[2] प्रियांसे
प्रादाद् भुजं तरलकूजितकङ्कणाढ्या[3] ॥२६॥
काचिद् भुजौ दृढतरस्मरपाणिपाशौ
कण्ठे निधाय दयितस्य च लम्बमाना ।
शंपामयी स्रगिव मेचकमेघ[4]लग्ना
रेजेतरां तरुणिरग्रिमघर्मकान्तिः ॥२७॥
काचिन्मुखेन रमणस्य निजाङ्कसंस्थं[5]
काश्मीरचन्दनकुरङ्गमदानुलिप्तम् ।
आघ्राय जातपुलका प्रणयोत्करेण
गोपी सुगुप्तगतिरेव मुहुश्चुचुम्ब ॥२८॥
कस्यैचिदाकलितरासविलासनृत्य-
विक्षिप्तकुण्डलमणीगणमण्डिते स्वे ।
गण्डे स्वगण्डफलकं श्रमतो दधत्यै
प्रादात् प्रियो हि लतिकादलचर्वितं स्वम् ॥२९॥
अन्या च रासरसितै[6]र्वलयैर्नदन्ती[7]
कूजन्महार्हमणिनूपुरमेखलाद्या ।
पार्श्वस्थितस्य रुचिरं रमणस्य हस्तं
श्रान्ता स्तनोपरि निधाय सुखान्यवाप ॥३०॥
काचिज्जवेन दयितं परिरभ्य तुङ्ग-
वक्षोजविक्षुभितमक्षि[8] चुचुम्ब तस्य ।

---

१. श्रान्त उरु०—रीवाँ, बड़ो० । २. सूनथसप्रसना—रीवाँ, बड़ो० । ३. °कंकणाद्या—अयो०, बड़ो० । ४. शृङ्ग०—रीवाँ, बड़ो० । ५. °संस्था—रीवाँ, बड़ो० । ६. °रसिका—अयो०, °रचितैः—बड़ो० । ७. नटन्ती— अयो० । ८. विक्षोभित०—रीवाँ०, बड़ो० ।

इष्टं पृथक् पृथगनङ्गरसं निगूढ-
रासान्तरे पुपुषुरद्भुतकेलिदक्षाः ॥३१॥
गोपाङ्गना रुचिरराजकुमारवर्य-
हस्तद्वयाकलितगाढगृहीतकण्ठ्यः ।
रासक्रियाललितमण्डितमण्डलीषु
स्वच्छन्दमेव बहुधा विदधुर्विहारम् ॥३२॥
कदाचिद् गोपतरुणीमण्डलान्तरमण्डनः ।
रामः सीतासमं रेजे क्वणद्वेणुयुताधरः ॥३३॥
कदाचित् स्वाङ्गकान्त्यैव[1] प्रियामन्तर्हितां दधत् ।
चक्कार कौतुकं स्त्रीणां क्व गता महिषीत्यहो ॥३४॥
तासु संभ्रान्तचित्तासु स्थित्वा मण्डलमध्यतः ।
दर्शयन् सहजां लक्ष्मीं जयेति मुहुरीडितः ॥३५॥
साखिलव्रजकान्ताभिर्दीप्ताभिरपि मण्डले ।
अप्रधृष्यैव शुशुभे लोकसौन्दर्यजीवनी ॥३६॥
कदाचित्तस्या हस्तेन हस्तमादाय वल्लभः ।
जगाम कुञ्जभवने दासीवत्तास्तु तस्थिरे ॥३७॥
आज्ञापयिष्यति प्रभ्वी प्रभुर्वा किं न दूत्यमूः ।
सावधानतया तस्थुः कुञ्जद्वारलसद्दृशः ॥३८॥
कुञ्जालयं सुखं गम्य कृत्वा पूर्णं मनोरथम् ।
एताभ्यां पुनरेताभ्यां जयेत्युच्चैस्तरां जगुः ॥३९॥
संभुक्तिपानपरिधानविभूषणानि
लेपाञ्जनालभनमार्जनव्यञ्जनाद्यैः ।
तौ ता विशेषधिषणा[2] परिचेरुरुच्चै-
र्दासीवदप्यनुपदं कलितावधानाः ॥४०॥
कान्तेन भूरितरकेलिषु कोविदेन
ताः संसदि प्रतिपदं बहुदत्तमानाः ।

---

१. काङ्क्षैव—बड़ो० । २. विशेषैः परि°—रीवाँ, बड़ो० ।

नैतां[1] प्रियां समनुलङ्घितुमीशिरेऽपि
पूर्वं विसोढविरहस्मृतिकातराक्ष्यः ॥४१॥
नैवापि तासु वनितासु कुमारकेण
सार्द्धं प्रभूतरमणोत्सवसंभ्रमेषु ।
प्रत्यूहलेशमकरोद्यदमुष्य साक्षा-
न्नित्याङ्गसङ्गमवतो सहजैव लक्ष्मीः ॥४२॥
अश्रान्तरासरसिको रमणः स इत्थं
गुप्तस्फुटं प्रकट[2]केलिविधानदक्षः ।
रेमे रमैकरमितो रमणो रमाभि-
राभीरराजकुलभूषणसुन्दरीभिः ॥४३॥
कदाचिन्नृत्यमानानां वनितानां प्रियैः सह ।
भ्रमरालिरभूद्वीणा कोकिलामुरजध्वनिः ॥४४॥
रामरासरसं वीक्ष्य देवा ब्रह्मशिवादयः ।
विचिन्त्यमाना मनसि बभूवुः प्रेमघूर्णिताः ॥४५॥
अस्तमाममरनागनगोनां रूपसारभरजोऽप्यभिमानः ।
किङ्करीवदिह दर्शनमापुर्दूरतो रसिकरासरसेषु ॥४६॥
[3]आदित्या विश्वेदेवाश्च वसवस्तुषितास्तथा ।
भास्कराश्चानिलाश्चैव महाराजिकसाध्यकाः ॥४७॥
रुद्राः समुद्रा गिरयो नदा नद्योऽप्सरोगणाः ।
विद्याधराश्च यक्षाश्च गन्धर्वाश्चैव किन्नराः ॥४८॥
ग्रहनक्षत्रताराद्याः प्रह्लादश्च विभीषणः ।
ब्रह्मर्षयो वसिष्ठाद्यास्तथा देवर्षयोऽखिलाः ॥४९॥
लक्ष्मीनारायणौ चैव पार्वतीशंकरौ तथा ।
गायत्री चापि सावित्री सरस्वत्यप्सरः शची ॥५०॥

---

१. नैताः—बड़ो० । २. प्रकल०—बड़ो० । ३. अयं श्लोको नास्ति—रीवाँ, बड़ो० ।

सर्वे देवगणाश्चैव हर्षिताः स्वस्वचेतसि ।
योषारूपं समास्थाय रामरासे समाययुः ॥५१॥
तेषां विमानसंदोहैरभवत् संकुलं नभः ।
रामो नवघनश्यामो महारत्नविभूषितः ॥५२॥
लक्ष्मीं दधद् गोपिकाभिः संस्थितो रासमण्डले ।
स्वस्वभावानुसारेण सर्वेषां दर्शनं ददौ ॥५३॥
गोपीं गोपीमन्तरा रामचन्द्रो रामं रामं चान्तरा गोपनार्यः ।
इत्थं जाते मण्डले मञ्जुलाभो रेमे रामो रामया राजमानः ॥५४॥
श्रीहस्ताब्जबद्धसम्बद्धकण्ठचोरन्योन्यं वा बद्धबाह्वोर्युवत्यः ।
वामं हस्तं चोर्द्धयित्वानयोश्च मध्ये रेमे रामचन्द्रःकदाचित् ॥५५॥
इत्थं द्वेधा मण्डलं कल्पयित्वा पर्यायेण क्रीडमानो वधूभिः ।
योगाधीशस्तत्र योगीव रामो रेमे स्वानां संमुदं वर्धयानः ॥५६॥
रासक्रीडावेषविस्रस्तबन्धैर्धम्मिलैः स्वैर्मल्लिकाः संवमन्त्यः ।
विद्युद्वल्लीजैत्रविद्योतिताङ्ग्यो गोप्यो रासे नाटकं चक्रुरुच्चैः ॥५७॥
रासे समुद्भूतरमाविलासे श्रीरामचन्द्रेण समं नटन्त्यः ।
धम्मिलवल्ल्युन्ननितम्बभारं वोढुं न शक्ता वनिता बभूवुः ॥५८॥
नितम्बौ स्रस्तकाञ्चीकौ कुचौ विगतकञ्चुकौ ।
धम्मिलान् बन्धनोन्मुक्तान् वहन्त्यो रेजिरे स्त्रियः ॥५९॥
खेचरौघाः सह स्त्रीभिश्चन्द्रश्चोडुगणैः सह ।
रामरासं समालोक्य विस्मितोऽभून्निरन्तरम् ॥६०॥
यावद्विजहार भगवान् तावत्कालं रजनीशः संस्थितोऽभूत् ।
चन्द्रेण स्वस्यां गतौ विस्मृतायां स्वस्वस्थाने खेचराश्चापि तस्थुः ॥६१॥
यावन्तस्ता मण्डले गोपनार्यस्तावद्रूपो राघवेन्द्रो बभूव ।
अन्योन्यं चालक्ष्य लीलाविनोदं रेमे ताभिर्भूरि दाक्षिण्यशाली ॥६२॥
तासां प्रभूतश्रमकर्षितगोपिकानां
वक्त्राणि वारिकणसंवलितालककानि ।
हस्ताम्बुजेन स ममर्षतरां ततोऽमूः
पीयूषपातसुखिता इव संबभूवुः ॥६३॥

इत्थं हरेर्भगवतः पुरुषोत्तमस्य
रामस्य राघवकुलामलकीर्तनस्य ।
यः संशृणोति रतिरासविलासलीलां
स रामसंपदमुपैति विमुक्तकामः ॥६४॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे
रामरासो नाम[1] पञ्चत्रिंशोऽध्यायः ॥३५॥

❁

षट्त्रिंशोऽध्यायः

ब्रह्मोवाच

रामस्य रासं नयनै[2]र्निपीय ते दण्डकारण्यजुषोऽग्निपुत्राः ।
कामेन संक्षुब्धहृदः समन्तात्तन्मडलं तुष्टुवुः कल्पिताशाः ॥१॥

मुनय ऊचुः

प्रावृट्समुन्नतनवीनघनाभिरामं
योषासमूहपरिकल्पितमण्डलस्थम् ।
पीताम्बरद्युतितडित्प्रकराभिरामं
रासस्थितं रघुपतिं सततं भजामः ॥ २ ॥

श्रीमत्प्रमोदवनमञ्जुलकुञ्जवीथी-
विद्योतमानपरिपूर्णकलाहिमांशुम् ।
सामस्वरक्वणितवेणुसनाथपार्णिं
रासस्थितं रघुपतिं सततं भजामः ॥ ३ ॥

रत्नावलीयुतसुवर्णसुदिव्यमौलि-
मुक्तास्रगद्भुतसुलक्ष्यविशालवक्षः ।
श्रीवत्सलक्ष्मसुभगोत्तमदिव्यगात्रं
रासस्थितं रघुपतिं सततं भजामः ॥ ४ ॥

उद्यद्विशालमणिमञ्जुलतुङ्गनासं
गण्डस्थलप्रतिफलत्कलकुण्डलाग्रम् ।

---

१. रामरासे—अयो०, रीवाँ, बड़ो० । २. तपनैर्—रीवाँ, बड़ो० ।

कस्तूरिकातिलकभूषितभालदेशं
रासस्थितं रघुपतिं सततं भजामः ॥ ५ ॥
केयूरलम्बनललामभुजद्वयाग्र-
बन्धोद्गृहीततरकौस्तुभशोभि कण्ठम् ।
पादाम्बुजक्वणितनूपुरकिङ्किणीकं
रासस्थितं रघुपतिं सततं भजामः ॥ ६ ॥
एकद्वयत्रिचतुरादिभृतक्रमात्त-
तालप्रबन्धरचनानयनाभिरामम् ।
सङ्गीतशास्त्रविततालकागुरुं तं
रासस्थितं रघुपतिं सततं भजामः ॥ ७ ॥
नृत्यन्तमद्भुतकलानिकरप्रवीण-
मानापलापरचनैकविधानदक्षम् ।
वंशीधरं नटवरं वरदोत्तमाङ्गं
रासस्थितं रघुपतिं सततं भजामः ॥ ८ ॥
अङ्गोन्मिलन्मलयजद्रवजातभक्ति
रङ्गत्त्रिभङ्गकलितातिललामकामम् ।
कैशोरवेशमतिवर्त्य परिस्फुटन्तं
रासस्थितं रघुपतिं सततं भजामः ॥ ९ ॥
मन्दारमूलमधिगम्य विराजमानं
गोपाङ्गनाविरचितोत्तममण्डलास्यम्[2] ।
पीतांशुकच्छविनिबद्धकटिप्रदेशं
रासस्थितं रघुपतिं सततं भजामः ॥१०॥
मन्दस्मिताधरसुधारसरञ्जितोष्ठं
लोलालकावलितमुग्धकपोलदेशम् ।
पादाम्बुजप्रथिततालविधाननृत्यं
रासस्थितं रघुपतिं सततं भजामः ॥११॥

---

१. छलकं—बड़ो० । २. गोपांगनाभी रचितोत्तममंडलाग्र्यम्—अयो० ।

[1]ताम्बूलिकादलसुचर्वणचारुराग-
संवर्धगोपरमणीक्षणचुम्बनोग्रम् ।
तत्तुङ्गवक्षसिजमर्दनलग्नहस्तं
रासस्थितं रघुपतिं सततं भजामः ॥१२॥

सीतानिरन्तरविभूषितवामभागं
मध्यस्थलच्छविविनिर्जितसिंहमध्यम् ।
मन्दस्मितप्रसर[2]मण्डितमण्डलास्यं
रासस्थितं रघुपतिं सततं भजामः ॥१३॥

श्रीरत्नवेदिविपुलीकृतमण्डलान्तः-
कोटिप्रकारपरिकल्पितनिजप्रकाशम् ।
वामाङ्गसङ्गिसहजास्पृहणीयकेलिं
रासस्थितं रघुपतिं सततं भजामः ॥१४॥

श्रीमत्प्रमोदवनकल्पितमण्डलाब्ज-
सत्कर्णिकार्पितरमारमणैक[3]मूर्तिम् ।
स्वस्वामिनीसमनुवाञ्छितदिव्यरासं
रासस्थितं रघुपतिं सततं भजामः ॥१५॥

ब्रह्मेन्द्रशङ्करमुखत्रिदिवालयौघ-
हस्ताम्बुजच्युतसुरद्रुमपुष्पवृष्टिम् ।
कोटीन्दुजित्वरकिरीटमणिप्रभाढ्यं
रासस्थितं रघुपतिं सततं भजामः ॥१६॥

जय जय जय सहजानन्दरसनिर्भरनिजविलासमोहितब्रह्मादि-सुरसंस्तूयमान कुटिल[4]गोपाङ्गनाजनकटाक्षसमुद्भूतनूतनकन्दर्पशर-लक्ष्यीकृतचित्त कुन्दवनेश्वरिमनोरथपूर्तिप्रभावप्रेमपरिपालक सच्चि-दानन्दमयपरब्रह्मरस स्वानन्दैककन्द सहजकल्याणगुणनिधान नमस्ते नमस्ते ॥१७॥

---

१. अयं श्लोको नास्ति—अयो० । २. °स्वविर°—रीवाँ, अयो० । ३. रमारनैक—अयो०, बडो० । ४. कुट्टित—रीवाँ ।

किं त्वामशेषमतिसाक्षिणमर्थयामो
जानासि सर्वमपि नः स्पृहणीयमर्थम् ।
अस्यैव तावकविलासरसस्य नित्यं
पात्राणि किं नहि भवाम वयं स्मरार्त्ताः ॥१८॥

किं वा सहस्र जनुरर्जितकोटिपुण्य-
नैष्कर्म्यसिद्धिसुहितेन ननु त्वयैव[1] ।
दत्तामलभ्यवरभाजनतामुपेत्य
नित्यं भजाम निजवाञ्छितलाभतृप्ताः ॥१९॥

नो चेद् वयं विरहपावकदग्धदेहाः
स्नेहानुबन्धमहिमोद्धृतमोक्षसौख्याः ।
त्वत्पादपद्मपदवीं समुपेत्य भूयो
जन्मान्तरेऽपि कलयाम न किंचिदिष्टम् ॥२०॥

इति तेषां द्विजेन्द्राणां दण्डकारण्यवासिनाम्
श्रुत्वा विक्लवितं रामः प्रहसन्निदमुक्तवान् ॥२१॥

श्रीराम उवाच

सुविहिततपसो मुनीन्द्रवर्या दहनसुताः खलु दुर्लभोऽयमर्थः ।
श्रुतिभिरपि मदेककामुकीभिः शतशतकल्पजनुस्तपस्विनीभिः ॥२२॥

तदपि मयि निवेद्य वाञ्छितार्थं यदि न भवन्त उपेतवाञ्छिताः स्युः ।
इदमपि न ददेत तद्भवद्भ्यो दुरधिगमोऽपि मयोपकल्पितोऽर्थः ॥२३॥

कृष्णावताररूपेण समनुक्रीडता मया
आगामिनि भवे यूयं कृतकृत्या भविष्यथ ॥२४॥
कृष्णो नाम ममैवांशो जनिता नन्दगोकुले ।
तद्द्वारा मां समासाद्य फलितार्था भविष्यथ ॥२५॥
इयं च सहजाशक्तिः सच्चिदानन्दलक्षणा ।
तत्रैवांशेन भविता राधानाम्नी मम प्रिया ॥२६॥

---

१. °सुहितो नुदयन्स्त्वयैव—रीवाँ, बड़ो० ।

तयाविष्टासु सर्वासु सुन्दरीषु रतिं भजन् ।
विहरिष्याम्यहं तत्र दिव्ये वृन्दावने वने ॥२७॥
सीता लोकस्य सामग्री समस्ता खलु तत्र माम् ।
उपस्थास्यति विप्रेन्द्राः स्वस्वांशेन विनोदकृत् ॥२८॥
तावद्यूयं जातवेदःकुमाराः शुद्धप्रेमाणः सततं मां भजध्वम् ।
ईदृग् लीलाकारमीदृक् स्वरूपमीदृग्भावं प्राप्स्यथोच्चैः प्रसादात् ॥२९॥
इति तस्माद्वरं लब्ध्वा दण्डकारण्यवासिनः ।
मुनयस्तत्र सिद्धार्थास्तस्थुर्ध्यानपरायणाः ॥३०॥
एवं स रसिकेन्द्रस्य विलासो राससंज्ञितः ।
त्रैलोक्यं शोभयामास कामतत्त्वेन जृम्भितः ॥३१॥
नद्यः[1] स्तब्धतया तस्थुर्लतावृक्षाश्चकम्पिरे ।
दद्रुवुश्चैव पाषाणाः साध्यसत्त्वानि तत्यजुः ॥३२॥
जहौ शम्भुः समाधिं च विश्वकृद्विश्वकल्पनाम् ।
भ्रमणं शिशुमारान्तस्तत्याज ग्रहमण्डलम् ॥३३॥
सर्वे बभूवुः सहसा परमानन्दनिर्वृताः ।
रामरासरसोन्मादवासिताखिलवृत्तयः ॥३४॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे
रामरासो नाम[2] षट्त्रिंशोऽध्यायः ॥३६॥

सप्तत्रिंशोऽध्यायः

ब्रह्मोवाच

ततः सनृत्यश्रमजातभूयः स्वेदाम्बुलग्नाङ्गदुकूल[3] ईशः ।
निषेव्य शीतं सुरभिं समीरं लीलावगाहाय सरो जगाम ॥ १ ॥
तत्पृष्टतः पङ्कजलोचनानां तडित्त्विषां स्वेदकणास्रुतीनाम्[4] ।
जगाम पङ्क्तिः खलु कामिनीनां संचारिणीनामिव वल्लरीणाम् ॥ २ ॥

१. तदा—बड़ो० । २. रामरासे—अयो०, रीवाँ, बड़ो० । ३. जातांग°—बड़ो० । ४. स्वेदकणस्तुतानां—अयो० ।

तासामनु व्रजन्तीनां किङ्किणीनूपुरध्वनिः ।
उद्बुद्धराजहंसौघश्चक्रे कोलाहलं निशि ॥ ३ ॥
स्वच्छाय[1]कुञ्जवनवृक्षलतातलेषु
तासां तनुद्युतिभरेण महोद्धतेन ।
आच्छादय ताःसमजनि[2]प्रकटं निगूढ-
भृङ्गारकेलिसरसोगमनाध्वमध्ये ॥ ४ ॥
धम्मिलकूटकुचकुम्भनितम्बविम्ब-
भूयो भरोद्वहनजश्रमखिन्नगात्राः ।
एणीदृशो रसिकराजनिपीतसाराः
कष्टेन केलिसरसीषु प्रजग्मुरेताः ॥ ५ ॥
हेमत्विषां पुलिनभूमिषु संस्थितानां
तासां मुखेन्दुनिवहेन पयोगतेन ।
सा रामकेलिसरसी सहसैव रेजे
संपूर्णकोटिविधुमण्डलमण्डितेव ॥ ६ ॥
दिव्यावतंसमणिदीधितिवासिताभिः
श्रीरामचन्द्रचरणाब्जनखप्रभाभिः ।
तद्दिव्यकेलिसरसीसरसीरुहाणि
तत्कालमेव सविलासविकासमापुः ॥ ७ ॥
तासां मुखेन्दुशतशारदचन्द्रिकाभिः
प्रोद्भासितानि किल कैरविणां कुलानि ।
मञ्जीरमञ्जुलनिनादभरेण भूयो
निद्रायिता बुबुधिरेऽखिलराजहंसाः ॥ ८ ॥
उत्तार्य भूषणभरं वसनानि चामूः
स्नानक्रियासमुचितां तनुमुद्वहन्त्यः ।
कान्त्यैव संशुशुभिरे व्रजवामनेत्रा
हैम्यो लता इव विधूतदला वसन्ते[3] ॥ ९ ॥

---

१. स्वछाय—रीवाँ, बड़ो० । २. अछायद्यूतामजनि—रीवाँ, अछायधूत-मजनि—बड़ो० । ३. वतंसे—बड़ो० ।

निश्रेणिका पथञ्झणञ्झणितातिमञ्जु-
मञ्जीरशिञ्जितविमोहितराजहंसाः ।
तास्तत्र केलिसरसीमवगाहनाय
श्रीराघवेन्द्ररसिकेन सहावतेरुः ॥१०॥

गम्भीरनाभिषु डुमड्डुमितानुनाद-
लीलाविधायितजलोर्मिषु लोलमानाः ।
सद्यःभवाः श्रिय इवाम्बुनिधौ लसन्त्य
उक्षाम्बभूवुरभितो रघुवंशरत्नम् ॥११॥

रामोऽपि ताः करसरोरुहपत्रबद्ध-
वारांभरैः सरसिजानुनिपातधारैः ।
अभ्युक्ष्यतिस्म रतिकेलिनितान्ततान्ति-
श्रान्तान्मनः कमलवृन्दपरागगर्भैः ॥१२॥

गोपाङ्गनाकुचतटीपरिलिप्तभूरि-
काश्मीरचन्दनकुरङ्गमदप्रवाहैः ।
व्यामिश्रितं सपदि सारवमम्बुतत्-
त्रिवेणीप्रवाहपदवीमवहत् तदानीम् ॥१३॥

वक्रत्विषा सरसिजानि दृशा द्विरेफान्
गत्या मरालकुलमूर्मिकुलं त्रिवल्या ।
शैवालिकाः स्फुरदनुत्तमरोमपङ्क्त्या
प्रापुः पराभवमनः स्खलनं सुसाम्यम् ॥१४॥

आलोडितं रघुवरेण सरो विलोल-
वीचीविचालितसरोजपरागपूर्णम् ।
रेजे तमालकलिकानुकृते निजाङ्गे
पीताम्बरद्युतिमवाप तदञ्जसैव[1] ॥१५॥

नीचैरतुल्यमधरीयमथोत्तरीय-
मुच्चैः कुचेषु च सकञ्चुकभावमञ्चत् ।

---

१. तदंभसैव—रीवाँ।

आन्दोलितं प्रियकरैर्व्रजकामिनीनां
केलीसरोजलमनेकरुचा विरेजे ॥१६॥
गोपी नितान्तमवगाह्य सरोजलेऽस्मिन्
रामाङ्गसङ्गमवशादमृतादपोड्ये ।
संभोगसङ्गमसमुद्भवमङ्गसङ्गं
व्याप्य स्थितं श्रमभरं मुमुचुः सलीलम् ॥१७॥
मन्दानिलप्रचलतोरमहीरुहेभ्यः
संपातिनी विविधसौरभिपुष्पवृष्टिः ।
स्नान्तीषु गोपतरुणीषु चिरं बभासे
संसूच्यमानपुरुषायितविक्रमेव ॥१८॥
सर्वाः समं प्रियतमं करयन्त्रिकाभि-
राबध्य वारिपटलं परिषेचयन्त्यः ।
अम्भोधरं स्वकिरणैरभितः किरन्त्य-
स्तारा इव द्युतिभृतो गगने विरेजुः ॥१९॥
कान्तोऽपि तासु बहुधा करयन्त्रबन्ध-
धारायितानि सलिलानि नितान्तमुक्षन् ।
प्रावृट्पयोद इव काञ्चनवल्लरीषु
धाराजलानि कलयन् नितरां रराज ॥२०॥
काश्चित्परस्परमुदीर्णरसाः[1] सयूथं
चक्रुः करोत्करबलैर्जलकेलियुद्धम् ।
याश्चैव बिभ्रति पराभवमत्र तासां
पक्षे स्वयं भवति राघवसार्वभौमः ॥२१॥
बिम्बाधरामृतनिपापरिरम्भचुम्ब-
मुख्यैः करैर्विरचिताम्बुनियुद्धखेलः ।
निर्जित्य ताः सरसि संकुचतीर्मृगाक्षी-
र्जग्राह धावनकरी रसिकेन्द्र उच्चैः ॥२२॥

---

१. °माणाः—अयो० ।

ता एकसार्थमिलिता वनिता विजित्य
शैवालिकानलिननालगुणैर्निबद्ध्य ।
रामं त्रिलोकजनकं नयनाभिरामं
चुम्बन्ति लान्ति बहुशः परिरम्भयन्ति ॥२३॥
इत्थं परस्परमनेकविधां जलान्तः-
केलीं विधाय वनिताः सह वल्लभेन ।
पद्मैरनेकविधवर्णविराजिपत्रै-
र्भूषाविधानमतुलं रचयाम्बभूवुः ॥२४॥
श्रुत्योर्विभूषणमकुर्वत कर्णिकाभिः
पद्मच्छदैर्विरचयन्[1] कुचकञ्चुकानि[2] ।
केयूरहारवलयादिमृणालिकाभिः
स्वच्छन्दमेव विदधुर्वनिताः प्रवीणाः ॥२५॥
प्रत्यङ्गमेवमभिभूष्य सरोजहस्ता
उत्तेरुरम्बुजदृशः सरसीजलेभ्यः ।
कान्तं निषेवितुमिताः पुरुषोत्तमं तं
नेत्रोत्सवाः प्रियसुखा[3]मितरूपसाराः ॥२६॥
तासां पुरः कमलहारधरः समंतात्
किञ्जल्ककल्पितमनोहरमालिकाद्यः ।
रामो मृणाललतिकारसनाभिरामो
रेजे मतङ्गज इवानुसृतो गजोभिः ॥२७॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे
जलविहारवर्णनं नाम सप्तत्रिंशोऽध्यायः ॥३७॥

●

१. अरचयन्—अयो० । २. °कुम्कुमानि—रीवाँ। ३. प्रियइवामृत०—अयो० ।

अष्टत्रिंशोऽध्यायः

ब्रह्मोवाच

एवं कृत्वा जलक्रीडा रामो रमणपण्डितः ।
वनक्रीडां समारेभे सह व्रजवधूजनैः ॥ १ ॥
पुष्पस्तवकरम्येषु लताविटपवेश्मसु ।
उच्चावचेषु गुल्मेषु भूरुहेषु च भूरिषु ॥ २ ॥
काचिद्रघुपतेरंसमवलम्ब्य व्रजाङ्गना ।
पुष्पाण्यवचिनोतिस्म तुङ्गवृक्षगतान्यपि ॥ ३ ॥
एकाधिमालतीकुञ्जेऽहसत् केनापि हेतुना ।
अपराञ्जलिमुन्नीय तस्थौ पुष्पावलिप्सया ॥ ४ ॥
चन्द्रिकानिचयस्थानैर्व्रजस्त्रीणां मुखेन्दुभिः ।
दधुः सुमनसां केलिं भूरि व्याकोशपुष्पताम् ॥ ५ ॥
चम्पकानामभूद् ग्लानिस्तासां भूरितनुत्विषाम् ।
दूरात्प्रमत्तमधुपस्तोमैराद्रियमाणया ॥ ६ ॥
कण्टकप्रकराकीर्णस्वर्णकेतककाननम् ।
विहाय तासामङ्गानि भेजे भ्रमरमण्डली ॥ ७ ॥
कर्णेषु रोचयामासुःकार्तस्वरगणानतः[1] ।
अलयो व्रजकान्तानामङ्गसौरभ्यनिर्वृताः ॥ ८ ॥
भूषयामासुरङ्गेषु रसालतरुमञ्जरीः ।
ताः सौरभ्यविशेषेण बभूवुः पूरितान्तराः ॥ ९ ॥
स्थूलैः फलैः सवक्षोजा व्याकोशकुसुमान्विताः ।
स्त्रीभिः समाबभुःकाश्चित्प्रमोदवनवल्लयः ॥१०॥
अवलम्ब्य प्रियस्यांसं चिन्वन्त्यः पुष्पधोरणीम् ।
विजिग्युर्लंतिकाः कान्ता विटपान्तरसंगताः ॥११॥
नानाविधानि पुष्पाणि स्मरचापशराकृतीः ।
अवचिक्युर्भूरुहेभ्यो लताभ्यश्च व्रजस्त्रियः ॥१२॥

---

१ मासुर्झंकार स्वरगानतः —अयो० ।

कदम्बगोलकग्राममवचीय व्रजस्त्रियः ।
वेणोर्विभूषयामासुः प्रान्तस्तवकशालिनीः ॥१३॥
सन्नाह[1]मञ्जुलाकारा वञ्जुलद्रुममञ्जरीः ।
गण्डयोर्मण्डयामासुर्निबध्यालकरज्जुभिः ॥१४॥
रसालमञ्जरीरन्यालकपाशैर्निबध्य च ।
चक्रे कपोलयोर्भूषां स्मरदर्पणदीप्तयोः ॥१५॥
अन्याश्च कर्णिकारौघैश्चक्रुः कर्णेषु कर्णिकाः ।
मोहनं प्रियचित्तस्य तदुन्मानैव सेहिरे ॥१६॥
अतसीकुसुमैः[2] काश्चिज्जुगुफुः कटिमेखलाः ।
गजमुक्ताफलस्थूलकिङ्किणीजालशालिनीः ॥१७॥
काञ्चीः प्रकल्पयामासुः काश्चिद्वकुलदामभिः ।
वलयानि प्रकोष्ठेषु भुजयोरङ्गदानि च ॥१८॥
अन्याश्च गुम्फनाभिज्ञाः कान्तस्वान्तनिवेशिनः ।
आकल्पान्कल्पयामासुः नागपुन्नागकेसरैः ॥१९॥
काश्चित्प्रियङ्गुकलिकाः कदम्बकुसुमैः सह ।
संमेल्य[3] मालिकां चक्रुस्तुङ्गवक्षोजयोः स्रजः ॥२०॥
[4]क्रीडापराजिताः काश्चिच्चाम्पेयकुसुमैः सह[4] ।
संमेल्य मालिकां चक्रुः प्रियप्रेमविवर्द्धिनीम् ॥२१॥
मालतीकुसुमैरेव काश्चिद्भूषागणान्यधुः ।
काश्चिज्जपाभिरेवान्याश्चम्पकैरेव केवलम् ॥२२॥
काश्चिदाकल्पमातेनुः पञ्चवर्णैः[6] प्रसूनकैः ।
प्रेयांसं मोहयामासुरिन्द्रचापलता इव ॥२३॥
तासामाकल्पसामग्रीकल्पनाय समन्ततः ।
प्रमोदविपिने तत्राविरासीत् कुसुमाकरः ॥२४॥
अनेकवर्णकुसुमजातिभिः समलङ्कृतः ।
कूजत्कोकिलभृङ्गौघहृदुत्कण्ठाविवर्द्धनः ॥२५॥

---

१. संत्रोट्य—अयो० । २. अतीश०—अयो०, रीवाँ, बड़ो० । ३. संमिल्य—रीवाँ, बड़ो० । ४—४. नास्ति—अयो० । ६. °पर्णैं—रीवाँ ।

साद्य [सद्यः ?] संफुल्लविविधपद्मजातिसुखप्रदः ।
मधूकपल्लवस्तोमरञ्जिताष्टदिगन्तरः ॥२६॥
स्मरप्रतापसंकाशश्चलत्किंशुकराजिकः ।
निशातकरपत्राभविस्फुरत्केतकच्छदः ॥२७॥
सुवर्णमालतीजालसंचरन्मत्तषट्पदः ।
केतकीकाननोद्भूतपरागापूरिताम्बरः ॥२८॥
रक्ताशोकलतासद्म[1] संगीतशुकसारिकः ।
प्रियालमञ्जरीधूलीधूसरीकृतदिक्तटः ॥२९॥
समन्ततः संप्रवृत्ते वनान्तः कुसुमाकरे ।
आस्फालयामास धनुरुन्मदो मनसः सुतः ॥३०॥
रामारामा हृताकल्या रामेण सह संगताः ।
वसन्ते रेमिरे रम्यं रतिरङ्गरसात्मकम् ॥३१॥
रसालमञ्जरीवृन्दकल्पितोत्तंससुन्दरः ।
रेमे चात्म[2]विहारेण रामो रमयतांवरः ॥३२॥
वनराजीः परिस्पृष्टा[3] नीतमन्दसुगन्धयः ।
अलिझङ्कारभवनाः पवनास्तं सिषेविरे ॥३३॥
प्रमोदवनकुञ्जेषु कुसुमाकल्पमालिनीः ।
लता इव सिषेवेऽसौ कामिनीः कान्तभूरुहः ॥३४॥
सान्धकारेषु कुञ्जेषु दृङ्निमीलनलीलया ।
चौरो भूत्वा स्वयं रेमे रामो रामासुखप्रदः ॥३५॥
कदाचित्कामिनीवृन्दैर्दृङ्निमीलनकृ[4]त्प्रियः ।
अन्योन्यं रमयामास रमणीः[5] कृतकौतुकाः ॥३६॥
इत्थं जलस्थलवनेषु विहारशाली
व्यालीढकोटिललनासमुदायचित्तः ।

---

१. °संघ०—रीवाँ, बड़ो० । २. बत—अयो० । ३. परिस्पृष्ट्वा०—अयो० । ४. वृन्दद्दग्मिर्मीलनकृत—अयो० । वृन्दैर्दानिमीलनकृत्—बड़ो० । ५. रमणीं—अयो०, रीवाँ ।

क्रीडां चकार रघुवंशविभूषणोऽसौ
श्रीमान् प्रमोदवनकुञ्जलतातलेषु ॥३७॥
इत्येतद्व्रजरमणीगणेन सार्धं
यो विक्रीडितमनिशं शृणोति मर्त्यः ।
पूतात्मा स निजजनिं कृतार्थयित्वा
चिल्लोके वसति सदा समुपैति रामभक्तिम् ॥३८॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे
वनविहारो नाम[1] अष्टत्रिंशोध्यायः ॥३८॥

एकोनचत्वारिंशोऽध्यायः

ब्रह्मोवाच

इत्थं प्रियेण प्रतिलाल्यमाना व्रजस्त्रियस्ताः प्रणयेनैव बद्धाः ।
अलौकिकं भोगमवाप्य निर्वृता न किंचिदप्राप्तमितो मेनिरे ताः ॥ १ ॥
त्रैलोक्यमध्येऽथा[2]धिक्यं यत्किंचिद्भोगवस्तु प्राप्यमथाप्यवाप्यम् ।
तत्प्राप्तं रामरामाभिरङ्के यावत्तत्रोदेति चित्तस्य वाञ्छा ॥ २ ॥
प्रतिक्षणं पाल्यमानाः प्रियेण क्रीतेनेव तेन पुंसांवरेण ।
आत्मानं लोकाधिकं मन्यमानाः समाचकाङ्क्षुःसह जायाः पदं याः ॥ ३ ॥
तद्वत्त्रिवेदीशिरसां रहस्यं चिल्लोकस्थं परमैश्वर्यपात्रम् ।
रूपं पूर्णं ब्रह्मणस्तत्परं यन्निर्णीयते नेतिनेतीतिविद्भिः ॥ ४ ॥

ता एकदा प्रमुदकाननमध्यदीव्यत्-
सौवर्णसौधशिखरेऽमलरत्नदीप्ते ।
अन्वासितं सहजयैव तया रमण्यः
प्रेयांसमेव ददृशुः खलु शुक्लवर्णम् ॥ ५ ॥

---

१. वनविहारे—अयो०, रीवाँ, बड़ो० । २. °प्या°—रीवाँ, बड़ो० ।

एभिश्चतुर्भिरपि शङ्खगदादिभिस्तै-
रश्रान्तमायुधवरैः समुपास्यमानम् ।
मूर्तैः स्फुरद्भिरणिमादिक[1]सिद्धिसङ्घै[2]-
स्तद्वद्भुगैश्च सकलैरनुमृग्यमानम् ॥ ६ ॥

त्रैलोक्यरचनातीतैः पदार्थैः सकलैर्युतम् ।
तावन्मात्रे सौधतले कोटियोजनविस्तरे ॥ ७ ॥

तदप्यस्यैव सामर्थ्याद् दृश्यमानं चिदात्मकम् ।
यद्रामपरमं स्थानं धिया पश्यन्ति सूरयः ॥ ८ ॥

दृष्टं तु सर्वगोपीभिस्तमसः परमद्भुतम् ।
शुद्धसत्त्वाव्यवहितं यद्रूपं ब्रह्मणः परम् ॥ ९ ॥

तत्रैकदेशे ददृशुः साकेतपुरकल्पनाम् ।
मधुरां द्वारकां चैव श्रीमद्वृन्दावनं तथा ॥१०॥

तस्मिन् सौधतले दृष्ट्वा विस्मयं परमं ययुः ।
साकेतनगरे तत्र नृपं दशरथं तथा ॥११॥

चतुरस्तस्य रामादीन् कुमारान् दीप्तवर्चसः ।
ज्येष्ठस्य च कुमारस्य रावणाद्यसुरद्विषः[3] ॥१२॥

स्वप्रेयसो रामनाम्नः सविधे स्वात्मसंस्थितः ।
प्रमोदवनसंयुक्तं दृष्ट्वाश्चर्यं परं ययुः ॥१३॥

मथुरायां च कंसारिं केशवं लोकसुन्दरम् ।
अंशं श्रीरामचन्द्रस्य वीक्ष्य विस्मयमागताः ॥१४॥

श्रीमद्वृन्दावने दिव्ये प्रमोदवनस्यांशके[4] ।
ईदृग्विधाभिर्लीलाभिः खेलन्तं नन्दनन्दनम् ॥१५॥

ईदृग्रूपगुणकारं ईदृग्भूषाविभूषितम् ।
ईदृक्चेष्टावयोऽवस्थासन्निवेशविशेषितम् ॥१६॥

---

१. °द्भिर्निगमाधिक°—रीवाँ, °दिक°—बड़ो० । २. °साध्यैः—रीवाँ, °सर्वैः—बड़ो० । ३. °णाद्या (°द्याः—बड़ो०) सुर°—अयो०, रीवाँ । ४. °वनगौ-शके—रीवाँ, °गांशके—बड़ो० ।

ईदृक्परिकरोपेतं वीक्ष्य ता विस्मयं ययुः ।
अहो अयं स्वप्न उतेशमाया किंवास्मदीयो मतिविभ्रमः स्यात् ।
किंवा कैश्चित्कृत्रिमं संप्रयुक्तं येनास्मदीयं भ्रमतीवेक्ष्य चित्तम् ॥१७॥
अथो अयं [मुं ?] त्रिगुणातीतलोकं
चिल्लोकाख्यं[1] तस्य भर्तुः प्रासादात्[2] ।
सच्चित्सुखैकनिधिमग्रगण्यं वरेण्यं
वयं प्रपन्नाः शरणं तस्य तेन[3] ॥१८॥
एतत्साकेतनगरे पूर्वसिद्धे नवांशकम् ॥
तत्किनु पश्याम एवं साकेताख्यं मथुरायां
किं वा विमृष्यामो मथुरां साकेतधाम्नि ।
किं जानीमो द्वारकायामयोध्या-
मयोध्यायां द्वारकां वापि किंस्वित् ॥१९॥
वृन्दावने किं प्रमोदारण्यमेतत्
प्रमोदारण्ये किंनु वृन्दावनं तत् ।
चित्रं हि सौधस्य विशालतेयं
यत्रानन्तो भात्यसौ कोऽपि देशः ॥२०॥
अयं प्रमोदविपिने किं विभाति
किं वैतस्मिन् प्रमुदवनं चकास्ति ।
दिव्यं स्वानन्दौघं चिन्मयमप्रतर्क्यं
सत्त्वातीतं शुद्धसत्त्वात्मकं च ॥२१॥
अस्माकं वै पुरत इदं चकास्ति
किं वै स्फीतं धाम विष्वक्प्रवाहम् ।
पश्यामोऽत्र प्रेयसा सार्धमेतत्
स्वीयानां वै वृन्दमानन्दयुक्तम् ॥२२॥
पश्यन्त्यस्ता इत्थमग्रे चलित्वा
श्यामं रामं ददृशुः पूर्ववच्च ।

---

१. °लोकाख्यात्—रीवाँ, बड़ो० । २. प्रसादात्—अयो० रीवाँ, बड़ो० । ३. स्म इत्येव विद्मः—अयो० ।

तत्राप्येनं परिकरमात्मना समेतं
गोप्यो वीक्षाञ्चक्रिरे साभ्यसूयम् ॥२३॥
सहजा [जे ?] यं तथा स्वामी रूपान्तरविधानतः ।
प्रेयसोऽत्यन्तवैषम्यं दृष्ट्वा गोप्योऽवदन्निति ॥२४॥
दृष्टं क्वचिदहो आल्यः[1] प्रेयसोऽस्य छलात्मनः ।
अतिधूर्तस्य मूर्तस्य कैतवस्यैव कैतवम् ॥२५॥
तथास्त्ययमसावत्र कृत्वा रूपान्तरग्रहम् ।
प्रेयसीं रमयत्येनां विजातीयसुखात्मना ॥२६॥
प्रियो विश्वसनीयोऽसौ नैव सख्यः कथंचन ।
गुणक्रियायां व्यक्तौ वा यत्प्रामाण्यं न विद्यते ॥२७॥
आराध्योऽसौ पुनर्वृत्ते सहजानन्दलब्धये ।
नो चेत्प्राणपरित्यागं कुरुध्वं मानवर्जिताः ॥२८॥
को विशेषो मतस्त्वस्यामस्मत्सौभाग्यधर्षणः[2] ।
यद्वशीभावितो धूर्तो रमत्येकान्तसंगतः ॥२९॥
इत्यन्योन्यं समामन्त्र्य दुरात्मानो दृढव्रताः[3] ।
प्रमोदवनवीथीषु देहान् सन्त्यज्य गोपिकाः ॥३०॥
सहजामाविशन् सर्वाः सत्त्वांशेन मृगीदृशः ।
प्रियेणैकान्तभोगाय चक्रिरे कर्म दुष्करम् ॥३१॥
तावत्तासां शरीराणि कालशक्तिर्जुगोप च ।
न म्लानिर्न च विक्लेदो बभूव तत्प्रसादतः ॥३२॥
ततः स सहजानन्दशक्त्या रेमे च पूर्ववत् ।
संभोगविप्रलम्भाभ्यां स्वस्वकालोचितक्रियः ॥३३॥
साप्याचकाङ्क्षे कान्तस्य स्वरूपानन्दलब्धये ।
ततः साप्यविशद्रामं तद्रूपानन्दलब्धिहृत् ॥३४॥
परमानन्दपाथोधिस्वभावच्चिद्वपुर्द्धरम् ।
स्वरूपमात्रनिरतं विरतं विषयग्रहात् ॥३५॥

---

१. अल्पाः —रीवाँ, बड़ो० । २. °वर्धन—अयो० । ३. °श्रिताः—अयो० ।

सममित्रार्युदासीनमध्यस्थद्वेष्यबान्धवम् ।
तं प्राप्य सहजालक्ष्मीः परब्रह्मस्वरूपिणम् ॥३६॥
न प्रापातिशयानन्दं प्राप्ता न रतिजां मुदम् ।
यत्र सर्वे महानन्दा एकीभूता भवन्ति वै ॥३७॥
परस्परा न लक्ष्यन्ते गुणाः स्वार्थविवर्जिताः ।
मोक्षेति नाम्ना विख्याताः केवलं शून्यरूपिणः ॥३८॥
तामवस्थां गतो रामः केवलं ब्रह्मशब्दभाक् ।
संयोगं नैव जानाति केवलानन्दरूपधृक् ॥३९॥
स्मृत्वा पूर्वविलासौघं विप्रलम्भरसोऽभवत् ।
तदा प्राणप्रियां स्मृत्वा जजागार[1] महारुजः ॥४०॥
क्व याता मे प्रिया सीता चन्द्रवक्त्रा चकोरदृक् ।
अहो प्राणप्रिया सा मे हाहा प्राणप्रिया मम ॥४१॥
क्व गता क्व गता देवी वञ्चयित्वेव मामपि ।
स्वरूपं विस्मृतं भाति तां विना मृगलोचनाम्॥४२॥
ततो हृदयदेशात्तु रामस्यानन्दरूपिणः ।
एकदूती समुद्भूता या पुरा दृष्टविग्रहा ॥४३॥
विलपन्तं तदा दृष्ट्वा प्राह सत्वरमेव सा ।

दूत्युवाच

सर्वास्ता व्रजसुन्दर्यो सीतामर्षवशंगताः ॥४४॥
अस्याः सुखं परिप्राप्तुं लिल्युरस्यां[2] चिदाकृतौ
इयं त्वयि विलीनाभूत्तत्त्वं किमनुशोचसि॥४५॥
शृङ्गारस्यैव संहारकालोऽयं समुपस्थितः ।
एतासु लीनरूपासु शून्यं विश्वं विभाति मे ॥४६॥
शून्यं प्रमोदविपिनं शून्यं साकेतपत्तनम् ।
शून्यं ब्रह्मसुखं चैव त्वं शून्यमिव लक्ष्यसे ॥४७॥
तस्मात्त्वमधुना राम प्रादुर्भावय भामिनीम् ।
यदा शृङ्गाररूपस्य जन्म जायेत पूर्ववत् ॥४८॥

---

१. जागार स—अयो० । १. लिप्सुरंस्यन्—बड़ो० ।

ततो रामो रतिं कर्तुमिच्छां चक्रे सनातनीम् ।
इच्छां चक्रे स्वरूपं च सच्चिदानन्दविग्रहे ॥४९॥

एकोऽहं बहुरूपेण रंस्ये स्वानन्दशक्तिभिः ।
ततः प्राणप्रिया सीता श्रीमज्जनकनन्दिनी ॥५०॥
हृद्देशात् रामचन्द्रस्य प्रादुरासीत् सुलोचना ।
प्रकाशयन्ती हरितः स्वरुचा दीप्यमानया ॥५१॥

साब्रवीत्तु पतिं प्रेम्णा प्रणयालोकतत्परा ।
अहो त्वयि विलीनापि विरहं लब्धवत्यहम् ॥५२॥
क्वायं तव मुखाम्भोजदर्शनप्रोद्भवो रसः ।
क्व च स्वरूपानन्दान्तर्लयजाः परमा मुदः ॥५३॥

उत्कृष्टोऽपि ममात्यन्तं ब्रह्मानन्दो न रोचते ।
यथा त्वद्भजनानन्दो नित्यमास्वादिमद्रसः ॥५४॥
विप्रलम्भो मया जातस्त्वयि कान्त विलीनया ।
मयि लीनास्तु ताःसर्वाः किं जानासि व्रजाङ्गनाः ॥५५॥

मय्यमर्षपरा भूत्वा मत्पदं संगतास्तु ताः ।
इत्युक्त्वा निजहृद्देशात् प्रादुर्भावितवत्यसौ ॥५६॥
ततः समस्तास्ता गोप्यो यथापूर्वं बभाषिरे ।
स्वानि स्वानि शरीराणि जगृहुः पूर्ववत्तु ताः ॥५७॥

प्रणम्य कान्तं कान्तां च इदं वचनमब्रुवन् ।
वयं त्वया स्पर्द्धमाना गतास्त्वत्पदवीं सखि ॥५८॥
त्वदीयानन्दभोगाय किमर्थं त्वं लयं गता ।
पृथग्भूततया स्थित्वा संभोगं नाचरः कुतः ॥५९॥

सीतोवाच

प्रियस्वरूपावाप्त्यै च लीना प्रागभवं प्रियाः ।
ततः शून्यतयातिष्ठं नान्वभूवं किमप्यहम् ॥६०॥
ततो विक्लविता भूत्वा प्रादुर्भूता पृथक्तया ।
युष्माभिर्मयि लीनाभिः किं कृतं वामलोचनाः ॥६१॥

युष्माकमेव भोगार्थमहं जाता पृथक् प्रभोः ।
नानेनैक्येऽपि वर्तेयं स्वरूपानन्दरूपिणी ॥६२॥
अतः परं तु मां यूयं नानुसूयितुमर्हथ ।
संहारः स्यात्तदा सख्यः शृङ्गारस्य रसेशितुः ॥६३॥
तस्मात्स्वस्वात्ममर्यादां न विलम्बितुमर्हथ ।
अहं प्रिया भवत्यश्च सततं शर्म बिभ्रतु ॥६४॥
अशक्यं न प्रभोरस्य सर्वासां भोगभोजने ।
यथा चन्द्रस्य सर्वेषां कुमुदानां प्रकाशने ॥६५॥
एनं हि सर्वभावेन सर्वा एव भजन्त्विति ।
ओमित्युक्त्वा तु ताः सर्वाः पूर्ववन्मुदमाप्नुवन् ॥६६॥
नित्यरासविलासादींश्चक्रुः स्वप्रेयसा सह ।
एवं विहरतस्तस्य प्रमोदविपिनान्तरे ॥६७॥
बहु संवत्सरा जग्मुर्दिव्यतारुण्यशालिनः ।
प्रमोदविपिनद्वारे कदाचिल्लक्ष्मणादिभिः ॥६८॥
भ्रातृभिः सह संजातः संग्रामोऽसुरयूथपैः ।
तेषां प्रयुद्धचतां तत्र उदतिष्ठन्महान् ध्वनिः ॥६९॥
तं श्रुत्वा रघुशार्दूलो गोपिकाः प्रत्युवाच ह ।
कोऽसौ ध्वनिः श्रूयतेऽद्य प्रमोदविपिनाद्बहिः ॥७०॥
प्रायो मे भ्रातरः केनाप्याक्रान्ता सुरवैरिणा ।
नियुद्धस्येव संरावः श्रूयते व्रजयोषितः ॥७१॥
तत्र गछाम्यहं शीघ्रं पुनरेष्यामि वोऽन्तिकम् ।
ततस्ताभिरनुज्ञातो लक्ष्मणस्यान्तिकं ययौ ॥७२॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे राचचरितवर्णनं नाम[1] एकोनचत्वारिंशोऽध्यायः ॥३९॥

१. रामचरिते—अयो०, बड़ो०, नास्ति—रीवाँ।

चत्वारिंशोऽध्यायः

ब्रह्मोवाच

तत्र गत्वा ददर्शासौ युद्धचन्तं लक्ष्मणं परि ।
भरतं चैव शत्रुघ्नं दानवैर्बलसंवृतैः ॥ १ ॥
आगतं राममालोक्य अभियुक्ताः परैस्तु ते ।
लक्ष्मणो भरतोऽरिघ्नो हर्षमापुरनुत्तमम् ॥ २ ॥
ततो रामसहायास्ते परान् जिग्युश्च तत्क्षणात् ।
स्वस्था भूत्वा ततो ज्येष्ठमूचिरे वचनं त्विदम् ॥ ३ ॥

लक्ष्मण उवाच

स्वागतं ते गुणाधीश[1] कार्यं संपादितं प्रभो ।
सेवनात् कामराजस्य कच्चित् संपूरिता स्पृहा ॥ ४ ॥
त्वदाज्ञातत्पराः सर्वे वयं गोपगणैः सह ।
धेनुरक्षापरा नानातीतवन्तः स्म वासरान् ॥ ५ ॥
प्रत्यूहाश्चेह सञ्जाता बहवोऽप्यसुरैः कृताः ।
तेऽपि नीताः क्षयं राम त्वत्प्रसादजुषा मया[2] ॥ ६ ॥
एतौ च भ्रातरौ सम्यगवर्तेतां त्वदाज्ञया ।
अधुना यत्तु कर्तव्यं तदपि श्रूयतां परम् ॥ ७ ॥
राज्ञा दशरथेन त्वमस्माभिः सेवकैः सह ।
आकारितोऽसि नीतिज्ञ विवाहार्थं वयोयुतः ॥ ८ ॥
धात्रीगृहे वयं सर्वे जाताः स्म धृतपुष्टयः ।
अधुना पितुरादेशादयोध्यां याम राघव ॥ ९ ॥
गजाश्वरथसन्दोहः पित्रा नः प्रेषितोऽनघ[3] ।
गजा ध्वजपरिप्रौढाः[4] स्वर्णालङ्कारशालिनः ॥१०॥
हेमपल्याणिनश्चैव रथाश्वाः सपरिच्छदाः ।
सेवकाश्चापि बहवो नीता दिग्देशभूमिपाः ॥११॥

---

१. गुणागाध—बड़ो० । २. °मपि—रीवाँ । ३. ऽधुना—अयो० । ४. गज°—अयो०, रीवाँ, °पौष्ठाः—बड़ो० ।

अस्मदानयनार्थाय प्रेषिताः सर्वभूभृता[1] ।
श्रीमद्दशरथेनास्मत्तातेन प्रवयोजुषा ॥१२॥
आर्यं त्वां च कृतोद्वाहं राज्यकार्ये नियोज्य सः ।
प्रियोऽस्माकं पितृवृत्तिं वानप्रस्थं श्रयिष्यति ॥१३॥
तदार्यं तत्र संगम्य पितरौ नन्दयामहे[2] ।
धात्रीगृहे निवसतां बहवो वत्सरा ययुः ॥१४॥
इदानीं पितृगेहस्य कुर्मोऽलङ्करणं वयम् ।
किं तैः सुतैर्ये न कुर्युः पितृसंतोषणक्रियाम् ॥१५॥
जीवतो गेहसंतोषो मृते वा पारलौकिकः ।
एवमुक्तस्तु तै राम ओमित्यूचे वचः प्रभुः ॥१६॥
अयोध्यां प्रतिगच्छामो नन्दयामः पितॄनथ ।
ततस्ते कृतसंकल्पाः प्रयाणाय पितुर्गृहे ॥१७॥
सुखिताख्येन गोपेन गवेन्द्रेणेदमीरिताः ॥

हे राम हे लक्ष्मण भूरिकर्मन् हे शत्रुहन् भरत पितुर्गृहं प्रति ।
किं प्रस्थिता यूयमितोऽधुना व्रजे कः पालयिष्यत्यखिला अमूर्गाः ॥१८॥
एताः खलु प्रेमभरेण युष्मत्संपालिताः कंचन विश्वसन्ति न ।
अहो धर्मज्ञा तत्क्षणादेव चामूर्विनाशमेष्यन्ति च त्वद्वियोगात् ॥१९॥
अस्माकं वा कागतिस्तात युष्मत्प्रेमामृतैकाश्रयिणां गोपकानाम् ।
अयं व्रजो वा मुखदर्शने क्वचित्पलार्द्धमप्यन्तरायं न सोढा ॥२०॥
क्रीतः प्रेम्णा राजपुत्रैर्भवद्भिर्लोकोऽत्रत्यः कां गतिं लभ्यतेऽसौ ।
क्व युष्माकं मन्दिरे नः प्रवेशो भूमेरेकश्छत्रछायास्पदानाम् ॥२१॥
यूयं तदेवं कर्तुमर्हन्ति नैव धर्मज्ञातारः सत्कृपासिन्धुचित्ताः ।
अनन्यभाजां खलु नो यूयमेव चित्रं वित्तं चेह चामुत्रपूर्णम् ॥२२॥
नान्यं भजामो न च संस्मरामो न चाश्रयामो न च वीक्षयामः ।
भवत्पदाम्भोरुहमत्र नः परं परं शरण्यं शरणागतानाम् ॥२३॥

---

१ °स्तेन भू°—अयो० । २. नंदयामहि—अयो० ।

माङ्गल्योवाच

वत्स राम भवतः प्रणयेन प्रायशो व्रजजनोऽस्ति निबद्धः ।
अद्य का गतिरमुष्य भवित्री प्रेषिते त्वयि चिरात्कृतसङ्गे ॥२४॥
जीवतां[1] खलु जनो भवतासौ चापदां समुदयानपनीय ।
अद्य किं स न मरिष्यति युष्मद्वक्त्रपूर्णविधुदर्शनहीनः ॥२५॥
यः खलु प्रतिदिनं त्वया विना वर्तितुं क्षणमपि क्षमते न ।
स त्वदाननविलोकनं विना कीदृशीं गतिमवाप्स्यति लोकः ॥२६॥
तत्पुरीं प्रति न याहि सांप्रतं रामचन्द्र पितराविहैव ते ।
आगमिष्यत इदं वचनं नः पालयस्व वरदेश्वरेश्वर ॥२७॥
एष गोपनृपतिस्त्वया परं पुत्रितां समुपगम्य निर्वृतः ।
वत्स राम तदमुष्य वियोगं दातुमर्हति भवान्न कदापि ॥२८॥

गोपा ऊचुः

अयि मित्राणि निबोधत रामसुमित्रातनयभरतशत्रुघ्नाः युष्मद्विरह-भयार्त्तिः कदाचिदपि नानुभूतपूर्वा नः । संप्रति भवतां नगरे प्रस्थानं श्रूयतेऽस्माभिः दीर्घमजनिष्ट दुःखं प्राणान्तादप्यतीव गरीयः ॥२९॥

अथ भविता किमतोऽग्रे मित्रवियोगेन मरणमस्माक-
मथवा पूर्वं मरणं तदनु वियोगो भवतु भवाय ॥३०॥
साद्धंतदस्माभिरा बाल्याद्बहुलं सुखं लसितम् ।
तेषां क्षणवियोगेऽपि कथं स्थास्यामहे वयम् ॥३१॥
एषां विलोकनेऽस्माभिर्निमेषोऽपि विगर्हितः ।
वहन्तो विरहं तेषां कथं स्थास्यामहे वयम् ॥३२॥
पानभोजनशय्यादौ यैर्विना न च संस्थिताः ।
विप्रयोगे चिरं तेषां कथं स्थास्यामहेऽधुना ॥३३॥
एषां राजकुमाराणां तिष्ठतां रत्नवेश्मसु ।
दौवारिकैर्वयं रुद्धा प्राप्स्यामः किं प्रवेशनम् ॥३४॥
यौवराज्ये स्थितो रामः किंत्वस्मान् संस्मरिष्यसि [ति ?] ।
इन्द्रादिदिविषद्वन्द्यो वन्दनीयपदाम्बुजः ॥३५॥

---

१. तावती—रीवाँ, तावत्तान्—बड़ो०

एवमालपतां तेषां वचांस्याकर्ण्य गोपिकाः ।
अमी वदन्ति किं तावदिति प्रोचुः परस्परम् ॥३६॥
तत्रैकापि च लोकेभ्यो रामयानं विजानती ।
प्रोवाच गाढधैर्येण नस्फुटद्धृदया सती ॥३७॥
अयि गोपा अहो आल्यः सर्वेऽपि नगरं प्रति ।
प्रस्थानं रामचन्द्रस्य समाचक्षत आर्त्तिदम् ॥३८॥

अयं खलु पितृभ्यां वै धात्रीगेहे चिरोषितः ।
यौवराज्याभिषेकार्थमाहूत इति शुश्रुमः ॥३९॥
एते खलु नरेन्द्रस्य कुमारा अग्निवर्चसः ।
राक्षसानां भयेनात्र गोपगेहे निवेशिताः ॥४०॥
इह तिष्ठद्भिरेतैस्तु कति दैत्या विनाशिताः ।
राक्षसाः पूतनाद्यास्तु विकटाद्याश्च[1] राक्षसाः ॥४१॥
रामेण क्रीडता सख्यः सदैव एव विनाशिताः ॥

त्रिलोकमध्ये नरदैत्यदैवतात् कुतोऽप्यमीषां हि भयं न विद्यते ।
एते खलु क्ष्मातलसाधुपालकाः कृतावतारा: पुरुषोत्तमाः स्वयम् ॥४२॥

यथा राम[2]स्तथा लक्ष्मा[3] यथा स भरतस्तथा ।
यथैव भरतो वीरः तथा शत्रुघ्न उच्चकैः ॥४३॥
एते स्वयं रुचा पूर्णा भगवन्तो नरोत्तमाः ।
पितृभ्यामिति विज्ञाय समाहूताः स्वपत्तने ॥४४॥
जीवने चापि संदेहः किंत्वस्माकमतः परम् ।
येषां क्षणेऽपि विच्छेदो नानुभूतः कदाचन ॥४५॥

तेऽमी प्रयाताः स्वपुरं द्रष्टव्याः कथमक्षिभिः ।
इति श्रुत्वा सखीवाक्यं सर्वास्ता व्रजयोषितः ॥४६॥
मूर्छिताः सहसा तत्र निपेतुर्धरणीतले ।
पतितास्वासु धरणौ महान् कोलाहलोऽभवत् ॥४७॥

---

१. विद्यध्राश्चैव—अयो०, रीवाँ। २. श्रीरामः—बड़ो०। ३. लक्ष्मणः—अयो०, रीवाँ।

ता एवोपचरन्तीनां गच्छन्तीनामितस्ततः ।
दूतीनां च सखीनां च सदय एव व्रजाङ्गणे ॥४८॥
तालवृन्तानि कुरुत नाडी पश्यत पश्यत ।
मुखेषु सलिलं दत्त किंचित्पृच्छत पृच्छत ॥४९॥
अहो हि निमिषत्येषा श्वसित्येषा तु किंचन ।
अहो किंचिद्वदत्येषा [1]ईषद्विस्फुरिताधरा ॥५०॥
इत्येवं वदतां तत्र जनानां च परस्परम् ॥
ततश्चिराय प्रतिलब्धचेतना गवेन्द्रघोषस्य[1] कुरङ्गलोचनाः ।
प्रिय प्रयाणश्रवणेन कातरा परं वचः प्रोचुरिदं परस्परम् ॥५१॥
अहो वयस्याः प्रतिकूलदेवाः क्वचित्समाकर्णितमीदृशं वचः ।
अयं खलु श्वो नगरं प्रयाताहूतः पितृभ्यां युवराजयोग्यः ॥५२॥
ततः कथं जीवनमाप्नुयामः कदाप्यनभ्यस्तवियोगवेदनाः ।
गतिस्मिताप्रेक्षणभाषणादिभिः सख्योऽमुनाकृष्टवशीकृतान्तराः ॥५३॥
ईदृग्विपत् क्वापि कदापि जन्मनि प्राप्ता नचास्मासु यतः सुसंशयः ।
अहोऽमुना वर्षदवानलादिना प्राणान्तकेभ्यः किमु रक्षिता वयम् ॥५४॥
इत्युक्त्वा सहसा गोप्यो गलत्कज्जलकैश्चलैः ।
कदम्बकुसुमस्थूलैर्बहुलैरश्रुबिन्दुभिः ॥५५॥
ममृजुः कुचकाश्मीरं दीर्घनिःश्वासकम्पिताः ।
यथा कथंचिद्धैर्येण प्राणान् संरुध्य तस्थिरे ॥५६॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे रामप्रयाणो नाम[2]
चत्वारिंशोऽध्यायः ॥४०॥

१–१. नास्ति—बड़ो० । २. रामप्रयाणे—अयो०, रीवाँ, बड़ो० ।

एकचत्वारिंशोऽध्यायः

ततो रामेति विश्लेषकातरं सुखिताभिधम् ।
गवेन्द्रं चैव माङ्गल्यां पुत्रविश्लेषकातराम् ॥ १ ॥
गोपान् सुदर्शनानन्दसुनन्दादीन् महात्मनः ।
गोपीश्च शृण्वतीः सर्वाः सदय एवेदमूचिवान् ॥ २ ॥
अयि तात गवेन्द्र त्वं मातर्माङ्गल्यके शृणु ।
सुदर्शनाद्याश्च गोपाः शृणुतेदं वचो मम ॥ ३ ॥
कच्चित्क्षणं न सोढव्यो भवतां विरहो मया ।
मद्वियोगप्रभूतार्तिः युष्माकं किंतु बाधते ॥ ४ ॥
भवद्वियोगजैवार्त्तिर्मम तावत्ततोऽधिका ।
तथापि न क्वचित्तात संजाता संजनिष्यते ॥ ५ ॥
नाहं वसामि वैकुण्ठे न वै गोलोकसंज्ञके ।
मथुरायां द्वारकायां श्वेतद्वीपालये न वा ॥ ६ ॥
अहं वसामि सततं सुखितस्यैव मन्दिरे ।
माङ्गल्यकाकरानीतं मृदु हैयङ्गवीनकम् ॥ ७ ॥
अशानो भ्रातृभिः सार्धं नान्यथा तृप्तिरस्ति मे ।
एवं विज्ञाय वै नित्यं मम चारित्र्यमद्भुतम् ॥ ८ ॥
युवाभ्यां शोचितव्यं न कदाचित्क्वचिदप्युत ।
न चैव मन्मनः क्वापि प्रमोदविपिनं विना ॥ ९ ॥
रमते बहुधा कल्पत्रैलोक्यश्रीभरेष्वपि ।
[1]रासाख्यलीलया मह्यमन्या लीला न रोचते ॥१०॥
गोपालबालकेभ्योऽन्यो न मे प्रणयभाजनम् ।
इयं हि मे नित्यलीला भवतां सदनेषु या ॥११॥
अन्यावतारसमये भवन्नैमित्तिकी हि सा ।
नित्यं वसामि युष्माकं सदने सरयूतटे[1] ।
रासाख्यलीलाभिर्नित्यं विहरामि सखीगणैः ॥१२॥
कदाचिन्मत्स्यरूपेण लोके प्रादुर्भवाम्यहम् ।

१—१. अयमंशो नास्ति—रीवाँ ।

वेदोद्धरार्थमुदधौ कुर्वञ्चरितमद्भुतम् ॥१३॥
कदाचित्कूर्मरूपेण प्रादुर्भूय करोम्यहम् ।
देवासुरेषु श्रान्तेषु मन्दराचलधारणम् ॥१४॥
कदाचिद्दैत्यराजे तु धरणीनाशनोद्यते ।
दिव्यवाराहरूपेण तदा प्रादुर्भवाभ्यहम् ॥१५॥
कदाचिद्भक्तराजस्य प्रह्लादस्य सुखाकृते ।
नारसिंहस्वरूपेण दैत्यराजं निहन्म्यहम् ॥१६॥
कदाचित्सर्वदेवानां स्थानेषु स्थापनाकृता ।
दिव्यवामनरूपेण दैत्येन्द्रं छलयाम्यहम् ॥१७॥
कदाचित् परशुं धृत्वा धर्मस्य प्रतिपालकः ।
दुष्टक्षत्रविनाशाय भुवि प्रादुर्भवाम्यहम् ॥१८॥
कदाचिद्राघवे वंशे प्रादुर्भूय स्वविक्रमैः ।
धर्मं संस्थाप्य धरणीभारं बहु हराम्यहम् ॥१९॥
कदाचिन्ममांशकलया कृष्णो वै संभविष्यति ।
द्वापरान्ते यदुकुले देवक्यां वसुदेवतः ॥२०॥
कदाचिन्मृत्युदुःखेन यज्ञजन्तून् विशोचतः ।
अनुग्रहामि संजातो बुद्धरूपेण भूतले ॥२१॥
कदाचिन्म्लेछवृन्देषु धर्मविप्लवकारिषु ।
नीलं हयं समारुह्य कल्किः प्रादुर्भवाम्यहम् ॥२२॥
अन्यैरपि स्वरूपैश्च तत्र तत्र स्फुटीभवन् ।
अधर्मं नाशयित्वाहं स्वधर्मं स्थापयाम्यहम् ॥२३॥
एवं यदा यदा धर्मः क्षीयते सर्वभूतजः ।
स्वात्मानं कल्पयित्वा तु तदा प्रादुर्भवाम्यहम् ॥२४॥
नित्यं वसामि भवतां सदने दिव्यगोकुले ।
माणिक्यरत्नसन्नद्धमुक्तामणिविभूषितः ।
माङ्गल्यायाः करानीतं नवनीतमशान्नथ ॥२५॥
मद्वियोगजदुःखं तु भवतां नैव बाधते ।
यदि बाधेत सैषा तु मन्मायैव रसात्मिका ॥२६॥

संयोगो विप्रयोगश्च रसस्तु द्विविधः स्मृतः ।
आद्योऽनुभूत एवान्तो द्वितीयस्तु भविष्यति ॥२७॥
पित्रोः संतोषणं कृत्वा कृत्वोद्वाहं च तत्सुखम् ।
राज्यकार्यं विधायाथ पुनरेष्यामि वो गृहे ॥२८॥
न कार्यो भवता शोकस्तात मद्विरहोद्भवः ।
एष तु स्वप्नवद्भूत्वा क्षणाद्यास्यति दुःखदः ॥२९॥
अहं निजप्रियान् गोपान् नीत्वा यास्यामि तां पुरीम् ।
एतैर्विना क्षणं स्थातुं हेतात क्वापि नोत्सहे ॥३०॥
त्वं च तावद् गवां तात पालनं कारय प्रभो ।
अस्मिन् प्रमोदविपिने नव्यनव्यैस्तृणाङ्कुरैः ॥३१॥
माङ्गल्यके मातरिह मा शुचो मद्वियोगतः ।
न त्वां विना क्षणमपि स्थातुं भो सुखसंयुतः ॥३२॥
गोपा यूयं सखायो मे आयान्तु मम सार्थगाः ।
प्रमोदवनविश्लेषो गतो वो मुखदर्शनात् ॥३३॥
भवद्भिः सहितः सर्वं राज्यकार्यं विधाय च ।
हत्वा चासुरसंदोहानेष्यामि पुनरत्र वै ॥३४॥
अन्ये च मत्प्रेमपराः[1] सकलव्रजवासिनः ।
न शोकेनाभितप्यध्वं मद्वियोगैकजन्मना ॥३५॥
एष वः स्वप्नवद्भूत्वा क्षणाद्यास्यति निश्चयः ।
इति तेषां समस्तानां प्रमोदवनवासिनाम् ॥३६॥
व्रजौकसां सदाराणां कृत्वा सान्त्वनमच्युतः ।
यियासुः[1] पितुरागारं तां रात्रिं तत्र चावसत् ॥३७॥
तमीयुः सकला गोप्यः प्रियविश्लेषकातराः ।
रुदन्त्यो भूरिशोकेन प्रवासभयविह्वलाः ॥३८॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे रामप्रवासो नाम[2]
एकचत्वारिंशोऽध्यायः ॥४१॥

१. ये मत्परा :—रीवाँ, बड़ो० । १. प्रियालुः—रीवाँ, बड़ो० । २. रामप्रवासे —अयो०, रीवाँ, बडो० ।

द्विचत्वारिंशोऽध्यायः

गोप्य ऊचुः

पित्राहूतः स्वनगरं राज्यकार्यावगुप्तये ।
प्रभात एव स्वैः साकं यास्यसीत्यनुशुश्रुम ॥१॥
नैवं त्वं कर्त्तुमर्होऽसि हत्वा नो हरिणीरिव ।
निजदृष्टिशराविद्धाः प्रेमस्वरविमोहिताः ॥ २ ॥
त्वं तु विस्मृतवान् प्रायः प्रमोदवनखेलनम् ।
विस्मर्तव्यं न चास्माभिस्तत्सुखं क्षणमप्यहो ॥ ३ ॥
ता यामिन्यस्तद्रहस्यं केलयस्ताश्च वेलयः ।
ते ते रासविलासाद्याः स्मर्यमाणा हरन्ति नः ॥ ४ ॥
प्रमोदवनपर्यन्तं भूरिकुञ्जनिकुञ्जभूः ।
प्रमोदे स्थापयत्यन्तः स्मरन्तीनां पुनः पुनः ॥ ५ ॥
कदाचिद्भ्रुवता साकं रामसंपूर्णचन्द्रमाः ।
खेलन्तीनां वनेऽस्माकं संध्याभूत्कृष्णपक्षगा ॥ ६ ॥
ततः प्रववृते ध्वान्तं गाढं नवघनोपमम् ।
यस्मिन्प्रत्येकमादाय भुक्तवान् नो रघूद्वह ॥ ७ ॥
कदाचित्पुष्पावचये याताः प्रमुदकानने ।
संध्यायामभवद्घोषो घनसंघट्टजोऽम्बरे ॥ ८ ॥
तदा प्रववृते दिव्या कामकेलिर्मनोहरा ।
यां विलोक्य मुदं भव्यां प्रापुर्गोविशिखा अपि ॥ ९ ॥
कदाचित्सरयूवारिगम्भीरावर्तदुर्धरम् ।
वयं च दधि विक्रेतुं यातुकामाः पुरं प्रति ॥१०॥
तदा त्वं कामसौन्दर्यगम्भीरेऽस्मिन्नदीजले ।
सौवर्णीं नावमारोप्य क्रमात्तरितवानसि ॥११॥
कदाचिद् घट्टरक्षायै नियुक्ते गोपभूभृता ।
गच्छतीर्दधिविक्रेतुं मध्ये मार्गं निरुद्धवान् ॥१२॥
कदाचिद्रथमारोप्य सौवर्णमणिकिङ्किणीम् ।
वनाद्वनान्तरं नीत्वा शोभां दर्शितवानसि ॥१३॥

कदाचिन्माधवे मासि कुसुमाकरशोभिनि ।
दिवानिशमविज्ञाय नित्यं विहृतवानसि ॥१४॥
कदाचिन्निष्ठुरे ग्रीष्ममासे दिव्ये तु पाथसि ।
जलकेलीः सहास्माभिः कृतवानसि सुन्दर[1] ॥१५॥
कदाचिद् भूरिवर्षायां रत्नाद्रेरधिकन्दरम् ।
वार्भृतो जवनीकृत्य[2] रतवान् श्रीगणैः सह ॥१६॥
कदाचिद्धैमने काले कुञ्जाभ्यन्तरवेश्मसु ।
हसन्तीसाम्यमानेतुं[3] तूलैः सेवितवानसि ॥१७॥
कदाचिच्छैशिरे काले लतिका इव पुष्पिणीः ।
मरुत्वानिव धीरस्त्वं प्रिय कम्पितवाँश्च नः ॥१८॥
इत्थं तत्तत्कालदेशे[4] तत्तत्तारूण्यवेशिता ।
तत्तद्वल्ली वीथी[5] पथः[6] पीत्वा प्रेमामृतं रसम् ॥१९॥
तत्तत् कामक्रीडा यस्य संचितस्वर्निविडाकारः ।
श्रीरामेन्दोर्जितवानसि कन्दर्पाणां किमपि परार्धम् ॥२०॥
एवं त्वं रमयास्मान् स्वानन्दरससागरे ।
प्रत्येकं बहुलीकृत्य रामेन्दो रतवानसि ॥२१॥
अधुना तानि तानीह सुखानि विमुखे त्वयि ।
पर्णवत्कण्टकानीव भेत्स्यन्ति हृदयानि नः ॥२२॥
मैवं कार्षीः कदापि त्वं वनितावधपातकम् ।
विक्रमी पुंस्वभावत्वादयि त्वं निष्ठुरोऽप्यसि ॥२३॥
प्रमोदवनचन्द्रस्य तव प्रिय चकोरिकाः ।
न खेदय मनाङ् मानिन् मनोज्ञाचरितो भव ॥२४॥
विस्मृत्य निखिलां चेष्टां महामाधुर्यवार्निधिम् ।
शुष्ककाष्ठस्वभावं च कथमुत्सोढवानसि ॥२५॥
कोऽयं क्रमो रसिकपुङ्गव सार्वभौम
यद्भूरिशः सुखसुधोदधिनिर्वृतानाम्[7] ।

१. अधिशंवर—अयो० । २. जयमी°—बड़ो० । ३. हसन्तीषु समानेषु—अयो० । हसन्तीस्म समानेतुं—रीवाँ, बड़ो० । ४. तत्तत्काले तत्तद्देशे—अयो० । ५. तत्रतद्वल्लिवीथी—रीवाँ । ६. पाथः—अयो० । ७. निर्मितानाम्—रीवाँ ।

आर्त्तिप्रवेकमनुभावयसि स्वभावात्
स्वानन्दसारसमुदायमयोऽपि सन् नः ॥२६॥
ईशोऽपि सर्वभुवनस्य निजे वशोऽसि
प्रेमैकवश्यहृदयोऽसि सुसाधनोऽसि ।
निर्वाञ्छनोऽसि स कथं रघुनन्दन त्वं
कर्मातिघोरमिह कर्तुमथोद्यतोऽसि ॥२७॥
मैवं कार्षीः प्रभो तस्मात् प्रमोदवनदुःसहम् ।
विरहं कर्तुमर्होऽसि[1] रसिकेन्दुमहामणे ॥२८॥
अथ चेत्त्वमिमं नाथ संकल्पं कृतवानसि ।
तदा नः प्राणनिर्वृत्त्याद्युपायं[2] शिक्षयाधिहन् ॥२९॥
असमक्षे त्वयि स्वामिन् किं कार्यं सेवकैः जनैः ।
स्वभोगं वापि संन्यासमरण्यं वा विरक्तितः ॥३०॥
यैः कालदिङ्निमिषभित्तिपदान्तरेऽपि
सोढः कदाचिदपि नैव भवद्वियोगः ।
ते जीवनं समधिगम्य कथं सहन्तां
श्रीमन् महाविरहदावजपापकीर्तिम् ॥३१॥
तस्मात्त्वयि दृशोर्द्वन्द्वाद् दूरं याते प्रियोत्तम ।
किं कार्यं भक्तवर्गेण[3] तदस्मास्वनुशिक्षय ॥३२॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे रामयात्रानाम[4]
द्विचत्वारिंशोध्यायः ॥४२॥

●

१. महेसि किं—रीवाँ, बड़ो० । २. निर्वृत्तमु०—रीवाँ, बड़ो० । ३. भक्तिवर्येण—रीवाँ, बड़ो० । ४. रामयात्रायां—अयो०, रीवाँ, बड़ो० ।

त्रिचत्वारिंशोऽध्यायः

ब्रह्मोवाच

इति तासां वचः श्रुत्वा रामः कारुणिकोत्तमः ।
ददौ प्रतिवचस्तासां स्मित्वा संमोहयन्निव ॥ १ ॥

श्रीराम उवाच

अहो प्रिया मत्स्वरूपा मत्केति सुखसंश्रयाः ।
नैवं विलपितुं योग्या भवन्त्यो नित्यसंगताः ॥ २ ॥
व्यापिवैकुण्ठलोकेऽस्मिन् प्रमोदविपिनाभिधे ।
मदीये चिन्मये दिव्ये भवन्त्यो ह्यपि देवताः ॥ ३ ॥
श्रीमती जानकी सीता मदीया परमप्रिया ।
तदंशाः सकला यूयं नित्यं सन्निहिता मयि ॥ ४ ॥
चन्द्रस्य चन्द्रिका यद्वत्तपनस्य प्रभा यथा ।
पृथिव्या इव संबन्धो घटस्येव घटत्वकम् ॥ ५ ॥
असाधारणमेवैषा मदीयं लक्षणं प्रिया ।
तदंशत्वाद्भवत्योऽपि मदीयं लक्षणं परम् ॥ ६ ॥
विश्लेषो न कदाप्यस्ति भवतीभिः समं मम ।
नाभून्न भविता वापि चिन्मयेऽस्मिन् महापुरे ॥ ७ ॥
यथाहं सच्चिदानन्दरूपः श्रीविग्रहं दधत् ।
तथैव मत्प्रिया यूयं सच्चिदानन्दविग्रहाः ॥ ८ ॥
लीलेक्षया यथैवाहं निर्गुणोऽपि गुणात्मकः ।
तथा प्रिया भवन्त्योपि नानुशोचितुमर्हथ ॥ ९ ॥
लीला गुणमयी ह्येषा मदीया निर्गुणापि च ।
नैते गुणाः प्राकृतत्वं कदाचित् कलयन्ति च ॥१०॥
प्रमोदवनकुञ्जाश्च प्रमोदवनमेदिनी[1] ।
प्रमोदवनगावश्च प्रमोदवनभूरियम् ॥११॥

---

१. °मोहिनी—रीवाँ, बड़ो० ।

माङ्गल्या च गवेन्द्रश्च गोपा गोप्यः खगा मृगाः ।
सर्वं ब्रह्ममयं नित्यं[1] सच्चिदानन्दविग्रहम् ॥१२॥
अपि स्मरथ यद्दृष्टं दिव्ये[2] प्रासादवेश्मनि ।
द्वारकां मथुरां चैव श्रीमद्वृन्दावनं तथा ॥१३॥
प्रमोदविपिनस्थेऽस्मिन् प्रमोदवनमुत्तमम् ।
तत्र मां नित्यलीलास्थं स्वात्मनि चैव सुव्रताः ॥१४॥
रुक्मिणीं जानकीं चैव सहजां प्रियमीश्वरीम् ।
अपरा मे प्रिया भक्ता भक्तिरूपा तथापरा ॥१५॥
मत्तोऽपि मम भक्तानां मम भक्तिर्विशिष्यते ।
यथाहं वश्यतां यामि सा मत्तोऽप्यधिकैव हि ॥१६॥
प्रेमनेत्रा भावमुखी रसगात्री रतिस्तनी ।
रागाधारा महाभावहृदया मे प्रिया परा ॥१७॥
सैषा मद्वामतनुगा सुन्दरी मधुरस्मिता ।
सीतेतिसाधिकेत्याख्या सहजेति च कीर्तिता ॥१८॥
मोदिनीति सदाख्याता मन्मनोमोददायिनी ।
शय्यासनाटनस्थाने यां भवन्त्योऽभ्यसूयथ ॥१९॥
इयं हि सर्वलीलानामेकैवास्ति प्रवर्त्तिका ।
नानया रहितः क्वापि भविष्यामि मृगेक्षणाः ॥२०॥
यूयं तदंशभूतत्वान्नित्यं संनिहिता मयि ।
मद्गात्रकिरणाकाराः किमर्थमनुशोचथ ॥२१॥

गोप्य ऊचुः

एवं चेत्तर्हि श्रीराम प्रवादः कोऽयमुत्थितः ।
अयोध्यां यास्यति श्रीमान् पित्रोराज्ञावशंवदः[3] ॥२२॥
तच्छ्रुत्वा सहजो लोके[4] महान् खेदोऽभ्यजायत ।
अकाण्डताण्डवप्रायं किमिदं रघुपुङ्गव ॥२३॥

---

१. वित्त—अयो० । २. दिव्य°—बड़ो० । ३. पित्रोराज्ञोवशं०—रीवाँ, बड़ो० । ४. तच्छ्रुत्वा सहगोलोकं—रीवाँ, बड़ो० ।

लोकः किं वितथं ब्रूते त्वं वा किं वञ्चयस्युत ।
निर्हेतुको न चैवायमुदितः सुमहान् ज्वरः ॥२४॥
एवं नः संशयं छिन्धि सत्यं ब्रूहि च राघव ।
नानृतं हि वदेल्लोको भवतीत्यास्तिकं[1] वचः ॥२५॥

श्रीभगवानुवाच

न लोको वितथं ब्रूते मल्लीलादर्शको ह्यसौ ।
किंत्वस्मिन् विषये यूयं नानुशोचितुमर्हथ ॥२६॥
पुरा खलु भवे यूयं देवं पशुपतिं प्रभुम् ।
कोपयित्वा लब्धशापाः किंचिद् दुःखमवाप्स्यथ ॥२७॥
ददौ स भगवान् शापं युष्मभ्यं मद्वियोजनम् ।
तेनेदं रूपमन्तर्धाः किंचित्कालं भविष्यति ॥२८॥
तत्तद्देहांशरूपेण तदा यूयं भविष्यथ ।
अन्तरङ्गतया सर्वां लीलामनुभविष्यथ ॥२९॥
लोके वियोग[2] इत्याख्या तस्यैव च भविष्यति ।
भविष्यति तु योऽन्तर्धिः, साक्षाद्दर्शीतु[3] किंचन ॥३०॥
तत्राप्यनवधिं तावदानन्दं समवाप्स्यथ ।
मद्भूयत्वान्मदंशानां नैवं यूयं भिदायुजः[4] ॥३१॥

गोप्य ऊचुः

कदा स भगवान् रुद्रः शशापास्मान् भवत्प्रियाः ।
किंवा तत्कारणं राम कुत्र देशेऽथवा प्रभो ॥३२॥

श्रीभगवानुवाच

एकदा चैव विषये श्रीप्रमोदवनान्तरे[5] ।
भवन्त्यः सहजायुक्ताश्चक्रुः क्रीडां मया सह ॥३३॥
ततश्च[6] सुरतश्रान्ता[7] उपेक्ष्य भवतीरहम् ।
मध्ये निकुञ्जभवनं रतवान् रमया सह ॥३४॥

---

१. भवान्नैवास्तिकं—अयो० । २. मद्वियोग—रीवाँ, बड़ो० । ३. दर्शस्य—अयो० । ४. भिदा पुनः—रीवाँ, बड़ो० । ५. श्रीमत्प्रमुद०—अयो० । ६. क्रीडायां—अयो० । ७. सुरतस्यान्ते—बड़ो० ।

यूयं निकुञ्जभवनस्याङ्गणे[1] बद्धमण्डलाः ।
मद्गुणानेव गायन्त्यस्तस्थुः सुस्थिरमानसाः ॥३५॥
तत्राजगाम भगवान् रुद्रः पशुपतिः प्रभुः ।
कृत्वा वन्दनमेताभ्यः क्व राम इति सोऽब्रवीत् ॥३६॥
नोचुस्ताः संप्रगायन्त्यो रामचारित्रमद्भुतम् ।
पुलकैः समुपेताङ्ग्यः कलिताश्रुविलोचनाः ॥३७॥
रुद्रः प्रतिवचोऽश्रुत्वा कृतावज्ञा उवाच ताः ।
भवत्यो रामविश्लेषं लभन्तामचिरात्स्त्रियः ॥३८॥
इत्युक्त्वा प्रययौ रामकुञ्जाभिमुखमीश्वरः ।
दृष्ट्वा तु समुपायान्त[2]मुदतिष्ठमहं प्रियाः ॥३९॥
ईषद्विवसनीभूतवपुषा रमया सह ।
आदिद्रिये तमीशानं समस्तैरुपचारकैः ॥४०॥
अपृच्छं चैव कैलाशाद् भव्यागमनकारणम् ।

रुद्र उवाच

तव लीलादर्शनार्थं कैलाशादहमागमम् ॥४१॥
अहो रसमयी लीला श्रेयोगुणमयी तव ।
सच्चिदानन्दैकमपि न वाङ्मनसगोचरा ॥४२॥
मुक्ता अभिभजन्ते यां दिव्यमास्थाय विग्रहम् ।
निर्गुणापि भवातीतैर्गुणैः सत्त्वादिभिर्युता ॥४३॥
तद्दर्शनार्थं संक्षुभ्य तपो विस्मृतवानहम् ।
दिव्यवेणुरवं श्रुत्वा स्थानं त्यक्त्वेह संगतः[3] ॥४४॥
वाञ्छामि त्वन्मुखाम्भोजदर्शनामृतपानकम् ।
अहो धन्ये दृशौ मत्के याभ्यां दृष्टोऽसि राघव ॥४५॥
लीलापरिकरोपेतः स्निग्धश्यामलविग्रहः ।
सहजाशक्तिसहितः सहजानन्दनन्दितः ॥४६॥

---

१. भवने स्वगणे—रीवाँ, बड़ो० । २. तूमयायान्त—अयो० । ३. मागतः—बड़ो० ।

नमस्तेस्तु नमस्तेस्तु नमस्तेस्तु रघूद्वह ।
नमस्ते नित्यलीलायै नमस्ते केलिसंपदे ॥४७॥
नमः प्रमोदकुञ्जाय नमोऽस्यै रत्नभूमये ।
नमः साकेतदुर्गाय नमः सरयुरोधसे ॥४८॥
नमस्ते गोपिगोपेभ्यो धेनुकाय नमोनमः ।
गवेन्द्राय नमो नित्यं सुखिताय नमोनमः ॥४९॥
नमो गवेन्द्रसुन्दर्यै माङ्गल्यायै नमोनमः ।
नमो गवेन्द्रघोषाय सर्वसंपदमीयुषे ॥५०॥
नमः प्रमुदवनस्थाय[1] रामाय परमात्मने ।
सदानन्दाय रामाय सदा सं'तारमाजुषे ॥५१॥
पीताम्बराय नवनीरदनीलभाय
वंशीविशालरसिने मधुराधराय ।
गोगोपगोपरमणीकमनोयभासे
भाषान्विताय च नमोऽस्तु रघूत्तमाय ॥५२॥
राम त्वदीयमुखपङ्कजमक्षिभृङ्गैः
पीत्वा त्वदन्यविषयग्रहसंनिवृत्तैः ।
संसत्कृतार्थमिव संप्रति मन्यमानो
भ्राम्यामि भूतलमशेषपदार्थसिद्धः ॥५३॥
सरयूसरसं शश्वच्चुलुकीकृत्य निर्वृतः ।
कदा रासविलासादि पश्येयं स्वाधिकारतः ॥५४॥
नित्यलीलापरिकरे कदा मे गणना भवेत्[2] ।
कदा वीक्षेय रामेन्दो भवद्वदनचन्द्रिकाम् ॥५५॥
साक्षात्कृतिस्ते लीलाया एष मेऽनुग्रहः प्रभो ।
श्मशानचारिणोऽत्यर्थमभद्रपथसेविनः ॥५६॥
अहो मे रामचन्द्रस्य दर्शनार्थमिहागमः ।
तेन पृष्टा इमा देव्यो न मे प्रतिवचो ददुः ॥५७॥
तमोरूपप्रकाशार्थमिह क्रोधान्धता मम ।
नोचेदिह गुणातीते स्थाने क्रोधः कथं भवेत् ॥५८॥

१. नमो मोदवन°—अयो० । २. °भवत्—अयो०, बड़ो० ।

अघं[1] ममैतत् क्षन्तव्यमपराधनमीश्वर ।
यत्त्वत्परिकरस्यापि शापो दत्तो मया प्रभो ॥५९॥
तदाहमुक्तवान् रुद्रं भगवन्नेवमेव तत् ।
तथापि मे चिकीर्षायाः साधनायैव कल्पताम् ॥६०॥
गवेन्द्रस्य महाधाम्नि नित्यं निवसतो मम ।
अवतारार्थसंसिद्धयै शापोऽयं ते भविष्यति ॥६१॥
कौशल्यायास्तदा मातुः पितुर्दशरथस्य च ।
संतोषणं तथा ज्ञातिस्वजनानां सुखोद्भवः ॥६२॥
वधश्च रावणादीनां समुद्धारस्तथा शिव ।
पशुपक्ष्यन्त्यजादीनां कष्मलाक्रान्तचेतसाम् ॥६३॥
अवतारकृत्यमेतावत्करिष्यामि महेश्वर ।
तदर्थं तव शापोऽयमुद्भूतोऽस्त्यत्र[2] मा शुचः ॥६४॥
मच्चिकीर्षानुकूलत्वान्न ते शापो रुषावहः ।
स्वैरं विहर[3] संसिद्धो मद्भक्तान् मृडयन् प्रभो ॥६५॥
एवमुक्तो मया शम्भुरभिवन्द्य पुनः पुनः ।
निर्जगाम निजं स्थानं कैलासाख्यं मनोहरम् ॥६६॥
युष्माकमेवं संजातो रुद्रशापोऽतिदुर्धरः ।
यूयं तस्य प्रभावेण मद्वियोगमवाप्स्यथ ॥६७॥
मद्भक्तातिक्रमो[4] ह्येष मद्भक्तैर्दुरतिक्रमः ।
परंत्वत्रापि विश्लेषे सन्निलीय मदं शृणु (?) ॥६८॥
मत्सायुज्यं परिप्राप्य मत्तादात्म्यमवाप्स्यथ ।
मदानन्दोदधौ मग्नाः क्षणवद्यापयिष्यथ ॥६९॥
मद्वियोगं सुदुर्धर्षं नैव ज्ञास्यथ मत्प्रियाः ।
तावत्कृत्वावतारार्थमागमिष्यामि वः पुनः ॥७०॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे रामयात्रायां पुरप्रवेशो-नाम[5] रामगीतायां त्रिचत्वारिंशोऽध्यायः ॥४३॥

---

१. इदं—बड़ो०। २. °तः पुत्र—रीवाँ। ३. विहार—अयो०, बड़ो०।
४. मद्भक्ता मृदवः—रीवाँ, अयो०। ५. पुरप्रवेशे—अयो०, रीवाँ, बड़ो०।

चतुश्चत्वारिंशोऽध्यायः

ब्रह्मोवाच

एवं प्रबोधिता गोप्यो रुद्रशापस्य कारणम् ।
विश्वस्य दुःखभूयिष्ठाः समवोचन् रघूद्वहम् ॥ १ ॥

गोप्य ऊचुः

स्वामिन् भाविपदार्थानां प्रतीकारो न विद्यते ।
तथापि त्वां प्रपन्नानां नार्तिः स्यात् कर्हिचित् प्रभो ॥ २ ॥
अयमेव प्रतीकारो भवदुःखनिवर्हणे ।
यत्त्वच्चरणपाथोजतरणिद्वन्द्वसेवनम् ॥ ३ ॥
निवृत्ताखिलतर्षास्ते हंसाः परमभावुकाः ।
पारङ्गता भवाम्भोधेः स्थितास्त्वत्समुपाश्रयात् ॥ ४ ॥
कथं भक्ताः प्रपद्यन्ते केन भावेन राघव ।
तदस्मानुपदेशेन बोधयस्व कृपावशात्[1] ॥ ५ ॥
त्वद्वियोगभवा[2] प्रायः परमार्तिर्भविष्यति ।
कथं नु तां तरिष्यामो नित्यं त्वत्सङ्गसंश्रयाः ॥ ६ ॥
कथं त्वद्विरहे काले[3] व्यूहो लीनो भविष्यति ।
व्रजस्त्रीणां समूहोऽसौ भवल्लीलैकसंश्रयः ॥ ७ ॥

राम उवाच

यथा भक्ताः प्रपद्यन्ते येन भावेन वा प्रियाः ।
तद्वः समुपदेशेन बोधयामि विशेषतः ॥ ८ ॥
एकान्ते विमले क्षेत्रे योगक्षेमं विधाय च ।
मन्निष्ठां भावनां कुर्याद् यथा शीघ्रं भवं तरेत् ॥ ९ ॥
वैदिकैस्तान्त्रिकैः कर्मव्यूहैः सुविमले हृदि ।
प्रवृत्तौ भावनां यातां तां[4] कुर्यान्मदुपाश्रयाम्[5] ॥१०॥
हृत्पुण्डरीकमध्ये तु साकेतं भावयेन्मुहुः ।
तत्र मां[6] भावयेत् पूर्णं लीलाभिः पुरुषं परम् ॥११॥

---

१. °कृताद्—अयो० । २. एव—रीवाँ, बड़ो० । ३. त्वद्देहविरमे—अयो० ।
४. त्वां—रीवाँ, बड़ो० । ५. मद्भुताश्रयां—अयो० । ६. स—बड़ो० ।

यद्धि किंचिद्वस्तुजातं भावयेत्तन्मदात्मकम् ।
मत्तः परं नैव किंचिन्मयीदं[1] सर्वमेव तु ॥१२॥
भूर्जलं पावको वायुः खं मनोमण्डलं दिशः ।
प्रकृतिः पुरुषो ब्रह्म ज्ञेयं सर्वं मदात्मकम् ॥१३॥
मत्तः प्रवर्तते सर्वं प्रपञ्चोऽयं मदात्मकः ।
मत्कार्यः संततो नित्यं मय्येव व्यपदिश्यते ॥१४॥
मय्यात्मरतिमायाते लीयन्ते भशिता यथा ।
स्वरूपानव[2]बोधश्च मनो देहेन्द्रियादिषु ॥१५॥
स्वतादात्म्या[3]वभासश्च सा विद्या परिकीर्तिता ।
व्योमवद्व्यापकं ब्रह्म किंचिन्मायांशचेष्टितम्[4] ॥१६॥
सर्वतः पाणिपादं च सर्वतोदृक्शिरोमुखम् ।
सर्वतो नासिकाश्रोत्रे सर्वमाविश्य तिष्ठति ॥१७॥
अनन्ता मूर्त्तयस्तस्य भिन्नाभिन्नस्वरूपिणः ।
एकोऽहं बहु भवेयेतीच्छा[5] तस्याभवत् कदा ॥१८॥
ततोऽवर्तत लोकोऽसौ जडजीवान्तरात्मभिः ।
सन्मात्रं भाति सर्वत्र न भाति च चिदन्तरा ॥१९॥
[6]सन्मात्रं जड़वर्गोऽयं चिन्मात्रो जीव ईरितः ।
सच्चिदानन्दरूपो वाप्यन्तरात्मा महेश्वरः ॥२०॥
जडः स्फुरति जाग्रत्सु स्वप्ने भाति चिदन्तरा ।[6]
सुषुप्तौ सच्चिदानन्दो ह्यन्तरात्मा[7] प्रकाशते ॥२१॥
यल्लीना अवतिष्ठन्ते स्वरूपानन्दभोगिनः ।
आनन्दमय आनन्दभुगि[8]त्युपनिषत्सु सः ॥२२॥
तुरीयस्त्वहमेतेभ्यः समः सर्वत्र सर्वगः ।
विद्यया तु यदा विद्या नश्यति ध्वान्तवद्रुचा ॥२३॥

---

१. मयोक्तं—अयो०, रीवाँ । २. स्वसाररव—रीवाँ । ३. °ज्ञानात्मा°—रीवाँ, बड़ो० । ४. °विष्टितं—रीवाँ, बड़ो० । ५. जायेत तीछा—अयो० । ६...६. अयमंशो नास्ति—रीवाँ, बड़ो० । ७. पञ्जरात्मा—रीवाँ, ह्यजरात्मा—बड़ो० । ८. °भागि० —बड़ो० ।

तदा स परमानन्दः प्रकाशात्मा प्रकाशते ।
सर्वाध्यासनिवृत्तौ तु शुद्धा देहेन्द्रियादयः ॥२४॥
मल्लोकानन्दभोगार्हा जायन्ते ते मदात्मकाः ।
नित्यलीलां तदा पश्येन्मद्भक्तो मत्स्वरूपिणीम् ॥२५॥
न यत्र शोको न जरा न मृत्युर्न मदादयः ।
तन्मदीयं परं स्थानं मद्भक्तः संप्रपद्यते[1] ॥२६॥
यस्मान्न पुनरावृत्तिः सर्गादावपि जायते ॥२७॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे रामगीतायां
चतुश्चत्वारिंशोऽध्यायः ॥४४॥

पञ्चचत्वारिंशोऽध्यायः

श्रीभगवानुवाच

नवधा भक्तिरुद्दिष्टा श्रुतिसंकीर्तनादिभिः ।
कर्मज्ञानोपासनाभिः प्रत्येकं त्रिविधैव सा ॥ १ ॥
सप्तविंशतिधा भिन्ना गुणैः सत्त्वादिभिः पुनः ।
एकाशीतिप्रकारेण भक्तियोगः प्रकीर्तितः ॥ २ ॥
निर्गुणा त्वेकरूपैव मन्निष्ठा मत्फलोदया ।
मत्स्वरूपात्मिका नित्यं भूयो मत्प्रेमलक्षणा ॥ ३ ॥
न तां ददामि कर्मिभ्यो न ज्ञानिभ्यः कदाचन ।
नोपासकेभ्यो नाज्ञेभ्यो नचान्येभ्यो मृगेक्षणाः ॥ ४ ॥
मन्निष्ठेभ्यो ददाम्येनां यथा युष्मभ्यमङ्गनाः ।
कर्माणि ज्ञानयोगाश्च संन्यासाश्च पृथग्विधाः ॥ ५ ॥
ते मत्स्वरूपनिष्ठायाः कलां नार्हन्ति षोडशीम् ।
तस्मात् स्वरूपनिष्ठो यः स सर्वेभ्यो विशिष्यते ॥ ६ ॥

---

१. सन् प्रप°—अयो० ।

कर्मोपास्तिस्तथा ज्ञानं विहितादितरत्र तु ।
मत्स्वरूपैकनिष्ठस्य सर्वं प्रेमैकलक्षणम् ॥ ७ ॥
अहमेव फलं येषां न स्वर्गादि कथंचन ।
स्वर्गादिफलकं काम्यं केवलं ह्याधिभौतिकम् ॥ ८ ॥
आध्यात्मिकं चित्तशुद्ध्या ज्ञानैकफलकं प्रियाः ।
केवलं कर्म मन्निष्ठमाधिदैविकमुत्तमम् ॥ ९ ॥
अथाधिभौतिकं ज्ञानं जीवप्रत्यक्षसाधनम् ।
अक्षरं[1] ब्रह्म साक्षात्त्वहेतुराध्यात्मिकं स्मृतम् ॥१०॥
परब्रह्मानन्दपददायकं ह्याधिदैविकम्[2] ।
मत्स्वरूपानन्दभोगहेतुस्तुर्यं तदुच्यते ॥११॥
उपासनापि त्रिविधा पूर्ववत्समुदीरिता ।
जीवब्रह्मपरब्रह्मसाक्षात्कारविधायिनी ॥१२॥
अहमेव फलं यस्याः सा तुर्या परिकीर्तिता ।
निर्गुणं भावमापन्ना सर्वतोऽपि विशिष्यते ॥१३॥

गोप्य ऊचुः

सर्वैरपि ब्रह्मविद्भिस्त्वं लभ्योऽसि नरोत्तम ।
उत कश्चिद्विशेषोऽस्ति तन्नो ब्रूहि रघूत्तम ॥१४॥
केचित्तु वामदेवाद्याः संलीनास्त्वयि केवलम् ।
केचित्पुनर्महाभागास्त्वया भोगान्नु[3] भुजते ॥१५॥
वरिष्टाः केऽभवन् तेषां तव वेदस्य वा मताः ।
एतद्वेदितुमिच्छामस्त्वत्तः कमललोचन ॥१६॥

श्रीभगवानुवाच

अक्षरं कथ्यते ब्रह्म सर्ववेदान्तगोचरम् ।
पुच्छभूतं प्रतिष्ठा मे तद्गेयं योगवित्तमैः ॥१७॥
ममैव संप्रकाशोऽसावुद्द्योत इव भास्वतः ।
पुरुषाकृतेर्मे देहोऽसौ गृहिण्यश्च गृहं मम ॥१८॥

---

१. अथाक्षरं—रीवाँ । २. त्वाधि°—रीवाँ । ३. भोगानु° रीवाँ ।

भास्वतश्च प्रभा दिव्या यथावदवधार्यताम् ।
स एव चिन्मयो लोको यद्गत्वा न निवर्तते ॥१९॥
तस्य विज्ञानमात्रेण तन्मयो जायते नरः ।
तत्रैवाप्येति यत्रास्य भेददृष्टिर्निवर्त्तते ॥२०॥
जन्तोर्मदिच्छया चेत्तु भक्तिः समुपजायते ।
तदा मया सर्वकामभोगान् प्राप्नोति मत्परः ॥२१॥
अन्यथा त्वक्षरे धाम्नि लीनस्तिष्ठेदकम्पनः ।
किं त्वस्यापि भवेद्भावि भक्ति[1]स्वरूपयोग्यता ॥२२॥
न ह्यब्रह्मज्ञे कदापि भक्तिः[1] समुपजायते ।
मयि सद्धारणा[2]❀ हेतुर्यदाह श्रुतिरूर्जिता ॥२३॥
भक्तिं वैधीमुपाश्रित्य मन्निष्ठो मयि लीयते ।
प्रेममात्रस्फुरद्भावो भुङ्क्ते भोगान् मया सह ॥२४॥
प्रमोदवनकुञ्जस्थो नित्यलीलानुभावकः ।
सख्यवात्सल्यदास्यादिमहाभावैर्विभावितः ॥२५॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे
रामगीतायां पञ्चचत्त्वारिंशोऽध्यायः ॥४५॥

षट्चत्वारिंशोऽध्यायः

गोप्य ऊचुः

किंस्वरूपो मतो जीवः सम्बन्धो ब्रह्मणा च कः ।
कीदृङ्मतं परं ब्रह्म अक्षरं वापि कीदृशम् ॥ १ ॥

श्रीभगवानुवाच

सावयवो ह्यसौ जीवः[3] स्वचैतन्यगुणेन तु ।
सर्वं पुर[4]मभिव्याप्य वर्त्तते दीपवद् गृहे ॥ २ ॥

१—१. अयमंशो नास्ति—रीवाँ, बड़ो० । २. मद्धरणं—अयो०, बड़ो० । ❀ अत्रयावदेव मधु० पुस्तकस्य खण्डितोंऽशः । ३. स्वाविद्यवोह्यसौ—अयो०, सावयवोसौ स्व°—रीवाँ, सावयवोऽस्त्यसौ—बड़ो० । ४. परम्—रीवाँ ।

योगेन मत्प्रसादाद्वा तत्स्वरूपं प्रकाशते ।
निर्धूमानलसंकाशं निरभ्रविधुसन्निभम् ॥ ३ ॥
तदा ब्रह्माण्डकोटीनामाश्रयत्वमियादयम् ।
अंश्यंशभावः[1] संबन्धो ब्रह्मणा सह तस्य तु ॥ ४ ॥
अग्निना महता यद्वद्विस्फुलिङ्गस्य कीर्तितः ।
नहि ज्ञाते विस्फुलिङ्गे वह्निर्न ज्ञायते महान्[2] ॥ ५ ॥
प्रेमाख्यश्चैव संबन्धो येन प्राप्नोति मानवः[3] ।
अक्रिये कर्मसंबन्धो न घटेत कदाचन ॥ ६ ॥
अज्ञेये ज्ञानसंबन्धो न भवेच्च कथंचन ।
प्रेमाख्यस्तु महान् योगो नित्यं मम रसाभिधः ॥ ७ ॥
जीवनिष्ठोऽपि स परब्रह्मण्येव तु संभवेत् ।
संख्यापदार्था द्वित्वाद्याः संयोगश्च यथा प्रियाः ॥ ८ ॥
व्यासज्यैव तु[4] वर्त्तन्ते यथा प्रेमापि बुध्यताम् ।
सर्वाधिकश्च सुदृढो विषयेभ्यः पराङ्मुखः ॥ ९ ॥
माहात्म्यज्ञानसंस्कारो[5] विनिर्धूतरजस्तमः ।
परमानन्दपाथोधिः प्रेमा निरतिशायितः[6] ॥१०॥
तेनापि जीवनिष्ठेन ब्रह्म संबध्यते परम् ।
येनैव द्वारभूतेन नित्येन तदवाप्नुयात् ॥११॥
तत्साधनमहं पूर्णो निरुपाधिः कृपाश्रयः ।
कृपयामि परं[7] यस्मै तस्मै प्रेम परं ददे ॥१२॥

गोप्य ऊचुः

त्वं सर्वेषां समः प्रेयान् सर्वेषां साधनः प्रभो ।
कस्मै ददासि नो कस्मै वेत्तुमिच्छामहे त्वदः ॥३१॥

---

१. अंशांशभावः—बड़ो० । २. "अग्निकणे ज्ञाते महानग्निर्न ज्ञायते इति न किंतु ज्ञायत एव" टि०—मथु० । ३. प्राप्येत मानवैः—मथु०, बड़ो० । ४. संवृत्तो वस्तु—रीवाँ । ५. °संपृक्तो—मथु०, बड़ो० । ६. °शयितः—मथु०, बड़ो । ७. कृपया कृपया—रीवाँ ।

सर्वेषां मुक्तिरेव स्यात् सर्वे स्युः प्रेमभागिनः ।
साधारण्यात्तव श्रीमन् प्रेमदस्य प्रियस्य च ॥१४॥

श्रीभगवानुवाच

अनेकजन्मसंसिद्धकर्मज्ञानादिभागिने ।
ददामि परमं प्रेम परितुष्टो मुहुः प्रियाः ॥१५॥
न सर्वस्मै ददाम्येतत् परमानन्दलक्षणम् ।
कर्मभिश्चित्तसंशुद्धो ज्ञानेन च्छिन्नसंशयः ॥१६॥
श्रवणादिमुहुर्भक्तिसाधनैः साधिताकृतिः ।
जनो यो मां प्रपद्येत ज्ञात्वा परमपूरुषम् ॥१७॥
तस्मै ददामि तां भक्तिं प्रेमाख्यां मदुपाश्रयाम् ।
तां लब्ध्वा चापरं लाभं मन्यते न जगत्त्रये ॥१८॥
श्रद्धावान् ब्रह्मनिष्ठश्च परब्रह्मरसोत्सुकः ।
वीतरागो विषयतो मत्प्रेम लभते नरः ॥१९॥
नित्यलीलारसाभिज्ञः श्रुतमत्प्रेमलक्षणः ।
ज्ञात[1]पारमहंस्यश्च[2] मत्प्रेम लभते नरः ॥२०॥
क्वचिन्नृत्येत् क्वचिद्गायेत् क्वचिद्धावेत मत्तवत् ।
क्वचिद्धसेत् क्वचिज्जल्पेत् क्वचित्क्रीडेत् क्वचिद्रुदेत् ॥२१॥
मत्प्रेममदिरामत्तस्तृणवन्मन्यते जगत् ।
मत्प्रेमभागिनो दृष्ट्वा प्रहृष्येत् प्राप्तबन्धुवत् ॥२२॥
रमते तैः समं नित्यं सर्वस्वैरिव बन्धुभिः ।
भक्तैः परमहंसैश्च भ्रातरस्तस्य ते जनाः ॥२३॥
सखायः सुहृदश्चैव प्रियाश्च हितकारिणः ।
तेषामर्थे यतेन्नित्यं प्राणांस्त्यक्त्वापि दुस्त्यजान् ॥२४॥
ते ह्यस्य परलोकस्य संगिनः सुहृदो जनाः ।
एष भावः समुद्दिष्टो येनाऽसौ मां प्रपद्यते ॥२५॥
तेषामहं स्वस्वरूपं दर्शयिष्यामि वै मुहुः ।
तत्सन्निधौ सदा स्थास्याम्यहमद्भुतभाववान् ॥२६॥

---

१. ज्ञातं—अयो०, ज्ञातः—रीवाँ । २. °हंसश्च—अयो०, हंसस्य च—रीवाँ ।

भावितो भावसंदोहैर्भविष्यामि च तद्वशे ।
स्वस्वरूपं दुर्लभमप्येभ्यो दास्याम्यहं प्रियाः ॥२७॥
मद्वियोगभवं दुःखं यथा तेषां निवर्तते ।
तथा वो बोधयिष्यामि विशिष्टं शृणुत प्रियाः ॥२८॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे रामगीतारहस्यो-
पाख्यानं नाम षट्चत्वारिंशोऽध्यायः ॥४६॥

सप्तचत्वारिंशोऽध्यायः

श्रीभगवानुवाच

अलाभे मत्स्वरूपस्य मद्वियोगभवा रुजः ।
विनेया मत्प्रतिकृतिः समाराधनतत्परैः ॥ १ ॥
काञ्चनी रूप्यजा ताम्री शैली दारुमयी तथा ।
मदीया प्रतिमा कार्या यथारुचितविग्रहा ॥ २ ॥
साङ्गोपाङ्गां सायुधां च परिवारगणैर्युताम् [1] ।
नित्यं परिचरेद्भक्त्या प्रांतरारभ्य साधकः ॥ ३ ॥
पाद्यार्घ्याचमनैर्भूयो मधुपर्कैर्मनोहरैः [2] ।
स्नानैर्विलेपनैर्गन्धैर्धूपैर्दीपैर्विभूषणैः ॥ ४ ॥
वस्त्रालङ्करणैः पुष्पैर्गीतवादित्रतोरणैः ।
पानीयभोजनैर्भूरि संविधाभिः प्रमार्जनैः ॥ ५ ॥
नानोपायनसंदोहैर्यथाभिलषितैरपि ।
आरार्त्तिकैः [3] पुष्पवर्षैः स्तौत्रैश्चापि परिक्रमैः ॥ ६ ॥
नमनैर्नर्तनैर्दास्यकरणैर्गृहधावनैः ।
आत्मार्पणैर्नामगणैर्गुणनैः प्रीणनैरपि ॥ ७ ॥

---

१. °गुणैर्—रीवाँ, मथु०, बड़ो० । २. "दधिसिताघृतमधुभिर्मिलितैर्मधुपर्कः" टि०—मथु० । ३. आरार्तिकैः—रीवाँ ।

नानाभावपरीरम्भैर्नाना चोत्सव[1]कल्पनैः ।
अवन्ध्यं तद्दिनं कुर्यात् कीर्तनश्रवणादिभिः ॥ ८ ॥
शृणुयात् सततं सख्यो रामायणमनन्यधीः ।
वेदवत्तद्विजानीयाद्यत्रास्ति चरितं मम ॥ ९ ॥
वाल्मीकं चैव वासिष्ठं शैवं पाराशरं तथा ।
भौशुण्डं पञ्चमं[2] षष्ठं[3] काप्यं[4] रामायणं स्मृतम् ॥१०॥
अन्येष्वपि पुराणेषु यत्रापि चरितं[5] मम ।
तं तं भागमपेक्षेत विशेषेण मदाश्रयः ॥११॥
रां रामाय नम इति मम मन्त्रं षडक्षरम् ।
अशेषकामनापात्रं[6] गृह्णीयात् सद्गुरोर्मुखात् ॥१२॥
वैदिकैस्तान्त्रिकैर्वापि प्रकारैः परिसाधयेत् ।
ततस्तु चित्तसंशुद्ध्या जातः प्रेमविघूर्णितः ॥१३॥
भजेन्मदविशेषेण मन्मूर्तिं प्रागुदाहृताम् ।
सच्चिदानन्दरूपां तां भावयेत विचक्षणः ॥१४॥
जानक्या प्रियया युक्तं रात्रौ संजातजागरम् ।
ईषन्मदविघूर्णाक्षं प्रभाते मां प्रबोधयेत् ॥१५॥
मङ्गलारात्रिकं कुर्यात् सिंहासनगते मयि ।
ततो माङ्गल्यकैर्भावैः शिक्ये हिन्दोलयेत्तराम् ॥१६॥
तत्र मां भोजयेद् दिव्यं नवनीतं सितोपलैः[7] ।
ततोऽवतार्य सौगन्ध्यतैलेन परिलेपयेत् ॥१७॥
उद्वर्तयेत् प्रेमभावात् स्नापयेत्तदनन्तरम् ।
प्रोञ्छ्य[8] शृङ्गारयेद्भक्त्या नखादा शिखमद्भुतम् ॥१८॥
नूपुरौ पादयोः कुर्यान्मध्ये च क्षुद्रघण्टिकाम् ।
अङ्गदौ बाहुयुगले नसि[9] मुक्ताफलं न्यसेत् ॥१९॥

---

१. नानार्चोत्सव°—अयो० । २. पश्चिमं—अयो० । ३. चान्यद्—रीवाँ । ४. काप्यं—"हनुमद्रामायणं" टि०—मथु०, बडो० । ५. यत्राभि°—अयो० । ६. °पायं—अयो०, °प्रातं—रीवाँ । ७. "सिताभिः सहितं" टि०—मथु० । ८. प्रोंच्छा—अयो०, रीवाँ । ९. नासे—अयो०, रस°—रीवाँ ।

पश्चाद्भागे न्यसेद्वेणीं ताटङ्कौ श्रवणद्वये ।
पुंभूषणैः स्त्रीभूषाभिः प्रियं शृङ्गारयेच्च माम् ॥२०॥
ततो मां भोजयित्वा तु कुर्यादारात्रिकं सुधीः ।
ततो गोपिजनैश्चापि भोज्यमानं विभावयेत् ॥२१॥
ततो गोचारणार्थाय युक्तं गोपालबालकैः ।
तात्कालिकरसाविष्टं वने यान्तं[1] विभावयेत् ॥२२॥
तत्र शाद्वलसंदोहस्थलीमुक्तसुगोधनम् ।
प्रमोदवनकुञ्जान्तर्भुञ्जानं मां विभावयेत् ॥२३॥
ततः क्वापि महाकुञ्जे प्रियया केलिसंयुतम् ।
अत्यर्थं सुखविश्रान्तं शयानं मां विभावयेत् ॥२४॥
ततः प्रहरमात्रावशेषे तु दिवसेश्वरे ।
गौडमालवरागेण गायन्तं कलितोत्सवम् ॥२५॥
नयन्तं दिनशेषं तु धेनुसंदोहरक्षणैः ।
पीताम्बरं समान्दोल्याह्वयन्तं दूरगाश्च गाः ॥२६॥
सुखितस्य गवेन्द्रस्य गृहाभिमुखतः स्थितम् ।
धेनुयूथं पुरस्कृत्य वर्त्तमानं सुहृद्गणैः ॥२७॥
तत्रैव भोजयेद्भक्त्या यथासंपन्नभोजनैः ।
गवेन्द्रव्रजगोष्ठस्य सन्निधौ सदनोत्सुकम् ॥२८॥
गोष्ठे विशन्तं गोपोनां समूहैः परिवेष्टितम् ।
कलितारात्रिकं भूयो रामचन्द्रं च मां स्मरेत् ॥२९॥
आगतं सदने स्वस्य माङ्गल्याकलितोत्सवम् ।
लाल्यमानं चुम्ब्यमानं सन्ध्यायां मां विभावयेत् ॥३०॥
तेषु तेष्वथ[2] गोष्ठेषु गोदोहनमिषेण माम् ।
मिलन्तं भवतीभिश्च हसन्तं मां विभावयेत् ॥३१॥
गोदोहस्यावसाने तु माङ्गल्यासदने स्थितम् ।
कुर्वाणं भोजनं दिव्यं सुखितेन सह स्मरेत् ॥३२॥

---

१. यातं—रीवाँ। २. च—मथु०, बड़ो०।

भोजनान्ते च माङ्गल्याकलितारात्रिकोत्सवम् ।
शयानं शयने गोष्ठे रामया सह मां स्मरेत् ॥३३॥
एवं प्रभातमारभ्य रात्रिपर्यन्तमादरात् ।
तैस्तै भावैर्भावयानो भजेन्मां राजरूपिणम् ॥३४॥
गोपा गोप्यश्च नो विज्ञाः स्वभावेनाज्ञबुद्धयः ।
तेष्वेवाहं[1] सदा तुष्टो न प्राज्ञेषु कथंचन ॥३५॥
अज्ञाः स्नेहरसाक्रान्ता मदर्थे त्यक्तजीविताः ।
वेदवादविधेर्मुक्ता मामेवैकं विजानते ॥३६॥
एवं प्रमोदवने स्वां लीलां प्रकटयन् सदा ।
विहरामि वने वासं करोमि प्रकटः स्वयम् ॥३७॥
प्रमोदमण्डलं दिव्यं तथा साकेतमण्डलम् ।
मण्डले मत्प्रियतमे मणिमद्धरणीतले ॥३८॥
नित्या वै परमा लीला मयैव[2] प्रकटीकृता ।
तथामुक्तमविश्रान्तं[3] भावयेन्मामनन्यधीः ॥३९॥
रात्रौ च गोपिकावृन्दरासकेलि[4]रसावृतम् ।
क्रीडमानं च नृत्यन्तं गायन्तं चैव मां स्मरेत् ॥४०॥
एवं प्रभजतो[5] नित्यं भावसंदोहभावितः ।
वृश्चाम्यहं विरहजां[6] परमार्त्तिमुदारधीः ॥४१॥
स्वस्वरूपस्य साक्षात्त्वमचिरेणैव दुर्लभम् ।
ददामि तस्मै भक्ताय नित्यलीलाप्रवेशिने ॥४२॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे रामगीतारहस्योपाख्याने सप्तचत्वारिंशोऽध्यायः ॥४७॥

●

१. तेष्वहं च—रीवाँ । २. °ऽत्रमया—मथु०, बड़ो० । ३. सुविश्रान्तं—रीवाँ । ४. °केली०—मथु०, बड़ो० । ५. प्रभावतो—रीवाँ । ६. वृश्च्याहं विरहं तासां—रीवाँ ।

अष्टचत्वारिंशोऽध्यायः

श्रीभगवानुवाच

कदाचिद् भूरिविश्लेषभावितात्मानमात्मना ।
ऐक्यं संचिन्तयन् स्वस्य रश्मिवृन्दे प्रवेशये ॥ १ ॥
मदङ्गरश्मिसंलीनाः परमानन्दनिर्वृताः ।
जरामृत्युभयं त्यक्त्वा विहरन्ति सुखेन ते ॥ २ ॥
वात्सल्येन भजन्ते ये तदा विरहकातराः ।
तानहं मुखचन्द्रांशुसंदोहेषु विलापये ॥ ३ ॥
तत्र ते भूरिमाङ्गल्याकौशल्याभावभाविताः ।
परमानन्दसंदोहमग्नास्तिष्ठन्ति सेवकाः ॥ ४ ॥
सख्येन ये भजन्ते मां वदन्तः स्नेहजां रुजम् ।
तानहं बाहुयुग्मांसकिरणेषु विलापये ॥ ५ ॥
दास्येन तु भजन्ते मां याता विरहजां रुजम् ।
विलापयामि तानङ्घ्रिकिरणेषु सुनिर्वृतान् ॥ ६ ॥
माधुर्येण भजन्ते ये गोपीभावेन भाविताः ।
वक्षःस्थलांशुसन्दोहे तानेवाहं विलापये ॥ ७ ॥
ये च शान्ताः सुनिर्विण्णाः परां शान्तिमुपागताः ।
विलापयामि तान् रक्तान् निजायतनरश्मिषु ॥ ८ ॥
वैदिकैस्तान्त्रिकैर्वापि विधिभिर्वीतकल्मषाः ।
भजन्ते ये जनास्ते तु लीयन्ते मद्विभूतिषु ॥ ९ ॥
कर्ममार्गेण ये भक्ता भजन्ते भूरिनिष्ठया ।
ते वैधसं लोकमेत्य मुच्यन्ते तद्विमोक्षणे ॥१०॥
ज्ञानमार्गेण ये चापि भजन्ते मां समाहिताः ।
तेऽक्षरं ब्रह्म संप्राप्य मामेव प्राप्नुवन्ति हि ॥११॥
तत्तद्देवोपासकानां वासनावासितात्मनाम् ।
तत्र देवेषु विलयो भवेदिति हि मे मतिः ॥१२॥

गोप्य ऊचुः

अयमंशुक्रमो राम देहेन सह किं भवेत् ।
किंवा देहं परित्यज्य लीयेतात्मैव केवलम् ॥१३॥

श्रीभगवानुवाच

द्विधेवांशुलयः सख्यो भावभेदेन भाव्यताम् ।
सदेहानां भवेदेकः परः केवलमात्मनाम् ॥१४॥
भावो द्विधा भवेदेको भृङ्गीकीटवदीरितः ।
मणिस्पर्शादयः स्वर्णवद्वा तादात्म्यभाविताः[1] ॥१५॥
चक्षुरादित्यवच्चापि भावोऽन्यः समुदाहृतः ।
आद्यः सुदुर्लभो लोके मत्कृपातिशयं विना ॥१६॥
परोऽपि दुर्लभः किन्तु ज्ञानिनामपि जायते ।
कीटो भृङ्गीभयात्तेन[2] वपुषा तन्मयो भवेत् ॥१७॥
अयस्तेनैव रूपेण स्वर्णतां प्रतिपद्यते ।
चक्षुस्तु[3] गोलकं त्यक्त्वा सूर्यतां प्रतिपद्यते ॥१८॥
एवं स्वेनैव वपुषा मद्भक्तोऽभून्मदात्मकः ।
ज्ञानी स्वं वपुरुत्सृज्य सर्वथा मन्मयो भवेत् ॥१९॥
एतद्वः कथितं सर्वं मामपृच्छन् यदङ्गनाः ।
भूयः शृणुत मत्प्राप्तेरुपायान्तरमुच्यते ॥२०॥
अष्टोत्तरशतं नाम्नां मत्प्रियायाः प्रकीर्तयेत् ।
संतुष्टा तेन सहजा मामेव भावयेत् प्रियाः ॥२१॥
सहजा जानकी सीता मोदिनी राधिका रमा ।
आनन्दिनी परालीला ललना लास्यकारिणी ॥२२॥
सीरध्वजसुता साध्वी गान्धर्वी पद्मगन्धिनी ।
गोपराजसुता गोपी गोपिता नन्दनात्मजा ॥२३॥
सुखितोत्साहिनी सौम्या रत्नाचलविलासिनी ।
प्रमोदवनमध्यस्था कुञ्जस्था कुञ्जगेहिनी ॥२४॥

---

१. °भावितः—रीवाँ । २. भयस्तेन – रीवाँ । ३. चक्षुःस्व°—मथु०, बड़ो० ।

राघवेन्द्रप्रिया रामा लोलुपा[1] जारसंगिनी[2] ।
रत्नाचलदरीस्थाना भाविनी भावभूषिता ॥२५॥
रामप्रिया रामरता रामकाम्या कृपावली ।
किशोरी कन्दुकक्रीडा चित्रकूटकृतालया[3] ॥२६॥
रासकेलीरतिः स्निग्धा मन्दारवनवासिनी ।
अशोकवनगावल्ली हृल्लासकविधायिनी ॥२७॥
गोपवंशध्वजपटी रघुवंशविलासिनी ।
विनोदिनी चिरवधूर्वावदूका वराङ्गना ॥२८॥
अक्षक्रीडाहृतजया[4] जयदा जयवर्धिनी ।
उच्चैःस्वररता वीणा दिव्यगानमनोहरा ॥२९॥
देवीजन[5]कृतस्तोत्रा स्तुता सामगसेविता ।
सावित्री शेवधिः सेव्या भक्तिः प्रेमस्वरूपिणी ॥३०॥
प्रेमदा प्रेमघूर्णाक्षी लावण्यवनवाटिका ।
साकेतपुरलक्ष्मीश्च महामण्डपमध्यगा ॥३१॥
खण्डिता विप्रलब्धा च स्वाधीनपतिका[6] प्रिया ।
कलहान्तरिता चैव तथा वासकसज्जिका[7] ॥३२॥
अभिसारी[8] प्रोषितोक्ता राघवी चाष्टनायका ।
सुदती सुमुखी सुभ्रूः सुनासा सुकपोलिनी ॥३३॥
दूती दूतीजनप्रीता रक्ताम्बरधरालिनी ।
लोलाक्षी लास्यललिता वने यौवनशालिनी ॥३४॥
सुधावर्षा सुधाधारा सुधाकरमुखी सुधा ।
गर्विणी दुर्जया दुर्गा सपत्नीगर्वहारिता ॥३५॥

---

१. लोलुपा = "चञ्चला" टि० मधु० । २. 'जारयति लिंगशरीरं ध्वंसयतीति जारो रामः, तत्संगिनी" टि०-मधु० । ३. °क्रयालया-अयो० । ४. °हृदयजा—रीवाँ । ५. "दिव्यस्त्रीजन०" टि०—मधु० । ६. "यस्या रतिगुणाकृष्टः पतिः पार्श्वं न मुंचति । विचित्रविभ्रमासक्ता स्वाधीनपतिका मता" टि०— मधु० । ७. "निश्चित्य वासरं भर्तुर्भूषणानि करोति या । भवेद्वासकसज्जासौ द्वारं पश्यति सादरा ।" टि०— मधु० । ८. "निर्भया सती प्रियं प्रति याति सा अभिसारिका" टि०—मधु० ।

कोमलालापिनी काम्या कुमारी रामवल्लभा ।
इत्येतत्कथितं सीता नाम्नामष्टोत्तरं शतम् ॥३६॥
सायं प्रातः कीर्तयेद्यो रामस्तस्मै प्रसीदति ।
स्वं लोकं दर्शयित्वा सा प्रदद्याद्रामसन्निधिम् ॥३७॥
यद्यत् कामयते चित्ते तत्तत् फलमवाप्नुयात् ।
भावयेत् सततं देवीं रत्नसिंहासनस्थिताम् ॥३८॥
रमणीरामणीभ्यां तु सखीभ्यां परिपार्श्वयोः ।
दिव्यचामरयुग्मेन वीज्यमानां मनस्विनीम् ॥३९॥
अशोकलतिकादिव्यमण्डपान्तरचारिणीम् ।
सुवर्णसंशोभिशीर्षं रक्ताम्बरवराकृताम् ॥४०॥
क्वचिन्निलीय कुञ्जान्तर्दृष्टं (ष्टां ?) सपुलकं[1] (कां ?) मया ।
ईषच्छैशवतारुण्यकेलीभिः परिशालिताम्[2] ॥४१॥
सहजां नन्दिनीं दिव्यां राघवेन्द्रप्रियां च ताम् ।
विविधैर्भावनिवहैर्भावितात्मातिभक्तिमान् ॥४२॥
सरय्वा अपरे पारे नन्दनो नाम धेनुपः ।
तत्प्रिया राजनीनाम तस्यां जाता नु जानकी ॥४३॥
सहजा नाम सा प्रोक्ता कुशलेन विवाहिता ।
गोपेन मम भक्तेन सा मह्यं विनिवेदिता ॥४४॥
प्रमोदवनवीथीषु मयैव रमिता मुहुः ।
दिव्यवेणुरवाहूता दिव्याशोकवनाश्रया ॥४५॥
तस्यां कुर्यात् सदा भक्तिं नित्यं मत्प्रेम चार्थयेत् ।
हे देवि सहजे नित्ये गोपिके नन्दनात्मजे ॥४६॥
रामे यथा तव प्रेम तथा मह्यं प्रदेहि भोः ।
यथा त्वयि रतः स्वामी तथा मय्यपि चास्तु सः ॥४७॥
इत्येवं प्रार्थिता देवी ददात्येव रतिं पराम् ।
यथा तुष्टो राघवोऽहं हृदि सद्यः प्रकाशये ॥४८॥

---

१. "कदाचिन्मयाऽस्याः सपुलकरोमवृन्दं दृष्टमतस्तन्नाम दृष्टसपुलका" टि०—मधु० । २, °शीलितां—रीवाँ ।

अयमेव महोपायो मद्वशीकरणे प्रियाः ।
नान्य ईदृग्विधः कश्चिदुपायोऽस्ति मदाप्तिकृत् ॥४९॥
तां सेवमानाय सदाहमेवं सद्यः प्रसीदामि सुरैरलभ्यः ।
स्वात्मानमप्यमुमेवार्पयित्वा स्वां नित्यलीलां प्रददामि नित्यम् ॥५०॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे रामगीता-
महोपाख्याने अष्टचत्वारिंशोऽध्यायः ॥४८॥

●

एकोनपञ्चाशत्तमोऽध्यायः

गोप्य ऊचुः

केषु केषु च भावेषु भाव्योऽसि त्वं रघूद्वह ।
केन केन स्वरूपेण स्थितोऽसि च[1] निजेच्छया ॥ १ ॥
त्वमेव साक्षात्पुरुषोत्तमोऽसि[2] विश्वं समुद्धर्तुमुरुप्रयत्नः ।
जातोऽसि सद्वृत्तककुत्स्थवंशे ज्ञातोऽधुनात्वत्कृतया दिव्यदृष्ट्या ॥ २ ॥
विभाव्यं यत्र यत्रास्ति त्वत्स्वरूपं सुखावहम् ।
तत्तन्न आचक्ष्व पते बोधनाय निजाकृतेः ॥ ३ ॥

श्रीराम उवाच

अन्तरङ्गं स्वरूपं मे बहिरङ्गं तथैव च ।
अप्राकृतं ह्यान्तरंगं प्राकृतं बहिरङ्गकम् ॥ ४ ॥
मद्वपुश्चैव मल्लोको[3] नित्यः परिकरो मम ।
मद्गुणा मम कार्याणि मद्रूपाश्चायुधादयः[4] ॥ ५ ॥
मद्गृहं मम पीठं च मच्छत्रं चामरं मम ।
चिदानन्दमयं सर्वं मदात्मकमिदं स्मरेत् ॥ ६ ॥
प्राकृतेष्वपि चार्थेषु यत् सद्रूपं ममैव तत् ।
भूतानां चैव सर्वेषामधिदेवोऽस्मि सर्वगः ॥ ७ ॥

---

१. स्थितश्चासि—अयो०, रीवाँ । २. ममेति—अयो०, रीवाँ । ३. मल्लोके—रीवाँ । ४. च युष्मादृशः—रीवाँ ।

सृष्टिस्थित्यन्तकृच्चास्मि जगतां पापदाहकः ।
कर्मणां फलरूपोऽस्मि लोके सदसदात्मनाम् ॥ ८ ॥
अव्याकृतगुणानामस्म्यहमव्याकृतः[1] स्वराट् ।
धर्मिणां त्रिषु लोकेषु स्वाभाविकगुणोऽस्म्यहम्[2] ॥ ९ ॥
कार्याणां सूत्ररूपोऽस्मि जीवोऽणूनां सनातनः ।
वेदानां ब्रह्मरूपो[3]ऽस्मि बीजानां त्रिवृदस्म्यहम् ॥१०॥
त्रिपदा छन्दसामस्मि सुराणां सुरराडहम् ।
वसूनामग्निनामास्मि विष्णुश्चापि विवस्वताम् ॥११॥
नीललोहितनामास्मि रुद्राणां पिङ्गलोचनः ।
ब्रह्मर्षीणां भृगुश्चास्मि राजर्षीणां मनुस्तथा ॥१२॥
देवर्षीणां नारदोऽस्मि कामधेनुश्च गोष्वहम् ।
प्रह्लादश्चास्मि दैत्यानां सोमश्चौषधिवीरुधाम् ॥१३॥
शेषो भुजङ्गराजानां पाथसां वरुणालयः ।
प्रतापिनां दिनकरो जनानां च जनाधिपः ॥१४॥
ज्ञानिनां वाक्पतिश्चास्मि समुद्रः सरितामहम् ।
केसरी[4] दंष्ट्रिणास्मि हयानां च वृहच्छ्रवा[5] ॥१५॥
वर्णानामस्मि विप्रोऽहं संन्यासश्चाश्रमस्थितौ ।
तीर्थानां कोटितीर्थोऽस्मि घर्घरसरयूसंगमः[6] ॥१६॥
वीराणामस्त्रविद्यास्मि शंभुश्चाप्यस्त्रिणामहम् ।
स्थानानां मेरुरूपोऽस्मि गिरीणां च हिमाचलः ॥१७॥
यज्ञानां ज्ञानयज्ञोऽस्मि ज्ञानिनां[7] ज्ञानमस्म्यहम् ।
ध्यानानां धारणा चास्मि सोमपीथश्च कर्मिणाम् ॥१८॥
अहिंसास्मि च धर्माणामश्वत्थश्चास्मि भूरुहाम् ।
अन्नानां पायसश्चास्मि पवित्राणामहं कुशः ॥१९॥

---

१. च व्याकृतः—अयो०, रीवाँ। "अविकृतस्वभावः" टि०—मधु०।
२. "लोकत्रये उत्तमगुणो धर्मः सो यस्यास्ति स धर्मी, तस्मिन् स्वाभाविको गुणः अहम्" टि०—मधु०। ३. ब्रह्मवेदो—अयो०, सामरूपो—रीवाँ। ४. केशरी—रीवाँ। ५. मघवद्धयः—मधु०, बड़ो०। ६. परसंगमः—बड़ो०। ७. ज्ञानानां—मधु०, बड़ो०।

योगानां भक्तियोगोऽस्मि शतरूपास्मि योषिताम् ।
भाषाणां शेमुषी चास्मि बुद्धीनां चाप्यभेददृक्[1] ॥२०॥
उपांशुश्चास्मि गुह्यानां युगानां कृतमस्म्यहम् ।
संवत्सरो प्रमादाना[2]मृतूनामस्म्यहं मधुः ॥२१॥
अभिजिच्चास्मि ताराणां मासानामाग्रहायणः ।
वेदव्याख्यानकर्तॄणां कृष्णद्वैपायनोऽस्म्यहम् ॥२२॥
विवेकिनामहं शुक्रो भार्गवाणां श्रीधरोऽ[3]स्म्यहम् ।
कृष्णश्चाप्यवताराणां वैष्णवेषु च नारदः ॥२३॥
पूर्णानां रामचन्द्रोऽस्मि वंशानां च रघोः कुलम् ।
राजीवश्चास्मि पुष्पाणां हविःष्वाज्यमहं पुनः ॥२४॥
द्रव्याणां संपदश्चास्मि मणीनामस्मि कौस्तुभः ।
इन्द्रनीलश्च रत्नानां वीराणां वज्रमस्म्यहम् ॥२५॥
द्यूतानां छलरूपोऽस्मि त्यागो वैराग्यशर्मणाम् ।
ऊर्जस्वलानामोजोऽस्मि लिङ्गं मूर्तिमतामहम् ॥२६॥
अम्बूनां रसरूपोऽस्मि शब्दानामस्म्यहं च गाः ।
धर्मिष्ठानां वलिरहं वीराणामस्मि कार्तिकः ॥२७॥
इन्द्रियाणां मनश्चास्मि प्राणिनामस्मि चेतना ।
भूतानां नभ एवास्मि कर्तॄणां प्रकृतिः परा ॥२८॥
योगिनां कपिलश्चास्मि[4] सांशिनां[5]जानकीपतिः ।
जम्बुद्वीपोऽस्मि द्वीपानां पुरीणां कोशला[6]स्म्यहम् ॥२९॥
नरो नारायणश्चास्मि पुण्यसेतुस्तपस्विनाम् ।
अयं मे बहिरङ्गात्मा विभूतीनां प्रविस्तरः ॥३०॥
आब्रह्मभुवनव्याप्तकार्यो वाङ्मनसाकृतिः ।
ज्ञानवैराग्यधर्मैश्च[7] तद्विरुद्धं च मद्वपुः ॥३१॥

---

१. "चिज्जड़शरीरी भगवानेक एवेति ज्ञानमभेदज्ञानन्" टि०—मधु० । २. "कालात्मकः कलयतां" टि० पाठः—मधु० । ३. "श्रीधरः परशुरामः" टि०—मधु० । ४. कपिलोस्म्यंशी—अयो०, बलोममांशः—मधु०, बड़ो० । ५. सोहं श्री०—मधु० बड़ो० । ६. "साकेतं कोशलायोध्या—इति कोशात्" टि०—मधु० । ७. धर्मैश्वर्य—अयो०, रीवाँ ।

न यत्र वाङ् नैव मनः प्रवृत्तिर्न यत्र साक्षी न च साक्षिभास्यहम् ।
नित्यश्चिदानन्दमयश्च लोकः[1] स मे सर्गः शाश्वतश्चान्तरङ्गः ॥३२॥

यत्रास्ति साकेतपुरी सुधन्या
पुण्या नदी सरयूरुत्तरङ्गा ।
श्रीरत्नाद्रिर्गोपराजस्य गोष्ठं
प्रमोदकान्तारभुवः सुपेशलाः ॥३३॥
यत्राप्यशोकलतिकावनकुञ्जवीथी
रम्या कुटी रमे यत्र रामः किशोरः ।
सोऽहं प्रिया दशरथस्य सुतः सुपूर्ण-
स्वानन्दसिन्धुरसकृद्भवतीश्च नन्दन् ॥३४॥
सोऽहं सर्वगतश्चास्मि पुरुषश्चाक्षरः परः ।
कदाचिन्नैव लीला मे प्राकृतत्वाय कल्पते ॥३५॥
न नाशाय न दृष्टयै च न विकृत्यै चिदाकृतीः ।
एष मे शाश्वतो धर्मो रमणं शक्तिभिः सह ॥३६॥
स्वानन्दरसरूपाभिः पूर्णाभिः पूर्णशक्तिभिः ।
एषा मे सहजा लक्ष्मीः सर्वलीलाधिदेवता ॥३७॥
मां भूषयति संगच्छत्युन्मार्जयति राति च ।
तथैव निर्मितो लोकः स्वशक्त्या मत्स्वरूपया ॥३८॥
तयाहं नित्यसंयुक्तो रमामि कुशलैर्गुणैः ।
तदंशाः सकला यूयं नित्यं सन्निहिता मयि ॥३९॥
न कदाचिद्वियोगार्हाः स्वरूपं पश्यत प्रियाः ।
यूयं चिदानन्दमयाः सनातनाः स शक्तिभिर्निर्जितभूर्भुवःस्वः ।
पश्यन्तु दिव्येन दृशोदयेन न लब्धध्वं क्लेशलेशं कदापि ॥४०॥
मां सेवयन् यो भवतीरुपासते मद्भक्तिरूपाः सहजाभावरूपाः ।
तेनापि विश्लेषमहं न कुर्वे कथं स तावद्भवतीनां करिष्ये ॥४१॥

दास्यामि वो दिव्यदृष्टिं प्रियाणां
यया युक्ता द्रक्षथ स्वं स्वरूपम् ।

---

१. "प्रमोदवनं" टि०—मधु० ।

सच्चिद्रूपं सच्चिदानन्दरूपे
मयि ब्रह्मण्यादिदेवे तु प्रतिष्ठम् ॥४२॥
इत्युक्त्वा श्रीपतिस्ताभ्यो दिव्यं चक्षुरदात् प्रभुः ।
ततस्ता ददृशुः कृत्स्नं रूपं स्वं विश्वतो हरिः ॥४३॥
यत्रास्ति धाम विपुलं मणिजुष्टहेम-
प्राकारगोपुरगृहापणसौधगन्धम् ।
आरामपुष्पितलतातरुसौरभाढ्यं
गुञ्जद्द्विरेफमदराव[1]पिकीसमूहम् ॥४४॥
यत्रावसन्ति पुरुषाः शतपत्रनेत्राः
श्यामावदातवपुषः सुपिशङ्गवस्त्राः ।
सर्वे चतुर्भुजविराजितशङ्खचक्र-
कौमोदकीकमलशार्ङ्गधराः सवेषाः ॥४५॥
माया न यत्र गुणकर्मकलाविलासा
यद्वासिनो हरितनोर्नितरामभिन्नाः ।
श्रीमद्रमारमणजुष्टतुलस्यमोघ-
सौरभ्यसंग्रहसमुद्भवभूरिमत्ताः ॥४६॥
यत्राङ्गणं विविधरत्नविनिर्मितं यन्-
मन्दारमूलमणिभृत् क्रमिकालवालम्[2] ।
दिव्याङ्गनागतिविमोहितराजहंस-
पेपीयमानपरिपूर्णसुधावसेकम् ॥४७॥
चाम्पेयकुन्दवकुलोत्पलनागताल-
हिन्तालकेसरकदम्बतमालजुष्टैः ।
यत्राद्भुतैरुपवनैः कमलेक्षणानां
चेतो न याति विकृतिं भगवत्पराणाम् ॥४८॥
यस्मिन् रमारमणसौधमहार्हतुङ्ग-
द्वारोभयस्थलनिषण्णसुवेत्रहस्तौ ।

---

१. °दर्पि°—रीवाँ । २. मणिभूतकनिकाल०—मधु०, बड़ो० ।

दिव्यौ जयश्च विजयश्च सुरेश्वरादीन्
काले प्रवेशयति (तः ?) दूरनमत्किरीटान् ॥४९॥
यस्मिन् विभाति विपुलाश्च विमानकोट्यो
वैदूर्यरत्नकनकोत्तमनिर्मिताङ्गाः ।
तत्र स्थिता हरिमयाः पुरुषाः स्फुरन्ति
रामैकलीनमनसोऽद्भुतकेलिमन्त्राः ॥५०॥
यत्र प्रयान्ति विधिभिर्विपुलैर्यजन्तो
ये वा बिचित्रविषयोद्भवसौख्यमत्ताः ।
यत्कोटिशास्त्रवचनैर्विनिरूपितं किं
त्वद्यापि वाङ्मनसगोचरतां न यातम् ॥५१॥
तत्रास्थिताः[1] स्वरूपं मे प्रत्येकं ददृशुः स्वयम् ।
श्रीराम[रमा?]रमणस्यान्तं[2] नारायणवराङ्गकम् ॥५२॥
नारायणः सत्त्वनिधिः सतांपतिः सहस्रनामा श्रुतिवागगोचरः ।
त्रयीमयः शेषमये शयानो भुजङ्गतल्पे चिद्धनो ब्रह्मपूर्णः ॥५३॥
तस्याङ्कसंस्थं ददृशुः स्वरूपं स चापि रामः सहजास्ताः स्वयं च ।
निःशोकनिर्व्याकुलपूर्णरूपः सच्चित्सुखाम्भोनिधिसद्मगग्नाः[3] ॥५४॥
एवं ताश्चिन्मये लोके रामेण श्रीचिदात्मना ।
साकं भोगांश्च भुञ्जानाः सहजारूपमभ्ययुः ॥५५॥
स्वप्नवत्तदवस्थातः समुत्थाय विचित्रिताः ।
ददृशुः स्वपुरे रामं स्वात्मानं तत्पुरोगतम् ॥५६॥
तामवस्थां संस्मरन्त्यः श्रीराममहिषीपदम् ।
सद्यश्च मिलिताः सर्वा इदमूचुः सुविस्मिताः ॥५७॥
अहो अयं कान्त किमेतदन्तराचक्ष्महि[4] ब्रह्म सुखातिगं यत् ।
सुखं परं वीतविश्वप्रवाहं रजस्तमःसत्त्वगुणातिगं च ॥५८॥
अहो लोकस्य माधुर्यं अहो विपुलतापि च ।
अहो प्रासादसौधादिरचनाश्रयभूः परा ॥५९॥

---

१. यत्रा°—रीवाँ । २. रमणास्थानं—रीवाँ । ३. °सेव्यमानाः—अयो०, रीवाँ ।
४. °दन्तरं विचक्ष्महि—अयो०, रीवाँ ।

अहो ईश तवामुष्य प्रभावः श्यामसुन्दर ।
अहो वयं धन्यतमा महिष्यस्त्वन्महाङ्गगाः ॥६०॥
सर्वाश्च सहजारूपाः सच्चिदानन्दविग्रहाः ।
न कुतश्चित् क्वापि चोनाः साम्राज्यपदवीजुषः[1] ॥६१॥
तदेव दर्शयास्माकं स्वं धाम प्रकृतेः परम् ।
न यत्र तव विश्लेषो क्षणमप्यस्ति राघव ॥६२॥

श्रीराम उवाच

स एवैष महालोकश्चिल्लोकोऽयं[2] प्रपश्यथ ।
यत्र प्रमोदवनभूश्चेतो मोदयते भृशम् ॥६३॥
ततोऽस्य नैव भेदोऽस्ति गोपवध्वो मनागपि ।
पुनः पश्यत सद्दृष्ट्या[3] लोकदृष्टिं व्यपोह्य च ॥६४॥
मत्स्वरूपमिदं सर्वं कोटिब्रह्माण्डमूर्धगम् ।
ममांशैश्च कलाभिश्च बहुरूपेण संततम् ॥६५॥
तत्र तत्र भवत्योऽपि महिषीपदमागताः ।
यत्र यत्रास्मि श्रीरामो मम धाम चिदात्मकम् ॥६६॥
सर्वाः संमिलिता यूयं प्रमोदविपिने मया ।
सर्वेऽप्यंशा मम पुनरिहैव मयि संगताः ॥६७॥
इत्येवं भावयित्वा स्वं रूपं सदसतः परम् ।
मया नित्यं सुसंबद्धं नैव शोचितुमर्हथ ॥६८॥
वैकुण्ठे चिन्मये लोके श्वेतद्वीपे मनोहरे ।
सूर्यमण्डलमध्ये च भ्रुवोरन्तश्च योगिनाम् ॥६९॥
व्यापिवैकुण्ठमध्ये च यूयं सर्वत्र संगताः ।
भवतीभिर्विना क्वापि नाहं तिष्ठामि निर्वृताः ॥७०॥
अंशरूपा कलारूपा युष्माकं सकलाः श्रियः ।
सर्वासामंशिनी श्रीणां सहजा सहजाकृतिः ॥७१॥

---

१. कुतश्चित्क्वापि च नः साम्राज्यपदवीजयः—अयो०, रीवाँ । २. "साकेतः" टि०—मथु० । ३. तद्दृ°—रीवाँ ।

एवं विज्ञाय चात्मानं स्वरूपं च व्रजाङ्गनाः ।
रमध्वं मयका साकं परमानन्दनिर्वृताः ॥७२॥
अवतारार्थमेतं नु करिष्यामि धृतव्रताः ।
न तत्र शोचितुं योग्या भवत्यः प्रकृतेः परः ॥७३॥
एतद्वो दर्शितं रूपं मोहव्यपगमाय च ।
विश्लेषार्त्तिभवायासव्यवच्छेदाय च प्रियाः ॥७४॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे रामयात्रायां रामगीता-
महोपाख्याने एकोनपञ्चाशत्तमोऽध्यायः ॥४९॥

❀

पञ्चाशत्तमोऽध्यायः

श्रीभगवानुवाच

पुनश्च वो दिव्यदृशं ददामि व्रजयोषितः ।
तेन द्रक्ष्यथ मद्रूपमिहैव प्रकृतेः परम् ॥ १ ॥
इत्युक्त्वा दर्शयामास स्वं रूपं रामचन्द्रमाः ।
कोटिब्रह्माण्डसंस्थानामाश्रमं दिव्यविग्रहम् ॥ २ ॥
सहस्रमूर्द्धाननकर्णचक्षुर्नासौष्ठगण्डादिकपाणिपादम् ।
सहस्ररोचिःप्रकरप्रकाशप्रत्यस्तदिग्भूमिनभस्तमिश्रम् ॥ ३ ॥
सहस्रदिव्याभरणप्रकाशं सहस्रदिव्यायुधतेजसां निधिम् ।
सहस्रबाहूदरनाभिवक्षः सहस्रदिव्यं मणिकुण्डलश्रियम् ॥ ४ ॥
यत्राश्विनौ वसवश्चैव साध्या विश्वेदेवाः सूर्यगणाश्चैव रुद्राः ।
एकोनपञ्चाशदपि प्रभञ्जनाश्चतुर्दशेन्द्रा लोकपालाश्च सर्वे ॥ ५ ॥
गन्धर्वविद्याधरसिद्धकिन्नरा नागा नगाश्चैव नदाश्च नद्यः ।
समुद्र आपः प्रदिशो दिशो भूर्द्वीपाः पुरग्रामवनाद्रिसंघाः ॥ ६ ॥
एकैकस्मिन् रोम्णि रामस्य[1] कोटिब्रह्माण्डसंस्थां ददृशुर्गोपवध्वः ।

---

१. °कस्मिन् श्रीरामस्य—मथु०, बड़ो० ।

जम्बूद्वीपं तत्र साकेतसंस्थां[1] प्रमोदकान्तारमथात्र रामम् ॥ ७ ॥
तत्सन्निधौ स्वस्वरूपं च गोप्यो नित्योल्लसद्रामविलासपुष्टम् ।
दृष्ट्वा विचित्राश्च विचेतसस्ताः संतुष्टुवुः प्राञ्जलयो गृणन्त्यः ॥ ८ ॥

गोप्य ऊचुः

सत्यं त्वमूचेऽहमनादिरव्ययः प्रकाशमानः पुरुषः पुराणः ।
त्वद्दर्शनात् साधु सम्यक् प्रतीतं परावराणां परमस्त्वं महेशः ॥ ९ ॥
त्वामेव गायन्ति समस्त वेदास्त्वामेव पश्यन्ति सुयोगदृष्ट्या ।
त्वामेव भावन्त इमे प्रपन्नाः कालत्रासात् पाहि पाहीति राम ॥१०॥
त्वमादिसृष्टौ भगवान् विरञ्चिर्भूत्वा त्रयीमध्यगीष्टाः[2] स्वभासा ।
त्वमेव विश्वस्य निधानमुत्तमं त्वमेव बीजं स्थिरजङ्गमानाम् ॥११॥
अमी लोका लोकपालाश्च सर्वे त्वय्येव सूत्रे मणिवत्संप्रयुक्ता ।
त्वं कालशक्त्या निजया विश्वमेतत् सृजस्यवस्यत्सि च भूरिवीर्य ॥१२॥
न च त्वदीयं महिमानमेते जानन्ति लोकास्त्वयि नित्यप्रतिष्ठाः ।
अहो अनन्तस्य तवेदृशं परं मरुत्त्वमुज्जासितवाङ्मनः पदम् ॥१३॥
न ते वीर्यं वेत्तुममी समर्थाः सब्रह्मलोकाश्च सलोकपाला ।
स्वानुग्रहेणैव वेद्योऽसि किंचिन्नमोस्तु ते ब्रह्मणेऽस्मै परस्मै ॥१४॥
दृष्ट्वा तवेदं वपुरुग्रवीर्यं स्वलङ्कृतं भूरि विष्वक्प्रकाशम् ।
कोटीन्दुसूर्यानलबिम्बनेत्रं वित्रस्तचित्ताः स्म वयं स्त्रियः प्रभो ॥१५॥
ग्राम्यस्वभावाः क्व वयं व्रजस्था क्व ते रूपं दुर्वितर्क्यं सुराणाम् ।
ज्वालासहस्रप्रकरैर्दुर्निरीक्ष्यं तदेवास्मान् दर्शय स्वरूपम् ॥१६॥
अस्मिन् स्वरूपे तव रामचन्द्र स्वात्मानमप्येवमुदीक्षयामः ।
त्वां चैव साकेतपुरीसमीपप्रमोदकान्तारनिकुञ्जसंस्थम् ॥१७॥
तथापि नो हृदयं वेपतेऽद्य दृष्ट्वेदमुग्रं तव नामरूपम् ।
कालोऽसि वा कालकालोऽसि वा त्वं रुद्रोऽसि वा कोऽपि कालाग्निरुद्रः॥१८॥
इदं रूपं द्रष्टुमर्हा वयं नः स्वतेजसा व्याप्तदिगम्बरावनि ।
तदेव नो दर्शय रूपमाधिहन् कन्दर्पकोटिद्युतिहारि हृद्यम् ॥१९॥

---

१. °संस्थं—अयो० । २. °गोप्यः—रा.वाँ ।

नमोस्तु तुभ्यं पुरुषाय शाश्वते पूर्णात्मने कारुणिकाय वेधसे ।
स्वरूपशक्त्या सकलं च बिभ्रते परावराणां परमाय राघव ॥२०॥

प्रमोदवनमध्यस्थकुञ्जान्तरविलासिने ।
नित्यलीलाभ्युपेताय रामचन्द्राय ते नमः ॥२१॥
साकेतनगरोपान्ते अशोकवनवासिने ।
सहजाशक्तियुक्ताय रघुवर्याय ते नमः ॥२२॥
नमो मुक्ताविभूषाय नमोरत्नावतंसिने ।
नटाय[1] दिव्यवेशाय राघवाय च ते नमः ॥२३॥
कञ्जकिञ्जल्कवस्त्राय नीलसुन्दरकान्तये ।
अरविन्दनिभेक्षाय नमो नृपतिसूनवे ॥२४॥

यद्दृष्टमेतद्भुवतः स्वरूपं सहस्रमार्तण्डकरालरोचिः ।
आद्यस्तदेवाद्य वरेण्य नाथ स्वविग्रहं दर्शय दोर्द्वयेन ॥२५॥

नारायणस्तवैवांशः सहजांशस्तथा रमा ।
स त्वं राम वरः[2] साक्षाद्वयं चापि रमात्मिकाः ॥२६॥

तथाप्यनेनैव सुखग्रहेण सदात्वमस्मान् रमयाधिहन्तः ।
किं वा वियोगानलबिभ्यतीर्नः[3] प्रवेशय स्वांशसमूह एव ॥२७॥

यत्र प्रमोदवनमञ्जलमाधुरीयं
यत्रोत्तरङ्गसरयूपुलिनद्वयश्रीः ।
यत्राप्यशोकवनमद्भुतवल्लिजुष्टं[4]
देशः स[5] एव हृदि नः सततं चकास्तु ॥२८॥

श्रीरामचन्द्र वरदेश्वर नित्यलील
श्रीमन् प्रभो कलय नः करुणार्द्रदृष्ट्या ।
येन त्वदङ्घ्रिसरसीरुहसौरभान्त-
र्भृङ्गीवदुन्मदहृदः सततं वसामः ॥२९॥

इत्याभाष्याखिला गोप्यः प्रेमविह्वलिताशयाः ।
निपेतुश्चरणाम्भोजे स्वात्मार्पणधिया प्रभोः ॥३०॥

---

१. नराय—बड़ो० । २. रामावदः—अयो०, रीवाँ । रामवदः—मथु०, बड़ो० ।
३. विभ्रतीर्—बड़ो । ४. °पुष्टं—रीवाँ । ५. "स कोशलः" टि०—रीवाँ, मथु० ।

श्रीराम उवाच

अहो धन्यतमा यूयमहं याभिर्वशीकृतः ।
मल्लीलामाधुरीं नित्यं पश्यन्त्यः सुखमासताम् ॥३१॥
युष्माकं मोहनाशाय स्वरूपं दर्शितं मया ।
माभूद्वःक्लेशनाशोऽपि संगतानां मयि प्रियाः ॥३२॥
मदीया कालशक्तिश्च नैव[1] स्पृक्ष्यति वः प्रियाः ।
कालमायातिगे लोके[2] सुखमेधध्वमङ्गनाः ॥३३॥

नित्यः संगो भवतीभिर्ममायं
चन्द्रस्येवाहर्निशं चन्द्रिकाभिः ।
इत्थं ज्ञात्वा नानुतप्यध्वमन्त-
र्दृष्ट्वाप्यन्यं मेऽवतारस्य कार्यम् ॥३४॥

अत्र नित्यस्थितश्चाहं स्वांशेन नृपतेर्गृहे ।
अवतीर्य करिष्यामि धर्मरक्षां सनातनीम् ॥३५॥
दैत्यांश्चैव हनिष्यामि रावणादीन् सुरद्रुहः ।
जानकीमुद्वहिष्यामि सहजांशत्वधारिणीम् ॥३६॥
भक्तान् समुद्धरिष्यामि पशुपक्ष्यन्त्य[3]जानपि ।
धर्मं संस्थापयिष्यामि तोषयिष्यामि निर्जरान् ॥३७॥
रघुवंशं करिष्यामि यशोभिः सुरभिर्मुहुः ।
साधूंश्च मानयिष्यामि मान्यान् देवद्विजादिकान् ॥३८॥
करिष्यामि महायज्ञानश्वमेधादिकानहम् ।
लीलाः संतानयिष्यामि क्रियाशक्त्या स्वकीयया ॥३९॥
कृत्वावतारकार्याणि बहूनि विपुलानि च ।
प्रमोदवनमेष्यामि भवतीसौख्यहेतवे ॥४०॥
तावद्यूयं मया साकं प्रमोदवनवीथिषु ।
अंशुरूपं समासाद्य मदभेदेन रंस्यथ ॥४१॥

---

१. न च—अयो०, न—मथु०, बड़ो० । २. "प्रमोदवने" टि०—मथु० ।
३. °प्रक्ष्यंतिजानपि—मथु०, बड़ो० ।

अत्रस्तोऽप्यहमीशानशापपालनकाम्यया ।
अन्तर्हितो भविष्यामि मदंशून् यूयमेष्यथ[1] ॥४२॥
यदा सुमहती पीडा देहे वाधिष्यते च वः ।
तदा यूयं वियोगेन मत्तादात्म्यमवाप्स्यथ ॥४३॥
इत्येतत् कथितं गोप्यो रहस्यं मम यत् स्थितम् ।
भूयःकिमिच्छथ श्रोतुं तद्वो गोप्यतमं ब्रुवे ॥४४॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे रामयात्रायां रामगीतामहोपाख्यानं नाम पञ्चाशत्तमोऽध्यायः ॥५०॥

❁

एकपञ्चाशत्तमोऽध्यायः

गोप्य ऊचुः[2]

कति रूपाणि भवतो ध्येयानि शुभमिच्छुभिः ।
शृङ्गारवीररौद्रादिभेदात्तन्नो वद प्रभो ॥ १ ॥
यस्य रूपस्य ध्यानेन यत्फलं समवाप्यते ।
तन्नः कथय श्रीराम साधकाभीष्टहेतवे ॥ २ ॥

श्रीराम उवाच

निर्गुणोऽप्यहमाश्चर्यैरप्राकृततमैर्गुणैः ।
नृणां पृथगिवाभातुं योग्योऽस्मि मदुपासिनाम् ॥ ३ ॥
शुद्धमप्राकृतं सत्त्वं रजश्चैव तमस्तथा ।
मत्संस्थं तद्विजानीत कल्याणगुणमन्दिरम् ॥ ४ ॥
तैस्तैर्गुणैः पृथग्भावमाश्रित्य[3] शुभहेतवे ।
भक्तानां दर्शयाम्यद्धा स्वरूपं सुमनोहरम् ॥ ५ ॥
रत्नपीठसमासीनमास्थितं योगमुद्रया ।
अङ्कन्यस्तसमुत्तानकरपङ्कजभूषितम् ॥ ६ ॥

---

१. अयं श्लोको नास्ति—अयो० । २. नास्ति—अयो०, रीवाँ । ३. °श्रितैः—रीवाँ ।

नासाग्रन्यस्तनयनं मुद्रितास्यं च सुस्थिरम् ।
विष्टब्धवक्षसं दिव्ययोगध्यानपरायणम् ॥ ७ ॥
याज्ञवल्क्यादियोगीन्द्रैरुपासितसुविग्रहम् ।
सरयूपुलिनाश्वत्थमूलमास्थाय संस्थितम् ॥ ८ ॥
सततं[1] मां स्मरेदेतत् सात्त्विकं ध्यानमीरितम् ।
वामोरुन्यस्तचरणं रत्नसिंहासनस्थितम् ॥ ९ ॥
वामे करे तत्त्वमुद्रां दक्षे व्याख्यां च निर्वृताम् ।
योगीन्द्रेष्वात्मतत्त्वार्थं व्याचक्षाणं स्मिताननम् ॥१०॥
वेदवादसमुन्नादमुखरीकृतदिक्तटम् ।
सिद्धान्तज्ञापनानन्दनमन्मुनि[2]गणार्चितम् ॥११॥
ध्यायेन्मां सततं ध्यानमेतत्सात्विकराजसम् ।
वीरासनसमासीनं स्वपक्षस्थापनोद्धुरम् ॥१२॥
परपक्षं निरस्यन्तं क्रुध्यन्तं वा सुरेष्वपि ।
ध्यायेद्रघुवरं ध्यानमेतत्सात्विकतामसम् ॥१३॥
प्रपन्नभक्तसंदोहकरुणाकुललोचनम् ।
उद्भूताश्रुकलाकीर्णं मोचयन्तं भवार्तितः ॥१४॥
ध्यायेन्मां सुमुखं[3] ध्यानमेतत्सात्विकतामसम् ।
हैमसिंहासनासीनं कौस्तुभेन विभूषितम् ॥१५॥
दक्षे लक्ष्मणसंयुक्तं वामे जनकजायुतम् ।
अग्रे हनुमता भक्तिनिबद्धाञ्जलिना युतम् ॥१६॥
सौमित्रिभरताभ्यां च दिव्यचामरवीजितम् ।
मात्रा कौशल्यया स्नेहान्नीराजितशिखानखम् ॥१७॥
स्तवनोद्घोषिताष्टांशैः स्तूयमानं सुर्षिभिः ।
इन्द्रादिदिविषद्वृन्दमुक्तकल्पलतासुमम् ॥१८॥
भेरीपटहनिःस्वानमृदङ्गस्वर[4]नादितम् ।
दिव्यप्रासादभवने शोभमानं मुदान्वितम् ॥१९॥

---

१. सततो—अयो० । २. °श्रीमन्मुनि०—अयो० । ३. स्वमुखं—रीवाँ । ४. °रव°—मधु०, बड़ो० ।

समस्तराजराजेन्द्रं दिव्यायुधविराजितम् ।
धनुर्बाणधरं ध्यायेद् ध्यानमेतत्तु राजसम् ॥२०॥
शाम्भवं धनुरादाय त्रोटयन्तं तृणादिवत् ।
ईषत्संरंभसाटोपं ध्यायेद्राजसतामसम् ॥२१॥
क्रुध्यन्तं राक्षसानीकमथनोन्मुखसायकम् ।
कबन्धीकृतवीरौघसंकुले रणमण्डले[1] ॥२२॥
मृगेन्द्रमिव खेलन्तं दुराधर्षं निजौजसा ।
ताम्रारुणेक्षणं वीरं दोर्दण्डद्वयविक्रमैः ॥२३॥
कुण्डलीकृतकोदण्डं प्रचण्डं मां हृदि[2] स्मरेत् ।
तामसं ध्यानमुद्दिष्टं शुभदं राघवस्य मे ॥२४॥
सिन्धुतीरप्रतिष्टब्धवानरानीकसंकुलम् ।
क्रियाविघातसंभूतरोषसंहितसायकम् ॥२५॥
तज्जाग्निदह्यमानाब्धिव्याकुलाशेषयादसम् ।
कोपान्नियमिताम्भोधिकृतपादाभिवन्दनम् ॥२६॥
संरंभेण ब्रुवाणं च मार्गं देहीति सिन्धवे ।
ईषद्भ्रूभङ्गसंभिन्नललाटविकटाकृतिम् ॥२७॥
सीताविरहनिर्जूटजटामुकुटमण्डितम् ।
ईदृशं भावयेन्मां तद्ध्यानं राजसतामसम् ॥२८॥
अथ वक्ष्ये गुणातीतं मदीयं ध्यानमुत्तमम् ।
प्रमोदवनकुञ्जान्तर्दिव्यकल्पलतागृहे ॥२९॥
सहजानन्दया शक्त्या युक्तं वामाङ्कसंस्थया ।
दिव्यशृङ्गारवेशाढ्यं मुक्ताहारविभूषितम् ॥३०॥
हरिचन्दनलिप्ताङ्गं मणिवर्यावतंसकम् ।
किशोरं कञ्जपत्राक्षं रासरूप[3]मनोहरम् ॥३१॥
गोपालतरुणीतीक्ष्णकटाक्षतरलीकृतम् ।
फुल्लारविन्दसंयुक्तं नालभ्रमरकारिणम् ॥३२॥

---

१. मण्डले स्थिरं—रीवाँ । २. हृदा—मथु०, बड़ो० । ३. राजरूप०—बड़ो० ।

मकराकृतिमाणिक्यकुण्डलश्रवणद्वयम् ।
नवमौक्तिकसंशोभिनासाग्रमधुराकृतिम् ॥३३॥
उन्नद्धचारुचिबुकं पक्वबिम्बारुणाधरम् ।
दशनज्योतिरालोकप्रकाशितदिगन्तरम्[1] ॥३४॥
नीलालकालिलावण्यललिताननपङ्कजम् ।
श्रीमच्चूडामणि[2]द्योतिमूर्धानं वेणिकान्वितम् ॥३५॥
मुरलीमञ्जु[3]माधुर्यसंमुग्धमधुराधरम् ।
रत्नाङ्गुलीयकद्योतविचित्रमुरलीकरम् ॥३६॥
रत्नकेयूरसंभ्रान्तद्दोर्दण्डद्वयमण्डितम् ।
रक्ताम्भोजदलाकारचारुपाणितलद्वयम् ॥३७॥
रत्नपूर्णकटीबन्धरणत्क्वणित[4]विग्रहम् ।
पीताम्बरपरीधानं निम्ननाभिवलित्रयम् ॥३८॥
वामाङ्घ्रिकृतदक्षाङ्घ्रिसर्वाङ्गललिताकृतिम् ।
मन्दहाससुधासिक्ताभीरोर्हृदयभूरुहम् ॥३९॥
परार्द्धकामसौन्दर्यगर्वहारिदृगञ्चलम् ।
कटाक्षक्षोभिताशेषगोपस्त्रीचित्तलोचनम् ॥४०॥
नवीननीलपाथोजपटलीमसृणाशिखम् ।
इन्द्रनीलमणिप्रख्यमतसीकान्तितस्करम् ॥४१॥
कण्ठादुभयपार्श्वस्थलोलत्[5]पीतपटच्छविम् ।
माणिक्यमुकुटभ्राजिमुक्ताहारविभूषणम् ॥४२॥
पञ्चवर्णप्रसूनाढ्यं वनमालाविभूषितम् ।
मञ्जीरमञ्जुलाकारं चरणाम्भोजपल्लवम् ॥
राजराजसुतं रामं रमणं मां विभावयेत् ॥४३॥
एतद्ध्यानमनुत्तमं खलु गुणातीतं मुहुर्भावितम्
श्रीमन्नन्दननन्दिनीनयनयोरानन्दरत्नाकरम् ।
कृत्वा यः कुरुते जपार्चनविधिं न्यासादिरूपाः क्रिया-
स्तस्मै श्रीसहजापतिः प्रणतये सद्यः प्रसीदत्यहो ॥४४॥

---

१. °दिगम्बरम्—रीवाँ, मथु०, बड़ो० । २. रामचूडामणि°—रीवाँ । ३. °मन्द°—अयो० । ४. °पूर्णित°—रीवाँ । ५. लोल°—रीवाँ, मथु०, बड़ो० ।

अन्यान्यपि तु रामस्य ध्यानानि मम सन्ति वै ।
व्रजे विहरतः श्रीमद्गवेन्द्रसुखितालये ॥४५॥
अवाङ्मनसरूपाणि निगुर्णान्येव तान्यपि ।
क्वचिद् द्विहायनं बालं[1] खेलन्तं शिशुभिः सह ॥४६॥
नवनीतकराम्भोजं रिङ्गन्तं गोपिकाङ्गणे ।
झणाझणत्कटितटीकिङ्किणीनूपुरद्वयम् ॥४७॥
कोटिचन्द्रमुखं श्रीमत्पङ्कजायतलोचनम् ।
जडितद्वीपिनखरस्वर्णखण्डविभूषितम् ॥४८॥
अव्यक्तमधुरालापं मातृणां सुखदायकम् ।
भजेन्मां सर्वमाङ्गल्यहेतवे भक्तिमान्नरः ॥४९॥
बहूनि बाललीलायां यौवनेऽपि बहून्यपि ।
रूपाणि मम भाव्यानि भक्त्या भक्तिधनैर्जनैः ॥५०॥
तेषां सुखं श्रियं पुष्टिं तुष्टिं नैःश्रेयसीं मुदम् ।
ददामि सर्वमाङ्गल्यमैहिकं पारलौकिकम् ॥५१॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे रामयात्रायां श्रीरामगीतामहोपाख्यानं नामैकपञ्चाशत्तमोऽध्यायः ॥५१॥

द्विपञ्चाशत्तमोऽध्यायः

श्रीराम उवाच

शक्तिहस्तं स्मरेन्नित्यं रणे जयमवाप्नुयात् ।
धनुर्बाणधरं स्मृत्वा रणे जयमवाप्नुयात् ॥ १ ॥
खड्गचर्मधरं यो मां स्मरेन्नित्यमखण्डितः ।
तस्याहं संकटे बाधां सर्वां हन्तुं दृढव्रतः ॥ २ ॥
गदाहस्तं स्मरेन्नित्यं द्यूते जयमवाप्नुयात् ।
नौकारूढं स्मरेद्यो मां जलभीतिं तरत्यसौ ॥ ३ ॥

---

१. वत्सं—रीवाँ ।

भिल्लवेशधरं क्रूरं गुञ्जाकल्पितभूषणम् ।
स्मरन्नुच्चाटयेच्छत्रून् संग्रामे संकटेऽपि वा ॥ ४ ॥
दिव्यकुञ्जधरं स्मृत्वा मोहयेज्जगतीतलम् ।
मुक्ताहारधरं दिव्यमुक्ताफलविभूषितम् ॥ ५ ॥
रक्तपुष्पस्रजं स्मृत्वा तत्क्षणान्मारयेद्रिपून् ।
शुक्लाकल्पं शुक्लवस्त्रं शुक्लमाल्यानुलेपनम् ॥ ६ ॥
शुक्लवर्णं राघवं मां शान्तिके कर्मणि स्मरेत् ।
पीतं पीताम्बराकल्पं स्मरेन्मां वशयेज्जगत्[1] ॥ ७ ॥
गजारूढं स्मरेन्नित्यं हेमच्छत्रविभूषितम् ।
परितो रोचिषा भान्तं विभूतिं प्राप्नुयान्नरः ॥ ८ ॥
लसत्तुलसिकादामराजमानसुवक्षसम् ।
स्मरेन्मां तत्क्षणादेव दृढवैराग्यमाप्नुयात् ॥ ९ ॥
चिन्मुद्रया दक्षकरे वामे पुस्तकभूषितम् ।
मां सदा स्मरतः पुंसः सद्यो ज्ञानोदयो भवेत् ॥१०॥
ताम्बूलरागदिग्धौष्ठं स्मयमानमुखाम्बुजम् ।
स्मरन्मां मुच्यते जन्तुर्दारिद्र्यभवशोकतः ॥११॥
रत्नाकल्पं रत्नहारभूषितं रत्नकङ्कणम् ।
स्मरन्मां जानकीजानिं त्रैलोक्ये विजयी भवेत् ॥१२॥
रथारूढं स्मरेन्नित्यं त्रैलोक्यं भ्रामयेज्जनः ।
प्रासादशिखरासीनं स्मरन्नुत्कर्षमाप्नुयात् ॥१३॥
व्रजस्त्रीगणमध्यस्थं हसन्तं नर्मकेलिभिः ।
कुञ्जहारहरं स्मृत्वा त्रैलोक्यसुभगो भवेत् ॥१४॥
विपञ्चीं वादयन्तं च मूर्छनास्वरभक्तिभिः ।
स्मरेन्मां सततं मर्त्यः सर्ववागीश्वरो भवेत् ॥१५॥
मञ्जुलालापसुभगं प्रियया सीतया सह ।
स्मरेद्रघुवरं यो मां सत्कविर्जायते नरः ॥१६॥

---

१. अतः परं "गजारूढं स्मरेन्मां यः सर्वं स वशयेज्जगत्" इत्यधिकः पाठः—अयो०, रीवाँ ।

छत्रायितेन्दुसंदोहस्रवत्पीयूषनिर्झरैः ।
सिच्यमानं स्मरन् रामं मामारोग्यमवाप्नुयात् ॥१७॥
दक्षे दरवरं बिभ्रद्वामे मुष्टिं दृढां दधत् ।
स्मर्यमाणो रामवीरं सद्यः स्तम्भयते द्विषः ॥१८॥
चक्रपाणिः स्वयं रामः सद्यो नाशयते परान् ।
गदापाणिः स्वयं रामः सद्यो नाशयते गदान् ॥१९॥
कुण्डलीकृतकोदण्डमुक्तैः शिततमैः शरैः ।
ताडकां मारयन् रामः परकृत्यानिवारकः ॥२०॥
शितिभल्लनिकृत्तविग्रहां रुदतीं शूर्पणखां सुविस्मयन् ।
स्मरणीयतमोऽस्मि डाकिनीभयशान्त्यै व्रजवामलोचनाः ॥२१॥
अश्वारूढं स्मरेद्रामं संप्राप्ते धर्मसंकटे ।
दक्षे प्रसूनकलिका वामे जनकजाकरम् ॥२२॥
बिभ्रत्सर्वार्थसंसिध्यै ध्येयोऽस्मि रघुनन्दनः ।
धनुर्वाणधरो रामः सर्वकार्यं प्रसाधयेत् ॥२३॥
एवं ममातिरुचिराणि सुखावहानि
रूपाणि वाङ्मनसलोचनमङ्गलानि ।
ध्यायन्नरोऽथ लभते कुशलानि भूयो
धर्मार्थकामगणमुक्तिसुखावहानि ॥२४॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे रामयात्रायां रामगीता-
महोपाख्याने द्विपञ्चाशत्तमोऽध्यायः ॥५२॥

त्रिपञ्चाशत्तमोऽध्यायः

गोप्य ऊचुः

सुखितः किंतपोऽतप्यन्माङ्गल्या च यशस्विनी ।
ययोर्नेत्रहृदानन्दचन्द्रमास्त्वमवातरः ॥ १ ॥
नन्दनः किंतपोऽकार्षीद् गोपेन्द्रो वैश्यसत्तमः ।
तत्पत्नी राजिनी चैव महाभागा शुचिस्मिता ॥ २ ॥
ययोरपत्यतां याता सहजानन्दिनी स्वयम् ।
एषा हि सच्चिदानन्दपरब्रह्मस्वरूपिणी ॥ ३ ॥
एतत् कथय नो देव रघुवंशदिवाकर ।
अस्माकं सुकृतानां च माहात्म्यं वद राघव ॥ ४ ॥
याभिः संवीक्षितो दृग्भ्यां पूर्णब्रह्म परं भवान् ।

श्रीभगवानुवाच

मद्रूपश्चिद्घनानन्दो गवेन्द्रः सुखितो ह्यसौ ।
तथैव माता माङ्गल्या मद्रूपा सच्चिदात्मिका ॥ ५ ॥
नन्दनो राजिनी चैव सहजानन्दिनीप्रसूः ।
तथापि तेषाम् उत्पत्तिं कथयामि युगे युगे ॥ ६ ॥
यदा यदानुजायेऽहं ज्ञानं सत्त्वाद्यनावृतम् ।
आविर्भूय मदंशैश्च मम लीलासुखावहः ॥ ८ ॥
अयं हि पूर्वकल्पेऽभूत् कर्दमाख्यः प्रजापतिः ।
देवहूतिश्च माङ्गल्या तेजोरूपौ तपोनिधी ॥ ९ ॥
दम्पती समकुर्वातां सहस्रं शरदां तपः ।
जिताहारौ मिताहारौ प्रत्यहं व्रतकर्षितौ ॥१०॥
नैव किञ्चिदयाचेतां मत्स्वरूपैकनिर्वृतौ
तस्मिन् भवे मत्कृपया तत्त्वज्ञानमवापतुः ॥११॥
समनस्कौ निर्मनस्कौ शुद्धबुद्धौ चिदात्मकौ ।
कापिलेन स्वरूपेण शुद्धब्रह्माणि योजितौ ॥१२॥

अतृप्यतां नैव तथापि तद्रसात्तौ दम्पती सच्चिदानन्दरूपिणौ ।
विशुद्धभक्त्या पुरुषोत्तमं मां[1] प्रसाधयन्तौ सहजेन शर्मणा ॥१३॥
यावत्त्रेतायुगं तावद्[2] ब्रह्मकैरस[3]निर्वृतौ ।
ततः स्वरूपनिष्ठौ तौ माङ्गल्यासुखिताविह ॥१४॥
बभूवतुर्महोदारौ महावंशौ महाधनौ ।
शुद्धया परया भक्त्या मत्सान्निध्यमवापतुः ॥१५॥
तयोर्हृदयसंतुष्ट्यै प्रादुरासमहं प्रियाः ।
श्रीमत्परिकरोपेतो नित्यसिद्धाभिरन्वितः ॥१६॥
तथासाधनसिद्धाभिरन्वितो भक्तवत्सलः ।
श्रुतयस्ता ब्रह्मलोके मद्गुणग्रामगायिकाः ॥१७॥
इदानीमृषयः सर्वे दण्डकारण्यवासिनः ।
भक्त्या स्वरूपसंसिद्धा यास्यन्ति मम सन्निधिम् ॥१८॥
कृष्णावतारे लीलायां मम तादात्म्यवत्यहो[4] ।
नित्यसिद्धास्तथैवैता भविष्यन्ति प्रिया अपि ॥१९॥
भविता वसु[5]मुख्यश्च द्रोणोऽसौ सुखितेश्वरः ।
तत्प्रियां च धरां तत्र माङ्गल्या तु प्रवेक्ष्यति ॥२०॥
माङ्गल्या सुखितश्चैव मद्रूपौ मद्रसात्मकौ ।
आविश्य तत्र तत्रैतौ लीला वर्धयतो मम ॥२१॥
एवं प्रभाभानुरूपौ राजिनीनन्दनावपि ।
तौ पूर्वस्मिन् भवे मत्तो भक्त्या सुष्ठुप्रसाधितात् ॥२२॥
मत्स्वरूपवरं लब्ध्वा संगताविह जन्मनि ।
एकोऽहं सन् द्विधा जातः सहजा राम एव च ॥२३॥
प्रभाभान्वोः प्रमोदार्थं शृङ्गाररसविग्रहः ।
अनेन रसवर्येण मत्सेवातत्पराविमौ ॥२४॥
अयं च रसवर्योऽस्ति मद्रूपो नीलसुन्दरः ।
यो यां यां भावनां धत्ते तस्य तां तां बिभर्म्यहम् ॥२५॥

---

१. परं—मथु०, बड़ो० । २. सम्यक्—मथु०, बड़ो० । ३. ब्रह्मरस—मथु०, बड़ो० । ४. °भागिनः—रीवाँ । ५. गोप°—रीवाँ, येसु°—मथु०, बड़ो० ।

प्रभा च चित्रभानुश्च मम सेवापरायणौ ।
दिव्यवर्षसहस्राणि तपोनिष्ठौ बभूवतुः ॥२६॥
तयोः स्वरूपनिष्ठां तां तपश्चोग्रं सुदुष्करम् ।
वीक्ष्य प्रसन्नोऽहमासं पुरो भूयः स्थितोऽभवम् ॥२७॥
दिव्यमाणिक्यमुकुटो वनमालाविभूषितः ।
दिव्यशृङ्गारवेशाढ्यो वामाङ्के सहजायुतः ॥२८॥
रत्नाकल्पमनोज्ञाङ्गः कौस्तुभेन विभूषितः ।
प्रावृषेण्य[1]घनाकारनीलसुन्दरविग्रहः ॥२९॥
स्मितमाधुर्यमुग्धास्यो हरिचन्दनलेपवान् ।
पीताम्बरपरीधानो महामञ्जुलविग्रहः[2] ॥३०॥
मूर्तिमान्मन्मथश्चैव लावण्यामृतसागरः ।
एवंविधं मां दृष्ट्वा तावभूतां मोहितान्तरौ ॥३१॥
नैव किंचिदवृण्वातां मत्स्वरूपैकनिर्वृतौ ।
मनः संकल्पमतुलमकुर्वातां सुदुर्गमम् ॥३२॥
एवं विधाय जामात्रे कन्या चैवंविधा भवेत् ।
तयोराशयविच्चाह[3]मब्रुवं मञ्जुलं वचः ॥३३॥
ज्ञातो वां समभिप्रायः तथैवैतद्भविष्यति ।
संकल्पितं युवाभ्यां यत्तत्तथैव भविष्यति ॥३४॥
ततस्तौ संचितवरावारेभाते स्तुतिं मम ।
[4]यादृशेन स्वरूपेण दृष्टस्तादृशभावनौ[4] ॥३५॥

भानुरुवाच

नमस्ते विश्वात्मन् सततसहजानन्दनिधये
मुनीनामप्यन्तर्विरचितनिजानन्तरतये ।
अगम्याया[5]चिन्त्यप्रकृतिरमणीयाय युवयो-
र्युगायास्मै कस्मैचिदपि परिपूर्णाय महसे ॥३६॥

---

१ प्रावृण्मेघ°—रीवाँ । २. अयं श्लोको नास्ति—अयो० । ३. विज्ञाय—रीवाँ । ४—४. नास्ति—अयो०, रीवाँ । ५. अगण्याया°—मथु०, बड़ो० ।

घनस्तोमश्यामं विलसति महामञ्जुलतरं
तडित्स्वर्णं वर्णाधिकसुकमनीयं च किमिदम् ।
अमुष्य श्रीरेषा परमपुरुषस्योत्तमपते[1]-
र्गुणातीता काचित् परिलसतु सा चेतसि मम ॥३६॥
अहो अदृष्टपूर्वाभ्यां रुचिराभ्यां स्वभावतः ।
पूर्णाभ्यां स्फुटमेताभ्यां दम्पतीभ्यां नमोनमः ॥३७॥
अहो हृदयमेताभ्यां आलिङ्गनरसोत्सुकम् ।
अलौकिकमहो दृष्ट्वा सद्यः किन्तु बिभेति नः ॥३८॥
अहो लावण्यविस्फारमूर्तिमन्तौ मनोरथौ ।
कुत्र वां परमो लोकस्तत्रावां नयतां न किम् ॥३९॥
अहो लोकोत्तरं तेजो माधुर्यं श्रीश्च सौभगम् ।
चिरं नयनभाग्यैर्नस्तिष्ठतामिह मन्दिरे ॥४०॥
नूनमेष पुरुषोत्तमोत्तमो यः परावरकजन्मनां परः[3] ।
तस्य नित्यसुविलाससंगिनी श्रीरसौ मधुरकोमलाकृतिः ॥४१॥
अहो तपोभिरस्माकं फलितं यद् दृशंगतौ ।
एतौ परमकल्याणविग्रहौ लोकमङ्गलौ ॥४२॥
अहो युवाभ्यां पुरुषोत्तमाभ्यां श्रीराघवाभ्यां मधुराकृतिभ्याम् ।
अपूर्वलावण्यनिकेतनाभ्यां लोकोत्तराभ्यां सततं नमोनमः ॥४३॥
अस्मत्तपोविबुधवृक्षमहाफलाभ्यां
श्रीमत्स्मिताधरसुधाहृतलोचनाभ्याम् ।
शश्वत्स्वभावरमणीयसुविग्रहाभ्यां
नित्यं नमोस्तु श्रीजानकीरामचन्द्राभ्याम् ॥४४॥
युवामज्ञानगतिकावज्ञातविभवाकृती ।
सृष्टिस्थित्यन्तमेतस्य विश्वस्य कुरुतो भृशम् ॥४५॥
ब्रह्मा विष्णुश्च रुद्रश्च त्रिगुणाः सुरसत्तमाः ।
कटाक्षमात्रनिष्पन्ना युवयोरेव सेवकाः ॥४६॥

---

१. °त्तमस्य ते—अयो०, मथु०, बड़ो० । २. रामो—मथु०, बड़ो० ।
३. परावरे यः परजन्मनः परः—रीवाँ ।

युवां कैवल्यनिर्वाणपरमोत्सवदायकौ ।
स्वरूपानन्दशक्त्यैव वृंहमाणौ गुणाद्भुतौ ॥४७॥
यत्तद्ब्रह्म परं पूर्णं स्वरूपानन्दनिर्वृतम् ।
तत्तु वामेव महतोस्तेजो भद्रामरोत्तमौ[1] ॥४८॥
अहो अत्यद्भुतं भाग्यमस्माकं वचनातिगम् ।
येन वामद्भुतौ दृष्टौ ब्रह्मपूर्णौ सनातनौ ॥४९॥
यावदारोप्यते युष्मास्वगुणेषु गुणोत्करः ।
तावत्स्ववाचश्चापल्यं यूयं पुनरनुत्तमौ ॥५०॥

प्रभोवाच

इयन्ते सहजानाम चारुरूपा शुचिस्मिता ।
कल्याणिनी महाभागा गौरी हरिणलोचना ॥५१॥
असौ ममैवानन्दाय भूयात् स्वानन्दनन्दिनी ।
[2]भवे भवति भव्यायां नित्यं परिचरन्ति ये ॥५२॥
अस्याः स्वरूपलावण्यवशीकृतमनाः भवान्[2] ।
अनन्यप्रेमगो भूत्वा रंस्यसे नित्यकेलिभिः ॥५३॥
युवाभ्यां नित्यमाधुर्यभूमिकाभ्यां नमोनमः ।
एवमेव सदा कार्यो मल्लोचनमहोत्सवः ॥५४॥
नमोस्तु दम्पतीभ्यां मे शृङ्गाररसमूर्त्तये ।
घनविद्युन्निभाकारनीलसुन्दरतेजसे ॥५६॥
अद्य नस्तपसां राशिः फलरूपः सुरद्रुमः ।
यदेतद्दृष्टिविषये याति दम्पतियुग्मकम् ॥५७॥
अहो कोऽपि चमत्कारो जातो नयनयोर्मम ।
स एव सर्वदा तिष्ठत्ववलम्बनमात्मनः ॥५८॥
ईदृशो मम जामाता ईदृशी मम कन्यका ।
जायेतां नयनानन्दहेतवे सौख्यसिन्धुवत् ॥५९॥

---

१. महत्तेजो भवत्यमरोत्तमौ—अयो०, मथु०, बड़ो० । २-२.—नास्ति अयो०, रीवाँ।

इष्टं हुतं दत्तमथापि कृत्यं तपश्च[1] यत्तत्फलितं नैव वेद्मि ।
अनुग्रहः किंतु कृपासमुद्रयोः फलत्यसौ सहजारामयोर्वा ॥६०॥

कोटिभिः साधनानां यन्नैव सद्यः[2] प्रसीदति ।
परब्रह्म तदेतन्नो नयनानन्दहेतवे ॥६१॥
अहो भाग्यमहो भाग्यमस्माकं किन्नु वर्ण्यते ।
यद्दृशोः गोचरं ज्ञानं परब्रह्माभिधं महः ॥६२॥
अहो उत्कण्ठया लोलं हृदयं वाञ्छतीव मे[3] ।
सद्यः परिष्वजाम्येतौ परमानन्दसुन्दरौ ॥६३॥
दृष्ट्वा त्वलौकिकं धाम मनो मे परिवेपते ।
चन्द्रसूर्य्याग्निधामभ्यः परं धामेदमद्भुतम् ॥६४॥
तपन्निव स्रवन्निव ज्वलन्निवैष रोचते[4]
महोभरः प्रभाकरः प्रभासुरः सुखोत्तरः[5] ।
अयं हि सर्वदेवतामयस्त्रयीमयोऽक्षरः
नरोत्तमः प्रियायुतो[6] रमापतिः सतांगति ॥६५॥

नमस्ते नमस्ते सदा राम राम प्रसीद प्रसीदेश लक्ष्मीनिवास ।
अनेनैव रूपेण नित्यं दृशोर्नः प्रपन्नार्तिहन् गोचरत्वं प्रयाहि ॥६६॥

श्रीरामसहजाभ्यां मे पूर्णाभ्यां निजतेजसा ।
अखण्डानन्दबोधाभ्यां पराभ्यां संततं नमः ॥६७॥
इत्येवं विविधैःस्तोत्रैर्भूयस्तुष्टुवतुश्च माम् ।
संतोष्याहं कामवरं रहोवनमगां ततः ॥६८॥

ततो निमेषार्धमितं कालेन प्रतिगच्छता ।
अभूतां साकेतदेशे राजिनीनन्दनश्च तौ ॥६९॥
एतत्सर्वं परिप्रोक्तं यत्पृष्टमपि वः प्रियाः ।
मन्नित्यलीलाविस्तारे सर्वं जानीत संगतम् ॥७०॥

---

१. तप्तं कृतश्च—मथु० बड़ो० । २. साधनैनैंव सद्यः पूर्वं—रीवाँ । ३. वांछं जीवसे—बड़ो० । ४. तवान्निर्वस्रवच्चैव निर्गोचर न रोचते—रीवाँ । ५. महोभरः प्रभाकारः प्रभाशूरः सुखोत्तरः—रीवाँ । ६. °युक्तो—अयो०, रीवाँ, बड़ो० ।

नित्यो ह्ययं परिकरो नित्यं मोदवनं त्विदम् ।
नित्या गावश्च गोपाश्च नित्यः श्रीसुखितेश्वरः ॥७१॥
माता नित्यैव माङ्गल्या नित्यं श्रीनन्दनस्तथा ।
नित्यैव राजिनी साक्षान्नित्या श्रीसहजा मम ॥७२॥
तं तं भक्तं समाविश्य क्रीडति च युगे युगे ।
आविश्य तत्र तत्रैव यत्र साक्षाद्भवाम्यहम् ॥७३॥
साधनैरेव सिद्धयन्ति मद्भक्ताः शुद्धभक्तितः ।
तत्र चैते समाविश्यावतरन्ति भवे भवे ॥७४॥
मदीये लोकसंसिद्धे स्वस्वरूपेण तेऽखिलाः ।
वर्त्तन्ते सच्चिदानन्दविग्रहाः सत्पदं गताः ॥७५॥
कदाचिच्छ्रीपरिकरो भक्तानां दिव्यविग्रहः ।
चिल्लोकवत्स्वरूपेणावतीर्येह प्रवर्तये[1] ॥७६॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे रामयात्रायां रामगीतामहोपाख्याने त्रिपञ्चाशत्तमोऽध्यायः[2] ॥५४॥

●

चतुःपञ्चाशत्तमोऽध्यायः

गोप्य ऊचुः

नित्यसिद्धा वद ब्रह्मन् ब्रूहि साधनसिद्धिगाः ।
ऋग् रूपा[3] ऋषिरूपाश्च तासां मध्ये वयं च काः ॥ १ ॥

श्रीराम उवाच

प्रमोदविपिने नित्ये चिन्मये ब्रह्मसंज्ञिते ।
मद्रूपा नित्यसिद्धास्ता भवत्यः पश्यत प्रियाः ॥ २ ॥
इत्युक्त्वा स्वाङ्गरश्मिभ्यः प्रादुर्भावितवान् प्रभुः ।
ताः षोडशसहस्राणि प्रादुरासुः समंततः ॥ ३ ॥

---

१. प्रवर्तते –अयो० । २. चतुःपञ्चा°—अयो०, रीवाँ, मथु०, बड़ो० । अतः परं चतुर्ष्वेव मातृकासु अध्याय संख्याङ्कने भ्रान्तिः [—संपा०] । ३. अजरूपा—रीवाँ ।

एतास्ता नित्यसिद्धा ये शशिमुख्यः सुलोचनाः ।
प्रियाः षोडशसाहस्रं नित्यलीलाधिदेवताः ॥ ४ ॥
तासां मध्ये षोडशैव मुख्याः स्युर्वामलोचनाः ।
रामाश्यामाचन्द्रकलामञ्जुलाललितालताः ॥ ५ ॥
लासिनी भामिनी भासा सुदीप्तिः सुरुचिः प्रभा ।
चञ्चला कनका काम्या कामिनीति निरूपिताः ॥ ६ ॥
स्वस्वमण्डलमुख्याश्च रामाः सर्वासु नायिकाः ।
सहजानन्दिनी सैव श्रीसीता जानकीत्यपि ॥ ७ ॥
एतस्या अंशरूपास्तु सर्वा एताः शुचिस्मिताः ।
भवतीनां प्रमोदाय प्रादुर्भाव्य प्रदर्शिताः ॥ ८ ॥
नित्या एताः प्रमुदविपिने मत्स्वरूपादभिन्नाः
श्रीसाकेतश्रिय इह भवे वावतीर्णाश्च साक्षात् ।
आसां पादाम्बुरुहरजसः प्राप्तये ब्रह्ममुख्या
गीर्वाणेन्द्राः पुलकवपुषः सर्वतः कामयन्ते ॥ ९ ॥
भवतीनाममर्षःस्यात्तदर्थे तु तिरोहिताः ।
मयि नित्यं सन्निहिताः संततानन्दहेतवः ॥१०॥
मद्वदेताः परिज्ञायेदानीं संस्तूयत प्रियाः ।
इत्युक्ताः प्रभुणा तास्तु स्तोतुं समुपचक्रमुः ॥११॥

गोप्य ऊचुः

नमो वो नित्यसिद्धाभ्यः प्रियाभ्यो राघवेशितुः ।
स्वरूपानन्दरूपाभ्यो युवतीभ्यः समंततः ॥१२॥
यत्सौन्दर्यं क्वापि लोकेऽस्ति किंचित्-
तद्युष्माकं कान्तिसारस्य लेशः ।
नोचेदस्मिन् पञ्चभूतात्मकाङ्गे[1]
क्वोत्कर्षःस्याच्छोकभूमावभव्ये[2] ॥१३॥

---

१. °त्मलोके—रीवाँ । २. °भाव्ये—अयो०, मथु०, बड़ो० । कोत्रोत्कर्षः शोकभू°—रीवाँ ।

अस्मास्वपि प्रभालेशो भवतीनां विजृम्भते ।
नोचेच्छ्रीराघवेन्द्रस्य भवेमहि कथं प्रियाः ॥१४॥
प्रमोदवनमेतद्धि भवतीनां निकेतनम् ।
प्रियेण नित्यसंबद्धाः खेलनं कुरुथ प्रियाः ॥१५॥
यस्मै बिभर्थ कारुण्यं तस्मै भक्ताय साधवे ।
नित्यं विहरथ प्रीत्या नित्यलीलाप्रवेशनम् ॥१६॥
अतः परं सदास्मासु कृपालेशो विधीयताम् ।
येन युष्मत्संगमेत्य[1] पत्या मोदामहेऽमुना ॥१७॥
ब्रह्माद्या अपि देवेन्द्राः श्रीमच्चरणरेणुषु ।
लुठन्ति बहुधा स्नात्वा धन्यंमन्या दृढव्रताः ॥१८॥
भवतीनामहो भाग्यं वर्णयामः कथं वयम् ।
याभिर्वशीकृतो रामः पूर्णं ब्रह्म निजैर्गुणैः ॥१९॥
नमो नमोस्तु युष्मभ्यं ब्रह्मरूपाभ्य उत्तमाः ।
श्रीराघवेन्द्ररामाभ्यः प्रेयसीभ्यो नमोनमः ॥२०॥
अस्माकं भवतीष्वस्तु नाभ्यसूया कदाचन ।
यूयं खलु महिष्योऽस्य वयं दास्यः सदैव वः ॥२१॥
करिष्यति प्रियो दृष्टिं भवतीनामनुग्रहात् ।
करुणार्द्रां यया शोकं तरिष्यामो वियोगजम् ॥२२॥
अस्मास्वन्तर्हितिस्तावन्नोचिता दासिकासु हि ।
भवतीनामाश्रयेण करिष्यामः प्रियं वशे ॥२३॥
यूयं तावन्नित्यसिद्धाः सदानन्दनिकेतने ।
रमथ श्रीराघवेन्द्रे कोऽर्थो वः शिष्यतेतराम् ॥२४॥
एतावत्खलु कर्तव्यमस्मासु महिषीवराः ।
यत्सदा रामचन्द्रस्य कृपादृष्टिं लभामहे ॥२५॥
भवद्दर्शनजं क्षेमं भविष्यति नचान्यथा ।
नित्यपार्थकतां याति सज्जनानां समागमः ॥२६॥

---

१. °मेन—रीवाँ ।

श्रीराम उवाच

एताश्चिल्लोकस्वामिन्यः सेवनीयाः प्रयत्नतः ।
यदि वाञ्छेन्मम प्रेमपरमानन्दमन्दिरम् ॥२७॥
एतासां हि प्रसादेन विधिकेशवशङ्कराः ।
मद्भुक्तिपात्रतां याता विपुलक्षेमराशयः ॥२८॥
लक्षवर्षसहस्राणि एभिस्तप्तं तपः पुरा ।
आसां मत्पदराज्ञीनां पादरेणूपलब्धये ॥२९॥
तथापि नैव तैः प्राप्तास्तासां चरणरेणवः ।
ततो विशुद्धया भक्त्या प्रणताः शरणं ययुः ॥३०॥
न स्त्रियः सन्ति खल्वेताः ब्रह्मरूपाः सनातनाः ।
ब्रह्मा शिवश्च शेषश्च श्रीश्च ताभिः समा नहि ॥३१॥
प्राकृते प्रलये प्राप्ते व्यक्तेऽव्यक्तं गते पुरा ।
शिष्टे ब्रह्मणि चिन्मात्रे कालमायातिगेऽक्षरे ॥३२॥
ब्रह्मानन्दमयो लोको व्यापिवैकुण्ठसंज्ञकः ।
निर्गुणोऽनाद्यनन्तश्च वर्त्तते केवलेऽक्षरे ॥३३॥
अक्षरं ब्रह्म परमं वेदानां स्थानमुत्तमम् ।
तल्लोकवासी तत्रस्थैः स्तुतोऽहं वेदराशिभिः ॥३४॥
चिरं स्तुत्या ततस्तुष्टः परोक्षं प्राह तान् गिरम् ।[1]
तुष्टोऽस्मि व्रूत भोः प्राज्ञा वरं यन्मनसि स्थितम् ॥३५॥

श्रुतय ऊचुः

नारायणादिरूपाणि ज्ञातान्यस्माभिरच्युत ।
सगुणं ब्रह्म सर्वेश[2] वस्तुबुद्धिर्न तेषु नः ॥३६॥
ब्रह्मेति पठ्यतेऽस्माभिर्यद्रूपं निर्गुणं परम् ।
वाङ्मनोगोचरातीतं ततो न ज्ञायते तु तत् ॥३७॥
आनन्दमात्रमितियद्वदन्तीह पुराविदः ।
तद्रूपं दर्शयास्माकं यदि देयो वरो हि नः[3] ॥३८॥

---

१. चिरं प्रमोदवनवासीयान् परोक्षमिह—रीवाँ । २. सर्वेदं—मथु०, बड़ो० ।
३. हितः—मथु०, बड़ो० ।

श्रुत्वाहं दर्शयामास स्वलोकं प्रकृतेः परम् ।
केवलानुभवानन्दमात्रमक्षरमध्यगम् ॥३९॥
यत्प्रमोदवनं नाम वनं कामदुघैर्द्रुमैः ।
मनोहरनिकुञ्जाढ्यं सर्वत्र सुखसंयुतम् ॥४०॥
यत्र रत्नगिरिर्नाम सुनिर्झरदरीयुतः ।
रत्नधातुमयः श्रीमान् द्विजालिगण[1]संकुलः ॥४१॥
यत्र निर्मलपानीया सरयूः सरितां वरा ।
रत्नबद्धोभयतटी हंसपक्ष्यादिसंकुला ॥४२॥
नानारासरसोन्मत्तं यत्र गोपीकदम्बकम् ।
तत्कदम्बकमध्यस्थः किशोराकृतिरित्यहम् ॥४३॥
दर्शयित्वेति च प्राह व्रूत किं करवाणि वः ।
दृष्टो[2] मदीयो लोकोऽयं ततो नास्ति परं वरम् ॥४४॥

श्रुतय ऊचुः

कन्दर्पकोटिलावण्ये त्वयि दृष्टे मनांसि नः ।
कामिनीभावमासाद्य स्मरक्षुब्धान्यसंशयम् ॥४५॥
यथा त्वल्लोकवासिन्यः कामतत्त्वेन गोपिकाः ।
भजन्ति रमणं मत्वा चिकीर्षाजनि नस्तथा ॥४६॥

श्रीभगवानुवाच

दुर्लभो दुर्घटश्चैव युष्माकं सुमनोरथः ।
मयानुमोदितं सम्यक् सत्यो भवितुमर्हति ॥४७॥
आगामिनि विरञ्चौ तु जाते सृष्ट्यर्थमुद्यते ।
कल्पं सारस्वतं प्राप्य व्रजे गोप्यो भविष्यथ ॥४८॥
साकेते सारवे क्षेत्रे अयोध्यामण्डले मम ।
प्रमुद्वने[3] भविष्यामि प्रेयान्वो रासमण्डले ॥४९॥
जारधर्मेण सुस्नेहं सुदृढं सर्वतोऽधिकम् ।
मयि संप्राप्य सर्वस्वं कृतकृत्या भविष्यथ ॥५०॥

---

१. सुपक्षिगण°—मथु०, बड़ो० । २. दृश्यो—अयो०, रीवाँ । ३. प्रमोदवने—मथु०, बड़ो० । "अक्षराधिक्यमार्षं" टि०—मथु० ।

श्रुत्वैतच्चिन्तयन्त्यस्ता रूपं मम मनोहरम् ।
उक्तं कालं समासाद्य गोप्यो भूत्वाद्य मां गताः ॥५१॥
इत्येवं श्रुतिरूपाणां माहात्म्यं कथितं मया ।
इदानीं मुनिरूपाणां माहात्म्यं शृणुत प्रियाः ॥५२॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे रामयात्रायां रामगीतामहोपाख्याने चतुष्पञ्चाशत्तमोऽध्यायः ॥५४॥

पञ्चपञ्चाशत्तमोऽध्यायः

श्रीराम उवाच

एते षष्टिसहस्राणि दण्डकारण्यवासिनः ।
मुनयो दीर्घतपसो भावयन्तः शुचिव्रताः ॥ १ ॥
दिव्येन भक्तियोगेन प्राप्ता मां हि परात्परम् ।
रासमण्डलमध्यस्थं प्राप्य स्नेहरसाकुलाः ॥ २ ॥
अधुनापि त एवेह संगताः सन्ति संनिधौ ।
दिव्यदृष्ट्या निरीक्षध्वं भवत्यस्तान् मुनीश्वरान् ॥ ३ ॥
इत्युक्त्वा दर्शयामास स्वपार्श्वस्थान् द्विजोत्तमान् ।
गोपिकारूपमासाद्य क्रीडमानान् दिवानिशम् ॥ ४ ॥

दृष्ट्वा तु ताः शशिमुखाः[1] सुनेत्रा हेमद्विषश्चपलापाङ्गवक्त्राः ।
श्रीरामचन्द्रं धयतीः स्वदृग्भिः स्तोतुं भक्त्या चक्रमुः संमुखस्थाः ॥५॥
नमो वः स्त्रियो राघवेन्द्रप्रियाभ्यस्तपोराशिसंजातभक्त्युद्भवाभ्यः ।
मुनीन्द्रस्वरूपाभ्य उच्चैर्गतिभ्यो सदानन्दकेली[2]रसान्तःस्थिताभ्यः ॥६॥

यूयं[3] हि भूरितपसः परमर्षिमुख्याः
भक्त्या वशीकृतवतीः सततं प्रियं स्वम् ।
श्रीमत्प्रमोदवनमञ्जुलमाधुरीषु-
संख्यातिगानि कुरुथ क्रमतः सुखानि ॥ ७ ॥

---

१. शशिवक्त्राः—मथु०, बड़ो । २. रसानंदकेलि—रीवाँ । ३. पूर्व—रीवाँ ।

वयं युष्मत्पदं लब्धुं सततं कामयामहे ।
विना भवत्कृपादृष्टिं कथं प्राप्नुमहि प्रियम् ॥ ८ ॥
युष्माकमङ्घ्रिसरसीरुहरेणुकेभ्यो
भूयो लुठन्ति विधिरुद्रमुखाः सुरेशाः ।
नित्यानुरक्तमनसः परमोत्सवेन
श्रीनित्यकेलिपरिदर्शनजातकामाः ॥ ९ ॥
अहो भवद्भाग्यमहोदधिर्महान् किं वर्णनीयो विबुधैरगम्यः ।
यद्रामचन्द्रं नयनाभिरामं नित्यं वशीकृत्य सुखं वहन्ति ॥१०॥
अहो गोप्यो मुनिरूपाः समन्तात् प्रभौ यथा भवतीनां नित्यलीलाः ।
तस्यास्माकं जायतामेष कामः पूर्णो भूयाद्भवदीक्षाबलेन ॥११॥

श्रीराम उवाच

दृष्ट्वा कच्चिन्मुनिरूपा युवत्यो विशालभाला भाग्यवत्यः सुतृप्ताः ।
आसां सद्यो दर्शनाद्देवतानां माङ्गल्यं भवतितरां भवेऽत्र ॥१२॥
एषा गृहीतजलजा जलजेव मनोहरा ।
मनो मोदयते भूयो जवनाख्यो मुनिर्ह्यसौ ॥१३॥
अग्निपुत्रो मामुपास्य दिव्यो मत्पदवीं गतः ।
सहस्रं गोपिका नित्यं याः समन्तादुपासते ॥१४॥
अयं त्रिषवणो नाम मुनिरग्नेः कुमारकः ।
येयं रक्तांशुकवृता यूथमुख्या विराजते ॥१५॥
अयं यायावरो नाम मुनीन्द्रः संशितव्रतः ।
येयं पीतदुकूलाढ्या निजयूथेश्वरी पुरः ॥१६॥
अयं च कोषणो नाम मुनिस्तापससत्तमः ।
येयं वीणाकरा नित्यमुपवीणयतेऽद्य . माम् ॥१७॥
वीणाकरासु गोपीषु यूथेशी मत्परेक्षणा ।
अयं मेधातिथिर्नाम मुनिः पावकवर्चसः ॥१८॥
येयं कनकदण्डाढ्या मदीयाच्छत्रधारिणी ।
नित्यं मां सुखयत्येषा छायेव सुखभूरुहा ॥१९॥
अयं निकषणो नाम वह्निपुत्रो मुनीश्वरः ।
अयं च सुमतिर्नाम तथैव मुनिसत्तमः ॥२०॥

यौ तौ चामरयुग्मेन नित्यं वीजयतोऽद्य माम् ।
अयं किर्मीरणो नाम मुनिः परमभावभृत् ॥२१॥
या दिव्यतालवृन्तेन सेवते नित्यमेव माम् ।
अयं सुवचनो नाम परमोदारहृन्मुनिः ॥२२॥
येयं नागदलैर्वीटीं मह्यमर्पयति प्रिया ।
अयं मदनको नाम मुनिवर्यः सुपेशलः ॥२३॥
येयं सुवर्णवलया नीलशाटीवृता प्रिया ।
अयं च निकृतिर्नाम मुनिः परमधार्मिकः ॥२४॥
येयं संगीतविद्यानामाचार्या दृश्यतेऽभितः ।
अयं सुखेषणो नाम मुनिर्भक्तिमतां वरः ॥२५॥
या दिव्यपटहीवाद्यकुशला व्रजसुन्दरी ।
अयं च बर्हिणोनाम मुनिः सेवकसत्तमः ॥२६॥
येयं मार्दङ्गिकी भूत्वा नित्यं मोदयतेऽद्य माम् ।
अयं शतपथो[1] नाम मुनिः पूजितसद्गुणः ॥२७॥
तालदानक्रियामध्ये येयं पटुतरा पुरः ।
अयं च सुकथो नाम मुनिः सुन्दरविग्रहः ॥२८॥
येयं स्वरालापकरी कोकिलाकण्ठजित्वरी ।
अयं प्रवहणो नाम मुनिस्तापससत्तमः ॥२९॥
येयं रत्नच्छटाहस्ता चित्तचौर्यकरी प्रिया ।
अयं विभावसुर्नाम मुनिर्मतिमतां वरः ॥३०॥
येयं कमलमालान्या पुरतो गोपसुन्दरी ।
अयं कुवलयो नाम शंसनीयो मुनिर्महान् ॥३१॥
यस्याः करं भूषयति शारिका हेमपञ्जरी ।
अयं शोलपतिर्नाम माननीयो मुनिर्व्रजे ॥३२॥
अरुणाः शङ्खवलयाः यस्याः करसरोजयोः ।
अयं कृततनुर्नाम मुनिर्मान्यतमो नृणाम् ॥३३॥
येयं सुवर्णवसना रत्नमालाविभूषिता ।
अयं सुखाशनो नाम मुनिः सुखदकीर्तनः ॥३४॥

१. सन्तपथो—रीवाँ ।

माणिक्यहारिणी येयं स्वनोन्नयनकारिणी ।
अयं कौपीनसो नाम मुनिर्भक्तिपरायणः ॥३५॥
यस्याः शिरसि शोभन्ते चम्पकैर्ग्रथिताः कचाः ।
अयं सून्मथनो नाम मुनिः कौशलवारिधिः ॥३६॥
यस्या वकुलपुष्पैस्तु[1] कल्पिता कटिमेखला ।
अयं मधुवनो नाम मुनोन्द्रः कोविदाग्रणीः ॥३७॥
यस्याः कपोलयोर्भाति रत्नकुण्डलयोर्युगम् ।
अयं च निहुतिर्नाम मुनिः परमकीर्तिमान् ॥३८॥
ज्योत्स्नेव विशदा यस्याः शोभते तनुशाटिका ।
एवं तैस्तैः शुभैः चिह्नैः चिह्निता गोपसुन्दरीः ॥३९॥
रामः प्रदर्शयामास ऋषिरूपास्तु ताः किल ।
तासां सौन्दर्यभङ्गीभिर्बभूवुर्निर्जिताश्च ताः ॥४०॥
तासां कदम्बके रामो नित्यक्रीडाविशारदः ।
अशोभतापूर्वमेव तासां दृक्सौख्यहेतवे ॥४१॥
क्रीडमानो नृत्यमानो मोदमानो दिवानिशम् ।
रममाणो रामचन्द्रस्तासां मध्ये व्यरोचत ॥४२॥
तास्तासां व्रजनारीणां वीक्ष्य क्ष्वेलितकं[1] मुहुः ।
आत्मानं रञ्जयाञ्चक्रुरपूर्वमिव विस्मिताः ॥४३॥

गोप्य ऊचुः

अहो युवां नित्यकेलिर्नित्यं दृग्गोचरास्तु नः ।
न भवत्सदृशः क्वापि दाम्पत्यप्रभवा[2] मुदः ॥४४॥
नमस्ते भक्तलोकानां कल्पवृक्षाय शाश्वते ।
पूर्णब्रह्मस्वरूपाय अवाङ्मनसवृत्तये ॥४५॥
नमस्ते नित्यकान्ताभ्यः प्रमोदवनमाधुरीम् ।
नित्यमेव धयन्तीभ्यो निभृतैर्लोचनाञ्चलैः ॥४६॥

---

१. वहुकलापुष्पै—रीवाँ । २. वीक्ष्य त्वतिलकं—रीवाँ । ३. "अन्यपुरुषस्त्री-संबंधजाः" टि०—मथु० ।

ऋषिरूपा ऊचुः

अनेन प्रभुणा साकं नित्यं क्रीडामहे वयम् ।
अवतारात् पूर्वमेव संगता [1]ह्यस्य संनिधौ ॥४७॥
भवत्यश्चावतारस्य समयेऽमुष्य संगिनीः ।
अतः परं भविष्यन्ति ह्यस्मद्व[1]न्नित्यसंगताः ॥४८॥
अयं प्रभुर्हि भक्तानामाश्रितानां सुखप्रदः ।
यथा पूर्येत तत्कामस्तथैव कुरुते भृशम् ॥४९॥
वशीकृतात्मा तैरेव त्रिषु लोकेषु सोऽधुना ।
आत्मानमप्येष ददात्येभ्यः परमदुर्लभम् ॥५०॥
क्वचिच्च पुत्रतां प्राप्य भक्तानामनुकम्पया ।
कुरुते बालकेलीस्ता याः श्रुत्वा मुक्तिभाग्भवेत् ॥५१॥
क्वचित् सुहृद्बन्धुरूपो भक्तान् मोदयते भृशम् ।
क्वचिन्माधुर्यरूपेण रमयत्येष कामिनीः ॥५२॥
सदा रासविलासादीन् कुरुते सुमनोहरान् ।
सर्वभाग्येन सेव्योऽसौ श्रीमान् राघवचन्द्रमाः ॥५३॥
इत्युक्त्वा ऋषिरूपास्तास्तिरोधानं ययुस्तदा ।
आभिः परिवृतो राम एकाकी समपद्यत ॥५४॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे रामयात्रायां रामगीता-महोपाख्याने पञ्चपञ्चाशत्तमोऽध्यायः ॥५५॥

षट्पञ्चाशत्तमोऽध्यायः

श्रीराम उवाच

अतः परं तु युष्माकं पूर्वजन्म वदाम्यहम् ।
कृतं हुतं तपस्तप्तं तत्सर्वमवधार्यताम् ॥ १ ॥
... ...[2]स्मरसुन्दरम् ।
विलोक्य मां विमुमुहुः स्नेहनिर्व्यूढमानसाः ॥ २ ॥

१—१. नास्ति—अयो०, रीवाँ। २. नास्ति—अयो० रीवाँ। हरितालेन लेपितः पाठः—मथु० ।

कृष्णावतारिणं कान्तं श्रीवृन्दावनगोचरम् ।
आबाल्यतो मां निरीक्ष्य बभूवुर्मद्वशीकृतः ॥ ३ ॥
मन्मनस्का मदालापा मदात्मानो मदन्तराः ।
बभूवुर्विप्रयोगेन मोहिताः स्मरपीडिताः ॥ ४ ॥
ततो मत्प्राप्तये चक्रुः कात्यायन्यर्चनव्रतम् ।
हेमन्ते यमुनावारिण्याप्लुत्य शुचिमानसाः ॥ ५ ॥
स्थाणुं संपूज्य तत्पार्श्वे देवीं च प्रत्यपूजयन् ।
नन्दनन्दनमेवैकं वाञ्छन्त्यः पतिमात्मनः ॥ ६ ॥
ततः प्रसन्ना सा देवी साक्षाद्भूतान्नवीद्वचः ।
एष देवः परं ब्रह्म पतित्वे वाञ्छितं हि वः ॥ ७ ॥
ब्रह्मादीनामपि परं दुर्लभोऽयं मनोरथः ।
तेनैव पूरितुं योग्यो ब्रह्मणा नरमूर्तिना ॥ ८ ॥
ततोऽन्येद्युर्व्रतार्थाय जले तस्थुर्निमज्ज्य ताः ।
कृष्णो विवसना ज्ञात्वा शनैः पर्यहरत् पटान् ॥ ९ ॥
नग्नास्ताः सूर्यजातोयात् समुत्थाय सुमध्यमाः ।
पाणिभ्यामपिधायाङ्गान्यूचुर्मां शशिलोचनाः ॥१०॥
कृष्ण कृष्ण महाबाहो देहि वासांसि नः प्रभो ।
जलमध्येऽतिशीतार्ता वयं वेपामहेऽधुना ॥११॥
ततो नमस्कारयित्वा कराभ्यां शिरसा सह ।
दत्तवानहमेतासां वसनानि मृगोदृशाम् ॥१२॥
तासां ततो व्रतसमाप्तिचिकीर्षयाहं ,
कृष्णावतारसमये वरमभ्यदां च ।
एताः क्षपाः[1] प्रकृतिकालगुणाद्यतीता ,
यूयं मया सह रमध्वमपेतकृत्याः ॥१३॥
ततः कृष्णावतारेऽहं तासां वाञ्छितपूर्तये ।
स्वंलोकमभ्यदां पूर्णं सच्चिदानन्दलक्षणम् ॥१४॥
यत्र वृन्दावनं नाम वनं दिव्यमनुत्तमम् ।
यदेवं पश्यथ प्रेष्ठाः प्रमोदवनमुत्तमम् ॥१५॥

---

१. परा—रीवाँ ।

यत्रोत्तरङ्गसलिला यमुना सरितांवरा ।
येयं श्रीसरयूर्यत्र राजहंसनिषेविता ॥१६॥
उच्चैः कटाहनिर्भेत्री कोटिब्रह्माण्डभेदिनी ।
हरिविष्णुब्रह्ममयी भक्तानां हितकारिणी ॥१७॥
प्रेमपूर्णप्रवाहाढ्या भावरूपतरङ्गिणी ।
शृङ्गारसारसलिला रतिरङ्गतटद्वया ॥१८॥
यत्र गोवर्धनोनाम गिरिः कोटिमणिप्रभः ।
योऽयं रत्नगिरिर्भाति भवतीनां पुरः प्रियाः ॥१९॥
यत्र श्रीर्मथुरानाम नगरी रत्ननिर्मिता ।
येयं साकेतनगरी भासते भवनैः शुभैः ॥२०॥
यत्र नन्दव्रजः श्रीमान् गोपगोपीभिरन्वितः ।
सर्वर्तुसुखशोभाढ्यो देवानामपि कामितः ॥२१॥
योऽयं सुखितराजस्य गोपवर्यस्य वै व्रजः ।
मत्क्रीडास्थानभूतत्वात् सर्वसौख्यविहारदः ॥२२॥
यत्र प्रियतमा गोप्यो मम लीलापरायणाः ।
मद्गुणानेव गायन्त्यो बाल्यात् कैशोरकावधि ॥२३॥
ता यूयमेव सकला जानीतात्मानमङ्गनाः ।
यं ज्ञात्वा न पुनर्मोहमेवं यास्यथ मत्समाः ॥२४॥
अहं कृष्णश्च रामश्च वृन्दावनविहारवान् ।
प्रमोदवनसारङ्गोऽप्यशोकवनसारवित् ॥२५॥
यत्र मे रमणी राधा वृषभानुसुता स्वयम् ।
मत्स्वरूपैकनिरता सदा मद्रूपसंगिनो ॥२६॥
भक्तिरूपा भावरूपा रतिरूपा रतिप्रिया ।
अनङ्गकेलिनी लास्यकारिणी मदसुप्रिया ॥२७॥
सेयं श्रीः सहजानन्दा प्रेमालयपताकिका ।
नानया सदृशी लक्ष्मी[1]र्न शेषो न विधिः शिवः ॥२८॥
अनया वाञ्छिता लक्ष्मी[1]र्मद्भोग्यत्वमुपागता ।
नानया रहितां तां च कामये किमुतेतराम् ॥२९॥

१—१. नास्ति—अयो० ।

भवतोष्वियमाविश्य राधिका सहजात्मिका ।
भुङ्क्ते भोगान् मया साकं भवतीनां प्रसादकृत् ॥३०॥
नानया रहिता यूयमंशिन्या स्वांशविग्रहाः ।
एकेयं बहुरूपेण क्रीडति व्रजवीथिषु ॥३१॥
यूयं हि पूर्वजनिषु ब्रह्माणो वासवाः शिवाः ।
आदित्या वसवो विश्वे भास्करा अनिलादयः ॥३२॥
शुद्धभक्ता मामुपास्य मत्सान्निध्यमुपागताः ।
या या तु भावना यस्य तस्य तां तां बिभर्म्यहम् ॥३३॥
कदाचिद्विधिराराद्धुं श्वेतद्वीपपतिं प्रभुम् ।
यातः क्षीरसमुद्रान्तं यत्र देवो हरिः स्वयम् ॥३४॥
तत्र याताः सुराः सर्वे लोकपालाः सवासवाः ।
आदित्या वसवो रुद्रा ये चान्येऽग्नियमादयः ॥३५॥
सर्वेषां प्रवरो ब्रह्मा स्तौति नित्यं प्रभुं च तम् ।
स्तोत्रैर्ऋग्यजुषैः सामाथर्वभिः सूक्तिभिस्तथा ॥३६॥

नमस्ते श्वेतद्वीपाधिपतये पूर्णब्रह्मस्वरूपाय परमात्मने सकल-जगदानन्दनिदानसद्धर्ममूर्त्तये अक्षररूपाय कलाविलासनित्यदीक्षिताय प्रपन्नजनकल्पतरवे श्रीमतेऽनिरुद्धाय ॥ ३७ ॥

योऽयं धर्मस्त्रयीवाग्निभृतनिगदितो ब्रह्मणः सा क्रियाख्या
शक्तिस्ते तत्स्वरूपं भुवनसुखकरं नित्यमिष्टं च पूतम् ।
रक्षायै तस्य नित्यं त्वमिह विजयसे क्षीरसिन्धोस्तटान्ते
श्वेतद्वीपे मनोज्ञे स्वयमथ भगवानादिनारायणाख्यः ॥३८॥
तस्मै नमस्ते गरुडध्वजाय रमाकलत्राय सुरारिहन्त्रे ।
सशङ्खचक्राब्जगदाधराय निषङ्गिणे शार्ङ्गधनुर्धराय ॥३९॥
यो वासुदेवः सत्त्वमूर्जस्वलं यत् संकर्षणो यो भगवान् कालमूर्तिः ।
यः प्रद्युम्नो वेदवेदाङ्गरूपः स त्वं साक्षादनिरुद्धोऽसि धर्मः ॥४०॥
यदि त्वमनया मूर्त्या प्रकटो न भवेः प्रभो ।
तदा विप्लवमागच्छेद् धर्मसेतुः सनातनः ॥४१॥
साधूनां रक्षणार्थाय धर्मस्य स्थापनाय च ।
दुष्टानां दमनाय त्वं प्रसिद्धो भगवान् स्वयम् ॥४२॥

नित्यं कृपय देवेश भक्तेभ्यो नः सदा प्रभो ।
यथास्मान् कमलाकान्त त्वद्भक्तिरनपायिनी ॥४३॥
एवं ब्रह्मादयो देवाः स्तुवन्ति परमेश्वरम् ।
स्तुत्वा नत्वोपास्य नित्यमायान्ति स्वस्वविष्टपान् ॥४४॥
कदाचिद्भगवान् श्रीमान् अनिरुद्धश्चतुर्भुजः ।
पश्यतां सर्वदेवानां बभूव प्रेमसंप्लुतः ॥४५॥
अक्ष्णोरश्रुकलापूर्णः पुलकाङ्गः[1] सुनिर्वृतः[2] ।
स्तब्धः खिन्नः सकम्पश्च भावयुक्तः पदे पदे ॥४६॥
तद्दृष्ट्वा रूपमीशस्य ब्रह्मा प्रोवाच साद्भुतः ।
अहो श्रीदेवदेवेश त्वं साक्षाद्भगवान् परः ॥४७॥
कस्यानुस्मरणात्पूर्णप्रेमयुक्तोऽद्य लक्ष्यसे ।
किंवा स्वात्मानन्दवृत्तो नित्यं प्रेममयाकृतिः ॥४८॥
तवापि ध्येयतां याति तत्किरूपं परं पदम् ।
कर्ताविता वा संहर्त्ता जगतोऽस्य त्वमेव हि ॥४९॥

अनिरुद्ध उवाच

सर्वे भवन्तो गच्छन्तु प्रमोदवनमेव हि ।
तत्र दिव्ये रामकुण्डे स्नानं कुरुत देवताः ॥५०॥
तदा श्रीरामलीलायाः साक्षात्कारो भविष्यति ।
तद्रूपं मे परं ध्येयं ज्ञेयं प्राप्यं च सर्वदा ॥५१॥
तस्यानुस्मरणादेव प्रेमपूर्णोऽस्मि संप्रति ।
अस्रुविन्दुपरीताक्षः पुलकाञ्चितविग्रहः ॥५२॥
श्रुत्वेदमनिरुद्धस्य वाक्यं प्रमोदवनं वै ।
ययौ ब्रह्मा सुरैः साकं स्वाधिकारानुवर्त्तिभिः ॥५३॥
स गत्वा रामकुण्डान्तर्निमज्य विबुधैः सह ।
बभूव दिव्यस्त्रीवेशी देवाः स्त्रीरूपधारिणः ॥५४॥
बभूवुस्तत्क्षणादेव रामकुण्डप्रभावतः ।
विसस्मरुश्च स्वात्मानं ब्रह्माद्या देवतागणाः ॥५५॥

---

१. पुलकांतः—अयो० । २. स्वनिर्वृतः—रीवाँ ।

क्वाहं कुतः समायातः किं करिष्यामि स्वल्वहम् ।
इति व्याभुग्धचित्तास्ते न मनोनिर्वृतिं ययुः ॥५६॥
तस्मिन् क्षणे रामकुण्डतीरभूमौ सुरेश्वराः ।
मृदङ्गध्वनिमाकर्ण्य बभूवुर्दिव्यदृष्टयः ॥५७॥
स मृदङ्गो रामरासे गोपीहस्तप्रणोदितः ।
वाद्यति प्रसभं तुङ्गधुंकारध्वनिसुन्दरः ॥५८॥
तदा श्रीमाधुरीकुञ्जात् रामकुण्डं प्रगच्छती ।
तैर्दृष्टा दिव्यमाल्यानि बिभ्रती गोपिका करे ॥५९॥
सा पृष्टा तैः शशिमुखी रामकुञ्जानुयायिनी ।
का त्वं सखि क्व यासीति सा नोवाच जवाद्ययौ ॥६०॥
तेऽपि तत्पृष्ठसंलग्ना ययुर्ब्रह्मादयः सुराः ।
सा च कुञ्जं विवेशाग्रे ते प्रतीहारवारिताः ॥६१॥
शिवः पञ्चमुखः साक्षात् प्रतीहारोऽत्र संस्थितः
तान् विषण्णहृदो दृष्ट्वा शिक्षयन्नवदच्छिवः ॥६२॥
रे नार्यः किं विषादेन तप्यध्वं परमं तपः ।
रामं विशुद्धया भक्त्या सेवध्वं यदि वाञ्छथ ॥६३॥
रामकुञ्जे प्रवेशाय भूरिभाग्याभिरन्विते ।
इत्युक्तास्ते तदा देवास्तपस्तेपुः सुदुश्चरम् ॥६४॥
स्नात्वा सरयूजले वै लक्षवर्षमजायत ।
तेन पुण्यप्रभावेण संजाताः सरयूकुले[1] ॥६५॥
नित्यं रामं प्रेमपरा जारधर्मेऽनुवर्त्तिताः ।
सोऽहं रामः स्वयं ब्रह्मावतीर्णोऽस्मि पुनर्व्रजे ॥६६॥
सुखितेश्वरगेहे तु प्रमोदवनमध्यगे ।
तं मामनुव्रता यूयमवतीर्णा इह प्रियाः ॥६७॥
ता एव व्रजसुन्दर्यो याः स्थिताः सरयूतटे ॥६८॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे रामयात्रायां राम-गीतामहोपाख्याने षट्पञ्चाशतमोऽध्यायः ॥५६॥

---

१. °तले—रीवाँ ।

सप्तपञ्चाशत्तमोऽध्यायः

श्रीभगवानुवाच

एष ब्रह्मा स्वयं भाति या रक्तांशुकधारिणी ।
गोपी चन्द्रप्रभानाम दृक्चकोरसुखावहा ॥ १ ॥
एष शक्रो या तु भाति पीतकौशेयधारिणी ।
गोपी चन्द्रकलानाम नवयौवनशालिनी ॥ २ ॥
एते ते वसवो देवा या गोप्यो नीलशाटिकाः ।
श्यामा भामा रमा कामा कामिनी कामिकाभिधा ॥ ३ ॥
दामिनी यामिनीत्येता नामभिः परिकीर्तिताः ।
एष रुद्रगणो यास्तु गोप्यो हेमपदान्विताः ॥ ४ ॥
किशोरी कुशला कुल्या सुधा चान्द्री बुधा वधूः ।
भव्या नव्याभिनव्याङ्गा नामभिः परिकीर्तिताः ॥ ५ ॥
अमीदेवास्त आदित्या याः सूक्ष्मासितशाटिकाः ।
रमणी रामणी रम्यरञ्जना रससारसा ॥ ६ ॥
रुचिरा रोचिनी रुच्या रङ्गिणी रक्तिरङ्गजे[1] ।
एता द्वादश पद्माक्ष्यः स्वैः स्वैर्नामभिरन्विताः ॥ ७ ॥
विश्वेदेवा अमी यासां नवमौक्तिकनिर्मिताः ।
नवदूर्वादलश्यामाः केयूराः करनालयोः[2] ॥ ८ ॥
लवङ्गी ललिता लीला शीला शाला शिलाभिधाः।
अमी ते भास्वरा यास्ता नवमौक्तिकनिर्मिताः ॥ ९ ॥
सुवर्णवलयाभ्यासे शोभन्ते कङ्कणोत्तमाः ।
सुभगा सुरुचिः सत्या सुमुखी रङ्गदेवता ॥१०॥
दीप्तिः प्रतीतिः संज्ञप्तिः प्रकाशा काशिनी कशा ।
कला चारुमतिश्चञ्चा चञ्चला चपला चरूः ॥११॥

---

१. °रङ्गते—अयो० । २. करणालयाः—अयो०, रीवाँ ।

चारिणी चरिता चान्द्री चन्द्रा चन्द्रकला निशा ।
सेवा सेवारतिः सेव्या सुसेवा सेविनी शिवा ॥१२॥
शिवदा शुभदा शुभ्रा शम्भुजा शम्भला[1] शमा ।
शची रुचीका रचिता[2] चित्रा चित्रध्वजा धुनी ॥१३॥
धरिणी धारिणी धारा सुखिनी सुखदा सुखा ।
सुश्रीः सुसेना सुतरा वज्जुला चाबला बला ॥१४॥
बालका बालवी वल्ली वल्गुनी वल्गुभाषिणी ।
वल्लवी वल्लभा विद्या वन्दिनी विततता नता ॥१५॥
लज्जावती चतुःषष्टि नाम्नैव परिकीर्तिताः ।
अमी वायुगुणा गोप्यो याः स्वकण्ठेषु बिभ्रति ॥१६॥
नीलाम्बुजमयीं मालां मुखचन्द्रविकासिनीम् ।
विकस्वरा विकसिता पुष्पापुष्पा च पुष्पिणी ॥१७॥
करिणी कारिणी मित्रा सुमित्रा सुमिला सुमी ।
सुषमा कुसुमा केलिकेलिनी कमला कला ॥१८॥
कलिनी कलिका कल्या कल्पिणी कुलिता कृतिः ।
सुकृतिः सुप्रतीका च कोशिनो कुशिका कुला ॥१९॥
कलावती कलापा च कुलजा कोमला कलिः[3] ।
मानिनी दामिनी दान्ता कान्ता कामा कृपावती ॥२०॥
अरुणा करुणा क्रीड़ा केकरी कोरकाकरा ।
ललिता वलिता वामा वामाङ्गीति सनामभिः ॥२१॥
ऊनपञ्चाशदेवैताः कीर्तिता व्रजमण्डले ।
अमी साध्यगणा गोप्यो यासां कटिषु मेखलाः ॥२२॥
पद्मरागमयी कल्पा भान्ति सायं रवित्विषः ।
सूतिः स्यूतिः सिता सीता शीता शातोदरी दया ॥२३॥
दयावती च दयिता दशा दामोदरी द्युतिः ।
एता द्वादश संख्याभिराख्याभिः परिसूचिताः ॥ २४ ॥
महाराजिकसंघोऽयं यासां मृगदृशां हृदि ।
नवमाणिक्यघटिता मङ्गलाल्य इव स्रजः ॥ २५ ॥

---

१. शंभुला—रीवाँ । २. रुचिर्वारिचित्ता—रीवाँ । ३. °कुलिः—रीवाँ ।

इन्दिरा सुन्दरी सुन्दा सुगमा सुमतिः समा ।
तुलिता निस्तुला तुल्या तल्पिनी तुलनी तुला ॥२६॥
राविणी द्राविणी द्रव्या भव्या भाव्या भवाभवा ।
मनोरमा रमा रामा नामभिः परिकीर्तिताः ॥२७॥
आर्यतुषितनामानो देवा मृगदृशस्तु याः ।
श्वेतपद्ममयैर्हारैर्भूषिताः कण्ठभूमिषु ॥२८॥
केतकी कनका कान्तिः कान्ता कुञ्जाकुतोभया ।
कुतूहला कौतुकी च कुतुका कुतुकाञ्चला ॥२९॥
कल्याणिनी मङ्गला च कुमुदा कुमुदावली ।
पद्मा पद्मावती पूर्णा पूर्णिमा पूर्णयौवना ॥३०॥
सुस्तनी सुकुचा सौम्या सीमा सन्ध्या सुसाधना ।
साध्वी सभ्या समासाभा[1] शुभिता शोभिता शुभा ॥३१॥
भ्रमरी कबरी कूर्मा कूर्मजेत्येव नामभिः ।
परस्परालापकेलिशालिन्यो या मृगीदृशः ॥३२॥
एतेऽग्नयः स्वयं भान्ति रक्तपङ्कजमालिनीः ।
हेमा हेमप्रभा हैमी नामभिर्गोपिका इमाः ॥३३॥
अयं स शमनो देवो या मत्तनुसमद्युतिः ।
दामिनीनां गणे भाति नवनीलघनोपमा ॥३४॥
सारङ्गी नाम या गोपी नामतः परिकीर्तिता ।
अयं स निर्ऋतिर्नाम या गोपी मणिभिः सितैः ॥३५॥
हृदि कल्पितहारौघा भाति द्यौरिव चोडुभिः ।
नाम्ना सुवदना नाम मदनानलदीपिनी ॥३६॥
अयं स वरुणो नाम या गोपी शोणितप्रभा ।
मणिभिः कल्पितवलया नाम्ना च कनकप्रभा ॥३७॥
अयं यक्षाधिपो नाम नाम्ना या रत्नमञ्जरी ।
मौक्तिकैरेव सर्वाङ्गे दिव्यभूषणधारिणी ॥३८॥

---

१. सभासा साभासा—अयो०, समासमा सामा—रीवाँ ।

इत्येवं कोटिब्रह्माण्डाधिकारिप्रवराः सुराः ।
शुद्धेन भक्तियोगेन गोपिकारूपमाश्रिताः ॥३६॥
मम रासविलासादिक्रीडानर्तनकारिकाः ।
एकैका पाटवनिधिः कलाकोटिविभूषिताः ॥४०॥
रूपलावण्यतारुण्यमाधुर्यगुणवारिधिः ।
एताश्च गोपिकामुख्या यज्ञपत्न्यस्तु या पुरा ॥४१॥
मत्पराः पूर्णया भक्त्या मम साधर्म्यमागताः ।
एतासां पतयश्चैव ब्राह्मणाः सन्ति गोकुले ॥४२॥
गोपरूपधराः सर्वे ममैव हितकारिणः ।
एवं हि देवताः सर्वा अलङ्कुर्वन्ति गोकुलम् ॥४३॥
गोपगोपीवेशधराः खेलन्ति ते मया सह ।
नैतेषां कालजा बाधा नापि प्रकृतिसंभवा ॥४४॥
न वा गुणः क्षोभकृतः कदाचित् प्रभविष्यति ।
मृत्योर्मूर्ध्नि पदं दत्त्वा ते क्रीडन्ति मया सह ॥४५॥
प्रेमानन्दमयैर्भोगैर्ब्रह्मानन्दाधिकोत्तरैः ।
एतेषां दर्शनादेव महामङ्गलवान् भवेत् ॥४६॥
मम भक्तिपरो भूत्वा मम साम्यमवाप्नुयात् ।
मत्तोऽप्यमी समधिका मम लीलाविशारदाः ॥४७॥
नित्याः परिकरा एते नित्यानन्दमयास्तथा ।
अद्यापि ब्रह्मरुद्राद्या देवा दिव्याधिकारिणः[1] ॥४८॥
अमीषां पादरजसः कामेनावतरन्ति ते ।
अयोध्यापुरपर्यन्तनिकुञ्जव्रजभूमिषु ॥४९॥
प्रमोदवनमध्ये च ब्रह्माद्याः सन्ति देवताः ।
व्रजभक्तपदाम्भोजाङ्कितरेणूपलब्धये ॥५०॥
अन्येऽपि देवर्षिवरास्तथा ब्रह्मर्षयो वराः ।
इहैव निवसन्त्येवं नित्यलीलादृशोच्छया ॥५१॥

---

१. °धिकारगाः—बड़ो० ।

स्तुवन्ति विविधैः स्तोत्रैर्मां मत्परिकरं तथा ।
एवं भवत्यः स्वं रूपं ज्ञात्वा व्रजमृगीदृशः ॥५२॥
नित्यानन्देन रम्यध्वं मा कुरुध्वं शुचोलवम् ॥५३॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे रामयात्रायां रामगीतामहोपाख्याने सप्तपञ्चाशत्तमोऽध्यायः ॥५७॥

●

अष्टपञ्चाशत्तमोऽध्यायः

श्रीगोप्य ऊचुः

यदेतद् भवताख्यातं पूर्वजन्मकथानकम् ।
तस्य श्रवणमात्रेण मोहो नः प्रगतः प्रभो ॥ १ ॥
वैष्णवैर्यच्च कर्तव्यं कायेन मनसा गिरा ।
आवश्यकं तदाख्याहि सुखितेश्वरनन्दन ॥ २ ॥

श्रीराम उवाच

तीर्थयात्राभिगमनं मम मन्दिरमार्जनम् ।
स्नानं दानं वैष्णवेभ्यः तपः कायिकमीरितम् ॥ ३ ॥
तीर्थानामुत्तमं तीर्थं सरयू नाम या नदी ।
तत्र संस्नानमात्रेण प्रेमभक्तिमवाप्नुयात् ॥ ४ ॥
व्रजनारीगणस्नानच्युतचन्दनपङ्किलाम् ।
सरयूमवगाहन्ते ब्रह्माद्या अपि संततम् ॥ ५ ॥
तत्र स्नात्वा रत्नगिरेः कुर्यान्नित्यं प्रदक्षिणम् ।
मम मन्दिरमेतद्धि दरीनिर्झरसंकुलम् ॥ ६ ॥
रत्नाचलरजःस्पर्शात् कुष्ठी मुच्येत कुष्ठतः ।
यन्नित्यमेव मत्पादपद्मचन्दनचर्चितम् ॥ ७ ॥
साकेतपुरपर्यन्तं यात्रां कुर्याद्विचक्षणः ।
यत्र द्वादश दिव्यानि वनानि निवसन्ति हि ॥ ८ ॥
प्रथमं मञ्जुलवनं वनानामुत्तमं हि यत् ।

यत्र श्रीः सहजानन्दा नित्यमेव प्रतिष्ठिता ॥ ९ ॥
कामिकावनमुद्दिष्टं द्वितीयं वनमुत्तमम् ।
यत्र श्रीः सहजादेवी कामं निर्मितवत्यहो ॥१०॥
हरनेत्रानलप्लुष्टं कटाक्षक्षेपमात्रतः ।
तृतीयं तु प्रेमवनं यत्राभूद् व्रजयोषिताम् ॥११॥
प्रेमावतारसरणिर्मन्मुखेन्दुविलोकनात् ।
तुर्य्यं रसाल[1]विपिनं सुधास्वादुफलान्वितम् ॥१२॥
यत्र गोचारणामध्ये क्षुधितान् गोपबालकान् ।
दृष्ट्वाहं कल्पयामास फलैः पीयूषपारणम् ॥१३॥
पञ्चमं मन्दारवनं मन्दारद्रुमसंकुलम् ।
कूजत्कोकिलभृङ्गौघजुष्टं पुष्टं वनश्रिया ॥१४॥
पारिजातवनं षष्ठं कुञ्जपुञ्जमनोहरम् ।
खेलद्गोपाललनामञ्जीरध्वनिमञ्जुलम् ॥१५॥
सप्तमं कन्दलवनं परमानन्दकन्दलम् ।
यत्रावर्तत सुन्दर्या दानलीला मनोरमा ॥१६॥
अष्टमं संमदवनं मनःसंमदवर्धनम् ।
यत्रावर्तत सहजया मानलीलाविधिः शुभः ॥१७॥
नवमं केसरवनं[2] यत्र व्रजमृगीदृशः ।
अलङ्कुर्वन्ति कुसुमैः स्वात्मानं रामकेलिषु ॥१८॥
दशमं माणिक्यवनं महामाधुर्यमन्दिरम् ।
विस्फुरद्द्रव्यरत्नांशुमञ्जरीशतसंकुलम् ॥१९॥
एकादशं पद्मवनं गुञ्जद्भ्रमरसंकुलम् ।
यत्र शय्यागृहं भाति मदीयं सुखवर्धनम् ॥२०॥
द्वादशं सौरभवनं सुरभीकृतदिक्तटम् ।
दिव्यभूरुहपुष्पौघमरविन्दरसशीतलम् ॥२१॥
द्वादशैव बिभान्त्येवं तेषामुपवनान्यपि ।

---

१. रसद्°—रीवाँ । २. केशरवणं—अयो०, रीवाँ ।

माधुरीकुञ्जमाद्यं स्यान्मल्लीकुञ्जं द्वितीयकम् ॥२२॥
तृतीयं मालतीकुञ्जं यूथीकुञ्जं चतुर्थकम् ।
पञ्चमं लवलीकुञ्जं कालीकुञ्जं च षष्ठकम् ॥२३॥
सप्तमं लवङ्गी कुञ्जं केतकीकुञ्जमष्टमम् ।
नवमं मल्लिकाकुञ्जं रत्नकुञ्जं ततः परम् ॥२४॥
एकादशं केकिकुञ्जं द्वादशं केलिकुञ्जकम् ।
एतेषु गमनादेव मनःशुद्धिः प्रजायते ॥२५॥
नित्यलीलाविभावश्च परप्रेमोदयस्तथा ।
स्नानाद्दानात्तथा ध्यानान्मम सायुज्यमाप्नुयात् ॥२६॥
सरयूपरितो भान्ति महावैकुण्ठभूमयः ।
एकैककुञ्जरूपेण महानन्दैककन्दराः ॥२७॥
तेषां दर्शनमात्रेण परप्रेमोदयो भवेत् ।
तत्रापि शुद्धया भक्त्या समाराध्य सीतापतिम् ॥२८॥
इहामुष्मिकभोगाय समर्थो भवति ध्रुवम् ।
अयोध्यापरितः क्षेत्रे ये तिष्ठन्ति च भूरुहाः ॥२९॥
ते ब्रह्मविष्णुरुद्रादिरूपाः साक्षात्सुरेश्वराः ।
ये वसन्ति जनास्तत्र ते साक्षान्मम विग्रहाः ॥३०॥
धनुर्वीणा [र्वाण ?] धराः सर्वे द्विभुजाः श्यामविग्रहाः ॥
येषामङ्गशरीरसंस्पर्शतो भाग्योदयो जायते
येन स्यात्सहजापतिः प्रियतमो विद्योतमानो रुचा ।
तल्लीलारसपाततो रसिकता वर्वर्ति सर्वोपरि
प्रेमानन्दविचूर्णमानमनसा तृप्तिः पराविर्भवेत् ॥३१॥
एतस्मिन्निवसन् देशे मम नामपरो भवेत् ।
येऽन्तरायाः कोटिशो वै सन्ति भूयः सुशोभयोः ॥३२॥
सहसा ते प्रणश्यन्ति मम नामप्रभावतः ।
प्रमोदवनवासश्च रामनामग्रहस्तथा ॥३३॥
तुलसीवनसेवा च कार्यमेतन्मुमुक्षुभिः ।
प्रमोदवनमध्ये तु तुलसीवनमुत्तमम् ॥३४॥

तन्मञ्जरीरजस्पर्शाद्दिव्यदृष्टिर्भवेन्नरः ॥
तत्सौरभैर्घ्राणपथप्रयातैरन्तः परप्रेमरसं प्रबोध्य ।
मद्रूपसाक्षात्कृतियोग्यताविधिः क्रियेत पूर्णा परमाद्यवस्था ॥३५॥
मनसा स्मरणीयोऽहं नित्यकेलिसमन्वितः ।
प्रमोदवनमध्यस्थो मानसं परमं तपः ॥३६॥
प्रेमगद्गदकण्ठत्वं दृशोरस्रुकलोदयः ।
स्तम्भस्वेदौ पुलकिता भावरूपं परं तपः ॥३७॥
भक्तिः श्रद्धा मतिर्धैर्यं विवेको विनयार्जवम् ।
क्षमा सत्यं दया बुद्धिर्मानसं परमं तपः ॥३८॥
भावोऽपि मानसो धर्मो स कथं शब्दगोचरः ।
भावोदयो न यावत्स्यात्तावन्नो मानसं तपः ॥३९॥
ममाङ्गभूषा विन्यासो मम भोजनसंविधा ।
मदर्थं कर्मकरणं स्वप्रियस्य निवेदनम् ॥४०॥
एष स्यान्मत्परो भावः सर्वमन्यदनर्थकम् ।
एतद्वैष्णवलोकानां कर्तव्यं भूरिभावतः ॥४१॥
सेव्यसेवकभावश्च स्मृतिरात्मनिवेदनम् ।
मत्सुखे सुखभावश्च मदीयहितभोजनम् ॥४२॥
मत्कीर्त्तनं मद्भक्तेषु सूनृतालापकारिता ।
संप्रश्नः प्रश्रयः सख्यं वाचिकं तप उत्तमम् ॥४३॥
उत्सवाश्च प्रकर्त्तव्या ये मे संवत्सरोद्भवाः ।
मज्जन्मदिवसोत्साहो मद्यात्रापूजनोत्सवः ॥४४॥
मत्पवित्रा[1]रोपणं च तथा मम रथोत्सवः ।
दोलोत्सवश्च हिन्दोलोत्सवो दीपोत्सवस्तथा ॥४५॥
अन्नकूटोत्सवश्चैव वसन्तोत्सव एव च ।
एते चैव महोत्साहा कार्या मच्चित्ततुष्टये ॥४६॥
वैदिकैस्तान्त्रिकैर्दिव्यैः पौराणैर्विधिभिर्यजेत् ।
पूर्णज्ञानानन्दरूपं देवं मां पुरुषोत्तमम् ॥४७॥

---

१. मद्वृक्षा°—अयो०, रीवाँ ।

कर्म कार्यं मत्परमं ज्ञानं यत्तन्मदाश्रयः ।
भक्तिर्मदवधिः साक्षात् प्रेमानन्दमयी परा ॥४८॥
एवं त्रेधापि मार्गोऽयं मत्परत्वाय कल्पते ।
येनानुष्ठितमात्रेण भवेन्मल्लक्षणं फलम् ॥४९॥
यल्लब्ध्वा नापरो भावो विद्यते भुवनत्रये ।
भावः सत्सङ्गविभवै[1]र्वैष्णवैरेव लभ्यते ॥५०॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे रामयात्रायां रामगीता-महोपाख्याने अष्टपञ्चाशत्तमोऽध्यायः ॥ ५८ ॥

एकोनषष्टितमोऽध्यायः

श्रीभगवानुवाच

अस्मिन् ब्रह्मपुरे दिव्ये नवद्वारे महापथे ।
दहराख्यं पुण्डरीकवेश्म[2] नित्यं विराजते ॥ १ ॥
यस्मिन् प्राणः पञ्चविधो यस्मिन् कामाः समाहिताः ।
अस्ति यत्किंचिदिह यन्नास्ति वस्तु जगत्त्रये ॥ २ ॥
तत्सर्वं भाति यत्रैव यदन्विष्य परं गताः ।
तद्वेश्मनि परं भाव्यं मदायतनमुत्तमम् ॥ ३ ॥
कोटिसूर्यप्रतीकाशं कोटिचन्द्रसुशीतलम् ।
कोटिविद्युद्वह्निसमं जाग्रद्रूपं जडेतरम् ॥ ४ ॥
ज्योतिरूपं ब्रह्मरूपमूर्जस्वलमनुत्तमम् ।
कलासहस्रकलितं निष्कलं कालवर्जितम् ॥ ५ ॥
सत्यं विज्ञानमानन्दसंततं विततं वृहत् ।
सर्वतः सैन्धवघनं निराकुलमनन्तरम् ॥ ६ ॥
चिन्मयं परमं व्योम नित्याकारं सुरञ्जनम् ।
सरयूपुलिने रम्ये प्रतिष्ठिततमं महत् ॥ ७ ॥

---

१. भवान्तसंभवैर्दिव्य०— मथु०, बड़ो० । २. ब्र·ह्म- रीवाँ ।

चिदानन्दवनं[1] यत्र हेमरत्नमयी मही ।
सत्यं स्वच्छं सरो यत्र सुधासलिलसंभृतम् ॥ ८ ॥
प्रकारः पूरितो यत्र कालरूपी दुरासदः ।
स्वातन्त्र्यतृप्तिसार्वज्ञ्यं[2] बोधरूपो यदापणः ॥ ९ ॥
यद्वासिनो महोदारा हंसाः प्रकृतिकोमलाः ।
ब्रह्मनिर्वाणलोकस्य राजानः सकला अपि ॥१०॥
अहं यत्र प्रभुः साक्षात् परब्रह्म परात्परः ।
ज्योतिरिङ्गणवद्यत्र ज्योतिःकणविभूषिताः ॥११॥
रमन्ति मुक्ताः पुरुषाः परमे धाम्नि कोटिशः ।
तत्परिवृतं पुराणं मां पुरुषं भावयेत् सदा ॥१२॥
सकलं निष्कलं[3] वापि पूर्णं सकलनिष्कलम् ।
नित्यश्रीविग्रहोपेतं श्रीलालितपदाम्बुजम् ॥१३॥
प्रेम्णा सहजभावेन समुपेतः सदा शुचिः ।
स्नायात्सुविमले तीर्थे ब्रह्मादिसुरसेविते ॥१४॥
सुपूर्णे त्रिपथातीरे ललाटे वैन्दवे सरे ।
सहस्रदलमध्यस्थचन्द्रमण्डलविस्रुतैः ॥१५॥
सुधारसैर्भृतं पूर्णं वैन्दवं विशदं सरः ।
तत्र संस्नानमात्रेण नरः पूतः प्रजायते ॥१६॥
भावनाधिकारयोग्यश्च भाव्यमर्थमवाप्नुयात् ।
दिव्येन तपसा युक्तः समाधिफलमाप्नुयात् ॥१७॥
समाधौ संपरिणते ध्यानं फलति तत्त्वतः ।
फलिते ध्यानयोगे तु ध्येयं साक्षात्कृतं भवेत् ॥१८॥
ध्येयमस्मि परं ब्रह्म यत्पूर्णममृतं विदुः ।
सत्यज्ञानानन्दरूपे मयि जीवं समर्पयेत् ॥१९॥
अकर्ता जायते सद्यो निर्लेपश्चैव निर्गुणः ।
कर्ता च करणं कार्यं यावदेतावती भिदा ॥२०॥
तावत् संसारवृक्षस्य कर्तनं च कथं भवेत् ।
कर्ता कृतिश्च नियतं द्रष्टा च दृशिरेव च ॥२१॥

---

१. °वने—रीवाँ । २. °सर्वज्ञ°—रीवाँ । ३. निश्चलं—रीवाँ ।

महतश्चरमो भावः सोऽहङ्कारविजृम्भितः ।
तच्छिन्द्यादात्मनो मोहं तमोरूपं निरर्थकम् ॥२२॥
ज्ञानविज्ञानपूर्णात्मा प्रेमाङ्कुरमनोरमः ।
समैहिकामुष्मिकश्च साधुसंस्कृतमानसः ॥२३॥
मत्स्वरूपाश्रयो विद्वान् कृतकृत्यः प्रजायते ।
न तस्य त्रिषु लोकेषु कर्तव्यमवशिष्यते ॥२४॥
मामुपेतस्य पूर्णस्य ब्रह्मिष्ठस्य महात्मनः ।
एवंभूतो भवेत् साधुर्भवतीनां कृपावशात् ॥२५॥
नित्यलीलाधिकारी च प्रमोदवनमध्यगः ।
एवं प्रियाः स्वस्वरूपं साक्षाद् दिव्यं परात्परम् ।
मल्लीलां मोहिकीं[1] दृष्ट्वा नानुतप्यध्वमञ्जसा ॥२६॥

गोप्य ऊचुः

कतरा मोहिकी लीला तात्त्विकी कतरा च ते ।
एवं नः संशयं छिन्धि रघुवंशदिवामणे ॥२७॥

श्रीभगवानुवाच

लीलाविहरणं[1] नित्यं नित्यश्रीविग्रहस्य मे ।
पलायनं क्वचिद्दैत्याद्भयं चिन्ता च दुःखिता ॥२८॥
व्रजभक्तेषु विरहो विनाशो व्रजवस्तुनः ।
इत्यादिमोहिकी लीला सात्विकी सकलैव तु ॥२९॥
नित्या चिदानन्दमयी स्वरूपानतिरेकिणी ।
गुणाकारशरीराद्या स्वरूपानतिरेकिणी ॥३०॥
नित्या मे सकला लीला नित्यः परिकरोऽखिलः ।
इति ज्ञात्वा न मोहाय मनो वः कल्पतां प्रियाः ॥३१॥
एतद्वः कथितं सर्वं गीतोपाख्यानमद्भुतम् ।
यः पठेच्छृणुयाद्वापि लभते भक्तिसंपदम् ॥३२॥
दिव्यज्ञानसुसंपन्नो दिव्यचक्षुस्तथा भवेत् ।
मयादौ ब्रह्मणे प्रोक्ता ब्रह्मणा नारदाय च ॥३३॥

---

१. मोहिनीं—अयो० । २. बाललीला विहरणं—मथु०, कालं जित्वा विहरणं—बड़ो० ।

प्रोवाच नारदः सम्यगम्बरीषाय साधवे ।
रहस्यं परमं चैतत् सहजायै समर्पितम् ॥३४॥
सहजाचित्तसर्वस्वं शास्त्रमेतत्सुधोपमम् ।
सरहस्यं सुदुर्बोधं त्रयीसारं सनातनम् ॥३५॥
शब्दतोऽपि परिज्ञातं शुभं सुष्टु प्रयच्छति ।
अर्थतश्च परिज्ञातं मोक्षमेव प्रयच्छति ॥३६॥
शब्दार्थमयमेतद्धि कृतकल्पफलं लभेत् ।
गुरुणा विदुषा दत्तं सद्यो वाञ्छितदायकंम्[1] ॥३७॥
धारयेत् सततं मूर्ध्नि मुक्ति सायुज्यभाग्भवेत् ।
रामभक्ताय दातव्यं[2] नान्यस्मै तु कथंचन ॥३८॥
रामभक्ताय मुनये रामलीलाविनोदिने ।
पवित्रवपुषे वाच्यं मेधाविने द्विजन्मने ॥३९॥
मृत्युञ्जयकरी विद्या रामगीता मनोरमा ।
सेवनीया प्रयत्नेन नित्या सिद्धा[3] सनातनी ॥४०॥
श्रीरामसहजानन्द पुराणपुरुषोत्तम ।
प्रपन्नपारिजातेश पाहि मामित्युदीरयेत् ॥४१॥
श्रीरामः शरणं ममेति परमो मन्त्रोऽयमष्टाक्षरः
स्मर्तव्यः सततं निवेद्य सहसा स्वात्मानमस्मै मुहुः ।
श्रीरामः सहजापतिः सकलमित्याभाषमाणो गिरा
त्यक्त्वा कृत्यमकृत्यमेतदखिलं चिन्मात्रसंस्थो भवेत् ॥४२॥
गीतामिमां यः पठति प्रयत्नात् सत्संहितां मामकीं मामको यः ।
प्रेमावत्या भाषया भाषमाणो जनः स्वयं जन्म कृतार्थयेत् सः ॥४३॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे रामयात्रायां
रामगीतामहोपाख्याने एकोनषष्टितमोऽध्यायः ॥५९॥

॥ [4]समाप्ता चेयं रामगीतोपनिषत्संहिता[4] ॥

●

१. अयंश्लोको नास्ति–अयो० । २. रामभक्ते प्रकर्तव्यं–मथु०, बड़ो० । ३. साध्य°—रीवाँ । ४–४. नास्ति-रीवाँ ।

षष्टितमोऽध्यायः

ब्रह्मोवाच

इत्येवं गोपकन्याभ्यः स्वकान्ताभ्यः कृपावशः ।
दिव्यगीतामृतं नाम पाययित्वा रघूद्वहः ॥ १ ॥
तां रात्रिं तत्र चैताभिः सुन्दरीभिर्मदात्मना[1] ।
चकार विविधां केलीं विविधालापभूषिताम् ॥ २ ॥
सुखिताय गवेन्द्राय माङ्गल्यायै महात्मने ।
अन्येभ्यश्चैव गोपेभ्यो गोपीभ्यश्च स्वयंप्रभुः ॥ ३ ॥
साक्षान्निदर्शयामास स्वं लोकं प्रकृतेः परम् ।
यत्र सच्चित्सुखाकारो राजते करुणानिधिः ॥ ४ ॥
सत्यज्ञानानन्तमयं यद्धि ब्रह्म सनातनम् ।
गुणात्यये प्रपश्यन्ति यद्रूपं मुनिसत्तमाः ॥ ५ ॥
ब्रह्मरुद्रे सारवाख्ये ब्रह्मतीर्थे सुधोपमे ।
मज्जयित्वा व्रजं सर्वं निजं लोकमदर्शयत् ॥ ६ ॥
चिदानन्दमयं साक्षात् ब्रह्मरूपं सनातनम् ।
नित्येच्छावैभवानन्दावयवोपेतवस्तु यत् ॥ ७ ॥
तस्मिन् लोके स्वरूपं च स्तूयमानं सुर्षिभिः ।
छन्दोभिर्मूर्त्तिमद्भिश्च समुपासितविग्रहम् ॥ ८ ॥
सहजानन्दिनीं सीतां कोटिलक्ष्म्याद्युपासिताम् ।
साकेतनगरीं चैव प्रमोदवनमुत्तमम् ॥ ९ ॥
स्वात्मानं चैव ते गोपाः समपश्यन् पृथक् पृथक् ।
नित्यं व्रजस्थ[2]लीलाभिः समुपेतं च राघवम् ॥१०॥
तद् दृष्ट्वा सकलं गोपो गवेन्द्रः स्तुतिमाचरत् ।

सुखित उवाच

नमस्ते राघवानन्त नित्यश्रीविग्रहाकृते ।
न त्वां जानन्ति वेदाश्च किमुतान्ये वराककाः ॥११॥

---

१. मदाममं - अयो० । २. व्रजस्था—अयो०, रीवाँ ।

न ते लीलां विदुर्ब्रह्मन् पुरुषोत्तम सत्पते ।
न ते रूपं विदुर्देवा ब्रह्माद्या अपि संततम् ॥१२॥

साकेतनगरे चैव[1] कोशलाख्ये पुरोत्तमे ।
श्रीसरयूवने[2] चैव प्रमोदविपिने तथा ॥१३॥
एकस्त्वमेव नित्याभिर्लीलाभिः परिशोभसे ।
लीलायाश्च न ते हेतुर्निगमैरपि बुध्यते ॥१४॥

नित्या चिदानन्दमयी यथासि त्वं तथैव सा ।
सवितुस्तद्वरेण्यं त्वं भर्गः स्वभगवत्तया[3] ॥१५॥
देवस्य धीमहीक्षां[4] ते धियो यो नः प्रचोदयात् ।
श्रीरामं सच्चिदानन्दं भक्तोद्धृतिकृतिक्षमम् ॥१६॥

स्वरूपानन्ददानायेदृशं संसेवयेऽ[5]निशम् ।
राघवस्य गुणोत्कर्षः सर्वावतरणेषु यः ॥१७॥
अधुना स प्रविज्ञातः स्वरूपानन्ददर्शनात् ।
स्वरूपजनितानन्दरमणोत्कर्षहेतुकम् ॥१८॥

रामेति भवतो नाम नान्यावतरणेऽभवत् ।
येऽन्ये ह्याननृसिंहमुखाः परस्य
पूर्णस्य राम पुरुषोत्तम तेऽवताराः ।
तेषामयं परिवृढः[6] खलु रामनामा
भाते[7] स्वयं स भगवान् रघुनन्दनस्त्वम् ॥१९॥

तत्ते चिदानन्दमयं सनातनं धामोद्धुरं[8] वेदविदामगम्यम् ।
प्रकाशते यत्सहजं मुनीनां हृदन्तराले वशिते योगभक्त्या ॥२०॥

तद्भावयामि भवतो विदितं त्रिवेद्यां
ब्रह्मात्मकं चरणमेकमखण्डवीर्यम् ।

---

१. °नगरोमध्ये—रीवाँ । २. वने = 'जले' टि०—मथु०, बड़ो० । ३. "स्वस्य भगवत्त्वेन यत् सवितुः सूर्यस्य वरेण्यं तेजस्तत् ध्येयं भर्गः" टि०—मथु० । ४. "ईक्षां दर्शनं ध्यायेमः" टि०—मथु० । ५. मदंशेवनसे—रीवाँ । ६. परिदृढः—अयो०, परिवृतः—रीवाँ । ७. भाति—रीवाँ । ८. "उद्धुरं धाम स्वरूपं" टि०—मथु० ।

भूतानि यस्य सकलानि स एकपादः
किंच त्रिपादमृतमूर्ध्वमुदै[1]द्वरिष्ठम् ॥२१॥
श्रीराघवेन्द्र भवतश्चरितं तुरीयं[2]
तुर्यात्मनां प्रकृतिपूरुषयोः परं यत् ।
तद्भासते भुवनभूषणभूतमात्र-
प्रोद्धार[3]साधनमशेषगिरां पदं तत् ॥२२॥

गोपा ऊचुः

नमो नः साधवे सख्ये श्रीरामाय महात्मने[4] ।
यस्य भरतशत्रुघ्नलक्ष्मणा भ्रातरो मताः ॥२३॥
भवांश्चतुर्व्यूहतनुः पुराणः श्रीमान् परः पूरुष एव कश्चित् ।
चत्वार[5] एतेऽवयवाः स्फुरन्ति श्रीवासुदेवादय एव यस्य ॥२४॥
आद्यःस देवोऽसि विशिष्य[6] मुक्तानन्दप्रदः सन्मय एव पूर्णः ।
यस्यान्तरं नो न बहिर्न मध्यं श्रीरामचन्द्रः सकलं तदेतत् ॥२५॥
त्वं स द्वितीयः पुरुषोऽसि भामन्[7] कालात्मकः शिष्यते यः स शेषः ।
वेदात्मकः शब्दमयः स पूरुषो यत्राखिलो निहतो भाति धर्मः ॥२६॥
कामोऽसि लोकस्य भवान् स्मरो यः प्रवर्तको लोकचक्रस्य नित्यम् ।
तं त्वां परं पूरुषमादिसर्गे प्रभुं प्रपन्नोऽस्मि विशिष्टभक्त्या ॥२७॥
त्वमेव देवोऽस्यनिरुद्धनामा धर्मात्मकः सर्वधर्मैकरक्षी ।
यस्यानिशं भाति परं स्वरूपं क्षीरोदसिन्धोः पुलिनैः प्रकाशम् ॥२८॥
त्वं पञ्चमः संप्रथितोऽसि तेषां धर्मो कलाभिः समताभिराढ्यः ।
प्रमुद्वने यो ललनासहस्रलीलागणैः सेवित एव नित्यम् ॥२९॥

गोप्य ऊचुः

नमो राघववर्याय रामाय रमणात्मने ।
रमासहस्रसेव्याय रामाय श्रीपरात्मने[8] ॥३०॥

१.°पदं—रीवाँ । २. यतीनां—रीवाँ । ३. °मात्रनिष्कार°—रीवाँ । ४. श्रीराम-परमात्मने—रीवाँ । ५. चत्वारि—रीवाँ, मथु०, बड़ो० । ६. विशिष्ट°—अयो०, रीवाँ । ७. भक्तः—रीवाँ । ८. श्रीराघवे—अयो०, श्रीशविष्णवे— मथु०, बड़ो० ।

यो नः पतिः प्रमुदकाननकुञ्जभूमौ
पाणिग्रहेण विधिना विधिवद्गृहीतः ।
स त्वं रमारमण एव विशेषतोऽद्य
विज्ञात एव परमः पुरुषोत्तमो यः ॥३१॥
स्त्रीणां नः परमैव त्वं गतिर्भव जगत्पते ।
पञ्चेषुरूपलावण्यं हरन् सौन्दर्यभूषितः ॥३२॥
मोहिका मन्मथस्यापि या ते लीला स्मरोद्धता ।
सा नो विषयतां याता धत्ते जगति मण्डलम्[1] ॥३३॥
यस्त्वं चिदानन्दमयो रामो रमणकोविदः ।
स एव वल्लभोऽस्माकं पूर्णः श्रीपुरुषोत्तमः ॥३४॥
नित्यं रमाम भवता सह कामलीला-
विस्तारणैकचतुरेण नरोत्तमेन ।
उत्कण्ठिता इति वयं रघुराज युष्म-
त्पादारविन्दयुगलाश्रयणैकदास्यः ॥३५॥
इत्येवं भाषमाणेषु व्रजवासिषु साधुषु ।
भक्त्या प्रसीदद्धृदयः समवोचत् स्मिताननः ॥३६॥

श्रीराम उवाच

व्रजवासिजना यूयं धन्याः स्थ बहुमङ्गलाः ।
यन्मम प्रियतां याता मृत्योर्मूर्ध्नि समासते ॥३७॥
न कालो न मायापि युष्मासु शक्तो मम क्रीडितानन्दपात्रेषु सत्सु ।
यथा मत्स्वरूपं तथा यूयमद्धा परे व्यापिवैकुण्ठधामानुपेताः ॥३८॥
इत्येवं सरयूक्षेत्रे प्रभाते मज्जतां नृणाम् ।
अनुभाव्य स्वयं रामः स्वं लोकं प्रकृतेः परम् ॥३९॥
सुखितस्य गृहाद्गन्तुमयोध्यामुपचक्रमे ।
कृतस्वस्त्ययनो रामो भ्रातृभिः सहितो युवा ॥४०॥
प्रयाणे रथमारोढु[2]मिच्छुस्तातं समब्रवीत् ।
हे तात सुखित श्रीमन् गवेन्द्र व्रजनायक ॥४१॥

---

१. मंगलम्—मथु०, बड़ो० । २. °मारुढ°—अयो०, रीवाँ ।

दाशरथीं पुरीं गन्तुमनुजानीहि मां प्रभो ।
युष्माकं सदनेष्वद्धा[1] चिरमध्युषितं मया ॥४२॥
[2]दधि दुग्धं च मिष्टान्नमश्नता प्रीणतानुजैः[2] ।
स्थित्वा शुभेषु भवतीसदनेषु[3] नित्यं
यत्क्रीडितान्यहमकारिषमात्तवेदः[4] ।
गास्यन्ति तानि मुनयोऽपि परार्द्धपारे[5]
संख्यापितानि निगमैः कुशलान्वितानि ॥४३॥
भवतां चापि नामानि कतिदोषहराण्यतः ।
कीर्तयिष्यन्ति मनुजास्त्रिषु लोकेषु तत्त्वतः ॥४४॥
मातर्माङ्गल्यके यत्त्वं पालयामास नः सुतान् ।
तद्वयं बलिनो जाता जेष्यामो भुवनद्विषः ॥४५॥
अनुजानीहि मां भद्रे साकेतपुरगन्तवे ।
पराजिष्ये रिपून् सर्वान् भवतां कीर्तिवर्द्धनः ॥४६॥
ताःश्रोष्यथ मम क्रीडाविषयान् पुरि[6] तिष्ठतः ।
यानुद्गाय परांप्रीतिं ममेष्यथ वनौकसः ॥४७॥
युष्माभिर्नंच बोध्योऽहं विश्लिष्टो जनकानने ।
नित्यं हि निवसाम्यत्र प्रमोदवनमध्यतः ॥४८॥
इत्याभाष्य मिथो बन्धून् परिरभ्य पुनः पुनः ।
परिरब्धश्च तै रामो रथोपस्थमुपाविशत् ॥४९॥
भ्रातरः परितो रामं तस्थिरे रथभूमिषु ।
शङ्खभेरीमृदङ्गाश्च समवाद्यन्त भूरिशः ॥५०॥

श्रीरामः सुखितगवेन्द्रघोषमध्यात् साकेतं व्रजति निदेशतः पितृभ्याम् ।
आकर्ण्येत्यमरवधूकदम्बकेन प्रेक्षार्थं सपदि जवेन तत्र जग्मे[7] ॥५९॥

विमानावलिभिर्व्योम समंतात्परिवारितम् ।
रामेन्दुं वीक्ष्यमाणानां देवानां चैव वर्ष्मभिः ॥५२॥

---

१. शुद्धा—अयो०, रीवाँ । २—२. नास्ति—अयो० । ३. °निलयेषु—मथु० बड़ो० । ४. "अंगीकृतलीलारहस्य इति चित्सुखा०" टि०—मथु० । ५. °पारा—रीवाँ । ६. °यानपि—रीवाँ । ७. श्रुत्वा—रीवाँ ।

अजायत महानेव संभ्रमो व्योम्नि च क्षितौ ।
गच्छतां रामगोपानां साकेतनगरीं पथि ॥५३॥
गोपान् निजसखीन् रामः सरामोऽप्यपृथक् पृथक् ।
स्यन्दनेषु सुवर्णेषु जगाम रघुपुङ्गवः ॥५४॥
असज्जन्त ध्वजगजाः स्वर्ण[1]पल्याणिनो हयाः ।
पत्तयः समकादन्त[2] रथाश्च विपुला ययुः ॥५५॥
मन्त्री दशरथेन्द्रस्य महत्या सेनया वृतः ।
अनुराजकुमारं तं ययौ सुखितपूजितः ॥५६॥
रथधूलिरजोरेखा यावत् संदृश्यते दिवि ।
तावद् गोपालनार्य्यस्ताः सौधाग्रेष्वलमासत ॥५७॥
रथे दूरं गते पत्युरवतेरुर्व्रजाङ्गनाः ।
श्रीरामविरहक्लेशदुःप्रेक्ष्ये दूरतोऽबलाः ॥५८॥
तद्गुणानेव गायन्त्यो विवृद्धस्नेहवार्धयः ।
कुञ्जे कुञ्जे रटन्त्यस्ता नात्मगेहानि सस्मरुः ॥५९॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे
रामयात्रायां षष्टितमोध्यायः ॥६०॥

●

एकषष्टितमोऽध्यायः

ब्रह्मोवाच

गृहप्रवेशविधिना कुमारं समवेशयत् ।
राजा दशरथः प्रीतः कुमाराननदर्शनात् ॥ १ ॥
दृष्ट्वा स चतुरः पुत्रान् प्रीतोऽभवदरिन्दमः ।
अमन्य[3]तैष मे बालो रावणादीन् हनिष्यति ॥ २ ॥
अहो अत्यद्भुतं तेजो रामचन्द्रस्य शोभते ।
अनेन नो गृहं स्पृष्टं त्विषा वितिमिरीकृतम् ॥ ३ ॥

---

१. असज्जंत गजाः स्वर्णकक्षाः—रीवाँ, २. यत्र यः शिविकादंत°—रीवाँ।
३. "तदानीमेवालौकिकतेजोदर्शनेन माहात्म्यज्ञानं जातमिति भावः। अग्रे वात्सल्यनिर्वाहस्तु भगवल्लीलयैवेति चित्सुखीः" टि०—मथु०, बड़ो०।

अहो सुजनुषा[1]मेषां रक्षायै सुखितालये ।
अकारिषं स्थितिमहं पुनरेते कुतोभयाः ॥ ४ ॥
कालस्थायिनियन्ता यः[2] पुरुषः प्रकृतेः परः ।
स एव रामदेवोऽयं कथं साधारणो भवेत् ॥ ५ ॥
अनेन नः कुलं सौरं विशेषाद्विमतीकृतम् ।
तेजसामपि तेजो यत् स रामः पुरुषोत्तमः ॥ ६ ॥
नायं जनो नापि सुरो न यक्षो नापि लौकिकः ।
अलौकिकं महः पूर्णं रामशब्देन कथ्यते ॥ ७ ॥
दृष्ट्वास्य वदनाम्भोजं चिरं नयनयोर्मम ।
संजाता परमा प्रीतिः किमेतावद् गतं जनुः ॥ ८ ॥
अहो सुखितगोपस्य भाग्यं पारमुपागतम् ।
यच्छैशवैऽस्य वदनं प्रीत्या परिचुचुम्ब सः ॥ ९ ॥
अहो माङ्गल्यया नित्यं लुण्ठितः सुखवारिधिः ।
यदस्य मुखचन्द्रस्य पपौ पीयूषमादरात् ॥१०॥
सुकुमारममुं बालं राक्षसो धर्षयेदिति ।
न्यस्तवान् सुखितागारे श्रीराममकुतोभयम् ॥११॥
[3]भीषास्मान् मारुतो वाति भीषेदिति दिवाकरः ।
भीषेन्द्रश्चैव वह्निश्च मृत्युर्धावति पञ्चमः ॥१२॥
अयं कालस्यापि कालो दैवतस्यापि दैवतः ।
जानेऽहं सकला गायन्त्यमुमेव श्रुतेर्गिरः ॥१३॥
एष साक्षात् स्वयं रामो जातः प्रीत्या मदालये[4] ।
वासुदेवादिभिः स्वांशैः पूरितः शर्मकृन्नृणाम् ॥१४॥
नमो[5]ऽस्त्वमुष्मै पुरुषाय मूर्त्तये कलाविलासप्रकरैकमूर्त्तये ।
लोकाभिरामाय विलासिने नमो रामाय श्यामाय नमोऽस्तु संततम् ॥१५॥

---

१. स्वजनुषा°—रीवाँ । २. अयं—रीवाँ । ३. "ब्रह्मस्वरूपं ज्ञात्वा श्रुत्यर्थतयोपवर्णयतीति चित्सु०" टि०—मथु० । ४. "अवतारात्पूर्वमपि मूलचरित्रकारित्वान्नित्यमेव रामेतिनामेति चित्सु०" टि०—मथु० । ५. अहो अमु०—मथु०, बड़ो० ।

यस्य या सहजा शक्तिः सा श्रीः सर्वाङ्गसङ्गिनी ।
अयं च भगवान् पूर्णो दत्तं दृगवलम्बनम् ॥१६॥
यौवराज्यस्य बालस्य नाहं सर्वर्द्धिमानपि ।
शक्नोमि भवितुं राजा प्रभामण्डलधर्षितः ॥१७॥
तस्मादेनमिहाभिषिच्य सुखदं साकेतराज्ये चिरं
पूर्वैः पालितधर्मसेतुसदृशे सद्धर्मशर्मालये ।
अस्यैव प्रणयप्रकाशवपुषो[1] ध्यानात्परब्रह्मणो[2]
वानप्रस्थ्यमहाश्रमं सफलयाम्यस्मिन् रघूणां कुले ॥१८॥

अथवा पुरुषोत्तमस्य साक्षाद्रघुनाथस्य परावरेश्वरस्य ।
तनयेतिधियैव साधयानि प्रभुतः स्वात्मसुखं पराद्धर्यसंख्यम् ॥१९॥
अयमद्भुतरूपसौख्यराशिः फलितः संकलितश्च मे दृशाद्य ।
तत एव परां श्रियं भविष्ये यदिहामुष्मिकवस्तुसारभूतम् ॥२०॥

यथायं[3] पुरुषो जातः पुत्ररूपेण मद्गृहे ।
आज्ञापयिष्यति तथा करिष्यामि न संशयः ॥२१॥
कोऽहं कर्ता बराकः सन् प्रभुरेव करिष्यति ।
इत्येवं ज्ञाततत्त्वार्थः प्रावर्तत स राघवः ॥२२॥
एकतः कर्षति स्नेहो माहात्म्यज्ञानमेकतः ।
उभयोरन्तरे राजा रञ्जयामास मानसम् ॥२३॥
कौशल्यापि स्वसदनगतं रामचन्द्रं कुमारं
नीराज्यार्त्तिः सुभगरुचिभिर्दीपिकाभिः प्रकामम् ।
आरोप्याङ्के मदनमदहृद्रूपलावण्यलीलम्
स्निग्धोद्भूतं प्रणयहृदया हृष्टरोमा चुचुम्ब ॥२४॥
एवं भरतशत्रुघ्नलक्ष्मणानपि मातरः ।
नीराज्य निर्मञ्छयामासुर्मणिमुक्तादिकं धनम् ॥२५॥
रामे निर्मञ्छिताः सद्यः पितृभ्यां रत्नराजयः ।
नभोगतानि तान्येव नक्षत्राण्यरुचन्न वा ॥२६॥

---

१. °वपुषे—मथु०, बड़ो० । २. °ब्रह्मणे—मथु०, बड़ो० । ३. यथाहं—अयो०, मथु०, बड़ो ।

तत्राशिषः प्रयुञ्जानाः कुमाराणां चतुष्टये ।
प्रादुर्बभूवुस्त्रिदशास्तथैव च महर्षयः ॥२७॥
समवादयन्त पटहा भेर्यो दुन्दुभयस्तथा ।
रामचन्द्रसुखालोके प्रजानां प्रीतिवर्धने ॥२८॥
कृतपुण्याहवचनाश्चत्वारो राजनन्दनाः ।
व्यरोचन्त सभामध्ये मूर्तिमन्तो मनोरथाः ॥२९॥
कृतकुण्डलविन्यासा वलयानद्धबाहवः ।
केयूरोल्लासदोर्दण्डाश्चित्रोष्णीषकिरीटिनः ॥३०॥
हेमकञ्चुकलिप्ताङ्गा निषङ्गोग्रा धृतासयः[1] ।
झङ्कारितधनुर्ज्यास्ते कलितोत्साहवृद्धयः ॥३१॥
व्यरुचन् रघुशार्दूलाः पितुः सन्निधिसेविनः ।

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे अयोध्यागमनं नाम एकषष्टितमोऽध्यायः ॥६१॥

❁

द्विषष्टितमोऽध्यायः

ब्रह्मोवाच

यौवराज्ये स्थितो रामः शोभयामास भूतलम् ।
चक्षूंषि रञ्जयामास मनुजानां च पश्यताम् ॥ १ ॥
राजा दशरथः प्रीत्या संप्राप्य सुतदर्शनम् ।
अपूर्वपदलावण्य[2]दर्शनाद्विस्मितोऽभवत् ॥ २ ॥
दिने दिने स्नेहमानः स्नेहो जनकभूभुजः ।
अलौकिके चिदानन्दे पुरुषे सफलोऽभवत् ॥ ३ ॥
उद्भवेज्ञानमाहात्म्यं शंखचक्रादिदर्शनात् ।
तनयत्वेन मेने स रामं नित्यशुभाकृतिम् ॥ ४ ॥

---

१. निषङ्गधृतसायकाः—रीवाँ । २. °लावण्यलाभ°—रीवाँ ।

तथापि जनतानन्दसंदोहाभिनवाङ्कुरे ।
नान्यसाधारणो रामे बभूव स्नेहसागरः ॥ ५ ॥
कदाचिन्नृपतिः कृत्वा हरिनन्दातिथिव्रतम् ।
कलार्द्धं द्वादशीं ज्ञात्वा निराशः कृतजागरः ॥ ६ ॥
अनुल्लङ्घ्यासुरीं वेलां सरयूतीर्थमभ्यगात् ।
स्नातुं प्रविष्टं तं तीर्थेऽहरद्भृत्यः प्रचेतसः ॥ ७ ॥
अदृष्ट्वा नृपतिं भृत्याश्चक्रुः कोलाहलं मिथः ।
हा हा कुत्र गतो राजा पश्यतां नः सविग्रहः ॥ ८ ॥
कौशल्यानन्दनो ज्ञात्वा जनकं यादसा हृतम् ।
तत्सन्निधिमगात् पूर्णं प्रविश्याम्बुनि सारवे ॥ ९ ॥

तं दिव्यरत्नमणिहेमकिरीटजुष्टमूर्धानमुल्लसितपद्मदलायताक्षम् ।
मुक्तागणस्रजमुदारमुरोवहन्तं श्यामं ददर्श वरुणः सहसैव रामम् ॥१०॥

प्राप्तं तमीशमखिलस्य भवस्य भव्यं
राजीवलोचनमसावधिगम्य रामम् ।
देवाधिदेव इति राममुदा सपर्यां
चक्रे स दिव्यमणिमौक्तिकरत्नपुञ्जैः ॥११॥

वरुण उवाच

अद्य मे पावितं वेश्म चरणाम्भोजरेणुभिः ।
तस्य स्पर्शाच्छिरश्चैव गात्रं पावनहेतुभिः ॥१२॥
अद्यैव सफलं वर्ष्म चक्षूंषि सफलानि नः ।
समन्ताद्वीक्ष्यमाणानां श्यामं सुन्दरविग्रहम् ॥१३॥
अवितर्क्योऽसि पूर्णोऽसि स्वयंज्योतिरसि प्रभो ।
तथाप्यवतरन्नृणां तनुषे सगुणां धियम् ॥१४॥
ते गुणानां न संगोऽस्ति ब्रह्मणः परमात्मनः ।
तथापि कृपया देव दृश्योऽसि जगतो दृशः ॥१५॥
त्वत्संगिनी दृशिरसौ रघुवंशकेतो
चेतोगतिः समतिवर्त्य जयन्ति शश्वत् ।

इच्छावशात्तव कृपामृतसागरस्य
भूयो जवेन जनतां भृशमुद्विधोर्षोः[1] ॥१६॥
न तेऽस्ति माता न पिता कुतस्ते सहोदरा बन्धवोऽव्यक्तमूर्त्तेः ।
तथापि लीलामधिगम्य रम्यां सर्वस्वरूपो भवसीश सद्यः ॥१७॥
त्वमेव सुखितो गोपो माङ्गल्या च त्वमेव हि ।
त्वमेव गोप्यो गोपाश्च त्वं प्रमोदवनं हरे ॥१८॥
त्वमयोध्यापुरी विष्णो त्वं वै दशरथो नृपः ।
त्वं कौशल्या च सा माता लीलामानुषविग्रहः ॥१९॥
वैकुण्ठवासी देवेश तवैवांशो रमापतिः ।
यः क्षीरसागरे शेते निगमैः समभिष्टुतः ॥२०॥
यश्च वेदमयो देवो भगवानक्षरात्मकः ।
स्वराट् सहस्रवदनः सा ते मूर्तिर्गिरात्मिका ॥२१॥
नमस्ते रामचन्द्राय कल्याणगुणसिन्धवे ।
परमानन्दकन्दाय परमज्योतिरात्मने ॥२२॥
भूर्भुवःस्वःस्वरूपाय विराजपुरुषाय ते ।
महते विश्वरूपाय परस्मै प्रकृतेर्नमः ॥२३॥
इत्यभिष्टूय सर्वज्ञो रामचन्द्रं रघूद्वहम् ।
प्रचेताः सहसात्मानं पातयामास पादयोः ॥२४॥
उत्थापयामास समार्त्तबन्धुः प्रचेतसं राघवसार्वभौमः ।
तमुत्थितः पाशधरो ददर्श धनुर्धरं कञ्जविशालनेत्रम् ॥२५॥
रामचन्द्र इति ज्ञात्वा नत्वा चैव पुनः पुनः ।
नृपं दशरथं नत्वा समर्प्य प्रभवे ततः ॥२६॥
विसर्जयामास पुराद्रामं त्रिभुवनेश्वरः ।
राज्ञा सहोन्मज्जासौ पश्यतां सरयूजले ॥२७॥
प्रत्यङ्गं भूषितो रत्नैर्वरुणेनोपदीकृतैः ।
आनन्दमज्जनांस्तत्र आनीय पितरं जवात् ॥२८॥

---

१. °मसि भावबंधुः—रीवाँ ।

तदा जयेति निर्घोषोऽभवत् साकेतपत्तने ।
पुत्रप्रभावेणानीतो राजा दशरथः पुनः ॥२९॥
अहो रामस्य सामर्थ्यं निन्ये मां वरुणालयात् ।
इति चित्रान्वितो राजा बभूव भृशहर्षितः ॥३०॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दशरथानयनं नाम द्विषष्टितमोऽध्यायः ॥६२॥

त्रिषष्टितमोऽध्यायः

ब्रह्मोवाच

अथागमन्मधुर्दिव्यमाधवीमधुगन्धभृत् ।
मधूकप्रसवामोदगुञ्जद्भ्रमरसंभवः ॥ १ ॥
कूजत्कोकिलकादम्बशिखण्डिगणनादितः ।
मन्दैर्मलयजैः पा(वा ?)तैराकाम्पितलतागृहः ॥ २ ॥
फुल्लर्तिकशुककान्तारः शुकास्यकुसमाकरः ।
रसालमञ्जरीपुञ्जमञ्जुलीकृतकानन:[1] ॥ ३ ॥
पुंस्कोकिलरवाकीर्णदिगन्तकुटिकागणः ।
किंचिद्धिमसमुद्भेद[2] विकस्वरदिवाकरः ॥ ४ ॥
फुल्लनीरजसौरभ्यसंभारसुरभीकृतः ।
गङ्गातरङ्गशिशिरमरुल्लहरिसौख्यदः ॥ ५ ॥
पुरनारीजनाक्रान्तदोलोत्सवविशारदः ।
अमुमेवंविधं दृष्ट्वा नृपतिः कुसुमाकरम् ॥ ६ ॥
श्रीरामं रमयामास आरामेषु रमासखम् ।
कर्पूरचूर्णसंदोहैः कस्तूरीरजसां चयैः ॥ ७ ॥
सिन्दूररेणुसंव्रातैर्दिव्यभुवनपयोधराः ।
रक्तैः केलिरजोभिश्च क्रीडा जाता परस्परम् ॥ ८ ॥

---

१. °कामलः—रीवाँ । २. "किंचित्पुष्पसमुद्भेद" इत्यधिकः पाठः—रीवाँ ।

सरय्वाः पुलिने दिव्ये मुक्ताकुञ्जे मनोहरे ।
अभूत् केलिसमारम्भो रामस्य सखिभिः सह ॥ ९ ॥
तेषामुद्गीयमानानां संक्रीडारजसां भरैः ।
नभश्छन्नमभूद् भूयो रक्तैरम्बुधरैरिव ॥१०॥
भुञ्जाना विविधान् भोगान् खेलमानाः परस्परम् ।
अभिरामस्य रामस्य सखायो रेमिरे मिथः ॥११॥
पल्लवैः कुसुमैः स्तोमैः कन्दुकैः कोमलैः फलैः ।
केलीं संवर्धयामासुश्चत्वारो रघुपुङ्गवाः ॥१२॥
स्वयं दशरथो राजा गन्धर्वैरुपवीणितः ।
रेमे वसन्तसमये कौतुकी तनयैः सह ॥१३॥
वसन्तोत्सवमालोक्य रामस्य कुतुकान्वितम् ।
ब्रह्माद्या मुमुहुर्देवा नन्दिताश्चाभवन् मुदा ॥१४॥
तस्मिन् दिव्योत्सवे राममासीनं भूभृता सह ।
उपवीण्यमानं गन्धर्वैः प्राप्तश्छायामयोऽसुरः ॥१५॥
संकिरंस्तामसीं छायां छादयामास तां सभाम् ।
यत्रासते ते भरतरामलक्ष्मणशत्रुघ्नाः ॥१६॥
तस्यासुरस्य छायाभिर्मूर्छिता अभवंस्तदा ।
एकं राममृते सर्वे सभास्तारा[1] मधूत्सवे ॥१७॥
रामो विज्ञाय तां मायामसुरस्य दुरात्मनः ।
चुक्रोध तद्वधं कर्त्तुं प्रभुस्त्रिभुवनेश्वरः ॥१८॥
शरासने शरं घोरं संयोज्य रिपुदर्पहा ।
तं राक्षसं मर्मदेशे जघान नृपनन्दनः ॥१९॥
स हतस्तस्य बाणेन पृथक् छायामयीं तनुम् ।
अपतद्दर्शयन् घोरं दुर्दर्शं विपुलं वपुः ॥२०॥
पुनस्तमेकेन शरेण हत्वा प्रक्षेपयामास बलाद्रघूद्वहः ।
यथा स उड्डीय पपात सिन्धौ समुच्छलल्लोलतरङ्गमाले ॥२१॥

---

१. समस्तास्ते—रीवाँ ।

तस्य कण्ठोद्गतं तेजो रामस्य चरणाम्बुजे ।
प्रविवेश पतत्तारातेजःपुञ्जः प्रभासुरः ॥२२॥
तच्चित्रमिव संजातं विमानस्थदिवौकसाम् ।
क्षणाल्लब्धप्रबोधानां तत्रस्थानां तथा नृणाम् ॥२३॥
लक्ष्मणो भरतश्चैव शत्रुघ्नश्च निरीक्ष्य तत् ।
भूयो जयेत्यभिदधौ श्रीरामस्य पृथक् पृथक् ॥२४॥
न तत्रान्यस्य सामर्थ्यं यच्छायासुरमारणम् ।
विना रामं घनश्यामं महावीरं धनुर्धरम् ॥२५॥
अयं छायासुरो नाम राक्षसस्तामसीसुतः ।
देवान् रणे पराभूय त्रैलोक्यं बुभुजे पुरा ॥२६॥
नार्को नेन्द्रो न वा ब्रह्मा न शिवो नेतरः सुरः ।
अमुं नाशयितुं शक्तो मायाच्छायामयं रिपुम् ॥२७॥
अविद्या जगतो ह्येषा व्यूढं छायामयं तमः ।
अमारयद्घोररूपं रामभद्रः स्वतेजसा ॥२८॥

इत्युच्चकैः समभिधाय सुराः सहर्षाः
श्रीराममूर्ध्नि सुरपादपपुष्पवृष्टिम् ।
चक्रुः स्तवं त इममेव गिरां समूहैः
सत्संभ्रमेण दिवि दुन्दुभिनादपूर्वम् ॥२९॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे छायासुरवर्णनं नाम त्रिषष्टितमोऽध्यायः ॥६३॥

चतुष्षष्टितमोऽध्यायः

ब्रह्मोवाच

कुसुमाकरमुत्फुल्लं द्रष्टुकामो रघूद्वहः ।
कुञ्जाभ्यन्तरकुञ्जेषु गह्वरेषु विवेश ह ॥ १ ॥
सेव्यमानं सुखस्पर्शैर्वातैर्मलयगन्धिभिः ।
ददर्श कौतुकी रामो वसन्तवनजां श्रियम् ॥ २ ॥
सहकारतरून् दृष्ट्वा भूरिमञ्जरितान् प्रभुः ।
मेने विषशरैर्युक्तमधिज्यं म (मा ?)न्मथं धनुः ॥ ३ ॥
हेमकेतकिपुष्पौघैर्धूरिपूरैः समंततः ।
तमोऽन्धकारितं वीक्ष्य मेने स्मरचमूद्धतिम् ॥ ४ ॥
उत्फुल्लपङ्कजामोदभ्रमद्भ्रमरसंकुले ।
कुञ्जवीथीपथे रामश्चलितुं नाशकज्जवात् ॥ ५ ॥
लतासु वृक्षेषु तथा क्षुपेषु[1] गुल्मेषु पुष्पप्रचयाकुलेषु ।
इतस्ततो दृष्टिसुखं विचिन्वन् सस्मार रामः सहजां स्वचित्ते ॥ ६॥
स्मराशुगैर्विद्धमना रघूद्वहो युवा सरोजच्छदनायतेक्षणः ।
तत्याज सामान्यजनान् स्वसंगिनस्तमेव तस्थुः सविधे सखायः ॥ ७॥
ये भुक्तिपानपविधानविहारलीला-
नर्मक्रियादिषु सदा सविधे वसन्ति ।
शुद्धान्वयप्रवरराजकुमारवर्या
आज्ञाकराः प्रणयिनं सहसोपचेरुः ॥ ८ ॥
नानादेशाधिनाथानां ये वै राजकुमारकाः ।
तेषां प्रसादपात्राणि मित्राणि द्वित्रिसंख्यकाः ॥ ९ ॥
पीठमर्दा विटाश्चेटा नर्मदाश्च विदूषकाः ।
इत्येवं गोदुहां बालास्त आसन् रामपार्श्वगाः ॥१०॥

---

१. "ह्रस्वशाखाशिफः क्षुपः" टि०—मथु०, बड़ो० ।

केचिन्नवदलैः शय्यां रचयामासुरद्भुताम् ।
केचिच्च कल्पयामासुर्मृणालीभिरुरस्रजः ॥११॥
केचित् कमलपत्रैस्ते परिवव्रुः पटैरिव ।
प्रसूनमकरन्दाद्यैः शीतलैः केचिदाकिरन् ॥१२॥
केचिच्छायासु सान्द्रासु वीजयामासुरीश्वरम् ।
केचिदातपरोधार्थमातपत्रं दधुः प्रभोः ॥१३॥
सहजानन्दिनीकान्ताविश्लेषव्यथितान्तरम् ।
पटु क्षामं च ते रामं दृष्ट्वा वचनमब्रुवन् ॥१४॥

कुमारा ऊचुः

राम राम महाबाहो कोऽयमाधिस्तवान्तरे ।
प्रत्यङ्गरुग्णतामेष सत्स्वस्मासु महाप्रभो ॥१५॥
त्वदाज्ञावशगानां नो नालभ्यं भुवनत्रये ।
तदाज्ञापय राजेन्द्रकुमारास्मान् स्वसेवकान् ॥१६॥
पाताले वा भुवि स्वर्गे यद्वरिष्टतमं[1] तव ।
वयं तदाहरामोऽद्य राघवेन्द्र निवेशय ॥१७॥
मौनमेव भजन्नेवं कालं क्षिपसि मे सखे ।
तापेनाङ्गानि शुष्यन्ति जीर्यन्ति विगलन्ति च ॥१८॥
कदाचित् स्विद्यसे राम स्तब्धो भवसि च क्वचित् ।
कदाचित् पुलकोद्भेदैः कदम्बकुसुमायसे ॥१९॥
कदाचित् स्वरभङ्गेन मौनमेवावलम्बसे ।
कदाचित् कम्पसे गात्रे कदाप्यस्रं विमुञ्चसि ॥२०॥
धत्से म्लानां मुखच्छायां कदाचिच्छुष्कदच्छदः ।
कदाचिदिन्द्रियाण्युच्चैः विलापयसि चेतसि ॥२१॥
इत्येताभिरवस्थाभिर्हृदि रागोऽनुमीयते ।
सहजानन्दिनीकान्तामानयामो निदेशय ॥२२॥
किं वाशोकलताकुञ्जमण्डपं याहि तं प्रभो ।
यत्र गोप्यो विषीदन्ति भवद्दर्शनलालसाः ॥२३॥

---

१. यद्यदिष्टतमं—अयो० ।

विस्मर्तव्यतमं नैव प्रमोदवनमच्युत ।
भवतो दर्शनं यत्र काङ्क्षन्ति व्रजबालिकाः ॥२४॥
व्यापकः परमात्मा चेत् सर्वत्रैवास्यखण्डधीः ।
तथाप्यस्मद्विनोदार्थं प्रकटो भव तत्र वै ॥२५॥

राम उवाच

शृण्वन्तु सकला गोपा अयोध्यावासिनो मम ।
प्रमोदवनपद्माया विरहो बाधतेतराम् ॥२६॥
आनेतुं सा कथं शक्या भवद्भिः शुद्धवंशजा ।
नहि यावत् कुलस्त्रीणां कौलव्रतमुदस्यते ॥२७॥
अन्याश्च सकला गोप्यो मद्विश्लेषार्दिता अपि ।
अथ मां च समेष्यन्ति तीर्त्वा कुलव्रताम्बुधिम्[1] ॥२६॥
तस्माद्विरूपे हृदये महाविरहकातरः ।
आभीरललनारत्नप्रवरानवलोकनात् ॥२९॥
अवशिष्टां[2] क्रियां तस्मात् समाप्य सहजासखः ।
व्रजे गच्छेय तच्छीघ्रं युष्माभिः सह गोपकाः ॥३०॥
अयमेवाभ्युपायोऽस्ति तासां वै मिलने मम ।
तावद्यूयं व्रजे गत्वा ता आश्वासयत प्रियाः ॥३१॥
वियोगजां ममावस्थां तासां निर्वर्ण्य मित्रकाः ।
तदवस्थान्ममाप्येत्य निर्वर्णयत सादरम् ॥३२॥
सुन्दरं नन्दनं लीलां ललामं चैव गोदुहम् ।
प्रेषयामास चतुरो नर्मज्ञान् सुखितव्रजे ॥३३॥
शीघ्रमेष्यति रामोऽत्र भवद्दर्शनलालसः ।
चिन्ता न कार्या युष्माभिः प्राणेभ्योऽपि प्रिया यतः ॥३४॥
विसर्ज्य राजपुत्रांस्तान् सुखितस्य व्रजं प्रति ।
किंचिद्वनलतावेश्ममण्डपं प्रविवेश सः ॥३५॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे वसन्तोत्सवं नाम चतुष्षष्टितमोऽध्यायः ॥६४॥

---

१. वधूं--अयो० । २. अवशिष्टाह्न०—मथु०, बड़ो० ।

पञ्चषष्टितमोऽध्यायः

श्रीभगवानुवाच

रामो लतामण्डपमेत्य तस्य छायामधिसृत्य सुखेन तस्थौ ।
गन्धर्ववर्यैरुपवर्ण्यमानो ग्रामोल्लसन्मूर्छित[1] मूर्छनाभिः ॥ १ ॥

यदा विशेषाद्विरहोत्करस्य स्थातुं न तत्रैव शशाक कामी ।
तदा निषिध्यारुचिरान् समस्तान् द्वित्रिसहास्थाद्रघुवंशवीरः[2] ॥ २ ॥

असाविहावर्त्तविवर्तनाभिः सुष्वाप धैर्येण विनैव निद्राम् ।
कदाचिदुत्थाय धृतोपधानस्तस्थौ भृशालस्यपरीतगात्रः ॥ ३ ॥

ददर्श कंचिद्रुचिरं विहङ्गमं विचित्रपक्षद्युतिरोचमानम् ।
लोकातिगं पाण्डवमुद्वहन्तं विराजपुच्छाग्रकलाललामम् ॥ ४ ॥

न राजहंसं न शुकं न कोकं न कोकिलं केकि न वा कपोतम् ।
प्रपञ्चसर्गातिगनव्यसर्वं भान्तं तिरस्कृत्य विरञ्चिदाक्ष्यम् ॥ ५ ॥

ईदृग्विधो नैव दृष्टः श्रुतो वा विहङ्गमः केनचित् क्वापि लोके ।
इत्यादरेण प्रभुलक्ष्मणाभ्यां मुहुर्मुहुः संददृशे विहङ्गमः ॥ ६ ॥

उत्पत्य तेन सुरुचा विहगोत्तमेन
रत्नोत्तमद्युतिविचित्रसुविग्रहेण ।
रामस्य रूपरसराशिजलाशयस्य
सद्यः करोऽधिरुरुहे कमलभ्रमात्किम् ? ॥ ७ ॥

तच्चित्रवेशधरमेकविहङ्गमक्षि
संपश्यतो रघुवरस्य न तृप्तिमाप ।
अङ्गं तथाप्यतिमृदुस्पृशतोऽस्य पाणिः
संभृण्वतोऽतिमधुरं क्वणितं च कर्णः ॥ ८ ॥

---

१. ग्रामो लसन्—अयो०, रीवाँ, "ग्रामैः उल्लसन्त्यः मूर्च्छिताः वृद्धिमिताः याः मूर्च्छनास्ताभिः" टि०—मधु० । २. °हीरः—मधु०, बड़ो० ।

तं राघवेन्द्रतनयो रुचिरं क्वणन्त[1]-
माकर्ण्य तं च परिपृच्छति यावदेव ।
तावत् सदक्षिणचरो विहगेश्वरस्त-
मुच्चैरुवाच वचनोच्चयचुञ्चुचञ्चुः ॥ ९ ॥

विहग उवाच

सामन्तभूपशतवर्यकुमारकं[2] त्वां
वेद[3] त्रिलोकजनतानयनाभिरामम् ।
मां च प्रमोदवनकुञ्जनिकेतनस्य
लीलाविशेषरसिकं खगमेव विद्धि ॥१०॥

मां गोपिकानिवह[4]हासविलासरास-
लावण्यसागरसुधारसमापिबन्तम् ।
राम त्वया सह वने मणितारवस्य[5]
शिक्षैकभाजनमवेहि मनोजबन्धुम् ॥११॥

राम प्रियासु तव मानवतीषु सद्यो
भूरुग्भुजाग्रमधिरुह्य विमुक्तकण्ठम् ।
धीरैः स्वरैर्मनसिजप्रतिबोधनेन
धैर्यं हरन्तमिह किं स्मरसि प्रभो माम् ॥१२॥

अथ त्वमेवं शशिमानसद्धा पाण्डुत्वमङ्केषु किमाबभार ।
प्रायेण[6] तस्मात् सुखितस्य गेहाद् विश्लिष्ट उद्विग्न इवासि दृष्टः ॥१३॥

मैव प्रभो त्वं त्रिजगत्प्रतिष्ठा[7]-
भूतत्वमेत्य विरहानुगमेन चित्ते ।
खिद्य स्वयं कमपि दासमिहादिशस्व
स स्वर्गतं करगतं कथयिष्यतीष्टम्[8] ॥१४॥

---

१. रुचिरक्वणानाम्—मथु०, बड़ो० । २. कुमारक—सथु०, बड़ो० । ३. वन्दे-मथु०, बड़ो० । ४. निबद्ध—अयो०, रीवाँ । ५. "मणितं रतिकूजितम्" टि०—मथु० । ६. प्रायोद्य—मथु०, बड़ो० । ७. मैव प्रभो त्वमखिलजगत्प्रतिष्ठा—मथु०, बड़ो० । ८. °तीश०—मथु०, बड़ो० ।

ताश्च प्रमोदवनमण्डपकुञ्जसंस्थाः
सीदन्ति नाथ भवतो विरहेण गोप्यः ।
भूयः समाश्वसिहि ताः स्वकरे गृहीताः
श्रीरामचन्द्र शरणार्थिमहाशरण्य ॥१५॥
त्रैलोक्यपावनपुराणजनार्चितस्व[1]-
पादारविन्दपरिणद्ध[2]परागराजीम् ।
सौरभ्यसंपदमवाप्नवतीमपूर्वा-
मासेव्य राम कृतकृत्यमिदं जगत् स्यात् ॥१६॥
अन्यास्तु गोपललना विरहागमार्ताः
सन्त्येव कोटिश इह व्रजभूस्थलेषु ।
श्रीराम तत्र[3] सहजा तु न दृश्यतेऽपि
यत्रास्त्यशोकलतिका वनमण्डप[4]श्रीः ॥१७॥
संकेतदेशमतनुज्वरहारिशीलं
तं संविहाय खलु सा क्वगता न जाने ।
भूयस्तवैव हृदये किमियं गता वा
गेहं गता त्रिजगतां च गतिं गता वा ॥१८॥
शून्यामशोकवनमण्डपिकां विलोक्य
न ज्ञायते दशदिगन्तदृशि[शा ?]र्मयापि ।
तद्रामचन्द्र पुरुषोत्तम तान् विलासान्
भूयोऽपि तत्र कुरु लोकसुखैककन्दान् ॥१९॥

श्रीराम उवाच

नाहं प्रमोदवनतः खग निर्गतोऽस्मि
नित्यं वसामि तदशोकलतानिकुञ्जे ।
किंत्वेष लौकिकदृशां विषयोऽस्मि नाहं
ये भावुकाः सुरसिका विषयोऽस्मि तेषाम् ॥२०॥

---

१. °त्वत्—मथु०, बड़ो० । २. °परिणिद्धि°—मथु०, बड़ो० । ३. किंतु—रीवाँ । ४. °मण्डल°—रीवाँ ।

अवतारचरित्राणि कर्तुं भूमितलेऽवहम् ।
अवतीर्णोऽस्मि पूर्णोऽपि स्वांशेन द्युमणेरधः ॥२१॥
अयोध्यामागतोऽस्म्येष सहजानन्दिनी च सा ।
अयोनिजा निमेर्वंशे स्वांशेनावततार ह ॥२२॥
बुधाः तत्रैव पश्यन्ति क्रीडमानां मया सह ।
रक्ताशोकलतामञ्जुमण्डपान्तरचारिणीम् ॥२३॥
नित्यः स खलु सर्वोऽपि लीलापरिकरो मम ।
सर्गादौ जायते नैव प्रलये न विनश्यति ॥२४॥
अपरं च द्विजश्रेष्ठ भवता वचनान्मम ।
नैम्यस्य मिथिलेन्द्रस्य गन्तव्यं त्वरितं गृहे ॥२५॥
तत्र त्वमे[यै ?]त्य सच्चित्रं लिखितं रङ्गविद्यया ।
देयं जीवातयेऽमुष्याः सहजायाः कराम्बुजे ॥२६॥
तस्याः पुनः प्रतिकृतिः पतगेन्द्र मह्यं
संजीवनौषधविशेषतया प्रदेया ।
वाच्यं च सन्निहितमेव करिष्यतेऽसौ
पाणिग्रहं सपदि ते जनकेन्द्रपुत्रि ॥२७॥
शंभोर्धनुः कठिनमित्यधि[1]गम्य बाले
चित्रायितव्यमपि दाशरथौ न बाले ।
एतद्रहस्यतरमेव विधाय कार्यं
त्वंजीव दैवतमते शरदां सहस्रम् ॥२८॥
इत्याज्ञाप्य द्विजं रामस्तूष्णीमास ततो द्विजः ।
गत्वा जनकराजस्य मन्दिरं मिथिलां प्रति ॥२९॥
तत्र क्षितेः सप्तमभूरिभागे प्रासादवर्यस्य तले निषण्णाम् ।
आकर्णयन्तीं विपुलान् वयस्यामुखाम्बुजेभ्यः स्वपतेर्गुणौघान् ॥३०॥
पुनः पुनः प्रश्नयन्ती श्रुतानपि गुणोत्करान् ।
[प्रीतिभरान् प्रियस्य हि[2] ।] .
अस्य योग्या न वास्मीति खिद्यमानां मुहुर्मुहुः ॥३१॥

---

१. °तामधि°—मथु, बडो° २. अयमंशोऽधिकः प्रतिभाति ।

जघनन्यस्तदोर्दण्डतले संस्थाप्य चाननम् ।
क्षणे क्षणे सरोमाञ्चां कम्पमानां क्षणे क्षणे ॥३२॥
क्षणे क्षणे धृतस्तम्भां रम्भास्तम्भवदम्भसा ।
स्विद्यमानां क्षणोष्णेन साश्रुनेत्रां क्षणे क्षणे ॥३३॥
ददर्श पक्षी मिथिलेन्द्रनन्दिनीं भित्वापरार्द्धस्मरसुन्दरीमदम् ।
विराजमानां मणिनिर्मिताङ्गणे सहस्रमूर्तिप्रतिबिम्बकैतवान् ॥३४॥
नमस्कृत्य तां मैथिलीं रामकान्तां परार्द्धेन्दिरा[1] रूपगर्वान् हरन्तीम् ।
नमस्कृत्य चञ्चूपुटा[2]च्चित्रपत्त्रीममुञ्चत्तदग्रे पुरस्तात्सखीनाम्[4] ॥३५॥
तदादाय चित्रं नरेन्द्रस्य कन्याप्रपञ्चातिगं पूरुषं तत्र मत्वा ।
कुतः पत्त्रिकेयं मुहुस्तर्कयित्वा विचित्रायमाना समंतादपश्यत् ॥३६॥
गृहगोपानसीसंस्थं दृष्ट्वा पक्षिणमद्भुतम् ।
मणितुण्डं स्वर्णपक्षं हरिन्मणिपदप्रभम् ॥३७॥
तं गृहीतुमनाः सीता बहु प्रयततेस्म[5] सा ।
उत्प्लुत्योत्प्लुत्य स च तां निन्ये मध्ये रहो वनम् ॥३८॥
तत्रापि च तदग्रे स कूजमानः पुनः पुनः ।
न यावत्करयोरेति स्मित्वा तावद्वचोऽब्रवीत् ॥३९॥
मैथिलि त्वामहं वन्दे राघवेन्द्रप्रियासि भोः ।
योऽसौ चित्रगतः साक्षाल्लिखितो रङ्गविद्यया ॥४०॥
अचिरादेव ते तन्वि पाणिं रामो गृहीष्यति ।
तावज्जीवातवे तस्य चित्रमर्पय तावकम् ॥४१॥
इतिब्रुवाणं तं साधु प्रत्यपूजत् सपर्यया ।
भवान् प्राणेशदाता मे विधिना मेलितोऽसि[6] भोः ॥४२॥
त्वत्प्रसादात् प्रियो मेऽद्य मिलितः प्राप्त एव हि ।
चिरं जीव चिरं जीव चिरं जीव सखे सदा ॥४३॥

---

१. परार्द्धे मिश—अयो० । "परार्द्धमपरिमितकालं स्थिता इन्दिरा तद्रूपं" टि०—मथु० । २. °युगा° अयो०, रीवाँ । ३. °पक्षी—रीवाँ । ४. पुरतस्तत्सखीनां—रीवाँ । ५. प्रपद्यतेस्म—अयो०, रीवाँ । ६. लिखितोऽसि—अयो०,मथु०, बड़ो० ।

दापयित्वा सखीहस्ताच्चित्रं स्वीयं नृपात्मजा ।
मार्गे त्वं कुशली याहीत्युक्त्वा कृच्छ्राद्व्यसर्जयत् ॥४४॥
स राजधानीं संगम्य राज्ञो दशरथस्य ताम् ।
ययौ तत्र वनोद्देशे युवराजोऽस्ति यत्र वै ॥४५॥
सीताचित्रमदात्तस्मै तदवस्थां निवेद्य च ।
संतोषितः श्रीपतिना तद्विसृष्टः खगो ययौ ॥४६॥
तच्चित्रं तस्य जीवातुर्बभूव श्रीरमापतेः ।
भूयः सहजया सार्द्धं यावत्पाणिग्रहो भवेत् ॥४७॥
इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे सीताचित्रागमनं नाम[1] पञ्चषष्टितमोऽध्यायः ॥६५॥

❀

षट्षष्टितमोऽध्यायः

ब्रह्मोवाच

सुन्दरो नन्दनो लीलो ललाम[2]श्चैव ये पुरा ।
गता राजकुमारास्ते व्रजं प्रापुः सुखाकरम् ॥ १ ॥
निकुञ्जकुञ्जशोभाढ्यं कूजत्प्रमदकोकिलम् ।
सर्वर्तुसुखदं रम्यं छायाभूरुहमण्डितम् ॥ २ ॥
श्रीरामरसिकोत्तंसगुणगानपरायणैः ।
समन्ताद् गोदुहां हारैः संकीर्णच्छायपादपम् ॥ ३ ॥
गवां हुँभारवैर्भूयः समाकलितमङ्गलम् ।
दधिमन्थभवोद्घोषहेमभाण्डविराजितम् ॥ ४ ॥
इतस्ततः कूर्दमानैस्तर्णकैर्भूरिशो गवाम् ।
शोभमानं सलक्ष्मीकं श्रीरामस्य निजालयम् ॥ ५ ॥
तुलसीकुसुमामोदैः संपूरितदिगन्तरम् ।
सरयूतीरकल्लोलशीतलानिलसेवितम् ॥ ६ ॥

---

१. चित्रागमने—अयो०, रीवाँ, मथु०, बड़ो० । २. सुन्दरीनन्दनो लीला-ललामश्चैव—अयो०. रीवाँ ।

विलोक्य राजन्यकुमारकास्ते मनोहरं गोपराजस्य घोषम् ।
वैकुण्ठलोकोत्तमनिर्विशेषं[1] विदाञ्चक्रुर्भूरिसानन्दचित्ताः ॥ ७ ॥

राजकुमारा ऊचुः

अहो अस्य गवेन्द्रस्य भाग्यं वक्तुं न शक्यते ।
षट्पञ्चाशत्कोटिसंख्यं राजते यस्य गोधनम् ॥ ८ ॥
अहो अत्र व्रजस्थाने रामणीयकमद्भुतम् ।
कदम्बकुसुमामोदसंपूरितदिगन्तरम् ॥ ९ ॥

अहो अमी पादपाः सारवाम्भस्तरङ्गसङ्गादनिशं पवित्राः ।
गायन्ति नित्यं वयसां निनादैर्लोकाभिरामं ननु रामचन्द्रम् ॥१०॥
अमी गृणन्ति[2] प्रसभं द्विरेफाः श्रीरामदेवस्य सुधासवर्णाम् ।
कीर्तिं त्रिभिर्निगमैर्गीयमानां गङ्गाम्बुवत्पावनीं पापराशेः ॥११॥
नमः सरय्वै व्रजभूमिं पुनन्त्यै शुभोत्तरैरूर्मिभिरद्भुतायै ।
संगादमुष्या[3]सुरसिन्धु[धो ?]रासीद्विशेषतः कोटितीर्थास्पदत्वम्[4]॥१२॥
यस्यास्तटे रासविलासलीलां चक्रे रमाया रमणः स रामः ।
समुच्छलद्दिव्यतरङ्गजुष्टं नमाम तां सरयूं ब्रह्मपुत्रीम् ॥१३॥
या सप्तकल्पान्तजलेऽतिभीमे सप्तार्णवैकाम्बुकरालसंभ्रमे ।
महानलज्वालवदुज्ज्वलाङ्गी विराजते तां सरयूं नमामः[5] ॥१४॥
नमामहे सिन्धुजलप्रभेदिनीं साकेतपर्यन्तविराजिविग्रहाम् ।
गवेन्द्रघोषप्रमदाकुचस्थलश्रीखण्डलेपोज्ज्वलवीचिमालिनीम् ॥१५॥
प्रभावतीं विन्दुमतीं कलावतीं कृपावतीं भक्तिमतीं सुधावतीम् ।
पयस्विनीं पुण्यगवीं मनस्विनीं तरस्विनीं श्रीसरयूं नमामताम् ॥१६॥
मातः कृपावति तरङ्गिणि रङ्गकारि झाङ्कारिणि[6] त्रिभुवनाघविदारणोग्रे ।
श्रीरामचन्द्रचरणाब्जरतिप्रकाशसंवर्द्धिके सरयु संप्रतिपालयास्मान् ॥१७॥

---

१. °कात्तनुनिर्वि°—अयो०, मथु०, बड़ो० । "अतिसुन्दरं" टि०—मथु०, बड़ो० । २. एवान्ति—अयो०, रीवाँ । ३. अमुष्मात्—अयो०, रीवाँ । ४. °स्पदत्वात्—मथु०, बड़ो० । ५. नमामि—मथु०, बड़ो० । ६. झङ्कारिणि—अयो० रीवाँ ।

व्रजिनहरणदक्षा रामभक्तिप्रकाशा
कमलभवनिषेव्या वैष्णवत्वप्रदात्री ।
तुलसिवनविशेषा मोदितीरान्तदेशा
प्रभवतु सरयूर्नः सर्वकल्याणकर्त्री ॥१८॥
हे मातः सरयु त्रिलोकजननि क्षेमैकवारांनिधे
धाराभूषितभूतलेऽमलसुधाकासारिणि श्रीपतेः ।
मज्जन्मानुषमुक्तिदे त्रिजगतीसौभाग्यसंपत्प्रदे
सन्नीरे सरयु प्रसीद भवती गम्भीरधीरद्रवे ॥१९॥
इत्यष्टकं यः प्रपठेत् सरय्वाः प्रभातकालेऽवभृथप्रसङ्गे ।
सपापराशीन् समतीत्य सर्वान् कैवल्यनिर्वाणपदं प्रयाति ॥२०॥
इत्यभिष्टूय सरयूं राजपुत्राः शुभाशयाः ।
निमज्य सलिले तस्याः नित्यं च समवर्तयन् ॥२१॥
अन्यतस्तत्तटे देशे अपश्यन् रत्नपर्वतम् ।
अनेकरत्नकिरणमञ्जरीमञ्जुलाकृतिम्[1] ॥२२॥
अनेकसरसीवर्यसंफुल्लनवपङ्कजम् ।
सौगन्धिकरजोवृन्दपटलाच्छादिताम्बरम् ॥२३॥
हंसकारण्डवाकीर्णसुनिर्झरनदीशतम् ।
कादम्बबकुलाक्रान्तरत्नवापीसहस्रकम् ॥२४॥
सरोजलान्तःसंभिन्नरत्नाङ्कुरमयूखकम् ।
गन्धर्वललनागीतसमुन्नादितदिक्तटम् ॥२५॥
तं वीक्ष्य रामक्रीडाद्रिं कोटिरत्नप्रभामयम् ।
मेनिरे ते गवेन्द्रस्य राजधानीं महाश्रियम् ॥२६॥
कथं न लक्ष्मीः कृपयेदिहैव यत्रास्ति रामस्य विहारभूमिः ।
विशालगोपीकमलासहस्रपादाब्जमञ्जीररवानुघुष्टम् ॥२७॥
अस्मिन् गवेन्द्रः सुखिताभिधानः करोति राज्यं खलु घोषराजः ।
अयं स देशो रघुपुङ्गवस्य प्राणप्रियः सौरभमाधुरीचयः ॥२८॥
इति ब्रुवाणास्ते क्षिप्रं प्रमोदवनमाययुः ।
फुल्लाशोकलताकुञ्जविस्फुरन्माधुरीमयम् ॥२९॥

---

१. °मंजलीमंजलीकृतम्—रीवाँ ।

इतस्ततः कदम्बौघप्रसूनसुरभीकृतम् ।
प्रमत्तबर्हिणारावमुखरीकृतदिक्तटम् ॥३०॥
स्नेहप्रमत्तगोपालबालिका[1]केलिवर्द्धनम् ।
अत्यर्थविरहावेशसाक्षात्कृतनिजप्रियैः ॥३१॥
श्रीरामस्य कलत्रैस्तैः सेवितं कान्तमन्दिरम् ।
तुलसीपवनामोदैः पावयन्तं दिशो दश ॥३२॥
भक्ति रससुरेन्द्रादिसेव्यमानरजोभरम् ।
अलौकिकामोदमाद्यन्मधुपारावपूरितम् ॥३३॥
श्रीराममुरलीनादविह्वलीकृतबर्हिणम् ।
संगीतकर्णपीयूषरोचमानजनश्रुतिः ॥३४॥
प्रमोदकानने गत्वा सुखितस्य गृहं प्रति ।
जग्मुर्नृपकुमारास्ते विशालध्वजलक्षितम् ॥३५॥
तत्र गत्वा रथेऽभ्यस्ते व्यवतेरुः समन्ततः ।
ददृशुः सुखितं गोपं श्रीरामस्मृतितत्परम् ॥३६॥
तेभ्यः प्रणतमौलिभ्यो गोपः कृत्वा शुभाशिषः ।
परिरेभे रामधिया रामचन्द्रस्य मित्रकान् ॥३६॥

सुखित उवाच

सुखं राघववर्यस्य रामस्य प्राणदस्य[2]नः ।
कच्चित् कुशलिनो बालाश्चत्वारः सौख्यदा मम ॥३८॥
तेष्वेव लोकसारेषु बालकेषु मनो मम ।
शून्य एव दिशाः सर्वाः पश्यतो व्रजमण्डले ॥३९॥
लोकोत्तराः सुजनिमान इमे कुमाराः
श्रीराचन्द्रतनयप्रमुखाः सरूपाः ।
अप्यात्मनो नयनवृत्तिहरा जयन्तु
नित्यं यथा प्रमुदमेव परां लभामः ॥४०॥

माङ्गल्यकोवाच

अहो राजकुमाराणां युष्माकं मुखचन्द्रता[3] ।
पीत्वा कुशलपीयूषं रामस्यानन्दिता वयम् ॥४१॥

---

१. °लतिका°—रीवाँ । २. प्रणयस्य—रीवाँ । ३. रथचन्द्रतः—रीवाँ ।

अहो भाग्यमहो भाग्यं या पश्यति मुखाम्बुजम् ।
रामस्य लोकरामस्य कामदस्य जगत्त्रये ॥४२॥
साकेतपत्तननृणां खलु भाग्यवल्ली
साफल्यमेति रघुनाथमुखेन्दुं दृष्ट्वा ।
वैकुण्ठमेव सुखमेतदथो समग्रम्
अत्रैव पूर्णपुरुषोऽस्ति दयार्द्रवृत्या[1] ॥४३॥
अधुनापि तथैवाहो तान्येव दिवसानि नः ।
वियोगेऽपि परावेशाद्राममेव प्रपश्यताम् ॥४४॥
कदा खलु व्रजे राम आगमिष्यति नो गृहान् ।
इतिवार्त्तोदयेनैव विरहो व्रजवासिनाम् ॥४५॥

राजपुत्रा ऊचुः

कुशली रामभद्रोऽस्ति कूजन् कुशलवारिधिः ।
प्रीणयन् शयने पित्रोर्जनतानन्दवर्धनः ॥४६॥
मातर्जननि माङ्गल्ये श्रीरामपरिपोषिके ।
पारे भाग्यसमुद्रस्य प्राप्तासि किमु वर्ण्यताम् ॥४७॥
प्राप्तो राजश्रियं रामो न विस्मरति नित्यशः ।
मातस्तव करानीतं नवनीतस्य पारणम् ॥४८॥
व्रजदुग्धदधिक्षीरनवनीतादिभोजनम् ।
नित्यप्रियं राघवस्य पुष्णाति भवतां भगम् ॥४९॥
अहो घोषस्य वो लक्ष्मीः पारे वाङ्मनसः स्थिता ।
वशीचकार या रामं निःश्रेयसरसेश्वरम् ॥५०॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे व्रजे दूतप्रेषणो नाम षट्षष्टितमोऽध्यायः ॥६६॥

---

१. पुरुषो दययार्द्रवृत्त्या—मधु०, बड़ो० ।

सप्तषष्टितमोऽध्यायः

ब्रह्मोवाच

श्रीरामसुहृदस्तान् वै कुमारान् दीप्तवर्चसः ।
सुखितः प्रीणयामास दधिदुग्धौदनादिभिः ॥ १ ॥
माङ्गल्यकाकरानीतैः पक्वैरन्नैः सुपेशलैः ।
आत्मानं रोचयामासुः सखायो राघवस्य ते ॥ २ ॥
वार्तालापैः शुभोदन्तैः प्रश्नैः श्रीरामसंगतैः ।
सुखितं नन्दयामासुर्घोषराजं महाशयम् ॥ ३ ॥
भोजयित्वा व्रजे हृद्यै रत्नैर्दधिघृतादिभिः ।
सारवं सलिलं पीत्वा स्थितान् ताम्बूलिकामदात् ॥ ४ ॥
सुखितः सर्वगोपानां सभायां सुसभाजितान् ।
सखीन् रामस्य तान् हृद्यानर्चयामास माल्यकैः ॥ ५ ॥
सुगन्धैस्तोषयामास रञ्जयामास सुस्वरैः ।
भूषयामास वै सूक्ष्मवासोऽलङ्कारमौक्तिकैः ॥ ६ ॥
दिव्ये महार्हशयने सुखेन सुषुपुश्च ते ।
वीजयामास माङ्गल्या रामबुद्धचैव तत्सखीन् ॥ ७ ॥

ततश्च तेऽन्येद्युरशोककुञ्जं विलोकितुं कामयानाः[1] कुमाराः ।
ययुः शनैः सारवतोयविन्दुप्रवर्षिमन्दानिलवीजिताङ्गाः ॥ ८ ॥
ते रामभद्रस्य पदानि तत्र तत्र स्थले प्रियमाणाः स्वचित्ते ।
आनन्दशोभासहितान्यपश्यन् लीलाविशेषप्रकराङ्कितानि ॥ ९ ॥
रघूत्तमो येषु येष्वादरेण व्रजाङ्गनानां स्मरचित्तचौरः ।
चकार चमत्कार करान् विहारानपारसौहर्षसुधारसार्द्रम् ॥१०॥
येषु क्षणं तस्थुषां मानवानां गङ्गासहस्राधिकतीर्थपुण्यम् ।
स्नानाद्दानात्पिण्डनिर्वापतः स्यान्निर्णीतं यद्विबुधानां मुखेभ्यः ॥११॥

---

१. रामयानाः—अयो० ।

सरय्वाः पुलिनद्वन्द्वे प्रमोदवनमुत्तमम् ।
तत्र श्यामवनं नाम रामस्य सुखवर्धनम् ॥१२॥
अधित्यकायां रत्नाद्रेः सरय्वाः पुलिने तथा ।
अशोकवनमाधुर्यं किंचिदुक्तं न शक्यते ॥१३॥
तत्र रामः स्वयं साक्षादाभीरीजनवल्लभः ।
क्रीडन्नास्ते परब्रह्म लीलामानुषतां गतः ॥१४॥
तत्राशोकलताकुञ्जे ययुस्ते राममित्रकाः ।
व्रजवासिजनोद्दिष्टमार्गेणादृतपूर्वकाः ॥१५॥
तत्र कुञ्जालये दिव्ये पारिजाततरोस्तटे ।
अपश्यन् सहजारामचरणाम्भोजयुग्मकम् ॥१६॥
भक्त्या प्रणम्य सहजारमणाङ्घ्रिपद्मं[1]
पूताशया[2]स्तुलसिकादलसौरभेण ।
ते पारिजाततरुमूलमवाप्य दृष्ट्वा
प्रापञ्चिकीं विषयगामतितेरुराशाम् ॥१७॥
तत्रैव ता राघवेन्दोः परिचर्यः शुभाननाः ।
आभीरकन्यका एत्य परिवव्रुः कुमारकान् ॥१८॥
ते रामस्य नर्मसखास्तासां रामे मनोरतिम् ।
दृष्ट्वा चात्मानमत्यर्थं निनिन्दुर्भावकोविदाः ॥१९॥
सौकुमार्यं च लावण्यं रूपं लावण्यमेव च ।
तासां दृष्ट्वा कुमारास्ते मेनिरे रहितं जगत् ॥२०॥
श्रुतवन्तो यथा पूर्वं गुणान् गुणनिवेदितान् ।
सहस्रगुणितास्तस्मादपश्यन् रामपार्श्वगाः ॥२१॥
इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे व्रजदूत-
प्रेषणो नाम[3] सप्तषष्टितमोध्यायः ॥६७॥

---

१. पदद्वयं—अयो० । २. पूतास्तुया—अयो०, रीवाँ । ३. °प्रेषणे—अयो०, मथु०, रीवाँ ।

अष्टषष्टितमोऽध्यायः

ब्रह्मोवाच

सुन्दरं नाम राजन्यकुमारं रामसुन्दरम् ।
वीक्ष्य तास्तुष्टुवुः सर्वा गोप्यो विरहविह्वलाः ॥ १ ॥
तस्यालापपटोः साक्षाद्रामभक्तस्य वर्ष्मणा ।
स्निग्धश्यामावदातेन गोप्यो रामं सुसस्मरुः ॥ २ ॥
तं संदेशहरं ज्ञात्वा रामरामाः शुचिस्मिताः[1] ।
रामं विषयमालक्ष्य प्रोचुर्वचनमादरात् ॥ ३ ॥

गोप्य ऊचुः

कुवलयवनबन्धो निर्गतं संमतं ते
कृतवधमबलानां चोचितं तारकेश ।
प्रतिदिनविकलङ्क प्रीतये संप्रविश्या[2]-
च्चरमदिशि ततायां[3] दुष्टतां नाभ्युपैषि ॥ ४ ॥
अनुलवमसहत्वं मार्दवं नः शरीरे
तदुभयमपि[4] युष्मन्मानसे राम नास्ति ।
प्रणतिरपि विहन्त्री प्रीतिसंप्राणनस्य
प्रियमुखपरिदर्शोऽप्यस्ति नो तद्विशेषः ॥ ५ ॥
निगम इति वचस्ते श्रव्यमाचम्य कान्त
श्रवणकसुपुटाभ्यां तथ्यपथ्यं सुधाक्तम् ।
तदपि यदि विषं स्यात् साधुवादस्य देशे
किमु पतितमरिष्टं नैव तिष्ठेत्त्वया तत्[5] ॥ ६ ॥

---

१. सुविस्मिताः—रीवाँ। २. विस्यसंसत्—रीवाँ। "विश्वसेत्, अस्माकं विश्वासो नास्ति तर्हि प्राचीदिक् कथं विश्वासं करिष्यति" टि०—मधु०। ३. ततायां—बड़ो०। ४. "उभयं मार्दवमसहत्वं च तव न वयं तु मृदुस्वभावा तव-प्रयाणमसहमाना" टि०—मधु०। ५. "यः स्नेहेन जीवति तस्य तु नमस्कारप्रिय-मुखावलोकनेऽपि न प्रयोजनसाधकेऽतो नास्ति कश्चन विशेषः इत्येवाह—वेदप्रमाणकं तव वचनं अतः श्राव्यं तदपि विषमिव भवति तदा तु साधुवादेऽरिष्टं पतितं स्यात् त्वयि तन्न संभवति। तव स्मृत्यादेस्तन्नाशकत्वादिति" टि०—मधु०।

स्मृतिपरिचरणाभ्यां ध्यानसंकीर्तनाभ्यां
श्रवणनिगमनाभ्यां भक्तिसंसेवनाभ्याम् ।
परिणमसि बहूनां क्षिप्रमेव प्रसह्य
क्षिपसि च दुरदृष्टं कालरूपं च विघ्नम् ॥ ७ ॥
वयमिह कुमुदिन्यस्त्वं कलानां निधिश्चेद्
वमसि कथमकस्मात् कालहालाहलौघम् ।
त्रिभुवनजनताया मंक्षु[1] संजीविनी सा
क्व नु खलु निहताङ्ग स्वात्मनः क्वापि वृत्तिः ॥ ८ ॥
अथ यदि दुरदृष्टं जायते नोऽन्तरायो
वरद किमु न नाश्यं तत्त्वयाधोक्षजेन ।
अघतत[2]पशुपक्षिप्राणिनस्तांस्तिरश्चो
विरचयसि विमुक्तिप्राज्यभाजः प्रभुस्त्वम् ॥ ९ ॥
रघुकुलजलधीशः पूर्ण एवासि नित्यं
प्रकटयसि किमस्मास्वङ्ग वैकल्यमेवम् ।
स्थिरचरजनतायाः प्राणिनः साधु भूत्वा-
प्यवकिरसि तमिस्रं मोहमूर्छादिमिश्रम् ॥१०॥
कुहकमिदमपूर्वं राघवेन्द्र त्वयीत्थं
स्थगयति सकलं ते सान्तरं साधुवादम् ।
सरसमधुपरागोत्सौरभं केतकाङ्गे
परित इव विलग्नः कण्टकौघः कठोरः ॥११॥
त्वयि किमु वचनीयं[3] लोचनानन्दहेतौ
दिशि ननु चरमायामस्ति नोऽमर्ष एव ।
अमुमनुपमकीर्तिं स्वान्तराले दधाति,
द्रुतमखिलजनानां भूय आच्छिद्य दृग्भ्यः ॥१२॥
तव चरणसरोजैकाश्रयान् नित्यमस्मान्
लपयसि विरहाग्निज्वालनैः किं हिमांशोः ।

---

१. °तायामक्षिसं°—रीवाँ, °मक्षसं°—अयो० । "मंक्षु ईषत्" टि०—मधु० ।
२. अपतन°—अयो०, रीवाँ, अवतत—बडो० । ३. "वचनीयम् -उपालम्भम्" टि०—मधु० ।

प्रकृतिरपि तवासौ कच्चिदन्तर्द्धिमागात्
कलयसि किमु कच्चित् कौतुकीवृत्तिमुग्राम् ॥१३॥
तुहिनकर तवोग्रा विश्लिषः किंनु[1] वाच्या
वद दहनसदृक्षा[2] स्माकमक्षद्रुमाणाम् ।
किरति यदि भवानेवामृतं रूपसारं
परिगिलति तदा सा प्लोषिका शोषिका वा[3] ॥१४॥
यदि तव करुणार्द्रा चित्तवृत्तिः सखेऽस्ति
द्रुतमवयवदाहं तत् सुनिर्वापय त्वम् ।
अथ यदि सुतरा चेन्निर्दयोऽपि प्रकाशं
किमु भवसि प्रचण्डोऽस्मासु यद्वत्कृतान्तः ॥१५॥
सुत इह सुखितस्य त्वं च माङ्गल्यकाया
दशरथमुपगं[4]श्चेद्यासि कौशल्यकां च ।
अनुभवसि पृथिव्यां भूरिसाम्राज्यसौख्यं
पशुरपि न सहेत् कः स्वप्रियस्य प्रभावम् ॥१६॥
त्रिभुवनमनुभावैः प्रीणयन् भासि शश्वद्
विहर न कथमस्मानेव दुःखाकरोषि ।
यदसि शिशिरशोचिस्तत्कुले वासि[5] जातः
प्रमुदवनविधोस्ते किं न[6] नित्यः स्वभावः ॥१७॥
इह मुदयति नोपालम्भनं त्वय्यनन्ते
प्रभवति जगदीशे किंतु विज्ञापनं नः ।
तदखिलमवधार्यागम्यतां रामचन्द्र
वनभुवमुरुदुःखद्रावितां सानुकम्प ॥१८॥
इत्युदीर्य वचो गोप्यस्तूष्णीमासन् विलोचनैः ।
उदस्रभिर्ज्ञापयन्त्यो वियोगस्योद्भवं हृदि ॥१९॥
तासां विरहसंतापशान्त्यर्थं राजपुत्रकाः ।
सखायो रामचन्द्रस्य प्रोचुस्तत्त्वार्थवित्तराः ॥२०॥

---

१. किंतु—मथु०, बड़ो० । २. °सुवृक्षा—अयो० । ३. प्लोषिका सारसारम्—रीवाँ । ४. नृपराजं—अयो०, रीवाँ । ५. खरोस्रोऽसि—अयो०, मथु०, बडो० । ६. विधो किं ते न—रीवाँ ।

भवतीमहिमानं वै अवाङ्मनसगोचरम् ।
भवन्त एव जानन्ति यूयं कान्ताप्रियश्च सः ॥२१॥
साक्षात्पद्मालया यूयं रामो नारायणः स्वयम् ।
प्रभुणा कोऽपि संदेश उदितो वो व्रजाङ्गनाः ॥२२॥
तच्छृण्वन्तु भवन्त्यो वै पीयूषशिशिराक्षरम् ।
मां वेद धर्मरक्षार्थमवतीर्णं स्वलोकतः ॥२३॥
प्रमोदाख्याद्विजानीत तत्करिष्यामि वै द्रुतम् ।
हनिष्याम्यसुरस्तोमं स्थित्वा राज्यपदस्थितौ[1] ॥२४॥
ब्रह्मक्षत्रियविट्शूद्रान् वैष्णवान् स्वस्वभावतः ।
समुद्धरिष्ये सहसा कार्यमेतन्ममैव हि ॥२५॥
ततोऽहमागमिष्यामि व्रजभूमिं मनोहराम् ।
भवतीनां हरिष्यामि वियोगजनितां रुजम् ॥२६॥
तावन्मदंशसंलीना यूयं स्थास्यथ गोपिकाः ।
इत्युवाच व्रजेशो वः कान्ताविश्लेषविह्वलः[2] ॥२७॥
तद्यापयत तद्धचानात् कानिचिद्दिवसान्यलम् ।
ध्यानेनापि प्रभुर्ह्येष साक्षाद्भवति सेविनाम् ॥
परमात्मा व्यापकात्मा प्रत्यग्ज्योतिः सनातनः ॥२८॥
इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे चन्द्रिकास्तवो नाम[3] अष्टषष्टितमोऽध्यायः ॥६८॥

❁

एकोनसप्ततितमोऽध्यायः

ब्रह्मोवाच

इति सान्त्वनवाचाभिः सुन्दर्यः कृतसान्त्वनाः ।
न ययुर्विरहस्यान्तं तरण्य इव वारिधेः ॥ १ ॥
प्रवदन्त्यो दृगस्रूणि कथं कथमपि स्त्रियः ।
संस्तभ्य धैर्यलज्जाभ्यां प्रोचुः सप्रणयं वचः ॥ २ ॥

---

१. °क्षितौ—अयो०, रीवाँ। २. कान्ता विश्लेषविह्वलाः—मथु०, बडो०। °चिह्नितः—अयो०। ३. चन्द्रिकास्तवे—अयो०, रीवाँ, मथु०, बड़ो०।

गोप्य ऊचुः

सिता संभक्षिता येन लोलुपेन सुजन्मना ।
तं सितानां कथामात्रात् कस्तर्पयितुमर्हति ॥ ३ ॥
अमृतं येन निःपीतं भुक्त्वा देवत्वमात्मनः ।
तस्यामृतकथामात्रात् कः खल्वर्हति तर्पणम् ॥ ४ ॥
तादृशो दयितोऽस्माभिर्भुक्तः कन्दर्पकेलिषु ।
तस्य विश्लेषयोगोऽद्य किं भविष्यति जीवनम् ॥ ५ ॥
ब्रह्मानन्दरसोऽस्माकं हरते नैव मानसम् ।
प्रेमानन्दरसाम्भोधौ मग्नानां प्रियसन्निधौ ॥ ६ ॥
पूर्णो रामः स्वयं ब्रह्म परमात्मा सनातनः ।
जानीमहे ध्रुवं किंतु निर्वृतिं नैति नो मनः ॥ ७ ॥
प्रमोदवनकुञ्जान्तर्माधुरीमण्डपस्थितः ।
आनन्दयति चेद्रामो मनो निर्वृतिमेष्यति ॥ ८ ॥
एवं नो मोहयित्वासौ यातः साकेतपत्तने ।
कथं करिष्यते राज्यमन्यायार्थसमाकुलः ॥ ९ ॥
अयमेव मतोऽन्यायस्त्यक्त्वा यदबला हि नः ।
सुखं शेते पितुर्गेहे नैतद् युक्तं महात्मनः ॥१०॥
अशेषनीतिविषयः साम्राज्यपदभाजने ।
रामः सर्वगुणारामः कथमेवं करिष्यति ॥११॥
इत्युपालभ्य बहुशो रामं गोपालबालिकाः ।
तेषामातिथ्यमाचेरुर्यथासंपन्नभोजनैः ॥१२॥
गोपदारैः कृतातिथ्याः श्रीरामप्रेमभाजनैः ।
राजपुत्रास्तत्क्षणेन तादृग्भावमुपाययुः ॥१३॥
तासां चरणधूलीभिः शिरांसि लिलियुश्च ते ।
उदस्रनयना भूत्वा रराजुस्ते कुमारकाः ॥१४॥
अहो धन्या अमी देव्यः संन्यासव्रतधारिकाः ।
सर्वं न्यस्य चिदानन्दे रामचन्द्रे कृताशयाः ॥१५॥

अहो आसां शुभं जन्म कालपाशविनिर्गतम् ।
अजरामरसाम्राज्ये स्नेहनिर्जितराघवम् ॥१६॥
राघवः श्रीहरिः साक्षाद्रामदेवः सनातनः ।
तस्य प्रियतमा एतास्तेन प्रतिनिधीकृताः ॥१७॥
मुक्तिसाम्राज्यश्रीदाता सत्पथां प्रभुरात्मना ।
तथैवैताः स्वयं गोप्यो मुक्तिसाम्राज्यदायिकाः ॥१८॥
भक्तानां भक्तिवर्धिन्यः स्वर्धुनीसलिलैः समैः ।
यशोभिर्भूषिता गोप्यः कथं सामान्यतामियुः ॥१९॥
इत्येवं ता अभिष्टूय कृत्वा भूयोऽभिवादनम् ।
चरणाम्बुरजोमूर्ध्नि धृत्वा तेजोभरोर्जिताः ॥२०॥
रामस्नेहप्रमत्तान्तःकरणा[1] मुक्तबन्धनाः ।
गोपीदासा वैष्णवाग्रा[2] ज्ञाततत्त्वाः सुपेशलाः ॥२१॥
गोपीगोरूपदेशेभ्यो वर्धिष्णुः प्रेमसंपदः ।
आययू रामसविधे कृतार्थास्ते कुमारकाः ॥२२॥
तान् दृष्ट्वा रघुशार्दूलपादानतशिरोधरान् ।
स्वागतोक्त्याग्रहीद्रामः करुणापूर्णलोचनः ॥२३॥
निनायैकान्तविषये प्रियाणां हरिणीदृशाम् ।
पर्य्यपृच्छत्ततोऽवस्थां सदा तद्भावमानसः ॥२४॥

श्रीभगवानुवाच

कच्चित् सुखं व्रजभुवि कच्चिच्छ्रीसुखितः सुखी ।
कच्चिन्माता च माङ्गल्या धन्यास्ते सुखसंपदा ॥२५॥
कच्चिन्नन्दनराजिन्योः सहजायाश्च संततम् ।
कच्चिन्मे धेनवो नव्या साक्षात्कामदुघाश्च ताः ॥२६॥
तृणोदकादिसौख्येन निर्वृताः सुखमासते ।
कच्चित् सा सरयू शान्ता वनं कच्चिन्निरामयम् ॥२७॥
कच्चित् कुशलिनो गोप्यो गावश्च सुखमासते ।
आभीरकन्यका मह्यं त्यक्तलौकिकवैदिकाः ॥२८॥

---

१. °करुणा—अयो०, रीवाँ । २. वैष्णवाः प्राक्—अयो०, रीवाँ ।

कुमारा[1] ऊचुः

सुखमास्ते व्रजभुवो यद्राजासुखितः सुखी ।
माङ्गल्या सुखिनी धन्या कोटिशो गोधनेश्वरी ॥२९॥
यस्या त्वमेव तनयस्त्रैलोक्यप्रीतिवर्द्धनः ।
सुखं नन्दनराजिन्योः सहजायाश्च नित्यशः ॥३०॥
यासां त्वमेव सर्वस्वं पूर्णब्रह्म स्वरूपतः ।
सुखिनो लोकाः कामदुघाः शान्तोदा सरयू शुभा ॥३१॥
निरामयं वनं सर्वं गोपाः कुशलिनस्तव ।
आभीरकन्यकावृत्तं राम मा पृच्छ केवलम् ॥३२॥
अथ पृच्छसि चेद् वृत्तं तत्प्रतीकारमाचर ।
अत्यर्थं दर्शनीयं चेद् वृणुयात् को नु मानुषः ॥३३॥
तां तामवस्थाविषये सर्वं जानासि राघव ।
पटान्तरेऽपि विश्लेषं सोढुं याभिर्न शक्यते ॥३४॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे व्रजाद्राजपुत्रागमो नाम[2] एकोनसप्ततितमोध्यायः ॥ ६९ ॥

सप्ततितमोऽध्यायः

राजकुमारका ऊचुः

धन्यो व्रजस्य महिमा सुखितेन्द्रघोष-
लक्ष्मीविलासभवनस्य विशेषदृष्टः ।
यत्र स्वयं विहरसि त्वमनन्तवीर्यो:
गोपाङ्गना[3]भिरभितो रसलोलुपाभिः ॥ १ ॥
श्रीराम तावकमतीव वलक्षमीषत्-
सानन्दहासवदना:[4] सुयशो गृणन्ति ।

---

१. कुमारका—मथु०, बड़ो० । २. °पुत्रागमे—अयो०, रीवाँ, मथु०, बडो० । ३. गोपालनाभि—मथु०, बडो० । ४. वलस्यलक्ष्यः यत्सानुरागवदन्त—अयो०, रीवाँ । "वलक्षो धवलोऽर्जुनः" टि०—मथु० ।

गोप्यः स्फुरत्पुलकराजिकपोलपालिं
संप्रेक्ष्य पाण्डिममनोजविकारभाजः ॥ २ ॥
किं वर्णयाम तव राम रसप्रसक्ति-
माभीरराजतनयाविषये विशिष्टाम् ।
यस्यास्तु कोटिकमलासुविलासभावाः
अंशांशिभावमुपयान्ति सुखप्रकर्षात् ॥ ३ ॥
धन्यैव ते रसिकता पुरुषोत्तमस्य
पूर्णस्य राम परमात्मन ईशितुश्च ।
इत्युद्दिधीर्षसि जडानपि मोहशीलान्
गोगोपगोकुलवधूपशुपक्षिकीटान् ॥ ४ ॥
इच्छा स्वतन्त्रविषया भवतोऽच्युतस्य
जीवोद्धृतौ किमपि राम सपक्षपाता ।
यद्ब्राह्मणेषु निगमत्रयवित्सु दूरं
लोलायसे पशुसरीसृप[1]बालकेलिः ॥ ५ ॥
हैयङ्गवीनमपि ते प्रियमस्ति राम
किंत्वस्ति तत्र[2] विषये सुमहानुपाधिः ।
यद्गोकुलव्रजवधूवदनारविन्द-
बिम्बाधरामृतरसैः स्मरतापहानिः ॥ ६ ॥
शृङ्गारसीकररसावयवोऽसि रामो
जानीमहे व्रजवधूचरणप्रसादात् ।
ब्रह्मैव पूर्णमचलं परमंचिदेक-
मानन्दमात्रमिदमेव चकास्ति तावत् ॥ ७ ॥
नान्यत्परं किमपि कोऽपि चकास्तिभाव-
स्तत्त्वं च सद्विषयसेकमदोऽस्ति नान्यत् ।
यद्राम सुन्दर भवच्चरणारविन्द-
द्वन्द्वं सदा परमहंसमनःप्रकाशम् ॥ ८ ॥
रामेतिराम भवतो दुरितौघहारि
किंवर्ण्यते सुलभहेतुकृते जनानाम् ।

---

१. पशुपसंसरि°—मथु०, बडो० । २. किं त्वत्रयत्न°—रीवाँ ।

धर्मार्थकामित[1]चतुर्थफलप्रदान-
लीलासमर्थितनिजांशसुर[2]व्रजस्य ॥ ९ ॥
एतत्त्वदीयमहिमाकलनं जनानां
स्वस्यैवमुद्धृतय एव रमेश नो चेत् ।
न त्वां विदन्ति विबुधा अपि वासवाद्या
ब्रह्मातपत्र[3]धरणादिभिरुद्धृताज्ञाः ॥१०॥
ज्ञातोऽसि राम परमः पुरुषोत्तमोऽसि
इत्यागमैरपि भवान् परमार्थवेद्यः ।
नैवासि चिन्मयघनाकृतिरप्रमेयः
पादारविन्दरजसस्तु विना प्रसादात् ॥११॥
जानीमहे तदधुना विषकल्पमेवं[4]
संसारमेनमधमात्रफलप्रसूतिम् ।
युष्मत्कृपैकविषयव्रजभक्तगोपी—
पादारविन्दरजसैव विधूतपापाः ॥१२॥
याचामहे तदधुना प्रभुगामनुज्ञां
स्वच्छेषु पुण्यसरयूविषयाश्रमेषु ।
नित्यं च रामं भवतश्च जपाम नाम
स्वात्मावबोधगतिस्वात्मविमुक्तिदायि ॥१३॥
धिक् संसृतिं विषयतुच्छसुखप्रधानां
त्वत्पादपद्मविमुखत्वगतिप्रदात्रीम् ।
तद् याम तामथ विहाय विषद्रुमाभां
रामेतिनामभजनैककुठारहस्ताः ॥१४॥
इत्युक्त्वा राजपुत्रास्ते जगृहुस्तत्पदद्वयम् ।
लसत्तुलसिकामोदं झङ्कारिमुनिषट्पदम् ॥१५॥

राम उवाच

किमर्थं संसृतिं घोरां तितिक्षथ कुमारकाः ।
यावत्तां कुण्ठितप्रायां कृत्वा स्थापयत प्रियाः ॥१६॥

---

१. °कामिक—अयो०. रीवाँ । २. °सुरा°—मथु०, बड़ो० । ३. ब्रह्मातपव्रत—अयो०, रीवाँ । ४. जानेऽधुना विषयकल्पमिमं दुरूहं—अयो०, रीवाँ ।

राजपुत्रा ऊचुः

कथं वा कुण्ठितप्रायः संसार उपजायते ।
भुजङ्ग इव मन्त्रेण तन्नो वद रघूद्वह ॥१७॥

श्रीराम उवाच

प्रवक्ष्याम्यत्र वो दिव्यमाख्यानं भरतस्य यत्[1] ।
स वै अनुपगम्यैव कर्मन्दीभावमुद्यतः[2] ॥१८॥
तमेवमृषिशार्दूलः शाण्डिल्यो नाम वै मुनिः ।
तत्त्वार्थं बोधयामास प्रजानां हितकाम्यया ॥१९॥

शाण्डिल्य उवाच

किमर्थं भरत श्रेष्ठां राजलक्ष्मीं जिहाससि ।
पितृपैतामहीं तात तव तत्त्वाविरोधिनीम् ॥२०॥

भरत उवाच

मदावहा राज्यलक्ष्मीः कथं तत्त्वाविरोधिनी ।
[3]एतन्ममाचक्ष्व मुने किंवा वञ्चयसि ध्रुवम् ॥२१॥

शाण्डिल्य उवाच

हृदयं पुण्डरीकं यत्तस्यान्तर्वेश्म तत्परम्[3] ।
ब्रह्मणस्तु पदं दिव्यं शाश्वतं ध्रुवमच्युतम् ॥२२॥
तद्भावयस्व राजेन्द्र धिया बोधविशुद्धया ।
तस्मिन् साक्षात्कृते स्थाने मार्गणीयं ततः परम् ॥२३॥
पूर्णं चिदानन्दघनं विशुद्धं समंततो[4] रामवनं पुराणम् ।
साकेतकुन्दवनपारिजातप्रमोदसीतावननामधेयम्[5] ॥२४॥
तत्र स्थितं वै पुरुषं पुराणं[6] श्रीरामरामेति[7] शुभाभिधानम्[8] ।
अहर्निशं भावयतो जनस्य संसार एवामृतकल्प एषः ॥२५॥

---

१. वः—मथु०, बड़ो० २. सवै अनुवमस्यैव कर्मदोषं···दधतः—रीवाँ० । ३—३. अयमंशो नास्ति—अयो०, रीवाँ० । ४. च समंततः । इत्युक्त्वानुष्टुब्छन्दसेयमर्द्धाली—बड़ो० । ५. "नामपञ्चकं रामवनं" टि०—मथु० । ६. स्थितं पुरुषं परमं—मथु०, बड़ो० । ७. रामादि°—अयो०, मथु०, बड़ो० । ८. °त्रिधानः—बड़ो० ।

महत्परब्रह्म[1] पयोदनीलं श्रीरामचन्द्रं शरणं प्रपद्ये ।
इत्यात्मनः शरणापत्तिभावं विभावयन्[2] राज्यलक्ष्मीं च भुङ्क्ष्व ॥२६॥

श्रीराजबालं[3] समलोकपालं[4] हैयङ्गवीनाद्यकरं रघूद्वहम् ।
अहर्निशं भरत विभावयान्तरे न संसृतिः किमपि करिष्यते तव ॥२७॥

भावनेऽप्यसमर्थश्चेन्नामजापपरो भव ।
रामेतिद्व्यक्षरं नाम त्रिविधाघविदारकम् ॥२८॥

उद्दीप्तवह्निसंकाशं पापपुञ्जविदाहने ।
अहर्निशं रटन् मर्त्यः संसाराब्धिं[5] तरिष्यति ॥२९॥

द्वादश्यां पौर्णमास्यां च अन्नकूटोत्सवे तथा ।
रामप्रसादं भुञ्जानो भवाब्धिं संतरिष्यति ॥३०॥

किं[6] करिष्यति यमस्तस्य सर्वभूतोग्रदण्डनः ।
संजीर्यति च यत् कुक्षौ प्रसादो रामसिक्थकः ॥३१॥

रामसिक्थान्नसिक्थेन त्रायते पुरुषत्रयम् ।
तद्देवा अपि वाञ्छन्ति रामभुक्तोदनादिकम् ॥३२॥

शुना काकेन वाप्यन्नं भक्षितं रामभक्षितम् ।
चतुर्भुजत्वं कुरुते सद्य एव न संशयः ॥३३॥

अन्नादि रामाय निवेद्य भूयो भजेदनन्यो भगवत्प्रसादम् ।
पुण्यस्य संख्यास्य न वर्तते यद् गङ्गानुसंस्पर्शनतोऽपि धन्यम् ॥३४॥

तुलसीभूषितगलो राममुद्राधरः कुथः ।
रामप्रसादं भुञ्जानः कथं शोचति मानुषः ॥३५॥

न तस्य कार्यं त्रिषु लोकेषु किंचिद् यो रामचन्द्रस्य बिर्भत्ति मुद्राम् ।
मृत्योः परं मूर्ध्नि पदं निधाय विमोक्षसाम्राज्यमुपैति मर्त्यः ॥३६॥

एवं ज्ञात्वा पूर्वतरैर्मुनीन्द्रैःश्रितं गृहं धर्ममोक्षाविरोधि ।
त्याज्यं न कर्हिचिद्भरतोग्रबुद्धे निषेवणीयं पद्मपत्राम्बुरीत्या ॥३७॥

---

१. महः परब्रह्म—मथु०, बडो० । २. विभावयस्व—अयो०, मथु०, बडो० । ३. °रामबालं—अयो० । ४. शरणापन्नपालं—मथु०, बडो० । ···पालं—अयो० । ५. संसार च—अयो०, रीवाँ । ६. किंवा—रीवाँ ।

इति शाण्डिल्यवाक्येन नृपः संप्राप्तचेतनः ।
बभूव सुप्रसन्नात्मा स्थिते राज्ये प्रमादिनि ॥३८॥
एवं वः कथयाम्यद्धा ज्ञानं राजकुमारकाः ।
धर्ममोक्षाविरोधित्वाद् गृहं न त्यक्तुमर्हथ ॥३९॥
अथ चेद् गृहमुन्मुच्य वनं यास्यथ मित्रकाः ।
मनस्तु चञ्चलं भूयो गृह एव निवेशयेत् ॥४०॥
मनश्चेन्निर्जितं तर्हि गृहं किं नु करिष्यति ।
गृह एव जितं तैस्तु यैः सत्येन मनो जितम् ॥४१॥
फुल्लेन्दीवरलोचनं सुललितं श्यामावदाताङ्गकम्
रामं मां हृदयारविन्दसदने संविष्टमाध्यायथ ।
तस्मिन्नेव निवेद्य सर्वविषयान् स्वात्मानमप्यञ्जसा
संसाराब्धिमिमं तरिष्यथ तदा हेराजपुत्रा भृशम् ॥४२॥
इति रामनिदेशेन प्राप्तज्ञानाः कुमारकाः ।
तस्थुः श्रीरामसविधे सुहृदो नर्मवित्तमाः ॥४३॥
इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे राजकुमारकोपदेशो
नाम[1] सप्ततितमोऽध्यायः ॥७०॥

●

एकसप्ततितमोऽध्यायः

ब्रह्मोवाच

विहङ्गमसमानीतप्रियाचित्रावलोकनैः ।
कृच्छ्रं राघवशार्दूलो दिवसानत्यवाहयत् ॥ १ ॥
रक्ताशोकलताकुञ्जदेवता स्वयमीश्वरी ।
जानकी जनकाख्यस्य राज्ञो गेहेऽप्यजीजनत् ॥ २ ॥

---

१. °कुमारकोपदेशे—अयो०, रीवाँ, मथु०, बडो० ।

सा मे कदा दृष्टिपथं प्रयास्यति प्रिया रमा कोटिमनोजविग्रहा ।
व्रजस्त्रियोऽपि प्रियमङ्गमस्या आविश्य भोक्ष्यन्ति मया रसाम्बुधिम् ॥ ३ ॥

इमाः समाविश्य यथा रमा वरान् विशेषभोगान् बुभुजे पुरा बहून् ।
अमुं समाविश्य तथा व्रजस्त्रियो भोक्ष्यन्ति भोगान् राज्यलक्ष्मीसमेतान् ॥४॥

इत्येवं वाञ्छति श्रीशे सीतापरिणयोत्सवम् ।
विधिरप्यनुकूलोऽभूद्विधेयः परमात्मनः ॥ ५ ॥

अथैकदा गाधिपुत्रो विश्वामित्र इति श्रुतः ।
ऋषिः साकेतनगरमगमत् सह शिष्यकैः ॥ ६ ॥

तमागतमृषिं वीक्ष्य समुत्तस्थौ वरासनात् ।
प्रणम्य चैव साष्टाङ्गं मानार्हं विधिवन्नृपः ॥ ७ ॥

आलिङ्ग्य चोपवेश्यामुमपृच्छत् कुशलं मुहुः ।
कृताखिलशुभः प्रश्नः स ऋषिः कलितार्हणः ॥ ८ ॥

पादोपसेवनाद्याभिः क्रियाभिः प्रीतमानसः ।
उवाच राघवश्रेष्ठं वीरं बहुपराक्रमम् ॥ ९ ॥

ऋषिरुवाच

चिराद् दृष्टोऽसि राजेन्द्र साकेतनगरीपते ।
पुरा दृष्टस्त्वं सुराणां रणे साहाय्यमाचरन् ॥१०॥

अहो तव बलावेशो मया वक्तुं न शक्यते ।
एकादशसहस्राणि रक्षसां यदयोधयत् ॥११॥

सहायमुपलभ्य त्वां रणे शक्रादयोऽमराः ।
अजयन् राक्षसानीकं दुर्धर्षं च वरोर्जितम् ॥१२॥

अहो दशसहस्राणि वर्षपूगानि तेऽगमन्[1] ।
युध्यतो दानवैः सार्द्धं देवानां च जयार्थिभिः ॥१३॥

अहो धनुर्ज्याकिणबन्ध एष प्रकोष्ठयोस्ते समलङ्करोति ।
वीरत्वहेम्नः कषणोपलाभं स्वरूपयोर्घर्ष इवातिशुद्धः ॥१४॥

---

१. निर्गमन्—अयो० ।

अहो त्वदीयं विमलं कुलं यत् केतुस्तपत्येष दिवामणिः स्वयम् ।
स्वरूपतस्त्वं बलदक्ष एव श्रीकान्तपादार्पितचित्तवृत्तिः ॥१५॥
अगाधपुण्यपात्राणामग्रणीस्त्वं जगत्पते ।
इन्द्रोऽपि भवतः साम्यं प्राप्तुं नैवाशकत् प्रभो ॥१६॥
अधुना तु विशेषेण भागधेयनिधिर्भवान् ।
संजातो यद्भुवद्गेहे पूर्णोऽसौ पुरुषोत्तमः ॥१७॥
श्रीरामो राघवेन्द्रो वै रसिकेन्द्रशिरोमणिः ।
एष वै देवकार्याय प्रादुर्भवति नित्यशः ॥१८॥
बलकृष्णादिरूपेण जगत्कल्याणकारकः ।
इदानीं पूर्णरूपेण भवद्गेहेऽप्यवातरत् ॥१९॥
एष एव श्रिया[1] साकं शेते प्रमुदकानने ।
अस्यैवांशः स पुरुषो यः सहस्राननेक्षणः ॥२०॥
वासुदेवादयोऽप्येवं ब्रह्मादिसुरपूजिताः ।
चतुर्युगेषु कालेषु राम एवायमीरितः ॥२१॥
रमाया रमणः साक्षात्तेन रामेतिकीर्तितः ।
स ते तनयतां प्राप्तः पूर्णब्रह्म सनातनः ॥२२॥
यस्याहुरागमाः सर्वे सुपुण्यं विमलं यशः ।
एकान्तेन स्थितो ह्येष प्रमुद्वनविहारवान् ॥२३॥
प्रादुर्भावात् पूर्वमपि रामसत्ता सनातनी ।
प्रमोदविपिनस्यान्तरशोकलतिकावने ॥२४॥
यः पूज्यते सुरेन्द्राद्यैः स रामस्तनयस्तव ।
धर्मद्रुहां राक्षसानां संहारार्थमवातरत् ॥२५॥
यज्ञविध्वंसकर्तॄणि रक्षांसि प्रहरिष्यति ।
राजन् मम्माश्रमोद्देशे यज्ञः पूर्वप्रवर्तितः ॥२६॥
स राक्षसैः महाघोरैः प्रत्यूह्यत[2] इतस्ततः ।
सदैवाशुचयो नग्ना मलिनाः कृमिभक्षिणः ॥२७॥
अदर्शनं समास्थाय यज्ञघाते भवन्ति वै ।
नैतेषु मन्त्रसामर्थ्यं वरदृप्तेषु वै भवेत् ॥२८॥

---

१. रामः प्रिया—रीवाँ । २. प्रत्युद्यूत—अयो० ।

दैवैः क्षुद्रप्रतिष्ठैस्ते वर्धिता धर्मनाशकाः ।
विनाशयोग्यास्ते रामलक्ष्मणाभ्यां शितैः शरैः ॥२९॥
एवं युगे युगे धर्मः पाल्यमानः प्रवर्तते ।
अमुना रामेणैवायं नान्यथा गतिरस्य हि ॥३०॥
अस्मिन् सनातनो धर्मः स्वयमेव प्रतिष्ठितः ।
अतश्चराचरं विश्वं शुभाय प्रतिपद्यते ॥३१॥
तत्त्वं विज्ञापयाम्यद्धा दातारं[1] सर्वरक्षकम् ।
रामं प्रदेहि मे राजन् धर्मरक्षकमच्युतम् ॥३२॥
नहि काकुस्थवंशेऽस्मिन् कश्चिदर्थी पराहतः ।
इत्युक्तो गाधिपुत्रेण विश्वामित्रेण पार्थिवः ॥३३॥
ओमित्युक्त्वा मुनेः संगे अकरोद्रामलक्ष्मणौ ।
तौ बद्धदिव्यतूणीरौ ऋषेरनुगतौ पथि ॥३४॥
रुरुचाते श्रिया सम्यक् भास्करज्वलनोपमौ ।
अधिज्यधनुरुन्मुक्तैस्त्रासयन्तौ शरैररीन् ॥३५॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे विश्वामित्र-समागमो नाम[2] एकसप्ततितमोऽध्यायः ॥७१॥

●

द्विसप्ततितमोऽध्यायः

ब्रह्मोवाच

पथि प्रगच्छतो रामसौमित्रेयकुमारयोः ।
अभवद्रोधको मध्ये बलिष्टो गर्दभासुरः ॥ १ ॥
तमायान्तं हरिर्वीक्ष्य शरेणोरस्यताडयत् ।
स चाविगणयित्वैव रामं पद्भ्यामताडयत् ॥ २ ॥

---

१. °पयामासं धातारं—अयो० । २. °समागमे—अयो०, रीवाँ, मथु०, बड़ो० ।

वक्त्रेण चादशद्वक्षः स तं दोर्भ्यामताडयत् ।
ताडितस्तस्य हस्तेन पपात स धरातले ॥ ३ ॥
पुनर्निश्वस्य वै पश्चात्पादाभ्यां समताडयत् ।
दूरे स्थित्वा ततो रामस्तं विव्याध शितैः शरैः ॥ ४ ॥
नेत्रयोश्च मुखे चैवं सोऽवमद्रुधिरं ततः ।
अन्धीकृतस्ततस्तेन दुधाव स्वशिरो दृशः ॥ ५ ॥
गर्जयन् हरितः सर्वाश्चुक्रोध बहुशोऽपि सः ।
पुनर्गर्जन् पुनर्धावन् पुनः संताडयन् खरः ॥ ६ ॥
चकार संमृधं घोरं रामेण सह राक्षसः ।
ततो रामः स्ववीर्येण तं पश्चात्पादयोर्बलात् ॥ ७ ॥
गृहीत्वा शैलशृङ्गाग्रे ताडयामास राघवः ।
एकवारं द्विवारं च त्रिवारं च पुनः पुनः ॥ ८ ॥
यावत् स व्यसुतां याति कामरूपोऽपि राक्षसः ।
ततस्तत्परिवारोऽपि युयुधे हरिणा सह ॥ ९ ॥
स ताभ्यां रघुपुत्राभ्यां क्षयं नीतो बलोद्धतः ।
मुमुचुश्च तयोर्मूर्ध्नि पुष्पवृष्टिं दिवौकसः ॥१०॥
शेषास्तत्परिवारस्था राक्षसा सिन्धुमभ्यगाम् ।
लङ्कापुरीं ययुः सर्वे शरणं राक्षसेश्वरम् ॥११॥
अग्रे पथि ततः काचित्ताडका नाम राक्षसी ।
मध्येऽग्रहीद्रामचन्द्रं विश्वामित्रानुयायिनम् ॥१२॥
प्रभुस्तस्याः सुतौ पूर्वं हृतवानिति सा जवात् ।
क्रोधेन राक्षसी तत्राभ्यगाद्रामजिघांसया ॥१३॥
कपालहारिणी घोरा शवान्त्रस्तोममालिनी ।
कपालकुण्डलधरा क्षुत्क्षामा निम्नतोदरी ॥१४॥
व्याघ्रचर्मपरीधाना दंष्ट्रादन्तुरिताम्बरा[1] ।
भीषयामास सा रामं कालस्यापि च भीषणम् ॥१५॥
निश्वसन्ती विषश्वासैः प्लोषयामास पादपान् ।

---

१. दंष्ट्रान्तप्रसिताम्बरा—रीवाँ ।

क्षणेन तद्वनतृणं प्राज्वलद्विषमारुतैः ॥१६॥
रामो विव्याध मार्गेण[1] ताडकामथ वक्षसि ।
साभ्येत्य दृढमुष्टचैनं गाढं वक्षस्यताडयत् ॥१७॥
रामस्य निशितैर्बाणैस्ताडकायाश्च मुष्टिभिः ।
अभूद्घोरतरं युद्धं देवविस्मयकारकम् ॥१८॥
ततो राघवशार्दूलो बाणं धनुषि संदधे ।
तस्याः प्राणहरं घोरं उक्षितं विषपाथसा ॥१९॥
सा ताडिता तेन शरेण ताडका विषोल्वणेनासुहरेण तेजसा ।
पपात भूमौ सहसात्मकुल्यैः साकं विदीर्णास्यभयानकाकृतिः ॥२०॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे खरताडका-
प्राणहरणो नाम द्विसप्ततिमोध्यायः ॥७२॥

●

त्रिसप्ततितमोऽध्यायः

ब्रह्मोवाच

गाधेयः स्वगृहं नीत्वा रामं त्रैलोक्यपावनम् ।
यज्ञं प्रवर्तयामास तस्य भूतिहरेशितुः ॥ १ ॥
अग्निष्टोमं मखवरमत्यग्निष्टोममेव च ।
उक्थ्यं षोडशिनं चैव वाजपेयं तथैव च ॥ २ ॥
अतिरात्रमाप्तोर्यामं संस्थाभिः सप्ततन्तुकम् ।
प्रातःसवन एवाथ राक्षसाः पुण्यकृन्तनाः ॥ ३ ॥
आययुर्गाधिसूनोस्तं मखं मखविनाशकाः ।
तान् रामो विशिखैस्तीक्ष्णैरग्रहीदरिवारणः ॥ ४ ॥
मारीचाद्या महाघोराः सुबाहुप्रमुखाश्च ते ।
ताडकावधसामर्षा निपेतू राघवं प्रति ॥ ६ ॥

---

१. "मार्गेण = मार्गणेन" टि०—मधु० ।

स तानापततो वाणैः सर्वान् पर्यग्रहीद्बली ।
यथा पराक्रमी सिंहः कुञ्जरान् काननद्रुहः ॥ ७ ॥
यूपं प्रभञ्जयिष्यामः[1] पत्नीशालां च पूर्ववत् ।
आसन्दीं[2] चैव सोमस्य पातयिष्याम उच्चकैः ॥ ८ ॥
स्रुकस्रुवौ त्रोटयिष्यामः इडां क्षेप्स्यामहे पुनः ।
चमसान् विकिरिष्यामो ग्रसिष्यामश्च यज्वकम् ॥ ९ ॥
वेदं विध्वंसयिष्यामो वेदीं यास्याम लङ्घनात् ।
प्राशित्रं नाशयिष्यामो यज्ञाङ्गान्याखिलान्यपि ॥१०॥
अस्माकं भागधेयाय देवानां वर्जनाय च ।
इति निश्चित्य ते घोराः पूर्ववत्समुपागताः ॥११॥
आययुः सहसा रामवाणानलपतङ्गताम् ।
मारीचस्ताडितो वाणैः पलायत रणान्तरात् ॥१२॥
सुबाहुर्विशिखैर्घोरैरभृशमेव निपीडितः ।
जृम्भको नाम वै नीतो राक्षसो यमसादनम् ॥१३॥
दुःसहश्च शरैर्घोरैर्नीतो यमनिकेतनम् ।
एवं नैर्ऋतवर्येषु म्रियमाणेषु सर्वतः ॥१४॥
राघवेन्द्रशरौघेण शेषा लङ्कापुरीं ययुः ।
तत्र तान् भग्नगात्रौघान् पश्यतो राक्षसान्निजान् ॥१५॥
लङ्केशितुश्च हृदये निखातं वीर्यमात्मनः ।
रामबाणप्रभावेण विद्रुता राक्षसेश्वराः ॥१६॥
रावणं शरणं जग्मुर्लङ्कायां मृत्युकातराः ।
अद्भुतं विक्रमं दृष्ट्वा लक्ष्मणो राममूचिवान् ॥१७॥

श्रीलक्ष्मण उवाच

अहो आर्यस्य चरितमद्भुतं पश्यतो मम ।
हृदयं हरते राम त्रिदशानां तु का कथा ॥१८॥

१—°यिष्यामि—रीवाँ ।　　२. "आसन्दीं = सोमवल्लीस्थापनशकटीम्" टि०—मधु० ।

स्थिताः सुपर्वाण इमे विमानेष्वार्यस्य दिव्यं चरितं निरीक्ष्य ।
अद्याप्यबिभ्रन्न दृशोर्निमेषं विचित्रदृष्टिस्तिमिताक्षमीनाः ॥१९॥
जाने भवानद्भुत एव कश्चित् पूर्णः परः पूरुषपुङ्गवोऽस्ति ।
जगत्समुद्धर्तुमिहावतीर्णः खगान् मृगान् राक्षसान् दुःखभावान् ॥२०॥
अत्यर्थमेतत्कदनं त्वयाद्य सुरद्रुहां पश्यतो मे कृतं यत् ।
तेन त्वदीयं रघुवर्य वीर्यं विज्ञातमज्ञानदृशं प्रमार्ज्य ॥२१॥
आर्य प्रभो पश्यतां मानुषाणां बालोऽसि कञ्जच्छदकोमलाङ्गः ।
दैतेयरक्षोदनुजप्रमाथे वज्राधिकं सारमुरीकरोषि ॥२२॥
अमी धरण्यां खलु शेरते भृशं भवच्छराग्निस्पृशिदग्धविग्रहाः ।
शैलेन्द्रकूटप्रतिमांसबाहवो भयानका योजनविंशकायतः ॥२३॥
उत्क्षेपिता हरिदन्तेषु वाणैः कुलाद्रिकल्पा रासक्षाः शेरते स्म ।
पराङ्मुखे त्वय्यजवंशकेतौ पराक्रमयान्ति वैफल्यमेव ॥२४॥

श्रीराम उवाच

नैते मया हता भ्रातस्त्वया खलु निपातिताः ।
इच्छामात्रेण सौमित्रे स्मर तात निजं बलम् ॥२५॥
अथ चेदहमेतानि रक्षांसि समनाशयम् ।
तथापि नात्मना किन्तु त्वदावेशेन लक्ष्मण ॥२६॥
संकर्षणोऽसि कालाग्निः तवैतत्कर्म लक्ष्मण ।
प्रमोदवनकुजान्तःकुटीषु रमणं मम ॥२७॥
नाहमेतेन क्लेशेन युञ्जेय क्वापि लक्ष्मण ।
गवेन्द्रमन्दिरे दिव्ये नवनीतस्य भक्षकः ॥२८॥
किं कष्टं मम दैतेयैः किं सुखं च सुपर्वभिः ।
निर्लेपस्य निरीहस्य निर्विकारस्य सर्वदा ॥२९॥
एतत्तवोचितं कर्म कालस्याव्ययरूपिणः ।
सृजस्यवसि भूतानि क्षेपयस्यनिशं प्रभुः ॥३०॥
देवे सुरे नरे नागे तापसे व्रतवर्जिते ।
समदृष्टिरहं तात न मे कार्यमिह क्वचित् ॥३१॥

रामेण रक्षिता यज्ञा विश्वामित्रस्य धीमतः ।
प्रावर्त्तताहर्निशं वै वत्सरान् विघ्नवर्जिताः ॥३२॥
तत्रैवोवास रक्षार्थं तावद्रामः सलक्ष्मणः ।
क्षपयन् राक्षसानीकान् भौमदिव्यन्तरिक्षगान् ॥३३॥
रामस्य निशितैर्वाणैर्भिद्यमानास्तु राक्षसाः ।
प्रवेशं लेभिरे नैव भ्रमन्तः परितो मखम् ॥३४॥
शरवर्षेण वै रामो नीरन्ध्रं पञ्जरं व्यधात् ।
न यत्र प्रविशेद्रक्षो मन्त्रै रक्षोघ्नरूपिभिः ॥३५॥
प्रातर्माध्यन्दिने सायं सवनेषु त्रिषु स्थिरः ।
अधिज्यो धनुरादाय ररक्ष राघवो मखम् ॥३६॥
एवं यावत्समाप्तिः स्याद् दीर्घसत्रविधेर्मुनेः ।
तावद्रामः सहातिष्ठल्लक्ष्मणेन सहायवान् ॥३७॥
सत्रे समाप्ते गाधेयो ज्ञात्वामुं पुरुषं परम् ।
अवर्द्धयच्छुभाशीर्भिस्तुष्टाव च शुभैस्तवैः ॥३८॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे विश्वामित्र-यज्ञरक्षणो नाम[1] त्रिसप्ततितमोऽध्यायः ॥७३॥

●

चतुस्सप्ततितमोऽध्यायः

विश्वामित्र उवाच

त्वं मत्स्यकूर्मादिनिजावतारेष्वेकाकिनैवावतरस्यात्मनेशः ।
रामावतीर्णोऽस्यधुनातु पीठच्छत्रायुधस्त्रक्[2]शयनादिभिःसह[3] ॥ १ ॥
इदं ते परमं पीठमक्षरं ब्रह्म यत्परम् ।
छत्रं ते विमलं सत्त्वं रजसस्तमसः परम् ॥ २ ॥

---

१. °रक्षणे–अयो०, रीवाँ, मधु०, बड़ो० । २. °रत्न°–रीवाँ० । ३. खलु–रीवाँ ।

आयुधानि च श्रीराम धनुर्वाणासिचर्म च ।
धर्मार्थकाममोक्षाणां चतस्रोऽप्यधिदेवताः ॥ ३ ॥

स्रग्वैजयन्ती भवतः पञ्चवर्णप्रसूनजा ।
आपादपद्मप्रणता यशःसौरभसंभृता ॥ ४ ॥

शयनं ते शेषनागो वेदात्माक्षरविग्रहः ।
कालात्मा पुरुषः पूर्णो यमनन्तं प्रचक्षते ॥ ५ ॥

तेऽमी भवत्सन्निधिवर्तमानाः प्राप्तैकभावाः प्रकृतेः परस्मात्[1] ।
स्थाने स्थिता वासुदेवादिरूपा रमेश ते पूर्णतां द्योतयन्ति ॥ ६ ॥

त्वमेव च्छन्दसां राशिस्त्वं वर्हिर्यज्ञसाधनम् ।
त्वमाज्यं हविराधारं चातुर्होत्रस्त्वमेव च ॥ ७ ॥

त्वं स्रुक्स्रुवौ च चमसास्त्वमिडा त्वं ग्रहास्तथा ।
त्वं प्रासित्रं त्वमेवाद्यमग्निहोत्रं निदर्शितम् ॥ ८ ॥

त्वं दीक्षणीया देवेश त्वमेवोपसदास्त्रयः[2] ।
त्वं प्रायणीयोदयणीये प्रवर्ग्यस्त्वमेव हि[3] ॥ ९ ॥

अत्यग्निमण्डपस्त्वं च त्वं यागः षोडशी तथा ।
वाजपेयोऽतिरात्रस्त्वं आप्तोर्यामस्त्वमेव च ॥१०॥

द्वादशाहादिसत्राणि त्वमेव त्वं क्रतुस्तथा ।
त्वं यज्ञस्त्वं तथैवेष्टिस्त्वं स्वर्गस्तत्फलं प्रभो ॥११॥

वैराग्ययुक्तं कर्म त्वं सत्त्वशुद्धिस्त्वमेव च[4] ।
त्वं भक्तिस्त्वमात्मजयश्चित्रस्थैर्यं त्वमेव च ॥१२॥

तेनानुभवितं ज्ञानं त्वमेव जगदीश्वरः ।
निर्विघ्नता त्वं कार्याणां त्वमेवाखिलमङ्गलम् ॥१३॥

ज्ञानानि यज्ञाश्च तपांसि कर्माण्यलं प्रपूर्यन्त इतः प्रसन्नात्[5] ।
त्वय्यप्रसन्ने हि किमात्मवर्त्तिभिः किंकर्मभिः किंतपसा किंच भव्यैः ॥१४॥
कृतोपकारोऽसि मयि प्रसादात् प्रभो तव प्रत्युपकारमप्यहम् ।

---

१. °तेर्यकस्मात्—अयो०, रीवाँ । २. °श्रयः—अयो० । ३. त्वष्टमेव च—रीवाँ । ४. त्वमात्मजा—रीवाँ । ५. प्रसन्ने—रीवाँ ।

वाञ्छामि कर्तुं यदि भो मया सह समेष्यसि त्वं मिथिलेन्द्रमन्दिरम् ॥१५॥
तस्यात्मजा [तत्र]किमप्ययोनिजा साक्षाद्रमा कोटिविधुप्रकाशा ।
तवोचिता श्रीः पुरुषोत्तमस्य मन्दस्मिता भूषितवक्त्रचन्द्रा ॥१६॥
राजापि स ब्रह्मविदां वरिष्ठः श्रीमैथिलेन्द्रो जनको वीतरागः ।
जामातरं त्वामुपलभ्य रामं गार्हस्थ्यमासादयिता फलाढ्यम् ॥१७॥
अत्यद्भुतं गाधिसूनोर्वचस्तदाकर्ण्य रामस्त्रपया बद्धमौनः ।
विलोक्यतां लक्ष्मण वत्स संप्रति व्योमावदातातपमित्यवादोत् ॥१८॥
अर्थान्तराक्षिप्तहृदं स रामं विज्ञाय शीलेन विबद्धमौनः ।
नैम्यस्य तामनयद्राजधानीं नाम्ना शुभां मिथिलेतिप्रसिद्धाम् ॥१९॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे मिथिलागमनोद्यमो नाम[1] चतुस्सप्ततितमोऽध्यायः ॥७४॥

❁

पञ्चसप्ततितमोऽध्यायः

ब्रह्मोवाच

स गत्वा मिथिलापुर्याः सविधे सहराघवः ।
मुनिर्माध्याह्निकीं सन्ध्यां विधिना निरवर्तयत् ॥ १ ॥
तावद्राजकुमारौ तौ आरामश्रियमीक्षितुम् ।
मिथिलोपवने तत्र सुखं विविशतुर्मुदा ॥ २ ॥
तौ रामणीयकमवेक्ष्य वनस्य फुल्ल-
वासन्तिकापरिमलभ्रमितालिजुष्टम्[2] ।
प्राप्तो वसन्त इति तावधिजग्मतुःप्रा-
गागामिभि[3]र्मलयशैलसमीरणौघैः ॥ ३ ॥

---

१. गमनोद्यमे—अयो०, रीवाँ, मथु०, बड़ो० । २. °थान्तं—मथु°, बडो० । ३. °तुर्वैप्रागामिभिः—अयो०, मथु०, बडो० ।

तत्रागमच्च मिथिलेन्द्रकुमारिका सा
सीता स्वयं नमितुमालयमम्बिकायाः ।
तां वीक्ष्य भूय उदितस्मरबाणताप-
संभ्रान्तचित्त इव तत्क्षणमास रामः ॥ ४ ॥

श्रीराम उवाच

एषा विमानादवरुह्य याति विद्याधरी चापि सुरी नरी वा ।
सौदामिनी वा रतिकामिनी वा शची रमा वा हिमशैलजा वा ॥ ५ ॥
न मे प्रयात्येव मनोरथान्तर्वर्धिष्णुभिर्निःप्रतिमैर्महोभिः ।
जाने ममानङ्गजतापहारिणी पीयूषधारेयमहो भविष्यति ॥ ६ ॥
अहो अमुष्या मिलने वनेऽस्मिन् वसन्तकालोदय एष जातः ।
लोकोत्तरं धाम चकास्ति तावत् समंततो रत्नसमूहचित्रम् ॥ ७ ॥
अहो अपूर्वैव विभाति सृष्टिर्मन्ये न सामान्यविरञ्चिलेखा ।
अयोनिजां यां मुनिराह सेयं स्वभावसौन्दर्यमयीव लक्ष्मीः ॥ ८ ॥
अहो इदं चायतनं शिवायास्तामर्चितुं तावदसाविहागमत् ।
तत्प्रार्थयेऽहं प्रथमं महेशीमस्या स्वयंवरविधौ मणिमल्लिकायै[1] ॥ ९ ॥
धन्येयं मिथिला नाम नगरीणां शिरोमणिः ।
यस्यामियं दृश्यते वै युवतीनां शिरोमणिः ॥१०॥
रक्ताशोकलताकुञ्जे इयमेव रता मया ।
इदानीं नाभिजानाति मोहिता मम मायया ॥ ११॥
आद्वीपात् क्षीरसिन्धोश्च भूपालाः संगता अमी ।
महावीरा महेष्वासा महाबलपराक्रमाः ॥१२॥
तेषां मध्ये तु मत्तोऽन्यः कोऽस्याः पाणिं ग्रहीष्यति ।
इति निश्चित्य मनसा धीरोऽस्मिन्नस्मि[2] राघवः ॥१३॥
[3]इत्यागतां तामवलोक्य रामः[3] शिवालये कोटितडित्प्रकाशाम् ।
मुमूर्च्छ वैवेति कथंचिदुन्मनाः संस्मृत्य गाधेयमृषिं न्यवर्तत[4] ॥१४॥

---

१. °काद्यैः—मथु०, बड़ो० । २. °नतु—अयो०, बड़ो० । ३—३. नास्ति —अयो०, रीवाँ । ४. "संस्मृत्यगाधेयमृषिं ततः शीघ्रं न्यवर्तत" इत्यनुष्टुभेन— अयो० रीवाँ ।

कृतमाध्यन्दिनविधिं मुनिं कृत्वा पुरःसरम् ।
धनुर्धरावाविशतां कुमारौ मिथिलां पुरीम् ॥१५॥
तौ पश्यतां पौरजनेक्षणानां पीयूषवृष्टिः समभूत्क्षणेन ।
शृङ्गारसारावयवौ मनोज्ञौ पारेपरार्द्धस्मरसन्निवेशौ ॥१६॥
तौ तत्र संमर्दमथो नृपाणामपश्यतामष्टदिग्भ्यो युतानाम् ।
सीतापणीभूतगिरीशचापपराहताव्याहतदुर्बलानाम् ॥१७॥
कन्यां निरीक्ष्यामितहर्षभाजो धनुर्विलोक्यामितदुःखनिःसहाः ।
आजग्मुरावेगमतीव भूमिपा दैवी तथेच्छा तु परं सुदुर्घटा ॥१८॥
तुङ्गेषु मञ्चेषु नृपालयाङ्गणे स्वां स्वां दिशं प्राप्य परिस्थिता नृपाः ।
संशोभयामासुरुदाररोचिषा समन्ततस्ते मिथिलेन्द्रपत्तनम् ॥१९॥
नानादिगन्तदेशेभ्यो नानानामान एव ते ।
सीतास्वयंवरोत्साहे संगता अभवन्नृपाः ॥२०॥
तेषां संचरतां मत्तगजानां रत्नमालिनाम् ।
घण्टारावेण पिहिता दिशोऽष्टौ मिथिलापुरी ॥२१॥
सीतास्वयंवरजहर्षवशंवदोऽसौ रामः सरोजदलकोमलविग्रहत्वात् ।
गाधेयचेतसि धनुर्विषये पुरारेरीषच्च संशयपदं व्यतनोन्मुनीशः ॥२२॥
त्रिंशत्या वाहनानां यद् धार्यं[1] हरधनुः क्व तत् ।
सिरीषप्रसवागर्भकोमलः क्व च राघवः ॥२३॥
इतिसंततसंदेहदोलायितमनोगतिः ।
मिथिलेन्द्रगृहद्वारमगमद् गाधिनन्दनः ॥२४॥
इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे मिथिलागमनो
नाम[2] पञ्चसप्ततितमोऽध्यायः ॥७५॥

---

१. दधीचास्थिमयं सारं त्विदं—रीवाँ। २. मिथिलागमने—अयो० रीवाँ, मधु०, बड़ो०।

षट्सप्ततितमोऽध्यायः

इतः सा कौशिकी नाम शुद्धनीरा तरङ्गिणी ।
विश्वामित्रस्य क्षत्रस्य ब्रह्मतेजःप्रभेव या[1] ॥ १ ॥
इतो घोषवतीनाम पुण्यतोया महानदी ।
द्वयोर्मध्ये पुरी श्रेष्ठा मिथिला नाम सा पुरी ॥ २ ॥
यस्यां निमिकुलोत्तंसो जनको नाम भूपतिः ।
जन्मज्ञानी जन्मशुद्धो महायोगी सदाश्रयः[2] ॥ ३ ॥
[3]तस्य सा परमा कन्या सीता नाम्नी त्वयोनिजा ।
यज्ञवेद्यां समुद्भूता पश्यतां महसां पुरा ॥ ४ ॥
रुक्मिणी[3] सत्यभामाद्या यस्यांशाः सकला अपि ।
भूलीलाराधिकेत्यादि नामपर्याययोगिनी ॥ ५ ॥
चाम्पेयगर्भमृदुला दामिनीशतविग्रहा ।
प्रेमभक्तिस्वरूपेण अवतीर्णा भवेत् स्वयम् ॥ ६ ॥
अस्याः संस्मरणादेव प्रेमभक्तिः प्रवर्द्धते ।
तया संतुष्यते रामो वशीभवति नान्यथा ॥ ७ ॥
मतिश्चापि रतिश्चैव द्वे प्रिये जगदीशितुः ।
रामस्य दुर्भगा त्वाद्या सुभगा त्वितरैव हि ॥८॥
सेयं सीतेति सहजा नाम्ना ख्यातागमत्रये[4] ।
एनामेव प्रगायन्ति नेतिनेतीति चागमाः ॥ ९ ॥
सा नित्या संगता रामे तत्स्वयम्वर ईर्यते ।
ब्रह्मादयोऽपि यत्रासन् महाकौतुकनिर्वृताः ॥१०॥

अथ मिथिला नाम्नी सा नगरी बृहद्गोपुरविराजितकनककपाटा संकलितसुवर्णशृङ्गाटका देवगिरिप्रतिमप्राकारपर्यन्तप्रविन्यस्तागाधपरिखाजला महामङ्गलप्रसंगविस्तीर्णनगरद्वारा मणिहेममयतोरणा विशाल-

---

१. विश्वामित्रब्रह्मतेजःप्रभेव या विराजते —रीवाँ । २. अयं श्लोको नास्ति—अयो०, जन्मवैराग्यशेवधिः—मथु०, बड़ो० । ३–३. नास्ति—अयो०, रीवाँ । ४. जगत्त्रये—अयो० ।

पुराट्टालस्फाटिकभित्तिप्रतिफलितरविरश्मिसंदोहचकच्चकायमाना नानामणिप्रभावलीभिः पुरन्दरधनुर्लतायमाननगरगोपानसीका विततापणप्रसार्यमाणसुवर्णमणिरत्नप्रचुरा विशालस्वरमूर्छायितान्तरिक्षपथैर्गन्धर्वराजैरुपगायद्भिरासादितगोष्ठीमनोरमा पवनान्दोलितदीर्घध्वजपटसनाथप्रासादशिखरोपात्तघूर्णायमानप्रमत्तकपोतकुलमन्दध्वनिमनोहरा अनवरतहुताज्यगन्धिश्रोत्रियागारोपरिभ्रमद्धूमलेखानुक्षणधावद्बुभुक्षुद्विजकुला निरन्तरप्रवृत्तदीर्घदीक्षाकाध्वरसमामन्त्रितपुरन्दरादिदेवगणा चतुर्वर्णचतुराश्रमाचारप्रवर्त्तनमूलकरणभूता ॥ ११ ॥

तस्यां नगर्यां दीर्घध्वजपताकातूर्यत्रिकनादानुलक्षितं जनकभूभुजः पुण्यतमं भवनम् । यत्र भगवांस्त्रिकालपरामर्शविदितवेद्यो ब्रह्मविद्वरिष्ठो याज्ञवल्क्यो नाम योगीन्द्रोऽमुष्मै एव परब्रह्मविद्यामुपदिशन् प्रीतिपणित इव निरन्तरमास्ते ॥ १२ ॥

अन्ये च शुकवामदेवप्रमुखास्तादृशा एव निर्ग्रन्थाः समुत्तीर्णशब्दब्रह्मविषयाः परमनयोः कथानकं ब्रह्मोद्यं जायमानं शृण्वन्ति । तत्र तमायान्तं गाधिनन्दनमुपश्रुत्यासन्नमकक्षान्तमभिवन्द्य गृहेऽप्रवेशयज्जनकराजः ॥ १३ ॥

तत्र स्थितं याज्ञवल्क्यं ववन्दे गाधिनन्दनः ।
स च तं वर्द्धयामास शुभाशीर्भिः सुतोपमम् ॥१४॥
कृतार्हणं तेजसोग्रं ब्रह्मक्षत्रं महामुनिम् ।
उवाच नृपतिश्रेष्ठो जनको ब्रह्मवित्तमः ॥१५॥

राजोवाच

स्वागतं ते मुनिश्रेष्ठ चिराद् दृष्टोऽसि भाग्यतः ।
भवादृशा हि धरणौ नृणां गच्छन्ति शर्मणे ॥१६॥
कुशलं त्वयि योगेन्द्र प्रष्टव्यं सेवकैर्जनैः ।
अन्येभ्यः कुशलं दत्से त्वयि कस्तस्य संशयः ॥१७॥

ऋषिरुवाच

राजन् निमिकुलोत्तंस किमाश्चर्यं भवादृशः ।
स्वभावमधुराचारा विशेषाद् गृहमागताः ॥१८॥

धन्योऽसि कृतकृत्योऽसि यस्य योगर्द्धिरुत्तमा ।
ब्रह्मविद्वर वन्द्योऽसि योगीन्द्र जनकेश्वर ॥१९॥
धन्येयं मिथिला यत्र भूमिपालो भवादृशः ।
ज्ञानविज्ञानसंपन्नो दर्शनात् पङ्क्तिपावनः ॥२०॥

राजोवाच

इमौ कौ भवतः संगे कुमारौ दीप्तवर्चसौ ।
ललितैः श्यामलैरङ्गैर्दृक्पीयूषप्रवर्षिणौ ॥२१॥
धनुर्वाणधरौ तुल्यवेशौ निजपराक्रमौ ।
अहो अत्यद्भुतावेतौ सानन्दं कुरुतोऽद्य माम् ॥२२॥

ऋषिरुवाच

अस्ति रविवंशकेतुर्महामना महाधार्मिको महातेजस्वी दितिजदनुज-रक्षोवधसंतोषितपुरन्दरादिसुपर्वगणोद्गीतविपुलकीर्तिः साकेतपुरीपालो राजा दशरथो नाम ॥२३॥

तस्येमे ऋष्यशृङ्गभागधेयपुञ्जा इव चत्वारो रघुकुलपुण्यपरिपाक-परिप्राप्तोपचयवद्विग्रहाः पुत्रा रामलक्ष्मणभरतशत्रुघ्नेत्याख्याभिः प्रसिद्धाः ॥२४॥

त्रिभुवनेऽपि ईशौ तौ रामलक्ष्मणौ यौ दृप्तानेकराक्षसकुलवधेन मदीयमहायज्ञदीक्षानिवर्हणादीक्षितेन धनुषा सनाथीकृतकरतलौ भरत-शत्रुघ्नौ पुनर्दशरथस्य दृशमानन्दयन्तौ साकेत एवाभिनन्दयतः ॥२५॥

अमी ते सीतापुरोगानां चतसृणां दुहितृणां विधिनैव निरूपिता अनुरूपवयोवेशर्द्धिकुलसंपन्ना वराः । लोकोऽपि संपन्नमनोरथ एव प्रायशो भविता यः श्रीरामेण वरेण वरस्वयंवरसमाप्तौ ॥२६॥

इति श्रुत्वा स भूपालो विश्वामित्रोदितं वचः ।
सस्मार शाङ्करं धन्व महावज्रशिलादृढम् ॥२७॥

राजोवाच

अहो दशरथो राजा पुण्मात्मा पुण्यकीर्तनः ।
तस्येमौ तनुजौ वीरौ भाग्याद् दृष्टिपथं गतौ ॥२८॥

परं त्वेकः पणो घोरः कन्याविवरणे मम ।
आरोपयेद् य ऐशं तद्धनुस्तस्मै प्रदीयते ॥२९॥
इत्युक्तः स मुनी राज्ञा जनकेन मनस्विना ।
राममालोक्य प्रोवाच सस्मितं मधुरं वचः ॥३०॥
संबध्यतां परिकरो हरकार्मुकरोपणे ।
वत्स राम त्वमियति समस्ते वीरमण्डले ॥३१॥
कुर्वपूर्वतरं कर्म यत्र वै वाणरावणौ ।
अभूतां बलसंदोहनैरर्थक्यपराहतौ ॥३२॥
इत्युक्तो भगवान् रामः स्वयं साक्षाद्रमापतिः ।
दृष्ट्वा हरधनुः सद्यो लीलयैव समाददे ॥३३॥
यस्य वाणानलोद्गारे त्रिपुरोऽभूत् पतङ्गवत् ।
हिमालयं धनुर्यस्य ज्या शेषो भुजगेश्वरः ॥३४॥
शरः स भगवान् विष्णुस्त्रयीमूर्तिः सनातनः ।
तमादायैकहस्तेन कोदण्डं कृत्तिवाससः ॥३५॥
ज्यां समारोपयामास समालम्ब्य[1] बभञ्ज च ।
धनुर्भङ्गोद्भवः शब्दो गगनं क्ष्मामपूरयत् ॥३६॥
चचाल धरणी सर्वा पर्वताश्च चकम्पिरे ।
तत्रास वासुकिकुलं विभ्यु[2]र्देवगणा दिवि ॥३७॥
महाशब्देन जातेन[3] सागराश्च विसुस्रुवुः ।
गिरीणां कन्दरास्वन्तर्घनीभूतो महाध्वनिः ॥३८॥
हर्यक्षान् क्षोभयामास प्रलयाघातदुःसहः ।
तदा रामधनुर्भङ्गात् सीता पूर्णमनोरथा ॥३९॥
स्वयंवरस्रजं पत्युः कण्ठे सप्रणयं न्यधात् ।
रामस्य कण्ठे पतति स्वयंवरसरे तदा ॥४०॥
दिवि दुन्दुभयो नेदुर्जनकस्य पुरे तथा ।
जनकस्तुष्टहृदयो जामातरि महागुणे ॥४१॥

---

१. आकलय्य—रीवाँ । २. तत्रसुर्मनुजा भूमौ तथादेव°—रीवाँ । ३. °शब्द-प्रणादेन—रीवाँ ।

राजा तमाह्वयामास साकेतनगराधिपम् ।
विवाहं कारयामास ब्राह्मणैर्विधिकोविदैः ॥४२॥
सीताराघवयोर्यत्र ब्रह्मादद्या आययुः सुराः ।
राघवः सीतया साकं कृत्वा सप्तपदीविधिम् ॥४३॥
लाजाहोमविधिं कृत्वा रराज सुषमाञ्चितः ।
अश्मनि स्थापिता देवी शुशुभे तत्र जानकी ॥४४॥
अद्यापि मूर्धगा मृत्यो रामोत्सङ्गे स्थिरैव सा ।
हरिद्राग्रन्थिकलितं पीतसूत्रं करे दधत् ॥४५॥
सीतया शुशुभे रामो गृहलक्ष्म्या गृहाधिपः ।
लक्ष्मणोऽपि वधूं प्राप्य उर्मिलां जनकात्मजाम् ॥४६॥
रामवत्सीतया सार्द्धं तया सार्द्धं मुमोद सः ।
एवं भरतशत्रुघ्नौ कुमारौ रामसुन्दरौ ॥४७॥
माण्डविश्रुतकीर्तिभ्यां वधूभ्यां जग्मतुर्मुदम् ।
चतस्रोऽमुष्य ताः कन्याश्चतुर्भ्यां दिव्यविग्रहाः ॥
वरेभ्यः सहसा दत्ताः प्रजानां दृक्सुखं ददुः ॥४८॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे हरधनुर्भङ्गो नाम[1] षट्सप्ततितमोऽध्यायः ॥७६॥

●

सप्तसप्ततितमोऽध्यायः

ब्रह्मोवाच

भङ्गे हरधनुःशब्दो भार्गवस्य तपस्यतः ।
श्रवणे छादयामास दुःखकोपविवर्द्धनः ॥ १ ॥
साटोपं राम उत्थाय पर्शुमादाय सत्वरः ।
निजाश्रमपदं त्यक्त्वा यावदायाति भार्गवः ॥ २ ॥
तावज्जनकभूपस्य बोधनार्थं महात्मनः ।

---

१. हरधनुर्भंग विवाहोत्सवं नाम—अयो० । हरधनुर्भंगे—रीवाँ, मथु०, बड़ो० ।

स्वशिष्यं प्रेषयामास रामो भार्गवसत्तमः ॥ ३ ॥
भार्गवेण श्रुतः पूर्वं जनकस्य धनुःपणः ।
तच्छ्रुत्वा चुक्रुधे भूयः कोपनः कालदुर्धरः ॥ ४ ॥
त्रिःसप्तकृत्वो भूपालान् मारयित्वा स्वपर्शुना ।
स्यमन्तपञ्चकेऽकार्षीच्छोणितौघान् महाह्रदान् ॥ ५ ॥
स रामो दुर्मनीभूत्वा कस्य कल्याणमिच्छति ।
सुरासुरमनुष्येषु तस्मात्तं न प्रकोपयेत् ॥ ६ ॥
कथितो भृगुशार्दूलः सर्वस्वं नाशयेत् क्षणात् ।
इति जानाति राजापि जनकः सत्यभाषणः ॥ ७ ॥
जामातुश्च बलेनैव तीर्णवान् भृगुपावकम् ।
रामेण प्रेषितो दूतः शिष्यो जनकसन्निधौ ॥
समागत्य सभामध्ये इदं वचनमब्रवीत् ॥ ८ ॥

ब्राह्मण उवाच

राजन् नैम्य नृपाधीश कस्मैचिन्नृपसूनवे ।
कन्या प्रदीयतां मा वा वृथा हरधनुःपणः ॥ ९ ॥
एतच्छाम्भवमूर्जस्वि त्रिपुरानलवारिदम् ।
धनुः शैलेन्द्रसारं यत् दुराधर्षं जगत्त्रये ॥१०॥
देव त्वदीयभवने विन्यस्तं जनक प्रभो ।
त्वया न स्थाप्यतां कश्चित्पणीकृत्य सुबुद्धिना ॥११॥
इदं हि स्वायुषो दारि यशस्तेजस्तपोनुदम् ।
यद्द्रव्यवस्तुविषये लौकिको मतिराहिता ॥१२॥
एतद्विबुद्ध्यतां राजन् विशेषेणाधुना मुहुः ।
यदीशधनुरुत्सृज्य पणीकार्यं धनान्तरम् ॥१३॥
एतत् प्रोवाच ते राजन् भार्गवः क्षत्रियान्तकः ।
रामो दुर्दर्शनो धाम्ना कुठारक्रीडनोद्धरः ॥१४॥
तदाकर्ण्य यथायोग्यं क्रियतां निमिभूपते ।
नो चेत् स जामदग्न्यो वै वीरेन्द्रो दुर्मनायते ॥१५॥

दुराराद्धयः स कोपेन सहस्रार्जुनसूदनः ।
साक्षात् क्रोधी हरेरंशो भगवान् भार्गवोत्तमः ॥१६॥
जामातुः स्वस्य भोग्येन सोऽनुकूलो विधीयताम् ।
अन्यथा न भवेत्क्षेमं कुपिते जमदग्निजे ॥१७॥
ब्रह्मक्षत्रमयं तेजो दुराधर्षतमं हि तत् ।
बलाद्वन्द्यतमं लोके क्षत्रियाणां विशेषतः ॥१८॥
एतत्ते कथितं भूप यामि रामस्य सन्निधौ ।
इत्युक्त्वा यावदचलद्विप्रो जनकसन्निधौ ॥१९॥
तावद्धरधनुर्भङ्गकाहलः समभूत्तराम् ।
घोरो ब्रह्माण्डसंभेदी जगत्त्रयविकम्पनः ॥२०॥
प्रलयान्तसमुन्नादि समुद्र इव दुःसहः ।
कल्पान्तघनसंघट्टघटाटोपभयङ्करः ॥२१॥
इन्द्रायुधत्रुटत्पक्ष[1]पर्वतारावसन्निभः ।
दार्यमाणगिरिग्रावसमो[2] गम्भीरनिस्वनः ॥२२॥
वज्रनिर्घोष उदघौ रावणश्रुतिभेदनः ।
अहो अनर्थः कुपितो रामः क्षत्रकुलान्तकः ॥२३॥
इतिब्रुवन्निर्जगाम दूतो रामस्य स द्विजः ।
क्रोधान्धो राम आधावच्छ्रुत्वा स धनुषो रवम् ॥२४॥
अहो समुत्थितः कोऽयमकस्माद्भीषणो ध्वनिः ।
न वा पर्वतनिर्दारो वज्रपातो न कश्चन ॥२५॥
नाब्धिनिर्मन्थनो घोषो नकल्पान्तभवो ध्वनिः ।
न भूमिकम्पनोद्घोषो न कल्पान्तमरुद्ध्वनिः ॥२६॥
कोऽयं शब्दमयोत्पातो भविष्यति धरा न वा ।
कुलाचलसुसंघर्षे निर्वृतो वा परस्परम् ॥२७॥
इति भूयः संदिहानो रामो निश्चित्य तत्क्षणात् ।
भज्यमानमहादेवधनुषः संभवो ध्वनिः ॥२८॥

---

१. नुदत्पक्ष—रीवाँ । २. °साम°—अयो०, मथु०, बड़ो० ।

धावन् स परशूहस्तो भार्गवः क्रोधपावकः ।
हरिद्राकङ्कणं रामं मार्गे प्रत्यग्रहीत् पुनः ॥२९॥

भार्गव उवाच

अहो अरे क्षत्रियपोतकस्त्वमीदृक् पापं कर्म[1] कस्मादकार्षीत् ।
केनेदं ते शिक्षितं शत्रुभावाद्[2] भव्यासहं मत्कुठाराचलाग्नौ ॥३०॥
अहो अभाग्यं जनकस्य दुर्मतेर्जामातृरक्षाकुशलैकघातिनः ।
पणीकृतं येन धनुः पिनाकिनो दुर्बुद्धिना वार्धकनष्टचेतसा ॥३१॥
ईशस्तु भगवान् साक्षात् करुणा रसवारिधिः ।
शान्तात्मा तपसां राशिः कस्तस्मात् संबिभेति वै ॥३२॥
तत्पुत्रस्तारकस्यारिस्तादृग् दैत्यचमूपतेः ।
स्कन्दोऽपि विस्मितो[3] येन तस्य शं न भविष्यति ॥३३॥
स्कन्दोऽपि यदि नेदानीं भूतानां भयकारकः[4] ।
अहं त्वनादृतः कस्मात् कुठारकठिनाशयः ॥३४॥
धिक् क्षत्रवंशे करुणामिदं यस्याः फलं खलु ।
अतः कृपालुना भाव्यं नातः परमिहान्वये ॥३५॥
इतिब्रुवाणं भृगुवंशकेतुं कोपेन संभ्रामितसत्कुठारम् ।
सौमित्रिरभ्येत्य जवादवादीत् संरम्भसाटोपगिरा गभीरः ॥३६॥
अहो तवोपवीतश्रीरहो मौञ्जीकटिस्थिता ।
अहो कमण्डलुः पाणौ जटा मूर्ध्नि मृगाजिनम् ॥३७॥
अहो तापस केनासि विकारमिममाश्रितः ।
एतद् दृष्टिविरुद्धं ते न च कार्यं त्वया रणम् ॥३८॥

भार्गव उवाच

अहो क्षत्रियपोतस्य विवक्तुमिव[5] दुर्वचः ।
दुनोति हृदयं तावत्तन्ममैव कृपाफलम् ॥३९॥

---

१. गुर्व°—मथु०, बड़ो० । २. शत्रुणा वा—अयो० रीवाँ । ३. "रुद्रस्तु निवर्त्तः अति प्रतापी स्कन्दोऽपि येन रामेण विस्मृतश्चेत् तस्य रामस्य कल्याणं न" टि०—मथु० । ४. "नभयकारकः शान्तश्चेत् कठिनकुठारवतो ममानादरः किमर्थम्" टि०—मथु० । ५. °मिति—रीवाँ ।

कथं रे क्षत्रबन्धो ते पूर्वजाः किन्न मारिताः ।
कुठारेण ममानेन दुर्धर्षेणोरुतेजसा ॥४०॥
इति स्वगतमेवाह यावद्भार्गवसत्तमः ।
तावत् ताण्ड्यायनः शिष्यः शतानन्दस्य योगिनः ॥४१॥
उपगम्य भृगुश्रेष्ठं सादरं प्रणनाम ह ।

भार्गव उवाच

भो आयुष्मान्[1] भवान् भूयात् त्ताण्ड्यायन तपोनिधे ॥४२॥
विप्राग्र्य त्वदुपाध्याययजमानस्य भूभुजः ।
रुद्रचापारोपणश्रद्धा निवृत्ता नाथवा मुने ॥४३॥

ताण्ड्यायन उवाच

निवृत्ता भगवन् किंतु सहैव हरधन्वना ।

भार्गव उवाच

किमात्थ रे किमात्थ त्वं सहैव हरधन्वना ॥४४॥
स्फुटं तावन्मम ब्रूहि यथा वृत्तं[2] प्रबुद्ध्यते ।

ताण्ड्यायन उवाच

सुबाहुमारीचमुखा कौशिकाध्वरघातिनः ॥४५॥
यद्बाणानलनिर्दग्धाः क्षणात्प्रायुः पराभवम् ।
ऋष्यश्रृङ्गऋषे[3]र्भागभुवो ये राजसूनवः ॥
तेषां यः प्रथमो रामस्तेन भग्नं शरासनम् ॥४६॥

भार्गव उवाच

यस्मिन् वक्रे[4] पुरस्तिस्र दग्धा अग्नौ पतङ्गवत् ।
तदद्य दा शिशुना तेन राघवेण पराहतम् ॥४७॥
हरस्य दैवतं चापं तदा मन्ये रघोः कुलम् ।
मत्कुठारजले मग्नं मग्नमेव न संशयः ॥४८॥

---

१. आयुष्मन्—बड़ो० । २. ह्रास—रीवाँ । ३. °मखे—रीवाँ । ४. चाग्रे—रीवाँ ।

ब्रह्मोवाच

ताण्ड्यायनः ससंरम्भं ज्ञात्वा भार्गवसत्तमम् ।
उपाध्यायाय तद्वार्तां वक्तुं शोघ्रं विनिर्गतः ॥४९॥
जामदग्न्यः पुनर्नव्यविवाहमङ्गलाङ्कितम् ।
रामं निश्चित्य सहसा सहानुजमवर्णयत् ॥५०॥

भार्गव उवाच

पारेपरार्द्धकन्दर्पसुन्दरः क्षत्रबालकः ।
गाम्भीर्यं पुनरेतस्य हरस्येवातितेजसः ॥५१॥
माधुर्यं पुनरानन्दि राकाहिमरुचेरिव ।
शृङ्गारवीराद्भुतकैः किमेष घटितो रसैः ॥५२॥
ततः समुपसार्यामुं वीरौ तौ रामलक्ष्मणौ ।
निर्वर्ण्य बहुधा चित्ते कृताश्चर्यौ बभूवतुः ॥५३॥

लक्ष्मणोवाच

क्वेयञ्च धनुषो मौर्वी क्वेयं मौञ्जी च मध्यतः ।
क्वेमे सिताग्रविशिखाः क्व च वैतादृशाः कुशाः ॥५४॥
धारोज्ज्वलः क्व परशुः क्व च दिव्यकमण्डलुः ।
वीरशान्तरसावेतौ संगतौ किं परस्परम् ॥५५॥
आर्यब्रह्मक्षत्रमयं किमिदं चित्रवत् पुरः ।

श्रीराम उवाच

वत्सैवं किंतु जानासि भगवान् भार्गवो ह्ययम् ॥५६॥
क्रौञ्चाचलस्य शिखरं विद्धं येन शितैः शरैः ।
त्रिःसप्तकृत्वा विप्रेभ्यो जित्वा दत्तं महीतलम् ॥५७॥
पुरा येनैव संग्रामे जितस्तारकसूदनः ।
कुठाराञ्चलधाराभिः हैहयेन्द्रस्य दोर्बलम् ।
पुरा निराकृतो येन सोऽयं वीरस्तपोनिधिः ॥५८॥

---

१. लक्ष्येते—रीवाँ

लक्ष्मण उवाच

तर्हि साश्चर्यशीलोऽयं भगवान् भृगुनन्दनः ।
यः सुमेरुयुतां भूमिं स्वर्णभृङ्गीमिवैष गाम् ॥५९॥
कश्यपायर्षये दत्त्वा नात्मानं श्लाघतेतराम् ।
स्कन्दशक्तिक्षतं क्रौञ्चगिरिं वाणैर्बिभेद यः ॥६०॥

इति श्रीमदादि रामायणे ब्रह्म-भुशुण्डसंवादे रामभार्गव-संग्रामो नाम[1] सप्तसप्ततितमोऽध्यायः ॥७७॥

●

अष्टसप्ततितमोऽध्यायः

ब्रह्मोवाच

अथ रामोऽञ्जलिं बध्द्वा सानुजः प्रणनाम तम् ।

भार्गव उवाच

संग्रामविषयी[2] भूया[3] इत्याशिषमवोचत ॥ १ ॥

राम उवाच

भगवन् भार्गवश्रेष्ठ करुणागाधवारिधे ।
अहं त्वनुगृहीतोऽस्मि तपसांनिधिना त्वया ॥ २ ॥
भार्गवः स्वगतं प्राह अस्याहो विनयः शिशोः ।
अतिमात्रं प्रकुप्यात्र किंस्याच्चन्द्रसुशीतले ॥ ३ ॥
ततो विमृश्य सस्मार भग्नं यच्छाम्भवं धनुः ।
बालायाश्चैव जानक्या वैषम्यं[4] स्यान्निजास्त्रतः ॥ ४ ॥
अयोग्यतममेतद्धि जमदग्निसुतस्य मे ।
आः शान्तः परशुर्घोरो रेणुका[5]कण्ठकृन्तनः ॥ ५ ॥

---

१. संग्रामे—अयो०, रीवाँ, मथु०, बड़ो० । २. °विजयी—मथु०, बड़ो० । ३. भूयादि°—अयो०, मथु०, बड़ो० । ३, वैधव्यं—मथु०, बडो० । ४, वैरिणां—रीवाँ ।

ततः प्रकाशमाहैष रामं दाशरथिं मुनिः ।
चण्डीश्वरधनुर्भङ्गप्रभवोद्गर्वभाविनोः[1] ॥ ६ ॥
वाह्वोस्तवैव रुधिरैरधुना मधुना समैः ।
भूय आसाधयिष्यामि कुण्ठारं कुण्ठितं मम ॥ ७ ॥

श्रीराम उवाच

भगवन्नधुना कर्तुं निग्रहानुग्रहौ मयि ।
स्वतन्त्रोऽस्ति भवान् किन्तु कोपबीजं न बुध्यते ॥ ८ ॥

भार्गव उवाच

अहो दर्पाढ्यता नाम बलमेतद् यदात्मना ।
अस्माभिः कथितं चापि न विजानाति दुर्नयम् ॥ ९ ॥
ननु रे तद् गुरोर्भग्नं चापं न[2] शिशुना त्वया ।
येन शिक्षितमद्यापि पुरस्त्रीविरहव्रजम् ॥१०॥

श्रीराम उवाच

भगवन्नित्यलीकेन लोकवादेन भूयसा ।
अनघे मयि संजातो मुधा कोपः कलंकितः[3] ॥११॥

भार्गव उवाच

तत्किं गिरीशचापस्य स्वस्त्यस्ति क्षत्रडिम्भक ।

श्रीराम उवाच

किंचित्स्पृष्टं न वा स्पृष्टं धनुस्तत् पुरवैरिणः ॥१२॥
तद्वै चिरेण जीर्णत्वादभज्यत करोमि किम् ।

भार्गव उवाच

अहो चन्दनदग्धेन शरेण हृदिगामिना ॥१३॥
मामयं शीतलयते ज्वलता कोपवह्निना ।
तदयं कठिनो घोरः कुठारो विशताद् गले[4] ॥१४॥

---

१. प्रभवामर्षयागिरा—रीवाँ । २. नन्वेतच्चगुरोर्धन्वा भग्नं न—अयो० । .....भग्नं धन्व—मथु०, बडो० । .....यद्गुरो—रीवाँ । ३. स्वधांको निःकलंकितः—रीवाँ । ४. विशतां जले—अयो०, रीवाँ ।

अमुष्य क्षत्रपोतस्य सीतावैषम्य[1]कारणम् ।
त्रिपुरारिधनुर्भङ्गपातकक्षालनं तथा ॥१५॥
तत्प्रवीरो भव रणे राम दाशरथे शिशो ।
उपस्थितोऽयं संग्रामो भार्गवेण मया सह ॥१६॥

श्रीराम उवाच

कुठारो विशतात् कण्ठे मा वा विप्रवरस्य ते ।
अस्तु नो दारवैषम्यं[2] गच्छतां धर्म[3]सादनम् ॥१७॥
तथापि न वयं वीरा ब्राह्मणेषु कदाप्यहो ।

भार्गव उवाच

अहो प्रणति[4]मात्रेण जानासि भृगुनन्दनम् ॥१८॥
वत्स ब्राह्मणमात्रेण दुष्टक्षत्रनिषूदनम् ।
सोऽहं परशुरामोऽस्मि यः स्कन्दमजयं पुरा ॥१९॥
क्षत्रजात्या गर्वितस्त्वं मां तृणाय न मन्यसे ।
तद्ब्रह्मक्षत्रयोस्तावदिदानीं का गरीयसी[5] ॥२०॥
इतिसङ्ग्राममात्रेण भविष्यत्यद्य निर्णयः ।

राम उवाच

न ब्रह्मन् भवता सार्द्धं[6] रणवार्ता घटेत नः ॥२१॥
क्षत्रं हीनबलं तावद् ब्रह्मैव बलवत्तरम् ।
ऊर्जस्वलं च परमं[7] विप्राणां ब्रह्मवर्चसम् ॥२१॥
दुराधर्षतमं तेज उपवीतस्य शाश्वतम् ।
जात्यैव गुरवो विप्राः कथं नेयाः शुभेच्छुभिः ॥२२॥

लक्ष्मण उवाच

धनुरेकगुणं धत्ते[8] बलमस्माकमूर्जितम् ।
उपवीतं[9] नवगुणं विशिष्टं भवतां बलम् ॥२३॥

---

१. वैधव्य° । २. °वैधव्य—मथु०, बडो० । ३. यम°—मथु०, बडो० । ४. तापस°—रीवाँ । ५. कलहागमः—रीवाँ । ६. न ब्रह्मणेन भवता—रीवाँ । ७. °मात्मानं—अयो०, मान्यं च—मथु०, बडो० । ८. इदमेकगुणं धन्व—अयो०, मथु०, बडो० । ९. °वीतेन—रीवाँ ।

राम उवाच

वत्सैवमेव किं त्वस्मिन् माननीयतमे मुनौ ।
अलं दुर्विनयाचारैर्यतोऽसौ दुर्मनायते ॥२४॥

भार्गव उव च

अस्य को वा शिशोर्दोषः कुठारस्यैव दूषणम् ।
यदस्य नावधीत् पूर्वं पितृपैतामहं कुलम् ॥
धिक् क्षत्रगोत्रे करुणां यत्फलं दुर्वचस्त्विदम् ॥२५॥

राम उवाच

अलमस्मिन् क्षीरकण्ठे कोपेन भृगुवल्लभ ।
तत् क्षम्यतां मुनीशान पादयोस्ते नता वयम् ॥२६॥

भार्गव उवाच

किमुच्यते क्षीरकण्ठो विषकण्ठोऽ[1]स्ति खल्वसौ ।

लक्ष्मण उवाच

विषकण्ठस्य शिष्येण क्षन्तव्यो भवतास्मि भोः ॥२७॥

भार्गव उवाच

विषकण्ठत्वसाम्येन तर्तिक त्वमपि मे गुरुः ।

लक्ष्मण उवाच

भगवन्नन्यतात्पर्यान्मयोक्तं क्षन्तुमर्हसि ॥२८॥
किरीटमधिरूढेऽपि बाले शिशिररोचिषि ।
शितिकण्ठस्य नो चित्ते धत्ते कोपाङ्कुरः पदम् ॥२९॥

भार्गव उवाच

अहो क्षत्रवटोरस्य वाक्पाटव[2]मिहाद्भुतम् ।
क्षान्तमेव मया तावदयन्तु क्षमते न हि ॥३०॥
अशेषक्षत्रियवधे दीक्षितोऽयं परश्वधः ।
कोलालकोकसकचैः क्षत्रियाणां समन्ततः ॥३१॥

---

१. विषोत्कण्ठो – मथु०, बडो० । २. चापल्यं—रीवाँ ।

त्रिवर्णा पृथिवीप्येषा कृता क्षत्रियवर्जिता ।
नीरेणुकीकृता भूमिर्दुष्टक्षत्रियशोणितैः ॥३२॥
तथा स्वर्गवधूवृन्दस्वयंवरमहोत्सवे ।
पद्ममालासहस्राणां रेणुव्याप्तं कृतं नभः ॥३३॥

लक्ष्मण उवाच

भार्गव त्वत्कुठारेण कृता नीरेणुका मही ।

भार्गव उवाच

आस्तां तावत् कथं पापो रेणुकावृत्तमुत्कटम् ॥३४॥
संस्मारयति मेऽनेन मर्मस्पर्शं करोत्युत ।
अये[1] क्षत्रियपोत त्वां निरावाधनिमित्तकम्[2] ॥३५॥
कठोरभाषिणं कण्ठे हनिष्यामि तवाधुना ।

जनक उवाच

जामदग्न्य मुधा वाक्यैः किमित्येवं प्रगल्भसे ।
तदिदानीं भवांच्छास्ता गृह्यतां वै शरासनम् ॥३६॥

भार्गव उवाच

किमयं जनकः शिष्यो[3] याज्ञवल्क्यस्य योगिनः[4] ।
शरासनेन किं तेऽद्य पद्मासनमुपाश्रय ॥३७॥
युष्माकं क्षत्र[5]विप्राणां मिथ्योत्कण्ठा रणे खलु ।
तेऽन्ये वीरा खड्गधाराधौतारिस्त्रीदृगञ्जनाः ॥३८॥
योगमेवावलम्बस्व न युद्धं भवता समम् ।
रहस्य[6]चर्चया त्वं हि याज्ञवल्क्यं मुनिं भज ॥३९॥
एतावेव पुनः क्षत्रविस्फुलिङ्गौ मदोद्धतौ ।
निर्वापयामि परशुधाराञ्चलजलैर्मुहुः ॥४०॥

ब्रह्मोवाच

पुनः शतानन्द ऋषिः समागम्य जगाद तम् ॥४१॥

---

१. अरे—रीवाँ । २. निरपराधं (निःपरा°-मथु०,) निहन्मि किं—अयो०, मथु०, बड़ो० । ३. जनको वक्ति—अयो०, मथु०, बड़ो० । ४. °वल्क्ययोगिनः—मथु०, बडो० । ५. तत्र—अयो० । ६. रणस्य—अयो०, मथु०, बड़ो० ।

शतानन्द उवाच

जामदग्न्य कथं तादृक् शान्तस्य वरयोगिनः ।
जमदग्नेः सुतोऽपि त्वं जातोऽसि शमदुर्गतः ॥४२॥

भार्गव उवाच

कस्मात्त्वया शिक्षितेयं शान्तिरेतादृशी खलु ।
गौतमाद्वा भगवतः शक्राद्वा मातृजारतः ॥४३॥

शतानन्द उवाच

आः पाप क्षत्रियापुत्र मातृकण्ठनिषूदन ।
कुलाङ्गार तपस्तुङ्गमिदमाङ्गिरसं कुलम् ॥
कलङ्कयसि मिथ्येव केनेदं शिक्षितं तव ॥४४॥

भार्गव उवाच

आः पाप पांसुलापुत्र विशेषात् कुलपांसन ।
भृगूणामग्रतः स्वीयं तपः श्रावयसेऽ[1]धुना ॥४५॥

राम उवाच

भगवन् सर्वविख्यातं भृगूणामङ्गिरसां तथा ।
तपः सुदुश्चरं[2] तत्र भृगुशिष्ये विशेषतः ॥४६॥
अतो विज्ञापयाम्येवं मुनीनामुचितं हि वः ।
तपः शान्तं मन श्चैव स्फाटिका मणिमालिका ॥४७॥
कुशाः कुण्डी तथा दण्ड उटजेषु च केतनम् ।
नोग्रं वचो भ्रुभङ्गश्च न वाणधनुषी तथा ॥४८॥
न वा परश्वधो हस्ते धर्मोऽयं च सनातनः ।
अशुभः परशुः क्वासौ पवित्रं च क्व वा कुलम् ॥४९॥
क्वेदमुग्रं धनुर्ब्रह्मन् क्व च शीलं सुनिर्मलम् ।
क्व शराः सुमहाघोराः पर्णशाला तथा क्व वा ॥५०॥

भार्गव उवाच

कथमन्यमुनेस्तुल्यं मन्यसे मां सुर्द्धरम् ।
स एष जामदग्न्योऽस्मि यः क्षत्रियकुलान्तकः ॥५१॥

---

१. क्ष्मापयसे—मधु०, बड़ो० । २. तपःसुचरते—रीवाँ ।

रक्तधारासरित्पूरे निवृत्तोऽभिषवो मम ।
तत्र क्षत्र[1]शिरःकेशाः कुशा एवाभवन्मम ॥५२॥
पितॄंस्तर्पयतो रक्तैरञ्जलिप्रसरोद्गतैः ।
तदहं हि यथा पूर्वं कृत्वा वारत्रिसप्तकम् ॥५३॥
कदनं पूर्वभूपानामकार्षं शोणितैर्नदीम् ।
तथान्यत्सप्तकृत्व[2]स्त्रिकृत्वा विशसनं पुनः ॥५४॥
कापालीमक्षमालां तां भैरवस्य निवेदये ।

श्रीराम उवाच

प्रसीद रोषतो ब्रह्मन् जितं वारत्रिसप्तकम् ।
मा हारय यशस्तत्त्वं एकवारेण भार्गव[3] ॥५६॥

भार्गव उवाच

कथं रे हारयिष्यामि यशः पूर्वं विनिर्जितम् ।
सर्वे भवन्तः सहिताः सहन्त[4] विशिखान् मम ॥५७॥
ईशत्यक्तं पुराणं तद् वलितं भवता धनुः ।
तेन गर्वायसे राम किमित्येवं मुहुर्मुहुः ॥५८॥
सोढुं न शक्तो मद्बाणान् भवतो गुरुरप्यसौ ।
त्यक्त्वा क्षत्रतनुं[5] यस्माद् ब्राह्मीं वृत्तिमुपाश्रितः ॥५९॥

श्रीराम उवाच

भगवन्तं गाधिसूनुं विश्वामित्रं जगद्गुरुम् ।
अधिक्षिपसि तेनैव सोढव्यस्त्वं न चाधुना[6] ॥६०॥
जामदग्न्यमुने भग्नं न भग्नं वापि तद्धनुः ।
मग्नं मनसि ते शल्यं किंभवेत्तावता पुनः ॥६१॥
त्रैयक्षं वैष्णवं चापि भवत्वाख्यातमत्र हि ।
युद्धं चेद्वाञ्छसि तदा वयं सज्जा रणाङ्गणे ॥६२॥

---

१. क्षत्रभर्तृ°—अयो०, रीवाँ । २.° कृत्वश्च—मथु०, बड़ो० । ३. मह्यं हारय तत्सर्वं तदा तुभ्यं ददे रणम्—रीवाँ, अतः परं—"महामर्षेण युक्तस्त्वमादरेण च भार्गव ।" इत्यधिकः पाठः—रीवाँ । ४. संहतान्—मथु०, बड़ो० । ५. क्षत्र धनु—अयो० । ६. नाधुना मया—रीवाँ ।

ब्रह्मोवाच

एवं वादे निवृत्तेऽभूद्वीरकेलिः परस्परम् ।
ततः स भार्गवो रामं निर्वर्ण्य बहुधा मुनिः ॥६३॥
उवाच वचनं शान्तं वीतरोषस्तु तत्क्षणात् ।
अहो त्रैलोक्यममुना सुखितं जायतेतराम्[1] ॥६४॥
कोऽयं सौन्दर्यमाधुर्यसमुदायः सुखावहः[2] ।
बालः कुवलयश्यामो रामः कमललोचनः ॥६५॥
दृष्टिमानन्दयत्येष जगतां पुरुषोत्तमः ।
कस्तेन समरं कुर्यान्नेत्रानन्देन स्वामिना ॥६६॥
स पूर्णः[3] पुरुषो ह्येषोऽवतीर्णो भूमिभारहृत् ।
ज्ञातसारो[4] न केनापि मनुजत्वेन मन्यते ॥६७॥
पूर्णं ब्रह्म चिदानन्दं मनुजाकृति दृश्यते ।
नानेन सदृशं वस्तु दृश्यते भुवनत्रये ॥६८॥
इदं तत्तेजसां तेजो ज्ञेयानां ज्ञेयमुत्तमम् ।
न ज्ञातं येन तज्जन्म मुधैव समभूद् भुवि ॥६९॥
येन ज्ञातो ह्यसौ देवः समृत्योर्मृत्युतामियात् ।
नमोऽस्मै पूर्णरूपाय पुरुषाय महात्मने ॥७०॥
योगीन्द्रहृदयागारवासिने ब्रह्मरूपिणे ।
अनेन तुल्यतामेति एष एव महाशयः ॥७१॥
अयं रामो लोकरामो रमाया वल्लभः स्वयम् ।
नमाम्यमुष्य चरणौ बालकस्य महात्मनः ॥७२॥
एष एव गवेन्द्रस्य सुखितस्यालये वसन् ।
जघान राक्षसानीकं स्ववीर्येण महाबलम् ॥७३॥
बलकृष्णादिरूपाणि अमुष्यैव महात्मनः ।
एष पूर्णः स्वयं रामो विश्वरूपो जनार्दनः ॥७४॥
नचास्य प्रभवो नान्तो न मध्यं न पुनर्भवः ।
पूर्णरूपः स्वयं लाभः स्वतन्त्रो निरवग्रहः ॥७५॥

---

१. जायतां तदा—रीवाँ । २. पुरो मम—मथु०, ब्रह्मो० । ३. सुपूर्णः—मथु०, ब्रह्मो० । ४. ज्ञाततत्त्वो—रीवाँ ।

नास्य लीलाविधौ कश्चिद्धेतुरस्ति जगत्त्रये ।
अयमेव स्वरूपेण चिदानन्दमयाकृतिः ॥७६॥
अमुष्य सहजा[1]शक्तिः सृष्टिस्थित्यन्तकारिणी ।
अवतीर्णोऽयमधुना मम तेजोऽपहारकः ॥७७॥
ज्ञाततत्त्वः प्रभुः पूर्णो रणं कः कर्तुमिच्छति ।
क्षामयाम्यपराधं स्वमस्य पादाब्जवन्दनात् ॥७८॥
इत्युक्त्वा सोऽग्रहीत् पादौ रामस्य भृगुनन्दनः ।
एवं मा कुरु हे ब्रह्मन् वन्द्योऽसि जगतः प्रभो ॥७९॥
जामदग्न्य तपोराशौ त्वयि नः संततं नतिः ।
ततोऽञ्जलिपुटे बद्ध्वा रामः पङ्कजलोचनः ॥
ववन्दे मुनिशार्दूलं भार्गवं वीतविग्रहम् ॥८०॥

भार्गव उवाच

निसर्गकल्याणविधौ त्वय्याशोः पुनरुत्थिता ।
तथाप्याशास्महे नित्यं वयं भक्ताः प्रभुर्भवान् ॥८१॥
विस्तारयद्यशः शुभ्रं राघवेन्द्रकुलेऽमले ।
शरदां च सहस्राणि तप[2] त्रैलोक्यमण्डले ॥८२॥
हर राम भुवो भारं कृतार्थय निजान् जनान् ।
इत्युक्त्वा तुष्टहृदयो निर्जगाम भृगूत्तमः ॥८३॥

इतिश्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे भार्गव-निर्जयो नाम[3] अष्टसप्ततितमोऽध्यायः ॥७८॥

---

१. अमुष्यास्य सदा°—मधु, बड़ो० । २. तपन्—रीवाँ । ३. °निर्जये—अयो०, रीवाँ, मधु०, बड़ो० ।

एकोनाशीतितमोऽध्यायः

ब्रह्मोवाच

विश्वामित्रस्यानुमत्या जनकः सुमहाशयः[1] ।
उर्मिलां लक्ष्मणायादान्माण्डवीं भरताय च ॥ १ ॥
श्रुतकीर्तिं शत्रुहन्त्रे विधिवत् प्रददौ नृपः ।
पारिवर्हमदाद् भूयः सर्वेभ्यश्च पृथक् पृथक् ॥ २ ॥
गजान् दशसहस्राणि हयानामयुतं नृपः ।
सुवर्णानि च रत्नानि रथांश्च सपरिच्छदान् ॥ ३ ॥
दासीः कमलपत्राक्षीः सालङ्काराः शुभाननाः ।
सीतायै जनकः प्रादादन्यच्च विपुलं धनम् ॥ ४ ॥
उर्मिलायै च माण्डव्यै श्रुतकीर्त्यै तथैव च ।
असंख्येयं वस्तु प्रादादुत्तरोत्तरतो वरम्[2] ॥ ५ ॥
पुरः[3] प्रस्थानसमये सुमहान् मङ्गलोत्सवः ।
अभूद्राघववर्यस्य वरवध्वति[4]मङ्गलम् ॥ ६ ॥
विवाहमङ्गले पीतवस्त्रवेशादिभूषिताः ।
रामलक्ष्मणशत्रुघ्नभरता रेजिरेतराम् ॥ ७ ॥
शङ्खदुन्दुभिभेरीभिः पणवानकगोमुखैः ।
अन्यैर्माङ्गलिकैर्वाद्यैः स शब्दः सुमहानभूत् ॥ ८ ॥
विमानावलिभिर्व्योम देवैः कौतुकसंगतैः ।
सिद्धविद्याधराद्यैश्च व्याप्तमासीत् समन्ततः ॥ ९ ॥
मङ्गलं सुमहत्तत्र नरनारीगणेष्वभूत् ।
सीतारामौ शुभाशीर्भिर्ब्राह्मणाः समपोषयन् ॥१०॥
सुमहान्मङ्गलोपेतो राजा दशरथः कृती ।
सवधूकैः सुतैर्युक्तः साकेतपुरमागमत् ॥११॥
तत्र वैवाहिकं दिव्यं कौतुकं परिपश्यताम् ।
जनानां नयनानन्दो बभूव सुमहान् मुहुः ॥१२॥

---

१. स महा°—मथु०, बड़ो० । २. मनोज्ञं च ततो वरं—अयो०, रीवाँ ।
३. पुरा—अयो०, मथु०, बड़ो० । ४. °वध्वे सु°—रीवाँ ।

गीतवाद्यविनोदेन महता संभ्रमेण च ।
वरवद्धूवोः प्रवेशेणाऽप्ययोध्या शुशुभेतराम् ॥१३॥
चित्रध्वजपताकाद्यैर्भवनानि विरेजिरे ।
लाजदध्यक्षतजलैः पुराध्वानो विरेजिरे ॥१४॥
स्थले-स्थले[1] च नारीणां सुगीतं समजायत ।
शुभाशिषः प्रयुञ्जाना ब्राह्मणा समुपाययुः ॥१५॥
नर्तक्यो ननृतुश्चैव गन्धर्वा जगुरुच्चकैः ।
जगत् प्रमुमुदे सर्वं सीतारामस्वयंवरे ॥१६॥
भक्ताः परमहंसाश्च महाभागवता नराः ।
दृष्ट्वा सीतायुतं रामं स्वभाग्यं[2] बहु मेनिरे ॥१७॥
तथा सूक्ष्मदृशः केचिद्योगिनो रामसेवकाः ।
रामे नित्यस्थितां सीतां विशेषाद् ददृशुर्मुदा ॥१८॥
अमृतौघप्रवर्षी[3] च स कालः समभून्नृणाम् ।
यत्र सीतायुतं रामं ददृशुः प्राकृता अपि ॥१९॥
परंब्रह्म पराशक्तिः सीतारामेति कथ्यते ।
चिदानन्दवपुः साक्षात्कल्याणगुणचर्चितम्[4] ॥२०॥
तद्यस्य गोचरं दृष्टचोः स वै धन्यतरो नरः ।
अयोध्यास्थान् जनान् सर्वान् पशुपक्ष्यन्तिजानपि ॥२१॥
दृग्भ्यामा[5]नन्दयामास रामः सीतावधूयुतः ।
यथा राकाचन्द्रिकया युतः शारदचन्द्रमाः ॥२२॥
सुखितस्यालये स्थित्वा गोपेन्द्रनन्दनात्मजा ।
या रता रघुरामेण सैवाभूज्जनकात्मजा ॥२३॥
अंशरूपेण सर्वत्र सीता सर्वस्वरूपिणी ।
नानया रहितो रामः क्वचित्स्थास्यति निश्चितम् ॥२४॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे सीतारामसमागमनो नाम एकोनाशीतितमोऽध्यायः ॥७९॥

---

१. स्थाने स्थाने—रीवाँ । २. हृद्भाग्यं—अयो०, मथु०, बड़ो० । ३. °घस्य वर्षा—रीवाँ । ४. °वर्जितम्—बड़ो० । ५. दृशोरा°—रीवाँ ।

अशीतितमोऽध्यायः

ब्रह्मोवाच

इत्थं गाधिसुतो रामं नीत्वा धनुरशिक्षयत् ।
धनुर्विद्याप्रसंगेन तेन यज्ञमरक्षयत् ॥ १ ॥
कृतोपकारं तं स्वस्य यज्ञप्रत्यूहनाशनात् ।
सीतास्वयंवरे नीत्वा तां पत्नीं समकल्पयत् ॥ २ ॥
वधूयुतं वरं रामं सानुजं पुनरानयत् ।
अयोध्यानगरीमध्ये प्रजासौख्यं वितीर्णवान् ॥ ३ ॥
एवं महामना धीरो गाधेयो मुनिसत्तमः ।
चक्रे मैत्रीं दशरथेन राज्ञा धर्मेण भूभृता[1] ॥ ४ ॥
नृपं मुनिरनुज्ञाय स्वाश्रमं समगात्ततः ।
रामः स्थितो यौवराज्ये प्रजासंतोषमाचरत् ॥ ५ ॥
सीतां संतोषयन् भूयो रेमे[2] केलिकदम्बकैः ।
सहजानन्दिनीं रामां रतिकोटिगरीयसीम् ॥ ६ ॥
कृतयज्ञक्रियारक्षो हतराक्षससैनिकः ।
रामश्चक्रे यौवराज्यं नन्दन् दशरथं नृपम् ॥ ७ ॥
यौवराज्ये स्थितो रामः प्रमोदविपिने हि तत् ।
नित्यं गच्छति केल्यर्थं लतानां भूरिसंपदा ॥ ८ ॥

भुशुण्ड उवाच

का इमास्तत्र विपिने लताललितसंपदः ।
यासु श्रीरामभोग्यत्वमाधुर्यं संततं स्थितम् ॥ ९ ॥
लताः स्थावररूपास्ताः कथं रामेण रेमिरे ।
एतन्नः संशयं छिन्धि भूयो लोकपितामह ॥१०॥

ब्रह्मोवाच

इदं रहस्यं परमं चरित्रं रामस्य ते वच्मि पुराणकल्पम् ।
खगेन्द्र वेदै[3]रपि गीतपूर्वं नित्यं महाभागवतैकहृद्यम् ॥११॥

---

१. भूभुजा—आयो० । २. स्मरकेलि°—मथु०, बड़ो० । ३. देवैरपि—अयो० ।

यौवराज्ये स्थितं राममभिरामवयोगुणम्[1] ।
उदारं रूपलावण्य[2]निधिं परमधार्मिकम् ॥१२॥
रममाणं श्रिया साकं रामया सीतया तया ।
पीयूषमिव वर्षन्तं नेत्रानन्दं स्ववन्धुषु ॥१३॥
जननीं तोषयन्तं च वात्सल्यरसरूपिणीम् ।
कृतनीराजनं नित्यं सायंप्रातर्दिने दिने ॥१४॥
मृगयाभिः खेलमानं धावन्तं घनकानने ।
पितुर्दशरथस्यापि पूरयन्तं मनोरथान् ॥१५॥
सहस्रं शरदो याताः निवसन्तं पितुर्गृहे ।
कदाचिदेकान्तचरं नारदः प्रत्यपद्यत ॥१६॥
तं दृष्ट्वा सहसोत्थाय ब्रह्मदूतं मुनीश्वरम् ।
सुस्थितं चार्हयाञ्चक्रे पाद्यार्घ्याचमनादिभिः ॥१७॥
कृतातिथ्यो मुनिश्रेष्ठो नन्दथुः प्रीतमानसः ।
उवाच स्मयमानस्तं प्रीत्युन्नमितलोचनः ॥१८॥

नारद उवाच

तव राम चरित्रेण नन्दितं सकलं जगत् ।
भक्ताः परमहंसाश्च श्रवणेन कृतार्थिताः ॥१९॥
गायन्ति सुरनार्यश्च[3] सुन्दरं विमलं यशः ।
गङ्गाम्बुपावनं साक्षात् पीयूषौघप्रवर्षणम् ॥२०॥
रामरामेति भवतो यन्नामश्रुतिगोचरम् ।
तदेव शरणं लोके इदानीं निश्चितं प्रभो ॥२१॥
नाम्ना रूपेण बहुधा क्रीडसे पुरुषोत्तम ।
लीलया रमयन् विश्वं भक्तान् भागवतान् नरान् ॥२२॥
नहि ते पूर्णरूपस्य न्यूनता क्वापि दृश्यते ।
रूपमाधुर्यविक्रान्तिगुणशीलादिषु प्रभो ॥२३॥
पूर्णोऽसि ब्रह्मरूपोऽसि तादृशं चरितं तव ।
जीवनं भक्तलोकानामवाङ्मनसगोचरम् ॥२४॥

---

१. कल्याणगुणसागरं—रीवाँ । २. नित्यलावण्यं—रीवाँ । ३. °स्ते—मधु०, बड़ो० ।

सर्वं जानासि विषयं कृतं कर्तव्यमेव च ।
नापेक्षसे नियोगं त्वं ब्रह्मणोऽपि महात्मनः ॥२५॥
तथापि सेवकैर्नित्यं प्रार्थनीयः प्रभुः प्रभो ।
स्वतन्त्रोच्छो दयासिन्धुः पूर्णात्मा भक्तशेवधिः ॥२६॥
इति विज्ञाय विधिना प्रेषितोऽहं त्वदन्तिके ।
कथयिष्यामि संदेशं शृणोतु भगवान् किल ॥२७॥
साकेतपुरपर्यन्ते यद्रसालवनं महत् ।
तत्र नार्यो लतारूपास्तव भक्ता जगत्पते ॥२८॥
मन्मानसभवाः पूर्वं सृष्ट्यादौ ब्रह्मणः किल ।
ब्रह्मकल्पे संप्रसूता[1] विधेर्मानसतो मम ॥२९॥
चन्द्राननाः शुभोदर्का उदारास्तनुमध्यमाः ।
तडित्कोटिप्रभाः श्यामाः सुनासामृतलोचनाः ॥३०॥
इन्दिरा एव ताः साक्षात् सौन्दर्येण स्मरप्रियाः[2] ।
ज्योत्स्नावलक्षहसिता असितापाङ्गकेलयः ॥३१॥
ता वीक्ष्य मुमुहुः सर्वे देवता विधिपार्श्वतः ।
संपन्नवयसो ज्ञात्वा प्रोक्तवानहमुत्तमम् ॥३२॥
सुन्दरीः सकलास्तास्तु निजमानससंभवाः ।
भो भो पुत्र्यो दिव्यरूपा भवन्त्यः स्वोचितान् जनान् ॥३३॥
वृण्वन्तु देवगन्धर्वराक्षसेषु यथास्पृहम् ।
नगनागमनुष्येषु पशुषु द्रुमपक्षिषु ॥३४॥
यथायोगं[3] यथाकामं लभन्तां शुभगान् वरान् ।
स्त्रीणां हि भर्तैव गतिर्भर्तुर्धर्मः सदागतिः ॥३५॥
इत्युक्त्वा विरते वाक्यं मयि[4] नोचुः शुचिस्मिताः ।
ततोऽहं लज्जिता ज्ञात्वा ब्राह्मीं विद्यामुवाच ह ॥३६॥
वद[5] त्वं पुत्रिके एता भगिनीर्मन्मनोभवाः[6] ।
वरार्थं स्पृहयन्त्वेतास्त्रैलोक्ये भूरितेजसम् ॥
सरस्वती तु ताः सर्वा एतत् प्रोक्तवती वचः ॥३७॥

---

१. प्रसूताभि—अयो० । २. °र्ये रतिराशयः—रीवाँ । ३. °योग्यं—रीवाँ । ४. यदि—रीवाँ । ५. यदि—रीवाँ । ६. °दयाः—रीवाँ ।

सरस्वत्युवाच

अये भगिन्यः शृण्वन्तु हितं वः प्रोच्यते वचः ।
विधीयतां तत्तथैव ममैवाज्ञातमा चिरम् ॥३८॥
देवानां प्रवरः शक्रः सर्वैर्देवगणैर्वृतः ।
ततश्च द्वादशादित्या वसवोऽष्टौ च शंकराः ॥३९॥
एकादश च विश्वे च साध्याश्च मरुतस्तथा ।
अन्ये च विविधैश्वर्यभूषिता देवसत्तमाः[1] ॥४०॥
गन्धर्वाश्च तथा सिद्धा मुख्याश्चित्ररथादयः ।
दैत्याश्च बहवः सन्ति मुख्यस्तेषां वलिर्मतः ॥४१॥
राक्षसाश्चैव विविधा भूतिभाजो भवे मम ।
तथैव दानवाः सन्ति वराद्या बलशालिनः ॥४२॥
मनुष्याणां नृपाः श्रेष्ठा मर्त्यलोके सहस्रशः ।
स्रोतसां सागरो राजा नगानां च हिमालयः ॥४३॥
मेरुर्वा सर्वदेवानां स्थानभूतो मनोरमः ।
सुपर्णो वासुकिः श्रेष्ठो हरेरंशः सनातनः ॥४४॥
एषां मध्ये यथाकामं वरार्थं प्रतिपद्यते ।
इत्यादेशो विधेः सख्यस्त्रैलोक्यपरमेष्ठिनः ॥४५॥
विधीयतां तथा[2] कार्यं भवतीनां हितं हि तत् ।
तदाकर्ण्यावदन् वाक्यं ताः सर्वाः पद्मलोचनाः ॥४६॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे वल्लरीमोक्षोपाख्यानं[3] नाम अशीतितमोऽध्यायः ॥८०॥

---

१. विविधा देवा विविधैश्वर्यभूषिताः—मथु०, बड़ो० । २. यथा—रीवाँ । ३. °ख्याने—अयो०, रीवाँ, मथु०, बड़ो० ।

एकाशीतितमोऽध्यायः

कन्यका[1] ऊचुः

सरस्वति महाप्राज्ञे कथमेवं ब्रवीषि नः ।
तुच्छं हि जगदेवेदं आब्रह्मस्तम्बतोऽखिलम्[2] ॥ १ ॥
सारमेकं रामनाम विश्वे यस्य महात्मनः ।
रामस्य देववन्द्यस्य त्रयीतत्त्वार्थरूपिणम् [णः] ॥२॥
कायेन मनसा वाचा तमेवाखिलरूपिणम् ।
प्रतिपद्यामहे नान्यं देवं गन्धर्वमेव च ॥ ३ ॥
अनित्यैव विधेर्लक्ष्मीर्वसूनां वासवस्य च ।
गन्धर्वाणां दानवानां दैत्यानां चैव रक्षसाम् ॥ ४ ॥
इति विज्ञाय गणितं तृणवत् सकलं जगत् ।
ततश्चुकोप सहसा तास्वहं[3] प्रतिकूलतः ॥ ५ ॥
उवाचपरुषं वाक्यं रुषा रञ्जितलोचनः ।
भवतीनामलभ्योऽसौ स्त्रीणां रामः सुदुर्लभः ॥ ६ ॥
भर्तृद्वारा[4] गतिस्तासां युष्माकं विधिदर्शिता[5] ।
तच्चेन्न मन्यथ तदा स्थावरा भवत स्त्रियः ॥ ७ ॥
मां शक्रं च तथा देवं [व] गणं सकलमद्भुतम् ।
गन्धर्वांश्च तथा दिव्यानन्यांश्च मम सृष्टिजान् ॥ ८ ॥
यतोऽवगणयाञ्चक्रुर्यूयं पद्मविलोचनाः ।
तेन दोषेण गन्धर्व्यः[6] स्थावरीं वृत्तिमाप्स्यथ ॥ ९ ॥
इत्युक्त्वा परुषं शापं[7] विरते मयि तत्क्षणात् ।
प्रोचुस्ताः सकलाः शप्ताः संतप्ता निजमानसे ॥१०॥

---

१. कन्या—अयो०, रीवाँ । २. तोषितम्—अयो० । ३. ताः सर्वाः—अयो०, रीवाँ । ४. भर्ता नरो—रीवाँ । ५. दर्शितः—रीवाँ । ६. गंधर्वाः—रीवाँ । ७. परुषा तत्र—रीवाँ ।

कन्या ऊचुः

कदा विधे[1] विमोक्ष्यामः[2] शापादस्माद्भयङ्करात्।
असंशयन्नः संतप्ता एतद् ब्रूहि पितामह ॥११॥
यथा[3] कुर्यात् पिता नृणां सदसद्वा तथा भवेत्।
पितैव चेदशुभकृत् तर्हि शर्म करोतु कः ॥१२॥

तदाहमूचे निजमानसोद्भवाः कन्याः स्थिताः पुरतः शापतप्ताः।
निर्मायभूयः करुणावशंवदः तासां रूपं सार्थकं संविधत्सुः ॥१३॥

प्राप्ते सारस्वते कल्पे द्वाविंशतितमे युगे।
त्रेतायां सरयूतीरे त्रिंशद्योजनमण्डले ॥१४॥
अयोध्यायां ब्रह्मपुर्य्यां स्वयं रामो भविष्यति।
भुवो भारावताराय पूर्णब्रह्म सनातनः ॥१५॥
राम एव स्वयं स्वामी शापं वो मोचयिष्यति।
भविष्यति च भर्ता वः स एव जगदीश्वरः ॥१६॥
तत्पादपद्मरजसा धूतशापा भविष्यथ।
तावत्तत्र लतारूपमास्थाय सरयूतटे ॥१७॥
तिष्ठन्तु सकला यूयं रसालविपिने शुभे।
इत्युक्त्वा मयि निर्याते लतास्ता अभवन् भुवि ॥१८॥
यथानिरूपिते स्थाने पुष्पवत्यः फलानताः।
रसालद्रुमस्कन्धेषु परिरब्धसुविग्रहाः ॥१९॥
षट्त्रिंशत्कोटिगुणिताः सौरभाञ्चितविग्रहाः।
वर्षावातातपहिमं सहन्त्यो व्रतकर्शिताः ॥२०॥
तलच्छायानिषादीनि शिवलिङ्गानि कोटिशः।
पूजयन्त्यः सुपुष्पौघैः काले-काले दिवानिशम् ॥२१॥
एवं सारस्वतं कल्पं कष्टेन समुपाश्रिताः।
तासां समुद्धृतिं राम इदानीं कर्तुमर्हसि ॥२२॥
अवतीर्णः सदा च त्वं परमात्मा सनातनः।
समुद्धर विलम्बेन नोपेक्षस्व स्वसेवकान् ॥२३॥

---

१. विभो—अयो०। २. निर्मोक्ष्यामः—मधु०, बड़ो०। ३. यावत्—रीवाँ।

अतः परं विलम्बस्तु तासां सौख्येऽन्तरायकः ।
एतद्विरञ्चिराह त्वां राम राघवपुङ्गव ॥२४॥
अतः परं प्रभो तावद्यथार्हं कर्तुमर्हसि ।
मया लब्धं दर्शनं ते राम पूर्णो मनोरथः ॥२५॥
विहितो धातुरादेशो भक्तोद्धार[1]कृतेऽर्थिनः ।
अतः परं स्वर्गन्तुं मा[2]मनुजानासि राघव ॥२६॥
त्वद्यशो गाययिष्यामि गन्धर्वान् ललितैः स्वरैः ।
वीणां क्वणन् सुमधुरां सख्या तुम्बुरुणा युतः ॥२७॥
इत्युक्त्वा निर्ययौ तस्माद्देवर्षिर्नारदाभिधः ।
रामेण वन्दितो भूयः सीतया चैव भक्तितः ॥२८॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे विधिविज्ञापनं नाम[3]
एकाशीतितमोऽध्यायः ॥ ८१ ॥

•

द्व्यशीतितमोऽध्यायः

ब्रह्मोवाच

कदाचिद् भ्रातृभिः सार्द्धं मृगयार्थं विनिर्गतः ।
रामः कुवलयश्यामः कौतुकी सेनया वृतः ॥ १ ॥
दन्तिनो वाजिनश्चैव स्यन्दनानि च पत्तयः ।
सज्जिताः पत्तयो रेजुर्नृपसूनोर्महात्मनः ॥ २ ॥
तत्र रामः स्वयं दिव्यरथोपस्थे विराजितः ।
शारदाभ्रोपरि भ्राजन् पूर्णचन्द्र इवाभवत् ॥ ३ ॥
आवद्धरत्नकनकेषुधिरात्तचापः
सन्नाहवान् कनकवज्रशिरस्त्रधारी ।
मूर्तः स वीर इव सच्चतुरङ्गिणीषु
रेजे महोज्ज्वलवपुर्नृपतेः कुमारः ॥ ४ ॥

---

१. भक्तिद्धार°—अयो०, रीवाँ। २. स्वर्गंगंतुमनु—रीवाँ। ३. विज्ञापने—अयो०, रीवाँ, मधु०, बड़ो०।

महत्या सेनया युक्तः पुरलोचनसौख्यदः ।
अगमत् काननं घोरं सरयूतटभूमिषु ॥ ५ ॥
भ्राम्यत्प्रसूतकरिणीकरभं समन्तान्मत्तेभवृंहितदरीप्रतिनादभीमम् ।
विक्रान्तकेसरिकुलं विलुलल्लुलायं वाराहखातवनमुस्तलसन्मयूरम् ॥ ६ ॥
घनभूरुहराजीभिः समन्ताद् दुर्गमं महत् ।
कूर्दमानमृगीपोतं मत्तश्वापदभीषणम् ॥ ७ ॥
व्यालोलूकरवाक्रान्तं शललीकुलदुर्गमम् ।
माद्यत्तरक्षुशरभं[1] शार्दूलगणनादितम् ॥ ८ ॥
संभ्राम्यदुन्मदानीकदैत्यदानवराक्षसम् ।
लसद्वनलताकुञ्जलीनकेसरिपोतकम् ॥ ९ ॥
कूजत्कोकिलकीराढ्यं प्रमत्तभ्रमरीकुलम् ।
करालोच्छूनभल्लूकपूर्णमानदरीविलम् ॥१०॥
प्रविष्ट एव रामस्तु धनुर्मुक्तमहेषुभिः ।
त्रासयामास दुर्जीवान् क्रूरान् स्वकुलघातकान् ॥११॥
एक एव बली रामः संजह्रे भीषणान् हरीन् ।
शार्दूलांश्च तरक्षूंश्च महिषांश्चातिभीषणान् ॥१२॥
दुष्टानि सर्वसत्त्वानि घातयामास कानने ।
रामश्च लक्ष्मणश्चैव भरतश्चैव शत्रुहा ॥१३॥
मृगेषु मोचयामास मृगयासुपटून् शुनः ।
तरक्षूंश्च विमुक्ताक्षान् श्येनांश्च मृगयोत्कटान् ॥१४॥
वृषार्क इव संरेजे प्रतापी राघवोत्तमः ।
तीक्ष्णैर्वाणांशुसंदोहैः प्रतपन् सर्वतो दिशम् ॥१५॥
वीररौद्ररसोदारो रामः संततमुज्ज्वलः ।
चञ्चलं हयमारूढो मृगयायां रराज सः ॥१६॥
दैतेयान् दानवांश्चैव राक्षसान् यक्षदुर्भटान् ।
निजघान शरैर्घोरैरसंख्यान्[2] राघवोत्तमः ॥१७॥

---

१. °संरब्ध—मथु०, बड़ो० । २. संरब्धान्—मथु०, बडो० ।

दुगमं काननं चक्रे सुगमं रघुनायकः ।
संजगुस्तद्यशो देव्यः[1] प्रसभं वनदेवताः ॥१८॥
अथ[2] कुर्वन् वनक्रीडां रामः कमललोचनः ।
सरयूतीरमभ्येत्य चक्रे विश्राममाप्लुतः ॥१९॥
सरयूतटकुञ्जेषु कृत्वा माध्याह्निकीं क्रियाम् ।
भुक्त्वा प्रत्यग्रवसनरत्नालङ्कारभूषितः ॥२०॥
देवगङ्गां समुत्तीर्य द्राक्षी[3]सरयुसंगमे ।
अपश्यत् स वनं रम्यं प्रमोदवनपार्श्वतः ॥२१॥
रसालवनमत्यर्थं वनानामुत्तमं वनम् ।
कूजत्कोकिलसंघुष्टं मत्तभ्रमरनादितम् ॥२२॥
केकिकेकामनोज्ञं तन्मयूरीगणनादितम् ।
तुङ्गप्रतानिनीपुञ्जपरिरब्धमहाद्रुमम् ॥२३॥
लतावृक्षफलाक्रान्तं पुष्पवृक्षनिषेवितम् ।
सरःसु हंसचक्राह्वकलहंसकुलाकुलम् ॥२४॥
देवगङ्गाजलकणस्पर्शशीतलमारुतम् ।
द्राक्षी[4]तरङ्गकल्लोलशीतलानिलचालितम् ॥२५॥
रसालतरुभिर्व्याप्तं नित्यं फलप्रसूनकैः ।
तत्र गत्वा मनोहारि रसालवनमद्भुतम् ॥२६॥
मया निरूपितं स्थानं नारदेन मनीषिणा ।
लतामण्डपमभ्येत्य [illegible] तत्तथा [illegible] संददर्श सः ॥२७॥
श्रीरामचन्द्रचरणाम्बुजधूलिपुञ्ज-
स्पर्शान्निवृत्तविधिशापविपाकतायाः ।
सद्यो विहाय लतिकात्वममूर्मृगाक्ष्यः
प्राग्जन्मदेहरुचिरूपविशेषमापुः ॥२८॥
सर्वास्ता मदिराकाराः शरज्ज्योत्स्नातडित्त्विषः ।
पूर्णेन्दुवदना रेजुः साक्षात्प्राप्ता इव श्रियः ॥२९॥

---

१. दिव्यं—रीवाँ। २. इत्थं—मथु०, बडो०। १. दाक्षी°—मथु०, बडो०। २. दाक्षी—मथु०, बडो०।

तासां रूपविलासेन राघवश्चकितोऽभवत् ।
अहो अपूर्वसौन्दर्यं दुर्लभं नरजन्मनि ॥३०॥
एता हि देवताः काश्चित्प्रभामण्डलमण्डिताः ।
इति प्रपेदे वैचित्र्यं दृष्ट्वापूर्वां तनुप्रभाम् ॥३१॥

राम उवाच

का वै भवत्यस्त्रिदशाङ्गना वा नागाङ्गनाः किंपुरुषाङ्गना वा ।
शच्यःश्रियो वा रतयोऽप्सरा वा रम्भावृता वा प्रमुखाः श्रियो वा॥३२॥
अहो इदं रूपमपूर्वदृष्टं तडित्प्रकाशं शरदिन्दुकाम्यम् ।
सुधाप्रवर्षं प्रमुदां निधानं कृतार्थयिष्यन् पुरुभागधेयान् ॥३३॥
के वा वरा वस्तडिदाकृतीनां सुजन्मभाजो मनुजापि देवाः ।
यैरर्चितः पूर्वभवे विरञ्चिस्त एव पाणिग्रहणोचिता वः ॥३४॥
सितासिताम्बुद्वयसंगमे वै सरस्वतीतोयमध्ये प्रविश्य ।
त्यक्त्वा तनुर्वापि त एव युष्मत्पाणिग्रहाणामुचिता सुभाग्याः ॥३५॥
इत्युक्त्वा विरते रामे विहस्य तनुमध्यमाः ।
विधिमानसजाः कन्या ऊचिरे मधुरं वचः ॥३६॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे वल्लरीमोक्षो-
पाख्यानं नाम[1] द्व्यशीतितमोध्यायः ॥ ८२ ॥

१. °पाख्याने—अयो०, रीवाँ, मथु० बडो ।

त्र्यशीतितमोऽध्यायः

वल्लर्य ऊचुः

ब्रह्मणो मानसाज्जाता वयं कन्याः सुलोचनाः ।
षट्त्रिंशत्कोटिगुणिता असंख्याताः सहस्रशः ॥ १ ॥
अस्माकं रूपलावण्यश्रिया श्रीरपि निर्जिता ।
श्यामाः पूर्णेन्दुवदना विधिदृष्टा वरोचिता ॥ २ ॥
प्रत्युवाच जगत्सर्वं वरार्थे रूपयन्निदम् ।

ब्रह्मोवाच

अहो यूयं देवकन्याः श्यामाः कुवलयेक्षणाः ॥ ३ ॥
वरार्थं पश्यततरां जगत्स्थावरजङ्गमम् ।
स्वयं संप्रोच्य बहुशः सरस्वत्याप्यचीकथत् ॥ ४ ॥
ततो वयं सावमर्षमुक्तवत्यः सरस्वतीम् ।
अलं देवि मृषाभूतजगत्संग्रहणेन नः ॥ ५ ॥
तथापीद्धं जगत्सर्वं तुच्छमेव विमर्शितम् ।
फल्गु चान्ते च विरसं भूयो दुर्गतिदायकम् ॥ ६ ॥
तमेव देवं जगतां निदानं भजामहे राम इति प्रसिद्धम् ।
स्थिता अमी यस्य वशे सुरौघा इन्द्रादयो ब्रह्मणा चापि सार्द्धम् ॥७॥
इति श्रुत्वा विरञ्चिस्तु चुक्रुधे रजसोभवः ।
शप्तवान् नः स्वरचनानादरात् कुपिताशयः ॥ ८ ॥
स्थावरत्वं व्रजत हे मुग्धाः संकोचिताशयाः ।
अवहेलितगीर्वाणाः स्वधियैव कृतार्थवत् ॥ ९ ॥
तेन शापेन सुभग लताभावं समाश्रिताः ।
रसालवनमध्यस्था दिवसानतिवाहिताः ॥१०॥
ब्रह्मकल्पं समारभ्य यावदद्य वयं स्थिताः ।
प्राप्ते सारस्वते कल्पे मुक्तशापा इहाधुना ॥११॥
तव श्री चरणाम्भोजरजसा तीर्णदुष्कृताः ।
लतारूपं परित्यज्य वयं जाता यथास्थिताः ॥१२॥

रामदर्शनावधिक उक्तः शापो विरञ्चिना ।
तस्मात्त्वं राम एवासीः पूर्णः पुरुषपुङ्गवः ॥१३॥
त्वं भर्ता नः प्रभो पूर्वमस्माभिः परिरम्भितः ।
रमयिष्यसि रासेन्दो एतस्मिन्निर्जने वने ॥१४॥
अमी हि तरवः पूर्वमस्माभिः परिरम्भिताः ।
तेनैव परकीयात्वमस्मासु रसिकोत्तम ॥१५॥
यो रसो रसशास्त्रेषु पूर्वाचार्यैर्निरूपितः ।
परकीया एव तस्य श्रुतास्तत् सावलम्बनम् ॥१६॥
त्वं कान्तस्तरुणः शूरो वेशवान् बहुधार्मिकः ।
महोदारो महामानी सर्वासामुचितः प्रियः ॥१७॥
यथा निरूपितो धात्रा तत्तथैवावलोकितः ।
नृणां कल्याणदः शश्वद् दृशां भाग्येन नः प्रभो ॥१८॥
एतावज्जन्मसाफल्यं यत् त्वदाननदर्शनम् ।
प्रश्नसंस्पर्शभोगाद्यैः[1] किमु वाच्यो महोत्सवः ॥१९॥
अहो प्रिय त्वां समवाप्य सुन्दरं वराभिलाषस्य गतैव चर्चा ।
नहि त्रिलोक्यां सुषमालवस्तव नखप्रभानिर्जितकोटिभास्वतः ॥२०॥
अहो धन्या वयं कान्त यासां कान्तस्त्वमीदृशः ।
अपूर्वरूपलावण्यशृङ्गारैकसुरद्रुमः ॥२१॥[2]
निर्मञ्छनत्व[3]मुपयान्ति ननु त्वयीश
पारे परार्द्धमपि सुन्दर पञ्चवाणाः ।
नीराजना भवति ते वदनारविन्दे
राकासुधाकरसहस्रकदम्बकस्य[4] ॥२२॥
नखात् समारभ्य शिखावधीदं शृङ्गारसारं भवतः शुभाङ्गे ।
धैर्याणि नो लुण्ठति रामचन्द्र स्वभावसौन्दर्यसमूहजुष्टम् ॥२३॥
रघुवरमभिरामं प्राप्य कान्तं भवन्तं
कलयति यदि लक्ष्मीः स्वस्वरूपं कृतार्थम् ।

---

१. भोगाढयैः—मधु०, बड़ो०। २. २२ श्लोकानन्तरमयं श्लोकः—मधु०, बड़ो०। ३. निर्मंछनस्य—रीवाँ। ४. "नीराजना भवति शारदपूर्णचन्द्रबिंबालवानख-शिखंसुषमांचितस्य" इत्युत्तरार्द्धेनायमेवश्लोकः पुनरावृत्तः—बड़ो०।

तदितरललनानां संसृतौ कास्तु वार्ता
बहुतरजनुषां चेदर्जितं नास्ति पुण्यम् ॥२४॥
अन्या अपि शचीमुख्याः स्त्रियो या या[1] भवद्गुणान्।
अश्रुत्वैव महेन्द्रादीन् वृतवत्यः शुभेतरान् ॥२५॥
भवान् हि सर्वकल्याणराशिरेको जगत्त्रये।
पूर्णः पुराणः पुरुषस्त्रयीगुह्यस्त्रयीमयः ॥२६॥
येऽपि[2] त्वां सनकाद्यास्ते प्रापुः शरणदं सताम्।
तेनाल्पभाग्यनिलया गण्यन्ते भुवनत्रये ॥२७॥
इत्याभाष्य ब्रह्मणस्ता मानस्यः शुभकन्यकाः।
तूष्णीं बभूवुः सहसा वर्णयन्त्यः प्रिययाननम् ॥२८॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे वल्लरीमोक्षोपाख्यानं नाम[3] त्र्यशीतितमोऽध्यायः ॥८३॥

चतुरशीतितमोऽध्यायः

श्रीराम उवाच

एतत्तु नोचितं मम राघवाणां कुलेऽमले।
नास्मत्कुले व्यभिचारो न कदर्यो न मद्यपः ॥ १ ॥
न ब्रह्महा नातिभाषी परिभिर्नच्च कर्हिचित्।
परिवेत्ता नचाप्यस्ति नाजितेन्द्रियवर्गकः ॥ २ ॥
नाशूरो नाभिशापी च नानुदारोऽपि कश्चन।
अहमीदृग्विधं कृत्वा प्रथमं कुलपांसनः ॥ ३ ॥

---

१. प्रायो—मधु०, बड़ो०। २. ये ये—रीवाँ। ३. °व्याख्याने—अयो०, रीवाँ, मधु०, बड़ो०।

न भवेयं यतो यूयं परकीयाः सुलोचनाः ।
अखिलागमेन[1] सदृशो विधिर्नैवं वधिष्यति ॥ ४ ॥
इत्युक्त्वा विरते रामे दीर्घश्वासो धृताधराः ।
विवर्णवदनाः सर्वा विमनस्कास्तदाभवन् ॥ ५ ॥
ऊचुश्चैनं चिरेणैताः श्यामलं पद्मलोचनाः ।
रामं लोकाभिरामं तमधिक्षिप्य विधेःसुताः ॥ ६ ॥
अये अये राजकुमार राघव प्रपन्नलोकाभयदानदीक्षित ।
उदारता वो रघुवंशजन्मिनां न लोपिता वा रघुनाथ कर्हिचित् ॥७॥
सा लुप्यतेऽस्मानपहाय संस्थिते भवत्यनल्पा ननु सद्गुणाश्रये ।
न केवलं सैव विलुप्यते पुनः प्रपन्नलोकस्य शरण्यतापि च ॥ ८ ॥
तस्मादस्मांश्चिराद्धित्वा स्थिताः[2] स्थावरजङ्गमम् ।
प्रपन्नाः स्वपदाम्भोजे भज राम रमापते ॥ ९ ॥
दुरवग्रहणेनालं देवधुर्य धुरन्धर ।
न ते पद्मदलाक्षस्य लिप्ते सुकृतदुष्कृते ॥१०॥
अयं हि जगतो धर्मो यद् गतिः पुण्यपापयोः ।
नेश्वराणां हि तत्स्पर्शः स्वतन्त्रेच्छावतां प्रभो ॥११॥
येषामिदं जगत्सर्वं वशे स्थावरजङ्गमम् ।
कस्तेषामुपरोधः स्यात् पुण्यपापादिकर्मभिः ॥१२॥
तस्मात् सखे रमय नोऽ[3]त्र रसालवन्यां[4]
नित्यप्रभूतकुसुमाकरपल्लवायाम् ।
यद्युद्विधीर्षसि च नो विफलावतारा
व्यर्थाः प्रभूततनुरूपवयोविलासाः ॥१३॥
राम त्वामाश्रितानां किं दैन्यं भवति किंचन ।
इति ते प्रसृतं नाम जागर्ति भुवनत्रये ॥१४॥
न त्वां विना भविष्यामो लौकिक्या तृष्णया युताः ।
त्वद्वियोगात्तनुं त्यक्त्वा लप्स्यामस्त्वत्पदद्वयम् ॥१५॥

---

१. °लागम°—मथु०, बड़ो० । २. तुच्छं—मथु०, बड़ो० । ३. त्वमवने—रीवाँ । ४. °वृण्यां—अयो० ।

वियोगानलभारेण भस्मीभूता वयं यदा ।
उदीर्य[1] राम यास्याम[2]स्त्वदागमपथे तदा ॥१६॥
एवमेव भविष्यामस्त्वया चेदवहेलिताः ।
वियोगं न सहिष्यामो ब्रह्मकल्पान्निषेवितम् ॥१७॥
इत्युक्त्वा विरते तस्मिन् युवतीनां कदम्बके ।
रामः प्रोवाच विहसन् गिरा मधुरया पुनः ॥१८॥

श्रीराम उवाच

अहो अनन्यभावेन भवतीनां वशीकृतः ।
अहं यथा व्रजे तिष्ठन् प्रेम्णा गोपमृगीदृशाम् ॥ ॥१९॥

कन्यका ऊचुः

अहो रघुकुलोत्तंस त्वं क्रीडन् व्रजवर्त्मसु ।
आभीरदारैः संयुक्तः कदाचिदिह संगतः ॥२०॥
तथा त्वयि व्रजस्त्रीणां प्रेमभावमलौकिकम् ।
दृष्ट्वा विचित्रिताः सर्वा लताभावेऽपि चेतनाः ॥२१॥
मनसा कृतसंकल्पास्तदा सर्वा अपि स्त्रियः ।
करवाम व्रजस्त्रीवदिमं कान्तं लभाम चेत् ॥२२॥
अहो अत्यद्भुतो ह्येष कान्तो नवनवद्युतिः ।
धन्या इमा व्रजे रामा यासां प्राणधनं ह्यसौ ॥२३॥

राम उवाच

अहं प्रेम्णा परिक्रीतो व्रजभक्तैर्वशीकृतः ।
साक्षीभूता भवन्त्योऽपि प्रमोदवनपार्श्वगाः ॥२४॥
अधुना भवतीनामप्यहं कृत्वा करग्रहम् ।
क्रीडिष्याम्यद्य विपिने प्रेमैकसुलभो यतः ॥२५॥
ज्ञानवैराग्ययोगाद्यैर्न प्रापुर्मुनयः प्रियम् ।
तं मां भवत्यः प्राप्स्यन्ति स्थावरा लतिका अपि ॥२६॥
युष्माकं गुरवो गोप्यो याभ्यो मत्प्रेमशिक्षिताः ।
अतः परं भवाम्भोधेः पारं यास्यथ सुव्रताः ॥२७॥

---

१. उद्दीर्य—अयो० । उद्गीय—रीवाँ । २. पश्याम—मथु०, अयो० ।

ततस्ताः रमयाञ्चक्रे रामः कमललोचनाः ।
षट्त्रिंशत्कोटियुवतीः सेवमानो रघूत्तमः ॥२८॥
वैषम्यं नाभजत् तासु पूर्णः पुरुषपुङ्गवः ।
तदा प्रादुरभूद्रात्रिर्नित्यकेलीनिकेतनः ॥२९॥
सद्यः पूर्णशरच्चन्द्र उद्ययौ व्योममध्यतः ।
नानाविधानि पुष्पाणि रसालविपिनान्तरे ॥
ज्योत्स्नाज्योतिर्विकासीनि सद्यो व्याक्रोशतां दधुः ॥३०॥
पूर्वं वनं रञ्जितमिन्दुभासा पुनश्च सद्यः स्नाऽपितं कुंकुमेन ।
क्षणादभूच्छारदचन्द्रकान्तिश्रीखण्डपूरद्रवलिप्तकल्पम् ॥३१॥
शीतलः सुरभिर्मन्दः प्रावाद्धोरः समीरणः ।
सरयूनीरकल्लोलसमुच्छालनकौतुकी ॥३२॥
शृङ्गाररसचेष्टाभिस्तासां रामोऽपि रञ्जितः ।
झणज्झणितमञ्जीरनूपुराणां समन्ततः ॥३३॥
ता एकदा रामकिशोरकस्य वरस्रजो निदधुः कण्ठदेशे ।
समुल्लसत्कामविकारभाजः प्रकर्षमानाः पुलकेनावकीर्णाः ॥३४॥
वृतासु तासु रामेण स्वामिना व्यक्तमूर्तिना ।
प्रभुणा रामचन्द्रेणेत्यवादीद् भुवनत्रयम् ॥३५॥
ब्रह्मकल्पं समारभ्य अद्यावधिपरार्थिनीः ।
एता रामः स्वयं वव्रे महाकारुणिकः प्रभुः ॥३६॥
इति ब्रह्मा प्रसन्नोऽभूत् कन्यापरिणये[1] कृते ।
प्रभुणा राघवेन्द्रेण स्वतन्त्रेच्छेन[2] धीमता ॥३७॥
तासामाभीरदाराणां तुष्टिं रामः स्वयं ददौ ।
रसालविपिनेऽद्यापि क्रीडति प्राणजीवनः ॥३८॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे वल्लरीमोक्षोपाख्याने वल्लरीणां वरणं नाम[3] चतुरशीतितमोऽध्यायः ॥ ८४ ॥

●

१. कन्यायाः प्रणये—अयो० । २. स्वतंत्रेणैव—रीवाँ । ३. वरणे—अयो०, रीवाँ, मथु०, बड़ो० ।

पञ्चाशीतितमोऽध्यायः

ः ह्योवाच

तत्र रासरसारम्भैर्ऋतुषट्कोत्थकेलिभिः ।
चान्द्रीपुष्पावचयैस्तरुस्कन्धावलम्बनैः ॥ १ ॥
जलकेलिविहारैश्च[1] नित्योत्साहैश्च मङ्गलैः ।
नानाभूषणविन्यासैर्नानावसनवासनैः ॥ २ ॥
नानानुलेपनैश्चैव नानामाल्यविनिर्मितैः ।
नानाधूपानुधूपैश्च नानादीपोत्सवैस्तथा ॥ ३ ॥
नानाभोगविलासैश्च नानासुरतबन्धनैः ।
नानामानविधानैश्च नानामानविमोचनैः ॥ ४ ॥
हावैश्च विविधैर्भावैर्विविधालापसक्तिभिः[1] ।
विविधैर्नर्महासैश्च प्रहासैश्च परस्परम् ॥ ५ ॥
विधिमानसजैर्दारै रतिदर्पनिरासनैः ।
क्रीडतो रामचन्द्रस्य सहस्रं शरदां ययुः ॥ ६ ॥
तावन्निमेष एवासीन्नृणां साकेतवासिनाम् ।
राममायाप्रभावेण नजर्जुर्दिवसान् गतान् ॥ ७ ॥
यथैकाकी प्रविष्टोऽभूद्रसालविपिनान्तरे ।
तथैव चिरमत्रास भुञ्जन् भोगान् मनोरथान् ॥ ८ ॥
नित्यं रासविलासादौ सीतासान्निध्यमाचरत् ।
तां[2] दृष्ट्वा चकिताः सर्वा आसन्मानसकन्यकाः ॥ ९ ॥
सीताया रूपसौन्दर्यं दृष्ट्वा ताः सकला अपि ।
गतदर्पभरास्तस्थु[3]र्ज्योत्स्नायां तारका इव ॥१०॥
सीतायाश्चैव रामस्य दृष्ट्वा प्रेम परस्परम् ।
भूयो ननन्दुरात्मानं तादृक्प्रेमकृतस्पृहाः ॥११॥

---

१. °शक्तिभिः—अयो०, रीवाँ । २. तं—अयो० । ३. स्तास्तु—रीवाँ ।

अहो अत्यद्भुतं[1] रूपमनयोर्लोककान्तयोः ।
अहो अत्यद्भुतं प्रेम दुर्लभं भुवनत्रये ॥१२॥
अहो ईदृग्विधो योगश्चन्द्रचन्द्रिकयोरिव ।
नेत्रानन्दाय जगति[1] भाग्येनैव प्रजायते ॥१३॥
अहो सौन्दर्यसीमानावेतौ पूर्णमनोरथौ ।
अस्मदुद्धारणायैव चक्षुषोर्गोचरं गतौ ॥१४॥
इत्युक्त्वा स्वगतं सर्वा बहिरूचुर्नृपात्मजम् ।
अहो राजकुमार त्वत्सङ्गे केयं शुभाकृतिः ॥१५॥
विद्युल्लतेव गौराङ्गी लक्ष्मीरिव मनस्विनी ।
शचीविलसितैश्वर्या साक्षाद्रतिरिवाद्भुता ॥१६॥
यदा त्वमागतो राम नेयं सङ्गे तदा स्थिता ।
कुतः समागता कस्मान्मध्ये रासादिकेलिषु ॥१७॥
नानया सदृशी काचित् त्रैलोक्ये क्वापि कामिनी ।
दृष्ट्वा[ष्टा] श्रुतापि चास्माभिश्चिरराज्जाताभिरीश्वर ॥१८॥

श्रीराम उवाच

एवं सैव निजानन्दशक्तिर्लीलाधिदेवता ।
नानया रहितः क्वापि स्थास्यामि भुवनत्रये ॥१९॥
रमण्यः सन्ति यावन्त्यो मम लीलाविनोदिकाः ।
तासामियं मुख्यतमा[2] रमणीनां शिरोमणिः ॥२०॥
नैनां विना रासलीलाविलासो मे भवेदिति ।
एतामाविर्भाव्य पूर्वं पश्चादाविर्भवाम्यहम् ॥२१॥
अस्याः एव प्रसादेन शं लब्धं[3] व्रजदारकैः ।
आविवेशेयमबलास्ततोऽहं रतवानिमाः ॥२२॥
भवतीष्वप्यसौ पूर्वमाविष्टा स्वांशभागतः
अतो मया रतानां चेद्व्यभिचारो भवेन्नहि ॥२३॥
कायेन मनसा वाचा नैनां व्यभिचराम्यहम् ।
एकपत्नीव्रतं यस्मात् कीर्तितं मे जगत्त्रये ॥२४॥

---

१. जगतो—मथु०, बडो० । २. पुण्यतमा—रीवाँ । ३. संलब्धं-अयो०, रीवाँ ।

राधायां चैव रुक्मिण्यां सत्यायां च श्रियामपि ।
भूलीलादिषु चैवैषा स्वांशेनाविष्टविग्रहा ॥२५॥
सर्वत्र सर्वरूपेण मन्मनोरमणाश्रया ।
एकधानेकधा चैव दृश्यते नित्यकेलिनी ॥२६॥
इति श्रुत्वा[1] राघवेन्द्रगिरं ता विधिकन्यकाः ।
सहजां तुष्टुवुः सर्वा रामलीलाधिदेवताम् ॥२७॥

कन्यका ऊचुः[2]

नमस्ते सहजानन्दे राघवेन्द्रस्य वल्लभे ।
तव सौभाग्यतो देवि सौभाग्यं भुवनत्रये ॥२८॥
गायत्री चैव सावित्री तथा देवी सरस्वती ।
लक्ष्मीर्गौरी शची चैव त्वयैव सुभगाभवत् ॥२९॥
त्वं देवि सर्वसौभाग्यं देहि नो राघवं पतिम् ।
यथा तव सदाकान्तस्तथैवास्ति सदैव नः ॥३०॥
इति स्तुत्वा चिरं सीतां तत्प्रसादसमन्विताः ।
सर्वा गोप्यो[3] गतिं लेभुर्दुर्लभां भुवनत्रये ॥३१॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे वल्लरीमोक्षदानं[4]
नाम पञ्चाशीतितमोऽध्यायः ॥८५॥

●

१. इत्युक्त्वा—रीवाँ । २. ब्रह्मोवाच—अयो०, मधु०, बडो०, । ३. गोपी—अयो०, रीवाँ । ४. °दाने—अयो०, रीवाँ, मधु०, बडो० ।

षडशीतितमोऽध्यायः

ब्रह्मोवाच

स मोचयित्वा लतिकावनं ततः कृच्छ्रात्मकाः स्थावरभावदुःखिताः ।
मूहूर्तमात्रेण पुनर्निजां चमूमासाद्य वीरो नगरीं समाययौ ॥ १ ॥

इत्थं स नित्यं मृगयामिषेण प्रयाति संशोभि रसालकाननम् ।
तत्रैव गोपीजनसंगमः सदा भवत्यमुष्य प्रणयैकवेदिनः ॥ २ ॥

रमापतिः सत्यपतिर्गिरांपतिर्धियांपतिर्लोकपतिः सतां पतिः ।
स कोशलापतितनयस्सदा[1]गतिः शृङ्गारभोगार्थमसाववातरीत् ॥३॥

न दैत्यहरणार्थाय प्रभुर्भूमाववातरत् ।
तद्धि तत्सेवकः कालः कुर्यादाज्ञावशंवदः ॥ ४ ॥

न भक्तोद्धारणार्थाय तद्धि कुर्यात् पदे स्थितः ।
नानुग्रहाय देवानामिच्छामात्रेण तत्कृतः ॥ ५ ॥

सनित्यशृङ्गाररसप्रकर्षे न भूतिमात्रार्थमिहावतारी ।
नवं नवं देशकालादिक्लृप्तं भुङ्क्ते रसं चिन्मयधाम्नि राजन् ॥ ६ ॥

इदं हि संततं तत्त्वं कामकेलिः सनातनी ।
रसराजस्वरूपस्य नीलवैदूर्यजित्त्विषः ॥ ७ ॥

कदाचिदंशरूपेण स भूतो नन्दगोकुले ।
क्रीडतो विविधैर्भावैर्व्रजस्त्रीणां निषेवितैः ॥ ८ ॥

अयमेव निजांशेन गोलोके चिन्मयोत्तरे ।
सहजानन्दरूपेण रमते राधिकान्वितः ॥ ९ ॥

न तं वेदा विजानन्ति नबुद्धिर्वेदशोधिता ।
न योगेनैव विज्ञेयो न ज्ञानेन न चेज्यया ॥१९॥

तपसा नैव संसाध्यो न स्वभावेन कर्हिचित् ।
न कर्मणा न कालेन स्वेच्छया सुलभः प्रभुः ॥११॥

सरय्वाः पुलिने स्थाने ब्रह्मानन्दे सनातने ।
प्रेमानन्दमयं तत्त्वं राम इत्युच्यते बुधैः ॥१२॥

---

१. °स्त्वया—अयो०, मथु०, वडो० ।

रमां नित्यं रमयते स्वानन्दरसरूपिणीम् ।
इति रामस्त्रयीशब्दगोचरो रसरञ्जितः ॥१३॥
सकृदुच्चरितः शब्दो रामनामविभूषितः ।
कुरुते नामवत् कार्यं स्वर्गमोक्षसुखादिकम् ॥१४॥
राकारेणाघसंनाशो मकारान्मुक्तिरुत्तमा ।
पूर्णेन वश्यतां याति रामो रामेतिशब्दितः ॥१५॥

भुशुण्ड उवाच

यद्येवं नाममाहात्म्यं ब्रह्मन् संकीर्त्यते मुहुः ।
कोऽवकाशस्तदा देव प्रायश्चित्तादिसद्विधेः ॥१६॥
द्वादशाब्दोऽत्र भोग्यानां कृच्छ्राणां कृच्छ्रकर्मणाम् ।
आलान्तादिविधीनां च कोऽवकाशो भवेदिह ॥१७॥
रामनामफलं श्रुत्वा सकृत् कीर्तनमात्रतः ।
को वा कृच्छ्रे प्रवर्तेत द्वादशाब्दादिकर्मणा ॥१८॥

ब्रह्मोवाच

प्रत्यवायिनि कर्मिष्ठे जने पातकभूयसि ।
आविश्वासिनि दुष्प्रज्ञे कर्मकाण्डं वितन्यते ॥१९॥
बहुवेदिनि तत्प्राज्ञे तत्त्वज्ञे ब्रह्मवादिनि ।
स्वल्पेनैव कृतानल्पकर्मसूत्रं न तन्यते ॥२०॥
अथापि तन्यते भूयो ज्ञानं भक्तिं च वा फलम् ।
भक्तेन ज्ञानिना वापि स्वाधिकारानुसारतः ॥२१॥
क्रियन्तां भूरि कर्माणि नित्येज्यन्तां कदाचन ।
भक्तियुक्तः कर्मयोगः कर्मसंन्यासयोर्वरः ॥२२॥
इतिज्ञात्वा कर्मयोगो नित्यो वेदगणैः स्तुतः ।
पालनीयः शुभाचारैः भगवन्मतवेदिभिः ॥२३॥
एतत्ते कीर्तितं वत्स कामतत्त्वेन संयुतः ।
क्रीडितं रघुनाथस्य परब्रह्मस्वरूपिणः ॥२४॥
य एतत् कीर्तयेत् प्रातरग्निहोत्रे त्रयीविधौ ।
तस्य वेदास्त्रयश्चैव भवन्ति रामभक्तिदाः ॥२५॥

रामभक्तिप्रसादेन रामो गच्छति वश्यताम् ।
गोपोवत् स्वां गतिं दद्याद् भगवान् जानकीपतिः ॥२६॥

य एतत्[1] पठते विप्रस्तेनाधीता त्रयी पुरा ।
य एतच्छ्रावयेद् भक्तान् तस्य रामः प्रसीदति ॥२७॥

य एतत् सर्वकालेषु प्रपठेद्रामशीलितम् ।
सर्वान् कामानवाप्नोति स्वर्गमोक्षादिदुर्लभान् ॥२८॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे रामनामस्वरूपफल-कीर्तनं नाम षडशीतितमोऽध्यायः ॥८६॥

●

सप्ताशीतितमोऽध्यायः

ब्रह्मोवाच

अथ रामस्य[2] माहात्म्यं कीर्तयामि खगेश्वर ।
शृणु त्वं सावधानेन मनसा रामसेवक ॥ १ ॥
कदाचिद् भगवान् शेषो राममाराद्धुमीश्वरम् ।
साकेते समगात्तत्र प्रापश्यद्भ्रान्ति तेजसा ॥ २ ॥
सिंहासनानि भूरीणि रत्नहेममयानि च ।
स्वे स्वे धिष्ण्येऽधिष्ठितानि प्रज्वलन्तीव वर्चसा ॥ ३ ॥
पूर्वसिंहासनेऽपश्यद् देवं वाराहरूपिणम् ।
द्रंष्ट्राकोटयुद्धृतधरं स्तूयमानं सुरर्षिभिः ॥ ४ ॥
वेदैश्च मूर्तिसंयुक्तैस्त्रयीरूपं मखात्मकम् ।
भगवन्तं यज्ञरूपं भिन्नाञ्जनवनप्रभम् ॥ ५ ॥
तद्वामे धरणीं देवीं स्तुवन्तीं चारुलोचनाम् ।
प्रसन्नवदनां कान्तां भुवं त्रैलोक्यधारिणीम् ॥ ६ ॥

---

१. एतद्यः—अयो० । २. अथो राममा°—बडो० ।

दक्षसिंहासनोदीर्णहिरण्यकशिपू[1]दरम् ।
भगवन्तं नारसिंहं प्रापश्यल्लोलजिह्वकम् ॥ ७ ॥
प्रह्लादेन स्तूयमानं भक्तराजेन धीमता ।
वामे कमलया युक्तं ज्वलद्वज्रनखप्रभम् ॥ ८ ॥
कोटिराकाविधुप्रख्यं कनकाङ्गविराजितम् ।
स्तुवद्भिर्निगमैर्देवैर्गन्धर्वैः समुपासितम् ॥ ९ ॥
सिंहासने पश्चिमे तु वामनं खर्वमात्रकम् ।
भगवन्तं द्योतमानं यज्ञसूत्रधरं विभुम् ॥१०॥
अदितिं मातरं पार्श्वे कश्यपं च प्रजापतिम् ।
एताभ्यां स्तूयमानं तं देवकार्यहितैषिणम् ॥११॥
सिंहासने चोत्तरगे मत्स्यनाथं चतुर्भुजम् ।
भगवन्तं विधुस्वच्छं प्रापश्यन्निगमैः स्तुतम् ॥१२॥
पूर्वोत्तरदिशो कोणे कूर्मदेवस्य शार्ङ्गिणः ।
सिंहासनं पर्यपश्यज्जलधिं च सविस्तरम् ॥१३॥
पूर्वदक्षिणयोर्मध्ये बुद्धरूपं जनार्दनम् ।
पर्यपश्यद्देवदेवं सिंहासनवरस्थितम् ॥१४॥
यज्ञजन्तुकृपावेश[2]गृहीतावतरं विभुम् ।
प्रद्योतमानं महसा भगवन्तमधोक्षजम् ॥१५॥
दक्षपश्चिमयोर्मध्ये रामं क्षत्रकुलान्तकम् ।
पर्य्यपश्यज्जामदग्न्यं हेमसिंहासनस्थितम् ॥१६॥
भगवन्तं पर्शुहस्तं ज्वलन्तं ब्रह्मवर्चसा ।
दण्डकुण्डिकया युक्तं यज्ञसूत्रविभूषितम् ॥१७॥
पश्चिमोत्तरयोर्मध्ये कल्किनं कमलापतिम् ।
नीलाश्वगं पर्यपश्यद्रत्नसिंहासनोपरि ॥१८॥
मध्यसिंहासने कान्ते कोटिसूर्याग्निवर्चसम् ।
रघुनाथं पर्यपश्यद्देवं जनकजापतिम् ॥१९॥

---

१. 'कश्यपू°—अयो०, बडो०, । २. °दयावेश°—रीवाँ ।

स्मयन्तमरविन्दाक्षं वामे स्वप्रिययान्वितम् ।
कोटिसूर्यनखद्योतं शृङ्गाररससागरम् ।।२०।।
रूपसारसुधौघार्द्रं साक्षात् कन्दर्पसुन्दरम् ।
परार्द्धरतिसौन्दर्यां तद्वामे तस्य सुन्दरीम् ।।२१।।
तद्दक्षे हयमूर्धानं भगवन्तं त्रयीमयम् ।
पूर्णब्रह्ममयाकारं सच्चिदानन्दविग्रहम् ।।२२।।
चिन्मुद्रापुस्तकधरं मालाशङ्खविभूषितम् ।
चन्द्रमण्डलमध्यस्थं स्वर्णसिंहासनोपरि ।।२३।।
रामस्य वामपार्श्वे तु सिंहासनवरस्थितम् ।
श्रीकृष्णं गोपिकाकान्तं राधिकाप्रेयसीयुतम् ।।२४।।
वृन्दावनस्थितं देवं नीलतोयदसुन्दरम् ।
रुक्मिणीसत्यभामादिमहिषीगणसेवितम् ।।२५।।
अपश्यद्रत्नखचितस्वर्णालङ्कारभूषितम् ।
मयूरपक्षमुकुटं गुञ्जाहारविभूषितम् ।।२५।।
मुरलीभूषितकरं त्रिभङ्गललिताकृतिम् ।
स्निग्धश्यामलव्यालम्बिलोलालकयुताननम् ।।२६।।
पीतकौशेयवसनं वनमालाविभूषितम् ।
सुनसं[1] सुदृशं चारु मन्दहासप्रभाधरम् ।।२७।।
कृष्णस्य दक्षिणे पार्श्वे रौहिणेयं बलोत्तरम् ।
हलिनं मुशलेनाढ्यं भगवन्तं त्रयीस्तुतम् ।।२८।।
नन्दं चैव यशोदां च राहिणीं गोपिकास्तथा ।
अपश्यद्विस्मितः शेषः सिंहासनकदम्बके ।।२९।।
अन्यांश्चैव तु रामस्य अवतारान् सहस्रशः ।
अंशरूपान् कलारूपान् साक्षादावेशिनस्तथा ।।३०।।
सर्वान् श्रीरामवदने दत्तदृष्टीन् गतस्मयान् ।
वशंवदानिवाज्ञायाः स्वतन्त्रानपि चेश्वरान् ।।३१।।

---

१. सुनासं—अयो०, रीवाँ ।

अचिन्तयत् तदाशेषः संशयाकुलमानसः ।
अहो एषां भगवतामीश्वराणां स्ववर्चसाम् ॥३२॥
कतरं च प्रथमतो वन्देयं समवर्चसाम्[1] ।
याम्ये संप्रति सर्वेषां कमहं संस्तुयां पुरा ॥३३॥
इति संदेहमापन्ने शेषे वैष्णवसत्तमे ।
राम एव व्यलीयन्त सर्वे दशरथात्मजे ॥३४॥
येऽन्ये रामस्य परितो व्यराजन्त महौजसः ।
अंशरूपाः कलारूपाः विभूत्यावेशिनस्तथा ॥३५॥
राम एव लयं जग्मुस्ते सर्वे तस्य पश्यतः ।
ततः स विस्मितो भूत्वा रामं तुष्टाव भूरिशः ॥३६॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे श्रीराम-
माहात्म्ये सप्ताशीतितमोऽध्यायः ॥८७॥

●

अष्टाशीतितमोऽध्यायः

शेष उवाच

नमामि ते नाथ पदाम्बुजद्वयं सुवर्णरत्नामलपादुकाश्रितम् ।
विरञ्चिशक्रादिशिवान्तकादिभिर्मणिप्ररोहैः कृतनीराजनं यत् ॥ १ ॥
नमामि ते नाथ तनुत्रभङ्गिनीं सीतादृगानन्दसमूहसागरम् ।
प्रावृट्पयोवाहसुनीलदीधितिं भिन्नाञ्जनस्तोमतमालमेचकम् ॥ २ ॥
नमामि च त्वां सहजानन्दरूपं परात्परं ब्रह्मणोऽपि प्रतिष्ठाम् ।
सदामृतस्याश्रयमेकसत्यं प्रतिष्ठितः शाश्वतो यत्र धर्मः ॥ ३ ॥
येयं त्रयी नाथ वितत्य संस्थिता शब्दब्रह्मात्मिका सा तवैव ।
समासतो व्यासतो वा गुणौघान् गायत्युच्चैर्मागधानां सभेव ॥ ४ ॥
कर्मापि ते नाथ तथैव शक्तिः क्रियात्मिका शाश्वति सुप्रतिष्ठा ।
इष्टा[2]पूर्ताद्यात्मिका सत्फलाढ्या जगत्प्रतिष्ठाजनने समर्था ॥ ५ ॥

---

१. यशंवर्च°—अयो०, मथु०, बड़ो० । २. इच्छापूर्तौघा°- अयो० ।

कालोऽपि ते नाथ दृशोर्निमेषो दिवानिशं वर्षफलोपचायी ।
कल्पावधिर्ब्रह्मशक्राधिशक्तः[1] सृष्टिस्थितिप्रलयान्तक्रियो यः[2] ॥ ६ ॥
त्वं पक्षिरूपेण पुरेषु भूयो विराजसे द्वित्रिचतुष्पदेषु ।
प्रविष्टवद्भास्यप्रविष्टोऽपि भूमन् साक्षी नित्यश्चिद्घनस्तत्त्वतत्त्वम्[3] ॥ ७ ॥
त्वया पुरा कापि परैव सा गिरा प्रबोधमानानिलवह्नियोगतः ।
असूत शब्दं त्रिवृदात्मकं यदा तदाभवत् स्थावरजङ्गमं जगत् ॥ ८ ॥
संजातमात्रस्य विधेर्जडस्य विवेकहीनस्य विधेयवस्तुनि ।
त्वमादिदेवो हृदयेऽवातरत्ततो विनिर्ममेऽसौ विविधव्यक्तिराशीन् ॥ ८ ॥
एकोऽपि स त्वं वहुरूपेण दृश्यः सन्नेव रामः त्रिजगद्विग्रहोऽसि ।
अतोऽन्यविज्ञानविनिर्मलात्मभिर्ब्रह्मैव सर्वं भाति भूतं च भव्यम् ॥ ९ ॥
एकोऽहमेवं वहुधा भवेयमितीक्षणं ते नाथ सदैव यस्मिन् ।
सर्गस्यादौ निर्गताः स्वांशरूपा जीवाकाराश्चिद्गुणाः सस्वभावाः ॥१०॥
केचित्तेषां नित्यमुक्ता बभूवुः केचिद् भूयः साधनैर्मुक्तिभाजः ।
केचित्संसाराब्धिमध्ये दुरन्ते भूयो भूयो जन्मदुःखादिभाजः ॥११॥
अचित्प्रपञ्चोऽपि तवैव रूपं वैकुण्ठकुड्याङ्गणकुट्टिमादि ।
सदेव दृग्गोचरतां व्रजत्यपि स्वयं चिदानन्दमयं दिगन्तरम् ॥१२॥
नित्यैव ते नाथ विनोदलीला शृङ्गारवीरामृतसिन्धुपूरा ।
यस्यां निमज्जन्ति सदावदातास्ते राजहंसाः शुकनारदाद्याः ॥१३॥
जानामि ते नाथ[4] परस्य सर्वेऽप्यंशा अमी स्थूलसूक्ष्मादिरूपाः ।
स्थूलाः स्फुटं ये विविधावताराः सूक्ष्माः परं संसृतजीवसंज्ञाः ॥१४॥
अहो अगाधा भवतोऽस्य माया विमुक्तमायस्य चिदेकसंश्रयाः ।
यथैकरूपोऽपि भवान्नवैव[5] दृश्योऽसि भेदात्मधियां न वै सताम् ॥१५॥
देशं सु[6]कोशल पदं च परं त्वदीयं धामास्ति सच्चित्सुखमद्वितीयम् ।
विराजते यत्र सुकोमलाख्या पुरी समुद्यत्सरयूतरङ्गा ॥१६॥
यत्रास्ति रत्नौघसुवर्णनिर्मितः प्राकारवर्यो धृततुङ्गयन्त्रः ।
अनेकदुर्धर्षणगोपुरान्तःकपाटसंघट्टित[7]वज्रकीलकः ॥१७॥

---

१. °धिशक्रः—अयो०, बड़ो० । २. क्रियाद्याः—अयो०, मथु०, बड़ो० ।
३. तत्त्वतस्त्वम्—रीवाँ । ४. राम—रीवाँ । ५. °न्नैव—अयो०, मथु०, बड़ो० ।
६. देशेषु—बड़ो० । ७. °संघाटित—रीवाँ ।

नित्यं[1] प्रमोदवनमद्भुतकेलिकुञ्जं मध्वादिसर्वमृतुसौख्यसमूहजुष्टम् ।
तत्राप्यशोकलतिकावनमस्ति यत्र प्राणेश्वरी विजयते तव जानकी सा ॥१८॥
सोऽयं तवैव महिमा निगमप्रसिद्धो यत्सार्वभौमपदवीप्रमुदां पुराणाम् ।
यत्रोत्तरोत्तरमभाणि शताधिकत्वं तस्यापि राम नितरामवधिस्त्वमेव ॥१९॥
येऽन्ये तवावतरणा इह मत्स्यकूर्मवाराहसिंहवरवामनभार्गवाद्याः ।
तेषामपि त्वमुदयो निलयश्च राम सीतापते सहजचित्सुखकेलिसिन्धुः ॥२०॥
विद्यास्वरूपमवलम्ब्य सतां जनानां हृत्पुण्डरीकविषयेषु भवांश्चकास्ति ।
नोचेत्सुदुस्तरतरत्वदपारमायाबन्धात्मकाद् भवरयात् कथमुद्धृतिःस्यात् ॥२१॥
रामेतिनाम भवतस्त्रिवृतोऽपि वर्षं पापात्मनो[2]ऽपि सकृदुच्चरितं पुनीते ।
ज्ञात्वेत्थमेव मुनिभिः सततं प्रशान्तैश्चित्ते सदा परमहंसतमैर्निखातम् ॥२२॥
त्वत्सङ्गिनीं नाथ नमामि तां परां शक्तिं सुपूर्णां सहजामद्वितीयाम् ।
या नित्यवृन्दावनकेलिकारिणी प्रमोदवल्लीवनदेवता च ॥२३॥
लीलाविशिष्ट भवतोऽपि च राम नाम रूपं च ते तादृशं मे चकास्तु ।
माणिक्यरत्नस्फुरितावतंसकं सुदीप्तगुञ्जामणिहारशोभितम् ॥२४॥
माङ्गल्यकोत्सङ्गविशेषलालितं गोपाङ्गनादृष्टिकटाक्षदीक्षितम् ।
रामाभिधानं परमं महस्तत् सदैव नेत्रातिथितां प्रयातु मे ॥२५॥
रघुकुलकमनीयं कामुकं गोपिकानां व्रजपुररमणीयं नीलवैदूर्यरम्यम् ।
जनकनृपतनूजाप्रीतिसंदोहपात्रं सुचिरमहमुपासे राघवं रामचन्द्रम् ॥२६॥

अशोकवनकुञ्जभूसहजनित्यकेलिप्रियं
व्रजस्थहरिणीदृशां मदनरागसंवर्द्धनम् ।
ककुत्स्थकुलभूषणं निगमकोटिवक्तृस्तुतं
भजे[3] दशरथात्मजं परं रामचन्द्रं मुदा ॥२७॥

इतिस्तुतिपरे शेषे प्रसन्नो राघवेश्वरः ।
प्रोवाच स्मयमानेन मुखेन मधुराकृतिः ॥२८॥
अहो नागेन्द्र शेष त्वं सम्यक् व्यवसितोऽसि भोः ।
यन्मदीया परा भक्तिः स्फुरिता हृदये तव ॥२९॥

---

१. धिष्ण्यं—बड़ो० । २. मायात्मनो—अयो०, रीवाँ । ३. भजामि—अयो०, मथु०, बड़ो० ।

न तां प्राप्नोति वै धाता न शिवो नापि वासवः ।
नित्यलीलारतिः सा ते वार्धिष्णुर्दृश्यते हृदि ॥३०॥
अथापि यदि यत्काम्यं तन्मत्तो व्रियतां मुहुः ।
संप्रीतस्तेऽनया भक्त्या ददाम्यहमतिप्रियम् ॥३१॥
भक्तोऽसि वैष्णावाग्र्योऽसि प्राज्ञोऽसि भुजगेश्वर ।
यत्ते हृदि प्रियं वस्तु मत्तस्तत् प्रार्थ्यतां मुहुः ॥३२॥
नह्यलभ्यं[1] मदीयानां भक्तानां मयि दातरि ।
ऐहिकामुष्मिकं वापि यत्स्वरूपं च दुर्लभम् ॥३३॥

इतिश्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे शेषस्तुतिर्नाम[2]
अष्टाशीतितमोऽध्यायः ॥८८॥

●

एकोननवतितमोऽध्यायः

शेष उवाच

भवतोऽन्यत्र मे काम्यं राम कामदविग्रह ।
नहि स्वरूपाशक्तानामैहिकामुष्मिकी स्पृहा ॥ १ ॥
अथापि चेद्वरं देयं वरदेन त्वया विभो ।
निजाङ्घ्रिकमले भक्तिर्दीयतां भक्तवत्सल ॥ २ ॥
सदा स्वरूपासक्तस्य स्वरूपासक्तिरेव च ।
निजसामीप्ययोगश्च पीठशय्यासनादिषु ॥ ३ ॥
लीलोपकरणत्वं च उपधानत्वमेव च ।
छत्रत्वं चामरत्वं च भ्रातृसाहाय्यमेव च ॥ ४ ॥
मुखचन्द्रामृतास्वादं सदासविधसंस्थितिः ।
एतन्मे दीयतां राम निर्माल्यस्य च भोजनम् ॥ ५ ॥

१.° लब्धं—रीवाँ । २. शेषस्तुतौ—अयो०, रीवाँ, मथु०, बड़ो० ।

श्रीराम उवाच

यद्यदिष्टतमं शेष तत्तवास्तु मदाज्ञया।
त्वमेव[1] भक्तवर्यो मे भविष्यति युगे युगे ॥ ६ ॥
आचार्यश्चैव भक्तानां भक्तिशास्त्रप्रकाशकः।
सदा सविधसंस्थानं भविष्यति परं मम ॥ ७ ॥
त्वमेव मम वै भूयाः[2] पीठशय्याशनादिकैः।
लीलासाधनसामग्री सर्वमेव त्वमक्षरम् ॥ ८ ॥
त्वमेव चोपधानं मे छत्रं चामरमेव च।
भ्राता सहचरो बन्धुः सखे मित्रं त्वमेव च ॥ ९ ॥
मदङ्गसङ्गिनी लक्ष्मीर्न ते लज्जां विधास्यति।
नर्मलीलारसास्वादपात्रत्वं वैष्णवाग्रणीः ॥१०॥
एवं दत्त्वा वरं रामस्तत्तथैवाकरोत्तराम्।
सोऽपि दिव्यमहावेशधरः स्फटिकनिर्मलः ॥११॥
सहस्रवदनो देवः पार्षदप्रवरोऽभवत्।
रामस्य जानकीशस्य प्रमोदवनवासिनः ॥१२॥
कोसला[3]पुरनाथस्य नित्यलीलासु संनिधिः।
कमला यत्र रमते तत्रास्तेऽद्यापि सेवयन् ॥१३॥
नित्यलीलारसं पश्यन् सहस्रफणवर्तिभिः।
दिव्यदीपशतैर्भाति मन्दिरे दिव्यवेश्मनि ॥१४॥
एवं सर्वावतारेषु कलास्वंशेषु चाग्रणीः।
उत्पत्तिर्विलयश्चैव रामो साकेतनायकः ॥१५॥
दर्शयित्वा निजे रूपे शेषाय प्रणतात्मने।
दत्त्वा प्रसादमेतस्मै समदादुत्तमं पदम् ॥१६॥
एवं कदाचिद् भगवान् कस्मैचित् संप्रसीदति।
अनिर्वाच्या तदिच्छा तु न विद्मः कं सुखयिष्यति ॥१७॥

---

१. त्वमेक—अयो०, रीवाँ। २. भूयाच्च—अयो०, रीवाँ। ३. कौशला°—अयो०, कौशिल्या°—रीवाँ।

गोकुलानन्दनो रामो माङ्गल्यानन्दनोऽपि च ।
व्रजभूनन्दनो देवः सुखितेश्वरनन्दनः ॥१८॥
एवं यो गृणते रामं रमेशं प्रणतार्तिहम् ।
तस्यासौ वश्यतां याता भक्तिभावान्न संशयः ॥१९॥
एवं गृणन्तो नारदाद्या मुनीन्द्राः पारेजाता लोकसिन्धोर्दुस्तरस्य ।
तस्मादेवं सज्जनैः कीर्तनीयं गेयं ध्येयं चाभिधेयं च नित्यम् ॥२०॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे शेषवरप्रदानं[1]
नाम एकोननवतितमोऽध्यायः ॥८९॥

●

नवतितमोऽध्यायः

ब्रह्मोवाच

कोसलायां निवसति रामभद्रे सतां गतौ ।
लक्ष्मीशे देवदेवेशे प्रभौ त्रैलोक्यवल्लभे ॥ १ ॥
लक्ष्मीभराः प्रादुरासुस्तथा संपद्भरा अपि ।
फलिनो भूरुहा आसन् रत्नसूश्च वसुन्धरा ॥ २ ॥
काले ववर्ष पर्जन्यः फलन्तिस्म लताद्रुमाः ।
भूधरा धातुदातारः सुवर्णरजतादिकान् ॥ ३ ॥
देवाः प्रसादसुमुखाः सुखाराध्या हविर्भुजः ।
यज्ञाः सद्यो विधिफलाः क्रियाः शीघ्रफलप्रदाः ॥४॥
ब्रह्मक्षत्रविशां चैव शूद्राणां च गृहे गृहे ।
सुवर्णमणिनिष्काढ्या विलसन्त्यङ्गनागणाः ॥ ५ ॥
सर्वे जनाः कृतानन्दा कृतोत्साहाः सुमङ्गलाः[2] ।
प्रसन्नमनसश्चासन् रामकौतुकदर्शनात् ॥६॥
रामेन्दौ यौवराज्ये स्थितवति भुवने नैव दुःखं न मर्षो
नोद्वेगो नाभिचारो न परबलभये नेतिभीतिर्न भीतिः ।

---

१. °वरप्रदाने-अयो०, रीवाँ, मथु०, बड़ो० । २. समङ्गलाः-मथु०, बड़ो० ।

नानीतिर्नेतिवीतिर्यमकृतविपदां नापगीतिर्जनानां
नायासो न प्रवासो न धनविधुरता नानपत्यो न रुग्णः ॥ ७ ॥
कदाचिन्नृपतेः साक्षात् कोशलाधिपतेः प्रभोः ।
अश्वमेधमखोत्साहो बभूव बहुमङ्गलम् ॥ ८ ॥
पुण्याहं वाचयित्वा स शुभकामान् द्विजन्मनः ।
अकरोद्दीक्षणीयेष्टिं प्रायणीयेष्टिमेव च ॥ ९ ॥
अर्वाणमश्वमेधीयमभिमन्त्र्य सुसंस्कृतम् ।
मुमोचात्मन इच्छाभिश्चरन्तमकुतोभयम् ॥१०॥
तस्य रक्षार्थमयुजन् सन्नद्धौ रामलक्ष्मणौ ।
महावीरौ कवचिनौ शस्त्रिणौ च निषङ्गिणौ ॥११॥
तिस्रो दिशश्चचाराश्वः पूर्वदक्षिणपश्चिमाः ।
इन्द्रेण प्रथमं रुद्धस्ततः कृत्वा महारणम् ॥१२॥
विनिर्जित्य समानीतो देवकन्यागणैः सह ।
विभज्य भ्रातृभिः साकमूढवान् भक्तवत्सलः ॥१३॥
ततो रुरोध भगवान् कालो दण्डधरः स्वयम् ।
तं निर्जित्य समानिन्ये कालकन्यागणानिह ॥१४॥
यमदत्तानुदवहत् सौमित्रेण च वै सह ।
वारुण्यां वरुणो देवः स्वागतं रघुपुङ्गवम् ॥१५॥
आनर्च रत्नहारौघैर्ज्ञात्वा त्रिभुवनेश्वरम् ।
उत्तरस्यां ययौ चाश्वो गान्धर्व्यां सुमहादिशि ॥१६॥
तत्र गन्धर्वलोकास्तमहरन् यज्ञघोटकम् ।
रत्नवर्मा चित्ररथः स्वर्णकायः सुलोचनः ॥१७॥
पद्ममाली हेमकेतुः वृषपर्वः सुकेतनः ।
अन्ये च बहवो मुख्या गन्धर्वाः समवेत्य तम् ॥१८॥
ततस्तौ सुमहावीरौ सज्यं कृत्वा धनुर्धरौ ।
अग्रहीष्टां शरव्रातै[1]र्वर्षैरिव महोधरान् ॥१९॥

---

१. शरावर्तैः—अयो०, मथु०, बड़ो० ।

अभूद् गन्धर्वनिवहैस्तत्र युद्धं महोत्कटम् ।
पश्यतां सर्वदेवानां रोमहर्षणकारकम् ॥२०॥
राममुक्तैः शरव्रातैर्गन्धर्वाः सुमदोत्कटाः ।
सद्यः प्रतिहताः सर्वे बभूवुस्तुङ्गविक्रमाः ॥२१॥
ततो गन्धर्वकन्याभिः सुमुखीभिः सहस्रशः ।
साकं हयवरं प्रादुर्गन्धर्वाः प्रीतमानसाः ॥२२॥

राम उवाच

अस्ति मे कापि महिषी प्राणेशी मम जीवनम् ।
तस्यां सत्यां कथमहमेता उद्वोढुमुत्सहे ॥२३॥

गन्धर्वा ऊचुः

भवान् स पुरुषः पूर्णो राम एव न संशयः ।
वह्नीनां रञ्जनकरः कान्तानां भूरिशक्तिमान् ॥२४॥
गोपाङ्गनास्तव विभो ललनाः समग्रा
दिक्पालकाश्च भवते समदुः स्वकन्याः ।
अन्याश्च नागनरकिन्नरदेववध्व-
स्त्वय्येव नेत्रसुखदे हि रता बभूवुः ॥२५॥
तस्मादेताः किंकरीस्त्वन्महिष्यो गान्धर्वेण प्रीतियुक्तो गृहाण ।
यस्मादेकस्त्वं समस्तत्रिलोक्याः स्वेच्छामात्रात् पूर्णचित्ताभिलाषः ।२६॥
इति तैर्गदितो रामो बहुमानपुरःसरम् ।
प्रत्यग्रहीच्च सानन्दं सर्वा गन्धर्वकन्यकाः ॥२७॥
चतुर्दिक्षु कृतोद्वाहः कुबेरेण च पूजितः ।
अश्वमेधं महायज्ञमकरोद्दीक्षितो नृपः ॥२८॥
प्रत्यक्षा देवताः सर्वा विधिवत् पर्यपूजयत् ।
अध्वर्युर्ऋत्विजो होतॄनुद्गात्रींश्च विशेषतः ॥२९॥
ब्रह्माणं स्वगणोपेतं सर्वांश्च गणसंयुतान् ।
गजवाजिमहीस्वर्णसर्वस्वं समदान्नृप ॥३०॥
एवं कृतमहायज्ञः सर्वस्वव्ययनिष्ठया ।
अग्नित्रयमुपासीनस्त्रिकालं विधिवन्नृपः ॥३१॥

पुष्णन् रामे परं स्नेहमभाद्दशरथो मखी ।
कदाचिद् यज्ञशालायां पश्यतो नृपतेः क्षणात् ॥३२॥
अग्नयो लुप्ततां जग्मुः पश्यतां च द्विजन्मनाम् ।
अदृश्यतां प्रयातेषु सेव्यमानेषु चाग्निषु ॥३३॥
हाहाकारो महानासीत् सर्वत्र द्विजवेश्मसु ।
ततः संचुक्रुधे रामः केन खल्वग्नयो हृताः ॥३४॥
आत्तचापो रथे स्थित्वा अव्याहतमनोगतिः ।
लक्ष्मणेन सह श्रीशः प्रतस्थे त्रिजगत्सु सः ॥३५॥
इन्द्रलोकेऽग्निलोके च यमलोके तथैव च ।
लोके च निर्ऋतेश्चैव तथा वरुणवेश्मनि ॥३६॥
वायुर्लोके कुबेरस्य लोके लोके शिवस्य च ।
स्वर्गे मर्त्ये च पाताले जगाम रघुनायकः ॥३७॥
तत्र तत्र नचैवाग्निमपश्यद् विस्मितान्तरः ।
ततोऽतिविस्मितो भूत्वा लक्ष्मणं प्राह राघवः ॥३८॥
नाग्नयः सन्ति सौमित्रे त्रिषु लोकेषु कर्हिचित् ।
नास्मद्रथगतेः कश्चिदगोचरतमोऽभवत् ॥३९॥
तस्माद् गता अग्नयोऽमी लोकालोकगिरेः परम् ।
सहस्रशीर्षा पुरुषो यत्रास्ति निजतेजसा ॥४०॥
अग्नीन्निजपितुः सेव्यानानेष्यामस्ततो वयम् ।
पश्यास्मद्रथवेगं त्वं लक्ष्मणामितविक्रमम् ॥४१॥
इत्युक्त्वा भगवान् सूतं लक्ष्मणं च रथान्तरे ।
स्थापयित्वा स्वयंवाहांस्तोत्रपाणिरवाहयत् ॥४२॥
लोकालोकं समुत्तीर्य प्राप घोरतरं तमः ।
तत्र स्थित्वा निजं चक्रं मध्ये मार्गमदीपयत् ॥४३॥
चक्रस्यामितया भासा प्रकाशे पथि ते हयाः ।
अवहन् स्यन्दनवरं सद्धर्मं निगमा इव ॥४४॥
समतीत्य विधेर्लोके तीर्णं मायाभिधं तमः ।
विरजां च समुत्तीर्य दुस्तरां सागरोत्तमाम् ॥४५॥

प्राप तं विषयं यत्र त्रिपाद् ब्रह्म सनातनम् ।
स्वयंज्योतिः स्वयं प्राज्ञं द्योतमानं निजत्विषा ॥४६॥
सहस्रवदनं देवं सहस्राननलोचनम् ।
सहस्रपाणिचरणं सहस्रश्रुतिनासिकम् ॥४७॥
यस्यांशांशावतरणा देवतिर्यङ्नरादयः ।
अनेकविधयो यत्र तथा रुद्रगणा अपि ॥४८॥
वासवा वसवश्चैव वरुणा वायवोऽग्नयः ।
यमश्च निर्ऋतिश्चैव सर्वाश्च गणदेवताः ॥४९॥
यस्मादेव प्रजायन्ते व्यक्तयः स्थूलसूक्ष्मिकाः ।
कोटिसूर्यतडित्तुल्यं महसामुत्तमं महः ॥५०॥
तत्र यातो रघुश्रेष्ठः सानुजः सह सारथिः ।
ततोऽवतीर्य रथतो भ्रातरौ मणिमन्दिरे ॥५१॥
जग्मतुर्यद्गृहद्वारे जयश्च विजयस्तथा ।
साधिष्ठौ द्वारप्रवरौ यच्च दिव्यं परं पदम् ॥५२॥
आयान्तं राममाज्ञाय राघवं तेजसां निधिम् ।
द्वारि प्रत्युद्गतो देव आदिनारायणो विभुः ॥५३॥
ननाम शिरसां वृन्दै रामं त्रैलोक्यसुन्दरम् ।
नत्वा प्रवेशयामास राममन्तःपुरे निजे ॥५४॥
भूयसीमर्हणां कृत्वा पादार्घ्याचमनादिभिः ।
सुधामयीसंविदाभिस्तुष्टाव निजमीश्वरम् ॥५५॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे रामयौवराज्ये
नवतितमोऽध्यायः ॥९०॥

एकनवतितमोऽध्यायः

आदिनारायण उवाच

वन्दे त्वां रामचन्द्रं सकलगुणनिधिं निर्गुणं ब्रह्म पूर्णं
सत्यारामं चिदेकं स्वविमलमहसा द्योतमानं समंतात् ।
यस्यांशा एव सर्वे वयमिह भुवने ब्रह्मविष्ण्वीशमुख्याः
सृष्टिस्थित्यन्तलीलाविरचनचतुरा वर्तयन्तीह चक्रम् ॥ १ ॥

योऽहं विष्णुः स राम त्वयि परमतमे सच्चिदानन्दसिन्धौ
वर्तेयं विन्दुमात्रं विधिरपि च भवो भास्करो वासवश्च ।
एतावानेव विष्वग् विलसति महिमा तावकः कोऽपि नित्यं
नाभूत्तेन स्मयस्ते विहरसि पशुवत् भूय आभीरदारैः ॥ २ ॥

एतत्ते रूपमस्मन्नयनविषयतां सच्चिदानन्दमात्रं
यातं यातं स्वभाग्यैर्निगमशतशिरो वेदितं नैव किंचित् ।
को जानीते यदेतद्विहरति सरयूतीरभूमीनिकुञ्जे
मुग्धैराभीरदारैः पशुगणविभवैर्दुर्लभं वै मुनीनाम् ॥ ३ ॥

लोकालङ्कारसीमानिगमनिगदितो राघवः कौशलेयः
कल्याणैकान्तलोकोत्तरविमलगुणः कामकेलीनिधानम् ।
साक्षाच्चिल्लोकनाथो रसमयविलसद्दिव्यलीलाविलासः
प्रेयान् प्राणाधिकस्त्वं मम किमपि परं राम सर्वस्वमेव ॥ ४ ॥

यथैव तेजसां लोके सर्वेषां प्राणदो रविः ।
तथा चैतन्यमात्रस्य भवानेकधनं प्रभो ॥ ५ ॥

शब्दात्मकं ब्रह्म तवैव घोषः श्वासोच्छ्वासो नित्य आकाशरूपः ।
तेन ब्रह्मा विसृजत्यादिसर्गे लब्ध्वा पूर्णां संविदं सृज्य वर्गे ॥ ६ ॥

इदं च ते रूपमखण्डसौभगं नेत्रोत्सवानन्दकरं जनानाम् ।
सद्यो निजेच्छाप्रकटं सत्कृपाढ्यं लोकातीतं कालमायाद्यतीतम् ॥ ७ ॥

नादिर्न मध्यं तव नावसानमस्माकमाद्यन्तमथापि मध्यम् ।
त्वमेव भूमन् पुरुषोत्तमेश न वाङ्मनोगोचरतां प्रयासि ॥ ८ ॥

त्वं वै विधिर्विष्णुरथापि रुद्रस्त्वं कालपालो निधयस्त्वमेव ।
त्वं वै दिगीशो किदिगीशस्त्वमेवमारोपमात्रं वितथोऽस्मासु शब्दः ॥ ९ ॥
यद्वाच्यवाचकमयं जगदेतदीश पादस्तवैष सकलो भुवनानि विश्वा
ऊर्ध्वं त्रिपात् पुनरुदैदमृतं तवैव रूपं परं परमहंस गुहायनस्थम् ॥१०॥

नमस्ते राम रमणीसहस्रसुविलासिने ।
नीलवैदूर्यवर्णाय सच्चिदानन्दवर्चसे ॥११॥
नमस्ते सहजालक्ष्मीपरमानन्दमन्दिर ।
अशोकवनकुञ्जान्तःशय्यामन्दिरकेलिने ॥१२॥
नमस्ते रामचन्द्राय चिच्चकोरीसुखात्मने ।
निःश्रेयसामृतौघाय ब्रह्मणे परमात्मने ॥१३॥

किमर्थमीशेन यत्नो विधेयः स्मृतो न तत्रैव सुकोशलायाम् ।
अनुग्रहो वा मयि कश्चित् स्वकीये विनिर्मितो नाथ यदागतं मुदा ॥१४॥
पुनर्नमोऽस्मै मुहुरेव नाथ तवामुष्मै सच्चिदानन्दधाम्ने ।
सीताविनोदैकनिकेतनाय श्रीविग्रहायामृतवर्षणाय ॥१५॥

श्रीराम उवाच

तातेनोपासिता यज्ञा अग्नयश्च त्रयीमयाः ।
अविच्छेदेन यजनं देवानां प्रत्यपद्यत ॥१६॥
तस्याग्नित्रितयं विष्णो कुण्डेभ्योऽपगता इति[1] ।
भ्रान्त्वा त्रिभुवनं सर्वमत्रान्वेषितुमायवस्[2] ॥१७॥
अत्र दृष्टाः सभायां ते अग्नयः पितृसेविताः ।
नेष्यामः प्रणिपत्यैतान् पितुर्मोदाय कोशले ॥१८॥

नारायण उवाच

एतेऽग्नयस्त्रयो नाथ त्वत्पित्रा समुपासिताः ।
मया हृताः परीक्षार्थं पूर्णस्य ब्रह्मणस्तव ॥१९॥
नीयतां संप्रति गृहे राम श्रीकोशलापुरे ।
अग्नयोऽमी त्रयीरूपाः पितुस्तेऽभीष्टदायकाः ॥२०॥

---

१. कुण्डेभ्यो य इहागताः—रीवाँ, २. °मीयिवान्—मथु०, वडो० ।

जानाति कस्ते माहात्म्यं वेदानामपि दुर्गमम्[1] ।
तवैव कृपया नाथ विज्ञेयं शुभजन्मभिः ॥२१॥
एवं प्रसादितो रामः पुरुषेणादिविष्णुना ।
नमन्तं तं विसृज्याग्नीन् पुरस्कृत्य त्रयीमयान् ॥२२॥
रथोपस्थमुपाविश्य मुहुर्मुक्तात्मभिः स्तुतः ।
वैमानिकगणैर्भूयः स्तूयमानः पदे पदे ॥२३॥
अक्षरस्यान्तमत्येत्य निस्तीर्य विरजां पुनः ।
कृत्वा च तमसः पारं चक्रज्योतिर्विभेदिनः ॥२४॥
लोकालोकमतिक्रम्य रथवेगेन तत्क्षणात् ।
आजगाम जवाद् रामः साकेतनगरीं प्रति ॥२५॥
अग्नित्रयं पुरोधाय सानुजो रथरंहसा ।
अयोध्यानयनानन्दवर्द्धनः पुनरागतः ॥२६॥
आगते रथशार्दूले अग्नीनादाय भूपतिः ।
अतिप्रीतमना भूत्वा रामं भूयोऽभ्यनन्दयत् ॥२७॥
अग्नीन् कुण्डेषु संस्थाप्य विधिवत् पुनराहितान् ।
सायं प्रातरुपासीनः पूर्णार्थो नृपतेरभूत् ॥२८॥
इत्थं स्थितो यौवराज्ये नन्दयन् भुवनत्रयम् ।
कोशलाधिपतेश्चित्तं विशेषेण ननन्द सः ॥२९॥

---

१. अतः परं—"भगवान् पुरुषः पूर्णो राम एव न संशयः ।
बहूनां रञ्जनकरः कान्तानां भूरि शक्तिमान् ॥
गोपाङ्गनास्तव विभो ललनाः समग्रा
दिक्पालकाश्च भवते समदुः स्वकन्याः ।
अन्याश्च नागनरकिन्नरदेववध्व—
स्त्वय्येव नेत्रसुखदे हि रता बभूवुः ॥
तस्मादेताः किंकरीस्त्वं महिष्यो
गान्धर्वेण प्रीतियुक्ता गृहाण ।
यस्मादेकस्त्वं स रामस्त्रिलोक्याः
स्वेच्छामात्रात् पूर्णचित्ताभिलाषः ॥"

इत्यधिकः पाठः—रीवाँ ।

यौवराज्ये स्थिते रामे सहस्रं शरदो ययुः ।
श्रीमज्जनकजापूर्णतारुण्यमदपोषिकाः ॥३०॥
प्रजानेत्रोत्सवो भूयान् प्रबभूव दिने दिने ।
श्रीरामचन्द्रपूर्णेन्दुदर्शनामृतवर्षणात् ॥३१॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे विष्णुकृत-रामस्तुतौ वैकुण्ठाग्न्यानयनं नाम[1] एकनवतितमोऽध्यायः ॥९१॥

●

द्विनवतितमोऽध्यायः

ब्रह्मोवाच

यौवराज्ये स्थितं रामं नीतिज्ञं धर्मकोविदम् ।
राज्ञो नैश्चिन्त्यकर्तारं श्रियः सर्वाः प्रपेदिरे ॥ १ ॥
ऐश्वर्यमतुलं वीर्यं यशस्त्रैलोक्यशीतलम् ।
जानक्या संमिता श्रीश्च ज्ञानं स्वात्मनिदर्शनम् ॥ २ ॥
वैराग्यं विषयोन्मोकं सर्वभोगसुखातिगम् ।
षड्विधं भगमित्येतद्रामचन्द्रे बभूव ह ॥ ३ ॥

भुशुण्ड उवाच

षड्विधेन भगेनैष भगवानिति शब्दितः ।
तत्प्रायो विश्रुतप्रायं वेदेभ्यो बहुरूपतः ॥ ४ ॥
तथापि न समाज्ञातं[2] रामचन्द्रगतं भगम् ।
प्रत्येकमैश्वर्यमुखं वर्णितं यद्भवादृशैः ॥ ५ ॥

ब्रह्मोवाच

बहुधा वर्णितं वेदैर्भगवत्त्वममुष्य तत् ।
भगं भाग्यं पराशक्तिरन्तरङ्गतया स्थितम् ॥ ६ ॥

---

१. °नयने—अयो०, रीवाँ०, मथु०, बड़ो० । २. मे समाचक्ष्व—मथु०, बड़ो० ।

स्वरूपधर्मरूपं तत् परे ब्रह्मणि राघवे ।
न परो भगवांस्तस्माद्रामात् त्रैलोक्यसुन्दरात् ॥ ७ ॥
अथ तेऽहं प्रवक्ष्यामि रामस्यैश्वर्यमुत्तमम् ।
यस्याज्ञावशगा माया देवानामपि मोहिनी ॥ ८ ॥

सापि दासीवदासीना कस्तस्मात्पर ईश्वरः ।
कालोऽप्याज्ञाकरो यस्य सृष्टिस्थितिलयावहः ॥९॥
सर्वभूतैकग्रसनः सर्वभूतभयङ्करः ।
आध्यात्मिकोऽधिदैवश्च स तथैवाधिभौतिकः ॥१०॥

लीलारसपदार्थानामाधारो रसवत्तरः ।
आधिदैव इतिख्यातः कालो रामस्वरूपकः ॥११॥

आध्यात्मिकस्तथा कालः सूर्यरूपो जनार्दनः ।
त्रयीमयः स[1] सविता आधिदैववशानुगः ॥१२॥
आधिभौतिककालोऽयमाध्यात्मिकवशानुगः ।
परिणामकरः सर्वभूतानां फलभावनः ॥१३॥

कर्मोपासाज्ञानमार्गेष्वेको यः प्रतिबन्धकः ।
भगवन्तं च तद्भक्तं सर्वथैव विमुञ्चति ॥१४॥
जीवाश्चांशा यस्य सूक्ष्माणुमात्राः स्वस्यैवाभिध्यानतः संसरन्तः ।
कामक्लेशाद्यैर्निरानन्दरूपाः स्वस्यैवाविर्भावतः स्वेन तुल्याः ॥१५॥
ब्रह्मेत्याहुर्ये च वेदान्तवाचः सत्यज्ञानानन्दपूर्णप्रकाशम् ।
निर्वैशेष्यं ज्ञानिनामेकधिष्ण्यं तच्चाप्येकं यद्विभूतिस्वरूपम् ॥१६॥

सूर्य्याचन्द्रौ यस्य नेत्रे विशुद्धे द्यौर्वै मूर्द्धा खं च नाभिर्विशालम् ।
आशाः श्रोत्रे भूतलं पाददेशो यस्य स्थूलं रूपमेतद्विराट् सः ॥१७॥

निराकारं निर्विशेषं निर्भेदं च निरञ्जनम् ।
सर्वभूतान्तरात्मैकसूक्ष्मं तत्त्वं च यस्य तत् ॥१८॥
योगिनां हृदयाकाशे प्रकाशं ज्ञानदीपितः ।
यन्मायया तिरोभूय सर्वं निर्व्याप्य तिष्ठति ॥१९॥

---

१. °मयैष°—मथु०, बड़ो०

सर्वतः पाणिपादाद्यं सर्वतोऽक्षिशिरःश्रुतिः ।
एकाकारं निराकारं नानाकारं विभक्तिमत् ॥२०॥

अणोरणु महच्चादिमहतो विष्वगुद्भवम् ।
सैवान्तर्यामिता यस्य कस्तस्मात्पर ईश्वरः ॥२१॥

इतीदमैश्वर्यमनन्तमेव श्रीरामसंज्ञस्य परस्य धाम्नः ।
वेदेषु गीतं कविभिर्वर्णितं च ततोऽप्यनन्तं वदतो मे निबोध ॥२२॥

अनन्तकोटिब्रह्माण्डं बिभ्रद्रोमविलः परः ।
पुरुषः सोऽपि यस्यांशः कस्तस्मात् पर ईश्वरः ॥२३॥

यस्य लीलैव कैवल्यं जीवानां संप्रगायताम् ।
ब्रह्मादीनामप्यगम्यं कस्तस्मात्पर ईश्वरः ॥२४॥

सृजत्या[1]विशते भूयो साक्षीव[2] निखिलं जगत् ।
जीवेनैवात्मरूपेण तथान्तर्यामिरूपतः ॥२५॥

विक्रीडति विशेषेण निजलीलारसात्मकः ।
सहजानन्दिनीशक्त्या कस्तस्मात् पर ईश्वरः ॥२६॥

एक एव द्विरूपेण नानालीलार्थरूपतः ।
नित्याविर्भूत एवासौ भुङ्क्ते स्वानन्दधोरणीम् ॥२७॥

अप्राकृतैः प्राकृतैश्च वस्तुभिः स्वैस्तदर्थकैः ।
नटवत् कुरुते केलीः कस्तस्मात् पर ईश्वरः ॥२८॥

यथा कश्चिन्महाराजो निजेच्छामनुरुध्य वै ।
अशक्यं च सुशक्यं च दुःशक्यं च विधाय हि[3] ॥२९॥
अन्यथा कुरुते भूयः करोति न करोति च ।
यथा प्राचीनवस्तूनि कृतानि स्वयमादरात् ॥३०॥

प्राकारगोपुरा[4]दीनि भङ्क्त्वोद्यानवनादिकम् ।
कुरुते तत्पुनर्भङ्क्त्वा प्राकारगोपुरा[5]दिकम् ॥३१॥

---

१. सृजन्यो—अयो०, रीवाँ । २. साक्षीत्वं—रीवाँ, मायीव—मथु०, बड़ो० । ३. चापिधावति—अयो०, रीवाँ । ४. गोमुखा°—मथु०, बड़ो० । ५. गोमुखा°—मथु० बड़ो० ।

एवं स्वयं कृतान्येव कुरुते स्वेच्छयान्यथा ।
निजलीलारसैकार्थं कस्तस्मात् पर ईश्वरः ॥३२॥

मत्स्यो भूत्वा कदाप्येष भक्तरक्षाविचक्षणः ।
लक्षैकयोजनायामशृङ्गस्थापितपोतकः ॥३३॥

प्रलयार्णवनिर्मग्नां वेदवाच[1]मुपाहरत् ।
तत्कालोचितमाधुर्यवेषविग्रहशोभितः ॥३४॥

सत्यव्रताय बहुशो वेदानां हार्दमुक्तवान् ।
चकच्चकायमानाङ्गः[2] शुद्धसत्त्वमुपाविशत् ॥३५॥

कदाचित् कच्छपाकारो मन्दराचलधारणात्[3] ।
ईषत्कण्डूतिसुखवाट् देवानां हितमाचरत् ॥३६॥

कदाचिद्दिव्यवाराहरूपभृत् संनिवेशवान् ।
कल्पान्तसमया[4]म्भोधिजलवृन्दं विनिर्धुवन्॥३७॥

उर्वीमुदवहद् भूरि सटा[5]मण्डितकन्धरः ।
खुराघातैः[6]कुलाद्रीणां कूटानि त्रोटयन् रुषा ॥३८॥

संवत्सरसहस्राणि हिरण्याक्षेण युद्धवान् ।
विनयन् बाहुकण्डूतीः केवलं वीर्यसंमदी ॥३९॥

अपातयन्महेन्द्रस्य विद्वेष्टारं तमुद्धतम्[7] ।
साक्षाद्यज्ञस्वरूपेण दृष्टो ब्रह्मशिवादिभिः ॥४०॥

व्यतनोत् कर्मणां संस्थाः स्वरूपेणैव तत्क्षणात् ।
अथ भूयोऽपि देवोऽयं[8] दिव्यकेवलरूपधृक् ॥४१॥

अरण्यादागतो रुष्टो दुर्दर्शः क्रूरविग्रहः ।
षष्टिवर्षसहस्राणि दितिजेन्द्रमयोधयत्[9] ॥४२॥

प्रह्लादस्य हितार्थाय तथारूपो बभौ प्रभुः ।
अथान्यदा बलिं नाम दैत्येन्द्रं त्रिजगत्प्रभुम् ॥४३॥

---

१. दैवींवाचं—मथु०, बड़ो० । २. °नाम्भः—अयो० । ३. मंदरात्—रीवाँ । ४. कल्पांतरसमां°—अयो० । ५. सदा—अयो० । ६. सुरावातैः—अयो० । ७. तमद्भुतम्—अयो० । ८. देवो वः—अयो० । ९. अबोधयत्—बड़ो० ।

सुरेन्द्रलक्ष्मीहर्तारं प्रसभं छलमात्रतः ।
पातालं वेशयामास वामनोऽथ त्रिविक्रमः ॥४४॥
देवैर्नरैर्मुनिगणैर्दृष्टोऽत्यद्भुतविक्रमी ।
कोटिबिम्बार्कदुर्दर्शो रसनाबद्धतारकः ॥४५॥
गणैर्जये[1]त्यभिहितस्त्रैलोक्येन विराजितः ।
शुशुभे भगवान् साक्षादयमेव शुभाकृतिः ॥४६॥
अथ राजन्यवर्येषु विधर्माक्रान्तबुद्धिषु ।
अब्रह्मण्येषु दुर्वृत्तेष्वात्मवीर्यविकासवान् ॥४७॥
कुठारधारादुर्दर्शो विप्रः क्षत्रियघातकः[2] ।
दुःक्षत्ररहितां भूमिं चक्रे वारैर्कविंशतिम् ॥४८॥
अपोषयद् ब्राह्मणांश्च दानं कृत्वा महाद्भुतम् ।
चकर्त कार्त्तवीर्यस्य दोर्दण्डद्रुममण्डलीम् ॥४९॥
अथ दाशरथे गेहे सर्वसंपद्विभूषिते ।
भ्रातृभिः सहितो जातो रसिकेन्द्रशिखामणिः ॥५०॥
कल्पं सारस्वतं प्राप्य साक्षात् पूर्णः शुभाकृतिः ।
मैथिलीनयनानन्ददायी पौरुषभूषणः ॥५१॥
नीतिधर्मप्रवृत्तित्वात् सतां संमतसद्गुणः ।
योगिभिर्वृतहृत्तर्षैं[3]र्गीयमान उदारधीः ॥५२॥
मर्यादापालनपरश्चक्रे लीलां मनोहराम् ।
तामहं गदितुं शक्तो नैव जिह्वासहस्रकैः ॥५३॥
श्रीरामो नाममात्रेण रमयन् जीवधोरणीः ।
रमते रत्नाचले नित्यं भ्रात्रा सेवितपार्श्वकः ॥५४॥
भूय एष क्षपयिता रावणं लोकरावणम् ।
अगस्त्यहयशीर्षाद्यैर्ज्ञाततत्त्वः कथंचन ॥५५॥
महावीरो महाधीरो महाकारुणिकेश्वरः ।
कृतज्ञो यशसां राशिर्विप्राशीर्भिः समैधितः ॥५६॥

---

१. रामोजये°—अयो०, मथु०, बड़ो०। २. घातुकः—मथु० बड़ो०।
३. रुद्धर्षैं—रीवाँ।

लोकलोचनविश्रामो विरामो भूरिदुर्हृदाम् ।
वेदमार्गनया[1]रामो रामो विजयतेतराम् ॥५७॥

बलकृष्णादिरूपेण भविता च समः क्वचित् ।
अथ यज्ञगताञ्जन्तून् दयमानो दयानिधिः ॥५८॥

बुद्ध इत्याख्यया युक्तो भविता स्वयमेव च ।
ततश्च म्लेच्छभावेषु जनेषु कलिकालतः ॥५९॥

पुनः संस्मृत्य स्वं धर्मं भविता कल्किरूपधृक् ।
इमानि दश मुख्यानि रुपाण्यस्य महात्मनः ॥६०॥

युगे युगेऽवतरतो गीयन्ते वेदवित्तमैः ।
अन्यानि चापि रूपाणि युगरूपाणि बिभ्रति ॥६१॥

गुणावताररूपाणि तथैवान्यानि भूरिशः ।
श्वेतरक्तपीतकृष्णनानावर्णानि वै खग ॥६२॥

तथैवान्यानि[2] रूपाणि कलाश्चांशाः सनातनाः ।
तथैवावेशरूपाणि पृथुराजमुखानि च ॥६३॥

रामस्यैवाखिलारम्भा दृष्टाश्चैव श्रुता अपि ।
स्मृताः पुनन्ति भुवनं कस्तमात्पर ईश्वरः ॥६४॥

सकलैश्वर्यसीम्नो[3]ऽस्यैश्वर्यमुपवर्णितम् ।
तथा हि महती भूतिरनेनात्र प्रदर्शिता ॥६५॥

यौवराज्यस्थितेनैव श्रीमद्दाशरथे गृहे ।
गृहं खलु विशालं तद् योजनोच्छ्रायमीडितम् ॥६६॥

सभामण्डप[4]संशोभि मणिमाणिक्यभूषितम् ।
पितृपैतामहं यत्र हेमरत्नविभूषितम् ॥६७॥

निःश्रेणिका[5]त्रय युतं दिव्यं सिंहासनं स्थितम् ।
तत्रस्थोऽयं सभाकाले शुभुभे यौवराज्यभुक् ॥६८॥

---

१. °परो—रीवाँ, "वेदमार्गश्च नयश्च ताभ्यां" टि०—मधु० । २. तथान्यानि च—मधु०, बड़ो० । ३. °सीमा—अयो०, मधु०, बड़ो० । ४. °मण्डल°—रीवाँ । ५. निःश्रीणीका—रीवाँ ।

पितुराज्ञामनुल्लङ्घ्य नीतिधर्मानुशासकः ।
गायका नर्तकाश्चैव वादकाश्चोपवीणकाः ॥६९॥
अनेकशिल्पवैचित्र्यशालिनः शुभकर्मिणः ।
स्वां स्वां विद्यां दर्शयन्त उवासाञ्चक्रिरे मिथः ॥
यौवराज्यस्थितं रामं त्रिजगत्कामवर्षणम् ॥६९॥
युवानमाजानुविशालदोर्द्वयं महार्हरत्नाढ्यलसत्किरीटिनम् ।
वलक्षमुक्ताफलपूरितश्रुतिं विलम्बिहाराभरणाद्युरःश्रियम् ॥७०॥
निरङ्कपूर्णेन्दुविराजिताननं जगत्त्रयीनेत्रचकोरतुष्टिदम् ।
समोदमीषत्स्मितरञ्जिताधरं नितान्तमाज्ञावशगाखिलेश्वरम्[1] ॥७१॥
सुपीवरांसं[2] सुविशालवक्षसं सुराजराजीवविराजितेक्षणम् ।
सुवर्णरत्नाङ्गदभातिरस्कृतस्फुरत्सभामण्डलभूतमित्रकम् ॥७२॥
स्वामित्वधर्मेण वशीकृता[3]खिलं स्वाभाविकोद्योतसहस्रदीधितिम् ।
प्रसन्नकान्त्याभिसुधांशु[4]संपदं मनोरमालापकलासु कोविदम् ॥७३॥
के के न तोषितास्तेन के के न च वशीकृताः[5] ।
के के न संगताश्चैव के के न च कृतार्थिताः ॥७४॥
के के न काञ्चनासारैः कवयो धनदीकृताः ।
[6]के के न गजसंदोहैर्जना गजपतीकृताः ॥७५॥
के के न वाश्वसंदोहैर्जना हयपतीकृताः ।
के के न मणिसंदोहैर्जना रत्नाकरीकृताः[6] ॥७६॥
दिवामणिकुलोद्योते रामे प्रकृतिरञ्जने ।
यौवराज्यस्थिते दूरमगात् कलुषसंभवः ॥७७॥
अघस्यापि न लेशोऽभूत् प्रजा धर्मानुवर्तिताः ।
निरस्ततिमिरं रेजे सर्वतोऽवनिमण्डलम् ॥७८॥
दारिद्र्यमगमद् दूरं दिवाभीत इवोदये ।
चतुर्दिक्षु जयेत्येव शब्दोऽभूत् सुखवर्द्धनः ॥७९॥

---

१. °खिलायुधम्—अयो०, मथु०, बड़ो० । २. सुपीतरासं—अयो० । ३. च स्वीकृता—अयो०, रीवाँ । ४. °धिसुधांशु—रीवाँ । ५. वचसाहिताः—रीवाँ । ६—६. नास्ति—अयो० ।

चतुर्णां च पुमर्थानामेष कल्पद्रुमोऽभवत् ।
साकेतपुरराजेन्द्रकुमारो लोकसुन्दरः ॥८०॥
मित्राणां स्थापनकरः प्रोज्जासनकरो द्विषाम् ।
कोटिकन्दर्पमूर्तित्वात् त्रिलोकीचित्तमोहनः ॥८१॥
तरुणार्क इवोद्योतशाली महिमभूषितः ।
तदेव चक्रे यत्राभूदन्येषामत्यशक्यता ॥८२॥
तत्रास्य बाणसंचारो यत्र राक्षससंक्षयः ।
ततान तादृशीं कीर्तिं भ्रातृव्याः यत्र मर्षिताः ॥८३॥
जगाद तादृशं वाक्यं यादृशं वेदसंमितम् ।
सज्जीकृत्य बलं गच्छन् गिरिश्रृङ्गाण्यपातयत् ॥८४॥
पुनश्च विनयं कृत्वा यात्रासिद्धिमवाप्य सः ।
जयतौर्यत्रिकोद्घोषैः प्रविशन् निजमन्दिरे ॥८५॥
असंख्यातान् गुणांस्तस्य को वा वर्णयितुं क्षमः ।
द्वितीयः सूर्य एवासौ साक्षाद्रामः स्वयंप्रभुः ॥६८॥
दिलीपस्य रघोश्चैव तथैवाजस्य भूपतेः ।
साक्षाद्दशरथस्यासावनुचक्रे पितुर्गुणान् ॥८७॥
आहोपुरुषिकां[1] साक्षाद्देवानां समपूपुषत् ।
असुराणां नाशकृते सिद्धीनामासनं बभौ[2] ॥८८॥
वीरतायाश्च मञ्जूषा शूरताशासनो बभौ ।
अधर्मस्य च संधारो धर्मस्याधार एव च ॥८९॥
पारावारो बलस्यैष कीर्तेः कर्तानुवासरम् ।
भूमेर्भर्त्ता दशरथस्तस्य संतोषदायकः ॥९०॥
विभ्राणश्च स्वयं शक्त्या विप्रगोवेदबान्धवान् ।
परपीडापहर्ता च संसारस्योपरि स्थितः ॥९१॥
सर्वस्योच्चैः स्थितोऽप्येष नीचैरेवास्थितो गुरोः ।
वेदानां रक्षकः साक्षात् क्षत्रधर्मव्रताकरः ॥९२॥

---

१. "अहमेव पुरुष इति अहंपुरुषस्तस्यभाव आहोपुरुषिका" टि०—मधु० ।
२. "असुरनाशकसिद्धीनाम् आसनमास्पदभूतो रामः बभौ" टि०—मधु० ।

दूरात् कालाग्नियन्त्राभः शत्रूणां भयवर्द्धनः ।
समीपे च महातीक्ष्णकालजिह्वाकृपाणवत् ॥९३॥
दुर्गाणा[1]मावरणकृद्द्वाररोद्धा कपाटवत् ।
सद्धर्मकर्मणां भूमिर्गुणैर्गङ्गासमुज्वलः ॥९४॥
अघतार्णकुटीपुञ्जज्वालनो नाममात्रतः ।
परसैन्यमहामेघघटासंघट्टमारुतः ॥९५॥
आकाश इव[2] विस्तारी ज्योतिषां स्थानमव्ययम् ।
सूर्यमण्डलवच्छत्रं चामरे चन्द्रबिम्बवत् ॥९६॥
सिंहासनं मेरुसमं पादप्रोञ्छनवन्मही ।
यस्योचितं परं त्वेष पितुराज्ञाकरो भृशम् ॥९७॥
द्वीपाद् द्वीपान्तरं गच्छन् नामयामास भूपतीन् ।
समुद्रान् ग्राहयामास सैन्यैः सचतुरङ्गकैः ॥९८॥
पर्वतान् लोपयामास[3] यातायातैर्बलस्य सः ।
देशान्तरादुपागत्य जगुरेनं कवीश्वराः ॥९९॥
लेभिरे रत्नकूटानि महेभांश्च महाहयान् ।
लक्षकोटयधिकं द्रव्यं प्रसादीकृत्य तान् ददौ ॥१००॥
लेभे च महतीं कीर्तिं शरच्चन्द्रांशुशीतलाम् ।
यथा प्रोद्भासितं विश्वं यावत्कल्पो विधेर्दिनम् ॥१०१॥
प्रजानां भालसंभाग्यं साक्षादेव रघूद्वहः ।
उज्जागरः श्रियामेषः सागरः सर्वसंपदाम् ॥१०२॥
आशीर्भिर्वर्द्धयामासुरेनं सिंहासनस्थितम् ।
चिरंजीव महाराजकुमार नयनोत्सव ॥१०३॥
श्रीराम लक्ष्मणसख भरताद्यनुजान्वित ।
तानेव नतवान् मूर्द्धना बहुमानपुरःसरम् ॥१०४॥
सिंहासनस्थे श्रीरामे युवराजे रघूद्वहे ।
रत्नभाजनसंदोहनानोपायनपाणयः ॥१०५॥

---

१. दर्पाणा°—रीवाँ । २. °वर°—अयो० । ३. लोकयामास—रीवाँ ।

ताम्बूलभाजनकराः पर्यस्थुः पारिपार्श्वकाः ।
माद्यद्गजवरारूढा नटवद्वंशसंस्थिताः ॥१०६॥
उपसेदुर्महामात्राः संतुष्टयै राघवेशितुः ।
कूर्द्दमानाः केकिशिराश्चतुरङ्गा जयोद्धुराः ॥१०७॥
लघुपल्याणिनो वीरा अश्वपालकरस्थिताः ।
पट्ट[1]सूत्रसमाबद्धा उपसेदुस्तुरङ्गमाः ॥१०८॥
[2]कृष्णसाराश्चारुदृशस्तीक्ष्णशृङ्गा जयोद्धताः ।
पट्टसूत्रसमाबद्धा उपसेदुस्तदग्रतः[2] ॥१०९॥
मृगयाधावननवाः श्वानो[3]मध्ये तरक्षुवत् ।
ललद्विलोलजिह्वाग्रा हयानामग्रगामिनः ॥११०॥
शार्दूलपोतैः सदृशाः परस्परगुणाधिकाः ।
कालवर्णाः पीतरुचः श्वेताश्चित्रतनुत्विषः ॥१११॥
धूम्राक्षाश्चातिधूम्राभाः पट्टसूत्रावलम्बिनः ।
कूर्द्दमानमृगीपोतग्राहिणस्तृतीये क्रमे ॥११२॥
ग्रामसिंहोत्तमास्तत्र ह्युपसेदुरनेकशः ।
ग्रामाणां नगराणां च देशानां च विशेषतः ॥११३॥
निष्पत्तिं तु समादाय सेवका उपतस्थिरे ।
कान्त्या विशालरसना[4] नेत्रैः पीयूषवार्मुचः ॥११४॥
गत्या चापि गरीयांसः कीर्तिविस्तारकारकाः ।
आख्यानाख्यायकाः[5] काव्यगुरवो वर्णनक्षमाः ॥११५॥
अनेक शास्त्रनिपुणाः कवयश्चोपतस्थिरे ।
देशेषु परदेशेषु तपन्तो भानुबिम्बवत् ॥११६॥
पञ्चहस्तप्रमाणाङ्गा युवानोऽगण्यविक्रमाः ।
सर्वे विज्ञातविजयाः शस्त्रशास्त्रविशारदाः ॥११७॥
कृपाणिकटिसंनद्धा वाणेषुधिधराश्च ये ।
वाचामन्यतमाः सर्वे शूराः समुपसेदिरे ॥११८॥

---

१. अक्षसूत्र°—रीवाँ। २—२. नास्ति—अयो०। ३. वन°—रीवाँ। ४. कृंत्यार्विलरसना—अयो०, कांत्याविरलसा—रीवाँ। ५. °ख्यायिकाकाव्य°—मथु०, बड़ो०।

तत्र तत्रा[1]भवद्भाग्यं यत्र यत्र दृशं ददौ ।
यदा यदा प्रसङ्गोऽभूत् कवीनां भाग्यवृद्धये ॥११९॥
तदा तदा समभवत् कांचनासारवारिदः ।
इति ते प्रोक्तमैश्वर्यं वीर्यमस्य शृणु द्विज ॥१२०॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे
रामयौवराज्ये द्विनवतितमोऽध्यायः ॥९२॥

●

त्रिनवतितमोऽध्यायः

ब्रह्मोवाच

अथ वीर्यं रामचन्द्रस्य वक्ष्ये ह्यनन्यसामान्यममेयमस्य ।
लोकोत्तरं भागवत्त्वैकचिह्नं निशम्यतां वीर भुशुण्ड मत्तः ॥१॥
येनैकविंशवारान् वै कुठारेण वरौजसा ।
क्षत्रियान् युधिनिर्जित्य क्लृप्ता[2] रक्तोदका ह्रदाः[3] ॥२॥
तपःप्रतापयोः पुञ्जः साक्षादग्निरिवोद्धतः ।
दुर्दर्शनोऽतिधाम्नैव दुराराध्यो दुरासदः ॥ ३ ॥
समुद्रवेष्ठितमही दानसंपूजितद्विजः ।
क्षत्रियान्तकरो रामः सोऽपि येन विनिर्जितः[4] ॥ ४ ॥
बलादाकृष्य तत्तेजः स्वस्मिन्नेव न्यवेशयत् ।
कस्तस्मादितरो वीरः श्रीमद्दशरथात्मजात् ॥ ५ ॥
शैलेन्द्रसारं कठिनं पुराणं शाम्भवं धनुः ।
बभञ्ज लीलया बालस्ततः कोऽन्योऽस्ति वीर्यवान् ॥ ६ ॥
पश्यतामेव सर्वेषामाद्वीपान्तमहीभृताम् ।
उवाह जानकीमेष ततः कोऽन्योऽस्ति वीर्यवान् ॥ ७ ॥

---

१. तदा—अयो०, मथु०, बड़ो० । २. कर्त्ता—रीवाँ । ३. ह्रदान्—रीवाँ ।
४. विवर्जितः—रीवाँ ।

भूतानां भयदं तीक्ष्णं सुबाहुं नाम राक्षसम् ।
सहस्रधा कृतात्मानं युद्धयन्तं शस्त्रवृष्टिभिः ॥ ८ ॥
मायाविनं महाघोरं जेतारं सुरसंपदाम् ।
विकटाटोपसंरंभदुर्दर्शं सुदुरासदम् ॥ ९ ॥
सहस्रधा स्वयं चापि कृत्वा स्वात्मानमुच्चकैः ।
अपातयद्रणे घोरे ततः कोऽन्योऽस्ति वीर्यवान् ॥१०॥
अन्ये च भूभारकृतो राक्षसा घोरदर्शनाः ।
विप्रद्रुहोऽपकर्त्तारः सतां देवत्रयोगिराम् ॥११॥
महाबला महाघोरा दुर्दुरूढा बलोच्छ्रयाः ।
आकाशचारिणो वीराः शिलापर्वतवर्षिणः ॥१२॥
करालविग्रहाटोपा घटासंघट्टमेचकाः ।
नानावर्णा दुराक्रम्या भयानकरणक्रियाः ॥१३॥
तेऽपि नीता क्षयं बाणैस्ततः कोऽन्योऽस्ति वीर्यवान् ।
अग्रे च भ्रूभङ्गमात्राज्जलधिं विपुलोदकम् ॥१४॥
नियम्य पातयामास पादयोरभयङ्करः ।
शिलाभिस्तं समाच्छाद्य सेतुं कृत्वा दृढं प्रभुः ॥१५॥
प्लवङ्गांस्तारयामास लङ्कानिर्जयहेतवे ।
भयानकानां राक्षसानामगण्य महाचमूम् ॥१६॥
लङ्कामावृत्य परितः स्वसैन्यं संनिवेश्य च ।
पश्यतां राक्षसेन्द्राणां लङ्काधिपतिशीर्षतः ॥
अपातयच्छितैर्बाणैरातपत्राणि तत्क्षणात् ॥१७॥
ज्ञातं च यन्महासत्त्वं मन्दोदर्या विशेषतः ।
वर्णितं स्वस्य पतये ततः कोऽन्योऽस्ति वीर्यवान् ॥१८॥
वालिनं चोद्धतबलं कृतलङ्केशनिर्जयम् ।
बभञ्जैकेन बाणेन ततः कोऽन्योऽस्ति वीर्यवान् ॥१९॥
योऽन्तर्यामितया सुरासुरनरत्रैलोक्यमध्ये स्थितो
भक्तानां भयसंजिहीर्षणकृते पाणौ धनुर्बाणभृत् ॥
मर्यादापरिपालनैकनिपुणः सर्वावतारेश्वरः ।
श्रीमानेष चिरन्तनो विजयते पूर्णः परः पूरुषः ॥२०॥

अस्याज्ञातत्परो वीरो हनूमान् विश्वनिर्जयी ।
कुर्वन् किलकिलाशब्दैः क्षोभणं यक्षरक्षसाम् ॥२१॥
कपीन्द्रः स्मरणादेव दुष्टजालप्रणाशनः ।
रुष्टोऽम्भोधिं शोषयेद्यो धरित्रीमपि दारयेत् ॥२२॥
पर्वतान् पातयेदेव भिन्द्याद् वज्रमपीच्छया[1] ।
मथ्यात्[2] त्रैलोक्यमखिलं ससुरासुरमानुषम् ॥२३॥
कालयेत् कालमपि यो हरेत् सर्वस्य पौरुषम् ।
सिंहनादी महाभीमो ब्रह्माण्डमपि चोद्वहेत् ॥२४॥
उद्धरेन्मेरुमपि यः साक्षान्मारुतनन्दनः ।
तादृशो यस्य पुरतो बद्धाञ्जलिपुटः स्थितः ॥२५॥
किंकरोमीति सततं स्वदास्यमनुदर्शयन् ।
आनमत्कन्धरौ भक्त्या ततः कोऽन्योऽस्ति वीर्यवान् ॥२६॥
इति श्रीरामचन्द्रस्य वीर्यं ते कथितं मया ॥२७॥
यस्यैकनाम सकलागमसारभूतं
भूयो जपन् किल नरः प्रविमुच्यते वै ।
ब्रह्मादिदैवतभयानकरूपकाल—
व्यालाननान् जयति कोऽन्य इतोऽपि वीरः ॥२८॥
प्राणान्तकरणोद्युक्ता[3] भयदा यमकिङ्कराः ।
सुदुर्दर्शाः पाशकराः कशाहस्ताः सुवेगिनः ॥२९॥
तेऽपि संयमिनीपुर्यां वासिनो घोरविग्रहाः ।
यस्यैकनाममात्रेण पलायन्ते दिशो दश ॥३०॥
निर्भयो जायते मर्त्यो निस्तीर्णः कालसंकटात् ।
सर्वत्र पूजां लभते कस्तस्मात्पर ईश्वरः ॥३१॥
यस्य भ्राता लक्ष्मणाख्यो यतीन्द्रः
कल्पान्ताग्निक्रोधदुष्प्रेक्षरूपः।
भक्तस्यार्थे स्वयमात्तेषुचापः
कोऽन्यस्तस्मादुच्चकैर्वीरवर्यः ॥३२॥

---

१. °मयीक्षया—अयो० । २. तथा—अयो० । ३. °करणे युक्ता—अयो०, रीवाँ ।

कालस्यापि भयं यस्माद्विश्वतः कलनात्मनः ।
सूर्य्यस्य नित्यं भ्रमतो मरुतस्य सदागतेः ॥३३॥
अन्येषां चापिदेवानां मर्यादासंस्थितात्मनाम् ।
यतो भयं नित्यमेव महासंहरणात्मनः ॥३४॥
स्थावराणां जङ्गमानां यत एवास्ति संस्थितिः ।
स्वे स्वे स्थाने स्थापितानां नाद्याप्यस्ति व्यतिक्रमः
प्रभूणां चापि सर्वेषामेक एव च यः प्रभुः ॥३५॥
कालाग्निरुद्रो जगतीतलस्य
करालरूपो विकटज्वालमाली ।
कल्पान्तेषु क्षम एषो[1]ऽस्य हृत्यै
सोऽप्यस्य य[2]स्तुल्यतां नैव याति ॥३७॥
यौवराज्यपदे स्थित्वा स्वपीठमधितिष्ठति ।
कोटिब्रह्माण्डकर्तारो विधयः कोटिशङ्कराः ॥३८॥
कोटयश्च महेन्द्राणां वरुणानां च कोटयः ।
कोटयः पावकानां च यमानां चापि कोटयः ॥३९॥
बद्धाञ्जलिपुटा भूत्वा अग्रतः पर्युपास्थिताः ।
ततः प्रसादमासाद्य गच्छन्ति स्वस्य विष्टपम् ॥४०॥
कांश्चित् कृपाकटाक्षेण कांश्चिन्मञ्जुमुखस्मितैः ।
कांश्चिदालापमात्रेण कांश्चिद्दर्शनमात्रतः ॥४१॥
राघवेन्द्रोऽनुगृह्णाति कोटिब्रह्माण्डनायकः ।
यस्यावतारसमये वैकुण्ठं वीक्ष्य शून्यवत् ॥४२॥
ये तत्र गामिनो देवा ब्रह्माद्या आधिकारिकाः ।
ज्ञात्वा परं पूरुषं तं नित्यमेवमुपासते ॥४३॥
तस्य वीर्यं समालम्ब्य रावणाद्यैरुपद्रुताः ।
विस्रस्ताः स्वाधिकारेभ्यः स्वान्ते संतापसञ्जुषः ॥४४॥
यस्य वीर्यं समालम्ब्य त्रिदशा सर्व एव हि ।
तादृशं विपदां भारं न किंचिद् गणयन्त्यहो ॥४५॥

१. एको—मथु०, बड़ो० । २. सोऽप्यस्यैष—मथु०, बड़ो० ।

स्मृत्वा यस्य धनुर्वाणौ सतां रक्षणकारकौ ।
दैत्यानामस्त्रशस्त्राणि मन्यन्ते तृणवच्च ते ॥४६॥
यस्य चक्रं महाज्वालामालादीधितिसंयुतम् ।
दैत्यस्तोमतृणारण्यदाहनोद्धुरताण्डवम् ॥४७॥
अपां तत्त्वं दरवरं यस्य पाणौ विराजते ।
यत्र मग्नास्तु दितिजा नोन्मज्जन्ति पुनः क्वचित् ॥४८॥
वायुतत्त्वमयी यस्य गदा नित्यं बलोर्जिता ।
दैतेयघनसंघट्टविद्रावणमहोर्जिता ॥४९॥
भुवनात्मकमम्भोजं यस्य पाणितले स्थितम् ।
मोहनं सर्वदैत्यानां ततः कोऽन्योऽस्ति वीर्यवान् ॥५०॥
देवानां चैव यक्षाणां गन्धर्वाणांच कन्यकाः ।
[1]राज्ञां पुण्यजनानां च मनुष्याणां च कन्यकाः[1] ॥५१॥
द्वीपान्तरस्थितानां च विचित्रजनुषां नृणाम् ।
काश्मीरादिप्रदेशस्थमानवानां गुणान्विताः ॥५२॥
पत्न्यश्च पुत्रिकाश्चैव रूपसौन्दर्यशोभिताः ।
कामलुब्धेन नितरां रावणेन दुरात्मना ॥५३॥
द्विरागमविवाहादौ येषु तेषु[2] जनादिषु ।
पतिसंयोगकालादौ प्रसभं बलिना हृताः ॥५४॥
वन्दीकृताश्चावरुद्धाः प्रत्यहं शोककर्शिताः ।
यस्य वीर्यविमर्शेन वासरं गमयन्ति ताः ॥५५॥
दीनानां नः प्रभुरेकस्त्रिलोक्यां श्रीमान् वीरो योऽग्रगण्यः प्रतापी ।
कदा समागत्य रघुप्रवीरः श्रीरामचन्द्रो मोचयिष्यत्यमुष्मात् ॥५६॥
अस्मांस्तदेकशरणाः पतिपितृभ्रातृ—[3]
पुत्रादिभिर्विरहिता हृदिशोकभाजः ।
श्रीराघवेन्द्र इह संगत एव काले
संमोचयिष्यति बलाद् बलवान् स एकः ॥५७॥

१—१. नास्ति—अयो०, रीवाँ। २. देवतासु—अयो०, मथु०, बड़ो०।
३. °पित्रपत्य°—अयो०, मथु०, बड़ो०।

नान्योऽस्माकं मोचयिता दृश्यते भुवनत्रये ।
रावणत्रिजगज्जैत्रादेकं रघुपतिं विना ॥५८॥
इति विश्वस्तचित्तास्ता भावयन्ति दिवानिशम् ।
यमेव वरशार्दूलं ततः कोऽन्योऽस्ति वीर्यवान् ॥५९॥
संप्राप्ते संकटे चापि महाभय उपस्थिते ।
संग्रामे विषमे घोरे दुर्गमे जलसंगमे ॥६०॥
राजद्वारे भयकरे तथैवाध्वनि दुर्गमे ।
क्रव्यादद्विपसर्पादौ सद्यो नाशार्थमुद्यते ॥६१॥
कान्तारे दुर्गमे चैव पर्वते सिंहसंयुते ।
भूतप्रेतपिशाचाद्यैर्जृम्भकाद्यैरुपद्रुते ॥६२॥
रामेति यस्य नाम्नैव तरन्ति विपदोऽखिलाः ।
जायन्ते निर्भया लोकाः कोऽन्यस्तस्माच्च वीर्यवान् ॥६३॥
इति ते वीर्यमाख्यातं रामस्य सुमहात्मनः ।
यज्ज्ञात्वा खलु जायन्ते अनन्यशरणा जनाः ॥६४॥
वीराय वीरवर्याय महावीर्यगुणात्मने ।
राघवेन्द्राय रामाय नित्यमेव नमोनमः ॥६५॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे पूर्वखण्डे
षड्गुणोपाख्याने [वीर्यव्याख्यानं नाम]
त्रिनवतितमोऽध्यायः ॥९३॥

चतुर्नवतितमोऽध्यायः

ब्रह्मोवाच

अथ ते राघवेन्द्रस्य प्रवक्ष्यामि यशोगुणम् ।
जनो यद्गानमात्रेण भवबन्धात् प्रमुच्यते ॥ १ ॥
सभामण्डपमागत्य स्थिते श्रीरघुसत्तमे ।
वेदास्तापसरूपेण गायन्ति विपुलं यशः ॥ २ ॥
अनवद्यलसद्वर्णां गद्यपद्यादिरूपिणीम् ।
अवलम्ब्य गिरं तादृग्गभीरार्थविशारदाम् ॥ ३ ॥
यमकोद्भासिनीं भूयो दण्डकोदण्डमण्डिताम् ।
सरस्वतीमुपाश्रित्य सालङ्कारां गुणान्विताम् ॥ ४ ॥
सर्वलक्षणसंयुक्तां विमुक्तक्रमसंक्रमाम् ।
अभूतपूर्वविपुलां कविताख्यां तरङ्गिणीम् ॥ ५ ॥
श्रीरामचन्द्रवदनालोककौस्तुभसंस्तुताम्[1] ।
चमत्कारशतैर्युक्तां भारतीं समदर्शयन् ॥ ६ ॥

वेदा ऊचुः

श्रीखण्डद्रवशीतलं विजयते नित्यं त्वदीयं यशः
कामक्लेशमुखैरुपद्रुतममुं जीवं तमःसंयुतम् ।
संतप्तं बहुशो विपन्नमसकृत् संशीतयत्येव यः
पीयूषोपममुच्चकैस्तदभितो भक्तैर्जनैर्गीयते ॥ ७ ॥
शरच्चान्द्रीवलक्षं[2] यत् प्रकृत्या स्वादु शीतलम् ।
अपहाय जनस्तादृक् तावकं विपुलं यशः ॥ ८ ॥
कोऽन्तःसंतापसंदोहनिर्वापं[3] खलु वाञ्छति ।
इति चात्र[4] महामोह[5]व्याकुले दुर्भगे भवे ॥ ९ ॥

---

१. संप्लुताम्—मथु०, बड़ो० । २. शरच्चन्द्रविलक्ष्यं—अयो०, रीवाँ । ३. बिवादे—अयो०, रीवाँ । ४. इतरत्र—अयो० । ५. अतः परं—"विवादं भजते पुनः, व्याकुले दुर्भगे चापि भागवान् जायते" इत्यधिकः पाठः—रीवाँ ।

नान्यस्त्वादृक् सुरेषु प्रतिकृतिकरणे भूरिसंतापराशेः
सर्वे त्वद्दत्तमेव प्रलयमवधितः स्वाधिकारं भजन्ते ।
एकस्त्वं निःसमानः प्रभुवर वरणीयोऽसि जीवैः समस्तै-
रेषा ते राम कीर्तिस्त्रिभुवनजनताचित्तसंतापहर्त्री ॥१०॥

कोटिनिर्लाञ्छनेन्दूनां भास्वन्त्या प्रभयापि च ।
यद् दुर्निवारतिमिरं त्वत्कीर्त्या तन्निवर्तते ॥११॥

त्रिभुवनजनतायाश्चित्तसंतापहर्त्री
प्रसभतरमविद्याकामकर्मादिरूपम् ।
तिमिरमपहरन्ती विष्वगौज्ज्वल्ययुक्ता
विलसति तव कीर्तिः संततं राघवेन्दो ॥१२॥

क्षीराम्भोधेः समन्ताद्विलुलितलहरीलास्यलावण्यचौरी
कर्पूरक्षोदगौरी द्रुततरविसरच्चन्दनामोदयुक्ता ।
कीर्तिस्ते रामचन्द्र प्रकृतिसुमधुरा पूर्णपीयूषपूर—
प्राग्प्राज्यप्रतिष्ठा कलयति कुमुदालोकिनीं चारुचान्द्रीम् ॥१३॥

जय जय जय देव साकेतचन्द्रश्रिया[1]तन्त्रचन्द्रद्युते[1] रामचन्द्र क्षमापाल शक्रादिदिक्पालतेजःस्फुरच्चण्डकोदण्डदण्डस्फुटोद्गीर्णवाणावली-शीर्णविद्वेषिसंघ प्रभूतप्रचण्डप्रतापप्रकाशप्रकृष्टप्रसर्पत्प्रभावप्रसारप्रभापूरित-क्ष्मातलक्षेमदाक्षुण्ण[2]कौक्षेयकाक्षामलक्ष्मोक सक्षेमसोन्मादमातङ्गविश्राण-नोद्दाम दीव्यद्गुणग्राम भूदेवविश्राम भूयस्तरायाम धर्मद्रुमाराम हेराम कामाभिरामद्युते ॥१४॥

जय कविजनगीत तावत्तुलातीत[3] नित्यप्रमुदित[4]शीतद्युति-स्फीतसत्कीर्तिसंनीतसाङ्गस्वराधीतविप्राननोन्नीतमाङ्गल्यवाग्गीत खड्गस्फु-टाघातसद्यःसमुत्खातसर्वद्विषव्रात भूमण्डलायातलावण्यसंघात दोर्विक्रम-त्रातसद्धर्मविख्यात किंचिन्नवप्रातरुद्यत्पयोजातरोचिष्णवभिख्यात-पादद्वयापातनम्रद्विषत्सातदानस्फुटौदार्य[5]सद्विप्रसत्कार्य सद्वृत्तनिर्धा-

---

१–१ नास्ति—अयो० । २. °दाक्षिण्य°—रीवाँ, "अक्षुण्णमखण्डितं कौक्षेयकं खड्गो यस्य" टि०—मधु० । ३. °वाद्यकलातीत—रीवाँ । ४. °प्रमोदीत°—अयो०, मधु०, बड़ो० । ५. "किंचिन्नवं नवीनं प्रातरुद्यत् विकसितं यत् पयोजातं कमलं तद्वत् ।

र्यवीर्यश्रियावार्य[1]सौन्दर्यसत्पात्र भूयोल्लसद्गात्रचञ्चद्यशोमात्र नित्यद्युते ॥१५॥

जय जय कविजनभालभूरिस्फुरद्भाग्यभूम्येकसौभाग्यसंपत्तिसंभार-धौरेयतोद्दण्डदोर्दण्ड शुण्डासमुच्चण्डभृङ्गावलीगण्डसोद्रेकवेतण्डविश्राण[2]-नाखण्डभूमण्डलाखण्डलोग्रप्रभाजाग्रदत्युग्रहस्ताग्र[3] किंभूयसा विस्तरेण त्वया देवकीर्तिश्रिया विश्वमेतत् समस्तं कृतं निस्तमस्कं तथा कोटिनिर्ला-ञ्छनेन्दुच्छवीनां छटाभिर्न संभाव्यते तादृशी श्रीरतस्त्वं समस्तावनीपाल-मूर्द्धाग्रमाणिक्य हेरामचन्द्र क्षमापालचन्द्र जीयाश्चिरं देव जीयाश्चिरम् ॥१६॥

जय जय गुणमयकाय सर्वाधिकोच्छ्राय दीव्यत्सदाध्यायविप्रावली-दायजाताहितापायशातावलीशाय विस्फूर्जितामन्दसौरभ्यमाकन्द[4] लक्ष्मीलताकन्द पूर्णान्तरामन्द दत्तारिहाक्रन्द[5] विद्वत्सभोल्लास भूयोरसा-वास खड्गोद्भवत्रास वश्यद्विषद्दास वाणासनोत्प्रासविक्रान्तिसोद्भास[6]हेराम तत्र त्वया कीर्तिरसंस्थापि यत्रोल्लसन्तः सुधापूरपूर्णाः स्फुरन्त्युच्चैस्तुङ्ग-गङ्गातरङ्गास्तथा राजहंसावली राजते यत्र कीर्तिस्तथा स्वःपते[7] ॥१७॥

इति ते भूयसीं कीर्तिं वर्णितां कविपुङ्गवैः ।
गायन्ति देवललना विमानस्थाः स्वकेलिषु ॥१८॥
मन्दाकिनी भोगवतो गङ्गा गुणवती च या ।
सा तवैव यशोराजीपुण्यतोयतरङ्गवाट् ॥१९॥

रोचिष्णु रुचिरं अभिख्यातं प्रसिद्धं पादद्वयं तस्य पातेन ताडनेन नम्रा द्विषन्तस्तेषां सातदाने सुखप्रदाने स्फुटं औदार्यं यस्य" टि०—मथु० । १. "यस्य वीर्यश्रियौ वारयितुमशक्ये" टि०—मथु० । २. "शुंडाभिः समुच्चंडो अत्युच्चो भृंगावलीयुक्तगंडो येषां ते तथाभूताः सोद्रेका मत्ता वेतंडा गजास्तेषां विश्राणनं दानं यस्य" टि०—मथु । ३. "प्रभया जाग्रद् देदीप्यमानं अत्युग्रं सर्वकार्यसमर्थं हस्ताग्रं यस्य' टि०—मथु० । ४. "विस्फूर्जितं प्रसृतं अमंदं यत् सौगन्ध्यं तस्य माकंद आम्र-वृक्षस्तत्तुल्यं" टि०—मथु० । ५. "दत्त अरीणां हाक्रन्दो हाहाकारो येन" टि०—मथु० । ६. "वाणासनं धनुः तस्योत्प्रास आकर्षणं तस्य विक्रांतिर्विक्रमस्तया विराजमानं" टि०—मथु० । ७. "यत्र सुधापूरः गंगा च यत्र हंसपंक्तिस्तत्रैव तव कीर्तिरिन्द्रस्य कीर्तिवत्" टि०—मथु० ।

उद्गायतां प्रतिपदं सुरभीकरोति
वक्त्राणि कल्पतरुपुष्यपरागवद् यः ।
चेतः पुनाति रुचिमुत्कुरुते श्रवःसु
जाड्यं धुनोति तनुते विपुलार्थसार्थम् ॥२०॥
श्लोकस्तादृक्तावको राघवेन्दो यन्नो गीतः शून्य एवास्ति वेदः ।
यद्वा गीतः सर्वभावातिरेकात् किंतैर्गीतैर्दुर्विदग्धैस्तथान्यैः[1] ॥२१॥
संगीयन्ते यस्य गुणा वदान्याः समस्तसौभाग्यमुदामजस्रम् ।
किं तेन गीतेन य एति मृत्युमुत्पद्यते प्रकृतिर्यस्य दुष्टा ॥२२॥
ईशावास्यमिदं सर्वं भवता गुणसिन्धुना ।
त्रैलोक्यबन्धुना राम संततं करुणात्मना ॥२३॥
सुमेरुशिखरासीना मन्दारद्रुममूलगाः ।
दिविषत्कन्यका राम गायन्ति भवतो यशः ॥२४॥
वेदैरपि न निर्णेयं यस्य नाम महद्यशः ।
के नाम तापसास्तत्र वयं वर्णयितुं क्षमाः ॥२५॥
दत्त्वा न प्रथयन्ति तज्जनमुखे शश्वद्गृहाभ्यागते ।
सानन्दं कृतसंभ्रमा इव भवन्त्याधाय कर्म प्रियम् ।
तूष्णीमासत आत्मनीतरजनस्वल्पोपकारक्रियां[2]
घण्टाघोषवदीरयन्ति दधते नोत्सेकमन्तः श्रियाम्[3] ॥२६॥
इत्याद्याः सकला गुणा विदधते कीर्तिं रघूणां हि व-
स्तत्रापि त्वमिह प्रभो विदित एवात्युत्तमः पूरुषः ।
येषामद्य[4] करोषि नाम सदलङ्कारं गुणानां हरे
तस्मात्ते गुणिनो जयन्ति हि गुणाः स्वार्थाःपरार्था अपि[5] ॥२७॥
नित्यं मारकतेषु हेमसदनालङ्कारिषु प्राङ्गणे—
ष्वासीना विदुषां स्त्रियस्त्वदमलश्लोकानुकीर्तिस्पृशाम् ।

---

१. "वेदः यत् तव यशः न उद्गीतः नो गायति तदा शून्य एव, यद्वा सर्वाधिक्येन गायति तदा तु अन्यगीतैः किं ?" टि०—मधु० । २. "आत्मनः स्वस्मात् इतरजनानां स्वल्पापि उपकारक्रिया उपकारकरणं" टि०—मधु० । ३. "उत्सेकं = दर्पं श्रियं प्राप्य उद्धता न भवन्तीत्यर्थः" टि०— मधु० । ४. तेषां—अयो०, मधु०, बडो० । ५. "किंभूता गुणा गुणिनः गुणा विद्यन्ते येषु ते परार्था परगुणगायका अपि गुणाः स्वार्थाः त्वद्गुणगायका एव" टि०—मधु० ।

मुक्ताविद्रुमहेमहीरकिरणप्रोन्मीलिताङ्गच्यः प्रभो
गृह्णे कर्मणि तावकं सुविषदं गायन्ति शश्वद् यशः ॥२८॥
नेन्दुः पूर्णतमोऽथ शारदनिशामध्योल्लसद्दीधिति—
र्नो वा कैरवकाननं न च सुधा संदीपिवन्मन्दिरम्[1] ।
नो वा शंभुशिरःसु मल्लिकुसुमस्रग्विष्णुपद्याः पयो
विश्वं भूषयते न राम भवतां यद्वद्वलक्षं यशः[2] ॥२९॥
यत्संगादशुचिः शुचिः सुमलिनोऽप्यौज्ज्वल्यवान् भासते
मूढोऽपि प्रगुणाकरः शठमतिश्चापीह सौहार्दवान्[3] ।
तत्तादृक् भवतो यशस्त्रिभुवनालङ्कारसारं जनो
हित्वान्यं यदुपासते नरपतिं लोभात् स वै दुर्भगः ॥३०॥
एके कालमहाभुजङ्गमपरित्रस्तास्तदेकौषधं
पीयूषोज्ज्वलमान्तराधिकपरीतापप्रतीकारकम् ।
श्रीमद्राघव तावकीनममलं विश्वप्रमोदप्रदम्
चेतोवश्यकरं यशः समुदयं प्रोद्गाय सुस्था बभुः ॥३१॥
नान्यो दाता न शूरो न च युवतिमनोहारिलावण्यलक्ष्मी-
र्नो विद्वान्नोपकर्ता न खलु पररुजां हारकस्तारको वा ।
प्रत्येकं रामचन्द्र त्रिजगति विरला ये गुणाः सर्व एते
तेऽमी त्वामेव लीलाऽवतरणसमुपाश्रित्य[4] शश्वज्जयन्ति ॥३२॥
धन्यो वाल्मीकिनामा जयति मुनिवरो धन्य एवाश्ववक्त्रो[5]
धन्यः श्रीमान् हनूमान् किमपि कलशजो धन्य उच्चैर्विधिश्च ।
धन्यः संकर्षणश्च त्रिभुवनभवनोद्दीपिनी वाक् च तेषां
धन्या श्रीरामचन्द्र प्रकृतिसुमधुरं त्वद्यशो ये वहन्ति ॥३३॥
यत्रैते ऋषयो भवन्ति ऋषयो विष्वक् प्रवृत्तिप्रदा-
श्छन्दोऽनुष्टुबथापि राम[6] बृहती त्रिष्टुब्[7] जगत्यादिभिः ।
त्रैलोक्योत्तरसर्वदिव्यगुणभूस्त्वंदेवता श्रीपते
शक्तिर्विश्वजनीनपापहरणं बीजं तथा कीलकम् ॥३४॥

---

१ °मन्मंदि°—रीवाँ, °मुन्मंदि°—अयो० । २. यच्चोज्ज्वलं ते यशः—अयो०, रीवाँ । ३. पीशलौहार्दवान्—मथु०, बडो० । ४. लीलावतारं समुपचितमुपा°—रीवाँ । ५. "हयग्रीव;" टि०—मथु० । ६. छन्दोभिः स्तुवतेभिराम—रीवाँ । ७. °नुष्टुब्—रीवाँ ।

त्वत्कीर्तिः सकलागमेषु विमलो मन्त्रः[1] परः कीर्तित-
स्तस्यैष प्रकृतः प्रयोगविभवः प्रोद्भाति सर्वेश्वर।[2]
कामक्रोधमदप्रमादपिशुनस्तोमैकमुद्राकरः
सिद्धिं कामपि वाञ्छतामिह नृणामस्यैव संसाधनम् ॥३५॥
सद्यः प्रत्ययकृत् प्रभाव उदयत्येतस्य[3] लोकोत्तरो
यत्सर्वा अपि संसरेद्धि विपदो विघ्नाननेकानपि।
श्रेयो भूरि लभेत भूतिरपि च श्रौरैहिकामुष्मिकी
के के नार्थगुणा जयन्ति जगति त्वत्कीर्तिमन्त्रे प्रभो ॥३६॥
आदौ नामैव सर्वागमनिगमगिरामित्थमेकं रहस्यं
चैतन्यानन्दरूपं तदनु च भवतो धाम नित्यप्रमोदम्[4]।
नित्या ते तत्र लीला तदनु विजयते पूर्णकैवल्यरूपा
हंहो[5] त्वद्भक्तिभाजां फलमपि परमं साधनं त्वत्पदाप्त्यै ॥३७॥
आबाल्याद्रामचन्द्र त्वमिह विहितवानुद्धृतिं जीवराशे-
स्तामप्युद्गाय लोकाः प्रभुवर भवितारः किमग्रे न तद्वत्।
एषा ते राघवेन्दो[6] जगति विजयते जीवजातेऽनुकम्पा-
यस्तां जानाति नान्धः स भवति विधिना वञ्चितो बुद्धिहीनः ॥३८॥

ते वर्णाः साधुवर्णाः किमपि रघुपते तत्पदं सत्पदाख्यम्
तद्वाक्यं साधुवाक्यं तदुपनतपदार्थाश्च ते सत्पदार्थाः।
बुद्धिः सा शाब्दबुद्धिस्तदुपरि निगमा आगमाश्च प्रमाणं
यत्र श्रीरामनाम्ना तव खलु निहितं स्वात्मनः स्थानमुच्चैः ॥३९॥
वह्वालापैश्च किं तैः श्रुतिशतकशिरोभूषणैस्त्वदयशोभि-
र्ये राहित्यं भजन्ते त्वदितरदिविषत्कोटिमन्त्राणि[7] भाजः।
यत्त्वत्कीर्त्याङ्कितं स्यात् प्रकृतिसुमधुरं दुर्लभं तत्किलैकं
वाक्यं त्वन्नामपूतं त्रिभुवनभवनध्वान्तहृद्दीपतुल्यम् ॥४०॥

---

१. "तत्र मंत्रे ऋषिः छन्दः देवता शक्तिः बीजं कीलकं जपे विनियोग-श्चेत्याद्यपेक्षितम्" टि०—मथु०। २. प्रोद्भासि सर्वेश्वरः—अयो०। ३. प्रभा उदयते तस्याशु—रीवाँ। ४. धाम प्रमोदवनं—मथु० बड़ो०। ५. हृद्या—रीवाँ। ६. राघवेन्द्र—रीवाँ। ७. मंत्राणु°—रीवाँ।

आदौ मध्ये तथान्ते किमपि तव यशो गीयते राघवेन्दो
साम्ना ऋग्भिर्यजुर्भिर्मधुमधुरमथाथर्वभिः साभिचारैः ।
कर्म ज्ञानं च शश्वन्मुखरमुखतया वर्णयन्तोऽपि चामी
स्वाभाविक्यां क्रियायां तव महिमनिधेर्ज्ञानशक्तौ च शक्ताः[1] ॥४१॥
आदौ यत्राग्निहोत्रं गदितमथ हरे पूर्णमासः सदर्श-
श्चातुर्मास्यं पशुश्चाखिलफलकरणप्रक्रमोदारकर्मा ।
ज्योतिष्टोमाख्य उच्चैस्तदुपरि विहितः सोमपीथक्रियावा-
नग्निष्टोमः स एवं विलसति भवतो वर्ष्म यज्ञस्वरूपम्[2] ॥४२॥
आदौ त्वं पञ्चधा[3] भूस्तदनु च पुरुषो द्वादशात्मा[4] प्रदिष्टः
साङ्गोपाङ्गः सकाण्डः[5] क्रमिककृतिमयः कोऽपि पूर्वः परोऽन्यः[6] ।
विध्यर्थोल्लापमन्त्रैरविरतमुदितो नामधेयैश्च तैस्तैः[7]
सा ते शक्तिः क्रियाख्या जयति फलवती कोटिशो विस्तृताङ्गी ॥४३॥
साम्नामन्तेषु वाक्यैर्नवभिरभिहितं श्वेतकेतूपयुक्तैः
पुंसामर्थं चतुर्थं दृढतरचिदचिद्ग्रन्थिभेदेन भान्तम् ।
एकं ब्रह्माद्वितीयं निरुपमपरमानन्दचैतन्यधन्यम्
सन्तं सत्ता[8]मनन्तं जनितजगदुपादानमात्मानमीडे ॥४४॥
साङ्गस्वाध्यायसिद्धौ विधिमतविधिना[9] राधिताराधनीय—
श्रीमद्राम प्रसादात् तवविमलमनाः शुद्धसत्त्वः शरीरी ।
जानात्यङ्गीकृताभ्यामुपनिषदि गतौ तद्यथेत्यादिवाक्यैः
कार्यत्वानित्यताभ्यां जगदिदमसुखं ब्रह्मसद्मा[10]वसानम् ॥४५॥
यत्त्वक्षय्यादिशब्दादवगतमथवापामसोमेतिवाचा
तत्त्वाभूतादिवाक्यानुमतमनशनं दीर्घकालस्थितत्वम् ।

---

१. "किंभूता अमी क्रियाशक्तौ ज्ञानशक्तौ चासक्ताः कर्मणि ज्ञाने च तथैव मुख्यतया प्रतिपादनमित्यर्थः ।" टि०—मधु० । २. "अग्निहोत्रं, दर्शपूर्णमासः, चातुर्मास्यं, पशुः, अग्निष्टोम एव ज्योतिष्टोमः इति पंचधा" टि०—मधु० । ३. पूर्वश्लोकोक्तः । ४. द्वादशदिनकृतसंस्थाक इत्यर्थः । ५. काण्डः क्रियातंत्रः । ६. "अयं यज्ञः पूर्वोऽयं पर इति क्रमः" टि०—मधु० । ७. "यजेदिति विधिः वायुर्वै क्षेपिष्ठा देवता इति अर्थोल्लापो नाम अर्थवादः । मन्त्रश्च नाम च तैः । इषेत्वोर्ज्जेत्वा इत्यादिमंत्रः उद्भिदा यजेतेति नाम" टि०—मधु० । ८. "सन्तं सद्रूपं सत्तां सत्ताप्रदं" टि०—मधु० । ९. "विधिरत्यन्तमप्राप्तौ नियमः पाक्षिके सति । तत्र चान्यत्र च प्राप्तौ परिसंख्येति गीयते ।" टि०—मधु० । १० °साम्नाव°—अयो० । °सत्राव°—बड़ो० ।

इत्थं दोषानुषङ्गं विषयसमुदये पश्यतो मुख्यपुंसः
स्वैरं स्वैरं विरक्तिर्भवति बलवती भुक्त्युपेक्षैकमूर्तिः ॥४६॥

शान्तो दान्तस्तितिक्षुस्तदनु च परमां मुक्तिमेवेहमानो
विक्षेपा[1]क्षुण्णचेताः श्रुतिशिखरमतारम्भविस्रम्भशाली ।
आपातज्ञातरूपं परिहृतनिखिलानर्थमानन्दसान्द्रं
सत्यज्ञानाद्वितीयं विविदिषतितरां ब्रह्मजिज्ञासुवृत्तिः[2] ॥४७॥

शुद्धिः[3]श्रीयन्त्रजातामृतरसविषयस्नेहधाराभिषिक्ते[4]
सज्जिज्ञासानुवृत्त्या समुचित[5]दशया संगते चित्तपात्रे ।
हंसा यावत् कषायाम्बरनिहितकरं दर्शयन्ती न वेला
तावन्नाभाति गर्भाश्रयतिमिरभरभ्रंशनज्ञानदीपः ॥४८॥

संन्यासं केचिदूचुः श्रवणविधिविनिश्चीयमाने विचारे
नानाकर्मानुबन्धव्यपनयनमुखेनाङ्गतामाददानम् ।
इन्द्रादेः प्राग्भवीयं कथमपि निहितं चातुरैरेनमन्ये
मन्यन्ते ज्ञानजन्मप्रतिभटदुरितध्वंसनेन प्रधानम् ॥४९॥

तस्मात् संन्यस्तकर्मा विधिवदपि शिखायज्ञसूत्रं विमुञ्चन्
कौपीनाच्छादनार्थं वसनमशिथिलग्रन्थि शोणं[6] वसानः ।
बिभ्राणो वेणुमेकं यदि मनसि रुचिर्भिक्षया कुक्षिपात्रं
कुर्वाणः पूर्णमुच्चैर्विपिनमधिवसन्नोहते ब्रह्मचिन्ताम् ॥५०॥

न्यायाभासोत्तराणामपरमुनिगिरामन्तरे संदिहानः
कृष्णद्वैपायनोक्त्या परिचितविषयैरन्यथासिद्धिशून्यैः ।
षड्भिस्तात्पर्यलिङ्गै[7]रथमुपनिषदामन्वयं ब्रह्ममात्रं
शुश्रूषुः सानुकम्पं गुरुमनुसरति श्रोत्रियं ब्रह्मनिष्ठम् ॥५१॥

---

१. चिच्छेषा—रीवाँ । २. ब्रह्मनिष्णात°—अयो० । ब्रह्मजिह्मान्य°—बडो० । ३. बुद्धिः—रीवाँ । ४. "श्रीरेव यंत्रः जलप्रवाहनिःसरणमूलस्थानं तत्र जाताः, अमृतरसो भगवद्रसः स एव विषयो यासां ताः स्नेहधाराः ताभिः क्षालिते" टि०—मधु० । ५. समधित°—अयो० । ६. सोर्ण—रीवाँ । ७. "श्रुतिलिङ्गवाक्यप्रकरण-स्थानसमाख्यात्मकैः" टि०—मधु० ।

[1]भाषाग्रन्थात् स्वतो वा समुदयति सति ज्ञानमस्मादयोगं
पक्षे प्राप्तं निरस्यन्नियमविधितया श्रावणं वाक्यमेके ।
जल्पन्त्यन्ये[2] तु नेदं विधिरपि तु तथा ज्ञानमात्रार्थकत्वा-
त्तार्तीयीकं तु कश्चिद्विधिमनुमनुते वारयेद् यत्नमन्यम् ॥५२॥
अद्वैतात्मन्यशेषश्रुतिशिखरगतिं तत्परत्वेन बुद्ध्या
निःशङ्कं मानमेकं मनसि च विमृशन्नत्र विज्ञोपदेशात् ।
श्रौतज्ञानानुकूलं तदपि गुरुकृपासिद्धसंस्कारशुद्धि—
र्भूयस्तं युक्तितोऽपि स्वयमनुमिनुते मेयशङ्कां[3] विहन्तुम् ॥५३॥
रंहत्यंहीरितानां[4]मुहुरिह कलयन्नेष गत्या गतीना—
मुत्क्रान्तिक्लेशगर्भाशयविविधदशादुःखसंभेदभाजाम् ।
द्वेषावेशप्रगल्भं विषयसुखपरिष्वङ्गवैमुख्यमाय—[5]
न्नात्मध्यानं विधत्ते चिरमनुविरतं भाग्यवानादरेण ॥५४॥
धाराध्यानानुभावा[6]दपचितिमितवानन्यथा भावनायाः
संप्रज्ञाते समाधौ नियमितहृदयः सम्यगासन्नयोगः ।
प्रत्यूहव्यूहभङ्गे श्रवणमुखभवत्संस्कृतिस्वान्ततोयं
हन्ताद्वैतं महात्मा निगमपरिचितं पश्यति ब्रह्मतत्त्वम् ॥५५॥
नव्यापूर्वं विरुन्धन्[7] न परिणतपुराकर्मसंदोहदाही
प्रारब्धस्यानुरोधादणुविपुलतनूमूलमायाममृद्नन्[8] ।

---

१. 'विधिरत्यन्तमप्राप्तौ नियमः पाक्षिके सति । तत्र चान्यत्र च प्राप्तौ परिसंख्येति कीर्तिता" व्रीहीन् जुहोतीति व्रीहीणां हवनमपूर्वतया विहितं, व्रीहीनवहन्तीत्यत्रावहननं तुषापाकरणं तत्तु नखविदलनेनापि तन्निरस्यावहननमेवेति नियमः, आत्मा वा रे श्रोतव्य इति श्रावणं श्रुत्या एव श्रोतव्य इति नियमविधिः । पंच पंचनखा भक्ष्या अत्र भक्षणं प्राप्तमन्यत्र मार्जारादावपि तत्प्राप्तं तत्रान्तिमभक्षणं निरस्यतीति परिसंख्या विधिः ।" टि०—मधु० । २. "ब्रह्मज्ञानार्थं वेदान्तश्रवणमपूर्वतया विधीयत इत्यन्ये" टि०—मधु० । ३. °मित्यशंकं—रीवाँ । ४. रंहत्यन्तर्गतानां—रीवाँ, वृंहत्यं°—बड़ो० । "वेदस्य षोडशपादास्तत्स्थो रंहतिपादाख्य एकः पादः, तदुक्तानां" टि०—मधु० । ५. °भावा°—रीवाँ । "विचारेण विषयसुखपरिष्वङ्गो विषयसुखासक्तिः तत्र वैमुख्यं विरागस्तमायन् प्राप्तः" टि०—मधु० । ६. धाराप्रवाहरूपं ध्यानं तस्यानुभवनात् शीलनात्" टि०—मधु० । ७. विरूपन्—अयो० । "नव्यं नवीनमपूर्वं यत् कर्मफलं तत् विरुंधन् अंकुरितमकुर्वन्" टि०—मधु० । ८. 'अणु सूक्ष्मं विपुलं स्थूलं यत् शरीरं तस्य मूलभूतां मायामपीडयन्' टि०—मधु० ।

भिन्दन्नज्ञानदोषावरणमयतमोदत्तसर्वज्ञभावो
ब्रह्मालोके विधत्ते कतिपयसमयान् योगिनो गौणमुक्तिम् ॥५६॥
वृत्तिर्ब्रह्मावलम्बा सकलफलभुजेरन्ततो जायमाना
मायोच्छित्त्या प्रधानं कलयति परमानन्दरूपापवर्गम् ।
पुंसो ब्रह्मत्वमेको वदति तदपरश्चेश्वरत्वेन सत्तां
श्रीव्यासो मुक्तिमात्रे प्रथममपि परां तास्विदानीन्तनीषु ॥५७॥
इत्येवं ज्ञानमुदितं ब्रह्ममायावलम्बनम् ।
फलाढ्यं त्वत्स्वरूपं तत् सर्ववेदान्तवर्णितम् ॥५८॥
भवबन्धविनिर्मुक्तौ ज्ञानशक्तिस्तव प्रभो ।
अधिकं यश एवेदं वेदवेदान्तवर्णितम् ॥५९॥
ब्रह्मापि तव रामेन्दो महिमैव सनातनः ।
यस्मिन् प्रतिष्ठितो नित्यं कविभिश्चारु वर्ण्यसे ॥६०॥
भूयः शक्तिद्वयापेतस्त्वं पूर्णः पुरुषोत्तमः ।
सर्वां रसमयीं लीलां प्रवर्तयसि संततम् ॥६१॥
अयं वापि तव श्लोको गीयते व्रजमण्डले ।
सहजानन्दिनीयुक्तस्त्वं यत्रैव विराजसे ॥६२॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे पूर्वखण्डे षड्गुणोपाख्याने [यशोव्याख्यानं नाम] चतुर्नवतितमोऽध्यायः ॥९४॥

●

पञ्चनवतितमोऽध्यायः

[ब्रह्मोवाच]

अथ श्रियं प्रवक्ष्यामि रामस्य श्रीपतेर्द्विज ।
यया[1]संशोभितं नित्यं रघुराजनिकेतनम् ॥ १ ॥
पुरग्रामव्रजारण्यदेशवेषावलम्बिनी ।
श्रीविग्रहावलम्बा श्रीर्बहुधैवानुवर्ण्यते ॥ २ ॥

---

१. यथा—अयो०, मथु०, बड़ो० ।

पुरं तदुत्तुङ्गविशालसौधशिरःप्रविन्यस्तसुवर्णकुम्भम् ।
प्रत्युप्तरत्नोद्भवया स्वभासा नक्षत्रलोकं पिदधद्विभाति ॥ ३ ॥
प्रासादतुङ्गबलभीविविधोपकल्पवातायनौघविवरान्तरनिर्गतानाम् ।
यच्चित्रशालमणिरत्नमयूखभासां संदोह आक्रमति राजपथं समन्तात् ॥४॥
गावो हरिन्मणिविशेषसमूहकल्पनिर्यूहदीवितिषु च तृणसंभ्रमेण ।
उद्ग्रीविकां किमपि कुर्वत इत्युदीक्ष्य नृत्यन्ति कौतुकवशेन हि यत्र बालाः॥५॥
स्त्रीणां विलासभवनेषु मनोजकेलिसंग्रामसंत्रुटितमौक्तिकरत्नवृन्दैः ।
कीर्णैरुषः सुगृहमार्जनिकानिरस्तैराढ्या भवन्ति कणभिक्षजुषो[1]ऽपि यत्र॥६॥
सायं प्रदीप्तशुभदीपमनोहरेषु सानन्दसर्वमनुजेषु निकेतनेषु ।
श्रीःपर्यटत्यविरतं भृशमात्मवत्तामन्वेषयन्त्यखिलपौरजनेषु यत्र ॥ ७ ॥
मञ्जीरमञ्जुलनिनादविशेषवत्यः कांचिज्झणज्झणितकौतुकितस्वचित्ताः ।
क्रीडन्ति यत्र कमला इव पद्महस्ता द्वारेषु मुग्धहृदया हरिणीदृशो वै ॥८॥
श्रीरामचन्द्रविपुलोर्जितकीर्तिगाथा दैनन्दिनानुचरितानि मनोहराणि ।
गायन्त्य उन्नततरेषु निकेतनेषु संमोहयन्ति सुदृशोऽप्सरसां मनांसि ॥ ९ ॥
श्रीः संचरत्यविरतं प्रतिसद्म यत्र रत्नाङ्घ्रिपूरसविशेषरवानुलक्ष्या ।
छायावशादनुमिता करपङ्कजस्य छत्रस्रुतैर्मणिगणैरवनौ किरन्ती ॥१०॥
आनन्दवान् दशरथो नृपतिः कुमारकीर्तिव्रजं कथयतां विदुषां गणेभ्यः ।
शश्वद्ददाति मणिहेमविभूषणानि रत्नानि पूरयति तानि गृहाणि लक्ष्मीः ।११।
श्रीजानकी विरचयत्यनिशं सपर्यां साध्वीगणेन सह यत्र वसिष्ठपत्न्याः ।
स्वच्छैरलङ्कृतिभरैर्वसनाङ्गरागैर्मन्दारमाल्यनिवहैः शुभभोजनैश्च ॥१२॥
ता आशिषः प्रतिपदं विदधत्यमुष्यै साकेतलक्ष्मि बहुभाग्यवती भवेति ।
आदाय याः स्ववसनाञ्चलरोपणेन भूयः पदोः पतति सा प्रसभं सतीनाम्॥१३॥
सीतास्वयंवरकथां निमिचन्द्रलक्ष्मीं श्रीरामचन्द्रभृगुवर्यरणप्रसक्तिम् ।
तद्वीर्यसंहरणिकामुपवीणयन्ति यत्रोत्सुकेषु पुरवासिषु किन्नरेन्द्राः ॥१४॥
धर्मध्वजाः किमपि यत्र जयन्ति पौरा येषां गृहेषु सकृदेव धनाभिलाषात् ।
द्वाराणि नान्यधनिनां मुहुरुद्व्रजन्ति पूर्णाशिषामुपगता निजजन्म यावत्॥१५॥

---

१. °भिक्ष (क्षु-अयो०) पुषो—अयो०, रीवाँ ।

चित्रोपक्लृप्तरचनारुचिरेषु यत्र प्रासादशृङ्गसदनेषु सुखस्थितानाम् ।
नानाविधद्युतिमतां विहगोत्तमानां वर्णभ्रमो भवति चित्रनिरीक्षणानाम्।१६।
रत्नाङ्गणेषु धनिनां तिमिराकुलासु रात्रीषु यत्र निहिताः शुभदीपलेखाः ।
मन्दीभवन्ति किरणैरधिकप्रकाशैरभ्युद्गतैस्तलत ऊर्ध्वगतैर्नभोऽन्तम् ॥१७॥
कल्पद्रुमैः परिवृतेषु च निष्कुटेषु गुञ्जन्ति यत्र सततं समदा मिलिन्दाः ।
एकीभवन्ति ललितेन कलस्वरास्ते मन्दोपनादितमनोहरवल्लकीभिः ॥१८॥
यत्रापणेषु वणिजां बहुलाभभाजां मूर्ताः स्थिता नवनवा निधयो नवापि ।
दृश्यन्त इत्युदितमासु निशम्य यक्षा यक्षाधिपश्च वचनात्सहसोपयान्ति॥१९॥
स्वप्नेऽपि नाधिरिह वासवतामुदेति व्याधिर्न च श्रुतिपथं क्वचिदभ्युपैति ।
श्रीरामचन्द्रमुखचन्द्रनिरीक्षणेन नित्योत्सवानि दिवसानि नृणां प्रयान्ति।२०।

कम्पः केतुषु निम्नगत्वमुदके दौर्बल्यमश्वानने
दुःखं द्वेषिकुले हिरण्यविरहः स्तोमेषु[1] तुष्टात्मनाम् ।
विश्लेषप्रभवा रुजश्च रजनौ नो मानुषेष्वस्ति तत्
तस्मिन् भर्तरि यौवराज्यपदवीमध्यासमाने श्रियः ॥२१॥

देशान्तरात् कविजना धनलिप्सयामुमभ्येत्य यावदुपयन्ति सभानिषण्णम् ।
तावत्कुटुम्बजनदूतमुखादुदन्तं शृण्वन्ति सद्मनि महामणिहेमवृष्टेः ॥२२॥
येष्वद्रिगर्भविवरेषु कदापि नैव दृष्टा खनिः कनकरूपमहाधनानाम् ।
तेष्वेव ताः खलु निरीक्ष्य बभूव नृणा[2]माश्चर्यमभ्यधिकमुद्रितराजभागाः ॥
भूमावनुप्तमपि धान्यमुदाविरासीत्[3] सूर्यातपं प्रतिनिरोद्धुमभूत्पयोदः ।
उप्तं च तावदभवत् फलपाकशालि यावद्गृहीतुमलसाः कृषिका बभूवुः॥२४॥
देशोऽखिलः कनकरत्नविराजिभूषासंदोहवद्भिरनिशोत्सवमङ्गलाढ्यैः ।
नारीगणैर्नरगणैः शुशुभे विशेषात् स्वर्गो यथा ससुखपीतसुधैः सुरौघैः ।२५।
राजा स्वयं दशरथः सुखसंपदाढ्यो रामो निदेशमनुतिष्ठति तस्य नित्यम् ।
कार्यं च सर्वमनुतिष्ठति लक्ष्मणादिभ्रातृत्रयं किमपरं सुखमीदृगस्ति ।२६।
लोकत्रयी दशरथस्य परां समृद्धिमुद्वीक्ष्य पुत्रधनदारविशेषजुष्टाम् ।
प्रत्येकमात्मसदनेषु समोदमूचे श्रीरामचन्द्रगुणगानविशेषहृष्टा ॥२७॥

---

१. स्तोषेषु—मथु०, बड़ो०, स्तेयेषु—रीवाँ। २. कल्प्त°—अयो०।
३. आविरास—मथु०, बड़ो०।

लोका ऊचुः

जानीथ तद्दशरथस्य नृपेश्वरस्य पूर्वप्रभूतमतुलं सुकृतं विशिष्टम् ।
यद्देवदानवरणे विषमे सुराणां साहाय्यमाचरितमस्य भुजद्वयेन ॥२८॥
के के न निर्भयपदं समवाप्य देवा दैत्यव्रजं जितवते[1] रघुपुङ्गवाय ।
अस्मै न वै दशरथाय शुभाशिषोऽदुर्यासामयं समभवद्भविको विपाकः ।२९।

संग्रामभूमिगत एष दुरासदानां देवद्विषां भुजबलेन बलं जहार ।
वन्दीः स्वयं दिविषदां खलु मोचयित्वा तासां शुभाशिषमुवाह बहुप्रकाराम् ३०
इत्याद्युपप्लवगणात् सततं प्रजाः स्वाः संरक्षणं स्वयमसौ नृपतिश्चकार ।
एतास्तदेनमतुलाधिकसत्फलाभिराशीर्भिरेधयितुमुत्कलिकामबिभ्रत् ॥३१॥

स्वेष्वाश्रमेषु मुनयो दितिजैर्द्विषद्भिरुद्वेजितास्तपसि विघ्नहता बभूवुः ।
तानेव[2] सुस्थहृदयानकरोन्नरेन्द्रः प्रायुञ्जताविरतमत्र शुभाशिषस्ते ॥३२॥
साध्यो निजव्रतविलोपभयात् सशोका दैत्येषु यौवनधरेषु विवृद्धिमत्सु ।
एतस्य विक्रमगुणैरभवन् विशोकास्ता आशिषः समपुषन्निह दुष्टजैत्रे ॥३३।

येऽन्ये तपस्विन उदीर्णमुनिव्रता वै गार्हस्थ्यधर्मनिरता निहिताग्निहोत्राः ।
स्वास्थ्यं चकार नृप एष स तेषु योग-क्षेमादिसंभृतिभिरुद्यदुदारवृत्तः ॥३४॥
मर्त्या मृगा अपि खगाः पशवस्तथान्ये दीना गवादय उदीत[3]भयाः परेभ्यः ।
तेषामसौ सुविपुलाभयदानदक्षः स्वस्वक्रियाकुशलताकरणो नरेन्द्रः ।३५।

ते सर्व एव नृपतेरुदयप्रकर्षं वाञ्छन्त आशिषमजस्रमुदीरयन्ति ।
तस्यैतदेवमुदितं फलमुद्विभाति यद्रामचन्द्रसदृशास्तनया जयन्ति ॥३६॥
रामो जगज्जनविलक्षणवृत्तशीलस्तादृक् च लक्ष्मण उदारगुणाम्बुराशिः ।
अन्यौ तथैव भरतोऽपि च शत्रुसूदः सर्वेऽप्युदारचरिता भरिता गुणौघैः ।३७।

जीवन्तु ते चिरममी नृपतेरुदारैरत्युन्नतैर्भवविलक्षणभागधेयैः ।
कल्याणकोटिसुकृतार्जनसंभवानां साकेतपत्तनजुषां च निजप्रजानाम् ।३८।
एतैः सुपुण्य[4]चरितैस्त्रिदशापगा च त्रैलोक्यपावनसमृद्धविशिष्टशीलैः ।
सर्वे जनाः सुकृतिनः खलु संबभूवुः श्रीमन्मुखेन्दुपरिदर्शनभूरिभाग्याः ॥३९॥

---

१. दैत्यान् जयन्ति तव ते—अयो० । २. तानेक—अयो० । तानेव—रीवाँ । ३. नुदीत°—अयो०, रीवाँ । ४. स्वपुण्य°—रीवाँ ।

श्रीराघवेन्द्रचरितामृतपूर्णधारानित्यावगाहसुविशुद्धमनोवपुष्काः ।
साकेतवासिन इमे मनुजाः स्वभाग्यैर्धन्या इति त्रिभुवनं परिशोभयन्ति॥४०॥
भूमण्डलस्य खलु कीर्तिरसावयोध्या यत्रास्ति पुण्यचरितः पुरुषः पुराणः ।
अंशैश्चनि[तु]भि[1]रभितो भुवनं समस्तमुद्दीपयन् दिवसनायकवंशदीपः ॥४१॥
हंहो वयं खलु निजानि निकेतनानि हित्वा वसाम रघुनाथपुरीमुपेत्य ।
यत्रेन्दिराप्रतिगृहं परिबंभ्रमीति हस्तारविन्दरुचिभिर्भुवि रञ्जयन्ती ॥४२॥
किं वर्णनीयमथ वक्त्रसहस्रकेण साकेतवासिजनतालिकपट्ट[2]भाग्यम् ।
त्रैलोक्यमेव खलु भाग्यसमृद्धिमद्यच्छ्री[3]रामचन्द्रजनुषा शुभसंभृतेन ॥४३॥
या श्रीः स्वयं वसति सुस्थिरभावमाप्ता वैकुण्ठसद्मनि समस्तगुणैरुपेता ।
सा स्वात्मनो दयितमेनमिहावतीर्णं विज्ञाय तिष्ठति रघूत्तमराजधान्याम् ॥४४॥
येष्वाशयेषु पयसां न कदापि पद्मास्तेष्वत्र पद्म[4]कुलसंपदभूतपूर्वा ।
मुक्ताफलानि च भवन्ति वृहत्तमानि केलिं तथा विदधते खलु राजहंसाः॥४५॥
इन्द्रालयेऽपि न तथा सुविभाति शोभा न ब्रह्मसद्मनि न वा खलु भोगवत्याम् ।
साकेतवासजुषि नीचतरेऽपि वर्णे यादृक् बभूव नरकिन्नरवीक्षणीया ॥४६॥
धिक् तस्य जन्म विधिसृष्टिमुपेत्य येन स्वप्नेऽपि नैव समवापितमक्षिमार्गम् ।
साकेतनामनगरं सरयूतरङ्गसंशीलितानिलसमागमपूतलोकम् ॥४७॥
सैवाद्भुता पुलिनभूः सरयूतटिन्याः पानीयपुष्टदृढमूलमहावनाढ्या ।
नो वासवस्य नगरी हरिचन्दनाद्यैर्वाञ्छानुरूपफलितैः परितः परीता ॥४८॥
किं पारमेष्ठ्यपदवीं समुपेत्य कार्यं धन्यैव सा तृणजनिः सरयूतटान्ते ।
यस्यां दुरापमपि तत्सुलभं शिशुत्वे क्रीडद्रघूत्तमकुमारपदारविन्दम् ॥४९॥

प्राज्यं स्वर्लोकराज्यं सुरवरवनिता पाणिपद्मोपगूढ-
प्रोदञ्चच्चामरान्दोलनगतसुरतस्वेदखेदं विहाय ।
श्रीमत्साकेतपुर्याः परिसरसरयूसंसरत्तुङ्गवीची-
नीचीभूतैकदूर्वादलमहिमदशामात्मनः कामयामः ॥५०॥
धन्या सा मल्लिवल्ली किमपि दिविषदामप्यलभ्यैस्तपोभि-
र्भूयो भाग्यैरयोध्यापुरगतसरयूसैकतान्ते प्ररूढा ।

---

१. द्विर्भि०—बडो० । २. किलपाद°—अयो० । ३. समृद्धिमद्य—रीवाँ । ४. सद्य°—रीवाँ ।

यस्याः पुष्पावलीभिर्विरचितमतुलं मण्डनं मैथिलीस्वै-
रङ्गैर्नित्यं बिभर्ति प्रियतमनयनानन्दसंदोहदात्री ॥५१॥
धन्यास्ते राजहंसाः सुविशदसरयूतोयसंसारशीलाः
येषां लीलाञ्चितानि स्वयमनुकुरुते मैथिलेन्द्रस्य पुत्री।
ये वास्याः पादपद्माभरणमणिगणक्काणमाकर्ण्य तुष्टा-
स्तादृक्शिक्षावशेन स्वयमपि दधते मञ्जुलालापलीलाम् ॥५२॥
[1]धन्यास्तेऽमी मयूराः सुरुचिरसरयूकूलकुञ्जे वसन्तो
नीलां प्रावृड्घनालीमपि निजमनसा सन्त्यनादृत्य तुष्टाः।
येषां चक्षुःप्रमोदं विरचयति सदा कोऽपि रामाभिधानः
पीयूषाम्भोद उच्चैर्जनकनृपसुताविद्युदालिङ्गिताङ्गः[1] ॥५३॥
धन्यास्ते चञ्चरीका विकसितसरयूकूलकुञ्जद्रुमाणां
येषां चित्तस्य नाभूत् सुरतरुकुसुमामोद आनन्दहेतुः।
क्रीडार्थं संगताभ्यां प्रतिसमयसुखं मैथिलीराघवाभ्यां
येषां घ्राणानि नित्यं निजतनुविलसत्सौरभैः संभृतानि ॥५४॥
इति श्रियं वर्णयतामयोध्यापुर्यास्तदावासिजनैकलभ्याम्।
मनांसि तेषां मुमुहुः समन्ताल्लोकत्रयस्थानजुषां जनानाम् ॥५५॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे पूर्वखण्डे षड्गुणोपाख्याने
[श्रीव्याख्यानं नाम] पञ्चनवतितमोऽध्यायः ॥९५॥

●

१-१. अयं श्लोको नास्ति—अयो०, रीवाँ।

षण्णवतितमोऽध्यायः

ब्रह्मोवाच

आख्याता रामचन्द्रस्य कीर्तिर्वेदोपवर्णिता ।
अथ ज्ञानं प्रवक्ष्यामि साक्षाद्ब्रह्मनिदर्शनम् ॥ १ ॥
अलौकिकानुभावेन ज्ञात्वा परमपूरुषम् ।
रामचन्द्रं मुनिगणाः उपजग्मुः ससंभ्रमम् ॥ २ ॥
राज्यसिंहासनासीने नृपाणां महतां गुरौ ।
देवे दशरथे सर्वे मुनयः समुपाययुः ॥ ३ ॥
कश्यपोऽत्रिर्वशिष्ठश्च पुलस्त्यः पुलहः क्रतुः ।
अङ्गिरा भृगुरोजस्वी दुर्वासा गर्ग एव च ॥ ४ ॥
कौण्डिन्यश्च्यवनो योगी विश्वामित्रोऽथ देवलः ।
शाङ्ख्यायन[1]स्तथा शङ्खो लिखितः कण्व एव च ॥ ५ ॥
अगस्त्यश्चासितो विष्णुः शर्कराक्षो दृढव्रतः ।
वामदेवः शुकः शान्तः सुतीक्ष्णश्च पराशरः ॥ ६ ॥
विदो वत्सो जामदग्न्यो जमदग्निस्तपोनिधिः ।
सुकलश्च भरद्वाजो मुद्गलो धौम्य एव च ॥ ७ ॥
सुवर्चाः सौविदः पैलः शातनिः शाकटायनः ।
संकराक्षः शमीकश्च ऋष्यशृङ्गो महामुनिः ॥ ८ ॥
कणादः कपिलो व्यासो गौतमश्च पतञ्जलिः ।
जैमिनिः पिप्पलादश्च शाण्डिल्यो मुनिपुङ्गवः ॥ ९ ॥
वरतन्तुर्वरेण्यश्च नारदाद्याः सुरर्षयः ।
ब्रह्मर्षयस्तथा सर्वे दिव्यज्ञानविलोचनाः ॥१०॥
वशिष्ठमग्रतः कृत्वा सर्व एव समाययुः ।
तेषामासनपाद्यादिविधिभिर्नतकन्धरः ॥११॥

---

१ शांखायनः—बड़ो० ।

सपर्यां महतीं चक्रे राघवो धर्मवित्तमः ।
पूर्वं दशरथं सर्वे उपसन्ना मुनीश्वराः ॥१२॥
ततः कौतूहलाक्रान्ता रामं ददृशुरद्भुतम् ।
ते रामेणाद्भुतां पूजां कृत्वा समभिवादिताः ॥१३॥
सहर्षं च ततः पृष्टाः शुद्धान्तं नृपतौ गते ।
महता[1] संभ्रमेणैव जातहर्षाः पुराविदः ॥१४॥

श्रीराम उवाच

उन्नतं नः पितुर्भाग्यं रघुवंशस्य सर्वशः ।
आतिथ्यं यस्य गृह्णन्ति ज्ञाननेत्रा भवादृशाः ॥१५॥
योगिनो वेदवेदान्तविदो निर्धूतकल्मषाः ।
विश्वस्य गुरवः साक्षान्मौनव्रतपरायणाः ॥१६॥
पुराविदो विधिज्ञाश्च ज्ञानविज्ञानदृष्टयः ।
ब्रह्मादीनां दिविषदां पूजनीयाः समंततः ॥१७॥
यूयं वेदविदः सर्वे स्मृतिभिर्धर्मवर्तकाः ।
संगता यस्य सदनं स धन्यो गृहवान् नरः ॥१८॥
जगतः कुशलार्थाय तीर्थानां करणाय च ।
परिभ्रमथ मेदिन्यां पूज्यो देशः स सर्वदा ॥१९॥
यत्र तिष्ठन्ति कार्येण मुहूर्तमपि योगिनः ।
परावरविदः साक्षाद्योगिनो ब्रह्मदर्शिनः[2] ॥२०॥
कच्चिद् वः कुशलं दिव्येष्वाश्रमेषु तपस्विनः ।
धर्मकर्मैकहेतूनां जलादीनां सुपुष्कलम् ॥२१॥
कच्चिद् वः प्राकृतैर्लोकैः कामलोभेन संगतैः ।
एकान्तिकासनसदां[3]नोपप्लावित आश्रमः ॥२२॥
कच्चिद् वस्तपसामौग्र्यं प्रविलोक्यासहिष्णुना ।
इन्द्रेण नेर्ष्येते विघ्नो रम्भादीनां प्रदर्शनैः ॥२३॥

---

१. सहजा°—रीवाँ। २. °दर्शनाः—अयो०, रीवाँ। ३. °पदां—बड़ो।

कच्चिद् वो यजनाद्यासु क्रियासु बहुलासु च ।
अशान्तेन समीरेण वने[1] नोद्विज्यते मनः ॥२४॥
[2]कच्चिद् वः स्वाश्रमवरेष्वारण्यैर्वारणादिभिः ।
न भज्यन्ते न पीड्यन्ते तरवो धर्मसिक्तकाः[2] ॥२५॥
कच्चिद् वः स्वाश्रमवरेष्वविप्रस्तपसो बलात् ।
साधर्म्यं समुपाश्रित्य विषादादि करोति न ॥२६॥
कच्चिद् वः कुशलिन्यस्ताः कामधेनुसमत्विषः ।
अग्निहोत्रादिसौकर्यसाधिकाः किल धेनवः ॥२७॥
कच्चित्तासामपत्येषूपद्रुतेष्वितरैर्मृगैः ।
तपस्तेजःस्वभावेन[3] युष्माकं नाभवद्रुषा ॥२८॥
जनानां कुशलं येभ्यः शान्तिश्च क्रूरचेतसाम् ।
तेषां वः कृतिनामेतदपृच्छ्यमपि पृच्छ्यते ॥२९॥
यतोऽहमादेशकरो युष्माकं ब्रह्मदर्शिनाम् ।
वाञ्छाम्यनुग्रहं शश्वत् किंचिदाज्ञाविशेषतः ॥३०॥
यदाज्ञापयथ प्रेष्यं शश्वदाज्ञाकरं च माम् ।
तत्करोमि मुनीशानाः[4] सकृद्वचनमात्रतः ॥३१॥
भवतां हि तपोविघ्नो विघ्नो भुवनसंपदाम् ।
अतस्तिष्ठथ[5] सौख्येन आश्रमेषु मुनीश्वराः ॥३२॥
एषोऽस्माकं पिता देवो भवतामेव सिद्धिजाम् ।
राज्यश्रियमुपाश्रित्य शक्तो भुवनरक्षणे ॥३३॥
इति श्रीरामचन्द्रस्य निशम्याभ्युदितं वचः ।
वक्तुं सर्वे मुनीशाना वशिष्ठं समचोदयन् ॥३४॥
तेषामिङ्गितमाज्ञाय वशिष्ठो ज्ञानलोचनः ।
उवाच वचसा रामं तोषयन् विदुषांवरः ॥३५॥

श्रीवशिष्ठ उवाच

वर्वर्ति सर्वतो वातं त्रैलोक्यस्यैव सुव्रत ।
विशेषतस्तापसानामस्माकं त्वयि राजति ॥३६॥

---

१. वनं—बडो० । २–२. अयं श्लोको नास्ति—अयो० । ३. स्वभावेषु—रीवाँ । ४. °शानां—अयो०, रीवाँ । ५. तिष्ठन्ति—अयो०, रीवाँ ।

पिता तव जगद्रक्षादक्षिणो धर्मवित्तमः ।
उन्मार्गगामिनां नृणां नित्यं दण्डयिता बलात् ॥३७॥
यूयं हि राघवाः साक्षाद्धर्मरक्षाविचक्षणाः ।
मान्धातृसगरादीनां लोके प्रोद्दीप्यते यशः[1] ॥३८॥
तेषां वंशे भवान् जातो रघुवंशैकभूषणः ।
जगतां तनुषे तोषं मुनीनां नो विशेषतः ॥३९॥
अप्येकः संभ्रमो ह्येषां योगिनां ज्ञानचक्षुषाम् ।
भवन्तमिह विज्ञाय ह्यवतीर्णं परात्परम् ॥४०॥
केनचित् कालकल्पेन पौलस्त्येन महौजसा ।
रक्षांसि सुसमृद्धत्वं प्रापितानि विशेषतः ॥४१॥
अतस्तेषां विनाशाय कालरूपी दुरासदः ।
अवतीर्णोऽस्यमेयात्मन् साक्षाद्रामेति यो[2] भवान् ॥४२॥
इतिविज्ञाय मुनयः सर्वे त्वां समुपागताः ।
अवाप्तुमतुलं ज्ञानं कर्मोपास्तिफलात्मकम् ॥४३॥
अनेकैरद्भुतैर्लिङ्गैर्भवान् ब्रह्मैव केवलम् ।
तत्पदं परमं सूक्ष्ममव्यक्तात् परतः स्थितम् ॥४४॥
इति सामान्यतो ज्ञात्वा मुनयस्त्वामुपागताः ।
सर्वोपनिषदां गुह्यं सारमर्थं विवेचितुम् ॥४५॥
यथाधिकारं सकलैर्भवानाश्रीयसे प्रभो ।
धर्मार्थिनस्त्वां धर्मार्थं सन्ततं पर्युपासते ॥४६॥
अर्थार्थिनस्तथार्थाय कामाय च तदर्थिनः ।
मुक्त्यर्थिनो जनाः शश्वन्मुक्त्यै त्वामेव संश्रिताः ॥४७॥
तेषां वयं रामचन्द्र भवबन्धविमुक्तये ।
आपन्नाः शरणं शश्वदितिप्राप्ताः स्म योगिनः ॥४८॥
ज्ञानिनां यल्लयस्थानं संततं ब्रह्मदर्शनम् ।
तद्भवान् विदितो राम किमुपेक्ष्योऽस्यतः परम् ॥४९॥
स्वात्ममायामुपाश्रित्य मोहयन् जगतो दृशम् ।
परं ब्रह्म सुखाकारं सुखाकारेण राजसे ॥५०॥

१. तेजसः—अयो०, रीवाँ । २. रामचन्द्रो—बड़ो० ।

इति विज्ञाय मुनयस्त्वां लिङ्गैरेव तादृशैः ।
भवन्तं शरणं प्राप्ता यथेच्छसि तथा कुरु ॥५१॥

श्रीराम उवाच

किमेष व्यवसायो वः समभून्मुनिपुङ्गवाः ।
यदेतादृश्यभूद् बुद्धिः क्वापि नैतादृशी भवेत् ॥५२॥
व्रजन्ति यत्कर्मभिराप्तकामास्तथा परोपासनया च यत्तत् ।
ज्ञानेन साक्षात्क्रियते भवादृशैरात्मस्थितं ज्योतिरनन्तबोद्धव्यम् ॥५३॥
स्वानन्दसंपत्समुपैति यस्मिन् विश्वं समस्तं विनिमीलयन्ती ।
योगेन तद्वो हृदये प्रकाशं ब्रह्माभिधं ज्योतिरनन्तमेकम् ॥५४॥
अजस्रमुन्मीलितयोगदृष्टि प्रव्यक्तमव्यक्तपरं महस्तत् ।
उपास्यते विश्वगुरोर्विशेषादजस्रमेव प्रयतैरमीभिः ॥५५॥
अतः परं किंनु परं प्रमृग्यते तत्त्वंपदौत्कण्ठ्यधियोऽत्र संगताः ।
न ज्ञानतोऽन्यत्किमपीह साधनं तद्वो लभन्ते दृशिमात्रतो जनाः ॥५६॥
न योगतोऽन्यः खलु कोऽपि यत्नः स चास्ति वः शिष्यसुशिष्यशिष्यगः ।
किमन्यदादातुमुपागता वै मदीयमागारमुदारवृत्ताः ॥५७॥

ब्रह्मोवाच

सर्वेषां मुनिमुख्यानां मतमादाय तत्क्षणे ।
जिज्ञासामनुनिर्णीय वशिष्ठः प्रत्युवाच तम् ॥५८॥

वशिष्ठ उवाच

सत्यमात्थ प्रभो राम नूनं तादृशमेव तत् ।
ब्रह्मणो दर्शनं नाम योगादिभिरवाप्यते ॥५९॥
ततश्चापि परं तत्त्वं वयं विविदिषामहे ।
प्राह विश्लेषवेलायां व्रजदेवीषु यद्भवान् ॥६०॥

देव्यो हि ता व्रजभुवस्तव रूपराशेः सौन्दर्यसारमकरन्दभरप्रमत्ताः ।
ईषद्वियोगमपि सोढुमशक्नुवन्त्यस्तत्त्वं तदेव परिचीय चिरेण तस्थुः ॥६१॥
शय्यासनादिषु कदापि निमेषमात्रमन्तर्धिमेत्य हृदि कल्पसमं विजह्रुः ।
ता एव गोपसुदृशः कथमन्यथा त्वां पारेपरार्द्धगुणराशिमृतेऽधितस्थुः॥६२॥

एतद्धि तत्त्वदुपदिष्टसुसूक्ष्मतत्त्वज्ञानप्रभावजनितामलभावभाजाम् ।
तासां मनस्त्वनुमिमीमहि सर्वकामस्वानन्दसंपदमृतं परिपोयमानम् ॥६३॥
मन्यामहे रघुकिशोर तदेव तत्त्वं यद्विप्रयोगशमनं व्रजसुन्दरीणाम् ।
तन्नः प्रवक्तुमुचितोऽसि दयाविशेषादेकं ततं यदखिलात्मतयागमेषु ॥६४॥

इत्युदीरितमाकर्ण्य मुनीनामूर्द्धरेतसाम् ।
जिज्ञासावेदिनो वाक्यं वशिष्ठस्य महामतेः ॥६५॥
उवाच प्रहसन् रामो वीक्ष्य तान् मुनिसत्तमान् ।
सन्ततं स्पृहयालून् वै कर्मज्ञानातिगां[1] दशाम् ॥६६॥

श्रीराम उवाच

प्रमोदवननारोणामुपदिष्टं मया तु किम् ।
सहजप्रेमभावेन वशोचक्रुरिमा हि माम् ॥६७॥
उपदेष्टव्यमेतासु किंचिन्नैवोपपद्यते ।
एता हि फलसीमानं भजन्ते दशया स्वया ॥६८॥
पुष्टः प्रेमा जयति सुदृशां श्रीप्रमोदाटवीषु
स्वानन्दाब्धेरुदितममृतं यद्धि संस्वाद्यमानम् ।
तद्वश्योऽहं क्वचिदपि न ता मंक्षु विस्मर्तुमीहे
प्राणान् यद्वत्सततमुदितश्चेतसा धारयामि ॥६९॥
विरहं वोढुमेतासां नैव शक्तिः कदाचन ।
इत्यहं नित्यलीलास्थो रमामि स्वजनैः सह ॥७०॥
अयं हि दुर्लभो भावो यत्प्रेमा मत्स्वरूपगः ।
ज्ञानस्य च पराकाष्ठा ब्रह्मतत्त्वावबोधनम् ॥७१॥
ब्रह्मतत्त्वस्य सा सीमा यत्तदानन्दनिर्भरः ।
आनन्दनिर्भरास्यैषा सीमा यत्प्रेम तादृशम् ॥७२॥
प्राचीना मुनयोऽनेके ब्रह्मतत्त्वं परं ययुः ।
एके तेषां दधुः प्रेम मत्कृपादृष्टिवीक्षिताः ॥७३॥
सुदुर्लभतमो यस्मात्तादृशो भाव आन्तरः ।
तस्मादेवैष विरलो मदिच्छामनुरुद्धच हि ॥७४॥

---

१ °ज्ञानादिक—अयो०, रीवाँ ।

मद्गोचरश्रवणकीर्तनसेवनादौ यावन्न जायत इहास्य मनःप्रवृत्तिः ।
प्रेम्णः कला न खलु तावदुदेति साध्वी एकैव सर्वविषयेषु विरक्तिहेतुः॥७५॥
कोऽप्येष रक्तिमगुणः समुदेत्य पूर्वचिद्व्योम यत्समनुरञ्जितमच्छमेव ।
प्रेमाभिधः स मम पूर्णकृपानुलभ्यस्तं ब्रह्मतत्त्वमनुगच्छति नांशतोऽपि ॥७६॥

इतिवस्तत्त्वमुदितं ज्ञानसारं परामृतम्
उपदेशमृते लभ्यं निजाशक्यैकमात्रतः ॥७७॥

ब्रह्मोवाच

इत्युक्त्वा भगवान् रामो मुनीनामनुकम्पया ।
प्रकाशयामास रूपं प्रमोदवनकुञ्जगम् ॥७८॥
शुद्धश्यामावदातं वपुषि परिलसत्कञ्जकिञ्जल्कवस्त्रं
श्रीमत्पद्मारुणाक्षं सुविलुलदलकश्रीविराजत्कपोलम् ।
कैशोरभ्राजिवेषं मधुरिमजलधिप्रेमपीयूषवर्यै-
र्दिक्प्रान्तश्रीविलासैर्मदनविटपिनं स्त्रीषु सिञ्चन्तमन्तः ॥७९॥
दोर्भ्यां वंशीं वहन्तं वदनसरसिजा[1]मोदिनीं राजहंसीं
बिम्बोष्ठस्निग्धकान्त्या प्रमुदवनवधूमानसं रञ्जयन्तम् ।
संमुष्णन्तं त्रिभङ्गीललितसुवपुषा लोचनानि प्रियाणां ।
रामं प्रेमाभिरामं ददृशुरनवधि श्रीमदानन्दमूर्तिम् ॥८०॥

केचिद्ददृशुरेवैनं बालवेषेण भूषितम् ।
नवनीतकरं रामं माङ्गल्याङ्कविराजितम् ॥८१॥
लम्बमानालकभ्राजदाननाम्बुजसुन्दरम् ।
मञ्जीरचरणाम्भोजं बिभ्रतं कटिमेखलाम् ॥८२॥
स्वर्णप्रत्युप्तशार्दूलनखराजितवक्षसम् ।
अव्यक्तकलया वाण्या मोदयन्तं स्वमातरम् ॥८३॥

केचिद् ददृशुरानन्दरूपिणं राममद्भुतम् ।
कैशोरवेषमधुरप्रसन्नमुखमञ्जुलम् ॥८४॥
प्रमोदवनकुञ्जान्तर्निविष्टं प्रियया सह ।
सर्वसौन्दर्यसदनं रक्षयन्तं स्वकाश्च गाः ॥८५॥

---

१ °सरजिता—अयो० ।

श्रीराजवेशमुदितं मोदयन्तं[1] बधूजनान् ।
कदम्बकुसुमैर्युक्तां वनमालां सुबिभ्रतम् ॥८६॥
अङ्गुलीयमणिद्योतच्छुरिताधरवंशिकम् ।
नानाकेलिपरीहासैर्गोपैर्मण्डितपार्श्वकम् ॥८७॥
केचिद् ददृशुरुद्भूतराजसंपत्तिभूषितम् ।
सिंहासनसमासीनं साकेतपुरमध्यगम् ॥८८॥
कौस्तुभोद्भासितग्रीवं मूर्तिमद्भिर्महायुधैः ।
उपासितं महाकीर्तिं योगमुद्राधरं विभुम् ॥८९॥
उदारगुणपाथोधिं षडैश्वर्यविभूषितम् ।
उन्नसं कम्बुकण्ठाढ्यं महामुकुटमण्डितम् ॥९०॥
नृत्यद्विद्याधरीवृन्दसभामण्डपमध्यगम् ।
प्रणतानेकभूपालं प्रसादसुमुखं प्रभुम् ॥९१॥
दासीकृतद्विषद्वृन्द[2]नीराजितपदद्वयम् ।
शिरोमुकुटरत्नांशुमञ्जरीभिः समन्ततः ॥९२॥
किंकुर्वाणैरनेकाब्धिद्वीपदेशैर्नराधिपैः ।
कृतदास्यरसावासं करुणादृष्टिवर्षिणम् ९३॥
केचिदात्मतया रामं ददृशुर्योगभावितम् ।
केचिद् ददृशुरैश्वर्यात् साकेताधिपतिं प्रभुम् ॥९४॥
केचिद् ददृशुरौत्कण्ठ्यात् सर्वेषां बन्धुवत्स्थितम् ।
ज्ञानमुद्राधरं धीरं योगिनां हृदयङ्गमम्[3] ॥९५॥
यो यथाभावसंपन्नस्तद्वत्तेन निरीक्षितः ।
अथैनं तुष्टुवुः सर्वे योगिनः शुद्धबुद्धयः ॥९६॥
पुलकाञ्चितवर्ष्माणः सर्व एव मुदान्विताः ।
बद्धाञ्जलिपुटाः स्थित्वा सर्वेऽद्भुतरसाकुलाः ॥९७॥

मुनयः ऊचुः

नमस्ते ब्रह्मरूपाय पूर्णाय च महात्मने ।
[4]सच्चिदानन्दरूपाय निजलावण्यभास्वते ॥९८॥

---

१. मादयन्तं—रीवाँ, मथु०, बड़ो० । २.—°वृन्दं—मथु०, बड़ो० । ३. गतम् —अयो० । ४-४. अयमंशो नास्ति—रीवाँ ।

अशेषगुणसंदोहभूषिताय कृपालवे ।
नानाविधलसल्लीलारसरञ्जितवर्ष्मणे ॥९९॥
हेमसिंहासनस्थाय त्रैलोक्यमपि शासते ।
स्वशक्तिभिः समेताय पुरुषाय महात्मने[1] ॥१००॥
विश्वसर्गादिकेलीभिर्ब्रह्मादीनां नियोगिने ।
धौरेयाय श्रिताशेषधर्मपालनशक्तये ॥१०१॥

परे ऊचुः

नमो रसिकवर्याय कुञ्जभूमिसुकेलये ।
मुक्ताहारपरीताय परिपूर्णरसात्मने ॥१०१॥
सर्वोद्धारप्रयत्नाय[1] निजलीलारसात्मने ।
सर्वविश्रान्तिरूपाय श्रीमद्रामाय ते नमः ॥१०२॥

अपरे ऊचुः

आविर्भाव्याखिलान् जीवान् कृत्वा च विविधाः स्थितीः ।
कुर्वते विविधाः केलीः पुरुषाग्र्याय ते नमः ॥१०३॥
अनवद्याखिलानन्दकल्याणगुणमूर्तये ।
प्रपन्नकल्पवृक्षाय नमस्ते राघवेन्दवे ॥१०४॥

अन्ये ऊचुः

अनाद्यनन्तरूपाय निर्गुणाय स्वरूपतः ।
सच्चिदानन्दरूपाय नमः कैवल्यमूर्त्तये ॥१०५॥
वर्जिताशेषरूपाय कल्पनारहिताय च ।
विश्वारामाय रामाय स्वात्मने ब्रह्मणे नमः ॥१०६॥

इतरे ऊचुः

विश्वतः पाणिपादाय विश्वतोऽक्षिमुखात्मने ।
विश्वरूपस्वरूपाय परस्मै ते नमो नमः ॥१०७॥
अथापि ममतावर्तमग्नोद्धारचिकीर्षया ।
अङ्गीकृतावताराय तारकब्रह्मणे नमः ॥१०८॥

---

१. °प्रपन्नाय—अयो० ।

ब्रह्मोवाच

इत्येवमेष निभृतं मुनिभिः समस्तै-
रभ्यर्चितः प्रणतपालनपादपद्मः ।
सद्यः प्रसादसुमुखो भगवानशेषान्
योगीश्वरान् समभिपूज्य शनैरुवाच ॥१०९॥

श्रीराम उवाच

यद्वस्तपः परिणतं सुचिरेण धीरा-
स्तेनेदृशी समभवन्मतिरात्मनीना ।
ज्ञातो यया खलु भवद्भिरहं विशेषान्-
मायां वितत्य च निजावरिकां स्थितोऽपि ॥११९॥
जातोऽधुना सुचिरचीर्णतपोविपाको[1]
युष्माकमुत्तमदृशां मम भावभाजाम् ।
मन्नित्यकेलिविषयां समवाप्य दृष्टिं
यूयं रमध्वमतुलप्रमुदाभ्युपेताः ॥९११॥
येषां सर्वतपःसिद्धिप्रत्यूहहरणक्षमः ।
अहं स्थिततमश्चित्ते तेषां चिन्ता न कापि हि ॥११२॥
धन्याःस्थ यूयं समभावमेनमवाप्य नित्यं तपसि प्रतिष्ठाः ।
पूर्णं फलं वः समजायतोच्चैरतः परं[2] तिष्ठत मत्स्वरूपे ॥११३॥
ज्ञानं परं ब्रह्मनिदर्शनं यत्प्रपञ्चनिष्ठामतिवर्तमानम् ।
तस्यापि पूर्णं फलमेतदेवमपिस्थितिर्यद्भवतां प्रयाता ॥११४॥
ब्रह्मभावमतिक्रम्य मद्भावं समुपाश्रिताः ।
विचरन्तु भवन्तो वै परानन्दपदं गताः ॥११५॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे पूर्वखण्डे षड्गुणोपाख्याने [नामव्याख्यानं नाम] षण्णवतितमोऽध्यायः ॥९६॥

●

१. °विशेष—रीवाँ । २. परे—अयो० ।

सप्तनवतितमोऽध्यायः

ब्रह्मोवाच

एष[1] ज्ञानगुणः प्रोक्तो भगं यत्परमात्मनः ।
अथ वक्ष्यामि वैराग्यं शृणुष्वावहितो द्विज ॥ १ ॥
एकमेव हि वैराग्यं श्रीरामस्य गुणात्मकम् ।
ज्ञानिनां योगिनां चैव वृत्तिभिर्बहुधा ततम् ॥ २ ॥
आत्मारामस्य रामस्य स्वानन्दैककलाजुषः[2] ।
ब्रह्मानन्दावधिः सर्वोऽप्यानन्दो नोपरोधकः ॥ ३ ॥
भुञ्जन्ते योगिनः सर्वे रामानन्दमनेकधा ।
रामस्वात्मानन्दभोगेऽप्युदासीनवदास्थितः ॥ ४ ॥
आब्रह्मभुवनाद्यावान् भोग आनन्दगोचरः ।
सोऽस्य तुच्छवदाभाति पूर्णस्वानन्दरूपिणः ॥ ५ ॥
एतावद्योगिनोऽप्यस्ति ज्ञानिनश्च विरक्तता ।
श्रीरामे तु विशेषो यत् स्वानन्देऽपिविरक्तिमान् ॥ ६ ॥
यथावह्नेर्न संतापः संतापैकस्वभाविनः ।
जलस्य न यथा शैत्यं शैत्यमात्रस्वभाविनः ॥ ७ ॥
तथानन्दस्वरूपस्य[3] रामस्य परमात्मनः ।
नानन्दो येन रक्तिः स्यात् क्वाप्यस्य परमेशितुः ॥ ८ ॥
ईशितव्यैर्यथा जीवैः रमते रामचन्द्रमाः ।
तथा न तेषु संरक्ति[4]राप्तकामस्य दृश्यते[5] ॥ ९ ॥
परब्रह्मस्वरूपस्य पूर्णानन्दपयोनिधेः ।
इयमेवास्य सततं ह्याप्तकामस्य कामना ॥१०॥
अथास्य बहुधा वक्ष्ये वैराग्यं नाम सद्गुणम् ।
यच्छ्रुत्वा योगिनोऽप्याशु विरक्तं जायते मनः ॥११॥

---

१. एवं—अयो० । २. °पुषः—रीवाँ । ३. °श्च—रीवाँ । ४. संसक्तिः—मथु०, बड़ो० । ५. भूपतेः—अयो० ।

ऋषिभिर्बहुधाप्रोक्तं वाल्मीकिप्रमुखैश्च यत् ।
वैराग्यं रामचन्द्रस्य तत् ते वक्ष्यामि भूरिशः ॥१२॥
ब्रह्मानन्दमतिक्रम्य प्रेमानन्दवती प्रिया[1] ।
सा प्रिया कौशिकी नित्यं[2] तां मुञ्चन् नैव बाधितः ॥१३॥
सुधासुमधुरैर्नित्यं मनःसंतापहारिभिः ।
आलापैर्या वशीचक्रे तां मुञ्चन् नैव बाधितः ॥१४॥
खञ्जरीटकुरङ्गालिचकोरमदहारिभिः ।
वश्यकृद्रक्तरङ्गैर्या तांमुञ्चन्नैव बाधितः ॥१५॥
राकानिशाकरोद्योतपराभवसमूर्जितैः ।
राजितैर्मन्दहासैर्या तां मुञ्चन् नैव बाधितः ॥१६॥
अलकावलिसंवीतैर्मधुरस्मितराजितैः ।
मुखचन्द्रांशुभिर्भाति तां मुञ्चन्नैव बाधितः ॥१७॥
भुकुटीकुटिलश्रीभिश्चञ्चलापाङ्गवीक्षितैः ।
अनन्यप्रेमपात्रं या तां मुञ्चन् नैव बाधितः ॥१८॥
विम्बोफलारुणद्योतैर्विद्रुमाभैर्मनोहरैः ।
याधरांशुभिरुद्भाति तां मुञ्चन् नैव बाधितः ॥१९॥
त्रैलोक्यजयिनो नित्यं पञ्चेषोर्जयहेतवे ।
यस्याः कम्बुसमः कण्ठस्तां मुञ्चन् नैव बाधितः ॥२०॥
यस्याः सिन्दूरपूरेण भूषितो मौक्तिकाचितः ।
नित्यमुद्भाति सीमन्तस्तां मुञ्चन्नैव बाधितः ॥२१॥
यस्याः सीमन्तरत्नेन[3] निर्जितो मङ्गलग्रहः ।
करैररुणयत्याशास्तां मुञ्चन्नैव बाधितः ॥२२॥
पीयूषमधुराम्भोदमसृणः काममोदनः ।
यस्याः प्रोद्भाति धम्मिलस्तां मुञ्चन्नैव बाधितः॥२३॥
यस्याः वेणी समुद्भाति शृङ्गाररसराजिवत् ।
रक्तसूत्रेण ग्रथिता तां मुञ्चन् नैव बाधितः ॥२४॥

---

१. प्रिये—मधु०, बड़ो । २. नित्यसंयुक्ता—अयो० । ३. करसरोजेन—रीवाँ ।

आदर्श इव कामस्य समुद्भासितदीधितिः ।
मुखचन्द्रस्तुतो यस्यास्तां मुञ्चन्नैव बाधितः ॥२५॥
यस्याः सुधासरोद्भूतमृणालसदृशौ भुजौ ।
राजेते हस्तपद्माभ्यां तां मुञ्चन् नैव बाधितः ॥२६॥
यस्याः करौ पारिजातलुलत्पल्लवशोभितौ ।
नैवापगच्छतश्चित्तात् तां मुञ्चन् नैव बाधितः ॥२७॥
यस्याः कनककुम्भाभ्यां कुचाभ्यामुरसः प्रभा ।
चेतोऽवसायितुं शक्ता तां मुञ्चन् नैव बाधितः ॥२८॥
यस्याः सुसूक्ष्ममुदरं रोमराजिविराजितम् ।
समुद्भातितरां चित्ते तां मुञ्चन् नैव बाधितः ॥२९॥
यस्याः परमगम्भीरं पीयूषसरसोपमम् ।
नाभिस्थलं समुद्भाति तां मुञ्चन् नैव बाधितः ॥३०॥
यस्यास्त्रिवलिशोभाभिः सुधास्रोतांसि सन्ततम् ।
निर्मीयन्ते विचित्राणि तां मुञ्चन् नैव बाधितः ॥३१॥
यस्याः काञ्चीसनाथाभ्यां नितम्बाभ्यां सुशोभितम् ।
मध्यस्थलं समुद्भाति तां मुञ्चन् नैव बाधितः ॥३२॥
कदलीकाण्डसदृशे जितशुण्डासमुच्छ्रये ।
भ्राजेते जघने यस्यास्तां मुञ्चन् नैव बाधितः ॥३३॥
ताम्बूलसंपुटाकारं यस्याः जानु[1] मनोभुवः ।
नित्यं मादयते चित्तं तां मुञ्चन् नैव बाधितः ॥३४॥
सुजातपद्मपत्रस्थरक्तिमश्रीहरौ पदौ ।
यस्याः नित्यं सुशोभेते तां मुञ्चन् नैव बाधितः ॥३५॥
यस्या गतिः सुमधुरा मरालकुलगञ्जिनी ।
मनो वशयितुं[2] शक्ता तां मुञ्चन् नैव बाधितः ॥३६॥
यस्या विग्रहलावण्यं रतिरम्भादिनिर्जयि ।
चमत्करोति हृदयं तां मुञ्चन् नैव बाधितः ॥३७॥

---

१. पात्र°—रीवाँ । २. ऽवसायितुं—रीवाँ ।

भ्रमयन्ती करे पद्मं मन्दमन्दं च गच्छति ।
विलासवाटिका मध्ये तां मुञ्चन् नैव बाधितः ॥३८॥
रक्तवस्त्रपरीधाना प्रवाललतिकेव या ।
अकालसन्ध्यां कुरुते तां मुञ्चन् नैव बाधितः ॥३९॥
प्रमोदविपिने क्रीडामध्ये कौतुककारिणी ।
अग्रणीः सर्वयूथेषु[1] तां मुञ्चन् नैव बाधितः ॥४०॥
तडिल्लतेव शुशुभे युवतीगणमध्यगा ।
या प्रमोदारण्यवीथ्यां तां मुञ्चन् नैव बाधितः ॥४१॥
यस्याः कामविलासेन सहजानन्दिनी स्वयम् ।
अमर्षं कुरुते चित्तं तां मुञ्चन् नैव बाधितः ॥४२॥
कदाचिद् या स्वयंकृत्वा मण्डितां स्ववपुर्लताम् ।
मानं जहार कृष्णायास्तां मुञ्चन् नैव बाधितः ॥४३॥
अहो अत्यद्भुतं यस्यां सौभाग्यं सुविशेषतः ।
स्वयं संवर्धितमभूत् तां मुञ्चन् नैव बाधितः ॥४४॥
अशेषललनामौलीभूता गुणवती तु या ।
आनन्दमातनोद् भूरि तां मुञ्चन् नैव बाधितः ॥४५॥
नित्यं रासविलासादौ विस्फुरन्ती सदैव या ।
ततान मुदमत्यर्थं तां मुञ्चन् नैव बाधितः ॥४६॥
जनकस्य गृहे या च सखीनामग्रणीः स्वयम् ।
मनोनुगा श्रीजानक्यास्तां मुञ्चन् नैव बाधितः ॥४७॥
एकान्ते च समासाद्य प्रियमानन्दरूपिणम् ।
चकार सहजाकार्यं तां मुञ्चन् नैव बाधितः ॥४८॥
ज्ञात्वापि सहजा यस्याः कौटिल्यं दूत्यमेवच ।
मुखदाक्षिण्यसंरुद्धा न किंचिद् वदति[2] स्वयम् ॥४९॥
तेनैव रमते साधु धूर्ता प्रियमनोरमा ।
एकान्ते च समासाद्य तां मुञ्चन् नैव बाधितः ॥५०॥

---

१. °भूतेषु—रीवाँ । २. बदती—अयो०, रीवाँ ।

भुशुण्ड उवाच

कदा खलु मुमोचासौ कौशिकीं दुस्त्यजामपि ।
एतन्मम विशेषेण विरञ्चे विस्तराद्वद ॥५१॥
श्रीरामचन्द्रचरितं भरितं गुणौघैः पीयूषमेव मम कर्णपुटद्वयस्य ।
त्वद्वक्त्रचन्द्रगलितं पिबतां सुराणां नो तृप्तिरुद्भवति तद्वद पद्मयोने ॥५२॥

ब्रह्मोवाच

इदमाख्यानमतुलं भुशुण्ड श्रूयतां त्वया ।
रहस्यं रामचन्द्रस्य देवस्य सुमहात्मनः ॥५३॥
यदा गर्भमभूद्देव्याः सीतायाः श्रीशसंगतः ।
तदास्वयमुवाचैनां क्रीडाकारणमानुषः ॥५४॥

श्रीराम उवाच

कश्चित् तवाभिलाषोऽस्ति जनकेन्द्रस्य नन्दिनि ।
तमहं पूरयिष्यामि मय्याज्ञापय भामिनि ॥५५॥
इत्युक्ता प्रभुणा देवी जानकी चारुलोचना ।
उवाच मधुरं वाक्यमीषत्स्मितमनोहरा ॥५६॥
न किंचिद् दुर्लभं नाथ त्रैलोक्यस्थेषु वस्तुषु ।
यद्यदिच्छामि मनसा तत्[1] सर्वं संस्थितं पुरः ॥५७॥
एकस्तु मेऽभिलाषोऽस्ति हृदये बलवत्तरः ।
अरण्ययात्रासमये मिलिता या मुनिस्त्रियः ॥५८॥
मुनीनां कन्यकाश्चैव तापस्यो वनवासिनीः ।
तासां वस्त्राणि भूषाश्च भोगांश्च विविधान् विभो ॥५९॥
दातुं मया प्रतिज्ञातास्तासामाश्रमवेश्मसु ।
मण्डनानि विचित्राणि करिष्यामीतिनिश्चितम् ॥६०॥
तासां कुमारिकाणां च कुमाराणां च योगिनाम् ।
अहमुद्वाहकार्येषु संपदं कर्तुमुत्सुका ॥६१॥
दरिद्रा वनवासिन्यस्तापस्यो मुक्तभोगकाः ।
तासां भोगं प्रदास्यामि भुक्तिभूषाम्बरादिभिः ॥६२॥

---

१. नः—रीवाँ ।

इतिसंकल्पितं चित्ते पूर्वमेव मया प्रभो ।
तं पूरयाभिलाषं मे गर्भवत्या विशेषतः ॥६३॥
एवं[1] नीत्वा कानिचिद्वासराणि तासां रम्येष्वाश्रमेषूपगत्य ।
आशीः पूजां तापसीनां गृहीत्वा भूयो यास्यामीश ते राजधानीम् ॥६४॥
इति श्रुत्वा प्रियावाक्यं रामो विरहकातरः ।
कष्टेन तामादिदेश तथेति रहसि स्थितः ॥६५॥
ततः परेद्युः प्रभुणा प्रियायाः कर्तुं पूर्णं तं नियताभिलाषम् ।
उक्तो भ्राता लक्ष्मणः प्रेषणाय पुण्यस्थानेष्वाश्रमेषु प्रियायाः ॥६६॥

श्रीराम उवाच

गच्छ लक्ष्मण पारे त्वं सरय्वाः पुण्यवत्सु वै ।
तापसीनामाश्रमेषु गृहीत्वा जनकात्मजाम् ॥६७॥
तापसानां पूजनाय गच्छत्येषा तु भामिनी ।
अस्याः संकल्पितं चित्ते पूरणीयं विशेषतः ॥६८॥
नीयन्तां वस्त्रभूषान्नसंभाराः शकटस्थिताः ।
अन्ये च विविधा भोगाः कर्पूरघुसृणादयः ॥६९॥
भूरिचन्दनसंभाराः स्थाप्यन्तां शकटादिषु ।
जनकेन्द्रसुता देवी यदाज्ञायपति स्वयम् ॥७०॥
तत्सर्वं भ्रियतां भूरि तापसीनां सुखावहम् ।
ताः सर्वाः शश्वदामन्त्र्य देवी पूजयतु स्वयम् ॥७१॥
तासामाश्रमदेशेषु यात्वेषा पूजनोत्सुका ।
दंपतीस्तान् समापूज्य भवत्वाप्तमनोरथा ॥७२॥
इत्याज्ञा विद्यते भ्रातर्जानक्यास्तत्तथास्तुवै ।
भवानिदं साधयतु प्रजावत्या मनोरथम् ॥७३॥
एषा हि वनवासान्तस्तापसीस्तपसिस्थिताः ।
तत्कन्यकाः कुमारीश्च नित्यं भोगविवर्जितान् ॥७४॥
वीक्ष्य जाता सकरुणा तेन संकल्पितं हृदि ।
एताः संपूजयिष्यामि प्राप्तराज्ये प्रभावहम् ॥७५॥

---

१. स्वयं—रीवाँ ।

ततस्तु त्वरितं कार्यं चिन्ताभिलषितं व्रतम् ।
गर्भवत्या मनःकामः पूरणीयो विशेषतः ॥७६॥
अन्यथा तु कृते भ्रातर्भाविनी संततिः स्त्रियाः ।
यावज्जन्माभिलाषेण ग्रस्ता स्यान्नात्र संशयः ॥७७॥
तत्रैनां खलु संस्थाप्य दासदासीसखीजनैः ।
तूर्णमागम्यतां भ्रातर्मत्पार्श्वे प्रीतिपूर्वकम् ॥७८॥

ब्रह्मोवाच

इति भ्रातुर्निदेशेन लक्ष्मणो विहिताञ्जलिः ।
मूर्ध्ना तदाज्ञामादाय तस्थौ गन्तुं तदाश्रमात् ॥७९॥
तदैव त्वरितं वीरो लक्ष्मणः प्राणवत्प्रभोः[1] ।
संपाद्याखिलसामग्रीः शकटैर्भारवाहकैः ॥८०॥
अक्षय्यपटभूषान्ननानाभोगरसादिभिः ।
संभृत्य शकटांस्तूर्णं नानोपायनराशिभिः ॥८१॥
गृहीत्वा भ्रातृजायां तां मणिकाञ्चनमण्डिते ।
स्थितां महारथे देवीमनयत् तापसीगृहान् ॥८२॥
सरय्वाः अपरे पारे उटजाश्रममण्डले ।
संस्थाप्य मुनिपत्नीनां पार्श्वे जनकनन्दिनीम् ॥८३॥
उवाच लक्ष्मणो भूयः सिद्धकामां प्रजावतीम् ।

लक्ष्मण उवाच

अत्र त्वं तापसीनां वै कुरु पूजां दिने दिने ॥८४॥
यथाभिलषितैरर्थैः पटभूषासनादिभिः ।
भोगैश्च विविधै रत्नैरक्षय्यैर्भूरिसंभृतैः ॥८५॥
तव संकल्पसिद्ध्यर्थं प्रभुणा प्रतिपादितैः ।
अलभ्यैरपि सामर्थ्यात् संचितैर्भूरिवस्तुभिः ॥८६॥
अनुज्ञां देहि मे देवि गच्छाम्यार्यस्य संनिधौ ।
कृतकार्यां पुनस्त्वां हि नेष्यामि नगरीं प्रति ॥८७॥

---

१. °वल्लभः—रीवाँ ।

ब्रह्मोवाच

ततश्चाज्ञापितो देव्या जानक्या लक्ष्मणः स्वयम् ।
नत्वा तस्याः पदाम्भोजे ह्यभिवाद्य मुनीश्वरान् ॥८८॥
तापसीश्च प्रणम्यासौ ताभ्यो देवीं प्रदर्श्य च ।
रथेन तूर्णवेगेन आजगाम पुरीं प्रति ॥८९॥

सा तत्र पुण्येषु तपोवनानां रम्येषु चैवाश्रममण्डलेषु ।
सुच्छाय[1]पुण्यद्रुमशोभितेषु कुरङ्गपोतैः परिशीलितेषु ॥९०॥
अनेकशाखामृगसेवितेषु कूजद्विहङ्गव्रजनादितेषु ।
सुशीतलैः सारवतोयसंगान्मन्दानिलैः संततसेवितेषु ॥९२॥
स्वाध्यायमुच्चैः पठतां मुनीनां घोषेण रात्रिन्दिवमावृतेषु ।
नादेन शश्वच्छुकसारिकानां वेदाक्षरोल्लापव्रतान्वितेषु ॥९२॥
निरन्तरं वर्तितदीर्घसंस्थैर्महामखैः सत्रगणैश्च मुख्यैः ।
सौम्यैस्त्रिकर्माकुलऋत्विगादिगणैः कृतः स्वस्वगतक्रियेषु ॥९३॥
सा री[2]समुच्चारितये यजामहे (?) श्रौषट्वषड्वौषडादिस्वरेषु ।
महेन्द्रमामन्त्रयतां मुनीनां सुब्रह्मण्यं[3] स्वरितोच्चैः स्वरेषु ॥९४॥
स्वच्छस्फुरत्पुष्करिणीजलान्तःसमुल्लसत्पद्मसमूहसौरभैः ।
सुगन्धिताशेषसरित्तटेषु हुताज्यगन्धैश्च समन्ततो वै ॥९५॥
मनोहरैः फलितैः पुष्पवद्भिः सपल्लवच्छाययतैरनोकहैः ।
मुनीन्द्रकन्याकरसिक्तबाहैः समन्ततो वीतपयन्तकेषु ॥९६॥
इतस्ततो वीक्ष्यमाणा सखीभिः साकं सुरुच्या परितः पर्यटन्ती ।
राजेन्द्रपुत्री हृदये प्रसन्ना बभूव भूयः समवाप तुष्टिम् ॥९७॥

सा संगता तापसीभिः समन्तात् संमानिता संस्तुता पूजिता च ।
श्रीरामपत्नी मुमुदे विशेषात् कृतातिथ्या तद्दिने ताभिरेव ॥९८॥
ऊचुश्चैनां मुनिदाराः समन्तादातिथ्यान्ते स्वागतादीन् विधाय ।
भक्त्या नतां राजराजेन्द्रपत्नीं सत्कृत्य चात्यन्तमनोज्ञया गिरा ॥९९॥

---

१. सुष्वाप—अयो० । २. साऋक्—रीवाँ । ३. स्वब्रह्मण्य°—रीवाँ ।

मुनिदारा ऊचुः

अहो अतीव धन्यासि जनकेन्द्रस्य नन्दिनि ।
अत्युदारचरित्रासि विश्वतः पावनैर्गुणैः ॥१००॥
तवैव पातिव्रत्येन सुभगाः सकला वयम् ।
मण्डितं भुवनं सर्वं स्त्रीकुलं च विशेषतः ॥१०१॥
चिरं जीवतु ते स्वामी शश्वद्दशरथात्मजः ।
तव सौभाग्यपुण्येन विश्वभूषणकारिणा ॥१०२॥
अवाप्नुहि परां लक्ष्मीं त्वं च लक्ष्मी रघोः कुले ।
रघोर्निमेश्च वंशस्य भूषारूपासि जानकि ॥१०३॥
अतिसम्यक् कृतं देवि भवत्या भव्यरूपया ।
आश्रमान् समुपेयुष्या वयं सर्वाः कृतार्थिताः ॥१०४॥
कस्य न स्पृहणीयासि वृत्तेन च गुणेन च ।
सफले नयने तस्या या त्वां देवि विलोकयेत् ॥१०५॥
अहो अत्यद्भुततमं शीलं ते वरवर्णिनि ।
पतिव्रतानां सर्वासां शीलनीयमिदं सदा ॥१०६॥
पत्या साकं यदा दृष्टा पुरा वननिषेवणे ।
तदावधि महोत्कण्ठा वर्द्धतेऽस्माकमुत्तमे ॥१०७॥
चिराद् दृष्टासि भाग्येन देवि त्वं नो विलोचनैः ।
अद्य नः सफलं जन्म त्वत्समागममोदतः ॥१०८॥
तापस्योऽपि वयं नाम[1] त्वया देवि वशीकृताः ।
निःस्पृहा सकले लोके त्वामेकां स्पृहयामहे ॥१०९॥
तव पुण्यकथाश्चित्रा[2] विश्वतः पावयन्ति नः ।
तापसीरपि चात्यर्थं तव पत्युर्महात्मनः ॥११०॥
युवयोः पुण्यवृत्तेन वेदगीतेन जानकि ।
पूतं पावयितव्यं च त्रैलोक्यमपि चाखिलम् ॥१११॥
यथा पुनाति त्रैलोक्ये विष्णुपादोद्भवा सरित् ।
सदैव युवयोः पुण्यलोकामृततरङ्गिणी ॥११२॥

---

१. तावत्—रीवाँ । २. गाथा—रीवाँ, मथु०, बड़ो० ।

निगूढं चरितं देवि भवत्या विश्वपावनम् ।
यस्य कर्णपथं नैति तस्य जन्म निरर्थकम् ॥११३॥
दिष्ट्या हतः स पापोऽद्य तव पत्या महात्मना ।
जगद्विद्रावणकरो रावणस्तपसोर्जितः ॥११४॥
तव शीलेन वृत्तेन हतः स हि खलाग्रणीः ।
जगद्दुरितरूपात्मा रावणः सकुटुम्बकः ॥११५॥
अद्य देवि प्रजाः सर्वा मोदन्ते सुकृतैस्तव ।
विदधत्याशिषः पूर्णास्ताभिस्त्वं सुखिनी भव ॥११६॥

सुराङ्गनाभिस्त्रिदशापगायास्तीरेषु कल्पद्रुमसंवृतेषु ।
पुण्यानि रुच्याणि गिरां फलानि गीयन्त उच्चैर्ननु ते यशांसि ॥११७॥
पुण्येषु तीर्थेषु च तापसानां शुभाश्रमेषु त्वरितस्वरेण ।
गायन्त्य उच्चैर्मुनिकन्यकास्त्वां तुष्यन्ति कीर्तिव्रजशुद्धमूर्तिम् ॥११८॥

अत्युद्धारगुणा लक्ष्मीर्यथा वैकुण्ठवासिनी ।
तथात्वमनवद्याङ्गि साकेतपुरवासिनी ॥११९॥
अथात्र नः सुपुण्येष्वाश्रमेषु विनोदिनी ।
यावद्गर्भप्रसवनं चिरं तिष्ठ पतिव्रते ॥१२०॥
गर्भिणीनां खलु मनो वनश्रीदर्शनोत्सुकम् ।
इह स्थित्वा प्रजायेथाः सन्ततिं वीर्यवत्तराम् ॥१२१॥
वीरसूर्भव भाग्येन रघुवंशदिवामणेः ।
तया त्वं प्रजया देवि नृपं संतोषय ध्रुवम् ॥१२२॥
यथा दशरथो राजा रामाद्यैः पुत्रवत्तमः ।
तथा श्रीरामचन्द्रोऽपि भूयाद्वै पुत्रवत्तमः ॥१२३॥
रघोः कुलस्वभावोऽयं वर्णितो विदुषां गणैः ।
लुम्पन्ति[1] कीर्तिं पूर्वेषां जाता जाता गुणोत्तराः ॥१२४॥
इति ताभिस्तुता देवी वचनैः सत्यसुन्दरैः ।
प्रत्युवाच विशालाक्षी स्मयमानमुखाम्बुजा ॥१२५॥

---

१. लुठन्ति—रीवाँ ।

श्रीजानक्युवाच

इयं हि भवतीनां वै तपसः सिद्धिरद्भुता ।
यन्नः शुभफलोदर्कः सर्वलोकविलक्षणः ॥१२६॥
अस्माकमेतदेवोच्चैर्धनं राज्यपदस्पृशाम् ।
भवतीनां तापसीनां यत्तपः समुपार्जितम् ॥१२७॥
वयं गार्हस्थ्यचिन्ताभिः संततं क्लिष्टमानसाः ।
तत्रापि भवतीनां वै दर्शनं सुकृतं परम् ॥१२८॥
एतच्च परमं पुण्यं भवतीभिर्निरूपितम् ।
स्वाश्रितानां यदस्माकमुत्कर्षोऽस्ति स एव वः ॥१२९॥
वृथा जनुर्याति गृहस्थितानां गार्हस्थ्यचिन्तापरिशीलनेन ।
तत्रापि यस्मिन् भवतीषु संगः स एव कालः सुकृतेन पूर्णः ॥१३०॥
क्व नः सदा गृह्यकृत्याकुलानां युष्माभिः स्यात्तापसीभिः प्रसंगः ।
तपोनुरागेण तृणीकृतोच्चैर्महेन्द्रलक्ष्मीः सुखसंपदाभिः ॥१३१॥
इति विज्ञाय तापस्यो युष्माकं दर्शनं मया ।
प्रार्थितं स्वामिने गत्वा पुण्यमाश्रममण्डलीम् ॥१३२॥
एतद् दुर्लभमस्माकं भवतीनां विलोकनम् ।
सर्वसार्थसमेतानां साक्षादिव तपःश्रियाम् ॥१३३॥
भाग्येन दर्शनं याता भवत्यः पुण्यमूर्तयः ।
द्रष्टुं योग्याः क्व नोऽस्माकं साक्षादिव तपःश्रियः ॥१३४॥
इति ताः परितः स्तुत्वा[1] मुनीनां धर्मचारिणीः ।
जानकी तोषयामास व्यक्तं सूनृतया गिरा ॥१३५॥
अन्योन्यं ताभिरालप्य राघवेन्द्रकुलेन्दिरा ।
पूजयामासविधिवदुपचारैरुदाहृतैः ॥१३६॥
आसनैर्भूषणैर्वस्त्रैर्मणिकाञ्चनराजिभिः ।
महार्हाभिश्च मालाभिर्हारावलिभिरुच्चकैः ॥१३७॥
स्वयं च परिधानार्हैः सुगन्धाम्बरभूषणैः ।
देश्यैः सुजातिसंपन्नैरानीतैः पत्युराज्ञया ॥१३८॥

---

१. श्रुत्वा—रीवाँ ।

तासामाश्रमसद्मानि छादितानि समन्ततः ।
वासोभिः कान्तिसंपन्नैः काञ्चनोद्योतशालिभिः ॥१३९॥
तोरणानि निबद्धानि द्वारेष्वाश्रमसद्मनाम् ।
मणिकाञ्चनमालाभिरुद्गतामलकान्तिभिः ॥१४०॥
उटजेषु मुनीन्द्राणां रोपिता विपुलध्वजाः ।
फलिता इव रत्नौघैः पर्णशालाः समन्ततः ॥१४१॥
वलिभिर्धूपदीपैश्च रत्नकुम्भैः फलान्वितैः
पूर्णैर्विशुद्धतोयेन शातकौम्भाम्बरावृतैः ॥१४२॥
पञ्चरत्नाभ्युपेतैश्च सकाञ्चनशरावकैः ।
कदलीस्तम्भरोपैश्च लसत्पल्लववल्लिभिः ॥१४३॥
रचितैः पर्णशालायां द्वारेषु विपुलाः श्रियः ।
अमरावती भोगवती वासीदाश्रममण्डली ॥१४४॥
सर्वतः कान्तिसंपन्ना सर्वतो भोग संयुता ।
राघवेन्द्रपुरश्रीश्च तत्राविरभवत्तदा ॥१४५॥
भोजिता परमान्नेन मुनयो मुनिकन्यकाः ।
मुनीनां धर्मपत्न्यश्च तथा तेषां कुमारकाः ॥१४६॥
तथान्तेवासिनस्तेषां पटभूषणसत्कृताः ।
भोजिता विविधै रत्नैः स्वादुसंतुष्टिकारकैः ॥१४७॥
उटजावलिमार्गेषु घुसृणैश्चन्दनैस्तथा ।
कर्पूरैरप्यगुरुभिस्तथा मृगमदादिभिः ॥१४८॥
द्रवीकृतैरभूत् सेको मूलेष्वाश्रमशाखिनाम् ।
इतस्ततः सौरभौघैर्व्यापिताः सकला दिशः ॥१४९॥
मृगाः शाखामृगाश्चैव येऽन्येऽत्राश्रमवासिनः ।
शुकसारीप्रभृतयस्तथैवोच्चावचां खगाः ॥१५०॥
भोजिता विविधैरन्नैः पशवः पक्षिणतस्था ।
धेनवश्च विशेषेण मुनीनां होमसाधनाः ॥१५१॥
अलङ्कृताः शुभैर्वस्त्रैर्भूषणैर्मणिकाञ्चनैः ।
भोजिता विपुलैरन्नैः सवत्सा विपुलौधसः ॥१५२॥

वत्साश्च वत्सतर्यश्च वृषाश्च शुभदर्शनाः ।
पूजिता गन्धमाल्याद्यैः पटकाञ्चनभूषणैः ॥१५३॥
भोजिताश्च विशेषेण मिष्टान्नयवसादिभिः ।
शृङ्गाण्यलङ्कृतान्युच्चैः पुष्पमालाकदम्बकैः ॥१५४॥
इत्थं प्रतिदिनं तत्र तासामाश्रममण्डले ।
पूजां विदधती देवी न्यवसज्जनकात्मजा ॥१५५॥
धर्मार्जनपरा देवी तापसीनां तपोवने ।
सानुरागमना जाता त्यक्तग्रामजनस्थितिः ॥१५६॥
[1]'तासां पुत्रेषु पुत्रीषु स्निग्धचित्ता हरेर्वधूः'[1] ।
चलितुं नाशकत् तस्मात् स्थानाद्राजेन्द्रकन्यका ॥१५७॥
तपस्विनां संपठतां स्वाध्यायं श्रुतिसुन्दरम् ।
कुर्वतां ब्रह्मकर्माणि यजतां प्रतिवासरम् ॥१५८॥
अनवद्यां स्थितिं वीक्ष्य प्रसन्ना जानकी वने ।
स्वच्छतोयेषु पुण्येषु तीर्थेषु च तपस्विनाम् ॥१५९॥
स्नान्ती प्रतिदिनं देवी पूजयन्ती च तापसीः ।
बहूनि वासराण्यत्र निवसन्ती निनाय सा ॥१६०॥
कुटुम्बवत्तापसीनां[2] मण्डलेषु निवासिनी ।
तासां हृदयरागस्य पात्रमत्र बभूव सा ॥१६१॥
प्रियस्य विरहेऽप्येषा तपस्विवनवासतः ।
अनुद्विग्नमना देवी चिरमाप सुनिर्वृतिम् ॥१६२॥
रामोऽप्यस्या मनोवृत्तिमाश्रमेषु तपस्विनाम् ।
सुप्रसन्नतमां वीक्ष्य प्रेषयामास नानुजम् ॥१६३॥
कानिचिद्दिवसान्युच्चैस्तत्रैव वसतु[3] प्रिया ।
इति न प्रेषयामास नेतुं लक्ष्मणमीश्वरः ॥१६४॥
कदाचिदनवद्याङ्गी तिष्ठन्ती सा तपोवने ।
कस्याश्चिदपि तापस्या मुखाच्छुश्राव जल्पितम् ॥१६५॥

१—१. नास्ति—अयो० । २. सकुटुम्बतापसीनां—रीवाँ । कुटुम्बतामाप सीता—मथु०, बड़ो० । ३. वसति—मथु०, बड़ो० ।

अहो राघववर्येण रामचन्द्रेण जानकि ।
ननु त्वं संपरित्यक्ता यतो नाकारयत्यसौ ॥१६६॥
एवं हि श्रूयते शब्दो नित्यं साकेतवासिनाम् ।
रावणस्य गृहे वासात् त्यक्ता रामेण जानकी ॥१६७॥
सभास्थितेन प्रभुणा पृष्टः कोऽपि विदूषकः ।
इत्युवाच प्रभुं धृष्टो जनतामुखजल्पितम् ॥१६८॥
असाधु साधु वा लोकः किं नो वदति संसृतौ ।
इतिपृष्टो मुहुर्देवं प्रत्युवाच विदूषकः ॥१६९॥
सर्वं खलु भवद्वृत्तं लोकः साध्विति जल्पति ।
एकमेव चरित्रं ते मन्यतेऽनुचितं जनः ॥१७०॥
अतः परं जगत्यस्मिन् दुष्टामपि निजां स्त्रियम् ।
नकोऽपि त्यक्ष्यति जनो रामं कृत्वा निदर्शनम् ॥१७१॥
परपुरुषकरेण स्पृष्टगात्रा निजांसं
मदनशरवशेनारोप्य नीता निकेतम् ।
अपिबहुदिवसौघं तत्र सा जातवासा
जनकनृपतिपुत्री स्वामिना संगृहीता ॥१७२॥
इतिस्त्रीणामसाध्वीनां भविष्यत्यवलम्बनम् ।
भर्त्रा चेत्त्यज्यते तर्हि वदेद्रामं निदर्शनम् ॥१७३॥
उपस्थितोऽयं जगति महान् धर्मस्य विप्लवः ।
स्त्रीणां स्वातन्त्र्यकरणे मूलमन्त्र इवोद्गतः ॥१७४॥
इति जल्पति लोकोऽयं द्वारि द्वारि गृहे गृहे ।
साकूतं सोपहासं च तेन क्लिश्यन्ति साधवः ॥१७५॥
इत्थं जजल्प रामेण मुहुः पृष्टो विदूषकः ।
तच्छ्रुत्वा रघुवीरस्य प्रियात्यागोन्मुखं मनः ॥१७६॥
इतितस्याः समाकर्ण्य वाक्यं जनकनन्दिनी ।
निश्चिकाय स्वमानेतुमनागमनकारणम् ॥१७७॥
अतिसंतप्तहृदया देवी प्रियचरित्रके ।
जाता व्याकुलचित्ता सा रुदन्ती करुणायुतम् ॥१७८॥

अहो किमेतत् प्रभुणा निरागसि कृतं मयि ।
स्वप्नेऽपि नानुपश्यामि व्यभिचारमहं क्वचित् ॥१७९॥
अप्युक्तं वीतिहोत्रेण साक्षाद्भगवता स्वयम् ।
सर्वैरपि सुरैस्तद्वद् गिरा च व्योमसंस्थया ॥१८०॥
तथा समस्तैर्मुनिभिस्तदा शपथपूर्वकम् ।
अहं च भगवत्यग्नौ साक्षाद्वैश्वानरेऽर्चिषि ॥१८१॥
शोधयित्वा[1] स्वमात्मानं निर्गता वीतकल्मषा ।
सर्वं विस्मृतवानेष प्रभुरद्य रघूत्तमः ॥१८२॥
अहो असह्यं हृदयस्य जातं प्रियस्य वृत्तं किमिदं ह्यकस्मात् ।
येनाहमद्धा मदसून् विहाय प्रवेष्टुमर्हा ननु पावकान्तः ॥१८३॥
किं नु कुर्वे गर्भवती प्रविशेयं शुचौ कथम् ।
कथं वा जीवितं तावद्धारयिष्याम्यहं खलु ॥१८४॥
स सर्वं कर्तुमर्होऽस्ति देवः श्रीरघुनन्दनः ।
नाहं किमपि वै कर्तुं शक्ता दुर्दैववश्यगा ॥१८५॥
स तादृक्प्रणयस्तस्य तानि वृत्तानि ते गुणाः ।
सर्वमेकपदे जातं मयि दुर्दैवमीदृशम् ॥१८६॥
अथवा पुरुषा नाम स्वभावेनैव निष्ठुराः ।
भवन्तीति स्फुटं मन्ये जानकी विधिना हता ॥१८७॥
इत्यादि विलपन्त्येषा तत्क्षणाज्जातदुर्गतिः ।
वाल्मीकिना समाश्वस्ता रुदती साश्रुलोचना ॥१८८॥

वाल्मीकिरुवाच

मा रोदीः करुणं वत्से जनकेन्द्रस्य नन्दिनि ।
प्रभुरेष स्वयं रामो वृत्तं जानाति तावकम् ॥१८९॥
न विजानाति लोकोऽयं दुर्दान्तो दैववञ्चितः ।
रामस्तु केवलं लोकमुपासीनोऽस्ति संप्रति ॥१९०॥
न कदापि च देवेशो भवतीं त्यक्ष्यति प्रियाम् ।
अलं विलप्य करुणं भवत्या स्थीयतां सुखम् ॥१९१॥

---

१. साधयित्वा—रीवाँ ।

इदं तपोवनं नाम मम तापससेवितम् ।
प्रशान्तश्वापदाकीर्णमत्र तिष्ठ चिरं सति ॥१९२॥
लोकस्य लोक एवायं परिच्छेत्स्यति संशयम् ।
रामस्तु केवलं देवि निर्लेपः पद्मपत्रवत् ॥१९३॥
युवामेव विजानीथो युवयोर्महिमोत्करम् ।
स रामः श्रीपतिः साक्षात्त्वं श्रीस्तस्याङ्कभूषणे ॥१९४॥
परं[1]ब्रह्म स्वयं रामस्त्वं तदानन्दिनी प्रिया ।
शक्तिः प्रमोदविपिने सहजेति श्रुता तु या ॥१९५॥
वृन्दावने तथा राधा त्वमेव परिगीयसे ।
वैकुण्ठे च स्वयं लक्ष्मीर्जानकी जनकालये ॥१९६॥
को विजानाति देवि त्वां चरमेण स्वचक्षुषा ।
ब्रह्मादीनामपि दृशां गोचरत्वं न गच्छति ॥१९७॥
महिमा युवयोर्नित्यं वेदेन खलु गीयते ।
प्राकृतः किल लोकोऽयं किंजानाति शिवात्मिकाम् ॥१९८॥
भवतीं नामरूपाभ्यां पावयन्तीं जगत्त्रयम् ।
कोटितीर्थसमश्लोकां श्रीरामस्य परां प्रियाम् ॥१९९॥
इत्येवं तां सुसत्कृत्य मुनिर्वल्मीकसंभवः ।
निजाश्रमपदे नीत्वा लोकलक्ष्मीमवासयत्[2] ॥२००॥
एतस्मिन्नन्तरे लोला कौशिकी नाम तत्सखी ।
सीताविरहितं रामं रहःस्थाने समाययौ ॥२०१॥
चन्द्राननां चारुचकोरनेत्रां कस्तूरिकाबिन्दुविराजिभालां ।
सीमन्तरत्नद्युतिभिः समंताद्दिशः समस्ताः परिरोचयन्तीं ॥२०२॥
मरालगत्या श्रितपादपद्मां मञ्जीरनादैर्जितहंसनादां ।
पादाङ्गुलीभूषणचारुचाटुकैः कलक्वणैर्लक्षितमन्दयानां ॥२०३॥
शोणाम्बरोल्लासिनितम्बविम्बद्युतिस्फुरच्चञ्चल[3]कामचक्रां ।
सुवर्णरम्भातरुकाण्डजङ्घां करीन्द्रशुण्डाविजितोरुकान्तिः ॥२०४॥

---

१. पर°—रीवाँ । २. निवासयत्—रीवाँ । ३. चेलक°—रीवाँ ।

गम्भीरनाभीह्रदहारिशोभया सुधासरःस्पर्द्धनया हरन्ती ।
शैवालवल्ली कलरोमराजीभृङ्गारवल्लीमवरोपयन्ती ॥२०५॥
करीन्द्रकुम्भोच्छ्रयशालिराजद्वक्षोरुहक्षोभितलोकचित्ता ।
हारावलीगुम्फितरत्नराजीनक्षत्रमालाञ्चितवक्त्रचन्द्रा[1] ॥२०६॥
ग्रैवेयकद्योतिमहोनिरस्तदिक्चक्रवालप्रसरत्तमिस्रा ।
मरुल्लसत्पल्लवपाणिशोभा भुजद्वयोर्निर्जितकन्दनाला ॥२०७॥
कराङ्गुलीचारुनखप्रभौघविनिर्जिताशेषमणिप्रचारा ।
प्रवालपङ्केरुहपत्रकान्तिन्यक्कारिणी पाणितलप्रभाभिः ॥२०८॥
पञ्चेषुकम्बुद्युतिजैत्रकण्ठी विराजिचञ्चच्चिबुकाग्ररम्या ।
संध्यातपोद्गारि सुधांशुलक्ष्मीर्विजैत्रमोष्ठद्वितयं वहन्ती ॥२०९॥
शुकास्यमुद्राकरकिंशुकाभनासाविलासिश्वसनानिलेन ।
समस्तसौरभ्यसमूहधारां प्रभूतचेतस्तृषिमुद्वमन्ती ॥२१०॥
दीव्यन्मनोभूमुकुरायमाणकपोलयुग्माञ्चितकुन्तलाढ्या ।
प्रदीप्ततादङ्कनिबद्धमुक्ताकलापताराञ्चितवक्त्रचन्द्रा ॥२११॥
समस्तसौभाग्यविभाविनीभिर्भूषाभिराभासितचारुगात्रा ।
चाम्पेयविद्युत्कनकादिजेत्री दिगन्तसंचारकलाप्रवीणा ॥२१२॥
प्रभाषमाणा किलवल्लकीव विद्योतमाना तडितां छटैव ।
संवर्धमानामृतकूलिनीव प्रसर्पमाणांशुदलैर्लतेव ॥२१३॥
व्रजे च कृष्णा सहजामुखीनां व्रजाङ्गनानां निवहेऽपि रामम् ।
प्रमोदयन्ती भ्रुकुटीविलासैर्विराजते या नयनाञ्चलैश्च ॥२१४॥
सा मन्दमन्दं समुपेत्य रामं लोकाभिरामं सुसमीक्ष्य किंचित् ।
लज्जावती नम्रमुखी चकासे साक्षाज्जयश्रीरिव मन्मथस्य ॥२१५॥
अभ्यासमासाद्य जवेन तस्थौ सा योगनिद्राविनिमीलिताक्षम् ।
श्रीराममुद्बोधयितुं चकार लीलारविन्दभ्रमणेन वायुम् ॥२१६॥
अथाक्षिणी पद्मदलाभिरामे उन्मील्य रामः समचष्ट पार्श्वे ।
तां कौशिकीं मेचकदृक्कटाक्षैः संताडयन्तीमिव[2] हृत् प्रियस्य ॥२१७॥

---

१. चन्द्रवक्त्रा—मथु०, बड़ो० । २. °मिह—रीवाँ ।

अथोवाच महायोगी रामः परमनिःस्पृहः ।
कौशिकीं तप्तहेमाङ्गीमेकान्ते सुसमागताम् ॥२१८॥

श्रीराम उवाच

किमर्थं कौशिकि प्राप्ता मत्सकाशमिहाधुना ।
रहस्यहं तपोनिष्ठस्त्यक्तसर्वपरिग्रहः ॥२१९॥

कौशिक्युवाच

इदानीं पुण्डरीकाक्ष रहितः प्रियया भवान् ।
अतोऽहं त्वां रमयितुं प्राप्तास्मि रहसि स्थितम्॥२२०॥

श्रीराम उवाच

मत्प्रिया जानकी साक्षाद्रतिकोटिमनोहरा ।
सैव चेन्मां परित्यज्य मुनीनामाश्रमं गता ॥२२१॥
कान्या मम मनो हर्तुं समर्थास्ति जगत्त्रये ।
एकपत्नीव्रतधरो नाहमन्यत्र लोलुपः ॥२२२॥
तदाज्ञावशगो भूत्वा तया सह सुसंगताम् ।
कदाचित्त्वां रमितवान् यथान्या गोपकन्यकाः ॥२२३॥
सहजाज्ञावशेनाहं रतवान् व्रजमण्डले ।
सहजा जानकी चेति रूपमेकं द्विधावपुः ॥२२४॥

ब्रह्मोवाच

विज्ञापयन्तीमपि तां कौशिकीं जानकीसखीम् ।
नोररीकृतवान् रामो महायोगेश्वरो रहः ॥२२५॥
ततः सा विमुखीभूय भग्नमाना सुदुर्मनाः ।
जानकीमेव समगात्तापसीनां समीपगाम् ॥२२६॥
अन्याश्च सकलाः सख्यः सीतायाः पद्मलोचनाः ।
कमलेक्षीप्रभृतयः प्रियेण सहसोज्झिताः ॥२२७॥
सीताविरहतप्तेन योगं समधितिष्ठता ।
भग्नमाना हृतधियः सीतामेव समाययुः ॥२२८॥
ताः सर्वाः संगता वीक्ष्य तत्रापि[1] जनकात्मजा ।
सीता भग्नदशा वीक्ष्य प्रोवाच वचनं सती ॥२२९॥

---

१. नवापि—मथु०, बडो० ।

किमर्थं भग्नमानाः स्थःसख्यः सर्वा विनिन्दिताः[1] ।
केनापि वञ्चिताः किंनु भग्नमानीकृताश्च वः ॥२३०॥

सख्य ऊचुः

प्रभुः कमलपत्राक्षो देवो दशरथात्मजः ।
तथैव विरहोद्रेकान्नास्मानादिद्रिये सखि ॥२३१॥
वयं सर्वास्तं समेता रहस्यं तपस्यन्तं योगमुद्रां वहन्तम् ।
अनेकधा चक्रममोहनं सखि स्वभावलोलैर्नयनैर्विलोक्य ॥२३२॥
स वै धीरस्त्वां विना नेतरस्यां स्वप्नेऽपि नासक्तमना मनागपि ।
अनादृतानामिति तेन पत्या गतो मानस्त्वत्सखीनामतो नः ॥२३३॥
अतः सर्वाः दुर्मनसो बभूवुस्त्वत्संनिधानं प्राप्तवत्यःस्म तस्मात् ।
यथात्वमत्राश्रममण्डले वसस्येवं तथा वयमप्यावसामः ॥२३४॥
तीव्रेण तपसा नित्यं कर्षयन्त्यो निजं वपुः ।
श्रीरामचन्द्रचरणध्यानधारासुधाप्लुताः ॥२३५॥
नेष्यामः कतिचिदहानि ते समीपे तिष्ठन्त्यः वरमतमात्मयोगनिष्ठाः ।
सायुज्यं पुनरथ राघवेण गत्वा देहान्ते परमपदं व्रजाम शीघ्रम् ॥२३६॥
इति ताः कृतसंकल्पाः सीतासंनिधितोषिताः ।
अचीकरंस्तपस्तीव्रं कौशिकीप्रमुखाः स्त्रियः ॥२३७॥
इदमग्रे प्रवक्ष्यामि विशेषेण तवाग्रतः ।
वैराग्यस्य प्रसङ्गेन किंचिदुक्तं मया द्विजः ॥२३८॥
इति वैराग्यनामासौ भगः श्री रामचन्द्रगः ।
तुभ्यं भुशुण्ड कथितमुपलक्षणमात्रतः ॥२३९॥
योऽतिप्रियतमो दान्तो लक्ष्मणः कृतलक्षणः ।
यं विना न क्वचित्तस्थौ तं त्यजन्नैव बाधितः ॥२४०॥
यस्यानुग्रह मिच्छन्ति नित्यं श्रीरामसेवकाः ।
सखायमात्मनः साक्षात्तं त्यजन्नैव बाधितः ॥२४१॥
येन सार्द्धं समावात्सीदरण्येऽपि प्रियान्वितः ।
विनीतमात्मनो भक्तं तं त्यजन्नैव बाधितः ॥२४२॥

---

१. अनिन्दिताः—मथु०, बड़ो० ।

यः साक्षादात्मना तुल्यः प्रियो भ्राता सुहृत्तमः ।
लक्ष्मणः परमोदारस्तं त्यजन्नैव बाधितः ॥२४३॥
एकान्ते यत्र सहजा जानकी वा स्वसन्निधौ ।
तत्रापि यस्य संपर्कस्तं त्यजन् नैव बाधितः ॥२४४॥
आज्ञावशो निजसुहृत् सखा साहाय्यपण्डितः ।
यो लक्ष्मणः प्रियोऽत्यन्तं तं त्यजन् नैव बाधितः ॥२४५॥
विनीतो वनवासेऽपि व्रतं द्वादशवार्षिकम् ।
आज्ञानुरोधात् कृतवान् तं त्यजन् नैव बाधितः ॥२४६॥
सर्वकार्येषु कुशलो धर्मात्मा प्राणसंमितः ।
अनुजश्चैव मित्रं च तं त्यजन् नैव बाधितः ॥२४७॥
वनेषु पर्णशालादिसर्वकार्यविधानकृत् ।
अनुजश्चैव शिष्यश्च त्यं त्यजन् नैव बाधितः ॥२४८॥
अनुग्रहस्य प्रेम्णश्च य एकः पात्रतां गतः ।
स्थितश्च निकटे नित्यं तं त्यजन् नैव बाधितः ॥२४९॥
यस्य क्षणवियोगे तु युगं कल्पायते दिनम् ।
पटान्तरेऽप्यमुक्तश्च तं त्यजन् नैव बाधितः ॥२५०॥
येन सार्द्धं विहृतवान् गृहेषु च वनेषु च ।
अनेकविधलीलाभिस्तं त्यजन् नैव बाधितः ॥२५१॥
हे लक्ष्मण सखे भ्रातः प्रियमित्रेतिचाब्रवीत् ।
यं नित्यमात्मदयितं तं त्यजन् नैव बाधितः ॥२५२॥
यस्यानर्घ्यतमोदारगुणसंतुष्टमानसः ।
वनेऽपि सुखितोऽवात्सीत् तं त्यजन् नैव बाधितः ॥२५३॥
यस्य बाहुबलेनासौ हतवान् राक्षसीं चमूम् ।
महाबलां महाघोरां तं त्यजन् नैव बाधितः ॥२५४॥
येनैव निहतो वाणैरिन्द्रजित्समरोद्धतः ।
सर्वदेवौघविजयी तं त्यजन् नैव बाधितः ॥२५५॥
यस्य वीर्यबलेनासौ प्रबलं राक्षसेश्वरम् ।
न किञ्चिद् गणयामास तं त्यजन् नैव बाधितः ॥२५६॥

यस्यानुभावमखिलं लौकिकं वाप्यलौकिकम् ।
स्वयं वेत्ति प्रभुर्नान्यस्तं त्यजन् नैव बाधितः ॥२५७॥
यस्य सौन्दर्यसारेण स्वयमेष वशीकृतः ।
आत्मसौन्दर्यतुल्येन तं त्यजन् नैव बाधितः ॥२५८॥
आबाल्याच्छीलितो यस्य संगः परमसौख्यदः ।
नेत्रसंतृप्तिजननः तं त्यजन् नैव बाधितः ॥२५९॥
अयं चास्य भगो नित्यं महावैराग्यशब्दितः ।
संप्रोक्तो बहुधा तुभ्यं भगवान् येन कीर्तितः ॥२६०॥
इत्थं ते षड्गुणाः प्रोक्ताः रामस्य सुमहात्मनः ।
श्रुत्वैतान् सर्वमाहात्म्यज्ञाता भवति भक्तिमान् ॥२६१॥
माहात्म्यज्ञानमङ्गं हि भक्तेः श्रीरामगोचरम् ।
अतस्ते बहुधा ख्याता माहात्म्यज्ञप्तये गुणाः ॥२६२॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे पूर्वखण्डे षड्गुणाख्याने वैराग्यव्याख्यानं नाम सप्तनवतितमोऽध्यायः ॥९७॥

●

अष्टनवतितमोऽध्यायः

ब्रह्मोवाच

एवं षड्गुणसंपन्ने यौवराज्यं प्रकुर्वति ।
रामे सर्वगुणारामे प्रजानां परमा मुदः ॥ १ ॥
बभूवुः परमैश्वर्यं प्रादुरासीत् प्रपश्यताम् ।
जनानां विस्मयश्चासीद्विलोक्य परमाः श्रियः ॥ १ ॥
वीर्यं च बहु तस्यासीद् यशश्च भुवनेष्वभूत् ।
राज्ञो दशरथस्यैष हृदयानन्दनोऽभवत् ॥ ३ ॥
अथैकदा रामचन्द्रे यौवराज्यासनस्थिते ।
विप्राः कोलाहलं चक्रुर्द्वारि संगत्य तत्क्षणे ॥ ४ ॥

विप्रा ऊचुः

हा हताः स्म प्रभौ रामे यौवराज्यस्थिते वयम् ।
व्याघ्रेण वनचारिण्यो गावोऽस्माकं विनाशिताः ॥ ४ ॥
अहो दशरथो राजा विरक्तो भूमिपालने ।
रामे सर्वां धुरं न्यस्य कमिदानीं वदामहे ॥ ६ ॥
निर्धनानां द्विजानां नो गावो हि परमं धनम् ।
अकस्मात्तत्क्षयं नीतं व्याघ्ररूपेण मृत्युना ॥ ७ ॥
ईदृशा बलिनो वीरा रघुनाथनिदेशगाः ।
न केनापि हतो व्याघ्रः कालरूपी गवां हि नः ॥ ८ ॥
प्रजानां पालने धर्मं जानात्येको रघूद्वहः ।
किमभाग्येन नो जातं हा हतं गोधनं बलात् ॥ ९ ॥
गोपालोऽपि हतस्तेन व्याघ्रेण पिशिताशिना ।
अहोदुर्दैवमस्माकं युवराजे रघूद्वहे ॥१०॥
अहो राम महावीर बलिनां श्रेष्ठ सत्पते ।
निर्धनाः स्म वयं जाता गावो व्याघ्रेण भक्षिताः ॥११॥
अहो - वीर नरश्रेष्ठ श्रीमन् दशरथात्मज ।
त्रैलोक्यदारिद्र्यहरे त्वयि नो दुर्गतिः कथम् ॥१२॥
घटोध्न्यः पृथुदोहास्ता गावो नः कान्तविग्रहाः ।
क्व नु दृश्या गृष्टयस्ताः समशृङ्ग्यः सुलोचनाः ॥१३॥
ईदृशी विपदस्माकं धेनवो व्याघ्रभक्षिताः ।
किं कुर्मः क्व व्रजामश्च दैवेनैव हता वयम् ॥१४॥
इत्युक्त्वा रुरुदुः सर्वे ब्राह्मणा जातमन्यवः ।
शुश्राव तद् दशरथो राजा प्रकृतिपालकः ॥१५॥

रामोवाच

क एते करुणाशब्दं कुर्वन्ति द्वारदेशगाः ।
रुदन्तो भर्त्सयन्तश्च शपन्तश्च विशेषतः ॥१६॥
हा हताःस्म इति क्रोशं कुर्वन्तो दैवपीडिताः ।
अहो मयि स्थिते राज्ञि रामे च युवराज्यगे ॥१७॥

प्रजानामीदृशी पीडा कथं भवति भूयसी ।
ततो दूतैः समागत्य वृत्तं तद्विनिवेदितम् ॥१८॥
ब्राह्मणानां हता गावो व्याघ्रेण गहने वने ।
इति भूयो रुदन्तस्ते विलपन्ति विपद्गताः ॥१९॥
अयोध्यावासिनः केचिद् विप्रा दैवेन पीडिताः ।
अस्थानं रोदनं ह्येतत् किंकार्यं धरणीपते;॥२०॥
अथादिशन्नृपो[1] वीरान् व्याघ्रं हन्तुं भयानकम् ।
गच्छन्तु विपिनं वीरा [2]व्याघ्रस्तिष्ठति यत्र सः[2] ॥२१॥
गावो हि भक्षिता येन ब्राह्मणानां पुरौकसाम् ।
एतद्यनुचितं राज्ञः प्रजायाः पीडनं तु यत् ॥२२॥
ततो विनिर्गता वीरा[2] नगरात् खड्गपाणयः ।
कटिप्रवद्धतूणीराः कवचैर्व्यूढविग्रहाः ॥२३॥
नानाशस्त्राण्युपादाय भुशुण्डीपरिघांस्तथा ।
शतघ्नीस्तोमरांश्चैव चापवाणादिकांस्तथा ॥२४॥
सरय्वाः पुलिने तद्धि दुर्दर्शं गहनं वनम् ।
विचित्रश्वापदाकीर्णं शल्लकीकुलदुर्गमम् ॥२५॥
प्लवङ्गमकुलैः कीर्णं [3]तरक्षुगणसेवितम् ।
शिवानिनादभयदं वराहोत्कीर्णमुस्तकम् ॥२६॥
वारणैर्निर्गतमदैः समन्ताद्व्याप्तमन्तरा ।
व्यालोलूकगणाकीर्णं[3] महामहिषभीषणम् ॥२७॥
मांसाशिभिर्बहुविधैः पशुभिर्भूरिनादितम् ।
गिरि[4]गह्वरदुर्दर्शं विविधानोकहव्रजम् ॥२८॥
तमालसालसरलकिंशुकौघसमावृतम् ।
लतावितानसंछन्ननानाभूरुहभीषणम् ॥२९॥
राजतालीवनोद्घोषभयानकसुविस्तृतम् ।
दरीनिकेतद्विगुणद्वीपीकुलनिनादितम्[4] ॥३०॥

---

१. °दिशत्त्रयो—अयो०, रीवाँ । २—२. नास्ति—अयो० । ३–३. नास्ति—अयो० । ४–४. नास्ति—रीवाँ ।

कुञ्जान्तरपरिव्याप्ततिमिरौघभयानकम् ।
शार्दूलनिहतानेकगजमुक्ताफलावृतम् ॥३१॥
रुधिराञ्चितशार्दूल नखराङ्कगणाङ्कितम् ।
जृम्भितास्यैः क्षुधाक्रान्तैः पलाशिभिरुपावृतम् ॥३२॥
श्येनसंदोहसंछन्नगिरिकन्दरमन्दिरम् ।
लोहतुण्डैर्महाकाकैर्व्याप्यमानं समन्ततः ॥३३॥
कृतकञ्चुकनिर्मोकैः कृष्णसर्पैः समावृतम् ।
दावानलज्वलद्वृक्षशुष्ककाननसेवितम् ॥३४॥
खर्जूरविटपिस्रावविमदलेपनदुर्मदैः ।
हयारिभिः समाकीर्णं शृङ्गविस्तारभीषणम् ॥३५॥
मार्जारकुलसंकीर्णं मत्तगोमायुसंकुलम् ।
ईदृशं ददृशुर्वीराः सरयूपुलिने वनम् ॥३६॥
पशूनां कदनं चक्रुर्दंष्ट्रिणां शृङ्गिणां तथा ।
आस्फोट्य सकला वीरा निपेतुर्निविडे वने ॥३७॥
अथ शैलदरीकुञ्जान्निर्ययौ सुमहोद्धतः[1] ।
वीरास्फोटकृत क्रोधो व्याघ्रोऽत्यन्तभयानकः ॥३८॥
मूर्ध्ना परिस्फुरत्पुच्छगुच्छभीषणविग्रहः ।
जिह्वाललनभीमास्यस्तडित्पुञ्जनिभाकृतिः ॥३९॥
दावानलचलन्नेत्रः कृतगुञ्जारवोद्भटः ।
महाशनिसुतीक्ष्णाग्रनखभीमप्रकोष्टकः ॥४०॥
गिरिगण्डसमुत्तुङ्गः समुच्छलनपण्डितः ।
विकटैस्तिग्मकिरणैर्नखरैः क्षोदयन् भुवम् ॥४१॥
सुदुर्दर्शदृगन्ताभ्यां मुञ्चञ्ज्वालाकणावलीम् ।
अत्युत्कटाङ्गगन्धेन जनानां दृष्टिमन्धयन् ॥४२॥
कुर्वन् गिरितटग्रावस्फोटैः कटकटारवम् ।
प्रकाशयन् दिशः सर्वास्तीक्ष्णदंष्ट्राङ्कुरत्विषा ॥४३॥

---

१. निर्ययुः सुमहोद्धताः—रीवाँ ।

ललाटपट्टसंलग्नभ्रुकुटीविकटाकृतिः ।
क्षुरसंतीक्ष्णमूर्ध्वाग्रं निर्धुन्वन् रोममण्डलम् ॥४४॥
जृम्भितास्यसुदुर्दर्शः क्रूरकर्मातिनिष्ठुरः ।
सेनाकोलाहलक्रुद्धो घूर्णयन् विकटे दृशौ ॥४५॥
भासयन् वपुषा कुञ्जं काञ्चनद्युतिवर्षिणा ।
त्रासयन् सकलान् वीरान् दृष्टिपातैर्भयानकैः ॥४६॥
तमग्नियन्त्रैर्विशिखैश्च तीक्ष्णैः परश्वधैः शक्तिभिर्मुद्गरैश्च ।
जघ्नुः सर्वे वीरवराः समंताद् दूरेस्थिताः कृतशस्त्रास्त्रवर्षाः ॥४७॥
तेषां शस्त्राणि चास्त्राणि यतमानानि भूरिशः ।
निजगाल मुखेनासौ फलानीव क्षुधातुरः ॥४८॥
तद्दृष्ट्वा सुमहच्चित्रमभूद् दाशरथे बले ।
सर्वे च भयसंत्रस्ता बभूवुः सैनिका जनाः ॥४९॥
अथोत्प्लुत्य जवेनासौ पपात बलमध्यतः ।
कोष्ठानि पाटयामास[1] नखैर्निर्भिद्य वेगवान् ॥५०॥
आचक्राम बलात् कांश्चिद् वक्षसा संमचूर्णयत् ।
चरणाभ्यां तथैवान्यानाक्रम्य समताडयत् ॥५१॥
अग्रपादहताः केचिद्गतासवः समशेरत ।
दंष्ट्राभिर्दारिताः केचित् केचिद्दीर्णोदरा नखैः ॥५२॥
निकृत्य कण्ठदेशेषु केषांचिद्रुधिरं पपौ ।
कांश्चिन्निपोथयामास देहभारेण भीषणः ॥५३॥
केषांचिल्लिलिहे रक्तं पाटयित्वोदरं रुषा ।
केषांचित् खण्डयामास चरणान् मूलदेशतः ॥५४॥
केषांचिद् भुजसंछेदं चकार स्कन्धदेशतः ।
केषांचिदच्छिनद् ग्रीवां केषांचित् कर्णनासिकम् ॥५५॥
निर्ददार बलाद्वक्षः केषांचित् कवचावृतम् ।
यत्र यत्र पपातोच्चैस्ते ते भुवि निपोथिताः ॥५६॥

---

१. पातयामास—अयो०, रीवाँ ।

केषांचिन्नाभिदेशेषु केषांचिदुदरेषु च ।
केषांचिज्जङ्घातलेषु पाटयित्वासृजः पपौ ॥५७॥
इत्थमेष क्षयं निन्ये सर्वं दाशरथं बलम् ।
पतमानानि चास्त्राणि शस्त्राणि च समंततः ॥५८॥
लाङ्गूलेनैव चिक्षेप विदीर्णास्येन जग्लिवान्[1] ।
मुखोत्थश्वासवातेन कानिचित् प्रतिजघ्निवान् ॥४९॥
विद्रुताः सैनिकाः सर्वे व्याघ्रस्य विपुलं बलम् ।
वीक्ष्य मारितशेषास्ते राज्ञोऽन्तिकमुपाययुः ॥६०॥
आचख्युः सकलं वृत्तं व्याघ्रस्य विपुलं बलम् ।
श्रुत्वा सुविस्मितो राजा बभूव किमिदं धिया ॥६१॥
रामचन्द्रस्तदाकर्ण्य निर्गतः सहलक्ष्मणः ।
धनुर्बाणौ समादाय विचिन्त्य हृदि कारणम् ॥६२॥
स गत्वा विपिनं घोरं यत्र गावो विनाशिताः ।
व्याघ्रेण घोररूपेण दुर्दर्शतरवर्ष्मणा ॥६३॥
स वीक्ष्य सहसा व्याघ्रं सटादुःप्रेक्ष्यकन्धरम् ।
पश्यतो लक्ष्मणस्याग्रे शरेणैकेन जघ्निवान् ॥६४॥
स रामवाणसंस्पर्शात् सद्योनिर्धूतकल्मषः ।
वैयाघ्रीं तनुमुत्सृज्य बभौ परमसुन्दरः ॥६५॥
पद्मपत्रविशालाक्षो दिव्यगन्धानुलेपनः ।
दिव्यवस्त्रपरीधानो दिव्यस्रग्भूषणाञ्चितः ॥६६॥
मुहुर्विद्योतयन् देहकान्तिभिः सकला दिशः ।
मुक्ताहाराभिरामेण वक्षसा विपुलौजसा ॥६७॥
विराजमानो हेमाभविग्रहः सुस्मिताननः ।
सुनासः सुकपोलाढ्यः सुग्रीवः सुष्ठुमूर्द्धजः ॥६८॥
सुदर्शनः सुरूपाङ्गस्तरुणः शोभिताकृतिः ।
दिव्यं विमानमारुह्य स्थितो व्योम्नि महेन्द्रवत् ॥६९॥

---

१. जल्पिवान्—अयो० ।

दिव्यानुचरसंवीतो दिव्यस्त्रीगणसेवितः ।
अवरुह्य विमानाग्रात् पादयोर्निपपात ह ॥७०॥
उत्थाय पुनरस्तौषीद् रामं सुन्दरविग्रहम् ।
लक्ष्मणेन युतं वीरं शापनिर्मुक्तिदायकम् ॥७१॥

पुरुष उवाच

नमस्ते राघवेन्द्राय रघूणां प्रवराय च ।
रघुवंशमहेन्द्राय रघुकीर्तिविधायिने ॥७२॥
नमस्तपनवंशाब्धिपूर्णचन्द्रमसे विभो ।
तुभ्यं परमवीराय वीरेन्द्राय च ते नमः ॥७३॥
नमस्त्रैलोक्यकल्याणनिधये पुरुषोत्तम ।
राजेन्द्रमुकुटाग्रस्थहीररुच्यपदाय ते ॥७४॥
नमस्ते यौवराज्येन त्रैलोक्यसुखदायिने ।
हेर्मासिंहासनस्थाय सुधीभिः सेविताङ्घ्रये ॥७५॥
नमस्त्रैलोक्यदारिद्र्यहृतये कामधेनवे ।
चिन्तारत्नसमानाङ्घ्रि नखदीधितये च ते ॥७६॥
मन्दारप्रसवामोदशालिसुन्दरकीर्तये ।
राजेन्द्रगणसेव्याय श्रीदाशरथये नमः ॥७७॥
दरिद्रजननिस्तारकारणव्रतधारिणे ।
कल्पद्रुमाय साधूनां श्रीरामाय नमोस्तु ते ॥७८॥
सर्वमङ्गलरूपाय सर्वपापहरात्मने ।
सर्वतीर्थैकरूपाय श्रीरामाय नमोनमः ॥७९॥
रामाय रामचन्द्राय रामभद्राय ते नमः ।
राघवेन्द्राय वीराय वीरेन्द्राय च ते नमः ॥८०॥
वामे जनकजा यस्य पुरतो लक्ष्मणः स्थितः ।
तद्वामे हनूमांश्चैव स रामः पातु मां सदा ॥८१॥
इतिस्तुत्वा स गीतेन सर्ववश्यविधायिना ।
तोषयामास राजीवलोचनं रघुनन्दनम् ॥८२॥
कस्त्वमेवं विधोऽसीति पृष्टो रामेण तर्हि सः ।
उवाच मुखनादेन घोषयन् सकला दिशः ॥८३॥

गन्धर्वश्चिरसंशप्तो मुनिना मन्युकारिणा ।
नाम्ना चित्रध्वजोऽस्मीश प्रसिद्धः किन्नरालये ॥८४॥
कदाचिदलकापुर्याः सविधे स्नातुमाययौ ।
स्रोतस्यलकनन्दायाः मत्तवारणसेविते ॥८५॥
मुनिं व्याघ्रमुखं नाम यथानामस्वरूपकम् ।
विलोक्य मम हासश्च संजातोऽनर्थकारणम् ॥८६॥
हसन्तं मां समालोक्य शशाप मुनिपुङ्गवः ।
अहो हससि दुर्बुद्धे मम वीक्ष्य मुखाकृतिम् ॥८७॥
व्याघ्रो भवतु वै नाम भवानपि सुदुर्मतिः ।
ममातिक्रमजातेन पापेनानेन भूयसा ॥८८॥
भक्षय त्वं वने सर्वान् पशून् विगतचेतनः ।
जाते रामावतारे तु मम शापाद्विमोक्ष्यसे ॥८९॥
रामवाणपरिस्पर्शसद्योनिर्धूतकल्मषः ।
गन्तासि स्वपदं भूयो नैवं शीलं पुनः कुरु ॥९०॥
इत्यहं तेन मुनिना शप्तो दारुणशापिना ।
वैयाघ्रीं योनिमापद्य स्थितोऽत्र चिरकालतः ॥९१॥
इदानीं राम निर्मुक्तो जातोऽस्मि त्वदनुग्रहात् ।
तथापि मम चित्तस्य ग्लानिर्नैव निवर्तते ॥९२॥
अहो मया हता गावो मनुष्याश्च विनाशिताः ।
कां गतिं नु गमिष्यामि घोरकर्मकृदीदृशः ॥९३॥
घोरस्य कर्मणो राम निष्कृतिर्नैव विद्यते ।
जन्मान्तरेऽपि तत्पापं भोक्ष्याम्येव न संशयः ॥९४॥
इतिसंरूढहृदयग्लानिरस्मि सतांपते ।
शरीरमेतत् त्यक्ष्यामि प्रवेक्ष्यामि हुताशनम् ॥९५॥

श्रीराम उवाच

मा ग्लासीर्हृदयेन त्वमधुना किन्नरोत्तम ।
मत्पादकमलस्पर्शात्तीर्णमेनोऽतिदारुणम् ॥९६॥
राक्षसा घोररूपाश्च संततं पिशिताशनाः ।
बहवो मत्पदाम्भोजस्पर्शान्मुक्तिमुपाययुः ॥९७॥

मन्नामजाप्यपरमो मम ध्यानपरायणः ।
वसन् किंपुरुषे वर्षे भजमानोऽनिशं हि माम् ॥९८॥
वर्तस्व मम भक्त्येत्थं कर्मपाशं विनिर्दहन् ।
गन्तासि मम सायुज्यं तच्चित्रध्वज मा शुचः ॥९९॥
इत्यादिश्य स गन्धर्वं नाम्ना चित्रध्वजं तु तम् ।
उवाच लक्ष्मणं वीरो गते किंनरयूथपे ॥१००॥
वैयाघ्रीं योनिमापन्नो गन्धर्वोऽयं निरीक्षितः ।
ब्राह्मणानां वने गावो यदनेन विनाशिताः ॥१०१॥
तदर्थं क उपायोऽस्ति चिन्त्यतां लक्ष्मणाधुना ।
रुदन्ति ब्राह्मणा दुःखात्तेषां दुःखं न नाशितम् ॥१०२॥

लक्ष्मण उवाच

गावः कालवशं याता व्याघ्रेण खलु भक्षिताः ।
तासां स्थाने गोसहस्रं ब्राह्मणेभ्यः प्रदीयताम् ॥१०३॥
ततो विप्रान् समाहूय गोदानाय प्रतिश्रुतम् ।
ब्राह्मणा नोररीचक्रुस्तासामर्थे सुदुःखिताः ॥१०४॥

ब्राह्मणा ऊचुः

गोभिस्त्वया प्रदत्ताभिः किं वयं करवाम भोः ।
यदि शक्तोऽसि ता एव समानय रघूद्वह ॥१०५॥
ततो रामोऽनुजं वीक्ष्य प्रोवाच वचनं स्मयन् ।
एहि लक्ष्मण गच्छावो गवां नयनहेतवे ॥१०६॥
यमस्य नगरीं यत्र प्रेतानामस्ति संस्थितिः ।
ब्राह्मणानां मनो दुःखं नान्यथा खलु नंक्ष्यति ॥१०७॥
ततो रथं समारुह्य लक्ष्मणो यत्र सारथिः ।
ययौ संयमिनीं घोरां यमस्य नगरीं हरिः ॥१०८॥
गत्वा परिसरे तस्या वादयामास राघवः ।
पाञ्चजन्यं निजं शङ्खं सर्वप्रेतविमुक्तिदम् ॥१०९॥
श्रुत्वा शङ्खरवं रम्यं देवो वैवस्वतः पुरात् ।
तूर्णं विनिर्ययौ हर्षात् श्रीरामदर्शनोत्सुकः ॥११०॥

दूरादेव रथोपस्थे संस्थितं रघुपुङ्गवम् ।
समचष्ट परं भाग्यं मन्यमानो रवेः सुतः ॥१११॥
यमः सविधमभ्येत्य रामस्य सुमहात्मनः ।
ववन्दे चरणाम्भोजं लक्ष्मणस्य च धीमतः ॥११२॥

यम उवाच

अद्य मे सफलं जन्म श्रीराम तवदर्शनात् ।
अहो अनुगृहीतोऽहं भवताद्य दयानिधे ॥११३॥
अद्य मे विपुलं भाग्यं प्रेतमण्डलवासिनः ।
सकुटुम्बः कृतार्थोऽहं भवतोऽनुग्रहात् प्रभो ॥११४॥
नमः कमलकिञ्जल्कपीतकौशेयवाससे ।
साक्षाल्लक्ष्मीकलत्राय रामाय करुणाब्धये ॥११५॥
उभाभ्यां विश्ववन्द्याभ्यां वीराभ्यां भुवनत्रयम् ।
भवद्भ्यां संप्रमुदितं गुणान् गायति नित्यशः ॥११६॥
जानेऽहं पुण्डरीकाक्ष युवां वै पुरुषोत्तमौ ।
अवतीर्णौ रवेर्वंशे श्रीमन्तौ वै परात्परौ ॥११७॥
अयं स शेषो निगमत्रयात्मा विश्वंभरा येन धृता निजांशतः ।
सहस्रदीव्यत्फणमण्डलस्फुरन् महामणिद्योतविभासिताकृतिः ॥११८॥
त्वं रामचन्द्रः कमलाकलत्रः साकेतवासी नवमेघवर्णः ।
पीताम्बरोल्लासिमनोज्ञविग्रहो धनुर्धरः कामपरार्द्धसुन्दरः ॥११९॥
आजन्मरमणीयानि चरित्राणि तवाच्युत ।
गायन्ति त्रिदिवे देवा विमानाग्रेषु संस्थिताः ॥१२०॥
रोमाञ्चितवपुष्मन्तः प्रमोदपरिपूरिताः ।
भक्तिप्रकर्षसंपन्ना जयरामेतिभाषिणः ॥१२१॥
भूभारहरणारम्भः कृत एव त्वया प्रभो ।
ताडका नाशिता यस्मात् सुबाहुश्च विनाशितः ॥१२२॥
एवं हरिष्यति भवान् रावणादीनपि प्रभो ।
इति विज्ञाय देवानां वर्द्धन्ते विपुला मुदः ॥१२३॥
इति स्तुतिमुदीर्यासावानिनाय निकेतनम् ।
उभौ तौ वीरशार्दूलौ श्रीमन्तौ रामलक्ष्मणौ ॥१२४॥

तयोर्दर्शनमात्रेण तत्रत्या प्रेतमण्डली ।
कृतार्थीभूय सगमात् स्वर्गं पुण्यवतां सुखम् ॥१२५॥
ततस्तौ पूजयामास पाद्यार्घ्यादिसपर्यया ।
कृतार्थं मन्यमानः स्वं वैवस्वत उदारधीः ॥१२६॥
अवसाने सपर्याया रामः स्मितमुखाम्बुजः ।
वैवस्वतमुवाचेदं मेघगम्भीरया गिरा ॥१२७॥

श्रीराम उवाच

ब्राह्मणानां शुभा गावो व्याघ्रेण खलु भक्षिताः ।
प्रत्यानेतुमहं ता वै संप्राप्तोऽस्मि तवालये ॥१२८॥

यम उवाच

अयोध्यावासिनो ये वै नरा गावः खगा मृगाः ।
न तेषामिह संप्राप्तिर्ममदूतैर्विधीयते ॥१२९॥
स्वर्गं गच्छन्ति भूतानि साकेतपुरवासतः ।
काकाःश्वापदचाण्डाला अधमाः पापयोनयः ॥१३०॥
सरयूवातसंस्पृष्टा मुच्यन्ते सर्वपातकैः ।
ब्रह्महत्यादिभिश्चापि किमुतान्यैर्जगत्पते ॥१३१॥
न ते चरणपाथोजपरागैः समलङ्कृते ।
देशे चरन्ति मद्दूता आनेतुं पापिनोऽपि हि ॥१३२॥
अयोध्या परितो राम योजनानां चतुष्टयम् ।
सुदर्शनं भवच्चक्रं भ्रमतीव हि दृश्यते ॥१३३॥
तस्यां नगर्यां न विशन्ति घोरा मदीयदूता न कलेश्च दोषाः ।
नान्ये तथा भूतगणा भयानका विनायका यक्षवैतालकाद्याः ॥१३४॥
अयोध्यायाः परितः पुण्यभूमिः प्रमोदनामा वनराजोऽस्ति यत्र ।
तद्देवता दुःसहवेत्रहस्ता सत्वान् प्रवेष्टुं न ददाति घोरान् ॥१३५॥
प्रमोदवनवातेन दूरादेवापसारिताः ।
न प्रवेशं लभन्ते वै विघ्नानां चापि कोटयः ॥१३६॥
भूतप्रेतपिशाचाद्या जृम्भका राक्षसादयः ।
कूष्माण्डवेतालगणा ये चान्ये त्रासका गणाः ॥१३७॥

डाकिनीपूतनाद्याश्च नोपसर्पन्ति तत्र वै ।
यत्रासाते धनुष्पाणी भवन्तौ रामलक्ष्मणौ ॥१३८॥
रामेति ध्वनिमात्रेण लक्ष्मणेति च नामतः ।
मम दूता कृतास्तत्र पलायनपरायणाः ॥१३९॥
सरयूपयसा पूता अयोध्यारजसाप्लुताः ।
पापिनोऽपि नराः स्वर्गं प्रयान्तीति न संशयः ॥१४०॥
निशम्य भगवान् राम इत्थं तद्यमभाषितम् ।
चेतसा चिन्तयामास क्व नु गावो गता इति ॥१४१॥
स गोलोके विनिश्चिन्त्य तासां खलु गवां स्थितिम् ।
लक्ष्मणं प्रेषयाम्रास स्वयमास यमालये ॥१४२॥
रामेणाज्ञप्त एवासौ लक्ष्मणः कृतलक्षणः ।
गोलोकं प्रययौ तूर्णं सुरभीकुलमण्डितम् ॥१४३॥
घटोध्नीभिः सौरभेयीवराभिर्गोभिर्व्याप्तं सिच्यमानं समन्तात् ।
वत्सप्रीतिप्रस्तुतैः सौरभाढ्यैः पीयूषवर्णैः शीतलैस्तत्पयोभिः॥१४४॥
आनन्दौघसमुल्लासिगोपगोपीजनाकुलम् ।
गवां हिंभारवैर्जुष्टं पूर्यमाणं च तर्णकैः ॥१४५॥
इतस्ततः कूर्दमानपीतवत्सकदम्बकम् ।
गोष्ठेषु सुविसर्पद्भिः प्रमत्तवृषभैर्वृतम् ॥१४६॥
ककुद्मतां बलीवर्दवराणां प्रकरैः सदा ।
पात्यमानतटप्रान्तवनभूमिविराजितम् ॥१४७॥
कलिन्दकन्यकावीचिसंगिमारुतसेवितम् ।
गोवर्धनगिरिप्रोद्यन्महाशृङ्गमनोहरम् ॥१४८॥
तत्र वृन्दावनं नाम समपश्यद्वनं च सः ।
राधावनं कृष्णवनं बलभद्रवनं तथा ॥१४९॥
व्यलोकत[1] व्रजभुवं मधुरां चात्र मध्यगाम् ।
वृन्दावनवृहद्वनप्रमुखैर्विपिनैर्वृतम् ॥१५०॥

---

१. व्यलोकयत्—अयो०, रीवाँ ।

हेमरत्नमयीं दिव्यां कुञ्जपुञ्जमनोरमाम् ।
श्रीमन्नन्दव्रजेन्द्रेण पाल्यमानां समन्ततः ॥१५१॥
श्रीयशोदानन्दपत्नीयशोगानपरायणैः ।
गोपालिकागणैर्जुष्टां पुण्यवातनिषेविताम् ॥१५२॥
दधिमन्थानघोषेण समन्ताच्च निनादिताम् ।
रोहिणीसुतसानन्दक्रीडाभाजनतां गताम् ॥१५३॥
तत्रापश्यदसौ रामं नीलमेघमनोहरम् ।
बलभद्रेण सहितं गोपालं सखिभिर्वृतम् ॥१५४॥
पालयन्तं नन्दधेनूर्वनमालामनोहरम् ।
कृष्णं कमलपत्राक्षं राधाप्रेमविघूर्णितम् ॥१५५॥
अनङ्गवाणव्यथितं गोपीप्रेमैकभाजनम् ।
गोपालिकासहस्रस्य दृक्कटाक्षैर्विराजितम् ॥१५६॥
वृन्दावनपरिसरे चारयन्तं गवां कुलम् ।
वेणुं क्वणन्तं खेलन्तं किशोरं केलिकोविदम् ॥१५७॥
तं दृष्ट्वा लक्ष्मणोऽत्यर्थं निजे हृदि विसिस्मये ।
अहो रामस्य माधुर्यं साक्षादाकलितं मया ॥१५८॥
अहो लोकस्य महिमा अहो अत्र सतां नृणाम् ।
सौभाग्यं च सुखं चैव प्रेम चातिशयोद्धुरम् ॥१५९॥
अहो अमुष्य[1] पुरुषोत्तमस्य रामस्यांशो यर्हि चापीह लोके ।
पश्यामि यस्यात्र कटाक्षपातैरुन्मत्तवद्भ्राति मनो वधूनाम् ॥१६०॥
अहो निसर्गो मधुरिम्ण एष यद् दृष्टमात्रो मदयन्नन्तरं मे ।
परार्द्धकन्दर्पविजैत्रमस्य माधुर्यसारं किमहं वर्णयामि ॥१६१॥
अहो अमीषां किमु भाग्यसिन्धोः समुद्गतः शारदपूर्णचन्द्रः ।
रामस्यासौ संप्रविभाति नित्यं किशोरमूर्तिर्मधुरापाङ्गवीक्ष्यः॥१६२॥

इति सचकितचेता वर्णयन् कीर्तिपुञ्जं
स्थगित इव बभूव प्रेमपीयूषपूर्णः ।

---

१. अमुष्मै—बड़ो० ।

अमुमलपत रामो दिव्यगोपालवेषः
किमपि ननु विधाय स्वागतादीन् विविक्ते ॥१६३॥
अपि ननु कुशली नस्तात आश्चर्यवृत्तो
दशरथ नृपमौलिः सौष्ठवोदार्यसिन्धुः ।
अपि च खलु जनन्या नाम कोशल्यया मे
समधिगतपुमर्थाः किन्नुलब्धाः श्रियस्ताः ॥१६४॥
सहि ननु वसुदेवो यादवानां वरेण्यः
किमपि जयति पत्नी तस्य सा देवकीर्ति ।
असुरबलसमूहैः पीड्यमानां विलोक्य
क्षितिमह मनयोर्वै द्वापरान्ते भवामि ॥१६५॥
कृतभरमधुनापि प्रोद्धतै रावणाद्यै-
र्जगदिदमवलोक्य ह्येतयोरेव वंशे ।
कृतमतिरवतीर्णो रामनामाभिराम-
श्चतसृभिरपि युक्तो मूर्तिभिः स्वाभिरुच्चैः ॥१६६॥
इत्यालपितमाकर्ण्य लक्ष्मणो भ्रातुर्ऋजितम् ।
उवाच वदतां श्रेष्ठो रूपमाधुर्यमोहितः ॥१६७॥

लक्ष्मण उवाच

कुशली रघुराजोऽसौ पिता दशरथस्तव ।
आप्तकामा च कौशल्या त्रैलोक्यश्रीभिरालये ॥१६८॥
त्वमेवाखिललीलाभिः क्रीडसे राम सुन्दर ।
अशेषपुरुषार्थानां परां सीमानमुद्वहन् ॥१६९॥
न ते व्यक्तिं विदन्त्यन्ये ये देवासुरमानुषाः ।
त्वमेव स्वात्मनात्मानं रमयन् राम खेलसि ॥१७०॥
भक्तानां करुणाहेतोर्दर्शयस्यात्मविग्रहम् ।
चिदानन्दमयं साक्षाद् ब्रह्मणोऽप्याश्रयं तु यत् ॥१७१॥
मोहयस्यात्मनो मायां वितत्य जगदीशितुः ।
यया मोहितचित्तानां दुर्लभा व्यक्तिरीदृशी ॥१७२॥
तव लीला रसानन्दमयी सर्वमनोहरा ।
वसुदेवालये वापि श्रीमद्दशरथालये ॥१७३॥

नन्दालये वा सुखितालये वा यशोदया वापि माङ्गल्यया वा ।
विराजसे लाल्यमानो नितान्तमजस्रकेलीरसमोदमग्नः ॥१७४॥

श्रूयतां मम विज्ञप्तिरतः परमरिन्दम ।
प्रेषितोऽहं मम भ्रात्रा रामेण पुरुषर्षभ ॥१७५॥
त्वं चात्र तादृशो देव रामस्यांशो विलोकितः ।
युवां वै युवयोस्तत्त्वं जानीथो नापरो जनः ॥१७६॥
स्वकार्यमेव भृत्येन साधनीयं विशेषतः ।
प्रभुकृत्यं प्रभुर्वेत्तु प्रभूणां सेवकोऽस्म्यहम् ॥१७७॥
स्वकार्यं साधयिष्यामि यदर्थं प्रेषितोऽस्म्यहम् ।
कश्चिद् गन्धर्ववर्यो वै मुनिशापविमोहितः ॥१७८॥
वैयाघ्रीं योनिमापद्य रामराज्ये द्विजन्मनाम् ।
गाश्च वै भक्षयामास रुरुदुस्ते ततो द्विजाः ॥१७९॥
रामस्य द्वारमागत्य ततश्चुक्रोध राघवः ।
निहतः स तु शार्दूलो महाबलपराक्रमः ॥१८०॥
रामेण बाणेनैकेन बहवो येन नाशिताः ।
राज्ञा संप्रेषिता वीराः कुर्वन्तोऽपि पराक्रमम् ॥१८१॥
मोचितः स च वैयाघ्र्या[1] योनेर्गन्धर्वपुङ्गवः ।
पश्यतो मे दिवं यातो दिव्यं यानमधिष्ठितः ॥१८२॥
ततः सहस्रशो गावो द्विजन्मभ्यः प्रतिश्रुताः ।
तासामेव गवामर्थे रामेणाक्लिष्टकर्मणा ॥१८३॥
ब्राह्मणानां गवामर्थे याचितो विनयानतः ।
यमः प्रोवाच भगवन्नात्र ब्राह्मणधेनवः ॥१८४॥
अयोध्यायां मृताञ्जन्तून् मम दूताः स्पृशन्ति न ।
क्षणं विचिन्त्य रामेण प्रेषितोऽहमिहागतः ॥१८५॥
त्वं प्रयच्छ शुभा धेनूर्ब्राह्मणानामिहागताः ।
श्रुत्वेत्थं भगवान् कृष्णो वचनं लक्ष्मणोदितम् ॥१८६॥

---

१. वै व्याघ्र°—रीवाँ ।

प्रत्युवाच रदोद्योतैर्द्योतयन् हरितो वने ।

श्रीकृष्ण उवाच

सत्यमत्रागता गावो नन्दराजस्य वै व्रजे ॥१८७॥
रामाज्ञातः पुनर्नेया न त्वितः प्रतिगच्छति ।
नरो वा किन्नरो वापि पशुर्वा विहगोऽपि वा ॥१८८॥
प्रबला रामचन्द्राज्ञा नयेमास्तेन लक्ष्मण ।
ततः सुसत्कृतस्तेन लक्ष्मणो नन्दसूनुना ॥१८९॥
विप्राणां गाः पुरस्कृत्य पुनरागाद् यमालयम् ।
यत्र प्रतीक्षमाणेन रामेण स्थीयते स्वयम् ॥१९०॥
मार्गे सुसंगतास्तस्य देवास्त्रिदिववासिनः ।
आनर्चुः पुष्पवर्षेण पाद्यार्घ्याचमनादिभिः ॥१९१॥
गायन्तो विपुलां कीर्तिं जय रामेति चोज्जगुः ।
अकर्तुमन्यथाकर्तुं क्षमते भगवान् प्रभुः ॥१९२॥
व्याघ्रेण भक्षिता गावो नीयन्ते भूतलं पुनः ।
रामाज्ञा प्रबला तस्मात् त्रैलोक्येऽपि न संशयः ॥१९३॥
इत्थं निगदतां स्वर्गे देवानां कीर्तिगायिनाम् ।
शृण्वन् सुविपुलं घोषं लक्ष्मणः पुनराययौ ॥१९४॥
यमस्य नगरी यत्र रामचन्द्रः प्रतिष्ठितः ।
आगतं लक्ष्मणं वीक्ष्य रामः प्रीतमना अभूत् ॥१९५॥
ततस्तौ यममामन्त्र्य पूजितौ तेन सत्कृतौ ।
दिव्यं रथं समारुह्य पुरस्कृत्य गवांकुलम् ॥१९६॥
संस्तुतौ जयशब्देन देवैराकाशसंस्थितैः ।
साकेतनगरीं रम्यां तत्क्षणे समलङ्कृताम् ॥१९७॥
कुतूहलसुसंपन्नैराधावद्भिरितस्ततः ।
नरनारीगणैः कीर्णां चित्रध्वजविराजिताम् ॥१९८॥
नादितां ब्रह्मघोषेण दिव्यैर्धूपैः सुधूपिताम् ।
आनन्दभरसंपन्नां सिच्यमानामितस्ततः ॥१९९॥

सुगन्धितोयसंदोहैर्वैकुण्ठादपि शोभिताम्[1] ।
भूषिताट्टापणगृहां समलङ्कृतगोपुराम् ॥२००॥
नादितां कीर्तिघोषेण सूतमागधवन्दिभिः ।
प्रसन्नहृदयैर्लोकैराकीर्णां भूरिमङ्गलाम् ॥२०१॥
गजदानद्रवोद्रेक[2]सिक्तराजपथाङ्गणाम् ।
नारीगणसमारब्धमङ्गलोद्गीतमञ्जुलाम् ॥२०२॥
समंताज्जयघोषेण पूर्यमाण[3]दिगन्तराम्[4] ।
नवीनोत्साहसंपन्नां साश्चर्यजनकाहलाम् ॥२०३॥
एवंविधां विविशतुर्वीरेन्द्रौ रामलक्ष्मणौ ।
ततो दशरथः प्रीतः पुत्रयोर्वीरवर्ययोः ॥२०४॥
पराक्रमेण महता त्रैलोक्याश्चर्यहेतुना ।
साश्चर्यं तौ समालिङ्ग्य पुत्रस्नेहपरिप्लुतः ॥२०५॥
आनन्दनिर्भरो भूत्वा तस्थौ स्तिमितलोचनः ।
निनायान्तःपुरे तौ च भ्रातरौ रामलक्ष्मणौ ॥२०६॥
मातरस्तौ समालिङ्ग्य कौशल्याद्याः समुत्सुकाः ।
अवापुः परमां प्रीतिं विस्मयं च विशेषतः ॥२०७॥
मृता गावः समानीता इतिवृत्तं परस्परम् ।
कथयन्त्योऽवरोधस्थाः स्त्रियः साश्चर्यमानसाः ॥२०८॥
जगदुस्तत्र रामस्य कीर्तिमेताममानुषीम् ।
अथ रामं निजं पुत्रं कौशल्या विश्वमङ्गलम् ॥२०९॥
नीराजयामास मुदा स्नेहव्याप्तमनास्तदा ।
मणिमाणिक्यरत्नानि मुक्ताहेमशतानि च ॥२१०॥
परमानन्दसंपन्ना पुत्रयोर्निरमज्छयत् ।
ततो रामः समाहूय ब्राह्मणान् दुःखपीडितान् ॥२११॥
ददौ तेभ्यो निजानीता धेनूर्व्याघ्रेण भक्षिताः ।
अबाधिता अक्षताश्च स्वप्नादिव समुत्थिताः ॥२१२॥

---

१. वैकुंठात्परामिव—बड़ो० । २. °द्रवझरी°—अयो०, मथु० रीवाँ ।
३. °माणा—रीवाँ, बड़ो० । ४. दिवंगतां—रीवाँ, दिगंबरां—अयो०, बड़ो० ।

रत्नौघैः समलङ्कृत्य दिव्यभूषाम्बरादिभिः
स्रग्गन्धपटवासाद्यैः परमानन्दनिर्वृताः ॥२१३॥
दृष्ट्वा द्विजवरा धेनूर्मुमुदुः परया मुदा ।
तुष्टुवुश्चैव वीरेन्द्रं रामचन्द्रं गुणाकरम् ॥२१४॥
परमीश्वरमेवामुं विनिश्चित्य विशेषतः ।

ब्राह्मणा ऊचुः

अहो अहो राघववर्य तावकं सुवीर्यमेतद्वचनाद्यगोचरम् ।
किं वर्णयामो वचसा जना वयं न यत्र वेदः किमपि प्रवर्तते ॥२१५॥
यशश्च ते राघवराजनन्दन स्वर्गापगापुण्यजलौघशीतलम् ।
नित्यं समुद्गाय जनास्त्रिलोकगाः स्वचित्ततापं शमयन्ति संप्रति ॥२१६॥
मान्धातृमुख्यास्तव वंशसंभवा राजान आजन्मसुपुण्यकीर्तयः ।
न त्वादृशः कोऽपि बभूव भूतले सुपुण्यनामा गदतामघापहः ॥२१७॥
कल्याणनामा जगतां मनोहरो माधुर्यसंदोहविभावितकृतिः ।
मन्दारकल्पद्रुमपारिजातवत्सुगन्धकीर्तिर्भुवने चिरञ्जय ॥२१८॥
जयाप्रमेयद्युतिधोरणीनिधे पुमर्थसाराखिलसद्गुणाश्रय ।
प्रमोदसंदोहदसुन्दराकृते श्रीराम राजीवदलायतेक्षण ॥२१९॥
त्वयि प्रसन्ने नरलोकभूषण स्फुटं जनानां न रुजो न च क्लमाः ।
पीयूषमाप्याययसि स्वकीर्तिभिस्त्रैलोक्यसंस्थाननिवासिनो जनान् ॥२२०॥
इहावतीर्णोऽसि परः स पूरुषः श्रीरामचन्द्रोऽनन्तगुणाकरः स्वयम् ।
रक्षोगणैर्भूरि निपीडितां भुवं पदाम्बुजाङ्कैः सततं प्रमोदयन् ॥२२१॥

इतिसंस्तुवतो विप्रान् लब्धमानान् विशेषतः ।
नत्वा प्रस्थापयामास बहुमानपुरःसरम् ॥२२२॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे पूर्वखण्डे द्विजगवानयनं नाम अष्टनवतितमोऽध्यायः ॥ ९८ ॥

नवनवतितमोऽध्यायः

ब्रह्मोवाच

दृष्ट्वा दशरथो राजा वीर्यं त्रिभुवनोत्तरम् ।
यशश्च रामचन्द्रस्य रहसीदमचिन्तयत् ॥ १ ॥

राजोवाच

अहो अयं देववरो मदालये समाविरासीद् द्विजदेवरक्षकः ।
आजन्मरम्याणि सुखावहानि च स्वयं चरित्राणि करोति यत् प्रभुः ॥ २ ॥
धनुर्धरः कामपरार्द्धसुन्दरः सरोजपाणिः प्रभुरेष वीक्षितः ।
रामस्तदा[1]तेन विनिश्चितः पुरा तथाह्यसौ सद्गुण[2]वानपि स्फुटः ॥ ३ ॥
अमुष्य ये पादसरोजयोस्तलं श्रयन्ति लोकाभयदानदक्षिणम् ।
न ते प्रपश्यन्ति कदापि दुर्भगं[3] विरञ्चिना भालतलेऽपि निर्मितम् ॥ ४ ॥
समर्थता सर्वगुणाढ्यतापि च त्रिलोकलोकोत्तरता च दृश्यते ।
दयालुता भक्तजनेषु च स्फुटा यदेष रूपं परमं व्यभासयत् ॥ ५ ॥
अमुष्य शश्वज्जनताशरण्ययोः पदाब्जयोर्यें शरणं व्रजन्ति न ।
त एव मूढाः स्वजनुर्वृथा दधुः सुधां समासाद्य विषं नु भुञ्जते ॥ ६ ॥
अयं किलात्मा ज्वर[4]मेनमुल्वणं भवाभिधं हन्तुमुदित्वरो भृशम् ।
य एनमेवं न विदन्ति दुर्भगास्त एव लोके ननु दैववञ्चिताः ॥ ७ ॥
अयं पुराभूदधुना च दृश्यते भविष्यतीशः पुनरेव विस्फुटम् ।
युगे युगे स्वां प्रकृतिं समाश्रितः स्वरूपमेष प्रकटीकरोति हि ॥ ८ ॥
विज्ञानमेतस्य हरत्यघं तमो मायाभिधं येन निबध्यते जनः ।
ब्रह्मेति चात्मेति च कीर्तितो गिरा स एष पूर्णः पुरुषः सनातनः ॥ ९ ॥
गुणैः स्वलिङ्गैरयमुत्प्रकाशते नचैनमज्ञाः कलयन्ति दुर्भगाः ।
निजात्मरूपेण लसन्तमीश्वरं कृपासमुद्रं क्षणतुष्टमद्भुतम् ॥१०॥

---

१. रामचन्द्रः—अयो०, मथु०, बडो० । २. तद्गुण°—मथु०, बडो० ।
३. दुर्भगां—अयो०, रीवाँ । ४. परमेन°—रीवाँ ।

अहो अमुष्यैव निजेच्छया जनो भवान्तरे संसरतीति निश्चयः ।
स्वभोगलीलाकरणे स्फुरत्कृतेः समुद्धृतोऽनेन च यः स मुच्यते ॥११॥
अचिन्त्यशक्तिर्भगवान् यदीश्वरः कथं स आत्मीयतया निबध्यते ।
तथापि भक्तैर्मनसैकगोचरो विधीयते त्यक्तभवाखिलैषणैः ॥१२॥
सुतः पतिर्बन्धुरथ प्रभुः सुहृत् सखेति नानाधिषणैः समाश्रितः ।
अयं परब्रह्मतया विनिश्चितः प्रभूतभूयोगुणरत्नवारिधिः ॥१३॥
विचित्रवीर्यस्य विचित्रकीर्तिता निधेर्विचित्राखिलसद्गुणाम्बुधेः ।
अमुष्य साक्षाद्भगवत्तयानिशं विराजमानस्य न किं किमद्भुतम् ॥१४॥
महोग्रतेजा महनीयसद्गुणो महामहैश्वर्यविभावितकृतिः ।
अक्लिष्टकर्मा भगवान् कृपैकभूरभूतपूर्वोद्धिनिधिर्विभात्यसौ ॥१५॥
अनन्तकीर्तिर्भगवाननन्तभूरनन्तवाह्वङ्घ्रिमुखोरुनासिकः ।
अनन्तकर्मा स्वगुणैरनन्तकृदनन्तनामा सततं जयत्यसौ ॥१६॥
कल्याणनामाकृतिरेष राघवः स्वभावतः सर्वजगन्मनोहरः ।
पवित्रकीर्तिर्विततागमो गुणैस्तथाप्यसौ वाङ्मनसाद्यगोचरः ॥१७॥
अमुष्य कर्माणि गुणांश्च वेदितुं तथैव संख्यातुमशक्तिरस्म्यहम् ।
तथापि किंचिद्धिषणा समुत्सुका समस्तहृत्कर्णरसायनत्वतः ॥१८॥
नितान्तमेनं समुपासते बुधाः परार्द्धनामाकृतिवीर्यवत्तया ।
त एव सिद्ध्यन्ति यथा सुरद्रुमाः स्वयं परेषां च समाश्रयोचिताः ॥१९॥
केचिन्निजात्मार्पणभक्तिभागिनो भवन्ति सिद्धाखिलकर्मसंविदः ।
त एव लीलारसमग्नमानसा भवन्ति भूयस्तमसौख्यभाजनाः ॥२०॥
परे स्वरूपात्मतया विभावितुं विभुं परब्रह्मतया गुणातिगम् ।
प्रपद्य नित्यं निजलाभतृप्तये महामहैश्वर्यममुं ममात्मजम् ॥२१॥
प्रायो न वेदा अपि शक्तिधारिणः प्रभोरमुष्य प्रभुतानिरूपणे ।
अतः समुच्चारितनेतिनेतिवागशक्तयोऽमी विरमन्ति[1] मूर्द्धनि ॥२२॥
असौ त्रिवेदीशिरसानिरूपितो महेशिता पूर्णगुणः परः पुमान् ।
गुणान् वितत्यापिच संस्थितो न तै[2]र्गुणैरसङ्गात्मतया प्रसज्जते[3] ॥२३॥

---

१. °शक्तयः श्री वीरगति—रीवाँ । °गीर्वित्माति—अयो० । "अमीवादाः, किंभूताः सम्यक् उच्चारिता नेतिनेतीति वाक् तया अशक्तिः असामर्थ्यं येषांते" टि०—मधु० । २. स तैः—रीवाँ ३. न सज्जते—रीवाँ ।

कुतूहलाविष्टतया जगज्जनाः भवन्ति वीर्यैश्चकिता इव प्रभोः ।
न तु स्वरूपं कलयन्ति तत्त्वतो मुहुस्त्रिवेदीशिरसा निरूपितम् ॥२४॥
तथाप्यसावज्ञजनोद्धृतिक्षमः स्वरूपसंसर्गगुणेन भूयसा ।
अयोमणिस्पर्शवशात् सुवर्णतां दधाति नो वेद यशो न निन्दनम् ॥२५॥

इति रहसि नरेन्द्रश्चिन्तयन् युक्तिपूर्वै-
रनुभवसमुपेतैस्तत्त्ववद्भिर्वचोभिः ।
किमपि मनसि तूष्णीमास यावत् स ताव-
न्मुनिजनसुदुरापां योगनिद्रामवाप ॥२६॥

यथा सुषुप्तौ किल सत्त्व[1]वृत्तिः साकं मनः क्वापि विलीयते भृशम् ।
तथा विलिल्येऽस्य मनो महत्यदःसमानरूपां प्रकृतिं समाश्रितः ॥२७॥

अथासौ भिन्नरूपेण ददर्श प्रकृतिं पराम् ।
साधारणीभूतगुणां सर्वतत्त्वां गुणेश्वरीम् ॥२८॥
यथान्तरिक्षे पवनः प्रवाति च न वाति च ।
समुद्भूतामनुद्भूतो तथा प्रकृतिमात्मनि ॥२९॥
प्रकृतिं समतीत्याथ स्वगुणैरेव संगतः ।
तस्थौ पुरुषरूपेण साक्षिमात्रेण संस्थितः ॥३०॥
अथ ब्रह्मणि संलीनः शुद्धेऽपहतपाप्मनि ।
अशोके विजिघत्सादिशून्ये पूर्णे परे पदे ॥३१॥

तदा क्षणं के गतोऽसौ व्यतिष्ठत्ततस्तस्यांते जजानाहमस्मि[2] ।
मुक्ताहन्तावृत्तिरस्मीति जज्ञौ त्यक्त्वास्मितां च स्वरूपावशेषः[3] ॥३२॥
महान्तमानन्दमवाप तत्पदं स्वरूपमेकं गुणशक्तिवर्जितम् ।
विकल्पहीनं जितकालसंगमं सुनिष्कलं निश्चलमात्ममात्रम् ॥३३॥
अपेतवर्णाश्रमसंविभागं गतापगाभेदमिवाम्बुराशिम् ।
अपेतभोगं निजमानन्दमात्रं परं पदं यद्धि वेदा वदन्ति ॥३४॥
संलीय तस्मिन् परमे पदेऽसौ तत्रस्थमोङ्कारमये विशुद्धे[4] ।
धाम्नि स्थितं पुरुषं संव्यचष्ट यदक्षरेति प्रवदन्ति धीराः ॥३५॥

---

१. सत्य°—अयो० । २ "अहंकारयुक्तं स्वस्वरूपं ज्ञातवान्" टि०—मधु० । ३. "मुक्ता अहंकारवृत्तिर्येन सः, अस्मीति अहंतायुक्तमात्मानं ज्ञातवान्, अस्मितां त्यक्त्वा स्वस्वरूपेण तस्थौ" टि०—मधु०, । ४. °ऽतिशुद्धे—अयो० ।

अथाक्षरे शुद्धमनाद्यनन्तमूर्तिं चिदानन्दघनस्वरूपम् ।
व्यचष्ट रामं नवमेघनीलं तडित्त्विषा सीतया संविभातम् ॥३६॥

यथास्वपुत्रभावेन पश्यति प्रत्यहं नृपः ।
तथात्र स्वामिभावेन ददर्श नृपसत्तमः ॥३७॥

संदर्शनानन्दमिहानुभूय प्रभोर्निवृत्तात्मजबुद्धिवृत्तिः ।
अथोदतिष्ठत् सहसा ततो यथा विधूय निद्रां पुरुषः सुषुप्तिगः ॥३८॥

अहो अहं चिदानन्दमये पूर्णे परे पदे ।
निमग्नं सहसा विश्वं विनिर्धूय शुचां पदम् ॥३९॥

अहो आनन्दमहिमा यत्स्वरूपैकगोचरः ।
तत्रापि परमानन्दं राममद्राक्षमद्भुतम् ॥४०॥

यदहं[1] चिन्तयामास स्वरूपं जानकीपतेः ।
तत्तथैवेति निर्णीतं विलोक्याक्षरमध्यगम् ॥४१॥

अधुना रामचन्द्रोऽसौ परब्रह्मैव निश्चितः ।
तदेनमीश्वरं साक्षाद् व्रजामि शरणं विभुम् ॥४२॥

निश्चिनोति स्वमनसा राजा दशरथः स्वयम् ।
एकान्तसंस्थितौ प्रागाच्छरणं रामलक्ष्मणौ ॥४३॥

राजोवाच

वशिष्ठो भगवान् योगी रघूणां नः परो गुरुः ।
यदब्रूत परं तत्त्वं युवयो रामलक्ष्मणौ ॥४४॥

तत्तथैवेति निर्णीतं परं धाम युवामिति ॥४५॥

श्रीरामरामनिखिलेशगुणाभिराम रामारमारमण रम्यतनो रसेन्द्र[2] ।
भोगीन्द्रमानसविलासक राजहंस ज्ञातोऽसि तत्त्वत इति स्फुटमानतोऽस्मि ।४६।
संकर्षणामितगुणाकरयोगिवेद्य श्रीलक्ष्मण प्रकृतिसुन्दर दिव्यरूप ।
जाने युवामनुभवेन यदस्य साक्षान्नित्यं प्रधानपुरुषेश्वरतां दधानौ ॥४७॥

प्रधानं पुरुषश्चेति विश्वकारणमुच्यते ।
तयोश्च कारणत्वेन युवां स्थः परमेश्वरौ ॥४८॥

---

१. यदहो—बड़ो० । २. रसीन्द्र—मथु०, बड़ो० ।

यद्भोग्यं तत्प्रधानं हि भोक्ता पुरुष ईदृशः ।
तयोरपीश्वरः साक्षाद् भवानेव न संशयः ॥४९॥
अवस्थाभेदतो यद्वदेको नानेव दृश्यते ।
तद्वद् भवान् कर्तृकर्मकरणादिस्वरूपभाक् ॥५०॥
त्वय्येतद् दृश्यते विश्वं त्वय्येव क्रियते विभो ।
त्वया व्याप्रियते भूयस्त्वत्त एव विभज्यते[1] ॥५१॥
त्वमेवास्य निमित्तं च तुभ्यं लीलारसात्मने ।
स्वरूपतोऽस्य संक्लृप्तिः कविभिः सुनिरूपिता ॥५२॥
प्रयोजकस्त्वं चास्यासि त्वय्येव प्राप्यते पुनः ।
समन्वयोऽस्य सर्वस्य त्वय्येवमुपपद्यते ॥५३॥
स्वात्मानं[2] विविधं सृष्ट्वा त्वमनुप्रविशस्यदः ।
ज्ञानक्रियाशक्तियुतं सर्वमेतद्बिभर्षि भोः ॥५४॥
यथास्ति वाणस्य न वेधशक्तिः सा तन्मोक्तुः पुरुषस्यैव दृष्टा ।
सूत्रात्मादीनां तथा शक्तयोऽपि तवैव भूमन् परकारणस्य ॥५५॥
सर्वज्ञ एकः खलु सर्वशक्तिस्त्वमेव सर्वानधितिष्ठसि प्रभो ।
अतः समारब्धविशिष्टकार्या न तु स्वतन्त्राः प्रभवन्त्य[3]चेतनाः ॥५६॥
असंहताः यदि भूतेन्द्रियौघा मनोगुणा निर्मितौ वै विराजः ।
नाशक्नुवंस्तर्हि विभो तवाज्ञाशक्त्यान्योऽन्यं चोदिताः संहतास्ते ॥५७॥
या वै चन्द्रमसः कान्तिः कौमुदीति निगद्यते ।
सा तवैव विनिर्दृष्टा सर्वह्लत्तापहारिणी ॥५८॥
पावकस्य च यत्तेजः समुद्रस्योदरे सतः ।
शोषयत्यम्भसां भारं तत्तवैव विनिश्चितम् ॥५९॥
आदित्यस्य प्रभा या वै सर्वोद्दीपनकारिणी ।
सा तवैव प्रभो राम पङ्कजोल्लासकारणम् ॥६०॥
चन्द्राग्निसूर्यनक्षत्रविद्युतां स्फुरणात्मिका ।
तवैव शक्तिरुदिता नान्यथेति विनिश्चयः ॥६१॥

---

१. वितन्यते—रीवाँ, अयो० । २. स्वात्मना—मधु०, बड़ो० । ३. प्रसभन्त्य° —रीवाँ ।

भूवार्यग्निमरुद्व्योमस्वस्मिन्नित्यं प्रतिष्ठिता ।
गन्धो रसस्तथा रूपं स्पर्शः शब्द इति श्रुतः ॥६२॥
आकाशदेशभेदेन यद्दिशामवकाशता ।
तत्त्वमेवासि नास्यां वै सर्वब्रह्माण्डसंस्थितिः ॥६३॥
अतद्व्यावृत्तिरूपेण यद्वदन्ति परागिरः ।
प्रतिषेधैकशेषाय तस्मै ते ब्रह्मणे नमः ॥६४॥
सच्चिदानन्दगुणकं सच्चिदानन्दविग्रहम् ।
विलक्षणं समस्तेभ्यस्तद्ब्रह्म परमं भवान् ॥६५॥
अविद्यादोषरहितमैश्वर्यादिविवर्जितम् ।
शुद्धचिन्मात्रसंलक्ष्यं तद् ब्रह्म परमं भवान् ॥६६॥
यस्माद् भूतानि जायन्ते प्रतितिष्ठन्ति यत्र च ।
यस्मिन्नेव विलीयन्ते विभूतिस्तव तत्पदम् ॥६७॥
यस्यैककृतिरेषास्ति सत्तामात्रेण संस्थितिः ।
तद् ब्रह्म विश्वोपादानं ततोऽपि च परं भवान् ॥६८॥
वेदान्तविज्ञानवन्तः सुनिश्चितपरार्थकाः[1] ।
संन्यासयोगसंशुद्धा यतयो यद्दिशन्ति च ॥६९॥
आनन्दानां च सर्वेषां श्रोतसामिव सागरः ।
यस्मिन्नेकपदे वेशस्तद् भवान् परमं पदम् ॥७०॥
विहाय निखिलं लोकमलोके[2] संव्यवस्थिताः ।
यदिच्छया यतिवरा वैराग्यं समुपाश्रिताः ॥७१॥
शब्दमात्रेण विज्ञाय स्वाराज्यपदमूर्जितम् ।
यच्छुद्धं ज्योतिषां ज्योतिरिहामुत्रार्थनिःस्पृहा ॥७२॥
छर्दितान्नसमं सर्वं[3] जगत् स्थावरजङ्गमम् ।
मन्यते यदिमं[4] नित्यं तत् केन तुलयामहे ॥७३॥
आप्तकामस्य पूर्णस्य निखिलं व्याप्य तिष्ठतः ।
यस्य लीलापि वै लोके न घटेत महात्मनः ॥७४॥

---

१. °तरार्थकाः—रीवाँ । २. मल्लोके—अयो० । ३. छर्दितानिव सर्वं च—रीवाँ । ४. मन्यन्ते यतिनो—मथु०, बड़ो० ।

स्वानन्दरसभोगाय कैवल्याय च सेविनाम् ।
घटते तत् परं ब्रह्म भवान् स्वानन्दभोगवान् ॥७५॥
त्वमेव चक्षुषश्चक्षुः श्रोत्रस्य श्रोत्रमुच्यते [से ?]।
असि स्थूलस्य सूक्ष्मस्य तत् त्वमेवाधिदैवतम् ॥७६॥

या चेन्द्रियाणां विषयप्रकाशिनीशक्तिस्तथा तदधिष्ठायिनोऽमराः[1] ।
ततोऽप्यधिष्ठानगता च शक्तिस्तथैव नित्याध्यवसायशक्तिः ॥७७॥
तथैव च प्रतिसंधानशक्तिर्यद् भूतानां कारणं तामसाख्यः ।
अहंकारो राजसश्चेन्द्रियाणां स सात्विकोऽप्याधिदैवाध्यात्मिकानाम् ॥७८॥
जीवानां वा संसृतेः कारणं यत्तत्सर्वं त्वं सर्वरूपेण भासि ।
विनाशशीलेषु च वस्तुषु त्वमन्ते स्वरूपं यदवशिष्यमाणम् ॥७९॥
कार्येषु यद्वद्घटकुण्डलादिस्फुटावशेषमृत्सुवर्णादिमात्रम् ।
तद्वद्विकारेष्वखिलेषु पश्चात् स्वरूपतो यदवशिष्यते तत्त्वम् ॥८०॥

गुणास्तत्परिणामाश्च ये वै स्युर्महदादयः ।
स्वरूपभूतयाचिन्त्यशक्त्या ते त्वयि योजिताः ॥८१॥
त्वयि तेषां हि सत्त्वेऽपि स्पर्शो नैवोपपद्यते ।
यतो जीवस्य संसारस्त्वदज्ञाननिबन्धनः ॥८२॥

सर्वे भावाः कार्यरूपा यदान्ते नियोजितास्त्वद्योगमायाबलेन ।
तदा न सन्त्येव विनाशशालिनस्त्वं चात्मसत्तां न दधासि तेषु ॥८३॥

आदौ मध्ये व्यवहारस्तु तेषां भवन्नपि स्वप्नदृष्टयेव सिद्धः ।
त्वत्सत्तातो नातिरिक्तां हि सत्तां संसाधयत्यनुशोच्योऽत एव ॥८४॥
अविद्वांसो निष्प्रपञ्चां गतिं ते सर्वात्मनामात्मनो व्यापकस्य ।
देहाभिमानेन कृतैः स्वकर्मभिर्भवन्ति जीवाः खलु संसारभाजः ॥८५॥
पटूनि संप्राप्य सदिन्द्रियाणि क्रियाज्ञानोभयगां चैव शक्तिम् ।
अहो जनो दैववशेन वञ्चितो न चिन्तयत्येष यतः स्वमर्थम् ॥८६॥
अहो अहंताममतानुबद्धो देहे तथैवानुगतेषु चैनम् ।
दुरत्ययं कालपाशं पतन्तं जानाति नैवायमतिप्रमत्तः ॥८७॥

---

१. शक्तिस्तदा तिष्ठति शायिनोमराः—रीवाँ । येऽमराः—अयो० ।

युवामशेषक्षितिभारहारकौ समस्तसाधूद्धृतिकार्यतत्परौ ।
इहावतीर्णौ मम सद्मनि स्फुटं मदात्मजौ चेति विम्डबनं मम ॥८८॥
तत्त्वा[1]मार्तजनावनाय विहितानेकाद्भुतक्रीडनं
सच्चिन्मात्रसुखाकृतिं लवणवत् स्वानन्दसंपद्धनम् ।
योगीन्द्राशयपद्मकोशमधुपं माहेन्द्ररत्नच्छविं
श्रीमन्तं पुरुषोत्तमं स्वशरणायोच्चैः शरण्यं भजे ॥८९॥
आदावेवाहमद्धा पुरुषवरवृतोऽस्मि त्वयानुग्रहेण
श्रीवत्साङ्कधनुःशरादिसहितं रत्नप्रभामण्डितम्[2] ।
क्वाप्यप्राप्तं नृचेतोनयनविषयतां भासयामास सूती-
गेहेऽस्मत्सुप्रसादं प्रकृतिसुभगतां संदधानो नितान्तम् ॥९०॥
तस्मै नमोऽद्य भवते विदधामि राम ज्ञात्वा परं स्वगुणलिङ्गगणैः पुमांसम् ।
स्नेहानुबद्धहृदयोऽपि सुतेति भावान्मध्ये प्रभूततरसुप्रणयाख्य पाशः ॥९१॥
यातं वयस्त्वयि परप्रणयेन राम त्वत्केलिवीक्षणसलालसमानसस्य ।
तेनाधुना भव भयार्तशरण्य शश्वन्मां पाहि नित्यशरणागतमादिदेव ॥९२॥
तिर्यक्त्वमञ्चितवतामपि[3] राक्षसत्वं नीचां पुलिन्दयवनश्वपचादियोनिम् ।
उद्धारकस्त्वमसिराम निजप्रभावात् कस्ते श्रमो मम मनोरथपूरणेन ॥९३॥
जानामि दिव्यज्ञानेन त्वद्दत्तेनैव राघव ।
नाधुनैवावतीर्णोऽसि मम गेहे जनार्दन ॥९४॥
प्रतिकल्पं प्रतित्रेतमेवमेव जगत्पते ।
ममालयेऽवतीर्य त्वं हंसि भूभारकारिणः ॥९५॥

ब्रह्मोवाच

श्रुत्वेत्थं रघुराजस्य पितुर्वाक्यं महार्थकम् ।
प्रजहास प्रभुः प्रीत्या रामो राजीवलोचनः ॥९६॥
मया महेशादि[4]मनोरथानामगोचरेण पितृभावे वृतोऽस्ति ।
ऐश्वर्यविज्ञानममुष्य नार्हं संकोचयत्येव च मामनेन ॥९७॥
आगत्य ब्रजमध्याच्च सुखितस्यालयादहम् ।
अनयोर्वर्द्धयामास शुद्धं प्रेम किमन्यथा ॥९८॥

---

१. तत्वा°—रीवाँ । २. श्रीवत्सांकं धनुर्वाणरत्नकिरीट कुंडलमद्दिव्यरूपं—मथु०, बड़ो० । ३. निष्कर्म संचितवतामपि—रीवाँ । ४. मायामयीशादि°—मथु०, बडो० ।

तथाप्यहो ब्राह्मणानां गवानयनलिङ्गतः ।
वसिष्ठादिमुनीनां च वचनात्प्रत्ययेन च ॥९९॥
ज्ञानांशः पुनरेतस्य प्राप्तोऽभ्युदयमुच्चकैः ।
इति संचिन्तयन् देवः प्रत्युवाच महोपतिम् ॥१००॥

श्रीराम उवाच

एतद्युक्तं वचो वः सहजविनयिनं मां स्तुतिव्याजमात्रात् ।
कृत्वा स्वस्थोपदेशास्पदमवनिपते यत्त्वयैवाभ्यधायि ।
ऐश्वर्यं वैभवं चाभिहितमसदृशं तद्यथास्मासु पुत्रे-
ष्वेषा भावानुकम्पा प्रकृतिरथ तथा सर्वजीवेषु युक्ता ॥१०१॥
एषोऽहं त्वत्तनूजः परपुरुषधिया भाववन्तो भवन्तः
सौमित्री केकयीजः सुविदितयशसश्चापि साकेतलोकाः ।
एवं सर्वेऽपि चैते विमलरघुकुले श्रैष्ठ्यभाजो विभाव्याः
श्रीमद्भिः सानुकम्पैः स्वपरमपरथा दुस्तरं निस्तरेत् कः ॥१०२॥
पुंसां नैसर्गिकीयं प्रकृतिरुदयते साधुभावान्वितानां
यत्सर्वं ब्रह्मभावात्मकपरधिषणाभावितं धारयन्ति ।
संसारान्तर्निमग्नानपि समुपदिशन्त्येवमात्मस्वरूपं
जीवान्निस्तारयन्ति प्रकृतिसकरुणाः कोमलान्तः स्वभावाः ॥१०३॥
किंवा यूयं समस्ता जगदिदमखिलं चैव साकेतवास्तु
स्थूलं सूक्ष्मं तथान्यच्चरमचरमपि स्वेन रूपेण यावत् ।
तावत्कृत्स्नं प्रसिद्धं तदहमिति विमर्शात्मकेनामलेन
ज्ञानेन ज्ञाततत्त्वाः परिकरमखिलं पश्यथ ब्रह्मरूपम् ॥१०४॥
विष्णुः शुद्धावबोध[1]प्रकृतिभृदमलज्योतिराकार एकः
पूर्णः सत्योऽप्यनन्तः स्वपरसमदृशि[2]र्निर्गुणो निर्विकारः ॥
आत्मा सर्वोत्तमोऽयं सुकृतगुणगणैः स्वात्मने सर्वदेहे-
ष्वित्थं नानेन[3] भाति त्रिभुवनविभवस्यैक आधारभूतः ॥१०५॥
आकाशो वायुरग्निर्जलमवनिरसौ तत्त्वसंघात उच्चै-
राविर्भावी तिरोभाव्यथ लघु विपुलैर्वस्तुभिर्भूरिभावः ॥

---

१. °वरोध°—मथु०, बड़ो० । २. रसपद—रीबाँ । ३. °देहो संतिष्ठन्नेव—रीवाँ ।

चिन्मात्रः सन् प्रतीतः कृतमतिभिरसावेकरूपोऽप्यनेको
नित्यो नित्यः स्वयंज्योतिरपिच विषयो निर्गुणः सद्गुणश्च ॥१०६॥

एवमुक्तः स रामेण स्वात्मौदासीन्यतत्त्वतः
विनष्टविषयानेकबुद्धिस्तूष्णीं बभूव ह ॥१०७॥
गोपयित्वा निजैश्वर्यं पुत्रस्नेहानुरक्षकः ।
तमेव भावं संपुष्णन् भगवांस्तमपोषयत् ॥१०८॥
वसिष्ठाद्युपदिष्टं तदैश्वर्यादि विदन्नपि ।
तथाभूतः प्रीतमना अभूत् स प्रेममानसः ॥१०९॥

विरोधिभावोपशमं विधाय विशुद्धिभावेन निजान् विजानन् ।
यान् भावयत्येवमनुग्रहेण कस्तेषु चिन्तालव आविरस्ति[1] ॥११०॥

प्रपञ्चेऽपि स्थितान् भक्तान् मोचयित्वेव सर्वथा ।
स्वरूपबलमात्रेण रामो रमणकोविदः ॥१११॥
अथ श्रीकौशल्या परमपुरुषाग्रचस्य जननी
विशुद्धा सा लक्ष्मीः सकलसुरसंवासवसतिः ।
प्रभोर्लीलाकौतूहलपरवशस्येहितकृते
तथा लीलाशक्त्या प्रणिहितमतिः किंचिदवदत् ॥११२॥
श्रीमन्तौ रामसौमित्री गुणलिङ्गैर्निवेदितौ ।
महानुभावौ विज्ञाय स्त्रीस्वभावाद् व्यजिज्ञपत ॥११३॥

श्रीरामचन्द्राप्रमितप्रभाव प्रभाविशेषाप्तविशेषबुद्धे ।
योगेश्वरस्वान्तविचिन्त्यरूप प्रतीत एवासि निजानुभावैः।११४॥

युवां ब्रह्मादीनामपि हृदयवाचामविषयौ
पुमांसौ तावाद्यौ निजप्रकृतिमात्रेहितधरौ ।
धराभूयोभारोद्धरणकरणार्थं[2] प्रकटितौ
जनः को जानीते किमपि ननु तत्त्वं च युवयोः ॥११५॥

ब्रह्मादयो दिविषदां प्रवरा मता ये सृष्टिस्थितिप्रलयकर्मविधानशक्ताः ॥
तेऽमी युवामखिलशक्तिभृतोर्भवाद्योरंशांशमात्रविभवा विलसन्ति लोके ११६

---

१. आविरास्ते—रीवाँ। २. °हरणार्थं—अयो०, मधु०, बड़ो०।

योऽयं सहस्रनयनाननपादबाहुरेकः पुमान् भुवनसंस्थितिमूलभूतः ।
अंशो[1]ऽस्त्यमुष्य ननु सा विततैव माया तस्या इमे सविभवास्तु गुणास्त्रयस्ते ।।

तेषां लेशेन जायन्ते विश्वोत्पत्त्यादयः पृथक् ।
पुरुषः सोऽपि युवयोरंशभूतः प्रतिष्ठितः ।।११८।।

गायन्ति नो किमपि कर्म वशिष्ठमुख्या ब्रह्मर्षयः सकलवेदविदां वरिष्ठाः ।
आदाय राम खलु यन्महतीं सपर्यामौपासनाग्निमुनयः पुरुषस्य लोकात्।११९।
एवंविधानि सुबहूनि[2] भवच्चरित्राण्युद्गापयन्ति भवतः पुरुषोत्तमत्वम्[3] ।
प्राप्तास्म्यहं तदरणं भवतः पदाब्जं संसारसागरमुदीक्ष्य दुरन्तपारम् ।।१२०।।
आनन्दमात्रमथ सर्वगुणावशेषं स्वात्मानमत्र च यदि[4] प्रकटं न कुर्याः[5] ।
तद्वेदगोद्विजपुरातनधर्ममार्गः सीदेत दीर्घमिह को ह्यवलम्बनं स्यात् ।।१२१।।

तव मूर्तिरसौ धर्मश्चतुष्पाच्छ्रुतिनिर्मितः ।
तस्य संरक्षणकृते भवान् प्रकटितो भुवि ।।१२२।।

येऽन्ये महीन्द्रादय ईशमानास्तद्वीर्यमप्रतिममद्भुतमेव मत्वा ।
आत्मानमुज्झितभरं सहसा विधाय प्राप्तास्त्वदङ्घ्रिकमलं शरणाय राम १२३

आनीता भवता राम मृता गावो द्विजन्मनाम् ।
अमानुषमिदं कर्म वीक्ष्य सर्वेऽपि विस्मिताः ।।१२४।।

ममापि कामः क्रियतां जगद्गुरो स्त्रीभावतोऽहं चपला नियोजये ।
यद् भ्रातरो मे निहता सुबाहुना तान् वीक्षितुं सोत्कलिकास्मि संप्रति।।१२५।।
तान् वैष्णवान् सुन्दररूपदर्शान्[6] शोचन्त्युदश्रु प्रतिमीलिताक्षी ।
मातामही ते महतीं शुचं गता नाद्यापि शान्तिं समुपैति चित्ते ।।१२६।।
तस्याः कृतेऽहमपि शोकजुषो जनन्याः शोकातुरास्मि भृशमुद्विजतीव चित्ते ।
तद्राम शक्तिहरणे भवति स्थितेऽपि शोकः कथं नु भवतीति न वेद्मि[7] किंचित् ।।

---

१. अङ्गो—मथु०, बड़ो० । २. सुर वन्द्य—अयो० । ३. °षोत्तमस्य—अयो० । ४. यदि च—अयो० । ५. कुर्यात्—मथु, बडो० । ६. °दर्शीन्—रीवाँ । ७. बोध—रीवाँ ।

ब्रह्मोवाच

मातुर्वचः समधिगम्य शुचातुरायाः[1] तान् स्वःस्थमातुलवरान् पुरुषप्रवीरान् ।
श्रुत्वा सुबाहुसमरे निधनं समागतानानेतुमात्तकरुणः स मतिं चकार ॥१२८॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे पूर्वखण्डे
षड्गुणाख्याने नवनवतितमोऽध्यायः ॥९९॥

●

शततमोऽध्यायः

ब्रह्मोवाच

ततः सलक्ष्मणो रामः सुबाहुसमरे हतान् ।
मातुलान् पुरुषश्रेष्ठानानेतुमुपचक्रमे ॥ १ ॥
रथं समास्थितो दिव्यं मणिकांचनभूषितम् ।
चराचराप्रतिहतं धनुष्पाणिः सलक्ष्मणः ॥ २ ॥
भूर्भुवस्वर्महश्चैव जनलोकमतीत्य सः ।
तपोलोकं गतो वीरो वीराणां यत्र संस्थितिः ॥ ३ ॥
दिव्यं रथं समधिरुह्य शुभासनस्थस्तूणीरबन्धनमनोज्ञकटिप्रदेशः ।
दिव्यं धनुस्ततगुणं दधदंसदेशे युक्तोऽनुजेन गगने ददृशे सुरौघैः ॥ ४ ॥
तैस्तैः स्तुतो दिविषदां प्रवरैरधीशैः शक्रादिभिः कृतमहार्हणदर्शनीयः ।
लोकान् जनेन षडतीत्य रघुप्रवीरः प्राप्तस्ततस्तपसि शूरसतीभिराढ्ये ॥५॥
यद्ऊर्ध्वरेतसां स्थानं मुनीनां युक्तचेतसाम् ।
शूराणां च सतीनां च पातिव्रत्यजुषां गृहम् ॥ ६ ॥
दिव्यैर्विमानप्रवरैर्मण्ड्यमानं[2] समंततः ।
दीप्यमानं विशेषेण देवानां तनुरश्मिभिः ॥ ७ ॥
हेमाङ्गणसमाबद्धमणिश्रेणिमनोहरम् ।
पारिजातद्रुमारामपरिवीतपुरालयम् ॥ ८ ॥
विध्वस्ततिमिरस्तोममहालोकमहोदयम् ।
शूरतापससाध्वीभिः सेव्यमानं मुदावहम् ॥ ९ ॥

---

१. भृशातुरायाः—अयो० । २. मंज्यमानं—रीवाँ ।

अनेकभोगसंपन्नं दिव्यस्त्रीगणसेवितम् ।
दिव्यरूपनटीलास्यतलनादनिनादितम् ॥१०॥
पाद[1]पूररवोद्घोषकारिणीभिः सुकान्तिभिः ।
युवतीभिः सुमत्ताभिः समन्ताच्चैव भूषितम् ॥११॥
व्याकोषबहुलाम्भोजकाननैर्गुंज्जितालिभिः ।
सुशीतलमरुद्धूतपरागैर्मण्डितोदकम् ॥१२॥
रत्नबद्धमहावापीराजहंसकुलक्वणैः ।
कादम्बकुलनादैश्च संनादितदिगन्तरम् ॥१३॥
क्वचिद्वसन्तसंफुल्लमल्लीवल्लीमनोहरम् ।
विकसच्चारुचाम्पेयहेमयूथोवनावृतम् ॥१४॥
वासन्तीलतिकापुष्पसौरभाञ्चितकाननम् ।
रसालमञ्जरीवृन्दपरागसुपिशङ्गितम् ॥१५॥
मणिकुट्टिमसंक्रान्तप्रतिमैः कृतकेलिभिः ।
संकेतसद्मसु नरैर्नारीभिः कृतकौतुकम् ॥१६॥
सुगन्धशीतलमरुन्मन्दगत्या निषेवितम् ।
ईदृशं तत् तपो रामो लोकानां लोकमुत्तमम् ॥१७॥
विलोक्य रघुशार्दूलः परां मुदमवाप सः ।
मन्दाकिनीमहास्रोतःस्नानेन विगतश्रमः ॥१८॥
तत्रत्यैर्मुनिभिर्दिव्यरूपदर्शनविस्मितैः ।
दूरादेव समुद्वीक्ष्य सादरं सुसमर्चितः ॥१९॥
तपोलोकाधिपतिना संप्राप्तौ रामलक्ष्मणौ ।
श्रुत्वा प्रत्युद्यतं[2] भूयो वरिवस्याभिरादरात् ॥२०॥
गृहीतौ विनयाक्रान्तमानसेन सुदूरतः ।
संपूजितौ संस्तुतौ तौ संस्पृष्टचरणाम्बुजौ ॥२१॥
उक्तौ सविनयं चैव सपर्यान्ते कृतादरौ ।
अहो युवां पावयथ कीर्त्या लोकांश्चतुर्दश ॥२२॥

---

१. पद—रीवाँ । २. प्रत्युद्यतौ—अयो० ।

अहो अत्यद्भुताः श्लोका युवयो रामलक्ष्मणौ ।
विध्वस्ततिमिरस्तोमाः शरत्सोमातिशीतलाः ॥२२॥
यौवराज्ये स्थितेनैव भवता राम सुन्दर ।
राजादशरथेनैव रञ्जितं भुवनत्रयम् ॥२४॥
स्वर्धुनीस्पर्शमात्रेण पुनाति भुवनत्रयम् ।
निजवर्णसमुच्छ्रायैर्दूरादेव भवद्यशः ॥२५॥
धरित्र्यामवतीर्णौ स्थः पुराणपुरुषौ युवाम् ।
असुराणां विनाशार्थं गोवेदद्विजद्रोहिणाम् ॥३६॥
निजदर्शनमात्रेण पश्यतां नयनव्रजे ।
सदानन्दसुधाधारां समंतादभिवर्षथः ॥२७॥
समौ[1] कमलपत्राक्षौ सुकुमारौ मनोहरौ ।
लोकोत्तरगुणारामौ भवन्तौ रामलक्ष्मणौ ॥२८॥
यैः सादरं दृशा दृष्टौ पुष्टौ संभाषितौ श्रुतौ ।
कीर्तितौ संस्मृतौ वापि ते धन्या धरणीतले ॥२९॥
लोकोत्तरगुणैर्लिङ्गैर्लोके वां पुरुषोत्तमौ ।
विदितौ स्थस्तथाप्येते मोहिता ईशमायया ॥३०॥
अद्यैव भवतो राम प्रपद्य चरणाम्बुजम् ।
मुक्ताः किं न भवन्त्येते बद्धाः स्वाज्ञानतो जनाः ॥३१॥

येषां भवान् भवपयोनिधिदुःखवीचीसंपर्कहारिचरणाम्बुरुहप्रसङ्गः ।
ते किं भवेयुरसकृज्जनिकष्टभाजो हंहो तवैव विषमा ननु कापि माया ॥३२॥
येनासुरास्त्रिभुवनामयरूपशीलाः संतारिता अतिखला अपि घोररूपाः ।
तस्य स्वभक्तजनतारणसाधुकृत्ये को नाम राम भवति श्रम आर्तबन्धो ॥३३॥
अन्यावतारचरितेषु न यद्विभाव्यं तत्कर्म राम कुरुषे ति विचित्रमेव ।
तेनेदमप्रतिममेव दधासि राम स्वं वैभवं त्रिभुवनाभयदानदक्ष ॥३४॥
ब्रह्मा भवस्त्रिनयनो भगवान् हयास्यस्त्वत्कीर्तिपुण्यगुणगानपवित्रगाथाः ।
नो चेत्तथा प्रकटयन्ति यथा जनानामानन्दनिर्भरवपुःपुलकादिभावाः ॥३५॥

---

१. श्यामौ—मथु०, बड़ो ।

ऐश्वर्यमेतदतुलं सुनिरीक्ष्य राम लोकाभिराम भवतो यदनन्यगामि ।
कस्यापि नेश्वरतया स्थितमद्यसाक्षादित्येक एव भुवनेषु महेश्वरस्त्वम् ॥३६॥
वीर्यं तथैतदतुलं तव रामचन्द्र संतापिते त्रिभुवने यदिहासुरोघैः ।
ब्रह्मादयो दिविषदः समुपेत्य साक्षादेकं भवन्तमसकृद्विनिवेदयन्ति ॥३७॥

नमस्त्रिभुवनाधीश विश्वमङ्गलविग्रह ।
आश्रितश्रुतिगोविप्रसंपालनदृढव्रत ॥३८॥
सत्यसंकल्प सत्यात्मन् सत्यपालनसुव्रत ।
सत्यस्यापि महासत्य सत्यदेव नमोस्तुते ॥३९॥
समस्तजगदाधार नित्यप्रमितगोचर ।
निस्तारितजगत्क्लेश रघुनाथ नमोस्तुते ॥४०॥
देवदेव दयासिन्धो दीनार्तिक्षपणोद्धर ।
धर्मपाल धनुष्पाणे राघवेन्द्र नमोनमः ॥४१॥
ततस्तौ पुरुषश्रेष्ठावुदारगुणभूषणौ ।
विश्वम्भरौ समापूज्य प्रोचुस्तापससत्तमाः ॥४२॥
यदूर्ध्वरेतसो भूत्वा वयं नियमतत्पराः ।
अकृष्महि[1] तपस्तीव्रं तस्येदं फलमुत्तमम् ॥४३॥
यद् युवां दर्शनं यातौ दृशां नः पुरुषोत्तमौ ।
अनर्घ्यगुणसंदोहभूषितौ जगतां पती ॥४२॥
करुणारसपाथोधी महोदारगुणाकरौ ।
सुपवित्रचरित्राढ्यौ युवां श्रीरामलक्ष्मणौ ॥४५॥
जगद्विलक्षणौ वीरौ विश्ववन्द्यपदाम्बुजौ ।
त्रैलोक्यगीतकल्याणगुणरत्नाकरौ युवाम् । ॥४६॥
प्रधानपुरुषौ साक्षाज्जगच्चेष्टाविधायकौ ।
स्वतन्त्रेच्छौ युवां नित्यं कुरुथो विश्वनिर्मितिम्[2] ॥४७॥
सर्वेश्वरौ सर्वपुमर्थरूपौ सर्वाधिकानन्तविशिष्टवीर्यौ ।
सर्वस्य रक्षाकरणे समर्थौ रघोः कुले वामवतीर्णवन्तौ ॥४८॥

---

१. प्रकृण्वहि—मधु०, बड़ो० । १. निर्मितं जगत्—रीवाँ ।

कलाभिरंशैर्विभवैः स्वकीयैर्विराजमानौ पुरुषौ भवन्तौ ।
सर्वाद्भुतौ सर्वविलक्षणश्रीनिकेतनौ राघववीरवर्यौ ॥४९॥

वीरा ऊचुः

रणेषु दत्त्वा शिर आगता इह स्वशूरताधर्मपरायणा वयम् ।
अद्याप्नवन्तो ननु लौकिकानां फलं युवां गोचरतां यदागतौ[1] ॥५०॥

वीरसेवितपादाब्जौ वीरेन्द्रौ वीरवत्तरौ ।
निजवीर्यजगद्रक्षाविधानकुशलौ युवाम् ॥५१॥
अद्य नः सफलो लोकः सफला लोकिता च नः ।
युवां यद्दर्शनं यातौ त्रैलोक्यसुभगाकृती ॥५२॥
विश्वरक्षापदेशेन क्रीडन्तौ विमलैर्गुणैः ।
विराजेते भवन्तौ वै सतां गेयगुणाकृती ॥५३॥

वैतानिका यमुदयं सुकृतैर्लभन्ते कष्टेन भूरिकृतकर्मकुलाकुलत्वात् ।
सोऽपि प्रभो त्वदनुसंधिमृतेदुरापो ध्वस्तं फलेन हि परानुगृहीतिहीनम्॥५४॥
तन्नाशवत्यपि फले नु वृथा यतन्ते त्वद्भावहीनमनसो मनुजा जगत्याम् ।
प्राज्ञाः परे तु फलतत्त्वविदस्त्वदर्थाः कृत्वा क्रियाः कलितपूर्णफला भवन्ति।५५।

पतिव्रता ऊचुः

वैश्वानरे निजवपूंषि हविर्विधाय प्राप्ताः स्म वीरवरलोकमिमं प्रियैः स्वैः ।
सत्यस्य तस्य फलमद्य निरूढमेतद् यद्रामचन्द्र भवतो दृशिमाप्नवत्यः ॥५६॥
गोप्यः प्रमोदवनवासजुषो निपीय यत्ते सुखं कमलसारभृतं कृतार्थाः ।
नेत्रैस्तदद्य सुनिरीक्षितमस्मदीयैः किं स्यादितोऽपि सुकृतं विबुधायुषां नः।५७।
कारुण्यसागर न यर्हि नरोत्तमेन दृष्टास्त्वया कमलगर्व[2]मुषा दशा वः[3] ।
तद्वर्चथमेव ननु रूपमदभ्रसारं नागीनगोपदजुषामसुरीसुरीणाम् ॥५८॥
धन्ये दृशौ पुरुषवर्य[4] भवत्सुरूप[5]माधुर्यसारमकरन्दरसं पिबन्त्यौ ।
ग्राम्यस्त्रियोऽपि वनवासजुषश्च तस्या नान्ये सुरेन्द्रकमला[6]सुनिरीक्षिकेऽपि५९

---

१. तदा°—रीवाँ । २. °वर्ग०—अयो० । ३. दशार्थं—अयो०, दृशत्थं—रीवाँ ।
४. °धुर्य—मथु०, बडो० । ५. °स्वरूप—मथु०बड़ो० । ६. °मबला°—मथु०, बडो० ।

धन्याः स्त्रियोऽपि सकलागमकर्महीनास्त्यक्ताधिकारविषया अपि सर्वधर्मैः ।
यास्ते मुखेन्दुममृताकरमच्छरूपं पश्यन्ति राम नयनैः कमलाधिसारैः[1] ॥६०॥
लावण्यमेतदधिकं किमु वर्णनीयं जानन्ति ता वनचरीदृश आत्तमानाः ।
या नित्यमेव कलयन्ति गवेन्द्रगेहे केऽपि कैतवगुणेन कृतानुषङ्गाः ॥६१॥
त्यक्त्वा कुलव्रतसमुद्रमनन्तपारं हित्वा त्रपानिवहपाश[2] सुपर्वजातम्[3] ।
यास्त्वां प्रपद्य विहिताखिलकर्मबन्धनाशा भजन्ति किमु ताः किल वर्णनीयाः॥
त्यक्त्वा[4] सुदुस्त्यजकुलाभिमतिं कृताशास्त्वद्वक्त्रचन्द्रपरमामृतपानमात्रे ।
ता एव गोपसुदृशो विधिशर्वमुख्यैर्देवैर्दुरापमधियान्ति तवाङ्गसंगम् ॥६३॥
एतावदेव सुधियां सुविचारणीयं किं नित्यमस्ति किमनित्यमिय[5]त्रिलोके ।
निश्चित्य तच्च परिशेषदृशा त्वयीश कार्या रतिर्न पुनरेति ततो विनाशम्।६४।
नित्यं सुखं जनकजानयनाभिराम यद्रामचन्द्र भवतैव भवेद्वितीर्णम् ।
यत्तु प्रसक्तपशुपुत्रधनादिभिःस्यात् तत्कालगीर्णमिति कस्य भवेत् प्रतीतिः ६५
रामेति नाम भवतो भवतापहन्तृ ये वै[6] गृणन्ति सकलाभयदानदक्षम् ।
ते कालवेगजरठीकृततुच्छसारं दुःखाकरं भवमुदस्य सुखं लभन्ते ॥६६॥
को नाम विद्वदुचितां धिषणां दधानो नित्यार्तिदे पशुसुतादिभवेऽनुषज्जेत् ।
हित्वा विषादहरणं तरणं शुचाब्धे[7] स्त्वत्पादपद्मयुगलं दिविषन्निषेव्यम्[8]।६७।
एकस्त्वमस्य भुवनस्य करोषि संस्थाः सृष्ट्यादिभिर्जनविलक्षणवीर्यराशिः ।
कोऽन्यः पुनः कमलनाभ भवेद्भवत्तः प्राप्तापदः प्रतियुगं प्रतिकर्तुमीशः।६८।
तस्मै नमोऽद्य भवते पुरुषोत्तमाय कुर्मः पुराणमुनिगीतमहागुणाय ।
दीनार्तिवृन्दहरणोद्धुरकार्मुकाय रामाय नैम्यकुलचन्द्रिकयान्विताय ॥६९॥
अस्माकमेष खलु सत्त्वफलप्रकर्षो लोकस्तपाख्य उदिताखिलसौख्यसंघः ।
सोऽप्यद्य तुच्छफलवद्विदितौ नृवीर त्वद्विग्रहामृतमृतेत्वदनुग्रहाप्यम्[9] ॥७०॥

इत्येवं संस्तुतो रामस्तैस्तैस्तल्लोकवासिभिः ।
उवाच सर्वान् सुप्रीतःस्मयमानोऽनया गिरा ॥७१॥

एतावद्वो लोकसंख्या किलाभूदतःपरं परिमुच्यध्वमस्मात् ।
भवाभिधाद्दीर्घदीर्घान्महाब्धेर्मया यूयं तारिताः सर्व एते ॥७२॥

---

१. कमलापसारैः - रीवाँ । २ तपोनिवह माशु—रीवाँ । ३. °जालम्—अयो० । ४. धूत्वा—रीवाँ । ५. °मयं—अयो० । ६. एवं—रीवाँ । ७. सुधाब्धेः—रीवाँ । ८. निमेषम्—अयो० । ९. °ग्रहास्य—रीवाँ । "सोऽपि तपोलोकोऽपि तवविग्रहं विना तुच्छो दृष्टः, किंभूतं त्वद्विग्रहं तवानुग्रहेणैव प्राप्यम्" दि०—मधु० ।

न प्रमाणं साधनं वा युष्माकं समपेक्षते ।
मदनुग्रहमात्रेण मोचिता भववारिधेः ॥७३॥
ब्रह्माक्षय्यसुखं धीराः समश्नुत मदाज्ञया ।
नित्यानन्दमयं लोकं न यस्मात् पुनरागमः ॥७४॥

अथाब्रवीत् पुरुषवरो मृदुस्मितैः प्रमोदयन् मधुरसुधानुबन्धिभिः ।
तथाभिधाद्भुततमलोकनायकं कृतार्हणः[1] किमपि स तेन सत्कृतः ॥७५॥

श्रीराम उवाच

तपलोकाधिप भवल्लोके नो मातुलोत्तमाः ।
इमे समासते एवैतान्नयामोऽधुना वयम् ॥७६॥
अयोध्यानगरी राज्ञा राघवेन्द्रेण पालिता ।
यत्रास्माकं संवसतिः सर्वसौख्यप्रदायिनी ॥७७॥

ततः स दिव्ये सदने विराजितान् दिव्योपभोगैः कलितप्रमोदान् ।
तपस्विलोकाधिपदर्शितांस्तान् ददर्श रामो निजमातुलोत्तमान् ॥७८॥
ये वै पुरा पद्मभुवः सभायां सामानि गायन्तमुदग्ररोषम् ।
सुमन्तुना संकलहायमानं तपस्विनं मुनिमत्रेस्तनूजम् ॥७९॥
जहसुः साध्यनामानः केचिद् देवगणास्तदा ।
शप्तास्तेनैव मुनिना मानुषीं योनिमागताः ॥८०॥
ते वीरकर्मणा भूयस्तपोलोकनिवासिनः ।
कौशल्याया भ्रातरस्ते दृष्टा रामेण सादरम् ॥८१॥
अभिवाद्य ततस्तांस्तु सानुजो मातुलान् निजान् ।
लोकाधिपमुपामन्त्र्य स्वां जगाम स तैः सह ॥८२॥
अयोध्यानामनगरीं वसुधामण्डनायतीम्[2] ।
पुरो मातामहीमात्रोर्मातुलांस्तान् न्यवेदयत् ॥८३॥
अथ मातामही तस्य दृष्टवा पुत्रांस्तुतोष सा ।
भगिनी चैव तान् भ्रातॄंश्चिरदृष्टान् यथागतान् ॥८४॥

---

१. क्षतार्दनः—अयो० । २. °मण्डला°—रीवाँ ।

ते मातरं समाश्लिष्य पुत्रस्नेहस्नुतान्तराम् ।
भगिनीं च महामान्यां तुतुषुः स्नेहसंयुताः ॥८५॥
ते पुनः पुनरालप्य मातरं विरहक्षताम् ।
भगिनीं च प्रमोदाक्ता बभूवुः स्निग्धमानसाः ॥८६॥
ते पश्यतां रामपुरीजनानामागच्छतां व्योम[1] पथादपश्यन् ।
विशुद्धरत्नैःखचितान् विमानान् हैमान् यथापूर्वमलङ्कृतान् स्वान् ॥८७॥
अथ ते तत्क्षणादेव नीलनीरदकान्तयः ।
पीताम्बरधरा भ्राजन् मकराकृतिकुण्डलाः ॥८८॥
विशुद्धेन किरीटेन भ्राजमानमुखत्विषः ।
शङ्खचक्रगदापद्मसमुपेतचतुर्भुजाः ॥८९॥
अवाप्य रामसारूप्यं दिव्यवेषविराजिताः ।
तान् विमानान् समारुह्य स्तुवन्तो जानकीशितुः ॥९०॥
विशदा कीर्तिगाथास्ताः श्रीरामभवनं गताः ।
रामचन्द्रप्रभावेण सकलाश्चर्यकारिणः ॥९१॥
य इदमनुशृणोति मातुलानां किमपि समुद्धरणं भवाम्बुराशेः ।
रघुवरचरितं जगत्पवित्रं स तु भवति प्रिय एव राघवस्य ॥९२॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे पूर्वखण्डे षड्गुणाख्याने मातुलोद्धारणंनाम शततमोऽध्यायः ॥१००॥

•

एकाधिकशततमो[2]ऽध्यायः

ब्रह्मोवाच

यौवराज्यस्थिते रामे गुणैर्नन्दयति प्रजाः ।
लक्ष्मणे च महावीरे वहति स्वगतां धुरम् ॥ १ ॥
राजा दशरथो न्यस्य पुत्रयोरखिलां पुरीम् ।
स्वयं जगाम तीर्थानां यात्रायै धर्मभृद्वरः ॥ २ ॥

---

१. व्योम्नि—रीवाँ । २. शताधिकैकतमो—रीवाँ, नास्ति—मथु० ।

राममाहूय नृपतिर्जगाद जगदीश्वरम् ।
लक्ष्मणं च सुसत्कृत्य तीर्थयात्रार्थमुद्यतः ॥ ३ ॥

राजोवाच

अहो रघुकुलश्लाघ्यौ चरित्रैर्गुणवत्तरौ ।
युवयोर्वीर्यधनयोर्भुजे न्यस्य धराधुरम् ॥ ४ ॥
तीर्थयात्राविधिं कर्तुमुद्यतोऽस्मि विशेषतः ।
निश्चिन्तोऽहं त्वया राम जगदारामहेतुना ॥ ५ ॥
पृथिव्यां सप्त द्वीपानि तेषु वर्षाणि भागशः ।
तेषु यावन्ति तीर्थानि तानि यास्यामि सादरम् ॥ ६ ॥
आरभ्य भारतं वर्षं यावन्ति खलु भूतले ।
वर्षाणीह प्रतिद्वीपं तेषु तीर्थानि भूरिशः ॥ ७ ॥
अहं तावत् सुसंगम्य स्नात्वा दत्वा च भक्तितः ।
ब्राह्मणेभ्यो गवां कोटीः स्वर्णशृङ्गीः पयस्विनीः ॥ ८ ॥
श्रियं सफलयिष्यामि त्वद्वीर्यबलवृंहिताम् ।
भूतानामनुकम्पाश्च कुर्वन्नन्नादिदानतः ॥ ९ ॥
तेषु तेषु सुतीर्थेषु विचरिष्यामि पुण्यकृत् ।
सपत्नीकः सानुगश्च इत्थं मे निश्चला मतिः ॥१०॥
इतिश्रुत्वा पितुर्वाक्यं प्रोवाच रघुनन्दनः ।
प्रीत्या संमोदयंश्चित्तं शृण्वतामत्युदारधीः ॥११॥

श्रीराम उवाच

सप्तद्वीपवतो पुण्या तत्र तीर्थानि भूरिशः ।
कानि कानि तु गम्यानि मानवैर्निजशक्तितः ॥१२॥
एतन्निर्धारय विभो वशिष्ठादिसुयोगिनाम् ।
वाक्येन राजशार्दूल यानि गम्यानि च प्रभो ॥१३॥
ततस्त्वं कुरु तीर्थानि यथागुणविशेषणम् ।
यथाद्रव्यविधानं च यथोपस्करमादरात् ॥१४॥
इतिश्रुत्वा रामचन्द्रस्य वाक्यं गुणान्वितं सत्समाख्यातधर्मम् ।
आकारयामास रघुप्रवीरो मुनीश्वरं स्वाश्रमात्तं वशिष्ठम् ॥१५॥

तं पूजयित्वा नृपतिः समागतं वशिष्ठनामानमशेषधर्मगम् ।
उवाच राजा धृतनम्रकन्धरो भक्तिप्रकर्षेण सुहृष्टरोमा ॥१६॥

राजोवाच

भगवन् मुनिशार्दूल सर्वशास्त्रसुकोविद ।
सर्वधर्मैकतत्त्वज्ञ किंचित् प्रष्टुमना अहम् ॥१७॥
पृथिव्यां यानि तीर्थानि पुण्यान्यायतनानि च ।
तानि मे वदतांश्रेष्ठ वद विस्तरशो मुने ॥१८॥
शास्त्रेषु यानि चोक्तानि त्वादृशैः परमार्थिभिः ।
कर्तव्यानि गृहस्थैर्यान्यद्भुतानि स्थलानि च ॥१९॥
क्षेत्राणि धर्मस्थानानि महापुण्यप्रदानि च ।
तानि मे मुनिशार्दूल वेद वेदप्रमाणतः ॥२०॥
सर्वशास्त्रपुराणेभ्यः प्रमितानि भवादृशैः ।
संचीय तानि सर्वाणि प्रदर्शय महामुने ॥२१॥
तीर्थयात्रां विधानेन करिष्याम्यहमादृतः ।
रामचन्द्रस्य वीर्येण संचिताः परमाः[1] श्रियः ॥२२॥
आनीयमानाः कोशेषु अर्जयिष्यामि तत्फलम् ।
धारणेन च देहस्य करिष्ये सुकृतोद्भवम् ॥२३॥
भवादृशानां मुनिपुङ्गवानां मुखाच्छ्रुतं शास्त्रनिगूढतत्वम् ।
यदर्जनीयं सुकृतं जनेन श्रोभिः पुमर्थेन सुसंचिताभिः ॥२४॥
पुण्येन पापेन च संभवोऽस्य देहस्य तेनानिशमर्जनीयम् ।
निरन्तरं सुकृतं येन न स्यात् पुनर्मातुः कुक्षिमध्ये निवासः ॥२५॥
दिने दिने क्षीयमाणस्य चास्य किमायुषः फलमेतेन लब्धम् ।
यन्नष्टजन्मोदरमात्रभृत्यानिमग्नः स्याद्विषयसुखेषु जन्तुः ॥२६॥
पापोद्भवस्य मलमात्रभृतोऽत्यनिष्टभूतस्य देहकृतकस्य[2] कृते क आर्थः[3] ।
पापैकहेतुमुदरंभरिसेव्यमानं भोगं करोति विषयस्य घृणैकपात्रम् ॥२७॥

---

१. परम°—रीवाँ ।२. देहस्य—अयो० । "कृतक·—कृत्रिमः" टि०—मथु०—बडो० । ३. "आर्थः विवेकी° टि०—मथु०, बडो० ।

तदहं वै पुरोधाय मुनिवर्यान् भवादृशान् ।
अटिष्यामि सुपुण्यानि तीर्थानि भुवि भूरिशः ॥२८॥
तानि मे गणयाशु त्वमुद्देशेन महामुने ।
आवश्यकानि यात्रायां विहितानि विशेषतः ॥२९॥
येषु स्नानेन दानेन यात्रया च विधानतः ।
नरो मुच्येत पापेभ्यस्तानि मह्यं विनिर्दिश ॥३०॥
श्रुत्वा राजर्षिवचनं प्राजापत्यो मुनीश्वरः ।
उवाच यात्राविषये तीर्थान्यावश्यकानि सः ॥३१॥

वशिष्ठ उवाच

शृणु राजेन्द्र वक्ष्यामि तीर्थानां विधिमुत्तमम् ।
येनाशु कृतमात्रेण चित्तशुद्धिर्भवेन्नृणाम् ॥३२॥
अदौ तवैव भविकावलिदायिनीयं दिव्या पुरी परममङ्गलभूरयोध्या ।
आस्ते[1] परा सकलकल्मषनाशितोया पुण्या विभाति सरयूः सरितां वरिष्ठा ३३
सर्वेषामेव तीर्थानां गङ्गा कोटिगुणा फलैः ।
गङ्गा कोटिगुणा नित्यं सरयूर्विश्वपावनी ॥३४॥
सरयूः कोटिगुणितफलायोध्यापुरी तले ।
ततः कोटिगुणं पुण्यं स्वर्गद्वारे विशेषतः ॥३५॥
पुरा यत्र स्वयं विष्णुर्भगवान् विश्वमङ्गलः ।
विधाय विविधं कर्म भूभारहरणोद्यतः ॥३६॥
गतो वैकुण्ठसदनं तदेतत् स्थानमुत्तमम् ।
सरयूतीर्थराशिभ्योऽप्यधिकं विश्वपावनम् ॥३७॥
इदानीं चापि भगवांस्त्वत्कुले जनितो हरिः ।
विश्वमङ्गलरूपोऽसौ रामः परमसुन्दरः ॥३८॥
अत्रैव नेष्यते सर्वान् साकेतपुरमानवान् ।
पशुकीटपतङ्गाद्यान् स्वीयं प्रमुद[2]मालयम् ॥३९॥
तेनेदमुत्तमं स्थानं तीर्थानां तीर्थमुत्तमम् ।
अत्र स्नानेन दानेन नरो मुच्येत पातकैः ॥४०॥

---

१. यस्यास्ते सकल°—मथु०, बडो० । २. प्रमोदमा°—मथु., बडो० ।

अत्र दद्यात् पितृभ्योऽपि श्राद्धमञ्जलिसंपुटम्[1] ।
गयाश्राद्धेन यत्पुण्यं तत्पुण्यं लभते नरः ॥४१॥
यं यं कामयते कामं तं तमाप्नोति नित्यशः ।
नानेन सदृशं तीर्थं त्रिषु लोकेषु विद्यते ॥४२॥
अयोध्यायां सप्तहरितीर्थान्याहुर्मनीषिणः ।
पूर्वं धर्महरिः प्रोक्तो धर्मो यत्र प्रतिष्ठितः ॥४३॥
चतुष्पादङ्गसहितो यथा सत्ययुगे सदा ।
कलिधर्मप्रवेशेन संततं नोपहन्यते[2] ॥४४॥
ततो गुप्तहरिः प्रोक्तो गुप्तो यत्र हरिः स्वयम् ।
अशेषशुभदो नृणां स्नानदानादिकारिणाम् ॥४५॥
ततो भरतपूर्वश्च हरिर्यत्रातिपावने ।
भरतो नाम राजा वः पूर्वजः सिद्धिमाप्तवान् ॥४६॥
भरतस्य यशः पुण्यं त्रैलोक्यस्यातिपावनम् ।
आख्यातं मुनिवर्यैस्तु विष्णोरिव महात्मनः ॥४७॥
अयं च भरतो नाम तव पुत्रस्तृतीयकः ।
तस्यापि नाम्ना भुवने ख्यातमेतद्भविष्यति ॥४८॥
अयं हि भगवान् साक्षात् यथा रामस्तथा गुणैः ।
कल्याणकर्मा भवने धर्मसेतुरुदीरितः ॥४९॥
ततो विष्णुहरिः प्रोक्तो विष्णुर्यत्रस्वयं स्थितः ।
समस्त दुःखहरणे भूतानामनुकम्पया ॥५०॥
विष्णुशर्मा द्विजः कश्चिदत्र दिव्येन कर्मणा ।
साक्षाल्लक्ष्मीपतेरुच्चैः हरेः सायुज्यमाप्तुवान् ॥५१॥
अथ बिल्वहरिः प्रोक्तो यत्र बिल्वफलाशनाः ।
मुनयो दीर्घतपसः परमां सिद्धिमाप्नुवत् ॥५२॥
तीर्थानामुत्तमं तीर्थमेतन्नाम्ना निगद्यते ।
स्नानदानविधानाद्यैः सर्वपापविनाशनम् ॥५३॥

---

१. °संयुतम्—मथु०, बड़ो० । २. नोपहृश्यते—मथु०, बड़ो० ।

ततश्चन्द्रहरिः प्रोक्तो महापातकनाशनः ।
यत्र संस्नानमात्रेण चन्द्रलोके महीयते ॥५४॥
ततश्चक्रहरिर्नाम तीर्थराजः सनातनः ।
चक्रं सुदर्शनं यत्र महापातकतारणम् ।
यत्रास्थि पतितं नृणां षण्मासाच्चक्रतां व्रजेत् ॥५५॥
एतेषु तीर्थवर्येषु स्नानदानादिमात्रतः ।
नरः शुभमवाप्नोति सद्यः प्रत्ययमेवच ॥५६॥
ब्रह्मकुण्डे नरःस्नात्वा सर्वपापैः प्रमुच्यते ।
काशी कोटिगुणं पुण्यं यत्रोत्तरवहा सरित् ॥५७॥
तत्र स्नानेन दानेन नरः कैवल्यमाप्नुयात् ।
ब्रह्मकुण्डजलस्पर्शात्कोलश्वानखरादयः ॥५८॥
काककङ्कपतङ्गाद्या अपि प्रापैकयोनयः ।
पशवः पक्षिणश्चापि नरा व्याघ्रादिजन्तवः ॥५९॥
ब्रह्महत्यादिपापौघैर्दूषिता अपि मानवाः ।
पापीयसीं तनुं त्यक्त्वा यान्ति नाम तथात्मताम् ॥६०॥
शङ्खचक्रगदापद्मचतुर्भुजविराजिताः ।
विमानवरमारुह्य यान्ति श्रीराममन्दिरम् ॥६१॥
अस्ति वै मगधे[1] देशे पुरं राजपुराभिधम् ।
तत्र कश्चिद् द्विजोऽधीत्य गुरोर्वेदमशेषतः ॥६२॥
तन्निन्दाचरणाज्जातो ब्राह्मणो ब्रह्मराक्षसः ।
पुरस्थमनुजान् नित्यमाविश्य कुरुतेऽसुखम् ॥६३॥
यमाविशति तस्यान्तं कुरुते ब्रह्मराक्षसः ।
बहवो नाशितास्तेन नरा नार्यश्च रक्षसा ॥६४॥
एवं प्रेतालयं जातं नगरं सर्वमेव तत् ।
विख्यातो राक्षसस्तत्र वसतीति श्रुतिर्जने ॥६५॥
कदाचिद् ब्राह्मणः कश्चिदागतस्तत्र पण्डितः ।
शास्त्रेण वाच्यमानेन श्रुतं तस्य मुखाज्जनैः ॥६६॥

---

१. मगध°—मथु०, बड़ो० ।

ब्रह्मकुण्डस्य माहात्म्यं सर्वपापविनाशनम् ।
ब्रह्मराक्षसवंशेभ्यो ब्राह्मणेभ्यो निदर्शितम् ॥६७॥

तच्छ्रुत्वा तस्य वंशस्थाः पण्डितस्य द्विजन्मनः ।
अन्तिकं समनुप्राप्ताः प्रोचुरेतद्द्विजन्मने ॥६८॥

अस्माकं पूर्वजो विद्वान् गुरुनिन्दोद्भवादघात् ।
ब्रह्मराक्षसतां ब्रह्मन् प्राप्तोऽद्यापीह तिष्ठति ॥६९॥

उद्वेजयति भूतानि समाविश्य भुनक्ति सः ।
यमाविशति तस्याशु निधनं खलु जायते ॥७०॥

कलङ्किता वयं सर्वे तेनैव ब्रह्मरक्षसा ।
कथं नु मुच्यते ब्रह्मन् पातकात् सोऽतिदारुणात् ॥७१॥

कृतानि भूरितीर्थानि गयाश्राद्धं तथा कृतम् ।
न मुच्यतेऽसौ पापीयान् ब्रह्मराक्षसयोनितः ॥७२॥

प्रेतालयं कृतं तेन नगरं सर्वमेव तु ।
इति श्रुत्वा द्विजो वाक्यं ब्राह्मणानिदमब्रवीत् ॥७३॥

अस्त्ययोध्यापुराभ्यासे ब्रह्मकुण्डमिति श्रुतम् ।
तीर्थानामुत्तमं तीर्थं त्रिषु लोकेषु विश्रुतम् ॥७४॥

तत्र गच्छत भो विप्रा भवनास्तस्य वंशजाः ।
तीर्थोदकैस्तर्पयित्वा श्राद्धं दत्त त्रिपिण्डकम् ॥७५॥

एकोद्दिष्टं तु प्रथमं विधाय विधिवद् द्विजाः ।
तेन पुण्यप्रभावेण प्रेतयोनेर्विमोक्ष्यते ॥७६॥

शीघ्रं कुरुत तत्कार्यं भवतां धर्म एव सः ।
किं तैः पुत्रादिभिर्जातैः यैः स्ववंश्या न मोचिताः ॥७७॥

द्विजोदीरितमाकर्ण्य ते तु चक्रुस्तथैव तत् ।
तथैव गुरुनिन्दोत्थपातकान्मुक्तिमीयिवान् ॥७८॥

सर्वैः प्रेतकुलैः सार्द्धं विमुक्तो भवबन्धनात् ।
जलाञ्जलिप्रदानेन ब्रह्मकुण्डस्य पावितः ॥७९॥

वैकुण्ठभवनं प्राप्तो विमुच्य ब्रह्मरक्षताम् ।
इति तद्विश्रुतं तीर्थं त्रैलोक्ये समभूत्तराम्[1] ॥८०॥
तदारभ्य ब्रह्मकुंण्डं सर्वोद्धारि[2] विराजते ।
गयाकोटिगुणं पुण्यं ब्रह्मकुण्डोऽत्र संभृतम्[3] ॥८१॥
किंवा तैर्बहुभिस्तीर्थैरेकमेव निषेव्यताम् ।
ब्रह्मकुण्डाभिधं तीर्थं महापापौघनाशनम् ॥८२॥
सूर्यकुण्डस्य माहात्म्यं किं वक्तव्यं जनाधिप ।
कुष्ठतोऽपि विमुच्यन्ते गलत्कुष्ठादिरोगतः ॥८३॥
सूर्यवारे नरः स्नात्वा सर्वपापैर्विमुच्यते ।
पुत्रार्थी लभते पुत्रं धनार्थी धनमाप्नुयात् ॥८४॥
कामार्थी लभते काम्यं यद्यन्मनसि वर्तते ।
उपरागे व्यतीपाते स्नानदानादिकं त्विह ॥८५॥
अक्षय्यफलतां याति नात्र कार्या विचारणा ।
सर्वपापविनिर्मुक्तः कुलकोटिं समुद्धरेत् ॥८६॥
एतद्दर्शनमात्रेण नरो मुच्येत पातकात् ।
सूर्योऽभिषेचितः सर्वैर्देवैरत्र पुरा नृपः ॥८७॥
ग्रहनक्षत्रताराणामधिराज्यमवाप सः ।
अक्षय्यं निहितं चात्र पुण्यं द्वादशमूर्तिना ॥८८॥
हत्यामोचनमत्रैव तीर्थमुत्तममस्ति वै ।
ऋणहत्या ब्रह्महत्या भ्रूणहत्यादिमोचनम् ॥८७॥
पिशाचमोचनं नाम तीर्थमत्रैव वर्तते ।
तस्य माहात्म्यमतुलं किमाख्येयं मया नृप ॥९०॥
गाधिसूनुर्महीपालो विश्वामित्रो महातपाः ।
ब्रह्मर्षितां परिप्राप्तुं महान्तं यत्नमाचरत् ॥९१॥
क्षात्रदेहं ततक्षासौ टङ्कैः खलु तपोमयैः ।
तपसात्यूर्जितबलो नवीनकरणोद्यतः ॥९२॥

---

१. °भूद्वरम्—मधु०, बडो० । २. सर्वोपरि—मधु०, बड़ो । ३. ब्रह्मकुण्डोत्थ-संवृतम्—अयो०, रीवाँ ।

राजर्षितां गतोऽप्येष स्पृहयामास भूतले ।
ब्रह्मर्षिपदकामेन तपस्तेपे सुदुश्चरम् ॥९३॥
नवीनसृष्टिसामर्थ्यं दृष्ट्वा ब्रह्मा भयं गतः ।
तमस्तौषीन्महाराज चतुर्भिर्वदनैर्विधिः ॥९४॥
स विधिं प्रार्थयामास ब्रह्मर्षिः स्यामहं विधे ।
सुदुःसाध्यप्रसादाय तस्मै विधिरुवाच ह ॥९५॥

ब्रह्मोवाच

अस्त्ययोध्या पुराभ्यासे तीर्थं मन्नामविश्रुतम् ।
तत्र गत्वा भवान् भक्त्या यज[न्]रामं सदा मखैः ॥९६॥
ब्रह्मकुण्डप्रभावेण ब्रह्मवर्चसमाप्स्यसि [ति] ।
ब्रह्मणो वचनं श्रुत्वा विश्वामित्रो महातपाः ॥९७॥
ब्रह्मकुण्डतटे राममयष्ट विधिवन्मखैः ।
पत्नीयाजैस्ततश्चेष्ट्वा विधिवन्मुनिसत्तमः ॥९८॥
यज्ञाश्वभृथमारेभे भूयसा चोत्सवेन सः ।
बभूवुः संगतास्तत्र मुनयो दीर्घदर्शनाः ॥९९॥
याज्ञवल्क्यो महायोगी शुको व्यासः पराशरः ।
भृगुरत्रिर्भरद्वाजो दुर्वासा पुलहोऽङ्गिराः ॥१००॥
ब्रह्मर्षिप्रवराः सर्वे देवर्षिप्रवरास्तथा ।
नारदाद्या मुनिश्रेष्ठा राजर्षिप्रवरास्तथा ॥१०१॥
तस्मिन्नवभृथे राजन्[1] संगताः सर्व एव ते ।
विधिवत् स्नापयामासुर्ब्राह्मणाः कर्मकोविदाः ॥१०२॥
ब्रह्मवर्चसकामं ते यजमानं महाव्रतम् ।
बभूवावभृथस्यान्ते व्योमवाक् तस्य कामदा ॥१०३॥
शृण्वतामेव सर्वेषामृषीणां दीर्घदर्शिनाम् ।
ब्रह्मर्षिरसि संवृत्तस्त्वमिदानीं महातपाः ॥१०४॥
विश्वामित्र मुनीशान ऋषयोऽपि ब्रुवन्तु वै ।
ततः सर्वे ऋषिवराः तथैवोचुः सुविस्मिताः ॥१०५॥

---

१. स्नातुं—अयो०, रीवाँ ।

ब्रह्मकुण्डप्रभावेण त्वमिदानीं महाव्रत ।
तपोनिधेमहातेजा ब्रह्मर्षिरसि सर्वदा ॥१०६॥
इतिप्रोक्तः प्रभावस्ते ब्रह्मकुण्डस्य भूरिशः ।
अयोध्यायां रामपुर्यां यत्रोत्तरवहा सरित् ॥१०८॥
उपरागादिषु सदा तत्र स्नानाद्विधानतः ।
लभते सुमहत्पुण्यं कुरुक्षेत्रशताधिकम् ॥१०८॥
ऊषरः[1] पुण्यपापानामयोध्यायामिदं त्रयम् ।
स्वर्गद्वारं ब्रह्मकुण्डं गुप्तगङ्गा च भूपते ॥१०९॥
तीर्थानि सुबहून्यत्र कोटितीर्थसमान्यपि ।
तीर्थत्रयमिदं पुण्यं सर्वेभ्योऽपि विशिष्यते ॥११०॥
दिवि भूमितले वापि स्थानत्रयमिदं नृप ।
दुर्लभं सर्वदा नृणां यथैतद् गदितं मम ॥१११॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे पूर्वखण्डे दशरथतीर्थ-यात्रायामेकाधिकशततमोऽध्यायः ॥१०१॥

●

द्व्यधिकशततमोऽध्यायः

याज्ञवल्क्योऽपि भगवांस्तपस्तेपे महातपाः ।
यस्य क्षेत्रस्य माहात्म्यं बहुधा सकलोत्तरम् ॥ १ ॥
आदित्यात् समुपश्रुत्य सूक्तानि च यजूंषि सः ।
यत्र संपाठयामास सशिष्यो बहुविस्तरम् ॥ २ ॥
ईजे च भगवान् नित्यं सौमैः संप्रतिवत्सरम् ।
तत्र तस्य तपस्थाने योगस्थाने सुसात्विके ॥ ३ ॥
यः स्नाति मनुजो गत्वा तस्य पुण्यं वदामि किम् ।
वाजपेयादिकोटीनां फलमाप्नोति तत्क्षणात् ॥ ४ ॥

---

१. आकरः—रीवाँ ।

वामदेवस्तथा दिव्यं तपश्चक्रे सुदुस्तरम् ।
तस्य क्षेत्रस्य माहात्म्यं मया वक्तुं न शक्यते ॥ ५ ॥
सोमयागशतं कृत्वा यत्फलं लभते नरः ।
तत्फलं समवाप्नोति तत्रसंस्नानमात्रतः ॥ ६ ॥
अहं वापि तपश्चर्यां विधाय विपुलां नृप ।
यत्रासादितवान् सिद्धिं तत्क्षेत्रं केन सेवितम् ॥ ७ ॥
वैवस्वतो नाम मनुर्भवतां कुलवर्तकः ।
स च तत्रैव विपुले तपस्तेपे मया सह ॥ ८ ॥
तस्य क्षेत्रस्य माहात्म्यं किं वदामि महीपते ।
स्नानाद्दानात् पिण्डदानाज्जपाद् ब्राह्मणभोजनात् ॥९॥
विपुलं पुण्यमाप्नोति तत्क्षणादेव मानवः ।
मनुना विपुलं पुण्यं तत्र संस्थापितं नृप ॥१०॥
अङ्गिराश्चैव भगवान् यत्रेजे बहुदक्षिणैः ।
यज्ञैः साक्षाद्विधिर्यत्र ब्रह्मासीद्विश्वसृड् विभुः ॥११॥
शक्रादयस्तथा देवास्तत्तत्कर्मणि संस्थिताः ।
इष्ट्वा च बहुभिर्यज्ञैश्चक्रुरवभृथोत्सवम् ॥१२॥
तत्पुण्यं सारवं क्षेत्रं तन्नाम्नैव प्रतिश्रुतम् ।
तत्र स्नानेन दानेन नरो याति परां गतिम् ॥१३॥
ऋष्यशृङ्गश्च भगवान् यत्र त्वत्पुत्रहेतवे ।
इयाज भूरियज्ञेन तच्च क्षेत्रं महाफलम् ॥१४॥
धनुस्तीर्थं तथा[1] दिव्यं यत्र रामेण शिक्षिता ।
धनुर्विद्या महाराज दैत्यदानवनाशिनी ॥१५॥
तत्तीर्थं यत्प्रदानादिविधानैर्लोकपावनम् ।
विश्वामित्रेण मुनिना यत्र रामाय साधवे ॥१६॥
शस्त्राण्यस्त्राणि च विभो शिक्षितानि महात्मनः ।
लक्ष्मणाय च शत्रुघ्ने [घ्न-] भरताय [भ्यां] च भूपते॥१७॥

---

१. महा°—अयो० ।

मखस्थाने[1] नरः स्नात्वा सर्वपापं व्यपोहति ।
अश्वमेधादि यागानां लभेद्पुण्यं दिनेदिने ॥१८॥
अतः परं प्रवक्ष्यामि वनानां वनमुत्तमम् ।
अयोध्यापरितो राजन् चतुर्विंशतियोजनम् ॥१९॥
प्रमोदवनमित्युक्तं सरयूतटसन्निधौ ।
तस्यास्तरङ्गपवनैः पावितं सर्वतोदिशम् ॥२०॥
रामलीलाविहारस्य स्थानभूतं सनातनम् ।
रामवैकुण्ठमित्युक्तं कविभिः शास्त्रकोविदैः ॥२१॥
गावः संचारिता यत्र रामेण तव सूनुना ।
सुखितस्य गवेन्द्रस्य गोष्ठं यत्र प्रतिष्ठितम् ॥२२॥
तथा श्रीनन्दनस्यापि गोपालस्य महीपते ।
राजिनीवल्लभस्यापि स्थानमत्रैव राजते ॥२३॥
तन्मण्डलं महाराज साक्षाद्वैकुण्ठमुत्तमम् ।
पदे पदेऽश्वमेधादियज्ञकोटिफलप्रदम् ॥२४॥
व्रजाङ्गना यत्र रमेश्वरस्य गायन्ति पुण्यानि यशांसि शश्वत् ।
प्रकम्पितैरुत्पुलकैर्वपुर्भी रमन्त्य उच्चैः प्रणयप्रकर्षम् ॥२५॥

राजोवाच

रामो राजकुले जातो वीर्यवान् वीरपुङ्गवः ।
कथं चारितवान् धेनूः सुखितस्य गवांपतेः ॥२६॥
एतन्मे संशयं छिन्धि तत्त्वज्ञोऽसि भवान् मुने ।
वणिजां कृत्यमेतद्वै क्षत्रस्य जनितं कथम् ॥२७॥

वशिष्ठ उवाच

स्वतन्त्रेच्छस्य रामस्य किमेतद्यदनौचिती ।
तथापि कारणं तत्र वदामि तव भूपते ॥२८॥
आविर्भूतं परमपुरुषं त्वद्गृहे श्रीरमेशं
रामं सच्चित्सुखमयतनुं ब्रह्म पूर्णप्रकाशम् ।

---

१. तत्र स्थाने—रीवाँ ।

विज्ञायोच्चैः सहजसुखदाद्व्यापिवैकुण्ठधाम्नः
प्रादुर्भूता अमुमनुगता देववाचोऽपि तास्ताः ॥२९॥
कर्मज्ञानार्चनविधिपरा ऋग्यजुःसामसंस्था
नानाकारा[1]व्रजभुवि ऋचो धेनुरूपेण जाताः ।
भक्तेस्तत्त्वं समनुभवितुं सर्वशास्त्रोत्तमाया—
स्ता रामेण स्वयमविरतं पालितास्तत्र गोष्ठे ॥३०॥
अतः परं वेदऋचः समस्ता भक्त्यैकतात्पर्यवतीः सतत्त्वाः[2] ।
जानीहि भूमीपतिसार्वभौम याधिप्रमोदाटवि संचरन्ति ॥३१॥
प्रमोदवनमेकान्ते भक्तिरूपं निशामय ।
तत्र प्रविष्टा गोरूपा ऋचो भक्तिमनुव्रताः ॥३२॥
गोपालाः सकलास्तत्र देवाश्च ऋषयोऽमलाः ।
तत्तच्छास्त्रा[3]चार्यपदं स्पृशन्तो भक्तिभाविताः ॥३३॥
काश्चिद् गुरोश्च वै धेनूर्विश्वामित्रस्य भूतले ।
रामः पालितवान् राजन् प्रमोदविपिनान्तरे ॥३४॥
कुन्दवने यथा रेमे श्रीरामः सीतया सह ।
श्रीनन्दनस्य सुतया तथा रामोऽत्र सुन्दरः ॥३५॥
एतद्रहस्यं चरितं सुपावनं रामस्य राजंस्तव पुत्रतापदम् ।
प्राप्तस्य संप्रोक्तमतीव सुन्दरं मया त्वदग्रे हृदि तद्विधारय ॥३६॥
न वाच्यमिदमन्यस्मै जनाय जनतादृशे ।
अन्यद्वै देवचरितमन्यज्ज्ञानं च लौकिकम् ॥३७॥
अक्लिष्टकर्मा भगवान् रघूत्तमस्तवात्मजो यः पुरुषः पुरातनः ।
न तस्य वीर्यं प्रविदन्ति तत्त्वतो ब्रह्मादयोऽन्यस्य जनस्य का कथा ॥३८॥
तवालये सर्वसमृद्धिसंयुते तिष्ठन्नेवायं प्रकाशान्तरेण ।
पूर्णस्वरूपो रममाण उच्चैरधिप्रमोदाटवि संविभाति ॥३९॥
मैनं प्रभुं विद्धि नृप स्वमात्मजं मायागुणैः कल्पितभूरिभावम् ।
अयं हि साक्षात् पुरुषोत्तमोत्तमः श्रीसाकेते योऽनिशं संविभाति ॥४०॥
भक्त्या त्वमुष्य परमस्य परस्य पुंसस्तीव्रं भवोद्भवमगाधमपारमेनम् ।
क्लेशं तरन्ति भविकं च सदा लभन्ते ये स्युः पदाम्बुरुहमस्य परिप्रपन्नाः॥४१॥

१. ज्ञानाकारा—रीवाँ । २. स्वतन्त्राः—रीवाँ । ३. तत्रस्था स्वा°—अयो० ।

एतत्ते कारणं प्रोक्तं रामगोचारणे नृप ।
अवधार्यं हृदा नित्यं कृतार्थो भव संततम् ॥४२॥
तत्तादृक् पुण्यमाख्यातं सुन्दरं व्रजमण्डलम् ।
माङ्गल्यावल्लभो यत्र सुखितः संप्रतिष्ठितः ॥४३॥
शरदो द्वादशानेन रामेण विहृतं पुरा ।
यत्र सौभाग्यसंपन्ने साक्षाल्लक्ष्मीनिकेतने ॥४४॥
वनानि तत्र परितो विभान्ति सुबहून्यपि ।
तयोर्मध्ये द्वादशैव मुख्यानि रघुभूपते ॥४५॥
येषु श्रीरामचन्द्रस्य तव पुत्रस्य संततम् ।
पदाम्भोरुहचिह्नानि दृश्यन्ते भक्तिमज्जनैः ॥४६॥
नित्यं च कमला यत्र मूर्तिमत्यनुगायति ।
रामचन्द्रचरित्राणि व्रजदारान् प्रगायतः ॥४७॥
एकैकं चरितं तत्र रामस्य सुमहात्मनः ।
परमानन्दसदनं मुनीनामपि मोहनम् ॥४८॥
कुञ्जपुञ्जमनोज्ञास्ताः सुपुण्यव्रजभूमयः ।
क्षणे दृष्ट्वा अपि नृणां हरन्ति त्रिजनुःशुचम् ॥४९॥
सरयूजलकल्लोलसमीरणसुशीतले ।
व्रजदेशेऽधिवसितुं को नेच्छेत वपुर्धरः ॥५०॥
तत्र पुण्यानि तीर्थानि काशीकोटिसमानि वै ।
तानि कृत्वा जनो मुञ्चेदन्यतीर्थौघवासनाः ॥५१॥
प्रथमं मञ्जुलवनं वनानामुत्तमं वनम् ।
यत्र मञ्जुलवीथीषु विपुलं विमलं सरः ॥५२॥
यत्रश्रीः सततं भाति क्रीडन्ती परया मुदा ।
नित्यं निनादितं नादैस्तस्याश्चरणपूरयोः ॥५३॥
तत्र स्नानेन दानेन वैष्णवानां च भोजनैः ।
सीतारामचन्द्रौ देवौ प्रीयेते नात्र[1] संशयः ॥५४॥

---

१. प्रीतौ नास्त्यत्र—अयो० ।

कामिकावनमुद्दिष्टं द्वितीयं सर्वकामदम् ।
यत्र लक्ष्मीकटाक्षेण हरदग्धो मनोभवः ॥५५॥
पुनरङ्गं परिप्राप्य त्रिजगज्जेतुमुद्यतः ।
तत्र स्वर्णमयीं दत्त्वा प्रतिमां कामदैवताम् ॥५६॥
पुनः स्नात्वा विधानेन सर्वान् कामानवाप्नुयात् ।
कुर्याच्चैव तिलाज्याभ्यां होमं श्रीरामतुष्टये ॥५७॥
भोजयेद् ब्राह्मणान् भूरि तस्य पुण्यं न गण्यते ।
तृतीयं तु प्रेमवनं यत्र श्रीव्रजयोषिताम् ।
रामचन्द्रमुखं दृष्ट्वा प्रेमाविर्भाव आगतः ॥५८॥
तत्र स्नानादिना लोको हरेः प्रेमाणमाप्नुयात् ।
येना[1]प्रेनानवाप्तव्यं त्रिषु लोकेषु किंचन ॥५९॥
तुर्यं रसालविपिनं महारसनिकेतनम् ।
रसैर्भोजयते विप्रान् यस्तत्र हरितुष्टये ॥६०॥
तस्य पुण्यस्य माहात्म्यं मया वक्तुं न शक्यते ।
यत्र गोचारणे रामः क्षुधितान् गोपबालकान् ॥६१॥
रसालफलसंदोहैर्योगमायाविनिर्मितैः ।
कृतवान् भूयसीं तृप्तिं कल्याणगुणभूषणः ॥६२॥
पुण्यं पवित्रमतुलं महापातकनाशनम् ।
वनानामुत्तमं स्थानं भक्तानां तद्रसावहम् ॥६३॥
पञ्चमं मन्दारवनं मन्दारद्रुमसंकुलम् ।
देवदेवीगणाकीर्णं नित्योत्सवनिकेतनम् ॥६४॥
स्नानदानविधानेन संततं पापनाशनम् ।
तत्रस्थपवनस्पर्शात् पूतो भवति मानवः ॥६५॥
पारिजातवनं षष्ठं सर्वर्तुसुखसंयुतम् ।
तत्र गत्वा नरो नित्यं स्नान[2]दानादि यश्चरेत् ॥६६॥
तस्य पुण्यमनन्तं हि मेरुणापि न तत्समम् ।
तुलाकोटिस्वर्णभारैर्न तत् संभावितं भुवि ॥६७॥

---

१. यत्रा°—अयो०, रीवाँ । २. सान्न°—रीवाँ ।

सप्तमं कन्दलवनं प्रेमानन्दैककन्दलम् ।
गीयते यत्र सुन्दर्या दानलीला मनोहरा ॥६३॥
तत्र गत्वा नरः स्नायात् स्थले वापि जलेऽमले ।
वैदिकेभ्यो ब्राह्मणेभ्यो दधिभाण्डानि दापयेत् ॥६९॥
तुलाकोटिसमं पुण्यं जायते नात्र संशयः ।
स्वर्णादिपात्रमध्ये तु गवां दधि सुधोज्ज्वलम् ॥७०॥
सदक्षिणं प्रदातव्यं श्रीरामचन्द्रतुष्टये ।
तस्य पुण्यस्य माहात्म्यं मया वक्तुं न शक्यते ॥७१॥
अष्टमं संमदवनं मनःसंमदवर्धनम् ।
गीयते यत्र सुन्दर्या मोनलीलामहोत्सवः ॥७२॥
तत्र ब्राह्मणवर्येभ्यः पटभूषणभोजनैः ।
मानयित्वा विशेषेण महत्पुण्यमवाप्नुयात् ॥७३॥
नवमं केशरवनं नागकेशरभूषितम् ।
यत्र स्नात्वा नरः सद्यो गङ्गास्नानसहस्रजम् ॥७४॥
महत्पुण्यमवाप्नोति तथा ब्राह्मणभोजनात् ।
अश्वमेधसहस्रस्य फलमाप्नोति मानवः ॥७५॥
दशमं माणिक्यवनं नवमाणिक्यमञ्जुलम् ।
सदापल्लवितं भाति रामकेलिनिकेतनम् ॥७६॥
यत्र माणिक्यनिवहैर्भान्ति मञ्जरिता द्रुमाः ।
अनेकवर्णकिरणैर्विचित्रितनभस्थला ॥७७॥
तत्र माणिक्यदानेन नरः सौभाग्यमाप्नुयात् ।
सुवर्णकलशोमध्ये दधिदुग्धादिपूरिते ॥७८॥
पञ्चरत्नं निधायाथ दद्याद् ब्राह्मणसत्तमे ।
तत्पुण्यमतुलं येन स्वर्गे लोके महीयते ॥७९॥
एकादशं पद्मवनं श्रिय एकान्तमन्दिरम् ।
शेते सीतापतिर्यत्र महालक्ष्मीनिषेवितः ॥८०॥
भोजयेत् सुबहून् विप्रान् तत्र शर्करपायसैः ।
दीर्घसत्रान् मखान् कृत्वा यत्पुण्यं लभते नरः ॥८१॥

तत्पुण्यं समवाप्नोति तत्क्षणान्नात्र संशयः ।
एकादश्यां व्रतं कृत्वा द्वादश्यां भोजयेद् द्विजान् ॥८२॥
पुण्यं सहस्रगुणितं ततोऽपि समवाप्यते ।
श्रीसीतारामचन्द्रौ च तुष्येतां तेन कर्मणा ॥८३॥
द्वादशं सौरभवनं सदा सुरभिसेवितम् ।
तत्र पुण्यसरो नाम सरसामुत्तमं सरः ॥८४॥
तत्र स्नानेन दानेन नरो मुच्येत किल्विषात् ।
पूजयेद् विविधैः पुष्पैः सीतारामौ परात्परौ[1] ॥८५॥
कोटियज्ञफलं तेन तत्क्षणाल्लभते नरः ।
वनानि द्वादशैतानि पुण्यानि मधुराणि च ॥८६॥
स्नानदानादिविधिभिः सर्वकामप्रदानि च ।
तावन्त्युपवनान्यत्र कीर्तितानि मनीषिभिः ॥८७॥
येषु स्नानादिविधिभिः कोटियज्ञफलं भवेत् ।
दद्याच्छ्राद्धानि विधिवत् पितृभ्यस्तत्र तत्र वै ॥८८॥
गयाश्राद्धसमं पुण्यं तेनाप्नोति पदे पदे ।
माधुरीकुञ्जमाद्यं स्यान्मल्लीकुञ्जं द्वितीयकम् ॥८९॥
तृतीयं मालतीकुञ्जं यूथीकुञ्जं तुरीयकम् ।
पञ्चमं लवलीकुञ्जं कालीकुञ्जं च षष्ठकम् ॥९०॥
सप्तमं लवंगीकुञ्जं केतकीकुञ्जमष्टमम् ।
नवमं मालिकाकुञ्जं रत्नकुञ्जं ततः परम् ॥९१॥
एकादशं केकि[2]कुञ्जं द्वादशं केलिकुञ्जकम् ।
एतेषु गमनादेव कोटिसोमफलं लभेत् ॥९२॥
स्नानाद्दानात्तथा ध्यानाद् रामसायुज्यमाप्नुयात्
सरयूपरितः सर्वा राजते शुद्धभूमयः ॥९३॥
तेषु वैकुण्ठरूपेण विष्णुर्वसति सर्वदा ।
शुद्धभक्त्या समाराध्य तत्र साक्षाद्रमापतिम् ॥९४॥

---

१. सीतारामचन्द्राविह—अयो०, मथु०, बड़ो०। २. केलि°— अयो०, मथु०, बड़ो०।

भुङ्क्त्वेह विपुलान् भोगानन्ते कैवल्यभाग् भवेत् ।
अयोध्यापरितो देशे पशुपक्ष्यन्त्यजा[1] अपि ॥९५॥
सर्वे चतुर्भुजा ज्ञेया इत्याज्ञा वैदिकी परा ।
नन्दिग्रामः सदा भाति साक्षान्नित्यं हरेः पदम् ॥९६॥
सुखिताख्येन गोपेन नित्यमेव समर्चितम्[2] ।
पालीग्रामः सदाभाति कोटितीर्थसमाश्रयः ॥९७॥
श्रीनन्दनो गोपराजो यत्र नित्यं प्रतिष्ठितः ।
आभीराणां च गोष्ठानि विभान्ति परितस्तयोः ॥९८॥
यत्रत्या[3] मनुजाः सर्वे देवरूपा न संशयः ।
मध्ये मञ्जुवटो नाम बहुपादविराजितः ॥९९॥
नीलकण्ठः स वै साक्षात्तस्य छाया मनोहरा ।
निषण्णास्तासु गोपाल्यो गायन्ति श्रीहरेर्यशः ॥१००॥
तद्गाननादमुदिताः कृष्णसाराः समंततः ।
तथैव सोमसवनो रामरासवटः शुभः ॥१०१॥
देवैः संप्रार्थितो रामो यत्र नाट्यमचीकरत् ।
तथा रामवटो नाम स्निग्धच्छायामनोरमः ॥१०२॥
सीतावटश्च सततं प्रोद्भाति रुचिरोच्छ्रयः ।
तथास्थाणुवटो नित्यं विभाति नवपल्लवैः ॥१०३॥
एते पञ्चवटा पुण्याः साक्षात् कल्पद्रुमाधिकाः ।
तेषां छायामुपाश्रित्य भवतापो निवर्तते ॥१०४॥
तत्र संपूजयेद् देवं राघवं सीतया सह ।
भोजयेद् बहुशो विप्रान् सिताज्यबहुपायसैः ॥१०५॥
यथोदितेन विधिना दद्याद् गाश्च पयस्विनीः ।
लभते मानवः पुण्यं मेरुशैलशताधिकम् ॥१०६॥
राजते तत्र रत्नाद्रिः साक्षाद्रत्नमयो गिरिः ।
यस्य छायां समाश्रित्य सरयू शीतलोदका ॥१०७॥

---

१. पक्षंतिजा—अयो०, मथु०, बड़ो० । २. समन्वितम्—मथु०, बड़ो० ।
३. तत्रत्या—मथु०, बड़ो० ।

तथा सौगन्धिको नाम गिरिराजः प्रतिष्ठितः ।
तयोर्विधाय मनुजः प्रादक्षिण्यं विशेषतः ॥१०८॥

पृथ्वीप्रदक्षिणापुण्यं लभते नात्र संशयः ।
एकादश्यां वा द्वादश्याममायां पूर्णिमादिने ॥१०९॥

रत्नाचलं परिक्रम्य पृथ्वीदानफलं लभेत् ।
रत्नाद्रिं संपरिक्रम्य स्नात्वा श्रीरामकुण्डके ॥११०॥

सरयूं वावगाह्याथ पुनर्जन्म न विद्यते ।
सौगन्धिकं महाशैलं रामकेलीनिकेतनम् ॥
संपूज्य लक्ष्मीरमणं जीवन्मुक्तो भवेद्ध्रुवम् ॥१११॥

गत्वा द्वादश काननेषु परितः प्रेम्णा परिक्रामयन्
स्नात्वा वार्षिकवासरेषु सलिलैः पूर्णे स्थले वा जले ।
ध्यात्वा गोपवधूविहाररसिकं रामाभिधानं महः
प्राप्नोति द्रुतमश्वमेधनिवहैर्यत्पुण्यमुच्चैर्जनः ॥११२॥

तमसामवगाह्याथ वनमालाविभूषिताम् ।
मुनीनां यज्ञवाटांश्च दृष्ट्वा पुण्यनिधिर्भवेत् ॥११३॥

अयोध्यायामादिलिङ्गं गौरीकान्तं महेश्वरम् ।
अन्यानि चैव लिङ्गानि परितः सन्ति यानि वै ॥११४॥

तानि स्पृष्ट्वा च दृष्ट्वा च तीर्थयात्राफलं लभेत् ।
तथा चण्डीं भगवतीं संपूज्य विधिवन्नरः ॥११५॥

स्नात्वा लक्ष्मणकुण्डे च कुण्डे मन्नामनिर्मिते ।
स्नात्वा दत्त्वा च दानानि तीर्थयात्राफलं लभेत् ॥११६॥

रामघट्टे नरः स्नात्वा स्वर्गद्वारेण मानवः ।
श्राद्धं दत्त्वा पितृप्रीत्यै सर्वं फलमवाप्नुयात् ॥११७॥

हनुमन्तं च सुग्रीवं लक्ष्मणं च विभीषणम् ।
अयोध्याकोटपालांश्च प्रातरुत्थाय यः स्मरेत् ॥११८॥

कल्याणं समवाप्नोति दुःस्वप्नादींश्च नाशयेत् ।
एवं यो वर्तयेन्नित्यमाजन्म सुकृती भवेत् ॥११९॥

पुरीणामथ सप्तानामयोध्या मूर्द्धगा मणिः ।
यस्याः स्मरणमात्रेण ब्रह्महत्यादि नाशयेत् ॥१२०॥

इतिश्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे पूर्वखण्डे[1] दशरथतीर्थयात्रायां द्व्यधिक[2]शततमोऽध्यायः ॥१०२॥

●

त्र्यधिकशततमोऽध्यायः

वशिष्ठ उवाच

नैमिषारण्यमध्ये च तीर्थानि शृणु भूपते ।
येषु स्नानेन दानेन मानुष्यं पुण्यभाग्भवेत् ॥ १ ॥
शौनकस्याश्रमे दिव्ये गोमतीपुलिने नृप ।
यत्र सूतो मुनीन्द्रेभ्यो[3] निजगाद विशेषतः ॥ २ ॥
इतिहासपुराणानि विविधाश्चैव सत्कथाः ।
ब्रह्मतीर्थे विष्णुतीर्थे रुद्रतीर्थे च भूपते ॥ ३ ॥
स्नानं कृत्वा द्विजातिभ्यो देयानि द्रविणानि च ।
सारस्वते महातीर्थे स्नातव्यं च विशेषतः ॥ ४ ॥
अन्यानि चैव तीर्थानि तत्र[4]सन्ति सहस्रशः ।
बलदेवस्य यात्रायां यानि पुण्यानि सत्पते[5] ॥ ५ ॥
यज्ञानां विघ्नकर्तारो राक्षसा यत्र नाशिताः ।
बलदेवेन वीरेण पुरा मुशलधारिणा ॥ ६ ॥
तवात्मजेन रामेण यत्र पुण्यं यशः कृतम् ।
मुनीनां तपसो विघ्ना दानवा नाशितास्तथा ॥ ७ ॥
चिरं तत्र मुनिस्तोमा उषिता[6] जितचेतसः ।
तेषामाश्रमवर्येषु गन्तव्यं च विशेषतः ॥ ८ ॥

---

१. अयोध्यामाहात्म्ये इत्यधिकं—अयो० । "पूर्वखण्डे" नास्ति—मथु०, बड़ो० । २. त्रि°—अयो० । ३. पूतो मुनीन्द्रो यो—अयो० । ४. यत्र—अयो० । ५. सत्पतेः—मथु०, बडो० । ६. उचिता—अयो०, रीवाँ ।

गोमत्यां च नरो वारिण्याप्लुत्य गतपातकः ।
विष्णुं ध्यायेत मनसा सर्वतीर्थफलं लभेत् ॥ ९ ॥
किं तेन न कृतं पुण्यं मानवेन महात्मना ।
येनेदं नैमिषारण्यं पद्भ्यां समवगाहितम् ॥१०॥
पदे पदेऽतिपुण्यानि तीर्थानि किल सन्ति वै ।
ॐकारध्वनिरत्रैव श्रूयते सततं जनैः ॥११॥
ब्रह्मणा तैजसं चक्रं विसृष्टं यत्र वै पुरा ।
क्षेत्राधिष्ठानरूपं तज्जातमत्र न संशयः ॥
शीर्णा तस्य महानेमिर्मुनीनां स्थानदायिनी ॥१२॥
निमिषेण च वै दैत्या विष्णुना नाशिताः पुरा ॥
तस्मात्तन्नैमिषं नाम तीर्थानामुत्तमोत्तमम् ॥१३॥
भवतां पूर्वजो यत्र भरतो नाम भूपतिः ।
तपः कृत्वावसद् भूपः क्षेत्रपुण्यविवृद्धये ॥१४॥
तस्मिन् भरतकुण्डे तु नरः स्नात्वा विमुच्यते ।
ब्रह्महत्यादिपापेभ्यो दुस्तरेभ्योऽपि भूपतिः ॥१५॥
तपः कृत्वावसद् भूयः क्षेत्रपुण्यविवृद्धये ।
चक्रतीर्थे च तत्रैव तीर्थानामुत्तमं स्थितम् ॥१६॥
तत्र संस्नानमात्रेण तीर्थकोटिफलं लभेत् ।
तप्तकुण्डे नरः स्नात्वा सर्वं पापं व्यपोहति ॥१७॥
गोमतीस्नानमात्रेण जनः स्यात् पङ्क्तिपावनः ।
इतिहासपुराणानामुत्पत्तिस्थानमुत्तमम् ॥१८॥
पञ्चरात्रमिह स्थित्वा विष्णुपूजापरो नरः ।
कोटियज्ञफलं लब्ध्वा भुक्त्वान्ते मुक्तिभाग् भवेत् ॥१९॥
वसन्ति देवताः सर्वा ब्रह्मा चैव चतुर्मुखः ।
तत्र प्रवेशमात्रेण धौतपापो[1] भवेन्नरः ॥२०॥
मासं चेन्निवसेत्तत्र तीर्थयात्रापरायणः ।
अश्वमेधसहस्रस्य फलमाप्नोति मानवः ॥२१॥

---

१. वीतपापो—रीवाँ ।

यानि तीर्थानि सर्वाणि पृथिव्यां सन्ति कोटिशः ।
तानि सर्वाणि तिष्ठन्ति नैमिषारण्यमध्यतः ॥२२॥
यत्पुण्यं नैमिषारण्ये पञ्चरात्रेण जायते ।
वर्षकोटिशतेनापि नान्यतीर्थेषु तस्य तत् ॥२३॥
सरयूनिःसृता यस्मात् तत्सरश्चापि पावनम् ।
तत्र स्नात्वा विधानेन सर्वपापैः प्रमुच्यते ॥२४॥
प्रयागं च ततो गच्छेत् तीर्थराजं पुरातनम् ।
गङ्गायमुनयोर्यत्र सङ्गमो लोकविश्रुतः ॥२५॥
तत्र यद्यत्कृतं सर्वं भवेदक्षयकामदम् ।
स्नात्वा दत्त्वा द्विजातिभ्यो महत्पुण्यमवाप्नुयात् ॥२६॥
गङ्गाभेदे नरः स्नात्वा सर्वपापैः प्रमुच्यते ।
देवान् मुनीन् पितॄंस्तत्र तर्पयेत्तीर्थवारिभिः ॥२७॥
नरः पुण्यमवाप्नोति सोमयागशतोद्भवम् ।
तेन पुण्यप्रभावेण लोके सारस्वते वसेत् ॥२८॥
बाहुदायां[1] नरः स्नात्वा वसेत्तत्पुलिने शुचिः ।
जपपूजापरो भूप एकरात्रं समाहितः ॥२९॥
तत्पुण्यं तस्य यत्पुण्यं लक्षब्राह्मणभोजनात् ।
बाहुदा[2]तीर्थमिच्छन्ति देवाश्च पितरस्तथा ॥३०॥
गत्वा चिरनदीं भूयः स्नानं कुर्याद्विलक्षणः ।
तर्पयेत्तेन पयसा देवर्षिपितृदेवताः ॥३१॥
विमलाशोकमध्ये तु रात्रिमेकां समावसेत् ।
तेन पुण्येन राजेन्द्र दिव्यान् लोकानवाप्नुयात् ॥३२॥
भर्तृस्थानं समासाद्य कोटितीर्थस्य वारिणि ।
समाप्लुत्य नरो विद्यात् गोसहस्र फलं लभेत्[3] ॥३३॥
असीवरुणयोर्मध्ये पञ्चकोशान्तरे नृप ।
पदे पदे महातीर्थान्यासते तत्र कोटिशः ॥३४॥

---

१. बहुदायां—रीवाँ। २. बहुदा°—रीवाँ। ३. नरः—मधु० बड़ो०।

एकतो भगवान् विष्णुर्माधवः संप्रतिष्ठितः ।
अपरत्र च लोलार्कः कोटिद्वय[1]मिदं स्थितम् ॥३५॥
धनुराकारतापन्नं काशीपुरमुदित्वरम् ।
यत्र कुत्र नरः स्नात्वा कोटियज्ञफलं लभेत् ॥३६॥
मनसा चिन्तयन् काशीं महत्फलमवाप्नुयात् ।
किं पुनः स्नानदानादितीर्थयात्राविधानतः ॥३७॥
वाराणस्यां मृतो जन्तुः शाङ्करं लोकमाप्नुयात् ।
विशेषाज्ज्ञाननिष्ठश्चेन्निर्गुणां मुक्तिमाप्नुयात् ॥३८॥
तत्र संपूज्य विधिवद् विश्वेश्वरमुमापतिम् ।
कोटियज्ञफलं प्राप्य सोऽन्ततो मुक्तिमाप्नुयात् ॥३९॥
कपिलाह्रदसंस्नानान्महादेवस्य पूजनात् ।
चतुःषष्टिदर्शनाच्च राजसूयफलं लभेत् ॥४०॥
ततश्च गोमतीगङ्गासङ्गमे तीर्थमुत्तमम् ।
अग्निष्टोमादिफलदं मार्कण्डेयमहामुनेः ॥४१॥
तत्र स्नात्वा वसेत्तत्र जपहोमपरायणः ।
ब्रह्मयज्ञं विनिर्वर्त्य जनः स्यात् पङ्क्ति[2]पावनः ॥४२॥
ततो गच्छेद् गयां राजन् पितृणां मुक्तिदायिनीम् ।
गयो नाम गिरिर्यत्र महापुण्यतमो नृप ॥४३॥
तथैव चाक्षयवटस्तत्र पिण्डान् सुनिर्वपेत् ।
स्मृत्वा स्मृत्वा नरव्याघ्र यावन्तो वै कुले मृताः ॥४४॥
ते सर्वे मुक्तिमिच्छन्ति पिण्डदापाद् गयाशिरे ।
गयापिण्डप्रदातारं प्रशंसन्ति च देवताः ॥४५॥
पितरश्च प्रशंसन्ति जातो भाग्येन नः कुले ।
येन संमोचिताः सर्वे दुस्तराद् भवसागरात् ॥४६॥
अक्षयस्य वटस्याथ मूले दत्तं तदक्षयम् ।
तत्रैव विद्यते राजन् फल्गुनाम[3]महानदी ॥४७॥

---

१. "एकस्यां कोटौ विन्दुमाधवः अपरस्यां च लोलार्कः उभयोर्मध्ये वाराणसी" टि०—मथु० । २. भक्ति°—रीवाँ । ३. फल्गुनाम—रीवाँ ।

तस्यामाचम्य विधिवत् तर्पयेत् सकलान् पितॄन् ।
अक्षयं फलमाप्नोति निजवंश्यान् समुद्धरेत् ॥४८॥
धर्मारण्ये तु तत्रैव पुण्यं ब्रह्मसरः स्थितम् ।
एकां रात्रिं वसेत्तत्र कोटियज्ञफलाप्तये ॥४९॥
महानद्यां च कौशिक्यां जनः स्नात्वा विधानतः ।
प्रदद्यात् पितृदेवेभ्यः श्रद्धायुक्त[1]स्तिलाञ्जलीन् ॥५०॥
पुण्ये ब्रह्मसरस्यद्भिरवगाह्य शुचिव्रतः ।
ब्रह्मयूपं विधानेन नरः कुर्यात् प्रदक्षिणाम् ॥५१॥
गङ्गा पुण्यनदी यत्र तस्यास्तीरे भगीरथः ।
बहुदक्षिणयज्ञौघैरीजे पुरुषसत्तमम् ॥५२॥
आप्लुत्य तत्र तीर्थे तु भोजयित्वा बहून् द्विजान् ।
सर्वस्यास्तीर्थयात्रायाः पुण्यमाप्नोति मानवः ॥५३॥
विश्वामित्रस्य राजर्षेर्ब्रह्मर्षित्वप्रदायिनी ।
कौशिकी पुण्यसलिला तस्यास्तीरे वसेद् द्विजः ॥५४॥
भूयः प्रेतशिलादौ च स्थाने तत्र व्रजेन्नरः ।
तदीयेनैव विधिना सर्वत्र श्राद्धमाचरेत् ॥५५॥
सर्वं तत्तीर्थमतुलं पितॄणां मुक्तिदायकम् ।
स्नानैर्दानैश्च विधिभिः सर्वान् संतारयेत् पितॄन् ॥५६॥
धेनुकं नाम तीर्थं च समासाद्य महीपते ।
तिलधेनूर्द्विजातिभ्यो दद्यात् सर्वविशुद्धये ॥५७॥
एकरात्रमिह स्थित्वा जपहोमपरायणः ।
तिलधेनुप्रदानेन सोमलोकमवाप्नुयात् ॥५८॥
कपिलायाः सवत्सायाः पदेषु तत्र पर्वते ।
सकृदाचम्य मनुजो धुनाति खलु पातकम् ॥५९॥
गत्वा गृद्धवटं तत्र दृष्ट्वा च शिवदं शिवम् ।
भस्मस्नायी लभेत् पुण्यं द्वादशाब्दव्रतोद्भवम् ॥६०॥
पदे सावित्रके सन्ध्यामुपास्ते यः सकृन्नरः ।
तत्र द्वादशवार्षिक्याः संध्यायाः फलमाप्नुयात् ॥६१॥

---

१. श्राद्धयुक्तान्—रीवाँ ।

योनिहारं स्थलं तत्र योनिसंकटमोचनम् ।
तत्र गत्वा दिने स्थित्वा न पुनर्योनिमाप्नुयात् ॥६२॥
धर्मपृष्ठे ततो राजन् स्नात्वा कूपोदकेन च ।
तर्पयेद्देवतांश्चैव मुनींश्चैव पितॄंश्च हि ॥६३॥
पीत्वा कूपोदकं तत्र सर्वपापं व्यपोहयेत् ।
मतङ्गस्याश्रमे चापि गन्तव्यं तीर्थयात्रिणा ॥६४॥
ब्रह्मतीर्थे नरः स्नात्वा ब्रह्माणं च समर्थयेत् ।
इष्टं तेनाश्वमेधेन तत्क्षणान्नात्र संशयः ॥६५॥
गत्वा राजगृहे तत्र स्थाने काक्षीवतो[1] मुनेः ।
पक्षिण्यां नित्यकं[2] भुक्त्वा ब्रह्महत्यादिकं त्यजेत् ६६॥
मणिनागे नरो गत्वा भुक्त्वा तस्य च नित्यकम् ।
गोसहस्रफलं प्राप्य सर्वेभ्यो निर्भयो भवेत् ॥६७॥
गोतमस्य वने गत्वा स्नात्वाऽहल्या[3]ह्रदे जनः ।
अभ्यर्च्य[4] च श्रियं साक्षात्परमां श्रियमाप्नुयात् ॥६८॥
तत्र कुण्डे महापुण्ये स्नात्वा राजर्षिसत्तम ।
अश्वमेधफलं प्राप्य महतीं श्रियमाप्नुयात् ॥६९॥
स्नात्वा जनककूपे च देवगन्धर्वसेविते ।
सर्वपापविशुद्धात्मा श्रीविष्णोर्लोकमाप्नुयात् ॥७०॥
सूर्यतीर्थे नरः स्नात्वा सूर्यलोके महीयते ।
तपोवनं जनो गत्वा तपःफलमवाप्नुयात् ॥७१॥
कर्बुदायां नरः स्नात्वा सर्वपापैः प्रमुच्यते ।
विशालायां ततः स्नात्वा सोमयज्ञ[5]फलं लभेत् ॥७२॥
धारां माहेश्वरीं सम्यगाप्लुत्य गतपातकः ।
अश्वमेधफलं लब्ध्वा नरः स्यात् पङ्क्तिपावनः ॥७३॥

---

१. कक्षीवतो—रीवाँ । २. "पक्षिणी नाम तीर्थं तत्र नित्यं नाम पक्षिपुरीषं" टि०—मधु० । ३. तस्य—अयो०, रीवाँ । ४. अभ्येत्य—मधु०, बड़ो० । ५. °याजि° —मधु०, बड़ो० ।

देवपुष्करिणीं प्राप्य नरः स्नात्वा शुचिव्रतः ।
न दारिद्र्यमवाप्नोति कदापि धरणीपते ॥७४॥
ततः सोमपदं गत्वा स्नात्वा माहेश्वरे[1] पदे ।
तत्रैव तीर्थकोट्यां च समाप्लुत्य विशेषतः ॥७५॥
पूजयित्वा कूर्मराजं विष्णुं दानवमर्दनम् ।
कोटियज्ञफलं प्राप्य वैकुण्ठे धाम्नि मोदते ॥७६॥
तत्र गच्छेद्धरिक्षेमं हरेः स्थानमनुत्तमम् ।
यत्र देवाश्च ऋषयः सदासंनिहितं हरिम् ॥७७॥
उपासते सदा भक्त्या देवदेवं जनार्दनम् ।
शालग्रामशिला यत्र प्रजायन्ते सहस्रशः ॥७८॥
विष्णोः सांनिध्यदा नित्यं पूजनात् पुण्यकोटिदा ।
तत्राभिगममात्रेण कोटियज्ञफलं लभेत् ॥७९॥
विष्णुक्षेत्रे नरः स्नात्वा विष्णुलोकं व्रजेद् ध्रुवम् ।
चतुःसामुद्रिके कूपे सकृदाचम्य मानवः ॥८०॥
देवान् पितॄंस्तर्पयित्वा पुण्यकोटिमवाप्नुयात् ।
ऋणत्रयविनिर्मुक्तो जायते तत्क्षणान्नरः ॥८१॥
ततो जातिस्मरस्थाने गत्वाचम्य यथाविधि ।
जातिस्मरत्वसंस्कारं संप्राप्नोति त्रिजन्मजम् ॥८२॥
गण्डकीकौशिकीसंगे नरः स्नायाद् यथाविधि ।
ऐहिकामुष्मिकांश्चापि सर्वान् कामानवाप्नुयात् ॥८३॥
ततः स्नात्वा विपाशायां शोणभद्रे महानदे ।
सर्वपापविनिर्मुक्तः सूर्यतेजा भवेन्नरः ॥८४॥
वटेश्वरं वामनं च गत्वाप्लुत्य[2] विशेषतः ।
भरतस्याश्रमं गच्छेन्मुनिवर्यस्य मानवः ॥८५॥
तत्र स्नात्वा च कौशिक्यां पुण्यनद्यां धृतव्रतः ।
असंख्येयं[3] फलं प्राप्य धूतपापो भवेन्नरः ॥८६॥

---

१. माहेश्वरी°—अयो०, रीवाँ । २. वामनं गत्वा तत्राप्लुत्य—अयो०, रीवाँ । ३. अगणेयं—मथु०, बड़ो० ।

चम्पकारण्यमध्ये च रात्रिमेकान्ततो वसेत् ।
सुमहत्पुण्यमाप्नोति [1]तत्रेन्द्रस्य नमस्कृतेः ॥८७॥
विश्वेश्वरं शिवं पश्येत्तीर्थे गोष्ठिलनामके ।
कन्यासंवेद्यकं तीर्थं गच्छेत् पुण्यफलाप्तये ॥८८॥
तत्र गत्वा लभेत् पुण्यं कन्यादानशतोद्भवम् ।
निश्चीरासंगमे स्नात्वा दत्त्वा दानं द्विजन्मने ॥८९॥
पुण्यमक्षयमाप्नोति[1] यत्र राजन् ममाश्रमः ।
तत्रावगाहमात्रेण महायज्ञफलं लभेत् ॥९०॥
देवकूटं ततो गच्छेत् कोटियज्ञफलाप्तये ।
कौशिक्यह्रद[2] आप्लुत्य कौशिक्यां पुण्यकोटिदे ॥९१॥
विश्वामित्रं गौतमं च स्मृत्वा तत्र जितेन्द्रियः ।
पञ्चरात्रोषितश्चापि तीर्थवर्यमहाह्रदे ॥९२॥
महत्पुण्यमवाप्नोति मासतश्चाश्वमेधकम् ।
महतीं श्रियमाप्नोति तस्मात् पुण्यप्रभावतः ॥९३॥
वीराश्रमस्य मध्यस्थं कुमारमभितो व्रजेत् ।
अग्निधारं व्रजेत् पश्चाद् यत्र विष्णुसदाशिवौ ॥९४॥
शैलराजे तत्र दिव्यं पितामहसरो व्रजेत् ।
नदी कुमारधाराख्या यत्र प्रस्रविणी जवात् ॥९५॥
तत्राप्लुत्य जनो नित्यं सोमयागफलं लभेत् ।
गौरीशिखरमासाद्य स्नायात् कुण्डेषु तत्र च ॥९६॥
देवान् पितॄन् समभ्यर्च्य महायज्ञफलं लभेत् ।
ताम्रारुणं ततो गत्वा वाजिमेधमवाप्नुयात् ॥९७॥
नन्दिन्यां च महाकूपे स्नात्वा कृत्वा च तर्पणम् ।
इन्द्रलोकं समासाद्य मोदते शरदां शतम् ॥९८॥
कलिङ्गा[3]संगमे चैव कौशिक्यरुणसंगमे ।
स्नानं कुर्यात् त्रिरात्रेण तत्रोपोषित आदरात् ॥९९॥

१—१. नास्ति—अयो०, रीवाँ। २. कौशिकं (क्यं—रीवाँ)—अयो०, रीबाँ। ३. कलिंका—अयो०, रीवाँ।

उर्वशीतीर्थमभ्येत्य सोमाश्रममनुत्तमम् ।
कुम्भकर्णाश्रमे चैव महत्पुण्यमवाप्नुयात् ॥१००॥
कोकामुखे ततः स्नात्वा भवेज्जातिस्मरो नरः ।
नन्दां च सुसमाप्लुत्य नरः स्वर्गमवाप्नुयात् ॥१०१॥
ऋषभद्वीपमाव्रज्य सरस्वत्यां समाप्लुतः ।
गच्छेदौद्दालकं तीर्थमभिषिञ्चेन्निजां तनुम् ॥१०२॥
ब्रह्मतीर्थं ततो गच्छेद्वाजपेयफलाप्तये ।
प्राप्याचम्य नरः स्नात्वा भागीरथ्यां च तर्पयेत् ॥१०३॥
पिण्डदानं च विधिवत् कुर्यात् पितृसुखाप्तये ।
निवेदिकां[२] ततो गत्वा तां सर्वजनसेविताम् ॥१०४॥
सर्वयज्ञफलं प्राप्य पूतो भवति मानवः ।
सन्ध्याकाले ततो गच्छेत् सविद्यातीर्थ उत्तमे ॥१०५॥
आचम्य विधवत् पश्चात्पूतो भवति मानवः ।
सर्वशास्त्रौघविद्यानां पारदर्शी भवेद् ध्रुवम् ॥१०६॥
लौहित्ये तीर्थराजे तु स्नात्वा विधिवदादृतः ।
करतोयां नदीं गच्छेत् कोटियज्ञफलाप्तये ॥१०७॥
[१]कपिलस्याश्रमे पुण्ये पञ्चरात्रोषितो नरः ।
वाजपेयोद्भवं पुण्यं समवाप्नोति पूरुषः[१] ॥१०८॥
ततः स्नानं प्रकुर्वीत गङ्गासागरसंगमे ।
अश्वमेधाधिकं पुण्यं तत्राप्नोति न संशयः ॥१०९॥
वैतरण्यां महानद्यां स्नात्वा दत्त्वा द्विजन्मने ।
विरजाख्ये महातीर्थे स्नानं कुर्याद्विचक्षणः ॥११०॥
ततो ज्योतिरथीशोणसंगमे स्नानमाचरेत् ।
तर्पयेत्तेन तीर्थेन देवताश्च मुनीन् पितॄन् ॥१११॥
ततः स्नायान्महातीर्थे नर्मदाशोणसंगमे ।
वंशगुल्माद्यत्र सरिन्नर्मदाख्या विनिःसृता ॥११२॥

---

२. निवेडितां—मधु, बडो० । १-१. अयं श्लोको नास्ति—अयो० ।

तत्र स्नात्वा नरः सम्यग्[1]महायज्ञफलं लभेत् ।
ऋषितीर्थं ततः स्नायात् कोशलायां रघूद्वह ॥११३॥
कालतीर्थं पुष्पवत्यां त्रिरात्रं संवसेन्नरः ।
स्नात्वा बदरिकातीर्थे वाजिमेधफलं लभेत् ॥११४॥
ततो महेरुकं गच्छेज्जामदग्न्याश्रमं नरः ।
रामतीर्थे महापुण्ये स्नात्वा दद्याद् द्विजाय गाम्[2] ॥११५॥
मतङ्गमुनि[3]केदारे स्नायात्तत्र विचक्षणः ।
श्रीपर्वते नदीतीरे गच्छेद्यत्र सदाशिवः ॥११६॥
संवसत्युमया देव्या तत्र स्नायाद्विचक्षणः ।
देवह्रदे महापुण्ये देवतीर्थे[4]सुरैर्वृते ॥११७॥
ऋषभाद्रौ महापुण्ये पाण्ड्यदेशेऽतिपावने ।
तत्र गत्वा त्रिरात्रेण वाजपेयफलं लभेत् ॥११८॥
अथावगाह्य कावेर्यां पुण्यतीर्थे महाद्भुते ।
स्नात्वा दत्त्वा द्विजातिभ्यः परमां श्रियमाप्नुयात् ॥११९॥
सहस्रधेनवो येन दत्ता स्वर्णाद्यलङ्कृताः ।
तत्पुण्यं समवाप्नोति कावेरीस्नानमात्रतः ॥१२०॥
समुद्रतीरे विमले कन्यातीर्थेऽतिपावने ।
तत्रोपस्पृश्य विधिवत् पुण्यदेहो भवेन्नरः ॥१२१॥
ततो द्वीपे समुद्रस्य गोकर्णं पार्वतीपतिम् ।
देवगन्धर्वयोगीन्द्रराक्षसोरगसेवितम् ॥१२२॥
त्रैलोक्यबन्धुं भूतेशमभ्यर्च्य विधिवन्नरः ।
त्रिरात्रं पञ्चरात्रं वा तथा द्वादशरात्रकम् ॥१२३॥
तत्र स्थित्वा महायज्ञकोटिपुण्यफलं लभेत्[5] ।
ततस्त्रिरात्रं निवसेद् गायत्रीस्थानमध्यगः ॥१२४॥
गायत्रीं चैव सावित्रीं पठेत्तत्र विशेषतः ।
स्मरेद् ब्राह्मण एवैनामन्यस्तु खलु विस्मरेत् ॥१२५॥

---

१. च पीत्वा च—अयो०, च मनुजः—मधु०, बड़ो० । २. द्विजातये—रीवाँ, ३. °मुक्ति°—अयो० । ४. ब्रह्मतीर्थे—मधु०, बडो । ५. भवेत्– अयो०, रीवाँ ।

संवर्त[1]वापिकामध्ये स्नात्वा मन्मथवद्भवेत् ।
वेणायां च ततः स्नात्वा धूतपापो भवेन्नरः ॥१२६॥
देवपित्रर्चनपरस्तस्यास्तीरे समावसेत् ।
ब्रह्मलोकं व्रजेदाशु तस्मात्[2] पुण्यप्रभावतः ॥१२७॥
ततो गोदावरी तीर्थे स्नानं कुर्यादतन्द्रितः ।
वेणायाः संगमे चैव वरदासंगमे तथा ॥१२८॥
ब्रह्मस्थूणां महापुण्यां कुशप्लवनमेव च ।
कृष्णवेणाजलोद्भूतं पुण्यं देवह्रदं तथा ॥१२९॥
ज्योतिमात्रह्रदं चैव कन्याश्रममनुत्तमम् ।
गत्वा स्नात्वा च विधिवदनन्तं पुण्यमाप्नुयात् ॥१३०॥
पयोष्णीसलिले स्नात्वा सर्वपापैर्विमुच्यते ।
दण्डकारण्यमध्ये च स्नात्वा दत्त्वा द्विजातये ॥१३१॥
शरभङ्गाश्रमं गच्छेच्छुकस्य च महाश्रमम् ।
ततः शूर्पारके गत्वा रामतीर्थे समाप्लुतः ॥१३२॥
सप्तगोदावरं गच्छेत्तत्र स्नात्वा जितेन्द्रियः ।
गच्छेद्देवचयं पुण्यं कोटियज्ञफलाप्तये ॥१३३॥
तुङ्गकारण्यमतुलं पवित्रं पापनाशनम् ।
आङ्गीरसेन मुनिना यत्र वेदाः प्रवर्तिताः ॥१३४॥
ब्रह्माविष्णुमहेशाद्यैर्यक्षदेवगणैः पुरा ।
ऋषिभिश्च महाभागैः पुनराधानपूर्वकम् ॥१३५॥
वेदा उपाकृताः सर्वे तत्पुण्यं तीर्थमुत्तमम् ।
गत्वा स्नात्वा विधानेन महत्पुण्यमवाप्नुयात् ॥१३६॥
मेधाविके महातीर्थे स्नात्वा दत्त्वा च भूरिशः ।
गिरिं कालञ्जरं गच्छेद् यत्र देवह्रदः शुचिः ॥१३७॥
तत्र स्नात्वा विधानेन पुण्ये देवह्रदाम्भसि ।
सर्वपापविनिर्मुक्तः पुण्यलोकानवाप्नुयात् ॥१३८॥

---

१. सुवर्त°—अयो०, मथु० बड़ो० । "ऋषिवापिका" टि०—मथु० ।
२. तस्याः—रीवाँ ।

चित्रकूटाचले स्नात्वा मन्दाकिन्याः शुभे जले ।
यत्रात्रेर्मुनिवर्यस्य सुपुण्यतम आश्रमः ॥१३९॥
पितॄन् संतर्प्य विधिवत् तत्र पुण्यतमोदकैः ।
महत्पुण्यमवाप्नोति दुर्गतिं च विनाशयेत् ॥१४०॥
श्रेष्ठस्थानं ततो गत्वा समभ्यर्च्य च शङ्करम् ।
चतुःसामुद्रिके कूपे स्नात्वा चैव विधानतः ॥१४१॥
शृङ्गवेरपुरं गच्छेद् गङ्गासेवितसंनिधिः ।
स्नात्वा चैव तु गङ्गायां सर्वं पापं विधूनयेत् ॥१४२॥
गत्वा मुञ्जवटं चैव तत्राभ्यर्च्य सदाशिवम् ।
महत्पुण्यमवाप्नोति क्षेत्रस्यास्य प्रभावतः ॥१४३॥
सर्वेषामपि भूपानां यथा रघुपते भवान् ।
तथा प्रयागस्तीर्थानामिति शुश्रुम भूपते ॥१४४॥
पुष्करं च प्रयागं च कुरुक्षेत्रं तथैव च ।
गङ्गाद्वारं च नृपते मुखमेतच्चतुष्टयम् ॥१४५॥

राजोवाज

पुष्करस्य विधिं ब्रूहि माहात्म्यं च विशेषतः ।
कानि कानि च तीर्थानि तत्र सन्ति महामुने ॥१४६॥

वशिष्ठ उवाच

मनुष्यलोके राजेन्द्र तीर्थं त्रैलोक्यपावनम् ।
त्रिपुष्करमिति ख्यातं दुर्लभं यद् दुरात्मभिः ॥१४७॥
सप्तद्वीपवतीं भूमिमधितिष्ठन्ति यानि वै ।
तानि सर्वाणि तीर्थानि पुष्करे निवसन्ति हि ॥१४८॥
दशकोटिसहस्राणि दशकोटिशतानि च ।
पुष्करे सन्ति तीर्थानि येषां संख्या सुदुष्करा ॥१४९॥
यत्र संनिहितो ब्रह्मा विष्णुश्चैव सदाशिवः ।
तथैव द्वादशादित्या वसवोष्टौ महीपते ॥१५०॥
एकादश तथा रुद्रा विश्वेदेवाश्च सर्वशः ।
ऊनपञ्चाशदनिलाः साध्यास्तुषितनामकाः ॥१५१॥

भास्कराश्चैव सकला महाराजिकसंज्ञकाः ।
गन्धर्वाप्सरसो नागा यक्षराक्षसगुह्यकाः ॥१५२॥
मुनयो मानवाश्चैव तथा राजर्षयोऽखिलाः ।
दैत्याश्च दानवाश्चैव तथा ब्रह्मर्षयोऽपि च ॥१५३॥
तपस्विनो योगिनश्च दानशीला दृढव्रताः ।
पुष्करं समुपाश्रित्य परमां श्रियमाप्नुवन् ॥१५४॥
मनसा स्मृतमात्राणि पुष्कराणि मनीषिभिः ।
धुन्वन्ति सर्वपापानि त्रिसन्ध्यमवनीपते ॥१५५॥
गायत्र्या चैव सावित्र्या ब्रह्मा लोकपितामहः ।
पुष्करे निवसन्नित्यं संचिनोति परां मुदम् ॥१५६॥
ऋषयः पितरो देवा ब्रह्माणमनुसंगताः ।
तत्रासत महाराज पुण्यतीर्थेऽतिपावने ॥१५७॥
अश्वमेधादियज्ञानां तत्र पुण्यं प्रतिष्ठितम् ।
स्नानाद्दानाज्जपाद्धोमात्तथा ब्राह्मणभोजनात् ॥१५८॥
पुण्यलोकानवाप्नोति पुष्करस्य प्रभावतः ।
यत्किञ्चिदपि कर्तव्यं पुण्यमत्र मनीषिणा ॥१५९॥
सकृत्स्नानेन दानेन नरः सर्वमवाप्नुयात् ।
न दुर्गतिं व्रजेत् कांचिन्नच दारिद्र्यमाप्नुते ॥१६०॥
कार्तिक्यां च महीपाल यो नरः स्नाति पुष्करे ।
स तत्पुण्यमवाप्नोति यदक्षय्यं प्रचक्ष्यते ॥१६१॥
त्रिसन्ध्यं यः स्मरेद्राजन् पुष्कराणि दृढव्रतः ।
सर्वतीर्थाभिषेकस्य पुण्यमाप्नोति मानवः ॥१६२॥
पुष्करे स्नानमात्रेण स्त्री वा पुरुष एव वा ।
आजन्मकृतपापस्य परं पारमवाप्नुयात् ॥१६३॥
देवतानां यथा विष्णुर्ग्रहाणां तपनो यथा ।
नक्षत्राणां यथा चन्द्रो मासानां माधवो यथा ॥१६४॥
सिन्धूनां सागरो यद्वद्वर्णानां ब्राह्मणो यथा ।
तथैव सर्वतीर्थानां मुख्यं पुष्करमुच्यते ॥१६५॥

यथा समस्तकाव्यानामाद्यं रामायणं स्मृतम् ।
तथा सकलतीर्थानामाद्यं पुष्करमुच्यते ॥१६६॥
व्रीहीन् वापि यवान् वापि यो वपेत् पुष्करावनौ ।
स सर्वयाज्ञिकं पुण्यं लभते नात्र संशयः ॥१६७॥
पूर्णवर्षशतं येन हुतमप्यावसथ्यके ।
कार्तिक्यां पूर्णिमायां च स्नानमात्रस्य तत्फलम् ॥१६८॥
कृत्वा प्रदक्षिणं तत्र पुष्करक्षेत्रमुत्तमम् ।
सर्वयज्ञफलं प्राप्य स्वर्गे लोके महीयते ॥१६९॥
यज्ञवाटं परिक्रम्य दृष्ट्वा वाराहमीश्वरम् ।
सोमनाथं समभ्यर्च्य गत्वा च मखवेदिकाम् ॥१७०॥
घृतकुल्यां मधोः कुल्यां स्नात्वा देवनदीमिह ।
सर्वपापविशुद्धात्मा पूतो भवति मानवः ॥१७१॥
गायत्रीं चैव सावित्रीं स्मृत्वा देवीं सरस्वतीम् ।
सर्वयज्ञफलं प्राप्य पूतो भवति मानवः ॥१७२॥
जम्बूमार्गं ततो गत्वा सर्वपापं व्यपोहयेत् ।
इदं काशीसमं क्षेत्रं पुण्यं सर्वाघनाशनम् ॥१७३॥
चर्मण्वत्यां महातीर्थं जम्बूमार्गाभिधं महत् ।
पदे पदे तत्र सन्ति शिवलिङ्गानि भूमिप ॥१७४॥
तानभ्यर्च्य नमस्कृत्य सर्वान् कामानवाप्नुयात् ।
जम्बूमार्गं गमिष्यामि जम्बूमार्गे वसाम्यहम् ॥१७५॥
इत्येवं ब्रुवमाणोऽपि प्रातरुत्थाय मानवः ।
महत्पुण्यमवाप्नोति काशीवासशताधिकम् ॥१७६॥
जम्बूमार्गे महाराज मुनीनामाश्रमावली ।
तत्र चैव नरो गत्वा धौतपापः प्रजायते ॥१७७॥
पारिजातगिरिस्तत्र पुण्यदेशः प्रतिष्ठितः ।
तत्रैव षट्पुरं[1] नाम गिरिमध्ये प्रतिष्ठितम् ॥१७८॥

---

१. "षटकडेति भाषा" टि०—मथु० ।

बिल्वकेश्वरसंज्ञं तच्छिवलिङ्गं प्रतिष्ठितम् ।
दर्शनात् स्पर्शनात् तस्य हरेत् पापं त्रिजन्मजम् ॥१७६॥
ततः पुण्यतमां गच्छेद्देवगन्धर्वसेविताम् ।
केतुमालां च मेध्यां च समाप्लुत्य[1] विशेषतः ॥१८०॥
गच्छेत्तु रक्तदन्तायाः स्थानं परमपुण्यदम् ।
रक्तदन्तां नमस्कृत्य सुरथस्य पुरे नृप ॥१८१॥
आजन्मसंभवं पापं तत्क्षणादेव नाशयेत् ।
सुरथस्य पुरं[2] राजन् पवित्रं पुण्यवर्द्धनम् ॥१८२॥
तस्याभिगमनादेव सर्वं पापं व्यपोहयेत् ।
शिवलिङ्गसहस्राणि यत्र सन्ति पदेपदे ॥१८३॥
गङ्गारण्ये नरः स्नात्वा सर्वपापैर्विमुच्यते ।
सैन्धवारण्ययात्रान्तरेषा यात्रा प्रशस्यते ॥१८४॥
लोहार्गलं नाम तीर्थं तस्मिन् देशे प्रतिष्ठितम् ।
तत्र स्नात्वा च दत्त्वा च दशसोमशतं लभेत् ॥१८५॥
गालवस्याश्रमं गत्वा मृगपक्षिनिषेवितम् ।
तत्र स्नात्वा च दत्त्वा च ब्रह्महत्यां व्यपोहति ॥१८६॥
पञ्चरात्रमिह स्थित्वा ब्रह्मचर्यपरो नरः ।
आजन्मसंभवं पापं विधुनोति न संशयः ॥१८७॥
उज्जयिन्यां पवित्राणि स्थानानि शृणु भूपते ।
येषु यात्रां सकृत्कृत्वा पुण्यभाजनतां व्रजेत् ॥१८८॥
तिस्रस्तत्र पुरीः सन्ति महापुण्यफलप्रदाः ।
आदौ ब्रह्मपुरी राजन् भवेद्विष्णुपुरी ततः ॥१८९॥
ततो महारुद्रपुरी सर्वपापप्रणाशिनी ।
यस्याः संदर्शनादेव सर्वं पापं प्रणश्यति ॥१९०॥
महाकालपुरी सर्वा यत्र सिप्रा महानदी ।
महाकालेश्वरं यत्र शिवलिङ्गं पुरातनम् ॥१९१॥

---

१. समासुत्य—अयो० । समसुत्या—रीवाँ । २. "सथूरपुरेति भाषा" टि०—मथु० ।

श्मशानमूषरं क्षेत्रं पीठं चैव वनं तथा ।
पञ्चैकत्र न लभ्यन्ते महाकालपुरीं विना ॥१९२॥
गन्धर्वाणां श्मशानं तन्महापुण्यमिति स्थितम् ।
ऊषरं पुण्यपापानां तत्रैव खलु तिष्ठति ॥१९३॥
अवन्तिका महाक्षेत्रं जनानां पुण्यवर्द्धनम् ।
हरसिद्धिशिवापीठं जपतां सर्वसिद्धिदम् ॥१९४॥
महारुद्रपुरीमध्ये कोटितीर्थं नराधिप ।
स्नात्वा दत्त्वा च विप्रेभ्यः कोटितीर्थफलं लभेत्॥१९५॥
अगस्त्येश्वरसंज्ञं तच्छिवलिङ्गमिह स्थितम् ।
गत्वा नत्वा यमभ्यर्च्य हयमेधातिगं फलम् ॥१९६॥
तत्र विष्णुपुरी मध्ये गोमतीकुण्डमुत्तमम् ।
तत्र स्नात्वा विशेषेण पूजयित्वा जनार्दनम् ॥१९७॥
ब्रह्महत्यादिभिः पापैर्मुक्तो भवति मानवः ।
अङ्गप्रपाते नरः स्नात्वा पूतो भवति तत्क्षणात् ॥१९८॥
अधिसिद्धवटच्छायां स्थित्वा तत्र च मानवः ।
संसारतापनिर्मुक्तो भवेदिति न संशयः ॥१९९॥
तथा ब्रह्मपुरी मध्ये स्नायाद् भूरिफलाप्तये ।
चतुर्द्वारेषु वै तस्या यानि स्थानानि भूपते ॥२००॥
तेषु गत्वा च दत्त्वा च पुण्यं महदवाप्नुयात् ।
यत्र[1] कुत्रापि क्षिप्रायां[2] स्नात्वा दत्त्वा च मानवः ॥२०१॥
असंख्यं फलमाप्नोति सोमयागकृतं नृणाम् ।
कामधेनूद्भवैः क्षीरैर्निर्मितेयं महानदी ॥२०२॥
सुरसा मृष्टसलिला तीर्थकोटिनिषेविता ।
अथ चन्द्रसुतां गच्छेत् पुण्याश्रमनिषेविताम् ॥२०३॥
तस्यामाप्लुत्य विधिवत् प्राणायामं समाचरेत् ।
वर्षाणि शतमाचर्य तपसः प्राप्नुयात् फलम् ॥२०४॥

---

१. तत्र—रीवाँ । २. क्षिप्रायां—अयो० ।

वह्वृचः सन्ति महानद्यस्तीर्थानि सुबहूनि च ।
तानि सर्वाणि रेवायाः कलां नार्हन्ति षोडशीम् ॥२०५॥
दर्शनाद्धरते पापं किं पुनः स्नानदानतः ।
रेवातीरे नरः स्थित्वा पञ्चरात्रं तपोरतः ॥२०६॥
शतवर्षकृतात्यर्थतपश्चर्याफलं लभेत् ।
तमालतरुसंछन्नं महावेतसवेष्टितम् ॥२०७॥
अनेकवनसंकीर्णं तीरमस्याः सुपावनम् ।
यस्मिन् क्षणमपि स्थित्वा पुण्यवातनिषेवितः ॥२०८॥
आजन्मसंभवैर्घोरैरंहोभिर्मुच्यते नरः ।
नर्मदासलिलस्पर्शी यत्र वाति समीरणः ॥२०९॥
स वै पुण्यतमो देशस्तपस्विजनसेवितः ।
प्रत्यक्स्रोता नदी पुण्या नर्मदा लोकपावनी ॥२१०॥
यानि तीर्थानि भुवने तानि तस्यां समासते ।
पितामहादयो देवा तथा देवर्षयोऽखिलाः ॥२११॥
सिद्धाः किंपुरुषाश्चैव तस्यास्तीरे निवासिनः ।
तत्र विस्रवसः स्थानं महर्षेः संप्रतिष्ठितम् ॥२१२॥
कुबेरो भगवान् यत्र नित्यमेव प्रतिष्ठितः ।
वैदूर्यशिखरो नाम्ना पर्वतः स हि कीर्तितः ॥२१३॥
फलिनः पुण्यवन्तश्च हरितच्छदशालिनः ।
भूरुहाः सुन्दर-छायाः सूर्यातपनिवारकाः ॥२१४॥
प्रसन्नसलिलं दिव्यं तत्रैव विपुलं सरः ।
उत्फुल्लकमलामोदसुगन्धितहरित्तटम् ॥२१५॥
सविलासरसोन्मत्तदेवगन्धर्वसेवितम् ।
विश्वामित्रस्य राजर्षेस्तत्रपुण्यतमा नदी ॥२१६॥
यस्यास्तीरे यज्ञसभामध्ये राज्ञां हि पश्यताम् ।
नहुषस्याग्रजो राजा ययातिः पुण्यकीर्तनः ॥२१७॥
यतमानः स्वर्गलोकात् पुनर्लेभे परां गतिम् ।
कक्षषेणमुनेर्यत्र सुपुण्यतम आश्रमः ॥२१

च्यवनस्य च राजेन्द्र तत्रैवाश्रम उत्तमः ।
कार्तवीर्यश्च राजेन्द्रो हैहयान्वयभूषणः ॥२१९॥
यत्र बाहुसहस्रेण रुरोध खलु नर्मदाम् ।
सहस्रधाराख्यं तीर्थं नार्मदे विश्वपावनम् ॥२२०॥
यत्र कालाग्निरुद्रश्च सततं संप्रतिष्ठितः ।
स्वाहया सहितो भाति काले काले परिस्फुटः ॥२२१॥
तत्तीर्थं च विशेषेण नार्मदं सर्वपावनम् ।
ॐकारेश्वरशैले च नर्मदा विश्वपावनी ॥२२२॥
मान्धातृनाम्ना विदितः स शैलो दुर्गभूषितः ।
मुचुकुन्दस्य यत्स्थानं सर्वदेवसमन्वितम् ॥२२३॥
यत्र गौरीसोमनाथलिङ्गं परमसुन्दरम् ।
चण्डवेगा नदी यत्र संगता रेवया सह ॥२२४॥
तत्क्षेत्रं केन तुलितं तीर्थानामुत्तमोत्तमम् ।
नर्मदादर्शनेनैष सद्यः शुद्धयति मानुषः ॥२२५॥
रात्रौ प्रवाहिनी चैषा शाङ्करीमूर्तिरुत्तमा ।
सौराष्ट्रे पुण्यतीर्थानि सुबहूनि महीपते ॥२२६॥
ऋषीनामाश्रमाश्चैव सरितः पर्वतास्तथा ।
चमसोद्भेदनं नाम्ना तीर्थानामुत्तमं स्मृतम् ॥२२७॥
प्रभासनामतीर्थं च सर्वदेवनिषेवितम् ।
उदधेस्तीर्थमाख्यातं यात्रया पुण्यकोटिदम् ॥२२८॥
पिण्डारकमहातीर्थं मुनिवृन्दनिषेवितम् ।
उज्जयन्ते गिरौ यानि तीर्थानि धरणीपते ॥२२९॥
तेषु स्नात्वा च दत्त्वा च पूर्वजानपि चोद्धरेत् ।
तपःस्थानानि दिव्यानि यत्र सन्ति तपस्विनाम् ॥२३०॥
तेषूपस्पृश्य सकृदप्यनल्पं पुण्यमाप्नुयात् ।
अथ द्वारवती साक्षान्माधवस्य महापुरी ॥२३१॥
गोमती यत्र सततं रम्या पुण्यतमा नदी ।
यादवेन्द्रस्य कृष्णस्य पुण्यं यत्र निकेतनम् ॥२३२॥

सातिधन्यतमा लोके पुण्या द्वारवती पुरी ।
अथ वक्ष्यामि ते राजन् कुरुक्षेत्रविधिं शुभम् ॥२३३॥
यत्रातिपुण्यसलिला नदी नाम्ना सरस्वती ।
उषित्वा यत्र मासं तु सर्वं फलमवाप्नुयात् ॥२३४॥
द्वारपालं महायज्ञमादौ समभिवाद्य च ।
ततोऽन्तः प्रविशेत्तत्र कुरुक्षेत्रे नराधिप ॥२३५॥
विष्णोः स्थानं ततो गत्वा महत्पुण्यमवाप्नुयात् ।
तत्र स्नात्वा हरिं दृष्ट्वा महायज्ञफलं लभेत् ॥२३६॥
परिप्लवं नाम तीर्थं ततो गच्छेन्महीपते ।
तत्र स्नात्वा च दत्त्वा च ब्राह्मणेभ्यः पयस्विनीः ॥२३७॥
अग्निष्टोमफलं प्राप्य स्वर्गे लोके विराजते ।
पृथिव्यास्तीर्थमभ्येत्य स्नानं कुर्याद्विधानतः ॥२३८॥
गोसहस्रप्रदानस्य फलमाप्नोति मानवः ।
शालूकिनी महातीर्थं गत्वा स्नात्वा विधानतः ॥२३९॥
दशाश्वमेधिके तीर्थे स्नायात्तत्र विधानतः ।
नागानां तीर्थमभ्येत्य तत्र स्नात्वा विधानतः ॥२४०॥
अत्यग्निष्टोमजं पुण्यमवाप्नोति महीपते ।
नागलोकं परिप्राप्य मोदते दिवि देववत् ॥२४१॥
तरन्तुकं द्वारपालं प्राप्यैकां रजनीं वसेत् ।
अमितं पुण्यमाप्नोति तं नमस्कृत्य मानवः ॥२४२॥
गत्वा पञ्चनदं तीर्थं दर्शनादेव पावनम् ।
कोटितीर्थे ततः स्नात्वा सर्वयज्ञफलं लभेत् ॥२४३॥
सुपुण्यमश्विनोस्तीर्थं स्नात्वा तत्र विधानतः ।
अश्विनीसुतवद्रूपं लभते नात्र संशयः ॥२४४॥
वाराहतीर्थमासाद्य मुनिवृन्दनिषेवितम् ।
कोटियज्ञफलं लब्ध्वा पुण्यकायो भवेन्नरः ॥२४५॥
भुंजावरं[1] ततो गत्वा सर्वदेवनमस्कृतम् ।
शैवतीर्थं महत्पुण्यं सुमहत्पातकं दहेत् ॥२४६॥

---

१. मुंजवटं—अयो० ।

तत्र रात्रं वसेद् धीरो महायज्ञफलाप्तये ।
स्नात्वा यक्षीं समभ्येत्य तत्रैव धरणीपते ॥२४७॥
सर्वान् कामानवाप्नोति त्रैलोक्ये कीर्तिमान् भवेत् ।
तत्र प्रदक्षिणो भूत्वा स्नायात् पुष्करसंमिते ॥२४८॥
जामदग्न्येन रामेण स्थापिते स्वानुभावतः ।
ततो रामेण वीरेण निर्मितान् क्षत्रशोणितैः ॥२४९॥
दृष्ट्वा पञ्चह्रदांस्तत्र महत्पुण्यमवाप्नुयात्[1] ।
पितरस्तर्पिता यत्र तथैव च पितामहाः ॥२५०॥
रुधिरेणैव रामेण सुमहाघोरकर्मणा ।
तैरेव च वरं दत्त्वा कृतं तत्तीर्थमुत्तमम् ॥२५१॥
तेषु ह्रदेषु विधिवत् स्नात्वा दत्त्वा द्विजन्मने ।
जामदग्न्यं समभ्यर्च्य महत्पुण्यमवाप्नुयात् ॥२५२॥
वंशमूलकतीर्थे च स्नात्वा वंशं समुद्धरेत् ।
कायशोधनतीर्थे च स्नात्वा कायं विशोधयेत् ॥२५३॥
लोकोद्धारमहातीर्थे स्नात्वा लोकान् समुद्धरेत् ।
श्रीतीर्थे च समाप्लुत्य परमां श्रियमाप्नुयात् ॥२५४॥
कपिलातीर्थमध्ये च सकृदप्याप्लुतो जनः ।
सहस्रकपिलादानफलमाप्नोति मानवः ॥२५५॥
सूर्यतीर्थे नरः स्नात्वा पितृदेवार्चने रतः ।
अग्निष्टोमफलं प्राप्य सूर्यलोकमनुव्रजेत् ॥२५६॥
तीर्थानामुत्तमे तीर्थे गवां भवन आप्लुतः ।
गोसहस्रप्रदानस्य फलमाप्नोति मानवः ॥२५७॥
तथैव शङ्खिनी तीर्थे देवी[2]तीर्थेऽतिपावने ।
स्नात्वा दत्त्वा द्विजातिभ्यो महदैश्वर्यमाप्नुयात् ॥२५८॥
मचक्रुकं[3] द्वारपालं गत्वा तीर्थपरायणः ।
सरस्वत्यां समाप्लुत्य महायज्ञफलं लभेत् ॥२५९॥

---

१. सुमहत्पुण्यमाप्नुयात्—रीवाँ। २. देव°—रीवाँ। ३. मचक्तुकं—रीवाँ, मथु०, बड़ो०।

ब्रह्मावर्ते महातीर्थे गत्वा स्नात्वा च मानवः ।
ब्रह्मलोकं समासाद्य मोदते पद्मयोनिवत् ॥२६०॥
सुतीर्थके महातीर्थे पितृदेवार्चने रतः ।
अश्वमेधफलं लब्ध्वा पितृलोके महीयते ॥२६१॥
काशीश्वरं च तीर्थेषु युवत्या सुसमाप्लुतः ।
महीयते ब्रह्मलोके सर्वदुःखविवर्जितः[1] ॥२६२॥
मातृतीर्थे च राजेन्द्र स्नात्वा दत्त्वा द्विजातये ।
अनन्तां श्रियमाप्नोति सर्वसौख्यविवर्द्धितः ॥२६३॥
गत्वा शीतवनं चैव स्नात्वा तीर्थोत्तमे जनः ।
महतीं शुद्धिमाप्नोति क्षणमात्रमपि स्थितः ॥२६४॥
श्वानलोमापहे तीर्थे स्वलोमानि निकृत्य वै ।
निक्षिपेत् तेन कायस्य महतीं शुद्धिमाप्नुयात् ॥२६५॥
दशाश्वमेधतीर्थाम्बुन्याप्लुत्य रघुसत्तम ।
कोटितीर्थावगाहस्य[2] शुद्धिमाप्नोति मानवः ॥२६६॥
सकृदाप्लुत्य राजेन्द्र तीर्थे मृगविमोचने ।
निर्धूय सर्वपापानि स्वर्गलोकमवाप्नुयात् ॥२६७॥
ततो मानुषतीर्थात्तु क्रोशोपरि महानदी ।
आपगेतिस्मृता नाम्ना तस्यामाप्लुत्य मानुषः ॥२६८॥
श्यामाकपायसैर्विप्रान् भोजयित्वा कृताह्निकः ।
भूयांसं धर्ममाप्नोति पितृदेवार्चने रतः ॥२६९॥
कोटयस्तेन वै विप्रा भोजिताः स्युर्न संशयः ।
स्नानैर्दानैश्च होमैश्च भूयः सुकृतमर्जयेत् ॥२७०॥
ब्रह्मोदुम्बरतीर्थे च लक्ष्मणः स्थानमुत्तमम् ।
तत्र सप्तर्षिकुण्डेषु स्नायान्नियमपूर्वकः ॥२७१॥
तथा कल्पितकेदारे स्नात्वा तीर्थोत्तमे नृप ।
महतीं सिद्धिमाप्नोति कपिलस्य प्रभावतः ॥२७२॥

---

१. विवर्जिते—रीवाँ । २. °तीर्थविगाहस्य—अयो०, मथु०, रीवाँ ।

अभ्येत्य पद्मयोनिं च ब्राह्मणक्षत्रियादयः ।
पूजयेयुर्लोकनाथं ब्रह्माणं विश्वकारकम् ॥२७३॥
तेन पुण्येन राजेन्द्र ब्रह्मलोकमवाप्नुयुः ।
गत्वा कपिलकेदारं पापराशिं विदाहयेत् ॥२७४॥
स्नात्वा सरकतीर्थे च प्राप्य कृष्णचतुर्दशीम् ।
रुद्रं संपूज्य विधिवत् सर्वान् कामानवाप्नुयात् ॥२७५॥
तीर्थानि कोटयस्तिस्रो यत्र संनिहितानि वै ।
रुद्राणां कोटयश्चैव ह्रदेषु किल जाग्रति ॥२७६॥
इलास्पदं महातीर्थं तत्र स्नात्वा विधानतः ।
देवान् संपूज्य दत्त्वा च पितृभ्यः श्राद्धमुत्तमम् ॥२७७॥
वाजपेयफलं प्राप्य स्वर्गलोकमवाप्नुयात् ।
किं दानं चैव किं जप्यं[1] किं तीर्थमुत्तमोत्तमम्[2] ॥२७८॥
तयोः[3] स्नात्वा विधानेन पुण्यं स्याद्दानजाप्ययोः ।
यत्र प्राप्येत राजेन्द्र कोटिदानजपादिभिः ॥२७९॥
कलश्यां[4] तीर्थतोयेन सकृदाचम्य मानवः ।
अग्निष्टोमोद्भवं पुण्यमाप्नोति नृप तत्क्षणात् ॥२८०॥
ततः पूर्वं नारदस्य तीर्थं नाजन्मनामनि[5] ।
सकृत् स्नात्वा नरो राजन् न पुनर्जन्मभाग् भवेत्॥२८१॥
शुक्ले दशम्यामाप्लुत्य पुण्डरीकस्य वारिणि ।
वैतरिण्यां पुण्यतीर्थे स्नात्वाभ्यर्च्य महेश्वरम् ॥२८२॥
विमुक्तः सर्वपापेभ्यो महत्पुण्यमवाप्नुयात् ।
फलकीवनमध्ये च दृषद्वत्यां समाप्लुतः ॥२८३॥
तीर्थे चाखिलदेवौघतपःस्नानैकभाजने ।
महायज्ञफलं चैव महादानफलं लभेत् ॥२८४॥
पाणिखाते नरः स्नात्वा देवतापितृतर्पणी ।
ऋषीणां गतिमाप्नोति राजसूयफलान्वितः ॥२८५॥

---

१. यज्ञं—अयो०, रीवाँ । २. °मुत्तममत्र वै—मथु०, बड़ो० । ३. तत्र-रीवाँ
४. तदस्य—रीयाँ । ५. तीर्थेन जन्मवानपि—रीवाँ ।

मिश्रके च सकृद् गत्वा स्नात्वा तीर्थेषु तत्र वै ।
मिश्रितं फलमाप्नोति सर्वतीर्थोद्भवं नृप ॥२८६॥
यत्र व्यासेन तीर्थानि सर्वाणि जगतीतले ।
आनीय स्थापितान्यद्धा तेन मिश्रमितीरितम् ॥२८७॥
पुण्यं व्यासवनं गत्वा स्नात्वा तीर्थे मनोजवे ।
असंख्यं पुण्यमासाद्य स्वर्गलोकमवाप्नुयात् ॥२८८॥
मधुवट्यां शुभे तीर्थे देवस्थाने समाप्लुतः ।
ईश्वरीं च समभ्यर्च्य कोटिदानफलं लभेत् ॥२८९॥
कौशिक्याश्च दृषद्वत्याः संगमे सुसमाप्लुतः ।
कोटितीर्थावगाहोत्थं पुण्यमाप्नोति मानवः ॥२९०॥
व्यासस्थलीं समासाद्य पुण्यसंचयवान् भवेत् ।
व्यासोऽत्र मायया विष्णोः पुत्रशोकाभिमूर्छितः ॥२९१॥
देवैरुत्थापितः सर्वैर्ज्ञाततत्त्वः स्वयं मुनिः ।
तत्र स्नानेन दानेन पुण्यमक्षय्यमाप्नुयात् ॥२९२॥
स्नात्वा किंदत्तके कूपे तिलदायी नृपोत्तम ।
ऋणत्रयविनिर्मुक्तो लभते प्रेत्य सद्गतिम् ॥२९३॥
वेदीतीर्थे[1] सकृत् स्नात्वा अहःसु दिनयोरपि ।
लभेत् सहस्रगोपुण्यं रविलोकं च मानवः ॥२९४॥
नृगधूमे रुद्रपदे स्नात्वा संपूज्य शङ्करम् ।
नरोऽश्वमेधजं पुण्यं लभते नात्र संशयः ॥२९५॥
कोटितीर्थे ततः स्नायात् कोटितीर्थफलाप्तये ।
गत्वा वामनके तत्र स्नात्वा विष्णुपदे नरः ॥२९६॥
वामनं चैव संपूज्य विष्णुलोके महीयते ।
कुलम्पुने सकृत् स्नात्वा कुलकोटिं समुद्धरेत् ॥२९७॥
वायुह्रदे देवह्रदे[2] शालिसूर्ये च मानवः ।
स्नानदानादिविधिभिरसंख्यं पुण्यमाप्नुयात् ॥२९८॥

---

१. देवतीर्थे—रीवाँ । २. ब्रह्मह्रदे—अयो० ।

श्रीकुञ्जं नैमिषं कुञ्जं पुण्यक्षेत्रं सुपावनम् ।
सरस्वत्याः शुभे तीर्थे तयोः स्नात्वा विधानतः ॥२९९॥
कन्यातीर्थे च राजर्षे[1] ब्रह्मणः स्थान एव च ।
सोमतीर्थे महत्पुण्यं सप्तसारस्वते तथा ॥३००॥
स्नात्वा चोशनसे तीर्थे तीर्थे कापालमोचने ।
अग्नितीर्थे महातीर्थे विश्वामित्रस्य वै मुनेः ॥३०१॥
ब्रह्मयोनौ च विधिवत् स्नात्वा दत्त्वा च शक्तितः ।
अमेयं पुण्यमाप्नोति परत्रेह च मोदते ॥३०२॥
तीर्थानामुत्तमं तीर्थमथ गच्छेत् पृथूदकम् ।
तत्राभिषिच्य विधिना तर्पयेद्देवतापितॄन् ॥३०३॥
आजन्मकलितं तस्य घोरं पापं प्रशाम्यति ।
अश्वमेधादियज्ञानां फलमासादयेन्नरः ॥३०४॥
भुक्तिदं मुक्तिदं चैव कामदं शुभदं तथा ।
पुण्यात्पुण्यतमं प्राहुर्नृणामेतत् पृथूदकम् ॥३०५॥
पावनं देवयजनं[2] कुरुक्षेत्रं महीपते ।
न तत्समं क्वचित्तीर्थं त्रिषु लोकेषु कीर्तितम् ॥३०६॥
सर्वस्माद्वै कुरुक्षेत्रान्महापुण्या सरस्वती ।
ततः पुण्यानि तीर्थानि तीर्थेभ्योऽपि पृथूदकम् ॥३०७॥
वरेण्यं सर्वतीर्थानां काशीकोटिफलाधिकम् ।
स्मरणाद् गमनाद्वापि स्पर्शनाद्दर्शनादपि ॥३०८॥
साक्षान्मुक्तिप्रदं तीर्थं त्रिषु वेदेषु गीयते ।
न ततश्चोत्तमं तीर्थं त्रिषु लोकेषु विद्यते ॥३०९॥
पापा अपि ततस्तत्र विमुच्येरन् न संशयः ।
दूरस्थः स्मरणेनापि तस्य शुद्धतमो भवेत् ॥३१०॥
पृथूदकान्तर्विख्यातं तीर्थं नाम्ना मधुस्रवम् ।
तत्र स्नानेन दानेन न पुनर्जन्मभाग् भवेत् ॥३११॥

---

१. राजेन्द्र—मधु०, बड़ो० । २. °यज्ञनां—अयो० ।

गच्छेत् पुण्यतमं राजन् देवीतीर्थमनुत्तमम् ।
सरस्वत्यारुणा यत्र[1] संगता लोकपावनी ॥३१२॥
त्रिरात्रमुषितस्तत्र स्नानं कृत्वा दृढव्रतः ।
मुच्यते सर्वपापेभ्यो महायज्ञांश्च विन्दति ॥३१३॥
कुलकोटीः समुद्धर्तुं क्षमो भवति पुण्यतः ।
महच्छुभमवाप्नोति शुद्धिं च महतीं नृप ॥३१४॥
तत्र तीर्थेऽवकीर्णाख्ये चतुः सामुद्रिकेऽपि च ।
सकृदाप्लुत्य यत्पुण्यं लभतेऽह्नाय तच्छृणु ॥३१५॥
अब्राह्मणो ब्राह्मणः स्यात् पूर्वत्र जगतीपते ।
चतुःसहस्रगोदानं परत्र च लभेद् ध्रुवम् ॥३१६॥
शतसाहस्रके तीर्थे तथा साहस्रकेऽपि च ।
स्नात्वा वा सकृदाचम्य महत्फलमवाप्नुयात् ॥३१७॥
यद्यत् करोति नृपते दानव्रतजपादिकम् ।
सहस्रगुणितं पुण्यं भवतीत्यनुशुश्रुम ॥३१८॥
विशुद्धे रेणुकातीर्थे तथा तीर्थे विमोचने ।
यज्ञेश्वरे च विधिवत् स्नानदानादिभिः शुचिः ॥३१९॥
तैजसे वारुणे तीर्थे कुरुतीर्थे विशुद्धिदे ।
स्वर्गद्वारे च नरकतीर्थे च[2] ब्रह्मणः स्थले ॥३२०॥
रुद्राणीसंनिधौ चैव तथा विश्वेश्वरालये ।
पद्मनाभस्य च स्थाने तीर्थे चाखिलदैवते ॥३२१॥
तथा पावनतीर्थे च कपिगङ्गाह्रदेऽपि च ।
गङ्गाह्रदे च कूपे च त्रिकोटीतीर्थसंमिते ॥३२२॥
आपगायां स्थाणुवटे वदरीपावने तथा ।
इन्द्रमार्गे महाराज आदित्यस्याश्रमे तथा ॥३२३॥
सोमतीर्थे दधीचस्य तीर्थे सारस्वतोद्भवे ।
कन्याश्रमे संनिहत्यां संनीतायां नराधिप ॥३२४॥

---

१. यस्य—रीवाँ । यस्तु०—अयो० । २. वै—मधु०, बड़ो० ।

स्नानं दानं तथा श्राद्धं जपहोमादिकं तथा ।
यद्यत् करोति सुकृतं तत्तदक्षयतां व्रजेत् ॥३२५॥
यावन्ति सन्ति तीर्थानि पृथिव्यां पृथिवीपते ।
तानि सर्वाणि नियतं संनीतानि महात्मभिः ॥३२६॥
संनीतेति श्रुता लोके तेनेयं सर्वपावनी ।
तस्यां यः कुरुते श्राद्धं ग्रहणे चन्द्रसूर्ययोः ॥३२७॥
अश्वमेधसहस्रस्य स राजन् पुण्यमाप्नुयात् ।
स्नानं दानं तथा श्राद्धं तत्तद्[1] दुष्कृतनाशनम् ॥३२८॥
द्वारपालं महायक्षं मचक्रुकमनुव्रजेत् ।
अभिवाद्य परिक्रम्य यात्राफलमुवाप्नुयात् ॥३२९॥
कोटितीर्थं महीपाल गङ्गाह्रदमनुत्तमम् ।
गत्वा स्नात्वा च विधिवत् महायज्ञफलं लभेत् ॥३३०॥
कुरुक्षेत्रसमं तीर्थं पृथिव्यां नैव विद्यते ।
धर्मक्षेत्रमिति प्रोक्तं मुनिश्रेष्ठैः पुरातनैः ॥३३१॥
कुरुक्षेत्ररजःस्पर्शात् पापात्मापि दिवं व्रजेत् ।
यावन्ति सन्ति तीर्थानि कुरुक्षेत्रे तु तानि वै ॥३३२॥
मनसापि कुरुक्षेत्रं यो गच्छेत् प्रातरुत्थितः ।
तस्यापि सर्वपापानि विलीयन्ते न संशयः ॥३३३॥
ब्रह्मणो वेदिराख्याता पुण्यभूमिः सनातनी ।
पावनं देवयजनं कुरुक्षेत्रमिति स्मृतम् ॥३३४॥
यत्र ब्रह्मर्षयो राजन् देवर्षिप्रवरास्तथा ।
राजर्षयश्च राजेन्द्र पुण्यवन्तः समासते ॥३३५॥
पश्यन्ति गच्छन्ति वसन्ति ये नराः पुण्यं कुरुक्षेत्रमुपासते च ये[2] ।
तेषां जनुः सार्थकमत्र संस्थितौ[3] परे तु दैवेन सदैव वञ्चिताः ॥३३६॥
ये जनाः सततं राजन् कुरुक्षेत्रे निवासिनः ।
किं करोति यमस्तेषां पुण्यराशिनिवासिनाम् ॥३३७॥

---

१. यत्तद्—रीवाँ । २. तु वै—रीवाँ । तु ये—मधु०, बड़ो० । ३. संसृतौ—मधु०, बड़ो० ।

तरन्तुका महापुण्या रन्तुका विश्वपावनी ।
तयोर्यदन्तरे क्षेत्रं पवित्रं पापनाशनम् ॥३३८॥
रामह्रदा यत्र पुण्यास्तथा यक्षो मचक्रुकः ।
स्यमन्तपञ्चकं क्षेत्रं तयोरन्तश्च भूपते ॥३३९॥
इयमुत्तरवेदिर्वै ब्रह्मणो वन्दिता सुरैः ।
कुरुक्षेत्रमिति ख्यातं स्थानं विश्वस्य पावनम् ॥३४०॥
पञ्चयोजनविस्तीर्णं सरस्वत्याभियाचितम् ।
कुरुणा यज्ञशीलेन यत्रोप्तो धर्म उत्तमः ॥३४१॥
एतदुद्देशतः प्रोक्तं मया तुभ्यं महीपते ।
कुरुक्षेत्रस्य माहत्म्यमत[1]स्तीर्थान्तिरं[2] शृणु ॥३४२॥

इतिश्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे पूर्वखण्डे दशरथतीर्थ-यात्रायां तीर्थानुकथने त्र्यधिकशततमोऽध्यायः ॥१०३॥

●

चतुरधिकशततमोऽध्यायः

वशिष्ठ उवाच

यत्रधर्मस्तपश्चक्रे धर्मतीर्थं तदुत्तमम् ।
महाधर्मप्रदं भूप गमनात् पापनाशनम् ॥ १ ॥
स्नानदानादिभिश्चैव ज्योतिष्टोमफलप्रदम् ।
विष्णुलोकप्रदं साक्षात् सप्तविंशतिमुक्तिदम् ॥ २ ॥
ततः सौगन्धिकवनं ब्रह्मादिसुरसेवितम् ।
तपस्विनां मुनीनां च स्थानभूतं सनातनम् ॥ ३ ॥
सिद्धचारणगन्धर्वकिन्नरोरगसेवितम् ।
तत्र गत्वा सर्वपापैर्विमुक्तो भवति क्षणात् ॥ ४ ॥
स्नात्वा प्लक्ष[3]सरस्वत्यां पितृदेवार्चने रतः ।
सर्वपापविशुद्धः सन्नश्वमेधफलं लभेत् ॥ ५ ॥

---

१. भूय°—मथु०, बड़ो० । २. प्रविस्तीर्णोत्तर—अयो० । ३. °प्लुत्य—अयो० ।

शम्यानिपातषट्के च स्नात्वा नृपतिसत्तम ।
सहस्रकपिलादानफलमाप्नोति मानवः ॥ ६ ॥
सुगन्धां शतकुम्भां च पञ्चयज्ञं च भूपते ।
गत्वा स्नात्वाप्युषित्वा च सन्ततिं लभते नरः ॥ ७ ॥
त्रिशूलखात[1]तीर्थे च शाकम्भर्यां महीपते ।
सुवर्णाक्षीमहास्थाने धूमावर्त्ते तथोत्तमे ॥ ८ ॥
रथावर्ते च निवसेत् त्रिरात्रं नियतः शुचिः ।
स्नात्वा प्रदक्षिणीकृत्य कोटितीर्थफलं लभेत् ॥ ९ ॥
धारानदीजलैः स्नात्वा किमर्थं यमकिङ्करैः ।
भयमाप्नोति राजेन्द्र सर्वपापविवर्जितः ॥१०॥

ततो गच्छेन्महातीर्थं गङ्गाद्वारे महागिरौ ।
तत्र स्नात्वा कोटितीर्थे कोटियज्ञफलं लभेत् ॥११॥
उद्धरेत् स्वकुलं चाशु महादानफलं लभेत् ।
नागतीर्थं लभतिकां[2] गत्वा स्नात्वा च मानवः ॥१२॥
सहस्रकपिलादानफलमाप्नोति तत्क्षणात् ।
लभेच्च स्वर्गवासाय[3] पुण्यमक्षय्यमद्भुतम् ॥१३॥

गङ्गायाश्च सरस्वत्याः संगमे रघुसत्तम ।
भद्रकर्णह्रदे चैव तथा कुब्जाम्रके नृप ॥१४॥
अरुन्धती वटे चैव स्नात्वा दद्याद् यथाविधि ।
गोसहस्रफलं लब्ध्वा वाजिमेधफलं लभेत् ॥१५॥
ब्रह्मावर्तं महापुण्यं यमुनाप्रभवं तथा ।
दर्वीसंक्रमणं तीर्थं सिन्धोश्च प्रभवं नृप ॥१६॥

वेदीं च ऋषिकुल्यां च वासिष्ठं तुङ्गमेवच ।
चीरप्रमोक्षणं सन्ध्यां विद्यातीर्थं च भूपते ॥१७॥
गत्वा वेतसिकां चैव तीर्थं सुन्दरिकाभिधम् ।
ततो ब्रह्मणिकां चैव स्नायात् सुकृतकोटये ॥१८॥

---

१. °बाण°—रीवाँ । २. भूतिकां च—अयो० । ३. मासाद्य—अयो० ।

काश्मीरमण्डले पुण्या नद्यः पुरुषसत्तम ।
यासु स्नानेन दानेन सर्वैः पापैर्विमुच्यते ॥१९॥
सर्वेषां योगिनां यत्र पुण्या आश्रममण्डलाः ।
प्रत्यक्षं दृश्यते यत्र भगवान् पार्वतीपतिः ॥२०॥
मानसस्याथ सरसो द्वारं पुण्यतमं मतम् ।
ततश्चोज्जानको रम्यो यवक्रीतस्य यत्स्थलम् ॥२१॥
अरुन्धतीवशिष्ठौ च यत्रासाते तपोरतौ ।
कुशवांश्च ह्रदः पुण्यो दिव्यपद्मविराजितः ॥२२॥
भृगुतुङ्गो महाशैलो देवगन्धर्वसेवितः ।
तत्र गत्वा च स्नात्वा च पापलेशो न विद्यते ॥२३॥
वितस्ता पुण्यसलिला पापराशिविनाशिनी ।
यस्याः कूले महर्षीणां पुण्या आश्रममण्डलाः ॥२४॥
जलाचोपजला चैव सुपुण्या यमुना सरित् ।
तासु मज्जनमात्रेण नरः पापाद्विमुच्यते ॥२५॥
स गङ्गायां महानद्यां संस्नातः पुण्यकर्मकृत् ।
पञ्चरात्रं तटे स्थित्वा पुण्यदेहो भवेन्नरः ॥२६॥
तीर्थं विवसनं[1] नाम मैनाके पर्वतोत्तमे ।
अस्याधिरोहमात्रेण पुण्यकर्मा भवेन्नरः ॥२७॥
ऋषिसेव्याः पुण्यतमा नगाः कनखलादयः ।
तत्र पुण्यवहा गङ्गा सप्तर्षिगणसेविता ॥२८॥
यत्र सिद्धिं परिप्राप्तो ब्रह्मणो मानसः सुतः ।
सनत्कुमारो भगवान् पर्वत्रिदशपूजितः ॥२९॥
भृगुतुङ्गे महाराज गमनादेव पूयते[2] ।
उष्णतोयवहा गङ्गा शीततोयवहा क्वचित् ॥३०॥
तामुपस्पृश्य सकृदप्यघं विधुनुते नरः ।
मुनिः स्थूलशिरा नाम तस्य चाश्रम उत्तमः ॥३१॥

---

१. विनशनं—मथु०, बडो० । २. भूपते—अयो०, रीवाँ ।

रैभ्यस्य चाश्रमो रम्यः पुण्यतोयह्रदान्वितः ।
उषित्वैतेषु पुण्येषु पुण्यगात्रत्वमाप्नुयात् ॥३२॥
उशीरबीजं मैनाकं गिरिं श्वेतं च भूपते ।
कालशैलमतिक्रम्य ततः स्थानममानुषम् ॥३३॥
यत्र सप्तविधा गङ्गा देवदृश्या महानदी ।
स्थानं विरजसं पुण्यं यत्राग्निर्भगवान् स्वयम् ॥३४॥
मन्दराद्रिश्चन्द्रसितः कल्पद्रुममनोहरः ।
यक्षाणां वसतिर्यत्र कुबेरस्य महात्मनः ॥३५॥
अनेकशतसाहस्रसंख्या गन्धर्वपुङ्गवाः ।
यक्षेशस्य मनोमोदं कुर्वन्ति सुखमासते ॥३६॥
अनेकरूपरुचिरा नानाबलपराक्रमाः ।
मणिभद्रमुपासीना यक्षराजं महाबलम् ॥३७॥
दुर्गमाः पर्वतास्तत्र कुबेरसचिवालयाः ।
षडयोजनसमुच्छ्रायः कैलाशश्चापि पर्वतः ॥३८॥
देवगन्धर्वसिद्धौघदर्शनौत्कण्ठ्यवर्द्धनः ।
विशाला यत्र नगरी देवगन्धर्वसेविता ॥३९॥
यक्षैःकिंपुरुषैश्चापि सुपर्णैर्नागसत्तमैः
अनेकविबुधैः सेव्या कुबेरसदनोन्मुखैः ॥४०॥
यत्र गङ्गा च यमुना दिव्यस्रोतोविराजिता ।
पुण्यगन्धवहश्चापि यत्र वाति समीरणः ॥४१॥
गन्धमादननामा च गिरीणामुत्तमो गिरिः ।
दिव्यधातुद्रवोद्गारि[2]शोभमानदरीमुखः ॥४२॥
मक्षिकादंशमशकासिंहव्याघ्रविवर्जितः ।
नरनारायणौ यत्र तेपाते परमं तपः ॥४३॥
पुण्या बदरिका यत्र विशालां नगरीमनु ।
कुबेरयक्षराजस्य रम्या[3] पुष्करिणी च सा ॥४४॥

---

१. सर्वतः—रीवाँ । २. द्रवझरी—मथु०, बडो०, । ३. रमा—रीवाँ, मथु०, बडो० ।

बदरीप्रभवा यत्र महाशुभजला नदी ।
बालखिल्या महात्मानो यत्र नित्यं तपोरताः ॥४५॥
मरीचेः पुलहस्याथ भृगोरङ्गिरसस्तथा ।
सामगानेन मुखरा यत्र नित्यं शुभा दिशः ॥४६॥
दैत्यस्य नरकाख्यस्य यत्रास्थीनि समंततः ।
हिमपाण्डुरवर्णानि विकीर्णान्यभितो दिशम् ॥४७॥
पर्वतप्रतिमं श्वेतमस्थिकूटं सुरद्विषः ।
नरकस्यातुलोच्छ्रायं संततं यत्र शोभते ॥४८॥
निपातितो[1]ऽसौ देवानां देवेन सुमहीयसा ।
विष्णुना समरे जित्वा तपोवीर्यदुरासदः ॥४९॥
दशवर्षसहस्राणि येन तप्तं महत्तपः ।
प्रवीरेण पदं दिव्यमैन्द्रं संप्राप्तुमिच्छता ॥५०॥
यत्र तेनैव देवेन केशवेन महात्मना ।
जले मग्ना मही भूप उद्धृतैकेन पाणिना ॥५१॥
महाशृङ्गे समारोप्य युद्धमुग्रं ततः कृतम् ।
वराहवपुषा दैत्यं हिरण्याक्षाभिधं घ्नता ॥५२॥
तद्दिव्यं परमं रम्यं कामवर्षिद्रुमावृतम् ।
नरनारायणस्थानं गङ्गावीचिसुशीतलम् ॥५३॥
अनेकदेवसदनं गन्धर्वगणसेवितम् ।
अप्सरोनृत्यतालादिस्वरमूर्छनयाञ्चितम् ॥५४॥
विशालां बदरीं प्राप्य गङ्गास्रोतसि पावने ।
मज्जनेनात्मना शुद्धो दिव्यदृष्टिर्भवेन्नरः ॥५५॥
अमानुषे तु स्थानेऽस्मिन् मानुषो नैव गच्छति ।
मधुश्रवफला यत्र पुण्यवृक्षा मनोरमाः ॥५६॥
शीतलच्छायया युक्ता मरुल्लुलितपल्लवाः ।
विकचाम्भोजपुष्पौघाः सौरभावृतदिक्तटाः ॥५७॥

---

१. निखानितो—अयो० ।

मुनीनां दीर्घतपसां तेजसा चातिदुर्गमः ।
देशोऽसौ पावितस्तुङ्गगङ्गावीचिकदम्बकैः ॥५८॥
तपसा श्रद्धया चैव वीर्येण सुगमो गिरिः ।
गन्धमादननामात्र नरनारायणस्थितिः ॥५९॥
तयोर्दर्शनमात्रेण नरनारायणेशयोः ।
प्राग्जन्म[1] दुष्कृतं चापि विधुनोति नरैः सकृत् ॥६०॥
गङ्गायाः प्रभवं चापि यमुनाप्रभवं तथा ।
नरो दृष्ट्वा विमुच्येत महापातकराशितः ॥६१॥
नानेन सदृशी यात्रा नानेन सदृशं तपः ।
नानेन सदृशं तीर्थं नानेन सदृशं सुखम् ॥६२॥
पुण्यो हिमगिरिः साक्षात् पार्वत्या जनकः स्वयम् ।
सर्वतो हिमसंव्याप्तो विष्णुपद्याभिपावितः[2] ॥६३॥
तादृशस्तस्य पुत्रोऽपि मैनाको भूभृतांवरः ।
तयोर्दर्शनमात्रेण पापपुञ्जं पलायते ॥६४॥
मन्दरे सुन्दरे शैले कैलाशे हरसंश्रिते ।
गन्धमादनशैले च जनैर्गन्तुं न शक्यते ॥६५॥
विना तपोबलं राजन् विना विद्याबलं तथा ।
विना शौर्यबलं चैव विना शौचबलं तथा ॥६६॥
बदर्याश्रमयात्राया नान्ययात्रा प्रशस्यते ।
सर्वतीर्थमयी चैव सर्वदेवमयी तथा ॥६७॥
यात्रेयं राजराजेन्द्र राजते सर्वतोऽधिका ।
तपोवनानि रम्याणि मुनीनामाश्रमाः शुभाः ॥६८॥
अनेकतीर्थगमनमनेकाद्भुतदर्शनम् ।
अनेकदेवसंदर्शोऽनेककुण्डावगाहनम् ॥६९॥
तप्तकुण्डेषु दिव्येषु शीतकुण्डेषु च प्रभो ।
अवगाह्य जनः सद्यो धौतपापचयो भवेत् ॥७०॥

---

१. आजन्म[2]—रीवाँ। २—२. °भियाचितः—रीवाँ।

स्थले स्थले च गङ्गायाः स्रोतांसि हिमपर्वते ।
विचित्राणि मनोज्ञानि तेषु स्नानेन पूयते ॥७१॥
एकधा च द्विधा चैव त्रिधा चैव चतुर्विधा ।
पञ्चधा चैव षड्धा च सप्तधा चाष्टधा तथा ॥७२॥
नवधा दशधा चैव शतधा च सहस्रधा ।
विश्वस्य पावनी गङ्गा प्रसूता दिव्यवाहिनी ॥७३॥
तस्याः प्रवाहेषु मनोरमेषु पुण्याश्रमस्थानतटोदितेषु ।
अनेकवाटीबहुवृक्षशोभानितान्तकान्तेषु सुखावहेषु ॥७४॥
कूजद्विहङ्गोत्तमनादितेषु देवाङ्गनाकौतुककारकेषु ।
पुण्याप्सरःस्नानसुखावहेषु सुच्छायदेवद्रुमशीतलेषु ॥७५॥
क्वचिद्दरीभेदनवेगवत्सु क्वचिन्महावृक्षलतानुगेषु ।
क्वचित् स्फुटद्गण्डशैलच्युतेषु क्वचिन्महानिर्झरशोभितेषु ॥७६॥
क्वचिद्विकीर्णेषु गिरिप्रसंगात् क्वचिद्वनेषु प्रसभोदितेषु ।
नानाविधानोकहपुष्पराजीसौरभ्यसंभारविभावितेषु ॥७७॥
सहस्रधारासुषमाञ्चितेषु नृत्यत्तरङ्गावलिशोभितेषु ।
सौन्दर्यसंचारसमुद्गतेषु मन्दप्रसारेषु समुन्नतेषु ॥७८॥
उच्चावचेषु स्फुरच्छैलधातुप्रसंगतोऽनेकवर्णाश्रितेषु ।
*लताप्रतानान्तरसंगतेषु छायावहेष्वातपभावितेषु ॥७९॥
महाहिमानीद्युतिसंगतेषु सुशीतलेष्वद्भुतनादवत्सु ।
स्थले स्थले हिमशैले निमज्य पुनर्न जन्मी भवतीह लोके॥८०॥
इत्येव ते महाशौचकारिणां नृप भूयसाम् ।
तीर्थानां वैस्वरूपाणि कथितानि मनीषिणे ॥८१॥
यस्मिन्देशे यानि तीर्थानि राजन् तद्देशजै[२]र्मनुजैः कीर्तितानि ।
तानि प्रकर्तव्यतमानि भूयो विना विचारं देहपावित्र्यकामैः ॥८२॥
भूयांसि भूमौ तीर्थानि दिक्षु चैव विदिक्षु च ।
क्षेत्राणि सरहस्यानि वनानि विविधानि च ॥८३॥

---

* अतः परं १०९ अध्यायस्य ९६ श्लोकं यावत् खण्डितः पाठः—अयो० ।
२. तद्देशीयै—मथु०, बड़ो० ।

न तेषां महिमा राजन् कल्पकोटिशतैरपि ।
शक्यते कथितुं भूयो मयाचान्येन वा क्वचित् ॥८४॥
सर्वेषामेव तीर्थानामेक एव समुच्चयः ।
श्रीमद्विष्णुपदीनाम कोटिपापापहारिणी ॥८५॥
न गङ्गया समं तीर्थं त्रिषु लोकेषु विद्यते ।
यस्याः संदर्शनादेव नरकं नैव पश्यति ॥८६॥

किंपुनः स्पर्शनात् स्नानात्तथैवाचमनादपि ।
अनेकधास्य दुरितं विनिहन्ति हि जाह्नवी ॥८७॥
ॐ नमो विष्णुपद्यै ते गङ्गायै सततं नमः ।
इतिब्रुवाणोऽपि जनः सर्वं पापं व्यपोहति ॥८८॥

गङ्गाया अधिकं पुण्यं यमुनायावगाहतः ।
सप्तब्रह्माण्डभेत्त्री सा कालिन्दी कृष्णरूपिणी ॥८९॥
कलिन्दगिरिसंभूता कोटिपापविनाशिनी ।
यमुना शीलिता येन यमलोकं न स व्रजेत् ॥९०॥
स्मरणादेव कालिन्द्या धूतपापो विमुच्यते ।
किं पुनर्दर्शनात् स्पर्शात् स्नानादाचमनादपि ॥९१॥

इयं पुराणतमिका गङ्गातोऽपि गरीयसी ।
यमुना यमभीतिघ्नी सेविता सज्जनैः सदा ॥९२॥
एकतः सर्वतीर्थानि एकतः पुण्यकोटयः ।
एकतः सकला यात्रा यमुना चैकतःस्थिता ॥९३॥

कृष्णपत्नी कृष्णसमा कलिकल्मषनाशिनी ।
करुणामूर्तिरतुला कल्याणगणकारिणी ॥९४॥
ब्रह्मानन्दमयी साक्षात् गङ्गागुणगणोत्करा ।
प्रेमानन्दमयी पूर्णा यमुना तु स्वयं पुरा ॥९५॥

कृष्णस्य यमुनायाश्च न भेदस्तत्त्वतो मतः ।
शृङ्गाररसरूपेयं कृष्णसायुज्यदायिनी ॥९६॥
कृष्णरूपा रसमयी वनमालाविभूषिता ।
भक्तोद्धारकरा दिव्यदोलाकेलिविधायिनी ॥९७॥

नानया सदृशं तीर्थं त्रिषु लोकेषु विद्यते ।
न यात्रान्तरमेतस्या यात्रया सदृशी भवेत् ॥९८॥
सर्वत्र यमुना पुण्या स्नानादाचमनादपि ।
मथुरातलगा त्वेषा स्वयं कृष्णस्वरूपिणी ॥९९॥
तीर्थानि खलु सन्त्येव पृथिव्यां सुबहून्यपि ।
मथुरास्नानसदृशं न पुण्यं कुत्रचिन्मतम् ॥१००॥
यमुनाजलकल्लोलरमणीयमहातटा ।
मथुरादर्शनादेव मथ्नाति खलु पातकम् ॥१०१॥
वसन्ति यस्य प्रति रोमकूपमण्डानि सप्तावरणान्वितानि ।
ध्यायन्ति यद्रूपमनन्यनिष्ठास्तपःसमाधिप्रयता मुनीन्द्राः ॥१०२॥
स वै पुरुषधौरेयो यदाज्ञायां प्रवर्तते ।
स्वयं विहरते सोऽत्र भगवान् पुरुषोत्तमः ॥१०३॥
सेयं मधुपुरी धन्या पुरीणामुत्तमोत्तमा ।
प्रणवाकारतां नित्यं बिभ्रती[1] शुभगाकृतिः ॥१०४॥
अकारात्मोत्तरा कोटिरुकारात्मा स्वयं पुरी ।
मकारो दक्षिणा कोटिर्नादविन्दुकला सरित् ॥१०५॥
वृत्ता द्वादशसङ्ख्याकैर्वनैरुपवनैरपि ।
विंशयोजनविस्तीर्णमण्डलेनाभिमण्डिता ॥१०६॥
सेव्या मधुपुरी नित्यं सद्भिः कृष्णपरायणैः ।
अस्यां न कलिदोषाणां संभवोऽद्यापि दृश्यते ॥१०७॥
कृष्णलीलानिजस्थानं नरनारीगणैर्वृता ।
नित्योत्सवैर्नित्यसुखैर्नित्यप्रेमविभूषितैः ॥१०८॥
साक्षाच्चतुर्भुजाकारैराकीटपशुपक्षिभिः ।
सेविता सुखदा नित्यं धन्या सा मथुरापुरी ॥१०९॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे पूर्वखण्डे राज्ञस्तीर्थयात्रायां चतुरधिकशततमोऽध्यायः ॥१०४॥

❁

१. भ्रमन्ती—रीवाँ ।

पञ्चाधिकशततमोऽध्यायः

राजोवाच

मथुरायां प्रसिद्धानि तीर्थानि वद मे मुने।
येषु मज्जनमात्रेण नरः शुद्धिमवाप्नुयात् ॥ १ ॥

वशिष्ठ उवाच

वसन्ति सर्वतीर्थानि मथुरायां जनाधिप।
सर्वदैव विशेषात्तु चातुर्मास्ये प्रशस्यता ॥ २ ॥
सप्तद्वीपवती भूमिस्तस्यां तीर्थानि यान्यपि।
तानि सर्वाणि मथुरामायान्ति शयिते हरौ ॥ ३ ॥
कार्तिके मासि यत्पुण्यं मार्गशीर्षे निगद्यते।
गुप्तस्नानं गुप्तदानं यत्रात्यन्तं प्रशस्यते ॥ ४ ॥
मार्गशीर्ष उषःकाले आप्लुत्य यामुनेऽम्भसि।
सर्वपापविनिर्मुक्तः कृष्णसायुज्यमाप्नुयात् ॥ ५ ॥
तपःसमाधिनियमैः प्राणायामायुतेन च।
योगेनात्मैकनिष्ठानां या गतिः सा नृणामिह ॥ ६ ॥
अश्वमेधादियागोत्थपुण्यकोटिशतेन च।
या गतिर्लभ्यते सात्र मथुरायां निवासतः ॥ ७ ॥
अस्ति तत्र रमाकान्तः केशवो नाम कीर्तितः।
तस्य संदर्शनादेव न पुनर्जायते नरः ॥ ८ ॥
दिव्यतेजोमयी मूर्तिः केशवस्य महात्मनः।
दृष्ट्वा स्पृष्ट्वा च तां लोकस्तत्क्षणादेव मुच्यते ॥ ९ ॥
कार्तिके केशवस्याग्रे दीपमालां करोति यः।
इहामुत्र च वै तस्य तिमिरं नैव विद्यते ॥१०॥
रविबिम्बप्रतीकाशं विमानमधिरुह्य सः।
दिव्यतेजोमये लोके क्रीडतेऽप्सरसां गणैः ॥११॥

कृत्वा केशवदेवस्य दर्शनं सप्तजन्मजम् ।
विधुनोति नरः पापं लभेत् सायुज्यमाशु सः ॥१२॥
स्नात्वा श्रीयामुने तोये परिक्रम्य च केशवम् ।
कुलकोटिं समुद्धृत्य स्वयं विष्णुमयो भवेत् ॥१३॥
यावन्तश्चरणन्यासाः केशवस्य प्रदक्षिणे ।
तावतां वाजिमेधानां फलं प्राप्नोति मानुषः ॥१४॥
यावन्ति लोके पुण्यानि वाजिमेधादिजान्यपि ।
तावन्ति केशवार्चायास्तुलां नार्हन्ति षोडशीम् ॥१५॥
अकृत्वा मथुरास्नानमदृष्ट्वा केशवं हरिम् ।
अगत्वा व्रजभूमिं च किं जन्म सफलं भवेत् ॥१६॥
शिवलिङ्गं च भूतेशं तत्रस्थं पापनाशनम् ।
विनास्य दर्शनं राजन् मथुराफलदायकम् ॥१७॥
प्रमथादीन् समादाय सर्वान् भूतगणान् सदा ।
मथुरामावसत्येष भूतेशो लोकशङ्करः ॥१८॥
दर्शनात् स्पर्शनात्तस्य पापकोटीर्विदाहयेत्[1] ।
इह भोगान् परिप्राप्य परत्र खलु मुच्यते ॥१९॥
वनानि द्वादशैवात्र तानि संग्रहतः शृणु ।
यत्र श्रीकृष्णचन्द्रस्य लीलाः सर्वाः सुखावहाः ॥२०॥
पूर्वं मधुवनं प्रोक्तं हरेः क्रीडाकरं वनम् ।
दृष्ट्वा प्रदक्षिणीकृत्य तोषयेन्मधुसूदनम् ॥२१॥
ततस्तालवनं नाम वनानामुत्तमं हि तत्[2] ।
तस्याभिगमनादेव सद्यो मुक्तिरवाप्यते ॥२२॥
वनं कुमुदसंज्ञं च महाकासारवेष्टितम् ।
उत्फुल्लकुमुदामोदसुवासितदिगन्तरम् ॥२३॥
ततः कामवनं नाम कामदं सर्वजन्मिनाम् ।
विमलोदकसंज्ञेन सरसा विमलीकृतम् ॥२४॥
वहुलावनसंज्ञं च तत्रास्ति रुचिरं वनम् ।
वहुला नाम सा धेनुः कृष्णहस्ता सुमोदिता ॥२५॥

---

१. पापकोटिर्विहायते—रीवाँ, २. हितम्—रीवाँ ।

तयाधिवासितं तस्याः खुराङ्कैरभिरोचितम् ।
अनेककुञ्जपूजाढ्यं कुसुमौघसुवासितम् ॥२६॥
ततो भद्रवनं नाम यमुनापरपारगम् ।
तस्याभिगमनाद्राजन् विष्णुप्रियतमो भवेत् ॥२७॥
खादिरं वनमाश्चर्यकरं खदिरमण्डितम् ।
यत्र शङ्खादिरं गोपीमुखाधररुचावहम् ॥२८॥
बृहद्वनं महाराज बलभद्रमुदावहम् ।
अनेकाश्चर्यसदनं कृष्णलीलारसावहम् ॥२९॥
बाललीलाविनोदेन रमते यत्र केशिहा ।
तस्याभिगमनादेव लीलारुचिमवाप्नुयात् ॥३०॥
लोहजङ्घवनं रम्यं लोहजङ्घाभिरक्षितम् ।
स्नानदानादिविधिभिर्वाजिमेधफलप्रदम् ॥३१॥
ततो बिल्ववनं नाम वनानामुत्तमं वनम् ।
तस्याभिगमनादेव कृष्णप्रेमाणमाप्नुयात् ॥३२॥
ततो भाण्डीरसंज्ञं तत् सर्वाश्चर्यमयं वनम् ।
तत्र गत्वा हरिं ध्यायेत् दिव्यलीलाविभूषितम् ॥३३॥
[1]भाण्डीरवटवृक्षस्य छायामाश्रित्य मानवः ।
विमुञ्चति परीतापं त्रिविधं हृदयस्थितम्[1] ॥३४॥
वृन्दावनं सुरुचिरं वृन्दादेव्याभिरक्षितम् ।
यस्य दर्शनमात्रेण प्रारब्धमपि नाशयेत् ॥३५॥
केशिपट्टे नरः स्नात्वा दत्त्वा चाश्वं द्विजन्मने ।
न पुनर्जायते जन्तुर्मातृगर्भे सुदारुणे ॥३६॥
चीरघट्टे नरः स्नात्वा कदम्बं परिपूजयेत् ।
वासोऽलङ्कारगन्धाद्यैर्यत्र रूढो हरिः स्वयम् ॥३७॥
स्त्रीणां वस्त्राण्युपादाय स्नान्तीनां यामुनेऽम्भसि ।
दिव्यं वरं स ताभ्यश्च दत्तवान् सर्वकामदः ॥३८॥
कालीयस्य ह्रदस्तत्र यमुना स्रोतसोऽन्तरे ।
तत्रस्नात्वा नरो राजन्नश्वमेधमवाप्नुयात् ॥३९॥

१–१. अयं श्लोको नास्ति—रीवाँ ।

यत्र प्राचीमुखं स्रोतः कालिन्द्या लोकपावनम् ।
तत्र स्नात्वा क्षणमपि स्थित्वा भाग्यनिधिर्भवेत् ॥४०॥
पञ्चरात्रोषितस्तत्र गोविन्दं योऽनुपश्यति ।
न तस्य लोके किमपि कर्तव्यमवशिष्यते ॥४१॥
[1]गोपेश्वराभिधं तत्र शिवलिङ्गं प्रतिष्ठितम् ।
दृष्ट्वा स्पृष्ट्वा च संपूज्य सर्वदुःखातिगो भवेत्[1] ॥४२॥
ततो गोवर्द्धनगिरिं गच्छेद्रत्नशिलामयम् ।
योजनद्वयमात्रोच्चैर्मथुरापश्चिमे स्थितम् ॥४३॥
अनेकनिर्झरस्रावमनोज्ञोपत्यकान्वितम् ।
अधित्यकासमुद्भासिरत्नशृङ्गविराजितम् ॥४४॥
द्रुमगुल्मलतावृन्दसमुल्लासिप्रसूनकैः ।
सौरभ्यहृतभृङ्गौघैः[2] पूर्यमाणं समंततः ॥४५॥
अनेककन्दरारम्यगह्वरोदीर्णपादपम् ।
निकुञ्जपुञ्जमधुरं माधुरीलतिकाञ्चितम् ॥४६॥
धातुप्रस्रवणानेकवर्णकान्तिविभूषितम् ।
सौभाग्यमिव भूमेस्तत्सर्वतो माधुरीमयम् ॥४७॥
सर्वाधिकोच्छ्रयभरेण विभूषिताङ्गं नानानिकुञ्जरमणीयमुदाररूपम् ।
कूजद्द्विजालिकुलझाङ्कृतिपूर्यमाणं भूयो दरीनिलयदीपितरत्नदीपम्॥४८॥
सायंसमुद्गतमहामहसंचितानां नानाविधिप्रचुरदिव्यमहौषधीनाम् ।
ताभिर्निरस्ततिमिरैः स्वगृहान्तकुञ्जपुञ्जैः कुतूहलितगोपवधूसमूहम् ॥४९॥
चत्वारोऽत्र ह्रदा राजन् प्राक्प्रत्यग्दक्षिणोत्तरः ।
तेषु स्नात्वा नरो गच्छेद्दिव्यं वैकुण्ठमन्दिरम् ॥५०॥
गोवर्धनं नाम गिरिं सुधन्यं यो दीपयेत् कार्तिकमासि दीपैः ।
दीपोत्सवे च त्रिदिनं विशेषान्न तस्य वै तामसलोकवासः ॥५१॥
गोवर्द्धनाद्रौ क्रियमाणमन्यैर्धन्यैर्जनैः पश्यति यः प्रदीपम् ।
सनिस्तरेत्तामसलोकवासात् व्रजेच्च शीघ्रं भगवन्निकेतम् ॥५२॥

१-१. अयं श्लोको नास्ति—रीवाँ । २. शृङ्गोच्चैः—रीवाँ ।

सर्वाश्चर्यमयो लोके श्रीमान् गोवर्द्धनाचलः ।
दृष्ट्वा परिक्रमेत्तं यः स निस्तरति दुर्गतिम् ॥५३॥
यमुनायाश्च तीर्थानि शृणुष्वावहितो नृप ।
तेषु स्नानेन दानेन न भूयो जन्मभाग्भवेत् ॥५४॥
संसारमोक्षणं नाम तीर्थं तत्रोत्तरं नृप ।
तत्र स्नात्वा च दत्त्वा च संसारान्मुच्यते जनः ॥५५॥
प्रयागतीर्थं तत्रैव विश्रुतं पापनाशनम् ।
स्नानदानादिभियत्र प्रयागादधिकं फलम् ॥५६॥
तीर्थं कनखलं नाम यमुनायां प्रतिष्ठितम् ।
स्नात्वा दत्त्वा च लभते फलं कनखलाधिकम् ॥५७॥
ततस्तिन्दुकतीर्थाख्यं यामुनं तीर्थमुत्तमम् ।
यत्र स्नात्वा नरो भूयो मातृयोनिं न विन्दति ॥५८॥
सूर्यतीर्थं महाराज तीर्थानामुत्तमोत्तमम् ।
यत्र स्नात्वा नरो राजन् सूर्यवज्जायते रुचा ॥५९॥
ध्रुवतीर्थं विशेषेण स्नानमात्रेण शुद्धिदम् ।
निर्वपेत् तत्र पिण्डांश्च पितॄणां मोक्षहेतवे ॥६०॥
तीर्थराजाभिधं तीर्थं सर्वतीर्थौघपावनम् ।
यत्र स्नात्वा नरो राजन् महतीं शुद्धिमाप्नुयात् ॥६१॥
ऋषितीर्थं महाराज ऋषितापसमण्डितम् ।
यत्र स्नानविधानेन ऋषीणां ज्ञानमाप्नुयात् ॥६२॥
मोक्षतीर्थं महापुण्यं मथुरायां सुविश्रुतम् ।
तत्राप्लुत्य नरो राजन् भोगं मोक्षं च विन्दति ॥६३॥
कोटितीर्थाभिधं तीर्थं कोटितीर्थमयं नृप ।
स्नानदानादिभिः सद्यः पृथ्वीप्रादक्ष्यपुण्यदम् ॥६४॥
वायुतीर्थे च राजेन्द्र स्नात्वा शुद्धतनुर्भवेत् ।
यत्र सर्वजवावाप्त्यै वायुनाचरितं तपः ॥६५॥
इत्थं दक्षिणकोटिस्थान्येतानि तव भूपते ।
तीर्थान्युक्तानि सर्वाणि मया यामुनपार्थसि ॥६६॥

अथोत्तरां कोटिमधिष्ठितानि तीर्थानि राजन् शृणु मन्मुखेन ।
स्नानेन दानेन च तर्पणेन सद्यो मनुष्यस्य शुभप्रदानि ॥६७॥
आदौ संयमनं तीर्थं धारापतनकं ततः ।
नागतीर्थं ततः प्रोक्तं घण्टाभरणकं ततः ॥६८॥
ब्रह्मलोकाभिधं तीर्थं सोमतीर्थं ततः परम् ।
सरस्वतीदीपनकं[1] तीर्थानामुत्तमं नृप ॥६९॥
दशाश्वमेधसंज्ञं च तीर्थं देवर्षिपूजितम् ।
ततश्च मानसं तीर्थं विघ्नराजाभिधं ततः ॥७०॥
कोटितीर्थं ततः प्रोक्तं शिवक्षेत्रं ततः परम् ।
एषु स्नानेन दानेन नरो मुच्येत पातकात् ॥७१॥
विशेषतश्च माहात्म्यमेतेषां संप्रतिष्ठितम् ।
येषां मध्ये तु शुभदा विश्रान्तिः संप्रतिष्ठिता ॥७२॥
गतश्रमेण विप्रेण मुनिना तीर्थसेविना ।
नित्यमाराधिता पूर्वं विश्रान्तिः पापनाशिनी ॥७३॥
पुरा कंसं घातयित्वा यत्र विश्रमितो हरिः ।
निजगोपगणैः सार्द्धं दृष्टो माधुरमानुषैः ॥७४॥
देवाङ्गनाभिर्देवैश्च बलभद्रेण संयुतः ।
दृष्ट्वा[2] संपूजितश्चैव कल्पद्रुमभवैः शुभैः ॥७५॥
सात्वतैश्च जनैर्भक्तैः सानन्दमभिवीक्षितः ।
पीताम्बरधरः श्रीमान् शिखिपिच्छविभूषितः ॥७६॥
सर्वदा मथुरावासो विश्रान्तिस्नानमेव च ।
गतश्रमपरिक्रान्ति[3]स्त्रयमेतत् सुदुर्लभम् ॥७७॥
देवानामपि राजेन्द्र किंपुनर्मर्त्यवासिनाम् ।
दिने दिने महापुण्यं विश्रान्तिस्नानमाचरन् ॥७८॥
जीवन्मुक्तो भवेन्मर्त्यः स्वर्गस्थैरपि वन्दितः ।
मनसा मथुरावासं प्रातरुत्थाय मानवः ॥७९॥

---

१. °पतनकं—मथु०, बड़ो० । २. दृष्टः—मथु०, बड़ो० । ३. "गतश्रमः ऋषिविशेषस्तस्य परिक्रान्तिः प्रदक्षिणा" टि०—मथु०, बड़ो० ।

यः संस्मरति पुण्यात्मा सोऽपि धन्यो न संशयः ।
किं पुनर्ये वसन्त्यत्र विष्णुभक्तिपरायणाः ॥८०॥
भूतेश्वरं शिवं दृष्ट्वा महाविद्यां च मातरम् ।
दीर्घविष्णुं तथा नत्वा समभ्यर्च्य च केशवम् ॥८१॥
मथुरामावसन्मर्त्यो विश्रान्तिस्नानतत्परः ।
सर्वपापचयं दग्धा[1] मर्त्य एव न संशयः ॥८२॥
कोटिद्वये नरः स्नात्वा दत्त्वा चैव द्विजातये ।
यथाशक्ति सुवर्णं गां सर्वपापैर्विमुच्यते ॥८३॥
मथुरामण्डलं राजन् सर्वपापप्रणाशनम् ।
स्मरणादेव दूरस्थं पुनाति सकलं नरम् ॥८४॥
हरिस्तु पश्चिमे तत्र गोविन्दश्चोत्तरेण हि ।
पूर्वे गताश्रमो पुण्यो वाराहो दक्षिणे स्थितः ॥८५॥
तयोर्मध्ये महत्क्षेत्रं पवित्रं पापनाशनम् ।
माथुरं[2] मण्डलं नाम देवानामपि वाञ्छितम् ॥८६॥
अर्द्धचन्द्राकृति क्षेत्रं तन्मध्ये लोकविश्रुतम् ।
मण्डले सारभूतं तन्महासौभाग्यवर्द्धनम् ॥८७॥
तत्र ये मनुजाः पुण्याः पशुपक्ष्यन्त्यजा[3] अपि ।
म्रियन्ते मुक्तिभाजस्ते व्योम्नि भूमौ जलेऽपि वा ॥८८॥
न ते क्रियामपेक्षन्ते दाहाद्यां वेदविश्रुताम् ।
मथुरामरणादेव मुक्ताः कल्याणभागिनः ॥८९॥
परिक्रमन्ति ये पुण्यां मथुरां लोकवन्दिताम् ।
कार्तिके शुक्रनवमीमक्षयाख्यामुपेत्य तु ॥९०॥
न तेषां मातृगर्भान्तःप्रवेशो भवति ध्रुवम् ।
अपि पापात्पापतरास्तेऽपि यान्ति परां गतिम् ॥९१॥
अनुज्ञाय हनूमन्तं वायुपुत्रं महाबलम् ।
नत्वा प्रदक्षिणीकृत्य तीर्थयात्रां समारभेत् ॥९२॥

---

१. °पापविशुद्धात्मा—मथु०, बड़ो० । २. माधुरं– रीवाँ । ३. °पक्ष्यन्तिजा—मथु०, बड़ो० ।

पद्मनाभं च देवेशं दीर्घविष्णुं महाप्रभुम् ।
देवीं वसुमतीं चैव तथा चैवापराजिताम् ॥९३॥
कंसवासनिकां देवीं वधूटीं च महेश्वरीम् ।
गृहदेवीस्तथा सर्वा वसुदेवीश्च भव्यहा ॥९४॥
गत्वा दक्षिणकोटिं च स्नात्वा संध्यामुपास्य च ।
संतर्प्य देवर्षिपितृंस्तीर्थयात्रां समाचरेत् ॥९५॥
इक्षुवासां वत्सपुत्रं गत्वा पञ्चस्थलीं चरेत् ।
अर्कस्थलं प्रथमतो वीरस्थलमनुत्तमम् ॥९६॥
कुशस्थलं ततो भूयः पुण्यस्थलमतः परम् ।
महास्थलं च राजेन्द्र शिवं सिद्धिमुखं[1] तथा ॥९७॥
हयमुक्तिं ततो गत्वा गच्छेत् सिन्दूरयावकौ ।
मल्लिको समनुव्रज्य गच्छेत् कादम्बखण्डिकाम् ॥९८॥
चर्चिकस्य[2] स्पृशां चैव स्पृशां वा वर्षिखातकम्[3] ।
भूतेश्वरं महादेवं सेतुबन्धं ततो हरेः ॥९९॥
बालह्रदं महापुण्यं कुक्कुटक्रीडनं पुनः ।
स्तम्भोच्चयं तल्पगृहं देवकीवसुदेवयोः ॥१००॥
तथा नारायणस्थलं सर्वदेवालयं तथा ।
विघ्नराजं गणपतिं कुब्जिकां वामनां तथा ॥१०१॥
महाविघ्नेश्वरीस्थानं तथादेवीं प्रभावतीम् ।
संकेतकुण्डमेवापि तथा संकेतकेश्वरीम् ॥१०२॥
संकेतकेशीकुण्डं च गोकर्णं च सदाशिवम् ।
सरस्वतीं विघ्नराजं गङ्गारुद्रमहालयम् ॥१०३॥
तथैव चोत्तरां कोटिं गणेश्वरमतः परम् ।
द्यूतस्थानं तथाविष्णोर्गार्ग्यतीर्थं तथैव च ॥१०४॥
भद्रेश्वरस्य तीर्थं च सोमेशं सोमतीर्थकम् ।
सरस्वतीसंगमं च घण्टाभरणमेव च ॥१०५॥

---

१. सिद्धमुखं—मथु०, बड़ो० । २. चर्चिकाम°—मथु०, बड़ो० । ३. वर्ष°—मथु०, बड़ो० ।

तीर्थानामुत्तमं तीर्थं तथा गरुडकेशवम् ।
धारापतनकं तीर्थं तीर्थं वैकुण्ठसंज्ञकम् ॥१०६॥
खण्डचैलकमेवापि तथा मन्दाकिनीमपि ।
संयमनं चासिकुण्डं नागतीर्थं तथैव च ॥१०७॥
अभिमुक्तेश्वरं चैव वैलक्षगरुडं तथा ।
गच्छेदनुक्रमेणैव परिक्रमविधौ शुचिः ॥१०८॥
एवं परिक्रम्य पुराणपूरुषं प्रियां पुरीं तां मथुराभिधानिकाम् ।
स्नात्वा च विश्रान्तिजले गतश्रमं[1] मुहुः परिक्रम्य नरो विमुच्यते ॥१०९॥
तीर्थानि सन्ति बहुशो जनपापपुञ्जदाहोद्धुराणिधरणीवलये परन्तु ।
केनोपमास्ति मथुराभगवन्नगर्याः कृष्णः स्वयं विहरति प्रणयेन यस्याम्११०
जन्मतो मरणाद्वाहाद्विवाहादुपवीततः ।
दीक्षातोऽवभृथाच्चापि स्नानाद्दानादुपोषणात् ॥१११॥
दशधा मथुरा नृणां कुरुते बहुलां श्रियम् ।
भुक्तिं मुक्तिं तथैश्वर्यं राज्यं स्वाराज्यमेव च ॥११२॥
नानया सदृशं स्थानं त्रैलोक्ये चापि विद्यते ।
तस्यां संवर्ततां नृणां कृष्णप्रेमोदयो भवेत् ॥११३॥
स्नात्वा विश्रान्तिपयसा समभ्यर्च्य च केशवम् ।
एकेनाह्ना नरो गच्छेद् दुर्लभं तद्धरेः पदम् ॥११४॥
राजन् द्रष्टास्यनेकानि स्थानानि धरणी तले ।
माथुरं मण्डलं दृष्ट्वा तूष्णीं यास्यसि चेतसि ॥११५॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे पूर्वखण्डे दशरथ-तीर्थयात्रायां पञ्चाधिकशततमोऽध्यायः ॥१०५॥

१. गतश्रमो—मथु०, बड़ो० ।

षडधिकशततमोऽध्यायः

वशिष्ठ उवाच

अक्रूरतीर्थं तत्रैव विख्यातं यमुनाम्भसि ।
तस्य माहात्म्यमतुलं मया वक्तुं न शक्यते ॥ १ ॥
शेषशय्यास्थितं दृष्ट्वा भगवन्तं सनातनम् ।
यत्र प्राप मुदं पूर्णमक्रूरो नाम यादवः ॥ २ ॥
स्नानाद्दानाच्च होमाच्च पिण्डनिर्वपणात्तथा ।
विप्राणां भोजनाच्चैव ध्रुवं मुच्येत पातकैः ॥ ३ ॥
किमर्थं सेव्यते काशी कुरुक्षेत्रं च किंफलम् ।
अक्रूराख्ये महातीर्थे सकृत् स्नायाद् यदानरः ॥ ४ ॥
नातः परतरं तीर्थं पुण्यं नातः परं नृप ।
कार्तिके शुक्लद्वादश्यां यदि स्नायादिह प्रभो ॥ ५ ॥
सकृत् संस्नानमात्रेण कोटियज्ञफलं लभेत् ।
पूर्णिमायां विशेषेण स्नानदानोद्भवं फलम् ॥ ६ ॥
नरः संप्राप्य वसुधां किं नु शोचति मुक्तये ।
सकृन्मज्जनमात्रेण अक्रूरो दृष्टवान् हरिम् ॥ ७ ॥
यदद्यावद्रूपसंपन्नं साक्षाच्छ्रीपुरुषोत्तमम् ।
तत्तीर्थसदृशं लोके न तीर्थान्तरमिष्यते ॥ ८ ॥
ध्रुवस्थाने तथाक्रूरे कूपे सप्तसमुद्रके ।
यो नरः कुरुते श्राद्धं तस्य मुक्ताः पितामहाः ॥ ९ ॥
कालियस्य ह्रदस्तत्र यमुनायां प्रविश्रुतः ।
तत्र संस्नानमात्रेण नरो मुच्येत संसृतेः ॥१०॥
मरणान्मुक्तिमिच्छन्ति पशुपक्ष्यन्त्यजा[1] अपि ।
एकां रात्रिं तत्र वसेत् स्नानोपोषणतत्परः ॥११॥
कालियस्यैव दमनं भावयानो दिवानिशम् ।
स मुक्तो मनुजो राजन् घोरात् संसारसागरात् ॥१२॥

---

[1] °पक्ष्यन्तिजा—मथु०, बड़ो० ।

नमो गोविन्ददेवाय कृष्णाय परमात्मने ।
नमो नटाय नव्याय कालियव्यालमर्दिने ॥१३॥
इत्युच्चारपरो लोकः क्षणं वृन्दावने स्थितः ।
योगिनामप्यलभ्यं तत् स्थानमाप्नोति तत्क्षणात् ॥१४॥
केशितीर्थं च तत्रैव त्रैलोक्ये विश्रुतं नृप ।
तत्र मज्जनमात्रेण निस्तुलं फलमाप्नुयात् ॥१५॥
किमर्थमश्वमेधादीन् यागानाचरसि प्रभो ।
किमर्थं पृच्छसे चैव तीर्थान्यन्यानि भूपते ॥१६॥
श्रीमद्वृन्दावने दिव्यं केशितीर्थं मुदावहम् ।
तत्र मज्जनमात्रेण चतुर्वर्गं प्रसाधय ॥१७॥
माकेशि तीर्थं विनिमज्य राजन् स्वं स्वं फलं धारय मानसे त्वम् ।
यत्संसृतौ संसरतां जनानां मुक्तिं प्रयच्छन्नपि लज्जते हृदि ॥१८॥
यत्रासुरः केशिनामा महौजाः पुरन्दराद्याखिलदेवजैत्रः ।
क्षणेन नारायणहस्तपद्मस्पर्शेन मुक्तः सहसोद्गतासुः ॥१९॥
तत्रातुले तीर्थवरे च विष्णोः पिण्डं विनिष्पात्य हितः पितृणाम् ।
संतारयेत् स्वं कुलमेकविंशाच्छ्रद्धान्वितो ब्राह्मणभोजनाद्यैः ॥२०॥
कुरुक्षेत्रे च यत्पुण्यं गयायां चैव भूपते ।
ततोऽधिकतरं पुण्यं केशितीर्थेऽवगाहनात् ॥२१॥
केशितीर्थे सकृत्स्नात्वा दत्वा चाश्वं द्विजन्मने ।
अश्वमेधसमं पुण्यं तत्क्षणाल्लभते नृप ॥२२॥
किमर्थं सेव्यते काशी किमर्थं सेव्यते गया ।
किमर्थं च कुरुक्षेत्रं केशितीर्थे निमज्ज्य तु ॥२३॥
पशुपक्ष्यन्त्यजानामप्यत्र मुक्तिः सनातनी ।
पश्यतां सर्वदेवानां यत्र केशी विमोचितः ॥२४॥
गायन्ति निगमा सर्वे काशीजनविमुक्तिदा ।
केशितीर्थगुणान् वक्तुमशक्ता एव ते नृप ॥२५॥
गोवर्द्धने रहस्यानि स्थानानि धरणीतले ।
तानि वक्तुं न शक्तोऽहं कल्पकोटिशतैरपि ॥२६॥

यत्र सा मानसी गङ्गा देवानामपि दुर्लभा ।
तस्यां स्नात्वा च दत्त्वा च कोटियज्ञफलाधिकम् ॥२७॥
फलं लभस्व राजेन्द्र कृत्वा शैलं प्रदक्षिणम् ।
अभ्यर्च्य हरिदेवं च पुनर्जन्म न विद्यते ॥२८॥
पुण्डरीकं नरो गत्वा स्नात्वा कुण्डेऽतिपावने ।
पुण्डरीकं च संयोज्य प्रयाहि हयमेधिताम् ॥२९॥
नाम्ना पापहरं तत्र कुण्डं विमलपाथसम् ।
तत्र स्नात्वा महीपाल पापं किमनुशोचसि ॥३०॥
स्नात्वा सांकर्षणे कुण्डे संकर्षणसुखप्रदे ।
यत्र स्नानेन दानेन धूतपापो भवेन्नरः ॥३१॥
इन्द्रतीर्थे नरः स्नात्वा मखस्थाने च गोदुहाम् ।
महदैश्वर्यमाप्नोति गोसहस्रं च विन्दति ॥३२॥
यत्रेन्द्रयज्ञो विहतः कृष्णेनाद्भुतकीर्तिना ।
दत्त्वा च गिरये पूजां सोऽन्नकूट इति स्फुटः ॥३३॥
गावो विप्रास्तथा देवा वैष्णवा ऋषयस्तथा ।
पूजिता नन्दराजेन यत्र कृष्णोपदेशतः ॥३४॥
तत्र संतर्प्य मनुजो देवर्षिस्वपितामहान् ।
शतसोमोद्भवं पुण्यं लभते नात्र संशयः ॥३५॥
स्नात्वा कदम्बखण्डान्तःकुण्डे विमलपाथसि ।
देवान् पितॄंश्च संपूज्य सर्वयज्ञफलं लभेत् ॥३६॥
तत्रत्यं शिवलिङ्गं च दिव्यगोपेन्द्रपूजितम् ।
तस्य दर्शनमात्रेण कुण्डस्नानेन च प्रभो ॥३७॥
दानेन तर्पणेनापि देवर्षिपितृजन्मिनाम् ।
कोटियज्ञोद्भवं पुण्यं लभस्व नृपसत्तम ॥३८॥
अथो मानसगङ्गाया उत्तरेण प्रतिष्ठितम् ।
अरिष्टहरणं क्षेत्रं यत्रारिष्टो निपातितः ॥३९॥
हरिणा गोपरूपेण लीलामानुषवर्ष्मणा ।
वृषहत्याविनिर्मुक्त्यै तत्र क्षेत्रं विनिर्मितम् ॥४०॥

महाफलं महातीर्थं पार्ष्णिघातोद्भवं हरेः ।
तत्र स्नात्वा च दत्त्वा च सुवर्णं गां द्विजाग्रे ।
आजन्मकृतपापेभ्यो मुच्यते नात्र संशयः ॥४१॥

राजोवाच

वृषहत्या कथं लग्ना कृष्णस्याद्भुतकर्मणः ।
कथं च निर्मितं तीर्थमेतन्मे भगवन् वद ॥४२॥

वशिष्ठ उवाच

चन्द्रिकाविमले शीले रम्ये गोवर्द्धने नृप ।
कृष्ण आकारयामास राधिकां प्राणसंमिताम् ॥४३॥

श्रीकृष्ण उवाच

दृश्यतां विमलं स्थानं शरच्चन्द्रिकयान्वितम् ।
आगम्यतां प्रिये शीघ्रमत्र रंस्यावहे मिथः ॥४४॥
इति प्रियोदितं श्रुत्वा तमुवाच व्रजेश्वरी ।
ईषत्स्मितरदज्योत्स्नासुधावर्षणकारिणी ॥४५॥

राधोवाच

सत्यमुक्तं त्वया कान्त वृषः किन्तु त्वया हतः ।
तेनास्पृश्योऽसि मयका सांप्रतं ब्रह्महत्यया ॥४६॥
इति श्रुत्वा प्रियावाक्यं कृष्णो मुदितमानसः ।
उवाच मधुरं वाक्यं शीघ्रमालिङ्गनोत्सुकः ॥४७॥
सत्यमुक्तं त्वया भद्रे लोकानुश्रुतिरीदृशी ।
किन्त्वेतद्दोषनिर्मुक्त्यै करिष्ये तीर्थमद्भुतम् ॥४८॥
पृथिव्यां यानि तीर्थानि सप्तद्वीपस्थितान्यपि ।
इहानेष्ये प्रिये तानि सर्वाणि वृषभानुजे ॥४९॥
इत्युक्त्वा वचनं कृष्णः पार्ष्णिघातेन भूतलात् ।
आविर्भावितवान् रम्यं तीर्थं विश्वस्य पावनम् ॥५०॥
कोटितीर्थमयं पुण्यं सर्वपापप्रणाशनम् ।
नानागुल्मलताकीर्णं दिव्यवृक्षवनान्वितम् ॥५१॥

तत्र स्नात्वा स्वयं कृष्णः परमात्मा सनातनः ।
आलिङ्गितो मुदितया राधया गोपकन्यया ॥५२॥
तद्देहकान्त्या समभूत् कुण्डमन्यन्मनोहरम् ।
राधाकुण्डमिति प्रोक्तं पुराणज्ञैर्मनीषिभिः ॥५३॥
ते कृष्णराधाकुण्डाख्ये तीर्थे सर्वस्य कामदे ।
तयोः स्नायान्नरो मूर्त्यै तीर्थयोः पुण्यरूपयोः ॥५४॥
कृष्णकुण्डे समाप्लुत्य राधाकुण्डे च मानवः ।
कोटिपापविनिर्मुक्तस्तयोः प्रियतमो भवेत् ॥५५॥
मोक्षराजाभिधं तीर्थं तत्रान्यत् सुमनोहरम् ।
दर्शनादेव लोकानां सर्वपापविनाशनम् ॥५६॥
इन्द्रध्वजाभिधं तीर्थं गोवर्धनगिरेः पुरः ।
तत्र स्नानेन दानेन न पुनर्जन्मभाग् भवेत् ॥५७॥
चक्रतीर्थं च तत्रैव पञ्चतीर्थाभिधं तथा ।
महासरः प्रविख्यातं देवानामपि वाञ्छितम् ॥५८॥
तत्र स्नात्वा च संतर्प्य दत्त्वा चैव द्विजातये ।
सर्वपापविनिर्मुक्तः कुलकोटिं समुद्धरेत् ॥५९॥
पदे पदेऽत्र तीर्थानि कीर्तितानि मनीषिभिः ।
गोवर्द्धनगिरिः साक्षात्कृष्णप्रेमैकमूर्तिकः ॥६०॥
गोविन्दं कुण्डमेतस्य हृदयं परिकीर्तितम् ।
कामधेनुस्तनोद्भूतैः पयोभिः परिपूरितम् ॥६१॥
रुद्रकुण्डं गिरौ पुण्यं स्नानाद्दानाच्च पावनम् ।
पुष्पसागरनामा च तथैव सुमहानिह ॥६२॥
सरोवरः सुरुचिरः कृष्णेन विनिषेवितः ।
तस्य दर्शनमात्रेण पापपुञ्जं पलायते ॥६३॥
एवं यः कुरुते यात्रां गोवर्द्धनगिरेर्नृप ।
तस्य पापानि नश्यन्तीत्येतत्तुच्छतरं फलम् ॥६४॥
यत्र मुक्तिस्तृणसमा पुलाकं[1] ब्रह्मणः पदम् ।
कस्तस्य किल माहात्म्यं वक्तुं शक्तियुतो भवेत् ॥६५॥

---

१. पुलर्क—रीवाँ ।

गोवर्द्धनगिरिः साक्षाच्चिन्तामणिमयी शिला ।
पूजनीया विशेषेण सर्वपापप्रणाशिनी ॥६६॥
गोवर्द्धनगिरेर्धूलिः श्रीकृष्णचरणाङ्किता ।
सा यस्य देहे संलग्ना यमस्तस्य करोति किम् ॥६७॥
शालग्रामशिला राजन् पूजनादेव भव्यदा ।
गोवर्द्धनशिला त्वत्र दर्शनादेव मोक्षदा ॥६८॥
नानातीर्थानि तिष्ठन्ति गोवर्द्धनशिलाश्रये ।
तां स्नापयित्वा विधिवत् प्रातरुत्थाय मानवः ॥६९॥
तत्तोयं सुसमाचम्य भक्त्या मानवसत्तमः ।
सर्वतीर्थोद्भवं पुण्यं तत्क्षणाल्लभते नृप ॥७०॥
नानेन सदृशं तीर्थं पुण्यं नानेन संमितम् ।
त्रैलोक्यपावनी यत्र शिला गोवर्धनोद्भवा ॥७१॥
एका शिला लघुतरा नृप यस्य गेहे संपूजिता कुसुमगन्धसमूहकाद्यैः ।
तिष्ठत्यविघ्नकरणी भविकौघहेतुः किं तस्य देवबहुभिः खलु तीर्थपुण्यैः॥७२॥
चिदानन्दमयः सर्वो[1] गोवर्द्धनगिरीश्वरः ।
तस्य संदर्शनादेव कोटियज्ञफलं लभेत् ॥७३॥
तदभावे शिला[2] चैका तस्य संस्थापिता गृहे ।
तदुद्भवैर्जलैः कोशं पावयेत् पाञ्चभौतिकम् ॥७४॥
सिंहासनस्थिता शैलशिला परममञ्जुला ।
गोवर्द्धनविहारेण नित्यं योजयते हरिम् ॥७५॥
स्नानं मानसगङ्गायां सकृन्मोक्षप्रदं हरेः ।
दर्शनं गिरिराजस्य प्रादक्षिण्यं च भक्तितः ॥७६॥
त्रयमेतत्समं राजन् पुराणज्ञैः प्रकीर्तितम् ।
एकैकमश्वमेधादि महायज्ञफलप्रदम् ॥७७॥
सर्वेषु वेदेषु तथा पुराणेष्वन्येषु शास्त्रेषु रहस्यकेषु ।
गोवर्द्धनस्याचलपुङ्गवस्य संवर्णितोऽयं महिमैकदेशः ॥७८॥

---

१. चिदात्मनः सर्वेशो—रीवाँ । २. सिकता—रीवाँ ।

स्नानेन दानेन च विप्रभोज्यैः श्राद्धेन देवार्चनकोटिभिश्च ।
यत्कोटितीर्थेषु महाफलं स्याद् गोवर्द्धने तद्रजसि प्रलिप्तिम् ॥७९॥
यत्र क्वचित्कुण्डजले सरोजले सुनिर्झरोत्थे च जले समाप्लुतः ।
गोवर्द्धनं प्राप्तभुवि व्रजे वनेष्वखण्डपुण्यप्रचयः प्रकीर्तितः ॥८०॥
गोवर्द्धनाद्रिभवधातुविचित्रिताङ्गो गोवर्द्धनाद्रिशिखिपिच्छकृतावतंसः ।
गोवर्द्धनद्रुमसुपल्लवभूषिताङ्गो गोवर्द्धनोद्भुरदरीगृहकल्पवासः[1] ॥८१॥
गोविन्द आदिपुरुषो रमणीयलीलो राधाविभूषितमनोहरवामपार्श्वः ।
गोवर्द्धनेनिवसता मनुजेन नित्यं ध्यातव्य एष करुणावरुणालयात्मा ॥८२॥

गोवर्द्धनगिरेर्वासाद् गोविन्दसर आप्लवात् ।
दिव्यदृष्टिर्भवेन्मर्त्यः कृष्णं येन प्रपश्यति ॥८३॥
स्थानानि सन्ति भूरोणि रहस्यानि महीतले ।
गोवर्द्धनगिरेस्तुल्यं न किंचिदपि दृश्यते ॥८४॥
ततोऽतिरम्यशिखरो वरसानुगिरिर्व्रजे[2] ।
राधिकायाः पितुः स्थानं वृषभानोर्महात्मनः ॥८५॥
तस्य संदर्शनादेव जीवन्मुक्तो भवेन्नरः ।
यत्र गोष्ठानि रम्याणि धेनूनां सर्वतो दिशम् ॥८६॥
कुञ्जपुञ्जावृता[3]न्यद्धा गुञ्जद्भृङ्गाणि सौरभैः ।
नन्दगोपस्य गोष्ठं च गवां हंभारवैः शुभम् ॥८७॥
सर्वतः कुञ्जपुञ्जाढ्यं महामङ्गलमण्डितम् ।
वत्सैर्वृततरोमन्थं शाद्वलेषु निषादिभिः ॥८८॥
घटोध्नीभिर्युतं गोभिर्मन्थानरवमङ्गलम् ।
गायद्गोपाङ्गनावृन्दकण्ठस्वरमनोहरम् ॥८९॥
नित्यानन्दपदं धाम नन्दगोपस्य कीर्तितम् ।
यत्र नित्यं हरेर्वासो लीलारमणशालिनः ॥९२॥
इतस्ततश्चरन्तीनां गोपीनां पादनूपुरैः ।
रमणीयतमं नित्यं नित्यकौतूहलान्वितम् ॥९१॥

---

१. °वास्तु—रीवाँ। २. ततो निवसते राजन् वरसानुगिरिं व्रजेत्—रीवाँ।
३. °हता°—मथु०, बड़ो०।

नन्दीश्वरगिरौ रम्ये सर्वदेवमये शुभे ।
प्रतिष्ठिततमं लोके विख्यातं तीर्थमुत्तमम्[1] ॥९२॥
नन्दग्राम इति व्यक्तं नाम धाम निरूपितम् ।
अनेकैः पुण्यसलिलैः सरोभिरभितो युतम् ॥९३॥
राजधानीस्वरूपं तत् समस्तव्रजमण्डले ।
अनेकवापिकायुक्तमनेकद्रुमसंकुलम् ॥९४॥
तत्राभिगमनाद्राजन् शैलसंदर्शनादपि ।
अवगाहाच्च तीर्थानां कृष्णलीलाविचिन्तनात् ॥९५॥
विप्राणां भोजनाद्दानाद् व्रजधूलिविलेपनात् ।
माहेयस्यातिमृष्टस्य तत्रत्यस्य च भोजनात् ॥९६॥
आयान्तीनां च यान्तीनां गवां खुररजःस्पृशः[2] ।
दर्शनात् स्पर्शनाच्चापि संलापाद् व्रजवासिनाम् ॥९७॥
अनेकधा भवेन्मुक्तिस्तस्य संवासतो नृणाम् ।
व्रजभूमौ गमिष्यामि व्रजभूमौ वसाम्यहम् ॥९८॥
इत्येवं चिन्तयन्नित्यं प्रातरुत्थाय मानवः ।
व्रजवासोद्भवं पुण्यं लभते मानवः कलौ ॥९९॥
संकेतस्थानमुभयोरतुलं मध्यदेशगम् ।
राधाकृष्णनिजक्रीडास्थानभूतं मनोहरम् ॥१००॥
साक्षात्तत्रानुभावोऽयं लोकलोचनगोचरः ।
न स्पृशन्ति द्रुमांस्तत्र पक्षिणोऽपि वनेचराः ॥१०१॥
नच विट्कणिकास्तेषु पातयन्ति सुदूरगाः ।
गुल्मवृक्षलताद्याश्च दधते युगलात्मताम् ॥१०२॥
कदाचिच्छ्रूयते चापि मनुजैर्दिव्यमानसैः ।
मृदङ्गरवसंनादो मुरलीरवमिश्रितः ॥१०३॥
दृश्यन्ते चापि धरणौ सिन्दूराञ्जनबिन्दवः ।
यावकस्य रसश्चापि चूर्णताम्बूलिकारसः ॥१०४॥

---

१. कीर्त्तिमत्तमम्—मथु०, बड़ो० । २. °स्पृशेत्—मथु०, बड़ो० ।

प्रत्यक्षदृष्टैरित्यादचैश्चिह्नैर्जनमनोहरैः ।
राधारमणयोः क्रीडा नित्यं तत्रानुमीयते ॥१०५॥
अन्येषु च रहस्येषु स्थानेषु धरणीपते ।
द्रष्टासि तत्र प्रत्यक्षमनुभावं रहस्यगम् ॥१०६॥

नन्दीश्वरादवाग्देशे वरसानुगिरेरुदक् ।
मध्ये भूमिरजोमध्ये ब्रह्मादिसुरसेविते ॥१०७॥
उषितं कलहायन्ते काश्यादचास्तीर्थकोटयः ।
यत्र कृष्णपदाम्भोजचिह्नानि सुखमासते ॥१०८॥
गोवर्द्धनगिरौ चैव वरसानुगिरौ तथा ।
नन्दीश्वरगिरौ चैव नित्यं कृष्णस्य संनिधिः ॥१०९॥

यमुनायाः परे पारे गोकुलं कृष्णजन्मभूः ।
तस्य दर्शनमात्रेण जीवन्मुक्तो भवेन्नरः ॥११०॥
कृष्णेन पूतना यत्र मोचिता बालकेलिना ।
शकटश्च तृणावर्ते यत्रैव विनिपातितः ॥१११॥
तथैव मृत्तिका यत्र भक्षिता मातृभीतितः ।
व्यादाय वदनं सर्वं ब्रह्माण्डं संप्रदर्शितम् ॥११२॥

तत्र स्नात्वा नरो याति कृष्णसायुज्यमुत्तमम् ।
यमलार्जुनपाते च नरो गच्छेद् विशेषतः ॥११३॥
तत्र स्नात्वा नरो सद्यो मुच्यते नात्र संशयः ।
कर्णवेधनकूपे च स्नायात् तीर्थौघसेविते ॥११४॥
लभते पुत्रपौत्रादीन् दीर्घमायुश्च विन्दति ।
पितॄन् संतर्प्य विधिवच्छतं तारयते कुलम् ॥११५॥

स्नात्वा भाण्डीरकूपे च भाण्डीरवटमूलगः ।
तत्रत्यं सेवमानश्च समीरं मन्दशीतलम् ॥११६॥
कृष्णलीलादर्शनार्थमधिकारं लभेद् ध्रुवम् ।
मथुरायां महाकूपे सप्तसामुद्रिकाभिधे ॥११७॥
स्नात्वा पितॄन् सुसंतर्प्य दत्त्वा च बहुलं द्विजे ।
न पुनर्जायते जन्तुर्मातृगर्भेऽतिदुःखदे ॥११८॥

यस्य क्वापि न मुक्तिः स्यात् प्रेतभावाद् गयादिषु ।
सप्तसामुद्रिकः कूपस्तं मोचयति वै द्रुतम् ॥११९॥
दुष्कृतानि समृद्धानि मेरुमन्दरशैलवत् ।
तूलराशिवदुड्डीय गच्छन्त्यत्रावगाहनात् ॥१२०॥
यावन्ति भुवि तीर्थानि सप्तद्वीपावधिस्थितौ ।
तावन्ति विमले कूपे सप्तसामुद्रिकाभिधे ॥१२१॥
एवं यः कुरुते राजन् मथुरायाः समंततः ।
यात्रां पापहरां सद्यः स किंमर्त्यः स दैवतः ॥१२२॥
मथुरामण्डलेऽन्यानि तीर्थानि धरणीपते ।
रहस्यानि क्रियार्हाणि पितृदेवार्चनादिषु ॥१२३॥
तेषु स्नात्वा च दत्त्वा च यथाशक्ति द्विजन्मने ।
न पुनर्लभते जन्तुर्मातृगर्भान्तरे स्थितिम् ॥१२४॥
मथुरामण्डले राजन् पशुपक्ष्यन्त्यजा[1] अपि ।
चतुर्भुजा एव सर्वे इत्याज्ञा जगतो हरेः ॥१२५॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे पूर्वखण्डे दशरथस्य तीर्थयात्रायां षडधिकशततमोऽध्यायः ॥१०६॥

●

सप्ताधिकशततमोऽध्यायः

राजोवाच

तीर्थानां सारभूता या विश्वतः पावनोदका ।
यमुना भवता प्रोक्ता माथुरे मण्डले शुभे ॥ १ ॥
तस्यास्तु मे समुत्पत्तिं ब्रूहि ब्रह्मर्षिसत्तम ।
कथं हि सा समुत्पन्ना केन वा हेतुना मुने ॥ २ ॥
किं स्वरूपा च सा प्रोक्ता कुत्र चोत्पत्तिमागता ।
एतन्मे मुनिशार्दूल वद विस्तरतोऽधुना ॥ ३ ॥

१. पक्ष्यान्तिजा—मथु०, बड़ो० ।

वशिष्ठ उवाच

श्रूयतां रघुशार्दूल यमुनोत्पत्तिरद्भुता ।
नित्यापि सा हरेर्लोके शुभार्थं जगतोऽजनि ॥ ४ ॥
जाते तु सकले लोके जाते स्थावरजङ्गमे ।
जाते त्रैलोक्यसंस्थाने देवा इदमचिन्तयन् ॥ ५ ॥
अहो इदं जगत् सर्वं विष्णुना गुणिरूपिणा ।
आत्मना जनितं तावद् विचित्ररचनामयम् ॥ ६ ॥
स्वर्भूःपातालसंस्थाश्च तत्तत् स्थाने विकल्पिताः ।
देवाश्च मानुषाश्चैव राक्षसानां गणास्तथा ॥ ७ ॥
देवयोनिगणाश्चैव गन्धर्वा साप्सरोगणाः ।
नागा नगाश्च नगराण्यटव्यो वनदेवताः ॥ ८ ॥
विविधा जन्तवश्चैव स्वभावाश्च पृथग्विधाः ।
विचित्रा लोकसंस्थाश्च भूनभोमण्डले अपि ॥ ९ ॥
दिशो दिग्देवताश्चैव राशयस्तारकास्तथा ।
दृश्यते यत्र यत्रैव तत्र तत्राद्भुतं महत् ॥१०॥
लोका विचित्ररचनाः सप्ताधः सप्त चोपरि ।
द्रव्याणि चाप्यनेकानि स्वर्णरत्नादिकान्यपि ॥११॥
धातवो विविधाकारा विविधाश्च नृणां धियः ।
एतत् त्रैलोक्यमतुलं वेधसा रचितं महत् ॥१२॥
वेदानां शब्द[1]वृन्देभ्यः सर्वथा परिकल्पिताः ।
चातुर्वर्ण्यं सदाचारं चतुराश्रमसंस्थया ॥१३॥
वृत्तयश्च प्रजानां वै स्वस्वोचितविभक्तयः ।
अवलोक्य धिया पूर्वं स्वतन्त्रेण मणीषिणा ॥१४॥
हरेराज्ञावशेनैव कल्पितं सर्वमादरात् ।
अनिन्द्यं सर्वतस्तच्च कविना विश्वमूर्तिना ॥१५॥
यतो यतः प्रसर्पेत दृष्टिः सूक्ष्मार्थदर्शिनी ।
ततस्ततोऽखिलं विश्वमनन्तं प्रतिभाति नः ॥१६॥

---

१. सप्त°—रीवाँ ।

अनन्ता रचिता जीवा इत्थं भगवता स्वयम् ।
निजमायामधिष्ठाय प्रकृतिं गुणिलिङ्गिनीम् ॥१७॥
तेषां दण्डधरः कश्चिन्न जात इति चिन्त्यताम् ।
राजानो राजधानीं स्वां शासन्ति खलुदण्डतः ॥१८॥

एतावद्राज्यमतुलं विष्णोर्वै परमेशितुः ।
विना दण्डप्रदं भूत्यै कथं भवितुमर्हति ॥१९॥
इत्येका महतो चिन्ता जागर्ति खलु नोत्तरे ।
अत्रोपायोऽपि तेनैव कार्योऽन्तर्यामिणा स्वयम् ॥२०॥

येनैव रचितं विश्वं सदसत्स्थूलसूक्ष्मकम् ।
तस्यैवेयं भवेच्चिन्ता सर्वे विज्ञापका वयम् ॥२१॥

स नयः स नयस्थानं स एव नयदर्शकः ।
स एव नयदाता च विश्वभूः परमेश्वरः ॥२२॥
दृष्टमेतत् पुराकल्पे दिव्येन ज्ञानचक्षुषा ।
दण्डपाणिः स्वयमभूद् भगवान् कालरूपधृक् ॥२३॥

रम्यदर्शः पुण्यवतामघानां क्रूरदर्शनः ।
शास्ता स सर्वलोकस्य पुण्यपापविवेचकः ॥२४॥
स एव चाधुनाप्यस्तु भगवान् स्वात्मना विभुः ।
यतः समस्तभूतानां भयं भवति भूरिशः ॥२५॥

भयेन न प्रवृत्ताः स्युः स्वाच्छन्द्येन जना भुवि ।
एकं मूर्ध्नि नियन्तारं मन्यमाना दिवानिशम् ॥२६॥
अन्यथा स्वेच्छया वृत्या भुवनं व्याकुलीभवेत् ।
इतिचिन्तासमाविष्टास्तूष्णीमासन् दिवौकसः ॥२७॥

वशिष्ठ उवाच

एतस्मिन्नन्तरे राजन् भगवल्लोकवासिनः ।
दिव्यपार्षदवर्यास्ते भगवन्तं विजज्ञपुः ॥२८॥
प्राणिनां पापसंभूतिमाज्ञाय महतीं हृदि ।
सर्वोपकारनिरताः करुणावशवर्तिनः ॥२९॥

पार्षदा ऊचुः

भगवंस्त्रिजगन्नाथ सर्वभूतविभावन ।
सर्वकल्याणधिषण करुणामय केशव ॥३०॥
शिवोऽसि शिवरूपोऽसि त्वमेवाशिवनाशनः ।
त्वमेकः सर्वभूतानामनुकम्पानिधे हरे ॥३१॥
बिर्भषि कौस्तुभव्याजात् करुणाङ्कुरमीश्वर ।
त्वयैव सर्वदा भव्ये स्थापनीयमिदं जगत् ॥३२॥
न तु संप्रत्यमी जीवाः क्लेशिताः पापकर्मभिः ।
विपद्यन्ते विपच्यन्ते नरके तामसौकसि ॥३३॥
अमीषां ज्ञानविभ्रंशान्नैव कर्मास्ति तादृशम् ।
येनोद्धरेयुरात्मानं नारकीं गतिमास्थिताः ॥३४॥
नापि विज्ञानसंपत्तिरमीषां जातु दृश्यते ।
भूयः संसरमाणानामविद्यापिहितात्मनाम् ॥३५॥
नाप्यमीषां समुद्धृत्यै योगोऽपि खलु दृश्यते ।
एकाकिनापि चाङ्गेन संसिद्धिं समुपागताः ॥३६॥
न तपस्तादृशं चैषु न कर्म तव तुष्टिदम् ।
न विज्ञानं ज्ञानबीजं न स्वाध्यायः क्षमा दया ॥३७॥
विनष्टा आत्मनैवामी विमूढाः कुशले पथि ।
त्वमेव स्वेच्छयामीषां हितकर्ता न चेद्भवेः ॥३८॥
भगवंस्तर्ह्यमी जीवा विनष्टा एव केवलम् ।
श्रिताः पापीयसीं वृत्तिमात्मवञ्चनकारकाः ॥३९॥
कदाचिदात्मनोंऽशेन जीवेषु करुणां दधत् ।
प्रादुर्भूयावतारादौ कुरुषे जगतां हितम् ॥४०॥
नित्यं चामलया त्रय्या कर्मज्ञानोपदेशनैः ।
विश्वचक्षुः समुन्मील्य जगतोहितमाचरः ॥४१॥
तथापि नो विजानन्ति विमूढाः स्वात्मनो हितम् ।
एषां शाश्वतिकं शश्वत् कुशलं कर्तुमर्हसि ॥४२॥
अनायासेन मुच्येरन् येन मूढा जगज्जनाः ।
किंचित् साहजिकं पुण्यं लोके प्रकटय प्रभो ॥४३॥

यत्संपर्काद्विशुद्धाः स्युः पापा अपि नरा भुवि ।
दृष्टमेतत् पुरास्माभिस्त्वत्प्रसादोत्थया धिया ॥४४॥
नीलं महस्तव विभो तीर्थरूपं द्रवामृतम् ।
जगतां शोकशमनं तव सायुज्यदायकम् ॥४५॥
बभूव कमलाकान्त यमुनेत्याख्यया स्फुटम् ।
इति विज्ञापितं तेषां निशम्य गरुडध्वजः ॥४६॥
ईषद्विहस्य भगवांस्तूष्णीमास जगत्प्रभुः ।
अथैकदा निजे लोके व्यापि[1]वैकुण्ठसंज्ञके ॥४७॥
नित्यलीलारसं पुष्णन् विरेजे भगवान् स्वयम् ।
श्रीमद्वृन्दावने रम्ये ऋतुषट्कनिषेविते ॥४८॥
महामाधुर्यभवने महासौभाग्यसागरे ।
द्रुमवल्लीवनाकीर्णे धीरमारुतसेविते ॥४९॥
वल्लवीनिवहोद्गीत[2]मञ्जुलस्वरनादिते ।
नित्योत्सवे नित्यसुखे नित्योत्साहविवर्द्धिते ॥५०॥
नित्यरासरसोल्लासे नित्यकैशोरलालिते[3] ।
नित्यं च शैशवाक्रीडे नित्यकौतूहलोदधौ ॥५१॥
नित्यकेलिरसानन्दे नित्यस्त्रीजनसंभृते[4] ।
गवां हंभारवैर्नित्यं वत्सानां कूर्दनैश्च तैः ॥५२॥
दधिमन्थनघोषैश्च स्त्रीणां नूपुरसिञ्जितैः ।
सायंप्रातः सदासौख्ये रात्रंदिवसुखव्रजैः ॥५३॥
नित्यमानन्दनिविडे महामाङ्गल्यगह्वरे ।
श्रीमन्नन्दालये तत्र भगवान् गोपिकासुतः ॥५४॥
बाललीलामतिक्रम्य कैशोरं समुपाश्रितः ।
नवीनयौवनोद्भेदप्रत्यङ्गमधुराकृतिः ॥५५॥
राधिकानयनानन्दो लावण्यगुणवारिधिः ।
संददर्श निजं रूपं कदाचिद्रहसि स्थितः ॥५६॥

---

१. व्याप्य°—रीवाँ । २. वल्लवीनां महोद्गीत—रीवाँ । ३. °लीलिते—बड़ो० । ४. संभ्रमे—मथु०, बड़ो० ।

दर्पणे चन्द्रविमले निर्जने गहने वने ।
स आत्मनः प्रतिबिम्बावलोकात् संक्षुब्धचित्तो रतितत्त्वाभिमर्शात् ।
स्त्रीरूपमात्मानमथेहमानः शुश्राव दिव्यामृतधारासहस्रैः ॥५७॥
प्रत्यङ्गमात्मानमुदीक्षमाणः संक्षुब्धचेता मन्दमन्दस्रुतोऽभूत् ।
श्रीविग्रहः कामतत्त्वेन सर्वमाविष्टः सन् द्रवतामाप तर्हि ॥५८॥
इत्थं समस्ते द्रवभावं गतेऽस्मिन् श्रीविग्रहे नीलमहस्यनन्ते ।
शिष्टो भागो भूरितरप्रभावस्तेजो दण्डाकारतां बिभ्रदासीत् ॥५९॥

अत्रान्तरे तु तत्रागात् संकर्षण उदारधीः ।
दृष्ट्वा तु तद् विस्मितोऽभूत् तेजोदण्डमयं वपुः ॥६०॥
नीलं महो द्रवमयं प्रवाहाकारतां दधत् ।
आःकिमेतदिति प्रोच्य स्मययानो मुहुर्मुहुः ॥६१॥
तत्रागाद् भगवान् ब्रह्मा सर्वविश्वसृजां पतिः ।
स्मयमानं बलं दृष्ट्वा प्रोवाच भगवान् स्वयम् ॥६२॥

ब्रह्मोवाच

किं नु विस्मयसे धीमन् संकर्षण महाबल ।
एतद्भगवतः कृत्यं कृष्णस्य परमात्मनः ॥६३॥
लौकस्यैव हितं नित्यं चरतश्चरितं हरेः ।
दुष्प्रतर्क्यं सुरैः सर्वैर्जातमेवानुभूयते ॥६४॥
दण्डाकारमिदं तेजो यम एव भविष्यति ।
जगतां दण्डदानाय पुण्यपापविमोचनः ॥६५॥
दृष्टमेतत् पुरा देवैश्चिन्तां कृत्वा महीयसीम् ।
को नु दण्डयिता लोके भवेदिति विचिन्तनात् ॥६६॥
स एष जातो भगवान् लोकानां यमरूपधृक् ।
अनेन स्वच्छन्दकृतो न भविष्यन्ति मानवाः ॥६७॥
नोचेल्लोके विशीर्णः स्यात् पुण्यपापविवेचनात् ।
अतो हितमिदं स्वेन हरिणैव विनिर्मितम् ॥६८॥
अयं च नीलमहसा महनीयतमद्युतिः ।
प्रवाहो भविता साक्षाद्यमुनेत्याख्यया नदी ॥६९॥

अनायासेन जगतां पुण्यौघस्य विवर्द्धिनी ।
कृष्णप्रिया स्वयं कृष्णा सर्वेषां पापहारिणी ॥७०॥
यावन्ति भुवि तीर्थानि सरितश्च सरांसि च ।
तान्यस्याः कृष्णकान्तायाः कलां नार्हन्ति षोडशीम्॥७१॥
कृष्णस्वरूपमालोक्य संक्षुब्धः कामतत्त्वतः ।
स्त्रीरूपं कामयाञ्चक्रे तेनैषा स्त्री भविष्यति ॥७२॥
यानि घोराणि पापानि ब्रह्महत्याधिकानि च ।
तान्यस्याः स्नानमात्रेण विनश्यन्ति नसंशयः ॥७३॥
किं च पापौघहारिण्यः सरितः सन्ति भूरिशः ।
गङ्गा गोदावरी चैव कावेरी च सरस्वती ॥७४॥
नर्मदा सिन्धुप्रमुखाः पयोष्णीप्रमुखा अपि ।
पुष्कराद्यानि तीर्थानि सरांसि विमलानि च ॥७५॥
स्थाने स्थाने च तालाङ्क[1] देशे देशे च भूरिशः ।
सन्त्यनेकानि तीर्थानि पापं यैः प्रविनश्यति ॥७६॥
इयं तु यमुना साक्षाद् भगवद्भक्तिवर्द्धिनी ।
यया सुलभतां याति भगवान् गोपिकासुतः ॥७७॥
अलभ्यं फलमाधत्ते कृष्णसाक्षात्कृतिं[2] स्फुटम् ।
अतोऽस्यास्तुलतां नार्हास्तीर्थानां कोटयोऽपि च ॥७८॥
इयमीदृग्गुणा लोके भविता यमुना नदी ।
कृष्णस्वरूपसलिला कलिलामयनाशिनी ॥७९॥
यत्स्वरूपेण संसिद्धेत् प्रयोजनमनुत्तमम् ।
नृणां तत्सेवमानानां संसिद्ध्यत्यनया ध्रुवम् ॥८०॥
नानया सदृशी गङ्गा न गोदा न सरस्वती ।
न नर्मदा न कावेरी न सिन्धुर्न पयोष्णिका ॥८१॥
पुष्करादीनि तीर्थानि नानया सदृशानि च ।
सरितः सागराश्चैव सरांसि च समानि नो ॥८२॥

---

१. "तालाङ्क—हे बलदेव" टि०—मथु०, बड़ो० । २. °कृतिः—मथु०, बड़ो० ।

यत्र संहरते गङ्गा न गोदा न सरस्वती ।
न नर्मदा न कावेरी न सिन्धुर्न पयोष्णिका ॥८३॥
पुष्करादीनि तीर्थानि न च हर्तुं क्षमाणि यत् ।
सरितः सागराश्चैव सरांसि च हरंति नो ॥८४॥
तत्पापं हरते नृणां यमुना स्नानमात्रतः ।
दर्शनात् स्पर्शनाच्चापि विन्दोराचमनादपि ॥८५॥
तरङ्गसङ्गिपवनात् सेवनान्नमनादपि ।
श्रवणात् कीर्तनाद्ध्यानाद् बालुकाधारणादपि ॥८६॥
तीरस्थधूलिलुठनाद् दूरादागमनादपि ।
यमुनां मनसोद्दिश्य यो व्रजेद् दूरदेशतः ॥८७॥
तस्यापि खलु मुक्तिः स्यात् काकथा तत्र मज्जतः ।
नित्यं संसेवमानस्य तीरस्थस्याच्युताग्रज ॥८८॥
शुभद्वयमिदं राम हरिणैव विनिर्मितम् ।
सर्वदेवौघविज्ञप्ति विज्ञाय निजमानसे ॥८९॥
विश्वस्य दण्डदानाय विविक्त्यै पापपुण्ययोः ।
आत्मनैवायमत्युग्रः पुरुषस्तेन निर्मितः ॥९०॥
अन्यश्च सर्वभूतानां पापसंहरणाक्षमम् ।
यमुनेत्याख्यया लोके तीर्थतत्त्वं भविष्यति ॥९१॥
इत्युक्तवत्यजे भूयो जगाद भगवान् बलः ।
उभयोरनयोर्नाम रूपं च विधिवद्विधे ॥९२॥
विनिवर्तय विज्ञाय तत्त्वतः पुरुषोत्तमम् ।
स्थानं ताभ्यां समाचक्ष्व भवेतां यत्र संस्थितौ ॥९३॥
उभावेतौ दिव्यरूपौ द्वावेतौ यमुनायमौ ।
इत्युक्तस्तेन संप्राह विधिरेकाग्रमानसः ॥९४॥

ब्रह्मोवाच

भगवन्नप्रमेयात्मन् संकर्षण महामुने ।
त्वदाज्ञया करोम्येतौ नामरूपसमन्वितौ ॥९५॥
धामकामवरोपेतौ विश्वोपकृतये क्षमौ ।
विधास्ये वैदिकैर्मन्त्रैस्तव संपश्यतः पुरः ॥९६॥

इत्युक्त्वा भगवान् वेधास्त्रयीमूर्तिस्तपोमयः ।
दर्भमुष्टिमुपादाय कमण्डलुमहोदकैः ॥९७॥
विरोचमानं पुरतस्तेजोद्रण्डममन्त्रयत् ।
दिव्यज्ञाननिधिं मन्त्रैः प्राणजीवेन्द्रियप्रदैः ॥९८॥

ये वै प्राणा आसन् परमेश्वरस्य वीर्यं महोबलमोजश्च तेजः ।
ते प्राणास्ते बलमाभरन्तां यमाय त्वा पुण्यपापे विवेक्तुम् ॥९९॥
यो वै जीवः परमात्मानमग्रे उपावृङ्क्त प्राणशक्त्याभ्युपेतः ।
प्राणापानोदानव्यानसमानैः सजीवस्त्वा यम जीवन्तं करोतु ॥१००॥

यानीन्द्रियाण्यग्र इहाविरासन्निन्द्रस्येन्द्रावरजश्चन्द्रमसश्च ।
श्रोत्रत्वक् चक्षुर्जिह्वाघ्राणमयैस्तैरिन्द्रियैस्त्वामिन्द्रियवन्तं करोमि ॥१०१॥
य आदिकर्तुः सततं स्थिता वाङ्मनश्चक्षुःश्रोत्रघ्राणप्राणाः ।
यमाय त्वामभिवीर्यं स्पृणन्तस्त इहागत्य सुखं चिरन्तिष्ठन्तु ॥१०२॥
वाक्पाणिपादाः पायुरुपस्थ[1] एनमुपासतामधिकर्मेन्द्रियाणि ।
पृथिव्यप्तेजोवाय्वाकाशमयानि भूतानि त्वामभितः संस्पृणन्तु ॥१०३॥

शब्दः स्पर्शो रूपरसौ गन्धस्त्वामागच्छतात् सुप्रतीकाय सम्यक् ।
श्रद्धामेधे जुषतां सर्वतस्त्वामायुष्मन्तं सुमनस्यमानाः ॥१०४॥
कामः संकल्पो विचिकित्सा श्रीर्मतिर्ह्रीभिरेते वामभ्युपेयासुरर्थाः ।
वर्चस्वी त्वं सर्वदेवेषु भूया मा मा हिंसी जातवेदास्तवायुः ॥१०५॥

यमोऽसि त्वं यमनामासि शश्वत् सान्निध्यं ते संयमिन्यां नगर्याम् ।
विश्वस्मै त्वं पुण्यपापे विविच्य हितं कुर्या भगवन् कालमूर्ते ॥१०६॥
अन्तश्चरन्नस्य लोकस्य नित्यं नियन्ता त्वं दण्डपाणे भवेति ।
सत्याशिषः[2] संततं वर्द्धयामि सत्यास्ते सन्तु यजमानस्य कामाः ॥१०७॥
वर्षे वर्षे सोमयाजी त्वमास्व शताश्वमेधैस्तद्भवान् वर्द्धिषीष्ट ।
पुण्येन पूर्णां तनुमेतां कृषीष्ट त्वमस्य दिष्टप्रमितं शर्म देयाः ॥१०८॥

संवर्द्धितः स तेनेत्थं मन्त्रैः प्राणप्रतिष्ठया ।
लब्धप्राणेन्द्रियः काल उदजृम्भत तत्क्षणात् ॥१०९॥

---

१. पायूपस्था—रीवाँ । २. सत्याशिषं—मथु० बड़ो० ।

कालरात्रितमोरूपमसीमेचकविग्रहः ।
महादण्डधरो भीमः सर्वलोकान्तको महान् ॥११०॥
संज्ञासंस्थानसहितो लब्धवृत्तिः स तत्क्षणात् ।
दिव्यरूपसमोपेतो दण्डपाणिरुवाच तम् ॥१११॥

यम उवाच

नमस्ते विश्वनिर्माणवेधसे सर्वसाक्षिणे ।
सर्वशक्तिविशिष्टाय सर्वलोकप्रवृत्तये ॥११२॥
त्रैलोक्यरचनाबीजस्वप्रकाशस्वयंधिये ।
सर्वलोकैकवन्द्याय शब्दब्रह्मात्मने[1] नमः ॥११३॥
लोकेशाय वरिष्ठाय सर्वदैवतमूर्तये ।
सर्ववेदस्वरूपाय पत्ये विश्वसृजां नमः ॥११४॥
सवकर्मस्वरूपाय यज्ञाय विजितात्मने ।
सर्वयज्ञफलेशाय नमो नित्यं स्वयंभुवे ॥११५॥
तपोरूपाय तप्याय तपःफलविधायिने ।
तपःसम्प्राप्तलोकाय सुरश्रेष्ठाय ते नमः ॥११६॥
सत्त्वाय ज्ञानविस्फूर्त्यै रजसे विश्वसृष्टये ।
तमसे विश्वरूपाय त्रिगुणाय नमोस्तुते ॥११७॥
सत्याय सत्यसंकल्पनिर्मिताखिलसृष्टये ।
सत्यलोकाधिपतये नमस्ते ब्रह्मणे नमः ॥११८॥
इति संस्तूय बहुशो भगवन्तं स वेधसम् ।
स्थितः कृष्णानदीतीरे तूष्णींमास महायमः ॥११९॥
तदन्तरेणैव ततः प्रवाहात् सुमेचकात् कृष्णतनुद्रवामृतात् ।
विरोचमानाभ्युदगाद्वराङ्गना प्रकाशयन्ती हरितस्तनुत्विषा ॥१२०॥
कल्याणरूपा कमनीयविग्रहा कृष्णा किशोरी कमलाननेक्षणा ।
पूर्णा शरच्चन्द्ररुचिप्रकाशिनी प्रत्यङ्गविस्फूर्जितरामणीयका ॥१२१॥
मुक्तासरं रत्नसरं सुबिभ्रती शृङ्गारसारेण वपुःश्रियान्विता ।
प्रत्यङ्गलावण्यसुधातरङ्गिणी कन्दर्पमानन्दयितुं क्षमानिशम् ॥१२२॥

---

१. च शब्द ब्रह्मणे—रीवाँ ।

दिव्यप्रसूनस्तवकौघगुम्फितां वेणीं दधाना प्रतिपन्नमौक्तिकम् ।
सीमन्तविद्योतितरत्नपट्टिकां सद्धेमताटङ्कमिलन्मणिप्रभाम् ॥१२३॥

प्रोद्भासिसीमन्तपुरःस्फुरन्मणीभालस्थलोदारतमश्रियाञ्चिताम् ।
सौभाग्यभास्वत्तिलकाङ्कुरच्छविं सिन्दूरविन्दुप्रभवावभासिताम् ॥१२४॥

उत्तुङ्गनासामलमौक्तिकच्छविं प्रत्यग्रपङ्केरुहचारुलोचनाम् ।
श्यामायमानैरमलैः प्रसादजैः कटाक्षवृन्दैर्जगतां कृपावतीम् ॥१२५॥

संपक्वबिम्बीफलमञ्जुलाधरां दन्तावलिद्योतितमन्दहासिनीम् ।
कण्ठत्विषा मन्मथजैत्रकम्बुवत्किञ्चिच्चमत्कारभरं वितन्वतीम् ॥१२६॥

तुल्यांसबन्धक्रमराजिविग्रहां मृणालकाण्डामलमञ्जुदोर्लताम् ।
निर्णिक्तलक्ष्मोमुकुरायमाणयोः कपोलयोरस्त्यलकावलिद्युतिः ॥१२७॥

वक्षस्थलस्थस्तनपद्मकोरकप्रकामतारुण्यपदेन निर्मिताम् ।
चन्द्रावलीमञ्जुलहारसंपदा ज्योत्स्नायमानामलविग्रहच्छविम् ॥१२८॥

कुम्भीन्द्रकुम्भस्थलसंभ्रमावहौ श्रीशातकुम्भोद्भवकुम्भसुन्दरौ ।
वक्षोरुहौ काममदेन बिभ्रतीं साटोपमुज्जासितदिव्ययौवनाम् ॥१२९॥

रोमावलीमञ्जुलभृङ्गमण्डलीसंसेव्यमानामलकल्पवल्लिकाम् ।
तुङ्गोत्तरङ्गत्रिवलीतरङ्गिणीं गभीरनाभीह्रदभासितोदरीम् ॥१३०॥

शातोदरीं साधुपरीतविस्फुरत्कौशेयसोद्भासिनितम्बनिर्भराम् ।
सुवर्णरम्भासुभगोरुगौरवाद्रम्भाद्विजम्भारिबधूविजैत्रिका ॥१३१॥

अनर्घरत्नप्रवरैरुपासिता सिञ्जानमञ्जीरकराजहंसकौ ।
पद्भ्यां वहन्ती मृदुमञ्जुभामिनी स्वःकामिनी श्रीरतिदामिनीसमा ॥१३२॥

मुरारिमाराधयितुं मनोरमा सखी समालापकलापपेशला ।
भुवि प्रमोदाय भविष्णुरद्भुता शुभाधिवृन्दाटविलालनोचिता ॥१३३॥

भविष्णुरेका महिषी रमापते रमासमालोकनसौख्यकारिणी ।
वृन्दाटवीवासविहारसौख्यदा संसेवनायाखिलभक्तसंपदाम् ॥१३४॥

तां वीक्ष्य रम्यावयवां शुचिस्मितां[1] संकर्षणो ब्रह्मभवो यमस्तथा ।
सर्वे सुराः संमुदिताः स्वमानसैर्बभूवुरुत्सिक्तदृशः कुतूहलैः ॥१३५॥

---

१. सुविस्मितां—रीवाँ

अथोज्जिहानैः सुदृशोर्विलासिभिः कटाक्षवृन्दैरियमत्र पूर्ववत् ।
प्रकल्पयामास वपुर्गदाभृतः स्थानादमुष्मादुदियाय तत्क्षणात् ॥१३६॥

यस्मिन्स्थाने द्रवीभूतो भगवान् माधवः स्वयम् ।
उदतिष्ठत्ततः सद्यस्तत्कटाक्षैरवेक्षितः ॥१३७॥
स तां वीक्ष्य मुदं प्राप मुकुन्दः स्वस्य वल्लभाम् ।
अन्योन्यं च तयोरासीत्प्रेमा सिन्धुरिवोद्गतः[1] ॥१३८॥
अथोज्जगाद भगवान् प्रजापतिरवेक्ष्य तौ ।
लोकस्य शुभदानाय ज्ञात्वा कार्यं जगत्पतेः ॥१३९॥
पुरा चिन्तातुरैः सर्वदेवैरेतद्विचारितम् ।
व्यक्तं तद्भवतादर्शि सर्वान्तर्यामिणा हरे ॥१४०॥
जातामिमां भवद्देहाद्यमुनां लोकपावनीम् ।
वीक्ष्य पापौघदहनां कृतार्थं स्याज्जगत्त्रयम् ॥१४१॥
अस्या एवाग्रजोऽयं च यमो यमयतांवरः ।
सर्वलोकविवेकाय भविता नात्र संशयः ॥१४२॥
अस्मै तु भगवन् पूर्वं मयैव सुविमर्शितम् ।
नाम धाम च कार्यं च भवांस्तदनुमन्यताम् ॥१४३॥
अस्मै च भवता देयं विनिर्दिश्य विशेषतः ।
नाम धाम स्वरूपं च यथा कार्यं सुरोत्तम ॥१४४॥

श्रीभगवानुवाच

मत्स्वरूपाविमौ दिव्यौ यमुना यम एव च ।
असौ भ्राताग्रजोऽस्त्यस्या इयं चावरजा स्वसा ॥१४५॥
सर्वदर्वीमलित्वासौ पूर्वमेव विचिन्तितः ।
तेनैष पूर्वतो ह्यस्या जात इत्यग्रजोऽभवत् ॥१४६॥
पुरीं संयमनीं प्राप्य तपसा सुसमेधितः ।
पितृलोके प्राज्यतमो राजा चैव भविष्यति ॥१४७॥
महावीर्यो महातेजा महाबलपराक्रमः ।
सर्वस्य जगतो नेता भविष्यति न संशयः ॥१४८॥

---

१. रिवाद्भुतः—रीवाँ ।

एष वक्ता शुभान् धर्मान् जगच्चक्रप्रवर्तकान् ।
कालो दण्डधरो भूत्वा त्रैलोक्यमनुशास्यति ॥१४९॥
अतोऽयं लोकयमनाद्यम एव त्वया कृतः ।
इयं यमस्यावरजा यमुनातो भविष्यति ॥१५०॥
भवान्तरे त्विमावेव सूर्यस्यात्मजतां विधे ।
प्राप्स्यतो लोककल्याणकरणायोद्यतौ सदा ॥१५१॥
कलिन्दान्द्रेः सुता चैषा भविता मार्गरोधिनः ।
कालिन्दीति ततो लोके प्रसिद्धिमनुयास्यति ॥१५२॥
जम्बूद्वीपे शुभान् लोकान् प्लावयन्ती निजैर्जलैः ।
मथुरामण्डलं गत्वा क्रमादानन्दयिष्यति ॥१५३॥
व्रजभूमिं परिप्राप्य जम्बूद्वीपस्य भूषणाम् ।
मम रासविलासादौ प्रमोदं जनयिष्यति ॥१५४॥
कलिन्दाचलमारभ्य समुद्रान्ताऽनुगामिनी ।
स्थाने स्थाने महातीर्थरूपा चैषा भविष्यति ॥१५५॥
सर्वाणि तीर्थान्यादाय सप्तद्वीपेषु यानि च ।
माथुरे मण्डले नित्यं निवत्स्यति यमानुजा ॥१५६॥
मम लीलारसावेशपरमानन्दधारिणः ।
पत्नीभावं परिप्राप्य स्वात्मानं सुखयिष्यति ॥१५७॥
इत्येवं सततं लोके ममेयं नित्यवल्लभा ।
दर्शनादेव कालिन्दी भक्तानानन्दयिष्यति ॥१५८॥
अतोऽस्यास्तुलनां लोके न तीर्थान्तरमृच्छति ।
इयं मद्देहसंभूता गङ्गा मत्पादसंभवा ॥१५९॥
वृन्दावने सर्वदेवर्षिरम्ये मद्भक्तजीवातुतमे स्थितेयम् ।
कल्लोलमाला कलिता जनानामानन्दयिष्यत्यसकृन्मनांसि ॥१६०॥
इत्युक्त्वा भगवान् विष्णुस्तूष्णींभूय ततः स्थितः ।
बलदेवेन सहितः प्रविष्टो नन्दमन्दिरम् ॥१६१॥
विधिं विसर्जयामास भक्तिप्रह्वं यमं च तम् ।
तौ च तत्र स्थितौ नित्यं तस्यास्तीरे तपोरतौ ॥१६२॥

अथ तत्राभ्युपागच्छन् सर्वदेवाः सकौतुकाः ।
महादेवं पुरस्कृत्य शिवं भक्तजनप्रियम् ॥१६३॥
ब्रह्मा शिवमुवाचाथ स्तूयतां भगवंस्त्वया ।
यमुना लोककल्याणी स्वयं श्रीकृष्णवल्लभा ॥१६४॥
ब्रह्मणा प्रेरितो देवः शङ्करो लोकशङ्करः ।
तुष्टाव यमुनां देवीं नित्यं भक्तजनप्रियाम् ॥१६५॥

जय जय जय देवि कृष्णप्रिये श्राद्धदेवानुजे जन्म धृत्वा कृतार्थीकृतोग्रप्रभे[1] विश्वमाङ्गल्यभूर्नील मेघप्रभे, भूय उच्चैः कलिन्दाचलात्संभविष्णो सरित्सागराखर्वगर्वैकजिष्णो, कृपालेशविस्तारिताशेषभव्ये सुधास्वादुनीरौघनित्याभिनव्ये । दिवा दीव्यदिन्दीवरानन्दिरूपे यशोदासुतामन्दलीलाभिरूपे, सतां सर्वसंपत्तिसंदोहदाने दयोदारचित्तेति रम्यावदाने । जयाकुण्ठवैकुण्ठसंपन्निधे ॥१६६॥

जय जय यमुनेति नामश्रुतिध्वस्तपापाटवीमूलनिर्मूलने कृष्णलीलारसानन्द पुष्टान्तरे, तारिताशेषपश्वादिजीवव्रजे भुक्तिमुक्तिप्रदानैकजैत्र ध्वजे, तुङ्गवीचीघटाटोपदर्पोद्धुरे राजहंसावलिक्वाणचेतोहरद्वीपदेश प्रतिष्ठामरौघस्तुतिप्रोद्यदम्भश्छटानित्यसंरम्भिणि ब्रह्मवक्त्रोत्थतद्वर्णवेदत्रयव्यस्तभूयोयशःस्तोमसोमप्रभानाशिताशोकलोकान्धकारोत्करे । सर्वलोकोत्तरे ॥१६७॥

जय जय जय कलिकल्मषाक्रान्तसंसारनिस्तारहेतो लसद्धर्मसेतो महोदारशीले सदारम्यलीलेऽतिकल्लोललोले समारूढदोले लसद्वीचिमाले त्रसत्पापजाले चमत्कारनीरे स्फुरद्रत्नतीरे शरद्चोमतारासमुल्लासिहारावलीराजमाने सदा साभिमाने क्वचित्कृष्णरासे समुद्यद्विलासे क्वचित्केलिकुञ्जे महासौख्यपुञ्जे क्वचिद्गोपदारेषु जाग्रद्विकारे क्वचित्कृष्णसंदर्शसंजातहर्षे । हरेर्वल्लभे ॥१६८॥

जय जय जय कृष्णभक्तिप्रभावेण दूरीकृताम्भोधिराजादरे तिग्मतापत्रयावेशतप्तात्मनामन्तरङ्गे हिमानीमहाशीतले । शेषभावं सुपर्वेशभावं तथा चेशभावं विहङ्गेशभावं तथा दर्शनात्सिन्धुकन्येशभावं च दत्से

---

१. °कृतो भविष्णूष्णप्रभे—मथु०, बड़ो० ।

त्वमेका जगन्मङ्गलायोद्यता विद्युतः श्रीपतेश्चिद्घनो विग्रहः कृष्णपत्नि
पवित्रीकृतक्ष्मातला त्वं भवित्री त्रिलोकस्य कल्याणकृत् केवलानन्दरूपा
कृपापूरपूर्णा जय प्रेमदे ॥१६९॥

नमः कृष्णपत्नि प्रमोदैककन्दे सदानन्दसंपत्तिसंदोहरूपे ।
नमस्तुभ्यमासेवनीये जनानां सती शोकमोहादिमूलापहन्त्र्यै ॥१७०॥

नमः सिद्धलक्ष्म्यै सति प्रेमदायै जगत्क्षेमदायै पवित्राम्बुवत्यै ।
चिदानन्दरूपस्य कृणस्य पत्न्यै मुनीन्द्रौघसेव्यप्रतीरक्षमायै ॥१७१॥

कलाकोटियुक्ताय कल्याणदाय त्रिवेदीशिरस्तत्त्वरूपाय तस्मै ।
दिवारात्रमुज्जागरोद्यत्प्रभावप्रवाहाय तेऽहं नमो देवि कुर्वे ॥१७२॥

मुनीन्द्रैरुपास्यं द्रवाकारमेतत् परं ब्रह्म विद्योति कृष्णाद्वितीयम् ।
चिरं भावयामि स्वरूपेण नित्यं चिदानन्दसंदोहसंपद्विधातृ ॥१७३॥

गुणा भान्ति तेनैव विद्योतमानां हरेर्यत् स्वभक्तानुकम्पाकरस्य ।
तदङ्गानुषङ्गात् सुधाशीतलस्य त्वदीयाम्भसः किन्नु वक्ष्मि प्रभावम्॥१७४॥

पवित्रं विचित्रं चरित्रं त्वदीयं महाघोरपापौघभित्यै लवित्रम् ।
रसालं विशालं सदालम्बनं ते स्वरूपं नृणां ध्यायती सर्वसिद्धचै ॥१७५॥

इयं पारमेशी कृपा देवि जाता समस्तावनीमानवोद्धारहेतुः ।
यदात्मा इवाकारतामावितोऽभूत् सुविस्तीर्णतापत्रयस्यापहन्त्र्यै ॥१७६॥

लसन्नीलरत्नप्रकृष्णप्रभायै मनोमोहतामिश्रजालापहन्त्र्यै ।
रमेशप्रसादार्तिनिर्णिक्तभासे नमस्तुभ्यमम्बान्तकस्यानुजायै ॥१७७॥

इमं ते स्तवं मन्मुखोत्थं सुवर्णं गृणीतेऽनिशं मानुषो यः प्रभाते ।
स याति स्वयं कृष्णसारूप्यमुच्चैर्हृदि प्रेमपीयूषसंदोहपूर्णः ॥१७८॥

शृण्वतां देववर्याणामित्थं तुष्टाव शङ्करः ।
यमुनां यमभीतिघ्नीमुद्यद्वीचिघटोत्कटाम् ॥१७९॥

ब्रह्मर्षिदेवर्षिवरेण्यसंघा येऽन्ये महाभागवतप्रधानाः ।
सर्वेऽपि ते तुष्टुवुर्भक्तिनम्राः समेत्य तत्रामितमोदमग्नाः ॥१८०॥

एके दूरात् प्रणेमुस्त्रिजगदघहरीं केऽपि भक्त्योपचेरुः
केचित् संकीर्त्यामासुरतुलयशसा स्वाभिमुख्यं विधाय ॥

केचित् तां वन्दमानाः सपदि जगदिरे सर्वजीवातुभूतां
सर्वैर्देवैरितीयं स्वमतिविभवतः सादरं वै गृहीता ॥१८१॥
संमानिता सा सकलैः सुरोघैर्ब्रह्मर्षिवर्यैश्च सुरर्षिमुख्यैः ।
स्वकीर्तिपाठश्रुतिजातदर्पा वीचीघटाभिः सहसोच्चचाल॥१८२॥
वारां धाराभिरुच्चैरलमवनितलं सर्वतः प्लावयन्ती
छन्ना मन्दारमाल्यैस्त्रिदशवरकरप्रच्युतैः सौरभाढ्यैः ।
उच्चैरूर्मिच्छटाभिर्गगनतलमभिच्छादयन्ती समंतात्
सानन्दं सोरुदर्पं त्रिदशपतिपदान्मन्दमन्दं चचाल ॥१८३॥

इतिश्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे पूर्वखण्डे महाराज-
तीर्थयात्रायां सप्ताधिकशततमोऽध्यायः ॥१०७॥

●

अष्टाधिकशततमोऽध्यायः

वशिष्ठ उवाच

ततश्च सा तुङ्गपयश्छटाभिः प्रोद्यन्महामेघघटोरुभाभिः ।
विश्वग्विकुण्ठातनयस्य लोकमाप्लाव्य भूयो विरजामियाय ॥ १ ॥
प्रधानपरमव्योम्नोरन्तराले प्रतिष्ठिताम् ।
ब्रह्मानन्दमहानीरां मुक्तसंदोहसेविताम् ॥ २ ॥
मन्दारमाल्यस्तवकैः समंतादाच्छादितात्यच्छमहाप्रवाहाम् ।
रमाकुचाभोगयुताङ्गरागसच्छालनाज्जातविचित्रवर्णाम् ॥ ३ ॥
सुवर्णरत्नोपलबद्धकूलां मुनीन्द्रवर्गैः समुपास्यमानाम् ।
सुधारसास्वादभृशं प्रमत्तमानन्दकूजद्बहुराजहंसाम् ॥ ४ ॥
उत्फुल्लपङ्केरुहराजिराजत्परागरागाञ्चितनीरपूराम् ।
तटस्थकल्पद्रुमफुल्लपुष्पमरन्दवृन्दैः सुरभिः समंतात् ॥ ५ ॥
श्रीकृष्णवंशीनिनदानुघोषप्रेमस्रवत्कामगवीस्तनोत्थैः ।
दुग्धौघकुल्यानिवहैः समंतात् सहस्रधासंजनितैर्मिलन्ती ॥ ६ ॥

क्वचिद्वियोगस्मरतापतप्तव्रजाङ्गनारब्धसुखावगाहम् ।
चञ्चच्चिदानन्दमयप्रवाहसकेलिकोकीगणनिक्वणाढ्याम् ॥ ७ ॥
क्वचिद्ग्रहः श्रीवृषभानुकन्यासमेतनन्दात्मजदत्तमोदैः ।
तरङ्गजालैरुपनीतभूयः फुल्लाम्बुजातार्हणसंविधानाम् ॥ ८ ॥
क्वचिद्घने कुञ्जवनेऽन्तरालप्रसर्पिणीं शीतलसुप्रवाहाम् ।
क्वचिन्महाशैलदरीगृहान्तर्विभेदनोत्तुङ्गतरङ्गजालान् ॥ ९ ॥
विराजमानां महसां समूहैस्तडित्प्रकाशैर्व्रजगोपदारैः ।
अलौकिकैरर्थगणैः समेतां विमुक्त्यवस्थापरिदृश्यरूपैः ॥१०॥
ब्रह्माण्डकोषाश्रयसंततौघां मायावश्यैर्जीवसंघैरदृश्याम् ।
पारे परब्रह्मगृहप्रतिष्ठामवारगाशेषजगत्प्रतिष्ठाम् ॥११॥
तया मिलित्वा ननु दिव्यरूपया जलान्तरोद्भासितशुद्धदेहया ।
स्वयं च दिव्यं वपुरास्थिता हरेः प्रिया प्रमोदं हृदये पुपोष सा[1] ॥१२॥
प्रत्यग्रहीत् सा यमुनां समेतां सपर्यया साधु विधीयमानाम् ।
सिद्धेन्द्रसेव्या विरजा समंताद्भुक्तेन्द्रसेव्यामभजत् स्वयं ताम् ॥१३॥
तरङ्गबाहून् विरजा वितत्य तयामिलन्नन्दसुतस्य पत्न्या ।
तेनैव सा सेव्यतमा बभूव तद्ब्रह्मधामस्थितमुक्तिराशेः ॥१४॥

यमुनास्पर्शमात्रेण विरजा विगतज्वरा ।
ब्रह्मानन्दमतिक्रम्य प्रेमानन्दमगाहत ॥१५॥
पाद्यार्घ्याचमनानि चैव मधुपर्कस्नानदानादिभि—
स्तामेषा समुपास्य गन्धकुसुमस्रग्धूपदीपादिभिः ।
नैवेद्यैरमृतात्मकैरपचितिं कृत्वा च नत्वा पुन—
स्तस्याः पादसरोरुहद्वयमुरुप्रेमप्रकर्षाग्रहीत् ॥१६॥
लुण्ठन्ती तच्चरणयोर्विरजा प्रेमसंप्लुता ।
तुष्टाव तामभिप्रेत्य महिषीं श्रीमुरद्विषः ॥१७॥

विरजोवाच

अयि प्रियासि प्रणयैकमूर्तेर्व्रजाधिनाथस्य सुखैकहेतुः ।
कल्याणिनी कोटिकलाविलासा कलिन्दकन्या भवती भवित्री ॥१८॥

---

१. या—रीवाँ ।

भवान्तरे सूर्यसुताभविष्णुस्त्वं मोदयिष्यत्यसकृद् गृहेशम् ।
त्रिंशच्च कोटीस्त्र्यधिका सुराणां त्वं योजयिष्यस्यमितैः शुभौघैः॥१९॥
मन्ये कलिन्दाद्रिशिखावलस्य पिच्छावली त्वं यमुने भवित्री ।
त्वयीशि यन्नेत्रपथं गतायां पलायिता कल्मषकालसर्पः ॥२०॥
जानाम्यहं व्योमसरोजमुच्चैश्चण्डत्विषो मण्डलपुण्डरीकम् ।
विहाय संमत्तमिलिन्दपङ्क्तिः कालिन्दनीलोत्पलमेष्यसि[1] त्वम् ॥२१॥
गुञ्जाव्रजः केकिकलाकलापाः पीताम्बराण्येव च वैनतेयाः ।
मातः कियन्तस्त्वयि सन्ति यान् वै मज्जन्त एते मनुजा अगृह्णन् ॥२२॥
काचस्फुरद्दर्पणपट्टिका त्वं सुनिर्मलाङ्गी यमुने विभासि ।
पुरस्थितायां ननु यद्भवत्यां पश्यन्ति नीरूपमपि स्वरूपम् ॥२३॥
प्रेमप्रकर्षात् परिरभ्य कृष्णं बभूव कृष्णा भवती स्वरूपात् ।
त्वदम्बुसंस्पर्शनमात्रतोऽपि कृष्णस्वरूपा मनुजा भवन्ति ॥२४॥
पद्मासना पद्मसमानदेहा पद्मात्मिका पद्मधरा त्वमम्ब ।
यत्पश्यतामाचमतां जनानां निमज्जतां च श्रियमातनोसि ॥२५॥
लोकोत्तरं यत्कुशलं सुभव्ये त्वय्येव[2] सर्वोपरि मुक्तिधाम्नि ।
तत्त्वत्तरङ्गप्रकरप्रसङ्गाल्लोकोऽपि संप्राप्स्यति कृष्णकान्ते ॥२६॥
त्वं विष्णुदेहादमिता विभासि गङ्गा तु सा विष्णुपदोद्गतैव ।
अतोऽम्ब तस्यास्तव चापि तौल्ये गिरः कवीनां विरला भवन्ति ॥२७॥
व्रजाङ्गनाभिर्विहरिष्यतोशस्तवैव तीरे भगवान् मुकुन्दः ।
अतः प्रशस्तेऽपि[3] भवे समस्ते करोतु कस्ते समतामुदारः ॥२८॥
न तीर्थशक्त्या न च पुण्यप्रकर्षान्न पापहृत्यामुरुसामर्थ्यभावात् ।
तव प्रशस्तिर्यमुने विदृश्यते यथाकृष्णाभिन्नरूपप्रभावात् ॥२९॥
यज्ज्योतिराद्यं कवयो गृणन्ति ब्रह्मेति सच्चित्सुखरूपमद्धा ।
तदम्ब ते धाम सनातना[4]ख्यं कृष्णप्रिये योगिनां ध्यानधिष्ण्यम् ॥३०॥
ततः परं त्वत्स्वरूपं तदम्ब प्रेमानन्दाकारतामाददानम् ।
विचित्रलीलारसकेलिपात्रं भक्तप्रमोदप्रसरैकहेतुः ॥३१॥

---

१. "व्योम एव सरः तस्माज्जातं सूर्यमण्डलमेव पुण्डरीकं कमलं विहाय त्यक्त्वा मत्तभ्रमरतुल्या त्वं यमुना कलिन्दपर्वत एव कमलं प्राप्स्यसि" टि०—मथु० ।
२. वर्वर्त्ति—मथु०, बडो० । ३. च—रीवाँ । ४. च संतताख्यं—रीवाँ ।

तस्यै नमस्ते हरिवल्लभायै व्रजाङ्गनाकौतुककारिकायै ।
श्रीनन्दसूनुस्फुटनीलरत्नप्रभाभिरामप्रचुराम्बरायै ॥३२॥
विज्ञप्तिरेका यमुने मदीया निधीयतां कर्णपुटे भवत्या ।
मदन्तरे नित्यमिहाविरोधिप्रसादपात्रं कुरुमामजस्रम् ॥३३॥
इत्युक्तवत्यां विरजायां प्रकामं तथेति तद्वाक्यमुरीचकार ।
अथ प्रसादं प्रविधाय तस्यां मृदुस्मितैर्भूरि मुदं पुपोष ॥३४॥
अथोदगाद्विरजायाः प्रवाहं निर्भिद्य कल्पान्तमरुत्सवेगा ।
घनौघसंघट्टघटाजटालैस्तरङ्गजालैर्जगतीं पुनन्ती ॥३५॥
दुरापपारे विरजाप्रवाहे महेषुवद् धावमाना जवेन ।
अलक्षिता तत्पुलिनस्थदेवैरेवं करिष्णुर्जनपापभेदम् ॥३६॥
यथा जवोऽस्या विरजाप्रवाहविभेदनेऽभूत् प्रलयानिलाधिकः ।
तथैव सर्वाशुभपापपुञ्जमहाद्रिनिर्भेदविधौ न चित्रम् ॥३७॥
निर्भिद्य सप्तावरणानि साथ ब्रह्माण्डभाण्डे सहसा विभिद्य ।
अन्तर्बहिः पूर्णतमं तमस्तत् प्रभिद्य शुद्धां भुवमाजगाम ॥३८॥

निर्भिद्य साथ वेगेन लोकालोकगिरेर्गुहाम् ।
मानसोत्तरशैलेन्द्रं निर्भिद्य समुपागता ॥३९॥

निर्भिद्य शुद्धोदसमुद्रमित्थं ततश्च दुग्धोदधिमात्तवेगा ।
निर्भिद्य सप्तार्णवनीरपूरानित्थं क्रमात् प्राप भुवोऽन्तरालम् ॥४०॥

श्वेतद्वीपपतेः स्थानमानिरुद्धस्य सागमत् ।
व्यापिवैकुण्ठलोकस्य यद्द्वारं परिकीर्तितम् ॥४१॥
अत्र सिद्धर्षिदेवौघैः स्तुता संपूजिता च सा ।
प्रेमानन्दमयीमृद्धिमतनोत् तेषु संततम् ॥४२॥

ऊर्ध्वं ब्रह्माण्डगोलं समधिकजविना स्रोतसा खण्डयित्वा ।
तन्मार्गं प्राप्य वार्ताविधिभवनमथो तापसानां च लोकम् ।
प्राप्ता लोकं जनाख्यं तदनु च महर्ल्लोकगा स्वर्गलोकम्
भूलोकं चैत्य पश्चाद् भुवमपि गतवत्यद्भुताम्भःप्रभावा ॥४३॥
लोके नारायणीये किमपि कमलया सेव्यमालोक्यमाना
पश्चाद् वैरिञ्चलोके मुनिवरनिवहैः सेविता संस्तुता च ।

संदोहैस्तापसानां सविनयमभितो वन्दिता तत्पुरस्ता-
ल्लोकस्थैः पूज्यमाना सुरतरुकुसुमामोदगर्भाम्बुनेत्री ॥४४॥
सप्तर्षिस्तोमवन्द्या ध्रुवभवनमिता तुङ्गरिङ्गत्तरङ्गै-
र्नक्षत्राणां विमानावलिमुदकभरैः सर्वतः प्लावयन्ती ।
स्वर्गङ्गाजातसङ्गा त्रिदिवपतिगजोत्तापसंदोहहर्त्री
सूर्यादींश्च ग्रहांस्तान्निजविमलगुणैर्भूरिशो मोदयन्ती ॥४५॥

मुख्ये शृङ्गे सुमेरोः सजवनिपतिता नन्दने संचरन्ती
मन्दारोत्फुल्लपुष्पस्तबकसुरभितं वारिपूरं वहन्ती ।
देवैर्गन्धर्वसिद्धादिभिरधिकतरं स्तूयमाना समंतात्
प्राप्येलावर्त्तवर्षं कनकमयमहाकूलशोभाभराढ्या ॥४६॥

इलावर्ते वर्षे कनकगिरिसच्छायतलगा
महारत्नप्रस्थप्रचुररुचिसंदोहवलिता ।
विचित्राकाराम्बुप्रवहणकरी कौतुकभरैः
परीतां गच्छन्ती दुरितशमनी भाति यमुना ॥४७॥

प्रोद्यत्कल्लोललोलप्रवहललहरीलास्यलावण्यलक्ष्मी-
र्लीलालालित्यशीला शिथिलितसुदृढोद्दामशैलेन्द्रमूला ।
काप्युच्चैः संपतन्ती जवदलितदृषद्दारुणारावकर्त्री
भिन्दाना देवदारुद्रुमवनमभितस्तीक्ष्णधाराजवेन ॥४८॥

इत्थं कौतूहलानि प्रतिपदमुदयद्वेगवद्भिः प्रवाहै-
स्तन्वाना यक्षरक्षस्त्रिदशमुनिदृगानन्दसंदोहकन्दा ।
दिव्यारण्यद्रुमोद्यन्मृदुमधुरमिलन्मारुतैर्वीज्यमाना
प्रोत्सर्पन्ती सदर्पं सुदृढगिरिदरीदारणोद्दामदर्पा ॥४९॥
विभिन्नभास्वद्गिरिजाप्रवाहा ब्रह्माण्डसप्तावृतिभेदकर्त्री ।
विदीर्णसप्तार्णववारिपूरपारङ्गमा संगतसर्वतीर्था ॥५०॥

कुलाचलग्रावविभेदनोग्रा सहस्रशो मार्गगता त्रिनेत्री ।
महाजवोन्मूलितवृक्षमूला क्रमेण सा प्राप कलिन्दशैलम् ॥५१॥
स्फुरन्महारत्नमहाप्रकाशैर्निरस्ततारागृहकान्तिदर्पैः ।
दिवं स्पृशद्भिः शिखरैः समंतात् प्रसह्य रुन्धानमिवेन्दुमार्गम् ॥५२॥

महामहावज्रशिलाकठोरैः समन्ततो दीर्घदृषत्समूहैः ।
विसंधिसर्वावयवं हरस्य त्रिशूलकोट्यापि न भेत्तुमुर्हम् ॥५३॥
अनेकसिद्धौषधिदीप्यमानदरीगृहक्रोडितकारिणीभिः ।
देवद्रुमोत्थानिलवीजिताभिः सुराङ्गनाभिः सुनिषेव्यमाणम् ॥५४॥
महामहारत्नखनिं समंतात् सुरद्रुमारण्यमनोज्ञमध्यम् ।
नक्षत्रमालापरिशोभिनीभिरुपत्यकाभिः परितः स्फुरन्तम् ॥५५॥
सर्वाधिकोच्छ्रायशिरःसहस्रमहामहावज्रशिलौघसारम् ।
रवीन्दुजैत्रद्युतिदीपिताशं गन्धर्वलोकामितगानरम्यम् ॥५६॥
नितम्बसंलग्नमहाघनालीसौदामिनीदीधितिदीपिताङ्गम् ।
माद्यन्मयूराञ्चितचारुकेकासंभिन्नपुंस्कोकिलकाकलीकम् ॥५७॥
सर्वर्तुसंसेवितकाननौघक्रीडत्सुरस्त्रीनयनाभिरामम् ।
सहस्रशो निर्झरधोरणीभिः प्रक्षालितात्यच्छशिलाकलापम् ॥५८॥
महामहारत्नगणप्रकाशं दिवानिशोत्फुल्लसुवर्णपद्मैः ।
स्फुरत्सुधानिर्मलतोयपूर्णैः समन्ततो देवसरोभिराढ्यम् ॥५९॥
अलौकिकानेकपदार्थसार्थैः सदैव विष्वक् परिपूर्यमाणम्
मुनीन्द्रसिद्धाश्रमसंघजुष्टसुपुण्यदेशाञ्चितमध्यभागम् ॥६०॥
महेन्द्रमुख्यामरहूयमानशुभाग्निजात्यर्थसुपुण्यधूमम् ।
गन्धर्वनारीकुचकुङ्कुमाक्तप्रायःप्रवाहामलदेवखातम् ॥६१॥
इस्तस्ततः संचरतां सुरस्त्रीकदम्बकानां चरणाम्बुजेषु ।
मञ्जीरघोषैश्चकितायमानमरालबालाक्वणितातिरम्यम् ॥६२॥

क्वचित् पिशङ्गः कलहेमशृङ्गैर्माणिक्यभाभिः क्वचिदात्तरङ्गम् ।
श्यामायमानं क्वचिदभ्रसंघैः क्वचिद् द्रुमौघैर्हरितायमानम् ॥६३॥
क्वचिन्महानिर्झरवातगौरमित्थं समुद्भ्रान्तमनेकवर्णैः ।
त्रैलोक्यमाङ्गल्यविधौ विधात्रा विनिर्मितं मण्डलमुख्यमुर्व्याम् ॥६४॥

अथ तत्रागता वेगाद् यमुनादीर्घवाहिनी ।
शैलं भेत्तुं मनश्चक्रे चण्डमारुतवेगिनी ॥६५॥
यथा संवर्त्तसमये मारुतश्चण्डवेगवान् ।
तथा बभूव यमुना जविनी शैलभेदने ॥६६॥

जवात् सुसंगता तेन शैलेन यमुना सरित् ।
महावज्रौघसाराभिर्दृषद्भिः सा परापतत् ॥६७॥
योजनादात्तवेगा सा गिरिपृष्ठविदारणे ।
वियोजनपरावृत्ता बभूव निहतोद्यमा ॥६८॥
हतवेगा तु सा पश्चात् परावृत्तपयोघटा ।
पुनर्वेगं समाबध्य स्रोतसा सुसमाययौ ॥६९॥
कृत्वा महाजवं स्रोतो धृतवीर्या महोत्कटा ।
वाणवत् प्रेरयामास जलौघं वेगवत्तरम् ॥७०॥
गिरिमर्ममहावज्रशिलासंघातकर्कशम् ।
विभेत्तुमत्युदीर्णा सा महावेगप्रधाविनी ॥७१॥
जवेनागत्य लग्ना सा गिरिभित्तिसु मर्मणि ।
समुच्छलिततोयौघा परावृत्ताभवत् पुनः ॥७२॥
सलज्जां यमुनां देवीं हतवेगां हतोद्यमाम् ।
तादृशीं तां समालोक्य देवाश्चिन्तातुरान्तराः ॥७३॥
बभूवुः सकलास्तत्र निराशा दीनचेतसः ।
अहो त्रैलोक्यभव्याय जाता मङ्गलरूपिणी ॥७४॥
शुभकृत्सर्वलोकानां सर्वतीर्थसमाश्रया ।
पुण्यसारा पुण्यवहा महापुण्यविवर्द्धिनी ॥७५॥
अभाग्येनैव जगतां गिरिः प्रत्यूहतामगात् ।
कृपया देवदेवस्य गिरिं भिन्द्यान्महाजवा ॥७६॥
अनुग्रहोऽयं भूतेषु कर्तव्यो विष्णुना स्वयम् ।
स्वयमेष तदाविश्य श्रोतस्यस्याः कृपानिधिः ॥७७॥
भिनत्ति चेद् गिरिग्रावसमूहं वज्रकर्कशम् ।
तदा त्रैलोक्यपापौघप्रतीकारो भविष्यति ॥७८॥
इति चिन्तातुराः सर्वे तुष्टुवुः कैटभद्विषम् ।
समस्तदेवदेवेशं त्रैलोक्यकरुणाकरम् ॥७९॥
नमो देवाय हरये विष्णवे प्रभविष्णवे ।
दैत्यदानवरक्षौघकुलदावाग्निवर्ष्मणे ॥८०॥

चक्रतेजःप्रभासंघविदारितसुरारये ।
वायुतत्त्वमयोद्दाममहावेगगदाभृते ॥८१॥
उद्दामशक्तये तुभ्यमक्षुण्णबलवर्ष्मणे ।
जगत्प्राणप्रतीकाशप्राणाधाराय ते नमः ॥८२॥

कल्पान्तसमयोद्दाममहावातसुवेगिने ।
प्राणान्तकाय दैत्यानां विष्णवे ते नमोनमः ॥८३॥
उद्दामरयनिर्भिन्नब्रह्माण्डशतकोटये ।
करालाय महोग्राय नमस्ते हरमूर्तये ॥८४॥

वन्ध्यापुत्रमुपेति पौरुषकलाहीनोऽपि याति व्रजं
स्त्रीणां मूकतमोऽपि वक्ति गुरुवदन्धोऽपि पश्येज्जनः[1] ।
यस्येच्छानुवशात् कृपारससमासिक्ते जने जायते
किं किं नैव सुदुर्घटं विजयसे स त्वं महोदारधीः ॥८५॥

त्वं सर्गो जगतामसि स्थितिकरस्त्वं तत्त्ववृन्दस्य सत्-
तत्त्वं तद्घटनामयो विजयसे विश्वस्य भावोऽपि च ।
त्वं सर्वेष्ववशिष्यसेऽवसरतो नश्यत्सु वस्तुष्वलं
तत्तन्नामगुणस्य रूपनिलयो न त्वां विना किंचन ॥८६॥

नित्यं वेदवचांसि गोचरतमा किंचित् समाचक्षते
नित्यं प्राप्तुमतन्निरासमुखतो वाञ्छन्ति शश्वत् प्रभो ।
आरोपार्थमुदीरयन्ति च गुणान् नैर्गुण्यलक्ष्मीनिधे
नोचेत् सच्चिदखण्डसौख्यजलधौ तेषां प्रवृत्तिः कथम् ॥८७॥

ब्रह्मण्येव गिरां वृत्तिरित्थंभूता विभाव्यते ।
कुतस्तरां परेब्रह्मण्यासां वृत्तिर्हरे त्वयि ॥८८॥

नमोस्तु ते देव सदैव कुर्महे किमन्यदानन्दनिधे विधीयताम् ।
एतावतालं भवतोऽनुतोषणं मुकुन्दभक्त्येकजुषामिहात्मनाम् ॥८९॥
संप्रत्यसौ नाथ तवानुकंपया विश्वस्य माङ्गल्यविधिर्बभूव ह ।
यस्मादियं पुण्यपरम्परामयी परावितासीमुनाभिधा सरित् ॥९०॥

---

१. पश्यत्यथान्धोजनः—मथु०, बड़ो० ।

सुधामयी सौख्यमयी रमामयी महोमयी मङ्गलधोरणीमयी ।
दयामयी ऋद्धिरपूर्वगा हरे जयत्यसौ नीलरुचिस्तरङ्गिणी ॥९१॥

अनया देवदेवेश कृतार्थमखिलं जगत् ।
विनैव साधनायासैर्विना चाध्यात्मसंविदा ॥९२॥
अस्या दर्शनमात्रतो मधुरिपोर्दृष्टं स्वरूपं तव
ब्रह्मानन्दकलाधिकं कलयति प्रेमपयोदार्णवम् ।
एषा श्रीर्जगतामलौकिकतमा कल्याणसंपत् परा
पुण्यौघैः प्रवहत्यनेकदुरितध्वंसप्रगल्भोदया ॥९३॥
अस्याः संप्राप्तिमध्येऽसौ प्रत्यूहः समुपस्थितः ।
भवतोऽनुग्रहाद्विष्णो किं तु दूरीभविष्यति ॥९४॥
किं किं न दुर्घटं नाथ तवानुग्रहभावितम् ।
जायते भुवि मर्त्यानां तत्प्रसीद जनार्दन ॥९५॥
ब्रह्माण्डसप्रावरणभेदनेन विलम्बिता ।
नापीश विरजापूरतोक्षणतोयौघभेदने ॥९६॥
न सप्तसिन्धुतोयौघनिर्दारणनिधावपि ।
तथैवैषा कलिन्दाद्रेर्दारणे न विलम्बताम् ॥९७॥
कृपां कुरु जगन्नाथ विश्वमङ्गलविग्रह ।
विश्वपापहरात्युग्र पूर्यतां नो मनोरथः ॥९८॥
विनिर्भिनत्तु भवतां दत्तया जववत्तया ।
कलिन्दपर्वतग्रावशिलावज्रतटोत्करम्[1] ॥९९॥
विनिर्यातु ततो देवी यमुना लोकमङ्गला ।
उच्चैर्भरतखण्डस्य पावनाय पयोभरैः ॥१००॥
भवन्तु मनुजाः सर्वे धरणीतलवासिनः ।
दर्शनादेव निष्पापाः कृष्णसायुज्यलब्धये ॥१०१॥
क्रियतां च क्षणात् सर्वजम्बूद्वीपनिवासिनाम्
तीर्थानां मानसंदोहः सर्वेषां पापशान्तये ॥१०२॥

---

१. °शतोत्कटम्—मथु०, बड़ो० ।

वशिष्ठ उवाच

इति स्तुवत्सु देवेषु ब्रह्मेन्द्रगिरिशादिषु ।
सद्य आविरभूत् तत्र भगवान् कमलापतिः ॥१०३॥

शङ्खचक्रगदापद्मविभूषितकराम्बुजः ।
कौस्तुभीकञ्जकिञ्जल्कपुञ्जमञ्जुतराम्बरः ॥१०४॥

वनमालान्तरप्रोततुलसीदलसौरभैः ।
प्रविष्टैर्घ्राणमार्गेण क्षालयन् योगिनां मनः ॥१०५॥

प्रावृषेण्यघनश्यामः शीर्षरत्नावतंसभृत्[1] ।
मकराकारनिर्णिक्तकुण्डलद्वयमण्डितः ॥१०६॥

उदारविलसत्तारमुक्ताहारविभूषितः ।
लम्बमानालकभ्राजन्मधुराननपङ्कजः ॥१०७॥

स्वर्णोपवीतवलितललितोदारकन्धरः ।
कङ्कणाङ्गदरत्नोप्रकटिसूत्रमनोहरः ॥१०८॥

रामणीयकसंपत्तिसंदोहामृतसागरः ।
इत्युदारगुणोत्कर्षसुधावर्षपयोधरः ॥१०९॥

वैनतेयमयोदारमहारथमधिष्ठितः ।
दिव्यपार्षदवर्यौघसमुपासितविग्रहः ॥११०॥

सोऽवतीर्य रथात् तूर्णं वैनतेयमयाद्धरिः ।
स्तुवतां देववृन्दानां मध्ये प्रादुरभूद् विभुः ॥१११॥

तं दृष्ट्वा सहसोत्थाय देवदेवं रमापतिम् ।
जयेत्यभिदधुर्देवा धृतोपायनपाणयः ॥११२॥

हरिः संभावयामास कृपादृष्ट्या सुरेश्वरान् ।
सुधाभिवर्षिणा चैव मन्दहासेन शोभिना ॥११३॥

---

१. "शीर्षे रत्नं अवतंसं च बिभर्त्तीति, उत्तंसावतंसौ द्वौ कर्णपूरेऽपि शेखरे इत्यमरः" । टि०—मथु० ।

तस्य प्रसादविशदैः कटाक्षैर्भाविताः सुराः ।
मेनिरे मुनयो देवाः सिद्धमात्ममनोरथम् ॥११४॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे पूर्वखण्डे यमुनोत्पतिर्नाम अष्टाधिकशततमोऽध्यायः ॥१०८॥

●

नवाधिकशततमोऽध्यायः

वशिष्ठ उवाच

समागतमभिज्ञाय रमाकान्तं चतुर्भुजम् ।
यमुना सहसागच्छत् प्राविर्भूय जलान्तरात् ॥ १ ॥
सा नत्वा कमलाकान्तं मेघश्यामं जनार्दनम् ।
तस्थावञ्जलिमावध्य तत्समीपे धृतेक्षणा ॥ २ ॥
तामुवाच स्मयन् देवो भगवान् कमलेक्षणः ।
हृदयान्तःसमुद्भूतकरुणामृतसुन्दरः ॥ ३ ॥

श्रीभगवानुवाच

गच्छ देवि महीं शीघ्रं देशान् पावय मार्गगान् ।
जनानां हर पापानि पश्यतामपि सुव्रते ॥ ४ ॥

यमुनोवाच

किंनु कुर्यामहं नाथ प्रत्यूहोऽयं महान्मम ।
कलिन्दगिरिरूपोऽत्र मध्येमार्गं व्यवस्थितः ॥ ५ ॥
नैनमुल्लङ्घितुमपि शक्ताहं कमलायते ।
रविवाहखुरस्पृग्भिः शिखरैर्व्यापितं दिवि ॥ ६ ॥
नापि भेत्तुमहं शक्ता स्रोतोजवविधायिनी ।
महाशनिशिलासारकर्कशावयवोन्नतम् ॥ ७ ॥

श्रीभगवानुवाच

अस्य त्वं तनया नाम्ना कालिन्दीति भविष्यसि ।
भित्वास्य हृदयं देवि विनिर्यास्यसि सुव्रते ॥ ८ ॥

कृतार्थयिष्यसि गिरेः कुलमस्य महात्मनः ।
पुत्रीभावं समासाद्य भूषयिष्यसि सांप्रतम् ॥ ९ ॥
शैलेन्द्रसुसमुत्तुङ्गं कोटिशृङ्गविभूषितम् ।
दिव्यभावसमायुक्तं नित्यं समधिवत्स्यसि ॥१०॥
नित्यं संनिहिता चात्र स्वेन रूपेण भाविनि ।
देवानृषीन् पितॄंश्चैव तोषयिष्यसि सर्वदा ॥११॥

यस्ते मनोज्ञपुलिनद्वयमध्यवास्तुस्त्वद्वारिमत्तनुमहो महितस्वरूपम् ।
संसेवयिष्यति जनः सुकृती स एव भुंक्ते च मुक्तिमनुविन्दति भक्तियुक्तः १२
या दुर्लभा दिविषदामपि सार्वलोकमैश्वर्यमुन्नतमखोद्भवपुण्यजन्यम् ।
आकल्पमेव जुषतां ननु सा भवत्याः पाथोनुषेवणकृतां सुलभास्ति भक्तिः॥१३
यावन्न गोपललनाकुचकुङ्कुमाक्तं मद्विप्रयोगभवतापहरं त्वदम्भः ।
आचामतीह मनुजो यमुने न तावन्मत्प्रेमजां स्वमनुविन्दति शश्वदार्तिम्॥१४
तत्त्वं कलिन्दगिरिराजसुतात्वमेत्य प्रादुर्भवस्व हृदयादुदपाय देवि ।
विश्वं विभूषय कुलं च गिरेरमुष्य भक्तिं परामृत[1]माचमतां पुषाण॥१५॥
वृन्दाटवीं तुलसिकामकरन्दवृन्दसौरभ्यसारशुभगामभिसंचरन्ती ।
उच्चैर्मदङ्गमहसां किल धोरणीव ध्वान्तापहा विजयसे यमुने कदा नु॥१६॥
यद् गोदुहां स्त्रिय इनेन्दुविजैत्रभासो बिभ्रत्यहो निरुपमां रुचिमानखाद्याम् ।
यत्कोटितोर्थसुकृतप्रचय[2]प्रतीके त्वत्पाथसां जयति मज्जनजः[3] प्रभावः॥१७

यथा मेरुगिरिर्मुख्यो गिरीणां गगनस्पृशाम् ।
यथा च मन्दरगिरिर्गन्धमादन एव च ॥१८॥
हिमवांश्च यथा साक्षाद्भुवान्या वन्दितो गुरुः ।
मलयश्चैव मैनाकः कैलासो द्रोण एव च ॥१९॥
गोवर्द्धनगिरिर्धन्यो विशाखगिरिरेव च ।
श्रीशैलश्च विशेषेण श्लाघनीयो यथा जनैः ॥२०॥
यथा विन्ध्यो महाशैलः कोटितीर्थनिषेवितः ।
दुर्गागिरिर्यथा चैव सर्वाश्चर्यमयो भुवि ॥२१॥

---

१. °समिति°—रीवाँ । २. प्रचुर—रीवाँ । ३. मज्जनता°—रीवाँ ।

नरायणगिरिश्चैव विष्णुपादरजोऽङ्कितः ।
यथातपनशैलश्च भासमानस्तनूत्विषा ॥२२॥
वैदूर्यपर्वतो यद्वद् रेवापातमनोहरः ।
पूर्वदक्षिणपाश्चात्योत्तरशैलवरा यथा ॥२३॥
तथायं भूभृतांश्रेष्ठः सर्वाश्चर्यनिधिर्गिरिः ।
कलयत्यखिलां लक्ष्मीमिन्द्रश्च ननु भूभृताम् ॥२४॥
कलिन्द इति तेनासौ कीर्तितो विबुधव्रजैः ।
कमनीयतमोत्तुङ्गसहस्रशिखरोचितः ॥२५॥
अशेषदेवतावासः सिद्धगन्धर्वसेवितः ।
श्वेतपीतहरिद्रक्तनानावर्णमनोहरः ॥२६॥
वशिष्ठादिमुनीन्द्राणां तपोभिः पुण्यपूरितः ।
विशेषात्त्वत्प्रवाहेण भविता कोटितीर्थभूः ॥२७॥
एवं ब्रुवाणे दिविषद्वरेण्ये रमापतौ भावितलोकभव्ये ।
तत्रातिशोभाञ्चितदिव्यवेशः कलिन्दशैलः समुपाजगाम ॥२८॥
आग्रे स्थितं केशवमेष वीक्ष्य प्रकामभक्तिप्रणतो गिरीन्द्रः ।
नीराजयंस्तुङ्गशिरोग्ररत्नैस्तत्पादपद्मद्वितयं पपात ॥२९॥
उत्थायोत्थाय शैलेन्द्रः पपात पदयोर्मुहुः ।
इत्थं विनीतवेशः स तस्थावग्रे कृताञ्जलिः ॥३०॥
तमुवाच हृषीकेशः स्मयन् मधुरया गिरा ।
जगत्कल्याणकरणीं करुणां समुपाश्रितः ॥३१॥

श्रीभगवानुवाच

धन्योऽसि धन्यधन्योऽसि कलिन्दगिरिनायक ।
यस्य शृङ्गमलङ्कर्तुं यमुना स्वयमागता ॥३२॥
इयं हि भवतो जन्म परिप्राप्य शुभावहम् ।
भूषयिष्यति वै सर्वं निजतोयैर्महीतलम् ॥३३॥
तथा कुरु गिरिश्रेष्ठ यथा ते वक्षसि स्थिता ।
प्रादुर्भूय जगत्सर्वं पुनीत निजपाथसा ॥३४॥
भवान् हि शिखरैर्व्योम मूलेन च महीतलम् ।
स्थितोऽसि व्याप्य शैलेन्द्र दिशश्च परिणाहतः ॥३५॥

ग्रहनक्षत्रताराद्या न त्वामुल्लंङ्घितुं क्षमाः ।
ईदृशी तव शीर्षाणां तुङ्गता परिदृश्यते ॥३६॥
उत्तुङ्गशीर्षता चैव तथैव दृढमूलता ।
विष्वगायामिताचैव तव भक्त्या विभूषिता ॥३७॥
इयमेतादृशी भक्तिर्गोवर्द्धनगिरेरिव ।
अलङ्करोति त्वामुच्चैर्गिरिराज सतांगणे ॥३८॥
तव भक्त्यैव शैलेन्द्र नित्यं सुदृढमूलया ।
यमुना त्वां परिप्राप्ता साक्षादमृतवाहिनी ॥३९॥
आनामय शिरः स्वीयं यमुनां तत्र वासय ।
क्रीडिष्यति[1] चिरं तत्र तरङ्गकुलरङ्गिणी ॥४०॥
भित्त्वा च त्वां हृदयतः प्रकटत्वमुपैष्यति ।
त्वं चानया तनयया पूर्णकामो भविष्यति ॥४१॥
श्रुत्वा भगवतो वाक्यं कलिन्दः पर्वतोत्तमः ।
जहर्ष हृदयेऽत्यन्तं पूर्णकामोपलक्षितः ॥४२॥
उवाच च श्लाघ्यमानो वाक्यं भगवतो हरेः ।
उत्फुल्लहृदयाम्भोजो हसन् मधुरभाषितः ॥४३॥

कलिन्द उवाच

भाग्यं मम इदं जातं भगवन् दीनवत्सल ।
ईदृशं यदपत्यं स्यादपत्यरहितस्य मे ॥४४॥
यन्मूर्ध्नि संनिवसतां सततं मुनीनामार्कीणतोऽयमखिलः स मया पुरैव ।
यद्ब्रह्मपूर्णगुणमङ्गलनामधाम दुद्राव सर्वजगतामघपुञ्जहन्त्रि ॥४५॥
नीलेन दीप्तिकलितेन महो महिम्ना जानामि सैव यमुनेयमिति स्वचित्ते ।
पश्यामि भाग्यसमुदायविशिष्टवासो दृग्भ्यां रमेश भवदाकृतिनित्यमेनाम्४६
पुत्री भवत्वियमपत्यविवर्जितस्य नित्यं ममैव कुलभूषणकारिरूपा ।
एष प्रसाद उदितो भवतो रमेश नित्यं महीतलसतां च नृणां हितार्थः ॥४७॥

वशिष्ठ उवाच

अथ शुभावहमेत्य मुहूर्तकं समनुकूलशुभग्रहतारकम् ।
कुवलयेतिकलिन्दगिरेर्वधूः क्रमपि गर्भमधत्त गुणोत्तरम् ॥४८॥

---

१. क्रीडयित्वा—रीवाँ ।

ततः कुवलया वधूः सुखमसूत पुत्रीमिमाम्
स्फुरत्कमलकोमलावयवसंघशोभावहाम् ।
महेन्द्रमणिभासुरां कुवलयावदातच्छविम्
महीतलशुभावहं त्रिजगतां मनो मोदिनीम् ॥४९॥
तज्जन्मकाले परमोत् सवोऽभूत्संजाततौर्यत्रिकनादमोदः ।
महेन्द्रमुख्यत्रिदशोपकल्पृप्तं मन्दारपुष्पप्रकरौघवर्षः ॥५०॥
शैलेन्द्रस्तां तु जानानो यमुनेत्याख्यया मुदा ।
सुखमामन्त्रयाञ्चक्रे विलोचनसुखावहाम् ॥५१॥
रूपसारं निपीयास्या गिरिर्वात्सल्यमोहितः ।
नातृप्यत् तत्र शैलेन्द्रः सुखोत्करसमाचितः ॥५२॥

अन्तःपुरे तां जननीसमीपे विराजमानां विहिताङ्गभूषाम् ।
स्त्रीणां गणोऽमन्यत मानसेषु रमापतेर्मुख्यवधूभवित्रीम् ॥५३॥
सा तासु शैलेन्द्रवधूषु वाक्यं तया ब्रुवाणा सुमुमोद चित्ते ।
जातिस्मरत्वं समवाप्य सद्यो विजानती स्वेन हरेश्चिकीर्षाम् ॥५४॥
सा बाल्य एवाधिकसौकुमार्यमाधुर्यसंपत्समुदायरम्या ।
बभूव लोकस्य मनांसि हर्तुं समर्थरूपप्रचयाचिताङ्गी ॥५५॥

शैशवं समतिक्रम्य ततः परमियं वयः ।
शोभयामास चार्वङ्गी शुभावयवसंपदा ॥५६॥
भूषितं यौवनेनास्यास्तनोः प्रथमया श्रिया ।
दिनेदिने विशेषेण काञ्चित्कान्तिकलां दधौ ॥५७॥
यौवनेन वपुस्तस्या वपुषा यौवनं तथा ।
विभूषितमभूत्तेन पुपोष परमां श्रियम् ॥५८॥
अन्योन्यशोभासंभारमभार्षीदञ्चिता गुणैः ।
सा च तद्यौवनं चैव ववृधे प्रतिवासरम् ॥५९॥

यतो यतो गच्छति शैलराजस्यान्तःपुरे यौवनभूषिता सा ।
ततस्ततो नीलसरोजराजीसंपुष्पितेवास दिनोदयेन ॥६०॥
अथाभवच्छैलपतेर्दुरन्ता चिन्ता तदुद्वाहविधौ त्रिलोक्याम् ।
नालम्भि रूपप्रतिमो यतोऽस्याः कश्चिद्वरः सर्वगुणौघसिन्धुः ॥६१॥

अथैकदा नारद आजगाम कलिन्दशैलस्य शुभं निकेतनम् ।
स पूजितस्तेन सुसत्कृतश्च माध्व्या[1] गिरा शैलपतिं जगाद ॥६२॥
अहो कलिन्दाचलराज नित्यं धन्योऽसि भूभृत्कुलभूषणोऽसि ।
यस्यात्मजा श्रीयमुना बभूव श्रीकृष्णदेहार्धमयी वरेण्या ॥६३॥

परब्रह्मस्वरूपेयं साक्षान्नीलघनाकृतिः ।
रूपसौन्दर्यसाराढ्या विभूषयति ते कुलम् ॥६४॥
शुभवर विषयेऽस्याश्चिन्तया किं तया ते
यदियमपरलक्ष्मीः सर्वसौभाग्ययुक्ता ।
हृदि कलय भवित्रीं भाविकृष्णावतारे
सकलभुवनभर्तुः श्रीपतेः पट्टराज्ञीम् ॥६५॥
जम्बूद्वीपविभूषणे शुभवने वृन्दावनाख्ये वने
दृष्ट्वा पौरुषभूषणं यदुकुलोत्तंसं विचित्रक्रियम् ।
श्रीकृष्णं कलयिष्यतीयमतुलं श्रीसंपदाढ्यं वरं
रुक्मिण्यादिषु तत्प्रियासु रुचिरा संशोभमाना गुणैः॥६६॥

इतोऽवधि क्ष्मातलवर्तिदेशान् घनौघकान्तैरुदकैः पुनन्ती ।
व्रजावनीमेत्य विराजमाना स्थास्यत्यसौ रासविलासकादौ ॥६७॥
गोपाङ्गनानां हरिविप्रयोगप्रभूतमुत्तापमिषं हरन्ती ।
वृन्दावनं श्रीपतिधाम कामं विभूषयिष्यत्यमलैर्जलौघैः ॥६८॥

इति नारददेवर्षिभाषितं मधुरं वचः ।
आकर्ण्य गिरिराट् सद्यः संपेदे परमां मुदम् ॥६९॥
इत्युदीर्य वचस्तस्मै देवर्षिः सहसोत्थितः ।
प्रणम्य यमुनादेवीं जगाम हरिमन्दिरम् ॥७०॥

यमुनारूपसौन्दर्यं जगौ स श्रीपतेः पुरः ।
क्वणयन् वल्लकीं रम्यां भक्तिरोमाञ्चिविग्रहः ॥७१॥
अथैकदा हरिस्तत्र द्रष्टुं श्रीयमुनामगात् ।
कलिन्दगिरिवर्यस्य निकेतं श्रीभरान्वितम् ॥७२॥

---

१. साध्व्या—रीवाँ ।

आसंचरन्ती विपिने मनोज्ञे कलिन्दशैलस्य मनोहरायाम् ।
उपत्यकायां लसितं समंताद्ददर्श कुत्रापि रथाङ्गपाणिम् ॥७३॥
परार्द्धकन्दर्पमनोज्ञरूपमिन्दीवराभ्यामिव लोचनाभ्याम् ।
कटाक्षवाणैर्हृदयं हरन्तं रत्नावतंसोज्ज्वलराजिशीर्षम् ॥७४॥
नखप्रभानिर्जितसूर्यचन्द्रद्युतिं च विद्योतितदिक्समूहम् ।
आनन्दसारावयवं समंतान्मुखेन्दुमन्दस्मितहारिणं तम् ॥७५॥

सा दृष्ट्वा कमलाकान्तं परार्द्धस्मरसुन्दरम् ।
द्रवत्वमगमद्देवी यमुना पूर्ववत् पुनः ॥७६॥
कृष्णोऽपि यमुनारूपं यथा दृष्टं पुनः पुनः ।
स्मारं स्मारं हृषीकेशो द्रवतां समुपागतः ॥७७॥
ते उभे श्रोतसी तत्र मिलित्वा विश्वपावने ।
कलिन्दहृदयं भित्त्वा विनिर्यांते व्रजान्विते ॥७८॥

स पूर्वरुद्धोऽपि तदा प्रवाहस्तेनैव मार्गेण विनिःसृतोऽभूत् ।
ततस्तदेतत्त्रय[1]मेकदेशे प्रतत्य सर्वं यमुनैव जातम् ॥७९॥

ओघत्रयवती कृष्णा कलिन्दाद्रेर्विनिर्गता ।
भित्त्वा दृढां गिरेर्भित्तिं चचाल शनकैस्ततः ॥८०॥

ततो महौघा यमुना यमानुजा जगाम दर्पेण समन्दवेगा ।
अनेकशैलप्रकरान् पथिस्थान् विभिदद्य साचोत्तरतः समव्रजत् ॥८१॥
इत्थं कलिन्दाचलकन्यका सा महौघसंघातजवान्विता नृप ।
स्थले स्थले तीर्थगणान् प्रकुर्वती पर्यव्रजद् देवनर्षिपूज्या ॥८२॥

विहायोत्तरदेशं सा देशं दक्षिणतोऽव्रजत् ।
काश्मीरमण्डले भूत्वा यमुना प्रभवावधि ॥८३॥
सर्वाणि[2] यामुनान्येव तानि तीर्थानि भूपते ।
त्रैलोक्यपावनानीति गदतो मे निशामय ॥८४॥
यमुनाद्वारमारभ्य यमुनोद्भेदनावधि ।
महातीर्थानि पुण्यानि यामुनानि महीपते ॥८५॥

---

१. तदद्य त्रय—मथु० बड़ो० । २. ससर्प—मथु०, बड़ो० ।

पुनन्ति स्नानदानाभ्यां स्पर्शादाचमनादपि ।
दर्शनाद्वा सुसंपर्कात्तद्गामिजनसंगमात् ॥८६॥
यमुनाप्रभवे स्नात्वा सर्वपापैः प्रमुच्यते ।
महाविष्णोः पदं स्पृष्ट्वा जीवन्मुक्तो भवेन्नरः ॥८७॥
यमुनाप्रभवं नाम सर्वतीर्थोत्तमोत्तमम् ।
तदेव यमुनादेव्याः प्रभवस्थानमुत्तमम् ॥८८॥
यावन्ति भुवि तीर्थानि तानि सर्वाणि भूपते ।
द्रष्टुं श्रीयमुनादेवीमाजग्मुस्तत्रसादरम् ॥८९॥
तेषां मध्ये स्फुरन्ती सा नक्षत्राणामिवेन्दुभा ।
कल्याणिनी विजयते नवनीलसमाकृतिः ॥९०॥
भूभृतां प्रवरो यत्र कलिन्दो नाम पर्वतः ।
गारुत्मतमहारत्नकोटिसानुमनोहरः ॥९१॥
तद्वने विचरन्ती सा दृश्यते दैवतोत्तमैः ।
पीताम्बरपरीधाना नवनीलघनाकृतिः ॥९२॥
यमुना यमभीतिघ्नी सर्वस्थानेषु दुर्लभा ।
स्थानत्रये तु सा नित्यं स्वयं मूर्तिमती स्थिता ॥९३॥
यमुनाप्रभवे चैव यमुनाद्वार एव च ।
वृन्दावने रामतीर्थे मथुरायां च भाविनी ॥९४॥
एषु स्थानेषु यमुना ध्यातव्या वैष्णवोत्तमैः ।
सततं भक्तिमिच्छद्भिः परं प्रेमाभिधा हरेः ॥९५॥
निविडजलदवर्णा पीतकौशेयवस्त्रा
सततमभयहस्ता दक्षिणेनाम्बुजाढ्या ।
क्वलितकनकदोला रत्नताटङ्ककर्णा
सकलसरिदुपास्या पातु कृष्णप्रिया सा ॥९६॥
इत्यद्भुतं ध्यानमुदीरयानो यत्र क्वचिन्मज्जति यामुने यः ।
तस्यापि वृन्दाटविमज्जनस्य फलं भवेच्छ्रीयमुनाप्रसादात् ॥९७॥
ततो ब्रह्महृदं नाम यामुनं तीर्थमुत्तरे ।
यत्र[1] स्नात्वा नरः सद्यो धौतपापो विशेद्दिवम् ॥९८॥

---

१. तत्र—मथु०, बड़ो० ।

स्नात्वा विष्णुह्रदे चैव यामुने तीर्थ उत्तमे ।
विष्णुभक्तिं लभेदाशु यामुने विमले जले ॥९९॥
स्नात्वा रुद्रह्रदे तीर्थे यामुने विमले जले ।
रुद्रस्यैव गतिं लब्ध्वा जीवन्मुक्तो भवेन्नरः ॥१००॥

प्लक्षावतरणं नाम यामुनं तीर्थमुत्तमम् ।
दृष्ट्वा सारस्वतैर्यत्र देवैरवभृथं कृतम् ॥१०१॥
पुण्यमक्षयमेवात्र निहितं मज्जतां सताम् ।
तीर्थमग्निशिरो नाम पुण्यं तत्र प्रतिष्ठितम् ॥१०२॥

यत्रेष्टं राजवर्येण सहदेवेन वै पुरा ।
तस्य पुण्यप्रभावेण यमुना पुण्यवाहिनी ॥१०३॥
सहस्रदक्षिणं नाम यमुनाम्भसि भूपते ।
विख्यातं विपुलं तीर्थं राज्ञा तेनैव निर्मितम् ॥१०४॥
ब्रह्मयूपाभिधं तीर्थं यमुनायां प्रतिष्ठितम् ।
यत्र स्नात्वा च दत्त्वा च वाजपेयफलं लभेत् ॥१०५॥

चन्द्रतीर्थे नरः स्नात्वा सर्वपापैः प्रमुच्यते ।
ऋषीणां बालखिल्यानां तपः स्थानं सुदुर्लभम् ॥१०६॥
तद्दिव्यं यामुनं तीर्थं दर्शनात् पापनाशनम् ।
आर्चीकपर्वते पुण्या यमुना दर्शनान्नृणाम् ॥१०७॥
त्रिशृङ्ग्यां स्नानमात्रेण पङ्क्तिपावनतां व्रजेत् ।
त्रीणि प्रस्रवणान्यत्र पुण्यानि यमुनाम्भसाम् ॥१०८॥

शन्तनुर्यत्र नृपतिः शनकश्च महीपतिः ।
स्थानं सनातनं प्राप्य नित्यं मुमुदतुर्हृदि ॥१०९॥
नरो नारायणश्चैव यत्र नित्यं प्रतिष्ठितः ।
देवताः पितरश्चैव यत्र सर्वे प्रतिष्ठिताः ॥११०॥

सुगम्भीरतमस्रोता यमुना तत्र शोभते ।
इदं प्रस्रवणं पुण्यं सर्वपापप्रणाशनम् ॥१११॥
तद्यामुनं महातीर्थं दर्शनात् पापनाशनम् ।
यत्र धातृविधातारौ वरुणश्चालभद् यशः ॥११२॥

मखान् बहुतरांश्चक्रे तेने पुण्यं च भूतले ।
नानामहर्षिब्रह्मर्षिदेवर्षिगणसेवितम् ॥११३॥
यमुनामवगाह्यात्र महायज्ञफलं लभेत् ।
मान्धातृयज्ञवाटे च यमुना विश्वपावनी ॥११४॥
सोमकस्य च राजेन्द्र सहदेवस्य भूपतेः ।
यूपप्रणिखने तीर्थे यमुना विष्णुदुर्लभा ॥११५॥
प्रजापतेर्यज्ञवाटे यमुना देवदुर्लभा ।
पुरा वर्षसहस्रं स यत्र सत्रमवर्तयत् ॥११६॥
अम्बरीषो महाराजः क्रतून् यत्र चकार वै ।
नाभागश्चमहाभागस्तत्रस्नात्वा दिवं गतः ॥११७॥
यत्र पुण्यतमो देशो ययातेः पुण्यकर्मणः ।
तत्र स्नात्वा च दत्त्वा च पुण्यश्लोको दिवं व्रजेत्॥११८॥
यमुनाम्भः सरस्वत्या यत्र संमिलितं नृप ।
तत्तीर्थमतुलं लोके मयाख्यातुं न शक्यते ॥११९॥
दृषद्वती च यमुना यत्र संमिलिते उभे ।
तत्तीर्थमृषिभिः ख्यातं कोटितीर्थसमं भुवि ॥१२०॥
जमदग्निमुनेर्भूप यत्र[1]पुण्याश्रमस्थलम् ।
तत्तीर्थं यमुनावारिण्यद्भुतं विश्वपावनम् ॥१२१॥
भृगुतीर्थे महाराज सर्वपापप्रणाशने ।
आप्लुत्य यामुने वारिण्यनन्तं फलमाप्नुयात् ॥१२२॥
वितस्तायमुनासंगे सर्वपापप्रणाशने ।
सकृन्निमज्जन् मनुजः सद्भक्तिं लभते ध्रुवम् ॥१२३॥
जलाचोपजला चैव यमुनामभिनिर्गते ।
तत्र स्नात्वा च दत्त्वा च महत्पुण्यमवाप्नुयात् ॥१२४॥
वायुतीर्थं महाराज यामुने शुभवारिणि ।
तत्र स्नात्वैव राजेन्द्र वायुतुल्यः शुचिर्भवेत् ॥१२५॥

---

१. °मुनेर्यत्र भूयः—मथु०, बडो० ।

औशीनरं तु राजानमिन्द्राग्नी अभिजग्मतुः ।
तत्र श्येनकपोतीये स्थाने तीर्थं मनोहरम् ॥१२६॥
यमुना वहते यत्र सर्वतीर्थमयी सरित् ।
तत्र स्नात्वा द्विजान् भोज्य कोटियज्ञफलं लभेत् ॥१२७॥
एवमुत्तरतो राजन् यमुना दक्षवाहिनी ।
यं यं देशमभिप्राप्य पावयामास भूपते ॥१२८॥
स स देशः पुण्यतमः स्नानदानादिकर्मसु ।
क्रतूनामुचितश्चैव विप्राणां वसतिक्षमः ॥१२९॥
यमुनापुलिने वासो यमुनाम्भसि मज्जनम् ।
यमुनाजलपानं च देवानामपि दुर्लभम् ॥१३०॥
पावयन्ती शुभान् देशान् इन्द्रप्रस्थमुपागमत् ।
तीर्थं निगमबोधाख्यं तत्र ख्यातं महीपते ॥१३१॥
तत्राश्वमेधाः शतशः सहस्रशो देवैस्तथाभूपवरैरनुष्ठिताः ।
तेनैतदत्युग्रतरं महीतले विभाति तीर्थं मुनिपुङ्गवैःस्तुतम् ॥१३२॥
तत्र स्नात्वा तथा दत्त्वा पुण्यमक्षयमाप्नुयात् ।
तुल्यं निगमबोधस्य तत्तीर्थान्तरमिष्यते ॥१३३॥
इन्द्रप्रस्थं महाराज योगिनीकोटिसेवितम् ।
वाराहीक्षेत्रमुदितं कालिका यत्र तिष्ठति ॥१३४॥
तत्र श्रीयमुनावारिण्याप्लुत्य सततं नरः ।
ऋणहत्याकरं पापं क्षिप्रमेव विमुञ्चति ॥१३५॥
पापमैहिकभोग्यं यदामुष्मिकफलं च यत् ।
स्नात्वा निगमबोधे तु सद्य एव निवर्तते ॥१३६॥
ततो व्रजेन्महापुण्ये नन्दगोपेन्द्रपालिते ।
संचरन्ती मन्दमन्दं यमुना लोकपावनी ॥१३७॥
अधिवृन्दावनं भूप बलस्य सुमहात्मनः ।
हलाकर्षणसंज्ञं तत् तीर्थं विश्वस्य पावनम् ॥१३८॥
तत्र स्नात्वा च दत्त्वा च ब्राह्मणेभ्योऽमितं वसु ।
लोकान् पुण्यकृतान् राजन्नाकल्पं प्राप्नुयान्नरः ॥१३९॥

मथुरामण्डले यानि तीर्थानि यमुनाम्भसि ।
तानि सर्वाणि संगम्य स्नानं दानं समाचरेत् ॥१४०॥
तस्य सर्वा तीर्थयात्रा सफला स्यान्महीपते ।
भुक्तिं मुक्तिं लभेदाशु यद्यन्मनसि वाञ्छति ॥१४१॥
ततश्च माथुरं राजन् मण्डलं सर्वसौख्यदम् ।
अतीत्य रेणुकातीर्थं यमुनायां प्रतिष्ठितम् ॥१४२॥
यत्र रामः स्वयं भाति भार्गवो लोकपूजितः ।
तत्र स्नात्वा च दत्त्वा च पुण्यमक्षयमाप्नुयात् ॥१४३॥
ततश्च यमुनातोये यमतीर्थं महीपते ।
सकृत्संस्नानमात्रेण यमभीतिं निवारयेत् ॥१४४॥
ऋषितीर्थं महाराज यमुनायां प्रतिष्ठितम् ।
रामतीर्थं विशेषेण जगतः पावनं मतम् ॥१४५॥
चर्मण्वत्या च यमुना नितरां यत्र संगता ।
तत्र स्नानेन दानेन नरोऽनन्तं फलं लभेत् ॥१४६॥
ततश्च देवतीर्थं तद् यमुनायां सुपावनम् ।
स्नानादेव महीपाल ब्रह्महत्यां व्यपोहति ॥१४७॥
विश्वेषां चापि देवानां ततो वै तीर्थमुत्तमम् ।
तत्र स्नानेन तृप्ताः स्युर्विश्वेदेवा महीपते ॥१४८॥
आदित्यतीर्थं चाप्लुत्य यमुनायां शुभावहे ।
आदित्यलोकं जयति यावत्कल्पं सुपुण्यभाक् ॥१४९॥
वसूनां सुमहत्तीर्थं यमुनायां प्रतिष्ठितम् ।
तत्र स्नानेन दानेन नरो विजयते दिवि ॥१५०॥
पराशरमुनेस्तीर्थं यमुनावारि[1]संस्थितम् ।
स्नानदानादिविधिना नरान् पावयितुं क्षमम् ॥१५१॥
वटेश्वरे महाराज यमुना विश्वपावनी ।
तत्तीर्थं त्रिषु लोकेषु विश्रुतं पुण्यमन्दिरम् ॥१५२॥
दर्शनात् स्पर्शनाच्चैव मथुरावत्सुपावने ।
नातः परतरं स्थानं यमुनायां प्रतिष्ठितम् ॥१५३॥

१. °वारिणि°—मथु०, बड़ो० ।

अतस्तत्र विशेषेण गन्तव्यं भूतिमिच्छता ।
चर्मण्वती यमुनया यत्र संपर्कमागता ॥१५४॥
स देशः सर्वदा पुण्यः सर्वकर्मणि शस्यते ।
चर्मण्वती महापुण्या स्वयमेव महीपते ॥१५५॥
किं पुनर्यमुनास्रोतःसंबन्धादुच्यतां मया ।
वेदोद्धारस्थलं नाम यामुनं तीर्थमुत्तमम् ॥१५६॥
यत्र देवाः समं वेदानधिजग्मुः परन्तप ।
तत्र श्रीयमुना साक्षान्मथुरावत् फलप्रदा ॥१५७॥
वेत्रवत्या समं यत्र यमुना संगता स्वयम् ।
तत्स्थानं सर्वदेवानां प्रभवत्वेन कीर्तितम् ॥१५८॥
यत्र देवाः पुरा चक्रुः सत्रं वै शतवार्षिकम् ।
पुण्यं च स्थापयाम्मासुस्तीर्थं लोकमुदावहम् ॥१५९॥
तीर्थराजे प्रयागे च गङ्गया सङ्गता स्वयम् ।
तत्तीर्थं वै त्रिवेणीति सर्वलोकेषु विश्रुतम् ॥१६०॥
तत्र यो म्रियते जन्तुर्भाग्येन धरणीपते ।
स विमुक्तिमवाप्नोति दुस्तरादुर्भवसागरात् ॥१६१॥
यमुनासंगमाद् गङ्गा प्रतिष्ठां महतीं गता ।
अतोऽसौ तीर्थराजाख्यः प्रयागः समुदाहृतः ॥१६२॥
प्रयजन्तेस्म विबुधा यत्र नित्यमकण्टकाः ।
प्रयाग इति तेनासौ तीर्थराजो निगद्यते ॥१६३॥
ब्रह्मवेदीतिसंप्रोक्तः पुराविद्भिर्महीपते ।
यत्र ब्रह्म स्वयं भाति शब्दरूपेण संततम् ॥१६४॥
मुनीनां पठतां ब्रह्म यत्पुण्यं नित्यवृद्धिमत् ।
तत्पुण्यं तीर्थराजाख्यं प्रतिष्ठायै विजृम्भते ॥१६५॥
दशकोटचश्वमेधानां यत्पुण्यं नित्यवृद्धिमत् ।
तत्पुण्यं तीर्थराजस्य नित्यमावपनं शुभम् ॥१६६॥
यावन्ति भुवि तीर्थानि तानि सर्वाणि भूपते ।
तीर्थराजप्रतिष्ठानि हरन्ति जगतामघम् ॥१६७॥

अतः परं महाराज यमुना गङ्गया समम् ।
देशान् पुनन्ती व्रजती प्रकटाप्रकटा क्वचित् ॥१६८॥
यत्र गङ्गासमं याता प्राकट्यं यमुना व्रजेत् ।
स तु पुण्यतमो देशः स्थातव्यमिह यत्नतः ॥१६९॥
यमुनोद्भेदमासाद्य यमुना भेदमागता ।
गङ्गायाः स्रोतसो भिन्नो यात्रात्मा प्रकटीकृतः ॥१७०॥
तत्तीर्थं सर्वदेवानां वेदनीयतमं भुवि ।
अन्योन्यमात्मना भिन्ने ते गङ्गायमुने उभे ॥१७१॥
संगते स्रोतसां भेदात् समुद्रं पयसां निधिम् ।
यमुनामागतां वीक्ष्य समुद्रो वाहिनीपतिः ॥१७२॥
योजनद्वयमात्रेण पुरस्तादाजगाम सः ।
प्रत्युत्थानाय कालिन्द्या आदरेण महीयसा ॥१७३॥
यमुना वाहिनीनाथमायान्तमभिवीक्ष्य सा ।
परावृत्ताभवत् सद्यः कृष्णपत्नीतिलज्जया ॥१७४॥
परावृत्तजवां वीक्ष्य मानिनीमिव तां ततः ।
समुद्रः प्रेषयामास गङ्गां श्रीयमुनां प्रति ॥१७५॥

समुद्र उवाच

गच्छ देवि जवादेनां यमुनां विश्वपावनीम् ।
संबोधय ततो गङ्गे मानिनीमिव तां मयि ॥१७६॥
संबोध्य सान्त्वयित्वैनामिहानय मदन्तिके ।
गङ्गा समुद्रवचनाद् यमुनान्तिकमागमत् ॥१७७॥
ततस्तां बोधयामास यदुक्तं तत्र सिन्धुना ।
सान्त्वनं वचनं शान्तं प्रसादकमनुत्तमम् ॥१७८॥

गङ्गोवाच

वाहिनीनां पतिः सिन्धुस्त्वामामन्त्रयति प्रियाम् ।
ततश्चैनमुपागच्छ प्रसक्त्या विश्वपावनि ॥१७९॥
सर्वाः समुपसर्पन्ति सरितो वाहिनीपतिम् ।
आत्मनो दयितं ज्ञात्वा त्वमप्येनमुपव्रज ॥१८०॥

इति गङ्गावचः श्रुत्वा यमुना प्राह सस्मितम् ।
अहं वैकुण्ठनाथस्य पत्नी लोकहितैषिणी ॥१८१॥
धरणीमण्डलं प्राप्ता कथं सिन्धुमुपव्रजे ।
इति तद्वचनं श्रुत्वा गङ्गोवाच सुविस्मिता ॥१८२॥
यद्येवं तर्हि यमुने समुद्रं निधिमम्भसाम् ।
कथं प्राप्तास्ति भवती पत्नी भूत्वा रमेशितुः ॥१८३॥

यमुनोवाच

समुद्रं भवती गत्वा मद्वचो ब्रूहि सादरम् ।
मार्गं मे दीयतां भद्र यथा गच्छेयमादरात् ॥१८४॥
आगता यत एवाहं तत्रैव गन्तुमुत्सहे ।
भित्त्वा त्वां पाथसांनाथ परतो गन्तुमुत्सहे ॥१८५॥
तदर्थमागता ह्यत्र दृष्ट्वा त्वां जलधे बलात् ।
तरङ्गभुजसंदोहैः परिरम्भेच्छुमागतम् ॥१८६॥
परावृत्ताभवं सद्यो लज्जया कृष्णवल्लभा ।
ततो मैवं कुरु त्वं हि कृष्णभक्तोऽसि सागर ॥१८७॥
वैष्णवानामयं धर्मो न कदापि विभाव्यते ।
परस्य पत्नीमागन्तुं यन्मनः कुरुते बलात् ॥१८८॥
इति तद्वाक्यमाकर्ण्य गङ्गा सागरमागमत् ।
यमुनोक्तं विस्तरेण सागरायाब्रवीद् वचः ॥१८९॥
समुद्रस्तत्समाकर्ण्य यमुनावाक्यमादरात् ।
भक्तिप्रह्वो ववन्दे तां कृष्णपत्नीति भावयन् ॥१९०॥
भक्त्यैव तु स तामेत्य परिजग्राह पूजया ।
पाद्यार्घ्याचमनाद्युक्तविधिसंपन्नया मुदा ॥१९१॥
तस्मै प्रसादसुमुखी कृष्णभक्तिं प्रदाय सा ।
तत्पत्नीभ्यो नदीभ्यश्च मुदा पर्यचलत् ततः ॥१९२॥
पुरोभूय समादाय स्वामिनीं भक्तवत्सलाम् ।
गृहं प्रवेशयामास प्रसादाय स आत्मनः ॥१९३॥
अनेकरत्नप्रकरप्रकाशं मुक्तावलम्बिप्रसरद्वितानम् ।
कल्पद्रुमस्तोमनिषेव्यमाणप्राकारपर्यन्तमनोज्ञमध्यम् ॥१९४॥

परिस्फुरद्दारुणलोकसंपत्कदम्बकल्याणपरम्पराढ्यम् ।
लसन्महाहर्म्यतलोर्द्धसंस्थामनोहरं फुल्लवसन्तलक्ष्मि ॥१९५॥
क्रमेण दीव्यत्सकलर्तुशोभामितस्ततो बालवधूसमेतम् ।
पदाम्बुजक्वाणितमञ्जुघोषमाञ्जीरवाद्यानुमिताच्छभित्ति ॥१९६॥
अनेकमाङ्गल्यविधिप्रसंगनृत्यन्नटीवृन्दविभूष्यमाणम् ।
धृताखिलाश्चर्यकरप्रपञ्चं तैर्वारुणैरेव जनैर्निषेव्यम् ॥१९७॥
मूर्ताभिरुच्चैः सरितांवराभिः पत्नीभिरारात् समुपास्यमानम् ।
क्वचिच्च शेषाहिमनुप्रसुप्तनारायणस्थापितसंपदाढ्यम् ॥१९८॥
तत्तादृगासाद्य समुद्रसङ्घ दृष्ट्वा पतिं तत्र रमापतिं स्वम् ।
संपूजिता पार्षदवर्यवृन्दैः सिन्धोश्च पत्नीभिरुदारहृद्भिः ॥१९९॥
सद्यः प्रसन्ना जलधौ बभूव भक्त्यातिनम्रे निजभर्तृदासे ।
आज्ञामुपादाय च भर्तुरेषा स्रोतोजलाढ्या परतश्चचाल ॥२००॥

इत्थं विभिद्य लवणार्णवमस्य भूयः
संवेष्टनं क्षितितलं परितः प्रपद्य ।
भित्त्वा तदग्रजलधिं च जलौघवेगा-
दन्यक्षितिं पुनरवाप कलिन्दकन्या ॥२०१॥

पुनर्भित्त्वा जलधीन् सप्तसंख्यान् सप्तद्वीपांश्चैव पाथोजवेन ।
शुद्धोदमुद्भिद्य पुनश्च याता ब्रह्माण्डभेदाद्विरजां महोर्मिम् ॥२०२॥
भित्वा पुनश्च विरजां विपुलप्रतीकां तत्पारगं हरिपुरं पुनराजगाम
वैकुण्ठनित्यसदनं परचित्सुखैकशेषस्य तस्य परमात्मन आदिमूर्तेः॥२०३॥

इत्थं च वैकुण्ठपुरं प्रवाहः प्रदक्षिणीकृत्य सदा जवेन ।
भ्रमत्यहोरात्रकमारघट्टन्यायाद्गता यत्पुनरेति शश्वत् ॥२०४॥
यातो यातो यमुनायाः प्रवाहो भूयोभूयः पुनरप्येति शश्वत् ।
न तस्य नाशो न च सिन्धौ निपातो न सूर्यभासा ग्रीष्मकालेऽपि शेषः२०५

पीयूषादधिकं येन यमुनावारि सेवितम् ।
न तस्य प्रभवेन्मृत्युर्न जरा न शुचां पदम् ॥२०६॥
चिदानन्दमयं वारि यमुनाया विशेषतः ।
पिबत स्नात मनुजा गायत ध्यायत द्रुतम् ॥२०७॥

इति नित्योपदेशेन यो भजेद्यमुनातटम् ।
कितस्य कोटिभिः पुण्यैर्जीवन्मुक्तस्य संततम् ॥२०८॥
इति ते रघुशार्दूल तीर्थयात्राप्रसंगतः ।
कथिता यमुनोत्पत्तिर्माहात्म्यगुणवृंहिता ॥२०९॥
इदं ते सर्वभक्तानां रहस्यं वृत्तमीरितम् ।
तादृशायैव लोकाय प्रकाश्यं नेतराय च ॥२१०॥
तीर्थानां चापि सर्वेषां यात्रा ते समुदाहृता ।
प्रकटानां महीलोके प्रकटानां च भूपते ॥२११॥
एवं क्रमेण सर्वेषां तीर्थानां धरणीतले ।
यात्रां विधाय भूपाल कृतकृत्यो भविष्यसि ॥२१२॥
आदौ पुलस्त्यमुनिना रचिता यथार्थं
पश्चाच्च लोमशमहर्षिवरेण यत्नात् ।
भूयो दिलीपरघुनाहुषकाम्बरीष-
मान्धातृमुख्यविबुधैश्च कृता विशेषात् ॥२१३॥
तथा त्वमपि भूपाल सपत्नीकः कुरुष्व ताम् ।
अभीष्टसिद्धिं लब्ध्वाशु भूयः कल्याणमाप्स्यसि ॥२१४॥
यस्य रामसमाः पुत्राश्चत्वारो वीर्यभूषणाः ।
भूषयन्ति कुलं नित्यं स धन्यस्त्वं रघूद्वह ॥२१५॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे पूर्वखण्डे दशरथतीर्थयात्रायां नवाधिकशततमोऽध्यायः ॥१०९॥

दशाधिकशततमोऽध्यायः

राजोवाच

सूर्यस्य तनया देवी यमुना परिकथ्यते ।
एतन्मे वद योगीन्द्र कथं जाता रवेः सुता ॥ १ ॥
तत्रैव जन्मन्यथवा जन्मान्तरमुपेत्य सा ।
अभूत् सूर्यसुता देवी तन्मे विस्तरतो वद ॥ २ ॥

वशिष्ठ उवाच

शृणु राजेन्द्र वक्ष्यामि यथा सूर्यसुताभवत् ।
यमुना लोकपापघ्नी देवानां हितकारिणी ॥ ३ ॥
प्रभा छाया चांशुमती तपनी तापनी तथा ।
घना च शोषिणी चैव रोषिणी रतिका तथा ॥ ४ ॥
सुतपा वर्चसा वर्षा द्वादशैता रवेः प्रियाः ।
सर्वाः प्रसवसंपन्नाः सुभगाः सूर्यवल्लभाः ॥ ५ ॥
तासां कनिष्ठा त्वाष्ट्री या कन्या त्वष्टृप्रजापतेः ।
चिरादधृतगर्भा सा मनसा समतप्यत ॥ ६ ॥
तत आराधयामास ब्रह्माणं विश्ववेधसम् ।
प्रसवार्थं तपोनिष्ठा जायार्कस्य बभूव सा ॥ ७ ॥
निराहारा वपुःक्लेशं चक्रे यावच्छतं समाः ।
तस्यै प्रजार्थं विधिवत्तपस्यन्त्यै शतं शमाः ॥ ८ ॥
त्वाष्ट्र्यै तुतोष भगवान् विश्वकर्ता प्रजापतिः ।
वरेण च्छन्दयामास सा तुष्टं वेधसांपतिम् ॥ ९ ॥
अयाचताञ्जलिं बद्ध्वा शुभां सन्ततिमिच्छती ।
अथ कालेन रविना संगता त्वष्टुरङ्गजा ।
दधार सा गुणवती गर्भं गुरुतरं गुणैः ॥१०॥
दिव्यवर्षशतं यावत्तस्याः सदुदरान्तरे ।
ववृधे तेजसा गर्भः प्राच्यामिव कलानिधिः ॥११॥

सा पीड्यमाना भारेण त्वाष्ट्री गर्भस्य दुःखिता ।
इच्छन्ती सन्ततिं भव्या न ददर्श तपस्विनी ॥१२॥
अन्तर्वत्न्यपि सा त्वाष्ट्री बभूवातिमनोहरा ।
विशेषाद्रूपसंपत्तिसंपन्ना स्त्रीकदम्बके ॥१३॥
तामेकदा तु भगवान् कामयानो विकर्तनः ।
वशीकृतस्तद्रूपेण संप्राप्तो रहसि स्थिताम् ॥१४॥
सहस्रेणापि किरणैस्तामेष मदनातुरः ।
आलिलिङ्ग बलेनापि नेतिनेति निषेधितः ॥१५॥
पुरुषाणां प्रवृत्तिं हि न स्त्री वारयितुं क्षमा ।
विवेकेनैव वार्यन्ते वेलयेव पयोधयः ॥१६॥
तस्याः करसहस्रेण ताप्यमाना तु साबला ।
सुस्राव शोभनं गर्भं पूर्णवर्षशताधिकम् ॥१७॥
श्यामस्तेजोमयो दण्डस्तयापूर्वं व्यदृश्यत ।
सहस्रकिरणाश्लेषाज्ज्वलितोर्वरिताकृतिः ॥१८॥
अत एव महत्तेजस्तादृशं रूपमुद्बहत् ।
जाज्वल्यमानं परितः क्रोधाविष्टमिवाद्भुतम् ॥१९॥
तदन्वदृश्यतात्युच्चैरपां सङ्घः सुतैजसः ।
कृष्ण एव सुसंजातो रन्धितो रवितेजसा ॥२०॥
गर्भस्रावं विलोक्यासौ त्वाष्ट्री लज्जान्विताभवत् ।
अहो मे वेधसा सम्यग्वितीर्णा सन्ततिः शुभा ॥२१॥
देवा अपि प्रजल्पन्ति वञ्चयन्ति च मानुषान् ।
किमेतत् सुप्रसन्नेन वितीर्णं नाम वेधसा ॥२२॥
इत्युक्त्वा वचनं त्वाष्ट्रो यावच्छपति वेधसम् ।
तावदभ्याजगामैनां वेधा विश्वसृजां पतिः ॥२३॥
दृष्ट्वा विषण्णहृदयां त्वाष्ट्रीमेष जगाद ह ।
सान्त्वयन् हृदयानन्दैः शीतलैर्वचनामृतैः ॥२४॥

ब्रह्मोवाच

अहो ते साध्वि सुमहान् संपूर्णोऽयं मनोरथः ।
मत्प्रसादात् पुरा देवि यदतप्यः शतं समाः ॥२५॥

तेजोदण्डस्तु पुरतो य एष परिदृश्यते ।
भविता स यमः साक्षाल्लोकदण्डधरोऽद्य वै ॥२६॥
विना दण्डधरं साक्षाद् विशीर्येताखिलं जगत् ।
अतोऽयं भगवान् विष्णुः स्वयमेवोदगाद्रवेः[1] ॥२७॥
पुण्यपापविवेकाय जगतां दण्डधारणः ।
अग्रस्तेजोमयः साक्षाल्लोकत्रितयतापनः ॥२८॥
अयं च जलसंघातो नवनीलघनाकृतिः ।
यमुनेत्याख्यया लोके भविष्यति शुभा नदी ॥२९॥
अनया सर्वलोकानां हरणीयमघं महत् ।
यत्र गङ्गादितीर्थौघैर्ह्रियते विश्वकल्मषम् ॥३०॥
येन पापेन जीवोऽसौ नित्यकैङ्कर्यतश्च्युतः ।
हरिष्यति स्वयमियं तत्पापं घोरमुल्वणम् ॥३१॥
येन पापेन मनुजैर्विस्मृतं हरिसेवनम् ।
हरिष्यति स्वयमसौ तापदं पापमुल्वणम् ॥३२॥
येऽस्यां स्नास्यन्ति मनुजाः सर्वसाधनवर्जिताः ।
तेऽपि लब्ध्वा हरेः प्रेम प्रयास्यन्ति कृतार्थताम् ॥३३॥
जम्बूद्वीपे यशश्चास्या भविष्यति विशेषतः ।
यत्र गङ्गादितीर्थानां सर्वमानुषपावनम् ॥३४॥
माथुरे मण्डले स्थित्वा श्रीमद्वृन्दावने वने ।
कृष्णाभिन्नस्वरूपेण पूजनीया जनैरियम् ॥३५॥
इत्युक्त्वा भगवान् वेधाः सान्त्वयित्वा रवेर्वधूम् ।
त्वाष्ट्रीं सन्तोषयामास सुसन्तानस्य काङ्क्षिणीम् ॥३६॥
प्राणप्रतिष्ठाविधिना यमं सर्वाङ्गसुन्दरम् ।
चकार जीविनं वेधाः सर्वत्रैलोक्यदण्डनम् ॥३७॥
यमोऽसि धर्मराजोऽसि त्वं वै दण्डधरोऽसि च ।
उत्तिष्ठ सर्वलोकानां पुण्यपापविविक्तये ॥३८॥
पुरीं संयमिनीं प्राप्य प्रेतवृन्दनिषेविताम् ।
विवेचय बलात्तत्र जगतां पुण्यपापके ॥३९॥

---

१. °वोदभूद्रवेः—मथु०, बडो० ।

प्रेताश्च कुणपाः सर्वे त्वदाज्ञाकारिणः स्फुटम् ।
एकाशीतिसहस्राणि वर्तन्तां पारिपार्श्वकाः ॥४०॥
ते नृणां म्रियमाणानां जीवमादाय सर्वतः ।
आनयन्तु भवत्पार्श्वे पुण्यपापविविक्तये ॥४१॥
किं तेषां पुण्यगुप्तानां गतीः पुण्या निदेशय ।
पापानां च गतीः पापास्तत्क्षणात् परिभावय ॥४२॥
पुण्यपापौघलेखाय नित्यं यत्ताः सुसाधकाः ।
भवन्तु चित्रगुप्ताद्या धर्मराज तवाज्ञया ॥४३॥
वक्ष्यते च शुभान् धर्मान् भवान् सर्वजगद्धितान् ।
यैः समाचरितैर्मर्त्यो न भूयः खलु ताम्यति ॥४४॥
घण्टालो नीलमेघाभो महिषस्तव वाहनम् ।
करवीरप्रसूनानां माला ते हितकारिणी ॥४५॥
कुर्वप्रतिहरं राज्यं सर्वेषामन्तरात्मदृक् ।
न त्वां विना भविष्यन्ति रहस्येऽपि जना भुवि ॥४६॥
त्वं वै स भगवान् साक्षात् प्रकटः स्वयमात्मना ।
असंकराय लोकानां पुण्यपापाधिकारिणाम् ॥४७॥
उदासीनवदासीनः साक्षी सर्वस्य जन्मिनः ।
अन्तकाले परिप्राप्ते त्वं वै प्राकट्यमेष्यसि ॥४८॥
एषा ते स्थितिरुद्दिष्टा यम धर्मभृतांवर ।
प्रणम्य मातापितरौ गच्छ त्वं दक्षिणां दिशम् ॥४९॥
इतिवादिनि लोकेशे तत्क्षणात् कृष्णपाथसः ।
उदस्थाद् यमुना साक्षाद् यमस्य भगिनी तु सा ॥५०॥
तां विलोक्य मुदं प्राप्य ब्रह्मा लोकपितामहः ।
इन्दीवरसमानाङ्गीं फुल्लपङ्कजलोचनाम् ॥५१॥
पद्महस्ताभयकरां जगतामुद्धृतौ क्षमाम् ।
पुराणमुनिभिः सेव्यां कृष्णाद्वैतस्वरूपिणीम् ॥५२॥
भासयन्तीं दिशः सर्वा निजदेहतडित्त्विषा ।
जातरूपप्रतीकाशतनुमण्डितभूषणाम् ॥५३॥

सा स्मयन्ती मन्दमन्दमवन्दत पितामहम् ।
तस्यै ब्रह्माशिषं प्रादाच्चिरञ्जय चिरञ्जय ॥५४॥
दत्ताशीर्ब्रह्मणा सा तु मातुः पार्श्वमुपागता ।
तां त्वाष्ट्री तोषयामास दिव्यावयवशोभिता ॥५५॥
तामुवाच स्वयं ब्रह्मा गच्छ लोकान् पथिस्थितान्
पुनन्ती निजनीरौघैः क्रमाद् देवि महीतलम् ॥५६॥
तत्र यस्तेऽन्तरा विघ्नो भविष्यति रवेः सुते ।
स नाशमेष्यतितरां निःशङ्कं व्रज भाविनि ॥५७॥

वशिष्ठ उवाच

अथामुं यमुना प्राह मन्दस्मितविराजिता ।
सत्यमुक्तं त्वया ब्रह्मन् व्रजेयमवनीतलम्॥५८॥
कार्यं तु मे निदेष्टव्यं किं नु कुर्यामहं विधे ।
कुत्र स्थास्याम्यहं ब्रह्मन् को मे भर्ता भविष्यति ॥५९॥

ब्रह्मोवाच

नृणां त्वं देवि पापानि दह ज्वालेव तार्णकम् ।
इति ते कार्यमुद्दिष्टं यमभीतिविनाशनम् ॥६०॥
माथुरे मण्डले चैव श्रीमद्वृन्दावने वने ।
स्थेयं भवत्या सततं कृष्णो भर्ता भविष्यति ॥६१॥

यमुनोवाच

कुटुम्ब एव भगवान् विरोधः स्थापितस्त्वया ।
प्रेतानां हि यमो राजा देयो मोक्षश्च वै मया ॥६२॥
यमेन के दण्डनीयाः के च मोच्या मया विधे ।
एतत्पृष्टतरं ब्रूहि विरोधः संनिवर्तताम् ॥६३॥

ब्रह्मोवाच

स्नास्यन्ति ये त्वयि जनाः सततं सूर्यकन्यके ।
तेषां दण्डयिता नैव यमः स्यादिति मे मतिः ॥६४॥
कार्तिके शुक्लपक्षे च द्वितीया या भविष्यति ।
तस्यामागत्य यमुने यमस्त्वयि निवत्स्यति ॥६५॥
तस्य त्वं भोजनैर्दिव्यैर्वस्त्रालङ्कारलेपनैः ।
करिष्यसि सुखं देवि तिलकेन च शोभिना ॥६६॥

तस्यां यमद्वितीयायां ये स्नात्वा मनुजास्त्वयि ।
यमं संतर्पयिष्यन्ति नैषां दण्डयिता यमः ॥६७॥
इति दत्त्वा मतिं वेधास्तयोर्भ्रात्रोरुदारधीः ।
जगाम विष्टपं स्वीयं यमोऽपि दक्षिणां दिशम् ॥६८॥
यमुना पुनाति लोकान् महराद्यांस्ततस्तुसा ।
क्रमेण धरणीमेत्य प्लावयामास सर्वतः ॥६९॥
एवं ते राजशार्दूल कथानकमनुत्तमम् ।
यमस्य यमुनायाश्च प्रोक्तं पापप्रणाशनम् ॥७०॥
ए एवं शृणुयान्नित्यं यमुनोत्पत्तिमुत्तमाम् ।
स तीर्त्वा घोरपापानि कुशलं लभते नरः ॥७१॥
एवं कृष्णाद्भगवतः सूर्याच्चैव कलिन्दतः ।
तदुत्पत्तिं त्रिधा श्रुत्वा शुभमाप्नोति मानवः ॥७२॥

ब्रह्मोवाच

श्रुत्वा तीर्थान्यशेषेण साक्षात्कथयतो मुनेः ।
स राजा रघुशार्दूलो मनश्चक्रे विशेषतः ॥७३॥
पुण्यायै तीर्थयात्रायै दानाय महतेऽपि च ।
पृथ्वीप्रदक्षिणायै च सुकृताय च भूयसे ॥७४॥
मुनिभिर्ब्राह्मणैः साकं समानवयसान्वितैः ।
वृद्धैश्च मन्त्रिप्रवरैः सुतन्यस्तकुटुम्बकैः ॥७५॥
ब्रह्मचारिभिरत्यन्तं स्वाध्यायकुशलैर्द्विजैः ।
गृहस्थैर्मुनिभिश्चैव साग्निकैः कर्मशालिभिः ॥७६॥
वानप्रस्थैस्तपोनिष्ठैः वैखानसधुरन्धरैः ।
यतिभिः सर्वसंन्यस्तैर्यैस्त्रिदण्डैकदण्डिभिः ॥७७॥
अन्यैश्च पुण्यमतिभिर्ब्राह्मणैः क्षत्रियोत्तमैः ।
नैगमैस्त्यक्तनिखिलव्यवहारश्रमैर्जनैः ॥७८॥
शूद्रैर्वैष्णवमुख्यैश्च हरिदास्यपरायणैः ।
उपासकैश्च बहुभिर्मन्त्रयोगपरायणैः ॥७९॥
अनेकशास्त्रव्याख्यानप्रवीणैर्ब्राह्मणोत्तमैः ।
साङ्गस्वाध्यायकुशलैः शब्दब्रह्मातिगैरपि ॥८०॥

अलोलुपैर्जिताहारैस्तपःकर्मकृतश्रमैः ।
स्वल्पाहारैः सदातृप्तैर्यथा संपन्नभोजनैः ॥८१॥
अयानगमनायाससहैरस्वादुभोजिभिः ।
कन्दमूलफलाहारकृतश्रद्धैस्तपोरतैः ॥८२॥
कर्षितैः कर्मनिष्ठाभिर्भोगकृत्यविवर्जितैः ।
देहकर्षणशीलैश्च गृहासक्तिविवर्जितैः ॥८३॥
वर्षवातातपहिमक्लेशकृत्यसहैर्जनैः ।
तान्निनाय नृपः सार्थे सेवका ये च तादृशाः ॥८४॥

राजोवाच

श्वस्तीर्थानि गमिष्यामि केऽनुयास्यन्ति मामिह ।
निवर्तन्तां भोजनादौ येषां स्वादुरतिर्नृणाम् ॥८५॥
येषां हृदि तपोनिष्ठा तीर्थाटनविधावपि ।
आदरस्तेऽनुवर्तन्तां मामनुद्वेगदायिनः ॥८६॥
येषां कृपोटपरिपूरणमेव मुख्यं गौणं च कायपरिकर्षणदं तपो वै ।
अत्रैव सन्तु नगरीमनुरुद्धयमानाः कर्मण्यथो तपसि ये च सदालसाङ्गाः॥८७॥
इत्युक्त्वा राजशार्दूलो राममामन्त्र्य मन्त्रवित् ।
लक्ष्मणं भरतं चैव शत्रुघ्नं च कृतादरः ॥८८॥
राज्यभारं प्रविन्यस्य रामे भ्रातृभिरादृते ।
वशिष्ठं च पुरस्कृत्य तीर्थान्यटितुमुद्यतः ॥८९॥
पत्नीं च कैकयीं नाम सार्थं जग्राह भूपतिः ।
कौशल्यां च सुमित्रां च रामप्रेम्णा गृहे न्यधात् ॥८९॥
प्रातरुत्थाय विधिवत्कृतस्वस्त्ययनो द्विजैः ।
कृताशीर्विधिवद्विप्रैः प्रतस्थौ तीर्थनिष्ठया ॥९०॥
सोऽनुवीक्ष्य शुभान् देशान् पुण्याश्रमविभूषितान् ।
पुण्यतीर्थगुणोपेतान् तृप्तिमाप नृपोत्तमः ॥९१॥
अयोध्यां परितो गत्वा तीर्थानि सुमहान्ति सः ।
ददौ सुवर्णं विप्रेभ्यो गाश्च रत्नौघमालिनीः ॥९२॥
वासांसि रत्नभूषाश्च भूरिरत्नानि चादृतः ।
तेषु तेषु सुतीर्थेषु सत्रमाज्ञापयन्नृपः ॥९३॥

चकार विपुलं कर्म परमेश्वरतुष्टिदम् ।
वेदोक्तं वैष्णवानां च यत्कार्यं रामतुष्टये ॥९४॥
गोप्रतारे नृपः स्नात्वा सहस्राणि चतुर्दश ।
ददौ गाश्च सुवर्णानि रत्नानि विविधानि च ॥९५॥
तमसामवगाह्यासौ पुण्यकर्मं नृपोत्तमः ।
आज्ञापयामास महत्सत्रं ब्राह्मणतुष्टिदम्* ॥९६॥
स्वर्गद्वारे समाप्लुत्य भोजयामास च द्विजान् ।
अनर्घ्यरत्नसहिता दक्षिणाश्च ददौ नृपः ॥९७॥
स्नात्वा नेत्रजलं पुण्यां वाशिष्ठीं सरयूं नृपः ।
पूतमात्मानमाज्ञाय दध्यौ श्रीराममादरात् ॥९८॥
श्रीरामः पुत्ररूपेण वात्सल्यरसवारिधिः ।
[1]वर्द्धयानः सदा तस्य व्यराजत हृदन्तरे ॥९९॥
रामाविर्भावमुदितः पुण्यतीर्थपरिप्लुतः ।
व्यरोचत नृपश्रेष्ठः शरच्चन्द्र इवोज्वलः[1] ॥१००॥
वशिष्ठकुण्डे नृपतिः समाप्लुत्य तपोरतः ।
प्राणायामसहस्रेण शोधयामास विग्रहम् ॥१०१॥
हरिसप्तकतीर्थेषु समाप्लुत्य नृपोत्तमः ।
कृतार्थं मन्यमानः स्वं विप्रेभ्यो बह्वदाद्धनम् ॥१०२॥
हत्यामोचनतीर्थं च तथा पैशाचमोचने ।
ब्रह्मकुण्डे च सरयूर्यत्र चोत्तरवाहिनी ॥१०३॥
सूर्यकुण्डे च गोमत्याः संगमे तीर्थराजके[2] ।
परिक्रम्य समाप्लुत्य चकार सुकृतं बहु ॥१०४॥
यत्र यत्राकरोत् स्नानं राजा रघुपतिः स्वयम् ।
तत्र तत्र द्विजश्रेष्ठा रत्नवर्षैः कृतार्थिताः ॥१०५॥
केकयी च महोदारा भरतप्रेषितं धनम् ।
वर्षन्ती विप्रवर्येभ्यो व्यचरत् स्वामिना सह ॥१०६॥

---

* १०४ अध्यायस्थ ७९ श्लोकस्योत्तरार्द्धमारभ्य इतो यावत् खण्डितः पाठः—अयो० । १—१. नास्ति—अयो० । २. °राजिते—अयो०, रीवाँ ।

एवं क्रमेण नृपतिः कुर्वंस्तीर्थावलिं जवात् ।
अभ्युपेयाय सुखितव्रजं सर्वसुखैर्युतम् ॥१०७॥
स आगतमभिप्रेत्य मित्रं दशरथं नृपम् ।
अभीयाय वृतो गोपैः सुखिताख्यो महामनाः ॥१०८॥
स तस्य घोषः सकलैः सुखैर्युतः सर्वर्तुसंवासमनोहरो महान् ।
माङ्गल्यकोदारगुणो[1]पबृंहितः श्रीरामसांनिध्यगुणेन भूषितः ॥१०९॥
प्रपश्यतो राजवरस्य मानसं चक्षुस्तथैवामृतपूरपूरितम् ।
प्रमोदयामास विशेषतः श्रिया यथा न पूर्वं सुतदर्शनेऽपि वै ॥११०॥
तामेष आनन्दकलां वितर्कयन्नभूतपूर्वां नृपतिर्मनीषया ।
जजान सद्यः सुखितव्रजागमं तद्धेतुभूतं भुवि राजसत्तमः ॥१११॥
अपूर्वानन्दसंपत्तिभावितात्मा नृपोत्तमः ।
उवाच सुखितं गोपं रामवात्सल्यभूषितम् ॥११२॥

राजोवाच

धन्यो भासि धरातलेऽत्र सुखित त्वं गोपराजः सखे
यस्यानन्दनिधिर्व्रजोऽयमसकृन्नेत्रप्रमोदाय नः ॥
वैकुण्ठेऽपि न वा भविष्यति लतासंतानगुल्मद्रुम-
श्रीमत्यत्रफलप्रसूननिवहेष्वालिङ्गिता श्रीरियम् ॥११३॥
जानाम्यत्र सदा[2] स्वयं स भगवान्तास्ते रमाकामुकः
पूर्णानन्दघनः प्रधानपुरुषौ साक्षाद्यदाज्ञावशौ ।
प्रेम्णा ते परमेण गोपनृपते बिभ्रत् सदा वश्यताम्
योऽसौ ध्यानपथेऽपि दुर्लभतरस्तेषां मुनीनामपि ॥११४॥
ब्रह्मानन्दकलामतीत्य परमप्रेमप्रमोदार्णवे
त्वं तावत् सततं सखे विहरसे श्रीराजहंसोपमः ॥
त्वत्सार्थे निवसन्ति ये प्रतिपदं ते गोदुहोप्युन्नता-
स्तेषां जन्मफलाञ्चितं न तु भवायासस्पृशां मादृशाम् ॥११५॥
किंराज्यं धरणीतलस्य किमसावानन्दलेशः सखे,
स्वर्गोवाप्यपवर्ग एति न किमप्यद्यास्मदीयं मनः ।

---

१. °मनो°—रीवाँ । २. रामः—मथु०, बड़ो० ।

संत्यज्यैकपदे समस्तमधुना सेव्यस्त्वदीयो व्रजो
यत्रत्याः पशुपक्षिणोऽपि परमं प्रेमान्तरे बिभ्रति ॥११६॥
न ज्ञानं न तपो न वा खलु मखा नो वा समाधिः सखे
नो धर्मो जपदानपूजनमुखः प्राप्तुं पदं त्वीदृशम् ।
किन्त्वेका भवतां कृपाव्रजभुवि प्राप्तास्पदानामहो
प्रेमानन्दमहार्णवोर्मिपटले नित्यं निमग्नात्मनाम् ॥११७॥
तन्मह्यं कृपयाशु गोपनृपते हस्तावलम्बेन भोः
येन स्यां सुखित त्वदीयसदनद्वार्यङ्कुरो[1]ऽपि ध्रुवम् ।
यत्राहर्निशमाभिगच्छदनुगच्छद्भिर्व्रजावासिभिः
पादाम्भोजरजःप्रसादकमलापात्रं क्रियेऽहं क्वचित् ॥११८॥

इत्युदीरितमाकर्ण्य राज्ञो दशरथस्य सः ।
प्रत्युवाच प्रसन्नात्मा सुखितो व्रजभूपतिः ॥११९॥

सुखित उवाच

सत्यं वदसि राजेन्द्र स्वात्मौपम्याद्भुवादृशाः ।
भावयन्ति परं प्रेम सर्वत्र समदर्शिनः ॥१२०॥
अद्य धन्यो व्रजोऽस्माकं धन्यं नो गोदुहांकुलम् ।
धन्ये दृशौ च संवृत्ते यदभूत्तव दर्शनम् ॥१२१॥
कच्चिद्रामः सुखी राजन्नास्ते भ्रातृभिरन्वितः ।
आनन्दयन्नयोध्यास्थान् जनान् भाग्यवतो भृशम् ॥१२२॥
कच्चित् स देशो भविकैः सूयतेऽनुदिनं नृप ।
यत्र श्रीरामचन्द्रस्य दर्शनात् सुखिता जनाः ॥१२३॥
कच्चित् प्रतिदिनं राजन्नयोध्या तस्य रोचते ।
बाल्यं नीतवतोऽस्माभिः सर्वस्वात्मनिदेशकैः ॥१२४॥
कच्चिद्रामस्य सुखदा मयूराः सुखमासते ।
येषां पिच्छावली नित्यमवतंसायते प्रभोः ॥१२५॥
कच्चिन्नः स्मरति क्वापि भोजनादौ रघूद्वहः ।
यस्य प्रियं तत्र नित्यं नवनीतं व्रजस्य मे ॥१२६॥

---

१. धार्यंकरो—अयो० ।

कच्चित् व्रजजुषो लोकान् कृपापात्रीकरोति सः ।
येषां तद्ध्यानमात्रेण गच्छत्यनुदिनं वयः ॥१२७॥
कच्चिन्मां स्मरति स्वामी राजेन्द्रकुलभूषणः ।
यस्याङ्कं मण्डयामास नीलरत्नाभवर्ष्मणा ॥१२८॥
कच्चित् कुटुम्बमध्यस्थः स्मरत्यस्मत्कुटुम्बिनीम् ।
इह संतृप्तिमानेष प्राशयन् मथितं दधि ॥१२९॥
कच्चित्तन्मनसस्तुष्टचै राजं स्ता राज्यसंपदः ।
अकिञ्चनेष्वेवास्मासु यस्यान्तःकरणं सितम् ॥१३०॥
कच्चिद्राजन्निमा धेनूः स्मरति प्रियकाननः[1] ।
नित्यं यासां परं प्रेम तद्धस्तस्पर्शलालनैः ॥१३१॥
लक्ष्मणस्य पुरः कच्चिद्रामो वार्तयति क्वचित् ।
प्रमोदवनलीलास्ता गोपालतनयैः सह ॥१३२॥
सत्यं यद्यपि राजेन्द्रतनयो बहुसेवकः ।
तथापि स्मरते कच्चित् सेवां नो व्रजवासिनाम् ॥१३३॥
येषामस्माकमसकौ प्रियः स्वामी सुहृत्सखा ।
अनन्यवृत्या राजेन्द्र तमेव ध्यायतां भृशम् ॥१३४॥

मग्ने दृशौ च हृदयं च महावियोगदावाग्निशीलपरितापकदम्बकेषु ।
रात्रिन्दिवं प्रमुदकाननवासिनां नो रामे प्रयातवति तत्र पुरीमयोध्याम्॥१३५॥
यद्यप्यनल्पधनसंपदुपेतमेतत् सद्मास्मदीयममुना रहितं तथापि ।
नो भाति शारदनिशाकरचन्द्रिकापि ध्वान्तायते तदनुवीक्षणकाङ्क्षिणां नः१३६
[2]धन्याःस्थ यूयमधुनास्मदुपेतभाग्याः[2] श्रीरामचन्द्रमुखचन्द्रनिरीक्षणेन ।
येषां दृशौ च हृदयानि च नित्यदृप्तान्येतावदेव जनुषः फलमर्जयन्ति॥१३७॥
किं तेन राज्यविभवेन किमाप्तवर्गैः किं भोगभोजनसुखैः सुवरैरलभ्यैः[3] ।
श्रीरामचन्द्रमधुराननचन्द्रकान्तिसंदोहपानविधुरा यदि दृक्चकोराः॥१३८॥
व्यर्थं जनुः किमपि यत्र न रामनामसंकीर्तनाश्रवणमार्गमनुप्रयाति ।
प्राप्यापि भोगमुदयाञ्चितसार्वभौमस्वाराज्यपूर्णपदवीगमनैकलभ्यम्॥१३९॥

---

१. °काननाः—अयो° । २—२. धन्या इमेऽत्र मनुजा वत भूरिभागाः—पाठां० टि०—अयो० । ३. °रपलभ्यैः—अयो० ।

भागोऽस्मदीय इतरासुलभः सखेऽसौ यद्राघवेन्द्रमुखचन्द्रसुधासमूहः ।
यं प्राप्य यूयमपि भूमिभुजः कृतार्था नो चेदकिञ्चनहितैकरसः क्व लभ्यः१४०
किंस्वित् सखे[1] विहितमस्ति परं भवद्भिर्दानं तपो मखमुखा अथवा क्रियास्ताः ।
यन्नित्यमेव पिबथ त्रिदशैरलभ्यं श्रीरामचन्द्रमुखकान्त्यमृतासवौघम्॥१४१॥
किंवा भवद्भिरखिलात्मनि सर्वभावादात्मानमप्यनिशमर्पितवद्भिरद्धा ।
प्राप्तं स्वभावगुणसिद्धममन्दभाग्यं येनेदृशः समुदयोऽजनि वस्त्रिलोक्याम्१४२
राजा स्वबाहुकरदीकृतसर्वभूपः संप्राप्तशेवधिचयो[2] धनदादपीशः ।
नित्यातिथिप्रियधनागमधन्यभाग्यः पुत्रप्रपौत्रपरिशोलितयामदक्षः[3]॥१४३॥
व्यर्थं समस्तमपि तस्य रघूद्वहस्य रामस्य नो यदि कृपातिशयोऽल्पलभ्यः[4] ।
किं तस्य देवमुनिमर्त्यगणा यशांसि संकीर्तयन्ति तव भाग्यमृतेऽस्य[5] यद्वत्१४४
देवाः सुमेरुशिखरेषु सुधारसानां भोगोद्भवं सुखमनादृतवन्त एव ।
तत्कारणं यदवधि व्रजनाथलीलासंगीतकं श्रवणमार्गमनुप्रयातम् ॥१४५॥
चेतोनिरोधसमवाप्तमुदग्रमन्तः स्वात्मप्रमोदपटलं मुनयोऽपि राजन् ।
श्रीरामचन्द्रगुणकीर्तनभव्यवश्यकर्णास्तृणीकृतमिवेह न चाद्रियन्ते ॥१४६॥
यैरेष भाग्यभवसंभृतभालपट्टैर्दृष्टः श्रुतस्त्रिभुवने मनुजैः सुधन्यैः ।
ते भोगभाजनमपास्य निकेतमन्तरस्यैव लोलितसुखेषु लयं[6] भजन्ते॥१४७॥
स्वर्गाङ्गनाधरसुधारसभोगहेतुमैन्द्रं पदं मखशतेन न कामयन्ते ।
यैरस्य पादकमलाश्रयिणी सुधातः स्वादीयसी मधुसरित् करणैर्निपीता१४८
यस्यानुभूतिगुणकीर्तनवैभवोत्थं किं वर्णयन्तु सुधियोऽपि गिरामधीशाः ।
यस्यानुभूतिमुपलभ्य महामुनीन्द्रा ब्रह्मानुभूतिसुखमप्युरु भर्त्सयन्ति ॥१४९
मन्यामहे नृपतिवृन्दशिरोमणित्वं सत्यं तव त्रिदशवर्म[7]सुखाशिषौघैः ।
शय्यासनाशनविहारविचेष्टनादौ यद्रामचन्द्रतनुसंनिधिमभ्युपेताः ॥१५०॥
एतद्वियोगरजनीषु वयं त्विदानीं ध्वान्तावृता दशदिशो न विलोकयामः ।
अत्यर्थमश्रुसरिदुद्भवमूलभूतान्यक्षीणि निष्फलजनूंषि धिगेव कुर्मः॥१५१॥
धिग्जीवनं च खलु नः फलवर्जनीयं धिक् प्राणवर्गमुरुदुःखभरं पुषाणम्[8] ।
यत्तादृशं सुखसमूहमुपेत्य दैवादेतादृशीं विधुरतां दधते दुरन्ताम् ॥१५२॥

---

१. पुरा—रीवाँ । २. ऋद्धिनिवहो—मथु०, बड़ो० । ३. वामदेशः—अयो० । ४. ह्यलभ्यः—मथु० बड़ो० । ५. °मृतस्य—मथु०, बड़ो० । ६. सुखं सुलभं—रीवाँ । ७. 'वर्य°—रीवाँ । ८. जुषाणं—रीवाँ । पुराणं—अयो० ।

जीवामहे च जगदन्तकृता यमेन स्पृश्यामहे न सकलैरपि वर्जनीयाः ।
जाताः स्म ईदृशदशाजुष एतदीयवक्त्रेन्दुवीक्षणकलारहिता अहो हाः॥१५३॥
किं कुर्महे खलु सखे यदसूंस्त्यजामस्तर्ह्याशया प्रतिपदं क्रियतेऽन्तरायाः ।
नो वा त्यजाम यदि सोढुमशक्य एष वज्रोपमेन च हृदा सुहृदो वियोगः ॥
विश्लेषदुःखनिवहाशनिपातपात्रं[1] प्राणं विमोक्तुमुदिताश्च भवाम यावत् ।
तावत् प्रियस्य मुखचन्द्रमनोज्ञहासाः ध्यानाध्वना हृदिगताः प्रतिविघ्नयन्ति ॥
इत्थं निपत्य सुहृदोऽस्य वियोगतप्तसंदंशमध्यमधुनाङ्ग कदर्थयामः ।
देहेन्द्रियासुसमुदायमपारदुःखं दैवे विधौ प्रतिविधातुमपारयाणाः ॥१५६॥
राजीवलोचनविलोचनपातभाग्य[2]हीनाः प्रमोदवनवृक्षलताप्रतानाः ।
कालावसानविषमज्वलितानलेन स्पृष्ट्वा इवाद्य बहुदुर्भगतां भजन्ते॥१५७॥
श्रीरामचन्द्रमधुराधरलग्नवंशीनिर्ह्लादसंततसुधारससिक्तसिक्ताः ।
ये भूरुहा उदवहन् प्रसवानुवृद्धिमाकालिकीं त इह मम्लुरकाण्डमेव॥१५८॥
श्रीराममञ्जुलमुखेन्दुमुदीक्ष्य कान्तिपीयूषपारणजुषः सहिता बभूवुः ।
ते संप्रति प्रतिपदं प्रतिवर्द्धमानसंतापसंततिविलीनदशाश्चकोराः ॥१५९॥
ये राघवेन्द्रशुभवर्ष्मसुरद्रुमोत्थसौरभ्यसारमुपलभ्य सुखं निषण्णाः ।
यत्र क्वचिन्मधुकराः सुहिता स्त एते शश्वद्गवेषणपराः परितो भ्रमन्ति ॥
लीलावशेन विलसन्तमुपत्यकायां रत्नाचलस्य चपलैः सखिभिः समेत्य ।
या वीक्ष्य राघवमुदारगुणं कृतार्था गावोद्यता दृशिभिरश्रुनदान् सृजन्ति ॥
पीताम्बरद्युतितडिद्वति दीर्घवंशीनिर्घोषशालि निवहाङ्कित[3]मौक्तिकाल्यः ।
आनन्दसारसमुदायसुधासमूहैर्वर्षत्यजस्रमभिता व्रजकाननेषु ॥१६२॥
उन्नम्रतामुपगते नवनीलमेघे श्रीराम एव भुवि जीवनमस्ति येषाम् ।
ते चातका व्रजनिवासिजनाः सखेति किंनाम कुर्युरधुना परमार्तिभाजः ॥
किंब्रूमहे बहुतरैर्वचसां प्रसारैरेतावतैव भवता प्रमतिर्विधेया ।
अद्धा दृशोत्सव किमप्यनुभूतिरासीदेतावतैव विरहेण रघूद्वहस्य ॥१६४॥

राजोवाच

जानामि तस्य विरहान्मम तीर्थयात्रा किंरोचते मनसि तत्सविधैकतृप्ते ।
वेदोदितो विधिरपि प्रणयप्रकर्षाच्छैथिल्यमेव भजते यदि किंनु कुर्मः॥१६५॥

---

१. °निवहात्सुनिपातपत्त्रं—रीवाँ । २. °विलोचनभाग्य°—अयो० ।
३. शालिनि बलाकिनि°—मथु०, बड़ो० ।

तस्यैव तु त्रिदिववासिसुदुर्लभस्य प्रेम्णः कृते जगति तस्य चिरायुषे च ।
कर्तुं महान्ति सुकृतानि महीं भ्रमामि सोढ्वापि दुर्विषहतद्विरहार्तिभारम् ॥

युष्मादृशां च रघुवर्यवशित्वहेतुप्रेमप्रकर्षमवलोकयितुं नितान्तम् ।
जानीहि मामतुलभाग्यनिधेर्निकेतान्निष्क्रान्तमङ्ग[1] भुवि भावितीर्थवर्यम् ॥

स्थानानि तानि मम दर्शय गोपराज श्रीरामचन्द्रचरणाम्बुजचिह्नभाञ्जि ।
संप्राप्य यैः परिचयं रचयन्ति नित्यं प्रायः सुरा अपि तनौ पुलकप्रसारम् ॥

लङ्केशसंततनिदेशकरान् बलाढ्यान् रात्रिञ्चरीप्रमुखराक्षसवृन्दवर्यान् ।
येषु स्थलेषु स ममर्द गुणाढ्यलीलास्तानि स्थलानि मम दर्शय तीर्थभक्तेः ॥

प्रायः प्रमोदवनमेतदशेषमेव श्रीरामचन्द्रचरितामृतपूरपात्रम् ।
यत्कुञ्जभूमिरजसः कणिकापि गात्रे लग्ना सुरैरसुलभां मुदमातनोति १७०

तीर्थाटनं मम फलाढ्यमभूदिदानीं त्वत्सङ्गसंजनितसंततमङ्गलस्य ।
द्रक्ष्ये प्रमोदवनमद्य भवद्भिरुद्धा निर्दिष्टमिष्टरघुनन्दनसच्चरित्रैः ॥१७१॥

अद्य प्रमोदवनमञ्जुलमाधुरीणां सौरभ्यमैन्द्रवनगैर्भ्रमरैरलभ्यम् ।
घ्राणाध्वना मम मनः प्रतिविश्य कांचित् प्रेम्णो दशां किमु जनिष्यति वै यथा वः।

इत्युत्कण्ठितमानसस्य नृपतेर्वाक्यं समाकर्ण्य स
प्रीतः श्रीसुखिताभिधो व्रजपतिः पूर्वं निनाय व्रजम् ।
राजानं खलु केकयाधिपसुतासंशोभिवामं पुन—
स्तत्रातिथ्यमचीकरत्तदमुयोः साकं परीवारकैः ॥१७३॥

रघुराजो व्रजं दृष्ट्वा सर्वसंपद्भिरार्चितम् ।
गवां हंभारवैर्युक्तं पूर्यमाणमितस्ततः ॥१७४॥

कूर्दमानसुखोपेतनैचिकीचक्रवालकम्[2] ।
तर्णकैर्निष्कभरणैरलङ्कृतमितस्ततः ॥१७५॥

कुर्वद्भिर्वप्रप्रान्तेषु महाबलपराक्रमैः ।
श्वेतचन्द्रनिभैः स्थूलैर्गोबलीवर्दकैर्युतम् ॥१७६॥

प्रातर्गोदोहनोद्घोषनिनादितदिगन्तरम् ।
दधिमन्थनघोषैश्च सर्वतो मुखरीकृतम् ॥१७७॥

---

१. °मङ्गभवि°—अयो० । २. "उत्तमगोसमुदायम्" टि०-मथु०, बड़ो० ।

संफुल्लानेकलतिकालिङ्गितानेकभूरुहम् ।
अपूर्वसौरभोद्गारैः सर्वतः परिपूरितम् ॥१७८॥
गात्रगौरवसंपन्नैरापीनभरभूषितैः ।
वत्सालेहमुहुःस्निग्धैर्गृष्टिवृन्दैरलङ्कृतम् ॥१७९॥
ग्राम्यगानस्वरोल्लापमधुराननपङ्कजैः ।
स्थले स्थले गोपवृन्दैरलङ्कृतगृहाङ्गणैः ॥१८०॥
बर्हिबर्हकृतोत्तंसैर्गुञ्जामणिविभूषणैः ।
मुख्यगोपतिभिर्नित्यं गृहोत्साहेषु भूषितम् ॥१८१॥
रामप्रेमरसोन्मत्तैराभीराणां कदम्बकैः ।
लतावितानच्छायासु समारब्धकलस्वरम् ॥१८२॥
वायूपनीतमधुरतुलसीवनसौरभम् ।
कामक्रोधलोभमदमात्सर्यादिविवर्जितम् ॥१८३॥
सर्वतः कलिदोषाणामजातप्रतिवेशनम् ।
श्रीरामचरितोद्गानसुखिताभीरदारकम् ॥१८४॥
प्रतिवीथि[1]परिभ्रान्तखिन्नमुक्तिचतुष्टयम् ।
द्रुमगुल्मलतापुष्पगुच्छविश्रान्तषट्पदैः ॥१८५॥
सर्वतः कृतझाङ्कारमधुरस्वरपूरितम् ।
प्रतिसन्तानकतरुविटपस्थैर्विहङ्गमैः ॥१८६॥
सर्वतः कूजितं सर्वमुनीन्द्रगणपूजितम् ।
सर्वदेवदृगानन्दसाक्षाद्वैकुण्ठमद्भुतम् ॥१८७॥
अतिरम्यकृतानेकपुण्यसंतानशालिभिः ।
ब्रह्मादीनां दिविषदामवाङ्मनसगोचरम् ॥१८८॥
वृन्दावनाद्यष्टकेन[2]मध्याङ्गणविराजितम् ।
श्रीरामविषयानन्तप्रेमपीयूषपूरितम् ॥१८९॥
सर्वविद्वद्गुरुवरव्रजस्त्रीप्रेमचर्यया ।
सर्वतो भूषितं दिव्यरसभावविशारदम् ॥१९०॥

---

१. परिवीथी—अयो० । २. °द्यष्टकोण—मथु०, बडो० ।

क्वचिद्रामप्रियतममभिसारक्रियाकुलैः ।
प्रौढगोपालनारीभिरामन्त्रितसखीजनम् ॥१९१॥

क्वचिदन्याङ्गनासक्तिदूषितं रामकामुकम् ।
अनादृत्याकुलैर्गोपदारैरादृतदूतिकम् ॥१९२॥

[1]क्वचिद् गोचारणोद्यातरामविश्लेषमन्थरैः ।
[2]गोपालदारकैर्ध्यातप्रदोषागमसंभवम् ॥१९३॥

क्वचिदामन्त्रयद्भिः स्वान् प्रियनर्मसखीजनान् ।[1]
गोपालदारैः पूर्यमाणपुलकोद्भेदविग्रहम्[2] ॥१९४॥

क्वचित् संकेतभवने वासकं सज्जमानकैः ।
उत्कैर्गोपीजनैर्दृष्टभवनद्वारतोरणम् ॥१९५॥

क्वचित्संगम्य संकेतमनुद्वीक्ष्य रमापतिम् ।
गोपीजनैः शप्यमानसखीदूतीजनाकुलम् ॥१९६॥

अतिप्रेमगुणोत्कर्षरूपसारविभूषितैः ।
दिव्यगोपीजनैः सद्यो वशीकृतरघूद्वहम् ॥१९७॥

अनेकभावभवनमनेकाद्भुतभावनम् ।
अनेकसुखसंदोहमनेकप्रेमचर्यकम् ॥१९८॥

मुमोद नृपशार्दूलः प्रसन्नमधुराशयः ।
प्रविष्टं लौकिकातीते धाम्न्यात्मानमनन्यता ॥१९९॥

प्रविवेश ततस्तस्य सुखितस्यैव गोदुहः ।
निकेतनं नवनिधिसेवितद्वारदेशकम् ॥२००॥

प्रविष्टमानो नृपतिः सुखितालयमद्भुतम् ।
अभूत् सुखित एवासौ परमानन्दपूरितः ॥२०१॥

परोक्षमपि तत्रासौ परोक्षमपि तत्क्षणे ।
राजीवलोचनं रामं जज्ञौ नृपतिपुङ्गवः ॥२०२॥

केनाप्यद्भुतरूपेण महसा तद्गृहस्य सः ।
तृणीचक्रे निजं वेश्म राज्यसंपद्भरान्वितम् ॥२०३॥

१—१. नास्ति—अयो० । २—२. नास्ति—रीवाँ ।

तत्र माङ्गल्यका देवी महोदाराशया स्वयम् ।
अभ्यागतां केकयेन्द्रसुतामभ्युद्ययौ जवात् ॥२०४॥

श्रीरामजननीभावप्रेमभूषितया तया ।
भाषिता स्वागतं पृष्टा केकयी के न्यमज्जत ॥२९५॥

सा तया कुशलप्रश्नस्वागतादिप्रसादिता ।
अगाहततरां चित्रे परमानन्दवारिधिम् ॥२०६॥

सुखितः सुप्रसन्नास्यः पाद्यार्घादिसपर्यया ।
पूजयामास नृपतिं कोशलेन्द्रं समाहितः ॥२०७॥

दिव्याङ्गरागलेपेन रञ्जयामास तद्वपुः ।
दिव्यपुष्पमयीं मालां तुष्टस्तद्वक्षसि न्यधात् ॥२०८॥

दिव्यागुरुमयैर्धूपैर्धूपयामास तं नृपम् ।
प्रदीपराजिकां न्यस्य प्रकाशं प्रचकार सः ॥२०९॥

माङ्गल्यका करानोतैर्नवेद्यैः स्वादुभो रसैः ।
चतुर्विधैस्तमतुलैरानन्दयदुदारधीः ॥२१०॥

तथैव माङ्गल्यकयापि केकयो संतोषिता शान्तमया सपर्यया ।
तौ स्वादुना रामगवोमहौधसामपूर्वतृप्तिं पयसाभिजग्मतुः ॥२११॥

रामहस्तकमलानुलालितश्रेष्ठधेनुपयसां विकारकैः ।
भुक्तवत्प्रपरिहर्षितान्तरौ भूपतिश्च महिषी च तस्य सा ॥२१२॥

प्राप्य वाङ्मनसगोचरातिगां ब्रह्मदर्शनशतांशिकां मुदम् ।
सद्य एव जनितां जगाहतुः प्रेमपूर्णहृदयौ च रेजतुः ॥२१३॥

परिवारोऽपि सकलः सान्तःपुरजनस्तयोः ।
प्राप्यातिथ्यं गोपगृहे मुमुदे परया मुदा ॥२१४॥

समाधिरुद्धचित्तानां योगिनां यः सदुर्लभः ।
सकलोपि जनस्तत्र तमानन्दमगाहत ॥२१५॥

प्राप्यानन्दसमुद्रान्तर्मज्जनं सकलो जनः ।
दधौ चमत्कृतमिव चित्तमाश्चर्यपूरितः ॥२१६॥

अनन्यहेतुकं मोदं मन्वानश्चतुरो जनः ।
असाधारणमाहात्म्यादस्तौषीद् व्रजभूपतिम् ॥२१७॥

अहो सुखित गोपेन्द्र वैकुण्ठमिव ते गृहम् ।
यत्र श्रीरामचन्द्रस्य मनः प्रापानुरागिताम् ॥२१८॥
अस्माकमार्यपुत्रस्य मनः परमशक्तिमत् ।
तेनैव तर्कयामस्त्वामनन्यविषयश्रियम् ॥२१९॥

अहो भाग्यं गोकुलस्यैव नित्यमनन्यसाधारणवृत्ति मन्महे ।
यत्र प्रीतिः श्रीमतो राघवेन्द्रकुमारवर्यस्य विशेषतोऽभवत् ॥२२०॥
अहो भाग्यं सुखित प्रेयसीनां त्वदालयाश्रयिणीनां विशिष्टम् ।
वैकुण्ठलोकेऽपि भविष्यतीयं न प्रायशः प्रेमऋद्धिः श्रियोऽपि[1] ॥२२१॥
अहो भाग्यं सुखित श्रीमतस्ते यद्रामचन्द्रस्य मनः सदा त्वयि ।
अनन्यसाधारणवृत्तिवृद्धं वशंवदं भवतः प्रेम वीक्ष्य ॥२२२॥

सहजप्रमोदविजिताश्चतुर्विधाः प्रतिवीथि यत्र विलपन्ति मुक्तयः ।
अनया श्रिया व्रजपुरस्य मन्महे त्रिजगत्पतेरपि विनिर्जिताः श्रियः ॥२२३॥
विदुषामवाङ्मनसिगोचरा इमा भुवने जयन्ति तव भाग्यसंपदः ।
ननु रामचन्द्ररतितः पराङ्मुखं क्षणमप्यदृश्यत न जातु यन्मनः ॥२२४॥
किमु कामधेनुकुलदुग्धदोहनैः किमु वा सुरद्रुमफलौघसंपदा ।
किमु रत्नवर्यविषयानुनाथनैः सततं जिता व्रजपुरस्य संपदः ॥२२५॥

सर्वसंपत्समूहेन पूर्णेऽस्मिन् सुखितव्रजे ।
आश्रयन्ति सुराः सर्वे प्रायो ब्रह्मादयस्त्वयि ॥२२६॥
अनन्यगोचरामृद्धिं वीक्ष्य व्रजपुरस्य ते ।
कस्य नो सार्वभौमस्य मनो विचकितं भवेत् ॥२२७॥
अत्र ग्राम्यजनस्त्रीणां पादाम्भोरुहनूपुरैः ।
अवहेलितका जाताश्चिन्तामणिगणा अपि ॥२२८॥
कः पृच्छति व्रजपुरे कल्पद्रुमसमुद्भवान् ।
प्रसवानल्पगुल्मादिपत्रपुष्पफलश्रिया ॥२२९॥
अत्र कामगवीजातिः परस्तात् क्रियतेतराम् ।
प्रमोददृष्टैर्गृष्टीनां गणैर्वत्सविभूषितैः ॥२३०॥

---

१. अयं श्लोको नास्ति—अयो०, रीवाँ ।

राजोवाच

यन्मामूचुस्तरां लोका अतृप्ता श्रियमद्भुताम् ।
तत्सत्यमभवत् सर्वं दृष्ट्वा स्वानुभवादपि ॥२३१॥

अस्माकमाराध्यतमोऽसि नित्यं प्राप्तं परां प्रेमरमामितीदृशीम् ।
त्वदङ्घ्रिपद्मप्रतिकूलधीजुषां किमीदृशः प्रेमलवोऽपि लभ्यः ॥२३२॥

ध्रुवं ब्रह्मादयो देवा लुठन्ति व्रजधूलिषु ।
त्वज्जनाङ्घ्रिसरोजोत्थधूलीमिश्रासु गोपते ॥२३३॥
अद्य नो जन्मसाफल्यं बभूव किमपि ध्रुवम् ।
त्वत्संगसुखपीयूषधारासु हितचेतसाम् ॥२३४॥

आब्रह्मावधि विस्तरात् कविगिरो गीर्वाणकर्णातिथेः
कीर्तेः पूर्णकलेन्दुकुन्दसदृशो यास्याम्यहं पात्रताम् ।
किंचान्यज्जनितश्रमोऽप्ययमभूदाकण्ठतृप्तस्य मे
युष्मत्संगसुखामृतेन सफलः संसारचक्रभ्रमः ॥२३५॥

अहो अपूर्वा रामस्य सिद्धिर्विजयतेतराम् ।
तत्रस्थोऽपि भवत्स्नेहान्नित्यमत्रैव दृश्यते ॥२३६॥

एतत्स्तुतिपरं वाक्यं जनानां नैव दृश्यते ।
अतस्मिंस्तत्समारोपः स्तुतिमात्रमिति स्मृतिः ॥२३७॥
प्रशंसन्ति जना यत्तु सुखित त्वां ससाक्षिकम्[1] ।
ततोऽप्यधिकमाङ्गल्यगुणसन्दोहवानसि ॥२३८॥
यतो वाचो निवर्त्तेरन् अप्राप्य मनसा सह ।
तदेतत् तव माहात्म्यं वर्णयन्तु जनाः कथम् ॥
स्वानुभूत्या तु यत्किंचिद् ब्रुवन्ति हृदि तोषिताः॥२३९॥
प्राप्यापि सुखसंदोहं यो न ब्रूयाद्यशोऽप्यलम् ।
परोपकृतिचौरस्य तस्य मूर्ध्नि भवेदृणम् ॥२४०॥

संप्रत्यसौ परिकरः सकलो मदीयः संप्रापितो हृदि मुदां प्रसरं समक्षम् ।
व्रूते व्रजं सुखितगोपपते त्वदीयं वैकुण्ठतोऽप्यधिकमेव किमत्र कुर्वे ॥२४१॥

---

[1] स्वसाक्षिकं—अयो० ।

अहं तु चकितोऽस्म्यद्धा वीक्ष्य ते संपदं पराम् ।
आनन्दव्याप्तचित्तत्वान्न वक्तुं पारयामि च ॥२४२॥
यथा पश्यामि मनसि पूर्णानन्दपयोनिधिम् ।
न तथा वक्तुकामोऽपि पारये वक्तुमादृतः ॥२४३॥
अथावदत् केकयराजपुत्री माङ्गल्यकां मातरमच्छभाग्याम् ।
श्रीरामचन्द्रस्य विभोरुदग्रवात्सल्यभावाञ्चितचित्तधन्याम् ॥२४४॥

कैकय्युवाच

किं ब्रवीमि वचनेन भवत्याः कीर्तिमद्भुतकलापरिपूर्णाम् ।
तत्किमद्भुतमिह स्फुटमेवं रामचन्द्रजननीप्रवरासि ॥२४५॥
शूरो वीरः सत्यवादी मनस्वी सौन्दर्याढ्यो भास्वतोवंशभाग्यः
सर्वैराढ्यो रामचन्द्रोगुणौघैस्तद्धेतुस्ते स्तन्यपानं प्रतीतम् ॥२४६॥
कौशल्याया भाग्यराशिः प्रवृद्धस्त्वत्स्तन्योत्थः प्रादुरासीद् गुणश्च
यस्यास्वादाद्रामचन्द्रो गुणानां सर्वेषां वै पात्रतामाजगाम ॥२४७॥
अस्त्वेतावद् गौरवं तवकीनं किं वक्तव्यं सर्वमेव मया तत् ।
घोषस्यापि श्रीरियं विष्वगेव प्रयाति नो वाङ्मनोगोचरत्वम् ॥२४८॥
अपूर्वमानन्दमवापितास्मि माङ्गल्यके त्वत्पददर्शनेन ।
वैकुण्ठलोकाधिकमेतदेव स्थानं प्रपद्यास्मि विमुक्तकल्पा ॥२४९॥
भुक्तिमुक्तिकरिणीं ननु दिव्यां देविकामपि दशां जनयामः ।
चित्तमप्रमितसत्सुखवश्यं त्वत्समागम इतोऽत्र विधत्ते ॥२५०॥

ब्रह्मोवाच

इत्येवं तत्र कुर्वाणैः कौतुकेन शुभाः कथाः ।
कैकेयीरघुशार्दूलौ माङ्गल्यासुखितौ प्रति ॥२५१॥
सुखं सुषुपतुर्घोषे समस्तस्वजनान्वितौ ।
वशिष्ठश्च महाभागः प्रणिधाय मनः स्थितः ॥२५२॥
ते तत्र सकलास्तत्त्वमद्राक्षुर्निशि निद्रिताः ।
नित्यलीलारसोपेतं रामनाम सनातनम् ॥२५३॥
अपश्यन्नद्भुतं घोषमादिव्रजसमाह्वयम् ।
कोटिसूर्येन्दुसदृशदिव्यानेकगृहान्वितम्[1] ॥२५४॥

---

१. अयं श्लोको नास्ति—अयो० ।

चिदानन्दमयाकारं प्रकाशमयमद्भुतम् ।
नित्यमेकरसं भान्तं स्वप्रकाशैकगोचरम् ॥२५५॥
सर्वतो निस्तमिस्रं च दिव्यसंस्थानभासुरम् ।
यद्वच्च सैन्धवघनं स्वरूपावयवान्वितम् ॥२५६॥
एकमेव द्विधा त्रेधा चतुर्धा भानगोचरम् ।
सर्वाश्चर्यैकसंपन्नं सर्वानन्दकलाकुलम् ॥२५७॥
कल्पवृक्षाधिकगुणैस्तरुभिः परिवेष्टितम् ।
सुवर्णवर्णस्तम्भैश्च महामरकतच्छदैः ॥२५८॥
महारत्नैकविटपैश्चिन्तारत्नप्रसूनकैः ।
सुधारत्नफलोपेतैः कोटिसूर्येन्दुभासुरैः ॥२५९॥
तन्मध्ये सुखितागारं प्रमोदवनमद्भुतम् ।
वृन्दावनाद्यष्टकोणमहागणसमुज्ज्वलम् ॥२६०॥
वल्लवीयूथसंगीतजितकोकिलनिःस्वनम् ।
सहजानन्दिनीकीर्तिचन्द्रिकौघविभासितम् ॥२६१॥
कृष्णासखीमहायूथकेलिकौतूहलान्वितम् ।
वल्लभेन्द्रयशश्चन्द्रासक्तचित्तचकोरकम् ॥२६२॥
नित्यकौतुककेलीनामालयं प्रेममन्दिरम् ।
माङ्गल्यकामहोदारवात्सल्यरसवारिधिम् ॥२६३॥
गोपीजनमनःक्षेमप्रेमदं रसवर्द्धनम् ।
दिव्यभावतरङ्गाब्धिमशोकपदमुत्तमम् ॥२६४॥
तत्र रासविलासाद्यैः क्रीडन्तं भावकोविदम् ।
कोटिलक्ष्मीसमुद्रिक्तकटाक्षशतसेवितम् ॥२६५॥
चिन्नभः[1]श्यामलतनुमतनु[2]व्यूहसुन्दरम् ।
ईषच्छैशवमत्येत्य कैशोरवयसाञ्चितम् ॥२६६॥
सहजानन्दिनीकृष्णाप्रेमपालनदक्षिणम् ।
मन्दहाससुधास्रोतोमूलवक्त्रसुधाकरम् ॥२६७॥

---

१. चित्प्रभुः—अयो० । २. °मनुं—अयो० ।

पीतकौशेयवसनविद्युद्द्योचितविग्रहम् ।
नीलनीरदगम्भीरमहोमहिममोहनम् ॥२६८॥
गोचारणमिषोद्भूतवनकेलिविशारदम् ।
मुरलीनादपीयूषैः सिञ्चन्तं काननद्रुमान् ॥२६९॥
त्रैलोक्यसुन्दरं रामं रमणीयूथमध्यगम् ।
गोपवेशधरैर्नित्यं त्रिभिर्भ्रातृभिरन्वितम् ॥२७०॥
माङ्गल्यागृहसर्वस्वं सहजाप्राणनायकम् ।
श्रीमत्सुखितगोपेन्द्रनित्यलीलासु[1]भाजनम् ॥२७१॥
अयोध्यां च तथाद्राक्षुर्व्रजभूमिविभूषिताम् ।
रामलीलाविशेषेण भावितां प्रतिवासरम् ॥२७२॥
तद्दृष्ट्वा तत्क्षणादेते सर्व एव समुत्थिताः ।
निद्रावेशं परित्यज्य क्षणात्संजातजागराः ॥२७३॥
अब्रुवंश्च तदन्योऽन्यं दृष्टं यन्निद्रया निशि ।
अत्यद्भुतरसोपेताश्चकिता इव सर्वतः ॥२७४॥
अहो किमद्राक्ष्म निशिप्रसुप्ता विचित्र रूपं रघुनन्दनस्य ।
विचित्ररूपांश्च जनान् व्रजस्य[2] धन्यान् सदा रामविहारदृष्टीन् ॥२७५॥
तद्विश्व एवास्य रघूद्वहस्य रामस्य सर्वाङ्गसुखाकरस्य ।
नित्यासु केलीषु किमप्यजस्रं प्राकाम्यमेतत्सहसा व्यलोकि ॥२७६॥
वन्दामहे तं पुरुषोत्तमोत्तमं व्रजेन्द्रबालं रसलीलाललामम् ।
मयूरपिच्छाञ्चितचारुशीर्षं गुञ्जास्रजाभूषितवक्षसं परम् ॥२७७॥
अनुगृहीतनिजाङ्घ्रिसरोजगतित्रजगदार्त्तजनावनपण्डितम् ।
सरसकेलिनिधानकलानिधिं कमलकोमलनीलघनाकृतिम् ॥२७८॥
व्रजवधूनयनाञ्चितविग्रहं मुरलिकाकलकाकलिकाकरम् ।
जय जयेत्यखिलश्रुतिकीर्तितं विमलकीर्तिसुधारसवर्षणम् ॥२७९॥
तदमुमेव शरण्यमियाम वै शरणमात्मकृतार्थतया ननु ।
तदितरं मनसापि न दध्महे परममुक्तिनिधिं प्रणयातुराः ॥२८०॥
इतिजल्पन्त एवामी प्रातःकाले समुत्थिताः ।
गोपराजं पुरस्कृत्य वनयात्रां प्रचक्रमुः ॥२८१॥

---

१. नित्यलालन°—मथु०, बड़ो० । २. व्रजस्थान्—मथु०, बड़ो० ।

उत्थाय राजा प्रवरो रघूणां नित्यक्रियान्ते कृतदानसङ्गः ।
प्रणम्य गोपेश्वरपादपद्मौ वनानि गन्तुं प्रकृतो बभूव ॥२८२॥
कैकेयी च महाभागा माङ्गल्यामात्मनः पुरः ।
विधाय वनयात्रायामुपचक्राम सादरम् ॥२८३॥
राज्ञे रघूणांपतये सुखिताह्वो व्रजेश्वरः ।
व्रजं प्रदर्शयामास वनमालाविभूषितम् ॥२८४॥
केकयीं च महोदारां रामप्रेमविघूर्णिताम् ।
माङ्गल्या दर्शयामास व्रजं वनविभूषितम् ॥२८५॥
सरय्वाः पुलिने रम्ये रम्याणि विपिनानि सः ।
रसालवनमुख्यानि प्रापश्यद्धीरमानसः ॥२८६॥
तमाह गोपशार्दूलो व्रजवीक्षणसादरम् ।
तानि तानि पदान्यत्र दर्शयन् करुणाकरः ॥२८७॥

सुखित उवाच

तदिदं राजशार्दूल स्थानानां स्थानमुत्तमम् ।
यत्राद्भुतं महदभूत् तत्क्षणात् पश्यतो मम ॥२८८॥
तन्न दृष्टं त्वया राजन् न च त्वत्पारिपार्श्वकैः ।
न चान्येन च केनापि ज्ञानयुक्ताक्षिगोचरम्[1] ॥२८९॥
यस्त्वया शिशुरानीतः परमश्यामसुन्दरः ।
त्वदङ्कभूषणकरो नीलरत्नमहोनिधिः ॥२९०॥
स मदङ्कस्थिते रामे शिशौ नीलघनाकृतौ ।
तत्कालसंभवे सद्यस्तिरोभूय समाविशत् ॥२९१॥
तद्दृष्ट्वात्यद्भुतं जातं मम विभ्रान्तचक्षुषः ।
तदद्भुतसमाविष्टं मुनिर्मां समुपाययौ ॥१९२॥
भगवानत्रितनयो दुर्वासानाम नामतः ।
अहं च पृष्टवानेतदद्भुतं चकितेक्षणः ॥२९३॥
भगवन् मुनिशार्दूल संभ्रमो मे महान् हृदि ।
तद्भवन्तं विशेषेण पृच्छामि भगवन्नहम् ॥२९४॥

---

१. °मुक्ताक्षिगोचरे—रीवाँ ।

त्रिकालज्ञं मुनिवरं वेदवेदाङ्गवित्तमम् ।
जगत्कल्याणकर्तारं पादाब्जजलपावनम् ॥२९५॥
किमेतन्मुनिशार्दूल संजाततममद्भुतम् ।
नृपेण रघुवर्येण किमानीतमिदं महत् ॥२९६॥
मत्पुत्रनिर्विशेषेण यन्मया दृष्टमद्भुतम् ।
किमर्थं च मदङ्कस्थं पुत्रमाविशदागतम् ॥२९७॥
इदानीं कश्च मे पुत्रः को वा दशरथस्य च ।
स्नेहश्च मम मत्पुत्रे वर्द्धते भुवनोत्तरः ॥२९८॥
किमहं चार्पयिष्यामि राज्ञे समय आगते ।
मत्पुत्रो मे प्रियतमो न तमर्पयितास्म्यहम् ॥२९९॥
एतन्मे संशयं छिन्धि त्रिकालज्ञ महामुने ।
भवदन्यो न संदेहं छेत्ता मे भुवनेऽपि च ॥३००॥

दुर्वासा उवाच

गोपराज महाभाग शृणु मत्तः परं वचः ।
रामस्य तत्त्वं वक्ष्यामि रहस्यं देवगोपितम् ॥३०१॥
नाख्येयं यस्य कस्यापि लोके तन्माययावृते ।
ऋतस्य मूलं संछन्नमनृतेन समन्ततः ॥३०२॥
अनृता पिहिता देवा अनृता पिहिता जनाः ।
अनृता पिहिता दैत्या यक्षरक्षोगणादयः ॥३०३॥
अनृता पिहिता धीमंस्त्रयोलोकाः सनातनाः ।
अनृता पिहिताः सर्वे मुनियोगिवरादयः ॥३०४॥
सर्वं चानृतमूलं हि यद्वस्तु व्यवहारतः ।
ऋतमेकं समस्तेषु वेदेषु परमार्थतः ॥३०५॥
ऋतस्य चानृतस्यापि अन्तरं महदन्तरम् ।
भक्त्या तत्त्वं प्रविज्ञाय मुच्यते भवबन्धनात् ॥३०६॥
आदावन्ते च मतिमन्नृतमेव प्रतिष्ठितम् ।
गन्धर्वनगराकारं मध्येऽनृतसमुद्भवम् ॥३०७॥

तदप्यन्तेन संमिश्रमृतवद्भासते नृणाम् ।
[1]न केवलं स्यादनृतमृतसंयोजनं[2] विना ॥३०८॥
ऋतानृते उभे अस्मिन्नेकीकृत्यात्मसत्तया[1] ।
निर्माणमण्डकोटीनां पुरापुंसा विनिर्ममे ॥३०९॥
तत्ते ऋतं प्रवक्ष्यामि रामतत्त्वं सनातनम् ।
अशेष वस्तु राशीनां महाकारणकारणम् ॥३१०॥
पुरेदमसदेवासीच्छून्यं तत्त्वं तमोवृतम् ।
संसुप्तवदनिर्वाच्यमनीदृशमविस्तरम् ॥३११॥
मायां समुपसंहृत्य चिन्मात्रमवशेषितम् ।
कार्यजातं प्रति तदा मिलिताक्षमिव स्थितम् ॥३१२॥
स्वसत्तामात्रसततं चिदानन्दात्मकं ध्रुवम् ।
अनाविष्कृतशक्तित्वात्तद्ब्रह्मेत्यभिधीयते ॥३१३॥
साक्ष्यभावादसाक्षित्वात् साक्षिणापि विवर्जितम् ।
अहं बहुस्यां जायेय प्रवर्तेय गुणान्वितः ॥३१४॥
इत्थं खलु परस्येच्छां सतीं समनुवर्त्य तु ।
चतुर्धा समभूदेकं तस्य तन्महितं महः ॥३१५॥
अक्षरं चैव कालश्च कर्म चापि तदात्मकम् ।
स्वभावश्च गुणैराढ्यः परमस्यैव मायया ॥३१६॥
यदक्षरमभूद् ब्रह्म द्विधा तदजनि स्फुटम् ।
प्रकृतिः पुरुषश्चैव कलासमुदयाञ्चितः ॥३१७॥
सहस्रशीर्षनयनः सहस्राननबाहुकः ।
सहस्रकरपादोरुः सहस्रश्रुतिनासिकः ॥३१८॥
अहमेवं भविष्यामीत्यभिध्यासहितेच्छया ।
अन्तःसमुत्थितात् सत्त्वगुणतः सृष्टिहेतुतः ॥३१९॥
तिरोहित इवानन्दे परस्मात् तद्विशिष्यते ।
सृष्टीच्छाव्यापृतः सोऽसौ भगवानेव केवलम् ॥३२०॥

१—१. नास्ति—अयो० । २. °दनृतसंभवो°—अयो०, रीवाँ ।

मुख्यजीवतया सर्ववेदान्तेष्वभिधीयते ।
अत एव चितां तत्र स्वयोग्ये चित्स्वरूपके ॥३२१॥
प्रवेशोऽस्तीति[1] कथितमौडुलोमिमतं ध्रुवम् ।
इच्छामात्रात्तिरोभावेऽप्यानन्दमयताक्षता ॥३२२॥
पुरुषावतारो भगवानतएव प्रकीर्तितः ।
तदेव ब्रह्म कूटस्थमव्यक्तमिति चोच्यते ॥३२३॥
नैरन्तर्यं सदैवास्य परमात् पुरुषोत्तमात् ।
सप्तावरणसंयुक्तकोटिब्रह्माण्डनिवहात्मकम् ॥३२४॥
कार्यजातं तु तत्रैव सर्वदा प्रतितिष्ठति ।
नित्यं च तदवच्छिन्नं परस्मात् पुरुषोत्तमात् ॥३२५॥
पुरुषोत्तमरूपस्य नित्याधारतया स्थितम् ।
आविर्भूते परस्मिंस्तदाविर्भूतमनेकधा ॥३२६॥
तस्यलोकस्तस्य पीठं तच्छय्या तस्य चासनम्[2] ।
नानाजीवजडाकारैराविर्भवति तद्युतम् ॥३२७॥
अत एव च ते जीवा नित्यमुक्ता उदीरिताः ।
जडा अपि च तत्रत्याश्चिन्मया एव कीर्तिताः ॥३२८॥
अन्तर्यामिस्वरूपेण हरेरन्तरुपासने ।
सद्यो[3] मुक्तौ ज्ञानिनां तच्चरणाब्जे प्रवेशनम् ॥३२९॥
पुरुषोत्तमसंज्ञस्य चरणं तत्प्रकीर्तितम् ।
अवतारस्वरूपेऽपि तथैव तद्व्यवस्थितम् ॥३३०॥
अधिदैवस्वरूपे च तद्वदेव व्यवस्थितम् ।
तथानन्दमयस्यास्य पुच्छमक्षरमीरितम् ॥३३१॥
ब्रह्मपुच्छं प्रतिष्ठेति श्रुतिरप्याह तादृशम् ।
अक्षरत्वेनैव तस्य सेवनं ज्ञानवर्त्मनि ॥३३२॥
तज्ज्ञानात्तन्मयत्वाप्तिर्वेदान्तेषु निरूप्यते ।
यो ब्रह्म वेद ब्रह्मैव भवतीति श्रुतेर्मतम् ॥३३३॥

---

१. प्रवेशोसीति—अयो०, मधु०, बड़ो० । २. तद्दच्छया तस्य चाक्षणा (चासनं—अयो०)—अयो०, रीवाँ । ३. सिद्धी—अयो० ।

तस्मादप्युत्तमो धीमन् श्रीरामः पुरुषोत्तमः ।
ब्रह्मानन्दात् समधिकः प्रेमानन्दो भवेद्यतः ॥३३४॥
कालेऽपि चाक्षरस्यैव स्वरूपान्तरमुच्यते ।
सर्वाकारेण भवनं यत्तत्सामर्थ्यमक्षरे ॥३३५॥
तदन्यसर्वसामर्थ्यमुक्तः काल उदीरितः ।
सर्वाधिकारसंयुक्तः सर्वदा फलसाधकः ॥३३६॥
इच्छामात्राच्चिदानन्दतिरोभावे विकल्पितः ।
सर्वानुभवसिद्धोऽपि सर्वप्रत्यक्ष एव सः ॥३३७॥
क्रियाशक्तिप्रधानोऽसौ सकलोद्भवकारणम् ।
सर्वं जगत्स्थापयित्वा स्वस्मिन् याति निरन्तरम् ॥३३८॥
अक्षरे च परे चापि न तत्सामर्थ्यमल्पकम् ।
विकृतावेव चात्यन्तं सृष्टिस्थित्यन्तभावकः ॥३३९॥
बहिर्मुखानां तु बहिर्व्यवहारेण तादृशः ।
यादृशो ज्ञानिनां शुद्धभगवत्त्वेन भासते ॥३४०॥
सच्चिदानन्दरूपोऽतः सर्वदा प्रकटत्वतः ।
भगवद्दत्तमैश्वर्यं भजते नित्यमेव सः ॥३४१॥
स सर्वापेक्षया तस्य[1] सेवकेष्वन्तरङ्गकः ।
आसुरादितमोऽन्धानां तस्यैवोपासनालयौ ॥३४२॥
प्रभोरिच्छानुसारेण क्रिया तस्य व्यवस्थिता ।
तस्याधिभौतिकं रूपं सूर्य एव न संशयः ॥३४३॥
युगाद्याध्यात्मिकं रूपमाधिदैवं स्वयं हरिः ।
इति ते संनिगदितं कालतत्त्वं व्रजेश्वर ॥३४४॥
कर्मापि चाक्षरस्यैव रूपान्तरमुदाहृतम् ।
पुंभिर्विधिनिषेधाभ्यां प्रकटीक्रियते तु तत् ॥३४५॥
हिताहितप्रदानेषु लोकानां स विशिष्यते ।
फलपर्यन्तमेवास्य प्राकट्यं समुदाहृतम् ॥३४६॥
भगवानेव तद्रूपैराविर्भूय तिरोभवन् ।
कर्मेति कीर्त्यते लोके प्रतिजीवं व्यवस्थया ॥३४७॥

१, सर्वापापक्षयात्तस्य—अयो०, सर्वा सेवया पेक्ष्या तस्य—रीवाँ ।

पूर्वापरीभावभेदाद् द्वेधा प्राकट्यमस्य च ।
कालस्यैवाङ्गमेतच्च कालस्य च वशे स्थितम् ॥३४८॥
स्वभावं तु हरेरिच्छारूपेण प्रकटः सदा ।
असाधारणतामेत्य सर्ववस्तुसमाश्रितः ॥३४९॥
जगदाकाररूपेण वर्तते जगति स्फुटः ।
तस्य पश्चाद्भागगतं सर्वमेव जगत् स्थितम् ॥३५०॥
ज्ञानकर्मगुणाश्चैव वस्तूनि बहुशस्तथा ।
सदुद्गमतिरोभावहेतवो बहवो मताः ॥३५१॥
परिणामेन कार्येण नित्यमेषोऽनुमीयते ।
अक्षराद्याश्च चत्वारो वासुदेवादिसंज्ञकैः ॥३५२॥
चतुर्भिर्भगवद्रूपैराविष्टा इति शुश्रुम ।
वासुदेवः संकर्षणः प्रद्युम्नश्चानिरुद्धकः ॥३५३॥
चतुर्मूर्तिः स्वयं विष्णुरादिदेवस्त्रयीस्तुतः ।
महापुरुष इत्युक्तः साक्षान्नारायणो हरिः ॥३५४॥
वैकुण्ठनाथो भगवानेष एव सनातनः ।
ब्रह्मानन्दमयी तस्य रमा सर्वाङ्गसंगिनी ॥३५५॥
विशुद्धं सत्त्वमतुलं विग्रहोऽस्य प्रकीर्तितः ।
रामस्य पूर्ण एवांशः स्वयं भगवतो ह्ययम् ॥३५६॥
चतुर्विधमसौ मोक्षं सेवकेभ्यः प्रयच्छति ।
ज्ञानसंमिश्रया भक्त्या तस्य सेवा प्रकीर्तिता ॥३५७॥
सहस्रशीर्षनयनः पुरुषोऽस्यांश उच्यते ।
तस्माद्रामचन्द्रो देवः सर्वकारणकारणम् ॥२५८॥
ब्रह्मा विष्णुश्च रुद्रश्च सृष्टिस्थित्यन्तकर्मणि ।
गुणावतारास्तस्यैव पुराविद्भिरुदाहृताः ॥३५९॥
तथान्ये मत्स्यकूर्माद्या अवताराः समीशितुः ।
स एव भगवान् साक्षादभूद्दाशरथे गृहे ॥३६०॥
मर्यादापालनार्थाय सतामुद्धरणाय च ।
द्विजधर्मत्रयीभूमिक्लेशसंहरणाय च ॥३६१॥

तस्याप्यात्मा स्वयं रामः सच्चिदानन्दविग्रहः ।
प्रमोदवनचन्द्रो यः सनातनतया स्थितः ॥३६२॥
प्रेमानन्दमयी तस्य रमा नित्याङ्गसङ्गिनी ।
सहजानन्दिनी सैषा लीलाधिष्ठानमास्थिता ॥३६३॥
शुद्धसत्त्वाव्यवहितः सच्चिदानन्दविग्रहः ।
सर्वांशैः परिपूर्णोऽसावंशित्वेनैव संस्थितः ॥३६४॥
स्वयं स भगवान् साक्षात् सर्वानन्दकलानिधिः ।
निजलीलाप्रवेशाख्यं सर्वकामफलात्मकम् ॥३६५॥
प्रेमानन्दमयं मोक्षं भक्तेभ्यो यः प्रयच्छति ।
विशुद्धभक्त्या संसेव्यः कर्मज्ञानाद्यमिश्रया ॥३६६॥
न तस्य कार्यकरणं विद्यते भुवनत्रये ।
गुणेभ्यः समतीतोऽसौ गुणावतरणोज्झितः ॥३६७॥
अन्यावतारदशया सततं परिवर्जितः ।
सर्वोदासीन एवासौ भक्तरञ्जितमानसः ॥३६८॥
निर्मर्यादमहालीलामाधुर्यरसवारिधिः ।
असतां चापि जीवानां समुद्धरणपण्डितः ॥३६९॥
निजांशोद्धृतगोविप्रश्रुतिधर्मानुरक्षकः ।
सर्वात्मनामप्यात्मासौ स्वेनैव च विशेषितः ॥३७०॥
स एष नित्यं गोपेन्द्र त्वदालयविभूषणः ।
रसभावमयीं लीलां नित्यमत्र करिष्यति ॥३७१॥
ऐश्वर्योत्थं मदं चैष निहन्तीश्वरमानिनाम् ।
यावतीर्मूललीला वै ता एवासौ करिष्यति ॥३७२॥
[1]अवतारचरित्राणि निजावेशात् करिष्यति ।[1]
सहजानन्दिनी लक्ष्मीर्हृदयं मोहयिष्यति ॥३७३॥
कोटिलक्ष्मीकदम्बान्तर्विलासं वितनिष्यति ।
नाम धाम स्वरूपं च गुणाश्चरितमेव च ॥३७४॥
नित्यमेवास्य सकलं श्रुतिवृन्दैर्निरूपितम् ।
महारासविलासेन क्रीडिष्यति वधूगणैः ॥३७५॥

१—१. नास्ति—अयो०, रीवाँ ।

नित्यश्चास्य विलासोऽयं प्रमोदवनवीथिषु ।
अस्यैव सोपि पूर्णोंऽशः कृष्णो वृन्दावनान्तरे ॥३७६॥
अन्यथान्यावतारेभ्यो माहात्म्यं किं विशिष्यते ।
रामेति द्वयक्षरो मन्त्रः सर्वमन्त्रशिरोमणिः ॥३७७॥

को विजानाति माहात्म्यं यच्च यावच्च तस्य तत् ।
रामस्यातिप्रियं नाम रामेत्येतदहर्निशम् ॥३७८॥
स्वयं जपति वै नित्यं सहजानन्दिनीसखः ।
रामस्यापि प्रियं नाम रामेत्येव सनातनम् ॥३७९॥
रात्रिन्दिवं गृणन्नेष भाति वृन्दावने स्थितः ।
यच्च कृष्णस्य सामर्थ्यं पापेन्धनविदाहने ॥३८०॥

तद्रामनामसंजापमाहात्म्यमिति निश्चितम् ।
हयग्रीवस्तथागस्त्यो मनुरत्रिश्चतुर्मुखः ॥३८१॥
कुबेरः कामदेवश्च पद्मबन्धुः सुधाकरः ।
अहं हरिर्हरश्चैव नन्दीशश्च शतक्रतुः ॥३८२॥
शुको द्वैपायनश्चैव वसिष्ठाद्याश्च योगिनः ।
नव योगीश्वराश्चैव याज्ञवल्क्यश्च गौतमः ॥३८३॥

जनकश्च तथान्ये च देवर्षिनरसत्तमाः ।
साक्षाच्छ्रीरामचन्द्रस्य नाममाहात्म्यवेदिनः ॥३८४॥
येषां तदेव सर्वस्वं प्राणपोषणमौषधम् ।
वेदशास्त्रपुराणेषु तत्त्वमेकं सुनिश्चितम् ॥३८५॥
रामेति चित्तरमणं नाम सद्यो विमुक्तिदम् ।
वाराणस्यां व्योमकेशो म्रियतां प्राणिनां ध्रुवम् ॥३८६॥

व्याचष्टे तारकं ब्रह्म रामेति द्वयक्षरात्मकम् ।
इति ते तनयस्यास्य स्वरूपं परमं ध्रुवम् ॥३८७॥
रहस्यं सर्वदेवानां विमृश्य कथितं मया ।
नित्याविर्भूतिता चास्य प्रमोदवनमन्तरा ॥३८८॥
साकेतनाथो भगवानाविर्भूतो नृपालये ।
न तस्य रावणादिभ्यो भयं च क्वापि विद्यते ॥३८९॥

यतः कालो बिभेत्येष त्रिनेमिरखिलोद्भवः ।
तथापि प्रेमवशगो राजा दशरथाभिधः ॥३९०॥
स्वप्रेम्णा रावणाद् भूत्वा भीतो निहितवांस्त्वयि ।
जातमात्रं शिशुं सैष रामं कैवल्यनायकम्[1] ॥३९१॥
अवतीर्णं स्वलोकात् तमादायेह समागतः ।
तवाति भगवान् पूर्णः साक्षाद्रामोऽक्षरात्परः ॥३९२॥
तदैवाजनि यर्ह्येव[2] राज्ञो दशरथादभूत् ।
दासीनां श्रुतिरूपाणां नित्यानां च मृगीदृशाम् ॥३९३॥
नागीनां च नगीनां च नारीणां च मृगीदृशाम् ।
ब्रह्मादिदैवरूपाणां सुन्दरीणां स्वरूपतः ॥३९४॥
नित्यलीलानन्ददानसिद्धये भोगसिद्धये ।
प्रेमानन्दस्वरूपायाः सहजायाः परश्रियः ॥३९५॥
सह रतिविहारेण मनोभिलषितप्रदः ।
भक्तानां भूरिभाग्यानां प्रेमानन्दपदस्पृशाम् ॥३९६॥
श्रीमत्परमहंसानां न्यासिनां च परा गतिः ।
त्वयि नित्यं वसत्येष रामः प्रेम प्रमोदभूत् ॥३९७॥
दशरथस्यालये च नित्यं विहरते यथा ।
अथ काले परिप्राप्ते गन्तैष नगरीं प्रति ॥३९८॥
अवतारार्थसिद्धयर्थं सदा रामेति कथ्यते ।
रामस्तु त्वद्गृहे[3]स्थाता न पदं यास्यति क्वचित् ॥३९९॥
नानयोश्च मतो भेदो रामसाकेतनाथयोः ।
आत्यन्तिके ह्यभेदे हि भेदकृन्नारकी भवेत् ॥४००॥
आविश्य वै मनो नित्यं श्रीरामे पुरुषोत्तमे ।
भक्तो[4] लीलारसानन्दं यथैवानुभविष्यति ॥४०१॥
तथैव वै तस्य हृदि श्रीरामः पुरुषोत्तमः ।
अयोध्यायां रामलीलां स्वयं चानुभविष्यति ॥४०२॥

---

१. रामं चैव सेनापतिं—अयो०, मधु०, बड़ो० । २. यर्ह्येष—मधु०, बड़ो० ।
३. त्वद्धृदि°—अयो० । ४. अत्र—रीवाँ ।

इत्येवमनयोस्तत्त्वं श्रीरामचन्द्रसीतयोः ।
मुनिभिः प्राक्तनैर्गीतमुच्चैः परमहंसकैः ॥
वर्णयेच्छृणुयाद्वापि सोऽपि मुच्येत संसृतेः ॥४०३॥

सुखित उवाच

इत्युक्त्वा मां मुनिवरः श्रीमानत्रितनूद्भवः ।
जगाम श्रीरामगुणान् गायन्नुच्चैः स्वमाश्रमम् ॥४०४॥
ज्ञाततत्त्वो मुनिवरादहं च परया मुदा ।
प्रेममय्या समाविष्टो बभूवैकान्ततत्परः ॥४०५॥
आसने शयने याने संक्रीडापानभोजने ।
राम एवार्पितमना बभूवाहमनन्यधीः ॥४०६॥
निपीय तद्वक्त्रसरोजसंभृतं प्रकाममाधुर्यमयं महन्मधु ।
विलीनसर्वेन्द्रियवृत्तिसंसरश्चिराय योगीव बभूव निर्वृतः ॥४०७॥
पत्नी च मे तन्मयतामवाप सा विहाय शय्यासनभोजनादिषु ।
एकान्ततो बद्धमना न किंचन विवेद वाह्यं विषयं न चान्तरम् ॥४०८॥
इत्येवमस्मास्वतदन्य[1]वृत्तिषु रामोऽपि रेमे रमणैककोविदः ।
वात्सल्यभावैकविदात्मभावो भृशं स्वरूपात् प्रणयं पुपोष च ॥४०९॥
तस्य स्वभावैकविदः सदा वयं सोऽस्मत्स्वभावं च विवेत्ति संततम् ।
जानीमहे न त्रिषु धामसु क्वचित्तच्चित्तरक्त्यै प्रभवेत् परोऽपि सन् ॥४१०॥
या यास्तस्य शुभा लीलास्तासां सारं वयं खलु ।
जानीमहे परस्यास्य नित्यानुग्रहभागिनः ॥४११॥
इतिश्रुत्वा दशरथो गोपराजस्य भाषितम् ।
परमानन्दपाथोधौ ममज्जातीव तत्क्षणे ॥४१२॥
धन्यं धन्यमिति प्राह गोपराजं सहानुगः ।
पपात पादयोरस्य प्रेमाविर्भावविह्वलः ॥४१३॥
दृष्ट्वा तत्स्थानमत्यर्थं गोष्ठमुख्यं सुपावनम् ।
व्रजस्य शिर एतद्वै इत्याह नृपसत्तमः ॥४१४॥
तत्स्थानदर्शनोद्भूतप्रेमोत्कण्ठः सुविह्वलः ।
कथं कथमपि स्वैरमन्यतोऽगान्नृपोत्तमः ॥४१५॥

---

१. °स्माकमनन्य°—रीवाँ ।

सुखितेन समादिष्टं मार्गमासाद्य भूपतिः ।
आदिव्रजस्थलीं पश्यंस्तुतोष परया मुदा ॥४१६॥

इति श्रीमदादिरामायणे ब्रह्मशुण्डसंवादे पूर्वखण्डे दशरथतीर्थयात्रायां आदिव्रजागमनं नाम दशाधिकशततमोऽध्यायः ॥११०॥

एकादशाधिकशततमोऽध्यायः

सुखित उवाच

इदं स्थानं महाराज तीर्थभूतं भवेन्नृणाम् ।
यत्र रामः स्वयं चक्रे डाकिन्या हननक्रियाम् ॥ १ ॥
यर्हि वाव मुनिश्रेष्ठो नारदो रक्षसां पतौ ।
देवगुह्यतमं कार्यं कथयामास तत्क्षणे ॥ २ ॥
लङ्काधिपः कृतक्रोधः प्रेषयामास राक्षसीम् ।
डाकिनीं लोकबालघ्नीं विचरन्तीं स्थले स्थले ॥ ३ ॥
प्रतिग्रामं प्रतिपुर प्रत्यावासं चचार सा ।
घ्नन्ती विविधरूपेण बालकान् सदतोऽदतः ॥ ४ ॥
सा ययौ कालनिर्दिष्टा व्रजे यत्र गृहं मम ।
घोरा कपटवेशेन सुन्दरी भूपकामगा ॥ ५ ॥
प्रसुप्तं पायितं मात्रा निगूढमिव पावकम् ।
दृष्टीर्जनानामाच्छाद्य तस्करी स्वकरे दधात् ॥ ६ ॥
न विद्मः कथमायाता कुतो वा पापमानसा ।
कासौ क्रूरा केन दृष्टा जग्राह प्राणजीवितम् ॥ ७ ॥
गृहकृत्ये स्थितं मात्रा दासीभिश्च तदाज्ञया ।
बालैः संक्रीडने लग्नं मया गोचारणे गतम् ॥ ८ ॥
इहत्यं वृत्तमाख्यातं बालैः कुतुकविह्वलैः ।
मृता सा सकलैर्दृष्टा बहुयोजनविग्रहा ॥ ९ ॥

अहो गोपाः शृणुतेयं सुघोरा पूर्वं दृष्टा सुन्दरी सुष्ठुवेशा ।
रामं समादाय करेण सुघ्नं प्रपाययामास पयःस्तनोत्थम् ॥१०॥
रामेण रुद्धाङ्कजुषा[1] कराभ्यां निष्पीडिता वक्षसि गाढमेषा ।
मा मुञ्चमुञ्चेति चिरं विलप्य मुमोच निःश्वासमुदग्रवेगम् । ॥११॥
विवृत्य विस्तीर्णतरानुदग्रान् केशांश्च दन्तान् वदनं शिरश्च ।
दृशौ च हस्तौ चरणौ च पश्चाच्छब्देन भूमौ महता पपात ॥१२॥
ततो व्रजस्त्रीनिवहः समन्तात् कृतार्तनादः सहसा जगाम ।
ददर्श चैतां सुभयानकास्यां विस्तीर्णकेशीं पृथु लम्बोदरीं च ॥१३॥

इत्युदीरितमाकर्ण्य बालानां मूढचेतसाम् ।
नैव श्रद्दधिरे गोपा अजानन्तोऽस्य वैभवम् ॥१४॥

कुटुम्बिनी च मे तस्य वात्सल्यप्रेमपूरिता ।
सहसोत्सङ्ग आरोप्य परिरेभे भयातुरा ॥१५॥
अहं च विपिनादेत्य श्रुत्वा कोलाहलं व्रजे ।
अपश्यं डाकिनीकायं बहुयोजनविस्तृतम् ॥१६॥
निशम्य सकलं वृत्तं गोपबालमुखोद्गतम् ।
बभूव परमाश्चर्यं ममापि हृदये नृप ॥१७॥

ततः कश्चित् प्रौढकल्पो गोपबालोऽब्रवीद्वहः ।
ममागत्य स्फुटं तत्र यद्वृत्तं डाकिनीगतम् ॥१८॥
श्रूयतां सुखित स्वामिन् सत्यमेतन्मयोदितम् ।
डाकिन्या वदनात्तोजो रामदेहे व्यलीयत ॥१९॥
तच्छ्रुत्वा महदाश्चर्यं बभूव मम मानसे ।
अहो रामस्य माहात्म्यं बाल्य एवायमीदृशः ॥२०॥

ततोऽहमागत्य निकेतमात्मनो माङ्गल्यकायाः करतः सुजीवनम् ।
बालं समादाय समाश्लिषन् मुदा बभूव वात्सल्य रसोर्मिघूर्णितः ॥२१॥

गोप्यः सर्वाः प्रवीणास्ता मातरो व्रजवन्दिताः ।
आगत्य विदधू रक्षां बालस्याङ्गेषु सर्वतः ॥२२॥

---

१. रुष्ट्वांक°—मथु०, बडो० ।

अहं चाहूय विप्रेन्द्रान् मन्त्रज्ञान् सर्वरक्षकान् ।
रक्षोघ्नमन्त्रसंदोहै रक्षयामास बालकम् ॥२३॥
स्वस्ति पुण्याहमावाच्य द्विजमुख्यान् हुतानलः ।
मन्त्रपूतैर्जलैर्बालं स्नापयामास सादरः ॥२४॥
दत्त्वा च दक्षिणास्तोमं चतुर्वेदाशिषां गणैः ।
वर्द्धयित्वा शुभैर्बालं नत्वाभ्यर्च्य व्यसर्जयम् ॥२५॥
इत्यसौ डाकिनी घोरा महापातककारिणी ।
मृता स्वेनैव पापेन रामस्य च सदा शुभम् ॥२६॥
स्वकरस्पर्शमात्रेण डाकिनीं ताममारयत् ।
अतारयच्च पापेभ्यो मुक्तिं च समदात् प्रभुः ॥२७॥
निकृत्य परशुच्छेदैर्दह्यमाना तु डाकिनी ।
मुमोचातीव सौरभ्यं धूमं सर्वाङ्गतो व्रजे ॥२८॥
तदङ्गधूमसौरभ्यैर्धूपिताः सकला दिशः ।
रामाङ्गस्पर्शमात्रेण तादृक्पदमगादियम् ॥२९॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दशरथतीर्थयात्रायां [डाकिनीवृत्तं नाम] एकादशाधिकशततमोऽध्यायः ॥१११॥

द्वादशाधिकशततमोऽध्यायः

ब्रह्मोवाच

तदन्यतो दिशं नीत्वा राजानं सुखिताह्वयः ।
उवाच वचनं भूयो रामलीलारसालयम् ॥ १ ॥

सुखित उवाच

स्थानं च तदिदं राजन् यत्र रामो व्यचूर्णयत् ।
[1]शयानोऽधःस्थितां खट्वां विधाय तिलशः क्षणात् ॥ २ ॥
दृष्ट्वा तत्रस्थितैर्बालैरूचे पूर्ववदद्भुतम् ।[1]
पुरुषो मुद्गरकरः करालवदनाकृतिः ॥ ३ ॥

१—१. नास्ति—अयो० ।

प्रांशुर्घोरतराकारो मेघमेचकविग्रहः ।
पश्यतां नः क्षणादेत्य खट्वां राक्षस आविशत् ॥ ४ ॥
खट्वेयं रामशिशुना मुहुर्मर्दयतोच्चकैः ।
चूर्णिता तिलशः कृत्वा गजदन्तमयी जवात् ॥ ५ ॥
संचूर्णितायां खट्वायां राक्षसः पुनरुद्गतः ।
दृष्टो मुद्गरमादाय धावमानोऽस्य संमुखम् ॥ ६ ॥
यावत्पातयते शस्त्रं तावद्बालपदाहतः ।
पतितोऽत्र विवृत्याङ्गं डाकिन्याः सोदरो यथा ॥ ७ ॥
भूयोऽस्य वदनात्तोजो विनिर्गम्योडुसन्निभम् ।
प्राप्य रामस्यैव वपुस्तत्क्षणेन व्यनश्यत ॥ ८ ॥
इदमद्भुतमाकर्ण्य वृत्तं रामस्य दुष्करम् ।
पूजयन्तः शिशून् सर्वान् गोपालाश्चकिता इव ॥ ९ ॥
अहं च विप्रानामन्त्र्य मंत्रै रक्षोघ्नकल्पकैः ।
अरक्षयन् मुहू राजन् सर्वाङ्गप्राणजीवनम् ॥१०॥
हुत्वाग्नौ विविधैर्मन्त्रैर्बालरक्षाविधायकैः ।
ग्रहाणां चाहुतीर्दत्त्वा स्नापितो मन्त्रिताम्भसा ॥११॥
राजिकां लवणैः सार्द्धं निर्मंक्ष्य प्राणजीवने ।
अपातयत् गोपदारा विकीर्य सर्वतो दिशम् ॥१२॥
गोपुच्छभ्रामणं चास्य विदधुः सर्वविग्रहे ।
अरक्षयंश्च फूत्कारैर्मन्त्रसिद्धमुखोद्गतैः ॥१३॥
योगिभिश्च कृतैर्नादैर्व्रजे विघ्नान् न्यवारयन् ।
मयूरपिच्छमुष्टया च रक्षां चक्रुः सुकातराः ॥१४॥
इत्येवं शमितो[1] विघ्नः सारिष्टः साशुभप्रदः ।
व्रजदारैर्हितपरै रामस्य शुभकाङ्क्षिभिः ॥१५॥
नारदस्य मुखाद्राजन् श्रुतं वृत्तमनन्तरम् ।
रावणप्रेषितोऽयं वै[2] विकटाख्यो महासुरः ॥१६॥
हतः स्वेनैव पापेन परापकृतितत्परः ।
बहवो निहता तेन शिशवो निद्रयावशाः ॥१७॥

---

१. एवं सक्रामितो—अयो०, रीवाँ । २. दुष्टैः—रीवाँ ।

ततश्च परमस्माभिरप्रमादैरिहस्थितैः ।
प्राणजीवनरक्षायां तत्परैर्द्धर्मतत्परैः ॥१८॥
अन्तःपुरे हिततमाः स्थापिता वृद्धमातरः ।
अप्रवेशश्च सर्वेषां यस्य कस्याप्यनागमः ॥१९॥
वहिर्निःसरणं चास्य विशेषेण विवर्जितम् ।
स्वहस्तार्वाजतं दुग्धं मम गेहिन्यपाययत् ॥२०॥
अदृष्टिभोजनं चैवमदृष्टोदकसेवनम् ।
जनसंचाररहिते देशे स्वापस्तथासनम् ॥२१॥
अवधानपरैरेभिः सर्वदा स्थापितः प्रभो ।
यतो व्रजे नः सर्वेषां रामो जीवातुरेधताम् ॥२२॥

ब्रह्मोवाच

श्रुत्वा गोपपतेर्वाक्यं विस्मितो नृपसत्तमः ।
तत्स्थाने परमे तीर्थे सर्वाङ्गस्नानमाचरत् ॥२३॥
तदन्यां च दिशं तेन संप्राप्य नृपसत्तमः ।
उक्तो गोपालपतिना स्थानं निर्देश्य सादरम् ॥२४॥
इदं तत्स्थानमतुलं यत्र क्रीडन् शिशुर्भुवि ।
हृतो वात्याजवेनाभ्रं प्रापितो घोररक्षसा ॥२५॥
निहत्य गगने रक्षो गलग्रहपरासुकम् ।
अपातयच्छिलापृष्ठे विचूर्णिततनुं जवात् ॥२६॥
स वै वात्यास्वरूपेण प्राप्तो घोरतमोऽसुरः ।
निहतः स्वेन पापेन भाग्यैरेष च जीवितः ॥२७॥
इतश्च नृपशार्दूल दत्तदृष्टिर्विलोकय ।
अत्र मत्प्राङ्गणे रूढः पातितोऽनेन भूरुहः ॥२८॥
एकदा राजशार्दूल देवानां च द्विजन्मनाम् ।
आमन्त्र्य भोजनार्थाय चक्रेऽन्नानि कुटुम्बिनी ॥२९॥
व्यञ्जनानि च भूयांसि शाकानि विविधानि च ।
फलानि च सुपक्वानि नानाजातीनि मद्गृहे ॥३०॥

अनेकधा कृताः स्निग्धा[1] द्विदलाश्च विशेषतः ।
वटकाश्च पूपिकाश्च तथा पूरणपूरिकाः ॥३१॥
शष्कुल्यो मण्डकाश्चैव बहुशः खण्डमण्डकाः ।
आदर्शाश्चेन्दुसङ्काशास्तथैव जलवल्लिकाः ॥३२॥
शर्करापारिकाः स्निधा दध्यपूपाश्च भूरिशः ।
पायसापूपकाश्चैव तथा कर्पूरनाडिकाः ॥३३॥
नवनीतापूपकाश्च फेणिकाश्च महोज्ज्वलाः ।
माठिकाः[2] खाद्यपूपाश्च तथा पापचिकाः शुभाः ॥३४॥
चक्रिकाः क्षीरचक्राश्च बर्बराश्च महत्तराः ।
लड्डुकानां जातयश्च मोदकानां च जातयः ॥३५॥
सितया मण्डिताः पूपा अनेकविधपूरिकाः ।
विधाय मत्कुटुम्बिन्या सर्वतः सद्म पूरितम् ॥३६॥
घृताक्तानि सुगन्धीनि सिताक्तानि सितानि च ।
पक्वान्नानि विनिर्माय पात्राणि समपूपुरत् ॥३७॥
गतान्यहानि सप्तास्याः संविधाया विनिर्मितौ ।
पाकक्रियाप्रवीणानां प्रावीण्यं च परीक्षितम् ॥३८॥
तस्यां रात्रौ ततः सूदाः सर्वपाकान् विनिर्ममुः ।
सुशालिभक्तावरणशाकादीन् स्वादुवत्तमान्[3] ॥३९॥
अथ कौतूहली रामो बालकैः सह सर्वशः ।
विधाय सद्मनि च्छिद्रं भित्तौ पश्चिमतो दिशि ॥४०॥
पक्वान्नानि समस्तानि समादाय यदृच्छया ।
मृगान् संभोजयामास प्रमोदवनवासिनः ॥४१॥
मृगान् शाखामृगांश्चैव[4] गवयान् महिषांस्तथा ।
कोलान् गौरखरांश्चैव शुनो मार्जारकांस्तथा ॥४२॥
तरक्षून् शशजांश्चैव क्रोष्टॄंस्तज्जननीस्तथा ।
भल्लूकांश्चैव गौधेरान् शरभान् मूषकांस्तथा ॥४३॥

---

१. कृताभिस्सा—मधु० बड़ो० । २. माडिका—अयो० । ३. उत्तमान्—अयो०, रीवाँ । ४. सखीन् गवांश्चैव—रीवाँ ।

पक्षिणोऽनेकजातीयानाहूयाहूय कौतुकी ।
पक्वान्नैर्भोजयामास ब्राह्मणार्थोपकल्पितैः ॥४४॥
पारावतान् मयूरांश्च चाषान् परभृतांस्तथा ।
कोकिलांश्च शुकांश्चैव श्येनोलूकांश्च वायसान् ॥४५॥
ते तर्पिता रामकरोपनीतैः पक्वान्नसंघैर्मधुरैर्मनोज्ञैः ।
उदीरयन्तो निनदान् प्रजग्मुरधिप्रमोदाटविकेलिकुञ्जान् ॥४६॥

रामस्य यूथात् कोऽपि गोपालबालः संजातभेदः सहसागत्य तेभ्यः ।
निवेदयामास तदेव वृत्तं कुटुम्बिन्यै गृहकार्याकुलायै ॥४७॥
बलादुपश्रुत्य समस्तमेतत् रामस्य संचेष्टितमार्तबन्धोः ।
संजातरोषा गृहिणी मदीया पक्वान्नगेहं सहसा जगाम ॥४८॥
भाण्डागारं स्वयमेषा विलोक्य विकीर्णपक्वान्नकदम्बकं तत् ।
गृहीतयष्टिः कुपिता प्रयत्नाज्जवेन रामाभिमुखं जगाम ॥४९॥
स बालयूथस्थित एनां निरीक्ष्य सवेत्रहस्तां जननीं ताडनोद्यताम् ।
पलायितो दूरतरं जवेन सा तत्पृष्ठलग्ना व्यचलत् कृपान्विता ॥५०॥

तत्स्थानादेष बालैः पलाय्य मध्ये गृहं तत्र निलीय तस्थौ ।
गवेषयन्त्या प्रतिसद्म चामुया क्रमेण तत्रैत्य निरीक्षितः शिशुः ॥५१॥
एकान्तचारी विरुदन्मुदश्रुणी विलोचने अञ्जनपूर्णपक्ष्मणी ।
मृजन् कराम्भोजयुगेन शोभिना निकेतकोणोपगतोऽतिभास्वरः ॥५२॥

तमादाय ततो गोपी रूपातिशयभूषिता ।
न ताडितवती यष्ट्या वात्सल्यस्नेहमोहिता ॥५३॥
तमानीयाङ्गणस्थेन तरुणायुष्यशालिना ।
बबन्ध करयोर्दाम्ना बालं क्रीडनकारिणा ॥५४॥

पुनश्च पक्वान्नगृहं समेत्य निरीक्ष्यते यावदसौ वसूनि ।
तावत्समस्तं परिपूर्णमेव प्रपश्यती मुमुदे मानसेन ॥५५॥
रामश्च तेन तरुणा कल्पवृक्षसमत्विषा ।
निबद्धः करयोर्मात्रा यावदाक्षिपते गुणम् ॥५६॥
तावदुन्मूलितो वृक्ष आमूलाद् भूरिविस्तरः ।
गगनस्पर्शिविटपस्कन्धस्तुङ्गशिखाधरः ॥५७॥

तरुर्महोच्छ्रायविभूषितो जवात् सनिष्पतन्भूतलमीरितस्वनः ।
रामस्य पर्यन्तचरैः शिशुव्रजैर्निरीक्षितो भूरिफलप्रसूनधृक् ॥५८॥

तस्य निष्पततः शब्दं समाकर्ण्य जना व्रजे ।
आययुस्त्वरितं तत्र यत्र वद्धोऽनया शिशुः ॥५९॥
तन्मात्रापि तदागत्य दृष्टो बालः स्वभाग्यतः ।
शनैरुन्मोचितो वृक्षाद् दाम्ना बद्धः सुनिश्चलः ॥६०॥
पृष्टाश्च पर्यन्तचराः शिशवो गोदुहां हि ये ।
कथमेष महावृक्षः स्वयमेवान्वभज्यत ॥६१॥
ततस्ते बालका ऊचुर्यावद्रामः स्वयं मुहुः ।
गुणमाक्षिपते तावदभज्यत महातरुः ॥६२॥
तरावुन्मूलिते रामबलेनैव[1] व्रजस्त्रियः ।
तत उद्गम्य पुरुषो महानेको व्यदृश्यत ॥६३॥
द्योतमानो दिशः कान्तिसंदोहेनातिभूयसा ।
प्रांशुरर्केन्दुसंकाशो रूपसारविभूषितः ॥६४॥
रत्नहारयुतोरस्को दिव्यदेहविराजितः ।
दिव्यवस्त्रद्वयवृतो मनोज्ञः पद्मलोचनः ॥६५॥
मुहुः संस्तूय रामं स प्रणम्य च मुहुर्मुहुः ।
दिव्यं विमानमारुह्य पश्यतां नः खमारुहत् ॥६६॥
गोपबालवचः श्रुत्वा नरा नार्यश्च विस्मिताः ।
चिरञ्जीवतु रामोऽयमिति सर्वे बभाषिरे ॥६७॥
गोपालिका रामचन्द्रं स्वाङ्के आरोप्य विह्वला ।
स्नेहेन लालयामासुर्महता प्राणजीवनम् ॥६८॥
अहो मद्भाग्यनिवहैरयमुर्वरितस्तरोः ।
देवतानां प्रसादेन स्वाशीर्भिश्च द्विजन्मनाम् ॥६९॥
कृतस्वत्ययनं बालं कृतदानं द्विजन्मने ।
चिरादङ्कं समारोप्य परिरेभे सुविस्मिता ॥७०॥

---

१. °बलैर्व्रजैः—अयो० ।

कुलदेवीं ततोऽभ्यर्च्य संपूज्य च सुखं सुरान् ।
देवताश्च पितॄंश्चैव पूजयित्वा विधानतः ॥७१॥
विप्रानाहूय सकलान् समुपामन्त्रितान् पुरा ।
सुखेन पूजयामास संतुष्टा मत्कुटुम्बिनी ॥७२॥
ततो ज्ञातीन् समाहूय नरान् नारीश्च कोटिशः ।
अवशिष्टं ब्राह्मणेभ्यो भोजयामास भूतये ॥७३॥
अक्षय्यं तदभूत् सद्य[1] पक्वान्नपरिपूरितम् ।
भुक्तं भुक्तमभूद् भूयो रामस्यैव प्रसादतः ॥७४॥
चन्दनादिभिरालिप्य ब्राह्मणान् दत्तदक्षिणान् ।
विससर्जाशिषामन्ते संतुष्टा मत्कुटुम्बिनी ॥७५॥
एवमेतत्स्थलं राजन् कोटितीर्थौघपावनम् ।
रामचन्द्रपदाम्भोजैरङ्कितं दृश्यतां मुहुः ॥७६॥

ब्रह्मोवाच

द्रुमभङ्गस्थले स्नात्वा भक्त्या दशरथो नृपः ।
अन्यतो दिशमानीय बभाषे सुखितेन सः ॥७७॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दशरथतीर्थयात्रायां द्वादशाधिकशततमोऽध्यायः ॥११२॥

त्रयोदशाधिकशततमोऽध्यायः

सुखित उवाच

उत्पातान् समभिज्ञाय महाघोषे महीपते ।
शङ्कयानः शिशोर्विघ्नं गोपैः साकममन्त्रयम् ॥ १ ॥
प्रियमोदप्रमोदाद्या गोपवृद्धाः पुरातनाः ।
शुभार्थिनो मे ये सर्वे तेषां वृद्धः प्रियाभिधः ॥ २ ॥
गोपालो मतिमान् धीरो वीरः परपुरञ्जयः ।
अब्रवीन्मन्त्रमतुलं तन्निशामय भूपते ॥ ३ ॥

---

१. सद्यः—अयो०, रीवाँ ।

प्रिय उवाच

होराशास्त्रे प्रवीणोऽहं शिष्यो माण्डव्यधीमतः ।
राजनीतौ च निपुणो लोकवार्ताविचक्षणः ॥ ४ ॥
तस्मान्मम मतं पक्वं कार्यमायुष्मता सदा ।
राजलक्ष्मीमतिक्रम्य लक्ष्मीस्ते शोभतेऽधुना ॥ ५ ॥
श्रोतव्या प्रथमं नीतिस्ततो[1] धर्मस्त्वया विभो ।
ततो लोकहिताचारः सानुष्ठानप्रयोजनः ॥ ६ ॥
पथ्यं तथ्यं च यो ब्रूते स हितः स सखाजनः ।
तमेव च पुरस्कृत्य कृतं कार्यं न शीर्यति ॥ ७ ॥
संपदा सेवितं वीक्ष्य बहवो यान्ति सेवितुम् ।
तेषां स्वरूपं संस्थानं ज्ञेयं संपद्वता सदा ॥ ८ ॥
संपदि प्रायशः सर्वे घनतां यान्ति मानुषाः ।
आपत्काले विशीर्यन्ति घना इव मरुज्जवे ॥ ९ ॥
एक एव हितः श्रेयान् किमनल्पैर्हितार्विदैः ।
तं राजा न त्यजेज्जातु स हि तस्यासुसंमितः ॥१०॥
संपदा नावजानीयाद्धितज्ञं मानुषं धनी ।
संपदो भूरि जायन्ते हितज्ञो विरलो जनः ॥११॥
संपन्नः पुरुषो लोके संपदं रक्षयेत् सदा ।
सुकरः सञ्चयस्तस्य दुष्करं रक्षणं पुनः ॥१२॥
एकस्य संपदं वीक्ष्य विकृतिं यान्ति वै परे ।
छिद्रान्वेषिभ्य एतेभ्यो रक्षणं कार्यमुच्चकैः ॥१३॥
संपत्सु च प्रभूतासु न कर्तव्यः स्मयो बुधैः ।
स एव तासां नाशस्य प्रकारो मुख्य उच्यते ॥१४॥
आपन्न इव संपत्सु दीनतां सर्वतः श्रयेत् ।
ईशस्य हि वशे कृत्वा संपदः सुखमेधते ॥१५॥
अन्यं न विश्वसेज्जातु संपत्सु कुशलो नरः ।
अनेकरूपतो दुष्टाः संचरन्त्यपहारकाः ॥१६॥

---

१. स्तयोर्—अयो०, रीवाँ ।

यथा प्रतिष्ठा जगति प्राणानां चापि वर्तनम् ।
तामेव संपदं नित्यं जानीयादात्मनो हिताम् ॥१७॥
हितानेव जनान् मर्म ज्ञापनीयं न भूयसः[1] ।
संपत्संरक्षणार्थापि मृग्यं संपद्वता स्थलम् ॥१८॥

यत्रस्थः संपदो भुङ्क्ते परैरपरिभावितः ।
संपद्वता स्थलं ग्राह्यमाकरादिविवर्जितम् ॥१९॥
संभावितश्रीविषये परैरुत्साद्यते चिरात् ।
साधारणे स्थले स्थित्वा साधारणतया वसन् ॥२०॥
भुञ्जीत नियतान् भोगान् सशङ्कितमनाश्चिरम् ।
धर्मं चार्थं च कामं च सेवमानोऽनिशं जनः ॥२१॥

उत्तरोत्तरतो विद्यात्तुर्ये सर्वान् नियोजयेत् ।
अह्नचर्जयेत्तथा येन रात्रौ स्वस्थमनाः स्वपेत् ॥२२॥
अर्जयेद्वयसा येन वार्द्धके सुखमेधते ।
जन्मना चार्जयेद् येन भुक्वान्ते सुखमाप्नुयात् ॥२३॥
दुःखाभावः सुखं चेति पुरुषार्थो यतो द्वयम् ।
कुर्यात् सत्पुरुषैः सङ्गं देवांशाविष्टचेतनैः ॥२४॥
असुरांशैः कृतः संगः समूलं नाशयेज्जनम् ।
धर्मं समाचरेन्नित्यं यथा संपन्नवस्तुभिः ॥२५॥

संपदां चात्मनश्चैव धर्म एवाभिरक्षकः ।
आपद्यपि जनः प्राज्ञो धार्मिको नियतं भवेत् ॥२६॥
जित्वा धर्मबलात् सर्वान् भूयः प्राप्नोति संपदः ।
धर्मे येषां स्थिरा निष्ठा किं तेष्वापत् करिष्यति ॥२७॥

आपदोऽपि नृणां तेषां संपत्प्राया उदीरिताः ।
आत्मा कुटुम्बिनी पुत्रा गृहं परिजना भुवः ॥२८॥
यः सर्वमेव धर्मार्थं प्रयुञ्जीत स पण्डितः ।
यस्य धर्मे परा निष्ठा प्राणेभ्योऽपि गरीयसी ॥२९॥

---

१. भूरिशः—अयो० ।

सर्वशास्त्रादिविद्यासु मूर्ख एव स पण्डितः ।
आत्मना फलयेज्जन्म जन्मना त्रिविधं वयः ॥३०॥

वयसा भौतिकं पिण्डं पिण्डेनात्मप्रयोजनम् ।
धर्मोऽस्य परमो वन्धुरिह चैव परत्र च ॥३१॥
न तमापत्[1] स्पृशेज्जातु यस्य धर्मे ध्रुवा मतिः ।
नातीयाल्लौकिकं वृत्तमलौकिकपरोऽपि सन् ॥३२॥

लौकिकं पालयानस्य सिद्धचेत् सर्वमलौकिकम् ।
लोकस्य नैकदेशोऽस्ति शास्त्रं यद्यप्यलौकिकम् ॥३३॥
तथापि लोकवर्तित्वान्नियोज्योऽत्येति नैव तम् ।
यत्र यस्य स्थितिर्नित्यं सोऽनुरुध्यात् सदैव तम् ॥३४॥

प्राश्नीत मधुरं चापि न मत्स्यः सलिलाद्वहिः ।
अलौकिकी क्रिया चापि विरुणद्धि न लौकिकम् ॥३५॥
विरोधे संशयप्राप्तौ त्यज्यते शास्त्रमप्युत ।
लोकसिद्धो य आचारः स कार्यो भूतिमिच्छता ॥३६॥

परम्परायाः प्रामाण्यं प्रयोजकमनुत्तमम् ।
लोके वर्द्धयते कीर्तिं व्यवहारः सुरक्षितः ॥३७॥
क्रियते कीर्तये सर्वं तदस्य परमं वपुः ।
लौकिका यद्विनिन्दन्ति तन्निन्द्यं वैदिकैरपि ॥३८॥

एक एव शुचिः पन्थाः प्रायशो लोकवेदयोः ।
इदं मे मतमातिष्ठन् गोपराज सुखी भव ॥३९॥
त्वयैव सुखिना सर्वे सुखिनः स्म वयं यतः ।
संपत् ते संप्रति परा स्वयं रामः सुखाकरः ॥४०॥

सर्वविप्रसमूहेभ्यो गोपायैनमतन्द्रितः ।
यस्मिन् सुरक्षिते सर्वं सकलं स्याद् गवांपते ॥४१॥
तदेव रक्षणीयन्त आत्मनापि धनैरपि ।
धर्मशिक्षा[2] तु ते नित्यं धर्मनिष्ठैकवेश्मनः ॥४२॥

---

१. न यमो तं—अयो० । २. धर्मसंज्ञा—रीवाँ ।

पुनरुक्ताय तेऽस्मासु तदप्याशास्महे शुभम् ।
प्रवृत्तोऽपि हि सन्मार्गे धीमान् सद्भिः प्रवर्तयन् ॥४३॥
पूर्वप्रवृत्तिदाढर्याय मुहुस्तत्र नियोज्यता ।
लोकवृत्तोपदेशोऽपि व्यवहारपटोस्तव ॥४४॥
न किंचिदुपयुज्येत स्नेहात्तु प्रेरिता वयम् ।
धर्मेण लोकवृत्तैश्च नित्यं गोपाय गोपते ॥४५॥
अशेषव्रजजीवातुरामं बालमिमं प्रियम् ।
भवितायं व्रजभुवः सर्वस्या एव नायकः ॥४६॥
गोदुहां च कुलेष्वेष सुश्रियं वर्द्धयिष्यति ।
गावो वत्सास्तथानेन पालनीया विशेषतः ॥४७॥
यथा पौरन्दरी लक्ष्मीस्तृणवद्भास्यते नृणाम् ।
अलौकिकीं श्रियमयं व्रजे संभावयिष्यति ॥४८॥
यथा देशाधिनाथानां श्रीमदः शान्तिमेष्यति ।
हरिष्यन्ति बलिं भूपाः किमु वाच्यमिदं लघु ॥४९॥
इन्द्रादिमुकुटैरस्य यत्सेव्या यन्नखप्रभा ।
सर्वसौख्यफलान्येष सर्वतः संफलिष्यति ।
अपवर्गसुखं येन तृणवत्प्रतिभास्यति ॥५०॥
अभ्युद्धरिष्यति कुलानि च गोदुहां नः स्वर्गापवर्गसुखसंततिसार्वभौमः ।
माङ्गल्यमेष वितनिष्यति भूय एव स्वेच्छावशात्त्रिजगतामशुभोत्करघ्नः ॥५१
स्वर्गापवर्गस्थानेष्वप्यलभ्यं भोगमुत्तमम् ।
अयं भावयिता साक्षाद् ग्राम्याणामपि गोदुहाम् ॥५२॥
ऋद्धयः सिद्धयश्चापि भजिष्यन्ति स्वतो व्रजम् ।
अस्यैव संप्रसादेन न किंचिद् दुर्लभं च वः[1] ॥५३॥
अस्य प्रभावं मे सर्वमूचुरेकान्ततः सखे ।
मुनयः सर्ववेत्तारो योगचक्षुर्निरीक्षकाः ॥५४॥
दुर्वासा भगवानत्रिर्वशिष्ठः पुलहस्तथा ।
पुलस्त्यो नारदश्चैव याज्ञवल्क्योऽथ गौतमः ॥५५॥

---

१. नः—अयो० ।

अन्ये च दिव्यवेत्तारो मुनयः शुद्धबुद्धयः ।
ते नित्यमातिथेयत्वादातिथ्यग्रहणाय मे ॥५६॥
संप्राप्ताः सदनं नित्यं तोषिता विनयेन मे ।
तान् संतुष्टानहं वीक्ष्य पर्यपृच्छं विशेषतः ॥५७॥
सख्युस्तवास्य पुत्रस्य भाविनीं भूतिमुत्तमाम् ।
ते मामूचुर्यदेतस्य रहस्यं रूपमद्भुतम् ॥५८॥
तन्मया पार्यते[1] वक्तुं रहस्यत्वात् कदाचन ।
एतावतैव विद्धि त्वं यदसौ पुरुषोत्तमः ॥५९॥
गुहासु मायया नित्यं विहरत्यात्मसेवकैः ।
श्रीवत्साङ्कः स भगवानेष एव न संशयः ॥६०॥
यद्येनं भुवि जानीयुर्मनुष्याः पुरुषोत्तमम् ।
सर्व एव तदा लोके विमुच्येरन्न संशयः ॥६१॥
गोपायेति यदुक्तं च त्वत्पुत्रविषये मया ।
तद्वात्सल्यगुणेनैव नो चेद् गोप्तायमेव ते ॥६२॥
सङ्कटेभ्योऽतिकष्टेभ्यो रक्षिष्यत्यखिलं व्रजम् ।
भवतां सर्वसौख्यानि वितनिष्यत्यसौ ध्रुवम् ॥६३॥
निधायैनं हृदि सदा विलसन्तोऽखिलैः शुभैः ।
वर्तध्वं शरणापन्ना एनमेव नरोत्तमम् ॥६४॥
अस्य लीलाविनोदेन रञ्जयध्वं चिरं मनः ।
रक्षणं चास्य हृदये सर्वभावेन सेवनम् ॥६५॥
अत्र स्थाने महोत्पाता जातास्तेऽनेन शामिताः ।
तथापि त्यज्यतामत्र वासः स्थेयं रहःस्थले ॥६६॥
नन्दिग्रामोऽधिवासार्थं रोचते मम संप्रति ।
गुप्ताश्च प्रकटाश्चैव देवता यत्र सन्ति हि ॥६७॥
रक्षोघ्नाः देवता[2] रक्षां करिष्यन्ति शिशोस्तव ।
न तत्र राक्षसी भीतिर्देवतानां प्रभावतः ॥६८॥

---

१. तन्न प्रार्थयते—अयो० । २. सर्वदा—मधु०, बड़ो० ।

पालीग्रामश्च सविधे यत्र श्रीनन्दनो नृपः ।
तस्य पत्नी महोदारा नाम्ना श्रीराजिनी पुरा ॥६९॥
कन्यारत्नं च तद्गेहे साक्षाल्लक्ष्मीस्तु सोच्यते ।
भवित्री तव पुत्रस्य वधूरेषा न संशयः ॥७०॥
आगमज्ञास्तु मामूचुर्माण्डव्याद्या मुनीश्वराः ।
तेनाभिसंधिना तत्र विशेषाद्वास इष्यताम् ॥७१॥
श्रीनन्दनेन गोपेन मैत्री कार्या चिरं तव ।
धर्मज्ञः सुकृती विद्वान् रामभक्तः पराक्रमी ॥७२॥
तेन मैत्री चिरंजाता सर्वान् विघ्नान् हरिष्यति ।
अयमेव महांल्लाभो भविष्यति तव ध्रुवम् ॥७३॥
श्रीराजिन्या च तत्पत्न्या माङ्गल्या सख्यमेष्यति ।
एवं परस्परं स्नेहो वर्द्धमानो दिने दिने ॥७४॥
करिष्यति व्रजभुवो माङ्गल्यं सर्वतः सुखम् ।
तस्मात्तत्र सखे नित्यं विशेषाद्वासमिष्यताम् ॥७५॥
सरयूसविधे तत्र यथैवात्र विराजते ।
तत्तीरे गोधनं सर्वं न्यस्यतां गोष्ठभूमिषु ॥७६॥
हरित्तृणमयो देशः सरयूतोयशीतलः ।
बहूदको बहुफलैस्तरुभिः परिवेष्टितः ॥७७॥
परितः शकटांस्तत्र विन्यस्य सुविधानतः ।
प्राकारमिव संरच्य सर्वतो गोपरक्षितम् ॥७८॥
मध्ये शुभानि गोष्ठानि विरच्यन्तां महामते ।
समन्ताद् वेष्टचतां ग्रामस्तन्मध्ये क्रियतां गृहम् ॥७९॥
महाप्रासादसुखदं दिव्यतोरणभूषितम् ।
बहुभिः शिखरै रम्यं तुङ्गध्वजविचित्रितम् ॥८०॥
महाराजन्यवर्यस्य वासोचितमनुत्तमम् ।
यमारुह्य प्रपश्येम श्रीनन्दननिकेतनम् ॥८१॥
महोच्छ्रायं महारम्यं महाभूतिविभूषितम् ।
महाविशालं विशदं सर्वबन्धुनिवेशनम् ॥८२॥

तत्र रामस्य सुखदैश्चरितैरमृतैरिव ।
व्यगाहयन्त आत्मानं वर्तध्वमिति मे मतम् ॥८३॥

सुखित उवाच

इत्याकर्ण्य वचो रम्यं गोपवृद्धेन भाषितम् ।
सर्वेऽप्युत्कण्ठिता जाता नन्दिग्रामनिषेवणे ॥८४॥
अथ सर्वं समादाय वर्णरत्नादिकं धनम् ।
गोधनं च पुरस्कृत्य सषट्पञ्चाशत्कोटिकम् ॥८५॥
अनांस्यारुह्य गोपीभिर्नन्दिग्राममगां नृप[1] ।
स्वं स्वं च गोधनं सर्वे पुरोधायान्वगुर्हि तम्[2] ॥८६॥
वीरपालाभिधं गोपं महाघोषाभिरक्षकम् ।
विधाय सकलैर्गोपैर्नन्दिग्राममहंगतः ॥८७॥
स देशो भवता राजन् पूर्वमेव विलोकितः ।
जलाशयेषु रम्येषु तत्रत्येषु महीपते ॥८८॥
अनुष्ठिते स्नानदाने धर्मपत्न्यानया सह ।
निरीक्षिताश्च भूपाल समंतात् कुञ्जभूमयः ॥८९॥
तत्र वृत्तानि रामस्य चरित्राणि निशामय ।
एकैकमद्भुततमं सुधातोऽप्यतिमञ्जुलम् ॥९०॥
गृहीतं हठतस्तेन वत्सानां चारणं नृप ।
सरयूरम्यतीरेषु दिव्यमारुतमञ्जुषु ॥९१॥
शुशुभे वनपालेषु दिव्यं वेशं मुदावहन् ।
लक्ष्मणाद्यनुजैः सार्द्धं लघुयष्टिधरः शिशुः ॥९२॥
तत्र तं वत्सरूपेण प्राप्तः कश्चिन्महासुरः ।
हन्तुकामः स मनसा चचार गहने वने ॥९३॥
स हरित्तृणलोभेन विवेश गहनान्तरम् ।
तत्पृष्ठलग्नः सर्वज्ञः स्वयमन्वचलत् प्रभुः ॥९४॥

---

१. °ग्राममहंगतः—अयो० । ग्राममयं नृप—मथु०, बड़ो० । २. हिताः—मथु० बड़ो० ।

यावत्प्रकाशते रूपं स्वीयमासुरभासुरम् ।
तावदादाय पदयोः प्रक्षिप्तस्तरुपङ्क्तिषु ॥९५॥
भग्नकल्पोऽपि स खलो रूपमुत्सृज्य तादृशम् ।
अतिष्ठद्व्योमचिकुरो भूमिस्थचरणाङ्गुलिः ॥९६॥
मुष्टिमुद्यम्य तं बालं यावत्ताडयतेऽसुरः ।
तावत् स्वलकुटं बालः प्राचोदयदिहासुरे ॥९७॥
गदारूपेण लगुडः प्रापतत् तस्य वक्षसि ।
विद्धो गदाप्रहारेण सद्य एव महासुरः ॥९८॥
तारकासदृशं भास्वदात्मज्योतिः समर्पयन् ।
रामस्य चरणाम्भोजे गतासुरपतद् भुवि ॥९९॥
तस्मिन् निपतिते भूमौ क्रूरकर्मणि दानवे ।
मन्दारकुसुमैर्वर्षमादितेया अचीकरन् ॥१००॥
एवं महांस्तीक्ष्णतुण्डस्तडिन्नख[1]निपातनः ।
श्येनाकारधरः क्रूरो रोरुवन्नत्यरुन्तुदः[2] ॥१०१॥
शम्पापथा घनं भित्वा[3] महानसुर आगमत् ।
चञ्चूपुटे शिशुं कृत्वा यावदुत्प्लवते[4] दिवि ॥१०२॥
तावच्चञ्चूपुटस्तस्य चूर्णभावमुपागतः ।
श्रीरामस्य प्रभावेण ततः स प्राक्षिपन्नखान् ॥१०३॥
नखा वज्राङ्गनिर्भिन्नाः सद्यो भङ्गमुपागताः ।
भग्नतुण्डो भग्ननखः पक्षतीः पर्यताडयत् ॥१०४॥
शिरीषसुकुमाराङ्गे कठिनो हृदयेन सः ।
अथ रामस्तस्य पक्षौ दोर्भ्यां पर्युदपाटयत् ॥१०५॥
चिक्षेप च फलक्षेपं बलादुपरितो भुवि ।
छिन्नभिन्नोदरः श्येनः पञ्चत्वमगमत् क्षणात् ॥१०६॥
व्योम्नः स्खलत्तारकाभं तस्यात्मज्योतिरुद्गतम् ।
व्यलीयत पदाम्भोजे रामस्य परमात्मनः ॥१०७॥

---

१. नखरांत°—रीवाँ। २. रुवन्नुत्पत्य तुंडितुं—रीवाँ। ३. झंपामिव दिवः कृत्वा—मथु०, बड़ो०। ४. उत्पतते—अयो०।

अथ वत्सगणान् रामो विकीर्णान् सर्वतो दिशम् ।
एकीकृत्य वनप्रान्तादुपावर्त्तत सौख्यकृत् ॥१०८॥
लघुमेकां वहन् यष्टिमरुणां करपङ्कजे ।
विषाणमपरे चैव काकपक्षमनोहरः ॥१०९॥
सुवर्णसूत्ररचितमुष्णीषं शिरसा दधत् ।
तदुपर्याहिताश्चित्रा मयूरवरचन्द्रिकाः ॥११०॥
त्रिकोणाकृति बिभ्राणः कटिवस्त्रं मनोहरम् ।
कटीबन्धं च मधुरं चलत्काञ्चीमणिक्वणः ॥१११॥
चरणाम्भोजसक्वाणकिङ्किणीगणशोभितः ।
वलयाङ्गदहारादिभूषागणविभूषितः ॥११२॥
स्फुरन्मकरिकापत्रभालगण्डमुखप्रभः ।
स्वल्पपादाम्बुजलसदुपानद्द्वयशोभितम् ॥११३॥
आदावन्ते च मध्ये च यूथस्य महतोऽभवत् ।
कदाचित्तार्णकस्तोमे शिशुस्तोमे[1] कदाचन ॥११४॥
कदाचित्तार्णकान् यष्टचा प्रेरयन् मधुरस्वरः ।
कदाचिच्छिशुभिः सार्द्धं क्रीडन् विविधकेलिभिः ॥११५॥
नमद्ब्रह्ममहेन्द्रादिशिरोमुकुटकोटिषु ।
पदे पदे दिव्यवेषैर्बोद्धचमानोऽपि पार्षदैः ॥११६॥
विष्वक्सेनखगाधीशप्रमुखैर्वेत्रधारिभिः ।
रूपसौन्दर्यसारस्य सीमा सर्वाङ्गभूषितः ॥११७॥
बाललीलारसासक्त्या प्रस्खलत्पादपल्लवैः ।
तत्क्षणे तान् सुराधीशानपसारयतो बलात् ॥११८॥
पार्षदान् वीक्ष्य सस्मेरं वर्जयन् करचालनैः ।
विसर्जयंश्च तान् देवान् स्वस्वविष्टपवास्तवे ॥११९॥
समीपे नन्दिग्रामस्य गोष्ठभूमिषु गोदुहाम् ।
वधूभिस्तत्क्षणे गीतां मङ्गलस्वरधोरणीम् ॥१२०॥

---

१. शिखिस्तोमे—अयो० ।

उपाकर्ण्य मुदं प्राप्त ईषत्प्रहसिताननः ।
शनैर्व्रजपुरं रामो न्यविशत्तर्णकैः सह ॥१२१॥
तमुपागतमालक्ष्य गोपीनां मङ्गलस्वरैः ।
जवादभिजगामैनं मुदिता मत्कुटुम्बिनी ॥१२२॥
संभ्रमोत्फुल्लनयना पुलकाञ्चितविग्रहा ।
मुदितैर्गोदुहां दारैर्गायन्ती मङ्गलस्वरम् ॥१२३॥
सौवर्णरत्नजटिते स्वर्णपात्रे मनोहरे ।
दधिदूर्वाक्षतयुते सिद्धार्थैः सुसमन्विते ॥१२४॥
सनाथे फलपुष्पाद्यै राजिकालवणान्वितैः ।
चतुष्कं पूरयित्वान्तर्मणिमाणिक्यमौक्तिकैः ॥१२५॥
तत्र दीपं प्रविन्यस्य स्थूलकर्पूरवर्त्तिकम् ।
प्रापाभिमुखतो रामं बालानां यूथमध्यगम् ॥१२६॥
निपीय तद्वक्त्रमधूनि गोपी विमुक्तविश्लेषभवोरुतापा ।
विलोचनानां दशकोटिमेषा पुनः पुनः पद्मभवं ययाचे ॥१२७॥
वत्सवृन्दखुरोत्कीर्णधूलिधोरणधूसरैः ।
अलकैः परिवीताच्छकपोलफलकाञ्चितम् ॥१२८॥
अलिभिः सेवितोपान्तं शतपत्रमिव स्फुरत् ।
वशीकृततमस्तोमपूर्णचन्द्रमिवोज्वलम् ॥१२९॥
माधुर्यामृतपूरेण पूर्यमाणमहर्निशम् ।
विलोक्य रामचन्द्रस्य मुखचन्द्रं विलोचनैः ॥१३०॥
न तृप्तिं लेभिरे लुब्धा गोपालानां मृगीदृशः ।
प्रेमाम्बुधिप्रदाहेण कृष्यमाणा इतस्ततः ॥१३१॥
सान्निध्येऽपि वियोगार्ता[1] बभूवुः स्वस्वचेतसि ।
रूपपाने च पक्ष्माणि महाविघ्नममन्यत ॥१३२॥
अथासौ मत्कुटुम्बिन्या भाग्यसंदोहसीमया ।
वितीर्णभालतिलकः कुङ्कुमेन व्यराजत[2] ॥१३३॥

---

१. वियोगाक्ताः—मथु०, बड़ो० । २. विराजितः—अयो० ।

विशालं तस्य भालं सा गजमुक्ताफलाक्षतैः ।
आनर्च सहसोदीतमर्द्धचन्द्रमिवोडुभिः ॥१३४॥
दधिविन्दु प्रविन्यस्य रामस्य भालपट्टके ।
प्रेम्णा नीराजयामास नखादाशिखमुत्सुकाः ॥१३५॥
उच्चैर्निर्मञ्छयाञ्चक्रे दधिदूर्वाक्षतादिकम् ।
मुक्ताफलानि भूरिणि रत्नानि विविधानि च ॥१३६॥
सिद्धार्थान् लवणाक्तांश्च राजिकाः सर्वतो दिशम् ।
आत्मानं चापि सा गोपी निर्मञ्छितवती सुते ॥१३७॥
आधीन् व्याधींश्च तस्याङ्गात् कराभ्यामात्मनि न्यधात् ।
चुचुम्बे वदनं चास्य मुहुः प्रेमपरिप्लुता ॥१३८॥
बह्वमन्यत चात्मानं सर्वत्रैलोक्यतोऽधिकम् ।
अहो भाग्यस्य संपत्तिर्यस्या ईदृग्विधः शिशुः ॥१३९॥
अथो अनिर्विशेषेण लक्ष्मणाद्यनुजत्रयीम् ।
गोपी सौहार्दसंपन्ना नीराजितवती पृथक् ॥१४०॥
अहो एते भ्रातरोऽस्य सखायश्च विशेषतः ।
इति प्रेमवती तेषु नापश्यद्भिन्नया दृशा ॥१४१॥
अलङ्कृत्य ततः पुष्पमालया रामसुन्दरम् ।
अङ्कमारोहयामास तदङ्गस्पर्शनिर्वृता ॥१४२॥
गायन्ती मङ्गलं गोपी गोपीनिवहमध्यगा ।
नीलरत्नसनाथाङ्का प्रविवेशात्ममन्दिरे ॥१४३॥
शिशुभिर्भणितं श्रुत्वा वने वृत्तं यदस्य तत् ।
अत्यर्थचकितस्वान्ता ववन्दे पुरुषं परम् ॥१४४॥
अग्रतो मे शिशुं नित्यमव्याच्छ्रीमधुसूदनः ।
पृष्ठतः पातु सततं भगवान् कैटभद्विषः ॥१४५॥
वामे रक्षतु वाराहो दक्षतो नरकेसरी ।
पुरो राहुशिरच्छेदी वने सिन्धुसुतापतिः ॥१४६॥
जलशायी जले पातु स्थले वैकुण्ठनायकः ।
भुञ्जानं पातु गोविन्दः शयानं केशवोऽवतु ॥१४७॥

गच्छन्तं रक्षताद्विष्णुस्तिष्ठन्तं विष्टरश्रवाः ।
जल्पन्तं वेदकृत् पातु हसन्तं हरिरीश्वरः ॥१४७॥
रुदन्तं शार्ङ्गभृत् पातु पश्यन्तं गरुडध्वजः ।
शृण्वन्तमच्युतः पातु स्पृशन्तं च जनार्दनः ॥१४८॥
जिघ्रन्तं माधवः पातु मनस्यन्तं गदाधरः ।
हृषीकेशः स भगवान् सर्वतः पातु सर्वदा ॥१४९॥
यानि यानि स्वरूपाणि साक्षाद्भगवतो हरेः ।
तानि तान्यभिरक्षन्तु सर्वावस्थासु मे शिशुम् ॥१५०॥
वागीशो वेदविन्नाथो हयग्रीवो महाप्रभुः ।
सर्वमन्त्रपतिर्देवो रक्षत्वेनं सदैव नः ॥१५१॥
इति विन्यस्य तस्याङ्गे रामनामानि गोपिका ।
स्वयं शरणमापेदे साक्षाद्रामं परं हरिम् ॥१५२॥
अथैनं स्नपयामास समुद्वर्त्य विशेषतः ।
सुगन्धिचन्दनमुखैः कस्तूरीकुङ्कुमादिभिः ॥१५३॥
संप्रोञ्छ्य[1] सुकुमाराणि तस्याङ्गानि व्रजेश्वरी ।
कालागुरुभवैर्धूपैर्धूपयामास मूर्द्धजान् ॥१५४॥
पुनश्च समलङ्कृत्य पटभूषाम्बरादिभिः ।
सायमार्तिक्यविधिना चक्रे नीराजनादिकम् ॥१५५॥
अथाहं गोधनैः साकं व्रजं सर्वसुखाम्बुधिम् ।
विपिनान्तादुपावृत्तो वेष्टितो वृद्धबालकैः ॥१५६॥
राक्षसं पक्षिणं चोग्रमुभौ पर्वतविग्रहौ ।
व्यसू निपतितौ भूम्यां मध्येमार्गं न्यरूपयम्[2] ॥१५७॥
आःकिमेतावुभावद्रो वत्सचारणकानने ।
कुतो वात्र महाशैलसंभवो दृष्टपूर्वके ॥१५८॥
इतितर्काकुलो दूरादारात् पुरुषपक्षिणौ ।
व्यसू पर्वतसंकाशौ समुद्वीक्ष्य सुविस्मितः ॥१५९॥

---

१. संप्रोक्ष्य—अयो० । २. न्यरुन्धयम्—रीवाँ ।

केनैतौ निहतौ दिनेऽद्य पुरुषश्रेष्ठेन वीरोत्तमा-
वेको राक्षस एष दृश्यत इतो भूयान् द्वितीयो खगः ।
किं वा प्राथमिकेऽद्य राघवपतेर्गोवत्ससंचारणे
विघ्नं वीक्ष्य विधिर्वधं विहितवान् व्योमस्पृशोरेतयोः ॥१६०॥
इति तर्कयन्नुपगतो व्रजान्तिके पुरमात्मनः सकलसंपदाकुलम् ।
अथ तत्र मां स्वपरगोपदारका जगदुर्द्रुतं समभिसृत्य यूथशः ॥१६१॥
गोप्य ऊचुः
दिष्ट्या ते गोपशार्दूल बालोऽभूत्पञ्चहायनः ।
दिष्ट्या गतोऽद्य विपिनं चक्रे गोवत्सचारणम् ॥१६२॥
पारम्परिकमेतद्वः कुले वृत्तं मनोरमम् ।
तदङ्ग कृतवान् रामो भविष्णुः कुलमङ्गलः ॥१६३॥
अद्य नो दीयतां भूरि मिष्टमन्नं फलैर्युतम् ।
भूषणं रत्नजटितं वस्त्राणि च महोत्सवे ॥१६४॥
पृथक् पृथक् ग्रहिष्यामस्त्वत्तो गोकुलभूपते ।
त्वद्दारेभ्यश्च सततं महोदारेभ्य आत्मना ॥१६५॥
एवमेव वितनोतु बालको धेनुचारणपणेन ते सुखम् ।
वार्द्धके विविधसौख्यसंयुतो मन्दिरे सुचिरमेधतां भवान् ॥१६६॥
एष ते सर्वसौख्यानां दाता पाता व्रजस्य च ।
सर्वदुःखप्रतीकर्ता भर्तासौ भुवनस्य च ॥१६७॥
विहितं चान्यदप्येकमद्यानेन कुतूहलम् ।
यच्छ्रुत्वा विस्मयं चित्ते सर्वेषां व्रजवासिनाम् ॥१६८॥
एकं तावन्महद्रक्षो वत्सवेषधरं गणे ।
समुद्वीक्ष्य स्वयं रामो जघान भुजविक्रमात् ॥१६९॥
श्येनवेषधरश्चैव राक्षसो बलवान् हतः ।
कुर्वन्नपि रणं घोरं रामेणातिबलीयसा ॥१७०॥
अत एष गुप्तबलवीर्यसंपदां निधिरूर्जितस्तव शिशुर्मनोहरः ।
सुचिरं जयत्वखिललोकरञ्जनः कमलाविलासभवनायितव्रजः ॥१७१॥
इति ब्रुवाणा व्रजसुभ्रुवोऽहं फलान्नवस्त्राभरणादिदानैः ।
संतोष्य सम्यग्विससर्ज भूयो माङ्गल्यगाथां बहु गापयित्वा ॥१७२॥

विलोक्य बालं रुचिरायताक्षं गोवत्ससंचारणकर्म दृष्ट्वा ।
हर्षाश्रुवैवश्यधरो भुजाभ्यां स्वाङ्कं समारोप्य तमालिलिङ्ग ॥१७३॥

समाप्य सायं गोदोहं दीपिकाभिः प्रकाशिते ।
विवेश वेश्मनि मुदा रामरत्नविरोचिते ॥१७४॥

सुपक्वानि कुटुम्बिन्या स्वादूनि विविधानि च ।
गोपराजिस्थितोऽन्नानि संप्राश्याहं सुनिर्वृतः ॥१७५॥
रामेण सहितोऽन्नानि भुञ्जानश्चैकभाजने ।
अस्य बालचरित्राणि गोपवृद्धैः कथापयन् ॥१७६॥
चुम्बितास्यः शिशोरस्य ददानः कवलं मुखे ।
आनन्दसागरे मग्नः किंचिन्नाहमचिन्तयम् ॥१७७॥

भोजनस्यावसानेऽहं दत्त्वा ताम्बूलिकां शिशोः ।
स्वयं संप्राप्य च सुखं गतः शयनमन्दिरम् ॥१७८॥
तं तत्र गोदुहां बालाः श्रावयन्त्यः कथाः शुभाः ।
अनयन्नङ्ग यामिन्या एकं यामं कुतूहलैः ॥१७९॥
एकदा तत्र सुमहत्कौतुकं दृष्टमद्भुतम् ।
तदद्य श्रूयतां राजन् कथयामि तवान्तिकम् ॥१८०॥

अचीकथन्नारसिंहीं वार्तामत्यद्भुजां पराम् ।
पुरा हिरण्यकशिपुर्दैत्योऽभूत् कश्यपात्मजः ॥१८१॥
तपसा विधिमाराध्य वरमाप महोर्जितम् ।
न स वध्यो मनुष्येण न चापि पशुना बली ॥१८२॥
नाङ्गणे न गृहे वापि न रात्रौ न च वासरे ।
न भूमौ न दिवा चापि नायुधैर्न जलादिभिः ॥१८३॥

ब्रह्मदत्तवरो दैत्यः समुत्सिक्तो महोर्जितः ।
ब्रह्मादींश्चैव शक्रादीन् स विनिर्जित्य दिग्जये ॥१८४॥
तापयामास सकलं त्रैलोक्यं परवीरहा ।
एकराजोऽभवद्वीरस्त्रिषु लोकेषु दानवः ॥१८५॥
तस्यात्मजोऽभवन्नाम्ना प्रह्लाद इति कीर्तितः ।
शान्तो दान्तो रामभक्तः क्षमावाननसूयकः ॥१८६॥

स पञ्चहायनो बालस्तस्य पित्रा नियोजितः ।
आचार्यशण्डामर्काभ्यां वर्णानां परिपाठने ॥१८७॥
पाठ्यमानोऽप्यसौ बालो बालकेषु पठत्सु च ।
नापठच्छुद्धचित्तत्वादूहूँच्छब्दान् वृथा विदन्[1] ॥१८८॥
सिद्धं बर्णसमाम्नाये रामेत्यक्षरयुग्मकम् ।
पपाठ मुहुरेवायं ताड्यमानोऽपि बालकः ॥१८९॥
तस्य निर्बन्धमालोक्य दैत्याचार्यौ सुहारितौ ।
हिरण्यकशिपौ सर्वं प्राहतुर्विबुधद्विषि ॥१९०॥
शिक्षितोऽपि स तेनासौ करुणात्मा सुरद्विषा ।
नामन्यत वचस्तस्य क्रोधहेतुरभूत्ततः ॥१९१॥
अरेर्नाम गृणातीति स बालं पर्यतर्जयत् ।
निर्बन्धिनं[2] स तं वीक्ष्य वधार्थं सहसोद्यतः ॥१९२॥
गिरेर्निपातितं बालं धरणी पर्यरक्षयत् ।
जले निमज्जितं चैनं वरुणो हरिकिङ्करः ॥१९३॥
अग्नौ दत्तं मुमोचाग्निर्नादहच्छान्तदीधितिः ।
खड्गधाराभवत् कुण्ठा विषं दत्तं सुधाभवत् ॥१९४॥
एवमुर्वरितं बालं स्वयं स कठिनाशयः ।
हन्तुं समुद्यतो दैत्यः खड्गमादाय भीषणम् ॥१९५॥
क्व ते रक्षयिता मन्द यस्य नाम गृणासि वै ।
तं मां निर्दिश तत्साकं त्वाहं छेत्स्यामि तत्क्षणात् ॥१९६॥
जले स्थले दिक्षु दिविस्तम्भेऽत्रास्मिन् स वर्तते ।
इति प्रह्लादवचनात् स्तम्भं कर्तितुमुद्यतः ॥१९७॥
ततः प्रादुरभूत् साक्षान्नारसिंहोऽतिभीषणः ।
ज्वालामालापरीताक्षः प्रज्वलन्निव तेजसा ॥१९८॥
तडिद्भीमजटाजालो ललज्जिह्वाग्र[3]भीषणः ।
पञ्चास्यवदनो भीमः स्फुरद्वज्रनखायुधः ॥१९९॥

---

१. ढूंकां छब्दानथावदत्—अयो०, रीवाँ। २. निबंधनं—अयो० रीवाँ।
३. लिहज्जिह्वाग्र°—रीवाँ, लोलजिह्वा°—अयो०।

कल्पान्तपावकज्वालामालाज्वालातिभीषणः ।
कोटिसूर्यकरालाङ्गस्त्रैलोक्यभयकारकः ॥२००॥

षष्टिवर्षसहस्राणि तेनायुद्धचत् स दानवः ।
खड्गशक्त्यृष्टिपरशुभुशुण्डीपरिघादिभिः ॥२०१॥
सोऽपि चिक्षेप भगवान् दैत्येऽस्त्राणि सुभूरिशः ।
गदाचक्रासिपरशुप्रभृतीनि समंततः ॥२०२॥

विनिर्धुन्वन् जटाजालं त्रिनेत्रो नरकेसरी ।
अथ काले परिप्राप्ते प्रह्लादं सुखयन् स्वयम् ॥२०३॥
बलाद्दैत्येन्द्रमादाय संस्थाप्योरुस्थले पटुः ।
नखवज्रायुधैः सायमध्यास्यालयदेहलीम् ॥२०४॥

अपाटयत्तदुदरं प्रोच्छलद्रुधिरोक्षितः ।
जिह्वाग्रेण लिहन् प्रेम्णा प्रह्लादस्य शिशोः शिरः ॥२०५॥
तत्तेजसा सुभीमेन व्याप्तं त्रैलोक्यमन्तरा ।
नागन्तुं शक्यते देवैस्तुत्यैर्ब्रह्मादिकैरपि ॥२०६॥

अथ लक्ष्मीं पुरोधाय समाजग्मुर्दिवौकसः ।
वीक्ष्य लक्ष्मीः प्रभो रूपमपलायत पितुर्गृहे ॥२०७॥
प्रह्लादमेव त्रिदशाः पुरस्कृत्य ततो ययुः ।
अस्तुवन् विविधैः स्तोत्रैर्मन्युसूक्तादिभिः पृथक् ॥२०८॥

सामगानैश्च विविधैर्दिवि संस्था महर्षयः ।
इत्येवं कीर्तितो नाम्ना नृसिंहो भगवान् हरिः ॥२०९॥
इति मातुर्वचः श्रुत्वा शय्यास्थो रामचन्द्रमाः ।
हुङ्कारमकरोद्राजन् सर्वत्रैलोक्यकम्पनम् ॥२१०॥

अखण्डरवसंभूतवज्रनिष्पेषसंभवः ।
निर्घातनिःस्वनो घोरः कम्पयामास रोदसी ॥२११॥
तेनैव कम्पिताः सद्यः पुरग्रामव्रजाकराः ।
सौधाः पतिष्णवो[1] भूत्वा तत्क्षणात् प्रचकम्पिरे ॥२१२॥

---

१. समूहाः—रीवाँ ।

आःकिमेतदिदं जातमिति चिन्तासमाकुलः ।
अहं तत्रागतो यत्र रामः शेतेऽधितल्पकम् ॥२१३॥
तन्माता तं मुहुर्दृष्ट्वा बभाषे वचनं त्विदम् ।
किमेतद्रामचन्द्र त्वं कृतवान् प्राणजीवनः ॥२१४॥
प्रेतावेशः क्वचिद् भूतो राक्षसावेश एव वा ।
तव हुंकारशब्देन त्रासिताः सकला दिशः ॥२१५॥
शाम्यन्तु पापानि तवाखिलानि शाम्यन्तु घोराणि भयावहानि ।
शाम्यन्तु रक्षांस्यखिलानि सद्यो रक्षा तवास्तां परमस्य पुंसः ॥२१६॥
इति वत सुतमङ्कं सा समारोप्य[1] गोपी
कलयति शुभरक्षां दत्तरक्षोघ्नमन्त्रा ।
वितरति च बिभीता गोशतं यावदेषा
सरभसमुपयातस्तावदेवाहमस्याः ॥२१७॥
यथावृत्तं सप्रसङ्गमाश्रुत्य चकितोऽभवम् ।
सर्वमाहात्म्यविद्वानप्यमुहं भाव[2]मार्गणैः ॥२१८॥
एवमन्येद्युरप्येषा विनिद्रं वीक्ष्य बालकम् ।
श्रावयन्ती कृष्णवृत्तं कथयामास गोपिका ॥२१९॥
व्रजे च मथुरायां च द्वारवत्यां च केशवः ।
चकार यानि कर्माणि तानि चाश्रावयत् प्रसूः ॥२२०॥
व्रजसंबन्धिवार्तासु दीर्घं निःश्वस्य राघवः ।
मुञ्चन्नश्रूणि बहुशो ललाप शृणु तद्वचः ॥२२१॥
राधे[3] हन्तवसन्त एष समयो मा धेहि मानं मना-
गेतं चेतसि यस्य यस्य चरणद्वन्द्वानतं माधवम् ॥
द्रागुत्थापय कान्तमातुरममुं तापं समुत्सारय ।
प्रेम स्रोतसि मज्ज हेममणिना नीलेन संगच्छताम् ॥२२२॥
हे सौन्दर्यतरङ्गिणि प्रणयिनि प्राणेश्वरि प्राणदे
कन्दर्पाशुगकालकूटहरिणि प्रोद्यत्सुधाकालिके ।

---

१. शीघ्रमारोप्य—अयो०, सायमा°—बड़ो० । २. तद्भाव°—रीवाँ ।
३. सीते—अयो०, मथु०, बड़ो० ।

कर्पूरद्रवविन्दुशीलिनि चिरं मुक्त्या दृशोर्दग्धयो-
र्मानं माकुरु मानिनि प्रतिपदं दोरन्तरे स्थीयताम् ॥२२३॥
श्लाघ्यं जन्म तव प्रसादसमये पीयूषवर्षावहे
धिक् धिक् चैतदतीव तावकमनो माने विषासारिणि ।
इत्यालोच्य चिरं मनः करुणया साम्मुख्यमानम्यताम्
वैमुख्यं विजहीहि मय्यतितरां प्राणप्रिये जानकि ॥२२४॥
त्वत्कुण्डं तव विप्रयोगविपदि स्वैरं वगाह्याप्रिये
किंचित्तापभरं तनोः प्रशमयाम्यङ्गं प्रभाश्रोमयम् ।
श्रीखण्डानिलमागतं तव तनुस्पर्शभ्रमाद्राधिके
सेवेऽहं विरहातुरोऽपि नितरां चक्रे वरालिङ्गनम् ॥२२५॥
इति निःश्वस्य निःश्वस्य भाष्यमाणो मदाननम् ।
विलोक्य लज्जया सद्यो निजाननमगोपयत् ॥२२६॥
कथानिकाभिर्बह्वीभिर्नीते प्रथमयामके ।
सुप्तं प्राणधनं वीक्ष्य सुखं सुष्वाप तत्प्रसूः ॥२२७॥
ब्रह्मलोकमुपैत्यद्धा प्रसुप्तः सकलो व्रजः ।
यतो वाचो निवर्तन्ते अप्राप्य मनसा सह ॥२२८॥
आनन्दं ब्रह्मणो लोके अनुभूय परात्परम् ।
ततः क्षणाद्विनिर्धूय प्रातर्जागर्ति वै व्रजः ॥२२९॥
दिने तु भवति स्पष्टं प्रेमानन्दकदम्बकम् ।
उभयोस्तारतम्यज्ञा व्रजवासिन एव हि ॥२३०॥
प्रातः काले व्रजस्यास्य शोभा किं वर्ण्यतां मया ।
यत्र राजन् नीरनिधेरप्याधिक्यं प्रतीयते ॥२३१॥
दधिमन्थ[1]रवोद्घोषी निनादचय[2]वीचिभृत् ।
वृषरत्नाङ्गनारत्न[3]गोपरत्नविराजितः ॥२३२॥
उदारगोपशार्दूलकल्पवृक्षविभूषितः ।
श्रीरामचन्द्रसुयशश्चन्द्रिकास्पर्शवर्द्धितः ॥२३३॥

---

१. °मन्थन°—अयो० । २. नैचिकीचय°—मथु० बड़ो० । "नैचिकी–उत्तमा गौः" टि०—मथु०, बड़ो० । ३. विचरन्नङ्गनारत्न°—रीवाँ ।

व्रजोदधिर्महीपाल सेवनीयः सदा जनैः ।
प्रेमानन्दनिदानैकभावपीयूषलब्धये ॥२३४॥

अथ नित्यसखायोऽस्य गोपतीनां कुमारकाः ।
भ्रातरो लक्ष्मणाद्याश्च प्रातः प्रेम्णोपयान्त्यमुम् ॥२३५॥
सर्वान् समागतान् वीक्ष्य तन्माता मत्कुटुम्बिनी ।
नानामाङ्गल्यवचनैः प्रबोधयति सादरम् ॥२३६॥

प्रबुद्धो मुखचन्द्रेण मञ्जुलस्मितशालिना ।
आनन्दयति सौम्येन जननीमङ्गलालयः ॥२३७॥
मङ्गलार्तिक्यविधिना नीराज्य जननी सुतम् ।
परमानन्दपाथोधिं हृदयेन विगाहते ॥२३८॥

अहं च तन्मधुरस्मिताञ्चितं[1] लुलल्ललितलसद्गुडालकम् ।
दृशा मुखं किमपि निपीय कान्तिमन्[2]न तादृशीं मुदमितरत्र संलभे ॥२३९॥
अधित्रियामास्वपि निद्रितोऽवशोऽनुभूय तद्ब्रह्मसुखं परात्परम् ।
श्रीरामचन्द्राननचन्द्रचन्द्रिकाचमत्कृतोऽहं सपदि व्यजोगणम् ॥२४०॥

गोपी प्रोद्वर्त्य रामं मृगजमलयजोन्मिश्र[3]काश्मीरकल्कैः
श्रीखण्डाक्तैः सुगन्धैः स्नपयति सलिलैः सारवैः कोटिसंख्यैः ॥
अङ्गानि प्रोक्ष्य पङ्केरुहदलसुकुमाराणि भूषाविधानैः ।
प्रत्यङ्गं मञ्जु भृङ्गारयति ननु यथा भाति कुन्दाननेन्दुः ॥२४१॥
नेत्रेऽनङ्गशरोपमे मृगदृशां दत्ताञ्जने मञ्जुले ।
कर्णौ कल्पितरत्नचारुमकराकारोल्लसत्कुण्डलौ[4] ।
[5]मूर्द्धाभ्यर्हित बर्हिबर्हविहित[6]श्रीमत्किरीटाञ्चितो
नासाग्रं मधुरौष्ठचुम्बिमणिमन्मुक्तालकं श्रीमुखम्[5] ॥२४२॥
भालं कस्तूरिकया तिलकितमुदयन्मञ्जुमृगाङ्कार्धनिभं
ग्रीवा ग्रैवेयकप्रस्फुरित[7] मणिगणालङ्कृतकम्बुच्छविभृत्[8] ॥

---

१. स्मिताननं—रीवाँ। २. मात्रिकां—रीवाँ। ३. मलययोर्मिश्र—अयो०। ४. मकराकारस्फुरत्°—अयो०, मथु०, बड़ो०! ५-५. नास्ति—रीवाँ। ६. वर्हि बृंहित—अयो०। ७. विस्फुरित—मथु०, बड़ो०। ८—८लंकृतं कंबुकंठम्—रीवाँ।

गुञ्जापुञ्जाढ्यमुरो[1] मणिसरभरितं मौक्तिकमाला मिलितं[2]
प्रत्यङ्गं साधुजयत्यनवधि[3]मधुरिम्णा कलितो वेत्रकरः[4] ॥२४३॥
अथ स्वस्वगृहेभ्यस्तं द्रष्टुं गोपालसुभ्रुवः ।
सद्भोजनान्युपादाय समायान्ति मदालयम्[5] ॥२४४॥
स्वाद्यं हैयङ्गवीनं बहुतरसितयाक्तं स्फुटारुण्यमुष्णं
कृष्णाया गोः सुमिष्टं लघुसुरभि पयोऽग्नौ समावर्ततं यत् ।
तस्यैवात्यर्थरुच्यं दधिमधुरतरं पिच्छिलं दुग्धसारम् ।
पक्वान्नान्यद्भुतानि प्रसृमरघुसृणामोदकर्पूरभाञ्जि ॥२४५॥
अनेकरत्नप्रत्युप्तकाञ्चनामत्रमध्यगम् ।
भूयः समुपकल्प्यान्नान्याययुर्व्रजगोपिकाः ॥२४६॥
स तासां चित्तभावज्ञः प्रणयी रामवल्लभः ।
तदन्नमूरीकृतवान् कटाक्षाक्षेपपण्डितः ॥२४७॥
मुग्धं मातृकरोपनीतमतुलं हैयङ्गवीनाञ्चितम्
स्वाद्यं चारु चतुर्विधं तदमलं प्राश्यान्नमात्मीयकैः ।
प्रातर्गोष्ठसहस्रसंजनितगोदोहावसानागतै-
र्गोपालेरभिवन्द्यमानचरणाम्भोजो मदङ्के स्थितः ॥२४८॥
किंचित्संचरणे नभस्तलतटीमारुढमात्रे रवौ ।
गोवत्सान् पुरतो विधाय विपिनान्यापूर्य शृङ्गं ययौ ।
उन्मुक्ताः पुरतो निधाय गणशो गाः कोटिशः कोटिशो
गोष्ठेभ्यः प्रतियातवत्सु मयकादिष्टेषु गोपेष्वपि[6] ॥२४९॥
वालानां शृङ्ग संनादा रामशृङ्गध्वनेन तु ।
तत्क्षणे लक्ष्मणादीनामाविरासुः समंततः ॥२५०॥
गोप्यः शृङ्गरवं श्रुत्वा भवनेभ्यो विनिर्ययुः ।
अलभ्यदर्शनं देवैर्द्रष्टुं रामं समुत्सुकाः ॥२५१॥
अग्रे वत्सान् प्रकृतिसुभगान् यूथशः कल्पयित्वा
पश्चात्तेषां धृतखुररजा[7] गोदुहां बालसङ्घैः ॥

---

१. °ढ्यवक्षो°—रीवाँ। २. °मालाभिरामं—रीवाँ। ३. प्रत्यंगं तस्य-साधूल्लसति—रीवाँ। ४. गुंफितो वेत्रहस्तः—रीवाँ। ५. तदालयं—रीवाँ। ६. °ष्वयं—मथु०, बड़ो०। ७. °पुरजा—अयो०, मथु०, बड़ो०।

क्रीडन् गायन् कमलनयनो वादयन् चारुशृङ्गं
भूषारत्नच्छुरितवपुषा भाति भाग्यैर्व्रजेन्दुः ॥२५२॥
यैर्दृष्टो रामचन्द्रः समयमनुसृतो धेनुवत्सौघचारं
भाग्यस्तोमप्रवृद्धैर्मधुरिमहृदयावेदिभिर्दृक्चकोरैः ॥
तेषां सज्जन्मभाजां प्रतिकरणमुपाविश्य दत्तस्वरूपाः
देवाः किं नो पिबन्ति त्रिभुवनजनतादुर्लभं कान्तिपूरम् ॥२५३॥
प्रसार्य नवशाद्वलेष्वमितधेनुवत्सव्रजं
स्वयं समवयोऽञ्चितैश्चपलगोपबालैर्युतः ॥
प्रतिद्रुमलतावनं प्रतिसरित्तटं संगतः
स्वभावमधुराकृतिः किमपि केलिभिः क्रीडति ॥२५४॥
अत्र श्रीरामचन्द्रो नृपतिकुलमणे केकिरावानुकारी[1]
प्राप्ताः कामेन मत्ताः सुखयति मुदिरश्रीमनोज्ञो[2] मयूरीः ।
अत्रानूकृत्य कीशान् प्रतितरुविटपं कूर्दमानः कुमारः
साकं गोपालबालैर्विहरति नितरां कल्पकेलीकलाढ्यः ॥२५५॥
अत्र पुंस्कोकिलध्वानमनुकृत्य व्रजाधिपः ।
संवर्द्धयन्नुत्कलिकाः[3] कोकिलानां प्रकूजति ॥२५६॥
अत्रानुकृत्य प्रचलन् राजहंसकदम्बकम् ।
हंसीनां मोहयन् चित्तं क्रीडते रामचन्द्रमाः ॥२५७॥
अत्र केशरिणाविष्ट इव संदर्शयन् गतिम् ।
बभूव केकियूथानां पलायननिमित्तताम् ॥२५८॥
अत्रैकसार्थकलितः कलयन् करतालिकाः ।
सिंहान्निर्गमयामास रत्नसानुदरीगृहात् ॥२५९॥
अत्र श्रीविग्रहे मेघे श्लायतोऽक्षि[4] चकोरकान् ।
मुखशारदचन्द्रांशुपातैरानन्दयत् स्वयम् ॥२६०॥
अत्र वक्त्रेन्दुबिम्बेन ताम्यतोश्चक्रवाकिकाः ।
ग्रैवेयकमहारत्नरुचा मुक्तशुचोऽकरोत् ॥२६१॥

---

१. कोकिलावाक्प्रकारी—रीवाँ। २. वाङ्मनोज्ञो—रीवाँ। ३. वर्द्धयन् प्रेमकलिकाः—अयो०, रीवाँ। ४. श्लाघ्यतोऽपि—रीवाँ।

अत्र दूतीगणं व्यग्रं प्राप्तं व्रजपुरात् पुरा ।
मुनिभिस्तोषयामास शश्वद्विरहभञ्जनम् ॥२६२॥
अग्रतो वत्सचारेषु व्याघ्ररूपिणमागतम् ।
अमारयत् स्वयं रामस्तीक्ष्णदंष्ट्रं महासुरम् ॥२६३॥
अत्र कौतूहली रामो दृष्ट्वाजगरमाननम् ।
परीभ्रान्त्या प्रविष्टान् स्वान् प्रवृद्धाङ्गो व्यपाटयत् ॥२६४॥
अत्र वत्सहरं रामो विधिं लोकेशमानिनम् ।
प्रदर्श्य नित्यां लीलां स्वां वीतमानं चकार ह ॥२६५॥
एतत्स्थानेषु[1] नृपते कच्चिच्चेतः प्रसीदति ।
कच्चिद्वानन्यविषया जायते तावकी मतिः ॥२६६॥
इति प्रतिदिनं दधत्सुरभिवत्सचारक्रियां
दिनस्य ननु तुर्यके प्रहर आर्तिहृद्राघवः ।
विहाय वनगह्वरं व्रजपुराभिमुख्यं[2] भजन् ।
स्वयूथपरिवेष्टितो जयति दिव्यलीलानिधिः ॥२७६॥

ब्रह्मोवाच

वत्सचारणवेशेषु नृपं संतोष्य गोपतिः ।
देशान्तरान् दर्शयिष्यन् निनाय तमितोऽन्यतः ॥२६८॥
इमामानन्दाढ्यां दशरथनृपाय प्रगदितां
स्वयं श्रीगोपालव्रजनृपतिना प्रीतमनसा ।
भुशुण्ड प्रेमाढ्यां द्विजवर सदा योऽत्र शृणुया-
ल्लभेद्रामे भक्तिं स इह खलु वश्यत्वजनिकाम् ॥२६९॥
सर्वा रसमयी लीला प्रभोस्तस्य महात्मनः ।
गोपबालतया त्वेषा सद्यः संसारबन्धनुत् ॥२७०॥
तामसा मूढहृदया ग्रामवृत्तिरताः सदा ।
ईदृग्विधा अपि जना यत्राभीराः समुद्धृताः ॥२७१॥
तादृशीं तस्य लीलां तामपहायातिरोचिकाम् ।
अरोचकेन संपन्नः किमन्यच्छ्रोतुमिच्छसि ॥२७२॥

---

१. एतेषु स्था°—अयो०, मथु०, बड़ो० । २. व्रजं सुरभि मुख्यं - रीवाँ ।

एषा रघुपतेर्लीला देवेभ्योऽपि सुगोपिता ।
स्थापनीया सदा चित्ते सर्वदा फलरूपिणी ॥२७३॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दशरथतीर्थयात्रायां त्रयोदशाधिकशततमोऽध्यायः ॥११३॥

चतुर्दशाधिकशततमोऽध्यायः

ब्रह्मोवाच

अन्यतस्तं सुसंनीय राजानं प्रेमविह्वलम् ।
उवाच सुखितो गोपो दर्शयिष्यन् प्रभोः कथाम् ॥ १ ॥

सुखित उवाच

सौगन्धिकगिरिर्नाम दृश्यतां नृपसत्तम ।
पर्वतोऽयं महान् राजन् प्रमोदवनभूषणम् ॥ २ ॥
इह देवाः सगन्धर्वा गायन्ति विमलं यशः ।
रामस्यैवाभिरामस्य कोटिकामसुखाकृतेः ॥ ३ ॥
स्नात्वा शुचिमना राममिह भावस्व भूपते ।
पादाब्जधूलिसंपर्कात् कोटितीर्थत्वमागते ॥ ४ ॥
अस्य पर्यन्तभूमीषु नवशाद्वलसंपदा ।
शोभितासु स्वयं रामो गाश्चारयति भूपते ॥ ५ ॥
जगन्मङ्गलमेतद्धि वृत्तं रामस्य संततम् ।
भाव्यते सत्परैः सद्भिर्येन चित्तस्य निर्वृतिः ॥ ६ ॥
चतुर्वेदऋचो ह्येताः सर्वकामदुघा अपि ।
आसुरं भावमाश्रित्य कदर्थ्यन्ते खलैर्जनैः ॥ ७ ॥
तासां रामः स्वयं नेता परमैश्वर्यदण्डभृत् ।
अधिकारिविभेदेन दोग्धि कामान् सतो बहून् ॥ ८ ॥

कर्म ज्ञानं तथोपास्ति[1]र्भक्तिरेतच्चतुष्टयम् ।
श्रुतिकामदुघां दुग्धं रामः पाययते निजान् ॥ ९ ॥
एकैकं स्वैकान्तवशात्प्रत्येकं फलति ध्रुवम् ।
अनैकान्त्यात्परस्याङ्गं भूत्वा च फलति ध्रुवम् ॥१०॥
प्रमोदवनमेतत्तु भक्तिरूपं समन्ततः ।
तस्य भावतृणं प्राश्य[2] प्रेमानन्दफलैव गौः[3] ॥११॥
भावघासाशना नित्यं रसपानीयपानकृत् ।
श्रुतिकामदुघां पङ्क्तिर्भक्तानां स्वेष्टदोहदा ॥१२॥
गोचारणक्रियातत्त्वमिदं ते कथितं मया ।
कीर्तितं श्रुतितात्पर्यविद्भिः सद्भिः सनातनैः ॥१३॥
सौगन्धिकगिरे राजन् परितो विततान्तरम् ।
सौगन्धिकवनं नाम वनानामुत्तमं वनम् ॥१४॥
रामस्यातिप्रियं धाम यत्रातिविमलं सरः ।
सौगन्धिकवनोल्लासरमणीयसुधाजलम् ॥१५॥
तत्र स्नाहि महीपाल दीयतां[4] धेनुराशयः ।
श्रीराममनसस्तुष्ट्यै तीर्थपूर्णफलाप्तये ॥१६॥

ब्रह्मोवाच

तदग्रे चान्यतो नीत्वा राजानं गोपभूपतिः ।
उवाच वदतां श्रेष्ठो मोहयन् कलया गिरा ॥१७॥

सुखित उवाच

अयं रत्नाद्रिरुद्भाति श्रीरामचन्द्रविग्रहः ।
धनुर्वाणाङ्कितततनुर्धरणीतलपावनः ॥१८॥
अष्टयोजनसोच्छ्रायश्चतुर्योजलम्बनः ।
योजनद्वयदैर्घ्येण सदामण्डितविग्रहः ॥१९॥
अनेकरत्नशिखरप्रोद्भासितदिगन्तरः ।
सूर्यचन्द्रप्रतीकाशो दिवारात्रं परिज्वलन् ॥२०॥

---

१. कर्मज्ञानतपोयोगै—रीवाँ । २. प्राप्य—अयो० । ३. फलोपत्रम्—रीवाँ । ४. धीयतां—अयो० ।

अनेकौषधिसंदोहसंसेवितदरीगृहः ।
गुप्तमन्त्रसाधकैश्च मुनिभिः सुनिषेवितः ॥२१॥
अनेकाकरसंभूतिरनेकवनमण्डितः ।
अनेकद्रुमगुल्मौघलताजालाभिमण्डितः ॥२२॥

इह सरांसि तथा सरितोऽपि वै कति न सन्ति महीपतिसत्तम ।
स्नपयतो सलिलेषु तनुं निजां हृदयशुद्धिजमोदभराप्तये ॥२३॥

सहजानन्दिनीकुण्डे रामकुण्डे मनोहरे ।
अनेकमुनिसंसेव्ये स्नाहि राजर्षिसत्तम ॥२४॥
यत्र स्नानाय मुनयो देवाश्चेन्द्रादयो नृप[1] ।
वाञ्छन्ति विविधैः पुण्यैः प्राक्तनैः सुतपोभरैः ॥२५॥
किं बहूक्तेन राजेन्द्र स्नात्वा चोभयकुण्डयोः ।
मुक्तिलाभमपि प्राज्ञास्तृणवन्मन्यते हृदि ॥२६॥
परब्रह्मणि यत्प्रेम तद्वशीकारकारकम् ।
तदाशु लभते मर्त्यो नात्र कार्या विचारणा ॥२७॥
एकदाहमिह स्नात्वा सहजाकुण्डपार्श्वसि ।
यदपश्यं नृपश्रेष्ठ तन्न वाच्यं कथंचन ॥२८॥
प्रश्रयावनतं तु त्वां दृष्ट्वात्युत्कण्ठिताशयः ।
कथयामि स्वानुभूतमत्यलौकिकवृत्तकम् ॥२९॥
स्नातमात्रस्त्वहं राजन् दिव्यं लोकं ददर्श ह ।
अतीतं लोकसंस्थायाः कालमायाद्यगोचरम् ॥३०॥
रत्नोष्णहेमप्राकारप्रविस्तृतसुवेष्टनम् ।
कल्लोलिनीसुकल्लोलगम्भीरपरिखाञ्चितम् ॥३१॥
पारिजातवनश्रेणीपरितो भूषितान्तरम् ।
दिव्यगन्धवहोद्वातपरिपावितमद्भुतम् ॥३२॥
सूर्यकोटिस्फुरत्कान्तिदिव्यरत्नशिलाञ्चितम् ।
चन्द्रकोटिशतज्योत्स्नासमुद्भासितमुच्चकैः ॥३३॥

---

१. ऽपि च—रीवाँ ।

अत्यर्थमधुरोदीर्णदिव्यवस्तुविभूषितम् ।
विमानशतसंकीर्णदिव्यस्त्रीनिकराञ्चितम् ॥३४॥
अनङ्गवर्द्धनात्यर्थरुच्यस्त्रीगानमञ्जुलम् ।
सर्वतः सर्वदोत्साहमाङ्गल्यगुणभूषितम् ॥३५॥
परमानन्द संदोहव्याप्तमत्यर्थसुन्दरम् ।
चिदानन्दमयालोकप्रकाशितदिगन्तरम् ॥३६॥
तत्रानन्दमयं दिव्यं विपिनं तस्य मध्यगम् ।
महाकुञ्जमयं वेश्मरत्नमञ्जरितैर्द्रुमैः ॥३७॥
समन्ततः परिव्याप्तं लतामण्डपमण्डितम् ।
सप्तकक्षाभिरुचिरं महद्गह्वरमध्यगम् ॥३८॥
तत्र प्रथमकक्षायां गोपाला वीक्षिता मया ।
द्वितीयकक्षामध्यस्था वेत्रहस्ता मृगीदृशः ॥३९॥
तृतीयकक्षामध्ये च ता एव हरिणेक्षणाः ।
एवं यावन्निजगृहं सर्वकक्षासु संस्थिताः ॥४०॥
मृगीदृशश्चन्द्रवक्त्राः कनकोज्ज्वलविग्रहाः ।
साक्षात्तडिल्लताकाराः सर्वलावण्यसुश्रियः ॥४१॥
कन्दर्पकोदण्डनिभभ्रूभङ्गरुचिभूषिताः ।
अनेकभावपाथोधिवीचिविस्तारवीक्षिताः ॥४२॥
चन्द्रिकाचयसश्रीकमनोज्ञविशदस्मितैः ।
कर्पूरनिकरोद्गारसौरभ्यगुणभूषिताः ॥४३॥
कस्तूरीपत्रमकरीसुकपोलयुगश्रियः ।
अनेकरत्नसंदोहजडिताङ्गगणश्रियः ॥४४॥
कामकान्ताचमत्कारन्यक्कार[1]कररोचिषः ।
साक्षाल्लक्ष्म्य इवामन्दसौन्दर्यनिवहाञ्चिताः ॥४५॥
ततो महारत्नगृहं महासौन्दर्यभूषितम् ।
रत्नभित्तिसमुत्थांशुमञ्जरीचयमण्डितम् ॥४६॥
शृङ्गारसंपत्सदनं सदारमनिकेतम् ।
अनन्तमानन्दकरं परमानन्दमन्दिरम् ॥४७॥

---

१. °निष्कार°—अयो०। °दिक्कार°—मधु०, बड़ो०।

लोकोत्तरगुणाक्रान्तं कान्तिसन्दोहविस्तरम् ।
पुष्पतोरणसंभ्रान्तगुञ्जद्भ्रमरसंभ्रमम् ॥४८॥
कोकिलाकाकलीरम्यकान्तासङ्गीतसंगतम् ।
रणद्वीणास्वरोच्छूनमूर्च्छनानादनादितम् ॥४९॥
तत्रेन्दुबिम्बोज्ज्वलमञ्जुमण्डपे महागणिस्तम्भसहस्रमण्डिते ।
प्रोद्भासि चिन्तामणिवृन्दनिर्मिते सिंहासनं हेममयं ददर्श ह ॥५०॥
तत्र श्रीसहजारामयुगलं भासते रहः ।
अन्योन्यदर्शनानन्दनिर्निमेषविलोचनम् ॥५१॥
अन्योन्यकान्तिपटलीविलिप्तान्योन्यविग्रहम् ।
अन्योन्यस्मितमाधुर्यसुधापानपरायणम् ॥५२॥
अन्योन्यगुणसंदोहकीर्तनासक्तमानसम् ।
अन्योन्यदत्ताम्बूलवीटिकारञ्जिताधरम् ॥५३॥
स्वरकेलीविनोदेन समुद्दीपितमन्मथम् ।
अन्योन्यविग्रहादर्शबिम्बितान्योन्यविग्रहम् ॥५४॥
अन्योन्यभूषणक्षेपचातुर्यकृतवर्णनम् ।
अन्योन्यविमलश्लोकभाषणासक्तिरञ्जितम् ॥५५॥
मणिदिव्यमहारत्नस्तम्भकोत्तंसभूषितम् ।
गुञ्जाफलमहामुक्ताफलहारमनोहरम् ॥५६॥
तडिन्नवघनाकारपीतनीलपटावृतम् ।
रत्नकुण्डलताटङ्ककर्णभूषणभूषितम् ॥५७॥
श्रीवत्साङ्कमहोत्तुङ्गस्तनवक्षस्थलप्रभम् ।
महार्हरत्नकटकवलयश्रीप्रकोष्ठकम् ॥५८॥
सर्वाङ्गभूषाविन्याससमुद्दीप्तशुभाकृतिः ।
स्फुरत्तारुण्यकैशोरवयोऽवस्थाविजृम्भितम् ॥५९॥
कोटिसूर्यशशिद्योतिपादाब्जनखरोचितम् ।
प्रावृषेण्यघनश्रेणीविद्युद्वल्लीचयप्रभम् ॥६०॥
कन्दर्पकोटिलावण्यरतिकोटिप्रभाभरम् ।
तमालविटपालम्बिहेमवल्लीमनोहरम् ॥६१॥

चित्राविचित्रा[1] चेटीभ्यां वामदक्षिणपार्श्वयोः ।
दिव्यचामरयुग्मेन वीज्यमानं दिवानिशम् ॥६२॥
अन्याभिश्चालिभिर्दिव्यनानोपायनपाणिभिः ।
मुखचन्द्रचकोरीभिः समन्तात् परिवारितम् ॥६३॥
कलाचन्द्रकलाभ्यां च सिंहासनवरादधः ।
महार्हे स्फाटिके पीठे संवाहितपदाम्बुजम् ॥६४॥
रसिकासुरसाभ्यां च विधृते दर्पणद्वये ।
संवीक्ष्यमाणमनिशं निर्मलां वदनश्रियम् ॥६५॥
संभावितप्रभावं च सहसाम्राज्यसंपदा ।
कोटिब्रह्माण्डजनकमहापुरुषपौरुषम् ॥६६॥
दाम्पत्यरसपाथोधिसमास्वादनपण्डितम् ।
दिव्यभोगकलादक्षमक्षीणगुणवैभवम् ॥६७॥
इति सप्तमकक्षास्थैः सुरैर्ब्रह्मशिवादिभिः ।
अनेकसूक्तिसंदोहमुखरीकृतदिङ्मुखैः ॥६८॥
चातुर्वेद्योपनिषदां सूक्तिसंतानपल्लवैः ।
समंततः स्तूयमानं प्रसादलवलब्धये ॥६९॥
तैरेव प्रहितैः किंचिद्विज्ञप्तिविनिवेदनैः ।
महितासु हितालिभ्यामानीतैर्भृत्यपत्रकैः ॥७०॥
वाचितैः सहसाज्ञातकोटिब्रह्माण्डवृत्तकम् ।
ततः पुरुषधौरेयं प्रत्याज्ञावाक्यकारकम् ॥७१॥
कोटिब्रह्माण्डनाथानां नन्दनोक्तीरनुक्षणम् ।
ऊर्मिला जटिला प्रोक्ता गृहीत्वा सस्मिताननम् ॥७२॥
कोटिब्रह्माण्डजननं कोटिब्रह्माण्डसंस्थितम् ।
कोटिब्रह्माण्डनाशं च कोटिब्रह्महरीश्वरैः ॥७३॥
पण्डिता कोविदाभ्यां च सखीभ्यां सकराञ्जलिम् ।
निवेदितमुपश्रुत्य विलोकितपरस्परम् ॥७४॥

---

१. चित्रविचित्रा—मथु०, बड़ो० । चित्रं विचित्र—अयो० ।

श्रिया पुष्ट्या सरस्वत्या कान्त्या कीर्त्या तथैव च ।
तुष्ट्येलयोर्जया चापि विद्ययाऽविद्यया तथा ॥७५॥

शक्त्या[1] च मायया नित्यं समुपासितदृग्बलम् ।
कटाक्षवीचिसंसिक्तचैतन्यपरमामृतम् ॥७६॥
स्त्रीवेशयित्वा चात्मानं निगमैः समुपागतैः ।
सुदूरस्थ[2]सखीवृन्दे मिलित्वा दृष्टमद्भुतम् ॥७७॥
धीरोद्धतगुणग्रामगरिमाञ्चितविग्रहम् ।
तथैव धीरललितगुणग्रामसुखावहम् ॥७८॥
धीरोद्धतगुणागारविशिष्टतरवैभवम् ।
धीरप्रशान्तगुणकं योगिभिर्हृदि शोलितम् ॥७९॥
अवीक्षितानादितहीमायादासीविभावितम् ।
कदा मयि प्रसन्नः स्यात् प्रभुरित्यवलोकितम् ॥८०॥
अनन्तगुणमाहात्म्यमनन्तश्रीभरान्वितम् ।
अनन्तकीर्तिकलितमनन्तैश्वर्यसंयुतम् ॥८१॥
अनन्तोदारचरितमनन्तभवतारणम् ।
अनन्तश्रुतिसंगीतमनन्तज्ञानगह्वरम् ॥८२॥
ईदृशं सहजारामयुगलं वीक्ष्य मज्जने ।
तत्क्षणान्मूर्च्छितो भूत्वा जनैस्तल्पे निपातितः ॥८३॥
अहं तु तत्रैवागच्छं यत्र ध्यानं प्रवर्त्तितम् ।
सप्तमद्वारकक्षायां मूर्तिमत्या प्रवेशितः ॥८४॥
महामाणिक्यभवने गत्वा वासं सुविस्मितः ।
वन्दनं कारितो दूरात्तातः स्थानानि दृष्टवान् ॥८५॥
रासमण्डलमूर्जस्वत्कोटिसूर्यसमप्रभम् ।
क्रीडतः सहजारामौ यत्र गोपीकदम्बकैः ॥८६॥
शृङ्गारमण्डपं भास्वद् गुञ्जागारस्य मध्यतः ।
विभूष्येते सखीवृन्दैर्यत्र तौ रत्नभूषणैः ॥८७॥

---

१. सत्या—अयो०, रीवाँ। २. सद्वरस्थ°—रीवाँ।

विशालमण्डपं श्रेष्ठं दिव्यं रत्नविनिर्मितम् ।
यत्र तौ रहसि स्थित्वा विलासं कुरुते भृशम् ॥८८॥
शय्यामण्डपमुद्दीप्तदीपिकाशतभासुरम् ।
सुरतान्तविनिद्राणौ यत्रतावालिवीजितौ ॥८९॥
सुगन्धिपवनोद्धातं भाति भोजनमण्डपम् ।
यत्र तौ किल भुञ्जाते स्वाद्वन्नं तच्चतुर्विधम् ॥९०॥
केलीमण्डपमुद्भाति कोटिसूर्येन्दुसन्निभम् ।
आत्मानं पणयित्वा तौ यत्र द्यूतेन खेलतः ॥९१॥
अभ्यङ्गमण्डपं भाति सौरभोद्गारसौभगम् ।
अभ्यज्येते सखीभिस्तौ यत्र स्नेहैः सुगन्धिभिः ॥९२॥
संस्नानमण्डपं भास्वत्कोटिरत्नमरीचिभिः ।
यत्र तौ स्नपयन्त्याल्यो गङ्गाद्यास्तीर्थशक्तयः ॥९३॥
धूपमण्डपमुद्भाति धूपसौरभमण्डितम् ।
तौ मुक्तचिकुरौ यस्मिन् धूपयन्ति सखीजनाः ॥९४॥
वसन्तमण्डपं भाति यत्र स्थित्वा प्रियौ च तौ ।
पुरस्तात्पश्यतो हेमपुष्पसर्षपकाननम् ॥९५॥
ग्रीष्ममण्डपमुद्भाति हिमधामसुशीतलम् ।
अनेकजलयन्त्रौघैः सिच्यमानं समन्ततः ॥९६॥
वर्षामण्डपमुद्भाति कदम्बतरुमध्यगम् ।
यत्र स्थित्वा विलोक्यन्ते बलाकिन्यो घनालयः ॥९७॥
शरन्मण्डपमुद्भाति मल्लीकाननमध्यगम् ।
महाजलाशयोत्फुल्लकुमुदाम्भोजमध्यगम् ॥९८॥
चन्द्रज्योत्स्नाचमत्कारविपुलाङ्गणभासुरम् ।
चकोरीमयनिक्वाणजाग्रत्पञ्चाशुगोन्मदम् ॥९९॥
फुल्लसप्तच्छदामोदिनातिशीतोष्णमञ्जुलम् ।
मल्लिकाकुसुमामोदतरङ्गितसमीरणम् ॥१००॥
हेमन्तमण्डपं भाति कुञ्जगह्वरमध्यगम् ।
हसन्तीभिर्हसदिव निर्धूमाङ्गारकान्तिभिः ॥१०१॥

कर्पूरदीपिकोद्भ्रान्तं तूलगर्भपटावृतम् ।
रंगशय्यामनोहारिनिरुद्धपवनागमम् ॥१०२॥
वातायनसुसंलग्नशतखण्डमनोहरम् ।
अन्तरावर्तगम्भीरवीणामुरजनिःस्वनम् ॥१०३॥
कुन्दकाननमध्यस्थं भाते शिशिरमण्डपम् ।
तैलसौरभसंमिश्रं पुष्पसारोत्थसौरभम् ॥१०४॥
वनानि द्वादशेमानि तत्र दृष्टानि भूपते ।
गुञ्जद्भ्रमरपुष्टानि नादितानि च कोकिलैः ॥१०५॥
शुकाङ्गनासमुद्भूतसहजारामनामभिः ।
सर्वतोमुखरीभूतदिग्दलानि दिवानिशम् ॥१०६॥
वसन्तलक्ष्मीजुष्टानि पुष्पसंपत्तिभाञ्जि च ।
नवपल्लवरागेण शोभितानि समन्ततः ॥१०७॥
सुवर्णलतिकापुष्पफलपत्रसमृद्धिभिः ।
विचित्रीकृतमध्यानि हरिन्मणिनिभैर्दलैः ॥१०८॥
विचित्रपत्रजुष्टानि विचित्रसुमभाञ्जि[1] च ।
वसन्तचित्रकारेण लिखितानीव सर्वतः ॥१०९॥
इमान्येव च कुञ्जानि तत्र दृष्टानि वै मया ।
पुष्पसौरभसारौघसंपन्नानि समन्ततः ॥११०॥
रहस्यस्थानमुक्तानि रत्नमण्डपभाञ्जि च ।
उत्फुल्लनवराजीव मकरन्दसुगन्धिभिः ॥१११॥
राजहंसकुलक्वाणकलितैर्निर्मलाम्बुभिः ।
सरोभिर्मणिमाणिक्यबद्धसोपानपङ्क्तिभिः ॥११२॥
सर्वतः सेवितान्यद्धा दिव्यगोपोगणैरपि ।
वीणामृदङ्गमुरजध्वनिकाहलितानि च ॥११३॥
नवोढाकेलिजुष्टानि मध्याप्रोत्साहनानि च ।
प्रौढाक्रीडनसंदोहसर्वतोरुचिराणि च ॥११४॥

---

१. सुमनांसि—अयो० ।

तेषु दूतीसखीचेटीनर्मज्ञानां कदम्बकम् ।
अद्राक्षमहमत्यर्थदिव्यवेशसुवर्ष्मणाम् ॥११५॥
क्रियास्वनङ्गस्वाराज्यवर्द्धनीषु समाकुलम् ।
दूतानां च सखीनां च चेटकानां विटात्मनाम् ॥११६॥
नर्मज्ञानां पीठमर्दप्रवराणां कुलं तथा ।
अपश्यं स्वस्वव्यापारै रसवृद्धिविधायिनाम् ॥११७॥
क्वचिन्मानं क्वचित्तापं क्वचित्प्रेमरुषं तथा ।
क्वचित्कान्ताभिसरणं क्वचिद्दूतीप्रयोजनम् ॥११८॥
क्वचिद्वशीभूय शश्वत्तत्रैवानिशसंस्थितिम् ।
क्वचिदुत्कलिकामार्तिं क्वचिद्विरहसंभवाम् ॥११९॥
दर्शंदर्शमहं भावान् प्रेमजानत्यलौकिकान् ।
मत्तवन्मूढवज्जाड्यं प्राप्तवत्तत्क्षणेऽभवम् ॥१२०॥
नकिञ्चित् स्मृतवान् राजन् कोऽहं वा कुत आगतः ।
इत्यलौकिकभावेन संपन्नश्चकितोऽभवम् ॥१२१॥
ददर्श पुनरेवाहं सरयूं पावनीमिमाम् ।
रत्नवद्धद्विकूलाढ्यां मणिसोपानमण्डिताम् ॥१२२॥
राजहंसकुलक्रीडानिक्वणाञ्चितपूरगाम् ।
शरत्कालशशिज्योत्स्नावलक्षजलकेलिनीम् ॥१२३॥
उत्तुङ्गवीचिसंघट्टघटाताण्डवकारिणीम् ।
लोलकल्लोलपटलैश्चुम्बतीं द्यामपि स्फुटम् ॥१२४॥
श्रीरामभक्तिसंपन्नमुनिवर्याह्निकेष्वपि ।
क्षमदात्रीं प्रेमदात्रीं प्रेमानन्दमयोदकाम् ॥१२५॥
सौगन्धिकगिरिर्दृष्टस्तत्रैव सुमनोहरः ।
सौगन्धिकवनोपेतसरसीशतशोभितः ॥१२६॥
तत्रैव चैषरत्नाद्रिर्दृष्टोऽत्यर्थमनोहरः ।
सुवर्णरत्नशिखरप्रोद्भासितदिगन्तरः ॥१२७॥
अनेककन्दरावेश्मरहस्यस्थानशोभितः ।
धनुर्वाणाङ्कतेजोभिः कोटिसूर्येन्दुभास्वरः ॥१२८॥

अनेकनिर्झरस्रावशीतलग्रावमण्डितः ।
नक्षत्रमालां गगने शिरोभिः संवहन्निव ॥१२९॥
दृष्टं प्रमोदविपिनं सर्वमेतदलौकिकम् ।
दृष्टानि गोपीवृन्दानि प्रेममत्तानि सर्वतः ॥१३०॥
पालीग्रामनिवासीनि दिव्यवेशयुतान्यहो ।
दृष्टश्च नन्दनो राजन् भ्राता मे प्राणसंमितः ॥१३१॥
तत्पत्नी च महोदारा दृष्टा श्रीराजिनी मया ।
सहजानन्दिनी कन्या संशोभितसमीपका ॥१३२॥
सर्वे चिदानन्दमया अखण्डरुचिमण्डिताः ।
गोगोपगोपीनिकरास्तर्णकानां गणास्तथा ॥१३३॥
येषां दर्शनमात्रेण दिव्यो भावः प्रजायते ।
श्रीरामविषयं प्रेम वर्द्धते प्रतिवासरम् ॥१३४॥
भ्रममाणस्तेषु तेषु स्थानेष्वद्भुतकान्तिषु ।
न तृप्तिमानहं जातः पिबन्माधुर्यमुन्नतम् ॥१३५॥
सर्वत्र च मया दृष्टं सहजारामयोर्युगम् ।
कोटिनागरिकावृन्दसमुपासितमद्भुतम् ॥१३६॥
इत्यहं स्वप्नवद्दृष्ट्वा प्रबुद्धः सद्य एव च ।
विहाय मूर्च्छनामन्तरङ्गायै समुपस्थितः ॥१३७॥
तद्दर्शनजसंस्कारवर्द्धिष्णुविरहव्यथः ।
गृहे वने घने शैले न क्वापि स्वस्थतां भजे ॥१३८॥
सा मे प्राणान्तकरणी महार्तिः समवर्द्धत ।
पाण्डुक्षाममुखप्रेम्णा शनैश्चित्तापवर्ष्मणा ॥१३९॥
अप्रतीकार्यमतुलं दुःखं विरहसंभवम् ।
अथ नेतुं शुको नाम योगीन्द्रः समुपागतः ॥१४०॥
निर्जनं स्थानमालम्ब्य स्थितोऽहं तेन संगतः ।
पाद्यार्घाचमनीयाद्यैः पूजयामास तं मुनिम् ॥१४१॥
पाण्डुक्षामतनुं दृष्ट्वा पृष्टोऽहं तेन योगिना ।

श्रीशुक उवाच

कच्चित्तव सुखं धीमन्नस्वस्थ इव लक्ष्यसे ॥१४२॥
अस्वास्थ्यकारणं ब्रूहि गोपराज सुखी भव ।
मादृशामतिथीनां त्वं हितोऽसि व्रजवल्लभः ॥१४३॥
तदाहं मुनिशार्दूलं स्वाधिकारणमुक्तवान् ।
ततो हसित्वा मां प्राह सूक्ष्मदर्शी महामुनिः ॥१४४॥

शुकउवाच

धन्योऽसि कृतकृत्योऽसि गोपराज नमोस्तुते ।
यस्य साक्षात्सीतानाथधाम ते दृष्टिगोचरम् ॥१४५॥
यन्न वेत्तुं शक्नुवन्ति मुनयो योगशीलिनः ।
तपस्विनो ज्ञाननिष्ठास्त्रिकालज्ञा अपि स्फुटम् ॥१४६॥
तत्ते रामपदं साक्षादक्षरं ब्रह्ममध्यगम् ।
प्रमोदाख्यं परं धाम दृशोर्गोचरतां गतम् ॥१४७॥
एतद्धि तस्य कृपया जातं ते गोपभूपते ।
योगिनामप्यलभ्यं यत् प्रमोदवनदर्शनम् ॥१४८॥
अचिरादेव ते भाग्यं भविता नात्र संशयः ।
सहजावल्लभो रामस्त्वद्गृहेऽवतरिष्यति ॥१४९॥
त्रिदिवेऽप्यहमश्रौषं यत्ते भाग्यं भविष्यति ।
पौलस्त्योपद्रुता देवाः साक्षाद्रामं ययाचिरे ॥१५०॥
चतुर्मुखं पुरस्कृत्य गताः सर्वे दिवौकसः ।
सरय्वाः पुलिने रम्ये कुञ्जपुञ्जे मनोरमे ॥१५१॥
तत्र प्रमोदविपने राममन्दिरमद्भुतम् ।
कोटिसूर्येन्दुसंकाशं यत्र हेममणिक्षितिः ॥१५२॥
ऐरम्मदीयमतुलं यत्रामृतमयं सरः ।
तुलसीवनवातेन वीजितं यद्दिवानिशम् ॥१५३॥
चिन्तामणिमयं यत्र साक्षाद्रामनिकेतनम् ।
सखीदासीचेटिकाद्यैः पार्षदैः समलङ्कृतम् ॥१५४॥

---

१. धाम—अयो०, मधु, बडो० ।

सखायो द्विभुजा यत्र धनुर्बाणादिभूषिताः ।
यत्र कामादिदोषाणां[1] प्रवेशो नैव विद्यते ॥१५५॥
स तस्मिन् भवने भाति कोटिब्रह्माण्डनायकः ।
रामचन्द्रो धर्ममयः साक्षात्परात्परः प्रभुः ॥१५६॥
रतिकुञ्जे रङ्गमये शयनं समधिष्ठितः ।
सीताकरसरोजाभ्यां संवाहितपदाम्बुजः ॥१५७॥
श्रीवत्सवक्षा देवेशो वनमालाविभूषितः ।
कौस्तुभोल्लासितग्रीवः सिद्धचष्टकनिषेवितः ॥१५८॥
स्फुरद्रत्नकिरीटाढ्यः श्रुत्योर्मकरकुण्डली ।
महार्हरत्नहारेण जातवक्षस्थलप्रभः ॥१५९॥
देवाभ्यां शङ्खचक्राभ्यां कौमोदक्या च शुभ्रया ।
पद्मेन चातिशोणेन[2] हरितालेन शोभितः ॥१६०॥
नन्दकेन च खड्गेन शार्ङ्गेणाद्भुतधन्वना ।
अन्यैस्तथाज्ञावशगैरायुधैः सुनिषेवितः ॥१६१॥
पीताम्बरतडित्कान्तिनीलमेघतनुप्रभः ।
साक्षान्मूर्तिधरैर्वेदैः सामादिभिरभिष्टुतः ॥१६२॥
तस्य तद्विमलं धाम प्रमोदवनमद्भुतम् ।
तत्समीपे सुराः प्राप्ताः ब्रह्माद्याः स्वस्वविष्टपात् ॥१६३॥
तुष्टुवुर्विविधैः सूक्तैश्चतुर्वेदमुखोदितैः ।
तदन्ते प्रार्थयाञ्चक्रुरार्ति स्वां विनिवेद्य ते ॥१६४॥
पौलस्त्योऽति दुराशयस्त्रिजगतां संदर्शयन् भीमतां
तीर्णो नीतिपथं सदा समजुषामस्माकमुद्वेजनः ।
वन्दीकृत्य स नः सुरेन्द्रकमलां तापं तनोत्युच्चकै-
र्दुष्टं तं प्रतिकर्तुमेव भवता सत्यं निजं स्मर्यताम् ॥१६५॥
ततः पद्मभवं प्राह व्योम्ना स भगवान् गिरा ।
उपलेभे विधिस्तां तु स्पष्टमात्मसमाधिना ॥१६६॥

---

१. दैवानां—रीवाँ । २. शोभेन—अयो० ।

राजा दशरथो नाम सर्वभूपनमस्कृतः ।
रघुवंशभवः साक्षाद्धर्मात्मातिथिपूजकः ॥१६७॥
तद्गेहेऽवतरिष्यामि देवानां हितकाम्यया ।
भुवि मत्परिचर्यार्थं त्रिदशांस्त्वं समादिश ॥१६८॥
सुखितो नाम गोपालः प्रमोदवनमध्यगः ।
तद्गृहे विहरिष्यामि पूर्णं रूपमुपाश्रितः ॥१६९॥
तस्मै वितीर्णो मयका पुरा वरः स्वरूपगानन्दसुलब्धिहेतवे ।
तेनैव भाग्येन युतः स गोपतिः सत्येन चानन्यगतेन संयुतः ॥१७०॥
प्रमोदवनलीलानामयमास्वादको भुवि ।
तस्य व्रजः सर्वसंपत्समृद्धगुणभाजनम् ॥१७१॥
सदैव मम लीलानां स्थानभूतो भविष्यति ।
ब्रह्मा च तदुपाश्रुत्य यथावत्त्रिदशाञ्जगौ ॥१७२॥
तस्मात्त्वं सुखितः श्रीमान् कथयामि यथा तथा ।
त्वद्गृहे श्रीरामः साक्षादुपैष्यति न संशयः ॥१७३॥
इति योगीन्द्रवचनमाकर्ण्याहं सुनिर्वृतः ।
विरहानलदग्धोऽपि प्रतीक्षां दधदाशया ॥१७४॥
अचिराच्च तथैवासीद् यथोक्तं शुकयोगिना ।
परमानन्दरूपो मे सदनं समुपागतः ॥१७५॥
यस्य माधुर्यपाथोधिमग्नान्तःकरणः सदा ।
तृणाय मन्ये देवेन्द्रसंपदं नृपसत्तम ॥१७६॥
इति ते सहजाकुण्डमाहात्म्यं कथितं मया ।
मम यद्भाविकल्याणसूचकं स्नानमात्रतः ॥१७७॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे पूर्वखण्डे दशरथतीर्थ-
यात्रायां चतुर्दशाधिकशततमोऽध्यायः ॥११४॥

पञ्चदशाधिकशततमोऽध्यायः

राजोवाच

धन्योऽसि गोपनृपते तव भाग्यसीमा नो शक्यते बुधवरैरपि चाधिगन्तुम् ।
यद् दुर्लभं सुरवरैरपि योगिमुख्यैस्तत्ते फलं भगवता स्वयमेव दत्तम् ॥१॥
नूनं तथैव सदने प्रणयेन बद्धो रामो रमापतिरशेषसुखाब्धिरास्ते ।
केलीः कदापि कलयन् प्रकटाः कदाचिद् गुप्ताः स्वयं स भगवानणिमादिबन्धः२

भूयोऽपि नः सखे ब्रूहि रामस्यैव शुभान् गुणान् ।
मुहुर्यच्छ्रवणेनैव कृतार्थं जगतीजनुः ॥ ३ ॥
बाल्यपौगण्डकैशोरशुभे वयसि शोभितः ।
यच्चकार स्ववीर्येण गुप्तः श्रीलक्ष्मणाग्रजः ॥ ४ ॥
पदानि तानि नश्चक्षुःप्रमोदाय प्रदर्शय ।
येषु येषु स्थितो रामः सुखेन भवतां व्रजे ॥ ५ ॥

सुखित उवाच

कच्चित्त्वमुत्कलिकयातिसमाकुलोऽसि कच्चिद्बलेन सहजेन वशीकृतोऽसि ।
यन्मां नियोजयसि मित्रमुहुर्मुहुस्तत्संकीर्तने सुरवधूश्रवणाभिरामे ॥६॥

सुपर्वाणः शश्वत्त्रिदिवपुरवामाधरपुटी
सुधाहेलावन्तः सुविहितसुधानादरधियः ।
रमन्ते रामस्याप्रमितरससंवाहिनि सदा
गुणव्रातस्रोतस्यतिशयितसंमोदविवशाः ॥ ७ ॥

पश्यन् सखे व्रजपदानि सुखावहानि भर्तुं[1]र्वशीकरणकारणसौभगानि ।
सस्नाहि साधु रसवाहिनि रामचन्द्रप्रेमामृतद्रवसरस्यवगाह्य गाढम् ॥८॥

पश्येमा विपिनस्थली[2]र्नवदलश्रेणीमिलन्मञ्जरी—
पुञ्जारञ्जितमञ्जुकुञ्जलतिकालावण्यलक्ष्मीजुषः[3] ।
कूजत्कोकिलकाकली[4]कलकलक्रुद्धप्रबुद्धस्मर—
क्रीडाकृष्टधनुर्गुणध्वनितुलाञ्झङ्कारिमत्तालयः ॥ ९ ॥

---

१. चक्षु°—मथु०, बड़ो० । २. नास्ति—अयो० । ३. °पुषः—मथु०, बड़ो० । ४. धैय—अयो० ।

अत्र द्वादश कुञ्जभूमय इमाः कामस्य केलीगृहा-
स्तत्पूजाप्रवणत्वतो रसनिधिर्यासु प्रविष्टः पुरा ।
आदिश्यानुजमात्मनः प्रणयिनं गोधोरणीचारणे
विस्तार्य स्फुटमाधिदैविकगुणैः कालं कलानां निधिः ॥१०॥

एतास्तच्चरितस्थलीः प्रतिपदं पूताः पदैरङ्किताः
क्रीडां यासु चकार कार्मुककरः सिंहादिदुर्जीवहा ।
गोपानां शिशुभिश्चकार सहितः सम्यक्फलास्वादनात्
तृप्तो वंशिरवं समस्तजगतीसंमोहनार्थं दधत् ॥११॥

एतत्स्थलं महाराज यत्र रामः शिशुत्वतः ।
बदरीफलमास्वाद्य कुपथ्यं रहसि स्थितः ॥१२॥
तदा निवेदितं गोपबालैः श्रुत्वा सतर्जनम् ।
निषिषेध करे कृत्वा कुपिता मत्कुटुम्बिनी ॥१३॥
नाहं बभक्षेति प्रोच्य व्यादाय वदनं स्थितः ।
सा तन्मुखपुटेऽपश्यद् ब्रह्माण्डरचनामिमाम् ॥१४॥
भूतं भवद्भविष्यच्च त्रिधाकालाश्रितं जगत् ।
तद्विलोक्य चकम्पे स मेने मायामिवात्मनि ॥१५॥
क्षणाद्विस्मृतवृत्ता च प्रणयाधीनमानसा ।
अपाययत् स्तनं तस्मादङ्कमारोप्य लालनैः ॥१६॥

जगदघहरणं चरित्रमस्य प्रकृतिमनोहररूपवैभवस्य ।
श्रुतिपथमुपयातमात्रमन्तः परिपवनं च मदादिदोषराशेः ॥१७॥
मनुज इह यथा यथा शृणोति प्रसभमरोचकमस्य संक्षिणोति ।
कलयति च तथा तथा पटुत्वं परतरसूक्ष्मपदार्थवेदनाय ॥१८॥

इमानि तानि स्थानानि येषु श्रीलक्ष्मणादिभिः ।
बालकेलीं व्यधत्तासौ विविधामात्मरञ्जनीम् ॥१९॥
क्वचित्सर्वे बाला कृतपणनकौतूहलपरा
वितन्वन्तोऽन्योन्यं किमपि जयवार्तां प्रतिगणम् ।
जयी तेषां मध्ये रमणकुतुकी राम उदगात्
समस्तानां धौर्त्ये[1] परमरसविस्तारचतुरः ॥२०॥

क्वचित् पर्वे च गोपाला वेणूनेकपदे लघु ।
रणयाञ्चक्रुरत्यर्थं कन्दराद्विगुणध्वनीन् ॥२१॥
क्वचित् सर्वे मल्लयुद्धं कुर्वन्तोऽन्योन्यमुच्चकैः ।
जये पराजये चैव कौतुकं सुमहद्व्यधुः ॥२२॥
क्वचित् पक्षिगिरः[1] सर्वे क्वचित् पशुगिरो वने ।
कूजन्तं रम्भमाणाश्च चिक्रीडुर्लक्ष्मणादयः ॥२३॥
ता एता वनवीथयः सतिमिराः सान्द्रैस्तमालद्रुमै-
र्वल्लीमण्डपमण्डिता अपिहिताः कुञ्जाः कुटीकोटरैः ।
यासु क्रोडितमक्षिमुद्रणकरैः कौतूहलेनार्भकै-
रन्योन्यं व्रजगोदुहां रसवशैस्तेषां तु रामो वरः ॥२४॥
क्वचिद्वन्यफलक्षेपैः क्वचिदुत्प्लुत्य केलिभिः ।
क्वचित्करलतास्फोटैः क्वचित्कुसुमकन्दुकैः[2] ॥२५॥
ता एताः पश्य राजेन्द्र सान्द्राः काननवीथिकाः ।
उत्फुल्लमल्लिकावल्लीसौरभेण समाचिताः ॥२६॥
वत्सचारणमेतासु सरयूतटभूमिषु ।
चक्रे रामो रमणकृन्नन्दयन् हृदयानि नः ॥२७॥
एतासु सरयूकूलभूमीषु नृपसत्तम ।
गोचारणक्रियादक्षो विजहे लोकमङ्गलः ॥२८॥

एतेषु रत्नगिरिरम्यशिलातलेषु गोचारणश्रमित एत्य सुखाय रामः ।
मध्याह्नकालकरणीयमुपास्य भोज्यं रेमे समानवयसां निवहैः शिशूनाम् ॥२९॥
वीक्ष्य मध्याह्नमासन्नं कृपया मत्कुटुम्बिनी ।
गोपीः संप्रेषयामास विश्वस्ता भोज्यवस्तुषु ॥३०॥
कामा धामा रमा पद्मा लीला शीला सरस्वती ।
इरावती पार्वती च नवैताः पाककारिकाः ॥३१॥
रामस्य रुच्यं रसनीयमन्नं पचन्ति सम्यक्कमनीयमेव ।
तद्रत्नपात्रेषु निधाय नित्यं मुद्राङ्कितं संप्रहिणोति गोपी ॥३२॥

---

१. पाक्षीर्गिरः—रीवाँ, बड़ो० । २. कदम्बकैः—अयो० ।

समुपस्कृत्य चान्नानि चतुर्धा रसवन्ति च ।
गोपालिकाकरानीतान्यत्ति रामः सलक्ष्मणः ॥३३॥
भरतश्चैव शत्रुघ्नः सखायो वृषभादयः ।
अश्नन्ति स्वादुकारेण पात्रेष्वन्नं चतुर्विधम् ॥३४॥

शिलासु पत्रेषु फलेषु चैव पात्रेषु हैमेषु च मार्त्तिकेषु ।
चतुर्विधं स्वादुमुपस्कृतं तं संभोज्य भारं बुभुजे वयस्यैः ॥३५॥
पशुपबालकमण्डलमण्डितः सभरतः सहलक्ष्मणशत्रुहृत् ।
विमलरत्नविभूषणभूषितो विरचितामितलासकुतूहलः ॥३६॥
अध्युपत्यकमधिष्ठितो गिरेर्बालकेलिकलितश्रमः स्वयम् ।
मण्डलानि विनिवध्य गोदुहां बालकैः स शुशुभे मणीन्द्रवत् ॥३७॥
फलानि रुच्यानि सहात्र भूरि प्रकारवर्यैः शिशुभिः समृद्नन् ।
अशेषयज्ञेश उदारहासः स यज्ञभुक् क्रीडति रामचन्द्रः ॥३८॥
एवं समाप्याशनकेलिमेष प्रसन्नधीर्नागदलान्वितास्यः ।
सुरञ्जितोष्ठः शयने दलानां निषीदतिस्मावृतमण्डपेषु ॥३९॥

केचिद् गोपकुमारकाः सुकृतिनो वीणास्वनं दध्वनुः
किञ्चित्किञ्चिदुदञ्चिपञ्चमरवा[1]स्तेनुः परे मूर्च्छनाः ।
किंचित्तस्य सरोजपल्लवमृदु श्रीमत्पदाब्जद्वयम्
प्रेम्णा संममृदुः परे व्यजनजैर्वातैः प्रभुं भेजिरे ॥४०॥

ततश्चतुर्थे प्रहरे दिनस्य शुभाय सर्वव्रजवासिनां नृणाम् ।
येनाध्वनोपाववृते तमेतं पश्यन्मनोनिर्वृतिमृच्छ राजन् ॥४१॥

गोचारस्य प्रथमदिवसे सोदरस्ताडकाया-
श्चण्डो नाम्ना बहुभुजबलो राक्षसः क्रूरकर्मा ।
येऽन्येऽनेके विविधवपुषो राक्षसा बद्धकक्षा-
रामेणैते सपदि निहता बाधका गोधनस्य ॥४२॥
तेषां मुखोद्गतं तेजो ज्वलदुल्कासमाकृति[2] ।
व्यलीयत हरौ रामे साक्षात्कारणमानुषे ॥४३॥

---

१. "उच्चैरालापित पंचमस्वराः" टि०—मथु० । २. °यसाकृतिः—अयो० ।

गाश्चारयित्वा विपिनात्संनिवृत्तो रोचिः सौम्यं विभ्रदभ्रौघनीलम् ।
गोसंदोहं स्वाग्रतः कल्पयित्वा रेजे रामो लक्ष्मणादयैरुपेतः ॥४४॥

गायन्तश्च हसन्तश्च खेलन्तश्चारुकेलिभिः ।
वादयन्तश्च शृङ्गाणि रेजिरे सुहृदोऽखिलाः ॥४५॥

तेषां मध्येऽभिनव्याम्बुद[1]रुचिरतनुः पीतकौशेयधारी ।
गुञ्जाबर्हाभिरामो मृगमदतिलकी कुण्डलोद्द्योतिगण्डः[2] ।
वन्यैः पुष्पैरनेकैः स्रजमुरसि दधल्लिप्तधातुद्रवाङ्को ।
विभ्रद्वंशीनिनादं नट इव शुशुभे मल्लकक्षापिधानः ॥४६॥

हसन् हासयन् गोदुहामेव बालान् ध्वनन् ध्वानयन् वंशिकां लक्ष्मणाद्यैः ।
व्रजप्राणदः शोणिपद्माङ्घ्रियुग्मो[3] व्रजं रामचन्द्रो वनादाजगाम ॥४७॥

स्वस्वप्रासादमौलीन् सुखमधिरुरुहुः सस्मिता[4] वामनेत्रा
विश्लेषं वासरोत्थं शिशमयिषुहृदः[5] सादरास्तस्य दर्शे ।
दूराद् वंशीविषाणध्वनिजनितजवाद्विस्मृताशेषकृत्याः
जातोद्वेगा इवाङ्गाभरणपटविपर्यासविन्यासवत्यः ॥४८॥

तासां वक्त्रेन्दुबिम्बैर्गगनतलमभूत् सर्वतोऽङ्कावकीर्णं
सन्ध्याभ्रारुण्यभाभिर्मिलिततनुरुचा विद्युदाभा विरेजुः ।
आलिङ्गन्त्यः समन्तात्प्रियतममसकृत्क्षिप्तनेत्रान्तभागै-
स्तारुण्योद्वेलितास्ताः सरित इव ह्रिया नैव रुद्धा गुरूणाम् ॥४९॥

रामोऽपि ताः सविनयं नयनान्तप्रोतप्रेमोदयः प्रहितसर्वविधप्रमोदः ।
संवीक्ष्य सादरमनङ्गरसेन सर्वा गोष्ठं विवेश जननीनयनाभिरामः ॥५०॥

तं मत्कुटुम्बनिधिरेत्य निपीय दृग्भ्यां संचुम्ब्य बिम्बमधुराधरमास्यचन्द्रम् ।
आरात्रिकेन विधिना प्रणयार्द्रभाजा चक्रेऽर्हयां प्रबल वत्सलभाववश्या ॥५१॥

इत्येवमेव मदनायुतकोटिरूपमाधुर्यसारजलधिः प्रतिवासरं सः ।
गोचारणं च दितिजासुरमर्दनं च चक्रे व्रजस्य च सुखं सुखदायिशीलः ॥५२॥

तमथोद्वर्तयाञ्चक्रे सुस्निग्धा मत्कुटुम्बिनी ।
उत्सौरभेण पङ्केन गर्भिता गुरुनाभिना ॥५३॥

---

१. °रुण°—रीवाँ । २. पशुखुररजसा चित्रलम्बालकास्यः–अयो०, मथु०, बडो० । ३. श्रोणिकोटीन्दुशोभा—रीवाँ । ४. सुस्मिता—अयो० । ५. "निवर्तकान्तः करणाः" टि०—मथु० ।

उष्णोदकैः स्नापयित्वा सारवैर्गर्भसौरभैः[1] ।
विमुक्ताध्वश्रमं पश्चाद् भोजयामास सा सुतम् ॥५४॥
उद्वर्तितस्नातनिषण्णभुक्तनिर्भुक्ताम्बूलदलस्य तस्य ।
सा कारयाञ्चक्र उपासिनीभिश्चित्रालये कामपि रङ्गशय्याम् ॥५५॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे पूर्वखण्डे महाराजतीर्थ-
यात्रायां व्रजागमने पञ्चदशाधिकशततमोऽध्यायः ॥११५॥

•

षोडशाधिकशततमोऽध्यायः

ब्रह्मोवाच

तमन्यतस्ततो नीत्वा सुखितो गोपसत्तमः ।
दर्शयामास तत्स्थानं यत्र कालाहिमोचनम् ॥ १ ॥

सुखित उवाच

स्थानं तदेतद्राजेन्द्र सरय्वाः सरसि स्फुटम् ।
कोटितीर्थमयं राजन् कालाहिर्यत्र मोचितः ॥ २ ॥

राजोवाच

वद कोऽयं कालसर्पः कस्माद्रामेण मोचितः ।
एतन्मे संशयं छिन्धि किं च तीर्थस्य कारणम् ॥ ३ ॥

सुखित उवाच

राज्ञो भगीरथस्यासीत् सचिवो वै सुलोचनः ।
राजा भगीरथश्चासीत् गङ्गार्थे वै[2] तपोरतः ॥ ४ ॥
तपस्यति प्रभौ मन्त्री स्वयं राजधुरन्धरः ।
बभूव बहुवित्तेशो तन्निधाय भुवि न्यधात् ॥ ५ ॥
यावदायाति राजेन्द्रो जाताशेषप्रयोजनः ।
तावन्मूर्तिं गतो मन्त्री राजा तं चान्वतप्यत ॥ ६ ॥

---

१. °गौर सौ°—अयो० । २. गांगतीर्थे—रीवाँ । गंगार्थे च—अयो० ।

अहो मम हितो मन्त्री कां गतिं नु गमिष्यति ।
स च वासनया तत्र निधौ सर्पोऽन्वजायत ॥ ७ ॥
अनेकफणमालाभृल्लोलजिह्वाग्रभीषणः ।
जातिस्मरो भुजङ्गोऽसौ करालतरभोगवान् ॥ ८ ॥
स तस्मिन् विपिने घोरे हरेरिच्छानुवर्तिनः ।
लिहन् वनतृणं भूमौ संचचार कदापि वै ॥ ९ ॥
तल्लीढानि तृणान्यत्त्वा काश्चिद्गावोऽस्य दैवतः ।
तत्क्षणान्मूर्च्छितास्तावै ततो वीरश्चुकोप सः ॥१०॥
मूर्छाकारणमन्विच्छंस्तासां रामः सुधानिधिः ।
ददर्श विपिने गूढं वल्मीकं तृणराशिभिः ॥११॥
तत्र कौतूहली रामः सर्वदर्शनकेलिकृत् ।
सर्पाकर्षणकृद्वाद्यं वादयामास कानने ॥१२॥

स तेन वाद्यध्वनिना विषं वमन् वल्मीकमध्यात्सहसोदसर्पत ।
तमेष पद्भ्यां सहसा समाक्रमन् मूर्द्धस्वधिष्ठाय ननर्त कौतुकी ॥१३॥
त्रुटच्छिरास्तस्य पदोपमर्दनैर्जगाद सद्यो भुजगः शिरः स्थितम् ।
भगीरथस्यास्मि दुरन्तपातको भुजङ्गयोनिं सचिवः समागतः ॥१४॥
स पूर्वजस्ते रघुवंशकेतोरितीव विज्ञाय विमोचयस्व माम् ।
निधिश्च वल्मीकगतोऽनुगृह्यतां कस्मिंश्चनार्थे विनियोजयस्व तम् ॥१५॥

तच्छ्रुत्वा रघुशार्दूलः पुत्रस्तव नृपोत्तम ।
जगाद मुक्त एवाहे[1] पादस्पर्शेन मेऽसि भोः[2] ॥१६॥
ततो विहाय सचिवस्तां योनिं दिव्यविग्रहः ।
विमानाग्रमधिष्ठाय रामं नत्वाप सद्गतिम् ॥१७॥
विलं निखन्य गोपालैर्ब्राह्मणेभ्योऽददद्धनम् ।
कोटितीर्थसमं जातं तत्खातं देवखातवत् ॥१८॥
तत्र काकोऽवगाह्याम्बु सद्यो दृष्टश्चतुर्भुजः ।
तदावधि च प्रत्यक्षं तीर्थमेतदभून्नृप ॥१९॥

---

१. एवाहिः—अयो०, रीवाँ । २. शिशोः—अयो०, प्रभोः—रीवाँ ।

ज्येष्ठशुक्लचतुर्दश्यां सर्पो रामेण मोचितः ।
तद्वासरे हि खातेऽस्मिन् यात्रासोत् प्रतिवत्सरम् ॥२०॥
अहिखातं नामतीर्थमिदं यः स्नाति मानवः ।
स घोरेणापि पापेन सार्पीं योनिं न गच्छति ॥२१॥

इति ते कथितं राजन्नहितीर्थस्य कारणम् ।
रामस्य पुण्यं चरितं तव पुत्रस्य भूपते ॥२२॥
एतच्च सरयूमध्ये नागतीर्थं प्रचक्ष्यते ।
मणिमान्नाम नागो वै यत्र रामेण नाथितः ॥२३॥

नागालयेऽस्ति मणिमानितिकीर्तिताऽहि-
वर्यः शतेन शिरसी सुविराजमानः ।
तावन्मणिप्रकरदीधितिदीप्तिदीप्तो
यः सारवे सरसि निर्भय आस तार्क्ष्यात् ॥२४॥
प्रमोदवनमाहात्म्यात्तत्र वैरं न विद्यते ।
परस्परं वैरिणोऽपि निर्वैरा यत्समासते ॥२५॥
अहिशिखाबलयोरहितार्क्ष्ययोर्मृगतरक्षुकयोर्महिषाश्वयोः ।
अथ परेष्वपि तद्वदुदीक्ष्यते न कलहः प्रमुदाटविवासिषु ॥२६॥

सुखमास्ते ततो नागः सारवे सलिले ह्रदे ।[1]
कुल्यो गरलदाहेन तावत्संतापितोदकः ॥२७॥
गरोग्रदहनोद्भवप्रबलदाहनिष्क्वाथितं
ह्रदस्य कलुषीकृतं जलममुष्य जन्तूज्झितम् ।
पतन्ति दिवि योजनादुपरि यत्र याताः खगाः[2] ।
कुलायविनिवासिनो निरसवो विषज्वालया ॥२८॥
तस्मिन्ह्रदे कदाप्यस्य गावः पीत्वाम्बु मूर्च्छिताः ।
ता वीक्ष्य रामचन्द्रेण सुधादृष्ट्या सुजीविताः ॥२९॥
तत एष ह्रदं तु सारवं सहसा निर्गरलं चिकीर्षुकः ।
निपपात जवेन तज्जले भुजदण्डभ्रमभग्नतद्गृहः ॥३०॥

---

१. गृहे—रीवाँ । २. यातोऽपि वै—अयो०, मथु०, बड़ो० ।

स उत्कुपितमानसः प्रतिपदं श्वसन्नुद्गतः
प्रचण्डशतजिह्विकाललन[1]भीषणास्यव्रजः ।
कृतः सपदि निर्जवस्तदभितो भ्रमन्[2] क्रीडया
रराज रघुपुङ्गवः प्रबलबाहुदण्डोर्जितः ॥३१॥
तावदस्य सुहृदश्च सखायो रामदर्शनवियोगसुतप्ताः ।
हाहहेति विलपन्त उदीर्णाः स्वान्तशोकविवशा परिमम्लुः ॥३२॥

अथायमुदगात्तस्माद्ध्रदादुपरि सौख्यदः ।
तावत्तमेष मणिमान् भोगेन निरवेष्टयत् ॥३३॥
घन[3]ध्वान्तौघनीलेन भोगेनाहेः स वेष्टितः ।
आसीदावेगकृत्तेषां सुहृदां परिपश्यताम् ॥३४॥
नन्दिग्रामे महोत्पातान् वीक्ष्य सर्वे वयं नृप ।
आवेगान्निःसृता ग्रामं विहाय तमवेक्षितुम् ॥३५॥
तस्मिन्दिने गृह एवासुरेते गोपालका वृद्धवयोजुषो ये ।
इतीव चिन्तां हृदयेऽव्रजन्नरा नार्यश्च निःसृत्य वनं प्रविष्टाः॥३६॥

विचिन्वतोऽस्य पदवीं प्रमोदवनमध्यतः ।
आययुः सरयूतीरे यत्र रामोऽहिवेष्टितः ॥३७॥
तं पृष्ट्वा ते वयं सर्वे रुद्धजीवा इवाकुलाः ।
पतितुं सरयूवारिण्यैच्छन् मूर्छितमानसाः ॥३८॥
पततोऽस्मान् समालोक्य लक्ष्मणोनिरवारयत् ।
मन्वानो रामचन्द्रस्य प्रभावं दैववत्स्वयम् ॥३९॥
अथ क्षणेनामितशीर्षं उदच्चयौ महाहिसंवेष्टनतो दयानिधिः ।
ततोऽहिवर्यस्य महच्छिरःशतं पद्भ्यां समाक्रम्य फणाग्रमास्थितः ॥४०॥

नटन्नटवरोचितप्रचलिताङ्घ्रिकामश्रियः
शिरःसु कृतमर्दनः क्रमत एव तान्युच्छ्रयात् ।
अनामयदसृग्वमन्त्युपशमं गतानि स्फुटं
वयं समभिवीक्ष्य तच्चरितमन्तरा नन्दिताः ॥४१॥

---

१. °उल्वण°—अयो० । २. भवन्—अयो० । ३. वन°—अयो०, मथु०, बडो० ।

तं नर्तुमुद्यतमवेक्ष्य वयस्यबाला[1] वीणाविषाणपणवानकभूरिघोषाः ।
उच्चैर्नटन्तमहिमूर्द्धसु कन्धलीलां भूयोऽस्य लास्यमनुकृत्य सिषेविरे गाम् ४२

इत्युपमर्द्य फणाः फणितु[2]र्नटराजोचितकेलिकलावान् ।
गोगोपीगोपतिकमनीयो विधिवन्नाट्यमशेषं चक्रे ॥४३॥

तं विलोक्य खचराः सुरदेव्यो व्योमयानमुदपास्य नमन्त्यः ।
वन्दनीयचरणाम्बुजमाराद् गीतवाद्यकलनैरुपसेदुः ॥४४॥

सिद्धर्षिदेववनिताप्सरसां समूहैर्व्योमाकुलं समजनि क्षणतः समन्तात् ।
आः साधु दण्डयति नागमसाविती[3]यङ्गीः सर्वतः समुदगाद्भुवि चाम्बरे च ॥

जीवन्नुर्वरितः स तस्य नटने काकोदर[4]ग्रामणीः
कान्ताभिः खलु मोचितो व्रजपतेः कृत्वा स्तुतिं सूक्तिभिः ।
कारुण्यामृतसागरः स भगवांस्तेनापि भूयः स्तुतः
तत्स्थानान्निरवासयत्तमुदकं चक्रे ततो निर्विषम् ॥४६॥

इति गायत[5]श्चरितमस्य भूपतेर्व्रजवासिलोकसुरवृन्दवीक्षितम् ।
विजहाति कालभुजगोद्भवं भयं पुरुषार्थसार उपसीदति ध्रुवम् ॥४७॥

ततो द्विजन्मप्रवराः शुभाशिषः प्रयुज्यमानाः खलु नः समाययुः ।
वितीर्य तेभ्यो द्रविणानि भूरिशः समागताः स्वानि गृहाणि ते वयम् ॥४८॥

प्राप्तप्राणाः कृच्छ्रतो दैवमात्राद् गोपा गोप्यो राममालोक्य हृष्टाः ।
सर्वे देवान् पूजयाञ्चक्रुरेते चक्रुर्मुक्तारत्ननिर्मञ्छनं च ॥४९॥

रामाभिषेकं विदधौ सुप्रीता मत्कुटुम्बिनी ।
द्विजाभिमन्त्रितैस्तोयैः सारवैरमृतोपमैः ॥५०॥

हुत्वाग्निं विधिवद्विप्रैर्भोजयित्वा च तान् बहून् ।
अभिषिच्य शिवं चैव तस्य भद्रं ययाचिरे ॥५१॥

गोदोहसंभवं क्षीरमुपायुञ्जन्न तद्दिने ।
रामस्य शुभमिच्छन्तः पुनर्गरलशङ्कया ॥५२॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दशरथतीर्थयात्रायां
(कालियदमनं) नाम षोडशाधिकशततमोऽध्यायः ॥११६॥

---

१. तं किन्नरीपतय आत्तमृदङ्गवाद्य°—अयो०, मधु०, बड़ो० । २. फणागणतुंडम्—रीवाँ । ३. रामखलानितो°—अयो०, मधु०, बड़ो० । ४. "काकोदरः सर्पः" टि० मधु० । ५. गोपतेः—रीवाँ ।

सप्तदशाधिकशततमोऽध्यायः

सुखित उवाच

इदं च विपिनं राजन्नशोकद्रुमशोभितम्[1] ।
नानावन्यद्रुमाकीर्णं पूतं रामाङ्घ्रिरेणुभिः ॥ १ ॥
अत्र विज्ञाय गोचारमनादृत्य मुनीश्वराः ।
ज्ञाततत्त्वास्तत्कृपया[2] पश्चाच्छरणमाययुः ॥ २ ॥
याज्ञवल्क्यो भरद्वाजो गौतमोऽत्रिस्तथाङ्गिराः ।
शाण्डिल्यो वरतन्तुश्च कौत्सः शातातपो भृगुः ॥ ३ ॥
अन्ये च मुनयस्तत्र सरयूतीरवासिनः ।
महत्सत्रमुपासीनाः केचिच्च क्रतुकारिणः ॥ ४ ॥
अधितस्थुर्मुनिश्रेष्ठाः सर्वे प्रमुदकानने ।
अशोकवनवाटचान्ते[3] कर्मतन्त्रक्रियाकुलाः ॥ ५ ॥
अथ गोचारणं कर्तुं रामो गोष्ठाद्विनिर्गतः ।
तुल्यवेशैर्वृतो गौपैर्गोपवेशविभूषितम् ॥ ६ ॥
गुञ्जावर्हवरावतंसमकराकारस्फुरत्कुण्डल-
श्रीमद्रत्नमहार्हमौक्तिकवरस्रङ्मेखलाभूषितः ।
विद्युत्पीतदुकूलभृन्नवघनश्रीर्मल्लकक्षाञ्चितो[4]
गोष्ठादेव पुरः स्फुरत्पशुकुलो वेणुं रणन्निर्ययौ ॥ ७ ॥
तमन्वयुर्गोपवराः समंतादनेकनामान उदारचित्ताः ।
शिखावलैरावतमेघवर्णसुकण्ठमालाधरवञ्जुलाद्याः ॥ ८ ॥
ते सर्वे विविशुर्गोपा प्रमोदविपिनं महत् ।
समंततः कुसुमितं पुष्पस्तबकचित्रितम् ॥ ९ ॥
कूजद्विचित्रद्विजनादमञ्जुलं मयूरकेकारवभूरिघोषितम् ।
समोदमत्तभ्रमरालिगानवत् समुल्लसत्कोकिलकाकलीयुतम् ॥१०॥

---

१. मंडितं—अयो० । २. ज्ञानतत्त्वान्युपायांश्च—रीवाँ । ३. °वोपान्ते—रीवाँ । ४. कच्छाञ्चितो—मथु०, बडो० ।

प्रमोदवनमध्ये तु सहजावनमद्भुतम् ।
तत्र प्रवालबर्हादिभूषणैस्तमभूषयन् ॥११॥
ततो दूरं गताः सर्वे गवां पृष्ठेषु संयताः ।
अतीत्य रत्नाद्रिद्रोणीमशोकवनमाययुः ॥१२॥
ग्रीष्मैर्भानुकरैस्तीक्ष्णैस्तापिता व्रजवासिनः ।
आतपत्रीकृत्य तरून् सरयूपरतो ययुः ॥१३॥
ते वृक्षाः पुष्पवर्षाद्यैः श्रीरामं समवाकिरन् ।
लताश्च स्तबकोत्तुङ्गस्तनमण्डलमण्डिताः ॥१४॥
ते बर्हधातुनवपल्लवभूषिताङ्गाः पत्रातपत्रतलरुद्धकठोरघर्माः[1] ।
तद्गोकुलं सरसि पाययितुं सरय्वाः सर्वे समाययुरुदारपतेः सखायः ॥१५॥
गोकुलं पाययित्वापः सारवोः स्वादु शीतलाः ।
स्वयं पपुश्चैव गोपा रामाद्या लक्ष्मणादयः ॥१६॥
अथाशोकवने प्राप्ताः पुनरेव व्रजौकसः ।
राममूचुरिदं राजन् क्षुद्भ्रातृव्येण बाधिताः ॥१७॥
हे राम हे लक्ष्मण शत्रुसूदन प्रकृष्टकीर्ते भरताग्रणीः सखे ।
सुदुःसहा क्षुत्कुरुते रुजं ततो विधीयतां तच्छमनं सुहृद्गणे ॥१८॥
उपागता नाद्य खलु व्रजात्स्त्रियो या आनयन्तेऽवसरेण[2] भोजनम् ।
मध्याह्नवेलामतियाति भास्करो विशेषतोऽद्य क्षुदुपप्लुता वयम् ॥१९॥
नास्मिन्नशोकद्रुमकानने पुनः फलानि पक्वानि गवेषितान्यपि ।
विधीयते यैः खलु वृत्तिरौदरी तदत्र संचिन्तय मण्डलाग्रणीः ॥२०॥
इति विज्ञापितो गौपै रामः कमललोचनः ।
क्षणं विचिन्त्य प्रहसन्नुवाच रुचिरं वचः ॥२१॥

श्रीराम उवाच

शिखोबलैरावतमेघवर्णा सुकण्ठमालाधरवञ्जुलादयः ।
सर्वे वयं तु यदि यज्ञवाटिकां व्रजेयुरन्नं तदिहानयेयुः ॥२२॥
यजन्ते ब्राह्मणा ह्यत्राविदूरे क्रतुकर्मभिः ।
याज्ञवल्क्यादयो नित्यं सत्रं ये गोतमादयः ॥२३॥

---

१. °बर्हाः—अयो०—रीवाँ । २. °रेऽन्न°—मथु०, बडो० ।

तेषां सत्रे क्रतौ यज्ञे मखे चैव व्रजन्तु ते ।
दास्यन्त्यन्नं द्विजन्मानो नो चेत्तेषां वधूर्वराः ॥२४॥
इत्यादाय प्रभोराज्ञां गोपाला वनमालिनः ।
बर्हधातुविचित्राङ्गास्तत्र गत्वा ययाचिरे ॥२५॥

गोपा ऊचुः

नमो वै द्विजवर्येभ्यो यत्तेभ्यो सत्रकर्मणि ।
मुनिभ्यो दीर्घदर्शिभ्यो हेतुभ्यो लोकशर्मणः ॥२६॥
रामेण प्रेषिता गोपाः सर्वे वयमुपागताः ।
भवतां सविधे विप्राः कार्यार्थं श्रूयतां च तत् ॥२७॥
इतो विदूरे गोचारं कुर्वन् रामः सलक्ष्मणः ।
समागतोऽशोकवने वादयन् वेणुमस्ति वै ॥२८॥
स मण्डलाग्र्यः सर्वेषां गोदुहां नः क्षुधाकुलः ।
याचतेऽन्नानि वो विप्राः पवित्राणि शुभानि च ॥२९॥
यज्ञकर्मावशिष्टानि यथासंपादितानि च ।
क्षुधितेभ्यः प्रदत्तानि साङ्गं कुर्वन्ति कर्म च ॥३०॥
इति श्रुत्वा वचस्तेषां केचिद्दीर्घाभिमानिनः ।
अनाकर्णितकेनैव भग्नाशांस्तान् प्रचक्रिरे ॥३१॥
केचिदूचुर्द्विजा गोपान् रामेणाचरितं शुभम् ।
यद्राजन्यकुले जातो गाश्चारयति कानने ॥३२॥
धात्रीपतेः सुखितस्याज्ञयासौ गृहीतगोचारणमध्यमक्रियः ।
किमन्नमन्विच्छति नो द्विजन्मनां मखोचितं ब्राह्मणभोजनोचितम् ॥३३॥
केचिन्निर्भर्त्सयाञ्चक्रुरपसर्पन्तु शूद्रकाः ।
ब्रह्मकर्म न वो दृष्टिगोचरं स्यादिति द्विजाः ॥३४॥
ततस्ते भग्नसंकल्पाः सौम्या गोपालपुङ्गवाः ।
राममागत्य सर्वेऽपि तथैवोचुर्द्विजेरितम् ॥३५॥
ततः प्रोवाच तान् रामो विहस्य कमलेक्षणः ।
पत्नीशालामनुव्रज्य तत्पत्नीर्मयि सादराः ॥३६॥
सर्वे भवन्तो याचन्तांदास्यन्त्यन्नानि ताश्च वः ।
चिरान्मयि धृतस्नेहाः प्राणेभ्योऽपि प्रियादपि ॥३७॥

कृतार्थयिष्यन्ति च ताः स्वान् पतीन् निजयोगतः ।
जन्मान्तरे च मत्कान्ता[1] सख्यमेष्यन्ति ताः स्त्रियः ॥३८॥
इत्याकर्ण्य प्रभोर्वाक्यं गोपाला जातसंभ्रमाः ।
परस्तादचञ्चवाटस्य पत्नीशालां समाययुः ॥३९॥
तत्र गत्वार्षिपत्नीभ्यो गोपा अन्नं ययाचिरे ।
नमो वो मुनिपत्नीभ्यो व्रतिनीभ्यो मखे विधौ ॥४०॥
देयान्यन्नानि वो देव्यः क्षुधितेभ्यः पतिव्रताः ।
अशोकवनमध्यस्थः प्रेषयामास नः प्रभुः ॥४१॥
रामः सर्वगुणारामः शीघ्रमन्नं प्रदीयताम् ।
इति श्रुत्वाखिलाः पत्न्यो मुनीनां दीर्घकर्मणाम् ॥४२॥
अन्नं चतुर्गुणं स्वादु स्वहस्तपरिपाचितम् ।
आच्छाद्य प्रययुः सर्वा रामचन्द्रदिदृक्षया ॥४३॥

यत्राशोकलतानिकुञ्जभवने क्रीडन् रणन् वंशिकां
गोपालैः सवयोभिरात्तमदनन्यक्कारिलीलारसः ।
सौन्दर्यैकसुधानिधिः सुमनसां कान्ताभिरालोकितो
रामस्तिष्ठति तत्र ताः सरभसं पत्न्यो मुनीनां ययुः ॥४४॥
रुद्धास्ता मखवाटिकाशुभवनद्वारिप्रियैर्दुर्जनै-
स्तं प्रत्यूहमुदस्य रामकरुणामात्रेण संप्रस्थिताः ।
संकल्पः प्रभुहेतवे यदि भवेत्सार्थस्तदासौ न किं
सर्वानर्थनिवारणैकचतुरा यैर्ध्यात आत्मा निजः ॥४५॥

संवीक्षणीयः पशुपालमण्डलीमध्यस्थितो रामसुधानिधिर्दृशः ।
इत्थं व्यवस्य प्रणयेन संयुता मुनिस्त्रियोऽयुर्मुनिवर्जिता अपि ॥४६॥
तास्तस्य वंशीनिनदं मनोहरं दूरात्समाकर्ण्य मुनीन्द्रसुभ्रुवः ।
उद्वेगरागोदधिमग्नमानसाः शनैरशोकाटविकां समाययुः ॥४७॥

तत्र स्थितं पशुपमण्डलमण्डनाग्र्यं पीताम्बरं नवसुधाघननीलकायम् ।
पद्मेक्षणं सुरुचिरस्मितमूषितास्यं लोलालकावृतकपोलयुगं मनोज्ञम् ॥४८॥

---

१. मत्कीर्ति°—रीवाँ ।

स्कन्धेऽनुगस्य निहितोरुभुजं करेण द्वैतीयकेन कलयाभ्रमनन्तमब्जम् ।
पारे परार्धमितपञ्चशरावतारं वीक्ष्यान्तरा विनिदधुर्मुनिवर्यपत्न्यः ॥४९॥
रामः प्रसन्नमुखचन्द्रसुधास्मितौघैस्तासां मनश्चिरवियोगहुताशदग्धम् ।
आनन्दसारजलधिः स्नपयाम्बभूव जातास्तदेकहृदयाः सहसा यथामूः ॥५०॥
ऊचे प्रभुः करुणया कलयन्नशोकास्ता योगिवर्यदयिताः स्मयमान एव ।
सुस्वागतं सुवदना भवतीभिरत्र प्रीतिर्मयि स्फुरति वः सुकृतावलीनाम् ५१
मय्यात्मनि प्रियतमे प्रणयं विधाय स्वर्गापवर्गपदवीष्वपि मुक्तवाञ्छाः ।
लोकोत्तरा मम जनाः सुखमासते वै मृत्योः शिरे निजपदं सहसा विधाय ५२
धन्या भवत्यो वनिता मुनीनां निःसाधना एव फलं यदापुः ।
किं ते क्रियातन्त्रनिबद्धचित्ता युष्माकमीशाः फलवस्तुमुग्धाः ॥५३॥
कृतार्थाः स्थ भवे यूयं न पुनर्वो भवागमः ।
भवतीनां संगमेन तेऽपि यास्यन्ति तत्फलम् ॥५४॥
इत्युदीर्य वचस्ताभिरानीतं भूरि भोजनम् ।
श्लाघ्यमानः सखियुतो बुभुजे यज्ञभुक् स्वयम् ॥५५॥
ता ऊचिरे समधिगम्य महाप्रसादं
प्राणेन संप्रति न नः प्रिय मोक्तुमर्हः ।
त्वत्पादपद्मयुगमेतदमूल्यदास्यो
नित्यं यथा परिचरेम तथा विदध्याः ॥५६॥
उवाच ताः सुवदना गच्छन्तु मखवाटिकाम् ।
भवत्यः सुखमेधन्तां विनिधाय मनो मयि ॥५७॥
इतो भवान्तरे सख्यो लप्स्यध्वं वाञ्छितं फलम् ।
भूत्वा श्रीसहजादेव्या नित्यसंगा निजालयः ॥५८॥
इति वितीर्णवरो वरदेश्वरो मुनिवधूर्विससर्ज कथंचन ।
सपदि ता अपि तेन वशीकृता निजगृहाणि ययुर्ननु कृच्छ्रतः ॥५९॥
तासां ते दर्शनं प्राप्य कृतिनीनां मुनीश्वराः ।
श्रीरामं विगणय्यान्तरनुतेपुर्मुहुर्मुहुः ॥६०॥

मुनय ऊचुः

अहो किं कृतमस्माभी रामो राजीवलोचनः ।
भजन्नपि न वै भेजे प्रपन्नशरणप्रदः ॥६१॥

अहो नु तस्य वात्सल्यं पत्नीमूढान् दुरात्मनः ।
स्वयमेवानुजग्राह नास्माभिर्विदितं पुनः ॥६२॥
एता एव परं धन्याः स्त्रियोऽपि फलसाधिकाः ।
याभिश्चन्द्रमुखो रामो दृष्टो राजीवलोचनः ॥६३॥
स्वतन्त्र एष भगवान् दाता स्वर्गापवर्गयोः ।
अवतीर्णो हरिः साक्षात् सतां कल्याणहेतवे ॥६४॥
धिगस्मान् धिक् च नः सत्रं धिग्जनुर्धिक् च नः कुलम् ।
यन्नावकलितो रामः पूर्णं ब्रह्म सनातनः ॥६५॥
एतासां दर्शनं पुण्यमसतां पापनाशनम् ।
याभिर्दृष्टो दृशा साक्षाद्रामचन्द्रः स्वयं प्रभुः[1] ॥६६॥
भविष्यति महद्भाग्यमेतासां कथयैव नः ।
रामे सर्वसुखारामे यत्स्याज्जन्मान्तरेऽपि धीः ॥६७॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे पूर्वखण्डे दशरथतीर्थयात्रायां व्रजागमने सप्तदशाधिकशततमोऽध्यायः ॥११७॥

अष्टादशाधिकशततमोऽध्यायः

सुखित उवाच

इदं स्थानं महाराज यत्र रामः शुभाकरः ।
गोगोपगोपिसंदोहान् दावाग्नेः पर्यरक्षयत् ॥ १ ॥
ज्योतिर्लिङ्गेश्वरं नाम लिङ्गमत्र त्रिशूलिनः ।
सर्वे कृष्णचतुर्दश्यां दर्शनार्थमुपाययुः ॥ २ ॥
गोपा गोप्यश्च सकलाः स्नात्वा वै सारवेऽम्भसि ।
सङ्कल्पव्रतमातेनुः शिवस्य वरदेशितुः ॥ ३ ॥
ते पूजयित्वा वरदं पञ्चकालमुमापतिम् ।
इहैव विपिनेऽवात्सुः सस्त्रीपशुकुमारकाः ॥ ४ ॥

---

१. रामो रामचंद्रः स्वयं—बडो० ।

अर्धरात्रे व्यतीते तु समन्ताद्विपिनं दहन् ।
उपस्थितो दाववह्निर्ज्वालाभिर्गगनं लिहन् ॥ ५ ॥
अभ्रङ्कषज्वालविशालमालादुर्दर्शरूपो विलिहन् समन्तात् ।
भस्मीकरिष्यन् पशुपां कुलानि दावानलः पर्यवृतत्[1] स तत्र ॥ ६ ॥
सुप्तानि खेचरकुलानि यदीयदेशेष्वण्डानि दावदहनेन विनिर्दहन्ति ।
त्यक्त्वा स्व[2]जीवितहितैषिण उच्चकैः खमुड्डिडिचरे सकरुणं कलितस्वनानि॥
कोला वनेवसतयो निभृतं सनिद्रा आकस्मिकेन दववह्निशिखागणेन ।
संप्लुष्यमाणवपुषः परितो भ्रमन्तः क्वापि प्रवेशमनवाप्य विनाशमापुः॥८॥
त्रस्ता दवेन करिणश्च करेणुयुक्ताश्चोत्कारिणः प्रतिरवाकुलकाननान्तः ।
शुण्डोच्छलज्जलभरेण वपुर्निताम्तमुक्षन्त एव दवदाहभृतो मुमूर्च्छुः ॥ ९ ॥
आवेजिता वनकृशानुकरालकोला मध्येऽनुधावितमपि प्रसभं न शक्ताः ।
सिंहा मृगाश्च शिखिनो भुजगाश्च यूथैरन्योन्यवैरमुदपास्य सहैव तस्थुः।१०।
वित्रासिनो मृगजपोतगणाः समन्ताद् भ्राम्यन्त आकुलधियो वनपावकेन ।
उत्सर्पता स्वजननीभिरपि प्रमुक्ता नो वर्तितुं न चलितुं च तदाङ्ग[3] शेकुः ॥
इत्थं ज्वलत्यविरतं विकरालरूपे दावानलेऽतिविकला व्रजवासिलोकाः ।
शोकाकुलीकृतधियोऽन्यविचारशून्याः श्रीराममेव शरणं सहसा प्रजग्मुः१२

लोका ऊचुः

हे राम राम रघुराम सदाभिराम
हे लक्ष्मणाग्रज सदा कुशलैकधाम ।
सर्वाधिहन् निजजनव्रजपालनेऽपि
किं सर्वशक्तिसमुपेत विलम्बनेन ॥१३॥
डाकिन्यः कालरूपं विकटविदलनं वीरवात्यासुरघ्नं
वत्साकारारिमारं भुजगगरहरं श्येनशार्दूलवारम् ।
यादोनाथाभिमानप्रसरनिरसनं शक्रकोपोपसृष्टा-
सारत्राणातपत्रं विगतिशरणदं त्वां वयं संश्रिताःस्म ॥१४॥

---

१. पर्यवृतः—मधु०, बड़ो० । २. त्यक्त्वाशु—अयो०, तत्काल°—रीवाँ ।
३. वदितुं न—रीवाँ ।

इत्थमभ्यर्थितो रामः स्वानां वीक्ष्य दवापदम् ।
उवाच यूयं सर्वेऽपि मुद्रयन्तु विलोचनम् ॥१५॥
ततः स्वयं पपौ रामो दुर्वारं दावपावकम्
क्षणान्निववृते तापः पशुपक्षिमहीरुहाम् ॥१६॥
इत्थं संशमिते दाहे दावपावकसंभवे ।
गावो गोपास्तथा गोप्यः सर्वे भद्राणि लेभिरे ॥१७॥
आकस्मिकदवोद्भूतमहानलनिवारणे ।
रामे विस्मितचित्तास्ते सर्वेऽप्यासन् व्रजौकसः ॥१८॥
तमेतमासुरं वह्निं शमयित्वा वनौकसाम् ।
क्रीडन् व्रजजनैः साकमियाय व्रजमीश्वरः ॥१९॥

ब्रह्मोवाच

अथैनमन्यतो नीत्वा बभाषे गोपपुङ्गवः ।
एष भद्रवटो नाम न्यग्रोधो बहुपादपः ॥२०॥
अत्रैव निहतौ रामलक्ष्मणाभ्यां महाबलौ ।
दुस्सहौ दुर्धरश्चोभौ क्रूरौ दानवपुङ्गवौ ॥२१॥
गोचारचतुरौ रामलक्ष्मणैर्भ्रातृसंगतौ ।
गोकुलानि पुरोधाय यदा गोष्ठाद्विनिर्गतौ ॥२२॥
सर्वगोपालसहितौ सर्वभूषणभूषितौ ।
तदा न्यविशतां मञ्जुप्रमोदवनमद्भुतम् ॥२३॥
ग्रीष्मेऽपि स्वगुणैरेव वसन्तायितमद्भुतम् ।
सौगन्धिकगिरिस्रावनिर्झरोदकशीतलम् ॥२४॥
सरयूजलकल्लोलसंगिमारुतशीतलम् ।
कूजत्सारसचक्राह्वकारण्डवकुलावृतैः ॥२५॥
कलहंसकृतोन्मादै राजहंसनिषेवितैः ।
सरोभिः पल्वलैः कुण्डैर्वापिकाभिश्च मञ्जुलम् ॥२६॥
वटकल्पतरुच्छायासीनपक्षिमृगाकुलम् ।
कोकिलोद्गीतमनिशं मल्लिझंकारमञ्जुलम् ॥
उत्फुल्लकमलामोदवाहित्रिविधमारुतम् ॥२७॥

तत्र प्रवालशिखिपिच्छविचित्रधातु-
गुञ्जौघभूषितवपुःसुभगाः समस्ताः ।
रामादयो विविधकेलिविनोदविज्ञा-
श्चिक्रीडुरात्तरसरञ्जनरक्तचित्ताः ॥२८॥

केचिन्ननृतुरन्योन्यमपरे युयुधुश्च ते ।
परे जगुस्तदन्ये च वाद्यानि परिदध्वनुः ॥२९॥
वंशीवेणुविषाणादीनापूर्यमधुरस्वरैः ।
सर्वतो घोषयाञ्चक्रुर्गोपा काननगह्वरम् ॥३०॥
वैदेशिकनटार्हेण वेशेन परिशोभितौ ।
श्रीरामलक्ष्मणौ तेषां मध्ये युयुधतुः परम् ॥३१॥
आहूयाहूय गोपालान् मल्लयुद्धविशारदौ ।
मध्ये मण्डपमत्यर्थमेतौ शुशुभतुर्वने ॥३२॥
क्वचिन्मण्डलमावध्य वयस्यैर्बभ्रमुश्च ते ।
क्वचिच्चैवातिमर्यादं कुल्यादीनि ललङ्घिरे ॥३३॥
क्वचिच्चिक्षेपुरन्योन्यं कन्दुकक्षेपमात्मनः ।
क्वचिदास्फोटनं चक्रुः क्वचिच्च चकषुर्जवात् ॥३४॥
क्वचिद् गोपालवीरैस्ते बाहुयुद्धविशारदाः ।
क्वचिद् वृक्षफलक्षेपैर्नियुद्धं ते वितेनिरे ॥३५॥
क्वचिन्नृसिंहवाराहवामनादयवतारणम् ।
प्रदर्शयन्तश्चत्वारो भ्रातरो रेमिरे वने ॥३६॥
एवं विक्रीडतो रामलक्ष्मणादीन् व्रजौकसः ।
तुष्टुवुः साधुवादेन हृदयोत्साहवृद्धये ॥३७॥
नटमल्लवराक्रीडा गन्धर्वा इव गायिनः ।
महत्कौतूहलं चक्रुः प्रमोदविपिनेऽन्तरे ॥३८॥
कदाचिदद्युध्यतो रामसुमित्रासुतयोरपि ।
दुर्धरो दुःसहश्चोभौ सखिवेशावुपेयतुः ॥३९॥
शिखाबलाकृतिः पूर्वो मेघवर्णाकृतिः परः ।
युद्धयन्तौ तौ चिरं ताभ्यां दूरे निन्यतुरासुरौ ॥४०॥

तत्र तावतिबलोन्मदावुभौ रामलक्ष्मणनिपातवाञ्छिनौ ।
विक्रमं बहु वितेनतुः परं नानयोर्बलमसीममीयतुः ॥४१॥
ततस्तौ वनवेगाभ्यां मुष्टिभ्यामुरसी तयोः ।
संताडय जग्मतुर्दूरं पुनराघातदित्सया ॥४२॥
तौ मुष्टिमावध्य समागतौ पुनः पद्भ्यां गृहीत्वा बलिनौ बलेन तौ ।
न्यपातयेतां कठिने शिलातले विचूर्णिताङ्गैर्व्यसुतामुपेयतुः ॥४३॥
शिलातलं चापि तदङ्गपाततः संचूर्णितं तच्छतधाभवन्नृप ।
ततस्तयोर्मूर्द्धनि कल्पवृक्षजप्रसूनवृष्टिर्न्यपतत्सुरालयात् ॥४४॥

ब्रह्मोवाच

ततोऽन्यतो नृपं नीत्वा बभाषे गोपपुङ्गवः ।
इदं स्थलं पश्य यत्र पूर्वं रामस्तृणानिलम् ॥४५॥
निपात्य दैत्यं बलिनौ क्रीडन्तं रामलक्ष्मणौ ।
सभ्रातृकौ गोपगणैर्नेक्षाञ्चक्रे गवांगणम् ॥४६॥
गोकुलं तृणलोभेन सरयूकच्छभूगतम् ।
ग्रीष्मे संतापितो भानोः किरणैराकुलीकृतम् ॥४७॥
विवेश सैकते नद्याः स्रोतसा रुचिरोज्झिते ।
इषीकानां वनं यत्र प्ररूढानां समंततः ॥४८॥
अथ सर्वे विचिन्वन्तो गोधनानि व्रजौकसः ।
खुराङ्कैर्दन्तसंदृष्टघासैश्चानुगताः ययुः ॥४९॥
उपलभ्य गवां वृन्दं प्राप्तजीवा इवाभवन् ।
तावत्तृणाटवीमध्ये समन्तादुदगाद्दवः ॥५०॥
तयोर्दानवयोः कश्चित्सखा दग्धुमना व्रजम् ।
उद्ययौ ज्वालरूपेण निर्दहंस्तृणकाननम् ॥५१॥
तमुद्गतं वीक्ष्य महातृणानलं गावश्च गोपाश्च महाभयेरिताः ।
तमेव देवं शरणार्थिनो ययुर्निवेदयांचक्रुरथो भवागमम् ॥५२॥
गावो निरीक्ष्य मुखमीशितुरिन्दुचारुं
प्रोद्यस्य बालधिमतीव न रम्भमाणाः ।
दृक्संज्ञयैव जगदुर्महतीं निजार्तिं
कारुण्यकातरधियो दवहाहभीताः ॥५३॥

पाहि प्रभो प्रथमवत्प्रथयात्मवीर्यं
प्राप्तान्यनन्यशरणानि गवां कुलानि ।
अस्मांश्च केवलनिजाङ्घ्रिसरोजमूल-
विच्छेदभीतिविवशान् करुणापयोधे ॥५४॥
इत्यात्मीयरुजं वीक्ष्य रामः करुणलोचनः ।
तान् मीलितदृशः कृत्वा सहसैवापिबद्वयम् ॥५५॥
संहारिते दावकृशानुपुञ्जे गावश्च गोपाश्च ततः क्षणेन ।
सर्वेऽपि ते भद्रवहं पुरेव संप्रापितास्तेन सुखाकरेण ॥५६॥
दृष्ट्वा भद्रवटं गोपाः सर्व एव सुविस्मिताः ।
अहो अस्यानुभावोऽयं सख्युरस्माकमीदृशः ॥५७॥
इति सर्वे प्रशंसन्तः पूजयाञ्चक्रुरात्मनः ।
आत्मानं सुहृदं चैव सखायं प्रियमीश्वरम् ॥५८॥
अभिरामो वृतो गोपैर्गोधनैश्चातिहर्षितैः ।
वेणुं विरणयन्नुच्चैराजगाम व्रजं प्रति ॥५९॥
व्रजवासिन आश्रुत्य रामलक्ष्मणयोः परम् ।
विक्रमं गोपवृन्देन कीर्तितं विस्मयं ययुः ॥६०॥
अहो अयं कोऽपि विभूषितो गुणैरिहावतीर्णः पुरुषोत्तमः पुमान् ।
सतां हिताय्यसतामपास्तये त्रयीसुधर्मद्विजगोअभीष्टदः ॥६१॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे पूर्वखण्डे महाराजतीर्थ-
यात्रायां व्रजागमने अष्टदशाधिकशततमोऽध्यायः ॥११८॥

एकोनविंशाधिकशततमोऽध्यायः

इदं स्थानं महाराज यत्र रामः स्वयं हरिः ।
कुपितेन्द्रकृतां वृष्टिमरुणत् स्वातपत्रतः ॥ १ ॥
एकदाहं कर्मरतो नवान्नेन पुरन्दरम् ।
विवक्षुरारभं राजन् मखं भूरिकृतव्ययम्[1] ॥ २ ॥
संभाराः सर्वतो दिक्षु कल्पिता अङ्गणे गृहे ।
यियक्षमाणेनाहूता मर्यात्विगुचिता[2] द्विजाः ॥ ३ ॥
अधिवासनस्य पूर्वेऽह्नि रामो दृष्ट्वा ममोद्यमम् ।
उवाच धरणीपाल स्मित्वा मधुरभाषणः ॥ ४ ॥

श्रीराम उवाच

अहो तात किमेतद्वः संभ्रमः सुमहान् गृहे ।
कोलाहलः प्रतिगृहं संभारकरणे नृणाम् ॥ ५ ॥
एकैरानीतवस्तूनि स्थाप्यन्ते सेवकैः परैः ।
अन्यैस्तथैव संभारा आनीयन्ते तवाज्ञया ॥ ६ ॥
आनेष्यन्ति परे भूयोऽप्याज्ञाया वशगा नराः ।
एवमान्दोलितं विश्वं दृश्यते बहुवासरात् ॥ ७ ॥
उत्सवो वा विवाहो वा कोऽप्यपूर्वोऽथवा विधिः ।
कथ्यतां तात भवता ममापि ज्ञातुमिच्छतः ॥ ८ ॥
तदाहमूचे मर्मज्ञं निखिलागमवाचितम् ।
आरब्धोऽयं मखो राम यष्टव्यो यत्र वासवः ॥ ९ ॥
मेघानां नायकः सर्वजगज्जीवनदायकः ।
देवानामग्रणीश्चैव वज्रहस्तः पुरन्दरः ॥१०॥
यज्ञेन देवा भाव्यन्ते भावयन्ति नरान् सुराः ।
एवमन्योन्यतो भावैरसकृच्छुभमाप्यते ॥११॥

---

१. °धनव्ययम्—मथु०, बड़ो० । २. मया ते गुणिनो—रीबाँ ।

यज्ञार्थं क्रियते कर्म कष्टमप्यर्थितुं फलम् ।
अन्यत्र कर्मलोकेऽस्मिन् सर्वतो गर्हितं बुधैः ॥१२॥
प्राप्ततत्त्वोऽपि कुर्वीत कर्म वेदोदितं शुभम् ।
अकुर्वन् लौकिकं सेतुं भज्यान्नैवात्र संशयः ॥१३॥
ब्रह्मार्पणधिया वापि फलावाप्तिधियाथवा ।
लोकसंग्रहणार्थं वा कर्म कुर्वीत कोविदः ॥१४॥
इति निशम्य मयेरितमीदृशं वचनमेष समस्तनियोजनः ।
किमपि मञ्जुलहाससुधाञ्चितं विरचयन् वदनं निजगाद माम् ॥१५॥
अहो अभिहितं तात भवता गोपसत्तम ।
यथा ददर्श वेदेषु तथात्थ त्वमिदं मम ॥१६॥
एवमाचरणं पुंसां पारम्परिकमेव भोः ।
यथा गड्डरिका[1] मार्गस्तथा जानीहि तत्त्वतः ॥१७॥
विविधाः कर्मणां मार्गाः पृथक् तेषां च वासनाः ।
याभिर्बद्धो याति[2] जन्तुरुच्चावचगतीर्मुहुः ॥१८॥
इज्येते देवताः सर्वाः पृथक् तन्त्रे क्रियापथे ।
ताभिर्दत्तान् भजन् भोगान् नवेत्यात्यन्तिकं हितम् ॥१९॥
अनित्यं कर्मणां तात फलं लोकप्रसाधनम् ।
इति विज्ञाय पुरुषो न कर्मस्वनुषज्जते ॥२०॥
यथा यथा कर्मफलानि भोगान् भुङ्क्ते जनस्तात तथा तथासौ ।
संप्रेरितो लुब्धधीरिन्द्रियेण न वै कदाचिद्भजते विरक्तिम् ॥२१॥
तस्मात्तत्त्वं विजनीयाद्यन्नित्यफलसाधनम् ।
जानन्नपि फले नित्ये कस्तावदनुषज्जते ॥२२॥
ज्ञात्वा भागवतं धर्मं नित्यानन्दफलोदयम् ।
भजस्व भवरोगैकमज्जनं हृत्प्रसादनम् ॥२३॥
त्वं तात वैष्णवान् धर्मान् साधयस्व सदाहितान् ।
गोविप्रभक्तवृन्दस्य यत्र पूजा विधीयते ॥२४॥

---

१. गरुड्डिका—रीवाँ । गड्डरिका—मथु०, बड़ो० । २. वर्द्धयते—अयो० ।

किं तात कार्यमिन्द्रेण पदं प्राप्तेन सावधि ।
स्वयं रुग्णः किमन्यस्य रोगान् संनाशयिष्यति ॥२५॥
यावत्यो देवताः सर्वास्ता वेदविदि वै द्विजे ।
तस्मात् पूजय विप्रांस्त्वं वैष्णवांश्च विशेषतः ॥२६॥
गिरिरेव स मद्भक्तः[1] धनुर्वाणाङ्कभूषितः ।
पूजनीयो विशेषेण रत्नाद्रिर्जनपावनः ॥२७॥
सौगन्धिकगिरिश्चैव रत्नाद्रिश्च विशेषतः ।
वलिभिर्धूपदीपाद्यैः पूजनीया उभौ गिरी ॥२८॥
अस्माकं गोधनं यत्र वर्द्धते सुखितं सदा ।
स एव पूज्यतां तात रत्नाद्रिः सर्वदा त्वया ॥२९॥
दीप्यन्तां कन्दराश्चास्य दीपैः कर्पूरवर्त्तिभिः ।
यासु कल्पद्रुमारामसमञ्जुलासु रमामहे ॥३०॥
अन्नराशिमयैः कूटैर्गिरिरेष विभूष्यताम् ।
भोज्यन्तां ब्राह्मणवरा भोज्यैः स्वादुतमैरिह ॥३१॥
पच्यन्तां मण्डकापूपपूरिकाखण्डमण्डकाः ।
वटकाः क्षीरवटकाः बटका नवनीतजाः ॥३२॥
आदर्शका माठिकाश्च चक्रिका दुग्धचक्रिकाः ।
गुह्यकाः शर्करापाराः पायसं जलवल्लिकाः ॥३३॥
पृष्ट्वाखिलान् गोपवृद्धान् पक्वान्नानि विशेषतः ।
क्रियन्तां राशिवत्तानि भोज्यन्तां तैर्द्विजातयः ॥३४॥
वैष्णवाश्च विशेषेण चातुर्वर्ण्यो द्भवा जनाः ।
संबन्धिन उदासीना ज्ञातयश्च कुटुम्बिनः ॥३५॥
भूष्यन्तां भूषणैर्वस्त्रैश्चन्दनागुरुकुङ्कुमैः ।
आगतस्वागताद्यैश्च तोष्यन्तामुपचारकैः ॥३६॥
एवमानन्दिता लोका विचरन्तु समन्ततः ।
कुर्वन्तु व्रजवीथीषु भूषाविधिमनुत्तमम् ॥३७॥

१. मम भक्तः—मथु०, बड़ो० ।

गायन्तु चापि वाद्यानि वादयन्तु शुभान्विताः ।
क्रीडन्तु व्रजसुन्दर्यः कौतूहलविधायिकाः ॥३८॥
एवमुत्साहविहितः क्रियतां तु महोत्सवः ।
आषाढस्य सिते पक्षे तृतीया पुष्यसंयुता ॥३९॥
तस्यां महोत्सवः कार्यो रथयात्रा हरेर्हि सा ।
मम जन्मदिने चापि फाल्गुन्यां च व्रजेश्वर ॥४०॥
कुरु प्रीतमनास्तात वैष्णवाराधनव्रतम् ।
कार्तिके मार्गशीर्षे च विधिवत् क्रियतामिदम् ॥४१॥
यथा सुतुष्टो भगवान् प्रयच्छेदतुलं फलम् ।
धनूराशि[1]गते चार्के दधिपायसशर्कराः ॥४२॥
निवेद्य हरये नित्यं भोज्यन्तां वैष्णवा जनाः ।
निवेद्य सीताकान्ताय यद्वैष्णवमुखे हुतम् ॥४३॥
तत्तदक्षयतां याति कल्पकोटिशतावधि ।
एवमाभाष्य नो रामः कारयामास भक्तितः ॥४४॥
गोविप्रभक्तबन्धुस्त्रीसपर्यां तां यथोचिताम् ।
रत्नाद्रेः परितो राजन् सौगन्धिकगिरेस्तथा ॥४५॥
सरयूतटभूमेश्च कृता भूयस्यलङ्क्रिया ।
स्नात्वा सर्वे गोपवराः पूजां चक्रुर्मया सह
गवां चैव द्विजानां च वैष्णवानां गिरेस्तथा ॥४६॥
दीपावलीभिः सरयूतटानि प्रदीपितानि द्रुममण्डलानि ।
शृङ्गाणि सौगन्धिकपर्वतस्य रत्नाद्रिशैलस्य च सर्वतोऽङ्गम् ॥४७॥
अधित्यका उपत्यका दरीगृहाश्च गह्वराः ।
लतावितानमण्डपाः प्रदीपकैः प्रकाशिताः ॥४८॥
बलेर्दिनं पुरस्कृत्य कार्तिके शुक्लपक्षके ।
दिने दिने गवां पूजा वैष्णवानां द्विजन्मनाम् ॥४९॥
गन्धैः पुष्पैस्तथा धूपैर्दीपैर्नैवेद्यराशिभिः ।
धनुर्वाणाङ्कितं शैलमलञ्चक्रुर्व्रजौकसः ॥५०॥

---

१. धनराशि—अयो०, मथु०, बड़ो० ।

प्रमोदवनदेवीभिर्गीयमानं समंततः ।
असकृ[1]द्रामचन्द्रस्य मधुरं विमलं यशः ॥५१॥
दीपमानाश्च ताः पूजाः स्वयं स बुभुजे गिरिः ।
भूत्वा पुरुषधौरेयो वृक्षशाखामहाभुजः ॥५२॥
भुक्त्वा पक्वान्नसंभारान् संतुष्टोऽदाच्छुभाशिषः ।
गोगोपगोपोनिवहैः श्रीरामो जीवताच्चिरम् ॥५३॥
दरीमुखविनिर्याताः श्रुत्वा गिरिवराशिषः ।
संतुष्टा गोदुहः सर्वे भेजिरेऽतीव विस्मयम् ॥५४॥
इत्थं समाप्य सुकृतेन बलेर्दिनं तदत्युत्सवाकलितमद्भुतचित्तहारि ।
धूर्णन्त आनन्दभरेण गोपाः स्निग्धाशयाः प्रियतमे सदनान्यभीयुः ॥५५॥

पूजाभङ्गं समालोक्य कुपितः पाकशासनः ।
प्रेरयामास जलदान्नन्दिग्रामं निमज्जितुम् ॥५६॥
गच्छन्तु कालजलदा मज्जयन्तु व्रजावनीम् ।
ये मत्तास्त्यक्तसीमानस्तान्नाशयत तत्क्षणात् ।.५७॥
अहो गौपैरमर्यादैः क्षत्रबन्धुगिरा वयम् ।
देवा अपि जगद्रक्षाकारिणो ननु लङ्घिताः ॥५८॥
तेषां द्वित्रिदिनोद्भूतं सौभाग्यश्रीमदं क्षणात् ।
हरताम्भोधराः सद्यो नाशयध्वं सगोधनम् ॥५९॥
नष्टजीवातवो नष्टदारापत्यसुहृद्गणाः ।
ज्ञास्यन्त्यात्मकृतं कर्मविपाकं क्षुद्रबुद्धयः ॥६०॥
अद्यावधि न केनापि कृतमीदृग्विकर्म च ।
यादृक् श्रीधनमत्तान्तःकरणैरेभिरञ्जसा ॥६१॥
इत्याज्ञाप्य महामेघान् पुष्करावर्तकादिकान् ।
प्रेरयामास कुपितः पुरुहूतः श्रियोन्मदः ॥६२॥
तेऽञ्जसा पर्वतप्रायाः कालजीमूतशर्कराः ।
अवाकिरन्नभोदेशं व्रजमावृत्य सर्वतः ॥६३॥

---

१. अश्रृण्म—मथु०, बड़ो०, ।

स्वनन्तोऽत्यर्थगम्भीरं घोषपूरितदिक्तटाः ।
तडिद्भिर्भीषणाकारा आययुः कालवारिदाः ॥६४॥
कराला: कालसदृशाः कालिकाजालदारुणाः ।
शुण्डिशुण्डासमाकारैरासारैर्मुमुचुर्जलम् ॥६५॥
उदग्रैर्मुशलाकारैर्धारासारैररुन्तुदैः ।
महीधरानुदखनन् वायुवेगेरिता घनाः ॥६६॥
धाराभिर्घोररूपाभिः खन्यमानं धरातलम् ।
अभूद्धनूंषि पञ्चाशदभूद्गर्तायितं नृप ॥६७॥
व्रजौकसस्तमालोक्य सर्वप्रलयमुत्थितम् ।
आययुः शरणं सर्वे रामस्य करुणानिधेः ॥६८॥
गावो वत्सा वत्सतर्यो रम्भमाणाः समन्ततः ।
धारासारार्दिता रामं पश्यन्ति च शुभाननम् ॥६९॥
गोपा गोप्यो व्रजजना महाकालघनार्दिताः ।
[1]कुपितेन्द्रकृतं मत्वा रामं शरणमाययुः ॥७०॥
राम राम महाबाहो लक्ष्मणव्रजजीवन ।
आबाल्याद्रक्षितानां नो विनाशोऽयमुपस्थितः[1] ॥७१॥
राम त्वच्चरणाम्बुजातविरहाद्भीता वयं संप्रति
क्रुद्धेन्द्रप्रतिमुक्तकालजलदासारातिधाराजलैः ।
हे हे नाथ भृशार्दिता व्रजजनाः कं याम जीवैषिण—
स्त्वत्तोऽन्यं शरणं महार्त्तिशमनं त्वं रक्ष नः केवलम् ॥७२॥
इतिस्वानामार्त्तिं हृदि समुपधार्य क्षितिपते
कृपासिन्धुर्बन्धुः स्वजनजनतायाः प्रभुरसौ ।
महोदारस्वान्तो दशरथ कुमारस्तव तदा
वितस्तार च्छत्रं निजमखिलरक्षाविधिपटुः ॥७३॥
छत्रं रामस्य यावज्जलधरपटली दारुणासारवर्षं
विस्तारं भूरि भेजे कठिनतरशिलावज्रपातेऽप्यशीर्यत् ।

१-१. नास्ति—रीवाँ ।

तस्याधो गोपगोपीपशुगणसहिताः सर्व एव व्रजस्थाः
पश्यन्तो रामचन्द्राननतुहिनकरं त्यक्तभीशोकमासुः ॥७४॥

एवं स पक्षपर्यन्तं[1] कुपितः पाकशासनः ।
अमुञ्चत् कालजलदैरासारं व्रजनष्टये ॥७५॥
गर्जदैरावतारूढो वर्षन् पाषाणधोरणीम् ।
व्रजस्योन्मूलनं शक्रश्चिकीर्षुरनटद्दिवि ॥७६॥

पक्षस्यान्ते निशम्य व्रजमखिलमसौ किञ्चिदप्यश्मपातै-
रक्षुण्णं रामचन्द्रामितविततमहाछत्रवर्यस्य मूले ।
जाताहङ्कारनाशस्तृणमिव लघुतां स्वस्य मन्वान इन्द्रः
पर्जन्यानां समूहं सपदि गगनगं[2] वारयामास भीतः ॥७७॥
रामस्य वीर्यादतुलाद्दुरन्तात्सभीतभीतश्चकितः पुरन्दरः ।
निश्चित्य रामं पुरुषप्रकाण्डं मुहुः स्वकार्यादनुतापमापत् ॥७८॥
रामोऽपि दृष्ट्वा प्रलयाभ्रजालं सद्यो निवृत्तं वितथोद्यमात्ततः ।
संजह्न आविंशतियोजनाधिकं विस्तीर्णमह्नाय निजातपत्रम् ॥७९॥

स्थानं च तदिदं राजन् यत्र लज्जानतो हरिः ।
आययौ शरणं रामं स्तुवन्निगमसूक्तिभिः ॥८०॥
विहाय मुकुटं यानं पादुकां छत्रचामरे ।
शुष्यता वदनेनासौ सापराधोऽभिलक्षितः ॥८१॥
धावित्वैव ततो दूराज्जगृहे पादमस्य सः ।
सापराधानामपि वै शरण्यं शरणार्थिनाम् ॥८२॥

सोऽवाङ्मुखो नामुञ्चदस्य पादौ कारुण्यवारांनिधिमानसस्य ।
उत्तिष्ठ देवेश सुधीर्भवेति तमुत्थापयामास कथंचन प्रभुः ॥८३॥
स उत्थितो वाग्वदनत्वमुज्झन्न[3]स्तौत् सुपर्वाधिप आत्तसूक्तिः ।
रत्नाद्रिसद्रत्नशिलानिषण्णं सिंहासनस्थं नृपमेव रामम् ॥८४॥
यावद्बुद्धिवितानकल्पितवचोविस्तारवाग्गुम्फनं
स्तुत्वा सर्वजनात्मभूतमखिलाधारं सुधर्माधिपः ।

---

१. वर्षर्तुपर्यन्तं—अयो० । २. च खगतं—रीवाँ । ३. मुंचन्—रीवाँ ।

स्वर्धेनुस्तनिकाचतुष्टयभवैर्दुग्धै र्बहिः संचर—
त्सौरभ्यैः सहसाभिषिच्य पुरतस्तस्थौ निबद्धाञ्जलिः ॥८५॥
स्वर्धेनुरपि सुप्रीता संस्तूयेन्द्रापराधनम् ।
क्षमाप्य सादरं पश्चादुवाचेदं महीपते ॥८६॥
एवमेव खलु निग्रहं दधत्स्वान् खलेन विदधच्च निर्भयान् ।
राम[1] धामघनवाम[2] मत्कुलं पालयंश्च शरदां शतं जय ॥८७॥
त्वं पूर्णः पुरुषोत्तमः सुविदितः कारुण्यसिन्धो मनाक्
सद्धर्मद्विजधेनुदैवतजनत्रय्यादिरक्षापरः ।
मूढस्यात्मरहस्यवेदनविधौ सामर्थ्यहीनस्य किं
न्वाग[3]श्चेतसि राम संकलयसे पुत्रस्य माता यथा ॥८८॥
इत्युक्त्वात्मानमस्य प्रणतजनशरण्याङ्घ्रिपद्मे समर्प्य
स्वर्धेनुः पातयित्वा त्रिदिवपरिवृढं दण्डवत्तत्पुरस्तात् ।
आदायाथाभ्यनुज्ञामतुलमधुरिमान्यलावण्यपूरैः ।
सिक्तान्तर्नेत्रयोश्च प्रणयपरवशागच्छदिन्द्रेण सार्द्धम् ॥८९॥
एतत्तस्याः पयःपूरैर्जातमत्यद्भुतं सरः ।
अत्रावगाह्य नृपते लभन्ते सिद्धिमुत्तमाम् ॥९०॥
इमान्यैरावतपदचिह्नानि धरणीपते ।
मुहुर्मुहुर्विलोक्यानि साश्चर्यैर्गोपबालकैः ॥९१॥
अयं शक्रध्वजो नाम रत्नाद्रेरध्युपत्यकम् ।
ग्रामः परमसौभाग्यकमनीयतमो व्रजे ॥९२॥
रत्नाद्रेः परितो मध्ये सरांसि सरसीस्तथा ।
फुल्लेन्दीवरसंजुष्टकमलाः पश्य भूपते ॥९३॥
अत्र तीर्थानि बहुलान्यवगाहस्व सादरम् ।
संपूर्णतीर्थयात्रायाः फलं लब्धासि तत्क्षणात् ॥९४॥
अत्र नारदकुण्डाख्यं तीर्थमस्ति महीपते ।
माहात्म्यं तस्य वक्ता ते सुकण्ठो नाम गोपतिः ॥९५॥

---

१. हेराम—रीवाँ । २- "धाम शरीरं धनवत् वामं सुंदरं यस्य स तत्संबुद्धौ हेघनश्यामविग्रह !" टि०—मधु०, बड़ो० । ३. किंत्वाग—मधु०, बड़ो० ।

शिवकुण्डे नरः स्नात्वा सर्वपापैर्विमुच्यते ।
श्रीरामदर्शनाकाङ्क्षी यत्र नित्यं स्थितो हरः ॥९६॥
स्थानान्यत्र हरस्यापि श्रीरामस्य महीपते ।
निर्दिष्टानि सुकण्ठेन तानि द्रष्टासि विस्मितः ॥९७॥
रामस्यातिप्रियो धन्यः सखा विरहिणां वरः ।
सुकण्ठो नाम गोपालः शेषं ते कथयिष्यति ॥९८॥
रामस्य कैशोरचरित्रमद्भुतं प्रवक्तुमस्मीश[1] न पारये ततः ।
सुकण्ठनामानममुष्य निस्तुलं[2] सखायमादिश्य नदीं व्रजाम्यहम् ॥९९॥
कृतनित्यक्रियः स्नात्वा सरय्वा विमलेऽम्भसि ।
आनेष्ये भोज्यसंभारं तुभ्यं राजन् मुदावहम् ॥१००॥
अत्र मञ्जुवटे तावज्ज्योतिर्लिङ्गेशसन्निधौ ।
सुकण्ठेन कथां शृण्वन् सुखमास्व महीपते ॥१०१

ब्रह्मोवाच

सुकण्ठमादिश्य नृपानुशीलने जगाम गोपः सुखितेश्वराभिधः ।
सुकुण्ठराज्ञोस्तदतः परं सखे भुशुण्ड संवादमनुत्तमं शृणु ॥१०२॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दशरथतीर्थयात्रायां
व्रजागमने एकोनविंशाधिकशततमोऽध्यायः ॥११९॥

❀

---

१. "अस्मीत्यहमर्थे" टि० – मथु०, बड़ो० । २. निष्कलं—अयो० ।

विंशाधिकशततमोऽध्यायः

ब्रह्मोवाच

सुकण्ठो नाम[1] गोपालः सखा रामरहस्यवित् ।
कविर्वर्णनसारज्ञ उपतस्थे महीपतिम् ॥ १ ॥
तं वै दशरथः प्रेम्णा समुपामन्त्र्य सज्जनम् ।
उवाच मधुरं वाक्यं श्रोतुकामः प्रभोर्गुणान् ॥ २ ॥

राजोवाच

अये सुकुण्ठ सुमते नन्दितोऽस्मि चिरादहम् ।
सुखितेन व्रजेन्द्रेण वदता रामसद्गुणान् ॥ ३ ॥
यानि कौमारवयसि चरित्राणि व्रजे सता ।
अनुष्ठितानि रामेण तानि मे सुखितोऽब्रवीत् ॥ ४ ॥
कैशोरचरितं तस्य रहस्यं लोकपावनम् ।
वक्तुं त्वामादिशदसौ सत्कविं सत्सखं प्रभोः ॥ ५ ॥
रहस्यवेदी त्वमसि रामस्याद्भुतकर्मणः ।
कथयस्व गवांपाल तच्चरित्रं रमापतेः ॥ ६ ॥
यावदायाति सुखितः स्नात्वा नीत्वा च भोजनम् ।
तावद्विनोदयतु नो भवान् रामस्य सद्गुणैः ॥ ७ ॥

ब्रह्मोवाच

इत्युक्तो राजवर्येण सभृत्येन स गोपतिः ।
कैशोरचरितं वक्तुमारेभेऽस्य रहस्यवित् ॥ ८ ॥
शृणु भूपाल वक्ष्यामि त्वत्सुतस्यामलं यशः ।
व्रजे विहरतो राजन् रामस्याद्भुतकर्मणः ॥ ९ ॥
शैशवं समतीयाय पित्रोरानन्दनं वयः ।
अथ कैशोरवयसि मोहयन् गोपकन्यकाः ॥१०॥
अरीरमत लावण्यमाधुर्यरसवारिधिः ।
ऋतुषट्कमनोज्ञेऽस्मिन् प्रमोदविपिने रहः ॥११॥

---

१. सुकंठनामा—मथु०, बड़ो० ।

अवर्तत चिरं रामो वार्तयन् मद्विधान् सखीन् ।
श्रीनन्दस्य गोपालराजस्य तनया च सा ॥१२॥
पालिग्रामे सखीवृन्दैः[1] क्रीडतिस्म दिवानिशम् ।
सापि कौमारमभ्येत्य कैशोरवयसि स्थिता ॥१३॥
श्रीरामगुणगानैकवश्याऽभूद्वै दिवानिशम् ।
सहजारामयोर्वृत्तमभिधास्यामि ते नृप ॥१४॥
तत्र लौकिकरीत्या त्वं न भावं कर्तुमर्हसि ।
कामलीलापि राजेन्द्र निष्कामत्वकरी सताम् ॥१५॥
इति विज्ञाय रहसि श्रोतुमर्हसि सादरम् ।
ऋषयः परमहंसाश्च गुणनिःसंगमानसः ॥१६॥
मयोच्यमानं शृण्वन्ति रामकैशोरसत्कथाम् ।
सहजानन्दिनी साक्षात्प्रमोदवनगा रमा ॥१७॥
रामं रमयितुं प्राप्ता श्रीनन्दननिकेतनम् ।
तत्र तस्याः सखीवृन्दं वक्ष्यामि तव भूपते ॥१८॥
याभिः सार्द्धं रमत्येषा शृण्वन्ती रामसत्कथाम् ।
श्यामा धामा मनोरामा रामा कामा कलावती ॥१९॥
सुकेशी मङ्गलेत्यष्टौ तस्याः प्रियसखीवराः ।
सुलोचनानाम तस्याः पृष्ठे श्रीश्छत्रधारिणी ॥२०॥
उभे चामरधारिण्यौ रमणी रामणी तथा ।
ताम्बूलिकापात्रकरा पुरःस्था रतिमञ्जरी ॥२१॥
क्षौविका बन्धुरा चास्यास्ताम्बूलोद्गारधारिणी ।
केशप्रसाधनकरी कर्पूरलतिकाभिधा ॥२२॥
यावकालङ्कारकारी सुवर्णलतिकाभिधा ।
रामप्रेमभरोन्मत्ता पतत्येषा[2] क्षणे क्षणे ॥२३॥
अवलम्बनदात्र्यस्याः सखी मोदा च मोदिनी ।
पद्माभिधा सखी चास्याः सरोभ्यः पद्महारिणी ॥२४॥

---

१. सखांवृन्दैः—अयो० । २. यत्तत्प्रेषा—अयो ।

पुष्पभूषाकरी चास्याः पुष्पवत्यभिधा सखी ।
अभ्यङ्गकारिणी चास्याः कुमुदा नाम तत्सखी ॥२५॥
कुङ्कुमोपेतश्रीखण्डोद्वर्तनी मञ्जुलाह्वया ।
स्नानकर्मप्रवीणाश्च शृणु तस्याः सखीर्नृप ॥२६॥
कमलेशी घोषवती गण्डक्यप्यघवारिणी ।
कौशिकी द्युम्निका चैव वनघोषा त्विरावती ॥२७॥
स्वयं लक्ष्मीश्च नवमी दशमी सरयूः स्वयम् ।
सखीवेशं समास्थाय सेवन्ते सहजां सदा ॥२८॥
सरितश्चन्द्रवदना वशीकृतसुधोदकाः ।
चण्डवेगा सखी तस्या अङ्गप्रोञ्छनकारिणी ॥२९॥
माणिक्यहारिणी तस्याः केशधूपनकारिणी ।
हेमाङ्गदा चित्ररेखा कुङ्कुमा कुब्जिका[1] तथा ॥३०॥
चतस्रश्चतुराः सख्यो भूषाविधिविधायिकाः ।
रागिणी च सुरागा च मलया मलयावती ॥३१॥
कुङ्कुमागुरुकस्तूरी अङ्गरागविधायिकाः ।
किशोरी कृशमध्या[2] च सुमध्या च सुलोचना ॥३२॥
अमूर्वसनविन्यासपण्डितास्तत्र वर्ष्मणि ।
अनेकपत्ररचनाविचक्षणधियः सखीः ॥३३॥
रत्नाङ्गदा च सुहिता कुटिला कुटिलालका ।
आदर्शधारिणी तस्याश्चन्द्रबिम्बाह्वया सखी ॥३४॥
आः साधुवादिनी तस्याश्चित्तदेवी सखीवरा ।
कथाकथनचातुर्यवत्योऽस्याः कतिचित्सखीः ॥३५॥
विचित्रचित्रलतिका सुमुखी च सुकण्ठिका ।
मानापहरणे दक्षा नर्मसख्यः सदा हिताः ॥३६॥
सुदती शालिनी शीला सुशीला प्रेमपालिनी ।
शुकी च कोकिला रङ्गलहरी चक्रवाकिका ॥३७॥

---

१. कुब्जिका—रीवाँ । २. कृतमध्या—अयो० ।

चञ्चला चञ्चलापाङ्गी वार्ताली वृत्तवेदिका ।
पादसंवाहिनी तस्याः कमला कोकिला कला ॥३८॥

सुकला मृदुहस्ता च सुखा च सरपालिका ।
विद्याधरी महाविद्या रङ्गविद्या च भारती ॥३९॥

काव्यशास्त्रकलाकोटिशिक्षिका वै तदालयः ।
पानीयहारिणी तस्या जाह्नवी कमलावती ॥४०॥

रागविद्याविधौ तस्या गुरुः साक्षात्सरस्वती ।
तस्या भोजनदायिन्यः सख्यः कमललोचनाः ॥४१॥

अमृता च सुधाधारा पीयूषा रत्नपालिका ।
सुपाचिका स्वादुपचा सुप[1]चाद्याः शुभालयः ॥४२॥

वनेभ्यः फलदात्र्योऽस्याः फलदा फलदायिनी ।
सुफला फलिनी चैव हरिता पीतवर्णिका ॥४३॥

मञ्जुगुच्छा स्तवकिनी रत्नवल्लीमुखालयः ।
सहकेलिविनोदिन्यः पूर्वमष्टौ निवेदिताः ॥४४॥

उपवीणनकृत्तस्याः प्रवीणाभाणिकादयः[2] ।
प्रवीणा भाणिका चैव सुस्वरा कोकिलस्वरा ॥४५॥

कलविङ्की[3] कलालापा सुलापा सुलयादयः ।
मार्दङ्गिक्यः सखीवर्याः सुभगा मृदुहस्तिका ॥४६॥

गम्भीरावर्तिनी धीरा सुधीरा पटिमा[4]दयः ।
नाट्यविद्यागुरुस्तस्या मन्दगा राजहंसका ॥४७॥

कलापिनी कलापूर्णा कलहंसी कलावती ।
संगीतविद्याविषये गुरवोऽस्याः सखीवराः ॥४८॥

रङ्गलेखा नृत्यलेखा सुलेखा लोलभाषिणी ।
काव्यालापकलाविद्यागुरुरेषा[5] कलेश्वरी ॥४९॥

एवमस्याः सखीवृन्दः शुभः शुभगुणालयः ।
अन्या लोकोत्तरानन्ददायिकास्तत्सखीवराः ॥५०॥

---

१. शुभ°—अयो०, रीवाँ । २. भाविका°—रीवाँ । ३. कलाविंबो—रीवाँ । ४. पट्टिमा°—रीवाँ । ५. 'रेका—मथु० बड़ो० ।

यासां नामानि धामानि कर्माणि च शुभानि वै ।
ललिता रत्नपूर्णा च सुपूर्णा कनकावती ॥५१॥
चित्राङ्गदा कलापूर्णा स्वादुलापा ललामिनी ।
सुभाला शेवधिर्भृङ्गी शुभाङ्गी[1]सुभगा भगा ॥५२॥
किशोरी कलगाना च कुलिका षोडश त्विमाः ।
अष्टानां पार्श्वगामिन्यो रमण्यो हरिणीदृशः ॥५३॥
यासां गुणानहं वक्तुं न क्षमः कोटिवत्सरैः ।
कर्पूरिणी रत्नपूरा लवङ्गी नवलीलता ॥५४॥
सुलता वञ्जुलदला मञ्जरी रत्नमञ्जरी ।
सुमञ्जरी मञ्जुगमा सुगमा षोडशाब्दिका ॥५५॥
कुमुदाक्षी कुमुदिनी साधुवादा विशारदा ।
शारदा शरदाभोगा[2] स्मरचापा विलासिनी ॥५६॥
कन्दर्पा दलिनी[3]दामा सुदामा दामदायिनी ।
कलहंसो राजहंसी रत्नलीला लयावती ॥५७॥
लुलिता लोलिनी लोला सुलोला लोललोचना ।
एता द्वात्रिंशदाख्याताः षोडशानां च पार्श्वगाः ॥५८॥
सर्वा रूपगुणोत्कर्षयौवनोद्भेदभासुराः ।
क्षेमदा रत्नकलशी कुशला कमलेक्षणा ॥५९॥
तरङ्गिणी सैवलिनी वलिता वेल्लिता सुधा ।
वसुधा वसुधामा च सुधामा धामधारिणी ॥६०॥
धरिणी धारिणी धारा रत्नधारा स्मरातुरा ।
अनङ्गवेगिनी वेगा विलासा विततिस्ततिः ॥६१॥
क्षणप्रभा सुधा मेधा शोभना बहुलाकुला ।
कुशीलवा पुलकिनी पुलका किलकिंचिता ॥६२॥
भाविनी भावदा भव्या सुभव्या शुभवेगिनी ।
सुभावा भावमुदिता पद्मास्या पद्मकोमला ॥६३॥

---

१. सुभाङ्गिः—मथु०, बडो० । २. °भीमा—रीवाँ । ३. दालिनी—अयो० ।

कलानिधिः कोरकिणी कलाशीला शिलावती ।
मणिगर्भा हेमगर्भा चम्पकाङ्गी कुमुद्वती ॥६४॥
मयूरी मानिनी माना धन्यकालोकिनी लया ।
लज्जिता विजिता जैत्रा सुजैत्रा चारुहासिनी ॥६५॥
लासिनी लसिता लीला लीलावत्यतिसुन्दरी ।
चतुःषष्टिरिमाः सख्यो द्वात्रिंशत्पार्श्ववर्तिकाः ॥६६॥
तासां रूपं गुणं शीलं न ब्रह्मापि क्षमो भवेत् ।
अनङ्गमालिनी माला रत्नमाला रतिप्रिया ॥६७॥
रमावती रामरता रतिविम्बा रसालया ।
माधवी मधुपुष्पा च सुपुष्पा सुखपल्लवा ॥६८॥
फलिनी पुष्पिणी वाणा पुष्पवाणविमोहिनी ।
दोहिनी क्षोभिणी क्षेमा क्षेमदा प्रेमदा मदा ॥६९॥
प्रमदा सुमदा मत्ता सुमत्ता मत्तवारणा ।
हारिणी हीरकोद्योता विद्योता विद्युता द्युतिः ॥७०॥
धर्मा सुधर्मा सौरभ्या सुकर्मा कलिकावती ।
रत्नाङ्कुरा रत्नदला रत्नमाला च रत्नभा ॥७१॥
केलिनी कामिनी कान्ता सुकान्ता काममन्दिरा ।
मदिरा दीपिनी दीपा प्रदीपा दीपपालिका[1] ॥७२॥
सुपाली[2] कुलभद्रा च सुभद्रा चाथ भद्रिका ।
कन्दर्पकुल्या कल्याणी सुकेतुः सुनिकेतना[3] ॥७३॥
संकेतिनी सुखवती मोदिनो च प्रमोदिनी ।
प्रेमोदया शुभगुणा सुगुणा गुणदायिनी ॥७४॥
वल्लरी मणिवल्ली च शुभवल्ली विचक्षणा ।
सुक्षणा दक्षिणा दक्षा सुदक्षा दक्षपालिका ॥७५॥
धन्या धरा धृतिमती मदिनी मादिनी मुदा ।
विदन्ती संविदन्ती च रत्नदन्ती महोदया ॥७६॥

---

१. °मालिका—अयो०, २. सुधाली—रीवाँ, ३. °निकेतनी—अयो०, रीवाँ ।

वल्गिनी रत्नवल्गा च वल्गुभाषा सुभाषिणी ।
उक्तिः सूक्तिर्महासूक्तिः प्रेमसूक्तिः सुमेखला ॥७७॥

मुकुरा मुकुरालोका सुलोका लोक[1]भाविनी ।
सुताना च सुगीता च तोषिणी रसरोषिणी ॥७८॥

पुष्टिदा रत्नवर्षा च सुधावर्षा सुखप्रदा ।
कामिनी भामिनी भामा सुभामा लासकेलिनी ॥७९॥

मञ्जुस्मिता मञ्जुदर्शा मालती स्वर्णमालती ।
सुवर्णमञ्मरी भव्यमञ्जरी मधुमञ्जरी ॥८०॥

खञ्जनाक्षी चकोराक्षी पद्माक्षी पद्मसौरभा ।
कामकेशी प्रमदिनी मन्मथा मधुमन्मथा ॥८१॥

अध्यष्टविंशतिशतमेताः सख्योऽम्बुजेक्षणाः ।
चतुःषष्टचालिपार्श्वस्थाः सर्वाः शुभगुणोदयाः ॥८२॥

आसां नामानि कर्माणि सहजानामकर्मवत् ।
गीतानि सुकृतिश्रेष्ठैः पावनानि मनीषिणाम् ॥८३॥

अतो[2]ऽपि द्विगुणं चान्यन्मण्डलं हरिणीदृशाम् ।
यासां राजन् षडधिकं भाति सार्द्धं शतद्वयम् ॥८४॥

ततोऽपि द्विगुणं चान्यन्मण्डलं पद्मचक्षुषाम्[3] ।
भाति पञ्चशती यासां द्वादशाधिकसङ्ख्यया ॥८५॥

चतुर्विंशत्यधिकया सहस्रं सङ्ख्यया ततः ।
ततः सहस्राण्ययुतं नियुतं प्रयुतं तथा ॥८६॥

लक्ष्यकोटचर्बुदा खर्वनिखर्वपद्मसङ्ख्यकाः ।
सख्यः श्रीसहजादेव्या भासन्ते भुवनोत्तराः ॥८७॥

पालिग्राममहारत्नसमुद्रमणिसंनिभाः ।
तासां मध्ये कोटिचन्द्रचन्द्रिकाचारुविग्रहा ॥८८॥

चन्द्रावली[4] च चार्वङ्गी भाति श्रीसहजाह्वया ।
सैकदा सायं समये सन्ध्यादेवीं समर्चितुम् ॥८९॥

---

१. श्लोक°—मथु०, बड़ो० । २. ततोऽपि—मथु०, बड़ो० । ३. °वर्चसाम्—रीवाँ । ४. चन्द्रावती—अयो० ।

आययौ रत्नचार्वङ्गी प्रमोदवनमन्तरा ।
सखीभिश्चञ्चलाभाभिः सहिता मुदिताशया ॥९०॥

चकासन्ती चकोराक्षी चञ्चला व्यचलद् गृहात् ।
हसन्ती हासयन्ती च कुर्वती केलिमद्भुताम्,
अदीपयद्वनं देवी देहकान्त्या शुचिस्मिता ॥९१॥

चमत्कुर्वतीचञ्चलापाङ्गमोक्षैश्चकोरावलीनां मनः कर्षतीव ।
सरोजावली मुद्रयन्ती मुखेन्दुप्रकाशेन कोटीन्दुभासा स्वभासा ॥९२॥

ननु व्यरचि सा वधूरिह सुमेधसा वशी—
करणवस्तुभिस्तुहिनसीकरक्षालिता ।
विलोचनसुखावहावयवशालिनी यन्मनो
जहार हृदिसंगता सकलमङ्गतापञ्च या ॥९३॥

कलानिधिकलाहासकोटिचान्द्रीमनोहरा ।
चकोरकुलचातुर्यन्यक्कारकविलोचना ॥९४॥
सुवर्णलतिकागुच्छसमुच्छलदुरोजभाः ।
सुवर्णकदलीगर्भगर्वहृज्जघनप्रभा ॥९५॥

नवकोकनराकारचरणस्पर्शकारिणी ।
पीयूषवर्षिणी कान्तिपटलेन महीयसा ॥९६॥
सिञ्जानचञ्चरीकौघमञ्जुलालापमेखला ।
सुधातरङ्गिण्यावर्तगम्भीरोद्भासिनाभिका ॥९७॥

त्रिवलीतरङ्गतुलितोदरी रसाधिपनिर्झरी रुचिररोमराजिका ।
रतिमञ्जरीस्तवकसन्निभस्तनी चपलखञ्जरीटयुगललोललोचना ॥९८॥

पुंस्कोकिलालापकलाकलापविजैत्रकण्ठोदितमङ्गलस्वरा ।
विम्बाधरस्थानसुधासमूहसुस्वादुसूक्तिश्रवमञ्जुभाषा ॥९९॥

शरत्सुधारश्मिसहस्रकोटिमुखच्छविव्याप्तवनान्तदेशा ।
शृङ्गारगम्भीरजलाशयौघशैवालवल्लीललितालकान्ता ॥१००॥

ललामभालस्थलभासमानकस्तूरिकाविन्दुविराजिभाग्या ।
अत्यर्थरूपोदयिसर्वकालवर्द्धिष्णुतारुण्यविशेषलक्ष्मीः ॥१०१॥

भ्रुवोर्मनोभूधनुषा समानयोः प्रयुज्यदृग्वाणमनल्पविक्रमम् ।
विदारयन्ती रसिकेन्द्रमानसं लावण्यदेशाध्वरहस्यचारिणी ॥१०२॥

सर्वानवद्याचरिता विचित्रता गुणाम्बुधिश्चक्षुचकोरचन्द्रिका ।
अनर्घ्यरत्नोत्करभासुरच्छविप्रसङ्गकान्तिप्रकरप्रसारिणी ॥१०३॥
तादृग्विधाभिर्वलिताशुभालिभिर्ललामलोलाकृतिभिः समंततः ।
शिञ्जानमञ्जीरकराजहंसकध्वनिप्रसर्पच्चरणा समाययौ ॥१०४॥
कुसुमितमखिलं निरोक्ष्य देवी, प्रमुदवने सहजेश्वरी प्रसन्ना ।
सदृशतमवयोभिरालिभिः सा हृदयमचीकरदात्मना विहर्त्तुम्[1] ॥१०५॥

तस्मिन् वने महत्केलिकुञ्जाह्वं कुञ्जमुत्तमम् ।
पत्रपुष्पफलोपेतलतावृक्षौघमण्डितम् ॥१०६॥

समीरल्हरीलोललुलत्पल्लवशोभितम् ।
अशोकादितरुस्तोममञ्जरीपुञ्जमञ्जुलम् ॥१०७॥
केतकीकाननोद्धूतधूलिधोरणिधूसरम् ।
उत्फुल्लकेतकामोदमाद्यन्मदनमन्दिरम् ॥१०८॥

मालतीमुकुलोन्मीलामिलन्मधुकराञ्चितम् ।
मल्लिकाकुसुमोद्गारिमधुनिर्झरसौरभम् ॥१०९॥
उत्फुल्लकुन्दसंदोहविशदीभूतमन्तरा ।
सहजादर्शनोद्भूतसुखैर्मन्दं हसत्किमु ॥११०॥

अतिमुक्ताद्यपुष्पौघसौरभ्यसुरभीकृतम् ।
रसालमञ्जरीपुञ्जरजसाञ्चितदिक्तटम् ॥१११॥
कर्णिकाकुसुमोद्भासिशोणितानङ्गमण्डपम् ।
मालिकापुष्पसंदोहविकाशविमलीकृतम् ॥११२॥

स्थलपद्मसमुल्लासवशिताहूतषट्पदम् ।
कल्हारवनसौभाग्यस्फुरद्दिव्यसरोवरम् ॥११३॥

पद्मबन्धुमहाबन्धुबन्धूककुसुमाकुलम् ।
सेवन्तिकापरिमलसमाच्छन्नदिगन्तरम् ॥११४॥

---

१. °दत्र केलिलोलम्—रीवाँ ।

दाडिमीकुसुमोल्लासलौहित्यभरशोभितम् ।
धाराकदम्बविटपविकसत्कुमोत्करम् ॥११५॥
लवङ्गलतिकामोदप्रमोदितषडङ्घ्रिकम् ।
माधवीमधुरोल्लासिपुष्पस्रावि मधूत्करम् ॥११६॥
तमालकलिका[1] जालविशालसुषमाञ्चितम् ।
मधूकपल्लवरुचिप्रचयाञ्चितसौभगम् ॥११७॥
वकुलद्रुमविस्तीर्णप्रसूनकुलमण्डितम् ।
माधुरीवल्लरीवृन्दविकसत्पुष्पवृद्धिमत् ॥११८॥
उद्गच्छल्लतिकाकान्तास्तनमण्डलसंगते ।
मत्तालिचूचुकव्राते प्रस्खलद्युवमानसम् ॥११९॥
पुन्नागकुसुमोद्गारिसौरभ्यभरमादनम् ।
यूथिकामण्डपाकाण्डप्रसूनभरशोभितम् ॥१२०॥
काञ्चनारप्रसूनस्थरूपमोहितमानसम् ।
शाखाभुजगृहीतोद्यद्वल्लीसौभाग्यसूचकम् ॥१२१॥
जपाकुसुमसौरूप[2]मण्डिताशेषमण्डपम् ।
फुल्लल्कुरवकस्तोमझङ्कारिभ्रमरावृतम् ।१२२॥
कुरण्टकवनोल्लासमहाशोभानिकेतनम् ।
वाणाकुसुमसंदोहसमुल्लासमनोहरम् ॥१२३॥
चण्डातिकुसुमोद्द्योतिरूपमाञ्जुल्यमादनम् ।
सदा मरुवकोत्कर्षिसौरभोद्गारमोदनम् ॥१२४॥
नानाप्रतानिनीवृन्दसमाक्रान्तमहीरुहम् ।
ललत्किशलयच्छन्ननागपुङ्गवचम्पकम् ॥१२५॥
चाम्पेयकुसुमोल्लासस्वर्णधाराभिषेकवत् ।
पाटलीपटलच्छन्नशाखाशतमनोहरम् ॥१२६॥
सप्तपर्णीपरिमलं प्रमत्तवनवारणम् ।
वरणाद्रुमभूयिष्ठं मन्दारतरुवेष्टितम् ॥१२७॥

---

१. °लतिका°—अयो० । २. °सारूप्य°—रीवाँ ।

आम्रातकद्रुमाक्रान्तं फुल्लंकिंशुकभूरुहम् ।
मालूरविटपाक्रान्तफलसंदोहसुन्दरम् ॥१२८॥
कुम्भवृक्षप्रतिच्छन्नमहातिमिरसङ्कुलम् ।
प्रियङ्गुकलिकावृन्दमनोहारि समंततः ॥१२९॥
मध्ये प्रमोदविपिनं महागह्वररूपधृक् ।
विवेश सहजानन्दा सखीवृन्दसमन्विता ॥१३०॥
नवतारुण्यलीलाभिर्वेल्लन्त्यः सहजालयः ।
चिक्रीडुस्तत्र विपिने करतालपुरःसरम् ॥१३१॥
मञ्जीरभूरिनादेन नादयन्त्योऽखिला दिशः ।
वीणामधुरवादिन्यो विजहुर्मत्तमत्तावत् ॥१३२॥
अवचीय प्रसूनानि लताभ्यः काश्चनालयः ।
विदधुर्भूषणं स्वाङ्गे रतिनिर्जयकारकाः ॥१३३॥
काश्चिज्जुगुम्फुः कुसुमैर्हारान् मध्ये फलाञ्चितान् ।
काश्चिद्वकुलपुष्पेण नासिकाभरणं दधुः ॥१३४॥
वलयाङ्गदताटङ्कशिरोभूषाश्च काश्चन ।
काश्चिद्विजह्निरे सख्यः प्रसूनकृतकन्दुकैः ॥१३५॥
काश्चिदुच्छालयन्ति स्म गगने कुसुमान्यलम् ।
काश्चित्परस्परं जघ्नुः प्रसूनैः कमलैरपि ॥१३६॥
काश्चित्सर्वाङ्गभूषौघं विहृत्य विदधुर्वने ।
काश्चित्करैः करान् बध्वा बभ्रमुर्गीतपूर्वकम् ॥१३७॥
तासां काञ्चीनिनादेन मोहनेन महीयसा ।
मत्तभ्रमरझङ्कारनिनदोऽभूत्तिरोहितः ॥१३८॥
कोमलालापलालित्यं तासां दृष्ट्वा वनान्तरे ।
कोकिला मौनमातेनुर्निन्दन्त्येव स्वकाकलीम् ॥१३९॥
ताः सर्वाः सहजानन्दां कुसुमैः पर्यभूषयन् ।
प्रमोदवनदेवीव सा रेजे नितरां तदा ॥१४०॥
प्रत्यङ्गं भूषितालीभिः सहजा सुखदायिनी ।
पुष्पचापं करे कृत्वा मदनं समभर्त्सयत् ॥१४१॥

तासां विहारं समचष्ट रामो मञ्जीरभूषानिनदानुघोषैः ।
लतान्तरे प्रावृतसर्वकायो द्वित्रै रहस्यैः सखिभिः समेतः ॥१४२॥
तां रोचमानां तडितां समूहे तडिद्गणेशीमिव वीक्ष्य रामः ।
अमूर्च्छदत्यन्तमनोहरैस्तत्कटाक्षवाणैर्हृदि पीड्यमानः ॥१४३॥
शिखावलैरावतमेघवर्णमुच्चैस्तदासौ सखिभिर्गृहीतः ।
सिक्तः पयोभिः सहजाविहारकुण्डोद्भूवैश्चेतनतामवाप ॥१४४॥
पुनः स चैतन्यमवाप्य रामो ददर्श तस्या वदनेन्दुबिम्बम् ।
रुचां समूहैरमृतैरिवान्तः सिञ्चन्तमह्लाय चकोरनेत्रे ॥१४५॥
तदधरमधुरश्रीवीक्षणोद्भूतकाम--
ज्वरशमनमुपायं केवलं तद्विदित्वा ।
चतुरिमनिधिरालीवेशमङ्गीचकार
स्वजनसखिसमूहं द्राक्समुज्झाञ्चकार ॥१४६॥
काचिन्नीलमणिप्रभा नवसखी सर्वाङ्गभूषावृता ।
सौन्दर्येण समुज्ज्वलाङ्ग-वसना लावण्यलीलानिधिः ॥
भूत्वा तत्र कदम्बभूरुहतले तस्थौ समुत्कण्ठया ।
चक्रे श्रीसहजेतिनामजपनं कुर्वन्नृपेन्द्रात्मजः ॥१७४॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे पूर्वखण्डे दशरथतीर्थ-
यात्रायां व्रजागमने विंशाधिकशततमोऽध्यायः ॥१२०॥

●

एकविंशाधिकशततमोऽध्यायः

सुकण्ठ उवाच

अथ तत्रागमत् कापि रामानामप्रिया सखी ।
खेलन्ती पङ्कजं हस्ते बिभ्राणा श्रीरिवापरा ॥ १ ॥
चरणाम्भोजमञ्जीरनादेनातिपटीयसा ।
नादयन्तो दिशः सर्वाः कर्षन्ती राजहंसिकाः ॥ २ ॥

मन्दमन्दमनोहारि पादन्यासं प्रकुर्वती ।
रञ्जयन्ती वने देहकान्त्यासौ विधुदक्षया ॥ ३ ॥
अङ्गसौरभ्यलोभेन परितो विनिपातितः ।
लीलाकमलकम्पेन तर्जयन्ती शिलीमुखान् ॥ ४ ॥
स्वाभाविकेन सौरभ्यसंभारेणातिभूयसा ।
मन्दवायूपनीतेन सूचयन्ती समागमम् ॥ ५ ॥
तनुवस्त्रसमुद्गच्छदच्छच्छविकदम्बकैः ।
दीपिकेव मनोजस्य हरन्ती तमसां ततीः ॥ ६ ॥
मुखचन्द्रचमत्कारिचञ्चद्रुचिररोचिषा ।
रमयन्ती चमत्कारं चकोरीलोचनव्रजे ॥ ७ ॥
चुम्बन्तीवाचिराच्चित्तं प्रविशन्तीव चक्षुषोः ।
आलिङ्गन्तीव सर्वाङ्गं छादयन्तीव चाखिलम् ॥ ८ ॥
परिस्फुरन्तीव पुरः सृजन्तीवाद्भुतं जगत् ।
बोधयन्तीव भावौघं शोधयन्तीव मानसम् ॥ ९ ॥
क्रोधयन्तीव मदनं हेलयन्तीव हावकैः ।
उद्वेलयन्तीवानन्दं मेलयन्तीव वाञ्छितम् ॥१०॥
तां विलोक्य मुदं प्राप दूरात् कमललोचनः ।
कृतकृत्यमिवात्मानं मेने वाञ्छितवस्तुनि ॥११॥
तां विलोक्य पुरः प्रोद्यन्नवनीलमणिप्रभाम् ।
अपूर्वतरुसौन्दर्यशोभिताशेषकाननाम् ॥१२॥
पुष्पपत्रभरानम्रतरुशाखावलम्बिनीम् ।
कान्तां षोडवर्षीयां मदनस्येव वल्लभाम् ॥१३॥
इन्दीवरदलोत्कर्षतनुमञ्जिममण्डिताम् ।
अन्तर्लग्नमनोजाधिविमनायितमानसाम् ॥१४॥
जपन्तीं सहजानाम मुखचन्द्रे मुहुर्मुहुः ।
तेनैव शमयन्ती च प्रदीप्तं विरहानलम् ॥१५॥
इयाय परमाश्चर्यं स्थगितेवाभवद्धृदि ।
आः केयममृतासारैः सिञ्चन्तीव विलोचने ॥१६॥

कर्पूररसधारेव शमयत्यक्षिणी नृणाम् ।
मनोरथानां संपत्तिर्मूर्तेयं विधिनिर्मिता ॥१७॥
नेदृशं भुवने रूपं क्वचिद् दृष्टं श्रुतं तथा ।
प्राणेश्वरीयं भविता व्रजस्यास्य न संशयः ॥१८॥
लावण्यमन्यदेवास्या वृत्तिरन्यैव दृश्यते ।
उत्कीर्य रूपमाधुर्यात्केनैषा प्रकटीकृता ॥१९॥
दृशौ तिरयतो दृष्ट्वा नीलपङ्केरुहश्रियम् ।
सामान्यब्रह्मणो नैषा रेखा संभाव्यते मम ॥२०॥
अवतारोऽथवा कश्चिद्रूपसारस्य भूतले ।
न मानुषी न गान्धर्वी न दैवी नापि चासुरी ॥२१॥
न नागकन्या धन्यैषा नगकन्या न वा भवेत् ।
कस्य सौभाग्यभाग्येन विधिना प्रकटीकृता ॥२२॥
पश्यतां जगतामेषा चक्षुषां पुण्यधोरणी ।
कमालप्यशुभैर्वाक्यै[1]र्मनस्यानन्दयिष्यति ॥२३॥
अङ्गमेव विभूषास्याः कान्तिसंदोहभूषितम् ।
कुर्वतोऽपि विधेरेषा हस्तस्पर्शं जगाम न ॥२४॥
प्रायो मलिनतां याति लोचनस्पर्शतोऽप्यसौ ।
प्राचीनसुकृतस्तोमैरभून्मे लोचनातिथिः ॥२५॥
रूपसारसुधौधस्य साक्षादेषा तरङ्गिणी ।
तारुण्यमपि लब्ध्वैनां हर्षोत्कर्षमुपैष्यति ॥२६॥
विधेः कार्मणकर्मेव जगतां मोहनीकृते ।
नर्माणि हावभावाश्च सर्वे प्रोल्लासमाययुः ॥२७॥
कवितां तिरयत्येषा कवीनामपि वाग्मिनाम् ।
साक्षात्प्रकटतां यातः पटिमाद्य च वेधसः ॥२८॥
प्राणा वै पञ्चवाणस्य दृश्यन्ते मूर्तिकारिणः ।
मुकुरोद्भासिसर्वाङ्गी सौकुमार्यकलानिधिः ॥२९॥

---

१. °र्यीक्ष्यै°—रीवाँ ।

इहैकस्थं सर्वमेव रूपवस्तु विलोक्यते ।
चूडामणिरयं साक्षात्सहजाया अपि स्फुटम् ॥३०॥
सहजापि किमेतस्या रूपस्य प्रतिरूपकम् ।
हरेस्तन्मोहिनीरूपं गर्वहीनं करोत्यसौ ॥३१॥
स्वप्नो वा दृश्यते कश्चिद्रूपसारैकगोचरः ।
नेयमेतादृशी तु स्यादियमेवैदृशी भवेत् ॥३२॥
रूपसारमयीं भिक्षां ददात्यन्यमृगीदृशाम् ।
एषामालिङ्ग्य चार्वङ्गीमङ्गानि तु कृतार्थये ॥३३॥
आलप्य चानया श्रोत्रे जनुःफलमुपैष्यतः ।
वञ्चितेयं नु भवितानुरूपवरहानितः ॥३४॥
अतीत्य शैशवकलां यौवनं भाषते ह्यसौ ।
किं कृतं विधिनैतस्या नानुरूपो वरः कृतः ॥३५॥

उज्जीवयत्यतनुमक्षितरङ्गितेन प्लुष्टं हरेण विहितप्रतिपक्षभावा ।
बिम्बाधराश्रयिसुधारससेचनेन दिव्यस्य कस्य शमयिष्यति चित्तदावम् ॥३६
नूनं नवीनरचना जगतो विधातुर्नाद्यापि कुत्रचन संजनितेत्यवैमि ।
एनां विधाय सुकृती विधिरद्य रूपनिर्माणगोचरमनःपटिमानमैच्छत् ॥३७॥
अस्यास्त्विषा प्रमुदकाननमेतदुच्चैरुद्दीपितं शतसहस्रशरवीन्दुभासा ।
देशोऽपि धन्यतम एष नितान्तमस्याः श्रीविग्रहाधिकरणत्वमुपेत्य भाग्यैः॥३८॥

धन्ये दृशौ सुकृतसारमयं बभूव जन्मैतयोः सुखकरीमुपलभ्य बालाम् ।
एनां स्पृशत्यपि विलोचनतारकाभिश्चित्ते बिभेमि मलिनीकरणं ह्युपेयात् ३९
धन्यं जनुः सफलमद्य बभूव लोके धन्यं कुलं च मम दर्शनभाग्यवत्याः ।
वेलातिगं सुखपयोनिधिमद्य रुन्धे प्रेमोदधिप्रसरवेगभरेण शश्वत् ॥४०॥

इत्यालपन्ती हृदयेन रामा वैकल्पमन्दैश्चरणक्रमैस्ताम् ।
कथंचनाङ्गानि विवोढुमीशा मुदां निधिं संनिधिगां चकार ॥४१॥
गत्वा तस्याः संनिधौ तत्र रामा प्रेमोत्कण्ठाकुण्ठिताशेषबुद्धिः ।
नत्वा नत्वा लौकिकाकारवत्त्वादात्मानं वै संततं निर्ममञ्छ ॥४२॥

हर्षाश्रुगद्गदं कण्ठं संस्तभ्योदितधैर्यका ।
उवाच वचनं रामा प्रेमस्रोतःसमुज्ज्वलम् ॥४३॥

रामोवाच

कासि त्वमत्र विजने विपिने चरन्ती
सौन्दर्यसारसमुदायमयो मृगाक्षि !
अङ्गानि तेऽभिनवनीलमणिप्रभौघ-
न्यक्कारकानि हृदयं मम मोहयन्ति ॥४४॥

त्वमङ्गकैर्मन्मथमङ्गलप्रदैरलङ्करोष्याभरणानि यानि ।
त्वदीयसौन्दर्यसुधापयोनिधौ मज्जत्यथोन्मज्जति मानसं मम ॥४५॥

त्वमस्य लोकस्य दृशां मृगेक्षणे पारेपरार्धादतिभाग्यसंपदा ।
महीतलेऽस्मिन् प्रकटत्वमागता नोचेत्क्वलोकः क्व च ते नु दर्शनम्॥४६॥

भाग्येन मम सख्यास्त्वं सखीत्वं किमु यास्यसि ।
यस्यास्तवोचितं रूपं त्रैलोक्येऽपि विलोक्यते ॥४७॥

अथवा नवनीलमेघविद्युद्घटनासंघटनापटीयसैव ।
विधिना त्वमकारि भाग्यवत्या मम सख्यः किल सख्ययोजनाय ॥४८॥

मरकतमणेर्वर्णः स्वर्णोचितः प्रतिभाति चेत्
कनकलतया योगो योग्यस्तमालतरोरपि ।
अथ समुचिता हैमी रेखापि चेन्निकषोपले
तदिह तव मत्सख्या सख्यं स्तुतये नृणाम् ॥४९॥

अथ कथय कथं करोषि कान्ते त्वमनुसवं किल कस्य नामजाप्यम् ।
स क इह पुरुषोत्तमोऽथवा स्त्री मणिरणिमादिनिधिस्तवाशये यः ॥५०॥
त्वदुरसि रसिकेऽस्ति यस्य बद्धा कनकमयी प्रतिमा गुणैर्निबद्धा ।
अनवरतमसावुपास्यमाना द्रुतवनकुङ्कुमचारुचर्चिताङ्गी ॥५१॥
यमनुसवमथो विचिन्तयन्ती विरहजतापभरेण ताम्यसि त्वम् ।
तरुणि नवशिरीषकोमलाङ्गी कमलदलायतलोचना ललामा ॥५२॥
किमलंकुरुषे कुलं स्वजन्या कतरस्ते जनकश्च का जनित्री ।
इति मे विनिवार्य संशयं त्वं मम सख्या नयनातिथिर्भवित्री ॥५३॥

इति श्रुत्वा वचस्तस्याः प्रणयप्रणतात्मनः ।
मन्दस्मितसुधासिक्तमुवाचेदं रहोवचः ॥५४॥

नवसख्युवाच

कस्यचिद्गोपवर्यस्य तनयाहं दयावति ।
नन्दिग्रामे वसाम्यद्धा सुखितो यत्र भूपतिः ॥५५॥
जपामि विरहोत्तापशान्तये नित्यमाकुला ।
सहजानन्दिनीनाम भवत्याः खलु या सखी ॥५६॥
सैव मच्चित्तवेश्मान्तरधितिष्ठति संततम् ।
अणिमाद्यष्ट सिद्धीनामाश्रयत्वमुपागता ॥५७॥
तस्याः स्वर्णमयी चैषा प्रतिमा मदुरःस्थलम् ।
अलंकरोति रक्तेन विनिबद्धा गुणेन या ॥५८॥
उपास्यतेऽनिशं सैव भाग्यपूर्णे भवत्सखी ।
चन्दनैः कुङ्कुमक्षोदरञ्जितैः सौरभाञ्चितैः ॥५९॥
पुष्पैर्धूपैस्तथा दीपैर्वलिभिश्चोपकारकैः ।
यथा मां प्राप्नुयाच्छीघ्रं हतभाग्यकदम्बकाम् ॥६०॥
कठिनं मम मानसं दयालो रचितं वज्रकठोरसारतश्च ।
तदपारवियोगयोगकीलाकुलितं चापि सहस्रधा न दीर्णम् ॥६१॥
कठिना च भवत्सखी नितान्तं सुमनोगर्भशिरीषकोमलापि ।
हृदि यास्ति दिवानिशं विशन्ती मम विश्लेषभवं रुजं न वेत्ति ॥६२॥
इदमस्मि बिभेमि सार्धितिष्ठत्यनिशं [1]प्रज्वलितं वियोगिचित्तम् ।
इति तत्प्रशमाय वाष्पधारासलिलैः सेकमहर्निशं[1] करोमि ॥६३॥
नूनं तद्विरहेणासौ तनुः पञ्चत्वमेति नः ।
आशाकवचमात्रेण रक्षितं दुःखहेतवे ॥६४॥
किं कस्मै कथयाम्यद्धा प्रलापं ज्ञास्यते जनः ।
अधिष्ठिता मद्धृदये सर्वं वेत्स्यति किं न सा ॥६५॥
कामिन्यप्यस्मि कामिन्या विरहेण दुनोमि चेत् ।
तद्रूपं पश्यतां दृष्ट्या पुरुषस्य दशा नु का ॥६६॥
महत्तमिश्रव्याप्ततत्वाद् दिवसो रजनीयते ।
इतीव विरहात्तप्ता वेद्मि सूर्यं सुधाकरम् ॥६७॥

१—१. नास्ति—अयो० ।

वियोगातपसंव्याप्ता रजनी दिवसायते ।
[1]इतीव शीतलोऽप्यालि चन्द्रश्चण्डकरायते ॥६८॥
राजीवविपिनं दृष्टं प्रज्वलत्पावकायते ।[1]
धूमधारायते तस्मात्तदुपर्यलिघोरणी ॥६९॥
निर्दयो ग्रामलोकोऽयं समंतात्प्रज्वलत्तमम् ।
किंशुकाटविदावाग्निर्निर्वापयति नाम्बुभिः ॥७०॥
पुरा रामेण कलितं निर्विषं सरयूजलम् ।
अकस्मादुत्थिता केयं गरलज्वालका ततः ॥७१॥
करपत्रायते नित्यं केतकीकाननं मम ।
निपतद्धृदयं तत्र द्विधा दीर्णं यदन्तरा ॥७२॥
प्राप्यापि पञ्चतामालि समीहे वपुषो दशाम् ।
तत्पदन्यासधरणौ धरणिः प्रविलीयताम् ॥७३॥
तल्लीलासरसीतोये तोयं यातु लयं ततः ।
तदादर्शतले ज्योतिरप्ययं प्रतिगच्छतु ॥७४॥
तदीयतालवृन्तेषु वायुरप्येतु मामकः ।
तद्गत्या गतिमार्गे च व्योमालयमुपेतु च ॥७५॥
अत्युत्कण्ठावशेनाहं धावं धावं मुहुर्मुहुः ।
परिरभ्य नभो नित्यं पतामि धरणीतले ॥७६॥
इन्दीवरवनैर्मिश्रा पुण्डरीकवने सखि ।
गङ्गायमुनयोः सङ्गे स्नातुमिच्छति मानसम् ॥७७॥
ईप्सति क्षिप्तविरहोच्छित्तये सुकृतोदयम् ।
किं न्वेष कुरुते विघ्नं कन्दर्पाख्यो महासुरः ॥७८॥
विश्लेषज्वालयोद्विग्नं मनश्चम्पककानने ।
प्रदीप्तानलबुद्ध्यैव सखि निर्मङ्क्तुमिच्छति ॥७९॥
विरहाग्निवृतं चित्तं किमध्यास्ते भवत्सखी ।
अनर्गलाश्रुधाराभिः सिक्ते नोपैति लोचने ॥८०॥

१—१. नास्ति – अयो० ।

संवरीतुं वियोगार्तिनाशकं गुरुसंनिधौ ।
नहि गोपाय्यते वह्निः पटे शतपुटै[1]रपि ॥८१॥
खिद्यामि सखि देहेन संतप्ता विरहाग्निना ।
किमु कम्पमुपैम्यद्धा तुषारेणेव पीडिता ॥८२॥
अत्युच्छ्रायवतीं मनोरथमहाप्रासादनिःश्रेणिका-
मारोहादवरोहतश्च विगलद्गात्रोऽतिमात्रं भजन् ।
श्वासोच्छ्वासपरम्पराभयमहाहिन्दोलिकान्दोलितः[2]
श्रान्तः खिन्नतनुः कदापि कलये विश्रान्तिमन्तर्न च ॥८३॥
कापि पुण्यवती भामा भविष्यति नु किं भवे ।
या मल्लोचनयोः तस्या दर्शनं प्रविधास्यति ॥८४॥

रामोवाच

कदा तव तदासक्तिर्हृदयेऽङ्कुरिता सखि ।
बद्धमूलतया यस्याः परिणामोऽयमीदृशः ॥८५॥
सा वै गोपालराजस्य श्रीनन्दनमहामतेः ।
तनया सप्तकक्षाढ्यप्रासादान्तरगोचरा ॥८६॥
अहो असूर्यम्पश्यायास्तस्याः क्व नु विलोकनम् ।
यस्यास्तनुलतागन्धवहो वातोऽपि दुर्लभः ॥८७॥
आवृतं च मनस्तस्या गुरुलज्जापटान्तरे ।
यस्य वाञ्छा प्रभामात्रमपि वै वहिरेव हि ॥८८॥
वयस्यापि च का तस्या मनः प्रत्ययभाजनम् ।
छायापि न स्पृशत्येनां वारिता तनुरोचिता ॥८९॥
इत्यपूर्वतमं प्रेम तव वीक्ष्य रतिप्रभे ।
भवामि संदिहानाहं तस्या वृत्तान्तवेदिनी ॥९०॥
इत्युदीरितमाकर्ण्य सहजेशीवयस्यया ।
प्रत्युवाच वचः श्यामा स्मितज्योत्स्नासमुज्ज्वलम् ॥९१॥

---

१. सत्पुरुषैः—रीवाँ। २. °हिन्दोलितः संततम्—अयो०, रीवाँ।

नवसख्युवाच

कः संशयस्तदासक्तौ तव संजायते सखि ।
याखिलव्रजलोकस्य साक्षाल्लोचनतारिका ॥९२॥
तथापि कथयाम्यस्या रहो मम समागमम् ।
प्रेम साक्षिसमुच्छ्रायबीजप्रदमहं सखि ॥९३॥
एकदा स्वप्नगायां मय्यक्ष्णोर्मीलितरूपयोः ।
सिद्धानाड्या सुसंयुज्य तूष्णींभूते च मानसे ॥९४॥
रहस्यं मम सर्वस्वं निद्रया समदर्शि सा[1] ।
येन रूपेण दृष्टा च तद्रूपं प्रतिबोधने ॥९५॥
रम्भाकाण्डस्य तालोपरि कमलतले शारदः शीतरश्मि-[2]
स्तस्मिन्नम्भोजमग्नं सृजति मुहुरुडुस्थूलमुक्ताफलानि ।
बन्धूकं धूनयन्नुत्प्रचलति पवनो गन्धफल्या[3] कवोष्णाः
कीर्णाश्च ध्वान्तधारा हिमकरमभितः सर्वमेतल्लतायाम् ॥९६॥
सौवर्णी सापि शश्वन्नवजलदघटा विप्रयोगा कृशाङ्गी
दृष्टा क्लिष्टेव कष्टं बहुलतरमिता शुष्यती चानुवेलम् ।
वीक्ष्यैतत्संदिहाना किमिदमिति जवात् प्रष्टुमीहामि यावत्
तावत्सख्या कयाचित्कथितमियमहो कन्यका नन्दनस्य ॥९७॥
जङ्घाकाण्डस्थबाहुः करतलनिहितास्यानिशं लोचनाभ्यां
मुञ्चन्ती वाष्पविन्दून् चलदधरदला श्वासचण्डानिलेन ।
दुःखादुन्मुक्तकेशावलिवृतवदना ज्ञायतां स्विन्नगात्रा ।
श्यामायास्ते वियोगादिति तदनु च जातास्मि निद्रादरिद्रा ॥९८॥
सखि तद्दिनमारभ्य सहजानन्दनात्मजा ।
मम चित्तमधिष्ठाय स्थिता विरहनिर्भरा ॥९९॥
इति ते गदितं सख्यै तस्यां प्रेम यथाभवत् ।
स्वस्वामिन्यै निवेद्यैतद्यथोचितमिहाचर ॥१००॥

---

१. °दर्शिता—अयो० । २. कमलसरः शारदं संनिषण्णम्—रीवाँ ।
३. गन्धपूर्वः—अयो०, रीवाँ । "बन्धूकं गन्धफली नासिका" टि०-मधु०, बड़ो ।

सुकण्ठ उवाच

ततः प्रोवाच रामाख्या सखी तां श्यामविग्रहाम् । अत्यद्भुतगुणप्रेम-
वयोवेषविभूषिताम् ॥१०१॥
सखि श्यामले काप्यपूर्वा गुणैस्त्वं मम स्वामिनी भवित्री प्राणदात्री ।
परं तावदत्रैव तिष्ठ द्रुमाधः सखीं यावदानीय ते दर्शयामि ॥१०२॥

तवरूपगुणप्रेमवयोवेशादिमाधुरीम् ।
मत्तः श्रुत्वा मत्सखी ते दर्शनार्थमिहैष्यति ॥१०३॥
त्वादृशी सद्गुणैराढ्या मत्सख्या विरहातुरा ।
मयोपकरणीयासि वाञ्छन्त्या सख्यमच्युतम् ॥१०४॥
इत्युक्त्वा श्यामलां रामा किंचिदाशावलम्बिनीम् ।
कदम्बमूले संस्थाय शनैः पर्यचलत्ततः ॥१०५॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे पूर्वखण्डे दशरथतीर्थयात्रायां
व्रजागमने एकविंशाधिकशततमोऽध्यायः ॥१२१॥

●

द्वाविंशाधिकशततमोऽध्यायः

सुकण्ठ उवाच

तामुपेतां चिराद्वीक्ष्य सहजोवाच कौतुकात् ।
अये क्व नु गतारामे मामनुक्तैव कानने ॥१॥
ततश्च पुनरायाता प्रेमोत्फुल्लविलोचना ।
कश्चित्प्रियतमो लोलः किं नु दृष्टस्त्वया रहः ॥२॥
प्रत्यङ्गं पुलकाङ्कुरैस्तव तनुर्व्याप्ता वरीवर्तते ।
श्वासोच्छ्वासपरम्परा च वदने नाद्यापि ते शाम्यति ।
आर्द्रासि श्रमवारिसीकरभरैरानन्दमावेदय-
त्यन्तः स्वान्तमहो नितान्तमसकौ वक्त्रप्रसादस्तव ॥ ३ ॥

इति साकूतमाख्याय सहजानन्दिनी स्वयम् ।
रामं लीलारविन्देन जघान स्मितपूर्वकम् ॥ ४ ॥

रामोवाच

अलं मृषोद्येन सखि स्वभावरक्ते जने केयमलीकशङ्का ।
किंतु त्वमेकान्तचरी यदि स्यास्तदास्मि किंचिद्विनिवेदयामि ॥ ५ ॥
इत्युक्त्वा सहजानन्दां रामा चतुरिमोदधिः ।
रहो लतामण्डपान्तर्नीत्वा प्रोवाच सादरम् ॥ ६ ॥
अये सखि मम प्राणप्रिये श्रीसहजेश्वरि ।
अद्यैकमद्भुततमं किंचिदालोकितं मया ॥ ७ ॥
इतो विदूरे भात्येकं कदम्बवनमद्भुतम् ।
तत्रैकस्य कदम्बस्य मूले नीलमणिद्युतिः ॥ ८ ॥
अपूर्वतरसौन्दर्यसंदोहेन विभूषिता ।
वर्ततेऽत्यद्भुता योषित्काचित्परमसुन्दरी ॥ ९ ॥
न तादृशं रूपमिह क्षमातले दृष्टं श्रुतं वा भवतीं विहाय तु ।
अनङ्गमत्यद्भुतकान्तिसंपदा शश्वद्वशीकृत्य विभाति सा स्त्री ॥१०॥
यस्य कस्यापि गोपस्य नन्दिग्रामनिवासिनः ।
त्वन्नामजपसंसक्ता त्वद्वियोगभरातुरा ॥११॥
त्वदनुध्यानपीयूषधराशीतलमानसा ।
संपूजयति सा नित्यं काञ्चनीं प्रतिमां तव ॥१२॥
गन्धैः पुष्पैस्तथा धूपैर्दीपैर्नैवेद्यकैरपि ।
एवं संपूज्य सततं गृह्णाति चरणोदकम् ॥१३॥
सहजे सहजानन्दे श्रीनन्दनसुते प्रिये ।
इति नामशतं नित्यं गृणाति तव तुष्टये ॥१४॥
त्वत्प्रेमपावकज्वाले तया प्राणास्तृणीकृताः ।
मन्ये तां तादृशीं वीक्ष्य कार्यं सख्यं त्वया सखि ॥१५॥
चिरादुत्कलिकावत्यै दर्शनं तु प्रदीयताम् ।
नूनं तव मनस्तस्यामत्यन्तं तोषमेष्यति
कादम्बिनीव दामिन्यास्तव सा सख्यमर्हति ॥१६॥

सुकण्ठ उवाच

ततश्च सहजानन्दा नितान्तं तुष्टमानसा ।
ददौ तस्यै निजं हारं समुत्तार्य स्ववक्षसः ॥१७॥
तस्याः स्कन्धे समारोप्य निजबाहुलतां ततः ।
शनैः पर्यचलत्स्थानाद् द्वित्राभिः[1] सहितालिभिः ॥१८॥

पुष्पावचयनव्याजाच्छेषाः संगान्यवारयत् ।
यत्र सा नीलमणिभा मूले नीपतरोः स्थिता ॥१९॥
तत्राजगाम शनकैः सहजानन्दिनी प्रिया ।
स तु नूपुरयोर्नादं दूरादाकर्ण्य निर्वृतः ॥२०॥

अहो प्राणप्रियामद्य द्रक्ष्यामि स्वयमागताम् ।
अभूतपूर्वभाग्याभ्यां लोचनाभ्यामितीरिता ॥२१॥
ततश्च सहजा साक्षान्नवनीलमणिच्छविम् ।
कदम्बतरुमूले तां व्यचष्ट सुभगोत्तमाम् ॥२२॥

दृक्चकोरानन्दकरीं चन्द्रकान्तामन्यत ।
यथोदितं रामया तद्रूपं कोटयधिकं ततः ॥२३॥
अथोभयोर्दृगानन्दः परस्परमवर्द्धत ।
परस्परस्यावलोक्य रूपसारं परस्परम् ॥२४॥

सहजानन्दिनी दूरात्किञ्चित्संजनितत्वरा ।
अमिलत् प्रियया सख्या कादम्बिन्यैव चञ्चला ॥२५॥
श्यामां निजप्रियतमामालिलिङ्ग चिरं सखी ।
परमानन्दपाथोधिमन्योन्यं ते जगाहतुः ॥२६॥

अथ रामातिचतुरा भावज्ञा तस्य कामिनः ।
[2]द्रागेत्याञ्चलयोर्ग्रन्थिमबध्नान्नीलपीतयोः [2] ॥२७॥
ततोऽन्या जहसुः सख्यो ज्ञाततत्त्वाः ससंभ्रमम्[2] ।
सहजानन्दिनी चित्ते लज्जामोषद्वथगाहत ॥२८॥

---

१. द्वित्रिभिः—रीवाँ । २—२ नास्ति—अयो०, रीवाँ ।

लज्जाशालीननयनां वञ्चितामिव रामया ।
विलोक्य सहजां सख्यः सद्य एवेदमूचिरे ॥२९॥
अलं ते लज्जयास्थाने चित्तेऽभिलषितो वरः ।
चिरादुत्कलिकामात्रं रामोऽयं मिलितस्तव ॥३०॥
अद्यास्माकमपि क्रिया फलवती प्राप्तं फलं चक्षुषो-
र्जातश्चापि मनोरथक्षितिरुहः सम्यक्फलाढ्यः सखि ॥
यद्द्वयातं सुचिरेण तत्समभवत्कल्याणमद्यैव नो ।
यत्साक्षाद्भवतीं प्रियेण सहितां भाग्येन वीक्षामहे ॥३१॥
कादम्बिनी चपलयोरिव सत्तमालसौवर्णचारुलतयोरिव चातिधन्यः ।
वैदूर्यरत्नवरकुन्दनयोरिवाहो भूयाच्चिराय भवतोरयमेव योगः ॥३२॥
वर्षासु सेर्ष्यं किल यच्चकोरीकुलं शरत्स्वप्ययि चातकीकुलम् ।
वर्षाशरद्योगमुदावहो युवां विलोक्य तुष्टि तनुतामुभे अपि ॥३३॥

अथैतयोः कुञ्जनिकेतनान्तरे
विवाहमह्नाय विधातुमीप्सवः ।
सखीः समामन्त्रयितुं रहस्ततः
संप्रस्थिताः काश्चन सख्य उद्धुराः[1] ॥३४॥
प्रमोदवनदेवी तु मङ्गलाह्वा ससंभ्रमम् ।
परितो रचयांञ्चक्रे कुञ्जवेश्मनि तत्क्षणे ॥३५॥
वैदूर्यरत्नमणिविद्रुमपुष्परागमुक्तामयो सपदि कुञ्जमहो चकासे ।
उत्फुल्लमञ्जरितवृक्षलताविताननशोभाचितानि विपिनानि मुदं वितेनुः ३६
सद्यो ववौ मलयचन्दनगन्धवाहस्तुङ्गोत्तरङ्गसरयूजलसंगशीतः ।
वल्लीशताकुलमहीरुहगह्वरान्तःसंचारमन्दगमनः सुखदः समीरः ॥३७॥
मण्डलाख्या तदागच्छच्छाण्डिल्यस्य मुनेर्वधूः ।
यो वै सुखितगोपस्य पुरोधाः सर्वकर्मसु ॥३८॥
सा च प्रकारयामास शशिनं पूर्णमण्डलम् ।
आत्मशक्त्या महायोगिन्यानन्दकरशीतलम् ॥३९॥

---

१. संप्रस्थितश्चास सखीव्रजस्तदा—रीवाँ ।

उदित्वरकलानाथकिरणोद्योतरञ्जितम् ।
नवपल्लवसंशोभि प्रमोदविपिनं बभौ ॥४०॥
चकोराश्चारुचन्द्रांशुचयपानविचक्षणाः ।
चमत्काराणि चित्तस्य चाटूनि समचोकरन् ॥४१॥
अथ मण्डलया नीताः सर्व एव सखीगणाः ।
गायन्तः शुभगीतानि सद्यस्तत्र समाययुः ॥४२॥
आगताश्च सखायोऽस्य प्रियनर्मवयस्यकाः ।
अहं शिखावलश्चैव मेघवर्ण उदारधीः ॥४३॥
मालाधरो मञ्जुघोष ऐरावतमुखा अपि ।
नदन्तो नादयन्तश्च वीणामुरजवल्लरीः ॥४४॥
सर्व एवोत्सवौचित्यशालिवेशविभूषणाः ।
राममानन्दयन्ति स्म सहजानन्दिनीयुतम् ॥४५॥
सर्वेषां द्विगुणो हर्षस्तक्षणात्समदृश्यत ।
सहजानन्दिनीराममिथुनं पश्यतां सताम् ॥४६॥
नवशाद्वलभूमीषु महामारकतीष्विव ।
नवपल्लवराजीभिश्चित्रमास्तरणस्तृतम् ॥४७॥
तत्र ताः कोटिशो यूथैः सख्यः कमललोचनाः ।
उपविश्य शुभं गीतं संजगुर्मधुराक्षरैः ॥४८॥

अथ नव सहकारमञ्जरीभिर्विहिततमौ सुरभिश्रियावतंसौ ।
शिरसि विनिहितौ वधूवरौ तौ सुरचितमङ्गलमूहतुस्तदानीम् ॥४९॥
पृथक्लतामण्डलसद्मनी उभे वधूवराभ्यां सहसा विरेजतुः ।
मणिस्रगुद्भाविततोरणस्रजा पुष्पावलोपल्लवजालिमध्यया ॥५०॥

उदपूर्णैर्माङ्गलिकैः कलशैरभिमन्त्रितैः ।
वधूवरदृगानन्दः पुपुषे दर्शनोद्भवः ॥५१॥
सर्षपाः परितः कीर्णाः सूक्ष्मारुणमणीकणाः ।
प्रतिमानजुषः सख्यं परस्परमुपाययुः ॥५२॥

स्वाभाविककदलीखण्डन्यासैर्धूपदीपावलिभाजननिक्षेपैः ।
अतिशोभिततोरणमालाविधिभिर्नवपल्लवपुञ्जपताकाकलनैः ॥५३॥

प्रासंगिकैर्गीतनादैर्गोपीजनमुखोद्गतैः ।
शुशुभे शोभया पूर्णः सुमुहूर्तः समागतः[1] ॥५४॥
ततो रामस्य विधिना समावर्तनमद्भुतम् ।
समकारि पुरन्ध्रीभिर्ब्रह्मचर्यमहाव्रतात् ॥५५॥
यत्र स्वाध्यायमध्येतुं यास्यमानो निकेतनात् ।
श्रीनन्दनस्य बालेन श्यालेन स निवर्तितः ॥५६॥
श्वश्रूस्थानापन्नया गोपनार्या कयापि रामस्तोषितः सप्रतिज्ञम् ।
कन्यादानस्वीकरणाद्ब्रह्मचारी स्तुतिक्रियापटभूषादिदानात् ॥५७॥
अथ निश्चयताम्बूलदानं निशि विधानतः ।
तस्मै कृतं पुरन्ध्रीभिर्मङ्गलस्वनपूर्वकम् ॥५८॥
निश्चयताम्बूलदाने रघुपतितनयः पूर्णचित्तः प्रमोदः
साक्षाच्छ्रीनन्दनैकप्रभुवरतनयायै निगूढं सखीभिः ।
वासो भूषा बहुविधफलान्नादिवस्तूनि धृत्वा
रत्नामत्रं द्रुमदलपुरैः प्रेषयामास रामः ॥५९॥
तदा निश्चयताम्बूले दीयमाने कलस्वरैः ।
कोकिलाकामिनीलोकः काकलीभिः समुज्जगौ ॥६०॥
कलितमलिकलापभूरिभेरीनिनदभरैः परितः शुभं प्रसक्तम् ।
प्रमुदवनसुकीचकैः स्वनद्भिर्मधुरतरो मुरजव्रजो ननाद ॥६१॥
सरसः ससमागमः किलासीदुभयेषां खलु सार्थयोर्निकुञ्जे ।
अनदन् प्रणयेन यत्र गालीः करुणाम्भोनिधये रघुवर्याय ॥६२॥
कूजन्त्यः कोकिलालापैराल्यो गालीर्गुणाञ्चिताः ।
उभयोः पक्षयो राजन् पुरन्ध्रयस्तत्र रेजिरे ॥६३॥
नान्दीमुखं विशेषेण सारिका निरवर्तयन् ।
वेदवेदाङ्गवैदुष्यविचक्षणतया स्थिताः ॥६४॥
यद्यत्कार्यतमं गूढैः प्रकटं वा सुरीतितः ।
लौकिकं वैदिकं चापि नोल्लङ्घ्य विदधुः स्त्रियः ॥६५॥

---

१. सुमुहूर्तादिनागमः—मथु०, बड़ो० ।

अथ वैवाहिके लग्ने संप्राप्ते वरपक्षगाः ।
गायन्त्यो वादयन्त्यश्च कन्यामण्डपमाययुः ॥६६॥
तत्र रत्नचतुष्के ताश्चतुष्कलशशोभिनि ।
वेदिकायां समारोप्य स्नापयाञ्चक्रुरालयः ॥६७॥
गायन्त्यः स्नानगीतानि शुभानि सुखदानि च ।
शृङ्गारमण्डपे यत्र देवी तिष्ठति मङ्गला ॥६८॥
प्रमोदविपिने वर्यास्तस्याः संनिधिमाययुः ।
तत्र शृङ्गारयाञ्चक्रुर्धूपदानपुरःसरम् ॥६९॥
दुधुवुः कालगुरुणा तस्याश्चिकुरधोरणीम् ।
स्नानार्द्राणि त्वथाङ्गानि कञ्जपत्रमृदूनि च ॥७०॥
अङ्गवस्त्रं समुत्तार्य तनौ रङ्गपटीं दधुः ।
पादयोस्तलमारभ्य शिखान्तं मण्डलं दधुः ॥७१॥
रामपक्षगताः सख्यो भूषयन्ति स्म ते प्रभुम् ।
अवतंसं दधुः पश्चाद्रसालमञ्जरीमयम् ॥७२॥
गायन्ति स्म सखीवृन्दाः सुस्वरं गीतमद्भुतम् ।
प्रमोदवनवासिन्यः कोकिलाश्च मदान्विताः ॥७३॥
अलिश्रेणीमयीं वीणां वादयन्ति स्म तत्पराः ।
उद्गुच्छ[1]स्तनशालिन्यो लताकान्ताः सखीवराः ॥७४॥
जगौ च मङ्गलां देवी प्रमोदवनदेवता ।
तस्याः स्वरेण सकलं नादितं कुञ्जमन्दिरम् ॥७५॥
अथ प्रेमहयारूढः सखीनां मण्डलैः सह ।
आययौ सुन्दरो रामः कन्यामण्डपतोरणम् ॥७६॥
प्रत्युद्ययुः सखीवर्याः कृत्वोदकलशं पुरः ।
दीपभाजनहस्ताश्च चक्रुर्नीराजनाविधिम् ॥७७॥
ततोऽभिषिषिचुः सर्वाः कलशस्थितपल्लवैः ।
अथ देवीं नमस्कार्य चक्रुरर्हणमस्य ताः ॥७८॥

---

१. उद्गच्छं—रीवाँ ।

विष्टरं पाद्यमर्घ्यं च मधुपर्कं करे दधुः ।
अथान्तःपटमानीय कन्यामानिन्युरङ्गनाः ॥७९॥
तत्रालयः काव्यकलाविचक्षणा वधूवरं चामितमङ्गलाशिषा ।
अवर्द्धयन्नृत्कलिकाशताकुलाः कुञ्जेश्वरीं च स्फुटमैरयंच्छुभम् ॥८०॥
सर्वानन्दनिधिप्रमोदविपिनश्रीभोगसंवर्द्धनौ[1]
त्रैलोक्यामितमङ्गलैकनिलयौ कुञ्जेश्वरीप्राणदौ ।
लावण्यैकनिकेतनौ कमलया नित्यं समाराधितौ
श्रीमन्नन्दननन्दिनीरघुवरौ नित्यं सुखं प्राप्नुताम् ॥८१॥
यस्याश्चारुकृपाकटाक्षविभवेनानङ्गसंदीपनम्
यस्य प्रेक्षणमात्रतो जडधियां चैतन्यलाभोऽनिशम् ।
सर्वोत्कर्षकलाकलापकलितश्रीविग्रहोद्द्योतितौ
तौ श्रीनन्दनकन्यकारघुवरौ नित्यं सुखं प्राप्नुताम् ॥८२॥
या सौन्दर्यतरङ्गिणी नयति यः सौन्दर्यरत्नाकरः ।
प्रेम्णः सारमनन्यगोचरतया जानीत एवेह यौ ।
कुञ्जागारमनोज्ञकेलिकलया लोकोत्तरश्रीयुतौ ।
तौ श्री नन्दनकन्यकारघुवरौ नित्यं सुखं प्राप्नुताम् ॥८३॥
सर्वस्वौ प्रणयप्रकर्षजमहाभावैकलक्ष्मीवतां
कल्याणैकमहास्पदौ रसिकतासन्तानसंवर्द्धनौ ।
नित्यानन्दपयोनिधी रसपतिश्रीकल्पवल्लीद्रुमौ
तौ श्री नन्दनकन्यकारघुवरौ नित्यं सुखं प्राप्नुताम् ॥८४॥
चक्षुश्चातकपोषणीं रससुधाधारं च यो वर्षति
स्वैरं चित्तचकोरिकासुखसुधासारं च या च्योतति ।
लोकातीतगुणास्पदौ तुहिनरुक्कादम्बिनीमण्डलौ
तौ श्रीनन्दनकन्यकारघुवरौ नित्यं सुखं प्राप्नुताम् ॥८५॥
छायामेत्य ययोर्भवन्ति सुजनास्तापत्रयोत्थव्यथा-
निर्मुक्ताः सततं जयन्ति च सुखस्वाराज्यलक्ष्मीभृतः ॥

---

१. संभोगश्रीवर्द्धनो—रीवाँ ।

संफुल्लप्रमुदाटवीरसवृषौ वल्लीतमालद्रुमौ
तौ श्रीनन्दनकन्यकारघुवरौ नित्यं सुखं प्राप्नुताम् ॥८६॥
प्रेमानन्दसरोजकाननमरन्दासेविभृङ्गोत्तमौ
लीलाक्षीरसमुद्रतुङ्गलहरीमालामरालाधिपौ ।
लोकानन्दनरागकाननवसन्तः काकलीकोकिलौ
तौ श्रीनन्दनकन्यकारघुवरौ नित्यं सुखं प्राप्नुताम् ॥८७॥
एका कान्तविधूदयेन कुमुदश्रेणीव मोदं दध-
त्यन्यस्ताद्रुचिचन्द्रिकाकुवलयं बिभ्रच्चिरं लोचने ।
अन्योन्याश्रयिणौ परस्परगुणग्रामाभिरामाकृती
तौ श्रीनन्दनकन्यकारघुवरौ नित्यं सुखं प्राप्नुताम् ॥८८॥

एतन्मङ्गलपद्यानामष्टकं यः शृणोति च ।
तस्य मङ्गलसंदोहो नित्यमेव प्रजायते ॥८९॥
अमङ्गलस्य लेशोऽपि न जन्मन्युपजायते ।
रामचन्द्रहृदानन्दिकुञ्जवैवाहिकाष्टकात् ॥९०॥
अथ माङ्गलिके लग्ने गजमुक्ताफलाञ्जलिः ।
परस्परस्मिन्न्यपतत् परस्परकराब्जतः ॥९१॥
वरो वधूमुखं वीक्ष्य वर्द्धिष्णुं प्रेमवारिधिम् ।
सखी नयनमन्दाक्षवेलया न्यरुणत्तराम् ॥९२॥
लीनाभ्यां सहजानन्दा नेत्राभ्यां न निरीक्षितुम् ।
शशाक वरवक्त्राब्जं सखीजनकदम्बके ॥९३॥
वरः प्रवीणो मदनस्य वाणैरत्यातुरो लक्षित आलिभिर्वै ॥
वधूकरस्य ग्रहणे नितान्तखिन्नेन रोमाञ्चवता करेण ॥९४॥
विज्ञाय रामा रमणस्य भावं मनोजवाणाहतमानसस्य ॥
द्विरागमस्याशुविधिं विधाय वधूवरौ कुञ्जगृहे न्यवेशयत् ॥९५॥
तत्रानयोः प्राकृतलेशवर्जो बभूव लीलाविधिरद्भुतो यः ॥
न तं पुनर्वक्तुमहं क्षमोऽस्मि निरीक्षमाणः प्रियनर्मसख्या ॥९६॥
इत्थं तयोः कुञ्जविहार एष रामासखीनिर्मित उत्सवाढ्यः ॥
पिकीजनो[1]द्गीतयुतालिवीणां संनादमाङ्गल्यसमूहयुक्तः ॥९७॥

---

१. सखीजनो°—रीवाँ ।

ततस्ताः सकलाः सख्यः कृतकृत्या इवाभवन् ।
युगलं वीक्ष्य मुदिताः सहजारामचन्द्रयोः ॥९८॥
सहजानन्दिनीं प्राप्य सुखितेन्द्रकुमारकः ।
समस्तगोकुलस्त्रीणां मनोरथफलं ददौ ॥९९॥
अयं चातिरहस्यत्वान्न प्रकाश्यः कदाचन ।
रामस्य कुञ्जभवने विवाहः सुखसाधकः ॥१००॥
ततोऽभवद्रामचन्द्रे व्रजः पूर्णमनोरथः ।
असिद्धः स्वयमन्यासां साधयेच्छं किमन्यथा ॥१०१॥
अपारविरहाम्भोधेः पारं जातवति प्रिये ।
कृतोपकाराः सकलाः सख्यः शर्माणि लेभिरे ॥१०२
परिभ्रमन् कुञ्जवीथीषु रामो विलोकितो विमना एव पूर्वम् ।
बलीयसा विरहेणैवमुक्तः सुधाकरो राहुणेवाप कान्तिम् ॥१०३॥
इतिश्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे पूर्वखण्डे दशरथतीर्थयात्रायां
व्रजागमने द्वाविंशाधिकशततमोऽध्यायः ॥१२२॥

त्रयोविंशाधिकशततमोऽध्यायः

राजोवाच

सहजानन्दिनी धन्या धन्यं तस्याः कुलं महत् ।
अवाप बहु भाग्येन रामस्य पदवीं यतः ॥ १ ॥
जानामि तत् परं ब्रह्म राम इत्याख्यया भुवि ।
प्रसिद्धं मम धाम्नैव योगिनामपि दुर्लभम् ॥ २ ॥
श्रीरामो रामचन्द्रो हरिरित्युक्त ईदृशैः ।
नामभिः कुरुते देवः सतां चित्तस्य पावनम् ॥ ३ ॥
करोमि किं समक्षं मे तस्य पुत्रेति भावना ।
बहुधा विनयं दृष्ट्वा पितृभक्तिर्मयि ध्रुवम् ॥ ४ ॥
असमक्षं तस्य मम माहात्म्यस्फूर्तिरद्भुता ।
ब्रह्मैव पूर्णमेतद्वै इति प्रत्यापयत्यलम् ॥ ५ ॥

इदानीं तस्य मे भावो ब्रह्मेत्येव महादृढः ।
तेन त्वां परिपृच्छामि रहस्यमपि तत्कृते ॥ ६ ॥
सहजानन्दिनी येयं प्रिया तस्य प्रकीर्तिता ।
औपपत्यं कथं तस्या गर्हितं लोकवेदयोः ॥ ७ ॥
इति मे संशयं छिन्धि भवान् श्रीरामसेवकः ।
त्वदन्यो रामलीलाया रहस्यज्ञो न विद्यते ॥ ८ ॥

सुकण्ठ उवाच

रसस्य परमा काष्ठा रामेणैवोदिता नृप ।
प्रमोदवनवीथीषु साक्षाद्विहरता स्वयम् ॥ ९ ॥
एवमेव महाराज तमपृच्छमहं प्रभुम् ।
स मे यदुक्तवान् रामस्तत्ते वक्ष्यामि भूपते ॥१०॥

राम उवाच

सखे सुकण्ठ लीला मे रसरूपा न संशयः ।
रसो नाम ममैवात्मा चिदानन्दमयो ध्रुवम् ॥११॥
यद्ब्रह्म परमं पूर्णं सच्चिदानन्दमूर्जितम् ।
रस एव तदेतद्वै महाभावैकगोचरः ॥१२॥
रस्यमानतया लोके रस इत्युच्यते बुधैः ।
परब्रह्मस्वरूपज्ञैर्मुनिभिस्तत्त्ववेदिभिः ॥१३॥
वात्स्यायनश्च भरतः शाण्डिल्यो व्यास एव च ।
नारदो भृगुरेवापि भगवांश्चतुराननः ॥१४॥
एते चान्ये च मुनयो रसशास्त्रविशारदाः ।
अग्निश्च भगवान्साक्षाद्द्योतिहोत्रस्त्रयीमयः ॥१५॥
रसस्य वस्तुतो रूपं जानात्येवेति निश्चयः ।
शृङ्गारादिविभेदेन बहुधाख्यायते तु सः ॥१६॥
सर्वेषामपि भेदानां शृङ्गारः प्रवरो मतः ।
संभोगविप्रलम्भेन द्विधासौ परिकीर्तितः ॥१७॥
कामिनी कामुकश्चैव तस्यालम्बनतां गतौ ।
उद्दीपनानि बहुशो वासन्तीकोकिलादयः ॥१८॥

वासन्ती विकसत्पुष्पमरन्दद्रवनिर्झरा ।
कोकिला कोमलालापकाकलीकलितस्वरा ॥१९॥
चन्द्रिका चञ्चुरानेकचकोरचटुकारिणी ।
लतामण्डप आनन्दी मत्तालिकुलनादितः ॥२०॥
इत्यादयोऽखिला भावास्तस्योद्दीपनतां गताः ।
कामिनी परकीयैव कामुकश्चौपपत्यभृत् ॥२१॥
इत्याज्ञा रसशास्त्रस्य जानन्ति किल कोविदाः ।
रसस्येव स्वभावोऽयं नात्र शङ्का विधीयताम् ॥२२॥
वस्तुनो यस्य यो धर्म औत्पत्तिक उदीरितः ।
स एव वस्तुनस्तस्य स्वभाव इति कीर्तितः ॥२३॥
भजन्ते मम येऽतीव प्रिया आस्वादकोत्तमाः ।
ते मां रसस्वरूपेण नान्ये साधारणा जनाः ॥२४॥
रसानन्दस्वरूपां मे लीलां माधुर्यवारिधेः ।
तामास्वाद्य पुनर्नैव विषयानवगाहते ॥२५॥
एक एव[1] शुभः पन्था अत्र साधनसाध्ययोः ।
इति मत्वा सुखी भूयाः सुकण्ठ मम पार्श्वगः[2] ॥२६॥
इति श्रीरामचन्द्रस्य पूर्णस्य परमात्मनः ।
तत्त्वतो रूपमाख्याय न मुह्यामि कदाचन ॥२७॥

राजोवाच

जन्मकर्म च मे ब्रूहि सहजायाः पराश्रयः ।
पितरौ कथं नन्दयते कथं भूषयते कुलम् ॥२८॥
कथं च व्रजराजस्य राजधानीं व्यभूषयत् ।
कथं मोदयते रामं प्रमोदवनकेलिषु ॥२९॥

सुकण्ठ उवाच

माघस्य धवले पक्षे पञ्चमी शिवयोगिनी ।
पूर्वाभाद्रपदायुक्ता शुभर्क्षग्रहतारका ॥३०॥

---

१. एष—अयो० । २. पार्श्वयोः—अयो० ।

वसन्तपञ्चमीत्युक्ता सा तिथिर्विश्वमङ्गला ।
यस्यां रतिपतिः कामः पुरा प्रादुरभूत्किल ॥३१॥
तस्यां संजातमात्रायां कालोऽभूच्छुभलक्षणः ।
दिशः प्रसन्ना अभवन् सद्यो जनितमङ्गलाः ॥३२॥

आनन्दस्पर्शकृद्वातो बभौ मलयवृक्षजः ।
रमणीयतमा भूमिरभूदानन्दवर्द्धिनी ॥३३॥
अकस्मादवृधल्लक्ष्मीः प्रतिग्रामव्रजाकरम् ।
स्वर्गे मर्त्ये च पाताले तूर्यत्रिकभवः स्वनः ॥३४॥
आनन्दयति चेतांसि तस्मिन्नवसरे नृप ।
श्रीनन्दनो गोपराजः पालीग्रामपतिः स्वयम् ॥३५॥

स्वस्ति विप्रान् वाचयित्वा जातकं समकारयत् ।
शुभाशिषो वाचयन्तो विप्राः संजातकौतुकाः ॥३६॥
आययुर्नन्दनागारं कन्यारत्ने समुद्गते ।
सूताश्च मागधाश्चैव वन्दिनश्च शुभान्विताः ॥३७॥
विप्राः पौराणिकाः शास्त्रविद्याजीवाः सहस्त्रियः ।
ज्योतिर्विदो बुधाचार्या आर्याः सर्वकलाविदः ॥३८॥

नरा नट्यो गायकाश्च वादका नायकाश्च ये ।
नन्दनस्य गृहे तैस्तैः संमर्दः सुमहानभूत् ॥३९॥
गोपा गोप्यश्च ननृतुः सद्यस्त्यक्तेतरत्रपा ।
तेभ्यो वासांसि भूषाश्च हिरण्यं विपुलं ददौ ॥४०॥
सुश्लोक इति विख्यातोऽभवच्छ्रीनन्दनो नृपः ।
कन्यारत्नं प्रजातन्तु श्रुत्वा श्रीसुखितो नृपः ॥४१॥

रत्नानि वर्षन् घनवत् पालीग्रामं समाययौ ।
एवमानन्दसंपन्नं जन्म कृत्वा सुखान्वितः ॥४२॥
कन्याया नन्दनो गोपो यशः प्राप जगत्त्रये ।
ततश्च सहजेत्याख्या तस्याः मुनिगणैः कृता ॥४३॥

रूपं वेशो वयः शीलं सर्वं हि सहजं यतः ।
एवं संजातजन्माया श्रीनन्दनगृहान्तरे ॥४४॥

दिवसेषु प्रगच्छत्सु लावण्यमपुषत्तनौ ।
परं न भाषते किंचिन्न च पश्यति किञ्चन ॥४५॥
न शृणोति न चाश्नाति नेङ्गते न च रिङ्गति ।
दृष्ट्वावस्थां स्वकन्याया गोपालो भयशङ्कितः ॥४६॥
किमेतदस्याः संजातं जाड्यं सर्वेषु वस्तुषु ।
प्रेतावेशो भयं वापि कृत्रिमं वापि केनचित् ॥४७॥
दृष्टिर्वा मुष्टिघातो वा चलदोषोऽपि वाभवत् ।
यक्षरक्षःपिशाचादिच्छाया च दुर्ग्रहोऽथ वा ॥४८॥
प्रतिकर्तुं न शक्नोमि मन्त्रज्ञैरपि सिद्धिजैः[1] ।
किं करोमि क्व गच्छामि कश्चित् सिद्धो मिलेदपि ॥४९॥
यो मे कन्यामहारत्नं प्रकृतिस्थं करिष्यति ।
तस्मिन्नेवान्तरे रुद्रो द्रष्टुं श्रीसहजेश्वरीम् ॥५०॥
उपेतः परया भक्त्या व्रजभूमिं समाययौ ।
तत्र श्रीसुखितागारे दोलन्तं सिक्यमध्यतः ॥५१॥
व्रजस्त्रीगणमध्यस्थं रामं द्रष्टुमुपागतः ।
विधाय योषितो रूपं शिवः परमया मुदा ॥५२॥
संपन्नश्यामवपुषं रामचन्द्रमुपैक्षत ।
तत्र कृत्वा स्वरैर्गानं मूर्च्छनावृन्दमञ्जुलम् ॥५३॥
प्रेष्ठं प्रसादयामास रामं राजीवलोचनम् ।
प्रसन्नं समभिज्ञाय रामं त्रैलोक्यसुन्दरम् ॥५४॥
भूयो विज्ञापयामास सहजादर्शनाय च ।
तमुवाच स्मयन् रामो गच्छ श्रीनन्दनालयम् ॥५५॥
यत्र ते सहजानन्दा स्वयं दास्यति दर्शनम् ।
ततो नत्वा जगन्नाथं रामचन्द्रमहानिधिम् ॥५६॥
शिवः संप्रस्थितस्तस्मात्पालिग्रामं समाययौ ।
वटुवेशधरो विप्रो वसानो हरिणाजिनम् ॥५७॥

---

१. मंत्रैरपि सह द्विजैः—रीवाँ ।

कौपीनधारो जटिलः कक्ष्याविन्यस्तपुस्तकः ।
धृताषाढः[1] पूततनुर्मौञ्जीमेखलयान्वितः ॥५८॥
प्रसन्नवदनाम्भोजस्तपसा प्रज्वलन्निव ।
तं विलोक्य ततो लोकाः पालिग्रामनिवासिनः ॥५९॥
महासिद्ध इति ज्ञात्वा गोपराजं न्यवेदयन् ।
एष विप्रवरोऽस्माकं प्रतिभाति तपोनिधिः ॥६०॥
एनं प्रदर्शय सुतां गोपराज त्वमात्मनः ।
अयमस्या वपुःस्तम्भं मन्त्रवीर्येण सिद्धिमान् ॥६१॥
नाशयिष्यति हस्तं च धास्यत्यस्यास्तनौ शुभम् ।
इत्युक्त्वा गोपराजाय वटुरन्तःप्रवेशितः ॥६२॥
दूराद्विलोक्य गोपेन्द्रो नमश्चक्रे महावटुम् ।
पाद्यार्घाचमनीयाद्यैः संपूज्य कृतशक्तितः ॥६३॥
उवाच निजकन्याया वृत्तं जाड्यादिकं च यत् ।
तमुवाच स्मयन् विप्रः समानय सुतां निजाम् ॥६४॥
मह्यं प्रदर्शय ततो ज्ञास्यामि यदि कारणम् ।
कूटं मन्त्रं[2] तथा दृष्टिं मुष्टिं प्रेतादिभिः कृतम् ॥६५॥
तत्सर्वं नाशयिष्यामि कन्यां मे दर्शय प्रभो ।
एकान्ते तमथो नीत्वा श्रीनन्दन उदारधीः ॥६६॥
राजिन्यङ्कगतां कन्यां वटुवेशं न्यवेदयत्[3] ।
वटुर्विलोक्य तां बालां स्मयन्तीं मधुराननाम् ॥६७॥
श्रीरामवल्लभां बुद्ध्वा मुमोद हृदये निजे ।
उवाच गोपराजं स एनां दत्त्वा करे मम ॥६८॥
गच्छ गोपेन्द्र दूरे त्वं सभार्यः सहभृत्यकः ।
प्रयोगं मम मन्त्राणां पश्य त्वं व्रजभूपते ॥६९॥
स्तम्भमस्या हरिष्यामि तद्धेतुं च निवेदये ।
इत्युक्तो नन्दनः कन्यां समर्प्य बटवे ततः ॥७०॥

---

१. धृतदण्डः—रीवाँ । २. "कूटं—कपटकर्म, मंत्रं—वशीकरणम्" टि०—मथु०, बड़ो० । ३. निवेदयत्—रीवाँ, मथु०, बड़ो० ।

दूरं जगाम विश्वस्तो मुहूर्तं स्वजनैः सह ।
तामेकान्तगतां दृष्ट्वा सहजां रामरागिणीम् ॥७१॥
रमणीमौलिमुकुटरत्नभूतां प्रभावतीम् ।
तुष्टाव मधुरैर्वाक्यैः सूक्तिभिः पार्वतीपतिः ।
ऋग्यजुःसामोपनिषत्सारैः सूक्तैः सुभाषितैः ॥७२॥

शिव उवाच

नमस्ते रामरामायै रमायै रमणात्मने ।
स्वेच्छाविलासनिधये प्रमोदवनदेवते ॥७३॥
नमः स्वेच्छाविहारिण्यै स्वेच्छाप्रकटवर्ष्मणे ।
[1]स्वेच्छाविमोचिताशेषप्रसन्ननिखिलात्मने ॥७४॥
परमात्मा त्वमेवात्र जीवानां बुद्धिसाक्षिणी[1] ।
अनश्नन्ती त्वमभिचाकशीति भवतो परा[2] ॥७५॥

तव स्वरूपं महिमार्णवायितं सच्चित्सुखैकात्मतया प्रसिद्धिमत् ।
अतन्निरासेन वदन्ति वैदिकोर्गिरस्ततो नेतिनेतीति चोचुः ॥७६॥

यत्ते महस्त्रिगुणकेलिकलातिगं तद्—
विज्ञाय चित्तकमले विदुषां वरेण्याः ।
भूयो भवन्ति भववेदनया न विग्ना
मग्नाः सुखामृतपयोनिधिवीचिकासु ॥७८॥
कोऽन्यो विहाय भवतीं शरणं नृणां स्यात्
संसारतापनिवहेन निपीडितानाम् ।
गच्छन्त्यतो ननु भवच्छरणं विमुक्ति ।
कामाः कृपाजलनिधे सुखमाप्नुवन्ति ॥७८॥

एकैव च त्वं वचनैरनेकैर्निरूप्यसे सद्भिरनन्तबोधा ।
वेदेषु शास्त्रेषु पुराणवाक्येष्वखण्डवाक्यार्थतया प्रतिष्ठिता ॥७९॥
त्वं प्रमोदवननिकेतनस्था श्रीरामचन्द्रं रमयत्युदारैः ।
वेदत्रयोद्गीततमैरनन्तैर्गुणैर्महाभव्यगुणाधिवासे ॥८०॥
निरतिशयकृपासुधाम्बुराशे मधुरिमनिर्झरिणीरसैकधारे ।
अनुपमगुणरामणीयकाढ्ये जय जय जाग्रदमन्दमङ्गलेशि ॥८१॥

१—१. नास्ति—अयो० । २. परं—मधु०, बड़ो० ।

दरिद्रं दुःशीलं दुरधिगमनं दुःखदलितं
दुराचारं दूरे पतितमितरैर्दुर्भरतरम् ।
जनैर्मुक्तं मुक्तिप्रमुखसुखसंपत्समुदयाः[1] ।
पुमांसं सेवन्ते भगवति भवद्दृष्टिभरितम् ॥८२॥
दयादृष्टिर्मातर्जयति तव सर्वाधिकगुणा
शठानप्युद्धर्तुं प्रभवति भवाम्भोधिरयतः ।
न सांख्यं नो योगो न च तप उदग्रं न सुकृतम् ।
फलत्यद्धा तद्वद्दुरधिगममाहात्म्यजलधे ॥८३॥
असङ्ख्यब्रह्माण्डप्रकटनपटुर्यत् कमलभू—
रुपेन्द्रोऽयं नानादनुजकुलसंहारणविधौ ।
महारुद्रो रुद्रः सकलजगतां संवृतिविधौ
तदेतन्माहात्म्यं तव जननि पादाब्जरजसः ॥८४॥
निगूढं सेवन्ते चरणकमलं मङ्गलतमं
वरेण्या विद्वांसो विगतगुणसङ्गाः सुकृतिनः ।
लभन्ते ते तस्मात्कलितजनकल्याणनिवहाः
प्रभूतं सामर्थ्यं भवजलधिसंतारविषये ॥८५॥
ते द्वारवत्यां महनीयशीले मनोजचारित्रकलाविदुष्यौ ।
पूर्वाभवद्भामिनि सत्यभामा परा च सा रुक्मिणीति प्रसिद्धा ॥८६॥
अन्याश्च ता मित्रविन्दादयो या वन्दारुवृन्दारकदारवन्द्याः ।
मातस्त्वदंशा अखिलर्द्धिपूर्णा कृष्णस्य चित्तं सुखयन्त्यथो किम् ॥८७॥
सा त्वं प्रमोदविपिनेऽत्र विभासि नित्यं
कल्याणकल्पतरुसर्वगुणाभिरामा ।
निर्णीयसे त्वमत एव सुधीभिरद्धा
तत्तेषु चापि निगमेषु च चित्कलेति ॥८८॥
तवानन्तकलां मातरुपजीवन्ति सर्वशः ।
स्वर्गापवर्गानन्दानां ये नित्यमधिकारिणः ॥८९॥
एतावदेव जननि स्पृहणीयमर्थं त्वं पूरयिष्यसि मम त्रिजगत्पवित्रे ।
रूपेण येन जयसि प्रमुदाटविस्था रूपं तदेव जय दर्शय देवि महयम् ॥९०॥

---

१. संपद्ह्यविरतं—रीवाँ ।

रामं प्रमोदवनशारदपूर्णचन्द्रं सा त्वं चकोरयसि येन कलागुणाढ्या ।
तत्ते स्वरूपमखिलागमवागगम्यं नूनं सुदुर्लभतरं विदुषां मुनीनाम् ॥९१॥
तन्मह्यमद्य ननु दर्शय दिव्यदिव्यं केलीकलाकलितसल्ललनाललामम् ।
त्रैलोक्यदेव नरकिंनरनागकन्यासौन्दर्यसारसमुदायमयं स्वरूपम् ॥९२॥
प्राप्तोऽस्म्यहं सुखितगोपगृहे ततश्च श्रीरामचन्द्रकरुणामधिगम्य मातः ।
तातस्य ते परमभाग्यसमूहसिन्धोः श्रीनन्दनस्य गृहमेष समागतोऽस्मि ।९३।
त्वद्दर्शनं प्रमुदकाननसच्चकोरीनेत्रेषु सौभगकरं सुलभं च तेषु ।
अत्यर्थदुर्लभतरं जगतीतरेषां लब्धुं समागत इहास्मि सदैकभक्तिः ॥९४॥
जानीहि मां जननि तावकपादपद्मप्रोद्यच्चदच्छमकरन्दसमूहभृङ्गम् ।
संत्यक्तसर्वविषयग्रहलालसं ते नित्यं प्रपन्नमथ नामपरं त्रिनेत्रम् ॥९५॥
सहजे सहजानन्दे सहजानन्दिनि प्रिये ।
इति ते नामपीयूषं रामस्य वदनाच्च्युतम् ॥९६॥
रहो निपीतं श्रोत्राभ्यां गृह्णामि सततं रहः ।
तेनैव कलये मुक्तिं काश्यां वै म्रियतां सताम् ॥९७॥
रामेति संमतो मन्त्रस्त्वन्नाम्ना संपुटीकृतः ।
मुक्तिदानविधौ शक्तिमुद्वहत्यनवग्रहाम् ॥९८॥

सुकण्ठ उवाच

इति स्तुत्वा विरते पार्वतीशे कृपानिधिः श्रीसहजा प्रसन्ना ।
तस्मै निजं दर्शयामास रूपं साक्षात्प्रमोदाटविगोचरं यत् ॥९९॥
पारेपरार्द्धरतिकाममनोललामं लावण्यसिन्धुलहरीनिवहाभिषिक्तम् ।
कोटीन्दुकोटिरविबिम्ब रुचिप्रकाशसंपन्नवन्नखमयूखकलापरम्यम् ।१००।
परिस्फुरच्चरणनखाच्छिखावधि स्वरूपतो मधुरिमपुञ्जमोहनम् ।
रघूद्वहप्रियतमवश्यताविधौ समर्थमुच्छ्वसितमनोजयौवनम् ॥१०१॥
ईषच्छैशवमत्येत्य नवयौवनरञ्जितम् ।
कटाक्षचालनाभ्यासपाटवैकान्तसुन्दरम् ॥१०२॥
रूपशालिपदार्थानां सर्वेषां समतास्पदम् ।
कवीन्द्रकवितोत्कर्षावहं युक्त्याद्यगोचरम् ॥१०३॥
अदर्शयत् सा प्रथमं प्रमोदवनमद्भुतम् ।
वसन्तागमसंफुल्लपल्लवारुणभूरुहम् ॥१०४॥

रसालमञ्जरीपुञ्जगुञ्जद्भ्रमरनादितम् ।
मञ्जुलद्रुमविस्तारि पल्लवारुणरञ्जितम् ॥१०५॥
वहन्मलयमारुतं सुकलकण्ठवामा[1]सुतं
सुगन्धि तुलसीदलं घनलताटवीशीतलम् ।
विनोदनविशारदं समदमानिनीशारदं[2]
समुल्लसितमाधवं[3] हृदि समुल्लसद्राघवम्[4] ॥१०६॥
विकचवकुलनागपुन्नागचाम्पेयजम्बू-
रसालद्रुमालम्बिवल्लीवितानस्फुरन्मण्डलम् ।
वकुलकुरवकतालहिन्तालकिंजालमल्ली-
तमालप्रवालस्फुरत्पत्रपुष्पप्रभापूरितम् ॥१०७॥
सफलपनसशाखिमाध्वीकसौरभ्यसंदोह-
मत्तभ्रमद्भृङ्गदम्पत्युदीर्णस्वरोन्नादितम् ।
नवकिसलयजालसंस्वादकिंचित्कषाय-
स्खलत्कण्ठनन्दोल्लसत्पञ्चमोच्चारभृत्कोकिलम् ॥१०८॥
तदन्वदर्शयद्दिव्यसखीनामष्टकं शुभम् ।
ततः षोडशकं चैव द्वात्रिंशकमनुक्रमात् ॥१०९॥
चतुःषष्टिं तद्द्विगुणं सखीवृन्दमदर्शयत् ।
एवं शतसहस्रादिसखीयूथान्यदर्शयत् ॥११०॥
चामरग्राहिणी छत्रधारिण्यादिसखीरपि ।
अन्याश्च स्नानपानादिक्रियासु सुविचक्षणाः ॥१११॥
प्रादुरासुः पश्यतोऽस्य देव्यः कमललोचनाः ।
ताभिः प्रमोदविपिनमाकुलव्याकुलीकृतम् ॥११२॥
तासां मध्ये कोटिचन्द्रसूर्यमण्डलभास्वता ।
अङ्गेन सुमनोगर्भसुकुमारतरेण सा ॥११३॥
शोभमाना रत्नभूषाभूषिता रत्नहारिणी ।
स्वयं षोडशवर्षीया तादृगालीकदम्बगा ॥११४॥
व्यतिष्ठत पुरस्तस्य सहजानन्दिनी ततः ।
चाकचक्यप्रभाजालधर्षिते इव तद्दृशौ ॥११५॥

१, °गाना°—रीवाँ । २. "मानिनोमाननिवर्तकं" टि०—मथु०, बड़ो० ।
३. "माधवं = वसंतं" टि०-मथु०, बड़ो० । ४. वशीकरमाधवम्—रीवाँ ।

अशक्नुवन्त्यौ सहजां द्रष्टुमित्यागते ह्यधः ।
विलोक्य सहजासख्यः शिवं सर्वा बभाषिरे ॥११६॥

सख्य ऊचुः[1]

पश्यास्मत्स्वामिनीं रुद्र यदर्थं त्वमिहागतः ।
किमधःक्षिप्तनयन आस्ते स्तब्ध इवाचलः ॥११७॥

रुद्र उवाच

स्वामिन्या वो मया सख्यो दर्शनं कर्तुमञ्जसा ।
शक्यते न वयोवेशतेजोऽतिशयकारणात् ॥११८॥
अलौकिकतमं तेजो रूपं चातिमनोहरम् ।
पश्यन्माधुर्यजलधौ मग्नोऽहं करणैः सह ॥११९॥
उन्मज्जामि निमज्जामि विपुले रूपसागरे ।
नावलम्बोऽत्र मे सख्यः प्रेमस्रोतो महारये ॥१२०॥
न पश्यामि स्थिरो भूत्वा क्षिप्तचित्त इतस्ततः ।
पश्यतो मे बलं वापि न किंचिदिह विद्यते ॥१२१॥
यदि वः स्वामिनी मह्यं निजदर्शनयोग्यताम् ।
दद्यात्तदैव शक्तः स्यामिति सख्यो विनिश्चितम् ॥१२२॥
इत्युक्त्वा पादयोः सद्यो न्यपतन्नीललोहितः ।
चिरं तत्रैव संलग्नस्ततस्तं सहजाब्रवीत् ॥१२३॥
उत्तिष्ठ भक्तशार्दूल यदर्थं त्वमिहागतः ।
तत्साधय मनाग्रुद्र कथं स्तब्ध इवासि भोः ॥१२४॥
दत्ता ते परमा दृष्टिः कृपया पार्वतीपते ।
यया च लप्स्यसेऽत्यर्थं मत्स्वरूपविलोकनम् ॥१२५॥
इत्युक्तोऽसौ सहजया दत्तदिव्यविलोचनः ।
अपश्यच्छिव उत्थाय तस्या रूपं महाद्भुतम् ॥१२६॥
अवलम्ब्य दृशं नावं रूपसागरमध्यगः ।
आलोलितो भावमयैस्तरङ्गैरपि निश्चलः ॥१२७॥
चिरमेष विलोक्यापि नातृप्यद्रूपपानतः ।

---

१. नास्ति—रीवाँ ।

अगाधरसपीयूषगम्भीरां तामम्मन्यत ॥१२८॥
ततो विज्ञापयाञ्चक्रे रुद्रस्तां भक्तवत्सलाम् ।
त्वं देवि नन्दनगृहे साक्षात्प्राकटचमागता ॥१२९॥
कथं न सुखयस्येमं क्रीडन्ती कालकेलिभिः ।
रिङ्गणक्रीडनालापमन्दहासावलोकनैः ॥१३०॥
कथं जाडचमिवालम्ब्य वर्तसे पार्श्वगा पितुः ।
अथोवाच स्मितं कृत्वा सहजानन्दिनी स्वयम् ॥१३१
अहं रामस्य विरहाज्जडीभूताखिलाङ्गकैः ।
न क्वचिद्दर्शनं कुर्वे न रमे नाभिभाषये ॥१३२॥
त्वं च मे भक्तराजोऽसि सत्यं कर्तुं वचस्तव ।
आच्छाद्य विरहं रुद्र क्रीडिष्ये बालकेलिभिः ॥१३३॥
सुखयिष्यामि जननीं चकोरीमिव चन्द्रिका ।
तातं च मयि वात्सल्यभाववन्तं भवद्गिरा ॥१३४॥
इत्यालप्य ततो रुद्रं रूपमन्तर्दधौ निजम् ।
ततः शैशवमासाद्य यथापूर्वमरोचत ॥१३५॥
एवमेषा शिवादीनां पूरयन्ती मनोरथम् ।
अतिष्ठज्जननीगेहं भूषयन्ती निजैर्गुणैः ॥१३६॥
आहूता अथ रुद्रेण गोपाः श्रीनन्दनादयः ।
गोप्यश्च राजिनीमुख्या ददृशुः सहजां ततः ॥१३७॥
क्रीडन्तीं ब्राह्मणस्याङ्के हसन्तीं सुखशालिनीम् ।
अतीव सुप्रसन्नास्यां तात तातेति भाषिणीम् ॥१३८॥
रिङ्गणाय प्रसर्पन्तीं सद्योऽपगतजाडचकाम् ।
प्रत्युत्तारं च ददतीं हुंकारोच्चारणादिभिः ॥१३९॥
तां विलोक्य गतावेशां वटुसिद्धस्य मन्त्रतः ।
अमन्यन्त व्रजजना मुदं च प्रापुरुत्तमाम् ॥१४०॥
विप्रहस्तात्समादाय कन्यारत्नं मुदान्विताः ।
तुतुषू राजिनीमुख्या नन्दनान्तःपुरस्त्रियः ॥१४१॥
श्रीनन्दनोऽपि संतुष्टो वटुं विज्ञाय निस्पृहम् ।
आत्मानं सदनं भृत्यान् पशूंस्तस्मै न्यवेदयत् ॥१४२॥

स वटुः पूर्णकामोऽसावाशिषं समुदीरयन् ।
[1]जगाम मुदितस्वान्तः स्वस्थानं यत आगतः[1]॥१४३॥
गोपा गोप्यश्च मुदिताः पिता माता मुहुर्मुहुः ।
महान्तमुत्सवं चक्रुः क्रीडन्तीं वीक्ष्य कन्यकाम् ॥१४४॥
सर्वे निर्भच्छयाञ्चक्रुर्मुक्तारत्नमणिव्रजान् ।
स्नापयित्वा शुभैस्तोयै रक्षां चक्रुर्विशेषतः ॥१४५॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे पूर्वखण्डे दशरथतीर्थ-यात्रायां व्रजागमने त्रयोविंशाधिकशततमोऽध्यायः ॥१२३॥

चतुर्विंशाधिकशततमोऽध्यायः

सुकण्ठ उवाच

सा वर्द्धमाना गोपराजस्य गेहे कलाः सर्वाः पोषयन्ती क्रमेण ।
शिशुत्वभावोचितकेलिवृन्दललामरूपा व्यरुचच्चन्द्रिकेव[2]॥ १ ॥
अतीत्य शैशवं सम्यक् तारुण्यं समुपेयुषी ।
गूढभावाञ्चिता दृष्ट्वा मात्रा गोपेन्द्रकान्तया ॥ २ ॥
तस्याश्चित्तेऽभवच्चिन्ता कोऽस्याः समुचितो वरः ।
रूपलावण्यमाधुर्यकान्तिभिस्तुल्यभावनः ॥ ३ ॥
त्रैलोक्ये दुर्लभं मन्ये तादृशं रूपमीप्सितम् ।
देवगन्धर्वमनुजमुनिवर्येषु सांप्रतम् ॥ ४ ॥
अस्याश्चातुर्यसदृशं सुतरां दुर्लभं भवे ।
अन्यत्र खलु चातुर्यमिति मे धीर्विषीदति ॥ ५ ॥
रूपमस्या अप्रतिमं सुखयिष्यति कं जनम् ।
अनर्हवरलाभे तु पश्चात्तापो भविष्यति ॥ ६ ॥
अनन्यगोचरं चास्या यौवनं रूपमण्डितम् ।
कस्य नेत्रातिथिर्भूत्वा कृतार्थत्वमुपैष्यति ॥ ७ ॥

१—१. नास्ति—अयो० । २. चन्द्रकेषु—अयो०, रीवाँ ।

इति चिन्तासमाविष्टा गोपराजनितम्बिनी ।
रहः संगम्य भर्तारमिदमूचे मनोहरम् ॥ ८ ॥
गोपेन्द्र सर्वसंपद्भिः समुपेतोऽसि संप्रति ।
एषा श्रीरिव मूर्ता ते पुत्रीभावं समागता ॥ ९ ॥

नैतादृशी सुरनरनागलोके दृष्टा श्रुता चापि मनोज्ञरूपा ।
अहो भाग्यं धरणीमण्डलस्य पुत्रीयमुच्चैः स्फुटमाविरासीत् ॥१०॥
धन्ये उभे अपि कुले तपसां समूहैर्भाग्याञ्चितैरितरलोकदुरापपुण्ये ।
यत्रेदृशी सकलसौभगभाजनं श्रीः साक्षादतुल्यसुषमानिधिराविरासीत् ॥११
धन्ये दृशौ खलु नृणां सुकृतौघभाजा मेनामशेषगुणरत्नगणाभिरामाम् ।
संपश्यतां निमिषविघ्नभराकुलेऽप्यह्नाय रूपपरमामृतपानपात्रे ॥१२॥

एषा संप्रति नाथ शैशवकलामुत्तीर्य नव्यं वय-
स्तारुण्यं वपुषा विभूषयति दृष्टचालापगत्यादिभिः ।
क्रीडन्ती सहिता सखीभिरसकृत्किञ्चिद्रहोबोधिता
मन्दाक्षं भवती दृशा रुचिरया वक्षो निजं वीक्षते ॥१३॥
तस्माद्विज्ञापयामोदं त्वामस्या विषये प्रभो ।
अनुरूपवयोवेशो वरः कश्चिद्विमृश्यताम् ॥१४॥
सामान्यवरयोग्यत्वं नैषा कलयते गुणैः ।
यस्यास्तनुरुचा हेमभूषणं मलिनायते ॥१५॥
इन्दीवरश्रियमियं दृग्भ्यां तिरयति स्फुटम् ।
मुखेन शारदं पूर्णचन्द्रं विजयते स्फुटम् ॥१६॥
अनुरूपेण भर्त्रासौ योजिता हंसगामिनी ।
दुहिता मेऽनवद्याङ्गी सुखयिष्यति लोचने ॥१७॥
एषा रामचन्द्रसमा वयोवेषगुणादिभिः ।
सामान्यपुरुषेणातो योजनीया न कर्हिचित् ॥१८॥
अस्याश्च सकलं तत्त्वं रुद्रो मेऽभिजगाद ह ।
ईदृशी दुहितारत्नं भाग्यैरेवाभवन्मम ॥१९॥
इत्युक्तो नन्दनः श्रीमान् राजिन्या निजभार्यया ।
अनुरूपं वरं प्रष्टुं शाण्डिल्यमुनिमाह्वयत् ॥२०॥

संपूज्य मुनिशार्दूलं त्रिकालज्ञविदां पतिम् ।
उवाच नन्दनो वाक्यं सुधाभिस्तर्पयन्निव ॥२१॥

श्रीनन्दन उवाच

भगवंस्तपसां राशे शाण्डिल्य मुनिसत्तम ।
मया विज्ञाप्यसे किंचित्सावधानमनाः शृणु ॥२२॥
सांप्रतं दुहितेयं मे[1] स्वानुरूपतयोचितम् ।
वरमर्हतिसौभाग्यसागरं जगतीतले ॥२३॥
तद्भवान् पश्यतु व्यक्तं दुहितुर्मे गुणोचितम् ।
रूपसौन्दर्य संपन्नं वरं सत्कुलसंभवम् ॥२४॥
इह चान्यत्र च प्राज्ञ जगत्यां यत्र कुत्रचित् ।
उदारगुणसंदोहं वरमस्यै समानय ॥२५॥
एवमुक्तो मुनिर्यातो वरचिन्तासमाकुलः ।
संवर्ध्य तं शुभाशीर्भिः स्तुतः संपूजितो ययौ ॥२६॥
दैत्यदानवदेवर्षिनरकिंनरसङ्कुलम् ।
नगनागनभश्चारिनिकेतेषु च पर्यटन् ॥२७॥
गवेषमाणो गोपेन्द्रदुहितुः सद्गुणोचितम् ।
वरं पुरुषधौरेयो नालभत्तेषु कुत्रचित् ॥२८॥
ततोऽसौ सन्निववृते मुनिर्बहुकृतश्रमः ।
अगमत्सुखिताख्यस्य गोपवर्यस्य मन्दिरम् ॥२९॥
यत्र रामः स्वयं साक्षाद्भगवान् पद्मलोचनः ।
ईषत्पौगण्डमत्येत्य कैशोरवयसि स्थितः ॥३०॥
लीलालावण्यजलधिः क्रीडते सखिभिः सह ।
नवनीलमणिश्यामः प्रकाममधुरद्युतिः ॥३१॥
पारेपरार्द्धकन्दर्पदर्पनिर्हरणोद्धुरः ।
ईषत्कटाक्षपातेन मोहयन् देवसुन्दरीः ॥३२॥
भाति भासितमाधुर्यलावण्यगुणविग्रहः ।
मन्दहाससुधासिक्तवियोगिजनमानसः ॥३३॥

---

१. दुहिता चेयं—रीवाँ ।

तत्र गोपालवर्येण पूजितः स स्तुतो मुनिः ।
रामं वीक्ष्य परं प्रीतः प्रसन्नहृदयोऽभवत् ॥३४॥
आमन्त्र्य सुखितं पश्चादागतो मुनिसत्तमः ।
श्रीनन्दनस्य भवनं यथावृत्तमवेदयत् ॥३५॥

मुनिरुवाच

शृणु गोपेन्द्र भवतो दुहितुर्घटनोचितः ।
त्रैलोक्येऽपि मया नैव दृष्टः पुरुषसत्तमः ॥३६॥
विहायैकं गुणारामं रामं राजीवलोचनम् ।
सौनासीरमणिश्यामं साक्षात्कामं मृगीदृशाम् ॥३७॥
गुणरूपवयोवेशैः सोऽस्याः समुचितो वरः ।
पूर्वमेवैष विधिना प्रायो योगो विनिर्मितः ॥३८॥
अन्यथा विहितं चात्र न वै युक्ततमं भवेत् ।
इति विज्ञाय हृदये समाचर यथोचितम् ॥३९॥
इत्युक्त्वा मुनिवर्येऽस्मिन् गते निजनिकेतनम् ।
भ्रातृभिः स्वजनैः साकं गोपराजो न्यरूपयत् ॥४०॥
त एनमूचुः संपृष्टा भ्रातरः स्वजना अपि ।
श्रीनन्दन भवांस्तावत्कुलेन परमोर्जितः ॥४१॥
अहो ऐक्ष्वाकवे वंशे भवान् जातोऽसि भूतले ।
इति विज्ञाय संबन्धः श्रीरामेण सदा भवेत् ॥४२॥
संबन्धिनो भातृवर्गं तथाप्तान् सुहृत्तमान् सुखितादींश्च गोपान् ।
श्रीनन्दनः प्रणायमाततान स्वकन्यकायाः सहजाया विधानतः ॥४३॥
रसानुकूल[1]मेवासीत्तदिदं राजसत्तम ।
रसशास्त्रस्य दृष्टिर्हि परकीयैकगोचरा ॥४४॥
श्रीनन्दनस्य च ज्येष्ठो भ्रातासीन्नरनन्दनः ।
तस्यापि चासीद् दुहिता नाम्ना कृष्णेतिकीर्तिता ॥४५॥
सा वीररामचन्द्रेण योजिता धातुरिच्छया ।
यथा श्रीसहजानन्दा रूपशीलगुणादिभिः ॥४६॥

---

१. रूपानु°—मधु०, बड़ो० ।

तथैव सानवद्याङ्गी पृथक्परिकरान्विता ।
रूपसौन्दर्यसारेण रामस्य प्रेमभाजनम् ॥४७॥
उभे अपि व्रजे नित्यं गूढसापत्नभावके ।
राघवेन्द्रकुमारस्य वशीकरणकारिके ॥४८॥
पृथक्कुञ्जनिकुञ्जेषु रममाणेषु केलिभिः ।
पृथग्रासविलासादिलीलाचातुर्यभाजने ॥४९॥
यूथेश्वर्याविमौ साक्षाद्रामस्य परमे प्रिये ।
एका ज्येष्ठा कनिष्ठान्या तयोर्लीलां निशामय ॥५०॥
यदा श्रीः सहजानन्दा दिव्येन वयसा युता ।
पितुर्गेहं विहायैषा श्वशुरस्य गृहं गता ॥५१॥
तदाष्टभिर्वयस्याभिः क्रीडन्तीभिर्वने वने ।
नीयते तत आकृष्य नन्दिग्रामं मुदावहम् ॥५२॥
यत्र श्रीसुखितागारे सर्वसंपद्भरान्विते ।
विभाति कलयन् केली रामो राजीवलोचनः ॥५३॥
तत्रागतामिमां बालामोषत्कैशोरभूषिताम् ।
गृह्णाति सादरा भूत्वा माङ्गल्या सुखितप्रिया ॥५४॥
अये परमकल्याणि श्रीमद्गोपेन्द्रनन्दिनि ।
अलंकुरु ममागारं नित्यं संनिहिता भव ॥५५॥
तवागमनमात्रेण मत्सुतः पद्मलोचनः ।
अत्यर्थं भवति प्रीतो न वै दुःखमुपैति सः[1] ॥५६॥
ज्योत्स्नायसे त्वं सहजे तस्य नेत्रचकोरयोः ।
अपि तत्तनुवासन्तीविषये सुरभीयसे ॥५७॥
अथ निर्मज्छयाञ्चक्रे [2]रत्नमुक्तामणिव्रजम् ।
सुखं प्रवेशयामास स्वागारं सर्वसौख्यदम् ॥५८॥
सर्वमाङ्गल्यसंपन्नं नानाकौतुकवर्द्धिनी ।
सा दृष्ट्वा सुखितागारं सानुरागमना अभूत् ॥५९॥
रामः श्रीसहजां वीक्ष्य प्राणजीवातुमञ्जसा ।
अभवद्विरहात्क्षोऽपि दूरात्प्राप्तमनोरथः ॥६०॥

---

१. यः--मथु०, बड़ो० । २--२. नास्ति--अयो० ।

पश्यन्नयनकोणेन सहजायाः शुभं वपुः ।
ईषन्निर्वापयाञ्चक्रे[२] ज्वलन्तं विरहानलम् ॥६१॥
अन्योन्यदर्शनोत्कण्ठाविलोलनयनावुभौ ।
आपतुः सहजारामावन्योन्यं परमां मुदम् ॥६२॥
तत्र सा पाकशालायां गता श्रीसहजेश्वरी ।
चतुर्विधव्यञ्जनेषु प्रावीण्यं समदर्शयत् ॥६३॥
अथ माङ्गल्यका देवी सादरा सहजां प्रति ।
अवोचद्वचनं प्रीता सुतस्याशयवेदिनी ॥६४॥
त्वमेव सहजानन्दे पाककर्मणि दक्षिणा ।
सुखमश्नाति मे पुत्रस्त्वत्कराब्जविनिर्मितम् ॥६५॥
अन्नं चतुर्विधं स्वादु व्यञ्जनं जनरञ्जनम् ।
त्वमेव कर्तुं जानासि सहजे परमोदये ॥६६॥
इत्युक्त्वाभ्यर्हणं तस्याः कृत्वा वाक्येन मञ्जुना ।
कारयामास सूपादि तत्करेण मनोहरम् ॥६७॥
तथा तद्बुभुजे रामो मध्याह्ने बन्धुभिः सह ।
श्लाघ्यमानः स्वादुकारं सहजाकरनिर्मितम् ॥६८॥
सुखितो गोदुहांवर्यो गोपमण्डलमण्डितः ।
अन्नं नानारसोपेतं बुभुजे भुक्तिपण्डितः ॥६९॥
सुधासाराधिकं सर्वं मन्यमानो मुदान्वितः ।
विशेषेण तदश्नाति पाचितं यद्विदग्धया ॥७०॥
श्रीनन्दनसुधारश्मेरुद्गतेयं सुहृत्तमा ।
सहजानन्दिनी चंचत्कटाक्षव्यजनानिलैः ॥७१॥
वीज्यमानतनुर्भुङ्क्ते सानन्दं सुखितात्मजः ।
इत्थं समाप्य सुखदां रसिको भोजनक्रियाम् ॥७२॥
ताम्बूलवासितमुखः शय्यामन्दिरमागमत् ।
तत्रायं सहजानन्दादृग्वाणविनिपीडितः ॥७३॥
आकुलव्याकुलतनुः [१]शय्यामालिङ्ग्य संस्थितः❀ ।
निरम्बुपल्वले यद्वन्मीनः संपरिवर्त्तते ॥७४॥

१—१. नास्ति—रीवाँ । ❀ अतः परं पूर्वखण्ड-समाप्तिं यावत् खंडितः पाठः—अयो० पुस्तके ।

तद्वदेषोऽपि शय्यायामासीन्निःसहविग्रहः ।
तदा भुक्तिक्रियान्ते तां रामानीय व्यदर्शयत् ॥७५॥
रामाय रमणोद्युक्तां सहजानन्दिनीं रहः ।
तस्यास्तरलदृक्कोणदर्शनामृतधारया ॥७६॥
ईषत्सिक्ततनुः[1] कान्तः किंचित्स्वास्थ्यमवाप सः।
अथानयोरभूत्तत्र सङ्केतः सुखवर्द्धनः ॥७७॥
प्रमोदविपिने रम्ये कामेश्वरनिकेतने ।
तत्राशोकलताकुञ्जे यत्र भद्रवटो द्रुमः ॥७८॥
माणिक्यकुसुमो रत्नफलो मरकतच्छदः ।
तत्र नौ सङ्गमो भूयादनुक्षणमहर्निशम् ॥७९॥
इत्थं झटिति संलप्य नत्वा कान्तस्य पादयोः ।
माङ्गल्यकाकराब्जेन सम्यग्भूषितविग्रहा ॥८०॥
रत्नैः मुक्ताफलैः पुष्पैर्विद्रुमैर्मणिभिस्तथा ।
वहन्ती रूपसौन्दर्यं क्रीडन्ती पुष्पकन्दुकैः ॥८१॥
हसन्ती हासयन्ती च सखीस्तुल्यवयोञ्चिताः ।
भूषयन्ती कुञ्जवीथीः कान्तिसारेण वर्ष्मणा ॥८२॥
लीलासौन्दर्यभवनं श्वसुरस्यालयं ययौ ।
यातमात्रेण सा नूनं तल्पमालिङ्ग्य मन्दिरे ॥८३॥
अतिष्ठत्सहजानन्दा हाहेति व्याधिपीडिता ।
तस्याः श्वश्रूःस्निग्धमनास्तरला नाम सत्वरम् ॥८४॥
वैद्यराजमभीप्सन्ती प्रेषयामास गोपिकाः ।
ताः सर्वतो दिशं याता वैद्यराजगवेषणे ॥८५॥
स्वयं च निर्गता गोपी शाण्डिल्यस्याश्रमं सती ।
यत्र सा मण्डला देवी तद्वधूः सिद्धयोगिनी ॥८६॥
अथ यामे तृतीयेऽह्न आगमावसरे गवाम् ।
रामः शृङ्गारितो मात्रा महासौन्दर्यवारिधिः ॥८७॥
सुवर्णवेत्रमादाय वयस्यैः सखिभिर्वृतः ।
मुक्तारत्नमणिस्तोमप्रत्यङ्गपरिभूषितः ॥८८॥

मुरलीं वादयन् मञ्जु वयस्यैः शृङ्गनादिभिः ।
रममाणो मुदा गायन् प्रतस्थौ सुखितालयात् ॥८९
प्रविश्य गह्वरे सर्वान् वयस्यान् गोपबालकान् ।
कुसुमावचयाद्यर्थमाज्ञाप्य रसिकाग्रणीः ॥९०॥

स्वयं ब्राह्मणवेशेन मण्डलान्तिकमागमत् ।
सा तं दृष्ट्वा द्विजवरं मन्त्रसिद्धं महाधियम् ॥९१॥
अब्रवीत्तरलामेष तव वध्वा शरीरगाम् ।
हरिष्यति महापीडामावेशाच्चैव रोगतः ॥९२॥
कृत्रिमाद्वापि दृष्टेर्वा सर्पाघ्रातप्रसूनतः ।
एष सिद्धोऽखिलां बाधां हरिष्यति न संशयः ॥९३॥

ततश्च मण्डलेश्वर्या विश्वस्ता भाषितेन सा ।
तरलादाय तं सिद्धं ब्राह्मणं मन्त्रकोविदम् ॥९४॥
जगाम च निजं सद्म यत्र श्रीसहजातया ।
निपीडितातिदुःखेन शय्यामालिङ्ग्य संस्थिता ॥९५॥
द्विजःसिद्धोऽथ तां दृष्ट्वा तरलायाः स्नुषां सतीम् ।
आवर्तेन विवर्तेन सर्पन्तीमधितल्पकम् ॥९६॥

बलादितस्ततोऽङ्गानि क्षिपन्तीं पाण्डुराननाम् ।
शुष्यतीमिव सूर्यांशुस्पर्शाद् ग्रीष्मलतामिव ॥९७॥
विलोक्य नाडिकां चैव ज्ञाततत्त्वोऽब्रवीदथ ।
तरले तव कल्याणि सुखेयं भाग्यभूयसी ॥९८॥

पीडिता हेतुना येन तमहं ते निवेदये ।
कृते च तत्प्रतीकारे शान्तिमेष्यत्युपद्रवः ॥९९॥
भवतां हि कुले पूर्वं कामेश्वरः सदाशिवः ।
केनापि मानितः किंचित्कस्मैचित्कारणाय च ॥१००॥
तत्कार्यं तु कृतं तेन कामेश्वरशिवेन वै ।
न च संमानितोऽत्यर्थं तेनेदं कर्मणा स्फुटम् ॥१०१॥
स्नुषायास्तवपीड़ाभूत्ततः संमानय द्रुतम् ।
कामेश्वरं वराध्यक्षं शिवं सर्वार्तिनाशनम् ॥१०२॥

प्रमोदविपिनस्यान्तस्तस्यालयमनुत्तमम् ।
अशोकलतिकाकुञ्जे तत्र प्रेष्या त्वया स्नुषा ॥१०३॥
गन्धैः पुष्पैस्तथा धूपैर्दीपैर्नैवेद्यवस्तुभिः ।
भूयश्च फलताम्बूलदक्षिणाभिर्दिवानिशम् ॥१०४॥
मण्डलं पूजयत्वेषा पद्यैश्चात्मकराहृतैः ।
आत्मनावचितैः पुष्पैर्विरच्य विपुलाः स्रजः ॥१०५॥
फलैश्चात्मकरानीतैर्मालूरैर्बिल्वजैस्तथा ।
आत्मनैवाहृतैस्तोयैर्जलधारा विधीयताम् ॥१०६॥
एवमाराधितो देवः शङ्करः पार्वतीपतिः ।
हरिष्यत्यखिलां बाधां कामेशो वरदेश्वरः ॥१०७॥
यस्मिन् दिने सविस्रब्धं पूजारम्भो भविष्यति ।
तदेव दिनमारभ्य पीडानाशो भविष्यति ॥१०८॥
प्रातः समयमारभ्य सायंपर्यन्तमादृता ।
पूजयिष्यति कामेशं ततः शुभमवाप्स्यति ॥१०९॥
आधयो व्याधयश्चैव ग्रहपीडाश्च दारुणाः ।
आवेशो भूतजा पीडा न कदाचिद्भविष्यति ॥११०॥
धनधान्यमयी लक्ष्मीर्गृहान्नापगमिष्यति ।
आयुष्यं विपुलं भोग्यं सौभाग्यं सर्वसंपदः ॥१११॥
प्रीतिः कीर्तिस्तथा तुष्टिः पुष्टिश्चापि दिने दिने ।
भविष्यति न संदेहो नूनमेतद्विधीयताम् ॥११२॥
सखीभिः सवयस्काभिः सहिता गानपूर्वकम् ।
रात्रौ जागरणं कुर्याद्विशेषात्सोमवासरे ॥११३॥
इत्येष विधिरुद्दिष्टः कामेश्वरशिवार्चने ।
अतोऽन्यथा कृते चैव विपरीतं भविष्यति ॥११४॥
अत आवश्यकं कार्यं कामेश्वरशिवार्चनम् ।
अल्पे कृते फलं भूयो येन स्यात्तद्विधीयताम् ॥११५॥
अहं चास्याः कारयिष्ये कामेश्वरशिवार्चनम् ।
परस्त्रियं न स्पृशामि स्प्रक्ष्यामि कुशमात्रतः ॥११६॥

तावच्च ते सुतो गोपः स्पर्शं नास्याः करिष्यति ।
कृते शिवकृता बाधा करिष्यति न संशयः ॥११७॥
इत्युक्त्वा चाशिषं दत्त्वा द्विजः सिद्धः प्रसन्नधीः ।
तरलां समुपामन्त्र्य यथोद्देशं यथोचितम् ॥११८॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दशरथतीर्थयात्रायां व्रजागमने चतुर्विंशाधिकशततमोऽध्यायः ॥१२४॥

●

पञ्चविंशाधिकशततमोऽध्यायः

सुकण्ठ उवाच

अथ कामेश्वरं शम्भुं लोकानां वरदं प्रभुम् ।
समाराधयितुं श्वश्रूः प्रेषयामास तां स्नुषाम् ॥ १ ॥
गन्धपुष्पोपहारादिसंविधां खलु भूयसीम् ।
कृत्वा हस्तेषु चार्वङ्गी सखीभिः प्रस्थिता ततः ॥ २ ॥
तस्याः सङ्गे गोपकन्या धृतकाञ्चनभाजनाः ।
धूपदीपादिकं धृत्वा प्रययुः प्रमुदाटवीम् ॥ ३ ॥
तावत्तत्र स्वयं रामो भूत्वा कामेश्वरः शिवः ।
अधिप्रमोदविपिनमशोकतरुमण्डपे ॥ ४ ॥
अतिष्ठत्सहजानन्दादर्शनोत्सुकमानसः ।
शृङ्गाररससर्वस्वो भोगभोजनलालसः ॥ ५ ॥
ताः सर्वा नूपुरारावमञ्जुलाङ्घ्रिसरोरुहाः ।
गृहीतमन्दगतयो मरालकुलजैत्रिकाः ॥ ६ ॥
श्यामा रामा मनोरामाप्रमुखा नर्मवेदिकाः ।
सख्यः कमलपत्राक्ष्यो वार्तयन्त्यः परस्परम् ॥ ७ ॥
आसेदुर्विकसद्भूरिलतातरुमनोहराम् ।
मन्दारपुष्पसौरभ्यवासितां प्रमुदाटवीम् ॥ ८ ॥

तत्र गत्वा पुष्पवत्सु वनगह्वरशाखिषु ।
पुष्पावचयनं चक्रुः पूजार्थं वरदेशितुः ॥ ९ ॥
सर्वा विहृत्य विपिने जगुरुच्चैः स्वरान्विताः ।
गायन्त्यो वादयन्त्यश्च मधुराः करतालिकाः ॥१०॥
कूर्दमानाः खेलमाना हेलमानाः परस्परम् ।
हसन्त्यो हासयन्त्यश्च नर्मोद्घाटनपूर्वकम् ॥११॥
अक्षिमुद्रणलीलाभिर्विहरन्त्यो मुदान्विताः ।
नमस्ते वरदेशाय पशूनां पतये नमः ॥१२॥
नमः पिनाकहस्ताय त्रिनेत्राय नमोनमः ।
नमः प्रमोदविपिनलतामण्डपचारिणे ॥१३॥
नमः श्रीरामभक्ताय नमः श्रीरामदायिने ।
नमस्ते घोररूपाय अघोराय दयावते ॥१४॥
घोरघोराय घूर्णाय घोरघोरतराय च ।
नमो मन्मथनाशाय नमो मन्मथवर्द्धिने ॥१५॥
नमस्त्रिजगदीशाय ईशानाय नमोनमः ।
नमो गणानां नाथाय नमो गणविहारिणे ॥१६॥
नमो गणाय सेव्याय गणपस्य प्रियाय च ।
नमो धूर्जटये नीललोहितायात्ममूर्तये ।
नमो विश्वस्य लिङ्गाय त्रिलिङ्गाय नमोनमः ॥१७॥
नमो गिरीशाय गिरि[1]प्रियाय गिरांपतेः सर्ववरप्रदाय ।
गिरैकगम्याय गिरां महिम्ने गिरामगम्याय सनातनाय ॥१८॥
नमो गण्डस्वनोद्घोषप्रसन्नाय त्रिशूलिने ।
धतूराशनमत्ताय उमासहचराय च ॥१९॥
नमस्तुङ्गशिराचुम्बिचन्द्रखण्डावतंसिने ।
त्रैलोक्यपुरनिर्माणमूलस्तम्भाय शम्भवे ॥२०॥
नमो मन्दाकिनीमल्लीमाल्यभूषितमूर्द्धने ।
नमो वेदान्तवेद्याय तपःप्रणिहितात्मने ॥२१॥

---

१. गिरः—मथु०, बड़ो० ।

नमः स्वात्मैकमुक्ताय नमः स्वानन्दशालिने ।
नमो वेदत्रयोद्गीतमूर्तये चाष्टमूर्तये ॥२२॥
नमो गुणाभिरामाय गुणातीतमितौजसे ।
गुणैर्गुप्तस्वरूपाय गुण्याय परमात्मने ॥२३॥
शुद्धाय शुद्धतत्त्वाय शुद्धस्फटिकमूर्तये ।
नीलकण्ठाभिरामाय श्रीकण्ठाय नमोनमः ॥२४॥
इतिसंस्तूय पुरतः सखीः प्राञ्जलयः स्थिताः ।
दण्डवत् प्रणतिं भूमौ चक्रुर्मुख्यपुरःसराः ॥२५॥
एतस्मिन्नन्तरे पुत्री तरलायाः सदा खला ।
ननान्दा सहजेशान्या भङ्गुरानाम नामतः ॥२६॥
पैशुन्यं समुपाश्रित्य तरलां निजमातरम् ।
समुपेत्य जवाद् दुष्टा रहसि प्रत्यबोधयत् ॥२७॥

भङ्गुरोवाच

अये मातस्तव वधूः स्त्रीचरित्रमुपाश्रिता ।
आसक्ता सुखिताख्यस्य गोपवर्यस्य पुत्रके ॥२८॥
त्वं न जानासि शुद्धात्मा[1] सा तद्विरहपीडिता ।
मिथ्या रोगापदेशेन हाहेति कुरुते मुहुः ॥२९॥
इदानीं चापि कामेशशिवपूजनकैतवात् ।
गता प्रमोदविपिनं यत्र धूर्तः स वर्तते ॥३०॥
प्रमोदविपिनं नाम तस्य लीलानिकेतनम् ।
तत्राशोकलतासद्मन्यनेन सह संगता ॥३१॥
रमते कामुको सा वै तेन प्रच्छन्नकामिनी ।
समस्तव्रजयोषाणां पातिव्रत्यापहारिणा ॥३२॥
तस्य लोचनबाणेन विद्धा हृदि महोन्मदा ।
का स्त्री न विचलेन्मातः पातिव्रत्यात्पराङ्मुखी ॥३३॥
घण्टाघोषोऽयमेतस्य श्रुतो व्रजपुरे मया ।
सर्वापि मोहिता वामा एतेन व्रजवासिनाम् ॥३४॥

---

१. त्वं जना सिद्धसिद्धात्मा—रीवाँ ।

अथचेत्त्वमिमं वृत्तं वितथं यदि मन्यसे ।
तदा मार्तानिरीक्षस्व गत्वा प्रमुदकाननम् ॥३५॥
कामेश्वरस्य पूजा चेत्सत्यमेतद्भविष्यति ।
न चेद्वयभिचरन्तीं तां वारयस्व निजस्नुषाम् ॥३६॥
इति प्रबोधिता माता महापिशुनया तया ।
प्रेषिता तरला तत्र यत्र कामेश्वरः शिवः ॥३७॥
सा प्रच्छन्नवपुर्भूत्वा गताशोकलतावनम् ।
पश्चात्कामेशलिङ्गस्थ स्थिता तरलिका स्वयम् ॥३८॥
पश्यतिस्माखिलं वृत्तं सहजायाः सुखावहम् ।
यथा कामेश्वरो देवः पूजितो वरदस्तथा ॥३९॥
सा तत्र स्वकरानीतैर्गन्धैः पुष्पैः सरोरुहैः ।
धूपैर्दीपैश्च नैवेद्यैः कुसुमाञ्जलिभिस्तथा ॥४०॥
शुद्धाभिर्जलधाराभिः सारवीभिरखण्डितम् ।
कामेशस्य प्रियाभिश्च संविधाभिर्मुहुर्मुहुः ॥४१॥
गीतैर्वाद्यैस्तथा नृत्यैर्दण्डवन्नतिपूर्वकम् ।
भक्त्या संपूजयामास वरदं शूलपाणिनम् ॥४२॥
तस्याः पूजां समादाय सखिभिः सह निर्मिताम् ।
तेनैव साधुरूपेण द्विजसिद्धेन कारिताम् ॥४३॥
सुप्रसन्नः शिवः साक्षाद्भगवान् करुणानिधिः ।
वरेण च्छन्दयामास भूयसा वरदेश्वरः ॥४४॥
पश्यन्त्यामेव च श्वश्वां प्रत्यक्षश्चन्द्रशेखरः ।
पार्वतीजुष्टवामाङ्गः सहजां समवोचत ॥४५॥
अयि श्रीनन्दनसुतेऽनया तव सपर्यया ।
तुष्टोऽस्मि भक्तिभावेन श्रद्धायाश्चातिरेकतः ॥४६॥
किं ते ददामि सहजे तव वश्योऽस्मि संप्रति ।
कृपयिष्यसि यस्मै त्वं सोऽपि धन्यो धरातले ॥४७॥
धन्यासि गोपकन्यैवमहो भक्तिस्तवेदृशी ।
अनया तव भक्त्याहं क्रीतोऽस्म्यत्र न संशयः ॥४८॥

धनं धान्यं च सौभाग्यमारोग्यं जयसंपदः ।
भाग्यं च विपुलं भोग्यं सुखं मङ्गलमद्भुतम् ॥४९॥
प्रियस्य चिरजीवित्वं यद्यच्च मनसेप्सितम् ।
तत्सर्वं प्राप्नुहि सदा दासदासीजनावधि ॥५०॥
यस्मिन्निकेतने धन्ये भवती प्रतिवत्स्यति ।
तस्य भाग्यं च सौख्यं च किमर्थं वर्णयाम्यहम् ॥५१॥

धन्यः स देशः सुखसंपदान्वितः सदा महामङ्गलराशिसंयुतः ।
नित्योत्सवस्तोमविशेषभूषितो भविष्यति त्वत्कृपयानुवासरम् ॥५२॥
ये वा खलास्त्वद्विषये विनिन्दकाः पैशुन्यवाचो वचनीयवाञ्छया ।
तेषां विनाशो भविता स्वदोषतस्तवानुकम्प्याश्च भवन्तु निर्भयाः ॥५३॥

त्रैलोक्ये जायतां शुभ्रं यशश्चाप्रतिमं तव ।
यद् गीयमानं मनुजैर्भुवनं पावयिष्यति ॥५४॥
वरश्च ते दीयमानः पुनरुक्तायते किल ।
यतस्त्वं स्वत एवासि वरसंदोहभूषिता ॥५५॥
पातिव्रत्यमखण्डं ते सतीनां भुवि भूषणम् ।
स्वाभाविकेन चानेन नित्यं विजयमेष्यसि ॥५६॥

दुरुक्तकारिणो दुष्टास्तवाज्ञालोपकाश्च ये ।
तेषामहं दण्डयिता सुप्रीतस्तव भक्तितः ॥५७॥
इति दत्त्वा वरं शम्भुः सहजायै मुहुर्मुहुः ।
सुप्रसन्नमुखाम्भोजस्तूष्णीमास महीपते ॥५८॥

अथ सा तरला नाम सुप्रीता वरलाभतः ।
शिवस्य पृष्टतः सद्यः स्फुटीभूय पुरः स्थिता ॥५९॥
सहजायाः पदाम्भोजे जग्रहीत्तुष्टमानसा ।
मुहुर्मुहुः प्रणम्यैनामुवाच विमलाशया ॥६०॥

अहो मे परमं भाग्यं यस्य गेहे त्वमागता ।
उभे अपि कुले धन्ये भवत्या भुवनश्रिया ॥६१॥
विभूषिते श्रीसहजे चिरञ्जीव ममाशिषा ।
धन्यं व्रजपुरं यत्र भवती मण्डनायिता ॥६२॥

अहो तव त्रिजगतां पावनं विमलं यशः ।
पार्वती सिन्धुतनया सावित्री च सरस्वती ॥६३॥
अरुन्धती नलवधूरनसूया तथा शची ।
अर्हन्ति सहजानन्दे न हि ते षोडशीं कलाम् ॥६४॥
कीर्त्या कान्त्या च भाग्येन सौभाग्येन शुभेन च ।
तथा गुणैर्महोदारैर्महिम्ना चाति भूयसा ॥६५॥
शीलेन लज्जया चापि पातिव्रत्यगुणेन च ।
तव दर्शनतो देवि देव्योऽपि कुलभूषणे ॥६६॥
भवन्ति हृदि सुप्रीताः प्रणयं च वितन्वते ।
तवावलोकनेनैव पवित्रं योषितां कुलम् ॥६७॥
किं पुनः स्पर्शसंलापसख्यसंसेवनादिभिः ।
वक्तुं च तव माहात्म्यं न क्षमास्म्यहमद्भुतम् ॥६८॥
यया त्वयानया भक्त्या तोषितः पार्वतीपतिः ।
त्वद्भक्त्या नूनमस्माकं तुष्टोऽयं वरदेश्वरः ॥६९॥
पवित्रं विमलं रम्यं यस्ते नाम ग्रहीष्यति ।
सोऽपि सर्वाभ्य आपद्भ्यो निस्तरिष्यति भूतले ॥७०॥
अद्यावधि मया स्वात्मा धन्यो भृशमन्यत ।
त्वत्संगमगुणोऽस्माकं भवितादुःखतारणः ॥७१॥
जानामि लोकत्राणाय श्रेयोवितरणाय च ।
श्रीरामस्य सहचरी श्रीस्त्वं प्रकटिता भुवि ॥७२॥
भवत्या गुणसंदोहं गृणीते शंकरः स्वयम् ।
त्वां प्राप्य मत्सुतो धन्यः सौभाग्यनिधिरेव हि ॥७३॥
चिरञ्जीव चिरं धेहि सौभाग्यं मम सद्मनि ।
चिरं विहर लीलाभिः प्रमोदविपिनान्तरे ॥७४॥
यत्र यत्र पदन्यासं करोति भवती भुवि ।
तत्र तत्रैव तीर्थानि समायान्ति स्वदेशतः ॥७५॥
यत्र यत्रेक्षणन्यासं करिष्यसि प्रसादतः ।
स्त्रियो वा पुरुषस्यापि तस्य तस्य शुभं महत् ॥७६॥

माहात्म्यवत्यनुमितासीदानीं तु विशेषतः ।
अस्मद्भाग्यमविच्छिन्नमितरैर्भुवि दुर्लभम् ॥७७॥
अस्मासु करुणां कृत्वा प्रमोदं[1] वितनिष्यसि ।
येन स्याम वयं धन्यास्त्वादृश्या स्नुषया भुवि ॥७८॥
अहो श्रीनन्दनस्यापि श्रीराजिन्यास्तथैव च ।
प्रभूतं भाग्यमतुलं मया स्तोतुं न पार्यते[2] ॥७९॥
ययोरङ्कगता भूषा भवती भाग्यभूयसी ।
आबाल्यात्परमानन्दमददाः पद्मनेत्रयोः ॥८०॥
जाने श्रीनन्दनाम्भोजे उदिता कापि वै सुधा ।
स्वजनेन्द्रियदेवानां निर्जरत्वविधायिनी ॥८१॥
जाने त्वं देवि सहजे काचिद्रुचिरचन्द्रिका ।
स्वलोचनचकोराणामेकैवानन्ददायिनी ॥८२॥
सखीलोचनपद्मानां त्वं काचिदरुणप्रभा ।
दिने दिनेऽभ्युदयिनी हर्तुं त्रिजगतां तमः ८३॥
यो वै वर्षसहस्रेणाप्यखण्डाराधनैर्नृणाम् ।
प्रसीदति न वा शम्भुर्योगिनां ध्यानगोचरः ॥८४॥
स त्वया पूर्णया भक्त्या स्ववशीभूतवत्कृतः ।
अतोऽखिलोऽपि भुवने कस्ते सादृश्यमञ्चतु ॥८५॥
आशीर्भिर्वर्द्धयामि त्वामथवा प्रणमाम्यहम् ।
इति संशयमापन्ना त्वामाशासे नमामि च ॥८६॥
एकं स्नुषेति वात्सल्यं माहात्म्यज्ञानमेकतः ।
उभयोरन्तरे नित्यं तुष्यामि च रमामि च ॥८७॥
अथ श्रीसहजानन्दे त्वमिहात्र प्रमुद्वने ।
संपूज्य देवं कामेशं विधाय सुभगव्रतम् ॥८८॥
रात्रौ जागरणं कृत्वा गीतवाद्य[3]पुरःसरम् ।
विहृत्य च सखीवृन्दैस्तुल्येन वयसाञ्चितैः ॥८९॥

---

१. प्रसादं—मथु०, बड़ो० । २. °तुलमास्तोतुं नैव पारये—रीवाँ । ३. °नाद°—मथु०, बड़ो० ।

मनोरथं पूरयित्वा समाप्य च शुभं विधिम् ।
परमानन्दसम्पन्नां वनकेलीं विधाय च ॥९०॥
जलकेलीं ततः कृत्वा क्रीडानिर्भरमानसा ।
स्वैरमागच्छ भवनमलङ्कुरु ततो मम ॥९१॥
इत्थं पुनः पुनस्तस्या क्रीडोत्कण्ठितचेतसः ।
इच्छानुरूपमाख्याय संश्लिष्य च पुनः पुनः ॥९२॥
पुनः पुनः शुभाशीर्भिरभिनन्द्य प्रियां स्नुषाम् ।
पुनः पुनः प्रणम्यैनां शिवं कामेश्वरं तथा ॥९३॥
पुनः पुनः सुसंस्तूय नत्वा संपूज्य सादरम् ।
कोटिधेनुपतेः पत्नी गृहकार्यशताकुला ॥९४॥
सखीभ्यः सहजास्नेहाद् विनिवेद्य सुरक्षितुम् ।
समाभाष्य सुसत्कृत्य तरलागान्निकेतनम् ॥९५॥
तस्यां गतायां स्निग्धायां सहजानन्दिनी स्वयम् ।
[1]कामेश्वरस्य शेषां तां सपर्यां प्रत्यपूपुरत् ॥९६॥
ततः कामेश्वरो देवः प्रहस्य समवोचत ।
अतः परं श्रीसहजे सखीभिः सहिता स्वयम्[1] ॥९७॥
लीलानिकुञ्जभवनं समलङ्कुरु सादरम्[2] ।
यत्र ते दयितो रामश्चिरात्समभितिष्ठति ॥९८॥
श्रोतुं त्वच्चरणाम्भोजनूपुरारावमादृतः ।
राजहंसकुलक्वाणं न किञ्चिदिति मन्यते ॥९९॥
पुनः पुनश्च चकितश्चाटकैरकुलध्वनौ ।
त्वत्पादाङ्गुलिभूषाणां संनादं मनुते हृदि ॥१००॥
चिरात्पुलकितैरङ्गैस्त्वदागमनवाञ्छया ।
मुहुर्मुहुः समीकुर्वन् कदम्बसुममालिकाम् ॥१०१॥
क्रुध्यत्कन्दर्पविशिखकुसुमेभ्यः परिच्युतैः ।
मकरन्दैरिव स्वेदसलिलैरार्द्रविग्रहः ॥१०२॥
मुहुस्त्वन्मिलितोत्कण्ठासंभवानन्दसीकरैः ।
पतद्भिस्तुहिनासारकणैरिव सवेपथुः ॥१०३॥

१—१. नास्ति—रीवाँ । २. साधनम्—रीवाँ ।

कूजत्सु कलविङ्केषु कलहंसकुलेषु च ।
तदङ्घ्रिभूषणध्वानध्यानात्सोत्कण्ठमानसः ॥१०४॥
त्वद्वियोगप्रभूतार्तिविलीनसकलेन्द्रियः ।
वाष्पाणि मुञ्चन्नेत्राभ्यामन्तस्तापभरोदयात् ॥१०५॥
तत्र गत्वा त्वमुत्तप्तमात्मनो[1] विरहाग्निना ।
श्रीरामं प्राणदयितमानन्दय मुखेन्दुना ॥१०६॥
चिरादासक्तहृदयैस्त्वयि सीदति ते प्रियः ।
एतत्तेऽनुचितं श्रीमत्सहजानन्दिनि ध्रुवम् ॥१०७॥
कृताखिला वरिवस्या मदीया प्रसन्नोऽहं स्वाशिषं ते ददामि ।
इह प्रमुद्वनकुञ्जान्तराले प्राणप्रियं राममानन्दयेति ॥१०८॥
नातः परं प्रियं किंचिन्ममापि सहजेश्वरि ।
पश्येयुः सस्पृहाः सख्यः संगतौ दम्पती युवाम् ॥१०९॥
युवां क्रीडाविनोदार्थं प्रमोदविपिनं मया ।
संरक्ष्येते श्रीरामस्य नित्यमाज्ञानुगामिना ॥११०॥
युवां लीलारसेनैताः प्रमोदवनवल्लिकाः ।
परिपुष्टतमा[2] नित्यं शोषिता विरहे च वाम् ॥१११॥
अतो द्रुतं समभिसर प्रिये प्रिये प्रियालयस्त्वदुपगमे धृतस्पृहाः ।
वृथा व्रजत्यवसर एष माधवः समुल्लसद्विपिनलतातरुव्रजः ॥११२॥
चिरं चलन्मलयसमीरसङ्गमात्समन्ततः सुरभितवृक्षवल्लरि ।
लवङ्गिकापरिमलपूरितान्तरं प्रमुद्वनं सफलय तन्वि संप्रति ॥११३॥

सुकण्ठ उवाच

एवं वदति कामेशे लीलानन्दावलोकिनि ।
मङ्गलामण्डलेश्वर्यौ सहजामुपजग्मतुः ।

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दशरथतीर्थयात्रा-यामादिव्रजागमने पञ्चविंशाधिकशततमोऽध्यायः ॥१२५॥

●

---

१. तमुत्तान्तमा°—मथु०, बड़ो० । २. धुरिपुष्टितमा—रीवाँ ।

षड्विंशाधिकशततमोऽध्यायः

मङ्गलोवाच

जय जय सहजेश्वरि त्वद्विलासाय भाति प्रमोदाटवी मञ्जुरूपाद्य-
सद्भृत्यवर्येण सद्यो वसन्तेन सम्यक्कृता चित्रलेखेन लीलापटी वाति चित्र-
विचित्रद्रुमस्तोम सोमच्छन्नशाखालसन्मञ्जरीभूतभूयो रसालद्रुमालम्बि-
वल्लीक्वणत्कोकिलालापरुच्या कदम्बाटवीपुष्पधावद्रजोधोरणीधूमधारानु-
मीतस्मराधीशचापप्रतापानलज्वालजालायितप्रोल्लसत्किंशुका भासते ॥१॥

विकचवकुलनागपुन्नागहिन्तालतालीतमालद्रुमालीसमालीढलोलल्ल -
वङ्गीलतावृन्दचञ्चदञ्चल्ललच्चञ्चरीकौघझङ्कारतारस्वराकर्णनप्रोद्यदा -
नन्दखेलत्कुरङ्गीकुलाकेतकीकान[1]नोद्धूतधूलीभरज्ञातचेतोभवच्छत्रभृद्भूरि -
सेनातुरङ्गाटवीटापटङ्कत्रुटद्भूरजच्छन्नदिङ्मण्डला । वञ्जुलानोकहोल्ला-
सिमञ्जुस्फुरन्मञ्जरीपुञ्जरत्नोप्तशाखाहरित्पर्णपूर्णद्युतिद्योतिता संतता-
ल्लासभृच्चम्पका राजते ॥२॥

मरकतमणिवर्यविद्योतिवैदूर्यविस्फारिगारुत्मतव्रातसंमिश्रनव्येन्द्र नील-
प्रभाभारभास्वन्निकुञ्जाङ्गणस्पृष्टमाणिक्यमुक्ताचतुष्कासनासीनसानन्दह् -
न्मेघनादानुलासिस्फुरद्बर्हविस्तारसच्चन्द्रकस्तोमशोभावती फुल्लपङ्केरुहा-
मन्दकिञ्जल्कपुञ्जसंचलद्धूलिधाराविचित्रीकृतानेककासारपातःपतद्राजहंसा-
वलिक्वाणकोकीकलापातिकोलाहलोन्निद्रयञ्चेषुविद्धाखिलग्राम्यधर्माढ्यजो -
वा जरीजृम्भते ॥३॥

इह विलसति कापि वल्लीलसत्तुङ्गगुच्छस्तनी [2]कापि पङ्केरुहोड्डोन-
भृङ्गीवरश्रेणिवेणीधरा कापि रामाननोद्वीक्षणैकस्पृहानिर्निमेषीकृतात्यर्थ-
मत्तालिनी[2]तारकोद्भासिसंफुल्लपुष्पेक्षणा कापि संफुल्लपुष्पस्मितद्योतिता
कापि सत्पल्लवारक्तविम्बाधरा कापि चञ्चच्छुकीचञ्चुनासापुटद्योति-
मृद्वीफलस्थूलमुक्ताफला कापि मूलक्वणन्मत्तकादम्बयुग्म[3]स्फुरत्कोमला-
ङ्घ्रिद्वयोनूपुराकेलिसद्माङ्गनानामिव भ्राजते ॥४॥

---

१. अतः परं १२६ अध्यायस्य १०९ श्लोकं यावन्नास्ति—रीवाँ।
२—२. नास्ति-रीवाँ। ३. °पूग°—रीवाँ।

मदाज्ञावशगेनेदं चित्रं सुरभिणा कृतम् ।
प्रमोदवनमुद्भाति मणिवैडूर्यमौक्तिकैः ॥ ५ ॥
विचित्रा[1] मणिमाणिक्यैः समंतात् कुञ्जभूमयः ।
स्वराज्ये रसराजस्य श्रिया शृङ्गारिता इव ॥ ६ ॥
क्वचिन्मरकतद्योति क्वचिद्वैदूर्यकैः स्फुरत् ।
क्वचिन्माणिक्यसंमिश्रनानारत्नविचित्रम् ॥ ७ ॥
पत्रितं पुष्पितं चैव फलितं च समन्ततः ।
हरितं चित्रितं चारु नानावर्णविराजितम् ॥ ८ ॥
पश्य प्रिये क्षणेनैतत् प्रमोदवनमीदृशम् ।
कृतं मया महामञ्जु त्वत्केलिरसपुष्टये ॥ ९ ॥
दृष्टिपातेन समलङ्कुरु तावत्समन्ततः ।
प्रमुद्वनं षड्ऋतवः शोभयन्ति प्रतिक्षणम् ॥१०॥
पृथक् पृथङ्निकुञ्जेषु गृहीतावतराः स्फुटम् ।
ऋतवः षडपि प्राप्ता युगपत्प्रमुदाटवीम् ॥११॥
स तत्र दयितो रामस्त्वदागमनकौतुकी ।
उद्वेजित इवात्यर्थं निशितैर्मान्मथैः शरैः ॥१२॥
त्वन्नूपुररवोद्घोषग्रहणाय श्रुतिद्वयम् ।
मुहुरुत्कण्ठयन्नास्ते हन्त प्राणप्रियस्तव ॥१३॥
विसृज्य मुरलीनादं विसृज्य सुहृदः सखीन् ।
विसृज्य नैचिकीवृन्दं स तत्र सखि वर्तते ॥१४॥
मया पद्मदलैः शय्या रचिता कुञ्जसद्मसु ।
नानावर्णप्रसूनाढ्या प्रान्तकिञ्जल्कभूषिताः ॥१५॥
सान्धकारेषु वल्लीनां मण्डपेषु मया सखि ।
लसन्मणिमयैर्दीपैर्दिवैव रजनीकृता ॥१६॥
न यत्र खलु सूर्यांशुसंबन्धस्तेषु सद्मसु ।
रत्नभित्तिकरस्तोमैः प्रकाशो व्यरचि स्फुटम् ॥१७॥

---

१. विचित्र°—रीवाँ ।

येषु वल्लीनिकेतेषु दुर्लभः पवनागमः ।
तेषु वातायनद्वारा कृतोऽतिसुलभो मया ॥१८॥
प्रकाशितप्रदीपाभैर्नवचाम्पेयकोरकैः ।
क्रियते परमा शोभा मध्ये कुञ्जनिकेतनम् ॥१९॥
कर्पूरागुरुकस्तूरीकुङ्कुमद्रवसौरभैः ।
आयाति रुचिरो वायुः समन्तात्कुञ्जसद्मसु ॥२०॥
विलसदभिनवश्रीरोचमानं वसन्ता-
द्यृतुसमुदयलीलाभाजनत्वं प्रयातम् ॥
रसपतिबहुकेलीकौशलोद्योगबीजं
प्रमुदवनमिदानीं दृश्यतां सानुरागम् ॥२१॥

मण्डलोवाच

मया त्वत्केलिसंपत्त्यै सर्वेषां व्रजवासिनाम् ।
आच्छाद्य चित्तज्ञानानि प्रेमवृद्धिर्वितन्यते ॥२२॥
न कश्चिल्लक्ष्यते भेदो युवयोः प्रेमगोचरः ।
अभिज्ञा अपि पश्यन्ति मूढवद् व्रजवासिनः ॥२३॥
युवयोः प्रेमलेशोऽपि न कस्यचिदपि प्रिये ।
दृष्टिगोचरतां याति ततः केलिर्निरन्तरा ॥२४॥
मन्यते कुशलो गोपो भवतीं पार्श्ववर्त्तिनीम् ।
इत्यज्ञातरतिक्रीडा रमस्व प्रेयसा सह ॥२५॥
प्रत्यक्षापि त्वदासक्तिर्लग्ना श्रीरामचन्द्रके ।
न लक्ष्यते व्रजजनैरिति मे महिमा स्फुटम् ॥२६॥
दृष्ट्वापि रामदयिते नित्यं रतिमतीं स्फुटम् ।
मन्यते गोकुलेऽनन्यपातिव्रत्यं पतिस्तव ॥२७॥
चतुर्यामितिमाकारां त्रियामामपि कामिनि ।
ब्रह्मायुर्यापनोदीर्णां करिष्यामि न संशयः ॥२८॥
गुरूणां दृष्टिमाच्छाद्य मातृणां दुष्टचेतसाम् ।
पिशुनानामपि नृणां केलीं संवर्द्धये तव ॥२९॥
रहस्यं युवयोः कान्ते देवानामप्यगोचरम् ।
इति विज्ञाय निःशङ्कं रमस्व त्वमनुक्षणम् ॥३०॥

कुञ्जे मृदङ्गसाहस्रसंभवो घोष उच्चकैः ।
पटुश्रवणयुक्तानामपि नित्यमगोचरः ॥३१॥
कुतस्तरामङ्गभूषाघोषः स्याच्छ्रुतिगोचरः ।
इति विज्ञाय रमय गीतवाद्यपुरःसरम् ॥३२॥
प्रियं त्वत्केलिसोत्कण्ठं क्षणविश्लेषपीडितम् ।
सहजानन्दिनीप्राणजीवातुं मदनार्त्तिदम् ॥३३॥
तव लीलारसाभिज्ञा तन्मात्रविहिताश्रया ।
त्वामानेतुमहं प्राप्ता सहजे सुखय प्रियम् ॥३४॥
तव केलिविनोदेन प्रमोदवनवास्तवाः ।
कलयन्ति मुदं पूर्णां पशुपक्षिगणा अपि ॥३५॥

मङ्गलोवाच

सत्यं श्री मण्डलादेवी वदतीति विचिन्तय ।
आवां हि सहजानन्दे तव लीलाप्रवर्त्तिके ॥३६॥
अथ तेऽहं प्रवक्ष्यामि गीता रामेण गाथिका ।
ऋतुषट्कं समालम्ब्य विरही याः प्रगायति ॥३७॥
शृङ्गाररससंपृक्ताः स्वयं रामेण निर्मिताः ।
आकर्ण्य सहजे गाथास्तत्परा त्वं भविष्यसि ॥३८॥
एकैकमृतुमालोक्य मण्डपेषु पृथक् पृथक् ।
सङ्कल्पयंस्त्वन्मिलनं रामो वर्णयति स्म ह ॥३९॥

अवलीढगाढपरिपाकलसन्नवलीमिलद्घनवनप्रतिमम् ।
शवलीभवत्तनुतडिद्भिरहः कवलीकरोति घनजन्मतमः ॥४०॥
जलमावृणोति जगतीं जटिलं बलमादधाति मदनो धनुषि ।
कलमालपन्ति परितः शिखिनः कलमाकुला कलयभूमिरियम् ॥४१॥
अवनौ समुल्लसति कन्दलिनी धवनीपसौरभि विभाति वनम् ।
नवनीलनीरदि विरौति वियद्भुवनीभवन्ति परदेशिजना ॥४२॥
हरितः स्फुरन्ति हरितालपतृणैः सरितः पतन्त्युभयकूलगताः ।
तरि[1]तस्करा इव घनैः पवनाः परितः शनैर्विरहिजीवहराः ॥४३॥

---

१. "तरिः = नौका" टि०—मथु०, बड़ो० ।

नयनाम्बुभिर्विरहिणां जलदाः शयनान्तराय गुणतां दधति ।
अयनान्तरञ्चति कदम्बकुलं जघनान्तरोयकतया मदनः ॥४४॥
मदनाशुगा नवकदम्बमयाः कदनानि यद्विरहिणां दधति ।
सदनानि संप्रति विहाय जनास्तदनाश्रिता न भवत प्रियया ॥४५॥

चपला क्षणं ननु चमत्कुरुते प्रपलाय्य गच्छति घनावृतिषु ।
अपलायिता नववधूरिव तन्न पलार्द्धमोहत गृहव्यवधिम् ॥४६॥
ज्वरकारणानि भृशमध्वजुषां करका लसन्ति भुवि तोयकणैः ।
स्मरकालवज्रगुलिका तुलिता परकातरोरुमधुना न कथम् ॥४७॥
हरदाहितस्मरविभूतिमहावरदायिनो कुमुदकासरुचिः ।
ज्वरदारुणाः सपदि पान्थजनाः शरदागता कथय कात्र गतिः ॥४८॥

अहिमालिकेव विगताभ्रततिर्महिमानमेति पुनरेव नभः ।
सहिमातपरुचिमुपैति विधुर्नहि मानमम्बुजदृशाद्रियते ॥४९॥
धरणो विभाति गतपङ्कचया शरणी पुनः प्रकटभावमिता ।
तरणीयतां क्वचिदुपैति सरित्तरणीभिरासदत तेन गृहम् ॥५०॥
इदुरङ्गभस्म समभाव्य तपद्भिदुरं तदभ्रमणुतूलनिभम् ।
छिदुरं विभाति तनु नाकमहो विदुरञ्जसा यदिदमिन्द्रधनुः ॥५१॥

जितरोचना नवरुचिः सुमुखी हितरोषितापि न दधाति रुषम् ।
इतरोऽपि सद्म न जहाति निजं सितरोचिषोज्ज्वलमुदीक्ष्य नभः ॥५२॥
कमलं विहाय वसुधावलये कमलङ्करोति न निशादयितः ।
अमलं विधिस्तदिदमुल्लसितं समलं कलङ्कमिषतः कुरुते ॥५३॥
करुणारवं त्यजति चक्रवधूर्वरुणालये च शयनं मधुभित् ।
अरुणास्य दृष्टिरिव जागरिता तरुणार्कमण्डलमकल्पि जनैः ॥५४॥

हरिणाङ्कना स्वपतिमाद्रियते हरिणाङ्कसंवलनमेति निशा ।
हरिणांशुना रुचिमिताः ककुभो हरिणाञ्जसेव नववल्लविकाः ॥५५॥
बलिना हिमेन कृतमन्दरुचं कलिना मुनोशमिव वीक्ष्य रविम् ।
नलिनानि लोपमुपयान्ति शनैरलिनास्यते क्वचन तद्विरहात् ॥५६॥
दिवसं तु संकुचदतिशीतवशादिव संप्रयाति रविरग्निदिशम् ।
निवसन्ति कान्तसंहिताः सुदृशः शिवसहितार्द्धगिरिजोपमिताः ॥५७॥

अजनीद्वयामवितताव्र तथा रजनी दिनेन लघुतानुगता ।
व्रजनीतिनावनवरेण यथा न जनीहिता न शिशुना महती ॥५८॥
शिशिरस्पृशन् वितताम्बिन्दुमणिर्दृशिरं धमत्पुरगफूत्कृतिभिः ।
दिशि रन्तुमेति दहनस्य रविर्निशि रङ्गमाश्रयति कामिजनः ॥५९॥
ललितं सुधाकरवदूर्ध्वदशां वलितं हिमेन रविबिम्बमभूत् ।
स्खलितं हिमं बहु कुहेलिकया पलितं दिशामिव जनैरकलि ॥६०॥
धरणीसुरादशनवैणिकतां करणीयमज्जनवशाद्धृतः ।
अरणीषु वह्निमतिमय्यकिणाभरणीभवन्ति करजागुङ्लिभिः ॥६१॥
भवनानि नैव जहितेह जनाः पवना वहन्ति न तु नर्मभिदः ।
न वनानि यान्ति मुनयोऽपि सदा हवनाय बिभ्रति रुचिं ज्वलने॥६२॥
विहिताश्रयास्थ दहनावृतिभिः पिहितामवेत नवतूलपटैः ।
स्निहितारहारपरिहारवती निहिता हृदि प्रियतमा यदि न ॥६३॥
मधुना विकासितमिदं विपिनं मधुनाशिनेव रघुवंशकुलम् ।
मधुना कुलानि मुदितान्यलिनामधुना कथं कथय कानुकथा ॥६४॥
तरवः स्फुरन्ति विविधैः कुसुमैः सरवः पिबत्यलिगणोऽत्र मधु ।
स्मरवस्तु किंचन विरौति पिकीमरवः परं विधिवशात् पथिकाः ॥६५॥
सति कानने कुसुमिते मनसा कति कामिनो न कलयन्ति मुदम् ।
रतिकामुकज्वलनदाववशादतिकातरानिह विना पथिकान् ॥६६॥
मलयानिलस्खलनलोलतलाः सलया इव प्रतिलसन्ति लताः ।
वलयानि गुञ्जदलिपुञ्जमिषात् कलयन्ति हन्त बलयन्त्य इव ॥६७॥
समदालिशालिकुसुमालिभरान्नमदाकृतिं दधति भूमिरुहः ।
क्रमदारुणे पथि निजे मदनः कमदाद्यं न मधुमासि जनम् ॥६८॥
स बकोऽत्र मौनमुररीकुरुते नवकोकिलोऽतिकलमालपति ।
भवकोटरे मिलति शालिफले यवकोद्रवे कथय कस्य रुचिः ॥६९॥
नवतन्दुलैरतनुभक्तिपरा यवतन्तुभिः कुसुमानि शनैः ।
अवतंसयन्ति सुरभौ स्मृतिभू सवतन्त्रनिर्णयविदो वनिताः ॥७०॥
यदनन्तषट्चरणचक्रनिभाश्छदनं यदा भ्रमसि जालनिभम् ।
नदनं पिकस्य विजयध्वनयस्तदनङ्गसैन्यपतिरेष मधुः ॥७१॥

जलमज्जनेऽधिकरुचिं जनयन् कलमद्भुतं परभृतान् विनयन् ।
नलमत्स्यकेलिकुतुकानि हरन् नलमल्पयन्निशमुपैति तपः ॥७२॥
पनसातिसौरभविशेषभरा मनसाममन्दमुदमादधते ।
घनसारचन्दनरसग्रहणेन न सादरः सकल एष जनः ॥७३॥
सविता तथा तपति हन्त यथा न वितायतेऽहनि निशीव जनैः ।
जविताश्रितः शिखिकलापभरैः सवितानको भवति भोगिगणः ॥७४॥
अहनीह शोणितपुरीव शुचौ महनीयतीव्रकटतापवशात् ।
दहनीयतामुपगता धरणिः सहनीयतां कथमुपैतु मम ॥७५॥
अवधूनयन्ति लतिकाः सुमनोभवधूलिभिर्धवलिता मरुतः ।
न वधूजनं विरहितं न मुहुर्जवधूतधीरतरुमूलशिखाः ॥७६॥
कनयन्निशामतितरामनिशं जनयन्निशावधिकदीर्घमहः ।
तनयन्नदीरुपकरोति चिरं सनयं रथाङ्गमिथुनस्य तपः ॥७७॥
जलदानशीतलतरेषु शनैर्बलदायिषु स्मृतिभुवोऽनुपधि ।
नलदालयेषु शयनं नृपबहुलदार्तयो विदधते शबराः ॥७८॥
तनुभासुरेऽभिनवमज्जनतो ननु भाग्यवानिह जनः सदने ।
अनुभावयत्यपि सुखं वनिता ननु भावनाशरणमेव मम ॥७९॥
सरसीकरोति हृदयं परितः सरसीषु मज्जनमुपास्य सुखम् ।
वरसीकरः सुममरन्दमयोऽधरसीत्कृतिश्च सुखकृत्सुदृशाम् ॥८०॥
अलकेषु शैत्यमधुना सुदृशां जलकेलिशीतलतरेषु भृशम् ।
नलकेषु शीतलनिषिक्ततरस्थलकेषु च स्मरविलाससुखम् ॥८१॥

किमहमृतुसमूहं विस्तृतं वर्णयामि
प्रसरति परितो मे तद्वियोगेन मूर्च्छा ।
यदि भवति समीपे कामिनी यामनीश-
द्युतिवदनविनोदात्तत्समस्तं सुखाय ॥८२॥
इयमियमुपयाता साङ्गनामौलिरत्नं
नहि नहि नवकुञ्जे काञ्चनीवल्लरीयम् ।
अयमुदयति तस्याः पादमञ्जीरघोषो
नहि नहि कलहंसीकान्तकेलीनिनादः ॥८३॥

जातं विस्मरणं किमेतदथवा श्वश्रूरभूद्विघ्नकृत्
किं वा कामपि कामिनीं स्वहृदये संचिन्त्य रुष्टाभवत् ।
संकेतं मम दत्तवत्यवितथं तत्किं न सा प्रेयसी
वक्त्रेन्दुद्युतिभिश्चिरादसुखयच्चेतश्चकोरं सखि ॥८४॥
तावत् कुर्वन्तु मोहं मे दुर्बलस्यर्तुबेधकाः ।
यावन्नायाति रक्षित्री सा सेना स्मरभूपतेः ॥८५॥
इत्थं महाकवेस्तस्य श्रुत्वा रामस्य गाथिकाः ।
तदेकनिष्ठहृदया तमेव व्रज सत्वरम् ॥८६॥

सुकण्ठ उवाच

इत्युत्साहितमानसा सपदि सा कामेश्वरस्याग्रत-
स्ताभ्यां श्रीप्रमुदाटवीश्वरतमा लीलेश्वरीभ्यां पृथक् ।
नत्वा देवमुदग्रकामवरदं यावत्प्रयात्यन्तिकं
तावन्नर्मसखी प्रियस्य लुलिता नाम्ना ततोऽभ्याययौ ॥८७॥
पुष्पभूषामत्रहस्ता सा निदेशकरीशितुः ।
उवाच सहजानन्दां स्मितमञ्जुलभाषिणी ॥८८॥

लुलितोवाच

सखि मध्यन्दिनात् किञ्चिदुत्तीर्णे रश्मिमालिनि ।
विहाय निद्रामुत्तस्थौ प्रियस्तव सविभ्रमम् ॥८९॥
संमार्जिताक्षिपक्ष्मास्यो राज्य[ज]वेशमनोहरः
शिखावलैरावणाद्यैर्निजनर्मसखैर्युतः ॥९०॥
नन्दिग्रामाद्विनिःसृत्य प्रमोदवनमागतः ।
गुञ्जन्मधुकरारावरमणीयतमद्रुमम् ॥९१॥
कूजत्कोकिलनिध्वानयुक्ताम्रतरुगह्वरम् ।
लवङ्गलतिकामोदसुवासितदिगन्तरम् ॥९२॥
पृथक् पृथङ्मण्डपेषु ऋतुषट्कनिषेवितम् ।
राजहंसकुलक्वाणमनोज्ञसरसोशतम् ॥९३॥
अथ गाः पाययित्वासौ सारवं विमलं जलम् ।
निदेश्य लक्ष्मणं तासां रक्षणाय विचक्षणम् ॥९४॥

निजनित्यसखैर्युक्तः स्वयं संकेतमागतः ।
सखि मञ्जुवटे तस्याः सख्यस्ताः संगता वयम् ॥९५॥
लुलिताहं मञ्जुलान्या कोकिला कलकण्ठिका ।
कलहंसी कलालापा मधुरा च वनप्रिया ॥९६॥
लीला शीला नवैवास्याः सख्यः कमललोचनाः ।
आसनाशनपानादौ सहचर्यः शुचिव्रताः ॥९७॥
युवयोः केलिरसिकाः कृष्णायाः प्रतिपक्षिकाः ।
संगताभिस्ततोऽस्माभिः प्रियः केलिकलापटुः ॥९८॥
भूयोऽवचययामास पुष्पाणि सखि भूरिशः ।
त्वदर्थभूषाविधये स्वयं चावचिकाय सः ॥९९॥
अवचीयातिविकचलताभ्यः पुष्पधोरणीम् ।
सखीभिर्गुम्फयामास विविधाः खलु मालिकाः ॥१००॥
जुगुम्फ चातिचतुरः स्वयमप्येष वल्लभः ।
हारकेयूररशनाकङ्कणादीन् पृथक् पृथक् ॥१०१॥
कदम्बचम्पकस्वर्णयूथिकास्वर्णजातिभिः ।
अपराजितायाः पुष्पाणि नीलोत्पलदलानि च ॥१०२॥
एकीकृत्य जुगुम्फासौ हारान् सखि विचक्षणः ।
अन्यानि चापि पीतानि नीलानि च महामतिः ॥१०३॥
संयोज्य रचयाञ्चक्रे हारकेयूरकादिकान् ।
वेणोताटङ्कावतंसकाञ्चीकङ्कणनूपुरान् ॥१०४॥
सानुरागो विनिर्माय भूषाः सर्वाङ्गगोचराः ।
इमास्ता मम हस्तेऽसावर्पयित्वा ततः सखि ॥१०५॥
सद्यः संप्रेषयामास त्वत्समीपं स्मरातुरः ।
स उवाचाति मधुरमिदं वाक्यं मम प्रियः ॥१०६॥
लुलिते परिधाप्यैता भूषास्तां प्राणवल्लभाम् ।
द्रुतमानय चार्वङ्गीमिमं देशं मनोहरम् ॥१०७॥
द्रुततरमभिसार्य तां किशोरीमपहर मद्विरहं तपार्कतप्तम् ।
सुखयतु सततं तदाननेन्दुश्चिरतरतापवहौ च दृक्चकोरौ ॥१०८॥

यथा विलम्बते कान्ता त्रपालुलितमन्मथा ।
तथावसीदन्ति मम गात्राणि विरहाग्निना ॥१०९॥
यदवधि हृदयं जहार सा मे द्रुतकनकोत्तमकान्तिगात्रयष्टिः ।
तदवधि समभूत् सखि प्रवासो मम हृदयाच्च विलोचनात् सुखस्य ॥११०॥
तन्मुखेन्दुप्रकाशेन विना सखि दिशोऽखिलाः ।
अन्धकारकुलाक्रान्ता इव संप्रति भान्ति मे ॥१११॥
इति मुहुर्मुहुरुक्तिशतेन मां स विनिबोध्य सखि त्वदुपान्तिकम् ।
प्रियतमो विससर्ज विलग्नधीस्तवपदाम्बुजनूपुरकध्वनौ ॥११२॥
नातः परं विलम्बस्ते कर्तव्यः सहजेश्वरि ।
प्रियप्रेषितभूषाभिर्भूषयित्वा तनुं व्रज ॥११३॥

सुकण्ठ उवाच

ततो विभूष्य रमणी प्रसूनाभरणैस्तनुम् ।
शनैः शनैस्ततःस्थानात् प्रतस्थौ हंसगामिनी ॥११४॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे पूर्वखण्डे दशरथयात्रायां व्रजागमने षड्विंशाधिकशततमोऽध्यायः ॥१२६॥

●

सप्तविंशाधिकशततमोऽध्यायः

सुकण्ठ उवाच

ततः सखी समुदयहेममालिका समुल्लसत्सुरुचिरमध्यरत्नभाः ।
प्रकुर्वती प्रमुदवनं रुचाञ्चितं तदन्तिकं तरुणिवरा समाययौ ॥ १ ॥
स दूरतो रसिकवरो निशम्य तत्पदाम्बुजाभरणकहंसकध्वनिम् ।
वियोगजप्रचुरतरार्तिभेदिनीं तदा चिरादलभत मुत्परम्पराम् ॥ २ ॥
ततश्च तत्तनुभवकल्पवल्लरीविनिःसरत्परिमलवाट् समीरणः ।
समंततः प्रसृमर आववौ भृशं स तस्य हृन्मुदमतुलामजीजनत् ॥ ३ ॥

प्रमुद्वनं समजनि तत्समागमे महामहोत्सवनिवहस्य सूचकम् ।
निनादयन् मधुकरराजिवल्लकीं पिकस्वरैर्मुरजरवेण मिश्रिताम् ॥ ४ ॥
अवादयत् समदमयूरझल्लरीर्वनस्थलीपरिहितपल्लवांशुका ।
महीरुहां शिरसि ननर्त मञ्जरी पुराङ्गनागण उदितातिसंभ्रमः ॥ ५ ॥
प्रतानिनीसमुदितपौरकन्यका अवाकिरन् नवदलचीरभूषिताः ।
समन्ततो विकसितपुष्पलाजकैः समागता उपसहजेश्वरी सखी ॥ ६ ॥
ससुल्लसत्कुसुममरन्दधोरणीर्वहन् मुहुः कमलपरागरञ्जितः ।
समीरणः सपदि सिषेव तत्क्षणे वनस्थलीर्नवफलपुष्पभूषिताः ॥ ७ ॥
ततश्च सा तस्य विलोचनातिथिर्बभूव बाला विदिता सखीगणे ।
प्रसूनिनीनां नवकुञ्जवीरुधां कदम्बके हेमलतेव पुष्पिणी ॥ ८ ॥
तां वीक्ष्य सर्वावयवैर्विभूषितां समुत्थितोऽसौ रसिकेन्द्रशेखरः ।
चिरं तपर्त्तुप्रभवातपाकुलो निकुञ्जसाखीव नवाम्बुदावलीम् ॥ ९ ॥
ननन्द तल्लोचनचातकद्वयो सुखान्यवापुः करणानि केकिनः ।
वपुर्लताभूत् पुलकाङ्कुराचिता विलोक्य तां गौरसुधाघनावलीम् ॥१०॥

मङ्गलामण्डलेश्वर्यौ संयोज्य रमणेन ताम् ।
अभूतां प्राप्तसर्वार्थे कृतकृत्ये इव द्रुतम् ॥११॥
लुलिता पुरतस्तस्य ववन्दे द्रुतमेत्य सा ।
समञ्जुलैः स्मितैस्तासामुपकारममन्यत ॥१२॥
स तां सर्वानवद्याङ्गीं सखीनां समुदायगाम् ।
आलिलिङ्ग दृशैवान्तरानन्दभरपूर्णया ॥१३॥

तावन्योन्यं निपीय प्रचुरमधुरिमो प्रेममाध्वीकसारं
माद्यन्तौ मोदमानौ वचनरचनयान्योन्यमुत्तृप्तिभाजौ ।
जातान्योन्यस्मिताद्रौ [रुचि]रुचिरभरोल्लासिनीं पुष्पशय्या-
मध्यास्यातेनतुर्हीभवकलुषहरालापलीलां किशोरौ[1] ॥१४॥
ननन्द तत्रोभयपक्षगामी सखीकलापो मिथुनं विलोक्य ।
भेजे च तत्तत्परिचर्यया तौ प्रसारिपुण्यातिशयेन युक्तः ॥१५॥

---

१. °हरां कोमलालापलीलाम्—मधु०, बड़ो० ।

सखीनां सख्यविधयो दूतीनां दूत्यसत्क्रियाः ।
आसुस्तयोर्मिलितयोः कृतार्था इव तत्क्षणे ॥१६॥
न बोजफलहारिण्या फलैः पाकमनोहरैः ।
स्वादुभिः सुरसैश्चैव कृतौ तौ सुहितौ हितौ ॥१७॥
अथाङ्गरागहारिण्या कस्तूरीकुङ्कुमादिभिः ।
कृतोऽङ्गरागः सरसस्ताभ्यां सम्यङ्निवेदितः ॥१८॥
धृतः स रामया सम्यक् सहजारामयोः स्तनौ ।
स तदङ्गातिसौरभ्यैर्द्विगुणं सुरभीकृतः ॥१९॥
ततः स्वस्वसखीवृन्दैः सहितौ विजयैषिणौ ।
द्यूतकेलिक्रियां सम्यक् चक्रतुः कुञ्जवेश्मनि ॥२०॥
तस्मिन् संजायमाने तु द्यूतकेलिविधौ मिथः ।
सहजानन्दिनो दैवाद् विजिग्ये रामकामुकम् ॥२१॥
ततस्तदालिसंदोहः संददत् करतालिकाः ।
जहास रामचन्द्रं तं यस्य द्यूते विनिर्जयः ॥२२॥
दीयतां नः पणो राम यथैवात्र प्रतिश्रुतः ।
दिशो विलोकयन्नूर्ध्वं किमास्से केलिपण्डितः ॥२३॥

सख्य ऊचुः

अहो अस्माकमीशोऽयं रामः पङ्कजलोचनः ।
जये पराजये वापि तुल्य एव न संशयः ॥२४॥
भवेदुभयथाप्यस्य जय एव न संशयः ।
जये स्यादुपरि प्रेष्ठो नीचैश्च सहजा भवेत् ॥२५॥
पराजय उपर्येषा नीचैरस्माकमीश्वरः ।
इत्याकर्ण्य वचस्तासां सहजानन्दिनी स्वयम् ॥२६॥
किञ्चदाकुञ्चितभ्रूस्ताः सासूयं वक्त्रमैक्षत ।
जघान च भृशं गौरी लीलाकुसुमकन्दुकैः ॥२७॥
अहो अलीकभाषिण्यः स्वैरमालपथ ध्रुवम् ।
इत्युक्त्वा पुनरप्येषा प्रेयसा द्यूतमारभत् ॥२८॥

जिगाय सहजानन्दा प्रेयांसमतिदक्षिणा ।
सख्यः पुनरपि प्रेयानेवास्माकं विनिर्जितः ॥२९॥
जये स्यादुपरीत्यादि गाथाः सम्यगगायत ।
पुनस्ताः केलिपद्मेन जघान सहजेश्वरी ॥३०॥
अथ ताः सहजासख्यो राममूचुः शुचिस्मिताः ।
वारद्वयं जितोऽसि त्वं सख्यास्माकं सुलोचन ॥३१॥
प्रतिश्रुतं पणं देहि पूर्वस्माद् द्विगुणं प्रिय ।
नो चेदेनां नमस्कृत्य निस्तीर्णो भव तं पणम् ॥३२॥

प्रियसख्य ऊचुः

युष्माकं स्वामिनी सख्यो विह्वलीकृत्य नः प्रियम् ।
मुहुर्विजयते किन्तु नैष न्यायः सनातनः ॥३३॥
चतुरङ्गवती सेना मदनस्येयमूर्जिता ।
अस्त्रशस्त्रसमुद्रेकवती नित्यं जयत्यसौ ॥३४॥
जहार हृदयं पूर्वं ततश्च नयनद्वयम् ।
ततो हृतवती धैर्यं विजयेनैव वः सखी ॥३५॥
तथापि पश्यथेदानीं विजयं नः प्रभोरपि ।
एकस्मिन्नेव वारेऽसौ हारयिष्यत्यमूं प्रियः ॥३६॥

सोत्कर्षमित्युक्तवतीं प्रियालीमधिक्षिपन्ती व्रजराजकन्या ।
विलोकमाना कुटिलैः कटाक्षैर्व्यताडयत् केलिसरोरुहेण ॥३७॥

अथैका प्रेयसो नर्मसचिवा दक्षिणा सखी ।
द्यूतकेलिक्रियानन्या जिगाय सहजासखी ॥३८॥
ततः प्रियसखीवर्गः सोत्कर्षं करतालिकाः ।
ददौ जहास चातीव जयोऽस्माकं प्रभोरिति ॥३९॥
अथ मालाकरी चित्रां पञ्चवर्णप्रसूनकैः ।
वैजयन्तीमानिनाय द्वयोः परिहितिक्षमाम् ॥४०॥
ताम्बूलहारिणी हैमं ताम्बूलामत्रमानयत् ।
ततश्च लोलनयने नीविकां पश्यति प्रिये ॥४१॥

सद्यः सख्यो विनिर्याता निकुञ्जभवनाद्बहिः ।
ततः स्वैरमभूत्केलिः स्वयं यत्र मनोभवः ॥४२॥
प्रेमैवाभवदुद्वेल आनन्दामृतसागरः ।
आविरासुर्भावमयास्तरङ्गास्तत्र निर्भरम् ॥४३॥
कटाक्षदोर्लताक्षेपप्रसाराकुञ्चनादिभिः ।
लोभयन्तो मनस्तस्य प्रेमराज्यमवर्द्धयत् ॥४४॥
पूर्वं प्रदर्श्य दौर्लभ्यं मुहुरास्वादयद्रसम् ।
इति दाक्षिण्यमासाद्य स्मरकेलीमरोचयत् ॥४५॥
स्वैरं विहरतोः कुञ्जे या शोभा समभूत्तयोः ।
सा सुधासारिणीवात्ता सखीलोचनभाजनैः ॥४६॥
कुञ्जवातायनपथप्रसारितदृगञ्चलाः ।
सख्य आस्वादयाञ्चक्रुर्माधुरीं रसवारिधेः ॥४७॥
नानाबन्धनिबन्धनाधरसुधाशीत्कारमिश्रालक-
स्तोमाकर्षणघर्षणाङ्गवलनासंमर्शनस्पर्शनैः ।
अन्योन्यं रुचिदर्शनैर्मुकुरगस्वाङ्गावलोकोद्भव-
प्रोत्साहैः सुरतक्रिया सरिदिव प्रावर्ततावर्त्तिनी ॥४८॥
रतिप्राज्यानन्दं ददति सहजायां प्रियतमे
मुदा सख्यः सर्वाः स्तिमितहृद आसन् पुलकिताः ।
पयोधारासारैर्भवजलधरं वर्षति यथा
लतायां पत्राणि स्फुटमुपलभन्ते मुदमलम् ॥४९॥
यत्सामरस्यपरमामन्दं प्रकृतिपूरुषौ ।
निषेवेते तदप्यस्य परानन्दोपजीवकम् ॥५०॥
श्रीरामे पुरुषोत्तमे सहजया साकं जुषत्यद्भुतं
निःसीमद्युतिसामरस्यपरमानन्दं निकुञ्जान्तरे ।
जातास्मिकमोदसिन्धुलहरीसन्दोहमग्नात्मनां
त्रैलोक्यस्य नृणामभून्निरवधिः प्रेमोदयः क्षेमदः ॥५१॥
सर्वात्मना यः समभूत्प्रयत्नः सखीजनस्य प्रियमेलनाय ।
कृतार्थतामाप स तावदद्धा तस्मिन् प्रजाते सुरतप्रसङ्गे ॥५२॥

स्त्रीभिः स्त्रीणां वीक्ष्य पुंभिः प्रसङ्गं चित्तेऽमर्षो जायते स्वाभिलाषात् ।
तासामासीत् सहजायां रतायां रामेणान्तःप्रीतिराश्चर्यमेतत् ॥५३॥

एक एव रतानन्दः सहजाचित्तगोचरः ।
विभक्त इव सर्वासु सखीषु समजायत ॥५४॥
मञ्जीरध्वनिभिः कर्णौ त्वक्तदङ्गानिलस्पृशा ।
चक्षुषो सुरतक्रीडारूपसारविलोकनात् ॥५५॥
जिह्वा युगलनामैकरसानन्दानुभूतितः ।
नासा तदङ्गसौरभ्यैरेवं सर्वेन्द्रियव्रजः ॥५६॥
सखीनां निर्वृतिं प्राप मनोमिलनतस्तयोः ।
रामायाः सख्यघटना कृतार्थत्वमियाय च ॥५७॥
अहो लोकोत्तरगुणग्रामराशी उभावपि ।
इमौ परस्परौचित्यात् सार्थरूपौ बभूवतुः ॥५८॥
त्रैलोक्येऽस्याः समुचितवरालाभोद्भूवाः शुचः ।
अशीशमन् रामचन्द्रे सहयोगमुपागते ॥५९॥

यत्तासामवलोकनेन सुरतक्रीडारसं तन्वती
किंचिच्चेतसि संचुकोच सहजानन्दा प्रियास्यङ्गगा ।
तद् भूयः सुषुमामवाप दधती तुल्यौ त्रपामन्मथौ
तेनातीव बभूव सौख्यजनिकापश्यत्सखी नेत्रयोः ॥६०॥
तस्याः सुरतकालीनकण्ठकोमलकूजितम् ।
हन्तानुकर्तुं नाशक्नोत् कुञ्जपारावतीकुलम् ॥६१॥
कदा पश्येम युगलमेकदेशस्थितं रहः ।
एषोऽधुनाभवत् पूर्णः सखीलोकमनोरथः ॥६२॥

इदमनुदिनमुत्तमं सुखं यः पिबति जनो रसिकः श्रवःपुटाभ्याम् ।
स भवति रसिकेन्द्ररामचन्द्रप्रणयरसोदधिवीचिभिर्निषिक्तः ॥६३॥

इत्थं विहृत्य रसिकेन्द्रशिरःकिरीटरत्नोत्तमेन रमणेन रसज्ञमौलिः ।
व्यत्यस्तजातरशनाभरणाभिरामारामादिभिः प्रियसखीभिरिदं बभाषे ॥६४॥

चातुर्यं सखि विस्मृतं सकलमाप्यासीस्त्वमत्युद्धता
प्राणेशि प्रणयात् प्रियेण सह संगम्यासि मुक्तत्रपा ।

एतत्ते नयनद्वयं कथयति व्यक्तं रते निर्भरं
प्रातर्मत्तालिमिलिन्दनर्ममरुणाम्भोजं विजेतुं क्षमम् ॥६५॥
काचित्सखी लतां वीक्ष्य सहजावृत्तमब्रवीत् ।
भ्रूसंज्ञया सखीमन्यां सूचयन्ती रहोगताम् ॥६६॥

सखि विदलिता मल्ली मत्तालिना मदशालिना
प्रतिदलमियं धत्ते तेजाङ्कुरोद्गममीदृशम् ।
विकसितलसत्पुष्पश्रेणी विमोटनतः स्फुटम्
मधुरसझरीवर्षैरार्द्रीकृत्याधिगता तनुः ॥६७॥

अस्याः पुष्पान्तराले मधुकरतरुणः कोऽपि केलीं चकार
प्रेम्णा पत्रोपरिस्थाचिरतरमपिबन्मोदमानो मरन्दम् ।
क्रीडन् रागात् परागारुणरुचिचरणन्यासचिह्नानि कुर्वन्
स्नेहेनात्तोऽनयापि प्रणयपरवशस्वान्तया सादरं सः ॥६८॥

क्रीडां क्वाप्येष कुर्वन् कमलवनपरागैः सरागं शरीरं
बिभ्रत् प्राप्तस्ततोऽस्यां कलितविहरणः स्वेच्छया भूरिभावः ।
तत्संपर्कादसावप्यतिशयितमिमं रागमङ्गैर्दधाना
किंचित्कम्पाकुलाङ्गी विरचयति चमत्कारमन्तर्ममालि ॥६९॥

एनां वीक्ष्योत्सुका अन्या अपि कुञ्जलताः सखि ।
आलिङ्ग्य भूरुहां शाखाश्चलन्त्यः किञ्चिदासते ॥७०॥
अपरोवाच साकूतमन्यां सखि विलोकय ।
मलयानिलमालिङ्ग्य स्वैरमङ्कुरिता लता ॥७१॥
आलिङ्गन् कुञ्जलतिकाः समोदो मलयानिलः ।
अत एव व्रजत्येष मन्दं मन्दं मदाचितः ॥७२॥
एवमन्योन्यमालप्य सहजारामयोर्मनः ।
मन्दाक्षवशगं कृत्वा सख्यस्ताः पुनरब्रुवन् ॥७३॥
अलं वां लज्जयास्मासु नर्मज्ञासु विशेषतः ।
भवतोः केलिचातुर्यं वीक्ष्यान्तर्मुदिता वयम् ॥७४॥
भवतोर्नित्यसंयोगं वाञ्छामः प्रेमसुन्दरम् ।
वयमेतस्य तत्त्वज्ञाश्चन्द्रस्येव चकोरिकाः ॥७५॥

सुकण्ठ उवाच

ततस्ता राममामन्त्र्य सख्यः सहजया सह ।
मुदा भद्रवटं जग्मुर्ध्यायन्त्यः प्रियसंगमम् ॥७६॥
कामराजं समापूज्य स्वागतां सहजेश्वरीम् ।
तरलानाम गोपाली जग्राह परमोत्सवैः ॥७७॥
अर्घ्यपूर्वकमानीय विशालभुवनान्तरे ।
तरला सहजानन्दां गृहलक्ष्मीममन्यत ॥७८॥
अथ तद्दिनमारभ्य तरलाया निकेतने ।
अभूत्प्रभूतं सौभाग्यं धनं धान्यं दिने दिने ॥७९॥
आरोग्यं बहुलं भोग्यं सर्वदा सर्वसंपदः ।
स्वजनानां प्रसादश्च स्वाज्ञावर्तित्वमेव च ॥८०॥
दासानां चैव दासीनां शोभावृद्धिस्तनुश्रिया ।
पुरन्ध्रीजनगीतेन सदाकौतुकमुच्चकैः ॥८१॥
गवां वत्सतरीणां च वत्सानां चेन्दुवर्चसाम् ।
संपत्तिः परमा जाता वृषाणां च सुरोचिषाम् ॥८२॥
तस्य देशस्य परितो वनं सर्वसमृद्धिमत् ।
सर्वर्त्तुसुखदं जातं पत्रपुष्पफलर्द्धिमत् ॥८३॥
यत्र श्री सहजाश्वश्वा गोधनं हरितैस्तृणैः ।
सुहितं सर्वदा भूयः प्रीतियुक्तं प्रजायते ॥८४॥
अवाप्य तरला गोपी स्वगृहेऽनन्यगां श्रियम् ।
सहजायां प्रीतिमती विशेषेण बभूव ह ॥८५॥
यस्या गृहपतिस्तत्र कुशलो नाम गोपतिः ।
दैवात् पौरुषहीनोऽभूद्रामभक्तिपरायणः ॥८६॥
स एकदा वने रामं क्रीडन्तं सखिभिः सह ।
ददर्श सरयूतीरे तरङ्गानिलसेवितम् ॥८७॥
द्विभुजं च धनुर्बाणधरं पद्मविभूषितम् ।
महामाणिक्यमुकुटं महार्हतनुभूषणम् ॥८८॥
पीताम्बरपरीधानं वनमालाधरं विभुम् ।
नवनीलघनाकारं मञ्जुलस्मितभूषितम् ॥८९॥

आबद्धरत्नरसनं महार्हाङ्गदशोभितम् ।
मुक्तासारधरं कर्णस्फुरन्मकरकुण्डलम् ॥९०॥
लोलालकावलीमध्यविस्फुरन्मुखपङ्कजम् ।
तद्वामपार्श्वे च ततो ददर्श सहजेश्वरीम् ॥९१॥
साक्षात्पूर्णमहालक्ष्मीं पूर्णसर्वगुणान्विताम् ।
पूर्णेन्दुवदनद्योतां पूर्णलावण्यवारिधिम् ॥९२॥
यत्तेजसाखिलं व्याप्तं त्रैलोक्यं सचराचरम् ।
अस्याः कलां जुषन्तेऽन्याः रतिप्रमुखयोषितः ॥९३॥
यस्या अंशांशसंभूतिस्तडित्सूर्यकलानिधौ ।
तां तथा रामपार्श्वस्थां दृष्ट्वातीव सुविस्मितः ॥९४॥
तुष्टाव विविधैर्वाक्यैः परमैश्वर्यभावितः ।
पूर्वभावविनिर्मुक्तो भावान्तरमुपेयिवान् ॥९५॥

कुशल उवाच

त्वं रमा परमा कान्तिस्त्वं देवि जगदीश्वरी ।
तवानन्दकलां स्पृष्ट्वा सानन्दाः सर्वयोगिनः ॥९६॥
त्वं वेदमाता विदिता सर्वविद्याधिदेवता ।
त्वां परावरभावेशीं विज्ञायासौ विमुच्यते ॥९७॥
गायत्री चैव सावित्री त्वमेव परमेश्वरी ।
यया ब्रह्मा च विष्णुश्च नीतः स्वाधीनतां स्वयम्॥९८॥
त्वमेव सिद्धजननी सिद्धानां विदुषामपि ।
वन्दनीयतमा नित्यं सर्वसिद्धिप्रदायिनी ॥९९॥
त्वमेव कल्पान्तकरालमूर्त्तेर्ज्वालावली भीमजटाधरस्य ।
रुद्राणि रुद्रस्य वधूः स्वरूपानुरूपरूपा प्रलयाग्निजिह्वा ॥१००॥
कलाकाष्ठादिरूपेण त्वं कालावयवेश्वरी ।
कालयस्यखिलं विश्वं स्वस्मिन्नारोप्य सन्ततम् ॥१०१॥
न ते तत्त्वं विजानन्ति ब्रह्माद्या अपि देवताः ।
प्रवृत्ताः स्वाधिकारेषु मोहितास्तवमायया ॥१०२॥

त्वं मुक्तिरानन्दकदम्बकाढ्या निःशेषदुःखानुभवेन शून्यम् ।
स्वरूपशुद्धं स्वधिकृत्य जीवं स्थिता निरूप्यानिगमान्तभागैः ॥१०३॥
त्वं ज्ञानरूपासि मुनीश्वराणां करोषि चेतः स्वत एव शुद्धम् ।
सूक्ष्मार्थसंदर्शनशक्तिरूपा त्वमेव देवर्षिकृतप्रतिष्ठा ॥१०४॥
यदेतद् व्यजृम्भत आविरञ्चिस्तम्भादितो विश्वमशेषमेव ।
तस्मिन्नुपादानतया प्रविष्टा त्वामेव सर्वत्र विलोकयन्ति ॥१०५॥

त्वां नारदाद्या ऋषयो विशेषाद् भक्तिस्वरूपां समवाप्य मातः ।
श्रीरामचन्द्रप्रियतामवाप्य जयन्ति सर्वोपरिवर्त्तमानाः ॥१०६॥
रामचन्द्रोऽसौ विदितः स्वरूपाद् रामो रमा तस्य परप्रतिष्ठा ।
त्वं देवि सद्यो विदिताभयेति निषेवणीयौ सततं भवन्तौ ॥१०७॥

भवतो नामरूपाभ्यां जगदेति कृतार्थताम् ।
इतीव भवतोर्लोके आविर्भावो विराजते ॥१०८॥
इति मे समभूज्ज्ञानं कृपया तव भाविनि ।
न चेन्मादृशजीवानां क्वज्ञानकलिकोदयः ॥१०९॥
अद्यावधि सदा भूयात्तव भक्तिर्दिने दिने ।
विवर्द्धमाना हृदये प्रेमाख्या भवरूपिणी ॥११०॥

आस्वादार्थं रसराजस्य मातः श्रीरामेणा कारि योगो मया ते ।
नो चेत्साक्षात्पूर्णपत्नी रमाख्या त्वं कस्य जायासि विना रमेशम् ॥१११॥
यद्दौर्लभ्यं स्यात्परायत्तता च पराकाष्ठा रसराजस्य सौख्या ।
तदर्थमेनं प्रभुणाकारि योगो विज्ञातं ते कृपया तत्त्वमेतत् ॥१२२॥

अथ प्रभो राम साक्षात्प्रमोदाटविकला नाथवदाम्यहं त्वां ।
इयं श्रीमन्नन्दने नेह मह्यं दत्ताहं ते नाथ सपर्ययामि ॥११३॥
त्वद्रूपसौन्दर्यमिदं निरीक्ष्य न कस्य पुंसोऽपि मनो विमुह्येत् ।
स्त्रीभावमासादयितुं च रन्तुमुत्कण्ठितं स्यात्कोटिकन्दर्प जैत्रः ॥११४॥

अतोऽहं प्रार्थये तुभ्यं यथा स्त्रीरूपमाप्नुयाम् ।
तवाधरसुधां नाथ पिबेयं तापमोचनीम् ॥११५॥
इत्युक्त्वा कुशलो गोपः पादयोरपतज्जवात् ।
परार्धरतिकन्दर्पमोहिनी युगलात्मनः ॥११६॥

रामस्तमुत्थाप्य भृशमालिलिङ्ग दयानिधिः ।
अब्रवीच्चास्मितोद्द्योतरञ्जिताधरमण्डलः ॥११७॥
धन्योऽसि मम भक्तोऽसि पूर्णस्तव मनोरथः ।
अनन्यप्रेमवृत्त्या ते वशितोऽस्मि न संशयः ॥११८॥
मद्रूपं वीक्ष्य गोपाल कस्य नो सुमतं मनः ।
साक्षादमूमुहन् विप्रा दण्डकारण्यवासिनः ॥११९॥
तेषां कामज्वरं वीक्ष्य तदा दत्तो मया वरः ।
तत एव हि मां नित्यं भजन्ति स्त्रीस्वरूपतः ॥१२०॥
वेदास्त्रिपृष्टगा वीक्ष्य मत्स्वरूपं मनोहरम् ।
मुमुहुस्तेन ते नित्यं स्त्रियो भूत्वा भजन्ति माम् । २१॥
त्वं तु गोपवर प्रेम्णा विरहज्वरपीडितः ।
निमज्ज्य सहजाकुण्डे स्त्रीरूपं समवाप्स्यसि ॥१२२॥
ततो नित्यं मया साकं विहरिष्यसि रात्रिषु ।
दिवसे तु सखा तद्वत् पुरुषः पश्यतां नृणाम् ॥१२३॥
मम लीलापरिकरे सखीभावमुपैष्यसि ।
त्वमेवाद्धा मत्समीपमानेष्यसि मम प्रियाम् ॥१२४॥

सुकण्ठ उवाच

इत्थं तस्मै गोपवराय रामो वरं दत्वा भूरि भावद्वयेऽपि ।
तेनैव साकं विजहाराभिनव्यप्रियाभावं कृपया प्रापितेन ॥१२५॥
सनिमज्य प्रेममये सहजा कुण्डपाथसि ।
बभूव रतिचार्वङ्गी कुशला नाम गोपिका ॥१२६॥
सखी चक्रगता श्रेष्ठा रामस्य सुखवर्द्धिनी ।
यथाकामं विहृत्यैषा पुरुषो भवति क्षणात् ॥१२७॥
अचिन्त्या करुणा तस्य प्रभोर्लीला रसात्मनः ।
अगोचरो मुनीनां यः क्रीडति व्रजदारकैः ॥१२८॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे पूर्वखण्डे दशरथतीर्थ-यात्रायां आदिव्रजे सप्तविंशाधिकशततमोऽध्यायः ॥१२७॥

अष्टविंशाधिकशततमोऽध्यायः

सुकण्ठ उवाच

याश्चैवान्या व्रजगोप्यः कन्यारूपधराः शुभाः ।
गोपालानां कुले जाता देवानामङ्गनाश्च याः ॥ १ ॥
याश्च वेदऋचो जाता दिव्यस्त्रीरूपभाविताः ।
मुनिरूपा देवरूपास्तथान्याश्चैव कन्यकाः ॥ २ ॥
नगनागसुताश्चैव नरकिन्नरकन्यकाः ।
नानादेशोद्भवाः कन्याः सुखितालयमध्यगाः ॥ ३ ॥
तासां मनो रामचन्द्रे कामतत्त्वेन जृम्भितम् ।
आकुलं चैव विरहेणातिभूयसा ॥ ४ ॥
स्मरबाणसमाविद्धं न विश्रमति कुत्रचित् ।
श्रीरामरूपलावण्यवशीकृतमहर्निशम् ॥ ५ ॥
वियोगतप्तसंदेशपतितं भृशपीडितम् ।
तासामग्निः सुसंतप्ताश्चन्द्रचन्दनचन्द्रिकाः ॥ ६ ॥
परितो दववद्भ्रान्ति पुष्पभूषितभूरुहाः ।
ज्वलिताश्च वितानिन्यो लक्ष्यन्ते ज्वलिता इव ॥ ७ ॥
काकिलानां गिरस्तासां कर्णयोः सूचिवेधनम् ।
कुर्वन्ति भ्रमराणां च गुञ्जितं हृद्रुजावहम् ॥ ८ ॥
सर्वतो ज्वलितं भाति किंशुकद्रुमकाननम् ।
भ्रमन्त्यो भ्रमरश्रेण्यो धूमधोरणसंमिताः ॥ ९ ॥

एवं वियोगा यदि सर्वतो व्रजे विलोक्य रामं प्रणयानुबन्धनम् ।
मृगीश शस्ता मिलिता रहोगता विचार्य चक्रुःफललब्धये व्रतम् ॥१०॥

दुर्वाससो महामन्त्रलब्ध्या विरहपीडिताः ।
सहजानन्दिनीं देवीं महालक्ष्मीं हि भेजिरे ॥११॥
कार्तिके चैव मार्गे च माघे वैशाखमासि च ।
पृथक् पृथक् स्वरूपेण तावेव समुपासिश्रताः ॥१२॥

सीतारामचन्द्रौ प्रेम्णा[1] कार्तिके ताः सिषेविरे ।
मार्गशीर्षे च तावेव श्रीरामं जनकात्मजाम् ॥१३॥
सीताराघवरूपेण माघे चक्रुस्तयोर्व्रतम् ।
वैशाखे च भृशं भेजुः श्रीसीतारामचन्द्रकौ ॥१४॥
एवं ताः सततं चक्रुर्व्रतमेकमनोरथाः ।
सखाः सलिले स्नात्वा श्रद्धाभक्तिसमन्विताः ॥१५॥
विरच्य सैकतीं मूर्तिं सीतारामचन्द्रात्मिकाम्[2] ।
सङ्कल्पपूर्वकं सर्वाः पूजयाञ्चक्रुरङ्गनाः ॥१६॥
आवाह्य स्थापयित्वा च सन्निधाप्य निरुध्य च ।
पादार्घाचमनीयादि मधुपर्काभिषेचनैः ॥१७॥
गन्धैः पुष्पैस्तथा धूपैर्दीपैर्नैवेद्यकल्पनैः ।
दक्षिणाफलताम्बूलैर्नमनस्तवनादिभिः ॥१८॥
यावद्वर्षमिदं चक्रुर्यत्ता चित्तव्रजस्त्रियः ।
गीतवाद्यादिभिः सम्यक् हविष्याशनतत्पराः ॥१९॥
पूर्णे चाब्दे ततश्चक्रुरुपायनमतन्द्रितः ।
अग्निं संस्थाप्य जुहुवुस्तिलाज्यैर्विधिपूर्वकम् ॥२०॥
पूजां च महतीं चक्रुस्तथा जागरणं निशि ।
सरयूपुलिने रम्ये घने कुञ्जवने स्थिताः ॥२१॥
ततोऽर्धरात्रसमये स्त्रीणां मण्डलमध्यतः ।
अविरासीन्महालक्ष्मीः सहजानन्दिनी स्वयम् ॥२२॥
स्वच्छविद्युल्लता गौरी स्वच्छवस्त्राभिवेष्टिता ।
प्रसन्नवदनस्मेरा प्रसादरुचिरेक्षणा ॥२३॥
विराजिता चतुर्बाहु[3]र्वरदाभयधारिणी ।
भ्रामयन्ती करे पद्मं सुधाभाजनमेव च ॥२४॥
बिभ्रती सुन्दरी साक्षात्स्वर्णयष्टिरिवाद्भुता ।
साब्रवीद् ब्रियतां मत्तो वयं युष्माभिरङ्गनाः ॥२५॥

---

१. सीताश्रीरामचन्द्रोभौ—रीवाँ । २. विधात्विकाम्—रीवाँ । ३. द्विर्बाहु—रीवाँ ।

व्रतेनानेन युष्माकं प्रसन्नाहं पुरःस्थिता ।
यद्यन्मनसि दुष्प्राप्यमपि तद्वो ददाम्यहम् ॥२६॥
इत्युक्त्वा सकला गोप्यः प्रेष्ठं संचिन्त्य तत्क्षणे ।
ययाचिरे वरं यस्मै व्रतमीदृक् प्रचक्रिरे ॥२७॥

गोप्य ऊचुः

त्वमाद्याः श्रीः सर्वकल्याणदात्री भक्त्या यस्मै संप्रसीदस्यमोघे ।
तत्र त्रिलोकेऽपि न दुर्लभं भवेद् यत्किञ्चनेष्टं हृदये चिन्तितं स्यात् ॥२८॥
वयं श्रीमद्दशरथराजराजकुमारकेऽस्मिन् त्रैलोक्यसारे[1] ।
आसक्तचित्ताः सततं कामबाणैः क्लिश्यामहे विप्रयोगेन चान्तः ॥२९॥
स्नेहप्रसङ्गेन वियोगवह्निर्ज्वलत्यन्तर्द्विगुणो नोऽबलानाम् ।
अन्तर्यामिन्यात्मना बुद्धिरूपा जानाति सर्वं भवती स्वेष्टदात्रि ॥३०॥
तदस्मासु त्वं वरदे संप्रसीद यथा स्वेष्टं प्रियमेनं लभेम ।
त्वमाराध्याखिललोकेष्टदात्री वरोऽस्माकं प्रिय एषोऽद्य भूयात् ॥३१॥
इत्यादिपूर्वकं ताभिर्याचिते स्वप्रिये वरे ।
उवाच सा महालक्ष्मीः स्मितद्योतितदिक्तटा ॥३२॥

महालक्ष्मीरुवाच

वितीर्णोऽयं मया भूयाद् युष्माकं कामितो वरः ।
नातः परं तद्विरहो भवतीनां भविष्यति ॥३३॥
प्रेमवश्यः प्रभुरयं दुर्लभो योगिनामपि ।
युष्माकमार्ति संवीक्ष्य स्वरूपं दास्यति स्त्रियः ॥३४॥
मयानुमोदितश्चैव विशेषाद्वो व्रजस्त्रियः ।
स्वरूपानन्ददानार्थं समर्थोऽद्य भविष्यति ॥३५॥
इत्युक्त्वा जानकी देवी सर्वासु युवतीष्वलम् ।
आविष्टा स्वांशभागेन सद्य एव तिरोऽभवत् ॥३६॥
अथापरेद्युस्ताः सर्वाः स्नातुकामा व्रजस्त्रियः ।
अवतेरुर्वस्त्रहीनाः सारवे विमलेऽम्भसि ॥३७॥

---

१. बषं श्रीमद्दशरथस्यपरा न राजस्य त्रैलोक्यसारे कुमारे—मथु०, बड़ो० ।

तदा स्वयं वरदराट् रामः कमललोचनः ।
तत्र शीघ्रं समागम्य वस्त्राण्यादाय योषिताम् ॥३८॥
द्राक्तीरभूमिमन्दारमारुरोहातिकौतुकी ।
स्वरूपं दर्शयन् स्त्रीणां कोटिकन्दर्पमोहनम् ॥३९॥
सर्वास्ताः सलिलान्तःस्थाश्चीरचोरं रमापतिम् ।
विलोक्य स्मरसंक्षुब्धा ऊचुर्वचनमादरात् ॥४०॥

गोप्य ऊचुः

वयमार्ता माघमासस्य शीते प्रकम्पमानास्तव लक्ष्मीश दास्यः ।
देह्यस्माकं वसनानि व्रजेश यानि प्रभो परिधाय त्वां व्रजामः ॥४१॥
चिराय त्वद्विरहेणार्तबन्धो संतप्ताः स्म त्वामुपलभ्य चाद्य ।
वयं कृतार्थाः स्याम तन्नाथ कुर्याः कृपावलोकं नित्यमस्मासु धेहि ॥४२॥
त्वल्लब्धयेऽस्माभिरहो उपासिता तव प्रिया सापि चाभूत्प्रसन्ना ।
वृत्तं वरं त्वत्स्वरूपं दुरापं कृपावशाददददत्युदारा ॥४३॥

श्रीराम उवाच

अहो व्रजाभीरकन्या वरोऽयं सुदुर्लभो दुर्घटश्चाप्यतीव ।
मत्स्वामिन्या किन्तु यद्यो वितीर्णः सुखाय एवाभवदिन्दुमुख्यः ॥४४॥
अस्त्यत्रैकं वचनीयं विमूढा यद्यूयमेवं स्नाथ नग्नाः सरय्वाम् ।
तेनाभवत्खण्डितं वो व्रतं वै नार्यविधिः स्नानकर्मण्युदीर्णः ॥४५॥
मयानुमोदितं त्वेतदखण्डितमिहास्तु वः ।
सर्वा भवन्त्यो गृह्णन्तु वासांसि बहिरागताः ॥४६॥
ततः परस्परं बाला वीक्ष्य वक्राणि सत्रपम् ।
जहसुर्युगपत् प्रीताः कथं कार्यमतः परम् ॥४७॥

बाला ऊचुः

धूर्तोऽसि धूर्तराजोऽसि देहि वासांसि साहसिन् ।
पश्चात्ते दर्शयिष्यामो यदङ्गं द्रक्ष्यसि स्वयम् ॥४८॥

मध्या ऊचुः

कोऽसौ हास्यविधिस्त्वदीय उदितः सर्वा वयं त्वामहो
पौष्पैर्दामभिरानिबध्य सदने संस्थापयिष्यामहे ॥

माङ्गल्या यदि न स्तुतिं बहुविधां कृत्वा समुन्मोचये-
देवं तामपि संनिबध्य सहसास्माभिः प्रतीक्ष्यं बलम् ॥४९॥

प्रौढ़ा ऊचुः

यर्हि त्वं मुरलीधर व्रजवने गाश्चारयन् स्वप्रियां
संस्मृत्य स्मरबाणविद्धहृदयो मध्ये निकुञ्जं गतः ॥
तर्हि प्रेषितदूतिका परिकरो धत्से व्यथां यादृशी-
मस्मास्वप्यवधानतो नहि कथं त्वं तादृशीं पश्यसि ॥५०॥

अन्या ऊचुः

त्वामार्तबन्धुं शरणं प्रपन्नाः किमार्तिमीदृ[1]ग्द्विगुणां लभन्ते ।
आनन्दसिन्धोरमितोत्सवस्य त्वदीयमेतद्वचनीयमेव ॥५१॥
त्वयि धृतहृदयानामीदृशोऽयं विपाकः
समजनि भुवने नो यद्वियोगाग्नितप्ताः ।
नयनसलिलपूरैः पल्वलान् पूरयन्तो
गुरुजनकृतखेदाः कं नु देशं व्रजामः ॥५२॥
दृष्ट्वा दृष्ट्वा भवतो रूपमेतत्परार्द्धकन्दर्पसमूहजैत्रम् ।
दिवानिशं पीडिताः कामवाणैस्त्वदाप्यवश्याः[2] किमु कुर्मः सुखाब्धे ॥५३॥
अतस्त्वां शरणं यातास्त्वत्स्वामिन्या कृतव्रताः ।
ज्ञानतोऽज्ञानतो वापि कलितानन्यवृत्तयः ॥५४॥
भवान् वरदराड् व्यक्तं पूरयास्मन्मनोरथम् ।
यथास्मराशुगैर्नित्यं न विध्येमहि सत्रपाः ॥५५॥

अपरा ऊचुः

सर्वत्र सर्वभावेषु सर्वदा सर्ववृत्तिभिः ।
त्वमेव स्फुरितोऽस्माकं परंब्रह्मैव भाससे ॥५६॥
अतस्त्वमेव नो दुःखं हरिष्यसि मनोहर ।
इत्याशया प्रपन्नास्त्वां कुरु त्वं च यथोचितम् ॥५७॥

---

१. °मीश = मथु०, बड़ो० । २. मन्दाक्षवश्याः—मथु०, बड़ो० ।

सर्वा ऊचुः

देहि नो राम वासांसि वैदग्ध्याकर नेदृशम् ।
कर्तुमर्हसि यत्तोये कम्पेमहि विवाससः ॥५८॥
कायेन मनसा वाचा यदि त्वामीश केवलम् ।
प्रपन्नास्तर्हि कोऽयन्ते निबन्धो ह्री[1]निरासने ॥५९॥
कान्तर्द्धा[2] पुण्डरीकाक्ष्य प्राणेशस्य निजात्मनः ।
परस्परं तु सुन्दर्यो ह्रीणीमहि न संशयः ॥६०॥

राम उवाच

यदि सर्वत्र मे स्फूर्तिर्भवतीनामभूत्तदा ।
किं नु स्वपरभेदेन जिह्रेथाभीरदारिकाः ॥६१॥

रामा ऊचुः

अनीतिरेषा रघुनाथसूनो रतिं विना नग्नवधूविलोकनम् ।
ततोऽर्पयाशेषनयाम्बुराशे चीराणि नो वारिसकम्पवर्ष्मणाम् ॥६२॥

राम उवाच

विवाससो यत्सलिलावगाहनं चकर्थ वामा व्रतसुक्षामदेहाः ।
तदेतदज्ञानभवं भवत्यघं मदुक्तकर्माचरणाद्विनङ्क्ष्यति ॥६३॥
इतीरिताः सर्वविज्ञानकर्त्रा वाचामधीशेन तदाखिलात्मना ।
निगूह्य गुह्यं निजपाणिपद्मैः सर्वा वहिःस्रोतस आययुः स्त्रियः ॥६४॥

राम उवाच

यथोदिताघनाशाय नत्वञ्जलिभिरीश्वरम् ।
गृहीतनिजवासांसि यथानन्दं व्रजस्त्रियः ॥६५॥
ततस्तास्तत्पराधीनाः कृत्वा सर्वं प्रियोदितम् ।
अवापुः स्वानि वासांसि यथेष्टं च तथा वरम् ॥६६॥
सम्यक् प्रवञ्चितास्तास्तु त्याजिताश्च त्रपाभरम् ।
नर्मोपहसिताश्चैव यन्त्रपुत्तलिकायिताः ॥६७॥
अङ्गान्याच्छाद्य ताः सर्वा वासोभिर्विविधैः पृथक् ।
श्रीरामचरणन्यस्तनेत्रास्तस्थुः सुविस्मिताः ॥६८॥

---

१. हि—रीवाँ । २. °न्तर्द्धः—मथु०, बड़ो० ।

तदाहितमनःप्राणदेहात्मेन्द्रियवृत्तयः ।
तदेकानन्यसर्वस्वा आसंश्चित्रार्पिता इव ॥६९॥
ता आह भगवान् रामः स्मयमान[1] उदारधीः ।
कृतकृत्यार्थविषया इति विज्ञाय चेश्वरः[2] ॥७०॥

राम उवाच

मनोरथो वां विज्ञातो मत्स्वरूपैकगोचरः ।
स आराधितया देव्या पूर्वमेव समर्थितः ॥७१॥
न तदुक्तमादर्थान्मदुक्तमतिरिच्यते ।
यतः सा मेऽखिलार्थानामधिपाध्यक्षरूपिणी ॥७२॥
तदाविष्टलया यूयं सर्वाः प्राप्तमनोरथाः ।
नो चेत्वान्याङ्गनासङ्ग एकपत्नीव्रतस्य मे ॥७३॥
किन्तु सर्वात्मभावेन ये मामेवमुपासते ।
मय्येव न्यस्तसर्वार्था तानहं सततं वृणे ॥७४॥
न व्रतं नियतं कर्म न तपो नापि धारणा ।
न ज्ञानं नापि वैराग्यं मद्रूपानन्दलब्धये ॥७५॥
किन्तु मत्सेवनं प्रेम्णा मदेकवशिताकरम् ।
तद्वान् लभेद्दुर्लभं यद्ब्रह्मशेषश्रियामपि ॥७६॥
प्रेमानन्दमयैर्भावैर्मदाराधनतत्पराः ।
यूयं मां वश्यतां नीत्वा पूर्णकामाःस्थ योषितः ॥७७॥
कल्पान्ते यं चिरतरमेत्य मत्प्रसङ्गं
मद्रूपामृतरसलाभतृप्तिमत्यः ।
कालादेः शिरसि निधाय चात्मपादौ
मत्सार्धं ननु विहरिष्यथेन्दुमुख्यः ॥७८॥
इति तासां वरं दत्वा रामः कमललोचनः ।
जगाम सखिभिः सार्द्धं वने गोचारणोद्यतः ॥७९॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे पूर्वखण्डे दशरथतीर्थयात्रायां व्रजागमने अष्टाविंशाधिकशततमोऽध्यायः ॥१२८॥

१. स्मयमाना—रीवाँ । २. राघवः—मथु०, बड़ो० ।

एकोनत्रिंशाधिकशततमोऽध्यायः

सुकण्ठ उवाच

अथ रघुपतिवर्यः कोटिकन्दर्पजैत्र-
द्युतिमधुरिमसिन्धुर्बन्धुरार्तान्तराणाम्[1] ॥
अधिगतवरदानः शारदीं वीक्ष्य राकां
व्रजपुरवनिताभ्यः प्रेषयामास दूतीः ॥ १ ॥

धीमती श्रीमती ज्येष्ठा श्रेष्ठा च मधुयूथिका[2] ।
धूर्तिनी धारिणी धरा धीराधीरा धरा धृतिः ॥ २ ॥

मधुहासा मधूली च मधुभाषा[3] च मोहिनी ।
शोभिनी क्षोभिणीत्याद्या दूतिकाः शतशःप्रभोः ॥ ३ ॥

गुणवर्णनचातुर्यवन्त्यो धैर्यविहारिकाः ।
उत्कर्षख्यापनपराः पट्व्यः कमललोचनाः ॥ ४ ॥

बहुवित्तव्ययोदारा बहुभीतिप्रदर्शिकाः ।
विद्यमानेषु गुरुषु वाक्पाटवविधायिकाः ॥ ५ ॥

नीतिविद्यासु निपुणा नानाशास्त्रविचक्षणाः ।
नानाकोककलाभ्यासा दक्षिणाः प्रियवादिनीः ॥ ६ ॥

विपञ्चीकलभाषिण्य ऋतुवर्णनदक्षिणाः ।
वित्तापहारनिपुणा रतिसौख्यप्रबोधिका ॥ ७ ॥

कुलभीतिनिवारिण्यः श्रीरामरतिबोधिकाः ।
तारुण्यबलबोधिन्यो वयसः फलबोधिकाः॥ ८ ॥

एकमेव जगत्सारं[4] बोधयन्त्यो रुरिंपतिम् ।
नानावेषविधायिन्यः स्वजनभ्रान्तिनाशिकाः ॥ ९ ॥

१.°रार्त्तगोपीगणानाम्—रीवाँ । २.°पुष्पिका—मथु, बड़ो० । ३.°मासा—रीवाँ । ४. एवमेव जगत्सर्वं—रीवाँ ।

श्रीरामचन्द्रबिम्बस्य चन्द्रिका इव निर्गताः ।
देशकालवयोऽवस्थाचित्तवाक्यप्रदर्शिकाः ॥१०॥
याश्चान्या माधुरीकान्तिचातुरीप्रमुखाः प्रभोः ।
नित्यमेवातिमोहिन्याः सहजाएव[याश्च]दूतिकाः ॥११॥
माधुरी चैव कान्तिश्च चातुरी रूपरञ्जिता ।
सुषमा भारती प्रज्ञा नित्योत्साहा कलावती ॥१२॥
ताः सर्वा प्रययुर्दूत्य आज्ञामादाय मूर्द्धभिः ।
रामस्य लोकरामस्य गृहाणि व्रजवासिनाम् ॥१३॥
सर्वतः प्रेषिता दूत्यो बालानां चित्ततोषिकाः ।
एकां तु मुरलीं दूतीमगृह्णात्स्वकराम्बुजे ॥१४॥
सर्वदूतीगणश्रेष्ठां ज्येष्ठां तु मतिमत्तमाम् ।
प्रियः प्रस्थापयामास कृष्णां रामनिकेतने ॥१५॥
तत्र कृष्णा व्रजे ज्येष्ठा वयसा च गुणैरपि ।
कनिष्ठा तु ततो रामा सहजानन्दिनी तु या ॥१६॥
कृष्णाख्या वल्लभेशस्य नवनीलमणिप्रभा ।
सहजानन्दिनी साक्षाद् गौरी विद्युल्लताकृतिः ॥१७॥
परस्परसपत्न्यौ ते ऐकान्त्यात्कृतसंगमम् ।
प्रियं दृष्ट्वाथवा श्रुत्वा मानवत्यौ बभूवतुः ॥१८॥
अतस्ते वल्लभे रामो वामदक्षिणपार्श्वयोः ।
गृहीत्वा समभावेन रमते स्वेच्छया प्रभुः ॥१९॥
कृतेऽन्यथा तु न सुखं कदाचिदपि जायते ।
श्रीनन्दनस्य यो भ्राता ज्येष्ठस्तुल्यवयोगुणः ॥२०॥
तस्य पुत्री स्वयं कृष्णा प्राणेभ्योऽप्यतिवल्लभा ।
ताभ्यां कर्तुं महारासं प्रभुरैच्छत्प्रमुद्वने ॥२१॥
महाराकानिशं वीक्ष्य वरदानं च योषिताम् ।
उभौ परिकरौ रामश्चक्रे एकान्तमण्डले ॥२२॥
उभयोश्चैव या सख्यस्तथा दूत्यश्च चेटिकाः ।
नित्यसिद्धाः स्त्रियो याश्च तथा साधनसिद्धिगाः ॥२३॥

अनुग्रहैकसिद्धाश्च देवानामङ्गनाश्च याः ।
याश्च स्त्रीरूपतः प्राप्ता देवरूपा वराङ्गनाः ॥२४॥
याश्च वेदत्रयऋचः प्राप्ताः स्त्रीवेशवेशिताः ।
मुनयश्च प्रेमविद्धाः कृत्वा स्त्रीरूपमागताः ॥२५॥
नरकिन्नरनागेन्द्रनगेन्द्राणां च याः स्त्रियः ।
कुमार्यो मध्यवयसः प्रौढाश्चैव तु याः स्त्रियः ॥२६॥
ऊढाश्चैव तथानूढा रामप्रेमवशीकृताः ।
नानादेशोद्भवाश्चैव कन्यकाः सुखितव्रजे ॥२७॥
तासामानयनार्थाय प्रेषितास्तत्र दूतिकाः ।
उद्धरिष्यति ताः सर्वाः प्रेमबद्धाः समागताः ॥२८॥
लतारूपाश्च याः कान्ताः प्रमोदवनमध्यगाः ।
ब्रह्मणो मानसाज्जाताः असंख्या एव संख्यया ॥२९॥
पुरा क्षीरसमुद्राच्च लक्ष्म्या सह विनिःसृताः ।
अजातपाणिग्रहणा अदृष्टरमणाननाः ॥३०॥
तासां वयश्च रूपं च भाग्यं सौभाग्यमेव च ।
कान्तित्वं कमनीयत्वं स्त्रीत्वं वा विधिनिर्मितम् ॥३१॥
तत्सर्वं सफलीकर्तुं स्वरूपानन्ददानतः ।
प्रभुरिच्छां यदा चक्रे समाहूतास्तदैव ताः ॥३२॥
[1]मण्डलेशो महासिद्धा दाराः शाण्डिल्यशर्मणः ।
लीलाशक्तिः प्रभोरेषा वितेने निजवैभवम् ॥३३॥
लीलानुकूल्यमतनोत् सर्वभावेन भूपते ।
अतो व्रजजनाः सर्वे तस्यां रात्रावसूषुपन् ॥३४॥
येऽप्यप्रमत्तहृदया निशि जागरितव्रताः ।[1]
महाभोगबलोपेतास्तेऽपि निद्रायितास्तया ॥३५॥
मायायवनिकां विश्वग्विस्तार्य समधिष्ठिताः ।
ये च निद्रायिता लोके व्रजे रामस्य मायया ॥३६॥

१—१. नास्ति—रीवाँ ।

ते नीता ब्रह्मणो लोके त्रिपाद्यत्र प्रतिष्ठितः ।
सर्वानन्दगणस्थानमुत्तरोत्तरतोऽधिकम् ॥३७॥
यस्मिन्नेवैकतां प्राप्य मात्रानन्दाः प्रतिष्ठिताः ।
निधास्यति परे प्रेम्णि तत उद्धृत्य तानपि ॥३८॥
अथ व्रजपुरं प्राप्तः श्रीमान् राघवनन्दनः ।
गोचारणपरिश्रान्तः सायं न्यविशदालये ॥३९॥
मात्रा माङ्गल्यया सम्यग् वीक्ष्य नीराजितः सुतः ।
तत उद्वर्तितः स्नातः प्राशितोऽन्नं चतुर्विधम् ॥४०॥
स्वापितः कोमले तल्पे पादसंवाहनादिभिः ।
तास्ताः कुर्वन् कथाः सुप्तः सर्वगोचारचेष्टितः ॥४१॥
अथ राकानिशाकान्तकरैर्धवलिता भृशम् ।
उत्फुल्लमल्लिकामोदपूर्णां संवीक्ष्य सन्निशाम् ॥४२॥
अगात् प्रमोदविपिनं प्रेमानन्दरसोदधिः ।
अपश्यत् सर्वतो दृष्टां मङ्गलां मङ्गलाटवीम् ॥४३॥
सरयूसमीरलहरीलुलन्नवमल्लिकादलकलापमञ्जुलाम् ।
स्फुटमल्लिकाकुसुमसंततस्रवन्मकरन्दतुन्दिलमिलिन्दमन्दिरम् ॥४४॥
अरविन्दकाननपरागधोरणीस्मरसैन्यवाजिसुरधूलिपूरिताम् ।
नवपूर्णचन्द्रकिरणारुणीकृतप्रतिपत्रशेभिसहकारवञ्जुलाम् ॥४५॥
कुमुदाटवीसुमविकाशमेदुरामलचन्द्रिकास्मरयशःप्रपूरिताम् ।
अमृतस्रुतिस्नपितनिश्चलक्वणन्राजहंसकुलकूजितान्तराम् ॥४६॥
स्फुटसप्तपर्णमधुगन्धमत्तदिग्गजदानपूर्णपटलीनिदानतां गता-
मित्यसीममददीप्तिकारणमदनानपेक्षरतिकेलिबोधनाम् ।.४७॥
अथ तत्र सोमसवनाभिधे वटे परिभूतकल्पतरुमाधुरीभरे ।
नवनीलमारकतपत्रमञ्जुले मणिरत्नपुष्पिणि सुधाभरस्रवे ॥४८॥
गगनस्पृशि स्फुरति शारदानिलप्रविलोलपर्णविटपायुतायते ।
शतकोटिसंख्यरविचन्द्रमण्डलद्युतिभाजि शीतलतरस्फुरत्तले ॥४९॥
मणिरत्नवेदिरुदयन्त्यलौकिकद्युतिमत्यवाङ्मनसगोचरायतिः ।
रचिताक्षकोटिदलमध्यविस्फुरद्द्रुमकर्णिकाविकचपङ्कजाकृतिः ॥५०॥

सर्वतन्त्ररहस्यं तं महायन्त्रं प्रतिष्ठितम् ।
परब्रह्मार्चनस्थानं चिदानन्दमयं पदम् ॥५१॥
कालमायागुणातीतं विधिनिर्मित्यगोचरम् ।
अयं च धातुसंश्लेषमवाङ्मनसचेष्टितम् ॥५२॥
असीमकल्याणगुणमशेषद्युतिभाजनम् ।
चिदानन्दमयं पद्मं यद्वदन्ति मनीषिणः ॥५३॥
तस्य प्रान्तेऽप्यवस्थातुं ब्रह्मशेषशिवश्रियः ।
नार्हन्ति पारमैश्येऽपि किमुतान्ये दिवौकसः ॥५४॥
तस्य मध्ये स्वयं स्थित्वा सहजानन्दिनीसखः ।
व्यराजत महाराजो महासिंहासने यथा ॥५५॥
कालकोटिसमापूर्णे मण्डले चन्द्रमा यथा ।
मानसोत्फुल्लपद्मान्तर्महामधुकरो यथा ॥५६॥
कोटिबिम्बमये बिम्बे साक्षाद्दिनमणिर्यथा ।
कोटिसिद्धिमये सिद्धासने योगीश्वरस्तथा ॥५७॥
मणिनूपुरयुग्माढ्यविस्फुरत्पादपल्लवः ।
यावकद्युतिसंदोहद्योतिपादाङ्गुलीगणः ॥५८॥
नानावर्णलसच्चोरनाट्यकक्ष[1] मनोहरः ।
मणिकिङ्किणिकाचारुमेखलादामसुन्दरः ॥५९॥
पञ्चवर्णप्रसूनाढ्यवनमालाविराजितः ।
वैजयन्तीमिलन्मञ्जुमुक्तादामश्रियाञ्चितः ॥६०॥
पञ्चवर्णमहारत्नदीर्घमालाव[2]लम्बितः ।
कौस्तुभाख्यमणिद्योतकोटीन्दुरविदीधितिः ॥६१॥
विचित्रकञ्चुकश्रेष्ठकस्तूरीकुङ्कुमाञ्चितः ।
रत्नाङ्गदलसद्बाहुरुद्दामकटकप्रभः ॥६२॥
निर्णिक्तमुकुराकारकपोलफलकद्युतिः ।
नासाश्रीनिहितोत्तुङ्गगजमुक्ताफलच्छविः ॥६३॥

१, °नरकच्छ°—मथु० बड़ो० । २. °मालांस°—मथु० बड़ो० ।

माधुर्यसिन्धुमध्यस्थमकराकारकुण्डलः ।
तन्माणिक्यप्रभापूरच्छुरिता[1]लकधोरणिः ॥६४॥
कस्तूरीपत्ररचितमध्यत्विड्दिव्यमौक्तिकः ।
कस्तूरीतिलकोद्भासिसद्रत्नतिलकालिकः ॥६५॥
भालोच्चैर्निहितोत्तुङ्गमाणिक्योभयतोगते ।
आकर्णलग्नविमलगजमुक्तालते वहन् ॥६६॥
बिम्बाधरप्रभोद्रेक[2]रञ्जिताशेषकाननः ।
चन्द्रबिम्बचमत्कारिचकोराभविलोचनः ॥६७॥
कोटीन्दुरविरत्नोप्तमहामुकुटरोचितः ।
मुकुटाग्रततानेककेकिपिच्छावलीधरः ॥६८॥
तत्संलग्नमहामञ्जुगुञ्जापुञ्जस्रजान्वितः ।
सर्वाङ्गभूषणोद्योतनिरस्ततिमिरोदयः ॥६९॥
सुधावर्षिनवोन्नम्रश्रीविग्रहवलाहकः ।
स्मितैः कुसुमिताः कुर्वन् केलिकुञ्जलताः शतम् ॥७०॥
त्रिविधैर्नयनालोकैर्वनभूमीरुहां ततीः ।
अनेकमणिमाणिक्यमयूखाङ्कुरमञ्जरीः ॥७१॥
उद्भावयन् युवापीनव्यायतोरःस्थलद्युतिः ।
लावण्यस्यापि लावण्यं माधुर्यस्यापि माधुरी ॥७२॥
सौभाग्यस्यापि सौभाग्यं श्रियोऽपि महतीं श्रियम् ।
रूपस्यापि महद्रूपं भूषाणामपि भूषणम् ॥७३॥
स्वैरेव सहजैरङ्गमहोभिर्महिमाञ्चितैः ।
मुष्णन् उष्मरुचेरिन्दोरपि मुष्णन् रुचां मदम् ॥७४॥
अशेषभुवनोद्दीप्तः शृङ्गारजयदीपकः ।
गोपीदृष्टिचकोराणामानन्दायैकचन्द्रमाः ॥७५॥
वियोगनैशतिमिरं क्षपयन्निव भास्करः ।
कलासमूहविश्रामधामदर्शितचेष्टितः ॥७६॥

---

१. °द्योतिता°—रीवाँ । २. °प्रभोत्कार°—रीवाँ ।

विनिबद्धां कटितटादादाय मुरलीमसौ ।
पाणिभ्यामङ्गुलीयांशुसाङ्गुलिभ्यामनेकधा ॥७७॥

मधुराधे च विन्यस्य पूरयन्मुखजैः स्वरैः ।
विलोलपल्लवाभाभी रन्ध्रानङ्गुलिभिः स्पृशन् ॥७८॥

वामबाहुलसद्वामकपोलफलकाञ्चितः ।
भूयो मुरलिकामर्शकिञ्चिन्मुकुलितानन: ॥७९॥

दक्षिणेन पदाक्षिप्तवामपादस्त्रिभङ्गभृत् ।
अनङ्गकोटिसौन्दर्यविजित्वरसमुद्यमः ॥८०॥

जगौ जगन्मोहनकर्मदीक्षितां शृङ्गारवापीं कमलालिझङ्कृताम् ।
लीलासुधासागरराजहंसिकानिक्वाणिनीं कोमलकाकलीमसौ ॥८१॥

तन्नादास्वादसंजातकर्मणां तरसागमाः ।
प्रमोदवनगास्तूष्णीमभवन् पशुपक्षिणः ॥८२॥

आविश्य मङ्गला देवी सकलां प्रमुदाटवीम् ।
अपिबद्राममुरलीपीयूषरसधोरणीम् ॥८३॥

प्रमुद्वनलतावृक्षविटपान्तरपातिनी ।
वृष्टिः सुधासीकराणामदृश्यत समन्ततः ॥८४॥

रससंपद्वासनाभिरवासितहृदोऽप्यलम् ।
ईयुः शुष्कश्रोत्रियाद्या रसिकत्वं तदा क्षणे ॥८५॥

प्रेमानन्दरसाभिन्नशब्दाद्वैतमयं जगत् ।
तस्मिन् क्षणे समभवद्रामवंशोनिनादने ॥८६॥

द्वापरान्ते तथा कृष्णः कर्ता वृन्दावनेऽवयम् ।
अथैव भगवान् रामश्चकार मुरलीध्वनिम् ॥८७॥

प्रमुद्वने सर्वसंपत्समृद्धिसमुदायिनि ।
नादृश्यत तरुः कश्चिच्छुष्कपत्रोपसेवितः ॥८८॥

तदाकर्ण्य व्रजे वामा मुरलीस्वररञ्जितम् ।
प्रेमानन्दपयोराशौ न्यमज्जन्नाशिरःशिखम् ॥८९॥

उन्मज्योन्मज्य मज्जन्ति तदा स्मर[1]महोदधौ ।
वक्षोजतुम्बिकायुग्ममवलम्ब्यापि सादरम् ॥९०॥
ज्वलन्नपि हृदि स्मेरस्तासां विरहपावकः ।
अलिप्यत विशेषेण स्नेहेन द्विगुणीकृतः ॥९१॥
अथ प्राणप्रियप्रेष्ठसंयोगस्पृहया ततः ।
उत्तेरुर्व्रजवामाक्ष्यो रागसागरपाथसः ॥९२॥
त्यक्त्वा व्रजपुरं सर्वाः प्रतस्थुः प्रियसंनिधौ ।
नगैरिव तरङ्गिण्यो गुरुभिर्नापि विघ्निताः ॥९३॥
रणच्चरणमञ्जीरैश्चटुकाङ्गुलिभूषणैः ।
माणिक्यकिङ्किणीशालिमेखलादामभिस्तथा ॥९४॥
वलयानां कङ्कणानां समूहैर्गतिचञ्चलैः ।
मणिहारैश्चन्द्रहारैरन्योन्यवलनोद्धुरैः[2] ॥९५॥
सुवर्णरत्नताटङ्कैः शाटीपटकदम्बकैः ।
शब्दायमानैः परितः कुञ्जवीथीरबोधयन् ॥९६॥
मुखेन्दुभिश्चकोरीणां केशपाशैश्च केकिनाम् ।
नूपुरैः कलहंसानां करिणां गतिविभ्रमैः ॥९७॥
काञ्चीकलापैरलिनां मध्यैः केसरिणां तथा ।
कण्ठनादैः कोकिलानां चातकानां तनुत्विषा ॥९८॥
कुचयुग्मैश्च कोकीनां भोगिनां रोमराजिभिः ।
व्याहारैः शुकवर्याणां रुन्धन्त्यः कानने गतिम् ॥९९॥
आननैश्चक्रवाकानां मध्येन करिणां तथा ।
कचैः काकोदराणां च चातकानां मुखत्विषा ॥१००॥
शुकानां करभूषास्थवैदूर्यमणिभिस्तथा ।
मध्येमार्गं च संप्राप्ताः सृजन्त्यः सुमहद्भयम् ॥१०१॥
मर्दयन्त्यः पदैर्भोगान् विषफूत्कारभीषणान् ।
हरन्त्यस्तिमिरस्तोमं कूजयन्त्यो वनस्थलीः ॥१०२॥

---

१. °न्मज्य वामां यो मज्जन्ति स्मर°—मथु०, बड़ो० । २. मणिहारैरथान्यो-न्यसंमर्दबलमुद्धुरैः—रीवाँ ।

पूजयन्त्यः पदाम्भोजैः प्रमोदवनभूतलम् ।
पूरयन्त्यः सौरभौघैः सहजैः काननावलीम्[1] ॥१०३॥
इन्दीवरमयं लोलनेत्रैः भृङ्गाररोचकैः ।
चन्द्रबिम्बमयं चारुमुखमण्डलकोटिभिः ॥१०४॥
राजहंसमयं मन्दक्वणत्पादाब्जनूपुरैः ।
कचैः केकिमयं चैव देहकान्त्या तडिन्मयम् ॥१०५॥
फुल्लचाम्पेयकमयं समन्ताच्चन्द्रिकामयम् ।
स्वर्णद्रवमयं चैव कुर्वन्त्यः सर्वतो वनम् ॥१०६॥
प्राप्तास्ताः सकला गोप्यः सहजानन्दिनीपतिम् ।
यद्वत्सुधातरङ्गिण्यः सुगम्भीरसुधाम्बुधिम् ॥१०७॥
श्रीरामदर्शनानन्दनिर्वृत्ता हृष्टचेतसः[2] ।
मध्ये प्रमोदविपिनं विरेजुर्व्रजयोषितः ॥१०८॥
तं[3] वेष्टयित्वा रमणं सहजानन्दिनीवरम्[4] ।
स्थितास्तमालप्रवरं सुवर्णलतिका इव ॥१०९॥
अनुजग्राह ताः सर्वाः प्रियस्त्रैलोक्यसुन्दरः ।
पीयूषवर्षणामन्दहासेनोद्दीपयन् दिशः ॥११०॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्ड-संवादे दशरथतीर्थयात्रायामादि-व्रजागमने एकोनत्रिंशाधिकशततमोऽध्यायः ॥१२९॥

---

१. °वलीः—रीवाँ। २. श्रीरामचन्द्रवदनचन्द्रदर्शननिर्वृताः—मथु०, बड़ो०।
३. ता—मथु० बड़ो०। ४. °वशम्—मथु० बड़ो०।

त्रिंशाधिकशततमोऽध्यायः

सुकण्ठ उवाच

उवाच ताः स्मितज्योत्स्नाधूतविश्लेषतापिकाः ।
वक्रोक्तिकवितावेधाः श्रीरामो मोदयन्मनः ॥ १ ॥

श्रीराम उवाच

अहो हि साहसं स्त्रीणां भीरूणां दृष्टमद्भुतम् ।
यद्यूयं त्यक्तसर्वस्वा गोकुलान्मामुपागताः ॥ २ ॥
स तादृक्षः पन्था लुलितरसनाभीमभुजगो-
सहस्रैराकीर्णस्तिमिरपटलीभीषणतरः ।
अतिक्रान्तः कान्ताः कथमिव तदप्यस्तु कुलजा
रसज्ञा दुर्वाचां विषजलनिधिर्नैव सुतरः ॥ ३ ॥
अनैकान्त्यं याताः कथमिव वतागारपतिभि-
र्यतो दासीदासद्रविणसुतसंबन्धकुशलम् ॥
इतोदं युष्माकं क इव पुरुषः शंसतु गुणान्
समाख्यातुं यत्राहमपि लघुशक्तिः समभवम् ॥ ४ ॥
इदानीमप्यस्त्वक्षतकुलकथानां किमपि वः
कुलं वोढुं कालो व्रजत निगमान् पालयत भोः ॥
मुहूर्तं तु स्थित्वा मम सविध आभीरदयिताः
गुणैर्मुक्ता दोषान्तरिततनवो भास्यथ भुवि ॥ ५ ॥
कुलं शीलं दाक्ष्यं स्वजनविभवो गौरवगुणाः
स्वरूपाद्या मां वै वशयितुमलं नैव जगति ॥
परं त्वेकं प्रेम प्रभवति वशीकारविधये
ममात्यन्तक्षेमप्रवितरणदक्षस्य सुदृशः ॥ ६ ॥
तदेतेन प्रेम्णा सहजरमणीयेन सुदृशो
वशेऽहं युष्माकं कथयत भयं किंतु करवै
तथा कार्यं किन्तु प्रसरति कलङ्को न च यथा
कुलं वा नो भज्येन्न च भवति लज्जापगमनम् ॥ ७ ॥

अतो वो मद्वीक्ष्यावधिरयमजस्रं विलसतु
प्रियाः प्रेमाक्षेमाकर इति विमृश्यैव मनसि ॥
व्रजन्तु स्वस्थानं न पुनरिह मत्पार्श्वविषये
चिराय स्थातव्यं तदिदमपि बुध्या विमृशत ॥ ८ ॥

राकाहिमकरद्योतद्योतितां[1] रजनीमिमाम् ।
वीक्ष्यापसर्पततमां परपूरुषपार्श्वतः ॥ ९ ॥
स्त्रीणां हि निर्मितो धर्मो विधिनायं सनातनः ।
न वै यत् परपुंयोगप्रशंसा क्वचिदीक्ष्यते ॥१०॥

तदा वः प्रमदाः सत्यं मया दत्तो महान् वरः ।
भोगः स्वर्गापवर्गेषु यदिष्टं तत्तु गृह्यताम् ॥११॥
अहं राम इति ख्यातो रामास्त्रिभुवने नृणाम् ।
अकृष्टैः कर्मभिर्नूनं रमयामि यतो मनः ॥१२॥

न मदाचरितं कश्चिद् विगातुं क्षमते जनः ।
येन स्वस्यैव दोषेण तथा कुर्वन्नधो व्रजेत् ॥१३॥
एका च मे सहचरी सहजानन्दिनी प्रिया ।
तया निर्दिष्टविषये ममात्यावश्यकी कृतिः ॥१४॥

नूनं गच्छत सद्भार्या न च स्थातुमिहोचिताः ।
धवलं वः कुलं नो वा तदङ्कयितुमर्हथ ॥१५॥
अहमात्मात्मनां वामा यदि प्रियतमोऽस्मि वः ।
जने स्वपतिरूपे तन्निःशङ्कं रमत स्त्रियः ॥१६॥
असाधारणता वा चेन्मयि युष्माभिरीक्षिता ।
तर्ह्यनेनैव रूपेण सदा भावयताबलाः ॥१७॥
अतिमात्रमुदीक्ष्यापि रूपं मम मृगेक्षणाः ।
विहाय कामनां बाधां सुखं वर्तध्वमङ्गनाः ॥१८॥
जानामि मत्प्रणयिनामहं दुःखमयं तमः ।
तन्निरासाय सततं मुखचन्द्रं प्रदर्शये ॥१९॥

१—सन्ततां—रीवाँ ।

श्रुत्वा श्रोत्रपुटैश्चिरं रसनया संकीर्तनैश्चेतसा
ध्यानैः संपरिपाकमृच्छति मम प्रेम्णा प्रमेयातिगे ।
संप्राप्नोति ततश्च दर्शनसुखं जीवश्चिराद् दुर्लभं
तन्मात्रेण कृतार्थतामुपगतो नान्यत्र कुर्यात् स्पृहाम् ॥२०॥

अथ यान्यपतिस्पृहा स्त्रिया भुवने सा तु विनिन्दिता बुधैः ।
इति चेतसि संविमृश्य वः स्वपतिः सेव्यतमः परः पुमान् ॥२१॥
कल्याणमेष्यथ यथोदितधर्मकृत्याःसंत्यागतो मुदमवाप्स्यथ नो तदर्हाः[1] ।
लोकोत्तरामितगुणप्रकरास्पदानामेतावतालमुपदेशनिदेशनेन ॥२२॥

इति वो धर्मसर्वस्वं मया निगदितं मुहुः ।
सावधानतया ज्ञात्वा करिष्यथ यथोचितम् ॥२३॥
इति श्रुत्वा प्रभोर्वाक्यं सर्वास्ता व्रजयोषितः ।
गिरा निवर्तनं बुद्ध्वा बभूवुः परमाकुलाः ॥२४॥
त्यक्तः साहजिको धर्मो यस्यार्थे लोक एव च ।
स चेत्त्यजेत् कमधुना शरणं याम पूरुषम् ॥२५॥

इत्थं विमृश्य सकलोद्यमसंघसारवैतथ्यसंजननजातमहार्तिमग्नाः ॥
सद्यो विनष्टनिखिलाशतया विवर्णन्यञ्चन्मुखा अतनुतापनिपातदेहाः॥२६॥
दावाग्निशोलननितान्तमहोष्णवातसंपत्तिभिः सुपुरुषश्वसनैः स्पृशन्त्यः ।
बिम्बोष्ठमात्तसुषमान्तरतापताम्यच्चित्ताः सुनिःसहतनूद्वहनः प्रसक्ताः ॥२७

एवं ब्रुवीत[2] कथमेष न इष्टसंगः
प्राणप्रियः सखिवरः सुहृदात्मभूतः ।
इत्थं विचिन्त्य मुहुराहितशोकमङ्घ्रि-
जाङ्गुष्ठकोणकुटिला लिलिखुर्धरित्रीम् ॥२८॥

यच्चिन्तया किमपि नीतसमस्तयामाः
कामान्धकारपिहिताखिलबोधमार्गाः ।
तस्मिन् पराङ्मुखतया वदतीदमेवं
शून्याशयाः सकलगोपसुता बभूवुः ॥२९॥

---

१. गन्ता मुदं प्राप्स्यथ नो तदार्हा— रीवाँ। २. ब्रवीति—रीवाँ।

ऊचुः स्वरमणं सर्वा रामं कमललोचनम् ।
ज्ञात्वा पुरुषधौरेयं दुःखसंतारदायकम् ॥३०॥
यन्नो निदेशयसि वीरवरार्तिहर्तः स्निग्धास्त्वदेकविषयव्रतबन्धनद्धाः ।
बद्धाशयास्त्वयि चिरात्पुरुषप्रकाण्डे तत्ते विगर्हिततमं समुदारपाणे ॥३१॥
यदस्माभिः परित्यज्य त्वत्पादाब्जद्वयेऽर्पितम् ।
तच्चेतसापि न वयं प्रक्ष्यामो धर्मकोविद ॥३२॥
अपि या लौकिकी प्रीतिस्तस्या अपि जगत्प्रिय ।
त्वामेवास्पदमालोच्य प्रपन्नाः शरणं हरे ॥३३॥
ये त्वां विहाय सुहृदं परात्मानं परायणम् ।
इतरत्र हृदा रक्तास्ते जनाः स्म वयं न च ॥३४॥
यन्मूलमानन्दकदम्बकस्य विहाय यत्तुच्छमशेषमेव ।
यस्यांशतश्च स्पृहणीयमेव तमेव देवं स्म गतिं प्रपन्नाः ॥३५॥
त्यक्त्वापि दूरं स भवान् गतिर्नः सन्तिकङ्करीः स्वप्रणयानुविद्धाः ।
नित्यप्रपन्नाखिलपालनोत्थं प्राणं विहास्यत्यखिलान्तरात्मन् ॥३६॥
अथो इमाः स्वप्रणयागता नः कैङ्कर्यकर्मोद्यमनैकनिष्ठाः ।
आर्ता विशेषादवतो वतोच्चैर्यशस्तवातीव भवेद्बलिष्ठम् ॥३७॥
इत्यन्योन्यं नर्मसूक्तैर्मनोज्ञैराभाष्य गोप्यः स च गोकुलेन्दुः ।
रेमुर्निकुञ्जेषु कलाविशिष्टैः केलिप्रकारैः प्रणयप्रसक्तैः ॥३८॥
अनन्यधिषणा ज्ञात्वा कायेन मनसा गिरा ।
रामाः सभगवद्रामोऽदधद्वेषं मनोहरम् ॥३९॥
यावतीर्लौकिकीः क्रीडाः कामिनीनां च कामिनः ।
ताः सर्वा अभवंस्तत्र शृङ्गारपरिपोषिकाः ॥४०॥
विलोचनैर्निर्निमेषैरीक्ष्यमाणः प्रियाननम् ।
विसस्मरुर्विरहजं तापं ता व्रजयोषितः ॥४१॥
समवर्धतमाधुर्यसागरः सहजापतेः ।
सकामनेव चात्मानं दर्शयन् व्रजसुभ्रुवाम् ॥४२॥
पूरयामास स प्रेयान् कामकेलिरसस्पृहाम् ।
तासां वदनपद्मानि चञ्चरीक इव प्रियः ॥४३॥

अपिबद्रूपमाधुर्यमकरन्दरसग्रहः ।
कपोलयोश्चिबुकयोरधरे नेत्रयोः पृथक् ॥४४॥
अचुम्बदानन्दनिधिर्धन्या आभीरकन्यकाः ।
आलिङ्गन्त्यो मुमुदिरे लताः कल्पतरुं यथा ॥४५॥
श्रीरामस्याङ्गसंस्पर्शादानन्दामृतसागरे ।
ममज्जुः सकला वामा अर्द्धोन्मीलितलोचनाः ॥४६॥
एवमानन्दिताः कान्ताः प्रियेणामृतकेलिनीः ।
यथान्योन्यं जहुः क्लेशं सापत्न्यामर्षसंभवम् ॥४७॥
विरेजिरे विविधविलासशालिनीः प्रियाङ्गगा व्रजवरवामलोचनाः ।
लसत्सुधाजलधरमध्यसंगता यथाद्भुतास्तडित उदित्वरा त्विषः ॥४८॥
प्रियस्य पाणिद्वितयेन योषितो निजं समायोज्य करद्वयं पुरः ।
भ्रमन्त्य आसादितकेलिसंभ्रमा बभुर्यथाभ्रैश्चपलाः सुलालिताः ॥४९॥
क्रीडत्य उच्चैर्दयितस्य संगमे व्रजाङ्गनाः प्रेममनोभवेरिताः ।
मञ्जीरनादेन निकुञ्जवीथिका उद्घोषयामासुरिवात्तजागराः ॥५०॥
ताः कुञ्जमन्दारलताकदम्बकाद्विकासिपुष्पाण्यवचीय योषितः ।
विभूषयामासुरनङ्गजित्वरं प्रत्यङ्गमानन्दितमात्मनः प्रियम् ॥५१॥
उष्णीषकञ्चुकपटीकटिबन्धनाद्यैः प्रेष्यैर्यथोचितमशेषवपुःस्थलेषु ।
संभूषितः प्रियतमो विबभौ[1] विशेषान्मूर्तो वसन्त इव पुष्पमयः सुगन्धिः॥५२॥
राकानिशाकरकरप्रकरोज्ज्वलायां रात्रौ कृतातिशयितस्मरकेलिरेषः ।
पुष्पावतंसकलितः शुशुभे शुभाङ्गश्छत्रं वहन्निव मनोभव एकराज्यः ॥५३॥
प्रियोऽपि भूषयामास प्रेमवश्यमना वधूः ।
अपचीय प्रसूनानि लताभ्यो ललितानि सः ॥५४॥
पादाङ्गुल्याभरणरसनादाममञ्जीरहार-
स्रक्ताटङ्काङ्गदवलयिता कङ्कणोत्तंसकाद्यैः ।
प्रत्यङ्गं ताः किमपि रचनावद्भिराकल्पवृन्दै—
राभूष्यासौ सपदि कृतवान् कुञ्जसंफुल्लमल्लीः ॥५५॥

---

१. विभवैः—रीवाँ ।

लतिकाभूरूहांश्चैव विपुष्पीकृत्य कामुकः ।
कामिनोः पुष्पिताश्चक्रे चित्रं प्रेम्णो गुणाढ्यता ॥५६॥

अन्योन्यालापसंदर्शनवलनमुखासक्तिदृक्चुम्बनाद्यैः
जातः केलिप्रकर्षो मदनमदमनुज्जृम्भितानां प्रियाणाम्[1]
येन प्राग्भूरिभुक्तौ विरहभवसमुत्तापसंदोह आसां
प्रत्यस्तो वल्लरीणामिव घनसमये ग्रीष्मकालीन ऊष्मा ॥५७॥
ददान आनन्दममेय[2]मन्तः कुर्वाण उच्चैर्विविधाः सुकेलीः ।
ततोऽपि न श्रान्तिलवं प्रयातो मेने स ताभिः पुरुषप्रकाण्डः ॥५८॥
यावन्तो वै कामशास्त्रे प्रकाराः केलीनां ते तत्क्षणे प्रादुरासुः ।
माधुर्याब्धौ चातुरीपुञ्जपात्रे तस्मिन् क्रीडत्यङ्गनामौलिरत्नैः ॥५९॥
चन्द्रश्चान्द्रीचन्द्रिकाचन्दनद्रुस्पर्शी वायुर्मल्लिकानां विकासाः ।
उद्वेलन्तः सारवाम्भस्तरङ्गा जातोल्लासाः कैरवाणां कलापाः ॥६०॥
एकैकस्य श्रीर्महत्याविरासीत् कालस्याज्ञामाधिदैवस्य लब्ध्वा ।
सर्वस्येशे सर्वसंपन्निधाने तस्मिन् कुर्वत्यात्मवर्गेण केलीम् ॥६१॥

एवं तास्तेन कान्तेन रममाणा रमान्विताः ।
रूपसौभाग्यवर्गेण पूर्णा आसन् मृगीदृशः ॥६२॥
ततश्च भगवान् रामः प्रिया सौभाग्यरञ्जितः ।
दिदर्शयिषुरासान्तः क्रीडन्नेव तिरोदधौ ॥६३॥

कस्याश्चिद्भुजसंपुटवर्त्ती, कस्याश्चित्करसक्तकराब्जः ।
कस्याश्चित्प्रिय उरसि शयानः कस्याश्चित्सविधस्थित एव ॥६४॥
कस्याश्चिन्मुखचुम्बनलग्नः कस्याश्चित्परिरम्भनिमग्नः ।
कस्याश्चिद्दर्शनरससक्तः कस्याश्चिद्वचनामृतरक्तः ॥६५॥

कस्याश्चित्कचगुम्फनकारी कस्याश्चिन्मुखदर्पणधारी ।
कस्याश्चिच्चन्दनरसरञ्जी कस्याश्चित्पदपावकसंगी ॥६६॥
कस्याश्चिन्मधुरोदकपायी कस्याश्चित्ताम्बूलकदायी ।
कस्याश्चित्कञ्चुकपरिधायी कस्याश्चिन्मणिहारनिधायी ॥६७॥

---

१. वधूनाम्—मधु० बड़ो० । २. °ममन्द°—मधु०, बड़ो० ।

कस्याश्चिद् बह्वनुनय[1]भाषी कस्याश्चित्कुसुमस्रग्भूषी ।
कस्याश्चिद्व्यजनैः श्रमनाशी कस्याश्चित्पदसंवाहनकृत् ॥६८॥
कस्याश्चिद्वशनागुणभञ्जो कस्याश्चित्परिचरणव्यञ्जो ।
कस्याश्चिन्निविडस्तनगञ्जो कस्याश्चिदवलोकनरञ्जो ॥६९॥
कस्याश्चिद्विरचितगुणगानः कस्याश्चिन्निर्मितपरिधानः ।
कस्याश्चित्परतोऽञ्चिततानः कस्याश्चित्कृतभूषणदानः ॥७०॥

कयापि च सह रतिकेलीं कुर्वन् कयापि चाक्षैर्निभृतं क्रीडन् ।
कयापि सह कुसुमान्यवचिन्वन् कयापि सह परिहासं तन्वन् ॥७१॥
कयापि हेलित इति परितप्यन् कयापि संक्ष्वेलित इति लुभ्यन् ।
कयापि मोहित इति संक्षुभ्यन् कयापि संस्तोभित इति मुह्यन् ॥७२॥

कामपि वक्षसि रहसि दधानः कामपि सस्मितमालपमानः ।
कामपि मानान्मोचयमानः कामपि हृदये शोचयमानः ॥७३॥
कामपि रूपमदादवगणितः कामपि किंचित्परुषं भणितः ।
कयापि खलु ताडितोऽब्जहनितः कथाप्युदस्तः पदयोः पतितः ॥७४॥

इत्थं सौभाग्यमत्ताभिः स्वेशः प्राकृतवन्मतः ।
ताभ्यः प्रियायाः सौभाग्यमभिव्यक्तुं तिरोदधे ॥७५॥
पश्यन्त्य एव सद्यस्तमपश्यन्त्यः सुलोचनाः ।
विस्मिता इव ता जाता विरहोत्तप्तविग्रहाः ॥७६॥
इतो भविष्यति प्रेयानितः खलु भविष्यति ।
इतो भविष्यति क्रीडन्नित्याशापाशकैश्चिताः ॥७७॥

पदोच्चैर्मानशब्देन नादात्प्रत्युत्तरं प्रियः ।
तदा गवेषयामासुर्वनादेत्य वनान्तरम् ॥७८॥
बभ्रमुर्विपिने वामा विचिन्वन्त्यो विशेषतः ।
प्रतिकुञ्जं द्रुमतलं प्रियान्वेषणकातराः ॥७९॥
वृक्षान् लतास्तथागुल्मान् भ्रमरीश्चैव कोकिलान् ।
पद्मानि सरसीश्चैव राजहंसान् तदङ्गनाः ॥८०॥

---

१. बहुनूपुर—रीवाँ ।

वनानि खं मरुत्वन्तं तेजस्तोमं वसुन्धराः ।
पृच्छन्त्यः परितः कान्तं मृगयन्त्योऽपि गोपिकाः ॥८१॥
न लेभिरे यदा स्वेष्टं सखायं सुहृदं च तम् ।
आत्मनः प्राणदयितं तदा स्तोतुं प्रचक्रमुः ॥८२॥

जय जय जय पारेपरार्द्धं पञ्चशरावतारिन् निरवधिमधुरिमोद्रेक-वशीकृतत्रिभुवनजनमानसमहामहोमहिममनोमोहन मानिनीमाननिरासन भ्रूशरासनप्रयुक्तलोचनविशिखनिर्भिन्नमनस्वितमुकुलजावधूमनोधैर्य कठिन-तरसंनाह परस्तादकाण्डविरहवेदनासंवर्द्धनवदनावलोकलज्जावतीलोचन-लज्जालवलोपन लावण्यभवन[1] मधुराधरसुधारससंदोहसुहितसमुद्दृप्त-दुर्वंशजधृतानेकविवरवंशिकाकलितकलकाकलीकलाकुलितारिबलकुलका -मिनीकलापललितमुखचन्द्र मञ्जुलस्मितलवकवलिताबलाजनहृदयमहो-दार दयासिन्धो दीनजनैकबन्धो[2] निजचरणकमलपरागपूरपरिपूतप्रमोद-वनवसुधाविलुण्ठदनेकगीर्वाणवरवितीर्णविपुलाभय प्रभो ॥८३॥

सकलगुणग्रामाभिराम सुभगाभीरकुलजलधिविवर्द्धनकुमुदबन्धो मुदिताखिलजनलोचनचकोर परमानन्दसुधाधारासारनवाम्बुवाह प्रियतम प्राणजीवन स्वेष्टसुहृत् सखे सकलमङ्गलालय माङ्गल्यालय नीलमणे जगज्जनदुःखजालमहातमोभिदज्ञागरूक श्रीविग्रह नमस्तव शरणागत-जनतावनगृहीतव्रताभ्यां स्वभावारुणाभ्यां चरणाभ्याम् ॥८४॥

अपि च पूर्वमेव रक्षिताः स्म समस्तव्रजजनैः सह कुपितेन्द्रनिर्मुक्त-प्रलयपयोधरप्रबलशंबरासारसहाशनिसंपातभीत्यकाण्डज्वलदुज्ज्वलज्वाला-जालजटिलशुष्काटवीहुताशमहाहिगरसंचारजमहाविपदादिमहद्विपद्भ्यः परमदारुणाच्च निजविप्रयोगसमुद्भवप्रलयकालानलात् किं पुनरपि वित-नोषि तादृशमेव निजान्तर्द्धि[3]विवर्द्धमानमतिदुःसहमनलं वियोग-नामानम् ॥८५॥

---

१. लावण्यमधुरा°—रीवाँ । २. निजजनैकबन्धो—इत्यधिकं—रीवाँ ।
३. °न्तर्हित—मथु० बड़ो० ।

अपण्यदास्यश्चैवं तव संयोगपरमाह्लादभरेण विस्मृतात्मस्वरूपास्त्वयैव लोकोत्तरनिरवधिसंपदालयेन वितीर्णपरमतममदःसौभाग्यमासादितवत्यो मदाविष्टमानसाः स्म जाताः तदेव निदानमीदृग्गवेषणयाप्यलब्धमधुरमन्दहासोन्मीलितप्रमोदमहोदारमुखचन्द्रावलोकस्य तव विरहविततवेदनार्णवस्य ॥८६॥

अहो निःसीमतपःसंकलनतत्पराणां मुनीनामप्यन्तःकरण एव स्वात्मानं प्रकाशयसि न वा क्व पुनरीश सकलकामफलभोगभोजयित्रीभिरिह केलिभिः परमकल्याणगुणप्रसूनभरभाजनत्रिभुवनसभाजनगोचररोचमानस्वरूपानन्ददानम् ॥८७॥

तद्यथा भूतपूर्वमेव करुणारसकलितं मनः कुर्वन्निजानन्यसामान्यमहौदार्यगाम्भीर्याद्यखिलस्वरूपानुबन्धितो गुणान् विमृशन् संलापयेथाः[1] परमावद्यशतमलीमसतमानपि निजविप्रयोगानलदन्दह्यमानमानसान् प्रणयमाधुरीपरीपाक[2]प्रकटितस्वसौभाग्यमदानपि स्वजनान् न खलु महाराजोऽप्यर्थिनामौचितीं चेतसि निधाय वितरति तद्योग्यताधिकतरमर्थं समर्थोऽसि च त्वमेवास्य निजमुखानवलोकनमहादारुणदारिद्र्यसंहरणे ॥८८॥

अहो कठिनतास्य हृदयदुराशयस्य यत् क्षणमपि शरत्समुदितसंपूर्णतुषारकरकोटिपराभवोद्धुरत्वन्मुखचन्द्रचन्द्रिकाचमनविधुरेऽपि लोचनचकोरद्वयेऽचिराच्छतधाविदीर्यामन्दमलयानिललहरीभिरुड्डीय त्वच्चरण[3]कमलपरागसराग[4]महोरजः कणैर्नैव मिलति त्वदुरःस्थलमण्डलमहामधुरमालोचितप्रसूनप्रसवसौभाग्यभाजनवनलता भूत्वा प्ररोढुमपेक्षतेषा[5]॥८९॥

अये मनसिजमदहरणमहोद्धुरमाधुरीमहाम्बुराशे सहजसौभाग्यभाग्यभासितप्रभाषितभालपट्टप्रकटितमहोमहोदय मोदयतमां[6]त्वत्संगैककृतार्थतानुष इदानीमिहावस्थातुं[7] निःसहान् प्राणान् ॥९०॥

---

१. रसं पालयेथाः—रीवाँ। २. प्रणयमाधुरीपाक—रीवाँ, प्रणयपरीपाक—मथु० बड़ो०। ३. तव चरण°—मथु० बड़ो०। ४. परागमही°—रीवाँ। ५. "अपेक्षते" नास्ति—मथु० बड़ो०। ६. °महामोदपते नुगृहाण मां—रीवाँ। ७. इदानीमहमवस्थाति—मथु० बड़ो०।

प्रायः प्रेयसैवेदं कार्मणपांसुपटलमिव विस्तारितं प्रेम येन पुरःस्थमपि वस्तु विषयीकर्तुमशक्नुवतीनां नितान्तमारुण्यरोचनरुचिरज्जिते गलदनर्गल-जलधाराधौतविमलवपुषां व्रजाभीरदारिकाणां लोचने शंतमस्तवालोकः परमकदर्थितदृक्कोरकानां नः पद्मिनीनामिव दिवसपरिवृढस्य ॥९१॥

अहो कृपाकन्दलिताशयोऽददाद् भवान् स्वमात्मानमपीश दुर्लभम् ।
वयं पुनः स्पष्ट[1]खलाशयाः स्त्रियो मदाविलास्त्वय्यपि वक्रतां दधुः ॥९२॥

क्वापीदृशः[2] पौरुषसारभूषणः स्वभावदुष्टे कुटिलेऽधमे जने ।
भवेदनन्यं हितमेव संदधन्महामहोदारगभीरमानसः ॥९३॥
जयामितप्रेमसुधामहोदधे जय प्रमोदाटविचारुचेष्टित ।
जय प्रपन्नाशयशर्मकृद्धरे जय प्रमोदाटविचन्द्र पाहि नः ॥९४॥
सुरा नराः किन्नरयक्षपन्नगा नगाः खगा मौनधराश्च योगिनः ।
रमन्ति ये त्वय्यतुलप्रमोदे तेनैव ते नाम जगत्सु कीर्तितम् ॥९५॥
गायन्ति ते नाम यशः सुराङ्गना नभोङ्गणे मङ्गलकारि पावनम् ।
विमानवर्येषु विभूषिताः स्थितास्तृणीकृतस्वामृतभोगभोजनाः ॥९६॥
वैमानिकानां हृदयानि कर्षता महत्तमो नाशयता जगत्त्रये ।
सुरापगातीर्थसहस्रपाविना भवच्चरित्रेण विभूषितो व्रजः ॥९७॥
विभूषितं ते वपुषा जगत्त्रयं महामहैश्वर्यमहोऽतिभास्वता ।
समूर्तिकन्दर्पसहस्रशोभिना महायशःसौरभसारशालिना ॥९८॥

तव प्रपत्तिः सकलार्तिहारिणी समस्तकल्याणकदम्बकारिणी ।
परन्त्वलभ्या भुवि सान्यसाधनैर्विना तवानुग्रहमीश मानिनाम् ॥९९॥
यावन्मदश्चेतसि संभृतो नृणां कुलस्वरूपाभिजनादिसंभवः ।
तावत्त्वमत्यन्तमिहासि दुर्लभो निष्किञ्चनानां प्रणयैकगोचरः ॥१००॥
व्रजाधिहन्ता प्रमुदाटवीविधुर्मङ्गल्यकाभागनिधिर्भवान् प्रभो ।
स्वविप्रयोगाद्विधुरस्य कामिनीजनस्य दैन्यं दल इन्दिरापते ॥१०१॥
येषां त्वमानन्दनिधे समीपगो दुःखान्तकृद्दर्शनदानकोविदः ।
तेषां नृणां प्राग्भवभूरितन्त्रितं न शक्यतेऽद्धा सुकृतं निरूपितम् ॥१०२॥

---

१. सृष्ट°—रीवाँ । २. क ईदृशः—मथु०, बड़ो० ।

नमो नमो दीनजनावनात्मने नमो नमः स्वाश्रितदैत्यनाशिने ।
नमो नमः स्वाभयदानकर्मणि स्फुटान्तदीक्षाय विभो तवाङ्घ्रये ॥१०३॥
इति तास्तोष्टुवन्त्यस्तं विवृद्धविरहापदः ।
तथाप्यलब्धदृशयो रुरुदुः करुणं स्त्रियः ॥१०४॥
अथ तासां प्रभूतार्तिनाशनाय सतां पतिः ।
आविरासीत् स्मेरमुखः प्रमोदवनचन्द्रमाः ॥१०५॥
ताः स्थिताः सरयूतीरप्रभूतवनगह्वरे ।
दृष्ट्वैव तं समुत्तस्थुः सद्यः प्राप्ताः सुजीवनाः ॥१०६॥
वामतः सहजानन्दा दक्षिणे श्यामसुन्दरी ।
उभे अपि प्रिये शश्वत् सर्वसंदोहसेविते ॥१०७॥
बिभ्राणः परमोदारस्मितसौन्दर्यशोभितः ।
उभयोरपि दाक्षिण्यान्मनोरञ्जनपण्डितः ॥१०८॥
वामपार्श्वस्थितां वामां दृष्टिदानेन मोदयन् ।
दक्षिणस्थां तु हस्ताब्जव्यापारैर्विकलाशयाम् ॥१०९॥
करेणैकेन सततं लीलाकमलकोरकम् ।
भ्रामयन् मुखचन्द्रेण द्योतयन् सकला दिशः ॥११०॥
कटौ सुकाञ्चिकां[1] विभ्रन्नानारत्नविचित्रिताम् ।
उच्चैः पीताम्बरं विभ्रदंसयोरा[2]ततं शुभम् ॥१११॥
महार्हरत्नप्रत्युप्तकेकिपिच्छावतंसभृत् ।
असावसक्तरुचिरप्रियादक्षिणबाहुकः ॥११२॥
नवीनोल्लाससंशोभि पुण्डरीकविलोचनः ।
कल्याणगुणसंदोही मन्दिरामन्दविग्रहः ॥११३॥
माणिक्यवर्यसुभ्राज[3]न्नासापुटमनोहरः ।
अनर्घ्यरत्नरसनाचारुकेसरिमध्यकः ॥११४॥
भूषामुकुटविद्योतध्वस्तकुञ्जतमोभरः ।
लसत्कौस्तुभरत्नाढ्यकण्ठग्रीवविराजितः ॥११५॥

---

१. सुकछिनीं—मथु०, बड़ो० । २. °ङ्शधारा—रीवाँ । ३. मणिवर्यसुत्रि भ्राज°—मथु० बड़ो० ।

प्रसादसुमुखो देवो युगपत्ताभिरीक्षितः ।
उत्थानस्वागतार्हाभिः संभाव्य प्राणजीवनम् ॥११६॥
आनन्दविकचैरक्षिकमलैः पर्यपूजयन् ।
आतस्तरुः प्रियायास्मै सोत्तरीयासनानि ताः ॥११७॥
रञ्जितानि सुगन्धीनि कुचकाश्मीरकर्दमैः ।
आवृत्य च स्थिताः सर्वास्तारा इव कलानिधिम् ॥११८॥
वैदूर्यमिव रत्नानि तमालं स्वर्णवीरुधः ।
भक्तिस्वरूपसिद्धान्तप्रश्नाक्षरनिरूपणैः
अन्योन्यं समभूत्तत्र समालापः सुखावहः ॥११९॥

गोप्य ऊचुः

विहाय लोभं दम्भं च भजतां प्रीतिपूर्वकम् ।
कच्चित्प्रसीदसि न वा वदस्वैतद्विनिर्णयम् ॥१२०॥

श्रीभगवानुवाच

शुद्धमिश्रविभेदेन भजनं द्विविधं मम ।
त्रिविधं मिश्रमाख्यातं ज्ञानोपासनकर्मभिः ॥१२१॥
शुद्धमेकविधं प्रोक्तमित्थं भक्तिविनिर्णयः ।
ज्ञानमुख्यं तु भजनमङ्ग ज्ञानस्य मुख्यता ॥१२२॥
भवेत्तद्वान्ममात्मैव नात्र कार्या विचारणा ।
उपासनामपि तथा भजनेनैव साधयेत् ॥१२३॥
तया संस्तुतचित्तस्तु ज्ञानमेवाधिगच्छति ।
तथा कर्मापि भजनात् साङ्गं कुर्वन्ति केचन ॥१२४॥
तेषामुपासनार्थाय कर्मैव भवति स्फुटम् ।
सर्वत्र पञ्चधा मुक्तिः फलं भवति गोपिकाः ॥१२५॥
मया सह तु यो भोगः सर्वकामफलात्मकः ।
संशुद्धभजनेनैव प्राप्यते व्रजयोषितः ॥१२६॥
मत्स्वरूपान्यथाप्रेक्षा[1] वर्जितः प्रणयोर्जितः ।
भजनात्मा महान् योगः स लभ्यः कृपया मम ॥१२७॥

---

१. °रूपेतरापेक्षा°—मथु० बड़ो० ।

अथवा भवतीनां वै प्रसादात्सुलभो भवेत् ।
साधनानि तु सर्वाणि यत्र पूर्त्ति व्रजन्ति हि ॥१२८॥
अथ युष्माकमाकूतं सख्यो विदितमेव मे ।
भवत्यः खलु मन्निष्ठा[1] भजन्त्यो मां दृढव्रताः ॥१२९॥
भवतीनां प्रियो नित्यं तेनाहं संस्थितो वशे ।
अथ प्रत्युपकाराय नालमस्मि चराचरे ॥१३०॥
तेनोपढौकितः सख्यः स्वात्मैव सुचिरं मया ।
अनेन विहरिष्यध्वं मृत्युमूर्द्धपदाब्जकाः[2] ॥१३१॥
एवमन्योऽपि चेत् कश्चिन्मां भजेन्मृगलोचनाः ।
तस्याप्यहं स्वमात्मानं दास्ये नैवात्र संशयः ॥१३२॥
सर्वात्मभावयुक्तेन प्रेम्णा तेन व्रजाङ्गनाः ।
अमूल्यक्रीत एवाहं युष्माकं करयोः स्थितः ॥१३३॥
परमात्मैकलभ्यत्वमात्मनो व्यञ्जयन्नहम् ।
तिरोहितेन रूपेण युष्माकं प्रेम दृष्टवान् ॥१३४॥
[3]अहो हि सख्यो युष्माकमार्त्तिरेषा वियोगजा ।
स्पृष्ट्वा ममापि चात्मानं स्थानस्थितमचालयत्[3]॥१३५॥

गोप्य ऊचुः

क्व ते स्थानं सुनिहितं सुखितेन्द्रकुमारक ।
इति वेदितुमिच्छामः कथयस्व कृपानिधे ॥१३६॥

भगवानुवाच

यत्र मत्प्रेमनिरता मम दासा मदात्मकाः ।
भजन्ते मां परं वेद्यं तत्र नित्यं वसाम्यहम् ॥१३७॥
शृण्वन्तः कीर्तयन्तश्च परस्परहितैषिणः ।
स्मरन्ति यत्र मां भक्तास्तुष्यन्ति प्रीतमानसाः ॥१३८॥
तत्राहं सततं सख्यस्तिष्ठामि परया मुदा ।
सर्वात्मभावयुक्ताश्च सेवन्ते यत्र मां जनाः ॥१३९॥

---

१. खल्वतिक्लिष्टाः—मथु०, बड़ो०। २. कृत्वांघ्री मृत्युमूर्धनि—मथु०, बड़ो०। ३-३. नास्ति—रीवाँ।

नाहं वैकुण्ठभवने तिष्ठामि सविधे श्रियः ।
मम स्थानं परं नित्यं प्रमोदविपिनं महत् ॥१४०॥
इति ज्ञात्वा भजत मां मुदा सर्वात्मभावतः ।
अहमेव फलं धन्याः सर्वभोगसुखाय वः ॥१४१॥

ततश्च भगवान् रामस्तास्तदा प्राणसंमिताः ।
आनिनाय स्वयं देवो विहर्तुं मण्डलोत्तमम् ॥१४२॥
तत्र सोमवटस्याधः कोटिसूर्येन्दुभासुरम् ।
पञ्चवर्णमहारत्नमणिमाणिक्यमण्डितम् ॥१४३॥

वटशाखान्तसंस्रावि सुधा संपातशीतलम् ।
प्रेमानन्दपदं नित्यं प्रेमसाम्राज्यभाजनम् ॥१४४॥
राकासुधाकरकरद्विगुणीकृतरोचिषम् ।
कुञ्जद्रुमलतागुल्मगोचरद्युतिदीपितम् ॥१४५॥

अनेकरत्नसंभ्राजत्कमलावलिभूषितम् ।
रचितानेकमाणिक्यचतुष्करुचिरद्युतिम् ॥१४६॥
अनेककुञ्जविटपिमञ्जरीकृतदीधितिम् ।
समन्ततः समुद्भासि गगनस्पृक्प्रभाभरम् ॥१४७॥

अक्षरानन्दमध्यस्थप्रेमानन्दरसालयः ।
भावानन्दमयं दिव्यनृत्यगीतादिसेवितम् ॥१४८॥
तत्रस्थः शुशुभे रामो दिव्यगोपीकदम्बगः ।
अलौकिकं परिप्राप्य नृपः सिंहासनं यथा ॥
प्रभावोत्साहकान्त्यादिसहजानन्तशक्तिभिः ॥१४९॥

रामस्योभयपार्श्वगे परमया कान्त्या स्फुरनयौ मुदा
देवी श्रीसहजेश्वरी परकला कृष्णाभिधे वल्लभे
रेजाते रसनायकस्य सविधे सौवर्णवैदुर्यभा-
संदोहाक्तमुदावली इव दृशोः कल्याणसंवर्धिके ॥१५०॥

तयोः सखिवरास्तत्र यथापूर्वं विराजिताः ।
शुशुभुर्मण्डलश्रेष्ठकान्तिसंदोहभूषिताः ॥१५१॥

अथ तत्र महारासः प्रवृत्तो मण्डलोत्तमे ।
रामस्य व्रजरामाणामन्योन्यस्य सुखावहः ॥१५२॥
कदाचित्सहजासार्द्धं कदाचित्कृष्णया सह ।
अनृत्यद्रामरसिकः शक्तित्रयसुशोभितः ॥१५३॥
एकस्य नन्दिनी शक्तिः परा सा चित्कलात्मिका ।
उभाभ्यां सहितो रामो विरेजे रासमण्डले ॥१५४॥
कदाचित् सहजासख्यः स्वस्वामिन्या सहान्विताः ।
कदाचिद्रामसुन्दर्यः सख्यः स्वस्वामिनीयुताः ॥१५५॥
नरीनृत्यन्तेस्म रासे दर्शयन्त्यो विशेषतः ।
स्वस्वचातुर्यसंदर्भमन्योन्यं विजिगीषवः ॥१५६॥
कलासमूहेन विभूषिताङ्ग्यः स्त्रियः समस्ताः परिणाहिभासः ।
उत्साहयन्ति स्म मनः प्रियस्य तस्मिन् महारासरसप्रसङ्गे ॥१५७॥
प्रभाभिरामाः परिभूतकामाः पूर्णेन्दुधामान इव त्रियामाः ।
सुवर्णदामान इवातिभामा बभुः सरामा व्रजवासिरामाः ॥१५८॥
बभौ नवेन्दीवरदामकोमलः कलाविशेषात् सललामतां दधत् ।
प्रमोदकारी वनितासु वल्लभोऽमृतप्रवर्षीव लतासु वारिदः ॥१५९॥
नृत्यगीतादिजातीनां संगीतादिभिदाजुषाम् ।
यदाधिदैविकं रूपं तदाविरभवत्तदा ॥१६०॥
सार्द्धं रामविलासिना परमया प्रीत्या नटन्त्योऽबलाः
कन्दर्पोद्भवकर्तरूपसुषमासारा उदाराशयाः ।
नव्येनामृतवारिदेन सहिते व्योम्नि भ्रमन्त्यो यथा
विद्युदच्छश्रिया उदीर्णमहसो रासे विरेजुस्तराम् ॥१६१॥
तासां नूपुरमेखलावलयिकापादाङ्गुलीभूषणा-
ध्वानक्षुब्धरसाम्बुरासिलहरीसंदोहनादोपमः ।
रासः प्राङ्गणतः समुल्लसितवानाब्रह्म सद्मावधिः
प्राप्तः प्रेमबलात् समाधिमहरद्योगीश्वराणामपि ॥१६२॥
विहाय शम्भुर्वत योगनिद्रां चचाल योगात् स ततस्तदानीम् ।
तदङ्गापर्वतराजपुत्री क्षुब्धाशयाभूद्रसमात्रवश्या ॥१६३॥

महेन्द्रलोके रसिकेन्द्रवंशीनिनादसौख्यातिमिते प्रजायते ।
पुलोमजावल्लभबाहुयन्त्रगताप्यतिक्षोभमवाप लौल्यात् ॥१६४॥

इत्थं सर्वपतिव्रताकुलमनःसंक्षोभलोलाधरे
श्रीमद्राममहारसेन्द्रमुरलीनादे तदा जाग्रति
शब्दाद्वैतमयानि यद्यपि जगन्त्यासुः परं त्रीण्यपि ।
स्वेच्छातः खलु सूक्ष्मदर्शनवता[1]मेवोपलम्भोऽभवत् ॥१६५॥

स्वर्णाद्रेरधिकन्दरं सुरमुनिश्रेष्ठाः सुसंविह्वलान्
ब्रह्मानन्दसमुद्रसान्द्रलहरीनिर्भग्नचित्ता अपि ।
सद्यः श्रीरघुवंशजस्य मुरलीनादं श्रवःसंपुटै-
राकर्ण्यामितविप्रयोगजननीं प्रेम्णो दशां लेभिरे ॥१६६॥

रसिकेन्द्रमनोज्ञवंशिकाध्वनिमाकर्ण्य गलत्समाधयः ।
सनकादिमहामुनीश्वरा विरहापद्गतचेतसोऽभवन् ॥१६७॥

अनृत्यन् नृत्यचतुरा अगायन् गानकोविदाः ।
आलापनिपुणाः कान्ता आलपन् रासमण्डले ॥१६८॥
चक्रुरुद्घटनं[2] काश्चित्तत्क्रियाकुशलाशयाः ।
रामस्तु सर्वनिपुणः सर्वं चक्रे क्रमागतम् ॥१६९॥

द्वयोर्द्वयोर्मध्यगतो विलासी रेजे प्रियास्कन्धगतोर्ध्वबाहुः ।
तास्त्वेकहस्तं दिवि नर्तयन्त्यः प्रियस्य नाभौ चलदन्यहस्ताः ॥१७०॥

इत्थं परस्पराबद्धबाहूनामन्तरे प्रियः ।
तडिद्द्वितयमध्यस्थो रेजे नीलघनो यथा ॥१७१॥
कदाचित्समसंख्येन स्वरूपेण विराजितः ।
मोदयामास सर्वास्ता दर्शितानन्यगामितः ॥१७२॥
दर्शनस्पर्शनालापचुम्बनालिङ्गनादिभिः ।
चक्रे रसिकशार्दूलः सर्वासां कामपूरणम् ॥१७३॥

अङ्घ्री मञ्जीरमञ्जुध्वनिकुशलतमौ नाटयन् भूप्रदेशे
प्रोद्भूतात्यद्भुतश्रीर्मदनमदभरं मर्दयन्नङ्घ्रिपातैः ।

---

१. दर्शनमुदा°—रीवाँ । २. °रुत्तरणं—रीवाँ ।

नासाभ्रूलोचनोष्ठावयवविचलनोदारचातुर्यमञ्छन्
किञ्चित्किञ्चिन्निषिञ्चन् युवतिजनमनोविप्रयोगौघपात्रम् ॥१७४॥
कोटीन्दुद्योतिकोटिद्युमणिरुचिलसत्केकिपिच्छावतंस-
च्छायामालोक्यनृत्यन्नमितगुणगणैर्भूरिगर्वायमाणः ।
पादन्यासाननेकांस्तदनु च बहुशो हस्तजांश्चैव तन्वन्
रामो रामाभिरामाकृतिरपि जगतां मोहयन् मानसानि ॥१७५॥

अखेलत् खेलनकलापण्डितो मण्डितोऽमरैः ।
खेचरीभिर्वीक्ष्यमाणः किशोरवरशेखरः ॥१७६॥

प्रोद्यन्मञ्जीरनादाः कटितटरसनालोलघण्टोनिनादाः ।
केयूरान्दोलनश्रीमधुर[1]भुजलताः कङ्कणाध्वानवत्यः ।
लीलालोलाल काली वलित मुखरुचः कोकिला काकलीभिः ।
कूजन्त्यः कण्ठदेशे कलविधुतिकलाभिर्नभो भूषयन्त्यः ॥१७७॥

पद्भ्यां भूम्याक्रमणविधिषु प्रस्फुरद्भूरिभङ्ग्यो
हस्तैरुच्चावचगतिमतो हस्तकान्दर्शयन्त्यः ।
भ्रूदिग्भङ्गैः स्मितविलसितैर्भावकान् भावयन्त्यो
लीलालोलाञ्चलपटपरिव्यक्तवक्षोजशोभाः ॥१७८॥
नृत्यार्थोद्भावितबहुपरीवर्तनावर्तनाद्यै-
र्गत्युत्कर्षैस्त्रुटिमिव तनोर्मध्यभागे नयन्त्यः ।
गण्डाभोगप्रतिफलनगा[2]नर्घ्यताटङ्कशोभाः
शश्वन्नृत्यश्रमजलकणार्द्रीभवद्वक्त्र पद्माः ॥१७९॥
नृत्यादिष्टाः शिथिलितकचग्रन्थिशोभाविशेषाः
काञ्चीवस्त्रोद्ग्रथनविवशाःसंभ्रमेणालसाङ्ग्यः ।
स्निग्धस्वान्तप्रियतमभुजाक्रान्तिसत्कान्तिभाजः
काञ्चिल्लक्ष्मीं पुपुषुरबला रासचक्रान्तरस्थाः ॥१८०॥
स्वस्वलोचनवक्त्रभ्रूकरव्यापारभाजनम् ।
कुर्वन्त्यो रमणं रामाः स्वरमेव विजह्रिरे ॥१८१॥

---

१. °मदुर°-- रीवाँ । २. द्युतिफनभवा°—रीवाँ ।

कदाचिन्नाट्यसावेशा गानाविष्टा कदाचन ।
उभयोरप्यभावेऽभूद्रहःकेली परस्परम् ॥१८२॥
परस्याः क्रियमाणास्तानाज्ञाप्य परया स्त्रिया ।
स्वस्वाभिमतलाभेन सर्वा मत्तदृशोऽभवन् ॥१८३॥

तं तादृशं रतिपुषं पुरुषप्रकाण्डमासाद्य कान्तमतुलं व्रजवामनेत्राः ।
तद्बाहुदण्डसविशेषगृहीतकण्ठ्यः केलीकलाकुलितमत्तह्रदे विजह्रुः ॥१८४॥
अंसे स्थितः प्रियभुजः परतः कुचान्तं संसक्त आत्तकुटिलक्रमआतुरत्वात् ।
मर्मस्पृशि प्रकटितास्फुटकण्ठनादाश्चक्रेऽखिलामृगदृशः स्खलितोरुवीर्याः ॥
ताः कान्त संगमवशेन सुविह्वलाङ्ग्यः सन्नृत्यगीतभवदिष्टतयालसाश्च ।
संस्तम्भितुं ननु पदा स्ववपुर्नशेकुः पार्श्वस्थिते प्रियमतीव तदालिलिङ्गुः ॥

इत्थं सर्वा प्रिततमे भरं न्यस्य सुनिर्भरम् ।
स्वच्छन्दं गोदुहां दारा विजह्रुः श्रीप्रमुद्वने ॥१८७॥
दृष्ट्वा भगवतः केलीं महारासाभिधां नृप ।
चन्द्रमा लज्जितो भूत्वा रूपगर्वोपवर्जितः ॥१८८॥
आत्मानं चन्द्रसरसि न्यमज्जयदुदाशये ।
अनन्धकारितं वीक्ष्य सर्वे देवा नभस्तलम्[1] ॥१८९॥
आययुर्ब्रह्मणः पार्श्वे ब्रह्मा सर्वैः सुरैः सह ।
आययौ भगवान् यत्र गोपीभिः सह नृत्यति ॥१९०॥
दृष्ट्वा रघुपतेः केलीमानन्दरसनिर्भराम् ।
चन्द्रं च चन्द्रिकाश्चैव हृदयैरवमेनिरे ॥१९१॥
अथ स्नानसमायातगोपीपादाब्जसंगमम् ।
प्रसादं प्राप्य सहसा चन्द्रः स्वस्थो दिवङ्गतः ॥१९२॥
सर्वाश्चन्द्रसरस्तोयैः स्नात्वाभ्युक्ष्य परस्परम् ।
कृत्वा च पद्मकिञ्जल्कलीलाद्यैर्भूषणं तनौ ॥१९३॥

प्रातः प्रबोधसमये वनिताव्रजस्य लग्नाशया यदधि[2]गन्तुमनीहमानाः ।
आमन्त्र्य रामरमणं सहजादि युक्तास्तस्याज्ञया स्वसदनाभिमुखा बभूवुः १९४

---

१. नभस्थलम्—रीवाँ । २. यदपि°—मथु०, बड़ो० ।

तासां वै गेहपतयो नाद्रुहयन् किंचिदप्युत ।
जानन्त एव मनसि स्वस्वसंनिधिवर्तिनीः ॥१९५॥

राजोवाच

ध्रुवं समागता गोप्यो रामस्य खलु संनिधौ ।
कथं नु पतयोऽजानन् स्वस्वसंनिधिवर्तिनीः ॥१९६॥
एतन्मे ब्रूहि रामस्य सखे नूनं सुकण्ठ भोः ।
यत्रैश्वर्यगुणव्यक्तिर्जायते हृदये सताम् ॥१९७॥

सुकण्ठ उवाच

उक्तमेतत् पुरा तुभ्यं राजमौलिमणे मया ।
लीलाशक्तिः प्रभोरस्य मङ्गला सिद्धयोगिनी ॥१९८॥
दुर्घटं सुघटं कुर्याद्घटेताघटितं तथा ।
रामलीलाविनोदार्थं त्रैलोक्यमपि मोहयेत् ॥१९९॥
तया विमोहिताः किं किं नाभिपश्यन्ति जन्तवः ।
लीलानुकूलतां नित्यं संपादयति सा व्रजे ॥२००॥
तदर्थसिद्धयोगिन्याः सर्वे चाज्ञाकरा व्रजे ।
प्रियस्यापि प्रियायाश्च लीलापरिकरोऽखिलः ॥२०१॥
शक्त्यैव सिद्धयोगिन्या भवेत् संघटितो वने ।
अतस्ता एव ते जानन् स्वस्वसंनिधिवर्त्तिनीः ॥२०२॥
वनाधिदेवता देवी मङ्गला नाम संततम् ।
लीलार्हं कुरुते सैव प्रमोदवनमुत्तमम् ॥२०३॥
मङ्गला नाम देवीयं सर्वदा सिद्धयोगिनी ।
लीलाधिदेवतेशस्य त्रैलोक्यस्यापि मोहिनी ॥२०४॥
मङ्गलायै नमो नित्यं प्रमोदवनमङ्गले ।
नमस्ते रामरमणचित्तरञ्जनराशये ॥२०५॥
नमस्ते मङ्गलादेव्यै व्रजमण्डलमोहिनि ।
पूर्णमण्डलचन्द्रायै रामलीलैकशक्तये ॥२०६॥

---

१. °स्तयैव—मथु० बड़ो० ।

नमः श्रीसहजादेव्यै रामस्याह्लादशक्तये ।
नमः प्रेमरसानन्दरूपिण्यै रामभक्तये ॥२०७॥
नमो रामस्य चिच्छक्त्यै चेतयन्त्यै सतां मनः ।
कृष्णायै नीलरत्नाभश्रीविग्रहलसद्रुचे ॥२०८॥
नमः श्रीरामचन्द्राय लीलानन्दरसात्मने ।
प्रमोदवनचन्द्राय परब्रह्मस्वरूपिणे ॥२०९॥
नमो रासविलासादिलीलानन्दरसाब्धये ।
कोटिकामाभिरामाय रामाय रमणात्मने ॥२१०॥
इत्यष्टकं प्रातरुत्थाय राजन् पठेत् सदा प्रेमरसानुरक्तः ।
नेत्रे समुन्मील्य रसाम्बुराशेरानन्दलीलां पश्यति सद्य एव ॥२११॥
अलं कर्मायासैरलमलघुसायासतपसा[1]
अलं योगैः साङ्गै[2]रलमथ बहुज्ञानविभवैः ।
परप्रेमानन्दप्रसरपरिपूर्त्येकजनिकां
प्रभोर्लीलां ध्यायन् दलितभवबन्धो विजयते ॥२१२॥
इति ते सर्वमाख्यातं यथा रामो रसात्मकः ।
आदिव्रजे विहरति प्रेमाक्तैः स्वजनैः सह ॥२१३॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे पूर्वखण्डे दशरथतीर्थयात्रायां आदिव्रजागमने त्रिंशाधिकशततमोऽध्यायः ॥१३०॥

एकत्रिंशदधिकशततमोऽध्यायः

सुकण्ठ उवाच

एकदा नारदो राजन् देवर्षिर्भक्तपुङ्गवः ।
सनत्कुमारस्य मुखादश्रौषीत् सहजेश्वरीम् ॥ १ ॥

सनत्कुमार उवाच

रामस्यातिप्रिया धन्या सहजानन्दिनी स्वयम् ।
आदिलक्ष्मीरसौ ज्ञेया भक्तिरूपा सनातनी ॥ २ ॥

---

१. सायासकतनैः—रीवाँ । २. तथैवालं योगैः—मधु० बड़ो० ।

तस्याः प्रसादमासाद्य यो नरो भजते तु ताम् ।
स रामभक्तिं लभते प्रेमाख्यां भवरूपिणीम् ॥ ३ ॥
नान्यथा लभते मर्त्यो दुर्लभां दैवतैरपि ।
रामभक्तिर्मुनिश्रेष्ठ कल्पकोटिशतैरपि ॥ ४ ॥
आदिव्रजे निवसति तत्रस्थान् संप्रपूजयन् ।
स एव तत्प्रसादस्य प्राप्तं भवति नेतरः ॥ ५ ॥

नारद उवाच

सहजानन्दिनी नाम कासौ रामस्य वल्लभा ।
वदैतस्याः समुत्पत्तिं भगवन् शृण्वतो मम ॥ ६ ॥
ततो धाम गुणान् वृत्तवृन्दं मे सर्वशो मुने ।
यस्याः प्रसादमासाद्य रामभक्तिं लभेज्जनः ॥ ७ ॥

सनत्कुमार उवाच

सा नित्या वल्लभा तस्य प्रेमानन्दमयी परा ।
अमुना भावरूपेण नित्यं रामे प्रतिष्ठिता ॥ ८ ॥
नामधामस्वरूपेण यथा रामस्तथैव सा ।
प्रमोदवनगा नित्यं रमते रमणान्विता ॥ ९ ॥
तथापि तस्याः संस्थानं रहस्यं कथयामि ते ।
यद् गोप्यं सर्ववेदेषु नाख्येयं यस्य कस्यचित् ॥१०॥
सर्वधामशिरोरत्नं प्रमोदवननामकम् ।
राजते रामवैकुण्ठं सहजायाः परं पदम् ॥११॥
ततश्च देवकार्यार्थं साकेतेऽसाववातरत् ।
आविर्भाव्य निजं धाम परं प्रमुदकाननम् ॥१२॥
अयोध्यां परितो देशश्चतुर्विंशतियोजनः ।
प्रमोदवनमुद्दिष्टं श्रीरामस्य परं पदम् ॥१३॥
आविर्भूतं प्रियं[1] रामं विज्ञाय सहजेश्वरी ।
अवातरत् स्वयमपि रसानन्दशरीरिणी ॥१४॥
सुखितो नाम गोपेन्द्रस्तद्गृहे राम उद्भवः ।
श्रीनन्दनस्य गोपस्य गृहे श्रीसहजेश्वरी ॥१५॥

---

१. परं—रीवाँ ।

परकीयारसप्रेमपुष्ट्यर्थमवतारिणी ।
विजहार प्रियेणैषा नित्यं प्रमुदकानने ॥१६॥
नित्या रसमयी लीलाः सहजारामयोर्जनः ।
गायन् शृण्वन् पठंश्चैव श्रावयन् विदुषांगणे ॥१७॥
ततः संजातया भक्त्या भवबन्धात् प्रमुच्यते ।
लभते तत्परिकरे कृपयान्तःप्रवेशनम् ॥१८॥
सहजानन्दिनी तत्र कोटिचन्द्र[1]समद्युतिः ।
श्रीरामलोचनद्वन्द्वचकोरद्वयतोषिणी ॥१९॥
कोटिकोटिसखीयूथतारकामध्यचन्द्रिका ।
नवयौवनसंपूर्णलावण्यरसवारिधिः ॥२०॥
परार्द्धरतिनिर्जैत्रमाधुर्यरसरञ्जिता ।
अपीच्यतमुरु[2]ग्रामकल्याणकुलमण्डिता ॥२१॥
महामहार्हवसनरत्नालङ्कारभूषिता ।
वनकेलिरतिक्रीडासमुत्कण्ठितमानसा ॥२२॥
सर्वानुभावभवना विभावनिवहात्मिका ।
परकीयारसप्रेमसामग्री साधनात्मिका ॥२३॥
दौर्लभ्यद्योतिनी नित्यं प्रेमशातौघ[3]वर्द्धिनी ।
नानाहावैश्च भावैश्च मनो मोदयतेऽस्य सा ॥२४॥
य एतस्या गुणांल्लोके शृणुयाद् रहसि स्थितः ।
तस्य तद्रूपतो नूनं रामभक्तिः प्रजायते ॥२५॥
सहजा सहजेत्येवं रामरामेति कीर्तयन् ।
मुच्यते भवबन्धेभ्यो महाकलुषतोऽपि च ॥२६॥
तस्मात्कीर्तयतां नित्यं नारद प्रीतिपूर्वकम् ।
क्वणयन् नाम वीणायां सद्यो निर्वृति[4]मेष्यसि ॥२७॥
इति श्रुत्वा तु देवर्षिः सहजादर्शनोत्सुकः ।
श्रीरामसहजास्थानमादिव्रजमुपाययौ ॥२८॥

---

१. इग्दु[1]—रीवाँ । २. °तनुरुचि°—रीवाँ । ३. यशोलोभ°—मथु०, बड़ो० । ४. सधीर्निवृति°—रीवाँ ।

प्रमोदविपिनं पूर्णं सर्वर्तुसुखसंपदा ।
ददर्श तत्र विमलं पद्मखण्डविराजितम् ॥२९॥
सहजानन्दिनीचारुचरणाब्जरजोऽङ्कितम् ।
रामप्रेमोत्थविरहमज्जद्व्रजवधूजनम् ॥३०॥
हंससारसचक्राह्वकादम्बकुलनादितम् ।
रमणीयं सरस्तस्मिन् स्नातुकाम[1] उपागमत् ॥३१॥
तत्र यावन्निमज्यासावुदतिष्ठन्मुनीश्वरः ।
तावत्तत्राभवद्दिव्ययोषित् सौभाग्यशालिनी ॥३२॥
सञ्जातरूपसौन्दर्यगर्वाङ्कुरमनोहरा ।
ततो निःसृत्य सरसः स्त्रीवस्त्रं परिधाय च ॥३३॥
अपश्यद्रामलीलाभिर्व्याप्तं प्रमुदकाननम् ।
प्रमोदवनवातेन वीजिता साभवत्तथा ॥३४॥
अन्तःप्रेममयीं वृत्तिं दधती चकिताभवत् ।
क्वाहं कुतः समायाता क्व यास्यामीति विभ्रमात् ॥३५॥
नाशकद्धृदयं रोद्धुं न शशाक च तर्कितुम् ।
ततो रुरोद साक्रोशं सा वामतनुरुच्चकैः ॥३६॥
न किंचिज्जानती कर्तुमेकान्ते निर्जने वने ।
ततस्तस्मिन् वने काचित् सहजायाः सखीगणात् ॥३७॥
विनिर्मुक्ता सखी प्राप्ता पुष्पावचयकर्मणि ।
वर्तमाना सुवेषाढ्या वस्त्रालङ्कारभूषिता ॥३८॥
सा वीक्ष्य वामां रुदतीमेनां प्रोवाच सौहृदात् ।
किमर्थं वत रम्भोरु रोदिषीह प्रमुद्वने ॥३९॥
स्वयूथतः परिभ्रष्टा प्रायस्त्वं वामलोचने ।
मा रोदीस्त्वामहं तत्र प्रापयिष्यामि भीरुकाम् ॥४०॥
इत्थमाश्वासिता सा तामुवाच मुनिरूपिणी ।
अहं हि सहजारामदर्शनार्थं समत्सुका ॥४१॥

---

१. °कर्मा—रीवाँ ।

अतो मां प्रापय परं यत्र तौ संप्रतिष्ठितौ ।
ततः सा तां समादाय यूथेश्वर्यै न्यवेदयत् ॥४२॥
सापि चान्यां स्वयूथेशीं सा चान्यां सापि चेतराम् ।
एवं क्रमेण सा नीता भाग्येन च सुभक्तितः ॥४३॥
मुख्ययूथेश्वरीं श्यामां सहजायाः प्रियां सखीम् ।
सा तां दृष्ट्वाभिनव्याङ्गीं पप्रच्छ हृदि विस्मिता ॥४४॥
कासि त्वं वद वामोरु वसतिः क्व च ते पुरे ।
साब्रवीन्ननु मां विद्धि यां कांचिद् व्रजवासिनीम् ॥४५॥
सहजारामयोर्नूनं दर्शनार्थे समुत्सुकाम् ।
दर्शयिष्यसि चेत्त्वं तौ तदिष्टं मे करिष्यसि ॥४६॥
संस्थाप्य[1] द्वारि तां श्यामा महतः कुञ्जसद्मनः ।
अन्तर्गत्वा प्रभोरन्तस्त[2]दागममवेदयत् ॥४७॥
प्रवेश्यतामन्तरिति प्रभोराज्ञामवाप्य च ।
श्यामान्तः सप्तमीं कक्षामानिनाय ततस्तु सा ॥४८॥
कयाचिद्वेत्रधारिण्या निरुद्धाभिनवत्वतः ।
श्यामाब्रवीद्वेत्रहस्तामियमन्तः प्रवेश्यताम् ॥४९॥
आज्ञा श्रीरामचन्द्रस्य वेत्रहस्ताब्रवीत्ततः ।
इदं श्रीसहजादेव्याः कुञ्जसद्म मनोहरम् ॥५०॥
नात्र श्रीरामचन्द्रस्य स्वातन्त्र्यं सखि विद्यते ।
ततः श्यामाब्रवीद् गत्वा सहजारामयोरिमाम् ॥५१॥
रामः श्रीसहजावक्त्रं ददर्श करुणानिधिः ।
प्रियस्याभिप्रायतश्च सहजाज्ञापयत् सखीम् ॥५२॥
आनयस्वेह तां श्यामे प्रियस्याज्ञा गरीयसी ।
ततस्तामानिनायासौ मुनिं स्त्रीवेशधारिणम् ॥५३॥
तं तथावेशिनं दृष्ट्वा जहास सहजेश्वरी ।
वदनांशुच्छटाजालैर्द्योतयन्ती निकुञ्जकम् ॥५४॥

---

१. संशय्य—रीवाँ, २. प्रभोरन्ति तदा°—रीवाँ ।

ततः कौतूहलेनासौ पप्रच्छ कपटस्त्रियम् ।
कस्मिन् ग्रामे वसस्यद्धा[1] किं च ते नाम कामिनि ॥५५॥
ततस्तद्दर्शनोद्भूतप्राचीनस्मृतिमानयम् ।
अहं नारदसख्यस्मीत्येवमुत्तरमब्रवीत् ॥५६॥
ततः श्रीसहजादेवी प्रोवाच स्मितपूर्वकम् ।
दृश्यतां प्रिय नैतस्य मुनेरद्यापि निर्गतः ॥५७॥
पूर्वजन्मोत्थसंस्कारस्तन्नात्र स्थातुमर्हति ।
ततो रामः स्वयमपि स्मित्वा प्रोवाच नारदम् ॥५८॥
मुनिपुङ्गव यद्भुक्तिप्रसादस्तेऽजनि स्फुटम् ।
यदत्र रहसि प्राप्तः परन्त्वद्यापि नो गता ॥५९॥
वासना पूर्वदेहोत्था तन्नात्र स्थातुमर्हसि ।
स्वनाम्नैवाङ्कितेे[2] कुण्डे प्रेमचर्यां चरन् रहः ॥६०॥
चिरं तिष्ठ व्रजजनपादपद्मरजो वहन् ।
ततः कालेन भविता संपूर्णस्ते मनोरथः ॥६१॥
इत्याज्ञप्तः स रामेण सख्या निःसारितस्ततः ।
स्थिते नारदकुण्डेऽत्र प्रेमचर्यामुपाश्रितः ॥६२॥
संदर्शनं तस्य कर्तुं भवानुपगमिष्यसि ।
तावदायाति गोपेन्द्रो गृहीत्वा भोज्यसंविधाम् ॥६३॥
ततो जगाम नृपतिर्नारदं द्रष्टुमानसः ।
परिवारगणैः साकं तीर्थयात्रासु निष्ठितः ॥६४॥
स्नात्वा नारदकुण्डस्य सुधास्वादुतमे जले ।
पीत्वा च पङ्कजश्रेणीपरागौघविचित्रितम् ॥६५॥
सस्त्रीकः परिवारेण सहितो नृपसत्तमः ।
महतीं मुदमापासौ तीर्थस्यास्य प्रभावतः ॥६६॥
स तत्तटमधिष्ठाय तिष्ठन्तं मुनिपुङ्गवम् ।
सर्वभक्तगणश्रेष्ठं ददर्श खलु नारदम् ॥६७॥

---

१. कस्मिंस्त्वं निवसस्यद्धा—रीवाँ । २. कृते—रीवाँ,

अग्रहीत् तस्य चरणौ प्रश्रयावनतो नृपः ।
भक्तराज इति ज्ञात्वा ननाम च मुहुर्मुहुः ॥६८॥

राजोवाच

अहो ते मुनिशार्दूल भाग्यं किं वर्ण्यते मया ।
यस्त्वं ददर्श तामाद्यामादिलक्ष्मीं रमापतेः ॥६९॥
प्रियेण संगतां सम्यग् रामेण प्रेयसानिशम् ।
तस्याः कृपाकटाक्षेण भक्तिस्ते नित्यमूर्जिता ॥७०॥
दर्शनात् तव भक्तस्य नृणां प्रेमाङ्कुरो भवेत् ।
अहोऽहं त्वां प्रपन्नोऽस्मि भक्तिलाभसमुत्सुकः ॥७१॥

नारद उवाच

अहो नृपतिशार्दूल किं पूजयसि मां वृथा ।
[1]कुत्र लब्धा मया भक्तिरस्य नित्यविलासिनः ॥७२॥
भवेज्जनः क एतस्य रामस्य स्नेहभाजनम् ।
तस्यानुग्रहतः किंचिद् भविष्यति किमद्भुतम् ॥७३॥

राजोवाच

विलोक्य रूपमेतस्य विनयप्रश्रयं तथा[1] ।
साक्षाद्भवति वात्सल्यं मम भूयो विवृद्धिमत् ॥७४॥
पश्चात्तु तस्य माहात्म्यं स्मारं स्मारं रमापतेः ।
सद्यो विनष्टवात्सल्यो भवामि मुनिसत्तम ॥७५॥

नारद उवाच

धन्योऽसि यस्य ते रामे जायते प्रेम वृद्धिमत् ।
माहात्म्यज्ञानमुचितं तस्य वै परमात्मनः ॥७६॥
नूनं नृपतिशार्दूल त्वयि भूयाननुग्रहः ।
यत्स्वं श्रीरामचन्द्रस्य चुचुम्ब मुखपङ्कजम् ॥७७॥
तस्य मूर्द्धन्युपाघ्राय समालिङ्ग्य च तद्वपुः ।
दूरादायान्तमालोक्य गृह्णसि स्वाङ्कमध्यतः ॥७८॥

१—१. नास्ति—रीवाँ ।

ईदृशोऽस्य सदा भावो ब्रह्मादीनां सुदुर्लभः ।
भावेऽस्मिन्नमृताम्भोधौ मग्नस्तिष्ठ चिरं नृप ॥७९॥
अपास्य सर्वमाहात्म्यमैश्वर्यं[1] भूतमद्भुतम् ।
पुत्रवात्सल्यभावेन रञ्जितो भव भूपते ॥८०॥

ब्रह्मोवाच

ततो नत्वा मुनिश्रेष्ठं शिवकुण्डं गतो नृपः ।
तत्र स्नात्वा शिवोऽप्यास नारीरूपधरः क्षणात् ॥८१॥
ततोऽसौ योग्यतां प्राप्य सहजानन्दिनीसखीम् ।
रामं लीलारसोपेतं ददर्श तदनुग्रहात् ॥८२॥
तत्र स्नात्वा नृपो दत्त्वा विप्रेभ्यो बहुलं धनम् ।
मुदा परमया युक्तो भूयो मञ्जुवटं गतः ॥८३॥
सुकण्ठाद्या यत्र गोपाः प्रभोरेकान्तसेवकाः ।
आसते परमप्रेमपुलकाङ्कुरविग्रहाः ॥८४॥
तैरेव संगतो राजा परमानन्दनिर्भरः ।
पुनः श्रीरामचन्द्रस्य वार्तयन् विशदान् गुणान् ॥८५॥
यावदास मुहूर्तेन तावत्सुखित आगतः ।
सारवे विमले तोये कृतनित्यक्रियो बुधः ॥८६॥
गृहीत्वा भोज्यसंभारं प्रसादं श्रीरमापतेः ।
तेनासौ तर्पयामास राजानं परिवारकैः ॥८७॥
अन्तःपुरपरीवारं वाह्यांश्च नृपसेवकान् ।
कैकेयीं नृपतिं चैव तोषयामास गोपतिः ॥८७॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे पूर्वखण्डे दशरथतीर्थयात्रा-यामादित्रजागमने एकत्रिंशदधिकशततमोऽध्यायः ॥१३१॥

१—सीतापतेः—रीवाँ ।

द्वात्रिंशदधिकशततमोऽध्यायः

ब्रह्मोवाच

अथ मञ्जुवटच्छायामध्यास्य नृपसत्तमः ।
व्रजवासिकरानीतभोजनैस्तृप्तिमाचरत् ॥ १ ॥
सर्वैः परिकरैः सार्द्धं कैकेय्या सहितो नृपः ।
दधिभिश्चन्द्रसुस्निग्धैर्दुग्धैश्चावर्तितैर्मुहुः ॥ २ ॥
सिताक्तैस्तद्विकारैश्च तत्रान्नैः पायसादिभिः ।
प्रकारसंविधाभिश्च बभूव सुहितो भृशम् ॥ ३ ॥
उवाच नृपशार्दूलः सुखितं गोदुहां पतिम् ।
अहो मे नेदृशी तृप्तिः कदाचिदपि चाभवत् ॥ ४ ॥
राजभोगैरविरसैर्भोजनैश्च पृथग्विधैः ।
सोऽयं भवत्करस्यैव माहात्म्यं सुखिताधिप ॥ ५ ॥
यत्र श्रीरामरसिको मनस्तोषकरान् रसान् ।
भुञ्जानः सुहितो जातस्तत्रान्यस्य तु का कथा ॥ ६ ॥
माहात्म्यं सुखिताधीश देवानामपि दुर्लभम् ।
आस्वाद्य मम चित्तस्य जायते प्रीतिरद्भुता ॥ ७ ॥
अलौकिकं वतेदं नो भोजनं सुखितेश्वर ।
परमानन्दजननं मनःप्रीतिविवर्द्धनम् ॥ ८ ॥
अहो अपूर्वा सामग्री मनःप्रीतिविवर्द्धिनी ।
अहो वतैतच्चातुर्यं किमपि व्रजवासिनाम् ॥ ९ ॥
अहो आनन्दसंदोहो हृदये मेऽभिवर्द्धते ।
एवं प्रीतिं दधद्राजा बुभुजे व्रजमण्डले ॥१०॥
अथ वक्ष्यामि षट्त्रिंशच्छाकभेदान् हरिप्रियान् ।
यैः स्वयं सुहितो राजा प्रीतिमानभवद् व्रजे ॥११॥
भर्जितं च भडित्रं च राज्यात्तं मधुरान्वितम् ।
तथा चणकचूर्णाक्तक्वथिता वटकास्तथा ॥१२॥

तथैव पक्ववटिकाः क्वथिता मधुराम्लयोः ।
पर्पटास्तिलवट्यश्च कूष्माण्डवटिकास्तथा ॥१३॥
कर्चरीपत्रवटिका वटकाश्चन्द्रसेनकाः ।
तथा ते दधिमध्वक्तास्तथा शिखरिणीरसः ॥१४॥
शिखरिण्याश्च वटिका वासोन्ध्यार्वाततास्तथा ।
मलायी राजिका वोजी खण्डला द्विदलापि च ॥१५॥
आचारोद्गोलका[1]श्चैव लवणो मधुरोऽम्लकः ।
तथा सुखदकोलुञ्जी तथा कच्चटिकापि च ॥१६॥
तथा फलस्य वटका भ्रष्टक्वाथोदधिप्लवाः ।
काञ्जिका चापि माहेयं दुग्धमार्वाजतं तथा ॥१७॥
षट्त्रिंशदिति विख्याता व्यञ्जना रामसुप्रियाः ।
उक्ताः श्रीसहजादेव्या सुपचायै प्रियालये ॥१८॥
षट्पञ्चाशद्धरेर्भोगाः समाख्यातास्तु नामतः ।
भक्तं श्वेतं च पीतं च मिष्टमम्लावटीयुतम् ॥१९॥
दध्यक्तं पायसं रोटी वाटीस्थूली च पूरिका ।
कोचोटिका वेष्टानिका परिवेष्टाश्च मङ्कुकाः ॥२०॥
अपूपिका लुञ्चिकाश्च मात्यपूपास्तथैव च ।
आदर्शः स्थपटी माठा गुह्यकाः खाद्यकास्तथा ॥२१॥
तथा सार्करपाराश्च तथैव जलवल्लिकाः ।
सेवविन्दुकमुद्गालचुण्डमोहनलड्डुकाः ॥२२॥
शतपत्रं घृतवरं नवनीतवटास्तथा ।
तथा दधिवटाश्चारु कलिकाः फेणिकास्तथा ॥२३॥
तथैव क्षीरवटका दधिरोटास्तथैव च ।
पापची सीरिका चैव तथा मोहनथालकाः ॥२४॥
लम्पासिका च मिष्टाम्ला कंशारः खण्डमण्डलाः ।
कर्पूरनाडिका चैव तथा कर्पूरमञ्जरी ॥२५॥

---

१. आचारो झोलकश्चैव –रीवाँ ।

मेवातिका चक्रिका च शुष्कवटचुस्किरा तथा ।
समोषा स्वर्गमध्या च खर्जूराः पेटकास्तथा ॥२५॥
वटेली त्रिगिणी चैव तथा सौगन्धिकीति च ।
एते श्रीरामचन्द्रस्य प्रियभोगा रसावहाः ॥२७॥
श्रीमत्सहजया सख्यै सुपचायै प्रबोधिताः ।
तानास्वाद्य महाराजः प्रीतिमानभवद्धृदि ॥२८॥
व्रजवासिकरानीतैः श्रीरामस्य प्रियैस्तथा ।
फलैः प्रमोदवनजैः परां प्रीतिमवाप सः ॥२९॥
प्रीणयित्वा नृपं गोपः सर्वगोपजनैः सह ।
स्वयमप्यतुलं भोज्यं भोक्तुमाज्ञां गृहीतवान् ॥३०॥
तथा सुकण्ठनामानं श्रीमद्रामसखं नृपः ।
पुनः पप्रच्छ यत्किंचिद्गोपीनां स्नेहवृत्तकम् ॥३१॥
राज्ञा सदैव संयुक्तः सुकण्ठः प्रीतमानसः ।
उवाच स्नेहवाक्यानि गोपीनां रामगोचरे ॥३२॥

सुकण्ठ उवाच

यदि गाश्चारयित्वासौ सायमेति व्रजालयम् ।
तदा तद्विरहव्याप्ता ब्रुवन्तिस्म व्रजाङ्गनाः ॥३३॥

गोप्य ऊचुः

अयमेति सख्य द्रुत आदृताशयः स्निहिपुष्टिदक्षिणमनाः सुकामुकः ।
नयने निभालयत चापलान्विते लसता श्रिया किमपि पूरितान्तरे ॥३४॥
सुषमाभरेण किमपीव घूर्णिते मदनस्य मानदमनाय पण्डिते ।
न चकोरखञ्जनसरोजधोरणी तुलनामवाप्तुमुचितानयोः क्वचित् ॥३५॥
अयमङ्गनाजनमनोज्ञवृत्तकः क्वणयन्मुखेन मुरलीं यदालयः ।
किमपि प्रगायति रतिस्पृशो गुणान् वदत श्रुतिष्वयति कीदृशी दशा ॥३६॥
अनवेक्षितेक्षणपुरस्थवस्तवः स्थिरतन्व उत्तभितकर्णलोचनाः ।
हरिणाङ्गना अपि विहाय निर्भरं रतिमादृताः किमपि खल्वचिन्तयन् ॥२७॥
अयमुद्भ्रमद्भ्रुकुटिलायतेक्षणो मुकुलीकृताननविधुस्त्रिभङ्गधृक् ।
अपि वामबाहुगतवामगण्डभृत् करयुग्मकाधरपुटस्थवंशिकाम् ॥३८॥

यदि सख्य आकलयति[1] स्वरामृतैर्हृदयस्य का वत दशा विलोक्यताम् ।
विरहार्णवे चिरतरं विमज्जति प्रसभोद्धृतं वहिरेति शून्यताम् ॥३९॥
वयमात्तकोटिकुसुमेषु माधुरीमदसंहृतिः सहजवेषविभ्रमैः ।
रमणो मनोज्ञमुरलीमुखं दधद् यदि सख्य एति विपिनाद् व्रजोन्मुखः ॥४०॥
कुलजागणो वत विहाय ह्रत्त्रपां सदनं च शीलमतनुस्पृहावशः ।
सहते हतेहजनजन्यनिन्दनं न तु कष्टमस्य विरहोद्भवं महत् ॥४१॥
अयमालयो विशति गोष्ठमण्डलीं यदि सस्मिताननविलोललोचनः ।
कलितत्रिभङ्गललिताकृतिः पथि क्वणयन् मुखेन मुरलीमहोद्धुरम् ॥४२॥
तदपास्य धामसुतभर्तृसौहृदं विरहातुरः किमपि धावति स्फुटम् ।
कुलजागणोऽपि कुलटोचितक्रियः क्वचनाम्बरं क्वचन भूषणं तनोः ॥४३॥
अयमेति धेनुखुरधूलिधोरणीपरिधूसरालकसुपिच्छमाल्यभृत् ।
यदि नर्तयन्[2] भ्रुकुटिमङ्गनागणे मधुरस्मितं स्पृशति लोचनं ततः ॥४४॥
तदसौ तदा तु सुषमावलोकनो न किमप्यवैति परिमोहिताशयः ।
निमिषान्तरे नु शयनान्तरे लुठन् परिवर्तनैः क्षपयते निशां कथम् ॥४५॥
अयमेव देवगणसेविताङ्घ्रिकः कमलाविलासभवनोत्तमाकृतिः ।
यदि धूनयन् कुलकथां मृगीदृशामित आदधाति चरणौ स्वतोऽरुणौ ॥४६॥
तदमुष्य पश्यत गतिं किमालयो हृदयानि मार्दयति धैर्यवन्त्यपि ।
किमुताधिरोहयति मन्मथद्रुमं कुलकामिनीनिवहचित्रभूमिषु ॥४७॥
अयमीक्षणोपगतिरेति संमुखं मुखरीकृताधरगवंशिकाकरः ।
ध्रुवमालयो झगिति यर्हि लोचनैर्विनयन् मनस्वितमकामिनीमनः ॥४८॥
ननु तर्हि पश्यत सखीजनाङ्गनामनसो दशां विरहसिन्धुमज्जनः ।
मदमोहमूर्छितकशङ्किता भयश्रमदैन्यधैर्यमुखभावचित्रिता ॥४९॥
अयमुन्मुखो व्रजपुरस्य वर्तते वत पुष्पनिर्मितमनोज्ञभूषणः ।
मुरलीरवेण मदनप्रजागरं कलयन् प्रतिप्रमदमुच्चकैर्यदि ॥५०॥
तदमुष्यवक्त्रविधुदर्शनोद्भुवैरमृताम्बुभिर्ज्वलितमात्मनो हृदि ।
शमयन्ति काश्चन वियोगपावकस्निहिसंगमद्विगुणकीलवर्द्धनम् ॥५१॥

---

१. सम्यगाकल°—रीवाँ । २. तेजयन्—रीवाँ ।

अयमागतो विशदवल्गुमोहनस्मितमाधुरीभिरभिपूरितानन: ।
यदि पश्यति प्रणयपूर्वमालय: किमु तर्हि वाच्यमदसीयवृत्तकम् ॥५२॥
स्वरतो हरिण्य इव मोहिताशया: परितोऽभिवेष्टच ननु योषित: स्थिता: ।
सुखपूर्वकग्रहणयोग्यविग्रहा: स्थिरतामगुर्जनितचित्तविक्लवा: ॥५३॥
अयमालय: समुपयाति काननाद् यदि पुष्पवर्हगिरि[1]धातुचित्रित: ।
नटवर्यवेशकमनीयतां दधद्बुधवर्ण्यनूतनकिशोरतागुण: ॥५४॥
चकमेऽस्य काप्युरसि सज्जितुं दृढं तृषमेति कापि मुखमाशु चुम्बितुम् ।
स्वपितुं च कापि शयनेऽमुनालषद् पतितुं च कापि पदयोरचीकमत् ॥५५॥
अयमेकवीर उदयं दधद् भुवि प्रतिवासरं विरचयन् यश: सितम् ।
सुखितस्य धेनुपरिपालनव्रतो रिपुवर्गकालननिबद्धकक्षक: ॥५६॥
दिवसस्य संपरिणतौ विधुर्यथा दिनतापनाशनपटु:[2] समागत: ।
व्रजलोकमङ्गलनिधिर्व्रजेश्वरो व्रजमोहनो व्रजपतिर्व्रजाधिप: ॥५७॥
अयमाकुलीकुरुत आत्मनो रुचा रतिहेतुना स्मरपरार्द्धजैत्रिणाम् ।
त्रिदिवाङ्गनाजनवियोगवर्द्धनो भुवनोत्सवाकरचरित्रवर्द्धन: ॥५८॥
नटयत्यजस्रमबला वियोगिनी: प्रणयाख्यसूत्रसितशालिभञ्जिका: ।
ग्रहतोऽङ्गणेऽङ्गणत आश्रिता गृहं विचरन्ति नि:श्रमणिकाट्टदेहली: ॥५९॥
अयमाश्रितावनविचक्षणोऽपि सन् विविधार्तिसंहरणपण्डितोऽपि सन् ।
अबलाजनं सखि वितीर्य चित्तभूषालहस्तयो: स्वयमुदासिताशय: ॥६०॥
नहि न: स खल्ववति तादृशी: सती: पुरुविप्रयोग परमार्तिभागिनी: ।
अपि नास्य कीर्तिरतुलान्यथा भवत्यवनौ न चापि विगुणोऽस्य वर्द्धते ॥६१॥
अयमालय: परिगतौ दिनस्य चेदुपयन् व्रजं व्रजनरेन्द्रलालित: ।
निजलोचनान्तकलया निमन्त्रयत्यबलागणं निजनिकुञ्जकेलये ॥६२॥
तदिमा:[3] प्रतीत्य सकला अपि स्त्रियो निजगेहकार्यपटलानुबन्धनम् ।
सहसा विहाय दयितस्य तुष्टये ननु भूषयन्ति तनुमात्तविभ्रमा: ॥६३॥
अयमक्षिकोणगतिभिर्निमन्त्रिता व्रजसुभ्रुव: सुखयति प्रियोत्तम: ।
यदि तर्हि तास्तदनुचिन्तनावशाद्विवशाशया दधति पीडनं तनौ ॥६४॥

---

१. मुख्यवर्णिह°—रीवाँ । २. °यापनवटु:—मथु० बड़ो० । ३. त्रिदिशं—रीवाँ ।

करयोः पदे चरणयोः करद्वये कटिगं गले गलगं कटौ[1] न्यधुः ।
श्रवणे दिशन्ति नयनाञ्जनं दृशोरधरोचितद्युतिमलक्तकं दधुः ॥६५॥
अयि कान्त गाढमुरसि त्वमास्यतां नयनद्वयान्नविचलत्वमद्भुतः ।
अपि नो गृहाण विरहाब्धिमज्जनीः स्वकरावलम्बविधिना स्वभावतः ६६
यदपीश षोडश कलाः प्रदर्शयन् परिपूर्ण एव स भवान् विलोक्यते ।
तदपि स्त्रियः सुकुटिलाः कलानिधिं विकलं स्वभावभजनं विनान्यगुः॥६७॥

सुकण्ठ उवाच

इतिवर्णितरूपोऽयमाभीरवरदारकैः ।
विवेश गोष्ठं सायाह्ने पूर्णमाधुर्यमण्डितः ॥६८॥
गोदोहपात्रं करयोर्निधाय व्रजाङ्गना रामविलोकनोत्सुकाः ।
विगाढ सायं समयान्धकारसहायभाजः स्म विशन्ति गोष्ठम् ॥६९॥
तत्रान्योन्यं दिनजविरहोन्मोकसम्यक्प्रकाशं
स्निग्धालापेक्षणमिलनसंप्रश्नसंमाननाद्यैः ।
स्पर्शास्पर्शप्रभवकलनाचुम्बनालिङ्गनाद्यैः
कश्चित्केलीरस उदयते निर्जितानङ्गबाणः ॥७०॥
यावच्चित्ताभिलाषं व्रजवरवनिता गोष्ठभूषु प्रियेण
स्वच्छन्दं संविहृत्यामृतसमपयसा पूर्णपात्राणि हस्ते ।
बिभ्राणा ज्ञाततत्त्वा प्रणयिपरसखी जातनर्मेतिहासाः
स्वासोच्छ्वासानुलक्ष्यप्रचुरविहरणा आत्मधामानि जग्मुः ॥७१॥
य एतदानन्दनिधेः शृणोति सायं प्रवेशं विपिनाद्व्रजान्तः ।
निर्धूय सर्वान् हृदयस्य कामान् रामानुरागं समुपैति लोकः ॥७२॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे पूर्वखण्डे दशरथतीर्थयात्राया-
मादिव्रजागमने द्वात्रिंशदधिकशततमोऽध्यायः ॥१३२॥

१. कटिमंडले च गलगण्डयोः—रीवाँ ।

त्रयस्त्रिंशदधिकशततमोऽध्यायः

ब्रह्मोवाच

भुक्तोत्थितस्तदा गोपराजः शेषं रमापतेः[1] ।
प्रसादतुलसीपत्रैर्मुखं संशोध्य दिव्यधीः ॥ १ ॥
आजगाम नृपश्रेष्ठं श्रीमन्मञ्जुतरोस्तले ।
वार्तयन्तं सुकण्ठेन रामसम्बधिनीः कथाः ॥ २ ॥

सुखित उवाच

कच्चिन्नृपतिशार्दूल श्रुतं सम्यक् सुकण्ठतः ।
कच्चित्तव मनस्यासीत् प्रसादः शृण्वतः परम् ॥३॥
अयं पुरुषवर्यस्य रामस्यामितकर्मणः ।
सखा सुहृद्रहस्येषु समक्षः सकलेष्वपि ॥ ४ ॥
या यास्तस्य शुभा लीलाः सतां गोपा सुपावनीः ।
वाह्याभ्यन्तरभेदेन वेदितास्ताः सुकण्ठकः ॥ ५ ॥
रहस्यविद्रामचन्द्रस्य लीलानां रसवेश्मनाम् ।
समुच्छलत्परप्रेमधारास्नपितचेतसाम् ॥ ६ ॥
यासां स्वरूपं विज्ञातुं ब्रह्माद्या अपि देवताः ।
नालं सहस्रवदनो यत्र शब्दोऽप्यमुह्यत ॥ ७ ॥
पारे वाङ्मनसं तस्य वृत्तमेकैकमद्भुतम् ।
आनन्दस्य पराकाष्ठा यत्र सम्यक् प्रतिष्ठिता ॥ ८ ॥
यस्मै कृपायति त्वेष दास्यन् स्वप्रेम दुर्लभम् ।
तस्य प्रकाशयत्यन्तर्लीलामानन्दरूपिणीम् ॥ ९ ॥

राजोवाच

सत्यमेतत्कथयसि गोपराज सतां भुवि ।
दुर्लभः प्रेमसम्बन्धो रामस्याद्भुतकर्मणः ॥१०॥

---

१. सीतापतेः—रीवाँ ।

धन्यास्ते तत्र यूयं प्रमुदवनलतापुष्पसौरभ्यसारै-
र्विष्टैर्घ्राणाध्वनीतस्तुलसिपरिमलैः शोधिताशेषदेहाः ।
लीलामानन्दरूपामनुभवथभवे भावुकैकान्तधाम्नो
रामेन्दोः सत्प्रमोदाटविविहृतिकलामण्डलाखण्डितस्य ॥११॥

भवतां ये च पार्श्वस्थाः प्रेमानन्दशरीरिणाम् ।
तेऽपि प्रेमकलाभाजो भवन्ति भुवि मानवाः ॥१२॥
अलौकिकी प्रेमवृद्धिः प्रमोदवनवासिनाम् ।
चन्दनानामिव तरून् गन्धः स्पृशति मानवान् ॥१३॥
कर्मोपास्तिज्ञानमार्गेष्वुत्तरोत्तरतः शुभे ।
सर्वेषां शुभकृत्प्रेम भवतामूर्जितं महत् ॥१४॥
भवतां भावपाथोब्धौ निमज्जति सतां मनः ।
प्रेमरत्नवरप्राप्तिहेतवे सुखहेतवे ॥१५॥
सुकण्ठस्य मुखोद्गीर्णं प्रेमचारित्रकं प्रभोः ।
श्रुत्वा गोपालराजाद्य मयि प्रेमाङ्कुरोऽभवत् ॥१६॥
त्वदादेशात् सुकण्ठो मे कृपयामास गोपते ।
रहस्यं रामचरितं चक्रे मत्कर्णगोचरम् ॥१७॥
शितिकण्ठादपि श्रेष्ठः सुकण्ठो रामवल्लभः ।
ब्रह्मानन्दादपि श्रेष्ठः प्रेमानन्दरसो ह्ययम् ॥१८॥
भावेनानुगृहीतोऽस्मि त्वया सुखितवित्तम ।
भवतां कृपया रामः स्वरूपं कलयिष्यति ॥१९॥
गोपलीलापरिकरे क्रीडन्तं विश्वसुन्दरम् ।
सर्वाङ्गणे स्थितं रामं कदा द्रक्ष्यामि चक्षुषा ॥२०॥
केकिपिच्छकृतोत्तंसं गुञ्जाहारविभूषणम् ।
लीलारसानन्दमयं रामं द्रक्ष्यामि वै कदा ॥२१॥
प्रमोदवनमध्यस्थं परं ब्रह्म रसात्मकम् ।
भक्तप्रेमानुरागेण प्रकाण्डं कलये कदा ॥२२॥
अपि भूयोऽपि मे ब्रूहि प्रमोदवनमध्यतः ।
धामानि रामचन्द्रस्य समाख्यातानि लीलया ॥२३॥

अतः परं यानि शुभानि लोके रामश्चरित्राणि चकार खेलन् ।
आख्याहि तानि प्रचुराणि विद्वद्वरेण्य गुण्यानि मनोरमाणि ॥२४॥
सुखिताधिप ऊचिवान् पुनः शृणु राजेन्द्र निगद्यते मया ।
चरितानि बहूनि सत्पतेर्व्रजभूम्यां वसतोऽत्र मद्गृहे ॥२५॥
बाल्यपौगण्डकैशोरेष्वाख्यातानि मया पुरा ।
शिष्टानि ते तथावोचत् सुकण्ठोऽत्र समागतः ॥२६॥
अन्यानि ते पुनर्वक्ष्ये यावत् साकेतमागतः ।
एकदाहं सिताष्टम्यां चण्डिकामर्चितुं गतः ॥२७॥
श्मसानस्थां श्यामलेशानीं साक्षान्महिषमर्दिनीम् ।
रात्रावुपोषितः स्नातः पूजयित्वा हरप्रियाम् ॥
चकार चोत्सवं तत्र गीतवाद्यपुरःसरम् ॥२८॥
तत्प्रीतये द्विजवरेभ्य उपागतेभ्यो
गाः स्वर्णरत्नवसनानि वितीर्य भूरि ।
अन्नानि पायसमुखानि च भोजयित्वा
हुत्वाधिवह्नि समदां बहु दक्षिणाश्च ॥२९॥
कुटुम्बं भोजयित्वा च दधिदुग्धफलादिभिः ।
शाकं गोपवरैस्तत्र निशीथात् परतः स्वयम् ॥३०॥
सुप्तं मां कश्चिदुरणः समागत्य पदेऽग्रसत् ।
तेन ग्रस्तपदः क्रोशन् प्रबुद्धोऽहं निशान्तरे ॥३१॥
दृष्ट्वा महाजगरमग्निशिखाप्रदीप्तनेत्रद्वयं प्रचलदुद्भटविस्फुलिङ्गम् ।
भीतोऽहमार्तकरुणारवपूर्णवक्त्रश्चुक्रोश तेन परितो ब्रजवासिनां गणः[1] ३२
स च तैर्हन्यमानोऽपि लोष्ठाश्मलकुटादिभिः ।
नामुञ्चन्मां ततो रामः स च स्वयमुपागमत् ॥३३॥
कृतमच्चरणग्रासं पदा स तमताडयत् ।
आराधितेन मुनिभिरहल्याशापहारिणा ॥३४॥
स्पृष्टमात्रः स तेनाङ्घ्रिकमलेन महानतिः ।
नीचां तां योनिमुत्सृज्य दिव्यं रूपमवाप ह ॥३५॥

---

१. °वासिनोऽगुः—मथु० बड़ो० ।

तमुवाच हसन् रामः कथं भोः कामसुन्दरः ।
कस्माच्चैतादृशीं योनिमापन्नः प्राणिभीषणीम् ॥३६॥
अब्रवीत् स तमानम्य नमस्ते पुरुषोतम ।
त्वदङ्घ्रिकमलोद्भूतप्रसादान्मोचितोऽस्म्यहम् ॥३७॥
अहल्या मोचिता येन स्वस्य प्रस्तरभावतः ।
भगीरथस्य सचिवः सर्पभावाच्च मोचितः ॥३८॥
तथान्यो दुष्टकालाहिः सारवे सलिले वसन् ।
मोचितो घोरसंसाराद् गरुड़ाच्चापि निर्भयः ॥३९॥
अन्ये च बहवः प्राप्तास्त्वामेव हि दयानिधे ।
ब्रह्मक्षत्रियविट्शूद्रा मोचिता घोरसंसृतेः ॥४०॥
तदेव तेऽङ्घ्रिकमलमतिमानसं व्यथाहरं कलिकलुषापहं मे[1] ।
महातुरस्येह ममोपकारं कृपावशात् समजनि भूरि भव्यदम् ॥४१॥

स्वभावस्ते नाथ त्रिभुवनमहाक्लेशहरणं
नृणां भूयः श्रेयोवितरणमहाव्यूहदलनम् ।
महामोहध्वंसोऽशुभविदलनं कालभयहृत्
कियानेष स्वामिन् तव मम समुद्धारणविधिः ॥४२॥
अहं चन्द्रमुखो नाम गन्धर्वप्रवरः प्रभो ।
व्योमयानं समारूढश्चचार विदिशो दिशः ॥४३॥
वनिताभिः सेव्यमानो माध्वीकग्रहणोन्मदः ।
रूपसौन्दर्यमत्तश्च कुलस्याभिजनोन्मदः ॥४४॥
क्वचिद्वै दत्तशर्माणमात्रेयं मुनिपुङ्गवम् ।
दिगम्बरतनुं वीक्ष्य स्वात्मारामं जहास ह ॥४५॥
तस्योपस्थमहं नग्नं विरूपतरदर्शनम् ।
लीलाकमलपत्रेण छादयामास दुर्मतिः ॥४६॥
समोपहसितः क्रोधाच्छशाप मुनिरात्मधीः ।
एवं कुटिलचित्तस्त्वं सर्पं वपुरवाप्स्यसि ॥४७॥

---

१. भो—मधु०, बड़ो० ।

ज्ञात्वा प्रसादितश्चासावब्रवीत् करुणाकरः ।
श्रीरामचरणस्पर्शात् प्रकृतिं स्वामुपैष्यसि ॥४८॥
अनुग्रहः कृतस्तेन मुनिना शापकैतवात् ।
चराचरगुरुः साक्षाद्यतो दृष्टो भवानिह ॥४९॥
नमस्ते पुरुषाग्र्यायापौरुषप्रतिमौजसे ।
पुरुषार्थचतुष्कैकदायिने शुभदायिने ॥५०॥
अगाधबोधभवनमगाधानन्दसागरम् ।
लोकवत्केलिकैवल्यं त्वामहं शरणं गतः ॥५१॥

पारेपरार्द्धनवपञ्चशरावतारं श्रीमत्प्रमोदवनशारदपूर्णचन्द्रम् ।
आभीरिकानयनजीवनदानदक्षं नित्यं नमामि रघुवर्य परं भवन्तम् ॥५२॥
त्वत्पादपद्मपरिरम्भणतो मयाप्तं स्वं रूपमीश रघुपुङ्गव नाधुनाहम् ।
यास्यामि पूर्ववदलंमदमन्धकारं त्वामेव भक्तिरसभावधरो भजिष्ये ॥५३॥
हित्वा विमानमुरुमानमनङ्गमत्ताः [1]विद्याधरीशतकभोगविमोहमूलम् ।
त्वामच्युतात्मगतिदायिनमेकमीशं सेवेय सैव भवतान्मतिरप्रमत्ता[1]॥५४॥

इत्येवमप्यस्तु तवाधुना प्रभोरनुग्रहोऽनन्यजनैकसंमुखम् ।
त्वामेव सेवे रघुपुङ्गवाशिषं प्रपूरयाशेषवरप्रदानकृत् ॥५५॥
ब्राह्मं पदं प्राप्य विरञ्चिरीश्वर स्वामात्मनः क्षेमनिधिनिभालयम् ।
संसेवते कीर्तयते चतुर्भिःशस्यैः क्षणे विस्मरति क्वचिन्न सः ॥५६॥

असौ घोरस्वरूपोऽपि संसारविषभूरुहः ।
त्वामीश सेवमानानां विभाति गुणवन्नरः ॥५७॥
इति स्तुत्वा चिरं देवं वियोगभयकातरः ।
नत्वा नत्वा तदादिष्टो जगाम दिशमुत्तराम् ॥५८॥

अवाप्य हिमशैलस्य करा रत्नप्रदीपिताः ।
एकान्ततः समासीनश्चिन्तयामास तं प्रियम् ॥५९॥
तच्चिन्तनभरप्रेम परमाह्लादतुन्दिलम् ।
भक्तियोगमुपासीनस्तस्थौ त्यक्तपरिग्रहः ॥६०॥

१—१. नास्ति—रीवाँ ।

यस्य रामचरणाम्बुजातयोर्भाग्यतोऽजनि शुभंकरी रतिः ।
तस्य सर्वविषयानुशीलनं तुच्छवत्स्फुरति पूर्णचेतसः ॥६१॥
य इमां शृणुयाद्रामगुणकीर्तनगां कथाम् ।
सोऽपि मुच्येत संसारात् यथा चन्द्रमुखाह्वयः[1] ॥६२॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे पूर्वखण्डे दशरथतीर्थयात्रा-यामादिव्रजागमने त्रयस्त्रिंशदधिकशततमोऽध्यायः ॥१३३॥

चतुस्त्रिंशदधिकशततमोऽध्यायः

सुखित उवाच

किमत्र दुर्लभं लोके प्रसन्ने निखिलेश्वरे ।
किञ्चापि दुर्लभं राजन्नु प्रसन्ने परे प्रभौ ॥ १ ॥
अथापरां प्रभोर्लीलां शृणु राजर्षिसत्तम ।
महौदार्यगुणो यस्यामुद्देशेन स्फुटीकृतः ॥ २ ॥
अस्ति वै सूरिशर्मेति द्विजो वै मिथिलापुरे ।
अयाचितोपपन्नेन प्राणान् संजीवयन् गृहे ॥ ३ ॥
दरिद्रो दुर्बलः श्रान्तो व्यवहाराक्षमोऽधनी ।
दिनस्य तुर्ये भुञ्जानो यथासंपन्नमेव सः ॥ ४ ॥
तस्येन्दिरावती नाम भार्या क्षुत्क्षामविग्रहा ।
सा चार्थानामसंबन्धाद्धास्यमाना कुटुम्बिभिः ॥ ५ ॥
तपस्विनी महोदारा यथासंपन्नमेव सा ।
अर्धं निवेद्य विप्राय तदर्धं पतिपुत्रयोः ॥ ६ ॥
शिष्टं स्वयं सदा भुङ्क्ते इति सा प्रतिवासरम् ।
कुर्वती विप्रभार्या सा निर्वाहं सुतपस्विनी ॥ ७ ॥

---

१. °मुखाद्विषः—रीवाँ ।

एवं तयोराचरतोः कन्या जाता विधेर्वशात् ।
दरिद्रस्य पितुः कन्या मास्तु कस्यापि वै विधे ॥ ८ ॥
इति प्रार्थयतोरेव कन्या सा निरुजा भवत् ।
कृतनामक्रिया सातु नाम्ना चन्द्रमती धृता ॥ ९ ॥
दिने दिने वर्द्धमाना बभौ परिणयोचिता ।
अथ चिन्तातुरा जाता माता तस्यास्तपस्विनो ॥१०॥

इन्दिरावत्युवाच

अतः परं किं कर्तव्यं जातासौ तनया मम ।
प्रबुद्धोद्वहनौचित्यं बिभ्रती सुस्मिताननां ॥११॥
दारिद्राया मम सुतां कः खलूद्वोढुमिच्छति ।
अतोऽस्या दुर्लभो भर्ता समुदाये द्विजन्मनाम् ॥१२॥
मिलितोऽपि स्वापतेयं[1] विना सर्वक्रियावहम् ।
योजनीयोऽनया सार्द्धं कथमुद्वाहकर्मणि ॥१३॥
क्रियया चापि शाकादिर्भोजनीयः कथं खलु ।
इतिचिन्ताप्रदग्धायां न किंचिदुपतिष्ठते ॥१४॥
येन सा पतिसंबन्धं कारणीया पतिम्वरा ।
अथैकदा महासार्थस्तदाश्रममुपेयिवान् ॥१५॥
मद्गृहाद् गच्छतां पूर्णकामानां धनिनां नृणाम् ।
याचकानां गुणवतां सूतमागधवन्दिनाम् ॥१६॥
विप्राणां वेदविदुषां श्रीरामोपगतश्रियाम् ।
आनन्दिनां वार्तयतां रामस्य शुभगान् गुणान् ॥१७॥

जना ऊचुः

अहो साक्षाद्रामो जयति सुरवृक्षः क्षितितले
वितन्वन् सर्वेभ्यः सकलमसकृद्वाञ्छितफलम् ।
मनस्तुष्टचा युक्तः कलयति समूहं सुमनसां
द्विजांस्तत्तच्छाखा समुदयसुसंस्थाश्च सुखयन् ॥१८॥

---

१. "स्वापतेयं = धनं" टि०—मधु०, बड़ो० ।

रामो दाता राम एवास्ति पाता
रामो नामैकोऽर्थिनां सोऽभिरामः ।
इन्द्रश्चन्द्रः सूर्य ईशः कुबेरो
रामस्यांशा रचिता वेधसैव ॥१९॥

चिदानन्दागारं भुवनभयहारं नतिकृता-
मपारं संसारं हरति सविकारं सनिरयम् ।
महामेघश्यामं सदयमभिरामं नयनयोः
प्रकामं स्वारामं विरमयत रामं निज हृदि ॥२०॥

रामश्चेत्सर्वचेतोरमणगुणगणैराढ्य आनन्दरूपः
साक्षात्संसेवितस्तर्ह्यपरनृपतिभिः सेवितैः किं खलु स्यात् ।
नो रामः सेवितश्चेत् त्रिभुवनसुखदानन्दकेलीनिधानं
कारुण्यस्यार्णवस्तर्ह्यपरनृपतिभिः सेवितैः किं खलु स्यात् ॥२१॥

इत्थमालपतां तेषां सुवाक्यानि परस्परम् ।
दरिद्रयेन्दिरावत्या श्रुत्वा पत्ये निवेदितम् ॥२२॥

इन्दिरावत्युवाच

इह खलु वर्तते प्रमुदकाननराज इति प्रथितयशा
भुवि प्रणयिनां प्रणयन् कमलाः ।
अधिगतमङ्गलालय उदारकराम्बुरुहः
स जयति रामचन्द्र उदयं दधदस्खलितः ॥२३॥

तमुपसर प्रिय प्रणयिनोवचनादपि ते
सुजनितयानया क्षतमयाचितकं सुतया ।
अथ यदिमां वरे समुपयोज्य भवेः सुकृती
पुनरपि तादृगेव सहजं व्रतमस्तु सदा ॥२४॥

इत्युक्तः प्रियया विप्रः प्रमोदवनमाययौ ।
फलपाणिः प्रभुं द्रष्टुमितश्चेतश्च धावति ॥२५॥
तदा स चिन्तयामास ब्राह्मणोऽयाचितव्रती ।
कथं नु खलु रामस्य सविधे याचितास्म्यहम् ॥२६॥

अपि मद्वचने वाणी देहीत्यद्यावधि क्वचित् ।
नावतीर्णा साद्य कथं प्रादुर्भावमुपैष्यति ॥२७॥
इति चिन्ताज्वरोत्तप्तः पथि श्वासं समुत्सृजन् ।
निषसाद तरोर्मूले श्वासेन शुष्ककण्टकः ॥२८॥
तत्र प्राप्तः स्वयं रामोऽवतीर्णः प्रार्थितार्थदः ।
स यावदुत्थितोऽपश्यदग्रे पुरुषमुत्तमम् ॥२९॥
अदृष्टपूर्वसौन्दर्यसंपदं निस्तुलं त्विषा ।
सर्वाङ्गरुचिरं दिव्यवेशं राजीवलोचनम् ॥३०॥
सूरिशर्मा द्विजः पीत्वा तन्मुखं पद्ममञ्जुलम् ।
अवाप मुदमत्युच्चैर्नानुभूतां पुरा क्वचित् ॥३१॥

सूरिशर्मोवाच

कस्त्वं भोः पुण्डरीकाक्ष सुबाहो पुरुषर्षभ ।
रामं द्रष्टुमहं प्राप्तस्त्वां दृष्ट्वा मुदितोऽस्म्यहम् ॥३२॥
आजानुबाहुः सुखदः सुरूपः समूढवक्षाः कमलारुणाक्षः ।
स्मितानन: शोभितरत्नचूडः प्रत्यङ्गभूषारुचिभास्वरस्त्वम् ॥३३॥
दारिद्र्यानलतप्तोऽपि त्वां दृष्ट्वा शीतलोऽस्म्यहम् ।
जाने नृणां शोकनुदो विधिना त्वं विनिर्मितः ॥३४॥
तव नाम कुलं शीलं श्रोतुमुत्कण्ठितोऽस्म्यहम् ।
आख्याहि कृपया धीमन् यदि योग्यं मम श्रुतेः ॥३५॥

श्री भगवानुवाच

रामस्यानुचरः कश्चिदस्म्यहं निर्जने वने ।
नियुक्तः स्वप्रतिनिधिरतिथीनां समाहितौ ॥३६॥
वने स्वादुतमान्यस्मिन् फलन्ति विविधानि च ।
तर्पयाम्यतिथीनेतैः सारवेण च पाथसा ॥३७॥
एतावन्मम कर्तव्यं तदादेशादितोऽधिकम् ।
स एव कर्तुमुचितः सर्वसामर्थ्यसंयुतः ॥३८॥
स देवोऽद्य स्वयं यातः कामेश्वरमुपासितुम् ।
रक्ताशोकलताकुञ्जे निभृतः क्वापि वर्तते ॥३९॥

सूरिशर्मोवाच

अहो राममहं द्रष्टुमिहायातः प्रमुद्वने ।
कदा तद्दर्शनं लप्स्ये क्व च तन्मह्यमावद ॥४०॥

श्रीभगवानुवाच

न याति कुञ्जभवनाद् बहिरेषु वनेष्वसौ ।
दर्शनाकाङ्क्षिणो लोका बहवो विफलं गताः ॥४१॥
सुस्वादूनि फलान्येतान्यशान सुहितो भव ।
सारवं सलिलं पीत्वा तृप्तो गच्छ यथागतम् ॥४२॥

सुखित उवाच

इत्युक्तः स्वयमेवासौ रामेण निभृतात्मना ।
अयाचितव्रतध्वंसभीतस्तुष्टोऽभवद् द्विजः ॥४३॥
अद्यावधि व्रतं नित्यमक्षतं मम मौनिनः ।
विधिना पालितं यस्माद्रामो न मिलितो मम ॥४४॥
करिष्ये कन्यकायास्तु विवाहं येन केनचित् ।
वन्यैः फलैः पल्लवैश्च पूजयिष्ये सुतापतिम् ॥४५॥
पुष्पैः सुतां भूषयित्वा हरिद्राग्रन्थिभिस्तथा ।
यस्य कस्यापि विप्रस्य करिष्ये करगामिनीम् ॥४६॥
फलपल्लवपुष्पेषु सत्सु नाना वने वने ।
स्वयमेवोपपन्नासु वेदमन्त्रकुशास = ॥४७॥
किमन्याभिः संविधाभिः कन्य. ... भुवि ।
यदर्थं श्रीदुर्मदान्धान् याचन्ते दीनया गिरा ॥४८॥
अहं स्त्रियोपदेशेन स्वाश्रमाच्चपलीकृतः ।
तथापि रक्षितं धात्रा मदीयं नियतं व्रतम् ॥४९॥
इत्युक्त्वा हृदयेनासौ विप्रस्तामुपदां ददौ ।
तस्मै पुरुषवर्याय प्रोवाच च वचो मृदु ॥५०॥
मदाश्रमफलान्येतान्यागते रघुनायके ।
मन्नाम्ना प्रतिपाद्यन्तां मदाशीश्च निवेद्यताम् ॥५१॥

तेनायाचितदत्तानि फलानि सुरसानि सः ।
प्रास्य पीत्वा च सुरसं सारवं विमलं पयः ॥५२॥
तमामन्त्र्य नरश्रेष्ठं परमापोच्यदर्शनम् ।
स्वाश्रमाभिमुखो विप्रः प्रतस्थौ वै प्रमुद्वनात् ॥५३॥
अथापश्यदसौ दूरात् स्वाश्रमस्थानमाकुलम् ।
सुवर्णरत्नप्रासादैर्वैजयन्तैरिवाद्भुतः ॥५४॥
तपनांशुसमाद्योतद्योतितैर्भवनोत्तमैः ।
चित्रध्वजपताकाभिः शिखरैः स्वर्णरञ्जितैः ॥५५॥
शातकुम्भजकुम्भैश्च मणिस्तम्भैश्च शोभनैः ।
वैदूर्यरत्नकिरणद्योतिताभिश्च भित्तिभिः ॥५६॥
अनेकैश्चित्रशालैश्च वाजिशालाभिरन्ततः ।
गजैः पर्वतसंकाशैः शुण्डालैर्हेमभूषितैः ॥५७॥
मदच्युद्भिर्हलरदैः स्वर्णकम्बलधारिभिः ।
दिव्यस्त्रीणां समुद्गीतैर्विष्वक् कोलाहलीकृतम् ॥५८॥
वेष्टितं गजशालाभिः समन्तात्सुसमाकुलम् ।
कालागुरुभवैर्धूपैः परिव्याप्तनभस्तलम् ॥५९॥
सरोभिः सरसीभिश्च फुल्लपङ्कजराशिभिः ।
गृहारामैश्च पुष्पाणां वाटिकाभिरलङ्कृतम् ॥६०॥
ततो वितर्कयामास मुनिः संजातसंशयः ।
किमिदं कस्य च स्थानं यातो वा मतिविभ्रमः ॥६१॥
अहो स्वप्नं प्रपश्यामि दिङ्मोहो वा ममाजनि ।
देशः खलु स एवायं नाश्रमो दृश्यते कुतः ॥६२॥
क्वाभूद् दैववशात् सा मे पर्णशाला लघीयसी ।
दृश्यन्ते चात एवामी दूरादाश्रमपादपाः ॥६३॥
हरिन्मणिमयैः पत्रैः पुष्पैर्मणिमयैरपि ।
फलैरमृतपाकाढ्यैर्विविधैश्चापि काञ्चनैः ॥६४॥
तस्मिन्नेवाथ देशे वै श्रीरन्या दृश्यते त्वसौ ।
विचित्रैर्विविधैर्गेहैः सुधया धवलीकृतैः ॥६५॥

रजताचलसंकाशैः सुमेरुगिरिसन्निभैः ।
द्रक्ष्यामि चाग्रतो गत्वा किमेतदजनि स्फुटम् ॥६६॥
अथायं सविधे गत्वा ददर्श नगरोत्तमम् ।
तदा शुशोच मनसा हतः केन ममाश्रमः ॥६७॥
क्व चाभविष्यत् सा नाम भार्या मे निर्धना सदा ।
किं करोमि क्व गच्छामि कं नु पृच्छामि संप्रति ॥६८॥
अहो नगरवास्तूनां प्रभासंचरतां नृणाम् ।
एषां प्रभावमालोक्य धर्षिते इव चक्षुषी ॥६९॥
एवमाशङ्कमानोऽसौ ददर्श वरवर्णिनीः ।
प्रेषिता इन्दिरावत्या प्रेष्या भवनदासिकाः ७०॥
ता आलोक्य प्रियं प्राप्तं कृताञ्जलय आदरात् ।
बवन्दिरेऽभिवाञ्छन्त्यः कृपालोकममुष्य वै ॥७१॥
नीराजयित्वा कर्पूरदीपिकाभिः समंततः ।
निर्मञ्छ्य मुक्तामाणिक्यसमूहैस्तारकोर्जितैः ॥७२॥
ऊचुरेनं महाभाग प्रासादाग्रे प्रविश्यताम् ।
यत्रेन्दिरावती देवी ध्यायन्ती त्वां गृहोपरि ॥७३॥
वलभीं तुङ्गजालस्था पुरवीथीर्विलोकते ।
तया संगम्य विप्रेन्द्र भुङ्क्ष्वैनां परमां श्रियम् ॥७४॥

श्रीरामचन्द्रचरणोपगमप्रसादादासादितां सुमहतीं वत भूतिमेनाम् ।
दृष्ट्वा कुरुष्व सफलां भृशमाश्रितेभ्यो देहि प्रकाशय यशो विपुलं जगत्सु ॥

इत्युक्तो विप्रवर्योऽसौ ताभिरत्यन्तमादृतः ।
तत्क्षणे प्राप वै तादृक् भोगार्हां विपुलां श्रियम् ॥७६॥
महेन्द्र इव दुर्धर्षः कन्दर्प इव सुन्दरः ।
चन्द्रवत्कान्तसंदोहभूषितस्तेजसा रविः ॥७७॥
व्यरोचत महाबाहुर्भोगार्हपटुतायुतः ।
यद्दिने प्रस्थितो विप्रो रामचन्द्रदिदृक्षया ॥७८॥
स्वाश्रमात्स्वस्त्रियाज्ञप्त आसीत्तद्दिन एव वै ।
रात्रावियं परा लक्ष्मीर्वैकुण्ठनगरोचिता ॥७९॥

सा प्रातरिन्दिरावत्या दृष्टा विस्मितचित्तया ।
सापि श्रीरिव संजाता महासौन्दर्यभूषिता ॥८०॥
वीक्ष्यात्मानं परं प्राप्ता विस्मयं भवनानि च ।
सर्वतश्चकिताक्षीव पश्यन्ती चिरमास सा ॥८१॥
अथ विप्रवरः प्राप्तो महाप्रासादमन्दिरम् ।
दूरादालोकितः पत्न्या महासौभाग्यभूषितः ॥८२॥
दृष्ट्वैवालिङ्गितः प्रेम्णा भूयः प्राप्ताभिलाषया ।
स्नातः स्रग्गन्धभूषाद्यैर्भूषितः प्रीतमानसः ॥८३॥
भुक्तश्च विविधैर्भोज्यैः सार्वभौमनृपोचितैः ।
एकान्ते सुसमासीनस्तया सार्द्धं वरासने ॥८४॥
सुवर्णरत्नप्रासादे मणिदीपप्रदीपिते ।
महार्हे चारुपल्यङ्के गजदन्तैर्विनिर्मिते ॥८५॥
दुग्धफेनोज्ज्वले तल्पे सोपधानेऽतिशोभने ।
पट्टराज्ञ्या सहासीनः साक्षान्नृपवरो यथा ॥८६॥
अचिन्तयत्तदा तत्र ब्राह्मणस्तुष्टमानसः ।
विस्मयं च परं प्राप्तो वीक्ष्य स्त्रियमनन्यगाम् ॥८७॥

सूरिशर्मोवाच

नूनं स राम एवासीद् दृष्टोऽयं[यः] पुरुषो मया ।
अतिमात्रं कृपायुक्तो मादृशे शरणागते ॥८८॥
तं विहाय पुमान् कोऽन्य ईदृशः स्यान्मनोहरः ।
दृष्ट्वैव मे मनो जह्रे महतीमापदं तथा ॥८९॥
उदार चूड़ामणिना दीनोऽहं भूपतिः कृतः ।
अहो मया तदैवासौ न ज्ञातः पुरुषोत्तमः ॥९०॥
इदानीं तु प्रभावेण ज्ञातो रामः स एव हि ।
ईदृग्विधो भवेद्दाता न भूतो न भविष्यति ॥९१॥
कृपाकटाक्षमात्रेण चक्रे शक्रपुराधिपम् ।
अयाचितोऽपि यत्प्रादादयाचितः किमदास्यत ॥९२॥
धर्मार्थकाममोक्षाणां नूनमेष परः प्रभुः ।
तमेतं कोऽनुयाचेत तुच्छमैहिकवैभवम् ॥९३॥

यः स्वयं भुक्तिमुक्त्यादिदानोदारकराम्बुजः ।
परमेष प्रार्थनीयस्तत्पदाम्भोजभक्तये ॥९४॥
भक्त्या प्रसन्नो भगवान् स्वरूपमपि यच्छति ।
मानुषं भावमास्थाय स्वयं स भगवान् परः ॥९५॥
जगतां शोकशमनो महाकल्याणदायकः ।
सतामुद्धारकः साक्षादसतां कुलनाशकः ॥९६॥
नूनमेष स्फुटो लोके पूर्णः श्रीपुरुषोत्तमः ।
क्रीडति स्वजनैः सार्द्धं रञ्जयन् प्रमुदाटवीम् ॥९७॥
ज्ञाततत्त्वो जनस्तस्य चरणौ शरणं व्रजेत् ।
स आशु लभते मुक्तिं घोरात् संसारसागरात् ॥९८॥
यस्मै कृपयति त्वेष चिदानन्दमहोधनः ।
स एव धन्यो जगति तन्मायामोहिते नरः ॥९९॥
न ब्राह्मं पदमूर्जितं स्पृहयते वैरिञ्च्यधिष्ण्यं महत् ।
स्वाराज्येन विराजितं न वसुधासंपूर्णराज्यश्रियम् ॥
यस्तस्याङ्घ्रिसरोजयोः करुणया संतीर्य मोहार्णवं
लब्ध्वा भक्तिमथोर्जिताम[1] सुलभां शश्वत्कृतार्थो भवेत् ॥१००
नमतस्मै भगवते अचिन्त्यानन्तशक्तये ।
महापुरुषरूपाय रामाय परमात्मने ॥१०१॥
त्रिगुणातीतरूपाय सच्चिदानन्दकेलये ।
परापरपरेशाय नमो रामाय वेधसे ॥१०२॥
अहो ते गाम्भीर्यं पुरुषवर माहात्म्यजलधे
क ईष्टे देव त्वामतुलमवगाढं त्रिजगति ।
मुनीन्द्राणां श्रेष्ठा अपि परमहंसाः कृतधियो
न ते पारं प्राप्तुं दधति न तु सामर्थ्यमुचितम् ॥१०३॥
अनन्तस्त्वं मायातिगवपुरनन्तास्तव गुणा
नराकारं ब्रह्म त्वमुदयसि यद्धाम परमम् ।

---

१. °मखंडिता°—मथु०, बड़ो० ।

अतद्व्यावृत्या त्वं श्रुतिभिरभिधेयं तु किमपि
स्फुटं नेतीति त्वां जगदुरवशा अन्तत[1] इमाः ॥१०४॥
किं त्वां याचेय भगवन् भोगस्वर्गापवर्गदम् ।
त्वत्स्वरूपानन्दमात्रे रुचिरस्तु जगत्पते ॥१०५॥
इत्यसौ पूर्णसर्वार्थः संजातप्रणयः प्रभो ।
ध्यायमानस्तमेवान्तर्विषयेभ्यो न्यवर्तत ॥१०६॥
कस्मैचिद् द्विजवर्याय कन्यां सोपस्करं ददौ ।
तं भूपस्तोषयामास रामदत्तैर्महाधनैः ॥१०७॥
सुवर्णमणिरत्नौघैर्वासोभिर्वाजिभी रथैः ।
पुर एव स्वके तत्र जामातरमवासयत् ॥१०८॥
संपाद्य विविधान् भोगान् बहुमानपुरःसरम् ।
ब्राह्मणान् पूजयामास तया परमया श्रिया ॥१०९॥
आगतानतिथीन् नित्यं मुनीन् तत्त्वार्थवेदिनः ।
भक्तान् परमहंसांश्च महाभागवतान् जनान् ॥११०॥
रामेण दत्तां तां भूतिं रामस्यार्थे महामनाः ।
व्ययीकुर्वन् सदा रेजे[2] सूरिशर्मा द्विजाग्रणीः ॥१११॥
भार्यया चेन्दिरावत्या कथंचिदनुरञ्जितः ।
तस्या एवानुरोधेन विषयान् बुभुजे रतः ॥११२॥
दर्शयन्नात्मनासक्तिं रामासक्तमनोगतिः ।
विषयापनुदं भोगं विषयाणां चकार सः ॥११३॥
यतो यतः संस्पृहा स्यात् तं तं पूरयति स्म ह ।
भोगं विषयसंदोहेष्वलिप्तश्चास स स्वयम् ॥११४॥
एवं शीलयमानोऽसौ गार्हस्थ्यं परया श्रिया ।
निष्ठामौपशमीं प्राप्तो यया सद्योपसृज्यते ॥११५॥
इहैव परमं ज्ञानं परमानन्दरूपिणः ।
परात्मनः श्रीरामस्य स्वरूपमात्रगोचरम् ॥११६॥

---

१. जगदुरवशिष्टं तत—रीवाँ । २. समारेजे—रीवाँ ।

लब्ध्वा द्विजः सूरिशर्मा निर्विदद्य सहसैव स ।
विविच्य तत्पदं सूक्ष्मं विवेश सदसत्परम् ॥११७॥
एवमेव नृपश्रेष्ठ बहवः पुण्यभागिनः ।
लेभिरे तत्परं धाम रामाख्यमभिरामकम् ॥११८॥
तेनैव दत्तया दृष्ट्या श्रीरामेण दयालुना ।
जानीयात्तत्स्वरूपं वै यतो भूयो न संसरेत् ॥११९॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे पूर्वखण्डे दशरथतीर्थयात्रा-यामादिव्रजागमने चतुस्त्रिंशदधिकशततमोऽध्यायः ॥१३४॥

❀

पञ्चत्रिंशदधिकशततमोऽध्यायः

सुखित उवाच

गोकुले सर्वतः सौख्यैः प्लाव्यमानेऽतिशोभने ।
रामस्य चरणाम्भोजप्रसादात्कुशलान्विते ॥१॥
गृहे गृहे नरा नार्यो नानाकौतुकसंयुताः ।
गायन्ति क्रीडया युक्ताः खेलन्ति च रमन्ति च ॥२॥
हसन्ति सुखसंदोहैर्हासयन्ति परस्परम् ।
स्थले स्थले शुभैर्वाक्यैर्विश्वङ्मुखरिता दृशः ॥३॥
गोप्यो रामप्रेमवश्याः सदनुग्रहपूरिताः ।
पश्यन्त्यो रूपमाधुर्यं मोदन्ते व्रजवीथिषु ॥४॥
गोपवृद्धाश्च मुदिता रामदर्शनमात्रतः ।
पूर्णाभिलाषाः सर्वेऽपि गायन्ति विमलान् गुणान् ॥५॥
सखायो रामचन्द्रस्य भाग्यभाजनतां गताः ।
परमानन्दमुदिता स्तुष्यन्ति च परस्परम् ॥६॥
एवमादिव्रजे सर्वे शोभासंपत्समन्विते ।
अगादसहमानोऽसावसुरो वृषभाकृतिः ॥७॥
पोडाकरः परुषनाद उदग्रशृङ्गः कीलाकरालनयनो भयकृज्जनानाम् ।
क्रूरप्रचारखुरविक्षतभूमिभागः कल्माषकायविजिताभ्रघटाकलापः ॥८॥

पापीयसीं मतिं विभ्रदभ्रोत्कर्षणशृङ्गभृत् ।
पुच्छाग्रभ्रामणोद्घातघातितोडुकदम्बकः[1] ॥९॥
ककुद्मान् विकरालाङ्गः शब्दापूरितदिङ्मुखः ।
अगादादिव्रजं शब्दैर्भीषयन् भङ्गुरेक्षणः ॥१०॥
गोष्ठानि तेन शृङ्गाभ्यां विभिन्नानि समंततः ।
विहाय गावो गोपालाः सर्व एव पलायिताः ॥११॥
रम्भणैस्तस्य भयदैर्दूराद् गावो वृषा नराः ।
कुर्वन्तिस्म सकृन्मूत्रं समीपं तस्य को व्रजेत् ॥१२॥
गर्भिणीनां स्रवेद् गर्भो यस्य निर्घोषशब्दतः ।
खुरोद्धूतैर्धूलिभरैर्नभश्चैवान्धकारितम् ॥१३॥
तं वज्रकठिनोत्तुङ्गविषाणोत्पाटिताम्बरम् ।
वीक्ष्य बिभ्युर्व्रजे लोका गोपा गोप्यो गवां गणाः ॥१४॥
त्रायस्वास्मान्[2] राम रामेति सर्वे शब्दं चक्रुस्तेजसा तस्य पूर्वम् ।
वित्रस्तात्मान[3]स्ततो रामचन्द्रः कृत्वातेषामभयं पर्यतिष्ठत् ॥१५॥
पीताम्बरेण विनिबद्धच कटिं स वीर आस्फोटयंस्तलरवेण भुजौ नितान्तम् ।
पार्श्वस्थगर्जदनुजांसधृतैकबाहुरन्येन बाहुविटपेन तमाजुहाव ॥१६॥
सक्षुब्धधीस्तद्भुजास्फोटशब्दैः सुकर्कशैराहतकर्ण आरात् ।
संजातरोषस्तपनारुणाक्षः शृङ्गं समुद्धृत्य विनिर्धुवत् शिरः ॥१७॥
रामस्याभिमुखोऽभ्येत्य क्रूरारावी महासुरः ।
शृङ्गाभ्यां तं समुद्धर्त्तुमैच्छत् सुकठिनाशयः ॥१८॥
स तं जग्राह पाणिभ्यां शृङ्गयोरति[4]दारुणम् ।
व्यनुदत् प्रातिलोम्येन धनुर्विंशतिकोपरि ॥१९॥
स तत्र न्यपतद् भूमौ रामबाहुबलेरितः ।
कम्पमानश्च सर्वाङ्गं स्वेदतोयेन पूरितः ॥२०॥
पुनरुत्थाय वेगेन निश्वसन्नतिरोषणः ।
ज्वालावलीढनयनस्तिर्यक् क्रूरं विलोकयन् ॥२१॥

---

१. घातिद्रुमकदं°—रीवाँ । २. °स्वाद्य—रीवाँ । ३. विश्र ब्धात्मा°—मथु० बड़ो० । ४. गूढ़ं गोपति°—रीवाँ ।

मुञ्चन्नसृगपाङ्गाभ्यां क्रोधतामसमानसः ।
पुच्छमुद्यम्य सहसा भूयोऽभिमुखमापतत् ॥२२॥

तं संनिगृह्य बलवान् सविषाणयुग्मे संभ्राम्य दिक्षु धरणौ विनिपात्य धीमान् ।
आक्रम्य चाशु चरणेन गले ममर्द प्रोत्पाट्य शृङ्गमुरुरोषवशाज्जघान॥२३॥

सोऽसृग्धारां वमन् वक्त्रे पश्चाद्विण्मूत्रमुत्सृजन् ।
विक्षिपंश्चरणानुच्चैः पर्यस्तविवशेक्षणः ॥२४॥
कष्टं प्राणान् समुत्सृज्य जगाम यमसादनम् ।
विबुधास्तुष्टुवुर्व्योम्नि रामं विक्रमशालिनम् ॥२५॥
ववृषुः पुष्पवर्षाणि जगुर्गन्धर्वनायकाः ।
चाटुकारैर्जयेत्यूचुः सर्वतो देवतागणाः ॥२६॥
कश्यपस्य सुतो दैत्यो रत्नाचलदरीशयः ।
त्रासकः[1] सर्वदेवानां रामेण निहतो बलात् ॥२७॥
तस्मिन् वने मृगास्तस्थुः पक्षिणो मनुजाः सुखम् ।
हते महाबलीवर्दरूपधारिणि दारुणे ॥२८॥
गोपा जयजयेत्यूचुर्मुनयः सिद्धचारणाः ।
तस्मिन् विनिहते दैत्ये महाबलपराक्रमे ।
ऊचुः स्म रावणं गत्वा दैत्यदानवराक्षसाः ॥२९॥
पौलस्त्यनन्दन श्रीमंस्त्वयि लोकान् प्रशासति ।
हन्यन्ते मर्त्यरूपेण दैत्यदानवराक्षसाः ॥३०॥
तव सेना महाराज हन्यते मर्त्यरूपिणा ।
एतद्वचनुचितं विद्धि तवास्माभिर्निवेदितम् ॥३१॥

रावण उवाच

जानामि मानवः कश्चिद्रघुवंशेऽभवद् भुवि ।
जनकस्य सुता येन ब्यूढा भङ्क्त्वा विभोर्धनुः ॥३२॥
स एव हन्ति दैतेयान् दानवान् राक्षसानपि ।
अबला एव हन्यन्ते हन्तव्यः सबलेन सः ॥३३॥

---

१. क्रोशकः—रीवाँ ।

इत्युक्त्वा रावणः क्रोधाद्विससर्ज सुरद्विषः ।
रामे प्रेषितवानेष सुघोरं नाम राक्षसम् ॥३४॥
भो राक्षसचमूनाथ बलवीर्याधिको भवान् ।
गच्छत्वयोध्यां यत्रास्ति रामो दशरथात्मजः ॥३५॥
तं विद्धि राक्षसानीकद्रुहं हरधनुर्द्रुहम् ।
बहवो निहितास्तेन स्थानस्थेनैव चासुराः ॥३६॥
शत्रुर्दूरात्प्रतीकार्यो यावदायाति नान्तिकम् ।
बद्धमूलः पुनर्हन्यादात्मानं बलसंवृतः ॥३७॥
इत्युक्त्वा प्रहितस्तेन राक्षसानीकनायकः ।
एकाकी बलदृप्तोऽसौ खमार्गेण तमाययौ ॥३८॥

दृष्ट्वा प्रमोदविपिनं राक्षसः फलितद्रुमम् ।
परां मुदमवापैष उवास बहुवासरम् ॥३९॥
रामस्याभिमुखो भूष्णुः प्रतीक्षन् समयं स्थितः ।
विलूनयन् वनं सर्वं भीषयन् पशुपक्षिणः ॥४०॥
शब्दं करोति गहने दरीप्रतिरवोत्कटम् ।
त्रासयत्यखिलान् दुष्टो दुर्दर्शविपुलाननः ॥४१॥
विमोटच फलसंदोहमत्ति मारयते पशून् ।
एवं सोऽत्यनयं कुर्वन्नुवासात्यन्तदारुणः ॥४२॥
नैतस्मिन् विपिनोद्देशे कोऽपि गच्छति मानुषः ।
पलायन्तेऽस्य शब्देन दूरादेव नरा मृगाः ॥४३॥
एकदा भगवान् रामस्तत्र क्रीडनकौतुकी ।
आजगाम गवांवृन्दैर्गोपैश्च परिवारितः ॥४४॥
वेणुं विरणयन् वक्त्रे वीतभीर्बालकेलिकृत् ।
तलशब्दैस्तालिकाभिर्वने कोलाहलं दधौ ॥४५॥
तेषां तं निनदं श्रुत्वा वीतनिद्रः सराक्षसः ।
आजगाम बलोद्रिक्तो हुंकारोच्चारभीषणः ॥४६॥
गर्जयन्निव कान्तारं तर्जयन्निव गोकुलम् ।
कुर्वन्निव तडित्पातं भूपृष्ठं दारयन्निव ॥४७॥

भीषणो धूमधूम्राङ्गः करालज्वाललोचनः ।
उल्कामुखो ललज्जिह्वस्तडित्वानिव तोयदः ॥४८॥
अद्य मेऽवसरो जातः करिष्ये तृप्तिमुत्तमाम् ।
मर्त्यानामामिषैः स्निग्धैः स्वामिकार्यं च साधये ॥४९॥
एवं विचिन्त्य हृदयं प्राप्तो गोपालमण्डले ।
यत्र वेणुं क्वणन् रामः क्रीडते सखिभिः सह ॥५०॥
गोपा अस्य वपुर्वीक्ष्य दंष्ट्राभिर्भीषणाननम् ।
तिर्यग्भ्रुकुटिदुर्दर्शं तत्रसुर्मण्डले स्थिताः ॥५१॥
केचिच्चकम्पिरे गोपाः केचित्सिस्विदुरङ्गकैः ।
केचिद्विवर्णवदना भयेनासुर्गवांदुहः ॥५२॥
गावो वीक्ष्य सुदुर्दर्शं मुखज्वालासमुद्गिरम् ।
विहाय शाद्वलं सर्वं वने भीता विदुद्रुवुः ॥५३॥
इत्थं क्रीडारसं भिन्दन् रामस्याद्भुतकर्मणः ।
आजगामासुरः कोपान्मण्डलीं वीक्षयन्निव ॥५४॥

दृष्ट्वा भयेन संभ्रान्तान् गोपालान् गोकदम्बकान् ।
उवाच भगवान् रामः स्वानां भीतिं हरन्निव ॥५५॥
गोपाला मा विभित भोः किं भयं वो मयि स्थिते ।
गोकुलं रक्षत प्राज्ञा यावदेनं निहन्म्यहम् ॥५६॥
इति गोपान् समाश्वास्य वद्धपीतपटः कटौ ।
राक्षसस्याभिमुखतस्तस्थौ रामः स्मयन्निव ॥५७॥
उवाच तस्मै बलवानवगण्य विशेषतः ।
किमन्यैस्त्रासितैर्मूढ मामेहि त्वां निहन्म्यहम् ॥५८॥
ततः स मुष्टिमाबध्य रामस्याभिमुखं द्रुतः ।
आगत्य च बलाद्रामं जघानोरसि मुष्टिना ॥५९॥
स तस्य वज्रसदृशं मुष्टिघातं प्रसूनवत् ।
उवाह निजपाणिभ्यां जग्राह च भुजौ रिपोः ॥६०॥
सोऽपि रामस्य दोर्दण्डौ जग्राहोभयपाणिना ।
युयुधाते तत उभौ मल्लाविव जयैषिणौ ॥६१॥

अन्योन्यं बाहुचलनैरन्योन्यं शीर्षघट्टनैः ।
अन्योन्यं जानुनिष्पेषैरन्योन्यं तलताडनैः ॥६२॥
परिरभ्योन्मर्दनैश्च वियुज्य परिघट्टनैः ।
वक्षस्यायोज्य मथनैर्युध्येते बलिनौ मिथः ॥६३॥

बाहुयुद्धे पराभूतो वियुज्य दितिजः स्थितः ।
दंष्ट्राकरालवक्त्रेण भीषयन्निव दूरतः ॥६४॥
रामोऽथ तमभिद्रुत्य जघानास्मै चपेटया ।
सोऽतिमात्रं तया सम्यग् जुघूर्णे परिपीडितः ॥६५॥

अथैनं मुष्टिना भूयो यावत्ताडयते हृदि ।
तावद् गृहीत्वा पदयोर्भ्रामितः सर्वतो दिशः ॥६६॥
ततो हन्त बलं कृत्वा पातयामास भूतले ।
पद्भ्यां च पोथयामास यथा प्राणैर्वियुज्यते ॥६७॥
तं तथा व्यसुमालोक्य तत्याज बलिनांवरः ।
सोऽपि मीलितदृक् प्राणैर्वियुक्तो भीमदर्शनः ॥६८॥
अदृश्यत गवांधुग्भिर्हर्षितैर्गतसाध्वसैः ।
वज्रोपमपदाघातत्रुटिताशेषविग्रहः ॥६९॥

व्यादाय वदनं भूमौ पतितस्तत्क्षणान्मृतः ।
प्रसारितायततरपाणिपादोऽन्धु[1]लोचनः ॥७०॥
धूलिधूसरसर्वाङ्गो मुक्तकेशकदम्बकः ।
ध्वस्तास्थिपञ्जरः सद्यो गिरिगण्ड इव च्युतः ॥७१॥
तां वीक्ष्य विस्मिताः सर्वे गोपाः संजातसंभ्रमाः ।
उक्त्वा जयजयेत्येनं तुष्टुवुर्व्रजनायकम् ॥७२॥

अथ संक्रीडमानास्ते पुरस्कृत्य गवांकुलम् ।
मध्ये रामं लक्ष्मणं च वेष्टयित्वा खिलाः स्थिताः ॥७३॥
पाययित्वा पशून् सर्वान् सारवं विमलं जलम् ।
पद्मादिभिः कृताकल्पाः कूर्दमानाः समेधिताः ॥७४॥

---

१. °पादोर्ध्व°—रीवाँ । 'अन्धुः—कूपः' टि०—मथु०, बड़ो० ।

वनान्तात् संनिवर्तन्त संकुलीकृत्य धैनुकम् ।
हसन्तो हासयन्तश्च वादयन्तो विषाणिकाः ॥७५॥

दूरादुद्यम्य दोषं दिशि दिशि दययान्दोलयित्वा दुकूलं
दर्पादाहूय दम्यान् नयनजलजयोर्दीव्यतो द्वीपद्वीपे[1] ॥
दैत्यद्वेषी दिनस्य द्युतिभृदुपरतो दिव्यदावादुपेतो
दत्तां दीप्तिं दुरापां दधदुरसि दृढं दाम वो दाशरथ्यः ॥७६॥

रत्नाद्रेः प्रान्तदेशे तु क्षममासीन्मनोहरम् ।
सुघोरशमनं नाम तीर्थं घोराघनाशनम् ॥७७॥

तत्र राजन्न यः स्नायात्सुघोरशमने ह्रदे ।
तस्यादित्रजयात्रायाः सुघोरः फलमश्नुते ॥७८॥

तस्मात् तत्र विशेषेण गन्तव्यं धर्मकोविदैः ।
स्नात्वा दत्त्वा द्विजन्मभ्यः प्राप्नुयात्सकलं फलम्॥७९॥

पादाघातैर्यदा दैत्यः पोथितोऽपि समंततः ।
न ममार गलोद्देशे रुद्धप्राणो बहून् क्षणान् ॥८०॥

अथोवाच स्वयं रामः कथं न मृयसे खल !
मत्पादघातैर्नितरां पोथितोऽपि धरातले ॥८१॥

दैत्यः सुघोर ऊचे तं मुक्तिर्मे राम दीयताम् ।
तदाहं विसृजाम्येतच्छरीरं झटिति प्रभो ॥८२॥

राम उवाच

यद्यादित्रज एतस्मिन् यात्रार्थं पर्यटिष्यति ।
अयं त्वद्वधदेशेऽत्र नोपेष्यति यदाऽसुर ॥८३॥

यात्राफलं तदा तस्य तुभ्यमेव भविष्यति ।
तेन पुण्येन दितिज विमुञ्च स्वकलेवरम् ॥८४॥

इति श्रुत्वा सदैतेयस्त्यक्त्वा प्राणान् दिवं गतः ।
अतो राजन् विशेषेण सुघोरशमनं व्रजेत् ॥८५॥

रामस्याज्ञां पालयता कर्तव्यं तीर्थमुत्तमम् ।
सुघोरशमनं नाम देवखातं महाह्रदम् ॥८६॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे पूर्वखण्डे दशरथतीर्थयात्रायां-
मादित्रजागमने पञ्चत्रिंशदधिकशततमोऽध्यायः ॥१३५॥

---

१. °देशे—मथु०, वडो०।

षट्त्रिंशदधिकशततमोऽध्यायः

सुखित उवाच

अथैकदा होलिकायां रामो राजन्यवेषधृक् ।
हसन् गायन् सखीवृन्दैर्विजह्रे लोकमङ्गलम् ॥१॥
दूरादाशासु कलयन् शब्दाद्वैतमयं जगत् ।
कलैर्मुरलिकानादैः प्रमोदवनमध्यगः ॥२॥
केलिधूलीभरेणामूः सर्वा एवानुरञ्जयन् ।
काश्मीरक्षोदसलिलैरार्द्रीकृतवराम्बरः ॥३॥
दत्तगालिभिरेताभिर्विभीतो हासपूर्वकम् ।
स्वयं च ताः सोपहासं गालीभाजनतां नयन् ॥४॥
एवं परस्परं तत्र संप्रवृत्ते कुतूहले ।
रामेण मोहिता गोप्यो मुरलीमञ्जुगीतिभिः ॥५॥
डंफांश्च वादयाञ्चक्रुर्गोपाला अतिहर्षिताः ।
वीणावेणुमृदङ्गोत्थः[1] पस्पर्श गगने रवः ॥६॥
लक्ष्मणस्य शुभा गोप्यः सुन्दर्यः कमलेक्षणाः ।
भरतस्य च वीरस्य शत्रुघ्नस्य च सादराः ॥७॥
एकत्र तस्मिन् दिवसे मण्डलानां चतुष्टयम् ।
बभूव विहरद्भूयो लज्जाभयविवर्जितम् ॥८॥
श्रीरामपक्षगा गोप्यो याश्च लक्ष्मणपक्षगाः ।
उभयोः पक्षगा याश्च ददुर्गालीं परस्परम् ॥९॥
एवामापूर्यमाणेऽस्मिन् समाजे वरयोषिताम् ।
वेणुं विभ्रत्क्वणन् रामो जहार सुदृशां मनः ॥१०॥
अनन्यचित्तास्ता सर्वा मधुमत्ता इव क्षणम् ।
तस्थुर्वेणुरवाकृष्टा रामवक्त्रेन्दुदर्शनाः ॥११॥
अथ तद्गीतनादेन मोदिता व्रजसुभ्रुवः ।
स्खलन्नीव्यो गलद्वस्त्रा विस्रस्तकबरस्रजः ॥१२॥

---

१. मृदङ्गानां—मथु०, बड़ो० ।

पतन्मुक्ता मणिलता विगलत्तनुभूषणाः ।
स्वं परं चैव न विदुः सर्वाः संमत्तवत्स्थिताः ॥१३॥
विचित्रास्तास्तथा दृष्ट्वा कश्चिद्यक्षगणाधिपः ।
माणिक्यतिलको नाम कुबेरस्य प्रियः सखा ॥१४॥
तत्राजगाम कामान्धः संवीक्ष्य व्रजकामिनीः ।
हठात् संप्रेरयामास नेतुमात्मनिकेतम् ॥१५॥
मुमूर्षुः सोऽतिचपलः कामेन विकलीकृतः ।
यावत्प्रेरयति स्वैरं तावच्चुक्रुशुरङ्गनाः ॥१६॥

हा राम हा रमण लक्ष्मण दीनबन्धो
हा शत्रुहन् भरत क्वासि दयैकसिन्धो ॥
युष्मान्वितान्तमवमत्य खलः स्मरान्धः
कोऽयं बलान्नयति नो हठिनं घनतैनम् ॥१७॥

इत्थं वनान्तः स्वजनार्तशब्दं निशम्य ते प्राणविपत्समेतम् ।
रामादयो वेणुनिनादसक्ताः सर्वाः परित्यज्य समन्वधावत ॥१८॥

उपेत्य गोपिकावृन्दैर्भ्रातरः संबभाषिरे ।
अलं भयेन पद्माक्ष्यः प्राप्ताःस्म भयहारकाः ॥१९॥
संदृष्ट्वा तान् परिप्राप्तान् शरणागतपालकान् ।
त्यक्त्वा वृन्दं व्रजस्त्रीणां गृहीत्वासून् पलायत ॥२०॥
रामः संरक्षणार्थाय गोपीनां लक्षणादिकान् ।
संस्थाप्य भ्रातरः सर्वान् स्वयं चौरमधावत ॥२१॥
पलायनपरश्चौरो यत्र यत्रान्वधावत ।
तत्र तत्रान्वगाद्रामः साक्षात्काल इव द्रुतः ॥२२॥

तमुत्तरस्यां दिशि धावमानं, यक्षाधिपं कालमिवाप्रसह्यम् ।
दधार रामो बलवान् प्रगृह्य, कचेषु तादृक्खलनिग्रहार्हः ॥२३॥

पशुवत्तस्य मूढस्य दिव्यरत्नयुतं शिरः ।
जहार रामो भगवान् स्वानां प्रियचिकीर्षया ॥२४॥
आदाय तस्य तिलकस्थितं रत्नमुदित्वरम् ।
आययौ विक्रमनिधिः सुहृदां यत्र मण्डलम् ॥२५॥

लक्ष्मणाय मणिं प्रादाद्भानुमण्डलभासुरम् ।
प्रशसंसुस्तमेतेन विक्रमेण सुहृद्गणाः ॥२६॥

स्थानं तदस्त्युत्तरतः प्रमुद्वनं, सुतीर्थभूतं शुचि सर्वपावनम् ।
पलायमानं वनितापराधिनं बलेन यक्षं निजघान यत्र सः ॥२७॥

यक्षप्रमोचनं नाम तत्रास्ति सुमहत्सरः ।
तत्र स्नात्वा महीपाल सर्वयात्राफलं लभेत् ॥२८॥

एवं व्रजे निवसतो रघुपुङ्गवस्य भूरणि सन्ति चरितानि दिनेदिनेऽस्य ।
साधीयसीं हृदयकर्णरसायनैर्यैः कालुष्यमाशु विधुनोति नरः स्वचित्ते ॥२९॥

व्रजमण्डलमङ्गलालयस्त्रिजगल्लोकतमोमलापहः ।
चरितामृतसागरः प्रभोर्जयति प्राणनकृत् सतां सदा ॥३०॥

यानि यानि चरित्राणि चकारेह सतांगतिः ।
तानि तानि मया तुभ्यं कीर्तितानि महीपते ॥३१॥

इत ऊर्ध्वं व्रजजनप्राणं जीवातुविग्रहम् ।
रामचन्द्रमितो नेतुं मन्त्री संप्रेषितस्त्वया ॥३२॥

आगता घनसंकाशा गजेन्द्रास्ते पदच्युतः ।
प्राणापाये व्रजस्थानां कालस्यानुचरा इव ॥३३॥

आगता पञ्च धाराभिरार्द्रयन्तो धरातलम् ।
वाजिनो वै वियोगाग्नेः विस्फुलिङ्गा इव त्विषा ॥३४॥

आगतास्ते रथवरास्त्रासयन्तो मनांसि नः ।
वियोगदुःखराजस्य यानानीव भयङ्कराः ॥३५॥

चतुरङ्गवतीं सेनां निभाल्य व्रजवासिनः ।
अहो किमिदमित्येवं विचेरुर्भयसंयुताः ॥३६॥

अतः परं या व्रजवासिनां दशा, नितान्तमाभाषितया तवालम् ।
स्वचेतसा वेत्तु स एव वल्लभो यस्यानिशं दुर्विषहो वियोगः ॥३७॥

वाष्पतोयतरङ्गिण्यः कति नो रचितास्तदा ।
बहुबन्धकृता विघ्नाः कति नो घटिता जनैः ॥३८॥

शपथैः कति नो वाचः प्रभवे विनिवेदिताः ।
प्रतिकूले विधौ सर्वं प्रतिकूलमभूत्तराम् ॥३९॥

इयति विरहभारे रामचन्द्रप्रियस्य
प्रसभनिपतितेऽन्तर्गोष्ठुमात्माश्रितेषु ।
लघुरिव हृदि लग्ना यातना कापि याम्या
प्रसृतवहलकीलो भ्राष्ट्रवह्निश्च सोऽन्यः ॥४०॥
वर्णितुं नैव सा शक्या वेदना व्रजवासिनाम् ।
मग्नानां निजसौख्येषु किं तया प्रोक्तया नृप ॥४१॥
अहो यावद्वर्णितुं वै तवाग्रे तावद्राजन् वर्णितुं नैव शक्यम् ।
प्रसादतः किंतु तस्यैव सर्वं पुरस्थवत्स्फुरितं मे विशेषात् ॥४२॥
तथैवास्य सुकण्ठस्य प्रसादात्तस्य राधसः ।
सर्वं पुरःस्थं चरितं रामचन्द्रस्य जायते ॥४३॥

राजोवाच

युवयोरेव संजातः प्रसादोऽयं गवांपते ।
एतन्मे कारणं किन्तु कथ्यतां सुखिताधिप ॥४४॥

सुखित उवाच

सरस्वती वेदमाता स्वपित्रा ब्रह्मणा सह ।
विचारं समनुप्राप्ता तत्त्वं राजन्निशामय ॥४५॥

सरस्वत्युवाच

सारं सर्वेषु लोकेषु वेदेषु गुणवत्सु च ।
चरित्रं रामचन्द्रस्य नित्यानन्दरसालयम् ॥४६॥
वर्णितं सत्सूरिवरैर्विशेषात् सारवेदिभिः ।
वाल्मीकिनाप्यगस्त्येन हयग्रीवेण धीमता ॥४७॥
शिवेन योगनाथेन शम्भुना शूलपाणिना ।
हनुमता वायुना च लक्ष्मणेन च सीतया ॥४८॥
अन्यैश्च मुनिभिस्तात देवैश्च प्राप्तभक्तिभिः ।
किंतु निःशेषतो नैव कश्चिज्जानाति तद्गुणान् ॥४९॥
भूयस्तस्य चरित्रं च रहस्यं योगिनामपि ।
न ज्ञातुं शक्यते तात बहुजन्मकृतं तु तत् ॥५०॥

राज्य[ज]वेशमुरीकृत्य सुखितस्य व्रजे वसन् ।
चकार यानि पुण्यानि चरित्राण्यखिलेश्वरः ॥५१॥
तानि गुह्यतमान्येव शुभानि च विशेषतः ।
कथं ज्ञेयानि कविभिर्वर्णनीयानि वा कथम् ॥५२॥
चक्रे द्वादशवर्षेषु वासं सुखितगोपतौ ।
तत्रत्यास्तस्य लीलास्तु वाल्मीकिर्न निबद्धवान् ॥५३॥
मूलचारित्ररूपत्वाद्रहस्यत्वाच्च सर्वतः ।
तत्साक्षात्करणे तात क उपायोऽस्ति तद्वद ॥५४॥
यदुक्त्वा समवाप्नोति जन्मनः फलमुत्तमम् ।
भक्ताश्चैवानुगृह्णेरन् शुकाद्या योगवित्तमाः ॥५५॥
इति प्रोक्तं सरस्वत्या निशम्य भगवान् विधिः ।
क्षणं विचिन्त्य प्रोवाच सरस्वत्यै विशेषतः ॥५६॥
आराधय तदर्थं त्वं राममेव सनातनम् ।
सहजाप्राणदयितमङ्गप्रत्यङ्गसुन्दरम् ॥५७॥
तदनुग्रहतः किंचित् ज्ञानं तव भविष्यति ।
येन तस्य चरित्रं ते गोचरत्वमुपैष्यति ॥५८॥
त्वद्गोचरत्वं संप्राप्य ममापि प्रतिभास्यति ।
इत्युक्त्वा भारती देवी स्वलोके ब्रह्मणा पुरा ॥५९॥
रामं समाराधयितुं प्रमुद्वनमुपागमत् ।
तमसासरयूतीरे निवसन्ती दिने दिने ॥६०॥
आरराध प्रभुं रामं सहजावल्लभं हरिम् ।
यथा तुष्यति राजीवलोचनो रामया सह ॥६१॥
एकदा भगवाँस्तस्याः कामं पूरयितुं स्वयम् ।
आजगाम प्रसन्नात्मा रामः सहजया सह ॥६२॥
सा तमालोक्य सहजावल्लभं राममीश्वरम् ।
दण्डवत्पतिता भूमौ भक्त्या संजातया हृदि ॥६३॥
उत्थाय च ततो देवमिदमाह सरस्वती ।
तव लीला रसमयी कालमायाद्यगोचरा ॥६४॥

सा मे गोचरतां यातु प्रार्थयामि पुनः पुनः ।
राजरूपेण भवता कृपा मयि विधीयताम् ॥६५॥

राम उवाच

मम लीलारसानन्दो देवानामपि दुर्लभः ।
तस्याधिकारी सुखितः सुकण्ठश्च भविष्यति ॥६६॥
मम भक्तान् समालोक्य यत्रैतौ कथयिष्यतः ।
तत्र त्वं संनिधौ भूत्वा सर्वं श्रोष्यसि भामिनि ॥६७॥
आदिव्रजे तु या लीला मम लीलारसात्मनः ।
अतः सा प्रकटीभूता भविष्यति न संशयः ॥६८॥
सुखितो नाम गोपालो दृष्ट्वाप्यैश्वर्यमद्भुतम् ।
पुत्रस्नेहपरीतात्मा माधुर्यं बहुमन्यते ॥६९॥
सुकण्ठश्च सखा नित्यं मदीयः पद्मलोचनः ।
मम रासविलासादिलीलासाक्षी सुहृत्तमः ॥७०॥
एतौ रहस्यगां लीलां लोकेऽस्मिन् स्फुटयिष्यतः ।
ततश्च त्वं समाकर्ण्य ब्रह्मणे कथयिष्यसि ॥७१॥
ब्रह्मा ममात्यन्तभक्तभुशुण्डाय गदिष्यति[1] ।
एवं भुशुण्डो भगवान् दाल्भ्याय कथयिष्यति ॥७२॥
स चाख्यास्यति संप्राप्य कृपां लोमशशर्मणे ।
एवमादिव्रजे जाता मल्लीला व्यक्तिमेष्यति ॥७३॥
इत्थमाख्याय भगवान् सरस्वत्यै तपः फलम् ।
जगाम वल्लभायुक्तो रन्तुं श्रीमत्प्रमुद्वने ॥७४॥
एवं राजन् विजानीहि सरस्वत्यै यथा प्रभुः ।
कृपां चकार चावाभ्यां कीर्तितास्तद्गुणा यतः ॥७५॥
तीर्थस्थानप्रसंगेन मया तुभ्यं प्रकीर्तितम् ।
चरितं रामचन्द्रस्य कालमायादृगोचरम् ॥७६॥
अनर्हं यन्मया वक्तुं शृङ्गारैकान्तमद्भुतम् ।
तत्ते सुकण्ठगोपालः प्रोवाच श्रीपतेः सखा ॥७७॥

---

१. भक्ते भुशुण्डे कथयिष्यति—मथु०, बड़ो० ।

इत ऊर्ध्वमयोध्यायां विचरन् प्राणजीवनः ।
चकार यद्यच्चरितं तत्स्वयं वेत्सि भूपते ॥७८॥
सरस्वत्यास्तु तपसा प्रसादात्तु रमापतेः[1] ।
सर्वं पश्यामि चरितं पुरःस्थविषयोपमम् ॥७९॥
गत्वायोध्यां पुरीं रामो विश्वामित्रेण योगिना ।
प्रार्थितो यज्ञरक्षार्थं गमिष्यति तदाश्रमम् ॥८०॥
आदौ स ताडकानाम्नीं राक्षसीं निहनिष्यति ।
ततो मखस्यान्तरायान् राक्षसान् संहरिष्यति ॥८१॥
ततो जनकराजस्य मिथिलां प्रतियास्यति ।
तत्र शम्भोर्धनुर्भङ्गं कृत्वा सीतां पणीकृताम् ॥८२॥
पाणिग्रहेण विधिना ग्रहीष्यति च सादरम् ।
तत्र भार्गवतेजोऽयं तेजसा संहरिष्यति ॥८३ ।
ततो विजयवानेष पुनः साकेतमेष्यति ।
महान्तमुत्सवं तत्र करिष्यन्त्यस्य मातरः ॥८४॥
दृष्ट्वा सीतायुतं रामं सुखमेष्यन्ति मानवाः ।
एवमस्य कियान् कालः सीतासौख्येन यास्यति ॥८५॥
ततो यदा भवान् राजन् कर्ता महाभिषिञ्चनम् ।
तदा केकयराजस्य पुत्र्या याच्यं वरद्वयम् ॥८६॥
भरते राज्यतिलकं रामनिर्वासनं वने ।
तदासौ भगवान् रामः सर्वत्र समदर्शनः ॥८७॥
निजलीलारसं पुष्णन् प्रस्थास्यति ततो वने ।
त्रिरात्रं सलिलं प्राश्य चतुर्थेऽह्नि फलाशनः ॥८८॥
ततो गङ्गां समुत्तीर्य चित्रकूटमुपैष्यति ।
तत्रास्माभिः समं तस्य संगमो भविता हरेः ॥८९॥
स तत्र भगवान् वीरः पश्यतामेव नस्तदा ।
दिव्यं धनुः समादाय सन्धास्यति शरद्वयम् ॥९०॥

---

१. सीतापतेः—रीवाँ ।

जिहन्म्येष विराधाद्यान् राक्षसान् भुवनद्रुहः ।
करोम्येतत्सतां रक्षाविधानं विधिनामुना ॥९१॥
इत्युक्त्वा दीर्घशब्देन मुमोच विशिखद्वयम् ।
प्रमोदवनमायातः स्वयं सीतानुजान्वितः ॥९२॥
तौ शरौ रोदसी भाभिर्द्योतयन्तौ दिशस्तथा ।
महाघोरं वनं प्राप्य जज्ञाते रामलक्ष्मणौ ॥९३॥
प्रभा तु साभवत् सीता तद्विलोक्यान्तरिक्षगाः ।
देवाः किमेतदित्यन्तर्विस्मयं प्रापुरुत्तमम् ॥९४॥
ततो वनचरैर्दृष्टौ गच्छन्तौ पथि निर्भयौ ।
खड्गिनौ बद्धतूणीरौ चापहस्तौ श्रियान्वितौ ॥९५॥
विराधाद्यान् महाघोरान् हत्वा राक्षसपुङ्गवान् ।
गोदातीरस्थितान् विप्रान् रक्षन्तौ विचरिष्यतः ॥९६॥
एवं क्रमेण यास्येते रम्यं पञ्चवटीवनम् ।
तत्र सूर्पनखा नासाकर्णकृन्तनपूर्वकम् ॥९७॥
तत्पृष्ठगान् महाघोरान् राक्षसान् संहरिष्यति ।
महापराक्रमयुतान् खरादीन् खलदारुणान् ॥९८॥
दण्डकावनमध्ये च कल्याणं वितनिष्यतः ।
तच्छ्रुत्वा तस्य चरितं रावणः क्रोधमेष्यति ॥९९॥
ततो मारीचसहितो रथमास्थाय रावणः ।
प्राप्तः[1] पञ्चवटीं यत्र सीता रामश्च लक्ष्मणः ॥१००॥
मारीचं मृगवेषेण वेशयित्वा स मायया ।
तत्पृष्ठतो गते रामे लक्ष्मणे तस्य पृष्ठतः ॥१०१॥
आश्रमं शून्यमालोक्य भूत्वा कपटतापसः ।
जहार रावणस्तूर्णं सीतां छायामयीं स्त्रियम् ॥१०२॥
सीता नु गार्हपत्याग्नौ प्रविष्टा श्रीः स्वयंभवा ।
ततो राम उपावृत्तो लक्ष्मणेन सह प्रभुः ॥१०३॥

---

१. यात :—मथु०, बड़ो० ।

दर्शयन् मानुषीं लीलां विरहार्तोऽभवद्वने ।
तावन्निमित्तमासाद्य देवः क्रीडनकौतुकी ॥१०४॥
हतवान् स कुलं रक्षो देवकार्यार्थसिद्धये ।
विभीषणाय भक्ताय लङ्कां दास्यति तत्र सः ॥१०५॥
साधयित्वा देवकार्यं पावकेन समर्पिताम् ।
सीतामादाय विनयो पुनः साकेतमागतः ॥१०६॥
तस्मिन् प्रसङ्गे हनुमत्सुग्रीवाद्यैः कपीश्वरैः ।
उपास्यमानचरणः प्रभुर्विजयतेतराम् ॥१०७॥
एतत्ते सर्वमाख्यातं चरितं सहजापतेः ।
श्रोतव्यं कीर्तितव्यं च ध्येयं चैव सतां सदा ॥१०८॥
प्रमोदविपिने तस्य नित्यलीलेति भावय ।
अयोध्यायां चित्रकूटे तथान्यत्र प्रिये स्थले ॥१०९॥
नैमित्तिकी पुनर्लीला धर्मग्लानिनिमित्तजा ।
भूभारहरणार्था च सापि सद्भिर्विचिन्त्यते ॥११०॥
एकैकं तस्य चरितं कर्णपीयूषमेव हि ।
निपीय विबुधाः सर्वेऽप्यजरामरतां ययुः ॥१११॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे पूर्वखण्डे दशरथतीर्थयात्रायां आदिव्रजागमने षट्त्रिंशाधिकशततमोऽध्यायः ॥१३६॥

❁

सप्तत्रिंशाधिकशततमोऽध्यायः

ब्रह्मोवाच

एवमाकर्ण्य नृपतिः सुखिताद् गोदुहांपतेः ।
कर्णपीयूषरस्यं तद्रामेन्दुचरितं शुभम् ॥ १ ॥
सद्यःपुलकिताशेषदेहः संप्रीतमानसः ।
उत्फुल्लनयनद्वन्द्व इदमूचे स्मिताननः ॥ २ ॥

राजोवाच

धन्योऽहमादित्रजवासिनां वः पादाब्जरेणुप्रकरेण पूतः ।
दृष्ट्वा परां स्नेहदशाममीषां संजातशिक्षः सहसा कृतार्थः ॥३॥
युष्माकं कृपया शश्वद्वर्धमानरसोदयः ।
कामप्यवस्थां बिभ्राणस्तिष्ठामि धरणीतले ॥ ४ ॥
युष्माभिः सह संगम्य दृष्ट्वा चादित्रजस्थलीम् ।
रामप्रेमकथाः श्रुत्वाधुना किं तीर्थयात्रया ॥ ५ ॥
समाप्तान्यसमाप्तानि यानि तीर्थानि गोपते ।
तानि मे सफलान्येव भवतां संगमात्रतः ॥ ६ ॥
दानं व्रतं वा हवनं तपो वा करोमि यद्यत् सुकृतं व्रजेन्द्र ।
तन्निष्ठयाहं स्पृहयामि शश्वन्नित्योदयं जानकीरामचन्द्रयोः ॥ ७ ॥
एतावत्तीर्थयात्रायाः फलं सुकृतमूर्जितम् ।
यद्रामचन्द्रविषये परा प्रीतिः प्रवर्द्धताम् ॥ ८ ॥
अनुजानीहि मां भद्र शेषां यात्रां समापितुम् ।
चिराय दुःसहं मन्ये रामस्य विरहं हृदि ॥ ९ ॥

ब्रह्मोवाच

सहजारामलीलानां तानि तानि विलोक्य सः ।
स्थानानि रम्यरूपाणि परमानन्दमन्वभूत् ॥१०॥
गोपीनां चैव रामस्य [1]विहारस्थानमद्भुतम् ।
रासस्थानं रतिस्थानं[1] विरहस्थानमेव च ॥११॥
दानलीलारसस्थानं मानलीलारसस्थलम् ।
सङ्केतविषयस्थानं कुञ्जानि च पृथक् पृथक् ॥१२॥
दृष्ट्वा दशरथो राजा परमप्रेमविह्वलः ।
आनन्दनिर्भरो भूत्वा ससुहृत्परिवारकः ॥१३॥
जगाम नृपशार्दूलः सरयूस्रवणं सरः ।
तत्र स्नात्वा स विधिवत् कौशिकीं पुण्यवाहिनीम् ॥१४॥

१—१. नास्ति—रीवाँ ।

जगाम तत्र आगत्य तमसां सरयूं तथा ।
गोमतीं जनपापघ्नीं संगमे चोभयोरिह ॥१५॥
ब्रह्मावर्तं महातीर्थं यत्र स्नात्वा विशेषतः ।
दत्त्वा ब्राह्मणवर्येभ्यो गाः सुवर्णं महद्धनम् ॥१६॥
स ततः प्रस्थितो राजा नैमिषारण्यमुत्तमम् ।
स्नानदानफले लब्ध्वा संभोज्य[1] ब्राह्मणान् बहून् ॥१७॥
एवं क्रमेण समगात्तीर्थराजं नृपोत्तमः ।
यत्राश्वमेधो विहितो ब्रह्मणा दैवतैः सह ॥१८॥
सर्वे च निर्जरा यत्र वेदान् प्राप्य सुहर्षिताः ।
तत्र स्नात्वा ब्राह्मणेभ्यः प्रादाद्बहुतरं धनम् ॥१९॥
पुलहस्याश्रमे गत्वा कृतातिथ्यः स तेन च ।
तत्रत्ये तीर्थ आप्लुत्य प्रसन्नहृदयोऽभवत् ॥२०॥
हरिक्षेत्रे समाप्लुत्य श्रुत्वा पुण्ययशो हरेः ।
गोमत्यां चैव गण्डक्यां विपासाशोणभद्रयोः ॥२१॥
स्नात्वा दत्त्वा च द्रविणं ब्राह्मणेभ्योऽभवच्छुचिः ।
ततो वाराणसीं गत्वा स्नात्वा च मणिकर्णिकाम् ॥२२॥
देवं विश्वेश्वरं दृष्ट्वा पर्यपूजच्छुभेच्छया ।
असीवरुणयोर्मध्ये यानि तीर्थानि सन्ति वै ॥२३॥
तानि सर्वाणि विधिवदाचचार नृपोत्तमः ।
ततश्च स गयास्थानमयासीन्नृपसत्तमः ॥२४॥
पितृभ्यः पिण्डदानं च कृत्वा तत्रातिहर्षितः ।
ततः क्रमेण संप्राप्तो गंगासागरसङ्गमे ॥२५॥
कपिलस्याश्रमे गत्वा स्नात्वा च विधिसंयुतः ।
रामप्रसादसंप्राप्त[2]दिव्यदृष्टिर्व्यलोकत ॥२६॥
हाटकेश्वरसंज्ञं तच्छिवलिङ्गं हिरण्मयम् ।
आप्लुतः सागरे राजा कुर्वन् पृथ्वीप्रदक्षिणाम् ॥२७॥

---

१. संपूज्य—रीवाँ । २. °प्रसादत. प्राप्त°— मथु० बड़ो० ।

पुरुषोत्तमसंज्ञं तत् सिद्धक्षेत्रमुपागमत् ।
नीलमाधवमालोक्य शङ्खचक्रादिभूषितम् ।
तत्रत्यैर्वैष्णववरैः संगतो मुनिपुङ्गवैः ॥२८॥
रामस्वरूपं निगमत्रयस्तुतं तेभ्यः समाकर्ण्य नृपोऽतिहर्षितः ।
जगत्पतेर्नीलगिरीशितुः शुभं प्रसादमास्वाद्य सुतृप्तिमानभूत् ॥२९॥
ततः कुर्वन् सुतीर्थानि महेन्द्राचलमागतः ।
तत्रोपस्पृश्य सलिलं ददर्श भृगुनन्दनम् ॥३०॥
एकविंशतिधा येन निःक्षत्रा धरणी कृता ।
वरेण्यं तपसां राशिं तमवन्दत भार्गवम् ॥३१॥
सप्तगोदावरीं गत्वा स्नात्वा च विधिपूर्वकम् ।
वेणां पुण्यां नदीं यातः कृष्णया सह संगताम् ॥३२॥
आप्लुत्य विधियत्तस्यां स्नात्वा पम्पासरस्यपि ।
आप्लुतो भीमरथ्यां च ब्राह्मणेभ्योऽददाद्धनम् ॥३३॥
स्वामिनं स महासेनं दृष्ट्वात्यन्तं मुदान्वितः ।
श्रीपर्वतं जगामाथ यत्र साक्षादुमापतिः ॥३४॥
तीर्थानि द्राविडे देशे यानि कानि च भूपतिः ।
आप्लुत्य विधिना स्नातो[1] वेङ्कटाद्रिं ददर्श सः ॥३५॥
कामकोटिपुरीं गत्वा स्नात्वा च नृपसत्तमः ।
ययौ काञ्चीनाम पुरीं विष्णोरपि शिवस्य च ॥३६॥
कावेरीं स समाप्लुत्य सरित्कुलनमस्कृताम् ।
श्रीरङ्गपट्टनं नाम विष्णोर्धाम व्यलोकत ॥३७॥
यत्र साक्षाद्रमाकान्तः सर्वदेवनिषेवितः ।
आस्ते जगत्त्रयस्यैष कल्याणगुणसागरः ॥३८॥
ऋषभाद्रिमुपव्रज्य पुण्यश्लोको नराधिपः ।
हरेःक्षेत्रविशेषेण स्नानदानादिपूर्वकम् ॥३९॥
कृत्वा यात्रां मनोवृत्ति प्रसादजननीं ततः ।
दक्षिणां मथुरां गत्वा शुश्राव चरितं हरेः ॥४०॥

---

१ विधिनिष्णातो—मधु०. बड़ो० ।

यत्र रामः पुराक्रीडन् द्राविडीभिः सह स्वयम् ।
भक्ताभिर्वरवामाभिर्दिव्यरासविलासकैः ॥४१॥
मथुरायां दक्षिणस्यां गीयमानं मनस्विभिः ।
मुनिभिः कोविदैश्चापि श्रुतरामयशोऽद्भुतम् ॥४२॥
सेतुबन्धेश्वरं दृष्ट्वा स्नात्वा दक्षिणसागरे ।
अमन्यत पुराजातं रामस्याद्भुतचेष्टितम् ॥४३॥
नित्यतां च स्वरूपस्य तथा नाम्नश्च कर्मणः ।
अन्यानि चैवास्य विभोः पुरावृत्तानि सैक्षत[1] ॥४४॥
सर्वत्र दक्षिणे देशे रामस्य यशसाङ्कितान् ।
वीक्ष्य पुण्यतमान् देशान् मुमुदे कैकयीपतिः ॥४५॥
सेतुबन्धे कृतस्नानो द्विजन्मभ्योऽददाद्बहु ।
हिरण्यं द्रविणं धेनूर्वासांसि विपुलाशयः ॥४६॥
कृतमालां नदीं पुण्यां सिद्धगन्धर्वसेविताम् ।
दृष्ट्वा स्नात्वा च विधिना स्वतनुर्बहु [ह्व] मन्यत ॥४७॥
ताम्रपर्णीं ततो गत्वा द्रविडावनिभूषिणीम् ।
विलुनज्जलकल्लोलैर्मिलन्तीं दक्षिणार्णवे ॥४८॥
कुलाद्रिं मलयं दृष्ट्वा निर्झरेष्ववगाह्य च ।
दिव्यानि वीक्ष्य लिङ्गानि शिवस्य परमात्मनः ॥४९॥
भूयः सुकृतसाराणि व्यतनोत् तत्र तत्र सः ।
दृष्ट्वा कन्यां कुमारीं च संपूज्य च स्वभक्तितः ॥५०॥
रामस्य पुत्रभूतस्य प्रार्थयामास वैभवम् ।
भूयः सुकृतसाराणि व्यतनोत् तत्र तत्र सः ॥५१॥
नत्वा कन्यां कुमारीं च संपूज्य च स्वभक्तितः ।
ततोऽनन्तपुरेऽगच्छत् तत्र पञ्चाप्सरं सरः ॥५२॥
दृष्ट्वा स्नात्वा च विधिवद्विष्णुप्रीतिस्पृहाधरः ।
सत्रिलक्षमदाद् धेनूस्तीर्थेऽमुष्मिन् शुभावहे ॥५३॥

---

१ संस्मरन्—रीवाँ ।

कृत्वा यथोक्तद्विगुणपरिच्छदसमन्वितः ।
केरलेषु च तीर्थानि रामपादाङ्कितानि सः ॥५४॥
बभ्राम नृपशार्दूलश्चिन्वन् पुण्यमसंख्यकम् ।
गोकर्णमगमद्राजा यत्र संनिहितः शिवः ॥५५॥
तत्र स्नात्वा तीर्थजलैः पूजयामास शङ्करम् ।
आर्यादेवीं समालोक्य महापूजामचीकरत् ॥५६॥
समुद्रद्वीपमध्यस्था सा सर्वजनकामदा ।
तत्र सूर्यसुतां तापीं समपश्यन्नृपोत्तमः ॥५७॥
स्नात्वा दत्त्वा द्विजन्मभ्यः कृतार्थं स्वममन्यत ।
पयोष्णीं पुण्यसलिलां कलिपापापहारिणीम् ॥५८॥
दृष्ट्वा च नृपतिस्तत्र स्नानाचमनकर्मसु ।
ब्राह्मणेभ्योऽयुतं धेनूरददद्विमलाशयः ॥५९॥
पञ्चरात्रं स्थितस्तत्र पूजयन् द्विजदेवताः ।
निर्विन्ध्यां च महापुण्यदर्शनस्पर्शनाचमनाम् ॥६०॥
विलोक्य समुपस्पृश्य पुण्यं भाग्यं च लब्धवान् ।
ययौ स दण्डकारण्यं सिद्धगन्धर्वसेवितम् ॥६१॥
नानामुनिगणाकीर्णां पुण्यपुञ्जविवृद्धिमत् ।
तत्र रेवाभिधां पुण्यां नदीं पुण्यजनार्चिताम् ॥६२॥
माहिष्मतीं पुरीं रत्नविस्फुरच्चारुकामिनीम् ।
अनेकाद्भुतसंपन्नामनेकशतमङ्गलाम् ॥६३॥
अनेक शिवलिङ्गाढ्यां ददर्श नृपपुङ्गवः ।
तस्यां स्नात्वा पुण्यतमैर्जलैस्तापमलापहैः ॥६४॥
शिवलिङ्गानि चापूज्य बभूव प्रियमानसः ।
दृष्ट्वा वैडूर्यशैलं च देवतागणसेवितम् ॥६५॥
स्नात्वा ब्रह्मद्रवमये तीर्थे चामरकण्टके ।
मनुतीर्थे समालोड्य शरीरं विगतज्वरः ॥६६॥
तत्र नत्वाभ्यर्च्य शिवमात्मानं बह्वमन्यत ।
अम्बिकावनयात्रां च कृत्वा संपूज्य चाम्बिकाम् ॥६७॥

सरस्वतीमुपस्पृश्य भूयः संशुद्धमानसः ।
कुर्वन् बहूनि तीर्थानि द्विजन्मभ्योऽददद्धनम् ॥६८॥
अर्जयानश्च सुकृतं कीर्तिं च त्यागसंभवाम् ।
प्रतिस्थानं प्रतिक्षयं ब्रह्मसत्रं समादिशन् ॥६९॥
शृण्वन् यशांसि रामस्य पूजयानो हरं हरिम् ।
दृढं बीजं वपन् पुण्यं धरण्यां धरणीपतिः ॥७०॥
क्रमेण कुर्वंस्तीर्थानि प्रभासक्षेत्रमागमत् ।
यत्र श्रीयादवेन्द्रस्य स्वेच्छया सर्वयादवैः ॥७१॥
अन्योन्यमौशलाच्छापात् प्रहृत्यात्मा विनाशितः ।
यत्राश्वत्थतले विष्णुः शयानः स्वयमच्युतः ॥७२॥
भिल्लेन निहतः पादे बभूवान्तर्हितः क्षणात् ।
तस्मिन् क्षेत्रे सर्वदेवनित्यस्थाने महाद्भुते ॥७३॥
संपूज्य शङ्करं देवं सर्वान् देवानपूजयत् ।
तत्र ब्राह्मणवर्येभ्यो यादवानां तथोन्नतिम् ॥७४॥
विनाशं ब्रह्मशापाच्च श्रुत्वा विस्मित आस सः ।
मेने च ब्राह्मणान् सर्वदेवेभ्योऽत्यधिकं भुवि ॥७५॥
सर्वभूतानुग्रहार्थमवतीर्णः स्वयं हरिः ।
अथासौ श्रद्धया युक्तो जगाम द्वारकापुरीम् ॥७६॥
यत्र श्रीद्वारकेशस्य मन्दिरं सर्वकामदम् ।
षण्मासाज्जायते यत्र शंखो मानवमस्थ्यपि ॥७७॥
यत्र गर्जति चाम्भोधिर्हरन् पापानि जन्मिनाम् ।
तत्र गत्वा महानद्यां गोमत्यां धौतविग्रहः ॥७८॥
ददौ ब्राह्मणवर्येभ्यो गाः सुवर्णं धनं बहु ।

भुशुण्ड उवाच

श्रुतं परात्परं रामं द्वारकायां तु[1] राघवम् ।
भावयामास नृपतिरेतन्मे त्वं वद प्रभो ॥७९॥

---

१. द्वारिकाधीशात्—मथु०, वड़ो० ।

ब्रह्मोवाच

प्रभासक्षेत्रमध्येऽस्य दुर्वासा मुनिपुङ्गवः ।
वेदव्यासेन मुनिना वार्तयन् विविधाः कथाः ॥८०॥
मिलितः सोमनाथस्य निषण्णौ तौ तु पार्श्वतः ।
दृष्ट्वा स रघुशार्दूलो ववन्दे तौ यथाक्रमम् ॥८१॥
स्वागतं कुशलप्रश्नमातिथ्यं बहु संविधम् ।
राज्ञः सपरिवारस्य चक्रतुस्तौ प्रसादिनौ ॥८२॥
तयोस्तादृक् परं प्रेम दृष्ट्वा नृपतिभूषणः ।
उवाच प्रश्रयन्नन्तः प्रसन्नहृदयो नृपः ॥८३॥

राजोवाच

किमत्र कुरुतः स्थाने विजने ब्रह्मवित्तमौ ।
किंस्वित्परात्परं तत्त्वं युवां भावयतस्तराम् ॥८४॥
अहो वां स्वामिनौ सिद्धौ सर्वज्ञौ विदितार्थकौ ।
न किंचिद् युवयोरत्र भवत्यविदितं मुनी ॥८५॥
[1]सौराष्ट्रे पञ्चरत्नानि नदीनारीतुरङ्गमाः ।
द्वारका यादवेन्द्रस्य सोमनाथश्च पञ्चमः[1] ॥८६॥

व्यास उवाच

एतस्य ऋषिवर्यस्य सूनोरत्रेर्महात्मनः ।
मुखाम्बुजाद्विगलितं शृण्मो रामकथामृतम् ॥८७॥
तदेव परमं वेद्यं सारात्सारं जगत्त्रये ।
सर्वोपनिषदां वेद्यं सर्वानुभवगोचरम् ॥८८॥
आत्मारामधुरीणानामात्मरूपेण भासुरम् ।
एकधानेकधा चैव व्याप्य भूतानि संस्थितम् ॥८९॥
रामः स्वयं स भगवान् सकलागमानां तत्त्वं मुनीन्द्रहृदयातिगनित्यरूपः ।
यस्य प्रमोदवनसंज्ञमनन्तमेव धामाक्षरं तपनकोटिरुचा समेतं ॥९०॥
सर्वावतारगणमूलमनन्तमाद्यं यद्रूपमादिकवयः सततं गृणन्ति ।
ब्रह्मेति वृंहणतया च वृहत्वतश्च स्वात्मेति भूरिभगवानिति सुप्रसिद्धम् ॥९१॥

१—१—नास्ति—रीवाँ ।

भूमाभिधः पुरुष एतदशेषलोकसंस्थामयावयववान् सकलात्मभूतः[1]।
अंशोऽस्य सोऽपि गदितः सहितः प्रकृत्या तेनोत्तमा जयति तस्य पराविभूतिः९२

एवं व्यस्तसमस्ताभ्यां स्वरूपाभ्यां स्वयं प्रभुः ।
विभाति सकलैर्वेदैरेको रामः प्रशस्यते ॥९३॥
एवमस्य मुनीन्द्रस्य मुखादाकर्ण्य तत्त्वतः ।
स्वरूपं रामचन्द्रस्य विस्मयो मे महानभूत् ॥९४॥
भक्तिर्मम पुनश्चैव रामचन्द्रे सतां गतौ ।
भूयो वृद्धिमतीतेन संवादोऽत्रावयोरभूत् ॥९५॥
जायमाने तु संवादे रामचन्द्रैकगोचरे ।
आवयोः संशयोच्छित्यै नाभसी वागभूदिह ॥९६॥
"सर्वश्रीरामचन्द्रेति वेदसारं परात्परम् ।
येऽन्ये कृष्णादयः सर्वेऽप्यवताराह्यसंख्यकाः ॥९७॥
रामस्यैव कलांशास्ते त्ववतारी रघूत्तमः ।
एवं प्रमुदवनस्यैव कला वृन्दावनादयः ॥९८॥
तथा सीता पराशक्तेरंशा राधादयः स्त्रियः ।
तथा सरय्वाश्चैव कलाः श्रीसूर्यतनयादयः" ॥९९॥
इति श्रुत्वा गिरं व्यौमीं निष्ठा नौ समभूद् दृढा ।
एवं श्रीरामचन्द्रेति ध्यायतोः सुहितात्मनोः ॥१००॥

राजोवाच

धन्यौ युवां मुनिवरौ विदितेशतत्त्वौ
भक्त्या प्रभूतपुलकाङ्कुरशालिदेहौ ।
सङ्गाद्ययोरखिलजीवकदम्बकस्य
भाग्यं भवे भवति तत्परतत्त्वलाभात् ॥१०१॥
नमो दुर्वाससे तुभ्यं योगीन्द्राय महात्मने ।
रामभक्तिमहासद्मस्तंभरूपाय तद्विदे ॥१०२॥
यस्यानुग्रहमासाद्य तत्रादिव्रजधामगाः ।
आतुरा गोपवनिताः सहजामन्त्रमाप्नुवन् ॥१०३॥

---

१. संस्थाप्यवान् सकललोकजनात्मभूताः—रीवाँ ।

सहजामन्त्रतन्त्रादितत्त्वं लब्ध्वा व्रजाङ्गनाः ।
साक्षाच्चक्रुः परानन्यां तामेव परदेवताम् ॥१०४॥
ततश्च ता वशीचक्रुस्तस्या करुणया परम् ।
प्रमोदवनचन्द्रं तं रामचन्द्रं परात्परम् ॥१०५॥
इति शुश्रुम योगिभ्यो भगवन्नत्रिसंभव ।
माहात्म्यं तव तादृग्वै तत्ते कुर्मो नमोनमः ॥१०६॥
नमः सत्यवतीसूनो तुभ्यं विदितवेद्यक ।
यस्य वागमृताम्भोधिः सेव्यः परमहंसकैः ॥१०७॥
यस्य सूनुः शुको नाम योगीन्द्रः परमात्मवित् ।
प्लावयत्यखिलं लोकमात्मज्ञानोपदेशनैः ॥१०८॥
जातं सर्वं तीर्थयात्राफलं मे क्षेत्रेऽस्मिन् वै युवयोर्दर्शनेन ।
यद्वाञ्छन्तः सकलं त्यज्य पूर्वे युक्ताःप्राज्ञाः काननं शीलयन्ति ॥१०९॥

दुर्वासा उवाच

आवयोः परमं तत्त्वमनुभूय सतोरिह ।
निष्ठाविवर्द्धनाय त्वं किंच ब्रूहि महीपते ॥११०॥

राजोवाच

किमहं वेद्मि सर्वज्ञौ कथं च मम वाक्यतः ।
स्वभावसिद्धा युवयोर्निष्ठा संपरिवर्त्तते ॥१११॥

दुर्वासा उवाच

सर्वं त्वं वेत्सि भूपाल यद्वेद्यं योगिनामपि ।
यस्यात्यलं भूषयति स्वयं स भगवान् परः ॥११२॥
यस्य संदर्शनं लभ्यं न कोटचा तपसामपि ।
त्वया वै क्रियमाणं स जानाति प्रेमलालनम् ॥११३॥
त्वदङ्कनीलरत्नस्य रामस्य परमात्मनः ।
अद्भुतानि चरित्राणि गायन्ति मुनयो भुवि ॥११४॥
अहो भाग्यं नृपते तावकीनं, किमस्माभिः कथ्यतां योगशीलैः ।
संदर्शनस्पर्शनालापशश्वदेकासनस्थितिसंभोजनाद्यैः ॥११५॥

राजोवाच

जानामि न ब्रह्मतया परमात्मतयापि च ।
भगवत्त्वेनापि चैनं रामं प्रेमैकभाजनम् ॥११६॥
पुत्रेति परवात्सल्यप्रेम्णा परमसुन्दरम् ।
तं सेवे सर्वलोकैककल्याणगुणभूषणम् ॥११७॥
जानामि नास्य भावस्य कलामपि च षोडशीम् ।
वैराग्यं वा तपो वापि ज्ञानं वा ब्रह्मगोचरम् ॥११८॥

ब्रह्मोवाच

एवमालप्य योगिभ्यां ताभ्यां स नृपसत्तमः ।
प्रतस्थौ द्वारकापुर्यां ज्ञाततत्त्वो विशेषतः ॥११९॥
ततः स राघवेन्द्रे च पराभक्त्या प्रसन्नधीः ।
पञ्चरात्रं द्वारकास्थो भावयानः परं पदम् ॥१२०॥
शैलं रैवतकं नाम दृष्ट्वा तत्तीर्थराशिषु ।
उपस्पृश्य शुभाश्चापः प्रादक्षिण्यक्रमादगात् ॥१२१॥
स्नात्वा पञ्चनदं राजा ददानः स्वर्णगोधनम् ।
उपस्पृश्य रयः सिन्धोरगात्काश्मीरमण्डलम् ॥१२२॥
तत्र दिव्यानि तीर्थानि यात्रयित्वा नृपोत्तमः ।
कुरुक्षेत्रं ततोऽगच्छत् प्रसन्नः शुचिमानसः ॥१२३॥
स्नात्वा जले सरस्वत्याः सिद्धदेवर्षिसेविते ।
रामह्रदेषु पुण्येषु समुपस्पृश्य भक्तितः ॥१२४॥
पृथूदकमगाद् भूयः काशीकोटिफलाधिकम् ।
यमुनातीर्थवर्येषु स्नानं चक्रे सभक्तितः ॥१२५॥
गङ्गाद्वारमगाद्भूयः पुण्यं विश्वस्य पावनम् ।
वसुधाराजले स्नात्वा ब्राह्मणेभ्योऽददाद्धनम् ॥१२६॥
विशालां नगरीं गत्वा तपोवनशुभाध्वना ।
दृष्ट्वा बदरिकास्थानं केदारं चाव्रजत्ततः ॥१२७॥
ततस्तुषारपटलैराकीर्णेन पथा नृपः ।
तदा कांश्चिद् द्विजान् भृत्यान् बभाषे रघुनन्दनः ॥१२८॥

राजोवाच

निवर्त्यतामितो लोका ये भोक्तारोऽन्नमुत्तम् ।
यस्याभिलाषा भोग्येषु ये वस्त्राद्यभिलाषुकाः ॥१२९॥
येषां मनः सुखे नित्यं तपस्युद्वेगिनश्च ये ।
त इतः प्रतिगच्छन्तु ममायोध्यां शुभां पुरीम् ॥
तत्र रामो महावीरः पालयिष्यति तान् जनान् ॥१३०॥

जना ऊचुः

न कश्चिदेतेषु जनेषु राजन् विना भवन्तं क्वचिदासितुं क्षमः ।
आपद्गतौ वा तपसि स्थितौ वा ये त्वामजस्रं परिवार्य तस्थुः ॥१३१॥

अस्ति यद्यपि रामेन्दुः सर्वेषां सुखदायकः ।
तथापि वयमेकं त्वां नित्यमेव भजामहे ॥१३२॥

अतो वयं सुखलोभेन न त्वां विहाय साकेतपुरीं यियासवः ।
यत्पार्श्वगा केकयराजकन्या तपोयुता कुरुते राजयात्राम् ॥१३३॥

विजनेषु महारण्येष्वन्नवर्जेषु भूपते ।
सर्वसौख्यविवर्जेषु भीतिस्थानेषु संततम् ॥१३४॥
फलपत्रादिरहितेष्वपि शीतातपादिभिः ।
उद्वेजिता अपि परं स्थास्यामस्तव संनिधौ ॥१३५॥
भवान् नृपतिशार्दूल यया गत्या भविष्यति ।
सैवास्माकं गतिर्हीष्टा सुखं वा दुःखमेव वा ॥१३६॥
धिगेव केवलं तान्वै राजन् वृत्त्याधमान् नरान् ।
ये सुखे स्वामिसंपृक्ता दुःखेष्वेतं जिहासवः ॥१३७॥
न ते समुन्नतां भूतिं स्वामिनः प्राप्नुवन्ति हि ।
क्षेमेण तेषां चित्तानि विकृतानि प्रकुर्वते ॥१३८॥
ये पुनर्दुःखिता दुःखे सुखेषु सुखिताशयाः ।
भूरि भाजनतां यान्ति ते नराः स्वामिना समम् ॥१३९॥
ये पुनर्ब्राह्मणा लोके क्षेत्रे भूयस्तपस्यति ।
अलसा भुञ्जते भोगान् हास्यास्ते तत्समीपगैः ॥१४०॥

तस्माद्वयं महाराज क्षणं न त्वां तितिक्षवः ।
तीर्थयात्रां समाप्यैव द्रष्टारः स्वं स्वमालयम् ॥१४१॥
योऽयं जन्मादितः कृत्वा मरणान्तं प्रपालकः ।
तं विहाय महीपाल सुखलोभाद् व्रजाम किम् ॥१४२॥
उक्त्वैवं प्रस्थिताः सर्वे तस्य सङ्गे महीपतेः ।
अयोध्यावासिनो लोका ये पूर्वं पृष्ठगामिनः ॥१४३॥
ब्राह्मणाः क्षत्रिया वैश्याः शूद्रा योषित एव च ।
संबन्धिनश्च सुहृदो भृत्याः सख्यजुषो जनाः ॥१४४॥
युवान ईषत्तरुणा वर्षायां सोऽल्पगामिनः ।
चित्तोत्साहं पुरस्कृत्य दिव्यं स्थानं दिदृक्षवः ॥१४५॥
केकयी च महाभागा कोमलाङ्घ्रिसरोरुहा ।
हिमार्ता संकुचन्नासा गच्छती त्यक्तभोगकाः ॥१४६॥
पृष्टस्थीकृतराज्यश्रीः सर्वसौख्या तपस्विनी ।
महातुषारपवनैरुद्विग्नस्थिरमानसा ॥१४७॥
पृष्ठतो निजभर्तारमनुयान्ती सुधीरहृत् ।
महत्यास्तीर्थयात्रायाः सिद्धलक्ष्मीरिवाद्भुता ॥१४८॥
स भूपतिस्तत्र तत्राद्विराजेऽश्रौषीत् पुरादिग्विजयप्रसङ्गे ।
समागतस्यारिनुदो महौजसो रामस्य लोकाशयरञ्जनान् गुणान् ॥१४९॥
अत्र देवैर्विरञ्च्याद्यैर्दृष्टो रामः सकौतुकः ।
संस्तुतः पूजितश्चारु प्रसूनैर्नन्दनोद्भवैः ॥१५०॥
अत्र गन्धर्वकन्याभिः कोटिकन्दर्पसुन्दरः ।
पुरुषप्रकाण्डो दृष्टः स्खलन्नीविगलत्पटम् ॥१५१॥
अत्र देवाङ्गनाश्चैनं दृष्ट्वा सादरमानसाः ।
स्वागतैः कुशलप्रश्नैः क्षणं चक्रुर्विलम्बनम् ॥१५२॥
अत्र सज्जीकृतधनुः कांश्चिद् गन्धर्वपुङ्गवान् ।
वीरान् मुहुर्योधितवांस्तेभ्यो रत्नानि चाददात् ॥१५३॥
अत्र दृष्टः शिवेनासौ कैलाशाचलवासिना ।
प्रसाद्यानीतः सदनं भक्त्या संपूज्य संस्तुतः ॥१५४॥

अत्रैनं त्रिदशा वीक्ष्य लङ्केशभयविद्रुताः ।
विश्रब्धा विक्रमगुणैः परां प्रीतिमुपाययुः ॥१५५॥
अथ देवमुनिः साक्षान्नारदोऽभ्यागतः प्रभुः ।
तं ववन्दे स्वयं रामः परामृष्य मुहुर्मुहुः ॥१५६॥
श्रुत्वा मुनीन्द्रवचनाद्विशालाख्यां वरस्त्रियम् ।
प्रगृहीतव्रतां स्वार्थे चकमे केलिपण्डितः ॥१५७॥
इत्येवमादीनि यशांसि शृण्वन्नृणां महाशैलदरीगृहाणाम् ।
निजात्मजश्लोकगृहीतचेता ययौ गिरीन्द्रं ननु गन्धमादनम् ॥१५८॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे पूर्वखण्डे दशरथ-
तीर्थयात्रायां गन्धमादनप्रवेशो नाम षट्त्रिंशाधिकशत-
तमोऽध्यायः ॥१३६॥

●

सप्तत्रिंशदधिकशततमोऽध्यायः

भुशुण्ड उवाच

ब्रह्मन् कासौ विशालाख्या वरस्त्री पुण्यकर्मकृत् ।
स्वार्थे धृतव्रतो यां वै चकमे रामचन्द्रमाः ॥ १ ॥
एतन्मे ब्रूहि सर्वज्ञ व्रतं रामकथाश्रयम् ।
यस्य श्रवणमात्रेण पूयेताखिलपातकी ॥ २ ॥
एतद्रहस्यं वरपक्षिराज वक्ष्याम्यहं त्वच्छ्रवणामृताभम् ।
चरित्रमस्याद्भुतमीश्वरस्य रामस्य लोको नरमाधुरीनिधेः ॥ ३ ॥
प्रमोदवनमध्ये तु सहजानन्दिनीपतिम् ।
श्रुत्वा वशीकृतं रामं तथैव स्वगतैर्गुणैः ॥ ४ ॥
अक्षुभ्यत्सिन्धुजा चित्ते मम नाथः स मत्करात् ।
हा गतः कथमेवं त्वमिति चिन्ताकुलाभवत् ॥ ५ ॥

ततः स्वयं वशीकर्तुं वल्लभं कमलालयम् ।
आरराधोग्रतपसा परमात्मानमव्ययम् ॥ ६ ॥
द्वीपे क्षीरसमुद्रस्य महाघोरवनालये ।
वसन्ती विगताहारा चचार परमं तपः ॥ ७ ॥
ऊर्ध्वदृष्टिस्तपर्तौ सा पञ्चाग्निवेदिमध्यगा ।
वर्षर्तौ जलधाराभिः सिच्यमाना महाघनैः ॥ ८ ॥
महाप्रचण्डवातोर्मिमहामुशलवृष्टिवाट् ।
शीततौं जलमध्यस्था तपस्यन्ती महत्तपः ॥ ९ ॥
मिताहारा शुष्कपर्णाशना पवनभक्षिणी ।
परित्यक्ताखिलाहारा घोरं नियममास्थिता ॥१०॥
परन्तु द्रुह्यती देवीं सहजानन्दिनीं ततः ।
देवं शीघ्रं वशीकर्तुं न शशाक समुद्रजा ॥११॥
अथ कश्चिन्मुनिर्भक्तः सहजाया रहस्यवित् ।
रामलोकं जिगमिषुर्गोलोकादुपरिस्थितम् ॥१२॥
सौवरो नाम विप्राग्र्यस्तत्रागात् प्रेमपुष्टिमान् ।
सहजा सहजेत्याख्यां रामरामेति चोद्गिरन् ॥१३॥
तमागतमुदीक्ष्यासौ धृतेर्ष्यां तनयाम्बुधेः ।
स्वागतं कुशलं प्रश्नं न चकार हरिप्रिया ॥१४॥
ऊचे च वचनं घोरं क्रोधप्रस्फुरिताधरा ।
सापत्न्यभावदोषेण दुष्टात्मा स्त्रीस्वभावगा ॥१५॥

अहो जनास्तां व्यभिचारदुष्टां गायन्ति किं नन्दनगोपकन्याम् ।
प्रायः परस्त्रीविषयेऽनुरक्ति प्रभोरपि ख्यातुमथावतीर्णाम् ॥१६॥

इति निर्भर्त्स्य निर्भर्त्स्य जगादोच्चैः तपःस्थिता ।
तच्छ्रुत्वा स मुनिः क्रुद्धः स्वामिन्याः पादसेवकः॥१७॥

सौवर उवाच

तस्यास्तत्त्वं न जानासि कमले किं तपस्यसि ।
जन्मान्तरे तपो घोरं सविवेकं फलिष्यति ॥१८॥

इत्युक्त्वा प्रययौ विप्रः सा घोरमचरत्तपः ।
ततो व्योम्न्यभवद्वाणी तपस्यन्त्या वने श्रियः ॥१९॥
अनाराध्य मम प्रेष्ठां सहजानन्दिनीं प्रियाम् ।
पूर्णाभिलाषा कमले भवती न भविष्यति ॥२०॥
अतो जन्मान्तरं लब्ध्वा मत्प्रिया सेवकालये ।
द्वितीया सहजेव त्वं मां वशीकर्तुमर्हसि ॥२१॥
ततः सा समभूदीर्ष्यां परित्यज्य पराश्रियः ।
गन्धमादनशैलस्य कन्या सर्वाङ्गसुन्दरी ॥२२॥
विशालाक्षीति युक्तेन नाम्ना ख्यातिं गता भुवि ।
कमला नाम तत्पत्नी तस्या अङ्कमरोचयत् ॥२३॥
दीव्यती कान्तिपटलैर्दिव्यरूपविराजिता ।
श्रीरामस्य वशीकारं कर्तुं समुचिताभवत् ॥२४॥
तस्यां तु पुष्यमाणायां देहभासा दिने दिने ।
वराय चिन्तामकरोत् पर्वतो गन्धमादनः ॥२५॥
क्वचित्तां नारदोऽद्राक्षीत् पितुरङ्कगतां शिशुम् ।
लक्षणैरेनमाहाथ भवित्रीं हरिवल्लभाम् ॥२६॥
आदिदेश पितुर्भक्त्या प्रणतस्य महीभृतः ।
सोऽचिन्तयत्तदा शैलो धन्योहं यस्य मे सुता ॥२७॥
साक्षाद्वै रामचन्द्रस्य प्रिया भूष्णुः प्रवर्द्धते ।
कोऽन्यो मत्तः शुभजनिर्भवेऽस्मिन् प्रेमभक्तिभृत् ॥२८॥
मम नान्दीमुखाः सर्वे पितरस्तुष्टिमन्वगुः ।
श्रुतं दत्तं तपस्तप्तं यत्किंचित्सुकृतं मम ॥२९॥
अत्यर्थं फलमासाद्य जातं त्रिभुवनेऽतुलम् ।
इत्युत्कण्ठावशं चित्तं कुर्वन् शैलो मुहुर्मुहुः ॥३०॥
ननन्द परमप्रीतः परसौभाग्यमण्डितः ।
नवशाद्वलसंदोहस्फुटप्रेमाङ्कुरोद्गतः ॥३१॥
ततः शैशवमत्येत्य तारुण्यं नाम सद्वयः ।
प्राप्तायां श्रीविशालायां रूपभारमभूत्तनौ ॥३२॥

करयोः पादयोश्चैव जङ्घयोरुदरे कटौ ।
त्रिवलौ रोमराजौ च श्रिया पुष्टा बभूव सा ॥३३॥
यौवनारम्भसंभारमन्दमन्दगमाङ्गणे ।
रराज चञ्चला बाला विद्युद्वल्लीव सा त्विषा ॥३४॥
पितुर्गृहमुपेतेभ्यः श्रीरामगुणघोरणीः ।
सूतमागधवन्दिभ्यः सा शुश्राव प्रतिक्षणम् ॥३५॥
अथास्याः सर्वदा रामं शृण्वन्त्याः पुरुषोत्तमम् ।
बद्धमूलोऽभवच्चित्ते प्रेमा तन्मात्रगोचरः ॥३६॥
सखीभिरुपनीतेषु चित्रेषु रघुपुङ्गवम् ।
पश्यन्ती पूर्णपुलकाङ्कुरमङ्गं बभार सा ॥३७॥
अथ श्रीरामविषयः प्रेमा परिणतो हृदि ।
असूत विरहं घोरं पाण्डुताक्षामताकरम् ॥३८॥
एतस्मिन्तन्तरे रामो हयमेधे महीपतेः ।
आज्ञया प्रस्थितो वीरः कुर्वन् दिग्विजयं क्रमात् ॥३९॥
तुषाराद्रिमतिक्रम्य संप्राप्तो गन्धमादनम् ।
धनुर्धरो रथध्वानैः कन्दराः प्रतिनादयन् ॥४०॥
स रथादवतीर्यास्य वने शार्दूलशालिनि[1] ।
देवदारुद्रुमाकीर्णे पिहिते चन्दनद्रुमैः ॥४१॥
आजगाम महारम्ये कामश्चैत्ररथे यथा ।
चिक्रीडे भगवांस्तत्र प्रमोदविपिनं स्मरन् ॥४२॥
रहितः सीतया तत्र वियोगी मदनातुरः ।
देवोद्यानद्रुमलतादर्शनोद्दीपिताशयः ॥४३॥
तत्राजगाम सा बाला कोटिरत्यङ्गनासमा ।
सखीभिः सहिता यूथे क्रीडन्ती तडिदुज्ज्वला ॥४४॥
बोधयन्तीव शृङ्गारं क्रोधयन्तीव मन्मथम् ।
रोधयन्तीव चित्तानि योधयन्तीव लोचने ॥४५॥

---

१. गह्वरे वनशालिनि—मधु०, बड़ो० ।

तासां पादाब्जमञ्जीरनादैस्ताः कुञ्जभूमयः ।
कन्दराः प्रतिशब्देन व्याप्ता आसन् समंततः ॥४६॥

तासां बलयमञ्जीरभूषणध्वानधोरणीम् ।
श्रुत्वा रामरस [से]न्द्रस्य हृदये चुक्षुभे स्मरः ॥४७॥

ता आगतास्तत्र कुरङ्गनेत्राः संपूजनार्थे ननु पार्वतीशयोः ।
वनेऽत्र पुष्पाण्यवचेतुमादृता लतावितानान् विविशुः समेताः ॥४८॥

लताभ्यो भूरुहेभ्यश्च पुष्पाण्यादाय ता यदा ।
ययुर्लीलासरः स्नातुं सर्वाः पङ्कजलोचनाः ॥४९॥

जलकेलिं प्रकुर्वाणा मज्जनोन्मज्जनादिभिः ।
अकम्पयन् मृगदृशः पद्मिनीनां वनानि ताः ॥५०॥

तासां मध्ये वरस्त्रीणां विशालाक्षी मनोरमा ।
स्नानकालोचितं वेषं बिभ्राणा व्यरुचत्तराम् ॥५१॥

जलार्द्रसूक्ष्मवस्त्रेण देहलग्नेन सा तदा ।
प्रत्यङ्गलक्ष्यसुषमा दृष्टा रामेण गुप्ततः ॥५२॥

लतावितानसंछन्नविग्रहो लग्नया दृशा ।
प्रत्यङ्गं सुषमां तस्या व्यचष्ट रसिकोत्तमः ॥५३॥

तद्रूपलावण्यविमोहिताशयो बभूव रामः स्थगितान्यवृत्तिकः ।
विमूढकल्पो जनकाधिपात्मजामहानुरोधेन विवृद्धकामः ॥५४॥

जलोत्तरात्सा निःसृत्य परिधाय दुकूलिकाम् ।
पद्महस्ता बभौ साक्षाच्छ्रीरिवाम्बुधिनिर्गता ॥५५॥

सा दैववशतः सर्वान् वर्जयित्वा सखीजनान् ।
इच्छन्ती विजनं स्थानं तस्य सन्निधिमागमत् ॥५६॥

अथ पूजोपकरणहस्तैः साकं सखीजनैः ।
विशेषदेवतागारं कुञ्जगह्वरमध्यगम् ॥५७॥

तस्मिन् वृषमतिक्रम्य गता सा शिवसन्निधौ ।
तुष्टाव विविधैः स्तोत्रैः पार्वत्या सह शङ्करम् ॥५८॥

विशालाक्ष्युवाच :—

नमो देवेवर्याय ते पार्वतीश त्रयीसूक्ति[1]संस्तुल्यरूपाय देव ।
जटाजूटखेलत्सुपर्वाथिगोमिच्छटाधौतदिव्यस्फुरद्विग्रहाय ॥५९॥

---

१. °शक्ति°—रीवाँ ।

नमो नीलकण्ठाय ते वामदेव त्रिभिर्देववर्यैरुपास्याय शश्वत् ।
गुणैस्तैस्त्रिभिर्विस्तृताशेषसृष्टिप्रविष्टात्मने विश्वरूपाय तस्मै ॥६०॥
नमः सच्चिदानन्दरूपाय नित्यं शिवायासुरध्वंसकर्मैककर्त्रे ।
महोग्राय कल्पान्तवह्न्यस्त्रतेजोमहाभैरवेशाय ते व्योमकेश ॥६१॥
नमोऽशेषगीर्वाणराजीशरण्यप्रपन्नार्तिहन्त्रङ्घ्रिपद्मद्वयाय ।
गिरीशाय गौरीसखायेश्वराय त्रिनेत्राय भव्यात्मने ते नमः ॥६२॥
त्वमुर्वी त्वमापस्त्वमग्निर्महेश त्वमेवासि वायुस्त्वमाकाशरूपः ।
त्वमस्यध्वरस्त्वं पुमानादिकर्ता न तत्त्वं न यत्सर्वरूपप्रकाशः ॥६३॥

अन्तरात्मासि सर्वेषां नमस्ते नीललोहित ।
जानासि मानसां वृत्तिं त्वमेवाखिलबुद्धिदृक् ॥६४॥
अतस्त्वयि प्रार्थनं मे पुनरुक्तायतेतराम् ।
त्वमेव पूरणे शक्तः कामानां सर्वकामद ॥६५॥
तथापि स्त्रीस्वभावेन प्रेरिता चञ्चलाशया ।
याचे वाचा प्रकटया त्वामहं योगिनीपते ॥६६॥
मन्मनः क्वापि पुरुषप्रकाण्डे विश्वसुन्दरे ।
संलग्नं संततासक्त्या सुलभं कुरु तं प्रभो ॥६७॥
इति संस्तूय गिरिशं विशाला समपूजयत् ।
गन्धपुष्पोपहारादिसंविधाभिर्मुहुर्मुहुः ॥६८॥
कपोलनादैः करतालिकाभिः कलामनोहारिकलस्वरैश्च ।
सन्तोष्यभक्त्या भविकप्रदेशं भवं भवानीसहितं विशाला ॥६९॥

निरगाद्बहिरागारं ततः सा कुञ्जगह्वरात् ।
सखिभिः सहिता क्रीडन्निकुञ्जभवनाङ्गणे ॥७०॥
कश्चित्प्रसूनसंदोहैः कृत्वा कन्दुकधोरणीम् ।
उच्छालयन्त्यो गगने विरेजुर्हरिणीदृशः ॥७१॥
काश्चित्परस्परं पुष्पैस्ताडयन्त्यो मृगेक्षणाः ।
चिक्रीडुः पुष्पधनुषः कामिन्य इव सोत्सवः ॥७२॥
काश्चित्परस्परं हस्तैर्हस्तानाबध्य सत्वराः ।
भ्रमन्त्यो मण्डलं कृत्वा तडिद्रेखा इवारुचन् ॥७३॥

काश्चिन्ननृतुरुद्रिक्ताश्चातुर्यमदतोऽङ्गनाः ।
काश्चिज्जगुः स्वरैः कण्ठे पुष्णन्त्यो वल्लकीध्वनिम् ॥७४॥
व्यचष्ट तासां तां शोभां गीतनृत्यादिकालिकीम् ।
रामः कुतूहलाविष्टो लतान्तरितविग्रहः ॥७५॥
सदैव वसतः सर्वान् दर्जयित्वा सखीजनान् ।
इच्छन्ती विजनं स्थानं तस्य सन्निधिमागमत् ॥७६॥
तत्रातिगह्वरे कुञ्जे लतापुञ्जविधानके ।
निर्विशङ्कमना भूत्वा विवेश तरुणी स्वयम् ॥७७॥
तत्रापश्यत्पुरुषवरमत्यद्भुतश्रीनिकेतं
शश्वन्मन्दास्मितलवसुधाविन्दुभिर्मोहयन्तम् ।
स्निग्धापाङ्गं कुटिलनयनालोकनिर्भिन्नचित्तम् ।
साक्षाच्चेतोभवमिव मनोनिघ्नयन्तं मनोज्ञम् ॥७८॥
तां विलोक्यागतप्राणा पूर्वजन्मस्मृतिं गता ।
निश्चिकाय विशालाक्षी साक्षाद्रामं स्वकं[1] पतिम् ॥७९॥
सा कुञ्जमध्यगावोचदनुयायिसखीजनान् ।
अपूर्वोऽत्र मया सख्यो दृष्टः कश्चिद्विहङ्गमः ॥८०॥
विश्रब्ध इव मां[2] वीक्ष्य भवतीभिः सकौतुकम् ।
शब्दैरुच्चाटनीयोऽसौ तन्नेहा गच्छतालयः ॥८१॥
इत्थं निषिध्य सर्वास्ता वयस्या गान्धमादनी ।
समीपमभजत्तस्य पुंवरेण्यस्य निर्जने ॥८२॥
स तामेकान्तगां दृष्ट्वा दैवात्प्राप्तां तडित्त्विषम् ।
पुलकाङ्कुरलिप्ताङ्गो बभूव स्तम्भवान् परः[3] ॥८३॥
तमुवाच विशालाक्षी कामह्रीभयमिश्रितम् ।
अन्तः कुञ्जकुटीरस्थ नयन्तं चित्तमोहनम् ॥८४॥
ननु कोऽसि किंस्विदिह कोऽपि निर्जरः पुरुषप्रकाण्ड कथयात्मनोऽभिधाम् ।
तदनु स्ववंशमतुलं गुणोज्ज्वलं वद तत्पुरः स्वगुणविक्रमादिकम् ॥८५॥

---

१. रामचन्द्रं—मथु०, बड़ो० । २. विश्रब्धेव इमं—रीवाँ । ३. स्तम्भवत्स्थिरः—मथु०, बड़ो० ।

ननु वेद्मि पुंवर स एव किं भवान् हृदयेन यश्चिरतरान्मया धृतः ।
रामचन्द्र रविवंशभूषणो रघुनाथ उत्तमचरित्रचित्रितः ॥८६॥
मुनिपुङ्गवेन ननु नारदेन मे पुरुषप्रकाण्ड भवता समं न किम् ।
विधिरीरितः शुभकर ग्रहस्य यद्वितनोषि तृप्तिमतुलीविलोकनात् ॥८७॥
नवनीलरत्नमहनीयमाधुरीमहिमोर्जितं तव वपुर्विलोक्यते ।
विदितोऽसि नर्मग वयस्ययार्पितं तव चित्रलेख प्रतिदृष्टया मया ॥८८॥
न च जायते मम भयं तवाननं सुसमीक्ष्य नाभ्यसितपुंपतेः कचित् ।
हृदि वर्द्धतेऽपि च पुराजने स्मृतिर्ननु भुक्तपूर्व इव दृश्यसे क्वचित् ॥८९॥
परपुरुषं रहसि वीक्ष्य चक्षुषा न विभेमि नापि च दुनोमि चेतसा ।
तदनन्य एव विदितो भवानसि स्मृतिरप्यवेदि ननु पूर्वजन्मजा ॥९०॥
इयदेव साहसमपूर्वपूरुषे त्वयि यत्सुविश्वसिमि पूर्वभुक्तवत् ।
तदुपासितुं किमपि पृच्छ्यसे रहः कुशलस्वरूपकुलधामनामसु ॥९१॥
यदि नो भवान् भुवनभूषणाकृते भृशमन्य एव भुवने भविष्यसि ।
तदपीह नौ रुचिरमस्तु संगतं क्षणपञ्चकालपनवृत्तपूर्वकम् ॥९२॥
भवतानवद्यगुणवारिराशिना किमपि स्वभावमधुरेहितस्पृशा ।
जगदेकभूषणवरेण संगतं समवाप्य किं न गुणवत्यहं भवे ॥९३॥
विधिनापि नाविह सुनिर्जने वने सुसमागमोऽद्य समपादि किं कृते ।
मम वा तवैव उभयोः सुखाय वा भवनस्य वापि भुवनत्रयस्य वा ॥९४॥
यदि चित्रलेखपरमानुभूतितो व्यभिचारमेष्यति न तेऽवलोकनम् ।
वरमालिका तदनु मामकी तव कण्ठदेशयुतलब्धसौभगा ॥९५॥

इत्युदीरितमाकर्ण्य तस्याः श्रीरामचन्द्रमाः ।
उवाच मधुरं वाक्यं संकोच्य सहजस्वरम् ॥९६॥
यश्चित्रलेखगो दृष्टस्त्वया कोऽपि पुमान्नवः ।
स एवाहमिह प्राप्तः पितुस्तव निकेतनम् ॥९७॥

परं भवन्त्या परया युवत्या धृतः किमर्थं हृदये स तन्वि ।
स्ववक्षसा सुभ्रु धृतोऽन्यया यः स्वातन्त्र्यसंस्पर्शविवर्जितात्मा ॥९८॥
तत्कण्ठगा ते वरमलिकापि भूत्वा नु कां सिद्धिमुपेष्यतीह ।
पूजाविधौ दैवतमूर्तिकण्ठस्थिता तु माला मनसेप्सिताय ॥९९॥

यदा जनः कोऽपि भवेदधीनः कस्यापि न स्यात् स तदा स्वतन्त्रः ।
न तेन कार्यं किमपीह लोके विक्रीततुल्यः खलु तस्य चात्मा ॥१००॥
विभासि लोकोत्तररम्यरूपा त्रैलोक्यसारा मधुरस्वभावा ।
अनेकसत्पुण्यपरंपराभिः प्राप्यासि केनाप्यनुरूपपुंसा ॥१०१॥
यन्नारदस्त्वाह मुनीन्द्रवर्यस्तन्नो मृषा स्यादिति संप्रतीतिः ।
यो रामचन्द्रः[1] पुरुषोऽखिलात्मा यं कंचिदाकारमनुप्रविष्टः ॥१०२॥
इतीरिते भास्करवंशभूषारत्नेन रामेण भृशं विशाला ।
अभूत्प्रभूतार्तिसमुद्रमग्ना विहाय तत्पारमनन्यमाना[2] ॥१०३॥
चिरं विनिःश्वस्य सगद्गदेन कण्ठेन सा वक्तुमपारयन्ती ।
अपारखेदार्पितचित्तवृत्तिः शून्याशयाङ्गुष्ठविलेखितक्ष्मा ॥१०४॥
उवाच धैर्यं हृदयेऽवलम्ब्य हेनाथ नैवं शरणागतायाः ।
तिरस्कृतिं कर्तुमिहोचितोऽसि भूत्वापि काकुत्स्थकुलेऽवतीर्णः ॥१०५॥

युष्माकमन्वयभवाः पुरुषाः कथाया-
मार्कर्णिताः स्वशरणागतपालनाय ।
आत्तव्रताः स खलु तेषु भवान् भवेऽस्मिन्
मामाशयाविरहितां न कुरुष्व नूनम् ॥१०६॥

भूमन्नथापि यदिमां त्वमशुल्कदासीं
नाङ्गीकरिष्यसि तदा विरहाग्निदग्धम् ।
सद्यः कलेवरमिदं मम भस्म भूत्वा
प्रोड्डीय मारुतजवात्तव वर्त्म यातु ॥१०७॥

तेनापि नाथ तव कोमलपादपद्म-
संचारसंभवसुधारसशैत्ययोगात् ।
संशामिताखिलवियोगमहोष्मतायाः
संगोद्भवेन च सुखेन समेधिता स्याम् ॥१०८॥

---

१. रामचन्द्राख्यः—मथु०, बड़ो०। २. लग्नाशया तत्पदयोश्चिराय—मथु० बड़ो०।

पञ्चत्वमेतु तनुरस्य च भूतवर्गः
स्वस्वप्रकृत्युपगतः किमु तत्र दुःखम् ।
तत्रापि ते चरणपद्मपरागधूली-
संपृक्तमेव पुनरन्यदुपैतु मह्यम् ॥१०९॥
भोक्ष्ये चिराय किमपि प्रथमं वियोगं
पश्चात्तु संगममुपेत्य सुखानि लप्स्ये ।
देहान्तमप्युरुतरार्तिजुषं सहिष्ये
नाहं क्षमास्मि विरहं सुचिराय बोढुम् ॥११०॥
किंवा प्रभो किमपि यद्भूवितुं कलाहं
तन्मे भविष्यति किमेतदनूदितेन ।
पृच्छामि ते पुरुषवर्यं जनेन केन
स्वातन्त्र्यभावविभवस्तवलुप्तकल्पः ॥१११॥
त्वं वीरवर्यं वशगोऽसि जनस्य यस्य
तस्यैव पादकमलं सहसा प्रपद्य ।
आराधयामि स च तेन ततः प्रसन्न-
स्त्वद्रूपलाभवरदानकरो न किं स्यात् ॥११२॥

श्रीराम उवाच

यद्येवं निश्चितं चित्ते त्वया सुन्दरि सर्वथा ।
तदा सुसिद्ध एवासौ तव कामोऽविलम्बितम् ॥११३॥
अथाख्याहि स्वयं चापि निज नाम कुलादिकम् ।
औचितीं समभिज्ञाय ततः कार्यं विधीयते ॥११४॥

विशालोवाच

अहमस्य गिरेः पुत्री नाम्ना यो गन्धमादनः ।
अनेकदेवगन्धर्वमुनिसिद्धौघसेवितः ॥११५॥
यस्य गह्वरदेशेषु कुञ्जपुञ्जेषु सर्वतः ।
गुञ्जद्भ्रमरजुष्टेषु पुष्पवल्लीयुतेषु च ॥११६॥
गायन्ति किन्नराः साकं वनिताभिः कलस्वरम् ।
मोहयन्तो वनमृगानुत्तब्धश्रुतिचक्षुषः ॥११७॥

यस्य काञ्चनमाणिक्यरत्नशृङ्गेषु भूरिषु ।
संचलन्तो जलधराः कांचिच्छोभां वितन्वते ॥११८॥
यस्य रत्नमयैः शृङ्गैर्दिग्भागाः संप्रकाशिताः ।
विभ्रत्यकाण्डसंभूतां शारदीं चन्द्रिकामिव ॥११९॥
सर्वर्तुसुखसंपन्नः सर्वदेवर्षिवल्लभः ।
सर्वतीर्थमयो नित्यं पिता मे गन्धमादनः ॥१२०॥
नाम्ना च मां विशालेति वदन्त्यभिजनाः स्फुटम् ।
नारदोक्तिवशादाशां चिरात्त्वयि दधाम्यहम् ॥१२१॥
तस्य दिव्यदरीवेश्मरत्नदीपप्रकाशितम् ।
अधिष्ठाय मया भोगान् भुङ्क्ष्व निःशङ्कमानसः ।१२२।
इत्युक्तः स तयावोचत् स्वभावमधुरस्मितः ।
आराधयतरां सुभ्रु प्रमोदविपिनेश्वरीम् ॥१२३॥
सहजानन्दिनीं नाम्ना वरदेशीं ममप्रियाम् ।
अतुल्यरूपमाधुर्यलावण्यगुणनिर्भराम् ॥१२४॥
यस्याः प्रसादमासाद्य व्रजे गोपालदारिकाः ।
मां लेभिरे वरं सर्वाः कृतकृत्या इवाभवन् ॥१२५॥
प्रयाहि चेतस्तरुणीं भवतीं राजकन्यकाम् ।
विचिन्वन्ति चिरात्सख्यस्त्वामस्मिन् निर्जने वने ॥१२६॥
त्वया समाराधितया सहजानन्दया त्वहम् ।
बोध्यमानस्तव वशे भविष्यामि न संशयः ॥१२७॥
इत्युक्त्वा तेन वीरेण विसृष्टा सा विशालिका ।
चित्तमाधाय तत्सङ्गे देहमादाय निर्गता[1] ॥१२८॥
पुनः पुनर्विचलितचारुकन्धरं विलोकयन्त्यतनुवशा स्वपृष्ठतः ।
अपारतन्मधुरिममोहिताशया गता कथं कथमपि कुञ्जगह्वरात् ॥१२९॥

तत्र तां सुचिरात्सख्यो विचिन्वन्त्यः सुसंगताः ।
ऊचुः शैलेन्द्रतनये क्वगता भूरि यत् क्षणम् ॥१३०॥

---

१. निर्ययौ—मधु०, बड़ो०।

क्व स पक्षी मनोहारी यो वै त्वां विप्रलब्धवान् ।
कथं च तन्वि करगस्तवैष स्याद्वने रतः ॥१३१॥
एहि शैलेन्द्रपुत्रि त्वं निःसृतासि चिराद्गृहात् ।
किं वदिष्यन्ति ते माता पिता च प्रेमवांस्त्वयि ॥१३१॥
काश्चित्तस्या मुखज्योत्स्नामोषदानन्दनिश्चिताम् ।
दृष्ट्वा संभावयामासुरकस्मात्प्रीतिकारणम् ॥१३३॥
काश्चिदन्तर्गतं तस्या आलक्ष्य विरहव्यथाम् ।
चक्रुर्मनोरथोपेतप्रियसंगमभावनाम् ॥१३४॥
काश्चित्सुचिरमालक्ष्य तस्या अन्यमनस्कताम् ।
जजुः कश्चिदिहैतस्याः पुमान् दृष्टो भवेदिति ॥१३५॥
सर्वास्ताः सस्मितालापैः कुर्वन्त्यः प्रेमसंकथाम् ।
आययुः कन्यका रम्यं शैलराजस्य मन्दिरम् ॥१३६॥
तामामन्त्र्याखिलाः सख्यः स्वानि स्वानि गृहाण्यगुः ।
एकान्ते सा ततस्तस्थौ कन्या शुद्धान्तवेश्मनि ॥१३७॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डिसंवादे पूर्वखण्डे दशरथ-तीर्थयात्रायां गन्धमादनगमने सप्तत्रिंशाधिक-शततमोऽध्यायः ॥१३७॥

अष्टत्रिंशदधिकशततमोऽध्यायः

ब्रह्मोवाच

विजहे भगवान् रामो गन्धमादनपर्वते ।
विशालां हृदये कृत्वा रूपलावण्यभूषिताम् ॥ १ ॥
विरहिण्याः परं तस्याः विरहेणोत्थितव्यथः ।
उपत्यकासु संफुल्लपाटलद्रुमराजिषु ॥ २ ॥

अधित्यकासु विपुलशिलाप्राङ्गणभूमिषु ।
शिखरेषु लसन्नानाधातुचित्रितमूर्तिषु ॥ ३ ॥
कुञ्जेषु पुष्पितानेषु भूरुहस्थगितालिषु ।
कूजत्कोकिलसंमिश्रशिखण्डिध्वनिशालिषु ॥ ४ ॥
गह्वरेषु लतास्तोमविहिताङ्गैरनोकहैः ।
आच्छादितेषु संलक्ष्य तपनातपकान्तिषु ॥ ५ ॥
संपातिनिर्झरा एव प्रतिध्वनिनिनादिषु ।
[1]दरीषु दीर्घदीर्घासु ज्वलित्यौषधिकान्तिषु ॥ ६ ॥
अनेकरत्नकिरणद्योतितासु समंततः ।
काननेषु च संफुल्लवृक्षवाटीसुगन्धिषु[1] ॥ ७ ॥
लक्ष्मणेन द्वितीयोऽसौ विजह्रे लोकमङ्गलः ।
तत्रत्यवनदेवीभिः स्तूयमानो महायशाः ॥ ८ ॥
उपवीणित आनन्दमग्नैर्गन्धर्वपुङ्गवैः ।
पूजितो मुनिभिर्देवैर्दिव्यभावोपचारकैः ॥ ९ ॥
क्वचित्सरःसु संफुल्लपद्माकरसुगन्धिषु ।
राजहंसकुलक्रीडारमणीयजलोर्मिषु ॥१०॥
क्वणच्चक्राह्वकादम्बकारण्डवकुलेषु च ।
जलकेलिरसं बिभ्रन्महामत्त इव द्विपः ॥११॥
क्वचिद्गह्वरकुञ्जेषु श्रीखण्डौघसुगन्धिषु ।
प्रफुल्लचम्पकाराम[2]स्वर्णयूथीविराजिषु ॥१२॥
मन्दानिल[3]समुद्धूतकेतकीवनधूलिषु ।
वसन्त इव पुष्पौघमण्डनं वपुषा दधत् ॥१३॥
नानावर्णप्रसूनाढ्यां वनमालां मुदा वहन् ।
दृष्टो गन्धर्वकन्याभिः किशोरः केलिकोविदः ॥१४॥
कोटिकन्दर्पसुभगः किरीटी रत्नमेखलः ।
कौस्तुभोद्भासितोरस्कः कमनीयतमाकृतिः ॥१५॥

१—१. नास्ति—रीवाँ । २. चंपकारण्य—मथु० बड़ो० । ३. महानिल—मथु०, बड़ो० ।

क्वचिद्योगीन्द्रवर्येषु तपस्यत्सु सुसंगतः ।
ब्रह्मानन्द[1]परीतेषु प्रेमानन्दरसं पुषन् ॥१६॥
चचार तैः सप्रणयंस्तुतः संपूजितश्च सः ।
क्वचिद्देवैर्मुदा दृष्टो गन्धमादनवासिभिः ॥१७॥
अयं नः कार्यकृद्राजा इति सादरमर्चितः ।
क्वचिद्दिव्यधनुर्विभ्रन्निषङ्गी कवचावृतः ॥१८॥
चचार मारयन् घोरानसुरान् दैवतद्रुहः ।
तन्महाकन्दरान्तस्थान् सर्वस्यापि भयानकान् ॥१९॥
इत्थं देवप्रियं कुर्वन् भगवान् रघुपङ्गवः ।
विचचार गिरौ तस्मिन् सानुजो गन्धमादने ॥२०॥
रामशङ्खस्वनं श्रुत्वा समागाद् गन्धमादनः ।
महार्हरत्नाभरणविविधोपयथा[पपदा]न्वितः ॥२१॥
गजरत्नैरश्वरत्नैः सहितो भक्तिसंयुतः ।
बहुपूजोपकरणहस्तैर्भृत्यैः समन्वितः ॥२२॥
तंधातुताम्रमधुराधरपाणिपादमत्युन्नतं सुरमहीरुहदीर्घबाहुम् ।
मुक्तौघमण्डितशिलापरिणाहिवक्षो देशं जगाम गिरिराडिति रामचन्द्रः२३
सोऽवन्दतास्य चरणौ शिरसा समेत्य
प्रह्वोऽतिभक्तिविलसत्पुलकाच्यकायः ।
श्रीरामचन्द्रमिति चेतसि साधुवाक्यै-
र्निश्चित्य चाद्रियजत् महतार्हणेन ॥२५॥
उवाच परमानन्दपरीतहृदयो गिरिः
निवेद्य तच्चरणयोरात्मानं धीमतांवरः ॥२६॥

गन्धमादन उवाच

यश्चेतसा योगिभिरीश चिन्त्यसे समाधिवश्येन्द्रियसंयतात्मभिः ।
स्वयं स साक्षाद्भगवानयं भवानस्मादृशं भाग्यवशेन गोचरः ॥२७॥
क्व मे शिलाकोटिसुकर्क शंमनो महाभिमानी जडभावभावितम् ।
क्व ते महायोगमुनीन्द्रदुर्लभं संदर्शनं नाथ तमोमलापहम् ॥२८॥

---

१. ब्राह्मणेषु–रीवाँ ।

कृपैव ते केवलमन्यसाधनव्रजानपेक्षा भगवन् गरीयसी ।
ययाञ्जसा भूरिसमाधिसाधनैरलभ्यमाप्नोति भवन्तमीदृशः ॥२९॥
नमस्त्रयीधर्मपथद्रुहोऽसुरान्निगृह्णतेऽद्धानुगृहीतसाधवे ।
अनेकधानिर्मितविश्वगुप्तये विश्वात्मने ते परमाय राघव ॥३०॥
इति संस्तूय संपूज्य निवेद्य विविधोपदाः ।
गजाश्वरत्नमुख्यानि वसूनि च समर्प्य सः ॥३१॥
मुहुर्मुहुस्तच्चरणौ लोचनाभ्यां परामृशन् ।
शिरसा हृदयेनापि संवहन् संमुमोद सः ॥३२॥
स्मयावलोकेन मदीयमानसं कृत्वा विशुद्धं विरजस्तमोमलम् ।
पदारविन्दद्वयचिह्नसंयुतं वपुस्तदीयं च विधाय मङ्गलम् ॥३३॥
विसर्जयामास तमार्तबान्धवस्तस्मिन् क्षणेऽसौ दुहितुः कृते प्रभुम् ।
विज्ञापयामास मुनीन्द्रभाषितं संस्मृत्य चित्तेन तु दीनमानसः ॥३४॥
तस्य विज्ञापनं रामो मञ्जुस्मितविलोकनैः ।
अङ्गीचकार भगवान् दृशोः पीयूषवर्षणैः ॥३५॥
अथास्य दुहितुर्वेश्म भगवान् नारदोऽभ्यगात् ।
तं पूजयित्वा पाद्याद्यैः रहसीदमुवाच सा ॥३६॥

विशालोवाच

मुनीन्द्र त्वाभिपृच्छामि तद्ब्रूहि कृपया मयि ।
कथं नु सहजानन्दा प्रमोदवननायिका ॥३७॥
आराध्या मयका ब्रह्मन्निति मे प्रतिबोधय ।
स्तवैर्वा पूजनैरन्यसाधनैर्वा विशेषतः ॥३८॥

नारद उवाच

आराधयतमां शीघ्रं तामेव सहजेश्वरीम् ।
श्रीरामदयितां नित्यं प्रमोदविपिनश्रियम् ॥३९॥
यदि रामस्वरूपे ते निमग्नं नितरां मनः ।
सहजाराधनादन्यत्साधनं नात्र विद्यते ॥४०॥
येन स्तवेन रामस्य विरहेणार्त्तमानसाः ।
आदिव्रजनिवासिन्यस्तुष्टुवुर्गोपयोषितः ॥४१॥

तमेतत्ते प्रवक्ष्यामि स्तवं सर्वार्थसाधकम् ।
सहजानन्दिनीशीघ्रप्रसादजननं भुवि ॥४२॥
प्रमोदकाननस्यान्तरशोकद्रुममण्डपे ।
श्रीरामविरहेणार्त्ता इदमूचुर्व्रजाङ्गनाः ॥४३॥

गोप्य ऊचुः

नमो नित्यलीलारसानन्दरूपे प्रमोदाटवीकुञ्जवीथीविनोदे ।
व्रजाधीशसूनोर्वियोगार्त्तिहन्त्रि स्फुटप्रेमभक्त्या कृते देवि तुभ्यम् ॥४४॥
पराणां परायै परानन्दमूर्त्यै प्रपञ्चातिगामिस्वरूपाद्भुतायै ।
नवांशुप्रभाकोटिचन्द्रार्कभासे नमो नन्दनापत्यरत्नाय तुभ्यम् ॥४५॥
नमोऽशेषकल्याणसंपद्गुणायै नमो वाङ्मनोभ्यां सदागोचरायै ।
नमो निर्गुणायै निराकारिकायै नमस्ते परप्रेमसंपत्समृद्धयै ॥४६॥
जयस्येकरूपा तथानेकरूपा जगद्रूपिणी सर्वधीवृत्तिरूपा ।
परार्द्धस्मरप्रेयसी चारुरूपाप्यरूपा परा चित्कला त्वं विभासि[1] ॥४७॥
परब्रह्मरूपा पराविश्वसृष्टेस्तथा विश्वमूर्तिर्विचित्राकृतिः सा ।
परप्रेमभृत्सच्चिदानन्दरूपा ततो विश्वरूपा विधात्री परा त्वम् ॥४८॥
नमस्तेऽस्त्वविच्छिन्नसच्चित्सुखैकानुभूत्यै प्रभूत्यै विभूत्यै परस्य ।
प्रभोः सर्ववेदान्तगम्यस्य या त्वं[2] परानन्दसच्चित्कलायै च तुभ्यम् ॥४९॥

मात्रानन्दस्वरूपायै परानन्दैकमूर्तये ।
निरुपाधिस्वरूपायै परस्यै ते नमो नमः ॥५०॥
नमो ब्रह्मशिवाराध्यपादपद्मनखत्विषे ।
सर्वदेवमयानन्तरूपायै ते नमो नमः ॥५१॥
सर्वविश्वोदयस्थानसंहारकरुणात्मने ।
समस्तदुःखहारिण्यै सहजायै नमो नमः ॥५२॥
सहस्रशीर्षापुरुषरूपायै ते गुणात्मने ।
एकांशविश्वरूपायै सर्वोर्ध्वायै[3] नमोनमः ॥५३॥

---

१. चारुरूपा सरूपाप्यरूपा परा चित्कला त्वं—मथु०, बड़ो० । २. गम्यस्य रामस्य या त्वं—रीवाँ । ३. सर्वोद्धर्त्यै—रीवाँ ।

त्रिपाद्ब्रह्मस्वरूपायै विश्वातिक्रान्तवर्चसे ।
समस्तविश्ववय्यै ते सहजायै नमोनमः ॥५४॥
अनन्तशक्तिरूपायै नित्यायै नित्यतृप्तये ।
अचिन्त्याद्भुतरूपायै ज्ञानमूर्त्ते नमोनमः ॥५५॥
सन्मात्रवेद्यरूपायै चिन्मात्रपरशक्तये ।
आनन्दमात्ररूपायै परस्यै ते नमोनमः ॥५६॥
नितान्तनिःप्रपञ्चायै सप्रपञ्चात्ममूर्तये ।
योगिध्येयस्वरूपायै ध्यानमूर्त्ते नमोनमः ॥५७॥
नमः सावयवायै ते निरवयवमूर्तये ।
[1]परिणामस्वरूपायै तथाऽपरिणतात्मने[1] ॥५८॥
नमो निःशब्दरूपायै नमस्ते शब्दमूर्तये ।
नमो विवर्तरूपिण्यै परिणामात्मने नमः ॥५९॥
नमः कूटस्थरूपायै नमो बीजैकमूर्त्तये ।
नमः प्रकृतिरूपायै नमस्ते पुरुषात्मने ॥६०॥
परतत्त्वस्वरूपायै परमाकाशमूर्त्तये ।
समस्तशक्तिरूपायै रामपत्न्यै नमोनमः ॥६१॥
त्वमिच्छारूपिणी पूर्वं त्वमादिज्ञानरूपिणी ।
त्वमेव वयुनं नाम परस्य ब्रह्मणः कला ॥६२॥
त्वमीश्वरी क्रियारूपा सृष्टिस्थित्यन्तरूपिणी ।
त्वं विद्या त्वमविद्याभूस्त्वं परा चापरा तथा ॥६३॥
सदसद्व्यक्तिरूपा त्वमव्यक्तं त्वं महानसि ।
त्वं प्रवृत्तिः प्रतिष्ठा त्वं ह्यविद्याशक्तिरुत्तमा ॥६४॥
शान्तिस्त्वं शान्त्यतीता च परा त्वं सूक्ष्मरूपिणी ।
त्वमेव समना देवि त्वमेवास्युन्मनाभिधा ॥६५॥
नानाकारेण यद्दृश्यं विश्वं स्थावरजङ्गमम् ।
भूतं भवद् भविष्यच्च तत् त्वमेवासि सुन्दरि ॥६६॥
त्वं लक्ष्मीस्त्वं शिवा गौरी त्वं सावित्री जगत्प्रसूः ।
त्वं शची त्वमसि स्वाहा त्वं संहारिण्य[2]नुत्तमा ॥६७॥

१—१. नास्ति—रीवाँ । २. रुद्राणी ह्य°—रीवाँ ।

त्वं तामसी मूर्तिरसि त्वमेव खलु भार्गवी ।
त्वं सदागतिराकाशस्थानगा प्राणदेवता ॥६८॥
त्वमेव सर्वसंपत्तिस्त्वमैश्वर्यस्वरूपिणी ।
त्वं रोहिणी शशाङ्कस्य त्वं संज्ञा चण्डरोचिषः ॥६९॥
त्वं रात्रिर्दिवसस्यान्ते यज्ञमूर्तेश्च दक्षिणा ।
त्वं भुक्तिरूपिणी साक्षात्त्वं मुक्तिर्भवबन्धनुत् ॥७०॥
अकुतोभयरूपा त्वं शुद्धचिन्मात्ररूपिणी ।
'त्वं कालकलनाकारा विश्वसर्गप्रवर्तिका ॥७१॥
स्त्रीनामाङ्कितवस्तूनां त्वमाकारसमर्पिणी ।[1]
सर्वदेहेषु भूतानां षट्चक्राधाररूपिणी ॥७२॥
चक्रान्तरस्था चिन्मूर्तिस्त्वं चित्रा सूक्ष्मतन्तुगा ।
त्वं विश्वभासिनी भव्या स्त्रीपुंभावभिदामयी ॥७३॥
त्वत्स्वरूपावगमने[2] महोपनिषदामपि ।
भयाद्वाचो मौनमासुर्नेतिनेत्याचचक्षिरे ॥७४॥
मनसश्चैव वाचश्च यत्र वृत्तिर्न विद्यते ।
अतद्व्यावृत्तिरूपेण बोधयन्त्यत एव हि ॥७५॥
यद्रूपं यत्परं ब्रह्म चित्प्रकाशमयं स्वतः ।
तत्रानन्दस्वरूपेण त्वमेव प्रतितिष्ठसि ॥७६॥
अणोरणीयसी त्वं हि महतश्च महीयसी ।
विरुद्धसर्वधर्माणामाश्रयादुक्तगोचरा ॥७७॥
तत्पदार्थस्वरूपा त्वं त्वंपदार्थस्वरूपिणी[3] ।
उभया भेदरूपा च त्वमेव परमेश्वरि ॥७८॥
तव लीलाप्रपञ्चस्य विश्वस्यास्य त्वदात्मनः ।
अनिर्वाच्यं स्वरूपं ते त्वं तदा कथमुच्यताम् ॥७९॥
यावन्ति खलु तत्त्वानि विभिन्नानि परस्परम् ।
तेषामभेदज्ञानाय बुद्धिस्त्वदवलम्बिनी ॥८०॥

१–१. नास्ति–रीवाँ : २. तस्यरूपाव°–रीवाँ। ३. तत्पदानि त्वमेवासि तत्पदार्थस्वरूपिणी ।—रीवाँ ।

त्वं ददासि यशो लोके भावेन भजतां नृणाम् ।
ऐश्वर्यं सुकवित्वं च पाण्डित्यं चार्थशब्दयोः ॥८१॥
वीर्यं धैर्यं च गाम्भीर्यं ज्ञानं विज्ञानमेव च ।
धान्यं धनं प्रभूतिं च पुत्रपौत्रादिसंततिम् ॥८२॥
स्वाराज्यमाधिपत्यं च सर्वं यज्ञफलं तथा ।
ब्रह्मात्मैक्यफलां विद्यामैहिकामुष्मिकं सुखम् ॥८३॥
अनायासेन जायन्ते फलान्येतानि देहिनाम् ।
कामयन्ते च यं कामं लभन्ते तं तमेव च ॥८४॥
सम्यगाराधितादम्ब[1] त्वत्पादाम्बुरुहद्वयात् ।
अतिदुर्लभमप्यर्थं लभन्ते मानवा भुवि ॥८५॥
काले काले त्वमेवाम्ब प्रादुर्भूय स्वरूपतः ।
सतां संरक्षणं धत्से शमनं चासतामपि ॥८६॥
प्रमोदवनलीलानामधिष्ठात्री विराजसे ।
शृङ्गारकल्पवल्ली त्वं श्रीरामरमणप्रदा ॥८७॥
अस्माकं हृदयं चिराय सहजे रामे मनोहारिणि
प्रेम्णा शक्तिमुपेत्य दीर्घविरहज्वाले वियोगानले ।
दाघं तेन दिने दिनेऽतिविषमानङ्गज्वरव्याधिना
संतप्यामह इत्यतः सुखनिधिं त्वामाश्रिताःस्मो वयम् ॥८८॥
महद्रहस्यमस्माकं रामाख्यं दीयतां धनम् ।
त्वदेककरगं मातः सुलभं त्वत्प्रसादतः ॥८९॥
इति ते मुहुरेव याच्यते प्रमदारण्यविहारनायिके
विरहाधिविपन्निवृत्तये शरणं त्वां वयमातरागताः ॥९०॥
त्वदेकवशगो रामः सदास्मभ्यं प्रदीयताम् ।
त्वमाविश्य जगत्सर्वं सहजे परिदीव्यसि ॥९१॥
तव सौभाग्यमतुलं सदृशं केन वर्ण्यताम् ।
इति विज्ञाय भक्तेषु करुणां कर्तुमर्हसि ॥९२॥

---

१. देवि—रीवाँ ।

इति तासां स्तुवन्तीनां मध्ये श्रीसहजेश्वरी ।
प्रादुरासीत् प्रसन्नात्मा साशोकद्रुममण्डपात् ॥९३॥
पद्मं दक्षिणहस्तेन वामेन दधती वरम् ।
शारदेन्दुसहस्राभ[1]वदनद्युतिदीधितिः ॥९४॥
तडित्कोटि प्रकाशाङ्गी[2] मञ्जुलस्मितशालिनी ।
सर्वावयवभूषाढ्या दृशो पीयूषवर्षिणी ॥९५॥
जपाकुसुमसंकाशरक्ताम्बरसमावृता ।
संध्येव पूर्णचन्द्रांशुसंदोहद्युतिदीपिता ॥९६॥
तस्या मुखेन्दुकिरणैर्दीपिताः सकला दिशः ।
उत्तानचञ्चवश्चासन् प्रमुद्वनचकोरिकाः ॥९७॥
सर्वा एव नमश्चक्रुः सहजानन्दिनीं स्त्रियः ।
श्रीरामविषयं कामं मेनिरे सफलं च ताः ॥९८॥
सर्वाः गोपालवनिताः संबोध्य सहजेश्वरीम् ।
उचाव वचनं प्रीताः प्रसादसुमुखाकृतिः ॥९९॥

सहजानन्दिन्युवाच

अस्तु वो गोपसुन्दर्यः सफलोऽयं मनोरथः ।
अचिरादेव लप्स्यध्वं रामेण रमणं सह ॥१००॥
नातः परं वः प्रियविप्रयोगो बाधिष्यते निश्चिनुतैवमन्तः ।
एतासु रात्रीषु मनोजमग्नास्तारुण्यमेतत् सफलं कुरुध्वम् ॥१०१॥
इति दत्त्वा वरं ताभ्यः सुप्रीता सहजेश्वरी ।
आविवेश निजांशेन सर्वा एव व्रजाङ्गनाः ॥१०२॥

नारद उवाच

त्वमप्येवं विशालाक्षि समाराधय भक्तितः ।
तामेव सहजेशानीं सर्वकामवरेश्वरीम् ॥१०३॥
तस्याः सुवर्णघटितां प्रतिमां हृदये वह ।
गन्धपुष्पादिभिर्नित्यं संपूजय मुहुर्मुहुः ॥१०४॥

---

१. °सहस्रस्य—रीवाँ । २. °प्रकाशासौ—रीवाँ ।

अचिरादेव ते वश्यो रामचन्द्रो भविष्यति ।
प्रसादात्सहजादेव्याः प्रमोदविपिनाश्रयः ॥१०५॥

ब्रह्मोवाच

उपदिश्य विशालाक्षीं सहजानन्दिनीव्रतम् ।
ययौ सपदि देवर्षिर्वल्लकीं क्वणयन् दिवि ॥१०६॥

इतिश्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे पूर्वखण्डे दशरथतीर्थयात्रायां गन्धमादनगमने अष्टत्रिंशदधिकशततमोऽध्यायः ॥१३८॥

●

ऊनचत्वारिंशाधिकशततमोऽध्यायः

ब्रह्मोवाच

ततश्च सा विशालाक्षी श्रीमद्रामेन्दुलिप्सया ।
नारदोक्तेन विधिना सिषेवे सहजेश्वरीम् ॥१॥
अथैनां सुप्रपन्ना सा प्रादुर्भूय पुरः स्थिता ।
वरेण तोषयामास यथोक्तेन[1] वरप्रदा ॥२॥
ततश्च भगवान् राम उवाचानुजमादरात् ।
गच्छ लक्ष्मण शीघ्रं त्वं शैलेन्द्रं गन्धमादनम् ॥३॥
तस्मै मद्योग्यकन्यार्थं गत्वा याचस्व मद्गिरा ।
श्वोभूते तां विवाह्योतो गच्छावो भूरिसंपदा ॥४॥
आर्यस्य वाक्यमादाय लक्ष्मणो बुद्धिमत्तरः ।
जगाम शैलवर्यस्य पुरं मणिपुराभिधम् ॥५॥
रत्नवैदूर्यकनकप्रासादवरशोभितम् ।
इन्द्रनीलमणिद्योतिलसत्स्फटिकगोपुरम् ॥६॥
कल्पद्रुमलतोत्तुङ्गध्वजराजितमन्दिरम् ।
रत्नचत्वरविश्रान्तवणिग्विक्रीतमौक्तिकम् ॥७॥
[2]वीप्सामिवालकापुर्या वसंतं सर्वसंपदाम् ।
पर्यायमिव नाकस्य निर्मितं विश्वकर्मणा ॥८॥

---

१. °यथेप्सित—रीवाँ । २. "वीप्सा पुनरुक्ति." टि०—मधु० ।

गङ्गाप्रवाहसंशोभिपरिखामध्यभासुरम् ।
ज्वलद्दिव्यमहावप्रस्पर्धितार्केन्दुमण्डलम् ॥९॥
रत्नशालासुविश्रान्तगायद्गन्धर्वमण्डलम् ।
स्वर्गादपि मनोहारि सर्वदेवगणाकुलम् ॥१०॥
रत्नप्रासादशिखरच्छविच्छुरितवारिदम् ।
प्रतिहर्म्यनदच्चारुमुरजध्वनिगर्जितम् ॥११॥
महार्हरत्नखचितं गृहभित्तिमनोरमम् ।
जनैः संदिग्धनक्षत्रप्रतिबिम्बसमुज्ज्वलम् ॥१२॥
दिव्यौषधिप्रकाशेन तमिस्रास्वपि भासुरम् ।
कृताक्षेपभयानर्हरत्नदीपप्रदीपितम् ॥१३॥
नित्यं यौवनसंपन्नदिव्यपौरजनाकुलम् ।
कन्दर्परतिसौन्दर्य[1]नरनारीगणोर्जितम् ॥१४॥
परमानन्दनिर्निद्रसदा जाग्रन्महाजनम् ।
हावभावमनोहारिदिव्यस्त्रीकुलसंकुलम् ॥१५॥
संतानकतरुच्छायाविश्रान्ततरुणाध्वगम् ।
नित्योत्साहसमापूर्णनित्योत्सवविवर्द्धितम् ॥१६॥
नित्यानन्दसमूहाढ्यशृङ्गाररससेवितम् ।
मञ्जीरनादमधुरचलद्विद्याधराङ्गनाम् ॥१७॥
नृत्यगीतसमासक्तक्रीडत्पौरजनाकुलम् ।
क्रीडन्नवनिधिस्तोमसंमर्दरुचिरापणम् ॥१८॥
सरसीशतसंफुल्लस्वर्णरत्नसरोरुहम् ।
ग्रहारामसदादोव्यत्प्रसन्नकुसुमाकरम् ॥१९॥
तत्र गत्वा स शैलस्य मन्दिराभिमुखो ययौ ।
समस्तपौरलोकानां हृदयानि हरन् भृशम् ॥२०॥
तं कोटिमन्मथललामकिशोरवेशं [2]नव्येन्द्रनीलमणिमञ्जुलकोमलाङ्गम् ।
आजानु विस्तृतभुजं वृषपीवरांसं विस्तीर्णवक्षसमुदारमनोज्ञहासम्[2] ॥२१॥

---

१. कन्दर्पमात्र सातंकं-पा०, "सातंकं नाम सभयमित्यर्थः" टि०—मधु०, बड़ो० । २ – २ नास्ति—रीवाँ ।

माधुर्यसागरमनन्तरजं रमेशाद्रामान्निकाममभिरामलसन्मुखेन्दुम् ।
प्रातःसमुल्लसितनव्यसरोजनेत्रं सौमित्रिमीक्ष्य मुमुदुर्नयनानि नृणाम् ॥२२॥
तमायान्तमभिप्रेत्य गन्धमादनपर्वतः ।
अभ्यागत्य बहिर्गेहादग्रहीद्बहुसादरम् ॥२३॥
प्रवेशितस्तेन सरत्नसौधे महार्हसिंहासनमास्थितोऽभूत् ।
पाद्यादिसर्वार्चनसंविधान्ते संदिष्टमार्येण जगाद वाक्यम् ॥२४॥

लक्ष्मण उवाच

श्रूयते भवतः कन्या रत्नभूता जगत्त्रये ।
तामार्यो याचते प्रीत्या कुर्वंतस्त्वं यथोचितम् ॥२५॥
श्रुत्वा शैलपतिर्वाक्यं लक्ष्मणस्य महात्मनः ।
मुमुदेऽतीव हृदये यथोचितवराप्तितः ॥२६॥

गन्धमादन उवाच

अहो मे महती भाग्यसंपद्विजयतेतराम् ।
यत्साक्षाद्भगवान् रामो मम मान्यो भविष्यति ॥२७॥
जानाम्यहं युवां भूमौ नव्येन्दीवरसुन्दरौ ।
भ्रातरौ देवकार्यार्थमवतीर्णौ नरोत्तमौ ॥२८॥
पुराणपुरुषौ साक्षात्प्रधानपुरुषेश्वरौ ।
भवांस्तदक्षरं ब्रह्म रामः श्रीपुरुषोत्तमः ॥२९॥
एकमेव परं ब्रह्म रामो लोके प्रकाशते ।
अनन्तकालरूपस्त्वं शेषः संकर्षणोऽव्ययः ॥३०॥
रामचन्द्रः परंधाम परात्परमुदाहृतम् ।
यद्ब्रह्म पूर्णगुणकं परमानन्दमन्दिरम् ॥३१॥
स मां जामातृरूपेण तोषयिष्यति राघवः ।
अहो मे परमं भाग्यं लोके गास्यन्ति मानवाः ॥३२॥
यद्भाग्यं सरितांपत्युर्यद्भाग्यं जनकस्य च ।
तदेव भाग्यमतुलं ममापि खलु दृश्यते ॥३३॥

ब्रह्मोवाच

ततः स रत्नगर्भाख्यां पत्नीमाहूय पर्वतः ।
उवाच ननु ते पुत्र्या विवाहः समुपस्थितः ॥३४॥

यः स्वयं भगवान् पूर्णः परो रामः स्वयं हरिः ।
सोऽपि दाशरथे गेहे जामाता ते भविष्यति ॥३५॥
पुरन्ध्रीवर्गमाहूय सुमुहूर्त्ते शुभे दिने ।
कन्यारत्नमिदं योग्यं रामाय प्रतिपाद्यताम् ॥३६॥

रत्नगर्भोवाच

जनकस्य सुता तस्य भूपतेः प्रथमा वधूः ।
सैवास्य पट्टमहिषी भविष्यति न संशयः ॥३७॥
मत्सुतां सुकुमाराङ्गीं रूपेणाप्रतिमां भुवि ।
निषेदुषीमधस्तस्याः कथं सोढुमहं क्षमे ॥३८॥
अतो निवेद्यतामेष जामाता भवता प्रभो ।
यथोत्कर्षो न भज्येत मत्सुतायाः शशिश्रियः ॥३४॥
इत्युक्त्वा शैलराजं सा पुरन्ध्रीवर्गमाह्वयत् ।
कर्तुं वैवाहिकीं सर्वां सविधां शुभवासरे ॥४०॥
स तथेति प्रतिश्रुत्य लक्ष्मणं विससर्ज वै ।
स आगत्येप्सितं कार्यं सिद्धमार्ये व्यजिज्ञपत् ॥४१॥
अथ वैवाहिके लग्ने चन्द्रवृद्धिसमन्विते ।
तिथौ जामित्रयुक्तायां सबन्धुर्गन्धमादनः ॥४२॥
वैवाहिकीं शुभां दीक्षां चकार मुदिताशयः ।
सर्वतो भूषितं पार्श्वमुभौ तस्य पुरं नवम् ॥४३॥
द्रक्ष्यामोऽद्य स्वयं रामं भाग्यं नश्चक्षुषामिति ।
पौराणां हृदये भूयस्युत्कण्ठा समवर्द्धत ॥४४॥
अथोत्तराफाल्गुनीसु चन्द्रयुक्तासु तद्दिने ।
मैत्रे मुहूर्ते सुभगा भूषयन्तिस्म कन्यकाम् ॥४५॥
मङ्गलाभ्यङ्गमातेनुस्तस्याः सुभगयोषितः ।
लोध्रकल्केन तत्प्रोञ्छ्य कालेयोद्वर्तनं दधुः ॥४६॥
मणिवैदूर्यमुक्ताभिर्निर्मिते चारुचित्रिते ।
चतुष्के तां समारोप्य स्नापयामासुरङ्गनाः ॥४७॥
ततः सुवर्णकुम्भस्थैर्जलैस्तूर्यपुरःसरम् ।
स्नानं कृत्वा विशुद्धाङ्गी पटं परिदधौ नवम् ॥४८॥

मणिस्तम्भचतुष्केण शोभमाने वितानिनि ।
विहिते वेदिमध्ये तां निन्युर्दिव्यासनान्विते ॥४९॥
धूपितागुरुधूपेन तस्याश्चिकुरधोरणी ।
दूर्वामधूकदाम्नोच्चैर्बद्धा सुभगया ततः ॥५१॥
विलिप्य शुक्लागुरुणा तदङ्गं सुभगाः स्त्रियः ।
गोरोचनापत्रभक्त्या चित्रितुं समचीकरन् ॥५१॥
सुवर्णवर्णैर्मृदुभिः कर्णार्पितयवाङ्कुरैः ।
विलम्बितालकौ तस्याः कपोलौ परिरेजतुः ॥५२॥
स्वाभाविकरुचा रक्तौ तस्याः कमलकोमलौ ।
चरणौ रञ्जितौ स्त्रीभिर्यावकेन विशेषतः ॥५३॥

इन्दीवरदलाकारे नवखञ्जनमञ्जुले ।
कालाञ्जनेन नयने रञ्जनं समवापतुः ॥५४॥
सुवर्णमणिभूषाभिः प्रत्यङ्गं सा विभूषिता ।
विरेजे नववल्लीव वसन्तागमपुष्पिता ॥५५॥
सर्वाङ्गभूषितामेतामादर्शफलकं स्त्रियः ।
दर्शयामासुरानन्दभरमञ्जुस्मिताननाम् ॥५६॥

यापत्यरत्नजननाद् भुवि रत्नगर्भा
सा गन्धमादनवधूः कमताभिधाना ।
तद्भालमार्द्रहरितालमनःशिलाभ्यां
चक्रे विवाहतिलकान्वितमञ्जुलाभ्याम् ॥५७॥

बबन्धोर्णामयं सूत्रं प्रेमवाष्पाकुलेक्षणः ।
वैवाहिकीं शुभां दीक्षां सूचयामास तत्करे ॥५८॥
सा विरेजेतरां बाला नवीनक्षौमवासिनी ।
चन्द्रिकोच्छ्रायविपुलाकलेव सितरोचिषः ॥५९॥
प्रणम्य ततो माता पूजिताः कुलदेवताः ।
प्रणामं कारयामास साध्वीनां कुलयोषिताम् ॥६०॥
शिवस्य गिरिजेव त्वमेहि सौभाग्यमूर्जितम् ।
रामस्येति सतीलोकाः प्रायुङ्क्तः परमाशिषः ॥६१॥

सुहृद्बन्धुसमाजस्थस्तत्पिता गन्धमादनः ।
वैवाहिकेऽखिले कृत्ये सज्जः स ब्राह्मणैः सह ॥६२॥
आस प्रतीक्षमाणोऽथ रामचन्द्रवरागमम् ।
तावत्सोऽपि स्ववधूभिर्भूषितः कुञ्जमण्डपे ॥६३॥
सातकुम्भमयैः कुम्भैः स्वर्गङ्गाजलसंभृतैः ।
स्नापितो देवकन्याभिः पुत्रो दशरथस्य सः ॥६४॥
दध्यौ कर्पूरकस्तूरीकुङ्कुमागुरुनिर्मितम् ।
अङ्गरागं शुभं रामो विवाहोत्सवदीक्षितः ॥६५॥
नवाम्रमञ्जरीपत्रपारिजातप्रसूनकैः ।
शुशुभे शेखरे बिभ्रद्वसन्त इव मूर्त्तिमान् ॥६६॥
भाले गोरोचनापत्रं दधार रसिकोत्तमः ।
वहन्नुदयकालीनमष्टमीशशिनं घनः ॥६७॥
तिलकं हरितालस्य रेजे तद्भालमण्डले ।
रोहिणीवाङ्कमारूढा विलसत्यष्टमी विधोः ॥६८॥
सुवर्णमणिमाणिक्यभूषणैर्भूषिताम्बरः ।
प्रसन्नतारकाजालं कलयन्निव तोयदः ॥६९॥
सौवर्णसूत्रघटितमुष्णीषं शिरसा दधत् ।
विरेजे छुरितं विष्वक् चूडामणिमरीचिभिः ॥७०॥
सकञ्चुकं वहन्नव्यं सुवर्णगुणनिर्मितम् ।
रेजे तडिद्वितानेन विलिप्त इव वारिदः ॥७१॥
कटिबन्धं दधद्रामो निस्त्रिंशेन समन्वितम् ।
वीरो मूर्त इव भ्राजदुत्साहःस्थायिसंगतः ॥७२॥
जानकीहृदयानन्दं सहजाचित्तमोहनम् ।
भ्रात्रोपनीते मुकुरे स्वमात्मानं ददर्श सः ॥७३॥
"सुभगे शिर आरोह शोभयन्ती मुखं मम" ।
इति मन्त्रेण मुकुटं दधौ वैवाहिकं वरः ॥७४॥
वाचयित्वा सुपुण्याहं वसिष्ठाद्यैर्मुनीश्वरैः ।
नीराजितः स्ववधूभिर्जयघोषपुरःसरम् ॥७५॥

स उच्चैःश्रवसं नाम वासवेन समर्पितम् ।
अश्ववर्यं समारुह्य प्रतस्थौ श्वसुरालयम् ॥७६॥
तमनुप्रस्थितो वीरः सौमित्रिः शुभदर्शनः ।
मनोभवमिव प्रेम्णा प्रहृष्यन् कुसुमाकरः ॥७७॥
तमनु प्रस्थिता देवा विधिशक्रशिवादयः ।
ऋषयश्च वशिष्ठाद्या जयमन्त्रयुताः पुरः ॥७८॥
गीर्वाणवनिताश्चानु प्रस्थिताः शुभगीतिभिः ।
कालोचितं प्रागायन्त्यो देवकन्यागणैः सह ॥७९॥
चक्रुरप्सरसो नृत्यमुर्वशीप्रमुखाः पथि ।
जगुर्गन्धर्वपतयः सतालल्यमूर्छनाः ॥८०॥
तूर्यघोषो महानासीन्महामाङ्गलिकः पथि ।
यथा जलधरोद्घोषैरगर्जन् कन्दरा गिरेः ॥८१॥
शङ्खवीणामृदङ्गानां दुन्दुभीनां समंततः ।
पटहानां झर्झराणां संघर्षोऽभूत् परस्परम् ॥८२॥
नारदस्तुम्बुरुश्चैव श्रीरामस्य पुरो गतौ ।
निजां वैणिकतां तत्र सफलां चक्रतुर्मुनी ॥८३॥
माङ्गल्यतूर्यघोषेण विमानपथचारिणा ।
आकारितः शुभोद्वाहं द्रष्टुं स्वर्गपुरीजनः ॥८४॥
तस्यातपत्रं जगृहे भगवान् पद्मबान्धवः ।
उच्चैः शुशोभ शीर्षस्थमुक्तादामविलम्बि तत् ॥८५॥
पार्श्वयोः गङ्गयमुने सिषेवाते रघूद्वहम् ।
चामरग्राहिणीभूय हित्वा नद्यात्मकं वपुः ॥८६॥
ब्रह्मा वैकुण्ठनाथश्च तं शनैरभ्यगच्छताम् ।
जयेति धीरया वाचा वर्द्धयन्तौ मुदं परम् ॥८७॥
सुमुहूर्तेन शैलस्य प्राप्तो मणिपुरं पुरम् ।
उपकण्ठस्थितैः पौरैर्दृश्यमानो मितादरम् ॥८८॥
प्रत्युज्जगाम तं शैलः सुहृद्भिर्बन्धुभिः सह ।
गजाश्वरथपादातैः पथिसंमर्दयन् बलैः ॥८९॥

स वेदितो जगद्भर्ता जामात्रा हृदि लज्जितः ।
आराधितः पुरा येन स दूरात्सहजापतिः ॥९०॥
स तं प्रवेशयामास समृद्धं निजमन्दिरम् ।
भूषितापणसौधस्थपौरकन्याजनेक्षितम् ॥९१॥
तदानीं पुरसुन्दर्यो दृष्ट्वा रूपं वरस्य तत् ।
बभूवुर्धन्यजन्मानः सफलायतलोचनाः ॥९२॥
काचिदालोकमार्गेण द्रष्टुं रामं समागता ।
उद्वेष्टनगलन्माल्यान् बद्धु केशाश्च नाशकत् ॥९२॥
काचित्प्रसाधिकाहस्तादाक्षिप्यैवार्धरञ्जितम् ।
पादं गलद्रसं भूमावङ्कयामास तत्क्षणे ॥९४॥
साञ्जनैकेक्षणा काचिन्निरञ्जनपरेक्षणा ।
शलाकां दधती हस्ते वातायनमुपागमत् ॥९५॥
काचित्प्रस्खलितां नीवीं दधत्येककरे वधूः ।
नाशक्नोद्बद्धुमालोकमार्गन्यस्तायतेक्षणा ॥९६॥
काचित् स्तनन्धयं त्यक्त्वा व्रजन्ती रामवीक्षणे ।
प्रस्नुताभ्यामुरोजाभ्यां सिषेच पदवीं वधूः ॥९७॥
तासां मुखसहस्रेण कान्तिमण्डलशालिना ।
गवाक्षाः परितो रेजुः सेन्दुविम्बा इव स्फुटम् ॥९८॥
पताकाकोटिसंछन्नं द्वारेष्वाबद्धतोरणम् ।
समङ्गलं प्रतिपदं रामः पुरमुदैक्षत ॥९९॥
सर्वेन्द्रियवती[1] वृत्तिः पौराणां रामदर्शने ।
सर्वात्मना नेत्रयुग्मे प्रविष्टाभवदातुरा ॥१००॥
अथो मणिपुरस्त्रीणां मुखेभ्यो निर्गता गिरः ।
शुश्राव रामचन्द्रस्ताः सोत्साहद्विगुणाशयः ॥१०१॥
उचितमिदममुष्य प्राप्तये श्रीविशाला
भृशमचरदनल्पं सेवनं दैवतस्य ।
ननु चरणसरोजेऽप्यस्य दास्यं दुरापं
किमिति कुसुमचापस्पर्द्धिनोऽस्याङ्कशय्या ॥१०२॥

---

१. °सर्वेन्द्रियाणां य°—रीवाँ ।°

युगमिदमनुरूपं रूपलावण्यकान्ति
प्रभृतिगुणसमूहैश्चेत्स नायोजयिष्यत् ।
तदखिलकमनीयां सर्वलोकोत्तरां च
श्रियमनुपमरूपां किं विधाता व्यधास्यत् ॥१०३॥
ननु लवणिमसिन्धोरस्य रूपेण कामः
परिभवमुदवाप्य स्वान्तसंक्रान्तलज्जः ।
त्रिनयननयनाग्नौ स्वं वपुः संजुहाव
क्व नु खलु भुवनेऽस्मिन् जीवनं मानहानौ ॥१०४॥
गिरिपरिवृढ एष प्राप्य संबन्धमेनं
सकलभुवनमध्ये लप्स्यति कीर्तिमग्र्याम् ।
धरणिधरणकार्यां दर्पणं स्वस्य पुत्र्याः
पुरुषगणवरेऽस्मिन् प्राप्स्यतीज्यां प्रतिष्ठाम् ॥१०५॥
वैकुण्ठराड्दत्तहस्तः सोऽवतीर्य हयोत्तमात् ।
शैलेन्द्रसद्मनः कक्षां प्राप ब्रह्मपुरःसरम् ॥१०६॥
तमनु त्रिदशाः सर्वे शर्वशक्रपुरोगमाः ।
आलये शैलराजस्य प्राविशन् कलितोत्सवाः ॥१०७॥
अग्रे समागत्य सरत्नगर्भया नीराजितः साक्षतपात्रहस्तया ।
ततोऽभिषिक्तः सुभगाशिरःस्फुरत्सुवर्णकुम्भोदकविन्दुपल्लवैः ॥१०८॥
रामाय शैलो विधिवत् स्थापयित्वा शुभासनम् ।
त्रिः प्रोच्य दर्भघटितं विष्टरं संन्यवेदयत् ॥१०९॥
सरत्नमर्घ्यं मधुपर्कमुत्तमं निवेद्य गव्यं मधुमद्विधानतः ।
कदम्बकिञ्जल्कपिशङ्गरोचिषो ददौ दुकूलेऽभिनवे वराय सः ॥११०॥
अथान्तःपटमानीय वरवध्वोर्यथा विधिः ।
गोत्रोच्चारः समभवद्वसिष्ठाद्यैर्मुनीश्वरैः ॥१११॥
अथारुणाङ्गुलिहस्तं विशालाक्ष्याः सुकोमलम् ।
शैलराजोपनीतं स जग्राह रघुपुङ्गवः ॥११२॥
रोमाञ्चितोऽभवद्धस्तो विशालायाः स तत्क्षणे ।
रामस्य स्वेदमभजत् करस्तद्ग्रहणक्षणे ॥११३॥

मङ्गलाशीर्गिरामन्ते शुभे लग्ने परस्परम् ।
परस्परस्य शिरसि चक्रातेऽक्षतपातनम् ॥११४॥
उर्दाचषमथो वह्निं त्रिःपरिक्रम्य दम्पती ।
लाजहोमं प्रचक्राते कृतशिक्षौ पुरोधसा ॥११५॥
एष तेऽतिशुभो वह्निर्विवाहं प्रति साक्ष्यताम् ।
भजते पुर एतस्य मदुक्तमवधारय ॥११६॥
अयोध्यानाथपुत्रेण रामेण सह भामिनि ।
धर्मचर्या त्वया कार्येत्युक्तं वाक्यं पुरोधसा ॥११७॥
अश्मेव त्वं स्थिरेत्येनामश्मानमधिरोपिताम् ।
ददर्श रामो भगवानीषत्कौतूहलस्मितम् ॥११८॥
भर्त्रा प्रदर्श्यमाणं सा ध्रुवं दृष्ट्वोन्नताननाः ।
कथंचिद् दृष्ट इत्याह लज्जया वक्तुमक्षमा ॥११९॥
पाणिग्रहप्रयोगान्ते तौ भक्तिनतविग्रहौ ।
प्रणेमतुः सुरान् सर्वान् पद्मसंभवपूर्वकम् ॥१२०॥
ते तामखण्डसौभाग्यमङ्गलाशीःप्रयोजकाः ।
ज्ञाततत्त्वाः सुराः सर्वे जज्ञुर्लक्ष्मीं जगत्प्रसूम् ॥१२१॥
चतुरस्रमहाविद्याकनकासनमास्थितौ ।
आर्द्राक्षतारोपपूर्वं मन्त्राशीर्भिः प्रतोषितैः ॥१२२॥
मुक्ताफलाक्षतैर्देवा मन्त्राशीर्वादपूर्वकम् ।
सिषेविरे कृतोत्साहा विशालारघुपुङ्गवौ ॥१२३॥
अथ स्वयं महालक्ष्मीः रामचन्द्रसमीपगा ।
पद्मातपत्रं दधतां सिषेवे दम्पती शुभौ ॥१२४॥
अस्तौत् स्वयं तन्मिथुनं वेदरूपा सरस्वती ।
मायामयस्वरूपेण तदप्यल्पतरं तयोः ॥१२५॥
अथ सर्वान् समाजस्थान् विसृज्य त्रिदशाधिपान् !
वधूमादाय हस्तेन कौतुकागारमन्वगात् ॥१२६॥
उपेतस्वर्णकलशं कालागुरुसुधूपितम् ।
कर्पूरदीपद्युतिमत् वलूप्ततल्पंमहीतले ॥१२७॥

गवाक्षविवराक्रान्तसखीलोचनवीक्षितौ ।
तौ दम्पती रहोवृत्तं चक्राते संचरत्त्रपम् ॥१२८॥

अथ प्रभाते वसुधानरेन्द्रो जामातरं सोत्सवमाशयित्वा ।
तत्सार्थगांश्च त्रिदशान् समेतांस्तथा सुहृद्बन्धुगणान् शुभान्नैः ॥१२९॥

अथ शक्त्यधिकं शैलः पारिवर्हमकल्पयत् ।
येनायोध्यापतेः सद्म प्राङ्गणं च प्रपूरितम् ॥१३०॥
हिमकर्पूरगौराणां धृतस्वर्णमणिस्रजाम् ।
ऐरावतसजातीनां सहस्रं दन्तिनामदात् ॥१३१॥
द्विसहस्रनवाम्भोदपटलश्यामविग्रहाः ।
क्षरन्तो दानवारीणि वितीर्णास्तेन वारणाः ॥१३२॥
पञ्चधाराप्रवीणानां महाम्भोनिधिगामिनाम् ।
अयुतं वाजिरत्नानामदादुद्वाहपर्वणि ॥१३३॥
स्यन्दनानि महार्हाणि प्रभूतधनवन्ति च ।
अयुते द्वे सुसंनह्य समदात् पर्वताधिपः ॥१३४॥
दासीनां च सहस्रे द्वे समदात् समलङ्कृते ।
सुवर्णमणिभूषाभिरदाद्वैवाहिकोत्सवे ॥१३५॥
धनं च विपुलं तस्मै सुवर्णाख्यं महोर्जितम् ।
संभारान् दश मुक्तानां मणीनां समदाद् गिरिः ॥१३६॥
इत्थं संतोषितस्तेन जामाता तनयाकृते ।
आदरं बहुलं चक्रे संमाननपुरःसरम् ॥१३७॥
शङ्खभेरीमृदङ्गाद्या अवाद्यन्त मुहुर्मुहुः ।
वरवध्वोर्मङ्गलाय तदानीमुत्सवावहाः ॥१३८॥
क्रमता रत्नगर्भास्या पर्वतो गन्धमादनः ।
तयोः प्रकाशयामास स्वरूपमिति शुश्रुम ॥१३९॥
यदक्षरं ब्रह्मविदामगम्यं वेदान्तवाक्यैर्बहुधा प्रतीताम् ।
यत्रैव तत्प्रेमवतां प्रवेशस्तद्वै प्रमोदाख्यवनं ददर्श ॥१४०॥
चिन्तामणिमयी भूमिः कल्पवृक्षलतावृता ।
तन्मध्ये मन्दिरं दिव्यं सहस्रस्तम्भशोभितम् ॥१४१॥

मणिमाणिक्यवैदूर्यमुक्तारत्नसुनिर्मितम् ।
कोटिसूर्येन्दुसंकाशं मुकुरामलदीधिति ॥१४२॥
सुवर्णकुम्भशिखरप्रत्युप्तमणिभासुरम् ।
तत्र रत्नमये पीठे विराजितमुरुप्रभम् ॥१४३॥
सुधांशुमणिरोचिष्णुदिव्यच्छत्रविरोचितम् ।
पीताम्बरधरं देवं पुण्डरीकसुलोचनम् ॥१४४॥
नवीननीरदश्यामं कुटिलालकशोभितम् ।
किरीटप्रभया कोटिमणिमाणिक्यमिश्रया ॥१४५॥
समन्ततो दीप्यमानं तरुणार्कप्रभामयम् ।
मन्दस्मितमनोहारि मुखेन्दुद्युतिदीपितम् ॥१४६॥
सर्वाङ्गसुन्दरं श्यामं तुलसीवनमालिनम् ।
आजानुविपुलोद्दण्डभुजाभ्यां रुचिराकृतिम् ॥१४७॥
अरालभ्रुकुटीचारुलोचनान्तकृतस्मरम् ।
कुण्डलाङ्गदमाणिक्यकटकाभरणोर्जितम् ॥१४८॥
मेखलासक्तवैदूर्यप्रभारोमावलिद्युतिम् ।
तुङ्गनासासुशोभाढ्यकपोलमुकुटश्रियम् ॥१४९॥
कम्बुकण्ठमनोहारिपृथुवक्षःस्थलाञ्चितम् ।
आजावशंवदैः सर्वैरायुधैः समुपासितम् ।
अणिमाद्यैः सिद्धिसङ्घैः सेवितं सर्वदैवतम् ॥१५०॥
मूर्तिमद्भिश्चतुर्वेदैः स्तूयमानं समन्ततः ।
महोपनिषदुद्गीतं शब्दब्रह्म परं महः ॥१५१॥
रामचन्द्रस्य भक्तोऽसौ शैलराजः सदानतः ।
तमभीष्टमसौ रामं पश्यन् विस्मितमानसः ॥१५२॥
जाया च तस्य साध्वी सा तथारूपमुदैक्षत ।
विशालां च परां लक्ष्मीं पद्महस्तामपश्यताम् ॥१५३॥
ततः संस्तूय विधिवत्तौ गिरिर्दिव्यदम्पती ।
पुरीं प्रस्थापयामास तामयोध्याभिधां पराम् ॥१५४॥
रामस्ताभ्यां परां भक्तिं दत्त्वा संप्रीतमानसः ।
आगामित्रेताख्ययुगे सौगन्धिकगिरिं व्यधात् ॥१५५॥

यस्य प्रमोदविपिने नित्यं वासो भविष्यति ।
श्रीरामसहजाप्रेमपरिरञ्जितचेतसः ॥१५६॥

ततस्तौ स्यन्दनं दिव्यमास्थितौ त्रिजगत्पती ।
विशालारामरमणौ स्वामयोध्यां प्रतस्थतुः ॥१५७॥

गन्धमादन एवायं रामो रमणकोविदः ।
रमते श्रीविशालाक्ष्याः कैश्चिदद्यापि वीक्षितः ॥१५८॥

इति शुश्रुम योगिभ्यः पुराविद्भ्यः परं यशः ।
रामस्य भक्तवश्यत्वं यत्रानेन स्फुटीकृतम् ॥१५९॥

क्षमता रत्नगर्भाख्या तस्य भार्या महात्मनः ।
तनयायामतिस्निग्धा विशालायां विशेषतः ॥१६०॥

यदा प्रस्थातुमारेभे राम उद्वाह्य तां रमाम् ।
तदा भृशं वियोगार्ता रुरोद विपुलाश्रुभृत् ॥१६१॥

तदा तयो रत्नगर्भागन्धमादनशैलयोः ।
प्रेम्णा निबद्धहृदयो रामस्तत्रैव तस्थिवान् ॥१६२॥

अद्यापि यत्र सद्भक्तैर्दृश्यते रमणं दधत् ।
विशालाक्षीपरप्रेमरसकेलिविनोदवान् ॥१६३॥

एवं दशरथो राजा शुश्राव विशदं यशः ।
गीयमानं सुरवरैर्गन्धमादनपर्वते ॥१६४॥

तत्र गत्वा महातीर्थेष्ववगाह्य नृपोत्तमः ।
त्रिस्रोतसः शुभां धारां दृष्ट्वोपस्पृश्य निर्वृतः ॥१६५॥

आगतं निजजामातुः पितरं गन्धमादनः ।
निशम्य प्रश्रयन्नन्तःपुरः प्रत्युद्ययौ गिरिः ॥१६६॥

तयोर्मिलनमत्रासीद् भूपतीन्द्रगिरीन्द्रयोः ।
बहुगौरवसंपन्नं बहुप्रणयमन्दिरम् ॥१६७॥

मिलित्वा नृपवर्यन्ते शैलराजः शुभाशयः ।
निनाय मन्दिरं स्वीयं बह्वातिथ्यविधानकृत् ॥१६८॥

तं प्रीणयित्वा बहुसंविदाभिस्तथानुचर्यानिरतं महीन्द्रम् ।
ननाम भक्त्यावनतो महीन्द्रो रामस्य भाग्यैकनिधिः पितेति ॥१६९॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे पूर्वखण्डे दशरथतीर्थयात्रायां गन्धमादनगमने एकोनचत्वारिंशाधिकशततमोध्यायः ॥१३९॥

चत्वारिंशाधिकशततमोऽध्यायः

ब्रह्मोवाच

ततः प्राप्य महात्मानं गन्धमादनपर्वतात् ।
श्रुत्वा श्रीरामचन्द्रस्य शैलराजेऽमलं यशः ॥१॥
धारामलकनन्दाया रामकीर्तिसमुज्ज्वलाम् ।
अवगाह्य महीपालो हिमवन्तं विलोक्य च ॥२॥
हिमवच्छैलदुर्गेषु कृत्वा तीर्थाटनं बुधः ।
तुतोष हृदयेऽत्यन्तं वशिष्ठादिपुरस्कृतः ॥३॥
एकाशीतिसहस्राणि तावल्लक्ष्यमितानि च ।
तावत् कोटिमितान्यत्र तीर्थानि हिमपर्वते ॥४॥
गुप्तानि च प्रकटानि क्षमायां सन्ति ब्रह्माविष्णुरुद्रात्मकानि ।
अन्येषां चैवामराणां गृहाणि पुण्यानि तीर्थानि जयन्ति यानि ॥५॥
तानि सर्वाण्यरुन्धत्याः पतिना योगदृष्टिना ।
निर्दिष्टानि पुरो भूयः कारितानि चकार सः ॥७॥
वर्षेषु तेषु व्रजतां मुनीनां निवहेन सः ।
वर्णितानीव लक्ष्याणि यशांसि परमात्मनः ॥७॥
प्रियस्य सुतरूपस्य सत्यसन्धस्य सुश्रियः ।
रामचन्द्रस्य शुश्राव तेनासीदतिनिर्वृतः ॥८॥

अथ सोऽवातरच्छैलराजात्सुकृतमण्डितः ।
कूर्माचलपथेनैव कुर्वन् भूमिप्रदक्षिणाम् ॥९॥
कौशिकीं विततस्रोतां स्नात्वा सत्पुण्यसंचयी ।
ईशानादिक्रमेणैव मोरङ्गगिरिमागमत् ॥१०॥
नेपालेश्वरमालोक्य गुह्येशीं संप्रणम्य च ।
ततः प्रदक्षिणां कुर्वन् पुण्यां यात्रां क्रमेण सः ॥९१॥
कामरूपेश्वरं गत्वा कामाक्षीं समवातरत् ।
यत्र ब्रह्मादयो देवा मायया परमात्मनः ॥१२॥
भग्नमानाः कृताः सर्वे तामेवाद्यां प्रतुष्टुवुः ।
तां नत्वा संप्रशंस्योच्चैर्ययाचे स्वसुतोदयम् ॥१३॥
इत्थं परिक्रमन् भूमीं तत्र तत्र महायशाः ।
इयाज सोमैर्नृपतिरन्यैश्च क्रतुभिर्भुवि ॥२४॥
वशिष्ठाद्यैर्मुनिवरैरुपदिष्टाखिलाः क्रियाः ।
भूपः क्रमेण पुण्यानि स्थानानि वरयोगिनाम् ॥१५॥
पर्यटन् मिथिलां प्राप्तो यत्र नैम्यो मनस्विराट् ।
जनको नाम योगीन्द्रः सोऽस्मै प्रत्युद्ययौ नृपम् ॥१६॥
भूयः संमानितं कृत्वा स्तवनाद्यैर्महीपतिः ।
गृहं प्रवेशयामास विद्वद्भिः परिवारितः ॥१७॥
मुनिभिर्याज्ञवल्क्याद्यैः सर्वैर्विज्ञातवेद्यकैः ।
उवाच जनको भूपः प्रसाद्य रघुपुङ्गवम् ।
श्रीरामाख्यपरब्रह्मजनिभाग्यमहोदयम् ॥१८॥

जनक उवाच

धन्योऽसि कृतकृत्योऽसि रघुवंशशिखामणे ।
यस्य ते श्रीरामः साक्षादवतीर्णः परः पुमान् ॥१९॥
राजन् राममवेहि त्वं परमात्मानमद्वयम् ।
विश्वोपादानमतुलं बीजं परमकारणम् ॥२०॥
कल्याणगुणसंपन्नं भक्तानामभयंकरम् ।
यज्ज्ञात्वा न पुनः किञ्चिज्ज्ञातव्यमवशिष्यते ॥२१॥

पिबंस्तस्य च[1] वक्त्रेन्दुमाधुर्यरसमद्भुतम् ।
सफलं कुरु राजेन्द्र स्वं चक्षुरुदयत्स्पृहम् ॥२२॥

वशिष्ठ उवाच

युवामेव भवे धन्यौ राजन् निमिरघूद्वहौ ।
ययोः प्रसन्नो भगवान् पूर्णः श्रीपुरुषोत्तमः ॥२३॥
त्वयि सा श्रीर्जन्मवती यदेकांशावलम्बनात् ।
त्रैलोक्येऽखिलवस्तूनि श्रीमन्त्यूर्जस्वलानि च ॥२४॥
ब्रह्मानन्दकला पूर्णा प्रेमानन्दकलानिधिः ।
जानकी प्रोच्यते विद्वन् वेदैरपि विशेषतः ॥२५॥
या स्वयं परमा लक्ष्मीः श्रीः पद्मवनवासिनी ।
गायत्री चैव सावित्री मेधा प्रज्ञा प्रभामयी ॥२६॥
विद्याधीर्धारणायुक्ता चेतना ह्रीर्धृतिः स्मृतिः ।
तस्याः प्रभावं विज्ञातुं स्वयमीष्टे तदीश्वरः ॥२७॥
स साक्षाद्भगवान् पूर्णः पुरुषोत्तमशब्दितः ।
परब्रह्मस्वरूपोऽस्य राज्ञो भूषयते गृहम् ॥२८॥

अतो युवां निमिरघुवंशभूषणौ परं यशो वितनुथ आत्मनोर्भुवि ।
अगोचरं मुनिजनमानसस्मयत्तदुत्तमं युगलमवाप्तचक्षुषौ ॥२९॥

दशरथ उवाच

नाहमस्य निमिचन्द्रभूपतेः षोडशीमपि कलां समाश्रये ।
यस्य योगबलमेतदद्भुतं दृश्यते सुविजिताखिलेन्द्रियम् ॥३०॥
अहो अयं महाराजस्तृणवन्मन्यतेऽखिलम् ।
राज्यं सुखसमृद्धिं च विगण्य्य स्थितो मुदा ॥३१॥
नास्यानुबन्धनं राज्यं न समृद्धिः परं सुखम् ।
अनित्यमखिलं मत्वा योगमन्तःश्रितो ह्ययम् ॥३२॥
भगवन् मुनिशार्दूल प्राजापत्य तपोनिधे ।
याज्ञवल्क्यप्रसादेन सिद्धोऽस्यौ भुवि भूपतिः ॥३३॥

---

१. धयानस्तस्य—मधु० बड़ो० ।

यत्तत्त्वमेकं मुनयो वदन्ति वेदेषु शास्त्रेषु च यन्निरूढम् ।
तदस्य हस्तामलकं पुरः स्फुरत्यात्मात्मनात्मात्मभिदा विमुक्तम् ॥३४॥
अस्यात्मदृष्टेरिदमर्द्धमङ्गं महात्मविद्यानलकीलदग्धम् ।
अर्घं पुनश्चारुकुरङ्गनेत्राकराम्बुजैः शोलितपादपद्मम् ॥३५॥
अस्यैव शिक्षां समवाप्य विद्वान् योगी शुको नाम महामुनीन्द्रः ।
बभूव लोके गुरुरात्मविद्याप्रवर्तको रामगुणप्रकाशकः ॥३६॥
इत्थं परं शुश्रुम योगचर्याममुष्य वै सत्कृतलोकवृत्ताम् ।
नो चेन्मुनीन्द्रैरपि दुष्करं यत्तत्को नु सेवेत विषं सुधां च ॥३७॥
अमुं स्वदेहं विगतात्मभेदं कैवल्यशीलं समवाप्ततत्त्वम् ।
विशिष्यते तत्पदलिप्सयैव मुनीन्द्रवर्याः परिवार्य तस्थुः ॥३८॥
तेषामेष ब्रह्मविदां नवानामन्तर्मोदं जनयन् वैष्णवाग्र्यः ।
स्वज्ञानविज्ञानविविक्तबुद्धिरास्ते परंब्रह्मविचिन्तयानः ॥३९॥
येऽन्ये मुनीन्द्रा इह याज्ञवल्क्यमुख्या इमे तेष्वयमात्तशासनः ।
तथापि पुण्यैश्चरितैः स्वकीयैस्तान् शिक्षयन्नेष विराजतीव ॥४०॥
अतोऽस्य योगीन्द्रवरस्य सेवां विधाय शाश्वत्कतिचिद्दिनानि ।
अधिक्रियेऽहं परमार्थभूतं तत्तत्त्वमावेदितुमात्मनोऽन्तः ॥४१॥
इत्युक्तवति राजेन्द्रे तस्मिन् स निमिचन्द्रमाः ।
उवाच किमपि स्मेरवदनाम्भोजसुन्दरः ॥४२॥

जनक उवाच

अये नृपतिशार्दूल किमवाप्तव्यमस्ति ते ।
यस्य चेतो भृतं श्रीमद्रामप्रेमपरामृतैः ॥४३॥
न कर्मणा नो तपसादितो वा विज्ञानतो[1] नाप्युपासाभिरद्धा ।
यत्प्राप्यते तत्पदमाप्तवानसि त्वं तत्परब्रह्मरसानुभूत्या ॥४४॥
जानामि ते सुखितो गोपराजो लीलारसानन्दपदं विविच्य ।
आदिव्रजे प्रोक्तवान् यद्रहस्यं गिरामभिज्ञोत्तमवैदिकीनाम् ॥४५॥
ततोऽस्ति नानन्तपदं मुनिष्वपि ब्रह्मज्ञानावाप्तिसाम्राज्यवस्तु ।
यत्प्रेमसिन्धौ रासलीलारसेऽस्ति शिवोऽपि यल्लब्धमना जहौ तपः ॥४६॥

---

१. नो विज्ञानतो वा न ज्ञानतो—मधु०, बड़ो० ।

यदस्यासौ परमोदारलीला प्रेमामृतालङ्कृत आत्मवश्यः ।
श्रियः सहस्रं रमयन् नृत्यगानकौतूहली क्रीडति रामचन्द्रः ॥४७॥
तदा किं तद्गुणितानन्दमात्रं ब्रह्मत्वमाहैतदवाप्तिसाधनैः ।
ज्ञानादिभिस्तत्कृपयैव किंचिद् भुक्तं हि तत्त्वं पशुपालदारैः ॥४८॥
भवान् राजन् रसिकेन्द्रलीलामाधुर्यमावत्सलभावमाप्तवान् ।
ततः किमन्यत् स्पृहयस्युदारधीर्ब्रह्माभिधं पदमेतद्विभूति ॥४९॥

सर्वानन्दपदं तस्य प्रेमानन्दं सुदुर्लभम् ।
अवाप्य स्पृहते केन नमितानन्दकं बृहत् ॥५०॥
मीमांसितोऽयमानन्दस्तत्त्वोपनिषदा क्वचित् ।
वित्ताढ्यां भुवमारभ्य ब्रह्मपर्यन्तमूर्जितः ॥५०॥
आनन्दानां तु सर्वेषां विश्रामो यत्र दृश्यते ।
रसानन्दमयाकारः पुरुषोत्तमशब्दितः ॥५२॥
सा गतिः सा परा काष्ठा भक्तानां स्निग्धचेतसाम् ।
यस्य स्वधामैव वृहदित्यद्धा श्रुतिरवोचत ॥५३॥

स्थाने तवेयं मतिरूर्जिता भो यस्यात्मजः श्रीपुरुषोत्तमः परः ।
स्वमायया मानुषवत्प्रतीयते बिभर्ति लीलारसमात्मनैव यः ॥५४॥

पाणिग्रहोत्सवे राजन् रामोऽभून्मद्गृहातिथिः ।
यर्हि तत्सेवनं त्यक्त्वा योगनिष्ठोऽभवं तदा ॥५५॥
तन्मायया मोहितात्मा जानंस्तं प्राकृतोपमम् ।
अप्रकाशितमाहात्म्यं योगमेवान्वगामहम् ॥५६॥
तदा तद्योगनिष्ठायां पर्यवस्थितमात्मना ।
स्थिरकायं नतग्रीवं भ्रुवोर्मध्यस्थलोचनम् ॥५७॥
मामात्मानन्दनिरतमनुभावयितुं स्वयम् ।
स्वरूपं रामचन्द्रोऽभूद्गोचरो योगसंविदि[1] ॥५८॥
तदापश्यमहं दिव्यामयोध्यां नगरीं नृप ।
ब्रह्मानन्दमयीं साक्षाद्दिव्यवैकुण्ठरूपिणीम् ॥५९॥

---

१. परो योगो हि मद्बुद्धि—रीवाँ ।

चिन्तामणिमयीं भूमिं दिव्यरत्ननिकेतनाम् ।
ज्वलत्प्राकारमध्यस्थां सूर्यकोटिप्रभामयीम् ॥६०॥

तत्र कल्पद्रुमस्तोमनानानिष्कुट[1]संवृतम् ।
अद्राक्षं दिव्यभवनं मणिहेमविनिर्मितम् ॥६१॥
सहस्रस्तम्भसंशालि नानाशिखरभूषितम् ।
नानासखिसखीवृन्दैरन्वितं दिव्यपार्षदैः ॥६२॥

तत्र सिंहासनं दिव्यं नानारत्नमयं ध्रुवम् ।
कोटिचन्द्रार्कसंकाशं विस्फुरत्कोटिदीधिति ॥६३॥
तत्र परात्परं साक्षाद्रामचन्द्रं जगत्प्रभुम् ।
सीतालक्ष्मीसहचरं चिदानन्दघनाकृतिम् ॥६४॥

अमुमेव यथाकारमद्राक्षं द्विभुजान्वितम् ।
त्वां च तत्र महाराजस्थितमव्ययशासनम् ॥६५॥
त्वत्कुमारममुं देवं प्रसन्नं शुभगाकृतिम् ।
रत्नकल्पमनोहारिप्रावृषेण्यघनोपमम् ॥६६॥

रत्नकुण्डलसंसेव्यसुन्दरश्रवणद्वयम् ।
अर्द्धचन्द्रस्फुरद्भालकस्तूरीतिलकाञ्चितम् ॥६७॥
पीताम्बरधरं देवं मन्दस्मितशुभाननम् ।
सुनसं विस्फुरच्चारुकपोलफलकान्वितम् ॥६८॥

विस्फुरद्रक्तकटकं श्रीवत्सललितोरसम् ।
सुवर्णसूत्ररचितकटिबन्धविराजितम् ॥६९॥
लसद्दिव्यकिरीटाढ्यं रत्नमालाविभूषितम् ।
वनमालाधरं धीरं केयूरमणिदीपितम् ॥७०॥

विस्फुरद्रत्नकटकं श्रीवत्सललितोरसम् ।
सुवर्णसूत्ररुचिरकटिबन्धविराजितम् ॥७१॥
लम्बलीनमहारत्नविस्फुरन्नाभिमण्डलम् ।
निषेव्यमानं मूर्त्तीभिः समस्तायुधशक्तिभिः ॥७२॥

---

१. "निष्कुटाः आरामाः" टि०—मधु०, बड़ो० ।

स्तूयमानं समन्ताच्च वेदैर्मूर्तिधरैः पृथक् ।
सनकाद्यैर्नारदाद्यैर्मुनिभिः पर्युपासितम् ॥७३॥
दिशांपतिभिरानम्रकन्धरैर्भक्तिसंयुतैः ।
ब्रह्माद्यैर्लोकपालैश्च विविधस्तुतिभिः स्तुतम् ॥७४॥
कालेनापि च मूर्त्तेन पर्युपासितमादरात् ।
भक्तैरनेकैः स्वाकारैः पर्युपासितविग्रहम् ॥७५॥

इत्यहं योगनिद्रायामपश्यं राममद्भुतम् ।
दृष्ट्वा च विपुलैः स्तोत्रैः स्तुवतां [रस्तौष]च यथामति ॥७६॥
ततो झटिति[1] तद्दिव्यदर्शनाह्लादसंयुतः ।
व्युत्थाय किमिदं दृष्टमिति तर्काकुलोऽभवम् ॥७७॥
ततो निश्चीय मनसा परब्रह्म सनातनम् ।
रामचन्द्रं चिदानन्दविग्रहं त्रिजगत्प्रभुम् ॥७८॥
विश्वात्मानं च विश्वस्य वन्द्यं स्वप्रियमद्वयम् ।
स्वरूपानन्दनिरतं योगिध्येयं सतांगतिम् ॥७९॥

प्रपन्नोऽहं प्रभुं साक्षादन्तर्योगविवर्जितः ।
बहिः सेवाधिकारेण पर्युपास्य निरन्तरम् ॥८०॥
तदावधि न मे योगे निष्ठाभून्नृपसत्तम ।
अमुमेव बहिः सेवे श्रीरामं चिद्घनाकृतिम् ॥८१॥

आनन्दमयमद्वैतं लीलारसिकमीश्वरम् ।
भक्त्या सुलभपादाब्जं दुर्लभं योगिनामपि ॥८२॥
स ते नृपतिशार्दूल पुत्रतां प्राप्तवान् परः ।
कथं भुवि न धन्योऽसि श्लाघ्यस्त्वं योगिनामपि ॥८३॥

हेलालालित एष ते निधिसमो रामोऽङ्कमाभूषय-
न्नानन्दामृतकन्दलः प्रतिपदं पुष्णाति लीलारसम् ।
यत्पादाम्बुजविस्फुरन्नखमणिज्योत्स्नाप्रकाशोद्यमम् ।
साक्षाद्ब्रह्म परं यदन्तिमगिरा नेतीति वेदा जगुः ॥८४॥

---

१. झगिति—मथु० बड़ो० ।

अहो तव महद्भाग्यमप्राप्यं सर्वयोगिनाम् ।
यस्याङ्कभूषणो रामः परापरपरो हरिः ॥८५॥
अहो हि धन्या कौशल्या श्रीरामजननी स्वयम् ।
ब्रह्मोपनिषदो यस्याः कलां नार्हन्ति षोडशीम् ॥८६॥
युवामेव परं धन्यौ भवेऽस्मिन् भूतिमत्तरौ ।
संश्लाघनीयमाहात्म्यौ त्रिवेदीशिरसामपि ॥७७॥
आस्तां रामस्य महिमा वेदस्तं वर्णयेत् कथम् ।
युवयोरेव माहात्म्यं वक्तुं शक्तिर्न दृश्यते ॥८८॥
सर्वदेवमयी देवी कौशल्या विश्वमङ्गला ।
भवान् भूपशिखारत्न शुद्धसत्त्वैकविग्रहः ॥८९॥
प्रपञ्चातीतमाहात्म्यौ त्रिजगन्मङ्गलौ युवाम् ।
महोपनिषदां तत्त्वं ययोः पुत्रत्वमागमत् ॥९०॥
इत्युक्तवन्तं निमिचन्द्रमादराच्छ्रीरामभक्तिप्रवणान्तराशयम् ।
उवाच वीरो रघुवंश[1]धूर्धरः स्वयं स सीतासुरहस्यसारवित् ॥९१॥

राजोवाच

तवोचितैवेयमुदारवस्तुगा मतिर्वरेण्या निमिवंशपुङ्गव[1] ।
यस्यात्मजा सा स्वयमद्भुता रमा प्रसन्नपङ्केरुहकोषवासिनी ॥९२॥
यदंशांशसमुद्भूतिर्दृश्यते भुवनत्रये ।
चन्द्रसूर्यतडिद्वह्निज्योतिश्चक्रप्रभामयी ॥९३॥
लक्ष्मीः गौरी गिरा गङ्गा गौतमी गणदेवता ।
गायत्री चैव सावित्री स्वाहा भूरुर्वशी शची ॥९४॥
स्त्रीसंनिवेशि यद्वस्तु तत्सर्वं स्वयमेव सा ।
परापरपराकारा तव पुत्री न संशयः ॥९५॥
तस्याः स्वरूपं विज्ञातुं न वेदाः प्रभवन्ति हि ।
इत्यचिन्त्यस्वरूपत्वं तस्या एव जगुः स्फुटम् ॥९६॥
परार्द्धाधिकनामा सा परार्द्धाधिकरूपिणी ।
तथाप्यनामरूपा सा चित्रं श्रुतिभिरीर्यते ॥९७॥

१—१. नास्ति—रीवाँ ।

सर्वावताररूपेण सैव कर्त्रीति भासते ।
अकर्त्री च स्वरूपेण चित्रं कथमिवेर्यताम् ॥९८॥
पाणिग्रहे श्रीरामस्य तस्यास्तत्त्वमजानता ।
मया सा त्वत्सुते[1]त्यद्धा दृष्टा प्राकृतभावतः ॥९९॥
तदा ममान्तरं मोहं विधूय कृपया स्वयम् ।
अनुभावितवत्यद्धा स्वरूपं रामवल्लभा ॥१००॥
दृष्टा मयामृतपयाः सरयूः सुकान्तिरुद्य[2]त्सहस्रशतयोजनविसृतात्मा ।
संपूर्णशारदतुषारमरीचिरोचिः संश्यर्द्धवर्द्धिष्णुतरङ्गसान्द्रा ॥१०१॥
कल्लोलजालजलकेलिकलाविधूतवेलावनावलिमहीरुहपुष्पकीर्णा ।
आनन्दमग्नमुदितान्तरमीननक्रग्राहौघकच्छपकुलाकुलतोयचक्रा ॥१०२॥
तस्यान्तरे विपुलकल्पलतापरीतकल्पद्रुमैः परिवृतं मणिहेमहर्म्यं ।
उत्तुङ्गतोरणसहस्रनिबद्धपुष्पस्रग्गन्धमाद्यदलिपुञ्जसुगुञ्जिताढ्यम् ॥१०३॥
वैदूर्यहीरमणिनिर्मितदीर्घभित्तिविद्योतिदीधितिवितानविराजमानम् ।
विश्वक्तं स्फटिकरत्नशिलानिबद्धनिःश्रेणिकाशतसहस्रविरोचमानम् १०४
रत्नोपलप्रकरसद्रचनाविचित्रबद्धाङ्गणेन्द्रमणिपद्धतिशोभमानम् ।
प्रोद्भासिनव्यमणिकुट्टिमरश्मिजालविध्वस्तनैशतिमिरोज्ज्वलरत्नदीपम् ॥
प्रोद्यन्महामणिरुचा मुकुरायमाणस्तम्भावलीशतसहस्रसुमण्डपाढ्यम् ।
वातायनायनविनिःसरदच्छरत्न[3]ज्योत्स्नाविमिश्रकटकद्युतिसुप्रकाशम् १०६
अट्टालजालविपुलाङ्गणभूप्रभाक्तनिर्यूहलग्नमणिरत्नमरीचिकान्तम्[3] ।
गोपानसीशतसहस्रनिषण्णमत्तपुंस्कोकिलध्वनिमहामुखरीकृताशम् ॥१०७॥
सूर्येन्दुकान्तविपुलोपलहेमवापिपीयूषवारिसुविलासिमरालयूथम् ।
लीलासरःसलिलफुल्लसुवर्णपद्मगुञ्जत्प्रमत्तमधुलिट्पटलेन पूर्णम् ॥१०८॥
संफुल्लनिष्कुटमहीरुहकल्पवल्लीहल्लीसकानुरति[4]विस्तृतमल्लिवल्लि ।
नित्योल्लसल्ललितपुष्पसुवर्णयूथीसंज्ञानमण्डपशतावृतकाननान्तम् ॥१०८॥
आरामधामगतदिव्यमनेकजातिपक्षिप्रकूजितमनोभवमूलमन्त्रम् ।
दिव्याङ्गनाजनगखोद्गुतमङ्गलाढ्यसंगीतगीतनिनदैः परिपूरिताशम्॥११०॥

---

१. वै स्नुषे°—मथु०, बड़ो० । २. °मृतमयाः सरसः सकान्ति°—रीवाँ । ३—३. नास्ति—रीवाँ । ४. "हल्लीसकं—परस्परहस्तबंधनं" टि०—मथु०, बड़ो० ।

कौतूहलात्तकुसुमायुधतन्त्रचारुसंचारणप्रणयिनीकृतसख्यवृत्यम् ।
स्वस्वामिनीप्रणयपोषणबद्धचित्तदूतीसखीविविधचेटकचेटिकाख्यम् ॥१११॥
तालस्वरप्रचुरमूर्छनगीतिदक्षस्वःकामिनीनिवहकूजितकण्ठनादम् ।
आलापलापकलसंकलनप्रकीर्णगायन्महागुणवतीगणगानरम्यम् ॥११२॥
वीणावतीनिवहवाद्यकलानुपृक्तमार्दङ्गिकीकरकुतूहलवाद्यनादम् ।
मानार्पणप्रवणपाणविकीकलापस्पर्द्धाविहप्रवरमौरजिकीकलाढ्यम् ॥११३॥

नित्योत्सवप्रमुदिताशयसस्पृहालीसंचारितप्रचुरकामकलाविनोदम् ।
नित्यर्तुराजविविधोत्सवभाजनं तच्चिच्चक्रवर्त्तिमहिषीपदमाविभाति ११४
तन्मन्दिरे मणिसुवर्णमये समंतात्संतानकद्रुमतले मधुवातपूते ।
सूर्येन्दुकोटिकिरणावलिरोचमानं सिंहासनं किमपि तद्विपुलं विभाति ११५

तन्मध्यगं विपुलसौरभपूरपूर्णं
विष्वक्प्रसारिसुयशोमकरन्दवृन्दम् ।
आनन्दतुन्दिलमिलिन्दकदम्बकाढ्यं
सम्यग्विभाति सुविकासिविलासपद्मम्[1] ॥११६॥

तत्पद्मा[2]सनमध्यस्था वरदाभयपाणिनी ।
हेलालीलादिभिर्हावैर्मूर्त्तिमद्भिरुपासिता ॥११७॥
कोटिशारदपूर्णेन्दुवदनद्युतिमण्डिता ।
ज्योत्स्नापूरकिरच्चारुरदनांशुयुतस्मिता ॥११८॥
नखचन्द्रचयज्योत्स्नाचकोरीकृतचेतसाम् ।
स्ववर्बधूनां समूहेन संततं समुपासिता ॥११९॥
स्वभावारुणरोचिष्णुलसच्चरणपल्लवा ।
मञ्जीरकिङ्किणीजालपादगुल्फविराजिता ॥१२०॥
अणिमादिमहासिद्धिसेविताङ्घ्रिरजोभरा ।
प्रसादसुमुखी नित्यं महासाम्राज्यरञ्जिता ॥१२१॥
सुवर्णकदलीकाण्डमञ्जुलोरुविराजिता ।
उन्मीलन्मेखलादाममणिमञ्जुमरीचिभाः ॥१२२॥

---

१. विलाससद्म—मथु०, बड़ो० । २. यत्पद्मा°—रीवाँ ।

सुनिम्ननाभीकुहरच्छातनील[1]मणिप्रभा ।
त्रिधाबद्धवलिभ्राजत्तनिमाकलितोदरी ॥१२३॥
नीवीनीलमणीन्द्राभा विस्फुरद्रोमराजिमा ।
सातकुम्भलसत्कुम्भकुम्भिकुम्भसमस्तनी ॥१२४॥
माणिक्यकम्बुकण्ठस्थग्रैवेयकविभाञ्चिता ।
सुवर्णसूत्रग्रथितमणिहारविराजिता ॥१२५॥
तडिद्वर्णसमुन्नद्धकुचकञ्चुलिकाञ्चिता ।
सुवर्णवल्लरीचारुबाहुद्वयविराजिता ॥१२६॥
मणिविद्रुमशाखाभकराङ्गुलिगणप्रभा ।
करपद्मनखद्योतजितनक्षत्रमण्डला ॥१२७॥
स्फुरत्करतलन्यस्तरङ्गविन्द्विन्द्रगोपभाः ।
गण्डमण्डलसंक्रान्तमणिताटङ्कदीधितिः ॥१२८॥
ताटङ्करश्मिच्छुरितविततालकवल्लिका ।
फुल्लच्चिबुकपुष्पान्तर्नीलविन्दुमिलिन्दभाः ॥१२९॥
श्रीरामकामतापारिसुधाधीर[2]शुभाधरा ।
मञ्जुलाधरमाणिक्यजितबिम्बफलद्युतिः ॥१३०॥
स्मितज्योत्स्नासमुद्भिन्नबिम्बाधरमणिप्रभा ।
शुकचञ्चूपराभूतिचतुरोञ्जितनासिका ॥१३१॥
नासाभरणमाणिक्यतडिताधरपल्लवा ।
खञ्जत्खञ्जनचातुर्यमञ्जुसाञ्जनलोचना ॥१३२॥
विशालभालफलकरोचनातिलकद्युतिः ।
शीर्षमाणिक्यसुषमाजितचन्द्रार्कदीधितिः ॥१३३॥
धम्मिल्लतिमिरस्तोमवन्दीकृतरविप्रभाम् ।
सीमन्तरेखां दधती सिन्दूरपरिपूरिताम् ॥१३४॥
सन्ध्याशोणाम्बरस्थानां नक्षत्राणां विजित्वरीम् ।
सिन्दूरपूर्णसीमन्तरत्नमालां प्रबिभ्रतीम् ॥१३५॥

---

१. °नीवी°—मधु०, बड़ो० । २. कामनार्यारिशुभाधार—रीवाँ ।

साक्षात्कल्पलतां यद्वद्वसन्तागमपुष्पिताम् ।
सर्वाङ्गभूषारुचिरां भक्तानामभयङ्करीम् ॥१३६॥
चेतयन्तीं दृशा जीवान् परतत्त्वविमोहितान् ।
निराकारपरब्रह्म साकारप्रतिपादिकाम् ॥१३७॥
भूरिसप्तमभागस्थांसिंहासनविराजिताम् ।
करुणार्णवपाथोधिलहरीदृग्विचेष्टिताम् ॥१३८॥
तत्वात्मिकाश्च परितो देवताः पर्युपासते ।
सखीवेषधराः सर्वाः सुन्दर्यः परितःस्थिताः ।
नानोपायनहस्तास्ताः श्रीमुखे निहतेक्षणाः ॥१३९॥
रामोऽपि सखिवेशेन वेशयित्वा निजां तनुम् ।
सहजानन्दिनीस्थानं व्रजतीति विनिश्चयः ॥१४०॥
रसस्य या पराकाष्ठा सात्रैवहि प्रतिष्ठिता ।
अत एव रसानन्दरूपेणैनां जगौ श्रुतिः ॥१४१॥
इत्यहं तत्करुणया दृष्ट्वा तद्रूपमुत्तमम् ।
सुप्तोत्थित इवाश्चर्यसागरे निममज्ज ह ॥१४२॥
तदा दुर्वाससा प्राप्तं रहस्यं सकलं मया ।
विज्ञातं तस्य कृपया मन्त्रतन्त्रादिपूर्वकम् ॥१४३॥
सोऽहं विमुक्तसंदेहो विचरामि महीतले ।
विमुक्तः सर्वपापेभ्यो जानन् सीतामयं जगत् ॥१४४॥
सा विद्या सर्वतत्त्वैकवेदनोपायरूपिणी ।
सैव वेद्यं परं तत्त्वं तदुपास्त्या विमुच्यते ॥१४५॥
इति ते सर्वमाख्यातं संक्षेपेण मया प्रभो ।
सीताया यत्परं तत्त्वं दुर्ज्ञेयं योगिनामपि ॥१४६॥
रहस्यं किल वेदानां तन्त्राणां च विशेषतः ।
नाख्येयं यस्य कस्यापि पुरोराज्ञां महामुने ॥१४७॥
[सै] षा तवात्मजा ब्रह्मरूपिणी चित्सुखाश्रया ।
महिमानमतो ज्ञातुमीश्वरा न चतुर्विदः[1] ॥१४८॥

---

१. नैव सामगा ऋग्यजुर्विदः—मथु० बड़ो० ।

चित्सुखाकृतेर्जन्महेतुना वन्दनीयतामेषि योगिनाम् ।
स्वात्मसंविदानन्दसागरे मग्नमानसो मुक्त एव भोः ॥१४९॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे पूर्वखण्डे
दशरथतीर्थयात्रायां मिथिलागमनेएकचत्वारिंश-
दधिकशततमोऽध्यायः ॥१४१॥

●

द्विचत्वारिंशदधिकशततमोऽध्यायः

जनक उवाच

कृपा मयि परा तस्या यदाभूत्सा ममात्मजा ।
परंतु तत्त्वविज्ञाने मूढकल्पोऽस्मि भूपते ॥१॥
शुकेन योगिमुख्येन तन्माहात्म्यं निवेदितम् ।
श्रुत्वापि मूढकल्पोऽहं वात्सल्ये मग्नमानसः ॥२॥
जानामि सीतां रामस्य सहजानन्दिनीं प्रियाम् ।
प्रमोदवनराजेशीं परब्रह्मस्वरूपिणीम् ॥३॥
तथापि पितृभावेन ग्रस्तज्ञानस्य मे प्रभो ।
दुर्वाससा ते यत्प्रोक्तं तत्तत्त्वं वद राघव ॥४॥
अपि मे ब्रूहि तत्तत्त्वं मन्त्रं तन्त्रपुरः सरम् ।
यज्ज्ञात्वा मोहपाशेन नावृतः स्यां कदाचन ॥५॥
किं मन्त्रं किं पुनस्तन्त्रं किंच तन्मन्त्रसाधनम् ।
केन ज्ञानेन विज्ञाता सहजानन्दिनी भवेत् ॥६॥
एतन्मे वद राजर्षे मतं दुर्वाससो मुनेः ।
क्रोधनः स मुनिः प्रष्टुमशक्यो यन्मया ध्रुवम् ॥७॥
ब्रजे गोपालबालानां विरहोच्छेदनं विधिम् ।
प्रोवाच किं ते दुर्वासा इति शुश्रुम भूरिशः ॥८॥

राजोवाच

प्रश्रयावनतं दृष्ट्वा मां दुर्वासा महामुनिः ।
प्रोक्तवानखिलं तत्त्वं रहस्यं यद् गिरामपि ॥९॥

प्रणवो भुवनेशानी कमला काम एव च ।
सहजानन्दिनी ङेन्तं स्वाहान्तो द्वादशाक्षरः[1] ॥१०॥
हिरण्यगर्भ एतस्य मुनिश्छन्दोऽस्त्यनुष्टुभम् ।
सहजानन्दिनी देवी देवता ब्रह्मरूपिणी ॥११॥
लक्ष्मीर्बीजं त्रपा शक्तिः कामाढ्यं कीलकं स्मृतम् ।
षोढा कृत्वा मनुं कुर्यात् कराङ्गन्यासमेव च ॥१२॥
ध्यानमस्याः प्रवक्ष्यामि यत्प्रोक्तं मेऽत्रिसूनुना ।
कलितं योगिमुख्यैर्यत्स्वचित्तकमले पुरा ॥१३॥
प्रमोदवनसद्मान्तरशोकवनवासिनी ।
मणिहेमलसद्दिव्यसिंहासनविराजिता ॥१४॥
तस्योपरि महापद्मे मत्तभ्रमरसेविते ।
अष्टपत्रे शुभे दिव्ये सख्यष्टकसमन्विता ॥१५॥
रक्तांशुकपरीधाना वराभयलसत्करा ।
महोपनिषदां वृन्दैः स्तूयमाना समंततः ॥१६॥
कटाक्षालोकमात्रेण संजीवितमनोभवा ।
तडित्पुञ्जलसत्कान्तिः कोटिचन्द्रसमानना ॥१७॥
कोटिसूर्येन्दुवह्न्याभा तेजोरूपा सनातनी ।
दक्षबाहुलतापाशावष्टब्धरघुपुङ्गवा ॥१८॥
सस्मितेक्षणकल्लोलैर्मोदयन्ती रघूद्वहम् ।
अनेककोटिब्रह्माण्डसृष्टिस्थितिलयात्मिका ॥१९॥
इच्छाज्ञानक्रियाशक्तिरूपिणी ब्रह्मरूपिणी ।
एवं भूता सदा ध्येया प्रमोदवननायिका ॥२०॥
प्रातरुत्थाय शिरसि ध्यायेद् गुरुमनन्तकम् ।
सहस्रदलपद्मान्तःपूर्णामृतकरप्रभम् ॥२१॥
वराभयकरं शान्तं सर्वदैवतरूपिणम् ।
प्रसन्नमुखपाथोजं गन्धमाल्याम्बरावृतम् ॥२२॥

---

१. "ॐ ह्रीं श्रीं क्लीं सहजानन्दिन्यै स्वाहा" इति द्वादशाक्षरो मंत्रः । —टि० मधु०, बड़ो० ।

चन्द्रबिम्बे हंसपीठे संस्मरेद् भृशमादरात् ।
पञ्चतत्त्वमयैः शस्तै[1]र्गन्धाद्यैः परिपूजयेत् ॥२३॥
इत्थं मानसपूजान्ते सहजां हृदि भावयेत् ।
यथोक्तध्यानमार्गेण सच्चिदानन्दविग्रहाम् ॥२४॥
ततो योन्या नमस्कृत्य पूजयेन्मानसार्चया ।
ततः क्षमापयेद्देवीं श्लोकमेनमुदीरयन् ॥२५॥
रामप्रेमानन्दसंदोहरूपे प्रत्यक्चैतन्यप्रकाशाखिलाङ्गि ।
विश्वव्यापिन्यद्वितीये परेशि क्षन्तव्यो मे देवि पूजापराधः ॥२६॥
इत्युदीर्याखिलं विश्वं तन्मयं भावयेद्धृदि ।
ततो मूलाधारपद्मे भावयेत् कुण्डलीमयीम् ॥२७॥
चतुर्दलं तत्र पद्मं सिन्दूरारुणसुन्दरम् ।
तत्कर्णिकागतं दिव्यं स्वयंभूलिङ्गमुद्यतम् ॥२८॥
शङ्खावर्तक्रमात्तस्य वेष्टिनीं दृष्टसूत्रतः ।
सार्धत्रिवलयाकारां सर्वतत्त्वस्वरूपिणीम् ॥२९॥
सूर्यकोटिप्रतीकाशां चन्द्रकोटिसुशीतलाम् ।
कोटिपावकविद्योतां जीवशक्तिं सनातनीम् ॥३०॥
तां चेतयित्वा प्रणवेन मूलमन्त्रेण वा चक्रविभेदरीत्या ।
नीत्वा सहस्रच्छदनं समंतात्प्रकाशमानां महसांभरेण ॥३१॥
उल्लासिता शेषसरोरुहान्तःप्रसर्पदंशुप्रकरप्रसारम् ।
संयोजयेच्चिन्मयधाम्नि तस्मिन् स्रवत्सुधापूरविलीनगात्राम् ॥३२॥
संयोगजन्मामृतवारिधारासंस्नातसर्वावयवानवद्यः ।
तिष्ठेच्चिरं चिन्मयसामरस्यप्रमोदधाराविनिमग्नचित्तः ॥३३॥
ततस्तां भुजगीरूपां मूलप्रकृतिरूपिणीम् ।
जीवशक्तिं यथास्थानं स्थापयेत्सुखितान्तरः ॥३४॥
ततः स्मरेत्कामपि हंसविद्यां चिद्रूपदीपाकृतिमप्रमेयाम् ।
हंसोमुनिश्छन्द उदीर्यतेऽस्या अव्यक्तगायत्रसमाह्वयं च ॥३५॥

---

१. नित्यैः—मथु०, बड़ो० ।

हंसात्मिका राजति देवतास्या हंबीजमुक्तं स इतीह शक्तिः ।
तत्कीलकं सोऽहमिति प्रसिद्धं वेदादितत्त्वं स्वर इत्युदात्तः ॥३६॥
मोक्षैकहेतोर्विनियोग उक्तः कुर्यात् षडङ्गं विहितस्थलेषु ।
सूर्यात्मसोमात्मनिरञ्जनात्मज्योतिर्निराभासतराभिधाना ॥३७॥
तथैव चाव्यक्तमनन्तमेतास्तद्देवताः संगदिताः पुराणैः ।
ध्यानं परं रूपमनन्तमाद्यं स्वानन्दबोधाकृति हंसरूपम् ॥३८॥
द्युशीर्षकं दिक्श्रवणं खं च नाभिः सूर्येन्दुनेत्रं बसुधातलाङ्घ्रि ।
अशेषलोकावयवं समंतात्सर्वत्रगं तत्पुरुषप्रतीकम् ॥३९॥
ध्यायन्ति यद्योगिन आत्मबुद्ध्या त्रिनेमिचेष्टावदुपासनीयम् ।
तंषट्शतैरभ्यधिकैर्कविंशसहस्रसंख्याकमशेषजाप्यम् ॥४०॥
आरभ्य सूर्योदयमाद्वितीयोदयं दिवारात्रिकृतं स्वभावात् ।
गणेश्वरे ब्रह्मणि विष्णुरुद्रजीवेश्वरश्रीगुरुषूपपाद्य ॥४१॥
श्वासक्रियावर्तितहंसमन्त्रमयं जपं भूय उपाददीत ।
स्वात्मानमत्युग्रविभाविभातं सिद्धासनाध्यासनदिव्यरूपम् ॥४२॥
अन्तःसमाधिप्रभवप्रभौघसुपाटलं चेतसि भावयानः ।
पुरस्तथा पार्श्वयुगे च पृष्ठेऽप्युपर्यधः श्रीसहजां विजानन् ॥४३॥
कृत्वा नमस्कारशतं च भूयो विमुक्तमात्मानमनुस्मरेत ।
श्वासानुसारेण पदं धरण्यां निधाय तस्यै प्रणतिं च कुर्यात् ॥४४॥
नमो भुवे सागरमेखलायै समस्तशैलस्तनमण्डलायै ।
श्रीरामपत्न्यै जगतां जनन्यै श्रीस्वेष्टदेव्यै सहजाजनन्यै ॥४५॥
नमो नमस्तेऽस्तु पुनर्नमस्ते संसारयात्राप्रतिपादिकायै ।
मत्पादसंस्पर्शमिमं क्षमस्व निजेष्टदेवीं विधिनार्चयिष्ये ॥४६॥

इत्येवं कृतसंकल्पः समुत्थाय सुसंयतः ।
[1]देहशौचविधानेन विदध्यान्मन्त्रसिद्धये ॥४७॥
ततो जनेन बिभ्रता बहिः शरीरशोधनम्[1] ।
क्रियेत दन्तधावनक्रिया क्रमोदिताध्वना ॥४८॥

१—१. नास्ति—रीवाँ ।

जातो शैखरिकाति[1] सौरभलसच्चाम्पेयजम्बूमुखे-
ष्वेकं कंचिदुदञ्चितक्षितिरुहं संगम्य संप्रार्थितम् ।
वेदादिस्थतडित्पदोत्तरधृतस्वाहाणुना छेदये
त्वत्काष्ठं तपनाङ्गुलं सुललितं दन्तावलीधावने ॥४९॥

तं कामबीजेन ततोऽभिमन्त्र्य संक्षालयित्वोभयदन्तपङ्क्तीः ।
जिह्वां लिखेद्दीपशिखानुकारां वाग्वादिनीमन्त्रमुदीर्य भूपः ॥५०॥
प्रक्षाल्य निक्षिप्य च दन्तकाष्ठं श्रीबीजतोयेन मुखं विशोध्य ।
मूलेन कुर्याच्च सकृद्विशुद्धिं खानि स्पृशेदाचमनं विधाय ॥५१॥
पूर्वं विनिर्माय मलापकर्षणं श्रीखण्डयुक्तामलकीसुकल्कम् ।
स्नायात्ततः सरयूनिर्मलोदकैः संकल्प्य वेदोदिततान्त्रिकाभ्याम् ॥५२॥
अस्त्राभिमन्त्रितमृदं करयोर्गृहीत्वा संमन्त्र्य चास्त्रमनुना शिखया विशोध्य ।
उच्चार्य मूलमभिमन्त्र्य तनौ विलिप्यन् मूर्धादिपादयुगलान्तमुपासकेन्द्रः ५३
संमुखीकरणनाममुद्रया प्राणरोधनपुरःसरं ततः ।
संनिमज्य सकृदुत्थितः पुनः संस्थितः पयसि नाभिमात्रके ॥५४॥

प्राणायामत्रितयकरणाच्चानुकृत्वा षडङ्गं
चक्राकारे पयसि पुरतः कल्पयित्वा च तीर्थम् ।
सूर्यं प्रार्थ्याङ्कुशकलनया भेदयित्वा च तीर्थं
कुर्यात्तीर्थावहनविधिना तत्र तीर्थप्रवेशम् ॥५५॥

श्रीतीर्थशक्तिं तपनस्य मण्डलात्तत्र प्रविष्टां विधिवद्विचिन्तयेत् ।
पञ्चाशदर्णां सुविचिन्त्य सरयूं संमन्त्रयेत्तन्मनुना च सप्तधा ॥५६॥

आलोड्य च भुवनेश्या सुधाणुना तत्सुधीकृतम् ।
अवगुण्ठ्य कवचमनुना संरक्ष्यास्त्रेण तर्पयेत् सहजाम् ॥५७॥
साङ्गां सावरणां तां समस्तपरिवारवर्गसहितां च ।
अभिमन्त्रितेन पयसा संतर्प्य च सप्तधा त्रिधा शतधा ॥५८॥

स्नायात्तच्चरणारविन्दविगलत्पीयूषपूरद्रवैः
संतापत्रयहारिभिर्विधुहरब्रह्मादिभिः सेवितैः ।

---

१. सैवरिका—रीवाँ । "शैखरिका = अपामार्गः"—टि० मधु०, बड़ो० ।

ब्रह्माण्डोदरमध्यवर्त्तिविलसत्संपूर्णतोर्थास्पदैः ।
सद्यो मार्जितसर्वमानसमलैस्तीर्थौघसारैर्जलैः ॥५९॥
मन्त्रस्नानमथोच्यते पदयुगं प्रक्षाल्य मन्त्रं पठ–
न्नाचान्तो विधिवत्पुनर्दशदिशः स्थानं च संशोधयेत् ।
अस्त्रं न्यस्य समस्तहस्ततलयोः श्रीमूलमन्त्रक्रमात्
कुर्यान्न्यासविधीन् स्वमन्त्रविहितानित्युक्तवानत्रिजः ॥६०॥
स्नानं मानसमुच्यते शतगुणं मन्त्रादपि स्नानतो
देवीं श्रीसहजेश्वरीं द्युतिमतीं व्योम्नि स्थितां भावयेत् ।
स्नायात्तच्चरणारविन्दनखरुग्ज्योत्स्नामलैर्वारिभिः
सत्तीर्थैर्निजदेहसूक्ष्मविवराविष्टैस्तनुं क्षालयेत् ॥६१॥
विचिन्तितश्रीसहजापदाम्बुजश्रीमन्नखांशुप्रकरप्रदाहजैः
पयोभिरासिच्य तनुं सुनिर्मलः षट्चक्ररूपां मनुजो विचिन्तयेत् ॥६२॥
एकं नरः स्नानमुपास्य जायते गंगादितीर्थावलिपावनोचितः
विशुद्धचित्तो विरजा धृताम्बरो मूलेन कुर्यात्तिलकं हरेः पदम् ॥६३॥
ॐ स्वाहेति त्रिराचम्य गृह्णन् वामकरे जलम् ।
लं वं रं यं हमित्येतैर्मूलमन्त्रैर्विशोधयेत् ॥६४॥
क्षालयेन्मूर्द्धदेशं स्वं गलितोदकविन्दुभिः ।
कृत्वा दक्षकरे वारि समाकृष्य च वामया ॥६५॥
देहान्तः पापसंदोहं तेन संक्षाल्य तत्क्षणाद् ।
रेचयेत्कलुषीभूतं दक्षया नासया सुधीः ॥६६॥
पुरो ज्वलद्वज्रशिलामध्ये वारि विनिःक्षिपेत् ।
ॐ घृणिः सूर्य आदित्य ॐ मित्यर्घं निवेदयेत् ॥६७॥
सूर्यायार्घं त्रिधा दत्त्वा सहजायै त्रिधा ततः ।
अर्घं दद्यान्मूलमन्त्रसमुच्चारणपूर्वकम् ॥६८॥
"ॐ सहजायै विद्महे रामपत्न्यै च धीमहि ।
तन्नः सीते प्रचोदयात्" गायत्रीं शतधा जपेत् ॥६९॥
देवानृषीन् पितॄंश्चापि संतर्प्य सहजेश्वरीम् ।
साङ्गां सावरणां तोयैर्मूलमन्त्रेण तर्पयेत् ॥७०॥

कृतसन्ध्यातर्पणश्च तत आदाय पाणिना ।
पुष्पाणि जलकुम्भं च पाददृष्टिर्गृहं व्रजेत् ॥७१॥
प्रक्षाल्य पादावाचम्य सहजापूजनालये ।
द्वारदेवीः क्रमेणैव पूजयेद्गन्धमुख्यकैः ॥७२॥
आदौ गणेशं विघ्नेशं शङ्खपद्मौ ततः परम् ।
गङ्गां च यमुनां चैव सावित्रीं च सरस्वतीम् ॥७३॥
अणिमाद्या महासिद्धिर्लक्ष्मीनारायणौ तथा ।
देहलीं वास्तुपुरुषं कालं पञ्चमुखं तथा ॥७४॥
प्रतीहारीं वेत्रहस्तां सुप्रसन्नमुखस्मिताम् ।
त्वरितां पूजयेद् भूयो निधीशं वाक्पतिं तथा ॥७५॥
संकोच्य वामचरणं विघ्नेभ्यो निर्गमं ददत् ।
प्रविशेत्सहजादेव्याः पूजासद्म शशिप्रभम् ॥७६॥
तत्र त्रिकोणवृत्तोपर्यासनं विनिवेश्य तु ।
वाचांयमश्चोपविशेत् सिद्धासनपुरःसरम् ॥७७॥
उत्सारयेच्च त्रिविधान् विघ्नानक्षतमार्गणैः ।
विचिन्त्य वह्निप्राकारं परितो वाहुबीजतः ॥७८॥
ततो भूतानि संशोध्य शरीरस्थानि साधकः ।
निर्दह्य पापपुरुषं प्राणान् संस्थापयेत्तनौ ॥७९॥
सहजानन्दिनीभूत्वा सहजानन्दिनीं यजेत् ।
सहजानन्दिनीभक्तिं प्राप्तुकाम उदारधीः ॥८०॥
आत्मानं रक्षयित्वा च मूलमन्त्रेण साधकः ।
कुर्यान्न्यासविधीन् सर्वान् मन्त्रसाधनकामुकः ॥८१॥
प्रणवं शिरसि यस्य द्वितीयं बीजमानने ।
तृतीयं च चतुर्थं च वाह्वोर्न्यसेद्विचक्षणः ॥८२॥
ततश्च स्तनयोर्न्यस्य पंचमं षष्ठमक्षरम् ।
सप्तमं हृदि विन्यस्य न्यसेज्जंघाद्वयेऽक्षरम् ॥८३॥
एकादशं द्वादशं च न्यसेत्पादद्वये सुधीः ।
एकैकं मातृकावर्णं मूलमन्त्रपुटीकृतम् ॥८४॥

न्यसेत् समस्तगात्रेषु मन्त्ररूपत्वकामुकः ।
शीर्षे मुखे नेत्रयुगे कर्णयोर्नासिकाद्वये ॥८५॥
गण्डयोर्दन्तपङ्क्त्योश्च ओष्ठयोश्च यथाविधि ।
जिह्वामूले च ग्रीवायां स्वरान् षोडश विन्यसेत् ॥८६॥
काद्यान् दक्षिणबाहौ च पञ्चस्थानेषु विन्यसेत् ।
चाद्यांस्तथा वामबाहौ टाद्यान् दक्षपदे न्यसेत् ॥८७॥
ताद्यान् वामपदे न्यस्य पफौ कुक्षिद्वये न्यसेत् ।
बकारं पृष्ठगे वंशे भकारं नाभिमण्डले ॥८८॥
मकारं चोदरे न्यस्य यकारं हृदये न्यसेत् ।
रकारं दक्षिणे स्कन्धे लकारङ्ककुदि न्यसेत् ॥८९॥
वकारं वामस्कन्धे च हृदादिदक्षदोष्णि शम् ।
हृदादिवामबाहौ षं हृदादिदक्षपादके ॥९०॥
सकारं विन्यसेद्धीमान् हृदादिवामपादके ।
हंकारं विन्यसेत् लं च हृदयादावधोऽङ्गके ॥९१॥
हृदयादाशिरोऽन्तं च क्षकारं विन्यसेदिति ।
क्रमो क्रमाद्विधायेत्थं साक्षान्मन्त्रमयो भवेत् ॥९२॥
अमुं न्यासविधिं कृत्वा वाक्पतिर्जायते नरः ।
अमुना न्यासवर्येण संग्रामे रामलक्ष्मणौ ॥९३॥
बज्राङ्गतां परिप्राप्य रावणादीन् विजिग्यिरे ।
अमुना न्यासवर्येण दक्षशप्तः पुरा शशी ॥९४॥
विजित्य राजयक्ष्माणं संपूर्णकलतामगात् ।
ततश्च प्राणानायम्य मूलमन्त्रेण वै त्रिधा ॥९५॥
कराङ्गन्यासमाचर्य जपेन्मूलं समाहितः ।
तेजोमयं जयफलं सहजानन्दिनीपदे ॥९६॥
समर्पयेत्ततो रामभक्तिं याचेत बुद्धिमान् ।
ततः प्रमोदविपिनं भावेयदतिगह्वरम् ॥९७॥
सन्तानकतरुच्छन्नं पारिजातद्रुमावृतम् ।
कल्पवृक्षसमाकीर्णं कुसुमाकरसेवितम् ॥९८॥

नानापुष्पलताकीर्णं वहत्त्रिविधमारुतम् ।
श्रीखण्डवाटिकारम्यं मलयानिलसेवितम् ॥९९॥
प्रमत्तकोकिलोद्घुष्टं प्रकूजच्छुकसारिकम् ।
गुञ्जद्भ्रमरगुञ्जाढ्यं मयूरकलनादितम् ॥१००॥
सुवर्णरत्ननिश्रेणिसरसीशतशोतलम् ।
रत्नार्ककिरणोद्द्योतसंफुल्लकमलाकरम् ॥१०१॥
सर्वर्तुगुणसंसेव्यं सर्वानन्दनिकेतनम् ।
तन्मध्ये भावयेद्दिव्यमशोकतरुकाननम् ॥१०२॥
कल्द्रुमलताकुञ्जमण्डपान्तरगह्वरम् ।
तत्र चिन्तामणिमयं योगपीठं विभावयेत् ॥१०३॥
कोटिसूर्येन्दुसंकाशं नानारत्नविचित्रितम् ।
रत्नप्रभावता तेन रमणीयतमं सदा ॥१०४॥
तत्र श्रीसोमसवनं वटवृक्षं विचिन्तयेत् ।
हरिन्मणिमयैः पत्रैः परिच्छन्नं समंततः ॥१०५॥
सुवर्णस्तम्भरुचिरं सुवर्णविटपाञ्चितम् ।
माणिक्यसमसंशोणपल्लवव्रजपूरितम् ॥१०६॥
चिन्तामणिप्रसूनाढ्यं सुधापाकलसत्फलम् ।
विचित्ररत्नकिरणविलसन्मञ्जरीकुलम् ॥१०७॥
मन्दानिललसत्पर्णं सुधासीकरवर्षणम् ।
तन्मूले भावयेद्दिव्यं रत्नसिंहासनोत्तमम् ॥१०८॥
मणिमाणिक्यकिरणव्रातसंछन्नमद्भुतम् ।
तस्योपरि महापद्ममष्टपत्रं मनोहरम् ॥१०९॥
तत्र क्लृप्तासनां देवीं सहजानन्दिनीं स्मरेत् ।
श्रीरामप्रेमनिरतां प्रेमानन्दस्वरूपिणीम् ॥११०॥
दिव्यवेषसखीहस्तचामरद्वयमध्यगाम् ।
शीर्षे सुवर्णदण्डाढ्यमाणिक्यच्छत्रधारिणीम् ॥१११॥
रत्नमाणिक्यभूषाढ्यां रामालिङ्गितविग्रहाम् ।
पादाम्बुजनखज्योत्स्नापरब्रह्मप्रकाशिनीम् ॥११२॥

दिव्यस्वर्गवधूमौलिविलुण्ठत्पादपल्लवाम् ।
शक्तिभिर्दुर्विभाव्याभिः समंतात्पर्युपासिताम् ॥११२॥
सिद्धिभिश्चाणिमाद्याभिः सुदूरात्सुनिषेविताम् ।
कोटिलक्ष्मीप्रकाशैश्च स्वात्मरूपैरुपासिताम् ॥११३॥
अभिन्नदेवलोकेशैरुत्तरूपैरुपासिताम् ।
सर्वावतारूपैश्च मत्स्याद्यैः सुनिविषेविताम् ॥११४॥
कोटिलक्ष्मीशिरोमौलिगिराचार्यैः समंततः ।
शब्दब्रह्मस्वरूपज्ञैः समंतात्पर्युपासिताम् ॥११५॥
तनुप्रभापरिव्याप्तकोटिब्रह्माण्डमण्डपाम् ।
चराचरजगद्योनिं चराचरजगन्मयीम् ॥११६॥
किंकुर्वाणसखीदूतीचेटीगणनिषेविताम् ।
सर्वाङ्गभूषाललितां कटाक्षोज्जीवितस्मराम् ॥११७॥
भ्रुकुटीतर्जितोद्भूतकलां कालस्य कालिनीम् ।
कालशक्तिप्रदां लोके कालागोचरकेलिनीम् ॥११८॥
कालस्य कलनारूपां कलनादमनोहराम् ।
प्रेमानन्दमयीं साक्षाद्भावयेत्पीठनायिकाम् ११९॥
नित्यं निधुवनानन्दश्रीरामाङ्कविलासिनीम् ।
महापद्मसमुल्लासिकर्णिकामध्यवासिनीम् ॥१२०॥
श्यामाधामादिभिर्विष्वक् सखीभिः संख्ययाष्टभिः ।
निषेवितपदाम्भोजां तन्मात्रदत्तदृष्टिभिः ॥१२१॥
पीठं संपूजयेत्तस्याः कुसुमाक्षतचन्दनैः ।
प्रत्येकं पीठशक्तीश्च भावयित्वार्चयेत् क्रमात् ॥१२२॥
आधारशक्तिप्रकृतिं च कूर्मं कालाग्निरुद्रं भुजगेशशेषम् ।
वाराहमाद्यं धरणीं सुधाब्धिं माणिक्यपोतं विकचारुणाब्जम् ॥१२३॥
मणिद्वीपं ततो वेश्म चिन्तामणिमयं महत् ।
पारिजाततरुं मूले विततां रत्नवेदिकाम् ॥१२४॥
मणिपीठं महायोगपट्टासनमनन्तरम् ।
तस्योपरि सखीवृन्दं गोपालगणमेव च ॥१२५॥

सौभाग्यवस्तुवसनालङ्कारादिकमेव च ।
कुरङ्गपोतान् हंसांश्च मयूरान् कोकिलानपि ॥१२६॥
शुकांश्च सारिकांश्चापि परितो मत्तवारणान् ।
क्रीडतस्तुरगांश्चापि नरयानानि भूरिशः ॥१२७॥
नरनारीगणांश्चापि गानस्तुतिपरायणान् ।
तेषां मध्ये महादिव्यरूपवेशवयोऽन्विताम् ॥१२८॥
किशोरीं कामिनीरत्नमौलिभूतां कृपावतीम् ।
कोटिलक्ष्यंशिनीं सीतां सहजानन्दिनीं स्मरेत् ॥१२९॥
अथ यन्त्रं प्रवक्ष्यामि यथोक्तमत्रिसूनुना ।
सहजानन्दिनी यत्र नित्यं संनिहिता परा ॥१३०॥

विन्दुं चतुष्कोणमथो वसुच्छदं कलाम्बुजं तद्द्विगुणं तथाम्बुजम् ।
ततोऽपि भूयो द्विगुणं सरोरुहं लसच्चतुःषष्टिसखीजनाकुलम् ॥१३१॥
ततोऽपि भूयो द्विगुणं सरोरुहं ततश्च जाग्रद्रुचिमण्डलत्रयम् ।
ततस्त्रिरेखां धरणीपुरं भवेद्यन्त्रं मनोज्ञं सहजात्मकं विदुः ॥१३२॥

पुरतः सन्निवेश्याथ यन्त्रराजं मनोहरम् ।
पूजयेद् गन्धपुष्पाद्यैर्यथासंपन्नवस्तुभिः ॥१३३॥
अथवा विततेपट्टे सौवर्णे राजते तथा ।
ताम्रे वा विलिखेद्यन्त्रमष्टगन्धेन मानवः ॥१३४॥
ततश्च मूलमन्त्रान्ते पुष्पाञ्जलिं विनिःक्षिपेत् ।
अथान्तर्यजनं कृत्वा बाह्यं यजनमाचरेत् ॥१३५॥
सहस्रदलमारभ्य कण्ठान्तं साधकोत्तमः ।
पात्राणि भावयेत्प्रेमामृतपूर्णानि वै क्रमात् ॥१३६॥
सामान्यार्घं तथा कुम्भे गुरोश्चार्चनभाजनम् ।
श्रीपात्रं च विशेषार्घं सर्वदैवत्यमेव च ॥१३७॥
पञ्चैतानि प्रविन्यस्येत्तत्तत्स्थानेषु साधकः ।
सामान्यार्घं विशुद्ध्याख्ये चक्रे षोडशपत्रके ॥१३८॥
कुम्भं च विन्यसेद्योगी महाविन्दुसरोवरे ।
गुरुपात्रं भ्रुवोर्मध्ये आज्ञाचक्रे मनोहरे ॥१३९॥

श्रीपात्रं पूर्णचन्द्रान्तरमृता[1]पूरपूरितम् ।
विशेषार्घं यत्र गुरोः पादुकाख्यं परं पदम् ॥१४०॥
मनसा विन्यसेत्पाद्यं बुद्ध्यार्घं प्रविधाय च ।
अहङ्कारेणाचमनं मधुपर्कं च चेतसा ॥१४१॥
विज्ञाने स्नानपात्रं च प्रविन्यस्य यथाविधि ।
पञ्चप्राणादिषु तथा गन्धादीन् पञ्च विन्यसेत् ॥१४२॥
अथ वृत्त्या करेणैव पूजयेद्धृदयाशये ।
प्रमोदविपिनादीनि हृदयेव परिचिन्तयेत् ॥१४३॥
गुहायां प्रमोदवनं निहितं बहु विस्तृतम् ।
पूज्यपूजकयोस्तस्मिन्नेकाधिकरणस्तथा ॥१४४॥
अन्तरात्मा परः पूज्यः सहजानन्दिनी स्वयम् ।
पूजकश्च सदा तत्र जीवात्माहंपदार्थकः ॥१४५॥
तयोस्तत्रैव विषये नित्यं संनिहिता स्थितिः ।
नाह्वानं स्थापनं नो वा नापीह संनिरोधनम् ॥१४६॥
संमुखीकरणं नैव तत्र क्वचिदपेक्षितम् ।
नित्यं यत्र स्थितः साक्षादीश्वरो जीवबुद्धिदृक् ॥१४७॥
तमेनमर्चयेद्भक्त्या नित्यं मानसवस्तुभिः ।
गन्धैः पुष्पैस्तथा धूपैर्दीपैर्नैवेद्यवस्तुभिः ॥१४९॥
बुद्धिरूपां तदा देवीं मनःपीठेऽर्चयेन्मुदा ।
ततस्तां वहिरावाह्य चक्रपीठे समर्चयेत् ॥१४९॥
यावन्मानसपूजायां न भवेत्सुस्थिरा मतिः ।
तावत्कथं विधीयेत वाह्यपूजनमुत्तमे ॥१५०॥
पुष्पाञ्जलिं समादाय करकच्छपिकास्थितम् ।
वहन्नासा पुटात्तस्मिन् परतत्त्वं समानयेत् ॥१५१॥
सहस्रदलमध्यान्तर्यत्तत्त्वं शिरसि स्थितम् ।
परमात्मस्वरूपेण विश्वं व्याप्य च संस्थितम् ॥१५२॥

---

१. संभृता°—रीवाँ ।

तत्तत्त्वं सहजानन्दा स्वेष्टदेवीस्वरूपकम् ।
हृदि संनीय संपूज्य मानसैरुपचारकैः ॥१५३॥
पुष्पाञ्जलौ ततः प्राप्तं ध्यात्वा चक्रे निधापयेत् ।
तत आवाहनं कुर्यात् स्थापनं संनिधापनम् ॥१५४॥
संनिरोधनमेवापि संमुखीकरणं तथा ।
सकलीकरणं चैव अवगुण्ठनमेव च ॥१५५॥
अमृतीकरणं चैव तत आप्यायनं तथा ।
परमीकरणं चापि प्राणप्रतिष्ठितिस्तथा ॥१५६॥
सर्वत्रैवाभिपूर्णाया देवताया प्रपूजने ।
सादरं संमुखीभावमावाहनमिहोच्यते ॥१५७॥
विभोर्निवेशनं यन्त्रे स्थापनं कथितं बुधैः ।
पूजां प्रपूजमानां तु गृहीत्वानुग्रहादिके ॥१५८॥
कर्तुं सामर्थ्यमस्यास्तु तत्सान्निध्यं प्रचक्षते ।
आकर्मकाण्डपर्यन्तं सान्निध्यं हि विभोश्च यत् ॥१५९॥
ससंनिरोध उद्दिष्टो भक्तितो मन्त्रवित्तमैः ।
आनन्दायतनं तत्त्वं सच्चिदानन्दलक्षणम् ॥१६०॥
तदत्र सकलं व्याप्तं ध्येयं स्यादवगुण्ठनम् ।
सकलीकरणं नाम सर्वैस्तेजोभिरेकताम् ॥१६१॥
अङ्गानामङ्गिना सार्द्धं विदध्यादमृतीकृतम् ।
क्षमा तस्यापराधानां विज्ञेया परमीकृतिः ॥१६२॥
अपरिच्छिन्नतत्त्वस्य परिच्छिन्नत्वभावनम् ।
तेऽपराधाः समुद्दिष्टा इति शास्त्रविनिश्चयः ॥१६३॥
पीठे देवीं प्रतिष्ठाप्य सकलीकृत्य वा पुनः ।
मूलमन्त्रेण दर्भोदैस्त्रिवारं प्रोक्षयेद् बुधः ॥१६४॥
आप्यायनमिदं प्रोक्तं मन्त्रविद्भिर्विचक्षणैः ।
जीववाक्चित्तदृक्रूपश्रोत्रघ्राणप्राणप्रतिष्ठया ॥१६५॥
देवतां सहजानन्दरूपिणीं रामवल्लभाम् ।
तन्त्रपीठे प्रतिष्ठाप्य ततः संपूजयेद् बुधः ॥१६६॥

पाद्यार्घाचमनीयं च स्नानं वसनभूषणम् ।
गन्धपुष्पधूपदीपनैवेद्याचमनानि च ॥१६७॥
ताम्बूलमथ च स्तोत्रं तर्पणं च नमस्क्रिया ।
प्रयोजयेदर्चनायामुपचारांस्तु षोडश ॥१६८॥
उपचारेषु यत्किंचिद् दुर्लभं साधनं भवेत् ।
तत् सर्वं मनसा ध्यात्वा पुष्पक्षेपेण कल्पयेत् ॥१६९॥
सहजावामभागे तु दद्यान्मूलेन चासनम् ।
पौष्पं दारुमयं वास्त्रं कौशं तैजसमेव च ॥१७०॥
आसनं पञ्चधा प्रोक्तं देवताप्रीतिकारकम् ।
सुगन्धिपुष्परचितं पौष्पं तत्समुदाहृतम् ॥१७१॥
निष्कण्टकं दारुमयं चन्दनादिविनिर्मितम् ।
वास्त्रं कार्पासकौशेयकम्बलादि प्रकीर्तितम् ॥१७२॥
सप्तविंशति दर्भाणां वेण्यग्रे गन्थिभूषिता ।
विष्टरं सर्वयज्ञेषु लक्षणं परिकीर्तितम् ॥१७३॥
तैजसं स्यात्सुवर्णादि लोहशीसादिवर्जितम् ।
एके चार्ममपीच्छन्ति मृगव्याघ्रचादिकाजिनम् ॥१७४॥
पाद्यं तु पादयोर्दद्यान्नमोमन्त्रेण मन्त्रवित् ।
श्यामाकदूर्वाकमलविष्णुक्रान्ताजलैरिदम् ॥१७५॥
स्वाहामन्त्रेण देवेश्याः अर्घं दद्याच्छिरोपरि ।
गन्धपुष्पाक्षतयवकुशाग्रतिलसर्षपैः ॥१७६॥
अर्पयेत् सहजेशान्या एतदर्घ्यं प्रकल्पयेत् ।
आचमनं मधुपर्कं च स्वधामन्त्रेण वै मुखे ॥१७७॥
जातीलवङ्गकङ्कोलैर्भवेदाचमनं शुभम् ।
माक्षिकं शर्करा सर्पिः दधिक्षीरयुतं तथा ॥१७८॥
मधुपर्कं कल्पयित्वा प्रदद्याद्विधिपूर्वकम् ।
सर्वतः क्षौद्रमधिकं दधि सर्पिः सितासमम् ॥१७९॥
जलं तत्सर्वतः स्वल्पं मधुपर्क उदाहृतः ।
पुनराचमनं दद्यादद्भिरेव स्वधाणुना ॥१८०॥

गन्धादिभिः कारयेत्स्नानं वाससी परिधापयेत् ।
भूषणानि ततो दद्याद्रत्नाद्याभरणानि च ॥१८१॥
चन्दनं मलयोत्पन्नमनाघ्रातं सुशीतलम् ।
कर्पूरागुरुकस्तूरीहिमाम्बुक्षोदितं शुभम् ॥१८२॥
अनन्यार्पितमच्छिद्रं पूतं पुण्यं नवं शुभम् ।
गुणचन्दनसंयुक्तं नानागन्धमनोहरम् ॥१८३॥
पत्रं वा यदि वा पुष्पं फले नेष्टमधोमुखम् ।
दुःखदं तत् समाख्यातं यथोत्पन्नं तथार्पणम् ॥१८४॥
विनापुष्पाञ्जलिमयं नियमः परिकीर्तितः ।
अङ्गुष्ठतर्जनीभ्यां तु चक्रे पुष्पं निवेदयेत् ॥१८५॥
जटामांसी लोहवाणचन्दनागुरुकैस्तथा ।
कर्पूरैः कुङ्कुमापृक्तैर्धूपं दद्यान्मनोहरम् ॥१८६॥
धूपभाजनमस्त्रेण प्रक्षाल्याभ्यर्च्य हृदाणुना ।
अस्त्रेण पूजितां घण्टां वादयन्धूपयेद् बुधः ॥१८७॥
घृतप्रदीपः प्रथमस्तिलतैलसमुद्भवः ।
सार्षपःफलनिर्यासजातो वा वारिजोद्भवः ॥१८८॥
दधिजश्चान्द्रजश्चैव दीपाः सप्त प्रकीर्तिताः ।
तैजसं राजसं वापि मार्तिकं दारुजं तथा ॥१८९॥
अश्मजं वापि दीपेषु पात्रमेवं प्रकल्पयेत् ।
सणं वादरकं जीर्णं वस्त्रं मलिनमेव वा ॥१९०॥
उपभुक्तं न दद्यात्तु वर्तिकार्ये कदाचन ।
वर्त्या कर्पूरगर्भिण्या सर्पिषा तिलजेन वा ॥१९१॥
आरोप्य दर्शयेद्दीपानुच्चैः सौरभशालिनः ।
पारावतभ्रमाकारं दीपं नेत्रादि दर्शयेत् ॥१९२॥
दक्षिणे सर्पिषा दीपस्तिलतैलेन वामतः ।
सितावर्तिर्दक्षिणतो रक्ता वर्तिस्तु वामतः ॥१९३॥
दीपकालेऽञ्जनं चापि प्रदद्यान्नेत्ररञ्जनम् ।
तैजसेषु च पात्रेषु सौवर्णे राजते तथा ॥१९४॥

ताम्रे वा प्रस्तरे वापि पद्मपत्रेऽथवा पुनः ।
यज्ञदारुमये वापि नैवेद्यं कल्पयेद् बुधः ॥१९५॥
सर्वाभावे तु माहेयं स्वहस्तघटितं यदि ।
यद्योग्यमर्घपात्रेण तन्निधाय निवेदयेत् ॥१९६॥
पायसं कृसरं दद्याच्छर्करागुडसंयुतम् ।
आज्यं दधिमधून्मिश्रं सहजायै स्वभक्तितः ॥१९७॥
कन्दुपक्वं स्नेहपक्वं घृतसंयुक्तपायसम् ।
मनःप्रियं च नैवेद्यं दद्यात् स्वादुतमं मुहुः ॥१९८॥
ताम्बूलं च सकर्पूरं नालिकेरं सशर्करम् ।
पायसं संस्कृतं चैवमार्द्रकं लवणान्वितम् ॥१९९॥
सतण्डुलं तिलं चैव श्रीफलं फलमुत्तमम् ।
करञ्जं बकुलं चैव तालं खर्जूरमेव च ॥२००॥
अन्यानि च सुगन्धीनि स्वादूनि च फलानि च ।
निधाय स्वर्णजे पात्रे साधारं तत्र मण्डले ॥२०१॥
निधाय चतुरस्रे च संस्कुर्याच्छास्त्रमार्गतः ।
अस्त्रमन्त्रेण संप्रोक्ष्य चक्रमुद्राभिरक्षितम् ॥२०२॥
वायुबीजेन संशोध्य वह्निबीजेन तं दहेत् ।
अमृतीकृत्य तत्सर्वं मूलमन्त्रेण तत्पुनः ॥२०३॥
स्पृशन् कराभ्यां विधिवदष्टधा चाभिमन्त्रयेत् ।
धेनुमुद्रां प्रदर्श्याथ गन्धपुष्पैः समर्चयेत् ॥२०४॥
तत्त्वाख्यमुद्रया देव्यै नैवेद्यानि निवेदयेत् ।
चुलुकं विधिवद्दद्याद् ग्रासमुद्रां प्रदर्शयेत् ॥२०५॥
सुमञ्जुलां वामदोष्णा विकचोत्पलसन्निभाम् ।
प्रदर्शयन् दक्षिणेन प्राणादीनां प्रदर्शयेत् ॥२०६॥

स्पृशेत्कनिष्ठोपकनिष्ठिके द्वे साङ्गुष्ठमूर्ध्ना प्रथमेह मुद्रा ।
तथापरा तर्जनिमध्यमे स्यादनामिकामध्यमिके च मध्या ॥२०७॥
अनामिकातर्जनिमध्यमे स्यात्तद्वच्चतुर्थी सकनिष्ठिका च ।
स्यात्पञ्चमी तद्वदिति प्रतिष्ठाः प्राणादिमुद्रा निजमन्त्रयुक्ता[1] ॥२०८॥

---

१. तथामहोल्लासकरी परेश्याः—रीवाँ ।

प्राणापानसमानोदानव्यानास्तारपूर्वकः ।
चतुर्थ्यग्निवधूयुक्ताः प्राणमन्त्राः स्मृता अमी ॥२०९॥
क्षणं विमृश्य मतिमान् दद्याद् गण्डूषकं ततः ।
अमृतापिधानमसि स्वाहेति मनुनामुना ॥२१०॥
अन्ते च चुलुकं दत्त्वा दद्यात्ताम्बूलमुत्तमम् ।
एलालवङ्गकर्पूरजातीफलसमन्वितम् ॥२११॥
तमालदलकर्पूरपूगभागतरङ्गितम् ।
विशेषार्घ्याम्बुना सिच्य दद्यात्सर्वोपचारकान् ॥२१२॥
ततश्च मूलमन्त्रेण त्रिवारं तर्पयेत् सुधीः ।
गृहीत्वाज्ञां महादेव्याः परिवारान् समर्चयेत् ॥२१३॥
षडङ्गमर्चयेद्विन्दौ ततः श्रीरघुपुङ्गवम् ।
प्रमोदवनमेवापि पूजयेद्गन्धपुष्पकैः ॥२१४॥
माता श्रीराजनी पूज्या पिता श्रीनन्दनस्तथा ।
सहजा मोदिनी सीता जानकीति चतुष्टयम् ॥२१५॥
चतुरस्रे समापूज्य धूपदीपौ निवेदयेत् ।
श्यामा धामादिका अष्टौ संपूज्या अष्टपत्रके ॥२१६॥
ततस्ता द्विगुणाः सख्यः संपूज्या अरुणांशुकाः ।
षोडशाब्जे[1] महापद्मे ताः प्रसिद्धा महाव्रजे ॥२१७॥
ततस्ता द्विगुणाः पूज्या [2]द्वात्रिंशत्पत्रपङ्कजे ।
ततोऽपि द्विगुणाः सख्यः संपूज्या अरुणांशुकाः ॥२१८॥
ततोऽपि द्विगुणाः पूज्याश्चतुःषष्टिदलाम्बुजे ।
ततोऽपि द्विगुणाः पूज्या[2] अष्टविंशाधिकंशतम् ॥२१९॥
आसां नामानि सर्वासामादिव्रजनिकेतने ।
प्रसिद्धान्येव जातानि रूपं च सहजात्मकम् ॥२२०॥
वराभयकराः सर्वाः पूज्या दिव्यविभूषणाः ।
तद्बहिर्भूपुरे पूज्या इन्द्राद्या दश गोदुहाः ॥२२१॥

---

१. षोडशादि°—रीवाँ । २—२. नास्ति—रीवाँ ।

तदायुधानि दिव्यानि क्रमतः परिपूजयेत् ।
अशोकविपिनं पूज्यं पूज्यः कल्पतरुस्तथा ॥२२२॥
पुष्पवाणं रतिं चैव तन्मध्ये परिपूजयेत् ।
चिन्तामणिमयं पूज्यं हेमसिंहासनं तथा ॥२२३॥
प्रीतिं च पूजयेच्छ्रीमत्सहजानन्दिनीपुरः ।
कदम्बविपिनं पूज्यं वसन्तं परिपूजयेत् ॥२२४॥

ततो ग्रीष्मादिकान् रम्यान् षडृतून् परिपूजयेत् ।
गौरवर्णा रतिः प्रोक्ता प्रीतिः श्यामा प्रकीर्तिता ॥२२५॥
सहजायास्ततो वामे रामान्तरितविग्रहाम् ।
कृष्णां नाम व्रजेशानीं पूजयेद् गोपदारिकाम् ॥२२६॥
इत्थं संपूज्य सहजानन्दिनीं रासनायिकाम् ।
रसेश्वरीं रामयोषां साङ्गां सावरणां तथा ॥२२७॥

गन्धपुष्पं तथा धूपं नैवेद्यं भूय एव हि ।
पूजान्ते कल्पयेद्भक्त्या ततो होमं तु कारयेत् ॥२२८॥
सौरभेयघृताहुत्या नित्यहोमो विधीयते ।
काम्यहोमं प्रवक्ष्यामि यथोक्तं मुनिना पुरा ॥२२९॥
मालतीजातिवल्लीभिर्घृतपूर्णे हुताशने ।
होमयेत्प्रयतो मन्त्री वागीशत्वफलाप्तये ॥२३०॥

जपापुष्पैर्घृतयुतैः करवीरैश्च होमतः ।
मोहयेत्त्रिजगद्योषाः सहजामन्त्रजाप्यतः ॥२३१॥
कर्पूरं कुङ्कुमं चैव मृगनाभिविमिश्रितम् ।
हवनात्कुरुते मन्त्री मन्त्रिणे विजयं ध्रुवम् ॥२३२॥

पाटलैर्हवनाल्लक्ष्मीं चञ्चलां स्थिरयेद् गृहे ।
श्रीखण्डचन्दनं चन्द्रमगुरुं मन्त्रहोमतः ॥२३३॥
नरनागेन्द्रदेवानां पुरन्ध्रीर्वशमानयेत् ।
क्षीरं मधु दधि प्राज्यमाज्यं चैव विधानतः ॥२३४॥
पृथग्घुत्वा लभेदायुर्धनमारोग्यमिन्दिराम् ।
क्रमेण हवनात्क्षीरमधुभ्यां मृत्युनाशनम् ॥२३५॥

दधिमाक्षिकहोमेन सौभाग्यं धनमाप्नुयात् ।
सितया केवलं होमो वैरिस्तम्भनकारकः ॥२३६॥
होमो दधिमधुक्षीरलाजाभिर्मन्त्रपूर्वकः ।
महादुष्टवशीकारो होमो नीलोत्पलैर्भवेत् ॥२३७॥
होमेन श्वेतकमलैर्लभते भारतीं श्रियम् ।
लभेद्धनं च सौभाग्यं कल्हारगणहोमतः ॥२३८॥
मातुलिङ्गौघहवनात् क्षत्रियान्वशयेत् क्षणात् ।
नारङ्गहोमतश्चैव वैश्यान् वशयति ध्रुवम् ॥२३९॥
कूष्माण्डहोमतः शूद्रान् वशयेन्नात्र संशयः ।
द्राक्षाफलैर्लक्षहोमात्सिद्धचष्टकमवाप्नुयात् ॥२४०॥
रम्भाफलानि लक्षन्तु हुत्वा भूमिपतीन् दश ।
वशीकुर्यान्महामन्त्री नात्र कार्या विचारणा ॥२४१॥
खार्जूरलक्षहोमेन वशयेद्विंशतिं नृपान् ।
पक्वतालफलैर्हुत्वा लक्षमन्त्रं यथाविधि ॥२४२॥
चतुःसमुद्रां धरणीं वशयेन्नात्र संशयः ।
पक्वैः सस्यैः फलैर्होमो लक्षमात्रेण भूपतीन् ॥२४३॥
क्षत्रियांश्चैव वैश्यांश्च वशयेन्नात्र संशयः ।
तिलाज्यहवनात् सर्वकार्यसिद्धिर्भवेद्ध्रुवम् ॥२४४॥
राजिकालवणाभ्यां तु होमो दुष्टान् वशं नयेत् ।
गुग्गुलस्याहुतीर्दत्त्वा सर्वरोगं विनाशयेत् ॥२४५॥
कुङ्कुमैर्हवनात् सद्यस्त्रैलोक्यं वशगं भवेत् ।
चन्दनैर्हवनात् सर्वान् वैरिणो वशमानयेत् ॥२४६॥
रक्तैश्च चन्दनैर्हुत्वा स्त्रीपुंसो वशयेद् भुवि ।
कर्पूरहवनाद्वाचं वशयेन्नात्र संशयः ॥२४७॥
कस्तूरीहोमतो वश्या भवेयू राजमन्त्रिणः ।
तिलतण्डुलहोमाच्च शान्तिर्वर्धति भूयसी ॥२४८॥
शर्करागुडहोमाद्वै सर्वकार्यार्थसाधनम् ।
सिताघृतान्वितं हुत्वा पायसं जातवेदसि ॥२४९॥

वशीकुर्यात् त्रिभुवनं धान्यसिद्धिश्च जायते ।
सोपस्करैश्च वटकैरुपसर्गान् विनाशयेत् ॥२५०॥
जपाकुसुमहोमेन जगद्वश्यं प्रजायते ।
मोगरैर्वाणपुष्पैश्च तथा वकुलपुष्पकैः ॥२५१॥
हवनाल्लभते भूयः सौभाग्यं नात्र संशयः ।
साङ्गधूपस्य होमेन सौभाग्यं निस्तुलं लभेत् ॥२५२॥
जम्बू फलानां होमेन स्त्रियो वश्या भवन्ति हि ।
कूष्माण्डहोमतो वश्या भवेयुर्दैत्यकन्यकाः ॥२५३॥
श्रीफलैरतुलां लक्ष्मीं लभते नात्र संशयः ।
इक्षुदण्डैः सुखावाप्तिस्तद्रसस्य तु होमतः ।२५४॥
नारिकेलजलैर्वापि वशयेद्राजकन्यकाः ।
केवलं घृतहोमात्तु वरदाः सर्वसिद्धयः ॥२५५॥
अथ होमीयवस्तूनां मानमुक्तं मनीषिणा ।
पुष्पं समग्रं जुहुयात्तिलांश्च शतसंख्यया ॥२५६॥
तथैव राजिकाश्चापि लाजा मुष्टिप्रमाणतः ।
घृतं [1]गगनमानं च चुलुकं पय आहुतिः ॥२५७॥
अन्नग्रासमिदं हव्यं खण्डैः स्थूलफलं हुनेत् ।
रम्भाफलं चतुःखण्डमखण्डं लघुचेद्धुवेत् ॥२५८॥
नारिकेलस्य खण्डं च स्थूलं कुर्यान्मनःप्रियम् ।
प्रतिपर्वेक्षुदण्डं च द्राक्षाफलमशेषतः ॥२५९॥
नारङ्गं चैव खार्जूरं गुग्गुलं च तथैव हि ।
क्रमुकस्यार्धशो होमः कुङ्कुमं चन्द्रसंज्ञकम् ॥२६०॥
कस्तूरी गुञ्जया हव्यं चन्दनं क्रमुकोन्मितम् ।
एवं होमं विनिर्वर्त्य यथेष्टं फलमाप्नुयात् ॥२६१॥
सहजानन्दिनीमन्त्रसाधनात् किं न जायते ।
एकैनैवाखिलं कार्यं जायते मङ्गलं भुवि ॥२६२॥

---

१. गद्याण°—मधु० बड़ो० ।

किमर्थमन्यमन्त्राणां साधनं क्रियते जनैः ।
ऐहिकामुष्मिकं सर्वं तन्मन्त्रेणैव जायते ॥२६३॥
सहजानन्दिनीरामौ परिचर्य[1] कदाचन ।
न देवतान्तरं सेव्यं स्वर्गमोक्षाद्यवाप्तये ॥२६४॥
तुलसीपत्रजां मालां वैजयन्तीं विधाय तु ।
ये रोपयन्ति सहजानन्दिनीरामवक्षसि ॥२६५॥
पूजान्ते सुलभस्तेषां तत्प्रसादोऽति[2]दुर्लभः ।
पद्माक्षमालया जप्त्वा सहजानन्दिनीमनुम् ॥२६६॥
दशांशं चानले हुत्वा सुरभीघृतधारया ।
तत्क्षणाद्देवतां वश्यां कुरुते नात्र संशयः ॥२६७॥
चतुर्णामपि बीजानां साधनं पृथगीरितम् ।
प्रणवं लक्षमावर्त्य कुशग्रन्थिस्रजो बुधः ॥२६८॥
किंशुकैर्हवनं कुर्यात् सर्वज्ञो जायते भुवि ।
तत्र ध्येया महेशानी ब्रह्मविष्णुशिवात्मिका ॥२६९॥
नानायुधधरा साक्षाद्विश्ववन्द्य[3]स्वरूपिणी ।
एवं द्वितीयबीजं च लक्षमावर्त्तयेद् बुधः ॥२७०॥
रुद्राक्षमालया पश्चात्तिलाज्यहवनं चरेत् ।
यद्यत् कामयते कामं तत्तदाप्नोति मानवः ॥२७१॥
तत्र ध्येया च सहजा कर्णस्वर्णोरुकुण्डला ।
पीनवक्षोरुहा स्थूलमुक्ताहारविभूषणा ॥२७२॥
मल्लीकुसुमधम्मिल्ललीलालोलविलोचना ।
चन्द्रानना रक्तकाञ्ची सर्वाभरणभूषिता ॥२७३॥
[4]तथा तार्त्तीयबीजं च लक्षमावर्तयेद् बुधः[4] ।
स्रजा पद्माक्षमय्या च पद्माक्षैर्होममाचरेत् ॥२७४॥
महतीं श्रियमाप्नोति तत्र ध्यानं विशिष्यते ।
श्वेताम्बुजस्थिता ध्येया जातरूपसमाकृतिः ॥२७५॥

---

१. परित्यज्य—मधु० बड़ो० । २. °दोऽपि—मधु०, बड़ो० । ३. विश्वस्तप° —मधु० बड़ो० । ४—४. नास्ति—रीवाँ ।

तथैव तुर्यबीजं च लक्षमावर्तयेद् बुधः ।
स्रजा विद्रुममय्या तु होमं रक्ताम्बुजैश्चरेत् ॥२७६॥
ध्यानं कुर्याद्विशेषेण रक्तभूषाम्बरावृतः [ताम्] ।
रक्ताशोकलताकुञ्जमण्डपान्तरगोचराम् ॥२७७॥
महासौभाग्ययुक्तः सन् कामवन्मोहयेज्जगत् ।
य इत्थं साधनं कुर्यात्कामबीजस्य मानवः ॥
इति ते सहजामन्त्रसाधनं सम्यगीरितम् ॥२७८॥
नातः परं कर्म जगत्त्रयेऽपि विराजते यत्र भवन्ति सद्यः ।
आयास[1]वर्जं खलु सिद्धयोऽष्टौ भुक्तिश्च मुक्तिश्च करस्थितैव ॥२७९॥
प्राप्य मोक्षपदे[2]सीतां सहजानन्दिनीं हरेः ।
वल्लभां सुमहोदारां कामार्थान् को नु याचते ॥२८०॥
यत्काम्यमपि चात्रोक्तं देवतान्तरवारणात् ।
सहजायामेव नृणां चित्तस्यावेशसिद्धये ॥२८१॥
एवमाराध्य तां साक्षात्करुणामृतपुष्कलाम् ।
प्रार्थयेत् परमं प्रेम श्रीरामपदगोचरम् ।

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे पूर्वखण्डे दशरथतीर्थयात्रायां मिथिलागमने द्विचत्वारिंशदधिकशततमोऽध्यायः ॥१४२॥

●

त्रिचत्वारिंशदधिकशततमोऽध्यायः

ब्रह्मोवाच

एकं तयोः सुसंवादः समभून्मिथिलापुरे ।
ततः स नैम्यमामन्त्र्य स्नात्वा च कमलेश्वरीम् ॥ १ ॥
योगिवर्यैः सुसंगम्य जनकस्य पुरस्थितैः ।
परमप्रीतहृदयो भूत्वा प्रेमैकनिर्भरः ॥ २ ॥

---

१. आगांसि—रीवाँ । २. मोक्षोपदेशीं—मथु०, बड़ो० ।

आदित्रजस्यातुल्यत्वं ज्ञातुकामो जनेश्वरः ।
उत्तीर्य गंगां यमुनां मथुरामण्डलं ययौ ॥ ३ ॥
प्रागान्नन्दव्रजं[1] स्निग्धैर्जनैः सर्वत आवृतः ।
तत्र गत्वा सुमधुरां मथुरां समुदैक्षत ॥ ४ ॥
यत्र श्रीकेशवः साक्षाद्योगिध्येयपदाम्बुजः ।
यमुनाकेलिनी यत्र तरङ्गनिकरावृता ॥ ५ ॥
प्रसन्नसलिला कूजद्राजहंसकुलाकुला ।
दक्षिणां कोटिमारभ्य स्फुरदुत्तरकोटिका ॥ ६ ॥
तत्र स्नात्वा महाराजस्तीर्थे विश्रान्तिसंज्ञके ।
ददौ सहस्रं लक्षं च धेनूनां विपुलौधसाम् ॥ ७ ॥
दश सोमान् चकारोच्चैर्भूपो दक्षिणयान्वितान् ।
भूर्यन्नान् भूरिहव्यांश्च भूरिसंभारकल्पितान् ॥ ८ ॥
अत्र स्नात्वोभयोः कोटचोः कुरुक्षेत्राधिकं फलम् ।
लब्धं ज्ञात्वा सहृदयो बभूव प्रीतमानसः ॥ ९ ॥
दृष्ट्वा केशवदेवं च शिवलिङ्गं प्रणम्य च ।
महाविद्यां पीठराज्ञीं दृष्ट्वातिसुखितोऽभवत् ॥१०॥
ततो दत्त्वा कुरुक्षेत्रे गया[2]धिकफलप्रदे ।
ध्रुवक्षेत्रे महाक्षेत्रे पितृभ्यः श्राद्धमुत्तमम् ॥११॥
दृष्ट्वा दक्षिणभागस्थं श्रीमद्वाराहमूर्जितम् ।
नत्वा स्तुत्वा सुसंपूज्य धन्यमात्मानमप्यवैत् ॥१२॥
तत उत्तरकोटिस्थं गोकर्णेश्वरमीश्वरम् ।
संपूज्य विधिवद्राजा यातः सुप्रीतमानसः ॥१३॥
एवं तीर्थाटनं कुर्वन् दक्षिणोत्तरकोटिगः ।
उवास पञ्चरात्राणि मथुरायां जनाधिपः ॥१४॥
एकदा रजनौ सुप्तो जागरान्तमुपागतः ।
नातिनिद्रश्च भूपालो मध्यसंधिर्व्यवस्थितः ॥१५॥

---

१. यत्र नन्दव्रजः—मथु०, बड़ो० । २. °यात्रा—रीवाँ ।

रामस्यांशकलं कृष्णं सीतांशं राधिकां तथा ।
स्वस्यांसं वसुदेवं च कौशल्यांशं च देवकीम् ॥१६॥
अयोध्यांशं मथुरां वै प्रमोदांशं तु वृन्दिकाम् ।[1]
ततः प्रबुद्धः सपदि प्रसन्नहृदयो रघुः ॥१७॥
वशिष्ठादिमुनीन्द्रेभ्यः सर्वमाख्यातवान्नृहः ।
तेषां वशिष्ठो भगवान् पुराणमुनिरब्रवीत् ॥१८॥
रामांशो भगवान् कृष्णः सीतांशा राधिका सती ।
नान्यथा दण्डकारण्यवासिनां स्यान्मनोरथः ॥१९॥
[2]ये रामं प्रार्थयाञ्चक्रुस्तद्रूपरमणार्थिनः ।
तेभ्यो रामोऽवदत् प्रीतः कृष्णावतरणे फलम्[2] ॥२०॥
त ऊचुर्नान्यरूपेण रमणेच्छा रमापते ।
सोऽवदत्तांस्तदाकारो भविष्यामहमेव हि ॥२१॥
अनेनैव स्वरूपेण रमयिष्यामि वोऽबलाः ।
इत्युक्त्वा भगवान् रामो[3] विससर्ज मुनीश्वरान् ॥२२॥
तस्माद्भूमिभृतां श्रेष्ठः सत्यसन्धः परात्परः ।
तेनैव हि स्वरूपेण रतवान् मुनिरूपिणीः ॥२३॥
परात्परेशं श्रीरामं विद्धि स्वात्मजमव्ययम् ।
जनोऽयं नैव जानाति मोहितस्तस्य मायया ॥२४॥
एवमुक्तो वशिष्ठेन प्रीतो दशरथो नृपः ।
व्रजदर्शनसोत्कण्ठो जगाम मधुकाननम् ॥२५॥
केकयेन्द्रसुतायुक्तो वशिष्ठादिपुरस्कृतः ।
सह सर्वजनैः सार्धं कुर्वन् कौतूहलं महत् ॥२६॥
प्रविष्टमात्रो मधुकाननेऽसौ ददर्श योगीन्द्रवरं शुकाख्यम् ।
जगाद यो रामपरान् सुधर्मान् संसारपाथोनिधिपोतरूपान् ॥२७॥

---

१. अतः परम्—"प्रमोदवनस्यांशकलं वृन्दावनमपश्यत्तथाचनृपसत्तमः" इत्यधिकः पाठः—मधु०, बड़ो०। २—२. नास्ति—रीवाँ। ३. इति दत्वा वरं रामो—रीवाँ।

तं व्याससूनुं करुणावतारं श्रीरामतत्त्वैकविदं मुनीन्द्रम् ।
दृष्ट्वा महाप्रेमरतः स राजा मुमोद सर्वावयवाङ्कुराढ्यः॥२८॥
तस्यार्हणं महच्चक्रे पाद्यादिभिरुदारधीः ।
उवाच मधुरं भक्त्या विनयानतकन्धरः ॥२९॥

राजोवाच

भगवन् मुनिशार्दूल दिदृक्षोर्मे व्रजावनिम् ।
भवता सह संबन्धः परं निःश्रेयसायनम् ॥३०॥
गोदोहमात्रं भवतो दर्शनं दुर्लभं भुवि ।
यः साक्षाद्भगवानेव भासि लोकानुकम्पया ॥३१॥
स मे भवान् भक्तियुताय विद्वन् ब्रवीतु माहात्म्यमशेषमस्य ।
व्रजस्य पूर्वं भगवद्वशिष्ठमुखाच्छ्रुतं चापि विशिष्टवेद्यम् ॥३२॥
आदिव्रजः कथं कोऽत्र व्रजश्च वद कः पुनः ।
कथमत्रोभयोर्ब्रह्मन् प्रादुर्भावोऽभवत् पुरा ॥३३॥
रामस्य वद महात्म्यं परस्य च मुनीश्वर ।
उभयोस्तारतम्यस्य यद्भेदो वा स्वरूपयोः ॥३४॥
वनानां महिमानं च ब्रूहिविद्वन्नशेषतः ।
कथं च यात्रा कर्तव्या को विधिः किं फलं तथा ॥३५॥

श्रीशुक उवाच

अये राजन्नतिधन्योऽसि यत्ते स्वयं च रामो भगवान् सुतोऽभूत् ।
पश्यन्ति यं योगिन आत्मतत्त्वे ज्ञानप्रकाशं न तु साक्षात्स्वरूपम् ॥३६॥
स ते परब्रह्मनिधिः स्वयंभूः श्रीराम आस्ते तनयो निकेतने ।
विभूषयन्नात्मगुणप्रकाशनैस्त्रैलोक्यमानन्दसुधार्णवः प्रियः ॥३७॥
स त्वं विमुक्तसंसारबन्धनैरात्मवित्तमैः ।
गोपोऽसि रघुशार्दूल रामचन्द्रप्रसंगतः ॥३८॥
द्रष्टुमिच्छामहे राजंस्त्वां सदा योगिनो वयम् ।
यस्य गेहमलंकुर्वन् परब्रह्म विलोक्यते ॥३९॥
तस्यैव प्रभुवर्यस्य रामस्य परमात्मनः ।
आज्ञया त्वामनुप्राप्तं विद्धि मां बुद्धिमत्तम ॥४०॥

आदिव्रजस्य यात्रा ते सुखितेन फलीकृता ।
व्रजस्य यात्रा सुकृतं मया सार्द्धं फलिष्यति ॥४१॥
आदिव्रजस्यांशश्चेति व्रजमेवमवेहि भोः ।
हेतुं तस्य ब्रवीम्यद्धा सावधानोऽवधारय ॥४२॥
धात्रा विज्ञापितः पूर्वं प्रमोदवननायकः ।
भूमिभारावतारार्थं द्वापरान्तेऽप्यवातरत् ॥४३॥
कल्पे कल्पे तथा नित्यं रामस्यांशकलामयः ।
बभूव भगवान् बालः कृष्ण इत्यभिधीयते ॥४४॥
यदा यदा हि लोकेऽस्मिन् जायते धर्मसंकटः ।
तदा तदा स्वयं रामोऽवतरत्यात्मधामतः ॥४५॥
तस्य धाम परं तद्वै प्रमोदवननामकम् ।
यत्ते सुखितगोपालो दर्शयामास चिन्मयम् ॥४६॥
यत्ते रहसि संजातं गोचरं स्वात्मसंविदि ।
तत्प्रमोदवनं नाम राजन् विज्ञातमेव ते ॥४७॥
अवतीर्णे परिकरैः सार्द्धं रामे रमापतौ ।
प्रमोद विपिनं चापि यथास्थानमवातरत् ॥४८॥

पद्माकारं[1] प्रमुदविपिनं रामचन्द्रस्य साक्षा-
त्प्रेमानन्दप्रगुणमगुणं निर्विशेषं निरीहम् ।
वन्द्यं वृन्द प्रभृतिसुभग द्वादशारण्यमुख्य
पुण्यं धन्यं क्षितिनिवसतामक्षतं धाम रम्यम् ॥४९॥

एतदानन्द भवनं[2] सदा विपिनमद्भुतम् ।
प्रमोदविपिनं पश्य परब्रह्मरसालयम् ॥५०॥
अस्ति प्रयोजनं रामः सानु बन्धो बभूव यत् ।
भवतैः सह शुभां लीलां दण्डकारण्यवासिभिः ॥५१॥
योगिनो मुनयः शान्ताः श्रमणा ऊर्द्धरेतसः ।
तपस्विनो वातरशना ब्रह्मचर्यव्रते स्थिताः ॥५२॥

---

१. सुखप्रकारं—रीवाँ । १. प्रमानन्दाद्यमितकगुणं—रीवाँ । २—घनं—रीवाँ ।

अग्नेः कुमाराः कृतिनः षष्टिसाहस्रसंख्यकाः ।
दृष्ट्वा नटन्तं रामेन्दुं सहजानन्दिनीसखम् ॥५३॥
प्रमोदविपिनस्येन्द्रं कोटिकन्दर्पसुन्दरम् ।
चुक्षुभुः कामयानास्ते रूपलुब्धाः स्मरार्दिताः ॥५४॥
स्वाश्रमाणां परिसरे यदा रामः समागतः ।
तदाह्याराधयञ्च क्रुर्मुनयः सहजान्वितम् ॥५५॥
तेभ्यो प्रसन्नो भगवान् रामो राजीवलोचनः ।
अनेनैव स्वरूपेण रमयास्मान् रमापते ॥५६॥

दृष्ट्वा तमेवं मधुराधरप्रभासंमिश्रमञ्जुस्मितचन्द्रिकाञ्चितम् ।
मुखेन्दुमानन्दनिधेः स्मरार्दिताः स्वतेजसा नाथ वयं बभूविमः ॥५७॥
यदावधि त्वं प्रियया नया विभो प्रमुद्वनाभ्यन्तरकुञ्जवेश्मनि ।
दधद्विलासान् रसनिर्भराश्रयान् विलोकितोऽस्माभिरहो तदावधि ॥५८॥
दुर्मनो नः क्षुभितं स्मरेषुभिर्महावियोगानलकीलकीर्तितम् ।
तवाधरा धारसुधारसे क्षणात्प्र विस्मृतं तत् खलु तादृशं तपः ॥५९॥
अहो असि त्वं प्रकटः पुमान् परः परार्द्धकन्दर्पमनोहराकृतिः ।
कुलाबला धैर्यविलोपनोद्धुरो विलोलविस्तीर्णविलोचनेषुभिः ॥६०॥
कथं नुताः संप्रति गोपयोषितो जीवन्ति विश्लेषवशात्त्वया विना ।
यासां पतिश्चापि मतिर्गतिर्भवान् स्वरूपतः केलिरसं वितीर्णवान् ॥६१॥
तस्माद्वयं नाथ विमोहिताशया नितान्तमाराध्नुम कामतत्त्वतः ।
स्त्रीभूयसंभूय भवन्तमादराद्वरं वरेण्यं वरयाम वल्लभम् ॥६२॥

इति ते वित्रपा[1] नाथ वाचा याचामहे स्फुटम् ।
एतावानेव चास्माकं वरोन्यंड्येन किमस्ति नः ॥६३॥

श्रीशुक उवाच

इति निवेदिते पावकात्मजै र्मुनिभिरात्मनः कामिते वरे ।
कमललोचनो जानकीमुखं किमपि वीक्ष्य तान् प्रत्युवाच सः ॥६४॥

---

१. निस्त्रपं—मथु० बड़ो० ।

श्रीभगवानुवाच

इदं हि वो लुब्धमनस्त्वमद्भुतं जितेन्द्रियाणां सततं तपस्विनाम् ।
यत्कामवाणेन पराजितान्तरा अस्वोचितंवर्णयथात्मवित्तमाः ॥६५॥
अनर्हमेतच्च भवद्भिरीरितं न वै पुमान् कामयते पुमांसम् ।
यद्योगशक्त्यापि भविष्यथस्त्रियस्तथापि लौल्यं विदुषामनर्हम् ॥६६॥
समाधिनावेश्यमनो मयि स्थिरं येसम्यगानन्दमवाप्य निर्वृताः ।
तरन्ति ते वै न चिराद् भवार्णवं लभन्ति भोगं च चिरं रसात्मकम् ॥६७॥
स्मरन्ति शृण्वन्ति च कीर्तयन्ति ये ध्यायन्ति बुद्ध्याद्यभिदं सदैवमाम् ।
ते यान्ति तद्ब्रह्मरसं सनातनं न तु स्वरूपेण मयाङ्गसङ्गिताः ॥६८॥
एकैव सा मेऽस्ति सदाङ्गसङ्गिनी लक्ष्मीः सरोजान्तरकोशवासिनी ।
नान्या च मेऽतीव विमोहनक्षमा नित्यानुकूलस्य मितैकभाषिणः ॥६९॥

शुक उवाच

इत्युदीरितमीशस्य श्रुत्वा ते मुनयस्तदा ।
तस्थुर्विवर्णवदना चिरं संतापकातराः ॥७०॥
ऊचुश्च सुचिराच्छोकसागरादुद्धृताशयाः ।
मैवं वादीर्नरश्रेष्ठ हानं विज्ञापनस्य नः ॥७१॥
त्वयि प्रकामं पुरुषप्रकाण्डे विज्ञापना विफला यदि स्यात् ।
भवेत्तदा किं निगमो नशोच्यस्तवैव निःश्वासतया प्रसिद्धम् ॥७२॥
अमोघं याचनं नाथ त्वयि सर्ववरास्पदे ।
अन्ततोऽपि न मोघं नः प्रार्थनं संभविष्यति ॥७३॥
अपि निर्बन्ध एवास्ति तवास्मासु यदाह नः ।
तदा वयं दैवहीनाः करिष्यामः शृणुष्व तत् ॥७४॥
भवद्वियोगानलकीलजालैः संपाद्य शुद्धं भसितं शरीरम् ।
तवैव पादाम्बुजवर्त्म रुद्ध्वा स्थास्याम आनन्दनिधेः समंतात् ॥७५॥
तेनाप्यहो आकुलिता भविष्यन्त्यस्मद्विपक्षा इव ते सपक्षाः ।
तदर्हसि प्राणपते वरीतुं नितान्तमस्मानखिलस्पृहायते ॥७६॥
इतिनिर्बन्धमाकर्ण्य तेषां रामो वरप्रदः ।
उवाच प्रहसन् मन्दं कामनाः पूरयन्निव ॥७७॥

श्रीभगवानुवाच

अशक्यो दातुमप्येष भवतां कामितो वरः ।
चिरेण सेत्स्यति प्राज्ञास्तावत्तिष्ठत मद्गिरा ॥७८॥

मम या प्रेयसी लक्ष्मीरेषा नित्याङ्गसंगिनी ।
तामाराधयमाणानां कालोऽयं यातु वो द्विजाः ॥७९॥
आगामिनि तु तत्त्वज्ञाः कल्पे सारस्वताभिधे ।
यद्विंशके द्वापरान्ते व्रजे गोप्यो भविष्यथ ॥८०॥

तदाहमपि युष्माकं कामलीलारसं मुहुः ।
अनुपूरयितुं प्राप्स्याम्यनेनैव स्वरूपतः ॥८१॥
तदा वंशीधरं तं मां रासलीलारसानयम् ।
भवन्तः सङ्गताः सर्वे भविष्यन्ति मुनीश्वराः ॥८२॥

त्यक्त्वा गृहापत्यपतिस्वधर्मं मदेकचित्ताः मम रूपकृष्टाः ।
स्वात्मान मङ्घ्रौ मम संनिवेद्य चिराय रंस्यध्व इहैव धाम्नि ॥८३॥

तदाहमात्मनः सर्वलीलोपकरणान्वितम् ।
प्रमोदवनमाधास्ये जम्बूद्वीपे महीतले ॥८४॥
सरय्वाः पुलिने तद्धि भविष्यति भुवि स्फुटम् ।
मनुष्यपशुपक्ष्यादि परमानन्दकन्दलम् ॥८५॥

तावद्यूयं मुनिश्रेष्ठा मदनुस्मृतितत्पराः ।
अस्याश्च सहजेशान्या मन्त्रजापपरायणाः ॥८६॥
मत्प्रमोदकनक्रीड़ाकीर्तनश्रवणादिभिः ।
नयन्तः कालमखिलं श्रीमद्वैष्णवसेवकाः ॥८७॥

भुञ्जाना मद्भुक्तशेषं शुभान्नं मद्दत्तस्रग्गन्धवस्त्रादियुक्तम् ।
विभ्राणाः श्रीजानकीपादपद्मप्राप्तप्रज्ञाः कालमायाद्यवश्याः ॥८८॥

पठन्तो राघवं रामं शृण्वन्तो राघवंमतम् ।
ध्यायन्तो राघवं धाम मत्स्वरूपमवाप्स्यथ ॥८९॥
मद्विप्रयोगसंभूता महती वेदना च वः ।
नैषा बाधिष्यते प्रज्ञा सुखे स्थास्यथ भूतले ॥९०॥

एवं कालं समुत्तीर्य महाराससमुत्सुकाः ।
प्राप्य सारस्वतं कल्पं व्रजे गोप्यो भविष्यथ ॥९१॥
तवाहं वो मोदयिष्यामि धीरा दत्त्वा वरं सर्वकामोपभोगम् ।
दत्त्वापरं कालमायादिमूर्ध्नि क्रीडिष्यध्वं मान्मथैर्दिव्यभोगैः ॥९२॥
श्रीश्चैषा[1] सहजानन्दा वृषभानुव्रजेशितुः ।
धर्मपत्न्यां कीर्तिदायां राधा नाम्ना भविष्यति ॥९३॥
तद्भ्राता चन्द्रभानुश्च गोपालो धर्मकृत्सदा ।
सुखदानाम तत्पत्नी तस्यां कृष्णा भविष्यति ॥९४॥
नाम्ना चन्द्रावली सा तु ज्येष्ठा राधा मृगीदृशः ।
उभे अपि पृथग्भावैर्यूथेश्वर्यौ भविष्यतः ॥९५॥
आदिव्रजनिवासिन्यो याश्चैवान्या मृगेक्षणाः ।
ऋग्यजुःसामऋग्रूपा देवरूपाश्च प्राग्भवे ॥९६॥
ऋषिरूपास्तथैवान्या देवगन्धर्वकन्यकाः ।
नगनागनरोद्भूताः प्रमोदवनरासगाः ॥९७॥
ताः सर्वास्तत्र मत्सार्थे कृत्वावतरणं पृथक् ।
महारासे सुसंगम्य रंस्यन्ते वै मया सह ॥९८॥
मुदिता मोदयिष्यन्ति महामाना मनोर्जिताः ।
तां केलीं वीक्ष्य गगने वैमानिक्योऽपि देवताः ॥९९॥
तथैवाप्सरसो देव्यो गलन्नीव्य श्चलांशुकाः ।
मोहमेष्यन्ति विवशाः स्थगिताश्च विशेषतः ॥१००॥

श्रीशुक उवाच
इति तान् समुदीर्येशो वरदानमभीप्सितम्[2] ।
पूजितः संस्तुतो भूयो दण्डकारण्यवासिभिः ॥१०१॥
सर्वानामन्त्र्य योगीन्द्रान् स्वरूपनिरतान् द्विजान् ।
जगाम सह सौमित्रिः सीतासेवितपार्श्वकः ॥१०२॥
इति ते कथितं राजन् कृष्णलीलासमुद्भवम् ।
योऽसौ रामस्तव सुतस्तस्यांशो वसुदेवजः ॥१०३॥

---

१. श्रीसखी—रीवाँ । २. वरं दत्त्वा भविष्णुकम्—मथु०, बड़ो० ।

तं सेवमानः परया भक्त्या संयोजिताशयः ।
मुच्यते कर्मपाशेभ्यो नित्यं लीलारसं स्पृशेत् ॥१०४॥
समासव्यासयोगेन सर्वोऽपि निगमः स्फुटम् ।
राममेवाह नियतं प्रधानपुरुषेश्वरम् ॥१०५॥
यत्प्राप्नुवन्ति सद्भक्ता भजन्तो नियतं प्रभुम् ।
तत्कीर्तितं श्रुतिगणैः राम एव परं पदम् ॥१०६॥
न रामात् परतः किंचित्तत्त्वमस्ति निरूपितम् ।
श्रुतिभिश्चाप्युपनिषद्गणैः सर्वान्तभाषणैः ॥१०७॥
स एव भगवान् नित्यं माधुर्यमेचकद्युति ।
श्रीराजरूपमास्थाय क्रीडन्तं सरयूतटे ॥१०८॥
एवं यो वेत्ति निखिलं तत्वं श्रीरामसीतयोः ।
स तत्प्रेमरसं प्राप्य विमुक्तः सुखमश्नुते ॥१०९॥
यद्ब्रह्मेति श्रुतं वेदैः सर्वदैकरसस्फुटम् ।
निर्गुणं च निराकारं तद्धाम परमं हरेः ॥११०॥
अतस्तत्र व्रजन्त्येव भक्त्या आयासवर्जिताः ।
ज्ञानिनामिव नैतेषामायासस्तत्र जायते ॥१११॥
अयोध्यारामवैकुण्ठवर्षकिम्पुरुषादिषु ।
प्रमोदवनसह्याद्रि[1] चित्रकूटाचलादिषु ॥११२॥
यत्र यत्र स्थितो रामस्तत्र तत्र ध्रुवं स्थितम् ।
सर्वेऽवतारा यावन्तः स्तुवन्त स्तद्यशः पृथक् ॥११३॥
मध्यसिंहासने देवः सीतया सहितो मुदा ।
सर्वप्रसादसुमुखः सर्वाधिष्ठानतां गतः ॥११४॥
दक्षिणे लक्ष्मणयुतो वामे चादिश्रियान्वितः ।
पुरो हनुमत्सुग्रीवसुपर्णाद्यैः सुसंस्तुतः ॥११५॥
महामहिमसंदोहैः कोटिब्रह्माण्डनायकैः ।
प्रसादाकाङ्क्षिभिर्विष्वक् स्तूयमानो मनोहरः ॥११६॥

---

१. सप्ताद्रि—मथु०, बड़ो० ।

विराजते त्रयीशब्दस्तुतिभाजनतां गतः ।
शरदिन्दुयशःशुभ्रं प्रमोदवनविश्रमः ॥११७॥

ब्रह्मोवाच

इत्यन्योन्यं कृतालापैरन्योन्यं मिलनोत्सुकैः ।
मुनीन्द्रराजेन्द्रवरौ वनानि द्रष्टुमीयतुः ॥११९॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दशरथतीर्थयात्रायां व्रजागमने त्रिचत्वारिंशदधिकः शततमोऽध्यायः ॥१४३॥

●

चतुश्चत्वारिंशदधिकशततमोऽध्यायः

ब्रह्मोवाच

ततो मधुवनं वीक्ष्य शुकः प्राह जनेश्वरम् ।
इष्टं मधुवनं पश्य राजन् सर्ववनोत्तमम् ॥१॥
अस्य संदर्शनादेव मुक्तपापो भवेद्ध्रुवम् ।
यत्र वायुः सुखस्पर्शः पुनाति भुवनत्रयम् ॥२॥
अत्र दिव्यं सरो राजन् यत्र स्नानेन माधवः [राघव] ।
सर्वतीर्थविगाहोत्थं पुण्यं प्राप्नोति तत्क्षणात् ॥३॥
संप्राप्य माघपूर्णायां यत्फलं तीर्थराजके ।
तत्फलं लभते मर्त्य इहोपस्पर्शमात्रतः ॥४॥
सहस्रवर्षवासेन यत्काश्यां फलमाप्यते ।
तत्फलं लभते मर्त्यः सकृत्स्नानादिह ध्रुवम् ॥५॥
ये धर्मकर्मभिर्हीना दुष्टात्मानो नराधमाः ।
तेषां मधुवनं स्नानान्नरकार्त्तिर्न जायते ॥६॥
अत्र देवे हरौ सुप्ते उषितुं तीर्थकोटिभिः ।
आगम्यते स्वस्थानेभ्यो यमुनायां च भूपते ॥७॥
तेनात्र कीर्तिता यात्रा तस्मिन् काले विशेषतः ।
पुण्यकोटिप्रदा राजन् कृष्णप्रीतिविवर्द्धनी ॥८॥

इदं वनं महाराज कृष्णलीलानिकेतनम् ।
अत्र स्थित्वा क्षणं साक्षाद्भावय श्रीपतिं हृदि ॥९॥
वल्लवीप्राणमध्यस्थं केकिपिच्छविभूषितम् ।
ध्यात्वा मधुवने कृष्णं भूयस्तत्प्रेमसंयुतः ॥१०॥
कीर्तयेन्मधुराः केलीः शृणुयाच्छ्रावयेदपि ।
तत्क्षणात् परमानन्दो हरिस्तस्य विवर्द्धते ॥११॥
कृत्वा भक्त्या हरेः पूजां वैष्णवान् पूजयेद्बहून् ।
एकादश्यां विशेषेण रात्रौ जागरणं चरेत् ॥१२॥
प्रातर्मधुयुतां धेनुं दद्याद्ब्राह्मणसत्तमे ।
मधुपात्रं च सौवर्णं पञ्चरत्नसमन्वितम् ॥१३॥
भोजयेत् पायसैराज्यः शर्करापूपसंयुतम् ।
समिद्धे पावके चापि तिलाज्यैर्हवनं चरेत् ॥१४॥

ब्रह्मोवाच

एवं शुकोचितं राजा प्राप्य तीर्थफलं महत् ।
जगाम तालविपिनं वनश्रीसुमनोहरम् ॥१५॥

श्रीशुक उवाच

इदं तालवनं नाम वनानानुत्तमं वनम् ।
यस्य दर्शनमात्रेण कर्तव्यं नावशिष्यते ॥१६॥
वर्षासु सुप्ते गोविन्दे स्नात्वात्र नियतं नरः ।
सर्वपापविशुद्धात्मा कृष्णप्रेम लभेद् ध्रुवम् ॥१७॥
अत्र च धेनुको नाम कामरूपो महासुरः ।
गोचारणे हतः सद्यः कृष्णेन क्रीडता वने ॥१८॥
अत्र ब्राह्मणवर्येणभ्यो धेनूः कनकदक्षिणाः ।
दत्त्वा कृष्णार्पणधिया भूयो निःश्रेयसं लभेत् ॥१९॥

ब्रह्मोवाच

तत्तथा विधिवत्कृत्वा राजा दशरथः शुचिः ।
जगाम कौमुदं नाम वनं लीलानिकेतम् ॥२०॥

श्रीशुक उवाच

इदं राजन् दृश्यतां कृष्णकेलिविनोदनं विपिनं कौमुदाख्यम् ।
अत्र स्नात्वा भक्तियुक्तो मनुष्यो मनःशुद्धिं लभते तत्क्षणेन ॥२१॥
भाद्रे कृष्णैकादशी या भवेद्वै तस्यां स्नात्वा भक्तियुक्तो विशेषात् ।
कृष्णप्रेमानन्दसंदोहमाशु लभेत शुद्धेन हृदा मनुष्यः ॥२२॥

अथाभ्यर्च्य हरिं साक्षाद्भगवन्तं रमापतिम् ।
तुलसीदलमालाभिस्तोषयेद् दत्तभूषणम् ॥२३॥
शरत्पूर्णनिशापूर्वयामेऽथ वृषभानुजाम् ।
कृष्णं च फुल्लकुमुदैर्भूषयित्वा नमेन्मुहुः ॥२४॥
अश्वमेधसहस्राणां फलमाप्नोति मानवः ।
अत्र मुग्धा गोपकन्या सहिता भानुकन्यया ॥२५॥
ग्रीष्मरात्रौ सरो मध्ये स्नात्वा कुमुदपुष्पकैः ।
हाराङ्गदादिभूषाभिर्भूषयित्वा निजां तनुम् ॥२६॥
परस्परं रमन्तस्म तत्कृष्णः केलिकौतुकम् ।
लतिकान्तरितो दृष्ट्वा व्यमुहत् प्रेमसायकैः ॥२७॥
रहःस्थानमिदं राधामाधवौ यत्र केलतः ।
अनेकविधलीलाभिर्दिव्यभूषणभूषितौ ॥२८॥

ब्रह्मोवाच

यथोदितं तत्र विधाय राजा स्नानादि दानान्तमशेषकर्म ।
संपूजयामास विशुद्धचित्तः श्रीराधया युक्तमनन्तगोतम् ॥२९॥

कीर्तनश्रवणाभ्यासशीलः कृष्णगुणव्रजे ।
प्रविष्टं हृदयं कृत्वा तत्रैवोवास तौ निशाम् ॥३०॥

ततोऽव्राजीद्बहुलाया वनं स संफुल्लकानोकहश्रेणिरम्यम् ।
गायन्ति यत्र भ्रमराः पिकाश्च लीलायशः श्रीवृषभानुजायाः ॥३१॥

श्रीशुक उवाच

इदं पश्य वनं राजन् कृष्णक्रीडानिकेतनम् ।
गुञ्जद्भ्रमरपुञ्जाढ्यं मत्तपुंस्कोकिलाञ्चितम् ॥३२॥

लतागह्वरसंछन्नं तिमिरस्तोमसंकुलम् ।
तमालविटपस्तोमैः श्यामताकलितं क्वचित् ॥३३॥
नृत्यन्मत्तमयूरनादितमलं पुंस्कोकिलानां रुतै-
रुद्धुष्टं वनदेवतासमुदयत्कण्ठस्वरानन्दितम् ।
उत्साहैकविवर्द्धनं मृगदृशां दृष्टिप्रमोदावहम्
नित्यं शीतलमन्दसौरभमरुत्संसेव्यमेतद्वनम् ॥३४॥

अत्रदिव्यसरोवारिण्याप्लुत्य सुविशुद्धधीः ।
जहाति त्रिविधांस्तापान् श्रीकृष्णैकान्तमानसः ॥३५॥
अत्र सारसचक्राह्वकादम्बकुलकेलिभिः ।
हृतचित्तैर्गोपबालैः पर्यत्रियत माधवः ॥३६॥

बाला ऊचुः

कृष्ण कृष्णत्र विपिने क्रीडितुं नो हृदुत्सुकम् ।
जलकेलीं करिष्यामः संफुल्लनवपङ्कजैः ॥३७॥
स्थलकेलीं ततो मित्र कर्तुं योग्यात्र कानने ।
वसन्तलक्ष्म्या सततं स्थीयतेऽत्र यतः सखे ॥३८॥

अत्र माधव शाखोटसालतालादिभूरुहाः ।
पचेलिमफलाः कान्ता नम्रशाखाशिफाः स्वतः ॥३९॥
अत्रायं मारुतः कृष्ण मन्दारद्रुमसंगतः ।
सौरभाणां लहरिभिर्नित्यं मोदयते मनः ॥४०॥

अमी जलाशयचराः पक्षिणो हंसकादयः ।
कूजन्ति किमपि स्वैरं मधुरं मधुरं हरे ॥४१॥
अतोऽत्र शृङ्गवेण्वादिवादित्रगणधोरणम् ।
विहाय निभृतं कृष्ण श्रूयतां पक्षिकूजितम् ॥४२॥

नानास्वरनिनादाढ्यं नाना मूर्छनमूर्छितम् ।
नाना रागकलामिश्रं मत्ताः कूजन्ति पक्षिणः ॥४३॥
एतेऽनुशिक्षिताः प्रायो गोपीनां कण्ठजैः स्वरैः ।
अथात्र संचरन्तीनां क्रीड़न्तीनां मिथो वने ॥४४॥

इति श्रुत्वा स भगवान् गोपबालैरुदीरितम् ।
विजहार वने ह्यस्मिन्[1] शृण्वन् पक्षिगणारुतम् ॥४५॥
नवशाद्वलनिर्मुक्तधेनुमण्डल उदञ्चतैः ।
गोदुहां बालकैः कृष्णो रेमे रम्ये जले स्थले ॥४६॥
इहैव राजशार्दूल बहुलानाम कापि गौः ।
धृता व्याघ्रेण विपिने सत्यं कृत्वा व्रजं गता ॥४७॥
आश्वास्य शिशुकं वत्सं क्रीडन्तं गोपमण्डले ।
सखीभ्यस्तं संनिवेद्य निषिद्धापि च सा मुहुः ॥४८॥
सत्येन वचसा बद्धा भूयो व्याघ्रान्तिकं मता ।
परितुष्टस्ततो व्याघ्रः कामरूपी स सत्यतः ॥४९॥
मुमोच तां यथास्थानं व्रजेति बहुलां सतीम् ।
तस्या सत्य प्रभावेण तद्देशस्य जनेश्वरः ॥५०॥
प्रजाभिः सहितः स्वर्गं समगात् सुवृतोर्जितम् ।
बहुला सत्यपुण्येन धेनवः पशुपक्षिणः ॥५१॥
सर्वेऽपि शाश्वतं स्थानं जग्मुः सुकृतसंगताः ।
एवमेतद्वनं राजन् परमाश्चर्यसंयुतम् ॥५२॥
स्थीयतामत्र रात्र्येकं स्नानदानपुरःसरम् ।
पूज्यतां भगवान् विष्णुर्गोपरूपी जगत्प्रभुः ॥५३॥
तुलसीमञ्जरीपत्रैः रत्नकोटिफलाधिकैः ।
ततश्च वैष्णवा विप्राः पूज्यन्तां सुसपर्यया[2] ॥५४॥
एवं सुकृतसंयुक्तः कुर्ववन्ध्यं दिनं त्विदम् ।
यथोक्तं विदधौ राजा मुनिना तेन संगतः ॥५५॥
तां रात्रिमनयत्तत्र कीर्तनश्रवणान्वितः ।
ततो गोवर्द्धनगिरिमगाद्भूपति पुङ्गवः ॥५६॥
शिखरैर्व्याप्य गगनं तिष्ठन्तं सुमनोहरम् ।
नानाकुञ्जनिकुञ्जाढ्यं नानागह्वरसुन्दरम् ॥५७॥

---

१. तस्मिन्—रीवाँ । २. संतर्प्य सपर्यया—रीवाँ ।

नानाधातुभिराकीर्णं नानापक्षिगणाकुलम् ।
नाना निर्णर संपात निर्ह्रासुमनोहरम् ॥५८॥
क्रीडद्गोपाङ्गनावृन्दपादनूपुरकूजितम् ।
अनेकाश्चर्यभवनं नवशाद्वलभूषितम् ॥५९॥
सौरभाढ्यमरुद्वीचिनिषेवितवनाकुलम् ।
मृगपक्षिगणाकीर्णं मत्तकोकिलनादितम् ।
गुञ्जद्भ्रमरसंदोहसानन्दलतिकाञ्चितम् ॥६०॥
प्रसन्नपीयूषजलाभिराम नानासरः फुल्लसुवर्णपद्मम् ।
कादम्बचक्राह्वयराजहंसकलस्वनैः श्रोत्रपुटाभिरामम् ॥६१॥
वीक्ष्यास्य हरिदासस्य गिरेरद्भुतरूपताम् ।
उवाच मुनिशार्दूलो राजानं रघुपुङ्गवम् ॥६२॥
राजान्नयं गिरिवरो हरिदासमुख्यो यः सेवते हरिमजस्रमशेषभावैः ।
तत्स्थावरोऽप्ययममन्दचिदेकरूप आनन्दमग्नतनुरुत्पुलकोऽङ्कुरौघैः[1]॥६३॥
पुण्यक्षेत्रं महागुह्यं रहस्यं परमं भुवः ।
मथुरातः पश्चिमस्यामष्टक्रोशोपरि स्थितः ॥६४॥
चत्वारि तत्र तीर्थानि पूर्वादिक्रमतो नृप ।
ऐन्द्रं याम्यं वारुणं च कौबेरं सुमनोहरम् ॥६५॥
भूमेर्भाग्य[2]स्वरूपोऽयं श्रीमद्भगवतः प्रियः ।
कदाचिदत्र लीलास्थः श्रूयते रजनौ ध्वनिः ॥६६॥
कदाचिदस्य शिखरे द्योतयन्तोऽभितो दिशः ।
दृश्यन्ते दीपका दिव्या मनुजैर्मुक्तिमार्गिभिः ॥६७॥
कदाचिदत्र पवनो राधाकृष्णाङ्गसंगमी ।
अन्यलौकिकसौरभ्यैर्भरितो वाति वीचिवत् ॥६८॥
कदाचिच्चात्र सिन्दूर कज्जलालक्तकाङ्किताः ।
ताम्बूलोद्गारशोणाभा दृश्यन्ते मसृणाः शिलाः ॥३९॥
दर्शनं हरिदेवस्य तापत्रयनिवारणम् ।
ये कुर्वन्ति जना भक्त्या वन्द्यन्ते ते सुरैरपि ॥७०॥

---

१. °हृदयाम्बुरुहः फलौघैः—मथु०, बड़ो० । २. भक्ततत्त्व°—रीवाँ ।

अत्रैव मानसी गङ्गा तस्यां स्नात्वा नराधिपः ।
सर्वपापविनिर्मुक्तः कुलकोटिं समुद्धरेत् ॥७१॥
पुण्डरीकं च संपूज्य देवपित्रतिथींस्तथा ।
अश्वमेधोद्भवं पुण्यं लभते नात्र संशयः ॥७२॥
तथा प्रसन्नसलिले श्रीकुण्डेऽस्मिन् महीपते ।
तथा साङ्कर्षणे तीर्थे संकर्षणसुरक्षिते ॥ ७३ ॥
इन्द्रतीर्थे चातिपुण्ये स्नात्वा कुर्वत तर्पणम् ।
कुण्डे कदम्बखण्डस्थे प्रसन्नसलिलाशये ॥७४॥
स्नात्वा पितॄन् सुसंतर्प्य यथेष्टं शुभमाप्नुयात् ।
दृष्ट्वा देवगिरिं पुण्यं स्नात्वा च विधिवन्नरः ॥७५॥
अतुलं पुण्यमाप्नोति दैवतैर्वन्द्यते च सः ।
रुद्रकुण्डे चातिपुण्ये स्नात्वा रुद्रं प्रणम्य च ॥७६॥
त्रिजन्मजं धुनोत्याशु पातकं धरणीपते ।
कृतेऽरिष्टवधे चैव यत्कुण्डं राधया कृतम् ॥७७॥
तत्र चारिष्टतीर्थे च कृष्णकुण्डे च भूपते ।
स्नात्वा दत्त्वा च विप्रेभ्यो राधिकां प्रीणयेन्नरः ॥७८॥
मोक्षराजाभिधे तीर्थे तथा चन्द्रव्रजाभिधे ।
चक्रतीर्थे पञ्चतीर्थे स्नायात् सर्वशुभाप्तये ॥७९॥
तीर्थानि विचरेदत्र रात्रौ कुर्याच्च जागरम् ।
एकादश्यां निराहारो द्वादश्यां प्रातरुत्थितः ॥८०॥
स्नात्वा संनिर्वपेत्पिण्डान् तर्पयेत् पितृदेवताः ।
भोजयेद् विप्रसंदोहं पायसेन विशेषतः ॥८१॥
देवान् गाश्चैव संपूज्य विशिष्टं फलमाप्नुयात् ।
परिक्रमे च विधिवद्गोवर्द्धनगिरिं हरेः ।
अश्वमेधशतोद्भूतं पुण्यमाप्नोति मानवः ॥८२॥
अमान्नकूटोत्सवसुप्रसंगे दृष्ट्वा हरिं दुःखहरं जनानाम् ।
कृत्वा च यात्रां विधिवत्प्रदीपैः प्रदीपयेत् सर्वतः शैलराजम् ॥८३॥

जुहुयाच्च सुहव्यानि समिद्धे जातवेदसि ।
अलङ्कृतं गवां वृन्दं पूजयेद्वत्सकैः सह ॥८४॥
ब्राह्मणानतिथीन् प्राप्तान् पूजयेत् पटभूषणैः ।
भोजयेद्विविधान्नानि प्रसादाच्छ्रीहरेस्तदा ॥८५॥
स्वयं च प्राप्य स्वादूनि कृतकृत्यो भवेन्नरः ।
कोट्यश्वमेधजं पुण्यं लभते नात्र संशयः ॥८६॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे पूर्वखण्डे दशरथतीर्थ-यात्रायां व्रजागमने चतुश्चत्वारिंशदधिकशततमोऽध्यायः ॥१४४॥

पञ्चचत्वारिंशदधिकशततमोऽध्यायः

ब्रह्मोवाच

शुकोक्तमाकर्ण्य रघूद्वहस्तथा विधायगोवर्द्धनशैलयात्राम् ।
स्नातश्च तीर्थेषु विधानतस्तदा जगाम काम्याभिधमुत्तमं वनम् ॥ १ ॥
शुकोक्त्या तत्र निर्णीय तीर्थानां तत्त्वमुत्तमम् ।
बभ्राम स्नानदानादिकुशलः पुण्यमर्जयन् ॥ २ ॥
विमलोदे महाकुण्डे विशेषेण निमज्जितः ।
ददौ ब्राह्मणमुख्येभ्यः सुवर्णाङ्गाश्च भूयसीः ॥ ३ ॥
ततो वृतो वशिष्ठाद्यैः पुरस्कृत्य शुकं तथा ।
वरसानुगिरिं प्राप बृषभानुपुरं हि यत् ॥ ४ ॥
दिव्यकुञ्जे निकुञ्जाढ्यं कन्दरागह्वराश्रयम् ।
अनेकशिखरोच्छ्रायं दृष्ट्वा प्रीतमना अभूत् ॥ ५ ॥
तत्र संपूजिता राधा साक्षाद् वृन्दावनेश्वरी ।
कृष्णेन सहिता तेन ददौ भक्तिं सुनिश्चलाम् ॥ ६ ॥
बृषभानुसरस्तोयैः प्रक्षालिततनुस्तदा ।
अध्वश्रमं सुनिर्मुच्य विश्रान्तोऽभूज्जनैस्सह ॥ ७ ॥

तत्र तं मुनिशार्दूलः शुको योगीन्द्रसंमतः ।
उवाच सुप्रसन्नास्यः शृण्वतां सर्वयोगिनाम् ॥ ८ ॥

श्रीशुक उवाच

अहो ते राजशार्दूल भाग्यं वक्तुं न शक्यते ।
श्रीरामस्य प्रसादेन दृष्टवानसि वै व्रजम् ॥ ९ ॥
तत्रापि कृष्णस्वामिन्या एतत् पितृनिकेतनम् ।
वृषभानुपुरं नाम दृष्टवान् भक्तिसंयुतः ॥१०॥
इदं सरः सूर्यसरः प्रसिद्धं राधापितुः प्रीतिविवर्द्धनं च यत् ।
बृन्दावनेशीजलकेलिपात्रं निमज्यास्मिन् संसृतिर्नाशमेति ॥११॥
कृष्णप्रेमोदये जाते ब्रह्मानन्दोपसर्जने ।
कृतकृत्यो भवेदाशु व्रजदर्शनमात्रतः ॥१२॥
इतो विदूरे संकेतस्थानमस्ति मनोहरम् ।
तद्दृष्ट्वा मनुजव्याघ्र न भूयः संसृतिं व्रजेत् ॥१३॥
ततो नन्दीश्वरं पश्य कृष्णस्थापितमन्दिरम् ।
एतान्यतिरहस्यानि स्थानानि धरणीतले ॥१४॥
नाल्पपुण्येन राजेन्द्र दृश्यन्ते संसृताविह ।
यत्र नित्यं हरेः क्रीडा न विश्राम्यति राधया ॥१५॥
वरसानुगिरिश्चैव तथा नन्दीश्वरो गिरिः ।
उभयोरन्तरे कृष्णक्रीडास्थानं सुदुर्गमम् ॥१६॥
यत्र भूमिरजो मध्ये श्रीकृष्णचरणाङ्किते ।
लुण्ठन्ति ब्रह्मशर्वाद्यास्त्रिदशा भक्तिकामुकाः ॥१७॥
इदं रहस्यं राजेन्द्र व्रजभूमेर्विलोक्यते ।
नन्दालयश्च संकेतो वरसानुरिति त्रयम् ॥१८॥

ब्रह्मोवाच

कृतार्थयित्वा संजन्म तत्र राजा रघूद्वहः ।
जगाम खादिरं नाम वनानामुत्तमं वनम् ॥१९॥
तद्दृष्ट्वा विधिवत्स्नात्वा दत्त्वा दानादि भूरिशः ।
उवासैकां निशं राजा हरिकीर्तनतत्परः ॥२०॥

ततः शेषशयं विष्णुमपश्यद्ध्रुवमोचनम् ।
यः क्षीरसागरतटे शेते कमलया सह ॥२१॥
पूजितो यः पुरा देवो नन्दाद्यैः कृष्णसंयुतैः ।
संपूज्य तं विधानेन भार्यया सह भूपतिः ॥२२॥
स्नात्वा क्षीरसमुद्रे च प्रससाद निजे हृदि ।
ततो वृन्दावनं द्रष्टुमियाय शुकसंगतः ॥२३॥

श्रीशुक उवाच

इदं वृन्दावनं राजन् भुवः कीर्तिविवर्द्धनम् ।
अत्र चीराणि गोपीनां जहार भगवान् हरिः ॥२४॥
विधित्सुर्व्रतसंपूर्तिं महावरदराट् स्वयम् ।
अत्र वंशीवटतले वेणुवाद्यं विधाय च ॥२५॥
आजुहाव हरिः सर्वा गोपिकाः काममोहिताः ।
महारासं ततस्ताभिश्चक्रे त्रैलोक्यमोहनम् ॥२६॥
अत्रैव कालियो नाम कालसर्पो जलाशये ।
नाथितो देवदेवेन निर्विषा च कृता सरित् ॥२७॥
अत्रैव निहतः केशी कृष्णेन क्रीडता वने ।
तत्क्षेत्रं कोटिगुणितं काश्या अपि विशिष्यते ॥२८॥
अत्र संक्रन्दनं नाम तीर्थमस्ति पुरातनम् ।
यत्र स्नात्वा च दत्त्वा च वाजिमेधफलं लभेत् ॥२९॥
अदैव योगपीठाख्यं स्थानमस्ति मनोरमम् ।
नानावल्लीद्रुमाकीर्णं चन्द्रकोटिप्रभामयम् ॥३०॥
तत्र सिंहासन दिव्यं पारिजाततरोस्तले ।
तेजोमयं ज्वलत्कान्तिसहस्रकिरणैर्वृतम् ॥३१॥
प्रभासमुदयव्याप्तधरणीगगनान्तरम् ।
सर्वानन्दपदं जाग्रत्कालमायाद्यगोचरम् ॥३२॥
तत्र सख्यष्टकवृता श्रीमद्वृन्दावनेश्वरी ।
राधिका नियतं भाति श्रीमद्गोविन्दपार्श्वगा ॥३३॥
कामलीला गुणवती सौन्दर्यरसमञ्जरी ।
माधुर्यमधुरोद्रिक्ता कान्तिपीयूषवीचिका ॥३४॥

रसा सौरभवासन्ती कीर्तिप्रद्योतचन्द्रिका ।
मञ्जुला चञ्चलापाङ्गी व्रजण्डलमण्डना ॥३५॥
तां सेवते सदा कृष्णः कामकेलिप्रसूनकैः ।
स्मितचन्दनगन्धेन परिरम्भणधूपकैः ॥३६॥
कटाक्षदीपमालाभिर्नैवेद्यैरधरामृतैः ।
तयोर्नित्यविहारेण सर्वा आनन्दिता व्रजे ॥३७॥
चन्द्रावलिप्रभृतयो याश्चान्या गोपदारिकाः ।
तयोरेव प्रीतिवश्याः सकला व्रजनायिकाः ॥३८॥
तस्याश्चरणपाथोजरेणुलाभार्थमिन्दिरा ।
तपः करोति सततं वैकुण्ठस्वामिनी स्वयम् ॥३९॥
तस्या ध्यानपरा नित्यं पार्वती शिवसन्निधौ ।
शिवः संकीर्तयत्येनां तन्त्रैर्मन्त्रैश्च भूरिशः ॥४०॥
आराधयन्ति तां काश्चिद् गोप्यो नन्दव्रजे स्थिताः ।
तासामियं दिशत्याशु लीलासाम्राज्यमुत्तमम् ॥४१॥
नास्यास्तत्त्वं विजानन्ति ब्रह्माद्या अपि देवताः ।
वेदान्ताश्च रहस्यानि तामेव निर्दिशन्ति हि ॥४२॥
एतद्युग्मं चिदानन्दमयमद्वैतमद्भुतम् ।
आत्मनो हृदये राजन् स्थापयित्वा सुखी भव ॥४३॥

ब्रह्मोवाच

दृष्ट्वा वृन्दावनं राजा क्रीडास्थानानि तानि सः ।
भावयानो नन्दसूनुं पञ्चरात्रमुवास ह ॥४४॥
अथ तं शुकयोगीन्द्र उवाच मधुरं वचः ।
यमुनातीरगां तस्मै निर्देष्टुं[1] वनराजिकाम् ॥४५॥
यमुनापरपारे तु भद्राख्यं वनमद्भुतम् ।
स्नानदानादिभिर्भूयस्तत् कोटिगुणपुण्यदम् ॥४६॥
गमनादेव वै तत्र पुनात्यासप्तमं कुलम् ।
कृष्णस्यैकान्तिकीं लीलां भावयेत्तत्र भक्तिमान् ॥४७॥

---

१. निर्दिष्टां--रीवाँ ।

अस्ति बिल्ववनं दिव्यं यत्र गोचारणे हरिः ।
सहितो गोपबालाद्यैर्मुदितः क्रीडतेऽनिशम् ॥४८॥
तत्र स्नात्वा च दत्त्वा च सुवर्णं गाः सहस्रशः ।
भोजयेत् ब्राह्मणान् राजन् श्रीकृष्णप्रीतये सुधीः ॥४९॥
लोहजङ्घवनं चास्ति लोकातीतगुणान्वितम् ।
तस्मिन् गमनमात्रेण पातकौघः पलायते ॥५०॥
भाण्डीरं नाम च वनं रामकृष्णाभिरक्षितम् ।
दृष्ट्वा चालौकिकं स्थानं कृष्णप्रेम विवर्द्धते ॥५१॥
प्रलम्बाख्योऽसुरस्तत्र रामेण निहतः पुरा ।
आरोप्य स्कन्धयोरेनं यूथादग्रे नयन् रिपुः ॥५२॥
तत्र गत्वा वटस्याधः[1] क्षणं स्थित्वा च मानवः ।
मन्दानिलं सेवमानो मुञ्चते तापमान्तरम् ॥५३॥
भाण्डीरवनकुप्यास्ता आपो ब्रह्मद्रवामृताः ।
स्नात्वा पीत्वा च मनुजो लभते कृष्णभावनाम् ॥५४॥
एतेषु वनवर्येषु रामकृष्णौ रसात्मकौ ।
सखिमण्डलमध्यस्थौ कुरुतः क्रीडनं मिथः ॥५५॥

महावनं नाम वनं तदस्ति कृष्णस्य बाल्याचरितस्थलं यत् ।
ब्रह्माण्डतीर्थे मनुजोऽत्र भक्त्या स्नायान्मृदं यत्र जघास कृष्णः ॥५६॥
यत्रामुना मुद्रितलोचनेन सा पूतना नाम हतास्ति राक्षसी ।
तां क्रूरबुद्धिं जननीपदं ददौ स्तन्यप्रदानेन महानुभावः ॥५७॥
बभञ्ज यस्मिन्[2] यमलार्जुनौ हरिः श्रीमातृहस्तोद्य[3]दुलूखलासितः ।
कृपाम्बुधिस्तौ च मुमोच बन्धनात् संसारपाशादुपयात इच्छया ॥५८॥

एवं बहूनि चित्राणि चरित्राणि चकार सः ।
बाल[4]लीलारसं पुष्णन् कौतुकी पुरुषः परः ॥५९॥
यानि संगीयमानानि यशोरूपाणि भूतले ।
पुनन्ति बहुधा लोकान् तीर्थरूपाणि संततम् ॥६०॥

---

१. वनस्यान्तः—रीवाँ । २. सोऽस्मिन्—रीवाँ । ३. श्रीमान् वानाद्य°—रीवाँ । ४. बहु°—रीवाँ ।

ब्रह्मोवाच

ततो जगाम धर्मात्मा वनं पुण्यं महावनम् ।
तमुवाच शुको दृष्ट्वा वनं निर्दिश्य तत्तदा ॥६१॥
इदं श्रीगोकुलं रम्यं नन्दगोपस्य भूपते ।
परमानन्दभवनं कृष्णक्रीडारहःस्थलम् ॥६२॥

अस्य दर्शनमात्रेण जनः कैवल्यमश्नुते ।
प्रेमानन्दं लभेदाशु ब्रह्मानन्दपदोपरि ॥६३॥
स्नात्वा दत्त्वा द्विजन्मभ्यः सुवर्णं दक्षिणामपि ।
तत्कोटिगुणितं पुण्यं फलतीति विनिश्चयः ॥६४॥
यानि यानीह तीर्थानि पारेऽवारे च भूपते ।
न तानि वर्णितुं शक्यान्यतिकल्पशतैरिह ॥६५॥
एतेषां महिमानं तु स्वयं वेत्ति रमापतिः ।
धन्येयं माथुरी भूमिः स्वैरेव समलङ्कृता ॥६६॥

अस्याः स्वरूपं माहात्म्यं गुणान् वेत्ति हरिः स्वयम् ।
मथुरामण्डलभुव इति वेदैर्विनिश्चितम् ॥६७॥
अस्या भुवः परं पारं हरिर्जानाति निश्चितम् ।
हृते गोवत्सके पाले[1] प्राप्य गोवत्सतामपि ॥६८॥
हरिर्जघास रम्याणि तृणानि व्रजमण्डले ।
गोवत्सतां परिप्राप्य को वेत्ति स्वादुमीदृशम् ॥६९॥
अहो आनन्दरूपस्य लोकस्यास्य परन्तप ।
न भूमितलसंस्पर्शः कमलस्येव वारिणि ॥७०॥

इह यस्य जन्तुर्हरिभावनया समुपैति विशिष्टसुखौघभुजा ।
स न मुक्तिपदं स्पृहणीयमपि स्पृहयत्यमृताश इवान्नजलम् ॥७१॥
इति मे मतिरस्ति भृशं सुदृढा यमुनाजलवीचिविलोलमरुत् ।
तटकुञ्जकुटीरगृहं भजतो न रमापतिधाम मुदे मनसः ॥७२॥

---

१. यां लेढि वै रसनया—मथु०, बड़ो० ।

ब्रह्मोवाच

इति व्रजं दर्शयित्वा राज्ञे दशरथाय सः ।
तस्मिन्नेव निकुञ्जान्तः पश्यतोऽन्तर्दधौ शुकः ॥७३॥
असौ मुनिर्नित्यविलासदर्शने कुतूहली श्रीजनकात्मजायाः ।
सखीपदं प्राप्य निकुञ्जराज्ये प्रियेण साकं रमते सदैव ॥७४॥
एवं हि यः प्रेमरसं गरिष्ठमाप्नोति सीतारमणे निरन्तरम् ।
न तस्य संसारदवाग्निवायुर्महोग्रतीक्ष्णोऽप्यनुबाधते वपुः ॥७५॥
नैके शुष्कं ज्ञानमिच्छन्तिविज्ञाः कुतः कर्मोपासनासाधनानि ।
येषां चेतः प्रत्यहं मोदतेऽन्तो रामप्रेमानन्दसंदोहपूर्णम् ॥७६॥

प्रेमानन्दमयी मुक्तिः प्राप्यते तत्कृपावशात् ।
साधनैर्लभ्यते सान्या ब्रह्मानन्दपदात्मिका ॥७७॥
तच्छुकाद्रघुशार्दूलो ज्ञाततत्त्वो रमापतेः[1] ।
प्राप्य प्रेमरसानन्दं क्षेममुत्कृष्टमात्मनः ॥७८॥
एवं कृताखिलमहीतलतीर्थयात्रापुण्यप्रकर्षसुविशुद्धमना महीपः ।
श्रीराममङ्गलगुणानभिलाषुकात्मा साकेतपत्तनमुपैतुमथाचकाङ्क्ष ॥७९॥

पुरग्रामारण्यप्रकरसुरहस्यस्थलगणा-
नटित्वा श्रीरामप्रणयविनिबद्धो दशरथः ॥
जनुः सार्थं कृत्वा करचरणचक्षुःफलमसौ
समादायायोध्यां ससुखमगमद्रामकलिताम् ॥८०॥
यत्र यत्र गतो राजा तीर्थयात्रापरायणः ।
तत्र तत्रैव शुश्राव रामस्य यशसां भरम् ॥८१॥
ददर्श व्यापकं रामं सर्वतीर्थेषु सुस्थितम् ।
तत्सामान्यविशेषाभ्यां विश्वमेवावृतं यतः ॥८२॥
पुलस्त्येन कृता यात्रा श्रूयते ग्रन्थदर्शने ।
तथा सोमकृतां तीर्थयात्रां प्राहुः पुराविदः ॥८३॥
मनोश्च धर्मशीलस्य लोमशस्य मनीषिणः ।
धौम्यस्य च वशिष्ठस्य पराशरमुनेरपि ॥८४॥

---

१. सीतापतेः—रीवाँ :

अन्ये च पृथिवीपालाः पुण्यात्मानो महौजसः ।
प्रदक्षिणेन धरणीं विचेरुर्मुनिसत्तमाः ॥८५॥
राष्ट्रपालाभिधो वैश्यः सर्ववैश्यशिरोमणिः ।
बभ्राम धरणीं सर्वामर्जयन् सुकृतं बहु ॥८६॥
ऋषयः सिद्धगन्धर्वा राजानश्चक्रवर्त्तिनः ।
बहवो बभ्रमुस्तीर्थेष्वयजंश्च यथामति ॥८७॥

नैतादृशी केनचित्तीर्थयात्रा चीर्णा पुरा भूपतिना द्विजेन वा ।
वैश्येन वा सर्वसमृद्धिभाजा कृता यादृश्यमुना राघवेण ॥८८॥

आसीन्नैवासमुद्रक्षितितलवलये कोऽपि दीनो धनेन
क्लिष्टो वा वैरिपीडापरिमुदितमना नापि कश्चिच्चिरायुः ॥
त्यागाद्दोष्णोर्बलाच्चाप्यतुलतरतपःपुण्यसंपूरणाच्च ।
प्राज्यानन्दं ददानो व्यचरत भुवने तीर्थयात्राक्रमेण ॥८९॥

अवतीर्णे सीताकान्ते साक्षाच्छ्रीपुरुषोत्तमे ।
अपूर्वा श्रीरभूद् भूम्यां तामपश्यद्रघूद्वहः ॥९०॥
रमणीयतमां शोभां पश्यन् भूमण्डलस्य सः ।
तत्कारणं हृदा मेने श्रीशावतरणं तदा ॥९१॥
मथुरामण्डलं सर्वं यात्रयित्वा रघूद्वहः ।
सरयूतीर्थनियमं समाप्य सुखितोऽभवत् ॥९२॥

शतं ग्रामान् समदाद् द्वे च कोटी घटोध्नीनां स्वर्णभूषावृतानाम् ।
गवां मुक्तारत्नभारांस्तथा त्रीन् पूर्णान्मदैर्वारणान् विंशतिश्च ॥९३॥

द्वे सहस्रे तथाश्वानां स्यन्दनानां सहस्रकम् ।
दासीनां रत्नभूषाणां चत्वारि च शतानि सः ॥९४॥
एवं विप्राय विधिवद्दत्त्वा रघुकुलोद्वहः ।
वाचयामास विप्रेभ्यः स्वस्ति पुण्याहमेव च ॥९५॥

भूयसीं दक्षिणां दत्त्वा ब्राह्मणेभ्यः प्रमाणवित् ।
ततः प्रतस्थौ स महद्दण्डकाक्षेत्रमुत्तमम् ॥९६॥

यस्मिन् भृगुपतिः सक्षात्तपस्यति महातपाः ।
तत् क्षेत्रमभितं[1] भूमौ गुह्यस्थानं प्रकीर्तितम् ॥९७॥
तत्र च संगतो रामो ब्रह्मक्षेत्रमयोऽपि सन् ।
अवतीर्णो रामचन्द्रे ब्रह्ममात्राऽवशेषकः ॥९८॥
उपशान्तमतिर्वीरो निवृत्तक्रोध ईश्वरः ।
अवलम्ब्य तपस्तिष्ठन् पुण्यक्षेत्रमुदारधीः ॥९९॥
तं वीक्ष्य रघुशार्दूलः सहसा विनयान्वितः ।
तुष्टाव प्राञ्जलिर्भूत्वा भार्गवं तपसां निधिम् ॥१००॥
नमस्ते भृगुवर्याय ब्रह्मक्षत्राय तेजसे ।
रमणाद्रामचन्द्राय वीरेन्द्राय तपोऽग्नये ॥१०१॥
यस्य ते भृगुशार्दूल कुठारः सूर्यदर्शनः ।
आसुरक्षत्रियतमस्तोमांश्चिक्षाय विश्वतः ॥१०२॥
भृगूणां वंशदीपस्य यस्य ते तपसां निधेः ।
तेजोऽग्नौ सुसमिद्धेऽगादर्जुनोऽपि पतङ्गताम्[2] ॥१०३॥
येन त्वया भार्गव सार्वभौम सद्वीपशैला वहुकाननेयम् ।
मही सुवर्णाद्रियुता द्विजेभ्यस्त्रिसप्तदत्ता निजपुत्रिकावत् ॥१०४॥
भुवं वितीर्णं भुवि दैवतेभ्यो विज्ञापयस्त्वं तपसे पर्णशालाम् ।
विधित्सुकामो जलधिं ययाचे स्थलं कियत्तापसवासयोग्यम् ॥१०५॥
बहूनि वीर्याणि तव प्रशस्तान्यल्पाय नो वै सुशकानि वक्तुम् ।
अनुग्रहस्ते जगतां शुभाय क्रोधः पुनः कालवत्संक्षयाय ॥१०६॥
कोट्यः कियन्त्यश्चमरातपत्रभाजां नृपाणां भवता विभिद्य ।
कुठारधाराञ्चलकालजिह्वया वधावशेषै रुधिरोदविन्दुभिः ॥१०७॥
ब्रह्मन् कुरुक्षेत्रमधिष्ठितस्त्वं समन्ततः पञ्च सरांस्यकार्षीः ।
पितॄन् सुसंतर्प्य च यानि सद्यश्चकार पुण्योदमयानि तैर्वृतः ॥१०८॥

तानि तीर्थानि कवयो गृणन्ति भृगुसत्तम ।
समन्तपञ्चकेत्याख्यावन्ति पुण्यानि भूतले ॥१०९॥

---

१. प्रथितं—रीवाँ । २. गतिं गतः—रीवाँ । ३. तिलधात्रिकावत्—मथु० बड़ो० ।

दृष्टानि चोपस्पृष्टानि स्नातानि च मया मुने ।
अनन्तपुण्यलाभाय तस्मात्संदर्शनं तव ॥११०॥

श्रीपरशुराम उवाच

स्वस्त्यस्तु ते रघुकुलामितकीर्तनस्य राजंस्त्रिलोकजनमङ्गलमन्दिरस्य ।
पुण्येन यस्य हरिरप्रमेयः पुत्रत्वमाप धरणीभरनाशनाय ॥१११॥

स्वच्छाशयः कीर्तिसुधोदपूर्णस्त्वं भूतले पुण्यसरोवरोऽसि ।
चत्वारि पद्मानि यतोऽभ्युदीर्णत्रैलौक्यतापैकरुजानि राजन् ॥११२॥
महोदधिस्त्वं महनीयकीर्तिर्यतोऽभ्युदैत् पूर्णकलः सुधांशुः ।
त्रयीचकोरीहृदयैकहर्षिविद्वत्समूहैककुमुद्वतीशः ॥११३॥
जानासि तत्त्वं किमु तस्य राजन् रामस्य राजीवविलोचनस्य ।
यत्तत्त्वविज्ञानविचिन्तनेन नेतीति वेदा जगदुर्मुखेन ॥११४॥

महोपनिषदः सर्वा एकं रामं प्रचक्षते ।
न सामान्यावतरणं विद्धि रामं रसाश्रयम् ॥११५॥
कथ्यतां नाम केनापि निःशेषं तस्य वैभवम् ।
तत्त्वतोऽप्यधिकं राजन्नुदेत्य विदितं गिराम् ॥११६॥
यस्यैकसत्तया व्याप्तं त्रैलोक्यं सचराचरम् ।
तादृशी भूयसी राजन् तस्य सत्ता विजृम्भते ॥११७॥
किमर्थं तीर्थयात्रायै अटितोऽसि[2] वनाद्वनम् ।
तमेव किं न सेवेथाः सर्वसेव्यपदाम्बुजम् ॥११८॥
यदाश्रितमहीपालसनकाद्यैर्मुनीश्वरैः ।
अकुतोभयमिच्छद्भिः कालमायादिमूर्द्धगम् ॥११९॥

ब्रह्मोवाच

स तस्य भाषितं श्रुत्वा भार्गवस्य तपस्विनः ।
प्रसन्नहृदयो राजा ज्ञात्वात्मभवने हरिम् ॥१२०॥
निमज्य रेणुकातीर्थे यमुनायां विशेषतः ।
तत्पुरश्च महातीर्थे यत्रोत्तरवहार्कजा ॥१२१॥

---

१. सकैकेयिहृदैकहर्षि—रीवाँ । २. भ्रमितोऽसि—रीवाँ ।

न तत्तीर्थस्य माहात्म्यं वक्तुं शक्यं सुरैरपि ।
परशुराममुखाच्छ्रुत्वा स्नातवांस्तस्य वारिणि ॥१२२॥
दत्त्वा तत्र द्विजन्मभ्यो वेदविद्भ्यो धनं बहु ।
जगाम तेन मार्गेण वटेश्वरमरिन्दमः ॥१२३॥
यमुनायां महत्तीर्थं पुण्यं स्थानं पिनाकिनः ।
चकार तदपां तीरे[1] दश सोमान् यथा विधि ॥१२४॥
तोषयित्वा द्विजांस्तत्र सुवर्णमणिभोजनैः ।
प्रतस्थौ पूर्णसर्वार्थस्तामयोध्यां निजां पुरीम् ॥१२५॥

तस्याभिजग्मुः परतः कुमारा रामादयः स्वर्णरथाधिरूढाः ।
कृत्वा पुरो विप्रकुले श्रुतिज्ञं महार्हयानप्रवराधिरूढम् ॥१२६॥
राज्ञा सार्थं प्रययुर्योगिमुख्या नानादेशाश्रमवास्तव्यशीलाः ।
निजां पुरीमध्युषितुं समन्तादत्यादरेणोपनीता मुनीन्द्राः ॥१२७॥
ते वै प्रतिग्रामसीमं सुमन्त्रैर्निमथ्याग्नि नित्यमिष्ट्वा यजन्तः ।
प्रापुः कथंचिद्दिवसैःकियद्भिर्नृपस्य भक्त्या महतादरेण ॥१२८॥
तेषां वेदं पठतां ब्रह्मघोषो दूरादश्रूयत[2] ब्राह्मणानाम् ।
ततो रथस्य ध्वजकोविदारं[3] रामादयो वीक्ष्य तदावतेरुः ॥१२९॥

महत्या सेनया युक्तः पुरोधाः पुरतो गतः ।
कृत्वा प्रणामं भूपस्य प्रसाददृशमग्रहीत् ॥१३०॥
ततो रामादयः सर्वे कुमारा भक्तिसंनताः ।
रथोपस्थस्थितस्यैव जगृहुश्चरणौ पितुः ॥१३१॥
ते प्रणम्य महाराजं यथापूर्वं यथाक्रमम् ।
वद्ध्वाञ्जलीन् पुरस्तस्थुस्तोषयामासुरस्य हृत् ॥१३२॥
अवतीर्य रथात् सद्यो राजा दशरथः सुतान् ।
आलिलिङ्ग प्रमोदेन परिपूर्णतमाशयः ॥१३३॥
दृष्ट्वा रामस्य वदनं कोटिचन्द्रामृतद्युति ।
प्रमोदसागरो राज्ञ उल्ललास हृदन्तरे ॥१३४॥

---

१. च दयावर्ती—रीवाँ । २. दूरात् सुश्रूयत—रीवाँ । ३. ध्वजमुच्चविदूरात्—रीवाँ ।

रामः पितुः प्रश्रयेणावनम्रो दिशोस्त्रपाभारगभीरदृष्टिः ।
भक्तिप्रपन्नो निजभावदर्शनाज्जहार माहात्म्यदृशं नृपस्य ॥१३५॥

भक्त्याचरणजैर्भावैर्माहात्म्यज्ञोऽपि भूपतिः ।
मुमोह रामचन्द्रस्य परतत्त्वे पुराश्रुते ॥१३६॥

यदस्य तत्त्वं श्रुतिभिर्विमृग्यते परात्परं सच्चिदानन्दसान्द्रम् ।
ध्यानावधानैः कथमप्यगोचरं तदस्य वात्सल्यधिया न लक्ष्यते ।१३७।

रामं प्रदर्शयामास राजा तानृषिपुङ्गवान् ।
साकेतपुण्यवासाय येऽस्य सार्थे समागताः ॥१३८॥
शापानुग्रहसामर्थ्यवन्तः सन्तः शुभाशयाः ।
यायजूकाः शास्त्रविदो वेदशाखाप्रवर्तकाः ॥१३९॥
तन्त्रमन्त्रादिकुशला विशुद्धज्ञानदृष्टयः ।
आययुर्भूपतेर्भक्त्या निवासाय महापुरे ॥१४०॥

केचिद्विशुद्धधिषणा विदिताखिलार्था विज्ञाय पूर्णपुरुषं तमिहावतीर्णम् ।
तद्भक्तिभावसुधया स्नपितान्तरङ्गाः साकेतपत्तननिवासधियोपजग्मुः।१४१।
ते वीक्ष्य राममविताखिलमार्तबन्धुं पराःपरं द्विभुजमद्भुतमादिदेवम् ।
सीतारमारमणचारुकलानिकेतं ब्रह्मानुभूमुदधिकांमुदमापुरन्तः ॥१४२॥
ते राघवेन्द्रतनयैर्विनयेन भक्त्या भूयोऽभिवादितपदा मुनयो वरेण्याः ।
आशीःसुधाजलभरैः स्नपयाम्बभूवुरेनानशेषभवभव्यकरान् पुमग्र्यान् १४३

एके सूक्ष्मधियोजज्ञुरेनान् विदितवेद्यकाः ।
रममाणान् सरयूतीरे नित्यं च सखिभिः सह ॥१४४॥
एके रामं हृदा जज्ञुर्भगवन्तं स्वयं हरिम् ।
लीलारसालयं नित्यं लक्ष्मणाद्याख्यया स्फुटम् ॥१४५॥
केचिद्रामं विदुः साक्षादक्षरात्मानमद्वयम् ।
लक्ष्मणं कालरूपं च भरतं कर्मरूपिणम् ॥१४६॥
शत्रुघ्नं च स्वभावाख्यं जगतः पालनोद्यतम् ।
एवं स्वमत्यनुसृता विदुरेनान् मुनीश्वराः ॥१४७॥
कश्चिद्रामं विशालाक्षं पुरुषोत्तमशब्दितम् ।
विदन्नपि प्रेममुग्धं प्रियं निजममन्यत ॥१४८॥

रामः सर्वान् मुनिवरान् वशिष्ठाद्यान् प्रणम्य च ।
सप्रेमदृष्टिपातेन सर्वांस्तोषितवान् हृदि ॥१४९॥

अथ स्वभर्त्रा सह धर्मचारिणीं या तीर्थ[1]यात्रातपसि प्रसक्ताम् ।
तां केकयेन्द्रस्य सुतां सुमातरं प्रणेमुरङ्घ्रचोरुपगत्य सर्वे ॥१५०॥

सा रामादीन् शुभाशीर्भिरानन्दितवती पृथक् ।
हृदा च भरते स्निग्धां दृशं स्थापितवत्यसौ ॥१५१॥
अथ पितुराज्ञया दशरथस्य महाविदुषः
सपदि कुमारका रथचतुष्टयमारुरुहुः ।
श्रुतिगणघोषपूर्वकमथ प्रययुर्नगरीं
ध्वजपटचित्रितोच्चतरसौधशिरोरुचिराम् ॥१५२॥
नृत्यन्तस्तुरगास्तत्र सेनायां दिव्यभूषणाः ।
शोभयाञ्चक्रुरवनीं वत्सा इव विवस्वतः ॥१५३॥
मदेन मन्दगतयो वारणाः परवारणाः ।
घण्टाघोषनिनादेन जगर्जुर्जलदा इव[2] ॥१५४॥
रथानां गच्छतां घोषैर्घनगम्भीरमञ्जुलः ।
छादयामास हरितो राज्ञः पुरनिवेशने ॥१५५॥

अथो अयोध्यापुरवीथिमार्गाः श्रीखण्डवारिक्षरणेन सिक्ताः ।
सुधूपिता मन्दमरुद्विलोलैः कालागुरूत्थैरतिनीलधूपैः ॥१५६॥
नीपप्रसूनप्रकरप्रसङ्गी समीरणः शीतलमन्दवाही ।
आनन्दयामास चिरेण भूपं समागतं तं नगरीप्रवेशे ॥१५७॥

पौराःसुमृष्टमणिभूषणभूषिताङ्गा नव्याम्बराणि दधतो हरिचन्दनाक्ताः ।
आलापसुप्रकटमोदसमूहसिन्धुमग्नाः कुतूहलयुताः पुरतः समीयुः ॥१५८॥

नागर्यो वनिताः सर्वाः सभूषिततनुत्विषः ।
केकयेन्द्रसुतां द्रष्टुकामाः पुरत आययुः ॥१५९॥
प्रादक्षिण्यं भुवः कृत्वा तीर्थयात्रां विधाय च ।
तद्दर्शनं पुण्यमिति नागरा दर्शनार्थिनः ॥१६०॥

---

१. सत्तीर्थ°--मथु०, बड़ो० । २. जगमुर्जलधरा इव—मथु० बड़ो० ।

अभीयुः संमुखं तस्य महासुकृतवर्ष्मणः ।
तेनापि दृष्ट्या सर्वे ते पुण्यया सुसमीक्षिताः ॥१६१॥
स राजभवनं प्राप पुरीं पश्यन् सुसंस्कृताम् ।
नरनारीगणाकीर्णां केतुध्वजपताकिनीम् ॥१६२॥
तोरणेषु सुविन्यस्तकदलीकाण्डशोभिताम् ।
उदपूर्णलसत्पूर्णकुम्भदिव्यफलान्विताम् ॥१६३॥
सोत्साहगायद्वनितागीतनादमनोरमाम् ।
आच्छादितां चित्रपटैर्ब्रह्मघोषेण नादिताम् ॥१६४॥
पुष्पतोरणमालाभिर्द्वारेषु विहितश्रियम् ।
विभूषितापणपथां शृङ्गाटककृतश्रियम् ॥१६५॥
आभूषितानन्दितसंचरज्जनां प्रसन्नगन्धर्वकुलस्वरान्विताम् ।
मुनीन्द्रवृन्दैः क्षणसंगमाखिल[1]द्विजेन्द्रराजोपरिवारितां पुरः ॥१६६॥
विवेश भवनं राजा प्रासादशतसंकुलम् ।
वलभीतुङ्गमूर्धाग्रसौधराजिविराजितम् ॥१६७॥
वातायनसमासक्तदिव्यस्त्रीमुखचन्दिरम् ।
रत्नभित्तिसुसंक्रान्तसूर्यांशुद्योतदीपितम् ॥१६८॥
तुङ्गतोरणविन्यस्तविचित्ररचनायुतम् ।
निवासमिन्दिरादेव्या निधिसमर्दशालिनम् ॥१६९॥
वैजयन्तमिवानेककौतूहलसमन्वितम् ।
नदत्तूर्यसमुद्घोषप्रतिनादविशारदम् ॥१७०॥
राजदम्पत्तिसंवीक्षासमुत्कण्ठितमानसैः ।
नरनारीगणैर्विष्वगाकीर्णं महसोन्नतम् ॥१७१॥
कलानिधिकलावृन्दैः सर्वतो नटितं यथा ।
रविमण्डलबिम्बाजत्कमनीय तमद्युतिम् ॥१७२॥
प्रविष्टो दिव्यभवनं ब्रह्मघोषपुरःसरम् ।
मुनीन्द्रान् पुरतः कृत्वा भक्तिवश्यान् विदुत्तमान् ॥१७३॥

---

१. मुनीन्द्रवृन्देक्षणसंगताखिल°—मथु०, बड़ो० ।

स तान् संमानयामास प्रथमं सुसपर्यया ।
पुण्याहं वाचयामास महाहैर्द्विजसत्तमैः ॥१७४॥
कौशल्या च सुमित्रा च केकयेन्द्रसुतां सतीम् ।
परिरभ्यांशतः पुण्यं प्रापतुस्तैर्थयात्रिकम् ॥१७५॥
अथो समेतं तिसृभिर्वधूभिः सपुत्रसंपद्बहुसौभगाभिः ।
द्विजोत्तमामन्त्रजलैर्नरेन्द्रं महाभिषेकेण शुशोधुरेनम्[1] ॥१७६॥
कृतानि सर्वतीर्थानि पुण्यानि सुमहान्ति च ।
तवाङ्के सुस्थिरीभूय तिष्ठन्तु धरणीपते ॥१७७॥
आसमुद्रान्तधिष्ण्यानि पुण्यतीर्थानि यानि ते ।
दृष्टानि चोपस्पृष्टानि वसन्त्वङ्केषु तानि ते ॥१७८॥
इत्थं तीर्थाभिषेकेण राजानं महिषीयुतम् ।
सिषिचुर्ब्राह्मणवराः पल्लवैर्मन्त्रवज्जलैः ॥१७९॥
तीर्थयात्राभिपूर्त्यर्थं तेभ्योऽदाद्दक्षिणामसौ ।
हिरण्यं गाः सुवासांसि रत्नानि विविधानि च ॥
ते प्रसन्नहृदो विप्रा ब्रुवाणाः परमाशिषः ॥१८०॥
अथ राजाधिपो राममब्रवीद् भक्तिसंनतः ।
उद्दिश्य तान् मुनिवरान् नानादेशाश्रमागतान् ॥१८१॥

राजोवाच

एते मे मुनयः प्राणा जीवितादपि च प्रियाः ।
योगक्षमं विधायैनान् पुरीवासाभिलाषुकान् ॥१८२॥
संस्थापय सदा राम भक्त्या चैवादरेण च ।
कृत्वाश्रमवरानेभ्यः प्रयच्छ सुमहामते ॥१८३॥
वनेष्वयोध्यापर्यन्तशोभितेषु ततेषु च ।
स्थापयैनान् महाभाग योगक्षेमं विधाय च ॥१८४॥
साग्निकाः केऽपि मुनयः केऽप्यन्तर्निहिताग्निकाः ।
तेभ्यो यथोचितं राम स्थानानि प्रतिपादय ॥१८५॥

---

१. शुशोधुरक्षणम्—रीवाँ ।

नोद्विजन्ते यथा राम मुनयस्तत्त्वदर्शिनः ।
तथा त्विमे संनिवेश्या यथास्थानं महामते ॥१८६॥
रघूणां संपदो नूनं ब्राह्मणानां महात्मनाम् ।
सुखायैवेति विमृशन् यथोचितमुपाचर ॥१८७॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे पूर्वखण्डे राज्ञ आगमने पञ्चचत्वारिंशदधिकशततमोऽध्यायः ॥१४५॥

●

षट्चत्वारिंशदधिकशततमोऽध्यायः

ब्रह्मोवाच

अथायं मुनिवर्यांस्तान् निर्दिश्य तपसां निधीन् ।
रामाय कथयामास राजा प्राणप्रियान् द्विजान् ॥ १ ॥

राजोवाच

अयं स गौतमो नाम परमर्षिस्तपोनिधिः ।
यं स्मृत्वा प्रविशन् ग्रामे सुखमाप्नोति पूरुषः ॥ २ ॥
अस्य सत्तर्कवचनैर्लोके शास्त्रं प्रवर्तते ।
यस्य ज्ञानं विना नैव संजायेत पदार्थधीः ॥ ३ ॥
अस्मायाश्रमसंस्थानं विधायात्र समर्पय ।
अत्रासौ सहशिष्यैस्तु मोदतां तपसांनिधिः ॥ ४ ॥
सपत्नीकः सपुत्रोऽसौ सशिष्यो यत्र तिष्ठति ।
तत्र क्षेमं भवेन्नित्यं प्रजानां राष्ट्रभूपयोः ॥ ५ ॥
आयासश्च शरद्वांश्च सौभाण्डो मुनिसत्तमः ।
तथा दीर्घतमानाम करेणुपालिरेव च ॥ ६ ॥
वामदेव उतथ्यश्च कक्षीवान् मुनिसत्तमः ।
एतेऽस्य परिषन्निष्ठा मोदयन्ति मनो मम ॥ ७ ॥
सर्वे विदितवेद्याश्च त्रिकालज्ञा महाधियः ।
तवैव दर्शनाकांक्षात्यक्तनानिजाश्रमाः ॥ ८ ॥

किमप्येतेऽभिजानन्ति त्वामेव विधिसंमितम् ।
अतः सर्वे परित्यज्यायोध्यावासाभिलाषुकाः ॥ ९ ॥
उतथ्य औशिजश्चैव बृहदुक्थो महामुनिः ।
अङ्गिराश्च भरद्वाजो गर्गो रूक्षायणः कपिः ॥१०॥
एते त्वच्चरणाम्भोजसमीपे वासकामुकाः ।
मुनयो दीर्घतपसः कर्मतन्त्रक्रमोद्धुराः ॥११॥
विष्णुवृद्धस्तथा कण्वो हरितश्च रथीतरः ।
मुद्गलः पुरुकुत्सश्च त्रसदस्युर्महामुनिः ॥१२॥
अजमीढो विरूपश्च भार्म्यश्च तार्क्ष एव च ।
कौत्सः पैङ्गिस्तथा शङ्खोदार्भिर्भीमगवस्तथा ॥१३॥
पृषदश्वोऽष्टदंष्ट्रश्च सर्वेऽङ्गिरसा अमी ।
द्विजा ज्ञातरहस्याश्च सर्वज्ञा त्वयि सस्पृहाः ॥१४॥
एतेभ्य आश्रमस्थानान्यत्र संपत्फलादिभिः ।
युक्तानि बहुसस्यानि देहि संप्रति राघव ॥१५॥
अयं च भगवानत्रिर्वेदविद्वान् महातपाः ।
दर्शनेनैव शुभदः स्थाप्यतामिह संनिधौ ॥१६॥

गविष्ठिरो वाधृतक आर्चनानस एव च ।
पूर्वातिथिर्मुनीशानो मुनिश्रेष्ठो धनञ्जयः ॥१७॥
सुमङ्गलश्च श्यावश्च एते चात्रेयसंज्ञकाः ।
मुनिवर्या रामचन्द्र भवद्दर्शनकाङ्क्षिणः ॥१८॥
एभ्य आश्रययुक्तानि वनानि प्रतिपादय ।
बहुसस्यफलाढ्यानि बहुदिव्यजलानि च ॥१९॥

अयं स कश्यपो नाम भगवान् सर्वदर्शनः ।
विदिताखिलवेद्यश्च विज्ञातात्मा तपोनिधिः ॥२०॥
सरयूतीरविपिने बहुधान्यफलान्विते ।
अस्मै शुभाश्रमं राम प्रतिपाद्य समादिश ॥२१॥
नैध्रुवश्चैव रैभ्यश्च शाण्डिल्यो भगवानयम् ।
असितो देवलश्चैव कश्यपाश्रमपार्श्वगाः ॥२२॥

अयं वशिष्ठो भगवान् कुले नोऽनुग्रहान्वितः ।
यस्य मे तीर्थयात्रायां संगो भूयानभूत्तराम् ॥२३॥
अस्य विज्ञानगोष्ठीभिर्नीतिगोष्ठीभिरेव च ।
क्षणतुल्यानि यातानि दिनानि मम भूरिशः ॥२४॥
कौडिण्य उपमन्युश्च मुनिश्चैव पराशरः ।
साकल्य ऐन्द्रप्रमदो भरद्वान् मुनिसत्तमः ॥२५॥

एते वशिष्ठस्य महामुनीन्द्रवर्यौघमान्यस्य मनस्विनो भृशम् ।
समीप एवाश्रममण्डलेषु संस्थापनीयास्तव रामचन्द्र ॥२६॥
त्वद्दर्शनानन्दविधूतसर्वतपश्चर्यास्त्वत्पदाम्भोजनिष्ठाः ।
त्वामेव शश्वत्किमपि विदन्ति एते स्थास्यन्ति पुर्यामिह संनिकृष्टा ।२७।

अयं स भगवान् राम विश्वामित्रो महामुनिः ।
त्वामभिज्ञाय साकेते वस्तुमिच्छति शाश्वतम् ॥२८॥
अस्यैते पार्श्वगा राम मुनीन्द्रा वै तपोधनाः ।
येषां दर्शनमात्रेण प्रजा राष्ट्रं च वृद्धिमत् ॥२९॥
औदलो देवरातश्च मधुच्छन्दाश्च रोहितः ।
अष्टकोरौक्षकश्चैव रैवणो गाथितस्तथा ॥३०॥
देवश्रवा देवरसो भगवान् कामकायनः ।
कात्य आत्कील आजश्चाप्याघमर्षण एव च ॥३१॥
आश्मरथ्यः पूरणश्च वाधूलो बहुमन्त्रवित् ।
हर्यश्वो वेणुरेवापि शालङ्कायन एव च ॥३२॥
रोहिणः काथकश्चैव क्राथको वेदवित्तमः ।
बहुलोमा हुतश्चैव तथा हिरण्यरेतसः ॥३३॥
सुवर्णरेताः कापोतरेतसो घृतकौशिकः ।
एते त्वद्दर्शनाकाङ्क्षाविस्मिताशेषलौकिकाः ॥३४॥
निवास्यैनान् सदा राम विश्वामित्रस्य संनिधौ ।
सुखादाश्रमदेशेषु बहुशस्यफलेषु च ॥३५॥
अगस्त्यो भगवानेष सर्वेषां प्रीतिवर्द्धनः ।
दिव्येन तपसा यस्य मुनयो विस्मिता हृदि ॥३६॥

अश्मवाहः सामवाहः सोमवाहस्तथैव च ।
यज्ञवाहश्चैध्मवाहो मुनिवर्यो दृढच्युतः ॥३७॥
दर्भवाहश्च भगवान् सप्तैते परिषद्द्विजाः ।
राम त्वद्दर्शनाकाङ्क्षाविस्मृताशेषसत्क्रियाः ॥३८॥
पुलस्त्यो भगवानेष सर्वज्ञो वेदवित्तमः ।
यस्य सत्तीर्थचर्यायां तीर्थतामगमन्मही ॥३९॥
अयं च पुलहो नाम भगवान् विदितार्थकः ।
वरेण्यः सर्वयोगीन्द्रसंसदां तपसां निधिः ॥४०॥
अयं क्रतुर्महायोगी मुनीन्द्रः सुरहस्यवित् ।
अमीषां शुद्धरूपाणि स्थानानि सरयूतटे ॥
कृत्वा त्वं देहि रामेन्द्र प्रजानां शुभहेतवे ॥४१॥
अयं शुको नाम महामुनीन्द्रः श्रीरामपादाम्बुजभक्तिचित्तः ।
वेद्याखिलार्थागमसारवेत्ता गुरुर्मुनीनां विविधोपजीव्यः ॥४२॥
इमौ महामुनी राम हिमचर्बर्हिमोदकौ ।
नित्यं समाधिनिरतौ जिताहारौ जितेन्द्रियौ ॥४३॥
इमौ विदितवेद्यार्थौ मुनीन्द्रेशौ गणेश्वरौ ।
अयं स कौत्सो भगवान् वेदवेदाङ्गपारगः ॥४४॥
अयं स वामरथ्याह्वो मुनीन्द्रः सर्ववेदवित् ।
यौक्तिको नाम योगीन्द्रो मुनिरेष समाधिभृत् ॥४५॥
अयं स जातूकर्णाख्यो मुनिर्वेदार्थसारवित् ।
तपसा यस्य सर्वेऽपि मुनयो विस्मयं ययुः ॥४६॥
अयं स सांकृतिर्नाम मुनीन्द्रो विजितेन्द्रियः ।
तपोनिधिर्ज्ञाननिधिः सर्वकर्मविशारदः ॥४७॥
गौरवीतो मुनिरयं सर्वधर्माभिरक्षकः ।
सर्वशास्त्रार्थसिद्धान्तवेत्ता निष्णातमानसः ॥४८॥
अयं शातातपो नाम मुनिः सच्चरिताशयः ।
अयं स पूतिमाषाख्यो मुनिरिन्द्रस्तपस्विनाम् ॥४९॥
लौगाक्षिरेष भगवान् तपस्वी ज्ञानवारिधिः ।
अयमुद्दालको नाम महर्षिर्वीतकल्मषः ॥५०॥

अमीषां मुनिवर्याणां पृथक् स्थानानि निर्दिश ।
सगृहाः साग्निहोत्राश्च यथातिष्ठेयुरध्वरैः ॥५१॥
तेऽमी राम महामान्या महाशास्त्रार्थवेदिनः ।
कर्मतन्त्रैककुशलाः स्मृतिमार्गप्रवर्तकाः ॥५२॥
आहिताग्नय आचारसंपन्ना [1]दीक्षितोत्तमाः ।
शापानुग्रहकर्तारः श्रद्धावन्तोऽनसूयकाः ॥५३॥
ज्ञानविज्ञानसंपन्ना नाना [1]शास्त्रप्रवर्त्तकाः ।
गोत्रप्रवरकर्तारो नानावंशविधायकाः ॥५४॥
प्रवृत्तिमार्गनिपुणा निवृत्तिसुविचक्षणाः ।
तक्षकाः कर्मपाशानां सत्संगतिविचक्षणाः ॥५५॥

तेऽमी सहापत्यगृहाग्निहोत्रैः समागतास्त्वां रघुवंशकेतो ।
विज्ञाय तत्त्वं किमपि प्रकृष्टं त्वामेव याताः शरणाय राम ॥५६॥
किं जानते चेतसि रामचन्द्र त्वामेत आसादितसत्तपःफलाः ।
त्वमेव तद्वत्स महानुभावो न तावकं कश्चन वेत्ति तत्त्वम् ॥५७॥

यत्र यत्र मया राम गतं तीर्थानुयात्रया ।
तत्र तत्रैव मुनय उपासांचक्रिरे हि माम् ॥५८॥
तव माहात्म्यसारं तु प्रविज्ञाय रघूत्तम ।
मामाद्रियन्तो मुनयः परिवार्यावतस्थिरे ॥५९॥
उपासेऽहं मुनीनेतान् मुनयो मामुपासते ।
भवन्तमभिसंधाय श्रीराम किमहं ब्रुवे ॥६०॥

भगवान् जामदग्न्यो मे तवयत्तत्त्वमूचिवान् ।
तद्विज्ञातुं न शक्नोमि वात्सल्येन समावृतः ॥६१॥
माहात्म्यमेकतो राम तावकं मुनिभिर्मतम् ।
अनुकर्षत्येकतो मां वात्सस्यं प्रेम वुद्धिमत् ॥६२॥
माहात्म्यं ज्ञानवात्सल्यप्रेम्णोरभ्यन्तरे गतम् ।
मामकं मानसं राम काममालोकितं मुहुः ॥६३॥

१—१.नास्ति—रीवाँ,

तवैव तत्त्वं विज्ञातुं संग्रहीता मया ह्यमी ।
नानाश्रमेभ्य आनीय मुनयो दिव्यदर्शनाः ॥६४॥
एतेभ्यो रमणीयानि स्थानानि यशसांनिधे ।
स्वाश्रमाणि पवित्राणि सरय्वास्तटयोर्द्वयोः ॥६५॥
प्रभूतफलपुष्पाणि सुपुण्यसलिलानि च ।
शाकपत्रादियुक्तानि बहुसस्यानि सर्वतः ॥६६॥
पशुपक्षिसुविश्रामसौख्यदानि समंततः ।
निरामयानि रम्याणि तपोयोग्यानि नित्यशः ॥६७॥
यज्ञोपद्रवदुर्जीवरहितानि विशेषतः ।
सुवास्तूनि सुशालानि विशालानि समंततः ॥६६॥
शूद्रम्लेछादिसांनिध्यवर्जितानि सुदूरतः ।
लतामण्डपयुक्तानि निकुञ्जाढ्यानि सर्वतः ॥६९॥
निरुद्वेगानि वर्षासु ग्रीष्मेषु शिशिराणि च ।
शिशिरेऽर्कातपाढ्यानि योगक्षेमवहानि च ॥७०॥
जनैर्जानपदैर्नित्यं नोपमर्दीकृतानि च ।
नगर्या नातिसामीप्यनातिदूरत्ववन्ति च ॥७१॥
अमीषामृषिबालानां यत्र सौख्यं प्रजायते ।
तथा महर्षिपत्नीनामयत्नसुखदानि च ॥७१॥
नामीषामृषिवर्याणां भोगेऽस्त्यभिरुचिः क्वचित् ।
अतः स्वभावतस्तानि भोगदानि विधापय ॥७३॥
नैषां सुखेन संतोषो नोद्वेगो दुःखयोगजः ।
परतत्त्वज्ञानविद्भिः सर्वं सममुदीक्ष्यते ॥७४॥
अस्माकं तु सदा धर्मो यदमीषां सुखोदयः ।
न तत्रोद्योग एतेषामतो मुक्ति विचारय ॥७५॥
यथा स्वभावसिद्धानि स्थानानि स्युर्निरन्तरम् ।
एषां निःस्पृहचित्तानां मुनीनां वसतामिह ॥७६॥
फुल्लपङ्कजरम्याणि गुञ्जद्भ्रमरवन्ति च ।
सरांसि परितः सन्तु मुनीन्द्राणामुपाश्रमम् ॥७७॥

संफुल्लमल्लिकाशाली चन्दनस्पर्शसौरभी ।
मन्दो वायुः सदा वातु मुनीन्द्राणां तपोवने ॥७८॥
एषामाश्रमपर्यन्तस्निग्धकाननवीथिषु ।
कुसुमाकर आनन्दी सदा तिष्ठतु राघव ॥७९॥
रामरत्नमयी भूमिः सुवर्णधनघट्टिता ।
अस्त्वेषामाश्रमस्थाने दैवादेवोपसेदुषी ॥८०॥
लतिकाश्च प्रसूयन्तां सुवर्णदलधोरणीः ।
हरिन्मणिमयीः शाखा बिभ्रतां भूरुहाः स्फुटम् ॥८१॥
पीयूषपाकरुचिरां बिभ्राणः फलधोरणीः ।
पोषयन्तु सदा वृक्षा मुदं स्वर्गेऽपि दुर्लभाम् ॥८२॥
वीणानिनादरुचिरं स्वनन्तु वनकीचकाः ।
मन्दानिलसुसंस्पृष्टां विभ्राणा रन्ध्रधोरणीम् ॥८३॥
कलमालपतादुच्चैः कोकिलानां कलापिनाम् ।
मुनीनामाश्रमे राजी हृत्कर्णसुभगध्वनिम् ॥८४॥
इति लोकोत्तरा शोभा स्वाभाविक्याश्रमावनौ ।
प्रादुर्भूय सदा राम तिष्ठतादिति मे मतिः ॥८५॥
फलपत्रसुमस्तोममभिव्याप्यसुधारसः ।
सदोपसीदतु मुनीन् वैराग्यतपसां निधीन् ॥८६॥
अत्रोपसीदतान्नित्यं कर्पूरागुरुसौरभी ।
कुसुमाकरसंशाली मनोहारी समीरणः ॥८७॥
सर्वात्मना राजवर्योपभोग्या त्वदाज्ञातो निर्मिता मायया ते ।
सदा संपत्संविधा तिष्ठतां वै मुनिस्थानेऽभ्यर्हिता रामचन्द्र ॥८८॥
नैतामेते विजानन्तु संविधां राजदुर्लभाम् ।
अन्यथास्मत्कृतां ज्ञात्वा त्यजेयुर्निःस्पृहा अमी ॥८९॥
अथो अमीषां हृदयानि राम त्वद्दर्शनानन्दसुधारसाय ।
चिरं स्पृहावन्ति रघूत्तमेन्दो तमेव कामं प्रतिपूरयादृतः ॥९०॥

श्रीराम उवाच

तथ्यं वदसि राजेन्द्र शुभाय जगतश्च नः ।
प्रसन्नचित्ततामीषां परब्रह्मैकवेदिनाम् ॥९१॥

पठद्भिः शर्वरीशेषेऽभ्युत्थाय मुनिभिः पृथक् ।
समस्तराष्ट्रकल्याणं क्रियतेऽमीभिरक्षयम् ॥९२॥
गोदोहमात्रं यत्रैते तिष्ठन्ति परमर्षयः ।
तत्स्थानं कुर्वते तीर्थं गीयमानं पुरातनैः ॥९३॥
किंनाम तव राष्ट्रस्य महिमा तात वर्ण्यताम् ।
अजस्रं यत्र स्थास्यन्ति मुनयोऽमी तपोधनाः ॥९४॥
तीर्थपादाः शुभाचाराः सर्वे विदितवेद्यकाः ।
वेदार्थकल्पतरवः स्थास्यन्तीह शुभायनाः ॥९५॥
अहो अमीषां सुखदं स्थानमेतत् स्वभावतः ।
अयोध्यापुरपर्यन्ते प्रमोदवनसंज्ञकम् ॥९६॥
विद्धि राजन् निजं स्थानं सरय्वाः कूलयोर्द्वयोः ।
साक्षाच्छ्रीरामधामैव प्रमोदवनमद्भुतम् ॥९७॥
स्वभावादेवात्र क्षितिरतुलचिन्तामणिमयी
सवर्णैः संबद्धा हरितमणिबद्धाखिलपथा ।
तदन्तःसंपाती दिवसपतिमारीचनिकर-
श्चमत्कारं धत्ते कमपि जनतालोचनहरम् ॥९८॥
अमुष्यां भुव्युच्चैस्तरव उदिता स्वादुरफलाः ।
स्फुरन्मल्लीवल्लीप्रसरनिभृतावेष्टितभुजाः ।
शरद्यम्भःसंस्पर्शनसमुदितानन्दविभवः
समीरोऽयं वाति प्रचुरपरमामोदभरितः ॥९९॥
स्वाभाविकमतो राजन्नत्रत्यानां महत्सुखम् ।
यत्सुखं नैव वैकुण्ठे लभन्ते विष्णुपार्षदाः ॥१००॥
मोदिष्यन्ते मुनीशाना इह प्रेमसुधाप्लुताः ।
स्वभावसिद्धो महिमा कोऽप्यस्यैव विराजते ॥१०१॥
अस्मिन्निव सतां स्थाने कामः क्रोधो भयं मदः ।
मात्सर्यमानदम्भाद्यचिन्तादुःखामयादयः ॥१०२॥
स्वत एवोपशाम्यन्ति ये दोषा मोहसंभवाः ।
प्रकाशते परं ज्ञानं परतत्त्वैकगोचरम् ॥१०३॥

नन्दव्रजोऽपि चास्यैव कोऽप्यंशश्चित्सुखाकृतिः ।
रहस्यं केलिसदनं कृष्णस्य कथमन्यथा ॥१०४॥
एतत्सुखमयं धाम मामकं परमेष्टदम् ।
यद्धित्वा न लभेऽन्यत्र त्रैलोक्याधिकवैभवम् ॥१०५॥
अतः प्रमोदविपिनमित्युक्तं सुमहर्षिभिः ।
सनकादिभिराप्तश्रीमुखतः श्रुतवैभवम् ॥१०६॥
एतावज्जन्मनः सारमेतावच्च वपुःफलम् ।
यत्प्रमोदवने वासं प्राप्नुवन्ति मनीषिणः ॥१०७॥
यन्नित्यं सच्चिदानन्दं परब्रह्म सनातनम् ।
तदत्र वसतः पुंसां गोचरीभवति स्फुटम् ॥१०८॥
इति विज्ञाय सेवन्ते प्रमोदवनमद्भुतम् ।
मुनयः शास्त्रतत्त्वज्ञा भक्तिलाभाभिलाषुकाः ॥१०९॥

ब्रह्मोवाच

इत्युक्त्वा भगवान् रामः प्रणम्य मुनिसत्तमान् ।
आश्रमाणि विनिर्दिश्य स्थापयामास तत्पुरैः ॥११०॥
ते पूर्वदक्षिणप्रत्यगुत्तराशासमाश्रिताः ।
स्वस्वाश्रमनिकेतस्था अलंचक्रुरलंपुरीम् ॥१११॥
पिबन्तः सारवं वारि प्रमुद्वनफलाशनाः ।
भावयन्तो रामचन्द्रं सानुजं जानकीयुतम् ॥११२॥
पश्यन्तः प्रत्यहं पूर्णप्रेमानन्दसुधाभरैः ।
परमात्मपदद्वन्द्वं भक्त्यालभ्यममुष्य वै ॥११३॥
विस्मृतात्मतपोयोगा वहिर्योगपरायणाः ।
तस्थुः सुखमयोध्यायामृषयः शुद्धबुद्धयः ॥११४॥
ते कालेन भविष्यन्ति सहजारामपार्श्वगाः ।
यथाधिकारं मुनयः सखीदासीपदाश्रिताः ॥११५॥
इयं हि परमा मुक्तिर्भक्तानां तत्कृपोद्भवा ।
नित्यलीलामण्डलान्तः प्रवेष्टव्या सुदुर्लभा ॥११६॥

सर्वकामफलभोगरूपिणीं यां जगुः किमपि तैत्तिरीयकाः ।
सोऽश्नुतेऽखिलसुखं विपश्चितो ब्रह्मणा सहित इत्यलंवचः ।११७।

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे पूर्वखण्डे महर्षिजन-संस्थापनंनाम षट्चत्वारिंशाधिकशततमोऽध्यायः ॥१४६॥

॥ इतिश्री आदिरामायणे पूर्वखण्डः समाप्तः ॥

●

---

१. बड़ो०—श्रीसहजानन्दिनी जयति । विक्रमसंवत् १९९० श्रीशालिवाहन शक १९४५ माघमासेशुक्लपक्षे तृतीयायां गुरुवासरे वटपत्तननिवासिना रेवाशंकर तनूजेन पुरुषोतमशास्त्रिणा आदर्शपुस्तकमनुसृत्य ग्रंथस्य लेखनक्रमः समाप्तिं नीतः संशोधितश्च । यादृशं दृष्टं तादृशं स्वीकृत्य शास्त्रीपुरुषोत्तमरेवाशंकर शर्मा स० द० पो० ता० ८-२ सन् १९२४ मु० बडोदरा

श्रीमदादिरामायणे

दक्षिणः खण्डः

श्रीगणेशाय नमः श्रीरामचन्द्राय नमः श्रीसहजानन्दित्यैनमः ।

प्रथमोऽध्यायः

ब्रह्मविरचितं स्तोत्रम्

दिनकरकुलकेतुः सर्वसौन्दर्यसेतुः त्रिभुवनसुखहेतुर्भूतिकृज्जम्भजेतुः ।
सुरनरनगरामानन्दसन्दोहधामा धृतमणिवरदामा पातु वो रामनामा ॥ १ ॥

दुरितहरणदक्षः [1]साधुवर्यैकपक्षस्त्रिदशरिपुविपक्षः स्वर्गसंपत्तिरक्षः ।
प्रबलनिखिलरक्षःसंहृतौ बद्धकक्षः सकलगुणवलक्षः पातु रामो विचक्षः ॥ २ ॥

नतिनुतिलवमन्ता कालभीत्येकहन्ता परमगहनगन्ता सत्यवाक्यानुमन्ता ।
कुशलनिधिरनन्तानन्दलीलैकरन्ता जयति जय दुरन्तापत्तिहृद्रामचन्द्रः ॥ ३ ॥

परममधुरशीलः प्रावृषेण्याभ्रनीलः सकलसुखदलीलः कृत्तहृच्छोककीलः ।
त्रिभुवनशुभवेशः कोटिकल्याणदेशः कुटिलमसृणकेशः पातु भास्वत्कुलेशः ॥ ४ ॥

सलिलनिधिगभीरः सर्वलोकैकवीरः स्थिरतरमतिधीरः सूर्यवंशैकहीरः ।
सुरभियश उशीरः स्वर्णवर्णाच्छचीरः श्रितविपिनकुटीरः पातु नो रामवीरः ॥ ५ ॥

त्रिभुवनजनपालः सर्वदुष्टैककालः करकृतकरवालः कीर्त्तिलक्ष्मीविशालः ।
समरभुवि करालः सत्तपस्वी जटालः कलयतु रघुबालः संपदं नो रसालः ॥ ६ ॥

मुनिजनकृतभक्तिर्बद्धसीतानुरक्तिः कलितललितशक्तिर्जातसंपद्विरक्तिः ।
कृतसकलविभुक्तिः सच्चिदानन्दभुक्तिर्दितिजहरणयुक्तिः पातु रामः सदुक्तिः ॥ ७ ॥

गुणनिधिरभिरामः सर्वरक्षोविरामः समरभुवि सभामः सौभगश्रीललामः ।
निरवधिशुभधाम श्रीदृशोर्द्दत्तकामः स्फुटमधुरिमवामः पातु वः सोऽपि रामः ॥ ८ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे ब्रह्मविरचित[2]स्तोत्रं नाम प्रथमोऽध्यायः ॥ १ ॥

●

---

१. साधुवर्गैक०, मथु० । २. विरिंचि०, बड़ो० ।

द्वितीयोऽध्यायः

श्रीभुशुण्ड उवाच

रामो जयति लोकानां नित्यमानन्दवर्द्धनः ।
स्वच्छन्दक्रीडनानन्दी सच्चिदानन्दविग्रहः ॥ १ ॥

तं नमामि रसानन्दरूपिणं रघुवल्लभम् ।
यं भजन्ति सदा भक्ता भक्त्या प्रेमस्वरूपया ॥ २ ॥

रामेण रसरूपेण प्रेमानन्दैकशालिना ।
नित्यलीलानिकेतेन कृतं मे भूरिमङ्गलम् ॥ ३ ॥

तेन साधनभूतेन श्रीरामेण मनोजुषा ।
साधयामि परं कार्यमिति मे निश्चिता मतिः ॥ ४ ॥

परब्रह्मस्वरूपाय रसानन्दैकमूर्तये ।
समर्पयेऽहं सकलं रामाय परमात्मने ॥ ५ ॥

परमानन्दसदनाद्रामाद्रघुकुलोद्वहात् ।
राजीवलोचनाच्छ्यामान्नास्त्यन्यच्छरणं मम ॥ ६ ॥

तस्यैवाखिलसर्वस्वभूतस्य सकलात्मनः ।
रामस्य मे परा भक्तिर्भूयाज्जन्मनि जन्मनि ॥ ७ ॥

श्रीरामे सहजाकान्ते चिदानन्दैकवेश्मनि ।
कृपापीयूषजलधौ मनो मे परिसज्जतु ॥ ८ ॥

नमः सर्वविभक्तीनामाश्रयायाखिलात्मने ।
श्रीरामपरमेशाय रमणानन्दसद्मने ॥ ९ ॥

श्रुतं विस्तरशो ब्रह्मन् रामस्य रमणं मया ।
व्रजवासिजनानन्दमन्दिरं लोकमङ्गलम् ॥ १० ॥

रामस्य रसरूपस्य श्रुतं जन्म च कर्म च ।
महारासात्मकं दिव्यं रमणं निजशक्तिभिः ॥ ११ ॥

राक्षसीहननाद्याश्च बाललीलाः श्रुता विभो ।
याभिस्तन्मयतामेति हृदयं भक्तिभाजनम् ॥ १२ ॥

अयोध्यायां कृता लीलाः परमानन्दवर्द्धिकाः ।
सीतोद्वाहप्रभृतयो ब्रह्मन्नाकर्णिता मया ॥ १३ ॥

[1]षड्गुणाश्च श्रुतास्तस्य स्वयंरामस्य भूपतेः ।
याभिः श्रुताभिर्हृदयं तन्मयत्वाय कल्पते ॥ १४ ॥

---

१. सगुणा०, रीवाँ ।

पौलस्त्यवधरूपं तु तच्चरित्रं महोदयम् ।
श्रोतुमिच्छामि भगवन् भवांश्चेदनुमन्यते ॥ १५ ॥

राज्याभिषेकं संत्यज्य वनवासविधौ विभोः ।
अनुमेने कथं नाम केकयेन्द्रसुता स्वयम् ॥ १६ ॥

कथं च हरणं देव्याः पौलस्त्येन वने कृतम् ।
अतिगर्हितमेतद्धि भक्तस्य प्रतिभाति मे ॥ १७ ॥

स्वयं भगवतः शक्तिः सच्चिदानन्दरूपिणी ।
रावणातिक्रमं ब्रह्मन् कथं सेहे स्वयं च सा ॥ १८ ॥

वने च निवसन् रामो भगवान् जगदीशिता ।
यद्यच्चकार चरितं तन्मे कथय विस्तरात् ॥ १९ ॥

कं कं भक्तजनं दीनं वनवासे रघूद्वहः ।
अभ्युद्धार कृपया सुघोराद्भवसागरात् ॥ २० ॥

राज्ञो दशरथस्यापि वियोगं मरणान्तिकम् ।
कथं वितीर्णवान् रामो भक्तस्य स्वगतात्मनः ॥ २१ ॥

एतदाद्यखिलं तस्य चरित्रं रसरञ्जितम् ।
कथयस्व कृपां कृत्वा येन स्यात्तन्मयी मतिः ॥ २२ ॥

कृपासिन्धुर्भगवान् सत्यसन्धो दीनात्मबन्धुर्भुवनैकभर्त्ता ।
यद्यच्चकाराखिलवन्द्यपादस्तत्तद्विधे [1]जनजीवातुभूतम् ॥ २३ ॥

अटित्वा तैर्थिकीं यात्रां यच्चक्रे राजपुङ्गवः ।
तन्मे वद विशेषेण रामचारित्रगर्भकम् ॥ २४ ॥

जानामि यस्य मनुजस्य जनुः प्रयाति श्रीरामचन्द्रगुणकीर्तनया दिनेषु ।
रात्रीषु भावयत एतदपारलीलां जातः स एव गुणवान् भुवने जनन्याः ॥ २५ ॥

वल्मीकवत्तस्य जनस्य कर्णौ शृणोति यो नास्य यशः पवित्रम् ।
दृशौ मयूरस्य च चन्द्रिकाभे लीलास्थलीं तस्य न पश्यतो ये ॥ २६ ॥

वृथैव सा त्वग्नयायास्य भक्ता आलिङ्गिताः संसृतितापमोक्षणाः ।
जिह्वा तरोःपल्लववल्ललन्ती वृथा न या मुख्यगुणान् गृणीते ॥ २७ ॥

इति विज्ञाय सततं शीलनीयो रघूद्वहः ।
सर्वेन्द्रियकृतार्थत्वहेतवे सज्जनैर्भवे ॥ २८ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे प्रश्नाधिकारो नाम द्वितीयोऽध्यायः ॥ २ ॥

---

१. जनजीवनानु०, मथु० ।

तृतीयोऽध्यायः

ब्रह्मोवाच

युक्तः कुमारैश्चतुरैश्चतुर्भिर्वसन्नयोध्यानगरे महीन्द्रः ।
महीतले धर्मतः पालयानो विशेषतोऽसौ मुमुदे तदानीम् ॥ १ ॥

प्रत्यहं पूजनान्यासुर्मुनीनामात्मयोगिनाम् ।
बभूवुर्ज्ञानगोष्ठ्यश्च तैः समं तस्य भूपतेः ॥ २ ॥

रामस्य पुरतो राज्ञा पूजमाना मुनीश्वराः ।
सलज्जा इव ते जाताः सर्वदेवगरीयसः ॥ ३ ॥

रामोऽपि भगवान् नित्यं ब्रह्मण्यानां शिरोमणिः ।
पृथक् पृथक् मुनीन्द्रांस्तानाराराध सपर्यया ॥ ४ ॥

ते पूज्यमाना रामेण पादप्रक्षालनादिभिः ।
विदन्तोऽस्य परं तत्त्वं तूष्णीमासुर्मुनीश्वराः ॥ ५ ॥

एकदा भूपवर्यस्य पुरतो मुनिपुङ्गवाः ।
मुदिता इदमूचुस्ते पूजान्ते जातसंभ्रमाः ॥ ६ ॥

मुनय ऊचुः

अहो ते राजशार्दूल भक्त्या परमयानया ।
संतुष्टाः किं वयं लोके ददामोऽभीष्टमद्भुतम् ॥ ७ ॥

संपदस्ते परतरा अवाङ्मनसगोचराः ।
कुबेरमतिवर्तन्ते [1]राजराजं निधीश्वरम् ॥ ८ ॥

पुत्रस्तवाखिलगुणाकर एष साक्षाद्रामः [2]सुरासुरमहर्षिसमूहभाव्यः ।
अंशांमात्रविभवशाश्रयमस्य लब्धास्तेजस्विनो जगति चन्द्रविभाकराद्याः ॥ ९ ॥

तमेवानुगताः शीलवीर्यौदार्यादिभिर्गुणैः ।
सर्वं एते तव सुताः लक्ष्मणाद्याः सुवर्चसः ॥ १० ॥

योऽसौ तव सुतो ज्येष्ठो रामाख्यो महसां निधिः ।
तस्याज्ञायां स्थितः कालः कालयत्यखिलं जगत् ॥ ११ ॥

मुक्तिस्तव पुरे[3] राजन् पण्यस्त्रीव न गण्यते ।
रामप्रेमरसाविष्टहृदयैरधमैरपि ॥ १२ ॥

अथो वयं भूपतिसार्वभौम ददाम किं ते वरमत्यभीष्टम् ।
आराध्यमाना अनिशं महत्या सपर्ययात्यूर्जितभक्तिमत्या ॥ १३ ॥

ब्रह्मण्यदेवप्रवरो मनस्वी धर्मिष्ठवर्यः श्रुतिशास्त्रवेत्ता ।
स्वात्मैकनिष्ठो विदिताखिलार्थः स्वामीदृशोऽस्यां भुवि धन्य एव ॥ १४ ॥

---

१. राजा राज्यं विधीश्वरम्, रीवाँ । २. रामो निखिलसुरर्षि०, मथु० । रामः सुरर्षि०, रीवाँ । ३. पुरो, रीवाँ ।

नित्यानन्दमयी राजन् नगरी तव सर्वदा।
सर्वसौभाग्यसंपन्ना सकलाभीष्टदायिनी ॥ १५ ॥

अस्यां वसन्तो नियतं वयं भूपशिरोमणे।
कृतार्थयामः सततं निजं जन्म महोदयम् ॥ १६ ॥

किं यमैर्नियमैर्वापि किं वा योगेन नः प्रभो।
इदानीं तव पुत्रस्य प्रेमानन्दवशीकृताः ॥ १७ ॥

रमामः सततं लीलारसानन्दमहोदधौ।
ब्रह्मानन्दं समभ्येत्य[1] तिष्ठामः सुमहोदयाः ॥ १८ ॥

यत्कर्मभिर्लभ्यते स्थानमुच्चैः सुराङ्गनासंगमभूरिभोगम्।
विमानवर्यैः परिभूष्यमाणं तत्कालशक्तिग्रसनीयमेव ॥ १९ ॥

[2]यज्ज्ञानिभिर्लभ्यत आत्मयोगात्स्थानं परं ब्रह्ममयं महोर्जम्[3]।
वेदचानुभूत्या स्वदनेन[4] हीनं तत्कं प्रतीयात् पुरुषार्थभावम् ॥ २० ॥

तत्तदेवोपासनावासनाभिस्तत्तल्लोकाख्यं पदं लभ्यते यत्।
तदन्योन्याधिकसौख्यानुमर्शात्स्पर्द्धाकुलं नैव सतां मनोज्ञम् ॥ २१ ॥

क्षीयमाणानन्दरूपं स्वर्गादि लघुतास्पदम्।
वृहच्च गणितानन्दं ततोऽस्मिन्न रतिः सताम् ॥ २२ ॥

अतो रामे रमणानन्दसिन्धौ, परब्रह्मण्यमिते वाङ्मनोभिः।
अगोचरे सर्वकामानुभोग्ये लब्धवन्तः कतिचित्तोऽत्र सन्तः ॥ २३ ॥

भक्तिभावपुलकौघमण्डितैर्विग्रहैर्विदितमोदसंभवाः।
रामपादकमलानुरक्तयः केऽपि सन्त इह शर्म बिभ्रति ॥ २४ ॥

यस्येदृशी परा भक्तिः पुरुषार्थस्वरूपिणी।
स ते तनुजतां प्राप्तः को नु धन्यस्त्वया समः ॥ २५ ॥

त्वं यत्पूजयसे राजन् मुनीन् भक्त्या समाहितः।
स ते स्वभाव एवायं फलकामविवर्जितः ॥ २६ ॥

ब्रह्मण्यदेवो यस्यात्मा साक्षाद्रामः स्वयं हरिः।
तस्य ते धर्मनिष्ठैव बुद्धिरत्र किमद्भुतम् ॥ २७ ॥

पर्याप्तकामता नित्यं नाश्चर्याय तव प्रभो।
आत्मकामः स भगवान् यस्यालङ्कुरुते गृहम् ॥ २८ ॥

वरं दातुं न शक्ताःस्म संतुष्टा अपि ते वयम्।
यस्य प्रियहितः पुत्रः श्रीरामो वरदेशराट् ॥ २९ ॥

---

१. ममग्रंपेत्य, रीवाँ। २. यज्ञादिभिर्, रीवाँ। ३. महोग्रं, रीवाँ। ४. सदनेन, रीवाँ।

तवानुग्रहपात्रत्वं प्रयातुं कामयामहे ।
यत्फलं त्वत्पुरीवासो रामे च परमा रतिः ॥ ३० ॥

सततं रतिसंपन्ना नित्यं येऽस्य प्रिया जनाः ।
तेषामेव प्रसादेन सुलभा तत्पदे रतिः ॥ ३१ ॥

एतद्दुर्लभमस्माकं नानादेशनिवासिनाम् ।
सरयूजलपानं यद्वासश्च सरयूतटे ॥ ३२ ॥

सरयूवातपूतानां नृणां नित्या च संगतिः ।
रामनामसमुच्चारो रामरूपावलोकनम् ॥ ३३ ॥

त्वद्दर्शनोद्भवं राजंस्त्वदनुग्रहणं तथा ।
अनिर्वाच्यमिदं लोके फलमुज्जृम्भतेतराम् ॥ ३४ ॥

यन्नः पूजयते रामो नित्यं भक्त्या सुसंयतः ।
एतद्ब्रह्मण्यदेवत्वं ब्रह्मणः परमात्मनः ॥ ३५ ॥

न पूजयति चेद्रामो ब्राह्मणान् वेदपारगान् ।
कोऽन्यः पूजयिता लोके तदा स्यान्मोहसंवृतः ॥ ३६ ॥

लोकानुग्रहणार्थाय लोकप्रवर्तनाय च ।
रामस्य कर्मणां वृत्तिरितिनिश्चिनुमो वयम् ॥ ३७ ॥

इत्युदीरितमाकर्ण्य मुनीनां कोशलाधिपः ।
उवाच स्मितसंलक्ष्यः परमानन्दमण्डितः ॥ ३८ ॥

राजोवाच

नास्य बालतमस्यैव महिमाऽज्ञायि योगिनः ।
कोऽप्येष पुरुषश्रेष्ठो भूम्युद्धारार्थमागतः ॥ ३९ ॥

[1]इत्यहं हि मुहुरात्मधियामुं संविदन्नपि विमुग्धहृदस्मि ।
माययास्य जटितो न किलैनं तत्त्वतः कलयितुं प्रभवानि[1] ॥ ४० ॥

अनुग्रहोऽस्य परमो यमसावुद्दिधीर्षति ।
तस्मै ददाति स्वां भक्तिं लीलानन्दरसाप्लये ॥ ४१ ॥

सुखितो नाम गोपालस्तत्पत्नी च महाशया ।
अन्ये च गोपिगोपाद्याः पशवः पक्षिणस्तथा ॥ ४२ ॥

व्रजे वसन्तः सततं मोदन्ते प्रेमसंपदा ।
तेषां पदरजःप्राप्तुं कामयन्ते शिवादयः ॥ ४३ ॥

कदाचितत्र देवर्षिर्नारदः प्रेमगर्वितः ।
इयाय वीणां क्वणयन् भक्त्युत्पुलकविग्रहः ॥ ४४ ॥

१-१. नास्ति, रीवाँ ।

स वीक्ष्य व्रजवास्तूनां ग्राम्याणां प्रेमसंपदम् ।
तृणीकृतात्मा मुमुहे ससंभ्रममना मुनिः ॥ ४५ ॥

व्यलुठच्चिरमेतेषां पादपङ्कजरेणुषु ।
पुनःपुनःस्तुवन् गोपान् गोपीश्चानन्यमानसाः ॥ ४६ ॥

सोऽद्यापि वर्त्तते तत्र संगतो व्रजवासिभिः ।
शीलयन् प्रकृतिं तेषां परप्रेमैकरूपिणीम् ॥ ४७ ॥

कामं सन्तु सहस्रशो विधिशिवश्रीतार्क्ष्यशेषादयो
भक्ता रामपदाम्बुजप्रणयिनि स्वान्ते रतिं बिभ्रतः
या तेषां व्रजवासिनां विजयते प्रेम्णो दशात्युत्कटा
सात्यन्तं खलु दुर्ल्लभैव भुवने न क्वापि संलक्ष्यते ॥ ४८ ॥

येषां कर्णौ दृशौ जिह्वा करौ पादौ मनोऽसवः ।
सर्वं निर्मन्थनीभूतं श्रीरामचरणाम्बुजे ॥ ४९ ॥

येषां किल क्षणमपि प्रियविप्रयोगे पारे परार्द्धशतसंख्यदिनायमानम् ।
लोकानवेक्ष उत चात्मसुहृद्गृहाप्ता प्राणानपेक्ष उदमी प्रणयश्च येषाम् ॥ ५० ॥

तेषामशेषव्यवहारवर्गोऽप्यशेषलोकोत्तरयास्यरत्या[1] ।
वहत्यनैकान्त्यमिति व्रजस्था न स्वार्थकामाय कदापि मग्नाः ॥ ५१ ॥

ये कर्मतन्त्रक्रियया कुलाशया ये चाप्युपासाविधिकल्पलग्नाः ।
अव्यक्तसद्वस्त्वनुभूतये च ये क्लिष्टाशया भूरियोगादिभाजः ॥ ५२ ॥

[2]ते सर्वेऽध्यासते नैव निःकामानुगतां भुवम् ।
निर्गुणं चापि मुनयो व्रजवासिजनेतरे ॥ ५३ ॥

त एव निःकामपथेन यायिनस्तयेव वा निर्गुणात्मैकनिष्ठाः
ये प्रेमयुक्ता व्रजवासिलोकवद्धृदासुभिर्वर्ष्मभिश्चैकभावाः ॥ ५४ ॥

रामोऽपि तेभ्यो सुलभं स्वरूपं प्रकाशयत्यात्मना भक्तितुष्टः ।
नास्य प्रियः कोऽपि तदन्य ईक्ष्यते येऽनन्यभावेन भजन्ति संततम् ॥ ५५ ॥

एतद्वः कथितं विप्रास्त्रिवेदीपारगामिनः ।
न मया ज्ञानमानेन स्वयं वेत्स्य हि त त्त्वतः ॥ ५६ ॥

ब्रह्मोवाच

इत्येवं ज्ञानगोष्ठीभिर्मुनीनां चैव भूपतेः ।
जगाम ससुखं कालो वसतां प्रेमपत्तने ॥ ५७ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे महर्षिजनज्ञानगोष्ठ्यां तृतीयोऽध्यायः ॥ ३ ॥

❀

१. स्वरत्या, रीवाँ । २. ते सर्वेऽध्यासितेनैव निःकामानुगता, रीवाँ ।

चतुर्थोऽध्यायः

[ब्रह्मोवाच]

एकदा भगवान् रामः स्नातुं नयनजाजले ।
जगाम स्वेच्छया सर्वैर्मुनिभिः परिवारितः ॥ १ ॥

तमनु प्राविशन् सर्वे मुनीन्द्रा नयनोद्भवाम् ।
यावदन्तर्जले मग्ना अपश्यंस्तावदद्भुतम् ॥ २ ॥

तद्वै दिव्यं प्रमुदविपिनं भूरिकल्पद्रुमाढ्यं
चञ्चच्चिन्तामणिगणमयीं तां भुवं सुप्रकाशम् ॥
प्रेमानन्दप्रवहदुदकं सारवं सुप्रवाहं
क्रीडालोलैर्निगमनिनदैः पूरितैः राजहंसैः ॥ ३ ॥

पारे परार्द्धचन्द्रार्कपावकाभासमुज्वलम् ।
सर्वतस्तद्वनं दिव्यं चिदानन्दैकमन्दिरम् ॥ ४ ॥

तन्मध्ये मञ्जुलं कुञ्जं फुल्लवञ्जुलभूरुहम् ।
कोटियोजनविस्तीर्णं तावदेव निरीक्षितम् ॥ ५ ॥

तत्र रासरसोन्मत्तं दिव्यगोपालिकाकुलम् ।
नित्यज्ञानक्रियातन्त्रकुशलं तडिदुज्ज्वलम् ॥ ६ ॥

तासां मध्ये मञ्जुनीलोज्ज्वलाङ्गं शृङ्गारैकान्तस्फुरन्नाद्यवेषम् ।
सालङ्कारं कलिकाढ्यं तमालं सौवर्णीनां वल्लरीणामिवान्तः ॥ ७ ॥

अपश्यन् मुनयः सर्वे श्रीमन्तं रामसुन्दरम् ।
सहजानन्दिनीकान्तविस्फुरद्वामविग्रहम् ॥ ८ ॥

पशूंश्च पक्षिणश्चापि द्रुमांश्च लतिकांस्तथा ।
सर्वं चतुर्भुजाकारमपश्यन् विष्णुविग्रहम् ॥ ९ ॥

उपास्यमाना अणिमादिभूतिभिः पृथक् पृथङ्मूर्त्तिधरैश्च वेदैः ।
दिगीशवृन्दैर्मघवत्पुरोगैर्ब्रह्मादिभिश्चाप्यमितैर्लोकपालैः ॥ १० ॥

यावत्प्रमोदाटविमध्यसंस्थं नानाविधं दृश्यते वस्तु जातम् ।
तावत्समस्तं सुमहाविभूतिमन्मुनीन्द्रदृष्ट्याकलितं समन्तात् ॥

उन्मज्य च पुनः सर्वेऽप्यपश्यन् पुरतो गतम् ।
रामचन्द्रं भक्तिनम्रकन्धरं प्राकृतोपमम् ॥ १२ ॥

पुर्न्निमज्य तेऽपश्यन् हृदा संजातसंभ्रमाः ।
तथैव प्रमुदारण्यं तद्विहारिणमप्यमुम् ॥ १३ ॥

अथोन्मज्य पुनः सर्वे मुनयो विस्मिताशयाः।
अन्योन्यं मुखमैक्षन्त संस्तब्धाखिलवृत्तयः ॥ १४ ॥

किमिदं किमिदं चेति वदन्तस्तर्कवर्जिताः।
अमुमेव विनिश्चित्य तन्मूलं वाग्भिरस्तुवन् ॥ १५ ॥

मुनय ऊचुः

नित्याप्रमेयमहिमाम्बुधिविग्रहाय स्वात्मानुभूतिमहसैव विभाषिताय।
स्वाधार एव च नितान्तमधिष्ठिताय श्रीरामविश्वरमणाय नमोऽस्तु तुभ्यम् ॥ १६ ॥

यावद्ध्यशेषनिगमैर्भवतां महित्वं विस्तार्यते सकलमान्तगिरा परेश।
तत्तावतोऽप्यधिकमुल्लसति प्रकामं त्वत्तोऽन्यथा श्रुतिवचो न भवेन्निवृत्तम् ॥ १७ ॥

यच्चेतसि स्फुरति सन्ततभावनाभिस्तत्त्वं परं समुदितं विदुषां मुनीनाम्।
तस्मादयि त्वमसि राम परः परात्मा नो चेत् कृतोऽसि मनसामतिवर्त्तिसीमा ॥ १८ ॥

यत्स्वानुभूतिविभवान्तमतुच्छसौख्यं कैवल्यनाम परमं पदमामनन्ति।
तत्त्वय्यनन्तसुखधाम्नि परापरेशे साक्षात्कृते किमपि न स्पृहणीयमास्ते ॥ १९ ॥

ये त्वत्पदाम्बुतुलसीमकरन्दमिश्रसौरभ्यलाभसुखनिर्धुतसर्वकामाः।
[1]त्वन्नित्यकेलिकलनामधिगम्य तृप्तास्त्वच्चारुचित्रचरितार्णवराजहंसाः ॥ २० ॥

त्वल्लोचनान्तभरितामृतपूरमग्नदेहास्त्वदेकभजनस्पृहणीयतत्त्वाः।
द्वित्रास्त एव भुवने ननु कालमायामूर्धस्थपादकमलाः सततं जयन्ति ॥ २१ ॥

दुर्दान्तकालकवलातिगमस्तमायामोहं महामहिमभून्महनीयमुच्चैः।
स्वानन्दभोगरसिकैस्तव भक्तवर्यैरास्वाद्यमानरसमीशभवत्स्वरूपम् ॥ २२ ॥

उच्चैरवाङ्मनसगोचरमस्तनामरूपं निरन्तरमनन्तमखण्डबोधम्।
तत्त्वं सदेकमखिलेश्वर वैदिकीगीर्यद्वक्ति तत्तव विभूतितयोपसर्गम् ॥ २३ ॥

भक्त्या प्रपूजयसि विप्रवरान् वरेण्य स्वीयं निगूहयसि विश्वपते स्वरूपम्।
एतत्तवात्यधिप चित्रसमं चरित्रं दृष्ट्वा विमूढहृदयाःस्म तवावबोधे ॥ २४ ॥

कोवेत्ति राम तव को नु चिकीर्षितार्थः किंचालिखेश तव मानस तोषकारि।
आरम्भ ईश तव साधुफलानुमेयस्त्वाक्लिष्टकर्मकरणेऽभिरतं व्यनक्ति ॥ २५ ॥

याचामहे प्रणतपालक किंनु वाचा त्वामात्मधीविषयसाक्षिणमन्तरात्मन्।
औदार्यसागर तथापि भवद्गुणेन संप्रेरिता इव रतिं त्वयि भिक्षयामः ॥ २६ ॥

मुक्त्या च राम किमु नः करणीयमस्ति यानादृताधमतरैरपि मानहीना।
एतत्पुरीपरिसरे परिबम्भ्रमन्ति वीतप्रयोजनतया ननु रोरवीति ॥ २७ ॥

---

१. तन्नित्य·····गम्य तृष्णाः, रीवाँ।

अभ्यर्थनीयमिदमेव च केवलं नस्त्वत्केलिनित्यरसभाजनतां प्रयामः ।
एतादृशी रघुपते[1] रुचिता मतिर्नो भूयात्कृतेष्टहुततप्तमुखैः[2] सुकृत्यैः ॥ २८ ॥

एकापि नाथ तव संप्रणतिर्जनस्य लोके प्रभूततमसौख्यभरं करोति ।
यो नाश्वमेधमुखपुण्यसहस्रसाध्यो ज्ञात्वा तदेवमसकृत्प्रणता वयं त्वाम् ॥ २९ ॥

भूयो नताःस्म जगदेकपते भवन्तं कल्याणमन्दिरमनन्तगुणामृताब्धिम् ।
एकांशसंभवसमस्तभवप्रकाशमीदृक् सहस्रशतकोटिपरार्द्धकांशम् ॥ ३० ॥

यदृशांशेन सकलं व्याप्तमेतज्जगत्त्रयम् ।
सोऽप्यंशः पुरुषो यस्य तद्वृहत्तावकं महः ॥ ३१ ॥

परिच्छिन्नोऽपीश त्वमलमपरिच्छिन्नविभवो
निरीहोऽपि स्वेच्छाकलितनवलीलानिधिरसि ।
निराकारोऽप्यानन्दयसि परमानन्दवपुषा
क इत्थं तत्तत्वं तव किमपि वेत्तुं प्रभवति ॥ ३२ ॥

निरुपाधिदयासिन्धो लीलामृतरसाकर ।
सदसत्पर पूर्णात्मन्नित्यं राम नमोस्तु ते ॥ ३३ ॥

त्वन्नामकीर्तनोद्भुतमनन्तं सुकृतं विभो ।
न तत्सदृशतां यान्ति वाजिमेधादिकोटयः ॥ ३४ ॥

यथा यथा शुद्धयति नाथ चित्तं त्वन्नामसंकीर्तनवारिधारया ।
तथा तथा राम तव स्वरूपं भवत्यनुध्यानपथाधिरूढम् ॥ ३५ ॥

न विद्महे नाथ कुतो नु जाताधिकारिणेयं तव भक्तिगोचरा ।
श्रद्धानुभूतं ननु यत्फलं विभो त्वत्केलिधामाकलनं सुदुर्लभम् ॥ ३६ ॥

अथवा त्वत्कृपानाथ कारणं न समीहते ।
दुर्लभो योगिनां यस्त्वं सुलभोऽसि वनेचरैः ॥ ३७ ॥

ब्रह्मोवाच

इति स्तुत्वा चिरं विप्राः सरयूस्रोतसि स्थिताः ।
कर्मणा मनसा वाचा जग्मुस्तं शरणं विभुम् ॥ ३८ ॥

ततस्तद्दिनमारभ्य दृष्ट्वा लौकिकवस्तुगम् ।
विरहं बिभ्रतश्चित्ते नस्वास्थ्यं क्वापि लेभिरे ॥ ३९ ॥

तदेव धाम ध्यायन्तो यथा दृष्टं निमज्जने ।
रामं चापि तदन्तःस्थं भावयन्तः परात्परम् ॥ ४० ॥

नित्यमानन्दिनीशक्तियुक्तं सुन्दरविग्रहम् ।
तं चार्थयन्तो मनसा नित्यं तन्मयतां ययुः ॥ ४१ ॥

---

२. तव रते, मथु० । २. कृतेष्टहुतनप्रमुखैः, रीवाँ ।

कदाचिदेकान्तचरं चिदानन्दमहोनिधिम् ।
रामं संलक्ष्य मुनयो ययुस्तस्य समीपतः ॥ ४२ ॥

दण्डवत्प्रणतिं सर्वे विधायाञ्जलिपाणयः ।
तस्थुस्तत्सविधे तूष्णीं विरहार्तिदलद्धृदः ॥ ४३ ॥

तेषामभिप्रायविदा प्रभुणा स्मितशालिना ।
ऊचे वचनमानन्दि मनो मोहयता भृशम् ॥ ४४ ॥

जानाम्यहं वो विदुषां मनोगतं यूयं हि मत्संगवियोगतोदिताः ।
ते दण्डकारण्यनिवासिनो यथा द्विजाः परामेव बिभर्थं वेदनम् ॥ ४५ ॥

अहो मुनीन्द्रा मम धामचिन्मयं नित्यं परानन्दमयं मनोरमम् ।
नापक्वचित्तोर्जितवासनात्मभिर्नालुप्तकामैश्च जनैरवाप्यते ॥ ४६ ॥

नाप्राप्तविद्यैर्नचाभक्तिवित्तैर्नाप्राप्तमद्वरणैश्चापि लोकैः ।
नमत्स्वामिन्याप्यनङ्गीकृतैश्च न वा प्रारब्धावशेषप्रदिग्धैः ॥ ४७ ॥

तद्वत्सर्वं साधनं जातकल्पं जातः श्रीमत्सरयूवातपूतः ।
शेषं किंचित्साधनं यत्त्वपेक्ष्यं तदप्यशेषीभवितुं मे दृशार्हम् ॥ ४८ ॥

अङ्गीकरिष्यति हि वो मदनुग्रहेण श्रीमत्प्रमोदवनकुञ्जविहारिणी सा ।
मत्स्वामिनी विधिशिवादिसुदुर्लभान्तःसद्यप्रसादविभवा सहजाख्य शक्तिः ॥ ४९ ॥

तामाराधयतां हि वो हितजनाः श्रीमत्प्रमोदाटवी—
नित्येशीं परिणद्धमद्विषयकप्रेम्णां पराख्या रतिः ॥
भक्तिः शक्तिमती विलुप्तविविधावेषा ममार्कर्षिणी ।
प्रादुर्भावमुपैष्यति त्रिगुणसंश्लेषेण सा वर्जिता ॥ ५० ॥

ततश्च तस्यां सहजानन्दिन्यां लयमेष्यथ ।
सा मामुपेत्य सहसा लीना स्थास्यति निर्भरम् ॥ ५१ ॥

अहं स्वानन्दरूपिण्यां तस्यामेव सदारतः ।
तदा स्थास्यामात्मनयोपार्जितानन्दवारिधिः ॥ ५२ ॥

आत्मक्रीड आत्मरतिरित्यादि श्रुतिवागवैत् ।
तत्पदं परमं सूक्ष्मं सच्चिदानन्दमात्रकम् ॥ ५३ ॥

विमुक्तभेदविषयं द्वैताद्वैतविवर्जितम् ।
अनिराकारसाकारं तच्च निर्गुणसद्गुणम् ॥ ५४ ॥

विधेर्निषेधतश्चापि उभयस्मात्सदातिगम् ।
अनिर्देश्यमवाच्यं च भेदाभेदविवर्जितम् ॥ ५५ ॥

तद्वै प्रमोदवनमित्यवधारयन्ति नित्यं महोपनिषदानुभवेन चापि ।
प्राप्तुं तदैव कृपया क्वचिदीशिते च केऽपि त्वदङ्घ्रिकमलासवपूर्णकामाः ॥ ५६ ॥

क्रीडित्वाहं चिरं तत्र कालातीते परे पदे ।
पुनरुत्थाय सपदि योगीवासत्समाधितः ॥ ५७ ॥

सौषुप्तानन्दानुभवाद्यद्वच्च प्राकृतो जनः ।
चिन्तयिष्ये सकृत्सर्गं सत्यसङ्कल्पया धिया ॥ ५८ ॥

❀ तस्मिन् सृष्ट्यादिकाले वै मदिच्छामात्रनोदिताः ।
मदंशांशाश्चेतनाख्या निर्यास्यन्ति सहस्रशः ॥ ५९ ॥

चिदंशसाधूपचिताः सतापन्नोऽणुरूपिणः ।
सदंशेन जडोद्भूतिः पुनरेव भविष्यति ॥ ६० ॥

तत्तेषां भोगायतनं शरीरं व्यपदिश्यते ।
सुखं दुःखं भयं निद्रा बुद्धिरिच्छा स्मृतिर्धृतिः ॥ ६१ ॥

रजस्तमःसत्त्वभवा विकाराः प्रवर्तिष्यन्ते जगन्मूलशक्त्या ।
तेषां साक्षी सच्चिदानन्दरूपः सोऽन्तर्यामी भविता चाहमेव ॥ ६२ ॥❀

एवं त्रिधा व्यवहारो यतोऽयं जडो जीवश्चान्तरात्मेति लोके ।
तथाधिभूताध्यात्माधिदैवैस्तस्था भूयो भूर्भुवःस्वक्रमेण ॥ ६३ ॥

एवं प्रपञ्चे प्रसृते ह्यनादौ मच्छक्तिमायाविभवे मद्विनोदे ।
तत्रैवाहं मम चेत्याभिमानः संसारोऽयं जायते जीवनिष्ठः ॥ ६४ ॥

अवस्तुरूपोऽपि दृढं विलग्नोऽध्यासैकमूलश्चिदचिद्वस्तुनो वै ।
तस्योच्छित्त्यै प्रयतन्ते मुनीन्द्रातेषां नश्यन्त्येव स्युष्मादृशानाम् ॥ ६५ ॥

अहं चैवानुकम्पास्थो जीवानुद्धर्तुमादृतः ।
आविर्भावमुपैम्यद्धा लोकेऽस्मिन्प्राकृतोपमः ॥ ६६ ॥

स्वात्ममायां समाश्रित्य क्रीडन्नात्मप्रियैर्जनैः ।
तदाप्यहं भविष्यामि पुष्यानुद्धर्तुमीदृशः ॥ ६७ ॥

मन्मायाविभवे लोके यदा म्लायति धर्मधीः ।
तदैवाहं स्वरूपेण प्रादुर्भूय विभर्मि ताम् ॥ ६८ ॥

कृते विप्राः सर्व एवात्मनिष्ठा योगध्यानप्राप्तपूर्णप्रमोदाः ।
चतुष्पादो यत्र धर्मो ह्यनादिस्तं सेवन्तेऽध्यात्मविद्यां च मुक्त्यै ॥ ६९ ॥

त्रेतायां मां सर्वदेवस्वरूपं क्रियातन्त्रैर्यजमाना अजस्रम् ।
विशुद्धसत्त्वोदितबोधाः कथंचित्कल्पन्ते वै स्वस्वरूपाधिगत्यै ॥ ७० ॥

द्वापरे चावतारादिरूपेण बहुधा जनाः ।
अर्चन्ते मां हि कल्पन्ते स्वात्मबोधाय केचन ॥ ७१ ॥

❀—❀ नास्ति, रीवाँ ।

कलौ मत्कीर्तिगाथानां कीर्तनश्रवणादिभिः ।
शोधयन्तो निजात्मानं भवन्ति ज्ञानशालिनः ॥ ७२ ॥

एवं युगानुरूपैर्मां मुनीन्द्राः साधनव्रजैः ।
प्राप्नुवीन्तिः जनाकेचिन्मत्कृपापात्रतां गताः ॥ ७३ ॥

तथापि मां को नु लभेत मर्त्यो दुरन्तमायागुणजालबद्धः ।
न चेदहं कञ्चन हेतुमेत्य प्रादुर्भवामि दृशरूपयुक्तः ॥ ७४ ॥

एदद्धि मद्वपुरसंख्यगुणाकरत्वात्कल्याणकोटिफलकल्पतरुप्रतीकम् ।
आश्रित्य केऽपि कृतिनो मनसा च वाचा पारं प्रयांति भवभीषणसागरस्य ॥ ७५ ॥

यदा सारस्वतो नाम कल्पो विप्रा भविष्यति ।
तदा षड्विंशके त्रेतायुगे मां समवाप्स्यथ ॥ ७६ ॥

मुनय ऊचुः

वयमाराध्य सहजां भवतः स्वामिनीं प्रियाम् ।
तत्रैव लयमाप्स्याम इत्याज्ञप्तं त्वया प्रभो ॥ ७७ ॥

सा च त्वय्यात्मरतिगे लीना किं न भविष्यति ।
एवं चेद्वीतभेदानां कथं त्वत्प्राप्तिरस्ति नः ॥ ७७ ॥

एतन्नः संशयं राम छिन्धि त्वयि धृतात्मनाम् ।
त्वदन्यो नहि लोकेऽस्मिन् संशयस्यास्य नाशकः ॥ ७९ ॥

श्रीराम उवाच

आत्मारामस्यापि मम पृथग्घि रमणेच्छया ।
सच्चिदानन्दिनी साक्षात्सहजाविर्भविष्यति ॥ ८० ॥

एकाकिनो मे सहजाप्रियाया वाधिष्यतेऽतीव महान्वियोगः ।
तदाप्तकामत्वमयास्य चात्मारामत्वमत्याकुलतां भजिष्ये ॥ ८१ ॥

यथा कामी स्वकामिन्या विरहेणानुपीडितः ।
लभते न दिवारात्रं मनःस्वास्थ्यं कदापि हि ॥ ८२ ॥

एवं मे पूर्वजातानुभूतेः प्रियाया मे सहजाया विप्रयोगः ।
आकस्मिकः सर्वधृतिप्रमाथी प्रादुर्भविष्यत्यधिपो रसानाम् ॥ ८३ ॥

तदाहमानन्दयितुमत्यधीरमात्मानमत्याकुलितं विप्रयोगात् ।
एकोऽपि सन्नात्मनाऽखण्डरूपी द्विधा भविष्यामि न मोघभावनः ॥ ८४ ॥

ततश्च सा कोटिचन्द्रप्रकाशस्मितज्योत्स्नारुचिरास्या प्रकामम् ।
सहार्चिता नामधामस्वरूपसखीजनैर्मत्पुरतो भवित्री ॥ ८५ ॥

उपासकाश्च ये येऽस्यां लयं जग्मुः पुराभवे ।
ते ते प्रादुर्भविताः सेविष्यन्ते क्रमादिमाम् ॥ ८६ ॥

इयं च तैर्भक्तजनैः समेता सेविष्यते मां रतिकेलिपुष्पैः ।
श्रीमत्प्रमोदाटविधामराज्ञी परार्द्धलक्ष्मीर्ललितस्वरूपा ॥ ८७ ॥

एवं हि वो मुनिवर्या मदाप्तिर्भविष्यति प्रेमभक्त्या प्रकामम् ।
तावद् यूयं क्षणवत्कालमेतं मत्कीर्तनश्रवणाद्यैर्नयन्तः ॥ ८८ ॥

भजध्वं मां साधुजनप्रसंगे नित्यं हृदा मोदमानास्त्रिकालम् ।
अर्चन्तो मां तुलसीगंधपुष्पैर्धूपदीपैः स्वादुनैवेद्यभोगैः ॥ ८९ ॥

मद्भुक्तशेषं भुञ्जाना गायन्तो मां गतत्रपम् ।
एवं विशुद्धचित्ताश्चेत्सहजां सेवयिष्यथ ॥ ९० ॥

एतद्वः कथितं विप्राः साधनं च फलं महत् ।
नातः परतरं वेद्यमस्ति श्रुतिशिरःस्वपि ॥ ९१ ॥

एवमुक्त्वा मुनीन् रामो ब्रह्मज्ञान् वीतकल्मषान् ।
आवश्यकं चकाराथ विमले सारवे जले ॥ ९२ ॥

मुनयोऽपि महामोदसागरे मग्नमानसाः ।
तमेवानुभवं बुद्ध्या शीलयन्तः ससंभ्रमाः ॥ ९३ ॥

आवश्यकं विनिर्वर्त्य प्रभुदर्शननिर्वृताः ।
अनुज्ञाताश्च तेनैते स्वाश्रमान् समुपाययुः ॥ ९४ ॥

स्वयं च भगवान् रामः कृतार्थीकृत्य तान् द्विजान् ।
इयाय राजभवनं यत्र श्रीजनकात्मजा ॥ ९५ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे मुनिजनोद्धरणो नाम चतुर्थोऽध्यायः ॥ ४ ॥

●

पञ्चमोऽध्यायः

ब्रह्मोवाच

एवं स भगवांस्तस्यामयोध्यायां पुरीमणौ ।
निवसन् बुभुजे भोगान् सीतया सह निर्वृतः ॥ १ ॥

लाल्यमानो महाराजकौशल्याभ्यां दिवानिशम् ।
सेव्यमानो मुनिव्रातैः सेवमानः स्वयं च तान् ॥ २ ॥

स्वेच्छया कतिचिद्वर्षान् लीलया सोऽत्यवाहयत् ।
युवराजपदं धाम्नालंकुर्वाणोऽखिलेश्वरः ॥ ३ ॥

दिने दिने देवतानां सपर्यां मुनीन्द्राणां वरिवस्याश्च शश्वत् ।
त्रैलोक्यमानन्दयितुं च तस्य दिनेदिनेऽभून्नव उत्सवः प्रभोः ॥ ४ ॥

यद्रामणीयकममुष्य कदापि केनाप्यालोकितं तदपरे दिवसे न तत्स्यात् ।
आधिक्ययुक्तमिव नव्यतया व्यलोकि लोकोत्तराखिलगुणस्य रघूद्वहस्य ॥ ५ ॥

एवं सीता प्रिया चक्षुश्चकोरी पूर्णचन्द्रमाः ।
रेमे निरवधिक्रीड़ानन्दसंहोहसागरः ॥ ६ ॥

अलौकिकैर्लौकिकैश्च विलासैर्विश्वमोहनैः ।
स्फुटसर्वरसानन्दैर्मोदयामास जानकीम् ॥ ७ ॥

त्रैलोक्यं मोदयामासुश्चत्वारो भ्रातरो गुणैः ।
तेषां रामो विशेषेण शरण्यः शरणार्थिनाम् ॥ ८ ॥

सर्वानन्दप्रदः सर्वजनतापनिवारणः ।
सर्वत्र समदृष्टश्चैव करुणामृतसागरः ॥ ९ ॥

लक्ष्मणो भगवान्साक्षात्सर्वासुरभयप्रदः ।
सत्कालकारणीभूतः साधुमार्गप्रवर्त्तकः ॥ १० ॥

भरतो भगवान् सर्वप्रजारञ्जनशीलवान् ।
प्रजानां वृद्धिकरणः सर्वभाग्यविवर्द्धनः ॥ ११ ॥

शत्रुघ्नः सर्वसद्धर्मपालनोर्जितमानसः ।
असद्धर्मनिराशात्मा स्वभावात्साधुधर्मभृत् ॥ १२ ॥

सर्वेऽप्युदारा गंभीरा धीरा वीरा सुखप्रदाः ।
सुदर्शनाः सुवयसः सर्वसंपत्तिपोषकाः ॥ १३ ॥

ब्रह्मण्याः साधुवादैकभाजनाः साधुपालकाः ।
कल्पवृक्षस्वभावाश्च सर्वसौख्यविवर्द्धनाः ॥ १४ ॥

सुशीलाः सर्वलोकानां तापत्रयनिवारकाः ।
चित्रामितचरित्राश्च महामाना महौजसः ॥ १५ ॥

भूभारहरणोद्युक्ताः सर्वासुरभयप्रदाः ।
सतां द्विजानां देवानां धर्मस्यास्य विवर्द्धनाः ॥ १६ ॥

सीतया सहितो रामो लक्ष्मणश्चोर्मिलायुतः ।
माण्डव्या सहितो वीरो भरतश्चारुदर्शनः ॥ १७ ॥

श्रुतकीर्त्या च शत्रुघ्नः सर्वानन्दविवर्द्धनः ।
ज्योत्स्नया सहिताः सर्वे साक्षाच्चन्द्रमसो यथा ॥ १८ ॥

प्रभया सहिताः साक्षात्सूर्या इव सुतेजसः ।
स्वाहास्वधा वषट्वौषड्युक्ता हुतभुजो यथा ॥ १९ ॥

प्रद्योतिनो विशालाक्षाः विनीताः शुद्धविग्रहाः ।
सर्वाप्रधृष्टयवपुषः सर्वविद्याविभूषिताः ॥ २० ॥

सर्वशस्त्रास्त्रविद्यानां पारं प्राप्ताः सुवर्चसः ।
सुधियः सुमुखाः सूग्राः कीर्त्या कान्त्या च मण्डिताः ॥ २१ ॥

मातुः पितुर्गुरूणां च नित्यमाज्ञाभिवाञ्छकाः ।
सर्वदारिद्रदमना जगतां कामपूरणाः ॥ २२ ॥

तानुग्रवीर्यान् पुरुषप्रकाण्डान् संलक्ष्य जातांश्चतुरो वर्द्धमानान् ।
शेषोऽसुरानीकशतोपमर्दितक्ष्माभारखिन्नोपि तदोदसर्पत ॥ २३ ॥

महार्हासनसंरूढान् हारिणो हृदयङ्गमान् ।
महाराजकुमारांस्तान् विप्रो भूत्वा प्रतुष्टुवे ॥ २४ ॥

[शेषोवाच]

जयजयामितकीर्तिविवर्द्धना जनमनोरथदानविचक्षणाः
रघुकुलामलपङ्कजभानवश्चिरमुदञ्चत राजकुमारकाः ॥ २५ ॥

सुवयसां महनीयमहीभृतां भुवनसौख्यकृता जनुषैव व.[1] ।
व्यपगतोऽयमहो ह्यवनीभरो ननु करिष्यथ सच्चरितैर्मुदम् ॥ २६ ॥

त्रिभुवनाद्भुतकारि यशोनिधे जनविलोचनसार्थकताकरान् ।
सकललोकविलक्षणसौभगान् ननु नतोऽस्मि नतोऽस्मि नतोऽस्मि वः ॥२७॥

इदमनर्घ्यतमं भवतामुरःस्थलविभूषणलालसमानसः ।
परमभक्तिभरेण समर्पये सुरुचिरं मणिहारचतुष्टयम् ॥ २८ ॥

दत्तः प्रसादांस्तानेवं नत्वा नत्वा मुहुर्मुदा ।
मणिहारान्समर्प्योच्चैः शेषराजो विनिर्गतः ॥ २९ ॥

अथागमद् दिवानाथः प्रभामण्डललक्षितः ।
स्पृहणीयाकृतीनस्तौत् त्रयीमूर्तिर्मुदान्वितः ॥ ३० ॥

[सूर्य उवाच]

मत्तः साक्षात्प्रभूतं कुलमिदममलं मङ्गलं वः कुमाराः
यस्मिन् सर्वादिवैवस्वतमनुरभवत्पुत्र ऐक्ष्वाकुरस्य ॥

अन्ये मान्धातृमुख्याः सागरनहुषजाद्याश्च सर्वे प्रवीराः
पुण्यश्लोका यशोभिः किमपि भुवमिमां भूषयामासुरुच्चैः ॥ ३१ ॥

तेषां यूयं कीर्तिदाः स्वैश्चरित्रैः सौभाग्यश्रीवर्द्धना धर्मपालाः ।
सर्वैर्दोषानाविलैः सद्गुणौघैः पर्येधध्वं भूतलेऽस्मिंश्चिराय ॥ ३२ ॥

सर्वे भवन्तः पुरुषोत्तमाः स्फुटं लोकोत्तराशेषगुणौघमङ्गलाः ।
चिरञ्जयन्तु त्रिजगन्तिजप्रजासुभव्यसौभाग्यसुखैकदायिनः ॥ ३३ ॥

अपूर्वा मम वंशस्य वृद्धिर्वो जन्मना भवत् ।
अहो हि मे महद्भाग्यं कियत्केन निरूप्यताम् ॥ ३४ ॥

---

१. ० कृताजमुखैर्वचः, रीवां ।

इमानि मत्कलारूपाण्युच्चैराभरणानि वः ।
समर्पये स्वाङ्गतेजः संकोच्यैनानि वक्ष्यथ ॥ ३५ ॥

इति सम्पूज्य तपनो महाराजकुमारकान् ।
नत्वा स्तुत्वा निर्जगाम मुदोत्पुलकविग्रहः ॥ ३६ ॥

महेन्द्रः सुरवन्दीनां विमुक्त्याशोद्भवं मुदम् ।
असंवृण्वन्समेयाय प्रत्यङ्गपुलकोद्गमैः ॥ ३७ ॥

लङ्केशतनयाक्रान्तमहिमापि मुदान्वितः ।
अस्तौदस्तोभवचनो दृष्ट्वा दशरथात्मजान् ॥ ३८ ॥

जयन्तु नो भाग्यपुरः प्रकर्षान्निजेच्छया सत्कृपयावतीर्णाः ।
साक्षाद्भवन्तो भुवने शत्रुघ्नभरतलक्ष्मणरामचन्द्राः ॥ ३९ ॥
यद्ब्रह्मसद्मातिगमद्वितीयं परंप्रधानात्पुरुषाच्च[1] पूर्णम् ।
तद्धाम नित्यं विमलं विशोकं साकेतसंज्ञं परमोत्तमं वः ॥ ४० ॥

विज्ञाय भक्तौघपरावहेलनां महासुरानीककृतां कृपावशाः ।
इहावतीर्णास्त्रिजगद्भवाय कुलेऽमले दाशरथे यशस्कराः ॥ ४१ ॥

करिष्यथ द्यां नियतं महोर्जितप्रमत्तरक्षो[2]भरभाववर्जिताम् ।
स्ववीर्यतः सम्प्रति मोचयिष्यथ स्वर्लोकवन्दीन् निजचित्तदुःसहान् ॥ ४२ ॥

इमाः सदाम्लानतमाः सुगुम्फिता मुदा स्वदासीकरपल्लवाभ्याम् ।
अमन्दमन्दारतरुप्रसूनजाः स्रजः समारोपयत स्वपक्षसि ॥ ४३ ॥

इत्यभ्यर्च्य सहस्राक्षः पीत्वा तद्रूपसारघम् ।
चिरं स्तुत्वा मुहुर्लब्धप्रसादोऽगाद् दिवं प्रति ॥ ४४ ॥

ब्रह्मोवाच

एवं समस्तैस्त्रिदशैः काले काले यथोचितम् ।
निषेव्यमाणा मुमुदुर्मोदयन्तो जगत्त्रयम् ॥ ४५ ॥

यथा यथा दाशरथेः कलोदयः कृष्णेतरे पक्ष इवोडुपस्य ।
तथा तथा कोकवामेव मम्लौ लङ्काधिपोत्तंसविभूषणश्रीः ॥ ४६ ॥

श्रीरामस्य महद्वीर्यमसुरानीकदुःसहम् ।
प्रत्यहं ववृधे भूयः सतां संतोषपोषणम् ॥ ४७ ॥

अनादृत्य राज्याभिषेकं रमेशः सुराणां मुनीनां सतां मङ्गलार्थी ।
वसन्नेव पूर्णे यमादिव्रजान्तर्निजां[3]शेन यातो वनं भक्तकार्ये ॥ ४८ ॥

---

१. पुरुषार्थ०—रीवां । २. रक्षःपरिभाव—मथु०, अयो० । ३. अयो० प्रतिका पाठ खण्डित है ।

इति ते कथयिष्यामि साक्षाद्भगवतो यशः ।
नित्यं धवलितं येन स्वभासा भुवनत्रयम् ।। ४९ ।।

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे राज्याभिषेके पञ्चमोऽध्यायः ।। ५ ।।

❁

षष्ठोऽध्यायः

ब्रह्मोवाच

अथ सर्वगुणागारं त्रैलोक्यस्यानुरञ्जनम् ।
साधुसंस्तुत्यचरितं रामं राजीवलोचनम् ।। १ ।।
रमारमणकर्तारं हर्तारं त्रिदशापदाम् ।
जगदानन्दिशीलाढ्यं सर्वशस्त्रास्त्रकोविदम् ।। २ ।।
पालकं सर्वसाधूनां त्रयीधर्माभिरक्षकम् ।
नयाकरं दुर्नयघ्नमनन्तगुणमन्दिरम् ।। ३ ।।
ईतिभीतिसमूहघ्नं यक्षरक्षोभयापहम् ।
चातुर्वर्ण्यहितं देवं श्रुत्याचारामिरक्षकम् ।। ४ ।।
दुरदृष्टविनाशाय लोके दर्शनदायिनम् ।
सर्वकल्याणभवनं सर्वसौख्यविवर्द्धनम् ।। ५ ।।
लौकिकालौकिकानन्ददायिनं परमाद्भुतम् ।
राजा तंलक्ष्य मनसा मुमुदे परया मुदा ।। ६ ।।
कुलक्रमागते राज्ये प्रजासौख्यविवर्द्धने ।
अभिषेक्तुं तदा राममाचकाङ्क्ष महावयाः ।। ७ ।।
तं देवाः पुरुहूताद्या वशिष्ठाद्या महर्षयः ।
मन्त्रेषु दक्षिणाः सर्वे मन्त्रिणश्चोपतस्थिरे ।। ८ ।।
गते च भरते दूरं कैकेय्याः पितृवेश्मनि ।
सर्वैः सम्मन्त्रयाञ्चक्रे राजा रामहितैषणः (हिते रतः ?) ।। ९ ।।
सभां सुमहतीं चक्रे सहस्रस्तम्भशालिनीम् ।
मूर्त्तिमद्भिर्निधिकुलैः सर्वदा समुपासिताम् ।। १० ।।
यत्र सिंहासनं साक्षात्सूर्यमण्डलभासुरम् ।
महामणिगणोद्द्योति काञ्चनं कमलास्पदम् ।। ११ ।।

मान्धातृप्रमुखैः पूर्वमाक्रान्तं धर्मवित्तमैः ।
अधःस्फाटिकपीठेन युक्तमूर्जस्वलं महत् ॥ १२ ॥

अशेषधरणीपालमौलिमालामणित्विषा ।
नीराज्यमानपीठान्तं वन्द्यमानं कृताञ्जलिम् ॥ १३ ॥

विराजते मणिस्तम्भचतुष्कपरिमध्यगम् ।
यत्र स्थितं मर्त्यमपि साक्षाद् रामः स्वयं विशेत् ॥ १४ ॥

तस्योपरि तपद्भासा सूर्यमण्डलचण्डिमम् ।
छत्रमुद्भाति विमलं स्वयं लक्ष्म्या करे कृतम् ॥ १५ ॥

चामरे विततते चारुचञ्चच्चन्द्रांशुनिर्मले ।
विराजेते वीज्यमाने भूपालैश्छत्रवर्जितैः ॥ १६ ॥

सप्तद्वीपावनीसम्पत्सम्भारैकनिकेतनम् ।
तद् राज्यं रघुवंश्यानां राज्ञां प्रकृतिरञ्जनम् ॥ १७ ॥

न्यस्तुकामः स्वयं राजा रामे सर्वगुणाश्रये ।
मन्त्रिभिर्मन्त्रयाञ्चक्रे वानप्रस्थव्रतोन्मुखः ॥ १८ ॥

राजोवाच

शृण्वन्तु नीतिनिपुणा वृद्धाः सचिवपुङ्गवाः ।
न मेऽधुना पुत्रवतो रोचन्ते राज्यसम्पदः ॥ १९ ॥

धुरंधरेषु पुत्रेषु यस्य राज्योन्मुखी मतिः ।
न तस्य विषयासक्तिरन्तकालेऽपि नङ्क्ष्यति ॥ २० ॥

प्रजानां पालनार्थं हि राज्यं गृह्णन्ति साधवः ।
विषयाणामरत्यापि भोगस्तत्रानुषङ्गिकः ॥ २१ ॥

नहि वैषयिकं भोगमुद्दिश्य रघुवंशजाः ।
राज्यं कर्त्तुं समीहन्तेऽध्यात्मविद्याविचक्षणाः ॥ २२ ॥

चिरं जयन्तु रामाद्यास्तनयाः सूर्यवर्चसः ।
प्रजानां भाग्यसंदोहैरवतीर्णाः स्वय ह्यमी ॥ २३ ॥

रामं सर्वगुणारामं सौमित्रिरनुवर्तते ।
तथैव भरतं सौम्यः शत्रुघ्नोऽप्यनुवर्तताम् ॥ २४ ॥

रामश्च भरतश्चोभौ विभज्य सकलां भुवम् ।
नित्यं पालयतां वीरौ परस्परहिते रतौ ॥ २५ ॥

अथवा राममेवैते लक्ष्मणाद्याः सुवर्चसः ।
सन्तस्त्रयोऽनुवर्त्तन्तां पुरुषं तद्गुणा[2] इव ॥ २६ ॥

---

१. नीथं यत्–अयो० । २. सद्गुणा–अयो० ।

चत्वारोऽप्यथवा राज्यं चतुःखण्डावनीगतम् ।
अङ्गीकुर्वन्तु साधूनामनुमत्या यथोचितम् ॥ २७ ॥
एतेषु खलु पक्षेषु कतमो वोऽभिरोचते ।
तद्ब्रूत सचिवश्रेष्ठाः प्रजानां हितकाम्यया ॥ २८ ॥
राज्यं निधाय पुत्रेषु प्रजापालनकारिषु ।
मुनीनां वृत्तिमास्थाय स्थास्यामि वनगोचरः ॥ २९ ॥
स्वयं यो भगवान् रामः परमात्मा प्रियः सुहृत् ।
तस्मिन् प्रेम समास्थाय विधास्ये स्वात्मनो गतिम् ॥ ३० ॥
यस्य मे तनयः साक्षाद् रामो राजीवलोचनः ।
विश्वानन्दैकभवनं तस्य किं मे सुदुर्लभम् ॥ ३१ ॥
इत्युक्तं राजवर्येण सभायामवधार्य ते ।
मन्त्रिणः स्वगतं ध्यात्वा जगदुः सर्वमङ्गलाम् ॥ ३२ ॥
नैतवो मनुजेन्द्राणां वैवस्वतमनोः कुले ।
राजर्षीणां पवित्राणां विषयौदास्यमद्भुतम् ॥ ३३ ॥
भवन्तो ह्यखिलं वेत्थ लौकिकं चाप्यलौकिकम् ।
पूर्वं सर्वावनीराज्यहेतवे परमात्मने ॥ ३४ ॥
वंशे धुरन्धरं जातं वीक्ष्य भोगेषु निःस्पृहाः ।
वानप्रस्थोचितां वृत्तिं श्रयन्ति रघुवंशजाः ॥ ३५ ॥
दैवमेवानुकूलं वः सर्वत्र वसतां सताम् ।
गृहे वापि वने वापि क्षेमं प्राप्याधितिष्ठताम् ॥ ३६ ॥
राज्यक्षेपश्च यो राजंस्त्वया चित्ते विचारितः ।
स रामचन्द्र एवोच्चैः सर्वथा शोभतेतराम् ॥ ३७ ॥
यद् गदन्ति स्फुटं वृद्धा ना विष्णुः[1] पृथिवीपतिः ।
स रामः स्वयमेवैष ततोऽन्यः कोऽस्तु भूपतिः ॥ ३८ ॥
शोभते राम एवैतद् राज्यं भूमण्डलस्य यत् ।
तद्भुक्तिरेव चान्येषु सर्वकल्याणदायिनी ॥ ३९ ॥
त्वमिवैष स्वयंरामः पृथिवीं पालयत्वलम् ।
प्रजा भद्राणि पश्यन्तु निःसपत्ना निरीतयः ॥ ४० ॥
रामस्य भुजदण्डाभ्यां गुप्तमेतद् धरातलम् ।
सर्वसौख्यान्वितं राजन् पुनर्नवमिवास्तु च ॥ ४१ ॥
लक्ष्मणो भरतश्चैव वीरेन्द्रः शत्रुसूदनः ।
रामभक्तियुता नित्यं कर्मणा मनसा गिरा ॥ ४२ ॥

---

१. नारामः, रीवाँ, मथु० ।

एषामाचरितै राजन् प्रकटं तर्कयामहे ।
राज्यं रामेऽर्पयिष्यन्ति दीयमानमपि त्वया ॥ ४३ ॥

अतोऽभिषिच्यतां राजन् राम एव त्वया भुवः ।
पयोधिमेखलावत्या राज्यपाणिग्रहे विधौ ॥ ४४ ॥

न कनिष्ठश्च राज्यार्हो ज्येष्ठे शक्ते विराजति ।
परिवेत्तेतितं दुष्टं वयोवृद्धाः प्रचक्षते ॥ ४५ ॥

अतोऽचिरेण रामेन्दौ राज्यमेतन्निधीयताम् ।
ततस्तिष्ठ यथेच्छं त्वं वने वा गृह एव वा ॥ ४६ ॥

यौवराज्यं दधद् रामो नित्यं रञ्जितवान् प्रजाः ।
भविष्यति पुनश्चास्य राज्यं ते द्विगुणश्रियै ॥ ४७ ॥

मुनय ऊचुः

त्वया समर्पितं राज्यं रामे सर्वगुणाश्रये ।
शोभिष्यते महीपाल शशिखण्डमिवेश्वरे ॥ ४८ ॥

त्रैलोक्यमपि वीर्य्येण रामः पालयितुं क्षमः ।
आसमुद्रावनीभारं किंनोद्वोढुमसौ क्षमः ॥ ४९ ॥

न तस्य लिप्सा राजर्षे पूर्णकामस्य भुक्तिषु ।
भक्त्या जनैरर्प्यमाणानादत्ते विषयानसौ ॥ ५० ॥

सर्वोत्कृष्टतमः शक्त्या स्वाभाविकमहोनिधिः ।
समस्तावनिराज्यस्य स्वयमेवाधिकार्यसौ ॥ ५१ ॥

इति निश्चितमाकर्ण्य सर्ववर्षीयसां नृपः ।
राज्याभिषेचनं कर्तुं सर्वथैवान्वसज्जत ॥ ५२ ॥

दूरं गतेऽधिवसति भरते मातृबन्धुषु ।
रामभक्तिं विनिर्णीय राजा निःशङ्कतां दधौ ॥ ५३ ॥

सुमित्रातनयौ चापि राम एव सदा रतौ ।
लक्ष्मणश्चापि शत्रुघ्नो भ्रूसंज्ञाज्ञाकरावुभौ ॥ ५४ ॥

न रामात्परतः किंचित्प्रियं वस्तु धरातले ।
त्रयाणामपि तुल्यानां भ्रातृणां दीप्ततेजसाम् ॥ ५५ ॥

इति निश्चित्य मनसा राजा दशरथस्तदा ।
रामे राज्यभरं न्यस्य वने गन्तुमना अभूत् ॥ ५६ ॥

स पुरोधसमाहूय वशिष्ठं सर्वदर्शिनम् ।
उवाच वदतां श्रेष्ठं सर्वविश्वैकमङ्गलम् ॥ ५७ ॥

राजोवाच

भगवन् मुनिशार्दूल सर्वज्ञ तपसां निधे।
पितृपैतामहं राज्यं रामे ममभिषिच्यताम् ॥ ५८ ॥
सर्वतीर्थोदकैः स्नानं सर्वमन्त्राभिषेचितम्।
रामं विशतु राज्यश्रीः कन्या वरमिवोर्जिता ॥ ५९ ॥

दशवर्षसहस्राणि भोगान् भुक्तवतो मम।
नेदानीं विषयस्नेहस्त्यक्तुमीहे कलेवरम् ॥ ६० ॥
[1]पलितैर्धवलश्मश्रोर्दशा परिणता मम।
आरोपयति हृद्वृत्तिं श्रीरामचरणाम्बुजे ॥ ६१ ॥

अपि चानुगृहीतोऽस्मि साक्षाद्भगवता मुने।
यो मां पुत्रस्वरूपेण भजते नात्र संशयः ॥६२ ॥
भवदाद्याः सर्वदृशो वर्षीयांसो मुनीश्वराः।
राममेव विजानन्ति सर्वकारणकारणम् ॥ ६३ ॥

स्वतोऽनुग्रहकर्त्तारं रामचन्द्रं रमेश्वरम्।
यास्यामि शरणं ब्रह्मन् कृत्वा भरसमर्पणम् ॥ ६४ ॥
अतोऽभिषिच्यतां ब्रह्मन् सुमुहूर्ते रघूद्वहः।
रामचन्द्रो महाराज्ये पितृपैतामहे पदे ॥ ६५ ॥

वशिष्ठ उवाच

साधु व्यवसितं राजन् दशोचितमिदं त्वया।
सुशको ह्यैन्द्रियजयः शत्रून् जितवतस्तव ॥ ६६ ॥
साधयात्मानमव्यग्रो न्यस्य रामे परां[2] (धरा ?) धुरम्।
एष ते निखिलार्थानां निधिः प्रादुरभूत् कुले ॥ ६७ ॥

रामे जाग्रति राजर्षे सर्ववंशधुरन्धरे।
किं तेऽनुचिन्तयेदानीं राज्यगोचरयामुया ॥ ६८ ॥
न भोगाय रघूणां वो राज्यमेतत् परं भुवः।
प्रजानां पालनायैव तद् रामेण विधास्यते ॥ ६९ ॥

पूर्वमेवोदितो रामः प्रजानां तापमोक्षणे।
अलं राज्यधुरोद्वाहश्रमेण तव सुव्रत ॥ ७० ॥
अभिषेक्ष्यामि रामेन्दुं सर्वथाद्य तवाज्ञया।
प्रजानां भावुकैरेष स्वयं हि प्रकटो हरिः ॥७१ ॥

---

१. पालितैः—रीवाँ। २. धराधुरम्—यह पाठ उचित है।

निरीतयः प्रजाः सर्वाः सर्वोपद्रववर्जिताः ।
बिभ्राणे त्वयि साम्राज्यं रामे तु नितरां ततः ॥ ७२ ॥
वर्षीयांसोऽपि तरुणा आत्मनिष्ठाः शठा अपि ।
नरकार्हा अपि स्वर्गार्हा भविष्यन्ति भवे जनाः ॥ ७३ ॥
स्वयं जानासि राजेन्द्र रामचन्द्रं परात्परम् ।
अकर्त्तुमन्यथाकर्त्तुं कर्त्तुं च नियतं प्रभुम् ॥ ७४ ॥
यस्यांशांशभवा राजन् विधिविष्णुमहेश्वराः ।
स एष भगवान् रामस्तवाद्य तनयोऽभवत् ॥ ७५ ॥
अतः परं किं भाग्यं ते वर्णयाम जनाधिप ।
याह्येनं सर्वभावेन शरणं जगदीश्वरम् ॥ ७६ ॥
सर्वार्पणप्रकारेण यं सेवन्ते सदा बुधाः ।
तस्मै राज्यार्पणं कृत्वा कृतकृत्यो भव प्रभो ॥ ७७ ॥

ब्रह्मोवाच

इति श्रुत्वा मुनेर्वाक्यं प्राजापत्यस्य योगिनः ।
राज्याभिषेकसामग्रीं कारयामास सेवकैः ॥ ७८ ॥
जलान्यानाययामास सर्वतीर्थमयानि सः ।
विप्रानामन्त्रयामास ऋत्विग्वरणहेतवे ॥ ७९ ॥
महतीं कारयामास हेमरत्नाश्मनिर्मिताम् ।
शालां भूदेवदेवर्षिराजवृन्दसभोचिताम् ॥ ८० ॥
तत्र वेदीं सुमहतीं कुण्डमण्डपमण्डिताम् ।
कारयामास विधिवन्मन्त्रज्ञैर्ब्राह्मणोत्तमैः ॥ ८१ ॥
क्षत्रियानाजुहावाथ नानादिग्देशवर्त्तिनः ।
ते धनानि समादाय कोसलां सुसमाययुः ॥ ८२ ॥
गजाश्वरथपत्तीनां सम्मर्दः कोसलापुरे ।
समभूदभितो वीन्द्र गच्छतां प्रतिगच्छताम् ॥ ८३ ॥
अलंकृतं पुरं सर्वं पताकध्वजतोरणैः ।
रामं निःस्पृहमप्यन्वक् सेवितुं श्रीरिवागता ॥ ८४ ॥
एतस्मिन्नन्तरे शक्रः सर्वदेवगणैर्वृतः ।
उन्मना इव लोकेशसंसदं समुपेयिवान् ॥ ८५ ॥
प्रजापतिं नमस्कृत्य हंसासनगतं हरिः ।
उवाच कार्यं देवानां यदर्थं पूर्वमुद्यतम् ॥ ८६ ॥

---

१. इस चरण में ९ अक्षर है, जो आर्ष दृष्टि से ठीक ही हैं ।

इन्द्र उवाच

जानासि भगवन् यस्मै[1] स्वयं रामो ह्यवातरत् ।
अनादिनिधनः साक्षाद्भगवान् भास्वतः कुले ॥ ८७ ॥
त्रैलोक्यशल्यमेतद्धि रावणाख्यमनुद्धृतम् ।
सञ्जीविता न मुनयो रक्षोभिर्भक्षिताश्च ये ॥ ८८ ॥
वन्दीर्देवावरोधानां नोद्धारः स्ववीर्यतः ।
न चोद्धरान् विराधाद्यानसुरान् स्वशरैरहन् ॥ ८९ ॥
न चक्रे दण्डकारण्यं क्षेमावासं तपस्विनाम् ।
न च पञ्चवटीं तत्र मुनीनामस्थिभिर्वृताम् ॥ ९० ॥
रक्षोऽनीकशतैः शून्यं न चक्रे दक्षिणापथम् ।
न च भक्ततमान् रामो भव्यैर्योजितवान् बहून् ॥ ९१ ॥
ये तस्य दर्शनाकाङ्क्षानिरताः सुचिराज्जनाः ।
श्रुत्वा श्रुत्वा गुणान् रम्यान् बद्धात्कण्ठा वियोगिनः ॥ ९२ ॥
वियोगातुरसम्भ्रान्तहृदयाः परमातुराः ।
पुण्डरीकाक्षपद्रेणुप्राप्तिकामनया स्थिताः ॥ ९३ ॥
इहामुत्रार्थविषयाननादृत्य व्यवस्थिताः ।
रामस्नेहगुणैर्बद्धा दृढपाशोपमैश्च ये ॥ ९४ ॥
न तेषां मनसां कामाः पर्याप्ता रामवल्लभे ।
मानिनां दम्भिनां चैव न च दोषा निराकृताः ॥ ९५ ॥
न च भक्तिपथं लेभे प्रतिष्ठां सुगरीयसीम् ।
न च भक्तेषु तत्प्रीतिमधिकामविदन् जनाः ॥ ९६ ॥
न च भक्तेषु वश्यत्वं ज्ञातवन्तोऽस्य लौकिकाः ।
न चास्य विहृतिः पूर्णा सीतया सह कानने ॥ ९७ ॥
न च सार्थकतां निन्ये देवान् कपितया स्थितान् ।
न चास्य महिमा सर्वोऽप्यसाधारणतां गतः ॥ ९८ ॥
लौकिकैर्नृभिरज्ञायि दुःशका चरणादिभिः ।
न च रक्षोधिपः साकं परीवारैः क्षयं गतः ॥ ९९ ॥
न च युद्धाभिलाषोऽपि पूर्णतामगमत् प्रभोः ।
शस्त्रास्त्रशिक्षा गाधेयी प्रतिष्ठां नालभद्भुवि ॥ १०० ॥
न च मन्मनसः शल्यं मेघनादः क्षयं गतः ।
इत्याद्यनेककार्याणि कर्तव्यानि धनुर्भृता ॥ १०१ ॥

१. राम एवातरत् स्वयं—मथु० ।

न कृतानि कथं सोऽत्र पित्रा राज्येऽभिषिच्यते ।
किं तस्य जगदीशस्य कोदण्डनिवहेशितुः ।। १०२ ।।

आराध्यस्य स्वयं पूर्णब्रह्मणः परमात्मनः ।
आसमुद्रान्तधरणीराज्येन लघुना भृशम् ।। १०३ ।।

स्वाभाविकं तस्य चरित्रमद्भुतं जगत्पवित्रीकरणं सुमङ्गलम् ।
गायन्ति धातः परितो जगज्जनाः किं तस्य राज्येन समुन्नतिः परा ।। १०४ ।।

यस्य श्रिया मण्डितमेतदीक्ष्यते ज्योतिर्मयं चक्रमजस्रमम्बरे ।
यस्यांशभूतिर्ननु वैश्वतेजसी किं तस्य राज्येन परो महोदयः ।। १०५ ।।

यतोऽखिलं विश्वमिदं प्रसूयते विश्वम्भरो यश्च पिता जगत्त्रये ।
यः स्वेच्छया संहरतेऽखिलं च तत्कोऽन्योऽस्ति राजा च ततः परो जनः ।। १०६ ।।

तस्मात्तस्यैच्छिकी लीला व्याहन्येत यथा न सा ।
तथा कार्यं त्वया ब्रह्मन् किं राज्यं जगदीशितुः ।। १०७ ।।

अन्यथा त्वखिलं कार्यं देवानां प्रतिरुध्यते ।
इतीन्द्रभाषितं श्रुत्वा पद्मयोनिर्जगाद तम् ।। १०८ ।।

ब्रह्मोवाच

पुरैव चिन्तितं शक्र मयेदं प्रभुचेष्टितम् ।
तत्र विघ्नोपमंराज्यमवश्यं संनिवार्यताम् ।। १०९ ।।

मन्थरा नाम कैकेय्या दासी मन्दतमा धिया ।
तस्याः कण्ठे संनिविश्य ब्राह्मी प्रतिविधास्यति ।। ११० ।।

पुरैव राज्ञा कैकेय्यै वरयुग्मं प्रतिश्रुतम् ।
रामराज्याभिषेके तत् स्मारयिष्यति मन्थरा ।। १११ ।।

ततस्तद्वचनोद्बुद्धा कैकेयी भरतप्रसूः ।
राज्यार्थं निजपुत्रस्य रामं प्रेषयिता वने ।। ११२ ।।

दैत्यानां देवतानां च युद्धे दशरथः पुरा ।
देवपक्षस्थितोऽयुद्धद्यद् दितिजैरपरिश्रमः ।। ११३ ।।

समं पञ्च सहस्राब्दान् निद्रातन्द्राविवर्जितः ।
अजस्रबद्धतूणीरो वाणसंचारणोद्धुरः ।। ११४ ।।

तस्य दक्षकराङ्गुष्ठो धनुर्ज्याकृष्टिधारया ।
लग्नाङ्गुलित्रक्षणोऽभूत् स तेन व्यथितो भृशम् ।। ११५ ।।

मुखे निक्षिप्य कैकेय्या जिह्वोत्थामृतविन्दुभिः ।
भृशमङ्गुष्ठपर्वास्य रक्षितं शयनान्तरे ।। ११६ ।।

तेनैष सुखितः किंचिन्निद्रां निर्व्यथमाश्रितः ।
बह्वब्दजागरोद्भूतभूरिनिद्रालुनाधरः ॥ ११७ ॥
तदा तेन वरौ तस्यै प्राप्ते काले परिश्रुतौ ।
तावेव स्मारयन्ती सा मन्थरा विघ्नयिष्यति ॥ ११८ ॥
इति धातुर्वचः श्रुत्वा मुदितोऽभूत् पुरन्दरः ।
ज्ञात्वा सिद्धं देवकार्यमातिष्ठत मुरालयम् ॥ ११९ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे रामराज्याभिषेके षष्ठोऽध्यायः ॥ ६ ॥

सप्तमोऽध्यायः

ब्रह्मोवाच

अथ प्रजानां पौराणामन्तःपुरनिवासिनाम् ।
नृणां स्त्रेषां परेषां च जज्ञिरे सर्वतो गिरः ॥ १ ॥
रामराज्याभिषेकोत्थमङ्गलानन्दिचेतसाम् ।
साधुवादगिरो नृणामश्रूयन्त गृहे गृहे ॥ २ ॥

जना ऊचुः

अहो नो भाग्यसम्पत्तिः किमस्माभिः कियत्तपः ।
अकारि येन द्रक्ष्यामो रामं राजानमद्य वै ॥ ३ ॥
कुलक्रमागतं राज्यं प्राप्य रामो वहन् मुदा ।
चन्द्रमा इव विद्योतं दृशो नः सुखयिष्यति ॥ ४ ॥
येषां च बत नोऽस्माकं राजासौ जानकीपतिः ।
किमलभ्यतमं तेषां पुरुषार्थचतुष्टये ॥ ५ ॥
यद्यदिष्टतमं लोके तत्तदस्य प्रसादजम् ।
प्राप्स्यामः सुकृतेनाढ्या वयं रामेण सेश्वराः ॥ ६ ॥
श्रीरामस्य प्रियायोध्या साक्षाल्लक्ष्मीनिवासभूः ।
आनन्दनगरी चैषा वसतिर्नः परं शुभा ॥ ७ ॥
सुरनार्योऽप्यमुं द्रष्टुं कामयन्ते प्रतिक्षणम् ।
तमेनं[1] मनसा दृष्ट्वा दृशौ सफलयामहे ॥ ८ ॥

---

१. तमेनमसकृद् दृष्ट्वा—ग्रथ० ।

दधिदूर्वाक्षतकराः सनिर्मञ्छनपाणयः ।
राज्याभिषेकिनं राममद्य द्रक्ष्यामहे वयम् ॥ ९ ॥
मदच्युत्कुञ्जरगतिर्विलोलचमरालका ।
चलत्सारङ्गनयना मणिविद्रुमभाधरा ॥ १० ॥
पद्माकरमुखश्रीका राजहंसस्खलद्गतिः ।
द्वितीया जानकीवामं राज्यश्रीरद्य यास्यति ॥ ११ ॥
राज्यश्रीरमणं चैनं दृष्ट्वा दृष्ट्वा जगज्जनः ।
श्रियं मातरमासाद्य महोन्नतिमुपैष्यति ॥ १२ ॥
इत्याद्यनेकधा चित्ताभिलाषभवया गिरा ।
पुरं कोलाहलीचक्रुः पौरा हर्षितमानसाः ॥ १३ ॥
अथ प्राप्ते सुमुहूर्ते वशिष्ठः श्वोभाविन्यामभिषिक्तौ मुनीन्द्रान् ।
सन्मन्त्रविद्याकुशलानाजुहाव पूर्वं चिकीर्षुर्मण्डपस्याधिवासम् ॥ १४ ॥
ते स्वस्तिपुण्याहमुदीर्य विप्रा मन्त्रैर्महाघोषवद्भिः सुभव्यैः ।
आदौ गणेशं वरुणं वास्तुदेवं सम्पूज्य गन्धाक्षतपुष्पदीपैः ॥ १५ ॥
ततोऽधिवासयाञ्चक्रुः सर्वा मण्डपदेवताः ।
वेदीं संस्कृत्य विधिवन्महार्हमणिनिर्मिताम् ॥ १६ ॥
प्रधानदेवतां तत्र स्थापयित्वा विशेषतः ।
साङ्गोपाङ्गां सुविधिभिर्जपस्तोत्रपुरःसरम् ॥ १७ ॥
अकुर्वन्नौदकीं शान्तिं विधिदृष्टां द्विजातयः ।
अग्निं च स्थापयाञ्चक्रुरार्त्विज्यविधिवित्तमाः ॥ १८ ॥
तां निशां सुखतो निन्युर्मन्त्रघोषपुरःसरम् ।
प्रातरुत्थाय जुहुवुस्तिलाज्यैर्जातसम्भ्रमाः ॥ १९ ॥
श्रीमन्त्रनिवहैर्विप्राः कृत्वा माङ्गलिकं स्वरम् ।
ततश्च रामं संस्नाप्य [1]कुशशोभितपाणयः ॥ २० ॥
तीर्थोदकैश्च विविधैर्मन्त्रघोषपुरःसरम् ।
अथासौ मङ्गलक्षौमे परिधाय सुभूषितः ॥ २१ ॥
प्रधानदेवतां नत्वा स्थितो वेद्यां शुभासने ।
यावत्समभिषिच्येत मन्त्रैराज्याभिषेचनैः ॥ २२ ॥
तावदन्तःपुरे राज्ञ उदतिष्ठन्महाध्वनिः ।
रुदत्कैकेयराजेन्द्रतनयाश्वासनोद्भवः ॥ २३ ॥
तं निशम्य नृपो व्यग्रः स्वयं दशरथः क्षणात् ।
सभामण्डपतः सद्यः समुत्थाय ययौ गृहम् ॥ २४ ॥

१. सर्वौषधिजलेन ते—अयो०, मथु० ।

सोऽन्तःपुरचरीवक्त्रादाकर्ण्य रघुसत्तमः ।
कैकयेन्द्रसुतावृत्तं सुव्यग्रस्तामुपागमत् ॥ २५ ॥

सा पिधायाञ्चलेनास्यं रुदन्ती करुणावहम् ।
पृष्टापि नैव प्रत्यूचे राजानं धृतचण्डिमा[1] ॥ २६ ॥

अन्तस्ताप भरात्युष्मान् मुञ्चन्ती श्वाममारुतान् ।
विशुष्यदधरात्यर्थमन्तःशोकाग्निदीपिनी ॥ २७ ॥

श्वासोष्ममलिनीभूतनासामुक्तामणिद्वया ।
विकीर्णालकसंदोहरुद्धपार्श्वचरेक्षणा ॥ २८ ॥

अधोमुखी गलन्मुक्ताफलस्थूलाश्रुबिन्दुभिः ।
श्रीखण्डकुङ्कुमालेपं क्षालयन्ती स्तनद्वये ॥ २९ ॥

अनाकर्णितसम्युक्तिरार्त्तस्वरपरायणा ।
रुदन्ती करुणं दीना हृतेवात्मश्रिया मुहुः ॥ ३० ॥

उवाच नृपतिस्तां तु तादृशीं क्रोधनिर्भराम् ।
सुघोरचरितां चण्डीं विस्मृताशेषलौकिकाम् ॥ ३१ ॥

राजोवाच

रामाभिषेकसमये किमेवं रोदिषि प्रिये ।
कारणं नास्य जानामि शोकाग्नेः समुदञ्चतः ॥ ३२ ॥

वादयन्ति शुभनादानि वाद्यानि परितो गृहे ।
गायन्ति चारु गन्धर्वा वीणानिनदमिश्रितम् ॥ ३३ ॥

नृत्यन्ति नर्तकीवृन्दा मुहुर्मङ्गलगीतयः ।
मुदिता नगरी सर्वा सहर्षाः सर्वतो जनाः ॥ ३४ ॥

रामे त्रिभुवनारामे विरामेऽखिलदुर्हृदाम् ।
राज्येऽभिषिच्यमानेऽद्य हर्षितं सकलं जगत् ॥ ३५ ॥

विषीदसि त्वमेवैका कथं राजेन्द्रकन्यके ।
मलिनीकुरुषेऽकस्मात् कथमुज्ज्वलमाननम् ॥ ३६ ॥

निदानमाकस्मिकशोकवह्नेर्ज्ञातुं विशालाक्षि मुहुर्मुहुस्त्वाम् ।
पृच्छामि मूर्छन्नहमप्यमन्दशङ्कासमुद्रोर्मिविगाढचित्तः ॥ ३७ ॥

श्रुत्वा भर्त्तुर्वचश्चण्डी श्वासोच्छ्वासक्रमाकुला ।
उवाच रुदिता व्यक्तस्वरोदीरितदारुणा ॥ ३८ ॥

कैकेय्युवाच

सम्यक् त्वया कृतं राजन् मत्पुत्रः पूर्वमेव यः[2] ।
गृहान्निर्वासितः साधुरपराधविवर्जितः ॥ ३९ ॥

---

१. धृतचण्डिका—रीवाँ । २ यत्-मथु० ।

सपत्न्यास्तनयो नूनं राज्ये समभिषिच्यते ।
सर्वथा हतमानाया नाधुना जीवितं मम ॥ ४० ॥

किं नु स्थास्याम्यहं लोके सपत्न्याः पिण्डभोजिमी ।
सम्यङ्मे फलितं भाग्यं यस्या मे त्वादृशः पतिः ॥ ४१ ॥

जरया लुप्तरूपस्य लोपिता धिषणापि ते ।
सत्यं च लोपितं प्रायस्तादृग्धर्मगुरोस्तव ॥ ४२ ॥

का न्वीदृशं परिभवं भुवने सहेत सापत्न्यतुल्यविभवाप्यधिकात्सपत्नात् ।
तज्जीवितं लघुतृणीकृतमद्य हित्वा लोके मुखं मलिनकान्ति न दर्शयिष्ये ॥४३॥

सर्वथा मे गतो मानस्त्वया पत्या जनाधिप ।
तमहं [1]प्रतिपत्स्यामि त्यक्त्वापि निजजीवितम् ॥ ४४ ॥

त्वयि जीवति हे नाथ करिष्ये सर्वथा द्वयम् ।
प्रवेक्ष्यामि शुचिं दीप्तं पास्यामि गरमेव वा ॥ ४५ ॥

सहिष्येऽनादरं नैव समृद्धाद् बलवत्तरात् ।
सपत्नात्प्राप्तराज्यश्रीजातलोकसमुन्नतेः ॥ ४६ ॥

नादद्यावधि मया नाथ निकर्षः क्वापि वीक्षितः ।
समानचरुभागेन यया वीरः सुतोऽजनि ॥ ४७ ॥

भूत्वापि वीरसूः साहं प्राप्तानल्पं पराभवम् ।
दैवं न प्रतिकूलं मे प्रतिकूलः परं भवान् ॥ ४८ ॥

रामाभिषेकपटहो वादद्यन् कर्णकटुर्मम ।
प्रोषितात्मजरत्नाया रुजत्यतितरां मम ॥ ४९ ॥

कुर्वन्ति कर्णयोरेते तप्तसूचिव्यधव्यधव्यथम् ।
वीणानिनादद्विगुणा गन्धर्वनिवहस्वराः ॥ ५० ॥

मन्दिरेषु प्रतिद्वारं निबद्धास्तोरणस्रजः ।
असह्यामनलज्वालां पातयन्ति दृशोर्मम ॥ ५१ ॥

नृत्यन्त्य एता नर्त्तक्यो वज्रसङ्घातकर्कशैः ।
मनश्चरणतालैर्मे मर्दयन्ति मुहुर्मुहुः ॥ ५२ ॥

भागिनोऽस्मानतिक्रम्य सपत्नजनपक्षगाः ।
सपत्नीव मया लक्ष्मीरद्य सोढुं न शक्यते ॥ ५३ ॥

जराविलुप्तधिषणः सर्वं विस्मृतवानसि ।
देवदानवयुद्धान्ते किं नु राजन् प्रतिश्रुतम् ॥ ५४ ॥

सत्येन मारुतो वाति सत्येन तपते रविः ।
सत्येन च ज्वलत्यग्निः सत्येनेन्द्रोऽभिवर्षति ॥ ५५ ॥

---

१. प्रतिरोत्स्यामि—अयो०, मथु० ।

सत्येन च चलत्येषा भूरापः सत्यतो द्रवाः ।
सत्येन रोदसी वद्धे मृत्युर्धावति सत्यतः ॥ ५६ ॥

सत्येनैव तपस्यन्ति यजन्ते सत्यतो जनाः ।
सत्येन फलदं सर्वं सत्यं संस्मर पार्थिव ॥ ५७ ॥

यत्सत्यं राजशार्दूल भवानकथयत् पुरा ।
वरद्वयं प्रतिश्रुत्य तदिदानीं प्रयच्छ मे ॥ ५८ ॥

इत्थं प्रणोदितो राजा कैकेय्या क्रूरचित्तया ।
उवाचाभिरतः सत्ये तामङ्कार्धनिवेशिनीम् ॥ ५९ ॥

राजोवाच

उपसंहर रम्भोरु क्रोधं सापत्नभावजम् ।
यच्चिकीर्षसि चित्तेन तत्सत्येन ददाम्यहम् ॥ ६० ॥

करोमि ते प्रियं तन्वि वरौ दत्त्वा प्रतिश्रुतौ ।
न कदर्थयितव्यं ते वाष्पौघैर्लोचनद्वयम् ॥ ६१ ॥

स्मरामि सम्यक् चित्तेन यत्तुभ्यं मे प्रतिश्रुतम् ।
मा रोदीः करुणं तन्वि कैकयेन्द्रसुते वृथा ॥ ६२ ॥

एतत्तवानुचितमेवमतीववदुःखं कैकेयराजतनये किमु रोदिषीत्थम् ।
सत्ये निवद्धहृदयोऽहमशेषमेव हित्वा प्रतिश्रुतवरौ तव तन्वि दास्ये ॥ ६३ ॥

यथेच्छं मामनसूयापरं त्वं याचस्व दास्यामि यथा प्रतिश्रुतम् ।
प्राप्यान्तिमामीदृशीमप्यवस्थाममत्यवाङ्न भविष्यामि लोके ॥ ६४ ॥

इति स्फुटं साजसुतेन[1] भामिनी समीरिताश्वासनवाक्यपूर्वकम् ।
वमाण भूयश्चिरकामितौ वरौ राज्ञा प्रतिश्रुत्य चिरात्कृताङ्कुरौ[2] ॥ ६५ ॥

कैकेय्युवाच

एवं चेत्तर्हि राजेन्द्र तव स्वर्गो निरन्तरः ।
सत्यादक्षुण्णचित्तस्य नियतं हि भविष्यति ॥ ६६ ॥

अन्यथा तद्विपरीतैव गतिरित्यवधारय ।
यैः सुसंरक्षितं सत्यं प्राणादपि धनादपि ॥ ६७ ॥

तैः किं न रक्षितं लोके स्वेष्टां गतिमुपार्जितैः ।
येषां त्वन्तमितं सत्यं ते शोच्या जगतीतले ॥ ६८ ॥

प्रवासय वनं राजन् रामं प्राणसमं प्रियम् ।
एवमेको वरः सत्यं दत्तः स्यान्मे प्रतिश्रुतः ॥ ६९ ॥

---

१. राजसुतेन—रीवाँ । मा अजसुतेन – दशरथेन । २. कृतौ करौ—रीवाँ ।

द्वितीयस्तु महाराज मत्पुत्रे राज्यमर्पय ।
इत्युक्त्वा क्रूरहृदया तूष्णीमास नृपाग्रतः ॥ ७० ॥

तस्यास्तद्वचनं श्रुत्वा राजा दशरथो भृशम् ।
बाणेनेवातिवज्रेण बभूव हृदि ताडितः ॥ ७१ ॥

चिरं सम्भ्रान्तहृदयो विषण्णहृदयः क्षणात् ।
मेने प्राणाधिकं रामं वियुक्तमात्मना नृपः ॥ ७२ ॥

सत्याश्रयेण दोषेण हतश्रीरिव घूर्णितः ।
निश्चिक्रायात्मनः सोऽन्तं रौद्रतापसशापजम् ॥ ७३ ॥

यावन्धौ सुतशोकेन प्रविष्टौ ज्वलनं प्रति ।
तयोः शापस्य समयमुपस्थितमसाववैत् ॥ ७४ ॥

तथास्त्विति द्रुतमभिधाय भामिनीं निवार्यतां कुधियमसुव्ययोद्धुराम् ।
विषण्णधीर्विरहहुताशनस्य स ज्वलिष्यतः स्वतनुमवैत्पतङ्गवत् ॥ ७५ ॥

मा रोदीः पूर्णकामासि मा च त्वं जीवितं त्यज ।
भरते त्वत्सुते राज्यं रामे च वनवासनम् ॥ ७६ ॥

इत्युक्त्वा निर्गतस्तस्मात् कैकेयीभवनान्नृपः ।
तापलज्जामहोद्वेगपर्याकुलितमानसः ॥ ७७ ॥

तच्छ्रुत्वा भगवान् रामः कैकेयी हठ भाषितम् ।
राज्ञो वरार्पणं चापि मुदितोऽतितरामभूत् ॥ ७८ ॥

राज्यार्पणश्रीः सा रामे पितुः सत्याभिपालनात् ।
नाधिकं मनसः प्रीत्यै इति तूष्णीमिवाभवत् ॥ ७९ ॥

अथैकान्ते स्थितो राजा शोकोद्वेगत्रपाकुलः ।
गुरुमामन्त्रयाञ्चक्रे वशिष्ठं सर्वदर्शिनम् ॥ ८० ॥

प्राजापत्यो मुनिर्वीक्ष्य विषादविकलेन्द्रियम् ।
उवाच वदतां श्रेष्ठो राजानं बोधयन्निदम् ॥ ८१ ॥

वशिष्ठ उवाच

किं शोचसि महीपाल भाग्यं हि बलवत्तरम् ।
पुरुषो दैवनियतः पराधीनतमः किल ॥ ८२ ॥

ये भावा भाविनः पुंसः पूर्वमेव विनिर्मिताः ।
न तान् जानाति मनुजो दैवमायावशे स्थितः ॥ ८३ ॥

सुखं दुःखं व्ययो लाभो जयोऽभिभव एव च ।
दैवस्येच्छावशे भावाः कथं नान् शोचसि प्रभो ॥ ८४ ॥

जगल्लीलामयं ह्येदं परस्य परमेशितुः ।
तत्रायं स्वाभिमानेन जीवः क्लिश्यति नित्यशः ॥ ८५ ॥

कृतस्य क्रियमाणस्य संचितस्याप्यनेकधा ।
कर्मणां गतिरत्यर्थमनन्ता धरणीपते ॥ ८६ ॥

कर्मपाशशतैर्बद्धो भ्रमन्नेष उपर्यधः ।
आरघट्टघटीतुल्यो लभते विविधा गतीः ॥ ८७ ॥

देहाध्यासैकमूलानि कर्माणि विदधज्जनः ।
तेषां कर्त्तारमात्मानं मन्यमानोऽतिखिद्यते ॥ ८८ ॥

गुणैर्गुणानारभते हेतून् विविधसंसृतेः ।
गुणमय्या प्रकृत्यैष विद्वानप्यभिभूयते ॥ ८९ ॥

अहं ममेति सततं पुमान् भेदधिया हतः ।
क्रोधद्रोहेर्ष्यासूयाद्यैर्भावैर्मुह्यति तामसैः ॥ ९० ॥

समं विद्वानविद्वांश्च संसरत्यात्मनो गुणैः ।
पूर्वस्य बाधिता वृत्तिः परस्याभाति सत्यवत् ॥ ९१ ॥

महान् विशेषो विदुषो जनादविदुषो ध्रुवम् ।
ज्ञानामृतोक्षितस्तापं शमयत्यात्मनो यतः ॥ ९२ ॥

यतो गुणाः प्रवर्तन्ते भाति यस्य चिदाखिलम् ।
तमीशं सर्वकर्त्तारं शरणं गच्छ मुक्तये ॥ ९३ ॥

मायामोहमदाविष्ट श्चिरं संतप्तमानसः ।
शास्त्रीयज्ञानवान् गच्छेच्छरणं पुरुषं परम् ॥ ९४ ॥

चिरात्संभरमाणेऽग्नौ यावन्नो शान्तिमृच्छति ।
दृढपाशशतैर्बद्धस्तावन्नैवापवृज्यते ॥ ९५ ॥

विविधक्लेशभवनमल्पमात्रसुखास्पदम् ।
परिणामैकविरसं जहि संसारमात्मनः ॥ ९६ ॥

को ह्यपायानपेयस्य पुरा चीर्णस्य कर्मणः ।
फलमापतितं भुञ्जन् न खिद्येत भृशं बुधः ॥ ९७ ॥

यस्य ते सुदृढः स्नेहो यतसे यद्धिताय च ।
स एष भगवान् रामः सर्वत्र समदर्शनः ॥ ९८ ॥

स्पृहा राज्याभिषेकेऽस्य कच्चिन्नेतरलोकवत् ।
न द्वेषो वनवासे च सर्वत्र समदर्शिनः ॥ ९९ ॥

येऽस्य किंचिद्विजानन्ति स्वरूपं तत्त्वतो बुधाः ।
तेषां मानपनामादिमङ्गो नास्य कुतस्तराम् ॥ १०० ॥

को वेत्ति प्राक्तनो जन्तुरस्य किं नु चिकीर्षितम् ।
निमित्तमात्रं कैकेयी सर्वं हि कुरुते स्वयम् ॥ १०१ ॥

चिकीर्षितानुसारेण सर्वमस्यैव जायते ।
इति ज्ञात्वा न कस्यापि दोषं मनसि भावय ॥ १०२ ॥

सर्वेषां हृन्निविष्टोऽयं प्रवर्तयति कर्मसु ।
जनः स्वात्माभिमानेन केवलं बद्ध्यते भवे ॥ १०३ ॥

अमुमेव सदा चित्ते भावयन्नखिलेश्वरम् ।
सर्वकर्म समर्प्यास्मिन् निवृत्तभववेदनः ॥ १०४ ॥

विरहेऽप्यमुमेवान्तर्भजन् स्वात्मसमाधिना ।
परिक्षीणाखिलोद्वेगो ब्रह्मभूतः सुखी भव ॥ १०५ ॥

यदखण्डितमैश्वर्यमाज्ञास्थविधिशङ्करम् ।
तदेतस्याल्पकं राजन् किं नु राज्यमिदं भुवः ॥ १०६ ॥

भूभारासुरराजन्यचमूहननहेतवे ।
अवतीर्णो स्वयं साक्षाद् रामो न विदितस्तव ॥ १०७ ॥

कथं स्थास्यति रुद्धोऽयमनया राज्यसम्पदा ।
यस्य कृत्यं न पर्याप्तं धर्मसंस्थापनाभिधम् ॥ १०८ ॥

चरन् कान्तारभूमीषु पादाभ्यां पावयन् जगत् ।
हरन्नसुरयूथानि भक्तानभ्युद्धरन् भवात् ॥ १०९ ॥

करिष्यति विचित्राणि चरित्राणि महीपते ।
तन्मूलमेतत्संजातं कैकयीवाक्यकैतवात् ॥ ११० ॥

अक्लिष्टान्यस्य कर्माणि सुखदानि सतां सदा ।
इति विज्ञाय कैकेयीं न दूषयितुमर्हसि ॥ १११ ॥

इत्युक्तः पृथिवीपालो मुनिना तत्त्वदर्शिना ।
खिद्यमानोऽपि मनसा क्षणं सन्तोषमाय सः ॥ ११२ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे कैकेयीवरप्रदानो नाम सप्तमोऽध्यायः ॥ ७ ॥

अष्टमोऽध्यायः

ब्रह्मोवाच

मन्थरामन्त्रितं श्रुत्वा कैकेयी मन्दधीर्मुधा।
रामं वने प्रेषयति राज्यं कामयते सुते॥ १॥

इति कोलाहलं श्रुत्वा साकेतनगरे जनाः।
निनिन्दुर्भूरि कैकेयीमयशोभिर्मलीमसाम्॥ २॥

अहो अतीव विषमं वनं कमलकोमलः।
रामो राजकुमारोऽयं कथं गाहिष्यते जनाः॥ ३॥

जगतां प्राणरूपोऽसौ शिरीषमृदुकुमारकः।
रामः कथं नु विपिनं पद्भ्यां सेविष्यते मुहुः॥ ४॥

चतुर्दशसमा यावत्कथं वत्स्यति कानने।
रामो राज्येन्दिराभोगरसिकत्वोचितः स्वयम्॥ ५॥

कैकेयराजदुहितुर्वरमर्थयन्त्या ईदृग्विपाकविषमं विषहं विषाभम्।
तस्याः कथं नु हृदयं सहसा न दीर्णं किं वाश्मसारसमुदायमयं कठोरम्॥ ६॥

अम्भोजगर्भमृदुलासनसंस्थितेऽप्यायासमञ्चत इवात्यरुणौ यदङ्घ्री।
सैष प्रकामसुकुमारवपुर्वनान्तभूमीषु पर्यटितुमर्हति नैव रामः॥ ७॥

हंहो विधेरयमतिप्रतिकूलभाव एवंविधेऽप्यवसरेऽतुलमङ्गलाढ्ये।
एतं सुदीर्घतमशोकनिदानमेवं कैकेयजावचनमीदृशमाविरास॥ ८॥

नीचवाक्यानुरोधेन कैकेयी राज्यकन्यका।
कथं नु रामचन्द्रस्य प्रतिकूलमुपाचरत्॥ ९॥

कैकेय्या अयशोराशिः सान्द्रध्वान्तमलीमसः।
अशेषजगति व्याप्तो भविष्यति न संशयः॥ १०॥

जाया दशरथस्यैषा भरतस्य प्रसूः सती।
कथं कलङ्कयामास कैकेयी स्वात्मनो धियम्॥ ११॥

जम्बालपुञ्जरूपाणि कैकेय्या दुर्यशांसि च।
विलिप्य रोदसी नृणां लिपेयुर्हृदयान्यपि॥ १२॥

असावशुद्धिर्हृदयस्य तस्याः कथं नु जाता भरतस्य मातुः।
रामं सदा सर्वगुणाभिरामं या नैव मेहेऽखिलमङ्गलाढ्यम्॥ १३॥

गुणा दोषैरुपहताः कृतमप्यकृतं ह्यभूत्।
श्रेयांसि दुष्कृताढ्यानि व्यामोहोऽभूद् विधेरपि॥ १४॥

अहो सर्वज्ञवर्यस्य वशिष्ठस्य महात्मनः ।
आशिषां फलमासीत्किमनृतं तत्क्षणादिव ।। १५ ।।

इमानि खलु दुःखानि वव धृतान्यासुरेकतः ।
आविर्भूतानि सहसा कुतश्चैकपदे नृणाम् ।। १६ ।।

ब्रह्मोवाच

इत्थमुद्विग्नमनसां जनानामाकुला गिरः ।
उद्वेगं जनयामासुर्विदुषामपि चेतसि ।। १७ ।।

रामस्तदवधार्याथ धीरतागुणवारिधिः ।
अतीव मुदितो जातो वने क्रीडितुमुत्सुकः ।। १८ ।।

राजा दशरथश्चित्ते सोद्वेगः समभूत्क्षणात् ।
कथं नु वनवासाय रामं वक्ष्याम्यहं गिरा ।। १९ ।।

अहो मे दुष्कृतं भूरि कुतः प्रादुरभूदिदम् ।
यत्पश्यतो रामचन्द्रं मध्ये विघ्नो बभूव ह ।। २० ।।

प्रजाः किं मे नु वक्ष्यन्ति नितान्तं कठिनाशयम् ।
रामेन्दुं वनवासाय प्रेरयन्तं स्वयं गिरा ।। २१ ।।

यदाहं वचसा ब्रूयां वनवासाय सुन्दरम् ।
रामं राजीवनयनं सुकुमारं मनोहरम् ।। २२ ।।

तदा तेनैव वचसा साकं पञ्चापि मेऽसवः ।
तूर्णं कण्ठाद्विनिर्यान्तु दौहार्दसुमलीमसः ।। २३ ।।

अस्मै दुर्विधये किं नु धात्राहं जीवितश्चिरात् ।
त एव धन्या ये दुःखमभुक्त्वैव दिवं गताः ।। २४ ।।

दुःखं चापि महत्प्राप्तं सुघोरं प्राणसंकटम् ।
कथं वियुज्य रामेण जीविष्यामि जगत्यहम् ।। २५ ।।

अहो हि सा महाचण्डी केनेदं शिक्षिता जवात् ।
न जज्ञौ च कथं क्रुद्धा स्वात्मवैधव्यकारणम् ।। २६ ।।

तपस्वी विकृतः पूर्वं मया तस्य घ्नता सुतम् ।
तस्येदमतिघोरस्य कर्मणः फलमीदृशम् ।। २७ ।।

मृगया सा ममात्यन्तमीदृग्दोषावहाजनि ।
अतएव विनिन्दन्ति साधवस्तां सुदूरतः ।। २८ ।।

रामस्य कोटिविधुशीतलतागुणाढ्यमानन्दकारि वदनं सदनं रमायाः ।
सम्पश्यतो मम सुखार्णवमग्नदृष्टेरीदृङ्महोदयमुदीक्ष्य विधिर्न से हे ।। २९ ।।

रामसुन्दरमुख्यानां चतुर्णां सुखकारिणाम् ।
सुतानां मध्यतः स्थित्वानन्यसौभाग्यवानहम् ।। ३० ।।

पुरा चीर्णानि पूर्णानि तपांसि हृदि तर्कयन् ।
अखर्वगर्वताशैलो हा हतोऽस्मि विधेर्बलात् ।। ३१ ।।

इत्थं विचिन्तयन् राजा मनसा मोहसागरे ।
निर्ममज्ज भृशं विद्धः कैकेयीवाक्यशल्यभृत् ।। ३२ ।।

तं रामः सहसाऽऽगत्य लज्जाशोकभराकुलम् ।
उवाच मुदितोऽत्यन्तं स्मितयंशोभितामनः ।। ३३ ।।

श्रीराम उवाच

अहो रघूणां प्रवरस्य राजंस्तव स्वभावात्सुकृतोर्जितस्य ।
धन्यं वपुश्चैव जनुश्च नित्यं पुण्येन कीर्त्या च सुनिर्मलं बभौ ।। ३४ ।।

देशे देशे निखातास्ते ग्रामे ग्रामे पुरे पुरे ।
यूपा अनेकमखजाः शोभन्ते धरणीपते ।। ३५ ।।

समाणि नित्यमुपजीवति ते द्विजालिर्दारिद्र्यमस्तमितमत्र धनैस्त्वदीयैः ।
यज्ञेषु ते भृशमजस्रममाद्यदिन्द्रः साकं समस्तविबुधैः परिवारभूतैः ।। ३६ ।।

अभ्यर्थनां त्वयि विधाय न कोऽपि नैव लोको बभूव भुवने ननु पूर्णकामः ।
वाञ्छाधिकप्रचुरदातरि तावकीने वामेतरे जयति दोषि वृथा सुरद्रुः ।। ३७ ।।

येषां न लौकिके वस्तुन्यपेक्षा ब्रह्मदर्शिनाम् ।
तेऽपि त्वया मुनिश्रेष्ठा भक्त्यैव परितोषिताः ।। ३८ ।।

संग्रामे च त्वया तात सहायेन मरुत्वतः ।
यूथशो निहता दैत्याः शरैर्भुजजवेरितैः ।। ३९ ।।

तवोज्ज्वलेन यशसा विष्वक् त्रैलोक्यशोधिना ।
तिथयः पूर्णिमामय्यः कृतास्तात न संशयः ।। ४० ।।

जनकस्य पुरस्तात मिथिलायां गते मयि ।
यशस्त्वदीयं भगवद्विश्वामित्रमुखाच्छ्रुतम् ।। ४१ ।।

नभः पथे विमानस्था गायन्तस्त्वद्यशः सुराः ।
तृणाय हृदि मन्यन्ते सुधास्वादभवं सुखम् ।। ४२ ।।

यशसश्च प्रतापस्य भवान् निधिरभूद् भुवि ।
इति ते सफलं जन्म कृतं सत्सुकृतं त्वया ।। ४३ ।।

भगीरथ इवान्यस्त्वं ययातिरिव चापरः ।
धन्योऽसि तात धन्योऽसि किमर्थमनुशोचसि ।। ४४ ।।

यद्यत्त्वया सुकृतमर्जितमासमुद्रभूमण्डलप्रथितमिन्द्रपुरेऽपि गीतम् ।
तत्तन्न केन च भूपतिपुङ्गवेन कार्यं कृतं क्रियत एव च वा जगत्याम् ।। ४५ ।।

अपूर्णकामता तात न क्वापि तव दृश्यते ।
भाविन्यर्थे बलवति किमर्थमनुशोचसि ॥ ४६ ॥

आजन्म सत्यशीलस्य तव सूर्यकुलोद्वह ।
सत्यं यथाल्पेनार्थेन नोपहन्येत तत्कुरु ॥ ४७ ॥

अपि तात कियत्कार्यं मयि राज्याभिषेचनम् ।
भवान् यस्यानुरोधेन सत्यमप्यति [1]वर्तते ॥ ४८ ॥

न मे राज्ये स्पृहा राजन् नाहं तुष्यामि भोगतः ।
कानने वा गृहे वापि समानं मम वर्त्तनम् ॥ ४९ ॥

दीयतां भरते राज्यं पाल्यतां सत्यभाषितम् ।
मम राज्येन कैकेयी मा बिभर्त्तु रुषं हृदि ॥ ५० ॥

आहूयतां भरतो मातुलेभ्यः स शास्तुभूमिं नयधर्मनिष्ठः ।
भवान् यथेच्छं श्रयतादात्मयोगं गृहं वनं वापि समानमेव ॥ ५१ ॥

अहं तात त्वदिगरां सप्रयत्नं सत्यस्यते पालनार्थं क्षणेन ।
शिरोऽपि स्वं वीतशोकस्त्यजेयं किं नाम राज्यं भुव एतदल्पम् ॥ ५२ ॥

यथा पितुः स्वर्गपदान्निपातो भवेन्न सत्यातिक्रमाद जस्रम् ।
तथा कार्यं ननु पुत्रेण लोके विपर्या सश्चेन्न स पुत्रः सुपुत्रः ॥ ५३ ॥

भावी चार्थोऽतिबलवान् राजन्निर्दिष्ट एव ते ।
प्राजापत्येन मुनिना वशिष्ठेन [2]तपस्विना ॥ ५४ ॥

मा शुचस्त्वं हृदा तात भाव्यर्थममुमीदृशम् ।
अवधाय वने गन्तुं मामद्य क्षिप्रमादिश ॥ ५५ ॥

श्रुत्वा मुदितचित्तस्य कौसल्या नन्दनस्य सत् ।
वाक्यं सत्यकथोपेतमुवाच रघुसत्तमः ॥ ५६ ॥

राजोवाच

रामचन्द्राभिरामे त्वन्मुखचन्द्रे दृशौ मम ।
चिराय रूपलावण्यपानासक्ते बभूवतुः ॥ ५७ ॥

तं त्वां विहाय कैकेयीवागुत्थामितपातकः ।
किं न्वहं जगतीदानीं प्राणान् धारयितास्म्यहो ॥ ५८ ॥

त्वद्वियोगानलज्वालामालाकवलितायुषः ।
मम त्वया पुनर्योगः कथं राम भविष्यति ॥ ५९ ॥

त्वयि वेश्माधिवसति सत्यमुच्छिद्यते मम ।
वनं च याति रामेन्दौ प्राणोच्छित्तिर्भविष्यति ॥ ६० ॥

---

१. वर्तयेत्—मथु० । २. मनस्विना—अयो०, मथु० ।

पटेनाप्यन्तरं तात दुःसहं त्वन्मुखस्य मे ।
केवलं जीवितान्ताप वियोगस्तस्य तेऽधुना ॥ ६१ ॥

शून्यं जगदिदं राम शून्याश्च सकला दिशः ।
शून्या भूः सदनं शून्यं प्राणदेन त्वया विना ॥ ६२ ॥

स त्वं विहाय मां राम प्रस्थातास्यधुना वनम् ।
नितान्तं जीवलोके मे तमोलिप्तो भविष्यति ॥ ६३ ॥

शुभं ममेह रामत्वन्मुखचन्द्रावलोकनम् ।
स एव परमानन्दस्तदेव जनुषः फलम् ॥ ६४ ॥

तेनादय विधुरः सोऽहं न वत्स्यामि महीतले !
इति मे विप्रियं कर्त्तुं कैकेय्युदवमद् विषम् ॥ ६५ ॥

उद्वान्तगरलासादय नागीवैष्यति निर्वृतिम् ।
न शोचयति वैधव्यममर्षविकलीकृता ॥ ६६ ॥

क्व गच्छेयं किं नु कुर्यामनर्थोऽयमुपस्थितः ।
असह्यस्तव विश्लेषो मरणादपिराघव ॥ ६७ ॥

इत्यधीरहृदं रामः पितरं रघुपुङ्गवम् ।
आत्मतत्त्वोपदेशाय संक्षिप्येदमवोचत ॥ ६८ ॥

श्रीराम उवाच

कातर्यमवलम्ब्यालं चिरं विद्वन्निषेविणा ।
भवता राजशार्दूल ज्ञानैकमवलम्ब्यताम् ॥ ६९ ॥

अथ कः केन सम्बन्धः कः कस्य प्रीतिमञ्चतु ।
स्वाज्ञानरचितं विश्वं हित्वा स्वात्मानमाश्रयः ॥ ७० ॥

यावद्विगुणसम्पर्कस्तावन्नानात्वमात्मनः ।
ततश्चाहंममेत्याख्यापराधीनत्वमप्युत ॥ ७१ ॥

तावदेव भयं पुंसः परस्माद् भेदकल्पितात् ।
तच्छान्त्यै साधनानीह तावदेव वितन्वते ॥ ७२ ॥

अतः स्वात्मैकत्वधिया छिन्धि नानात्मधीतरुम् ।
सततं वीत तं कल्पो निःसङ्गः समुखं चर ॥ ७३ ॥

यावन्न ज्ञायते तात स्वात्मतत्त्वमखण्डितम् ।
तावदेव भवत्यस्य धीरनेकार्थगोचरा ॥ ७४ ॥

यान्यत्रविषयेतात तर्षा[1] (तृषा) नदयम्बुवेगिनी ।
लब्धे स्वात्मसुखे सा तु तत्क्षणादेव शाम्यति ॥ ७५ ॥

१. तृषा—पाठ भी हो सकता है ।

अन्वेष्य ज्ञानालोकेन निधिमात्मगुहागतम् ।
चिरात्प्राप्य गुरुक्त्यैनं मोदते सततं बुधः ॥ ७६ ॥

यावदानन्दसंदोहवारिधिं पूर्णमच्युतम् ।
अनन्तमात्मनमात्त्वं ज्ञात्वा किं न सुखी भवेः ॥ ७७ ॥

वीततर्षश्चिरं तिष्ठ स्वात्मानन्दपयोनिधिः ।
किमर्थं भेदधीग्लानो वृथैवं परितप्यते ॥ ७८ ॥

कृतस्य चापि तप्तस्य विज्ञातस्य च भूपते ।
एतदेव फलं सारं यत्स्वात्माभिरतिर्भवेत् ॥ ७९ ॥

कृतं च क्रियमाणं च सञ्चितं कर्म तत्क्षणात् ।
छिन्धि ज्ञानासिवेगेन संस्कारेणविशुद्धिभृत् ॥ ८० ॥

ततः प्रारब्ध शेषान्तामविद्यां जीवितावधि ।
बिभ्रदासादिताशेषपरमार्थश्चिरं जय ॥ ८१ ॥

एकं यथा ज्योतिराग्नेयमुच्चैर्दीपे दीपे वर्तियोगादनेकम् ।
एवं ब्रह्मान्तःकरणोपदिग्धं नानाभावोपगतं दृश्यतेऽद्धा ॥ ८२ ॥

अनेकानि शरीराणि प्राप्यैकः पुरुषः स्वराट् ।
भासयत्यात्मचैतन्यसमुद्भिन्नाखिलेन्द्रियः ॥ ८३ ॥

यस्तं जानाति नृपते शब्दात्स्वानुभवादपि ।
स तीर्त्वा मोहजलधिं निर्भयः किं न जायते ॥ ८४ ॥

असोढो विरहक्लेशो यस्त्वयोक्तः स्वमृत्यवे ।
सोऽप्यज्ञानदृगुद्भूतस्तन्निवृत्तो निवर्त्तते ॥ ८५ ॥

योऽत्यन्तमानन्दसमुद्र एष स्वात्मापरात्मेश्वरभेदहीनः ।
तत्रैव चारोपित एष भाति ससारनामामितमोहवृक्षः ॥ ८६ ॥

इत्थं सामान्यतोराजश्चित्तोपाधिभृतामथ ।
स्वात्मनश्चाखिलद्रष्टुर्निगूढं तत्त्वमीरितम् ॥ ८७ ॥

मयिबध्नन्तिके[1] (ये ?) प्यद्धा सर्वज्ञाः स्नेहमुत्तमम् ।
ते तरन्ति च तेनैव भवसागरमूर्जितम् ॥ ८८ ॥

न त्वहं सर्वभूतानामात्मा प्रियतमः सुहृत् ।
सखा बन्धुर्निरुपधिरस्मि तेषां प्रमोदकृत् ॥ ८९ ॥
लीलारसानन्दनिधिः कल्याणगुणभूषणः ।
शृङ्गारसारसीमा च सर्वदूषणवर्जितः ॥ ९० ॥
आत्मतन्त्रः शरीरादिजडवर्गप्रबोधकः ।
अंशांशेनधृतानेककोटिब्रह्माण्डमण्डलः ॥ ९१ ॥

---

१. यहाँ 'ये' पाठ उचित जान पड़ता है ।

सच्चिदानन्दैक वपुः सर्वभेदविवर्जितः ।
नित्येधाम्नि निजेनित्यं कालमायादयगोचरे ॥ ९२ ॥

रममाणः स्थितस्तात पूर्णाभिः स्वात्मशक्तिभिः ।
अशेषभक्तोद्धरणचरित्रनिचयान्वितः ॥ ९३ ॥

य इत्थं मामभिजानाति राजन् पुरातनं पुरुषमद्वितीयम् ।
भक्त्या समर्प्याखिलकर्मधोरणीमपेतकृत्यश्चिरमासीत मत्स्थः ॥ ९४ ॥

न लिप्यते स पापेनं न च पुण्येन कर्मणा ।
भक्त्याखिनं मां विज्ञाय विशत्याशु विविक्तदृक् ॥ ९५ ॥

तत्र भक्तिमये योगे प्रसक्तोमद्वियोगजः ।
न क्लेशाय भवेत्क्लेशस्तापोऽग्नेरिव तापदः ॥ ९६ ॥

भावयानो हृदा लीलाः सम्प्राप्य मदनुग्रहम् ।
कश्चिदेवभवेल्लोके मद्वियोगरसोचितः ॥ ९७ ॥

यावद्धि नार्त्तिरुदयत्यखिलेन्द्रियाणामस्वास्थ्य वेदनविशेषकरी समन्तात् ।
तावन्न वेत्तिदशदिक्षु मदात्मकः सन् मामेकमेव निरुपाधिकृपासमुद्रम् ॥९८॥

इति ते तत्त्वमाख्यातं मत्संयोगवियोगयोः ।
यद्विनिश्चित्य मनसा मन्मयत्वाय कल्पते ॥ ९९ ॥

ब्रह्मोवाच

बहुधा भगवान् रामः समाश्वास्य प्रयत्नतः ।
तस्मिन् क्षणे तु तं चक्रे वीतशोकं वचोऽमृतैः ॥ १०० ॥

अथोदतिष्ठत्स्मितमञ्जुला ननः प्रफुल्लपङ्केरुहचारुलोचनः ।
सौमित्रिणा संगत एष तत्क्षणे विज्ञापितस्तेन विशेषभक्तिना ॥ १०१ ॥

लक्ष्मण उवाच

अधुना किं प्रकर्त्तव्यं तदाज्ञापय मे प्रभो ।
त्वदङ्घ्रिपद्मनिष्ठस्य न मेऽन्या गतिरीक्ष्यताम् ॥ १०२ ॥

श्रीराम उवाच

भ्रातः सत्यगिरं कर्त्तुं राजानं जनकं निजम् ।
वने गन्तास्मि सपदि सन्त्यज्य भवने रतिम् ॥ १०३ ॥

अरण्यचारिणां वृत्तिमास्थितोऽब्दांश्चतुर्दश ।
स्थास्यामि वृक्षमूलेषु कन्दरासु च भूभृताम् ॥ १०४ ॥

जगदुद्वेजनमपि कैकेयीयाचितं वरम् ।
अहं पूरयिता भ्रातः साक्षात्तुल्यप्रियाप्रियः ॥ १०५ ॥

लोके सत्यप्रतिज्ञो मे नान्यथा जनको भवेत् ।
गृहेवने च वसतस्तुल्यमेव हितं मम ॥ १०६ ॥

त्वं च तिष्ठ गृहे भ्रातर्मोदयन् सुहृदः सखीन् ।
भोगांश्च भुञ्जन् विविधान् रममाणो यथोचितम् ॥ १०७ ॥

लक्ष्मण उवाच

नैवं गदितुमर्होऽसि त्वमार्यं मयि सेवके ।
यत्र त्वमसि तत्राहं वने वा भवनेऽपि वा ॥ १०८ ॥

आर्य त्वदङ्घ्रिकमलामि तमोददायिमाध्वीकपानविलसन्निखिलेन्द्रियस्य ।
को नाम भोगविभवो भुवने च यस्मै त्वां संविहाय भवनेऽभिरतिं करोमि ॥१०९॥

स एव पन्थाः प्रकटः सुपन्थाः स एव गेहश्च सुदर्शनीयः ।
वनं तदेव प्रमुदावहं च यत्र प्रभो त्वन्मुखचन्द्रदर्शनम् ॥११०॥

किं मे गृहेण नगरेण किमाप्तबन्धुजायासुहृत्सखिभिरेभिरशेषलोकैः ।
त्वामेकमन्तरसुखामृतपूरसिन्धुं लब्ध्वाहमार्य जगदेव तृणाय मन्ये ॥१११॥

यस्य प्रसंगात्सुखदानि नित्यं सर्वाणि वस्तूनि मनोरमाणि ।
अमन्दमानन्द भरं प्रपुष्णन् सर्वस्वभूतो मम कोऽपि स त्वम् ॥११२॥

एकं विहाय रघुवंशदिवामणे त्वां सर्वं ममातिविषहं जगदाविभाति ।
प्राप्तोऽस्मि तस्य तव पादसरोजयुग्ममार्यस्य राम रमयापि निषेवितस्य ॥११३॥

निधायांसे चापं कटितटनिबद्धाक्षयमहालसतूणीयुग्मः कलितकरवालोद्धुरकरः ।
पुरः पश्चात्पार्श्वे सततमुपनीतात्मवपुषा सदा त्वां सेविष्ये रघुतिलक कान्तरधरणौ ॥११४॥

कायेन मनसा वाचा मम वृत्तिरनेकधा ।
त्वां विहाय कदाप्यार्य नान्यत्र विनिमज्जतु ॥ ११५ ॥

इति कृतनिश्चयं निजपदाम्बुजबद्ध मतिं ।
सपदि स लक्ष्मणं वननिवाससहायतमम् ॥

प्रियतममाससाद निजभक्त मजस्रतं ।
तदनु स तेन सार्द्धंमगमज्जनी सविधम् ॥ ११६ ॥

असकृच्छोचयन्तीं तां वियोगार्तिविवर्द्धनम् ।
प्रवासं रामचन्द्रस्य पुत्रस्य सुमहात्मनः ॥ ११७ ॥

अकस्मान्मग्नमनसं महासंतापसागरे ।
कैकेय्या अयशोध्यान्तैर्मलीमसतमे भवे ॥ ११८ ॥

ईषदप्यात्मनो दृष्टौ प्रकाशमणुमात्रकम् ।
अपश्यन्तीं कुहूरात्रौ चक्रवाकीमिवाकुलाम् ॥ ११९ ॥

पुनः पुनर्मन्थरायाः खलत्वात् खलायमानां कैकयेन्द्रस्य पुत्रीम् ।
आवर्त्तयन्तीं मनसा जगद्धिते श्रीरामचन्द्रे प्रतिकूलमानसाम् ॥१२०॥

यथा वने विप्रवासः सुतस्य निवर्त्तते तां युक्तिमुत्थापयन्तीम् ।
सत्यव्रतं तदनुविमृश्य रामं मुहुर्महाशोकभरं वहन्तीम् ॥१२१॥

आसन्नवैधव्यविरुद्धवृत्तिभिः स्फुटाङ्गरागाम्बर भूषणादिभिः ।
न रोचमानामपि सर्वदेवतामयीं विशुद्धोर्जितसत्त्वविग्रहाम् ॥१२२॥

धर्मसम्बद्धधिषणां यशःसौरभसम्भृताम् ।
कौसल्यामात्मजननीं व्यचष्टार्यः ससम्भ्रमाम् ॥ १२३ ॥

दूरादेवानमद् रामः करद्वयकृताञ्जलिः ।
सा दीर्घायुर्भवेत्येनमाशिषा समवर्द्धयत् ॥ १२४ ॥

अथ श्रीरामजननीं सुमित्रासुत आदृतः ।
प्रणनाम स्वभावोदयत्करुणामृततोषिणीम् ॥ १२५ ॥

तमभीष्टं लभस्वेति संतोष्य परमाशिषा ।
उभावपश्यत्कौसल्या प्रीतिकातरया दृशा ॥ १२६ ॥

वनप्रवासोन्मुखचित्तमम्बा श्रीरामचन्द्रं विषहार्तिवत्या ।
दृषाधयन्ती पृथुलाश्रुविन्दुभिश्चकारविघ्नाकुलितेस्वपक्ष्मणी ॥ १२७ ॥

अथ तत्र सुमित्रापि सङ्गताभवदाकुला ।
रामस्य वनवासेन विस्मृताखिलवस्तुधीः ॥ १२८ ॥

नत्वा परमया भक्त्या सुमित्रां रामलक्ष्मणौ ।
तयोर्जनन्योः पुरतो निषण्णौ तौ यथोचितम् ॥ १२९ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे
वनगमनोद्यमनेऽष्टमोऽध्यायः ॥ ८ ॥

नवमोऽध्यायः

ब्रह्मोवाच

विषण्णां मातरं वीक्ष्य कौसल्यां सर्वदेवताम् ।
प्रबोधयञ्छुभैर्वाक्यैरुवाच रघुपुङ्गवः ॥ १ ॥

श्रीराम उवाच

कर्त्तुं सत्यगिरं तातमाजन्मवरधार्मिकम् ।
गन्ताहं काननं मातर्मा विषीदस्व चेतसा ॥ २ ॥

बाल्यादारभ्य भवती यन्मां रक्षितवत्फलम् ।
सा प्रीतिस्त्वां विना मातश्चेतो बाधिष्य ते मम ॥ ३ ॥

अवशः किमयं कुर्याद् दैवमेवाश्रयेत्तराम् ।
भाविनां हि यतोऽर्थानां प्रतीकारो न विद्यते ॥ ४ ॥

अब्दांश्चतुर्दशमितानुषित्वा वनगोचरः ।
पुनर्द्रष्टास्मि ते मातश्चरणौ मङ्गलप्रदौ ॥ ५ ॥

तवैव कृपया मातर्वनेऽपि वसतो मम ।
दुःखानि नैव हृदयं बाधिष्यन्ते महान्त्यपि ॥ ६ ॥

सुदृष्ट्या तव कल्याणदायिन्या जननि ध्रुवम् ।
कृच्छ्राण्यतितरिष्यामि पोतारूढो नदीमिव ॥ ७ ॥

अवश्यम्भाविनार्थेन मा खिद्यस्व हृदासति ।
सत्त्वमेवाश्रयेत्प्राज्ञस्तत्र शोकतमोनुदम् ॥ ८ ॥

नित्यं मोहाकृतैर्जीवैरात्मा स्वाराज्यभाजनम् ।
कदर्थीकृत्य स्वानन्दात्पातितः कर्मणां वशे ॥ ९ ॥

यथा कारयते दैवं तथा कुर्वञ्छुभाशुभम् ।
लिप्यते स पुनस्तेन नीहारेणेव भास्करः ॥ १० ॥

दृष्ट्वा मोहाभिभूतानि भूतान्युच्चावचान्यपि ।
प्राज्ञः स्वयं विरज्येत संसृतेर्घोरकर्मणः ॥ ११ ॥

कैकेयराजतनयानासूयितुमथोचिता ।
अन्यो हि प्रेरकस्तस्या अन्तरस्थो भवस्य यः ॥ १२ ॥

सा त्वं शोकं परित्यज्य भाव्यर्थं सुबृहत्तमम् ।
अजस्रमाशिषाना मां वर्त्तेथा दैवमाश्रिता ॥ १३ ॥

भरतो मे प्रियो भ्राता लप्स्यते राज्यमुत्तमम् ।
पिता मे सत्यवचनात्स्वर्गी नित्यं भविष्यति ॥ १४ ॥

कैकेयी त्वत्समामातर्ममभातृपदेस्थिता ।
सुखं प्राप्स्यति तेनैव सुतराज्यसुखार्थिनी ॥ १५ ॥

देवानां च महत्कार्यं वनेऽपि वसता मया ।
असुरानीकहननं रक्षा च जगतः स्फुटम् ॥ १६ ॥

अनेकाश्रमवास्तूनां महर्षीणां तपस्विनाम् ।
दर्शनं स्पर्शनं प्रश्नः पूजा नित्यं च सङ्गतिः ॥ १७ ॥

आशो वनफलानां च शयनं पल्लवेषु च ।
पुण्यतीर्थावगाहश्च वसतिर्मुनिवेश्मसु ॥ १८ ॥

दर्शनं पुण्यतीर्थानां वनानां फलपुष्पिणाम् ।
किमऽतोपि परं मातर्ममभूयस्तमं हितम् ॥ १९ ॥

भ्राता मे नीतिनिपुणो भरतो भक्तिसत्तमः ।
पोषको ज्ञातिबन्धूनां प्रजानां हितसाधकः ॥ २० ॥

तस्य चेद् राज्यलाभःस्यान्ममैव हितमुत्तमम् ।
कैकेय्यां त्वयि चात्यन्तं मम भेदो न कर्हिचित् ॥ २१ ॥

साचित्सुखवती लोके हितं मे किमतः परम् ।
तेषु घोरेष्वरण्येषु गिरीणां गह्वरेषु च ॥ २२ ॥

तिष्ठन्तो घोरकर्माणः प्रजावित्रासकारकाः ।
हन्येयुरसुरा नूनं वनेषु चरता मया ॥ २३ ॥
देवानां तन्महत्कार्यं हितं मे किमतः परम् ।
अधिज्यं धनुरादाय प्रतिग्रामपुराटवि ॥ २४ ॥

मया पर्यटता नित्यं रक्षितं स्यादिदं जगत् ।
अवाप्नुयुर्जनाः सौख्यं हितं मे किमतः परम् ॥ २५ ॥

महर्षयस्तीर्थपादास्तपसा धूतकल्मषाः ।
पुण्यतीर्थाश्रमजुषो द्रष्टव्याः प्रतिवासरम् ॥ २६ ॥

पूजनीयाः संविधाभिर्वन्याभिः सत्फलादिभिः ।
पृष्टव्यान् भूरि संदिग्धानर्थान् वैदिकलौकिकान् ॥ २७ ॥

निर्वृतिस्तैः सहालापाद्धितं मे किमतः परम् ।
स्नानं पुण्येषु तीर्थेषु तत्रत्यैः पुण्यमूर्तिभिः ॥ २८ ॥

दर्शनस्पर्शनालापैः संगतिः स्यादनुक्षणम् ।
तैरेव सह संवासो हितं मे किमतः परम् ॥ २९ ॥

वन्यैर्यथोपलब्धैश्च पत्रपुष्पफलादिभिः ।
मृगाणां चैव मेध्यानां लब्धैः क्षत्रियधर्मतः ॥ ३० ॥
पललैर्देवताशेषैः षष्ठे काले सु तर्पणम् ।
तपस्विभिर्द्विजैः साकं हितं मे किमतः परम् ॥ ३१ ॥
अनुजानीहि मां मातर्गमनाय वनं प्रति ।
नातः परं क्षणमपि संस्थितिर्नगरे मम ॥ ३२ ॥
पिता मे सत्यवाग् भूयात्तन्मे कार्यं सुनिश्चितम् ।
इति रामवचः श्रुत्वा कौसल्या साश्रुरब्रवीत् ॥ ३३ ॥

कौसल्योवाच

दीर्यते हृदयं वत्स मनो मे परिदह्यते ।
मुखं शुष्यति तापेन बुद्धिर्भ्रंश्यति तत्क्षणात् ॥ ३४ ॥
गलन्तीव ममाङ्गानि शोकश्च परिवर्द्धते ।
स्तम्भितुं नयनाश्रूणि न शक्नोमि सुदुःखिता ॥ ३५ ॥
ईदृशं परमं दुःखं नानुभूतिपथं गतम् ।
विधात्रा जीविता किं नु कथं नैवमृतापुरा ॥ ३६ ॥
त्वं वत्स सर्वसौख्यानां दायकः सर्वरक्षकः ।
ज्ञातिबन्धुसुहृत्प्राणजीवातुतम ईदृशः ॥ ३७ ॥
उदयं प्राप्नुवंल्लोके न सेहेऽद्य कथं तया ।
अपि नाम यदर्थे सा प्रतिकूलकरी तव ॥ ३८ ॥
सोऽपि वै भरतः श्रीमांस्त्वयि भक्त्या सदा नतः ।
अस्याः क्रूरचरित्रेण कथं संतोषमेष्यति ॥ ३९ ॥
त्वयि सर्वहिते वत्स मदमत्सरवर्जिते ।
विशुद्धहृदयेऽत्यन्तं सर्वकल्याणकारिणि ॥ ४० ॥
सर्वानुरञ्जके नित्यं जगज्जीवातुवर्ष्मणि ।
नित्यं मन्निर्विशेषेण चेतसा परिपश्यति ॥ ४१ ॥
लोके सर्वजनःप्रेमभाजने मङ्गलात्मनि ।
प्रातिकूल्येन वर्तन्तीं धिक् तां कैकेयपुत्रिकाम् ॥ ४२ ॥
धिक् तस्याः कुत्सितां बुद्धिं क्रूरां कीर्तिविरोधिनीम् ।
जगतः प्राणरूपं त्वां सहते या न दुर्भगा ॥ ४३ ॥
मन्दधीर्मन्दभाग्या च मन्थरावाक्यकारिणी ।
लोकमाङ्गल्यकालोऽपि भूरिदुःखविवर्द्धिनी ॥ ४४ ॥
सर्वलोकजनीनोऽपि कलङ्कभरवर्द्धकः ।
नापवादोऽपि वै तस्या बाधकोऽभवदद्भुतम् ॥ ४५ ॥

किं मां वक्ष्यन्ति मनुजा अस्थाने शोकवर्द्धिनीम् ।
स्वार्थं विनिहताशेषपरमार्थां सुदुर्धियम् ॥ ४६ ॥

प्रस्तोष्यन्ति कथं वा मां पुण्यशीला दयालवः ।
साधवः शुद्धहृदयाः कथयिष्यन्ति किं नु माम् ॥ ४७ ॥

इत्थं भूरिविचारेण लज्जया च विवर्जिता ।
सा जीवति जगद्दुःखहेतुभूता खलाशया ॥ ४८ ॥

धिक्[1] तस्या जीवनं लोके यात्यन्तं बहुदुःखकृत् ।
तां जुगुप्सितकर्माणमनुबध्नानि किं नृपः ॥ ४९ ॥

नेदृश्या वचनं राज्ञाप्यङ्गीकर्त्तुमिहोचितम् ।
जाने तस्यापि जरया बुद्धिर्नाशमुपागमत् ॥ ५० ॥

अनुज्ञां याचसे वत्स वनवासाय मां कथम् ।
कथं मया मुखाद्वाच्यं वनं गच्छेति दुर्वचः ॥ ५१ ॥

त्वां विना चेह वर्त्तन्त्याः किं मे जीवितमीदृशम् ।
धन्यास्त एव भुवने भाग्यवन्तः सुकर्मभिः ॥ ५२ ॥

अदृष्ट्वैव हिये दुःखं पूर्वमेव मृतिं गताः ।
तेषां लोकजनैर्दुःखं दृष्ट्वा न क्रियते घृणा ॥ ५३ ॥

त्वद्वक्त्रचन्द्रपरिदर्शनलालसाहं दूये पटान्तरगतापि वितास्यदक्षा ।
सा लोकमङ्गल चतुर्दशसंख्यवर्षान् यावत्वया विधुरिता किमु शर्म वक्ष्ये ॥ ५४ ॥

कैकेयिकारसनया किल कालसर्प दुर्दान्तयाऽवमि विषं बचनच्छलेन ।
या शेषलोकजनमानसमोहमूर्च्छाहेतुत्वमेत्य नितरां भयदाऽविरासीत् ॥५५॥

भवतोर्दीप्तमहसोःकृतविश्वप्रकाशयोः ।
नृदेवपद्मकुमुदसमुल्लासविधायिनोः ॥ ५६ ॥
शस्त्रास्त्रदीधितिगणैर्दैत्यध्वान्तविनाशिनोः ।
तामसानीकद्विषतोः सूर्याचन्द्रमसोरिव ॥ ५७ ॥

वनवासादृश्यत्वं गतयोरस्ततो यथा ।
कैकेय्या प्रावृषा नूनं जललोचनवारिदैः ॥ ५८ ॥

वर्षन्त्या वाष्पसंदोहधारासारैरखण्डितैः ।
द्रागेवैतत्त्रिभुवनं सान्धकारं भविष्यति ॥ ५९ ॥

कुहूरात्रिसमा ह्येषा भवन्तौ रामलक्ष्मणौ ।
सूर्याचन्द्रमसौ नित्यं सर्वविश्वप्रकाशकौ ॥ ६० ॥

अदर्शयन्ती कैकेयी जगच्छोभां हरिष्यति ।
जगदुद्वेगदा नित्यमकीर्तिध्वान्तमेचका ॥ ६१ ॥

---

१. धिक्कृतं जीवनम्—अयो० । धिक् तज्जीवनम्-मयु०-इस पाठ में छन्दोभंग है ।

यदर्थं मानवा लोके म्रियन्ते रणमूर्द्धनि ।
तां कीर्तिमिह कैकेयी लोपयामास किं स्वयम् ॥ ६२ ॥
इत्युक्त्वा भूरिनिःश्वस्य कौसल्या विश्वमङ्गलौ ।
निभालयन्ती चक्षुर्भ्यां प्रवत्स्यन्तौ क्षणेन तौ ॥ ६३ ॥
रुरोद करुणं देवी निमग्ना दुःखसागरे ।
कैकेयीक्रूरचारित्रजाततशोकनिमीलिता ॥ ६४ ॥
तस्या आर्त्तस्वरं श्रुत्वा वैदेही विश्वमङ्गला ।
सीता चैवोर्मिलोद्विग्ना तयाजग्मतुरुत्त्वरे ॥ ६५ ॥
अथ रामो लक्ष्मणश्च जनन्यौः शोकमीलिते ।
आश्वासया मासतुर्वै वचोभिरमृतोपमैः ॥ ६६ ॥

रामलक्ष्मणावूचतुः

अलं जनन्यौ शोकेन किं दैवं कस्यचिद्वशे ।
यथा नियुज्यते जन्तुः करोत्येष तथावशः ॥ ६७ ॥
जीवन् पश्यति भद्राणि भूरीणि भुवने जनः ।
मृतस्यास्य पुनर्नैव भविष्यति समागमः ॥ ६८ ॥
मरणं जीवनं चैव वियोगो योग एव वा ।
सुखं दुःखं लाभहानीजया वापि पराजयः ॥ ६९ ॥
सर्वं दैवेन नियतं लभते मानुषोऽवशः ।
किं तत्र शोकमोहाभ्यामात्मा केवलमात्मना ॥ ७० ॥
व्याकुलीक्रियते मूढैः शोचन्नर्थेदुरत्यये ।
ये तु ज्ञानामृतरसै रक्षन्त्यात्मानमात्मना ॥ ७१ ॥
तेषां न बाधकौ मातः शोकमोहौ भविष्यतः ।
अथो चतुर्दशैवाब्दान् प्रवासोनौ भविष्यति ॥ ७२ ॥
ततः परं तु जननि तीर्त्वा पदमनुत्तमम् ।
कृत्वा सत्यगिरा तातं स्वर्गिणं निरुपद्रवम् ॥ ७३ ॥
पुनरप्यागमिष्यावो (आगमिष्यामः ?) नगरीं भूरिमङ्गलाम् ।
भवतीं सुखयिष्यावो हृतशत्रुबलौवलात् ॥ ७४ ॥
पितृपैतामहं राज्यं करिष्यामो[1] वयं ध्रुवम् ।
मा शुचः क्षणवन्मातर्गमिष्यन्ति दिनानि ते ॥ ७५ ॥
इति विज्ञाय नात्यन्तं शोके मज्जय मानसम् ।
इत्थमाश्वास्य जननीं तौ वीरौ धैर्यसागरौ ॥ ७६ ॥
क्षौमाम्बरे समुत्तार्य बध्नतुर्वल्कलाम्बरे ।
वनवासोचितं वेशं कल्पयामासतुः क्षणात् ॥ ७७ ॥

---

१. करिष्यावः—अयो०, मथु० ।

सीतोर्मिला च तौ दृष्ट्वा प्रवत्स्यन्तौ वनं प्रति ।
स्वयमप्यन्वमज्जेनां वनयानोचितां क्रियाम् ॥ ७८ ॥

अथ रामः प्रियां दृष्ट्वा मन्वरं वाक्यमब्रवीत् ।
त्वं गृहे तिष्ठनैवासि वनवासोचिता प्रिये ॥ ७९ ॥

साक्षाद्विदेहराजस्य तनया सुखभाजनम् ।
शिरीषसुकुमाराङ्गी पद्भ्यां पद्मदलोपमा ॥ ८० ॥

क्व सा महत्यरण्यानी दर्भगर्भक्षमातता ।
क्व ते वपुः सौकुमार्यं तस्मात्त्वं तिष्ठवेश्मनि ॥ ८१ ॥

त्वं भीरुः पद्मपत्राक्षि स्वभावादेव भामिनि ।
क्व तद्वनं भयकरं सिंहव्याघ्रादिभिर्वृतम् ॥ ८२ ॥

श्वश्रूं परिचरन्तीह तस्मात्त्वं तिष्ठ वेश्मनि ।
किं नो वक्ष्यन्ति राजानो येषामन्तःपुरे स्थिताः ॥ ८३ ॥

दाराः सौख्यानि दधते पश्यन्ति न दिवाकरम् ।
वयं तु पुरुषा भीरु सर्वं कर्तुं क्षमा भुवि ॥ ८४ ॥

स्वभावादेव कठिनाः किमस्माननुवर्त्तसे ।
स्त्रीधर्माननुवर्त्तन्ती तस्मात्त्वं तिष्ठ वेश्मनि ॥ ८५ ॥

कुर्वन्तो मृगयावृत्तिं क्षत्रिया वनगोचराः ।
स्वैरं भ्रमन्ति वैदेहि न स्त्रियोऽनुव्रजन्ति तान् ॥ ८६ ॥

स्त्रीष्वेव नियतं वासः स्त्रीणामिति मतिर्मम ।
कुटुम्बमनुवर्त्तन्ती तस्मात्त्वं तिष्ठ वेश्मनि ॥ ८७ ॥

क्व तद्व्रतं सुविषमं मुनीनां वनवासिनाम् ।
कन्दमूलफलाहारं क्व च तेनापि वर्जितम् ॥ ८८ ॥

क्व च तं पद्मपत्राक्षि शिरीषमृदुविग्रहा ।
राजहंसगतिस्तन्वी तस्मात्त्वं तिष्ठ वेश्मनि ॥ ८९ ॥

मृगान् समनुधावन्तं बद्धतूणं धनुर्धरम् ।
ग्रीष्मातपे पर्यटन्तं श्राम्यन्तं शरकर्मणा ॥ ९० ॥

कठिनं बद्धनिस्त्रिंशं कथं मामनुवर्त्स्यसि ।
शिरीषादपि मृद्वङ्गी तस्मात्त्वं तिष्ठ वेश्मनि ॥ ९१ ॥

वचःकरी सदा पत्युर्बन्धुचित्तानुरञ्जिनी ।
श्वश्रूं परिचरन्ती या सा वधूः कुलदीपिनी ॥ ९२ ॥

आत्मानं स्त्रियमाज्ञाय तस्मात्त्वं तिष्ठ वेश्मनि ।
इत्युक्ता प्राणनाथेन रामेण जनकात्मजा ॥ ९३ ॥

अन्तर्विषादमलिनाननचन्द्रकान्तिर्निःश्वासधूममलिनीकृतनस्यभूषा ।
अत्याकुला भृशमसह्यवियोगतापसम्भावनाकृशतनुर्निजगाद सीता ॥ ९४ ॥

सीतोवाच

पत्यौ वने विप्रवसत्यङ्गीकृतमुनिव्रते ।
स्वयं तिष्ठन्ति भवने ता अन्या एव योषितः ॥ ९५ ॥

पत्यौ वल्कलचीरादिवनवासोचितव्रते ।
स्वयं बिभ्रति चीराणि ता अन्या एव योषितः ॥ ९६ ॥

पत्यौ वनं पर्यटति दर्भगर्भावनिस्थलम् ।
स्वयं वसन्ति सौधेषु ता अन्या एव योषितः ॥ ९७ ॥

पत्यौ शिलामधिष्ठाय वीतनिद्रे विवर्तनैः ।
उज्जागरपरे दृग्भ्यामनिवाह्य यति क्षपाः ॥ ९८ ॥

स्वयं तल्पानधिष्ठाय पद्मपत्रसुकोमलान् ।
स्वपन्ति निद्रया स्वस्थास्ता अन्या एव योषितः ॥ ९९ ॥

पत्यौ मार्गाटनश्रान्ते ताम्यति ग्रीष्मभानुना ।
छायामध्यास्य तिष्ठन्ति ता अन्या एव योषितः ॥ १०० ॥

पत्यौ भृशं परिक्लिष्टे मृद्यमाने महापदा ।
स्वयं च भुञ्जते भोगान् ता अन्या एव योषितः ॥ १०१ ॥

पत्यौ वनेषु दुर्जीवक्रूरशब्दान् विशृण्वति ।
स्वयं वीणाध्वनिरतास्ता अन्या एव योषितः ॥ १०२ ॥

अहं वैदेहराजस्य तनया युक्तचेतसः ।
समानसुखदुःखस्य तुल्यनिन्दास्तुतेर्मुनेः ॥ १०३ ॥

ममापि तादृशी वृत्तिः पत्युरेवानुरोधतः ।
भोगं दधामि नियतं न तु स्वार्थाय कर्हिचित् ॥ १०४ ॥

किं मे गृहेण किं सौख्यः किं धनेन च बन्धुभिः ।
यस्मै प्रियं तत्सकलं सद् व्रजति काननम् ॥ १०५ ॥

किं मयात्रामिवस्तव्यं भीषणेन विरोधिना ।
सर्वथैवाभिगन्तव्यं सार्थं एव न संशयः ॥ १०६ ॥

लौकिकैर्वैदिकैश्चापि विधिभिर्यत्करेकृता ।
तस्य सार्थे वनं यान्त्याः शोभा मे किमतः परम् ॥ १०७ ॥

द्रक्ष्यामि भूरितपसस्त्यक्तलोकसुखादरात् ।
मुनीनां योगिनां दारान् पर्यटन्ती शुभाश्रमान् ॥ १०८ ॥

द्रक्ष्यामि पुण्यतीर्थानि स्नान्ती पुण्यतमाः स्थलीः ।
प्राणप्रियेण संयुक्ता सुखं मे किमतः परम् ॥ १०९ ॥

तेषु तेषु मनोज्ञेषु स्थानेषु पतिसंगता ।
स्थास्यामि रक्ष्यमाणा च देवरेण मनीषिणा ॥ ११० ॥

पर्णशालाः शुभास्तास्तास्तरुपल्लवनिर्मिताः ।
काननेष्वधिनिष्ठन्ती न स्मरिष्यामि मन्दिरम् ॥ १११ ॥

इति निश्चित्य मनसा वनं गन्तुं समुत्सहे ।
अतो मे प्रियकृत्कश्चिन्न निरोधं करोत्वतः ॥ ११२ ॥

इत्युक्त्वा निश्चितं तूष्णीं वर्त्तमानां विदेहजाम् ।
उर्मिलानुजगादोच्चैः पतिमीषद्विलोक्य तम् ॥ ११३ ॥

उर्मिलोवाच

सत्यं वदसि मज्ज्येष्ठभगिनि त्वं सदेदृशी ।
पातिव्रत्यं तवातुल्यं विदितं धरणीतले ॥ ११४ ॥

पत्युः सुखं तथा दुःखं या नित्यमनुवर्त्तते ।
सैव सत्कुलजा योषित्पूज्यते दैवतैरपि ॥ ११५ ॥

यथा त्वया मनं साध्वि ममापि मतमीदृशम् ।
आवां सहैव वत्स्यावो वनेषु पति सार्थगे ॥ ११६ ॥

तत्रैव नियतो भोगस्तत्रैव च सुखं महत् ।
तत्रैव सुहृदः सर्वे गृहं तत्रैव आविनि ॥ ११७ ॥

तत्रैव भूतयः सर्वास्तत्रैवाप्ताश्च बन्धवः ।
तत्रैव दास्यो दासाश्च सख्यश्चाज्ञावशस्थिताः ॥ ११८ ॥

यत्रैव प्राणनाथेन सङ्गः स्यात्सकलेष्टदः ।
विना च तेन भगिनि शून्यमेवाखिलं जगत् ॥ ११९ ॥

अतः प्रकाशरहिते सर्वमङ्गलवर्जिते ।
गृहे न स्थेयमावाभ्यां स्वयं वदति चेद् विधिः ॥ १२० ॥

इत्युक्त्वानुगता सीतामुर्मिलाप्यन्वसज्जत ।
तां लक्ष्मणो महावीर आत्मनो धर्मचारिणीम् ॥ १२१ ॥

भ्रूसंज्ञयैव सहसा पर्यषेधन्महाव्रतः ।
सा पत्या प्रतिषिद्धान्तरतप्यत भृशं सती ॥ १२२ ॥

ततस्तां दुःखितात्मानं दीनां प्रियवचःकरीम् ।
उवाच सान्त्वनगिरा सीता शीतांशुहासिनी ॥ १२३ ॥

सीतोवाच

यथाऽऽज्ञापयते साध्वि पतिस्ते विदितव्रतः ।
तदेव कर्तुं योग्यासि स्त्रियो हि पतिदेवताः ॥ १२४ ॥

मया त्ववश्यं गन्तव्य पत्या साकं वनं प्रति।
राज्याभिषेके विघ्नोऽस्य मया साकमभूद्यतः ॥ १२५ ॥

अहमेवाभविष्यं च महिषी राज्यसम्पदि।
अहमेव भविष्यामि वनेऽपि सहचारिणी ॥ १२६ ॥

पत्या सहस्त्री नियतं भाजनं सुखदुःखयोः।
मा विषीदोर्मिले नित्यं श्वश्रूं परिचरिष्यसि ॥ १२७ ॥

माण्डव्या श्रुतिकीर्त्या च सार्धं धर्मपरायणा।
गुरुदेवार्चनरता कालं कञ्चिन्नयिष्यसि ॥ १२८ ॥

इत्युक्तासाभवत्तूष्णी पातिव्रत्यपरायणा।
गन्तुं कृतमतिः सीता प्रियस्य निहितेक्षणा ॥ १२९ ॥

ब्रह्मोवाच

अथ मातरमानम्य पादयोः रामलक्ष्मणौ।
सुमित्रां भृशमापृच्छ्य भक्तियुक्तौ प्रणेमतुः ॥ १३० ॥

तयोरनु ततः सीताश्वश्र्वाः पादप्रणामिनी।
उवाच वचनं सौम्या निमिवंशाब्धिचन्द्रिका ॥ १३१ ॥

अनुजानीहि मां श्वश्रूः पत्या निर्विशतीं वनम्।
शुभवत्या त्वया स्थेयं न नश्चिन्ताविधीयताम् ॥ १३२ ॥

कष्टं ते समनुप्राप्तं सुखकालेऽपि भाविनि।
यत्ते प्रियसुहृत्पुत्रो वियोगं समुपैष्यति ॥ १३३ ॥

कैकेय्या दुश्चरित्रेण सर्वं व्याकुलितं जगत्।
नागीव रसना चास्या उद्ववाम वचोविषम् ॥ १३४ ॥

तत्किं नु कं प्रति जनं प्रतिवाच्यमद्धा दैवं हि साधुफलति ध्रुवमय्यसाधु।
नो चेदिमौ दशरथस्य सुतौ प्रियौ च प्रेष्ठौ कथं नु वनवासविधिं लभेताम् ॥१३५॥

संततं नाम्ब कुर्वीथाश्चिन्ता जर्जरितं मनः।
चिन्ता हि ग्रसते प्राणान् जीवन्ती ईक्ष्यसे सुखम् ॥ १३६ ॥

गत[1] राजेन्द्रपुत्री सा घोरं वनमिति स्मृतिम्।
विधाय मनसः खेदं न कुर्यास्त्वं त्रिराय च[1] ॥ १३७ ॥

रामभक्तं च भरतं नान्यथा द्रष्टुमर्हसि।
स वै वीरो महाबाहुर्विनयी प्रश्रयानतः ॥ १३८ ॥

दयावान् सत्यसन्धश्च महोदारो महाधनः।
नासौ दुष्यति धर्मात्मा कैकेय्याः क्रूरकर्मणा ॥ १३९ ॥

---

१. १. नास्ति—बड़ो० ।

इत्युक्त्वा वाष्पपूर्णाक्षीश्वश्वा अङ्घ्री पुनः पुनः ।
वाष्पैः प्रक्षालयाञ्चक्रे तस्याः स्नेहेन मोहिता ॥ १४० ॥

पुनरूचे समुत्थाय श्रीमती जनकात्मजा ।
मोहेन वा प्रमादेन बालया चाविनीतया ॥ १४१ ॥

अपराद्धं मया किंचित् कदाचिद् यदि भाविनि ।
तत्क्षन्तुमर्हसि हृदा त्वं सदा करुणावती ॥ १४२ ॥

वनेऽपि निवसन्त्या मे कृपया तव सुव्रते ।
भविष्यति सुखं नित्यं सुभगाभ्यां निरन्तरम् ॥ १४३ ॥

आभ्यां संरक्ष्यमाणायाः किं मे कष्टं वने भवेत् ।
गृहं शून्यतमं भाति विनाऽऽभ्यां भूरिकण्टकम् ॥ १४४ ॥

कैकेयी कुरुतां राज्यं तत्सुतो भरतोऽपि वा ।
वयं वने निवत्स्यामो नाभ्यसूयात्र चेतसः ॥ १४५ ॥

इत्युक्ता सीतया देव्या प्रवत्स्यन्त्या वनं प्रति ।
शोकसागरनिर्मग्ना कौसल्या पुनरब्रवीत् ॥ १४६ ॥

हा हतास्मि चिरं सीते कैकेय्या वचसा भृशम् ।
या मां वियोजयामास पुत्रेण स्तुषयापि च ॥ १४७ ॥

रामः सर्वगुणारामः सर्वशास्त्रार्थवित्तमः ।
सर्वलोकानुरागैकभाजनं यशसां निधिः ॥ १४८ ॥

अनसूयापरो नित्यं धर्मात्मा सर्वसम्मतः ।
प्राणाधिकश्च सर्वेषां कैकेय्या नैव सह्यते ॥ १४९ ॥

अपराद्धं किं नु तस्यास्तादृक् पिशुनकर्मणः ।
रामेण मम पुत्रेण निर्विशेषधियाचमत् ॥ १५० ॥

सर्वलोकानुरक्तेन सर्वप्राणप्रियेण च ।
न यद्यपि विशेषोऽस्य वने वा गृह एव वा ॥ १५१ ॥

अहं तु दीर्घशोकार्ता मरिष्ये तदृतं विना ।
वियुक्ता निजवत्सेन गौरिव बलेशपीडिता ॥ १५२ ॥

नूनं कैकेयि ते नष्टः परलोकः कुकर्मणा ।
इह चाकीर्तिसंदोहमलिना त्वं बभूव ह ॥ १५३ ॥

रघूणां त्वं कुलवधूर्जननी भरतस्य च ।
कैकेयि कथमेवासि प्राप्ता दुर्बुद्धिमीदृशीम् ॥ १५४ ॥

भवत्यापकृता नूनमहमेव न केवलम् ।
सर्वेषामेव लोकानां त्वया ननु हृतं सुखम् ॥ १५५ ॥

विलपन्त्य स कृन् पौराः सस्त्रीपुत्रकुटुम्बकाः।
येषां प्राणप्रियो रामस्त्वया सम्प्रेषितो वनम् ॥ १५६ ॥

सौजन्यं रामचन्द्रस्य गायन्ति भुवनत्रये।
तत्रैवाकीर्तिसंदोहं तव कैकेयि निर्भरम् ॥ १५७ ॥

विनापराधं कैकेयि दण्डयन्त्याः सुदारुणम्।
विना वैरं च सुजनं जिघांसन्त्या भृशं तव ॥ १५८ ॥

स्वभाव एव दुष्टोऽयं दुश्चरित्रोपबृंहितः।
मातुः स्तनं प्रपिबतो वत्सानाच्छिद्य रुन्धसि ॥ १५९ ॥

स्वैरं तृणं भक्षयन्तीं गां च भूयोऽनुकर्षसि।
दौर्जन्यमेकतश्चास्तां त्वया पापं न गण्यते ॥ १६० ॥

इत्याद्यनेकमाक्रोश्य कौसल्या दीनमानसा।
अरोदीत्करुणं भूयो वीक्षमाणा सुताननम् ॥ १६१ ॥

तामाह राम आश्वास्य लक्ष्मणश्च महामनाः।
मा रोदीः करुणं मातर्मा च भर्त्सय केकयीम् ॥ १६२ ॥

मा च शोकातुरं चित्तं कुरुष्वार्थेन भाविना।
दैवमेवाश्रयतरां धीरा भव महाशये ॥ १६३ ॥

इत्यावेद्य विनिर्यातो राजाज्ञामनुयाचितुम्।
रामो लक्ष्मणमाहेदं भृशं मुदितमानसः ॥ १६४ ॥

श्रीराम उवाच

अनुजानीहि मां तात गच्छामि मुदितो वनम्।
भवान् सत्यवचा भूपाः कैकेयी सुखमृच्छतु ॥ १६५ ॥

गृहं वनं च मे तुल्यमप्रमादेन वास्तवे।
त्रिवर्गपालने तुल्ये प्रीये धर्मेण केवलम् ॥ १६६ ॥

नीतिरेव मनस्तुष्ट्यै न राज्यवहनाद्धरः।
स्वभावसिद्धमेतन्मे न यशांसि न वा गुणाः ॥ १६७ ॥

मा विषीद त तश्चित्ते भरते राज्यमर्पय।
नीतिमान् स हि धर्मज्ञः प्रजापालनयत्नवान् ॥ १६८ ॥

निर्दोषगुणसंदोहसंश्रयः शास्त्रवित्तमः।
प्रजानां रञ्जनश्चैव सर्वेषां दुःखनाशकः ॥ १६९ ॥

ममापि प्रेमविषयः प्राणादप्यधिकश्च मे।
न स्वात्मभोगाय गृही धर्मायैव च संयतः ॥ १७० ॥

स पालयिष्यति भुवं प्रकृतिं रञ्जयिष्यति।
[1]पालयिष्यति वै राज्यं धर्मायैव न मुक्तये[1]।
इत्यालप्य स्थिते रामे भक्तिसंनतकंधरे॥ १७१॥
उवाच राजा दीनात्मा रामविश्लेषकातरः।
प्रभूतप्रेमसंजातकण्ठगद्गदिताक्षरः॥ १७२॥

राजोवाच

धिङ्मां दुर्दैवनिहतं संरूढदुरिताङ्कुरम्।
कैकेय्या दुष्टतमया वार्द्धकं लघुतां गतम्॥ १७३॥
मलीमसानि पापेन पलितानि कृतानि मे।
ईदृग्दशां दृशा द्रष्टुं विधिना जीवितः किमु॥ १७४॥
कथं न्वहं सहिष्यामि विरहं तव सम्प्रति।
नूनं श्रोष्यसि मां वत्स धर्मराजपुरातिथिम्॥ १७५॥
त्वादृशं नीतिभवनं सर्वभूतिनिकेतनम्।
नयनानन्ददं पुत्रं रघुवंशयशोनिधिम्॥ १७६॥
प्रवास्य घोरं विपिनमपराधविवर्जितम्।
नूनं नरकवासस्य गमिष्याम्यधिकारिताम्॥ १७७॥
बोध्यमानापि कैकेयी वचो न मम मन्यते।
दुर्दैवेनाभिपन्नस्य जाया मे दुर्मतिं गता॥ १७८॥
प्रतिकूले विधौ सर्वं प्रतिकूलं बभूव मे।
भुक्त्वा सुखानि भूरीणि परिणामेऽस्मि दुःखितः॥ १७९॥
राजीवलोचनं स्निग्धं त्वादृशं प्राणसम्मितम्।
अपश्यतः सुतं शूरं धर्मिष्ठं दानकोविदम्॥ १८०॥
महाघोरेण तमसा दृशौ मे परिनङ्क्ष्यतः।
द्रक्ष्यामि लग्नदावाग्निदीप्यमाना दिशोदश॥ १८१॥
हा वत्स मां परित्यज्य वनं गन्तुं सुसंयतः।
इदानीं मे दृशौ दग्धे त्वद्वियोगादरिन्दम॥ १८२॥
कदा नु मन्मनस्तुष्ट्यै भविता तवदर्शनम्।
अथवा मृत एवाहं क्व नु ते दर्शनं विभो॥ १८३॥
इति मुह्यन्तमाज्ञाय पितरं रघुवंशजम्।
दर्शयामास परमं स्वं धाम जगदीश्वरः॥ १८४॥
ददौ दिव्यां दृशं तस्मै गुणसङ्गविवर्जिताम्।
रामस्य परमं धाम यया पश्यन्ति सूरयः॥ १८५॥

---

१. १. नास्ति—मधु०, बड़ो।

ततः स परमया भक्त्या प्रमोदविपिनं तु वै ।
अपश्यत्सर्वतो व्याप्तं सत्यं ज्ञानमनन्तकम् ।। १८६ ।।

तत्रायोध्यापुरीं दिव्यां दिव्यकाञ्चनभूमिगाम् ।
रत्नप्राकारमध्यस्थां कल्पद्रुमवनावृताम् ।। १८७ ।।

प्रेमामृतप्रवाहाढ्यसरयूतीरसंश्रिताम् ।
परमानन्दसंदोहमयीं कौतूहलान्वितम् ।। १८८ ।।

दिव्यपार्षदसंदोहसंकुलां सुमहोत्सवाम् ।
मणिस्तम्भशताकीर्णे तत्र प्रासाद उत्तमे ।। १८९ ।।

दिव्यसिंहासनासीनमपश्यत्परमोत्सवम् ।
आत्मानं परमानन्दं सर्वमङ्गलभाजनम् ।। १९० ।।

आत्मनः परितः पुत्रां श्चतुरो विश्वसुन्दरान् ।
रामादीन् विश्वरमणान् रमाकामितविग्रहान् ।। १९१ ।।

रामसत्तापरिव्याप्तं सर्वं च समपश्यत ।
न तत्र कालगमनं न च मायाप्रवेशनम् ।। १९२ ।।

कुतस्तद्गुणसम्बन्धस्तत्र सम्भावितो भवेत् ।
अनुभूय परानन्दं स तस्मादुदतिष्ठत ।। १९३ ।।

दृष्ट्वा पुरोगतं रामं प्रवत्स्यन्तं वनं प्रति ।
समवोचद् दशरथो राजा विस्मितमानसः ।। १९४ ।।

राजोवाच

जानामिरघुशार्दूल त्वामहं परमेश्वरम् ।
सर्वहेतुं सर्वरूपं स्वतन्त्रं सर्ववस्तुषु ।। १९५ ।।

तवैव माया विश्वात्मन् यया मोहयसे जगत् ।
यथेच्छसि तथा लीलां विस्तारयसि संततम् ।। १९६ ।।

न ते रूपं विजानन्ति तत्त्वतो विश्वदैवत ।
विश्वेशिवविरञ्च्याद्या मुनयो नारदादयः ।। १९७ ।।

नाहं तां तत्त्वतो ज्ञातुं प्रभवाम्यखिलेश्वर ।
समक्षं यत्प्रपश्यामि तद्विजानामि वासव ।। १९८ ।।

सामान्यतस्त्वां जानामि परब्रह्मस्वरूपतः ।
न शक्नोमि विशेषेण निर्देष्टुं महसां निधे ।। ९९ ।।

तथापि खलु मुह्यामि पुत्रभावनयाप्लुतः ।
वात्सल्योपहता बुद्धिर्न त्वां स्पृशति तत्त्वतः ।। २०० ।।

निर्दहामि वियोगेन विपिनं ते प्रवत्स्यतः ।
न च शक्नोम्यहं कर्त्तुं यथेच्छसि तथाकुरु ।। २०१ ।।

ब्रह्मोवाच

ततः स भगवान् रामः पादयोर्न्यपतत्पितुः ।
उत्थाय संस्थितस्तावल्लक्ष्मणो वाक्यमब्रवीत् ॥ २०२ ॥
यत्रैव रामो नृपते तत्रैवाहं न संशयः ।
अनुजानीहि तस्मात्त्वं मह रामेण मापपि ॥ २०३ ॥
वनाय गन्तुमद्याहं संयतोऽस्मि मुदान्वितः ।
इत्युक्त्वा संस्थितं राजा लक्ष्मणं वाक्यमब्रवीत् ॥ २०४ ॥
कथं लक्ष्ण मामद्य दुरदृष्टवशानुगम् ।
कैकेयीवाक्यनिर्दग्धं त्यक्तुमिच्छसि सुव्रत ॥ २०५ ॥
पुरैव मातुलागारं प्रेषितौ तौ कुमारकौ ।
युवां प्रवसतोरद्य दह्येते नयने मम ॥ २०६ ॥
कं वत्स पुत्र मामेहीत्युक्त्वा यास्यामि निर्वृतिम् ।
जानामि दुर्नयं माद्य को नु शिष्टो न संत्यजेत् ॥ २०७ ॥
रामेणाद्य विनिर्मुक्तः पापोऽहं विधिना कृतः ।
यन्मां विहाय त्वमपि वत्स गच्छसि लक्ष्मण ॥ २०८ ॥
इत्युक्त्वा व्यरुदद्भूयो मुक्तास्थूलाश्रुविन्दुभिः ।
ततः प्रणम्य सौमित्रिस्त्वरितं पादयोः पितुः ॥ २०९ ॥
अन्वगात्प्रस्थितं रामं वनवासाय सत्यधीः ।
धनुष्मान् कवची खड्गी बद्धतूणीर उत्सुकः ॥ २१० ॥
अथ राजा सुमन्त्राख्यं मन्त्रिणां प्रवरं बुधम् ।
शीघ्रमाज्ञाययामास विषादग्रस्तमानसः ॥ २११ ॥

राजोवाच

रामं प्रयान्तं वनवासहेतवे भवान् सुमन्त्रत्वरितोऽनुगच्छतु ।
संयोज्य दीप्तं कनकावृतं रथं सदस्ववर्यैरथ संनिवेदय ॥ ११२ ॥
तत्र रामं समारोप्य लक्ष्मणं चानुगामिनम् ।
तदेकानुगतां साध्वीं सीतां च कुलमङ्गलाम् ॥ २१३ ॥
अहानि पञ्च वा सप्त रमयित्वा पुराद् बहिः ।
वनेषु फुल्लवासन्तीपरागौघसुगन्धिषु ॥ २१४ ॥
पुनरानय शीघ्रं तं रामं मे प्राणवल्लभम् ।
सीतासौमित्रिसहितमयोध्यानगरीमिमाम् ॥ २१५ ॥

ब्रह्मोवाच

स इत्थमादाय वचो नृपस्य ययौ सुमन्त्रस्त्वरितं सदश्वैः ।
युक्त्वा महार्हं रथमेत्य रामं न्यवेदयत्सप्तमगोपुरस्थम् ॥ २१६ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे रामप्रस्थानं नाम नवमोऽध्यायः ॥ ९ ॥

दशमोऽध्यायः

सुमन्त्र उवाच

पुरीं विहाय विपिनं गच्छतस्ते परंतप ।
कथं निवेदये राम सज्जोऽयं रथ आस्यताम् ॥ १ ॥

राज्ञो विशिष्टकामस्य बुद्धिरेषा गरीयसी ।
यत्त्वां विहाय कैकेय्या वचनेऽभिरतिं दधौ ॥ २ ॥

इत्युक्तः स सुमन्त्रेण सौमित्रिमिदमब्रवीत् ।
गच्छ लक्ष्मण दोलायां समारोपय जानकीम् ॥ ३ ॥

तस्यां हि दोलारूढ़ायां पुत्र्यां जनकभूपतेः ।
आवां स्यन्दनमारुह्य गच्छावः पुरतो वनम् ॥ ४ ॥

स तद्वचनमादाय त्वरितो जनकात्मजाम् ।
गत्वाब्रवीद्वचो देवि दोलामारोह सम्प्रति ॥ ५ ॥

आर्यः स सप्तमीं कक्षां समलंकुरुतेऽधुना ।
त्वय्यारूढ़स्वयानायामार्य आरोक्ष्यते रथम् ॥ ६ ॥

सा तस्य वचनं श्रुत्वा लक्ष्मणस्य महात्मनः ।
सर्वाः श्वश्रूः समामन्त्र्य प्रणम्य च मुहुर्मुहुः ॥ ७ ॥

अन्याश्चान्तःपुरचरीः पृष्ट्वा साधु प्रसन्नधीः ।
रुदतीरेव ताः सर्वा विहाय पतिदेवता ॥ ८ ॥

आरुरोह शुभां दोलां मुदिता जनकात्मजा ।
तदा कश्चिन्निजा आलीः कमलेशीमुखाः स्वयम् ॥ ९ ॥

पश्यतो वाष्पनेत्रस्य अन्तःपुरजनस्य सा ।
आत्मन्येव तिरोभावं निनाय गमनक्षणे ॥ १० ॥

अथैकामवरोधस्थामुवाच स्मितशालिनी ।
भगिन्यौ मे पितुर्गेहे जनकस्य महीपतेः ॥ ११ ॥

पतिभ्यां स्थापिते पूर्वमलं मत्प्रीतिकातरे ।
सम्बोधनीये सततं भवत्या वचनान्मम ॥ १२ ॥

न सीताविषये साध्व्यौ भवत्यौ शोकमृच्छताम् ।
इति चान्यच्च वक्तव्यमन्न आश्वासनं तयोः ॥ १३ ॥

अथ लक्ष्मण आगत्य रामं प्रियसुहृत्तमम् ।
आरुह्यतां रथं शीघ्रमित्युवाच स तन्मनाः ॥ १४ ॥

तस्मिन् काले वरोधस्थाः प्रयान्तं राममीक्षितुम् ।
शिरांस्यारुरुहुस्तूर्णं सौधानां दर्शनातुराः ।। १५ ।।

पुरे नराश्चनार्यश्च सर्वेऽप्याकुलमानसाः ।
अनुगन्तुं तदा राममभ्यजन्त मुदान्विताः ।। १६ ।।

ऊचुरन्तःपुरजना रामसौहार्दतोषिताः ।
लालप्यमानाः सर्वेऽपि कीर्त्तयन्तश्च तद्गुणान् ।। १७ ।।

किमकारि वतास्माभिः पुण्ये कर्मणि दुष्कृतम् ।
यल्लब्धोऽपि मनोहारी रामो द्रष्टुं न लभ्यते ।। १८ ।।

त्रैलोक्यमोहनो रामः स्वभावान्मधुराकृतिः ।
दयावान् सत्यसन्धश्च महोदारो महामनाः ।। १९ ।।

नयनानन्दजननादासेचनकविग्रहः ।
चिरं निपेयश्चक्षुभ्यामन्तरायं चिराद्गतः ।। २० ।।

युगकोटिसमानानि क्व वर्षाणि चतुर्दश ।
क्व चासोढवियोगानां दर्शनातुरता दृशाम् ।। २१ ।।

असावपुण्यराशिर्नो युगपत्प्रकटोऽभवत् ।
यदभूदेष विश्लेषो रमणीयेन वस्तुना ।। २२ ।।

राजानं बोधयामः किं सर्वाः संहत्य संगताः ।
रामं सर्वगुणारामं विप्रवासयसे कथम् ।। २३ ।।

अथवा मूढ कैकेयीवाक्यवश्यो जनाधिपः ।
अतीतलोकदुर्वादो मानयेत्किमु नो वचः ।। २४ ।।

हा हताःस्म वयं नूनं रामे प्रवसति प्रिये ।
प्राणाधिके गुणैराढ्ये जीवा तौ जीवदातरि ।। २५ ।।

न जीवितुमतो युक्तमस्माकं क्लिष्टचेतसाम् ।
यासां सर्वस्वभूतोऽसौ वने वत्स्यति राघवः ।। २६ ।।

अवधीरितसाधूक्तिः कैकेयीवशमागतः ।
नूनं हि लप्स्यते दुःखं रघूणामधिपो भृशम् ।। २७ ।।

चक्षुषी परितप्येते दीर्यन्ते हृदयानि नः ।
विगलन्ती व चाङ्गानि विनिर्गच्छति राघवे ।। २८ ।।

किं कुर्मः कं प्रति ब्रूमः कथं तिष्ठति राघवः ।
प्रतिकूले विधौ सर्वं प्रतिकूलमिवाभवत् ।। २९ ।।

स्वभावदारुणां बुद्धिं धिक्कैकेयि तवेदृशीम् ।
रमणीयतमे रामे प्रतिकूल्यं गतासि किम् ।। ३० ।।

हा देवि रामदयिते निमिचन्द्रकुलोद्भवे ।
सखि भूमिसुते सीते कथं स्थास्यसि कानने ॥ ३१ ॥

अशेषलोकसाम्राज्यमहिषीपदभाजनम् ।
सीतां वने प्रवत्स्यन्तीमद्य पश्यामहे वयम् ॥ ३२ ॥

धिक्[1] चक्षुषी धिग्जनुः क्लिष्टं धिगायुर्धिक् च कर्म नः ।
या सां प्राणप्रियो रामः सदारो याति काननम् ॥ ३३ ॥

अयं कमलपत्राक्षो लक्ष्मणः शुभ लक्षणः ।
अस्माकं दुष्कृतैर्नैव राममेवानुगच्छति ॥ ३४ ॥

अयं सर्वात्मना वीरो रामेण सदृशौ गुणैः ।
आर्त्तानां नः शुचो हन्तुं किं नास्था स्यदिहैव हि ॥ ३५ ॥

अथवा सर्वथार्त्तानां प्रतिकूलोऽद्य नो विधिः ।
उभावपि विनिर्यातौ राघवौ प्राणजीवनौ ॥ ३६ ॥

इत्थं खलु वदन्तीनामवरोधस्थयोषिताम् ।
मनांस्यादाय सहसा मुदितो रामचन्द्रमाः ॥ ३७ ॥

आरुरोह रथं दीप्तं भ्रात्रा सह विचक्षणः ।
पार्श्वस्थजनचित्तानि सकृत्सम्मोहयन् दृशा ॥ ३८ ॥

अथाश्वान् प्रेरयामास सुमन्त्रस्तान् मनोजवान् ।
तत्पश्चाज्जानकीयानमूह्यमानं नरैर्ययौ ॥ ३९ ॥

चैतन्यं भृशतप्तायाः कौसल्याया महाशुचः ।
कैकेय्याश्चैव सौजन्यं सुमित्रायास्तथात्मजम् ॥ ४० ॥

प्राणितव्यं पितुश्चैव प्रजानां च मनःसुखम् ।
मनांसि मुनिवर्याणामाप्तानां वपुषो रुचिम् ॥ ४१ ॥

अयोध्यायाः श्रियं चैव सौभाग्यं राजवेश्मनः ।
देवानां च हितं कार्यं समादाय स्वयं तदा ॥ ४२ ॥

दर्शयन्नात्मनो मोहं प्रतस्थौ रामचन्द्रमाः ।
तमनुप्रययुः सर्वे जनाः पुरनिवासिनः ॥ ४३ ॥

यावत्संदृश्यते दूरादध्वजो रामरथस्यसः ।
तावत्सौधवराग्रेषु स्थितोऽन्तःपुरिको जनः ॥ ४४ ॥

दूरं गते रथेकेतौ संजाते दृष्ट्यगोचरे ।
पश्चान्निववृते शोकान्मुक्तवाष्पं रुदन् भृशम् ॥ ४५ ॥

तं पौरा रथपर्य्यन्तयायिनो भृशदुःखिताः ।
अग्रे कृत्वा द्विजवरान् विहिताञ्जलयो मुहुः ॥ ४६ ॥

---

१. इस पाद में छन्दोभंग है ।

अयाचन्त समुद्विग्ना मा गच्छ विपिनं प्रभो ।
नो चेत्वा मनुयास्यामः सर्वथा प्राणजीवनम् ॥ ४७ ॥

स तथा याच्यमानोऽपि जनैः पुरनिवासिभिः ।
पितुः सत्येन भगवान् वनमेवान्वरोचत ॥ ४८ ॥

रामोऽनुयायिनः पौरान् दूरं प्राप्ता ननु व्रतान् ।
प्रीणयन् दृष्टिपातेन जगाद स्निग्धमानसः ॥ ४९ ॥

निवर्तन्तां जनाः पौराः पितुः सत्यं विभर्म्यहम् ।
भवतां भाग्यवृन्देन भ्राता मे भरताभिधः ॥ ५० ॥

चिरं जीवतु धर्मिष्ठः पुण्यकर्मा यशोनिधिः ।
मम प्राणप्रियोवीरः सत्यसन्धोदयाकरः ॥ ५१ ॥

कल्याणागुणसंदोहः कैकेय्याः प्रीतिवर्द्धनः ।
ज्ञानवान् गुणसम्पन्नो धीरः प्रकृतिरञ्जनः ॥ ५२ ॥

स्वभावमधुरो वाग्मी महोदारो महाशयः ।
साधयिष्यति वो नूनं हितानिविधिवत्सदा ॥ ५३ ॥

यूयं तेन सदा भूरि शुभानि समवाप्स्यथ ।
अतो मयीव वस्तस्मिन् प्रीतिः सम्परिवर्द्धताम् ॥ ५४ ॥

प्रीणयिष्यति वः प्राज्ञा मनांसि भरतो बुधः ।
योग्य एव हि वो राज्ञा स वै भर्ता समीहितः ॥ ५५ ॥

तदाज्ञा वः सदा कार्या राज्ञः प्रियचिकीर्षुभिः ।
एतदेव प्रियं पौरा ममापि सुसमीहितम् ॥ ५६ ॥

बोध्यमानोऽपि रामेण चातुर्वर्ण्यजनो भृशम् ।
गुणैराकृष्टहृदयो रथमेवान्वगच्छत ॥ ५७ ॥

रामः पौरजनस्नेहाल्लक्ष्मणश्च दयानिधिः ।
वाष्पोदरुद्धनयनौ बभूवतुरुभावपि ॥ ५८ ॥

अथ प्रयान्तमेवैनं दृष्ट्वाप्रकृतिरञ्जनम् ।
रामं लक्ष्मणसीताभ्यां सहितं लोकमङ्गलम् ॥ ५९ ॥

तपोयशःप्रतापाढ्यं ब्राह्मणाः मंन्यवारयन् ।
अये सुमन्त्र नयसे क्व च नः प्राणजीवनम् ॥ ६० ॥

कृतं नृपेण दुर्बुद्धिकेकेयीवशवर्त्तिना ।
परावर्त्तयसे किं न विपरीतगतीम् हयान् ॥ ६१ ॥

इत्थमार्त्तद्विजोदीर्णां गिरं श्रुत्वा ससम्भ्रमः ।
अवतीर्यरथात्तूर्णं भक्तिसन्नतकन्धरः ॥ ६२ ॥

पद्भ्यामेव ययौ रामः सीतालक्ष्मणसंयुतः ।
कथमग्रे चलेदेष हित्वा ब्राह्मणसत्तमान् ॥ ६३ ॥
इत्यवेक्ष्य चिरं पश्चात्सादरं पर्यवस्थितः ।
रामस्य सन्निधिं प्राप्य समवोचन्त ते द्विजाः ॥ ६४ ॥
अन्तःसंतापविकलानस्मान् हित्वा निरागसः ।
क्व नु गच्छसि धर्मात्मन् वयं त्वामनुयायिनः ॥ ६५ ॥
साग्निहोत्राः सपत्नोका न निवर्त्स्याम निश्चितम् ।
जानीमस्त्वां धर्ममूर्त्तें न त्यक्ष्याम कथंचन ॥ ६६ ॥
सदधीतैर्वेदमन्त्रैर्यज्ञैश्च सदनुष्ठितैः ।
इदमेकं विजानीमो भजामस्त्वां सदा वयम् ॥ ६७ ॥
[1]वने त्वामनुयास्यामस्त्वद्गुणैर्विश्वमङ्गलैः ।
आकृष्टचित्ताः स्थास्यामो नैवात्र नगरे वयम् ॥ ६८ ॥
साम्राज्यदीक्षालब्धानि सितछत्राण्यमूनि नः ।
तव त्यक्तातपत्रस्य छायार्थं बिभृमो वयम् ॥ ६९ ॥
यथा राजकुमार त्वामङ्गैः कमलकोमलम् ।
मध्यंदिनार्कविद्योतो न ग्लापयति दुःसहः ॥ ७० ॥
धर्मोऽयमेव चास्माकं त्वयि धर्माभिरक्षके ।
नो चेद् वृद्धैर्द्विजैः पौरैर्याच्यमानः प्रजाहितः ॥ ७१ ॥
निवर्तस्व वनाद् राम कैकेयी तप्यतां चिरम् ।
जनेषु तव भक्तेषु भक्तिं कुरु महामते ॥ ७२ ॥
किं ते भक्तजनत्यागो विहितो भक्तवत्सल ।
अर्द्धानुष्ठितयज्ञानां जातार्द्धगृहकर्मणाम् ॥ ७३ ॥
वनात्वयि निवृत्तैऽद्य सम्पूर्णाःस्युर्मनोरथाः ।
अमीपक्षिरवैर्वृक्षाः कुर्वन्ति करुणस्वरान् ॥ ७४ ॥
रोरुवन्ति चिरं क्लिष्टाः खगा वृक्षेष्ववस्थिताः ।
सरःसु गुञ्जद्भ्रमरा यामिन्यो विरुवन्ति च ॥ ७५ ॥
अर्द्धावलीढघासास्याः पशवः कृच्छ्रमासते ।
इत्थमापतितं कष्टं त्वयि सम्प्रस्थिते वनम् ॥ ७६ ॥
इति विक्रोशमार्त्तानां द्विजानां दीनचेतसाम् ।
शृण्वं स्तूष्णीं जगामैष कथंचिन्न न्यवर्त्तत ॥ ७७ ॥
अपश्यत्तमसामग्रे तरङ्गभुजवेगिनीम् ।
वारयन्तीमिवात्मानं गद्गदस्वरघोषिणीम् ॥ ७८ ॥

---

१. वनम्–अयो०, मथु० ।

तस्यास्तीरे तरोर्मूलमाश्रित्य रघुनन्दनः ।
सहसौमित्रिसीताभ्यामवात्सीत्प्रथमां निशाम् ॥ ७९ ॥

अथाह लक्ष्मणं रामः सोद्वेग इव लक्षितः ।
पश्येमां तमसां भ्रातर्मध्येमार्गमुपस्थिताम् ॥ ८० ॥

तरङ्गभुजवल्लीभिर्वनाद् वर्जयतीवमाम् ।
पश्य पुण्यान्य रण्यानि शून्यानि परितः सखे ॥ ८१ ॥

जानेऽस्माकं दशां द्रष्टुमशक्ताः पशुपक्षिणः ।
इतो देशान्तरं याताः कः पश्येत्स्वामिनः शुचम् ॥ ८२ ॥

स्थावरा जङ्गमाश्चाद्य रुदन्त्यस्मत्कृते स्फुटम् ।
प्रथमेयं निशास्माकं गृहात्प्रवसतां वनम् ॥ ८३ ॥

अद्यायोध्यापुरी भ्रातः कां दशां लप्स्यते शुचा ।
आबालवृद्धस्त्रीलोकजनशब्दविवर्जिता ॥ ८४ ॥

पितरौ परिशोचामि यौ रुदन्तौ समुज्झितौ ।
शोकाब्धिलहरीवृन्दैर्नोह्यमानौ विचेतसौ ॥ ८५ ॥

त्वया मयाच्च रहितौ कथं खलु भविष्यतः ।
जातो नूनमहं पित्रोः केवलं दुःख हेतवे ॥ ८६ ॥

तरिर्भरत एवाद्य ततुं शोकोदधिं तयोः ।
आश्वासनाय शक्तोऽस्त्वावशेषपुरुषार्थभूः ॥ ८७ ॥

मत्कृते तप्तमनसोर्मत्पित्रोर्दुःखहारिणा ।
तैनेव हृदि नैश्चिन्त्यं किंचिदाप्नोमि लक्ष्मण ॥ ८८ ॥

त्यया च सहितो भ्रातर्वनवासेऽपि नोद्विजे ।
जाने कुटुम्बमध्यस्थमात्मानं सुसहायिनम् ॥ ८९ ॥

वैदेहीरक्षणे कार्ये मुक्तचिन्तो बभूव ह ।
अद्भिरेवाद्य वर्त्तिष्ये फलवत्यपि कानने ॥ ९० ॥

सम्पश्यन् विहितं धर्ममिति मे सम्मता मतिः ।
इति सौमित्रिराकर्ण्य सुमन्त्रश्च प्रभोर्वचः ॥ ९१ ॥

सावधानतया तस्थौ सेवासंपतमानसः ।
सुमन्त्रोऽथ विमुच्याश्वान् पाययित्वोदकं शुचि ॥ ९२ ॥

आशयत्स्वादुयवसं ततः प्रभुमसेवत ।
मुहूर्तं पश्चिमां सन्ध्यामुपास्यारुणमण्डलाम् ॥ ९३ ॥

विलोक्य यामिनीं प्राप्तामुद्भिन्नोडुगणप्रभाम् ।
प्रभवे व्यस्वप्तल्पं नवपल्लवमञ्जुलम् ॥ ९४ ॥

सुमित्रासुत आर्यस्य चरणौ पल्लवारुणौ ।
अविनिज्यकृताहारे तस्मिन् केवलमम्बुना ॥ ९५ ॥

अङ्गीचक्रेनु वैदेह्याः स्वयमप्युदकं बुधः ।
ततः सुप्ते महाराजकुमारे सीतया सह ॥ ९६ ॥

सुप्ताःप्रकृतयः सर्वास्तमसातीरकानने ।
रामप्रवासनोद्वेगशोकमोह भरातुराः ॥ ९७ ॥

जाग्रदेव स्थितो वीरः सौमित्रिः सारथिं प्रति ।
कथयामास रामस्य गुणांस्त्रिभुवनाद्भुतान् ॥ ९८ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे तमसातीरनिवासो नाम दशमोऽध्यायः ॥ १० ॥

एकादशोऽध्यायः

लक्ष्मण उवाच

जानासि किं नु जगदीशमिमं सुमन्त्र रामं त्रिलोकरमणीयगुणाभिरामम् ।
एष स्वयं स भगवानखिलात्मभूतो यं नेतिनेति विभृतं निगदन्ति वेदाः ॥ १ ॥

भूभारकारिविविधासुरवाहिनीनामेष क्षयं कलयितुं कृपयावतीर्णः ।
श्रीमत्प्रमोदवननित्यनिकुञ्जकेलिवद्धादरः सहजया स्वभुजोपगूढः ॥ २ ॥

तन्मण्डलं विजयतेस्य महाविलासनित्यास्पदं कनकरत्नमयंमनोज्ञम् ।
लक्ष्मीसहस्रशतकेलिकलासमेतं संगीतनृत्यबहुगानविधानयुक्तम् ॥ ३ ॥

तत्र स्वयं सहजयाश्रितवामपार्श्वः संफुल्लहेमलतयेव तमालवृक्षः ।
शृङ्गारसारसुविहार भरप्रकारसंशोभितारमणिहारधरो विभाति ॥ ४ ॥

यावद्व्रजप्रणयिनीगणसाभिलाषचक्षुश्चकोरपरिपोषणपूर्णचन्द्रः ।
आनन्दवृन्दमकरन्दकरामिताङ्घ्रिमन्दारजस्तबकमोहितभक्तभृङ्गः ॥ ५ ॥

नित्योत्सवप्रमुदिताखिलपार्षदौघसंसेव्यमानकमनीयतमस्वरूपः ।
वर्हावतंसपरिपूक्तमहामणीन्द्रमार्त्तण्डकोटिकिरण प्रकराव कीर्णः ॥ ६ ॥

प्रत्यक्षलक्ष्यविरहातुरदिव्यकान्तासंदोहसंगत उदारगुणाम्बुराशिः ।
वृन्दावनावनिपुरंदरसंगतात्मसत्ताविजृम्भितमहामहनीयभावः ॥ ७ ॥

बैकुण्ठनाथवसतौ परमेऽन्तरिक्षे गोलोकधाम्नि महसामयने परस्मिन् ।
क्षीरार्णवस्य पुलिने रविमण्डलान्तर्वृन्दारकप्रवरसद्मसुतेषु तेषु ॥ ८ ॥

स्वाराज्यसम्पदि सदामृतभोगवत्यां साम्राज्यसम्पदि महीतलभोगदायाम् ।
अस्यांशवैभवकलामधिगम्य नित्यमानन्दधोरणिहृदेति विशेषपूर्णा ।। ९ ।।

सोऽयं प्रमोदवनकेलिकलाविलासी सर्वात्मकः सकलभूरपि सर्वशक्तिः ।
रामो रमाकरनिषेवितपादपद्मः श्रीमान् स्वयं स्वपिति भूमितले वनान्तः ।। १० ।।

जानाति को भगवतोऽस्य चिकीर्षितानि तत्त्वं च वेदशिरसाकलितं कथंचित् ।
रामस्य शासनवशान्निगमामधीशो ब्रह्माण्डकोटिकल्पनाकुशलोऽयमेति ।। ११ ।।

काले जगन्ति निखिलानि चराचराणि निःशेषमेककवलेन सभूतसूक्ष्मम् ।
संहृत्य रन्तुमयमात्मनि नीयतेऽन्तःस्वानन्दभोगरसिकोऽखिलयोगशक्तिः ।। १२ ।।

यावन्न सावधिपदार्थविरक्तचेता ज्ञात्वास्य निर्गुणतनोर्महिमानमित्थम् ।
भक्त्योपसन्नधिषणः शरणं प्रयाति तावन्न कालभयतः परिमुच्यतेऽसौ ।। १३ ।।

नो कर्मणा न तपसा न समाधिना च न ज्ञाननोऽस्य महिमानमवैति किंचित् ।
यावन्न कम्पपुलकाश्रुमुखात्युदीर्णभावाञ्चितास्य हृदये समुदेतिभक्तिः ।। १४ ।।

वन्दे स्वसाधुजनमानसराजहंसं चञ्चन्महर्षिजनचित्तमिलिन्दपद्मम् ।
आनन्दवृन्दमकरन्दभरं दधानं कल्पद्रुमस्तबकसौरभमङ्घ्रिमस्य ।। १५ ।।

ब्रह्मोवाच

एवमालपतस्तस्य गुणान् भक्तजनप्रियान् ।
सुमन्त्रं प्रति सौमित्रेर्जगाम सकला निशा ।। १६ ।।

तां रात्रिं भगवान् रामो महायोगेश्वरेश्वरः ।
रतवान् तमसातीरगोकुलस्था वराङ्गनाः ।। १७ ।।

तत्राभीरकुले जातास्त्रिदशाः स्त्रीस्वरूपिणः ।
चिराय रामचन्द्रस्य गुणश्रवणमोहिताः ।। १८ ।।

ता यूथशोमृगदृशः सदनेषुसुप्तान् बन्धून् सुहृत्पतिकुटुम्बजनान् विहाय ।
देहांश्च तान् गुणमयान् सहसा विसृज्य शुद्धात्मना रघुकुलोद्वहमेनमीयुः ।।१९।।

विलासवटमूले स सीतया स्वात्मरूपया ।
आनन्दशक्त्या संयुक्तो रेमे गोकुलदारकैः ।। २० ।।

तां रात्रिं तत्र रामेन्दुपूर्णचन्द्रप्रभासिताम् ।
उत्फुल्लकुमुदामोद माद्यन्मधुकरस्वराम् ।। २१ ।।

त्रिविधानिलसांदोलमन्दारतरुकोरकैः ।
आत्मशक्त्या समुत्फुल्लैः प्रसरत्सौरभाञ्चिताम् ।। २२ ।।

समुल्लसन्नीपतरुपुष्पसौरभशालिनीम् ।
गुञ्जद्भ्रमरसंजुष्टां कोकिलाकलकूजिताम् ।। २३ ।।

तमसानीरकल्लोलकौतूहलसमन्विताम् ।
तत्तीरवालुकाभूमिविस्तीर्णकनकासनाम् ॥ २४ ॥
ताभिर्वेणुकलध्वानमोहिताभिः सुकान्तिभिः ।
शुद्धभक्तात्मरूपाभिः कामिनीभिः सहस्रशः ॥ २५ ॥
रेमे श्रीमान् सीता(रमा)कान्तः सुखैर्निधुवनोद्भवैः ।
समुद्धार ताः सर्वाः कालमायावशाद् भवात् ॥ २६ ॥
दृढामात्मरतिं दत्त्वा मुनीनामपि दुर्लभाम् ।
स्वरूप मात्रासक्ताश्च कृत्वा सर्वात्मना प्रभुः ॥ २७ ॥
चिररात्रे तथैवात्र सुप्तः समुपलक्षितः ।
ततः स्वयं जजागार वैदेह्या सहितः प्रभुः ॥ २८ ॥
चिरं विमृश्य मनसा सुप्तान् पौरजनान् वने ।
आत्मना सह संक्लिष्टान् विषण्णान् वनवासतः ॥ २९ ॥
उवाच लक्ष्मणं रामो भ्रातरं प्राणसम्मितम् ।
पश्य भ्रातरिमे पौरा मदर्थे क्लिष्टमानसाः ॥ ३० ॥
त्यक्तसौख्यास्त्यक्तवासा वनवासाय चोद्यताः ।
अतो यावदिमे सुप्ता नोत्तिष्ठेयुः समन्ततः ॥ ३१ ॥
निवर्तयेयुर्न च नो[1] वचोभिर्दीनमानसाः ।
तावदास्थाय सहसा स्यन्दनं तुरगैर्युतम् ॥ ३२ ॥
शीघ्रगं शब्दरहितं गच्छामः पुरतो वनम् ।
एवमेते जना अस्मांस्त्यक्ष्यन्ति पुरवासिनः ॥ ३३ ॥
स्वपन्ति वृक्षमूलेषु मत्प्रीतिकलिताशयाः ।
क्लिष्टेष्वेतेषु महती जायते मम वेदना ॥ ३४ ॥
न तथा वनवासेन मनो मे परिदूयते ।
अस्मत्कृते कथं पौराः प्राप्नुयुर्दुःखसंहतिम् ॥ ३५ ॥
एतेह्यनुगता भ्रातः सर्वे सर्वात्मनैव माम् ।
गच्छन्तु स्वस्वभवनं प्राप्नुवन्तु परां मुदम् ॥ ३६ ॥
इत्युक्तो रामचन्द्रेण लक्ष्मणो बुद्धिसत्तमः ।
प्रत्यूचे वचनं सम्यगार्याय सुमहात्मने ॥ ३७ ॥
यद् विचारयसि प्राज्ञ तत्तथैव मतं मम ।
शीघ्रमारुह्यतामार्य स्यन्दने वेगगामिनि ॥ ३८ ॥
ततः सुमन्त्रः संयोज्य रथं जात्यैस्तुरङ्गमैः ।
प्राञ्जलिः श्रीमते तस्मै न्यवेदयदुपस्थितः ॥ ३९ ॥

१. मां—मथु० ।

सुप्ताः पौरजना एते न जानीयुर्यथा प्रभा।
तथा भवान् गन्तुकामः सज्जोऽयं सुमहान् रथः ॥ ४० ॥

ततो व्यामोह्य भगवान् परान् सुप्तांश्च जाग्रतः।
आस्थाय स्यन्दनवरं ततार तमसां नदीम् ॥ ४१ ॥

मनोज्ञं काननं प्राप तस्या अपरपारगम्।
महर्षिजनसंवीतं विशुद्धाश्रममण्डलम् ॥ ४२ ॥

निष्कण्टकतरुस्तोमसेवितं सर्वतस्ततम्।
पुष्पिताच्छ लताजालवेष्टितोन्नतभूरुहम् ॥ ४३ ॥

दुर्जीवरहितं नित्यमभयं फलपुष्पवत्।
तमसातीरनीरोर्मिममीरणसुशीतलम् ॥ ४४ ॥

प्रातः पौराः सहसा प्रतिबुध्य निरीक्ष्य व्यामोहार्थं कल्पितमभिपुरि रथयानम्।
श्रीमानेष पुरीमनुगत इतिहृदि हृष्टाः सर्व युगपत्साकेतपुरीमनुजग्मुः ॥४५॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे पौरजनव्यामोहनं नामैकादशोऽध्यायः ॥ ११ ॥

*

द्वादशोऽध्यायः

ब्रह्मोवाच

ते गत्वा नगरीं पौरा अपश्यन्तो रघूद्वहम्।
रुदन्तो वाष्पनयनाः पतिताः शोकसागरे ॥ १ ॥

मृतेषु पतिपुत्रेषु हृतेषु धनराशिषु।
न तथास्ति नृणां शोको यथा रामे प्रवासिनि ॥ २ ॥

रुग्णा इवातिरोगेण ग्रस्ता इव महापदा।
निकृत्वा इव चाङ्गेषु दुःखमूहुः पुरीजनाः ॥ ३ ॥

आसने शयने प्रापुः भोजने भाषणे तथा।
रामेति मग्नमनसो न क्षणं स्वस्थतां ययुः ॥ ४ ॥

पुत्रे जाते विवाहे वा रोगहानौ द्विरागमे।
नोत्सवं चक्रिरे पौराः क्लिष्टा रामप्रवासतः ॥ ५ ॥

रामं विहाय सम्प्राप्तान् जगर्हुर्वनिताः पतीन्।
यावकाञ्जनसिंदूरभूषणादिविवर्जिताः ॥ ६ ॥

मलिनाङ्ग्योऽतिदुःखार्त्ता भृशं मलिनमानसाः ।
अपश्यन्त्यो जनकजां ददृशुस्तामसं जगत् ॥ ७ ॥

तमसालिप्तनयनाः सर्वं च तमसावृतम् ।
मेनिरे विपदं प्राप्ता अयोध्यापुरयोषितः ॥ ८ ॥
पतिपुत्रकुटुम्बादीनाप्तस्वजनबान्धवान् ।
गृहान् देहान् धनं प्राणानसह्यं हृदि मे निरे ॥ ९ ॥
यासां प्राणाधिकः प्रेयान् प्रोषितो रघुनन्दनः ।
तासां किं भुवने प्रीत्यै विरहग्रस्तचेतसाम् ॥ १० ॥

ऊचुः परस्परं गेहेष्वशेषारम्भवर्जिताः ।
स एव सुकृतीलोके लक्ष्मणो दुःखवर्जितः ।
यो वै सर्वात्मभावेन सीतारामौ निषेवते ॥ ११ ॥

धन्यास्ताः सरितो यासां तोयं पिबति राघवः ।
अध्वश्रमपरिश्रान्तो या सु मज्जति स स्वयम् ॥ १२ ॥

येषां फलानि सोऽश्नाति धन्यास्ते पादपा वने ।
धन्यास्ते पर्वता येषु पद्भ्यां चरति राघवः ॥ १३ ॥

रामस्य गमनान्नूनं वन एवाद्य मङ्गलम् ।
धन्यास्त आश्रमावासा येषु वत्स्यति राघवः ॥ १४ ॥

धन्या महर्षयो येषां श्रीराममुखदर्शनम् ।
अहो किमत्र नो भव्यं यास्यामो रघुनन्दनम् ॥ १५ ॥

अनन्यान् शरणं प्राप्तान् रामो वः पालयिष्यति ।
अस्मांश्च परमोदारा रक्षिष्यति विदेहजा ॥ १६ ॥

सर्वात्मना नो निर्वाहं वन एव करिष्यतः ।
त्रैलोक्यमङ्गलोदारौ सीतारामौ महाशयौ ॥ १७ ॥

नूनं रामस्य विश्लेषाद् राजा प्राणान् विमोक्ष्यति ।
कैकेय्या वशगं राष्ट्रमधर्मोऽभिभविष्यति ॥ १८ ॥

पुत्रं प्रव्राजयामास या रामं लोकसुन्दरम् ।
तां निर्दयां न कैकेयीं भजिष्यामो वयं ध्रुवम् ॥ १९ ॥

इत्थं विलप्य बहुधा रुरुदुर्वाष्पलोचनाः ।
अयोध्यानगरीसंस्था नरा नार्यश्च दुःखिताः ॥ २० ॥

रामश्चाभ्युदिते सूर्ये प्रातःसन्ध्यामुपास्य वै ।
ययौ दिव्यरथारूढो वेगात्सन्तीर्य गोमतीम् ॥ २१ ॥

पश्यञ्छुभान्यरण्यानि पुष्पितानि विशेषतः ।
शृण्वन् ग्रामेषु लोकानां कैकेय्या दुर्यशोभरम् ॥ २२ ॥

वेदस्मृति नदीं तीर्त्वादक्षिणाभिमुखो जवान् ।
अनुस्मरन् पितुः सत्यं वनवासैकमानसः ॥ २३ ॥

कथयन् मधुरावार्त्ताः सूतं सौमित्रिमेव च ।
सायंकाले परिप्राप्ते तपने लोहितायति ॥ २४ ॥

शृङ्गवेरपुरस्योच्चैः सन्निधिं प्राप राघवः ।
सस्नौ पुण्यजलां तत्र सरयूं चिरसेविनीम् ॥ २५ ॥

तत्रास्य देशवास्तव्या जना ज्ञातप्रवृत्तयः ।
पृष्ठलग्ना दीर्घतरं रुदन्तः करुणस्वरम् ॥ २६ ॥

आश्चास्य मधुरैर्वाक्यैस्ते रामेण विसर्जिताः ।
नत्वा नत्वातिशोकार्ताः श्वसन्तो वाष्पलोचनाः ॥ २७ ॥

कथंचिदपि कष्टेन त्यक्तवन्तो रथं प्रभोः ।
अथो ददर्श भगवान् गङ्गां सागरगामिनीम् ॥ २८ ॥

कल्लोललोलसलिलां जगतः कलिलापहाम् ।
आत्मपादोदकीं पुण्यां महोर्मिगणसंकुलाम् ॥ २९ ॥

स्वर्गमार्गैकनिःश्रेणीं पीयूषाच्छप्रवाहिनीम् ।
राजहंसगणाकीर्णां चक्रसारससेविताम् ॥ ३० ॥

भुवः शाटीमिव सितां शरज्ज्योत्स्नाविजित्वरीम् ।
शीतलां चन्दनक्षोदसदृशीं तापहारिणीम् ॥ ३१ ॥

कर्पूरपूररुचिरां त्रिजगत्पाविनीं पराम् ।
अशेषतीर्थसाम्राज्यपदभाजं महोन्नताम् ॥ ३२ ॥

तां दृष्ट्वा सुमहावर्त्तगम्भीरजल वेगिनीम् ।
सुमन्त्रं चैव सौमित्रिमामन्त्र्य यशसां निधिः ॥ ३३ ॥

तीरावनिवने रम्ये शीतलानिलसेविते ।
इंगुदीतरुमालक्ष्य तन्मूले वासकामुकः ॥ ३४ ॥

रथादवततारैष सीतासौमित्रिसंगतः ।
सुमन्त्रोऽश्वान् समुन्मोच्य प्राञ्जलिः समुपस्थितः ॥ ३५ ॥

निषादराजस्तत्रामुं स्वदेशे प्राप्तमीश्वरम् ।
आजगाम गुहो नाम भाग्यवान् पुण्यवान् बुधः ॥ ३६ ॥

सजातीयैर्जनैर्युक्तो वृद्धैश्च बहुदर्शिभिः ।
तं सामात्यं परिष्वज्य रामः सौमित्रिसंगतः ॥ ३७ ॥

जग्राह बहुमानेन मानदोऽनन्यचेतसाम् ।
इत्थं सम्मानितः सम्यगुवाच गुहं ईश्वरम् ॥ ३८ ॥

भवानेकः शरण्योऽत्र शरणं त्वामुपेयुषाम् ।
अयमात्मा कुटुम्बश्च नगरं चेदमीश्वरम् ॥ ३९ ॥

भूरियं सकलाराम तवाङ्घ्र्योरर्पिता मया ।
देहि मां[1] (मे ?) शरणायातं कोमले ते पदाम्बुजे ॥ ४० ॥

चिरेण रघुशार्दूल चेतसानन्यगामिना ।
चिन्तितोऽसि जगन्नाथ स मे कामोऽद्य पूरितः ॥ ४१ ॥

चिरेण प्रार्थिते राम तवैव चरणाम्बुजे ।
मयादय समनुप्राप्ते न मोक्ष्याम्यधुना त्विमे ॥ ४२ ॥

ततो विधाय पादार्घौ सुप्रसन्नमना गुहः ।
उवाच सीतासौमित्रिसहितं रघुपुङ्गवम् ॥ ४३ ॥

अन्नं चतुर्विधं नाथ स्वादु सद्यो विनिर्मितम् ।
गन्धपुष्पाङ्गरागादिशयनान्यासनानिच ॥ ४४ ॥

निवेदयामि तत्तुभ्यं स्वागताय महात्मने ।
महीं चैवा खिलामेतां यथेच्छं वस मद्गृहे ॥ ४५ ॥

अहं ते प्रेष्य एवास्मि भव मे शरणं विभो ।
आज्ञापय यथेष्टं मे करिष्यामि रघूद्वह ॥ ४६ ॥

अद्य मे सफलं जन्म सफलं चाद्य मे कुलम् ।
अद्य मे सफलो देहः सफले मम चक्षुषी ॥ ४७ ॥

नापेक्षितं मे लोकेश पुरं राज्यं तथा धनम् ।
एकमेवापेक्षितं मे तव पादनिषेवणम् ॥ ४८ ॥

इत्युदीरितमाकर्ण्य गुहस्य जगदीश्वरः ।
प्रत्यूचे भगवान् रामः स्मितमञ्जुतमाननः ॥ ४९ ॥

सर्वकृतं त्वया सम्यग् यद्यदिष्टतमं मम ।
भाग्येन त्वां प्रपश्यामि सर्वसम्पत्समन्वितम् ॥ ५० ॥

अपि त्वं कुशली नित्यं देहगेहसुहृद्युतः ।
कुशलं ते चिरं देशे पुत्रबन्धुधनादिभिः ॥ ५१ ॥

यत्त्वया मम संतुष्टयै प्रीत्या मह्यं निवेदितम् ।
तत्सर्वमेव विधिवन्मनसारक्षितं मया ॥ ५२ ॥

प्रतिग्रहीतुमेतत्ते न त्वयं समयः सखे ।
अशनं फलमूलादि वासो मे हरिणाजिनम् ॥ ५३ ॥

आसनं वल्कलैश्चापि शयनं मे महीतलम् ।
वृत्तिस्तापस्यवृत्यैव वासो मे गह्वरे वने ॥ ५४ ॥

घासो मे दीयतां सम्यगश्वेभ्यस्तन्ममार्चनम् ।
अमी दशरथस्याश्वा राज्ञः प्रियतमा भृशम् ॥ ५५ ॥

एतेषु दत्तभोज्येषु पूजितोऽहं विशेषतः ।
एवमुक्तः स रामेण निषादाधिपतिर्गुहः ॥ ५६ ॥

अनुरुध्य प्रभोराज्ञां रामस्य परमात्मनः ।
अश्वानां यवसं दत्त्वा बद्धाञ्जलिरुपस्थितः ॥ ५७ ॥

रामो जह्नुसुतातीरे धरण्यां कल्पिता मनः ।
जलं प्राश्यस्थितो धीमान् धर्मात्मा सत्यसागरः ॥ ५८ ॥

पादौ समुपवाह्यास्य लक्ष्मणो भक्तितत्परः ।
ततो नत्वा सभार्यं तं स्थितो वृक्षतले निशि ॥ ५९ ॥

सौमित्रिश्च सुमन्त्रश्च गुहश्च पुरुषर्षभः ।
त्रयो जाग्रत एवामी बद्धतूणा धनुर्धराः ॥ ६० ॥

यशांसि रामचन्द्रस्य गायन्तश्चरितानि च ।
अन्योन्यं दर्शयन्तश्च रामभक्तिमनुत्तमाम् ॥ ६१ ॥

तस्थुस्तरुतले वीराः कथयन्तः शुभाः कथाः ।
कैकेयीदुश्चरित्रेण पश्चात्तापभृतो हृदि ॥ ६२ ॥

रामस्य भूमौ जनकेन्द्रकन्यया साकं शयानस्य सुखोचितात्मनः ।
कुत्राप्यदृष्टेदृशदुःखसंहते रात्रिर्व्यतीयाय सुखेन सा ततः ॥ ६३ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे इङ्गुदीतरुतलवासो नाम द्वादशोऽध्यायः ॥ १२ ॥

त्रयोदशोऽध्यायः

ब्रह्मोवाच

गुहेन चिरमुक्तोऽपि लक्ष्मणः सुमहाव्रतः ।
न शिश्ये वरशय्यायां क्लृप्तायां स्वस्य हेतवे ॥ १ ॥

तमेव चात्मनोधर्मं गुहाय समदर्शयत् ।
दुःखं च सुमहत्प्राप्तं सर्वेषां समवर्णयत् ॥ २ ॥

ततः प्रभातकल्पायां रजन्यां तमसिक्षते ।
भास्करस्योदये सूतं सौमित्रि चाब्रवीदिदम् ॥ ३ ॥

उत्थीयतामितो भ्रातः सुमन्त्रायोज्यतां रथः।
श्रूयते पक्षिणां शब्दः कोकिलः कुरुते रवम्॥ ४॥

अरुणस्य प्रभा ताम्रा रञ्जयत्यखिलं भुवम्।
काश्मीररक्षोदसलिलैः काननं परिरञ्जितम्॥ ५॥

अधुना जह्नुतनयां तरिष्यामोः दिवो नदीम्।
जगतः पावनीं रम्यां स्रोतसा दीर्घवेगिनीम्॥ ६॥

ततः सुमन्त्रसौमित्रिगुहा बद्धाञ्जलीपुटाः।
अग्रतः संस्थिता रामं गुहो नावमथानयत्॥ ७॥

ततस्तौ बद्धतूणीरौ बद्धखड्गौ महारथौ।
धनुष्मन्तौ महावीरौ सुधीरौ सीतया सह॥ ८॥

त्रैलोक्यपावनीं गङ्गां मुदा समुपजग्मतुः।
रामः सुमन्त्रमुद्दिश्य वचनं समवोचत॥ ९॥

गच्छाधुना सुमन्त्र त्वमयोध्यां सुखदायिनीम्।
अतः परं निवर्त्तस्व गमिष्यामो वयं वनम्॥ १०॥

पद्भ्यामेवोचितः पन्था गन्तुमस्माकमुत्तमः।
इति तेनाभ्यनुज्ञातः सारथिर्दीनमानसः॥ ११॥

तद्वचो निष्ठुरं मत्वा प्रत्युवाच स्खलन्मनाः।
अहोते पुरुषव्याघ्र धर्मेनिष्ठा किमद्भुता॥ १२॥

शास्ता त्वं सर्वलोकानां धर्मस्य च महामते।
त्वया वियुज्य धर्मात्मन् किं सुखं भुवने नृणाम्॥ १३॥

भवान् सौमित्रिसीताभ्यां वनेऽपि निवसन् प्रभो।
प्राप्तासि परमं सौख्यं कुर्वन् विश्वस्य मङ्गलम्॥ १४॥

वयं तु त्वां विना वीर निहताः स्म स्वकर्मणा।
कैकेय्या दुश्चरित्रेण सर्वेषां दुःखमुत्थितम्॥ १५॥

यत्र यत्र भवान् राम निवत्स्यसि महाव्रत।
तत्र तत्रैव नियतं विजयो मङ्गलं श्रियः॥ १६॥

अस्माकं तु महावीर न किं चिज्जीवतां फलम्।
कैकेय्या वशगा भूत्वा प्राप्स्यामः परमां शुचम्॥ १७॥

पदे पदे महद्दुःखमापदश्च पदे पदे।
त्वया विवर्जिते नाथ नगरे नः शुभं गतम्॥ १८॥

एवमुक्त्वा भृशं सूतो रुरोद बहुदुःखितः।
तं सान्त्वयित्वा भगवान् बिलुप्ताश्रुं चकार ह॥ १९॥

उवाच च भृशं तस्य दुःखेन परितापितः।
मा वोचः करुणं प्राज्ञ पुरीं गच्छ मुहूत्तम ॥ २० ॥

त्वमस्माकं कुलस्यामि चिरेण हितकारकः।
आश्वासय महीपालं वृद्धं मद्विरहातुरम् ॥ २१ ॥

यथा स नानुतप्येत वर्षीयान् धरणीपतिः।
तथाऽऽश्वासय तं गत्वा मद्वाक्येन गरीयसा ॥ २२ ॥

प्रजानां पालनार्थाय भरतो धर्मतत्परः।
मम प्राणप्रियो भ्राता सुखं राजा विधीयताम् ॥ २३ ॥

समानसुखदुःखस्य समगेहवनस्य च।
मम दुःखेन भूपालो नानुतप्येत्तथा कुरु ॥ २४ ॥

समाश्वासय कैकेयीं सुमित्रां च विशेषतः।
तथैवान्याश्च मे मातृः शोको नाभिभवेद् यथा ॥ २५ ॥

तां च सौभाग्यसम्पन्नां मदर्थे भूरिवेदनाम्।
सुखदायिसुतां भूयः कौसल्यां च विशेषतः ॥ २६ ॥

आश्वासय महाप्राज्ञ भूयसा वचसा मम।
प्रजाश्च दुःखसंतप्ताश्चिरमाश्वास यिष्यसि ॥ २७ ॥

पुनः पुनश्च राजानं बोधयिष्यसि मद्गिरा।
रामे त्वया न संतापः कर्तव्य स्त्वद्वचो वशे ॥ २८ ॥

सहस्रवर्षपर्यन्तं वसेद् रामो वनालये।
न च खिद्येत सत्येन तव वाक्यानुरोधतः ॥ २९ ॥

कियच्चतुर्दशाब्दं च वने वासोऽस्य दुःखकृत्।
पितुराज्ञां त्यजेद्यस्तं[1] धिक् तं पुत्रं सुखार्थिनम् ॥ ३० ॥

पितुः सत्यं तथा स्वर्गे येन नैव व्यपेक्ष्यते।
अलं तेन प्रजातेन पुत्रेणापुत्रता वरम् ॥ ३१ ॥

अकार्यमपि कुर्वेऽहमशक्यमितरैर्जनैः।
न तत्कार्यं मया येन वचनीयं पितुर्भवेत् ॥ ३२ ॥

सर्वाश्च मातरो वाच्याः शुभं मद्विषये महत्।
पादाभिवन्दनं कार्यं मातृणां नृपतेश्च मे ॥ ३३ ॥

त्वरितं च नृपो वाच्यो भरतानयनं प्रति।
यौवराज्याभिषेकेण सत्कार्यश्च विशेषतः ॥ ३४ ॥

---

१. यहाँ 'तु' पाठ ठीक जँचता है।

मम प्राणप्रियो भ्राता भरतो नीतिमान् बुधः ।
एवं कृते पितुर्दुःखं मत्कृते न भविष्यति ॥ ३५ ॥

इत्येते मम संदेशाः पितुर्वाच्यास्त्वया भृशम् ।
भरतोऽपि चिरं सूत संदेष्टव्यो गिरा मम ॥ ३६ ॥

वर्तस्व न्यायतो राजन्यपि सम्पालय प्रजाः ।
सर्वासुचाविशेषेण वर्त्तेथा वत्स मातृषु ॥ ३७ ॥

विशेषान्मद्वियुक्तायां कौसल्यायां दयां कुरु ।
इत्यादि सर्वबन्धुभ्यः संदिदेश रघूद्वहः ॥ ३८ ॥

अथ रामं समालोक्य लक्ष्मणः सूतमब्रवीत् ।
कैकेयीं प्रति सामर्षो निःश्वासैः पूरिताननः ॥ ३९ ॥

भृकुटीकुटिलापाङ्गः क्रोधारक्तविलोचनः ।
भुवं विलोकयन् वीर उवाच पितरं प्रति ॥ ४० ॥

इदं ममापि वाक्येन संदेष्टव्यो महीपतिः ।
चिरं राजन् प्रणामोऽयं लक्ष्मणस्यातिखिद्यतः ॥ ४१ ॥

सम्यक्कृतं महीपाल रामः प्रव्राजितो वनम् ।
विनापराधं मे भ्राता कैकेय्या वचनात्त्वया ॥ ४२ ॥

इदं ते दुष्कृतं राजन् गास्यन्ति भुवने जनाः ।
त्रैलोक्यरञ्जनो रामः कीर्त्तिमान् धर्मतत्परः ॥ ४३ ॥

शान्तिनिष्ठस्तपोनिष्ठस्त्वयि प्रीतिविवर्द्धनः ।
किमागः कृतवान् रामो यद्वने निरवासयः ॥ ४४ ॥
यत् पुत्रेण प्रकर्त्तव्यं तद् रामेणाखिलं कृतम् ।
यशस्यं धर्मयुक्तं च त्रैलोक्ये प्रथितं महत् ॥ ४५ ॥

पित्रा तु यत् प्रकर्त्तव्यं पुत्रस्नेहेन भूपते ।
न तत्त्वया कृतं किंचिद् द्वयोस्तुल्ये कृताकृते ॥ ४६ ॥

निःस्नेहत्वे च पारुष्ये दुष्कृते च महीपते ।
न किंचिदवशिष्टं ते कैकेय्या वचनाद् भृशम् ॥ ४७ ॥

प्रमादरूपिणीं तात निपीय मदिरामिमाम् ।
अलं ते परितापेन शोके न च महीयसा ॥ ४८ ॥

स्वयमेवेदृशं कर्म यशोधर्मविवर्जितम् ।
विधाय परितप्यन्ते न तु जातु भवादृशाः ॥ ४९ ॥

इत्यादि क्रोधरक्ताक्षश्चिरं संदिश्य सारथिम् ।
तूष्णींमास विलोक्यार्थं वारयन्तं महाभुजम् ॥ ५० ॥

ततोऽब्रवीत्स्वयं रामो लक्ष्मणेन रुषोदितम् ।
न वाच्यः परुषं राजा दुःखी मद्विरहाद् भृशम् ॥ ५१ ॥

सद्यः परुषमाकर्ण्य त्यजेत्प्राणानपि क्वचित् ।
न निःस्नेहो महाराजः सत्यसंयुक्त एव सः ॥ ५२ ॥

मातरं पितरं चैव स्वर्गं कीर्तिं सुखानि च ।
सत्येन संत्यजन् पुत्रं परमं धर्ममाप्नुते ॥ ५३ ॥

लुप्यते न मयि स्नेहो राज्ञः सत्यं हि रक्षतः ।
अतः क्रुद्धस्य मे भ्रातुर्लक्ष्मणस्य वचस्त्वया ॥ ५४ ॥

न वाच्यं पृथिवीपाले भृशं ह्यसि विचक्षणः ।
प्रियमेव सदास्माभिर्वाच्यं तस्मिन् प्रियोचिते ॥ ५५ ॥

अपि नैतत्क्वचिद् दृष्टं यत्स्वपुत्रं निरागसम् ।
पिता त्यजेत्स्त्रीवाक्येन विनैवार्थं तु भाविनम् ॥ ५६ ॥

इत्यादिभिर्वचोरूपैरमृतैः परिबोधितः ।
सुमन्त्रो रामविश्लेषशोकादतिनिपीडितः ॥ ५७ ॥

उवाच दीनहृदयो रामं कमललोचनम् ।
क्व मां निवर्त्तयस्येवं नगर्यां किं धृतं मम ॥ ५८ ॥

सर्वस्वमसवस्त्वं मे वनं व्रजसि राघव ।
त्वया विना पुरे किं मे न गन्तुं तत्र रोचये ॥ ५९ ॥

वन एव गमिष्यामि त्वया सह महामते ।
न निवर्त्तय मां राम शून्ये तत्र पुरे त्वया ॥ ६० ॥

कथं त्वया विरहितं रथमास्थाय राघव ।
गमिष्यामि पुरीं किं मां वक्ष्यन्ति पुरवासिनः ॥ ६१ ॥

प्रसीद रामचन्द्र त्वं वने गन्तुं त्वया सह ।
अग्रेसरस्तव वने भविष्यामि रघूद्वह ॥ ६२ ॥

तव सेवापरो नित्यं परांगतिमवाप्नुयाम् ।
त्वां प्रवास्य वने पापभागिनो नृपतेरहम् ॥ ६३ ॥

संनिधिं न भजिष्यामि विहाय त्वं सुधार्मिकम् ।
वनवासं व्यतिक्रम्य त्वया सह पुनः प्रभो ॥ ६४ ॥

अनेनैव रथेनाहं नेष्यामि त्वां शुभां पुरीम् ।
क्षणवन्मम यास्यन्ति त्वत्सगेऽब्दाश्चतुर्दश ॥ ६५ ॥

अन्यथा न क्षपयितुं शक्तोऽहं शतवर्षवत् ।
भक्तोऽस्मि तव दासोऽस्मि न मां त्यक्तुं त्वमर्हसि ॥ ६६ ॥

त्वया त्यक्तो न जीविष्ये प्रवेक्ष्ये ज्वलिते शुचौ ।
मयि वन्ध्या कथं चास्तु भक्तवत्सलता तव ॥ ६७ ॥

एवं विलप्य बहुधा सुमन्त्रो भूरि दीनवाक् ।
निपत्य पदयोस्तस्य चिरमास महात्मनः ॥ ६८ ॥

ततस्तं करुणासिन्धुर्भगवान् रघुपुङ्गवः ।
उवाच वाष्पनयनः सान्त्वयन् कलया गिरा ॥ ६९ ॥

अवश्यमेवगन्तव्यं सुमन्त्र नगरीं प्रति ।
कैकेय्याः प्रत्ययार्थाय नूनं रामो वनं गतः ॥ ७० ॥

इति निःशङ्कहृदया यास्यते महतीं मुदम् ।
ज्ञास्यते स्वात्मना नूनं तातं नः सत्यवादिनम् ॥ ७१ ॥

अन्यथा जातु शङ्केत मिथ्यावादीति भूपतिम् ।
यदर्थं सकलो यत्नो मया सम्यगनुष्ठितः ॥ ७२ ॥

जानामि ते परां भक्तिं मय्यनन्यमना असि ।
कुरु मद्वचनं सम्यक् सुमन्त्र नगरीं व्रज ॥ ७३ ॥
इत्युक्त्वा रघुशार्दूलः खिद्यन्तं तं पुनः पुनः ।
सान्त्वयामास भूपश्च वाष्पोदपि हितानन: ॥ ७४ ॥

ततश्चाज्ञापयामास गुहं सुहृदमात्मनः ।
समानय वटक्षीरं लेपयिष्यामि मूर्द्धजान् ॥ ७५ ॥
वनवासोचिताः सम्यक् करिष्यामि जटाः सखे ।
स तदाज्ञाकरः क्षिप्रं तथा चक्रे गुहः सुहृत् ॥ ७६ ॥

रघुनाथो जटाश्चक्रे लक्ष्मणस्य तथाऽऽत्मनः ।
आजानुबाहुरुचिरौ जटाघोरणिशालिनौ ॥ ७७ ॥
तेजसा त्वेन दीव्यन्तौ तापसोत्तमवेशिनौ ।
भ्रातरौ तुल्यवयसौ नीलमेघमनोहरौ ॥ ७८ ॥

अशोभतामुभौसम्यगनुभावविशेषतः ।
अथोवाच गुहं रामः स्मयमानो मुदान्वितः ॥ ७९ ॥
सदा त्वं कुशली भूया निजं राज्यभरं वहन् ।
निषादाधिपते नित्यं मम मैत्रीं न विस्मरेः ॥ ८० ॥

अप्रमत्तोऽखिलाङ्गेषु प्रजाः समनुपालय ।
इत्यनुज्ञाप्य सहसा गुहं काकुत्स्थसत्तमः ॥ ८१ ॥
पूर्वं लक्ष्मणमाज्ञाप्य नावारोहणकर्मणि ।
ततः सीतां समारोप्य स्वयं नावमथारुहत् ॥ ८२ ॥

अभिदीक्ष्य पुनश्चैष प्रसन्नतमया दृशा ।
सुमन्त्रं च गुहं चैव सामात्यं भक्तमात्मनः ॥ ८३ ॥

अथ सम्प्रेरयामास नाविकान् रघुसत्तमः ।
तैः प्रेरिता तु नौः शीघ्रं कर्णधारैः प्रवाहगा ॥ ८४ ॥

बभूव वायुवेगेन परपारोन्मुखी ततः ।
मध्येगङ्गा परिप्राप्ता तुष्टाव जनकात्मजा ॥ ८५ ॥

अयि देवि पुरारिकपर्दिचरीं नवमौक्तिकमालिकया तुलिताम् ।
सुरलोकतरंगिणि सिन्धु वधूं प्रणमामि चिरं भवतीं जननि ॥ ८६ ॥

सुरभूरुहपुष्पवराञ्जलिभिस्तव पूजितमम्बु सुरर्षिगणैः ।
सुविभाति मदा सुधया सदृशं भृशमञ्चितमौरभसारमिदम् ॥ ८७ ॥

त्रिविधान्तरतापविनाशकरी त्रिदशालयमञ्जुलवीथिचरीम् ।
विलसत्परमामृतपूरझरी भववारिनिधेस्तरणाय तरी ॥ ८८ ॥

त्वमनन्तशुभोदयमोदनिधिर्विधिविष्णुशिवादिसुरैद्यनुता ।
जयसि प्रसभं जनपापहरा धरणीतलशोभिवलक्षरुचिः ॥ ८९ ॥

प्रसादयामि जाह्नवि त्वमीश्वरी शुभं कुरु ।
पुनस्त्वया समागमो ममास्तु निर्धुतापदः ॥ ९० ॥

गङ्गे तव प्रसादार्थं घटोघ्नीर्गाः सहस्रशः ।
सकल्पयामि मनसा शीघ्रं कुरु ममोदयम् ॥ ९१ ॥

जवेनविपदं तीर्त्वा पत्या साकं महात्मना ।
कदा द्रक्ष्यामि देवि त्वां गङ्गे त्रैलोक्यमङ्गलाम् ॥ ९२ ॥

इति संस्तूय सा गङ्गां मध्येस्रोतसि संस्थिता ।
समीरजवया नावा परं पारमुपागमत् ॥ ९३ ॥

दक्षिणं तीर्थमासाद्य जाह्नव्या लोकपावनम् ।
सीतासौमित्रिसहितः कृतकार्यांतरीं जहौ ॥ ९४ ॥

ते गङ्गा लोकशुभदां प्रणम्य नतकन्धराः ।
ततो विसर्जयामासुर्नाविकान् भक्तिसंनतान् ॥ ९५ ॥

रामं त्यक्तुमनिच्छन्तो नाविका विरहातुराः ।
सान्त्वयित्वा चिरं तेन मुक्तास्तीरावनौ स्थिताः ॥ ९६ ॥

चक्षुःपथादतिक्रान्ते रामे त्रैलोक्यसुन्दरे ।
विषण्णहृदयः सूतो गुहश्चापि न्यवर्त्तत ॥ ९७ ॥

प्रसादं बहुलं प्राप्य रामस्याच्युतकर्मणः ।
मैत्रीं सौमित्रितुल्यां च कृतकार्योऽभवद् गुहः ॥ ९८ ॥

पुरः सुमित्रातनयस्तत्पश्चाज्जनकात्मजा ।
तस्याः पश्चात्पथं रक्षन् धनुष्पाणिः स्वयं ययौ ॥ ९९ ॥

महान्तं मार्गमभ्येत्य सीतया सहितावुभौ ।
ततः पुष्करिणीं दिव्यां भ्रातरौ समपश्यताम् ॥ १०० ॥

राजहंसशताकीर्णां फुल्लकह्लारमण्डिताम् ।
पद्मकैरवसंदोहसंशोभिविमलोदकाम् ॥ १०१ ॥

दर्शनीयशुभाकारां चक्रसारसनादिताम् ।
कारण्डवकुलध्वाननादिताशेषकाननाम् ॥ १०२ ॥

दर्शयामास वैदेह्यै तां रामो जातसम्भ्रमः ।
पश्य प्रिये शुभामेतां सरसीं त्वामिवोज्ज्वलाम् ॥ १०३ ॥

उत्फुल्लपद्मवदनां फुल्लेन्दीवरलोचनाम् ।
भ्रमरावलिसंजातलोलालकलतारुचिम् ॥ १०४ ॥

राजहंसकुलोन्नादिमञ्जीरध्वनिमञ्जुलाम् ।
उत्तुङ्गपुलिनारोहनितम्बद्युतिशोभिताम् ॥ १०५ ॥

चलत्तरङ्गसंदोहतारुण्यमदविभ्रमाम् ।
समीरवेगजातोर्मित्रिवलीचारुविग्रहाम् ॥ १०६ ॥

मिथुनीभूतचक्राह्ववक्षोजद्वयशोभिताम् ।
मृणालकाण्डदोर्लग्नकरपङ्कजभूषिताम् ॥ १०७ ॥

ततः पद्मपरागौघदिव्यांशुकविराजिताम् ।
निशम्य पत्युर्वचनं वैदेही सत्रपाभवत् ॥ १०८ ॥

अलं प्रिय मृषोद्येनेत्युक्त्वा तां सुमदैक्षत ।
तस्यास्तीरे महोत्तुङ्गं न्यग्रोधतरुमाश्रितौ ॥ १०९ ॥

भ्रातरौ सीतया युक्तौ तां रात्रिं तौ व्यतीयतुः ।
लक्ष्मणो जानकीप्रीत्यै पद्मानि समुपाहरत् ॥ ११० ॥

पद्महस्ता तु सा रेजे साक्षाल्लक्ष्मीरिवाद्भुता ।
त्रिरात्रं ते जलं प्राश्य तस्थुर्घोरतरे वने ॥ १११ ॥

चतुर्थीं तां निशं प्राप्य फलान्यादुर्महाव्रताः ।
हत्वा च चतुरो मेध्यान् सायं न्यग्रोधमास्थिताः ॥ ११२ ॥

त्वरितास्तत्र सम्प्राप्तास्त्रिरात्रेणबुभुक्षिताः ।
उपास्य पश्चिमां संध्यां प्राणावृत्तिमकल्पयन् ॥ ११३ ॥

लोकवृत्तमधिष्ठाय विललापचिरं वटे ।
सौमित्रिसहितो रामः कैकेयीं समनुस्मरन् ॥ ११४ ॥

देशाद्विनिष्क्रान्तवतोऽस्य सा निशा विना सुमन्त्रं प्रथमान्वपद्यत ।
घोरे वने जाग्रत एव तत्र ते न्यग्रोधमूले विजनेऽधितस्थिरे ॥ ११५ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे न्यग्रोधतरुतलवासो नाम त्रयोदशोऽध्यायः ॥ १३ ॥

चतुर्दशोऽध्यायः

ब्रह्मोवाच

अथोदिते दिवानाथे नदत्पक्षिगणस्वरैः ।
विनीतनिद्राः प्रोत्थाय ततः स्थानात्प्रतस्थिरे ॥ १ ॥
संफुल्ल चित्रपुष्पाद्यान् गुञ्जद् भ्रमरनादितान् ।
पश्यन्तः पादपान् रम्यान् लताश्च कुसुमान्विताः ॥ २ ॥
नानावर्णा मनोज्ञाश्च नवपल्लवभूषिताः ।
देशांश्च विविधान् पद्भ्यां विगाहन्तो दृढव्रताः ॥ ३ ॥
कल्याणतरमध्वानं प्राप्य कोतूहलान्विताः ।
प्रजग्मुः सम्प्रमुदिताः प्रसन्नमनसो भृशम् ॥ ४ ॥
रक्तायमाने तपने भरद्वाजाश्रमं ययुः ।
यत्र गङ्गामनुगता यमुना भूरिवेगिनी ॥ ५ ॥
तयोः सन्धि समासाद्य स्थिता यत्र सरस्वती ।
यत्रत्यक्त्वा तनुं मर्त्या ब्रह्मज्योतिर्विशन्ति हि ॥ ६ ॥
वसन्ति मुनयो यत्र भरद्वाजमनुव्रताः ।
तपस्विनो वीतरागाः परापरविदुत्तमाः ॥ ७ ॥
तेषां सम्पठतां नित्यं ब्रह्मघोषो दिवानिशम् ।
प्रवर्तते मुखरयन् वनानि च दिशो दश ॥ ८ ॥
तत्र दूरात्सुसंलक्ष्य मुनीनामाश्रमेष्वलम् ।
अग्निहोत्रोद्भवं धूमं मुमुदे रघुपङ्गवः ॥ ९ ॥
सीतासौमित्रिसंयुक्तः पश्यन्नाश्रमभूरुहान् ।
गङ्गायमुनयोः शृण्वन् मिथः संघर्षजं रवम् ॥ १० ॥
अस्तं याति रवौप्राप महर्षेः पुण्यमाश्रमम् ।
तीर्थराजे प्रयागाख्ये प्रतिष्ठिततमं शुभम् ॥ ११ ॥

तत्र गत्वा मुनीशानं भरद्वाजं तपोनिधिम् ।
एकान्ते सु समासीनं हुताग्निं शंसित व्रतम् ॥ १२ ॥
दृष्ट्वा ननाम वैदेह्या लक्ष्मणेन च संयुतः ।
स्वात्मानं ज्ञापयामास मुनये रघुनन्दनः ॥ १३ ॥

ब्रह्मन् दशरथस्यावामात्मजौ रामलक्ष्मणौ ।
इयं मेऽनुव्रता भार्या पुत्री जनकभूपतेः ॥ १४ ॥
गृहात्प्रव्राजितं पित्रा मामेषानुगता सती ।
अयं च मेऽनुजो ब्रह्मन् सौमित्रिः कृतनिश्चयः ॥ १५ ॥

स्वयमेवान्वगाद्धीरो वनवासोन्मुखं हि माम् ।
सोऽहं वने चरिष्यामि धर्मं प्रव्रजितो गृहात् ॥ १६ ॥
वन्यै रेव विधास्येऽहं वृत्तिं मूलफलादिभिः ।
इत्युक्तो रघुवर्येण मुनिवर्यस्तपोनिधिः ॥ १७ ॥

सूक्ष्मदर्शी ददौ तस्मै आसनं चार्घमुत्तमम् ।
उदकं च प्रदायास्मै फलमूलैरभोजयत् ॥ १८ ॥
काकुत्स्थः प्रतिगृह्यास्मादातिथ्यमतिथिप्रियात् ।
सूपविष्टः शुभे देशे शुभासनपरिग्रहः ॥ १९ ॥

सीतासौमित्रिसहितो बभाषे मुनिना ततः ।
भवद्भिः पालिते देशे योगक्षेमाद्वसामहे ॥ २० ॥
चिरं तव पितुः प्रीत्यै सरयूतीरमाश्रितम् ।
इदानीमत्र तिष्ठामि स्वाश्रमे मे पुरातने ॥ २१ ॥

गङ्गायमुनयोर्मध्यं पुण्यं त्रैलोक्यविश्रुतम् ।
इयं मे वसतिः पुण्या चिरं तिष्ठात्र राघव ॥ २२ ॥
चिरेणा निःसृतो गेहादिति त्वामनुशुश्रुम ।
कारणं चापि विज्ञातं वनं प्रवसति त्वयि ॥ २३ ॥

इमं देशं समातिष्ठ रघूद्वह मया सह ।
गङ्गायमुनयोर्मध्ये सावकाशमिदं वनम् ॥ २४ ॥
इहैव सीतया सार्धं पुत्र्या जनकभूपतेः ।
सुखं विहर रामेन्दो वर्द्धयन् मद् दृशोः सुखम् ॥ २५ ॥

सौमित्रिश्च तव भ्राता सुखं तिष्ठतु मे वने ।
गङ्गायमुनयोः सन्धौ विस्तृते पुण्यतीर्थके ॥ २६ ॥
पत्रमूलफलादीनामिह सौलभ्यमस्ति च ।
अतोऽत्रस्थीयतां राम यदि ते हृदिरोचते ॥ २७ ॥

इत्युक्तस्तेन मुनिना रामो मुदितमानसः ।
उवाच दीर्घतपसं भरद्वाजं स्ववेदिनम् ॥ २८ ॥

महदेव भवेद् भाग्यं शुभं च महदेव मे ।
त्वया परावरज्ञेन सह संवसतो वने ॥ २९ ॥

किं त्वितो निकटेऽयोध्या भगवन् मा पुरी मम ।
पौरैर्जानपदैर्लोकैः प्रेक्षकैर्मां विशेषतः ॥ ३० ॥

करिष्यतेऽत्र सम्मर्द एकान्ते भवदाश्रमे ॥ ३१ ॥

अतो नात्र रुचिर्वासे कृपैव तव भूयसी ।
एकान्ते ममवासार्थं क्वचित्स्थानं विमृष्यताम् ॥ ३२ ॥

इत्युक्तः सत्यसन्धेन रामेण मुनिसत्तमः ।
सर्वैः कामैरदीनात्मा तस्यां निशि महावसत् ॥ ३३ ॥

सुविचित्राः कथाः कुर्वन् मुनिना तत्त्ववेदिना ।
मुमुदे रघुशार्दूलो जानकीलक्ष्मणान्वितः ॥ ३४ ॥

पूजितस्तापसवरैर्भारद्वाजाश्रमस्थितैः ।
श्लाघितः सस्तुतश्चैव सुप्रसन्नोऽभवद्भृशम् ॥ ३५ ॥

भरद्वाजो मुनिश्रेष्ठः प्रतिपूज्य रघूद्वहम् ।
शुभासनस्थितं पश्चादिदमूचे वचोऽमृतम् ॥ ३६ ॥

जानामि त्वां रघुश्रेष्ठ धर्मरक्षण हेतवे ।
संजातं सूर्यवंशस्य भूषणं स्वेन तेजसा ॥ ३७ ॥

साकेतनाथो भगवान् पूर्णः सहजशक्तिभिः ।
स्वयं सर्वगुणैराढ्यः स त्वं त्रिभुवनेश्वरः ॥ ३८ ॥

कुर्वन्नद्भुतकर्माणि वितन्वन् विशदं यशः ।
विचरिष्यसि धर्मात्मन् वनेषु पुरुषोत्तम ॥ ३९ ॥

दर्शनस्पर्शनप्रश्नपादशौचासनादिभिः ।
पावयन् सर्वदेशेषु मुनीनामाश्रमाञ्छुभान् ॥ ४० ॥

संहरन्नसुरानीकमुद्धरन्नायुधैर्निजैः ।
शोभयन् धरणीमेतां चरणाङ्कैर्मनोहरैः ॥ ४१ ॥

चरिष्यसि हितं कुर्वन् देवानां च द्विजन्मनाम् ।
शाश्वतं पालयन् धर्ममाविर्भूतोऽसि यत्कृते ॥ ४२ ॥

प्रस्थास्यमानं त्वां ज्ञात्वा पूर्वमेव मया पुरी ।
परित्यक्ता कृतो यस्यां तव पित्रा ममाश्रमः ॥ ४३ ॥

येऽन्ये च मुनयो राम तवपुर्यां निवासिनः ।
ते प्रस्थितं त्वां विज्ञायत्पक्ष्यन्ति वर्मनि ध्रुवम् ॥ ४४ ॥

न त्वां विहाय किमपि प्रियं नो भुवनत्रये ।
येषां हुतं तपश्चैव त्वदर्थे रघुपुङ्गव ॥ ४५ ॥

एवं विचित्रवार्त्ताभिर्मोदयन् रघुवल्लभम् ।
निनाय तां निशं तस्य पार्श्वे परमनिर्वृतः ॥ ४६ ॥

अथ प्रभातेऽभ्युदिते दिनेश्वरे प्रणम्य रामो मुनिवर्यमादरात् ।
सौमित्रिसीतासहितो महामना निमज्ज्य गङ्गायमुनासमागमे ॥ ४७ ॥

मुनीन्द्रदिष्टेन पथा प्रथीयसा सम्प्रस्थितो धर्मधरो धनुर्धरः ।
पुरोनिधायानुजमस्य पृष्ठगां प्रियां पुरोधाय विदेहजां ययौ ॥ ४८ ॥

सन्तीर्यांशुमतीं स लक्ष्मणसमाबद्धप्लवेनाशुगां
कालिन्दीं यमुनांसु[1]तीर्थसलिलां न्यग्रोधमासाद्य च ।
वैदेह्या भृशसंस्तुतस्य च तले विश्रम्य तस्य क्षणं
गव्यूत्यन्तरमार्गमेत्य च ततश्चक्रे निवासं वने ॥ ४९ ॥

श्रीमान् मनोज्ञे यमुनातटे शुभे जलार्थमायातमपश्यदुद्धतम् ।
कुलं मृगाणां विनिहत्य तेष्वसौ कांश्चिन्निवासाय ततो द्रुतं ययौ ॥ ५० ॥

सूर्यात्मजाप्रवने सुशीतले तरङ्गसंशीलितवातसेविते ।
चिरं विहृत्य प्रियया नुजेन च क्षपागमे सोऽध्य वसन्मुदान्वितः ॥ ५१ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे यमुनातीरनिवासो नाम चतुर्दशोऽध्यायः ॥ १४ ॥

●

पञ्चदशोऽध्यायः

ब्रह्मोवाच

अथ प्रभातवेलायां गरुड़ाग्रजरोचिषा ।
विलिप्ते कानने तस्मिन् सिन्दूरेणेव रञ्जिते ॥ १ ॥

नवकाश्मीरजरसैः प्रक्षालित इवाद्भुते ।
ललत्पल्लवसंदोहशोभाढ्यविविधद्रुमे ॥ २ ॥

यमुनावातलहरीवीज्यमानलतागृहे ।
सूर्योदयरणच्चित्रपतङ्गकुलनादिते ॥ ३ ॥

---

१. तथाच्छ—अयो०, मथु० ।

पुंस्कोकिलगणोद्गीतप्राभातिकसुमङ्गले ।
रामः प्रोत्थापयामास शनैः सौमित्रिमादरात् ॥ ४ ॥

श्रूयतां भ्रातरधुना विचित्रविहगध्वनिः ।
प्राभातिकीं शुभां वेलां पश्य लक्ष्मण सम्प्रति ॥ ५ ॥

अरुणस्य प्रभा शोणा लिम्पतीवाखिलं वनम् ।
पश्य द्विगुणमारुण्यं तरुणां पल्लवेष्विह ॥ ६ ॥

उत्फुल्लकमलामोदीवाति प्राभातिकोऽनिलः ।
अतोऽधुना वयं सर्वे स्नात्वा पाथसि यामुने ॥ ७ ॥

उपास्य प्रथमां संध्यां प्रस्थातुमुचिताः सखे ।
ततः सर्वे तथा कृत्वा पूतात्मानः प्रतस्थिरे ॥ ८ ॥

तद्वर्त्म चित्रकूटस्यनिर्दिष्टं मुनिनापुरा ।
सम्प्राप्य शोभयाञ्चक्रुस्त्रयस्ते विस्मयोहनाः ॥ ९ ॥

अचिरेणैव कालेन ददृशुर्जातकौतुकाः ।
चित्रकूटं महाशैलं गन्धमादनसन्निभम् ॥ १० ॥

विचित्रभूरुहाकीर्णं लतामण्डपमञ्जुलम् ।
विचित्रपुष्पस्तबकरमणीयलताकुलम् ॥ ११ ॥

विचित्रपक्षिसंदोहमधुरध्वनिनादितम् ।
उतुङ्गानेकशिखरनानावर्णमनोहरम् ॥ १२ ॥

नानानिर्झरनिर्ह्रादमिश्रझिल्लीगणस्वनम् ।
प्रभूतफलमूलाढ्यं प्रभूतमधुसम्भवम् ॥ १३ ॥

रमणीयं महत्पुण्यं कन्दरामन्दिरान्वितम् ।
स्वधास्वच्छम्बुवाहिन्या मन्दाकिन्या विराजितम् ॥ १४ ॥

नानाकुञ्जरयूथाढ्यं मृगयूथविराजितम् ।
कपालशिरसो नाम्नो महर्षेःस्थानमुत्तमम् ॥ १५ ॥

अन्येषां च मुनीन्द्राणां स्थानभूतं मनोहरम् ।
विकसन्मञ्जुमन्दारपारिजातवनान्वितम् ॥ १६ ॥

कल्पवृक्षद्रुमच्छायाविश्रान्तमुनिमण्डलम् ।
कूजत्कोकिलभृङ्गौघशिखण्डिगणसेवितम् ॥ १७ ॥

झिल्लीझङ्कारमधुरं चकोरीचयनादितम् ।
राजहंसकुलानन्दिसरसीशतसुन्दरम् ॥ १८ ॥

फुल्लकुन्दकदम्बाग्र चम्पकद्रुमसंकुलम् ।
शीतात्ययसुसंफुल्लपद्मशोभिसरोजलम् ॥ १९ ॥

प्रदीप्तकिंशुकाशोकपुष्पकान्तिमनोहरम् ।
भल्लातकवनच्छन्नं बिल्वतिन्दुकसंकुलम् ॥ २० ॥

फलभारनतानेककपित्थपनसद्रुमम् ।
कदलीखण्डसंशोभिगह्वरोन्नादिनिर्झरम् ॥ २१ ॥

स्थले स्थले महातीर्थैस्त्रिजगत्पावनैर्युतम् ।
अतिपुण्यतमानेक शृङ्गोच्छ्रायविभूषितम् ॥ २२ ॥

साक्षात्स्वर्गोपमं दिव्यं सुविस्तीर्णशिलातलम् ।
क्वचिन्मारकतैः शृङ्गैर्गगनं व्याप्य संस्थितम् ॥ २३ ॥

क्वचिद्रत्नमयैः क्वापि स्फाटिकैः सुमहोन्नतैः ।
क्वचिच्चमाणिक्यमयैः क्वचित्स्वर्णमयैरपि ॥ २४ ॥

क्वचित्सिन्दूरपूरेण संध्यातपमिवारुणम् ।
क्वचिन्नवतृणाभासधातुभिर्हरितापितम् ॥ २५ ॥

क्वचिद्धातुरसैः पीतैर्वसन्तमिवकाञ्चनम् ।
अनेकधातुप्रभवमनेकाद्भुतसुन्दरम् ॥ २६ ॥

वीक्ष्य रामो जनकजामब्रवीन्मधुरं वचः ।
रामणीयकमस्याद्रेः पश्य वैदेहि सम्प्रति ॥ २७ ॥

अस्मदागमनोद्भूतसर्वर्तुसुषमाञ्चितम् ।
वनं प्रमोदयति मामध्युपत्यकमूर्जितम् ॥ २८ ॥

इमाः फलभरैर्नम्राः पुष्पवन्त्यो महालताः ।
मन्दानिलेन कम्पन्ते कन्दर्पेणेव योषितः ॥ २९ ॥

पुष्पाञ्जलिमिवादाय स्थिताः पल्लवपाणिभिः ।
फलभारैर्नमच्छीर्षा भक्त्येव प्रयता द्रुमाः ॥ ३० ॥

अनुमन्दाकिनीं पश्य पुलिने पुष्पितान् द्रुमान् ।
वनराजिरियं पुण्या मनो मोदयते भृशम् ॥ ३१ ॥

अत्रेमे तरवः सम्यक् फलभारैः समाकुलाः ।
कामं नः पूरयिष्यन्ति विनाऽऽयासेन जीवनम् ॥ ३२ ॥

नानाविधानि मूलानि स्वादूति सुरभीनणि च ।
फलानि पाकरम्याणि शाकानि विविधानि च ॥ ३३ ॥

उपायोक्ष्यामहे शश्वत्प्राणवृत्त्यै विदेहजे ।
अत्र त्वत्पाणिचरणप्रतीकाशाः प्रभारुणाः ॥ ३४ ॥

दृश्यन्ते तरुवल्लीनां पल्लवाः पश्य तान् प्रिये ।
अत्र कूजन्त्यमी रम्यं पक्षिणः कोकिलादयः ॥ ३५ ॥

अनङ्गवर्द्धनं मन्त्रं पठन्त इव संततम् ।
निषण्णास्तरुशाखासु स्निग्धच्छायासु पल्लवैः ॥ ३६ ॥
सर्वर्त्तुसुखशोभाढ्यं वनमेतद् विलोक्यताम् ।
उपत्यकामनुगिरेर्नीलं पत्रौघ सम्पदा ॥ ३७ ॥

शृणुष्वात्र गिरौ रम्ये गायत्रीर्वनदेवताः ।
मूर्छयित्वा स्वरैर्वीणां पञ्चमोद्गारशालिनीः ॥ ३८ ॥
तासाममूययेवेमाः कूजन्ति वनकोकिलाः ।
रसालशिरसि स्थित्वा नादिताशेषकाननाः ॥ ३९ ॥

इह वैदेहि परमां मनोमुदमवाप्स्यसि ।
निवसन्ती मया सार्धं सुखेन विहरिष्यसि ॥ ४० ॥
इत्येवं वर्णयन् रामो वैदेह्या जनयन् मुदम् ।
पश्यन् मन्दाकिनीं रम्यां पुष्पितोद्देशकाननाम् ॥ ४१ ॥

सौमित्रिसहितः प्राप्तश्चित्रकूटं महागिरिम् ।
वासानुरूपमनिशं विलासोचितमात्मनः ॥ ४२ ॥
ततस्तस्यैकपार्श्वे तौ भ्रातरौ प्रीतमानसौ ।
आवासं चक्रतुर्वीरौ सुस्निग्धौ रामलक्ष्मणौ ॥ ४३ ॥

लक्ष्मणो जानकीरामप्रीतिसंवर्द्धनीं पृथक् ।
पर्णशालां समातेने मनोज्ञशयनान्विताम् ॥ ४४ ॥
आत्मने च ततश्चक्रे पर्णशालां लघीयसीम् ।
पत्रैर्लतावितानैश्च वेत्रबद्धैः सुदारुभिः ॥ ४५ ॥

वंशैश्च हरितैः सम्यग् विधिना विनिवेशितैः ।
नानापर्णघसंछन्ने पर्णशाले विरेजतुः ॥ ४६ ॥
सम्मार्जिते चोपलिप्ते संस्कृते च विशेषतः ।
ततश्च मृगमांसेन श्रपयित्वा चरुं शुभम् ॥ ४७ ॥

इध्मैरग्निं परिज्वाल्य जुहुवे रघुसत्तमः ।
देवान् पितॄंश्च सम्पूज्य सर्वभूतानि चाहृतः ॥ ४८ ॥
हुतशेषं ततः स्वादु धृत्वा पर्णपुटे प्रभुः ।
परिविष्टं सवैदेह्या सानुजो बुभुजे स्वयम् ॥ ४९ ॥

सीतापि बुभुजे देवी स्वयं लक्ष्मीस्तदाज्ञया ।
तयोः शेषं समादाय स्थित्वैकान्ते शुभाशया ॥ ५० ॥
ततश्च तां पर्णमयीं मनोहरां प्रविश्य शालां रघुवंशाब्धिचन्द्रः ।
विनोदयामास विदेहजां रमां मुदा तदात्मैकरसौ महामनाः ॥ ५१ ॥

लक्ष्मणस्तावुपासीनो दासकृत्यपरायणः ।
आसीद् दूरे समीपे च यथाभिरुचितं तयोः ॥ ५२ ॥

ते तत्र शैले विजने वनावृते मनोज्ञनानापशुपक्षिसंकुले ।
फलप्रसूनस्तबकोपशोभितद्रुमाकुले भूरिसुखा विजह्रिरे ॥ ५३ ॥

दरीषु रम्यासु वनेषु विस्फुरद्विचित्रवल्लीशतमण्डपेषु च ।
शुभेषु तन्माल्यवतीतटेषु च प्रकाममध्यास्य महामुदं दधुः ॥ ५४ ॥

जायापती तौ कृतधातुमण्डनौ विचित्रबर्हस्तबकोपशोभितौ ।
गुञ्जामणिस्रग्वरकान्तिधारिणौ विजह्रतुः शैलवरे यथासुखम् ॥ ५५ ॥

रामो रमां रमणीयैर्विलासैः साक्षात्परां सहजानन्दिनीं ताम् ।
प्रमोदया मास यथा प्रमोदवने मनोज्ञे सुखितेन्द्रधाम्नि ॥ ५६ ॥

ताः कन्दराः संस्तृतचारुपल्लवा दिव्यौषधीरत्नसमूहदीपिताः ।
अध्यास्य माणिक्यमयीश्च ताः शिलाः सदैव रामो रमयाम्बभूव ताम् ॥ ५७ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे चित्रकूटनिवासो नाम पञ्चदशोऽध्यायः ॥ १५ ॥

षोडशोऽध्यायः

ब्रह्मोवाच

वसन् गिरिवरे रामः सीतया सहितः प्रभुः ।
रसिकेन्द्रः स्वयं रेमे पौलोम्या सुरराडिव ॥ १ ॥

प्रियामादाय मुदितामेकान्ते सञ्चरन् वने ।
विजहार विलासाढ्यः सर्वर्तुसुखदे गिरौ ॥ २ ॥

उवाच गेह्वरे कुञ्जे दर्शयित्वा प्रियां गिरिम् ।
वसन्तागमसंफुल्लमाधवीशतसंकुलम् ॥ ३ ॥

प्रिये वैदेहि दृष्ट्वेमं सर्वर्तुसुखदं गिरिम् ।
वनं च फलपुष्पाढ्यं कूजत्कोकिलनादितम् ॥ ४ ॥

त्वां चानुकूलधिषणां संततं सुखदायिनीम् ।
न मन्ये मे गतं राज्यं न चापीष्टवियोजनम् ॥ ५ ॥

यस्यास्य गिरिराजस्य धातुमन्ति वृहन्ति च ।
शृङ्गानि रवमिव व्याप्य स्थितानि जनकात्मजे ॥ ६ ॥

केचित्कर्पूरधवलाः केचिद्बालातपारुणाः ।
केचिन्नवतृणाभासाः केचित् काञ्चनसन्निभाः ॥ ७ ॥

पुष्परागोपमाः केचित् केचित्पद्मदलप्रभाः ।
केचिन्नवदलाभासाः केचिच्चित्रैर्विचित्रिताः ॥ ८ ॥

विभान्ति सानवस्तुङ्गा गिरेरस्य महौजसः ।
अयं भुजैरिवामीभिर्दिशोऽष्टौ परिरम्भते ॥ ९ ॥

पश्य प्रियेऽद्य मधुना पशुपक्षिगणेष्वपि ।
मन्मथस्य शरैर्नूनं सुविक्रान्तमिवाद्भुतम् ॥ १० ॥

पश्येमां हरिणीं स्निग्धां मृगेणानुगतां वनें ।
शृङ्गकण्डूयनोद्भूतस्पर्शसौख्यनिमीलिताम् ॥ ११ ॥

पश्येमां मल्लिकापुष्पे पिबन्तीं मधु निर्भरम् ।
अलिनीमलिना सार्द्धं झङ्कारकलगायिनीम् ॥ १२ ॥

पश्येमास्तरुभिः सार्द्धं मिलिता ललिता लताः ।
पुष्पमन्दस्मितोद्गाराः प्रोत्तुङ्गस्तबकस्तनीः ॥ १३ ॥

आम्रैर्माधविकाः श्लिष्टाः कलयन्ति परां मुदम् ।
आम्रातकैश्चमाधुर्यः परिरम्भसुनिर्वृताः ॥ १४ ॥

लोध्रैर्मालतिकाः स्निग्धा आलिङ्गनमुपागताः ।
प्रियकैः पृथुदोशाखैरतिमुक्तलता अपि ॥ १५ ॥

ककुभैः कुन्दमन्दारैरक्षोटैः पनसद्रुमैः ।
मधूकैर्बकुलैर्बिल्वैस्तिलकैः कोविदारकैः ॥ १६ ॥

नीपैरामलकैश्चैव बदरैर्बंधुजीवकैः ।
प्रियालैः कर्णिकारैश्च शालैस्तालैस्तमालकैः ॥ १७ ॥

नानाजातिलताः श्लिष्टाः फलपुष्पोपसेविताः ।
अङ्कुरोद्भिन्नवपुषः कलयन्ति कुतूहलम् ॥ १८ ॥

कम्पन्ते किमपि ह्येता मन्दानिलविलोलिताः ।
युक्ताः सात्विकभावेन मनोजशरलक्षिताः ॥ १९ ॥

अपि पश्य मनोज्ञेषु गिरेः प्रस्थेषु किन्नरान् ।
स्वस्वप्रियासमासक्तान् मदनोन्मादशालिनः ॥ २० ॥

विद्याधरीणां पश्यैते क्रीडोद्देशा मनोरमाः ।
जलनिर्झरसंशीताः पुष्पसौरभशालिनः ॥ २१ ॥

अमी सम्मुदिताः[1]सन्ति वरटाभिः सहान्विताः ।
राजहंसाः सरस्तोये पद्मसौरभशालिनि ॥ २२ ॥

---

१. नित्यम्—अयो०, मथु० ।

लनावितानच्छन्नानि वनानि विविधैर्द्रुमैः ।
निरातपमनोज्ञानि कुर्वन्ति महतीं मुदम् ॥ २३ ॥

कानिचिद्गह्वराण्यत्र निकुञ्जैरतिसंकुलैः ।
परितः सान्धकाराणि मध्ये दिव्यौषधित्विषा ॥ २४ ॥

भास्वराणि नदाच्चित्रद्विजालिकुलवन्ति च ।
अन्तरुत्फुल्लपुष्पौघशोभावन्ति विदेहजे ॥ २५ ॥

कुर्वन्ति मनसः प्रीतिं चित्रशालोपमान्यलम् ।
अनङ्गकेलिकारीणि जनयन्ति मनोरुचिम् ॥ २६ ॥

पश्य माल्यवतीमेतां तरङ्गावर्त्तशालिनीम् ।
मन्दाकिनीं तटद्वन्द्वनवशाद्वलशालिनीम् ॥ २७ ॥

अस्यास्तटद्वयेऽप्येषा वनराजी विराजते ।
निरन्तरपयःसेकप्रौढभूरुहसंकुला ॥ २८ ॥

अत्र मे महती चित्ते रतिः सम्परिवर्द्धते ।
तन्वि त्वया सहैकान्ते चरतोऽनन्यचेतसा ॥ २९ ॥

अस्मिन् गिरौ निवसतो वनेषु चरतो मम ।
त्वमेव पद्मपत्राक्षि रक्षित्री कामसायकात् ॥ ३० ॥

इदमेकं फलं लब्धं सुकृतस्य मयाधुना ।
प्राप्तः स्वर्गोपमो वासः शैलेऽस्मिन् यत्त्वया सह ॥ ३१ ॥

रमस्व ननु वैदेहि मया सह गिराविह ।
पश्यन्ती विविधां शोभां कामोद्दीपनकारिणीम् ॥ ३२ ॥

इमाः शैलस्य शोभन्ते विचित्राः शतशः शिलाः ।
हैम्यश्च मारकत्यश्च राजत्यश्चातिशोणिताः ॥ ३३ ॥

आसामुपरि वल्लीनां पुष्पवर्षेण संततम् ।
राजन्ते विपुलाः शय्या मृदुलास्तरणैः स्तृताः ॥ ३४ ॥

इमा औषधयः शोभां दीपिका इव कुर्वते ।
प्रकाशं गिरिराजस्य बाह्याभ्यान्तरतो दिशम् ॥ ३५ ॥

किंस्विदेकशिलाकारः सारोऽयं धरणीधरः ।
एको मणिरिव स्थूलो भित्त्वेव भुवमुत्थितः ॥ ३६ ॥

विहृत्यास्मिन् वने तन्वि विलासैर्मधुमाधवैः ।
विरच्य चम्पकैर्माला नागपुन्नागकेसरैः ॥ ३७ ॥

अतिमुक्तैर्मल्लिकाभिर्वकुलैः किंशुकोद्भवैः ।
अन्यैश्च विविधैः पुष्पैः पद्मैः पद्मदलैस्तथा ॥ ३८ ॥

विधाय भूषाविन्यासं वनश्रियमिवाद्भुताम् ।
रमयिष्यामि तन्वि त्वां यदि त्वमनुमन्यसे ॥ ३९ ॥
अयं हि त्रिविधो वायुरग्रेसर इवातनोः ।
आयाति शासने कुर्वञ्छृङ्गारेकमयं जगत् ॥ ४० ॥
पश्यात्र शैले पद्माक्षि विहृतानां स्ववल्लभैः ।
किन्नरीणामुदोहारा विस्रस्ताः पतिता भुवि ॥ ४१ ॥
पश्येमा मृदिताः शैल पुष्पशय्याः सुकोमलाः ।
रतिमल्लमहायुद्धेऽपविद्धाश्च मणिस्रजः ॥ ४३ ॥
यावकाञ्जनसिन्दूरमणिमुक्तादिवस्तुभिः ।
सम्पन्नः शैलराजोऽयं क्रीडास्थानं मतं मम ॥ ४३ ॥
किं करोमि पुरीवासं किं करोमि नृपश्रियम् ।
किं करोमि गजानश्वान् किं करोमि महीमिमाम् ॥ ४४ ॥
त्वमेका स्पृहणीया मे लोलनेत्रा नितम्बिनी ।
पीनस्तनी दीर्घकेशी पूर्णचन्द्रनिभानना ॥ ४५ ॥
इदं च विपिनं रम्यं गिरिगह्वरगोचरम् ।
प्रमोदवनसंकाशं स्पृहणीयं सदा मम ॥ ४६ ॥
लक्ष्मणश्च प्रियोभ्राता हितकारी वशंवदः ।
अनुकूलः सदा शान्तः स्पृहणीयो विशेषतः ॥ ४७ ॥
इत्यालप्य प्रियां तां परमसहचरीं सर्वभावानुकूलां
कन्दर्पोत्तापसिद्धौषधिमिव रुचिरामाददानः करेण ।
प्रेम्णा संक्षुब्धचित्तः पदि पदि सुखयन् चुम्बनालिङ्गनाद्यै
रेमे सम्यग्विलासी प्रमुदवनगतः प्रेमवत्या यथा प्राक् ॥ ४८ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे चित्रकूटगिरिवर्णन नाम षोडशोऽध्यायः ॥ १६ ॥

●

सप्तदशोऽध्यायः

ब्रह्मोवाच

अथ रम्यलतावृक्षवेष्टितोत्तीरभूमिकाम् ।
मन्दाकिनीं पुण्यजलां वीक्ष्य शैलाद् विनिर्ग[1]ताम् ॥ १ ॥

१. विनिर्गतः—अयो०, मथु० ।

आभाषत प्रियां रामो राजीवनयनः स्वयम् ।
पश्य प्रिये नदीमेतां सखीमिव तवाद्भुताम् ॥ २ ॥

तीरभूरुहपुष्पौघविचित्रपुलिनद्वयाम् ।
हंससारसचक्राह्वकादम्बशतसंकुलाम् ॥ ३ ॥

वातान्दोलिततीरस्थलताकुसुममण्डिताम् ।
विचित्रफलपुष्पाढ्यां पूजितां तीरभूरुहैः ॥ ४ ॥

क्वचित् कमलकह्लारकैरवादिभिरावृताम् ।
क्वचित् पीतप्रसन्नैशाकुलाध्यासितशाद्वलाम् ॥ ५ ॥

क्वचित् पीतजटाभारैर्वल्कलाजिनधारिभिः ।
कालेऽवगाढ़सलिलामृषिवर्यैस्तपोरतैः ॥ ६ ॥

आदित्यमुपतिष्ठद्भिर्नियतैरूर्ध्वबाहुभिः ।
क्वचित् संकीर्णपुलिनां मुनिभिः शंसितव्रतै ॥ ७ ॥

क्वचिन्मरुत्समान्दोललुलत्पल्लवशालिभिः ।
पादपैः सेवितोत्तीरप्रदेशां पुष्पसंकुलैः ॥ ८ ॥

क्वचित्करेणुसंलग्नमत्तद्विरदमण्डिताम् ।
महामेघघटाभारं बिभ्रतीमिव संततम् ॥ ९ ॥

पश्यैते विहगाः कूजन्त्यनुमन्दाकिनीवनम् ।
पठन्त इव कामस्य दीपनं मन्त्रमुद्धुरम् ॥ १० ॥

पश्यैते वानरगणाः क्रीडन्ति मुदिता इव ।
पाकरम्यफलास्वादपुष्टाङ्गाः काननेष्विह ॥ ११ ॥

पश्यात्र विपिने तन्वि दृष्ट्वा त्वन्मुखमण्डलम् ।
हृष्यन्ति चापि नृत्यन्ति चकोराश्चन्द्रविभ्रमात् ॥ १२ ॥

एतेभ्यो लग्नदृष्टिभ्यो मम चित्तमसूयति ।
द्विजा इति विचार्याथ मोक्तुमिच्छामि नो शरम् ॥ १३ ॥

अथवात्रावयोरेते चिरात् संवत्सतोर्गिरौ ।
वद्धसौख्याः सख्यमेव कामयन्तो विहङ्गमाः ॥ १४ ॥

अवगाहस्वदयिते पुण्यां मन्दाकिनीमिमाम् ।
सरयूनिर्विशेषेण रुचि धत्स्वेह भामिनि ॥ १५ ॥

कञ्जकिञ्जल्कपुञ्जेन रञ्जितां मञ्जुलामिमाम् ।
भजस्व मृगशावाक्षि पुण्यां मन्दाकिनीं नदीम् ॥ १६ ॥

इहावगाह्य सुचिरं शीततोयैर्गतक्लमा ।
पद्मकिञ्जल्कपत्राद्यैर्भूषयस्व तनुं प्रिये ॥ १७ ॥

अयोध्यासदृशं पश्य चित्रकूटमिमं प्रिये ।
विना राज्यभरं तन्वि पुण्येन सुखिनो वयम् ॥ १८ ॥

लक्ष्मणः सन्निधौ भ्रातानुकूलो मे वशंवदः ।
त्वं च काञ्चनतुल्याङ्गी काम्यं मे किमतः परम् ॥ १९ ॥

इत्थं संदर्शयन् रामो भार्यायै काननं गिरिम् ।
नदीं तत्पुलिनं चापि ततो निववृते चिरात् ॥ २० ॥

गिरेरुत्तरतः पादे चित्रकूटस्य संचरन् ।
ददर्श कन्दरामेकां रमणीयतमां द्रुमैः ॥ २१ ॥

तां दिव्यरत्नौषधिसुप्रकाशितां विशालमाणिक्यशिलातलाङ्गनाम् ।
प्रभूतपुष्पास्तरणैरलंकृतां मरुत्पतत्पल्लवतल्पशोभिताम् ॥ २२ ॥

मनःशिलाद्यैर्गिरिधातुभिः सदा प्रभूतवालातपमञ्जुलारुणाम् ।
सुखप्रचेयद्रुमवल्लरीदलैर्निवारिताकांशुमहःसमागमाम् ॥ २३ ॥

तां दर्शयित्वा जनकात्मजायै दरीं सुवर्णोपलरत्नरम्याम् ।
सुनिर्जने तत्र वने मनोज्ञे स रन्तुकामोऽवतरन् बभाषे ॥ २४ ॥

पश्यसि प्रिये कन्दरामिमां शैलधातुभिः पूरितान्तराम् ।
विस्फुरल्लतापुष्पमञ्जरीपल्लवादिभिस्तल्पशालिनीम् ॥ २५ ॥

अत्र शंतमे निर्जने वने स्थीयतां प्रिये साधुरम्यताम् ।
विस्मृता इमाः स्फाटिकीः शिला वीक्ष्य कामये त्वां विषज्जितुम् ॥ २६ ॥

भूरिमन्मनःकामतापहृत्सम्भ्रमादिह त्वं भविष्यति ।
त्वादृशीं प्रिये प्राप्य कामिनीं कस्य नो रहः क्षुभ्यते मनः ॥ २७ ॥

अत्र कानने कोकिलारवैः काम उज्जागरो वर्ततेऽनिशम् ।
इत्यहं मुहुस्त्वामनिन्दितां वीक्ष्य दर्शयाम्यात्मनो रुचिम् ॥ २८ ॥

इत्युक्त्वा रसिकेन्द्रोऽसौ प्रियामादाय पाणिना ।
रहो विहर्तुं रामेन्दुः शिलां तामुपजग्मिवान् ॥ २९ ॥

सहजानन्दिनी साक्षात्सीला शीतांशु दीधितिः ।
उवाच मृदुहासेन द्योतयन्ती वनं वचः ॥ ३० ॥

दृष्ट्वेमां संविधां नाथ वनेऽपि स्वेष्टकारिणीम् ।
मनो मे प्रीयतेऽत्यर्थं तव संनिधिनिर्वृतम् ॥ ६१ ॥

यदाज्ञापयसि प्रेष्ठ तत्तथैव मतं मम ।
कन्दरामन्दिरं ह्येतद् रन्तुमेवोचितं प्रिय ॥ ३२ ॥

इति ब्रुवाणां वैदेहीं लोकोत्तरगुणान्विताम् ।
स्मितमाञ्जुल्यशोभाभी रञ्जयन्तीं दिशो दश ॥ ३३ ॥

अब्रवोदधिकं चेतो लोभयन् केलिपण्डितः ।
विभूतिरेषा पञ्चेषोः ज्ञाननेऽस्मिन् प्रसृत्वटी ।। ३४ ।।

शीतलः सुरभिमन्द आयात्येष समीरणः ।
अग्रेसर इवामन्दशासनः स्मरभूपतेः ।। ३५ ।।

लतालिङ्गितदोःशाखा अमी हि वन भूरुहः ।
निर्दिशन्ति जयं नित्यमनङ्गस्य प्रसर्पतः ।। ३६ ।।

इमाः कुसुमिताः शश्वत्फलभारनता लताः ।
तरुण्य इव कम्पन्ते वातेनेव मनोभुवा ।। ३७ ।।

इति ब्रुवत एवास्य शिलातलनिषादिनः ।
आरुरोहाङ्कमागत्य सीता शिञ्जितनूपुरा ।। ३८ ।।

रमयामास तां रामो रसिकेन्द्रो रसाकुलाम् ।
चञ्चलामिव चार्वङ्गीं क्रीडन्तीमङ्कमध्यगाम् ।। ३९ ।।

चिरं विपरिवर्तन्ती तडित्कोटिसमाकृतिः ।
मोदयामास रमणं नवोनमिव मन्मथम् ।। ४० ।।

चिरं विहृत्य वैदेह्या भगवान् रतिवर्द्धनः ।
अशोभत शिलापृष्ठै पौलोम्येव पुरन्दरः ।। ४१ ।।

अथ शृङ्गारयामास प्रियां विस्रस्तभूषणाम् ।
चम्पकैर्गुम्फयामास वेणीमलकशालिनीम् ।। ४२ ।।

अलकेषु बबन्धास्याः केशरस्य सुमान्यलम् ।
चक्रे कमलपत्रैश्च कञ्चुकीं कुचकुम्भयोः ।। ४३ ।।

सनालैः पङ्कजैश्चक्रे वाह्वोः केयूरयुग्मकम् ।
विचित्र पुष्पस्तबकैर्भूषाः कल्पितवान् पृथक् ।। ४४ ।।

पञ्चवर्णप्रसूनाढ्यां स्रजं कमलशालिनीम् ।
वक्षसि न्यस्तवान् रामो रमण्याः स वशंवदः ।। ४५ ।।

हरितालरसैर्मिश्रां सिन्दूराक्तां मनःशिलाम् ।
संघृष्य रमणोऽङ्गुल्या भालेतिलकमातनोत् ।। ४६ ।।

विभूष्य स्वामिनीमेष स्वयं चाभूषितस्तया ।
रेजाते तावुभौ तत्र शोभमानौ परस्परम् ।। ४७ ।।

इत्थं चिरं कन्दरायां चित्रकूटमहीभृतः ।
क्रीडित्वा प्रेयसीयुक्तो निर्जगाम ततः शनैः ।। ४८ ।।

मध्येमार्गमियं प्राप्ता प्रेयसी प्रेयसान्विता ।
राजहंसगतिः श्यामा रेजे रञ्जितमानसा ।। ४९ ।।

पश्यन्ती मृगशावाक्षी मार्गे वानरयूथयान् ।
वराहान् महिषांश्चैव मातङ्गान् वनचारिणः ॥ ५० ॥

विभ्यती तत्र तत्रासौ चकितैणाविलोचना ।
परिरेभे प्रियं धन्या वीरमात्तधनुःशरम् ॥ ५१ ॥

रामः प्रियां परीरम्भसुखमीलितलोचनाम् ।
स्वयं च परिरेभे तां द्विगुणोद्भूतमन्मथः ॥ ५२ ॥

भर्त्सयन् वारयन् हिंस्रान् दुर्जीवान् वनचारिणः ।
निनाय प्रेयसीं रामः संफुल्लाशोकवाटिकाम् ॥ ५३ ॥

तत्राशोकतरुप्रसूनविसरैरन्योन्यमाभूषिता-
वन्योन्यं गिरिधातुपल्लवकृताकल्पौ प्रभूतश्रियौ ।
आबद्धातुलबर्हचन्द्रककृतापीडावतंसोज्वलौ
शोभन्त्या वनमालयातिरुचिरौ लोकोत्तरं रेजतुः ॥ ५४ ॥

दर्शयित्वा तु विविधान् देशानद्रौ विहृत्य च ।
उपावर्तत जानक्या सहितो निजमाश्रमे ॥ ५५ ॥

यत्र श्रीमान् सुमित्रा तनय उचितकृच्छुद्धवाणेन हत्वा
मेध्यान् वै कृष्ठासारान् दशभृशमपचद् भूरिभेदान् प्रवीणः ।
कांश्चित्संशुष्यमाणान् शुचिमृदुपललान् पर्यरक्षच्चिरेण
प्राप्तं प्रत्युज्जगाम प्रणिहितधिषणः प्रेयसीयुक्तमार्यम् ॥ ५६ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे चित्रकूट-कन्दराविहारो नाम सप्तदशोऽध्यायः ॥ १७ ॥

अष्टादशोऽध्यायः

ब्रह्मोवाच

लक्ष्मणेन कृतं कर्म दृष्ट्वा रामो मुदावहम् ।
अनन्ददधृदयेऽत्यर्थं प्रेमज्ञो रघुवल्लभः ॥ १ ॥

मेध्यानि मृगमांसानि जानकी भर्तुराज्ञया ।
पक्त्वा स्वादूनि विविधान्युपनिन्ये पुरस्तयोः ॥ २ ॥

देवान् पितॄंश्च सम्पूज्य रामः परमधर्मवित् ।
सह सौमित्रिसीताभ्यां बुभुजेऽखिलयज्ञभुक् ॥ ३ ॥

कदाचिच्चित्रकूटाद्रौ छायामाश्रित्य भूरुहः ।
प्रेयस्या अङ्कमास्थाय सुष्वाप सुरतश्रमात् ॥ ४ ॥

देवदत्तवरः काकः पर्यटन् मेदिनीमिमाम् ।
स्वभावाद्दुष्टहृदयो मैथिलीं पर्यखेदयत् ॥ ५ ॥

भर्त्तुर्निद्राच्युतिभयाद् वारयन्ती शनैः खगम् ।
अत्याकुलीकृता तेन दुष्टेनाधमपक्षिणा ॥ ६ ॥

पक्षतुण्डनखाग्रैस्तां काकः पर्यतुदद् वने ।
ततः सा रोषताम्राक्षी किंचिच्चलितविग्रहा ॥ ७ ॥

दृष्ट्वा भर्त्रा समुत्थाय खेदिता तेन पक्षिणा ।
रामेण वार्यमाणोऽपि न जगाम स वायसः ॥ ८ ॥

ततो रोषं चकारोच्चै राघवः परपक्षभित् ।
काकमुद्दिश्य तत्याजं मन्त्रेणैकामिषीकिकाम् ॥ ९ ॥

इषीकास्त्रेण दुद्राव काकस्त्रिभुवनेऽखिले ।
अथानवाप्तशरणो राममेव गतिं ययौ ॥ १० ॥

अधः कृत्वा शिरः पादौ स्प्रष्टुकामः स वायसः ।
विचार्यास्पृश्यमात्मानं नास्पृशद् दीनमानसः ॥ ११ ॥

आक्रोशमानो विहगो इषीकास्त्रेण तापितः ।
अनन्यशरणं रामं जगाम[1] मतिमान् खगः ॥ १२ ॥

तमुवाच हसन् देवो रघूणां प्रवरः स्वयम् ।
अलं भयेन ते मन्द प्राप्तं दुष्कृतजं फलम् ॥ १३ ॥

प्रियापराधी मे तस्मात्त्वं ताडित इषीकया ।
अथ मे शरणं प्राप्तो रक्ष्योऽसि मतिमन् ध्रुवम् ॥ १४ ॥

अमोघं तु विजानीहि ममास्त्रं वायसोत्तम ।
भङ्क्त्वैकमङ्गं भवतो निवर्त्स्यति न संशयः ॥ १५ ॥

तेनोक्तः स ततः स्वामी भगवन् रघुसत्तम ।
निग्रहं वानुग्रहं वा यथेच्छं कुरु धार्मिक ॥ १६ ॥

मन्येऽनुग्रह एव स्यान्निग्रहोऽपि च ते मयि ।
एकं मे लोचनं नाथ भिनत्त्वस्त्रं तव प्रभो ॥ १७ ॥

एवं सम्प्रार्थिते देवे काकेनामितबुद्धिना ।
एकं चक्षु पपातोर्व्यामस्त्रं निववृते ततः ॥ १८ ॥

ततः काकः प्रणम्यैनं तुष्टाव जनमोक्षणम् ।
सद्यः संजाताधिपणो दर्शनेन महौजसः ॥ १९ ॥

---

१. जजान—अयो०, मथु० ।

वायस उवाच

नमस्ते रघुशार्दूल नमो भक्तजनप्रिय ।
नमो राजीवनयन नमस्त्रिभुवनेश्वर ।। २० ।।

अङ्कितोऽहं तवास्त्रेण धन्यस्त्रैलोक्यसुन्दर ।
विचरिष्यामि सर्वत्र सर्वथा निर्भयोऽधुना ।। २१ ।।

यस्ते पुरुषवर्यस्य शरणं भाग्यतो गतः ।
न तस्याखिलसंहर्त्ता कालोऽपि भयकृद् भवेत् ।। २२ ।।

जानामि भगवान् साक्षाद्भवान् प्रकृतिपूरुषौ ।
आज्ञापयसि लोकस्य सृष्टि स्थित्यन्तहेतवे ।। २३ ।।

उदासीनवदेव त्वं संस्थितो निखिलेश्वर ।
प्रयोजकोऽसि सर्वेषां कर्तृणां तव शक्तितः ।। २४ ।।

नूनं तवाङ्घ्रिकमलोपगतिं विनेश क्षेत्रं न कुत्रचन लोकजना लभन्ते ।
इत्थं समस्तकमनीय हृदावधार्य त्वादृग्यं पुमांसमुपयामि परं शरण्यम् ।। २५ ।।

धन्यं महीतलमिदं नरदेवसूनो त्वत्पादपद्मयुगमण्डितमाविभाति ।
धन्यं जनुः किमपि नाथ नृणामिदानीं ये त्वां धयन्ति निखद्यविलोचनाभ्याम् ।। २६ ।।

अपि मामपि राम सुन्दर त्वदिषीकास्त्रकृताङ्कमीदृशम् ।
तव भक्तजनेषु केऽपि वै गणयिष्यन्ति कृतातिदुष्कृतम् ।। २७ ।।

कुरु शर्म मदीयमीश्वर त्रिजगन्न प्रतिलब्धरक्षकम् ।
शरणं समुपेतमात्मनो गणयानन्य निजाश्रितेषु माम् ।। २८ ।।

इति संस्तूय काकोऽसौ परमात्मानमीश्वरम् ।
नत्वा निपत्य पदयोर्निर्जगाम यथेप्सितम् ।। २९ ।।

स चित्रकूटे निवसन् महागिरौ त्रिलोककल्याणददिव्यदर्शनः ।
प्रियासमेतो विहरन् दिने दिने निनाय कालं कमनीयविग्रहः ।। ३० ।।

अधिप्रमोदाटवियद्वदीश्वरो व्रजेश्वरीप्राणपतिः प्रमोददः ।
अनेकभावैर्विजहार राघवः स तद्वदेवात्र गिरौ महाद्भुते ।। ३१ ।।

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे
काकनयनशातनो नामाष्टदशोऽध्यायः ।। १८ ।।

एकोनविंशोऽध्यायः

ब्रह्मोवाच

अथ भरतसमागमात्स वीरः किमपि समुद्विजिताशयोऽत्र शैले ।
अतिविजनवनान्तरैकशीली कमपि मुदावहमन्य देशमैच्छत् ॥ १ ॥

भुशुण्ड उवाच

मातुलेष्ववसद् वीरो भरतः केकयीसुतः ।
इति श्रुतं पुरा ब्रह्मन् स कदा रामभागतः ॥ २ ॥
सर्वं विस्तरतो ब्रूहि भगवच्छृण्वतो मम ।
भरतस्यागमं तत्र प्रस्थानं चेशितुस्ततः ॥ ३ ॥
किमब्रवीत्स भरतो मातरं पापकारिणीम् ।
प्रसाद्य च ततो रामं न निनाय कथं बुधः ॥ ४ ॥
कथं चावर्त्तत प्राज्ञः प्रोषिते रघुपुङ्गवे ।
प्रजाः कथं रक्षितवान् वृत्तं दशरथं च किम् ॥ ५ ॥
एवमाद्याः कथाः सर्वा रघुवीरकथाश्रिताः ।
ब्रूहि संशृण्वते मह्यं भक्तिप्रह्वायपद्मभूः ॥ ६ ॥

ब्रह्मोवाच

रामे गङ्गां समुत्तीर्णे भरद्वाजाश्रमं गते ।
न्यवर्त्तत सुमन्त्रोऽपि बद्धदृष्टिः प्रभोरनु ॥ ७ ॥
निषादराजश्च तदा विषण्णः संन्यवर्त्तत ।
गायन्तौ तद्गुणग्रामं स्मरन्तौ तस्य चेष्टितम् ॥ ८ ॥
ध्यायन्तौ तत्पदाम्भोजे वर्णयन्तौ च तं मिथः ।
तन्मनस्कौ तदात्मानौ तत्प्राणौ तन्मयौ च तौ ॥ ९ ॥
उभावपि गतौ तत्र शृङ्गवेरपुरे ततः ।
सुमन्त्रो गुहमामन्त्र्य रथं संयोज्य वाजिभिः ॥ १० ॥
साकेतमगमत्तूर्णं शून्यं रामेण निःसुखम् ।
संसुप्तमिव सर्वत्र निर्दग्धमिव सर्वतः ॥ ११ ॥
तूष्णींभूतमिवात्यर्थं रामविश्लेषदुःखितम् ।
विलिप्तमिव कैकेय्या अयशोराशिकज्जलैः ॥ १२ ॥
चिरादुद्विग्नहृदयैर्नरनारीगणैर्वृतम् ।
रुदन्निष्क्रूजसोद्वेगपशुपक्षिगणावधिम् ॥ १३ ॥

अस्तंगते सवितरि समुपेतः स सारथिः ।
अयोध्यां रामविश्लेषनिरुत्साहाखिलप्रजाम् ॥ १४ ॥

प्रतिहट्टं प्रतिगृहं प्रतिवीथि प्रतिक्षणम् ।
कैकेय्या दुश्चरित्राणि गदद्भिर्मानुषैर्वृताम् ॥ १५ ॥

रामस्य सत्यशीलत्वं गुणांश्चान्यान् मनोरमान् ।
राज्ञश्च चित्तनैष्ठुर्यं वैदेह्याः साधुवृत्तताम् ॥ १६ ॥

लक्ष्मणस्य व्रतं धैर्यं सख्यं च गदतां नृणाम् ।
रामविश्लेषखिन्नानां गणैः सर्वत्र आवृताम् ॥ १७ ॥

आर्त्तामिव समुद्भूतदीनस्वरविलापिनीम् ।
निरुत्साहां निरानन्दां प्रशान्ताखिलमङ्गलाम् ॥ १८ ॥

जनैस्त्यक्तगृहारामविहारार्थगतागताम् ।
नारीगणैः परित्यक्तभूपालेपनमज्जनाम् ॥ १९ ॥

रामे गतमनस्काभिर्नागरीभिः क्षीणकान्तिभिः ।
सद्यः [1]समुज्झिताशेषपतिबान्धवसत्क्रियाम् ॥ २० ॥

कैकेयीहृतसौभाग्यां सद्यः शोकसमावृताम् ।
वीक्षमाणः पुरीं सूतः प्राविशद् राजमन्दिरम् ॥ २१ ॥

दृष्ट्वा शून्यं रथं पौरा रामस्य वनवासिनः ।
अनुद्रुत्य जवात्सद्यः परावृत्ता बभूविरे ॥ २२ ॥

केचित्स्यन्दननिर्घोषं श्रुत्वा संजातसम्भ्रमाः ।
एकाकिनममुं प्राप्तं दृष्ट्वा खेदसमावृताः ॥ २३ ॥

क्वास्माकं प्राणदो रामस्त्राता दाता सतां मतः ।
ज्ञाता प्रेमलताकन्दः सौहार्दनिधिरीश्वरः ॥ २४ ॥

क्वस्थापितस्त्वया सूत सदा जीवनदः स नः ।
प्राप्तोऽसि कथमेकाकी युङ्क्त्वाशून्यमिमं रथम् ॥ २५ ॥

एवमापृच्छमानास्ते यथावृत्तं निवेदिताः ।
दृढ़प्रतिज्ञो भगवान् मां भाग्यपरिवर्जितम् ॥ २६ ॥

पुरीं प्रति समाज्ञाप्य स्वयं तापसवेषभृत् ।
श्रीमान् गङ्गां समुत्तीर्य सीतासौमित्रिसंयुतः ॥ २७ ॥

वीक्षितः परतो गच्छन् यावद्दृष्टिपथं गतः ।
तस्मिन् दृक्पथमुल्लङ्घ्य वर्तमाने महाशये ॥ २८ ॥

विश्लेषपरितप्तोऽहं स्थानान्निववृते ततः ।
आर्यः पुनरलंचक्रे भरद्वाजाश्रमस्थलीम् ॥ २९ ॥

१. ममुद्गिता०—मथु० ।

दृशः कृतार्थयित्वा च तत्रत्यानां तपस्विनाम् ।
महाभागमुनिश्रेष्ठविनिर्दिष्टेन सोऽध्वना ॥ ३० ॥

चित्रकूटमलंकुर्वन्नास्ते इत्यनुशुश्रुम ।
इत्युक्तास्तेन ते लोका वाष्पव्याकुललोचनाः ॥ ३१ ॥

भृशं रुरुदुरुत्तप्ताः संवीता विरहाग्निना ।
प्रस्थापनं सुमन्त्रस्य विमृश्य नगरीं प्रति ॥ ३२ ॥

तस्य तापसवेशं च परतः प्रस्थितिं तथा ।
भृशं सं तप्तहृदया बभूवुः पुरवासिनः ॥ ३३ ॥

अहो गतत्रपोऽयं किं रामं हित्वा वनान्तरे ।
स्वयमत्रागतः सूतो धिगेनं भाग्यवर्जितम् ॥ ३४ ॥

किं कृते खलु वृद्धेन राज्ञापहृतबुद्धिना ।
रामः सर्वगुणारामः प्रवासं प्रापितोगृहात् ॥ ३५ ॥

धिक्कैकयेन्द्रतनयां सर्वेषां प्राणजीवनम् ।
रामं प्रवासयाञ्चक्रे लुब्धात्मैकोदरंभरिः ॥ ३६ ॥

इत्यादीन् दुर्वचः शब्दान् नृणां शुश्राव सारथिः ।
ततोऽसौ राजभवनं गत्वोन्मुच्य तुरङ्गमान् ॥ ३७ ॥

भेजे विलपतो राज्ञः समीपं खिन्नमानसः ।
तत्र शून्यं रथं वीक्ष्य क्रोशन्तीनामितस्ततः ॥ ३८ ॥

सौधाग्रेष्वधिरूढानां विलापं राजयोषिताम् ।
शृण्वन्नार्त्तस्वरोपेतं बभूवातीव दुःखितः ॥ ३९ ॥

रथमारोप्य मे पुत्रं सभार्यं क्व नु नीतवान् ।
अये सुमन्त्र दुर्बुद्धे रथं शून्यं किमानयः ॥ ४० ॥

कष्टंजीवाम्यहं यस्य पुत्रो गेहाद् विनिर्गतः ।
अदर्शयद् भवानास्यं किमेकाकी कुसारथे ॥ ४१ ॥

इत्थं सकरुणा वाचः शृण्वन् सूतः सुदुःखितः ।
राजानं रामविश्लेषशोकमीलितलोचनम् ॥ ४२ ॥

महासंतापकलितं वार्द्धके दुःखभागिनम् ।
चिरात्समनुशोचन्तं पश्चात्तापमुपागतम् ॥ ४३ ॥
[1]विषण्णहृदयं नत्वा प्रवक्तुमुपचक्रमे ॥

यदस्मै तेन संदिष्टं तरणीमारुरुक्षता ।
तन्निशम्य वचो राजा संदिष्टं ज्येष्ठसूनुना ॥ ४४ ॥

---

१. यह श्लोकार्ध अयो० और मथु० में अधिक है ।

विशोर्णहृदयः सद्यो विसंज्ञः सहसाभवत् ।
सिंहासनात्पपातोर्व्यां वियोगभरमूर्च्छितः ॥ ४५ ॥

नृपं निपतितं दृष्ट्वा मृतकल्पं विचेतनम् ।
हा हताःस्म इति प्राप्ताः प्रोचुरन्तःपुरस्त्रियः ॥ ४६ ॥

अहो रामस्य दुःखेन राजासौ मूर्छितो भुवि ।
न्यपतद् गतसंज्ञश्च कष्टमापतितं महत् ॥ ४७ ॥

एवमुद्यतवाहनां श्रुत्वान्तःपुरयोषिताम् ।
आक्रोशं तत्र कौसल्या प्राप्ता सह सुमित्रया ॥ ४८ ॥

पतिं भूमौ निपतितमुत्थाप्यारोप्य चासने ।
अभिवीक्ष्य च कौसल्या जगादार्त्तमना वचः ॥ ४९ ॥

अयं ते समनुप्राप्तः सूतो रामं प्रवास्य च ।
सभार्यं विपिने घोरे पृच्छस्येनं कथं न च ॥ ५० ॥

इदानीं महिषी सा ते कैकेयी पापकारिणी ।
कथं न निर्वृतिं राजन् प्रयास्यति दुराशया ॥ ५१ ॥

खिद्यसे च किमत्यर्थं कृत्वा स्वमतिपूर्वकम् ।
किं तवानेन खेदेन चिरं नन्दय भामिनीम् ॥ ५२ ॥

ममायमुचितः खेदो यस्याः पुत्रो वनं गतः ।
यदि वा लज्जसे राजन् विधाय नयवर्जितम् ॥ ५३ ॥

तथाप्यलं ते शोकेन संज्ञामेहि महीपते ।
आत्मना यत्कृतं तत्तु भोक्ष्यसे दुष्कृतं चिरम् ॥ ५४ ॥

त्रैलोक्यस्य प्रियं राममपराधविवर्जितम् ।
प्रवास्य घोरं विपिनं भूरिदुःखमवाप्स्यसि ॥ ५५ ॥

किं न पृच्छसि दुर्भाग्यं सूतमेनं महीपते ।
तवादेशकरो रामः किं संदिश्य वनं गतः ॥ ५६ ॥

अथवा मुखदाक्षिण्यात्कैकेय्यास्त्वं न पृच्छसि ।
परोक्षेऽपि भवान् यस्या भयं मनसि मन्यते ॥ ५७ ॥

अहं तु नाथ निर्लज्जा प्राणान् वपुषि धारये ।
यस्याः स तादृशः पुत्रो व्युषितोऽब्दांश्चतुर्दश ॥ ५८ ॥

तत्तादृक् सुन्दरं तस्य मुखं चन्द्राधिकप्रभम् ।
पुत्रस्नेहेन पश्यन्ती नाहं मेहे पटान्तरम् ॥ ५९ ॥

साहं पश्यामि भवनं रहितं तेन सूनुना ।
शून्योऽभूज्जीवलोको मे दुःखं स्यात्किमतःपरम् ॥ ६० ॥

इत्थं विलप्य कौसल्या मूर्छिता न्यपतद् भुवि ।
तां तादृशीं नृपं चैव विसंज्ञमतिदुःखतः ॥ ६१ ॥

विलोक्य सर्वा अवरोधयोषितः कृतार्तनादं रुरुदुः सुदुःखिताः ।
निशम्य तं नादमशेषमेव तत्पुरं बभूवार्त्तरवेण का हलम् ॥ ६२ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे सुमन्त्रोपावर्त्तनं नामैकोनविंशोऽध्यायः ॥ १९ ॥

❀

विंशोऽध्यायः

ब्रह्मोवाच

प्रतिलभ्य ततः संज्ञां सम्मृज्य नयनद्वयम् ।
पश्यंस्तमोवृतंविश्वं राजा सारथिमब्रवीत् ॥ १ ॥

अहो कष्टं सुमन्त्र त्वां पश्याम्येकं गृहागतम् ।
विना राममतो नूनं दीर्यते हृदयं मम ॥ २ ॥

तापेन परिदह्येते चक्षुषी मे सुदुर्भगे ।
अन्धकारमयं सर्वं पश्यामि भुवनत्रयम् ॥ ३ ॥

क्व गतः प्राणदो रामः क्व चावासं करिष्यति ।
एकाकी भार्यया युक्तो भ्रात्रा च लघुनान्वितः ॥ ४ ॥

कथं स्थास्यति मे वत्सः कानने भृशदुर्गमे ।
शिरीषसुकुमाराङ्गः कथं पद्भ्यां चलिष्यति ॥ ५ ॥

कियद्यावद् भवांस्तस्य सार्थे समगमः पथि ।
कुतो विसर्जितस्तेन भवान् सार्थमनुव्रजन् ॥ ६ ॥

अहो राजकुमारोऽसौ किमत्स्यति वने चरन् ।
चिराय यस्य संजातो राजभोगो मुदावहः ॥ ७ ॥

पद्मपत्रोपमैरङ्गैः क्व वा स्वापं करिष्यति ।
दुग्धफेननिभाः शय्या यस्यासन् मृदुसंस्तृताः ॥ ८ ॥

गच्छन्तमनुजग्मुर्यं नरेभाश्वरथादयः ।
स कथं पद्मतुल्याभ्यां पद्भ्यां वनभुवि व्रजेत् ॥ ९ ॥

दर्भगर्भावनी सा तु पद्भ्यामाक्रम्यतेऽमुना ।
यस्याङ्गणेऽपि चरतो नरा यानमुपानयन् ॥ १० ॥

अहो तद्विपिनं घोरं सिंहव्याघ्रादिभिर्वृतम् ।
सरीसृपकुलाकीर्णं नानादुष्टगजावृतम् ॥ ११ ॥

कथं स्थास्यति तत्रासौ मम वत्सो मनोहरः ।
कोमलानि यदङ्गानि शिरीषकुसुमादपि ॥ १२ ॥

मा च राजेन्द्रतनया साक्षाल्लक्ष्मीरिव स्वयम् ।
राज्यभोगोचिता सीता कथं वत्स्यति कानने ॥ १३ ॥

अहो मे दुष्कृतं भूरि स्त्रीवाक्येन विमुह्यतः ।
व्रजन्तं तनयं योऽहं न हठात्पर्यषेधयम् ॥ १४ ॥

भवान् भाग्यनिधि सूतं यस्तौ धर्मैकविग्रहौ ।
सुपुण्यदर्शनौ वीरौ दृष्टवानसि चक्षुषा ॥ १५ ॥

श्रीरामलक्ष्मणौ साक्षाज्जानामि मुनिवाक्यतः ।
किं मामवोचद् धर्मात्मा स रामः सत्यसागरः ॥ १६ ॥

लक्ष्मणश्च महाबाहुर्दृढव्रत उदारधीः ।
तावुभौ मां किमब्रूतां स्त्रीजितं न्यायवर्जितम् ॥ १७ ॥

इति पृष्ठो नरेन्द्रेण सुमन्त्रः सर्ववृत्तवित् ।
उवाच करुणोद्रेककलिताक्षरया गिरा ॥ १८ ॥

प्रथमेऽह्नि वीरेन्द्रः सीतासौमित्रिसंगतः ।
पौरैः सबाष्पनयनैर्द्विजैरार्त्तस्वराक्षरैः ॥ १९ ॥

निषिध्यमानोऽपि स्वैरं वनमेव द्रुतं ययौ ।
उवास तमसातीरे पौरजानपदैर्वृतः ॥ २० ॥

रात्रौ प्रभातकल्पायां सुप्तांस्त्यक्त्वा प्रजाजनान् ।
व्यामोह्य सर्वान् प्रययौ गुहाश्रममुदारधीः ॥ २१ ॥

ततो गङ्गातटे सद्यो मां विसृज्य महामनाः ।
नावमारुह्य सपदि गुहानीतां मुदायुतः ॥ २२ ॥

परं पारं समुत्तीर्य सभार्यः सहलक्ष्मणः ।
चित्तवृत्तिं ममाच्छिद्य प्रस्थितः पुरतो वनम् ॥ २३ ॥

उवाच कांश्चित्संदेशांस्तान् शृणुष्व नराधिप ।
बद्ध्वाञ्जलि भुवं स्पृष्ट्वा प्रणतिं त्वां चकार सः ॥ २४ ॥

पप्रच्छ कुशलं चापि तव भक्तिसमानतः ।
मातॄणां चापि सर्वासां कौसल्याया विशेषतः ॥ २५ ॥

स्वविश्लेषपरीतापदुःखितायाः कृपानिधिः ।
इदं संदिष्टवांश्चापि दुःखतप्तां स्वमातरम् ॥ २६ ॥

मद्वियोगपरीतप्तः पिता मे कोसलेश्वरः ।
नातोदनीयो जननि कदापि परुषाक्षरैः ॥ २७ ॥

मत्प्राणशपथं मत्वा ध्यात्वा च पुनरागमम् ।
नित्यमाराधनीयश्च यथा देवः पिता मम ॥ २८ ॥

भरतं च महीपाल संदिदेश महाशय ।
आराधयेथाः पितरं यौवराज्यगतः सदा ॥ २९ ॥

तव शुश्रूषणात्प्रीतो न शोचिष्यति मां नृपः ।
स्निग्धोऽसि मयि चेद्भ्रातर्वर्त्तस्व पितुराज्ञया ॥ ३० ॥

मातृश्च ममभावेन सर्वा द्रक्ष्यसि संततम् ।
इत्यादि कथयन् रामो वाष्परुद्धेक्षणोऽभवत् ॥ ३१ ॥

ततश्च लक्ष्मणः क्रुद्ध इदमूचे नराधिप ।
पितुः प्रणतयो वाच्या ममार्यमनुगच्छतः ॥ ३२ ॥

इदं च वाच्यो नृपतिरनयोऽयं कृतस्त्वया ।
विनापराधं मे भ्राता भवता यत्प्रवासितः ॥ ३३ ॥

नाहं कदाचित्पारुष्याद् भवतो हृदयंगमः ।
भवेयं विप्रवासार्हो न तु रामः प्रियंवदः ॥ ३४ ॥

त्रैलोक्यानन्दजननः साधुशीलः सतां मतः ।
रामस्य लोकारामस्य वद बीजं प्रवासने ॥ ३५ ॥

कैकेय्या वचनादेव प्रमुष्टा धिषणा तव ।
किमीदृग्वरदानं ते लोके कीर्त्तिविनाशनम् ॥ ३६ ॥

अधर्मकरणं चापि वार्द्धके लघुताकरम् ।
एकतः सर्वमेतत्ते स्नेहोऽप्यस्तं गतो नृपः ॥ ३७ ॥

दया लुप्ता हृदयतस्तस्मिंस्त्वयि ममाधुना ।
न स्नेहो विद्यते तात म्रियमाणोऽपगच्छति ॥ ३८ ॥

अधुना मे पिता माता सुहृद् बन्धुर्गुरुः सखा ।
प्राणाः सर्वस्वमेवापि राम एव जगत्त्रये ॥ ३९ ॥

सर्वलोकाभिरामस्य रामस्य त्यागमाचरन् ।
भरतेनापि किं राजा साधु वाच्यो मनीषिणा ॥ ४० ॥

इति ब्रुवाणां सौमित्रिं रामस्त्वद्भक्तिसंनतः ।
उवाच वारयन्नुच्चैः क्रोधरक्तेक्षणं बुधः ॥ ४१ ॥

मैवं वादीः कदापि त्वं तात प्रियहिते मम ।
सत्यवाक्याश्रितो धर्मस्तेन सम्यगुपाश्रितः ॥ ४२ ॥

मदर्थं मन्यिता नैव सत्यात्प्रस्खलितो बुधः ।
अधर्मकृत्प्रिता यस्य धर्मात्मा स कथं भवेत् ॥ ४३ ॥

ममापि तत्प्रकर्त्तव्यं सत्यवाक् स यथा भवेत् ।
नैतावता मयि स्नेहो हीयतेऽस्य महामतेः ॥ ४४ ॥

इत्यादि बोधयामास सौमित्रिं क्रोधमूर्च्छितम् ।
दाक्षिण्यविनयाचारसागरस्तनयस्तव ॥ ४५ ॥

वैदेही तु चिरं राजन्निःश्वस्य सुदृढव्रता ।
बाष्पाकुलेक्षणा भूयः पश्यन्ती नृपतेः सुता ॥ ४६ ॥

अदृष्टेदृशदुःखा सा नैव किंचिदवोचत ।
विसृज्यमानं भर्त्रा मां निरीक्ष्याश्रूण्यमुञ्चत ॥ ४७ ॥

ततः प्रणम्याश्रुविलोचनो भृशं त्वदङ्घ्रिपद्मौ मनसा कृताञ्जलिः ।
वियोगतप्तं विससर्ज मां नतं निवेद्यमानोऽपि न खल्वरक्षयत् ॥ ४८ ॥

वदामि भूयोऽपि शृणुष्वभूपते यथा वनं प्रस्थित एव राघवः ।
विधाय तान् स्निग्धशिरोरुहान् जटा वटस्य दुग्धेन महोग्रतापसौ ॥ ४९ ॥

विभूतिलिप्ताखिलचारुविग्रहौ महाभुजौ वल्कलचीरधारिणौ ।
तरीं समास्थाय विदेहजायुतौ जवेन तीर्त्वा विबुधायगां पुरः ॥ ५० ॥

प्रजग्मतुर्घोरतरं घनं वनं रघूद्वहौ तावकसत्यपालनौ ।
प्रपश्यतो मे च गुहस्य चान्तरं हृत्वा प्रयागाभिमुखौ गतावुभौ ॥ ५१ ॥

अग्रे प्रयाति सौमित्रिर्बद्धतूणो धनुर्धरः ।
मध्ये विदेहजा देवी द्योतयन्ती दिशस्त्विषा ॥ ५२ ॥

पृष्ठतो रघुशार्दूलो रामः कमललोचनः ।
मनांसि खेदयन्नद्धा पश्यतां पशुपक्षिणाम् ॥ ५३ ॥

ततश्चाहं निवृत्तोऽस्मि मन्दभाग्यतयोज्झितः ।
रामेण लोकरामेण श्यामसुन्दरमूर्तिना ॥ ५४ ॥

वाजिनश्च चिरं राममार्गान्वीक्षणकातराः ।
क्रोशन्तो बाष्पनयना ह्रेषमाणा निवर्त्तिताः ॥ ५५ ॥

गङ्गा च लहरिस्तोममुपनीयास्य पादयोः ।
गम्भीरदीर्घनिर्ह्रादा चिरं चुक्रोश भूपते ॥ ५६ ॥

तरवः पक्षिणां रावैर्भृशं रुरुदुरुद्धुराः ।
फलभारनतान् मूर्ध्नः पदोरस्य निकीर्षवः ॥ ५७ ॥

परिम्लानदलाः सद्यो वियोगोत्तापधारिणः ।
क्रोशन्त्य इव नद्योऽपि कलोष्णकलुषोदकाः ॥ ५८ ॥

बभूवुर्म्लानपद्मास्याः पद्मिन्यो गतकान्तयः ।
अर्धावलीढकवलाः खिन्ना हरिणयूथपाः ॥ ५९ ॥

वनं रुददिवाभाति चलद्वायुस्वनाकुलम् ।
पशवः पक्षिणो लोकाः सर्वे कान्तिविवर्जिताः ॥ ६० ॥

पुरे ग्रामे जनपदे शोकाद्वैतमिवाभवत् ।
सर्वे शोचन्ति ते पुत्रं प्रोषितं तव सत्यतः ॥ ६१ ॥

निन्दन्ति मां जनाः पौरा रामं सम्प्रेष्य चागतम् ।
देहलीभवनाट्टालजालस्था वरयोषितः ॥ ६२ ॥

शपन्ति मां क्रूरकर्मा रामं हित्वाऽगतो ह्ययम् ।
गलद्बाष्पोदकाः पौरा निरीक्षन्ते पुरीजनाः ॥ ६३ ॥

अस्मत्सर्वस्वमतुलं क्व रामः स्थापितोऽमुना ।
अहं च दग्धहृदयो न जीवन्नस्मि सम्प्रति ॥ ६४ ॥

रामस्य सौहार्दगुणैर्वञ्चितोऽस्मि महीपते ।
सुखं रामेण पौराणां स्वयं प्रवसता हृतम् ॥ ६५ ॥

इति सूतमुखान्निशम्य वाचं करुणार्द्रामतिविक्लवान्नरेन्द्रः ।
विललाप चिरं कृतानुतापः सुभृशं केकयजाकृतेन तप्तः ॥ ६६ ॥

चिरमात्मनः कथितदोषसंहतिर्गुरुदुःखसागरनिमग्नमानसः ।
विगतासुकल्प उपजातमूर्छनो व्यथितोऽधिभूमि निपपात पार्थिवः ॥ ६७ ॥

करुणं विलप्य नृपतौ ततश्चिरं कृतमौनमासितवति प्रमूढवत् ।
विललाप रामजननी चिरेण तद्दिवगुणां निशम्य खलु सूतभाषितम् ॥ ६८ ॥

तामार्त्तामतिशयशोकशल्यविद्धां कौसल्यां त्रिभुवनमङ्गलैककुक्षिम् ।
संस्मृत्य प्रभुवरवाक्पदानि भूयस्तपन्तीं किमपि समादधौ सुमन्त्रः ॥ ६९ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे सुमन्त्रसंदेशो नाम विंशोऽध्यायः । २० ॥

●

एकविंशोऽध्यायः

ब्रह्मोवाच

अथोवाच महीपालो विलप्य बहुदीनवाक् ।
असह्यविरहोद्रेकदुःखसागरमग्नहृत् ॥ १ ॥

धिङ्मां सुमन्त्र जीवन्तं विना रामेण सूनुना ।
लक्ष्मणेन च वीरेण वैदेह्या सुचरित्रया ॥ २ ॥

यत्र तौ सुमहावीरौ लोकोत्तरगुणाद्भुतौ ।
नय मामपि तत्रैव नान्यथा जीवनं मम ।। ३ ।।

अथवा मद्वियोगार्त्तिं निवेद्य करुणार्निधिम् ।
निवर्त्तय वनाद्रामं वैदेहीलक्ष्मणान्वितम् ।। ४ ।।

हा मया किं कृतं कर्म घोरं धर्मयशोपहम् ।
त्रैलोक्यजीवनो रामः प्रवसन् न निवारितः ।। ५ ।।

धिङ्मे सत्यवचोनिष्ठां यया रामः प्रवासितः ।
इदानीमपि मे रामं सुमन्त्र परिदर्शय ।। ६ ।।

इमं मे दुःखदावाग्निं विना रामघनाघनम् ।
कोऽन्यः शमयिता लोके स्वानन्दरसवर्षणैः ।। ७ ।।

अहो रामवियोगोत्थो दुःखोर्मिः शोकसागरः ।
न मया सुतरः सूत तेन त्यक्ष्यामि जीवितम् ।। ८ ।।

दूरं गतस्ताडकारिर्भवान् यावत्तमानयेत् ।
तावद्विरहदावाग्निर्मम प्राणान् ग्रसिष्यति ।। ९ ।।

इत्थं विलप्य भूपालो गतासुरिव तत्क्षणात् ।
मूर्छितः पतितोभूमौ परित्यज्य नृपासनम् ।। १० ।।

कौसल्या च तथैवार्ता विलप्य करुणं बहु ।
तप्यमानेन मनसा सुमन्त्रमिदमब्रवीत् ।। ११ ।।

हा सूत मामपि क्षिप्रं तत्रैव नय कानने ।
यत्र सौमित्रिसीताभ्यां सहितो रामचन्द्रमाः ।। १२ ।।

तादृक्पुत्रवियुक्ताया धिङ्मे जीवनमीदृशम् ।
अतो रथं समारोप्य नय मां रामसन्निधौ ।। १३ ।।

यदि मां कृपया साधो न रामं दर्शयिष्यसि ।
तदा विरहदावाग्निर्धक्ष्यत्येव न संशयः ।। १४ ।।

अथवा मामकं सूत हृदयं भृशकर्कशम् ।
वज्रादपीति मन्येऽहं यन्न शोकेन दीर्यते ।। १५ ।।

कुत्र मे मरणं सूत महाकठिनचेतसः ।
यमोऽप्यसून् न गृह्णाति रामविश्लेषकल्मषान् ।। १६ ।।

इत्युक्त्वा रामजननीं शोकमूर्च्छायितां शनैः ।
सुमन्त्रो क्रोधयामास स्मृत्वा संदेशमीशितुः ।। १७ ।।

समाश्वसिहि मा तेऽम्ब शोकोऽयं हृदि वर्द्धताम् ।
धैर्यमालम्ब्य वर्त्तस्व नान्यथा विद्यते गतिः ।। १८ ।।

रामस्तु भुवनारामः काननेविमुदान्वितः ।
सौमित्रिणा सेव्यमानो वर्त्तते सुखमीश्वरः ॥ १९ ॥

किं चिकीर्षुर्वनं याति तद् वेत्ति स्वयमेव सः ।
त्रैलोक्यमङ्गलार्थाय जातोऽसौ पुरुषोत्तमः ॥ २०

गुहाश्रमगते तस्मिन् संसुप्ते भूमितल्पगे ।
सर्वं मे तत्त्वमाचख्यौ लक्ष्मणस्तद्रहस्यवित् ॥ २१ ॥

स वै पुरुषधौरेयः साक्षात्कारणविग्रहः ।
न तस्य विषये शोकं राज्ञि त्वं कर्तुमर्हसि ॥ २२ ॥

त्रैलोक्यमङ्गला मातर्धन्या ते कुक्षिरूर्जिता ।
श्लोष्यते भवती तस्य गुणान् भुवनमङ्गलान् ॥ २३ ॥

न तस्य विपिने कष्टं परमानन्दवारिधेः ।
नापि तं सेवमानस्य लक्ष्मणस्य महामतेः ॥ २४ ॥

जानकी मुदितात्यर्थं वर्त्तते स्वामिना सह ।
प्रासादेष्विव खेलन्ती रमते काननेष्वपि ॥ २५ ॥

न दीनहृदया नापि दुःखयुक्ता वनेषु सा ।
समस्तमङ्गला लक्ष्मीर्भासयत्यखिलं वनम् ॥ २६ ॥

पश्यन्ती पुष्पितान् वृक्षान् लताश्च स्तबकान्विताः ।
द्योतयन्ती वनं कान्त्या याति सा स्वामिना सह ॥ २७ ॥

मञ्जुमञ्जीरनादेन चमत्कृतमृगेक्षिता ।
याति संचारिणी साक्षात् काञ्चनी प्रतिमेव सा ॥ २८ ॥

ययोः स्मरणमात्रेण लोके भवति मङ्गलम् ।
क्व तयोर्विपदोः मातः कानने वा गृहेषु वा ॥ २९ ॥

सरस्सु फुल्लपद्मेषु हसन्ती राजहंसकान् ।
विलासाञ्चितया गत्या याति सीता वनान्तरे ॥ ३० ॥

रामं नवघनश्यामं लक्ष्मणं च सुलक्षणम् ।
पश्यन्ती परमानन्दां रमते सा शुभान्विता ॥ ३१ ॥

यथा पुरे राजगृहे क्रीडन्ती काननेऽपि सा ।
शोभते स्मितपीयूषवर्षिचन्द्राद्भुताननाः ॥ ३२ ॥

अपूर्वान् कानने वृक्षान् विचित्राश्च लताः सती ।
सरांसि सरितश्चापि दृष्ट्वा पृच्छति वल्लभम् ॥ ३३ ॥

तत्र तत्र प्रियः स्थित्वा भूयो मोदयति प्रियाम् ।
वार्त्ताभिः सुविचित्राभिर्दर्शयन् काननश्रियम् ॥ ३४ ॥

समीरणेन मन्देन शीतलेन सुगन्धिना ।
परागमधुगर्भेण सेव्यमाना सवल्लभा ॥ ३५ ॥

वनेऽपि मुदिता सीता न जहाति तनुप्रभाम् ।
वनश्रीदर्शनोत्कण्ठा द्विगुणोद्भूतकौतुका ॥ ३६ ॥

मोदयन्ती प्रियं रामं लक्ष्मणं चापि सेवकम् ।
वनकुञ्जपथं प्राप्ता रमते सा विनोदिनी ॥ ३७ ॥

पद्मपत्रारुणाभ्यां च चरणाभ्यां महीतलम् ।
रञ्जयन्ती तडित्कान्तिद्योतं ते वनवीथिषु ॥ ३८ ॥

न च सिंहगजव्याघ्रभयं तस्या विलोकये ।
अधिज्यधनुषोर्मध्ये गच्छन्त्या वीरयोर्द्वयोः ॥ ३९ ॥

त्रैलोक्यरक्षितारौ तौ वीरौ पौरुषभूषणौ ।
विनयन्तौ वने हिंस्रान् गच्छतोऽतिमुदान्वितौ ॥ ४० ॥

न ग्लानिर्नश्रमो नापि खेदो न विपदः क्वचित् ।
तयोः संचरतोः स्वैरमुपनम्राखिलश्रियोः ॥ ४१ ॥

अनुकूलं तयोः सर्वं वनेऽपि वसतोर्मुदा ।
गच्छतोर्यत्र यत्रैव तत्र तत्रैव मङ्गलम् ॥ ४२ ॥

यानाश्रमद्रुमान् रामः सायमाश्रित्य तिष्ठति ।
सम्प्रस्थितेऽपि ते तस्मिन् मुच्यन्ते परयाश्रिया ॥ ४३ ॥

सरस्सु स्वच्छतोयेषु येषु रामोऽवगाहते ।
अकस्मात्तेषु दृश्यन्ते नवपद्मवनश्रियः ॥ ४४ ॥

श्रीरामचरणन्यासात्फलितं पुष्पितं वनम् ।
तदेवान्यदिवाभाति सद्यः संजातया श्रिया ॥ ४५ ॥

शाकमूलफलाहारे धर्मं चरति राघवे ।
प्रभूततमसम्पत्तिर्दृश्यतेऽद्यवनावली ॥ ४६ ॥

तावन्योन्यप्रियालापौ कृतान्योन्यहितावुभौ ।
वैदेहीं वीक्ष्य मुदितौ वने धर्मपरायणौ ॥ ४७ ॥

अन्योन्यस्नेहसम्बद्धौ भ्रातरौ मुदिताशयौ ।
क्वचिन्न स्मरतो मातः पुरीं वा पुरवासिनः ॥ ४८ ॥

लक्ष्मणस्य पिता माता सखा बन्धुः सुहृद् गुरुः ।
सर्वस्वमसवो रामो नान्यं स स्मरति क्वचित् ॥ ४९ ॥

रामो जनककन्यायाश्चारित्रेणातिमोदितः ।
वनवासेऽति सानन्दो न कंचिद्भि काङ्क्षति ॥ ५० ॥

वैदेही भर्तृपरमा मोदयन्ती मुदान्विता ।
सोत्कण्ठा वनवासेन वर्तते सुखसम्पदा ।। ५१ ।।

न तेषां विषये शोकः कार्यस्ते जननि क्वचित् ।
महानुभावमुख्यानां वनवासे रतात्मनाम् ।। ५२ ।।

अलं खेदेन ते राज्ञि राज्ञः खेदमपाकुरु ।
द्रष्टा चतुर्दशाब्दान्ते रामं भार्यानुजान्वितम् ।। ५३ ।।

रामस्त्वद्विषये मार्त्तश्चिन्तापूर्वमुवाच माम् ।
भृशमाश्वासय क्षिप्रं वियुक्तां मम मातरम् ।। ५४ ।।

उक्तं सशपथं तेन नूनं मामम्ब मा शुचः ।
पितुः सत्यात्मनुप्रीतो निवत्स्यामि वने मुदा ।। ५५ ।।

सा त्वं विहाय मनसः शोकं मोहं च दीनताम् ।
आश्वासय महीपालं न पुनः परिखेदय ।। ५६ ।।

इत्युक्त्वा वचनमुदारमार्त्तचित्तामाश्वास्य प्रभुवरमातरं सुमन्त्रः ।
नत्वोच्चैर्दशरथभूपतिं भृशार्त्तं निर्यातः सपदि स राजकीयसौधात् ।। ५७ ।।

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे कौसल्यानृपाश्वासनो नामैकविंशोऽध्यायः ।। २१ ।।

❀

द्वाविंशोऽध्यायः

ब्रह्मोवाच

आश्वासितापि कौसल्या सुमन्त्रेन महात्मना ।
रुदती भूरिशोकार्त्ता रामविश्लेषदुःखिता ।। १ ।।

उपालम्भत भर्त्तारं वाक्शरैः पीडयन्त्यलम् ।
विललाप च दुःखार्त्ता तस्याग्रे वाष्पलोचन ।। २ ।।

तस्या वाक्य शरवातैरतिसम्पीडितो नृपः ।
विश्लेषाद् रामचन्द्रस्य पूर्वमेव विचेतनः ।। ३ ।।

चिरं निःश्वस्य निःश्वस्य मोहसागरमध्यगः ।
अपश्यत् तामसा व्याप्तं भुवनं मीलितेक्षणः ।। ४ ।।

सुशोच परमं चित्ते कौसल्यां दुःखभाषिणीम् ।
प्रतिवक्तुमशक्तात्मा रुरोद भृशदुःखितः ।। ५ ।।

विसंज्ञ इव संजातो द्विगुणोद्दीप्तशोकहृत् ।
ततश्चिराल्लब्धसंज्ञः कौसल्यामिदमूचिवान् ॥ ६ ॥

सत्यं ते दुःखतप्तायाः उपालम्भनमीदृशम् ।
मया क्रूरेण कुधिया कृतामि किल दुःखभाक् ॥ ७ ॥

आत्मनः कुत्सितं कर्म शोचाम्यहमभीक्ष्णशः ।
भूयो नैवास्य शोकस्य पारं प्राप्तोऽस्मि सुव्रते ॥ ८ ॥

अलं प्रसादये त्वाहमीदृशैरतिनिष्ठुरैः ।
न भिद्यते वाक्यशरैर्हृदयं मेऽतिनिष्ठुरम् ॥ ९ ॥

इत्युक्त्वा विरते भूपे कौसल्या भर्तृवत्सला ।
परुषाक्षरसम्भापा जातमागस्तदात्मनः ॥ १० ॥

अक्षामयत्सा नृपतेः कृत्वा पादाभिवन्दनम् ।
मयोक्तं परुषं यत्ते तत् क्षमस्व महीपते ॥ ११ ॥

दुःखिताः किं य भाषन्त इति विज्ञाय चेतसि ।
साहं रामप्रवासेन दुःखितास्मि न संशयः ॥ १२ ॥

धृतिर्मे लुप्यते शोकात् प्रज्ञा च श्रुतमेव च ।
तमोऽभिभूतं पश्यामि शोकेन सकलं जगत् ॥ १३ ॥

तामित्थमात्मपरुषोक्तिभवापराध सम्मार्जनाय नृपतिं प्रतिभाषमाणाम् ।
सम्बोध्य रामजननीं सुमतिः सुमित्रा नीचैरुवाच नृपतौ लघुलब्धनिद्रे ॥१४॥

तनयस्तव कौसल्ये वीरस्त्रैलोक्यरञ्जनः ।
यदि निर्वासितो राज्ञा किं ततस्तस्य हीयते ॥ १५ ॥

स्वाभाविकगुणाढ्यानां पुरुषाणां महौजसाम् ।
गृहे वापि वने वापि सर्वत्र [1]विपुलं यशः ॥ १६ ॥

पितुर्नियोगतो रामः सत्येन प्रोषितो वनम् ।
सर्वत्र कुशली लोके न तं शोचितुमर्हसि ॥ १७ ॥

य एवं धार्मिकाः शूराः प्रज्ञाःकौशलभूषिताः ।
सर्वत्र सर्वदा तेषां विजयश्रीरचञ्चला ॥ १८ ॥

धर्मेण यो वनं यातः पितुः सत्याभिवृद्धये ।
तस्य पौरुषसारस्य शुभं भूरि पदे पदे ॥ १९ ॥

यस्य त्रैलोक्यमखिलं यशसा विमलं बभौ ।
तस्य रामवरेण्यस्य महीराज्यसुखं कियत् ॥ २० ॥

गोपायतः सतां मार्गं वर्त्तमानस्य धर्मतः ।
न त्वं रामस्य विषये कल्याणि कलयेः शुचम् ॥ २१ ॥

---

१. विमलम्–अयो०, मथु० ।

यस्तादृशं महात्मानं धर्मेणैवानुवर्त्तते ।
तस्यापि मम पुत्रस्य विषये मति मा शुचः ॥ २२ ॥

भवनं या परित्यज्य धर्मतोऽनुगता पतिम् ।
शुचिस्मितातिमुदिता त्रैलोक्ये यशसां निधिः ॥ २३ ॥

विदेहराजकन्यां तां किमर्थमनुशोचसि ।
यस्याः संस्मरणेनाशु पूयते भुवनत्रयम् ॥ २४ ॥

लभन्ते मङ्गलं लोका यस्याःमनुकीर्तनात् ।
शोच्या न सा जनकजा दीनचित्ता यथेतरा ॥ २५ ॥

त्वमेव खलु कौसल्ये या शोकेनानुतप्यसे ।
सा राजराजजननी भूयो निर्वृतिमेष्यसि ॥ २६ ॥

भविता ते सुतो नूनं धरण्याः पतिरूर्जितः ।
यशःसौरभ्यसंदोहसुखिताखिलविष्टपः ॥ २७ ॥

मा वदः करुणां वाचं वीरेन्द्रजननी सती ।
द्रक्ष्यसि त्वं सुतं स्वीयमेकच्छत्रावनीपतिम् ॥ २८ ॥

कियश्चतुर्दशाब्दाश्च कियच्च वनवासनम् ।
सर्वे महानुभावानां कष्टमेतन्मतं लघु ॥ २९ ॥

यं सेवते वनेऽपि श्रीः साक्षान्सीतभिधापरा ।
तस्य त्रैलोक्यमखिलमनुकूलं विलोकये ॥ ३० ॥

किं न राज्यं समस्ताया मेदिन्याः कुरुते सति ।
अद्यापि ते सुतो यस्य राज्यश्रीः सा विदेहजा ॥ ३१ ॥

अथ यस्य कृते ननु दुःखशतैरनुशोचसि कोसलराजसुते ।
स विलङ्घ्य चतुर्दशवर्षरुजं भवतीं प्रणमिष्यति हृष्टमनाः ॥ ३२ ॥

वनवसतिमुपास्य रामचन्द्रे समुपगते नगरीमिमां सुखाढ्याम् ।
विकसति यदि काञ्चनैः प्रसूनैर्ननु भवती स्मरसि ध्रुवं वचो मे ॥ ३३ ॥

ये धीराः प्रकृतिसुवृत्तभाजः सत्येन प्रशमितसर्वपापकृत्याः ।
तेषां तत्कियदिव दुःखमापदुत्थं त्रैलोक्ये दधतिशुभानि ते परेषाम् ॥ ३४ ॥

इतीत्थमाश्वास्य वचोऽमृतैस्तां धृतज्वरां कोसलराजपुत्रीम् ।
सुधीरचित्ता शनकैः सुमित्रा जगाम मौनं स्वपति क्षितीन्द्रे ॥ ३५ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे
सुमित्रावाक्यं नाम द्वाविंशोऽध्यायः ॥ २२ ॥

त्रयोविंशोऽध्यायः

ब्रह्मोवाच

रामं प्रवास्य सत्येन जातशोको महीपतिः ।
पष्ठेऽह्नि शोचन्मनसा सम्प्रबुध्य निशीथके ॥ १ ॥

पूर्वकर्मविपाकोत्थं स्वीयं दुष्कृतमस्मरत् ।
स्मृत्वा तापसशापोत्थां मरणान्तं महापदम् ॥ २ ॥

उवाच महिषीं ज्येष्ठां कौसल्यां राममातरम् ।
जागर्षि यदि कल्याणि शृणु मे पूर्वकर्म तत् ॥ ३ ॥

कृत्वा दोष समारम्भं यः काङ्क्षति गुणोदयम् ।
मृषा तस्य मनःकामो दोष एव फलिष्यति ॥ ४ ॥

उप्त्वा कण्टकिनो वृक्षान् भिद्यते किं न कण्टकैः ।
एवं दुष्कृतमारभ्य को वाञ्छेत् पुण्यजं फलम् ॥ ५ ॥

मयां खलु पुराऽऽरब्धं दुष्कृतं सुविपत्प्रदम् ।
तच्छृणुष्वाद्य कल्याणि मम कर्म पुरातनम् ॥ ६ ॥

एकदाहं तवोद्वाहात् पूर्वकाले सुदुर्मदः ।
तारुण्यारम्भदुःशीलं मृगयां समशीलयम् ॥ ७ ॥

युवराजपदं प्राप्य तारुण्यमदभावितः ।
धनुरादाय विपिने विचरामि भृतेषुधिः ॥ ८ ॥

निहन्मि महिषान् कोलान् सिंहान् व्याघ्रान् वनेचरान् ।
मातङ्गांश्चापि सम्प्राप्ताञ्छब्दमात्राद्भिनद्यहम् ॥ ९ ॥

शब्दवेधीशरक्रीडादुर्मदो मृगयारतः ।
सरयूतीरमासाद्य व्रीडामि दिवसे निशि ॥ १० ॥

कदाचिज्जलकुम्भस्य पूर्यमाणस्य वेगतः ।
श्रुत्वा शब्दं मुक्तबाणः कंचित्तापसबालकम् ॥ ११ ॥

अन्धयोरात्मनः पित्रोरेकयष्टिसमाश्रयम् ।
पर्यवेधयमत्युग्रशापसम्प्राप्तिहेतवे ॥ १२ ॥

इषुणा छिन्नहृदयः सोऽन्धतापसबालकः ।
अरोदीत्करुणं भूयस्तातनामपुरःसरम् ॥ १३ ॥

तस्येषुणा विभिन्नस्य प्रोतस्य निजमर्मणि ।
आर्त्तशब्दं ममाकर्ण्य तदन्तिकमुपागतः ॥ १४ ॥

दृष्टस्तत्रेषुणा विद्धो घूर्णमानो घटोपरि ।
अन्धतापसयोर्बालः सोऽनङ्कुरितकूर्चकः ॥ १५ ॥

आः पापकर्मणा केन हतोऽहमिषुणामुना ।
निर्वैरो विजने नद्यां जलाहरणकार्यकृत् ॥ १६ ॥

सोऽहं तयोस्तापसयोर्मदेकसुतयोर्गतिः ।
संन्यस्तदण्डयोर्दण्डः केन पापीयसा हृतः ॥ १७ ॥

अन्धो वृद्धः सुदीनात्मा वनवासो तपोरतः ।
मत्पिता मां विना कं नु हस्तग्राहं श्रयिष्यति ॥ १८ ॥

कस्याभून्मद्वधे बुद्धिः पापस्योन्मत्तचेतसः ।
किं फलं मम घातेन निर्वैरस्य वनस्थितेः ॥ १९ ॥

मय्यद्य निहते केनाप्युन्मन्तेनाद्यकारिणा ।
कां गतिं खलु गन्तारौ पितरौ हीनचक्षुषौ ॥ २० ॥

जानाति मम माता सा नद्यां क्रीडति मे सुतः ।
सोऽहं पापीयसा केनाप्यसूहीनः कृतोनिशि ॥ २१ ॥

इत्थं भूयो विलपतस्तस्यार्त्तरवमीदृशम् ।
अश्रौषं निर्जने रात्रौ दूरेऽप्यतिसमीपवत् ॥ २२ ॥

ततो भृशं विषण्णोऽहं हत्वा बाणेन तापसम् ।
प्रमादादात्मनः कर्म शोचन्नासंसु दुर्मनाः ॥ २३ ॥

हा हा मया हतः कश्चित्तापसः संहतेषुणा ।
ततो गवेषयामास तमहं परपारगम् ॥ २४ ॥

नदीं स्वल्पजलां तत्र तीर्त्वा बभ्राम भूरिशः ।
निशीथे तमसि व्याप्ते नालभं मुनिपुत्रकम् ॥ २५ ॥

ततश्चाभ्युदिते चन्द्रे तं देशमगमं तदा ।
ददर्श सरयूतीरेघूर्णन्तं कलशोपरि ॥ २६ ॥

बालकं प्राप्तकैशोरमनङ्कुरितकूर्चकम् ।
प्रविकीर्णजटाभारं सायकप्रोतविग्रहम् ॥ २७ ॥

क्षतजोक्षितसर्वाङ्गमनर्हमीदृशीं दशाम् ।
शयानं घटमालिङ्ग्य विलप्य विरतं क्षणात् ॥ २८ ॥

अपश्यं चास्य हृदये संलग्नं बाणमात्मनः ।
तथा तस्य दशां दृष्ट्वा विसंज्ञ इव चाभवम् ॥ २९ ॥

ततो मां वीक्ष्य बालोऽसौ तापसो वधकारिणम् ।
उवाच करुणं तादृगार्त्तिप्रस्खलिताक्षरम् ॥ ३० ॥

किं तेऽपराद्धं नृपते मया निर्वैरवृत्तिना ।
एकेनैवेषुणाकस्माद् विद्धोहं कलशं भरन् ॥ ३१ ॥

पितरौ तापसावन्धौ तयोरर्थे जलार्थिनः ।
मम प्राणास्त्वया राजन् गृहीता एकबाणनः ॥ ३२ ॥

ईदृशो मृगया राजंस्तव सार्धायसी वने ।
मदसुव्ययकृत् सम्यक् शिक्षिता शब्दवेधिता ॥ ३३ ॥

मृते मयि महीपाल घोरेण तव पत्रिणा ।
मा त्वां दहतु मे तातस्तापसः पुत्रमारिणम् ॥ ३४ ॥

पुत्रशोकसमुद्भूतदुःखेनाकुलमानसः ।
त्वां मेऽसुघातिनं मत्वा शपेन्मम पिता मुनिः ॥ ३५ ॥

सर्वस्यास्त्वं भुवो भर्त्ता त्वयि दुर्गनिमागते ।
अनाथाः किं न शीर्येयुस्त्वदेकशरणाः प्रजाः ॥ ३६ ॥

न चाहं जीविता राजन् दुःखं स्याद्द्विगुणं ततः ।
विज्ञापयाशु गत्वा त्वं नाचरात्पितरौ मम ॥ ३७ ॥

यावन्न शपते क्रुद्धः पिता मे त्वां महीपते ।
तावदात्मकृतं कर्म घोरं तस्मै निवेदय ॥ ३८ ॥

इति वादिन एवास्य विभ्रतो दीर्घवेदनाम् ।
बाणमाशीविषाकारमहमुत्खातवान् बलात् ॥ ३९ ॥

उत्खाते हृदयाद् बाणे तस्मिंस्तज्जीवनाशया ।
एक या हिक्कया प्राणान् जहौ तापसबालकः ॥ ४० ॥

प्रसारिताङ्घ्रि परिवृत्तलोचनं दृष्ट्वा मृतं तापसबालक तथा ।
विसंज्ञ आसं भृशदुःखितान्तरो मुनेश्च शापेन नितान्त भीतिमान् ॥ ४१ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे मुनिपुत्रवधाशंसनं नाम त्रयोविंशोऽध्यायः ॥ २३ ॥

चतुर्विंशोऽध्यायः

ब्रह्मोवाच

कथयन्नात्मनः पूर्वं दुष्कर्मधरणीपतिः ।
मुनिपुत्रवधं प्रोच्य ततो जातं यदाह् तत् ॥ १ ॥

ततश्चाहमुपादाय कलशं वारिसम्भृतम् ।
वेपमानो हृदातीव गतस्तत्पितुराश्रमम् ॥ २ ॥

यत्र तौ पितरौ तस्य गृह्णन्तौ चरणध्वनिम् ।
पिपासितौ चिरादन्धौ वर्त्तेते स्वसुताशया ॥ ३ ॥

वार्तयन्तौ सुतं स्नेहात्प्रतीक्षन्तौ तदागमम् ।
उत्कर्णौ मत्पदध्वानं श्रुत्वा तावाहतुर्मुनी ॥ ४ ॥

एह्येहि पुत्रकात्यर्थं किमेतावद्विलम्बितः ।
देहि पानीयमानीय पीडितौ स्वः पिपासया ॥ ५ ॥

यज्ञदत्त चिरं तात क्रीडितोऽसि नदीजले ।
त्वदेकगतिका चावां सम्प्रतीक्षावहे चिरात् ॥ ६ ॥

इत्यादि स्निग्धहृदयौ सुतमुद्दिश्य भाषिणै ।
तावहं भीतहृदयो दुःखाक्तमिदमभ्यधाम् ॥ ७ ॥

वाष्पसंलग्नकण्ठत्वाद् गद्गदाक्षरया गिरा ।
वेपमानः शापभीतो बद्धाञ्जलिरधर्मकृत् ॥ ८ ॥

नाहं तवास्मि तनयः स दूर प्रेषितोमया ।
आगस्कारी क्षत्रियोऽहं युवयोः शापभाजनम् ॥ ९ ॥

नाम्ना दशरथो येन कृतं कर्म सुदारुणम् ।
दुष्टोऽहं मृगयां कुर्वन् सरयूतीरभूमिगः ॥ १० ॥

कुम्भस्य पूर्यमाणस्य तवपुत्रेण साधुना ।
श्रुत्वा ध्वनिं गजभ्रान्त्या मुक्तो घोरः शरो मया ॥ ११ ॥

तेन ते तनयः साधुः सद्यः पञ्चत्वमागतः ।
अतः परं मयि मुने यदिच्छसि कुरुष्व तत् ॥ १२ ॥

सत्यं ते दण्डनीयोऽहं येनेदं दुष्कृतं कृतम् ।
इति घोरतमां वाचं मम श्रुत्वा स तापसः ॥ १३ ॥

उवाच वाष्पनयनो बिभ्यतं मां कृतागसम् ।
हा नृशंस दुराचार किमिदं दारुणं कृतम् ॥ १४ ॥

अन्धस्य ममजीवातुरेकयष्टिः स बालकः।
निहतोऽद्य त्वया पाप हा हतोऽस्म्यहमेव च ॥ १५ ॥

तत्रैव नय मां क्रूर यत्र मे बालको हतः।
शेते धरणिमालिङ्ग्य गतप्राणस्तवेषुणा ॥ १६ ॥

द्रक्ष्यामि तं तथाभूतं प्रसारितपदं भुवि।
प्राणादपि प्रियं पुत्रमेकमेव त्वया हतम् ॥ १७ ॥

ततस्तौ प्रापितौ तत्र मया दुष्कृतकारिणा।
दृष्ट्वा सुतं भुवि तथा पतितं विगतासुकम् ॥ १८ ॥

प्रकीर्णमूर्द्धजं बालं शोणितोक्षितविग्रहम्।
मया प्रदर्शितं नद्यास्तीरे जायापती भृशम् ॥ १९ ॥

दीर्घं रुरुदतुर्भूयो विलापरवकारिणौ।
प्राक्कृतानि चरित्राणि तस्य सेवाः पुरातनीः ॥ २० ॥

स्मारं स्मारं गुणांस्तस्य चक्रतुः करुणस्वरम्।
हा पुत्र हा यज्ञदत्त हा तापस किमीदृशीम् ॥ २१ ॥

निद्रां भजसि नोत्थाय किमावां परिरम्भसे।
ब्रूह्यावां दुःखितौ तात करुणा ते न बाधते ॥ २२ ॥

आवां विहाय कृपणौ क्व प्रयातोऽसि पुत्रक।
हा हतौ दुर्बलौ दीनावन्धौ न ब्रुवता त्वया ॥ २३ ॥

उत्थीयतामितः पुत्र प्रयाहि निजमाश्रमम्।
केनेयं शिक्षिता निद्रा भाषस्वोन्मील्य लोचने ॥ २४ ॥

भवानेका गतिर्लोके दीनयोर्हीनचक्षुषोः।
अनावृत्तिं गतोस्यद्य कमध्वानं प्रयातवान् ॥ २५ ॥

अधीष्व पुत्र स्वाध्यायं सुखयावां विचेतनौ।
रुदन्तीं मातरं दीनां न ब्रूषे मातृवत्सल ॥ २६ ॥

कोऽपराधो नौ पतितः पुत्र यन्नाद्य भाषसे।
कथं नु भविता माता त्वय्येवं निष्ठुरे सति ॥ २७ ॥

सुदीर्घतमध्वानं प्रस्थास्यस्यद्य पुत्रक।
अतः स्नेहातुरावावां पितरौ नैव भाषसे ॥ २८ ॥

निर्वैरः सर्वभूतेषु तापसीं वृत्तिमास्थितः।
केनेदृशीं दशां पुत्र प्रापितोऽसि सुदुःखदाम् ॥ २९ ॥

इत्थं विलप्य तौ दीनौ विसंज्ञौ दीर्घशोकतः।
व्यसुकल्पावपततां तस्य देहे सुमूर्छितौ ॥ ३० ॥

चिरेण संज्ञामासाद्य तापसो भार्यया युतः ।
पुनरूच्चे वच इवं पुत्रमुद्दिश्य तादृशम् ॥ ३१ ॥

मृतोऽसि घोरबाणेन ताडितो हृदि पुत्रक ।
एहि पुण्यकृतां लोकान् सुकृतेन समेधितः ॥ ३२ ॥

आजन्म कृतवान् नित्यं पित्रोराराधनं भवान् ।
तेन पुण्येन पुत्र त्वं गच्छ स्वर्गमनश्वरम् ॥ ३३ ॥

ये लोका ब्रह्मनिष्ठानां ये लोकाः पितृसेविनाम् ।
ये लोकास्तीर्थनिष्ठानां ये लोका अग्निसेविनाम् ॥ ३४ ॥

स्वाध्यायिनां च ये लोकाः प्रणवाक्षरजापिनाम् ।
ये लोका दीर्घसत्राणां तानाप्नुहि मृतो भवान् ॥ ३५ ॥

राजर्षीणां च ये लोकाः सत्यधर्मसमुद्भवाः ।
यान् लोकानपि गच्छन्ति नैष्ठिका गृहमेधिनः ॥ ३६ ॥

ब्रह्मचर्येण ये लोकाः प्राप्यन्ते भूरितापसैः ।
तांल्लोकान् पुण्यवितान् पुत्र त्वं व्रज सत्वरम् ॥ ३७ ॥

इत्थं सम्प्रोच्य बहुशस्तापसो हीनलोचनः ।
शशाप मां समुद्दिश्य वाष्पोदकभृताञ्जलिः ॥ ३८ ॥

यथाहं पुत्रशोकेन प्राप्तोऽस्मि चरमां दशाम् ।
तथा त्वमपि भूपाल पुत्रशोकान्मरिष्यसि ॥ ३९ ॥

सुतं लालसमानस्त्वं मरिष्यसि कुलाधम ।
यथाहं म्रियमाणोऽद्य पुत्रलालसयान्वितः ॥ ४० ॥

श्रुत्वा तु तापसस्याहं शापं तापैककारणम् ।
प्रत्यूचे तं मुनिश्रेष्ठं विषण्णवदनो भवन् ॥ ४१ ॥

शापोऽपि ते मयि वरो न दृष्टतनयानने ।
किं तु नाहमनर्थस्य पारं पश्यामि तापस ॥ ४२ ॥

अथ तस्य प्रमीतस्य विधाय पारलौकिकम् ।
तापसो भार्यया सार्द्धं प्रददावुदकाञ्जलीन् ॥ ४३ ॥

तस्मिन्नेवान्तरे साध्वि विमानं दिव्यमास्थितः ।
पारिजातसुम[1]स्रग्भिर्दिशः सुरभितां नयन् ॥ ४४ ॥

उपतस्थौ मुनिसुतः पित्रोर्विलपतोः पुरः ।
दिव्यवेशधरो भूत्वा वाचमेतामुदाहरत् ॥ ४५ ॥

भवतोः सम्प्रसादेन चिराच्च परिचर्यया ।
प्राप्तोऽस्मि विरजांल्लोकानशोकान् सुकृतोर्जितान् ॥ ४६ ॥

१. यहाँ छन्दो भंग के भय से 'न' का लोप कर दिया गया है ।

प्राप्स्यथः परमं स्थानमचिरेणैव वामपि ।
एवं भाविनि चार्थेऽस्मिन् न मां शोचयतं युवाम् ॥ ४७ ॥

न चाप्यतितरां राजा खेदनीयः सुधार्मिकः ।
असन्तं सन्तमर्थं वा भाविनं कोऽन्वतिक्रमेत् ॥ ४८ ॥

इत्युक्त्वा स ऋषेः पुत्रो द्योतयन् महसा दिवम् ।
गतो नक्षत्रमार्गेण गीयमानोऽप्सरोगणैः ॥ ४९ ॥

तावप्यन्धौ समिद्धारैर्ज्वलयित्वा हुताशनम् ।
पुत्रशोकात्समाविश्य दिव्यं लोकमुपेयतुः ॥ ५० ॥

सोऽहं किमद्य शोचामि कर्म यत्कृतमात्मना ।
जानामि तस्य शापस्य कालो मां समुपागतः ॥ ५१ ॥

नान्यथा दुष्टवाचाली वचोदीपितमत्सरा ।
कैकयेन्द्रसुता जातु प्रपद्येतेदृशीं धियम् ॥ ५२ ॥

तीर्थानि मम संगेन यया स्नातानि भूतले ।
श्रुतानि तेषु रामस्य यशांसि मुनिमण्डले ॥ ५३ ॥

सा कथं केकयसुता दुर्बुद्ध्योपहता भवेत् ।
मुनिशापकृतं मन्ये सर्वमेतन्न संशयः ॥ ५४ ॥

सुखितो नाम गोपालस्तत्पत्नी च सुमङ्गला ।
ताभ्यां निरूपितं सर्वं तत्त्वं रामस्य यत्परम् ॥ ५५ ॥

शुश्राव सा मयासार्द्धं कैकयेन्द्रसुताखिलम् ।
तीर्थयात्राप्रसङ्गात्तन्नजयात्राविनोदतः ॥ ५६ ॥

न जाने क्व गता तस्याः परमार्थोन्मुखी मतिः ।
मन्थरादुष्टवाचाल्या कृतासद्यो यदन्यथा ॥ ५७ ॥

नाधुना जीवनं मन्ये रामस्य विरहाद्भृशम् ।
पीड्यमाना मम प्राणा बहिर्निष्क्रमणोत्त्वराः ॥ ५८ ॥

हा हन्त क्व नु पश्येयं रामं प्रकृतिसुन्दरम् ।
को मां जीवयितुं शक्तो विना रामं रसालयम् ॥ ५९ ॥

पश्यतो रामचन्द्रं मे विदितो न किमप्यसौ ।
प्राणान्तकरणो दाहस्तीव्रो विश्लेषसम्भवः ॥ ६० ॥

पश्यामि क्व नु गोपेन्द्रं सुखिताख्यं व्रजेश्वरम् ।
ततः शिक्षामि वा किं नु विरहाभ्यसनं परम् ॥ ६१ ॥

बाल्यात्कैशोरपर्य्यन्तमवात्सीद्येषु राघवः ।
ततो वियोगिनः कस्मादजीवन् व्रजवासिनः ॥ ६२ ॥

शिक्षयेत्सुखितो गोपो विरहं मे सजीवनम् ।
तावत्कथं नु जीवेयमसवस्त्वरयन्ति माम् ॥ ६३ ॥

सुखितेन सुकण्ठेन व्रजे विक्रीडितं विभोः ।
तदेव ध्यानमायातु मरणे समुपस्थिते ॥ ६४ ॥

न ज्ञानं न च कर्माणि नोपासनमपि क्षमम् ।
तत्पदप्राप्तये नृणां व्रजविक्रीडितं यथा ॥ ६५ ॥

स्मरामि यत्सुखितेनोपदिष्टं तथा सुकण्ठेन च तस्य सख्या ।
महारासे क्रीडनं राघवेन्दोस्तदेव मे चित्तपथं प्रया तु ॥ ६६ ॥

इत्यादि कथयन् राजा संस्मरन् राममद्भुतम् ।
ध्यायानस्तस्य चरितं सुकण्ठोक्तं रहस्यकम् ॥ ६७ ॥

हा राम हा व्रजवधूरमणैकशील हा पुत्र हा विरहदायक हा रमेश ।
हा गोपतेर्दयित हा शरदिन्दुवक्त्र हा पद्मलोचन नमां त्यज जातु दीनम् ॥ ६८ ॥

इत्थं स विलपन्नेव रामरूपो बभौ नृपः ।
योगिनामपि दुष्प्रापे राम एवाव्रजल्लयम् ॥ ६९ ॥

कौसल्या च सुमित्रा च सुप्तं ज्ञात्वा शनैर्नृपम् ।
तूष्णीं सुषुप्ततुः पार्श्वे विरहक्लेशपीडिते ॥ ७० ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे दशरथलयो नाम चतुर्विंशोऽध्यायः ॥ २४ ॥

●

पञ्चविंशोऽध्यायः

ब्रह्मोवाच

रात्रौ जातावसानायां भास्करस्योदयात्पुरा ।
प्रबोधकेषु परितो बोधयत्सु यथाक्रमम् ॥ १ ॥

पठत्सु वन्दिलोकेषु गायत्सु विरुदावलीम् ।
कीर्तयत्सु च सूतेषु मागधेषु विशेषतः ॥ २ ॥

वंशानुपूर्वीमखिलां श्रावयत्सु समन्ततः ।
उच्चारयत्सु विप्रेषु यथापूर्वं शुभाशिषः ॥ ३ ॥

गीयमानासु गाथासु भूयोमाङ्गलिकीगणैः ।
नीयमानेषु परितः पुण्यदर्शन वस्तुषु ॥ ४ ॥

छायादर्शनपात्रेषु कल्पमानेषु सेवकैः ।
पठत्सु पञ्जरस्थेषु शुकेषु विहगेषु च ॥ ५ ॥
निष्कुटेषु च कूजत्सु कोकिलानां कलस्वरैः ।
प्रत्युपस्थानकुशलेष्वागच्छत्सु यथा पुरा ॥ ६ ॥

दन्तधावनमादर्शं स्नानीयं च यथाविधि ।
आदाय सज्जमानेषु लोकेषु स्वाधिकारतः ॥ ७ ॥
शब्दश्च सुमहानासीत् प्रबुद्धे राजवेश्मनि ।
सर्वे स्वस्वाधिकारेण यथास्थानमुपस्थिताः ॥ ८ ॥

जातः सूर्योदयोऽप्यद्धा न चचाल च भूपतिः ।
नेङ्गते विगतप्राणः पतितः पाञ्चभौतिकः ॥ ९ ॥
शयनाग्रेसरीणां च जाता वाचः परस्परम् ।
कथमद्य न राजेन्द्रः प्रबुद्धः क्लिष्टमानसः ॥ १० ॥

चिरं रात्रौ जजागार महिषीभ्यां च खेदितः ।
पुत्रविश्लेषदुःखेन वार्तयन् विविधाः कथाः ॥ ११ ॥
एते अपि चिरं सुप्ते महिष्यौ दुःखकर्षिते ।
अथा पराः शङ्कयानाः स्त्रियोभूयो महीपतिम् ॥ १२ ॥

अपश्यन् सविधे गत्वा धाष्टर्यं कृत्वा भयातुराः ।
तावत्ता ददृशुर्भूपं तथावस्थामुपागतम् ॥ १३ ॥
उन्नेत्रसलिलं शान्तं शीतलं सर्वगात्रतः ।
इङ्गालमिव शान्तस्य वन्हेर्निःश्वासवर्जितम् ॥ १४ ॥

अथ प्रचुक्रुशुः सर्वा उत्क्षिप्ताहतप्राणयः ।
भालेषु चापि वक्षःसु ताडयन्त्यः करद्वयम् ॥ १५ ॥
तासामार्त्तस्वरं श्रुत्वा कैकेयीप्रमुखा जवात् ।
तत्राययुः किं किमिति शङ्कमाना भयोद्धृताः ॥ १६ ॥

तासां कोलाहलं श्रुत्वा पार्श्वस्थे उदतिष्ठताम् ।
कौसल्या च सुमित्रा च पश्यन्त्यौ नृपतेर्दशाम् ॥ १७ ॥
सदयः सम्भ्रान्तनयने स्वापोत्थितससम्भ्रमे ।
हा हार्यपुत्रेत्याक्रुश्य निपेततुरिलातले ॥ १८ ॥

तयोर्भुवि विचेष्ठन्त्योर्भूरेणुविगतात्विषोः ।
कैकेयीप्रमुखाः सर्वानिपेतुरवनीतले ॥ १९ ॥

रुरुदुस्तीव्रशोकेन महोच्चैः शब्दकारिकाः ।
तासां शब्दमुपश्रुत्य रुदतीनां समन्ततः ॥ २० ॥

उत्थायोत्थाय भूपृष्ठे पतन्तीनां मुनिर्भरम् ।
बाहुभिस्ताडयन्तीनां वक्षांसि च शिरांसि च ॥ २१ ॥

निरात्मरक्षं भूपृष्ठे घ्नतीनां कोमलास्तनूः ।
आययुः स्वस्वगेहेभ्यः समस्ता राजबन्धवः ॥ २२ ॥

रुदन्तो रोदयन्तश्च चित्रस्थानपि शोकतः ।
अथासीत् सुमहान् शब्दस्तेषामन्योन्यपातिनाम् ॥ २३ ॥

अन्योन्यमालिङ्गचतामन्योन्यं च प्रलापिनाम् ।
सर्वंमापूरितं वेश्म नीचैरुच्चैः समन्ततः ॥ २४ ॥

तलध्वनिः प्रतिच्छायाध्वनिश्च सुमहानभूत् ।
हाहाकारो महानासीदन्तःपुरनिवासिनाम् ॥ २५ ॥

शिरोवक्षस्ताडनोत्थः शब्दश्च सुमहान भूत् ।
सर्वा राजमहिष्यश्च विचेष्टन्त्यौ महीतले ॥ २६ ॥

नाशोभन्त तदातारा आकाशात्पतिता इव ।
अतीव शोकसंशब्दे जायमाने समन्ततः ॥ २७ ॥

कौसल्या पतिशोकेन विललाप तपस्विनी ।
हा नराधिप हा मित्र सुखदायक हा निधे ॥ २८ ॥

हा शत्रुनारीवैधव्यदीक्षादानविचक्षण ।
हा देवनरनागेन्द्रसर्वस्व यशसां निधे ॥ २९ ॥

हा भूप्रकाश हा नाथ हा वदान्य महाक्रतो ।
हा यायजूक हा सम्राट्प्रवराधिप हा पते ॥ ३० ॥

हा विश्वकान्त हा कान्त क्व गतोऽसि त्वमीदृशः ।
हायोध्यानगरीनाथ हा निजावनपण्डित ॥ ३१ ॥

हा हा असुरसंदोहनिवारणविधिक्षम ।
हा नाथ युधि दैत्यौघान् विजित्य निशितैः शरैः ॥ ३२ ॥

प्रतापाग्निभिरावेष्टय सप्तसिन्धुभृतां महीम् ।
नीराजितवपुर्देवकन्याभिर्यशसान्वितः ॥ ३३ ॥

पुनरायास्यसि गृहान् सुखयिष्यसि बान्धवान् ।
हा नाथ किमिमां निद्रां भजसे मीलितेक्षणः ॥ ३४ ॥

पुनरुद्बोधरहितां किमीदृग्व्यसनं तव ।
हा नाथ कस्य पुण्येन पुनस्त्व त्यक्तमीलनः ।
झटित्युत्थाय सुहृदः सुखयेच्छोककर्षितान् ॥ ३५ ॥

हा नाथ कस्या हतमङ्गलाया दुर्बुद्धिजातेन सुतापदेन ।
रामस्य विश्लेषहुताशनेन त्वमत्यजः सर्वहितान् निजासून् ॥ ३६ ॥

हा नाथ दुष्टा रिपवोऽद्य जाताः पूर्णाशिपस्त्वय्यसुहीनदेहे ।
मित्राणि ते जीवित जीवितानि सीदन्ति दुर्दैवविमुष्टभव्याः ॥ ३७ ॥

हा नाथ दुर्दैववशादसोढं वैधव्यमेतत् कथमद्य वक्ष्ये ।
प्राणाविनिर्यान्ति न भूरिघातैराहन्यमाना अपि वक्षसो मे ॥ ३८ ॥

अहो अहं दैवहतादद्यजाता क्व तादृशोमेऽभ्युदयो व्यतीतः ।
हा हा अकाण्डज्वलनेन दग्धा जीवामि किं नाथ भवत्युदासे ॥ ३९ ॥

वृत्तानि तानि स्मरसे न नाथ त्वया वितीर्णानि शुभानि मह्यम् ।
क्व तानि ते लोकपते वचांसि वितीर्णवान् यैर भयं हितेभ्यः ॥ ४० ॥

अयं कुतः सम्पतितौवियोगस्तवात्मजस्योदितदुर्विपाकः ।
पुत्रस्य पत्युश्च ममातुराया विश्लेष आसीदयमेकदैव ॥ ४१ ॥

न जीवनं सम्पति वै ममाहं तथापि जीवामि विधेर्विपाकात् ।
करोमि किं न ग्रसते ममासून् पुत्रस्य पत्युश्च वियोग एषः ॥ ४२ ॥

सुदुर्धरो मे विरहः सुतस्य त्वद्विप्रयोगाद् द्विगुणत्वमाप ।
सुदुर्भगाहं सुतरां सहामि दुःखोर्मिवन्तं ननु शोकसिन्धुम् ॥ ४३ ॥

हा कैकेयि तवैव दुष्कृतमिदं जागर्ति भूमीतले
भोक्ष्येराज्यमकण्टकं भृशमिति क्रूरे व्यधाः पातकम् ।
वैधव्यापदमीदृशीमगणयन्त्येवं प्रजादुःखदे
मत्पुत्रं मदनात्प्रवासितवती तददुश्चरित्रं तव ॥ ४४ ॥

त्यक्त्वा भर्तृसुखं विधाय च महादुःखं दुराचारिणी
ब्रह्मक्षत्रविडन्त्यजादिसकलक्षोणीतलस्थायिषु ।
का स्त्री स्वात्मसुखार्थिनी वितनुतामेवंविधां क्रूरतां
केकेयि प्रकृतिप्रकामपरुषे दुष्टाशयां त्वामृते ॥ ४५ ॥

वैधव्यापदमुद्धुरामपयशोध्वान्तादपि श्यामलं
पापं चाप्रतिमं चकार भवती कस्मादिहामुत्र च ।
क्षान्तं सर्वमपि त्वदीयमशुभं कर्मेदृशं केकयि
क्रूरायास्तव किं गतं भृशमहं हा हन्त दीना हता ॥ ४६ ॥

हा हन्त कुब्जावाचालीवाक्यवश्यहृदा त्वया ।
रघूणां संक्षयो जातः शत्रूणां च मनोरथः ॥ ४७ ॥

तव प्रसादनार्थाय राजा सत्यपरायणः ।
रामं प्रवासयामास तस्येदं कर्मणः फलम् ॥ ४८ ॥

हा राम मामद्य हतामनाथां त्वया च पत्या च भृशं विहीनाम् ।
दुःखाप्लुतां पतितां शोकसिन्धौ जानासि नैवं विलपन्तीं सुदीनाम् ॥ ४९ ॥

यत्रासि तत्रासि चराचरस्य शुभं दधानः शुभवान् स्वतश्च ।
मामीदृशागाधतमे नितान्तं शोकाम्बुराशौ पतितां न वेत्सि ॥ ५० ॥

हा साध्वि कल्याणि विदेहराजकुलाचलस्योर्जितसत्पताके ।
धन्यासि पत्यासहिता सुखाब्धौ मग्नासि याहं विलपामि सा हता ॥ ५१ ॥

हा पापकारिणि क्रूरे यदर्थं रचितं त्वया ।
म एव भरतोनूनं त्वां भृशं गर्हयिष्यति ॥ ५२ ॥

सौम्योऽति धर्माचरितः सत्त्ववान् विमलव्रतः ।
तदर्थमेवं कैकेयि किं त्वं क्रूरमुपाचरः ॥ ५३ ॥

हा हातिपापसंकल्पे सुतः पापविवर्जितः ।
सोऽप्येवं कर्मणालोके त्वयादद्य मलिनीकृतः ॥ ५४ ॥

हा हा महाराज महीमहेन्द्र हा हा महाकीर्तिनिधे महा[1]द्यं ।
हा हा महाबाहुवरेण्य पुण्यनिधे न मां पश्यसि शोकमग्नाम् ॥ ५५ ॥

हा हा महाबल महामहनीयकीर्त्ते तत्तादृगुज्ज्वलतरं विमलं मनस्ते ।
कैकेयराजसुतयातिनृशंसयातिपापात्मना विकलितं कथमेवमासीत् ॥ ५६ ॥

इदं त्वया स्वात्मविनाशहेतवे सम्पादितं किं विदुषापि तादृशा ।
यद् रामचन्द्रं नितरां निरागसं प्रवासयामास दुरात्मनोगिरा ॥ ५७ ॥

यदि त्वया साकमहं महीपते विशेयमग्निं परितः समेधितम् ।
तदा गमिष्यामि भवत्सलोकतां सत्ये च धर्मे महतीं व्यवस्थितिम् ॥ ५८ ॥

दूरे तु मे तर्हि सुतस्य तस्य वै रामाभिधस्यामृतवर्षिवर्ष्मणः ।
स्याद् ददर्शनंलोकजनाभिकाङ्क्षितं ततो नु शोचामि करोमि किंन्वहम् ॥ ५९॥

हा राम निःशेषगुणाभिराम हा लक्ष्मणः क्षेमदलक्षणाढ्य ।
हा मैथिलि व्यापितसाधुवृत्ते कुत्रस्थ यूयं ननु मां न वित्थ ॥ ६० ॥

हा हा महाराज कुमारकौ वां प्रस्यन्दमानं ननु वामचक्षुः ।
किमद्य नाख्यास्यति दुर्निमित्तं ततोऽपि न स्याद् विपिनान्निवृतिः ॥ ६१ ॥

अथवा शुभमेव वां सदा त्रिजगन्मङ्गलदायिदर्शनौ ।
विधिना निहता तु मादृशी सुमहा संकट शोकभाजनम् ॥ ६२ ॥

इत्युच्चैर्विलपन्तीं तां कुररीमिव दुःखिताम् ।
आजगाम सतीमौलिर्भर्त्रा सार्द्धमरुन्धती ॥ ६३ ॥

तामालिङ्ग्य सुदुःखार्त्ता कौसल्या भर्तृशोकिनी ।
विललाप गलद्बाष्पधारासाराभिवर्षिणी ॥ ६४ ॥

हा मातस्त्वं रघुकुलवधूभूरिसौभाग्यकर्त्री
पूर्णां यामाशिषमलमदा मङ्गलैकान्तहेतुम् ।
सा मय्येवंविधपरिणतौ दुर्विधेर्दुर्भगायां
मूकीभावं कथमिव गता भर्तृतः पुत्रतश्च ॥ ६५ ॥

१. महायशः—अयो० ।

न खल्वतिशयोद्दीप्तदुर्दैवहतवृत्तिषु ।
देवतानामपि गिरोभवन्तिफलवत्तराः ॥ ६६ ॥

साहमद्य न जीविष्ये भृशं दुर्विधिना हता ।
ध्रुवमीदृगवस्थायाः श्रेयो मरणमेव मे ॥ ६७ ॥

तां समाधाय शोकार्तां भर्तृवाक्यादरुन्धती ।
व्यवहारविनीताभिर्दासीभिरनयत्ततः ॥ ६८ ॥

तत्स्थानं विजनीकृत्य प्राजापत्यो मुनिर्गुरुः ।
आकार्य मन्त्रिणः सर्वानिदं वचनमब्रवीत् ॥ ६९ ॥

यद्भावि तदभूद्दैवान् करणीयमतः परम् ।
क्रियतां त्वरितं तत्तु धैर्यमालम्ब्य चेतसा ॥ ७० ॥

रामः प्रवासी भरतो मातुलेष्वधितिष्ठति ।
संस्कार्यश्च महीपालः पारलोक्येन कर्मणा ॥ ७१ ॥

न च पुत्रेषु सत्स्वन्यः कर्माधिकुरुतेक्वचित् ।
रामश्च सत्यसम्बद्धो न निवर्त्स्यति सत्पथात् ॥ ७२ ॥

अत आकार्यतां सौम्यो भरतः कार्यहेतवे ।
यदर्थमिदमारब्धं कैकेय्या क्रूरचित्तया ॥ ७३ ॥

तच्च सम्पत्स्यते तस्या अभीष्टं भरतागमे ।
तावद् रक्ष्यमिदं तैले भूपतेः पाञ्चभौतिकम् ॥ ७४ ॥

रघूणां प्रवरो राजा नायं दुर्गतिमर्हति ।
यस्याग्नयोऽश्वमेधीयाः सदा कुण्डेषु जाग्रति ॥ ७५ ॥

येनेष्टं राजसूयैश्च तथान्यैः सुमहामखैः ।
स सम्राड्दीक्षितवर्योऽसौ या यजूकशिरोमणिः ॥ ७६ ॥

संस्कार्यो भरतेनैव सुपुत्रेण मनीषिणा ।
अन्त्येष्ठिकर्मणा चित्या मग्नीनाधाय यज्ञियान् ॥ ७७ ॥

अहं च वामदेवश्च कश्यपो गौतमस्तथा ।
मार्कण्डेयश्च भगवान् मौद्गल्यश्च महातपाः ॥ ७८ ॥

जातूकर्णश्च जाबालिः कात्यायन उदारधीः ।
एते चान्ये च बहवो मन्त्रपूता द्विजातयः ॥ ७९ ॥

सर्वे तमनुगन्तारो नीयमाने नराधिपे ।
देवर्षयो ब्रह्मर्षयस्तथा राजर्षयोऽमलाः ॥ ८० ॥

स सर्वैः सहितः सौम्यो भरतः श्रौतकर्मवित् ।
करिष्यते पितुर्दाहं यज्ञियेष्वेव चाग्निषु ॥ ८१ ॥

वचो वशिष्ठस्य निशम्य सर्वे सारार्थत्वादपरावर्त्तनीयम् ।
श्रीरामचन्द्रे हि गतं समाधिं विलोक्य राजानमितो विनिर्ययुः ॥ ८२ ॥

स्थले स्थले तदायोध्या रुदद्भिर्नागरैर्जनैः ।
नरैर्नारीगणैः कीर्णा शोकाद्वैतमिवाभजत् ॥ ८३ ॥

न शोभन्ती नगरी राजहीना विविर्जिता राजकुमारकैश्च ।
अस्तंगतेऽर्केऽनुदितेन्दुबिम्बा शोच्यामवद्वहुले शर्वरीव ॥ ८४ ॥

न वाद्यघोषो न च गीतनादो नालापशब्दोरुदतां जनानाम् ।
सर्वत्र शोकेन समावृता सा पुरी बभूवाभिभवं गतेव ॥ ८५ ॥

क्वापि घ्नन्ति शिरांसि भूतलशिलाखण्डैरुरांसि स्त्रियो
दृग्भिर्वाष्प परम्परां विदधते कुत्रापि निम्नोन्मुखी ।
कर्णाकर्णिकयन्ति केकयसुतादुष्कर्म कुत्राप्यलं
लिप्तोवान्धतमिस्रराशिभिरभूदूना रघूणां पुरी ॥ ८६ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे दशरथशोको नाम पञ्चविंशोऽध्यायः ॥ २५ ॥

●

षड्विंशोऽध्यायः

ब्रह्मोवाच

सा रात्रिरतिकष्टेन सर्वेषां पर्वतोपमा ।
कथंचिदत्यगाद् घोरा तापाश्रुपरिदेवनैः ॥ १ ॥

प्रभाते मन्त्रिभिः सार्द्धं वशिष्ठो भगवान् द्रुतम् ।
महर्षिभिः परिवृतः सभामण्डपमाययौ ॥ २ ॥

तत्र ते मन्त्रयाञ्चक्रुः सर्वेराज्याभिषेचनम् ।
यस्य कस्यापि वंश्यस्य वीक्ष्य नीराजकाः प्रजाः ॥ ३ ॥

तानाह भगवानुच्चैः कोऽभिषेचनमर्हति[1] ।
भरते भूमिभारार्हे मातुलेष्वधितिष्ठति ॥ ४ ॥

प्रेष्यन्तां केकयान् दूता द्रुतं गत्वा गिरिव्रजम् ।
आनयन्तु महाभावं भरतं कुलभूषणम् ॥ ५ ॥

भो भो दूतवराः शीघ्रमितो गच्छत मा चिरम् ।
आनेयः केकयान् गत्वा भरतो भूरिविक्रमः ॥ ६ ॥

---

१. कोऽभिषेकमिहार्हति । अयो०, मथु० ।

एवंभूतो विशेषोऽस्य ज्ञापनीयो न कर्हिचित् ।
आख्येयः कुशलं वन्धु देशग्रामपुरादिषु ॥ ७ ॥
आयुष्मंस्त्वयि कुशलिनि कुशलं प्राणिनामिति ।
सामान्यतोऽखिलं वाच्यं विशेषः कोऽपि नोच्यताम् ॥ ८ ॥
आनेय एव चायुष्मान् विज्ञाप्य मम शासनम् ।
इति सम्प्रेषिता दूता यावद्गच्छेयुरुद्धुराः ॥ ९ ॥
अपश्यद्भूरतस्तावद्दुर्निमित्तानि भूरिशः ।
निद्राणोऽतीव दुःस्वप्नान् ददर्श भयदायकान् ॥ १० ॥
सिन्धोः शोषं विधोः पातं गगनादवनीतले ।
दुर्दिनं काममेघौघैस्तमसावरणं भुवः ॥ ११ ॥
व्यचष्ट च महाराजमन्यथा तातमात्मनः ।
[1]पलितं मुक्तत्रिकुरं पतितं चैव शेखरात् ॥ १२ ॥
अगाधेऽतीव कलुषे पङ्कगोमयजे ह्रदे ।
तैलाञ्जलीन् पिबन्तं च पतन्तं च मुहुर्मुहुः ॥ १३ ॥
स्थितं तैलोदनं भुक्त्वा नीचैः स्थापितमस्तकम् ।
तैलाक्तासर्ववपुषं तैलकुण्डावगाहिनम् ॥ १४ ॥
श्यामे लोहमये पीठे निषण्णं श्यामवाससा ।
प्रहसन्तं दशरथं कामिन्यः श्यामपिङ्गलाः ॥ १५ ॥
काकध्वजे खरैर्युक्ते रथे कृत्वा त्वरान्विताः ।
रक्तकृष्णप्रसूनस्रग्धारिण्यो दक्षिणामुखम् ॥ १६ ॥
नयन्ति त्वरयन्त्यश्च प्रेम्णालिङ्ग्य समुत्सुकाः ।
इत्याद्यनेकमुद्वीक्ष्य स्वयं स पुरुषोत्तमः ॥ १७ ॥
जानन्नपि श्रीभरतो बभूवाज्ञवदात्मना ।
अथ प्रातः समुत्थाय महाराजाधिराज भूः ॥ १८ ॥
स्वभावमधुरोदाररसज्ञवरवल्लभः ।
तप्यमानेन मनसात्युदासीन इवात्मना ॥ १९ ॥
स्थितो वयस्यैः सहितो नीयमानोऽपि चान्यतः ।
न तत्याज मनःशोकं भाविसूचनदुर्मनाः ॥ २० ॥
प्रेमालापैः सुरुचिरैर्विचित्रैश्च कथानकैः ।
हास्येर्गानैस्तथा वाद्यैर्नृत्यैः कौतुककारिभिः ॥ २१ ॥
प्रेक्षणीयैश्च विविधैर्वस्तुभिर्नानास्तुलैरपि ।
सखिभिः प्रियचारित्रैश्चेटकैश्चाटुकारिभिः ॥ २२ ॥

---

१. नास्ति–मथु०, बड़ो०, अयो० ।

गोष्ठीभिर्विविधाभिश्च पदार्थैश्च प्रहर्षणैः ।
गजैरश्वैरथैर्मल्लैश्चित्रयुद्धविशारदैः ॥ २३ ॥

क्रीडाकौतुकवार्त्ताभिस्तथा रत्नैरनेकशः ।
मोदितो रञ्जितश्चैव तैस्तैर्वस्तुकदम्बकैः ॥ २४ ॥

महाराजकुमारोऽसौ प्रससाद न चेतसि ।
ततः कश्चित्प्रियसखो जिज्ञासुस्तन्मनोऽब्रवीत् ॥ २५ ॥

किमद्येदं[1] तवौदास्यं महाराजकुमारक ।
प्रसादहेतुष्वप्येषु कथं वा न प्रसीदसि ॥ २६ ॥

पराजित इवान्येन लक्ष्यसे विनयोर्जित ।
दुश्चिकित्स्यमिव व्याधिं प्राप्तो नित्यनिरामय ॥ २७ ॥

संस्पृष्ट इव पापेन दृश्यसे पुण्यदर्शन ।
उक्तोऽसि वा किमद्य त्वं केनापि कलुषात्मना ॥ २८ ॥

वियुक्त इव चैवासि प्राणतुल्येन केनचित् ।
किमर्थमीदृशीं कष्टामवस्थामेवमास्थितः ॥ २९ ॥

निमित्तं ब्रूहि मे किंचिदार्यस्य तव पृच्छ्यते ।
स शासनीयः कैकेयराजेन खलु दुष्टधीः ॥ ३० ॥

प्रतिकूलवचा यस्ते सर्वलोकानुरञ्जनः ।
इत्युक्तो भरतोऽवोचत्तं वै प्रियसखं निजम् ॥ ३१ ॥

मयाद्य निशि दुःस्वप्नो वीक्षितो घोरदर्शनः ।
स्मारं स्मारमहं तस्य पारं दुःखस्य न व्रजे ॥ ३२ ॥

ततः सर्वं समाचख्यौ यद् दृष्टमद्यसूचनम् ।
न जानाम्यद्य तातस्य शुभं किमपि वर्त्तते ॥ ३३ ॥

अङ्गानि मे विशीर्यन्ति दीर्यते हृदयं च मे ।
रामस्य वापि वैदेह्या भ्रातुर्वा लक्ष्मणस्य मे ॥ ३४ ॥

नाहमद्य शुभं वीक्षे मम वा घोरदर्शिनः ।
रात्रिशेषे तु यो दृष्टः स्वप्नो घोरतरो मया ॥ ३५ ॥

न तत्प्रतिकृतिं पश्याम्यहं शोकपरिप्लुतः ।
काकुत्स्थस्य वचः श्रुत्वा सुहृदस्तस्य बान्धवाः ॥ ३६ ॥

अवहित्थां ममालम्ब्य लीलयैव समादधुः ।
विचिन्तयंस्ततो घोरं दुःस्वप्नमद्यशंसकम् ॥ ३७ ॥

१. मद्यास्ति । अयो०, मयु० ।

उद्विग्नचित्तो भरतस्तां सभामधितस्थिवान् ।
तावद् दूताः परिप्रायुः कैकयेन्द्रस्य मन्दिरम् ॥ ३८ ॥

देशाननेकानुल्लङ्घ्य वशिष्ठप्रहिता जवात् ।
सप्तरात्रेण सम्प्राप्ताः कथंचिच्छ्रान्तवाहनाः ॥ ३९ ॥

ते समेत्य सभामध्ये कैकयेन्द्रं युधाजितम् ।
राजानं राजपुत्रं च भरतं च शुचान्वितम् ॥ ४० ॥

ददृशुः पादयोर्नत्वा राजानं श्रमखेदिताः ।
ऊचिरे भरतं दूता विधेयार्थनिवेदिनः ॥ ४१ ॥

सर्वैस्त्वं कुशलं पृष्टस्तूर्णमाकारितस्तथा ।
पुरोधसा मन्त्रिभिश्च कार्यमत्याहितं त्वयि ॥ ४२ ॥

अतः शीघ्रं विनिर्याहि समामन्त्र्य स्ववान्धवान् ।
भरतेन ततः पृष्टा दूताः सर्वेष्वनामयम् ॥ ४३ ॥

संक्षेपेणैव सम्प्रोचुर्निगूह्यान्तस्थितां शुचम् ।
दूतांस्त्वरयतो वीक्ष्य भरतः कार्यतत्त्ववित् ॥ ४४ ॥

मातामहमुवाचेदं जवाज्जिगमिषुः पुरीम् ।
आज्ञापयतरामार्य गच्छामि पितुरन्तिकम् ॥ ४५ ॥

शीघ्रं च पुनरेष्यामि निबद्धप्रणयस्त्वयि ।
ऊचे मातुलकश्चैनं युधाजिद् विरहातुरः ॥ ४६ ॥

सर्वेषु कुशलं वाच्यं पितृमातृमुखेषु ते ।
पुरोधसि वशिष्ठे च तथान्येषु द्विजातिषु ॥ ४७ ॥

स्मरणीया वयं शीघ्रं भवता हृतचेतसा ।
न ज्ञातश्च वसन् पुत्र भवान् प्रकृतिमोहनः ॥ ४८ ॥

आनन्दिता वयं सर्वे पुरं चेदं कृतार्थितम् ।
वियोक्तुं नैव वाञ्छामो भवतानन्ददायिना ॥ ४९ ॥

निबद्धहृदयाः सर्वा इमाः प्रकृतयश्च मे ।
प्रस्थास्यन्तं निशम्य त्वां जाता दुःखनिमीलिताः ॥ ५० ॥

योग एव त्वया भूयान्मा वियोगः कदाचन ।
हता मे शत्रवः सर्वे भूतिश्च महती कृता ॥ ५१ ॥

आनन्दिता भृशं वत्स कं नु शंसामि ते गुणम् ।
एवमेव सदास्मासु विदधत्सुखसम्पदम् ॥ ५२ ॥

सर्वदा दर्शनं देहि लोकानन्दसुधानिधे ।
अथास्मै तुरगान् जात्यान् विचित्रान् जलगामिनः ॥ ५३ ॥

अजिनानि महार्हाणि कम्बलान्यासनानि च ।
वस्त्राणिच्च विचित्राणि तद्देशप्रभवानि च ।। ५४ ।।

हेमनिष्कसहस्राणि तुङ्गा अश्वतरीस्तथा ।
क्रमेलकान् महाजात्यान् शुनश्च मृगयोद्धुरान् ।। ५५ ।।

चित्रवर्णान् महाकायान् व्याघ्रतुल्यान् पराक्रमे ।
केकयेन्द्रोऽदिशत्प्रीतः संविधाश्चापि देशजाः ।। ५६ ।।

अमात्यान् भूरिधिषणान् दासान् दासीश्च मञ्जुलाः ।
वन्दिनो मागधान् सूतान् भूरिकार्यकरान् जनान् ।। ५७ ।।

आखेटकांश्चेटकांश्च भण्डांश्च प्रियदर्शनान् ।
सभाप्रसादकान् प्राज्ञान् पण्डितांश्च महाकवीन् ।। ५८ ।।

यद्यद्रुच्यतमं तस्य स्वस्रेयस्य महात्मनः ।
प्रीत्योपपादयाञ्चक्रे तत्तत्केकयभूपतिः ।। ५९ ।।

धनं बहुतरं प्रादाद्भूगिन्यै चित्तरञ्जनम् ।
भूषाश्च रत्नजटिता विचित्राश्चापि शाटिकाः ।। ६० ।।

रत्नानि च महार्हाणि देश्यानि विविधानि च ।
सत्कृत्य सुबहु प्रादात्स्वस्रेयाय महात्मने ।। ६१ ।।

सार्थे तस्य ददौ सेनां महतीं चतुरङ्गिणीम् ।
प्रस्थाने भरतस्याथ गिरिव्रजपुरस्त्रियः ।। ६२ ।।

आत्मानं भूषयाञ्चक्रुर्दूषयाञ्चक्रुरेव च ।
आर्यपुत्रः पुरीमेतीत्यश्रुशोकविवर्जिताः ।। ६३ ।।

विरहात्तस्य चात्यन्तं वर्द्धयन्त्यः शुचं हृदि ।
नगरं भूषितं सर्वं तस्य संतोषहेतवे ।। ६४ ।।

आययुर्बलभीतुङ्गवातायनपथेषु च ।
कामिन्यः कामबाणेन ताडिता भरतं प्रति ।।
ऊचुः परस्परं दृना विरहेणास्य भूयसा ।। ६५ ।।

धन्यास्ताः सखि निवसन्ति कोसलायां
या स्वैरं भरतमुखेन्दुकान्तिसारम् ।
पीयूषादपि रमणीयमास्वदन्त्यः
स्वात्मानं किमपि कृतार्थयन्ति वामाः ।। ६६ ।।

जानीमः सखि भरतस्य पाणिपद्मे
पौष्पं तद्धनुरुदयत्यमोघवीर्यम् ।
पौष्पैस्तैरिषुभिरसौ ननु त्रिलोकीं
निर्जित्य प्रथयति कीर्तिमिन्दुवर्णम् ।। ६७ ।

नापश्यन् वयमिदमीयमेतदास्यं
चन्द्रादप्यधिकगुणं महामनोज्ञम् ।
एतावत्सहवसतावपीह भाग्यै
निर्मुक्ता न किमपि काममाप्नवन्यः ॥ ६८ ॥

क्वैतस्य त्रिशतमितेषु योजनेषु
क्षेमाढ्या वसतिरुदेतिपूरयोध्या ।
क्वास्माकं वसतिरियं गतेऽत्र देशे
विश्लेषं मनसि सहामहेऽस्य किं वा ॥ ६९ ॥

यास्यामो वयमथवास्य मंगलघ्नाः
पत्यादीन् सपदि विहाय वान्धवौघान् ।
निःशङ्कं श्रयतु कुलं कलङ्कभारं
विच्छेदं नदपि महामहेऽमुना न ॥ ७० ॥

इत्यमालपतीनां स मनांस्यादाय सुन्दरः ।
कैकयेन्द्रपुरस्त्रीणां निर्जगाम पुराद् बहिः ॥ ७१ ॥

नातिदूरे सन्निवर्त्त्य स्निग्धं मातामहं नृपम् ।
अयोध्याभिमुखो धीमान् भरतः समवर्त्तत ॥ ७२ ॥

सप्तरात्रोषितो मार्गे महत्या सेनया युतः ।
कोविदारध्वजरथः पुरीं प्राप महायशाः ॥ ७३ ॥

स्नात्वा स गोमतीं पुण्यां प्रातः परमधार्मिकः ।
ददर्शाथ रथारूढो दूरात्तां कोसलां पुरीम् ॥ ७४ ॥

मनुना निर्मितां पूर्वं महाराजेन धीमता ।
प्रमुप्तामिव सर्वत्र हर्षशोभाविवर्जिताम् ॥ ७५ ॥

तां तथा दुर्गतां वीक्ष्य राजचिह्नविवर्जिताम् ।
अशोचन्मनसा धीमान् भरतः शत्रुकर्षणः ॥ ७६ ॥

किमद्य ज्ञापयत्येषा पुरी सुप्तेव सर्वतः ।
न च संश्रूयते घोषः पुरेव तुमुलो महान् ॥ ७७ ॥

न च शृङ्गारितास्तुङ्गा दृश्यन्ते मदकुञ्जराः ।
आगच्छन्तश्च गच्छन्तः पानार्थं विमलोदके ॥ ७८ ॥

कृतपल्याणशोभाश्च न न दृश्यन्तेऽत्र वाजिनः ।
उच्छलन्तो महानद्यास्तरङ्गा इव सर्वतः ॥ ७९ ॥

न चोद्यानविहारार्थं पुरान्निष्क्रमतां बहिः ।
महाजनवरेण्यानां श्रूयते रथजो ध्वनिः ॥ ८० ॥

गानध्वनिश्च नारीणां पुरे न श्रूयते क्वचित् ।
न च दुन्दुभिवल्लकीवादिघोषा माङ्गलिकाः क्वचित् ॥ ८१ ॥

ध्वजकेतुपताकाश्च नेक्ष्यन्ते पुरवेश्मसु ।
न च माङ्गलिको घोषः श्रूयते चरतां नृणाम् ॥ ८२ ॥

प्रमुप्ता इव सर्वत्र दृश्यन्ते सत्त्वजातयः ।
पशवः पक्षिणश्चापि रुदन्त इव सर्वतः ॥ ८३ ॥

तिरोभूतेव नो भाति श्रीःप्रासादेषु चापि नः ।
पुरश्रीरपि नष्टेव लक्ष्यते खलु सम्प्रति ॥ ८४ ॥

इति शोचन् स मनसा सूतं च कथयत् मुहुः ।
विवेश नगरीं सद्यः सुप्तामिव गतश्रियम् ॥ ८५ ॥

म्लानानि तत्र पौराणां मुखानि विसुखानि च ।
वीक्ष्यमम्लौ हृदा वीरः किं भावीति वितर्कयन् ॥ ८६ ॥

मलिनान् वाष्पनयनान् दीनान् ध्यानपरान् जनान् ।
पश्यन्नपृच्छमानोऽसौ विवेश भवनं निजम् ॥ ८७ ॥

बहून्यनर्थजातानि चिन्तयन् मनसोत्त्वरः ।
पूर्वं ययौ पितुर्वेश्म शून्यं दृष्ट्वा परावृतत् ॥ ८८ ॥

ततोऽन्वगान्मातृगृहं स बुद्धिमान्
निशम्य माता श्वसुतं समागतम् ।
महार्हहेमासनतः समुत्थिता
जवेन दृष्ट्वाभिययौ समुत्सुका ॥ ८९ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे भरतागमनो नाम षड्विंशोऽध्यायः ॥ २६ ॥

सप्तविंशोऽध्यायः

ब्रह्मोवाच

तं यथावन्निमलित्वा सा केकयी स्नेहसंयुता ।
पप्रच्छ कुशलं भ्रातुः स यथा वन्निवेद्य च ॥ १ ॥

पप्रच्छ तां विशेषेण पुरे शोकस्य कारणम् ।
पितरं भ्रातरौ चैव मातरं चैव जानकीम् ॥ २ ॥

तमुवाचाथ कैकेयी राज्यलुब्धा प्रहर्षिणी ।
प्ररोचयन्ती हृदयं वृत्तं शोकस्य कारणम् ॥ ३ ॥

लयं गतस्ते जनको महात्मा भूरिदक्षिणः।
महामखो धर्मनिधिः परत्रेह च सौख्यकृत्॥ ४॥
एवं स्थितेऽधुना तात भुङ्क्ष्व राज्यमकण्टकम्।
इत्युक्तः स जनन्याथ मूर्छितः पितृशोकतः॥ ५॥
पपात धरणीपृष्ठे स्वश्च्युतश्चन्द्रमा इव।
उत्थापितः स कैकेय्या दोर्भ्यामादाय यत्नतः॥ ६॥
हा तातेति चिरं शोकाद् रुरोद भरतस्तदा।
विललाप ततो भूयो गुणान् संकीर्त्तयन् पितुः॥ ७॥
उवाच जननीं पश्चाद् दुःखसम्प्लुतमानसः॥
समाध्यवसरे तात किमुवाच तदीरय॥ ८॥
कथं समाधिं[1] सम्प्राप्तः पिता मे सर्वशक्तिभृत्।
इत्युक्ता भरतेनैषा कैकेयी वाक्यमब्रवीत्॥ ९॥
रामस्य विरहस्तप्तः पिता ते विलयं गतः।
हा राम राम रामेति विलपन् शोकसंवृतः॥ १०॥
उवाच सोऽन्तावसरे तत्पुत्र त्वं निशामय।
धन्यास्ते पुण्यकर्माणो रामं द्रक्ष्यन्ति ये जनाः॥ ११॥
जानकीं लक्ष्मणं चैव वनवासात् समागतान्।
तान् ये द्रक्ष्यन्ति मनुजास्तेषां भाग्यं महत्तमम्॥ १२॥
एवं रटन् भवत्तातो निरुच्छ्वासो लयं गतः।
रामस्तु सह वैदेह्या लक्ष्मणेन च साधुना॥ १३॥
जगाम विपिनं घोरं चरन् धर्ममतन्द्रितः।
जटाधरश्चीरवासा दिव्यतापसवेषभृत्॥ १४॥
वने वसति धर्मात्मा यस्यशोकान्मृतो नृपः।
इत्युक्तो भरतो मात्रा भूयस्तामाह दुःखितः॥ १५॥
किं कृतं तेन मे भ्रात्रा यतोऽसौ विपिनं गतः।
कच्चिन्निहतवान् विप्रमतिचक्राम वा गुरून्॥ १६॥
कच्चित्स परदारान् वा मनसापि समस्पृशत्।
कच्चिद्वान्यत्कृतं पापं येनार्यो विपिनं गतः॥ १७॥
ततोऽब्रवीत्तं कैकैयी न तेन ब्राह्मणो हतः।
न वान्यद्विहितं पापं तेन धर्मैकमूर्तिना॥ १८॥
जितेन्द्रियः सदाचारः साधुकर्मा सतां मतः।
वेदशास्त्रैकविज्ञाता साधुकर्मा रघूद्वहः॥ १९॥

---

१. समाधिम्—अयो०, मथु०।

ममैव कर्मणा रामो वनं यातः शृणुष्व तत् ।
यौवराज्याभिषेकाय रामस्य कृतवान् धियम् ॥ २० ॥

पिता ते साधुहृदयो मुनीनाकार्य मान्त्रिकान् ।
तदा मया कृतो विघ्नस्तव स्नेहेन भूयसा ॥ २१ ॥

प्राग्दत्तमहमस्मार्षं राज्यलुब्धा वरद्वयम् ।
यावत्पञ्चदशाब्दानि रामस्य वनवासनम् ॥ २२ ॥
एकेन याचितवती द्वितीयेन च पुत्रक ।
तव सर्वमहीराज्यं स्नेहात्प्रार्थितवत्यहम् ॥ २३ ॥

इति ते सर्वमुदितं यथा रामो वनं गतः ।
यथा च तद्वियोगेन पिता ते मरणं गतः ॥ २४ ॥

त्वदर्थं सर्वमेवैतन्निष्ठुरं रचितं मया ।
जानन्त्यपिहितं रामं सर्वत्रैलोक्यरञ्जनम् ॥ २५ ॥

महाभावं महाशीलं धर्मनिष्ठं सतां गतिम् ।
त्वयि संस्निग्धमनसा कृतमेतन्मयाखिलम् ॥ २६ ॥

स त्वं शोकं परित्यज्य पितुस्त्रिदिववासिनः ।
भ्रातुश्च सानुजस्यैव सभार्यस्य वनस्थितेः ॥ २७ ॥

पितृपैतामहं राज्यं भुङ्क्ष्व भोगांस्तथोज्ज्वलान् ।
यदर्थं क्षत्रिया युद्धं सज्जन्ते त्यक्तजीविताः ॥ २८ ॥

तत्ते करगतं राज्यमनायासेन पुत्रक ।
भुङ्क्ष्व मद्बुद्धिविहितं भोगयुक्तमकण्टकम् ॥ २९ ॥

निशम्य क्रूरं जननीभाषितं भरतस्तदा ।
करौ संताड्य धरणौ क्लिष्टधीरिदमब्रवीत् ॥ ३० ॥

अयिक्रूरतरे धीरेघोरपातककारिणि ।
किमिदं विहितं घोरं त्वया कुटिलचित्तया ॥ ३१ ॥

रामस्यैवाखिलं राज्यमहं रामस्य सेवकः ।
त्वया स्नेहं विजानन्त्या विप्रियं रचितं मम ॥ ३२ ॥

त्यक्तधर्मा वीतदया निर्लज्जा पापकारिणी ।
पतिहन्त्री घोरकर्मा किमिदं त्वमुपाचरः ॥ ३३ ॥

हा हा हतोऽस्मि पापिष्ठे त्वया कुलकलङ्कया ।
तव बुध्यातिकुटिले ममापि भ्रंशिता गुणाः ॥ ३४ ॥

हा हा हतोऽस्मि दग्धोऽस्मि दूषितोऽस्मि त्वया खले ।
अहं प्राणान् विमोक्ष्यामि मां विनात्वं भविष्यसि ॥ ३५ ॥

किं तैऽपराद्धं पापिष्ठे भर्त्रा तेन महात्मना ।
रामेण वानुकूलेन त्वं तयोर्यत्तथाचरः ॥ ३६ ॥

ब्रह्महत्यां भ्रूणहत्यां गोहत्यां गोहत्यां चातिकुत्सिताम् ।
तथान्यघोरपापानि भवती न चकार किम् ॥ ३७ ॥

प्रवासितवती रामं [1]यस्मात्त्वमनपराधिनम् ।
तद्वियोगेन घोरेण पतिं च समघातयः ॥ ३८ ॥

गन्तासि नरकं घोरं पापेनानेन दूषिता ।
अयं चैव परो लोकस्त्वया नाशित आत्मनः ॥ ३९ ॥

किं मे राज्येन किं भोगैः किं प्राणैः किं पुनस्त्वया ।
प्रवासिते वनं रामे तातेऽधुना ॥ ४० ॥

सर्वं मे दुःसहं लोके जीवितुं चापि नोत्सहे ।
पापं कृतवतीमेवं त्वामहं हन्मि निश्चितम् ॥ ४१ ॥

परित्यजेत्तु मां रामो मातृहत्याविदूषितम् ।
तत एव दुराचारे मुञ्चामि त्वां कृतागसाम् ॥ ४२ ॥

ईदृग्विधाघकारिण्या नेक्षिष्ये वदनं तव ।
किमर्थं रक्षिता पापा मम पित्रा त्वमीदृशी ॥ ४३ ॥

व्यालीव गरलोद्गारकारिणी पापचारिणी ।
धिक् त्वामेवंधियं क्रूरां नृणामत्यधमाधमाम् ॥ ४४ ॥

न त्वं धर्मात्मनः पुत्री कैकयेन्द्रस्य धीमतः ।
पापिष्ठा दुष्टधीः क्रूरा राक्षसस्यासि वीर्यजा ॥ ४५ ॥

त्वं राक्षसी न संदेहः पुत्रघ्नी पतिघातिनी ।
यया वियोजितो रामः कल्याणगुणवारिधिः ॥ ४६ ॥

रामं निवर्तयिष्यामि विज्ञाप्य वनवासतः ।
भक्तिं तस्य करिष्यामि नान्यथा जीवनं मम ॥ ४७ ॥

अविज्ञाय कृतं कर्म मामकं हृदयं त्वया ।
तत्फलं भोक्ष्यसे क्रूरे त्यक्तासि त्वं भृशं मया ॥ ४८ ॥

अहं वत्स्यामि विपिने यावत्पञ्चदशाब्दकम् ।
रामं राज्ये करिष्यामि प्रार्थयित्वा विशेषतः ॥ ४९ ॥

त्वया पातककारिण्या साधुस्नेहः कृतो मयि ।
प्राणेष्वपि च संदेहः पातितो मम यत्त्वया ॥ ५० ॥

---

१. इस चरण में एक अक्षर अधिक हो जाने से छन्दोभंग हो गया है ।

इत्येवं जननीं विगर्हितवता संजातभूयः शुचा
हा तातेति चिरं विलप्य भरतेनातीव तापः कृतः ।
निःश्वस्याश्रुपरीतलोचनयुगेनोत्क्षिप्तहस्तद्वयी
भूयस्ताडितवक्षसा बहुतरं सोत्तापमाक्रन्दितम् ॥ ५१ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे
भरतविलापे कैकेयीविगर्हणो नाम
सप्तविंशोऽध्यायः ॥ २७ ॥

❀

अष्टाविंशोऽध्यायः

ब्रह्मोवाच

विगर्हयित्वा जननीं भूयो निश्वस्य शोकतः ।
विललाप चिरं दुःखी भरतः पितृवत्सलः ॥ १ ॥
स्मारं स्मारं रामचन्द्रं प्रोषितं मातृकर्मणा ।
भूयोऽपि विललापासौ भरतो भ्रातृवत्सलः ॥ २ ॥
निःश्वस्य दुःखसंवीतो रुदित्वा च चिरं तदा ।
मूर्छितो निपपातोर्व्यां शक्रध्वज इवोन्नतः ॥ ३ ॥
शत्रुघ्नस्तं समाधायदोर्भ्यामुत्थाप्य भूमितः ।
सुचिरं भर्त्सयामास कैकेयीं पापकारिणीम् ॥ ४ ॥
हा कैकेयि महत्पापं स्त्रिया खलु कृतं त्वया ।
नीचचेटिकथा प्रोक्तं किमादृतवती वचः ॥ ५ ॥
अन्तःपुरचरीवाक्यान्मन्थरां नीचचेटिकाम् ।
विज्ञाय भरतः श्रीमान् शत्रुघ्नायन्यवेदयत् ॥ ६ ॥
सैषा दुर्मन्त्रदा मातुर्नीचा चेटी खलाशयाः ।
सर्वाङ्गभूषिता भूयो मात्रा सम्मानिता च नः ॥ ७ ॥
अनर्थमूलमेषैव चेटिका पापकारिणी ।
दूतोऽपसारयैनां त्वं दूरे शत्रुघ्न दुर्मतिम् ॥ ८ ॥
वारं वारमियं चक्षुःपथमद्य प्रयाति मे ।
मानयिष्यति मां स्निग्धामिति विज्ञाय दुष्टधीः ॥ ९ ॥

मया खलु कृतं राज्यं भरतस्येति सम्भ्रमात् ।
पुनः पुनर्दृशोर्मार्गमियमभ्येति मे खला ॥ १० ॥
मानयैनां यथायोग्यं नीचां चेटीं दुराशयाम् ।
यया नो निहतस्तातो भ्राता चैव वियोजितः ॥ ११ ॥

इतः परं कियन्नाम विप्रियं मे करिष्यति ।
पूजार्हां पूजयैनां त्वमुपानत्पांसुमुष्टिभिः ॥ १२ ॥
निर्दिष्टां भरतेनैवं मन्थरां पापकारिणीम् ।
विचकर्ष वलाद्भूयः शत्रुघ्नो भृशकोपितः ॥ १३ ॥

पातयित्वा महीपृष्ठे पद्भ्यामादाय तां खलाम् ।
आचकर्ष वलादेप निर्भर्त्स्य कुपितान्नरः ॥ १४ ॥
साऽऽकृष्णमाणा दुष्टात्मा शत्रुघ्नेन वलाद् भुवि ।
विचुक्रोश सुदीनात्मा पांसुभिः पूरिता ननु ॥ १५ ॥

तामाह दुष्टहृदयां शत्रुघ्नो घोरदर्शनः ।
हा नीचे राजपुत्रीणामेवं दुर्मन्त्रदायिनि ॥ १६ ॥
वधार्हां त्वां हनिष्यामि निर्दयां पापकारिणीम् ।
त्वया हतो महाराजस्त्वया भ्राता वियोजितः ॥ १७ ॥

रघूणां कुलमुत्कृष्टं त्वया नीतं सुलाघवम् ।
असुभिस्त्वां वियोक्ष्यामि महानर्थैककारिणीम् ॥ १८ ॥
त्वमीदृशाय विधये पालितोच्छिष्टभोजिनी ।
शुनीव पिण्डदानेन वर्द्धिता दशनोद्धुरा ॥ १९ ॥

त्वं रासभी भारयोग्या योग्या राजकुलस्य न ।
महाराजकुमारस्य रामस्य भृशवैरिणी ॥ २० ॥
कथं नु त्वं परित्यक्ता तेनार्येण दयालुता ।
त्वद्विधायां नृशंसायां को दयां परिपालयेत् ॥ २१ ॥

मया त्वमधुना पापे नेयासि यमपत्तनम् ।
अद्यत्वं द्रक्ष्यसिखले याम्या दारुणयातनाः ॥ २२ ॥
इदं नः पतितं घोरं दुःखं शोकोर्ज्जितं महत् ।
तदहं त्वयि मोक्ष्यामि वृश्चित्वा ननु ते गलम् ॥ २३ ॥

इत्युक्त्वा कुपितोभूयः कुब्जिकां शत्रुसूदनः ।
विपोथ्य धरणीपृष्ठे विचकर्ष मुहुर्मुहुः ॥ २४ ॥

भरतस्तं तथा क्रुद्धं वारयामास वाक्यतः ।
अवध्यामबलामेनामलं हत्वा महामते ॥ २५ ॥

हन्यामहमिमां पापं कैकेय्या सह किं नहि।
किंतु धर्मात्मनामग्र्यस्त्यजेद्राम इति क्षमे ॥ २६ ॥

इत्युक्तो भरतेनासौ शत्रुघ्नस्तपमानसः।
चिरं विकृष्यतां पापां पोथयित्वा महीतले ॥ २७ ॥

तत्याजनियनक्रोधो न तु हिंसितवान् रुषा।
ननस्तौ भ्रातरौ क्रुद्धौ दुःखशोकसमाकुलौ ॥ २८ ॥

परस्परं समाधाय हृदयं भृशमातुरम्।
कौसल्यां पुत्रशोकार्तां पतिशोकनिमीलिताम् ॥ २९ ॥

द्रष्टुं चैव समाधातुं ततस्तावदतिष्ठताम्।
तौ दूराद् वीक्ष्य दुःखार्तां रामस्य जननीं तदा ॥ ३० ॥

प्रणम्य भक्तिविनतौ पादयोरभिये ततुः।
परिष्वज्याथ कौमल्या शत्रुघ्नं भरतं तथा ॥ ३१ ॥

ऊचे दीर्घं विनिःश्वस्य यथावृत्तं विचिन्त्य सा।
कच्चित्ते पूरितः कामः कैकेय्या स्निग्धचित्तया ॥ ३२ ॥

कच्चित् प्राप्तं महीराज्यं मम पुत्रविवासनात्।
आनन्दितस्य राज्येन पितृशोकः म किं तव ॥ ३३ ॥

विनापराधं मत्पुत्रश्चीरवासा जटाधरः।
प्रवासितो वनं घोरं तव राज्यस्य हेतवे ॥ ३४ ॥

अहं तत्रैव यास्यामि यत्र रामः सहानुजः।
मभार्यश्च वनेचारी तपश्चरति धार्मिकः ॥ ३५ ॥

उचितं बत कैकेयी त्वदर्थमिदमाचरत्।
चेटिकामन्त्रकथनात् प्रादुर्भूतस्मृतिर्जवात् ॥ ३६ ॥

रामं प्रवास्य विपिने पतिं प्राणैर्वियोज्य च।
त्वदर्थं वत कैकेयी जगृहे राज्यमूर्जितम् ॥ ३७ ॥

प्राप्त एवाधुना स त्वं भोक्ष्यसे राज्यमूर्जितम्।
गतो यत्र स मत्पुत्रो नय तत्रैव मामपि ॥ ३८ ॥

भुङ्क्ष्व निष्कण्टकं राज्यं कैकेय्या समुपार्जितम्।
मृत्वापि तव तातेन तुभ्यं सम्प्रतिपादितम् ॥ ३९ ॥

कौसल्याया वचः श्रुत्वा भरतस्तामथाब्रवीत्।
मातर्जानामि कैकेय्या मामपृष्ट्वैव यत्कृतम् ॥ ४० ॥

ईदृङ्मम पुनर्बुद्धिर्मा भूत्स्वप्नेऽपि जातुचित्।
आर्ये महत्कृतं पापं कैकेयातिनृशंसया ॥ ४१ ॥

किं पुनर्मामिदं वृत्तमजानन्तं विगर्हसे।
रामः करिष्यते राज्यं तस्य दास्यऽमहं भजे॥ ४२॥

भूतभव्यभविष्यत्सु मनसा कर्मणा गिरा।
यस्य रामेऽन्यथाबुद्धिः स वै पततु रौरवे॥ ४३॥

यस्य दास्यं परित्यज्य रामे स्यान्मतिरन्यथा।
पापच्यमानः पापेन स वै पततु रौरवे॥ ४४॥

आर्ये यस्य परा प्रीतिर्नरामस्य पदाम्बुजे।
घोरेण पाप्मना ग्रस्तः स वै पततु रौरवे॥ ४५॥

रामचन्द्रमनादृत्य स्वस्य राज्याधिकारिताम्।
स्वप्नेऽपि यो विजानाति स वै पततु रौरवे॥ ४६॥

कैकेय्या यत्कृतं कर्म घोरबुद्ध्या नृशंसया।
तत्र यस्य भवेत्प्रीतिः स वै पततु रौरवे॥ ४७॥

रामस्य चेद्वने वासं राज्यलाभं तथात्मनि।
स्वप्नेऽपि भाविनं येन स वै पततु रौरवे॥ ४८॥

वेदशास्त्रपुराणेभ्यस्तस्य[1]स्याद् विमुखी मतिः।
रामस्य यो वने वासं स्वप्नस्थोऽपि विचिन्तयेत्॥ ४९॥

नित्यं पापानुगा बुद्धिस्तस्यास्तु शुभलोपिनी।
रामस्य यो वने वासं स्वप्नस्थोऽपि विचिन्तयेत्॥ ५०॥

ब्रह्महत्या महाघोरा तस्य लिम्पतु विग्रहम्।
रामस्य यो वने वासं स्वप्नस्थोऽपि विचिन्तयेत्॥ ५१॥

तस्य गोवधजात्पापान्मास्तु मुक्तिः कदाचन।
रामस्य यो वने वासं स्वप्नस्थोऽपि विचिन्तयेत्॥ ५२॥

हत्वा मित्रं गुरुं विप्रं तत्स्त्रियोऽप्यभिपद्यताम्।
रामस्य यो वने वासं स्वप्नस्थोऽपि विचिन्तयेत्॥ ५३॥

तस्य श्रेयस्करी बुद्धिः कदापि समुदेतु मा।
रामस्य यो वने वासं स्वप्नस्थोऽपि विचिन्तयेत्॥ ५४॥

इष्टं दत्तं हुतं तप्तं बन्ध्यं तस्यास्तु सर्वदा।
रामस्य यो वने वासं स्वप्नस्थोऽपि विचिन्तयेत्॥ ५५॥

तस्य श्रेयः सदा मा भूदिह चैव परत्र च।
रामस्य यो वने वासं स्वप्नस्थोऽपि विचिन्तयेत्॥ ५६॥

गोग्रासहृति यत्पापं तत्पापं तं प्रबाधताम्।
रामस्य यो वने वासं स्वप्नस्थोऽपि विचिन्तयेत्॥ ५७॥

---

१. तस्यास्तु—अयो०, मथु०।

अरक्षणात्प्रजानां यत्पापे राज्ञोऽस्तु तस्य तत् ।
रामस्य यो वने वासं स्वप्नस्थोऽपि विचिन्तयेत् ॥ ५८ ॥

विप्रस्य हृत्वा सर्वस्वं पुष्णातु स निजंवपुः ।
रामस्य यो वने वासं स्वप्नस्थोऽपि विचिन्तयेत् ॥ ५९ ॥

स्त्रीवधादग्निदानाच्च गुरुकन्याविदूरणात् ।
मित्रद्रोहाद् गोद्विजातिवह्निनिष्ठीवनात्तथा ॥ ६० ॥

यत्पापं गुर्ववज्ञातस्तत्पापं तस्य लिप्यतु ।
रामस्य यो वने वासं स्वप्नस्थोऽपि विचिन्तयेत् ॥ ६१ ॥

इत्याद्यनेकशपथैरात्मानं शपतामुना ।
आश्वासिता राममाता वाक्यमेतदवोचत ॥ ६२ ॥

जानामि त्वां महाप्राज्ञ शुद्धप्रकृतिमुज्ज्वलम् ।
कैकेय्या दूषणाद् वत्स न त्वं द्रष्यसि कर्हिचित् ॥ ६३ ॥

रामेण सहितस्तात चिरं श्रेयांस्यवाप्नुहि ।
अपीदृशैस्त्वं शपथैर्नूनमुद्वेजयस्ति माम् ॥ ६४ ॥

धर्मात्मा सत्यपरमो वेदार्थनयनो भवान् ।
चिरंधर्मेण वर्द्धस्व रघूणां कुलनन्दनः ॥ ६५ ॥

कदा द्रक्ष्याम्यहं रामं भवता लक्ष्मणेन च ।
सहितं चीर्णतपसं वनवासादुपागतम् ॥ ६६ ॥

राजर्षीणां महर्षीणां पुण्येन विमलात्मनाम् ।
दीर्घमायुश्च लभतां भवान् कुलयशस्करः ॥ ६७ ॥

पुण्यैः समेधितस्तिष्ठ चिरं नृपतिनन्दन ।
यथा रामस्तथैव त्वं ममातिप्रेमभाजनम् ॥ ६८ ॥

दिष्ट्या त्वमागतः पुत्र भाग्येन नृपतेरिह ।
कुरु संस्कारमत्येष्ट्या प्रमीतस्य पितुर्जवात् ॥ ६९ ॥

तैले निपातितं तत्ते पितुर्दाहोचितं वपुः ।
दह्यतां संस्कृते वह्नौ दीक्षितेन्द्रस्य यज्वनः ॥ ७० ॥

त्वदायत्तमिदं कर्म पितुस्ते पारलौकिकम् ।
कुरु द्विजातिभिः साकं कर्मज्ञैर्मुनिपुङ्गवैः ॥ ७१ ॥

स्वर्गतं पितरं वत्स त्वं प्रीणयितुमर्हसि ।
पिण्डसम्मेलनात्पूर्वं रेकार्थ्यकरणास्तथा ॥ ७२ ॥

कुरु पुत्रोचितं कर्म भवान् कुलधुरंधरः ।
आजानिकं रघूणां हि या दृशं विमलं यशः ॥ ७३ ॥

भूयश्चश्वासितो वीरस्तदा कौसल्यया भृशम् ।
रुरोद भूपतिं स्मृत्वा पितरं भ्रातरं तथा ॥ ७४ ॥

विललापातिकरुणं कौसल्यां वीक्ष्य तादृशीम् ।
विधवां शोकसम्पन्नां पुत्रेण च विवर्जिताम् ॥ ७५ ॥

तथा विलपतस्तस्य प्रावर्त्तत पितृप्रसूः[1] ।
उष्णंनिःश्वसतः शोकाद् दुःखसंवृतचेतसः ॥ ७६ ॥

ततो रात्रिरुपावृत्ता दुर्नेया पर्वतोपमा ।
शोके वर्षशताकारा त्रियामापि तमोवृता ॥ ७७ ॥

अथ प्रभाते भगवान् वशिष्ठो द्विजातिभिर्मन्त्रिवरैः प्रधानैः ।
समन्वितो राजगृहं सशोकमुपागमत् सर्वविधेयवेत्ता ॥ ७८ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे भरतकौशल्यासमागमोनामाष्टाविंशोऽध्यायः ॥ २८ ॥

एकोनत्रिंशोऽध्यायः

ब्रह्मोवाच

अपश्यन् भरतं सर्वे मन्त्रिणो दुःखकर्षितम् ।
शोकार्त्तं हीनवर्णं च विलपन्तं पुनः पुनः ॥ १ ॥

प्रवासं रामचन्द्रस्य शोकाच्च समाधिं पितुः ।
मातुर्धर्मातिक्रमं च चिन्तयन्तं पुनः पुनः ॥ २ ॥

शोकपारमपश्यन्तं वीक्ष्य निःशरणाः प्रजाः ।
अपापमपि चात्मानं जनन्या दुष्टकर्मणा ॥ ३ ॥

पापिष्ठमिव मन्वानं भृशं सम्मूढचेतसम् ।
प्राणानप्यवहेलन्तं जीवितेऽप्यकृतादरम् ॥ ४ ॥

तादृक्सुखिनमात्मानमकस्माद् दुःखभाजनम् ।
शोचन्तंभृशमुद्विग्नं वनबद्धमिव द्वियम् ॥ ५ ॥

वनेऽपि गत्वा रामस्य पादसंवाहनोत्सुकम् ।
शोकं विनेतुमिच्छन्तं रामवक्त्रेन्दुदर्शनात् ॥ ६ ॥

---

१. "सायं संध्या"—टि०–मथु०, बड़ो० । (षड्विंशो–बड़ो०)

ते तं तथाविधं वीक्ष्य विलपन्तमचेतनम् ।
मन्त्रिणो रुरुदुः सर्वे दुःखार्त्ता अश्रुलोचनाः ॥ ७ ॥

तमुवाच वशिष्ठोऽथ कृत्यज्ञो धीमतां वरः ।
अद्य त्वं व्यसनं घोरं शोकेन प्राप्तवानसि ॥ ८ ॥

मा भूर्विमूढहृदयः कृत्यं साधयचोत्तरम् ।
त्वादृशाः पुरुषाधीरा नैवं सीदन्ति ।शोकतः ॥ ९ ॥

तस्मान्निगृह्य त्वं शोकं संस्तभ्य हृदयं तथा ।
धृत्या युक्तः स्वपितरं शीघ्रं निर्हर्त्तुमर्हसि[1] ॥ १० ॥

न त्वां विनास्य संस्कारं कश्चित्कर्तुमिहार्हति ।
त्वां प्रतीक्षद्भिरस्माभिस्तातस्य तव विग्रहः ॥ ११ ॥

तैलंकोष्ठे विनिःक्षिप्तो राममातुर्निकेतने ।
तस्यौद्ध्वर्दैहिकं कर्म भवान् शीघ्रतरं कुरु ॥ १२ ॥

इमाश्च राजमहिषीर्दुःखिताः शोककर्षिताः ।
नोपेक्षतां भवान् वत्स ह्यनाथा नाथ तां गताः ॥ १३ ॥

प्रजाश्चेमा लोकनाथे मृते पितरि तेऽधुना ।
अनाथाः पालयामूषां नाथोऽसि खलु साम्प्रतम् ॥ १४ ॥

स एवमुक्तो मुनिना भरतो धर्मवित्तमः ।
उवाच नितरां क्लिष्टो नीचैः समभिवीक्ष्य तम् ॥ १५ ॥

प्राजापत्य मुनिश्रेष्ठ त्वय्यप्येवं प्रजल्पति ।
दीर्यते शोकशल्ये नान्तःस्थेन हृदयं मम ॥ १६ ॥

दासोऽहं रामचन्द्रस्य भृत्यः प्रेष्यश्च संततम् ।
स एव लोकनाथोऽद्य पितर्युपरते मुने ॥ १७ ॥

कोऽहं नाथः सुदीनात्मा मा भून्मे तादृशी मतिः ।
यादृशं विहितं घोरं कैकेय्या बत पातकम् ॥ १८ ॥

यदाह मां त्वं नृपतेः कर्तुं कर्मोध्द्वर्देहिकम् ।
शक्यं तत्तु मया कर्तुं दीर्यते हृदयं न चेत् ॥ १९ ॥

श्रुत्वा धर्म्यं वचस्तस्य भरतस्य महात्मनः ।
तस्मै दशरथस्यैते कलेवरमदर्शयन् ॥ २० ॥

तैलकोष्ठस्थितं प्रेतं हीनवर्णं गतत्विषम् ।
ददर्श भरतो राज्ञः कलेवरमनिन्दितम् ॥ २१ ॥

राजावरोधनिवहमग्रे कृत्वाश्रुवर्षणम् ।
रुदन्तं ताडयन्तं च दोर्भ्यां वक्षांसि दारुणम् ॥ २२ ॥

---

१. 'गृहाद्बहिर्निष्कासितुं' टि०-मथु० बड़ो० ।

दृष्ट्वा तु भरतस्तातं पुमीतं शोकमूर्छितः ।
निपपातमहीपृष्ठे शत्रुघ्नसहितस्तदा ॥ २३ ॥

विलप्य करुणं भूय उवाच पितरं पुनः ।
जीवन्तमिव सम्प्रेक्ष्य भक्तिनम्रः कृताञ्जलिः ॥ २४ ॥

किमिमां दारुणां निद्रां भजसे मीलितेक्षणः ।
उत्थाय पूर्ववत्तात किं परिष्वजसे न माम् ॥ २५ ॥

अयं तव सुतः स्निग्धः परप्रेमैकभाजनम् ।
शत्रुघ्नो दूयते शोकात्किमेनं नाभिभाषते ॥ २६ ॥

आरामक्रीडनादेत्य तवाङ्कमधितिष्ठतः ।
मम मूर्द्धन्युपाघ्राय परिरम्भमदाः पुरा ॥ २७ ॥

सोऽहं चिरान्मातुलेषु प्रोष्योपावृत्त उत्सुकः ।
विनापराधं भवता नाभिभाष्यः कथं कृतः ॥ २८ ॥

समुत्तिष्ठ महाराज दण्डयान् दण्डेन योजय ।
अकण्टकं निजं राज्यं भुङ्क्ष्व निद्रां विहाय भोः ॥ २९ ॥

धन्यः स एव धर्मात्मा रामो लक्ष्मण एव च ।
यस्तवाज्ञामुपादाय राज्यं त्यक्त्वा वनं गतः ॥ ३० ॥

हतभाग्योऽस्म्यधन्योऽहं यत्कृते राजसत्तमः ।
कैकेय्या वचनादेवं प्राणानुत्सृष्टवान् भवान् ॥ ३१ ॥

इत्थं भृशं विलपति भरते राजयोषितः ।
अत्यर्थं रुरुदुः सर्वा दीप्तशोकहुताशनाः ॥ ३२ ॥

विलपन्तं मुहुर्वीक्ष्य महाराजकुमारकम् ।
वशिष्ठजाबालिमुखा इदमूचुर्मुनिद्विजाः ॥ ३३ ॥

अलं शोकेन ते भूयः किं शोचसि महीपतिम् ।
येनेष्टं बहुधा यज्ञैरश्वमेधैः शताधिकैः ॥ ३४ ॥

राजसूयैरनेकैश्च सोमैस्तु प्रतिवत्सरम् ।
दत्तानि येन दानानि मेरुतुल्यधनानि च ॥ ३५ ॥

निहता दानवा येन शक्रः स्वर्गेऽधिरोपितः ।
ब्रह्मण्यो बहुदो यज्वा स न शोच्यः कदापि ते ॥ ३६ ॥

भवादृशाः सुता यस्य रामचन्द्रपुरोगमाः ।
सत्यसन्धा महाशूरा ब्रह्मण्या वेदपारगाः ॥ ३७ ॥

श्रद्धावन्तो धर्मनिष्ठाः सूर्यसोमानलोपमाः ।
जीवन्नेव स भूपालः प्रमीतोऽपि महाभगः ॥ ३८ ॥

श्रद्धन्ते नातिशोकं च प्रमीतस्य पुराविदः ।
महीयमानो लोकेषु सत्कर्मोपार्जितेष्वश्नलम् ॥ ३९ ॥

बन्धूनां शोकबाष्पौघैः क्षीणपुण्यः पतेर्दिति ।
नियम्य शोकबाष्पौघं स्वर्गात्प्रच्यावनं पितुः ॥ ४० ॥

कुर्वौद्ध्वर्वदैहिकं सम्यक् प्रीयते स्वर्गतो यथा ।
अतिशोकेन बाष्पौघैः क्षीणपुण्यः पिता तव ॥ ४१ ॥

स्वर्गात्प्रभ्रंशितः क्रोधान्न त्वां शपतु धार्मिकम् ।
पुण्येनोपार्जिता लोकाः पारमेष्ठ्यपदावधि ॥ ४२ ॥

इत्युक्त्वा विरतेष्वेषु मुनीन्द्रेषु महाशयः ।
धृत्या शोकं नियम्याशु भरतो मन्त्रिणोऽब्रवीत् ॥ ४३ ॥

आज्ञापितो मुनिश्रेष्ठैर्वशिष्ठाद्यैर्महात्मभिः ।
करिष्ये देहसंस्कारं यायजूकस्य मे पितुः ॥ ४४ ॥

आनेयाः संविधाः सर्वा यथोद्दिष्टा मुनीश्वरैः ।
और्द्ध्वदैहिककर्मार्हा याभिः संस्करणं पितुः ॥ ४५ ॥

मुक्तशोकः करिष्यामि निदेशेन महात्मनाम् ।
इत्युक्ता मन्त्रिणस्तेन तथाचक्रुः प्रणम्य तम् ॥ ४६ ॥

विप्राग्र्यैः कृतमतिभिर्महर्षिमुख्यैः सन्मन्त्रिप्रवरगणैः प्रभाषतोऽस्य ॥
सा घोरा रजनिरवर्त्ततातिशोका दुष्पाराकिमपि सहस्रवर्षतुल्या ॥ ४७ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे भरतशोको नामैकोनत्रिंशोऽध्यायः ॥ २९॥

त्रिंशोऽध्यायः

ब्रह्मोवाच

प्रातः प्रबोधनार्थाय सूतमागधवन्दिनः ।
महाराजकुमारस्य श्रावयन्ति स्म सुस्वरम् ॥ १ ॥

तानुवाचैष भरतस्तूर्यघोषं निवारयन् ।
नाहं महीपतिः किंतु यो राजा तस्य सेवकः ॥ २ ॥

किमर्थं मत्प्रबोधाय तूर्यघोषो वितन्वते ।
कस्यात्र कुरुथ स्तोत्रं राजा वस्त्रिदिवं गतः ॥ ३ ॥

तत्सुतो राज्यभोगर्हः स इदानीं वनं गतः।
यस्याहं सेवको भृत्यः प्रेष्यश्चैवास्मि सर्वथा ॥ ४ ॥

इति वर्जितसम्प्राप्तप्रावोधिकजनस्वरः ।
उवाच धर्म वित्तात्मः शत्रुघ्नं प्रति दुःखतः ॥ ५ ॥

अहो शत्रुघ्न पश्येदं कैकेय्या दुश्चरित्रकम्।
यया मे नाशिता कीर्तिरार्यदास्यसमुद्भवा ॥ ६ ॥

किं करोमि क्व गच्छामि दुःखपारं न दृश्यते।
इत्युक्त्वा विललापोच्चैर्भरतो भूरिदुःखितः ॥ ७ ॥

विलपन्तमनुक्लिष्टा विलेयुः सर्वयोषितः।
अवरोधो महान् राज्ञो विललापार्तनादभृत् ॥ ८ ॥

अथागमत्सभामेष शत्रुघ्नसहितो बुधः।
तत्रैनं मन्त्रिप्रवरा उपासाञ्चक्रिरेऽखिलाः ॥ ९ ॥

सुमन्त्राद्या यथास्थानमुपविष्टाः समन्ततः।
ततोऽभ्युपेयुः सर्वेऽपि प्रधानाः पुरवासिनः ॥ १० ॥

आगच्छतां राजलोकप्रवराणां महान् ध्वनिः।
तत्राभवन्सभामध्ये तलध्वनिमहोर्जितः ॥ ११ ॥

उपविष्टेषु सर्वेषु समर्यादं सभान्तरे।
वशिष्ठो भगवांस्तत्र पुरोहितशिरोमणिः ॥ १२ ॥

उवाच धर्मनिपुणो भरतं मन्त्रिणस्तथा।
पश्यैते मतिमन् सर्वे प्राप्ता लोकास्तवाज्ञया ॥ १३ ॥

संस्कारद्रव्यमादाय राज्ञो निर्हरणार्थिनः।
शुष्काणि चन्दनैधांसि देवदारूणि भूरि च ॥ १४ ॥

सुगन्धीनि च तैलानि रालासुरभिजं घृतम्।
गन्धान् माल्यानि पुष्पाणि धूपान् कालेयनिर्मितान् ॥ १५ ॥

एतैर्द्रव्यैः पितुर्देहमग्नौ संस्कुरु यज्ञिये।
शिविकायां रत्नमप्यामारोप्य नय तद्वहिः ॥ १६ ॥

सद्गतिं प्रापयतमां धार्मिकस्य कलेवरम्।
इत्याज्ञप्तो वशिष्ठेन भरतो भूमिभूषणः ॥ १७ ॥

ययौ सर्वजनैः साकं कौसल्यासदनं तदा।
तत्र तैलगतं राज्ञः समादाय कलेवरम् ॥ १८ ॥

शीघ्रमारोपयामासुः शिविकायां यथोचितम्।
विभूष्य दिव्यवसनैः कौशेयैर्मणिभूषणैः ॥ १९ ॥

विलिप्य चन्दनैर्दिव्यैः कर्पूरघुसृणादिभिः ।
दिव्यधूपैर्धूपयित्वावकीर्य कुसुमादिभिः ॥ २० ॥

अन्यैश्च सुरभिर्द्रव्यैर्विभूष्य च समन्ततः ।
उत्क्षिप्य शिविकां पश्चादुवाहाश्रुविलोचनः ॥ २१ ॥

शत्रुघ्नसहितः शोकाद् रुदन्नार्तस्वरं मुहुः ।
ऊहुः प्रेष्यजनाः सर्वे शिविकां मणिमण्डिताम् ॥ २२ ॥

पुरस्तात्प्रययौ छत्रं धवलं चन्द्रसन्निभम् ।
परितश्चामरैः श्वेतैर्वीजयन्तः स्थिता जनाः ॥ २३ ॥

निर्जहुर्नृपतिं प्रेष्या रुदन्तः शोकसंयुताः ।
जाबालिप्रमुखा विप्रा अग्निहोत्रं महीपतेः ॥ २४ ॥

हुत्वा पुरस्तादनयन् दीप्यमानं महादद्युतिम् ।
सुवर्णरत्नपूर्णानि शकटानि पुरो ययुः ॥ २५ ॥

और्ध्वदैहिकदानार्थं धनानिसुबहूनि च ।
निन्युःप्रेष्यजना अग्रे विसृजन्तः समन्ततः ॥ २६ ॥

अनाथेभ्यश्च दीनेभ्यो जनेभ्योऽधिपुरं ययुः ।
स्त्रियो वृद्धाःकुमाराश्च सर्वेपौरास्तमन्वयुः ॥ २७ ॥

अग्रे भरतशत्रुघ्नौ रुदन्तावन्वगच्छताम् ।
महाशोकभराविष्टौ वहन्तौ शिबिकां पितुः ॥ २८ ॥

राजदाराश्च कौसल्यासुमित्राकेकयीमुखाः ।
वक्यः प्रकीर्णचिवुरा रुदन्त्यो नृपमन्वयुः ॥ २९ ॥

यूथशः क्रोशमानास्ता नार्यः पङ्कजलोचनाः ।
शरत्सुधांशुवदनाः प्रययुः शोककर्शिताः ॥ ३० ॥

ते तत्र सरयूतीरे विमले सिकतान्मये ।
प्रसन्नशाद्वलचितेशिबिकां निदधुर्जनाः ॥ ३१ ॥

श्रीखण्डैर्मलयोद्भूतैः शुष्कैरगुरुदारूभिः ।
भूयः कर्पूरकस्तूरीकाश्मीरैर्विदधुश्चिताम् ॥ ३२ ॥

पद्मैः पद्ममृणालैश्च कुसुमैः सौरभान्वितैः ।
अलंचक्रुश्चितां राज्ञः सुगन्धद्रव्यराशिभिः ॥ ३३ ॥

चितामारोपयामासुर्नृपं कौशेयवाससम् ।
यज्ञपात्राणि तत्रैव सर्वाणि निदधुर्द्विजाः ॥ ३४ ॥

स्रुक्स्रुवौ च चषालांश्चमुशलोलूखलं तथा ।
अरणीं च पवित्राणि मन्त्रजापपुरःसरम् ॥ ३५ ॥

पवित्रैर्यज्ञपात्राणि ममृजुर्होतृसत्तमाः ।
उपलभ्य पशुं मेध्यं मन्त्रैः संस्कृत्य सुद्विजाः ॥ ३६ ॥

विनियुज्य यथास्थानं सवत्सां गामवासृजन् ।
सुवर्णलाङ्गलैः कृष्टां भूमिं संस्कृत्य यत्नतः ॥ ३७ ॥

चितां तत्र सुसंरच्य विभूष्य कुसुमादिभिः ।
सर्पिःसुगन्धतैलाद्यैः परिषिच्य समन्ततः ॥ ३८ ॥

अग्निहोत्राग्निना तां तु भरतः समदीपयत् ।
प्रदीप्तः सर्वतो वह्निर्ज्वालाजालैः समेधितैः ॥ ३९ ॥

चितास्थितां तनुं राज्ञो ददाह महसा तदा ।
विधिज्ञैर्ब्राह्मणश्रेष्ठैर्वसिष्ठाद्यैर्मुनीश्वरैः ॥ ४० ॥

सुसंस्कृतो महाराजो भस्मसादभवत् क्षणात् ।
प्रज्वालितः प्रदीप्तेन शुचिना यज्ञियेन सः ॥ ४१ ॥

तथाविधां गतिं राज्ञो दृष्ट्वा सर्वे पुराजनाः ।
चितायाः परितो भूयो विलेपुः शोकसंयुताः ॥ ४२ ॥

भरतः खलु शत्रुसूदनश्च ज्वलता शोकहुताशनेन युक्तौ ।
प्रविलप्य मुहुर्भृशं रुदन्तौ धृतमूर्ध्नौ विनिपेततुर्धरण्याम् ॥ ४३ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे दशरथसत्कारो नाम त्रिंशोऽध्यायः ॥ ३० ॥

●

एकत्रिंशोऽध्यायः

ब्रह्मोवाच

ततः प्रधानप्रवराः समुत्थाप्य महीतलात् ।
नृपात्मजौ ततो नियुः प्रकर्तुमुदकक्रियाम् ॥ १ ॥

अपसव्येन तौ राज्ञश्चितां गन्धप्रसूनकैः ।
अवकीर्य विनिर्यातौ रुदन्तौ सरयूतटे ॥ २ ॥

अवेक्ष्य पावकं दीप्तं राज्ञः सर्वाङ्गदाहिनम् ।
उदिदीपे महान् शोको भरतस्य मनोगतः ॥ ३ ॥

भरतं वीक्ष्य शत्रुघ्नो रुदन्तं शोकसम्प्लुतम् ।
विललाप भृशं क्लिष्टः परिरभ्य परस्परम् ॥ ४ ॥

विलपन्तौ महाराजकुमारौ शोकसंवृतौ ।
ममादधुर्वशिष्ठाद्याः मुनयो ज्ञानलोचनाः ॥ ५ ॥

समाहितौ मुनिवरैः शत्रुघ्नभरतौ तदा ।
जलक्रियां पितुः कर्त्तुं सरयूमभिजग्मतुः ॥ ६ ॥

तां पुण्यसलिलां स्वच्छां सरयूं सह बन्धुभिः ।
सुहृद्भिः स्वजनैः पौरैर्नरनारीकुमारकैः ॥ ७ ॥

अवगाह्य ददौपित्रे प्रेताय सलिलाञ्जलीन् ।
तस्य प्रेताय तातय ददतः सलिलाञ्जलीन् ॥ ८ ॥

सान्निध्यं चक्रिरे सर्वाः सरितो भुवनस्थिताः ।
गङ्गा च यमुना चैव गोदा चैव सरस्वती ॥ ९ ॥

नर्मदासिन्धुकावेरीप्रमुखाः पुण्यशंवराः ।
विपाशा चन्द्रभागा च शतद्रूप्रमुखास्तथा ॥ १० ॥

तासां जलैः पवित्रैस्तैः सरयूजलमिश्रितैः ।
दिवं प्रयातं पितरं भरतः समतर्पयत् ॥ ११ ॥

शत्रुघ्नो मुनयश्चैव वशिष्ठाद्याः पुरोधसः ।
पौराश्च सर्वे विधिवद् राज्ञश्चक्रुस्तिलाञ्जलीन् ॥ १२ ॥

शत्रुघ्नभरताद्यास्ते सर्वेपौरजनास्तदा ।
विरूपाः क्षौरविधिना कृत्वा राज्ञो जलक्रियाम् ॥ १३ ॥

समाहिता वशिष्ठाद्यैर्मौनिन विविशुः पुरीम् ।
सम्प्राश्य निम्बपत्राणि महाशोकपरिप्लुताः ॥ १४ ॥

उवाच भरतः शोकात्प्रविशन् दुर्भगां पुरीम् ।
नाहं पुरीं प्रवेक्ष्यामि भ्रात्रा पित्रा च वर्जिताम् ॥ १५ ॥

शून्यां च दुर्भगां जातां मन्मातुः क्रूरकर्मणा ।
वन एव निवत्स्यामि शोकदुःखसमाहृतः ॥ १६ ॥

प्रमीते नृपतौ ताते धर्मात्मनि महाक्रतौ ।
तदादेशाद् वनं याते ज्येष्ठे भ्रातरि सानुजे ॥ १७ ॥

न भाति नगरीयं मे श्मशानधरणी यथा ।
जीवितुं चापि नेच्छामि सुविपन्नोऽहमीदृशः ॥ १८ ॥

कृतमीदृग्विधं कर्म शोचिष्यति चिरं प्रसूः ।
किं मे तयातिपापिन्या किं पुर्या मृतनाथया ॥ १९ ॥

सोऽहं न वस्तुमिच्छामि पुर्यामिह हतौजसि ।
इत्यादि बहुधा तस्य श्रुत्वा विलपनं मुहुः ॥ २० ॥

अमात्यप्रवरा धीरा वशिष्ठाद्या मुनीश्वराः ।
अन्ये च पौरप्रवरा बोधयाञ्चक्रिरे भृशम् ॥ २१ ॥

निदर्शनैर्ज्ञानवाक्यैर्लोकवृत्तैश्च भूरिशः ।
बोध्यमानो महाराजकुमारः प्राविशत्पुरीम् ॥ २२ ॥

निरानन्दां विनिर्दग्धामिव कान्तिविवर्जिताम् ।
शोकैकबहुलां भूयो रोदनार्त्तरवाकुलाम् ॥ २३ ॥

सानुगः प्रविवेशासौ सप्रजः समुनिव्रजः ।
भूमौ तृणानि संस्तीर्य दशाहमुपविष्टवान् ॥ २४ ॥

चक्रे प्रतिदिनं राज्ञो गात्रपिण्डान् यथाविधि ।
विधाय दशगात्राणि प्रायश्चित्तानि च क्रमात् ॥ २५ ॥

दशमेऽह्नि ततः स्नात्वा सुहृद्बन्धुसमन्वितः ।
ऐकादशाह्निकं कर्म चकार स यथाविधि ॥ २६ ॥

प्राशयित्वा द्विजं पिण्डान् धनमस्मै सुबह्वदात् ।
ततो द्वादशिकं कर्म चक्रे विधिवदूर्जितम् ॥ २७ ॥

अर्घसम्मेलनं कर्म पिण्डसम्मेलनं तथा ।
विधाय विधिवद्विप्रैश्चक्रे दानानि भूरिशः ॥ २८ ॥

शुद्धश्राद्धं विधायाथ पितुः स्वर्गगतस्य सः ।
सम्प्रीणनाय विप्रेभ्यो दानानि प्रत्यपादयत् ॥ २९ ॥

त्रयोदशाह्निकेश्राद्धे विधिवद्विहिते द्विजैः ।
धनानि भूरि विप्रेभ्यो भरतो विससर्ज ह ॥ ३० ॥

छत्राण्युपानहश्चैव पादुकाः स्वर्णरत्नजाः ।
महार्हाणि च वासांसि रत्नानि विविधानि च ॥ ३१ ॥

गाः सवत्सा रूप्यखुरीः स्वर्णशृङ्गीः सुभूषिताः ।
मुक्तापुच्छीस्ताम्रपृष्ठीः कलशोघ्नीः सुदोहनाः ॥ ३२ ॥

वेश्मानि तुङ्गशृङ्गाणि सुधाढ्यानि महान्ति च ।
पृथक्स्थानानि गोशालमन्दुरावितितानि च ॥ ३३ ॥

भूषणानि प्रभाभांजि स्वर्णरत्नमयानि च ।
ग्रामव्रजगृहारामवाटिकाक्षेत्रसंयुताम् ॥ ३४ ॥

वापीकूपसरोयुक्तां महीं कोटिहलोन्मिताम् ।
सरित्प्रवाहसरसां पुण्याश्रमविराजिताम् ॥ ३५ ॥

गजानश्वां स्तथा मुख्यानुष्ट्रांश्च महिषीस्तथा ।
दासान् दासीश्च निष्काढ्या मणिमाणिक्यभूषिताः ॥ ३६ ॥

विहितानि विशिष्टानि दानानि विविधानि च ।
देशे काले च पात्रेभ्यः श्रद्धया विससर्ज सः ॥ ३७ ॥

राजाश्वं राजमातङ्गं राजयानं विशेषतः ।
पात्राय वेदवित्ताय ददौ भरत आदृतः ॥ ३८ ॥

एवं पितरमुद्दिश्य दत्त्वा दानानि भूरिशः ।
दिनेदिनेऽकरोच्छ्राद्धं यावद्वर्षसमापनम् ॥ ३९ ॥

अथो समेताः सर्वेऽपि मन्त्रिणो राजकार्यिणः ।
प्रजा अनाथाः संवीक्ष्य जगदुर्भरतं प्रति ॥ ४० ॥

गतो राजा दशरथः पिता ते समाधिं प्रति ।
अर्धासनं महेन्द्रस्य येनाक्रान्तं पुरैव तत् ॥ ४१ ॥

तस्य ज्येष्ठसुतो रामः सत्यसन्धोऽतिधार्मिकः ।
सानुजः सहभार्यश्च वनेवसति सोऽधुना ॥ ४२ ॥

त्वमेवाद्य महाबाहो प्रदिष्टो विधिना भृशम् ।
प्रजानां पालको नित्यं त्वयि धर्मः प्रतिष्ठितः ॥ ४३ ॥

सराजकं पुरं राष्ट्रं धरणीमण्डलं तथा ।
तापद्भिरभिभूयेत तस्मात्त्वं भूपतिर्भव ॥ ४४ ॥

राज्येऽभिषिच्यतामात्मा पितृपैतामहे निजे ।
कुलक्रमागतं श्रीमद् राज्यं भूषय तेजसा ॥ ४५ ॥

प्राप्तोऽभिषेकसम्भारः प्रजाश्चेमास्तवाखिलाः ।
एतासां रञ्जनंकार्यं त्वया राज्येऽधितिष्ठता ॥ ४६ ॥

इत्युक्तो राजतनयः प्रवरैर्मन्त्रिभिस्तदा ।
राज्याभिषेचनद्रव्याण्युपस्पृश्य शुभाय सः ॥ ४७ ॥

उवाच वचनं विद्वान् धर्मयुक्तमुदारधीः ।
मान्धाता सगरो राजा भगीरथ इलापतिः ॥ ४८ ॥

ययातिनहुषाद्याश्च पुराभूवन् प्रजेश्वराः ।
यावन्नो जनकस्तावज्ज्येऽष्ठो राज्यपदाश्रयः ॥ ४९ ॥

नैतावज्जाग्रतिज्येष्ठे लघिष्ठो राज्यभाजनम् ।
माभूत्स्वप्नेऽपि मे बुद्धिरीदृशी भूतिलोभतः ॥ ५० ॥

रामचन्द्रः स नो राजा गुणवान् श्रीनिकेतनः ।
साक्षात्परात्परो[1] देवः प्रजानां भाग्यमूर्जितम् ॥ ५१ ॥

---

१. नारायणो—मथु० ।

तस्मिन् विराजमानेऽद्य श्रीरामे भूमिभूषणे।
कोऽहं राज्यपदस्यार्हः सेवको भृत्य एव च॥ ५२॥

तमहं प्रणतो भक्त्या विज्ञाप्य बहुभावतः।
आनेष्ये वनवासस्थं भूमिराज्याभिषिक्तये॥ ५३॥

रघूणां महतीं सेनामादाय चतुरङ्गिणीम्।
राज्याभिषेकद्रव्याणि छत्रं चामरयुग्मकम्॥ ५४॥

भवद्भिः सहितो राममभिषेक्ष्यामि मंत्रिणः।
पुरस्कृत्य महावीरमानेष्ये भूरिहर्षितः॥ ५५॥

तस्य शोभिष्यते राज्यमिदं वंशक्रमागतम्।
उपहन्यामहं मातुर्मनोरथमपार्थकम्॥ ५६॥

अहं वने निवत्स्यामि तस्यार्यस्य प्रतिज्ञया।
तमहं स्थापयिष्यामि पितृपैतामहासने॥ ५७॥

राज्यासनस्थः सततं रामो राजीवलोचनः।
पालयानः प्रजाः सर्वा मम प्रीत्यै भविष्यति॥ ५७॥

पुरो गच्छन्तु पुरुषाः कुर्वतां मार्गशोधनम्।
अहं शीघ्रं गमिष्यामि सेनामादाय भूयसीम्॥ ५९॥

अलंकरोति यं देशं रघूणांसोऽधिभूपतिः[1]।
तं देशमहमेष्यामि भक्तिसन्नतकन्धरः॥ ६०॥

तस्य तद्वचनं श्रुत्वा मन्त्रिणो हृष्टमानसाः।
अङ्गीचक्रुर्विशेषेण रामे सुप्रीतिभागिनः॥ ६१॥

ततश्च भरताज्ञप्ता मन्त्रिणो बुद्धिसत्तमाः।
सेनां संघट्टयाञ्चक्रुर्गजवाजिसमाकुलाम्॥ ६२॥

भ्रातुरानयनार्थाय भरतो भ्रातृवत्सलः।
प्रस्थास्यतीति संघोषोमिथोऽभूत् कोसलापुरे॥ ६३॥

पुरस्तात् प्रययुर्लोकाः सेनामार्गस्य शोधकाः।
भूमिप्रदेशज्ञातारो नानाकर्मविचक्षणाः॥ ६४॥

खनकाः कूपकर्तारो वर्द्धकाः स्थपतीश्वराः।
मालाकाराः सुधाकारा जलयन्त्रविधायकाः॥ ६५॥

शिविरारोपपटवः सद्मो वेश्मविधायकाः।
पानीयवाहकाश्चैव मार्गवृक्षाधिरोपकाः॥ ६६॥

---

१. अधिभूः प्रभुः—मथु०।

वंशदाराः कर्मकाराः परदेशसुखप्रदाः ।
सर्वऽपि सज्जा अभवन् पुरुषा उपयोगिनः ॥ ६७ ॥

उष्ट्रपाला अश्वपालाः शिविकावाहकास्तथा ।
महामात्राः पत्तिगणा लोहयन्त्रधरास्तथा ॥ ६८ ॥

धनुर्बाणधराश्चैव खड्गवाहाः पदातयः ।
दोलावहाः पटकुटीरोपकाः पुरुषास्तथा ॥ ६९ ॥

अनेके सज्जिता लोका भरतस्याज्ञया तदा ।
विषमान् समीकुर्वन्तश्छेदयन्तश्च कूलकान् ॥ ७० ॥

पथिद्रुमान् प्रवृश्चन्तो ह्रासयन्तः स्थलानि च ।
समीकुर्वन्त उद्देशानुद्रुजन्त वनानि च ॥ ७१ ॥

प्रकुर्वन्तो नदीघट्टान् पुरस्तात्प्रययुर्जनाः ।
ततश्च महतीं सेनामादाय शुभकर्मणे ॥ ७२ ॥

प्रतस्थौ भरतः श्रीमाननुज्ञातः सुमन्त्रिभिः ।
वाचयित्वा द्विजैः स्वस्तिपुण्याहं मन्त्रवित्तमैः ॥ ७३ ॥

दैवज्ञैर्ज्ञापितेशुद्धे मुहूर्ते शुभवासरे[1] ।
रामस्यानयनोद्भूतहर्षोत्साहवशंवदाः ॥ ७४ ॥

तस्यानुमेनिरे सर्वे प्रधानामन्त्रिणो जनाः ।
वशिष्ठजाबालिमुख्याः सार्थेऽगच्छन्मुनीश्वराः ॥ ७५ ॥

भक्त्या भरतवीरस्य पूजिता बहुमानिताः ।
कौसल्या च सुमित्रा च कैकेयी चान्यगात्ततः ॥ ७६ ॥

तथान्या राजवनिताः प्रतस्थुः शिविकागताः ।
सुहृदो बान्धवाश्चैव रामानयनहर्षिताः ॥ ७७ ॥

प्रतस्थुः कलितोत्साहा भरतेन प्रपूजिताः ।
प्रचेलुर्वारणा मत्ताः कोविदारध्वजान्विताः ॥ ७८ ॥

उच्छलन्तो हयवराः सेनामण्डलभूषणाः ।
स्यन्दनाः कोविदाराङ्काः प्रययुर्वेगवत्तराः ॥ ७९ ॥

पत्तयः कूर्दमानाश्च खड्गचर्मविभूषिताः ।
धनुर्धरा बद्धतूणाः कवचच्छन्नविग्रहाः ॥ ८० ॥

पश्चादग्रे वामदक्षपार्श्वयोश्चम्वऊर्ज्जिताः ।
निर्ययुर्भरताज्ञप्ता रामानयनसोत्सवाः ॥ ८१ ॥

भरतः श्वेततुरगैर्भूषिते रत्नमालिनि ।
महति स्यन्दनवरेऽधिष्ठितः प्रययौपुरः ॥ ८२ ॥

---

१. वत्तरे—अयो०, मथु० ।

ब्रह्मघोषं प्रकुर्वन्तः प्रययुर्द्विजसत्तमाः ।
मत्स्यमांससुराहस्तास्तस्य वेश्याजनाः पुरः ॥ ८३ ॥

शकुनं सूचयामासुर्मातङ्गाश्च तुरङ्गमाः ।
अन्ये शाकुनिकाचार्या[1] गच्छन्तोऽस्य[2] पुरोऽभवन् ॥ ८४ ॥

पुरोधसो महाप्राज्ञा मन्त्रिणो मन्त्रवित्तमाः ।
तमन्वयुः सभास्ताराः क्षत्रियाः पङ्क्तिभोजिनः ॥ ८५ ॥

सामन्तैर्यौधिमुख्यैश्च राजकार्यकरैर्जनैः ।
अमात्यैर्मन्त्रिप्रवरैर्नैगमैश्चाप्यनेकशः ॥ ८६ ॥

सान्विता महती सेना गजवाजिरथाकुला ।
अन्वगाद् भरतं यान्तं रामदर्शनहर्षितम् ॥ ८७ ॥

कोविदारध्वजाङ्कानां रथानां सुमहान् ध्वनिः ।
रोदसी रोधयामास मथ्यमानाम्बुधेर्यथा ॥ ८८ ॥

अश्वका अश्वतर्यश्च वामिकाश्च करेणवः ।
महाद्रव्यभराक्रान्ताः प्रचेलुर्विस्तृते बले ॥ ८९ ॥

नैगमा हट्टपतयो नानावस्तुसमन्विताः ।
अभवन् सार्थगाः कृत्वा हट्टाः पटकुटीमयीः ॥ ९० ॥

पुरोधा भगवांस्तत्र वशिष्ठो मुनिभिर्वृतः ।
अन्यैश्च ब्राह्मणवरैरन्वगाद् भरतार्चितः ॥ ९१ ॥

ततः सेनापतिस्तस्य गङ्गामासाद्य पावनीम् ।
अब्रवीद्भरतं कूले संनिवेशयितुं बलम् ॥ ९२ ॥

सम्प्राप्तेयं त्रिपथगा गङ्गा त्रैलोक्यपावनी ।
अस्याः कूलभुवि श्रीमन् सेनेयं संनिवेश्यताम् ॥ ९३ ॥

इह विश्रम्यतां वीर भवता शत्रुकर्षण ।
दिव्यं पटकुटीवेश्म त्वदर्थमुपकल्पितम् ॥ ९४ ॥

श्वेतभूते च ततो नौभिः सेनां संतार्य भूयसीम् ।
गन्तुमर्हसि वीरेन्द्र ससुहृत्सखिबान्धवः ॥ ९५ ॥

ततः सेनापतिस्तेन समाज्ञप्तो महामतिः ।
प्रवाहमनुगङ्गायास्तद्बलं संन्यवेशयत् ॥ ९६ ॥

यथास्थानं तु सा सेना गङ्गायां संनिवेशिता ।
रराज मथ्यमानाब्धिघोषकोलाहलान्विता ॥ ९७ ॥

शिविराणि पृथग्रेजुर्मातॄणां राजयोषिताम् ।
उन्नम्रसांध्यजलदव्यूहतुल्यानि सर्वतः ॥ ९८ ॥

---

१. काश्चार्थाः—अयो०, मथु० । २. गच्छतो—अयो०, मथु० ।

भरतस्य च शत्रुसूदनस्य प्रथिमोच्छ्रायविराजिते समन्तात् ।
शिविरे व्यतिरेजतुर्घनाभे पटकोट्टामिततुङ्गगोपुराढ्ये ॥ ९९ ॥

महार्हमणिभूषिताद् रथवरात् समुत्तीर्य स
त्रिलोकपरिपाविनीं त्रिपथगां ववन्देबुधः ।
वगाह्य विगतश्रमो निजपितुः प्रमीतस्य च
प्रदाय सलिलाञ्जलीन् शिविरयाविशत्सानुजः ॥ १०० ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे भरतप्रस्थानो नामैकत्रिंशोऽध्यायः ॥ ३१ ॥

❁

द्वात्रिंशोऽध्यायः

ब्रह्मोवाच

तां गङ्गामन्ववसितां निरीक्ष्य महतीं चमूम् ।
निषादाधिपतिर्ज्ञातीन् विमृश्येदमवोचत ॥ १ ॥

भो भो निषादप्रवराः पश्यन्तु महतीमिमाम् ।
रघूणां वाहिनीं भीमां कोविदारध्वजै रथैः ॥ २ ॥

किं कर्त्तुमुद्यता एते पुरुषा रघुवंशजाः ।
किं क्रीडिष्यन्ति मृगयां हरिष्यन्त्यथवा परान् ॥ ३ ॥

गजान् वापि ग्रहीष्यन्ति हनिष्यन्त्यथवापि नः ।
इक्ष्वाकूणाममी वीराः शङ्कनीया विशेषतः ॥ ४ ॥

जानेऽहं भरतो मात्रा रामं प्रव्राज्य कानने ।
लयंगतेऽधुना तातेनिःशङ्को राज्यलोभतः ॥ ५ ॥

हन्तुमारब्धवानेष सानुजं वनवासिनम् ।
हा रघूणामियं बुद्धिः कथं जातः क्षयोन्मुखी ॥ ६ ॥

ज्येष्ठो राज्यपदस्यार्हो द्रुह्यतेऽमीभिरुद्धतैः ।
मलीमसा राज्यलक्ष्मीर्यस्यै मन्दाः परस्परम् ॥ ७ ॥

विहाय सौहृदं धर्मं योद्धुमिच्छन्ति हीदृशाः ।
क्व रामस्य मतिर्धर्म्या क्वामीषां धर्मलङ्घनम् ॥ ८ ॥

स मे भर्त्ता प्रभुर्बन्धुः सखा स्वजन ईश्वरः ।
मयि जीवति को न्वेतं नरो गञ्जयितुं क्षमः ॥ ९ ॥

धिङ् मे मैत्रीं च साहाय्यं बन्धुतां दास्यमेव च।
यद्येते मां समुल्लङ्घ्य युद्धयेरन् प्रभुणा मम ॥ १० ॥

मयैव प्रथमं युद्धममीषां दुष्टचेतसाम्।
अहं रामप्रभावेणजेतास्म्येतानधार्मिकान् ॥ ११ ॥

विहाय नगरं राष्ट्रं धरणीं राज्यमेव च।
वने वासी स धर्मात्मा मोढुमेतैर्न शक्यते ॥ १२ ॥

आत्मकोपाग्निना दग्धा यास्यन्त्येते पराभवम्।
यदि रामं साधुवृत्तं द्रोग्धुमिच्छन्त्यमी खलाः ॥ १३ ॥

इति निर्मितमन्त्रोऽसौ निषादानां पतिर्बली।
जगादाज्ञाकरान् दासान् लोहयन्त्रसहस्रभाक् ॥ १४ ॥

शृण्वन्तु मे वचोदासा महापौरुषमण्डनाः।
लोहयन्त्रशतैर्गत्वा रुन्धन्तु निखिलां नदीम् ॥ १५ ॥

इक्ष्वाकूणां महाघोरा यथेयं महती चमूः।
नोत्तीर्य सरितं गच्छेद् रामचन्द्रं मम प्रभुम् ॥ १६ ॥

अन्ये च विदिता वीरा भवतां ये महाबलाः।
सेनां संव्यूह्य तिष्ठन्तु ते सर्वे लोहयन्त्रिणः ॥ १७ ॥

मज्जन्तां लोहयन्त्राणि लक्ष्यशः पुरुषा मम।
वेधयन्तु परान् दुष्टान् लोहपिण्डैः सहस्रशः ॥ १८ ॥

शतघ्न्यः परिघाश्चैव भुशुण्ड्यस्तोमरास्तथा।
बाणाः क्षेपणिकाश्चैव सज्ज्यन्तां त्वरितं भटाः ॥ १९ ॥

एकैकं परवीरं च योधयन्तु शतं शतम्।
सन्नद्धा मामका वीरा नानाशस्त्रास्त्रवर्षिणः ॥ २० ॥

ननु प्रथममेतेषां प्रवृत्तिरनुमीयताम्।
यद्येषामभियोगश्चेद् रामचन्द्रे मम प्रभौ ॥ २१ ॥

तदामीभिर्न सुतरा गङ्गेयं मयि जीवति।
नूनं तत्पददास्येन जेतुमिच्छाम्यहं सुरान् ॥ २२ ॥

नास्याः शुभं प्रपश्यामि सेनाया मामकैः शरैः।
गजानश्वान् रथान् पत्तीन् भेत्तास्मि समरे क्षणात् ॥ २३ ॥

इक्ष्वाकूणां भटा एते रामद्रोहमलीमसाः।
स्वत एवाद्य गन्तारो धर्मराजनिकेतनम् ॥ २४ ॥

निमित्तमात्रमेतेषां संक्षये भवितास्म्यहम्।
किंतु नाज्ञातवृत्तेन स्पर्द्धितुं शक्यते मया ॥ २५ ॥

मज्जा भवन्तस्तिष्ठन्तु गच्छामि भरतं त्वहम् ।
प्रवृत्तिं तस्य विज्ञाय कर्त्तुमर्हं यथोचितम् ॥ २६ ॥

इत्युक्त्वा बलवान् वीरः शृङ्गबेरपुराधिपः ।
गृहीत्वोपायनान् दिव्यान् मत्स्यान् पाठीनरोहितान् ॥ २७ ॥

मांसानि मधुकुम्भांश्च फलानि विविधानि च ।
अभ्ययाद् भरतं शूरः सन्नद्धकवचो गुहः ॥ २८ ॥

संस्मृत्य रामचरणौ विन्यस्य निजमूर्द्धनि ।
वृतो ज्ञातिसहस्रेण राजद्वारमुपेयिवान् ॥ २९ ॥

दृष्ट्वा तमभिगच्छन्तं रामस्यानन्यसेवकम् ।
आचख्यौ भरतं प्राज्ञः सुमन्त्रो विनयान्वितः ॥ ३० ॥

एष त्वामेति काकुत्स्थ शृङ्गबेरपुराधिपः ।
रामस्यानन्यभक्तोऽयं गुहो नाम महामतिः ॥ ३१ ॥

महाबलो महाभाग्यो महाविनय ऊर्ज्जितः ।
समृद्धो दण्डकारण्ये रामस्य च सखा महान् ॥ ३२ ॥

वृत्तज्ञश्च सदार्यस्य गृहाण विनयादमुम् ।
इत्युक्तः स सुमन्त्रेण भरतो भूमिभूषणः ॥ ३३ ॥

विनीतहृदयो द्रष्टुमाचक्राङ्क्ष तदा गुहम् ।
प्रवेशितः प्रतीहारै रामानुजमियाय सः ॥ ३४ ॥

अपश्यद् भरतं सौम्यं गुणैः श्रीरामसम्मितम् ।
अवन्दत गुहो भक्त्या रामभ्रातरमादृतः ॥ ३५ ॥

उवाच सुप्रसन्नात्मा किंचिच्छङ्कावशेषितः ।
अयं तव गृहारामप्रायोदेशः सुमङ्गुलः ॥ ३६ ॥

गङ्गातीरावनीस्थानपुरग्राममनोरमः ।
अल्प एवापि[1] रुचिरो दृश्यतां सुभग त्वया ॥ ३७ ॥

तव दासगृहं चैतत्संक्षिप्तावसथोयमम् ।
इह मूल फलाहारैर्निरास्वादैर्मुनिव्रताः ॥ ३८ ॥

वसन्ति मनुजाः सौम्यास्तेषां त्वं दृक्सुखो भव ।
इहार्द्राणि च शुष्काणि मांसानि विविधानि च ॥ ३९ ॥

उच्चावचमिदं भक्ष्यं भविता वो न संशयः ।
सम्भावयितुमिच्छामि तवार्य महतीमिमाम् ॥ ४० ॥

---

१. अति—अयो०, मथु० ।

सेनां पुरुषहस्त्यश्च महोक्षोष्ट्रखगान्विताम् ।
भोज्यान्नयवसैरद्य मां पावयितुमर्हसि ॥ ४१ ॥

मत्प्रभोस्त्वं किल भ्राता प्रभुरेव मतो मम ।
अतोऽर्चितुं त्वामिच्छामि ससुहृद्बन्धुसैन्यकम् ॥ ४२ ॥

इत्थं निषादराजेन प्रार्थितो भरतोऽब्रवीत् ।
सर्वे वयं त्वया वीर मानिताश्चैव पूजिताः ॥ ४३ ॥

ममार्यस्य प्रियं मित्रं ममापि त्वं प्रियः सुहृत् ।
सर्वे मम कृताः कामा भवता सौम्यदर्शन ॥ ४४ ॥

धन्यस्तव हृदुत्साहो यो रामस्य चमूमिमाम् ।
सम्पूजयसि सोत्कण्ठो मम कार्यमिदं त्वयि ॥ ४५ ॥

संदर्शयस्व पन्थानं भारद्वाजाश्रमोपगम् ।
शुभो नः कतरः पन्था भारद्वाजाश्रमं प्रति ॥ ४६ ॥

अविज्ञाते हि देशेऽस्मिन् भवान् विज्ञापकोऽस्तु नः ।
इत्युक्तो भरतेनाथौ नृपपुत्रेण धीमता ॥ ४७ ॥

उवाच किंचित्साशङ्को गुहः श्रीरामसेवकः ।
प्राञ्जलिर्विनतस्कन्धो निखिलारण्यदेशवित् ॥ ४८ ॥

सन्तिमे बहवो दासास्तव मार्गनिरूपकाः ।
तैर्युक्तोऽनुगमिष्यामि भवन्तमहमादृतः ॥ ४९ ॥

किं तु ते ज्ञातुमिच्छामि प्रवृत्तिं वाञ्छितं तथा ।
कच्चिन्न रामं व्रजसि राज्येच्छुर्दुष्टयाधिया ॥ ५० ॥

तवेयं महती सेना गजाश्वभटसंकुला ।
सन्नद्धवीरपुरुषा कोविदारध्वजै रथैः ॥ ५१ ॥

संयुक्ता भूरिशस्त्रास्त्रैः शतघ्नीशतसंकुला ।
सर्वतोव्याप्तभूभागा शङ्कां वितनुते मम ॥ ५२ ॥

मलीमसा राज्यलक्ष्मीः पितृभ्रातृनिषूदिनी ।
केषांचिदेव शुद्धानां मनो मोहयते न च ॥ ५३ ॥

सभवान् किं समारब्धुमुद्यतोऽसि बलैर्युतः ।
इति विज्ञातुमिच्छामि रामस्यानुचरोऽस्म्यहम् ॥ ५४ ॥

इत्युक्तो रामभक्तेन गुहेन भरतस्तदा ।
उवाच मधुरं वाक्यं गङ्गावारिसितस्मितः ॥ ५५ ॥

मा भून्ममेदृशी बुद्धिः स्वप्नेऽपि रघुसत्तमे[1] ।
तद्धासदासं मां विद्धि सदाचरणदर्शिनम् ॥ ५६ ॥

---

१. रघुनन्दनै—अयो०, मथु० ।

स नो राजा प्रभुः स्वामी गुरुर्बन्धुः परायणः।
दहामि तद्वियोगेन मनःप्रीत्यै व्रजामि तम्॥ ५७॥

स मे पितृसमो बन्धुस्तस्यभार्येव भूरियम्।
तत्पतित्वमहं वाञ्छन् किं न स्यां गुरुतल्पगः॥ ५८॥

मय्यजानति कैकेय्या कृतं यद्गुरु पातकम्।
सा तेन कर्मणा भूयो विनिर्भर्त्स्यं मयोज्झिता॥ ५९॥

श्रीरामचरणाम्भोजदास्यलाभप्रमोदिनम्।
न मामिति त्वं शङ्केथाः सत्यं सत्यं वदाम्यहम्॥ ६०॥

धिङ्मासुक्लिष्टजन्मानं यत्कृते स रघूद्वहः।
मात्रा मे पापकारिण्या नीतो विपिनवासिताम्॥ ६१॥

नाजनिष्यत चेन्माता मामकर्मापराधिनम्।
नाभविष्यत्तदा ह्येष प्रजानां क्लेशसम्भवः॥ ६२॥

कदा द्रक्ष्याम्यहं तप्तः श्रीराममुखमण्डलम्।
कदा च विरहोद्रेकदुःखं मे शान्तिमेष्यति॥ ६३॥

अहं वने निवत्स्यामि तस्यार्यस्य प्रतिज्ञया।
तमुपावर्त्तयिष्यामि जातराज्याभिषेचनम्॥ ६४॥

अमी वशिष्ठप्रमुखा मुनयः शुद्धबुद्धयः।
एतैः सहित एवाहमभिषेक्ष्यामि तं प्रभुम्॥ ६५॥

अयशः पातितं मूर्द्धिन्न मम मात्रा न संशयः।
तदहं क्षालयिष्यामि रामदास्यरसोदकैः॥ ६६॥

इत्युक्तं भरते नासौ श्रुत्वा वाक्यं निषादराट्।
प्रतिपूज्य वचोभिस्तं बभाषे प्रीतमानसः॥ ६७॥

धन्योऽसि त्वं महाबाहो रघूणां कुलभूषणः।
श्रुत्वा नितान्तं प्रीतोऽहं धर्मोपेतं वचस्तव॥ ६८॥

काकुत्स्थानां कुले जातो धर्मात्मा सत्यभाषणः[1]।
कथं भवान् प्रवर्तेत न्यायातीतेऽसतां पथि॥ ६९॥

नित्यंतवेदृशी बुद्धिर्वर्त्ततां धर्मवर्त्मनि।
शोभा रघूणां वंशस्य वर्द्धतां प्रतिवासरम्॥ ७०॥

अयत्नोपगतं राज्यं भवान् संत्यक्तुमिच्छति।
अतस्ते सदृशं लोके न प्रपश्यामि धीनिधे॥ ७१॥

---

१. सत्यभाषितः—अयो०, मथु०। परंतु यह पाठ ठीक नहीं जँचता है। इसके स्थान पर 'सत्यभावितः' हो सकता है।

पित्रा प्रवासितं रामं यत्त्वमानेतुमिच्छसि ।
तेन ते महती कीर्त्तिर्भुवनेषु भविष्यति ॥ ७२ ॥

एतद्धर्मान्वितंकर्म न चित्रं भरत त्वयि ।
श्रीरामचरणाम्भोजदास्यनिर्मलमानसे ॥ ७३ ॥

तयोः संवदतोरित्थं सूर्यास्तमगमत्तदा ।
अवर्त्तत निशा घोरा रामविश्लेषदुस्तरा ॥ ७४ ॥

भरतश्चैव शत्रुघ्नो गुहेनोपगतावुभौ ।
पृच्छन्तौ रामवृत्तानि निद्रां नालभतां निशि ॥ ७५ ॥

आक्रान्तो विरहोद्भूतदुःखसागरवारिभिः ।
निषादराजं भरतः पर्यपृच्छत सस्पृहः ॥ ७६ ॥

त्यक्त्वा राज्यमिहागतो रघुपतिः कं देशमध्यूषिवान् ।
किं भोज्यं कृतवान् किमाह वचनं सूतं सुमन्त्रं च सः ॥

मैथिल्या सहितः कथं शयितवान् संस्तीर्यभूमौतृणं ।
गङ्गां लङ्घितवान् कथं कमवहद् देशं च धर्माधिपः ॥ ७७ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे गुहप्रश्नो नाम द्वात्रिंशोऽध्यायः ॥ ३२ ॥

●

त्रयस्त्रिंशोऽध्यायः

ब्रह्मोवाच

तथोक्तो भरतेनासौ बभाषे स निषाद्राट् ।
स्मृत्वा रामस्य चरणौ योगिनां ध्यानमङ्गलौ ॥ १ ॥

अयमिंगुदीतरुरुदेति ते पुरो ननु यत्र राघव उवास सीतया ।
धरणीतलेऽन्भुजविनिर्मितं महच्छयनं नवीनदलकल्पमास्थितः ॥ २ ॥

उपनीतमिन्दुसितमादरान्मया शयनं हृदा स विगणय्यधार्मिकः ।
शयितो महीतलरजोभराञ्चिते शयनं स्वबहुमुपधाय मे प्रभुः ॥ ३ ॥

निशि तत्र लक्ष्मण उदारविक्रमो धनुराततज्यमिषुयुक्तमात्मनः ।
करयोर्विधाय कथयन् कथाः शुभाःप्रयतश्चकारविधिवत्प्रजागरम् ॥ ४ ॥

स निजार्यकक्ष्य शयितस्य गुप्तयेऽनलसो विनिद्र इदमीरितोमया ।
ननु जागराम्यहमुदायुधो भवान् शयनेऽधितिष्ठतु मयोपकल्पिते ॥ ५ ॥

स्वजनैश्च बन्धुभिरुपेत आदरादहमत्र न स्वपि मिजागरं दधे ।
स्वपति प्रभौ मम सह स्वभार्यया विजने वने बहुलहिंस्रसंकुले ॥ ६ ॥

तत आह लक्ष्मण इदं मया सखे स्वपितुं न शक्यत इहेदृशापदि ।
स्वपति क्षितौ ममगुरौ रघूद्वहे परिणद्धराज्यसुखभोजनौचिते ॥ ७ ॥

प्रयतास्ततश्च गहने वयं त्रयो भृशमाततज्यशरचापपाणयः ।
रजनीमनैष्म रघुनाथविस्फुरद्गुण[1]वर्णनप्रभवशुद्धबुद्धयः ॥ ८ ॥

अथ वीक्ष्य तां निजगुरोर्वियदृशामतदर्हदुःखततिभोगभूयसीम् ।
विललाप लक्ष्मण उदीरयन् गिरं करुणाममेयबलवीर्यविक्रमः ॥ ९ ॥

ध्रुवमद्यकोसलपुराधिपः स नो जनकः कथं नु विपदा भविष्यति ।
गहनं गते प्रियहिते निजात्मजे विरहेण नूनमसुभिर्विमोक्ष्यते ॥ १० ॥

अयमिन्दुसुन्दरमुखः सरोरुहच्छदनोपमातिसुकुमारविग्रहः ।
मिथिलाधिराजसुतया सुखार्हया सहितोऽद्य संस्वपिति मेदिनीतले ॥ ११ ॥

ससुरासुरत्रिभुवनेऽतुलप्रभो रजनीशकोटिकमनीयदर्शनः ।
स्वजनेषु सर्वसुखदानशक्तिभृत् कथमीदृशीं नु भजते सुदुर्दशाम् ॥ १२ ॥

जगतामयं प्रणयभाजनं महान् सुमहोदयः सकलचित्तरञ्जनः ।
किमु केकयेन्द्रसुतया नृशंसया सदनात्प्रवास्य विपिनेऽधिवासितः ॥ १३ ॥

रहिता पुरी ध्रुवमनेन कोसला विसुखा श्मशानधरणीव दुर्भगा ।
उदिताश्रुलोचनरुदन्महाजना बहुशोकसागरगताद्य नङ्क्ष्यति ॥ १४ ॥

रघुवंशभूषणउदित्वरःश्रिया विजयी त्रिलोकजनशोकनाशनः ।
अयमार्य उज्ज्वलगुणौघमण्डितः कथमेवमर्हति नितान्तमापदम् ॥ १५ ॥

इति लक्ष्मणो बहु विलप्य तां निशामनयत्ततोऽभ्युदितवत्यहस्करे ।
वटदुग्धदिग्धविलसज्जटाधरौ वनवासयोग्यकुशचीरवाससौ ॥ १६ ॥

धृततापसोचितसुवेशविग्रहावपिकामपि श्रियमतीव बिभ्रतौ ।
पुरतो विधाय जनकात्मजामुभौ त्रिदिवापगां व्यतितरीतुमीयतुः ॥ १७ ॥

रघुवंशसिन्धुतुहिनद्युतिस्तदा प्रणतं सुमन्त्रमथ सं निवर्त्तयन् ।
बहु संदिदेश पितरं च मातरं विनयाद् भवन्तमुपदर्शितार्जवः ॥ १८ ॥

अनुजं सरोषकटुभाषिणं तदा विनिवार्य साधुधिषणस्तमूचिवान् ।
पुरुषं यदाह वचनं ममानुजो न सुमन्त्र तत्कथय मत्पितुः पुरः ॥ १९ ॥

वनवासनेन सततोयलालिते प्रणयो मयि क्षितिपतेर्न हीयते ।
स हि सत्यवाक् पुरुषधोरणीमणिर्न मयापनेतुमुचितः स्वसत्यतः ॥ २० ॥

इति शीतलैरमृतसारसुन्दरैर्वचनैः सुमन्त्रमभिधाय धैर्यभृत् ।
विससर्ज दुःखितमुदश्रुलोचनं सहगन्तुमाहितमनोरथं प्रभुः ॥ २१ ॥

---

१. वृत्तवर्णनविशुद्ध०— मथु० ।

परिपश्यतामलघुवाष्पचक्षुषां स हि नस्तदेक्षणपथं व्यतीयिवान् ।
मदुपाहितां ममधिरुह्य तां तरिं जनकात्मजानुजनिषेविताङ्घ्रिकः ।। २२ ।।
स मयोपनीतमधिकं चतुर्विधं रसनीयभोज्यनिवहं न चाददे ।
अनुजोपनीतमुदकं मुदायुतो जनकात्मजासहित आप्त धार्मिकः ।। २३ ।।
नयनाध्वनः परमुपेतवत्सु तेष्वधिकार्तिसिन्धुविनिमग्नमानसौ ।
विरहाधिवृन्दभृदहं च सारथिः परिमुष्ठशून्यहृदयौन्यवर्त्तताम् ।। २४ ।।
इतीरितं गुहेन संनिशम्य केकयीसुतः ।
रघूद्वहं विचिन्तयन् मुमोह भूरिदुःखतः ।। २५ ।।

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे गुहवाक्यं नाम त्रयस्त्रिंशोऽध्यायः । ३३ ।।

●

चतुस्त्रिंशोऽध्यायः

ब्रह्मोवाच

ततस्तभिगुदीमूलं सोऽन्वगाद् भरतः शुचिः ।
यत्र भ्राता शयितवान् भूमौ दयितया सह ।। १ ।।
तत्र शय्यां समुद्वीक्ष्य क्रान्तपूर्वां महात्मना ।
संस्तृतां तृणसंघेन मर्दितां परिवर्त्तनैः ।। २ ।।
अपश्यत् पल्लवांस्तत्र परिम्लानांश्चिरास्तृतान् ।
श्री रामस्याङ्गसंसक्तान् जानकतनुसौरभान् ।। ३ ।।
बभूव वाष्पनयनो भरतो भ्रातृवत्सलः ।
कौसल्यादद्या जनन्यश्च स्थानं तद् ददृशुर्दृशा ।। ४ ।।
विललाप पुरस्तासां स दीनः शोकसंवृतः ।
महाराजकुमारस्य मन्वानोऽनुचितां दशाम् ।। ५ ।।
सीतां च जनकेन्द्रस्य सुतां दशरथस्य च ।
स्नुषां राज्यसुखस्यार्हां सोऽशुचद् वाष्पलोचनः ।। ६ ।।
स्वयं चोषितुकामोऽसौ भ्रातुः प्रतिनिधिर्भवन् ।
राज्येऽभिषिच्य चैवार्यमानेतुं कृतनिश्चयः ।। ७ ।।
वाग्भिराश्वासयाञ्चक्रे कौसल्यां शोकपीडिताम् ।
इंगुदीतरुमूलस्थां शय्यामार्यस्य वीक्ष्य ताम् ।। ८ ।।

बभूवातितरां तत्र भरतः शोककर्षितः ।
प्रतिज्ञाञ्चौ वने स्थातुमार्यं राज्येऽभिषेचितुम् ॥ ९ ॥

देवताः प्रार्थयामास तथाभवितुमुत्सुकः ।
यदि मे प्रार्थितं सम्यगार्यो नाङ्गीकरिष्यति ॥ १० ॥

तदा तत्पादसविधे निवत्स्याम्यहमादृतः ।
एवमाह महाबाहुर्भरतः सत्यभाषणः ॥ ११ ॥

ततश्च निशि जातायां प्राप्तनीडेषु पक्षिषु ।
प्रभोर्भ्रातरमामन्त्र्य ययौ वेश्म निषादराट् ॥ १२ ॥

अथ प्रातः समुत्थाय भरतश्चैव शत्रुहा ।
तारयामासतुः सेनां गुहमाज्ञाप्य नौशतैः ॥ १३ ॥

शतानि पञ्च गङ्गायां तरण्यः समुपस्थिताः ।
आकृष्यमाणाः परितो दाशैराज्ञानुवर्त्तिभिः ॥ १४ ॥

नानावर्णाः पताकिन्यो विचित्रस्वस्तिकाञ्चिताः ।
वितानास्तरणोपेता घण्टाभरणभूषिताः ॥ १५ ॥

द्रोणीभिः क्षेपणीभिश्च शोभमानाजवप्लवाः ।
वेश्मवातायनोपेता व्यरुचन् जाह्नवीजले ॥ १६ ॥

पुरः परमकल्याणीमानन्दरवघोषिणीम् ।
ऊह्यमानां गुहेनैव भरतो नावमारुहत् ॥ १७ ॥

भरतस्य समीपस्थः शत्रुघ्नः शुशुभेतराम् ।
साक्षाच्चन्द्रसमीपस्थो द्वितीय इव चन्द्रमाः ॥ १८ ॥

आरुह्य रम्यतरणीः संतेरू राजयोषितः ।
कौसल्याद्याः षट्च्छन्नवेश्मान्तरसुसंस्थिताः ॥ १९ ॥

पुरोधसो मुनिश्रेष्ठा मन्त्रिणश्च द्विजातयः ।
पृथङ्नावः समारुह्य व्यतरन् स्वर्गनिम्नगाम् ॥ २० ॥

राजदासास्ततस्तेरुरश्वयानसमन्विताः ।
नैगमाश्चापणैः साकमनोभिर्भारवाहकैः ॥ २१ ॥

तरतां चैव तीर्णानां तथा चैव तरिष्यताम् ।
नृणां सम्भारयुक्तानां मिथः[1] कोलाहलोऽभवत् ॥ २२ ॥

स्त्रीगणैः राजदासीभिर्दासैर्दासेरकैर्गजैः ।
वाजिभिर्युज्ययानैश्च तरण्यः सर्वतो भृताः ॥ २३ ॥

नानाभाण्डान्विता नावो नानाजनसमाकुलाः ।
दाशैः संतार्यमाणास्ताः पारं जग्मुर्महाजवाः ॥ २४ ॥

---

१. महान्–अयो०, मथु० ।

विचित्रकम्बलास्तत्र विचित्रध्वजशालिनः ।
पर्वता इव दृश्यन्ते विचित्रशिखरा गजाः ॥ २५ ॥

नौकाभिश्च महानौभिः प्लवैश्च सकला चमूः ।
सयानापणलोकौघा संततार नदीं क्षणात् ॥ २६ ॥

ततः सर्वान् समुत्तार्य ज्ञातिभिः सहितो गुहः ।
भरतस्य पुरः सम्यक् प्राञ्जलिः समुपस्थितः ॥ २७ ॥

तमपृच्छत पन्थानं तस्य देशस्य राघवः ।
यस्मिन् देशे वसत्यार्यः सानुजो भार्यया सह ॥ २८ ॥

तमुवाच निषादेशः प्रयागे गम्यतां त्वया ।
पुण्यं तपोवनं यत्र भारद्वाजस्य धीमतः ॥ २९ ॥

गङ्गया यमुना यत्र संगता दीर्घघोषया ।
अन्तस्तयोः सरस्वत्या शोणभासा समागतम् ॥ ३० ॥

निमज्ज्य यत्र मनुजा व्रजन्ति विरजं पदम् ।
तत्र स्नात्वा मुनिश्रेष्ठं नत्वाऽतिथ्यं प्रगृह्य च ॥ ३१ ॥

समेधितस्तदाशीर्भिर्यशःसौभाग्यमण्डितः ।
तन्निर्दिष्टेन मार्गेण भ्रातरं द्रष्टुमेष्यसि ॥ ३२ ॥

इत्याकर्ण्य गुहेनोक्तं प्रसन्नहृदयोऽभवत् ।
तं विसृज्य ततोऽगच्छत्प्रयागं सह सेनया ॥ ३३ ॥

मध्येमार्गं महारण्यतरूकोटरवासिनाम् ।
पक्षिणां निनदं शृण्वन् भारद्वाजाश्रमोन्मुखः ॥ ३४ ॥

फलितान् पुष्पितांश्चैव नवपल्लवभूषितान् ।
गुञ्जद्भ्रमरपुञ्जाढ्यान् सम्पश्यन् वनपादपान् ॥ ३५ ॥

ददर्शपुरतो रम्यं प्रयागस्थानमुत्तमम् ।
इतो भागीरथी गङ्गा परतो यमुना तयोः ॥ ३६ ॥

मध्ये नानामरैर्जुष्टमृषिवृन्दैः समाकुलम् ।
नानादेवद्रुमाकीर्णं कल्पवृक्षशतावृतम् ॥ ३७ ॥

कमलाकरसंशोभि शोभितं सरसीगणैः ।
कोटितीर्थसमाक्रान्तं देवतायतनान्वितम् ॥ ३८ ॥

सर्वकालफलोपेतैः पादपैः परिशोभितम् ।
दृष्ट्वा वनं महद्रम्यं सर्वे ते प्रीतमानसाः ॥ ३९ ॥

देवं प्रदक्षिणं कृत्वा प्रजग्मुर्भरतादयः ।
भरतश्चैव शत्रुघ्नो वशिष्ठोऽन्ये द्विजातयः ॥ ४० ॥

कौसल्याद्या मातरश्च देवतायतनं महत् ।
कृत्वा प्रदक्षिणं प्राप्ता महातीर्थेऽवगाह्य च ॥ ४१ ॥

श्रद्धोपेताः प्रविविशुर्मुनेराश्रममण्डलम् ।
भरतः क्रोशतो दृष्ट्वा पद्भ्यामेव प्रतस्थिवान् ॥ ४२ ॥

तदाश्रमं महत्पुण्यं भारद्वाजस्य योगिनः ।
प्रययौ भरतः श्रीमान् संनिवेश्य बलं पृथक् ॥ ४३ ॥

वशिष्ठसहितोऽन्यैश्च द्विजवर्यैः समन्वितः ।
मन्त्रिभिः सहितः शुद्धः स्फीतवासाः सुभाषितः ॥ ४४ ॥

प्रविश्याश्रममद्राक्षीन्मुनिं वह्निसमत्विषम् ।
भरद्वाजं सुतपसं विख्यातब्रह्मवर्चसम् ॥ ४५ ॥

स विलोक्य मुनिश्रेष्ठं प्राजापत्यं महौजसम् ।
वशिष्ठं ब्रह्मविद्वर्यं रघूणां च पुरोधसम् ॥ ४६ ॥

त्यक्तासनः समुत्तस्थौ पाद्यहस्तो महामुनिः ।
यथार्हं तेन संगम्य सत्कृत्य च तमादरात् ॥ ४७ ॥

शत्रुघ्नभरताभ्यां च भक्त्या समभिवादितः ।
यथापूर्वं यथान्यायं सर्वानानर्च सोऽतिथीन् ॥ ४८ ॥

सर्वेष्वङ्गेषु कुशलं पप्रच्छ वदतां वरः ।
ज्ञात्वा प्रमीतं राजानं शुशोच क्षणमातुरः ॥ ४९ ॥

वशिष्ठो भरतश्चैव तं च पप्रच्छतुः शुभम् ।
देहाग्निहोत्रशिष्याप्ताश्रमसत्पशुपक्षिषु ॥ ५० ॥

एवं परस्परं तेषां सम्प्रश्नोऽभून्मनोहरः ।
ततोऽब्रवीद् भरद्वाजो भरतं प्रश्रयानतम् ॥ ५१ ॥

ब्रूहि स्वागमनस्यार्थं वने राज्यवतस्तव ।
पूर्वं प्रव्राजितो रामस्तव पित्रा वनं प्रति ॥ ५२ ॥

स्त्रियाः प्रसादनं कर्तुं धर्मात्मा सत्यसंगरः ।
त्वमिदानीं च किं कर्त्तुं प्रस्थितोऽसि बलान्वितः ॥ ५३ ॥

कच्चिन्न राज्यलोभेन त्यक्त स्नेहो वनेऽपि तम् ।
उद्वेजयितुमुद्युक्तो भवान् कारुण्यवर्जितः ॥ ५४ ॥

एवं चेदत्यनुचितं कर्त्तुमुद्यतवानसि ।
काकुत्स्थानां कीर्त्तिहरं महत्पापमिदं यतः ॥ ५५ ॥

स वै महात्मा धर्मिष्ठो रामः सत्यानतिक्रमः ।
पापदृष्ट्या त्वया नैव द्रष्टव्यो रघुवंशजः ॥ ५६ ॥

त्वदर्थमेव धर्मात्मा गुणवांल्लोकरञ्जनः ।
स्त्रिया वचनमादृत्य रामः पित्रा विवासितः ॥ ५७ ॥

स त्वं वनेऽपि तिष्ठन्तं तं सभार्यं च सानुजम् ।
रामं क्लेशयितुं नार्हो रघूणां वंशजो भवन् ॥ ५८ ॥

इत्युदीरितमाकर्ण्य भारद्वाजेन योगिना ।
दुःखितो वाष्पपूर्णाक्षः प्रत्युवाच विनिःश्वसन् ॥ ५९ ॥

गद्गदो भूतकण्ठत्वादपरिस्पष्टभाषणः ।
हा हा हतोऽस्म्यहं ब्रह्मन् यदेवं माभिभाषसे ॥ ६० ॥

मात्रा मम कृतं पापमहं शोचामि भूरिशः ।
न तं. कालमवाप्नोमि यस्मिन्नार्यः प्रवासितः ॥ ६१ ॥

नामुमर्थमहं जाने मातुलेषु चिराद् वसन् ।
जननीमप्यहं हन्यां यदि रामो न मां त्यजेत् ॥ ६२ ॥

अयं तु मे महान् रोषो यन्मात्रा जनितो भवे ।
मातुरेव च पापेन लिप्तोऽहं पापवर्जितः ॥ ६३ ॥

अधुनाहं व्रजाम्यार्हं रघुवंशविभूषणम् ।
प्रत्यानेतुं वने वासादभिषिच्यनृपासने ॥ ६४ ॥

आभिषेकाणि द्रव्याणि ब्राह्मणांश्चाभिषेचकान् ।
नयामि तत्र यत्रार्यो विद्यते मण्डयन् वनम् ॥ ६५ ॥

मनसा कर्मणा वाचा तस्य दासोऽस्म्यहं मुने ।
न मे राज्यस्पृहा ब्रह्मन् रामसेवाभिकाङ्क्षिणः ॥ ६६ ॥

नान्यथा मयि[1] शंकेथाः प्रसीद भगवन् मयि ।
तवाशिषाभिवाञ्छामि मयिज्येष्ठः प्रसीदतु ॥ ६७ ॥

निशम्य केकयीपुत्रवचनं स महामुनिः ।
प्रमसाद हृदात्यर्थं तुष्टाव च मुहुर्मुहुः ॥ ६८ ॥

उपपन्नमिदं मन्ये सर्वं त्वयि महामते ।
राघवे विमले वंशे जातमात्रा हि निर्मलाः ॥ ६९ ॥

न धर्मातिक्रमकरा न खला नापिकामिनः ।
ना कीर्तिभाजनाः केचिददद्यावधि कुले तव ॥ ७० ॥

स एव विमलो वंशो वैवस्वतमनोः किल ।
बभूवुर्धार्मिका यत्र मान्धानृसगरादयः ॥ ७१ ॥

एकैकस्य गुणान् वक्तुं कः शक्नोति जनो भुवि ।
तेषां कीर्तिकरा यूयं सर्वे दशरथात्मजाः ॥ ७२ ॥

---

१. माभि०—अयो०, मथु० ।

मातुः कृत्यमनादृत्य साधु ते मतिरूर्जिता ।
भवान् वर्द्धयिता लोके रघूणां कीर्तिसागरम् ॥ ७३ ॥

प्रीयेऽहं केकयीसूनो तव बुद्धयातिसौम्यया ।
आर्ये गुणवति ज्येष्ठे त्वया सम्यग्विचारितम् ॥ ७४ ॥

त्वाहं निमन्त्रयिष्यामि ससैन्यं ससुहृद्गणम् ।
समन्त्रिणां सभृत्यौघं सद्विजातिमुनिव्रतम् ॥ ७५ ॥

सयुग्यवाजिमातङ्गमन्नैः सुस्वादुभोजनैः ।
यथाकामोपपन्नैश्चदधिदुग्धमधुव्रजैः ॥ ७६ ॥

चोष्यैर्लेह्यैस्तथा पेयैर्भोज्यैः स्वादूपपादितैः ।
यस्य यावद्यथायोग्यैरश्वानां यवसैस्तथा ॥ ७७ ॥

गजानां शर्कराज्याक्तैः पिण्डैर्गोधूमसम्भवैः ।
बन्धूनां सुहृदां चैव मन्त्रिणां च पुरोधसाम् ॥ ७८ ॥

स्वादुबह्वन्नसम्भारैर्मैरेयैर्विविधैस्तथा ।
राजभोज्यैरनेकैश्च सुक्लृप्तैर्बहुसंविधम् ॥ ७९ ॥

कन्दैर्मूलैः फलैः शाकैर्भक्ष्यैरन्नैरनेकशः ।
अहं त्वां प्रीणयिष्यामि परिवारगणैः सह ॥ ८० ॥

निमन्त्रितोऽस भरत त्वं मया वन्यवृत्तिना ।
मम प्रीत्यानुजानीहि मद्गृहे भोक्तुमद्य भोः ॥ ८१ ॥

किमर्थं बलमुत्सृज्य त्वमेकाकी समागतः ।
किं नेह विस्तृतोदेशः सेनासंवासनोचितः ॥ ८२ ॥

स तमाह मुनिश्रेष्ठं प्राञ्जलिर्नम्रकन्धरः ।
सर्वं त्वया कृतं ब्रह्मन् भूयो मत्प्रीतिसाधनम् ॥ ८३ ॥

सबलः ससुहृद्बन्धुस्तोषितोऽस्मि न संशयः ।
दूरे संस्थापितं सैन्यमाश्रमोन्मर्दशङ्कया ॥ ८४ ॥

शैलोपमैर्गजैस्तुङ्गैर्वाजिभिस्तरलैर्भृशम् ।
बलैरुच्चावचैर्दीर्घैः प्रच्छादितमहीतलैः ॥ ८५ ॥

नानाविधजनस्तोमैः सम्मर्दः स्यात्तवाश्रमे ।
तपोनिष्ठाश्च मुनय उद्विजेरन्नुपद्रुताः ॥ ८६ ॥

इत्यहं महतीं सेनां दूरे संस्थाप्य भक्तितः ।
पद्भ्यामेवेहसम्प्राप्तस्त्वांद्रष्टुंपावकोपमम् ॥ ८७ ॥

स्थानं निर्दिश्यतां तन्मे यत्र रामो विराजते ।
तेनैव महती प्रीतिर्मम स्याद्भोजनाधिका ॥ ८८ ॥

आतिथ्यं च त्वया ब्रह्मन् कृतमेव ममाधिकम् ।
तवाश्रमैकोपलभ्यैः कन्दमूलफलोदकैः ॥ ८९ ॥

ततोऽधिकं च ते ब्रह्मन् किं न्यूनं सिद्धयोगिनः ।
आयासाल्लभ्यतेऽस्माभिः सा सम्पत्सहजा तव ॥ ९० ॥

अथाब्रवीन्मुनिश्रेष्ठो भरतं सौम्यदर्शनम् ।
आनयेहाखिलं सैन्यं मयास्यद्य निमन्त्रितः ॥ ९१ ॥

आतिथ्यं मेऽनुजानीहि यथाकामोपभोगतः ।
अद्य भुक्त्वा सुविश्रान्तः ससैन्यस्तिष्ठ मद्गृहे ॥ ९२ ॥

द्रष्टासि राममन्येद्युश्चित्रकूटनिवासिनम् ।
तद्वनं सुमहद्रम्यं पुण्यं मन्दाकिनीतटे ॥ ९३ ॥

नितान्तशीतलामोदिमन्दमारुतवीजितम् ।
नानाविधद्रुमाकीर्णं पिकालिशुककूजितम् ॥ ९४ ॥

स भार्यः सानुजो यत्र सुखमास्ते रघूद्वहः ।
गन्तासि श्वः परश्वो वा प्राप्तासि महतीं मुदम् ॥ ९५ ॥

आज्ञप्त इत्थं मुनिना भरतश्चैव शत्रुजित्[1] ।
तथेति सत्वरं चक्रे प्रीतिमान् मुनिवाक्यतः ॥ ९६ ॥

ततः स भगवान् योगी निमन्त्र्य भरतं तथा ।
संविधां कल्पयामास निजवैभवसम्भवाम् ॥ ९७ ॥

अग्निहोत्रगृहं गत्वा सकृदाचम्य सिद्धिमान् ।
आतिथ्यं कर्त्तुकामोऽस्य सर्वं तत्समपादयत् ॥ ९८ ॥

आययौ तस्य सदने विश्वकर्मा सु वैभवः ।
त्वष्टा प्रजापतिश्चैव महाभूतिर्महा धनः ॥ ९९ ॥

इन्द्रादयो लोकपालास्तत्तल्लोकविभूतिभिः ।
गन्धर्वाप्सरसोदेवा नद्यः कामरसस्रवाः ॥ १०० ॥

मुनिराज्ञापयामास योगसिद्धो महातपाः ।
आतिथ्यं कर्तुमिच्छामि भरतस्यादद्य सुश्रियः ॥ १०१ ॥

सर्वे भवन्तः कुर्वन्तु संविधा अत्यलौकिकीः ।
महाराजकुमारोऽसौ याभिस्तुष्येन्महामनाः ॥ १०२ ॥

अमू साक्षाद् रामांशौ वै शत्रुघ्नभरतावुभौ ।
मनोरमैर्गुणगणै रामलक्ष्मणसन्निभौ ॥ १०३ ॥

---

१. शत्रुभित्—अयो०, मथु० ।

स्वर्भूपाताललोकेषु भूतयो या मुदावहाः ।
ताः सर्वा उपसीदन्तु ममाश्रमनिकेतने ॥ १०४ ॥

मैरेयाणि मनोज्ञानि भक्ष्याणि विविधानि च ।
दधिदुग्धसितादीनि कल्पयन्तु विशेषतः ॥ १०५ ॥

वासांसि सुमहार्हाणि भूषणानि ज्वलन्ति च ।
आलेपनानि दिव्यानि पुष्पाणि विविधानि च ॥ १०६ ॥

माल्यानि सुविचित्राणि मांसानि च मधूनि च ।
चतुर्विधानि चान्नानि तथा भोगान् पृथग्विधान् ॥ १०७ ॥

कल्पयन्तु ममागारं समेत्य सकलाः सुराः ।
यैरातिथ्यं प्रकुर्वीय भरतस्य महात्मनः ॥ १०८ ॥

इत्याज्ञप्ताः सुराः सर्वे तथेति समपादयन् ।
अलौकिकान् महाभोगान् भूमिजानां सुदुर्लभान् ॥ १०९ ॥

विदधौ भगवान् सोमः स्वाद्वन्नममृतोपमम् ।
चतुर्विधं बहुरसं संविधाभिः समन्वितम् ॥ ११० ॥

चोष्यं लेह्यं च पेयं च भक्ष्यं प्रादुरभूद्बहु ।
मैरेयाण्यसृजन् नद्यो मद्यं बहुविधं तथा ॥ १११ ॥

शीतलानि सुगन्धीनि प्रावहन्नुदकानि च ।
काश्चिदिक्षुरसस्रोतोवहाः काश्चित्पयोवहाः ॥ ११२ ॥

काश्चिन्मधुवहाः काश्चिद्दधिकुल्या घृतस्रवाः ।
तरवः प्रादुरभवन् विचित्रफलपुष्पिणः ॥ ११३ ॥

चन्दनालेपनसृजो दिव्यगन्धरसस्रवाः ।
मधुस्रवा विचित्रस्रग्वासोऽलङ्कारभूषिताः ॥ ११४ ॥

विचित्रमद्यमैरेयस्रवा मांसौघवाहिनः ।
अकस्मान्नन्दनवनगोचरः प्रववौ मरुत् ॥ ११५ ॥

अवर्षन् वारिदास्तत्र पुष्पवृष्टीः समन्ततः ।
सर्वतो देवगन्धर्वा वाद्यानि समवादयन् ॥ ११६ ॥

श्रूयते स्म कलो रम्यः सर्वतो वल्लकीध्वनिः ।
नारदस्तुम्बुरुश्चैव चक्राते वीणया ध्वनिम् ॥ ११७ ॥

विश्वाची च घृताची च मेनका पुञ्जिकस्थला ।
मञ्जुघोषा सुकेशी च रम्भा रामा तिलोत्तमा ॥ ११८ ॥

उर्वश्याद्या अप्सरसो ननृतुर्भरतागमे ।
विश्वकर्माकरोत्सैन्ये स्वं कर्म विविधं ततः ॥ ११९ ॥

इन्द्रनीलमणिच्छन्ना समन्ताद् भूरिदृश्यतः ।
नवशाद्वल संछन्ना कुञ्जपुञ्जसमावृता ॥ १२० ॥

नानाविधाश्च तरवः प्रादुरासन् समन्ततः ।
अवहन् स्वच्छपानीया नद्यः काञ्चनकूलिनीः ॥ १२१ ॥

शुकसारसकादम्बमयूरपिकनादिताः ।
राजहंसरवोपेताः कुञ्जमण्डपशोभिताः ॥ १२२ ॥

लतावितानसंछन्नकाञ्चनोर्त्तारभूमयः ।
सरस्वतीमुखाः पुण्या गङ्गागोदारीमुखाः ॥ १२३ ॥

तासां तीरप्रदेशेषु सैन्यमासाम्बभूव तत् ।
विचित्राणि च हर्म्याणि मणिहेममयान्यभुः ॥ १२४ ॥

बलभीजालकोपेता गृहाः स्वर्णविनिर्मिताः ।
चतुःशालानि रम्याणि निवासाश्च पृथग्विधाः ॥ १२५ ॥

गजानां वाजिनां चैव शाला अन्नादिसम्भृताः ।
रत्नप्राकारसद्वृत्तिगोपुराजिरमण्डिताः ॥ १२६ ॥

तत्र राजगृहं रम्यं शरन्मेघसुनिर्मलम् ।
सुतोरणं पृथक् स्थानं दिव्याम्बरसमन्वितम् ॥ १२७ ॥

दिव्यास्तरणसम्पन्नं सर्वतः सौरभोर्मियत् ।
शशिशुभ्रमहातल्पसनाथभवनाञ्चितम् ॥ १२८ ॥

सर्वतः सर्वरसवद् दिव्यभोजनसंयुतम् ।
सर्वभोगे सुसम्पन्नं सुमृष्टमणिभाजनम् ॥ १२९ ॥

देवगन्धर्वनादाढ्यं श्रीमत्सर्वसुखान्वितम् ।
प्राविशद् भरतः श्रीमान् महर्षेराज्ञया तु तत् ॥ १३० ॥

पुरोधसा मुनिवरैर्द्विजवर्यैश्च मन्त्रिभिः ।
राजलोकैस्तथा सर्वैः सुहृद्भिर्बन्धुभिः सह ॥ १३१ ॥

तत्र सिंहासनं दिव्यं मणिरत्नविभूषितम् ।
चामरं तालवृन्तं च छत्रं च शशिनिर्मलम् ॥ १३२ ॥

प्रापश्यद् भरतः श्रीमान् प्रणम्यार्यधिया मुहुः ।
प्रणम्य च मुहुर्ज्येष्ठं रामं राजीवलोचनम् ॥ १३३ ॥

सेवां प्रदर्शयामास तत्रार्यस्य यथोचितम् ।
कदाचित्तालवृन्तेन वीजयामास भृत्यवत् ॥ १३४ ॥

कदाचिच्चामरकरः कदाचिच्छत्रपाणिकः ।
पादसंवाहनधिया कदाचिन्मणिपीठके ॥ १३५ ॥

करौ प्रचालयामास भरतो रामसेवकः ।
रामेणेवाभ्यनुज्ञातस्तत्रोपाविशदन्तिके ॥ १३६ ॥

उपविष्टाः समर्यादं मन्त्रिणश्च पुरोहिताः ।
सिषेविरे च तत्रामुं हाहाहूहूपुरोगमाः ॥ १३७ ॥

गन्धर्वा गायनवरा देवलोकेषु गोचराः ।
मृदङ्गान् मुरजान् वीणास्तालान् झर्झरकांस्तथा ॥ १३८ ॥

अवादयन्त पटहान् वाद्यानि मधुराणि च ।
ननृतुर्देव नर्तक्यो गन्धर्वाप्रवरा जगुः ॥ १३९ ॥

मूर्च्छनास्वरविस्तारैर्भरतं पर्यरञ्जयन् ।
आलेपनैः सुगन्धैश्च कस्तूरीकुङ्कुमादिभिः ॥ १४० ॥

माल्यैर्विचित्रैर्मधुरैः कुसुमैर्नन्दनोद्भवैः ।
वस्त्रैराभरणैश्चैव पर्यमोदन्त सैनिकाः ॥ १४१ ॥

सर्वे भोगाश्च सर्वेषामिच्छया पर्युपस्थिताः ।
शयनान्यासनान्युच्चैर्भूषणान्यम्बराणि च ॥ १४२ ॥

माल्यानि गन्धलेपाश्च स्वादून्यन्नाभ भूरिशः ।
फलानि मुखवासाश्च बभूवुः सुलभा नृणाम् ॥ १४३ ॥

ररञ्ज भरतस्यान्तः करणं वीक्ष्य तां श्रियम् ।
अहो स्वर्गोऽयमतुल इत्युच्चैरभिनन्दितः ॥ १४४ ॥

उपासाञ्चक्रिरे चैवं दिव्या युवतयः क्षणात् ।
कुबेरभवनादेत्य सहस्रं शतमेव च ॥ १५४ ॥

चाम्पेयहेमचपलागौराङ्ग्यो हरिणीदृशः ।
सहस्रं च शतं कान्ता आजग्मुः शक्रमन्दिरात् ॥ १४६ ॥

भरतस्योपासनार्थं सर्वाः काञ्चनसुप्रभाः ॥ १४७ ॥

काश्चिज्जगुश्च ननृतुः काश्चिद्वाद्यान्यवादयन् ।
काश्चिन्महर्षिणाऽऽज्ञप्ताः परिचेरुः सहस्रशः ॥ १४८ ॥

वृक्षा एव जगुस्तत्र वादित्राणि च दध्वनुः ।
इत्यद्भुतं वीक्षमाणा मुमुहुः सर्वतो जनाः ॥ १४९ ॥

या काश्च संविधास्तत्र वाञ्छिताः सैनिकैर्जनैः ।
परिधानान्नपानाद्यास्ताः सर्वा ऊहिरेद्रुमाः ॥ १५० ॥

महदद्भुतमालोक्य मुनेरातिथ्यकर्मणि ।
विस्मिता मानवाः सर्वे ज्ञात्वा श्रियममानुषीम् ॥ १५१ ॥

ये भोगा दिवि देवानां प्रापुस्तान भुवि मानवाः ।
भारद्वाजस्य वचनाद् भरतातिथ्यकर्मणि ॥ १५२ ॥

अनृत्यन् वल्लिकास्तत्र वल्लिका एव चो चोज्जगुः ।
वल्लिका वाद्यधारिण्यो वादयामासुरुच्चकैः ॥ १५३ ॥

सर्वमाश्चर्यमभवत् पश्यतां सर्वतो नृणाम् ।
पीत्वा कादम्बरीं सैन्यास्तरुस्कन्धपरिस्रुताम् ॥ १५४ ॥

रेमिरेस्वर्गवेश्यामिर्दिव्यालङ्कारभूषिताः ।
परे नदीस्वरूपेण वहन्तीं मदिरां पपुः ॥ १५५ ॥

वृक्षस्कन्धस्थितान्यादुर्भक्ष्याणि विविधानि च ।
नदीनां पङ्कप्रायाणि पायसानि च लेभिरे ॥ १५६ ॥

यत्र तत्रैव सुलभा भोगाः समभवंस्तदा ।
मद्यं मांसं च सुस्वादु साधुक्लृप्तं सुपाचितम् ॥ १५७ ॥

इष्यते यस्य यद्यावत्तस्य तत्सुलभं तदा ।
बभूव भरतातिथ्ये महर्षेर्योगसिद्धितः ॥ १५८ ॥

एकैकं पुरुषं तत्र पञ्च षट् च मृगीदृशः ।
उपासाञ्चक्रिरे भूयः स्नापनालेपनादिषु ॥ १५९ ॥

सुवर्णकूलिनीनां च कूलेषु सरितां तदा ।
स्निग्धकल्पद्रुमच्छायाशीतलेषु सुगन्धिषु ॥ १६० ॥

संस्थितान् पुरुषान् नार्यः स्वर्गादेत्य सिषेविरे ।
पादसंवाहनं चक्रुः काश्चिद् दिव्या मृगीदृशः ॥ १६१ ॥

वाजिनो वारणाश्चोष्ट्राः खरा अश्वतरा वृषाः ।
पपुः सुराप्रवाहासु सरित्सु मुदिता इह ॥ १६२ ॥

सैनिकान् भोजयामासुर्भक्त्या दिव्या मृगीदृशः ।
विकारानैक्षवान् रम्यान् लाजापूपान् मधूनि च ॥ १६३ ॥

तृप्ता नैवोपभुक्तास्ते रामकामप्रपूरिताः ।
विसस्मरुरयोध्यामत्यखिलानन्द भोगदाम् ॥ १६४ ॥

नाभिरन्तुं[1] च तेऽन्यत्र जनाश्चक्रमिरे ततः ।
सुतृप्ता मुदिता नैव रामदर्शनलालसाः ॥ १६५ ॥

भरतायाशिषोऽकुर्वन् रामस्य जगतस्तथा ।
ऐरयन् मुदिता वाचं भरतस्यानुयायिनः ॥ १६६ ॥

राजपुत्र चिरंजीव स्वर्गे सम्प्रापिता वयम् ।
अमुञ्जमहि महाभोगान् मर्त्यलोके सुदुर्लभान् ॥ १६७ ॥

---

१. गन्तुम्—मथु० ।

रामस्य दर्शनं तेऽस्तु सर्वान् कामानवाप्नुहि ।
इति नानास्वरोपेतां गिरं लोका वभाषिरे ॥ १६८ ॥

दिव्यासवरसोन्मत्ता दिव्यभोगोपभोगिनः ।
दिव्यामृतान्नसुहिता दिव्यालङ्कारभूषिताः ॥ १६९ ॥

न तत्र मलिनः कश्चिदासीन्नाभूषितस्तथा ।
नानुद्वर्त्तितदेहश्च नाधौतवसनो जनः ॥ १७० ॥

सर्वेषां पार्श्वगा आसन् वाय्वो मैरेयसम्भृताः ।
नद्यश्चापूपकूलिन्यः पायसप्रवहास्तदा ॥ १७१ ॥

कामधेनुसमा गावः स्वर्गात्तत्रामिपेदिरे ।
तासां क्षीरैः सर्वकाममयैः प्रमुदिता जनाः ॥ १७२ ॥

वितानिन्यो द्रुमाश्चासन् सर्वकामोपभोगदाः ।
अवहन् मांसमम्भारान् सुस्वादुमृदुपाचितान् ॥ १७३ ॥

अपश्यंस्तेषु मांसानि नानारूपाणि सैनिकाः ।
मार्गान्याजानि वाराहाण्याज्याक्तानि मृदूनि च ॥ १७४ ॥

सुगन्धीनि सभोज्यानि मृष्टानि मधुराणि च ।
मयूरतित्तिरिमुखपक्षिमांसान्यनेकशः ॥ १७५ ॥

मत्स्यभेदाननेकांश्च शालिमद्गुररोहिताम् ।
पाठीनपीत[1]शृङ्गाटान् घृताक्तांश्च सुपाचिताम् ॥ १७६ ॥

ददावन्यस्तथान्यस्मै स्वादुस्वादु प्रियं तदा ।
सहस्रशः पाकभेदाः शाकभेदाः सहस्रशः ॥ १७७ ॥

वीक्ष्याभवन् जनास्तत्र विस्मिताः सर्वतस्तदा ।
दधिदुग्धासितादीनि स्वर्णपात्रेषु भूरिशः ॥ १७८ ॥

यथेष्टं लेभिरे लोका भरतातिथ्यभोजने ।
शर्कराः पायसान्युच्चैर्यत्र कुत्रापि लेभिरे ॥ १७९ ॥

सर्वे भोगा अदृश्यन्त वस्त्रालङ्कारलेपनाः ।
उपानहः पादुकाश्च यानानि गजवाजिनः ॥ १८० ॥

अञ्जनीयाः कुञ्जनीयाः कंकाताद्याः सुपेशलाः ।
भाजनानि स्वर्णरूप्यरत्नजानि समन्ततः ॥ १८१ ॥

चन्दनानि विचित्राणि वस्त्राणि कुसुमानि च ।
नारीणां च नराणां च ये भोगाः सुखदायकाः ॥ १८२ ॥

त आसन्नाश्रमे तस्य महर्षेः स्वर्गसन्निभे ।
दर्पणा यावकालेयास्तैलानि सुरभीणि च ॥ १८३ ॥

---

१. मीन० —मथु० ।

उष्णोदकानि दिव्यानि स्वर्णकुम्भभृतानि च ।
शस्त्राण्यस्त्राणि दिव्यानि धनूंषि सुमहान्ति च ॥ १८४ ॥
शयनासनसंव्यानभोजनीयान्यनेकशः ।
लेभिरे तत्र तत्रैव यथेष्टं सैनिका जनाः ॥ १८५ ॥

सोत्पलाः सुजलाः शुद्धाः सपद्मवनराजयः ।
हेमरत्नसमाबद्धनिःश्रेणीसुमनोहराः ॥ १८६ ॥
विरेजिरे ह्रदास्तत्र स्नानार्थं विविधा नृणाम् ।
तेषु स्नात्वा पर्यदधुर्वस्त्राण्याभूषणानि च ॥ १८७ ॥

स्वप्नकल्पं तु तज्जातं नृणां रात्रंदिनं सुखम् ।
मुनिनाकृतमातिथ्यं भरतस्य महात्मनः ॥ १८८ ॥
विलोक्य विस्मिताः सर्वे न ततो यातुकामुकाः ।
अरमन्ताश्रमेतस्य देवा इव हरेः पुरे ॥ १८९ ॥

यैर्नाविकलितः स्वर्गो दिव्यभोगोपबृंहितः ।
तैरेष साक्षात्संदृष्टो महर्षेः कृपया तदा ॥ १९० ॥
क्रीडतां दिव्ययोषाभिर्नराणां मुदितात्मनाम् ।
व्यतीयाय निशा सर्वा भारद्वाजाश्रमे शुभे ॥ १९१ ॥

ततो जातातिथ्ये नरपतिकुमारे कृतसुखे
महर्षेराज्ञातः प्रतिययुरथ स्वर्गविषयाः ।
सगन्धर्वा नार्यो विविधसुखभोगाश्च विबुधाः
क्षणात्ते शक्राद्या द्रुतमदृशिमापुः[1] सपदि ते ॥१९२॥

महर्षेरातिथ्यं दशरथकुमारस्य य इदं
शृणोते श्रद्धावानुषसि शुचिरुत्थाय सततम् ।
न तस्यालक्ष्मीः स्यान्नच दुरितसम्भूतिरतुलां
श्रियंलब्ध्वा[2] लोके भजति मुदमारोग्यमपि यः ॥१९३॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे
भारद्वाजकृतभरतातिथ्यवर्णनं नाम
चतुस्त्रिंशोऽध्यायः ॥ ३४ ॥

---

१. दर्शि०—मथु० । २. लब्धा—अयो०, मथु० ।

पञ्चत्रिंशोऽध्यायः

ब्रह्मोवाच

अथ प्राभातिकीं वेलामधिगम्य सुखोषितः[1]।
भरतः प्रीतहृदयः कृतस्नानार्चनक्रियः॥ १॥

समये मुनिमभ्येत्य हुताग्निं विधिवत्तदा।
प्राञ्जलिः सन्नतस्कन्धः पुरस्तात्पर्युपस्थितः॥ २॥

तमपृच्छन्मुनिवरो वीक्ष्य कोमलया दृशा।
कच्चिददद्य सुखं रात्रिर्व्यतीयाय तवाश्रमे॥ ३॥

कच्चित्ते सैनिकाः सर्वे सुखमत्रा वसन् निशि।
तम ब्रवीत् ततो राजकुमारो भरतस्तदा॥ ४॥

कृताञ्जलिपुटोधीमान् विनतः प्रणयान्वितः।
प्रणम्य बहुशः प्रीतो दृष्ट्वा सिद्धिमलौकिकीम्॥ ५॥

यैर्नावकल्पितो ब्रह्मन् स्वर्गलोकः सुखालयः।
तेऽपीह मामका लोकाः स्वर्गस्था अभवन् निशि॥ ६॥

सभृत्यः सहसैन्यश्च सामात्यः सपुरोहितः।
त्वया स्वर्गोचितं सौख्यमहमद्य समागतः॥ ७॥

येकेचन महाभोगा मर्त्ये लोकेऽतिदुर्लभाः।
तेऽभूवन्निहलोकानां मामकानां त्वदाज्ञया॥ ८॥

आश्रमोऽयं महर्षेस्ते स्वर्गो लोकः सुखालयः।
यथा मुमुदिरे लोकाः सर्व एव न संशयः॥ ९॥

किं किं नु कथयाम्यद्य नृणां भोगसुखं महत्।
सर्वे कामा इहैकत्र निवसन्ति तवाश्रमे॥ १०॥

स्वर्गस्थानामियं रात्रिर्गतास्माकं महामुने।
तवानुग्रहमाहात्म्यं किं वाच्यमसकृन्मया॥ ११॥

तृप्ताः कामरसैर्भोगैरपेताध्वश्रमा जनाः।
नानाभक्ष्यौघसुप्रीताः शयनासनतोषिताः॥ १२॥

आनन्दिता न किमपि वक्तुं शक्ताश्च मामकाः।
अधुनाऽऽज्ञापयतु[2] मां गन्तुमार्यस्य सन्निधौ॥ १३॥

---

१. चितः—अयो०। २. आज्ञापयतु—अयो०, मथु०।

प्रस्थापयाशिषं दत्त्वा लभे तद्दर्शनं यथा।
एतावन्मे प्रियं ब्रह्मन् सुलभं भवदाशिषा ॥ १४ ॥

केन मार्गेण गन्तव्यं मया ब्रह्मविदां वर।
तन्निरूपय मे भक्त्या सन्नताय महाशय ॥ १५ ॥

एवमुक्तो मुनिश्रेष्ठो भरतेन तदा ब्रज।
अस्ति तात महान् रम्यश्चित्रकूटो महीधरः ॥ १६ ॥

इतो विदूरेण पथा कान्तिमान् भूरिधातुभिः।
विचित्रशृङ्गः कनकस्रावियापाणसंधिभृत् ॥ १७ ॥

अनेकपक्षिसंरावजुष्टकाननमञ्जुलः ।
अनेकविधपश्वौघसेवमानदरीगृहः ॥ १८ ॥

गिरेस्तस्योत्तरे पार्श्वे भाति मन्दाकिनी नदी।
बहुपुष्पभराक्रान्ततरुजुष्टतटद्वया ॥ १९ ॥

हंससारसचक्राह्वकादम्बकुलकोलिनी ।
तथा नानाविधा नद्यश्चित्रकूटाचलोद्गताः ॥ २० ॥

वाल्मीकेराश्रमस्थानं महर्षेस्तत्र शोभते।
तदन्तरा महापुण्यं[1] पुण्यारण्यनिषेवितम् ॥ २१ ॥

तस्मिन्नचलवर्ये तु वद्ध्वाऽऽश्रमपदं निजम्।
जानकीलक्ष्मणोपेत एकान्ते वसति स्वयम् ॥ २२ ॥

रामः कमलपत्राक्ष इति भूयः श्रुतं मया।
तमुपैहि महाभाग द्रक्ष्यसि स्वेष्टपूर्तये ॥ २३ ॥

इतस्त्वं दक्षिणेनैव पथा तत्र गमिष्यसि।
महत्या सेनया युक्तो विलङ्घ्य यमुनां नदीम् ॥ २४ ॥

ततो गन्तासितं देशं चित्रकूटं मनोरमम्।
एवमाभाष्यमाणे तु भरते मुनिना तदा ॥ २५ ॥

सम्प्रस्थितायां सेनायां तुमुले भवति ध्वनौ।
कौसल्यादद्या राजदारा मुनेर्दर्शनकाङ्क्षया ॥ २६ ॥

आययुस्तत्र ताः सर्वा भरतेन च दर्शिताः।
उवाच भरतः श्रीमान् सूचयंस्तां महर्षये ॥ २७ ॥

इयं हि कोसलेन्द्रस्य सुता ब्रह्मन् ययाजनि।
त्रैलोक्यसुन्दरो रामः सुविक्रान्तगुणोर्जितः ॥ २८ ॥

---

१. महत्-अयो०, मथु०।

सेयं साध्वी महाशोकवह्निना तप्तमानसा ।
अनर्गलगलद्बाष्पधौतोननविलोचना ॥ २९ ॥

कौसल्या नाम भगवन् निःश्वसन्ती सुदुःखतः ।
विलोक्यतामिह प्राप्ता भवन्तमभिवन्दितुम् ॥ ३० ॥

असौ मगधराजस्य तनया दुःखकर्शिता ।
कौसल्यामनुदीर्घेण संतापेन निमीलिता ॥ ३१ ॥

सुमित्रा नाम यासूत पुत्रौ विक्रमशालिनौ ।
त्रैलोक्यप्रथितप्रख्यौ वीरौ शत्रुघ्नलक्ष्मणौ ॥ ३२ ॥

एनां निरीक्षसे ब्रह्मन् यथामूलमुपार्जितम् ।
शोकस्यायशसश्चैव तथा वीरौ प्रवासितौ ॥ ३३ ॥

श्रीरामलक्ष्मणौ सद्यो राजा चापि मृतिं गतः ।
सर्वानर्थमहीमेनां जानीहि मम मातरम् ॥ ३४ ॥

यया मम यशो लोके हर्त्तुमारब्धमुग्रया ।
तदहं त्वार्यदास्येन स्थापयिष्यामि निश्चितम् ॥ ३५ ॥

एवमाख्यातवान् मातृर्भरतः शोककर्षितः ।
सर्वाभिः प्रणतो भूयः स मुनिर्दीर्घदर्शनः ॥ ३६ ॥

उवाचाश्वासयन् विद्वान् भरतं राजनन्दनम् ।
मा वीर दोषदृष्ट्यैनां योजयस्वात्ममातरम् ॥ ३७ ॥

केकयीं भूरिमाव्यर्थानुकूलधिषणावतीम् ।
रामप्रवासनं चैतत्सुखायैव भविष्यति ॥ ३८ ॥

ततोऽभिवाद्य भरतो भरद्वाजं महामुनिम् ।
सम्पूज्य मातरः सर्वास्तेनाश्वासितमानसाः ॥ ३९ ॥

प्रतस्थुः सहितास्तस्य कृत्वा चाभिप्रदक्षिणम् ।
आमन्त्र्य च महामन्त्रसिद्धं तमृषिमादृतः ॥ ४० ॥

प्रययौ भरतः साकं सेनया दीर्घया तया ।
असज्जन्त गजा अश्वाः स्यन्दनाश्च महाध्वजाः ॥ ४१ ॥

उच्चावचानि यानानि प्रययुः प्रस्थिते बले ।
महान्ति राजयानानि रेजुः स्वर्णपरिच्छदैः ॥ ४२ ॥

ध्वजारोहा गजास्तुङ्गाः सपक्षाः पर्वता इव ।
निर्ययुः सहसा सैन्ये भरतस्याभिगच्छति ॥ ४३ ॥

अश्वाः पल्याणिनो रेजुः स्वर्णरत्नपरिच्छदाः ।
मरुदुत्तालगतयो गच्छन्तो बलमध्यतः ॥ ४४ ॥

दासेरकाः स्वर्णरत्नभारवाहा विनिर्ययुः ।
रथाश्च दीर्घघोषाढ्याः कोविदारध्वजा ययुः ॥ ४५ ॥

शिविकामास्थितस्तत्र भरतः सौम्यदर्शनः ।
रेजे श्रीरामभक्तिश्रीसंदोहेन कृतास्पदः ॥ ४६ ॥

तमनुप्रययौ श्रीमाच्छत्रुघ्नो मधुराकृतिः ।
सर्वे च रामचन्द्रस्य दर्शनस्पृहयान्विताः ॥ ४७ ॥

मातरो राजदाराश्च प्रययुर्यानमास्थिताः ।
यमुनामतरत्सैन्यं सद्योदक्षिणगामि तत् ॥ ४८ ॥

संहृष्टद्विपवाजियोध्वनिवहव्याप्ता मृगान् पक्षिणः,
संत्रासेन विभीषयन्त्यतितरां क्षुब्धाब्धिनिर्घोषिणी ॥
सा सेना जविनी वनानि परितः सम्बाधमाना गिरी-
नुद्देशांश्च निपातयन्त्यभिययौ श्रीचित्रकूटोन्मुखी ॥ ४९ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे सैन्यप्रस्थानं नाम पञ्चत्रिंशोऽध्यायः ॥ ३५ ॥

❁

षट्त्रिंशोऽध्यायः

ब्रह्मोवाच

गर्जमाना महासेना रघूणां सिन्धुसन्निभा ।
मत्तमातङ्गनिवहव्याप्तक्षोणितला ययौ ॥ १ ॥

अश्वैः सिन्धुतरंगाभैरुच्छलद्भिः समन्ततः ।
छादयन्ती महीं मार्गान् वनानि विदिशोदिशः ॥ २ ॥

महतीमटवीं प्राप्य चित्रकूटोपशल्यगा ।
अनालक्ष्याभवत्सेना तरुस्तोमेषुभूरिषु ॥ ३ ॥

तान्यरण्यान्यतिक्रम्य नदीश्च विततोर्मिगाः ।
श्रीमानासादयाञ्चक्रे चित्रकूटमहागिरिम् ॥ ४ ॥

तत्र शुश्राव भरतो झिल्लीगणमुनिःस्वनम् ।
राजतालीवनध्वानं समीरजवसम्भवम् ॥ ५ ॥

भरतो वीक्ष्य तं देशं चित्रकूटसमीपतः ।
उवाच विस्मतः किंचिच्छत्रुघ्नं निकटस्थितम् ॥ ६ ॥

नूनं स एव देशोऽयं शत्रुघ्न सुनिरीक्ष्यते ।
भारद्वाजेन मुनिना यो मे संसूचितः पुरा ॥ ७ ॥

अग्रतो दृश्यतामेष पर्वतो नन्दनोपमैः ।
वनैः संकीर्णविविधाधित्यकोपत्यकावनिः ॥ ८ ॥

अस्यै गण्डगिरिग्रावस्राविणां निर्झराम्भसाम् ।
श्रूयते तुमुलो ध्वानो झिल्लीनिर्घोषसंयुतः ॥ ९ ॥

अमी मयूराः कूजन्ति गिरिकुञ्जनिवासिनः ।
येषां शब्दो दरीमध्यप्रतिशब्देन वृंहितः ॥ १० ॥

अमी नगशिखाग्रेषु कोकिलाः कलनादिनः ।
शुकालिकोककादम्बध्वनिरापूरयन् वनम् ॥ ११ ॥

अज्जृम्भन्तेऽमितः शैलं पुष्पिताश्च महीरुहाः ।
नानाविधाः स्वसौरभ्यैर्वनमापूरयन्ति च ॥ १२ ॥

अयं मन्दाकिनीवारितरङ्गावलिशीलनः ।
आवाति शीतलस्पर्शो वायुरामोदवर्द्धनः ॥ १३ ॥

नूनमस्मिन् गिरावार्यो भार्यया लक्ष्मणेन च ।
सहितो वसति क्षेममेकान्तसुखिताशयः ॥ १४ ॥

अमी वनमृगाः कामं रामदर्शनसस्पृहाः ।
त्यक्तवाणभया नूनं विश्रब्धा विचरन्त्यहो ॥ १५ ॥

अस्मिन् गिरिवरेभ्रातर्गह्वरे भूरिभूरुहे ।
गवेषणीयो धर्मात्मा ज्येष्ठो नः सत्यपालनः ॥ १६ ॥

विहाय सम्पदो राज्यं पुरीं बन्धु जनांस्तथा ।
वनकुञ्जप्रियो रामः शैलेऽस्मिन् विहरत्यलम् ॥ १७ ॥

इत्युक्त्वा भरतस्तत्र शत्रुघ्नं प्रति सैनिकान् ।
आदिदेश स्वयं भ्रातुः श्रीरामस्य गवेषणे ॥ १८ ॥

गवेषयन्तस्ते तत्र पुरुषा गह्वरे वने ।
विचेरुः शस्त्रकलितास्त्रासयन्तोवनेचरान् ॥ १९ ॥

प्रविश्य विपिनं सान्द्रं द्रुमवल्लीगणाकृतम् ।
मृगया चक्रिरे वीरा भरतस्याज्ञया गिरौ ॥ २० ॥

अग्रे च ददृशुर्धूमलेखां गगनसंसृतान् ।
आगत्यसूत्रयामासुर्भरतं सैनिका जनाः ॥ २१ ॥

गवेषितं वनं सर्वं मुनिवृन्दनिषेवितम् ।
न तत्र दृष्टस्ते भ्राता रामस्त्रैलोक्यरञ्जनः ॥ २२ ॥

एकान्ते तु गिरेर्भागे महागह्वरकानने ।
दृश्यते धूमलेखाभिर्व्याप्तं गगनमण्डलम् ॥ २३ ॥

नूनं तत्र तव भ्राता भविष्यति सभार्यकः ।
न तत्र शक्यते गन्तुमस्माभिः कुलनन्दन ॥ २४ ॥

वायुस्तत्र प्रभोराज्ञाकारी वचनगोचरः ।
गन्तुं न दत्ते सामान्यान् परावर्तयतीव नः ॥ २५ ॥

तच्छ्रुत्वा वचनं तेषां भरतो भ्रातृदर्शने ।
अत्युत्कलिकया युक्तो दूरे संस्थाप्य तां चमूम् ॥ २६ ॥

विवेश तं गिरिं घोरं वनावलिसमावृतम् ।
सेव्यमानो मरुद्भिस्तैर्धुतिपङ्कजराजिभिः ॥ २७ ॥

सर्वे भवन्तस्तिष्ठन्तु सैनिका इह दूरतः ।
एकोऽहं तत्र यास्यामि यत्रार्यः सह भार्यया ॥ २८ ॥

महाभाग्यवता भ्रात्रा सौमित्रयेण संयुतः ।
शत्रुघ्नश्च सुमन्त्रश्च वशिष्ठाद्याश्च मामनु ॥ २९ ॥

आयान्तु रघुनाथस्य तस्य दर्शनहेतवे ।
इत्युक्त्वा प्रययौ श्रीमान् भरतोऽन्यान् निषेधयन् ॥ ३० ॥

दिविधूमाग्रमालोक्य हर्षितो वेगवत्तरः ।
जगाम पुलकस्तोमव्याप्तसर्वाङ्गसुन्दरः ॥ ३१ ॥

रामस्तु भगवांस्तत्र भार्यया लक्ष्मणेन च ।
सह कुर्वन् कथाः स्फीता मोदते स्म महाभुजः ॥ ३२ ॥

तत्र तं वाहिनीशब्दं श्रुत्वावननिवासिनः ।
सिंहाद्याः कन्दरान्तःस्था उत्पेतुः कृतगर्जनाः ॥ ३३ ॥

व्याघ्रा निलिल्युः सम्भीत्या कोलाश्चैव विदुद्रुवुः ।
अन्ये च पशवो लिल्युर्यत्र कुत्रापि सम्भ्रमाः ॥ ३४ ॥

स्थानं त्यक्त्वा परे चेलुर्भ्रेमुरन्ये भयातुराः ।
परे चकितवच्चासन् महात्रासससमावृताः ॥ ३५ ॥

एवं संचाल्यमानेषु पशुवृन्देषु पक्षिषु ।
आसीन्महान् परिक्षोभः कानने सैन्यशब्दजः ॥ ३६ ॥

दावाग्निनेव सम्भीताः सर्वतः पशुपक्षिणः ।
आर्त्तस्वरयुताश्चक्रुर्भ्रमणां सर्वतो दिशम् ॥ ३७ ॥

केचिद्दरीषु विविशुः केचित्कुञ्जेषु लिल्यिरे ।
केचिद्गह्वर देशेषु तस्थुः सातंकमातुराः ॥ ३८ ॥

वनचालं समुद्वीक्ष्य लक्ष्मणो भ्रातृवत्सलः ।
सेनागमं विनिश्चित्य भ्रातरं समवोचत ॥ ३९ ॥

आर्य संश्रूयते शब्दः सेनाया इव कानने ।
तन्मूलं ज्ञातुमिच्छामि केयं सेनास्ति कस्य वा ॥ ४० ॥

अथोवाच प्रभुर्ज्ञात्वा सेनाशब्दमुदित्वरम् ।
ज्ञायतां कस्य सेनेयं भ्रातरत्रघनेवने ॥ ४१ ॥

आर्यस्याज्ञामुपादाय लक्ष्मणो बलिनांवरः ।
शैलोद्देशं समारुह्य शालस्कन्धमधिष्ठितः ॥ ४२ ॥

अपश्यन्महतीं सेनां रघूणां सिन्धुघोषिणीम् ।
गजवाजिरथ व्रातसंछादितमहीतलाम् ॥ ४३ ॥

सुगुप्तां वीरपुरुषैः कोविदारध्वजै रथैः ॥ ४४ ॥

ततो देशात् समुत्तीर्य लक्ष्मणो वीर्यवत्तमः ।
अब्रवीदार्यसविधे त्वरारोषसमन्वितः ॥ ४५ ॥

आर्यजानीहि सेनेयं भरतस्य सुदुर्धरा ।
गजाश्वरथसंछन्ना कोविदारध्वजाङ्किता ॥ ४६ ॥

आवां प्रवास्य विपिने तातं कृत्वा तथागतिम् ।
प्राप्तोऽभिषेकस्तेनैव राज्ये वंशक्रमागते ॥ ४७ ॥

जीवतोरावयोरेष न तथापि मनोरथम् ।
परिपूर्णतमं धत्ते सचिन्तो ज्ञातकण्टकः ॥ ४८ ॥

इति हन्तुं वनेऽप्येष प्राप्तो नौ दुष्टमानसः ।
महत्या सेनया युक्तः साशङ्कं केकयीगिरा ॥ ४९ ॥

दृश्यन्ते परितः शैलं कोविदारध्वजा रथाः ।
वनेऽत्र सर्वतो व्याप्ता रघूणां महती चमूः ॥ ५० ॥

अग्निर्निर्वाप्यतामार्य धूमलेखाभिसूचकः ।
इत एवाभिवर्त्तेरन्न यथा सैनिका भटाः ॥ ५१ ॥

प्रजावती प्रविशतु गिरेर्गुह्यतमां गुहाम् ।
धनुः सज्यं विधायाशु कवचं परिधीयताम् ॥ ५२ ॥

अद्यावां भरतो हन्यादावां वा भरतं रिपुम् ।
एष कालः परिप्राप्तः सपत्नस्य पराजये ॥ ५३ ॥

अद्यार्यः पश्यतुतमां मम चापपराक्रमम् ।
मम बाहुबलोत्क्षिप्ताः शरा विध्यन्तु विद्विषः ॥ ५४ ॥

धर्मश्चैवायमस्माकं वध्यः पूर्वापकारकृत् ।
अस्माभिरेव यत्कार्यं तदनेन स्वयं कृतम् ॥ ५५ ॥

एवं स्थिते तु धर्मेण यदि हन्याव विद्विषः।
तदा निष्कण्टकं राज्यं नन्वार्यस्य भविष्यति ॥ ५६ ॥

इति श्रुत्वा वचस्तस्य रामः सत्यभृतां वरः।
ऊचे सर्वमनःसाक्षी भगवान् कञ्जलोचनः ॥ ५७ ॥

किमर्थमप्रियं ब्रूषे भरते धर्मकारिणि।
मम प्राणप्रिये तस्मिंस्त्वत्तोऽपि प्रियकारिणि ॥ ५८ ॥

कदा नु भवता दृष्टं भरतेन कृतं मयि।
अप्रियं तेन नैवं ते शङ्कनीयमतः परम् ॥ ५९ ॥

[1]भरतात्ते न भेतव्यं ममातिप्रियकारिणः।
तृतीया सा तु मे मूर्तिरन्तर्दृष्ट्यावलोकय ॥ ६० ॥

प्रथमा वासुदेवाख्या सर्वेषां मुक्तिदायिनी।
संकर्षणाख्या द्वितीया सर्वैश्वर्यनिधिः प्रभुः ॥ ६१ ॥

प्रद्युम्नाख्या स्तृतीयेयं यामवाप्य मतोऽन्यदः।
चतुर्थी त्वनिरुद्धाख्या य एषा भवतोऽनुजः ॥ ६२ ॥[1]

एवं हि मम प्रियो वै भरतः प्राणसम्मितः।
दिदृक्षुरेषमाभ्येति परावर्त्तयितुं वनात् ॥ ६३ ॥

भरतं स्वाधिकं विद्धि पुनरेव न वक्ष्यसि।
द्रक्ष्स्यनुपदं तस्य मयि भक्तिं महात्मनः ॥ ६४ ॥

सेनेयं तस्य वीरस्य दृश्यतां परितो गिरिम्।
इमौ तौ वायुजवनौ तुरगौ तस्य धीमतः ॥ ६५ ॥

अयमग्रेसरो हस्ती सेनायाः परिदृश्यते।
नाम्ना शत्रुञ्जयो घोरः पितुर्मे प्रीतिवर्द्धनः ॥ ६६ ॥

इमौ भरत शत्रुघ्नौ संदृश्येते महाभुजौ।
सेनामुखं मण्डयन्तौ मम दर्शनवाञ्छिनौ ॥ ६७ ॥

वैदेहीं च विशेषेण दिदृक्षू भक्तिसंयुतौ।
इत्येवं कथयन् रामो लक्ष्मणं प्रति तद्बलम् ॥ ६८ ॥

ददर्श सीतासहितः प्रान्नुवन्महतीं मुदम्।
लक्ष्मणस्तु तथोक्तेन ललज्जे विमृशन् हृदि ॥ ६९ ॥

ततश्च भरतः सम्यक् सन्निवेश्य बलं महत्।
योजनार्द्धाद् गिरेस्तस्य स्थानसम्मर्दशङ्कया ॥ ७० ॥

---

१. श्लोक सं० ६०-६२ नास्ति—बड़ो०, अयो०, मथु०।

वशिष्ठं च महाभागो मातृरानेतुमादिशत् !
ततो जगाम धर्मात्मा सीतारामदिदृक्षया ॥ ७१ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे शैलागमनो नाम षट्त्रिंशोऽध्यायः ॥३६॥

●

सप्तत्रिंशोऽध्यायः

ब्रह्मोवाचः

पृच्छ्[1]मानो मुनींस्तस्य चित्रकूटवनालयान् ।
दर्शयन् मन्त्रिणो मान्यान् कौतुकानि च भूरिशः ॥ १ ॥
लक्ष्मणस्य च कृत्यानि वने तस्मिन् विलोकयन् ।
नदीं मन्दाकिनीमारात्सम्पश्यञ्छीतलानिलाम् ॥ २ ॥
फलानि चापि पुष्पाणि पर्णानि विविधानि च ।
रामलक्ष्मणसीताभिरुच्चैरवचितान्यलम् ॥ ३ ॥
कलयन् कलनादांश्च श्रृण्वन् विविधपक्षिणाम् ।
सम्प्राप तं शुभं देशं यत्रार्यः सह सीतया ॥ ४ ॥
लक्ष्मणेन च संयुक्तो मोदते हास्यकेलिभिः ।
अत्युत्कण्ठाभराक्रान्तः पुलकाञ्चितविग्रहः ॥ ५ ॥
प्राप्य मन्दाकिनीं पुण्यां बृहदूर्मिभुजाकुलाम् ।
अब्रवीत्स्वजनांस्तत्र विषादविकलो भवन् ॥ ६ ॥
अद्य द्रक्ष्याम्यहं भाग्यैर्वीरेन्द्रं धर्मपालकम् ।
मृगाजिनधरं शान्तं वन्यवृत्तिसमाश्रयम् ॥ ७ ॥
पर्णशालास्थितं धीरं कन्दमूलफलाशिनम् ।
धिङ्मां यस्य कृतेत्वार्य एवंगतिमुपागतः ॥ ८ ॥
इत्येवं विलयन् भूयो भरतस्त्रपयाकुलः ।
ददर्श पर्णशालां तां लक्ष्मणेन विनिर्मिताम् ॥ ९ ॥

---

१. आर्ष प्रयोग है ।

वन्यवृक्षदलैर्व्याप्तां विशालां कान्तिशालिनीम् ।
यज्ञवेदिसमां पुण्यां तूणीशरविभूषिताम् ॥ १० ॥

द्योतयन्तीं दिशः कान्त्या दुर्धर्षामितरैर्जनैः ।
वंशस्तम्भयुतां रम्यां श्रीरामेण चिरोषिताम् ॥ ११ ॥

सुवर्णविन्दुशालिभ्यां धनुर्भ्यां च विभूषिताम् ।
असिभ्यां हेममुष्टिभ्यां द्योतमानां स्वभावतः ॥ १२ ॥

गोधाङ्गुलित्रशोभाढ्यां सिंहस्येव गुहां तु ताम् ।
वहिर्वेदीप्रविन्यस्तपावकोज्ज्वलदीपिताम् ॥ १३ ॥

तत्र सीतासहासीनं जटापुञ्जवभूषितम् ।
वल्कलौघकृतावासं कृष्णाजिनधरं प्रभुम् ॥ १४ ॥

वीरवाससमुद्भ्रान्तं सहजेन स्वतेजसा ।
त्रैलोक्यभोगभोक्तारमग्रजं स्वं ददर्श सः ॥ १५ ॥

लक्ष्मणेन सहासीनं सिंहस्कन्धं महाभुजम् ।
प्रसादसुमुखं सौम्यं दीप्तिमन्तं स्वभावतः ॥ १६ ॥

सर्वभूम्येकगोप्तारं सर्वत्रैलोक्यरक्षणम् ।
दृष्ट्वैव दूरतः शोकाद् विललाप सुदुःखितः ॥ १७ ॥

अहो क्वसा सभा नाथ प्रजामण्डलशोभिता ।
क्वेयं वनमृगव्याप्ता पर्णशाला त्वयोषिता ॥ १८ ॥

क्व तानि दिव्यवासांसि महार्हाणि तव प्रभो ।
क्वेमानि मृगचर्माणि वल्कलानि च भूरुहाम् ॥ १९ ॥

क्व तानि सुविचित्राणि माल्यानि सुरभीणि ते ।
क्वेमा जटा भस्मचिताः शिरसा वहसि स्फुटम् ॥ २० ॥

क्व ते यज्ञोद्भवो धर्मो भूरिसौख्यकरः प्रभो ।
क्व चायं वनवासोत्थः शरीरक्लेशसंचयः ॥ २१ ॥

क्व तेऽङ्गरागा विविधाः सुगन्धाश्चन्दनादिभिः ।
मलदिग्धाङ्गता क्वेयं महाराजकुमार ते ॥ २२ ॥

हा हन्त मन्निमित्तं ते दुःखमेतदुपस्थितम् ।
सुखसंवर्द्धितस्योच्चैः श्रीशालिनि पितुर्गृहे ॥ २३ ॥

धिङ्मां नृशंसया जातं मात्रा तादृशकर्मणा ।
तव प्रवासदं यस्य जीवनं लोकगर्हितम् ॥ २४ ॥

इत्युच्चैर्विलपन् दूराद् वाष्पान्धितविलोचनः ।
अप्राप्य पादग्रहणं न्यपतद्भुरतो भुवि ॥ २५ ॥

शोकाभितप्तो रामस्य व्यलुठत्पुरतोरुदन् ।
हा हार्येति सकृत्प्रोच्य न किंचित्पुनरूचिवान् ।। २६ ।।

वाष्पव्याकुलकण्ठोऽसौ पुनः प्रेक्ष्यार्यमुत्थितः ।
रुदन्नार्येति सम्प्रोच्य वक्तुं किमपिनाशकत् ।। २७ ।।

रुदस्तथैव शत्रुघ्नो ननाम चरणौ प्रभोः ।
उभौ तौ परिरभ्यार्यो बभूवाश्रुकलान्धितः ।। २८ ।।

ततः सुमन्त्र आदाय तावुभौ करयोर्दृढम् ।
भक्त्या निवेदयामास रामलक्ष्मणयोः पुरः ।। २९ ।।

रामलक्ष्मणशत्रुघ्नभरतांस्तत्र संगतान् ।
विलोक्य करुणाभ्यक्ता रुरुदुर्वनवासिनः ।। ३० ।।

तेऽयोध्यापतितनया गजेन्द्रतुल्या आजानुप्रथितविशालबाहुदण्डाः ।
सिंहांसाः परिपृथुवक्षसस्तदानीं संसक्ता मिथ उदभासयन् वनं तत् ।। ३१ ।।

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे भरतसंदर्शनो नाम सप्तत्रिंशोऽध्यायः ।। ३७ ।।

●

अष्टात्रिंशोऽध्यायः

ब्रह्मोवाच

तमाघ्राय शिरस्यार्यः परिरभ्य मुहुर्मुहुः ।
अङ्कमारोप्य दुःखार्तं समाधायान्वपृच्छत ।। १ ।।

क्व नु तात पितास्माकमभवत्पृथिवीपतिः ।
तं विहाय त्वमेकाकी कथं वनमुपागतः ।। २ ।।

नहि तस्मिन् गुरौ जीवत्यागन्तुमुचितो भवान् ।
चिरायाथ पुरीं त्यक्त्वा मन्ये त्वां दूरमागतम् ।। ३ ।।

किं च वत्स तवारण्य मुपागन्तुं प्रयोजनम् ।। ४ ।।

अपि नः कुशली तातः स राजा सत्यपालकः ।
येनेष्टं राजसूयैरप्यश्वमेधैरनेकशः ।। ५ ।।

स च ब्रह्मसभाश्रेष्ठस्तपस्वी विदिताखिलः ।
उपाध्यायोमतोऽस्माकं विधिवत्पूज्यते त्वया ॥ ६ ॥

अपि नो मातरः सर्वाः कुशलिन्यो यथा पुरा ।
अपि सत्कुरुषे तात यथापूर्वं पुरोधसम् ॥ ७ ॥

वृद्धं वशिष्टं यत्रैव रघूणां धर्म आहितः ।
अपि नः परमाचार्यः सुधन्वा सुखमेधते ॥ ८ ॥

अग्निकार्येषु युक्तो यः सम्यग्धर्म निवेदकः ।
काले काले विधातव्या इष्टीर्यः कुरुते शुभम् ॥ ९ ॥

अपि तान् पुरुषान् शूरान् क्षत्रिया ननु वर्त्तसे ।
अपि तान् मन्त्रिणो मान्यान् वृद्धान् मानर्यास स्वयम् ॥ १० ॥

अपि प्रबुद्धचसे काले चिन्तयन्नर्थमात्मनः ।
अपि ते संवृतो मन्त्रः सम्यक् फलति कर्मसु ॥ ११ ॥

अपि त्वमर्थैलघुभिः प्राप्नोषि सुमहोदयम् ।
अथक्रियैव ते दत्ते क्रिया फलमहोदयम् ॥ १२ ॥

अपि स्वयं मन्त्रिभिर्वा बुध्यसे वेद्यमर्थवत् ।
अपि मूर्खाननादृत्य पण्डितान् मन्यसे शुभान् ॥ १३ ॥

यैरर्थकृच्छ्रं प्राप्तोऽपि राजा कल्याणमश्नुते ।
वशिष्ठवामदेवाद्या ये नो मन्त्रिपुरोहिताः ॥ १४ ॥

अपि तान् मानयन् भक्त्या सभाजयसि धार्मिक ।
अपि ते दुष्कृतं हन्ति सुकृतौद्यैः पुरोहितः ॥ १५ ॥

अप्यमात्यान् यथार्हं त्वं नियोजयसि कर्मसु ।
अयथार्हं नियुक्तास्तु न भवन्ति क्रियाक्षमाः ॥ १६ ॥

अपि नो दण्डयस्युग्रैर्दण्डैर्मन्त्रिकृतैः प्रजाः ।
अपि तात त्वमात्मीयैः कदाचिन्नावमन्यसे ॥ १७ ॥

अपि ते मतिमान् दृष्टः शूरः सेनापतिस्तव ।
अपियोधात् कार्यकरान् दृष्टानाद्रियसे सदा ॥ १८ ॥

अपि दुष्टान् शठान् स्तब्धान् यथावदनुवर्त्तसे ।
अपि राज्यहरान् क्रूरान् नोन्मूलयसि तत्क्षणात् ॥ १९ ॥

अपि मान्यान् यथास्थानं मानयस्यादरादिभिः ।
अपि ते तत्पराः सेनाः सुसज्जाः कर्मकारिभिः[1] ॥ २० ॥

अपि धर्मार्थकामेषु परस्परमबाधयन् ।
विचारयसि नीतिज्ञ सर्वेषामुपबृंहणम् ॥ २१ ॥

---

१. कारिकाः— मथु० ।

अपि दीनान् दरिद्रांश्च सम्यग्भरसि राष्ट्रके ।
अप्याशिषो द्विजैर्दत्ताः सम्यग्गृह्णासि भक्तितः ॥ २२ ॥

अपि राज्ञां हितां नीतिं शास्त्रदृष्ट्या निरीक्ष्यसे ।
सामदाने भेददण्डौ यथावदनुपश्यसि ॥ २३ ॥

अपि त्वं सफलारम्भोऽस्यपि त्वं सफलागमः ।
अपि त्वं सफलादेशोऽस्यपि त्वं सफलेप्सितः ॥ २४ ॥

अपि ते बन्धवो दाराः सुहृदो मित्रवंशजाः ।
ज्येष्ठाः कनिष्ठाः पुरुषा अनुकूलाः समासते ॥ २५ ॥

अपि मान्धातृमुख्या नः कुलजाः पृथिवीभृतः ।
यामधुस्तां निजां वृत्तिं सम्यक्तानुतिष्ठसि ॥ २६ ॥

यया नीत्या नृपो विन्देत्परत्रेह च मङ्गलम् ।
तां नीतिमनु तिष्ठंस्त्वं सम्यक् पालयसि प्रजाः ॥ २७ ॥

इत्यापृच्छ्य रघुश्रेष्ठो भ्रातरं भरतं च तम् ।
यावत्तूष्णीं बभूवासौ तावदाह सुसन्नतः ॥ २८ ॥

किं मे राज्येन किं नीत्या राजधर्मेण किं प्रभो ।
नित्यं त्वत्पादयोर्दास्यं सम्प्राप्य सुखितात्मनः ॥ २९ ॥

अपीदृशव्यसनकृत्तवार्यकुलपांसनः ।
विनिन्द्यजीवितः सोऽहं किं जातो राघवे कुले ॥ ३० ॥

नूनं धर्मविहीनोऽस्मि निन्दितोऽस्मि जगत्त्रये ।
यस्य माता हतभगा तवाप्रियमुपाचरत् ॥ ३१ ॥

त्व मे राजा पतिर्ज्येष्ठः प्रभुर्भव महीपतिः ।
नाहं कनीयान् राज्यार्हः किमेवमभिभाषसे ॥ ३२ ॥

गच्छार्य नगरीं स्वीयामयोध्यापूर्वजैर्धृताम् ।
राज्येऽभिषेचयात्मानं शुभाय च कुलस्य नः ॥ ३३ ॥

त्वं राजेति मतो लोकैर्मया तु परदैवतः ।
धर्मार्थकाममोक्षाणामीश्वरस्त्वं परः पुमान् ॥ ३४ ॥

मयि कैकेयदेशस्थे मातुलेष्वधिवासिनि ।
त्वय्यरण्यं समायाते पिता नो विरहातुरः ॥ ३४ ॥

अगात् समाधिं धर्मात्मा तव शोकेन दुःखितः ।
रटन् रामेति रामेति रामेति करुणस्वरः ॥ ३६ ॥

शत्रुघ्नेन मया चापि न तातस्य हितं भवेत् ।
प्रियस्तु तस्य नृपतेर्भवान् यावन्न यास्यति ॥ ३७ ॥

पितुस्ते प्रेमयुक्तस्य तावत्तृप्तिः कथं भवेत् ।
अतः कृत्वा हितं तस्मै भवान् गच्छतु तां पुरीम् ॥ ३८ ॥

त्वां शोचं स्त्वदर्शनेप्मुरनिशं त्वय्येवसक्ताशयो
यावत्त्वां विनिवर्त्तयेद्विपिनतो राजानिवर्त्येहितम् ।
तावत्त्वद्विरहानलद्रुततरज्वालावलीढातुर-
प्राणः प्रेमवशात्त्वयीथ विनिधा यात्मानमास्थात्परम् ॥ ३९ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे राम प्रियाख्यानो नामाष्टात्रिंशोऽध्यायः ॥ ३८ ॥

●

एकोनचत्वारिंशोऽध्यायः

ब्रह्मोवाच

निशम्य भरतेनोक्तां पितुः समाधिमिश्रिताम् ।
अत्यर्थंकरुणां वाचं मुमूर्छ रघुवल्लभः ॥ १ ॥
पतितं धरणीपृष्ठे रामं शोकौघविह्वलम् ।
दुःखिताः सीतया सार्द्धं सिषिचुर्भ्रातरोऽश्रुभिः ॥ २ ॥
तपः संज्ञां परिप्राप्य बभाषे रघुपुङ्गवः ।
हा तात हा सत्यपते हानः परमसंश्रया ।
हा पालक धरानाथ त्वं गतो गतिमीदृशीम् ॥ ३ ॥
हा वात्सल्य निधेऽस्माकमाजन्म परिरक्षक ।
हानेकसौख्यदातस्त्वं क्व नु दृश्योऽसि साम्प्रतम् ॥ ४ ॥
हा हा बत ममाभाग्यं योऽन्तेऽपि त्वां न दृष्टवान् ।
दुर्जनेन मयातात कर्तव्यं किं नु ते प्रियम् ॥ ५ ॥
मृतस्त्वं मम शोकेन त्वयाहं नैव संगतः ।
हा तात तं दुःसमयं यस्मिन् विरहितस्त्वया ॥ ६ ॥
समाप्य वनवासं च त्वया हीनां पुरीमहम् ।
कथं द्रक्ष्यामि दुर्भाग्यः शून्यामिव समन्ततः ॥ ७ ॥

---

१. स्त्वदर्शनेप्मु०—पाठ उचित जान पड़ता है ।

कदापि ते प्रियं तात न कृतं दुर्हृदा मया।
यथा शोकेन पञ्चत्वं गतोऽसि विलपन् मुहुः ॥ ८ ॥

तानि स्वभावरम्याणि तव वाक्यानि भूपते।
मत्संबोधनयुक्तानि श्रोतुं नार्हे मम श्रुती ॥ ९ ॥

इत्थं विलप्य करुणं रघूणां वल्लभो रुदन्।
भार्यां चानुजमभ्येत्य प्रोवाच कृपणो यथा ॥ १० ॥

वैदेहि तव धर्मात्मा श्वशुरो मरणं गतः।
भ्रातस्त्वं तातहीनोऽसि दुःखं स्यात्किमतः परम् ॥ ११ ॥

ततो लक्ष्मणसीताभ्यां सहितो रघुपुङ्गवः।
अरुदत्करुणं भूयो दुःखवेगसमाकुलः ॥ १२ ॥

धैर्यमालम्ब्य तान् क्लिष्टानूचे केकयिनन्दनः।
उदश्रुनयनः शोकात्सान्त्वयन् कलया गिरा ॥ १३ ॥

अलं दुःखेन ते तस्मिंस्तातेस्वर्गमितेऽधुना।
विलोक्य विलपन्तं त्वां दीर्यते हृदयं मम ॥ १४ ॥

किमेतावद्विलपता मया लब्धं रघूद्वह।
त्वमेव नः पितेदानीं गुरुर्बन्धुः सुहृत्पतिः ॥ १५ ॥

उत्तिष्ठार्योदकं देहि प्रमीतस्यात्मनः पितुः।
शत्रुघ्नेन मया चापि पुरैव विहितं तथा ॥ १६ ॥

रुदतीं जानकीं रामः परिष्वज्य समादधौ।
लक्ष्मणं चाब्रवीदेतद् दुःखिनं भूरिदुःखतः ॥ १७ ॥

भ्रातरानय मे सद्यो बादराण्यैङ्गुदानि च।
तैरहं निर्वपिष्यामि पिण्डान् प्रेतस्य मे पितुः ॥ १८ ॥

आनयस्वोत्तरीयं मे कुर्यां पितुरुदक्रियाम्।
ततस्तेऽन्वगमन् सर्वे पुण्यां मन्दाकिनीं नदीम् ॥ १९ ॥

सुतीर्थां स्वच्छपुलिनां देवगन्धर्वसेविताम्।
सानुजः सहभार्यश्च तत्र स्नात्वा रघूद्वहः ॥ २० ॥

स्वर्गस्थायात्मनःपित्रे प्रददाबुदकाञ्जलीन्।
ततस्तीरे समागत्य पिण्डान् निरवपद्भुवि ॥ २१ ॥

बदरैङ्गुदपिण्याकं सुमेध्यं दर्भसंस्तरे।
पुनः पर्णकुटीमीयुर्भ्रातरः सहसीतया ॥ २२ ॥

तस्या द्वारे स्थितो राम उभौ भरतलक्ष्मणौ।
कराभ्यां सुसमादाय रुरोद पितरं स्मरन् ॥ २३ ॥

तेषां प्ररुदतां तत्र वैदेह्या सह दुःखतः ।
उदभूत्करुणः शब्दो हरीणामिव गर्जताम् ॥ २४ ॥

कृत्वोदकं पितुः सर्वेभ्रातरस्तत्र संगताः ।
रुरुदुः करुणां वाचमीरयन्तः परस्परम् ॥ २५ ॥

सैनिकास्तमुपश्रुत्य तुमुलं रोदनध्वनिम् ।
अज्ञासिषुः सहार्येण भरतः संगतोऽधुना ॥ २६ ॥

रुदन्ति पितृशोकार्तास्तेऽमी नश्वरा इति ।
ततः सहस्रं पुरुषा रामदर्शनकाङ्क्षया ॥ २७ ॥

तत्राजग्मुः पर्णकुटीं यत्र श्रीमत आश्रमः ।
तेषामागच्छतामासीद् गजाश्वरथजो ध्वनिः ॥ २८ ॥

समागते बले तत्र गजाश्वरथ संकुले ।
वित्रेसुर्वन्यपशवो वराहमहिषादयः ॥ २९ ॥

सिंहा व्याघ्राश्च गोकर्णा गवयाः सैन्यशब्दतः ।
संत्रस्ताः कन्दरा भेजुश्चित्रकूटमहीभृतः ॥ ३० ॥

शुककोकिलकाकाद्याः कोककारण्डवादयः ।
दात्यूहाः सारसा हंसा नानारूपा विहंगमाः ॥ ३१ ॥

विसंज्ञाः सैन्यनादेन वित्रस्ताःसकलादिशः ।
उत्पेतुर्मण्डलं बद्ध्वा गगनान्तरचारिणः ॥ ३२ ॥

उच्चैः पक्षिगणाकीर्णं गगनं पर्यराजत ।
अधः सैन्यसमूहेन व्याप्तं धरणिमण्डलम् ॥ ३३ ॥

पारिरेभे जनान् कांश्चित्कांश्चिद्रामोऽभ्यवादयत् ।
कांश्चिज्जग्राह दृष्ट्वैव कांश्चित्सम्भाषणादिभिः ॥ ३४ ॥

कैश्चिन्नतः सविनयं कैश्चिदङ्घ्र्योश्च वन्दितः ।
सर्वानादिद्रिये रामः पितृशोकाकुलोऽपिसन् ॥ ३५ ॥

चक्षुर्लज्जानतो मौनं पितृशोकेन विह्वलः ।
आत्मानं मन्यमानश्च पित्रा रहितमातुरः ॥ ३६ ॥

रुरोद भ्रातृभिः सार्द्धं पुनर्नूतनयञ्छुचम् ।
अधोमुखस्तदातिष्ठच्चिन्ताशोकसमाकुलः ॥ ३७ ॥

भूयोरुदञ्छोकनिपातरुग्णः सन्नार्त शब्देन गुहागतेन ।
निनादयन् भूमिघरं समन्ताद् धृत्या न रोद्धुं हृदयं शशाक ॥ ३८ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे उदकाहरणो नामैकोनचत्वारिंशोऽध्यायः ॥ ३९ ॥

चत्वारिंशोऽध्यायः

ब्रह्मोवाच

राजदारान् पुरस्कृत्य वशिष्ठो मुनिसत्तमः ।
तं देशमागमच्छीघ्रं पश्यन् मन्दाकिनीं शुभाम् ॥ १ ॥

कौसल्या वीक्ष्य तां पुण्यां नदीं मन्दाकिनीं ततः ।
सुमित्रामब्रीद् वाक्यं तप्यन्तीं सुतशोकतः ॥ २ ॥

इतस्ते तनयः साध्वि भ्रातुराहरते जलम् ।
स वीरो राजपुत्रश्च प्राप्तोऽत्यनुचितां दशाम् ॥ ३ ॥

[[1]इदमैंगुदिपिण्याकं प्रायो रामेण भूतले ।
निर्वापितं पितुर्दर्भेष्वीक्ष्यते स्वर्गतस्य हि ॥ ४ ॥

अहो इदं तस्य भोज्यमुचितं भूरिभोगिनः ।
आसमुद्रक्षितिपतेर्न्युप्तं पुत्रेण ह्यापदि ॥ ५ ॥

भुक्त्वा स विविधान् भोगानासमुद्रक्षितीश्वरः ।
इदमापदि पुत्रेण न्युप्तं भोक्ष्यति भोजनम् ॥ ६ ॥]

इत्यादि विलपन्ती सा कौसल्या प्रापदाश्रमम् ।
रामस्य पर्णशालां तां दृष्ट्वा तत्र सुदुःखिता ॥ ७ ॥

तत्र स्थितं सुतं दृष्ट्वा त्यक्तभोगं जटाधरम् ।
वल्कलाजिनचीरौघैः[2] संवीतामलविग्रहम् ॥ ८ ॥

अश्रूण्यमुञ्चदत्यार्त्ता शोकविह्वलमानसा ।
दृष्ट्वैव रामो जग्राह मातॄणां चरणान् पृथक् ॥ ९ ॥

तथैव लक्ष्मणो भक्त्या सर्वा मातॄरबन्दत ।
सीता च पादान् श्वश्रूणामग्रहीद् भूरिदुःखिता ॥ १० ॥

अश्रुपूर्णाक्षिवदना शोचन्तीश्वशुरं मुहुः ।
तां दृष्ट्वोवाचकौसल्या निःश्वस्य करुणं वचः ॥ ११ ॥

हा विदेहनरेन्द्रस्य सुता दशरथस्नुषा ।
वीरेन्द्रस्य वधूर्भव्या कथमेवं सुदुःखिता ॥ १२ ॥

इदं ते वदनं कान्तं चन्द्रादपि सुशीतलम् ।
उत्फुल्ल पद्मरुचिरं कथमेवंदशां गतम् ॥ १३ ॥

---

१. ये तीन श्लोक अयो० और मथु० की प्रतियों में काट दिये गये हैं ।

२. राद्यैः—अयो० ।

नितान्तमातयक्लान्तं मलिनं वनवासतः ।
दृष्ट्वा तवाद्य कल्याणि हृदयं दीर्यते मम ॥ १४ ॥

ततो रामो वशिष्ठस्य पादौ जग्राह भक्तिमान् ।
अमात्यान् मन्त्रिणः सर्वान् प्रधानान् पुरवासिनः ॥ १५ ॥

आगतान् परिजग्राह परिरम्भेक्षणादिभिः ।
सर्वैःसमेत्य विधिवदुपविष्टश्च राघवः ॥ १६ ॥

उपोपविष्टाः सकला भ्रातरो मुनयस्तथा ।
पुरोहिता अमात्याश्च मन्त्रिणो राजमानिताः ॥ १७ ॥

कृताञ्जलिपुटो धीमान् भरतो भक्तिसंनतः ।
पुरो रामस्योपविष्टो विवक्षुः प्रणयान्वितः ॥ १८ ॥

तूष्णींभूताः स्थिताःसर्वे पश्यन्तो भरताननम् ।
किमेष वक्ष्यति वुधो राममानेतुमागतः ॥ १९ ॥

रामलक्ष्मणशत्रुघ्नभरतास्तैः सुहृज्जनैः ।
वृतास्तत्र व्यराजन्त वीक्षमाणाः परस्परम् ॥ २० ॥

निन्युस्तां रजनीं कृत्स्नां ते चिरान्मिलिता मिथः ।
ततःप्रभाते निमज्य मन्दाकिन्यां यथोचितम् ॥ २१ ॥

पर्णशालामुपागच्छन् सर्वे तूष्णींगिरो जनाः ।
भरतोऽथ सुसत्कृत्य रामं भक्तिसुसन्नतः ॥ २२ ॥

पश्यतां सुहृदां मध्ये इदमाह स धर्मवित् ।
नतोऽस्मि रघुवर्यत्वामात्मना दास्यशीलना ॥ २३ ॥

प्रसीद मह्यं नम्राय करुणां कर्त्तुमर्हसि ।
गच्छायोध्यां निजपुरीं पालयास्मान् स्वसेवकान् ॥ २४ ॥

प्रजाश्च सकला राजन् गोपाय निजधर्मतः ।
भुङ्क्ष्व राज्यं निजं प्राप्तं पितृपैतामहं क्रमात् ॥ २५ ॥

अगाधे नौरिवाम्भोधौ प्रचण्डानिललोलिता ।
त्वां विना राम राज्यश्रीरसौ नाशोन्मुखी क्षणात् ॥ २६ ॥

भवन्तमनुवर्त्तन्तां राज्यासनमधिष्ठितम् ।
प्रजाः प्रकृतयः सर्वास्तारा इव निशाकरम् ॥ २७ ॥

गायन्तु पुरनार्यश्च तवप्रावेशिकं पुरे ।
अन्तःपुरस्थितास्ताश्च सेवन्तां त्वां स्मरोपमम् ॥ २८ ॥

श्रीजानकीं पुरस्कृत्य सहस्रवनिताः पुरे ।
चन्द्राननास्त्वया सार्द्धं लभन्तां भोगमुत्तमम् ॥ २९ ॥

नरनागनगेन्द्राणां कन्या दिग्विजयार्जिताः ।
क्लिश्यन्त्यस्त्वद्वियोगेन पश्यन्तु त्वां गृहागतम् ॥ ३० ॥

नाहमर्होऽस्य राज्यस्य रासभोऽश्वगतेरिव ।
श्वेवहर्यक्षनादस्य काको हंसगतेरिव ॥ ३१ ॥

पितर्युपरतेस्माकमनाथानां गतिर्भवान् ।
चायस्व नः स्वपदवीमधितिष्ठन् रघूद्वह ॥ ३२ ॥

इति सम्भाषमाणस्य भरतस्यवचोऽमृतम् ।
अन्वमोदन्त तत्रस्थाः सभ्या नरमुनीश्वराः ॥ ३३ ॥

विलपन्तं मुहुर्वीक्ष्य भरतं रामचन्द्रमाः ।
उवाच धर्मसंयुक्तं धर्मभृत्प्रवरः स्वयम् ॥ ३४ ॥

क्षयिष्णु सकलं मन्ये यदृश्यं सदसत्तथा ।
संयुज्य विप्रयुज्यन्ते संयुज्यन्ते वियुज्य च ॥ ३५ ॥

सर्वं मृत्युवशं मन्ये जगदेतच्चराचरम् ।
मूढास्तस्य कृते सत्यं त्यजन्ति किमु कामुकाः ॥ ३६ ॥

इष्ट्वा बहुविधैर्दीर्घैर्मखैः सर्वस्वदक्षिणैः ।
महानुभावस्तातो नो मयि यातो समाधितः ॥ ३७ ॥

तद्वचः सत्यसम्बद्धं कथमुल्लङ्घ्यतां मया ।
स्वर्गतं च्यावये तातं सत्यातिक्रमणादहम् ॥ ३८ ॥

न मया सत्यमुल्लङ्घ्य वर्त्तितव्यं कदाचन ।
नाहं द्विर्भाषितुं जानै व्रतमेतत्परं मम ॥ ३९ ॥

योमेऽनुकूलो बन्धुश्च न निर्बन्धं करोत्विह ।
यद्भावि तद्भुतमिदं को निवर्त्तयितुं क्षमः ॥ ४० ॥

इत्यभिधाय निदेशकरः पितुराहितसत्यवचः परिरक्षं
स्तत्क्षणमेष ततो विरराम नराधिपसूनुरधर्मविपक्षः ।
शृण्वति सर्वमुनिप्रकरे भरतः पुनरेव ततोऽभिवभाषे
चेतसि भूरि विचित्य चिरं रघुनाथनिवर्तनसाध्वभिलाषे ॥ ४१ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे रामवाक्यं नाम चत्वारिंशोऽध्यायः ॥ ४० ॥

●

एकचत्वारिंशोऽध्यायः

ब्रह्मोवाच

कथं निवर्तयाम्येनमार्यं विपिनवासतः ।
इति युक्तं विचिन्त्यैप भरतस्तमवोचत ॥ १ ॥

क्षुद्रा मे जननी चक्रे यत्पातकमकारणम् ।
मय्यजानति ते दासे मातुर्लेख्वधितिष्ठति ॥ २ ॥

तदनिष्टमहं मन्ये महदेवात्मनाशनम् ।
त्वद्भ्याच्च न धर्मात्मन् मातरं दण्डयाम्यहम् ॥ ३ ॥

ममापकारिणी पापा प्रकृत्या राक्षसी त्वियम् ।
तदुत्पन्नश्च सुतरामहं पापैक सम्भवः ॥ ४ ॥

तथापि न करिष्यामि कर्म गर्हितमात्मना ।
यत्तातेन कृतं तत्तु किं नु गर्हामि सम्प्रति ॥ ५ ॥

मृतो न गर्हितुं योग्यस्तत्रापि जनकः स नः ।
अन्तकालेऽभवत्तस्य मोह एष न संशयः ॥ ६ ॥

यत्कृतं मुह्यता तेन पित्रा नः कर्म गर्हितम् ।
तद्भवान् संशमयतु तस्मिन् स्वर्गमितेऽधुना ॥ ७ ॥

एतदेव च कर्तव्यं सत्पुत्रेण ननु त्वया ।
कैकेय्या यत्कृतं पापं तामेवानुप्रयातु तत् ॥ ८ ॥

त्रायस्व नः कुलपते प्रकृतीश्च विशेषतः ।
सुहृदो बान्धवांल्लोकान् क्लिश्यतस्तव शोकतः ॥ ९ ॥

इदं तेऽनुचितं मन्ये वनवासजटादिकम् ।
आत्मनः कुलधर्मेण व्याहतं किं चिकीर्षसि ॥ १० ॥

ब्रह्मक्षत्रे उभेनित्ये स्वस्वलक्षणलक्षिते ।
विज्ञाय तद्भवान् सर्वमन्यत्कर्तुं न चार्हसि ॥ ११ ॥

विपरीतमिदं चार्य यन्मया तेऽनुशासनम् ।
जीवनायात्मनः किं तु त्वां शिक्षितुमहं यते ॥ १२ ॥

शाधि राज्यं स्वधर्मं च धर्मज्ञानां शिखामणे ।
इहैव बन्धुभिः सर्वैरात्मानमभिषेचय ॥ १३ ॥

आभिषेचनिकं द्रव्यं सर्वमेतदुपाहृतम् ।
कृतार्थयतरामार्यं कृत्वा त्वं स्वाभिषेचनम् ॥ १४ ॥

मुदिताः सन्त्विमे सर्वे वीक्ष्य त्वामभिषेकिणम् ।
पायाद्रक्षस्व जनकं ज्येष्ठस्यातिक्रमोद्भवात् ॥ १५ ॥

दासस्य मे वचः श्रुत्वा हृदि नाथ कृपास्तु ते ।
तथा सर्वेषु लोकेषु बान्धवेषु दयां कुरु ॥ १६ ॥

परास्य मामथ भवान् यदि गन्ता वनं प्रति ।
तदाहमपि गन्तास्मि पादलग्नः क्व नु व्रजे ॥ १७ ॥

इत्यार्त्तस्य वचो रामः श्रुत्वा तस्य सभान्तरे ।
उवाच शृण्वतां तेषां सर्वेषां धर्मसागरः ॥ १८ ॥

युक्तमेतत्वयि सदा यद्धर्मयुतमब्रवीः ।
पुत्रो दशरथस्यासि मम भ्राता शुभाशयः ॥ १९ ॥

पुरा तव प्रसूस्तात तव मातामहान्नृपात् ।
लब्धा राज्यं प्रतिश्रुत्य पित्रा नः सत्यभाषिणः ॥ २० ॥

अर्थं दैवासुरे युद्धे तव यात्रा पिता स नः ।
वरं सम्प्रार्थितः सत्यं द्वयं तत्राभियाचितम् ॥ २१ ॥

तव राज्यं मम पुनर्वने प्रवसनं यथा ।
तन्नः पित्रा भवन्मात्रे सम्यगेव प्रतिश्रुतम् ॥ २२ ॥

सोऽहं चतुर्दशाब्दानि वने वत्स्यामि धर्मतः ।
पितुः सत्याभिरक्षार्थं ससीतः सानुजस्तथा ॥ २३ ॥

कर्त्तुं सत्यगिरं तातं भवांस्तदनुमन्यताम् ।
यास्तु मिथ्यावचास्तातः कैकेयीयाचिते वरे ॥ २४ ॥

त्वं शाधि मतिमन् राज्यं पित्रा दत्तमकण्टकम् ।
सम्मोचय ऋणात्तातं सत्पुत्रोऽसि रघोः कुले ॥ २५ ॥

नरकाद्रक्ष पितरं सत्यवाक्यानुरक्षणात् ।
गच्छायोध्यां प्रजाः पाहि पित्रा तुभ्यं निदेशिताः ॥ २६ ॥

तवराज्येऽस्तु शत्रुघ्नः सहायः समितिंजयः ।
ममारण्यनिवासे च सहायोऽयं तदग्रजः ॥ २७ ॥

त्वं राजापुरवास्तूनां नराणां धर्मशासनात् ।
अहं वनमृगाणां च राजास्मि विधिना कृतः ॥ २८ ॥

त्वं गच्छ प्रयतमते पुरीमयोध्यां गन्ताहं तपसि सुखेन दण्डकांश्च ।
छत्रं ते शिरसि वलक्षमातपघ्नं छाया मे शिरसि मता वनद्रुमाणाम् ॥ २९ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे रामवाक्यनामैकचत्वारिंशोऽध्यायः ॥ ४१ ॥

द्विचत्वारिंशोऽध्यायः

ब्रह्मोवाच

तत्सभासंस्थितो विद्वान् जाबालिर्नाम वै मुनिः ।
निवर्त्तयन्तं भरतं राममेतदुवाच ह ॥ १ ॥

भो भो राम महाबाहो धर्मात्मन् सत्यसंगर ।
किं ते मयोपदेष्टव्यं विदुषः सर्ववेदिनः ॥ २ ॥

यज्ज्ञेयमखिलं राम तद्वेत्सि ज्ञानचक्षुषा ।
तवैव ज्ञानदीपेन प्रकाशन्तेऽखिला जनाः ॥ ३ ॥

यद्विशुद्धतमं ज्ञानं प्रकाशयति विश्वतः ।
न तदन्यस्य मर्त्यस्य न चामर्त्यस्य कस्यचित् ॥ ४ ॥

एकस्त्वमात्मा सर्वेषामात्मनां प्रियकृत्प्रियः ।
जाने त्वां ज्ञानदृष्ट्याहं परमं पूरुषं प्रभो ॥ ५ ॥

न ते समोऽन्यः पुरुषः सत्त्वोदार्यगुणादिभिः ।
कुतोऽस्त्वभ्यधिको लोके मर्त्यधर्मणि सर्वतः ॥ ६ ॥

त्वद्भाग्यमुपजीवन्ति ये केचिद्भाग्यसंयुताः ।
तवांशेनाखिलं विश्वं सर्वमेतत्प्रकाशते ॥ ७ ॥

भाग्यवान् पुरुषो लोके यस्तेऽनुग्रहभाजनम् ।
यस्मै कुप्यसि लोकेश न ततो दुर्भगः परः ॥ ८ ॥

लोकाननुगृहाणेमानयोध्यावासिनोऽखिलान् ।
आत्मानमभिषिच्य त्वं शाधि राज्यं सनातनम् ॥ ९ ॥

विधिना त्वं प्रदिष्टोऽसि प्रजानां प्रवरः प्रभुः ।
भजन्नौदास्यमेतासां मनः क्लिश्नासि राघव ॥ १० ॥

सुमहाभ्युदयो लोके त्वयि राज्यं प्रकुर्वति ।
अतोऽभ्युदयिनः कुर्याज्जनानेनान् निजाश्रितान् ॥ ११ ॥

नोदासीः क्षत्रवंशाब्धिप्रमोदनकलानिधे ।
मर्दयित्वा खिलान् विघ्नान् लोकं योजय मङ्गलैः ॥ १२ ॥

अमीषामात्मनाथानां जनानां कुरु रक्षणम् ।
नोदासीः सौभगनिधे भवानेकः समाश्रयः ॥ १३ ॥

पाहि स्वधर्मं धर्मात्मन् नान्यधर्ममुपाचर ।
कार्याकार्ये विजानाति भवान् स्वपरधर्मयोः ॥ १४ ॥

[1]यस्यांशां शकला वै हि सर्वेऽवताराः[2] कृष्णादयः ।
स वै राम त्वं सर्वेशस्तेषां वै हि नियामकः ॥ १५ ॥

भुङ्क्ष्व निष्कण्टकं राज्यमात्मनो भागमुत्तमम् ।
जनानुद्विजतश्चैतान् स्वस्थान् कुरु महामते ॥ १६ ॥

आत्मनोऽनुचितां विद्धि राजसूनो वनस्थितिम् ।
अयोध्यामावसन् रम्यां भुवं भुङ्क्ष्व स्वधर्मतः ॥ १७ ॥

अथ तं रघुशार्दूलः परावर्तयितुं प्रभुम् ।
उवाच विनयोद्रेकभरतं नतकन्धरः ॥ १८ ॥

भवानप्येवमुन्मार्गगामिप्राकृतबद् ब्रुवन् ।
सत्यं समुच्छेदयसि तत्कं शरणमाप्नुमः ॥ १९ ॥

सत्येन प्रीयते स्वात्मा सत्येन [3]स्वर्गमश्नुते ।
सत्येन देवा अचलाः सत्येन नियतं शुभम् ॥ २० ॥

यद्दाति सुपात्रेभ्यो यद्देवान् यजते पुनः ।
यज्जुहोति समिद्धेऽग्नौ यत्तपस्यति संयतः ॥ २१ ॥

तत्सत्येनैव कुरुते सर्वं कर्मफलोन्मुखम् ।
असत्यभाषिणो मन्ये सर्वमेव निरर्थकम् ॥ २२ ॥

सत्यमेकं महन्मूलं धर्मस्याभ्युदयस्य च ।
क आत्मनोऽशुभं कुर्यादसत्ये पथिवर्त्तिनः ॥ २३ ॥

एको बहूनामर्थाय पातकं कुरुते नरः ।
स्वयं सम्पच्यते घोरे नरके नेतरेऽर्थिनः ॥ २४ ॥

राज्यगृध्नुरहं नैव सत्यमुत्स्रष्टुमुत्सहे !
[किं मे बन्धुजनास्तत्र नरकक्लेशभागिनः ॥ २५ ॥

एक[4] एव विपक्ष्येऽहं नरके घोरदर्शने ।[4]][5]
अतः सत्येज्झितं मार्गं न त्वं शिक्षितुमर्हसि ॥ २६ ॥

कामान्मोहात्तथा लोभान्नाहं सत्यं समुत्सृजे ।
देवताः पितरः स्वर्गा यस्मिन्नेव प्रतिष्ठिताः ॥ २७ ॥

कृतानि तेन सर्वाणि पातकानि न संशयः ।
यः सत्यमनिवर्त्तेत कामतः पुरुषाधमः ॥ २८ ॥

गुरोर्वचः समुत्सृज्य भरतस्य वचो भरन् ।
कथं न कुर्यामधमोगुरूणामतिवर्त्तनम् ॥ २९ ॥

१–१. नास्ति–बड़ो० । २. इस चरण में ९ अक्षर हो जाने से छन्दोभंग है ।
३. स्वर्ग आप्यते–अयो०, मथु० । ४–४. नास्ति–बड़ो० । ५. ये दो पङ्क्तियाँ मथु० की प्रति में काट दी गयी हैं ।

इत्यादि बहुधा रामः प्रशंसन् सत्यभाषणम् ।
प्रत्यस्य जाबालिमतं तूष्णीमास्त महाशयः ॥ ३० ॥

जावालेर्मतमुत्क्षिप्य वशिष्ठस्तमवोचत ।
जाबालिः किं विजानाति लोकयात्रागतागतम् ॥ ३१ ॥

नैवं निवर्त्तनीयस्त्वं युक्तिरेषात्र राघव ।
आसीच्छून्यमिदं विश्वमसदेव ततश्च सत् ॥ ३२ ॥

जलमेवासृजत् पूर्वं पुरुषः स्वापनं महत् ।
ब्रह्माण्डमसृजत्तत्र बीजमुप्त्वा सनातनम् ॥ ३३ ॥

तस्मिन्नजायत पुनः स्वयमेव स पूरुषः ।
उच्चावचानि भूतानि ससर्जाग्रे प्रजापतिः ॥ ३४ ॥

वेदमध्यापयामास तस्मै वरदराड् विभुः ।
लोकयात्रा विधानानि ततो जज्ञे स आत्मवान् ॥ ३५ ॥

मरीचि प्रमुखास्तस्य पुत्रा आसन् मनोभवाः ।
मरीचेः कश्यपस्तस्य समभूदङ्गिरास्ततः ॥ ३६ ॥

प्रचेतास्तत्सुतो जातो मनुर्नाम महीपतिः ।
तस्येक्ष्वाकुरभूद् यो वः कुलज्येष्ठो महान् नृपः ॥ ३७ ॥

तस्य वंशे त्वमभवः साक्षाद्वंशविभूषणः ।
मृतान्मा शोच भो विद्वन् वर्तमानान् प्रपालय ॥ ३८ ॥

प्रत्यक्षं धर्ममातिष्ठ मापरोक्षं च चिन्तय ।
वशिष्ठस्यवचोऽसह्यं मन्वानो रघुपुङ्गवः ॥ ३९ ॥

विगर्हमाणस्तमथो उवाचेदं महायशाः ।
धर्मेण पूर्वे मनुजा जित्वेमं लोकमात्मना ॥ ४० ॥

अमुं लोकमुपातिष्ठन् किं परोक्षं विगर्हसे ।
कथं पित्रा कृतं कर्म हन्यामहमधर्मतः ॥ ४१ ॥

अर्थं गृध्नुं तु मां मत्वा नाधर्मे सम्प्रवर्तय ।
एतत्तेऽनुचितं वाक्यं रघूणां त्वं यतो हितः ॥ ४२ ॥

ततः कुप्यन्तमाज्ञाय रामं लोहितलोचनम् ।
पुनरूचे स जाबालिरन्यन्मृदुतरं वचः ॥ ४३ ॥

प्रत्यक्षवलमास्थाय कः परोक्षं विगर्हताम् ।
निवर्त्तनायते विद्वन् वयं [1]सर्वेसमागताः ॥ ४४ ॥

निवर्तस्व वनाद् राम मान्यान् मानय सम्प्रति ।
निशम्य जाबालिवचः पुनरूचे रघूद्वहः ॥ ४५ ॥

---

१. ऽभ्युपागताः—अयो०, मथु० ।

यो मे प्रियहितो लोके स नेत्थमभिभाषताम् ।
नाहं द्विर्याषितुं जाते ब्रह्मणापि प्रयोजितः ॥ ४६ ॥

कृत्वा मिथ्या गिरं तातं स्वर्गे लोकेऽपि गर्हितम् ।
नद्यां संस्मृत्य गोत्रादि कस्य देयोऽञ्जलिर्मया ॥ ४७ ॥

सोऽहं सत्यगिरंकर्त्तुं धार्मिकं तातमात्मनः ।
निवर्त्तिष्ये वनान्नैव यावद्वर्षाश्चतुर्दश ॥ ४८ ॥

ततो वशिष्ठजाबालिप्रमुखाः परमर्षयः ।
दृष्टान्तदर्शनैर्ज्ञानैर्युक्तिभिश्चाप्यनेकशः ॥ ४९ ॥

न्यवर्त्तयन् वनाद् रामं न तु शेकुर्निवर्त्तितुम् ॥ ५० ॥

सर्वे मुनीन्द्राः प्रकृतिप्रधानाः सन्मन्त्रिणोऽमात्यवराः समन्तात् ।
अरण्यवासाद्विनिवर्त्तयन्तो निर्बन्धमास्थाय चिराय तस्थुः ॥ ५१ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे निवर्त्तनवाक्य-योजनो नाम द्विचत्वारिंशोऽध्यायः ॥ ४२ ॥

त्रिचत्वारिंशोऽध्यायः

ब्रह्मोवाच

अथोवाच वशिष्ठस्तं वृद्धः कुलपुरोहितः ।
वदामि शृणु धर्मात्मन् सर्वथा मामकं वचः ॥ १ ॥

गुरवस्त्रय एवैते लोके धर्मभृतां नृणाम् ।
आचार्यः कुलवृद्धो यः पिता माता च तत्पुनः ॥ २ ॥

तत्राहं कुलपूज्यो व आचार्यो धर्मदर्शकः ।
मद्वचः सर्वथा मान्यं त्वया धर्मात्मना सदा ॥ ३ ॥

मातुश्च वचनं मान्यं वृद्धाया धर्मसंगतम् ।
अतो यद्भरतो ब्रूतेऽभ्यर्थयन् दीनमानसः ॥ ४ ॥

तत्कुरुष्व महाबाहो गुरुवाक्यानुरोधतः ।
ये गुरूनभिवर्त्तन्ते ते नराः शुभकारिणः ॥ ५ ॥

इत्यादि बहुधा तस्य लपतो दीनचेतसः।
वशिष्ठस्य वचः श्रुत्वा प्रत्युवाच रघूद्वहः॥ ६॥

गुरुर्मे जन्मना नित्यं राजा दशरथः कृती।
मया यत्संश्रुतं तस्य न तन्मिथ्या भविष्यति॥ ७॥

इत्युक्तो भरतस्तेन रामेण सुमहाशयः।
उवाच सारथि स्वीयं सुमन्त्राख्यं महाभुजः॥ ८॥

भो सूत सुमते सम्यगिहास्य पदपद्मयोः।
छायामाश्रित्य रचय मदर्थं कुशसंस्तरम्॥ ९॥

स्थण्डिलेऽधिशयिष्येऽहमिहास्य पदयोस्तले।
निराहारो निरम्बुश्च स्थास्यामि कृपणाशयः॥ १०॥

स्थास्याम्येवं प्रकारेण यावन्न कृपयेत्प्रभुः।
ततः स तमकुर्वाणं तथा रामाज्ञया विना॥ ११॥

वीक्ष्य स्वयं कुशान् भूमावास्तरन्नतिदुर्मनाः।
उक्तः कमलनेत्रेण रामेण करुणात्मना॥ १२॥

किमर्थं कुरुते भ्रातर्भवान् प्रायोपवेशनम्।
ब्राह्मणस्यैव धर्मोऽयं न राजन्यस्य सुव्रत॥ १३॥

उत्थाय पुरुषश्रेष्ठ राज्यं समनुपालय।
पित्रा दत्तं कुलप्राप्तं न भवांस्त्यक्तुमर्हति॥ १४॥

ततः पौरा जानपदाः प्रजाः प्रकृतयोऽखिलाः।
ऊचिरे भरतं सम्यग्वीक्ष्य रामस्य तद्व्रतम्॥ १५॥

एष सत्यधरो रामः करिष्यति पितुर्वचः।
न निवर्त्स्यति धर्मात्मा तवोपायशतैरपि॥ १६॥

को हि व्यावर्तयेदेनं सत्यसन्धं महाव्रतम्।
अथरामोऽब्रवीद्वाक्यं सर्वेषामनुशृण्वताम्॥ १७॥

अहं वने निवत्स्यामि यावद्वर्षाश्चतुर्दश।
ततो द्रक्ष्यामि नगरीमयोध्यामिनि मे व्रतम्॥ १८॥

भरतः प्रत्युवाचैनं शृण्वतां विदुषामिदम्।
यदि कार्यं पितुर्वाक्यं त्वया धर्मपरायण॥ १९॥

अवश्यं वन एवार्य निवत्स्यसि तदा ब्रुवे।
अहमेव पितुर्वाक्याद् वने वत्स्यामि धार्मिक॥ २०॥

स्वं राज्यमनुशाधि त्वं कुरु लोकस्य मङ्गलम्।
निशम्य भ्रातुर्वचनं रामः स्मित्वाब्रवीदिदम्॥ २१॥

तातेन मे यदादिष्टं जीवता सत्यवादिना।
न तदुल्लङ्घितुं शक्यं मयाभ्रातस्त्वयापि च ॥ २२ ॥

न त्वां प्रतिनिधीकृत्य वनवासो भवेन्मय।
अतो न कार्यो निर्बन्धस्त्वया व्रतधरे मयि ॥ २३ ॥

यदुक्तं भवतो मात्रा द्वौ वरौ याचमानया।
तस्यै दत्तं च यत्पित्रा मया यच्च प्रतिश्रुतम् ॥ २४ ॥

लोके तदन्यथाकर्त्तुं कः शक्तोऽत्र चराचरे।
जानामि त्वं हितो भक्तः सर्वंकर्त्तुमसि क्षमः ॥ २५ ॥

तथापि मम कल्याणमेतदेव व्रतं मतम्।
नान्यथा कर्त्तुमर्होऽसि मम सत्यं हितो भवान् ॥ २६ ॥

अनुजेन सहारण्यं प्रवेक्ष्यामि न संशयः।
सत्यं भवतु कैकेय्यै पित्रा दत्तं वरद्वयम् ॥ २७ ॥

अनृतात्त्राहि पितरं स्वर्गस्थं तं महाव्रतम्।
एतदेव प्रकर्तव्यं त्वया तात मयापि च ॥ २८ ॥

अथ तं देशमागच्छन् दशग्रीववधैषिणः।
देवाः सर्षिगणाः सर्वे भरतं सम्प्रबोधितुम् ॥ २९ ॥

ततो देवाश्च गन्धर्वा ऋषयश्च तपोधनाः।
राजर्षयो महान्तश्च भरतं समबोधयन् ॥ ३० ॥

अस्ति वीर महात्कार्यं देवानां जगतां तथा।
यदर्थं राघवे वंशे समभूद् रामचन्द्रमाः ॥ ३१ ॥

एतस्य स्थानममलं प्रमोदवनमुत्तमम्।
यत्र नित्यं वसत्येष रमयन्नात्मनो जनान् ॥ ३२ ॥

तत आगमनं त्वस्य महत्यै कार्यसम्पदे।
नान्यथा तद्भवेत्कार्यमतो वनमुपागतः ॥ ३३ ॥

निमित्तमात्रं जानीहि कैकेयीवचनं प्रभोः।
सर्वमेव करोत्येष आत्मना वीतसम्भ्रमः ॥ ३४ ॥

प्रमोदवनमेतस्य स्थानं परमशोभनम्।
यत्र जानन्ति मुनयो न देवा मनुजाः कुतः ॥ ३५ ॥

कोटिचन्द्रप्रतीकाशं कोटिसूर्यप्रतापवत्।
प्रेमानन्दकदम्बेन परिपूर्णमनुत्तमम् ॥ ३६ ॥

तद्धित्वा रामचन्द्रोऽयमयोध्यां समभूषयत्।
निमित्तं तत्र जानीमस्त्रैलोक्यस्यैव रक्षणम् ॥ ३७ ॥

अतस्त्वं तात भरत सिद्धार्थः सन्नितो व्रज।
आज्ञां सम्पालयार्यस्य यस्याज्ञावशगाःसुराः॥ ३८॥

इत्युक्त्वा वचनं सर्वे न्यवर्तन्त महर्षयः।
देवाश्चापि सगन्धर्वाः स्वं स्वं स्थानमुपागमन्॥ ३९॥

खिन्नचेतास्तु भरतः पुनर्भूत्वा कृताञ्जलिः।
भक्त्या सुसन्नतस्कन्ध इदमाह रघूद्वहम्॥ ४०॥

नमस्ते रघुशार्दूल सर्वभक्तानुपालक।
महोदार महाप्राज्ञ सफलं कुरु याचनम्॥ ४१॥

राजधर्मनिजं वीक्ष्य कुलधर्मं च शाश्वतम्।
देहिमे याचमानाय महोदार महाशय॥ ४२॥

न रक्षितुं मया शक्यं राज्यमेतदनाकुलम्।
न च रञ्जयितुं शक्याः पौरा जानपदाश्च ते॥ ४३॥

न त्वदीयाः प्रजा राम शक्या अन्येन रक्षितुम्।
ज्ञातयो बन्धुसुहृदो मित्राणि विविधा जनाः॥ ४४॥

त्वामेव परितो राम काङ्क्षन्ते सर्वदा प्रभो।
चकोरा इव शीतांशुं तावेतान् सुखयात्मना॥ ४५॥

न मे शक्तिर्महीपाल महीं च परिरक्षितुम्।
अनिशं त्वत्पदाम्भोजभक्तिमेवाभिकामये॥ ४६॥

इत्थमुक्त्वा वचो वीरः पादयोरपतत्प्रभोः।
तमुत्थाप्य ततो रामः करुणानिधिरच्युतः॥ ४७॥

अङ्कमारोपयामास सान्त्वयन् कलया गिरा।
अब्रवीच्च महाबाहुरिदमर्थप्रसाधनम्॥ ४८॥

बुद्धिरेषोपपन्नाते सुस्थिरा कुलनन्दन।
मदाज्ञया समर्थोऽसि पृथिवीमभिरक्षितुम्॥ ४९॥

अमी वृद्धा मन्त्रिवरा अमात्यानः कुलप्रियाः।
एतैः सम्मन्त्र्य सर्वाणि कार्याणि त्वं करिष्यसि॥ ५०॥

न पुनर्मत्प्रतिज्ञातं परावर्त्तय धार्मिक।
चलेन्मेरुश्चलेद्भूमिश्चलेदब्धिश्चलेन्नभः॥ ५१॥

अग्निः शैत्यमुपागच्छेच्चन्द्रश्चण्डरुचिर्भवेत्।
चलेत्स्थानाच्च शेषोऽपि न प्रतिज्ञामहं त्यजे॥ ५२॥

इति वादिनि धर्मज्ञे रामचन्द्रे मनीषिणि।
वशिष्ठोऽभ्यवदद् वाक्यं रघूणां यः पुरोहितः॥ ५३॥

जानामि त्वां महाराज धार्मिकं सत्यवादिनम् ।
नहि कृच्छ्रगतस्यापि तव पापोन्मुखी मतिः ॥ ५४ ॥

त्वामाश्रिता अपि न वै रमन्ते पापकर्मणि ।
कुतः पुरुषशार्दूल तव स्यात्तादृशी स्पृहा ॥ ५५ ॥

कुलमेवेदममलमिक्ष्वाकूणां विशेषतः ।
त्वं तत्र प्रकटो राम समग्रं भूषयन् कुलम् ॥ ५६ ॥

अतः परं ते विज्ञाप्यमिदमस्मि महाव्रत ।
प्रदेहि पादुके स्वीये भरतायाभि याचते ॥ ५७ ॥

इमे हि स्वप्रभावेण त्रैलोक्यं पालयिष्यतः ।
अनर्घ्यरत्नजटिते कोटिचन्द्रार्कसन्निभे ॥ ५८ ॥

विश्वं पालयितुं योग्ये तमो हर्त्तुं तथा क्षमे ।
एवमुक्तो वशिष्ठेन रामस्त्रैलोक्यरक्षकः ॥ ५९ ॥

प्रददौ प्रादुके तस्मै भरताय महाभुजः ।
ते गृहीत्वा प्रभोर्वीरः प्रहर्षं किंचिदाव्रजत् ॥ ६० ॥

ततः स रामचन्द्रस्य कृत्वा भक्त्या प्रदक्षिणम् ।
महानागेन्द्रशिरसि पादुके समरोपयत् ॥ ६१ ॥

अथ सर्वान् जनान् राम आनुपूर्व्याभ्यपूजयत् ।
मुनीन् वशिष्ठप्रमुखान् भरतं च विशेषतः ॥ ६२ ॥

सर्वाः सम्पूज्य मातृश्चरणविनतिभिर्दुःखिता वाष्पकण्ठीः
क्लिश्यन्तं वाष्पपूर्णेक्षणमथ भरतं रामचन्द्रो विसृज्य ।
सीतासौमित्रियुक्तः कथमपि धृतिमानश्रुपूर्णाकुलाक्षो
वीरस्तां पर्णशालां धरणिधरदरीं केसरीव प्रविष्टः ॥ ६३ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे पादुका-प्रदानो नाम त्रिचत्वारिंशोऽध्यायः ॥ ४३ ॥

●

चतुश्चत्वारिंशोऽध्यायः

ब्रह्मोवाच

ते पादुके रमेशस्य रामचन्द्रस्य मञ्जुले ।
अनेकमणिमाणिक्य जटितस्वर्णनिर्मिते ॥ १ ॥

समस्तसिद्धिसंदोहवदान्ये भुक्तिमुक्तिदे ।
ब्रह्मादिसुरसंदोहसंसेव्यरुचिरप्रभो ॥ २ ॥

कोटिचन्द्रार्कविम्बाभे कोटिरत्नसमुज्ज्वले ।
ब्रह्मानन्दरसस्थाने प्रेमानन्दसुखास्पदे ॥ ३ ॥

सनकादिमहायोगिसंविभाव्यस्वरूपिके ।
महामाङ्गल्यसंदोह वदान्ये कामधेनुके ॥ ४ ॥

चिन्तामणिगणाकीर्णे चिन्तितार्थविधायिके ।
महायोगीन्द्रमूर्द्धन्यसहस्रदलमध्यगे ॥ ५ ॥

स्मरणात्सर्वपापौघविनाशनमहोद्भटे ।
कीर्तनात्सर्वकल्याणकोटिकल्पलतोपमे ॥ ६ ॥

सर्वसौभाग्यसम्पन्ने सर्वामयविनाशिके ।
सर्वसम्पत्तिसुखदे मनोमोहतमोपहे ॥ ७ ॥

अविद्यावरणच्छन्नजीवस्वाराज्यदायिके ।
महोद्योतमहोवृन्दविभूषितमहाप्रभो ॥ ८ ॥

सर्वदोषौघरहिते सर्वतो गुणभूषिते ।
कोटिब्रह्माण्डरचनाज्ञप्तकोटिविरञ्चिके ॥ ९ ॥

प्रमोदवननिलये चित्तचैतन्यचन्द्रिके ।
सरय्वाः पुलिने रम्ये रत्नमन्दिरसंस्थिते ॥ १० ॥

महातिमिरसंदोहसंकुलस्थानभासिके ।
स्थूलसूक्ष्मपराकारे स्थूलसूक्ष्मपरातिगे ॥ ११ ॥

शिवे गुरुस्वरूपे च सर्वविद्याविशारदे ।
निर्गुणे अपि भक्तानां कृपयाऽऽत्तगुणद्भुते ॥ १२ ॥

नवे नवस्वरूपे च परमार्थप्रदर्शिके ।
सर्वाज्ञानतमोभेदभानुभे चिद्घनप्रभे ॥ १३ ॥
सर्वासिद्धौघसिद्धीशे सर्वमङ्गल मङ्गले ।
सर्वसौभाग्यसौभाग्ये सर्वकारणकारणे ॥ १४ ॥

सर्वमन्त्रावतरणे सर्वसौख्यमहास्पदे ।
कोटिब्रह्म शिवाराध्यस्वरूपे वचनातिगे ॥ १५ ॥

ॐकारपञ्जरान्तःस्थे कलनादसुकोकिले ।
सप्तकोटिमहामन्त्रमहाराज्यसुखासने ॥ १६ ॥

सर्वाम्नायसमाराध्ये सर्वासिद्धान्तगोचरे ।
महाकारुण्यकलिते समुद्धृतचराचरे ॥ १७ ॥

आसुरानीकसंतप्तधरणीतापमोचिके ।
अखण्डधारपीयूषरसवर्षाविधायिके ॥ १८ ॥

महोष्णेऽतिमहोष्णेभ्यः शीतलेभ्योतिशीतले ।
इन्दिरामन्दिरनिभे चन्द्रचन्दनचर्चिते ॥ १९ ॥

संसारार्णवनिर्मग्नसमुद्धरणपण्डिते ।
तरणीरमणीयाभे मणीन्द्रगणसुप्रभे ॥ २० ॥

चकोरीकृतयोगीन्द्रमानसे चन्द्रनिर्मले ।
श्रेयःफलौघफलिते निष्फले घोरचेतसाम् ॥ २१ ॥

आज्ञाकृतमहाराज्ये मुनिदेवेन्द्रवन्दिते ।
मन्दारपुष्पस्तबकपूजिते सौरभाञ्चिते ॥ २२ ॥

भूभारक्लिष्टभोगीन्द्रपरमानन्ददायिके ।
तापत्रयपराभूतसज्जनौघसुखप्रदे ॥ २३ ॥

सम्प्रदायगुरुज्ञातमाहात्म्ये भूरिगौरवे ।
रहस्ये सुरहस्येभ्यः सर्वशास्त्रौघगोपिते ॥ २४ ॥

महागुह्ये ज्ञानगम्ये भक्तिमार्गप्रकाशिके ।
अनुकूलेस्वभक्तानामभक्तप्रतिकूलिके ॥ २५ ॥

महामाधुर्यमधुरे मनोमोहनकारिके ।
जगतामीतिभीतिघ्ने प्रीतिरीतिसमर्चिते ॥ २६ ॥

उपासनाशास्त्रसारप्रकाशितमहागुणे ।
निर्दोषपूर्णगुणिके स्वतन्त्रे नित्यचेतने ॥ २७ ॥

आनन्दमात्ररूपे च परब्रह्मसुखास्पदे ।
सजातीयविजातीयस्वगतद्वैतवर्जिते ॥ २८ ॥

चमत्कारविचित्रे च रूपचित्रविचित्रिते ।
दैत्यध्वान्तपराभूतिप्रवीणे प्रगुणास्पदे ॥ २९ ॥

स्वशिरोभूषणीकृत्य विन्यस्य गजमूर्द्धनि ।
प्रणम्य जानकीकान्तं स्वप्रभुं पुरुषोत्तमम् ॥ ३० ॥

प्रतस्थौ भरतः श्रीमान् शत्रुघ्नेन समन्वितः ।
आस्थाय स्यन्दनवरं पादुकालाभहर्षितः ॥ ३१ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे पादुकावर्णनो नाम चतुश्चत्वारिंशोऽध्यायः ॥ ३४ ॥

पञ्चचत्वारिंशोध्यायः

ब्रह्मोवाच

वशिष्ठवामदेवाद्यैर्जाबालिप्रमुखैर्द्विजैः ।
मातृभिर्भ्रातृस्वजनैः सुहृद्भिश्चैव बन्धुभिः ॥ १ ॥
सहितो भरतश्चक्रे चित्रकूटं प्रदक्षिणम् ।
धातुभिर्मण्डितान्यस्य शृङ्गाणि सुमहान्ति सः ॥ २ ॥
वीक्षमाणो नदीर्दिव्याः शुभ्रा मन्दाकिनी मुखाः ।
गह्वराणिदरीर्दीर्घा निकुञ्जानि वनानि च ॥ ३ ॥
आधित्यका उपत्यकाश्च लताभूरुहभूषिताः ।
विकसत्कुसुमामोदप्रमोदितमधुव्रताः ॥ ४ ॥
मधुस्रवैर्विटपिभिः पल्लवारुणकान्तिभिः ।
शीतलच्छायसुभगैर्वल्ली मण्डपमण्डितैः ॥ ५ ॥
स्रवन्निर्झरसंदोहशीतलानिलसेविताः ।
प्रोद्गारिचन्दनामोदवासिताः सुभगाः स्थलीः ॥ ६ ॥
तीर्थानि च मनोज्ञानि कोटितीर्थमयानि च ।
देवगन्धर्वसंदोहसेवितानि शुभानि च ॥ ७ ॥
अटमानः ससैन्योऽद्रिं मुमुदेभूपतेः सुतः ।
वाल्मीकेराश्रमं दृष्ट्वा प्रजहर्ष महामतिः ॥ ८ ॥
अनुसूयापतेः पुण्यं स्थानं मन्दाकिनीतटे ।
समागम्य तरून् पश्यन्नुत्फुल्लकुसुमव्रजान् ॥ ९ ॥
गुञ्जद्भ्रमरसंघुष्टान् कोकिलाकाकलीयुतान् ।
अनङ्गदीपनं मन्त्रं पठतीः शुकसारिकाः ॥ १० ॥

पश्यन्नत्यन्तमुदितो न हातुं चक्रमे गिरिम् ।
स्वादूनि फलमूलानि भुञ्जानो हर्षसंयुतः ॥ ११ ॥

ततः प्रतस्थौ मतिमान् भारद्वाजाश्रमोन्मुखः ।
महत्या सेनया युक्तः कृतार्थो रामदर्शनात् ॥ १२ ॥

श्रीरामपादुकायुग्मसनाथीकृतमस्तकः ।
त्रिवेणीसंगमं प्राप्य भारद्वाजाश्रमं तथा ॥ १३ ॥

रथादवततारैष द्रष्टुं मुनिवरं पुनः ।
अथानमद् रघुश्रेष्ठो मुनेश्चरणयुग्मकम् ॥ १४ ॥

सत्कृत्याभिनतो विद्वान् मन्त्रसिद्धो मुनीश्वरः ।
उवाच तं महाराजकुमारं मारसुन्दरम् ॥ १५ ॥

अपि सिद्धाभिलाषोऽसि रामदर्शनतः सुधीः ।
प्रसन्नस्ते रघुपतिः सीतापतिरुदारधीः ॥ १६ ।

कच्चिन्मनोऽनुकूलं ते प्रजानां चानुकूलकम् ।
साधितं कार्यमार्येण धार्मिकेण मनीषिणा ॥ १७ ॥

इत्युक्तस्तेन भरतो भरद्वाजेन योगिना ।
उवाच तं महाभागो भक्तिश्रद्धासुसन्नतः ॥ १८ ॥

बहुधाभ्यर्थितो ब्रह्मन्नार्यः स गुरुभिर्मया ।
नोररीकृतवान् बद्धप्रतिज्ञो दृढनिश्चयः ॥ १९ ॥

यदूचे तद्वदिष्यामि भवते श्रूयतां मुने ।
पितुराज्ञां करिष्यामि प्रतिज्ञामात्मना कृता ॥ २० ॥

न हास्यामि महाबाहो उपायानां शतैरपि ।
चतुर्दशसमा यावद्वने वत्स्याम्य संशयः ॥ २१ ॥

वचः प्रतिवचश्चासीदावयोस्तत्र भूरिशः ।
आर्यस्य सम्प्रतिज्ञातं विनेतुं कोऽपि नाशकत् ॥ २२ ॥

देवताश्चापि गन्धर्वा मुनयश्च तपोधनाः ।
आर्यमेवान्ववर्त्तन्त स्वार्थसंसाधनोन्मुखाः ॥ २३ ॥

प्रायो दशग्रीवमुखा दुष्टचित्ता निशाचराः ।
जगद्विद्रावकास्तेन हन्तव्या इति निश्चितम् ॥ २४ ॥

एषा प्रवृत्तिरार्यस्य लक्ष्यते वनवासिनः ।
तदिष्टं सर्वजगतामुपहन्तुं क ईश्वरः ॥ २५ ॥

अराजकं च राष्ट्रं तन्नाहं पालयितुं क्षमः ।
अतो वशिष्ठो भगवान् पादुके समयाचत ॥ २६ ॥

ते अहं शिरसि न्यस्य कृतार्थो न्यवृतं ततः ।
करिष्येते महीराज्यं ते एव मम मूर्द्धगे ॥ २७ ॥

सोऽहमार्याभ्यनुज्ञातो गच्छामि किल कोसलाम् ।
गृहीत्वा पादुकायुग्ममार्यस्याखिलमङ्गलम् ॥ २८ ॥

भरतस्य वचः श्रुत्वा भरद्वाजोमहामुनिः ।
साधुवादं पुरस्कृत्य बभाषे मुदिताशयः ॥ २९ ॥

धन्योऽसि भरत श्रीमन् यस्य ते मतिरीदृशी ।
शुभं तव सदा भूयाद् धर्मिष्ठस्य महात्मनः ॥ ३० ॥

रघुवंशेति विमले जाता जातागुणाधिकाः ।
प्रीये तव चरित्रेण रामानुज महामते ॥ ३१ ॥

यथा रामस्तथा वीर भवन्तो भ्रातरस्त्रयः ।
येषां शुभवती बुद्धिर्विभर्ति भुवनं सदा ॥ ३२ ॥

मृतोऽपि ते पिता तात जीव[1]त्येव यशस्तनुः ।
यस्यास्ति त्वादृशः पुत्रो धार्मिकः कुलनन्दनः ॥ ३३ ॥

इत्युक्तो भरतस्तेन तमामन्त्र्य मुनीश्वरम् ।
कृताञ्जलिपुटो भूत्वा ययाचे गन्तुमुत्सुकः ॥ ३४ ॥

ततो मुनिवरं विद्वान् भक्त्या कृत्वा प्रदक्षिणम् ।
प्रतस्थौ कोसलां वीरो मन्त्रिभिः परिवारितः ॥ ३५ ॥

पुर्नानिववृते सेना गजाश्वरथपत्तिभिः ।
संकुला सर्वतो व्याप्ता छादयन्ती दिशोदश ॥ ३६ ॥

इभानां घोरचीत्कारैरश्वानां प्लवनक्रमैः ।
रथानां घर्घरारावैर्घोषयन्ती समंततः ॥ ३७ ॥

समुत्तीर्यं यथापूर्वं गङ्गां तुङ्गोर्मिवेगिनीम् ।
उच्छलद् ग्राहमकरप्रकरैरतिभीषणाम् ॥ ३८ ॥

शृङ्गवेरपुरं प्राय भरतः सहितो बलैः ।
सम्मानितो गुहेनोच्चैरयोध्यां स ततोऽव्रजत् ॥ ३९ ॥

दृष्ट्वा दूरात्पुरीं तां तु शून्यप्रायजनालयाम् ।
आनन्दनादरहितां निरुत्साहजनावृताम् ॥ ४० ॥

अदर्शयत् सुमन्त्राय सूतायाभ्याशवर्त्तिने ।
पश्य सूत पुरीमेतामार्येण रहितां ततः ॥ ४१ ॥

सर्वतस्तिमिरस्तोमव्याप्तामिव कुहूनिशाम् ।
प्रोषितोत्साहविभवां परास्तमुखसम्पदम् ॥ ४२ ॥

१. जीवन्नेत्र—अयो०, मथु० ।

दीनां दरिद्रप्रतिमां गतमानामिवाबलाम् ।
राज्ञा राजकुमारेण वर्जितां लुण्ठितामिव ॥ ४३ ॥

नाहमेतां पुरीं सूत सम्प्रति द्रष्टुमुत्सहे ।
अन्यादृशीव मे भाति सर्वतः शोकसंवृता ॥ ४४ ॥

ततस्तां प्राविशद्वीरः पुरीं मलिनदर्शनाम् ।
बहुलोलूकमार्जारव्यापृतप्रचुरालयाम् ॥ ४५ ॥

अस्तचन्द्रार्कतारौघां संवर्त्तरजनीमिव ।
प्रालेयपातनिहतां पद्मिनीमिव निष्प्रभाम् ॥ ४६ ॥

ग्रीष्मशुष्कोदकां पङ्कलुठद्बककुलावृताम् ।
सरसीमिव वित्रस्तयादःकुलसमाकुलाम् ॥ ४७ ॥

राहुग्रस्तमिवार्केन्दुमुख्यनक्षत्रमण्डलाम् ।
विशीर्णजीर्णपर्णौघव्याप्तामिव वनस्थलीम् ॥ ४८ ॥

प्रातर्वेलामिवोद्वाहरात्रेरम्बरकन्यकाम् ।
चन्द्रज्योत्स्नामिव प्रातश्चण्डांशुकरसंद्धताम् ॥ ४९ ॥

अदर्शनोचिताकारामुत्सवध्वनिवर्जिताम् ।
दैवेनैव हतां विश्वशून्यप्रायाममङ्गलाम् ॥ ५० ॥

चिराय मलिनाकारां मौकुरीं पट्टिकामिव ।
निर्मण्डनैर्निरालेपैर्निष्पानभोजनादरैः ॥ ५१ ॥

समस्तोत्साहरहितैर्जनैः समुपलक्षिताम् ।
मार्जनालेपचित्रादिरहितां रूपवर्जिताम् ॥ ५२ ॥

दर्शयंस्तां सुमन्त्राय प्रोवाच भरत शुचा ।
पश्य निःस्तिमितामेतां पुरीं प्रोत्साहवर्जिताम् ॥ ५३ ॥

न श्रूयते क्वचिन्नारीगीतवादित्रसम्भवः ।
न चोपलभ्यते क्वापि रूपं नेत्रसुखावहम् ॥ ५४ ॥

न च पूर्वमिवावान्ति सौरभाणि समंततः ।
कादम्बरीमदोन्मत्ताः प्रतिकर्मसमुज्ज्वलाः ॥ ५५ ॥

वेश्याजना न राजन्ते पुरेव प्रमुदान्विताः ।
न संचरन्ति वेतण्डा मदमत्ताः समंततः ॥ ५६ ॥

न च संश्रूयते ह्रेषा हयानां सुमनोहरा ।
इत्युक्त्वा प्राविशद् वीरस्तत्पितुर्भवनोत्तमम् ॥ ५७ ॥

विलोक्य भरतो गृहं दशरथेन रामेण च
श्रिया च रहितं तदाध्युषितमाच काङ्क्षेन सः ।
विवर्ण इव दुर्मनाः परमशोकचिन्ताकुलो
वभूव कुलमण्डनः किमपि चेतसा व्याकुलः ॥ ५८ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे भरतपुरप्रवेशो नाम पञ्चचत्वारिंशोऽध्यायः ॥ ४५ ॥

●

षट्चत्वारिंशोऽध्यायः

ब्रह्मोवाच

अयोध्यायां प्रविन्यस्य मातृः शोकनिपीडिताः ।
स्वयमुद्विग्नहृदयो वशिष्ठादीनुवाच सः ॥ १ ॥

नाहमत्र निवत्स्यामि शून्यप्रायां पुरीं मम ।
राज्ञा च रामचन्द्रेण लक्ष्मणेन च सीतया ॥ २ ॥

रहितं राजभवनं न भाति किमपीह मे ।
अतोऽह मधिवत्स्यामि नन्दिग्रामं मनोरमम् ॥ ३ ॥

युक्तं सुखितगोपेन व्रजवासिजनैस्तथा ।
श्रीमन्माङ्गल्यकामुख्यव्रजदारजनाकुलम् ॥ ४ ॥

दधिमन्थनकालीनगोपीतंगीतमञ्जुलम् ।
नैचिकीचयसंवीतं महावृषनिनादितम् ॥ ५ ॥

श्रीरामस्य पुरा स्थानं गोपलीलाविलासिनः ।
नित्योत्सवं नित्यसुखं नित्यमाङ्गल्य मण्डितम् ॥ ६ ॥

तत्राहं निवसन्नार्यपादुकार्चनसत्परः ।
विनोदयिष्य आत्मानं गोपालैः सुखिताहिभिः ॥ ७ ॥

अन्यथेदं महद्दुःखं मया सोढुं न शक्यते ।
तत्र स्थितो विनेष्यामि कथंचित्कष्टवासरान् ॥ ८ ॥

तमब्रुवंस्ततो वृद्धा वशिष्ठाद्याश्च मन्त्रिणः ।
यदुक्तं भवता वीर तद्युक्तमिति गम्यते ॥ ९ ॥

भ्रातृवात्सल्यसदृशमुपपन्नमिदं त्वयि ।
सर्वैरनुमतं तात यत्त्वया मनसा मतम् ॥ १० ॥

एवमुक्ते तु भरतः सर्वानामन्त्र्य मन्त्रिणः ।
सुमन्त्रमब्रवीत्सूत रथं मे योजयेति सः ॥ ११ ॥

यथानुपूर्वं सकला मातॄश्चैव गुरूंस्तथा ।
अभिवाद्य महाबाहुरारुरोह रथोत्तमम् ॥ १२ ॥

शत्रुघ्नसहितो वीरः सहमन्त्रिपुरोहितः ।
वशिष्ठाद्यैर्द्विजश्रेष्ठैः प्राङ्मुखैरग्रतः स्थितैः ॥ १३ ॥

सूच्यमानपथः श्रीमांश्चतुरङ्गबलान्वितः ।
पुरवासिजनैः श्रेष्ठैः पृष्ठतोऽनुगतस्तथा ॥ १४ ॥

श्रीरामपादुकायुग्मसमुद्भासितमस्तकः ।
नन्दिग्राम ययौ रम्यं पुण्यारण्यनिषेवितम् ॥ १५ ॥

सुखिताद्यैः स गोपालैर्दूरादेवातिमानितः ।
वन्दितः पूजितश्चैव दधिकुम्भैः सुमङ्गलैः ॥ १६ ॥

तैः संगम्य महास्नेहवश्यैर्गोपालराजकैः ।
उवास परमप्रीतो नन्दिग्रामे मनोरमे ॥ १७ ॥

सोऽब्रवीन्मन्त्रिणः सर्वान् वशिष्ठाद्यान् द्विजोत्तमान् ।
इदं सुविपुलं राज्यं दत्वा मे रामचन्द्रमाः ॥ १८ ॥

अरण्यं प्राविशद् घोरं सीता सौमित्रिसंगतः ।
क्षेमार्थंप्रददौस्वीये पादुके रत्नमण्डिते ॥ १९ ॥

एतयोराज्ञया भूमिं पालयिष्ये सुनिर्भयः ।
अनयोरास्थितं राज्यं रामपादुकयोर्ध्रुवम् ॥ २० ॥

रामस्यागमनं यावत् करिष्ये राज्यशासनम् ।
आयाते तु प्रभौ रामे कृतराज्याभिषेचने ॥ २१ ॥

अयोध्यायां गमिष्यामि इत्थं मे व्रतमाहितम् ।
इत्युक्त्वा सोऽवसद्वीरो नन्दिग्रामे महाव्रजे ॥ २२ ॥

गोपालैर्गोपिकाभिश्च शुभा लीलाः प्रभोः स्मरन् ।
बिभ्रज्जटावल्कलादींस्तापसव्रतवेषभृत् ॥ २३ ॥

ससैन्यो न्यवसत्तत्र व्रजं चानुपमर्दयन् ।
श्रीरामागमनाकाङ्क्षी पादुकाज्ञापरायणः ॥ २४ ॥

स प्रमोदवने तत्र योगपीठे महोत्तमे ।
महासिंहासनवरे तस्य ते पादुके न्यधात् ॥ २५ ॥

तयोरुपरि स छत्रं वालव्यजनमेव च ।
धारयामास भरतो रामभक्तिरसान्वितः ।। २६ ।।

रञ्जयन् प्रकृतीः सर्वाः पूजयन् रामपादुके ।
गायंल्लीलागुणग्रामं रामस्य रसनिर्भरम् ।। २७ ।।

कालं चिक्षेप भरतो भ्रातुरागमसस्पृहः ।
विरहात्तैर्व्रजजनैः सहितो विरहातुरः ।। २८ ।।

इदमधिकपवित्रं पादुकायुग्मदानं दशरथ सुतयोर्यः सादरं संशृणोति ।
स भवात कृतकृत्यो रामभक्ति प्रसादादुपचितधनधान्यः श्रीयशःक्षेमयुक्तः ।। २९ ।।

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे नन्दिग्राम-गमनो नाम षट्चत्वारिंशोऽध्यायः ।। ४६ ।।

●

सप्तचत्वारिंशोऽध्यायः

ब्रह्मोवाच

रामस्य पादुकायुग्मे यावद्राज्यं प्रशासति ।
न भयं नेतयः काश्चित्प्रजानां न शुचो रुजः ।। १ ।।

न दारिद्र्यं न दौर्भाग्यं न मृत्युर्नाशुभाधियः ।
न मालिन्यं न पापोत्थं दुःखं नापि धनक्षयः ।। २ ।।

नापदो दौर्मनस्यं न नोद्वेगो न च बन्ध्यता ।
क्वचिदप्यभवल्लोके कोसलायां विशेषतः ।। ३ ।।

यद्येन याचितं सम्यक्[1] तत्तस्मै प्रतिपादितम् ।
पादुकाभ्यां प्रसादेन नालभ्यं विद्यते क्वचित् ।। ४ ।।

परचक्रप्रशमनं ताभ्यां सम्यक् कृतं भुवि ।
शशास विपुलं राज्यं पादुकायुगलं सदा ।। ५ ।।

इन्द्रादयः सुरास्तत्र कल्पवृक्षप्रसूनकैः ।
अवर्षन् यत्र निहितं पादुकायुगलं प्रभोः ।। ६ ।।

---

१. सम्पत्—अयो० ।

अवाद् वायुः सुखस्पर्शः सुगन्धिर्मन्दसुन्दरः ।
अष्टयोजनतस्तत्र यत्र ते निहिते शुभे ॥ ७ ॥

संदिह्यमाने विषये जनो निश्चेतुमागमत् ।
तस्य तेऽतिशुभामाज्ञामादिषातां नभोगिरा ॥ ८ ॥

धर्मार्थिकाममोक्षेषु यच्च येनाभियाचितम् ।
तत्तस्मै प्रददावार्यपादुकायुग्ममुत्तमम् ॥ ९ ॥

द्वयोर्विवदतोर्मध्ये एकश्चेहानृतं वदेत् ।
श्रीरामपादुकाभ्याशे ध्रुवं तस्य पराजयः ॥ १० ॥

स्वभासा भूरिमार्त्तण्डभानुमत्या विशुद्धया ।
भुवनं व्याप्य सकलं तस्थतुः पादुके प्रभोः ॥ ११ ॥

त एव गुरुरूपेण मन्त्रतन्त्रप्रकाशिके ।
काले तस्मिन्नवर्त्तेतां महावैभवभूषिते ॥ १२ ॥

भरतः प्रातरुत्थाय कृतशौचो विधानतः ।
निमज्ज्य सारवेवारिण्याप्लुतः शुचिविग्रहः ॥ १३ ॥

उपास्त पादुकायुग्मं सर्वाभयवरप्रदम् ।
गन्धैः पुष्पैस्तथा धूपैर्दीपैर्नैवेद्यकल्पनैः ॥ १४ ॥

तयोर्निवेदितं भोज्यमभुङ्क्त स्वयमादृतः ।
माल्यालङ्कारवस्त्रादि बभार वपुषा स्वयम् ॥ १५ ॥

एवं दिने दिने विद्वान् विधिवत् पादुके प्रभोः ।
उपासीनः पञ्चकालमवर्त्तत सुखान्वितः ॥ १६ ॥

रामस्य शैशवी लीलाः कैशोरीर्व्रजभूमिगाः ।
अगायत् सुखितावासैर्गोपैः सह मुदान्वितः ॥ १७ ॥

व्रजस्त्रीणां मनःप्रेम वीक्षमाणोऽतिवृद्धिमत् ।
दिने दिने सुखस्तोममवहत्सोऽतिविह्वलः ॥ १८ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे पादुकाराज्ये सप्तचत्वारिंशोऽध्यायः ॥ ४७ ॥

अष्टचत्वारिंशोऽध्यायः

ब्रह्मोवाच

कदाचित्कुरुपाञ्चालमगधेषु निरन्तरम् ।
अतिवृष्टिरभूद्घोरा सर्वप्राणिभयंकरी ॥ १ ॥

न्युप्तानि दिव्यक्षेत्रेषु वीजानि हलिकैस्तदा ।
किंचित्प्ररुह्य धरणौ सीदन्ति स्म जलाप्लुतौ ॥ २ ॥

न दृश्यते स्म दिवसो दिननाथे तिरोहिते ।
घनेषु घर्घरारावभीषणेषु समंततः ॥ ३ ॥

वर्षत्सु वारिधाराभिरखण्डाभिर्दिवानिशम् ।
चकम्पिरे जनाः सर्वे शीतार्त्ताः शरणार्थिनः ॥ ४ ॥

जनाः खगा मृगा गावो वातवृष्टिप्रवेयिताः ।
निरन्तरासारपातैरुन्मेषं नैव दध्रिरे ॥ ५ ॥

ऊचिरे केऽपि मनुजा हा हा रामो वनं गतः ।
योऽस्मान् रक्षेदीतिभीतेरनुजौ किं करिष्यतः ॥ ६ ॥

हंहो रघुकुलेज्येष्ठ एतावत्पृथिवीपतिः ।
इदानीं त्वन्यथाजाते को न स्त्राता भवेदिह ॥ ७ ॥

दायादं ज्येष्ठमुत्सृज्य दध्रेदशरथोऽनुजे ।
राज्यं कुलक्रमायातमिति बुद्धिविपर्ययः ॥ ८ ॥

अनीतिरेषा सर्वाणि भूतान्युन्मूलयिष्यति ।
किं कुर्मः किं प्रतिब्रूमः कं यामः शरणं वयम् ॥ ९ ॥

मान्धाता सगरश्चैव पृथुरिक्ष्वाकुरेव च ।
भगीरथोऽथ नहुषो ययातिर्भगवान्मनुः ॥ १० ॥

तेषामिदं महद्राज्यं राज्ञां धर्मयशोभृताम् ।
दिलीपरघुमुख्यानां नष्टं दशरथेन किम् ॥ ११ ॥

यद्गुणाढ्यं सुतं राममतिवर्त्य स्त्रियो गिरा ।
कनिष्ठायातदर्हाय भरताय न्यवेदयत् ॥ १२ ॥

तस्येदं कर्मणः प्राप्तं फलमुग्रं प्रजान्तकृत् ।
विशीर्णानीव लोकानां हृदयानि महीतले ॥ १३ ॥

गतो यदवधिप्रायो वनं रामो महायशाः ।
चौरद् रक्षेद् भयाद् रक्षेद् रक्षेद् यश्चेतिभीतितः ॥ १४ ॥

परेभ्यः सततं रक्षेदापद्भ्यश्च निजाः प्रजाः ।
स एव राजाभ्यधिकं माननीयः सतामिह ॥ १५ ॥

स राम एव भुवने नास्त्यन्यः क्षत्रवंशभूः ।
तस्मिन् विप्रोषितेऽरण्यमनाथाः स्म न संशयः ॥ १६ ॥

क्व स कैकेयिकासूनुर्यस्मै राज्यमयाचत ।
अनादृत्येश्वरं रामं कैकेयी भर्तृसन्निधौ ॥ १७ ॥

किं न रक्षति भूतानि भरतो राज्यसंस्थितः ।
सुलभः खलु भोगोऽस्य कठिनं लोकपावनम् ॥ १८ ॥

इति जल्पत्सु लोकेषु चित्रस्तेष्वतिबृष्टितः ।
प्रजाः पौराश्च ये वृद्धास्तेऽन्वयुर्भरतं प्रति ॥ १९ ॥

हाहाशब्दमुखाः सर्वे रक्ष रक्षेति भाषिणः ।
तेषां मध्यंगताः केचिद्वर्षीयांसो बभाषिरे ॥ २० ॥

त्वं नो राजा राजपुत्र देशानां रक्षकस्तथा ।
त्राता भवादद्य दुर्वृष्टेर्निजवीर्यं प्रदर्शय ॥ २१ ॥

तानुवाच स धर्मात्मा भरतस्त्रपयान्वितः ।
नाहं राजास्मि वो वृद्धाः श्रीरामे वनवासिनि ॥ २२ ॥

तस्येमे पादुके दिव्ये कुर्वंतं राज्यशासनम् ।
एतयोरेव विज्ञाप्यं यदद्यार्तिर्भवतामसौ ॥ २३ ॥

हरिष्येते इमे शश्वद्भवतामार्त्तिमुद्गताम् ।
ये ममापि शरण्ये स्तस्तद्वियोगमहापदि ॥ २४ ॥

एवमुक्तास्तु ते लोका वृद्धा वैभववेदिनः ।
रामोऽयमिति विज्ञाय तुष्टुवुः पादुकाद्वयम् ॥ २५ ॥

जय धीर धर्मधारणधुरीण जय कामपूरणैकप्रवीण ।
जय धरणिभारभञ्जनचरित्र जय परमरुचिरगुणगणविचित्र ॥ २६ ॥

जय निगमपथावनबद्धकक्ष जय दितिजनिखिलदैवतविपक्ष ।
जय विविधयज्ञवर्त्तनसुवृत्त जय नीतिपाल दुर्नयनिवृत्त ॥ २७ ॥

जय साधुवादनादितदिगन्त जय विशदयशोराशिभिरनन्त ।
जय लोकवृत्तशोधनसुशील जय दुर्विभाव्यतरभव्यलील ॥ २८ ॥

जय परमपुरुष लक्षणललाम जय देवदनुजमनुजाभिराम ।
जय रमारमणिरमणीयरूप जय निखिललोकरमणानुरूप ॥ २९ ॥

जय दलितदुरितद्वारिद्रदाव जय मञ्जुमहिममहनीयभाव ।
जय कोटिरत्नवर्षणपयोद जय निहितनिखिल नरनयनमोद ॥ ३० ॥

जय विप्रधेनुपालनसुवीर जय महिमगरिममधुरिमगभीर।
जय समरधनुर्धरणैकधीर जय शत्रुमेघमण्डलसमीर ॥ ३१ ॥

जय पूतनासुपानप्रचण्ड जय कुटिलविकटरिपुहृत्यखण्ड।
जय शमितविकृतवात्यानुभाव जय शापविटपिकृतमुक्तभाव ॥ ३२ ॥

जय खगमृगाहिखण्डनसखेल जय दावदहननाशनसहेल।
जय चण्डवृष्टिशमनातपत्र जय दुःखदलनधृतजैत्रपत्र ॥ ३३ ॥

जय सुखितगोपसुखदानदक्ष माङ्गल्यकातिवात्सल्यरक्ष।
जय गोपदारमोहनमनोज जय लोललालितलोचनसरोज ॥ ३४ ॥

जय राम रासमण्डलसुवेश जयदण्डकस्यमुनिमोहनेश।
जय कलितललितलीलाविशेष सहजामुखेन्दुरसनिर्निमेष ॥ ३५ ॥

जय कोसलेन्द्रतनयप्रकाण्ड जय गाधिसूनुमखरक्षकाण्ड।
जय ताडकादिवधसावधान जय सुजनगीतपुण्यावदान ॥ ३६ ॥

जय कलितभर्गकोदण्डभङ्ग जय जनितजनकतनयानुषङ्ग।
जय जामदग्न्यजयकेलिकार जय पूर्णगुणकपुरुषावतार ॥ ३७ ॥

जय गुण समूहसर्वातिरेक जयतातरचितराज्याभिषेक।
जय सत्यवचनहितमुक्तभोग जय गुरुवितीर्णनिजविप्रयोग ॥ ३८ ॥

जय धर्मसेतुरक्षणसमर्थ जय सर्वलोकपूरितपुमर्थ।
जय जातभक्तदुःखावसाय जय नित्यसकलसज्जनसहाय ॥ ३९ ॥

जय देवहंसकुलकमलहंस रघुवंशसरोवरराजहंस।
नरपाल कृपालय पालयेति दीनो भवन्तमिह शरणमेति ॥ ४० ॥

जय राम राम भुवनाभिराम जय राम राम खलकुलविराम।
जय राम राम रसनालराम जय राम राम रमणीयधाम ॥ ४१ ॥

रटतामभीक्ष्णमिति रामनाम तव सर्वकामपरिपूर्त्तिधाम।
न भवे भवन्ति विपदो निकाममिति संविभाव्य शरणं प्रयाम ॥ ४२ ॥

कमनीयतागुणनिकेतनस्य परिभूतकोटिझषकेतनस्य।
घनतापतप्तजनताघनस्य तव राम नाम शरणं जनस्य ॥ ४३ ॥

रजनीशकोटिमुखसौभगाय भजनीयचारुपदमङ्कजाय।
अवते जगन्तिखलदुर्लभाय भवते नमोऽस्तु रघुवल्लभाय ॥ ४४ ॥

कलयन्ति ये न तव रामनाम दलयन्ति ते कथमघौघदाम।
इति ते वयं निखिलशर्मधाम मनसाभिराम चरणं भजाम ॥ ४५ ॥

इति संस्तुवतां तेषां भरतस्य पुरः सताम्।
वर्षीयसां प्रजासौख्यकामानां विदुषां नृणाम् ॥ ४६ ॥

आकाशादभवद् वाणी न भेतव्यमिति द्रुतम् ।
ततस्तेषामभूच्चित्रं सर्वतः स्तिमितात्मनाम् ॥ ४७ ॥

अतिवृष्टिरभूच्छान्ता वातवेगो न्यवर्त्तत ।
जलाप्लुतान्यपि परं वीजानि प्रारुहन् भुवि ॥ ४८ ॥

धान्यौषधिसमृद्धानि क्षेत्राणि धरणीतले ।
फलितान्यभवन् सद्यः पूर्वतोऽतिविलक्षणम् ॥ ४९ ॥

आकरेषु च रत्नानि पर्यदृश्यन्त भूरिशः ।
गिरयो धातुसम्भारैर्व्यराजन्त समंततः ॥ ५० ॥

अफलाः फलवत्यश्च फलिन्यो मेदिनी तले ।
महौषध्यो व्यशोभन्त पादुकाराज्यशासनात् ॥ ५१ ॥

श्रीरामपादुकायुग्मप्रभावाद्धरणीतले ।
उद्वेगदा मनुष्याणामतिवृष्टिरशाम्यत ॥ ५२ ॥

य एतत्पठतेमर्त्यः श्रीरामस्तोत्रमुत्तमम् ।
अतिवृष्टिप्रशमनं वृद्धविप्रौघभाषितम् ॥ ५३ ॥

तस्यार्थसिद्धिः सततमदूरेण करस्थिता ।
यं यमभ्यर्थयेत्कामं तं तमेवालमाप्नुयात् ॥ ५४ ॥

रामस्य पादुकायुग्मं भरताद्यैरुपासितम् ।
चिन्तितं तत्क्षणादेव भक्तानां दुरितापहम् ॥ ५५ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे पादुकाराज्येऽष्टचत्वारिंशोऽध्यायः ॥ ४८ ॥

●

एकोनपञ्चाशत्तमोऽध्यायः

ब्रह्मोवाच

एकदा रामचन्द्रस्य पादुकाराज्यशासने ।
अनावृष्टिरभूद् घोरा सर्वप्राणिभयंकरी ॥ १ ॥

प्रत्यायनाय लोकानां स्वानुभावस्यभूयसः ।
शुभोरेवेच्छया शश्वल्लोकानुग्रहकारिणः ॥ २ ॥

तदा प्रचण्डमार्त्तण्डकरसन्तापिता मही ।
कृषीबलैरुप्तबीजा[1] प्रशुष्यततरां शनैः ॥ ३ ॥

ग्रहैरपि प्रातिकूल्यं तस्मिन्काले ऽवलमितम् ।
रसेभ्यो दूरगः सूर्यस्तताप भुवनं करैः ॥ ४ ॥

भौमो रथाग्रणीर्भानोरभूद्वृष्ट्यवरोधकः ।
धान्यानां भवने मन्द उदवेजयत प्रजाः ॥ ५ ॥

रोहिणी द्वीपगा सिन्धोर्वारिदान् पर्यरुन्धत ।
इत्येवं भीतिरुत्पन्ना प्रजानामन्नलोपतः ॥ ६ ॥

अनावृष्टिकरो योगः सुतरामुदवेजयत् ।
उप्तापि प्लुष्ट बीजा भूर्मानवान्मममीषयत् ॥ ७ ॥

तृणाभावकृते दुःखे पशवो भ्रान्तचेतसः ।
न कंचिच्छरणं प्रापुः पीड्यमानाः क्षुधा मुहुः ॥ ८ ॥

तदा प्रजाश्च पौराश्च जना जानपदा भृशम् ।
भरतं भुवि राजानं विज्ञाय शरणं ययुः ॥ ९ ॥

भूशायिनं ब्रह्मचर्यव्रततत्परमानसम् ।
जटाधरं भस्मलेपं चीवराजिनवाससम् ॥ १० ॥

कुशास्तरणमास्तीर्य तिष्ठन्तं वल्कलावृतम् ।
श्रीरामपादुकासेवायातयाममनामयम् ॥ ११ ॥

नन्दिग्रामकृतावासं व्रजवासिजनैः सह ।
सुखिताद्यैर्गोपवर्यैः शिक्षन्तं प्रेम तादृशम् ॥ १२ ॥

श्रीरामविरहोद्भूतमहावेदनयाकुलम् ।
ध्यायन्तं तस्य पादाब्जे चित्तनिर्वृतिकारके ॥ १३ ॥

प्रेमचर्यापरं दीनं व्रजदारगुरूत्तमम् ।
ध्यानमीलितनेत्राब्जं विलपन्तं कदाचन ॥ १४ ॥

उपेत्य सकला लोका इदमुच्चैर्बभाषिरे ।
उपोपविष्टाः परितो लघुज्येष्ठयथाक्रमम् ॥ १५ ॥

अयि भो रघुशार्दूल श्रीमद्दशरथात्मजः ।
रामानुज प्रजापाल त्वं नो राजासि सम्प्रति ॥ १६ ॥

राजा दशरथस्तुभ्यं राज्यमेतददाद् भुवः ।
कैकेय्या वचसा बद्धस्तव मातुर्विशेषतः ॥ १७ ॥

इदमेव तु विज्ञाय श्रीमान् रामो बनं गतः ।
न्याय्यं वा यदि वा न्याय्यं त्वयि राज्यं प्रतिष्ठितम् ॥ १८ ॥

---

१. जाप्यशु०-मथु० ।

प्रजापालनभारस्ते भुजयोरधुना स्थितः ।
कथं न पश्यसि प्राज्ञ दुःखितास्ता निजाः प्रजाः ॥ १९ ॥

दैवकं राजकं वापि राज्ञा विज्ञेयमात्मना ।
तत्र प्रतिविधेयं च राजा जानाति संततम् ॥ २० ॥

नन्विदानीमनावृष्ट्या प्रजाः सम्पीडितास्तव ।
पशूनां पक्षिणां चापि कालोऽयं समुपस्थितः ॥ २१ ॥

तत्र प्रतिविधातव्यं त्वया भरत सत्वरम् ।
अलौकिकेन ज्ञानेन सर्वं जानासि राघव ॥ २२ ॥

मान्धातृसगराद्यास्ते पूर्वजा पितरः पुरा ।
उपद्रवेभ्योऽनेकेभ्यः पर्य रक्षन्त मेदिनीम् ॥ २३ ॥

स इदानीं भरो राजंस्त्वयिसर्वः प्रतिष्ठितः ।
कथं न लज्जसे वीक्ष्य प्रजाः स्वीयाः सुदुःखिताः ॥ २४ ॥

कमन्यं शरणं याम त्वांविहाय महीपते ।
त्वं पाहि स्वानुभावेन चतुर्वर्गनिधे प्रजाः ॥ २५ ॥

इति ते दुःखमाख्यातमनावृष्टिसमुद्भवम् ।
निवारय महाप्राज्ञ नियुक्तस्त्वं हि रक्षणे ॥ २६ ॥

श्रुत्वा विलपतां नृणां वाक्यमेतत्स राघवः ।
उवाच विमृशंश्चित्ते करुणालोललोचनः ॥ २७ ॥

अतिवृष्टावपीयं मे चिन्तासीद् भवतां कृते ।
तत्र प्रतिविधानं च प्रभुणैव विनिर्मितम् ॥ २८ ॥

यो राजा स प्रजा रक्षेदापद्भ्य इति निश्चयः ।
नाहं राजास्मि वः प्राज्ञाः कृपणो दीनमानसः ॥ २९ ॥

सेवेऽहं प्रभुणा दत्तं पादुकायुग्ममुत्तमम् ।
ते एव राज्यं कुरुतः प्रभौ तस्मिन् वनं गते ॥ ३० ॥

अपि स्तुते प्रभोरेते पादुके राज्यशासिके ।
दुःखं वः प्रतिकर्त्तव्यमाभ्यामेव न संशयः ॥ ३१ ॥

एते हि सर्वदुःखौघनिवारणविचक्षणे ।
समर्थे प्रभुपादाब्जपादुके सर्वदेवते ॥ ३२ ॥

कष्टं वः परिहर्तव्यं पादुकाभ्यां रमापतेः ।
ययोः सर्वमहीराज्यमधुना सम्प्रतिष्ठितम् ॥ ३३ ॥

इत्यादिष्टाः प्रजाः पौरा भरतेन महात्मना ।
मुनीन् विप्रान् पुरस्कृत्य तुष्टुवू रामपादुके ॥ ३४ ॥

प्रजाहितकृते सर्वे मुनयः शुद्धबुद्धयः ।
चतुर्वेदविदो विप्रा आनर्चुः पादुके गिरा ॥ ३५ ॥

लोकेऽवतीर्णः पुरुषः पुराणः सतां पतिर्यज्ञपतिर्महात्मा ।
स एव रामो विदितश्चरित्रैरलौकिकैर्मखरक्षादिकैश्च ॥ ३६ ॥

इमे युवां तस्य विभोः प्रतीते श्रीपादुके श्रीविभवादियुक्ते ।
अनन्यगत्या शरणं गतानां महापदं हरतं सर्ववन्द्ये ॥ ३७ ॥

यत्कर्मतन्त्रं प्रतिशाखं श्रुतीनां सुविस्तृतं भूरि फलोन्मुखं स्यात् ।
तद्वां समाराधनसाहचर्यं विनोषरे न्युप्तबीजायितं स्यात् ॥ ३८ ॥

यद्ज्ञानमज्ञानभिदे विशुद्धं सत्त्वोद्भवं योगकलानिमित्तम् ।
प्रवर्त्तते चित्तशुद्धि विना नो सा चिच्छुद्धिर्युवयोः संस्मृतौ स्यात् ॥ ३९ ॥

याः सिद्धयोऽष्टौदश पञ्चसंख्या महोत्तमा मध्यमा न्यूनभावाः ।
तासां युवामेकपदे प्रसिद्धे उपास्येथे विबुधैरन्यथा किम् ॥ ४० ॥

भवे भवेद्यद्भविकं जनानामिहामुत्र प्रभवं भूरिभेदम् ।
तद्वां समाराधनकर्मजन्यं विज्ञायते सर्वदैवत्यरूपे ॥ ४१ ॥

ये पांशवो युवयोः संनिपृक्ताः सुगन्धयो महिमोदर्कवन्तः ।
कुर्वंस्तेषां संचयनं विरञ्चिर्ब्रह्माण्डकोटीर्विदधाति शक्तः ॥ ४२ ॥

हरिः सहस्रेण शिरोभिरात्मनो वहन्नमून् भक्तिविभिन्नचेताः ।
लब्धा महान्तं भगमात्तचक्रः संरक्षितुं भुवनानीश आसीत् ॥ ४३ ॥

हरः प्रेम्णा पुलकौघाञ्चिताङ्गो मुदा समादाय कृतादरोऽभूत् ।
भवन्श्मशानालय गो विरक्तो विमर्त्यङ्गे भसितोद्धूलनायः ॥ ४४ ॥

शेषोरमा सनकाद्या मुनीन्द्राः सुदुर्लभं युवयोस्तं परागम् ।
भक्तिश्रद्धावित्तचित्ताः कदाचिल्लब्धा तृणं मन्यते सर्वमन्यत् ॥ ४५ ॥

दुःखाद्भयाद्व्याधिपीडादिजातात्प्रजाः स्वीया रक्षतं शश्वदेव ।
दुर्दैवजाता हरतं चापदो नः सदानुकूले भवतं निजानाम् ॥ ४६ ॥

सुखस्य काष्ठा भविकस्य काष्ठा धर्मस्य काष्ठा ज्ञानवैराग्ययोश्च ।
कैवल्य सौख्यस्य परा च काष्ठा प्रतिष्ठिता युवयोरेव नित्यम् ॥ ४७ ॥

दारिद्र्यदुःखं तनुरोगदुःखं यच्चित्तदुःखं भवरोगदुःखम् ।
शश्वत्समस्तं हरतं युवां नो दुःखं प्रभूतं प्रभुपादसक्ते ॥ ४८ ॥

यत्तत्परं ब्रह्मशिवादिमृग्यं रथानं गुणातीतमुदस्तकालम् ।
तस्मिन् महाधाम्नि कृतप्रतिष्ठे युवां रोचयेथे निगमैः स्तूयमाने ॥ ४९ ॥

यन्मूर्द्धि विद्योति सहस्रपत्रं पद्मं प्रपञ्चातिगमस्ति गुह्यम् ।
तत्रेन्दुबिम्बस्थितहंसपीठे युवां सदा योगिभिर्ध्येयरूपे ॥ ५० ॥

या कुण्डलीशक्तिरमोघवीर्या तत्त्वव्रजप्रसवित्री पराख्या ।
सा प्राप्य तस्मिन् युवयोः पदं तत्सुधाभिरासिञ्चति योगिदेहम् ॥ ५१ ॥

लब्धा परं वीर्यमसौ त्रिशक्तिः सम्पर्कतो वां बहुसौख्यं भजन्ती ।
गुणान् प्रसूयाखिलवीजभूतान् जगत्त्रयं सा क्रमतः प्रसूते ॥ ५२ ॥

संहृत्य चाशेषमिदं क्रमेण विश्वं स्वरूपं पुनराप्नुवाना ।
सा वां पदं तत्प्रतिलभ्य नित्यं स्वस्था शेते तत्र समाप्तसर्गा ॥ ५३ ॥

इत्थं समस्तं जगदेतदुच्चैर्निरन्तरं सृजथो रक्षथश्च ।
युवां सदा संहरथश्च शक्त्या विशिष्यवाचाभिरवाच्यरूपया ॥ ५४ ॥

युवां सदा विजयेथे स्वधाम्ना शुभाय लोकस्य चराचरस्य ।
भक्तानुकूले निखिलासुरौघप्रणाशनाय प्रतिकूलरूपे ॥ ५५ ॥

युवां सदा यत्र कृतप्रतिष्ठे तदक्षरं धाम विमुक्तगम्यम् ।
कालातिगं वेदविदो वदन्ति परेणधाम्ना युवयोः सुप्रकाशम् ॥ ५६ ॥

भक्तौघकल्पलतिके सुखकामधेनू कल्याणचिन्तितफलागमदिव्यरत्ने ।
अज्ञानगादतिमिरक्षयकोटिभानुप्त्याश्रिते विपुलसन्मुनिभिर्नमस्ये ॥ ५७ ॥

इति स्तुतिपरायणे मुनिगणे सुवाक्पुष्पकैः
समर्चनपरेऽनिशं रघुवरस्य ते पादुके ।
प्रसादसुमुखाकृती अभवतां सुसम्पत्प्रदे
समस्तवरदोत्तमे जगदतुर्गिरा व्योमगे ॥ ५८ ॥

अलं शोकेन वः प्राज्ञाः प्रभूतं वः सुखं भुविः ।
भविष्यति कृतार्थाः स्थ मदाराधनकर्मणा ॥ ५९ ॥

इति श्रुत्वा गिरं विप्रा मुनयश्च प्रजाजनाः ।
जयेति वचनं प्रोच्य बभूवुः सुखिताशयाः ॥ ६० ॥

प्रमोदवनसम्भूतैः सुपुष्पस्तबकोत्करैः ।
पूजां प्रचक्रिरे सर्वे रामपादुकयोश्चिरम् ॥ ६१ ॥

ततस्ते पादुकायुग्ममानम्य श्रेयसां निधिम् ।
सर्वे भरतमामन्त्र्य कृतार्थाः स्वगृहान् ययुः ॥ ६२ ॥

भरतोऽपि व्रजजनैः प्रेमवद्भिर्निरन्तरम् ।
व्रजलीलाः प्रभोर्गायन्नाराधास्य पादुके ॥ ६३ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे पादुकाराज्ये एकोनपञ्चाशत्तमोऽध्यायः । ४९ ॥

पञ्चाशत्तमोऽध्यायः

ब्रह्मोवाच

अथ तत्पादुकायुग्मं सच्चिदानन्दविग्रहम् ।
कृपया सर्वलोकानां मेत्रीभूय ववर्षतुः ॥ १ ॥

अकस्माज्जलदस्तोम आवृत्य व्योममण्डलम् ।
जगर्ज सर्वलोकानां मनःप्रत्ययकारणम् ॥ २ ॥

ततोवृष्टिरभूद्दिव्या फलौषधिविवर्द्धिनी ।
प्लुष्टान्यपि महीपृष्ठे बीजानि प्रारुहन् क्षणात् ॥ ३ ॥

सरांसि सरितः कुल्याः क्षेत्राणि गिरिनिर्झराः ।
दिव्यमेघजलैः सद्य आप्लुताः पुपुषुः श्रियम् ॥ ४ ॥

पादपाश्चैव वल्लर्य ओषध्यो गुल्मजातयः ।
फलपुष्पप्रभूतश्रीसंछन्ता रेजिरेतराम् ॥ ५ ॥

क्षेत्राणि च निराशानां कृषकाणामकालजाः ।
समृद्धीः फलपुष्पाणां दध्निरे सुखकारिणीः ॥ ६ ॥

फलौषधिभराक्रान्ता मेदिनी सर्वकामधुक् ।
चक्रार सर्वलोकानां चेतोनयनसम्मुदम् ॥ ७ ॥

येषु क्षेत्रेषु बीजानि दग्धानि तपनातपैः ।
तेष्वेव द्विगुणा सम्पद्बीजानां पर्यदृश्यत ॥ ८ ॥

सर्वतो धान्यसम्पत्तिर्भव्याऽसीदद्भुतोत्तमा ।
शिलातलेष्वपि तदा बीजरोहो व्यदृश्यत ॥ ९ ॥

अनुप्तान्यपि चोप्तानि क्षेत्राणि फलवृद्धिभिः ।
महतीं सम्पदं बभ्रुर्दिव्यवृष्टिसमुद्भवाम् ॥ १० ॥

किमेतदद्भुतं तस्मिन् प्रसन्ने पादुकाद्वये ।
रामस्य सर्वकामानां श्रेयसामभिवर्षके ॥ ११ ॥

प्रसन्ने पादुकायुग्मे रामस्य परमात्मनः ।
किं दुर्ग्रहाः प्रकुर्वन्ति नृणां भक्तिमतां भुवि ॥ १२ ॥

ईतयो भीतयः सर्वा व्याधयः परमाधयः ।
सद्यः एव निवर्त्तन्ते प्रसन्ने पादुकाद्वये ॥ १३ ॥

यैरर्चितं रघुवरस्य महानुभावं
सच्चित्सुखैकनिधिपादुकयोर्युगं तत् ।
तेषां भवन्तिधनधान्यसमृद्धियोगा
धर्मे च निश्चलतरा मतिरुत्तमा स्यात् ॥ १४ ॥

येषां सदैव कुलदैवतमेष देवः
सर्वावतारनिधिरद्भुतसच्चरित्रः ।
रामो नितान्तरमणीयगुणाम्बुराशिस्ते
सम्मता दिविषदा मपि पूरुषाग्र्याः ॥ १५ ॥

कल्याणमन्दिरमनन्तसुखैकहेतु
मापत्समूहहरणाय निबद्धकक्षम् ।
श्रीरामचन्द्रमपहाय जनः कमन्यं
कालप्रभावकवलीकृतमाश्रयेत ॥ १६ ॥

ब्रह्मादिदैवतसुपूजितयोः प्रकामं
श्रीरामचन्द्रपदपादुकयोः प्रसादात् ।
केचिज्जनाः सुकृतिनो ननु कालमूर्द्ध्न
पादौ निधाय भुवनेपु जयन्ति नित्यम् ॥ १७ ॥

आसादितामरगणप्रचुर प्रतिष्ठं
तत्सर्वकामपरिपूरणकल्पवृक्षम् ।
अज्ञानपाशहरणं च रघुप्रवीर
श्रीपादुका युगलमात्मनि सेवनीयम् ॥ १८ ॥

रामे विहाय धरणीवलयैकराज्यं
प्राप्ते वनं जनकराजसुतानुजाभ्याम् ।
तत्पादुकायुगलमात्तनिजानुभावं
चक्रे प्रजा सुकुशलानि विपद्गरोऽपि ॥ १९ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे पादुकाराज्ये पञ्चाशत्तमोऽध्यायः ॥ ५० ॥

●

एकपञ्चाशत्तमोऽध्यायः

ब्रह्मोवाच

कदाचिद् यवनानीकैर्नेपालगिरिदेशगैः ।
अन्यैश्च दुर्जनैर्युत्वा कोसलाः पर्युपद्रुताः ॥ १ ॥

गजवाजिरथौद्येन पत्तीनां प्रकरेण च ।
आक्रान्ता धरणी सर्वा परचक्रेण भूयसा ॥ २ ॥

फलोन्मुखीं भुवं दृष्ट्वा मास्याश्वयुज संज्ञके ।
अत्ति क्षेत्राणि धान्यानां परचक्रं बलोद्धतम् ॥ ३ ॥

तत्प्रतीकारकार्याय रघूणां महती चमूः ।
आदिष्टा भरतेनोच्चैः सन्नद्धाभिमुखेऽभवत् ॥ ४ ॥

संरब्धास्ते महारोषा वीर्यवन्तो रणं महत् ।
आरेभिरे महीहेतोरन्योन्यं विजिगीषवः ॥ ५ ॥

यवनानीकमध्यस्थो महाकोल इति श्रुतः ।
विक्रमी बलवान् वीरो रुद्रदत्तवरोर्जितः ॥ ६ ॥

युयुधे रघुभिःसार्द्धं राक्षसौघसमावृतः ।
आवृत्य तस्थिवान् धीरः सर्वानुत्तरकोसलान् ॥ ७ ॥

तेन प्रयुध्यमानानां रघूणां सुमहद्बलम् ।
दधाव सर्वतो भूरि ढक्काघोषपुरःसरम् ॥ ८ ॥

ये निर्जिता दशरथेन पुरा विपक्षा
स्तेऽस्मिन् प्रमीतवति किंचन लब्धरन्ध्राः ।
तज्ज्यायसोस्तु सुतयोर्गतयोर्वनान्तं
तद्विप्रयोगहृतयोर्हि कनीयसोश्च ॥ ९ ॥

लब्धावकाशमुपजायपरास्तदानीं
ते शात्रवा यवनराजबलेन युत्वा ।
आतेनिरे विपदमुत्तरकोसलानां
सन्मन्त्रिभी रघुवरैरपि योध्यमानाः ॥ १० ॥

मासैकमुग्रमभवत्स्वपरप्रभूतचक्रप्रचार परिमर्दितधान्यराशि ।
सत्क्षेत्रपालकृषिकृत्प्रतिकूलभूतं युद्धं सुवैशसभृतां च रघूद्भटानाम् ॥ ११ ॥

अत्याकुलाः कृषिवलाः फलवृद्धिनष्ट्या दुष्टारिचक्रहयवारणचारखिन्नाः ।
हाहेति विक्लवगिरो हृतवर्षभोज्या वृद्धं मुनिं समुपजग्मुररुन्धतीशम् ॥ १२ ॥

ज्ञानैकधाम भगवान् सुकृती वशिष्ठो विज्ञाय पौरजनजानपादौघदुःखम् ।
आदाय तान् कृतशुचः स पुरोहिताग्र्य आसेदिवान् भरतमात्तवनस्थवृत्तिम् ॥ १३ ॥

तमायान्तं समालोक्य जनौघेन समावृतम् ।
मुनिं ज्ञाननिधिं दूराद् रघुवर्यः स्मिताननः ॥ १४ ॥

उदतिष्ठत्सपाद्यार्घः स निवेद्यासनं मुनेः ।
अभ्यर्च्चितं सुखासीनमिदमाह विशांपतिः ॥ १५ ॥

अयि नाम पराक्रान्तान् विज्ञायोत्तरकोसलान् ।
प्रयाता राघवी सेना कच्चिन्न विजयोन्मुखी ॥ १६ ॥

भूशये वन्यवृत्तिस्थे मयि चार्ये वनं गते ।
सन्तीहोपद्रवाः शश्वत्प्रतीकार्यास्तु ते त्वया ॥ १७ ॥

भवान् पुरोहितोऽस्माकं प्राजापत्यस्तपोनिधिः ।
अतो निश्चिन्तहृदयास्तिष्ठामो दर्पिता वयम् ॥ १८ ॥

ईतयो भीतयश्चौरा आधयो व्याधयस्तथा ।
भवत्तपः प्रशमिता बाधन्ते नो कदापि नः ॥ १९ ॥

इत्येवं वदतस्तस्य भरतस्य महात्मनः ।
विधाय दृक्पथे दीनाः प्रजा मुनिरभाषत ॥ २० ॥

अपीमान् पश्यसिप्राज्ञ प्रजालोकान् सुपीडितान् ।
स्वचक्रपरचक्राभ्यां नित्यमुद्विग्नमानसान् ॥ २१ ॥

प्रबलो यवनाधीशो विपक्षैरितरैर्युतः ।
मासाद् रुजति ते देशान् सर्वानुत्तरकोसलान् ॥ २२ ॥

क्षेत्राणि नष्टप्रायाणि कृषकाणां समंततः ।
विलुप्ताराशयश्चैव धान्यानां वर्षभोजनाः ॥ २३ ॥

अत्याकुलाः प्रजा एतास्त्वामेव शरणार्थिनीः ।
उपयाताः प्रभो रक्ष स्ववीर्येण समावृतः ॥ २४ ॥

राजा नित्यं प्रजा रक्षेद् द्विजो रक्षेत्तपोबलम् ।
वैश्यो धनं सदा रक्षेच्छूद्रो रक्षति सेवनम् ॥ २५ ॥

उवाच भरतस्तं तु परिभाव्य समंततः ।
प्रेषितैव पुराब्रह्मन् रघूणां महती चमूः ॥ २६ ॥
तैरन्योन्यं रणे वृत्ते किन्नु म्लेच्छा निपातिताः ।
यन्मया यतनीयं स्यात्तन्मे त्वं ब्रूह्यतः परम् ॥ २७ ॥

नैव सेनामृते राज्ञामुपायः परनिर्जये ।
तस्मिन् सुविहितेचापि यदचशक्यं ततश्च किम् ॥ २८ ॥

अथोवाच मुनिश्रेष्ठो भरतं मन्त्रवित्तमः ।
सत्यं जेष्यन्ति रघवो रिपून् धर्मपरायणाः ॥ २९ ॥

यावदस्य बलं हन्युर्महाकोलस्य संयुगे ।
रुद्रदत्तबलस्तावदयं समनुमादयलि ॥ ३० ॥

हते त्वस्य बले घोरे रघुभिर्युद्धदुर्मदैः ।
परिक्षीणबलं सैष स्वयमेवोपशाम्यति ॥ ३१ ॥

किं नु तावत्प्रकृतयो वर्षभोग्यानि सर्वशः ।
नष्टानि वीक्ष्य धान्यानि स्वे स्वे मनसि बिभ्यति ॥ ३२ ॥

कार्तिकाश्वपुजोर्मासोः सर्वं वर्षं प्रतिष्ठितम् ।
तदैवोपप्लुते धान्यराशौ संवत्सरोवृथा ॥ ३३ ॥

म एष धान्यराशीनां प्रलयः समुपस्थितः ।
स्वचक्रपरचक्राभ्यां तेन चिन्ताकुलाः प्रजाः ॥ ३४ ॥

तत्प्रतीकारमालोच्य कुरुराजन् प्रयत्नतः ।
विज्ञाय प्रकृतीः सर्वा ईतिभीतिसमाकुलाः ॥ ३५ ॥

ऊचे तं भरतः श्रीमान् राजन्निति निजं मुनेः ।
सम्बोधनमुपाकर्ण्य विदूनहृदयोऽभवत् ॥ ३६ ॥

भगवन् सम्यगाख्याहि नाहं राजास्मि निश्चितम् ।
राजा श्रीराम एवास्य जगतोऽहं तु तद्गतिः ॥ ३७ ॥

एतत्तत्पादुकायुग्मं भवतैवाभियाचितम् ।
वहामि शिरसा तस्य समाराधनतत्परः ॥ ३८ ॥

आभ्यामेव पुरा किंचित्प्रजानां दुःखमुत्थितम् ।
निवारितं तथैवाद्य कृपया वारयिष्यतः ॥ ३९ ॥

इत्याश्रुत्य मुनिस्तस्य वाक्यं वाक्यविदुत्तमः ।
सस्मार सम्यग् ज्ञानेन पादुकायुगलं हृदा ॥ ४० ॥

कोटिसूर्यस्फुरद्धाम कोटिचन्द्रसुशीतलम् ।
कोटिकल्पानलोदीप्तं सर्वतः करुणामयम् ॥ ४१ ॥

तदक्षरमयं ब्रह्म सच्चिदानन्दमात्रकम् ।
अनाद्यनन्तमेवैकं परमे धाम्नि संस्थितम् ॥ ४२ ॥

समाधिसम्मीलितबाह्यवृत्तेस्तस्यान्तरे पादुकयोर्युगं तत् ।
समाविरासीत्कृतभूरिसौख्यं परात्मरूपेण चिदेकरूपम् ॥ ४३ ॥

अनुभूय परानन्दं मुनिः स उदतिष्ठत ।
पादुकाविषयध्यानसमाधेः सुप्रसन्नहृत् ॥ ४४ ॥

ततोऽर्वाक् प्रतिबुद्धात्मा प्राजापत्यो मुनीश्वरः ।
अस्तौषीत्परबुद्ध्या तत्पादुकायुगलं प्रभोः ॥ ४५ ॥

यतः शब्दब्रह्म प्रभवति पराख्यं परनभ
स्ततं विश्वोत्पत्तिस्थितिविलयमूलं सुविमलम् ।
तदुच्चैरानन्दार्णवमलमनन्ताक्षरमयं
प्रभोः पादद्वन्द्वं भवभयहरं चेतसि दधे ॥ ४६ ॥

गिरां वृत्तिः साक्षात्प्रभवति न यद्वेदितुमतो
भृशं गोणीभूय प्रचुरगुणसंदोहकृपया[1] ।
प्रवृत्ताचेतोऽपि प्रभवति न यद्गोचरयितु
मनामारूपं तत्तव चरणयुग्मं हृदि दधे ॥ ४७ ॥

---

१. कथया—मथु० ।

अमन्दानन्दानां यदनु पमसाम्राज्यभवनं
महैश्वर्यस्यैकं पदमखिलसौभाग्यसदनम् ।
प्रतिष्ठा सिद्धीनां सकलजनकल्याणजननं
जगद्बीजं वन्द्यं प्रभुचरणयुग्मं हृदि दधे ॥ ४८ ॥
निखिलनिगमस्थानं मन्त्रर्द्धिमन्दिरमद्भुतं
भवभयहरं सच्चिद्रूपं मुदां परमं पदम् ।
यदखिलकलाकल्पं कल्याणकोटिविधायकं
तिमिरहरणं श्रीनाथस्य स्मरामि पदद्वयम् ॥ ४९ ॥
यस्मिन् नित्यं प्रसन्ने न किमपि जगति स्यादलभ्यं जनानां
यन्माया मोहयन्ती जगदखिलमदः सर्वतश्चावृणोति ।
यज्ज्ञानं जीवजातेर्जननमरणयोर्मोक्षणं तत्क्षणेन
ध्येयं तत्पादयुग्मं मनसि जनकजावल्लभस्याश्रयामि ॥ ५० ॥

तत्तत्त्वविस्मृतकरीर्बहुलप्रमादा धिक्संपदो विपद एव परं प्रशस्याः ।
यासु प्रयाति हृदयं प्रभुपादयुग्मं ध्यानेन यद्वदधुना मम विस्मृतस्य ॥ ५१ ॥
ध्येयं ब्रह्मशिवादिभिः सुरवरैः स्वाभीष्टसम्प्राप्तये-
मेयं श्रौतवचःप्रमाणनिबहैः संवित्सहायेन यत् ।
कल्याणैकनिकेतनं जलधिजाशश्वद्विमृग्यं परं
तत्त्वं त्वत्पदपादुकायुगमहं श्रीराम वन्दे कदा ॥ ५२ ॥

कर्माणि यत्र निखिलानि समर्प्य सन्तो नैष्कर्म्यसिद्धिमतुलां कतिचिल्लभन्ते ।
तत्कर्मबन्धननिकृन्तनसाधुशीलं त्वत्पादुकायुगलमीश चिरं निषेवे ॥ ५३ ॥

इत्येवं ये स्तुवन्तीश पादुकायुगलं तव ।
तेषामशेषदुःखानि निवारयतरां प्रभो ॥ ५४ ॥

इत्यस्य तोष्टुवानस्य मुनेर्दिव्यार्थदर्शिनः ।
समगान्नाभसी वाणी श्रुत्योः श्रीपादुकोद्भवा ॥ ५५ ॥

अलं तापेन ते प्राज्ञ मा तप्यस्त्वं प्रजाकृते ।
पूर्वमेव मया तावद्दुःखं प्रतिकृतं नृणाम् ॥ ५६ ॥

यं यमिच्छसि योगीन्द्र तं तं काममवाप्नुहि ।
प्रसादान्मम भूतानां न विपद्भाविनीभवे ॥ ५७ ॥

एवं समाहितमना मुनिर्व्योम्या गिरा तदा ।
गन्धपुष्पादिभिर्भूयः सम्पूज्य प्रभुपादुके ॥ ५८ ॥

पुरोधाय प्रजाः सर्वा आमन्त्र्य भरतं तदा ।
कृतार्थः प्रत्ययोपेतः प्रहृष्टः संन्यवर्त्तत ॥ ५९ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे पादुकाराज्ये वशिष्टकृत्पादुकास्तवे एकपञ्चाशत्तमोऽध्यायः ॥ ५१ ॥

●

द्विपञ्चाशत्तमोऽध्यायः

ब्रह्मोवाच

तस्मिन्नेव क्षणे तत्र परसैन्ये सुदुर्मदे ।
अकस्मादायुधमयी महावृष्टिरजायत ॥ १ ॥

नभसः पतमानानि शस्त्राण्यस्त्राणि भूरिशः ।
क्षणान्निर्दारणं चक्रुः परसैन्यस्य सत्वरम् ॥ २ ॥

खड्गैर्विदारिता योधा यवना सुमहोद्धताः ।
द्विफालीभूतवपुषो दृश्यन्ते स्मरणाङ्गणे ॥ ३ ॥

प्रचण्डानिलचक्राया काण्डवृष्टिः समंततः ।
अजायत जवात्तत्र महानिःस्वनपूर्वकम् ॥ ४ ॥

अर्द्धचन्द्राकृतिधरैर्मल्लैः प्रबलपातिभिः ।
निकृत्तकण्ठा यवनाः शेरते स्म महीतले ॥ ५ ॥

क्षुरप्रैश्चण्डनिर्घातैर्द्विधासंजातविग्रहाः ।
विलपन्तः खलास्तत्र प्राणान्मुमुचुरञ्जसा ॥ ६ ॥

वह्निज्वालामयैः काण्डैरकाण्डविनिपातिभिः ।
छिन्नभिन्नाः स्म धावन्ति शत्रूणां वाजिनो गजाः ॥ ७ ॥

छिन्नाश्चक्रनिपातेन भुशुण्डाः कारिणां रणे ।
मुञ्चन्ति स्म महोच्छ्वासान् भांकारध्वनिभीषणाः ॥ ८ ॥

शूलपातैर्निकृन्तानां नरवारणवाजिनाम् ।
शरीराणि व्यदृश्यन्त पोथितानि महीतले ॥ ९ ॥

निपेतुरसयस्तत्र कुम्भदेशेषु दन्तिनाम् ।
शैलानामिव शृङ्गेषु कुलिशा व्योमदेशतः ॥ १० ॥

महाचक्रनिपातेन सहसैव विचूर्णितैः ।
रथैरातस्तरे भूमिर्विपर्यस्तनिपातितैः ॥ ११ ॥

गदापातविदीर्णानां मुहुर्निःश्वसतां भुवि ।
वपूंषि दुष्टयोधानां लुठन्ति स्म समंततः ॥ १२ ॥

प्रचण्डकरवालौघद्विधाभूतैरनेकशः ।
संस्तृता समरे तत्र मुण्डैरुण्डैश्च मेदिनी ॥ १३ ॥

दिव्यायुधानां नभसः पततां घोरनादिनाम् ।
निर्घातैरभवत्सेना राहुकेतुमयीव सा ॥ १४ ॥

महोल्कानां ज्वलन्तीनां विनिपातात्समं ततः।
ज्वलन्ति ध्वजवस्त्राणि दृश्यन्ते रथमूर्द्धसु ॥ १५ ॥

धावतां गर्जमाननां गजानां शरवृष्टिषु।
हयानां ह्रेषमाणानां शरणं नास किंचन ॥ १६ ॥

अकस्मात्परिजज्वाल कल्पान्तस्येव पावकः।
तस्य ज्वालावलीलीढा विनेशुः परसैनिकाः ॥ १७ ॥

खड्शूलगदाचक्रभुशुण्डीपरिघादिभिः ।
राक्षसानीकमखिलं क्षणेन विनिपातितम् ॥ १८ ॥

हाहेति च प्रभाषन्तो धावमाना इतस्ततः।
विनेशुर्यवनाःसर्वे वर्षायां पांसुभित्तिवत् ॥ ॥ १९ ॥

केचिद्वीर्यमदोद्रिक्ता गृहीतविविधायुधाः।
अनालक्ष्य परांस्तत्र बभ्रमुर्वितथोधमाः ॥ २० ॥

केचिदाकस्मिकीं वृष्टिमायुधानां समंततः।
समालोक्य सुवित्रेसुर्हंताः स्म इति वादिनः ॥ २१ ॥

केचित्संनद्धकवचान्यस्त्राण्यादाय चोद्धताः।
किमेतदिति तर्कन्तो विनेशुरसुरोद्भटाः ॥ २२ ॥

केचिद्दैवकृतं मत्वा कदनं घोरमात्मनः।
इतो नैवं करिष्याम इत्याभाष्य विनेशिरे ॥ २३ ॥

नष्टेषु म्लेच्छराजस्य सैन्येषु सह नायकैः।
मृते च राक्षसानीके शेषाः केचिद्विदुद्रुवुः ॥ २४ ॥

गृहीतवैशसाः केचिद्राजानः परपक्षगाः।
भग्न संकल्पसैन्यौघा दुद्रुवुःसमराजिरात् ॥ २५ ॥

तेषां ध्वजेषु देहेषु रथेषु गजवाजिषु।
रामनामाङ्किता एव निखाताः पत्रिणो रणे ॥ २६ ॥

ते वाचयित्वा रामस्य नाम पुंसेषु लेखितम्।
ललज्जिरेतरां भूपा अनेवंकारिणः पुनः ॥ २७ ॥

नष्टनष्टेषु सैन्येषु परेषां सुप्रमादिनाम्।
वितेनुर्दुन्दुभी घोषं रघूणां सैनिका जनाः ॥ २८ ॥

अकस्माद् दुर्दिनमिव प्रवातेन निवारितम्।
वीक्ष्य राघवसैन्यस्था विस्मिता इवचाभवन् ॥ २९ ॥

ऊचिरे च किमाश्चर्यं राजेन्द्रस्य वनौकसः।
तपते पादुकायुग्मं महीराज्यप्रशासने ॥ ३० ॥

महापदो निवर्त्तन्ते ययोः संस्मरणादपि ।
तयोः प्रभोः पादुकयोः किं चित्रं स्वीयरक्षणम् ॥ ३१ ॥

परचक्रप्रमथनं निजचक्रप्रहर्षणम् ।
श्रीपादुकाभ्यां विहितं यः पढेन्मानवोत्तमः ॥ ३२ ॥

आधयोव्याधयस्तस्य न भवन्ति कदाचन ।
उपस्थितानि दुःखानि कृत्स्नशो यान्ति दूरतः ॥ ३३ ॥

कीर्तनीयमिदं पुण्यं प्रातरुत्थाय मानवैः ।
वशिष्ठस्तवनं चैव परसैन्यविनाशनम् ॥ ३४ ॥

रामराजेन्द्रवर्यस्य पादुकाराज्यमुत्तमम् ।
दुर्दैवभीतिशमनं भक्तानां सुखदायकम् ॥ ३५ ॥

इति श्रीमदादिरामायणो ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे पादुकाराज्ये परसैन्यप्रमीलनं नाम द्विपञ्चाशत्तमोऽध्यायः ॥ ५२ ॥

●

त्रिपञ्चाशत्तमोऽध्यायः

ब्रह्मोवाच

कदाचित्कस्यचित्पुर्यां कृतवास्तोर्द्विजन्मनः ।
गावश्चौरैर्नीयमाना नामोचयत कश्चन ॥ १ ॥

ततः स विप्रो भवनान्निष्क्रान्तो दुःखकर्षितः ।
राजद्वारमुपागत्य विललाप कृतारवः ॥ २ ॥

हाहा दशरथो राजा क्व गतो धर्मपालनः ।
यस्य राज्ये प्रजाः सर्वा दुर्भिक्षं नैव जज्ञिरे ॥ ३ ॥

न चौरभीतीर्नोवापि परचक्रभवां रुजम् ।
नान्योन्यकलहक्लेशं नोत्पातान् दैवनिर्मितान् ॥ ४ ॥

स राजा पालयामास प्रजाः पुत्रानिवात्मनः ।
तस्मिन् दिवं गतवति दुःखिताः स्म न संशयः ॥ ५ ॥

चतुर्ष्वपि सुतेष्वस्य हंत राज्यमराजकम् ।
किं पुनः सम्प्रजातैस्तैर्ये न पान्ति निजाः प्रजाः ॥ ६ ॥

पितृपैतामहमिदं यैस्त्यक्तं राज्यमात्मनः ।
का दुराशापुनस्तेषामन्यो राज्येऽभिषिच्यताम् ॥ ७ ॥

एको वनं गतः साध्वीं भार्यामादाय दैवतः।
तमेवानुगतश्चान्यो दुःशकं लोकपालनम् ॥ ८ ॥

इतरो तद्वियोगेन ब्रह्मचर्यमुपाश्रितः।
पुरीमपि परित्यज्य नन्दिग्रामेऽधितिष्ठति ॥ ९ ॥

व्रजावासैर्जनैर्ग्राम्यैः कुरुते ग्राम्यसंकथाम्।
प्रजापालनमुत्सृज्य सामर्थ्यरहितो यथा ॥ १० ॥

तदन्योऽपि समुत्सृज्य प्रजानां पालनेधुरम्।
निःशक्तिरिव संजातो हंत लोकस्य दुर्भगम् ॥ ११ ॥

कः पालयिष्यति भवं कश्चौराद् दण्डयिष्यति।
रिपूणां सुमहद्राज्यं हन्त दैवेन किं कृतम् ॥ १२ ॥

सोऽहं चौरैर्हृतधनो विलपामि सुदुःखितः।
न मे दुःखप्रतीकर्त्ता कश्चिदत्रोपलक्ष्यते ॥ १३ ॥

श्रुत्वा दुर्वचनं तस्य विप्रस्य रुदतो भृशम्।
शत्रुघ्नो धनुरादाय निष्क्रान्तस्तस्कराध्वनि ॥ १४ ॥

तावत्ते तस्करारण्ये[1] कालयन्तो द्विजस्य गाः।
पाशैर्निर्बध्य पुरुषैः कैश्चिद् दिव्यवपुर्धरैः ॥ १५ ॥

कारागारमनीयन्त गावो विप्रस्य मोचिताः।
वत्सस्नेहस्नुतापोनाः स्वं स्वं स्थानमुपाययुः ॥ १६ ॥

तदुपश्रुत्य शत्रुघ्नोन्यवर्त्तत पुरीं प्रति।
विसिस्मियेतरां चित्ते श्रुत्वा गावः प्रमोचिताः ॥ १७ ॥

तस्मै शुभाशिषो दातुं ब्राह्मणः समुपागमत्।
केन ते मोचिता गाव इति पृष्टः ससम्भ्रमम् ॥ १८ ॥

स उवाच भवान् वीर गवां मोचयिता मम।
पुत्रो दशरथस्यासि चिरं जीव शतं समाः ॥ १९ ॥

विस्मितो द्विजवर्यंतु स प्रणम्य व्यसर्जयत्।
विनिबद्धांस्ततश्चौरानानयामास शत्रुहा ॥ २० ॥

ते पाशबद्धाः पुरतः शत्रुहन्तुरुपस्थिताः।
तानापृच्छत शत्रुघ्नः केन बद्धाःस्थ तस्कराः ॥ २१ ॥

त ऊचिरे वचस्तस्य पुरस्ताच्छृण्वतां नृणाम्।
पीताम्बरधराः केचित्पुरुषाः श्याममूर्त्तयः ॥ २२ ॥

चतुर्भुजाः स्फुरत्कर्णमकराकारकुण्डलाः।
लसत्किरीटशिरसो वनमालाविभूषिताः ॥ २३ ॥

---

१. यह आर्ष पाठ है यहाँ 'तस्कराः अरण्ये' ऐसा पदच्छेद है।

शङ्खचक्रगदापद्मधारिणः शान्तविग्रहाः ।
उत्फुल्लपद्मनयनास्तैर्गर्वितः सम्प्रमोचिताः ॥ २४ ॥

निबध्य च दृढैः पाशैर्वयं कारागृहे कृताः ।
पुनर्नैवं विधास्यामः कोसलायां सतां नृणाम् ॥ २५ ॥

येषां संरक्षकः साक्षात्स्वयं देवो जनार्दनः ।
इति श्रुत्वा वचस्तेषां मोचयामास तांस्ततः ॥ २६ ॥

अहो एषां महद्भाग्यं यैर्दृष्टा रामपार्षदाः ।
नूनमेषा पुरी साक्षाद्वैकुण्ठस्यापि कारणम् ॥ २७ ॥

यत्रत्यानां नृणां देवः स्वयमेवाभिरक्षकः ।
अहो भाग्यमिहस्थानामाचाण्डालमपि स्फुटम् ॥ २८ ॥

वरमिह पशवोऽपि पक्षिणश्च स्फुटतर भाग्यदम्बकेन युक्ताः ।
अपि खलु महितोऽपि नेतरत्र क्षितिपतिरानतराजपूजिताङ्घ्रिः ॥ २९ ॥

चतुर्भुजा एव वसन्ति चात्र मृगाः खगा अप्यधमा मनुष्याः ।
अजस्रमिंगत्सरयूसमीरसम्पृक्तगात्राः सुखसिन्धुमग्नाः ॥ ३० ॥

त्रातात्र रामचन्द्र देव एव स्वयं रमासेवितपादपद्मः ।
ध्रुवं स्वलोके वसतां जनानामसाधनानामपि मुक्तिभाजाम् ॥ ३१ ॥

यान्यत्र साधनशतैर्विहितैर्विशुद्धे चित्ते निरस्तमलमोहमहाकषाये ।
अध्यात्मबोधपरिशीलनतो दुरापा सा मुक्तिरत्र वसतां पशुपक्षिणां स्यात् ॥३२॥

स एव रामचन्द्रो देव एष भ्रातास्ति नः कञ्जदलायताक्षः ।
रमापरा श्रीजनकात्मजैषा यस्याः कला लक्ष्मी एवमन्ये ॥ ३३ ॥

जज्ञौ न कैकेयसुतान तं प्रभुं स्वार्थे प्रमुग्धा विधिदुर्विपाकतः ।
या सेवनीयं सनकादिभिः सदा योगीश्वरैर्यापि तवत्यरण्यम् ॥ ३४ ॥

तत्पादुके एव समस्तमङ्गलश्रीधामनी ब्रह्मशिवादिपूजिते ।
शुभं विधत्तः सकलस्य संततं दयालुताभावनिकेतनेऽधुना ॥ ३५ ॥

कस्त्रायते तदन्य एतदखिलं दुर्दैवदीनं जग-
न्मानोपप्लवमीतिभीतिनिवहग्रस्तंनिरस्तं भगैः ।
तस्मात्त्वां परदैवतं परसुखैः पूर्णा परं पूरुषं
प्राप्तोऽस्मि द्रुतमात्मनैव[1] शरणं श्रीजानकीवल्लभम् ॥ ३६ ॥

त्वं गूढः स्वात्ममायापरिपिहितनिजानन्दमात्रस्वरूपः
कुर्वन्कर्माण्यनेकान्यतिशयसुखदान्यद्भुतान्यत्र लोके ।
सत्त्वोद्रेकादमन्दाभ्युदितपरमसंशुद्धबोधैश्च कैश्चि-
द्भक्तिश्रद्धासमेतैर्भवविरतिकृते नाथ विज्ञायसे त्वम् ॥ ३७ ॥

---

१. नैष–मथु०, अयोध्या० ।

चिकीर्षितं ते नरदेवसूनो को मानवो वेत्तुमिहार्हतीश ।
स्वमाययादेव निगूढलिङ्गस्त्वं लोकपुण्या विदधाति लीलाः ॥ ३८ ॥

धन्यः स एव भरतो रघुनाथ नित्यं यः सेवते तव पदद्वयपादुके ते ।
याभ्यामशेषजगतः सततं शुभानि नन्वक्रियन्त मृदिता विपदश्च सर्वाः ॥ ३९ ॥

धन्यं कुलं खलु रघोः पुरुषाप्रकाण्ड यत्राविरास[1]रामो ह्य खिलात्मभूतः ।
सर्वावतारजलधिः पुरुषोत्तमो यः पूर्णोऽक्षरादपि परः श्रुतिभिर्विमृग्यः ॥ ४० ॥

दृष्ट्वास्वरूपमिह सर्वविलक्षणं ते लोका भवन्ति चकिता इव विस्मयेन ।
न त्वां विदन्ति रघुवल्लभ तत्त्वतस्ते ब्रह्मादिदैवतगणैरपि गीतकीर्त्ते ॥ ४१ ॥

केचिद्वदन्ति तव काल इति स्वरूपं कर्मेति केऽपि विबुधा इतरे स्वभावम् ।
दैवं परे पुरुष इत्यपरे स्वमत्या को वेत्तुमर्हति परं पुरुषोत्तमं त्वाम् ॥ ४२ ॥

इत्यभिष्टूय शत्रुघ्नः परं पुरुषमादृतः ।
शिश्रिये पादुके तस्य भक्त्या भुवनमङ्गले ॥ ४३ ॥

आराधयानः प्रभुपादपादुके निवेद्य ताभ्यां फलपुष्पादिसर्वम् ।
अश्नन् स्वयं तत्परमप्रसादजश्रीचन्दनालिप्तललाटपट्टः ॥ ४४ ॥

कुर्वन् महाभागवतोत्तमोत्तमैः प्रसंगतः प्रेमगोष्ठीरनेकाः ।
शिक्षन्मुनः प्रेमचयं व्रजस्थैर्निनाय कालं व्रजभर्त्तुर्वियोगी ॥ ४५ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे पादुका-राज्ये त्रिपञ्चाशत्तमोऽध्यायः ॥ ५३ ॥

●

चतुःपञ्चाशत्तमोऽध्यायः

ब्रह्मोवाच

कदाचिदसुरौ लोके प्रबलौ बाणरावणौ ।
रामपादुकयोस्तादृक् श्रुत्वा माहात्म्यमुत्तमम् ॥ १ ॥

अमर्षापूरितहृदौ तयोर्हरणकामुकौ ।
आजग्मतुर्योगपीठं निहिते यत्र ते उभे ॥ २ ॥

प्रपूज्य पञ्चकालं तु भरतो भक्तिमान् परम् ।
विधाय नृत्यगीतादि तयोः पुरत आदृतः ॥ ३ ॥

---

१. श्रीरामोऽखि०—मथु०, अयो० ।

यथाकालं महीपृष्ठे संस्तीर्याजिनमासनम् ।
सुष्वाप यामे तृतीये निशीथिन्याः समाहितः ॥ ४ ॥

प्रसुप्तं तमभिज्ञाय दुष्टौ तावसुरेश्वरौ ।
उपेयतुर्हर्त्तुकामौ पादुकापीठमुत्तमम् ॥ ५ ॥

तत्र विश्वक् तयोर्भासा भासितं सकलं तु तत् ।
योगपीठालयं वीक्ष्य विस्मयं ययतुः परम् ॥ ६ ॥

अथ तौ बलसंदृप्तौ हेलयैवेशपादुके ।
उद्ध्रतुर्योगपीठात्पदं नाचलतां तु ते ॥ ७ ॥

उद्धर्त्तुकामावसुरौ प्रयत्नं भूरि चक्रतुः ।
महासारगरिष्ठे ते वोढुं नाशकतां खलौ ॥ ८ ॥

हराचलं समुत्पाट्य हेलयैव बभार यः ।
स रावणोऽतिबलवान् बभूव वितथोद्यमः ॥ ९ ॥

यः सहस्रभुजो बाणः समस्ताधिकसारवान् ।
स रामपादुके वोढुं नाशकत्त्रययाञ्चितः ॥ १० ॥

यावद्वीर्यबलोद्रिक्तप्रयत्नाहितदोर्युगौ ।
तौ वाणरावणौ तत्र ललज्जातेतरां हृदि ॥ ११ ॥

ततस्तो लज्जितौ भूत्वा बाहुवीर्यबलक्षयात् ।
स्वं स्वं स्थानं वीतदर्पौ यथागतमुपेयतुः ॥ १२ ॥

एवं ते भरताराध्ये श्रीरामपदपादुके ।
चक्राते परमं राज्यमेकच्छत्रं तदा भुवः ॥ १३ ॥

धरण्यां सागरान्तायां धर्मनीतिरवर्त्तत ।
खलाः प्रशमिता आसन् साधवो मुदिताशयाः ॥ १४ ॥

देवदानवगन्धर्वमनुष्या मुनिसत्तमाः ।
स्वे स्वे मनसि सर्वेऽपि प्रत्ययं लेभिरेतयोः ॥ १५ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे पादुकाराज्ये वाणारावणपराजयो नाम चतुःपञ्चाशत्तमोऽध्यायः ॥ ५४ ॥

●

पञ्चपञ्चाशत्तमोऽध्यायः

ब्रह्मोवाच

कदाचिदद्योगपीठस्यपादुकादर्शनोत्सुकः ।
सनत्कुमारो भगवांस्तत्रैव समुपागमत् ॥ १ ॥

यत्रास्ते भरतो वीरः पूजा ध्यानपरायणः ।
सुविश्वस्तमना नित्यमाराध्नन् पादुकाद्वयम् ॥ २ ॥

स तमागतमालक्ष्य दूरादेव रघूद्वहः ।
आदरेणाति जग्राह प्रश्रयस्निग्धमानसः ॥ ३ ॥

पाद्यार्घ्याचमनीयादि प्रतिपाद्य महात्मने ।
उवाच वदतां श्रेष्ठः पुत्रो दशरथस्य सः ॥ ४ ॥

सम्यगागतमाराध्यैः कृपया मादृशे जने ।
प्राप्ते सफलतामद्य चक्षुषी तव दर्शनात् ॥ ५ ॥

मादृशां दीनचित्तानां सदनुग्रहणं विभो ।
स वः स्वाभाविको धर्मः करुणार्णवचेतसाम् ॥ ६ ॥

इत्युक्तवति वीरेऽस्मिन् रघुवंशविभूषणे ।
सनत्कुमारो भगवानुवाच कृपयाञ्चितः ॥ ७ ॥

धन्योऽसि कृतकृत्योऽसि तव वीर परा मतिः ।
भाग्यं च तव निःसीमं काकुत्स्थ भुवनत्रये ॥ ८ ॥

यदाराधयसे नित्यं भक्तिश्रद्धासमन्वितः ।
एतद्रामपदाम्भोजपादुकायुग्ममुत्तमम् ॥ ९ ॥

अपि जानासि कच्चित्त्वमेतयोर्महिमोत्करम् ।
सर्वोच्चैः परमे धाम्नि ययोः स्थानं प्रतिष्ठितम् ॥ १० ॥

इमे भाग्यवशाल्लब्धे त्वया वीर मनोरमे ।
ब्रह्मादीना मपि ययोर्दुर्लभं किल दर्शनम् ॥ ११ ॥

समस्तमन्त्रसाम्राज्यस्थानभूते सनातने ।
अमन्दानन्दसंदोहसम्पत्तिपरमास्पदे ॥ १२ ॥

उपास्व सावधानेन मनेसेमे निरन्तरम् ।
लप्स्यसे सर्वसिद्धीनामाश्रयत्वं सुदुर्लभम् ॥ १३ ॥

ज्ञानभक्तिमयी त्वेका प्रेमभक्तिमयी परा ।
पादुका रामचन्द्रस्य सिद्धिदा सेवतां नृणाम् ॥ १४ ॥

इमे समस्तयोगीन्द्रैर्द्वादशान्ते स्वमूर्द्धनि ।
सहस्रपत्रे कमले स्मर्येते सुसमाहितैः ॥ १५ ॥

आनन्दमात्रममलं सदसत्परं यत् पूर्णं समंतत उदित्वरमव्ययं च ।
सच्चिद्घनं त्रिभुवनावधिभूतमेकं श्रीपादुकावतरणं परमं पदं तत् ॥ १६ ॥

यद्विज्ञाय प्रयत्नेन मुच्यते मोहपाशतः ।
प्राप्नुवन्ति परं स्थानं स्वात्मभूतं सनातनम् ॥ १७ ॥

तद्विद्धि वेदवाक्यौघैर्मन्मुखाच्च विशेषतः ।
भज भक्तिप्रपन्नात्मा परमेण समाधिना ॥ १८ ॥

भरत उवाच

ब्रूहि मे श्रीपादुकयोर्महिमानमतः परम् ।
यं विज्ञाय विशेषेण भक्तिः स्यान्मम निश्चला ॥ १९ ॥

यथा भवान् विजानाति यत्र यावच्च सम्मतम् ।
तदुदीरय मे ब्रह्मन् पादुकाख्यं परं पदम् ॥ २० ॥

सनत्कुमार उवाच

नित्यं समाराधयतस्तव शुद्धमभून्मनः ।
त्वमतोऽधिकृतोऽस्यद्धा मन्त्रतत्त्वप्रकाशने ॥ २१ ॥

प्रणवो वाग्भवं माया कमला व्योम चन्द्रमाः ।
चण्डीशश्च शिखीशश्च वह्निझिंटीशविन्दु भाक् ॥ २२ ॥

अयमेकः सुमन्त्रज्ञैः कूटमन्त्र उदाहृतः ।
व्योमशीतां सुवर्गान्त्यमहाकालीशभूसुधा ॥ २३ ॥

वह्निः समीरणोर्धीशविन्दुयुक्तो द्वितीयकः ।
कूटमन्त्रः समाख्यातः सकलागमवेदिभिः ॥ २४ ॥

प्रथमः पुनराकाशश्चन्द्रव्यत्यासतो भवेत् ।
द्वितीयः पुनरूकारस्थान ईकारयुग्भवेत् ॥ २५ ॥

रां रामचन्द्रसहजानन्दिनीयुग्मपूर्वकम् ।
श्रीपादुकां पूजयामि नम इत्यन्ततो वदेत् ॥ २६ ॥

एकत्रिंशद्वर्ण एष पादुकामन्त्र इरितः ।
नारायणऋषिश्चास्य छन्दोऽनुष्टुबिति स्मृतः ॥ २७ ॥

श्रीपादुकाख्या नियतं परमात्मास्य देवता ।
हंसो बीजं तथा सोऽहं शक्तिरित्युच्यते बुधैः ॥ २८ ॥

वाग्भवं कीलकं प्रोक्तं मन्त्रागमविशारदैः ।
चतुर्वर्गे च मन्त्रस्य निनियोगः प्रकीर्त्तितः ॥ २९ ॥

षड्दीर्घस्वरसंयुक्तैर्हंसवर्णैः षडङ्गकम् ।
एवं विधाय कर्त्तव्यं पादुकाध्यानमुत्तमम् ॥ ३० ॥

मुक्ताविद्रुमहेमहीरघटितश्रीपीठराजोत्तमे
दीव्यन्त्यौविलसन्निसर्गपरमानन्दप्रकाशाद्भुते ।
विस्फूर्जत्तरुणार्ककोटि किरणव्याकीर्णशुद्धाम्बरे
सच्चिद्रूपघने घनाद्यतिमिरस्तोमैकनाशोद्भटे ॥ ३१ ॥

भक्तानां शिरसि प्रकाशपटलीफुल्लत्सहस्रच्छदे
पद्मेऽखण्डलचन्द्रमण्डलगतश्रीहंसपीठोत्तमे ।
तिष्ठन्त्यौनिजपूर्णधामनि सदा कल्याणदिव्यास्पदे
मायामोहमदान्धकारशमने सेव्ये विभोः पादुके ॥ ३२ ॥

एवं ध्यात्वा जपेन्नित्यमष्टोत्तरसहस्रकम् ।
गन्धपुष्पादिभिर्नित्यं पूजयेद्भावकल्पितैः ॥ ३३ ॥

तत्रैव स्वस्य शिरसि सहस्रच्छदमन्दिरे ।
भावयेत्संतत दिव्यंभक्तिभावपरायणः ॥ ३४ ॥

पुरश्चर्यां तथा कुर्यान्मन्त्रराजस्य साधकः ।
पुण्यतीर्थे सुविमले मेध्याशी मितभाषणः ॥ ३५ ॥

दशलक्षं जपित्वातु दशांशं हवनं चरेत् ।
नीलोत्पलैस्त्रिमधुरोन्मिश्रैर्मन्त्रस्य सिद्धये ॥ ३६ ॥

तर्पणं मार्जनं चैव ब्रह्मभोजनमेव च ।
यत्किंचिद्विधिवत्कुर्यात्तत्तत्र निवेदयेत् ॥ ३७ ॥

श्रीरामस्य पादुकायुग्मे रामार्पणधिया बुधः ।
निवेदितं श्रीरामाय सर्वकर्मामितं भवेत् ॥ ३८ ॥

यथा यथा स्याद्धृदयस्य शुद्धिर्नित्यं समाराधयतो जनस्य ।
तथा तथा पश्यति सूक्ष्मवस्तुस्वरूपमज्ञानचयो विशीर्णे ॥ ३९ ॥

अनन्तबोधोन्मिषितामलाक्षो भक्त्या परिक्षीणसमस्तविघ्नः ।
आविर्भवत्प्रेमरसद्रुतः स्याद् रामस्वरूपामृतलाभयोग्यः ॥ ४० ॥

इति ते सर्वमाख्यातमज्ञानेन्धनदीपनम् ।
श्रीरामपादुकायुग्ममंत्रतत्त्वमनुत्तमम् ॥ ४१ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे पादुकाराज्ये मन्त्रतत्त्वप्रकाशनो नाम पञ्चपञ्चाशत्तमोऽध्यायः ॥ ५५ ॥

●

षट्पञ्चाशत्तमोऽध्यायः

ब्रह्मोवाच

सनत्कुमार उवाच

अथ वक्ष्यामि ते वीर पादुकाकवचं शुभम् ।
पठनीयं सदा यद्धि मन्त्रसिद्धिमभीप्सता ॥ १ ॥

ब्रह्मणा धारितं पूर्वं नारायणमुखाम्बुजात् ।
तद्भूवयो ब्रह्मणा प्रोक्तं करुणाकलितेन मे ॥ २ ॥

तदहं ते प्रवक्ष्यामि भक्ताय सुमहात्मने ।
रहस्यं सर्ववेदानां सारभूतं समुद्धतम् ॥ ३ ॥

पादुकाकवचस्यास्य नारायणऋषिः स्वयम् ।
छन्दो विराडिति प्रोक्तं पादुका परदेवता ॥ ४ ॥

धर्माकामर्थमोक्षेषु विनियोग उदाहृतः ।
पठनीयं त्रिसंध्यं तत्प्रयत्नेन समाहितैः ॥ ५ ॥

प्रणवो मे शिरः पातु वाग्भवं पातु मेऽलिकम् ।
मायाबीजं मुखं पातु चक्षुषी कमलावतु ॥ ६ ॥

हकारो नासिकां पातु सकारः श्रवसी च मे ।
षकारो गण्डयुग्मं मे शेषं पात्वधरं मम ॥ ७ ॥

उत्तरोष्ठं सदा पातु कूटात्मा मन्त्रविग्रहः ।
द्वितीयः कूटमन्त्रो मे ग्रीवां रक्षतु सर्वदा ॥ ८ ॥

तृतीयः ककुदं पातु चतुर्थोंऽसयुगं सदा ।
राममन्त्र उरः पातु अज्ञानेन्धनदीपनः ॥ ९ ॥

रामचन्द्रः स्वयं पातु दक्षिणं मे भुजं सदा ।
मम वामभुजं पातु सहजानन्दिनी स्वयम् ॥ १० ॥

युग्मं मे हृदयं पातु श्रीरामसहजात्मकम् ।
रामःश्रीपादुका पातु बुद्धिं मे सत्त्वसम्भवाम् ॥ ११ ॥

तत्पूजनक्रिया पातु सदा कर्मेन्द्रियाणि मे ।
नमस्या च सदा पातु ज्ञानेन्द्रिय कदम्बकम् ॥ १२ ॥

उदरं मे सदा पातु मंत्रतेजो महाद्भुतम् ।
नाभिं मे सर्वदा पातु मन्त्र चैतन्यमुत्तमम् ॥ १३ ॥

मन्त्रप्रतिष्ठा सततं पातु मे चरणद्वयम् ।
मन्त्रशक्तिर्गुदंपातु मन्त्रबीजमुपस्थकम् ॥ १४ ॥

मन्त्राक्षराणि मे पान्तु अङ्गप्रत्यङ्गविग्रहम् ।
मन्त्रस्वराः सदा पान्तु शक्तिं मे सर्वकर्मसु ॥ १५ ॥

मन्त्रव्यञ्जनसंदोहः सर्वदावतु मे मनः ।
विन्दुः पातु सदा लक्ष्मीं विसर्गो विपदं द्यतु ॥ १६ ॥

मन्त्रादिः शिर आरभ्य ग्रीवां रक्षतु सर्वदा ।
कण्ठादारभ्य नाभ्यन्तं मन्त्रमध्यं ममावतु ॥ १७ ॥

मन्त्रावसानमनिशंमधोङ्गं मेऽभिरक्षतु ।
अशेषमन्त्ररूपं मे श्रीरामः सकलं वपुः ॥ १८ ॥

महदादिश्च भगवान् परतत्त्वं ममावतु ।
स्थूलदेहं सदा पातु विराड् ब्रह्माण्डरूपधृक् ॥ १९ ॥

भगवान् सर्वभूतस्थः सूक्ष्मदेहं ममावतु ।
परं शरीरं मे पातु परमात्मा सनातनः ॥ २० ॥

सरय्वाः पुलिने रम्ये रत्नधाम्नि सुसंस्थितम् ।
अक्षराख्यं परं ब्रह्म सर्ववेदोपसेवितम् ॥ २१ ॥

श्रीरामपादुकारूपं सर्वशक्तिसमन्वितम् ।
जाग्रत्स्वप्नसुषुप्त्याख्यगुणावस्थाविवर्जितम् ॥ २२ ॥

तुरीयं तुर्यपदगं यदेकं सर्वतः समम् ।
तन्मां पातु विशेषेण सर्वावस्थासु सर्वदा ॥ २३ ॥

योगिनां च शिरोदेशे सहस्रदलपङ्कजे ।
चिच्चन्द्रमण्डलान्तःस्थहंसपीठोपरि स्थितम् ॥ २४ ॥
पराशक्तिसुसम्पर्कसामरस्यरसोद्भवैः ।
अमृतैश्चित्सुखवहैरभिषिक्तं निरन्तरम् ॥ २५ ॥
समस्तमोक्षपदवीसाम्राज्यपदनायकम् ।
अज्ञानतिमिरस्तोम हरणोद्भुरशक्तिभृत् ॥ २६ ॥
सर्वज्ञानक्रियाशक्तिबीजभूतं परात्परम् ।
सर्वमन्त्रसमाराध्यं सर्वागमनमस्कृतम् ॥ २७ ॥
सर्वदैवतसंदोहसाम्राज्यसुखभाजनम् ।
वन्दे श्रीपादुकायुग्मं रामस्य परमात्मनः ॥ २८ ॥

श्रद्धां देहि धियं देहि भक्तिं देहि परात्मिकाम् ।
अनुग्रहं कुरु सदा पादुकापरदेवते ॥ २९ ॥

दत्तां बुद्धिं विशुद्धां गिरमतुलतरां वेदवेदाङ्गरूपां
श्रेष्ठां लोके प्रतिष्ठां मदगजगमनोद्भूतघण्टानिनादम् ।
एश्वर्यं विश्ववर्यंसुखमधिकतरं कामलोलैर्मृगाक्षी-
संदोहैः पूर्यमाणो धनवति सदने त्वत्प्रसादाल्लभन्ते ॥ ३० ॥

एवं संस्तूय सततं भज श्रीपादुकायुगम् ।
भविष्यस्यचिराद्वीर परानुग्रहभाजनम् ॥ ३१ ॥

कवचं च पठाजस्रं पादुकामन्त्रतत्त्वयुक् ।
लप्स्यसे परमानन्दं पूर्णं भरत तत्क्षणात् ॥ ३२ ॥

सौभाग्यं विपुलं भोग्यमारोग्यं सर्वसंपदः ।
प्राप्नुवन्ति जपादस्य जयं च जगति ध्रुवम् ॥ ३३ ॥

इदं रहस्यं रघुनन्दनस्य श्रीपादुकासत्कवचं पठन्नरः ।
अवाप्य धर्मार्थसुकाम मुक्तीर्भोगोदधौ क्रीडतिभक्तिसिद्धः ॥ ३४ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे पादुकाराज्ये कवचमन्त्रकीर्तनं नाम षट्पञ्चाशत्तमोऽध्यायः ॥ ५६ ॥

●

सप्तपञ्चाशत्तमोऽध्यायः

सनत्कुमार उवाच

अथ भूयोऽपि ते वच्मि पादुकातत्त्वमुत्तमम् ।
यज्ज्ञात्वां कृतकृत्यत्वमाप्नोति सततं नरः ॥ १ ॥

वर्णाश्रमाधिकारोक्तं यत्कर्म कुरुते नरः ।
निवेदयेत्तदखिलं रामपादुकयोः सदा ॥ २ ॥

एवं कर्मोद्भवं दोषं बन्धनाख्यं दुरत्ययम् ।
नाप्नोति परधर्मेण निवेदनमहीयसा ॥ ३ ॥

निन्दितानि प्रशस्तानि कर्माणि निखिलान्यपि ।
भवन्ति बन्धनायैव न तु जाते निवेदने ॥ ४ ॥

पुण्यं कर्माखिलं वीर प्रभोः पादे समर्पयेत् ।
अपुण्याच्च विरज्येत निरस्तफलभावनः ॥ ५ ॥

प्रमादात्संगदोषाच्च कृतमप्यशुभं जनः ।
न तत्फलोन्मुखं कुर्याद् रामपादे समर्पयन् ॥ ६ ॥

जिज्ञासेच्च परं तत्त्वं नित्यं गुरुमुखाम्बुजात् ।
तद्वै उपदिशन्त्येव करुणाः खलु साधवः ॥ ७ ॥

युक्तः प्रकृत्या पुरुषो महत्सर्गप्रवर्त्तकः ।
तन्मूलं परमं ब्रह्म प्रवदन्ति यदक्षरम् ॥ ८ ॥

जडजीवात्मनां तद्वै एकोपादानकारणम् ।
पुरुषोत्तमसंज्ञस्य रामस्य चरणं स्मृतम् ॥ ९ ॥

अत एवोत्तमो रामः पुरुषात्प्रकृतेरपि ।
आत्माभेदेन जिज्ञास्यमक्षरं ब्रह्म तत्परम् ॥ १० ॥

श्रीरामपादुकारूपं सच्चिदानन्दमद्वयम् ।
यतोऽवतारा: सर्वेऽपि स्रोतांसि जलधेर्यथा ॥ ११ ॥

गुणावताराः सृष्ट्यर्थं ब्रह्मविष्णुमहेश्वराः ।
बिभूतयः कलाश्चांशाः सर्वे ज्ञानक्रियात्मकाः ॥ १२ ॥

आवेशा अवताराश्च तत्तत्कार्यविधित्सया ।
पुरुषात्प्रभवन्त्येते पुरुषश्चाक्षरात्मकः ॥ १३ ॥

नित्यज्ञानक्रियाशक्ती अक्षरं पुरुषोत्तमात् ।
चत्वारो व्यूहपुरुषा वासुदेवादयः परे ॥ १४ ॥

अक्षरात्मतया नित्यं निविष्टाः पुरुषोत्तमे ।
यद्विशुद्धतमं सत्त्वं परमं धाम तस्य तत् ॥ १५ ॥

तदन्तरितदेहोऽसौ परमात्मा प्रकाशते ।
अनन्तरितदेहस्तु श्रीरामः पुरुषोत्तमः ॥ १६ ॥

आनन्दमात्रसकलकरपादमुखोदरः ।
प्रेमभक्त्यैकविज्ञेयो नित्यलीलारसात्मकः ॥ १७ ॥

तदेव परमं ब्रह्म सर्वव्यापकमव्ययम् ।
धर्मधर्मिस्वरूपेण स्वस्मिन्नेव प्रतिष्ठितम् ॥ १८ ॥

उपादानं निमित्तं च जगतो द्वैतवर्जितम् ।
अखण्डं सैन्धवघनं लीलामात्रप्रयोजनम् ॥ १९ ॥

अवतारावतारिभ्यो विश्वेभ्योऽतिविलक्षणम् ।
तद्भजस्व विशेषेण प्रेम्णा विधिविवर्जितः ॥ २० ॥

प्रेमातिरिक्तः सम्बन्धस्तस्मिन्नैवोपपद्यते ।
अतः प्रेम्णैव सम्बद्धं तदात्मनि विभावय ॥ २१ ॥

अमूर्त्तत्वान्न कर्माख्यः सम्बन्धस्तत्र युज्यते ।
दुर्ज्ञेयत्वान्न च ज्ञानविषयत्वं भवेदिह ॥ २२ ॥

प्रेमा रसमयः साक्षाद्रसो रामात्मकः स्फुटम् ।
अतस्तेनैव सम्बध्याद्रसरूपं [1]सीतापतिम् ॥ २३ ॥

कर्मापि तत्र कर्त्तव्यं रसरूपतया परम् ।
ज्ञानं च तत्र प्रेमाङ्गं भवत्येवेति निश्चयः ॥ २४ ॥

---

१. यहाँ दीर्घत्व आर्ष प्रयोग है ।

इति ते परमं तत्त्वमाख्यातं गुह्यमुत्तमम् ।
मथितं सर्ववेदेभ्यो भजनस्योपयोगि यत् ॥ २५ ॥

इत्युक्त्वा भगवान् योगी भरताय महात्मने ।
सनत्कुमारः प्रययौ स्वेच्छाचारी यथागतम् ॥ २६ ॥

भरतश्च विशेषेण श्रुत्वाऽराध्यमहत्त्वकम् ।
परमात्मस्वरूपेण सिषेवेत्पादुकाद्वयम् ॥ २७ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे पादुकाराज्ये सप्तपञ्चाशत्तमोऽध्यायः ॥ ५७ ॥

●

अष्टपञ्चाशत्तमोऽध्यायः

भरत उवाच

नमो ब्रह्मशर्वादिदेवेन्द्रवन्द्ये परे व्योम्नि नित्यं स्वधाम्नि प्रतिष्ठे ।
सदा सिन्धुजासुन्दरीसंविमृग्ये श्रिया संयुते श्रीप्रभोः पादुके वाम् ॥ १ ॥

सहस्रार्कशीतांशुविद्योतिरूपे महामोहतामिस्रविच्छेदशक्ते ।
दुरन्ते भवाम्भोनिधौ दिव्यनौके प्रभोः पादुके वां सदा सन्नतोऽहम् ॥ २ ॥

पदं श्रेयसां दत्तनिःश्रेयसं यद्विपन्काननोच्छित्तिकर्माकुठारम् ।
महासिद्धिमद्भूरिभाग्योदयाढ्यं विभातीशितुः पादुकायुग्ममेतत् ॥ ३ ॥

सदानन्दपीयूषधाराघनाली जगत्पापसंतापनिर्वापणाय ।
त्रिवेदीशिरःसद्मसर्वस्वभूतं प्रभोः पादुकायुग्ममुद्भातु चित्ते ॥ ४ ॥

सदा सम्पदामेकमुच्चैर्निकेतं महाघोरसंसारपाथोधिसेतुः ।
सुदुर्ज्ञेयतत्त्वप्रबोधैकहेतुश्चिरं शोभतां पादुकायुग्ममेतत् ॥ ५ ॥

अशेषप्रमाणप्रमेयार्थरूपे शिवब्रह्मकोटीररत्नांशुमिश्रे ।
सदानन्दसम्पत्तिसंदोहदाने प्रभोः पादुके प्राप्य भक्त्या भजेऽहम् ॥ ६ ॥

परं चिन्नभश्चारुचिच्चन्द्रकान्त्या सदोदीतया जातनित्यप्रकाशम् ।
तदातिष्ठतो यो स्थिते स्वे महिम्नि प्रभोर्ब्रह्मरूपे भजे पादुके ते ॥ ७ ॥

न यद्भासयत्यर्कबिम्बप्रकाशो न चन्द्रो न वह्निर्न वा विद्युतोऽपि ।
इदं भाति सर्वं यदेवानुभाच्चप्रभोः पादुकायुग्ममस्म्याश्रितस्तम् ॥ ८ ॥

न जाग्रन्न सुप्तिर्न वा सा सुषुप्तिस्तुरीयं पदं तत्र ये संस्थिते वै ।
चिदानन्दसन्मात्रनित्यस्वरूपे भजेऽहं सदा स्वामिनः पादुके ते ॥ ९ ॥

जगत्यर्चने ध्यानपूजानतीनां यदेकं पदं सर्वकल्याणधाम ।
सकामैरकामैस्तथा सर्वकामैस्तदाराधितं पादुकायुग्ममीडे ।। १० ।।

अमूर्त्तं तथा मूर्तिमद्वस्तु किंचिद्गुणैः संगतं निर्गुणं वायदेव ।
यदेकं तथानेकमात्मप्रकाशं परं ब्रह्म तत्पादुकायुग्ममीडे ।। ११ ।।

अशेषावतारावतारिस्वरूपं समस्तागमाम्नायमार्गैकसेव्यम् ।
सुसिद्धान्तिनामन्विताशेषवाक्यं भजे पादुकायुग्ममेकं समस्य ।। १२ ।।

यतो वर्णिताशेषतत्त्वप्रभूतिस्तथाशेषतत्त्वानि यत्राप्ययन्ति ।
परं तत्त्वमेकं परब्रह्मरूपं भजे पादुकायुग्मं सीतापतेस्तत् ।। १३ ।।

पशुग्रामपुत्राङ्गनादीनिनित्यं नृणां यत्प्रसादात्फलान्यैहिकानि ।
भवन्ति प्रभूतानि चामुष्मिकाणि स्मरेत्को न ते पादुके [1]राघवस्य ।। १४ ।।

नमः कोटि कल्याणकल्पद्रुमाभ्यां परानन्दसंदोहचिन्तामणिभ्याम् ।
अपि स्वैरमात्मप्रबोधप्रदाभ्यां सीताभर्त्तुरङ्घ्रिद्वयीपादुकाभ्याम् ।। १५ ।।

ब्रह्मोवाच

इत्यभिष्ठूय भरतो रामराजस्य पादुके ।
पुष्पाञ्जलिं ददावुच्चैः पूजान्ते प्रतिवासरम् ।। १६ ।।

अन्योऽपि मनुजो यस्तु भक्त्या सम्पूज्य पादुके ।
निवेदयति पूजान्ते मन्त्रपुष्पाञ्जलिं सदा ।। १७ ।।

तस्य सर्वार्थसिद्धिः स्यान्मन्त्रसिद्धिरनुत्तमा ।
श्री रामपादुकायुग्मप्रसादः स्यादनन्तरम् ।। १८ ।।

इति ते पादुकाराज्यं रामस्य त्रिजगत्प्रभोः ।
वर्णितं यन्मया तुभ्यं शृणुथात्तत्प्रयत्नतः ।। १९ ।।

स सर्वकामानाप्नोति भक्तिं चास्य सुदुर्लभाम् ।
अन्ते श्रीरामचरणं लभते नात्र संशयः ।। २० ।।

कामदा शुद्धिदा नृणां बुद्धिदा भूरिभुक्तिदा ।
मुक्तिदा सर्वकल्याणदायिनी रामपादुका ।। २१ ।।

विरहोद्वेगनिर्मुक्तिर्भरतस्य यथाभवत् ।
तथा भक्तिमतां नृणां पादुकायाः प्रसादतः ।। २२ ।।

व्याप्नोति नैव विरहो दुःसहोऽपि सीतापतेः ।
अमन्दानन्दसंदोहसुधाशीतलिते हृदि ।। २३ ।।

करुणा रघुनाथस्य भक्तेषु परिवर्त्तति या ।
सैव विश्वासभूरेका नृणां मोहतमोजुषाम् ।। २४ ।।

---

१. श्रीरामस्य —मथु०, अयो० ।

अनन्यकरुणाशाली प्रभुरेको रघूद्वहः ।
तवास्मीति ब्रुवन् मर्त्यो वशीकुर्यात् क्षणेन यम् ॥ २५ ॥
सकृदास्वादितं येन रामेति रसनामृतम् ।
तं न मायामयी घोरा भुजङ्गी दशति क्वचित् ॥ २६ ॥
वीक्षिता रघुनाथेन ये ये करुणया दृशा ।
ते कालपाशनिर्मुक्ताः शेरते सुखसद्मनि ॥ २७ ॥
रघुवीरात्परो लोके न कश्चित्पुरुषोभवे ।
मोचयेत्कालपाशाद्यो भावकान् सकृदात्मनः ॥ २८ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे पादुकाराज्य-समापनं नामाष्टपञ्चाशत्तमोऽध्यायः ॥ ५८ ॥

●

एकोनषष्टितमोऽध्यायः

ब्रह्मोवाच

चित्रकूटं परिक्रम्य प्रपाते भरते पुरीम् ।
सीतानुजाभ्यां सहितः पर्णशालामधिष्ठितः ॥ १ ॥
शुशुभे भगवान् रामो लीलाललितविग्रहः ।
युक्तो रतिवसन्ताभ्यां कन्दर्प इव मूर्तिमान् ॥ २ ॥
अधित्यकोपत्यकासु दरीषु शिखरेषु च ।
सकूजत्कोकिलाढ्येषु कुञ्जेषु गहनेषु च ॥ ३ ॥
विविक्तेषु च देशेषु पतन्निर्झरवारिषु ।
सुशीतमन्थरामोदिमरुल्लुलितवल्लिषु ॥ ४ ॥
देशकालानुरूपैस्तैर्विहारैर्विविधैरपि ।
रमयन् जानकीं नित्यं रेमे रमणकोविदः ॥ ५ ॥
तमेकान्ते समासीनमेकदा प्रिययान्वितम् ।
उपेत्य वीरः सौमित्रिरिदं वचनमब्रवीत् ॥ ६ ॥
कथं खलु महाराज देवकार्यं करिष्यसि ।
यदर्थं कोसलां त्यक्त्वा त्वमरण्यमुपाश्रितः ॥ ७ ॥
कथं घोराणि रक्षांसि हनिष्यसि महाभुज ।
यदर्थमवतीर्णोऽसि महापुरुषसत्तम ॥ ८ ॥

कथं रक्षिष्यसि भुवं राक्षसैरूपमर्दिताम् ।
कथं च प्रियया युक्तो धरणीं पर्यटिष्यसि ॥ ९ ॥

तमुवाच हसन् रामो भ्रातरं प्राणसम्मितम् ।
करिष्ये देवकार्याणि पालयिष्यामि सत्पथम् ॥ १० ॥
यदर्थं कोसलां त्यक्त्वा स्थितोऽस्मि वनगोचरः ।
हनिष्याम्यसुरानीकं हरिष्यामि भुवो भरम् ॥ ११ ॥

भक्तांश्च पालयिष्यामि करिष्ये धर्मरक्षणम् ।
किं च मे दुर्घटं यस्य भ्राता वीर भवादृशः ॥ १२ ॥

किं तैः सुबहुभिर्मित्रैर्ये स्युर्धैर्यापहारकाः ।
एकोऽपि धैर्यधरणो वरं भ्राता भवादृशः ॥ १३ ॥

सोऽहं भवत्सहायेन बन्धुसंदोहसंवृतः ।
अभ्युत्सहेऽखिलं कर्त्तुं यदद्यन्मम चिकीर्षितम् ॥ १४ ॥

तमुवाचाथ सौमित्रिरनुकूलमतिः सदा ।
नित्यमार्यस्य दासोऽस्मि नित्यंचैव निदेशकृत् ॥ १५ ॥

न मे विप्रतिपत्तव्यं प्रभो तव चिकीर्षितम् ।
एतावदेव श्रेयो मे तवाज्ञामनुतिष्ठतः ॥ १६ ॥

पर्णशाला मया कार्या दम्पत्योः सुखवर्धिनी ।
फलान्याहरणीयानि स्वादूनि विविधानि च ॥ १७ ॥

हत्वा मृगान् वराहांश्च मांसानि विविधान्यहम् ।
आनेतास्मि वनादार्यं पक्ष्यामि च सुसंस्कृतम् ॥ १८ ॥

प्रियया सह सुप्तस्य रात्रिं स्थास्यामि तत्परः ।
आबद्धकवचो नित्यं शरपाणिर्धनुर्धरः ॥ १९ ॥

पृष्ठतोऽनुगमिष्यामि आतपत्रं करे दधत् ।
पल्लवांश्च महीपृष्ठे धास्यामि पुरतः क्वचित् ॥ २० ॥

पादन्यासाय दम्पत्योर्यत्र कूर्पाकुला[1] मही ।
यदद्यद्भृत्योचितं कर्म करिष्यामि सुखेन तत् ॥ २१ ॥

भवान् करोतु कार्याणि देवानां सुखहेतवे ।
भुवो भारं हर विभो भक्तांश्च परिपालय ॥ २२ ॥

किं त्वापृच्छामि ते वीर चित्रकूटं मनोहरम् ।
कथं त्यक्ष्यसि सौख्यानामालयं सुचिरोषितम् ॥ २३ ॥

---

१. कूर्पा-शर्करा ।

यत्रैषा जानकी देवी दृश्यते बद्धमानसा ।
अस्येमाः कन्दराश्चास्याः क्रीडासद्मानि संततम् ॥ २४ ॥

त इमे गाङ्गरोद्देशा नानाकुञ्जलतावृताः ।
पतन्निर्झरसंशीतवातवेपितभूरुहाः ॥ २५ ॥

सुगन्धयो गिरेरस्य कुञ्जवृक्षैरुपत्यकाः ।
गुञ्जद्भ्रमरपुञ्जाढ्याश्चन्दनद्रुमशोभिताः ॥ २६ ॥

नदीप्रवहणोपेताश्चक्रसारसनादिताः ।
सरांसि फुल्लपद्मानि स्वच्छानि सुखदानि च ॥ २७ ॥

अधित्यका गिरेरस्य मनोहरशिलातलाः ।
उद्वेल्लद्वल्लरीवृन्दवेष्टितानेकभूरुहाः ॥ २८ ॥

सुकूजत्केकिनिवहाः कोकिलाकाकलीकुलाः ।
पशवः पक्षिणश्चेह मित्राणीव चिरेण नः ॥ २९ ॥

ये सायं प्रातरार्यस्य कर्मदर्भोपजीविनः ।
जानकीदत्तसलिलयवसास्त इमे मृगाः ॥ ३० ॥

आर्येण वा पितान् भूमौ विशुद्धान् वलितन्दुलान ।
उपजीवन्ति ये नित्यं त इमे पक्षिणो गिरेः ॥ ३१ ॥

अमी चकोराः सततं देव्या वदनचन्द्रिकाम् ।
आचमन्तः सुपुष्टाङ्गाः कुर्वन्ति चिरमाशिषः ॥ ३२ ॥

चिराय बद्धप्रेमाणो वयमत्र महागिरौ ।
कथमन्यत्र यास्यामो देवकार्यविधित्सया ॥ ३३ ॥

नन्वयं पर्वतवरो नभःस्पृग्भिर्महोन्नतैः ।
आलिङ्गतीव शिखरैरार्यं प्रत्यागतं वनात् ॥ ३४ ॥

नेमं विहातुं वाञ्छामश्चित्रकूटं महोन्नतम् ।
कन्दमूलफलैर्नित्यमातिथ्यं विदधाति यः ॥ ३५ ॥

अयं गिरिः कोऽप्यतिथिप्रियो वा दासोत्तमो वा तव राजमौले ।
यः सेवते कन्दरकन्दमूलफलप्रसूनप्रसवैः सदा नः ॥ ३६ ॥

देवी च नामनिमिचन्द्रसूता सदास्मै नित्योत्सुका स्पृहयते गिरिपुङ्गवाय ।
भाग्यं तथास्य वचनातिगमद्वितीयं नो शक्यते कथयितुं तव पादभाजः ॥३७॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे चित्रकूटगिरिवर्णनं नामैकोनषष्टितमोऽध्यायः ॥ ५९ ॥

षष्टितमोऽध्यायः

ब्रह्मोवाच

श्रुत्वा सौमित्रिवचनमर्थवद्रघुपुंगवः ।
ऊचे तदनुमत्यैव भक्तकामप्रपूरणः ॥ १ ॥

श्रीराम उवाच

ममाप्येतन्मतं भ्रातर्यदाह रुचिरं भवान् ।
चित्रकूटे गिरिवरे सदा रंस्यामि निश्चितम् ॥ २ ॥

विधान्तरेण करवै देवकार्याण्यशेषतः ।
स्वयं स्थास्यामि सततमिहैव रमणोत्सुकः ॥ ३ ॥

यथा प्रमोदविपिनं नित्यं प्रियतमं मम ।
तथैव सर्वशोभाढ्यश्चित्रकूटः प्रियो मम ॥ ४ ॥

इहस्थः सततं कुर्वे रमणं प्रियया सह ।
सर्वर्त्तुसुभगो ह्येष नित्यं कुसुमितैर्द्रुमैः ॥ ५ ॥

यथा प्रमुद्वनं त्यक्त्वा नैमि क्षणमपि क्वचित् ।
तथैव चित्रकूटाद्रिं न जहामि कदाचन ॥ ६ ॥

कामतायां मनोज्ञायां चक्राङ्कितततनौ सदा ।
विहरामि प्रियाक्रीडः प्रमोदविपिने यथा ॥ ७ ॥

एषोऽस्माकं भक्तवर्यश्चित्रकूटो मनोहरः ।
यत्र तिष्ठामि सौमित्रे सर्वर्त्तुप्रियकेलिकृत् ॥ ८ ॥

न मे वैकुण्ठभवनं श्वेतद्वीपमपि प्रियम् ।
रमाभवनमेवापि यथा मे कामता प्रिया ॥ ९ ॥

शिलातलेष्वधिष्ठाय चित्रकूटगिरेः सदा ।
विहरामि दधत्केलिं देवानां जनयन् मुदम् ॥ १० ॥

सुदुर्लभोऽपि सर्वत्र लोकेषु भजतामहम् ।
चित्रकूटाचले रम्ये सुलभोऽस्मि न संशयः ॥ ११ ॥

यो मत्पादाङ्कितमिमं गिरिराजं सुगह्वरम् ।
स्मरिष्यति क्षणं मर्त्यस्तस्याहं सुलभो भवे ॥ १२ ॥

स्थले स्थले महत्पुण्यं तीर्थकोटिशताधिकम् ।
चित्रकूटे मम भ्रातः स्थानभूते मनोहरे ॥ १३ ॥

किं तस्य बहुभिर्यज्ञैः प्रादक्षिण्येन वा भुवः ।
यश्चित्रकूटं सततं सेवते सुखवर्द्धनम् ॥ १४ ॥

यावन्ति शिखराण्यस्य भास्वन्ति परितो दिशम् ।
तेषामेकतमं दृष्ट्वा स्पृष्ट्वा च सुकृती भवेत् ॥ १५ ॥

स्फाटिकी यत्र विपुला शिला शैले प्रतिष्ठिता ।
तत्र मां स्मरतो नित्यं हृदये प्रविशाम्यहम् ॥ १६ ॥

यो दूरात्पश्यति गिरेः शृङ्गाणि खलु कौतुकात् ।
तस्य देहात्पलायन्ते पातकानि महान्त्यपि ॥ १७ ॥

स्पृष्ट्वा तु चित्रकूटस्य शृङ्गं नभसि विस्तृतम् ।
अनन्तकोटितीर्थेषु स्नातो भवति तत्क्षणात् ॥ १८ ॥

यत्किंचित्कुरुते चात्र सुकृतं कर्ममानवः ।
गिरिराजप्रभावेण तदनन्तगुणं भवेत् ॥ १९ ॥

दत्ताः स्युः कोटिशो गावः स्नाताः स्युस्तीर्थकोटयः ।
कृताः स्युः कोटिशो यज्ञा योऽत्र यात्रामनुव्रजेत् ॥ २० ॥

अत्र वाति सदा वायुः सीताङ्गस्पर्शसौरभी ।
यं स्पृष्ट्वा लभते मर्त्यो जीवन्मुक्तिमनुत्तमाम् ॥ २१ ॥

अत्र वेणुनिनादेन मोहयित्वा सुराङ्गणाः ।
ताभिः सार्द्धं करिष्यामि रासलीलामहोत्सवम् ॥ २२ ॥

महान् प्रमुद्रने रासश्चित्रकूटेऽत्र मध्यमः ।
लङ्कायामधमश्चेति चिरासदपितोऽस्म्यहम् ॥ २३ ॥

ये मे स्वरूपभूता वै व्रजभक्तामहोदयाः ।
तैः साकमुत्तमा लीला प्रमोदविपिने मम ॥ २४ ॥

या देत्यो ज्ञानविज्ञानसम्पन्ना मन्महिस्पृशः ।
तत्सार्द्धं मध्यमा लीला निश्चप्रेमाङ्किता यतः ॥ २५ ॥

रावणेन तु या रुद्धाः कन्यास्त्रिजगति स्थिताः ।
तत्सार्द्धं मध्यमा लीला काममात्राङ्किता यतः ॥ २६ ॥

न सर्वथाहं त्यक्ष्यामि चित्रकूटं महाचलम् ।
त्वया जनकपुत्र्या च सहितोऽत्र चिरं रमे ॥ २७ ॥

अत्र मे व्रजभक्तानां शुद्धप्रेमरसस्पृशाम् ।
संगमः सुखितादीनां भविष्यति न संशयः ॥ २८ ॥

इहस्थ एव त्रिदिवालयानां पौलस्त्यमुख्यैरसुरैर्विद्रुतानाम् ।
कार्यं करिष्याम्यहमुग्रवीर्यं ध्रुन्वन् धनुः संस्थित आजिमूर्ध्दन् ॥ २९ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे सौमित्रिसमाहितिर्नाम षांष्टतमोऽध्यायः ॥ ६० ॥

एकषष्टितमोऽध्यायः

ब्रह्मोवाच

इति श्रीमान् समाधाय भ्रातरं प्राणसम्मितम् ।
रेमे जनकजासंगशोभिपार्श्वो महामनाः ॥ १ ॥

अथास्य वननिष्क्रान्तिमाश्रुत्य सुखितादयः ।
गोपा गोप्यश्च सकलाः प्रमोदवनगोचराः ॥ २ ॥

समतप्यन्त मनसि प्रोद्दीप्तविरहव्यथाः ।
निनिन्दुः केकयीं सर्वे तदायत्तं च भूमिपम् ॥ ३ ॥

अनन्तरं प्रमीतं च रामविश्लेषदुःखतः ।
श्रुत्वा दशरथं सर्वे मौनमासन् सुविस्मिताः ॥ ४ ॥

ततः सुखितगोपालश्चित्रकूटनिवासिनम् ।
श्रुत्वा प्रियतमं राममागन्तुमुपचक्रमे ॥ ५ ॥

तस्य सार्थेऽखिलागोप्यो गोपाश्च विरहातुराः ।
गन्तुं कृतधियः सर्वे जाता उत्कलिकाकुलाः ॥ ६ ॥

इतस्ततः संचरतां व्रजस्थानां स्पृहावताम् ।
प्रस्थानं सज्जमानानां सम्मर्दः सुमहानभूत् ॥ ७ ॥

अनड्वुद्भिः समायोज्य शकटानि समंततः ।
बहूपल्कृप्तपाथेयाः प्रतस्थुर्व्रजवासिनः ॥ ८ ॥

श्रीराममुखचन्द्रस्य महीयस्यादिदृक्षया ।
आकुलाः सर्वतोगोप्यः प्रचेलुर्भूरिभूषिताः ॥ ९ ॥

ताश्चारुभालविलसत्तिलकाभिरामाः पाण्योः सुवर्णवलयोप्तमणिप्रकाशाः ।
चञ्चत्सुमृष्टमणिकुण्डलगण्डशोभाः कूजन्मनोज्ञमणिमेखलया स्फुरन्त्यः ॥ १० ॥

मञ्जीरमञ्जुरणितैर्व्रजकुञ्जवीथीः कुर्वन्त्य उत्सुकमदोद्धुरराजहंसाः ।
प्रोद्भासिनूतनदुकूलसुलक्ष्यगात्रविद्युद्रुचो व्रजकुरङ्गदृशः प्रचेलुः ॥ ११ ॥

आरूढाः प्रसभमनांसि योजितानि प्रोत्तालैः सदृशतमैर्गवां धुरीणैः ।
गायन्त्यो व्रजरमणस्य चेष्ठितानि प्रस्थानावसरमशोभयन् मृगाक्ष्यः ॥ १२ ॥

गोपा महार्हवसनाभरणाभिरामा आबद्धचारुशिखिपिच्छकृतावतंसाः ।
गुञ्जासु गुम्फितमणिस्रज उद्वहन्तो वन्यप्रसूनगिरिधातुविचित्रगात्राः ॥ १३ ॥

श्रीरामचन्द्रमुखचन्द्रदिदृक्षयोच्चैरोमञ्चिताः किमपि कौतुककेलि भाजः ।
स्वस्वप्रियाभिरुपदाभिरुपेतहस्ता गोपेन्द्रसूचितसुभव्यपथाः प्रतस्थुः ॥ १४ ॥

द्विजैः प्रशस्तवचनैः कृतपुण्याहवाचनः ।
माङ्गल्यया व्रजेशान्या प्रतस्थौ सुखितेश्वरः ॥ १५ ॥

आसीद् घनघटाशब्दः स्यन्दनानां प्रसर्पताम् ।
वलीवर्दवराढ्यानां किंकिणीजालमालिनाम् ॥ १६ ॥

ज्ञातयः सुहृदश्चैव बान्धवाः समवुद्धयः ।
अन्वयुः सुखितं गोपं महोत्कण्ठाः समाकुलाः ॥ १७ ॥

द्रक्ष्यामो रघुपुङ्गवं व्रजहितं रामं रमावल्लभं
स्प्रक्ष्यामः पुलकाञ्चितेन वपुषा स्वात्मप्रियं तं चिरात् ।
आनेष्याम इहैव तं परमया प्रीत्या वशीकृत्यचे
त्युत्कण्ठांञ्चितरंहसो व्रजजनाः सर्वे समं प्रस्थिताः ॥ १ ॥

आलोलालकवल्लरीवृतमुखाम्भोजप्रसादाश्रियः
सद्यः स्वस्वमनोरथोपचितया प्रीत्याभिजुष्टाशयाः ।
उद्दीप्ताश्चिरविप्रयुक्तदयितप्रेक्षासमुत्कण्ठया
गायन्त्यो गुणगह्वराणि चरितान्याभीरवामभ्रुवः ॥ १९ ॥

गाढं भुजाभ्यामालिङ्ग्य प्रियं धास्यामहे हृदे (दि) ।
यास्यामो विपुलं मोदं पास्यामो मुखसारघम् ॥ २० ॥

इति चित्त समुत्कण्ठा द्विगुणीभूतरंहसः ।
रामैकतानमनसो नोक्तं किमपि शुश्रुवुः ॥ २१ ॥

विषयान्तरसंचारविलोपनकरी तदा ।
सर्वेषां हृदये गाढं दिदृक्षा समवर्त्तत ॥ २२ ॥

आयाति चेद्रघुवरो निजभक्ताभियाचितः ।
तन्न प्रपूरयेत् काममिति चिन्ताप्यवर्त्तत ॥ २३ ॥

सुखितो व्रजधेनूनां नवनीतं तथा दधि ।
कृत्वा विपुलभाण्डेषु निनाय शकटोत्तमैः ॥ २४ ॥

उपदाश्च तथैवान्या वसनाभरणादिकाः ।
प्रमोदवनसुस्वादुफलपुष्पादिसंगताः ॥ २५ ॥

बर्हांश्च चन्द्रकैराढ्यान् प्रमोदवनवर्हिभिः ।
निर्मुक्तान् रमणीयाभान् श्रीरामस्य मनःप्रियान् ॥ २६ ॥

गिरिधातुविचित्रांश्च महार्हमणिसम्मितान् ।
निनाय सुखितः प्रेम्णा कदम्बस्रज उत्तमाः ॥ २७ ॥

माङ्गल्यका सुतमुखेन्दुदिदृक्षयाढ्यः सद्यः स्नुतस्तनयुगोद्भवभारखिन्ना ।
प्रेमाकुला चिरवियोगविरामजात कौतूहला पुलकिताढ्यतनुः प्रतस्थौ ॥ २८ ॥

अग्रेसराः सकुतुकं व्रजवासिनोऽस्य सम्प्रस्थितस्य सुखितस्य शुभाय शश्वत् ।
वंशीविषाणपणवानकगोमुखादी नाहत्य काहलरवं विदधुः समंतात् ॥ २९ ॥

संजल्पतां स्वस्वमनोरथानुरूपं समस्तव्रजवासिनां सः ।
कोलाहलो मङ्गलतूर्यमिश्रो दिशो नभः क्ष्मां च समाववार ॥ ३० ॥

ते चूर्णयन्तो विपिनानि सद्यश्चक्रैर्मुहुः संचरतां रथानाम् ।
महावलीवर्दखुरैरुदग्रपातैः प्रतस्थुर्व्रजवासिवर्याः ॥ ३१ ॥

सैन्यं महद्रामचन्द्रप्रियाणां महोक्षसाहस्रसमावृतं तत् ।
जगाम भूयो रथघोषयुक्तमुद्वेलसिन्धुप्रतिमं बभासे ॥ ३२ ॥

ते पश्यन्तः शुभान् वासान् जानकीरामयोर्वने ।
ययुः परमशोभाढ्यान् लक्ष्मणेनोपकल्पितान् ॥ ३३ ॥

तथा तथा विक्लवकातरान्तरा बभूवुराभीरवराः सदारकाः ।
यथा यथा ते ददृशुर्महावने रामस्य पर्णौघविनिर्मितान् गृहान् ॥ ३४ ॥

क्व स प्रभुर्बाहुबलोर्जितो युवा समस्तभूभोगकदम्बकोचितः ।
गृहाः क्व चेमे खलु वन्यवृत्तिभिर्निवेष्टुमर्हाः फलमात्रभोजनैः ॥ ३५ ॥

हा देव राजेन्द्र शिरो विभूषणस्फुरन्महानीलमणे बलोर्जित ।
अरण्यवृत्तिस्तव नोचिताप्रभो पदानतक्ष्मापतिकोटिपूजित ॥ ३६ ॥

जिताखिलक्ष्मापतिमौलिमालिका मणिप्रभोद्भासितपादपङ्कज ।
वसन्नरण्ये प्रियया समन्वितः फलानि भुङ्क्षे किमु वन्यशाखिनाम् ॥ ३७ ॥

हा देवि राजेन्द्रसुते रमाधिके प्रसूनशय्याविनिवेशनोचिते ।
शिरीषपुष्पाधिकदेहमार्दवे निद्रातुमर्हासि वने शिलातले ॥ ३८ ॥

हा वीर लक्ष्मणमहासुखभोगयोग्य नीलोत्पलाधिकमनोज्ञतनो तवाद्य ।
भ्रातुर्वने दयितया सह निद्रितस्य संरक्षणो नयनयो क्षणदाः प्रयान्ति ॥ ३९ ॥

कटीनिबद्धतूणस्य चापहस्तस्य जाग्रतः ।
तव प्राहरिकस्यादय सहायोऽपीह नापरः ॥ ४० ॥

प्रचण्डतममार्तण्डकिरणौस्तापिता वने ।
तरुच्छायामधिश्रित्य यूयं विश्रमथ क्षणम् ॥ ४१ ॥

धिक् तां कैकेयतनयां लोभोपहतमानसाम् ।
यया सुखोचिता यूयं वन्यवृत्तौ नियोजिताः ॥ ४२ ॥

एवं रटन्तो व्रजवासिवर्याः प्रियस्य दुःखोपहतैर्मनोभिः ।
ययुः समंताद्विनिभालयन्तस्तास्ता वने पर्णमयीः सुशालाः ॥ ४३ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे सुखितागमनो नामैकषष्ठितमोऽध्यायः ॥ ६१ ॥

द्विषष्ठितमोऽध्यायः

ब्रह्मोवाच

तमसायाः परं कूलं व्रजवासिकुलाकुलम् ।
श्रीरामगुणसंगीतकारिगोपीजनावृतम् ॥ १ ॥

वीक्ष्य गोपालप्रवराः प्रमोदवनवास्तवः ।
आनन्दितहृदो जाताः सर्व एव सदारकाः ॥ २ ॥

अहो अमीषां भाग्यानि तमसातीरवासिनाम् ।
रामैकतानचित्ता ये विषयेभ्यः पराङ्मुखाः ॥ ३ ॥

सुखितव्रजवासिन्यो गोपकान्ताः समुत्सुकाः ।
तमसातीरगोपीभिर्मिलिताः प्रेमवृत्तिभिः ॥ ४ ॥

ताभ्यस्तां कथयामासुः प्रेमलीलां सीतापतेः ।
रात्रिरासविलासाढ्यामनन्यानुग्रहोद्भवाम् ॥ ५ ॥

संगम्य ताभिः सुखितस्य गोप्यो रहः कथासंश्रुतिमत्सरा अपि ।
अतुल्यभाग्योदयदर्शनेन स्वतुल्यभावाः प्रशशंसुरेकदा ॥ ६ ॥

तासां मनःप्रेमनिभालयन्त्यो रमेश्वरानुग्रहमात्रलभ्यम् ।
फलं च तादृक् सहमुक्तिलाभं सुविस्मिता एव चिरं बभूवुः ॥ ७ ॥

ततो निषादराजस्य गुहस्य विषये वने ।
तदिंगुदीतरोर्मूलमासाद्य प्रेमकातरः ॥ ८ ॥

अवात्सीत्सुखितो गोप आभीरबलसंवृतः ।
तत्रत्यं चरितं पश्यन् सम्प्रमुग्ध इवाधिकम् ॥ ९ ॥

तत्र तस्य निषादेन्द्रः संगतोऽभूद् गुहाभिधः ।
श्रीरामभक्तिसम्भूतपुलकाङ्कुरसंवृतः ॥ १० ॥

गुह उवाच

अहो भाग्यवतां मौले सुखमास्से प्रमुद्वने ।
यत्र ते सदने रामः स्वामी मे चिरमावसत् ॥ ११ ॥

गोपचूड़ामणे नित्यं धन्योऽसि धरणीतले ।
रामवात्सल्यभावैकरसामृतनिधिर्भवान् ॥ १२ ॥

त्वद्गृहे रामचन्द्रोऽश्नन् नवनीतं पयो दधि ।
तुच्छीकृत महाभोगः प्रापासाधारणीं मुदम् ॥ १३ ॥

दृष्ट्वा तव मनःप्रेम क्षेमदो रामचन्द्रमाः ।
निबद्धहृदयोऽवात्सीन्नित्यमेव प्रमुद्वने ॥ १४ ॥

अमी आभीरदाराश्च धन्या एव धरातले ।
सुदुर्लभोऽपि रामेन्दुर्याभिः प्रेम्णा वशीकृतः ॥ १५ ॥

इदानीमपि वश्चित्तं मन्ये रामैकगोचरम् ।
यत्सर्वस्वमुपादाय प्रियमेवानुगच्छथ ॥ १६ ॥

युष्माकं विषयाः प्राणा इन्द्रियाणि धनं गृहाः ।
रामैकताना दृश्यन्ते सुहृद्दारसुतादयः ॥ १७ ॥

एवं सर्वात्मनायेषामात्मा रामे समर्पितः ।
तेषामात्मनि रामोऽपि कथं नात्मानमर्पयेत् ॥ १८ ॥

धन्याःस्थ कृतकृत्याः स्थ यूयं भाग्यवतां वराः ।
नित्यमात्मप्रदो येषामखिलात्मा रघूद्वहः ॥ १९ ॥

यूयमेवाभिजानीथ रत्यास्वादं रघूद्वहे ।
यं प्राप्य शंकरोऽप्यासीदनन्यविषयस्पृहः ॥ २० ॥

वैकुण्ठादुत्तमं मन्ये सुन्दरं तत्प्रमुद्वनम् ।
यत्तत्रैव रमा नित्यं सेवते श्रीरघूद्वहम् ॥ २१ ॥

इत्थं स रामभक्तेन संस्तुतः सुखितश्चिरम् ।
उवाच मधुरां वाचमवलोक्य तदाननम् ॥ २२ ॥

अये निषादराज त्वं भाग्यवानसि भूतले ।
राज्येऽपि निःस्पृहो रामः सम्यग्येनावलोकितः ॥ २३ ॥

अत्रेङ्गुदीतरोर्मूले वसन् रामस्त्वया न किम् ।
निर्बन्धेन गृहं नीतः सम्यग् भोगोपभुक्तये ॥ २४ ॥

ननु शृण्मोऽत्ररामेण जलमात्रमुपाशितम् ।
तत्किमेतादृशं कष्टं प्रियस्य समुपस्थितम् ॥ २५ ॥

ननु भूतल एवेह संसुप्तः प्रियया सह ।
जानीमो नैव केनापि मनःप्रेम्णा निवेदितः ॥ २६ ॥

अदत्तमपि योऽस्माकं चोरयत्याहि तं दधि ।
दीयमानोऽपि विषयस्तस्मै नान्यस्य रोचते ॥ २७ ॥

अथवान्यैव मर्यादा रामेणात्रावलम्बिता ।
तामेवानुसृतो नित्यं तादृगेवात्र चेष्टते ॥ २८ ॥

इतिप्रेमाप्लुतैर्वाक्यैः सुखितेनेन्द्रेण भाषितः ।
विस्मतोऽभूद् गुहो वीक्ष्य तत्प्रेम व्रजवासिनाम् ॥ २९ ॥

स तेभ्यः षड्रसं भोज्यं मत्स्यान् मांसं सुरां तथा ।
स्वदेशोत्थं नवं वस्तु निषादेन्द्र उपाहरत् ॥ ३० ॥
तं रामभक्ति इति चेतसि संविभाव्य प्रीतान्तरः सुखितगोपपतिर्विशेषात् ।
अङ्गीचकार तदुपाहृतमन्नराशिं सुस्वादु षड्रसमपीच्य चतुर्विधं सः ॥ ३१ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे सुखित-गुहसंगमो नाम द्विषष्टितमोऽध्यायः ॥ ६२ ॥

●

त्रिषष्टितमोऽध्यायः

ब्रह्मोवाच

अथ नावां सहस्रेण गुहोपनमितेन सः ।
भागीरथीं समुत्तीर्य परं पारमुपेयिवान् ॥ १ ॥
गोपानां तद्बलं भूरि शकटीवृषभाकुलम् ।
अतरज्जह्नुजां नौभिः साधनैः किं नु दुर्घटम् ॥ २ ॥
तेष्वेव रामजानक्योरावासोटजसद्मसु ।
पश्यन्तो महतीं शोभां भारद्वाजाश्रमं गताः ॥ ३ ॥
तत्र माङ्गल्यया सार्द्धं सस्त्रौ तीर्थे सितासिते ।
अदात् सुखितगोपेन्द्रो द्विजेभ्यः कोटिशश्च गाः ॥ ४ ॥
तमागतमुपश्रुत्य भारद्वाजो महामुनिः ।
अगृह्णात् परया प्रीत्या परमादृतमानसः ॥ ५ ॥
तमातिथ्येन जगृहे गोपराजं महामुनिः ।
उपविष्टं सुखेनाथ व्याहरच्छुभया गिरा ॥ ६ ॥
त्वय्येव रघुवर्यस्य परं प्रेम विजृम्भते ।
तदेकवश्य एवासौ निरपेक्षो जगत्त्रये ॥ ७ ॥
भाग्येन खलु दृष्टोऽसि त्वं गोपनृपते मया ।
क्व नु रामप्रिया दृश्याः प्रेमापूरितमानसाः ॥ ८ ॥
त्वयैव शोभतेऽत्यर्थं गोपेन्द्र प्रमुदाटवी ।
नवं नवं महं सूते शृणुमः संततं वयम् ॥ ९ ॥
अपास्य ममतामुच्चैर्गृहेषु स्वजनेषु च ।
श्रेयोऽर्थी किं न सेवेत भवतस्तत्प्रमुद्वनम् ॥ १० ॥

साक्षाद्वै रामभवनं स्वर्गादतिमनोहरम् ।
प्रेमपाठलसत्कण्ठकलकण्ठकुलाकुलम् ॥ ११ ॥

जाने न तत्समं धाम क्वचिदस्ति महीतले ।
तथापि स्वगृहाशाभिर्ग्रस्ता इव वयं सखे ॥ १२ ॥

येभ्योभवान् कृपयते गोपवंशशिखामणे ।
कतिचित्ते सुकृतिनो निवसन्ति प्रमुद्वने ॥ १३ ॥

कर्मणां सांख्य योगानामुपासनशुभाध्वनाम् ।
दूरे फलं संचिनुषे रामप्रेमरसामृतम् ॥ १४ ॥

न ब्रह्मशिवशेषाद्या लभन्ते श्रेय ईदृशम् ।
यादृशं भवंता लब्धं श्रीरामप्रेमसंचितम् ॥ १५ ॥

इति स्तुत्वा मुनिस्तस्य प्रेममानसमुत्तमम् ।
तां रात्रिं तत्र तत्सार्द्धं चक्रे गोष्ठीं रसोत्तराम् ॥ १६ ॥

ततः प्रभाते संजाते मुनिदिष्टेन वर्त्मना ।
जगाम यमुनां तीर्त्वा गोपराजो महद्वनम् ॥ १७ ॥

अतिक्रम्याटवीं नीलां हरित्पर्णमयैर्द्रुमैः ।
तमेकवटमासाद्य मुमुदे गोकुलेश्वरः ॥ १८ ॥

यत्र रामः पुराश्रान्तः पथि स्वप्रिययान्वितः ।
सम्प्राप्य शीललच्छायमापेदे विश्रमं क्षणम् ॥ १९ ॥

अथाससाद गोपेन्द्रः शैलराजं मनोरमम् ।
नभः सानुसमूहेन समंताद्व्याप्य संस्थितम् ॥ २० ॥

श्वेतपीतहरिद्रक्तनानाशिखरशोभितम् ।
सर्वस्वमिव मेदिन्या गर्भस्थं बहिरुद्गतम् ॥ २१ ॥

सद्रत्नशिखरस्तम्भत्विषा पूरितदिक्तटम् ।
छुरन्तमिव चाकाशं दिवारात्रिप्रकाशया ॥ २२ ॥

आलिङ्गन्तमिवार्केन्दू शिखरैरुच्छ्रितैर्भुजैः ।
क्वचित्कर्पूरधवलं क्वचित्सिन्दूरशोणितम् ॥ २३ ॥

सरःसु विकचाम्भोजैर्हसन्तमिव सर्वतः ।
भणन्तमिव सत्सूक्तीः कोकिलाकाकलीरवैः ॥ २४ ॥

पश्यन्तमिव शोभां स्वां चन्द्रकैर्वनकेकिनाम् ।
स्पृशन्तमिव दिक्कान्ताः समंतान्निजपालिभिः ॥ २५ ॥

काननैः पत्रसंछन्नैर्वसानमिव वाससी ।
सर्वकौतूहलमयं सर्वशोभासमन्वितम् ॥ २६ ॥

मन्दाकिनीजलस्रोतःसिक्तपुष्टमहीरुहम् ।
सर्वतोहंसचक्राह्वसारसौघनिनादितम् ॥ २७ ॥
रत्नवैदूर्यभित्तित्विट्परिशोभितविग्रहम् ।
जाम्बूनदमयैः शृङ्गैः क्वाप्यावृतनभस्तलम् ॥ २८ ॥
आसाद्य चित्रशिखरं गिरिमद्वितीय श्रीशोभितं मुमुदिरे हृदि गोपवर्याः ।
श्रीरामचन्द्रमुखचन्द्रनिरीक्षणोत्थ भूयोमुदामभवदागम एव चैषाम् ॥२९॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे व्रजवासि-चित्रकूटागमनो नाम त्रिषष्ठितमोऽध्यायः ॥ ६३ ॥

●

चतुःषष्टितमोऽध्यायः

ब्रह्मोवाच

रामचन्द्रस्य तत्स्थानमापृच्छन्तो व्रजौकसः ।
तापसान् वनवृत्तींश्च तत्रैव समुपाययुः ॥ १ ॥
पुरोगः सुखितस्तेषां व्रजवासिकुलैर्वृतः ।
रामस्यावासमापृच्छन् विचचार महीधरे ॥ २ ॥
गोपा मन्दाकिनीं वीक्ष्य महोर्मिशतसंकुलाम् ।
तत्संगिमरुदापृक्ता बभूवुर्लब्धविश्रमाः ॥ ३ ॥
पुरः समूहशस्तेषां गोपानामुपसर्पताम् ।
सम्मर्दः सुमहानासीच्चित्रकूटमहीधरे ॥ ४ ॥
शृङ्गवेणुभवं नादं तेषामाश्रुत्य पर्वते ।
रामः सम्प्रेषयामास किमेतदिति लक्ष्मणम् ॥ ५ ॥
पुरस्ताल्लक्ष्मणो वीक्ष्य सुखिताद्यान् व्रजौकसः ।
जहर्षमनसा पूर्वप्रेमसंस्मरणातुरः ॥ ६ ॥
सदूराद्गोपशार्दूलं सुखितं वीक्ष्य हर्षितः ।
शीघ्रं समुपसर्प्याथ सस्वजे प्रेमविह्वलः ॥ ७ ॥
जटिलं वल्कलधरमजिनाम्बरधारिणम् ।
तं दृष्ट्वा साश्रुनयनो बभूव सुखितेश्वरः ॥ ८ ॥
माङ्गल्यादद्यास्ततोगोपीवात्सल्यरसनिर्भराः ।
पर्यष्वजत सौमित्रिः प्रत्येकं प्रेमविह्वलाः ॥ ९ ॥

व्रजदारान् समालोक्य लक्ष्मणः प्रेमविह्वलः ।
आलिलिङ्ग स रोमाञ्चस्विद्यच्छिथिलविग्रहः ॥ १० ॥

लक्ष्मण उवाच

अहो युष्माकमाभीराः सुमुहानयमुद्यमः ।
यद्गृहान् सम्परित्यज्य स्वं एव समागताः ॥ ११ ॥

दारैः सुतैर्गृहैः प्राणैः सुहृद्भिर्बन्धुभिस्तथा ।
प्रपन्ना सततं यूयं राम एव खिलात्मना ॥ १२ ॥

एतद्धोदुर्घटं किं नु सर्वेत्यक्त्वा यदागताः ।
येषां प्रियसुहृद्रामो वसत्यत्र गिरौ वने ॥ १३ ॥

गोपा ऊचु

किमस्माकं व्रजे तत्र किं गृहैर्वापि किं धनैः ।
येषां सर्वस्वभूतौ वां शैलेऽस्मिन्नधितिष्ठतः ॥ १४ ॥

यत्रैव कुशली रामस्तत्र सर्वात्मना वयम् ।
जीवामस्तत्पदच्छायामवलम्ब्य सुशीतलाम् ॥ १५ ॥

ततस्तेऽन्योन्यमापृच्छ्य कुशलं संगतप्रियाः ।
क्षणं परस्परालोकनिर्वृता मौनमासिरे ॥ १६ ॥

ततः सुखितगोपालो निवार्यालपतः स्वकान् ।
इदमूचे परिष्वज्य रामानुजमुदारधीः ॥ १७ ॥

किमेतत्पुत्र भवतां राज्ञां विपिनसेवनम् ।
जटाधारणमेवापि वल्कलाजिनधारणम् ॥ १८ ॥

एनं वो वेषमालोक्य दीर्यतीव मनो मम ।
अपि क्व नः प्रियतमो रामो यं द्रष्टुमागताः ॥ १९ ॥

लक्ष्मण उवाच

सर्वं जानीथ नो वृत्तं कैकेय्या यदनुष्ठितम् ।
पुरो व्रजामि रामस्य वक्तुं युष्मत्समागमम् ॥ २० ॥

ततो हर्षसमुत्फुल्लहृदयः पुलकाञ्चितः ।
लक्ष्मणः पुरतो गत्वा रामायैतन्न्यवेदयत् ॥ २१ ॥

प्राप्तास्तेऽत्र प्रिया गोपाः प्रमोदवनवासिनः ।
सुखिताद्या महात्मानः[1] प्रेम्णाखलुवशीकृताः ॥ २२ ॥

यावत्यो व्रजगोप्यश्च ता अत्रैव समागताः ।
दारैः सुतैर्धनैः स्वेष्टबान्धवैः सर्वं आगताः ॥ २३ ॥

---

१. महामानाः—मथु०, अयो० ।

येषां भवान् प्रियतमः प्राणेभ्योऽप्यधिकः प्रभो ।
वने वसति ते किं वा गृहे तिष्ठेयुरातुराः ॥ २४ ॥

यैर्भवान् सरयूतीरे विजह्रे श्रीप्रमुद्वने ।
ते सखायः सुसम्प्राप्ताः सर्व एवात्र पर्वते ॥ २५ ॥

पितरौ बान्धवाः सख्यः सखायः सुहृदस्तव ।
सर्व एवात्र सम्प्राप्तास्तान् गृहाण यथानयम् ॥ २६ ॥

सौमित्रेरितिवचनात्प्रमुद्वनस्थांस्तान् सर्वान् सुहृद उपागतान् स्वपार्श्वम् ।
विज्ञाय प्रमुदितमानसो रमेशःस्वन्नाङ्गपुलकितविग्रहो बभूव ॥ २७ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे व्रजवासि-जनागमे चतुःषष्टितमोऽध्यायः । ६४ ॥

●

पञ्चषष्टितमोऽध्यायः

ब्रह्मोवाच

तावत्सुखितगोपालो व्रजवासिजनैर्वृतः ।
हर्षोत्फुल्लाक्षिवदनः पुरस्तात्समदृश्यत ॥ १ ॥

दृष्ट्वैव तं रघुवरः संस्मृतप्रेमविह्वलः ।
धावित्वा कतिचित्पादान् पर्यष्वजत साश्रुदृक् ॥ २ ॥

परिष्वज्य चिरं तेन गोपेनोदश्रुचक्षुषा ।
कांचित्मुदमवायान्तर्जानकीवल्लभः स्वयम् ॥ ३ ॥

ततो ज्येष्ठतमां सर्वगोपीमण्डलवर्त्तिनीम् ।
माङ्गल्यां समभिद्रुत्य पर्यष्वजत राघवः ॥ ४ ॥

सुखितं चैव माङ्गल्यां नत्वा नत्वातिविह्वलः ।
सर्वान् जेष्ठान् कनिष्ठांश्च सोऽग्रहीत् परमादृतः ॥ ५ ॥

दृशा संतोषयामास सर्वास्ता व्रजगोपिकाः ।
यासां प्रेमानुबन्धेन बद्ध एष निरन्तरम् ॥ ६ ॥

ता अप्यमुं स्वदयितं शुद्धप्रेमरसाक्तया ।
विरहोदीर्णया दृष्ट्या मोदयामासुरञ्जसा ॥ ७ ॥

तं वीक्ष्य तापसमनल्पजटाकलापं वल्काजिनाम्बरधरं रघुवंशकेतुम् ।
राजेन्द्रसूनुमखिलावनिभोगयोग्यं गोपालकाः किमपिदीनदृशो बभूवुः ॥ ८ ॥

कैकेयीमभिसंधाय दृशा सामर्षशोणया ।
ददृशुः स्तब्धनयनाः कोष्णोच्छ्वासा व्रजौकसः ॥ ९ ॥

ततो रामः पर्णशालां नीत्वा सर्वान् व्रजौकसः ।
महीयस्यजिरे तस्यां यथास्थानं न्यवेशयत् ॥ १० ॥

उवाच जानकीं देवि प्रिया मे व्रजवासिनः ।
प्रमोदवनवास्तव्यास्तानैतान् परमादृता ॥ ११ ॥

गृहाण निमिवंशाब्धिचान्द्रके सुहृदो मम ।
मदर्थं त्यक्तभवनान् विनिष्क्रान्तान् समूहशः ॥ १२ ॥

इमौ तौ पितरौ वृद्धौ माङ्गल्यासुखितौ मम ।
मद्वात्सल्योदश्रुदृशौ मत्प्रेमरसवार्निधी ॥ १३ ॥

अमी जनाश्च सर्वे मे प्रमोदवनवासिनः ।
इमारता गोपिकाः सर्वा मे प्रियाः प्रेमभूषिताः ॥ १४ ॥

इत्युक्ता परमोदारा मैथिली रुचिरस्मिता ।
संजगामतरां प्रेम्णा यथार्हं व्रजवासिभिः ॥ १५ ॥

तेभ्यः प्रियेभ्यः सौमित्रिरुपकल्पितवान् पृथक् ।
आसनानि मनोज्ञानि वनवेत्रदलाभिः ॥ १६ ॥

सुनिविष्टांश्च सुप्रीतान् विज्ञाय व्रजवासिनः ।
अपृच्छद् रघुशार्दूल इदं सुखितमादृतः ॥ १७ ॥

अप्यास्ते प्रमुदाटवीतरुलतागुल्मावलीनां शुभं
गावो मे कुशलिन्य आत्तसरयूतीरावनीशाद्वलाः ।

नन्दिग्रामनिवासिनां च महतां गोपेश्वराणां शुभं
पालीग्रामनिवासिनश्च किमपिं श्रीनन्दनस्यास्ति शम् ॥ १८ ॥

तेषां मदेकतानानामन्येषां च व्रजौकसाम् ।
शुभमस्ति महाभागाः प्रमोदवनवासिनाम् ॥ १९ ॥

आपृष्ट इति रामेण बभाषे सुखितेश्वरः ।
अस्ति सर्वत्र कुशलं प्रमोदविपिने प्रभो ॥ २० ॥

त्वदधीनं सुखं किंतु त्वया दत्तं भविष्यति ।
चिरेण त्वद्वियुक्तानां सुमन्त्रेण हृतात्मनाम् ॥ २१ ॥

यदवधि भवनेश प्रस्थितं कोसलायां तदवधि वनवल्लीवृक्षगुल्मादयोऽपि ।
त्वदमितविरहाग्निप्रोत्थसंतापभाजो ननु पिशगविशीर्णाकीर्णपर्णा बभूवुः ॥२२॥

गावश्च ते विरहदूनहृदो वितीर्णं हंभारवा अनशिताच्छहरित्तृणाश्च ।
शुष्कौघ सोऽतिकरुणं रुदतोऽपि वत्सान् नैवाद्रियन्त इति चेतसि विद्धि राम ॥२३॥

येषां त्वदीयमुखचन्द्रसुधामवाप्य नित्यं दृशः परमनिर्वृतिभाग्यभाजः ।
तेषां प्रमोदवनवारतुजुषां जनानां कल्पा इव प्रतिपदं दिवसाः प्रयान्ति ।।२४।।

विज्ञाप्यमेतदधुना रघुवर्य किंचिदस्माकमस्ति तव तीव्रवियोगभाजाम् ।
श्रीमन् पुनः प्रमुदकाननमेत्य वंशी निर्घोषसान्द्रसुधया ननु सिञ्चदीनान् ।।२५।।

ये दुर्गताः खगमृगद्रुमवल्लिलोकास्त्वद्विप्रयोगरुजितंततसोपतापाः ।
तान् पालयस्व शरणान् रघुसार्वभौम बक्रेन्दुमन्दहसितामृतपूरसेकैः ।। २६ ।।

किं दुर्लभं तव विभो यदि हेलितोऽसि कैकेयराजसुतयात्मसहेनगत्या ।
नैवास्तु ते धरणिराज्यमपारभारं श्रीमत्प्रमोदबनराज्यमिदं प्रशाधि ।। २७ ।।

मूर्द्धा जटारविवहोऽमितभूतिलिप्तो वल्काजिनावृततनुर्वनगोचरस्त्वम् ।
स्वानन्दनिर्वृतिधरोऽपि निकाममीश प्रोद्वेजयस्यविरतं निजभक्तचेतः ।। २८ ।।

गाः कोटिशः किमपिकामदुघास्त्वदीयास्ताः पालयन् प्रमुदकाननमध्यवर्ती ।
निःशङ्कमास्व विहरन् निजबन्धुवर्गैः स्वानां हरन्नमितमीश्वर चित्ततो[1]हम्।।२९।।

इति श्रीमदादिरामाणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे सुखित-
प्रलापे पञ्चषष्टितमोऽध्यायः ।। ६५ ।।

❀

षट्षष्टितमोऽध्यायः

ब्रह्मोवाच

सुखितोदीरितं वाक्यमाकर्ण्य रघुराड्विभुः ।
उवाच स्मितसानन्दस्फुरद्वदनचन्द्रमाः ।। १ ।।

स्थानेऽसि संगतरतात सबन्धुरिह सम्प्रति ।
वात्सल्योदर्कमधुरं सदैव भवतो मनः ।। २ ।।

मात्रा पित्रा सुहृद्भ्रातृबन्धुभिः सज्जनैरपि ।
समुज्झितस्य मे तात त्वमेवैकोऽस्यवेक्षकः ।। ३ ।।

अकृत्रिमो मनोभावस्तव तात निरन्तरम् ।
पुष्णाति मां भवे शश्वदुपप्लवविदूषितम् ।। ४ ।।

अद्य मे मानसस्तोदः प्रशान्तिमगमत् किल ।
दृष्ट्वा भवन्मुखाम्भोजममन्दकरुणोदयम् ।। ५ ।।

---

१. तोहम् व्यथाम ।

अप्यस्ति सर्वतो वार्तं प्रमोदविपिनान्तरे ।
अस्माकं तस्य घोषस्य तथा श्रीनन्दनस्य च ॥ ६ ॥

वर्षीयांसो गोपवरा येऽस्मद्घोषनिवासिनः ।
तेषां पुत्रकलत्रादिविषये सर्वतः शुभम् ॥ ७ ॥

श्रीनन्दनस्यघोषे च य उदारा गवांदुहः ।
तेषां वर्वर्ति कुशलं सर्वतः सर्ववस्तुषु ॥ ८ ॥

श्रीनन्दनस्य घोषेशी महोदारा महामनाः ।
वृद्धा श्रीराजिनी गोपी सर्वतः सुखमेधते ॥ ९ ॥

अन्ये च सुखमेधन्ते नरनारी जनाः सदा ।
येषां मदेकविषयं मनः प्रेमकरम्बितम् ॥ १० ॥

यदवधि भवतां मे विप्रयोगः प्रवृत्तः सकलविषयसार्थोदास्यकारी सुतीव्रः ।
तदवधि दधिदुग्धस्वादुमिष्टान्नमुक्तिप्रचुरहृदभिलाषः पूर्यते क्वापि नैव ॥११॥

किमपि रघुवरस्याशेषराज्योपपन्नाः श्रियउपचितभोगा वासवस्येव पूर्णाः ।
मम तु मनसि युष्मत्कामधेनुप्रभूतैः सुमधुरदधिदुग्धैरेव तृप्तिर्विशिष्टा ॥१२॥

ध्यायं ध्यायमजस्रमुत्सुकमनास्त्वद्घोषवास्तून्द्रुवान्
भोगांस्तान् दधिदुग्धमुग्धनवनीतान्नादिसत्सम्पदाम् ।
सोद्वेगानतिवाहयामि दिवसानेतानहं कांश्चन
प्रेमापूरितमानसान् प्रतिपदं ध्यायन् सुहृद्बान्धवान् ॥ १३ ॥

अथोवाच स गोपालो रामं सरसिजेक्षणम् ।
संस्मारितपुरावृत्त उत्कण्ठाकुलमानसः ॥ १४ ॥

त्वदेकतानमनसां सर्वेषामपि गोदुहाम् ।
निवृत्तान्याभिलाषाणां वार्तमस्ति प्रमुद्वने ॥ १५ ॥

नराणां चैव नारीणां त्वयैवापहृतात्मनाम् ।
श्रीनन्दनस्य चास्माकं घोषयोरुभयोः शुभम् ॥ १६ ॥

पालीग्रामाधिपतिना श्रीनन्दनमणीषिणा ।
पृष्टोऽसि कुशलं श्रीमन् बहुशो विहिताशिषा ॥ १७ ॥

तवैव कुशलं राम सर्वेषामभिकाङ्क्षितम् ।
तत्रत्यं कुशलं भूयस्त्वदागमनमात्रजम् ॥ १८ ॥

सर्वैरपीदमुक्तोऽसि विदूनैर्विरहात्तव ।
कदाऽऽगत्य प्रभो स्वानां वदनं दर्शयिष्यसि ॥ १९ ॥

येऽत्यावेगपराधीना विरहव्याधिविद्रुताः ।
त इमेऽह्वाय सद्मानि विहायेह समागताः ॥ २० ॥

असमर्थाः समागन्तुं येऽपितत्र निवासिनः।
तेषामपि तनुस्तत्र मनस्तु त्वयि संततम् ॥ २१ ॥

एवं प्रमोदविपिनं निखिलं त्वदीयविश्लेषजातसुमहापदि भूरिमग्नम्।
अप्युद्दिधीर्षसि न वा नरराजसूनो संरक्षितं हि भवतैव पुराविपद्भ्यः ॥२२॥

कालाहिगरलाकीर्णं सारवं सलिलं पुरा।
त्वयैव शोधितं राम निजजीवातुहेतवे ॥ २३ ॥

समंतात्कानने लग्नां वन्हिज्वालां महाभयाम्।
विनिवार्य भवानेकः पर्यरक्षन्निजान् जनान् ॥ २४ ॥

प्रचण्डपांसुवर्षेण समंतादन्धकारितम्।
राघव स्वानुभावेन पर्यरक्षद्व्रजं भवान् ॥ २५ ॥

कुपितेन्द्रकृतं वर्षमेकच्छत्रेण तत्क्षणात्।
न्यवारयद्भवानेव जीवातुर्निजपज्जुषाम् ॥ २६ ॥

राक्षसानीकमत्युग्रं स्वानामतिभयप्रदम्।
संजहार भवान् राम निजवीर्यसुसंवृतः ॥ २७ ॥

इत्यनेकविधापद्भ्यस्त्वया स्वीयाभिरक्षणम्।
बहुधा विहितं राम विस्मर्तव्यं कदापि न ॥ २८ ॥

साम्प्रतं स्वयमागत्य सदा सम्फुल्लभूरुहे।
प्रमुद्वने चिरान्नाथ पालनीयास्त्वया निजाः ॥ २९ ॥

येषां भवानेवगतिरैहिकी पारलोकिकी।
तेष्वौदासीन्यमालम्ब्य वर्तितव्यं कथं भवेत् ॥ ३० ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे संदेशकथने षट्षष्टितमोऽध्यायः ॥ ६६ ॥

सप्तषष्टितमोऽध्यायः

ब्रह्मोवाच

रामो जनकजां वीक्ष्य वाक्यमेतदवोचत।
एतान् मम सुहृद्बन्धून् प्रीत्या भोजय सुन्दरि ॥ १ ॥

त्वं हि पाकेषु कुशला पीयूषस्वादुवस्तुषु।
अलौकिकेषु भव्येषु षड्रसेषु च भूरिषु ॥ २ ॥

चतुर्विधेषु दिव्येषु पक्वान्नेषु रसेषु च ।
अनेकसंविधाढ्येषु नानारूपेषु चारुषु ॥ ३ ॥

दधिमध्वाज्यपूक्तेषु मधुरेषु सहस्रसः ।
अनग्निपाकपक्वेषु फलशाकादिभूरिषु ॥ ४ ॥

मुदावहेषु रुच्येषु संक्लृप्तेषु च सर्वशः ।
मद्भुक्तलक्ष्मीदृष्टेषु पुनत्सुबहिरन्तरम् ॥ ५ ॥

स्वाद्वन्नफलसम्भारैस्तैरेतान् भोजय प्रिये ।
पत्रशाकादिरुचिरैः षड्रसैश्च चतुर्विधैः ॥ ६ ॥

सत्पात्रसिद्धैः पूतैश्च विविधानेकभक्षणैः ।
सानुगं सपरीवारमामन्त्र्य सुखितेश्वरम् ॥ ७ ॥

भोजयस्व विशेषेण माङ्गल्यां मम मातरम् ।
ययोर्गृहे मया भुक्ता भोगाश्च विविधा रसाः ॥ ८ ॥

ताविमौ मद्गृहं प्राप्तौ पर्णशालाभिधं वने ।
आनन्दय स्वानुभावै राजपुत्रि विशेषतः ॥ ९ ॥

इत्युक्त्वा जानकीं रामो लक्ष्मणं प्राह सत्त्वरम् ।
रच्यन्तां विविधा भोगा गोपानां सुखहेतवे ॥ १० ॥

तथेति स प्रभोराज्ञां शिरसाऽऽदाय लक्ष्मणः ।
स्वां शक्तिमद्भुताकारां दध्यौ मीलितलोचनः ॥ ११ ॥

जानकी च महाभागा सस्मार स्वसखीस्तदा ।
आविरासुः समस्तास्ताः स्मरणानुग्रहक्षणे ॥ १२ ॥

कमलेशीप्रभृतयो नदीरूपा मनोहराः ।
सुवर्णहलकृष्टायां जनकस्य महीपतेः ॥ १३ ॥

यज्ञवेद्यां पुरा जाताः कञ्जनेत्राः सहैव याः ।
बद्धाञ्जलिपुटाः सर्वाः पुरस्तात्समुपस्थिताः ॥ १४ ॥

चन्द्राननाः पद्मदृशः सुरूपाः सुवर्णचाम्पेयकचारुगात्राः ।
स्मितत्विषा पर्वतकाननं तत्प्रकाशयन्त्यः स्तनभारनम्राः ॥ १५ ॥

नितम्बबिम्बोद्वहनप्रयत्नादालस्यभावाञ्चितचारुयानाः ।
भूसंज्ञया मैथिलराजपुत्र्या बद्धादराः कार्यं सहस्रकर्त्र्यः ॥ १६ ॥

स्वयमाज्ञापयामास ताः सखीर्जनकात्मजा ।
सख्यो निमन्त्रिता अद्य राघवेन्द्रस्य बन्धवः ॥ १७ ॥

एतान् दिव्यमहाभोगैरात्मशक्तिप्रसाधितैः ।
सम्भोजयितुमिच्छामि भवत्यः साधयन्तुतान् ॥ १८ ॥

इत्युक्ताः स्मितमुख्यस्ताः सीतया राजकन्यया ।
चक्रुरात्मानुभावेन विविधा भोगसंविधाः ॥ १९ ॥

उद्दीपे गिरौ तस्मिन् प्रासादः सुमहोन्नतः ।
रत्नतोरणमालाभिरलंकृतनिकेतनः ॥ २० ॥

परिणाहिसमावद्धरत्नोपलमहाजिरः ।
मणिकुट्टिमसंशोभी गवाक्षशतिसुन्दरः ॥ २१ ॥

समन्तोद्दीप्त सौवर्णप्राकार खचितैः शुभैः ।
महारत्नैर्मनोहारी भोगसम्भारसम्भृतः ॥ २२ ॥

संफुल्लानेकविटपिप्रसूनवरसौरभैः ।
गुञ्जद्भ्रमरपुञ्जाढ्यैर्गृहारामैरनेकशः ॥ २३ ॥

शोभितोऽन्तर्बहिश्चैव दिव्यस्त्रीनिवहाञ्चितः ।
दिव्यभोगसमायुक्तः सर्वरत्नसमन्वितः ॥ २४ ॥

अनङ्गोद्दीपनकरैः पदार्थैश्च सहस्रशः ।
अन्वितः सुमहाशालैरावासैश्चाप्यनेकशः ॥ २५ ॥

वलभीभवनोपेतस्तुङ्गवातायनान्वितः ।
अन्तर्बहिर्गृहैर्गूढैः सर्वभोगसमन्वितैः ॥ २६ ॥

सर्वर्तुसुखभोगार्हैरन्वितः कान्तिसंयुतः ।
निःश्रेणिकाभिस्तुङ्गाभिरासादितनभस्तलः ॥ २७ ॥

मुक्तामयीभिः सद्रत्ननिर्मिताभिः सुकान्तिभिः ।
महामारकतीभिश्च वैद्रुमीभिरनेकशः ॥ २८ ॥

सोपानिकाभिः पद्माभिर्भित्तिभिः सौधपङ्क्तिभिः ।
उज्जागरः सुशोभाढ्यो भूरिस्तम्भ समन्वितः ॥ २९ ॥

लक्ष्मणस्येच्छया सद्यो व्यजृम्भत महागिरौ ।
नभस्तल समालम्बी रत्नप्रासाद उत्तमः ॥ ३० ॥

सद्रत्नखचितानेकवापीकूपसरोवरः ।
संफुल्लकमलारण्यपरागमधुमारुतः ॥ ३१ ॥

सीतासखीनां विभवाः सद्यस्तत्र बभासिरे ।
उवाह कमलेशान्याः प्रवाहः पयसां भरैः ॥ ३२ ॥

तत्कूलकर्दमो जातः साक्षात्पायस उत्तमः ।
तटस्थास्तरवो रेजुः पक्वान्नफलशालिनः ॥ ३३ ॥

सुधास्वादुफलाः केचिद्द्रुहास्तत्क्षणे बभुः ।
अवहत् कौशिकीस्रोतः सितारसमयं क्षणात् ॥ ३४ ॥

अनेकेक्षुविकाराश्च जातास्तस्याः प्रवाहतः।
यत्र कुत्रापि सुलभा भोगिनां व्रजवासिनाम् ॥ ३५ ॥

घोषवत्याः प्रवाहोऽभूत् सद्यो दधिमयस्तदा।
स्वादूनि नवनीतानि प्रादुरासुरितस्ततः ॥ ३६ ॥

चन्द्रवर्णं सुधास्वादु दधि तस्या व्यशोभत।
पीयूषाधिकसारं च नवनीतं ततोऽधिकम् ॥ ३७ ॥

द्युम्नायाः सरितः स्रोतः सान्द्रमधुमयं बभौ।
अघवारा प्रवाहोऽभूदाज्यवाही मनोहरः ॥ ३८ ॥

सर्वास्ताः कामवाहिन्यो नद्यस्तत्राभवन् क्षणात्।
स्वयं लक्ष्मीः सरिद्भूपा सर्वसम्पन्मयी बभौ ॥ ३९ ॥

नानापुष्परसोपेता नानामधुरसाञ्चिला।
अनेकविधमैरेयवाहिनी रत्नकूलिनी ॥ ४० ॥

सुवर्णकर्दमोपेता स्वच्छशीतह्रिमोदका।
फुल्लत्कमलकह्लारकुमुदारण्यसंयुता ॥ ४१ ॥

विकचामन्दमन्दारकुञ्जमण्डपमण्डिता।
लतावितानसंशोभिद्वीपभूमिविभूषिता ॥ ४२ ॥

कूजत्कोकिलभृङ्गौघकेकिमण्डितकानना।
मल्लिकावल्लिकाजुष्टभूरुहस्तोमकूलिनी ॥ ४३ ॥

एता जनकजासख्यो मूर्तिमत्यश्च संस्थिताः।
शृङ्गारवेशरुचिरा नानोपायनपाणयः ॥ ४४ ॥

आज्ञापितार्थकारिण्यः स्मितमञ्जतमाननाः।
नानाकेलिकलाभ्यस्ताः कौतूहलविशेषिताः ॥ ४५ ॥

[1]जगुस्तत्र कलंगीतं दिव्याः केचन गायकाः।
नर्तक्यो ननृतुस्तत्र दिव्यवेशविभूषिताः[1] ॥ ४६ ॥

अवादयंश्च वाद्यानि नानावाद्यविचक्षणाः।
इच्छया जानकीदेव्याः कौतूहलमवर्तत ॥ ४७ ॥

गीतवादित्रनृत्यादि तत्र दिव्यमवर्तत।
अशोभततरां तत्र संफुल्लः कुसुमाकरः ॥ ४८ ॥

शोभा यादृच्छिकी सर्वा प्रावर्तत महागिरौ।
रामेणक्रियमाणेऽस्मिन् सुखितातिथ्यकर्मणि ॥ ४९ ॥

१-१. हरितालेन मेटितं—मथु० ।

चन्द्रचन्दनकाश्मीरकालागुरुभवा द्रवाः ।
पटवासाश्च वासांसि भूषणानि च भूरिशः ॥ ५० ॥

रत्नविद्रुममुक्तानां हीरकाणां स्फुरद्रुचाम् ।
मणीनां चैव जात्यानां माणिक्यानां सहस्रशः ॥ ५१ ॥

सम्भाराः पर्वते तस्मिन् व्यदृश्यन्त समंततः ।
आधित्यकोपत्यकाश्च कन्दराश्चैव पालयः ॥ ५२ ॥

प्रस्थाश्च चित्रकूटाद्रेर्बहिरन्तश्च भूमयः ।
रत्नदीपशिखासंघैर्भासिताः शुशुभुस्तराम् ॥ ५३ ॥

अभूदन्यदिवोद्भूतं रूपमद्रेः समंततः ।
अलौकिकश्रियोपेतं गोपानां हृदयङ्गमम् ॥ ५४ ॥

आतिथ्यं खलु सुखितवज्रेश्वरस्य श्रीरामे सपदि निजेच्छया चिकीर्षौ ।
श्रीरासीदभिनवसम्पदाभ्युपेता शैलस्याखिलसुखसार्थलाभयोग्या ॥ ५५ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे सुखितातिथ्यविधौ सप्तषष्टितमोऽध्यायः ॥ ६७ ॥

अष्टषष्टितमोऽध्यायः

ब्रह्मोवाच

रामः सुखितगोपेन्द्रमाबभाष इदं वचः ।
इयं ते कल्पिता तात मयातिथ्याय संविधा ॥ १ ॥

सानुगः सपरीवारः सबन्धुः ससुहृज्जनः ।
त्वमेतां संविधां तात विनियोक्तुमिहार्हसि ॥ २ ॥

अवगाह्य सरःस्वच्छसलिलेषु समंततः ।
धृताङ्गरागवसनभूषणो भुङ्क्ष्व भोजनम् ॥ ३ ॥

इह ते सार्थगा गोपा गोप्यश्च कृतमज्जनाः ।
भूषयन्तु वपूंष्यद्धा मणिकाञ्चनभूषणैः ॥ ४ ॥

धृताङ्गरागाः ससुखं दिव्यनूतनवाससः ।
दिव्यभोजनसामग्रीं भुञ्जतां तावका इह ॥ ५ ॥

यत्र कुत्रापि सौलभ्यं दिव्यभूषणवाससाम् ।
उद्वर्तनाङ्गरागाणां भोज्यानां चाप्यनेकशः ॥ ६ ॥

पिबन्तु दिव्यमैरेयं वहन्ति सरितोऽमलाः ।
तासां कूलनिकुञ्जेषु कल्पद्रुमतलेषु च ॥ ७ ॥

विश्रमन्तु व्रजजनाः कुर्वन्तु विविधाः कथाः ।
अश्नन्तु विविधान् भोगान् दिव्यभूषणभूषिताः ॥ ८ ॥

इमास्तात विजानीहि जानक्याः परिचारिकाः ।
तवातिथ्यविधानार्थमाहूता इह संगताः ॥ ९ ॥

इमाः परिचरिष्यन्ति गोपान् गोपीश्च सादरम् ।
स्नानाभ्यञ्जनसंस्कारभोजनादिषु कर्मसु ॥ १० ॥

माङ्गल्यका मे जननी ययाहं पोषितो व्रजे ।
सानुगा सपरीवारा भोगान् भुङ्क्तां यथोप्सिताम् ॥ ११ ॥

इहं भुक्त्वातिसुलभा विविधा भोगसंविधाः ।
विहरन्तु चिरं गोपा गोप्यश्च प्रीतिपूर्वकम् ॥ १२ ॥

स्वयं करसरोजाभ्यां जानक्या परिपाचितम् ।
अन्नं चतुर्विधं स्वादु भवान् भुङ्क्तां यथेप्सितम् ॥ १३ ॥

अत्यर्थं सादरमना जनकस्य सुता त्वयि ।
आतिथ्यं कर्तुमिच्छन्ति पपाच विविधं स्वयम् ॥ १४ ॥

अयमति रमणीयश्चित्रकूटो महीध्रः शिखरनिकरशोभाव्याप्यदिङ्मण्डलाभ्रः ।
सुरतरुविपिनाढ्यः सर्वसम्पत्समेतो ननु विहरणयोग्यास्तावकानां जनानाम् ॥ १५ ॥

इह कल्पतरुच्छायमवलम्ब्य व्रजौकसः ।
मन्दाकिनीमरुद्वीचिवीजिता विगतश्रमा ॥ १६ ॥

विहरन्तु चिरं तात देशकालोचितैः सुखैः ।
इह स्मरन्तु सुप्रीताः प्रमुद्वनभवं सुखम् ॥ १७ ॥

गोपा गोप्यस्तथान्योन्यं विहृत्य सकुतूहलम् ।
गायन्तु कलनादेन शैलेन्द्रं गर्जयन्तु च ॥ १८ ॥

अमुष्य कन्दरास्वन्तर्ज्वलद्दिव्यौषधित्विषा ।
दीपप्रकाशरुचिरा यापयन्तु च यामिनीः ॥ १९ ॥

आभिः सार्द्धं मैथिलेन्द्रस्य पुत्री नित्यैकान्तावासतो बद्धमौना ।
अद्यालापैः प्रीतिपूर्वं मनोज्ञैः कंचित्क्रीडाकौशलं संव्यनक्तु ॥ २० ॥

सुचिरं गोपगोपीभिर्वियोगासह्यवेदनाम् ।
प्राप्तोऽहमद्य तत्संगाद्भविष्यामि चिरं सुखी ॥ २१ ॥

लोके प्रियजनैः सार्द्धं दुर्लभः खलु संगमः ।
स एव यस्मिन् भवति तद्दिनं सुदिनं भवेत् ॥ २२ ॥

त इमे मिलिताह्यद्य प्रिया मे व्रजवासिनः ।
नानेन सदृशः कश्चिद्दिवसो भविता मम ॥ २३ ॥

इत्युक्त्वा गोपशार्दूलं रघुवंशविभूषणः ।
उवाच लक्ष्मणं भूयः प्रेम्णा मसृणया गिरा ॥ २४ ॥

भोज्यन्तां मम मित्राणि सौमित्रे व्रजवासिनः ।
यथा तृप्येयुरखिला विविधैर्भोग्यवस्तुभिः ॥ २५ ॥

आज्ञापयतु सानन्दं देवी स्वाः परिचारिकाः ।
कमलेशीमुखा मुख्याः सेवार्थं व्रजवासिनाम् ॥ २६ ॥

भवान् परिचरत्वेतान् प्रियान् मे व्रजवासिनः ।
अहं परिचरिष्यामि स्वयमत्यर्थमादृतः ॥ २७ ॥

नन्वेते साधवो भक्ताः प्रीता मयि विशेषतः ।
मम प्रीत्येह सम्प्राप्ता महोदारा व्रजौकसः ॥ २८ ॥

यथा विशेषात्तृप्येयुः सर्वकामोपभोजिताः ।
तथा कार्यं त्वया वीर मया च मम भार्यया ॥ २९ ॥

अत्यादरेण प्रीत्या च सेवया विनयेन च ।
तोषणीयाः प्रयत्नेन प्रिया मे व्रजवासिनः ॥ ३० ॥

अपि स्मरसि किं न त्वं भ्रातस्तत्र वयं यथा ।
प्रमुद्वनेऽतिसुखिता उषिता बहुवत्सरान् ॥ ३१ ॥

तातेन गोकुलेन्द्रेण मात्रामाङ्गल्यया तथा ।
लालिता विविधान् भोगान् प्रीतिपूर्वमभुञ्ज्महि ॥ ३२ ॥

न तथाखिलभूमीशे कृतसप्रेमलालने ।
तातेदशरथेऽप्यद्धा वयं सानन्दमूषिम ॥ ३३ ॥

अन्यदेव हि चामीषां मयि प्रेमोदितं मनः ।
ये पुत्रदारवित्ताढ्यं गृहं त्यक्त्वेह संगताः ॥ ३४ ॥

नन्वमीषां मनोऽत्यन्तं मयि प्रेमैकबन्धुरम् ।
अतोऽहमपि चैतेषु सानुबन्धोऽस्मि सौहृदात् ॥ ३५ ॥

गन्तुमेतान् न दास्यामि बन्धून् मे व्रजवासिनः ।
इहैव वासयिष्यामि शैलेन्द्रे बहुवत्सरम् ॥ ३६ ॥

सर्वकामोदितैर्दिव्यैर्भोगैरेतान् मम प्रियान् ।
सेविष्ये सहजप्रेमवशीभूतान् व्रजौकसः ॥ ३७ ॥

इहायं विपुलो देशः सर्वकामःप्रपूरणः ।
गोपालानां गवां चैव गोपीनां च विशेषतः ॥ ३८ ॥

अविदूरेऽत्र शैलस्य मन्दाकिन्यास्तटावनौ ।
महद्वनमिदं भाति सर्वर्तुसुखवर्द्धनम् ॥ ३९ ॥

विपुलं गोकुलेन्द्रस्य वासयोग्यं समंततः ।
गवां गोष्ठोचितं स्थानं प्रमोदविपिनं यथा ॥ ४० ॥

तद्भवत्वहमत्रार्थे मन्त्रयिष्येऽमुना रहः ।
यथैव भवेद्वासः सुहृदां मे व्रजौकसाम् ॥ ४१ ॥

आतिथ्यं तु भवानद्य प्रथमा गमनाह्निकम् ।
विशेषेण करोत्वेषां विज्ञाप्यं तु पुनर्भवेत् ॥ ४२ ॥

निकेतने तु दिव्येऽस्मिंस्त्वया प्राकाम्यनिर्मिते ।
प्रवेशय व्रजाधीशं सानुगं ससुहृज्जनम् ॥ ४३ ॥

संस्कार्योद्वर्तनाभ्यङ्गमज्जनालेपनादिभिः ।
भोजयान्नानि दिव्यानि सत्पात्रेषु चतुर्विधम् ॥ ४४ ॥

पुरस्तात्सह गोपालैर्गोपराजं भजस्व भोः ।
ततो माङ्गल्यकां सर्वगोपीगणसमन्विताम् ॥ ४५ ॥

गोकुलेन्द्रं भवान् भ्रातः सेवतां सर्वभोगदः ।
माङ्गल्यकां जनकजा सह सर्वसखीजनैः ॥ ४६ ॥

इत्युक्तो रघुपतिना सुमुग्धवाक्यैः सौमित्रिः परिचारितुं समस्तभोगैः ।
गोपेन्द्रं सह सकलैः सुहृज्जनौघैः प्रासादं निखिलसुखान्वितं नियाय ॥ ४७ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे सुखितातिथ्यविधा-वष्टषष्टितमोऽध्यायः ॥ ६८ ॥

एकोनसप्ततितमोऽध्यायः

ब्रह्मोवाच

तद्वीक्ष्य दिव्यभवनं दिव्यरत्नोपशोभितम् ।
विसिस्मियेतरां चित्ते गोपराजो महामनाः ॥ १ ॥

तत्रासनं ददौ रामो गोपेन्द्राय महात्मने ।
महार्हरत्नवैदूर्यमुक्तामाणिक्यमण्डितम् ॥ २ ॥

तत्रासीनः स शुशुभे गोपेन्द्रः प्रेमविह्वलः ।
गोपालमण्डलीमध्ये तारावृन्दे विधुर्यथा ॥ ३ ॥

प्राप्य माङ्कल्यका गोपी रामादिष्टं वरासनम् ।
गोपीगणान्तः शुशुभे रोहिणीवोडुमण्डले ॥ ४ ॥

गोपमण्डलमध्यस्थः सुखितेन्द्रो मुदान्वितः ।
गोपीमण्डलमध्यस्था माङ्कल्या च महामनाः ॥ ५ ॥

लब्ध्वा बहुतरं मानं शुशुभातेतरामुभौ !
श्रीरामलक्ष्मणालोकसानन्ददुतमानसौ ॥ ६ ॥

अवगाह्य सुधाशुभ्रं सरसां वारि शीतलम् ।
दिव्याम्बरपरीधानः शुशुभे गोकुलेश्वरः ॥ ७ ॥

स्वयं लक्ष्म्या समानीतमङ्गरागं सुसौरभम् ।
विलिप्य सर्वगात्रेषु जगाहे परमां मुदम् ॥ ८ ॥

कापि वासांस्यानिनाय कापि भूषणाधोरणीम् ।
काचिन्माल्यानि दिव्यानि काचित्ताम्बूलभाजनम् ॥ ९ ॥

एवं ताः परिचेरुस्तं देव्यादिष्टास्तदालयः ।
मुमुदेऽतीव गोपेन्द्रो महर्द्धिमभिवीक्ष्य ताम् ॥ १० ॥

इत्थमेवाखिलान् गोपान् परिचेरुः सरिद्वराः ।
कृत्वा रूपाणि रम्याणि शतधा च सहस्रधा ॥ ११ ॥

सुस्नाता अनुलिप्ताश्च भूषिताः पटभूषणैः ।
पीतसुस्वादुमैरेयाः केलिमन्तः परस्परम् ॥ १२ ॥

प्रीत्या बुभुजिरे गोपाः स्निग्धमन्नं चतुर्विधम् ।
सुस्वादु षड्रसोपेतं भूयः समुपकल्पितम् ॥ १३ ॥

युक्तं बहुविधं चैव नानापात्रेषु कल्पितम् ।
सुसंस्कृतं सुधासिक्तं फलशाकादिसंयुतम् ॥ १४ ॥

विविधानि च मांसानि पशूनां पक्षिणां तथा ।
लवणार्दकहिंग्वाढ्यमरिचाक्तानि कानिचित् ॥ १५ ॥

एकैकमेकैकगतामरुचिं लोपयद्भृशम् ।
अन्नं बहुविधं तत्र नीतं सीतासखीगणैः ॥ १६ ॥

बुभुजुर्गोपनिबहाः पङ्क्तिबन्धनिवेशिताः ।
हसन्तो हासयन्तश्च रामदर्शनसोत्सवाः ॥ १७ ॥

रामश्चलक्ष्मणश्चैव देवी च जनकात्मजा ।
गोपौघपरिचर्यायां बभूवुर्बद्धमानसाः ॥ १८ ॥

सादरं भगवान् रामो भोजयन् गोपमण्डलीम् ।
अतिकौतूहलोपेत आविष्ट इव चाभवत् ॥ १९ ॥

भोजयन्ती सखीवृन्दैर्जानकी गोपदारकान् ।
शुशुभेऽतितरां देवी रतिकोटिमनोहरा ॥ २० ॥

केचिन्मधुरसोन्मत्ता गोपाला जातसम्भ्रमाः ।
जागुर्जगर्जुर्ननृतुर्मुदा परवशीकृताः ॥ २१ ॥

गोपीगणा एकपङ्क्तिनिविष्टा दिव्यभोजनैः ।
सानन्दं भोजयामासुर्जानक्यास्ते सखीगणाः ॥ २२ ॥

निपीतमदिरामत्ता गोप्यः परमनिर्वृताः ।
चिक्रीडुर्जानकीशेन नयनैर्मदनातुराः ॥ २३ ॥

भुञ्जानाः स्वादुरुच्यानि दिव्यान्यन्नानि गोपिकाः ।
जगुः कान्तस्य चरितान्यद्भुतानि समूहशः ॥ २४ ॥

समृद्धिं यत्र कुत्रापि वीक्ष्य तां भोग्यवस्तुभिः ।
विस्मिताः सकलागोपाः कुर्वन्तो भोगमुत्तमम् ॥ २५ ॥

उत्फुल्लपङ्कजारण्यवातवीजितविग्रहाः ।
गोपा मुमुदिरे तत्र दिव्यभोगसमन्विताः ॥ २६ ॥

वासोभिर्विविधैश्चित्रैर्मणिकाञ्चनभूषणैः ।
अनेकैः रङ्गरागैश्च सिन्दूरैर्यावकैस्तथा ॥ २७ ॥

प्रसूनमकरन्दैश्च सुगन्धिभिरनेकशः ।
पुष्पतैलैर्बहुविधैः सुलभैर्यत्र कुत्रचित् ॥ २८ ॥

आत्मानं भूषयाञ्चक्रुर्गोप्यो मुदितमानसाः ।
मज्जनोद्वर्तनालेपभूषाकर्मविचक्षणाः ॥ २९ ॥

सखीभिरेव जानक्या भूषिता गोपसुभ्रुवः ।
नवप्रसाधनोपेताः शुशुभुः कमला इव ॥ ३० ॥

काश्चित्सरःसु संफुल्लकमलौघसुगन्धिषु ।
हंससारसचक्राह्वकादम्बकुलनादिषु ॥ ३१ ॥

जलकेलिरसंगोप्यः पुपुषुर्मुदिताशयाः ।
भूषिताः पङ्कजैर्नालैरवतेरुस्ततः क्रमात् ॥ ३२ ॥

चक्रु पुष्पावचयनं गिरौ संफुल्लभूरुहे ।
पारिजातलतापुष्पैर्जुगुम्फुर्ललिताः स्रजः ॥ ३३ ॥

एवं रात्रिंदिवं गोपा गोप्यश्च सुखिताशयाः ।
विजह्रुर्भूरिकेलीभिः कलाकोटिविचक्षणाः ॥ ३४ ॥

तत्र तेषां विनोदाय दिव्यगन्धर्वपुङ्गवाः ।
नानोपवीणयाञ्चक्रुः सुस्वरैः कोकिला इव ॥ ३५ ॥

कलस्वननिनादिन्यो नर्तक्यो नृत्यदक्षिणाः ।
गोपीजनविनोदायननृतुर्जगुरेव च ॥ ३६ ॥

वादयन्ति स्म वाद्यानि विद्याधर्यो ह्यनुत्तमाः ।
उच्चैर्मनांसि गोपीनां रञ्जयन्त्यो मुहुर्मुहुः ॥ ३७ ॥

पश्यन्त्यस्ताः प्रियतमं रामं गोपमृगीदृशः ।
चिरेण शमयामासुर्विरहाधिमनुत्तमम् ॥ ३८ ॥

वात्सल्यभावयुक्तानां कासांचिद्गोपसुभ्रुवाम् ।
पुपोष रामो वात्सल्यं दर्शयन् विनयं मुहुः ॥ ३९ ॥

शृङ्गारभावयुक्तानां मदनोन्मत्तचेतसाम् ।
मदं पुपोषगोपीनां कटाक्षै राम चन्द्रमाः ॥ ४० ॥

एवं मोदो महानासीत्तत्र तेषां परस्परम् ।
क्रीडतां गायतां चैव लयतां च रसोत्तरम् ॥ ४१ ॥

एकान्ते राममासाद्य गोपकान्ता मदोद्धताः ।
आलिलिङ्गुश्चुचुम्बुश्च चिक्रीडुश्च विशेषतः ॥ ४२ ॥

प्रासादेष्वतुलमणिप्रभासितेषु ज्योत्स्नायां मृदुशयनीयलब्धनिद्राः ।
गोपाला विविधविलासमोदमग्ना भोगाढ्या मुमुदुरनेकभावयुक्ताः ॥ ४३ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे गोपगोपीजनातिथ्ये एकोनसप्ततितमोऽध्यायः ॥ ६९ ॥

सप्ततितमोऽध्यायः

ब्रह्मोवाच

कृतातिथ्यो गोपराजः प्रातरुत्थाय सोत्सवः ।
मन्दाकिन्यां समाप्लुत्य कृतनित्यक्रियाविधिः ॥ १ ॥

सानुगः सहदारश्च सगोपालगणः सुखम् ।
स्वस्थः सुखासनासीन इदमाह रघूद्वहम् ॥ २ ॥

भरतस्तव यो भ्राता त्वद्विश्लेषरुजातुरः ।
नन्दिग्रामेऽधिवसति स इदानीं रघूद्वह ॥ ३ ॥

अस्माभिर्मिलितो नित्यं गायंल्लीलास्तव प्रभो ।
किंचिद्धैर्यसमालम्बी दिवसानत्यवाहयन् ॥ ४ ॥

कष्टेनास्मानिहागन्तुं ददौ धृतिविवर्जितः ।
दण्डवत् प्रणतिं तुभ्यं भक्तिप्रह्वश्चकार सः ॥ ५ ॥

सेवते सादरं भक्त्या तव पादाब्जपादुके ।
कष्टेन कालं नयति यावदागमनं तव ॥ ६ ॥

जटी विभूतिधवलो वल्कलाजिनसंवृतः ।
वन्यवृत्तिव्रतं बिभ्रत्त्यक्तभोगसुखश्च सः ॥ ७ ॥

स तवाज्ञां विना राम नास्माभिः सह सस्पृहः ।
इहाजगाम कैकेय्याः कर्मणा दुःखकर्षितः ॥ ८ ॥

लक्ष्मणं च प्रणतवान् सीतां च स हि भक्तिमान् ।
कष्टं तेन वियुक्तोऽस्मि त्वयेव रघुनन्दन ॥ ९ ॥

तपते पादुकायुग्मं तव दाशरथेऽधुना ।
प्रजानामीतिभीत्यादिप्रभावाद्विनिवारयन् ॥ १० ॥

सर्वतः कुशलं राम वर्वर्ति तव राष्ट्रके ।
तथापि त्वद्वियोगेन जनाः शान्ता इवाखिलाः ॥ ११ ॥

इति श्रुत्वा रघुपतिर्भरतोदन्तमाहृतः ।
उवाच सुखितं रामः स्मृततत्प्रेम विह्वलः ॥ १२ ॥

सत्यं मम प्रियो भ्राता भरतः प्रीतिमान्मयि ।
कष्टमापतितं तस्मिन् सुखार्हे भृशमेकदा ॥ १३ ॥

क्व मदागमनं तात वने स्यात्केकयीगिरा ।
कुत्र प्रतिज्ञा नृपतेर्भवेद्वरयुगात्मिका ॥ १४ ॥

क्व च मद्विरहेणार्तः प्रेमार्द्रो नृपतिर्भवेत् ।
सर्वमात्मकृतं मन्ये भरते दुखःमीदृशम् ॥ १५ ॥

प्रिय इष्टः सुहृद्बन्धुर्भरतो भक्तिमान् मयि ।
तस्य दुःखेन गोपेन्द्र दुःखितोऽस्मि न संशयः ॥ १६ ॥

मयि जाते वन्यवृत्तौ भरतोऽपि तथाभवत् ।
अहो कष्टमभूत्सानां कोऽपि ना श्वासकोऽधुना ॥ १७ ॥

इत्युक्त्वा रघुशार्दूलो माङ्गल्यामिदमुक्तवान् ।
मातस्त्वया पुरात्यर्थं पालितोऽस्मि विशेषतः ॥ १८ ॥

दधिदुग्धघृताहारैर्मधुरैर्भूरिभोजनैः ।
तव हैयं गबीनस्य प्रभावो वर्ण्यतां कुतः ॥ १९ ॥

भग्नं धनुर्महेशस्य तद्बलेनैवभूयसा ।
ताडका च हता मातः क्रव्यादी घोरदर्शना ॥ २० ॥

सुबाहुमारीचमुखा मारिताश्चैव राक्षसाः ।
भूयश्चापि हनिष्यामि बहून् राक्षस पुङ्गवान् ॥ २१ ॥

केन विस्मर्यतां मातस्तव वात्सल्यमद्भुतम् ।
गर्भाधारणपोषाभ्यामसि नित्यं गरीयसी ॥ २२ ॥

उपालम्भा व्रजजनैर्मामुद्दिश्य कृतास्त्वयि ।
सोढवत्यसि तान् सर्वान् मातर्मत्प्रेमविह्वला ॥ २३ ॥

आगतापि मम प्रेम्णा मातस्त्वं निर्जने वने ।
सानुगा सपरीवारा मन्ये तत्करुणामहम् ॥ २४ ॥

क्व मेऽत्र निर्जनेऽरण्ये बन्धूनां दर्शनं प्रियम् ।
एतत्तव कृपाजातं मन्ये सुखमनुत्तमम् ॥ २५ ॥

एताः प्रीतिमतीर्नित्यं दृष्ट्वा गोपीर्गुणोत्तराः ।
अतीव मुदितोऽस्म्यद्धा यथा मातः प्रमुद्वने ॥ २६ ॥

आसां नित्यमहं मातः स्पृहयामीह दर्शनम् ।
प्रियमन्यन्न मे किंचिद्व्रजवासिजनाद्भुवि ॥ २७ ॥

इत्युक्त्वा वचनं रुच्यं रसिकेन्द्रो रघूद्वहः ।
पुनः पुनः कटाक्षेण मोदयामास गोपिकाः ॥ २८ ॥

माङ्गल्यामातरं रामः प्रेमवृत्तं ब्रुवन्मुहुः ।
तिर्यक्कटाक्षपातेन हर्षयामास ताः प्रियाः ॥ २९ ॥

पुनरूचे व्रजाधीशं रामः कौतुकिताशयः ।
निवेदयामि ते तात सादरं श्रूयतां तु तत् ॥ ३० ॥

न भवेद्विप्रयोगो यस्तथा कार्यमतः परम् ।
संसारे वर्तमानानां प्रियःस्वेष्टसमागमः ॥ ३१ ॥

इति श्रुत्वा रघुपतेर्वाक्यमूचे व्रजेश्वरः ।
त्वामानेतु महं राम प्राप्तोऽस्मीह न संशयः ॥ ३२ ॥

किमर्थं राजशार्दूल वने वससि दुःखितः ।
स्वानां वितन्वन् दुःखानि ये तवाभ्युदयेच्छवः ॥ ३३ ॥

व्रजाप्रमुद्वने राम स्वान्बन्धून् परिपालय ।
ये त्वद्विरहदुःखेन क्षणकल्पशतोपमाः ॥ ३४ ॥

गावस्तव वियोगेन क्लिश्यन्ति रघुनन्दन ।
नित्यं प्रमुद्वनं यासां शून्यमन्धतमान्वितम् ॥ ३५ ॥

गावः खगः मृगा वृक्षा लता गुल्माः प्रमुद्वने ।
अन्धकारितदिक्चक्रदर्शिन्यः शून्यमासते ॥ ३६ ॥

एवं कदर्थनामाप त्वया विरहितो व्रजः ।
त्वत्समागमनाकाङ्क्षा वर्ततेऽन्याकुलो रुजा ॥ ३७ ॥

अतस्त्वां नेतुमखिलैर्नियुक्तो व्रजवल्लभ ।
प्राप्तोऽस्मीह चिरोत्कण्ठाविह्वलीभूतमानसः ॥ ३८ ॥
इति श्रुत्वा रघुवरः सुखितस्य वचोऽमृतम् ।
उवाच वदतां श्रेष्ठो मोहयन् वचनैर्मनः ॥ ३९ ॥

समीपे कोसलापुर्याः प्रमोदवनमस्ति तत् ।
अतः समुद्भूजे तत्र वसन् नित्यं पुरीजनैः ॥ ४० ॥

समीपस्थ प्रिवज्ञाय मां कोसलपुरीजनाः ।
करिष्यन्ति सदा संगं ततस्तत्र वसामि हि ॥ ४१ ॥

सुदूरेऽयं गिरिवरः कोसलाया व्रजेश्वर ।
अतोऽत्रैव वसन्नित्यं विहरिष्यामि मामकैः ॥ ४२ ॥

अवकाशोऽत्र सुमहान् गोपानां च गवां च ते ।
अतोऽत्रैव निवस्तव्यं सानुगेन त्वया प्रभो ॥ ४३ ॥

यथा प्रमुद्वनं रुच्यं चित्रकूटस्तथा प्रभो ।
सर्वर्तुसुखदो नित्यं प्रचेलिममहोरुहः ॥ ४४ ॥

इह मन्दाकिनीतीरे नवशाद्वलिनी मही ।
बहुयोजनविस्तीर्णा गवांते सुखदायिनी ॥ ४५ ॥

इहास्व सुचिरं शैले गोपराज मुदं वह ।
मन्दाकिनीपयःसंगिमरुल्लहरिवीजितः ॥ ४६ ॥

अञ्चन्तु त्वां प्रतिपदं शैलद्रुमलता इह ।
मकरन्दरसस्राविपुष्पस्तवकराशिभिः ॥ ४७ ॥

प्रसार्य गोसहस्राणि मन्दाकिन्यास्तटावनौ ।
अधित्यकासु शैलस्य विहरन्त्विह तावकाः ॥ ४८ ॥

देवगन्धर्ववासाढ्ये सर्वर्तुसुखदायिनि ।
इह शैले व्रजाधीश सुचिरं वसतिं कुरु ॥ ४९ ॥

अमी ते प्रासादा मम सहजशक्त्या विरचिताः सरोवापीकूपोपवनसुखसम्पत्समुदिताः ।
सुखार्थं वास्तव्याश्चिरमिह भवन्तु व्रजपते वसन्नेतेषु त्वं वितनु नयनानन्दपटलीम् ॥५०॥

इमाः श्रीजानक्याः प्रविदधतु सख्यस्तव चिरं मयादिष्टाः पादोद्वहनमुखसेवासमुदयम् ।
स्वयं च त्वद्भुक्ता परिचरतु देवीयमसकृन् ममाम्बां माङ्गल्यां विहितविविधाज्ञापरवशा ॥५१॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे गोपेन्द्राधिवासनोक्तौ सप्ततितमोऽध्यायः ॥ ७० ॥

एकसप्ततितमोऽध्यायः

ब्रह्मोवाच

श्रुत्वा रामस्य वचनं गोपराजो मुदान्वितः।
चिरं विमृश्य विहसन्निदमाह महामतिः ॥ १ ॥

यथा वदसि मां राम तथा कार्यं मया किल।
किंतु किं मे वदिष्यन्ति त्वद्वियुक्ता व्रजौकसः ॥ २ ॥

गतो रामं समाने तुं स तु तत्रैव संस्थितः।
इति धैर्येण रहिताः खिद्यन्ते व्रजवासिनः ॥ ३ ॥

त्वं वादयित्वा मुरलीं मनोज्ञां गाः कोटिशः पुरतः संविधाय।
युतो वयस्यैरुपयन् वनान्तात कदा व्रजस्थान् सुखयिष्यतीश ॥ ४ ॥

इत्युत्कलिक या युक्तास्तत्रत्या रघुनन्दन।
त्वदागमनमत्यर्थमभिकाङ्क्षन्ति सर्वदा ॥ ५ ॥

श्रीराम उवाच

अहं ननु गमिष्यामि तत्र तात प्रमुद्वनम्।
कांश्चित्तु दिवसान् स्थातुमिहैव मम मानसम् ॥ ६ ॥

अत्यन्त रमणीयोऽयं चित्रकूट महीधरः।
अतोदेवी जनकजात्यवतुं नोत्सहते क्षणम् ॥ ७ ॥

लक्ष्मणश्चात्र . निवसन्मुदमाय निरन्तरम्।
नातो विहातुकामोऽसौ गिरिमेनं मनोहरम् ॥ ८ ॥

अतो मद्वचनात्तात मित्रं श्रीनन्दनं तव।
आकारयतरामत्र गोपमेकं निदेशय ॥ ९ ॥

येऽन्ये च तत्र वर्तन्ते त्वत्प्रिया व्रजवासिनः।
तान् सानुगान् सदारांश्चात्राकारय सगोधनान् ॥ १० ॥

इत्युक्तः सुखितावीशो रामचन्द्रस्य निश्चयम्।
गिरिवासे प्रविज्ञाय शूरगोपमुवाच ह ॥ ११ ॥

गच्छ त्वं शूर सहसा नियुक्तो मे प्रमुद्वनम्।
गोधनैः सहितं मित्रं श्रीनन्दनमिहानय ॥ १२ ॥

सदारं सपरीवारं सगोधनसुहृज्जनम्।
वृद्धं श्रीनन्दनं गोपमिहानय महामते ॥ १३ ॥

इत्युक्तो गोपराजेन शूरगोपो व्रजं ययौ।
गोपेन्द्रस्य तमादेशं श्रीनन्दने न्यवेदयत् ॥ १४ ॥

शूर उवाच

रामप्रेमपराधीनः सुखितेन्द्रो महामनाः ।
निवस्तुकामस्तत्रैव त्वामाहेदं व्रजाधिप ॥ १५ ॥

मन्मित्रं हि भवान् गोप श्रीनन्दन महामते !
त्वां विना नैव शक्तोऽहं स्थातुमत्र क्षणं सुखी ॥ १६ ॥

रामोऽपि भवतः साधो दर्शनायाभिकाङ्क्षति ।
अत आकारितोऽसि त्वमिह वस्तुं व्रजेश्वर ॥ १७ ॥

सानुगः सपरीवारः सदारः ससुहृज्जनः ।
सगोधन इहागत्य चिरं वसमहागिरौ ॥ १८ ॥

देशोऽयं विततः स्वच्छः सदा सुरभिसुन्दरः ।
फलपुष्पभरानम्रसुच्छायासुखदद्रुमः ॥ १९ ॥

सेवनीयतमः शैलः सुखवद्भिर्भवादृशैः ।
अत्यन्तरमणीयोऽसौ चित्रसानुशतधुतिः ॥ २० ॥

न जातु चित्त्वमिह वसन् मनोहरे गिरौ मनस्यरतिमुपैष्यसि क्वचित् ।
सरिद्वरा तरलतरङ्गधोरणीसुशीतलैर्मृदुपवनैर्निषेवितः ॥ २१ ॥

सुखितस्य वचस्तस्मै संनिवेद्य महामतिः ।
शूरोऽनुवर्णयामास स्वयं शिखरिणां वरम् ॥ २२ ॥

किं वर्णयामि तव तस्य गिरेः सुशोभां
श्रीनन्दन स्वयमुपेत्य तु वेत्स्यसि त्वम् ।
सानूनि यस्य मणिहेमभयानिशश्व-
दाभूषयन्ति गगनं विदिशो दिशश्च ॥ २३ ॥

कुञ्जानि नित्यमृतुराजनिषेवितानि संफुल्लभूरुहवशीकृतषट्पदानि ।
सद्मानि पुष्पधनुषो विरतं विभान्ति चित्रीकृतानि सुमनः फलपत्रलक्ष्म्या ॥२४॥

केकाधरैरिह निकुञ्जतले वसद्भिः प्रोद्घुष्यतेमदनमन्त्रगणो मनोज्ञः ।
आकर्ण्य तत्समदचेतस उद्विलासा विद्याधराजंहति नैव कदापि यक्षाः ॥ २५ ॥

किंनराः कनकसानुषु संस्थाः किंनरीसहचरा विलसन्तः ।
सादरं खलु दृशा कलयन्तिक्ष्मामधोवननिकुञ्जविचित्राम् ॥ २६ ॥

पक्षिणो बहुविधाः परस्परस्पर्धयेव कलयन्ति कूजितैः ।
निन्यमत्र मुखरा दिशो दश स्वर्वधूमणितमश्रुतं यथा ॥ २७ ॥

गण्डाचलान्निपतताामिह निर्झराणामाराव आपतशिलातलपट्टिकासु ।
संव्याप्य कुञ्जभवनेषु तिरोदधाति प्रेयोगृहीततनुमुग्धवधूरुतानि ॥ २८ ॥

सीतारघूद्वहनिषेवणसौख्यहेतोः स्वस्वश्रिया षड्ऋतवोऽत्र सदा वसन्ति ।
अन्योन्यसंगमसमुज्झितसंविरोधाः स्वस्वामिने युगपदेव मुदं वहन्ति ॥ २९ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे श्रीनन्दना-कारणं नामैकसप्ततितमोऽध्यायः ॥ ७१ ॥

द्विसप्ततितमोऽध्यायः

ब्रह्मोवाच

श्रुत्वा शूरस्यतद्वाक्यं श्रीनन्दन उदारधीः ।
सुखितेन समाहूतस्तदा गन्तुमना अभूत् ॥ १ ॥

विहस्यानन्दमधुरमुखपङ्कजशोभितः ।
उवाच श्रृण्वतां तत्र सदसि स्वे महीयसाम् ॥ २ ॥

आहूतः सुखितेनाहं गन्तुमिच्छामि सस्पृहः ।
चित्रकूटो गिरिर्यत्र तं देशं भूरिभावुकम् ॥ ३ ॥

संगः स्यात्सुहृदा तेन रामचन्द्रस्य चेक्षणम् ।
वसतिश्चित्रकूटाद्रौ शुभं मे किमतः परम् ॥ ४ ॥

अहो स्वभावमधुरः स सुहृन्मे महत्तमः ।
यस्यदेवा अपीच्छन्ति संगमं खलु दुर्लभम् ॥ ५ ॥

दर्शनं रामचन्द्रस्य सुधातोऽप्यतिरिच्यते ।
केऽपि भाग्यवतां मुख्या लभन्ते तदनुग्रहात् ॥ ६ ॥

यावन्ति भुवि तीर्थानि सन्ति द्वीपेषु सप्तसु ।
पुण्यं तदवगाहोत्थंचित्रकूटेऽधिकं ततः ॥ ७ ॥

सर्वात्मना खलु शुभं समुपस्थितं मे यास्यामि सानुगसुहृत्परिवारवर्गः ।
द्रक्ष्यामि कोसल पतेस्तनयस्य वक्त्रं चन्द्रादपीच्यममृतस्रुतिसारशोभम् ॥ ८ ॥

इत्युक्त्वा सदसि श्रीमानन्तः पुरमियायसः ।
श्रीराजिनीमुवाचेदं सुतयाऽऽश्चावि तद्यथा ॥ ९ ॥

सुमुखिसुखितगोपेनाहमाकारितोऽस्मि प्रणयपरहृदा मे चित्रकूटे महीध्रे ।
कुवलयसुखदायी सर्वसम्पद्विधायी स जयति रघुनाथो यत्र सम्पूर्णचन्द्रः ॥ १० ॥

सुचिरविरहतप्तं मानसं मे करिष्ये किमपि रघुवरस्यालोकपीयूषपात्रम् ।
बहुलदिवसलग्नं तीव्रसंताप दाहं तदहनि शमयिष्ये चक्षुषोरेक दैव ॥ ११ ॥

शशिमुखि भवती यच्चेत सा साध्व्यजस्रं स्पृहयति तदिदानीं वेधसा योजितं वै ।
रघुवरवरवंशीनादपीयूषपूरैः सुखय सुखय शश्वत्कर्णरन्ध्रेप्रपूर्य ॥ १२ ॥

तदतुलसुखधाम श्यामलं चित्रकूट क्षितिधरवनमन्तःसान्द्रकुञ्जान्धकारम् ।
रघुपतिमुखचन्द्रज्योत्स्नया सुप्रकाशं भवतु वहलकेलीभाजनं मामकानाम् ॥ १३ ॥

भार्यामुद्दिश्य कथितं श्रीनन्दनमनीषिणा ।
श्रुत्वा श्रीसहजा देहे जुगूहे पुलकावलीम् ॥ १४ ॥

प्रसरत्पुलकावलीपरीता वहलस्वेदभरेणपूर्णगात्रा ।
प्रणयिस्मरणेन कम्पमाना विवशा विह्वलतां भृशं जगाम ॥ १५ ॥

श्यामा रामादयः सख्यो विज्ञातविरहोदयाम् ।
सहजामन्यतो निन्युर्निगूह्य वसनाञ्चलैः ॥ १६ ॥

भर्तुर्वचनमाकर्ण्य देवी श्रीराजिनो तदा ।
अन्तःसुखसघूर्णाक्षी जगाद स्मितशालिनी ॥ १७ ॥

अद्य मे नाथ सुप्ताया निशि यामे तुरीयके ।
अजनि स्वप्न ईदृक्षस्तं निबोध व्रजाधिप ॥ १८ ॥

जानेशरत्स्वच्छनभःप्रदेशे सम्पूर्णताराधिपमण्डलेन ।
विकीर्णमच्छं भुवि चन्द्रिकौघं पिबन्ति बद्धोत्कलिकाश्चकोराः ॥ १९ ॥

जाने प्रभातारुणरश्मिशोभा बन्धूक पुष्पद्युतिबन्धुरर्कः ।
उल्लासयत्यम्बुजिनीवनानि दिशां तमिस्रं किरणैर्निरस्य ॥ २० ॥

जाने स्थिता क्षीरसमुद्रमध्ये सुविस्तृते पुष्कर पर्णपात्रे ।
भुनज्मि सुस्वादु सिताविमिश्रं मनोहरं पायसमाप्तकामा ॥ २१ ॥

इत्येवं भाविकल्याणसूचकानि ददर्श ह ।
अहं स्वप्नेसु वस्तूनि तैरासं विस्मिताशया ॥ २२ ॥

क्व नःशुभं स्वेष्टरघूद्वहेन विश्लेषदुखोद्वहनक्षमाणाम् ।
इत्थं मुहुश्चेतसि चिन्तयन्ती लब्धावलम्बाह्यधुनाहमास ॥ २३ ॥

ये स्वयं गन्तुकामाः स्म स्वेष्टदर्शनसस्पृहाः ।
ते चेत्सुहृद्भिराहूताः सम्पन्नास्तन्मनोरथाः ॥ २४ ॥

इतिभार्यामतं सम्यगादाय व्रजनायकः ।
श्रीनन्दनश्चित्रकूटगिरिं गन्तुमसज्जत ॥ २५ ॥

गच्छ शूर गृहानद्य भुक्तभोज्यः सुविश्रम ।
श्वोभूतेऽहं गमिष्यामि चित्रकूटं सहानुगः ॥ २६ ॥

स तदाज्ञामुपादाय पालीग्रामं विलोक्य च ।
नन्दिग्राममुपागच्छद् यस्मिन् सुखितगोधनम् ॥ २७ ॥

गत्वा गोष्ठानि सर्वाणि मिलित्वा गोष्ठपालकैः ।
संदिदेश यदादिष्टं सुखितेन मनीषिणा ॥ २८ ॥

हे गोष्ठपालाः शृण्वन्तु यदुक्तमधिपेन वः ।
गोधनानि पुरोधाय यूयं मामुपगच्छथ ॥ २९ ॥

एष साधुतमो देशो गवां गोष्ठेभ्य उत्तमः ।
चारयन्त्विहगा गोपाः यावद्वसतिं राघवः ॥ ३० ॥

प्रमुद्वनादनूनं च चित्रकूटगिरेर्वनम् ।
इदं वित्त शदास्थायि सर्वंतुं सुखभाजनम् ॥ ३१ ॥

मन्दाकिन्याः पुलिनभूर्नवशाद्वलशालिनी ।
विरच्य तत्र गोष्ठानि सुचिरं वसत प्रियाः ॥ ३२ ॥

न चेह दुर्लभं किंचिद् रामचन्द्रप्रभावतः ।
आपदो दूरतः सर्वाः सम्पदोऽत्र ममोन्मुखाः ॥ ३३ ॥

फलपत्रपुष्पपरिणाहिसम्पदां भरमुद्वहन्ति गिरिगह्वरद्रुमाः ।
अवलोक्ययान् सकलसौख्यदायिनस्त्रिदशद्रुमा अपि मयावहेलिताः ॥ ३४ ॥

अतोऽत्र सुचिरं गिरौ वसत गोष्ठपालाः सुखं
रघूद्वहमुखक्वणन्मुरलिकानिनादामृतैः ।
सुसिक्तनवभूरुहे हरितपर्णमाला धरे
वने विहरतानिशं सह सुखाञ्चितैर्गोधनैः ॥ ३५ ॥

निशम्य शूरस्य वचो मनोहरं ते गोष्ठपालाः सुखितस्य सर्वशः ।
निर्घोषयामासुरशेषके व्रजे ढक्वाः परेयुर्गमनोद्यमाय वैः ॥ ३६ ॥

आकर्ण्य ढक्वानिनदं घनोपमं श्वोभाविन्यां प्रस्थितौ सर्वलोकाः ।
अनांस्यसज्जन्त धनैरनेकशो देशान्तरेभ्यश्चानयन् गोधनानि ॥ ३७ ॥

इति श्रीमदादिरामायणे ब्रह्महभुशुण्डसंवादे दक्षिणखण्डे श्रीनन्दन-प्रस्थानो नाम द्विसप्ततितमोऽध्यायः ॥ ७२ ॥

त्रिसप्ततितमोऽध्यायः

ब्रह्मोवाच

श्वोभाविगमनोयुक्तः श्रीनन्दन उदारधीः ।
आगच्छद् भरतं वक्तुं विरहेण सुविह्वलः ॥ १ ॥

तमागतं स जग्राह स्वादरेण प्रसन्नधीः ।
सुखासनस्थितं पश्चादुवाचेदं महामतिः ॥ २ ॥

सुखं बससि गोपेन्द्र पालिग्रामे मनोहरे ।
प्रायेण रघुनाथेन सर्वे विरहिणः कृताः ॥ ३ ॥

तेषांमेषां मनोऽस्माकं युष्माकं च व्रजौकसाम् ।
राम एव सदा लग्नं वियोगव्यसनाकुलम् ॥ ४ ॥

श्रुतो ढक्वानिनादस्ते प्रास्थानिक उदित्वरः ।
प्रायेण रामं गन्तारः शेषा अपि गवां दुहः ॥ ५ ॥

न किंचिदिह पश्यामि नूनं मदवलं वनम् ।
ननु रामप्रियैरेतैर्दिवसानत्यवाहयम् ॥ ६ ॥

त इदानीं गोपवराः सर्वेऽपि प्रियसन्निधौ ।
गन्तार इत्यधैर्येण वेपामि निजचेतसि ॥ ७ ॥

मुग्धोऽतिवाहयिष्यामि किमेतान् दिवसानहम् ।
रामप्राणेशविश्लेषदग्धदग्धान्धकारि तान् ॥ ८ ॥

देहि मे दर्शनं नित्यं पालीग्रामे त्वमावसन् ।
श्रीरामस्य प्रियैः सार्द्धं संगो मे वाञ्छितः सदा ॥ ९ ॥

श्रुत्वा स भरतोदीर्णवाक्यपीयूष मादरात् ।
विनिवेदयितुं यानं श्रीनन्दन उवाच ह ॥ १० ॥

याचेऽहमपि तत्रैव गन्तुं त्वां रामसम्मित ।
कृपास्मा सु सदा कार्या स्मरणीयाः सदा वयम् ॥ ११ ॥

चिरेण विप्रयुक्ताःस्म रामेण प्रेयसा वयम् ।
आकारिताश्च मित्रेण सुखितेनान्तिवासिना ॥ १२ ॥

द्रष्टुमीहे चिरात्प्राज्ञ तत्कान्तं प्रेय सो मुखम् ।
करुणालोकपीयूषवर्षि मानसहर्षणम् ॥ १३ ॥

आनेष्यामि व्रजं प्रायो निवेद्य रघुवल्लभम् ।
मा खिद्यस्वात्मनो हेतोः क्लिष्टोऽसि विरहज्वरैः ॥ १४ ॥

पश्यसि प्रेयसां नूनं वियुक्तानां दशामिमाम् ।
पशुपक्षिद्रुमवल्लीनां परितापभृतां भृशम् ॥ १५ ॥

एवमुक्तः स तेनासौ भरतो राममानसः ।
उवाच संस्मृतोद्दीप्तविरहानलविह्वलः ॥ १६ ॥

हा कष्टं पतितं भूरि मय्येव विधिवैशसात् ।
अवलम्बाय मे कोऽपि नास्त्यत्र किल निर्जने ॥ १७ ॥

अहमाज्ञापराधीनो रघुनाथस्य यत्पुनः ।
न दर्शनं लभे क्वापि शून्या मे सकला दिशः ॥ १८ ॥

दण्डवन्नतयो वाच्या मम तस्मिन् सहानुजे ।
सदारे करुणासिन्धौ वाच्यं मेऽऽत्मनिवेदनम् ॥ १९ ॥

अयमात्मा तव स्वामिन् पदोर्निर्भञ्छनीकृतः ।
त्वमेव विरहोद्भुतमाधिं मे लोपयिष्यसि ॥ २० ॥

इति संदेशवचनं वाच्यं मम मुहुर्मुहुः ।
श्रीनन्दन त्वं धन्योऽसि यथा सुखितगोपतिः ॥ २१ ॥

अथोवाचैष भरतं रघुवंशविभूषणम् ।
अवेक्षमाणः सततं प्रमुद्वनमिहास्व भोः ॥ २२ ॥

नन्दिग्रामो मनोहारी पालीग्रामश्च सम्प्रति ।
अवेक्षणीयः सततं भवता भूपनन्दन ॥ २३ ॥

रामस्यातिप्रियो देश आदिव्रज उदित्वरः ।
पालनीयस्त्वया प्राज्ञ प्रसीदिष्यति ते प्रभु ॥ २४ ॥

प्रमोदवनमानन्दि सर्वर्तुकुसुमाकरम् ।
इदं ते चित्तरुचये विरहेऽपि भविष्यति ॥ २५ ॥

निःसहा विरहेणैते दिवसास्ते सुदुर्वहाः ।
प्रमुद्वनं पश्यतोऽङ्ग सुखं यास्यन्ति निश्चितम् ॥ २६ ॥

उत्युदीर्यं वचश्चारु श्रीनन्दन उदग्रधीः ।
आमन्त्र्य भरतं इनं स्वगृहानभ्यगात्सुहृत् ॥ २७ ॥

स तत्र नन्दिग्रामस्थान् गोष्ठपालान् सगोधनान् ।
वासयामास सुहृदः स्वः प्रस्थातुमना बुधः ॥ २८ ॥

प्रातः सरय्वामाप्लुत्य कृत्वा पुण्याहवाचनम् ।
स्वस्तिवाचित आचान्तो ब्राह्मणैर्वेदपारगैः ॥ २९ ॥

---

१. आलोप आर्षः ।

जयेति प्रयतैरुक्तः सुतमागधवन्दिभिः ।
दत्त्वा द्विजेभ्यो दानानि यथावद्गाः सहस्रशः ॥ ३० ॥

गोपैर्गोपीभिरत्यर्थं तनुभूषणकान्तिभिः ।
शृङ्गवेणुरवोद्घोषैर्गीतैर्माङ्गल्यसूचिभिः ॥ ३१ ॥

उत्साहितमनाः श्रीमान् मनोज्ञमन आस्थितः ।
प्रतस्थौ चित्रकूटाद्रिं यत्र रामः स राघवः ॥ ३२ ॥

श्रीराजिनी महोदारा सहजानन्दिनीयुता ।
नरयानं समारुह्य प्रतस्थौ विहितोत्सवा ॥ ३३ ॥

विधायाग्रतो गोधनानि प्रकामं स्वनद्वेणुशृङ्गादिवाद्यौघहृष्टाः ।
प्रतस्थुर्व्रजाधीश्वरस्याज्ञया ते कृतान्योऽन्ययात्रोत्सवा गोष्ठपालाः ॥ ३४ ॥

रामाद्याः सुहिता विहितप्रस्थानाः सख्यः प्रेमपराः सहजानन्दिन्याः ।
उद्गायन्त्यः कुतुकादुदितानन्दौघाः गच्छन्त्यः सजवं शुशुभुस्ताःसर्वाः ॥३५॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे श्रीनन्दन-प्रस्थाने त्रिसप्ततितमोऽध्यायः ॥ ७३ ॥

चतुःसप्ततितमोऽध्यायः

ब्रह्मोवाच

गोधनैर्गोष्ठपालैश्च श्रीनन्दनमुपागतम् ।
आज्ञाय रामो हर्षेण बभूवपुलकावृतः ॥ १ ॥

श्रीनन्दनो गोपवरः सदारस्तनयायुतः ।
ददर्श चित्रकूटाद्रिं सुखितेनोषितं पुरा ॥ २ ॥

स्थले स्थले गोपकुलैः समाकुलं व्रजाङ्गनागीतनिनादशोभितम् ।
उदारगोपालकवादितस्वनत्सुवेणुशृङ्गादिकृतप्रतिध्वनिम् ॥ ३ ॥

गोष्ठैर्गवां गोपसमूहनिर्मितैर्हरिन्महावेतसवंशमण्डपैः ।
हरिच्छदच्छन्नतमैरुपत्यकासुविस्तृतैः सर्वत एव शोभितम् ॥ ४ ॥

कन्दरासु कृतावासं पुरा गोपैः कुटुम्बिभिः ।
शुभकोलाहलोपेतगह्वरप्रतिनादितम् ॥ ५ ॥

विचित्रशृङ्गरुचिरं रामप्रासादशोभितम् ।
पुरा विनिर्मितोत्तुङ्गपर्णशालाकुटी गृहम् ॥ ६ ॥

सीताक्रीडनकैश्चित्र मृगैर्विश्वस्तमानसैः ।
आवृतं चारुचकितैः कूर्दमानैरितस्ततः ॥ ७ ॥

जानकीमुखचन्द्रांशुपायिनां हृष्टचेतसाम् ।
चकोराणं समुदयैः सर्वतो मुखरीकृतम् ॥ ८ ॥

सीताव्रजाङ्गना शश्वत्केलिकौतुकनादिभिः ।
नूपुरैः कृत झाङ्कारं राजहंससुखावहम् ॥ ९ ॥

सरोभिः फुल्लनलिनैः शीतलीकृतमारुतम् ।
मन्दाकिनीमुख्यसरिद्वारिपुष्टमहीरुहम् ॥ १० ॥

व्रजाङ्गनासमाजेन विश्वतो विहितोत्सवम् ।
कमलेशीमुख्यसखीवृन्दचित्रविचित्रितम् ॥ ११ ॥

शृङ्गेभ्योऽवतरन्तीनां जातरूपतनुत्विषाम् ।
आरोहन्तीनां च पृथगन्यासां चम्पकत्विषाम् ॥ १२ ॥

ममंताद्व्रजदेवीनां विचरद्भिः कदम्बकैः ।
कीर्णनक्षत्रमालाढ्यमिवा निस्तिमिरीकृतम् ॥ १३ ॥

विकीर्णदिव्यरत्नौघप्रोज्जागरतरद्युतिम् ।
रामाधिवाससम्पन्नमहामाङ्गल्यमण्डितम् ॥ १४ ॥

सर्वर्तुशोभया कीर्णं विस्तीर्णमधिभूनभः ।
विचित्रकौतुकयुतं स्वर्गस्थानमिवापरम् ॥ १५ ॥

लतामण्डपसंकीर्णा विचित्रभवनान्वितम् ।
सर्वतः पुष्पसंदोहसौरभ्यलहरीयुतम् ॥ १६ ॥

दृष्ट्वा गिरिवरं दूरादारश्च सकुतूहलम् ।
रथादवततारैष जायया सुतयान्वितः ॥ १७ ॥

पुरन्ध्रीभिः समायुक्ता देवी श्रीराजिनी ततः ।
आरुरोह गिरिं यत्नाद् रघुनाथदिदृक्षया ॥ १८ ॥

स्वयं श्रीसहजानन्दारामाकृष्णादिसंगता ।
जगाम दयितं द्रष्टुं द्योतयन्ती दिशस्त्विषा ॥ १९ ॥

रामः सम्प्रेष्य सौमित्रिं पुरस्तात् ससुहृद्गणान् ।
अत्यादरेण जग्राह सर्वान् साधुसमागतान् ॥ २० ॥

ते रघूद्वहमालोक्य पूर्णचन्द्रमुखं दृशा ।
सर्वे सुनिर्वृता आसन् गोपाः श्रीनन्दनादयः ॥ २१ ॥

श्रीरानीमुखा गोप्यश्चिरेण विरहातुराः ।
सहजानन्दिनीसख्यः सर्वा आसन् सुनिर्वृताः ॥ २२ ॥

गोष्ठपालाश्चगणशो दृष्ट्वा रामं सुहृत्तमम् ।
अत्यर्थं मुदिताः सर्वे मयूरा इव वारिदम् ॥ २३ ॥

परिरभ्य स तान् सर्वानत्युत्कण्ठावशोन्मुखान् ।
सुखयामास रामेन्दुश्चन्दनेनेव वर्ष्मणा ॥ २४ ॥

सम्प्रश्नालिङ्गनालोकसत्कारैर्बहुमानिताः ।
मनोरथोदधेः पारं सुखमापुर्व्रजौकसः ॥ २५ ॥

महतीं सम्पदं वीक्ष्य चित्रकूटे सीतापतेः ।
रमावासं सुसञ्जातं मेने श्रीनन्दनस्तदा ॥ २६ ॥

वनश्रियं समालोक्य सर्वर्तुसुखदायनीम् ।
प्रमोदविपिनस्यांशं मुमुदे गोपपुङ्गवः ॥ २७ ॥

सुखितेन स संगम्य गोपराजेन धीमता ।
सुखितोऽभूद्विशेषेण तत्र श्रीनन्दनेश्वरः ॥ २८ ॥

परस्परं तौ मिलितौ समाजौ श्रीनन्दनश्रीसुखितेशयोर्यत् ।
कामप्यभिख्यां दधतुर्महीघ्रे रामस्तदालोक्य चिरं मुमोद ॥ २९ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे गोपेन्द्रसमाज-द्वयमेलने चतुःसप्ततितमोऽध्यायः ॥ ७४ ॥

●

पञ्चसप्ततितमोऽध्यायः

ब्रह्मोवाच

श्रीनन्दनो रामचन्द्रेण भूयः सम्मानितः प्रेमविशेषभाजा ।
उवास गोष्ठानि विरच्यरम्यास्वधित्यकासु क्षितिभृद्वरस्य ॥ १ ॥

पुरस्ताच्चित्रकूटस्य परस्ताद्दक्षिणोत्तरे ।
ऊषतुः ससुखोत्साहं समाजौ गोपराजयोः ॥ २ ॥

नन्दिग्रामसमाजेन मनःप्रीतिरवर्धते ।
पालीग्रामसमाजस्य चन्द्रेणेव पयोनिधः ॥ ३ ॥

रामः सम्पश्यतां तत्र मुनीनां त्रिदिवौकसाम् ।
अतिथीनां ब्राह्मणानां बभौ तापसवेषभृत् ॥ ४ ॥

जटीवल्काजिनधरो भूतिलिप्तसुविग्रहः ।
वन्यवृत्तिश्चायधरः सानुजः प्रिययान्वितः ॥ ५ ॥

गोपानां चैव गोपीनां महाभोगविलासवान् ।
गोचारणवनक्रीडारासकेलिविशारदः ॥ ६ ॥

शिखिपिच्छविभूषाढ्यो गुंजाहारविभूषितः ।
योगमायामुखाश्रित्य बभौ त्रैलोक्यमोहनः ॥ ७ ॥

स्फाटिकी सा शिला यत्र चित्रकूटस्य मूर्धनि ।
तत्र गोपीजनानन्दी शुशुभे केलिपण्डितः ॥ ८ ॥

एकतः सहजानन्दा परतो रामसुन्दरी ।
मोदयन् केलिरसिकश्चित्रकूटे व्यतिष्ठतः ॥ ९ ॥

व्रजाङ्गनाश्च ताः सर्वा वीरविश्लेषभीतयः ।
अरमन्त रमाकान्तविन्यस्तहृदयेक्षणाः ॥ १० ॥

सहजारामसुन्दर्योर्व्रजस्त्रीणां च सर्वशः ।
जनकेन्द्रसुतायाश्च साहाय्यमवलम्ब्य सः ॥ ११ ॥

रसराजः परां वृद्धिमिप्राय प्रतिवासरम् ।
राममन्मथनेत्राब्जकटाक्षशरसम्भवः ॥ १२ ॥

गोपीनां चैव रामस्य प्रेमवृत्तिं गुणोत्तराम् ।
अभिवीक्ष्य प्रतिपदं जानकी विस्मिताभवत् ॥ १३ ॥

एकदा कुञ्जपुञ्जाढ्ये चित्रकूटस्य गह्वरे ।
श्च्योतन्निर्झरपानीयशीतमारुतसेविते ॥ १४ ॥

सर्वधातुरसद्रावनानाचित्रविचित्रिते ।
सर्वतः साधुसंफुल्ललतावृक्षोरुसौरभे ॥ १५ ॥

गुञ्जद्भ्रमरसंदोहमन्दनादोपवीणिते ।
मादद्यत्कोकिलकण्ठोत्थकाकलीशब्दनादिते ॥ १६ ॥

संफुल्लपङ्कजारण्यसौरभोद्गारसुन्दरे ।
गिरिरत्नोपलद्यौतैर्विष्वग्वितिमिरीकृते ॥ १७ ॥

नानामृतफलस्तोममण्डितानेकभूरुहे ।
सम्प्राप्तमण्डलादेवीविचित्ररचनाञ्चिते ॥ १८ ॥

रत्नस्तम्भशतोपेतकेलिमण्डपमण्डिते ।
सर्वर्तुसुभगावासे विलासोल्लासशालिनि ॥ १९ ॥

ईदृशेऽतिशुभे स्थाने सहजानन्दिनीमुखाः ।
श्रीरामसुन्दरीमुख्याश्चिक्रीडुर्गोपकन्यकाः ॥ २० ॥

नानाकेलिकलोपेता रसभावकदम्बिताः ।
निपीतमधुसम्मत्ता माधुर्यमदमन्थराः ॥ २१ ॥

मञ्जुमञ्जीरनादिन्यो रणत्काञ्चीमनोहराः ।
बलय ध्वानकारिण्यो विनिर्जितमनोभवाः ॥ २२ ॥

भ्रूभङ्गभङ्गीमधुराः कटाक्षोन्मुक्तदृष्टयः ।
परस्तात्कबरीभारचाञ्चल्यसुमनोहराः ॥ २३ ॥

सपणाक्रीडशालिन्यो वद्धयूथाः परस्परम् ।
रामकान्तगुणग्रामसंगीतकविषारदाः ॥ २४ ॥

निबन्धकेलिकारिण्यः क्रीडाचपलकुण्डलाः ।
नानोपहासशालिन्यो बद्धमानससौहृदाः ॥ २५ ॥

एकतः सहजायूथ्याः परतो रामयूथगाः ।
तथैव रामसुन्दर्याः सयूथ्या रामयूथगाः ॥ २६ ॥

विशालाक्षीसयूथ्याश्च रामयूथ्यास्तथैवताः ।
जनकेन्द्रसुतायूथ्याः कमलेशीमुखाःस्त्रियः ॥ २७ ॥

सर्वास्ता इन्दिरारूपाश्चन्द्रास्या मृगलोचनाः ।
विदद्युद्वल्लिविलोलाङ्ग्यो विलुम्पन्त्यो मनस्त्रयाम् ॥ २८ ॥

श्रीरामरूपमाधुर्यमदिरामत्तमानसाः ।
मदनोन्मादकारिण्यो गलन्नीविगुणोद्गमाः ॥ २९ ॥

स्खलत्पादाब्जविन्यासा विश्लथद्भुजवल्लयः ।
अव्यक्तकललापिन्यो रामप्रेमरसावृताः ॥ ३० ॥

गायन्त्यश्चैव गुञ्जन्त्यः कूजन्त्यश्च कलापशः ।
लपन्त्यः प्रलपन्त्यश्च प्रत्यक्षविरहोद्धताः ॥ ३१ ॥

क्वचित्स्तब्धाः क्वचित्स्विन्नाः पुलकौघविसंष्ठुलाः ।
क्वचिच्च स्वरभङ्ग्यः क्वचिद्वेपथुविग्रहाः ॥ ३२ ॥

क्वचिद्विवर्णवदना अन्तःप्रेमहता इव ।
क्वचित्साश्रुदृशोनार्यो विलीनविकलेन्द्रियाः ॥ ३३ ॥

रामरूपसुधासिन्धुं पातुकामा मदोद्धताः ।
अगाध इति विज्ञाय स्वयं मग्ना हतोद्यमाः ॥ ३४ ॥

अप्राप्नुवन्त्यः पारं च मनोरथपयोनिधेः ।
प्रेम्णः कुटिलवृत्तित्वात्कुटिलाः सरला अपि ॥ ३५ ॥

अन्तःप्रेमपरीतप्ता रामपीयूषसागरे ।
पतिताः शमयन्त्यच महोष्माणं मनोगतम् ॥ ३६ ॥

काश्चिद्भ्रुकुटिमाबध्य दन्तद्रष्टाधरच्छदाः ।
घ्नन्त्यः कटाक्षनिक्षेपैः पश्यन्त्यः प्रियमात्मनः ॥ ३७ ॥

आयौज्यायोज्यदोर्वल्लीः पाशीकृत्य तडित्विषः ।
मेलयन्त्यः प्रियग्रीवास्वासज्य स्मरविह्वलाः ॥ ३८ ॥

मिलन्त्यस्तुङ्गवक्षोजैर्विवलन्त्यो लतइव ।
प्रेमाघातं ददानाश्च चुम्बन्त्यो गण्डमण्डलम् ॥ ३९ ॥

पिबन्त्योऽधरपीयूषं पाययन्त्यश्च तत्प्रियम् ।
स्पृशन्त्योनेत्रकमलमोष्ठाभ्यां प्रेयसः स्फुटम् ॥ ४० ॥

रञ्जयन्त्योऽलक्तकेन प्रियस्याधरपल्लवम् ।
रज्यमानाः प्रियेणैताः पाणिपादौष्ठपालिषु ॥ ४१ ॥

तोष्यमाणा भूष्यमाणा जोस्यमाणाः प्रतिक्षणम् ।
तौषयन्त्यो भूषयन्त्यो जोषयन्त्यश्च ताः प्रियम् ॥ ४२ ॥

प्रियेणदत्तैस्ताम्बूलैः रञ्जिताधरपल्लवाः ।
स्वयं च भक्षयन्त्यस्ताः प्रियं ताम्बूलवीटिकाम् ॥ ४३ ॥

इत्थं क्रीडारसे मग्नाः प्रियेण संहताः प्रियाः ।
न विजज्ञुर्दिवारात्रि निमेषार्द्धेण सम्मितम् ॥ ४४ ॥

श्रीचित्रकूटगिरिकन्दरमन्दिरान्तःकन्दर्पकेलिकलनोत्कलिकाकुलास्ताः ।
चिक्रीडुरात्तमदिरामदमोदमग्ना गोप्यो निगूढरसभावकलास्वभिज्ञाः ॥ ४५ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे गोपीजनविहरणं नाम पञ्चसप्ततितमोऽध्यायः ॥ ७५ ॥

●

षट्सप्ततितमोऽध्यायः

ब्रह्मोवाच

रामप्रेमविनिर्मग्नां वीक्ष्य तासां मनोगतिम् ।
रामं च तत्परवशं ज्ञात्वा सर्वात्मना भृशम् ॥ १ ॥

सहजानन्दिनीं चैकां सर्वयोषित्स्वरूपिणीम् ।
क्रीडन्तीं प्रेयसा सार्द्धं विज्ञाय जनकात्मजा ॥ २ ॥

तस्यां मिथो रहःकेलौ विनिविष्टमनाः स्वयम् ।
एतदाह वचस्तथ्यं कमलेशीमुखाः सखीः ॥ ३ ॥

श्रीजानक्युवाच

सख्यः पश्यत गोपिकाजनमहाभाग्यार्णवं वर्णितुं
नो शक्तास्मि भवेद्यदापि रसनाकोटिर्गुणोद्गारिणी ।
यासां केलिकलाकलापकलने कौतूहलं प्रेयसो
नित्यं सम्प्रति वर्द्धते निरुपमप्रेमप्रमोदस्पृशः ॥ ४ ॥

नन्वासां सुकृतं कियत् कथयत प्रायेण कीदृक् च तद्
या नित्यं निवसन्त्यनन्यविषयाविष्टे हृदि प्रेयसः।
यासां चेतसि चापि दृक्कमलयोर्माधुर्यलीलारस-
ग्राही कोऽपि मिलिन्दराज उदयत्यानन्दचिच्चन्द्रमाः ॥ ५ ॥

आसां यत्पदपङ्कजद्वयरजस्तत्प्राप्तुकामा भृशं
देवाः शक्रविरञ्चिशङ्करमुखास्त्रैलोक्य पूज्याङ्घ्रयः।
सेवन्ते प्रमुदाटवीं पुलकिनः प्रेमोद्गमप्रश्रित
स्वान्ताः कान्तपदावलीभिरनिशं गायन्त उच्चैर्गुणान् ॥ ६ ॥

एतासां चरणारविन्दनखरप्रद्योतलेशोपमां
नैवाप्नोति रमापि कान्यललना वोढुं समर्थामदम्।
साम्राज्यं वरवैभवं विधिपदं स्वाराज्यमैन्द्रं पदं
प्राज्यानन्दकदम्बभोगरुचिरं न्यक्कृत्य याः संस्थिताः ॥ ७ ॥

गीयन्ते सततं यशांसि गगने गीर्वाणयोषागणै-
रेतासां रसिकेन्द्रसंगमभवस्वानन्दकेलीजुषाम्।
सख्यः सम्प्रतमश्नुवाम वयमप्यानन्दसम्पद्भरा
नाभिः साधुसुसंगताः सवनशः संसारचक्रातिगाः ॥ ८ ॥

नो माया निखिलात्मनः पिदधती नो कालशक्तिर्जग-
च्चक्रं ग्रासमिवैककं विदधती जागर्ति तत्रालयः।
यत्रासामरविन्दनिर्जयिदृशां प्रेमप्रमोदोत्तरा
प्रेयःसंगजुषां जगद्विसदृशी केलीकला कल्पते ॥ ९ ॥

सख्यो ब्रह्मसुखं न किंचन हृदा निश्चित्य जानाम्यहं
लिल्युर्यम शतोत्तराण्यपि सुखान्याब्रह्मलोकावधि।
एतासां रसिकेन्द्रमौलिमणिना केलीसुधासागरे
मग्नान्तःकरणस्य भात्यगणितानन्दप्रकाशोदयः ॥ १० ॥

सख्योवेद्मि सुदुर्लभोऽयमधिपः कैवल्यसंज्ञाद्भुत
प्राज्यानन्दकदम्बसम्पद उतप्राकाम्यसिद्धीश्वरः।
ब्रह्माद्यामरवृन्दवन्दितपदाम्भोजो रमासेवितः
सोऽप्याभिः स्वकृपावलोकिततनोः सौलभ्यमेति द्रुतम् ॥ ११ ॥

ॐकाराक्षररत्नपञ्जरशुको लक्ष्मीचकोरी विधु-
र्मायामोहमदान्धकारगहनन्यक्कारचण्डद्युतिः ।
श्रीमानेष जगत्त्रयाद्भुतलतासंदर्भकन्दः शनै-
रेतासां करपङ्कजेषु पतितः प्रेम्णा परिक्रीतवत् ॥ १२ ॥

कन्दर्पः स्वयमेव एव सुषमाशालीवसन्तः स्वयं
सामग्री स्वयमेव नित्यमधुरक्रीड़ावलीनामसौ ।
तत्तद्रूपतया स्वयं परिणतः श्रीमान् प्रमोदाटवी
मेत्यानन्दयति स्वयं यदत्र कलितः प्रेमैकरूपः सदा ॥ १३ ॥

कल्याणैकनिकेतनं त्रिजगतां जीवातुभूतोद्भुत
क्रीडासागरपूर्णचन्द्र उदयं प्राप्तः प्रकाशास्पदम् ।
शृङ्गारोत्तमकल्पवृक्ष उचितो भोगैरनेकैरयं
भोक्तुं भव्यसुनव्यपूर्णरतिमानेताभिरेव ध्रुवम् ॥ १४ ॥

कल्याण्यः कमलाधिकाः परिलसत्केलीकलाकौशला
राकाशारदशर्वरी परिवृढन्यक्कारकल्पाननाः ।
शृङ्गारैक विसारकल्पलतिकाः कन्दर्पदर्पद्रुम
प्रध्वंसिस्मितलेशकान्तिविभवा लालित्यलीलालयाः ॥ १५ ॥

सान्द्रानन्दमयातिमञ्जुलतमप्रेमप्रकर्षोन्नत-
प्रासादध्वजपद्म उत्कटमनोभूकाण्डलोलेक्षणाः ।
सोज्जम्भभ्रूकुटीतरङ्गविगलत्त्रैलोक्यचन्द्राननाः
सौन्दर्योत्थमदा जयन्ति जगति स्वच्छन्दमेताः श्रियः ॥ १६ ॥

एताभिः कृपयेक्षिता ननु जना मोदन्त एवानिशं
प्रेमाणं च परस्य पुंस उदितं नित्यं लभन्ते ध्रुवम् ।
दुर्जेयस्य निधाय मूर्ध्नि विपदं कालस्य देवासुरैः
शश्वद्भोगमहोदधौ निरवधि क्रीडन्ति तैस्तैः सुखैः ॥ १७ ॥

आसां मण्डलमध्यगं मधुरतालावण्यवारां निधिं
प्रोदञ्चन्मुरलीनिनादखुरलीखेलन्मुखेन्दुस्वरम् ।
चित्तोद्गारिलसत्सुभङ्गवपुषं पुष्णन्तमन्तर्मुदं
द्रष्टृणां दरफुल्लपङ्कजदृशं पीताम्बरं नीलभम् ॥ १८ ॥
कस्याश्चित्कुचयोः स्फुरत्करनवं कस्याश्चिदोष्ठच्छदं
पीयूषैकपदं घयन्तमसकृत् कस्याश्चिदालिङ्गनम् ।
कुर्वन्तं हरिचन्दनाक्तवपुषा कस्याश्चिदास्यं दृशा
पश्यन्तं रघुनन्दनं स्वहृदये सख्यश्चिरं ध्यायत ॥ १९ ॥

इत्युक्त्वा वर्णनं तासां सखीभ्यो जनकात्मजा ।
प्रेयसः संनिधौ स्थित्वा वाक्यमेतदवोचत ॥ २० ॥

ननु सुभगनितान्तं विस्मयं याति चित्रित्तं प्रणय परिणतिस्ते शश्वदाभीरिकासु ।
किमु सुकृतममूषां भालभाग्यौद्यभाजां कथय कथय नृणां कर्मसाक्षी भवान् यत् ॥ २१ ॥

किं स्विच्चरित मेताभिर्मखदानक्रियादिषु ।
जपस्वाध्यायनियमज्ञानयोगसमाधिषु ॥ २२ ॥

यत्फलं रघुशार्दूल भवता नित्यकेलिषु ।
अजस्रं क्रियते भोगो रमयापि सुदुर्लभः ॥ २३ ॥

भवानमूभिः संगम्य प्रियाभिस्त्रिजगत्प्रिय ।
रमते लीलया भोगं वितन्वत् कमलेक्षण ॥ २४ ॥

परस्परं वः स्पृहणीयसंगमे लब्धास्पदः प्रेमसखो रसादि भूः ।
वसत्यजस्त्रं व्रजभूमिमण्डले न यं समर्था गदितुं परा गिरः ॥ २५ ॥

पुरा चीर्णं पूर्णं सपरिणतिपुण्यं परतरं
विना सौख्यं लभ्यं कथमिवतदीदृक् पुनरिदम् ।
इदं ते पृच्छामि त्रिभुवनपते पूर्णपुरुष
प्रवक्तुं योग्यस्त्वं भवसि मयि कृत्वा निजकृपाम् ॥ २६ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे व्रजभक्त-सुकृतप्रश्ने षट्सप्ततितमोऽध्यायः ॥ ७६ ॥

●

सप्तसप्ततितमोऽध्यायः

ब्रह्मोवाच

इतीरितो मैथिलेन्द्रस्य पुत्र्या पुंसां वरः श्रीरघुवंश केतुः ।
स्मित्वा सहर्षं समुवाच वाचमानन्दपाथोधितरङ्गसिक्तम् ॥ १ ॥

साधु पृष्टं त्वया कान्ते सुकृतैर्लभ्यते सुखम् !
सुकृतान्यप्यनेकानि फलभोगोन्मुखान्यलम् ॥ २ ॥

यथाधिकारं सर्वैस्तु क्रियते सुकृतं प्रिये ।
अधिकारा अपि कृताः सृष्टेरादौ पृथक् पृथक् ॥ ३ ॥

सर्वथा द्विविधा जीवा बद्धमुक्तप्रभेदतः ।
अनादिकर्मजनितचतुर्विधतनूयुजः ॥ ४ ॥

तासु तत्सम्बन्धिषु चाप्यहंताममतावृताः ।
बद्धा इति विनिर्णीता जीवास्तेषु दयां कुरु ॥ ५ ॥

अज्ञानाध्यस्तदेहादिष्वहंताममतातिगाः ।
स्वरूपप्राप्तिमन्तो ये ते मुक्ता इति कीर्तिताः ॥ ६ ॥

अणुव्यापिचिदाकारः स्वरूपगुणवैभवैः ।
श्रीरामचन्द्र तुल्यस्तन्नित्यकैङ्कर्यभाजनम् ॥ ७ ॥

अविद्ययाऽऽवृता ह्यस्य गुणाः सर्वेऽप्यगोचराः ।
रामस्यैव प्रसादात्त आविर्भूता भवन्ति हि ॥ ८ ॥

बद्धा अपि द्विधा प्रोक्ता जीवास्तत्र मुमुक्षवः ।
रामस्य ये निरुपधिकृपातो मोक्तुमिच्छवः ॥ ९ ॥

अविद्याकामकर्मादिसम्बन्धं प्रकृतेर्गुणैः ।
मुमुक्षवश्चसंसारे विषयान् भोक्तुमिच्छवः ॥ १० ॥

मुमुक्षुबो द्विधा ज्ञानसाधनाश्चान्यसाधनाः ।
फलाभिसन्धिहीनं ये कर्तृत्वत्यागपूर्वकम् ॥ ११ ॥

वर्णाश्रमोचितं कर्म कृत्वा विहितमूर्जिताः ।
निरन्तरनिदिध्याससम्भवज्ञानशालिनः ॥ १२ ॥

स्वसाक्षात्कारपश्यन्ति भक्तिनिष्ठामुपागताः ।
ते ज्ञानसाधना नाम मुमुक्षव उदीरिताः ॥ १३ ॥

तेऽपि द्विधोपास्ति शुद्धभक्तिभेदावलम्बनात् ।
पूर्वेचतारमन्त्रोक्तजपध्यानार्चनादिभिः ॥ १४ ॥

पुरश्चर्यादिभिश्चापि लब्धनिष्ठा विशेषतः ।
देहारम्भककर्मौघविनिवृत्त्येकसाधनाः ॥ १५ ॥

आत्मानुभूतिप्रत्यूहविनिवृत्तिपरायणाः ।
अत्यर्थमत्मकैवल्यविरोधिभ्योमुमुक्षवः ॥ १६ ॥

उपासका इति परं कीर्तिता वेदवेदिभिः ।
परेपुंसः रामस्यैव कीर्तनश्रवणादिषु ॥ १७ ॥

अनन्यानिष्ठावन्तो ये साक्षाच्छ्रीरामचन्द्रस्य ।
स्वरूपगुणरूपादिसाक्षात्कारसुखस्य च ॥ १८ ॥

प्रतिबन्धान्मोक्तुकामास्तथा भगवतो हरेः ।
अनुभूतिविरोधिभ्यो मोक्तुकामास्तथैव ते ॥ १९ ॥

ततोऽन्यसाधनास्ते ये सम्बन्धं प्राप्यकञ्चन ।
मोक्षे निश्चयवन्तो ये ते पुनर्द्विविधाः स्मृताः ॥ २० ॥

प्रपन्नाः साधुपुरुषकारानेष्ठाश्च केचन ।
हित्वा तु विहितोपायान् ज्ञात्वा परमचेतनम् ॥ २१ ॥

परसामर्थ्यवन्तं च दयालुं श्रीरामं प्रभुम् ।
परमप्राप्यमीशं च तमेवोपायमाश्रिताः ॥ २२ ॥

ते प्रपन्ना इति ख्याताः परे त्वाचार्यमाश्रिताः ।
ईशं स्वतन्त्रमालोच्य संकुचन्तो हृदा भृशम् ॥ २३ ॥

तत्कृपाप्रचुरस्थानं तमेवाज्ञाय तत्पराः ।
स्वस्यैव कृपया चैव सेवया च निरन्तरम् ॥ २४ ॥

प्रसत्तिभाजो ह्याचार्या मोचयन्ति न संशयः ।
रामप्रतिनिधीभूतास्त एवातो निरन्तरम् ॥ २५ ॥

प्रपन्ना अति दृप्तार्तभेदतो द्विविधा मताः ।
शरीरस्थितिपर्यन्तमत्रैव तु यथोचितम् ॥ २६ ॥

सम्प्राप्तान् सुखदुःखादीन् गणयन्तो न किंचन ।
शरीरान्ते पुनर्मोक्षसिद्धिं निश्चित्य ये स्थिताः ॥ २७ ॥

ते दृप्ता इति कीर्त्यन्ते महामाना महाशयाः ।
आर्तास्त्वसहमाना ये संसारं दुःखसागरम् ॥ २८ ॥

ततस्तत्क्षणमेवेशप्राप्तौ सत्वरमानसाः ।
अथ मुक्तान् प्रवक्ष्यामि यावच्छृणु भामिनि ॥ २९ ॥

नित्यकादाचित्कभेदाद् द्विधाते परिकीर्तिताः ।
गर्भजन्मजरादुःखं न कदाचिदुपागताः ॥ ३० ॥

ते नित्या इति कीर्त्यन्ते नित्यं तल्लोकवासिनः ।
मुकण्ठहनुमदाद्या नित्यसिद्धा हि पुरुषाः ॥ ३१ ॥

कादाचित्कास्तु भगवन्निर्हेतुककृपावशात् ।
अनादेरज्ञानपाशाद्विमुक्ताः सिद्धिमागताः ॥ ३२ ॥

अविद्याकृतसंकोचराहित्याद्भगवद्गतान् ।
स्वरूपगुणरूपादीन् पश्यन्तस्तत्प्रसादतः ॥ ३३ ॥

सालोक्यं चैव सारूप्यं सामीप्यं सार्ष्टिमेव च ।
सायुज्यं चानुभूयातिप्रीतिभाजो रामे प्रभौ ॥ ३४ ॥

अवस्थानस्थलेऽप्युच्चैः कदाचिदनवस्थिताः ।
सर्वदेशे सर्वकाले सर्वावस्थोचितं सदा ॥ ३५ ॥

कैङ्कर्यमेव कुर्वाणाः सेवकास्ते महाशयाः ।
नित्यलीलामहाभोगभाग्यवन्तः सुहृत्तमाः ॥ ३६ ॥

नित्या द्विधा परिजनपरिच्छदविभेदतः ।
पूर्वे मुकण्ठसुन्दरहनुमदादयः प्रभोः ॥ ३७ ॥

परे किरीटमुकुटवनमालायुधादयः ।
वस्त्राभरणरत्नाद्याः सच्चिदानन्दविग्रहाः ॥ ३८ ॥

कादाचित्का भागवताः केवलाश्च द्विधा मताः ।
तत्र पूर्वे तु भगवत्परा भगवतो हरेः ॥ ३९ ॥

स्वरूपगुणरूपादिसाक्षात्कारभवां मुदम् ।
वहन्तो निर्भरं नित्यं घूर्णचित्तविलोचनाः ॥ ४० ॥

केवलास्तत्सुखास्पृष्टा न्यूनकक्षासु संस्थिताः ।
आत्मारामा आत्मतृप्ता आत्मसंतुष्टनिःस्पृहाः ॥ ४१ ॥

उक्ता द्विधैव भगवत्परा अपि शृणु प्रिये ।
गुणानुसंधानपरास्तथा कैङ्कर्यतत्पराः ॥ ४२ ॥

पूर्वे स्वामित्वसौलभ्यसौशील्यादीन् प्रभोर्गुणान् ।
परिशीलयन्तः सततं तन्मात्रपारवश्यगाः ॥ ४३ ॥

परेस्वर्गादिनिर्माणक्रियाकौशलतत्पराः ।
द्विधैव केवलास्तद्वद्दुःखाभावैकतत्पराः ॥ ४४ ॥

आत्मानुभूतिशीलाश्चेत्येवं संकीर्तिताः प्रिये ।
प्रातिकूल्यानुसंधानाद् दुःखानां तन्निवृत्तये ॥ ४५ ॥

तन्मात्रनिष्ठामापन्नास्तथा देवि परे पुनः ।
स्वस्वरूपानन्दसाक्षात्कारसंतोषतत्पराः ॥ ४६ ॥

चितां[1] स्वरूपं कथितं साकल्येन तव प्रिये ।
तत्रेमे मत्परिजना विज्ञेया व्रजवासिनः ॥ ४७ ॥

तेषु सत्साधनैः केचिद्बहूनां जन्मनां क्षये ।
मामुपेत्य मुदं प्राप्ताः पुनरावृत्तिवर्जिताः ॥ ४८ ॥

नित्यलीलापरानन्दभोगोदधिविलासिनः ।
केचिज्ज्ञानैर्नित्यसिद्धा यथैवाहं तथैव ते ॥ ४९ ॥

ममाविर्भावकाले ये आविर्भूता भवन्ति वै ।
तिरोभावे तिरोभूता भवन्ति जनकात्मजे ॥ ५० ॥

कैश्चित्साधनसंसिद्धैर्नित्यसिद्धैश्च कैश्चन ।
मम लीलापरिकरः समाजः सर्वतो वृतः ॥ ५१ ॥

तत्रापि मुनयः केचित्सन्ति देवाश्च केचन ।
केचिच्च मानुषा भक्ता मम साधर्म्यमागताः ॥ ५२ ॥

इमास्ताश्चन्द्रास्यास्तरलतडिदुद्भासितनवो
मृगाक्ष्यः पद्मिन्यो विहरणविचित्राश्च शतशः ।
परीपाकप्राप्तप्रणयपरिणाहेन सततं
परिक्रीतात्मानोनिरवधिसुखं मे विदधते ॥ ५३ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे प्रणयिनीगणवर्णने सप्तसप्ततितमोऽध्यायः ॥ ७७ ॥

---

१. चिताम् = जीवानाम् ।

अष्टसप्ततितमोऽध्यायः

श्रीराम उवाच

इमाः पुनः प्रिये काश्चित्प्रिया मे विनिमालय।
याः सिन्धुमथनेलक्ष्म्या सख्यः सह विनिर्गताः॥ १॥

तिस्रः कोट्यश्चपञ्चाशल्लक्षाणि च चतुर्दश।
सहस्राणिशतान्यष्टौ दश चाम्भोजलोचनाः॥ २॥

चिरेणातप्ततपसः क्षीरतोयनिधेस्तटे।
कालेन जातास्ताः सर्वागोदुहां कन्यका व्रजे॥ ३॥

ता एताः पुरतो भान्ति तव श्रीजनकात्मजे।
पद्मास्याः पद्मनयनाः फुल्लपद्मगणस्रजः॥ ४॥

पद्मिन्यस्तनुशोभाभिर्भासयन्त्यः प्रमुद्वनम्।
इदानीमत्र सम्प्राप्ता मत्प्रेमविरहातुराः॥ ५॥

स्नानासनपरीधानपानभुक्तिषु मे सदा।
भवन्ति परिचारिण्यः सहजाबद्धसौहृदाः॥ ६॥

मानयन्त्यो मनोमोदं पर्वणीव सुसंगताः।
प्रसाधितोरुवपुषः पटभूषादिभिः प्रिये॥ ७॥

श्रीजानक्युवाच

कदा समुद्रो मथितः केन कार्येण वा प्रभो।
केन वा रघुशार्दूल गम्भीरः पयसां निधिः॥ ८॥

एतन्मे ब्रूहि पृच्छन्त्या यच्चितं कौतुकायते।
श्रोतुमत्यद्भुतं वृत्तं समुद्रमथनाश्रयम्॥ ९॥

श्रीराम उवाच

शृणु प्रिये समुद्रस्य मथनं कौतुकाश्रितम्।
अमानुषमिदं कर्म कृतं यत्त्रिदशैःपुरा॥ १०॥

पुरा कृतयुगेयुद्धं देवासुरमभून्महत्।
तारकाद्या बलोत्सिक्ता असुरा दैवतैर्यदा॥ ११॥

यज्ञभागोरुभोगार्थमस्पर्द्धन्त तदा मिथः।
प्रावर्त्तत तयोर्युद्धं तुमुलं रोमहर्षणम्॥ १२॥

यत्तारकामयं ख्यातं वर्षलक्षमजायत।
पृथिव्यां चैव गगने तारकाश्च ग्रहाः सुराः॥ १३॥

असुरैर्बलसंदृप्तैरहन्यन्त समन्ततः ।
वृतस्तैरसुराचार्यः पौरोहित्येन भार्गवः ॥ १४ ॥

मृतसंजीविनीं विद्यामवलम्ब्य महातपाः ।
मृतान् संजीवयामास सोऽसुरान् दुष्टचेतसः ॥ १५ ॥

पौरोहित्ये वृतो देवैर्बृहस्पतिरुदारधीः ।
देवान् स संजीवयितुं नाशकत्समरे हृतान् ॥ १६ ॥

तस्य पुत्रःकचो नाम्ना शिष्यो भूत्वागमत्कविम् ।
प्रच्छन्नवेषो व्यचरदसुरेष्वपि मायिषु ॥ १७ ॥

गुरोः पुत्र्या देवयान्या रक्षितः सानुरागयाः ।
सोऽपि मायाविभिः शश्वदसुरैस्तैरसूयुभिः ॥ १८ ॥

कालेऽनुलक्षितगतिर्बार्हस्पत्यो महाव्रतः ।
वसन् गुरुकुले दुष्टैश्चूर्णयित्वा ह्ययोधनैः ॥ १९ ॥

विनिक्षिप्य सुरामध्ये गुरोरेवानुपायितः ।
ततः प्रभृत्यपेयत्वमगमद्वारुणी भृशम् ॥ २० ॥

कचोद्भवब्रह्महत्यारूपदोषानुसंगतः ।
कचश्चाप्यगमन्नाशंपश्चात्तापकरो गुरोः ॥ २१ ॥

एवं दैत्या बलोद्रिक्तास्त्रिदशानजयन् मृधे ।
निपात्यमानास्तैः सर्वे विनेशुर्यत्र कुत्रचित् ॥ २२ ॥

यज्ञभागहृतस्तेषां ववृधुर्वीर्यसंवृताः ।
पूर्वं कृते समे भागेऽप्यात्तविप्रतिपत्तयः ॥ २३ ॥

ततो निरवशेषेण यज्ञभागान् हरन्ति ते ।
दुष्टाश्चेद्बलवन्तः स्युः पीडयन्त्येव सर्वथा ॥ २४ ॥

अधिकारानप्यमीषां जह्रुस्ते बलदर्पिताः ।
वन्दीकृत्य बलोद्रिक्ता भुञ्जते स्म सुरश्रियम् ॥ २५ ॥

हृतजीव्या हृतधना हृतस्थाना दिवौकसः ।
विचेरुर्विगतश्रीका मर्त्या इव महीतले ॥ २६ ॥

मेरोर्गह्वरमाश्रिता घनवनच्छायान्धकारावृतं
तूष्णींभूय समास्थिता निवहशस्ते संकुचवृत्तयः ।
चिन्ताशोक समुद्भवज्वरपरिस्तुष्टान्तराश्चेतसा
ध्यायान्ति स्म सुरेश्वरं त्रिजगतामेकायनं श्रीपतिम् ॥ २७ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे समुद्रमथनेऽष्टसप्ततितमोऽध्यायः ॥ ७८ ॥

●

एकोनाशीतितमोऽध्यायः

श्रीराम उवाच

ध्यायतां जपतां चैव देवानां मेरुकन्दरे।
पराजितानामसुरैश्चिन्तयाविष्टचेतसाम् ॥ १ ॥

आविरासीद्धरिः साक्षात्परमात्मा कृपार्णवः।
आरुह्य गरुडं यानं सम्प्राप्तः स्वीयधामतः ॥ २ ॥

वैकुण्ठात्त्रिदशाधीशश्चिकीर्षुस्तत्सहायताम् ।
शङ्खचक्रगदापद्मशार्ङ्गायुधनिषेवितः ॥ ३ ॥

पीताम्बरसमुल्लासिमहामारकतद्युतिः ।
नखकोणपराभूतमार्तण्डकिरणव्रजः ॥ ४ ॥

कटिसूत्राङ्गदधरः सद्रत्नवलयाञ्चितः।
रत्नाङ्गुलीयकद्योतविस्फुरत्पल्लवाङ्गुलिः ॥ ५ ॥

वैजयन्तीमहामालारुच्यवक्षःस्थलप्रभः ।
श्रीवत्सलाञ्छनधरः कण्ठकौस्तुभशोभितः ॥ ६ ॥

मुक्ताहारसमालम्बिपादाङ्गुलिनखप्रभः ।
अनेकरत्नजटितकिरीटोद्योतिमस्तकः ॥ ७ ॥

सूर्येन्दुनयनोद्भासी कस्तूरीतिलकालिकाः ।
श्रवणद्वयविद्योतिस्फुरन्मकरकुण्डलः ॥ ८ ॥

कपोलफलकोल्लासिलुलितालकवल्लरिः ।
अणिमादिमहासिद्धिसंशोभिपारिपार्श्वकः ॥ ९ ॥

वेदात्मकसुपर्णोक्तदिव्यस्तुतिकृतस्मितः ।
दिव्यपार्षदनिर्घुष्टसत्कीर्तिमहिमार्णवः ॥ १० ॥

तं दृष्ट्वा देवदेवेशं कृपाललितलोचनम् ।
तुष्टुवुस्त्रिदशाः सर्वे समुत्थाय समं ततः ॥ ११ ॥

ऊचुः प्राञ्जलयः सर्वे भक्तिप्रह्वोरुविग्रहाः ।
दयावलोकपीयूषसिक्तविज्वरमानसाः ॥ १२ ॥

देवा ऊचुः

नमो नमस्ते बृहते परिस्फुटव्यवस्थमायागुणवर्जितात्मने ।
अनन्तकल्याणगुणैकभास्वतेऽपवर्गसोख्याधिभुवेऽखिलेश्वर ॥ १३ ॥

त्वमस्य दृश्यप्रकरस्य साक्ष्यसि त्वमेव चादिप्रकृतेः प्रवर्तकः ।
प्रक्षोभ्यमाणा यदसौ तवेक्षणाद्गुणान् प्रसूते त्रिजगत्समुद्भवान् ॥ १४ ॥

निर्लेप एवासि विभोत्वमात्मना सृजस्यवस्यत्सि पुनश्चराचरम् ।
अहो विचित्रा तव शक्तिरुच्चकैरचिन्त्यरूपा च सुयोगिनामपि ।। १५ ।।

त्वत्तः प्रभूतं जगदेतदद्भुतं समाप्यते त्वय्यखिलात्मनास्थिते ।
अतो निरुप्यापिनिषेधशोषिका गिरो निवर्तन्त इव त्वदात्मनः ।। १६ ।।

गौणीं तुवृत्तिसमवलम्ब्य वैदिकीगिरां प्रवृत्तिस्त्वयि चित्सुखात्मनि ।
तथापि सम्यङ्न भवान् विचिच्यते परार्थमालम्ब्य वितीर्णस्वार्थया ।। १७ ।।

पञ्चात्मकस्त्वं द्विषडात्मकोऽभूः पञ्चद्वयीशतसहस्ररूपवान् ।
एकः समो ऽस्युज्झितसर्वदूषणः पूर्णो गुणैस्तेन बहूपमोऽभू ।। १८ ।।

यत्किं च दृश्यं परिवर्तिलौकिकं त्वत्सत्तया तस्य सत्तां प्रतीमः ।
अतो विशेषात्मतया स्थितेऽखिले सामान्यरूपस्त्वमिहाखिलेश्वर ।। १९ ।।

आरोपितात्मा भव एष यत्त्वपि स्फुरत्यतस्त्वय्यनु भूतिमागते ।
मृषात्मको बाधितवत्प्रतीयते स्वप्नो यथा स्वप्रतिबोधमागते ।। २० ।।

त्वमस्युपादानममुष्य मृद्यथा घटस्य दुस्तर्क्यविचित्रनिर्मितेः ।
यन्नामजात्याकृतियोगि वस्तुतत्त्वय्यस्ति नास्तीति ततो निगद्यते ।। २१ ।।

नैकस्य ते जातिरनेकसंश्रिता या वै पदार्थस्य परं स्वरूपदा ।
न निर्विशेषस्य विशेषधानकृद्गुणोऽपिकश्चित्त्वयि कल्पनामियात् ।। २२ ।।

विभागसंयोगजसाध्यरूपिणी क्रियापि कल्प्येत न चाक्रियस्य ते ।
अनामरूपस्य च नामरूपकृत्संज्ञापिते कल्पयितुं न शक्यते ।। २३ ।।

अतः कथं त्वाभिदधातु वैदिकी सरस्वती यः सकलैरुपाधिभिः ।
समुज्झितोऽसि स्वपरस्वरूपतो निजे महिम्नि त्वमतो महीयसे ।। २४ ।।

नाकोऽस्ति भूमन् गगने प्रतिष्ठितः सुखं सुरा यत्र वसन्ति सर्वशः ।
अतः प्रशस्तैर्महतो महत्तमैर्न लभ्यसे त्वं सुकृतैर्विना प्रभो ।। २५ ।।

परार्द्धकल्याणगुणप्रसूतये विशेषतो न्यस्तगुणानुषक्तये ।
स्वरूपमात्रं ननु धर्म धर्मिभाव न धत्सेऽनातिरिक्तसंगभृत् ।। २६ ।।

उपैषि लोके त्वमजोऽपिलीलयाऽऽविर्भावमात्रं निजजीवमुक्तये ।
उदारभूयो गुणकर्मनामभिः प्रवर्तयन् स्वं भजनं विशेषतः ।। २७ ।।

इति स्तुत्वामहास्तत्र देवदेवं चतुर्भुजम् ।
वरमन्दारकुसुमस्तबकैः पर्यपूजयन् ।। २८ ।।

मन्दाकिनीतीरसरोजकोष सम्पन्न सम्यङ्मकरन्दवृन्दैः ।
विधाय पाद्यार्घमुखीं सपर्यामात्मानमेते विनिवेद्य तस्थुः ।। २९ ।।

असुरानीकखिन्नानाममराणां विलोक्य ताम् ।
भक्तिमात्मनि गोविन्दः प्रसीदत् करुणार्णवः ।। ३० ।।

शुचिस्मितरुचिच्छटाविदलितान्धकारव्रजो नितान्तकरुणेक्षणविशीर्णशोकज्वरः ।
अमन्दतरमूर्तिमन्निजवरायुधोत्साहदो जगाद मधूसूदनस्त्रिदिववासिनोनन्दयन् ॥ ३१ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे समुद्रमथने देवकृतस्तोत्रे एकोनाशीतितमोऽध्यायः ॥ ७९ ॥

अशीतितमोऽध्यायः

श्रीभगवानुवाच

ज्ञाता वोऽसुरवर्गेभ्यः सम्भूतोच्चैर्मया रुजा ।
तत्प्रतीकारमधुना कर्त्तुमस्मि समुद्यतः ॥ १ ॥

लोकेऽहं सर्वजीवेषु वृत्तिं साधारणीं श्रितः ।
तथापि मम भक्तेषु करुणाभ्यधिकामराः ॥ २ ॥

समत्वं वापि वैषम्यमुदाहरतु मे जनः ।
तथापि मम युष्मासु पक्षपातो विशेषतः ॥ ३ ॥

युद्धे प्रसक्तेऽसुरपुङ्गवैर्वः पराजयो जायत एव देवाः ।
तन्मूलमेकं मृतसंजीविनी सा विद्या कवेरसुराचार्यकस्य ॥ ४ ॥

भवन्तोऽपि सुधापानादमरत्वं यदा सुराः ।
गच्छेयुस्तर्हि गच्छेयुररयो वः पराभवम् ॥ ५ ॥

मायाविनः पापवृत्ता असुराः कूटवृत्तयः ।
गमिष्यन्ति सुराः सर्वे स्वयमेव पराभवम् ॥ ६ ॥

भवन्तो धर्मपरमा नित्यं मां समुपाश्रिताः ।
नहि न्यक्कारमर्हन्ति असुरेभ्यो दिवौकसः ॥ ७ ॥

न्यूनं त्वमृतमेवैकं युष्मासु त्रिदिवालयाः ।
यल्लब्ध्वा वीतमरणा विजेष्यथ परान् मृधे ॥ ८ ॥

सिन्धोर्गर्भेतदमृतमस्ति देवाः सुदुर्लभम् ।
अतस्तमेव सोपायाः सिन्धुं मथितुमिच्छत ॥ ९ ॥

अगाधः पयसां राशिः सर्वरत्ननिकेतनः ।
कल्पद्रुमजनिः साक्षाद्वरुणस्यालयो महान् ॥ १० ॥

ममापि शय्याभवनं विषस्याप्यमृतस्य च ।
स्थानभूतो जलनिधिर्मथितुं शक्यते कथम् ॥ ११ ॥

अहो तादृश एवास्य मन्थदण्डोऽप्यपेक्षितः ।
गम्भीरस्य तलस्पर्शोप्यस्य सम्भाव्यते न च ॥ १२ ॥

अपेक्ष्यं तादृगेवास्य नेत्रं मन्थनहेतवे ।
तादृशा एव चापेक्ष्या मथितारो महाबलाः ॥ १३ ॥

यादसां भूरिजीवानां कदनं च भवेदिह ।
मकरौघालयो ह्येष सुगम्भीरः पयोनिधिः ॥ १४ ॥

सुदुर्घटमतो मन्ये मन्थनं क्षीरवारिधेः ।
पुरस्ताद्विषमे तस्य त्रैलोक्यजनमारणम् ॥ १५ ॥

मूर्च्छान्धकारनिविडं प्रादुर्भूतं भवेदितः ।
येन नाशस्त्रिजगतां सम्भाव्यो दुर्धरात्मना ॥ १६ ॥

अशक्यश्चामृतोत्पाद उपायैर्योजितैर्विना ।
इत्यहं मनसा दूये भवदर्थे दिवोकसः ॥ १७ ॥

उपायेन तु यच्छक्यं न तच्छक्यं विचारणैः ।
अतः प्रयतितव्यं व उपायानां समृद्धये ॥ १८ ॥

साहाय्यमत्रभवतामहमाचरिष्याम्यात्मप्रभावसमुपेत उपात्तनीतिः ।
उच्चैर्मया निभृतमाहित एव यत्नः साफल्यमेष्याति यथार्थमनोरथेन ॥ १९ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे समुद्रमथने विष्णुकृतमन्त्रोक्तौ नामाशीतितमोऽध्यायः ॥ ८० ॥

●

एकाशीतितमोऽध्यायः

ब्रह्मोवाच

विष्णुना व्याहृतं वाक्यं श्रुत्वा सर्वं सुरेश्वरः ।
शक्रः प्रोवाच विहसन् मनसामुदितो भृशम् ॥ १ ॥

उत्पद्येतामृतं सिन्धोरमरत्वविधायकम् ।
तर्हि तेनैव किं न स्युरमरा असुरा अपि ॥ २ ॥

तदा स्यादपरोऽनर्थ एवमेवासुराः खलु ।
जयिनस्त्रिदशैर्युद्धे किं पुनस्तेऽमृताशिनः ॥ ३ ॥

दुर्घटा चामृतोत्पत्तिः सिन्धोर्गम्भीरपाथसः ।
भवतैव विधातव्या देवानां पक्षपातिना ॥ ४ ॥

न लभेरंस्तदसुरास्तथा कार्यं च माधव।
स्यात्तत्कृतकृतं सुष्टु विपरीतं ततोऽन्यथा ॥ ५ ॥

श्रीभगवानुवाच

तदप्यहं करिष्यामि न लभेरन् यथासुराः।
मन्थनीयस्तु पाथोधिः सहैव त्रिदशासुरैः ॥ ६ ॥

यतो हि बलिनः सर्वे असुरा वीर्यवत्तराः।
सहितास्तैः प्रमथ्नन्तु भवन्तः क्षीरनीरधिम् ॥ ७ ॥

तैर्विना मथितात्सिन्धोः सम्भूतममृतं सुराः।
हरेयुरसुराः सर्वे संहत्य बलवत्तराः ॥ ८ ॥

अतो मिलित्वा मथ्नीत समुद्रमसुरैः सुराः।
पश्चात्तद्वञ्चनं कृत्वा निभृतं पास्यथामृतम् ॥ ९ ॥

उपायं तु प्रपतिताः कुरुध्वममरोत्तमाः।
अहं तत्र सहायोऽस्मि प्रज्ञया च बलेन च ॥ १० ॥

इन्द्र उवाच

समुद्रमथनोपायं भवानेव विनिर्दिशेत्।
तर्हि कार्यमिदं चक्रिन् कृतं सुष्टु कृतं भवेत् ॥ ११ ॥

भवानेवेश वेत्तास्ति स्थूलसूक्ष्मपरस्य वै।
त्वयैववेदितं भूमन् वेत्तुमर्हन्ति देवताः ॥ १२ ॥

अकुण्ठितं तव ज्ञानमिच्छा च फलसाधिनी।
कृतिश्च परमेशान तवैव सफला प्रभो ॥ १३ ॥

इत्याज्ञाय प्रार्थयाम उपायान् नो निवेदितुम्।
यैर्मथामपयोराशिममृतोत्पत्तिकाम्यया ॥ १४ ॥

त्वया हरेविनिर्दिष्टा उपाया मथनोन्मुखाः।
भविष्यन्त्येव सफला इति विश्वसिता वयम् ॥ १५ ॥

श्रीभगवानुवाच

अस्ति शैलवरे नाम्ना मन्दरः सुसमुन्नतः।
दृढसंहननो दीर्घोभूरिसारशिलाधरः ॥ १६ ॥

मूलारभ्य समुद्भाति लोहसाराधिको गिरिः।
द्रढीयान् भङ्गरहितो मन्थनोचितविग्रहः ॥ १७ ॥

तत्र नेत्रं समुचितं नागराजो महातनुः।
वासुकिर्नाम भोगेन द्राघीयान् भङ्गवर्जितः ॥ १८ ॥

मन्थदण्डावर्तसहः साधुराकर्षणेषु यः।
स प्रार्थनीयः संहत्य युस्माभिः सकलैः सुराः ॥ १९ ॥

तावत्सन्धिश्च कर्तव्यो युष्माभिरसुरैः सह ।
यावत्स्यात्सिन्धुमथनममृतं च भवेदितः ॥ २० ॥

आचार्यो वः प्राज्ञ आङ्गिरसो यः सम्प्रेष्योऽसावसुराचार्यपार्श्वम् ।
एतद्वृत्तं तत्र तेनैव वाच्यं यच्छ्रुत्वा स्युः सोद्यमाः पूर्वदेवाः ॥ २१ ॥

इत्युक्त्वासौ पश्यतां निर्जराणामन्तर्धानं प्राप्य नारायणोऽगात् ।
वैकुण्ठंस्वं लोकमाश्वास्य चैतां स्ते देवाचार्यं प्रैषयञ्शुक्र पार्श्वम् ॥ २५ ॥

स तत्र गत्वा भगवान् बृहस्पतिः शुक्रेण सम्मानित आदरादिभिः ।
सुखस्थितश्चित्रशिखण्डिजः शनैरित्यूचिवान् साधुवचः प्रमाणवित् ॥ २३ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे समुद्रमथनेमन्त्राविर्भाव एकाशीतितमोऽध्यायः ॥ ८१ ॥

द्व्यशीतितमोऽध्यायः

बृहस्पतिरुवाच

कच्चित्त्वमसुराचार्यं भूतिभिः सुखमेधसे ।
यस्य शिष्या विजयिनो दैवेया दानवा अपि ॥ १ ॥

भूभुर्वःस्वरिति ब्रह्मंस्त्रैलोक्यमसुरैर्जितम् ।
अहो अमीषामतुलं बलं वीर्यं च दुर्धरम् ॥ २ ॥

यानि रत्नानि लोकेषु तेषां श्रीरसुरैः कृता ।
तव मन्त्रप्रभावेण ततोऽसि भगवान् स्वयम् ॥ ३ ॥

अपि त्वेकं विजानीहि ज्ञात्वा चाप्यसुरान् वद ।
मतन्ते यर्हिभगवन् कुर्युस्तर्ह्यूर्जिता अमी ॥ ४ ॥

सर्वेषां खलु रत्नानां स्थानमेकं महोदधिः ।
स च स्यान्मथितोभूयस्तदालभ्यानि तान्यपि ॥ ५ ॥

ब्रूहि दैत्यगुरो दैत्यान् विशेषाद्बलशालिनः ।
मन्थेषुरुदधिं यत्नाद् रत्नानां खलु लब्धये ॥ ६ ॥

देवैरपि च कार्यं स्यात् साहाय्यं स्वात्मशक्तितः ।
यद्यमीभिः प्रदेयोंऽश एवं जाते शुभं महत् ॥ ७ ॥

देवाश्चैवासुराः सर्वे मथ्नन्तु पयसां निधिम् ।
तत उत्पाद्य रत्नानि विभक्तव्यानि सर्वशः ॥ ८ ॥

संहृत्यसर्वविहितं भवेत्कार्यं फलोन्मुखम् ।
असंहृत्य विनाशाय संघातो हि महद्बलम् ॥ ९ ॥

न धर्माय न भोगाय सिन्धौरत्नानि भूरिशः ।
विनियोज्यानि तान्येभिर्देवैरैक्यं विधाय हि ॥ १० ॥

मन्दरोमन्थदण्डोऽस्तु नेत्रं वासुकिनागराट् ।
उभयोर्भागयोः सन्तु मन्थितारः सुरासुराः ॥ ११ ॥

इत्युक्त उशना तेन सर्वानामन्त्र्य सोऽसुरान् ।
मन्त्रं तं कथयामास यदाह दिविषद्गुरुः ॥ १२ ॥

शृण्वन्तु मामकाः सर्वे यूयं हि बलवत्तराः ।
रत्नानामाकरं वित्तसमुद्रं पयसां निधिम् ॥ १३ ॥

किंपती श्रीस्तु भुवने श्रीमन्तः स्युर्यथासुराः ।
अतो मन्थत पाथोधिं महत्याः श्रिय आप्तये ॥ १४ ॥

किं तु नैकाकिना साध्यं महत्कार्यमिदं खलु ।
अतः संहृत्य विबुधैर्मन्थनं कुरुतोदधेः ॥ १५ ॥

रत्नानामाकरो ह्येष दिव्यानां श्रिय एव च ।
ततो भवन्तः श्रीमन्तो भविष्यन्ति सुखाय मे ॥ १६ ॥

अमृतोत्पत्तये देवाः सन्धिं यास्यन्ति दानवाः ।
सिद्धे कार्ये विधातव्यं यथोचितमरिन्दमाः ॥ १७ ॥

उपानयत शैलेन्द्रं मन्दरं दृढविग्रहम् ।
सुवर्णमयमुत्तुङ्गं द्राघीयांसं सुरैः सह ॥ १८ ॥

उपामन्त्रयत प्राज्ञा नागराजं च वासुकिम् ।
भागं दत्त्वामृतं तस्मै धत्त मन्थगुणं गिरौ ॥ १९ ॥

श्रुत्वा शुक्रोदीरितं वाक्यमेतद्बैरोचनिप्रमुखा दैत्यवर्याः ।
सद्रत्नानां लब्धये जातकामाः सिन्धून्माथं रोचयामासुरन्तः ॥ २० ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे
सिन्धुप्रमथने द्व्यशीतितमोऽध्यायः ॥ ८२ ॥

त्र्यशीतितमोऽध्यायः

ब्रह्मोवाच

देवाश्चैवासुराश्चैव संहत्यामृतलब्धये ।
जग्मुर्मन्दरमानेतुं जाम्बूनदशिलामयम् ॥ १ ॥

दैतेया दानवाश्चैव बलिप्रमुखतोऽखिलाः ।
बलिनो जम्भनमुचिबलाद्या दीर्घबाहवः ॥ २ ॥

नानाकुलसमुत्पन्नाः कालकाद्याः कलायशः ।
संहत्य देवैरगमन् यत्र मन्दरपर्वतः ॥ ३ ॥

समुत्पाट्यबलाच्छैलमनयन् सिन्धुसन्निधिम् ।
सुदूरतमगन्तव्ये पथि श्रान्ताश्च तेऽभवन् ॥ ४ ॥

कुलाचलभराक्रान्ता देवाश्चैवासुराः पथि ।
खिन्ना वोढुमशक्तास्ते तत्यजुर्विकलाः क्षणात् ॥ ५ ॥

पतता तेन शैलेन केचित्संचूर्णिताः पथि ।
व्यसुकल्पाः समभवन् महासारशिलाहताः ॥ ६ ॥

अथ सर्वे सुपर्वाणः सस्मरुर्गरुडध्वजम् ।
सर्वोपायोपेयफलदातारं सदनुग्रहम् ॥ ७ ॥

तत्क्षणात्स्मरतां तेषामाविरास जनार्दनः ।
सुपर्णपृष्ठमारूढः पीतवासा घनच्छविः ॥ ८ ॥

तस्यावलोकनात् सर्वे भग्नाअसुरदैवताः ।
पुनरुज्जीविता आसन् सुधासेकमिवापिताः ॥ ९ ॥

स एके न करेणाद्रिं स्थापयामास वाहने ।
स्वयमारुह्य च ययौ तीरं क्षीरनिधेर्जवात् ॥ १० ॥

तमनुप्रययुः सर्वे देवदैतेयदानवाः ।
ततोऽवरोहयामास सुवर्णात्पर्वतं हरिः ॥ ११ ॥

अहीन्द्रस्यागमं वाच्छन् प्रभुस्ताक्ष्यं व्यसर्जयत् ।
अथासावाजगामाब्धिं वासुकिः स्मरणक्षणे ॥ १२ ॥

तं वेष्टयित्वा शैलेन्द्रं नागराजं महाबलम् ।
वैरोचनिमुखा दैत्या देवा विष्णुपुरोगमाः ॥ १३ ॥

आरब्धवन्तो मथनं समुद्रस्य बलोद्धताः ।
नागेन्द्रस्य मुखे दैत्या अभवन् गर्वशालिनः ॥ १४ ॥

पुच्छे च देवता आसन् विष्णोः प्राज्ञातिरेकतः ।
ततः शैलो निराधारो ममज्ज पयसां निधौ ॥ १५ ॥

जले मग्नं च तं वीक्ष्य व्यषीदंस्ते सुरासुराः ।
ततः स भगवान् विष्णुः कूर्मो भूत्वोद्धार तम् ॥ १६ ॥

प्रविश्य सिन्धोः सलिलेऽत्यगाधे स कूर्मराजो भगवान् सुधार्थम् ।
दधारशैलं निजपृष्ठदेशे विस्तारतो योजनलक्षमाने ॥ १७ ॥

स तस्य पृष्ठे परिवर्तमानो गिरिर्महावज्रशिलाकठोरः ।
सुरासुरभ्रामितमूलदेशः सुखाय कण्डूतिहरो बभूव ॥ १८ ॥

आसुरं बलमादाय दैत्येषु प्राविशद्धरिः ।
दैवं बलमुपादाय देवेष्वाविष्ट आत्मना ॥ १९ ॥

अबोधरूपतामेत्य नागराजे विवेश च ।
स यथाऽऽकृष्यमाणोऽपि नाज्ञासीत्तनुवेदनाम् ॥ २० ॥

शैले च दार्ढ्यरूपेण प्रविष्टः स्वयमेव सः ।
उपरिष्टाच्च शैलेन्द्रमस्तभ्रादेष एव च ॥ २१ ॥

अधश्च कूर्मरूपेण स्वयमेव व्यवर्तत ।
इत्थमास स सर्वत्र कायव्यूहेन केशवः ॥ २२ ॥

भोगिराजमुखप्रोत्थैः श्वासोच्छ्वासैर्महाविषैः ।
दग्धसंहनना आसन् सर्वतो दैत्यदानवाः ॥ २३ ॥

दवदग्धा यथा वृक्षास्तडिद्दग्धा यथा जनाः ।
तथा विवर्णवपुष आसन् दैतेयपुङ्गवाः ॥ २४ ॥

पर्यरक्षद्धरिर्देवान् भोगिश्वासविषाहतान् ।
आत्मना प्रेरितैर्मेघैः सुच्छायैर्मन्दनिर्झरैः ॥ २५ ॥

समुद्रजलसम्पृक्तैर्वेलावनसमुद्भवैः ।
सुपुष्पमकरन्दाक्तैः समीरैरतिशीतलैः ॥ २६ ॥

सुभृशं मथ्यमानोऽपि नाजायत फलोन्मुखः ।
तदा स्वयं निर्ममन्थे हरिदेवेन वारिधिः ॥ २७ ॥

स बिभ्रदायस्तभुजोरुदण्डो भोगीन्द्रभोगं मथनाय नेत्रम् ।
आवद्धपीताम्बरमञ्जुकक्षो मनोज्ञरत्नाभरणः सुवेशः ॥ २८ ॥

सिञ्चन् सुरान् सकरुणामृतपूरलोल नेत्रारविन्दरुचिरेक्षणबिन्दुपातैः ।
साहाय्यमब्धिमथने भृशदुष्करेऽपि कुर्वन्नितान्तमरुवद्भगवान् रमेशः ॥२९॥

शैलादीन्द्रविकृष्टिवेगविचलद्दोर्दण्डदिव्याङ्गदं
स्विद्यद्वक्रविधूपवीतललितव्यालोलनीलालकम् ।
दीर्घान्दोलविलोलकुण्डलमणिस्रग्भारपीताम्बरं
मूर्ध्नार्पीच्यकिरीटधारिणमुरुप्रोद्यन्महाविक्रमम् ॥ ३० ॥

सावेशं मथनेम्बुधेः सदयदृक्पातेन सर्वान् सुरान्
सिञ्चन्तं सुधयेव वीक्ष्यगगने सिद्धाप्सरःखेचराः ।
एकानेकतया दधानमतुलं साहाय्यमुच्चैर्गिरा-
शंसन्ति स्म जयेति चामरगणा देवर्षयस्तुष्टुवुः ॥ ३१ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे समुद्रमथने त्र्यशीतितमोऽध्यायः ॥ ८३ ॥

❁

चतुरशीतितमोऽध्यायः

ब्रह्मोवाच

इत्थं नारायणेनोच्चैस्तथा देवासुरैरपि ।
मथ्यमानात् पयोराशेरभूदत्युल्बणं विषम् ॥ १ ॥
स्निग्धान्धकारकूटाभं ज्वालामालातिभीषणम् ।
महोग्रवेगं विषहं प्रविसर्पदितस्ततः ॥ २ ॥
उग्रं प्रतिक्रियाशून्यं व्याप्नुवद्दश दिक्षु च ।
शनैः शनैः स्ववीर्येण समाक्रामदुपर्यधः ॥ ३ ॥
सुमहद्भीतिजननं मोहमूर्च्छादिकारणम् ।
रोमाञ्चस्वेदवैवर्ण्यजनकात्यूष्मदुःसहम् ॥ ४ ॥
यद्धालाहलमित्याहुस्त्रैलोक्यजननाशनम् ।
भूचराणां खेचराणां सद्योऽन्धकरणं दृशोः ॥ ५ ॥
तदुत्सर्पद्विसर्पच्च प्रसर्पच्च दिशो दश ।
अन्धकारितदिग्व्योमभूमण्डलमुदञ्चितम् ॥ ६ ॥
तदूष्मज्वालजालेन वित्रस्तास्ते सुरासुराः ।
त्यक्त्वा मन्थगुणं सर्वे पलायन्ते स्म तत्क्षणे ॥ ७ ॥
ते विष्णुना विनिर्दिष्टाः शरणं यात शङ्करम् ।
स वै देवः स्ववीर्येण विषवीर्यं निरोत्स्यति ॥ ८ ॥
तथेति मतमादाय विष्णोरमिततेजसः ।
जग्मुःशरणमीशानं पार्वतीशं त्रिलोचनम् ॥ ९ ॥
तेषां स्तुतिभिरर्चाभिः प्रसन्नोऽभून्महेश्वरः ।
ब्रूत किं करवाणीति स तानाह सुरासुरान् ॥ १० ॥

तमूचुस्त्राहि नः शम्भो सुघोराद्गरलानलात् ।
यो मथ्यमानाज्जलनिधेर्जातो लोकान् दिवक्ष्यति ॥ ११ ॥

तदूष्मज्वालया भूयः प्रसर्पन्त्या दिशो दश ।
वित्रस्ताः सेश्वरालोकास्त्वामेव शरणं गताः ॥ १२ ॥

एवमुक्तः पशुपतिर्भयत्रस्तैः सुरासुरैः ।
पार्वतीं कथयामास प्रभावज्ञां तदात्मनः ॥ १३ ॥

महोल्बणं विषं सिन्धोर्मथ्यमानादजायत ।
तदूष्मज्वालयालोका विनङ्क्ष्यन्ति समंततः ॥ १४ ॥

प्रिये त्रैलोक्यरक्षार्थं निपेयं तन्मयाधुना ।
भवत्या न पुनः कार्या भीतिरत्र हिमाद्रिजे ॥ १५ ॥

स तया समनुज्ञातः प्रभावज्ञानशीलया ।
तदेकचुलुकीकृत्य पपौ हालाहलं विषम् ॥ १६ ॥

निपीतमपि तत्तस्य निजवीर्यमदर्शयत् ।
वितताम गलोद्देशे नीलिमानं मनोहरम् ॥ १७ ॥

अभूद्भ्रूरेव सा तस्य स्फटिकस्वच्छवर्ष्मणः ।
अनुलिप्तेव कस्तूरी ध्यायतां हृदये बभौ ॥ १८ ॥

शशंस भगवान् विष्णुर्दयालोः कर्म तस्य तत् ।
ब्रह्मादयस्तथादेवाः कीर्तयामासुरद्भुतम् ॥ १९ ॥

पिबतस्तस्य यत्किंचित्प्रस्रुतं पाणिदेशतः ।
तदाददुर्दन्दशूकाः सर्पाद्या विषजन्तवः ॥ २० ॥

धृतं तद्भुजगैः पूर्णं कालजीमूतवर्ष्मभिः ।
तदर्द्धं वृश्चिकबरैस्तदर्धं कर्कटादिभिः ॥ २१ ॥

भागशो विषवल्लीभिर्विषौषधिमहीरुहैः ।
धृतं तद्घोरगरलं बिन्दुमात्रं पपात यत् ॥ २२ ॥

हरिणा देवदेवेन स्वभक्तमहिमापरः ।
इत्थं हि ज्ञापितो लोके स्वीयानां भक्तिशालिनाम् ॥ २३ ॥

निपीतमात्रे गरले हरस्य नेत्रे अभूतामतिरक्तवर्णे ।
तदूष्मकीलाशममार्थमग्रे मूर्ध्नेशपादोदकमेष धर्ता ॥ २४ ॥

शम्भौ निपीतवति घोरतरं गरं तत् प्रीताशया अमरदानवदैत्यवर्याः ।
भूयः पयोनिधिसमुन्मथने प्रवृत्ता आसुर्निवृत्तभिय आशु गतान्तरायाः ॥ २५ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे समुद्रमथने विषसंहरणे चतुरशीतितमोऽध्यायः ८४ ॥

पञ्चाशीतितमोऽध्यायः

ब्रह्मोवाच

देवासुरैश्चाल्यमानो मन्थसूत्रेण भोगिना ।
मन्दरो नाम शैलेन्द्रः पयस्यावर्तनं दधौ ॥ १ ॥

कुलाचले सम्परिवर्तमाने गम्भीरपाथोनिधिवारिपूरे ।
यादोगणः संततवेगखिन्नो बभ्राम दैवागतजीवितान्तः ॥ २ ॥

मीनाःक्षीणायुषोनक्रा मकरास्तिमिकच्छपाः ।
पाठीना भोगिनो ग्राहा बभ्रभुर्जलवेगतः ॥ ३ ॥

आपातालतलव्याप्तगम्भीरजलशायिनः ।
आजग्मुरुपरि क्रूरा उच्छलन्तो जलेचराः ॥ ४ ॥

सभ्भ्रान्तान्यम्बुवेगेन यादांसि सहसोद्ययुः ।
निवृत्तभग्नवेगानि छन्नानि च समंततः ॥ ५ ॥

परस्परं निर्विरोधास्तिमपश्च तिमिंगिलाः ।
शीर्णवेगाः पयोवेगंर्बभ्रमुर्जीवितैषिणः ॥ ६ ॥

प्रादुर्भूतेविषे घोरे तदूष्मज्वालया हताः ।
भूरियोजनविस्तीर्णंवपुषः शिश्यिरेम्भसि ॥ ७ ॥

शैलमूलशिलाघातैः केचिच्चूर्णितविग्रहाः ।
कीर्णा जलनिधेर्नीरे मकराद्यागतासवः ॥ ८ ॥

वारिभ्रमणवेगेन भ्रामं भ्रामं स्वशक्तितः ।
निरुच्छ्वासतया केचिज्जहुः प्राणान् जलेचराः ॥ ९ ॥

परेघोरविषज्वालापरिस्पर्शक्षतायुषः ।
शेरते स्म जले मीना दग्धा इव दवाग्निना ॥ १० ॥

कुञ्जराः शैलराजेन मथ्यमानान् पयोनिधेः ।
श्वसन्तो वारिवेगेन समुत्तस्थुः सहस्रशः ॥ ११ ॥

ते विशीर्णंवपुर्वेगाः पतमाना इतस्ततः ।
विनिवृत्तभ्रमाः सद्यो लग्नाः कूले गतासवः ॥ १२ ॥

क्षिप्ताः पुरानिर्मथनाय वारिधौ फलच्छदा ह्यौषधिवृक्षवीरुधः ।
ते चूर्णभावं गमिताः सहस्रशो जाता यथा योगरसैकहेतवः ॥ १३ ॥

तृणानि वल्ल्यस्तरवो महौषधीगणा महानल्पगुणाः पुरा हि ताः ।
त एव सद्यः शतधा विचूर्णिता रसं महान्तं ससृजुः सुधात्मकम् ॥ १४ ॥

सा मुधा घोरमथनविलम्बापेक्षिणी ततः ।
न यावदाविरभवत्तावद्रत्नान्यनेकशः ॥ १५ ॥

आविर्भूतान्यदृश्यन्त दुर्लभानि जगत्त्रये ।
तथा तथा ते ममन्थुर्भूरिवैभवलिप्सया ॥ १६ ॥

आदौ देवहविर्धानी सुरभिः कामधुग्गवाम् ।
रत्नभूता प्रादुरास सर्वेषां नयनोत्सवा ॥ १७ ॥

समस्फुरद्दीर्घविशालशृङ्गी लसल्ललाटोदयसामिचन्द्रा ।
संध्यासवर्णाङ्गरुचिः सुभव्या स्रवच्चतुर्वर्गपया धटोघ्नी ॥ १८ ॥

तां समीक्ष्यानवद्याङ्गीमग्निहोत्रैकसाधनीम् ।
खुरविन्यासमात्रेण पुनन्तीमाश्रमस्थलीम् ॥ १९ ॥

जगृहुर्मुनयः सर्वे प्रभावज्ञा विशेषतः ।
वशिष्ठाद्या महात्मानो भूयः स्तुतिपुरःसरम् ॥ २० ॥

तत आविरभूद्रम्यो हय उच्चैःश्रवा इति ।
राकामृगाङ्कधवलः सर्वावयवसुन्दरः ॥ २१ ॥

ह्रेषाभिर्व्याहरंल्लक्ष्मी त्रैलोक्यैश्वर्यसम्भवाम् ।
शुभैरावर्तसंस्थानैरनवद्याखिलाङ्गकः ॥ २२ ॥

चन्द्रांशुसदृशोद्भूतमृदुस्वच्छतनूरुहः ।
उच्छलत्पुच्छवेगेन चामरं वीजयन्निव ॥ २३ ॥

पुरोऽङ्घ्रिखुरचेष्टाभिराह्वयन्निवभाति यः ।
त्रैलोक्यानन्यसामान्यसाम्राज्यपदसुश्रियम् ॥ २४ ॥

सर्वावयवभूषाढ्यं रत्नवल्गामनोहरम् ।
रत्नपल्याणकलितं चन्द्रांशुश्वेतकेसरम् ॥ २५ ॥

तं वलिः स्पृहयामास देवयानं महाहयम् ।
विष्णुना ज्ञापितः शक्रो मौनमेवास तत्क्षणे ॥ २६ ॥

अथाविरासीन्नागेन्द्र ऐरावत इति श्रुतः ।
युक्तो दन्तचतुष्केण कैलास इव पाण्डुरः ॥ २७ ॥

सोऽपि चासुरराजेन स्वीयत्वेनोररीकृतः ।
न तस्मै स्पृहयाञ्चक्रे इन्द्रःकालप्रतीक्षकः ॥ २८ ॥

पारिजातोऽभवद्भूयो मथ्यमानात्पयोनिधेः ।
स्वर्लोको भूषितो येन पूरिताश्चार्थिनां स्पृहाः ॥ २९ ॥

स्वर्णस्तम्भमनोहारी माणिक्यविटपो महान् ।
रत्नपुष्पसमुल्लासी महामरकतच्छदः ॥ ३० ॥

पीयूषपाकफलभृत्सुच्छायतलशीतलः ।
सम्पत्परम्परावर्षी चन्द्रोज्जागरदीधितिः ॥ ३१ ॥

आचकाङ्क्ष तमानेतुं बलिरारामामात्मनः ।
मौनमासुः सुराः सर्वे कार्यसाधनकोविदाः ॥ ३२ ॥

अथाविरासुर्ललना रतिकोटिजयोर्जिताः ।
या एताः स्वर्गिणां गेहानलंकुर्वन्ति कोटिशः ॥ ३३ ॥

दिव्या अप्सरसो नृत्यगीतवाद्यविशारदाः ।
निष्ककण्ठ्यो लसद्भूषा दुकूलवरशोभिताः ॥ ३४ ॥

मनांसि स्वर्गवास्तूनां हरन्त्यो वल्गुचेष्टितैः ।
गतिविभ्रमशालिन्यः स्मितकान्तावलोकनाः ॥ ३५ ॥

अथाविरासीत् कमला हरेः प्रिया फुल्लारविन्दं किल बिभ्रती करे ।
पद्मालया पद्मविलोचना ननां पद्मासनावर्ष्मसु पद्मसौरभा ॥ ३६ ॥

प्रकाशयन्ती महसाखिला दिशः शुचिस्मितद्योतिमुखेन्दुचन्द्रिका ।
सौदामिनीकोटिसुदीप्तविग्रहा त्रैलोक्यसम्पत्समुदायरूपिणी ॥ ३७ ॥

तां वीक्ष्य सर्वावयवानवद्यभां गतिस्मितप्रेक्षितकेलिकोविदाम् ।
विमुह्य देवा असुराश्च मानवा अचीकमन्ताधिकवश्यमानसाः ॥ ३८ ॥

तस्या वयोवेषविलासविभ्रमैर्माधुर्यरूपद्युतिवर्णमार्दवैः ।
उदारहासामलवल्गुवीक्षितैराक्षिप्तचित्ताः सहसाभवत् जनाः ॥ ३९ ॥

तामद्भुताकारगतिस्मितादिभिर्विमोहयन्तीं हृदयानि नाकिनः ।
आनर्चुरालोकनवश्यवृत्तयः पाद्यासनस्नानविलेपनादिभिः ॥ ४० ॥

ददौ तस्याः शुनासीरः स्थानाय शुभमासनम् ।
दिव्यं सलिलमानिन्यु गङ्गाद्याः सरितां वराः ॥ ४१ ॥

हेमकुम्भकराः सर्वा अभिषेकार्थमुद्यताः ।
वशीभूतहृदो वल्गुस्मितलीलावलोकनैः ॥ ४२ ॥

दिव्यौषधीरुपाजह्रे भूमिस्तदभिषिक्तये ।
पञ्चगव्यान्युपानिन्युर्गावः कामदुघाः स्वयम् ॥ ४३ ॥

मुनयो मन्त्रसिद्धाश्च प्रफुल्लहृदयाननाः ।
गायन्तश्च पठन्तश्च ऋग्यजुःसामगा गिरः ॥ ४४ ॥

स्तुवन्तो विविधैः स्तोत्रैः सूक्तैश्च पुरुषं यथा ।
चक्रुस्त्रैलोक्यभूत्यर्थमभिषेकोचितं विधिम् ॥ ४५ ॥

अवादयन् घनास्तुङ्गमृदङ्गपणवानकान् ।
मुरजान् गोमुखान् भेरीः शङ्खान् वेणूंश्च वल्लकीम् ॥ ४६ ॥

तां फुल्लपङ्कजकरां शरदभ्युदीतराकासुधांसुवदनामरविन्दसंस्थाम् ।
दिक्शुण्डिनोऽभिषिषिचुर्जलपूर्णहैम कुम्भैः करायविधृतैर्द्विजमन्त्रपूर्वम् ॥४७॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे समुद्रमथने श्रीप्रादुर्भावो नाम पञ्चाशीतितमोऽध्यायः ॥ ८५ ॥

●

षडशीतितमोऽध्यायः

श्रीराम उवाच

तस्याः सार्थे विनिर्यातास्तिस्रः कोट्यो वराङ्गनाः ।
तथा लक्षाणि पञ्चाशत्सहस्राणि चतुर्दश ॥ १ ॥
शतानि पञ्चदश च यथा लक्ष्मीस्तथैव ताः ।
वयोऽवस्थारूपगुणसौन्दर्याद्यैः समाः प्रिये ॥ २ ॥
कन्याः श्रीरसमुद्रस्य लक्ष्मीपतिवरोत्सुकाः ।
ताः समादाय सलिलात्स्वयं सिन्धुर्विनिर्ययौ ॥ ३ ॥
तासामुद्वहनार्थाय परया चिन्तयाऽऽकुलः ॥ ४ ॥
सर्वास्ताः पीतकौशेयवासिन्यो निष्कभूषिताः ।
वरपङ्कजमालाभिर्भूषिताः पद्मपाणयः ॥ ५ ॥
ताः श्रियं भूषयाञ्चक्रू रत्नाकरसमुद्भवैः ।
वासोभिर्भूषणैर्दिव्यैर्हारस्रक्कुण्डलादिभिः ॥ ६ ॥
स्वयं तस्याः पिता निम्वो पीतकौशेयवाससी ।
वैजयन्तीं स्रजं दिव्यां वरुणो यादसां पतिः ॥ ७ ॥
तस्यास्तु सौरभोद्गारैः ककुभः सुरभीकृताः ।
दिङ्मुखेभ्यः समाजग्मुराहूता इव षट्पदाः ॥ ८ ॥
मकरन्दभरस्राविपञ्चवर्णप्रसूनजाम् ।
वहन्ती तां स्रजं रेजे वसन्तश्रीरिवेन्दिरा ॥ ९ ॥
उपाहरद्विश्वकर्मा प्रजापतिरथ स्वयम् ।
तस्यै रत्नविचित्राणि भूषणानि सहस्रशः ॥ १० ॥
सरस्वती रत्नहारं ब्रह्मा पद्ममनुत्तमम् ।
शेषश्च कुण्डले दिव्ये मुदितः समुपाहरत् ॥ ११ ॥

तां पीतवसनां दिव्यरत्नभूषणभूषिताम् ।
वैजयन्तीस्रजोपेतां हरिद्राचूर्णरूषिताम् ॥ १२ ॥

विवाहोचितवेषाढ्यांश्यामं श्यामोत्पलेक्षणाम् ।
उवाच जनकस्तस्य वात्सल्येन सगद्गदम् ॥ १३ ॥

गन्धर्वविद्याधरमर्त्यनागराट्सुरासुराणामियतीह मण्डले ।
त्वं पुत्रि यं कं चिदनुत्तमैर्गुणैरात्मानुरूपं वरमृच्छ सम्प्रति ॥ १४ ॥

ममाङ्गजा सर्वगुणौघभाजनं त्रैलोक्यसम्पत्तिनिधानविग्रहा ।
गुणैरिहास्यप्रतिमा ततो वरं निरीक्ष्य चित्तेन विमृश्य यास्यसि ॥ १५ ॥

इत्युक्तवति पाथोधौ तस्याः सख्यो वरस्त्रियः ।
ऊचिरे युगपत्सर्वास्तत्प्रेमवशिताशयाः ॥ १६ ॥

यमेषा तात पद्माक्षी वरिष्यति निजं प्रियम् ।
वरः स एव नो भूयान्नेतरं कामयामहे ॥ १७ ॥

ततः स हंसगमना समाकर्ण्य पितुर्वचः ।
कृतस्वस्त्ययना देवी सव्रीडहसिताननना ॥ १८ ॥

वरमालां समादाय गुञ्जद्भ्रमरमण्डिताम् ।
दिव्यपद्ममयीं पीठादुदतिष्ठद्वरार्थिनी ॥ १९ ॥

ददर्श यक्षान् गन्धर्वानसुरान् सिद्धचारणान् ।
विद्याधरान् भूतपतींल्लोकेशानपि दिक्पतीन् ॥ २० ॥

देवान् ब्रह्मशिवेन्द्रादीन् ग्रहनक्षत्रनायकान् ।
आदित्यांश्च वसून् रुद्रान् विश्वान् देवांश्च भास्वरान् ॥ २१ ॥

तुषितानलिलांश्चैव साध्यान् पितृगणांस्तथा ।
रक्षोभूतपिशाचादीनसुरान् दैत्यदानवान् ॥ २२ ॥

यज्ञं संवत्सरं कालं वसन्तादृंश्चांस्तथा ऋतून् ।
नागानैरावतादींश्च वासुकिप्रमुखानहीन् ॥ २३ ॥

पुष्करावर्तकादींश्च घनान् नरपतीन् नरान् ।
नदांश्च शोणभद्रादीनश्वत्थादृंश्चान् वनस्पतीन् ॥ २४ ॥

धर्मं चार्थं तथा कामं मोक्षं चापि चतुर्विधम् ।
निरूपयन्ती व्यचरत्स्वानुरूप वरार्थिनी ॥ २५ ॥

सर्वपूर्णगुणस्थानं सर्वदोषविवर्जितम् ।
ध्रुवं पुरुषधोरैयमिच्छन्ती पदमात्मनः ॥ २६ ॥

विलोकयन्ती सर्वत्र त्रैलोक्ये नान्वविन्दत ।
ततश्च सा परावृत्ता परमानन्दरूपिणी ॥ २७ ॥

दीव्यत्कोटिसखीयूथविद्युन्मडलवर्तिनी ।
बिभ्रती पद्मवदना करपद्मे वरस्रजम् ।। २८ ।।

सदानवद्योऽखिलनित्यसद्गुणः क ईश्वरो मे प्रतिमो भवेदिति ।
मुहुर्विचिन्त्यैतदवोचतेन्दिरा निजां वयस्यां निभृतं सुचिस्मिता ।। २९ ।।

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे समुद्रमथने श्रीकृतवरान्वेषणे षडशीतितमोऽध्यायः ।। ८६ ।।

•

सप्ताशीतितमोऽध्यायः

श्रीरुवाच

वद सखि कियदेतत्तुच्छमाब्रह्मलोकं सुखमसुखविमिश्रं यत्कृते मुग्धचित्ताः ।
परमसुखकदम्बं कालमायाद्यपेतं विजहति भवचक्रे संततं भ्रान्तिभाजः ।।१।।

किमु सखि पुरराजः स्यान्महान् भूमिकोणे पदमयति यदीयं सापिभूरण्डकोणे ।
तदपि तु विधिनोप्तं भूरितोयैकदेशे विशति पुरुषनाभौ सोऽप्यतः कोटिशस्ते ।।२।।

वद सखि किमु पश्यस्याविरञ्चेः किरीटं त्रिजगति परमैश्यं क्वाप्यनन्यानपेक्षम् ।
भवदपि किमु खेलत्कालहर्यक्षदंष्ट्रा विकटकटकटाभिर्यन्न सद्यो निगीर्णम् ।।३।।

वद सखि किमु वीर्यं पश्यसि क्वापि दृप्यद्दितिजदनुजनाथानीकपर्याकुलायाः ।
कलयति धरणेर्यः क्लेशशान्ति स्वशक्त्या भवति यदिह नृणां सम्प्रवृत्तस्त्रिवर्गः ।।४।।

निगमनलिनमध्योद्गारिमाध्वीकपूरं सुरनरमुनिचेतःषट्पदास्वाद्यमेकम् ।
प्रथयति भुवनानां भूषणं सद्यशो यः स क इह सखि मृग्यः पूरुषाणां धुरोणः ।।५।।

उदयति परमाया कालमायाद्यपेता निरवधिनिजलेशव्याप्तलोकेशसङ्घा ।
चरणनखररोचिर्मग्नकोटीन्दुसूर्या क्वचन सखि पुनर्ग्रये दृश्यते तादृशी श्रीः ।।६।।

कथय सखि किमीयज्ञानमज्ञानदोषव्यधिकरणमगाधं भासयत्कृत्स्नमेतत् ।
निखिलभुवनवस्तूद्भासकः सोऽपि भास्वान् भवति भृशमनेनोद्भासितो भासनार्हः ।।७।।

स्मरविशिखविलोलस्वर्गपङ्केरुहाक्षी विविधविहृतिजन्मा भाति पत्र प्रमोदः ।
स सखि विषयभोगो भासते यस्य फल्गुः स्थिरतममतिरीदृक् को नु वैराग्यसारः ।।८।।

क इह सखि तपस्वी निर्जितो येन मन्युः परिहृतगुणसंगं ज्ञानमुद्भ्राति कस्य ।
अपि खलु स महान् को निर्जितो येन कामः क्व च विलसति धर्मः सर्वतः सौहृदाढ्यः ।।९।।

कथय सखि विमुक्त्यै त्यागवान् को नु लोके क इह वहति वीर्यं कालवेगाद्विमुक्तम् ।
स च क इह न संगो यस्य मायागुणानां क उत भुवि चिरायुः सर्वतो यस्य भोगः ।।१०।।

क इह निखिलभोगो यं न कालस्य दंष्ट्रा स्पृशति तदुभयं चेदस्ति कात्यायनीशे ।
तदपि पितृवनस्थे तत्र नो मङ्गलाशा सकलशुभसमेतः कश्चनापेक्षते माम् ।।११।।

सखि कमहमुपेयां सर्वशः सद्गुणाढ्यं प्रकृतिमधुररूपं संस्थितं कालमूर्ध्नि ।
इति मनसि विमृश्य प्रीतियुक्ता वरिष्ये सुलभमिह निजानां केशवं देवदेवम् ।।१२।।

श्रीराम उवाच

इत्युक्त्वा सा भगवती माधवं मधुसूदनम् ।
उपसृत्य समन्दाक्षं बव्रे कमलमालया ।। १३ ।।

अपश्यच्च त्रपाहर्षमन्दस्मितमनोज्ञया ।
दृशा कनकपत्राङ्गी सावगुण्ठपटानना ।। १४ ।।

निधाय तस्यांसयुगे वरस्रजं समुल्लसत्पद्ममयीं सुसौरभाम् ।
पार्श्वानुलग्नभ्रमरौघसेवितां गुञ्जारवच्छद्मनदद्यशोगणाम् ।। १५ ।।

अतिष्ठदुद्भासितवामपार्श्वगा निरीक्षमाणास्थितये शनैरुरः ।
दृशा मनोमर्षकषायकोणया परिस्फुरन्त्या वनमालयाञ्चितम् ।। १६ ।।

सव्रीडहासरुचिरेक्षणमोक्षवत्या लक्ष्म्या वृते त्रिजगतां जनके जनन्या ।
अन्तःप्रसादसुमुखाः पुलकावृताङ्गाः सर्वे जनाः समभवन् परमप्रमोदाः ।।१७।।

देव्या वृते निजे कान्ते तदंशास्त्रिजगज्जनाः ।
सर्वे नराश्च नार्यश्च मुदिता अभवंस्तराम् ।। १८ ।।

असुरेन्द्रैर्हृता च श्रीस्त्रिलोक्याः प्रोषितैव या ।
साभूत्पुनः परावृत्ता वृते नारायणे श्रिया ।। १९ ।।

ऐधन्त त्रिदशाः सर्वे पुनः स्वस्व पदाशिषा ।
जजागार त्रिजगतां पुनः श्रीः श्रीपतेर्बलात् ।। २० ।।

अथो अवाद्यन्त मृदङ्गदुन्दुभीसशङ्खभेरोमुरजानकादयः ।
वाद्यप्रभेदास्त्रिदशोपजीविभिर्विद्याधरैः सोत्सवगानमाहताः ।। २ ।।

गायतां नृत्यतां चैव स्तुवतां पठतां तथा ।
देवगन्धर्वविद्याध्रवर्याणामभवत् स्वनः ।। २२ ।।

ब्रह्मा रुद्रस्तथा शक्रो वाक्पतिश्चेतरे सुराः ।
तमीडाञ्चक्रिरे देवं सश्रियं मन्त्रसूक्तिभिः ।। २३ ।।

विष्णुसूक्तैः पृथग्विष्णुमस्तुवन् वेदवित्तमाः ।
श्रीसूक्तैश्च श्रियं देवीं परमाह्लादमन्थराम् ।। २४ ।।

तस्याः कृपाकटाक्षेण सप्रजापतयः सुराः।
पुनः स्वगुणसंयुक्ता अभवन् येऽसुरैर्जिताः॥ २५॥

उपेक्षितास्तया देव्या स्वकृपालोकतोऽसुराः।
सर्वदूषणसम्पन्ना अभवन् दैत्यदानवाः॥ २६॥

ततः समुद्रः सम्पद्भिर्मणिकाञ्चनभूषणैः।
अतोषयद् रमाकान्तमुवाच च मुदा युतः॥ २७॥

एषा तवाङ्घ्रिसेवार्थं दासिका त्रिजगत्प्रभो।
मया निवेदिता देव ग्राह्या करुणया दृशा॥ २८॥

भूयश्च दास्य एवेमास्तव सेवापरायणाः।
अनुग्रहीष्यसि ह्येता एकान्तभजनोत्सुकाः॥ २९॥

इत्थं वचः समुद्रस्य श्रुत्वा देवो रमापतिः।
उवाच त्रिजगद्वन्द्यमनोज्ञचरणाम्बुजः॥ ३०॥

यदुक्तं तत्त्वया सत्यं भक्ता एव मता इमाः।
मम सेवापरा नित्यं प्राप्स्यन्ति सुखमुत्तमम्॥ ३१॥

किंतु सिद्धपदं सिन्धो मामको लोक उत्तमः।
एतारतु साधनावस्थाः सिद्धा भूत्वा लभन्तु माम्॥ ३२॥

तावन्नीरनिधे शश्वत् त्वत्तीरभुवमाश्रिताः।
एतास्तपस्तपस्यन्तु मम भक्तिबलोर्जिताः॥ ३३॥

आगामिनि विरञ्चौ तु कल्पे सारस्वताभिधे।
राज्ञो दशरथस्याहं भवितास्मि गृहे सुतः॥ ३४॥

पिता मे रावणाद्भीतो धर्ता मां निधिसम्मितम्।
प्रमोदवनगोपस्य सुखितस्य निकेतने॥ ३५॥

तत्राहं विहरिष्यामि गूढलिङ्गः स्वमायया।
नित्याभिः केलिकान्ताभिः पुरुषः शक्तिभिर्यथा॥ ३६॥

तत्रैता अपि मां प्राप्य निजशक्तिविलासिनम्।
मानयिष्यन्ति सुरतं संजाता गोदुहां कुले॥ ३७॥

इयं च कमलादेवी तव पुत्री महोदया।
जनकस्य गृहे राज्ञो भविता मामनुव्रता॥ ३८॥

इति माधवेन समुदीरितं वचो जलधिर्निशम्य विनयेन संयुतः।
निगमेनतुल्यमिति चेतसा स्वयं ननु निश्चिकाय वचनं रमापतेः॥ ३९॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे समुद्रमथने श्रीप्रादुर्भाव वरवरणकर्मादिवर्णनं नाम सप्ताशीतितमोऽध्यायः॥ ८७॥

अष्टाशीतितमोऽध्यायः

श्रीराम उवाच

ता एता जलधेः कन्याः श्वेतद्वीपं समाश्रिताः।
तेयुस्तपःपरं चेतो विनिधाय रमापतौ ॥ १ ॥

ततः परिणते जाते तपसि प्राप्तसिद्धयः।
सम्प्राप्ताः सुदृढं भावं मत्केली मण्डलोचिताः ॥ २ ॥

प्रमोदविपिने जाताः पृथग्वंशेषु गोदुहाम्।
मत्केलीमण्डलं प्राप्य मम साधर्म्यमागताः ॥ ३ ॥

त्वं च सैव रमा देवि मम नित्यविलासिनी।
जाता जनकभूपस्य गृहे सर्वगुणोदिता ॥ ४ ॥

एतास्तव निजाः सख्यो मम सेवापरायणाः।
त्वया सहैव संजाता वृताश्चापि सहैव माम् ॥ ५ ॥

अतो निरीक्षमाणा त्वमेताश्चम्पकविग्रहाः।
कथं न हृदि सम्मोदं भजेथा जनकात्मजे ॥ ६ ॥

एता अपि त्वया सार्धमर्त्यार्थं प्रेमविह्वलाः।
क्रीडिष्यन्ति पुरावृत्तसाक्षात्कारविचक्षणाः ॥ ७ ॥

इत एव परिप्राप्ताश्चित्रकूटगिराविह।
त्वया मया च बहुधा विहर्तुं सुभगेश्वरि ॥ ८ ॥
अन्या अपि तथैवैता गोप्यः कमललोचनाः।
तवैवांशकलोद्भूता नान्यथा स्युर्मम प्रियाः ॥ ९ ॥

श्रीजानक्युवाच

अमृतोत्पत्तये कान्त मथितोऽब्धिः सुरासुरैः।
कथं च तत्समुत्पन्नं तन्मे ब्रूहि यथातथम् ॥ १० ॥

श्रीरामउवाच

ततश्चास्मादाविरासीन्मथ्यमानात्सुरासुरैः ।
कन्यारूपधरा देवी वारुणी यासुरप्रिया ॥ ११ ॥
राजन्ती पद्मपत्राक्षी चन्द्रकोटिसुशीतला।
सूर्यकोटिसमाभासा दाडिमीकुसुमांशुका ॥ १२ ॥

हिमकुन्देन्दुधवला पञ्च वक्त्रा त्रिलोचना ।
अष्टादशभुजैर्युक्ता सद्य आनन्दकारिणी ॥ १३ ॥

प्रहसन्ती विशालाक्षी समस्तासुरसन्मुखी ।
मथनान्दोलतुङ्गाब्धितरङ्गतरलाम्बुजे ॥ १४ ॥

शुभासने समासीना प्रमत्तवृषभोपरि ।
नीलकण्ठी तडित्तुल्या सर्वाभरणभूषिता ॥ १५ ॥

कपालखट्वाङ्गधरा घंटाडमरुवादिनी ।
पाशांकुशधरा देवी गदामुसलधारिणी ॥ १६ ॥

खड्गखेटकपट्टीशमुद्गरं शूलदण्डकम् ।
विचित्रखेटकं मुण्डं बिभ्रती वरदाभयम् ॥ १७ ॥

तामाददुर्महाघोरां वारुणीमसुरेश्वराः ।
हरिणा नोदिताः सर्वे मदविस्मरणावहाम् ॥ १८ ॥

अनङ्गीकृतमीशेन साक्षाद्भगवतामुना ।
तद्द्रव्यंवारुणीत्याहुरमृतं तदुरीकृतम् ॥ १९ ॥

आदिमं ये तु गृह्णन्ति ते दैत्या घोरबुद्धयः ।
चरमं ये तु ते देवाः सत्त्वोर्जितमहाधियः ॥ २० ॥

अथ भूयो मथ्यमानादुदधेः कश्यपात्मजैः ।
उदभूत्पुरुषःकश्चित् परमाद्भुतदर्शनः ॥ २१ ॥

पीनायतलसद्बाहुः कम्बुकण्ठः सुमेचकः ।
रत्नकण्ठो मनोहारी फुल्लपङ्कजलोचनः ॥ २२ ॥

तारुण्यवयसा कान्तो दिव्यमालाविभूषितः ।
भूषितः सर्वभूषाभिस्तप्तकाञ्चनवाससा ॥ २३ ॥

परिणाहिलसद्वक्षा नीलकुञ्चितकुन्तलः ।
सर्वसौभाग्य सहितः सर्वमङ्गलसद्गुणः ॥ २४ ॥

सिंहविक्रान्तिपिशुनखेलद्गतिरुदित्वरः ।
लसत्केयूरकटककटिसूत्रमनोहरः ॥ २५ ॥

सुधापूर्णं रत्नकुम्भं दधानो देवसन्मुखः ।
योंऽशः साक्षाद्भगवतो धन्वन्तरिरितिश्रुतः ॥ २६ ॥

आयुर्वेदाचार्यवरः फलदः सर्वयज्ञभुक् ।
स्मितशोभिमुखज्योत्स्नाप्रकाशितदिगष्टकः ॥ २७ ॥

इदं तदमृतं जातमिति निश्चित्य चेतसा ।
घटं तममृतापूर्णमाजह्नुरसुरेश्वराः ॥ २८ ॥

इदं पीत्वामृतं पूर्णं जेष्यामः सहसा सुरान् ।
इतराण्यपि रत्नानिग्रहीष्यामो बलाद्वयम् ।। २९. ।।

इति ते मन्त्रयन्ति स्म देवास्त्वासन् सुदुःखिताः ।
कृतेऽपि चोद्यमे तुल्ये दैत्यैर्भग्नाशिषः कृताः ।। ३० ।।

गृहीते दितिजैस्तस्मिन्नाच्छिद्यामृतभाजने ।
विषीदन्ति स्म विबुधा निर्बला बलशालिभिः ।। ३१ ।।

किंतु ते शरणं जग्मुर्भगवन्तमधोक्षजम् ।
स तान् दीनहृदोऽत्यर्थमुवाच शरणागतान् ।। ३२ ।।

मा शोचत सुराःसत्यं वदामि शृणुतेरितम् ।
अमृतं वः प्रदास्यामि वञ्चयित्वा खलानमून् ।। ३३ ।।

अन्यानि चापि रत्नानि भवतामेव साधये ।
श्रियमेकां विनादेवीं सा मे भागः सनातनः ।। ३४ ।।

स सान्त्वयितेति यथार्थभाषणो यथार्थकामश्च हरिः सुपर्वणः ।
निवर्तयामास मिथो विरोधतः शमेन साधोर्हि स नोपयुज्यते ।। ३५ ।।

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे समुद्रमथनेऽमृतोत्पत्तावष्टाशीतितमोऽध्यायः ।। ८८ ।।

❁

एकोननवतितमोऽध्यायः

श्रीराम उवाच

तेषां परस्परं जातः सुधार्थे कलहो महान् ।
दैत्यानां दानवानां च स्वस्वार्थे फल्गुचेतसाम् ।। १ ।।

अहं श्रेष्ठोऽस्म्यहं पूर्वं पास्यामि कलशामृतम् ।
मद्दत्तमितरैर्ग्राह्यं न त्वं प्राधान्यमर्हसि ।। २ ।।

इत्यूचुः केऽपि दुर्वृत्ताः स्वार्थसंत्यक्तसौहृदः ।
अपरे च पुनर्मूर्खाःक्रोधान्धीकृतलोचनाः ।। ३ ।।

अस्मद्बाहुबलादेष उद्धृतो मन्दराचलः ।
आकृष्टो वासुकेर्भोगो मथितश्चापि सागरः ।। ४ ।।

ते वयं पूर्वमत्स्यामो जरामरणनाशनम् ।
अमृतं शेषमन्येऽपि गृह्णन्त्वस्मत्कृताज्ञया ॥ ५ ॥
इत्यूचुरपरे भूय आस्फोटितभुजद्वयाः ।
क्रोधव्याकुलितैर्वर्णै रीरयन्ति स्म दानवाः ॥ ६ ॥

कुलेनाभिजनैर्गत्या मत्या च वयमूर्जिताः ।
भोक्ष्यामः कर्मनिष्पन्नं फलमेतत्सुधात्मकम् ॥ ७ ॥

इत्यन्योन्यं व्याहरन्तो विवलन्तश्च भूरिशः ।
हुं तुंकृत्य शपन्तश्च विवदन्तः समैः समाः ॥ ८ ॥

आच्छिद्यामृतमुत्तर्षा जुगुयुः साभ्यसूयकाः ।
एकस्मादेकको बिभ्यद्द्रुह्यंश्चारुणलोचनः ॥ ९ ॥

ये तेषां दुर्बलतमा आच्छिद्यादातुमक्षमाः ।
पक्षपातं दिविषदां परिगृह्याब्रुवन् वचः ॥ १० ॥

हा हा हत महानेष दुर्नयोधर्महापनः ।
यद्देवास्तुल्यमायस्ता वियोज्यन्ते स्वभागतः ॥ ११ ॥

अहंन्ति चात्मनो भागं तुल्यमेतेऽसुरैः सुराः ।
दुर्बला इति विज्ञाय वञ्च्यन्ते कालनोदितैः ॥ १२ ॥

नन्वमीभिः सदाद्रोहनिरतैर्दर्पशालिभिः ।
एवमेव पुराप्येते स्थानाद्विच्यावितः सुराः ॥ १३ ॥

पापात्मानः पापरताः सदा परशुभद्रुहः ।
आत्मवर्गेऽपि चात्यन्तं स्फुटं कपटवृत्तयः ॥ १४ ॥

केनेमे खलु नीयेरन् दुर्नयानयमुत्तमम् ।
ये लोकवेदनिष्पक्षाः स्वार्थैकान्तकृतस्पृहाः ॥ १५ ॥

विलपन्त इतीवोच्चैरनन्यशरणा भवे ।
असुरा बलिनां तेषां पश्यन्तिस्म मुखानि ते ॥ १६ ॥

इति कोलाहलस्तेषां मण्डले सुमहानभूत् ।
निभृतं कस्यचित्पाणौ न्यस्तं चामृतभाजनम् ॥ १७ ॥

हरिस्तत्प्रतिकाराय देवेष्वाबद्धसौहृदः ।
शिवादिधैर्यहरणं धृतवान् कामिनीवपुः ॥ १८ ॥

इन्दीवरदलश्यामं नवतारुण्यविभ्रमम् ।
चञ्चत्कटाक्षनिक्षेपजितकन्दर्पसायकम् ॥ १९ ॥
वेणीभारसमाबद्धनवमल्लीप्रसूनजैः ।
अमन्दसौरभोद्गारैरामन्त्रितमधुव्रतम् ॥ २० ॥

अङ्गसौन्दर्यसरसीतारुण्यलहरीभरैः ।
आप्लुवद्धैर्यधरणीं मुनीनामपि योगिनाम् ॥ २१ ॥
ललितापाङ्गसंदर्शैः स्मितपूर्वाभिभाषणैः ।
मोहयत्पीनजघनकाञ्चीगुणकलक्वणैः ॥ २२ ॥
ससुरासुरविस्तीर्णत्रैलोक्यहृदयंगमम् ।
उत्तुङ्गपीनवक्षोजश्रिया चित्तं विमोहयत् ॥ २३ ॥
कान्तिमद्भिरशेषाङ्गेष्वाचितैः रत्नभूषणैः ।
निवारयद्दिशां ध्वान्तं मुखचन्द्रश्रिया तथा ॥ २४ ॥
शान्ति समानयत्तेषां कलहं घोरमुत्थितम् ।
अलिश्रेणीमनोहारिरुचिरायाङ्गदर्शनैः ॥ २५ ॥
लोलालकलताशालिकपोलमुकुरद्वयम् ।
अर्धचन्द्रसमाकारभालपट्टप्रभाधरम् ॥ २६ ॥
कर्णद्वयपरिभ्राजद्रत्नताटङ्कसुन्दरम् ।
सुमेचकारुणात्यच्छलोचनश्रीमनोरमम् ॥ २७ ॥
शुकचञ्चुचमत्कारिनासालावण्यशोभितम् ।
विद्रुमारुणबिम्बोष्ठ लुलन्नासामणिद्युति ॥ २८ ॥
कम्बुकण्ठसमुल्लासिरेखात्रयविराजितम् ।
उदारहारभारश्रीसमुद्दीव्यदुरःस्थलम् ॥ २९ ॥
सुवर्णाब्जमृणालाभविस्फुरद्भुजवल्लरि ।
प्रमुष्टक्षीणमध्याङ्गं नितम्बाधिकवृद्धिमत् ॥ ३० ॥
नाभीसरस्समुत्सर्पद्रोमालीशैवलाञ्चिते ।
उदरे त्रिवलीचारुण्युपात्तक्रशिमास्पदम् ॥ ३१ ॥
राजहंसविनिर्जेत्रमदालसलसद्गति ।
हावभावानेकभेदभ्रुकुटीभङ्गसुन्दरम् ॥ ३२ ॥

तेऽन्योन्यतोऽसुरवराः कलशं हरन्तः सन्त्यक्तसौहृदनयाः श्रितदस्युभावाः ।
तां मोहिनीं भगवतः परमेश्वरस्य शक्तिं विलोक्य नितरां चकिता इवासन् ॥३३॥

सा मन्दमन्दमुपसृप्तवती पदाभ्यां मञ्जीरमञ्जुमधुपद्मवराम्बुजाभ्याम् ।
चञ्चत्सकूजवलयाङ्गदमेखलादिभूषालसत्तनुरमोहयदासुरांस्तान् ॥ ३४ ॥

ते दर्शनक्षणविमूढधियोऽसुरेन्द्रा अन्योन्यतोऽमृतकृते कलहं निवार्य ।
कामोद्धतास्तदधरामृतपातुकामास्तस्याः समीपमभजन् सजवं समेत्य ॥ ३५ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे समुद्रमथने एकोननवतितमोऽध्यायः ॥ ८९ ॥

नवतितमोऽध्यायः

श्रीराम उवाच

ऊचुश्च ते तामनवद्यदेहां सुलक्षणां हृच्छयवाणतप्ताः ।
निरूपयन्तो निभृतं स्वरूपमाधुर्यसिन्धूत्थतरङ्गसिक्ताम् ॥ १ ॥

अहो ते रूपमतुलमहो धाम मनोरमम् ।
अहो वयश्च ते नूत्नं न त्वं सृष्टिर्विधेरसि ॥ २ ॥

अन्यदेवाङ्गलालित्यमन्यदेव च वर्तनम् ।
अन्यैव ते तनोश्छाया कर्तुं शक्यं न वेधसा ॥ ३ ॥

इयमधरपुटी तवातिशोणा मधुरिमयूरपरम्पराप्रभूतिः ।
इह जगति सुधावधीन् पदार्थान् सपदि विजित्य विभाति वर्तमाना ॥ ४ ॥

तनुरियमतुला तवातिधन्या वद सखि केन तुलां प्रयातु लोके ।
अपि खलु विजितानयैव विद्युच्चरति मनस्त्वपया द्यनेषु गूढा ॥ ५ ॥

का त्वं कल्याणिनी बाले कुतो वा वरवर्णिनि ।
कस्यासि तन्वि कुलभूरपि किं कर्तुमिच्छसि ॥ ६ ॥

अये कमलपत्राक्षि न त्वं स्पृष्टासि केनचित् ।
देवासुरमनुष्येन्द्रसिद्धगन्धर्वयोगिषु ॥ ७ ॥

अपि केनेह हेमाङ्गि प्रेषितासि त्वमीदृशी ।
सुधामपि पराजे तुं प्रायः प्राप्ता स्वधामतः ॥ ८ ॥

अपीदृशीं ननु भवतीमलौकिकीं प्रपश्यतामसुरवराहिनाकिनाम् ।
परां रतिः सुदति मनस्युदैत्त मां विलिल्यिरे सपदि न इन्द्रियाणि यत् ॥ ९ ॥

नैतादृशी प्रीतिरभूत्कदाचित्सर्वेन्द्रियाणां मनसस्तथा नः ॥ १० ॥

यत्र यत्रारविन्दाक्षि प्रायस्त्वमनुयास्यसि ।
तत्र तत्रैव सानन्द वर्षिष्यन्ति सुधा घनाः ॥ ११ ॥

अपूर्वा सुषमामेतां पश्यन्तस्तव वर्ष्मसु ।
अतीव कौतुकायन्तो वक्तुं नो पारयामहे ॥ १२ ॥

त्वं चेल्लब्धासि लावण्यमाधुर्यैकतरङ्गिणि ।
नीरसेन त्वदधरात् किं लब्धेनामृतेन नः ॥ १३ ॥

मङ्गलोऽसौ सुसम्पन्नः कालो मथनकर्मणि ।
यत्र त्वं मिलितास्यद्धा सुधातोऽपि गरीयसी ॥ १४ ॥

स्पर्द्धध्वं मां दितिसुता इयं वोऽमृतभोजने ।
विभागदा विशेषेण संविधातुमुपस्थिता ॥ १५ ॥

न्यस्यतामममृतामत्रमस्याः पाणिसरोरुहे ।
पाययिष्यत्यसौ बाला यथेष्टं वो दितेः सुताः ॥ १६ ॥

क्रोधं द्रोहं च संघर्षं परस्परमुदस्य वै ।
इयमाश्रयणीयावो दग्धकन्दर्पजीवनिः ॥ १७ ॥

अयि त्यं कोमलापाङ्गि पाशाविव भुजाविमौ ।
क्षेप्तासि कस्य कण्ठान्तर्वशीकरणयन्त्रवत् ॥ १८ ॥

अये मध्यस्थलमिदं केन ते पाणिनामितम् ।
त्रिवली कैतवाल्लग्नं यदङ्गुलिचतुष्टयम् ॥ १९ ॥

इति सा काश्यपैर्भूयः प्ररोचनवचोभरैः ।
आभाषिता जहासोच्चैर्मोहिनी मृगलोचना ॥ २० ॥

अये धर्मभृतः पुत्राः कस्यपस्य प्रजापतेः ।
दितेः पतिव्रतायाश्च प्रभूता मां किमिच्छथ ॥ २१ ॥

अहं हि सर्वधर्मान्तकारिणी पांसुला परा ।
कुर्वन्ति मयि विश्वासं न कोऽपि खलुकोविदाः ॥ २२ ॥

विद्युत्प्रकाशं जलदस्य छायां यत्पुंश्चलीनां च सुखं प्रसंगात् ।
जातान्यपि त्रीणि भवे भवेयुरनित्यरूपाणि न विश्वसन्ति ॥ २३ ॥

किं च वो मत्प्रसंगेन सुखं स्यादस्थिरात्मनाम् ।
इति निश्चित्य विबुधा न विश्वसत मां क्वचित् ॥ २४ ॥

श्रीराम उवाच

हेलया लीलया चापि विभ्रमैः सम्भ्रमैरपि ।
विनिर्जितास्तया दैत्या बभूवुर्वश्यवृत्तयः ॥ २५ ॥

उत्पन्न दृढ़ विश्वासास्तस्यां ते दैत्यदानवाः ।
सम्मोहिता[1] हृच्छयेनान्तर्ददह्यन्ते स्म भूरिशः ॥ २६ ॥

न्यधुश्च तस्याः करयोः सुधाघटं निवृत्तसंघर्षजवादवृत्तयः ।
भृशं समाश्वस्त हृदो मुदावृता मुहुः स भावं जहसुः स्मरोत्कटाः ॥ २७ ॥

ततो गृहीत्वा स्वयमेव तैः करे वितीर्णमुच्चैरमृतस्य भाजनम् ।
उवाच कल्याणतमोरुभाषिता प्रकाशयन्ती दशनत्विषादिशः ॥ २८ ॥

अङ्गीकुरुत हे प्राज्ञा यत्कृतं मे यदृच्छया ।
अपि सम्यगसम्यग्वा विभजिष्ये तदामृतम् ॥ २९ ॥

---

१. अस्मिन् पादेऽक्षराधिक्यमार्षत्वात् ।

लीलाविलासवत्यास्तत्तस्या व्याहृतमुत्तमम् ।
तथैवेत्यसुरश्रेष्ठा हृदिश्रद्दधिरेतमाम् ॥ ३० ॥

अथ हरिणेरिताः सकलशक्तिमता विबुधाः प्रथममुपोषितास्तदनुमज्जनशौचयुजः ।
सुविधिहुताग्नयो विहितगोद्विजदानवराः कृतपरमाशिषो विविधमन्त्रधरैर्मुनिभिः ॥ ३१ ॥

मुहुः स्वस्तिपुण्याहमावाच्य विप्रैर्यथाप्रीति वासांसि नव्याहतानि ।
परीधाय सोद्रेकमाभूषिताङ्गाः स्थिताः पूतपूर्वाग्रदर्भासनेषु ॥ ३२ ॥

सुखं प्रङ्मुखाः सूपविष्टास्तदानीं सुराश्चासुरा बद्धपङ्क्तिद्वयास्ते ।
भृशंधूपदीपस्रगामोदजुष्टां महारत्नशालामधिष्ठाय रेजुः ॥ ३३ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे समुद्रमथनेऽमृताशनविधौ नवतितमोऽध्यायः ॥ ९० ॥

●

एकनवतितमोऽध्यायः

श्रीराम उवाच

अथ सा मोहिनी योषित्करभोरुरुदित्वरा ।
श्लथद्दुकूलमध्योद्यन्नितम्बतटभासुरा ॥ १ ॥

लीलालसगतिस्तन्वी मदविह्वललोचना ।
शिंजाननूपुरद्वन्द्वपादपद्मगतिक्रमा ॥ २ ॥

स्वर्णकुम्भस्तनी कर्णरत्नाभरणभूषिता ।
आविशद्रत्नशालां तां विभ्राणामृतभाजनम् ॥ ३ ॥

सा पद्मजासमरुचिर्मणिकुण्डलत्विड्भ्राजिष्णुकर्णयुगला शुकचञ्चुनासा ।
दीव्यत्कपोलमुकुरा शरदिन्दुवक्त्रा स्रंसत्सुचारुवसनाञ्चलगस्तनाढ्या ॥ ४ ॥

खेलन्मरालकुलनायकचारुयाना चन्द्रोज्ज्वलस्मितरुचिर्मधुरावलोका ।
साकूतसुन्दरकटाक्षविसर्गकर्त्री देवासुरान् भृशममोहयदुत्सुकांस्तान् ॥ ५ ॥

वञ्चनं कर्त्तुमिच्छन्ती दैत्यानाममृताशनात् ।
अकल्पयत्पृथक् पङ्क्तीर्देवेभ्यस्तद्धितैषिणी ॥ ६ ॥

एकपङ्क्त्या सूपविष्टा देवानामभितोऽसुराः ।
साजात्याद्धेतुतस्तेषामासीत्पृथगवस्थितिः ॥ ७ ॥

असुरान् वञ्चयन्ती सा बहुमानप्रियेरितैः ।
आरात्संस्थापितान् देवान् पाययामास तां सुधाम् ॥ ८ ॥

मोहिनीशक्तिरूपेण भृशं भगवता सुराः ।
पाय्यमानाः पपुः सर्वे कालभीतिहरां सुधाम् ॥ ९ ॥

स्नेहप्रदर्शनविधाकृतवञ्चनास्ते तस्या वचो हृदि विधाय कृतप्रतीक्षाः ।
तूष्णीं तदाननविलोकनदत्तनेत्रा नाज्ञासिषुस्तदमृतं नितरां निपीतम् ॥१०॥

तस्याः प्रणयपाशेन दृढं निबद्धचेतसः ।
नावोचन्त विमूढास्ते दैतेयाः साध्वसाधु वा ॥ ११ ॥

देवपङ्क्तौ देवलिङ्गप्रच्छन्नो राहुसंज्ञकः ।
असुरस्तत्र पीयूषमपिबत्कैतवग्रहः ॥ १२ ॥

हा हन्त हन्त हन्तेति चन्द्रार्काभ्यां स विष्णवे ।
बोधितश्चक्रमादाय निकृत्तस्तेन मूर्द्धनि ॥ १३ ॥

असुरेष्वेष चाण्डालो राहुः पापपरीतधीः ।
अतः सुधां पिबन्मध्ये हरिणा स विभेदितः ॥ १४ ॥

तच्छिरोऽमृतसंस्पृष्टं जहार भगवान् हरिः ।
कबन्धोन्यपतद्भूमौ यो न स्पृष्टोऽमृतेन सः ॥ १५ ॥

एवं सुरान् हितमतिः सुहितान् विधाय पीयूषपूरपरपारणया स्वभक्तान् ।
सम्पश्यतामथ शनैरसुरेश्वराणामन्तर्दधौ स भगवान् कृतभूरिमोहः ॥१६॥

एवं सुराश्चाप्यसुरास्तुल्योपायकरा अपि ।
फलेन युयुजुर्भक्ता अभक्ता अफला ययुः ॥ १७ ॥

समानेऽपि खलूद्योगे यद्विशेषः फलाफले ।
न तच्चित्रं स्फुटं विष्णोः संश्रयासंश्रयौ हि यत् ॥ १८ ॥

यस्यांशवैभवमुपेत्य भवन्ति लोके ऊर्जस्विनः श्रियमिताश्च विभूतिमन्तः ।
तस्मिन्प्रभौ सकलसत्त्वनिधौ प्रतीपे भूरिप्रयासकरणेऽपि कुतः फलं स्यात् ॥१९॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसम्वादे दक्षिणखण्डे समुद्र-मथनेऽमृतपाने एकनवतितमोध्यायः ॥ ९१ ॥

द्विनवतितमोऽध्यायः

श्रीराम उवाच

कबन्धे पतिते दाहोः शिरः परमदुर्धरम् ।
निकृन्तमपि चक्रेण न पपात महीतले ॥ १ ॥

व्यात्ताननलसद्घोरदंष्ट्राकोटिभयानकम् ।
कल्पान्तपावकज्वालालुलद्रसनयाञ्चितम् ॥ २ ॥

गाढगाढतमोनीलप्रभाव्याप्तद्युभूतलम् ।
महाकरालभ्रुकुटीविटङ्कविकटाकृति ॥ ३ ॥

उद्रिक्त क्रोध ताम्राक्षं स्फुटदत्युग्रमूर्द्धजम् ।
उद्यत्कटकटारावदंष्ट्रासंघर्षणोद्धुरम् ॥ ४ ॥

सूर्याचन्द्रमसौ सद्यो विधातुं ग्रासमेककम् ।
इतस्ततो धावमानं महासंरम्भभीषणम् ॥ ५ ॥

आच्छादयत्तयोर्भासमात्मनो मेत्रकत्विषा ।
हुंकारध्वनिदुर्दर्शं क्रूरमत्युग्रदर्शनम् ॥ ६ ॥

नभस्येव स्थितं ग्रस्तुं पुष्पवन्तौ समुद्धुरम् ।
आत्ताप्रतीकार्यवैरं चक्षुभ्यां विस्फुलिङ्गमुक् ॥ ७ ॥

तस्य प्रभावतो भीतौ सूर्याचन्द्रमसौ ग्रहौ ।
इतस्ततो धावमानौ न लेभाते क्वचिद्गतिम् ॥ ८ ॥

हित्वा सोमपानशालां सूर्याचन्द्रौ परिद्रुतौ ।
विलोक्य तत्रसुर्देवा अहो उत्पात उत्थितः ॥ ९ ॥

अनन्यशरणौ तौ तु सूर्याचन्द्रमसौ तदा ।
ध्रियमाणौ विपक्षेण शरणं जग्मतुर्हरिम् ॥ १० ॥

उद्धृतौ शत्रुदंष्ट्राभिर्भृशं विद्युत्सुकान्तिभिः ।
पीड्यमानौ गलद्रक्तविन्दूक्षितिकलेवरौ ॥ ११ ॥

शोचन्तावात्मनः कृत्यं विरोधोद्गमकारणम् ।
यत्पैशुन्यं कृतं तस्य देवतासुरसंसदि ॥ १२ ॥

तावतिव्याकुलीभूतहृदयौ दीनवादिनौ ।
तथापि चाविनिर्मुक्तौ वचनं त्विदमूचतुः ॥ १३ ॥

हा हरे करुणासिन्धो एतावत्सुरमण्डले ।
आवामेवामुना नाथे त्वयि पीड्यावहे कुतः ॥ १४ ॥

अच्युताच्युत गोविन्द विनिकृत्तमपि त्वया।
चक्रेण शितधारेण न पतत्यस्य मस्तकम् ॥ १५ ॥

जातः क एष उत्पात आवयोरेव दुःखकृत्।
हितं हि सर्वदेवानामावां विज्ञाय माधव ॥ १६ ॥

तुभ्यं सूचितवन्तौ यदसुरेष्वपि दुष्क्रियः।
सोमं पिबति चण्डाल इतितन्नो महद्भयम् ॥ १७ ॥

अजनिष्ट रमाकान्त यत्पीडयति वैरभृत्।
मोचयास्मात्सुदुर्धर्षादावां लुप्तप्रभावकौ ॥ १८ ॥

किमेतच्च हरे जातं न यत्पतति मस्तकम्।
निवृत्तमपि चक्रेण तव तीव्रनिपातिना ॥ १९ ॥

इत्युक्तो भगवान् विष्णुः सूर्येण च निशाकृता।
उवाच राहुं शमयन् शान्तेन वचसा क्षणम् ॥ २० ॥

क्रूरत्वं मुञ्च मुञ्चालं त्रिजगद्वन्दितावि मौ।
ग्रहेन्द्रौ दीप्तमहसौ सूर्याचन्द्रमसौ किल ॥ २१ ॥

नो चेत् पुनरपि त्वाहं चक्रेण जवपातिना।
शतधा चूर्णयिष्यामि क्षेप्स्यामि च दिशो दश ॥ २२ ॥

अथो निपत चाकाशाद्भूवलं क्रूरदर्शन।
यथा खलु कबन्धस्ते तथाशान्तिमुपेहि भोः ॥ २३ ॥

इति सम्भीषितो राहुर्हरिणा चक्रधारिणा।
क्षणं तत्याज दंष्ट्रातः सूर्यासोमौ ग्रहाधिपौ ॥ २४ ॥

उवाच च हरिं क्रुद्धो भूष्णुस्त्रिभुवने महान्
अमृताशनसम्प्राप्तजरामरणनिर्जयः ॥ २५ ॥

न ते वाक्यमतीवर्त्यं मया त्रिभुवनेश्वर।
मुक्ताविमौ यतो विष्णो सूर्याचन्द्रौ मम द्विषौ ॥ २६ ॥

एतौ मे पिवतः सोमं कृत्वा सौम्यतमं वपुः।
पैशुन्यं यदकुर्वातां तेन मे शत्रुतां गतौ ॥ २७ ॥

लब्धं तु ये सोमपानं कण्ठावधि ततो हरे।
जरामरणनिर्मुक्तो न पतामि महीतले ॥ २८ ॥

इमौ तु ग्रस्तुमिच्छामि पिशुनौ मे निरागसः।
आत्मभासाखिलं विश्वं द्योतयिष्यामि कृष्णया ॥ २९ ॥

इदानीं ते भयेनेमौ मुक्तो दंष्ट्रौघसम्पुटात्।
पुनः क्षणाद्ग्रसिष्यामि स्वादु पीतामृतौ ग्रहौ ॥ ३० ॥

इत्युक्तस्तेन. भगवान् सुघोरवचसा तदा ।
विमृश्य भगवान् भूय उवाच जगतां हितम् ॥ ३१ ॥

सिंहिकासुत सुक्रूर भवान् पीतामृतोऽधुना ।
अजरामरतां प्राप्य यथेच्छं किमु भाषसे ॥ ३२ ॥

नैतदेवं त्वया कर्तुं शक्यते क्रूरमानसा ।
एतौ हि जगतां वन्द्यौ जगदुद्भासतक्षमौ ॥ ३३ ॥

ग्रस्तयोरेतयो राहो जगदेतद्विनङ्क्ष्यति ।
मुञ्च मुञ्चासुरं भावं सम्प्रत्यमरतां गतः ॥ ३४ ॥

अवश्यं भाविनोऽर्थस्य प्रतीकारो न विद्यते ।
मा ग्रसीः पुनरेतौ त्वं जगद्वन्द्यतमौ ग्रहौ ॥ ३५ ॥

इत्थं स हरिणा प्रोक्तो भूय ऊचे वचस्त्विदम् ।
त्वयाऽऽज्ञप्तः करिष्यामि यदाह भगवन् भवान् ॥ ३६ ॥

प्रतिष्ठां त्वहमिच्छामि खेचराणां पदं स्पृशन् ।
अतो यदभियाचेऽहं तद्विधेहि हरेऽञ्जसा ॥ ३७ ॥

त्वया निबद्धमर्थं तु नोल्लङ्घितुमहं क्षमे ।
एवं कृते महावैरं त्यक्तप्रायमिदं भवेत् ॥ ३८ ॥

अहं हि भोक्तुमिच्छामि तारकाः सप्तविंशति ।
तत्रैकराशिगावेतौ ग्रसिष्यामि न संशयः ॥ ३९ ॥

पर्वप्रतिपदोः सन्धौ सूर्यं वापि निशाकरम् ।
ग्रसिष्यामि गदापाणे वैरमेतदनुस्मरन् ॥ ४० ॥

अहं खलु ग्रहो भूत्वा वत्स्यामि गगने चरन् ।
काले काले ग्रसिष्यामि सूर्याचन्द्रौ ग्रहाविमौ ॥ ४१ ॥

जगन्निर्माणकार्यस्थः सुखदुःखफलप्रदः ।
अहं ग्रहत्वमास्थाय भूष्णुरस्मि यदृच्छया ॥ ४२ ॥

नृणामुत्पद्यमानानामहं कालः प्रमापकः ।
सप्तानामष्टमो विष्णो ग्रहाणां भूष्णुरस्म्यहम् ॥ ४३ ॥

मह्यं ददतु भागं च यज्ञेषु सकला जनाः ।
तदाहं शान्तिमेष्यामि त्वयोक्तो मधुसूदन ॥ ४४ ॥

हरिस्तस्य वचःश्रुत्वा ज्ञात्वा चास्य दुराग्रहम् ।
सूर्यसोमावुवाचेदं प्रतिकर्तुं समुत्सुकः ॥ ४५ ॥

अयि भानो अये चन्द्र श्रूयतां मे परं वचः ।
साम्प्रतं दुर्निवारोऽयममरोऽभूद्यतोऽमृतात् ॥ ४६ ॥

ग्रहो भूत्वैष नियतं भोक्तुमिच्छति तारकाः ।
युवां ग्रसिष्यते तत्र ह्येकराशिसमागतौ ॥ ४७ ॥

नृणामुत्पद्यमानानामेष कालप्रमापकः ।
भविष्यति ग्रहाणां वः सप्तानामष्टमोऽभवत् ॥ ४८ ॥

एवं निबन्धमापन्ने दुष्टेऽस्मिन् किल दुर्ग्रहे ।
युवयोरपि निर्मुक्तिः काले दुःखं कदाचन ॥ ४९ ॥

हरेरिति वचःश्रुत्वा सूर्याचन्द्रमसौ तदा ।
ओमित्युक्तमुरीकृत्य निर्मुक्तौ तेन विद्विषा ॥ ५० ॥

एवं देवहितं कृत्वा भगवान् गरुडध्वजः ।
पश्यतामेव सर्वेषां स्वं धाम परमं ययौ ॥ ५१ ॥

शैलेन्द्रानयनेऽतिखिन्नवपुषो भग्नाश्च तत्पाततो
भोगीन्द्रश्वसनोद्गतेन गरलेनातीव संतापिताः ।
अल्पायासमवापिताश्च मथनेनागाधपाथोनिधे
रत्यर्थं प्रतिकूलवर्तिनि हरौ प्रापुः फलं नासुराः ॥ ५२ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे समुद्रमथने दैत्यवचने द्विनवतितमोऽध्यायः ॥ ९२ ॥

त्रिनवतितमोऽध्यायः

श्रीराम उवाच

उत्कर्षं देवपक्षस्य दृष्ट्वा ते दैत्यदानवाः ।
अतीव तेयुर्मनसि सुमहामर्षसंयुताः ॥ १ ॥

उत्पेतुरायुधकराः क्रोधसंरम्भभीषणाः ।
देवान् प्रति महामर्षभरेणात्यन्तमाकुलाः ॥ २ ॥

तेषामुत्पततामासुरनीकानि सहस्रशः ।
छिन्धिभिन्धि जहि स्कन्देत्युच्चैः शब्दानि संततम् ॥ ३ ॥

अहो हतं सुरैर्यन् तन्न क्षन्तव्यं मनीषिभिः ।
इति मन्त्रयतां तेषां समवायो महानभूत् ॥ ४ ॥

देवानभिमुखिभूय संरब्धाः समरेऽसुराः ।
नानायुधमयैर्वर्षैस्तत्क्षणात्समवाकिरन् ॥ ५ ॥

असिभिः पट्टिशैः शूलैर्गदाबाणापरश्वधैः ।
भुशुण्डैः स्तोमरैश्चचक्रैर्निर्घातः सुमहानभूत् ॥ ६ ॥

परस्परं घ्नतां तेषां क्रोधभीषणाचक्षुषाम् ।
कलहोद्भव आरावो रोदसी व्याप्य तस्थिवान् ॥ ७ ॥

उभयोःसेनयोस्तेषांमवद्यन्त भयवहाः ।
शङ्खतूर्यमृदङ्गाद्याः डमरूपटहादयः ॥ ८ ॥

भेरीदुन्दुभिनिर्घोषवीरनादभयानकाः ।
अदारयन्निव भुवं त्रिदशासुरसेनयोः ॥ ९ ॥

हस्तिनोऽश्वा रथाश्चैव पत्तयो व्यवदन्मुहुः ।
असज्जन्त तथैवैते संग्राममितरेतरम् ॥ १० ॥

महोक्षसादिनः केचित्केचित्खरनिषादिनः ।
केचिद्गौरखरारूढाः ऋक्षारूढाश्च केचन ॥ ११ ॥

केचिद् द्वीपिवरारूढाः सिंहारूढाश्च केचन ।
गृध्रकंकबकारूढा अन्ये श्येननिषादिनः ॥ १२ ॥

भासचाषमारूढाः केचिद्ग्राहनिषादिनः ।
शरभान् महिषान् खड्गान् गवयांश्चाप्यधिष्ठिताः ॥ १३ ॥

केचिद्गोवृषभारूढाः परे गोमायुसादिनः ।
केचिदाखुवरारूढाः केचिन्नकुलवाहनाः ॥ १४ ॥

कृकलासान् समारूढाश्चान्ये शशनिषादिनः ।
हंससूकरवस्ताधिरूढा हरिणवाहनाः ॥ १५ ॥

नानाजलस्थलचरसत्वारूढा भयानकाः ।
आकारैर्वाहनैर्वेषैर्विकृता घोरदर्शनाः ॥ १६ ॥

संग्रामभूमिमसुरा आययुस्त्रिदशानभि ।
नानाचित्रध्वजपटैर्विभूषितरथोत्तमाः ॥ १७ ॥

नानावर्णच्छत्रधरा नानाव्यजनचामराः ।
नानाकवचसंछन्ना नानाभूषणभूषिताः ॥ १८ ॥

नानाशस्त्रप्रहरणाः सूर्यांशुद्विगुणत्विषः ।
नानोत्तरीयरुचिरा नानोष्णीषविराजिताः ॥ १९ ॥

देवानां चापि दैत्यानां वाहिन्यो भीषणस्वनाः ।
बभासिरे विश्वकर्मविचित्ररचनाश्रयाः ॥ २० ॥

व्यूढा नानाविधैर्व्यूहैर्नानावीरवरान्विताः ।
सागरा इव यादोभिर्नानायोधवरैर्युताः ॥ २१ ॥

असुराणां चमूमध्ये वीरा बलिमुखाः स्फुटम् ।
बलिर्नमुचिरुग्रास्यः शम्बरो बाण उग्रभित् ॥ २२ ॥

अयोमुखो विप्रचित्तिर्द्विमूर्द्धा चक्रदृग्बलः ।
कालनाभः प्रहेतिश्च हेतिस्तारक इल्वलः ॥ २३ ॥

शुम्भो निशुम्भो जम्भश्च वज्रदंष्ट्रो विरोचनः ।
शकुनिर्भूतरुक्चैव उत्कलः शङ्कुशीर्षकः ॥ २४ ॥

हयग्रीवश्च कपिलोऽरिष्टनेमिश्च रिष्टकः ।
मयस्त्रिपुर एवापि तथान्योमेघदुन्दुभिः ॥ २५ ॥

पौलोमाश्चैव कालेया निवातकवचास्तथा ।
गणशोऽसुरवर्यास्तु समाजग्मुः सुरानभि ॥ २६ ॥

क्रोधलज्जापरीतान्तःकरणा भागलोपतः ।
यैर्निर्जिताः पुरा दैवास्ते दैत्या रणमाययुः ॥ २७ ॥

सिंहनादकरा भीमाः कृतास्फोटा बलोद्धताः ।
विचित्रवर्णा दैतेयाः सुरैः संयोद्धुमागताः ॥ २८ ॥

शङ्खनादकृतोत्साहा उत्पतन्तो धृतायुधाः ।
तान् वीक्ष्यैरावतारूढः कुपितोऽभूत् पुरन्दरः ॥ २९ ॥

उदयावसरे यद्वत्सूर्यः शैलशिरःस्थितः ।
शुशुभेऽमरराट् तद्वद्दीर्णासुरतमस्ततिः ॥ ३० ॥

तमनुप्रययुः सर्वे लोकपाला दिगीश्वराः ।
पाशभृद्वायुदहनयक्षराण्नैर्ऋतादयः ॥ ३१ ॥

द्वन्द्वशो द्वन्द्वशो देवा दैत्यैर्युयुधिरे रणे ।
युयुधे बलिना शक्रस्तारकेण षडाननः ॥ ३२ ॥

हेतिसंज्ञेन पाशी च मित्रोऽयुध्यत्प्रहेतिना ।
यमश्च कालनाभश्च परस्परमयुध्यताम् ॥ ३३ ॥

विश्वकर्मा मयश्चैव त्वष्टा शम्बर एव च ।
विरोचनश्च सविता वृषपर्वाश्विनावपि ॥ ३४ ॥

वाणमुख्यैर्बलिसुतैः शतेन युयुधे रविः ।
अपराजितो नमुचिना राहुणा रजनीकरः ॥ ३५ ॥

पुलोमा चानिलोऽन्योन्यं युद्धे तस्मिन्नयुध्यताम् ।
तथा शुम्भनिशुम्भाभ्यां देवी कात्यायनी स्वयम् ॥ ३६ ॥

जम्भो वृषाकपिं देवं योधयामास सर्वतः।
विभावसुं च महिषो मातृरुत्कलसंज्ञकः॥ ३७॥

दुर्मर्षः काममेवापि शुक्रो वाचस्पतिं तथा।
तथैवेवल्वलवातापी ब्रह्मपुत्रान् महाबलौ॥ ३८॥

शनैश्चरं च नरकः कालेया वसुसंज्ञकान्।
निवातकवचा दैत्या मरुतः समयोधयन्॥ ३९॥

विश्वान् देवांश्च पौलोमा रुद्रांश्चान्ये महासुराः।
अयोधयन् भिन्दिपालैस्तोमरैश्च परश्वधैः॥ ४०॥

खड्गैः शक्त्यृष्टिविशिखैर्गदाभिश्चक्रपट्टिशैः।
उल्मुकैः प्रासकुन्तैश्च मुद्गरैर्लोहदण्डकैः॥ ४१॥

अन्योन्यं युध्यमानानां देवासुरबलीयसाम्।
अनीकानि व्यदृश्यन्त संरब्धानि समंततः॥ ४२॥

निरभिद्यन्त मातङ्गास्तुरङ्गाः पत्तयो रथाः।
आयुधानां निपततां प्रहारैरतिदारुणैः॥ ४३॥

केचिन्निकृत्तदोर्दण्डाः परे भग्नशिरोधराः।
अन्ये वृक्णाङ्घ्रयस्तत्र बभूवुः सेनयोर्द्वयोः॥ ४४॥

केचिच्छिन्नध्वजधनुर्वर्माणो देवदानवाः।
मुष्टामुष्टिप्रहरणाः अयुध्यन्त रणाङ्गणे॥ ४५॥

अन्योन्यरथिनां चैव सादिनामभिधावताम्।
अत्युत्तालचलद्बाहखुराग्रैरुद्धतं रजः॥ ४६॥

दिशो दशनभश्चैव सूर्यं नक्षत्रमण्डलीम्।
आच्छादयत्तरां लोके यथाभूत्तिमिरं महत्॥ ४७॥

तद्रजः शस्त्रसम्पातप्रहारभवशोणितैः।
प्रवाहशः प्रचलितैः सद्यः शान्तिमनीयत॥ ४८॥

प्रस्थानभूरभूत्पूर्वं पङ्किला करिणां मदैः।
सा नीता प्रकृतिं भूयो हयैरुच्चैः कृतक्रमैः॥ ४९॥

इत्यालक्ष्य त्रपावद्भिर्गजैर्वार्भिः करोद्धृतैः।
छन्नो रजोभरो व्योम्नि नीतो जम्बालपिण्डताम्॥ ५०॥

संरम्भशोणनयनैः सकिरीटैः सकुण्डलैः।
दन्तदष्टाधरदलैर्हुंकारध्वनिगर्भितैः॥ ५१॥

आतरतरे रसा सद्यः शिरोभिरमरद्विषाम्।
कबन्धैश्च तथानेकैर्भाङ्कारध्वनिमुद्गलैः॥ ५२॥

केचित्कबन्धाः पतिताः स्वशीर्षनयनेक्षणाः ।
उदायुधाः समुत्पेतुः प्रहरन्तः परस्परम् ।। ५३ ।।

एवं कबन्धा युयुधुः कबन्धैर्युद्धदुर्मदैः ।
तदद्भुतमतीवासीन्निपेतुर्यच्चिराद्भुवि ।। ५४ ।।

अथ बलिरमरेन्द्रं संयुगे विक्रमन्तं दशभिरिषुभिरुच्चैर्विव्यधे हेमपुंखैः ।
त्रिभिरिभवरमस्या थाङ्घ्रिरक्षांश्चतुर्भिः सृणिकरमवधीदेकेन यन्तारमस्य ।। ५५ ।।

अमरपतिरुदीक्ष्यापातिनोऽष्टादशेषून् समिति समभिनत्तान् स्वैः स तावद्भिरेव ।
अहसदमितवीर्यस्तद्विलोक्यामराली भृशमुरुनिजभर्तुः कर्म तुष्टाव संख्ये ।। ५६ ।।

तदुपरि पुनरादादुत्कलः शक्तिमुग्रामभिनदमरराट् तां हस्त एवोज्ज्वलन्तीम् ।
अथ पुनरसुरेन्द्रो विक्रमन् युद्धभूमौ सुरपतिमभिशस्त्रं संदधावन्यदन्यत् ।। ५७ ।।

प्रासशूलगदाचक्रशरतोमरऋष्टिभिः ।
सुरेन्द्रं हन्दुमुद्युक्तो बलिः समरभीषणः ।। ५८ ।।

सुरेन्द्रस्तत्तदस्यास्त्रं शस्त्रं च बलिनोदितम् ।
अच्छिनत्सहसा स्वस्य शस्त्रेण स महौजसा ।। ५९ ।।

अथासुरेन्द्रःसमरे ससर्ज भयानकामासुरकूटमायाम् ।
ततः सुरानीकमधो विधाय शिलोच्चयोऽदृश्यत रवे महीपान् ।। ६० ।।

ततो निपेतुर्ज्वलिता महोल्का दावाग्निलिप्तास्तरवस्तथोग्राः ।
शिलाश्च तीक्ष्णाग्रकरालदर्शाः संचूर्णयन्त्यो दिविषद्बलानि ।। ६१ ।।

महोरगा दंशवला विषाग्निज्वालाभृतो वृश्चिकवर्यसंघाः ।
पञ्चानना व्याघ्रवरां वराहास्ततः समुत्पेतुरूदग्रवेगाः ।। ६२ ।।

प्रमर्दयन्तो दशनैर्दशन्तो विषाग्निना व्याप्नुवन्तो रुजन्तः ।
महागजान् देवबलस्थितांश्च तुरङ्गमान् स्यन्दनवाहवर्यान् ।। ६३ ।।

महाघना व्योम्नि गभीरतीव्रस्वनैर्मनांसि प्रविभीषयन्तः ।
अंगारवृष्टीर्मुमुचुः प्रचण्डवातेरिता घोरपिशङ्गवर्णाः ।। ६४ ।।

महानलौ दैत्य मायाविसृष्टः समीरवेगोच्चलकीलमालः ।
अत्युग्ररूपः प्रसभं प्रसर्पद् ददाह देवध्वजिनीं समन्तात् ।। ६५ ।।

ततोऽम्बुधिघर्घरघोषभीमः समन्ततः प्लावितसर्वदेशः ।
प्रचण्डवातोद्धुतभीमभूरितरङ्ग आवर्तशतप्रतानः ।। ६६ ।।

इत्थमेवेतरैर्दैत्यैस्तन्यमाना रणाङ्गणे ।
कूटमाया व्यदृश्यन्त सुरसैन्यभयावहाः ।। ६७ ।।

विषीदन्ति स्म तां दृष्ट्वा मायामसुर सम्भवाम् ।
देवाः प्रत्यक्षकर्माणः कूटरूपामलक्षिताम् ।। ६८ ।।

ततो विषण्णाः सुरलोकसैनिका हतोद्यमाः सस्मरूरिन्दिरापतिम् ।
अथाविरासोद्भगवान् स्मृतिक्षणे खगेन्द्रपृष्ठाहितपादपल्लवः ॥ ६९ ॥

स पुंवराग्र्योऽरुणपद्मलोचनः पिशङ्गवासा गलकौस्तुभाञ्चितः ।
किरीटरुक्कुण्डलभानुमण्डितः श्रीवत्सलक्ष्माष्टभुजो धृतायुधः ॥ ७० ॥

तस्मिन्नाविर्भूतमात्रे महौजस्यासुर्य्यस्ताः कूटमाया विनेशुः ।
यावन्नैवोदेति भानुर्जगत्यां तावद्विष्वग् दृश्यते ह्यंधकारः ॥ ७१ ॥

प्रकटेऽखिलमायेशे मायिनामपि मायिनि ।
कुतस्तुच्छैः कृतां माया स्वरूपं दर्शयेदपि ॥ ७२ ॥

अरिष्टनेम्युत्कलकालनेमिसुमालिमालिप्रमुखा महोग्राः ।
स्वस्वायुधक्षेपकरा महाजौ सुघोरदर्शा हरिणा न्ययुध्यन् ॥ ७३ ॥

खगपरिवृढवाहस्तान्मुसंरम्भभीमान सुरवर भटाग्र्यानाततताप्युग्रवीर्यान् ।
अमितबलनिधीशो लीलया संनिवार्य प्रकटितनिजचक्रज्योतिरुच्चैर्विरेजे ॥ ७४ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे असुरबल-पराभवोनाम त्रिनवतितमोऽध्यायः ॥ ९३ ॥

चतुर्नवतितमोऽध्यायः

श्रीराम उवाच

हरिणासुरमायासु क्षिप्तासु स्वेन तेजसा ।
सुराः संलब्धचैतन्या आतेनुः स्वस्वविक्रमम् ॥ १ ॥

बभूवुः संहताः सर्वे शक्रवायुपुरोगमाः ।
निजघ्नुरसुरानीकं हरिणा प्रतिबोधिताः ॥ २ ॥

बलिमुद्दिश्य कुलिशं सुरराडुद्तोलयत् ।
तदा हाहाकृतमभूद्दैत्यसैन्यं समंततः ॥ ३ ॥

देवेन्द्रः कुलिशं विभ्रदाश्वस्तो हरिणा रणे ।
उवाच बलिमुद्दृप्तं बहुविक्रान्तपूर्वकम् ॥ ४ ॥

आक्षिप्यत्वामिदमहं वच्मि रात्रौ यथार्थवत् ।
अलं ते मायया मूढ महामायाधिपे हरौ ॥ ५ ॥

ये बाला विनिबद्धाक्षास्तान् विजित्यैन्द्रजालिकः ।
सर्वस्वमाहरत्येवं भवान् मूढ स्वमायया ॥ ६ ॥

आरुरुक्षसि किं मूढ मायययेवानया दिवम् ।
एतां विधूय सहसा त्वामधः पातयाम्यहम् ॥ ७ ॥

दुष्टां त्वमति दुष्टात्मन् कूटमायामुपाश्रितः ।
तस्य तेऽहं हरिष्यामि वज्रेणात्युत्तमं शिरः ॥ ८ ॥

अनेकपर्वणो वज्रान्मम भीतास्तवासुराः ।
सहसा विद्रविष्यन्ति फेरुतुल्या दिशो दश ॥ ९ ॥

दुरुक्तैरेवमिन्द्रस्य ताडितोऽतीव मर्मणि ।
जगादासुरराट् क्रुद्धः पूर्वविक्रमदप्तधीः ॥ १० ॥

भवान् यन्मां पराभूय विजेष्यति रणाङ्गणे ।
किं चित्रं तर्हि देवेन्द्र ह्येकं स्याद्युध्यतो मृधे ॥ ११ ॥

एकतो विजयः कीर्तिरन्यतश्चाजयो मृतिः ।
एतद्दैवपराधीनं तत्र हृष्यसि किं मुधा ॥ १२ ॥

न स्वायत्तमिदं पुंसां जयो वापि पराजयः ।
तत्राभिमतिमांस्त्वं चेन्मूढ एव न संशयः ॥ १३ ॥

सत्यं पराजितोऽस्माभिर्यदि मायेति मन्यसे ।
तर्हि त्वया मृतं पीतं सापि माया न किं भवेत् ॥ १४ ॥

असुरा वारुणीं पीत्वा मामकाः समरोद्धताः ।
सुधापानमदं सद्यो हरिष्यन्त्यधुनैव वः ॥ १५ ॥

महामायाविना युद्धे विक्रान्तं यदि विष्णुना ।
ध्रुवं तर्हि जयस्तस्य त्वं तु नूनं विनिर्जितः ॥ १६ ॥

अलक्षितगतिस्थानवासेन हरिणा वयम् ।
जिता अपि प्रतिष्ठध्व वीर्याः किं खलु कुर्महे ॥ १७ ॥

त्वां तु जेतुं वयं क्षिप्त्वा नाराचान् वीरघातिनः ।
लज्जामहे सुरश्रेष्ठ वराकं शरणातुरम् ॥ १८ ॥

तथाप्यरून्तुदान्येवं ब्रुवाणः समराङ्गणे ।
नोपेक्ष्योऽसि महाभीरो मया त्वं कुलिशं वहन् ॥ १९ ॥

इति विध्वा वचोवाणैर्विरोचनसुतो बली ।
वाणैस्तं ताडयामास समरे मर्मभेदिभिः ॥ २० ॥

तदमृष्यन् सुरपतिः कुलिशं प्राहिणोद्द्विषे ।
स तेन प्रहितो भूमौ निपपात सवाहनः ॥ २१ ॥

बलिं निपतितं वीक्ष्य प्रियं सुहृदमात्मनः ।
जम्भासुरो महावीर इन्द्रं योद्धुमुपाययौ ॥ २२ ॥

जम्भेन गदयाशक्रः प्रहृतो रणमूर्द्धनि ।
ऐरावतश्च वलिना सुभृशं तीव्रवेगया ॥ २३ ॥

ऐरावतस्तं प्रहारं न सोढुमशकत्तमाम् ।
जानुभ्यामवनीं प्रापसुभूरिरुधिरोक्षितः ॥ २४ ॥

गजेन्द्रे मूर्च्छितप्राये महासत्वे सुरेश्वरः ।
रथं मातलीनाऽऽनीतमारुहच्छनकैर्मृधे ॥ २५ ॥

सुवर्णवर्णैस्तुरगैः समन्वितं रथं समारुह्य सुदीर्घनिःस्वनम् ।
रणाङ्गणे संशुशुभे सुराधिपो धनं यथा प्रावृषि मारुतेरितम् ॥ २६ ॥

अमृष्यन् मातलिं जम्भः शूलेन ज्वलितार्चिषा ।
जघान प्रहसन्नुच्चैः साधु रे सुरसारथे ॥ २७ ॥

शूलेन प्रहतस्तेन मातलिर्विह्वलोऽभवत् ।
तावत्सुरेन्द्रो जम्भस्य कुलिशेनाहरच्छिरः ॥ २८ ॥

इन्द्रेण निहते जम्भे महाभीमपराक्रमे ।
जिता इति सुपर्वाणः प्रहर्षमतुलं ययुः ॥ २९ ॥

आययुस्तदमृष्यन्तः कर्म युद्धे विडौजसः ।
तत्सजातीयनमुचिबलपाका महासुराः ॥ ३० ॥

ते छादयन्तो देवानां वाहिनीर्निशितैः शरैः ।
घना इव रणे रेजुर्धारासम्पातवर्षिणः ॥ ३१ ॥

क्षणाददृश्य तां नीताः सुरसेनाः शितैः शरैः ।
तं दृष्ट्वा प्रसरं चक्रुरसुराः सुमहोद्धताः ॥ ३२ ॥

बलेन पीडिता बाणैः सहस्रं तुरगा हरेः ।
तेऽभवन् रथमुत्सृज्य गन्तुकामा रणाङ्गणात् ॥ ३३ ॥

पाको मातलिमाविध्य शरैःसन्नतपर्वभिः ।
रथं च विव्यधेऽत्यर्थं महेन्द्रस्य रुषोद्धतः ॥ ३४ ॥

नमुचिश्चातुलबले जघान शरवर्षणः ।
रथिनं च रथं चैव सारथिं चैव मातलिम् ॥ ३५ ॥

ततोऽसुराः प्रहर्षेण गर्जन्तो वासवं रणे ।
अवाकिरन् बाणवर्षैस्तस्मिन्नवसरे जवात् ॥ ३६ ॥

अलक्ष्यतामुपगमितेऽसुरेषुभिः पुरन्दरे सपदि रणे मरुद्गणाः ।
विचुक्रु शुर्व्यपगतधैर्यवृत्तयस्तरौ खगा इव सरिदोघसम्प्लुते ॥ ३७ ॥

ततो विनिर्धूप शरौघपञ्जरं निजैः शरैर्वृत्रहरोविनिर्ययौ ।
रविर्हिमानीमिव घृष्णिभिर्निजैः प्रकाशयामास दिशश्च रोदसी ॥ ३८ ॥

स विलोक्य निजां सेनामसुरैर्विनिपीडिताम् ।
रुषाविष्टाशयोऽगृह्णाच्छ्युसंहरणंपविम् ॥ ३९ ॥

अवधीद्वासवस्तेन वलं पाकं च दानवम् ।
कबन्धीकृत्य समरे कुर्वन् दैत्यवले भयम् ॥ ४० ॥

वलपाकौ हतौ दृष्ट्वा शक्रेण नमुचिर्बली ।
शोकामर्षरुषाविष्टो जिहीर्षुस्तमुपाययौ ॥ ४१ ॥

स वज्रकठिनं शूलं दोर्भ्यामादाय वज्रिणे ।
प्रजिघाय हतोऽसीति गर्जमानो रणाङ्गणे ॥ ४२ ॥

इन्द्रः सहस्रशश्चक्रे तस्य शूलं तदापतत् ।
निजवाणैस्तीव्रवेगैस्तं च वज्रेण विव्यधे ॥ ४३ ॥

वृत्रभिद्वज्रघातेन नमुचिस्ताडितोऽपि सन् ।
न विव्यथे नापनीतस्त्यङ्मात्रश्चिन्तमास तत् ॥ ४४ ॥

शुशोच त्रिदशाधीशो वज्रेऽपि सुपराहते ।
अहोऽत्यद्भुतमेवेदं भृतं नाद्यापि मे क्वचित् ॥ ४५ ॥

वृत्रो येन विदारितोऽसुखरस्त्वाष्ट्रं परं यत्तपः
सारं भूखिलास्तथासुरवराः शस्त्रास्त्रकोऽप्यक्षताः ।
अद्रीणामपि पक्षभेदनविधौ विक्रान्तपूर्वं च यत्
तद्वज्रं नमुचेस्त्वचंदलयितुं कुण्ठीबभूवाद्भुतम् ॥ ४६ ॥

एतावत्यसुरेऽल्पवर्चसि मया मुक्तं वृथैवाभवत्
त्व ग्लोमादिकमप्यपा कुरुत नो यत्तन्मुधावीर्यकम् ।
वज्रं मे प्रतिरुद्धवीर्यमथवा दैवेनकुण्ठीकृतं
किं तद्दण्डसमंवृथैव पुनरादास्येऽस्थि सत्यं मुनेः ॥ ४७ ॥

इति शोकभराविष्टे शक्रे नारायणोऽब्रवीत् ।
मा विषीदेन्द्र नोवध्य आर्द्रैः सुष्कैरथं रिपुः ॥ ४८ ॥

लब्धो हि पूर्वमेतेन द्विषा ते देवतावरः ।
न केवलार्द्रशुष्काभ्यां तव मृत्युर्भवेदिति ॥ ४९ ॥

उपायान्तरमेवातश्चिन्तनीयं बधे रिपोः ।
इति श्रुत्वा सुनासीरश्चिरं दध्यौ समाहितः ॥ ५० ॥

नार्द्रं नैकान्ततः शुष्कं जले फेनं हितादृशम् ।
रसस्यानुपलम्भाद्धि नार्द्रं प्रत्यक्षतो मतम् ॥ ५१ ॥

अथो जलविकारत्वान्न शुष्कमनुमीयते ।
ततस्तेनावधीच्छत्रुमिन्द्रो देवगणप्रभुः ॥ ५२ ॥

तमृषयः परितः खलु तष्टुवुः सुरतरुप्रसवैः समवाकिरन् ।
पटुयक्षो जगुरप्सुरसां प्रिया ननृतुरप्सरसश्च मुदान्विताः ॥ ५३ ॥

हाहाहूहूश्चापि गन्धर्व्यमुख्यौ विश्वावसुश्चापि परावसुस्तम् ।
उच्चैः शब्दैः शृण्वतां निर्जराणां जगुः श्लोक्यं सर्वदेवौघमुख्यम् ॥ ५४ ॥

इतरेऽपि सुरश्रेष्ठाः पाश्यग्निमरुदादयः ।
जघ्नुः शत्रुगणान् संख्ये स्वस्वायुधमहौजसा ॥ ५५ ॥

सुधापानसुसम्पन्नैर्दैवैः संख्ये महोर्जितैः ।
दैत्यानां दानवानां च नितरां कदनं कृतम् ॥ ५६ ॥

अथ बलिप्रमुखासुरवैष्णवानवितुमब्जभवो विबुधांस्तदा ।
व्यरमयत्समरादतिरोषणान् प्रहितनारदवक्त्रनिसृष्टगीः ॥ ५७ ॥

ततस्तान् ब्रह्मणाऽऽज्ञप्तो नारदो मुनि मुनिपुङ्गवः ।
इदमाह सुसंरब्धान् दैत्यानां कदनं प्रति ॥ ५८ ॥

अहो सुरा लब्धपदैर्भवद्भिः पीतामृतैर्विष्णुभुजाश्रयेण ।
प्राप्ता विनष्टापि पुनर्निजश्रीरतः परं किं कलहेन दैत्यैः ॥ ५९ ॥

रणे जितास्तेऽपि महोर्जिता द्विषस्तस्यैव देवस्य हेरर्भुजोजसा ।
तमेव सुश्लोकवरेण्यमुच्चकैर्गिरानिशं गायत भूरिसौहृदाः ॥ ६० ॥

अतः परं किं रोषेण संरम्भेणाधिकेन च ।
तमेव स्वस्वलोकस्थाउच्चैर्यजत गायत ॥ ६१ ॥

ब्रह्मणो वचनादित्थ विनिवारितमन्यवः ।
निःसंरम्भा सुरा जग्मुः स्वं स्वं लोकमनामयाः ॥ ६२ ॥

स्वस्वानुचरसंदोहैर्गीयमाना जयोर्जिताः ।
स्वस्वलोकसमासीनाः शमेधाञ्चक्रिरे सुराः ॥ ६३ ॥

तस्मिन् रणेऽवशिष्टा ये दैत्यदानवपुङ्गवाः ।
बलिं राजानमादाय ते ययुः स्वं स्वमालयम् ॥ ६४ ॥

केऽप्यधोभुवनं याताः केऽपि सागरमध्यतः ।
केऽपि चास्तगिरिं जग्मुः परे मेरुं च दक्षिणम् ॥ ६५ ॥

तानविभिन्नवपुषोग्रीवाकुक्ष्वशेषितान् ।
शुक्रः संजीवयामास पुनः संजीविनीबलात् ॥ ६६ ॥

बलिर्भगवतो भक्तः श्रीपतेर्जनकात्मजे ।
शुक्रोपचरिताशेषदेवदिव्यायुधक्षतः ॥ ६७ ॥

देवैः पराभूततमोऽपि विष्णोः स्मरन् यशस्तन्त्रिजगत्पवित्रम् ।
ज्ञानेन नात्यन्तमखिद्यतान्तर्भक्तिप्ररोहामृतपूरमग्नः ॥ ६८ ॥

इत्थं य एतन्मथनं पयोधेः शृणोति लक्ष्म्या अपि तत्सखीनाम् ।
समुद्भवं पुण्यमथामृतस्य तस्य क्षयंयात्यघसंघशैलः ॥ ६९ ॥

पुण्यानि नारायणदेवकीर्तिगाथाश्रयाणीन्दुमुखीदृशानि ।
कर्माणि लोकोऽनुसवं हि शृण्वन् गायन्स्मरंश्चाभ्युदयं प्रयाति ॥ ७० ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे समुद्रमथने देवासुरसंग्रामविरामो नाम चतुर्नवतितमोऽध्यायः ॥ ९४ ॥

*

पञ्चनवतितमोऽध्यायः

श्रीजानक्युवाच

कीदृशं तत्परं कान्त रूपमत्यद्भुतं हरेः ।
मोहिता येन दैतेया दानवाश्चामृतं जहुः ॥ १ ॥

लक्ष्मीरपि प्रादुरभूदम्बुधेर्लोकमङ्गला ।
तयाप्यनाक्षिप्तचित्ता मोहिन्या मुमुहुस्तराम् ॥ २ ॥

एतदत्यद्भुतं भाति ननु ये प्राणवल्लभ ।
लक्ष्म्या अप्यधिकं मन्ये रूपं भगवतो हरेः ॥ ३ ॥

इदं खलु ममाचक्ष्व सौन्दर्यं तन्मधुद्विषः ।
यदालोकनमात्रेण दैतेया वश्यवृत्तयः ॥ ४ ॥

श्रीराम उवाच

नूनं भगवतो रूपं रमाकान्तस्य तत्प्रिये ।
लक्ष्मीरूपात्समधिकं भवत्या सम्यगामतम् ॥ ५ ॥

सर्वेऽप्यंशकला रूपा यस्य देवस्य सुन्दरि ।
कोऽन्यस्तस्य तुलां धर्तुं क्षमते भुवनत्रये ॥ ६ ॥

लक्ष्म्या अपि परं रूपं विष्णोरेवांशसम्भवम् ।
अतस्तत्तुलना नैव दृश्यते श्रूयतेऽपि च ॥ ७ ॥

यस्य रूपं समालोक्य मुमोह भगवान् भवः ।
किं वाच्यं तस्य सौन्दर्यं स्वयं भगवतो हरेः ॥ ८ ॥

मोहिन्याद्याखिलमहाशक्तिसंघमहेक्षितुः ।
अलौकिकं चाद्भुतं च सर्वमेव हरेः प्रिये ॥ ९ ॥

रूपातिशयमेतस्य साक्षाद्भगवतो हरेः ।
अहं तवाभिधास्यामि शृणुष्वैकमनाः प्रिये ॥ १० ॥

श्रुत्वा भगवतो रूपं दैत्यदानवमोहनम् ।
श्रियोऽप्यधिकमाकर्ण्य शिवो द्रष्टुमना अभूत् ॥ ११ ॥

ततो वृषभमारुह्य धर्मरूपं सनातनम् ।
पार्वतीसहितो रुद्रो विष्णोर्धामान्वपद्यत ॥ १२ ॥

सभाजितः स हरिणा स्वागताद्यैरुमापतिः ।
स्वासनस्थ उवाचेदं स्मयन् मधुरया गिरा ॥ १३ ॥

देवस्त्वमसि देवानां वेवेष्टि निखिलं भवान् ।
यद्दृश्यजातं भगवंस्तन्मधस्त्वं प्रतिष्ठितः ॥ १४ ॥

सर्वेश्वरस्त्वं भगवन् सर्वस्यात्माधिदैविकः ।
सर्वहेतुः सर्वसाक्षी त्वमेवैकः प्रगीयसे ॥ १५ ॥

आदिरन्तश्च मध्यं च त्वमेव जगतो हरे ।
त्वमन्तरं बहिश्चासि त्वमिदं त्वमहं प्रभो ॥ १६ ॥

यत्सत्यं परमानन्दं चिन्मात्रमद्वितीयकम् ।
तद्ब्रह्म परमं साक्षात्त्वमेवासि रमापते ॥ १७ ॥

ये नित्यं श्रेय इच्छन्ति मुनयः शुद्धबुद्धयः ।
इहामुत्र सृतीस्त्यक्त्वा त्वदङ्घ्रिं त उपासते ॥ १८ ॥

विश्वसर्गादिहेतुस्त्वं जीवैस्तत्तत्फलेच्छया ।
आराध्यसे प्रभो नित्यं तत्तद्रूपो व्यवस्थितः ॥ १९ ॥

त्वमुदासीन एवासि निरपेक्षतया प्रभो ।
तथापि ते लोकवत्तु लीला कैवल्यमीरितम् ॥ २० ॥

त्वमस्य कारणं विष्णो कार्यं च त्वं रमापते ।
द्वैताद्वैतस्वरूपेण त्वमेवैकः प्रतिष्ठितः ॥ २१ ॥

कुण्डलादद्यात्मना यद्वत्सुवर्णं सम्प्रतीयते ।
स्थानं सर्वविकल्पानां तथा त्वमखिलात्मना ॥ २२ ॥

केचिद्वदन्ति त्वां ब्रह्म परे धर्मं प्रचक्षते ।
प्रधानपुरुषावन्ये तयोरपि परं परे ॥ २३ ॥

विमलोत्कर्षिणी ज्ञान क्रिया योगा च प्रह्विका ।
सत्येशानानुग्रहा च यदेता नव शक्तयः ॥ २४ ॥

ताभिर्युक्तं परं केचित्त्वां बुधाः सम्प्रचक्षते ।
वदन्ति[1] केचित्त्वां स्वतन्त्रं महापुरुषमव्ययम् ॥ २५ ॥

अहं ब्रह्मा मरीच्यादद्या ऋषयश्च महाधियः ।
न ते लीलामपि ज्ञातुमीशते त्वां पुनः कुतः ॥ २६ ॥

भगवन् किं पुनर्वाच्यं राजसैस्तामसैश्च यत् ।
भवानगम्यरूपोऽसि यं न सत्यं प्रकाशयेत् ॥ २७ ॥

त्वं जन्मस्थितिनाशमस्य जगतो जानासि नाना सृती
भूर्तानां च समीहितं कलयसे बन्धं च मोक्षं तथा ।
त्वं व्याप्नोषि समस्तमेतदखिलं ज्ञानात्मकः श्रीपते
बाह्याकाशवदन्तरा बहिरपि त्वं सम्प्रविष्टोऽखिलम् ॥ २८ ॥

न त्वय्यघटितं किंचित्सर्वमाया नियन्तरि ।
तथापि कौतुकेनेश द्रष्टुं त्वां वयमागताः ॥ २९ ॥

---

१. पादेऽस्मिन्नक्षराधिक्यमार्षः ।

दृष्टानि तव रूपाणि क्रीडमानस्य स्वैर्गुणैः ।
भवार्थमद्रिभर्यानि लोकानां त्रिजगत्पते ॥ ३० ॥

तव या मोहिनी शक्तिः साक्षान्मूर्तिमती श्रुता ।
तामहं द्रष्टुमिच्छामि दैत्यदानवमोहिनीम् ॥ ३१ ॥

यद्रूपं प्रकटीकृत्य दानवांस्त्वममोहयः ।
अपाययश्च पीयूषं सुराणां सत्त्ववर्तिनाम् ॥ ३२ ॥

तद्रूपमहमिच्छामि द्रष्टुं त्रिभुवनेश्वर ।
श्रियोऽपि सौन्दर्यमदं हर्तुं यच्छक्नुते विभो ॥ ३३ ॥

इति विज्ञापितो देवः स्वयं स भगवान् हरिः ।
रुद्रेण पार्वतीशेन प्रहस्य तमुवाच ह ॥ ३४ ॥

दैत्यदानवयूथानां मोहनाय महेश्वर ।
मया प्रकटितं रूपं हिताय च सुपर्वणाम् ॥ ३५ ॥

तद्दिदृक्षसि चेच्छम्भो दर्शयिष्यामि तत्तव ।
कामिनः सुन्दरीः श्रेष्ठा यदुपासनयाऽऽप्नुयुः ॥ ३६ ॥

इत्थं वदन्नेव तदा भगवान् कञ्जलोचनः ।
पश्यतः पार्वतीशस्य तत्क्षणेऽन्तरधीयत ॥ ३७ ॥

भवो दश दिशः पश्यन्नास्ते गिरिजया सह ।
दिदृक्षुस्तस्य वैचित्रीं सर्वतो विकिरन् दृशम् ॥ ३८ ॥

अथ स्वधामोपवने रमापतिर्दिव्याङ्गनावेषधरो विमोहनः ।
आविर्बभूवाप्रतिमे समुल्लसद्वसन्तलक्ष्मीसुविचित्रितद्रुमे ॥ ३९ ॥

तां सुन्दरी कोटिशिरःशिखामणिं स्वपाणिना मञ्जुलकेलिकन्दुकम् ।
उच्छालयन्तीमधऊर्ध्वकं शनैः समीरलोलाञ्चललक्षितस्तनीम् ॥ ४० ॥

केलिश्लथच्छ्रोणिदुकूलमध्यतः सलीलमीषत्परिवृत्तमेखलाम् ।
पतोत्पतत्कन्दुककर्मसंचलद्वेणीनितम्बस्तनहारभारतः ॥ ४१ ॥

अभीक्ष्णभज्यत्सुकृशोदरीमिव क्रीड़ाचलच्चारूपदाम्बुजद्वयाम् ।
सौरभ्यसम्भारपतन्मधुव्रतैः संत्राससोद्वेगविलोललोचनाम् ॥ ४२ ॥

कर्णस्थताटङ्कमणिच्छविच्छटामिलत्कपोलस्थलमञ्जुलालकाम् ।
कुचाञ्चलं केलिकलापरिश्लथं संवृण्वतीं मङ्क्षुपरेण पाणिना ॥ ४३ ॥

मुहुस्तदन्येन च कन्दुकं क्षितौ प्रकीडयन्तीं भुवनैकमोहिनीम् ।
उच्चैस्तरामङ्गविकृष्टितः स्फुटं विभक्तचारुत्रिवलीतरङ्गिणीम् ॥ ४४ ॥

सभावसंलक्ष्यगभीरविस्फुरन्नाभीह्रदां प्रस्फुटरोमराजिकाम् ।
तां सत्रपस्मितविसृष्टकटाक्षबाणसद्यःप्रमुष्टहृदयां बहुहावभावाम् ॥ ४५ ॥

देवो निरीक्ष्य गिरिशोभृशविह्वलाङ्गः स्वात्मानमेष गिरिजामपि विस्मृतोऽभूत् ।
विक्रीड़न्त्याभूरिभावान्वितायास्तस्या हस्तात्कन्दुकोऽगाद्विदूरे ॥ ४६ ॥

आधावन्त्यास्तमनूत्तालपादं स्रंसत्काञ्चिश्लथमासोत्तरीयम् ।
अथो सभावं गिरिशस्य पश्यतस्तदुत्तरीयं मृदुकुञ्जमारुतः ॥ ४७ ॥

जहार संलक्ष्यसुपीवरस्तनी विवस्त्रदेहा बहुसंचुकोच सा ।
तां तप्तचामीकरचारुविग्रहां विवस्त्रसंलक्ष्यतमस्तनोदरीम् ॥ ४८ ॥

दृष्ट्वा गिरीशश्चकमेतमां हृदा सभावमायोजितलोललोचनः ।
विस्पष्टमङ्गं तडिदुज्ज्वलप्रभं निगूहयन्ती लतिकान्तरेषु सा ॥ ४९ ॥

रराज राजीववनातिसौरभा मधुव्रतौघाव्रियमाणविग्रहा ।
विमोहितात्मा मदनस्य मार्गणैः सतत्कटाक्षापहृताकुलान्तरः ॥ ५० ॥

निगूढदेहां लतिकासु वीक्ष्य तां रहः समालिङ्गितुमन्वगाद्भवः ।
निकुञ्जवातस्खलदुत्तरीयका सा रुद्रमायान्तमवेक्ष्य सत्रणा ॥ ५१ ॥

निलीयमाना विटपेषु भूरुहां स्मितानना न स्थिरतां दधौ क्वचित् ।
हरः प्रमुष्टाखिलविह्वलेन्द्रियः प्रसह्यं तामेत्य वधूशिरोमणिम् ॥ ५२ ॥

जवेनवेणीं परिगृह्य पाणिना स्मरेण मत्तः परिषस्वजेतमाम् ।
भृशं परिष्वक्ततनुः शिवेन सा सभावमावर्त्तितचारुविग्रहा ॥ ५३ ॥

निरीक्षमाणा त्रपया दिशो दश प्रकीर्णकेशी रुरुचे तडिद्यथा ।
सा मोचयित्वास्य भुजद्वयान्तराद्वपुः समालिङ्गनगाढमर्दनात् ॥ ५४ ॥

सशङ्कचित्तेव नितान्तमद्रवन्नितम्बभारोद्वहनश्रमालसा ।
तां धावमाना श्लथकेशबन्धनस्खलत्सुमन्दारसुमौघवर्षिणीम् ॥ ५५ ॥

तनुत्विषा रोचितसर्वकाननां शिवोऽन्वधावत् स्मरबाणवेपितः ।
प्रवृष्टधम्मिल्लसुमोत्कराङ्कितां जवेन तस्याः पदवीमनुद्रुतः ॥ ५६ ॥

भवो भवानीमपि पार्श्ववर्तिनीं न जज्ञिवान् ह्रीपरिलोपचञ्चलः ।
तडित्प्रभां तामनुधावतोजवाद्धरस्य चस्कन्द बलेन वीर्यकम् ।
प्रक्षुब्धचित्तस्य करेणुदर्शनाद्यथा करीन्द्रस्य मदाविलस्य तत् ॥ ५७ ॥

अमोघरेतसस्तस्य यत्र यत्र पपात तत् ।
रेतो दृशादिगुद्भासि कान्तिमत्ता प्रविस्फुरत् ॥ ५८ ॥

तत्र तत्राभवंस्तानि क्षेत्राणि धरणीतले ।
हेमपारदपूर्णानि श्रीकराणि नृणां भवे ॥ ५९ ॥

सरांसि सरितः शैलान् वनान्युपवनानि च ।
खेटकाः खर्वटा[1] वाप्यो मुनीनामाश्रमाणि च ॥ ६० ॥

पूर्णानि रुद्रवीर्येण हेम्ना वै पारदेन च ।
निकाममरुचन् दीप्त्या दीप्तानि परया श्रिया ॥ ६१ ॥

स्रस्ते चावितथे वीर्ये गिरीशः प्रत्यपद्यत ।
आत्मानं भगवन्मायाविप्रणाष्टधियं तदा ॥ ६२ ॥

---

१. "पर्वतप्रान्तग्रामाः" टि.–मधु० बड़ो० ।

न्यवर्तताथो शिव आत्ममोहात्सद्यः परिप्राप्तधृतिस्मृतिज्ञः ।
विज्ञाय मायां परमस्य विष्णोर्मेने न तच्चित्रमगाधबोधः ॥ ६३ ॥

ततः स्वस्थतमं शान्तमात्मप्रकृतिमागतम् ।
त्यक्तस्मररयं शम्भुं समुपेत्याब्रवीद्धरिः ॥ ६४ ॥

योषिद्रूपं मया शम्भो स्वमायाज्ञापनाय ते ।
प्रकटीकृतमुन्मुग्धा यदालक्ष्य सुरासुराः ॥ ६५ ॥

पश्य मे पौरुषं रूपामिदानीमिदमद्भुतम् ।
शङ्खचक्रगदापद्मदिव्यायुधनिषेवितम् ॥ ६६ ॥

वनमालालसद्वक्षस्फुरच्छ्रीवत्सकौस्तुभम् ।
इदं मे परमं रूपं ध्येयं योगीन्द्रसत्तमैः ॥ ६७ ॥

अनेनापि स्वरूपेण विकृतिं यान्ति योषितः ।
स्मरार्दिता मां सहसा सेवितुं सुसमुत्सुकाः ॥ ६८ ॥

श्रियोऽपि मोहनं शम्भोरूपमेतन्मनोहरम् ।
यथेच्छं पश्य भगवन् स्वस्थचित्तोऽधुनासि यत् ॥ ६९ ॥

त्वदन्ये न च मे माया न शक्या तर्तुमीश्वर ।
मदिच्छयैव देवेश मोहितोऽस्यद्यनिश्चितम् ॥ ७० ॥

भवादृशोऽपि योगीन्द्र यत्र मोहमुपागतः ।
तत्र कोऽन्यः समर्थः स्यादिति ज्ञापयितुं जनान् ॥ ७१ ॥

एतन्मे चरितं शम्भो स्त्रीस्वरूपविभावनम् ।
मा तेऽस्तु विक्लवः शम्भो मा च व्रीडा महात्मनः ॥ ७२ ॥

नूनं मे दुस्तरा माया तांस्तान् भावान् प्रकुर्वती ।
त्वामृते कस्तरेदेनां योगीन्द्रं स्वात्मनिस्थितम् ॥ ७३ ॥

एतां गुणमयीं शम्भो स्वात्मप्रकृतिमद्भुताम् ।
आश्रित्य वितनोम्यस्य सृष्टिस्थितिलयानहम् ॥ ७४ ॥

एवं समाहितमतिर्भगवान् विष्णुनाभवः ।
भवानीसहितः स्वस्थः स्वालयं प्रत्यपद्यत ॥ ७५ ॥

तत्र गत्वा रहः स्थित्वा तां देवीं शक्तिमात्मनः ।
उवाच विहसन् रुद्रो भवानीं प्रीतिसंयुतः ॥ ७६ ॥

अपि त्वया गौरि विलोकिता हरेः परस्य मायाखिलभावभाविनी ।
यया विहायात्ममहित्वमज्ञवद्विमोहितोऽहंसकलामरर्षभः ॥ ७७ ॥

अहं विरञ्चिर्मरुतामधीश्वरो मुनीश्वरा ये भृगुगौतमादयः ।
तेऽप्यस्य मायां परिणाहिनीं गुणैस्तरीतुमीशा न भवन्ति पार्वति ॥ ७८ ॥

सृष्टिस्थितिक्षयकरीं गुणसम्प्रवाहमुग्धाखिलत्रिभुवनां भवबन्धहेतुम् ।
आद्यां विचित्ररचनाश्रयदिव्यरूपां विष्णोः परस्य पुरुषस्य नतोऽस्मि मायाम् ॥७९॥

रहः स्थिता मां भवती कदाचित् कं ध्यायसीत्याप्तमना अपृच्छत् ।
स एष साक्षात्पुरुषः पुराणः स्वयं प्रपञ्चस्य निदानभूतः ॥ ८० ॥

श्रीराम उवाच

इति ते कथितं कान्ते समुद्रो मथितो यथा ।
स्वयं लक्ष्मीस्ततो जाता साक्षात्त्रिभुवनेश्वरी ॥ ८१ ॥

तत्सार्द्धं निःसृता एता भक्ता मे व्रजगोपिकाः ।
यूथेश्वर्यश्च सकला व्रजकेलिविनोदिकाः ॥ ८२ ॥

विलासिन्यस्तडित्कान्त्या द्योतयन्त्यो व्रजावनीम् ।
नित्यं रासविलासादिरसिका मम वल्लभाः ॥ ८३ ॥

कथिता चापि तेऽन्येषां रत्नानां सूतिरम्बुधेः ।
अमृतस्य तथोत्पत्तिः सुरेभ्यः पायितं यथा ॥ ८४ ॥

राहोर्ग्रहत्वसम्प्राप्तिर्नियमो वचसा हरेः ।
देवानां दानवानां च कलहश्च तवेरितः ॥ ८५ ॥

विक्रमस्तत्र सुमहान् साक्षान्मम रघूपतेः ।
पक्षपातश्च देवानां जयदानं तथामुना ॥ ८६ ॥

यः कीर्तयेन्नित्यमदः शृणोति स्मरत्यभीक्ष्णं रामस्य चरितं ।
महोत्तमश्लोकनिधेः स जातु पराभवं क्वापि लभेत नैव ॥ ८७ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे समुद्रमथनादिकीर्तनं नाम पञ्चनवतितमोऽध्यायः ॥ ९५ ॥

*

षण्णवतितमोऽध्यायः

श्रीजानक्युवाच

विदितं ते करुणया यत्तत्वं व्रजसुभ्रुवाम् ।
प्राग्जन्म मम चाप्युक्तं भवताखिलवेदिना ॥ १ ॥

सहजायास्तु यत्तत्त्वं स्वरूपं यच्च यादृशम् ।
तत्सर्वं श्रोतुमिच्छामि त्वत्तो रघुपतेऽधुना ॥ २ ॥

श्रीराम उवाच

सहजानन्दिनी साक्षात्परब्रह्मस्वरूपिणी ।
प्रमोदवनलीलेशी या नित्या परदेवता ॥ ३ ॥

सच्चिदानन्दरूपेयं प्रेमानन्दैकविग्रहा ।
अरूपा सर्वरूपा चाप्यनामा सर्वनामिनी ॥ ४ ॥
तथा च व्रजदेवीनां समस्तानां च जानकि ।
गायत्र्याश्चैव सावित्र्याः स्वरायाश्च परश्रियः ॥ ५ ॥
पार्वत्याश्च सरस्वत्या इन्द्राण्याश्च रतेरपि ।
स्वाहायाश्च स्वधायाश्च सुधायाश्च तथा भुवः ॥ ६ ॥
चन्द्रिकायाः प्रभायाश्च विकुण्ठायास्तथाप्रिये ।
तुष्टेः पुष्टेश्च मेधायाः प्रज्ञायाश्च तथाधिपः ॥ ७ ॥
विद्यायाश्चाप्यविद्यायाः कान्तेः कीर्त्तेर्धृतेः स्मृतेः ।
समस्तानां च शक्तीनामंशिनी सहजेश्वरी ॥ ८ ॥
यानि कानि च रूपाणि तव वा मम बल्लभे ।
तानि सर्वाणि नियतमस्या एवेति चिन्तय ॥ ९ ॥
एषैव विश्वं सृजति सृष्ट्वानुविशति स्वयम् ।
एषैवरक्षयत्येतत्काले संहरते पुनः ॥ १० ॥
बन्ध मोक्षकरी चैषा जीवानां जीवरूपिणी ।
जीवातुरप्यसौ कान्ते जगतोऽनुग्रहात्मिका ॥ ११ ॥
नित्यंसर्गविसर्गादिदशलीलास्वरूपिणी ।
लक्ष्यं च लक्षणं चैषा निषेधो विधिरेव च ॥ १२ ॥
कार्यं च कारणं चैषा परं चापरमेव च ।
स्वसत्तयाखिलंव्याप्य नित्यमुज्जृम्भयत्यसौ ॥ १३ ॥
सर्वेषां नामरूपे च स्वयं व्याकुरुते ह्यसौ ।
सदसद्वापि यद्वस्तु दृष्टमानुश्रवं तथा ॥ १४ ॥
तस्य सर्वस्य सर्वत्र स्थितेयमधिदेवता ।
अधिभूतं तथाध्यात्ममियमेव प्रतिष्ठिता ॥ १५ ॥
विरञ्चिः पञ्चतामेति हरिर्विरमते पुनः ।
रुद्रोविनाशमायाति तिरोभवति पूरूषः ॥ १६ ॥
महेन्द्राणां कोटयश्च विलीयन्ते विशेषतः ।
विराट् प्रलीयते काले कालोभवति निष्कलः ॥ १७ ॥
तदाप्येषा विहरति मया सार्द्धं समस्थिता ।
प्रमोदवनकुञ्जान्तरानन्दरसवर्द्धिनी ॥ १८ ॥
चिदानन्दमये नित्ये स्वे महिम्नि महीयते ।
नित्यरामविलासादिलीलोल्लासनकारिणी ॥ १९ ॥
नादो नादान्नमयते नादान्तो लीयते मयि ।
तदाप्यस्याः कलं गानं विरतिं नैति जानकि ॥ २० ॥

अमूर्त्तश्चैवमूर्त्तश्च भावः सर्वो विलीयते ।
तदाप्यस्याः परा मूर्तिर्भासते नित्य केलिनी ॥ २१ ॥

नित्या शरत्स्वच्छजला सरयूर्वीचिमालिनी ।
रत्नबद्धतटद्वन्द्वा राजहंसनिषेविता ॥ २२ ॥

हंससारसचक्राह्वकादम्बकुलकेलिभृत् ।
जलकेलिसमासक्तव्रजवामेक्षणाञ्चिता ॥ २३ ॥

मधुमाधवलक्ष्मीश्च नित्या तत्र विराजते ।
संफुल्लमधुरानेकमाधवीकुंजमण्डिता ॥ २४ ॥

मकरन्दभरोन्मत्तरोलम्बकुलनादिता ।
नवचूताङ्कुरास्वादकलकण्ठैरकुण्ठितैः ॥ २५ ॥

पुंस्कोकिलकुलैर्घुष्ट काकलीकलनिःस्वना ।
चमत्कारिकलक्वाणचकोरशुकसारिकाः ॥ २६ ॥

उत्फुल्लकुसुमस्तोमसंछन्नानेकभूरुहा ।
सुमन्दशीतलामोदिमारुतोर्मिसुसंगता ॥ २७ ॥

दोलाकेलिरसासक्तगोपीगीतकलध्वनिः ।
वाद्यन्मृदङ्गामुरजमञ्जुलध्वनिशालिनी ॥ २८ ॥

नित्यैव पूर्णिमा तत्र राकाख्या रासयोगिनी ।
अखण्डमण्डलोद्योतिरजनीकरमण्डिता ॥ २९ ॥

आनन्दबर्द्धिनी साक्षात् पूर्णपीयूषवर्षिणी ।
उद्यच्चन्द्रप्रभाशोणदिग्व्योमधरणीतला ॥ ३० ॥

काश्मीररससंसिक्तरञ्जिताशेषकानना ।
उत्तानितचलच्चञ्चुचकोराचमितामृता ॥ ३१ ॥

उत्फुल्लकुमुदामोदवहमञ्जुलमारुता ।
नित्यैव रजनी तत्र गोपीहृदयरञ्जिनी ॥ ३२ ॥

अनङ्गरङ्गरुचिरा शृङ्गाररसदीपिनी ।
दूतीसखीगणरहःप्रयोगपरिवर्द्धिनी ॥ ३३ ॥

प्रियप्रेमाभिसारादिप्रकारसुखभाविनी ।
रसोज्जागरसानन्दपशुपक्षिगणाकुला ॥ ३४ ॥

नित्यं प्रमुद्वनं तच्च भासुरं सर्वकामदम् ।
सर्वभोगकरं साक्षात् प्रेमानन्दनिकेतनम् ॥ ३५ ॥

तस्मिन्नशोकवनिका संफुल्लाशोकभूरुहा ।
उद्यत्सौरभ्यलहरीवासिताशेषकानना ॥ ३६ ॥

तत्र श्रीयोगपीठोत्तमवरविलसद्रत्नसिंहासनान्तः
सद्यः संफुल्लपद्मोपरिलसिता स्निग्धसख्यष्टकेन ।
आत्तव्यालोलवालव्यजनपटमणिस्वर्णभूषादियुक्त
श्रीमद्धस्ताम्बुजेनप्रतिपदमुदयत्केलिनासेव्यमाना ॥ ३७ ॥
हावैर्भावैरनेकैर्वदन विलसितैर्मन्दहासैर्विलासैः
शृङ्गारैकान्तकेलीं किमपि विदधती काममुज्जीवयन्ती ।
प्रेमार्द्रैर्द्रक्तरङ्गैः सुतरल सरलैर्व्वक्रिमोपक्रमाढ्यै-
राह्लादं वर्धयन्ती मम हृदि मधुरालापलीलाललामा ॥ ३८ ॥
चञ्चद्रक्तांशुकाढ्या स्तनकलशलसत्तारहाराभिराम
बिम्बोष्ठी तप्तचामीकररुचिरवपुःकान्तिसौरभ्यसीमा ।
कूजत्काञ्चीकलापश्लथगुणविगलच्छ्रोनितम्बाम्बराढ्या
ध्यातव्या सर्वसिद्धयै [ ] निजसहजानन्दिनीयं मदंके ॥ ३९ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे श्रीरामजनकात्मजा-संवादे सहजातत्त्वनिरूपणं नाम षण्णवतितमोऽध्यायः ॥ ९६ ॥

*

सप्तनवतितमोऽध्यायः

श्रीराम उवाच

ब्रह्मानन्दरसावाप्त्यै भजनीया त्वमिन्दिरे ।
प्रेमानन्दरसावाप्त्यै श्रीमती सहजेश्वरी ॥ १ ॥
त्वं चेयं च परानन्दरूपिण्यौमयि संगते ।
उभे अपिप्रियेनित्ये मम नित्यविलासिनः ॥ २ ॥
ज्ञानभक्तिस्वरूपा त्वं श्रीमज्जनकनन्दिनि ।
प्रेमभक्तिस्वरूपेयं सहजानन्दिनी प्रिया ॥ ३ ॥
ज्ञानिनोमपिलीयन्ते भक्ता अपि भवान्ततः ।
प्रेमभक्तिपरा नित्यं विलसन्ति मया सह ॥ ४ ॥
भवे न पुनरावृत्तिरुभयेषामपि प्रिये ।
मृत्योर्मूर्द्धिन्न पदं दत्त्वा प्राप्तानां परमं पदम् ॥ ५ ॥
सालोक्यसार्ष्टिसारूप्यप्रमुखा याश्च मुक्तयः ।
त्वं हि तासामधिष्ठात्री पराज्ञानफलोदया ॥ ६ ॥

न सत्त्वेन विना ज्ञानं न ज्ञानेन विना क्वचित् ।
भवबन्धविनिर्मुक्तिर्भवेदज्ञाननाशजा ॥ ७ ॥

इतिबन्धश्च मोक्षश्च त्वदायत्तावुभावपि ।
विद्याविद्यास्वरूपेण क्रीडसीह त्वमीदृशी ।। ८ ॥

आवत्यो मम लीलाश्च प्रमोदवनकुञ्जगाः ।
सरय्वाः पुलिने रम्ये मुक्ताकुञ्जमनोरमे ॥ ९ ॥

तासां भवत्यधिष्ठात्री सहजानन्दिनी प्रिया ।
अतश्च सहजारामा परा श्रीरिति गीयते ॥ १० ॥

लीलानन्दैकरसिका भोगसंकोचनाशिनी ।
नित्यानुकम्पाधरणी नित्यलीलाप्रवेशदा ॥ ११ ॥

यर्हि ज्ञानात्परं याति पूर्णां प्रेमकलां मयि ।
तर्हि मन्नित्यलीलायां प्रवेशायोचितो भवेत् ॥ १२ ॥

कुञ्जालयप्रतीहारी वेत्रहस्ता प्रवेशिका ।
श्यामारामाधन्यतमा सखी वक्ति तमागतम् ॥ १३ ॥

हे नाथ सहजाकान्त काचिच्चन्द्रमुखी वधूः ।
भवान्ते परमप्रेमपरीपाकेन शुद्धहृत् ॥ १४ ॥

शुद्धो जीव इह प्राप्तः प्राप्यालभ्यं सखीपदम् ।
स इदानीमिह स्वामिन् प्रवेश्यो नाथ वा वद ॥ १५ ॥

इत्युक्तो वेत्रधारिण्या प्रतिहार्या नियुक्तया ।
अहं श्रीसहजानन्दामुखं चन्द्राधिकप्रभम् ॥ १६ ॥

वीक्षमाणश्चिरं तिष्ठाम्यस्वतन्त्र इव प्रिये ।
ततः सा स्वामिनी मह्य मिदमीरयति स्फुटम् ॥ १७ ॥

स्मितज्योत्स्नाचमत्कारविशदीकृतमन्दिरा ।
किं तेऽभिलाषः कान्तास्याः प्रवेशेनाथवा प्रभो ॥ १८ ॥

ततोऽहं स्वामिनीमेनां ब्रवीमि रुचिरं वचः ।
चिरं तप्यत्वसौ तीव्रंतपस्तीर्थेषु सुन्दरि ॥ १९ ॥

ततश्च योगिनां स्थानं ज्ञानिनां च मनोरमम् ।
प्राप्नोत्विह पुनः कस्य प्रवेशः स्याद्वरानने ॥ २० ॥

आवयोः सुरहःक्रीडामावां जानीवहे प्रिये ।
अन्यस्य ज्ञापनार्हेय नैवेति मम निश्चितम् ॥ २१ ॥

ततः सा स्मितचन्द्रास्या साकूतमिदमाह माम् ।
नित्योऽभिलाष एतस्यास्तव लीलावलोकने ॥ २२ ॥

स कथं नाथ भज्येत न लभेच्चेत्प्रवेशनम् ।
ज्ञानिनः प्रेमभक्ताश्च तुल्या एव स्युरञ्जसा ॥ २३ ॥

ततश्च को भजेत्प्राज्ञ आवामधिकलिप्सया ।
श्रुतिश्च व्याहतैव स्याद्भक्त्युत्थफलबोधिका ॥ २४ ॥

निहितं गुहायां यो वेद परमे व्योम्नि तत्पदम् ।
सोऽश्नुते सकलान् कामान् विपश्चिद्ब्रह्मणा सह ॥ २५ ॥

गुहा वै हृदयाकाशः परमव्योम चाक्षरम् ।
तत्पदं परमं नित्यं प्रमोदवनसंज्ञिकम् ॥ २६ ॥

एतद्यो नियतं वेद स भक्तः प्रेमशीलनः ।
भुङ्क्ते स सकलान् कामान् दिव्यभोगरसोत्तरान् ॥ २७ ॥

आवयोर्युगलं यच्च विपश्चिद्ब्रह्म तन्मतम् ।
तत्सहक्रीडनं चैतदावयोर्धाम्नि वेशनात् ॥ २८ ॥

इति नित्यः श्रुतेरर्थः सतां चित्ते प्रकाशते ।
भजन्ति तेन विश्वस्ता आप्तस्य वचसा यथा ॥ २९ ॥

नान्यथा कथयेद्वेदो नान्यथा भजनं भवेत् ।
अतः प्रवेशनीयेयं कुञ्जद्वारगता वधूः ॥ ३० ॥

इति श्री सहजावाक्यं श्रुत्वाहं पुनरब्रुवम् ।
यथेष्टं प्रविशत्वेषा आवयोः केलिसद्मनि ॥ ३१ ॥

किं तु स्त्रीणां मनोभावश्चञ्चलो भवति प्रिये ।
कोटिमन्मथसौन्दर्यं दृष्ट्वा मां कामयेत सा ॥ ३२ ॥

तदा तव मनोग्लानिः सहजेशि न किं भवेत् ।
सपत्नीभावसामर्षा किं न त्वं मानिनी भवेः ॥ ३३ ॥

अतो विचार्य कर्तव्यं स्त्र्यन्तरस्य प्रवेशनम् ।
तथा कुरु यथा देवि नानुतापः पुनर्भवेत् ॥ ३४ ॥

इत्युक्ता मयका देवी सहजा पुनरब्रवीत् ।
आवयोर्गुणसंदोहो नान्यसाधारणः प्रिय ॥ ३५ ॥

अहमस्मि त्वद्वशगा त्वं च मद्वशगः प्रिय ।
आवयोः सहजः प्रेमा नान्यसाधारणः प्रभो ॥ ३६ ॥

काहं कुर्याममर्षं च मत्समा का तव प्रिया ।
बहुधा सम्प्रतीतोऽसि सुन्दरीनिवहेष्वपि ॥ ३७ ॥

इयं वराकी युवतिरावयोर्दर्शनार्थिनी ।
क मत्सापत्न्यभावेन युक्ता स्यान्मानकृन्मम ॥ ३८ ॥

इत्युदीरितमाकर्ण्य स्वामिन्याः साधुचेतसः ।
उवाचाहं प्रतीहारीं वेत्रहस्तां प्रवेशदाम् ॥ ३९ ॥

आज्ञापयति चेदेषा प्रिया मे प्राणवल्लभा ।
तदा प्रवेशयतमां भक्तां तां नवकन्यकाम् ॥ ४० ॥

इत्याज्ञप्ता प्रतीहारी प्रावेशयत तां सखीम् ।
तस्याः प्रेमगुणाकृष्टा सहजेश्यन्वरज्यत ॥ ४१ ॥

कृतप्रणामां तां दूरादन्तिके सालिकानयत् ।
तस्याः करौ समादाय सहजानन्दिनी स्वयम् ॥ ४२ ॥

मह्यं समर्पयामास करुणालोललोचना ।
इयं ते मत्सखी नाथ सेवनार्थमुपागता ॥ ४३ ॥

रहः सेवाविधौ नित्यं स्थापनीया वराङ्गना ।
समीप एव चाप्येनां भजस्व भजनोद्धुराम् ॥ ४४ ॥

कोटिकल्पांस्तपस्तप्त्वा शुद्धप्रेमोदयेन च ।
आवां निषेवितवती सरयूतटभूमिगा ॥ ४५ ॥

ततश्चैषा परित्यज्य लिङ्गं गुणमयं वपुः ।
शुद्धजीवत्वमापेदे प्रेम्णा चाधिकवृद्धिना ॥ ४६ ॥

इदं पदं परिप्राप्ता प्रमोदवनसंज्ञकम् ।
माधुर्यरसरक्तेयं सखीभावमुपागता ॥ ४७ ॥

आवयोर्नित्यलीलायां स्थास्यति प्रिय संततम् ।
चामरैर्व्यजनाद्यैर्नौ नित्यं परिचरिष्यति ॥ ४८ ॥

कृपाकटाक्षसंदोहैः पीयूषाधिकशीतलैः ।
इमामानन्दयतमां यथा परिचरेत्सुखम् ॥ ४९ ॥

इत्युक्तोऽहं सहजया जनानुग्रहशीलया ।
एवमस्त्विति तां गोपीं रहः स्थापितवानहम् ॥ ५० ॥

अतो जानकि नन्वेतद्वदामि त्वां प्रयत्नतः ।
सर्वकार्येष्वहं तस्याः परतन्त्रोऽस्मि सर्वदा ॥ ५१ ॥

सहजाया यदाकूतं तदहं साधु साधये ।
न विचारोऽस्ति मे तस्या अभीष्टार्थविधौ क्वचित् ॥ ५२ ॥

इति ते सम्यगास्यातं निगमैरपि वर्णितम् ।
तत्त्वं श्रीसहजेशान्याः स्वरूपं च रहस्यकम् ॥ ५३ ॥

मम श्रीसहजायाश्च नैव भेदोऽस्ति कश्चन ।
एकमेव द्विधारूपं रासःकेलिरिरंसया ॥ ५४ ॥

मत्तोऽधिकप्रभावेयं भक्तोद्धरणकर्मणि ।
साध्यसाधनरूपेयं स्वयमेव प्रतिष्ठिता ॥ ५५ ॥

पुराणेषु च वेदेषु विततेष्वागमेषु च ।
यामलेषुसंहितापु सिद्धान्तेषु च सर्वशः ॥ ५६ ॥

बुधैर्व्याससमासाभ्यामियमेव हि गीयते ।
य एनां प्रविजानन्ति प्रविज्ञाय भजन्ति च ॥ ५७ ॥

न तेषां भुक्तिमुक्त्यादि दुर्लभं वस्तु किंचन ।
य एनां न विजानन्ति तेषां वै ज्ञानिनामपि ॥ ५८ ॥

वृथा ज्ञानं च विज्ञानं फलशून्यतया प्रिये ।
य एनां न भजन्त्यद्धा ते मद्भ्राजोऽपि पूरुषाः ॥ ५९ ॥

न तथा फलयोगेन युज्यन्ते जनकात्मजे ।
यथामुष्या भजनतः फलभाजो भवन्ति हि ॥ ६० ॥

प्रमुदवनमहेशी नित्यलीलारसज्ञा शुभगुणगणराशिः सर्वसौन्दर्यसीमा ।
असममहिमधामश्लोकसम्पत्समग्रा निखिलनिगमगेया नन्दनस्यात्मजेयम् ॥ ६१ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे श्रीसहजा-तत्त्वाख्यानो नाम सप्तनवतितमोऽध्यायः ॥ ९७॥

*

अष्टनवतितमोऽध्यायः

ब्रह्मोवाच

इत्थं श्रीरामचन्द्रेण कीर्तितं व्रजसुभ्रुवाम् ।
तत्त्वं विज्ञाय मुमुदे श्रीमती जनकात्मजा ॥ १ ॥
उवाच च परिप्रीता रामं रमणकोविदम् ।
चित्रकूटगिरौ लब्धव्रजलीलाकुतूहलम् ॥ २ ॥

श्रीजानक्युवाच

ज्ञातं प्रभो करुणया भवतः स्वरूपमाभीरराजदुहितुः सहजाभिधाया ।
यस्यां भवानविरतं रमते रमण्यां स्वैरं समुल्लसितकोटिकलाकलापः ॥ ३ ॥

प्रेमापरंजयति ते रघुवंशकेतो श्रीनन्दनान्वयपयोनिधिचन्द्रिकायाम् ।
रात्रंदिवं प्रकटिताखिलहावभावशृङ्गारसारपरमामृतपूरपूर्णः ॥ ४ ॥

माधुर्यधुर्यधरणीरमणीयताढ्यः प्रावीण्यभारभरितोऽद्भुतभङ्गिपूर्णः ।
लावण्यभावपरिणाहकरः कलानामेकान्तकेलिभवनं युवयोर्विलासः ॥ ५ ॥

सौन्दर्यसारसमुदायतरङ्गिणीयं चूड़ामणिस्त्रिभुवनाद्भुतसुन्दरीणाम् ।
वक्रोक्तिचारुरचनारसहर्ष वर्ष प्रावृडधरा विजयते व्रजराजपुत्री ॥ ६ ॥

ब्रह्मादिदैवतकिरीटमणिप्ररोचिनीराज्यमानचरणाब्जनखाग्रमस्याः ।
ऐश्वर्यमत्यधिकमेव किमत्र चित्रं क्रीतो यया स्वकरगः परपूरुषस्त्वम् ॥ ७ ॥

नित्यं नतास्मि युवयोस्त्रिजगद्विशिष्टं प्रेमाणमेकरसतारमणीयरूपम् ।
स्वच्छन्दकेलिपरिणाहनिदानभूतं जीवातुमेतमखिलव्रजसुन्दरीणाम् ॥ ८ ॥

लक्ष्मीसहस्रसुविलासकलागभीर औदार्यधैर्यपटुतासमुदायसीमा ।
नित्योल्लसन्नवनवामितमोदसिन्धुः संगश्चिरं विजयती तव गोष्ठराज्ञ्या ॥ ९ ॥

को वेत्ति कान्त भुवने युवयो रहस्यं स्वच्छन्दकेलिरसनिर्वृतयोरजस्रम् ।
पादाब्जनित्य परिचारिकयापि भूत्वा यज्ञायते न नितरामधिकं मयापि ॥ १० ॥

यद्गीयते श्रुतिशिरःशतकेन नित्यं मात्रोपजीवनपरा विबुधाश्च यस्य ।
आब्रह्मविष्टपमुदारगुणप्रकर्ष आनन्द एष भवतो रसकेलिरूपः ॥ ११ ॥

कल्याणमन्दिरमुदारगुणाम्बु राशिमास्वाद्यमानभुवनोत्तरसौख्यसघम् ।
संसारचक्रबहुपर्यटनश्रमाणां विश्रामदं विजयते तव धाम नित्यम् ॥ १२ ॥

धामेश्वरी विजयते सहजैवनाथ सा तावकी परमचित्सुखभोगशक्तिः ।
सामर्षभूतहृदया अपि तेऽन्यवामा यद्दर्शनक्षणविलुप्तमदा बभूवुः ॥ १३ ॥

मूले कृतं रसनिषेचनमङ्घ्रिपस्य शाखाशिफाकुसुमपत्रफलं प्रयाति ।
तद्वत्प्रभो सहजया सहते रतेन तृप्ता भवन्ति निखिला व्रजवामनेत्राः ॥ १४ ॥

एकापि सर्वतरुणीसमुदायरूपा स्वैरं प्रभो विहरते भवता समं श्रीः ।
यद्वीक्ष्य भूरिरतिकेलिकलासमेतं मोदन्त ईश सकलाः सुदृशो व्रजस्थाः ॥ १५ ॥

हित्वा मम प्रणयमन्यत एष सक्तस्तत्किं करोमि सखि तामथ निश्चिनु त्वम् ।
दृष्ट्वा म्रियेत तरसैव मया कचेषु प्रेयानयं तत उदास्य करे विधेयः ॥ १६ ॥

अन्यर्थमेव ननु तां समुपालभे च का त्वं ममैव रमणः स्थगितो ययेति ।
नैवं करिष्यसि पुनः स्मरबाणदग्धा चेत्त्वं तदाधिसरयु प्रसभं पतेथाः ॥ १७ ॥

इत्थं सपत्नतरुणीशपते सरोषं जिज्ञासती व्यतिकरं किल तावदेव ।
यावत्त्वया सह रहोविलसद्विहारां नैक्षिष्ट नन्दनसुघोषपतेः किशोरीम् ॥ १८ ॥

यद्रूपमेकगुणमक्षिचकोरिकाभिः पेपीयमानमनिशं व्रजसुन्दरीणाम् ।
प्रेयस्त्वदीयमनया मिलितं पुनस्तद्वैगुण्यमाप परमप्रमुदामवाप्त्यै ॥ १९ ॥

सौदामिनीपरिचिता जलदच्छटेव सौवर्णवल्लिमिलितेव तमालपङ्क्तिः ।
रेखान्वितानिकषनीलशिलेव हेम्नः श्रीनन्दनस्य सुतया तव भाति मूर्तिः ॥ २० ॥

कास्विन्न नाथ समुदीक्ष्य कृतार्थयेत् स्वे नेत्रे कलानिधिसुरक्तचकोरकाभे ।
रूपं त्वदीयमरविन्दविलोचनेश श्रीनन्दनस्य सुतयाधिकजातशोभम् ॥ २१ ॥

सापत्न्यभावजममर्षमुपेयिवद्भ्यां
सौन्दर्यसारपरमामृतवञ्चिताभ्याम् ।
तस्याः स्त्रियो नु किमलम्भि विलोचनाभ्यां
या त्वद्युतां प्रियतमां तव नैव पश्येत् ॥ २२ ॥

त्रैलोक्यरूपमदसंहृतिकारि नित्यं बद्धादरं तव रघूद्वहलोचनाभ्याम् ।
बोभुज्यमानममृताधिकतर्षकारि स्वादावहं जयति तत्सहजास्वरूपम् ॥ २३ ॥

मां पातु नित्यरमणी तव नाथ शश्वत्प्रेमप्रमोदमयमञ्जुलमूर्तिरेषा ।
सामर्ग्यजुःश्रुतिशिरांस्यतिवर्त्य भूयो योगीन्द्रवृन्दहृदयानि च वर्तमाना ॥ २४ ॥

उद्रिक्तभूरिकरुणामृतशश्वदार्द्रां दृष्टिं दधातु मयि सा सततं स्वकीयाम् ।
या संददाति भवतश्चरणारविन्दे पूर्णां रतिं परमयोगिभिरर्थनीयाम् ॥ २५ ॥

भूयो मदीक्षणकनीनिकयोरजस्रं पीयूषवर्षि युवयोर्युगलं सलीलम् ।
श्रीमत्प्रमोदवनगह्वरवीथिकासु बिभ्रद्वहोविहरणं वसतु प्रकामम् ॥ २६ ॥

पुष्पाङ्गरागचमरातपतालवृन्त ताम्बूलसम्पुटविभूषणधारिकासु ।
या कापि संनिधिगता परिचारिकासु भूत्वापि दर्शनसुखं युवयोर्लभेय ॥ २७ ॥

एताश्च व्रजसुभ्रुवस्तव रहःकेलिप्रमोदस्पृशः
प्रेमाम्भोधिलसत्तरङ्गतरलास्तारुण्यलक्ष्मीभृतः ।
क्रीडन्त्यश्चिरमासतां मम दृशोस्ताराइव श्रीपते
याभिर्नैव विना लभे दश दिशो गाढान्धकारावृताः ॥ २८ ॥

इति स्तुत्वा च नत्वा च गोपीगोष्ठेश्वरीं च ताम् ।
सहजानन्दिनीं सीता नितान्तमरमत्तया ॥ २९ ॥

श्रीमन्नन्दननन्दिनी च विलसद्गोपीसमाजस्थिता
तारामण्डलमण्डितेव सरसा ज्योत्स्नेव सा शारदी ।
अत्युच्चैः शुशुभेतमां जनकजासङ्गप्रमोदावृता
ते चान्योन्यमुपेयतुर्निजनिजव्राताधिपत्यं तदा ॥ ३० ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे चित्रकूट लीलायामष्टनवतितमोऽध्यायः ॥ ९८ ॥

*

एकोनशततमोऽध्यायः

ब्रह्मोवाच

जानकी व्रजभक्तानां प्रेमवृत्तं निरन्तरम् ।
पश्यन्ती सस्पृहमना मुमुदे स्वेशसंगता ॥ १ ॥

ताश्चित्रकूटगिरि कन्दररत्नशालाः प्रेयःप्रसक्तमुदितव्रजदारजुष्टाः ।
पश्यन्त्यथ प्रतिदिनं प्रणयप्रकर्षवृत्तान्तशीलनपरा मुमुदे भृशं सा ॥ २ ॥

अणिमादिमहासिद्धिनिषेवितपदद्वया ।
सर्वात्मना व्यचष्टैषा व्रजलीलां मनोरमाम् ॥ ३ ॥

क्वचित् कुञ्जोद्देशे नवनवलिसान्द्रावृतिमति
प्रगाढध्वान्तौघस्पृशि रहसि कांचिद्व्रजवधूम् ।
व्यचष्ट स्वच्छन्दं नवनिधुवनानन्दनिरतां
तनोर्मध्ये काञ्चीमधुरमणितैर्लक्षिततमाम् ॥ ४ ॥

क्वचित्केलीकुञ्जे किमपि सहजां मानसरुषं
विनीताभिर्वाग्भिः प्रसभमनुनेतुं प्रिय इतः ।
पदाम्भोजे यावत्पतति स भृशं तावदमुपा
क्वणत्केयूराभ्यां मृदुलनिजदोर्भ्यां हृदि धृतः ॥ ५ ॥

क्वचित्प्रेयोवक्षःस्थलमितरयोषाकुचतटी
विलिप्तैः काश्मीरैश्छुरितमलमालोक्य तरसा ।
रुषा न्यक्कुर्वीत प्रणयिनमियं यावदबला
परिष्वज्याघ्राक्षीद्रसमुरसि तावत्स चतुरः ॥ ६ ॥

क्वचित्क्रीडावासे प्रणयकलहाक्रान्तहृदया
मनूनेतुं दूतीं रहसि कथयत्यात्मरमणः ।
जवाद्गत्वा वाच्यं त्वमसि रमणि प्राणदयिता
त्वयर्त्ते मत्प्राणा गुणवति बहिर्गन्तुमुदिताः ॥ ७ ॥

निरागस्के मय्याकलमसि किमागः शशिमुखि
प्रमाणं मे प्रेमा भवतु विगतान्यस्पृह इह ।
अदोषे दोषः क्व प्रणयवति दोषो यदि भवे
त्रिवेणी ते दृष्टिस्तमपि सपदि क्षालयतु च ॥ ८ ॥

इतीवोच्चैः पत्या रचितचदुसंदेशवचनं
समादाय क्रोड़ाभवनमथ दूती समगमत् ।
समाधाय प्रेयोवचनरचना तोऽप्यधिकया
गिरानिर्मानां तां त्वरितमनयत्कान्तसविधे ॥ ९ ॥

क्वचित्पायं पायं मधुरतरमन्योन्यमधर-
द्वयीस्थं पीयूषं परिणतिसुतृप्त्यैकजनकम् ।
मुहुर्मीलन्नेत्रं मुहुरुदितसीत्कारचटुलं
सकम्पं सस्तम्भं सपुलकमुभौ संविहरतः ॥ १० ॥

क्वचित्क्रीड़ाकुञ्जे प्रणयकलहेनान्तरितया
सरोषन्यक्कारावमतरमणायोगसहया ।
अथो भूयः सम्प्रेषितचतुरदूत्यामृगदृशा
सचिन्त सद्वारेक्षणमवहितं स्थीयत इह ॥ ११ ॥

क्वचित्संकेतान्तःप्रियमनुपपातं दिशि दिशि
प्रपश्यन्तीदूतीमसकृदुपलम्भैर्विधुनती ।
क्षिपन्ती ताम्बूलाभरणवसनालेपकुसुम
स्रजस्तप्ता तान्ता[1] हृदि कथमिवास्तेशशिमुखी ॥ १२ ॥

स्तुवन्तावन्योन्यं चरणनतिकारौ गुणगणान्
वदन्तावन्योन्यं रचितपरिरम्भौ सपुलकम् ।
पिवन्तावन्योन्यं दशनपटपीयूषपटलीं
प्रमत्तावन्योन्यं समरसतयोर्भौ विहरतः ॥ १३ ॥

क्वचित्स्वप्रेयस्याः कुसुमवसनालंकृतिभरं
स्वयं बिन्यस्यार्द्रः प्रणयपरिपाकेन रमणः ।
स्वदाक्षिण्यव्यक्तिप्रवणहृदयो भूषणपरः
स्वयं चासौ साक्षी परमसुषुमां पश्यति रहः ॥ १४ ॥

क्वचित्प्रेयानद्यौकसि मम सुखं वासक इति
स्फुटाशाः सज्जन्ते वपुषि बहुशोमण्डनभरम् ।
सुगन्धोदैः स्नात्वा दहदगुरुणा धूपितकचा-
स्तनोः कान्त्या सद्यस्तडित इव राजन्ति वनिताः ॥ १५ ॥

सखीकर्णोपान्ते पुलकवतिलग्ना प्रियतम-
प्रवृत्तिं कस्याश्चित्कथयति परं हर्षजननीम् ।
स्मितज्योत्स्नाजालैर्विदलितरहः सद्मतिमिरा
स्फुरद्भूयो हारावलि किमपि सा वीक्षत उरः ॥ १६ ॥

सखीभ्यः स्वोत्कर्षं प्रकटयितुमाभूषिततनु-
र्मुहुर्द्वारे दृष्टिपरिलिखितचित्रेक्षणमिषात् ।
समौ लज्जाकामौ निजहृदि बहन्ती सुनिपुणा
कुरङ्गाक्षी काचित्प्रकटयति नोवासकरसम् ॥ १७ ॥

विधीयन्ते पर्वोत्सवकपटतः स्नानवसव-
स्रगालेपालक्तच्छुरणमणिभूषाञ्जनमुखाः ।
सखीभिः शृङ्गारा नवनिधुवनार्हाः सरभसं
नवोढायाः कस्याश्चन हृदयमोहाय निभृतम् ॥ १८ ॥

विरच्यन्ते तल्पाः क्वचन कलिकाभिः सुमनसां-
गुणैराबद्धाभिः कृतसमुचितन्यासविधिभिः ।
क्वचित्स्रक्ताम्बूलक्रमुककणिकासम्भृतिविधौ
प्रियं स्मारं स्मारं शिथिलयतिपाणीशशिमुखी ॥ १९ ॥

---

१. तान्ता = ग्लाना सती ।

क्वचित्प्रातःकार्यं किमपिविनिवेद्यातिचतुरा
मुहुः श्वश्रूं प्रस्वापयति पठितान् पिञ्जरशुकान् ।
पिधत्ते शीतोक्त्या शिशमयिषितं दीपकमपि
प्रयुङ्क्ते न स्नेहैरसुरमणि उक्ता जिगमिषे ॥ २० ॥

क्वचित्केलीसद्मन्युदितमणिदीपद्युतिगल-
त्तमिस्रे सोत्कण्ठा मनसि मिलितुं प्राणदयितम् ।
विलम्बं संवीक्ष्य प्रकटपति तर्कान् बहुतरान्
विषीदत्युत्तान्ता स्वपिति च न जागर्ति च न सा ॥ २१ ॥

क्वचित्कान्तं शृङ्गारयति विपरीतोत्सुकमना
पुरा तेन प्रद्योतितपुरुषवेशातिशयिनी ।
स्फुरत्काञ्चीनासाभरणमणिताटङ्ककबरी
तुलाकोटीशाटीवलयतिलकालक्तकरसैः ॥ २२ ॥

क्वचित्कुञ्जावासाद्रमणमभिसर्तुं कृतमना-
स्त्वरातः सज्जन्ती वपुषि पटभूषादिरचनाम् ।
तुलाकोटीकण्ठेऽर्पयति मणिहारं चरणयो-
स्तथा बाह्वोः काञ्चीं श्रवणयुगले चाङ्गदयुगम् ॥ २३ ॥

समक्षं कान्तस्य क्वचन परमप्रेमपटली-
महिम्ना हेमाङ्गी विरहपरितापेन युयुजे ।
विवर्णस्या पाण्डुद्युतिपरिमिलद्गण्डयुगला
गलद्बाष्पोद्रेकोपहतनयना मौनमभजत् ॥ २४ ॥

क्वचित्कुञ्जागारे रहसि निवसन्ती व्रजवधू-
स्त्रपावश्यानासप्रियपरिचयाकोविदसुहृत् ।
मुहुर्धावं धावं पुलकित तनुः प्राङ्गणगतं
नभः श्यामं रामप्रियतमधियाऽऽलिङ्गतिमुहुः ॥ २५ ॥

कदाचित्तापिच्छं विकचकलिकाकीर्णविटपं
प्रियः साक्षादेष प्रसभमिति मत्वा सविधगा ।
रहःसंदेशोक्तीः कथयति पुनर्मौनकलितं
तमालक्ष्य स्तब्धेत्यवददियमत्यर्थकुपिता ॥ २६ ॥

क्वचिद्दृष्ट्वा काचित्सरसि नवमिन्दीवरवनं
नवोल्लासश्रीमद्रमण इति सम्भ्रान्तहृदया ।
परीरब्धुं गाढं विनिहितमतिस्तोयमविश-
द्धृता पश्चात्सख्या कथमपि मृगाक्षी निववृते ॥ २७ ॥

क्वचिद् दृष्ट्वा क्षुब्धा गिरिवरदरीगाढतिमिरं
मुहुः स्मारं स्मारं रघुपतिममुह्यत्सुनयना ।
उपालेभे भूयः प्रणयिवर दृश्योऽसि बहुधा
परं लभ्यो नासीत्यलमकृपतेऽन्वेषणशतैः ॥ २८ ॥

इति जानकी विविधभावचित्रितं प्रणयं व्रजप्रणयिनीगणस्य तम् ।
स्वदृशा व्यचष्ट बहुकौतुकान्विता कमलेश्वरीप्रभृतिसत्सखीयुता ॥ २९ ॥

प्रतिकन्दरं प्रतिलतावनद्रुमं प्रतिकुञ्जमण्डपमखण्डकेलिना ।
रघुनन्दनेनरमणेनरागिणा रमिता रमा इव विजह्रुरङ्गनाः ॥ ३० ॥

रुचिरे प्रमोदवनकेलिमण्डपे विदधौ यथा विलसितं निजेच्छया ।
सहजेश्वरीप्रणयिनीसहायवान् रमणस्तथैवमिह चित्रकूटके ॥ ३१ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे व्रजविलास वर्णनं नामैकोनशततमोऽध्यायः ॥९९॥

*

शततमोऽध्यायः

ब्रह्मोवाच

मन्दाकिन्यास्तटद्वन्द्वे निकुञ्जवरवेश्मसु ।
उपत्यकासु विस्तीर्णनवशाद्वलभूमिषु ॥ १ ॥
अधित्यकासु रम्यासु स्फाटिकी च शिलामनु ।
समुत्तुङ्गेषु शृङ्गेषु मणिकाञ्चनकान्तिषु ॥ २ ॥
अनेकधातुचित्रेषु वरभूरुहमालिषु ।
अह्निसंध्यायमानेषु सुप्रकाशेषु रात्रिषु ॥ ३ ॥
कन्दरासु मनोज्ञासु ज्वलदौषधिदीप्तिषु ।
लसद्रत्नशिलारम्यशय्यास्तरणभूरिषु ॥ ४ ॥
अशेषकेलिसामग्रीसनाथासु समंततः ।
आवातत्रिविधारामवातोर्मिभिः सुगन्धिषु ॥ ५ ॥
मणिदीपकभास्वत्सु मण्डपेषु च सर्वतः ।
गह्वरेषु लतावृक्षकुञ्जपुञ्जसुचारुषु ॥ ६ ॥
पतन्निर्झरसंशीतसावकाशाद्रिभित्तिषु ।
प्राङ्गणेषु विशालेषु रत्नशालेषु भूरिषु ॥ ७ ॥
रेमे श्रीरामरसिकः सहजाजानकीयुतः ।
यूथैर्व्रजवरस्त्रीणां मदनोन्मत्तचेतसाम् ॥ ८ ॥
स्फुरद्विचित्रभूषाणां विचित्रवरवाससाम् ।
विचित्रहावभावानां विचित्रवरवर्ष्मणाम् ॥ ९ ॥

झस्णज्झणितमञ्जीरनूपुराणां समंततः ।
वाद्यन्माणिक्यवलयकेयूराणां प्रतिक्षणम् ॥ १० ॥

विस्फुरन्नवनृत्यानां विलासजितविद्युताम् ।
नवगानमनोज्ञानां नवचातुर्यसद्मनाम् ॥ ११ ॥

सानन्दं सादरं चैव सहेलं सत्रपं तथा ।
सवैयात्यं सकुतुकं सोन्मादं समनोद्भवम् ॥ १२ ॥

सगर्वं सगुणोद्गारं सभावं सगुणस्पृहम् ।
सजोषं साभिलाषं च सविलासं विजह्रिरे ॥ १३ ॥

एकोऽनेकतया रामः कामीव कलयन् मुहुः ।
तास्ताश्चेष्टाः सुरुचिराः शृङ्गाररसपोषिकाः ॥ १४ ॥

दर्शयन्नात्मनो दैन्यं भूरिकेलिविचक्षणः ।
कलाकलापकुशलः कोविदः कविताकरः ॥ १५ ॥

विजह्रे व्रजवामाभिः श्यामसुन्दरविग्रहः ।
अपारवीर्यः संस्तभ्य स्वात्मना वीर्यमात्मनः ॥ १६ ॥

तस्य चैवं विहरतश्चित्रकूटमहागिरौ ।
अभवत्सुभगः कालः प्रकटाशेषसद्गुणः ॥ १७ ॥

मधुमाधवशोभाढ्यो मधुरः केलिपुष्टिकृत् ।
शरत्सहजसंफुल्लपद्मषण्डमनोहरः ॥ १८ ॥

हेमन्तः शिशिरश्चैव विस्तीर्णरजनीसुखः ।
वेश्माभ्यन्तरवेश्मान्तर्विलासरुचिवर्द्धनः ॥ १९ ॥

ग्रीष्मः शीतलमुच्छायकदलीवनसेवनः ।
जलयन्त्रोत्थलहरीसंगिव्यजनमारुतैः ॥ २० ॥

निरन्तरं संशमितसम्भोगजपरिश्रमः ।
सखीकरचलच्चारुचामरान्दोलशीलितः ॥ २१ ॥

अजस्रचन्द्रिकोद्गीर्णसुधावृष्टिहृतक्लमः ।
उशीरमण्डपावासनीतमध्याह्नजातपः ॥ २२ ॥

वापिकान्तरसंक्लृप्तदोलातल्पमनोहरः ।
वल्लरीजालविवरमन्दागतमरुत्प्रियः ॥ २३ ॥

वर्षाश्च घर्घराघोषिघनसंघट्टमङ्गुलाः ।
मादद्यन्मयूरसंघुष्टकेकाषड्जखराञ्चिताः ॥ २४ ॥

चातकाधीतमधुरविंकेश्वरकलस्वराः ।
निरन्तरघनच्छायापनीततपनातपाः ॥ २५ ॥

पतन्मनोज्ञसलिलविन्दुपुष्पौघवर्षणाः ।
दशदिक्षु चमत्कारिचपलासौष्ठवाञ्चिताः ॥ २६ ॥

कदम्बकाननोद्भूतसुमनोगुलिकाचिताः ।
सुपक्वजम्बूविपिनाः पक्वाम्रकलसौरभाः ॥ २७ ॥

तमालकाननोद्भूतकुसुमालिविराजिताः ।
शिलीन्ध्रपुष्पनिपतन्मत्तरोलम्बनादिताः ॥ २८ ॥

उत्फुल्लकेतकवनीसौरभ्यहृतषट्पदाः ।
दर्दुरध्वानविजितविचित्रपिककूजिताः ॥ २९ ॥

दिवानिशसमुद्भूतध्वान्तापिहितवासराः ।
सरित्समुद्रसरसीकुल्यातुल्याभिमानकाः ॥ ३० ॥

मालिनाम्बुवहच्छन्नसूर्याचन्द्रमरीचयः ।
अपिक्षुद्रनदीपूरेमहाजवविवर्द्धनाः ॥ ३१ ॥

एवं रामं षड्ऋतवः सेवितुं सुसमुत्सुकाः ।
स्वं स्वं स्थानं समालम्ब्य वसन्ति स्म गिराविह ॥ ३२ ॥

देशः स एवाविरभूदादित्रजसमाह्वयः ।
वनकुञ्जमनोहारी चित्रकूटमहीधरे ॥ ३३ ॥

तत्र प्रकाशयामास रामेन्दुः केलिवैभवम् ।
दर्शयन् परमैश्वर्यं सर्वासामपि योषिताम् ॥ ३४ ॥

जानक्याश्च विशेषेण त्रैलोक्यस्य च पश्यतः ।
ता एव रात्रयस्तत्र प्रादुरासुर्मनोहराः ॥ ३५ ॥

ता एव नृत्यगीतादिकलाश्चातिसुशोभनाः ।
ता एव सम्पदः सर्वाः परमाश्चर्यवर्द्धकाः ॥ ३६ ॥

इत्थं सञ्जितसर्वकेलिविभवो रामो रमाकोटिभिः
संयुक्तो रमया तथा परमया संसेव्यमानो भृशम् ।
प्रेमानन्दवपुष्मतीं च सहजामभ्याददानः करे
केलीकौतुकभावहन्नरमत श्रीचित्रकूटे गिरौ ॥ ३७ ॥

इति श्रीमदादिरामायणे बृह्मभुशुण्डसंवादे दक्षिणखण्डे चित्रकूटगिरि-विहारो नाम शततमोऽध्यायः ॥ १०० ॥

*

एकाधिकशततमोऽध्यायः

ब्रह्मोवाच

सहजाजानकीदेवीयूथद्वयविनोदनः ।
रममाणाश्चित्रकूटे चिरमास्त रघूद्वहः ॥ १ ॥

तदा दशाननश्चक्रे त्रैलोक्यकदनं महत् ।
तपसा तापिताशेषो रुद्रदत्तवरोर्जितः ॥ २ ॥

पुलस्त्यस्य मुनेः पुत्रो विश्रवा इति विश्रुतः ।
तस्य वीर्यात्समुद्भूताः कुबेरो रावणस्तथा ॥ ३ ॥

कुम्भकर्णश्च बलवान् जातमात्रौ तु तौ जगत् ।
भीषयाञ्चक्रतुः क्रूरौ ससुरासुरराक्षसम् ॥ ४ ॥

अधिलङ्कं कुबेरस्तु स्थानं दत्तं विरञ्चिना ।
प्राप्तवान् प्रथमं यत्र रक्षसामयनं महत् ॥ ५ ॥

रावणश्च तपश्चक्रे लिप्सुस्त्रैलोक्यसम्पदम् ।
रेवातीरमधिष्ठाय रुद्राराधनतत्परः ॥ ६ ॥

वायुभक्षो निराहारः शोषयन्स्वां तनुं हठात् ।
तथैव कुम्भकर्णोऽपि भूष्णुरप्रतिमो भवे ॥ ७ ॥

तपोरासुस्तपःस्थानान्यनेकानि महीतले ।
रेवातटं पुण्यतमं श्रीमदुज्जयिनीपुरम् ॥ ८ ॥

महाकालेश्वरं तत्र तोषयामास राक्षसः ।
मथुरायां च भूतेशमाराधय महातपाः ॥ ९ ॥

काश्यां विश्वेश्वरं चैव गङ्गासागरसंगमे ।
हाटकेश्वरनामानं लिङ्गरूपिणमीश्वरम् ॥ १० ॥

कैलासे पार्वतीनाथं स्वप्रकाशं महेश्वरम् ।
आरराध महाघोरः परेण तपसा खलः ॥ ११ ॥

सानुजस्तप आतिष्ठन् ववृधे रावणो भुवि ।
तेजसाप्रतिमोभुष्णुः पुनरप्याचरत्तपः ॥ १२ ॥

प्रातर्मध्याह्नसायाह्नेष्वकरोच्छिवपूजनम् ।
कोटिलिङ्गार्चनपरः सुमहाव्रततत्परः ॥ १३ ॥

लवणोदद्वीपमध्ये सर्वमानुषदुर्गमे ।
तीव्रेण तपसा युक्त आरराध महेश्वरम् ॥ १४ ॥

गन्धैःपुष्पैस्तथा धूपैर्दीपैः कमलमालया ।
नित्यमाराधनं तस्य नार्हयत दिने दिने ॥ १५ ॥

शैलेषु वनदुर्गेषु सरितां पुलिनेषु च ।
विचचार तपोयुक्तः खेचरो वीर्यसंवृतः ॥ १६ ॥

पुराभवकृतं विष्णोरपकारमनुस्मरन् ।
देवब्राह्मणधेनूनां सोऽभवद्द्रोहकारकः ॥ १७ ॥

वेदशास्त्रपुराणानि वेदाङ्गानि च सर्वशः ।
सोऽध्यैष्ट ब्रह्मचर्येण धनुर्वेदं तथाखिलम् ॥ १८ ॥

राक्षसाचार्यवर्येभ्यः शिक्षमाणोऽखिलाः कलाः ।
पारङ्गतोऽभूद्विद्यानां पार्वतीशप्रसादतः ॥ १९ ॥

शिवोऽपि भगवांस्तस्य सर्वान् कामानपूरयत् ।
अनन्याराधनश्रद्धासुप्रसन्नमनाः परम् ॥ २० ॥

वेदानां च तथाङ्गानां व्याख्याता सोऽभवत्स्वयम् ।
व्याचक्रे वेदशाखाश्च वाचस्पतिरिवापरः ॥ २१ ॥

तस्य घोषयतो वेदान् दशभिर्वदनैर्दृढम् ।
अभवत्सुमहाञ्छब्दः स्वरवर्णविजृंभितम् ॥ २२ ॥

प्रतिवर्णं प्रतिपदं क्रमं व्याकृतवान् स्वयम् ।
चतुर्णां च जटाश्चक्रे प्रातिशाख्यपुरःसराः ॥ २३ ॥

वेदाचार्यमुनीनां च मतानि ज्ञातवान् पृथक् ।
पाठभेदांस्तथा सर्वान् स्वरभेदांश्च कृतत्रशः ॥ २४ ॥

इत्थं स वेदशाखानां पारं प्राय सुदुर्गमम् ।
मनीषी पण्डितवरः सर्वशास्त्रेषु कोविदः ॥ २५ ॥

प्रसादात् पार्वतीशस्य ख्यातोऽभूद्भुवनत्रये ।
राजसं तामसं चैव धर्ममप्यास्थितः खलः ॥ २६ ॥

किंतु विष्णुं तदीयांश्च निरन्तरमसौ द्रुहन् ।
युक्त आसुरभावेन प्रजासन्तापकृद्बभौ ॥ २७ ॥

अजस्रं तप आस्थाय महाव्रतसुसंयतः ।
ब्रह्मचर्यकरस्तीव्रोरोषेण प्रज्वलन्निव ॥ २८ ॥

ऐहिकीं भूतिमान्विच्छन्नाराध महेश्वरम् ।
युञ्जानो राक्षसानीकं स्थानं च चकमेतराम् ॥ २९ ॥

हितास्तस्याभवन् केचिद्राक्षसप्रवरास्तदा ।
अत्युग्रकर्मणे तस्मै स्थानाय समजिज्ञपन् ॥ ३० ॥

राक्षसा ऊचु

अहो पौलस्त्य भुवने भवानप्रतिमो गुणैः ।
कर्मणा विद्यया कान्त्या शौर्येण यशसा तथा ॥ ३१ ॥

त्रैलोक्यभोगयोग्योऽसि प्रसादात् पार्वतीशितुः ।
अतस्तुभ्यं समुचितं वास्तव्यं मृगयामहे ॥ ३२ ॥

यत्रस्थः साधयेत्सर्वं भवानात्ममनीषितम् ।
तपसा तेजसा चैव त्वमिद्धो विक्रमेण च ॥ ३३ ॥

यथेच्छं कुरु वीर्येण राज्यं त्रैलोक्यगोचरम् ।
उद्वहस्व वरां भार्यामाहरस्व वरश्रियः ॥ ३४ ॥

त्रैलोक्यवररत्नानि संचिनुष्व स्वसद्मनि ।
एतत्ते ख्यातियोग्यं स्याद्यशः कर्म च निर्मलम् ॥ ३५ ॥

आकर्ण्य रक्षसां वाक्यं रावणस्तपसोर्जितः ।
उवाच प्रहसन्नुच्चैर्मुखरीकृतदिक्चयः ॥ ३६ ॥

अहोरे राक्षसश्रेष्ठाः किं नु स्थानं ममोचितम् ।
खिद्यामि यदभावेन सम्पत्कामोऽपि विक्रमी ॥ ३७ ॥

खिद्याम्यहं चातितरां बालिनो वानरेश्वरात् ।
महाबलान्महाघोरात्किष्किन्धानगरीशितुः ॥ ३८ ॥

भूयः खिद्याम्यहं वीरात्सहस्रभुजकाननात् ।
कृतवीर्यसुताद्भीमादर्जुनात् क्षत्रियोर्जितात् ॥ ३९ ॥

अन्ये तु मे तृणप्राया ये सुरासुरकिंनराः ।
नराश्च वानराश्चैव न तान् विगणयाम्यहम् ॥ ४० ॥

ताभ्यामाशङ्कमानोऽस्मि भविष्णुर्भुवनेष्वहम् ।
ययोर्वीर्यं बलं चैव हृदि शल्यायते मम ॥ ४१ ॥

इत्याकर्ण्य वचस्तस्य राक्षसास्तमसोर्जिताः ।
ऊचिरे वचनं सर्वे ये तत्प्रियचिकीर्षवः ॥ ४२ ॥

स्थानं तु ते पुरी लङ्का योग्या वसतये प्रभो ।
रक्षसामयनं दीव्यत्स्वर्णप्राकारभासुरा ॥ ४३ ॥

बृहद्गोपुरसाहस्रसंलग्ना रणदुर्जया ।
परिखावलयप्राप्तलवणोदान्तरस्थिता ॥ ४४ ॥

सौवर्णविपुलाट्टालबलभीजालमण्डिता ।
रत्नमाणिक्यखचितगृहभित्तिमनोरमा ॥ ४५ ॥

धनौघपूर्णविपणिर्बृहदापणशोभिता ।
सिन्धोरन्तर्ज्वलद्वूपावाडवाग्नेः शिखैव या ॥ ४६ ॥

वासवस्येव नगरी सलिले प्रतिबिम्बिता ।
सर्वर्तुफलपुष्पाढ्यगृहाराममहीरुहा ॥ ४७ ॥
गुञ्जद्भ्रमरसंदोहघुष्टमन्दारकानना ।
आपणैर्मणिमाणिक्यमुक्ताविद्रुमराशिभिः ॥ ४८ ॥
सर्वतः सर्वदा पूर्णैर्भासमाना दिवानिशम् ।
सूर्यांशुस्पृष्टसंदीप्यत्तपनीयनिकेतना ॥ ४९ ॥
प्रोत्तुङ्गकनकस्तम्भमहाशालाशतान्विता ।
या पूर्वं रचिता साक्षात् स्वबुद्ध्या विश्वकर्मणा ॥ ५० ॥
रक्षसां विनिवासार्थं जाम्बूनदमयी पुरी ।
तां गृहाण बलात् स्वामिंस्तत्र राज्यं प्रशाधि भोः ॥ ५१ ॥

रावण उवाच

तत्र ज्येष्ठो मम भ्राता कुबेर इति विश्रुतः ।
स आस्ते वेधसा दत्तं स्थानं दिव्यमुपाश्रितः ॥ ५२ ॥

राक्षसा ऊचु

को भ्राता कः पिता स्यात्क इह खलु सुहृद्बन्धुमित्रादिरस्य
स्वार्थो ज्यायान् जनस्य द्रुतमभिकलयेद्भूरि यत्नं तदर्थम् ।
सर्वः स्वार्थं समीह्य त्रिजगति भवति स्वस्वकार्ये प्रवृत्तो
विज्ञायेत्थं दशास्य त्वमिह समुचितं दर्शयस्वात्मवीर्यम् ॥ ५३ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे रावणमन्त्रो नामैकाधिकशततमोऽध्यायः ॥१०१॥

*

द्व्यधिकशततमोऽध्यायः

ब्रह्मोवाच

अथ राक्षसवर्याणां मन्त्रमाज्ञाय रावणः ।
अभिषेणयितुं ज्येष्ठं भ्रातरं चकमेतमाम् ॥ १ ॥
पूर्वं तु प्रेषयामास दूतीकृत्य दशाननः ।
रक्षः क्रूरमुखं नाम यथार्थगुणनामकम् ॥ २ ॥
ज्येष्ठं तु भ्रातरं त्वं मे गच्छ क्रूरमुख द्रुतम् ।
तत्र गत्वा च तं ब्रूहि लङ्केशं वचनान्मम ॥ ३ ॥

अहं बलान्निवत्स्यामि पुरींलङ्काभिधामनु ।
भ्रातस्त्वमन्यतो गच्छ यदि मत्प्रीतिमिच्छसि ॥ ४ ॥

सौवर्णी सा पुरी सर्वा रमणीयतमा मम ।
राजधानी भवे भूष्णुर्भविष्णोस्त्रिजगत्पतेः ॥ ५ ॥

भवान् हि वयसा ज्येष्ठस्तपसा विद्यया त्वहम् ।
विक्रमेण च यक्षेश ततः स्थानं प्रदेहि मे ॥ ६ ॥

श्रुत्वा दूतमुखोदीर्णं कुबेरः परुषंवचः ।
अभवत् क्रोधताम्राक्षः प्रज्वलन्निव तेजसा ॥ ७ ॥

विचार्य स्वगतं भूयस्ततोऽवोचत कोपतः ।
अये राक्षस मूढात्मंस्तमनुब्रूहि मद्वचः ॥ ८ ॥

तपः परिणतं सम्यक् तव यो मां जिगीषसि ।
ज्येष्ठं पितृसमं साक्षाद्भ्रातरं श्रीमदान्धदृक् ॥ ९ ॥

विद्या च ते परिणतिं सम्यगेवमुपागता ।
अनिचिक्रमिषोज्यैष्ठं यस्यान्धा विंशतिर्दृशः ॥ १० ॥

मा कुरुष्व विलम्बं भोस्त्वं हि कार्ये चिकीर्षिते ।
मयापि सम्मुखे ग्राह्यो दूरादेव दशानन ॥ ११ ॥

इत्युक्त्वा विससर्जैष दूतं क्रूरमुखं बली ।
स गत्वा रावणं प्राह कुपितस्ते धनाधिपः ॥ १२ ॥

युवयोः खलु संग्रामो भ्रात्रोरेव भविष्यति ।
उचितानुचिते विद्वान् यथेच्छं कुर्वतः परम् ॥ १३ ॥

अथासज्जत स क्रूरो मायिनां रक्षसां चमूः ।
अभिषेणयितुं सज्जो लङ्केशं राज्यलिप्सया ॥ १४ ॥

रक्षसां वाहिनीनाथा ये लङ्कायामपि स्थिताः ।
तेऽभवन् रावणबले दैवस्यैव यदृच्छया ॥ १५ ॥

कुबेरः कोटिशो यक्षान् गन्धर्वान् किन्नरांस्तथा ।
नानाजातीन् भूतयोनीन् पर्यसज्जत तत्क्षणात् ॥ १६ ॥

योद्धुं रक्षोबलं क्रुद्धा यक्षा आजग्मुरञ्जसा ।
रञ्जयन्तो मौलिरत्नैः कुबेरस्याङ्घ्रिपङ्कजम् ॥ १७ ॥

उभे सेने सुसम्पन्ने परस्परजयेहया ।
सिन्धोर्द्वीपे रावणस्य लङ्कायां धनदस्य च ॥ १८ ॥

स्वानुरूपं प्रविज्ञाय तामसत्वाद्दशाननम् ।
लङ्कास्थान्यपि रक्षांसि नागृह्णन् धनदेरितम् ॥ १९ ॥

यक्षराक्षसवाहिन्यः सज्जाः संग्रामकर्मणे ।
जगदुद्घोषयामासुः ससुरासुरमानवम् ॥ २० ॥

यक्षरक्षोबलैः पूर्णैः समंताद्भूमिरास्तृता ।
अभज्यतेव शेषस्य त्रोटयन्तीव मस्तकम् ॥ २१ ॥
पुलस्त्यस्तदनुश्रुत्य वृत्तं वै यक्षरक्षसाम् ।
अचिन्तयद्धृदा योगी स्वानां प्रियचिकीर्षुकः ॥ २२ ॥
उभौ मे तनयौ शूरौ कुबेरश्चापि रावणः ।
यथा स्याद्भ्रमनयोस्तथा भवितुमर्हति ॥ २३ ॥
अनयोर्युद्धयतोः स्वस्ववाहिनीबलदृप्तयोः ।
मिथः संघर्षजो वह्निर्नाशयेच्च कुले उभे ॥ २४ ॥
अतोऽनयोः प्रबलयोः कलहः पर्युपस्थितः ।
यथा शाम्येत्तथा कार्यमुभयोः श्रेयसे मया ॥ २५ ॥
इति निश्चित्य मनसा पुलस्त्यो भगवानृषिः ।
कुबेरपार्श्वमगमज्जिहीर्षुः कलहं तयोः ॥ २६ ॥
तमागतमृषिश्रेष्ठं श्रद्धया नरवाहनः ।
प्रत्यगृह्णात् स्वागताद्यैः पाद्यार्घादिसपर्यया ॥ २७ ॥
ऋषिः सम्पूजितस्तेन स्वस्थः स्वासनमस्थितः ।
विनयावनतांसेन धनदेनेदमीरितः ॥ २८ ॥
अद्यासम्यनुगृहीतोऽहं भगवन् करुणावता ।
भवता तीर्थपादेन स्वागतेन मदालयम् ॥ २९ ॥
प्राणिनां श्रेयसे शश्वदायान्ति हि भवादृशः ।
तेनैव पूर्वपापानां नाशोऽप्यनुमितः खलु ॥ ३० ॥
भवतां पादतीर्थेन पूयन्ते भवनानि नः ।
गृहाश्रमे प्रसक्तानां दग्धानां कामकोटिभिः ॥ ३१ ॥
श्रेयसामयनं साक्षाद्दर्शनं नोभवादृशाम् ।
अथो आज्ञापय ब्रह्मन् यन्मह्यमुचितं तथा ॥ ३२ ॥
कुबेरेणोदितं श्रुत्वा प्रसन्नोऽभूत् स आत्मवान् ।
तमुवाचाथ कृपया सद्वाग्व्यापारभाजनम् ॥ ३३ ॥
सर्वेषां श्रेयसां वत्स त्वं योग्योऽसि विशेषतः ।
विनीते धार्मिके सत्यं स्थास्नवोऽखिलभूतयः ॥ ३४ ॥
देशं कालं वयोऽवस्था सहायं स्वजनादिकम् ।
अनपेक्ष्यैव जायन्ते स्वधर्मेणैव भूतयः ॥ ३५ ॥
सर्वदेशे सर्वकाले सर्वावस्थासु सर्वथा ।
जायन्ते भूतयः सर्वास्त्वादृशे धर्मतत्परे ॥ ३६ ॥
अतस्ते कलहस्तेन रक्षसा घोरचेतसा ।
निवर्ततां जवात्पुत्र सुखमेधस्व संततम् ॥ ३७ ॥

कुबेर उवाच

एकं स्थानमिदं ब्रह्मन्निवसामि चिरादिह ।
तज्जिघृक्षुरसौ दुष्टः कलहं कुरुते मया ॥ ३८ ॥
अहं स्थानादितो भ्रष्टः क्व नु गच्छेयमन्यतः ।
इत्यनेन सुदुष्टेन चिकीर्षामि मृधं मिथः ॥ ३९ ॥
गजाश्वरत्नवित्तादि यद्देयमुचितं भवेत् ।
तद्दीयतेऽपि कृच्छ्रेण न तु स्थानं कदा च न ॥ ४० ॥
इत्थं स्थानभ्रंशमाशङ्कमानः सज्जो योद्धुं रक्षसा यक्षराजः ।
आख्यात्सर्वं कलहस्यापि हेतुं मौनं पश्चादास बद्धाञ्जलिः सः ॥ ४१ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे रावणविजय-यात्रायां द्व्यधिकशततमोऽध्यायः ॥ १०२ ॥

*

त्र्यधिकशततमोऽध्यायः

ब्रह्मोवाच

कुबेरोदीरितं वाक्यं सत्यं दैन्यपुरःसरम् ।
श्रुत्वा पुलस्त्यो भगवांस्तमूचे हर्षयन् हृदि ॥ १ ॥
भवानापद्यतां वत्स न स्थानभ्रंशमात्मनः ।
न जातु कृतबुद्धीनां भवेद् दुःखं परैः कृतम् ॥ २ ॥
अस्त्युत्तरस्यां नगरी सर्वभोगसुखप्रदा ।
अलका नाम यक्षेश विश्रुता भुवनत्रये ॥ ३ ॥
नवापि निधयो यस्यां वसन्ति सुनिराकुलाः ।
परमानन्दमग्नाश्च यक्षगन्धर्वकिन्नराः ॥ ४ ॥
मन्दाकिनीतरङ्गाक्तमन्दमारुतसेविता ।
शीतला सुभगा पूता सर्वर्तुसुखभोगदा ॥ ५ ॥
रत्नस्तम्भैर्महोच्छ्रायैः प्रसादैरुपशोभिता ।
रत्नाट्टावलिशोभाढ्या तुङ्गध्वजविराजिता ॥ ६ ॥
संचरद्यक्षनारीणां पादाम्भोरुहनूपुरैः ।
कूजद्भिर्मेखलाद्यैश्च भूषणैरुपघोषिता ॥ ७ ॥
गृहस्फाटिकभित्तीनां भासितानां रवेस्त्विषा ।
नित्यमुद्रिक्तया दीप्त्या रोचिष्णुः सर्वतोदिशम् ॥ ८ ॥

सूपक्लृप्तैर्मणिमयैश्चत्वरैरुपशोभिता ।
सुवर्णरत्नप्राकारबृहद्गोपुरमण्डिता ॥ ९ ॥

सुहीरकोपरचितैः कपाटैः स्वर्णकीलकैः ।
देदीप्यमानभवना सर्ववर्णविचित्रिता ॥ १० ॥

तोरणैर्मणिमाणिक्यमुक्तागणविचित्रितैः ।
विन्यस्य रुचिरालेख्यैः सर्वतो भासुरालया ॥ ११ ॥

गृहनिर्यूहविश्रान्तैर्विचित्रस्वरनादिभिः ।
विचित्रवर्णैर्विहगैः समन्तात्परिशोभिता ॥ १२ ॥

विचित्ररत्नजटितैर्मुकुराकारशालिभिः ।
अजिरैर्गृहमुख्यानां बहिरन्तर्विराजिता ॥ १३ ॥

विचित्रवलभीवेश्ममणिवातायनाचिता ।
बृहदापणविन्यस्तसर्वसम्पत्समुशोभिता ॥ १४ ॥

वापीभिर्मणिबद्धाभिर्बृहन्निःश्रेणिराजिभिः ।
उत्फुल्लपङ्कजामोदवासितारोषवेश्मभिः ॥ १५ ॥

राजहंसकुलकाणशालिनीभिर्विराजिता ।
रत्नवद्धबृहत्पद्मा संचरद्वरयोषिताम् ॥ १६ ॥

गतिक्रमैः सुरुचिरैर्विक्रमत्पञ्चसायका ।
प्रतिवीथि प्रतिग्रहं प्रतिद्वारं प्रतिस्थलम् ॥ १७ ॥

उत्फुल्लवरमन्दारपुष्पस्तवकशोभिता ।
कल्पद्रुमवृतारामगुञ्जन्मत्तमधुव्रता ॥ १८ ॥

सरोभिः सरसीभिश्च रत्ननिःश्रेणिकान्तिभिः ।
पीयूषस्वच्छसलिललुल्लहरिवीचिभिः ॥ १९ ॥

सर्वदेशेषुशोभाढ्या सोत्साहैर्वरकिन्नरैः ।
किन्नरीभिः सर्वकालं भूषणोज्ज्वलकान्तिभिः ॥ २० ॥

आगच्छतां गच्छतां च गन्धर्वाप्सरसां गणैः ।
विमानैश्च महादीप्तिभासमानैर्दिवानिशम् ॥ २१ ॥

शोभिता शुभसम्पन्ना नानागीतवरध्वनिः ।
नित्योत्सवप्रवृत्तानां गन्धर्ववरयोषिताम् ॥ २२ ॥

करतालैः पादतालैर्मुखरीकृतमन्दिरा ।
वरसौरभ्यसुभगा लुभ्यन्मधुकराञ्चिता ॥ २३ ॥

पुंस्कोकिलकुलोद्गीर्ण विलसत्पञ्चमस्वरा ।
वीणामृदङ्गमुरजगम्भीरध्वनिनादिता ॥ २४ ॥

सद्रत्नमञ्जरीपुञ्जशोभितैर्विततोन्नतैः ।
स्वर्णशालमहासम्भैर्दीप्यमाना दिवानिशम् ॥ २५ ॥

प्रेयोबद्धादरैर्भोगरसिकैर्मदनालसैः ।
किन्नरीणां कुलैर्जुष्टा शृङ्गाररतिभाजनम् ॥ २६ ॥
सौधेषु चन्द्रशुभ्रेषु फेनपुञ्जविराजिषु ।
तल्पेषुकिन्नरस्त्रीणां प्रवृत्तसुरतोत्सवा ॥ २७ ॥
सर्वकालप्रमुदितनरनारीगणावृता ।
प्रसूनसायकक्रीडासंजातरतिवर्द्धिनी ॥ २८ ॥
हावभावाञ्चितैर्जातचुम्बनालिङ्गनोत्सवैः ।
सदारैर्वरगन्धर्वैर्नीतसोज्जागरक्षपा ॥ २९ ॥
श्रीमत्कैलासशैलस्य नित्यं सन्निहितैव या ।
पार्वतीपतिभालस्थचन्द्रज्योत्स्नाप्रकाशिता ॥ ३० ॥
मिलन्मन्दाकिनीतुङ्गतरङ्गावलिसंगिना ।
प्राकारेणावृता नित्यमगम्यपरिखावलिः ॥ ३१ ॥
आनन्दमग्नभूतेशगणाक्रीडैक भाजनम् ।
उमामहेश्वरक्रीडारससौभाग्यशोभिता ॥ ३२ ॥
अजस्रं नन्दिभृङ्ग्यादिचित्तसन्तोषदायिनी ।
भवानोस्कन्दहेरम्बमहोत्सवविधायिनी ॥ ३३ ॥
शिवसेवासमायातशक्रादिसुरसेविता ।
फुल्लचैत्ररथोद्यानसंगित्रिविधमारुतैः ॥ ३४ ॥
गन्धर्ववरनारीणां हृतसम्भोगजश्रमा ।
कैलासशैलसौन्दर्यदर्शनासक्त किंनरा ॥ ३५ ॥
प्रतिवेश्म वृषारुढशिवभिक्षाटनाञ्चिता ।
निरन्तरमहादेवदर्शनानन्दवर्धिनी ॥ ३६ ॥
सर्वर्तुसुखशोभाढ्या नित्यं माधवसेविता ।
कल्पद्रुमवनानन्दिकूजद्भ्रमरकोकिला ॥ ३७ ॥
पार्वतीपतितोषार्थं गायद्भिर्मूर्च्छितस्वरैः ।
वल्लकीमूर्छनासक्तैगन्धर्वैः सुखवर्द्धिनी ॥ ३८ ॥
एतादृशीं त्वमलकानगरी मजस्रमाश्रित्य सर्वसुखभोगरसैर्नयेथाः ।
कालं कुबेर मम वाक्यमुररीकुरुष्व चित्तं निवर्तय दशाननयुद्धखेदात् ॥ ३९ ॥
तत्रानिशं निवसतस्तव यक्षराज मैत्री भविष्यति चिरं गिरिजासखेन ।
ईशेन सर्वजगतां करुणार्णवेन साक्षाद्भवेन किमतः परमोहितं ते ॥ ४० ॥
गन्धर्वयक्षमुहकिन्नरराजधानीमेकान्तभूतिमलकानगरीं प्रशासत् ।
त्वं राजराज इति सर्वभवे प्रसिद्धिमेकां गमिष्यसिसमस्तनिधीश्वरः सन् ॥ ४१ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डेऽलकावर्णनं नाम त्र्यधिकशततमोऽध्यायः ॥ १०३ ॥

*

चतुरधिकशततमोऽध्यायः

ब्रह्मोवाच

पुलस्त्यस्य मुनेर्वाक्यमाकर्ण्य गुणवत्तरम् ।
तथेति प्रतिजग्राह कुबेरो बीतसंगरः ॥ १ ॥

इत्थं निवर्त्य विपुलं कलहं यक्षरक्षसोः ।
पुलस्त्यो भगवान् यातस्तद्विसृष्टः स्वमाश्रमम् ॥ २ ॥

गते ब्रह्मर्षिप्रवरे कुबेरः कृतसम्मतिः ।
यक्षाणां राजधानीं तामलकां नगरीं ययौ ॥ ३ ॥

सानुगः सपरीवारः सदारः ससुहृद्बलः ।
अलकां प्रययौ धीमान् कुबेरस्त्यक्तसंगरः ॥ ४ ॥

तमगृह्णन्त गन्धर्वाः स्वभिषेकपुरःसरम् ।
दत्त्वालकापुरीराज्यं बभूवुर्वशवर्तिनः ॥ ५ ॥

पुष्पकं नाम तं दिव्यं विमानाग्र्यमनुत्तमम् ।
उपसेदे राजराजं यदृच्छागतिसाधनम् ॥ ६ ॥

शङ्खपद्मादयः सर्वेनिधयो दिव्यमूर्तयः ।
उपतस्थुस्तमाज्ञप्ता भूतनाथेन शम्भुना ॥ ७ ॥

स्वयं स भगवान् शम्भुस्तस्मै विहितभक्तये ।
कृपयामास चण्डीशश्चण्डिका च निरन्तरम् ॥ ८ ॥

कैलासस्थानमाश्रित्य रुद्रावासं सुदुर्गमम् ।
अत्यर्थं मुमुदे श्रीदः सख्यं चापि कपालिना ॥ ९ ॥

स्थानभ्रंशमवाप्यापि नाखिद्यत धनेश्वरः ।
ततोऽप्यनुत्तमं प्राप्तः स्थानं तदलकाह्वयम् ॥ १० ॥

रावणस्तदुपश्रुत्य निर्याणं किन्नरेशितुः ।
तदेव बलमादाय लङ्कामाजग्मिवान् बली ॥ ११ ॥

सह रक्षोगणैः सर्वैरनुजाभ्यां च संयुतः ।
भगिन्या शूर्पणखया परिवारैस्तथाखिलैः ॥ १२ ॥

आजगामबली घोरो राक्षसेन्द्रो दशाननः ।
पुस्कृतः स रक्षोभिस्तत्र राज्याभिषिक्तये ॥ १३ ॥

आययौ भगवांस्तत्र पुलस्त्यः सर्वयोगिराट् ।
प्रजाहितैषिणस्तस्य कर्तुं राज्याभिषेचनम् ॥ १४ ॥

स उवाह वरां भार्यां नाम्ना मन्दोदरीं शुभाम् ।
पातिव्रत्यपरां दिव्यां नित्यं कन्यापदे स्थिताम् ॥ १५ ॥

स तया सहितो वीरः सर्वराक्षसपुङ्गवः ।
पुलस्त्येनाभिषिषिचे लङ्काराज्ये महोर्जितः ॥ १६ ॥

महासुवर्णप्रासादे मणिमाणिक्य भासुरे ।
राज्यासनमनुप्राप्य शुशुभे राक्षसेश्वरः ॥ १७ ॥

स छत्रभृद्रत्नकिरीटशोभितः शुभाङ्गदोद्द्योतितबाहुर्विशति ।
सुरत्नमाली वरहेमवेष्टनो विभूषणाढ्यः शुशुभे दशाननः ॥ १८ ॥

संवीज्यमानः शशिशुभ्रचामरैः सुवर्णसिंहासनमध्यमास्थितः ।
मन्दोदरीशोभितवामपार्श्वकः पुलस्त्यनेत्रोत्सवकृद्बभूव सः ॥ १९ ॥

स भालपट्टेषु सुमौक्तिकाक्षतैर्विराजमानस्तिलकैश्चकौङ्कुमैः ।
सलाजदध्यक्षतदूर्विकादलैः सम्पूजितो राक्षसकन्यकागणैः ॥ २० ॥

राज्याभिषेके स्नपितो द्विजोत्तमैः पुलस्त्यमुख्यैर्वरमन्त्रपाठकैः ।
समस्ततीर्थाम्बुपवित्रविग्रहः स शुभ्रदिव्याम्बरधृग्व्यशोभत ॥ २१ ॥

स मन्त्रपुष्पाञ्जलिभिर्द्विजोत्तमैराशास्यमानः श्रितकाञ्चनासनः ।
प्रमोदपुष्टावयवः प्रसादभृत्त्रैलोक्यराज्यो चितवेषभृद्बभौ ॥ २२ ॥

अनन्यवीर्योऽप्रतिमः पराक्रमैरशेषविद्यापरपारदर्शनः ।
भूतेशभक्तिप्रचुरात्मवैभवो बभौ भृशं सद्गुण गौरवाञ्चितः ॥ २३ ॥

उच्छ्रूनदोर्दण्डधरो धनुर्धरः समस्तदिव्यायुधलब्धशिक्षणः ।
विशालवक्षःस्थलरत्नहारभृल्लङ्काधिराजः शुशुभेतमां त्विषा ॥ २४ ॥

किरीटभृत् कुण्डलवृन्ददीप्तिभृद्विशालविंशारुणलोचनप्रभः ।
सुवर्णकाञ्च यङ्गदरत्नशोभितः सुप्रांशुमूर्तिः कटकौघदीपितः ॥ २५ ॥

प्रतापभृत्प्राप्तवराभिषेचन उद्रिक्तचित्तोऽधिकवीर्यबृंहितः ।
सुदृप्त आत्माप्रतिमत्वचिन्तनात् त्रैलोक्यमाचिक्रमिषुर्बलाधिकः ॥ २६ ॥

पुलस्त्यवाक्येन भृशं प्रमोदितः समुद्रवीचीपरिखासुदुर्गमाम् ।
सुबेलशैलोन्नतिभूरि भीषणं[1] प्राकारगुप्तां नगरी शशास सः ॥ २७ ॥

तस्याज्ञया ते त्रिजगज्जयैषिणो विवृद्धवीर्याः समरेषु दुर्मदाः ।
लङ्कापुरीवास्तुजुषो निशाचरा अतीव चित्ते मुमुदुस्तदाखिलाः ॥ २८ ॥

तमन्ववर्तत्किल कुम्भकर्णो ज्येष्ठं प्रियं भ्रातरमुग्रदीप्तिम् ।
आज्ञावशाद्गोद्विजदेववेद धर्मध्रुगत्यर्थभयप्रदो नृणाम् ॥ २९ ॥

यो मासषट्कं वरमात्मनिद्रामयाचताराधितदेवतायाः ।
जागर्तिषण्मासमशेषलोकभयाय वीरः किल घोरकर्मा ॥ ३० ॥

---

१. "वज्रोपलच्छन्नसुघट्टितोन्नत" इत्यधिकः पाठः—मथु० बड़ो० ।

विभीषणश्चानुज एव तस्य परं स्वभावाद्धरिपादरक्षः ।
भजंस्तदीयान्निभृतं मनस्वी सदुत्तमश्लोककथाप्रसक्तः ॥ ३१ ॥

विष्वङ्घ्रिदोव्यत्तुलसीसनाथशिराः स हि ज्येष्ठकुकर्म्मदूनः ।
तथापि कालं कलितप्रतीक्षो निनाय तत्संगनिरस्तखेदः ॥ ३२ ॥

तेषामनूजा प्रबभूव शूर्पणखाह्वयान्यन्तसुघोररूपा ।
अनुव्रताभ्रातरमुग्रकर्मा त्रैलोक्यभीतेर्जननी स्वभावात् ॥ ३३ ॥

ये राक्षसा विश्ववसस्तनूजाः खरस्तथैव त्रिशिराश्च दूषणः ।
तथैव विद्युद्रशनः सुघोरस्तमन्ववर्तन्त तमोमयास्ते ॥ ३४ ॥

इत्थं विवृद्धमहिमा विपुलप्रतापो रक्षोधिपो दशमुखोऽसुरराजधानीम् ।
लङ्कामवाप्य भुवनाधिपतिर्बुभूषुस्तेपे तपः परमदुष्करमेष भूयः ॥ ३५ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्ड रावणराज्याभिषेको नाम चतुरधिकशततमोऽध्यायः ॥ १०४ ॥

*

पञ्चाधिकशततमोऽध्यायः

ब्रह्मोवाच

सोऽभ्येत्य कैलासगिरिमाराध सदाशिवम् ।
अतितीव्रेण तपसा भक्त्या च व्रततत्परः ॥ १ ॥

अर्चित्वा निबिडैर्गन्धैः स्वर्गङ्गाजलशीतलैः ।
कुसुमैर्नन्दनोद्भूतैस्तथान्यैरूपचारकैः ॥ २ ॥

मन्त्रपुष्पाञ्जलिंदास्यन्निदमाह सुभक्तिमान् ।
नृत्यन् पुलकपूर्णाङ्गो गायन्नुच्चैश्च सामभिः ॥ ३ ॥

जय देव महावरदाधिपते हिमदीधितभाललसत्तिलक ।
नरकिन्नरनागसुरासुरहृत्सुखदानमते गिरिजाधिपते ॥ ४ ॥

जय सर्वजगत्करुणाजलधेऽखिलसौख्यनिधेनतविष्णुविधे ।
भवभौतिकभूतिनिदान भवप्रभुतागुणसीम समस्तगते ॥ ५ ॥

यदिदं किलदृश्यमशेषमपि त्वयि कारणरूपतया स्थितिमत् ।
तदुदेति पुनस्तदवस्थमिव प्रमितं प्रतिमीयत ईशभिदा ॥ ६ ॥

पुनरेव महाप्रलये गिरिश त्वयि नाण्डवचण्डिमरूपभृति ।
प्रविलीयत एतदशेषमपि त्रिविधं जगदप्रकटत्वमितम् ॥ ७ ॥

इति बीजमिव प्रकटस्य तरोस्त्वमसीश भवस्यनिदानमतः।
करुणार्णव देव भवन्तमहं प्रणतोऽस्मि गतोऽस्मि परं शरणम् ॥ ८ ॥

त्वयि ये शिव बद्धधियः सततं दृढभक्तिवशादनुरक्तिमिताः।
न च ते क च यान्ति पराभवनं सुखसारसमृद्धि विवृद्धिमिताः ॥ ९ ॥

वसुधाधिपतिर्वसुधामपतिर्वसुधामगतिर्विबुधाधिपतिः ।
विधिसद्मपतिर्वरमुक्तिपतिर्भवति त्वयि भक्तिविशिष्टमतिः ॥ १० ॥

किमु भोगसुखं किमु योगसुखं किमु मोक्षनिरञ्जनभावशुभम् ।
किमु धातृपदं किमु शक्रपुरं त्वयि भूतपतेऽद्भुतभक्तिमतः ॥ ११ ॥

सुरकिन्नरमौलिकिरीटमणिद्युतिरञ्जितपादसरोजनखाः ।
त्वयि भक्तिकलामधिगम्य हर प्रभवन्ति जगत्पति फल्गुनराः ॥ १२ ॥

हिमशैलसितं रजताद्रिमितं वरभूतिभृतं गिरिजालसितम् ।
निगमप्रमितं निजभक्तिजितं प्रभजामि भवन्तमहं त्वरितम् ॥ १३ ॥

रजनीपतिचारुकलालसिते परभक्तिभवत्करुणाहसिते ।
घनसारमनोरमभस्मसिते निगमावसिते त्वयि यातु मतिः ॥ १४ ॥

इतियेऽर्चनकर्मसमाप्ति विधौ कुसुमाञ्जलि बन्धसनाथकराः ।
कलयन्ति गिरीश तव स्तवनं न हि तैः किमपीह दुरायतमम् ॥ १५ ॥

इति स्तुत्वा दशमुखो मन्त्रपुष्पाञ्जलिं न्यधात् ।
गिरीशचरणद्वन्द्वे करुणामृतवर्षिणी ॥ १६ ॥

एकदा भूतनाथस्य भक्तिभावमहोर्जितः ।
प्रभुर्बुभूवुर्लोकानामकरोत्कर्म भीषणम् ॥ १७ ॥

विधाय पूजामीशस्य पादयोः पद्ममालया ।
निकृत्य निजशीर्षाणि निदधौ धीरमानसः ॥ १८ ॥

एकैकमुत्कृत्य शिरो महासिना विनिर्गलन्नूतनतप्तशोणितैः ।
अभ्युक्षितं पद्ममिवारुणप्रभावभासितं भूतपतेः पदे न्यधात् ॥ १९ ॥

अधावदङ्घ्री करुणाम्बुधेर्विभोः कैलासशैलावतिधूलिधूसरे ।
निकृत्तमूर्द्धाविरलप्रवाहितारुधिरनिर्गलद्रक्तसमूढपाथसा ॥ २० ॥

एवं स यावद्दशमं शिरः शिवं प्रपूजयामास शिरोभिरात्मनः ।
प्रतिप्रकर्षं प्रपठन् मनोरमान्मन्त्रानखण्डा विदधच्च संस्तुतीः ॥ २१ ॥

समाधिसम्मीलितलोचनो हरस्ततः समुन्मील्य दृशावुदैक्षत ।
एकावशिष्टं कुणपाधिपस्य तच्छिरः पराण्यस्य शिरांसि पादयोः ॥ २२ ॥

चिकर्तिषुर्घोरमतिस्तदप्यथो भूतानुकम्पाम्बुधिना कपालिना ।
निवारितोऽद्धा करयोः प्रगृह्य स स्वयं वरं ब्रूहि ममेति चोदितः ॥ २३ ॥

स तं ययाचेवरभक्तिभावतो वशंवदं भूतपतिं त्रिलोचनम् ।
सर्वत्रिलोकाधिपतित्वमात्मनः पुनर्न मृत्युं च सुरासुराहिभिः ॥ २४ ॥

ब्रह्मादिदेवोपरिवर्तिनीं निजामाज्ञां ययाचेऽप्रतिमंच विक्रमम् ।
पुरन्दरादप्यधिकाश्चसम्पदस्तेजः कृशानोश्च विभावसोरपि ॥ २५ ॥

यद् यच्च काम्यं मनसि स्थितं परं भोगं वरायुश्च सुखं तथाधिकम् ।
स तद्ययाचे गिरिशान्द्रसादितात्कृपावलोकामृतवीचिवारिधेः ॥ २६ ॥

इत्थं स सिद्धवरलाभउमाधिनाथात्सद्यःप्रभूतदशमस्तकशोभमानः ।
घोरो न्यवर्ततमां प्रभुमाशु नत्वा कैलासशैलशिखरान्नगरीं प्रति स्वाम् ॥ २७ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे रावणवरलाभो नाम पञ्चधिकशततमोऽध्यायः ॥ १०५ ॥

*

षडधिकशततमोऽध्यायः (१)

ब्रह्मोवाच

दूषणेन त्रिशिरसा विद्युज्जिह्वखरादिभिः ।
सुदुष्टचित्तै रक्षोभिः सहितोराक्षसेश्वरः ॥ १ ॥

बलिना कुम्भकर्णेन निजाज्ञावशवर्तिना ।
स त्रैलोक्यं विनिर्जेतुं लङ्कापुर्य्या विनिर्ययौ ॥ २ ॥

महता राक्षसौघेन धरणीं नमयन् बलात् ।
आत्मगेहाद्विनिर्यातः कृताशीर्ब्राह्मणोत्तमैः ॥ ३ ॥

पुलस्त्यमुख्यैर्मुनिभिः स्वस्तिपुण्याहवाचनम् ।
विधाय राक्षसश्रेष्ठः प्रतस्थौ बलसंवृतः ॥ ४ ॥

सुगुप्तः पुरतः पश्चाच्चमूभिर्वामदक्षयोः ।
मध्ये महाचमूयुक्तः प्रतस्थौ विजीगीषुकः ॥ ५ ॥

सरितः सागरा नद्यः शैलाः काननगह्वराः ।
आच्छादितास्तच्चमूभिर्भीषणाभिः समंततः ॥ ६ ॥

अङ्गान् बङ्गान् कलिङ्गांश्च महाराष्ट्रांश्च केरलान् ।
कर्णाटान् कराहाटांश्च वरहाटान् वराटकान् ॥ ७ ॥

लाटान् भोटान् कुन्तलांश्च द्रविडान् कोंकणांस्तथा ।
त्रिपुरां कामतां चैव कामरूपांस्तथाध्वकान् ॥ ८ ॥

चौहारांश्च चोलदेशांस्त्रिगर्तानर्तकांस्तथा ।
सौराष्ट्रांश्चैव पांड्यांश्च मरून्मुत्कलकांस्तथा ॥ ९ ॥

मलयान् म्लेच्छदेशांश्च गान्धारान् काविलांस्तथा ।
जम्बूं काशीं च काश्मीरान् वाल्हीकान् मगधांस्तथा ॥ १० ॥

कोसलांश्च कुरुंश्चैव तथान्यान् विषयानपि ।
विजित्य वासयामास तत्र तत्र स्वराक्षसान् ॥ ११ ॥

अनतान् नामयामास नतानवचिकाय सः ।
अन्याय समुच्चखानैव नानादेशमहीपतीन् ॥ १२ ॥

तस्मै गजांस्तुरङ्गांश्च वडवा गोवृषांस्तथा ।
दासेरकान् वामिकांश्च स्वर्णभारान् मणींस्तथा ॥ १३ ॥

दासान् दासीश्च युवतीः सुन्दरीर्वरकन्यकाः ।
समादायाग्रतो निन्युर्भूपाला जीवितैषिणः ॥ १४ ॥

यो यश्च विजितो देशस्तत्र तत्र स्वसेवकः ।
राक्षसः स्थापितस्तेन प्रजानां कदनप्रियः ॥ १५ ॥

कदाचिन्नर्मदातीरे पुरीं माहिष्मतीमनुः ।
शिविरं कारयामास जगज्जयमहोर्जितः ॥ १६ ॥

स तत्र देवमाराद्धुं भवान्या दयितं भवम् ।
अतिष्ठन्नर्मदातीरे स्वस्थः सुविहतासनः ॥ १७ ॥

एतस्मिन्नेव काले तु हैहयाधीश्वरो नृपः ।
अष्टादशद्वीपपतिः कृतवीर्यसुतोऽर्जुनः ॥ १८ ॥

सहस्रबाहुर्दीप्तात्मा सम्राट् समरनिर्जयी ।
चिक्रीड नर्मदातोये कुरङ्गाक्षीगणैर्वृतः ॥ १९ ॥

कादम्बरीमदोन्मत्तः स्वच्छन्दविहितोत्सवः ।
अभ्युद्यमाणोऽभ्युक्षंश्च मण्डलेषु मृगीदृशाम् ॥ २० ॥

आनन्दतुन्दिलः श्रीमान् मुक्ताहारविभूषितः ।
विजहार करीवोच्चैः करिणीयूथगो यथा ॥ २१ ॥

रेवां बाहुसहस्रेण संनिरुध्य समास्थितः ।
संयुङ्क्ते च वियुङ्क्ते च तस्याः स्रोतः पयोभरम् ॥ २२ ॥

कौतुकी मदिरोन्मत्तः क्रीडति स्म यथासुखम् ।
संनिरुद्धः प्रवाहोऽस्यास्तस्य बाहुसहस्रशः ॥ २३ ॥

उद्गच्छति स्म बहुशः प्लावयन् पुलिनावनीम् ।
प्रतिकूलवहे चैवं प्रवाहे सरितस्तदा ॥ २४ ॥

प्लावितानि दशास्यस्य शिविराणि समंततः ।
शिवस्य पूजासम्भारः सर्वोऽपि जलसम्प्लुतः ॥ २५ ॥

अवहत्सहसा तत्र पात्राणां प्रचयस्तथा ।
भूषणानि च वस्त्राणि शय्यास्तरणकादयः ॥ २६ ॥

अवहन् जलवेगेन शिवलिङ्गानि च क्षणात् ।
अन्तःपुरपदार्थाश्च पानभोज्यासनादयः ॥ २७ ॥

इत्थं विपन्ने शिविरे चुकोप दशकन्धरः ।
किमिदं कुत एवेति केनेति च वितर्कयन् ॥ २८ ॥
अथास्यानुचराश्चाराः शशंसुः कर्म तस्य तत् ।
सहस्रबाहुवीरस्य क्रीडतो नर्मदाम्भसि ॥ २९ ॥
दोर्दण्डभूरुहै रुद्धं प्रतिकूलवहं पयः ।
निमज्जयामास विभो शिविराणि च सम्भृतीः ॥ ३० ॥

ततश्चातितरां तस्मिंश्चुक्रोधास्यपनायकः ।
हंहो निवार्यतामाशु हैहयोऽयं मदाबिलः ॥ ३१ ॥
अथादाय धनुर्बाणान् बली लङ्काभटोऽब्रवीत् ।
अयि दुश्चेष्ट मुञ्चैनां चेष्टां सोममुताजले ॥ ३२ ॥
मुक्तोऽपराधस्ते रुद्रपूजाविघ्नसमुद्भवः ।
इदानीमपि दुश्चेष्ट चेष्टां मुञ्च मयोदितः ॥ ३३ ॥

एवमुक्तोऽपि तेनासौ कार्तवीर्यार्जुनो बली ।
नाज्ञासीन्मदिरामत्तः कोऽसौ वदति मामिति ॥ ३४ ॥
ततः सदश तीक्ष्णाग्रान् सायकान् मर्मभेदिनः ।
निचखानास्य दोर्मूले राक्षसानां पुरन्दरः ॥ ३५ ॥

नाबुध्यत ततोऽप्येष लग्नान् दंशानिवाङ्गके ।
स्त्रियस्तु कथयामासुः कस्य वाणा इमे प्रभो ॥ ३६ ॥

दृष्ट्वा बाणांस्तनौलग्नानुदास्यः कृतवीर्यजः ।
अपश्यत् पुरतो रक्षः क्रुध्यन्तं दशकन्धरम् ॥ ३७ ॥
तं सम्बोध्य ततोऽवादीदृशास्य क्रोधमूर्च्छितः ।
किं नु गर्वायसेमूढ कृत्वाप्यागः सुदुःसहम् ॥ ३८ ॥
रुणत्सि किं वृथाक्रीड रेवास्रोतो भुजद्रुमैः ।
प्रतिकूलवहैस्तोयैः प्लावितं शिबिरं मम ॥ ३९ ॥

बहुबाहुतया दृप्तः किमेवं क्रीडसेमुधा ।
अपनेष्यामि ते दर्पं तीक्ष्णाग्रैः सायकैरहम् ॥ ४० ॥

इति क्षुद्रवाचालरक्षःप्रयुक्तं वचो मानहीनं निशम्यात्मना सः ।
महायोगिवर्यो मदाघूर्णिताक्षः कथंचिन्मनोविक्रियां नाजगाम ॥ ४१ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे दशास्य-दिग्विजयो नाम पञ्चाधिकशततमोऽध्यायः ॥ १०५ ॥

*

षडधिकशततमोऽध्यायः (२)

ब्रह्मोवाच

ततः स शरवर्षेणच्छादयामास रावणः ।
कार्तवीर्यार्जुनं वीर क्रीडन्तं नर्मदाजले ॥ १ ॥

ते शरास्तस्य वीरस्य क्रीडतः स्वेच्छयाम्भसि ।
अनवाप्य वपुःस्पर्शं निपेतुर्विश्वतो दिशम् ॥ २ ॥

ह्रीणः सोऽमर्षणोऽत्यर्थं बाणवृष्टेः पराभवात् ।
शूलान् परस्वधान् प्रासान् भुशुण्डीस्तोमरानसीन् ॥ ३ ॥

चक्रकुन्तगदादीनि ज्वलन्त्युज्ज्वलतेजसा ।
उच्चावचान्यायुधानि चिक्षेप परया रुषा ॥ ४ ॥

हुङ्कारेणैव तान्येष वारयामास सर्वतः ।
राजराजेश्वरो वीरः कार्तवीर्यार्जुनो बली ॥ ५ ॥

ततः सोऽनितरां क्रुद्धो दृष्ट्वा वितथमुद्यमम् ।
रूपं प्रदर्शयामास सर्वलोकभयानकम् ॥ ६ ॥

ज्वलद्दीपशिखाकारनेत्रविंशकभीषणम् ।
दंष्ट्राकरालवदनं तिर्यग्भ्रुकुटिभासुरम् ॥ ७ ॥

विस्फूर्जदायुधज्वालादुष्प्रेक्षभुजविंशकम् ।
कल्पान्तपावकोद्दीप्तज्वालामालातिदुःसहम् ॥ ८ ॥

विद्युज्जालजटाघोरं महोल्कावृन्दवर्षणम् ।
महोद्धतं महाटोपं गर्जमानं मुहुर्मुहुः ॥ ९ ॥

पादकम्पितपातालं किरीटलिखिताम्बरम् ।
सर्वतो रोदसी व्याप्य संस्थितं भूरिभीषणम् ॥ १० ॥

तस्य तं घोरमाकारं रक्षोमायाविसर्जनम् ।
त्रासनं सर्वजन्तूनां क्रोधसंरम्भदुःसहम् ॥ ११ ॥

निरीक्ष्य वनिताःसर्वा राजराजेश्वरस्य ताः ।
जलक्रीडां परित्यज्य दुद्रुवुः सर्वतोदिशम् ॥ १२ ॥

ससर्ज राक्षसः क्रुद्धः स्वां मायामति भीषणाम् ।
ततो निपेतुर्गगनान्महोल्काः प्रज्वलद्रुचः ॥ १३ ॥

शिलाश्चाविरलाः स्फूर्जद्वह्निज्वालाभयानकाः ।
महाज्वालामया वृक्षाः प्रकाशितदिगम्बराः ॥ १४ ॥

क्षणाच्च तिमिरं घोरं क्षणाच्च विपुलं महः ।
क्षणादङ्गारवृष्टिश्च क्षणादुल्कौघवर्षणम् ॥ १५ ॥

क्षणात्कटकटाशब्दो वज्रसम्पातसूचकः ।
क्षणात्पाषाणवृष्टिश्च क्षणाद्दावमहानलः ॥ १६ ॥

क्षणाच्च विपुलोऽम्भोधिः प्लावयन् सर्वतो महीम् ।
क्षणाच्चण्डानिलो घोरः समुत्पाटितभूधरः ॥ १७ ॥

एवं स राक्षसीं मायां दर्शयन् विश्वभीतिदाम् ।
भीषयामास सकलान् जनान् माहिष्मतीस्थितान् ॥ १८ ॥

अन्तःपुरस्य वनितास्त्रस्ता राक्षसमायया ।
चक्षुषी मीलयामासुर्विलयन्त्यो भयातुराः ॥ १९ ॥

तं जनाः शरणं जग्मुर्वित्रस्ताः पुरवास्तवः ।
महायोगेश्वरं वीरं कार्तवीर्यार्जुनं नृपम् ॥ २० ॥

ऊचुर्भयातुराः सर्वे राक्षस्या मायया भृशम् ।
पीड्यमानाः स्खलच्चित्तविवशा विह्वलाश्च ते ॥ २१ ॥

पाहि राजेश्वरामुष्माद्राक्षसाद्घोरदर्शनात् ।
सृजतो राक्षसीं मायां दृष्टपूर्वां न कर्हिचित् ॥ २२ ॥

पाहि पाहि महायोगिन् हैहयान्वयदीपक ।
अष्टादशद्वीपजगत्येकराजमहाद्युते ॥ २३ ॥

त्रैलोक्यमहनीयस्य सर्वमायामहेशितुः ।
सर्वयोगीन्द्रवर्यस्य का ते मायास्तु मोहिनी ॥ २४ ॥

यस्य स्मरणमात्रेण पलायन्ते सुदूरतः ।
आधयो व्याधयः सर्वे स भवान् पातु नः प्रभो ॥ २५ ॥

सहस्रबाहो विश्वेश कार्तवीर्यार्जुन प्रभो ।
हैहयेन्द्र महायोगिन् रक्ष रक्ष निजान् जनान् ॥ २६ ॥

राजराज महाराज राजराजेश्वरेश्वर ।
सर्वभूम्येकराज त्वं पाहि नः शरणागतान् ॥ २७ ॥

चापैः पञ्चशतैर्वीर बाणैः पञ्चशतैरपि ।
पाहि नो राजराजेन्द्र भजतस्त्वां निरन्तरम् ॥ २८ ॥

वीरेन्द्र विश्ववन्द्याङ्घ्रे विश्वभूतिविधायक ।
विश्वभीतिवितानघ्न त्रायस्वास्मान् भयातुरान् ॥ २९ ॥

सुरक्ताम्बरोष्णीषपुष्पस्रगाढ्यं महारक्तकाश्मीरलिप्ताखिलाङ्गम् ।
लसद्रक्तमाणिक्यसिंहासनस्थं महाराज नित्यं भवन्तं नताः स्मः ॥ ३० ॥

स्फुरद्वारुणीभूमदाघूर्णिताक्षं जगज्जीवकारुण्यसंदोहपूर्णम् ।
नमस्याकृताशेषमायानिवृत्तिं भवन्तं नताः स्मो नताः स्मो नतः स्मः ॥ ३१ ॥

महाराज राजेन्द्र माहिष्मतीश प्रभो कार्तवीर्यार्जुनातीतमृत्यो ।
महावीरवर्येन्द्र योगीन्द्रमौले भव प्राणिनां भीतिसंहारकस्त्वम् ॥ ३२ ॥

न मारीभयं नापि चौरादिभीतिर्न वा रोगकृत्याग्रहारिष्टकष्टम् ।
न दुर्दैवपीड़ा न च प्रेतवाधा तवामुष्य नामग्रहान्मानुषाणाम् ॥ ३३ ॥

महाष्टादशद्वीपसाम्राज्यलक्ष्मीपते हैहयान्वायपाथोधिचन्द्र ।
प्रभो सर्वलोकेशवन्द्यामलङ्घ्रे न हित्वां प्रपन्नाभयं प्राप्नुवन्ति ॥ ३४ ॥

अभयं सर्वभूतानां मङ्गलं सर्वदेहिनाम् ।
प्रशमं सर्वदुष्टानां विभो माहिष्मतीपतिम् ॥ ३५ ॥

ध्यायन् पञ्चशतांश्चापान् स्मरन् पञ्चशतानिषून् ।
अभयं सर्वथा लोकः प्राप्नोति कृपया तव ॥ ३६ ॥

स्मृतमात्रः प्रभो नित्यं त्रायसे सकलं जगत् ।
स कथं प्रकटः साक्षाद्रक्षिष्यति नवै निजान् ॥ ३७ ॥

इति संस्तुवतां तेषां निशम्य कृपणा गिरः ।
प्राबुध्यत महाराजस्तत्क्षणंमदिरामदात् ॥ ३८ ॥

विलोक्य राक्षसं घोरं पुरतो दशकन्धरम् ।
सृजन्तं राक्षसीं मायां प्राणिनामतिभीषणाम् ॥ ३९ ॥

समभिद्रुत्य बलवान् कार्तवीर्यार्जुनो नृपः ।
जग्राह सहसा दोर्भिर्दुष्टं व्यालमिवाहिकः ॥ ४० ॥

स धृतस्तेन बलिना महामायाविना खलः ।
संक्षिप्तसर्वमायोऽभूदभिभूत इव त्विषा ॥ ४१ ॥

सर्वाधिकतमैस्तस्य तेजोभिः कौणपेश्वरः ।
प्रधर्ष्यमाणहृदयस्तत्रास बहुशो धृतः ॥ ४२ ॥

त्वरमाणः स निर्मुक्त्यै बलेन बलिना धृतः ।
अत्यर्थं वितथोद्योगो नाशक्नोत्प्रपलायितुम् ॥ ४३ ॥

ततो बद्ध्वा दृढैः पाशैर्वाचालं राक्षसं खलम् ।
क्षुद्रं निरस्तमायं तमानयत् स्वगृहे द्रुतम् ॥ ४४ ॥

स शपन् बहुधा क्रोधाद् गालीभिः क्षुद्रमानसः ।
वीरेन्द्रेण बलाद्बद्धो नाचलात्पाशजालतः ॥ ४५ ॥

तं पञ्जरान्तः प्रक्षिप्य क्रीडाशकुनिकं यथा ।
अन्तःपुरपुरद्वारि कौतुकार्थमवासयत् ॥ ४६ ॥

वीरस्य हैहयेन्द्रस्य तस्यान्तः पुरयोषितः ।
निर्भर्त्सयास्तं तुदन्ति स्म वाक्शरैरतिकोपनम् ॥ ४७ ॥

अरे त्वं मूढहृदय कथमस्मत्प्रभुंद्विषन् ।
इमामवस्थां यातोऽसिधिक्ते तावत्पराक्रमम् ॥ ४८ ॥

क्व ते बलं च शौर्यं च क्व ते मानो दशानन ।
सहस्रबाहोः पुरतो यो दृप्तो विंशबाहुभिः ॥ ४९ ॥

साधु नः कौतुकार्थं त्वं विनिबद्धोऽसिपञ्जरे ।
दशाननो विंशवाहुर्नेत्राणां विंशतिंवहन् ॥ ५० ॥

काश्चिन्महोद्धता योषास्तस्य चक्षूंषि सर्वतः ।
इषीकाभिस्तुदन्ति स्म पञ्जरस्थस्य निर्गतैः ॥ ५१ ॥

काश्चित्तस्याशनार्थाय कृपोद्रेकेण कातराः ।
मुञ्चन्ति बालकोच्छिष्टान् पर्पटान् शष्कुलीस्तथा ॥ ५२ ॥

काश्चित्तं यावकरसैः पादरञ्जनशेषकैः ।
रञ्जयन्ति स्म वनितास्तूष्णीं भूय परिस्थितम् ॥ ५३ ॥

काश्चित्तमञ्जनैः स्निग्धैर्नेत्ररञ्जनशेषितैः ।
इषीकामुखसंलग्नैर्मेचकं कुर्वते स्त्रियः ॥ ५४ ॥

काश्चिदुद्वर्तनोत्तीर्णैश्चूर्णपिण्डैः सुगन्धिभिः ।
ताडयन्ति स्म सेषेण पूर्वं स्वाम्यपराधिनम् ॥ ५५ ॥

काश्चित्सुगन्धिभिस्तैलैर्मर्दनादवशेषितैः ।
स्ना[1]पयन्त्यस्तमवसं बहुशो हृदि रोषणम् ॥ ५६ ॥

एवं स्वस्वमनोरथोचितममुं दीनं निबद्धं तथा
क्रीड़ापञ्जरमध्यगं सुविवशं लुप्ताभिमानं खलम् ।
शश्वत्केलिरतस्य हैहयपतेरन्तःपुरस्थाः स्त्रियः
स्तैस्तैः कर्मभिरत्यरुन्तुदतमैर्भूयस्तुदन्ति स्म तम् ॥ ५७ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे रावणनिग्रहो नाम षडाधिकशततमोऽध्यायः ॥१०६॥

*

सप्ताधिकशततमोऽध्यायः

ब्रह्मोवाच

कुम्भकर्णादयस्तस्य भ्रातरः प्रियकारकाः ।
रक्षोबलं समादाय लङ्कां जग्मुः पराजिताः ॥ १ ॥

निधायान्तःपुरं तस्य भूयो मन्दोदरीमुखम् ।
अगमन् राक्षसवराः पुलस्त्यस्याश्रमं तदा ॥ २ ॥

---

१. अस्नापयंस्त० । मथु० ।

कुम्भकर्णः खरश्चैव विद्युज्जिह्वश्च दूषणः ।
त्रिशिराः सर्व एवैते राक्षसप्रवरा मुनेः ॥ ३ ॥

वृत्तं निवेदयामासुर्माहिष्मत्यां बभूव यत् ।
क्रीडनं कार्तवीर्यस्य रेवायाश्च परागतिम् ॥ ४ ॥

शिविरस्याप्लवं चैव क्रोधं लङ्कापतेस्तथा ।
युद्धं च कार्तवीर्येण वितथोद्योगतां तथा ॥ ५ ॥

बन्धनं च तथा तस्य दशवक्त्रस्य मायिनः ।
तेन मायापहारं च बलिनाशतबाहुना ॥ ६ ॥

बद्ध्वा च नयनं तस्य पुरीं माहिष्मतीं प्रति ।
ततः परं च स्वाज्ञानं शुभं वा यदि वाशुभम् ॥ ७ ॥

स्वस्य लङ्कागमं चैव माहिष्मत्याः पलाय्य हि ।
एतत्सर्वं मुनीन्द्राय ज्ञापयामासुरञ्जसा ॥ ८ ॥

तच्छ्रुत्वा मुनिशार्दूलः कार्तवीर्यप्रभाववित् ।
शुशोच मनसा वीरः स्वानां प्रियचिकीर्षया ॥ ९ ॥

विसृज्य कुम्भकर्णादीन् राक्षसप्रवरांस्तदा ।
जगाम तरसा योगी पुरीं माहिष्मतीं प्रति ॥ १० ॥

तमागतमभिप्रेत्य हैहयेन्द्रो जगत्पतिः ।
सपर्ययातिभूयस्या जग्राह परमादृतः ॥ ११ ॥

पूजितः कार्तवीर्येण नरेन्द्रेण महामुनिः ।
स्वस्थः शुभासनगतः शुशुभे ब्रह्मतेजसा ॥ १२ ॥

स तस्य पुरतो भक्त्या बद्धाञ्जलिपुटो नृपः ।
विनयावनतस्कन्ध उवाचेदमुदारधीः ॥ १३ ॥

अहो भाग्यं गृहिणां देहिनां नो धर्माधर्मक्लेशसंतापभाजाम् ।
येषां शिरः पुनते युष्मदङ्घ्रिद्वयावनिज्याप्रभवास्तीर्थधाराः ॥ १४ ॥

तपोमया ज्ञानमया विशुद्धास्तेजोमयाः सत्यमयास्त्रयीमयाः ।
मेधामयाः पुण्यमया विशुद्धसत्वप्रकाशैकमयाश्च यूयम् ॥ १५ ॥

आत्मानमाध्यायथ सत्त्ववृद्ध्या विवृद्धविज्ञानदृशानुभूत्या ।
अजस्रमानन्दमवाप्य पूर्णं तृप्ताश्च यूयं विगताशेषकामाः ॥ १६ ॥

तथापि यद्गृहमेधीयधर्मानुष्ठातृणां चक्षुषोर्गोचरत्वम् ।
प्रयाथ तत्तावदहो अमीषां भाग्यातिरेकेण दुरापदर्शनाः ॥ १७ ॥

अहं गमिष्यामि भवत्प्रसंगाद् ब्रह्मन् भवे सद्यशोभाजनत्वम् ।
संचारचक्रभ्रमणं तथोच्चैरद्यैव साफल्यमुपागतं मे ॥ १८ ॥

दृशानया ज्ञानविज्ञानमप्या माङ्गल्यया मानुग्रहाणविद्वन् ।
यथाखिलं स्थूल सूक्ष्मात्मकं वो विभाति हस्तामलकोपमानम् ॥ १९ ॥

शुभप्रदेनैहिकामुष्मिकार्थेद्वयेऽपि हस्तेन निजेन नित्यम् ।
मन्त्राम्भसां पृषतैः पावनेन स्पृश ब्रह्मन् शासनीयस्य कं मे ।। २० ।।

कृतार्थितोऽहं भवताद्य दर्शनप्रदानकल्याणगणाकरेण ।
ममौक आयातवता वताद्य प्रत्यूहरोगाद्युपसर्गराशेः ।। २१ ।।

युञ्जान आत्यन्तिकमात्मयोगं यद्यन्तरायैरुपहन्यते जनः ।
तदापि वः पादरजोऽभिषेकात्कल्याणमासादयतेऽस्तविघ्नः ।। २२ ।।

अथो यदृच्छाकरुणात्मनां वः पृच्छामि किं चागमनप्रयोजनम् ।
न वै परानन्दनशीलभाजां हिमांशुपाथोदसतां निजोऽर्थः ।। २३ ।।

इत्युदीर्य स्थिते मौने राजराजेश्वरे मुनिः ।
उवाच करुणार्द्राक्षः परोपकृतिबान्धवः ।। २४ ।।

पुलस्त्य उवाच

अहो निसर्गान्मधुरोऽसि राजन् कःस्विन्न लोकेषु दिदृक्षति त्वाम् ।
महानुभावं महनीयकीर्तिं महामहोध्वस्तजगत्तमिस्रम् ।। २५ ।।

कालात्मकं यत्प्रवदन्ति विष्णोः सुदर्शनं नाम महस्विचक्रम् ।
अशेषदैत्योघचमूविनाशं तदेव साक्षात्त्वमसीह जाग्रत् ।। २६ ।।

सहस्रमारा व्यति भान्तिराजन् दोष्णां सहस्रेण तवोग्रवीर्य ।
श्रीकार्तवीर्यार्जुन भूरिबाहो त्वं रक्षणायासि भवेऽवतीर्णः ।। २७ ।।

न त्वां विजानन्ति भवे मनुष्या ये संततं चर्मदृशोऽल्पमेधसः ।
येऽध्यात्मनिष्ठा धिषणाविशुद्धास्ते त्वां प्रविज्ञाय नमन्तिनित्यम् ।। २८ ।।

प्रादुर्भवस्यात्मविचिन्तनक्षणे नृणामभद्रक्षयकारिदर्शनः ।
विनाशयस्यग्रमधर्ममग्रतस्ततश्च पुष्णासि सुधर्ममात्मना ।। २९ ।।

धन्यं कुलं हैहयभूमिपाना माहिष्मती धन्यतमा पुरीयम् ।
जयन्तिधन्यास्तव दर्शनामृतप्रमोदभाजो मनुजा इहस्थाः ।। ३० ।।

त्वयात्मना हैहयवंशदीपेनाष्टादशद्वीपवती महीयम् ।
प्रकाशिता नित्यमधर्मकष्टशोकोपसर्गादितमोनिरस्य ।। ३१ ।।

यद्दर्शनं तेऽखिलजन्मभाजां सुमङ्गलं मोहतमोऽपहन्तृ ।
तत्काम एवाहमिहोपयातः कस्य प्रियो नासि महामहौजः ।। ३२ ।।

अथापि मेऽत्रागमनप्रयोजनं तवाभिधास्ये नृपवंशभूषण ।
निशम्य तत्प्रार्थितकल्पपादपो भवानवश्यं प्रविधातुमर्हति ।। ३३ ।।

राजोवाच

भगवन् भवतो वाक्यात्किमन्यत् प्रतिपादये ।
शिरोऽपि तव पादाब्जे निवेदितमिदं मया ।। ३४ ।।

पुलस्त्य उवाच

शिरस्ते भ्राजतां राजन्नेकच्छत्रधरं भुवि ।
भुङ्क्त्वायुरमितंशश्वदमितायुतवत्सरान् ॥ ३५ ॥

किन्त्वसावविनीतात्मा पौत्रो मे दशकन्धरः ।
जीवन् प्रदीयतां मह्यं भवतोदारपाणिना ॥ ३६ ॥

असौस्वात्मापराधेन प्राप्तः कष्टमिमां दशाम् ।
भवता शिक्षितोराजन् पुनर्नैकं करिष्यति ॥ ३७ ॥

इत्युक्तो राजराजेन्द्रो मुनिना सौम्यचक्षुषा ।
शालीननयनो भृत्यैर्दशाननममोचयत् ॥ ३८ ॥

भूयस्तदागःशान्त्यर्थं मुनीन्द्रं समपूजयत् ।
रावणं चास्य पौत्रत्वात्प्रविज्ञायाभ्यमानयत् ॥ ३९ ॥

संस्नाप्य पटभूषाद्यैराभूष्य च दशाननम् ।
श्रीमान्निवेदयामास मुनये स्वस्तिभाषिणे ॥ ४० ॥

इत्थं गतः स्वस्थ सुदुर्नयेन कष्टं दशास्यः स्खलिताभिमानः ।
मुनेः पुलस्त्यस्य गिरा नृपेण सभाजयित्वा सहसा विमुक्तः ॥ ४१ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे रावणमोचनं नाम सप्ताधिकशततमोऽध्यायः ॥ १०७ ॥

*

अष्टाधिकशततमोऽध्यायः

ब्रह्मोवाच

लङ्कां गच्छन् कौणपेन्द्रः संगतो मुनिना सह ।
विषण्णः स्वापमानेन महामानीदमूचिवान् ॥ १ ॥

धिङ्मे तपोबलं शौर्यं धिङ्मानं धिक्पराक्रमम् ।
बलान्निबध्य शुकवत्पञ्जरे यो निपातितः ॥ २ ॥

नाहं लङ्कां गमिष्यामि हृतमानो हृतोद्धतिः ।
किं तस्य जीवितं पुंसो यो जीवेन्मानवर्जितः ॥ ३ ॥

किं मुखं दर्शयिष्यामि राक्षसानां सुदुःखितः ।
तप एव करिष्येऽहं भग्नमानमदोऽधुना ॥ ४ ॥

यैर्दृष्टोऽहं तथा युद्धे हैहयेन पराजितः ।
निबध्य पाशैः सुदृढैर्नीयमानो निजां पुरीम् ॥ ५ ॥

तेषां पुरोऽहमास्फाल्य दोर्दण्डान् वितथोद्भवान् ।
किं नु गर्वापितेदानीमधिक्षिप्य सुरासुरान् ॥ ६ ॥

अधो विधाय तान् सर्वान् स्वर्णसिंहासनस्थितः ।
किं नु राज्यमदप्रौढिं वोढेदानीमहं पुरे ॥ ७ ॥

अपि योगीन्द्र भगवन् प्रजास्ते वयमीदृशीम् ।
दुर्गतिं तात यत्प्राप्तास्तत्तवापिह्यनौचिती ॥ ८ ॥

अतोऽहंमानभङ्गेन विषण्णहृदयोऽधुना ।
आराधयिष्ये गिरिशं प्रवेक्ष्ये वा हुताशनम् ॥ ९ ॥

धिग्जनुस्तस्य लोकस्य स्वानां यः पुरतोऽरिणा ।
ईदृक् पराभवं प्राप्तोऽप्यसून्मुञ्चति न द्रुतम् ॥ १० ॥

किं करोमि न मे प्राणा निर्यान्ति वपुषो बहिः ।
ईदृक् पराभवंप्राप्ता अधुनापि जिजीविषा ॥ ११ ॥

इत्थं भृशं विषीदन्तं लङ्केशं दशकन्धरम् ।
उवाच करुणायुक्तः पुलस्त्यो मुनिपुङ्गवः ॥ १२ ॥

मा विषीदतमां चित्ते राक्षसेन्द्र महाबल ।
जीवंल्लोकेषु विपुलां ख्याति त्वं समवाप्स्यसि ॥ १३ ॥

स हि राजा महाबाहुश्चक्रावतरणं हरेः ।
सहस्रबाहुर्द्रष्टव्यो न सामान्यधिया त्वया ॥ १४ ॥

यस्य वीर्यं बलं चैव सदापरिमितं भवे ।
यः साक्षाद्विदितः शिष्य आत्रेयस्य महामुनेः ॥ १५ ॥

येनाष्टादशद्वीपाढ्या मही करतले कृता ।
स्मृतिमात्रेणा यः पुंसां धर्माधर्मविवेचकः ॥ १६ ॥

न तेन स्पर्द्धितुं योग्यः कोऽपि लोके चराचरे ।
प्रसाददृष्टिं वाञ्छन्ति तस्य सर्वोऽपि संततम् ॥ १७ ॥

रममाणः स महिषीयूथेन विधुजाम्भसि ।
व्यर्थं प्रक्षोभितो वत्स भवताविदितौजसा ॥ १८ ॥

स्वयमेव समाधत्स्व हृदयं स्वं महाभुज ।
अथो तपस्व विपुलं तपः स्वोत्कर्षसिद्धये ॥ १९ ॥

मया चापि प्रदत्तस्ते वरः सामान्यभूतिकृत् ।
आराध्य भूयो भूतेशं लभस्वाभीष्टमात्मनः ॥ २० ॥

सद्यस्ते वरदोभूयात्पिनाकी गिरिजापतिः ।
लभस्व चासमां भूतिं तत आराधिताद्विभो ॥ २१ ॥

विमनायितव्यं ते नैव न च कार्या विरागिता ।
भव भूष्णुर्भविकवनुद्युञ्जीत विशेषतः ॥ २२ ॥

इत्थं समाहितस्तेन पुलस्त्येन सयोगिना ।
अतीवामर्षयुक्तोऽपि प्रशान्तिमगमत् खलः ॥ २३ ॥

मध्येमार्गं विसृज्यासौ मुनीन्द्रं स्वाश्रमं प्रति ।
कैलासमगमद्घोर आरिराधयिषुः शिवम् ॥ २४ ॥

अतुल्यतेजा भवितुं भवेऽस्मिन् दशाननो घोरतपश्चिकीर्षुः ।
कपालिनोऽभ्याशमगात्तमोऽधो नितान्तमाराधयितुं तमीशम् ॥ २५ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे रावणकृतोदग्रमो-
नामाष्टाधिकशततमोऽध्यायः ॥ १०८ ॥

*

नवाधिकशततमोऽध्यायः

ब्रह्मोवाच

आराध्नन् गिरिशं देवं राक्षसो विश्वभीषणः ।
उवास सुचिरं तत्र कैलासे सुमनोहरे ॥ १ ॥

भक्त्या दिवानिशं शम्भोः परिचर्यामुपाश्रितः ।
दृप्तो बाहुबलोद्रेकादिदं स चकमेतराम् ॥ २ ॥

उत्पाट्य कैलासगिरिं बलेन श्रीपार्वतीशेन समन्वितं चेत् ।
प्रसह्य लङ्कानगरीं नयामि तदा भवे मत्प्रतिमस्तु कः स्यात् ॥ ३ ॥

अवधार्य हृदात्यर्थमित्थं स दशकन्धरः ।
उत्पाटयामास गिरेः शृङ्गं कामार्यधिष्ठितम् ॥ ४ ॥

तस्य चोत्पाट्यमानस्य निःस्वन सुमहानभूत् ।
यथा वितत्रसुः सर्वे गणा ये प्रमथादयः ॥ ५ ॥

पार्वती गिरिनिर्भङ्गभीषणध्वनिभीषिता ।
आलिलिङ्गे जवाद्वक्षः शङ्करस्य भयापहम् ॥ ६ ॥

स्रवद्धातु पतद्ग्राव वहन्निर्झरवारि तत् ।
दोर्भिरुत्पाट्य शैलस्य निनाय शिखरोत्तमम् ॥ ७ ॥

नभःपथेन वीरेन्द्रो वहन् धरणि भृद्धरम् ।
जगाम तरसा लङ्कामनिरुद्धमनोरथः ॥ ८ ॥

स आत्ममन्दिरे सम्यग् रुद्रावासं महीधरम् ।
स्थापयामास सततं भक्त्या परिचरन् मुहुः ॥ ९ ॥

ततः स उद्धततमो महामानी महामनाः ।
विजिगीषुर्जगत् सर्वमकामयत चेतसा ॥ १० ॥
कथं नु ब्रह्मभवनाज्जित्वा ब्रह्माणमात्मना ।
आबध्य तरसा पाशैर्नयामि विनयामि च ॥ ११ ॥
आछिद्य वाहनं तस्य हंसयुग्मं मनोरमम् ।
गृह्णीय स्वस्य सुचिरं वाहनीकर्तुमञ्जसा ॥ १२ ॥
अथो कथं नु साध्यानां वसूनां वरुणस्य च ।
इन्द्रस्याग्नेर्यमस्यापि निर्ऋतेर्मरुतां तथा ॥ १३ ॥
आदित्यानां तारकाणां विश्वेषां सोमसूर्ययोः ।
जित्वा लोकानहं सद्यः स्वात्मसात्करवैक्षणात् ॥ १४ ॥
अन्येषां चापि देवानामधिकारांस्तथा गृहान् ।
विभूतीश्च क्षणाज्जित्वा कथं नु वशयाम्यहम् ॥ १५ ॥
सर्वे देवाश्च नागाश्च यावत्परिचरन्ति नो ।
मामशेषजगन्नाथं तावत्तुष्याम्यहं कथम् ॥ १६ ॥
शशी मां कोमलैरंशुसंदोहैः संततं निशि ।
चन्दनालेपमङ्गेषु दधातु प्रीणयत्वपि ॥ १७ ॥
सूर्योऽतिमृदुलैस्तावत् करैस्तपतु वासरे ।
यावन्निशाहिमकणान् हरेद्बर्ष्मणि मामके ॥ १८ ॥
मरुतस्तालपत्रेषु समाविश्य त्रिधा सुखम् ।
वितन्वन्तु मयि श्रान्ते रतिखेदेन रात्रिषु ॥ १९ ॥
इन्द्रो मत्परिचर्यायामिन्द्राण्या सह तत्परः ।
अस्तु स्नानासनालेपपानभोजनकर्मसु ॥ २० ॥
वरुणो मम पानीयहारी भवतु संततम् ।
वाक्पतिस्त्रिदशाचार्यो वन्दीव स्तौतु मां सदा ॥ २१ ॥
ब्रह्मा मम स्वस्त्ययनं कल्पयत्वनिशं पठन् ।
ऋग्यजुःसाममन्त्रौघान् सुस्वरं हृदि रोचनम् ॥ २२ ॥
अथो विष्णुमहं द्वेष्मि मम पूर्वविरोधितम् ।
तन्मूलश्चापि यो धर्मस्तमहं छेदयामि च ॥ २३ ॥
सत्त्वेन किं मया कार्यं सत्त्वं लिङ्गे हि वैष्णवम् ।
रजस्तमोभ्यां मे स्वार्थस्तामसो राजसो भवे ॥ २४ ॥
शम्भुमाराध्य सततं कायेन मनसा गिरा ।
अनन्यसामान्यसुखो भवेयं त्रिजगत्पतिः ॥ २५ ॥
चिकीर्षितमिदं नित्यं यन्मे मनसिवर्तते ।
तत्पूरयितुमीशोऽयं शम्भुरेव महेश्वरः ॥ २६ ॥

इति मनसि निधाय मन्त्रमेष स्मरहरभक्तिकलाभ्युपेतचेताः ।
रथमतुलमयुङ्क्त विश्वजैत्रं दशवदनो बलवान् निशाचरेन्द्रः ॥ २७ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे रावणमन्त्रो नाम नवाधिकशततमोऽयायः ॥१०९॥

*

दशाधिकशततमोऽध्यायः

ब्रह्मोवाच

तस्यासीत्तनयो घोरो मेघनाद इति श्रुतः ।
जातमात्रस्तु योऽरावीन्मेघवद्विपुलस्वरम् ॥ १ ॥

स क्रमेण बलोद्रिक्तौ वर्द्धमानो दिने दिने ।
राक्षसेन्द्रस्य भवनं भूषयामास तेजसा ॥ २ ॥

शेषस्य तनयां साध्वीं महीन्द्रस्य मनस्विनीम् ।
सुलोचनां नाम बलादुपयेमे स ऊर्जितः ॥ ३ ॥

स राक्षससुतैर्घोरैर्बलिभिर्विक्रमोर्जितः ।
पुरस्तात्पितुरासीन इदमूचे विनोतवत् ॥ ४ ॥

तात त्वमितिचित्तेन सचिन्त इव लक्ष्यसे ।
तस्य मे कारणं ब्रूहि का चिन्ता मयि जाग्रति ॥ ५ ॥

तमाह राक्षसाधीशो वत्स त्वं किमु वेत्स्यसि ।
चिन्तामूलमगाधं मे मनोरथवलन्मतेः ॥ ६ ॥

अहं हि प्रथमं देवान् स्वस्वविष्टपवर्तिनः ।
जिगीषुरश्मि विपुलामाजिहीर्षुश्च तच्छ्रियम् ॥ ७ ॥

स एव पुरुषोलोके मात्रा समजनि स्फुटम् ।
यस्य ख्यातिः परा पूर्वान् परांश्चाप्यतिवर्तते ॥ ८ ॥

यत्कीर्तिर्ब्रह्मभवने राजहंसायते सदा ।
महेन्द्रभवने चापि स्वर्गङ्गेव विराजते ॥ ९ ॥

यं भवे वर्तमानं च जानन्त्युत्कर्षभाजनम् ।
यस्याज्ञा विधिशक्रादिशिरोमाला बलम्बिनी ॥ १० ॥

स एव जातो जगति जनानां मध्यगोचरः ।
न चेत्कृमिप्रसूः किं नु कृमिं जनयते बत ॥ ११ ॥

को विशेषोऽत्र जगति कृमिपुंसोः प्रसूतयोः ।
ख्यातिर्वर्जितयोर्लोके वृथोदरभृतोरपि ।। १२ ।।

अतः पराक्रमं पुत्र कृत्वा त्वं विदितो भव ।
लोकेऽस्मिन् कालवशः को न जातो न जनिष्यते ।। १३ ।।

येषां नामानि लोकेऽस्मिन् गीयन्ते कविसत्तमैः ।
त एव माया जनिता जना जाग्रति भूतले ।। १४ ।।

इति पितुर्वचनं विनिशम्य स प्रकृतितीक्ष्णमहोद्धतमानसः ।
अवददद्भुतवाक्पटुतानिधिः पितरमानतमर्त्यसुरासुरम् ।। १५ ।।

यदात्थ तत्तथैवेह विक्रमेणैव लभ्यते ।
कीर्तिःसुरासुरनरमौलिमालावलम्बिनी ।। १६ ।।

दैवं चेदनुकूलं स्यात्साधयेत् सर्वमेव तत् ।
महतां कुलजो विद्वान् स्वकुलोचितमूर्जितः ।। १७ ।।

इत्युक्त्वा राक्षसवरकुमारैः सहितोबली ।
सभामण्डपतः सद्य उत्तस्थौ कुटिलाशयः ।। १८ ।।

नत्वा पितुः स चरणौ तद्दत्तं वीटकंकरे ।
समादाय महावीरः स्वात्मनः सदनं ययौ ।। १९ ।।

यस्मिन् सुलोचनादेवी शेषनागेन्द्रकन्यका ।
सखीसमाजमध्यस्था भासयत्यखिलादिशः ।। २० ।।

तद्गृहं पानभोज्यादिसर्वसम्भारसम्भृतम् ।
उपेत्य राक्षसाधीशतनयो नारमत्तमाम् ।। २१ ।।

शोकचिन्तासमाविष्टो न क्रीडति न भाषते ।
पित्रोक्तं वचनं चित्ते संस्मरन् विक्रमस्पृहः ।। २२ ।।

तं तथा शोकसंवीतं दृष्ट्वा देवी सुलोचना ।
उवाच सादरं सम्यक् सम्पूज्य प्रश्रयान्विता ।। २३ ।।

[1]**सुलोचनोवाच**

रक्षोऽधिनाथस्य दशाननस्य त्रैलोक्यनाथस्य महाविभूतेः ।
भवान् कुमारोऽप्रतिमः प्रसिद्धैः पराक्रमैश्चापधृगद्वितीयः ।। २४ ।।

विभूतयोया नरकिंनराणां पुलोमजेशस्य सुरासुराणाम् ।
भुजङ्गमानां च दिगीश्वराणां लोकेश्वराणां च धरापतीनाम् ।। २५ ।।

तास्ते गृहे भवितुं नाथ योग्या भवन्ति चैवाप्रतिमाः श्रियस्ते ।
न कंचनोत्कृष्टगुणं भवन्तः प्रत्येमि लङ्कावनिनाथसूनो ।। २६ ।।

---

१. राज्ञी सु० रीवाँ ।

भवान् यदाऽऽस्फाल्य रणे स्वचापं पयोदसंघट्टगभीरघोषम् ।
विमुञ्चसीद्धा शरघोरवर्षां तदास्तु कः सम्मुखदेशवर्ती ॥ २७ ॥

द्रष्टुं च शक्नोतु भवन्तमारात् कःस्वित्पुमान् लब्धवरोऽपि नाथ ।
सुरासुरानीकधुरन्धराणां ह्रसन्ति वीर्याणि तवेक्षणाद्यत् ॥ २८ ॥

गर्जन् समुच्चारितसिंहनादं पिता तवायोधनगो दशास्यः ।
परान् जयत्यायुधपातलक्ष्यमन्वेषयानो नितरां त्रिलोक्याम् ॥ २९ ॥

भवानपि स्फूर्जति नाथ युद्धे दोर्विक्रमाकृष्टजगद्विभूतिः ।
विभीषयन् मार्गणचण्डवृष्ट्या मनांसि देवासुरपुङ्गवानाम् ॥ ३० ॥

रक्षोबलैरेव जगत्यधीशास्तातेन तेऽद्धा करदीकृतास्ते ।
येषां पदाब्जे बत रञ्जयन्ति भूपाः किरीटाग्रमणिप्रकाशैः ॥ ३१ ॥

आज्ञैव नूनं भवता प्रतीच्या तातस्य कर्हि प्रभुतालसस्य ।
क्रूरभ्रुवा चेतसिलक्षितस्य विनिर्जये कस्यचिदासुरेश ॥ ३२ ॥

अतोऽनुशोचामि तवापि शोके किं कारणं सिद्धवरायुधस्य ।
किं कश्चिदास्ते जगतीह्वीरो विनिर्जयं काङ्क्षसि यस्य युद्धे ॥ ३३ ॥

अद्या प्रभो कौणपचक्रवर्तिचूडामणेः सद्मनिदुर्लभं किम् ।
यच्चिन्तनेनात्तविशालतर्षो भवान् विमुह्यत्यसकृत्सुभूते ॥ ३४ ॥

मृगीदृशो मामनुदेवनागगन्धर्वविद्याधरवर्यकन्याः ।
त्वयैव सख्यं स्पृहयन्तिचित्ते ननु त्रिलोक्यामसमोद्धुर्ववीर्य ॥ ३५ ॥

वैयात्यमेतदपि नाथ मम स्वभावात्लोल्लात्मनः स्त्रिय उदन्तवरानुयोगे ।
यत्तादृशस्त्रिजगतामधिपालकस्य रक्षःपतेर्गृहकथा ननु केन तर्क्या ॥ ३६ ॥

भूर्युत्कर्षोऽसिभूतेः पदि पदि च भवन् भूय एवासि भूष्णु-
स्त्रैलोक्ये ख्यातिभाजायसि किमपि भवान् मौलिहीरः कुमार ॥

दुस्तर्क्यं नामवृत्तं तवपितुरथवा यत्तवैवापितत् किं ।
मत्तोऽपि स्त्रीस्वभावाच्चपललघुमतेर्लक्ष्यते गोपनीयम् ॥ ३७ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे सुलोचनाप्रश्नो नाम दशाधिकशततमोऽध्यायः ॥११०॥

*

एकादशाधिकशततमोऽध्यायः

ब्रह्मोवाच

श्रुत्वा सुलोचना वाक्यमुवाच वदतां वरः।
रक्षःपतेः सुतो वीरो मेघनादो जिगीषुकः॥ १॥

अलं मृषाप्रशंसाभिर्मम नागपतेः सुते।
क्व नु मे विक्रमो लोके भवत्या लक्षितः प्रिये॥ २॥

को न प्रियजनैस्तन्वि स्वगृहेषु प्रशस्यते।
विगुणेऽपि गुणा भान्ति प्रियत्वं चैतदेव हि॥ ३॥

इदानीमपि लोलाक्षि न मे सार्थकतां ययौ।
अन्यत्र परिरम्भात्ते पीतं दोर्दण्डयोर्युगम्॥ ४॥

पटवासैरिव श्लोकैर्मम दिक्चक्रचुम्बिभिः।
संसदो वीरवर्याणां कदा नु सुरभीकृताः॥ ५॥

दिक्कुम्भिकुम्भतटभूमदजम्बालशोषणः।
क्व मे ज्वलति लोकेषु प्रतापाह्वो धनञ्जयः॥ ६॥

कदा नु मद्रथोद्घोषः कल्पान्तघनघर्घरः।
वित्रस्तानां सुरस्त्रीणां कर्णेष्वतिथितां गतः॥ ७॥

मम शङ्खध्वनिस्तन्वि परिरब्धेशवक्षसाम्।
निर्जरीणां कर्णपुटैरार्कर्णित उदित्वरः॥ ८॥

गत्वा स्वर्गपुरोपान्ते धनुर्ज्या घोरराविणी।
कदाखलु कुरङ्गाक्षि दृढमास्फालिता मया॥ ९॥

पलायन्त्याः सुरान् हित्वा कवरीव सुरश्रियः।
कदासि लतिका युद्धेष्वाकृष्टा मयका प्रिये॥ १०॥

व्यर्थं किं स्तौषि पद्माक्षि रतिमात्रसुखप्रदम्।
मामुद्धरमहावीरशिरोनत्यभिलाषुकम्॥ ११॥

अद्य खल्वधिकख्यातेः पितुः संसदि वृत्तिमान्।
समश्रौषमहं वाचं दशास्याब्जवनालितीम्॥ १२॥

को न कुक्षिभरिर्लोके स्वपिति स्वस्थवन्निशि।
विरलः खलु यो दोर्भ्यां समुत्खातारिशल्यकः॥ १३॥

अनुत्सादितहृच्छल्यभूतभूरिद्विषद्बलः।
क आप्नोतु निशि स्वापं वीरमानी सचेतनः॥ १४॥

एतदेवायुषोनाम साफल्यं हरिणेक्षणे।
यद्द्विषन्मौलिरत्नानि लुठेयुः पादपीठयोः॥ १५॥

वनितायूथमध्येषु गुणानुल्लपतां नृणाम् ।
अपराभूतवीराणां को विशेषो मृगीपतेः ।। १६ ।।

अहं निजबलोद्रेकादुच्छूनं दोर्युगं दधत् ।
अमर्षित इवात्यर्थमद्य तातेन संसदि ।। १७ ।।

सोऽहं परानिर्जित्य यदि वर्तेय तृप्तवत् ।
संकुत्सनीयस्तत्पित्रा त्रिजगज्जयमिच्छता ।। १८ ।।

जगज्जयमहोत्तर्षः क मे तातो दशाननः ।
क चाहं सुस्थितं मन्यो रतिप्रीत्या मृगीदृशाम् ।। १९ ।।

शोभते तस्य भोगोऽपि यूथेषु हरिणीदृशाम् ।
येन बोभुज्यते लक्ष्मीः शत्रुमण्डलगामिनी ।। २० ।।

लुण्ठितारिपुरश्रीभ्यां भुजाभ्यां परिरम्भणम् ।
अत्यर्थं रोचते मह्यं मानिन्या हरिणीदृशः ।। २१ ।।

यस्य पुत्रः पराभूय परानायाति मन्दिरे ।
स पुमान् स्वस्थवच्छेते जातवंशधुरन्धरः ।। २२ ।।

सोऽहं परान् पराभूय त्रिजगद्गर्भवर्तिनः ।
कदा रञ्जयितास्म्यङ्घ्री पितुर्मौलिमणित्विषा ।। २३ ।।

इत्थमेवानुशोचामि दिवारात्रमहं प्रिये ।
ज्येष्ठः खलु दशास्यस्य तनयो वीरमानिनः ।। २४ ।।

ब्रह्मोवाच

एवं वदन्तमेवामुं वीरमानिनमुद्धतम् ।
सुलोचनायाः सख्येका वाक्यमेतदवोचत ।। २५ ।।

सत्यं वदसि हे कान्त त्वं हि रक्षोमहेशितुः ।
कुमारः कुलधौरेयो वोढुं सर्वंभरं क्षमः ।। २६ ।।

किं त्वेषैव तव प्रेष्ठ त्रिजगद्विजयेन्दिरा ।
मत्सखी वीरपतिका वीरसूर्वीरसुस्नुषा ।। २७ ।।

नितम्बरथयोगिनी कुचतुरङ्गयुग्मोद्धुरा
स्मितद्युतिकृपाणिनी तनुरुचिव्रजानीकिनी ।
चलद्भ्रुकुटिचापिनी नयनतूणवीक्षाशरा
गतिद्विरदशालिनी सुवसनाञ्चलोद्यद्ध्वजा ।। २८ ।।

निरस्तशिशुताबला तरुणिमप्रतापोन्नति
निखाततनुरोमराजि जयसूचकस्तम्भिनी ।
इयं सुभगमत्सखीभुवनजैत्रलक्ष्मीरिव
क्षणक्षणसुखप्रदा भवतु ते सदैव स्थिरा ।। २९ ।।

इत्थमुत्साह्यमानोऽसौ प्रियभार्यावयस्यया ।
अरीरमत सानन्दं मेघनादो महामनाः ॥ ३० ॥

स्थितः पयःफेनसमूहशुभ्रेवरोपधाने मृदुचारुतल्पे ।
निनाय रात्रिं स सुलोचनाया मुहुः परीरम्भसुखाब्धिमग्नः ॥ ३१ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे मेघनादप्रहर्षणो नामैकादशाधिकशततमोऽध्यायः ॥१११॥

*

द्वादशाधिकशततमोऽध्यायः

ब्रह्मोवाच

तस्यां निशि व्यतीतायां नागकन्या सुलोचना ।
भार्या रक्षःकुमारस्य सस्मार जनकं निजम् ॥ १ ॥

स तत्स्मृतिक्षणे साक्षात् प्रादुरासीदहीश्वरः ।
देवः शेषमहानागः स्वप्रजाशुभवाञ्छकः ॥ २ ॥

योषापुरं राक्षसराजसूनोर्विभूषयन् स्वेन निजेन तेजसा ।
अहीश्वरः सन्मुनिवेशधारी जटाधरः पिङ्गलभास्विलोचनाः ॥ ३ ॥

आजगाम स्वकन्यायाः पार्श्वं भूरिवरप्रदः ।
अनिमेषदृगत्यर्थमानन्दपरिवर्द्धनः ॥ ४ ॥

तमागतमभिप्रेक्ष्य साक्षात्स्वजनकं सती ।
सहर्षविनयोत्कण्ठमुपतस्थौ सुलोचना ॥ ५ ॥

सम्पूज्य सादरं पञ्चात्पाद्यार्घाचमनादिभिः ।
शुभमासनमास्तोर्य भेजे तं प्रश्रयादिभिः ॥ ६ ॥

तामुवाचैष वात्सल्यादुद्भूतपुलकाङ्कुरः ।
चिरादृष्टासि पुत्रि त्वं कच्चित्ते सर्वतः सुखम् ॥ ७ ॥

असि त्वं सुखिनी गेहे कच्चित्स्वजनबन्धुभिः ।
कच्चिदाज्ञाप्रतिहता तव स्वजनबन्धुषु ॥ ८ ॥

कच्चित्ते हृदयं वत्से रमते स्वजनादिषु ।
कच्चित्तवाभिलषितं पूरयत्यस्त्रयेश्वरः ॥ ९ ॥

कच्चित्ते श्वसुरो वीरस्त्रैलोक्यविजयी बली ।
जगज्जयोपलब्धैस्त्वामभीष्टैस्तोषयत्युत ॥ १० ॥

कच्चित्तव सती श्वश्रूर्नाम्ना मन्दोदरी तु या।
सादरं सर्ववार्तासु त्वां पुरस्कुरुते भृशम् ॥ ११ ॥

कच्चित्ते हृदयं लग्नं श्वसुरस्य निकेतने।
शश्वत्पितृगृहासक्ति विस्मृत्य स्वस्थमस्त्युत ॥ १२ ॥

कच्चिन्मातृविसंश्लेषो बाधते न च ते मनः।
कच्चिद्वसनभूषाढ्यैः पूर्यते ते मनःस्पृहा ॥ १३ ॥

कच्चित्ते दासिकाः सौम्याश्चक्षुःसूचितकारिकाः।
समये त्वोपसीदन्ति कच्चित्सद्भोगसम्पदः ॥ १४ ॥

कच्चित्स्मरसि कल्याणि वासं भोगवतीपुरे।
कच्चित्तत्रत्यलोकेषु स्निग्धासि त्वं पुरा यथा ॥ १५ ॥

कच्चिन्मातृपितृश्रेष्ठः पितृपक्षजनस्तव।
स्मरणेऽपि समायाति ऋद्धायाः पतिवेश्मनि ॥ १६ ॥

इत्यादि बहुधा शेषो वात्सल्येन सुविक्लवः।
कथयित्वा वचस्तस्यै साश्रुनेत्रो बभूव ह ॥ १७ ॥

ततः सा पद्मपत्राक्षी पितृवात्सल्यविक्लवा।
उदश्रुनयना किंचिदुवाच सुखिताशया ॥ १८ ॥

चिरान्निभालितास्म्यद्य जातं मे सुमहत्सुखम्।
अभून्मे सुदिनं चाद्य तात त्वद्दर्शनोत्सवात् ॥ १९ ॥

अपि मे सुखिनी माता प्रजासंततवत्सला।
गर्भधारणयोषाभ्यां यया सम्पालितास्म्यहम् ॥ २० ॥

अपि मां जननी सा मे कदाचित्कच्चिदात्मना।
स्मरति स्नेहवद्यस्यां हृदयं मे प्रतिक्षणम् ॥ २१ ॥

अपि त्वं गृह्यवार्तासु कदाचित्स्मृतवान्नु माम्।
शयने चासने पाने भोजन च प्रसंगतः ॥ २२ ॥

अपि मे सोदरस्तात स नित्यं सुखमेधते।
यो मां नयति सम्प्रीत्या मातृदर्शनलालसाम् ॥ २३ ॥

अप्युत्सवा बहुविधास्तव सन्ति दिने दिने।
कच्चिदुह्यमते तात ममाकारणकर्मणि ॥ २४ ॥

सर्वे भवन्तः सुखिनो भोगवत्यां निवासिनः।
विषीदाम्यहमेवैका वियुक्ता सकलैश्चिरात् ॥ २५ ॥

द्रष्टुमुत्कण्ठितात्यर्थमस्मि वः सकलानहम्।
सुहृदो बान्धवान्नित्यं सोदरान् स्निग्धचेतसः ॥ २६ ॥

नित्यं मम मनस्तात भवतां दर्शनोत्सुकम्।
ऋद्धापि राक्षसेन्द्रस्य सम्पद्यत्र न रोचते ॥ २७ ॥

द्रक्ष्यामि मातुर्वदनं कदा नु सुखदायकम् ।
इत्युत्कण्ठावशं चित्तं विश्राम्यति न कुत्रचित् ।। २८ ।।

सम्यञ्च बहुलातातश्वसुरस्य गृहे मम ।
भाविनी त्वत्प्रसादेन ततोऽपि खलु भूयसी ।। २९ ।।

साक्षादनुगृहाणेमा निजापत्यप्रजा इह ।
यासामुत्कण्ठितं चेतो भवतां दर्शनोत्स्तवे ।। ३० ।।

मातामहे त्वयिभृशं मातुले सोदरे च मे ।
अमीषां मदपत्यानां निमग्नं सुचिरान्मनः ।। ३१ ।।

मातृपक्षसुहृद्बन्धून् सुधाशीतलदर्शनात् ।
दिदृक्षन्ति सदा ह्येते तवापत्यप्रजाजनाः ।। ३२ ।।

शीतलः खलु पक्षोऽयं मातृसम्बन्धिबन्धवः ।
न येषूत्कर्षोऽमर्षो वा न चापि प्रतियोगिता ।। ३३ ।।

एवमाभाष्यजनकं चिरोत्कण्ठावशान्तरा ।
स्वागतस्याकरोत्तस्य पानभोजनसंविधाः ।। ३४ ।।

सुलोचनायै प्रददावहीन्द्रो महोत्तमान् नागमणीन् सहर्षम् ।
मात्राभृशं स्निग्धहृदा दुहित्रे सम्प्रेषितान् स्वेन तथोपनीतान् ।। ३५ ।।

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे शेषागमने द्वादशाधिकशततमोऽध्यायः ।। ११२ ।।

*

त्रयोदशाधिकशततमोऽध्यायः

ब्रह्मोवाच

स्वगृहागतमाज्ञाय शेषं नागपुरीपतिम् ।
आत्मनः श्वसुरं साक्षान्मेघनादः समाययौ ।। १ ।।

रक्षः पतिकुमारेण जामात्रा नागनायकः ।
अमिलत्परमप्रीतो दोर्भ्यामालिङ्ग्य भूरिशः ।। २ ।।

श्वसुरं स्वागताद्यैः स मानयित्वा महामनाः ।
हृष्यन्निदमुवाचोच्चैस्तत्प्रसादाभिलाषुकः ।। ३ ।।

मेघनाद उवाच

अकस्मादुपपन्नं मे यन्नित्यमभिकाङ्क्षितम् ।
भवतो दर्शनं साक्षात्कल्याणगणभूयसः ।। ४ ।।

श्रीमन्नागपुरीनाथ त्वया सम्भालिता जनाः ।
नित्यं ससुखमेधन्ते धनापत्यगृहादिभिः ॥ ५ ॥

कस्ते न दर्शनं वाच्छेद्भूरिमङ्गलदायकम् ।
जनानां गृहमेधीयव्यापारव्याकुलात्मनाम् ॥ ६ ॥

यस्मै प्रसीदसि ब्रह्मन् दृशा कल्याणवर्षणः ।
स सर्वभुवनेष्वद्धा मान्यते नरपुङ्गवैः ॥ ७ ॥

भव मे वरदः साक्षाद्भूष्णोर्बहुलसम्पदः ।
निग्रहानुग्रहै कर्तुं यतः स्वाधीनधीरसि ॥ ८ ॥

एतावान्मेऽनुतापश्च त्वत्कृपाभाजनस्य किम् ।
हृदये स्थास्यति ब्रह्मन् यत्परोत्कर्षदर्शनम् ॥ ९ ॥

जिगीषामि जगत्सर्वं ससुरासुरमानुषम् ।
केवलं स्वात्मवीर्येण त्वत्कृपासाधनं यदि ॥ १० ॥

भवतः कृपया श्रीमन् सत्सम्बन्धप्रसूतया ।
किं न जेया मया युद्धे सुरकिन्नरमानुषाः ॥ ११ ॥

सदैवानुगृहाण त्व मतो मां भगवन् भृशम् ।
यत इन्द्रपुरीं जित्वा तत्सम्पदमिहानये ॥ १२ ॥

नित्यमाराधनतां नृणां भवान् कामवरप्रदः ।
अत आराधनं कर्तुमिच्छामि तव साम्प्रतम् ॥ १३ ॥

भगवन् भवतो वीर्यं तेजश्चाप्रतिमं भवे ।
तदेव साधनं भूयान्मम लोकस्य निर्जये ॥ १४ ॥

यद्विचिन्त्य मया ध्यातं भगवंस्तव दर्शनम् ।
तन्मे सुनिश्चितं भूष्णुर्दर्शनानुग्रहात्तव ॥ १५ ॥

इति सम्प्रार्थ्य बहुधा शेषं प्रार्थितसिद्धिदम् ।
सपर्यया रुचिरया सुस्वागतमथाग्रहीत् ॥ १६ ॥

सोऽतिप्रसन्नो नागेन्द्रस्तस्मै कामवरं ददौ ।
जामात्रे भक्तिनम्राय स्वकृतापचितये[1] मुहुः ॥ १७ ॥

शेष उवाच

भवान् विजयतां वीर पुरीमिन्द्रस्य दुर्जयाम् ।
आनयस्वबलाच्चैव बन्दीकृत्य सुरश्रियम् ॥ १८ ॥

अन्येषां चापि देवानां वसतीस्त्वं महाभुज ।
बलेनैव पराभूय तच्छ्रियं स्वात्मसात्कुरु ॥ १९ ॥

---

१. अस्मिन् पादेऽक्षराधिक्यमार्षः ।

अनन्यवीरस्त्रैलोक्ये भव सम्प्रति दोर्बलात् ।
एकराट् च तवख्यातस्तातो भवतु भूतले ॥ २० ॥
देवानां किन्नराणां च नराणां यक्षरक्षसाम् ।
सुश्रोण्यश्चन्द्रवक्त्रास्त्वां सेवन्तां प्रतिवासरम् ॥ २१ ॥
किङ्कराः सन्तु ते देवा यक्षगन्धर्वकिन्नराः ।
ग्रहाः सूर्यादयो नागा नगाश्चैव सविग्रहाः ॥ २२ ॥
तत्तल्लोकश्रियः सन्तु सदने तव संततम् ।
यं यं कामयसे कामं तं तमाप्नुहि मद्गिरा ॥ २३ ॥
इन्द्रश्चन्द्रश्च सूर्यश्च शमनो यादसां पतिः ।
वसवो मरुतश्चैव याश्चान्या गणदेवताः ॥ २४ ॥
स्वैः स्वैः परिग्रहैर्युक्तास्तवैव वचसि स्थिताः ।
उपानच्चामरच्छत्रताम्बूलामत्रधारणैः ॥ २५ ॥
स्नानशय्यासनालेपपानभोजनकल्पनैः ।
नित्यं परिचरन्तु त्वां त्यक्तवीर्याः सवे सवे ॥ २६ ॥
इमं मणिं महावीर सदैव प्रत्ययावहम् ।
त्रिपुरेण तारकेण बलिना बलशालिना ॥ २७ ॥
धारितं शिरसालोकनिर्जयाय रणे रणे ।
अन्यैश्चासुरराजेन्द्रैर्मानुषेन्द्रैः पुरा युगे ॥ २८ ॥
धारितं पूजितं चैव भुवनोत्कर्षलब्धये ।
धारयस्व निजेशीर्षे तादृग्भूष्णुस्त्वमप्युत ॥ २९ ॥
मन्त्रविद्यां च ते वीर सद्यः प्रत्ययदायिनीम् ।
ददामियत्प्रभावेण सर्वान् कामानवाप्स्यसि ॥ ३० ॥
जप्त्वा मन्त्रमिमं प्राज्ञ पुरश्चर्याविधानतः ।
होष्यसि प्रचुरैर्हव्यैः समिद्धे जातवेदसि ॥ ३१ ॥
तत उत्थास्यति क्षिप्रं रथः स्वर्णपरिच्छदः ।
दिव्यायुधगणोपेतः सपताकः सवाहनः ॥ ३२ ॥
मेघगम्भीरनिर्घोषः सुरासुरविभीषणः ।
त्रासनः सर्वलोकानां शब्दमात्रेणभूयसा ॥ ३३ ॥
तेजसाप्रतिमश्चैव रंहसा चाप्रतीहतः ।
यमास्थाय भवान् जेता सुरेशं युद्धदुर्मदम् ॥ ३४ ॥
तत्रैव रथवर्ये तु दिव्यं चापं तथेषुधी ।
अक्षयौ बाणपूर्णौ च लब्धासि त्वं महामते ॥ ३५ ॥
तैः शरैः समरेषु त्वां वर्षन्तं रणदुर्दिने ।
प्रावृषेण्याम्बुधरवत् का नु द्रक्ष्यति सम्मुखे ॥ ३६ ॥

उपशक्रपुरि प्राप्ते दुष्प्रेक्ष्यं त्वां स्वतेजसा ।
चापज्यां रणयन्तं च ज्ञास्यन्ति सुरयोषितः ॥ ३७ ॥

वित्रस्तास्तास्तदा सद्यः पतीनालिङ्ग्य वक्षसि ।
कर्णौ पिधायस्थास्यन्ति कथमप्यस्तधैर्यकाः ॥ ३८ ॥

तासांच पतयस्ते वै सुराः समरकातराः ।
अशक्तास्त्वत्पुरः स्थातुं दैवं प्रार्थ्य कथंचन ॥ ३९ ॥

कन्यारत्नानि रत्नानि समादाय करद्वये ।
बद्धाञ्जलिपुटाः सौम्या उपस्थास्यन्ति भृत्यवत् ॥ ४० ॥

किं बहूक्तेन वीर्येण मम मन्त्रप्रभावतः ।
रुद्रोऽपि भगवान् साक्षात्त्वया योद्धुं न शक्यते ॥ ४१ ॥

भवतोऽतिप्रियां चैनां मम पुत्रीं सुलोचनाम् ।
देव्योऽपि मौलिमणिभी रञ्जयिष्यन्ति पादयोः ॥ ४२ ॥

भुवनेषु तव ख्यातिर्मम प्रीत्यै भविष्यति ।
इति ते संददाम्यद्धा भूयः कामवरानहम् ॥ ४३ ॥

इति स प्रणयात्सुलोचनाया मुदितस्तत्पतये वरान् विशिष्टान् ।
प्रददौ बहुधा भुजङ्गमेन्द्रः स च तुष्टाव तमुच्चकैश्चिराय ॥ ४४ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे मेघनादवरलाभो नाम त्रयोदशाधिकशततमोऽध्यायः ॥ ११३ ॥

*

चतुर्दशाधिकशततमोऽध्यायः

ब्रह्मोवाच

सुलोचनाया वात्सल्यादुवास पुरि रक्षसाम् ।
भगवान् शेषनागेन्द्रोऽददन् कामवरान् बहून् ॥ १ ॥

पूरयित्वा स्वदुहितुर्बहुधा स मनोरथम् ।
तद्विसृष्टस्ततश्चैव स्वेच्छया स्वपुरीं ययौ ॥ २ ॥

शेषस्यागमनं पुर्य्यां लङ्कायां दशकन्धरः ।
श्रुत्वा कामवरावाप्तिं ततः स्वतनयस्य च ॥ ३ ॥

अधृष्यद्धृदयेनासौ ज्ञात्वा स्वोत्कर्षमुत्तमम् ।
सिद्धाभिलाषं तं वीक्ष्य मुदितं मुदितोऽभवत् ॥ ४ ॥

अथोदयतो जगज्जेतुं मेघनादो महामनाः ।
कृत्वा शेषाहिनिर्दिष्टं मन्त्रस्य विधिमुत्तमम् ॥ ५ ॥

स महीयस्तपस्तेपे मन्त्रसाधनतत्परः ।
सोमजायास्तटे पुण्ये यत्र वैदूर्यपर्वतः ॥ ६ ॥

मन्त्रमाराध्य कष्टेन चक्रे होमार्चनादिकम् ।
एवं यथाविधि कृते प्रादुरासीद्रथो महान् ॥ ७ ॥

होमद्रव्यैर्विधिहुतैः समिद्धाज्जातवेदसः ।
जगज्जयकरो दीप्तस्तेजसाप्रतिमेन यः ॥ ८ ॥

सर्वायुधगणैः पूर्णः सिद्धसर्वपरिच्छदः ।
जगज्जैत्रमहाघोषः साक्षादग्निसमद्युतिः ॥ ९ ॥

तं दृष्ट्वा प्रससादोच्चैः कुमारो राक्षसेशितुः ।
सिद्धं मनोरथं मेने सुरेन्द्रपुरनिर्जये ॥ १० ॥

अथासौ दर्पितो वीरः सुमुहूर्ते शुभोदये ।
विहिताशीर्मुनिगणैर्मन्त्रपाठपुरःसरम् ॥ ११ ॥

स्वस्तिपुण्याहमावाच्य सिक्तः पल्लवपाथसा ।
दिव्येन वर्मणा पश्चाद्दंशितो विपुलद्युतिः ॥ १२ ॥

सुधन्वा बद्धनिस्त्रिंशो बद्धाक्षयशरेषुधिः ।
मातरं पितरं चैव प्रणम्य विहिताञ्जलिः ॥ १३ ॥

स्वेष्टदेवं हृदि स्मृत्वा भालोदयत्कुङ्कुमाक्षतः ।
महान्तं रथमास्थाय प्रातिष्ठत जगज्जयी ॥ १४ ॥

गत्वास उत्तरामाशां कुबेरेण निषेविताम् ।
अधिज्यं धनुरास्फाल्य यक्षगन्धर्वकिन्नरान् ॥ १५ ॥

त्रासयामास टंकारैर्वाणवर्षपुरःसरैः ।
अनम्रान् नामयामास निजवीर्येणभूयसा ॥ १६ ॥

तस्योपनिन्युर्गन्धर्वा रत्नानि विविधान्यपि ।
अत्यर्थसुन्दरीः कन्या धनानि विपुलानि च ॥ १७ ॥

कुबेरस्त्रस्तहृदयस्तस्य वीर्येण कम्पितः ।
मेने तद्विहितामाज्ञामुपनीतमहानिधिः ॥ १८ ॥

उत्तराशां विजित्येत्थं सर्वस्वहरणोद्धतः ।
चन्द्रचूड शिवं वीक्ष्य समाराध्य सपर्यया ॥ १९ ॥

लब्ध्वा कामवरं चास्मात्ततो निववृते बली ।
एवमाशाश्चतस्त्रोऽपि जिगाय परमोद्धतः ॥ २० ॥

अनिर्जिताश्च ये पूर्वं दशास्येन महौजसा ।
अजैषीत्तान् नरपतीनाजहार धनानि च ॥ २१ ॥

ततः प्रतस्थौ बलवान् जेतुं सुरपतेः पुरीम् ।
नाम्नामरावतीं यत्र स्वयमास्ते पुलोमजा ॥ २२ ॥

तस्याः परिसरे गत्वा शङ्खं दध्मौ महाभुजः ।
उत्तेजयन् महेन्द्रस्य चित्ते युद्धमहोत्सवम् ॥ २३ ॥

श्रुत्वा शङ्खरवं तस्य वीरस्य दृढधन्वनः ।
जजागार महेन्द्रस्य हृदि युद्धमहोत्सवः ॥ २४ ॥

तमाययौ सुरपतिर्वारणेन्द्रं समाश्रितः ।
देवतानीकमध्यस्थो युद्धदुर्मदमानसः ॥ २५ ॥

धनुष्मान् कवची खड्गी वज्रहस्तः सुराधिपः ।
अमरावत्याः[1] परिसरे रक्षसा योद्धुमाययौ ॥ २६ ॥

तमनुप्रययुर्देवा आदित्या वसवस्तथा ।
भास्वरास्तुषिताः साध्या विश्वेदेवास्तथाखिलाः ॥ २७ ॥

अन्ये चोच्चावचा देवा गन्धर्वा मरुतस्तथा ।
अग्निर्यमो निर्ऋतिश्च वरुणो धनदस्तथा ॥ २८ ॥

ये निर्जिताः पुरा तेन विजयावसरे दिशाम् ।
तेऽमर्षिताः सुरगणा मघोना सह संयुगे ॥ २९ ॥

सायुधा बद्धवर्माणो रक्षसा योद्धुमाययुः ।
शङ्खनादान् प्रकुर्वन्तः स्वं स्वं वाहनमास्थिताः ॥ ३० ॥

तेऽगृह्णन् पुरतो भूत्वा राक्षसेन्द्रकुमारकम् ।
भुशुण्डीः परिघांश्चक्रान् गदाखड्गपरश्वधान् ॥ ३१ ॥

वर्षन्तः सायकांस्तीक्ष्णान् धनुर्मण्डलनिर्गतान् ।
युगपच्छादयामासुः सर्वे तं परमायुधैः ॥ ३२ ॥

सोऽपि क्रुद्धो महायुद्धे विक्रमन् सुमहाबलः ।
अयोधयत्सुरपतिं विक्रमन्तं सुदुर्मदम् ॥ ३३ ॥

इत्येवं युध्यतस्तस्य स्वर्गे विक्रमशालिनः ।
प्रादुरासुर्महाशब्दाः आयुधोत्क्षेपसम्भवाः ॥ ३४ ॥

सोऽत्यर्थतीक्ष्णान् विशिखान्नैरावतकटद्वये ।
निचखान महावीर्यः शुष्कदानजले भयात् ॥ ३५ ॥

स्त्रायुधैश्छादयामास सगजेन्द्रं पुरन्दरम् ।
तान् कृन्तयित्वा मघवा निश्चक्राम महाहवे ॥ ३६ ॥

युयुधे मेघनादेन समवीर्येण गोत्रभित् ।
अस्त्रैः शस्त्रैश्चबहुभिर्वज्रनिष्पेषराविभिः ॥ ३७ ॥

---

१. पादेऽस्मिन्नक्षराधिक्यमार्षः ।

स कुम्भयोर्गजेन्द्रस्य ताडयामास सायकैः ।
शूलेन चापि विव्याध तस्य मर्मणि संयुगे ॥ ३८ ॥

ऐरावतः सचीत्कारं पलायत रणाङ्गणात् ।
ताड्यमानोऽतिबलिना मेघनादेन भूरिशः ॥ ३९ ॥

इन्द्रस्त्यक्त्वा गजपतिं रथं मातलिनाऽऽहृतम् ।
आरुह्य द्रुतमायातो दशास्यसुतसम्मुखे ॥ ४० ॥

तमुवाच प्रहस्यैष महावीरो रणाङ्गणे ।
परावृत्तोऽपि किं शक्र पुनरायासि सम्मुखम् ॥ ४१ ॥

कथं स्थास्यति ते लज्जा पराभूतस्य वै मया ।
अतः प्राणान् समादाय द्रुतं याहि रणाङ्गणात् ॥ ४२ ॥

नो चेत्त्वां विरथं कृत्वा छिन्नवर्माणमेव च ।
विशस्त्रं दुर्गतं चापि बाणैस्तीक्ष्णातमैरहम् ॥ ४३ ॥

बद्ध्वा दृढतरैः पाशैर्नेष्यामि स्वां पुरीं जवात् ।
वीर्यं प्रकटय स्वीयं न चेद्द्रक्ष्यसि दुर्गतिम् ॥ ४४ ॥

इत्युदीर्य वचः क्रुद्धश्छादयामास तं शरैः ।
सवाहनध्वजरथं पुरुहूतं समातलिम् ॥ ४५ ॥

सोऽतिकृच्छ्राद्विनिष्क्रम्य रक्षसः शरपञ्जरात् ।
उदतोलयत क्रुद्धस्तं हन्तुं वज्रमात्मनः ॥ ४६ ॥

स तत्करं सकुलिशं विव्याध स्वमहेषुणा ।
यथा पपात धरणौ कुलिशं तेन संहितम् ॥ ४७ ॥

हस्तात्प्रविच्युते वज्रे महेन्द्रस्य महात्मनः ।
तत्र सुर्देवताः सर्वा हाहेति च विचुक्रुशुः ॥ ४८ ॥

स तस्मिन्नन्तरे शक्रं विव्यधे दशभिः शरैः ।
विशस्त्रमपि मन्वानः शीघ्रमात्मजयेच्छया ॥ ४९ ॥

इन्द्रमत्याकुलं वीक्ष्य परेणाक्रान्तमाहवे ।
अन्ये देवा युयुधिरे बलिनातेन रक्षसा ॥ ५० ॥

अत्याहिताः प्रयुयुजुः स्वानि स्वान्यायुधानि ते ।
युगपद्योधयामासुर्मेघनादं महाबलम् ॥ ५१ ॥

निरकृन्तत् स बलवांस्तेषामायुधसंहतिम् ।
प्रत्येकं ताडयामास सुतीक्ष्णैरायुधैर्निजैः ॥ ५२ ॥

ते ताडिता दशमुखस्य कुमारकेण प्रादुद्रुवुर्दश दिशस्त्रिदशास्तदानीम् ।
आदाय भीतिभवकम्पभृतो निजासून्नो सम्मुखे समरसीम्नि पुनर्बभूवुः ॥ ५३ ॥

देवान् पलायनपरान् मघवा विलोक्य धैर्यच्युतिप्रसभवेपितसर्वगात्रः ।
आत्ता सुमात्रकुशलो जबिना रथेन पृष्ठं प्रदाय समराद्व्यचलत्सुभीतः ॥ ५४ ॥

इति निजभुजवीर्याद् द्रावयित्वा सुरौघान् ध्वनितविजयशङ्खस्तत्क्षणे मेघनादः।
सरभसममराणां राजधानीं विजित्य श्रियमलघुममीषां स्वात्मसादेष चक्रे ॥ ५५ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे महेन्द्रपराजये चतुर्दशाधिकशततमोऽध्यायः ॥११४॥

*

पञ्चदशाधिकशततमोऽध्यायः

ब्रह्मोवाच

यदैवैष जिगायेन्द्रं मेघनादो रणाङ्गणे।
तदैवेन्द्रजिदित्याख्यांलेभेऽसौ भुवनत्रये ॥ १ ॥

आनिनाय पुरीं लङ्कां वन्दीकृत्य सुरस्त्रियः।
आजहारैष रत्नानि धनानि विपुलानि च ॥ २ ॥

आसनं चामरे छत्रं वाहनं सम्पदोमणीन्।
विभूतीरखिलाश्चैव सुरेन्द्रस्य जहार सः ॥ ३ ॥

इन्द्रो मरुद्गणैः साकमिन्द्राण्या च भयातुरः।
मेरुकन्दरमासाद्य निन्ये कालं प्रतीक्षया ॥ ४ ॥

यदा यदासुरैरेवमाक्रान्ताः सुरसम्पदः।
तदा तदा स भगवान् विष्णुः प्रादुरभूत्पुरा ॥ ५ ॥

अतोऽधुनापि गोविन्दः साक्षाद्देवो रमापतिः।
जनिष्यते हितार्थं नः स एतान् क्षपयिष्यति ॥ ६ ॥

आराध्नन्तु सुराः सर्वे तमेवैकं जगत्पतिम्।
इति विश्वासमालम्ब्य शक्रोऽस्थान्मेरुकन्दरे ॥ ७ ॥

रावणोऽपि जगज्जित्वा सानुजः ससुहृद्बलः।
प्रसभं भूभृतां कन्या वन्दीकृत्य जगत्त्रये ॥ ८ ॥

सुवर्णरत्नमुक्तानां मणिमाणिक्यसम्पदाम्।
भारान् प्रवलरक्षोभिर्वाहयित्वा नृपैरपि ॥ ९ ॥

प्रेषयामास परमां राजधानीं स आत्मनः।
इत्थं जित्वा त्रिलोकीं सनादयित्वा निजं जयम् ॥ १० ॥

यशः पटहनादेन घोषयित्वा दिशो दश।
आजगाम मुदायुक्तो गीयमानो द्विषद्गणैः ॥ ११ ॥

तावत्सुत्रोऽपि तस्यासाविन्द्रजिज्जितवासवः ।
सुमहसा[त्या ?]ख्यया युक्त आजगाम निजां पुरीम् ।। १२ ।।

श्रुत्वा सूनोर्विक्रमं स्वर्गलोके तं तादृशं देवसेनापलायम् ।
जहर्षचित्तेऽतितरां प्रमोदरोमाञ्चिताशेषवपुर्दशास्यः ।। १३ ।।

तत्रेन्द्रजिद्राक्षसराजधान्यामारोपयद्देवतरूंस्त्रिविष्टपात् ।
उत्पाट्य शाखासहितान् समूलं बृहच्छिफान् पुष्पफलच्छदाढ्यान् ।। १४ ।।

यानि कानि च वस्तूनि स्वर्ग्याणि भुवि मानुषैः ।
अलभ्यानि च सोऽकार्षीत्तानि तानि निजे पुरे ।। १५ ।।

पिता पुत्रश्च तौ वीरौ त्रैलोक्यपरितापिनौ ।
अतीव भीषणौ क्रूरौ सज्जनानां बभूवतुः ।। १६ ।।

विष्णुपक्ष इति ज्ञात्वा देवान् साधून् मुनीन् द्विजान् ।
द्रावयाञ्चक्रतुर्धर्मात् स्वस्यैवोत्कर्षकामुकौ ।। १७ ।।

नराणां किन्नराणां च देवगन्धर्वरक्षसाम् ।
नागानां च नगानां च कन्याः कमललोचनाः ।। १८ ।।

हृत्वा सम्पश्यतां तेषां निन्यतुः सदनं स्वकम् ।
ताभ्यां चक्रे जगत्सर्वं निःश्रीकं सर्वतो दिशम् ।। १९ ।।

प्रसारिता भुवने राक्षसौघाः प्रचण्डवीर्याभयदा जनानाम् ।
तैः सर्वतोयातमखोपघातैश्चक्रे समेतैः कदनं धरण्याम् ।। २० ।।

प्रशामिता विप्रगृहेषु पावकास्त्रयी च शान्ति गमिता प्रसह्य ।
सनातनोधर्मपथश्चनाशितोऽखिलंजगदुष्टदशामनीयत ।। २१ ।।

दशाननं चेन्द्रजितं तदङ्गजं सुबाहुमारीचमुखांश्च राक्षसान् ।
त्रिमस्तकं चापि खरं च दूषणं विद्युज्जिह्वं कौणपानं प्रवीरम् ।। २२ ।।

आश्रित्य रक्षोनिबहान् विशङ्कं विद्रावयामासुरशेषलोकम् ।
त्रथीपथं धर्मपथं सतां पथं निदूषयामासुरहो मदोद्धताः ।। २३ ।।

लङ्केशबलमाश्रित्य राक्षसाः सुमहोद्धताः ।
धर्मं विद्रावयामासुः पीडयन्ति स्म धार्मिकान् ।। २४ ।।

विष्णुभक्तान् सतः साधून् धर्मकर्मपरायणान् ।
त्रयीपथजुषो लोकान् याज्ञिकान् दीक्षितानपि ।। २५ ।।

नानारूपधरा रौद्राः प्रविश्य गृहमेधिनाम् ।
गृहेषु याज्ञियानग्नीन् शमया मासुरुद्धताः ।। २६ ।।

मुनीनामाश्रमेष्वद्धा प्रविश्य तपसि स्थितान् ।
द्विजानुद्वेजयामासुर्मायिनो राक्षसाः खलाः ।। २७ ।।

कन्या विदूषयामासुर्नानारूपैः प्रविश्य ते ।
दारानपहरन्ति स्म जनानां पापचेतसः ।। २८ ।।

यज्ञे याजे विवाहे च सीमन्तोपनयादिषुः ।
मण्डपादिप्रतिष्ठासु देवतास्थापनादिषु ॥ २९ ॥

विण्मूत्रवर्षणा घोराः श्मशानपांसुवर्षणाः ।
निष्ठीवनाद्यैर्नितराममेध्यं कुर्वते खलाः ॥ ३० ॥

धर्मद्रोहमुपाश्रिताः श्रितबलीलङ्काधिराजेन ते
रौद्रा रात्रिषु संरचन्त दुदितामर्षाः सतां घातुकाः ॥
नानारूपधरास्त्रयीपथसमुच्छित्त्यै गृहीतव्रता ।
हिंसाकर्मपरायणाः प्रतिदिनं वृद्धिं ययूराक्षसाः ॥ ३१ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे राक्षसप्रभावोनाम पञ्चदशाधिकशततमोऽध्यायः ॥ ११५ ॥

*

षोडशाधिकशततमोऽध्यायः

ब्रह्मोवाच

यद्यप्यस्त्रपराजस्य पुर्य्यां प्रतिनिकेतनम् ।
यज्ञयागादिकर्माणि नाहीयन्त दिने दिने ॥ १ ॥

गृहे गृहे देवपूजामतिथीनां तथार्चनम् ।
ब्राह्मणानां पुरस्कारं राक्षसा अपि कुर्वते ॥ २ ॥

तथापि तामसो धर्मस्तेषामत्युग्रमानिनाम् ।
स्वाध्यायः संयमो दानं सर्वमेतेषु तामसम् ॥ ३ ॥

धर्मस्य प्रभवो विष्णोः स एवैषां पराङ्मुखः ।
तत्कुतोऽस्त्वमला बुद्धिरमीषां घोरकर्मणाम् ॥ ४ ॥

हिंसाप्रायो मखश्चैषा मर्थः कामान्नहीतरः ।
धर्मः कामेकफलको मोक्षं चैते न जानते ॥ ५ ॥

सत्त्वं स्वप्नेऽपि नामीषां यल्लिङ्गं नियतं हरेः ।
रजस्तमोमयी वृत्तिः स्वार्थोन्मूलितसत्पथाः ॥ ६ ॥

कामः क्रोधस्तथा लोभो हिंसामोहो मदस्तथा ।
मात्सर्यं भूतविद्रोहः स्वभावादेषु सर्वदा ॥ ७ ॥

इत्थं धर्मोऽपि तामस्या वृत्त्या केवलया किल ।
बाधितप्राय एवैषां तेनाधर्मः प्रतिष्ठितः ॥ ८ ॥

दम्भेन क्रियतेऽमीभिर्धर्मवञ्चनहेतवे ।
तमःस्वभावाद्वृत्तिस्तु सात्त्विकी नैव दृश्यते ॥ ९ ॥

इत्यधर्मपथाधिष्ठैरमीभिरखिलं जगत् ।
अत्याकुलीकृतमभूत्सदेवनरकिंनरम् ॥ १० ॥

अथ भूमीभरं दृष्ट्वा ब्रह्मा लोकहितैषणः ।
पुरस्ताच्छक्रसर्वादीन् कृत्वा क्षीराम्बुधेस्तटे ॥ ११ ॥

श्वेतद्वीपं ययौ विष्णोः स्थानं यत्र मनोरमम् ।
यत्र स्वयं सभगवाननिरुद्धो विराजते ॥ १२ ॥

शेषशायी जगन्नाथो लक्ष्म्या नित्यं निषेवितः ।
सुपर्णविश्वक्सेनाद्यैः पार्षदैश्च समन्वितः ॥ १३ ॥

सनकाद्यैर्महायोगिवरेण्यैः सममिष्टुतः ।
मूर्तिमत्या तथा त्रय्या महोपनिषदां गणैः ॥ १४ ॥

समासव्यासयोगेन मुनीन्द्रैर्नारदादिभिः ।
पृथक् पृथक् स्तुतयशा गुणैः सर्वैर्निषेवितः ॥ १५ ॥

कल्याणपूर्णगुणको निर्दोषशुभविग्रहः ।
लोकरक्षाविधानार्थं सात्त्विकीं तनुमाश्रितः ॥ १६ ॥

भासा निर्मलया नित्यं द्योतिताशेषदिक्तटम् ।
पूर्णचन्द्रमुखद्योतमञ्जुस्मितविराजितः ॥ १७ ॥

लसत्किरीटकटककटिसूत्राङ्गदाञ्चितः ।
कर्णद्वयसमुद्दीप्तस्फुरन्मकरकुण्डलः ॥ १८ ॥

पीताम्बरधरः श्यामश्चतुर्भुजविराजितः ।
आयुधैः शङ्खचक्राद्यैर्मूर्तिमद्भिरुपासितः ॥ १९ ॥

कोस्तुभोद्द्योतविध्वस्तमायामोहतमोमलः ।
प्रसादसुमुखो देवो भक्तानुग्रहकारकः ॥ २० ॥

तत्र गत्वा कमलभूः सर्वदेवगणैर्वृतः ।
स्तुत्वा श्रीविष्णुसूक्ताद्यैश्चतुर्वदननिर्गतैः ॥ २१ ॥

प्रसादसुमुखं ज्ञात्वा देवदेवं रमापतिम् ।
उपप्लवं राक्षसौघैर्जगतां संव्यजिज्ञपत् ॥ २२ ॥

ब्रह्मोवाच

देवदेव महाविष्णो शुद्धसत्त्वतनूर्जित ।
विज्ञातमेव सर्वं ते सर्वज्ञस्य जगत्प्रभोः ॥ २३ ॥

अतो विज्ञापनं नाथ पुनरुक्तायते मम ।
तथापि प्रभवे वाच्यं भक्तैर्दुःखं स्वहृद्गतम् ॥ २४ ॥

साम्प्रतं खलु रक्षोभिः प्रबलैर्घोरदर्शनैः ।
जगद्विध्वंसितप्रायं भवता पाल्यते नु यत् ॥ २५ ॥

प्रतिकूलक्रिया एते राक्षसा भुवनद्रुहः ।
दशास्यबलमाश्रित्य न विद्मः किं चिकीर्षवः ॥ २६ ॥

त्रयी तु नाशितप्राया नाशिताः साग्नयो मखाः ।
अधर्मप्रचुरो लोकः कृत एव न संशयः ॥ २७ ॥

परदारापहरणाः परद्रव्यापहारकाः ।
कन्यानां दूषका एते जगद्विध्वंसकाः खलाः ॥ २८ ॥

महीं रसातलं नेतुं प्रवृत्ताः पापबुद्धयः ।
प्रधान एषां लङ्केशः सोऽपि पापतमः खलः ॥ २९ ॥

स निषेधति न स्वीयान् राक्षसान् पापकारिणः ।
सतां विद्रोहकान् पापान् जगत्संतापकारिणः ॥ ३० ॥

अग्रेऽपि खलु दैतेयैरत्युग्रैः पापकर्मभिः ।
मग्नप्रायां महीं कृत्स्नामुद्धार भवान् प्रभो ॥ ३१ ॥

दत्तश्च नो वरः स्वामिन् भवता वरदेश्वर ।
एवं यदा यदा पीडा दानवैर्वो भविष्यति ॥ ३२ ॥

धर्मग्लानिश्च नियतं तदा धास्ये तनूमहम् ।
शुद्धसत्त्वमयीं देवा हरिष्यामि च वः शुचम् ॥ ३३ ॥

अतो वयं सुविश्वस्ता भवन्तमखिलेश्वर ।
शरण्यं शरणं प्राप्ता दुःखं प्रति[1]विधेहि नः ॥ ३४ ॥

कमन्यं शरणं यामो भवन्तं रक्षकं विना ।
रक्षितव्या वयं नाथ प्रजाः स्वा निगमैः सह ॥ ३५ ॥

इत्युक्तवन्तं ब्रह्माणं भगवान् कमलापतिः ।
उद्भूतकरुणार्द्राक्षः प्रहस्येदमवोचत ॥ ३६ ॥

श्रीभगवानुवाच

पुरैव चिन्तितं ब्रह्मन् भवतामीप्सितं मया ।
अहं ह्यवतरिष्यामि रघुवंश्यस्य भूपतेः ॥ ३७ ॥

नाम्ना दशरथाह्वस्य धर्मपत्नीषुनिश्चितम् ।
कृत्वा चतुर्धा रूपाणि वासुदेवादिभिः स्वयम् ॥ ३८ ॥

अतो मामुनवर्तन्तां देवताः सकला अपि ।
याभिः सहाहं वर्तेयं भूतलेऽनन्यगोचरः ॥ ३९ ॥

मानवेषु विहंगेषु पशुषु प्लवगादिषु ।
अंशैरवतरन्त्वेते देवाः कार्यचिकीर्षवः ॥ ४० ॥

---

१. प्रतिविधेहि = दूरीकुरु ।

इन्द्रस्याग्नेर्यमस्यापि निर्ऋतेर्वरुणस्य च ।
वायोरथकुबेरस्य रुद्रस्य तपनस्य च ॥ ४१ ॥
अन्येषां चापि देवानामंशाः प्रादुर्भवन्तु वै ।
अथाहमपिसंयुक्तः स्वांशैर्यास्यामि भूतले ॥ ४२ ॥

इत्युक्त्वा भगवान् विष्णुः ब्रह्मादीनमरोत्तमान् ।
व्यसर्जयत् प्रति दिवं नत्वा धामानि ते ययुः ॥ ४३ ॥

ततो मानुषवर्येषु प्लवगानां कुलेषु च ।
नानारूपधरा देवाः प्रादुरासुर्महीतले ॥ ४४ ॥

यैः सार्द्धं भगवान् हरिः प्रतिदिनं चिक्रीड लीलाद्भुतं
रूपं बिभ्रदमेयशक्तिविभवो दुर्ज्ञेयतत्त्वो जनैः ॥
ते देवाः कतिचिन्मनुष्यवपुषः केचित्कपीनां कुले-
ष्वन्ये पक्षिषु सम्बभूवुरितरोक्षादियोनीः श्रिताः ॥ ४५ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे राघवप्रार्थनं नाम षोडशाधिकशततमोऽध्यायः ॥ ११६ ॥

*

सप्तदशाधिकशततमोऽध्यायः

ब्रह्मोवाच

स साक्षाद्भगवान् रामो लीलामानुषविग्रहः ।
अरमच्चित्रकूटाद्रौ स्वानां प्रियहितं दधत् ॥ १ ॥
एवं दिनेषु गच्छत्सु चित्रकूटमहीधरे ।
रममाणं रमानाथमभ्युपेयुर्मुनीश्वराः ॥ २ ॥

यर्हि श्रीजानकीदेवी क्रीडन्ती स्वेच्छया वने ।
अत्रेर्महामुनीन्द्रस्य सदनं समपद्यत ॥ ३ ॥
तदैव भगवान् रामोऽप्याश्रमं तस्य योगिनः ।
द्रष्टुकामोऽन्वगात्तत्र यत्र सा जनकात्मजा ॥ ४ ॥
अनुसूया सतीरत्नमालयन्ती मनोज्ञया ।
गिरा प्रपूजितात्यर्थं तया स्रक्चन्दनादिभिः ॥ ५ ॥
आगतं पुरुषश्रेष्ठमत्रिर्योगिभृतां वरः ।
स्वागतासनपाद्यार्घ्यभोजनाद्यैरमानयत् ॥ ६ ॥

उवाच स मुनिश्रेष्ठो ज्ञात्वा तं परमेश्वरम् ।
अहो स्वभावमधुरं चरितं ते रघूद्वह ॥ ७ ॥

येन पालयसे धर्मं द्विजानां गृहमेधिनाम् ।
मुनीनामाश्रमजुषां यतीनां च कृतात्मनाम् ॥ ८ ॥

त्रयीमार्गं सतां धर्मं कुलधर्मं तथा नयम् ।
नित्यं पालयसे राम त्वं सूर्यकुलभूषण ॥ ९ ॥

प्रार्थिताधिकदातारस्तव पूर्वे महीश्वराः ।
अचिन्तितार्थदाता त्वं सर्वेभ्योऽपि विशिष्यसे ॥ १० ॥

इत्युच्यमानो बहुशस्तं निवार्य महामुनिम् ।
उवाच रघुशार्दूलो वाचा पेशलया भृशम् ॥ ११ ॥

अहो तवाश्रमं ब्रह्मन् पश्यतो मे मनो भृशम् ।
जगाम निर्वृतिं पूर्णां सत्त्वं वसति यत्र वै ॥ १२ ॥

यत्र सत्त्वगुणः शुद्धो मनोमालिन्यमार्जनः ।
तत्रैव योगो धर्मश्च तपः सत्यं दया तथा ॥ १३ ॥

नन्वेते मुनयः शान्तास्तपसा दग्धकिल्बिषाः ।
कल्याणदर्शना मह्यं रोचन्तेऽनितरां हृदि ॥ १४ ॥

तवाश्रमचरा ब्रह्मन् शुका अपि पठन्त्युत ।
ॐकारममलं वर्णं यद्बोजं वेदभूरुहः ॥ १५ ॥

साक्षात्तपोनिधिर्ब्रह्मन् भवान् धर्मप्रवर्तकः ।
त्वयाऽम्नातं विधिं लोका अनुवर्तन्त आदृताः ॥ १६ ॥

आत्मारामस्य ते ब्रह्मन्नाप्तकामत्वमीदृशम् ।
भाति यस्मिंस्तृणमिव भोगो ब्राह्मपदावधिः ॥ १७ ॥

आज्ञापय यथेष्टं मां लोकानां शर्महेतवे ।
सर्वतः परिपूर्णस्य न तेऽवाप्तव्यमिष्यते ॥ १८ ॥

युष्माकं परिचर्यायां नित्यमुत्कण्ठितोऽस्म्यहम् ।
जानेऽतिधन्यमात्मानमाज्ञापूर्विकयामुया ॥ १९ ॥

इदं वः सुखदं स्थानं चित्रकूटगिरेस्तटे ।
संफुल्लवकुलाशोककदम्बतरुमण्डितम् ॥ २० ॥

अत्र ते योगसिध्यैव सुसिद्धाः सर्वसम्पदः ।
फलन्ति पादपा यत्र मनोभिलषितैः फलैः ॥ २१ ॥

सर्वभोगानुकूलानां श्रीणां सपदि सम्भवे ।
नित्यमेवाप्रतिहता वाञ्छैव तव साधनम् ॥ २२ ॥

क इष्टे भवतो योगसिद्धेस्तत्त्वं महामुनेः ।
वेत्तुं यत्र निमज्जन्ति सिद्धयो महतामपि ॥ २३ ॥

अत्रिरुवाच

सर्वमेवोपपन्नं मे निरपेक्षस्य केवलम् ।
तपसः साधनं प्रार्थ्यं भवेज्नुपहतं तुयत् ॥ २४ ॥

भवता वीरवर्येण प्रादुर्भूतेन भूतले ।
साधनीयं न वै किं किं सतां यदभिवाञ्छितम् ॥ २५ ॥

तपसिस्था द्विजाः सम्प्रत्युद्विजन्ते निशाचरैः ।
तेषां क्षये बद्धकक्षो भवाननुजसंयुतः ॥ २६ ॥

यदर्थमवतीर्णोऽसि स्वशक्त्या त्वं समूर्जितः ।
प्रार्थनीयं तदस्माभिः स्वतः सम्भविकं प्रभो ॥ २७ ॥

यदन्यदप्यद्भुतमत्यलौकिकं चरित्रमानन्दकरं सदा नृणाम् ।
तदप्यजस्रं तनुषे यदृच्छया समस्तलोकान्तरसद्मगोचरः ॥ २८ ॥

यदतीव तु मे प्रार्थ्यं तच्छृणो तु सदा भवान् ।
नित्यं मन्मानसे राम निवासमुररीकुरु ॥ २९ ॥

अप्यहं तीर्थराजस्य नित्यं दर्शनकामुकः ।
तत्र स्नानं करोम्युच्चैः प्रतिज्ञा मे सनातनी ॥ ३० ॥

साम्प्रतं खलु वर्षीयान् गन्तुं नो पारयेऽन्पतः ।
आश्रमादहमित्येवं चिन्ता मे भूयसी हृदि ॥ ३१ ॥

इहैव गङ्गां भुवनौघपाविनीं लभेय तन्मे मनसीश वाञ्छितम् ।
भवान् भवे पूरयितुं समर्थ इत्यजस्रमाशास्य भवामि निर्वृतः ॥ ३२ ॥

इति सम्प्रार्थितो रामः सूर्यवंशकुलाधिपः ।
प्रहस्य समुवाचेदं मनस्विजनशेखरः ॥ ३३ ॥

मनोमात्रेण योगीन्द्र भवान् शतसहस्रकम् ।
प्रयातीति न वै चित्रं तीर्थराजं प्रयासि यत् ॥ ३४ ॥

तथापि स्वाश्रमस्थानं तीर्थमेतच्चिकीर्षसि ।
अतस्तवाज्ञया ब्रह्मन् गङ्गामत्र समानये ॥ ३५ ॥

इत्युक्तवति राजेन्द्र ब्रह्मण्ये सत्यभाषिणि ।
चित्रकूटगिरेर्मध्यात्सद्यः प्रादुरभूत्सरित् ॥ ३६ ॥

मन्दाकिनी व्योमगङ्गा तोयप्रवहवेगिनी ।
प्राजापत्यस्य वृद्धस्य मुनेः स्नानादिकर्मणि ॥ ३७ ॥

आविर्भावं गतायां तु मन्दाकिन्यां सुधाम्भसि ।
तुष्टाव भगवानत्रिर्हर्षोत्कण्ठासमाकुलः ॥ ३८ ॥

स्तुवनि ब्रह्मर्षिवरे प्राजापत्ये तपोनिधौ ।
साक्षाद्भगवती गङ्गा प्रादुरास जलान्तरात् ॥ ३९ ॥

सुन्दरी चन्द्रतिलका सुधाशीतलविग्रहा ।
चन्द्रानना स्मितज्योत्स्नाविशदीकृतकानना ॥ ४० ॥

चित्रकूटबने रम्ये द्योतयन्ती दिशे दश ।
सा पश्यति मुनो रामं प्रोवाच विशदस्मिता ॥ ४१ ॥

अहं तवाज्ञया प्राप्तास्म्युच्चैर्वैकुण्ठधामतः ।
ब्रह्मर्षे प्रीणनायास्य साक्षात्सुतपसः प्रभो ॥ ४२ ॥

अयं हि बहुभि कल्पैर्मामिवैकामनन्यधीः ।
उपासीनो भवत्यस्मिन् भुवने महताऽऽयुषा ॥ ४३ ॥

अयं हि कोटियुगवित् कोट्यागमविशारदः ।
कोटिकल्पविदोजस्वी तपोमात्रैकविग्रहः ॥ ४४ ॥

स्नानाचमनकर्मभ्यौ मुनेरस्य सुखप्रदा ।
सदा स्थास्याम्यहं शैले चित्रकूटे शुभेवने ॥ ४५ ॥

तीर्थभूतमिदं स्थानं त्रिजगद्वन्द्यमद्भुतम् ।
भविष्यति प्रसादेन तव योगीन्द्र राधित ॥ ४६ ॥

त्वमपीह सदा क्रीडन् स्वात्मशक्तिभिरुच्चकैः ।
इह तिष्ठ मयाभ्याशे पादपद्मैकभाजनः ॥ ४७ ॥

त्रिषु लोकेषु विख्यातं स्थानमेतद्भविष्यति ।
मम चात्रेर्भगवतो नाम्ना च तव संततम् ॥ ४८ ॥

इत्युक्त्वा पश्यतस्तस्य योगीन्द्रस्य महात्मनः ।
जल एवाविशद्गङ्गा साक्षान्मन्दाकिनी तु या ॥ ४९ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे मन्दाकिनी-प्रादुर्भावो नाम सप्तदशाधिकशततमोऽध्यायः ॥११७॥

*

अष्टादशाधिकशततमोऽध्यायः

ब्रह्मोवाच

रामचन्द्रप्रभावेण प्रादुर्भूता पयस्विनी ।
साक्षान्मन्दाकिनी गङ्गा चित्रकूटे महीधरे ॥ १ ॥

दृष्ट्वा तां योगिवर्योदुत्रिर्भगवान् सर्वदर्शनः ।
तुष्टाव रघुशार्दूलं ज्ञाततत्त्वो मुनीश्वरः ॥ २ ॥

अत्रिरुवाच

जानामि त्वां रघुश्रेष्ठ पुराणपुरुषं परम् ।
धर्मसंदोहरक्षार्थमवतीर्णं यथातथम् ॥ ३ ॥

एतत्तवैव राजेन्द्र कर्तव्यमिह विद्यते ।
यद्गोविप्रश्रुतिपथरक्षणं चार्तपालनम् ॥ ४ ॥

कस्त्वां विनेह पुरुषस्त्रयीमुद्धर्तुमीश्वरः ।
असुरेण हृतां यत्र साङ्गोधर्मः सनातनः ॥ ५ ॥

मग्नामगाधे पयसि नीतां दुष्टेन मेदिनीम् ।
त्वां विना को नु पुरुष उद्वहेदेकदंष्ट्रया ॥ ६ ॥

यज्ञभागहरः साधुत्रयीधर्मविदूषकः ।
उज्जास्यः केन बलवांस्त्वां विना दानवेश्वरः ॥ ७ ॥

मग्नं समुद्रसलिले मन्दरं मन्थसाधनम् ।
त्वां विना को वहेत्पृष्ठे कृत्वा देवेष्वनुग्रहम् ॥ ८ ॥

त्रैलोक्यसम्पदं भूरि बलेन बलिना हृताम् ।
कः शक्तः पुनरानेतुं त्वां विना मधुसूदन ॥ ९ ॥

दुष्टक्षत्रवरानीकैरुत्सादितमुपारतम् ।
धर्ममुद्दीपयेत्कोऽन्यस्त्वत्तो भृगुकुलोर्जित ॥ १० ॥

अस्मिन्नवसरेऽपि त्वं बलिनं दशकन्धरम् ।
निहत्य रघुशार्दूल रक्ष धर्मं त्रयीपथम् ॥ ११ ॥

भवतोंऽशः पुना राम द्वापरान्ते यदोः कुले ।
भविता कृष्णरूपेण दुष्टासुरविनाशनः ॥ १२ ॥

अथो यज्ञहतान् जन्तून्शोचयन् करुणार्णवः ।
भवान् बुद्धस्वरूपेण राम प्रादुर्भविष्यति ॥ १३ ॥

अथ म्लेच्छप्राये जगति जगतीशोकशमनो
भवानश्वारूढः कलितकरवालः करतले ।
रणे दुष्टान्निघ्नन् प्रकटतरुणार्कद्युतितनुः
कलेरन्ते कल्कीत्यभिहित उदेष्यस्यखिलभृत् ॥ १४ ॥

एवं यदा यदा राम धर्मोग्लायतिसत्यते ।
तदातदावतीर्यामुं भवान् रक्षयति स्वयम् ॥ १५ ॥

विशुद्धं सत्त्वमुदितं तनुरेषा तवोर्जिता ।
सत्यज्ञानान्दनिधेरव्ययस्याखिलात्मनः ॥ १६ ॥

कर्माणि तव गीतानि विशुद्धानि महात्मभिः ।
न च तानि महाराज संख्यातुमहमीश्वरः ॥ १७ ॥

गणयेन्नामसीस्तारा भुवः पांसुकणानपि ।
कश्चित्सुसूक्ष्मधी राम न तु ते विशदान् गुणान् ॥ १८ ॥

वर्षीयानत्यहं दूरे गन्तुमक्षमतां दधे ।
इहैव गङ्गामुद्भाव्य त्वया देव कृतार्थितः ॥ १९ ॥

इत्थं स्तुवति योगीन्द्रे मुनयस्तपसोर्जिताः ।
आययुर्दण्डकारण्यवासिनस्तत्र पर्वते ॥ २० ॥

रक्षोभिरुद्वेजितचित्तवृत्तयो यक्षीकृतब्रह्मकुलैर्भयावहैः ।
तत्राययुर्ज्ञानदृशो मुनीश्वरा ज्ञात्वा तमेकं शरणं रघूद्वहम् ॥ २१ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डेऽत्र्याश्रमागमने ऽष्टादशाधिकशततमोऽध्यायः ॥ ११८ ॥

*

एकोनविंशाधिकशततमोऽध्यायः

ब्रह्मोवाच

सुतीक्ष्णो ब्रह्मवर्चस्वी सुशर्मानीललोहितः ।
सत्य आङ्गिरसः श्रौतिरुद्दालक इलामहाः ॥ १ ॥

शातातपो वृद्धशर्मा ऋद्धः ककुदुलूखलः ।
अगस्त्यस्य मुनेः शिष्या ये चान्ये सुहवादयः ॥ २ ॥

विश्वामित्रो मरुस्तार्क्ष्यः कक्षीवान् कुक्षिरूषरः ।
शुचिः पर्यवनो दक्षः शमनो दमनस्तथा ॥ ३ ॥

च्यवनो भृगुरौर्वश्च दुर्वासा नारदस्तथा ।
पर्वतो भगवान् योगी मैत्रेयः कपिलादयः ॥ ४ ॥

आचार्या ये वयोवृद्धाः शुद्धा ज्ञानदृशो बुधाः ।
सर्वे श्रीराममाज्ञाय भगवन्तमधोक्षजम् ॥ ५ ॥

अत्रेराश्रममायातं सदारं सानुजं च तम् ।
उपतस्थुर्मुनिवराः प्रजाकुशलहेतवे ॥ ६ ॥

तानागतान् स भगवानत्रिर्वैं वन्यवृत्तिभिः ।
तापयामास रामेण सीतया च सहातिथीन् ॥ ७ ॥

रामोऽपि तान् मुनिवरान् जग्राह विनयादिभिः ।
तेऽतिहृष्टाशया अत्रेः समक्षं राममब्रुवन् ॥ ८ ॥

जानीमहे त्वां वयमीशमस्या रक्षोभिरुत्सन्नरुचेस्त्रिलोक्याः ।
अतोऽखिलार्थप्रदमर्थयामस्त्वामेव हित्वा सकलान् सुरेशान् ॥ ९ ॥

त्वं दैवतैः प्रार्थित एव राम कामं कृपासिन्धुरिहावतीर्णः ।
यदर्दकृत्यै प्रसभं तमर्थं कुरुष्व विज्ञातविधेयजातः ॥ १० ॥

नन्विदानीं रघुश्रेष्ठ रात्रिंचरचमूपतेः ।
आज्ञया राक्षसैः सर्वा नाशिता एव ते प्रजाः ॥ ११ ॥

वाडवा भूरितपसो नैष्टिका वन्यवृत्तयः ।
भक्ष्यन्ते राक्षसैरुग्रैर्मांसाद्भिरसृजां पिबैः ॥ १२ ॥

शून्याः खल्वाश्रमगृहा इदानीं रघुपुङ्गव ।
पूर्णाश्चद्विजवर्याणामस्थिभिर्वज्रकर्कशैः ॥ १३ ॥

ये भक्षिताः कौणपैः क्रूरकर्मपरायणैर्नूतनब्रह्मचर्याः ।
पुत्रा मुनीनां बत कोमलाङ्गाः रुदन्ति तेषां पितरस्तेष्वाश्रमेषु ॥ १४ ॥

येषां मातापितरौ कौणपाधमैरत्युग्रदंष्ट्रैश्चर्वितौ क्रूरभावैः ।
ते बालका वन्यवृतां मुनीनां पाल्यन्ते किं हरिणीनां पयोभिः ॥ १५ ॥

दाक्षिणात्यैरपसदै राक्षसैः क्रूरकर्मभिः ।
शून्यप्रायं कृतं राम ब्राह्मणैर्दक्षिणापथम् ॥ १६ ॥

रात्रौ मायाविनोऽनेकरूपा ब्राह्मणसद्मसु ।
प्रविश्य राक्षसा यज्ञहुताशं शमयन्ति च ॥ १७ ॥

विण्मूत्रं चैव निष्ठीवं कुर्वते देवतालये ।
दूषयन्ति द्विजनुषां दारान् कन्याश्च बालिशाः ॥ १८ ॥

प्रतिष्ठितानां देवानामभ्युत्सादनकर्मणा ।
उद्वेजयन्ति सततं जनान् ग्रामपुरस्थितान् ॥ १९ ॥

खेटखर्वटवाटीषु ग्रामेषु नगरेषु च ।
विचरन्ति सदा रात्रौ ध्वंसयन्तो द्विजांश्च गाः ॥ २० ॥

यदयद्धर्मक्रियामूलं तत्तत्परमनिर्दयाः ।
निष्पिष्य नाशयन्त्येव तमःपिहितबुद्धयः ॥ २१ ॥

एवं धर्मविरोधेन मनोमोदं वितन्वते ।
लंकापतेर्नृशंसस्य यदायत्ता इमेऽखिलाः ॥ २२ ॥

सर्वेषां खलु दुष्टानां मूलं लङ्कामहीपतिः ।
उत्पथश्च सदोद्वृत्तो महातामसमानसः ॥ २३ ॥

तस्य निग्रहदानेन सर्वे राक्षससत्तमाः ।
तत्क्षणान्निगृहीताः स्युस्तत्र शक्तो भवान् प्रभो ॥ २४ ॥

भवानेवाश्रयस्तावद्धर्मस्यासुरभञ्जन ।
इति विज्ञाय शरणं प्राप्ताः स्मस्त्वां महादयुते ॥ २५ ॥

कालप्रवर्तकश्चासि त्वमेवेश निजेच्छया ।
यदद्यत्करोषि कालोऽपि तत्र तत्रानुकूल्यभृत् ॥ २६ ॥

प्रार्थयामो यदि श्रीश तदातिबिभिमो वयम् ।
उच्छिद्येत कदाचिद्वै यदभीष्टं प्रभोरिति ॥ २७ ॥

किं च सर्वज्ञनाथस्य तवेशप्रार्थनं जनैः ।
अतीवानुचितं विद्मस्तदा मोनं भजामहे ॥ २८ ॥

अप्रार्थितेष्टदातुस्ते यत्प्रार्थनमिहातुरैः ।
अधैर्यसूचकं तत्स्या दिति कैश्चिन्न याच्यसे ॥ २९ ॥

भगवन् भवता पूर्वं कतिधा नैव रक्षितः ।
दुष्टासुरचमूनाथहतो धर्मः सदातनः ॥ ३० ॥

तथापि वयमत्रेताः सन्निधौ तव राघव ।
निवेदनार्थमसकृदस्यैवार्थस्य भूयसः ॥ ३१ ॥

अतः परं त्वं द्विजदैवतत्रयी गोधर्मभूमीपरिरक्षणं प्रभो ।
यथोचितं कर्तुमजस्रमर्हसि त्रासो यथासौ जगतां प्रशाम्यति ॥ ३२ ॥

अथो चिरं ब्रह्धय राम निर्मलं दिशां वितानं परमोन्नतं यशः ।
चिरं निजान् रक्ष वरेण धन्वना वरेषुभिश्च प्रशमं नयाहितान् ॥ ३३ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे मुनिकृतश्रीराम-विज्ञायने एकोनविंशाधिकशततमोऽध्यायः ॥ ११९ ॥

*

विंशाधिकशततमोऽध्यायः

ब्रह्मोवाच

इति ब्रुवत्सु दीनेषु मुनीन्द्रेषु तदा वचः ।
अवतेरुर्दिवो देवा इन्द्राद्या ध्वंसितश्रियः ॥ १ ॥

ये मेघनादेन महोग्रधन्वना पराजिता इन्द्रपुरःसुराः सुरा. ।
ते धातुराज्ञामधिगम्य भूयसीं श्रीरामसंदर्शनसौख्यसस्पृहाः ॥ २ ॥

वसन्तं चित्रकूटाद्रौ विज्ञाय प्रभुमीश्वरम् ।
आययुस्त्रिदशाः सर्वे उत्कण्ठाविष्टमानसाः ॥ ३ ॥

अत्रेर्भगवतो योगिवर्यस्याश्रमसंस्थितम् ।
श्रीरामं ददृशुर्देवाः सेवाकरणसम्मुखाः ॥ ४ ॥

अत्रिं प्रणम्य योगीन्द्रं पुरस्ताद्भूरिवर्चसम् ।
अथो ददृशुरौदार्यसागरं राममद्भुतम् ॥ ५ ॥

सहस्रमर्चणांदधदेवनिश्चितो रामेण सक्षाद्भगवान् पुरन्दरः ।
अथो सभक्ति प्रणनाम तं पुरः स चाशिषा वर्द्धयदेनमुच्चकैः ॥ ६ ॥

अन्यानपि सुरान् नत्वा रामो राजीवलोचनः ।
सभक्तिश्रद्धमवनावासयामास पूजितान् ॥ ७ ॥

अत्रिस्तान् पूजयाञ्चक्रे बासवाद्यान् सुरेश्वरान् ।
सुस्थानासनवर्येषु तत ऊचे स्मितान्वितम् ॥ ८ ॥

शुभं ममैतन्महदेव सम्प्रति श्रीरामपादाम्बुजसंगमादभूत् ।
यदाश्रमद्वारमुपागता अमी महामहौजःप्रसराः सुरेश्वराः ॥ ९ ॥

पुरन्दरोहुतभुग्दण्डपाणिः क्रव्यादनाथो वरुणो वायवश्च ।
कुबेर ईशः पतयो दिशामिमे प्रजेश्वरा ये मरीच्यादयोऽभी ॥ १० ॥

मरुद्गणाः सर्वं इमे सुसंगता ममाश्रमे वसवश्चैव रुद्राः ।
साध्या आदित्या ग्रहा ये च विश्वेदेवा अमी पितरश्चोष्मपाद्याः ॥ ११ ॥

चतुर्मुखो ब्रह्म पठन्नखण्डं महोपवीती साक्षगुणः कमण्डलुम् ।
दधत्करे सैष प्रजापतीनां पतिः स्वयं संगतो ह्यत्रजातः ॥ १२ ॥

अस्यैव वीरस्य धृतासिधन्वनो ह्यक्षीणतूणीरभृतो हृतारेः ।
अन्वीक्षमाणाः शरणं सर्वं एते ममाश्रमं भूरि विभूषयन्ति ॥ १३ ॥

अस्यैवांशविभूतिभ्यः सद्भ्यः सूर्यांशुवत्पृथक् ।
नमो मे सर्वदेवेभ्य एभ्यः सद्भ्यः प्रजाहिते ॥ १४ ॥

जानामि सर्वं एवैते रक्षोनाथेन विद्रुताः ।
स्वधामसंक्षयाक्लिष्टाः प्रार्थनार्थमिहागताः ॥ १५ ॥

युगपत्प्रार्थयन्त्वेते रघूणां पतिमागताः ।
स्वस्वदुःखनिवृत्त्यर्थं देवोऽसौ शमयिष्यति ॥ १६ ॥

जानेऽहं रक्षसा घोररूपिणा विंशबाहुना ।
दशकन्धरभीमेन यूयं विप्रकृताश्चिरात् ॥ १७ ॥

तस्याश्रयाद्बलिनो राक्षसेन्द्राः सुबाहुमारीचमुखा महोग्राः ।
विध्वंसयन्तो जगदेव कृत्स्नं क्रूरात्मनो विचरन्तीह मर्त्यान् ॥ १८ ॥

वनेचरा बलिनो बालि मुख्याः कृत्स्नं जगद्दुःखमयं विधाय ।
कुर्वन्ति राज्यं नगरेषु लोकान्निपीडयन्तीति निवेद्यमस्मै ॥ १९ ॥

सम्प्रार्थितः कारुणिकौघमौलिरयं विधास्यत्यवनीमवश्यम् ।
निष्कण्टकां क्षिप्तसुरारिजातां सुखाकरिष्यत्यभयांश्चयुष्मान् ॥ २० ॥

उत्क्षिप्तकालासिविशीर्णशत्रुर्विजेष्यतेऽसौ भुवनेषुवीरः ।
आशीर्गणैरेपित उच्चकैर्वः सुवर्णसिंहानगो विभास्यति ॥ २१ ॥

इत्याभाष्य प्रपन्नांस्तान् रक्षोभीतान्सुपर्वणः ।
श्रीराममुखमालोक्य तस्थिवान् मुनिपुङ्गवः ॥ २२ ॥

अथाब्रुवन् ब्रह्मशिवेन्द्रमुख्या रक्षोधिपद्रावितसूरिवीर्याः ।
प्रजाहितप्रेप्सव आतुराश्च प्रकाममुद्भ्रान्तधियः प्रपन्नाः ॥ २३ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे देवागमनं नाम विंशाधिकशततमोऽध्यायः ॥ १२० ॥

*

एकविंशाधिकशततमोऽध्यायः

देवा ऊचुः

यदाह भगवानत्रिस्तत्तथैव रघूद्वहः ।
आवेदयितुमार्तिं स्वामेते प्राप्ता वयं प्रभो ॥ १ ॥

भवानार्तिहरोऽस्माकं नूनमार्तिं हरिष्यति ।
त्वां विना कतमः शक्तः प्रार्थितार्थप्रपूरणे ॥ २ ॥

एते खलु सुदुर्धर्षा राक्षसा जगतो द्विषः ।
भक्षयन्ति जनान् साधूनस्रपाः पिशिताशनाः ॥ ३ ॥

एतेभ्यो भीत मखिलं जगदेतत्सुदुःस्थितम् ।
अजस्रं प्रणसंदेहान्महतीमार्तिमृच्छति ॥ ४ ॥

तेषां तपोबलोद्रिक्तस्तेजसाप्रतिमोभुवि ।
भीषयत्येव भुवनं रावणो लोकरावणः ॥ ५ ॥

गर्वापितोऽयं वीर्येण बाहून् विंशतिसंख्यकान् ।
बिभ्राण एकच्छत्रोऽस्या भुवो राज्ये प्रतिष्ठितः ॥ ६ ॥

स्वेनैव बाहुवीर्येण जित्वा लोकान् सलोकपान् ।
सप्रजेशाः प्रजाः सर्वाः पीडयन् प्रतपत्यसौ ॥ ७ ॥

यावन्ति दिव्यरत्नानि तानि सर्वाणि तद्गृहे ।
मुक्त्वा श्रीरिन्द्रभवनं तस्यैवान्तःपुरे स्थिता ॥ ८ ॥

चन्द्रश्छत्रायते तस्य रतिश्रान्तस्य रात्रिषु ।
पीयूषविन्दुवर्षाभिः सिञ्चन् सोष्मकणं वपुः ॥ ९ ॥

प्रतापेनास्य तपनस्तपेऽपि नियतातपः ।
यावता तस्य वापीषु विकासयति पद्मिनीः ॥ १० ॥

अमायामपि शीतांशुः सम्पूर्णकलतां दधत् ।
सेवते सर्वदा व्यग्रो रतिश्रान्तं सुशीतयन् ॥ ११ ॥

समीरोऽप्यस्य नियतमाविश्य व्यजनेषु वै ।
सुगन्धिः शीतलोमन्दो नित्यं भजति विग्रहम् ॥ १२ ॥

अस्योद्यानतरुश्रेण्यां पुष्पविध्वंसनात्सभीः ।
मन्दं मन्दं मरुद्वाति यावद्धन्ति रतिश्रमम् ॥ १३ ॥

अन्योन्यमविरोधेन तस्योद्यानमहावने ।
प्रविश्य ऋतवः सर्वे सुखान्युपनयन्ति हि ॥ १४ ॥

पुरातनानि भुक्तानि नाद्रियाणस्य चेतसि ।
तस्य नव्यानि रत्नानि समुद्र उपढौकते ॥ १५ ॥

निशासु तल्पोपान्तेषु दधतः स्थिरदीपनाम् ।
तं वासुकिमुखा नागाः शीर्षरत्नैरुपासते ॥ १६ ॥

मालाकार इवेन्द्रोऽपि कल्पवृक्षप्रसूनकैः ।
निर्माय भूषणान्यस्मै समर्पयति नित्यशः ॥ १७ ॥

एवमासेव्यमानोऽपि प्रतापेनोपबृंहितः ।
दुःखाकरोति त्रैलोक्यमनन्यशरणं खलः ॥ १८ ॥

पल्लवा अपि नो येषां नूनास्त्रिदिववासिभिः ।
आरोपिता गृहेऽनेन छित्त्वा ते स्वर्वनद्रुमाः ॥ १९ ॥

वन्दीकृताः स्वर्वनितास्तं सुप्तं वीजयन्त्युत ।
चामरैरिव निःश्वासैः साश्रुसीकरशीतलैः ॥ २० ॥

सूर्याश्वटापटंकांकाः सानवः स्वर्णभूभृतः ।
कृतागृहाङ्गणे तेन स्वकान्ताकेलिपर्वताः ॥ २१ ॥

स्वर्गङ्गाम्भः सरो हित्वा तस्य वापोषु सम्प्रति ।
सुवर्णकमलोत्पत्तिर्लक्ष्यते श्रीनिरूपिणी ॥ २२ ॥

पुष्पकादीनि दिव्यानि विमानानि विहाय तम् ।
अनुयान्ति सुरा यान्तं यात्रायै भृत्यसम्मिताः ॥ २३ ॥

तस्य प्रधानपुरुषा राक्षसा यज्वभिर्हुतम् ।
आच्छिन्दन्ति हविर्वह्निमुखात्पश्यत्सु नाकिषु ॥ २४ ॥

इन्द्रस्योच्चैःश्रवास्तेन हृत्वा गृहमनीयत ।
कृतमात्मकुमाराणां क्रीडायानं च तत्पुरे ॥ २५ ॥

उपायाः खलु यावन्तस्तस्मिन्नस्माभिराहिताः ।
बभूवुर्विफला एव तुभ्यमावेदितं ततः ॥ २६ ॥
विजयाशासदा यस्मिन् कुलिशं तद्विडौजसः ।
तत्पुत्रशरसंछिन्नहस्तच्युतमपार्थकम् ॥ २७ ॥
तद्गजाः स्वर्णशैलस्य शिखरेष्वच्छकान्तिषु ।
तटाघातक्रियाभ्यासं कुर्वते मदमन्थराः ॥ २८ ॥
अतस्तस्य वधं कर्तुं सज्जो भव रघूद्वह ।
भाग्यैर्नः सुरलोकानां वन्दीकृतगृहश्रियाम् ॥ २९ ॥
यावन्न शाम्यतिद्रोग्धा त्रैलोक्यस्यैष रावणः ।
तावत्क नः सुखं राम प्रजासौख्यहितैषिणाम् ॥ ३० ॥
एतन्नो बाधतेऽत्यर्थमात्मनोऽपि पराभवात् ।
यत्साधून् पीडयत्येष निष्कारणविरोधनः ॥ ३१ ॥
तं नित्यं सेवमानानां सत्त्वं बुद्धिः पराक्रमः ।
विननाश प्रभोऽस्माकं क्व शं दुष्टनिषेवणे ॥ ३२ ॥

एवं विज्ञाप्य देवा रघुकुलतिलकं सानुजं तं सदारं
स्तुत्वा सम्यग्विशिष्टैर्गुणगणगरिमोद्गारपूर्णैर्वचोभिः ।
लङ्काधीशोपनीतोर्वरितसुरतरूत्थप्रसूनैः समंता-
दर्चित्वा तद्विसृष्टाः सुविहितधियः स्वस्वधामानि जग्मुः ॥ ३३ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे रघुपतिविज्ञापनो नामैकविंशाधिकशततमोऽध्यायः ॥१२१॥

*

द्वाविंशाधिकशततमोऽध्यायः

ब्रह्मोवाच

अत्रेर्भगवतो देवी धर्मपत्नी मनस्विनी ।
अनसूया जनकजां भूषयामास भूषणैः ॥ १ ॥
योगसिद्धिसमोपेतैर्दिव्यैः स्रक्चन्दनादिभिः ।
अभूषयतरां देवी सीतां शीतांशुशीतलाम् ॥ २ ॥

अनसूयोवाच

इदं ते चन्दनं देवि सिद्धमङ्गानुरञ्जनम् ।
नित्यं नवीनतां बिभ्रन्मम योगप्रभावतः ॥ ३ ॥

अङ्गरागमिमं धृत्वा स्वाङ्गेषु जनकात्मजे ।
न ग्लास्यसि समं पत्या यान्ती सुमहतः पथः ॥ ४ ॥

न ते सूर्यकरा देहं ग्लापयिष्यन्ति वर्त्मनि ।
छायायामिव गच्छन्त्याः सुखं भूरि भविष्यति ॥ ५ ॥

न ते रक्षोभवा बाधा तिष्ठन्त्या यत्रकुत्रचित् ।
भविष्यति महाराजवध्वा अप्यद्यदुर्गतेः ॥ ६ ॥

इमानि मत्पतेरस्य योगसिद्धस्य जानकि ।
आश्रमप्रभवैः पुष्पैः स्रजस्ते विनिवेदिताः ॥ ७ ॥

इमाः सन्ततमम्लाना योगसिद्धिमयीस्रजः ।
वहन्ती काननेषु त्वं निःशङ्कं विचरिष्यसि ॥ ८ ॥

त्वं प्रधृष्या न केनापि रक्षसा घोरमायिना ।
विनापि देवरं कान्तं नोद्वेगं कलयिष्यसि ॥ ९ ॥

मृगयार्थं हि गतयोरनयोः शून्य आश्रमे ।
वसन्तीत्वं जनकजे बन्धुपूर्णेव भास्यसि ॥ १० ॥

मणिस्वर्णमयान्येतान्यछान्याभरणानिते ।
प्रयच्छामि सरोजाक्षि पत्युः प्रणयपुष्टये ॥ ११ ॥

इदं ते वसनं दिव्यं प्रयच्छामि मनोरमम् ।
यत्परीधाय तिष्ठन्तीं न रक्षो धर्षयिस्यति ॥ १२ ॥

इयं पद्ममयी माला नित्यमम्लानपद्मजा ।
इमां सीते हृदा धृत्वा न त्वां वह्निः प्रधक्ष्यति ॥ १३ ॥

भुविभूमिस्वरूपा त्वं जले जलमयी तथा ।
वह्नौ वह्निमयी भूत्वा वायौ वायुस्वरूपिणी ॥ १४ ॥

व्योम्नि व्योममयी भूत्वा प्रवेशं समवाप्स्यसि ।
पञ्चतत्त्वमयी व्याप्तिर्मद्योगात्ते भविष्यति ॥ १५ ॥

वृष्टिवातातपादीनि निवसन्तीं वनेष्वपि ।
न त्वामुद्वेजयिष्यन्ति योगसिध्यान्वितामिव ॥ १६ ॥

भूयात्ते सर्वदा सौख्यं पत्या सह यथा सुखम् ।
वसन्त्यनुद्विग्नमना भव कल्याणिनी सदा ॥ १७ ॥

पाकस्थालीमिमां भद्रे गृहाण गुणवत्तमाम् ।
यस्यां षड्रससंयुक्तमन्त्रं नित्यमुपाहितम् ॥ १८ ॥

यं यमिच्छसि पाकंत्वं तं तमत्र निभालय ।
परिवेक्ष्यमाणं भोक्ष्यन्ति सहस्रं कोटयो द्विजाः ॥ १९ ॥

अतिथिव्रतवत्यास्ते इयं वै व्रतसाधनम् ।
विनाग्निजलसंयोगमन्नमत्रोपलप्स्यसे ॥ २० ॥

गच्छन्तीं प्रविशन्तीं च तिष्ठन्तीं विहितासनाम् ।
सुप्तां प्रसुप्तां भवतीं रक्षन्तां देवतागणाः ॥ २१ ॥

इन्द्रस्त्वांपुरतोरक्षेत्पृष्ठतोवह्निरेव च ।
यम एकान्तगां रक्षेत् स्नान्तींवरुण एव च ॥ २२ ॥

प्रयान्तीं मारुतोरक्षेदीशस्त्वां पातु सर्वदा ।
सर्वकार्येषु सर्वत्र त्वां रक्षेत् परमेश्वरः ॥ २३ ॥

ब्रह्मोवाच

इत्थमानखशिखं विभूषिता सिद्धयोगफलाखिलाशिषा ।
सिद्धयात्रिमुनिभार्यया तया भोजिता च जनकाबनीशजा ॥ २४ ॥

तुष्टिमाप परमां निजाशये बल्लभेन सहिता तदाश्रमे ।
वार्तयन्त्यतिमनोज्ञया गिरा संगतैर्वरमुनीन्द्रदारकैः ॥ २५ ॥

अत्रेः पत्न्या विस्फुरद्योगसिद्धया विभूषितां सुविहिताशिषंताम् ।
राजेन्द्रपत्नीं जनकस्य पुत्रीं विलोकयन्त्यो मुनिवर्यदाराः ॥ २६ ॥

स्वैः स्वैर्मनोभिस्तुतुषुर्नितान्तं सख्यो यथा पार्श्वचर्यः समस्ताः ।
प्रीत्या प्रयुक्तां परमाशिषोऽदुर्न तृप्तिमापुश्च मुखं धयन्त्यः ॥ २७ ॥

हसन्ती क्रीडन्ती किमपि कलयन्ती रहसि तै-
र्विलासं सुप्रीतैः प्रवरमुनिदारैर्जनकजा ।
मुमोदातीवान्तः सदयमनसूयासुविहितै-
रनेकैः सत्कारैः प्रतिपदमतिप्रीतहृदया ॥ २८ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे अनसूयासत्कारो नाम द्वाविंशाधिकशततमोध्यायः ॥ १२२ ॥

*

त्रयोविंशाधिकशततमोऽध्यायः

ब्रह्मोवाच

तां रात्रिमतिचक्राम पत्या सह मुदान्विता ।
अत्रेराश्रमगा सीता सत्कृता ह्यनसूयया ॥ १ ॥

अन्त्येद्युरुदिते भानौ प्रसन्ने व्योममण्डले ।
कृताग्निहोत्रे योगीन्द्रे जायया सह तिष्ठति ॥ २ ॥

सूपविष्टो वृसीसंस्थे प्रसन्नहृदये मुनौ ।
इदमूचे वचो रामः प्रियाशोभित पार्श्वकः ॥ ३ ॥

श्रीराम उवाच

अदद्य मे सफलं जन्म सभार्यस्य महामुने ।
यत्तवानुग्रहेणालं वासो जातस्तवाश्रमे ॥ ४ ॥

धर्मपत्नी तव ब्रह्मन्ननसूयात्मयोगिनी ।
स्नेहादन्वगृहीदेनां दयनीयां निजस्नुषाम् ॥ ५ ॥

भाग्यमस्या महन्मन्ये वियुक्तायाः सुहृद्गृहैः ।
विप्रवासविपद्वत्या अपि तेऽनुग्रहान्मुने ॥ ६ ॥

क्व मेऽसौ दुर्दशा ब्रह्मन् प्रोषितस्य पुराद् गृहात् ।
विपन्ने न्यस्तराज्यश्रीसम्भारे वनवासिनि ॥ ७ ॥

क्व च तेऽनुग्रहोऽत्यन्त दुर्लभो महतामपि ।
सम्पत्करः श्रीकरणः सर्वसौख्यविधायकः ॥ ८ ॥

तवानुग्रहपात्रत्वाददद्य मे दुर्लभं नु किम् ।
त्रैलोक्ये भाग्ययुक्तानामस्म्यहं मौलितां गतः ॥ ९ ॥

सर्वमेवोपपन्नं मे तवानुग्रहभागिनः ।
रक्षोबलानां हरणं यदेकेनापि धन्वना ॥ १० ॥

सुहृज्जनैर्वियुक्तापि स्नुषेयं तव सुव्रत ।
मुनीन्द्रदारमध्येऽद्य प्राप्ता बन्धुजनैर्युजिम् ॥ ११ ॥

प्रसादोऽस्याः समजनि दर्शनप्रीतिजस्तव ।
आत्मानं बहुसौभाग्ययुक्तमद्यैववेत्ति च ॥ १२ ॥

अमीषां मुनिवर्याणां दर्शनं दुर्लभं मम ।
तवाश्रमागमभवाद्भाग्यादजनि सम्प्रति ॥ १३ ॥

अनसूयापते ब्रह्मन् सिद्धयोगिन् दयानिधे ।
मुनीन्द्र ब्रह्मवर्चस्विन् मुनिवर्यशिरोमणे ॥ १४ ॥

एवमेव सदा महयं सकुटुम्बाय साधवे ।
कृपयस्व यथा यामि भूयः कल्याणपात्रताम् ॥ १५ ॥

किमितोऽप्यधिकं ब्रह्मन् भागधेयं नृणामिह ।
भवादृशानां महतां कृपादृष्टिर्यदुत्तमा ॥ १६ ॥

यन्मे करुणया ब्रह्मन् प्रजानामुदितं त्वया ।
तत्तवानुग्रहान्मन्ये सिद्धमेव न संशयः ॥ १७ ॥

कासौ दशमुखो जेता दशदिक्चक्रवर्तिनाम् ।
क्व चानुजद्वितीयोऽहं चापमात्रद्वितीयकः ॥ १८ ॥

सर्वंत्वत्करुणामात्रसाधनान्मम युज्यते ।
सुदुर्घटमपिब्रह्मन् सुघटं ते तपोबलात् ॥ १९ ॥

यदाह भगवान् वेधाः शर्वश्चैव पुरन्दरः ।
तत्तथैव विधास्यामि हरणाद्राक्षसेशितुः ॥ २० ॥

येनाकुलीकृता लोकाः साधवो धर्मतत्पराः ।
स वै स्वेनैव पापेन राक्षसेन्द्रः पतिष्यति ॥ २१ ॥

पुरैव चिन्तितं चैतन्मया करुणचेतसा ।
अनुनापं त्रिजगति विलोक्य दशकन्धरात् ॥ २२ ॥

मानुजः सपरीवारः क्षयमेष गमिष्यति ।
भवादृशानां महतां प्राविकूल्यमुपाचरन् ॥ २३ ॥

सर्वैर्मुनिगणैर्ब्रह्मन् मामाशीर्भिः समेधय ।
यथा जयेयं त्रैलोक्यतापिनः पिशिताशनान् ॥ २४ ॥

दृष्टस्त्वमद्भुतयोनिधिरात्मयोगविद्याप्रकाशसुनिरस्तमनस्तमिस्रः ।
जाताः परा मम मुदां प्रकराः शुभानि चाक्षय्यतामुपगतानि तव प्रसंगात् ॥ २५ ॥

इतोऽनुजानीहि मुनीन्द्रमौले गन्तुं मम स्वामथ पर्णशालाम् ।
सदारकः सानुज एष चाहं तव प्रपन्नोऽस्मि पदाम्बुजाते ॥ २६ ॥

इत्थं विज्ञाप्यमानोऽसौ रामेण मुनिपुङ्गवः ।
अवोचत् परमानन्दरससंदोहसंवृतः ॥ २७ ॥

अत्रिरुवाच

प्राकृतं समतीत्येदं संयोज्यात्मानमात्मनि ।
यमानन्दमहं राम प्राप्तोऽस्मि वचसां परम् ॥ २८ ॥

ततोऽप्युत्तम आनन्द एष ते दर्शनोद्भवः ।
अतस्त्वया विरहितुं नेच्छामि रघुपुङ्गव ॥ २९ ॥

तत्कथं त्वामहं गन्तुं वदामि प्राणजीवन ।
वेपते मे मनोऽत्यर्थं त्वद्विश्लेषमहारुजः ॥ ३० ॥

इति विक्लवचित्तस्य निशम्य स मुनेर्वचः ।
नाशयन्मनसो मोहमुवाचातीव पेशलम् ॥ ३१ ॥

सूक्ष्मां धियमुपादाय पश्यस्वात्मानमात्मनि ।
तत्र चैव तु मां पश्य यथेष्टं भावनाबलात् ॥ ३२ ॥

सर्वत्रगं सर्वमयं सर्वकारणकारणम् ।
सर्वसौन्दर्यसुभगं सुमुखं सुन्दरस्मितम् ॥ ३३ ॥

स्त्रीरूपं पुंस्वरूपं वा सगुणं चापि निर्गुणम् ।
नित्यं सम्पश्यतो ब्रह्मन् न ते विरहजा रुजः ॥ ३४ ॥

बाधिष्यन्ते मनस्तात नित्यं तुष्टिमतः किल ।
एषा ते भावना प्रोक्ता प्राज्ञस्यापि प्रबोधदा ॥ ३५ ॥

अनया वै भावनया भावयन्तः सदैव माम् ।
कतिचित्सुकृतोपेता मोदन्ते शाश्वते पथि ॥ ३६ ॥

सर्वं जानासि भगवन् दिव्येन ज्ञानचक्षुषा ।
प्रेमवित्तो हृदा भूत्वा भूयः सिद्धिमुपैष्यसि ॥ ३७ ॥

इत्थमत्रिमनसूयया युतं सम्प्रमोद्य निजदर्शनामृतैः ।
प्रेमवित्तहृदयौ प्रणम्य तौ निर्ययावनुजदारसंयुतः ॥ ३८ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डेऽत्र्याश्रमात्परावृत्तौ त्रयोविंशाधिकशततमोऽध्यायः ॥ १२३ ॥

*

चतुर्विंशाधिकशततमोऽध्यायः

ब्रह्मोवाच

व्रजन्तमाश्रमादत्रेः सदारं सानुजं च तम् ।
अनुजग्मुर्मुनिवरा विहातुं भृशमक्षमाः ॥ १ ॥

मुनय ऊचुः

हे राम करुणासिन्धो रविवंशविवर्धन ।
भवद्दर्शनवाञ्छानो वरीवर्ति सदा हृदि ॥ २ ॥

क्व नो विहाय राजेन्द्र गमिष्यसि सहानुजः ।
सदारः स्थाष्यसि श्रीमन् यत्र यत्र घनेवने ॥ ३ ॥

तत्र तत्रैवस्थास्यामस्तव पार्श्वं सुखावहम् ।
अमुञ्चन्तः कथमपि वयं वृत्या यया कया ॥ ४ ॥

एतत्ते वदनं सौम्य चन्द्रादपि सुशीतलम् ।
पश्यतां नः सदा भाविन्यमृतेनैव पारणा ॥ ५ ॥

यथा तवानुजः शान्तो लक्ष्मणः शुभलक्षणः ।
तथा वयमपि प्रेयः स्थास्यामस्तव संनिधौ ॥ ६ ॥

किं नो योगेन तपसा किं व्रतैर्विविधैरपि ।
एकं ते भजनं काम्यमेकान्ते नःस्पृहावताम् ॥ ७ ॥

मोदासीः करुणासिन्धो तव नित्यानुवर्तिषु ।
अस्मासु नित्यभक्तेषु वराकेषु द्विजन्मसु ॥ ८ ॥

ऐहिकामुष्मिके राम विहाय भविके उभे।
तव पादाब्जसेवा नः काम्या कामप्रपूरणा ॥ ९ ॥
अयोध्यानगरीलोकैर्न वयं सदृशाः प्रभो।
ये त्वां विहाय गेहेषु विरहार्तिभृतोऽवसन् ॥ १० ॥
वयं विवेकनिर्णीतपरमार्था अकिंचनाः।
न त्वां क्षणमपित्यक्तुं मनसा शक्नुवामहे ॥ ११ ॥
इति तेषां वचः श्रुत्वा मुनीनामनुयायिनाम्।
मर्यादाजलधिः श्रीमांस्तस्थौ रघुकुलोद्वहः ॥ १२ ॥
उवाच तान्सुसत्कृत्य ब्राह्मणान् शंसितव्रतान्।
मुनीन्द्राय यद्वदथ मां तत्तथैव सुनिश्चितम् ॥ १३ ॥
प्रीयन्ते मयि सुस्निग्धाः स्वभावेनैव मानवाः।
न तानहमपि प्रायः संत्यक्तुं क्षणमुत्सहे ॥ १४ ॥
यैर्निबद्धा मपि रतिः परमाशुद्धबुद्धिभिः।
ते मे प्रियतमाः शश्वदात्मनोऽपि मुनीश्वराः ॥ १५ ॥
त एव बन्धुसुहृदः प्राणाः सर्वस्वमेव च।
न तेभ्योऽप्यस्ति देयं मे स्वात्मप्राणगृहावधि ॥ १६ ॥
करोमि तेषामेवार्थे कर्माणि विविधान्यहम्।
यथा ते पूर्णकामाः स्युर्विनिबद्धधियो मयि ॥ १७ ॥
इदानीं नत्वहं विप्रा दण्डकारण्यवर्त्मना।
गन्तास्मि राक्षसैर्लूनं पुण्यं पञ्चवटीवनम् ॥ १८ ॥
दक्षिणापथमुत्सन्नं राक्षसैः पिशिताशनैः।
तत्राहं विचरिष्यामि दिनानि कतिचिद्द्विजाः ॥ १९ ॥
मारयन् राक्षसानीकं धनुर्मुक्तैः सुपर्वभिः।
तोषयन् भवतां सार्थं साधूनां शुद्धचेतसाम् ॥ २० ॥
तत्रैव योगिप्रवराः संगमिष्यथ वै मया।
रक्षःक्षयमुदाविष्टाः पुण्ये पञ्चवटीवने ॥ २१ ॥
एषा जनकजा साध्वी धर्मपत्नी मम द्विजाः।
तदाभोजनदानाद्यैर्युष्मान् परिचरिष्यति ॥ २२ ॥
परिवेषयन्ती वो विप्राः स्वादून्यन्नानि भूरिशः।
संवर्द्धनीया सततं युष्माभिरियमाशिषा ॥ २३ ॥
इत्युक्ता रघुवर्येण नत्वा ते संनिवर्तिताः।
स्वं स्वमाश्रममाजग्मुः सर्व एव मुनीश्वराः ॥ २४ ॥
ततश्च रामो मुनिधर्मपत्नीविभूषितां स्वां दयितां विशेषात्।
निरीक्षमाणः प्रणयेन भूयो निकेतनं स्वं समुपाजगाम ॥ २५ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डेऽत्र्याश्रमादागने चतुर्विंशाधिकशततमोऽध्यायः ॥ १२४ ॥

*

पञ्चविंशाधिकशततमोऽध्यायः

ब्रह्मोवाच

अथैकदा रघुवर्यो व्रजस्थैरनुव्रतैर्विचरन् भूधरेन्द्रे ।
धनुर्धरःशरतूणीरबन्धमनोहरोमृगयामास्थितोऽभूत् ॥ १ ॥

सानुजो जानकी युक्तः पशुपालकुलान्वितः ।
चिक्रीड स्वेच्छया तत्र भिन्दन् दुष्टमृगाञ्छरैः ॥ २ ॥

वयस्यास्तस्य सर्वेऽपि व्रजवासिधनुर्धराः ।
स्वां स्वां निर्भेदपटुतां दर्शयन्तो विजह्रिरे ॥ ३ ॥

तेषां सार्थगतः साक्षाल्लक्ष्मणः शुभलक्षणः ।
प्रभोरिच्छां प्रविज्ञाय विचचार धनुर्धरः ॥ ४ ॥

इदं विद्धमिदं विद्धमित्याखेटकमध्यगाः ।
गिरिं कोलाहलीचक्रुर्वयस्याः सर्व एव ते ॥ ५ ॥

तेषां विक्रमतामुञ्चैः पश्यन्ती भेदपाटवम् ।
तत्रास्त जानकीदेवी गोपीमण्डलमध्यगा ॥ ६ ॥

अथो रघूणां पतिरात्तशायकः सुपुङ्खबाणावलिमुक्तिदक्षणः ।
क्रीडन् गिरीन्द्रे मृगयां रसोत्तरां त्रीन् सायकान् संहितवान् धनुर्गुणे ॥ ७ ॥

तेष्वात्मनश्च सौमित्रेर्जानक्याश्चापि तत्क्षणे ।
संदधौ निस्तुलं तेज आत्मयोगेश्वरः स्वयम् ॥ ८ ॥

दक्षिणं लक्ष्मणं कृत्वा वामे जनकभूपजाम् ।
मध्ये स्वयं बभूवैष आत्मचैतन्यभासुरः ॥ ९ ॥

अथ त्रयस्ते विशिखा विशाला विद्योतयन्तो हरितश्चतस्रः ।
साक्षात् स्वयं रामकरातिकृष्टधनुर्गुणान्मुक्तिमवाप्यरेजुः ॥ १० ॥

तेजस्विनो जविनः शब्दवन्तः क्ष्मां द्यां च संव्याप्य महोवितानैः ।
चेत्नुः शरा रामधनुर्गुणोत्था अभूतपूर्वां श्रियमावहन्तः ॥ ११ ॥

प्रथमं तु धनुर्मुक्तैस्तैः शरैस्तिग्मरोचिभिः ।
कोटिविद्युत्प्रकाशेन व्यापिताः पश्यतां दृशः ॥ १२ ॥

दिविस्था गमनस्थाश्च शरनिर्मोचनक्षणे ।
चक्षूंषि पिदधुर्भीताः श्रुतीश्च बधिरायिताः ॥ १३ ॥

तत्तादृक् तेजसां वृन्दं ध्वनिं च विशिखास्त्रयः ।
धनुर्मुक्ताः समसृजंस्तत्कौतुकमिवाभवत् ॥ १४ ॥

पूर्वं विद्युद्दीधितिव्याप्तकृत्स्नदिग्भूव्योमोद्भूतभूरिप्रकाशाः ।
पश्चाद्दूरं किंचिदेते प्रयाताः प्रातःकालोदितसूर्योपभानाः ॥ १५ ॥

ततश्च ते तरुणार्कप्रकाशा गताः सुदूरं विशिखाः पौरुषेण ।
वीर्येण युक्ताः सहसावतेरुर्महीतलं यत्र विराधदेशः ॥ १६ ॥

द्वौ सायकौ व्योमपथे प्रयान्तौ दृष्टौ सुरैः प्रावृषेण्याभ्रनीलौ ।
परस्तयोर्वामतोद्योतमानस्तडित्समूहः प्रभया समेतः ॥ १७ ॥

तान् वीक्ष्यमाणा विशिखान् महस्विनः
सुरा विमानाग्रजुषः प्रभामरैः ।
प्रधर्षिताक्षा इव किंचिदुश्चकै-
र्बभूवुराश्चर्यपराश्च तत्क्षणे ॥ १८ ॥

अथो देशे विराधस्य दण्डकावन मध्यगे ।
नद्यामपीपतन् बाणास्तत्क्षणात्सुभगत्विषः ॥ १९ ॥

दक्षिणोलक्ष्मणः सोऽभूद्वामस्तु जनकात्मजा ।
मध्ये स्वयं दाशरथी रामचन्द्रो रघूद्वहः ॥ २० ॥

ते यथा भूषणोपेता यथा विमलवाससः ।
यथा स्वभावसुभगा यथा सौन्दर्यरोचिषः ॥ २१ ॥

यथाऽऽयुधौ तौ नरदेवदेवौ नरेन्द्रसूनू नवमेघनीलौ ।
गुञ्जास्रजौ केकिकलावतंसौ सुबिभ्रतौ पीतजटाभिरामौ ॥ २२ ॥

तापसोचितवेषाढ्यौ भूतिपाण्डुरविग्रहौ ।
आजानुलम्बितभुजौ सुमुखौ कमलेक्षणौ ॥ २३ ॥

सुशीलौ सुन्दरतरौ सिंहविक्रान्तिशालिनौ ।
नद्याः सरसि खेलन्तौ नवराजीवराजिभिः ॥ २४ ॥

सापि नैम्यनरेन्द्रस्य तनया तरुणीवरा ।
यथा भूषापटरुचिस्तथा सर्वात्मनाभवत् ॥ २५ ॥

शृङ्गारिता सा मुनिधर्मपत्न्यानसूययाऽऽभरणैरङ्गरागैः ।
प्रादुर्बभूवेह विराधरक्षोदेशे तटिन्यास्तटभूमियुग्मम् ॥ २६ ॥

प्रकाशयन्ती तडितां महोभिस्तनुप्रभासम्भवैर्दीप्तिदीप्तैः ।
शरन्महाचन्द्रविम्बाभिरामैः सुधास्रवैः पश्यतां लोचनेषु ॥ २७ ॥

अहो दूरं देशमिता इदानीमिति व्वाक्यं समुदीरयन्तः ।
त्रयोऽपि ते देवसमानरूपा वमज्ज्य सद्यः सरितो निरीयुः ॥ २८ ॥

रघूद्वहो मैथिलराजकन्यां करे दधन्नव्यसरोजभूषाम् ।
स्वदक्षिणे लक्ष्मणं वीक्षमाणो मुमोद माधुर्यमहाम्बुराशिः ॥ २९ ॥

इति श्रीमदाविरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे श्रीरामशरसंधानो नाम पञ्चविंशाधिकशततमोऽध्यायः ॥१२५॥

*

षड्विंशाधिकशततमोऽध्यायः

ब्रह्मोवाच

अथ तत्रान्तरदधाद्भगवान् रघुपुङ्गवः ।
पश्यतामनुरक्तानां बन्धूनां व्रजवासिनाम् ॥ १ ॥
सीतया लक्ष्मणेनापि सहितं रघुपुङ्गवम् ।
अपश्यन्तो वियोगार्ता अभवन् व्रजवासिनः ॥ २ ॥

इह गिरिशिखरे दधद्विहारं प्रतिमृगलक्ष्यमिषूंश्च संदधत्सः ।
क्व गत इत उदित्वरः प्रियो नो ध्रुवमतिगुप्तमसाविहैव वास्ते ॥ ३ ॥
क्षणमपि न वयं भवाम तेन प्रियसुहृदा परमोपकारिणार्ते ।
बहुविध विपदः स नो व्यनैषीन्निजभुजविक्रमभृद्वने जुगोप ॥ ४ ॥
क्व नो गवां पालनकृत्स रामः क्व लक्ष्मणोऽस्माकमनन्यबन्धुः ।
क्व च स्मितास्या जनकाधिराजसुता सदातीवहिता व्रजस्य ॥ ५ ॥
कान्वेषयामः करवाम किं वा गतः क्व रामः सुहृदो विहाय ।
यत्प्रेमयुक्ता वयमत्र याताः प्रमुद्वनं साधुगृहान् विहाय ॥ ६ ॥
एह्येहि रामानुजदारयुक्तः किं नः श्रितान् वञ्चयसीत्थमद्धा ।
जानीमहे त्वा वयमेकबन्धुमनन्यचित्ता व्रजवासिलोकाः ॥ ७ ॥
क्रीडन्नेव काधुना त्वं गतेऽभूः क्व तेऽनुजः सौम्यतनुः प्रिया च ।
किं वक्ष्यते नः सुखितो व्रजेशः किं चक्षुषीभ्रामयसीव बन्धो ॥ ८ ॥
किं रोदसी पूरयसीव कामं ध्वान्तैस्तवादर्शनसम्प्रभूतैः ।
क्षमस्व नः केनचिद्वा प्रयुक्तमरुन्तुदं दुर्वचनं जनेन ॥ ९ ॥
क्व यामः किं कुर्मस्तव विरहजन्मा हुतवहः
करोतीव ग्रासं प्रियतम मनो नः प्रतिपदम् ।
स्मितज्योत्स्नाशुभ्रं निजमुखमतो दर्शय सखे
श्रितानां नस्तेऽङ्घ्रि विपदघहरं मङ्गलकरम् ॥ १० ॥
इत्थं विलप्य व्रजवासिबाला धनूंषि तत्रैव विहाय मुग्धाः ।
अन्वेषयन्तिस्म रघुप्रवीरं श्रीचित्रकूटस्य गुहागृहाणि ॥ ११ ॥
गह्वराणि गुहाः कुञ्जान्यटवीः सरितां तटान् ।
उन्नावचानि स्थानानि बभ्रमुर्व्रजवासिनः ॥ १२ ॥
पश्यन्त्य एव प्रमदा प्रजौकसां रामं वनेऽन्तर्हिमभ्रमेचकम् ।
आः किस्विदेतद्भवतीति सम्भ्रमाद्विनिःश्वसन्त्यो मुमुहुस्तदा क्षणे ॥ १३ ॥
अथो चिरान्वेषणखिन्नविग्रहाः स पर्णशालां गत इत्युद्भुराशाः ।
सर्वे निवृत्ता व्रजवासिनस्ततो विहारकान्तारत आतुरान्तराः ॥ १४ ॥

ते पर्णशालां रघुवीरवर्जितां शान्तावसथ्याग्निचयां प्रशून्यवत् ।
निरीक्ष्य तप्ता विरहाग्निना भृशं विचिन्तयामासुरिदं व्रजौकसः ॥ १५ ॥

ध्रुवं गतो आश्रममेव नः प्रभुः पुनर्मुनेस्तस्य हितं चिकीर्षुः ।
हा वञ्चनं नो विहितं किमीदृशं पुरेव पृष्ट्वैव स नो न किं गतः ॥ १६ ॥

हा हन्त तस्य प्रणयः सुदुर्वहो विश्लेषकीलाजननोऽङ्गतापनः ।
क्षणे वियुक्ता अपि यन्म्रियामहे धन्यः स साकेतपुरीजनः पुनः ॥ १७ ॥

ब्रह्मोवाच

रामस्यादर्शनं ते च सुखिताय निवेद्य च ।
अत्रेर्मुनिवरेण्यस्य सर्वेऽपि ययुराश्रमम् ॥ १८ ॥

ददृशुस्तत्र योगीन्द्रं निषण्णं दीप्ततेजसम् ।
स्त्रियोबालास्तथा वृद्धाः प्रणेमुर्व्रजवासिनः ॥ १९ ॥

ऊचुर्व्रजौकसः सर्वे ते मुनिं दीर्घवर्चसम् ।
वियुक्ता रामचन्द्रेण दीर्घोच्छ्वासमुचो जनाः ॥ २० ॥

हा हन्त यमिनां श्रेष्ठ किमेतन्नः सुदुर्भगैः ।
अप्रियं जनितं सद्यो यद्रामोऽत्र न दृश्यते ॥ २१ ॥

क्रीडन्तेव क्रीडतां नः स मध्यादाच्छिदद्य चक्षूंषि जवेन पातः ।
क्व सम्प्रयातो न च विद्मएतत्स्थास्यामहे किं च बिना प्रियेण ॥ २२ ॥

दृशोऽन्धतमसं यान्ति दिशश्चान्धतमिस्रताम् ।
यस्य प्रीत्या वयं प्राप्ताः स प्रियो नाम दृश्यते ॥ २३ ॥

स्त्रियो बालाश्च वृद्धाश्च रामप्रेमवशा वयम् ।
म्रियामहे विना तेन प्रेयसात्र दवीयसा ॥ २४ ॥

दृष्टोगिरिर्गह्वरवान् गुहावानसौ निकुञ्जामि च शोधितानि ।
शृङ्गाणि चित्राणि गिरेरमुष्यान्विष्टानि रामस्य विलोकनार्थम् ॥ २५ ॥

भविष्यति क्व प्रणयी स नः सुहृद्धनुर्धरः सानुजदार आतुरः ।
अस्मान् विना यः क्षणमेकं न तिष्ठेत्कचिन्न भुञ्जीत पिवत्यपश्च ॥ २६ ॥

भवान् सुविज्ञाननिधिस्तपोनिधिर्विशुद्धया स्वात्मदृशा प्रपश्यतु ।
क्व नः प्रियो राम इतः प्रयात इतोऽपि यातः स ततोऽयि यातः ॥ २७ ॥

कान्वेषणीयः सुहृदात्मा च बन्धुरस्माकमापत्तिसमूहहर्ता ।
न तं विना क्षणमप्यास्महे वयं सोऽस्मान् विना न क्षणमेकमास्ते ॥ २८ ॥

मुनिर्विलपतां तेषां निशम्य व्रजवासिनाम् ।
वचांसि विरहार्तानां विनिश्चित्येदमब्रवीत् ॥ २९ ॥

अत्रिरुवाच

धन्याः स्थ यूयं भुवनेषु मुख्या व्रजे वसन्तः कृतपुण्यपुञ्जाः ।
येषां मनो वै नरदेवसूनौ श्रीराम एबालमनन्यवृत्ति ॥ ३० ॥

श्रीराममेकं प्रियमत्र लोके जानीथ भाग्यार्णवतां प्रयाताः ।
यूयं निरस्ताखिलजीवदोषा भृशं तदेकात्मतया प्रहृष्टा ॥ ३१ ॥

एतावता वः प्रणयेन संतो रामोऽनिशं वश्यवृत्तिर्वभूव ।
यो नः कथं चिन्मनसां न गोचरः स वः सदा क्रीडनकः परात्मा ॥ ३२ ॥

क्व वो वियोगः परमेण पुंसा श्रीरामसंज्ञेन विविक्तभावाः ।
यैवंश्यतामेष चिराय निन्ये प्रेम्णा प्रकृष्टेन न चान्यगामिना ॥ ३३ ॥

सम्यक् समीक्ष्यान्तर एव संतं रामं विविच्योपलभध्वमञ्जसा ।
अन्तर्बहिश्चापि स एव देहिनामास्ते परः पूरुष एक रामः ॥ ३४ ॥

एवं विविच्यान्विषतां जनानां सनेतरेषामपि दूरवर्त्ती ।
तदेकचित्ताः किमुत प्रियाणां युष्माकमद्धार्पितसर्वसम्पदाम् ॥ ३५ ॥

क्षितौ जले तेजसि चापि वायौ वियत्यथो दिक्षु मनःसु काले ।
प्रत्याशयं जन्मिनां देहभाजां स एव देवो वरिवर्ति नित्यम् ॥ ३६ ॥

तमीश्वरं ध्यायत नित्यमेव सर्वात्मना सर्वगं चापि सन्तम् ।
इति प्रबुद्धा मयका शुद्धबुद्धिप्रकाशवन्तः सुखिनः संततं स्थ ॥ ३७ ॥

अथापि युष्मभ्यमहं वदामि गतिं सुरार्थाय रघूद्वहस्य ।
विज्ञापितोऽसौ मुनिभिः समस्तै रक्षोभिरुद्वेजितसाधुचित्तैः ॥ ३८ ॥

असौ हि देवो हितकृज्जगत्या असूत यं कोसलराजपुत्री ।
सम्प्रार्थितो विधिनेहावतीर्णः स्ववीर्यतोरक्षिता सज्जनानाम् ॥ ३९ ॥

स दण्डकारण्यमितः प्रतस्थौ नूनं चिकीर्षुः सुरसंघकार्यम् ।
हत्वा विराधादयसुरान् बलिष्ठो गन्ता पुनः पञ्चवटीं क्रमेण ॥ ४० ॥

तत्रापि रक्षांसि बलेन हन्ता धनुर्धरोऽसावनुजद्वितीयः ।
समन्वितो मैथिलराजपुत्र्या सूर्यस्तमांसि प्रभयेवयुक्तः ॥ ४१ ॥

एवं स यावद्दशकन्धरस्य वधं विधायामरलोकपानाम् ।
करिष्यतेशं रघुवंशकेतुस्तावन्न युष्मासु भविष्यति स्फुटः ॥ ४२ ॥

अत्रापि चास्ते खलु तत्र चास्ते प्रभुर्विभुः सोऽयमशेषसाक्षी ।
परावरेशो भगवाननादिर्जानीत श्रीराघव एष एव ॥ ४३ ॥

कर्माणि तस्यामरसिन्धुपूतान्यनेकशः सांख्यपथातिगानि ।
गायन्ति विप्र निगमैरशेषजगत्त्रयालंकृतिदीक्षितानि ॥ ४४ ॥

देवाचार्यस्त्रिपुरहरणः शेषनागो हयास्यः
कुम्भोद्भूतः कमलभवनः सर्व एवामरेशा ।
गायन्त्यस्य प्रणयखचितैर्मानसैः संविदाना
नानावीर्याण्यमरसरितोऽप्युज्ज्वलान्यद्भुतानि ॥ ४५ ॥

श्रीमान्मारुतनन्दनोऽस्य परमो भक्तो भविष्यत्यलं
रक्षोनीकनिपातनेषु बलवान् साहाय्यमाधास्यति ।
इत्थं सर्वसुपर्वगर्वहरणीं लङ्काधिराजश्रियं
दोर्भ्यामेष हरिष्यतीश्वरवरैः पूज्याङ्घ्रिपद्मद्वयः ॥ ४६ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे व्रजवासिजनसमाहितिर्नाम षड्विंशाधिकशततमोऽध्यायः ॥ १२६ ॥

*

सप्तविंशाधिकशततमोऽध्यायः

ब्रह्मोवाच

इत्यत्रिणा मुनीन्द्रेण समाहृतमनोरुजः ।
व्रजौकसो निव वृतुर्जाततत्त्वा निजप्रभोः ॥ १ ॥
ते सर्वे कथयाञ्चक्रुर्वृत्तमत्यद्भुतं प्रभोः ।
सोऽपि विज्ञाय तत्सर्वं मुमूर्छ विरहातुरः ॥ २ ॥

अथ व्रजमृगीदृशः प्रणयपाशबद्धास्तथा
गतिस्मित विलोकित प्रतिनिमग्नचित्ताः प्रिये ।
गुहासु शिखरेषु चाटविषु चित्रकूटस्य ता
वियोगविकलां दशां हृदि दधत्य इत्यूचिरे ॥ ३ ॥

रमण परवशोऽसि प्रायशस्त्वं प्रियाया
जनकनृपतिपुत्र्यास्तत्सहैकान्तचारी ।
इति वत विकला नस्त्वद्वियोगाग्निदग्धाः
सपदि करुणपातः शून्य उज्झाञ्चकार ॥ ४ ॥

प्रतिविपिन मटन्त्यास्त्वां प्रियंनो गृहीत्वा
जनकनृपतिपुत्र्याः कौमलं पादयुग्मम् ।
कथमिव न तुतुदुस्ता भूमयो दर्भगर्भा
वयमथ करुणार्द्राः पल्लवानादधीम ॥ ५ ॥

व्रजवसतिजुषो नो ग्राम्यवृत्तीः स्वसार्थे
परिचरणविदग्धा नौ किमादातमग्रे ।
करुणरसविहीनं चक्रथुश्चित्तमीदृक्
तदिह बत् युवां वै विस्मृतौ किं परार्थम् ॥ ६ ॥

रघुवर बहुधा नो मानसं न प्रतीतं
क्षणविरहहुताशज्वालजालेन दाह्यम् ।
प्रमुदवनविहायिन् यो न एकान्तसंगी
मृदुकठिनपदार्थज्ञातशीलः खलु त्वम् ॥ ७ ॥

प्रमुदवनमजस्रं सेवमानाः पुरापित्वदमितविरहार्ता एव तत्रावसाम ।
पुनरपि किमु दत्त्वा चित्रकूटे प्रसंगं मदनदहनमन्तर्दीपयामास किं त्वम् ॥ ८ ॥
अलमलमथवा ते वार्तया राजसूनो पुनरपि वयमार्त्तास्तत्प्रसंगेनभूयः ।
द्विगुणमुदयते यत्स्नेहजन्यो हुताशः प्रतिपदमभिषेकात्स्तोकपाथःकणस्य ॥ ९ ॥
बहुतरमियदुक्त्वैः किं विलप्यापि नाथ
त्वमसि हृदयसंस्थः सर्वहृत्तत्त्ववेदी ।
स्वपति खलु फलाढ्यो जागरार्थः प्रयत्नो
न तु नरवर जाग्रत्केनचिद्बोधितः स्यात् ॥ १० ॥
स्मितगतिलपितेक्षाभोगदानैः पुरा नो
वशितहृदयवृत्तीरीदृशीस्त्वं विधाय ।
यदलघुविरहार्ता घोषनारीश्चकर्थ
स्फुटमिह विदितोऽभूस्तेन नो निर्दयः किम् ॥ ११ ॥
स्फुटतरमवधीस्त्वं कूर्दमानान् कुरङ्गान्
वनभुविः धृतचापः सायकैः पूर्णतूर्णः ।
प्रकृतिरिति न ते नो गोचरत्वं प्रयाता
नयनविशिखविद्धानाशयान् बिभ्रतीनाम् ॥ १२ ॥
प्रणयिवर तवोपालम्भनं नो निरर्थं बहुतरसुखदानैः प्रीणयामास यो नः ।
तव तु सहचरी सा स्यादुपालम्भनीयाविजनगतमकार्षीद् या भन्तं बलेन ॥ १३ ॥
अयि जनकसुते त्वं प्राणजीवातुरेव
व्रजवनवनितानां नास्युपालम्भयोग्या ।
हिमकरमुखि नित्यानन्दिनी त्वं तु भूयाः
किमु न विटपवर्गो मूलसेकान्न पुष्पेत् ॥ १४ ॥
त्वमसि हिमकरश्रीस्तारकाः स्याम सर्वा-
स्त्वमथ सुतनु बल्ली पल्लवास्ते वयं च ।
त्वयि खलु सुखितायां स्याम सर्वाः सुखिन्यो
यदि स भवदधीनोऽस्माकमेवास्त्यधीनः ॥ १५ ॥
तदपि वयमजस्त्रैकान्ततः स्त्रीस्वभावा-
च्चपलधियमुपेताः संततौत्कण्ठ्यभाजः ।
उचितमनुचितं वा भाषितं नः सखीना-
मतिपरिचयभाजां त्वं हि पूर्णाक्षमस्व ॥ १६ ॥
इति प्रणयबद्धास्ताः सीताराघवयोः प्रियाः ।
सख्य उच्चावचैर्वाक्यैर्विरहार्ता बभाषिरे ॥ १७ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे गोपीजनोपालम्भनोनाम सप्तविंशाधिकशततमोऽध्यायः ॥ १२७ ॥

★

अष्टाविंशाधिकशततमोऽध्यायः

ब्रह्मोवाच

ततः सुखितगोपेन्द्रो दृष्ट्वा सुचिरमातुरः ।
रामशून्यं चित्रकूटं व्रजं गन्तुमसज्जत ॥ १ ॥

आहूय बृद्धान् गोपबालान् सर्वगोव्रजभूपतिः ।
उवाच रामविरहादिदं स विरहाकुलः ॥ २ ॥

हे गोपवृद्धाः शृणुत साम्प्रतं गिरिरेषकः ।
नित्यं वनाश्रियाढ्योऽपि न मे रमयते मनः ॥ ३ ॥

यावद् राम इहावात्सीद्रममाणो निजैर्जनैः ।
तावन्मे मनसोऽत्यन्तं प्रीत्यै जातो महीधरः ॥ ४ ॥

इदानीं रामविश्लेषशून्या अन्धतमोवृताः ।
चित्रकूटगिरेराशा न जाने न लभे च शम् ॥ ५ ॥

अन्धकारितदेशोऽसौ सर्वशः पृथिवीधरः ।
गुहामय इवाशेषो जातः सम्प्रतिवर्तते ॥ ६ ॥

अत एनं संविहाय नवीनविरहप्रदम् ।
पुरा विरहसम्पूर्णां व्रजभूमिं पियासुकः ॥ ७ ॥

आदाय गोधनानीतः सर्वशो वितितान्यहम् ।
प्रमुद्वने प्रयास्यामि फलत्पुष्पल्लताद्रुमम् ॥ ८ ॥

सुनिर्वृत्तपशुव्रातं पक्षिस्तोमसुखप्रदम् ।
त्रिविधानिलसंसेव्यं सर्वर्तुगणसेवितम् ॥ ९ ॥

आकारयत गोपालान् पुरतः परतो गिरेः ।
मन्दाकिन्यास्तटे चैव पृथक् पृथगवस्थिताम् ॥ १० ॥

निर्घोष्य दुन्दुभिं घोषेष्वेकीकुरुत गोपतीन् ।
पुरो निधाय गोसार्थं सावधाना व्रजन्तु च ॥ ११ ॥

यथा पुरा प्रमुद्वने सदर्तुसुन्दरश्रिणिः ।
रघूद्वहं प्रगायत प्रमोदतो दिवानिशम् ॥ १२ ॥

स्मरत भजत नित्यमेनमेव प्रणयवशं रघुपुङ्गवं विशेषात् ।
इति निखिलविलपत्कदम्बकेभ्यो भयरहिताः सततं प्रयात साम्यम् ॥ १३ ॥

श्रुत्वा व्रजपतेर्वाक्यं वर्षीयांसो व्रजौकसः ।
अभ्यनन्दन् सर्व एव स्वे स्वे हृदि निराकुलाः ॥ १४ ॥

अवदन् व्रजभूमीशं साधुसम्मतमीदृशम् ।
यथा पुरा व्रजभुवं वासयामः समन्विताः ॥ १५ ॥

सर्वात्मना तमेवेशं ध्यायन्तः सर्वदा वयम् ।
जीविष्यामः परं प्रेम पुष्णन्तो विरहोद्भवम् ॥ १६ ॥

प्रमोदवनवीथीषु वसन्तो मधुमत्तमैः ।
वासन्तीनां सुमैर्घ्राणातृप्तिं कुर्वन्त एव च ॥ १७ ॥

सम्प्राप्तैर्भक्तिविवशैर्जनैः परमहंसकैः ।
शृण्वन्तश्चरितान्यस्य हृत्कर्णमधुराण्यलम् ॥ १८ ॥

यावत्तस्यैव संदर्शः प्रेयसः सुखबर्द्धनः ।
तत्रातिवाहयिष्यामस्तावत्कालं प्रमुद्वने ॥ १९ ॥

एवं निश्चित्य मनसा सर्वे ते व्रजवास्तवः ।
शृङ्गाण्यापूरयामासुः प्रतिष्ठन्तः प्रमुद्वनम् ॥ २० ॥

गवां वृन्दानि पुरतो विधाय विहितोत्सवाः ।
अनःस्वारोप्य दारान् स्वांश्चित्रकूटाद्विनिर्ययुः ॥ २१ ॥

गोपाङ्गना गुणगणान् रघुपुङ्गवस्य गायन्त्यउद्गतवियोगमदनेन मत्ताः ।
प्रेम्णा सुविह्वलतमास्त्वरितं प्रयान्त्यो युक्तैरनो भिररुचंस्तडितो यथाभ्रे ॥ २२ ॥

रामस्यावासदेशेषु वसन्तो रजनीषु ते ।
यमुनां जाह्नवीं चैव तीर्त्वा याताः प्रमुद्वनम् ॥ २३ ॥

ते चार्द्धवर्त्मनि गता भरतं जटालमायान्तमार्यसविधे ददृशुस्तदानीम् ।
पश्चादमीभिरुदिताखिलसम्प्रवृत्तिः संगामृतप्रमुदितं सह तैर्निवृत्तः ॥ २४ ॥

गोपेन्द्रो भरतेन रामचरणप्रेमप्रमोदस्पृशा
संगं प्राप्य चिराय तुल्यविरहक्लेशेनवार्तादिभिः ।
चित्तं स्वस्थ नितान्ततांतिविवशं शून्यां दिशो भावयन्
प्रेम्णात्यार्द्रमतिर्व्यनोदयदितः कृच्छ्रात्प्रमोदाटवीम् ॥ २५ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे प्रमोदवनागमनो नामाष्टाविंशाधिकशततमोऽध्यायः ॥ १२८ ॥

*

ऐकोनत्रिंशाधिकशततमोऽध्यायः

ब्रह्मोवाच

रामो भरतमायान्तमाशङ्क्य सविधत्वतः ।
चित्रकूटं परित्यज्य प्रययौदक्षिणां दिशम् ॥ १ ॥

सानुजेन सदारेण तेन मुक्तं महीधरम् ।
चित्ते न रोचयामासुः पशवः पक्षिणोऽपि च ॥ २ ॥

येषां सीतामुखचन्द्रानुरागः प्रतिक्षणं बर्द्धमानो बभूव ।
ते चित्रकूटाद्रिचराश्चकोराः शून्या इवाशा ददृशुः समंतात् ॥ ३ ॥

ये प्रावृषेण्याभ्रसमूहनीलं श्रीरामचन्द्रस्य वपुर्मनोज्ञम् ।
पश्यन्त आनन्दभृतो मयूरा ग्रीष्मेऽपि नान्तःपरितापमापुः ॥ ४ ॥

तेषामिदानीं समयः सुदुर्वहस्तेनैव कान्तेन वियोगभाजाम् ।
महादवाग्निज्वलिता इवासन् समंततश्चित्रकूटे वनान्ताः ॥ ५ ॥

धनुर्धरस्यापि विदेहजेशितुर्वरानुकम्पामधुरं वपुर्मृगाः ।
विलोकयन्तो मनसा न तत्रसुः कर्णान्तकृष्टाशुगमुक्तिभीष्वपि ॥ ६ ॥

ये रामचन्द्रमुरलीमधुरानुवादपीयूषपारणसुपल्लवपङ्क्तिपूर्णाः ।
ते चित्रकूटकटकद्रुमगुल्मबल्लीवृन्दा अपि प्रतिपदं शुशुषुस्तदानीम् ॥ ७ ॥

इत्थं हित्वा चित्रकूटं चिरावासं रघूद्वहः ।
आचक्राम धनुष्पाणिर्दक्षिणाशां सहानुजः ॥ ८ ॥

प्रेयां समनुगच्छन्ती जानकी व्यरुचत्तराम् ।
राज्यश्रीरिव शोभाढ्या गजेन्द्रवरगामिनी ॥ ९ ॥

विदेहजामनुगतो लक्ष्मणोऽपि व्यरोचत ।
प्रभोः पादोन्मुखीं भक्तिं जनो भागवतो यथा ॥ १० ॥

अत्रिपत्न्यानुलिप्तेन साङ्गरागेण भूयसा ।
पुण्यगन्धपुषा चक्रे वनं तत्साधुसौरभम् ॥ ११ ॥

सीताङ्गसौरभं भृङ्गा जिघ्रन्तस्तत्र कानने ।
सुरभीण्यपि पुष्पाणि तत्यजुस्तत्क्षणं किल ॥ १२ ॥

ऋषीणामाश्रमस्थानान्यलंकुर्वन्त उच्चकैः ।
आत्मभासान्विता जग्मुस्त्रयस्ते देवतोपमाः ॥ १३ ॥

प्रद्योतयन्तो विपिनं समंताच्छ्रीरामसीतानुजकल्पवृक्षाः ।
आनन्दिताः सौरभसम्भरेण मल्लीसुमेभ्यश्चकृषुर्मिलिन्दान् ॥ १४ ॥

वनस्थलीः पादसरोजपाविनीः समंततोऽसौ विदधद्रघूद्वहः ।
विराधरक्षोऽधियवासमाराज्जगाम कोदण्डधरोऽक्षयेषुधिः ॥ १५ ॥

क्रोडञ्छरैर्दुष्टमृगान् विहिंसन् मुक्तिं च तेभ्यः प्रददत्सुदुर्लभाम् ।
चमच्चकाराखिलमेव काननं महाबलो दाशरथिः सहानुजः ॥ १६ ॥

तयोर्महावीर्यमृगेन्द्रगामिनोर्मध्येन सा विद्युदिव प्रयान्ती ।
रेजे महाराजसुता मनस्विनी पादाब्जशिंजद्वरनूपुरद्वया ॥ १७ ॥

तस्यास्तनुद्योतभरेण भूयसा प्रकाशितास्तत्र वनेऽखिला दिशः ।
ननाश नैशं सहसा यथा तमश्चमत्कृताश्चाखिलसत्त्वराशयः ॥ १८ ॥

अग्रे रामः प्रकृतिसुभगश्चापतूणीरधारी
खड्गी श्यामोभसितधवलः पिङ्गचूडाललामः ।
पृष्ठे तस्य क्षितिपतिसुता द्योतयन्ती दिगन्तां-
स्तस्याः पृष्ठे कमलनयनो लक्ष्मणः संजगाम ॥ १९ ॥

तेषामेवं गच्छतां मार्गमध्ये रक्षोऽतिष्ठद्घोरकर्मा विराधः ।
संध्याकालीनाभ्रवभ्रुःस्वरूपेणोच्चैः कायः कामचारी करालः ॥ २० ॥

तं खलं मार्गमावृत्य तिष्ठन्तं रघुपुङ्गवः ।
उवाच कोमलां वाचमादाय परमेश्वरः ॥ २१ ॥

कस्त्वं भोः प्रांशुभीमाङ्गः संध्याभ्रकपिशद्युतिः ।
देहि नो गच्छतां मार्गं वनेऽस्मिन् भूरिभीषणे ॥ २२ ॥

इत्युक्तः कुटिलस्वान्तो राक्षसो रुधिराशनः ।
प्रकृत्या भीषणतनुरुवाच विधिवञ्चितः ॥ २३ ॥

के यूयमत्र विजने विपिने मम सद्मनि ।
सम्प्राप्ताः कोमलतमा रक्षसौ मम भक्षणाः ॥ २४ ॥

न कश्चिदत्र मनुजः संचरत्यात्मनो हितम् ।
अन्विच्छन् मदगारेऽस्मिन् भीषणे निर्जने वने ॥ २५ ॥

न चेह कश्चित्सम्प्राप्तः प्राणैः सह गतो जनः ।
अतो वो भोक्तुमिच्छामि मर्त्यानमृतपारणान् ॥ २६ ॥

विधिना नोदिता यूयं सम्प्राप्ता मम सद्मनि ।
अलं वः कातरतयाधुना भूतं हि भावि यत् ॥ २७ ॥

इति तस्य गिरा रामो ज्ञात्वा तं राक्षसाधमम् ।
निहन्तुमेकं विशिखमुद्धाराशु तूणतः ॥ २८ ॥

स तावदद्रेः शिखरमुत्पाट्य बलदुर्मदः ।
ऐच्छत्पातयितुं रामे आकर्णाकृष्टसायके ॥ २९ ॥

बाणो रामकरोन्मुक्तः खण्डखण्ड चकार तत् ।
गिरेः स्थूलतरं शृङ्गं न्यपतद्रक्षसः करात् ॥ ३० ॥

ततः सोऽन्यद्गिरेः शृङ्गं भ्रामयित्वाऽऽत्मपाणिना ।
मुमोच राक्षसो रामे कल्पद्रुकुसुमोचिते ॥ ३१ ॥

तदप्यस्य करोन्मुक्तबाणभिन्नं सहस्रधा ।
निपपात महीपृष्ठे करकावर्षसंनिभम् ॥ ३२ ॥

अथ भूयः स संक्रुद्धो मुष्टिमाबध्य राक्षसः ।
प्रहर्तुकामस्त्वरितं राममभ्याययौ खलः ॥ ३३ ॥

तमेकेन शरेणोच्चैर्भुजमूलेऽभ्यताडयत् ।
स तेन सुचिरं क्रूरो मूर्छनामाप राक्षसः ॥ ३४ ॥

विहाय मूर्छनां रक्षः सहसा पुनरुत्थितः ।
दर्शयन् भीषणं रूपं दंष्ट्राकोटिस्फुटाननम् ॥ ३५ ॥

रामो मर्मणि विव्याध राक्षसं स्वापराधिनम् ।
आकर्णाकृष्टज्यामुक्तैः शरैराघातवेगिभिः ॥ ३६ ॥

एकेन तस्य वक्षोऽहन् द्वाभ्यां बाहू व्यकृन्तयत् ।
पुनरेकेन तच्छीर्षं कन्धराया अपातयत् ॥ ३७ ॥

इत्थमालिङ्ग्य वैदेहीं श्रीरामो रघुसत्तमः ।
दृशा पीयूषवर्षिण्या ददर्श प्राणवल्लभाम् ॥ ३८ ॥

रामतीक्ष्णशराघातैर्विभिन्नतनुरस्रपः ।
निपतन् धरणीं कृत्स्नां कम्पयामास भारतः ॥ ३९ ॥

तदङ्गं शतधा कृत्वा राघवौ खड्गकर्तनैः ।
स्थाने दुर्गन्धमाशङ्क्य धरण्यां विनिचरन्व तुः ॥ ४० ॥

तस्मिन् दिने तद्विषयाद्विवासिता
स्तेनैव घोराचरितेन रक्षसा ।
स्वस्वाश्रमस्थानमुपाययुस्तदा
तपोधना राघवयोः कृताशिषः ॥ ४१ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे विराधवधो नामैकोनत्रिंशाधिकशततमोऽध्यायः ॥१२९॥

*

त्रिंशाधिकशततमोऽध्यायः

ब्रह्मोवाच

विराधवधसामर्षा ये चान्येऽपि निशाचराः ।
ते भेजू राघवावेत्य दीपेष्विव पतङ्गताम् ॥ १ ॥

मुनीन् सम्मानयामास रामः कामतरूपमः ।
विराधवधसंहृष्टास्ते तस्मायाशिषो ददुः ॥ २ ॥

ब्रह्मण्यदेवता तेन मुनिषु प्रकटीकृता ।
सीतां नियोजयामास येषां पादावनेजने ॥ ३ ॥

रामं निरीक्ष्य मुनयो दण्डकावनवासिनः ।
पूर्णकामाः समभवत् मेनिरे च तमीश्वरम् ॥ ४ ॥

असावधोक्षजः साक्षाच्छ्रिया देव्या समन्वितः ।
रामचन्द्रः सुखयितुं धरणीतलमागतः ॥ ५ ॥

कोऽन्योऽमुना विना हन्यादत्युग्रान् रजनीचरान् ।
द्विजदेवत्रयीधर्मं रक्षेच्च निजवीर्यतः ॥ ६ ॥

इतिरात्रं दिवं रामः स्वगुणानेवगायतः ।
मुनीन्द्रान् मोदयामास प्रकृत्यैव मनोज्ञया ॥ ७ ॥

मुनिदाराः प्रपश्यन्तः प्रियां रामस्य जानकीम् ।
आशंसन्तः प्रमुदिता इदमूचुः कृपावशात् ॥ ८ ॥

हा कष्टं राजतनये तव वीरेन्द्रभामिनि ।
पद्भ्यां पद्मपलाशाभ्यामटवीमवगाहसे ॥ ९ ॥

धिक् कैकेय्याः कुमतिं घोरकर्मणो यया समुद्भिन्ननवेन्दुनीलभः ।
रामः कान्तासहितः काननं व्रजन् निवारितो नैव गुणैर्महोज्ज्वलः ॥ १० ॥

जानेऽमुष्या बुद्धिरभ्युद्गतेयं भाग्यैरस्माकं वने वृत्तिभाजाम् ।
नो चेत्कासौ प्रावृषेण्याभ्रनीलो दृश्यः स्यान्नो दृष्टिभिस्तापसीनाम् ॥ ११ ॥

गीयाच्चिरं ते पतिरुर्जितोऽयं हे देवि वैदेहि चिरं लभस्व ।
साम्राज्यलक्ष्मीरिव पत्युरग्रे सौभाग्यभाग्याप्रतिमप्रभावम् ॥ १२ ॥

दूयामहे देवि तव त्विमां दशां विलोकयन्त्यो वनचारिणीर्वयम् ।
हृष्याम एवापि तवावलोकनात् स्वभाग्यवृद्धिं समुदीक्ष्य भूयः ॥ १३ ॥

इति सा वार्तयन्तीनां मुनिस्त्रीणां निकेतने ।
अवसत्स्वस्थहृदया पतिदेवरसंयुता ॥ १४ ॥

फुल्लवृक्षलतागुल्मप्रसूनवरमण्डिता ।
अङ्गसंगिसुगन्धौघैर्वासयन्ती वनस्थलीः ॥ १५ ॥

विचचार वनं सीता पत्या सह सुलक्षणी ।
वर्द्धयन्ती हृदि प्रीतिं दण्डकारण्यवासिनाम् ॥ १६ ॥

कोटिकन्दर्पसंदर्पमन्दीकरणमुत्तमम् ।
सौन्दर्यं रामचन्द्रस्य पपुर्धन्या वनेचराः ॥ १७ ॥

येषु येषु वने सीता वृक्षेषु समधिष्ठिता ।
तेषु तेष्विव संलग्नास्तदङ्गात्सौरभाश्रयः ॥ १८ ॥

प्रयान्त्याः कानने तस्याः पत्या सह वरश्रियः ।
अग्रेसरः समभवन्नदङ्गसौरभमारुतः ॥ १९ ॥

रञ्जयन्ती तनुश्रीभिः काञ्चनैरिव काननम् ।
द्योतयन्ती तडिद्द्योतैर्निविडा गह्वरस्थलीः ॥ २० ॥

आलपन्ती शुभा वाचः पत्युर्हृदयमोदनीः ।
वर्द्धयन्ती परां प्रीतिं द्विधा पत्यौ च देवरे ॥ २१ ॥

निवसन्ती समं पत्या पर्णशालासु रात्रिषु ।
देवरेणोपकल्पासु पत्युराज्ञानुवर्तिना ॥ २२ ॥

पचन्ती मृगमांसानि शुभाहारकराणि च ।
देवरेणोपनीतानि मेध्यानि विविधानि च ॥ २३ ॥

आवसथ्याग्निहोमान्ते पात्यौ भुक्तवति प्रिये ।
देवरेचाभ्यनुज्ञाता भुञ्जानामृतभुक् स्वयम् ॥ २४ ॥

उवास कानने देवी भर्त्रा सह सुनिर्वृता ।
देवरेण प्रतिपदं कृतभक्तिर्विशेषतः ॥ २५ ॥

सौमित्रिर्गृहिणे भ्रात्रे शय्याः पर्णमयीः शुभाः ।
पर्णशालासुरम्यासु कल्पयामास कालवित् ॥ २६ ॥

अध्यासीनः पर्णशालासु रामः शय्याः शुभा लक्ष्मणेनोपकल्पाः ।
निन्ये रात्रीर्जानकीभोगजुष्टः शश्वद्गाढालिङ्गनानन्दमग्नः ॥ २७ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे वनवासे त्रिंशाधिकशततमोऽध्यायः ॥१३०॥

*

एकत्रिंशाधिकशततमोऽध्यायः

ब्रह्मोवाच

कुटुम्बिन्यः किरातानां दृष्ट्वा रामं वनेचरम् ।
तापसं शुभवेशाढ्यं सदारं सानुजं तथा ॥ १ ॥

पूर्णप्रेमभरोत्कण्ठाश्चपलेक्षणपङ्कजाः ।
इदमूचुः प्रमुदिताः पुलकाञ्चितविग्रहाः ॥ २ ॥

अहो इमावग्निसमानवर्चसौ सत्तापसौ पिङ्गजटालकुन्तलौ ।
कौ काननेऽस्मिन् पुरुषोत्तमाबुभौ मन्दस्मितानन्दिमुखौ रसोज्ज्वलौ ॥ ३ ॥

का चेयमङ्ग स्तडितो विधुन्वती राकानिशाकामुकवक्त्रमण्डला ।
क्षामोदरी हेमघटोन्नतस्तनी प्रद्योतयन्ती रुचिभिर्वनस्थलीः ॥ ४ ॥

प्रायेण रामोऽयमनङ्गसुन्दरः सुलक्षणोऽयं च तथैव लक्ष्मणः ।
एषा च विद्मो जनकावनीभुजः कन्यैव ताम्यत्तपनीयविग्रहा ॥ ५ ॥

अहो अमी भूवलयैकभूषणाः सुपेशलाः सौरभशालिविग्रहाः ।
कृतार्थयन्तीह वने वनौकसो मन्दस्मितालोकमुखेन्दुरश्मिभिः ॥ ६ ॥

ये केऽपि लोके पुरुषोत्तमानिमान् पश्यन्ति दृग्भिः सुधयात्तपारणाः ।
ते एव धन्या इह शर्मधारिणो धुरंधराभाग्यभृतां सुजन्मनाम् ॥ ७ ॥

अये किराताङ्गभुवो वनौकसो भाग्यैर्व एतेऽत्र समागतास्त्रयः ।
इहैव तिष्ठन्तु निरन्तरं वने सुधाप्रवाहं च दृशः पिवन्तु नः ॥ ८ ॥

अये चकोरास्तरुनीडवासिनः किमप्यलभ्यं सुलभं बभूवः ।
इहादसीयं सुखकारिदर्शनं या मध्यगासावमुयोः पुमग्र्योः ॥ ९ ॥

अये मयूरा अमुमभ्र सुन्दरं सुधारसासारमनोज्ञदर्शनम् ।
विलोकयन्तः किमपि प्रहृष्यथ प्रायेण लब्धं किल वोऽसुजीवनम् ॥ १० ॥

इमाम पीच्यावयवां सुमध्यमां वने चरन्तीं कलहंसशावकाः ।
किमन्तरानन्दभृतौऽनुगच्छथ प्रायेणमञ्जीरकलक्वणादृताः ॥ ११ ॥

अहो युवां लोकमनोहराकृती स्वभावशुद्धौ कलमञ्जुभाषिणौ ।
किमप्यपूर्वं खनु रामणीयकं वनेऽत्र सम्यक्कुरुतस्तनुत्विषा ॥ १२ ॥

अये मनोज्ञे वरवर्णिनि क्षणं त्वमत्र कान्तारपथे सुसंगता ।
करोषि वैदेहि किरातयोषितां धन्ये दृशौ भाग्यसमूहसम्भृते ॥ १३ ॥

अये कियद्यावदितो गमिष्यसि प्राप्तासि पन्थानमतीत्य पुष्कलम् ।
इहैव तिष्ठाद्य विदेहभूपजे कुरुष्व धन्ये सफलाश्च नो दृशः ॥ १४ ॥

तवेदमङ्गं कमलाधि कोमलं समस्तभूमीसुखभोगयोग्यम् ।
गभस्तयोऽर्कस्य कठोरतापदाः श्रमाम्भसा यद्गलपयन्त्यनुक्षणम् ॥ १५ ॥

तदेव नोदूयत उच्चकैर्मनो विश्रम्यतां सम्प्रति राजकन्यके ।
इमौ च तौ काममनोज्ञवर्चसाविहैव संस्थापय भर्तृदेवरौ ॥ १६ ॥

कियत्सरोजाशयकोमलाभ्यां पद्भ्यामटव्यामवगाहयिष्यसि ।
भुवं कुशाग्रातिकठोरगर्भां प्रायेण चित्तं तवसाधु निष्कृपम् ॥ १७ ॥

इदं वनं नः खलु सत्त्ववर्जितं सुपल्लवश्रेणिमनोज्ञभूरुहम् ।
विकस्वरं भूरिफलं सुशीतलं सुच्छायकुञ्जद्रुमवल्लिमण्डपम् ॥ १८ ॥

इहास्यतां नोदयथा रघूत्तमौ किमुत्तमां खेदयथः प्रियामिमाम् ।
विधीयतां पर्णमयं शुभं गृहं मेध्यान् मृगान् हंस्यथ आत्मतृप्तये ॥ १९ ॥

युवां प्रकृत्यैव मनोहरावुभौ सुधन्यया वल्लभयामुयान्वितौ ।
इहैव रम्ये विपिने निशामिमां भाग्येन नः खल्वतिवाहयिष्यथः ॥ २० ॥

युष्मान् हि लोकोत्तररूपसम्पदा जगद्वशीकुर्वत आत्मशीलतः ।
निरीक्षमाणे अपि नो दृशाविमे अतृप्तकल्पे ननु रूपपारणात् ॥ २१ ॥

इति तासां वदन्तीनां संप्रेम्णां भिल्लयोषिताम् ।
समाकर्ण्य शुभा वाचो मुमुदुस्ते त्रयो हृदि ॥ २२ ॥

ततो लक्ष्मण आनीय मृगान् मेध्यान् निजै शरैः ।
विनिर्मये पर्णशाले उभे आर्याय चात्मने ॥ २३ ॥

आर्यस्य च सदारस्य पर्णशालां मनोहराम् ।
विनिर्ममे विशालां स आत्मने च तनीयसीम् ॥ २४ ॥

आर्यस्य लक्ष्मीवति पर्णशाले शय्यां शुभां भूरुहपद्मपल्लवैः ।
विनिर्ममे चावसथ्याग्निधानीं वेदीं च विज्ञः शुभलक्षणान्विताम् ॥ २५ ॥

आधाय मांसानि मृगस्य मेध्यान्पत्यादृतस्तत्र तयोः पदाब्जम् ।
प्रणम्य भक्त्या पुलकाचिताङ्गः संवाहयामास विनीतखेदः ॥ २६ ॥

अथ रघुपतिरग्निहोत्रहोमाज्जनकसुतापरिपक्वमेध्यमांसैः ।
विपिनतरुभवैः फलैश्च रम्यैरनुजवधूयुत आर्च्छदात्मतृप्तिम् ॥ २७ ॥

सुप्तः स पर्णसदने विविधाः प्रवृत्तीः संवार्तयन् भृशमसु प्रियया समेतः ।
निन्ये निशां कटुरणद्वनघूकघोषघोरान्धकारितशिवारुतभीमरूपाम् ॥ २८ ॥

तत्र लक्ष्मण उदाहितचापः पूर्णतूर्ण इषुभिर्निशिताग्रैः ।
जाग्रदेव रजनीं समनैषीदार्यपादकमलाहितचित्तः ॥ २९ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे वनवासनिस्वापो नामैक[1]त्रिंशाधिकशततमोऽध्यायः ॥ १३१ ॥

*

१. वनवासे एकं—बड़ो०

द्वात्रिंशाधिकशततमोऽध्यायः

ब्रह्मोवाच

ततः प्रभाते विमले कणत्सु वनपक्षिषु ।
विनीतनिद्रः श्रीरामः प्राबोधयत लक्ष्मणम् ॥ १ ॥

भ्रातर्जागृहि सौमित्रे उत्थायाभ्युचितं कुरु ।
गता निशासावुदितो रक्तांशुर्भानुमण्डलः ॥ २ ॥

इत एकतमांरात्रिं मध्ये विश्रम्य कानने ।
परतोऽह्निगमिष्यामः कुम्भयोनेः शुभाश्रमम् ॥ ३ ॥

अद्येदमद्भुततमं मुनीनां वनमुत्तमम् ।
क्षेममध्यासिता स्वो वै सुखयन्तो वनेचरान् ॥ ४ ॥

वनेऽस्मिन् मम भक्तास्ते विद्यन्ते दीप्तवर्चसः ।
येषां प्रेम्णा वशीभूतो भविष्यामि न संशयः ॥ ५ ॥

केनापि किल भावेन तपस्यान्ति तपोधनाः ।
स तेषां मनसो भावः प्रकटोऽद्य भविष्यति ॥ ६ ॥

इत्युक्त्वा लक्ष्मणं भूयः सुन्दरो रामचन्द्रमाः ।
ययावग्निकुमाराणां मुनीनां तत्तपोवनम् ॥ ७ ॥

प्रशान्तश्वापदाकीर्णं वेदपाठप्रघोषितम् ।
शान्तस्वरैर्विहंगानां कर्णयोः प्रमुदावहम् ॥ ८ ॥

सामगानस्वरोपेतं होमधूमोरुसौरभम् ।
श्रौषड्वौषड्वषट्शब्दनिरस्तासुरसंचरम् ॥ ९ ॥

संफुल्लानोकुहलतासुमनोगुच्छसौरभम् ।
गुल्मपुष्पातिसौरभ्यवशीभूतमधुव्रतम् ॥ १० ॥

मनोज्ञकोकिलालापकाकलीपञ्चमस्वरम् ।
परमानन्दसम्मग्नविकूजच्छुकसारिकम् ॥ ११ ॥

पञ्चवर्णप्रसूनाढ्यतरुचित्रविचित्रितम् ।
उत्फुल्लपद्मखण्डाढ्यसरोवरमनोहरम् ॥ १२ ॥

तरुगुल्मलतासंगित्रिविधानिलसेवितम् ।
वनदेवीमुखोद्गीतकलनादसुखावहम् ॥ १३ ॥

अनङ्गोद्दीपनमपि तपो विजितमन्मथम् ।
संफुल्लकिंशुकारण्यलोहितीभूतदिक्तटम् ॥ १४ ॥

विहङ्गमकलध्वानसंक्षिप्तभ्रमरध्वनि ।
भ्रमरध्वनिसंगीतवल्लकीनादमञ्जुलम् ॥ १५ ॥

अशोकवनिकापुष्पजातदिक्सुन्दरीपटम् ।
केतकीकाननोद्भूतपरागपटलीवृतम् ॥ १६ ॥

दृष्ट्वा तद्विपिनं रामः समंताद्रामणीयकम् ।
प्राविशज्जानकीयुक्तः शृङ्गारसुरभूरुहः ॥ १७ ॥

उवाच लक्ष्मणं भूयः पथ्येयं विपिनं सखे ।
पीयूषपाकमधुरफलसंदोहतृप्तिकृत् ॥ १८ ॥

अस्मिन् विहर्तुमिच्छामि दण्डकावनमूर्द्धनि ।
वनोत्तमे मुनिवने जनयन् जन्मिनां मुदम् ॥ १९ ॥

ये केचित्कानने ह्यस्मिन् मुनयः शुद्धबुद्धयः ।
तानस्म्यनुग्रहीष्यामि यथावाञ्छितसाधकः ॥ २० ॥

करोतु जानकीदेवी शृङ्गारमिहकानने ।
सुमनोभिः पञ्चवर्णैः फलैश्च तरुपल्लवैः ॥ २१ ॥

भवान् वनेऽत्रसौमित्रे मा वधीन्मेध्यकान् मृगान् ।
एते हि मुनिकन्याभिः पोषिताः सोदरा इव ॥ २२ ॥

खेलन्तीह सुविश्वस्ताः कृष्णसारा अमीवने ।
कर्षन्ति मुनिहस्तेभ्यः कर्मदर्भोदकाक्षतान् ॥ २३ ॥

वन्यैरेव फलैर्मूलैः पत्रैः पुष्पैरिहोचिता ।
वृत्तिर्नः साधुशीलानां मुनीनामाश्रमालिषु ॥ २४ ॥

इत्युक्त्वा भ्रातरं वीरः फलादयर्थं व्यसर्जयत् ।
स्वयं च व्यश्रमत्सान्द्रलतामण्डपमाश्रितः ॥ २५ ॥

विजह्रे जानकीतत्र भर्त्रा सह मुदान्विता ।
कुसुमान्वयचिन्वन्तो भूषणार्थं लतावने ॥ २६ ॥

अथ शृङ्गारयामास गात्रयष्टिं शुचिस्मिता ।
पत्युर्मनो[1]रञ्जनकृद्विन्यासविधिदक्षिणा ॥ २७ ॥

सानुकूलानुकूलेन पत्या साध्वी सुसंगता ।
रेजे रतिरिवोद्रिक्ता सज्जमाना मनोभुवा ॥ २८ ॥

सुसम्मार्ज्य कचांस्तस्या मल्लीमाल्यैर्जुगुंफ सः ।
ते द्विपाटीकृता रेजुर्नभस्ताराकितं यथा ॥ २९ ॥

पञ्चवर्णसुमैर्वेणीं जुगुंफ वरयोषितः ।
रेजेतरांलतैवोच्चैः साम्प्रतं गुच्छशालिनी ॥ ३० ॥

सिन्दूरैः पूरयामास सीमन्तं रामनायकः ।
नभःपथ इवाराजन्नवसांध्यकरारुणः ॥ ३१ ॥

---

१. हरं जन०--मथु० ।

अलकैर्मेलयित्वास्या बबन्ध शिखिपिच्छकान् ।
अन्योन्यगुणसम्पर्कात्ते रेजुः सुसखा इव ॥ ३२ ॥
गुंजाफलकृतोत्तंसमालापरिधिशालिना ।
मुखेन व्यरुचद्देवी शशिना वारुणस्रजा ॥ ३३ ॥
तरुपल्लव सम्पन्नकर्णभूषणशालिनी ।
वनश्रीरिव सा रेजे वसन्तागमसम्भृता ॥ ३४ ॥
पञ्चवर्णप्रसूनस्रक्कृताकल्पा नृपात्मजा ।
वसन्तलक्ष्मीरिव सा रेजे मदनमोदिनी ॥ ३५ ॥
तत्त[1]दङ्गप्रन्यस्तपुष्पभूषणशालिनी ।
साक्षात्कल्पलतेवाभाद्रामकल्पद्रुमाश्रिता ॥ ३६ ॥
एवं विहृत्य विपिने विदधौ प्रियायाः प्रत्यङ्गभूषणभरं सुमनोभिरच्छैः ।
दध्रे मनःशिलमथो हरितालमिश्रं तस्य ललाटफलके तिलकं रसीन्द्रः ॥ ३७ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे अग्निकुमारवर-प्रदानो नाम द्वात्रिंशाधिकशततमोऽध्यायः ॥ १३२ ॥

*

त्रयस्त्रिंशाधिकशततमोऽध्यायः

ब्रह्मोवाच

तावशोकवनवल्लिमण्डपे मत्तगुञ्जदलिपुञ्जमञ्जुले ।
मुक्तकण्ठकलकोकिलाङ्गनाकाकलीमुखरिते विजह्रतुः ॥ १ ॥
वीक्ष्य तां प्रियतमां रघूत्तमः कोटिकामरमणीविजित्वरीम् ।
क्लृप्तनव्यवनभूषणान्वितां जानकीं हृदयहारिविभ्रमाम् ॥ २ ॥
राघवो व्यमुहदात्मना भृशं तद्विनिर्मितसुवन्यभूषणः ।
रूपमप्रतिममुत्तमं तयोः कामकेलिमतनोत्परस्परम् ॥ ३ ॥
तत्र चारुनवशाद्वलाञ्चिते कुञ्जसद्मनि मनोहरस्थले ।
कापि केलिरभवत्तयोर्मिथः शिंजितानुगतहंससावका ॥ ४ ॥
तौ विहृत्य निभृतं परस्परं रूपसारभररामणीयकम् ।
नीलया ददृशतुः परस्परप्रेक्षणानुभवसाक्षिणावुभौ ॥ ५ ॥
आशुशुक्षणिसुतास्तपस्विनस्तत्र ते मुनिवराः समाययुः ।
आत्मनोऽतिसुचिरं मनोगतं बिभ्रतः कमपि भावमुत्तमम् ॥ ६ ॥

---

१. पादेऽस्मिन्नक्षरन्यूनमार्षः ।

रासकेलिरमुना यदा कृता सारवे विपुलभासिरोधसि ।
प्रेमलग्नमनसस्तदावधिप्रैधमानविरहाकुलान्तराः ॥ ७ ॥

ते पुरो जनकजारघूद्वहौ कुञ्जसद्मनि परस्परेक्षिणौ ।
वीक्ष्य तत्र हुतभुक्कुमारका वाडवाः सकलमेव विस्मृताः ॥ ८ ॥

के वयं कुत इहागताः कथं कुत्र किं जगदिति प्रतीतिः ।
वर्जिता किमपि मुक्तचेतसो रूपसाररमणीयतावशाः ॥ ९ ॥

तान् विमुग्धमनसो द्विजन्मनोवीक्ष्य राघव उदारमानसः ।
वाक्यमुज्ज्वलमुदाजहार वै एतदान्तरमनीषितैकवित् ॥ १० ॥

साधु वो नय उदारभावुका वाडवाः सफलसत्तपोधनाः ।
यूयमत्र कृपया ममागता ब्रूत किं नु करवाणि वो बुधाः ॥ ११ ॥

कोटिकल्पकृतपुण्यसम्पदामूर्जिताप्रतिमब्रह्मवर्चसाम् ।
ब्रूत वः किमिह नाम दुर्लभं स्वर्गिणामुत फलेऽपवर्गिणाम् ॥ १२ ॥

आन्तरं किमपि भावभावितं प्रेम वो विजयते रसोत्तरम् ।
यत्फलं खलु ममावलोकनं लब्धमेव हि भवद्भिरञ्जसा ॥ १३ ॥

इत्युदीर्णममुना मनीषिणा तेऽत्रगत्य तनया हविर्भुजः ।
ऊचुरुत्प्रणयमानसा द्विजाश्चित्तधैर्यमवलम्य किंचन ॥ १४ ॥

कोटिपञ्चशररामणीयकस्तेन रूपरुचिसारसम्पदि ।
वीक्षिते त्वयि रमेश नेतरद्वीक्षणीयमधुना भवेऽस्ति नः ॥ १५ ॥

एतदेव कुरु राम कामदोऽस्यस्मदीयमिदमत्र कामितम् ।
यत्तवैव पुरुषस्य कामिनः कामिनीभवितुमस्ति नः स्पृहा ॥ १६ ॥

एहि राम करुणारसाब्धितां तावकीनविरहो दुनोति नः ।
त्राह्यपाकुरुतमेनमूर्जितं देहि शुद्धमधरामृतं निजम् ॥ १७ ॥

तान्तिमेति हृदयं तपस्विनां तत्र धेहि निजपादपल्लवम् ।
मोददानममृतैकवर्षणां तावकीनविरहार्तिभेषजम् ॥ १८ ॥

एधते बहुतिथं मनोगतः कोऽपि भाव इति भावितस्त्वयि ।
तस्य पारमधुना प्रदर्शय श्रीशदेहि निजभोगभोजनम् ॥ १९ ॥

नान्यथा भवितुमर्हति स्पृहा कल्पिता त्वयि चिराय राघव ।
प्रार्थितार्थि गणकल्पशाखिनस्त्वत्प्रभो क इतरोऽस्त्वदोर्पकः ॥ २० ॥

नाथ नीतिरपि नैव हीयते प्रायशस्तव परा कदाचन ।
यो यथैव भवतः प्रपत्तिभाक्तं तथैव हि भवान् प्रपद्यते ॥ २१ ॥

देव्यसावपि तवानुमन्यतां भागधेयविभवेन नोऽर्थितम् ।
स्यात्सुदुर्लभमयीदमेतयानूमतं सुलभमेव राघव ॥ २२ ॥

इत्थमग्निसुततापसोदितं संनिशम्य रघुवंशचन्द्रमाः ।
मञ्जुलस्मितमयूरवपूरिताखण्डवक्त्रविधुमण्डलोऽब्रवीत् ॥ २३ ॥

श्रीराम उवाच

अहो हि यूयं कथमिच्छथैवं स्त्रीभावमाप्तुं पुरुषप्रकाण्डाः ।
स्त्रीजन्म निन्द्यं मुनयो वदन्ति मानुष्यलोके पूरुषजन्मनोऽस्मिन् ॥ २४ ॥

स्त्री नाम वेदानधिकारदुष्टा स्वातन्त्र्यहीनाग्लपितासुरद्धा ।
अनेकदुःखानुभवैकपात्रं पुमर्थवर्जा भयभाजनं च ॥ २५ ॥

शङ्क्या च शश्वद्व्यभिचारदोषादप्येकजन्मा च्युतसंस्कृतिश्च ।
को नाम विद्वाननवद्यपुंस्त्वं विहाय योषिज्जनुराद्रियेत ॥ २३ ॥

अथापि सर्वज्ञतयानपेतप्राग्जन्मसंस्कारगुणा भवन्तः ।
स्त्रीभूय रन्तुं यदि कामयन्ते तुल्या रतिस्तर्हि न किं नु पुंसाम् ॥ २७ ॥

अप्येवमभ्यर्थितकामभोगा आरुढपातित्यधरा भवन्तः ।
[1]भवादृशात्मज्ञगणोपहास्यं तपोव्ययं किं न परामृशन्ति ॥ २८ ॥

न ह्यात्मविज्ञानसुनिश्चितार्थाः प्राप्ताः परानन्दसुधाब्धिभोगम् ।[1]
भवादृशा ब्रह्मविदां वरेण्यास्तुच्छे फले नैव भवे रमन्ते ॥ २९ ॥

अथाप्यहो ज्ञानकलाप्रभावाद्यूयं सदैवोषरतां प्रयाताः ।
न पुण्यपापादिफलाङ्कुरार्हा यथेष्टमेव व्यवहारभाजः ॥ ३० ॥

तथाप्यहं त्वेकवधूप्रसंगव्रती विमुक्तान्यवधूप्रसंगः ।
न भर्तृभावं समुपेत्य भोक्तुं युष्माभिरर्हामि यथार्थवाचः ॥ ३१ ॥

इत्येवमुक्ता मुनयस्तदानीमवाङ्मुखाः शोककदर्थितास्ते ।
गाढं विनिःश्वस्य पुरः प्रियस्य न किंचिदूचुः क्षणमुग्रतापाः ॥ ३२ ॥

अथ धृतिमवलम्ब्य प्राग्वितीर्णस्मृतार्था
मुहुरुपचितभावा जातवेदःकुमाराः ।
दृढमतिपरिपाकादस्खलन्तः कथंचिद्व-
चनमिदमवोचन् नान्यभावानभिज्ञाः ॥ ३३ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे अग्निकुमार-मुनिवरदाने त्रयस्त्रिंशाधिकशततमोऽध्यायः ॥ १३३ ॥

*

१-१. नास्ति—बड़ो० ।

चतुस्त्रिंशाधिकशततमोऽध्यायः

मुनय ऊचु

स्त्रीत्वं वा पुंस्त्वमेवापि कामयानः स्वतन्त्रधीः ।
नायं पर्यनुयोगार्हः काम देन ननु त्वया ॥ १ ॥

भजते येन भावेन भवन्तं भजनीयकम् ।
भजस्व तं तथा राम त्वं कल्पतरुसन्मितः ॥ २ ॥

अथ नो राम रसिक यदाह गुणवद्भवान् ।
प्रमोदबनकान्तास्ताः कथं न तदुदाहरत् ॥ ३ ॥

यदात्थ स्त्रीत्वं सावद्यं त्वमवद्यौघमार्जनः ।
तन्नास्माकं वचो योग्यमनवद्यपदस्पृहाम् ॥ ४ ॥

विसस्मार किमेवं वाग्भवानात्मवचोऽमृतम् ।
यदुदीरितमार्तेभ्यो भवता रासमण्डले ॥ ५ ॥

वितीर्णोऽपि त्वया नाथ सर्वकामफलो वरः ।
स्मारितस्तव नानार्थव्यासक्तस्य वराककैः ॥ ६ ॥

अधुनापि किमेवं ते निर्बन्ध इव दृश्यते ।
जन्मान्तरेऽऽपि भाव्यर्थो भावनीयो न किं प्रभो ॥ ७ ॥

अथ सर्वज्ञमौलेस्ते दत्तस्याप्यनुनाथनम् ।
अचिरेणैव दानाय कृतमस्माभिरार्तकैः ॥ ८ ॥

श्रीराम उवाच

साधु संस्मारितो मेऽद्य वितीर्णो वो वरोह्ययम् ।
मया प्रमुद्वनस्त्रीभिः खेलता रासमण्डले ॥ ९ ॥

सुदुर्घटोऽप्यसावर्थो भवतां सम्भविष्यति ।
अनुमोदितमात्रस्तु महिष्या मे किलानया ॥ १० ॥

मया दत्तोऽप्यसावर्थः प्रार्थनीयो मुहुर्द्विजाः ।
एतस्या मे परानन्दस्वामिन्या अधुना रहः ॥ ११ ॥

इत्युक्तास्तेऽग्नितनया द्विजन्मानो महात्मना ।
राघवेन्द्रेण वै सीतासापेक्षाखिलवृत्तिना ॥ १२ ॥

ज्ञात्वा तामेव निखिलकार्यसिद्धीश्वरीं प्रभोः ।
प्रेयसीमनवद्याङ्गीमस्तौषुः परमार्थतः ॥ १३ ॥

मुनय ऊचु

त्वमेव सर्वकार्येशी रामस्य परमात्मनः ।
अतस्त्वामेव शरणं प्रपन्नाः स्मो निरन्तरम् ॥ १४ ॥

त्वमेव देवि रामस्य विश्वेशस्य महात्मनः ।
पुरोऽस्मान् रह आनन्दे संस्मारय शुभाप्तये ॥ १५ ॥

करावलम्बनं मातः कारयास्य निजेशितुः ।
त्वदधीनः किलैषोऽस्मान्न त्यक्ष्यति कथंचन ॥ १६ ॥

महतीं मोचयास्माकमार्तानां विरहापदम् ।
यथा कथचिद्धेह्य स्मान्निजे परिकरे सति ॥ १७ ॥

त्व देवि महनीयासि महतोऽस्य महात्मनः ।
एकधानेकधा चामुं रमयस्यभितो रमे ॥ १८ ॥

यथा त्वमाभीरवधूः प्रसादतः सदान्वगृह्णाविरहादिभोगिनीः ।
तथैव नः षष्ठिसहस्रसंख्यकान् द्विजान् स्वदृष्ट्यानुगृहाण जानकि ॥ १९ ॥

त्वमेव सहजानन्दा श्रीनन्दनसमुद्भवा ।
रक्ताशोकलतासद्मनिवासमुदिताशया ॥ २० ॥

त्वमेव परमा लक्ष्मीर्जगत्त्रयविभूषिणी ।
त्वामाराधयतां नृणां न भवन्ति मनोरुजः ॥ २१ ॥

कथय निजयर्ति नो भूरिविश्लेषदुःखं यदयनयति कारुण्याकरस्ते प्रियोऽसौ ।
सदयमनिशमस्मानाविश त्वं परा श्रीर्विचलति तव भर्तुर्नैकपत्नीव्रतं यत् ॥ २२ ॥

इति संस्तुवतो विप्रान् मुनीनग्नेः कुमारकान् ।
सीता कृपाकटाक्षेण वीक्षाञ्चक्रे कृपावती ॥ २३ ॥

अथ रामोऽब्रवीद्विप्रान् सिद्धं वः कामितं द्विजाः ।
अस्याः कृपाकटाक्षेण तद्गच्छथ निजाश्रमान् ॥ २४ ॥

आगामिनि विधौ प्राप्य कल्पं सारस्वतं द्विजाः ।
अनुग्रहाय यो नूनं संगं दाताहमात्मना ॥ २५ ॥

प्रमोदविपिने रम्ये सरय्वां वै तपोधनाः ।
अनेनैव स्वरूपेण रमयिष्यामि वो ध्रुवम् ॥ २६ ॥

तावत्तप्त योगीन्द्राः कायवाक्चित्तशोधनम् ।
दण्डकारण्यमध्यस्था यूयं सुविपुलं तपः ॥ २७ ॥

हित्वा गुणमयीरेतास्तनूर्मत्सविधोचितम् ।
स्त्रीभावमेत्य सर्वेऽपि यूयं मां समवाप्स्यथ ॥ २८ ॥

इति वः पूर्वमप्युक्तं मयकारासमण्डले ।
अधैर्या द्विरहोद्भूतात्पुनरप्यागताः स्थ माम् ॥ २९ ॥

इमां देवीमाराधयत मदभेदेन सततं
परप्रेम्णा साक्षात्परमसहजानन्दवपुषम् ।
कृपादृष्ट्यैवास्याः परिणतमनःकाम्यविषयाः
सुसिद्धाशेषार्थाः सपदि परमां प्राप्स्यथ मुदम् ॥ ३० ॥

इति भूयः सुविश्वस्ता लब्धकामवरा द्विजाः ।
प्रणम्य सीतां रामं च स्वानि स्वान्याश्रमाण्यगुः ॥ ३१ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे अग्निकुमारसमाश्वासनो नाम चतुस्त्रिंशाधिकशततमोऽध्यायः ॥ १३४ ॥

*

पञ्चत्रिंशाधिकशततमोऽध्यायः

ब्रह्मोवाच

अथ लक्ष्मण आगच्छत्फलान्याहृत्य काननात् ।
तान्यग्रे स्थापयामास सीताराघवयोरयम् ॥ १ ॥

देवताः पितरश्चैव तर्पितास्तेन तैः फलैः ।
अभ्युक्षितैर्द्रोणपात्रे मन्त्रपूतेन वारिणा ॥ २ ॥

तान्येष बुभुजे देवो जायया सहितः प्रभुः ।
स्वादं स्वादं पवित्राणि पाकरुच्यानि रोचयन् ॥ ३ ॥

अथ निश्युपजातायां दिव्यौषधिसुदीपते ।
निकुञ्जमण्डपे तस्मिन् सुष्वाप प्रियया सह ॥ ४ ॥

सौमित्रिरधिरूढज्यकोदण्डनिहिताशुगः ।
जाग्रदेव निशां निन्ये स्वपत्यार्ये सदारके ॥ ५ ॥

सव्यापरास्यपार्श्वाभ्यां परिवर्तनवर्तनैः ।
विनीतनिद्रो रघुपः प्रातः प्राबुध्यत स्वयम् ॥ ६ ॥

कराङ्गुलिभिरुन्मज्य नेत्रे अलसपद्मणी ।
उत्तस्थौ रघुशार्दूलः प्रियालोचनसौख्यदः ॥ ७ ॥

शृण्वन् विहगनिक्वाणं प्रातःसमभिकं शुभम् ।
प्रबोधमङ्गलोपेतो मुहूर्तं तस्थिवान् स्थिरः ॥ ८ ॥

नासाग्रन्यस्तनयनः संवृतास्यः सुनिश्चलः ।
विष्टभ्योरः क्षणं दध्यौ स्वात्मज्योतिरखण्डितम् ॥ ९ ॥

सूर्यवंशावतंसस्य रामस्य वदनाम्बुजम् ।
लक्ष्मणे वीक्षमाणाः सन् मुमुदेऽतितरां हृदि ॥ १० ॥

कुण्ठोत्कण्ठः पितर्यासील्लक्ष्मणो रामसौहृदात् ।
जानकीप्रेमसंतुष्टो जनन्यां शिथिलादरः ॥ ११ ॥

सीताराघवयोस्तस्य प्रीतिरासीद्दिने दिने ।
मातरं पितरं चापि यथा विस्मृतवान् हृदा ॥ १२ ॥

वनेऽपि वसतस्तस्य सीतारामस्वभावतः ।
बन्धुपूर्ण इवागरे हृदि हर्षो व्यवर्द्धत ॥ १३ ॥

तस्य संगाच्च तौ हृष्टौ वनवासं न जज्ञतुः ।
पूर्णराज्यश्रियोयेते सद्मनी वषितुः सुखम् ॥ १४ ॥

ततः प्रतस्थौ भगवान् लक्ष्मणेनानुमोदितः ।
प्रियया पृष्ठगामिन्या रोहिण्येवान्वितो विधुः ॥ १५ ॥

तस्मिन् पादपसंदोहो व्यकिरत्कुसुमव्रजम् ।
ज्ञात्वेव प्रतिवर्षंतुं घनं जीवनदायिनम् ॥ १६ ॥

पथि व्रजन् बभौ रामो नीलसुन्दरविग्रहः ।
तडित्वानिव संयुक्तः सौदामिन्येव कान्तया ॥ १७ ॥

चुकूजुः कोकिलाः सम्यग्बिभ्रतः पञ्चमस्वरम् ।
ननृतुश्च प्रतानिन्यो महताशिक्षिता इव ॥ १८ ॥

दध्वनुः कीचकाः सम्यग् रन्ध्रपूरितमारुताः ।
वनं तत्प्रथयामास संगीतमिवराघवे ॥ १९ ॥

त्रैलोक्यवल्लभेतस्मिन् सदारे सानुजे तथा ।
सम्प्रयाति प्रतिपथं सुखयामास तद्वनम् ॥ २० ॥

भर्तारमनुगच्छन्त्याः सीतायाश्चरणौ मृदू ।
नाखिदद्यतां किरत्युच्चैः पल्लवान् पादपव्रजे ॥ २१ ॥

क्वचित्तरुतले कांश्चित् क्षणान् विश्रमतोस्तयोः ।
पादसंवाहनं चक्रे लक्ष्मणो भक्तिविह्वलः ॥ २२ ॥

क्वचिद्द्रुमलतास्तोमैः कृत्वा छत्रं मनोहरम् ।
सीताराघवयोश्छायां सुमित्रातनयोऽतनोत् ॥ २३ ॥

तेऽविशन् विपिनं भीमं क्रीडच्छार्दूलशावकम् ।
उद्रिक्तघोरमहिषं शैलैरुच्चावचं पथि ॥ २४ ॥

नानावर्णविहंगाढ्यं नानावर्णमृगान्वितम् ।
नानाजातिलतावृक्षं सुच्छायसुखदान्तरम् ॥ २५ ॥

पश्यन्तो दण्डकारण्यभूमिं निर्जनभीषणाम् ।
प्रययुः सुमहासत्त्वास्त्रयस्ते वह्निदीप्तयः ॥ २६ ॥

कोदण्डोद्दण्ड भुजयोः खड्गिनोर्दृढवर्मणोः ।
कापि शोभा तयोरासीद् या वीरोत्साहयोर्मिथः ॥ २७ ॥

तयोर्मध्ये जनकजा कूजन्नूपुरमेखला ।
प्रयान्ती रतिरभ्राजद् वसन्तस्मरयोरिव ॥ २८ ॥

तान् गच्छतः पथि लता बनिता इवोच्चै रन्तर्द्विरेफविकसत्कुसुमोत्सुकाढ्यः ।
ऐक्षन्त मन्दमरुता विटपैस्तरूणांकिंचिद्विभक्ततनवस्त्रपयेव तेभ्यः ॥ २९ ॥

अत्रिनार्या वितीर्णैस्तैरङ्गरागैः सुगन्धिभिः ।
जानकी सुरभीचक्रे दण्डकारण्यपादपान् ॥ ३० ॥

तेऽतीत्य दूरमध्वानं सरजःपद्मकुन्तलाः ।
कुम्भोद्भवमुनेः स्थानं प्राप्तवन्तः सुखावहम् ॥ ३१ ॥

स्वच्छपानीयकासारं संफुल्लनलिनीवनम् ।
ओंकारनादसंकूजदनेकशुकसारिकम् ॥ ३२ ॥

कुसुमस्तबकाकीर्णलताभूरुहभूषितम् ।
मुनिपुत्रमुखोद्गीर्णऋग्यजुःसामघोषितम् ॥ ३३ ॥

सायमाहुतिदानार्थमभ्युद्धृतहुताशनम् ।
होमधूममिलिन्दालिमिलद्गगनमण्डलम् ॥ ३४ ॥

वनान्तरादुपादाय समित्कुशकदम्बकम् ।
उपावृत्तैर्मुनिजनैराकीर्णं सर्वतो दिशम् ॥ ३५ ॥

मुहूर्तं जपतां तूष्णीं गायत्रीं वेदमातरम् ।
मुनीनां भवनेष्वन्तर्निःशब्दायतवाडवम् ॥ ३६ ॥

सर्वतः शान्तिसम्पन्नं दुष्टसत्त्वविवर्जितम् ।
निर्विरोधकृतावासैराकीर्णं पशुपक्षिभिः ॥ ३७ ॥

हुताग्निहोत्राज्यगन्धपूयमानदिगष्टकम् ।
सायंसंध्यामुपासीने मुनिवृन्दे समंततः ॥ ३८ ॥

निःशब्दविहगस्तोमं मृगैः संचारवर्जितैः ।
अध्यासितोटजप्रान्तैः कृतरोमन्थवर्तनम् ॥ ३९ ॥

इयाय राघवस्तत्र भानावस्तमितायति ।
सीतानुजाभ्यां सहितस्तीर्थपावनपावनः ॥ ४० ॥

ददर्शासौ शान्तमिष्टाग्निहोत्रं लोपामुद्रासंयुतं कुम्भयोनिम् ।
त्रयोऽपि ते योगिनं तं मुनीन्द्रं ववन्दिरे स्वाभिधाख्यानपूर्वम् ॥ ४१ ॥

इति श्रीमदादिरामायणेब्रह्मभुशुण्डसंवादे दक्षिणखण्डे अगस्त्याश्रमोपगमने पञ्चत्रिंशाधिकशततमोऽध्यायः ॥ १३५ ॥

*

षट्त्रिंशाधिकशततमोऽध्यायः

ब्रह्मोवाच

तानाशीर्भिर्नन्दयामास भूयो गृहागतान् भगवान् कुम्भयोनिः ।
पाद्यार्घ्याद्यैरुपचारैः सहर्षं जग्राहाग्रे भूय युक्तो मुनीन्द्रैः ॥ १ ॥

विधिवत्स्वासनासीनास्तानुवाच घटोद्भवः ।
लोपामुद्रासहासीनः सूर्यकल्पो महामुनिः ॥ २ ॥

स्वागतं वः सर्वलोकक्षेमायचरथाटवीम् ।
अहो युष्माभिरर्च्यैष कृतार्थीकृत आश्रमः ॥ ३ ॥

यन्मे हुतं कृतं तप्तं तददय सफलं बभौ ।
यल्लोचनपथं जातः सदारः सानुजो भवान् ॥ ४ ॥

साक्षाद्धर्मोऽवतीर्णोऽसि द्विजदेवत्रयीहितः ।
त्वयि जाते रघोर्वंशे सम्पन्ना नो मनोरथाः ॥ ५ ॥

नाशायासुर पक्षाणां कियत्ते प्रार्थनं प्रभो ।
न ह्यभ्युदितमात्रेऽर्के तमस्तिष्ठति भूतले ॥ ६ ॥

अपि विश्रम्यतां राम क्वाप्याश्रित्य शुभं स्थलम् ।
अजस्रं संचरन्नेवं मनः खेदयसे मम ॥ ७ ॥

स्वभावसुकुमाराङ्गः क्व भवान् राजनन्दन ।
क्व चेयमटवी राम दर्भगर्भखरावनिः ॥ ८ ॥

अयं च सुकुमाराङ्गस्तव भ्राता स्मरोयमः ।
इयं च राजदुहिता शिरीषमृदुविग्रहा ॥ ९ ॥

नैनान् रवेदय नित्यं त्वमटमानो महाटवीम् ।
अतो विश्रम्यतां वीर क्वापि स्थाने मनोरमे ॥ १० ॥

अविदूरमितः प्रायः पुण्यं पञ्चवटीवनम् ।
विश्रामयोग्यं स्थानं ते तत्र तिष्ठ रघूद्वह ॥ ११ ॥

यत्र गोदावरी पुण्या गङ्गा गौतमनिर्मिता ।
तस्यास्तीरावनिः पुण्या कुञ्जपुञ्जमनोरमा ॥ १२ ॥

तत्र तिष्ठ प्रियायुक्तो मोदयन् मुनिमण्डलीः ।
कोदण्डोद्दण्डदोर्दण्डः शासद्दुष्टांश्च विक्रमैः ॥ १३ ॥

तत्र त्वया निवसता जनस्थाननिवासिनः ।
वाडवा मुनिवर्याश्चसुखमेष्यन्ति राघव ॥ १४ ॥

प्रायेणोपद्रुता राम रक्षोभिर्मुनयोऽधुना ।
येषामाश्रमसद्मानि पूरितानि किलास्थिभिः ॥ १५ ॥

भक्षिता भक्ष्यमाणाश्च ब्राह्मणा राक्षसाधमैः ।
तेषां भाग्येन रामेन्दो भवान् प्राप्तोऽस्ति संम्प्रति ॥ १६ ॥
धर्मकर्मत्रयीश्रेयस्तपश्च ब्रह्मवर्चसम् ।
इदानीं रघुशार्दूल त्वत्कोदण्डबलाश्रितम् ॥ १७ ॥
येषां सबन्धिनो दाराःपुत्रापत्यादयो जनाः ।
भक्षिता राक्षसै राम तेषां त्वं प्राणजीवितम् ॥ १८ ॥
इतः पञ्चवटीमेत्य नूनं विश्रम राघव ।
प्रायेण राक्षसानीकान्यत्र नित्यं चरन्ति हि ॥ १९ ॥
जहि तान् रघुशार्दूल राक्षसान् घोरकर्मणः ।
यैर्द्राविता जगत्कृत्स्नं धर्मकर्मविलोपकैः ॥ २० ॥
एकाकी स भवानेतान् हन्तुं शक्नोषि राक्षसान् ।
उद्धतात्तिमिरस्तोमान्न हि तेजांसि बिभ्यति ॥ २१ ॥
लोकानामसुरानीकैर्नित्यमुद्विग्नचेतसाम् ।
विप्राणां शोकतप्तानां मङ्गलं तव दर्शनम् ॥ २२ ॥
इत्युक्त्वा मुनिवर्येऽस्मिन् स्थितेमौनं महात्मनि ।
उवाच रघुशार्दूलः सानन्दाप्रेमविह्वलः ॥ २३ ॥
यदाह मुनिशार्दूल भवान् लोकहितैषणः ।
तत्तथैव श्रुतं ब्रह्मन् दुःखं लोकोपतापजम् ॥ २४ ॥
भवतामाशिषा ब्रह्मन् लोकश्रेयस्तपोभृताम् ।
बलमेतादृशं भावि दलनाय सुरद्विषाम् ॥ २५ ॥
श्रूयते भगवान् विष्णुः स्थितो नारायणाश्रमे ।
तपस्यति यतो लोकाः कल्पन्ते श्रेयसे भृशम् ॥ २६ ॥
अतो भवादृशां ब्रह्मन् नाप्तव्यमिह किंचन ।
तपस्तु केवलं तेषां प्रजानां श्रेयसे भवे ॥ २७ ॥
इत्थमालपता तेन तोषितो नितरां मुनिः ।
आहारं तस्य वन्याभिः संविधाभिरकल्पयत् ॥ २८ ॥
लोपामुद्रा भगवती मुनिदारैः समावृता ।
सीतां सम्मानयामास प्राप्तां भाग्यैर्निजाश्रमे ॥ २९ ॥
आहारैरमृतास्वादैर्भोजयामासवत्सला ।
वन्यैरेव द्विजानीतैः कन्दमूलफलादिभिः ॥ ३० ॥
ते वार्तयन्तः कुशलाः प्रवृत्तीर्मुनीन्द्रवर्यैर्मुनिदारकैश्च ।
सुखेन तां रात्रिमनैषुरत्र कुशात्तिनास्तीर्ण शुभासनस्थाः ॥ ३१ ॥

इति श्रीमदादिरामायणे ब्रह्मभूशुण्डसंवादे दक्षिणखण्डे अगस्त्याश्रम-निवासो नाम षट्त्रिंशाधिकशततमोऽध्यायः ॥ १३६ ॥

*

सप्तत्रिंशाधिकशततमोऽध्यायः

ब्रह्मोवाच

जाते प्रभाते विमले मुनिशिष्येषुसर्वतः।
अधीयानेषुनिगमानग्निहोत्रं गते मुनौ ॥ १ ॥

नित्यं मुनिगणस्नानपूते पयसि राघवः।
सानुजः प्रिययायुक्तः स्नात्वादाद्भास्वतेऽञ्जलीन् ॥ २ ॥

छन्दसां मातरं जप्त्वा गायत्रीं ब्रह्मरूपिणीम्।
कुर्वन् प्रातरुपस्थानं दध्यौ स्वां च त्रयीतनुम् ॥ ३ ॥

सुप्रसन्नमना भूय आजगामाश्रमं मुनेः।
तं हुताग्निं वृतं शिष्यैरपश्यज्जाययान्वितम् ॥ ४ ॥

अनुजानीहि मां ब्रह्मन् गन्तुं पञ्चवटीवनम्।
त्वदाज्ञया निवत्स्यामि तत्राहं कतिचित्समाः ॥ ५ ॥

लोकोपकृतये ब्रह्मन् यदाज्ञप्तं मम त्वया।
तत्तथैव करिष्यामि शुभवान् भवदाशिषा ॥ ६ ॥

सदारः सानुजश्चाहं नमामि चरणौ तव।
कृपावता सदा भाव्यमेवमेव त्वया मयि ॥ ७ ॥

अपितेऽन्नोदकैरद्यपूतोऽस्मि भगवन्नहम्।
क्व खलु श्रोत्रियस्यान्नं तदभावे पिबेज्जलम् ॥ ८ ॥

जातं मे मङ्गलं भूय उषितस्य तवाश्रमे।
मुनिवर्यैः प्रसक्तस्य कथा वार्तयतः शुभाः ॥ ९ ॥

जगति प्राणिनां ब्रह्मन् दुर्लभं तव दर्शनम्।
किं पुनः स्पर्शनं प्रश्नसहभोज्यासनादिकम् ॥ १० ॥

स्मरन्नेव तव ब्रह्मन् पादपद्मं शुभावहम्।
अध्यासिताहमधुना पुण्यं पञ्चवटीवनम् ॥ ११ ॥

तत्रावसन् मुनिगणान्नित्यं तोषयितास्म्यहम्।
भोज्यकामदुघा स्थाल्यानसूयादत्तयानया ॥ १२ ॥

ये मामुपस्थिताः पूर्वं वसन्तं चित्रकूटके।
ते प्राय उपगन्तारः पुण्ये पञ्चवटीवने ॥ १३ ॥

इत्युक्त्वावस्थितं वीरमुवाच स्मितसंयुतम्।
मैत्रावरुणिरन्तःस्थपरमानन्दपूरितः ॥ १४ ॥

आशासे तव कल्याणं लोककल्याणकारिणः।
वृद्धिमभ्युदयं चैव दीर्घमायुः बहुसमाः ॥ १५ ॥

भवता बत वीरेन्द्र नाशनीयोऽवनीभरः ।
इति सम्भाव्य नागेन्द्रो मोदतेऽतितरां हृदि ॥ १६ ॥
रघूणामन्वयो यस्ते जन्मना भूरिवृद्धिमान् ।
इत्यजस्रं ग्रहपतिर्हृदये मोदतेतराम् ॥ १७ ॥
दिवः परिभवो नूनं मेघनादेन यः कृतः ।
तत्स्थाने विजयो भावीत्यमरेन्द्रोऽपि मोदते ॥ १८ ॥
सर्वं एव सुरा जाता हर्षोन्निद्राननश्रियः ।
भवतो जन्मना राम बभूवत्रिजगत्सुखम् ॥ १९ ॥
चिरं वर्द्धस्व भुवने चिरं पालय मेदिनीम् ।
चिरं परिभवामित्राण्याशाते तव मङ्गलम् ॥ २० ॥
इत्याशिषाणे योगीन्द्रे रामं रघुकुलोद्वहम् ।
लोपामुद्रा भगवती जानकीमाशिषत्तराम् ॥ २१ ॥

लोपामुद्रोवाच

योगीन्द्रस्य नरेन्द्रस्य पुत्री त्वं पद्मकोमला ।
सहसेऽतितरां खेदं सत्यधर्मानुबन्धतः ॥ २२ ॥
तव सत्येन धर्मेण प्रजानां कुशलं ध्रुवम् ।
नूनं त्वं भाविनी सीते राज्यश्रीभोगभोजिनी ॥ २३ ॥
न ते दुःखस्य लेशोऽपि तिष्ठन्त्याः प्रियसंनिधौ ।
तव कल्याणमिच्छूनां मनस्तु परितप्यते ॥ २४ ॥
क्व त्वं शिरीषमृद्वङ्गी केयं भूर्दर्भदुःसहा ।
इतीव मम पश्यन्त्याः खिद्यते हृदयं सति ॥ २५ ॥
अचिरेणैव दुःखानां पारं दर्शय जानकि ।
लभस्व राज्यश्रीस्थानं शीघ्रं पत्यामुना सह ॥ २६ ॥
पत्या सहाभिषिक्तां त्वां पितृपैतामहे पदे ।
अचिरेणैव पश्यन्तु स्वाशिषाणा महर्षयः ॥ २७ ॥
मणिमाणिक्यजटिते स्वर्णसिंहासने स्थिता ।
पत्युरर्द्धाङ्गगा सीते चिरं नन्दय मानवान् ॥ २८ ॥
इत्याशीर्भिः सुसंवर्ध्य दम्पती मुनिदम्पती ।
कृतप्रणामौ भूयस्तौ प्रीतौ तौ विससर्जतुः ॥ २९ ॥
विश्लिष्यमाणा रघुपुङ्गवेन द्विजा अगस्त्याश्रमवासिनस्ते ।
यथैव चन्द्रास्तमये चकोरास्तथाबभूवुः परितापयुक्ताः ॥ ३० ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे अगस्त्याश्रमादयगमे सप्तत्रिंशाधिकशततमोऽध्यायः ॥ १३७ ॥

*

अष्टत्रिंशाधिकशततमोऽध्यायः

ब्रह्मोवाच

त्यक्त्वागस्त्याश्रमं रामं सोत्कण्ठमुनिमण्डलम् ।
सीतानुजाभ्यां सहितो ययौ पश्यन् वनश्रियम् ॥ १ ॥

तस्य मार्गद्रुमा दुच्चैः शुभमूचुर्महोन्नताः ।
विश्रान्तविहगश्रेणीकलकूजितकैतवात् ॥ २ ॥

वने वनलतास्तस्य गच्छतोऽधिज्यधन्वनः ।
शशंसुर्विजयं मत्तभ्रमरीगुञ्जितच्छलात् ॥ ३ ॥

कोकिलानां कला वाचो निशम्यामर्षसंयुतः ।
आलापयत्प्रियां भूयः कोकिलालापजित्वरीम् ॥ ४ ॥

सीतानुपुरशिंजितानि सरसीष्वाकर्ण्य कर्णप्रिया-
ण्यन्योन्यं तुलयेव हंसललनाऽउच्चैश्चुकूजुस्तराम् ।
तद्गत्यापरिभूयमानगतयस्तास्तत्क्षणे पद्मिनी-
पत्रैरन्तरिता निलीय निभृतं तस्युः सलज्जा इव ॥ ५ ॥

सीतया मुखमण्डलं परिणतज्योत्स्नाप्रकाशं दिनेऽ-
प्यालोक्यव्यमुन्नहो विटपिसु स्तब्धाश्चकोरा वने ।
तेभ्योनूनमसूयमानहृदयोऽप्यस्याः प्रतिर्धन्वना ।
धिज्येनापि न सायकान् द्विजधिया संधातुमैच्छत्तराम् ॥ ६ ॥

दम्पत्योरुपरि प्रकामसुखदप्राणप्रियालोकयोः ।
सानन्दं पथि गच्छतोर्वनलता मादद्यान्मिलिन्देक्षणाः ॥

अत्यर्थं ववृषुः सुमानि महतीं छायां तथैवात्मना ।
चक्रुर्भूरि ददुर्मरन्दकणिकाः शश्वन्मुदे घ्राणयोः ॥ ७ ॥

पुष्पाणां स्तबकेषु सौरभगुणस्तब्धद्विरेफैस्वलं ।
वल्लीनां नवमञ्जरीषु रजसा छन्नासु माध्वीरसैः ॥

आर्द्रासु द्रुमपल्लवेषु बहुभिर्वर्णैर्विचित्रेषु च ।
क्रीडादत्तविलोचनोत्सवसुखौ तौ दम्पती जग्मतुः ॥ ८ ॥

तयोरनुगतः श्रीमांल्लक्ष्मणः शुभलक्षणः ।
अशोभततरां यद्वद्वसन्तो रतिकामयोः ॥ ९ ॥

घनवनतरुवल्लीवृन्दसुच्छायमार्गं प्रतिपदकृतविश्रान्तिः कृती रामचन्द्रः ।
सरभसवनभिल्लीवीक्षमाणाङ्गलक्ष्मीर्मदनशतदुरायप्रेष्ठरूपो जगाम ॥ १० ॥

अतिक्रम्य वनं घोरमुत्कण्ठितमृगीगणम् ।
आससाद शुभक्रीडः पुण्यं पञ्चवटीवनम् ॥ ११ ॥

फुल्लवृक्षलतापुष्पसौरभ्यपिशुनैः शुभैः ।
अत्यच्छसरसीवारिसंगिभिः पवनैर्युतम् ॥ १२ ॥

दूरादुत्प्रेक्ष्य सुषुमैर्विचित्रफलपाकिभिः ।
व्यालीढनवलीवृन्दैस्तरुभिर्निविडीकृतम् ॥ १३ ॥

श्यामायमानं पुरुत उन्नम्रजलदाकृति ।
अरण्यमहिषानीकचकितोद्भ्रान्तसूकरम् ॥ १४ ॥

अतिसान्द्रतरुस्तोमव्यालीनतिमिरोत्करम् ।
समूहं कृष्णरात्रीणामेकीभूतमिवाग्रतः ॥ १५ ॥

क्वचिदद्युवमृगीवृन्दकूर्दमानमदैणकम् ।
क्वचित्प्रमत्तवाराहकृतमुस्तागणक्षति ॥ १६ ॥

क्वचिच्छृङ्गाश्रृङ्गियुद्धव्यासक्तवनसैरिभम् ।
क्वचित्प्रमत्तवेतण्डावगाढसरसीजलम् ॥ १७ ॥

क्वचिद्वनद्रुमलताविश्रान्तविहगव्रजम् ।
क्वचिद्गुञ्जदलिव्रातघ्रातवञ्जुलमञ्जरि ॥ १८ ॥

क्वचिद्रक्तप्रभं फुल्लपलाशविपिनश्रिया ।
क्वचित्पीतायितंनव्यविकसच्चम्पकद्रुमैः ॥ १९ ॥

क्वचिन्नीलीजलाकारं फुल्लतापिच्छभूरुहैः ।
क्वचित्पूर्णशशिश्वेतं मुनिवृक्षप्रसूनकैः ॥ २० ॥

क्वचिच्चित्रायितं चारु नानानोकुहराजिभिः ।
संफुल्लकमलारण्यमनोहारिसरोजलम् ॥ २१ ॥

बहुकौतूहलोपेतमत्यर्थप्रियदर्शनम् ।
गोदावरीसरिद्वारिलहरीपूतमारुतम् ॥ २२ ॥

मनोज्ञमपि रक्षोभिः समंतान्निर्जनीकृतम् ।
आश्रमेषु समापूर्णं भक्षितब्राह्मणास्थिभिः ॥ २३ ॥

तत्राविशद् रघुवरो विराधवधमर्षितान् ।
कम्पयन् राक्षसान् सर्वान् धनुर्ज्याघोरनिःस्वनैः ॥ २४ ॥

पुण्यं पञ्चवटीवनं रघुपतौ सम्प्राप्तमात्रे मुनि-
श्रेष्ठाः स्वानि वराश्रमाणि भयतस्त्यक्तानि यान्यस्त्रकाम् ॥
तान्याजग्मुरमेयवीर्यमुदिता रक्षोगणाश्चोद्धय-
भ्रान्तास्तस्य धनुर्वलाभिगमनाद्गूढं पलाय्य स्थिताः ॥ २५ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे पञ्चवटीवनप्रवेशो नामाष्टत्रिंशाधिकशततमोऽध्यायः । १३८ ।

*

एकोनचत्वारिंशाधिकशततमोऽध्यायः

ब्रह्मोवाच

सस्नौ गोदावरीं पुण्यां मार्यानुजसमन्वितः ।
रामस्त्रिभुवनारामः स्थापयन् धर्मपद्धतिम् ॥ १ ॥

ययौ पञ्चवटीं पुण्यां कुञ्जपुञ्जमनोरमाम् ।
उवाच लक्ष्मणं तत्र भक्तिप्रह्वशिरोधरम् ॥ २ ॥

इह वत्स्यामि सौमित्रे नूनं वर्षाणि कानिचित् ।
मुनेः सर्वज्ञवर्यस्यनिदेशात् कुम्भजन्मनः ॥ ३ ॥

रच्येतां पर्णशाले द्वे इह स्थाने मनोरमे ।
आत्मनो योगक्षेमार्थं भ्रातश्च गृहिणो मम ॥ ४ ॥

दृढवंशस्तम्भयुते वेत्रशाखासुनिर्मिते ।
सान्द्रपर्णततिच्छन्ने शाले द्वे इह कल्पय ॥ ५ ॥

आवसथ्याग्निमाधाय जुह्वानः प्रतिवासरम् ।
वृत्तिं वनफलैः कुर्वन्निह स्थास्याम्यहं सखे ॥ ६ ॥

वनमेतद्बहुफलं कन्दमूलदलान्वितम् ।
योगक्षेमाय नो नित्यं भविष्यति न संशयः ॥ ७ ॥

वनेऽस्मिन् दुष्टसत्वानि विनेयानिमया मुहुः ।
येषां भयेन वै शून्याः पर्णशाला द्विजन्मनाम् ॥ ८ ॥

भयान्मुनिकुलानीमान्यतः स्थानाद्विदुद्रुवुः ।
तानि भक्त्या समानीय प्रतिवासयितास्म्यहम् ॥ ९ ॥

जनस्थानमितः स्थानादविदूरेऽस्ति लक्ष्मण ।
प्रायस्तत्रापि मुनयो रक्षोभीता वसन्ति न ॥ १० ॥

स्वाहास्वधावषट्कारध्वनिः प्रोषित एव च ।
रक्षसां भयतो विप्राः प्राणरक्षणतत्पराः ॥ ११ ॥

भक्षिता भक्ष्यमाणाश्च वाडवा राक्षसाधमैः ।
पश्येमान्यस्थिवृन्दानि तेषामेव पुरस्तव ॥ १२ ॥

पुनः संजीवयिष्यामि तानहं ब्राह्मणोत्तमान् ।
दास्यन्ति ते प्रमुदितास्तुभ्यं महयं शुभाशिषः ॥ १३ ॥

ये केचित्सम्मुखे चात्र भविष्यन्ति निशाचराः ।
तानहं शातयिष्यामि वाणवह्नेः पतङ्गकान् ॥ १४ ॥

इति कृत्य निवसतोरत्र नौ सृष्टिसौख्यकृत् ।
इत्थं मुनेः कुम्भयोनेरादेशः सफलो भवेत् ॥ १५ ॥

इत्यार्येण समादिष्टो लक्ष्मणः प्रेमसम्प्लुतः ।
तथैव कृतवांस्तत्र पर्णशालाद्वयं सुधीः ॥१६॥

निकृत्य करवालेन वंशस्तम्बान् हरिद्रुचीन् ।
रम्या वेत्रलताश्चैव पर्णसंदोहशालिनीः ॥१७॥

अत्रीक्लृपत् सावकाशां पर्णशालां द्रढीयसीम् ।
आर्यस्य दारयुक्तस्य चिरसंवसनोचिताम् ॥१८॥

आत्मने चैव संक्षिप्तामारादेव विनिर्ममौ ।
प्रससाद प्रिया युक्तो भ्रातुः कृत्येन राघवः ॥१९॥

तत्रावसथ्यमाधाय रामो मन्त्रविधानवित् ।
यथासम्पन्नहविषा जुहाव वनवृत्तिमान् ॥२०॥

कन्दैर्मूलैः फलैः शाकैर्मांसैः कृष्णमृगोद्भवैः ।
होमावशिष्टैर्विधिवद्बुभुजे सकुटुम्बकः ॥२१॥

तस्यागमनमाज्ञाय दिव्ये पञ्चवटीवने ।
तस्यामेव निशि प्राप्ताः स्वाश्रमान् मुनिपुङ्गवाः ॥२२॥

रामः प्रियासहित आत्तसहर्षलीलः संवार्तयन् विविधमार्गवनप्रवृत्तीः ।
सुष्वापपर्णसदने धृततूणचापस्त्रैलोक्यकण्टकनिरासनिबद्धचेताः ॥२३॥

सौमित्रिरार्यचरणाहितचित्तवृत्तिरारूढचापनिहितैकशरः प्रकामम् ।
तस्थौ वने कटिनिबद्धनिषङ्गयुग्मो रक्षन् विनिद्रनयनः प्रियपर्णशालाम् ॥२४॥

इत्थंसुधीरहृदयः प्रथमानिशां तां गोदावरी निकटपञ्चवटीवनस्थः ।
सौमित्रिरार्यचरणो रहसि प्रसुप्ते संजाग्रदेव निभृताप्तमनिर्निनाय ॥२५॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे पञ्चवटीवन प्रथमागमो नामैकोनचत्वारिंशाधिकशततमोऽध्याय ॥१३९॥

*

चत्वारिंशाधिकशततमोऽध्यायः

ब्रह्मोवाच

प्रबुद्धः प्रातरेवासौ प्रियाशोभितपार्श्वकः ।
कृतप्रणामो भक्तेन भ्रात्रा सौमित्रिणा ततः ॥१॥

तस्थौ मुहूर्तं सुमना-सुप्रसन्नो महामतिः ।
पश्यन् विपिनसौन्दर्यं मुमुदे रक्तमानसः ॥२॥

उवाच जानकीं भूयः संवर्द्धितमहोत्सवः ।
पश्यसीदं प्रियतमे वनं पञ्चवटीमनु ॥३॥

अत्र मे मनसः प्रीतिर्वर्द्धतेऽतितरां मुहुः ।
आकर्णय कलां वाचं कोकिलानां कलावति ॥४॥

प्रातःप्रबोधमाङ्गल्यं कुर्वन्त्येतेऽद्य पक्षिणः ।
नानाजातियुताः सन्तो नानावर्णमनोहराः ॥५॥

सप्तस्वरसमुच्चारकुशलाः कलकूजिताः ।
महीरुहहरिच्छाखासुखासीनाः समंततः ॥६॥

पश्य प्रिये नरन्त्येते मयूरास्ततचन्द्रिकाः ।
उन्नम्रमेघसंकाश पश्यन्तो निविडं वनम् ॥७॥

कुसुमैः सप्तपर्णानां नवदानाम्बुगन्धिभिः ।
दधतीह परावृत्ति प्रतीभाशङ्किनो गजाः ॥८॥

पश्यस्येतां पुरस्तात्ते गङ्गां गौतमनिर्मिताम् ।
सिद्धगन्धर्वगीर्वाणैरवगाढामलोदकाम् ॥ ९ ॥

हंससारसचक्राह्वकादम्बकुलनादिनीम् ।
मदौष्मशमनीं नित्यमिभानामवगाहताम् ॥ १० ॥

मन्दनिर्ह्रादगम्भीरप्रवाहभरवेगिनीम् ।
तीरावनीसमासीनतपस्यन्मुनिपुङ्गवाम् ॥ ११ ॥

अम्बकाचलमध्यस्थबिल्ववृक्षविनिर्गताम् ।
पुनानां जगतीं कृत्स्नां लहरीसंगिमारुतैः ॥ १२ ॥

तटोद्देशसमुत्फुल्ललतावृक्षप्रवर्षितैः ।
छन्नां प्रसूनस्तवकैर्नीरसौरभशालिनीम् ॥ १३ ॥

कोटितीर्थाम्बुपावित्र्यकारिणीं साधुदर्शनात् ।
लुलल्लहरिसंदोहविलासभरशालिनीम् ॥ १४ ॥

क्वचित्स्नानसमायातसुरस्त्रीकबरच्युतैः ।
मन्दारपुष्पस्तवकैश्छन्ननीरां समंततः ॥ १५ ॥

क्वचिद्गन्धर्वनारीणां कुचकुम्भपरिस्नुतैः ।
काश्मीरचन्दनरसैः समंतात्सुरभीकृताम् ॥ १६ ॥

क्वचिन्नृपतिनारीणां स्नान्तीनां कुचमण्डलात् ।
च्युतैरेणमदैः सम्यक् सुगन्धितपयोभराम् ॥ १७ ॥

लीलावगाहमुदितस्वर्गस्त्रीतनुसंगतैः ।
नानावर्णैरङ्गरागैः पिञ्जरीकृतशम्बराम् ॥ १८ ॥

वगाहतां मुनीन्द्राणामघमर्षविचिक्षमाम् ।
नानादेशनृणां पापपुञ्जान्यक्कुर्वतीं क्षणात् ॥ १९ ॥

भूरिवारिघटारब्धताण्डवां वीचिबाहुभिः ।
स्पृशन्तीं पुलिनक्षोणिं निषण्णमुनिमण्डलाम् ॥ २० ॥

जातीमण्डपसंजुष्टेमल्लीमण्डपमञ्जुले ।
मालतीमण्डपारामरामणीयकसंयुते ॥ २१ ॥

श्रीफलाटविभूयिष्टे कदम्बवनभूषिते ।
तमालकाननच्छायासुविश्रान्तमुनि व्रजे ॥ २२ ॥

विकसन्नववानीरवल्लरीवलिते शुभे ।
उभे अपि धनच्छाये पुलिने बिभ्रतीं सदा ॥ २३ ॥

माद्यत्पुलिन्दतरुणीसेवितोत्तीरकाननाम् ।
अनेकाश्चर्यसम्पन्नां जलक्रीडोचितां तव ॥ २४ ॥

अस्यां प्रिये वगाह्यादद्य बाह्याभ्यान्तरशुद्धिभृत् ।
मुनीन् सम्मानयतमां ये पुरा चित्रकूटके ॥ २५ ॥

मिलिताः सान्त्विताश्चैव मया सुबहुलादरम् ।
आगमिष्यन्ति ते भूयोऽप्यस्मान् विज्ञाय संगतान् ॥ २६ ॥

एषात्रिधर्मपत्न्या ते दत्ता स्थाली मनोरमा ।
अक्षय्यान्नव्यञ्जनादिप्रसवित्री ह्यलौकिकी ॥ २७ ॥

इह त्वं भोजयतरां यथेष्टं संगतान् द्विजान् ।
कोटिब्राह्मणभोज्येऽपि विद्धि स्थालीयमक्षया ॥ २८ ॥

एवं दिने दिने शश्वत् सुकृतार्जनतत्परा ।
इह तिष्ठ प्रिये नित्यं पुण्ये पञ्चवटीवने ॥ २९ ॥

जनस्थाने स्थिता ये च दण्डकारण्यवासिनः ।
नानादेशनिवासा ये ते सर्वेऽपि द्विजोत्तमाः ॥३०॥

नैष्ठिका दीर्घतपसोयायजूकास्त्रयीमुखाः ।
मुनयो वाडवश्रेष्ठा योगयोगाङ्गविद्वराः ॥ ३१ ॥

ज्ञानिनः कर्मनिपुणा ब्रह्मोपास्तिपरायणाः ।
ब्रह्मज्ञा मुनयः शुद्धास्त्रिकालज्ञाः सुमेधसः ॥ ३२ ॥
ते सर्वेऽपि प्रविज्ञाय वसन्तं मामिह प्रिये ।
समेष्यन्ति शुभाचारा ब्राह्मणा ज्ञानचक्षुषः ॥ ३३ ॥
उद्वेजितास्ते रक्षोभिः कूटमायापरायणैः ।
मामेवभक्तिसुप्रह्वमेष्यन्तीह न संशयः ॥ ३४ ॥
तानहं मानयिष्यामि त्वया साकमनिन्दिते ।
येषां प्राणप्रियोऽस्म्येष ते मे प्राणप्रिया द्विजाः ॥ ३५ ॥
एवमत्र द्विजातीनां मुनीनां च तपस्विनाम् ।
सुब्रह्मवर्चसेद्धानां समवायो भविष्यति ॥ ३६ ॥
तस्मिन् महति विप्राणां समवाये यशस्विनि ।
अर्जुयन्तीह सुकृतं चिरं वस विदेहजे ॥ ३७ ॥
ब्राह्मणा एव मे प्राणा ब्राह्मणा एव मे धनम् ।
ब्राह्मणा एव मेऽभीष्टा न तेभ्योऽन्यत्प्रियं मम ॥ ३८ ॥
इतिगुणावति विप्रान्नित्यमाराध्नतां नो
यदि शुभमशुभं वा जायतां दैवयोगात् ।
न खलु विदितवेद्यान्याय्यमार्गादपेतं
पदमपि चलितुं वै प्रायशः शक्नुवन्ति ॥ ३९ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे पञ्चवटीस्थितौ चत्वारिंशाधिकशततमोऽध्यायः ॥ १४० ॥

*

एकचत्वारिंशाधिकशततमोऽध्यायः

ब्रह्मोवाच

अथ तत्र शुभे स्थाने श्रीरामवसति प्रिये ।
आजग्मुर्वाडवाः शुद्धा नानादिग्देशवासिनः ॥ १ ॥
तापसाः पुण्यकर्माणः श्रीरामप्रियदर्शनाः ।
यायजूका ब्रह्मनिष्ठा वैदिका विदुषां वराः ॥ २ ॥
वेदान्तशास्त्रनिष्णाताः ब्रह्मवादपरायणाः ।
[1]षडङ्गशास्त्रव्याख्यातारः कल्पसूत्रविदुत्तमाः ॥ ३ ॥

---

१. पादेऽस्मिन्नक्षराधिक्यमार्षः ।

सिद्धान्तज्ञा रहस्यज्ञा निषेधविधिवेदिनः ।
मन्त्रशास्त्रक्रियाकाण्डवेत्तारोद्विजसत्तमाः ॥ ४ ॥

पञ्चवट्यां वसन्तं तं ज्ञात्वा रामं रघूद्वहम् ।
उद्वेजिता राक्षसौघैराययुः सर्व एव ते ॥ ५ ॥

तान् रामः स्थापयामास बहुमानपुरःसरम् ।
आनर्च बहुपाद्यार्घाचमनादिसपर्यया ॥ ६ ॥

अत्रेर्मुनिवरेण्यस्य धर्मपत्न्याकृपाढ्यया ।
वितीर्णामक्षयां स्थालीं सीतारसवतीगताम् ॥ ७ ॥

इष्टान्नान्नि सुमृष्टानि सुस्वादूनि विशेषतः ।
सुशाकव्यञ्जनादीनि नित्यं प्रसुवतीं पराम् ॥ ८ ॥

सम्प्राप्य सुकृती रामो भोजयामास कोटिशः ।
ब्राह्मणान् विधिसम्पन्नानाशिषानान् दिने दिने ॥ ९ ॥

ते भोजिताः सुपक्वान्नैः सूपोदनघृतादिभिः ।
स्वादुभिर्व्यञ्जनैः शाकैः कथिकातेमनान्वितैः ॥ १० ॥

मण्डकापूपसंयुक्तैः पूरिकाशष्कुलीमुखैः ।
नानाविधैस्तथाऽहारैर्वटिकावटकादिभिः ॥ ११ ॥

तर्पिता ब्राह्मणश्रेष्ठा नानापङ्क्त्युपवेशिताः ।
सौमित्रिणा च रामेण सीतया शुभशीलया ॥ १२ ॥

परिविष्टैः शुभैरन्नैर्लेह्यचोष्यपुरःसरैः ।
संतोषिताश्चिरं तत्र बहुधा च समादृताः ॥ १३ ॥

शुभाशिषः प्रयच्छन्तो वीरेन्द्राय महात्मने ।
सौमित्रयेचसीतायै मन्त्राक्षतपुरःसरम् ॥ १४ ॥

प्रणताबहुभक्त्या च पादसंवाहनादिभिः ।
सेविताः ससुखंतस्थुर्जनस्थाने निरामये ॥ १५ ॥

एवं दिने दिने तत्र ब्रह्मपूजा व्यवर्त्तत ।
सीतया रामचन्द्रेण विहिता लक्ष्मणेन च ॥ १६ ॥

वनं च तद्रहोभूतं गते ब्राह्मणमण्डले ।
आसीन्मङ्गलसम्पन्नं दम्पत्योः क्रीडनोचितम् ॥ १७ ॥

विजहार वने तस्मिन् ब्रह्मभोजादनन्तरम् ।
रहोभूते शुभे स्थाने गुञ्जन्मधुपभूरुहे ॥ १८ ॥

प्रमत्तकोकिलारावजुष्टफुल्लाम्रकानने ।
विकचाशोकमन्दारचाम्पेयकुटजव्रजे ॥ १९ ॥

नित्यमावातत्रिविधवातोर्मिपरिशीलिते ।
गौतमीतीरवानीरकुञ्जमण्डपशालिनि ॥ २० ॥

त्र्यम्बकेशमहादेवनित्यपूजासमागतैः ।
देवगन्धर्वनिवहैः संततं काहलीकृते ॥ २१ ॥

सुरस्त्रीनूपुरारावझङ्कारमुखरीकृते ।
क्वणत्कादम्बसंदोहै राजहंसकदम्बकैः ॥ २२ ॥

सेवितैः सरसां तोयैः सर्वदा शिशिरीकृते ।
अशोकभूरुहभुजपरिरब्धैः सुपल्लवैः ॥ २३ ॥

लतिकानां शतैर्नित्यं सुच्छायविहतातपे ।
असूर्यंपश्यविहगश्रेणीविश्राममन्दिरे ॥ २४ ॥

जानकीनूपुरारावसोत्कण्ठकलहंसके ।
मेघश्यामरघुश्रेष्ठदर्शनोत्सुककेकिनि ॥ २५ ॥

सहकारतरुश्रेणीमञ्जरीभरशालिनि ।
एकतः केतकारण्यपरागपटलावृते ॥ २६ ॥

परतः पङ्कजारण्यपरागपिशगीकृते ।
अन्यतः केसरवनोद्धूतधूलीभरावृते ॥ २७ ॥

तदन्यतः किंशुकद्रुकुसुमैर्लोहितायति ।
क्रीडत्कुरङ्गमिथुनतरुकुञ्जसुमञ्जुले ॥ २८ ॥

कूजच्छुकगणक्रान्त नवपल्लवभूरुहे ।
प्रपठत्सारिकावृन्दविश्रान्तिसुखदद्रुमे ॥ २९ ॥

अनेकपशुपक्षाढ्ये अनेकतरुमण्डपे ।
अतिसान्द्रतरुस्तोमसर्वतःसंकुलान्तरे ॥ ३० ॥

सर्वर्तुसुखदे क्रीडत्किन्नरीगणशोभिते ।
गायद्गन्धर्वसंदोहमूर्छितस्वरपूरिते ॥ ३१ ॥

वातपूर्णकलध्वानकीचकप्रचयावृते ।
पुण्ये गोदापरिसरे विस्तीर्णे गहने वने ॥ ३२ ॥

विदेहतनयायुक्तो लक्ष्मणैकसहायकः ।
आस्फालितसुचापज्यारवोत्सारितकौणपः ॥ ३३ ॥

चिक्रीडे केलिरसिकः श्रीमान् रघुकुलोद्वहः ।
विलासैर्बहुभिर्युक्तो जलस्थलसुखोचितैः ॥ ३४ ॥

देवी च सा जनकजा दृष्ट्वा सर्वसुखप्रदम् ।
स्थानं रहःसुखकरं रेमे पत्या सुसंगता ॥ ३५ ॥

पुष्पस्तबकभूषाढ्या गिरिधातु विभूषिता ।
ऋतुयोग्यकृताकल्पा सुसूक्ष्मवसनावृता ॥ ३६ ॥

अनपायाङ्गरागाढ्याशिंजिच्चरणनूपुरा ।
मोदयन्तीमनः पत्युर्विरराज दिने दिने ॥ ३७ ॥

कमलेशीमुखाः सख्यस्तत्रैतस्यास्तनोर्वहिः ।
आविर्भूयस्फुटं रामं सावकाशाः सिषेविरे ॥ ३८ ॥

यथा प्रमुद्वने पूर्वं सुखं विहृतवान् प्रियः ।
तथैव विजहारेह पुण्ये पञ्चवटीवने ॥ ३९ ॥

गोदावर्यास्तटेषु द्रुमगहनलतामण्डपैरावृतेषु
स्वच्छेषु त्र्यम्बकाद्रेस्तटशिखरगुहोपत्यकाधित्यकासु ।
मान्द्रक्षोणीरुहासु स्मर इव रतिमान् पञ्चवट्याः स्थलीषु
श्रीमान् सीतासमेतः प्रतिदिनमकरोद् रामचन्द्रो विलासान् ॥ ४० ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे पञ्चवटीवनविहारो नामैकचत्वारिंशाधिकशततमोऽध्यायः ॥१४१॥

*

द्विचत्वारिंशाधिकशततमोऽध्यायः

ब्रह्मोवाच

एवं विहरतस्तस्य सदारस्य स्मरत्विषः ।
सानुजस्य सुखाढ्यस्य पञ्चवट्यां निवासिनः ॥ १ ॥

सार्द्धद्वादशवर्षाणि व्यतीयुः केलिशालिनः ।
अथैच्छन्मुनिभिर्देवैर्विज्ञप्तो भृशमाकुलैः ॥ २ ॥

जगद्विद्रावघोरस्य रावणस्य वधं प्रति ।
तदा शूर्पणखानाम क्रव्यादाधिपतेः स्वसा ॥ ३ ॥

वृषस्यन्त्यतिकामार्ता तत्रागात्पुरुषार्थिनी ।
स्थापयित्वा जनस्थाने रक्षसां सुमहद्बलम् ॥ ४ ॥

तत्र मुख्यतमाः केचिद्राक्षसा घोरदर्शनाः ।
खरश्चत्रिशिराश्चैव दूषणश्च बलाधिकः ॥ ५ ॥

तत्रत्या मुनयो वीक्ष्य राक्षसानां बलं तु तत् ।
हाहेति रामरामेति लक्ष्मणेति च चुक्रुशुः ॥ ६ ॥

अग्निहोत्रगृहाण्येषां शान्तानां शुभकर्मणाम् ।
श्मशानभस्मविण्मूत्रव्याप्तानि विदधुः खलाः ॥ ७ ॥

पलायितास्तेकृच्छ्रेण स्थापिताः सज्यधन्वना ।
रामेणभक्तिप्रह्वेण तमेव पुनरायायुः ॥ ८ ॥

तान् स सत्यवचा वीरः सान्त्वयामास वाडवान् ।
प्रतीक्षध्वं द्विजाः कालं यावदेतन्निहन्म्यहम् ॥ ९ ॥

एवमाश्वासितास्तेन वाडवा वेदपारगाः ।
अग्निहोत्राण्युपादाय तस्थुः श्रीरामसंनिधौ ॥ १० ॥

तान् रक्षमाणो रक्षोभ्यो ब्राह्मणान् साग्निकान् प्रभुः ।
अस्थापयत् स्वसविधे गोदायाः पुलिनावनौ ॥ ११ ॥

अथोकदाचित्स विदेहकन्यया सहास्थितः पञ्चवटीवने शुभे ।
विहारशीलः स्मरकोटिसुन्दरो रराज चान्द्रीसहितो विधुर्यथा ॥ १२ ॥

तत्राजगाम सा घोरा राक्षसी कूटमायया ।
सुन्दरं वेशमास्थाय दिव्यरूपेव सुन्दरी ॥ १३ ॥

छलाद्वशीकर्तुकामा जानक्याः पतिमच्युतम् ।
कामार्ता छद्मवेषाढ्या व्यदृश्यत वनान्तरे ॥ १४ ॥

पीनस्तनोच्छ्रायसुरत्नहारिणी बृहन्नितम्बस्थलचारुमेखला ।
तनूदरी मञ्जुगभीरनाभिभृद्विभक्तचारुत्रिवलीतरङ्गभृत् ॥ १५ ॥

नाभीसरोनिर्गतरोमराजिका मनोज्ञमध्या कृशदीप्तविग्रहा ।
सुकम्बुकण्ठी धृतकण्ठभूषणा कपोलपर्यन्तलसत्सुकुन्तला ॥ १६ ॥

अर्धेन्दुसंशोभिललाटपट्टिका सुलग्नसिन्दूरसुपूरविन्दुभाक् ।
अनङ्गकोदण्डयुगभ्रुवोरधः कुरङ्गचाञ्चल्यमनोज्ञलोचना ॥ १७ ॥

माणिक्यताटङ्कयुगप्रभावलीमिलन्मनोज्ञालकवल्लिचेष्टिता ।
शुकास्यनिर्जेत्रसुतुङ्गनासिका विलग्नमुक्ताभरणप्रभावती ॥ १८ ॥

विकासिबन्धूकसुबान्धवाधरा दन्तावलीभ्यां किरणावलीधरा ।
मृणालकाण्डोपमबाहुवल्लरीविलम्बिकेयूरसुरत्नदीधितिः ॥ १९ ॥

सलज्जमुच्चैरवगुण्ठवाससा पिधाय वक्त्रेन्दुमुदीतविभ्रमा ।
सहावलीलाहसितप्रकाशिनी समल्लिधम्मिल्लभरेण मन्थरा ॥ २० ॥

सकूजराजत्पदपद्मनूपुरा पदाङ्गुलीभूषणनादसौष्ठवा ।
मदालसामत्तगजेन्द्रगामिनी तरङ्गितारुण्यसुधोर्मिदर्शिनी ॥ २१ ॥

समस्तवामाकुलरूपगञ्जनोचितं वपुर्विग्रहवेषसौष्ठवम् ।
प्रदर्शयन्त्युद्यदपाङ्गवीक्षितैर्नृणां मनोमादनमोहनोचिता ॥ २२ ॥

सगर्वसोल्लाससलज्जसोन्मदं पदं क्षिपन्ती विजने घने वने ।
स्थिता पुरोभूय विदेहजेशितुः शनैरुपागात् सविधं च तस्य सा ॥ २३ ॥

स्थितौ रहो यत्र विलासशालिनावुभौ प्रियौ तौ रसिनौ परस्परम् ।
तत्रागता सा नितरां व्यदृश्यत छलेन रूपं दधती तथाविधम् ॥ २४ ॥

तामन्तराकोशनिगूढखड्गवत्सुतीक्ष्णचित्तांरुचिराकृतिं बहिः ।
विवेद रामो भुवनान्तरात्मदृक् करालदर्शां किल राक्षसीमिति ॥ २५ ॥

ततस्तामेष पप्रच्छ कासि त्वं वरवर्णिनि ।
कुत एवासि सम्प्राप्ता निर्जनेऽत्र घने वने ॥ २६ ॥

सुदी वा किन्नरी वापि नागी वापि वराङ्गना ।
बिभ्रती मोहनं नृणां रूपमेतदजानताम् ॥ २७ ॥

आख्याहि का त्वमेतस्मित् विजनेऽति घने वने ।
विचरन्ती मम पुरः सोत्कण्ठेव समागता ॥ २८ ॥

उवाच सा स्मितमुखी पृच्छमानं रघूद्वहम् ।
या काचिदस्मि पुंश्रेष्ठ किं ते जातिपरीक्षया ॥ २९ ॥

तथाप्युत्तममेवास्ति कुलं रूपोचितं मम ।
जातिरप्युत्तमा कापि ज्ञास्यसि क्रमतो न किम् ॥ ३० ॥

प्रयोजनं तु मे सम्यक्छ्रूयतां नृवर त्वया ।
दृष्ट्वा त्वां सुन्दरं लोके रन्तुकामास्मि संगता ॥ ३१ ॥
अत्यारूढो मम हृदि प्रज्वलन् मदनानलः ।
एवं भाषयते मां वै मन्दाक्षरहितं वचः ॥ ३२ ॥

स त्वं प्रकृत्या रमणीयरूपः प्रायः प्रतीतः पुरुषप्रकाण्डः ।
यथेप्सितं मां रमयेह रम्ये वने नितान्तं रमणीविलासैः ॥ ३३ ॥

अनन्तरं यत्र तवास्ति कामो गिरिष्वरण्ये दिवि वा धरण्याम् ।
विमानवर्येषु समुद्रमध्ये द्वीपेषु वा सौधवरेषु रन्तुम् ॥ ३४ ॥

तत्रैव नेष्यामि भृशं स्वशक्त्या स्वपौरुषाढ्यं रमयन्तमुच्चैः ।
चिरेण कामार्ततमास्मि सम्यङ्करावलम्बं मम देहि कान्त ॥ ३५ ॥

अथ यदि स्वयमेव समागतां पुरुष वर्य न मां विजहास्यसि ।
सुमुख सुन्दर शूरवरेण्य भोस्तदिहपुण्यमलं समवाप्स्यसि ॥ ३६ ॥

इति बहुविलयन्तीमात्मनः संग्रहार्थं
मदनमदपरीतां निस्त्रपामापतन्तीम् ।
निखिलनिगमवेत्ताप्येकपत्नीव्रतस्थो
विधुततदुदितार्थस्तामथोच्चैर्वभाषे ॥ ३७ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे शूर्पणखाप्रार्थनं-नाम द्विचत्वारिंशाधिकशततमोऽध्यायः ॥ १४२ ॥

*

त्रिचत्वारिंशाधिकशततमोऽध्यायः

श्रीराम उवाच

नैवं भाषितुमर्हासि मामेकरमणीव्रतम् ।
एवमाभाषमाणां त्वां त्रयापि न रुणद्धि किम् ॥ १ ॥

अत्यारूढो यदि तव मनः प्रमथनः स्मरः ।
तदा ममानुजं बाले भजस्व सदृशं मया ॥ २ ॥

प्रगुणं पुरुषश्रेष्ठं गुणैर्मत्समतां गतम् ।
चिराद्रामाविमुक्तं तं भज कामार्तमानसे ॥ ३ ॥

इत्युक्ता सा मनोलग्न मदनानलविह्वला ।
आजगाम सुमित्रायास्तनयं ध्वानिनूपुरा ॥ ४ ॥

सा मन्दमन्दद्विरदाभिगामिनीं सकूजमध्यस्थलराजिमेखला ।
शनैःपदक्षेपरुताङ्घ्रिनूपुरा पुरः स्थिता तेन ततो व्यदृश्यत ॥ ५ ॥

तमाह सा कोकिलमञ्जुलाषिणी ललामभावाञ्चितसुन्दरस्मिता ।
मनोरमापाङ्गविसर्गपूर्वकं मनो हरन्तीव रहः सुसंगता ॥ ६ ॥

गृहाण मां पौरुषसारभूषण त्वमागतां कामविलासकामुकीम् ।
पूर्वं तव ज्येष्ठमहं गतास्मि भोस्ततोऽसि तेनैव निदर्शितो मम ॥ ७ ॥

शुभं तवास्तु स्वयमागतायाः पाणिं च मे गृह्णत आतुरायाः ।
जानासि नीतिं बत् शास्त्रसिद्धां या प्राक्तनैः स्त्रीविषये निबद्धा ॥ ८ ॥

मामातुरामुररीकुर्वतस्ते सम्बन्धआशास्यतमो महत्तमैः ।
भविष्यति प्रायशो यल्लिलोक्यामभ्यर्थ्यते पुम्भिरुत्कर्षकामैः ॥ ९ ॥

स्वेच्छागमात्वामहमात्मनः पतिं नेष्यामि देशं मनसा यथेप्सितम् ।
यत्र स्थितस्त्वं सुरलोकदुर्लभान् लब्धासि भोगान् बहुसौख्यदायिनः ॥ १० ॥

अथो यदि त्वं न हि मां ग्रहीष्यसि स्वयं करे प्राप्ततमामभीप्सिताम् ।
श्रियं दुरापामिव साधनैरपि क्षतिस्तदा ते महती भविष्यति ॥ ११ ॥

इत्युक्तमात्रः स तया लक्ष्मणः साधुकृत्यवित् ।
अवहेलिततद्वाक्य उवाच वदतां वरः ॥ १२ ॥

लक्ष्मण उवाच

एतन्मेऽमुचितं कृत्यं भवेदङ्गीकृतौ तव ।
यन्मम ज्येष्ठसविधे पूर्वं संकल्पसंगता ॥ १३ ॥

गुरुभार्याभिगमनादद्यत्पापं सद्भिरीरितम् ।
तन्मे भविष्यतितमां पाणिं ते परिगृह्णतः ॥ १४ ॥

अतो न रोचये तावदहं संगमनं त्वया ।
यथेष्टं याहि रम्भोरु त्वं विषीद प्रसीद वा ॥ १५ ॥

इत्यनङ्गीकृता तेन भूयः सा रघुपुङ्गवम् ।
आजगाम स्पृहाभङ्गपरिक्षुब्धान्तरा शनैः ॥ १६ ॥

हेलितां तामुभयतो हताशां स्मरविद्धुराम् ।
अथापि पुनरायान्तीं जहास जनकात्मजा ॥ १७ ॥

हसन्तीं रामरमणीं विलोक्य कुटिलाशया ।
चकार हृदि संरम्भभङ्गुरभ्रुकुटीतटा ॥ १८ ॥

सा कैतवने सौम्यत्वमापन्नापि खलाशया ।
हसन्तीं जानकीमुच्चैः स्वभावोचितमब्रवीत् ॥ १९ ॥

किं मां हससि कौटिल्यादुभाभ्यामपि वञ्चिताम् ।
फलं मद्वञ्चनस्यास्य लप्स्येते द्रागिमौ ध्रुवम् ॥ २० ॥

त्वमप्यस्योपहास्यस्य लप्स्यसे फलमञ्जसा ।
अधिक्षिप्य मृगी व्याघ्रीं का लभेतात्मनो हितम् ॥ २१ ॥

अतो यूयं भाविनः स्वात्ममृत्योरिहानुरूपं चकृथैतद्धताशाः ।
ममागताया अवहेलनं बलाद्दुर्दैववश्याः कुर्वते किं न मूढाः ॥ २२ ॥

इत्युक्त्वा भृशसंरब्धा रावणावरजा तदा ।
स्वनाम्न उचितं रूपमाविर्भावितवत्यलम् ॥ २३ ॥

करालदंष्ट्रं विकरालदर्शं ललद्वज्वालविरुपजिह्वम् ।
वात्याभनिःस्वासिसुघोरघोणं दृग्भ्यांरुषाङ्गारकणौघमोक्षम् ॥ २४ ॥

सभीमरूपभ्रुकुटीभुजङ्गीबन्धोत्कटाराललाटपट्टम् ।
तडित्पिशङ्गोग्रजटासमूहं स्थूलोष्ठदंशोद्धुरदीर्घदन्तम् ॥ २५ ॥

महीध्रगण्डाभकपोलयुग्मं विलम्बभीमश्रुतिगह्वराढ्यम् ।
भृग्वाभचञ्चच्चिबुकाग्रचण्डं शिवासहस्रध्वनिघोरकण्ठम् ॥ २६ ॥

समुच्छ्रितस्कन्धमहाद्रिकूटं तालद्रुमव्यायतबाहुदण्डम् ।
करालकक्षान्तरकेशसान्द्रं स्थूलस्तनोत्सेधजिताद्रिशृङ्गम् ॥ २७ ॥

क्षुधासुसंलग्न कृपीटद[1]र्शां विदीर्णभूम्याभवलीविवर्तम् ।
महान्धकूपाभगभीरनाभी तमिस्रधारोद्धुररोमराजि ॥ २८ ॥

सरित्तटोद्देशनितम्बवप्रं महोच्चभूभृत्पुलिनाभजङ्घम् ।
मृद्वङ्घ्रिविन्यासभरेण भूयः प्रकम्पिताशेषमहीवनान्तम् ॥ २९ ॥

सुतीक्ष्णशूर्पाभनखप्ररोहैर्महाशिलाकोटिविपाटनार्हम् ।
प्रचण्डदीर्घाङ्गुलिवृद्धशारवं दिशो महीं खं च परीत्य संस्थितम् ॥ ३० ॥

---

१. कृपीटमुदरं नीरे—टि.—बड़ो. ।

शस्त्रो सुतीक्ष्णङ्गरुहंनृमांससुपूतिगन्धैर्दृशमन्धयच्च ।
विभीषयद्भीमदृगन्तमोक्षैर्हस्तेन संतर्जयता मुहुश्च ॥ ३१ ॥

अमङ्गलारावकरं सुघोरतनुत्विषा निन्दितकाकवर्णम् ।
विरूक्षदीप्तैर्नयनावलोकैर्विदाहयत्प्राणिनस्तत् क्षणेन ॥ ३२ ॥

तां घोरदर्शां नरमांसगृध्नुनिरीक्ष्य सीता विकृताङ्ग संस्थाम् ।
विवेश सद्यो निजभर्तुरङ्के जातास्मि भीतेति मुहुर्वदन्ती ॥ ३३ ॥

लक्ष्मणः सहसा तत्र राक्षसीति विबुध्य ताम् ।
पर्णशालामगात्क्षिप्रं खड्गानयमकर्मणे ॥ ३४ ॥

विकोशीकृतघोरासिं रूषाविष्टं तथानुजम् ।
उवाचार्यो न वध्येयं स्त्री विरूपा विधीयताम् ॥ ३५ ॥

सौमित्रिः सहसा तस्याः कर्णौ नासां च भीषणाम् ।
चकर्त तीक्ष्णखड्गेन कृपया किं तु नावधीत् ॥ ३६ ॥

पुर्वमेव विरूपा सा राक्षसी घोरदर्शना ।
अत्यर्थं प्राप वैरूप्यं नासाकर्णनिकृन्तनात् ॥ ३७ ॥

ततः सा तेन निर्मुक्ता क्षरन्ती रुधिरोत्करम् ।
कृत्तनासाश्रुतिः सद्य उड्डीयाम्बरमास्थिता ॥ ३८ ॥

सा विग्रा नभसि स्थिता क्षरदसृग्धारापरीतं वपुः
सांध्याभ्रद्युति विभ्रती खरवैरापूरयन्ती दिशः ।
अङ्गुल्याभृशतीक्ष्णवज्रनखया वक्राकृतिक्रूरया
कार्कश्याञ्चितपर्वणा सपदि ता वृत्तर्जयन्ती ययौ ॥ ३९ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे शूर्पणखापरिभवो नाम त्रिचत्वारिंशाधिकशततमोऽध्यायः ॥ १४३ ॥

*

चतुश्चत्वारिंशाधिकशततमोऽध्यायः

ब्रह्मोवाच

सा जनस्थानमभ्येत्य तथाभूता विरूपिणी ।
राक्षसेभ्यः खरादिभ्य आचख्यौ स्वं पराभवम् ॥ १ ॥

तां लूनवक्त्रावयवां स्वभर्तुर्वलिनोऽनुजाम् ।
निरीक्ष्य राक्षसाः सर्वे बभुवुर्जातमन्यवः ॥ २ ॥

अथ प्रतस्थुः संरब्धास्ते खरत्रिशिरादयः ।
राक्षसा घोरकर्माणो गृहीतविविधायुधाः ॥ ३ ॥

अहो कृतं मनुष्येण मृत्युकारणमात्मनः ।
इति हेलापरं सद्यो रक्षोऽनीकं समुद्ययौ ॥ ४ ॥

ते पुरोधाय विप्रां तामदृश्यां विजयोद्यमे ।
यत्प्रतस्थुर्यातुधानास्तत्रेषामशुभं बभौ ॥ ५ ॥

त एकीभूय संरब्धा नानावर्णनिशाचराः ।
निपेतुर्विकृतारावास्तस्मिन् स्थाने उदायुधाः ॥ ६ ॥

राघवेन्द्रो रिपून् वीक्ष्य सर्वानापततस्तदा ।
इदमाहानुजं सद्यः समधिज्यधनुर्धरः ॥ ७ ॥

नन्वेतान् पश्य सौमित्रे सुसंरब्धान् निशाचरान् ।
विग्नायाः खलु राक्षस्याः प्रायशो वन्धवो ह्यमी ॥ ८ ॥

अहं तु निग्रहीष्यामि प्राणान्तेन रिपूनिमान् ।
त्वं रक्षावहितोभूत्वा जायां मे जनकात्मजाम् ॥ ९ ॥

तथेति लक्ष्मणः सीतां जुगोपद्विषतां बलात् ।
आजुहावाथ तान् योद्धुमेको रामो धनुर्धरः ॥ १० ॥

यावन्तस्ते राक्षसानीकयोधा धृतायुधास्तत्रयोद्धुं निपेतुः ।
तावद्रूपो ददृशे तैः स रामो धनुर्धरस्तीक्ष्णवाणैघवर्षी ॥ ११ ॥

ते खड्गैर्ऋष्टिभिः शूलैः प्रासैः परशुपट्टिशैः ।
गदाभिर्मुशलैश्चक्रैः शक्तिभिर्युयुधुस्तराम् ॥ १२ ॥

केचिदुच्चिक्षिपुर्वृक्षान् केचिद् ग्राव्णां गणांस्तथा ।
केचिदुल्मुकसंदोहान् ज्वालामालाभयानकान् ॥ १३ ॥

एकं राघवमुद्दिश्य दृप्ताः सर्वेऽपि राक्षसाः ।
ववृषुर्विविधास्त्राणि तुमुलः सोऽभवद् रणः ॥ १४ ॥

रामोऽधिज्यं धनुः कृत्वा सीतां निक्षिप्य लक्ष्मणे ।
सुदूरे पर्णशालाया निर्जगामासुरानभि ॥ १५ ॥

तेषामापततो वेगादस्त्रपूगान् भयानकान् ।
अभीवीक्ष्य मुमोचेषून् धनुषः कुण्डलीकृतात् ॥ १६ ॥

शस्त्रास्त्रैः कौणपेन्द्राणामेकसार्थसमुद्गतैः ।
आच्छन्नमभवद्व्योम घनैरिव घनागमे ॥ १७ ॥

रामस्य चापनिर्मुक्तैः शरैर्ज्याङ्काररावभिः ।
रक्षसामस्त्रपूगानि खण्डखण्डानि चक्रिरे ॥ १८ ॥

बाहुवेगेरितास्तेषां पतमाना महाशिलाः ।
कृताः सहस्रधा रामसायकैः करका इव ॥ १९ ॥

मारयोत्सारयास्कन्द छिन्धि भिन्धि निपातय ।
इत्यारावषरा घोरा निपेतुस्तमभिद्विषः ॥ २० ॥

तानेकैकशरै रामश्चक्रे विशिरसः खलान् ।
कबन्धप्रायमभवत्सहसा तद्रणाङ्गणम् ॥ २१ ॥

शस्त्रहस्ता रुषाविष्टाः क्षरद्रक्तभरोक्षिताः ।
मुण्डेक्षणैः प्रपश्यन्तः कबन्धा ननृतुस्तराम् ॥ २२ ॥

क्षणेन तन्महासैन्यं रक्षसां सुमहोद्धतम् ।
आत्मक्रोधानलज्वालावलीढं न्यपतद्भुवि ॥ २३ ॥

महान्तो राक्षसा राम स्यार्द्धचन्द्रोपमैः शरैः ।
फुल्लकिंशुकवृक्षाभा बभूवुः समराजिरे ॥ २४ ॥

केषांचिन्मुञ्चतां शस्त्राण्यभिद्यन्त भुजा युधि ।
ते विदीर्णमुखा दंष्ट्रायुधै राममभिद्रुताः ॥ २५ ॥

निबद्धघोरभ्रकुटीविरूपाःकरालदीर्णाननघोरदंष्ट्राः ।
सुघर्घरारावमुचोऽरुणाक्षाः सद्यो निकृत्तायतबाहुदण्डाः ॥ २६ ॥

सुभीमतिर्यङ्नयनावलोकैः सन्तर्जयन्तो युधि राक्षसा स्ते ।
धनुर्धरं राममभिद्रवन्तो व्यकम्पयन् भूतलमङ्घ्रिपातैः ॥ २७ ॥

तान् राघवेन्द्रो विशिखैः सुतीक्ष्णैरापुङ्खमग्नैर्निभृतैरुरःसु ।
सद्यः परावर्तयदेकसार्थे ते घूर्णिताक्षा न्यपतंश्च भूमौ ॥ २८ ॥

प्रत्यालीढपदाः केचिदाकर्णाकृष्टकार्मुकाः ।
निकृत्तचरणा रामसायकैर्न्यपतन् भुवि ॥ २९ ॥

तेषां करविनिर्मुक्ताः सायका रामसायकैः ।
सद्योद्विधाकृता युद्धे विनिपेतुः परागताः ॥ ३० ॥

सहस्रं राक्षसा रामे एकसार्थनिपातिनः ।
तावद्भिस्तच्छरैः सद्यः परावृत्य निपातिताः ॥ ३१ ॥

रामचापजवोन्मुक्तैर्मलैः प्रबलपातिभिः ।
उड्डीयन्तेस्म मूर्द्धानो रक्षसां श्रीफलोपमाः ॥ ३२ ॥

मूर्द्धानोरक्षसां घोरा गिरिगण्डमिता अपि ।
उड्डीय संगता व्योम्नि दृश्यन्ते लघुसंम्मिताः ॥ ३३ ॥

नीलाः पीताभ्रूभ्रवर्णाश्च रक्ताः पिङ्गत्विषः काककृष्णाः सिताश्च ।
घोरा घटाः पातिनां राक्षसानां संदृश्यन्ते प्रावृषीवाभ्रसंघाः ॥ ३४ ॥

घोरान् कटकटारावकारिणः पिष्टदंदृष्ट्रकान् ।
नानावर्णान् यातुधानान् शरैश्चिच्छेद राघवः ॥ ३५ ॥

तेषां मुण्डा भूतलं कम्पयन्तो दन्ताग्रदष्टौष्ठपुटाः सुभीमाः ।
उत्तानितोऽग्रभ्रुकुटीतरङ्गा हुङ्कारगर्भाः सहसा निपेतुः ॥ ३६ ॥

निकृत्तशीर्षा रघुवीरसायकैर्विभिन्नदोर्दण्डयुगाः क्षताङ्घ्रयः ।
शिरोधराभिः कटुघोररावणो रुण्डायिताङ्गा न्यपतन्निशाचराः ॥ ३७ ॥

द्विधाकृताङ्गाः खलु रामसायकैः केऽप्येकबाह्वक्षिपदा निशाचराः ।
परिप्लवन्तो रुधिरौघवाहिनीस्रोतोजवैर्नीयमानाश्च दृष्टाः ॥ ३८ ॥

सा केशशैवाललताजटालरक्ताम्बुवेगाकलितप्रवाहा ।
विभिन्नमूर्द्धाम्बुजिनी कन्धग्राहाकुलान्दोलितबाहुमीना ॥ ३९ ॥

करालरक्षोधिपकायकूलं कषोर्मिवृन्दा सुविरूपदर्शा ।
रणाङ्गणो शोणितवारिपूरैस्तरङ्गिणी रामधनुर्धनोत्था ॥ ४० ॥

निरन्तरं प्रावहदस्रपोरःक्षितिघ्रनिर्भेदकरी समंतात् ।
यस्यां निमज्जन्त्यवगाहनार्थं प्रसह्य भूतेशगणाः पिशाचाः ॥ ४१ ॥

कोटिशो राक्षसगणा रामकार्मुकनिर्गतैः ।
सायकैर्घोरनिर्घातैः क्षयं नीतास्तदाञ्जसा ॥ ४२ ॥

अथाययौ वृतः कोट्या राक्षसैरुद्यतायुधैः ।
विचित्रयोधी प्रबलो दूषणोनाम राक्षसः ॥ ४३ ॥

खरश्चातिखरारावैर्युतः कोट्या निशाचरैः ।
आजगाम रणाकाङ्क्षी रामेण रणदुर्मदः ॥ ४४ ॥

तथैव त्रिशिरा नाम राक्षसोभीमयोधनः ।
आययौ समरे रामवीरं योधयितुं बली ॥ ४५ ॥

तेषामग्रेसरास्तावद्राक्षसाः सुमहोद्धताः ।
महान्तं विक्रमं चक्रुः खड्गशक्तिपरश्वधैः ॥ ४६ ॥

स्वायुधैर्वेगनिर्मुक्तैर्धारासम्पातदर्शनैः ।
राघवेन्द्रं गिरिमिवच्छादयामासुरस्रपाः ॥ ४७ ॥

तेषां शस्त्राणि चास्त्राणि पतमानानि कोटिशः ।
वभञ्ज राघवः सद्यो विशिखैः शीघ्रगामिभिः ॥ ४८ ॥

राक्षसायुधसंदोहवर्षाद् रामदिवाकरः ।
आत्मानं भासयामास बाणैर्दीधितिभिर्निजैः ॥ ४९ ॥

निरस्य राक्षसास्त्राणि वर्षाभ्राणीव राघवः ।
चण्डानिलैरिव शरैर्ददीपेपुनरर्कवत् ॥ ५० ॥

तथैवैकैकशः शत्रून् बाणैरेकैकयातिभिः ।
कत्स्नशो निर्विभेदैष प्रापणाय यमालये ॥ ५१ ॥

रामबाणविनिर्भिन्ना अपुनर्बोधशायिनः ।
पुरोगा राक्षसेन्द्राणां समं जग्मुर्यमालयम् ॥ ५२ ॥

महीयसि बले चैवं जाते स्वल्पीयसि द्रुतम् ।
आययुर्दूषणखरत्रिशिरःसंज्ञकाः खलाः ॥ ५३ ॥

रामस्तान् प्रतिजग्राह शरैः समनिपातिभिः ।
यथापूर्वं च निर्भिन्नविग्रहास्ते परापतन् ॥ ५४ ॥

त्रिभिरेव च रामस्य सायकैर्घोररावभिः ।
तेषां त्रयाणां रुधिरमायुश्च सहसा पपे ॥ ५५ ॥

हृदयानि विनिर्भिद्य परतो निर्गताः शराः ।
पश्चान्निपेतुः पूर्वं तु तेषां देहा महीतले ॥ ५६ ॥

इति रघुपतिसायकैर्निकृत्ते महति बले प्रबले निशाचराणाम् ।
चलमिव ददृशेरणाङ्गणं तत्प्रहरणपाणिभिरुद्धतैः कबन्धैः ॥ ५७ ॥

भ्रामं भ्रामं युद्धभूमौ कबन्धाः स्निह्यन्मेदोमांसरक्ताचितायाम् ।
वृत्तश्वासाः स्खलितास्ते कथंचिद्भूभारावाः कन्धराभिर्निपेतु ॥ ५८ ॥

सा योधयित्वा रघुवीरमुच्चकैः सुरद्विषां घोरतरा वरूथिनी ।
सुष्वाप भूयः प्रतिबोधवर्जिता गृध्रच्छदच्छायनिरालपावनौ ॥ ५९ ॥

उत्कृत्योत्कृत्य मांसोत्करमथ विकटारावभिः फेरुसंघै-
र्युक्ता मत्ताः शिवाल्यः समरभुवि मुहुर्बभ्रमुर्भीमरूपाः ॥
काकाःकंकाश्चगृध्राः पृथुतरपललग्रासकेलीर्दधाना ।
उड्डीयोड्डीय पक्षध्वनिभरभयदाः प्रेतवृन्दे निपेतुः ॥ ६० ॥

मांसमस्तिष्कपङ्केषु प्रमत्ताः फेरुभिः शिवाः ।
विकटारावकारिण्यः सीदन्तिस्म सतृप्तयः ॥ ६१ ॥

मेदोमांसवसास्वादसोष्माणः पलचारिणः ।
शोणितस्रोतसां मध्ये चिक्रीडुः शमितोष्मणाम् ॥ ६२ ॥

प्रसह्य भूतेशगणैः पिशाचैराकृष्यमाणा रुधिरौघमध्ये ।
बभुर्निबद्धान्त्रगुणाः कबन्धा नावो यथा सिन्धुषुकर्णधारैः ॥ ६३ ॥

आकर्षन्तो गृध्रनखाग्रलग्नान्यन्त्राणि युद्धाङ्गणगाःपिशाचाः ।
उड्डीयमाना दिवि वातजीवा गुणैर्दधाना इव रेजिरेतराम् ॥ ६४ ॥

इत्थं राघवबाणपूगसुविदीर्णानां महीशायिनां
तेषां तत्र पुनः प्रबोधनविहीनानां महारक्षसाम् ।
नैकोऽप्युर्वरितो निशाचरपतेर्वक्तुं ध्रुवं यो भवेद्
दुःसंदेशमिमं ननु स्वभगिनीं तामेव विग्नां विना ॥ ६५ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे खरदूषणत्रि-शिरोबधो नाम चतुश्चत्वारिंशाधिकशततमोऽध्यायः ॥ १४४ ॥

*

पञ्चचत्वारिंशाधिकशततमोऽध्यायः

ब्रह्मोवाच

सा लूनवक्त्रावयवा नितान्तं विलज्जमाना मरणाधिकार्तिः ।
कृच्छ्रं प्रदोषावसरे विवेशः शोचत्यदः शूर्पणखा पुरीं स्वाम् ॥ १ ॥

अहो हि धिङ्मामथ जीवमानामीदृग् विवत्तावपिधिङ्ममायुः ।
सहोदरो मे प्रथितः स तादृगहं पुनः प्राप्तपराभवेदृशी ॥ २ ॥

धिङ्मे स्मरार्त्तिविगतत्रपायास्तस्मिन्न किं जीवमहं जुहाव ।
न जीवनं सम्प्रति मे प्रशस्तं जीवामि हात्यन्तविगर्हणीया ॥ ३ ॥

हा हन्त सिद्धो भगवान् मुनीन्द्रस्तस्यान्वये जन्मवती किलाहम् ।
किमेतदङ्गक्षतिलाञ्छनार्थमजीविषं भग्नयशाः पृथिव्याम् ॥ ४ ॥

तौ मानुषौ कामसमानरूपौ सरोजगर्भाधिकसौकुमार्यौ ।
निरीक्ष्य जाताहमनङ्गतप्तानाज्ञासिषं दास्यत ईदृशीं दशाम् ॥ ५ ॥

कथं न्वहं दर्शयितास्मि वक्त्रं तस्य त्रयाणां जगतामधीशितुः ।
कुत्राप्यदृष्टात्मपराभवस्य भ्रातुर्जयाढ्यस्य दशाननस्य ॥ ६ ॥

किं मां वदिष्यन्ति च बन्धुमित्रसुहृज्जनास्ते दुरवस्थविग्रहाम् ।
हा रक्षसां कोटि सुनिर्हतासु कथं न दैवेन हता सुदुर्भगा ॥ ७ ॥

हता मदर्थं मम बन्धवस्ते चिरं नियुध्यत्रिशिरःखराद्याः ।
ममाद्यपूर्णो विधिवञ्चिताया सम्यक्किलायं मदनाभिलाषः ॥ ८ ॥

क्व यामि किं वाश्व करोमि मन्दा मिषेण केनाथ निगूहनीयम् ।
अङ्कस्थितं लाञ्छनमेतदुत्कटं विशेयमब्धिं दहनं महीं वा ॥ ९ ॥

भ्रातुर्ममातीव विशङ्कमानाः सुविभ्यतो भूर्दहनोऽम्बुधिर्वा ।
न मां गृहीतुं प्रभवन्ति केचित् क्व यामि वाहं गरलं पिबेयम् ॥ १० ॥

मन्दोदरी यत्र सुलोचना च भूयस्तथान्या मम बन्धुजायाः ।
कुम्भीनसी मे जननी पिता च स विश्रवा नाम च वन्धवोऽन्ये ॥ ११ ॥

तत्राहमेतां निजवक्त्रबिम्बवैरूप्यसम्पत्तिमलं वहन्ती ।
कथं नु वत्स्यामि विगहर्यजीविता कुर्वीय किं वा विधिनिर्हताहम् ॥ १२ ॥

इति स्वगतमेवैषा ब्रुवाणा शोकपीडिता ।
अगाच्छूर्पणखा कृच्छ्रं भवनं भ्रातुरात्मनः ॥ १३ ॥

सा रावणमधिक्षिप्य वीरं भ्रातरमात्मनः ।
इदमूचै वचः क्रुद्धा विरूपा राक्षसी खला ॥ १४ ॥

भ्रातः कस्ते प्रतापोऽद्य कृत्स्नं जितवतो जगत् ।
मानुषेणापि पीड्यन्ते प्रत्यक्षं यस्य बान्धवाः ॥ १५ ॥
यथेच्छं क्रीडमानाहं त्वत्प्रतापेन निर्भया ।
गोदातीरे वने रम्ये पञ्चवट्यां तवानुजा ॥ १६ ॥
नीता केनापि मर्त्येन सुदुर्दर्शां दशामिमाम् ।
अथो अन्यदपि भ्रातर्वृत्तं श्रोष्यसि मन्मुखात् ॥ १७ ॥
ये ते जनस्थानगता भ्रातरो बान्धवश्च ते ।
खरदूषणदुर्धर्षत्रिशिरस्तिग्मकादयः ॥ १८ ॥
तस्यैव दुष्टमर्त्यस्य बाणवह्नेः पतंगताम् ।
गता नियुध्य सुचिरं राक्षसाः सुमहोद्धताः ॥ १९ ॥
इदं खलु तवात्यन्तमनिष्टमजनि स्फुटम् ।
यस्य ते तादृशा वीरा अल्पेन निधनं गताः ॥ २० ॥
कालो विपर्ययं वक्ति प्रायशो जयिनस्तव ।
क्व स्वःपतेः परिभवस्तैरेव सुदुरासदैः ॥ २१ ॥
क्व चात्यन्तमनर्हेण मर्त्येन निधनं रणे ।
शमयेत्तृणमप्यग्निं क्वचित्कालविपर्ययात् ॥ २२ ॥
अमर्षणस्य ते भ्रातर्दुष्प्रवृत्तिरियं श्रुता ।
जनयिष्यति किं नातः क्रोधज्वलनमुत्कटम् ॥ २३ ॥
निग्रहो मर्त्यजातेन दिशां जैत्रस्य ते श्वसुः ।
तादृशानां निजाप्तानां वधश्च धनदानुज ॥ २४ ॥
दशानामपि ते मूर्ध्नामिदमाक्रमणं खलु ।
मन्ये मर्त्यशरीरेण कालस्यैव विपर्ययात् ॥ २५ ॥
कृताऽसौ येन दुष्टेन रक्षःपरिभवो महान् ।
तस्य भार्या च रूपेण तव योग्यैव विद्यते ॥ २६ ॥
तया हं हसिता चास्मि बहुगर्वायमानया ।
इति मद्धृदये भ्रातः संतापो वर्तते महान् ॥ २७ ॥
तामानय बलाद्दुष्टां वञ्चयित्वा तु तौ खलौ ।
अथवा मारयित्वापि भगिन्यास्तेऽपराधिनौ ॥ २८ ॥
विलोक्य तस्याः सौन्दर्यं हृदि दर्प्यैककारणम् ।
अमानवीयमिति ते विभ्रमोऽन्तर्भविष्यति ॥ २९ ॥
आनेष्यति भवान् हृत्वा तां दुष्टां रूपगर्विणीम् ।
तदैव मम तपोऽयं हृदि प्रशममेष्यति ॥ ३० ॥
इति स्वसुर्वाक्यमसौ निशम्य दशानतः क्रूरमनास्तदैव ।
जज्वाल रोषेण दहन्निवान्तर्निजाप्तवर्गक्षयजातशोकः ॥ ३१ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे शूर्पणखापरिवेदनं नाम पञ्चचत्वारिंशाधिकशततमोऽध्यायः ॥१४५॥

*

षट्चत्वारिंशाधिकशततमोऽध्यायः

ब्रह्मोवाच

विरूपां भगिनीं वीक्ष्य विलूनावयवां तथा।
रामेण मर्त्यरूपेण परितेपे दशाननः॥ १॥

रावण उवाच

हा ते भगिनि वैरूप्यं तेन दुष्टेन यत्कृतम्।
ध्रुवमात्मविनाशाय तन्मन्ये नात्र संशयः॥ २॥
अपूर्वोऽयं परिभवो रक्षसां मम चेतसि।
उपतापं जनयति प्रसह्यामर्षशालिनः॥ ३॥
अस्यामर्षोत्थरोषाग्नेः प्रतीकारो न विद्यते।
विना तस्यैव दुष्टस्य प्रसह्य विनिपातनम्॥ ४॥
हरणं चापि जायाया मरणेन समं ध्रुवम्।
इति निश्चित्य भगिनि करिष्यामि वलेन तत्॥ ५॥
मन्दाया जातगर्वाया हसन्त्यास्त्वां विरोधतः।
बलेन हरणं तस्या मुक्तमेव न संशयः॥ ६॥
कदनं मम बन्धूनां तादृशानां बलीयसाम्।
शोकवह्निमपूर्वं मे हृदये समदीपयत्॥ ७॥
हा सखे दूषण भ्रातः खर हा त्रिशिरः कथम्।
मर्त्येन तेन दुष्टेन यूयंनीताः स्थ संक्षयम्॥ ८॥
येषां वो बाहुवेगेन विनिःक्षिप्तैर्वरायुधैः।
सहसा त्रिदशानीकमभज्यत रणेष्वलम्॥ ९॥
ते पूयमद्य दुष्टस्य तस्यतापसवेशिनः।
विशिखैः संशयं याताः किं मे दुःखमतः परम्॥ १०॥
येषां बाहुबलं सम्यगाश्रित्य रजनीचराः।
त्रैलोक्ये निर्भयाः सन्तः क्रीडन्तिस्म यथातथम्॥ ११॥
यैर्लुप्ताः समरेषु श्रीजयदर्पभरा युधि।
सुराणां भूरिवीर्याणां स्वबाहुबलवेगतः॥ १२॥
येषां वीर्यात्सुखं शेते कुम्भकर्णः सुनिर्भयः।
अहं चापि सुसम्पन्नं मन्ये राज्यमिदं निजम्॥ १३॥
येषुवीर्यबलोद्रेकादगृहीतायुधपाणिषु ।
पिहितान्यबभन् नाके कपाटानि समंततः॥ १४॥

येष्वाज्ञावशतो बद्धकराञ्जलिपुटेषु मे।
न दुर्लभमभूत्किंचित्त्रैलोक्येऽपि चराचरे॥ १५॥

यै रोपिता ममारामे समुत्पाट्य स्व दोर्बलात्।
भयादिवधृताकम्पशाखाः सुरमहीरुहाः॥ १६॥

यैः केशेष्विव चाकृष्य पलायन्त्यः सुरश्रियः।
वन्दीकृत्य समानीताः प्रसभं मम सद्मनि॥ १७॥

यैर्दिग्विजययात्रासु ममाग्रेसरता गतैः।
कतिधा न कृता व्यर्था मम निर्धा वनश्रमाः॥ १८॥

येषां मयि परः स्नेहो मम येषु च सौहृदम्।
निरुपाधिमटोत्कर्षमुपयाति दिवानिशम्॥ १९॥

यैः पुलस्त्यमुनेर्वंशो गरीयान् गुणिभिः कृतः।
येषां च विजयश्लोकश्चुम्बतीन्द्रशिखामणिम्॥ २०॥

यैर्लङ्कानगरी नित्यं कृता विश्रमणं श्रियः।
येषां वीर्यबलोत्कर्षो ममोत्साहविवर्द्धनः॥ २१॥

येषां बलमुपाश्रित्य मया लङ्का विनिर्जिता।
विवासितश्च धनदो गन्धर्वकुलसंयुतः॥ २२॥

येषु संरब्धमात्रेषु देवगन्धर्वकिन्नराः।
विजयाशां जहुर्युद्धे मानवानां तु का कथा॥ २३॥

यैः स्वसम्बन्धसौहार्दकृत्यं मयि यथा कृतम्।
न तथा तु मया किञ्चित्कृतं कालं प्रतीक्षता॥ २४॥

रक्षसां राज्यमुत्कृष्टमहमाश्रित्य मत्तधीः।
यानवज्ञातवान् बन्धूनुच्चस्थानासनादिभिः॥ २५॥

तेषां सम्प्रत्यनादृत्य हतभाग्यं हतोन्नतिम्।
यमालयातिथीभूता हा रोदिमि कथं नु तान्॥ २६॥

न मयोपकृतं तेषु राज्यश्रीमत्तचेतसा।
मदर्थोपकृतप्राणान् हा रोदिमि कथं नु तान्॥ २७॥

तेष्वहं सम्परेतेषुजीवंस्तिष्ठामि सम्प्रति।
मन्दधीमन्दभाग्यश्च हा रोदिमि कथं नु तान्॥ २८॥

यैर्दत्तो मह्यमुत्कर्षो बलवद्भिर्दुरासदैः।
न मयोपकृतं तेषु हा रोदिमि कथं नु तान्॥ २९॥

येषां बाहुबलैर्देवाः समरे खण्डशः कृताः।
ते हता लघुमर्त्येन हा रोदिमि कथं नु तान्॥ ३०॥

यैर्निर्जितं यमपुरं यमश्च युधि खण्डितः ।
पुनस्तत्रैव ते प्राप्ता हा रोदिमि कथं नु तान् ॥ ३१ ॥

भक्ष्या हि नः सदा मर्त्या मर्त्येष्वपि स तापसः ।
तेषां प्राणहरो जातो हा रोदिमि कथं नु तान् ॥ ३२ ॥

पराभवस्य वार्तापि येषां स्वप्नेपि दुःश्रवा ।
श्रूयते मरणं तेषां हा रोदिमि कथं नु तान् ॥ ३३ ॥

काकथेषुप्रयोगस्य चर्वणं दंष्ट्रयैकया ।
न कृतं तस्य दुष्टस्य हा रोदिमि कथं नु तान् ॥ ३४ ॥

प्रसह्य वन्दीकर्तारः सुरलोकपतिश्रियाम् ।
ते युद्धवन्तो मर्त्येन हा रोदिमि कथं नु तान् ॥ ३५ ॥

यैः खण्डितः पुरा संख्ये दण्डपाणिः सहस्रधा ।
तान् नेतुमागतो नाभैद्धा रोदिमि कथं नु तान् ॥ ३६ ॥

येषां तदैन्द्रं कुलिशमङ्गकण्डूतिदुःखनुत् ।
ते मर्त्यस्य शरैः शीर्णा हा रोदिमि कथं नु तान् ॥ ३७ ॥

मुखे क्षिप्नैकहस्तेन यैः स दुष्टो न भक्षितः ।
युद्धप्रयासं चक्रुश्च हा रोदिमि कथं नु तान् ॥ ३८ ॥

रहिता यैर्मदसवो न प्रयान्ति तनोर्बहिः ।
जीवन्ति च लघीयांसो हा रोदिमि कथं नु तान् ॥ ३९ ॥

यैनाहूतोऽस्मि समरे युध्यमानैः क्षयोन्मुखैः ।
तस्यैककवलायाहं हा रोदिमि कथं नु तान् ॥ ४० ॥

आकार्यमेकतो वृत्तं मम जिष्णोः पुनर्जगत् ।
एकतोऽजनि शोकश्च हा रोदिमि कथं नु तान् ॥ ४१ ॥

नीता अपि यमागारं तेन मर्त्यलघीयसा ।
किं नागता यमं जित्वा हा रोदिमि कथं नु तान् ॥ ४२ ॥

यैर्वञ्चितोऽहं निःस्नेहैर्विस्मृत्य स्नेहसम्पदम् ।
गतास्ते मामनादृत्य हा रोदिमि कथं नु तान् ॥ ४३ ॥

इति प्रलपतोऽत्यर्थं मम शोकेन मूर्छतः ।
यैः संस्मृतिरपि त्यक्ता हा रोदिमि कथं नु तान् ॥ ४४ ॥

हा दूषण सखे भ्रातर्हा खर त्रिशिरः सुहृत् ।
विनापराधं मां हित्वा यूयं याताः क्व सम्प्रति ॥ ४५ ॥

क्व ता गिरः स्नेहदिग्धाः क्व सा प्रीतिः क्व ते गुणाः ।
सर्वं विस्मृतवन्तः स्थ यूयं मद्वञ्चने रताः ॥ ४६ ॥

क ता: क्रिया: प्रेमपुष: क सा गोष्ठी क्व तद्धितम् ।
सर्वं विस्मृत्य सुहृदो याता: स्थ मददर्शनम् ॥ ४७ ॥

युष्मासु प्रेततां यातेष्वधुना प्रसभं मया ।
कृतापि निष्कृतिर्व्यर्था तस्मिन्दुष्टे विरोधत: ॥ ४८ ॥

तथापि येन भवतां दर्शितं यमपत्तनम् ।
तस्य मर्त्यत्य मद्बाणा: कुर्वन्तु प्राणभोजनम् ॥ ४९ ॥

इति विप्रकृतिं नीत: शोकेन दशकन्धर: ।
रुरोद बन्धुवर्गस्य नाशाज्जातमनोज्वर: ॥ ५० ॥

तस्य संरुदत: प्रोच्चैर्दशवक्त्रोद्भवो रव: ।
सभामण्डपमापूर्य्य व्यानशेव्योममण्डलम् ॥ ५१ ॥

स बन्धुशोककष्टेन कृशीभूतकलेवर: ।
रुदन् संगतवांस्तेषां दारैरापन्नजीवितै: ॥ ५२ ॥

रामबाणविदीर्णानां रक्षसां योषितस्तदा ।
लङ्केशमुखसंदेशं श्रुत्वा वैधव्य सूचकम् ॥ ५३ ॥

मूर्छिता: पतिता भूमौ चिरेण च समुत्थिता: ।
कथंचिल्लब्धचैतन्या रुरुदुर्हृतवक्षस: ॥ ५४ ॥

तासां घ्नतीनां वक्षांसि शिरांसि च मुहुर्मुहु: ।
वज्रनिष्पेषनिर्घात: प्राकम्पयत मेदिनीम् ॥ ५५ ॥

स्मारं स्मारं च राक्षस्य: पतिबन्धुसुहृत्सुतान् ।
विलापं चक्रिरे दीर्घदु:खाल्लङ्केशितु: पुर: ॥ ५६ ॥

तेभ्यो मृतेभ्य: समरे कृत्वा प्रेतोदकक्रियाम् ।
रक्षोगणै: परिवृत: शुशोच दशकन्धर: ॥ ५७ ॥

त्रिशिर:खरदूषणादिरक्ष:प्रवराणां वनिता असोढशोका: ।
विविशु शुचिमेधसा समिद्धं परिरभ्यायुधवस्त्रभूषणादीन् ॥ ५८ ॥

तेषां मातृर्बन्धुवर्गांश्च शोकात्सद्य: प्राणांस्त्यजतो राक्षसेन्द्र: ।
वाक्यै: शोकायोहनार्द्रै: समाधात् कृच्छ्राद्भूय: स्वं निकेतं प्रपेदे ॥ ५९ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्ड रावणशोको नाम षट्चत्वारिंशाधिकशततमोऽध्याय: ॥ १४६ ॥

*

सप्तचत्वारिंशाधिकशततमोऽध्यायः

ब्रह्मोवाच

संक्षयाद् बन्धुवर्गाणां निग्रहाच्च निजस्वसुः ।
मर्त्येन निहितं मेने पदं दशसु मूर्धसु ॥ १ ॥

तत आहूय मारीचनामानं राक्षसं खलः ।
इदं रहसि संस्थाय मन्त्रयामास रावणः ॥ २ ॥

हे मारीच सखे भ्रातरश्रावि भवतापि यत् ।
कृतं मर्त्येन केनापि विप्रियं मम तादृशम् ॥ ३ ॥

यस्य मे बलिनो वीरा जयशीला भवादृशाः ।
सम्भावनीयः किं तस्य मर्त्येनापि पराभवः ॥ ४ ॥

स दुष्टस्तापसं वेशं बिभ्रद्भुवनवञ्चकः ।
भ्रातृदारयुतस्तस्मिन्नास्ते पञ्चवटीवने ॥ ५ ॥

तेन मे भगिनी नीता विग्रतां दुष्टबुद्धिना ।
विनिबद्धमतो वैरं मयि निःशङ्कचेतसा ॥ ६ ॥

तस्य वैरतरोरेष फलं प्राप्स्यति दुष्टधीः ।
ध्रुवमात्मविनाशेन मत्तः सपदि सम्प्रति ॥ ७ ॥

प्रथमं तु वधूं तस्य मम स्वस्रूपहासिनीम् ।
आहर्तास्मि बलात्तस्मात्स्थानात्साहाप्यतस्तव ॥ ८ ॥

त्वं तत्र मृगरूपेण विचरिष्यसि कानने ।
सीतायाः पुरतो भूत्वा वहन् स्वर्णमयीं तनुम् ॥ ९ ॥

मोहयित्वा मनस्तस्या दुरात्मानं चतापसम् ।
तं नेयष्यसि सुदूरं त्वं मृगयार्थं समुद्यतम् ॥ १० ॥

अहं तमेव समयं सम्प्राप्य रहसि स्थिताम् ।
आहर्तास्मि बलात् सीतामतदर्हां मनोरमाम् ॥ ११ ॥

जाने जनकभूपस्य सुता सा हृदयंगमा ।
अयोनिसम्भवा तेन मर्त्येनैव सुसंगता ॥ १२ ॥

तामानेतास्मि सपदि प्रसह्य स्वां पुरीमहम् ।
यां जहास ध्रुवं तस्याः करिष्यामि वशेस्थिताम् ॥ १३ ॥

हलप्रलम्बदंष्ट्राभिर्दत्तभीतिभिरञ्जसा ।
राक्षसीभिः समंतात्तां भीषयिष्यामि भूरिशः ॥ १४ ॥

सा मद्भुजान्तरं यावन्नायास्यति भयातुरा ।
तावत्तां भीषयिष्यन्ति राक्षस्यो राक्षसा अपि ॥ १५ ॥

आत्मकर्मविपाकं सा ध्रुवं यास्यति जानकी ।
रामश्च बहुलं शोकमधिकं मरणादपि ॥ १६ ॥
भवान् करोतु साहाय्यं मम तत्रैव कानने ।
रक्षःपरिभवोद्भूतं शोकं च हरः दुःसहम् ॥ १७ ॥
ध्रुवमात्मविनाशाय परकार्याणि साधवः ।
साधयन्ति यशोवल्लीं दृढं रोपयितुं भुवि ॥ १८ ॥
इति सम्मन्त्र्य दुष्टात्मा मारीचेन दशाननः ।
तथेति तद्वचः श्रुत्वा प्रस्थातुमुपचक्रमे ॥ १९ ॥
महान्तं रथमास्थाय स्वर्णरत्नपरिच्छदम् ।
घोषयन् हरितः सर्वा ययौ मारीचसंयुतः ॥ २० ॥
नभःपथमतिक्रम्य वीरमानी दशाननः ।
सीतावगाहपुण्योदं प्राप पञ्चवटीवनम् ॥ २१ ॥
स तत्र स्यन्दनवरादवतीर्य महाखलः ।
स्वयं बभूव मायावी भिक्षुब्राह्मणवेषभृत ॥ २२ ॥
मारीचश्चाभवत्तस्य गृहीत्वाऽऽज्ञामखण्डिताम् ।
सुवर्णहरिणोऽत्यन्तविचित्राङ्गरुहाञ्चितः ॥ २३ ॥
शृङ्गयुग्ममनोहारी चञ्चत्खुरचतुष्टयः ।
चञ्चल्लेक्षणसंशोभी सरूपश्रवणद्वयः ॥ २४ ॥
अपाङ्गदर्शनक्रीड़ाकारी कलितकौतुकः ।
नृत्यन्निवाङ्गैर्ललितैर्विशन्निव मुहुर्मनः ॥ २५ ॥
लोकोत्तरैः सौकुमार्यसौन्दर्यप्लुतिलाघवैः ।
वशीकुर्वन्निव मनः क्रीडावशितलोचनः ॥ २६ ॥
वने हरित्तृणान्पश्यन् विचचार समंततः ।
कूर्दमानः क्वचित्कापि नृत्यन् क्वापि स्थिरीभवन् ॥ २७ ॥
तौ मायाबलमाश्रित्य राक्षसौ कुटिलाशयौ ।
तस्थतुः सुप्रतीक्षन्तौ कानं रन्ध्रगवेषिणौ ॥ २८ ॥
तत्र श्रीरामचन्द्रो द्विजमुनिनिबहे भुक्तवत्यन्नमूलं
भूयः कृताशिष्यनुजजनकजायुक्त आदत्स्वयं च ॥
दत्त्वा शेषं च देवी हितशबरबधूभ्यो वने दुर्गतेभ्यो
दीनेभ्यः स्वाश्रितेभ्यो मुनिवरवनितादत्तपात्रं ममार्ज ॥ २९ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे मारीचरावणागमनो नाम सप्तचत्वारिंशाधिकशततमोऽध्यायः ॥ १४७ ॥

*

अष्टचत्वारिंशाधिकशततमोऽध्यायः

ब्रह्मोवाच

अथ मध्याह्नवेलायां मध्ये दिनगते रवौ ।
छायायां वनवृक्षाणां स्थितायां मूलसंश्रये ॥ १ ॥

घूर्णमाने मृगकुले सीतादत्तान्नभोजने ।
तृप्ते क्षणविनिर्मुक्तरोमन्थे तरुमूलगे ॥ २ ॥

ध्वनत्सु खगवृन्देषु वृक्षशाखानिषादिषु ।
गतासु भिल्लपत्नीषु भोज्यशेषान्नदानतः ॥ ३ ॥

गतेषु भिक्षुवर्गेषु स्वं स्वं विश्रान्तिशाखिनम् ।
मुनिष्वाश्रमसद्मानि प्राप्तवत्सु सरित्तटे ॥ ४ ॥

सर्वेषु भुक्ततृप्तेषु जनेषूच्चावचेष्वलम् ।
आश्वानकाकचाण्डालमाकीटपशुपक्षिकम् ॥ ५ ॥

सौमित्रिसीतारामेषु विधायबलिमुत्तमम् ।
माध्याह्निकेन हविषा चात्रसथ्यानले हुते ॥ ६ ॥

स्वयं च भुक्तवत्स्वेषु शुभाचारेषु संततम् ।
मृष्टवत्यां च जानक्यां स्थालीमात्रप्रियार्पिताम् ॥ ७ ॥

वनश्रीदर्शनासक्ते सौमित्रौ सविधस्थिते ।
रहो निकुञ्जमाश्रित्य तस्थतुस्तौ च दम्पती ॥ ८ ॥

तदानीमेव पुरतस्तयोः सम्प्रेक्षमाणयोः ।
आजगाम निशाचारी मायास्वर्णमृगः खलः ॥ ९ ॥

तं दृष्ट्वा जानकीदेवी मायास्वर्णमृगं खलम् ।
पत्यौ शृण्वति सोत्कण्ठमुवाचेदं विमोहिता ॥ १० ॥

अहो स्वर्णमृगस्यास्य रूपमत्यन्तमञ्जुलम् ।
अदृष्टपूर्वं कुत्रापि मनो मोहयतीव मे ॥ ११ ॥

अहो तनूरुहा अस्य विचित्राकृतिशालिनः ।
नान्यस्मिन् हरिणे दृष्टाः सुकुमारा मनोहराः ॥ १२ ॥

दृश्य तां सु समं शृङ्गद्वयमस्य मनोरमम् ।
जातरूपमयं चित्तचमत्कारि विराजते ॥ १३ ॥

अहो तरलता चास्य चक्षुषोर्भृशदीर्घयोः ।
हरते स्वर्गकान्तानामपि लोचनसौष्ठवम् ॥ १४ ॥

अद्भुते श्रवसीअस्य मनोज्ञे शृङ्गयोरधः ।
नादश्रवणसोत्तम्भे हृदयं हरतो मम ॥ १५ ॥

सातङ्क इव खल्वेष तृणान्यति सुचञ्चलः ।
शनैः क्रामन् वनभुवमद्भुतप्लुतिलाघवः ॥ १६ ॥

अहो अस्य मनोज्ञस्य चरणानां चतुष्टयम् ।
महीघ्रलङ्घनेऽप्यस्य स्यात्प्रायः प्लुतिलाघवम् ॥ १७ ॥

अन्यदेवास्य सौन्दर्यमन्यदेवास्य लाघवम् ।
अन्यदेव च चाञ्चल्यमन्यदेवाङ्गसौष्ठवम् ॥ १८ ॥

प्रायो नैवंविधो लोके मृगो भवितुमर्हति ।
मायेयं कापि मन्येऽहं पुरस्तान्मम भासते ॥ १९ ॥

विशतीव मम स्वान्तं क्षिप्रं छलयतीव माम् ।
अस्य रूपेण दिव्येन क्रीतेवास्मि न संशयः ॥ २० ॥

नैवंविधः क्वचिद्दृष्टो मृगजातिर्मया भवे ।
भवेदद्यदि वशीभूतो मम पूर्णा मनोरथाः ॥ २१ ॥

अनेन छलितप्राणा लप्स्येऽहं ननु कां गतिम् ।
वशीकरोति हि जनं क्वाप्यपूर्वार्थदर्शनम् ॥ २२ ॥

एतस्याङ्गरुहैश्चित्रां वोढुकामास्मि कञ्चुकीम् ।
अजिनं वास्यकुचयोच्छादनं भवतान्मम ॥ २३ ॥

निबध्य चामुं सूत्रेण लोकोत्तरगुणं मृगम् ।
ध्रुवं क्रीडितुकामास्मि वनेऽस्मिन् रसरञ्जिता ॥ २४ ॥

कुतो न खलु सम्प्राप्तः सारंगोऽयं गुणाकरः ।
नायं लोकोऽस्य वसतिः प्रायोऽयं स्वर्गसंस्थितः ॥ २५ ॥

देवक्रीडनको वायं प्राप्तो मे सुखहेतवे ।
ध्रुवमेतस्य लाभेन पूर्णः स्यान्मे मनोरथः ॥ २६ ॥

शून्ये वने वसन्त्या मे प्रायोऽयं चित्तरक्षये ।
वितीर्णो विधिना साक्षात् क्रीडाकौतुककृन्मृगः ॥ २७ ॥

न प्रयात्वन्यतश्चैष मामकं केलिसाधनम् ।
ध्रियतां क्षिप्रमासाद्य त्वया मत्कामपूर्तये ॥ २८ ॥

अथ लोलस्वभावत्वाद्धर्तुमेष न शक्यते ।
ध्रुवं विद्ध्वापि तह्येनं शरैरानय कामदम् ॥ २९ ॥

स्याच्छृङ्गारोपकरणं चर्मास्य गुणवत्तरम् ।
शृङ्गद्वयं तथैतस्य शोभिष्यति भवत्करे ॥ ३० ॥

मांसान्यस्य भवन्ति भूरिसुरसान्युच्चैः सुगन्धीनि च
श्वस्तृप्त्यै भवितार एव विधिना नायासदत्तानि नः ।
चर्मण्यस्य विचित्रकाञ्चनमयान्यङ्गेषु मे काञ्चन
स्वर्णाच्छादनमाधुरीं प्रतिपदं धास्यन्ति तेऽन्तर्मुदे ॥ ३१ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे सीतासम्मोहनो नामाष्टचत्वारिंशाधिकशततमोऽध्यायः ॥१४८॥

*

एकोनपञ्चाशदधिकशततमोऽध्यायः

ब्रह्मोवाच

श्रुत्वा विदेहजावाक्यं विहस्य रघुनन्दनः ।
इदमूचे जगच्चित्तसाक्षी साक्षान्महेश्वरः ॥ १ ॥

श्रीराम उवाच

प्रिये न वेत्सि मायेयं सुवर्णमृगरूपिणी ।
न जात्वीदृग्विधो दृष्टो वनेऽत्रान्यत्र वा मृगः ॥ २ ॥

प्रायशोऽनेकरूपेण विचरन्तीह राक्षसाः ।
निरूढवैशसा नित्यं मयि पूर्वविरोधिनि ॥ ३ ॥

प्रायः स्थानमिदं कृत्स्नं घोराणामेव रक्षसाम् ।
माययानेकरूपास्ते मां वञ्चयितुमुद्यताः ॥ ४ ॥

जानासि सा स्वसा साक्षाल्लङ्केशस्य दुरात्मनः ।
प्रसह्य विग्रतां नीतास्माभिस्तीक्ष्णकृपाणिना ॥ ५ ॥

नाशिता बन्धवस्तस्य ते दूषणखरादयः ।
कोटयो राक्षसानां च वनेऽस्मिन् युद्धयता मया ॥ ६ ॥

अतो वैरतरोर्मूलं सुदृढं तेन मेऽभवत् ।
भवेत्तस्यैव मायेयं कदाचित्सुदुरात्मनः ॥ ७ ॥

रूपाण्यनेकान्याश्रित्य घोरा मायाविनः खलाः ।
मोहयन्ति मनः पुंसां सुदुर्लक्ष्या निशाचराः ॥ ८ ॥

जह्यस्य स्वीकृतौ यत्नमपरिज्ञातचेतसः ।
अपूर्वकनकैणस्य भवेन्माया कदाप्यसौ ॥ ९ ॥

त्वमहं चैव सौमित्रिर्वनेऽत्रैकाकिनस्त्रयः ।
चतुर्थो नैव कर्तव्यो जातु विश्वासभाजनम् ॥ १० ॥

एते तु वाडवाः सौम्या रक्षोभिर्भीषिता वने ।
अस्मानाश्रित्य तिष्ठन्ति त्वद्वितीर्णान्नभोजिनः ॥ ११ ॥

न विश्वस्या न वोदास्या निरपेक्षा द्विजातयः ।
प्राणरक्षार्थिनः कृच्छ्रेणास्मदाश्रयवर्तिनः ॥ १२ ॥

किं करिष्यति चैणेन भवती हेमवर्ष्मणा ।
राजपुत्रि प्रतीक्षस्व कालमात्मसमुद्भवम् ॥ १३ ॥

त्यक्तास्ताः सम्पदः पूर्णाः पितृपैतामहक्रमात् ।
आगताः स्वकुले कृत्स्नधरित्रीराज्यसम्भृताः ॥ १४ ॥

कियान्मनोरथस्तर्हि भवेत्स्वर्णमृगेण ते ।
त्यज लोभामिमंतन्विनय कालं दुरासदम् ॥ १५ ॥

ताभिरेव नृपश्रीभिः काले युक्ता भविष्यसि ।
सम्प्राप्य व्यसनं मुग्धे माचालय मनो निजम् ॥ १६ ॥

सुवर्णरत्नकञ्चुक्यः कति नाङ्गे धृतास्त्वया ।
कति नो परिधातव्याः पुनः सम्प्राप्य तां श्रियम् ॥ १७ ॥

विभूषितास्यत्रिपत्न्या त्वमखण्डश्रिये प्रिये ।
वासयन्ती वनं स्वाङ्गसौरभ्यैर्विचरस्यहो ॥ १८ ॥

को नु स्यात्तव शृगादः सुवर्णमृगचर्मणा ।
प्रिये सहजयैवाङ्गश्रिया त्वं भूषिता ह्यसि ॥ १९ ॥

मुञ्चाभिलाषं तृष्णां च सुवर्णमृगसंग्रहे ।
इहापरिचिते स्थाने नप कालं यथातथम् ॥ २० ॥

कोऽसौ स्वर्णमृगच्छद्मा साधुर्वा दुष्ट एव वा ।
कोऽन्तः प्रविश्य जानाति कस्य चित्तं नु कीदृशम् ॥ २१ ॥

विपर्ययेण दैवस्य गच्छेत्साध्वप्यसाधुताम् ।
समीक्ष्यकारी जयति परस्तत्र विहन्यते ॥ २२ ॥

इतिहासं वदन्त्यत्र राज्ञ्याः स्वर्णखगस्य च ।
वञ्चयित्वा हृता राज्ञी यथा स्वर्णखगेन सा ॥ २३ ॥

आसीच्च सिंहलद्वीपे राजा नाम्ना शतञ्जयः ।
तस्यासीन्महिषी नाम्ना सुकेलिरतिसुन्दरी ॥ २४ ॥

स प्रजाः पालयामास तया देव्या समन्वितः ।
दिने दिने कृतप्रीतिस्तस्यामेव मृगीदृशि ॥ २५ ॥

स कदाचिद्वनं यातो मृगयार्थं महीपतिः ।
तया देव्या समं सद्यत्क्षणविश्लेषकातरः ॥ २६ ॥

अटवीमटमानस्तु चिक्रीडे मृगयावशः ।
रथस्थो जायया सार्द्धं वने घ्नन् मृगशूकरान् ॥ २७ ॥

तस्मिन् वने महाघोरो वसत्येको निशाचरः ।
कामचारी कामरूपो महिषीं तां ददर्श सः ॥ २८ ॥

रूपेणाप्रतिमां भूमावाकर्णायतलोचनाम् ।
तप्तचामीकराभासविग्रहां भूरिभूषणाम् ॥ २९ ॥

पद्माननां मृगदृशं चन्द्रकान्तेसमप्रभाम् ।
सुमत्तकोकिलालापां क्रीडापाङ्गनिरीक्षिणीम् ॥ ३० ॥

तनुवस्त्रावृतां तन्वीं सुव्यक्तावयवप्रभाम् ।
बिम्बाधरां पृथुश्रोणीं हेमकुम्भोन्नतस्तनीम् ॥ ३१ ॥

भवतीमिव चार्वङ्गीं दृष्ट्वा राक्षस ईदृशीम् ।
मुमोह विपिनेऽत्यर्थं मदनाविष्टमानसः ॥ ३२ ॥

हा मर्त्यजाति यत्रेदृक् सौन्दर्येण समन्विताः ।
भवन्ति नार्यो नयनैर्मोह्यन्त्यो नृणां मनः ॥ ३३ ॥

कथं न्वेतादृशी भार्या भवेन्मम मनोरमा ।
धिङ्मांरक्षोयोनिगतमनादृत्यं किलाखिलैः ॥ ३४ ॥

कदा न्वेतादृशीं बालां सुन्दरीमङ्कमध्यतः ।
आरोप्य रमयिष्यामि मदनोत्सवविह्वलः ॥ ३५ ॥

अपीयं नयनान्तेन मां पश्येद्रूपशालिनी ।
तदैव मे भवेज्जन्म सार्थकं जगति ध्रुवम् ॥ ३६ ॥

इति ब्रुवाण एवायं मुमूर्छ स्मरविह्वलः ।
पुनः सम्प्राप्य कृच्छ्रेण चेतनामेष राक्षसः ॥ ३७ ॥

गृहं गच्छत एवास्य पृष्ठलग्नो बभूव ह ।
विवेश भार्यामादाय रत्नसौधं महीपतिः ॥ ३८ ॥

गृहे निशाचरश्चास्य रन्ध्रान्वेषी बभूव सः ।
राज्ञे ज्योतिर्विदा केनाप्यावेदितमतः परम् ॥ ३९ ॥

राजन् भार्यां सावधानो गोपाय त्वं निरन्तरम् ।
अस्मिन् भार्यापहारस्ते मासि शास्त्रेण सूचितः ॥ ४० ॥

चौरेभ्यो राक्षसेभ्यो वा साशङ्कस्तिष्ठ संततम् ।
अलक्ष्यरूपाः कुर्वन्ति मायिनः कार्यमात्मनः ॥ ४१ ॥

इत्युक्तस्तेन नृपतिरन्तःपुरगतः पुनः ।
भार्यायै ज्ञापयामास दैवज्ञेन यदीरितम् ॥ ४२ ॥

मा विश्वस हृदा राज्ञि यं कंचिन्मानवं ध्रवम् ।
आवेदितं त्वद्विषयेऽनिष्टं ज्योतिर्विदा किल ॥ ४३ ॥

रक्षोभिस्तस्करैर्दुष्टैर्हरणं ते निवेदितम् ।
न सम्भाव्यतमं तत्तु तव रक्षाकृतस्थितेः ॥ ४४ ॥

सामान्यजनभार्यापि हर्तुं नो शक्यते परैः ।
किं पुनस्त्वं कुरङ्गाक्षि ममान्तःपुररक्षिता ॥ ४५ ॥

तथापि खलु दुर्दैवाच्छङ्कनीयं दिवानिशम् ।
इति तस्यै निवेद्यैष विश्वग्रक्षितवान् पुरम् ॥ ४६ ॥

अन्तःपुरं विशेषेण नृपतिः पर्यरक्षयत् ।
आत्मना च महीपालो रक्षां चक्रेऽवधानतः ॥ ४७ ॥

कदाचित् शान्तः पुरगा गृहारामे मनोरमे ।
विचरन्ती सखीवृन्दे खगमेकं ददर्श ह ॥ ४८ ॥

तमेव राक्षसं क्रूरं मायाकल्पितविग्रहम् ।
सुवर्णपक्षतिं रम्यं रत्नचञ्चुमनोहरम् ॥ ४९ ॥

विचित्रमणिमाणिक्यचरणं चारुचञ्चलम् ।
तं दृष्ट्वा चाद्भुततमं खगं कपटवेशिनम् ॥ ५० ॥

मुमोह मनसा बाला लोभात्तस्याभिलाषुका ।
तस्याः पुरः स विहगो मुहुः पर्युप्लवन् भुवि ॥ ५१ ॥

लोभयन् हृदयं चैव हस्तग्राह्य इवाभवत् ।
उत्प्लुत्योत्प्लुत्य धरणौ तिष्ठन् मायाखगः खलः ॥ ५२ ॥

अग्रेऽग्रे तां क्रमान्निन्ये यत्र सान्द्रलतावनम् ।
विवेश तत्र सा बाला स्वर्णपक्षिकृतस्पृहा ॥ ५३ ॥

विनिवार्य सखीवृन्दं खगोच्चाटनशङ्कया ।
आसीद्रहोगता चापि दुर्दैवेन प्रचोदिता ॥ ५४ ॥

दृष्ट्वा रहो गतां बालां तां चिरेण कृतस्पृहाम् ।
रूप प्रकाशयामास राक्षसो जनभीषणाः ॥ ५५ ॥

तामादाय बलात्तन्वीं रुदन्तीं भयविह्वलाम् ।
व्योममार्गेण सम्प्राप्तः स्वावासं गह्वरं वनम् ॥ ५६ ॥

अतस्तेऽहं जनकजे बोधयामि पुनः पुनः ।
न विश्वसैनं सौवर्णं मृगमज्ञातमानसम् ॥ ५७ ॥

असमीक्ष्यक्रिया हन्ति यशो विद्यां बलं धियम् ।
समीक्ष्यकारिणः सर्वे मोदन्ते सुखिनोजनाः ॥ ५८ ॥

एतन्मयोक्तं वचनं हितं ते राजेन्द्रपुत्रि प्रतिभान्वितायै ।
न लङ्घनीया च मम त्वदिष्टस्पृहाप्रपूर्तिर्भण यत् करोमि ॥ ५९ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे श्रीरामकृतप्रियाप्रबोधो नामैकोनपञ्चाशदधिकशततमोऽध्यायः ॥ १४९ ॥

*

पञ्चाशदधिकशततमोऽध्यायः

ब्रह्मोवाच

उपदिष्टापि सा पत्या जानकी हितकारिणा ।
भाव्यर्थवशनिर्बद्धा मुहुरूचे निरस्य तत् ॥ १ ॥

अलं ते शङ्कया नाथ किमेवं विप्रभाषसे ।
को मां वञ्चयितुं शक्तस्त्वयि जाग्रति धन्विनि ॥ २ ॥

आलस्याच्छङ्कया वापि त्वमेवं विप्रभाषसे ।
उभे अपि प्रिय भवत्यनर्हे धीरधन्वनि ॥ ३ ॥

ममाभिलाषपूर्तिस्ते न कदापि कृता न च ।
प्रदेह्यमुं स्वर्णमृगं मह्यमानीय कामद ॥ ४ ॥

अपि नैवंविधं वस्तु पुनर्लभ्यं कदाचन ।
त्वं नावगणयेः कान्त लोकोत्तरगुणं त्विमम् ॥ ५ ॥

मनोहरोऽयं हरिणो वने क्रीडनको मम ।
भविष्यति विशेषेण त्वं चेदानेष्यसि प्रिय ॥ ६ ॥

समानयैनं विध्वापि विचित्रगुणविग्रहम् ।
सौवर्णमेणमतुलं रमणीयतमाकृतिम् ॥ ७ ॥

न त्वादृशो महावीरः स्वभार्याकामपूरणे ।
क्वचिद्विलम्बते कान्त समर्थः सर्वकर्मसु ॥ ८ ॥

प्रत्येयमस्य हृदयं किमर्थं नु मया पशोः ।
करिष्यते च किमयं विप्रियं मम तेऽन्तिके ॥ ९ ॥

वराकः पशुजातीनां हरिणो नाम संततम् ।
हीनसारस्तुच्छतनुः का शङ्का नाम तादृशात् ॥ १० ।

आलस्यतः शङ्कया वा महान स्वार्थो विहन्यते ।
उभे अपि नरो हित्वा यतेत स्वार्थसिद्धये ॥ ११ ॥

उन्मूलितान्तः शङ्कानामनालस्यभृतां नृणाम् ।
उपसीदन्ति सकलाः सम्पदः स्वेष्टसम्भृताः ॥ १२ ॥

मृगोऽयं स्वर्गवास्तव्यः स्वर्णरत्नमयोऽखिलः ।
स्वर्गङ्गातीरसस्याशी केलिकृन्नन्दने वने ॥ १३ ॥

क्रीडनं स्वर्गयोषाणां सर्वाश्चर्यनिकेतनम् ।
अलभ्यो मानुषे लोके दैवाद्धि समुपागतः ॥ १४ ॥

कस्त्यजेदेनमालस्यशङ्कोपहतचेतनः ।
अतो नैनमुपेक्षस्व मदभीष्टैकसाधनम् ॥ १५ ॥

इति प्रियावचः श्रुत्वा लज्जासं रम्भमध्यगः ।
राम आकारयामास लक्ष्मणं शुभलक्षणम् ॥ १६ ॥

पुरोगतं च सौमित्रिं भक्तिप्रह्वं कृताञ्जलिम् ।
उवाच रभसाद् रामो भावितशेषगोचरः ॥ १७ ॥

पुरस्तात्पश्यसि भ्रातरेनं स्वर्णतनुं मृगम् ।
चित्ते कामयते चैनं जानकी कौतुकान्विता ॥ १८ ॥

यावद्यानयाम्येनं जातिप्रकृतिचञ्चलम् ।
जीवन्तं वापि हत्वा वा विचित्रगुणविग्रहम् ॥ १९ ॥

तावत्त्वं प्रयतो भूत्वा मत्प्रियायाः समीपगः ।
नूनं स्थास्यसि सौमित्रे घोरेस्मिन् निर्जने वने ॥ २० ॥

स्त्रीस्वभावसुसिद्धोऽस्याहठोऽयंबलवत्तरः ।
सुवर्णहरिणस्यास्य संग्रहे खलु वर्तते ॥ २१ ॥

प्रियाभिलाषपूर्तिश्च न जातु न कृता मया ।
अत आत्तधनुर्बाणः प्रयाम्येनमहं मृगम् ॥ २२ ॥

त्वय्यत्र वर्तमाने तु निश्चिन्तहृदयोऽस्म्यहम् ।
मा पुनस्त्यज सौमित्रे देशमेनं कदाचन ॥ २३ ॥

अत्याहितोऽपि कार्ये त्वं प्रगुणं मद्वचः स्मरन् ।
नेतः प्रयास्यसि क्वापि सौमित्रे मदसुप्रियः ॥ २४ ॥

सावधानो धनुर्धारी संहितैकेषुरूर्जितः ।
तिष्ठत्वमिह सौमित्रे यावदायान्यहं जवात् ॥ २५ ॥

प्रायोरक्षोभिरस्माकं जातो वैरतरुर्महान् ।
यस्यमूलं शूर्पणखानासाकर्णनिकृन्तनम् ॥ २६ ॥

सा स्वसा दशवक्त्रस्य भुवनेशाभिमानिनः ।
तदर्थे रक्षसां कोट्यः प्राणांस्त्यक्त्वा दिवं गताः ॥ २७ ॥

रावणेन श्रुतं प्राय इदंवृत्तं भविष्यति ।
अतो दुरात्मना तेन कार्यैवापकृतिर्मम ॥ २८ ॥

स्थानमेतच्च संचारो रक्षसामेव संततम् ।
भार्या च सततं रक्ष्या मन्दाक्षव्यय शङ्कितैः ॥ २९ ॥

महच्च नः कुलं भ्रातर्मान्धातृसगरादिभिः ।
अकीर्तिर्मलिनं जातु न भवे क्रियतां तथा ॥ ३० ॥

स्त्री नामपुरुषस्यास्य लज्जाजगति शंतमा ।
तस्याः संगोपने यानः कर्त्तव्योऽवहितात्मभिः ॥ ३१ ॥

न जातु निर्जनेस्थाने स्थापनीया वराङ्गना ।
गुप्ताश्च प्रकटाश्चापि नास्याः कत्यपहारकाः ॥ ३२ ॥

गृहस्थस्य तु वै प्राणाः स्त्रियायत्ता भवन्ति हि ।
अस्यामपगतायां किं प्राणैर्वा जीवितेन वा ॥ ३३ ॥

रक्षणीया च पुरुषैः सर्वदेशेषु सर्वदा ।
प्राणैर्वापि धनैर्वापि भार्या स्वात्मवदुत्तमा ॥ ३४ ॥

गृहस्थस्य यथैवात्मा तथा भार्या गरीयसी ।
रक्षणीया सुनियतमापद्यपि विशेषतः ॥ ३५ ॥

नापद्यपि स्त्रियं जातु समुपेक्षेत मानवः ।
सा ह्यस्य प्राणसदृशी सर्वापच्छेदकारणम् ॥ ३६ ॥

आपदः किल नीयन्ते स्त्रीसहायैर्मनस्विभिः ।
उच्छिद्यन्तेऽखिला यासु सुहृद्बन्धुसुतादयः ॥ ३७ ॥

पुनर्धनं पुनर्भृत्याः पुनः सखिसुहृज्जनाः ।
न पुनः प्राप्यते लज्जा स्त्रीरूपेण व्यवस्थिता ॥ ३८ ॥

धर्मस्य साधनं चापि कुलस्त्री गृहमेधिनाम् ।
उच्छिद्यन्तेऽखिला धर्माः स्त्रीषु नष्टासु लक्ष्मण ॥ ३९ ॥

लौकिकं वैदिकं वापि यत्कर्म क्रियते जनैः ।
स्त्रिया सहैव तन्नित्यमित्याज्ञा पारमेश्वरी ॥ ४० ॥

आश्रमेभ्यश्च सर्वेभ्यो गृहमेधी विशिष्यते ।
गृहं च गृहिणीरूपं तस्माद्रक्षेत तां सदा ॥ ४१ ॥

स्त्रिय एवं नृणां प्राणाः स्त्रिय एव धनानि च ।
स्त्रीषु नष्टासु सौमित्रे किं तैः किल सुरक्षितैः ॥ ४२ ॥

समक्षे तु स्वयं रक्षेत्पतिरेवावधानतः ।
असमक्षे स्वसदृशैर्विश्वस्तैस्त्वादृशैर्हितैः ॥ ४३ ॥

मातरं पितरं वापि भ्रातरं तनयं तथा।
स्त्रीरक्षायां नियुञ्जीत पुरुषं वा कुलोद्वहम् ॥ ४४ ॥

दुष्टेभ्यः कितवेभ्यश्च पिशुनेभ्यश्च निर्जनात्।
स्त्रियो रक्ष्याः सदा पुम्भिर्न प्रमाद्येत कर्हिचित् ॥ ४५ ॥

बालां तज्जनको रक्षेद्युवतीं तत्पतिः पुनः।
वृद्धां तत्संतती रक्षेन्न स्त्री स्वातन्त्र्यभाजनम् ॥ ४६ ॥

यत्र स्वतन्त्रता स्त्रीणां नष्टप्रायं हि तत्कुलम्।
न सतीति च वृद्धेति स्त्रीणां कार्यमुपेक्षणम् ॥ ४७ ॥

सतीमप्यसतीं कुर्युः केचिद्धूर्ताः प्रसंगतः।
कामिनां संगमात्रेण स्त्रियो दुष्यन्ति सर्वथा ॥ ४८ ॥

अथो यदि न दुष्येयुः स्वसत्त्वेन व्यवस्थिताः।
बहुभाषी तु लोकोऽयं कलङ्कयति सर्वथा ॥ ४९ ॥

वर्षीयसीति नोपेक्ष्या स्त्री क्वचित्कुशलार्थिभिः।
बहुभाषी यतो लोकः किं न वक्ति विडम्बयन् ॥ ५० ॥

कस्यचिद्वणिजो भार्या कामरूपे किलास ह।
वर्षीयसी प्रजाहीना धनधान्यसमृद्धिनी ॥ ५१ ॥

धनगृध्नुः पतिस्तस्या देशाद्देशान्तरं व्रजन्।
वृद्धोऽपि नोपरमते व्यापाराद्धनसंग्रहात् ॥ ५२ ॥

प्रजाहीनस्य वृद्धस्य योगक्षमेवतः सखे।
विडम्बनाय समभूद् व्यापारो धनसंग्रहः ॥ ५३ ॥

असन्तस्तस्य भ्रातृव्याः कथंचिद्दूषणोद्यताः।
असतीं कल्पनां चक्रुः सा लोके पदमादधात् ॥ ५४ ॥

अहो इयं वणिग्भार्या सिद्धमन्त्रप्रभावतः।
दिवा वर्षीयसी साधु लक्ष्यते प्रेक्षिभिर्जनैः ॥ ५५ ॥

रात्रौ तु जाततारुण्या रमते परपूरुषैः।
वञ्चयित्वा पतिं चैषा वृद्धं प्रावासयद्गृहात् ॥ ५६ ॥

इति लोकापवादेन तद्भ्रातृव्यकृते न हि।
सतीत्वं नाशितं तस्याः स्त्रिय आजन्मसंचितम् ॥ ५७ ॥

अतः कथमपि स्त्रीणां स्वातन्त्र्यं वा रहःस्थितिः।
न कार्या श्रेय इच्छद्भिः कलंकभयशङ्कितैः ॥ ५८ ॥

स्त्रीनाम भाजनं प्रोक्तं यशसोऽयशसस्तथा।
रक्षिता तु यशोधत्ते परं धत्ते ह्युपेक्षिता ॥ ५९ ॥

दुष्प्रमार्ज्यः कलङ्कश्च कुले स्त्रीव्यभिचारजः।
अद्यापि गर्ह्यन्त्येव लोके दारान् बृहस्पतेः ॥ ६० ॥

वयमापद्गता भ्रातर्विप्रयुक्ताश्च बन्धुभिः ।
स्त्रीयुक्ताः सततं चैव परदेशनिवासिनः ॥ ६१ ॥

कदा किलापदं तीर्त्वा पूर्वेषां पुण्ययोगतः ।
क्षेमवन्तो गमिष्यामः स्वगृहान्निर्जितारयः ॥ ६२ ॥

इति शङ्के दिवारात्रं कालाद्वै विघ्नभूयसः ।
विचरन्ति सदा दुष्टा रन्ध्रान्वेषणतत्पराः ॥ ६३ ॥

सिद्धमन्त्रो न विश्वस्यो न विश्वस्यः सुतोऽर्भकः ।
न विश्वस्यो निधिः प्राप्तो न विश्वस्या वराङ्गना ॥ ६४ ॥

अपक्वः किलसार्थोऽयं स्त्रीणां परपदस्थितौ ।
दैवेनैव हि निर्वाह्यो भाग्यवान् विरलो जनः ॥ ६५ ॥

अर्थं साधयतः पुंसो भूयांसो विघ्नसम्भवाः ।
अनुकूलेन दैवेन तेभ्य उत्तार्यते जनः ॥ ६६ ॥

अहो वयं राजपुत्राः क्व तावत्सुखसंश्रयाः ।
क्व चेयं दुःस्थितिर्भ्रातर्दैवं किं न करोति हि ॥ ६७ ॥

इत्युक्त आर्येण कृतावधानो नयं सुमित्रातनयो निशम्य ।
कृताञ्जलिर्भक्तिविनीतवेशः प्रत्यूचिवांस्तच्चरणाहिताक्षः ॥ ६८ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे सीतारक्षण-सम्प्रयोगोनाम पञ्चाशदधिकशततमोऽध्यायः ॥१५०॥

●

एकपञ्चाशदधिकशततमोऽध्यायः

लक्ष्मण उवाच

यदाह मतिमानार्यस्तत्तथैव निभाल्यते ।
अनुकूलेन दैवेन कार्यं कुशलमेव नः ॥ १ ॥

न विपद्भ्यो भयं चार्य मन्येऽहं त्वत्प्रसंगतः ।
त्वदाज्ञाभङ्गजा भीतिर्महती किलमद्धृदि ॥ २ ॥

सोऽहमाजन्मभक्तस्ते प्रपन्नस्त्वत्पदाब्जयोः ।
यथानुशास्ति मामार्यः करिष्यामितथान्वहम् ॥ ३ ॥

तव देव्याश्च येनेष्टं तन्मे कार्यमतन्द्रितम् ।
यदिष्टं तद्विधातव्यमहमाज्ञापरः सदा ॥ ४ ॥

मयि तिष्ठति निस्तन्द्रे त्वदाज्ञापरमे प्रभो ।
न शङ्कनीयं किमपि विधेश्च किमुतान्यतः ॥ ५ ॥

तव प्रतापतश्चार्यं सज्जीकृतधनुर्धरः ।
रुद्रादपि च नाशङ्के भुवने किमुतान्यतः ॥ ६ ॥

साधयेष्टं प्रियाया यदहं तिष्ठामि रक्षणे ।
सनाथस्त्वत्प्रतापेन निर्भयश्चैव सर्वदा ॥ ७ ॥

मामाज्ञापय वा स्वामिन् प्रियाप्रार्थितसिद्धये ।
नाहमाज्ञामिहार्यस्य कदाप्यत्येमि सर्वथा ॥ ८ ॥

दृष्ट्वा स्वर्णमृगं काम्यमपूर्वां व्यक्तिमीदृशीम् ।
साभिलाषा यदा देवी द्रुतं देहि रघूद्वह ॥ ९ ॥

त्वत्प्रतापभरन्यस्तसमस्तार्थौघसाधनः ।
अहं तिष्ठामि सततं त्वदाज्ञापालनव्रते ॥ १० ॥

का ते विपज्जगन्नाथ का च रक्षाप्रयासिता ।
यदाज्ञायां स्थितो नित्यं मादृशः सेवको जनः ॥ ११ ॥

दैवं तु शङ्कनीयं स्यात्सत्यं खलु भवद्वचः ।
तदपि त्वय्यनुकूलेऽनुकूलं स्थातुमर्हति ॥ १२ ॥

न दैवमतिवर्त्तेत भवन्तं रघुपुङ्गव ।
सत्यसन्धं दयासिन्धुं दीनानाथं जनप्रियम् ॥ १३ ॥

एक एव त्वदाज्ञातोजगज्जेतुमहं क्षमः ।
का शङ्का विघ्नकोटिभ्यस्त्वयिजाग्रति मूर्च्छनि ॥ १४ ॥

अभिलाषः स्वप्रियाया न विच्छेद्यः कदाचन ।
स्वयं वाज्ञापरेणैव मया वा साधय प्रभो ॥ १५ ॥

इति भक्तस्य सौमित्रेर्निशम्य रुचिरं वचः ।
ऊचे संनिधिगां सीतां गच्छन् रघुकुलोद्वहः ॥ १६ ॥

यामि स्वर्णमृगं देवि त्वदभीष्टार्थसिद्धये ।
त्वं स्थास्यसीह नियतं सौमित्रेः सन्निधौ सति ॥ १७ ॥

भक्तो मम प्रियश्चासौ प्रह्वो हृदयरोचनः ।
न कर्तव्यः क्षणमपि दूरगः स्वसमीपतः ॥ १८ ॥

यावदायामि सौवर्णं मृगमाहृत्य जानकि ।
तावदाश्रमदेशोऽयं निर्जनो न विधीयताम् ॥ १९ ॥

मा प्रेषयकदाचित्त्वं लक्ष्मणं मद्गवेषणे ।
स्वयमेवाहमायास्ये हत्वा स्वर्णमृगं बलात् ॥ २० ॥

नापि चिन्ता मद्विषये त्वया कार्या विदेहजे ।
इत्युक्त्वा भगवान् रामो वरः कारणमानुषः ॥ २१ ॥

मृगस्य वर्त्मानुसरन् मायाकल्पितवर्ष्मणः ।
आकर्णाकृष्टकोदण्डसंहितेषुः प्रतापवान् ॥ २२ ॥

आयान्तं राममालोक्य सोऽविशद्गह्वरं वनम् ।
तरुगुल्मलताकीर्णं झिल्लीझंकारभीषणम् ॥ २३ ॥

तदनुप्रययौ रामो धावमानो धनुर्धरः ।
महान्तं खलु पन्थानमतिक्रम्य वनेऽविशत् ॥ २४ ॥

पुरः स्वर्णमृगोऽधावन्माया कल्पितविग्रहः ।
तमन्वधावत्काकुत्स्थः प्रस्वेदपटलावृतः ॥ २५ ॥

क्षणात्पुरः क्षणात्पश्चात्क्षणाद्वामे च दक्षिणे ।
परिभ्रमन् मृगोऽरण्ये भ्रामयामास राघवम् ॥ २६ ॥

कूटमायामुपाश्रित्य संगतो राक्षसः खलः ।
नितान्तं खेदयामास वने कण्टकसंकुले ॥ २७ ॥

इतस्ततस्त्वरायुक्तो रामो मृगमनुद्रुतः ।
अश्रामत् स्वेदसंयुक्तः शिथिलाशेषविग्रहः ॥ २८ ॥

ततश्चुकोप हृदये राघवः परपक्षभित् ।
पदानि कानिचिद् भूयो धावित्वोच्चैर्जवेन सः ॥ २९ ॥

क्व यास्यसीति प्रसभमाक्षिप्य वचसाखलम् ।
आराद्विज्ञाय सम्प्राप्तं मायास्वर्णकुरङ्गकम् ॥ ३० ॥

आकर्णाकृष्टकोदण्डनिमुर्क्तेन महेषुणा ।
बिभेद हृदये तस्य संक्रुद्धो रघुनन्दनः ॥ ३१ ॥

भित्त्वा मृगतनुं बाणो भिन्नवान् राक्षसीं तनुम् ।
यावन्मृगतनुं हित्वा प्रयाति स दुराशयः ॥ ३२ ॥

धावमानो वने भीतो रामवाणाग्नितेजसा ।
तावदेव समुद्विद्धो मारीचो नामराक्षसः ॥ ३३ ॥

मायामयी मृगतनुः सद्योऽगच्छदलक्ष्यताम् ।
राक्षसी सा तनुस्तस्य पुरस्तात्समदृश्यत ॥ ३४ ॥

भिन्नो राघववाणवज्रपतनान्मारीचनामा खलो-
मुञ्चन्नूनमसूनसूयितमना हा लक्ष्मणेत्युद्धरम् ।
त्रिःशब्दं कृतवान् निशम्य नितरां यं पर्णशालागता
सीता पञ्चवटीवने दुरुदितैः सीतातुदद्देवरम् ॥ ३५ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे मायामृगमारीच-वधो नामैकपञ्चाशदधिकशततमोऽध्यायः ॥१५१॥

*

द्विपञ्चाशदधिकशततमोऽध्यायः

ब्रह्मोवाच

हा लक्ष्मणेति त्रिःशब्दं निशम्य जनकात्मजा ।
अतीवोद्भ्रान्तहृदया वभाषे देवरं सती ॥ १ ॥

श्रीसीतोवाच

श्रुतस्त्वयाऽऽर्तशब्दोऽयं सौमित्रे भीतिकृन्मम ।
अनेनार्तरवेणाहं शङ्के प्रोद्विग्नमानसा ॥ २ ॥

शमस्ति नैव भ्रातुस्ते ज्येष्ठस्यात्र घने वने ।
नानादुःसत्त्वसदने रक्षोगणसमावृते ॥ ३ ॥

कोऽन्यस्त्वामिह कान्तारे विषमे निर्जने वने ।
सम्भालयेदेवमार्तो नूनं तर्कय देवर ॥ ४ ॥

आर्यस्ते मृगयां यातस्तमेवानुद्रुतो मृगम् ।
मोहनं काञ्चनमयं मम वाक्यानुबन्धतः ॥ ५ ॥

केनापि दुष्टसत्त्वेन धर्षितः काननेऽत्र सः ।
नालम्बते मनो धैर्यं श्रृण्वन्त्या मम तं रवम् ॥ ६ ॥

अहो हि मन्दभाग्याहं कथमेकाकिनं प्रियम् ।
वने सम्प्रेषितवती सुवर्णमृगलोभतः ॥ ७ ॥

न तत्र कुशलं प्रायो यत्रास्ते वल्लभो मम ।
तर्कयामि मुहुश्चित्ते ध्वनिश्रवणशङ्किता ॥ ८ ॥

शीघ्रं त्वं गच्छ सौमित्रे तत्रैव वचनान्मम ।
आर्यस्तव गतो यत्र दुःसत्त्वबहुले वने ॥ ९ ॥

यस्त्वामापद्गत इदमातं वचनमूचिवान् ।
तमनुत्वरितं याहि बन्धुकृत्यमनुस्मर ॥ १० ॥

अभ्युद्धरेद्य आपद्भ्यो ध्रुवं बान्धवमात्मनः ।
स हितः स्वजनो बन्धुर्नेतरो यस्तटस्थवत् ॥ ११ ॥

श्रुत्वा जनकजावाक्यं लक्ष्मणो धीरमानसः ।
उवाच भ्रातुरार्यस्य वीर्यमाहात्म्यवेदकः ॥ १२ ॥

मैवं शङ्क स्व मनसा कर्हिचिज्जनकात्मजे ।
क आर्यं धर्षयेल्लोके सदेवासुरमानुषे ॥ १३ ॥

रक्षोभिरसुरैर्मर्त्यैर्गन्धर्वैर्मानुषैः सुरैः ।
नार्य आक्रमितुं शक्यस्तेजसाप्रतिमो महान् ॥ १४ ॥

धनुर्मात्रद्वितीयोऽसौ ससुरासुरमानुषम् ।
जगज्जेतुं सुपर्याप्त आत्मनाप्रतिमद्युतिः ॥ १५ ॥

अपरिच्छेद्यवीर्योऽयमार्यस्त्रिभुवने जनैः ।
नैवान्यजनसाम्येन शङ्कनीयो महाभुजः ॥ १६ ॥

शमयेत्पावकं दीप्तं समुद्रमपि शोषयेत् ।
सुमेरुमपि वाणैर्द्राग् भित्त्वा दिशि दिशि क्षिपेत् ॥ १७ ॥

महीमपि शरैर्भिन्द्यात्पञ्चाशत्कोटियोजनाम् ।
क्रुद्धः कालमपिक्रुद्ध द्रावयेद्द्राक् स्वतेजसा ॥ १८ ॥

अज्ञातात्मबलोदर्को जनैः सामान्यदर्शिभिः ।
विचरत्यवनीमार्यो यशोभिर्भूषयन् दिशः ॥ १९ ॥

मा पुनस्तत्र शङ्किष्ठा एवं देवि पराभवम् ।
अमेयबलवीर्यस्य कः पराभविता भवे ॥ २० ॥

गणयेदपि यस्तारा दिव उच्चावचास्तथा ।
विमायादपि दैवेन पार्थिवानि रजां स्यपि ॥ २१ ॥

न सोऽपि रामवीर्याणि जनः संख्यातुमर्हति ।
अहो वाग्देवताप्यस्य गुणानां पारमेति न ॥ २२ ॥

इति विज्ञाय देवि त्वं मा शङ्किष्ठा रघूद्वहे ।
नियतेरपि चैवायं नियतिः स्वयमीश्वरः ॥ २३ ॥

इत्युक्तवति सौमित्रौ सीता सामर्ष मानसा ।
शब्दादधीरहृदया पुनरूचे भयान्वितम् ॥ २४ ॥

सत्यं जानाति हि भवान् वीर्यं स्वभ्रातुरीदृशम् ।
अहं त्वधीरहृदया शङ्कयाम्यशुभं महत् ॥ २५ ॥

हा लक्ष्मणेति त्रिःशब्दं श्रुत्वार्तस्य भृशं वने ।
सीदन्ति मम चाङ्गानि शुष्यतीव मुखं मम ॥ २६ ॥

मनो मे दह्यते शोकाद् व्यथा मे परिवर्द्धते ।
सम्भावयामि न शुभं तवार्यस्याद्य लक्ष्मण ॥ २७ ॥

शब्दश्रवणमात्रेण विलुप्ता मे मनोधृतिः ।
अद्यापि नागतश्चैव रघूणां वल्लभो वनात् ॥ २८ ॥

तन्निमित्तं न जानामि कुतो वा स विलम्बितः ।
तर्कयन्ती चिरेणाहं मग्ना शोकमहोदधौ ॥ २९ ॥

दूरं गतो वा प्राणेशो लब्धः स्वर्णमृगोन वा ।
वने कृतं वा किमपि दुष्टसत्त्वेन केनचित् ॥ ३० ॥

मृगानवाप्तिलज्जातोऽथवा क्वापि विलम्बितः ।
इति चिन्ताकुलैवाहमश्रौषं तादृशं ध्वनिम् ॥ ३१ ॥

ततोऽपि किल जीवामि पत्युरातिं विजानती ।
किं नु कुर्यामहं मूढा शोचामि हठमात्मनः ॥ ३२ ॥

येन सम्प्रेषितोऽरण्यमेकाकी प्राणबल्लभः ।
किं नु भावि न जानामि शुभं नोपलभेऽद्य वै ॥ ३३ ॥

वामो मेऽद्य विधिर्मन्ये क्व तं दयितमाप्नुयाम् ।
गच्छ लक्ष्मण तत्रैव मा चिरं शीघ्रमानय ॥ ३४ ॥

भुजमूलं तु सव्यं मे स्फुरतीवाद्य भूरिशः ।
तथैव सव्यं चक्षुर्मे किं नु वक्ष्यत्यमङ्गलम् ॥ ३५ ॥

अथापि धैर्यमालम्ब्य स्थितोऽसि वत देवर ।
न वै प्रयासि त्वरितं भ्रातृचिन्तासमाकुलः ॥ ३६ ॥

विपन्नोऽयं स्मरत्यार्यः स उदासीनवद्भवान् ।
स्थितोऽसि तत्र नोपैषि किं नु दुःखमतः परम् ॥ ३७ ॥

हा लक्ष्मणेति त्रिः प्रोच्य स इदानीं न भाषते ।
इति मे स्फुटतीवान्तर्मनः किं नु भविष्यति ॥ ३८ ॥

इत्याकर्ण्य स्त्रीस्वभावोदितं तत्तस्या वाक्यं नैम्यभूमीन्द्रपुत्र्याः ।
आर्यस्याज्ञां संस्मरन् धीरचेता ऊचे वाचं श्रीसुमित्रातनूजः ॥ ३९ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे मैथिलीहृदयाशङ्कितं नाम द्विपञ्चाशदधिकशततमोऽध्यायः ॥१५२॥

*

त्रिपञ्चाशदधिकशततमोऽध्यायः

लक्ष्मण उवाच

भूय उच्चैर्वदन्त्येवमुद्वेजयसि मामपि ।
वीरेन्द्रपत्निनैतत्तेऽभ्युचितं वेद्मि भाषितम् ॥ १ ॥

धैर्यमालम्ब्य तिष्ठस्व स्मर वीर्यं महात्मनः ।
एकाकिना हता येन कोटयो रात्रिचारिणाम् ॥ २ ॥

खरश्च दूषणश्चैव त्रिशिराश्च महाबलः ।
येऽन्ये रावणदायादमुख्याः कोटिनिशाचराः ॥ ३ ॥

तेऽस्याप्रमेयवीर्यस्य बाणवह्नेः पतंगताम् ।
प्रययुस्तवपश्यन्त्याः स आर्यः केनजीयताम् ॥ ४ ॥

पुनः पुनर्मयोक्तापि प्रतीतिं नावलम्बसे ।
मोहिता शब्दमात्रेण किमधीरमना अभूः ॥ ५ ॥

कथं न्वितोऽहं गच्छामि भ्रातुर्वीर्यस्य तत्त्ववित् ।
एकाकिनीं विहाय त्वां घोरेऽस्मिन् निर्जने वने ॥ ६ ॥

आर्यस्यास्य पराधीनः कथं गच्छामि जानकि ।
एतत्ते नोचितं वक्तुमतः परम पार्थकम् ॥ ७ ॥

आज्ञाभङ्गापराधेनभीतोऽहं जनकात्मजे ।
न प्रयास्यामि हित्वा त्वां विषमे निर्जने वने ॥ ८ ॥

किं नु वक्ष्यति मां चार्यो नियुक्तं तव रक्षणे ।
आज्ञाभङ्गं विधापेत्थं यदि गच्छाम्यहं सति ॥ ९ ॥

नाहं स्वतन्त्रोभवितुमर्हामि जनकात्मजे ।
आजन्मनः पराधीनो रामस्यैवास्मि संततम् ॥ १० ॥

अतो नैवं ब्रवीर्भूयस्तव दासोऽस्मि यद्यपि ।
तथापि रामचन्द्रेण स्थापितः सन्निधौ तव ॥ ११ ॥

वनमेतद्दृतं घोरतमैः सत्त्वैरनेकशः ।
क्रव्यादैर्व्याघ्रसिंहाद्यै राक्षसैरतिनिष्ठुरैः ॥ १२ ॥

तत्र त्वैकाकिनीं हित्वा कृत्वा च बहुसाहसम् ।
आर्यस्याज्ञामतीवर्त्य कथं गच्छामि जानकि ॥ १३ ॥

प्रमाण्यं किं नु शब्दस्य यद्दृशादेवमातुरा ।
मुहुर्वदसि मां देवी धैर्यं धत्स्व मयोदिता ॥ १४ ॥

पशूनां पक्षिणां चापि सन्तिशब्दा अनेकशः ।
न जाने केन किं चोक्तं श्रुतं हा लक्ष्मणेति ते ॥ १५ ॥

अत्रेतिहासं वक्ष्यामि शब्दभ्रमभवं यथा ।
अस्तिद्रविडदेशे तु मौकुलिर्नाम वाडवः ॥ १६ ॥

तस्य पत्नी दृढमतिः शुल्कानाम्नी पतिव्रता ।
तस्याः पत्यौमहान् स्नेहः सानुबन्धोऽभवत्तदा ॥ १७ ॥

एकान्ते साब्रवीद्वाक्यं प्रतिज्ञापूर्वमादृता ।
नाहमन्यस्त्रिया तुल्या जीवामि त्वयि जीवति ॥ १८ ॥

तवान्यथागतौ भर्त्तः प्राणान् मुञ्चेयमञ्जसा ।
एकदा मौकुलिर्यातः समिधाहरणे वनम् ॥ १९ ॥

अथ कश्चिद्धतः काकश्चाण्डालेन पुराद्बहिः ।
तं ग्रामे जगदुर्लोका मौकुलि[1]र्हृत इत्यदः ॥ २० ॥

---

१. "काणूकमौकुली काके" टि० बड़ो० ।

तस्यपत्नीतुशुश्राव शुल्का नाम पतिव्रता ।
श्रुतमात्रे तु वचसि सा प्राणान् सहसात्यजत् ॥ २१ ॥
वनादुपागतस्तस्याः पतिर्दृष्ट्वा तथाविधाम् ।
स्वां भार्यामनुरक्तां तां सोऽपि शोकेन मूर्छितः ॥ २२ ॥
त्यक्तवानचिरादेव प्राणान् स ब्राह्मणोत्तमः ।
अतो ब्रवीम्यहं तुभ्यं शब्दस्य खलु का प्रमा ॥ २३ ॥
जायते च महानर्थः शब्दभ्रमनिबन्धनः ।
अतस्त्वमपि शब्देन न मां प्रेषय काननम् ॥ २४ ॥
एकाकिनीह विजनेस्थास्यसि त्वं कथंतमाम् ।
अतएव नियुक्तोऽहमार्येण तव रक्षणे ॥ २५ ॥
बहूपदेशपूर्वं मामिह स्थापितवान् समम् ।
आर्यः परमधर्मज्ञः सुविश्वस्तो मयि ध्रुवम् ॥ २६ ॥
विश्वासघातं तस्याहं कथं कुर्वीय सम्प्रति ।
तेन मे सुमहत्पापं भवेदत्र न संशयः ॥ २७ ॥
को जानाति कथं वार्यः सुचिरेण विलम्बितः ।
अज्ञाततत्त्वः किं त्वाहं त्यजेयं निर्जने वने ॥ २८ ॥
इति सपदि निशम्य देवरस्य प्रणयवतो वचनं नरेन्द्रपुत्री ।
किमपि भृशमधीरमानसेयं प्रतिवचनं पुनराहरुष्टचेताः ॥ २९ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे लक्ष्मणवचनं नाम त्रिपञ्चाशदधिकशततमोऽध्यायः ॥१५३॥

★

चतुःपञ्चाशदधिकशततमोऽध्यायः

सीतोवाच

यस्य चित्ते महान् स्नेहस्तस्य तापोऽपि वै भवेत् ।
विपन्ने बान्धवजने कस्ते तापोऽस्ति शोकजः ॥ १ ॥
उदासीनवदात्थ त्वं सौमित्रे निष्ठुराशयः ।
मृते वा जीवति भ्रातर्यस्ति ते न विशेषधीः ॥ २ ॥
अहं सुजीवति प्राणपतौ जीवामि निश्चितम् ।
अन्यथागतिमापन्ने प्राणान् मुञ्चेयमञ्जसा ॥ ३ ॥

भवांस्तु खलु दायाद इदमेवाभिलाषुकः ।
राज्यं धनं स्त्रियं चापि हर्तुकामः प्रतीयते ॥ ४ ॥

यत्तथाऽऽर्तस्वरं श्रुत्वा ज्येष्ठस्यभ्रातुरञ्जसा ।
उत्थाय धृतचापस्त्वं धावितोऽसि न लक्ष्मण ॥ ५ ॥

तेन शङ्केऽस्म्यहं त्वत्तोनिर्जनेऽस्मिन् घने वने ।
विपन्ने भ्रातरि ज्येष्ठे किं नु कर्तासि मां बलात् ॥ ६ ॥

इतीवगृध्नुहृदयं धिक्त्वामधमदेवरम् ।
योऽन्यथागतिमन्विदन्नार्यस्यस्थितवानिह ॥ ७ ॥

साहं शून्येऽत्र विपिने पत्यौ यातेऽन्यथागतिम् ।
प्रवेक्ष्ये वह्निमेवापि भवेयं पाणिगा न ते ॥ ८ ॥

तव पापीयसी बुद्धिर्व्यर्थैवेयं प्रतीयते ।
यस्या लोभेन नो यासि साहमग्नौ प्रवेशिनी ॥ ९ ॥

क एवं भ्रातुरार्यस्य श्रुत्वाप्यार्तस्वरं वने ।
तिष्ठेन्निःशङ्कहृदयस्त्वादृशः कठिनाशयः ॥ १० ॥

मन्दभाग्याहमधुना शोचामि कृतमात्मना ।
वञ्चिता स्वर्णकायेन हरिणेन न संशयः ॥ ११ ॥

कतिधाहं नोपदिष्टा पत्या तेन महात्मना ।
क्व शून्येऽत्र वने हीदृक् सुवर्णमृगसम्भवः ॥ १२ ॥

सर्वं दैवकृतं मन्ये निर्बन्धेन विनष्टधीः ।
प्राणेश्वरं प्रेषितवत्येकाकिनमहं तु या ॥ १३ ॥

ब्रह्मोवाच

एभिर्दुरुक्तैःसीताया भाव्यर्थकृतसूचनैः ।
उद्विग्नहृदयोऽतीव लक्ष्मणःशुभलक्षणः ॥ १४ ॥

अरोदीत् करुणं भूयो भक्तिप्रह्वः कृताञ्जलिः ।
उवाचेदं दृशा तस्या ईक्षमाणः पदाम्बुजम् ॥ १५ ॥

लक्ष्मण उवाच

हा देवि मातर्जनकेन्द्रपुत्रि ब्रवीषि मां त्वं कथमेवमद्धा ।
निजे तनूजे न खलु प्रसूर्वा लोकेन्यथाशङ्कितमातनोति ॥ १६ ॥

रामः पिता मे रघुवंशकेतुस्त्वं चापि माता मम राजपुत्रि ।
इतोऽन्यथा चेद्धृदयं मम स्यात् स्वप्नेऽपि मातस्तदहं शपामि ॥ १७ ॥

विपर्ययो वा कालस्य किं न भाषयते जनम् ।
आज्ञाभङ्गोऽस्तु वा भ्रातुरहं गच्छामि सम्प्रति ॥ १८ ॥

दुरुक्तैस्तव हा मातश्छिन्नमर्मास्मि भूरिशः ।
आज्ञाभङ्गमपिभ्रातुः सोढाहं यामि तद्दिशि ॥ १९ ॥

यथा मम भ्रातुराज्ञा तस्यार्यस्य सुवर्मणः ।
तवापि मे तथैवाज्ञा यामि रामान्तिकं ततः ॥ २० ॥

विपर्ययेण कालस्य यत्त्वमुक्तवती हि माम् ।
तद्दोषं क्षालयिष्यामि त्वदाज्ञाकृतिवारिणा ॥ २१ ॥

आर्योऽपि मामितो यातं निर्दोषं ज्ञास्यति स्फुटम् ।
नहि स्वत इतोयामि त्वदाज्ञाधीन एव हि ॥ २२ ॥

ममैव चापराधोऽयं यदार्यं न निषिद्धवान् ।
धनुरुद्यम्य सारङ्गमन्वहं नागमं कुतः ॥ २३ ॥

मयि जीवति भृत्ये हि किमार्यो धावनश्रमम् ।
आसादयेन्मृगमनु जातो वृद्धिध्यपो हि मे ॥ २४ ॥

अतः परं मामनुजानीहि मातर्गन्तुं किलार्यस्य समीपदेशे ।
त्वदाज्ञयाहं रघुपुङ्गवाज्ञामुल्लङ्घ्य गच्छामि न मेऽस्तु दोषः ॥ २५ ॥

किंत्वात्मधनुषः कोट्या कुण्डलीकृतमेतकम् ।
देशं मा देवि लङ्घिष्ठाः कृतोऽयं ते मया पणः ॥ २६ ॥

रक्षोभिरसुरैर्यक्षैर्दुष्टसत्त्वैर्दुरात्मभिः ।
भूतप्रेतपिशाचाद्यैर्देशोऽयं दुर्गमो भवेत् ॥ २७ ॥

एनं देशं त्वमानिष्ठ निःशङ्कं जनकात्मजे ।
वर्तमाने मयि यथा तथारक्षाभविष्यति ॥ २८ ॥

इत्युक्त्वा खलु सौमित्रिः प्रतापनिधिरच्युतः ।
तां भुवं कुण्डलीचक्रे स्वधनुष्कोटिरेखया ॥ २९ ॥

अथ पञ्चवटीवनस्पतीन् समभिष्ट्रुत्य मुहुर्न्ययोजयत् ।
जनकेन्द्रसुताभिरक्षणे निभृतं तद्वनदेवतामपि ॥ ३० ॥

हे वनस्पतयो देवाः फलदाः पुष्पमण्डिताः ।
यूयं सर्वतरुश्रेष्ठाः शृणुतेदं वचो मम ॥ ३१ ॥

प्रजावती मे जनकेन्द्रपुत्री वीरेन्द्रजाया जननी त्रिलोक्याः ।
युष्मासु भाग्यैरधितिष्ठतीयं संरक्षणीया नितरां भवद्भिः ॥ ३२ ॥

हे अश्वत्थ वनाधीश नारायणसमाश्रयः ।
हे न्यग्रोध तरुश्रेष्ठ जटामण्डितशङ्कर ॥ ३३ ॥

हे धात्रि मालति लते तुलसि श्रीशरूपिणि ।
हे आम्र जम्बूः पनस चाम्पेय रुचिराकृते ॥ ३४ ॥

एते भवन्तः शृण्वन्तु सर्वेदेवस्वरूपिणेः ।
रक्ष्येयं विजनेदेशे युष्माभिर्जनकात्मजा ।। ३५ ।।

युष्यासु संनिधायैनामहं गच्छामि सम्प्रति ।
आर्यस्य संनिधौ तत्र प्रजावत्याः किलाज्ञया ।। ३६ ।।

हे देवि सर्वसत्त्वौघरक्षित्रि वनदेवते ।
इमां रक्षतमां शश्वन्मम भ्रातृवधूं सतीम् ।। ३७ ।।

आर्यो रघुकुलाधीशो युष्माकं क्षेमकारकः ।
मंस्यते ह्युपकारं वः सर्वदैवतसंश्रयः ।। ३८ ।।

अथावसथ्यनिहितमग्निं तुष्टाव लक्ष्मणः ।
रक्षायै भ्रातृजायायाः सर्वदैवतरूपिणम् ।। ३९ ।।

त्वमग्ने सर्वदेवानां मुखं वै हव्यकव्यभुक् ।
त्वयि देवाश्च लोकाश्च वेदाश्चैव प्रतिष्ठिताः ।। ४० ।।

भ्रातुरार्यस्य मे जायां तिष्ठन्तीं विजने वने ।
भवान् रक्षिष्यतितरां रक्षोभ्यो दुष्टसार्थतः ।। ४१ ।।

हुतोऽस्यार्येण सततं मन्त्रतन्त्रत्रयीविदा ।
अतस्तस्य वधूमेनां मोपेक्षस्व हुताशन ।। ४२ ।।

इत्युक्त्वा वनदेवतां वनपतीञ्छ्रेष्ठः सुमित्रासुतो ।
दुर्वाक्यैर्विशिखैर्निजार्यललनाप्रोक्तैः सुतीक्ष्णैर्हतः ।।

देशं कुण्डलितं तमात्मधनुषः कोट्याभिधाय द्रुतं ।
स्कन्धन्यस्तधनुः कटीनिहिततूवीरोऽन्वगाद्भ्रातरम् ।। ४३ ।।

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे लक्ष्मणप्रयाणो-नाम चतुःपञ्चाशदधिकशततमोऽध्यायः ।।१५४।।

*

पञ्चपञ्चाशदधिकशततमोऽध्यायः

ब्रह्मोवाच

गते तु लक्ष्मणो दूरे भ्रातुरन्वेषणोद्यते ।
आययौ जानकीं हर्तुं मायावी दशकन्धरः ।। १ ।।

तमागतमभिप्रेत्य पलायाञ्चक्रिरे द्रुतम् ।
वानस्पत्याश्च ये देवाः सर्वाश्च वनदेवता ।। २ ।।

अग्निस्तु परिजज्वाल भगवानावसथ्यगः ।
जानक्याः स्थानदानार्थं सर्वदैवत्य आत्मनि ।। ३ ।।

अथ सोऽप्यतिमायावी धनुष्कोट्यन्तरा भुवि ।
प्रवेष्टुमक्षमतमं विज्ञायात्मानमस्वपः ॥ ४ ॥

स वै सुदुर्गमो देशो राक्षसैः खलवृत्तिभिः ।
रामस्याज्ञां भृशं दत्ता लक्ष्मणेन विनिर्मितः ॥ ५ ॥

इत्यसौ मायया भिक्षुर्बभूव कलभाषितः ।
अतिसौम्यतनुर्दृश्यो मनसा तीक्ष्णवृत्तिमान् ॥ ६ ॥

प्राविशत्सहसा पर्णशालाया द्वारिराक्षसः ।
शृण्वन्त्यां खलु जानक्यामुच्चैर्भाषितवान् वचः ॥ ७ ॥

हे देवि भवती भिक्षां ददातु सततव्रता ।
मह्यं दीनाय विप्राय द्वारप्राप्ताय सक्षुधे ॥ ८ ॥

सा श्रुत्वा वचनं भिक्षोर्दीनं करुणमानसा ।
आदाय फलशाकान्नमाजगाम बहिर्गृहात् ॥ ९ ॥

चञ्चलेव तनुद्योतैर्भासयन्त्याखिला दिशः ।
मुखेन्दुचन्द्रिकावृन्दं विकिरन्ती पुरः पुरः ॥ १० ॥

अथात्मना विनिर्गत्य लीलाकारणमानुषी ।
आवसथ्याग्निमविशत् सर्वज्ञा सर्वकारणा ॥ ११ ॥

भिक्षादानोन्मुखीमेतां मायाभिक्षुरवोचत ।
नाहं प्रचलितुं शक्तः क्षुधा व्याकुलमानसः ॥ १२ ॥

इहैवागत्य मे देहि हे देवि नियतव्रते ।
अभिगम्योत्तमं दानं यत आहुर्मनीषिणः ॥ १३ ॥

अथ सा किल सौमित्रिकुण्डलीकृतदेशतः ।
बहिर्जगाम सर्वज्ञा भिक्षादानार्थमुद्यत ॥ १४ ॥

तामागतां बहिः स्थानाद् रामाज्ञाकुण्डलीकृतात् ।
वीक्ष्य रक्षोऽधिपो मायी चकमे हर्तुमञ्जसा ॥ १५ ॥

अथाविरभवत्तस्य मायिनो रूपमुत्कटम् ।
विंशत्या बाहुभिर्भीमं करालं दशभिर्मुखैः ॥ १६ ॥

अकृष्टरुष्टभ्रुकुटीतरङ्गणभीषणम् ।
सुभीषणं नभःस्पृग्भिः शिरोमुकुलकोटिभिः ॥ १७ ॥

स्थूलघोणावलीघोरं ज्वलद्विंशतिलोचनम् ।
स्थूलोदरदरीभीमं स्थूलाङ्घ्रिक्षेपदुःसहम् ॥ १८ ॥

दृष्ट्वा रूपं सुदुष्प्रेक्ष्यं तस्य घोरतरं तदा ।
चकम्पे जानकीदेवी राक्षसोऽयमितिस्फुटम् ॥ १९ ॥

तामार्तनादां कुररीमिवोच्चैः स्थूलाश्रुमोक्षां रुदतीं नितान्तम् ।
प्रकम्पमानां जविनानिलेन रम्भामि वादाय करेण सद्यः ॥ २० ॥

अंसे निधाय प्रसभं स्मरस्य शरैः पराभूतमनाः स दुष्टः ।
उच्चैः समुत्प्लुत्य नभःपथेन जगाम लङ्काभिमुखं दशास्यः ॥ २१ ॥

सा तद्रक्षोंऽसपीठस्था दीपयन्ती दिशो दश ।
मुखचन्द्रचमत्कारिचन्द्रिकाभिर्घनावलीम् ॥
लिम्पन्तीव नभोमार्गे भान्ती विद्युदिव त्विषा ॥ २२ ॥

सूक्ष्मारुणां शुकवृतैरङ्गैर्वेपथुशालिभिः ।
तप्तचामीकरप्रख्यैः शोभयन्ती नभःपथम् ॥ २३ ॥

कुर्वतीव प्रतिपथं नभश्चाम्पेयकाननम् ।
उच्चैर्विकचमन्दारपुष्पसौरभसम्पदा ॥ २४ ॥

वासयन्ती दिशः कृत्स्ना मिलद्भ्रमरसंहतिः ।
मञ्जीरयुगनादेन कटिकाञ्चीरवेण च ॥ २५ ॥

कूजयन्ती नभो देशं लतेवालिगणान्विता ।
परस्ताद्विलुलद्वेणीपराभूतभुजङ्गमा ॥ २६ ॥

चलानां गतिवेगेन वलयानामपि ध्वनिम् ।
बिभ्रती मरुदालोललालितालकवल्लिका ॥ २७ ॥

आवेगात्पीनवक्षोजविपर्यस्तपटाञ्चला ।
स्वाङ्गस्पर्शसमुद्भूतैस्तस्यांसतटकण्टकैः ॥ २८ ॥

उद्विजन्ती प्रतिपदं शिरीषाधिकमार्दवा ।
शोचन्ती स्वात्मनः कृत्यं रुदन्ती करुणस्वरा ॥ २९ ॥

हा नाथ हा रघुपते हा वीरवर हा पते ।
क्वासि क्वासीति जल्पन्ती निमग्ना शोकसागरे ॥ ३० ॥

पुरस्तान्नीयमाना च तेन पापीयसा भृशम् ।
पृष्ठतः परिपश्यन्ती मृगीव चकितेक्षणा ॥ ३१ ॥

हा पाप हा दुष्टमते हा रक्षोधम हा खल ।
मुञ्च मुञ्चेति जल्पन्ती मुक्तास्थूलाश्रुमोक्षिणी ॥ ३२ ॥

मज्जन्तीवान्धतमसि व्याकुलीभूतमानसा ।
मुहुर्मुहुश्च मूर्छन्ती विलपन्ती मुहुर्मुहुः ॥ ३३ ॥

मिलन्ती घनराजीभिः पश्यन्ती व्योमदेवता ।
न भो निकषयन्ती च तनुकाञ्चनरेखया ॥ ३४ ॥

शपन्ती तं खलं पापं वमन्ती दुर्वचोविषम् ।
सूचयन्ती मृतिं तस्य वीरेन्द्रात्पत्युरात्मनः ॥ ३५ ॥

दुस्तरे शोकपाथोधौ मज्जन्ती मनसा भृशम् ।
खिद्यमानैव नितरां निन्ये घोरेण रक्षसा ॥ ३६ ॥

स घोरचेताः करुणाविहीनो दुरुक्तमस्या अवमन्यमानः ।
निजप्रतापोन्नतिजातगर्वो निनाय तां व्योमपथेन मायी ॥ ३७ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे सीतापहारो नाम पञ्चपञ्चाशदधिकशततमोऽध्यायः ॥ १५५ ॥

*

षट्पञ्चाशदधिकशततमोऽध्यायः

ब्रह्मोवाच

तस्या रुदितमाकर्ण्य दीनमार्तस्वरान्वितम् ।
जटायुर्नाम पक्षीन्द्र आययौ बलवीर्यवान् ॥ १ ॥

पक्षतिद्वयशब्देन दिशो मुखरयन् भृशम् ।
गतिवेगोद्भवैर्वातैः कम्पयन् वनभूरुहान् ॥ २ ॥

सुहृद्दशरथस्यासौ तस्य पुत्रवधूमिमाम् ।
हरन्तं राक्षसं दुष्टं रुरोध पथिवेगतः ॥ ३ ॥

हे राक्षसाधमखल पापीयस्तीक्ष्णमानस ।
हृत्वा मम सुहृत्पुत्रवधूं क्व खलु गच्छसि ॥ ४ ॥

मुञ्च मुञ्चावलामेनां परस्य ललनां सतीम् ।
इत्युक्त्वा तीक्षणया चञ्च्वा भृशं विव्याध राक्षसम् ॥ ५ ॥

हतश्चञ्चुप्रहारेण वज्रेणेव स राक्षसः ।
भृशमुद्विविजे तं च प्रजहार स्वपाणिना ॥ ६ ॥

पुरः पश्चाच्च तं पक्षी वामदक्षिणपार्श्वयोः ।
प्रजहार जवाविष्टश्चञ्च्वा वज्रकठोरया ॥ ७ ॥

स जानकीं वहन्नंसे रावणस्तेन पक्षिणः ।
भृशं व्याकुलितश्चञ्चुचरणाग्रप्रहारिणा ॥ ८ ॥

तस्याङ्गेभ्योऽक्षरद्भूरि रुधिरं तस्य पक्षिणः ।
वलीयसः स्फुरच्चञ्चुचरणाग्रप्रहारजम् ॥ ९ ॥

ततश्चुक्रोध बलवान् राक्षसेन्द्रो दुराशयः ।
मुष्टिभिः प्रजहारैनं वर्षीयां सं विहंगमम् ॥ १० ॥

स भृशं ताड्यमानोऽपि मुष्टिभिर्बलिना खगः ।
यावदात्मबलं तेन युयुधे रक्षसा पथि ॥ ११ ॥

कदाचित्तस्य नेत्रेषु कदाचित्कर्णसंधिषु ।
कदाचित्कक्षयोश्चापि तुतुदे चञ्चुपातनैः ॥ १२ ॥

पक्षाभ्यां वज्रतीक्ष्णाभ्यां विव्यथे वामदक्षयोः ।
तस्योरसि पुनः पद्भ्यां प्रजहार विहंगमः ॥ १३ ॥

यत्र यत्रैव तुदति पक्षी नखरशस्त्रकैः ।
ततस्ततोऽक्षरत्तस्य रुधिरं क्षतसम्भवम् ॥ १४ ॥

रक्षोमुष्टिचपेटाभिरपध्वस्त्वकलेवरः ।
मुमूर्छ बलवान् पक्षी युयुधे च समुत्थितः ॥ १५ ॥

तं पातयित्वा दशकन्धरोऽग्रे यावत्प्रयातः कतिचित्पदानि ।
तावत्समुत्थाय स आत्तचेतनो युद्धं चकारातिबलेन रक्षसा ॥ १६ ॥

मुष्टिभिश्च चपेटाभिः स तेन बलशालिना ।
विलूनपक्षतिश्चक्रे हतसर्वबलः खगः ॥ १७ ॥

अथासौ न्यपतद्भूमौ क्षीणाशेषबलः खगः ।
कण्ठागतातुरप्राणो युद्धं कृत्वा बलीयसा ॥ १८ ॥

चक्रे दाशरथीं मैत्रीं स गृध्रः कृतनिष्कृतिम् ।
तत्पुत्रजायावैरेणा युद्ध्वा घोरेण रक्षसा ॥ १९ ॥

यावदायास्यति रामः सूर्यवंशविभूषणः ।
तावद्रक्षति प्राणान् स्वान् जटायुर्युधि निर्हतः ॥ २० ॥

इत्थं स तं बलिनं पातयित्वा परिक्षरद्रुधिरौघेन लिप्तः ।
चचाल रक्षोधिपतिः पुरस्तादंसे वहन् राघवधर्मपत्नीम् ॥ २१ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे जटायुयुद्धो नाम षट्पञ्चाशदधिकशततमोऽध्यायः ॥१५६॥

*

सप्तपञ्चाशदधिकशततमोऽध्यायः

ब्रह्मोवाच

अथार्येण समं तत्र सुमित्रातनयो वने ।
संजगामोपावृत्तेन हत्वा मायामृगं खलम् ॥ १ ॥

वीक्ष्य लक्ष्मणमायान्तं रामो दूराद्विशङ्कितः ।
समीपस्थं च तं भूयः पप्रच्छागमकारणम् ।
यथावृत्तं च सौमित्रिः सर्वं तस्मै न्यवेदयत् ॥ २ ॥

ततश्च तावुभौ वीरौ क्षिप्रं प्रचलितौ वनात् ।
स्वाश्रमाभिमुखौ सीतां शङ्कमानौ रहोगताम् ॥ ३ ॥

अथ दूराद्रघुपतिर्ददर्शाश्रममण्डलम् ।
शून्यं प्रियतमाहीनं वृतं काकैः समंततः ॥ ४ ॥

शुष्यत्द्रुमलतागुल्मं रुदद्भिरिवपक्षिभिः ।
कूजद्भिरशुभध्वानं समंतात्परिवेष्टितम् ॥ ५ ॥

पुरस्तात्तप्तपवनागमदुर्दैवसूचकम् ।
सरस्तु मूर्छिताम्भोजमकस्माद्दुःखबोधकम् ॥ ६ ॥

कङ्कैर्गृध्रैर्वायसैश्चभ्रमद्भिर्व्योममण्डले ।
सान्द्रैः पक्षकृतच्छायैः कथितामङ्गलागमम् ॥ ७ ॥

अकस्मान्मौनमालम्ब्य स्थितैरमधुपायिभिः ।
मधुव्रतैः परित्यक्तलतावृक्षप्रसूनकम् ॥ ८ ॥

सरःसु मौनमालम्ब्यस्थितैरविसभक्षणैः ।
कुटुम्बैः कलहंसानां त्यक्तवारिविहारकम् ॥ ९ ॥

पुरस्ताद्विसेऽप्युच्चैः रटद्भिः फेरवीकुलैः ।
आक्रान्तं तरुशाखासु रटद्धूककदम्बकम् ॥ १० ॥

चित्तस्योच्चाटजननं मरुता पूतिगन्धिना ।
अत्यर्थमङ्गलप्रायमरुच्यं मनसः स्फुटम् ॥ ११ ॥

उवाच लक्ष्मणं रामो वीक्ष्याश्रमदशामिमाम् ।
पुरस्तादद्यसौमित्रे पश्यस्याश्रमण्डलम् ॥ १२ ॥

अमङ्गलानि चिह्नानि सर्वाण्यत्र विलोकये ।
किं नु मे सूचयिष्यन्ति भ्रातरद्य हते दिने ॥ १३ ॥

वामं च भुजमूलं मे समं वामेन चक्षुषा ।
मुहुः स्फुरति सौमित्रे दर्शयिष्यति किं भयम् ॥ १४ ॥

शुष्यतीव मम स्वान्तं शोको मे परिवर्द्धते ।
त्वक् च मे दह्यत इव किं नु भाव्यमतः परम् ॥ १५ ॥

नूनमत्राश्रमे भ्रातः सीतां पश्यामि नाद्य वै ।
त्वां हित्वा निर्जने देशे तस्थौ सा वञ्चनाय मे ॥ १६ ॥

तया विरहितश्चाहं प्राणांस्त्यक्ष्यामि तत्क्षणात् ।
इतीवामङ्गलं भ्रातरहं पश्यामि दुःसहम् ॥ १७ ॥

एते कङ्काश्च काकाश्च गृध्राश्च व्योममण्डले ।
भ्रमन्तः किं नु वक्ष्यन्ति मम भाग्यविपर्ययम् ॥ १८ ॥

अयमंगारकणमुक् तप्तस्पर्शः समीरणः ।
किं नु मे चित्तसंतापं प्रवक्तीति न बुध्यते ॥ १९ ॥

एते खगा मृगाश्चैव शिवारुतविशङ्किताः ।
रुदन्तइव कूजन्ति किं नु वक्ष्यन्ति मेऽहितम् ॥ २० ॥

तरुगुल्मलतावृन्दं सोद्वेगमिवदृश्यते ।
अन्यामिव दशां पश्याम्यद्य पञ्चवटींवने ॥ २१ ॥

उच्चाटमिव चित्तस्य स्थानमेतत् करोति मे ।
सम्भावयामि भद्रं नो अद्यशून्यायितं जगत् ॥ २२ ॥

उड्डीयत इव स्वान्तं स्थानं भक्षयतीव माम् ।
दिशो भयानकाः पश्याम्यटवीं भूर्यमङ्गलाम् ॥ २३ ॥

इतिब्रुवाणो रघुसार्वभौमोऽटव्यामभद्राणि वितर्कमाणः ।
प्रियान्यथावृत्तिविशङ्कचेता जवादुपेतः खलुपर्णशालाम् ॥ २४ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे पर्णशालागमनो नाम सप्तपञ्चाशदधिकशततमोऽध्यायः ॥ १५७ ॥

*

अष्टपञ्चाशदधिकशततमोऽध्यायः

ब्रह्मोवाच

दृष्ट्वा शून्यतमं रामः प्रियाहीनं तमाश्रमम् ।
वायसोलूकगृध्रौघकङ्कपक्षिसमाकुलम् ॥ १ ॥

फेरवीकटुसंरावं मूर्छितद्रुमवल्लिकम् ।
अचैतन्यसमाविष्टो मूर्छितः पतितो भुवि ॥ २ ॥

आर्यं तथाविधं दृष्ट्वा सौमित्रिः साधुलोचनः ।
आनीयाशुहिमं तोयमभ्यषिञ्चन्मुखं प्रभोः ॥ ३ ॥

शनैरुत्थापयामास भ्रातरं प्राणसम्मितम् ।
पश्यन् विरहजां चेष्टां विशीर्णहृदयोऽभवत् ॥ ४ ॥

श्रीराम उवाच

हा प्राणदयिते देवि हा हन्त जनकाङ्गजे ।
हा हन्त चन्द्रवदने हा हा कमललोचने ॥ ५ ॥

हा तन्वि रमणि कासि कासि हा प्राणदायिनि ।
हा हन्त वञ्चितोऽस्म्यद्य त्वया हठपरायणे ॥ ६ ॥

हा कोमलवचोलापे हा कोकिलकलस्वरे।
हा हन्त कोमलापङ्गि क्वासि क्वासि विदेहजे ॥ ७ ॥

कस्यांचिद्वनवल्यां वा कस्मिंश्चिद्वनभूरुहे।
कस्मिंचिद्वनगुल्मे वा संस्थितासि निलीय किम् ॥ ८ ॥

इतो गतासि हा देवि न जाने क्व गतासि वै।
वनं गता वा हृदयं गता वासि नृपात्मजे ॥ ९ ॥

कोमलाभ्यामयाङ्काभ्यामालोकय तथैव माम्।
नापराधमहं किंचिदात्मनो वेद्मि जानकि ॥ १० ॥

तवैवाहं निदेशेन मृगाहरणकर्मणे।
इतो गतोऽभवं देवि मायावञ्चितमानसः ॥ ११ ॥

को नारण्यं विशेद्देवि मृगयार्थं धनुर्धरः।
को न स्वर्णमृगं गच्छेज्जीवामास्फाल्य धन्वनः ॥ १२ ॥

को न प्रियतमाभीष्टमाहर्तुं मृगयेत्तराम्।
को जानाति जनो दैवं यद्रामं वञ्चयिष्यति ॥ १३ ॥

धिग्दैवं मम मन्दस्य धिगद्यतनवासरम्।
धिङ्नृतिं धिङ्मे व्यसनं यतोऽभूद् वञ्चनं मम ॥ १४ ॥

कथं रुष्टासि नो वेद्मि कथं चालक्ष्यतां गता।
त्वया विना क्षणमपि प्राणान् धर्तास्मि वा कथम् ॥ १५ ॥

हां देवं प्रतिकूलं मे किमकारणमेव च।
कृताः शुभाशिषो नाम विहिता मे द्विजन्मभिः ॥ १६ ॥

हा पञ्चवटि को वेत्ति चिरेण त्वं समाश्रिता।
ईदृशीं विपदं घोरां भवती मम दास्यति ॥ १७ ॥

हा हन्त कुञ्जभूयिष्ठे सुभगे वनदेवते।
मम दौर्भाग्यभारेण जाता त्वमपि दुर्भगा ॥ १८ ॥

हा हा पञ्चवटीवृक्षाः कृच्छ्रे यूयं समाश्रिताः।
चिरेण पुष्टवन्तः स्म मां विपन्नं फलव्रजैः ॥ १९ ॥

को जानाति विधेस्तत्त्वं विश्वस्तस्य ममेदृशम्।
प्राणापहारविषमं दुष्फलं किलदास्यथ ॥ २० ॥

हा तुङ्गवीचितरले गोदावरि चिरेण माम्।
तोयैस्तर्पितवत्यम्ब द्रष्टुं दुःखमिदं महत् ॥ २१ ॥

हा हन्त हृदयात्यर्थं काठिन्यगुणभाजन।
प्राणेश्यामप्यलक्ष्यायां स्फुटसि द्राक् कथं च न ॥ २२ ॥

आविर्भव प्रियेऽह्याय वृक्षगुल्मलतावनात्।
वञ्चयस्यधुना तन्वि किमकारणमेव माम् ॥ २३ ॥

कथं दधाम्यहं प्राणांस्त्वां विना प्राणवल्लभे ।
सद्य आविर्भवामुष्मात्सान्द्रपञ्चवटीवनात् ॥ २४ ॥

नादयन्ती पदन्यासैर्नूपुरे कलभाषिणी ।
किं नाग्रतो ममोपैषि पुरेव जनकात्मजे ॥ २५ ॥

स्फुरत्काञ्चीकुलक्काण रणच्चरणनूपुरा ।
अये पूर्वमिवात्मानं प्रिये दर्शयसे न किम् ॥ २६ ॥

दर्शयस्व कुरङ्गाक्षि मुखं ते चन्द्रशीतलम् ।
ताम्यतस्तव विश्लेषाच्चकोराविव चक्षुषी ॥ २७ ॥

इमां विरहजामार्तिमपूर्वानुभवां मम ।
विनाशय प्रिये सद्यो मुखचन्द्रं प्रदर्शय ॥ २८ ॥

म्रियन्ते हि मम प्राणाः स्खलतीव मनो मम ।
विगलन्तीव मेऽङ्गानि विरहे तव सम्प्रति ॥ २९ ॥

प्राणेशि स्वस्य हृदयाद् द्राक् काठिन्यमपाकुरु ।
दर्शनं देहि मे सद्यो गच्छतोऽसून् निवारय ॥ ३० ॥

हा हन्त स्वर्णहरिणच्छद्मना विधिरेव माम् ।
प्रसभं वञ्चयामास को वेत्ति पुनरीदृशम् ॥ ३१ ॥

हा हन्त लक्ष्मण भ्रातस्त्वयि विश्वस्तमानसः ।
निधाय प्राणदयितां गतोऽहं मृगहेतवे ॥ ३२ ॥

जवेन स त्वमधुना देहि प्राणप्रियां मम ।
नो चेत्त्यक्ष्याम्यहं प्राणानिति मे निश्चितं मतम् ॥ ३३ ॥

आनयस्व प्रियां सद्यः सौमित्रे मां यदीच्छसि ।
क्व मे प्राणेश्वरी याता पर्णशालामधिष्ठिता ॥ ३४ ॥

सोढानि किं नु भवता दुर्वाक्यान्यपि लक्ष्मण ।
त्वयि विन्यस्य तां यातः कं नु पृच्छामि सम्प्रति ॥ ३५ ॥

को मे प्राणप्रियां तावदपहृत्याश्रमस्थिताम् ।
स्थापयिष्यति तं भित्त्वा सद्य आनय लक्ष्मण ॥ ३६ ॥

योमेऽपहृतवान् प्राणदयितां विपिनादितः ।
भित्त्वाहं तस्य हृदयमानेतास्मिशितैः शरैः ॥ ३७ ॥

मही जलं वा तेजो वा मरुद्वा नभ एवच ।
वनं वा वनवृक्षो वा वने गुल्मलतापि वा ॥ ३८ ॥

वन्यो वा वनदेवी वा गिरिर्वा भित्तिरेव वा ।
देवोऽसुरो मनुष्यो वा यक्षो गन्धर्व एव वा ॥ ३९ ॥

को मे प्राणप्रियः हृत्वा निनाय रहसि स्थिताम् ।
भित्त्वाहं तस्य हृदयं जवात्सु निशितैः शरैः ॥
आनेतास्मि वलान्नो चेत्स्वत आनीय रातु मे ॥ ४० ॥
इति विलपनवाक्यैः क्लिष्ट आर्यस्य तावत्
सपदि गलितवक्त्रश्रीः सुमित्रातनूजः ॥
न किमपि समवोचद्भ्रिसं तप्तचेता
विधिविहितमजस्रं मग्नधीः शोचयानः ॥ ४१ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे श्रीराममनःशोको नामाष्टपञ्चाशदधिकशततमोऽध्यायः ॥ १५८ ॥

*

एकोनषष्ट्यधिकशततमोऽध्यायः

ब्रह्मोवाच

अथ लक्ष्मण ऊचे तं विलपन्तं मुहुर्मुहुः ।
सीतापहारसम्भूतशोकसागरमग्नधीः ॥ १ ॥
हा दैवकृत्यं शोचामि दुर्निवारं बुधैरपि ।
त्रैलोक्यस्थाविता वीर येन त्वमपि वञ्चितः ॥ २ ॥
हा हा हृदयमद्यापि शतधा न विदीर्यते ।
ईदृशीं घोरविपदमासाद्यापि सुदुस्तराम् ॥ ३ ॥
क्व नः कुलं च विमलं क्व चेदं लाञ्छनं महत् ।
यदेव कुरुते दैवं तदेव सहते जनः ॥ ४ ॥
दैवस्यापि भवान् दैवं श्रीसूर्यकुलभूषण ।
न जानामि तव क्रीडां ययेदं किलनिर्मितम् ॥ ५ ॥
भवान् विलपति श्रीमन् सर्वशोकापहारकः ।
दृष्ट्वा निरवलम्बोऽहं मज्जामि क्लेशसागरे ॥ ६ ॥
अग्रे कर्तव्यतामूढं भ्रमतीव मनो मम ।
वीक्ष्य त्वामपि खिद्यन्तं दुःखपारं न याम्यहम् ॥ ७ ॥
क्व हेममृग आगच्छेत् क्व देवी स्पृहयेदमुम् ।
क्व भवाननुधावेत क्व चेदं वञ्चनं भवेत् ॥ ८ ॥
सर्वं दैवकृतं दृष्ट्वा त्वयिदैवनियन्तरि ।
मनो निरवलम्बं मे शतधेव विशीर्यते ॥ ९ ॥

गच्छेयं शरणं यस्य स भवान् शोकसंयुतः ।
किं नु गच्छामि शरणं वीर श्रीमन्नतःपरम् ॥ १० ॥

हा मातर्जानकि कथमात्थ त्वमपि दुर्वचम् ।
भक्ति प्रह्वे मयि तथा जाने दैवाविपर्ययम् ॥ ११ ॥

नाज्ञासिषमहं देवि दैवस्येत्थं विपर्ययम् ।
शतधापि दुरुक्तोऽहं तद्गच्छेय किं न्वितः ॥ १२ ॥

हा वीर रघुशार्दूल पश्यामि त्वां सुदुःखितम् ।
जगच्चान्धन्तमो व्याप्तं किं नु दुःखमतः परम् ॥ १३ ॥

हा नाथ धैर्यमालम्ब्य समुत्तिष्ठ कथंचन ।
अग्रे कर्तव्यतां चैव मूढस्य मम दर्शय ॥ १४ ॥

इत्थं हि खिद्यमानं त्वां वीक्षमाणो रघूद्वह ।
म्रियेऽहं तीव्रशोकेन तं मां पाहि महाभुज ॥ १५ ॥

भवतश्चापि कर्तव्यं भवानेव रघूद्वह ।
जानाति विश्ववन्द्याङ्घ्रे कोऽन्यो ज्ञातुमिह क्षमः ॥ १६ ॥

यदि जीवति लोकेऽस्मिंस्तवप्राणेश्वरी प्रभो ।
क्व तदा वर्तते सा वै भूये एतद्गवेष्यताम् ॥ १७ ॥

अथो यदि न जीवेत् सा किं नु जीवसि त्वं प्रभो ।
अहं च किं नु जीवामि ततो जीवति सा ध्रुवम् ॥ १८ ॥

दैवस्य करणीयं तु दैवमेवार्यं वेत्ति च ।
भवांस्तस्य नियन्ता वा तृतीयो नेह दृश्यते ॥ १९ ॥

यदि प्राणांस्त्यजाम्याशु शोकेन तव राघव ।
सापराधोऽपि किं न स्यां सेवालोपविधायकः ॥ २० ॥

तव सेवाभिलाषो मे प्राणान् रक्षति सर्वथा ।
नो चेदीदृग्विधे शोके हृदयं न स्फुटेन्मम ॥ २१ ॥

अथ धिङ्मां तथा देव्या दुरुक्तैर्विद्धमानसम् ।
यस्तवाज्ञायतीवर्त्यं तां वने त्यक्तवान् रहः ॥ २२ ॥

तथापि किं न्वहं कुर्यामहमाज्ञाकरः सदा ।
अविशेषेण युवयोरुभयोरपि राघव ॥ २३ ॥

नायासिषं तथा भूयो नियुक्तोऽपि रघूद्वह ।
दुरुक्तशल्यैर्विद्धस्तु जातोऽस्म्यहमधीरधीः ॥ २४ ॥

सर्वं विस्मृत्य वीरेन्द्र त्वामहं गतवान् वने ।
नाज्ञासिषं दैवकृत्यं वञ्चनं मे भविष्यति ॥ २५ ॥

इत्थं विलप्य सौमित्रिररोदीद्भृशमातुरः ।
गर्जयन् काननं सर्वं मृगेन्द्र इव दुःखितः ॥ २६ ॥

ततश्च तावुभौ वीरौ भृशं रुरुदतुर्वने ।
गर्जयन्तौ दिशः सर्वा मृगेन्द्राविव दुःखितौ ॥ २७ ॥

तयोरित्थं प्ररुदतोर्मुक्तास्थूलाश्रुमोक्षिणोः ।
पशवः पक्षिणश्चापि रुरुदुः कानने भृशम् ॥ २८ ॥

रुरोद सा पञ्चवटी झिल्लीझाङ्कारकैतवात् ।
भूरुहाश्चारुदन् सर्वे भ्रमरारावसम्भृताः ॥ २९ ॥

चिरं रुदित्वारघुसार्वभौमः सलक्ष्मणः शोकसमुद्रमानसः ।
दृष्ट्वारदैर्दन्तपटं रुषाक्तः प्रियापहाराधृतधीरुदस्थात् ॥ ३० ॥

उत्थाय तौ पञ्चवटीवनस्थांस्तरूंल्लतागुल्मगणान् समंतात् ।
गवेषयन्तौ प्रतिपत्रशाखं सुदुःखितौ बभ्रमतुर्जवेन ॥ ३१ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे श्रीरामलक्ष्मण-विरहावेशो नामैकोनषष्टचाधिकशततमोऽध्यायः ॥ १५९ ॥

*

षष्टचधिकशततमोऽध्यायः

ब्रह्मोवाच

जानकीविरहोन्मत्तः स्खलद्बुद्धिगुणोदयः ।
बभ्राम रघुशार्दूलः खिन्नः पञ्चवटीवने ॥ १ ॥

क्वचित्स्खलन् क्वचिद्गच्छन् क्वचिद्धावन् क्वचिद्भ्रमन् ।
क्वचिद्रुदन् क्वचिज्जल्पन् क्वचिन्मौनमुपाश्रयत् ॥ २ ॥

अवीक्ष्यमाणो दयितां पश्यन् शून्यतमं जगत् ।
पर्यटन् संस्थया हीनोऽदीनः खिन्नतमश्च सः ॥ ३ ॥

जगाहे काननं सर्वं प्रियान्वेषणतत्परः ।
पृच्छमानस्तरुलतागुल्मतुङ्गवनस्पतीन् ॥ ४ ॥

अवीक्षमाणः शोकान्तमपारविरहज्वरः ।
पश्यन्नन्धतमोव्याप्ता दिशः शून्यतमा इव ॥ ५ ॥

अन्तःसंतापसंवीतो बहिः श्रान्तकलेवरः ।
गतो गोदावरीं पुण्यां गङ्गां गौतमनिर्मिताम् ॥ ६ ॥

तस्यास्तीरभुवि श्रान्तः पश्यन् प्राणप्रियापदैः ।
अङ्कितं सैकतं रामो मुमूर्छ हृतचेतनः ॥ ७ ॥

तदाननं शीततमैर्गौतमीनीरविन्दुभिः ।
ममार्जखिन्नहृदयो लक्ष्मणः करुणाञ्चितः ॥ ८ ॥

प्रक्षालितमुखस्तेन भ्रात्रा प्राकृतचेतनः ।
कथंचिदुन्मील्य दृशौ तस्थिवान् मौनमाश्रितः ॥ ९ ॥

तमाह लक्ष्मणो नीचैर्भक्तिप्रह्वः कृताञ्जलिः ।
शोकसंतप्तहृदयो वाष्पव्याकुललोचनः ॥ १० ॥

हा राम जगदाराम विश्वसंतापनाशन ।
बधान धैर्यं मनसि स्वीयकृत्यमनुस्मर ॥ ११ ॥

अलं गवेषणायासैरलं पर्यटनश्रमैः ।
अज्ञातस्थानविषय इत्थं त्वमतिखिद्यसे ॥ १२ ॥

यदि विज्ञायते स्थानं यत्र ते प्राणवल्लभा ।
ध्रुवमन्वेषणं कार्यं यत्नोऽपि सफलोभवेत् ॥ १३ ॥

अत आर्य सहस्वामु शोकवेगं सुदुर्धरम् ।
यावत्सम्प्राप्यते देवी प्राणेशी तव जानकी ॥ १४ ॥

स्वर्गे मर्त्येऽथ वा नागलोके गन्धर्व सद्मनि।
क्व नु सा वर्तते साध्वी देवी जनकभूपजा ॥ १५ ॥

पातिव्रत्यं ध्रुवं तस्याः शक्यं केन विनाशितुम् ।
यत्रास्ति तत्र सा देवी शुद्धैवात्र न संशयः ॥ १६ ॥

यत्नस्तस्याः परिप्राप्तौ कर्तव्यो रघुपुङ्गव ।
यदि बुध्येत तत् स्थानं यत्र सा शुद्धविग्रहा ॥ १७ ॥

वेधनीयो हृदि शरैर्नूनं तदपकारकः ।
ध्रुवमात्मविनाशाय हृता केनापि सा रहः ॥ १८ ॥

इत्थं तो कृतसंविदौ रघुवरौ शोकेन रुग्णाशयौ
तूणी युग्मनिबन्धनोद्धुरकटीदेशौ कृपाणीधरौ ।
सज्जीकृत्य धनुर्युगं जनकजालोकाय वद्धोद्यमौ
हित्वा पञ्चवटीवनं द्रुततरावग्रे समं जग्मतुः ॥ १९ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे पञ्चवटीवनत्यागो नाम षष्टयधिकशततमोऽध्यायः ॥१६०॥

★

एकषष्ट्यधिकशततमोऽध्यायः

ब्रह्मोवाच

मार्गे तरुलताश्रेणीर्गुल्मान् नानाविधानपि ।
अन्विष्यमाणो विरही प्रियार्थमतिकातरः ॥ १ ॥

भ्रात्रा सौमित्रिणा युक्तो गुणारूढधनुर्धरः ।
विलपञ्शोकसंवीतः प्रययौ दक्षिणां दिशम् ॥ २ ॥

किंचिद्दूरं ततो गत्वा ददर्श पतितं पथि ।
खगं कण्ठागतप्राणं जटायुं नाम राघवः ॥ ३ ॥

स वै सखास्य तातस्य राज्ञो दशरथस्य हि ।
वर्षीयान् दशवक्त्रेण युद्धवांल्लूनपक्षतिः ॥ ४ ॥

तमब्रवीद्रघुवरः केन ते पक्षसंहतिः ।
जटायो नितरां लूना पातितश्चासि भूतले ।
राघवेन्द्रस्य वचनं श्रुत्वा गृध्रवरोऽब्रवीत् ॥ ५ ॥

इह सीतां हरन्नूनं दशवक्त्रो मयेक्षितः ।
ततोऽहं तेन कृतवान् महद्युद्धं बलीयसा ॥ ६ ॥

यावद्वीर्यबलं राम युद्धवांस्तेन रक्षसा ।
लूनाः पक्षतयः सर्वास्तेन चाहं निपातितः ॥ ७ ॥

पातयित्वा महीपृष्ठे मृतप्रायं स मां बली ।
मुहुर्मया शप्यमानो हृत्वा देवीमितो गतः ॥ ८ ॥

यावत्त्वदागमं राम रक्षिता असवो मया ।
इदानीं त्वामहं दृष्ट्वा कृतार्थो नरपुङ्गव ॥ ९ ॥

त्यजाम्यसून् कृतानृण्यश्चिरं मैत्र्याभवत्पितुः ।
भवन्मुखालोकमात्रात् कृतार्थश्च रघूद्वह ॥ १० ॥

इत्युक्त्वा रघुशार्दूलं पश्यन्नेव दृशा खगः ।
उच्चैरुपररामान्तरात्मज्योतिषि संगतः ॥ ११ ॥

व्रणवन्ति तदङ्गानि दृष्ट्वा रामो दयानिधिः ।
अज्ञासीत्तस्य तत्कर्म युयुधे रक्षसा यथा ॥ १२ ॥

सौमित्रेरग्रतो रामः श्लाघमानो विहंगमम् ।
अरोदीद् भृशसंतप्तः पितृव्यापत्तिदुःखतः ॥ १३ ॥

हा तात हा पितृसख हा पितृव्य महाबल ।
अस्मदर्थोज्झितप्राणो धन्य एव भवान् किल ॥ १४ ॥

ऋणवानस्मि ते नित्यं गृध्रराज नमोऽस्तु ते।
सत्यं सखा त्वं तातस्य कृतं लोकोत्तरां त्वया ॥ १५ ॥

हा गृध्रराज सुकृतिन् क्व स राक्षस उत्कटः।
पक्षमात्रसहायश्च क्व त्वं जात्या विहंगमः ॥ १६ ॥

सत्वं तु भवतः श्लाघ्यं येन त्वं युद्धवांस्तथा।
अथो मम पितुर्मैत्र्या आनृण्यं गतवानसि ॥ १७ ॥

हा व्रणानि तवांगेषु तेन युद्धवतो द्विषा।
क्षरद्रुधिरपूक्तानि विलोक्यन्ते सहस्रशः ॥ १८ ॥

अहो बलमहो धैर्यमहो तव पराक्रमः।
अहो उपकृतिस्तात तव स्वजनबन्धुषु ॥ १९ ॥

अहो निस्तारिता कृत्स्ना गृध्रजातिरपि त्वया।
येषां कुले भवान् जातो धन्यास्ते पितरस्तवः ॥ २० ॥

तैः स्वस्य पूर्वजैः शाकं धन्यैर्धन्यतरो भवान्।
मुच्यतां ननु पक्षीन्द्र दुस्तराद्भवबन्धनात् ॥ २१ ॥

ईदृग्भवान् स्वबन्धूनामुपकारदयानिधिः।
क्व नु दृश्योऽसि पक्षीन्द्र साक्षात्तातसमो मया ॥ २२ ॥

त्वयि जीवति पक्षीन्द्र नाज्ञापि निधनं गतः।
स मे पिता दशरथो ह्यद्यैव निधनं गतः ॥ २३ ॥

इति स विलपमानः पक्षिणं ततुल्यं विहितसमरमुच्चै रक्षसा तादृशेन।
अपहृतबलवीर्यं स्वात्मनोऽर्थे क्षतासुं पितरमिव निजं तं वह्निना निर्ददाह ॥ २४ ॥

कृत्वाग्निसंस्कारमुखां समस्तां क्रियां स तस्यावगतोपकारः।
शुशोच रामो भृशमात्मताते मृते यथा भूरिकृताश्रुमोक्षः ॥ २५ ॥

उवाच सौमित्रिमथोपकारं स्मरन् स गृध्रस्य मृतस्य तस्य।
विधायदाहं विधिवद्विधिज्ञः प्रेतोदनिर्वापविधौ विलप्य ॥ २६ ॥

अमुं जानासि सौमित्रे गृध्रराजं महाबलम्।
यो देवासुरयुद्धानां वर्षीयान् साक्षितां गतः ॥ २७ ॥

अयं किलास्मत्तातस्य सखा प्राणसमोऽभवत्।
कतिधा नेक्षितस्तत्र वार्तयानः शुभाः कथाः ॥ २८ ॥

मृगयारसिकोऽस्माकं तातो दशरथो नृपः।
वनेऽनेन गृध्रेण कति वारं न सत्कृतः ॥ २९ ॥

विच्छिन्नाः सेवका यत्र सेनाश्चापि पृथक्स्थिताः।
एकान्ते निर्जनेऽरण्ये तत्रासौ बन्धुतां गतः ॥ ३० ॥

आदाय पाकरुच्यानि फलानि विविधान्यसौ।
शाकानि कन्दमूलानि हत्वानेकांश्च पक्षिणः ॥ ३१ ॥

नखैश्चञ्चुपुटेनापि पक्षैश्चादाय बुद्धिमान् ।
उपस्थितोऽग्रे तातस्य भोज्यदानार्थमुद्यतः ॥ ३२ ॥

तदा सुखितवानेष तातं नो धरणीपतिम् ।
यो हि कृच्छ्रगतं रक्षेत्स सखा स च वान्धवः ॥ ३३ ॥

देवासुरैः पुरा युद्धे ताते याते सहायताम् ।
देवानामेष पक्षीन्द्रस्तदाप्युपकृतिं दधौ ॥ ३४ ॥

चञ्च्वा नखैः पक्षि तिभिरेष दैत्यांश्च दानवान् ।
नासिकानेत्रकर्णेषु लुलाव बलसंयुतः ॥ ३५ ॥

नैतस्य विक्रमं वक्तुमह पर्याप्त आत्मना ।
इदानीमपि वृद्धोऽसौ चकारोपकृतिं मम ॥ ३६ ॥

प्रियापहारकेणैष रक्षसा घोररूपिणा ।
चकार सुमहद्युद्धं यावद्वीर्यवलं खगः ॥ ३७ ॥

प्राणान् रक्षितवांश्चासौ यावदागमनं मम ।
संनिवेदितवान् वृत्तं प्रियायास्तस्करस्यमे ॥ ३८ ॥

क मेऽमुना विना ज्ञातः प्रियायास्तस्करो भवेत् ।
आयासश्चापि विफलो भवेदन्वेषणे मम ॥ ३९ ॥

इत्येवं संलपन् रामस्तेन भ्रात्रा कनीयसा ।
संरुदन् विलपंश्चापि गृध्रायादाज्जलाञ्जलीन् ॥ ४० ॥

एवं कृत्वा प्रेतकर्मास्य रामो गृध्रस्योच्चैः पञ्चतामागतस्य ।
तस्यादेशादाततायित्वमाप्तो भ्रात्रा युक्तोऽयं ततोऽग्रे जगाम ॥ ४१ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे गृध्रसंस्कारो नामैकषष्ट्यधिकशततमोऽध्यायः ॥ १६१ ॥

*

द्विषष्ट्यधिकशततमोऽध्यायः

ब्रह्मोवाच

जानक्या विरहं बिभ्रत् संजिहोर्षुश्च रावणम् ।
जटायोरूपदेशेन मुक्तसंदेह आतुरः ॥ १ ॥

पश्यन् वनानि सान्द्राणि विरहावेशमुग्धधीः ।
पृच्छन् क्वचिल्लतावृक्षान् क्वचिन्मूर्छन् क्वचित्स्खलन् ॥ २ ॥

म्रियमाणो लक्ष्मणेन पतमानः पदे पदे ।
रावणस्यापराधेन सरोषहृदयोऽभवत् ॥ ३ ॥

मौनमेवाव्रजन्मार्गे शोकावेशसुविह्वलः ।
नायं सम्भाष्यते केनाप्यसौ कमपि वक्ति न ॥ ४ ॥

अत्यर्थकुपितस्वान्तो ब्रूते लक्ष्मणमेव सः ।
शृणु लक्ष्मण ते वच्मि सत्यमेतन्न संशयः ॥ ५ ॥

यदि जीवति मे जाया तदा जीवतु नाम सा ।
नो चेद्भस्मीकरिष्यामि जगदेतच्चराचरम् ॥ ६ ॥

सेशं सलोकपालं च सदेवासुरमानुषम् ।
खण्डयिष्यामि वसुधां शोषयिष्यामि सागरान् ॥ ७ ॥

मेरुं बिभेदयिष्यामि छेत्स्यामि विधुभास्करौ ।
पातयिष्यामि नभसस्तारकाश्च ग्रहानपि ॥ ८ ॥

यदि जीवति मे प्राणवल्लभा जनकात्मजा ।
तदा मे जीवतं भ्रातर्नो चेत्यच्यास्म्यसूनहम् ॥ ९ ॥

जगतः प्रलयं कृत्वा प्राणत्यागो भवेन्मम ।
इति तिग्मतरं वाक्यं नित्यं व्याहरतः प्रभोः ॥ १० ॥

श्रावं श्रावं जगत्सर्वमरिष्टान्यभजत्तराम् ।
दृष्ट्वा दृष्ट्वा च सौमित्रिः सकम्पहृदयोऽभवत् ॥ ११ ॥

भयविभ्रान्तनयनो न च किंचिदवोचत ।
प्रचचाल मही कृत्स्ना सागरश्चोदतिष्ठत ॥ १२ ॥

भयाञ्चकम्पिरे देवाश्चकम्पे मेरुरेव च ।
दिशः प्रजज्जलुः सर्वाः नागलोको व्यकम्पत ॥ १३ ॥

मनांस्यगुः कश्मलत्वं त्रैलोक्ये वसतां सताम् ।
अकस्माद् दुःखसम्भूतिरकस्माच्छोकसम्भवः ॥ १४ ॥

अकस्माच्च मनःकम्पस्त्रैलोक्ये समजायत ।
जानकीविरहाद् रामे क्लिश्यमाने तदानिशम् ॥ १५ ॥

एवं जगत्यरिष्टानि प्रविलोक्य दिवानिशम् ।
सौमित्रिरभवद्भीतः सकम्पहृदयो भृशम् ॥ १६ ॥

तदा प्रणम्य सहसा भ्रातरं रघुपुङ्गवम् ।
स्पृष्ट्वाङ्घ्रियुगलं प्रह्व इदं वचनमब्रवीत् ॥ १७ ॥

श्रीमन् रघुकुलाधीश सूर्यवंशध्वज प्रभो ।
आर्यधर्मपथाधार देवगोद्विजरक्षक ॥ १८ ॥

संप्तं त्वत्कृपादृष्ट्या जगदाप्यापतेतराम् ।
स चेद्भवान् प्रकुपितस्त्रैलोक्योपरि राघव ॥ १९ ॥

जीवेयुस्तत्कथं नाथ त्रिजगद्वासिनो जनाः ।
कश्चेदानीं रक्षकः स्याच्छ्रुतिदेवद्विजन्मनाम् ॥ २० ॥

मान्धाता सगरश्चैव भरतोऽथ भगीरथः ।
दिलीपो रघुरेवापि येऽम्बरीषादयो नृपाः ॥ २१ ॥

तैरिदं विश्वमखिलं स्वधर्मात्परिपालितम् ।
यावन्नो जनकः साक्षाद्राजादशरथोऽभवत् ॥ २२ ॥

तेषां कुले भवान् कीर्तिवर्द्धनः सत्यसंगरः ।
त्यागी दयापरः साधुरक्षको दुष्टनाशकः ॥ २३ ॥

सूर्यवंशैकतिलकः सम्मतश्च सतां सदा ।
एकस्याविनयेनार्य जगद्धन्तुं न चार्हसि ॥ २४ ॥

तमेव जहि पापिष्ठं रावणं लोकरावणम् ।
यस्याशु हननात्कृत्स्नं त्रैलोक्यं सुखयिष्यसि ॥ २५ ॥

यदीच्छसि त्वं संहर्तुं तं पापं दशकन्धरम् ।
तदा म वै हनप्रायो बलवीर्ययुतोऽपि सन् ॥ २६ ॥

पातयस्व प्रभो लङ्कां समुत्पाट्य महोदधौ ।
हरस्व राक्षसानीकमत्युग्रं लोकशोषणम् ॥ २७ ॥

आनन्दय सुराधीशं रक्ष गोब्राह्मणानपि ।
याहि त्रयीपथं धर्मं मर्यादां स्थापय प्रभो ॥ २८ ॥

एतत्त्वया सदा कार्यं पूर्वेषां कीर्तिवर्द्धनम् ।
न जातुचिद्रुषाविष्टस्त्रैलोक्यं संहरेद्भवान् ॥ २९ ॥

इत्थं निशम्य सौमित्रेः पादोपास्तिपरस्य वै ।
वचनानि रघुश्रेष्ठो भक्तिप्रह्वस्य वाग्मिनः ॥ ३० ॥

लज्जाविनम्रवदनो रामो रोषान्निवर्तितः ।
लक्ष्मणैर्लक्ष्मणास्याथ किंचिन्नियमितः प्रभुः ॥ ३१ ॥

प्रसन्नहृदयो भूत्वा स्नेहेन परिरभ्य तम् ।
दोर्दण्डयुगलेनोच्चैः कृत्वा घ्राणं च मूर्द्धनि ॥ ३२ ॥

बभूव सस्मितमुखः कारुण्यमधुराकृतिः ।
दृष्ट्वा तं तादृशं रामं स स्वस्थहृदयोऽभवत् ॥ ३३ ॥

जग्मतुः सत्वरं वीरौ ततस्तौ कृतसंविदौ ।
काननान्यवगाहन्तौ विश्रमन्तौ स्थले स्थले ॥ ३४ ॥

गाहन्तौ गिरिगह्वराणि विषमस्थानानि शृङ्गाणि च
प्रोत्तुङ्गानि महीभृतां घनतरुस्तोमाश्च दीर्घाटवीः ।

आरोहादवरोहतश्च सततं खिन्नौ सुधीराशयौ ।
सीताप्राप्तिसमुद्यमैकपरमौ तौ जग्मतुर्भ्रातरौ ॥ ३५ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे कुपितार्यसमाहितिर्नाम द्विषष्टयधिकशततमोऽध्यायः ॥ १६२ ॥

*

त्रिषष्टयधिकशततमोऽध्यायः

ब्रह्मोवाच

वृक्षगुल्मलतावृन्दे वीक्ष्यमाणो विदेहजाम् ।
दर्शयन् मानुषीं चेष्टां स्खलन् मोहेन च क्वचिन् ॥ १ ॥

म्रियमाणाश्च प्रतिपदं भ्रात्रा सौमित्रिणा ततः ।
प्रियायास्तस्करायोच्चैः प्रकुप्यन्मनसा प्रभुः ॥ २ ॥

कबन्धस्यालयं प्राप्तः शापजातस्य रक्षसः ।
स ददर्श तमत्युग्रं राक्षसं घोररूपिणम् ॥ ३ ॥

दोर्भ्यामाकृष्य सत्त्वानि वनजानि सहस्रशः ।
ग्रसन्तं मुखरन्ध्रेण गन्धर्वं पूर्वजन्मनि ॥ ४ ॥

तस्यातिदीर्घदोर्दण्डयुगं छित्त्वा रघूद्वहः ।
खड्गेन शितधारेण पातयामास भूतले ॥ ५ ॥

सोऽपि क्षणात्तनुं त्यक्त्वा राक्षसीमतिभीषणाम् ।
रामहस्तायुधस्पर्शाल्लेभे दिव्यतरं वपुः ॥ ६ ॥

गन्धर्व इति तेनासौ निश्चितस्तेन वर्ष्मणा ।
यथापूर्वं सुरुचिरो मणिहारविभूषण ॥ ७ ॥

प्रणनाम पुरोभूय राघवेन्द्रं मुदान्वितः ।
प्रसादसुमुखं देवं तुष्टाव कलया गिरा ॥ ८ ॥

स रावणहृतां सीतां विज्ञाप्य रघुवल्लभे ।
इदं विज्ञापयामास नीतिज्ञो यक्षसत्तमः ॥ ९ ॥

समुद्रमध्यवसतिर्लङ्काख्या यस्य सा पुरी ।
राक्षसौघसमाक्रान्ता दुर्गमा चैव मानुषैः ॥ १० ॥

स्वयं यो बलवांश्चैव त्रैलोक्यं येन निर्जितम् ।
लीलयैव च चिच्छेद पौरूषं यो दिवस्पतेः ॥ ११ ॥

येन कल्पद्रुमाश्छित्वा स्वावासतरवः कृताः।
यो ब्रह्माणां समाराध्य ययाचे वरमद्भुतम् ॥ १२ ॥

न जातु स्वस्य मरणं विधिसर्गभवैर्भवेत्।
तत्तथैवार्थितं तेन ब्रह्मणापि प्रतिश्रुतम् ॥ १३ ॥

ततः सहोदरसुतबान्धवोऽद्यबलोर्जितः।
जगज्जिगाय लङ्केशो नित्यं व्याकुलयन् जनान् ॥ १४ ॥

दशवक्त्रपरिस्फूर्जद्विग्रहोऽतिभयानकः ।
विंशबाहुसमुच्छ्रायो विंशलोचनभीषणः ॥ १५ ॥

विकरालमहाकायः कल्पाग्निरिव तेजसा।
शिवाराधनसंजातप्रतापाग्निमहोर्जितः ॥ १६ ॥

स ते प्रियापहारेण नितान्तं वद्धवतां गतः।
अतस्तस्य वधे यत्नो भवता भावितः कथम् ॥ १७ ॥

के नु तत्र सहायास्ते समानव्यसनाः प्रभो।
विज्ञापयामि तु श्रीमन् यदि चेतसि रोचते ॥ १८ ॥

अस्ति बालिकयेभ्राता सुग्रीवो नाम वानरः।
तस्यापि जाया तद्भ्रात्रा बालिना बलिना हृता ॥ १९ ॥

किष्किन्धापुरराज्यं च स्वयं स कुरुते प्रभो।
बलाद्विवासितस्तेन सुग्रीवः सेवते वनम् ॥ २० ॥

महाबली महावीरो महासत्यवचाश्च सः।
सूर्यस्य तनयः साक्षाद् ग्रहराजस्य भास्वतः ॥ २१ ॥

स चेत्त्वयाभिषिच्येत राज्येऽस्मिञ्चिरकाङ्क्षिते।
किष्किन्धानगरीराजधानीसम्पद्भिराञ्चिते ॥ २२ ॥

अवाप्नोति च चेत्तारां सुन्दरीं चिरकाङ्क्षिताम्।
ततः प्रत्युपकाराय तव सज्ज्येत सोऽर्कजः ॥ २३ ॥

अष्टादशमहापद्मसंख्याताश्च प्लवंगमाः।
तस्याज्ञावशगास्ते स्युस्तव सैन्यमहाभटाः ॥ २४ ॥

ऋक्षाणां च पतिर्वृद्धो जाम्बवान्नाम वीर्यवान्।
महाबलो महाकायः सोऽपि स्यात्ते चमूभटः ॥ २५ ॥

तैर्बृतस्त्वं महावीर साक्षात्तेजोनिधिः प्रभो।
विनयेथाःपरं युद्धे दशग्रीवं मदोत्कटम्।
सभृत्यं सपरीवारं सानुजं बलसंयुतम् ॥ २६ ॥

यदपि त्वामहं जानाम्यप्रमेयबलं जनैः।
तथापि सेनासंदोहो वरीयान् महतामपि ॥ २७ ॥

नैकाकी शोभते राम क्वचिद् भूमिपतिर्भुवि ।
भवांश्चाभासि वीरेन्द्र त्रिजगत्पतिरेव मे ॥ २८ ॥

इति विज्ञाप्य गन्धर्वो रामाय स्वात्मदायिने ।
विमानवरमारुह्य तदादिष्टो दिवं ययौ ॥ २९ ॥

तेनोद्दिष्टेन मार्गेण जगाम रघुपुङ्गवः ।
क्रामन् दुर्गान् क्षितिधरान् धनानि विपिनानि च ॥ ३० ॥

क्वचित्त्वरान्वितौ वीरौ क्वचिन्मन्दगमावुभौ ।
ज्यारूढधनुषौ धीरौ सीताप्रेक्षणलालसौ ॥ ३१ ॥

लालप्यमानो रहसि तमेवोद्यममातुरौ ।
सर्वज्ञौ मानुषीं चेष्टां वितन्वन्तौ विनोदिनौ ॥ ३२ ॥

खड्गिनौबद्धतूणीरौ शक्तिमन्तौ महाभुजौ ।
वीरेन्द्रौ बद्धकवचौ जटामुकुटमण्डितौ ॥ ३३ ॥

नीलोत्पलदलश्यामावतसीकुसुमप्रभौ ।
तमालकलिकाकारौ पुण्डरीकदलेक्षणौ ॥ ३४ ॥

सुकुमारतरौ रुच्यौ दिव्यतापसवेशिनौ ।
भिल्लैश्च भिल्लपत्नीभिर्वने वीक्षितविग्रहौ ॥ ३५ ॥

कारुण्यजननौ सद्यः सर्वेषामपि चेतसि ।
मयूरचन्द्रकधरौ गुञ्जापुञ्जविभूषितौ ॥ ३६ ॥

गिरिधातुप्रवालादिकृताकल्पौ महोज्ज्वलौ ।
त्रिजगत्सौख्यदानाथ बहुलीलाकृतोद्यमौ ॥ ३७ ॥

उच्चोच्चैर्गिरिशृङ्गाणि गिरिगह्वरकन्दराः ।
गिरिकाननवर्त्मानि गाहमानौ गतश्रमौ ॥ ३८ ॥

सीतासम्प्राप्तियत्नान्यं यत्नं न क्वापि बिभ्रतौ ।
त्यक्ताखिलसुखासङ्गौ स्वार्थसाधनसत्वरौ ॥ ३९ ॥

प्राप्तौ दिव्यजलं शुद्ध पम्पाख्यानं महासरः ।
सुगन्धिशुचिपानीयं फुल्लपङ्कजकेसरैः ॥ ४० ॥

नानाजातिलसत्पद्मवनभूषितमुज्ज्वलम् ।
ऋषिपत्नीगणाकीर्णमवगाढमृषि व्रजैः ॥ ४१ ॥

हंससारसचक्राह्वकादम्बकुलकेलिकृत् ।
मुक्ताविशुद्धशलिलगम्भीरमतिमञ्जुलम् ॥ ४२ ॥

वनराजीस्रगावीतं क्रान्तभूरुहवल्लरि ।
तटस्थवल्लरीकुञ्जपतत्कुसुमपूजितम् ॥ ४३ ॥

कमनीयतमोत्तुङ्गकूलनिःश्रेणिसुन्दरम् ।
अजस्रस्वगुणोद्गारिराजहंसगणावृतम् ॥ ४४ ॥

मन्दानिलकृतान्दोलं तेनुवीचिसमुद्भवम् ।
मौक्तिकोत्पत्तिसुभगमुक्तास्फोटकदम्बकम् ॥ ४५ ॥

देवाङ्गनावगाहोत्थहरिचन्दनरञ्जितम् ।
कार्णाटीकुचकुम्भोत्थमलयागुरुसौरभम् ॥ ४६ ॥

कूलकुञ्जलतासद्मविश्रान्तसुरकिंनरम् ।
जलपानसमायातनानावर्णमृगान्वितम् ॥ ४७ ॥

फुल्लपद्मदलासीननानाजातिविहंगमम् ।
मधुमत्तालिमधुपीगणसेवितपङ्कजम् ॥ ४८ ॥

राजहंसकुलक्काणमुखरीकृतदिक्तटम् ।
माध्वीकगन्धसंदोहपाटच्चरसुखानिलम् ॥ ४९ ॥

तत्तीरवासिनः शान्तान् ब्राह्मणान् मुनिपुङ्गवान् ।
प्रणनाम रघुश्रेष्ठो भूयस्तैरपि सत्कृतः ॥ ५० ॥

तत्र स्नात्वा रघुपतिः पम्पासरसि शीतले ।
विश्रान्तिमकरोत्कान्तावियुक्तोऽहानि कानिचित् ॥ ५१ ॥

मुनीनामाश्रमेष्वार्यो निवसन् लक्ष्मणान्वितः ।
धनुर्धरः कौणपेभ्यो व्यदधान्मखरक्षणम् ॥ ५२ ॥

वियोगात्तस्य रामस्य शीतं पम्पासरोजलम् ।
अतनोद्भूरि संतापं तप्यमानमिवाग्निना ॥ ५३ ॥

वीक्ष्यपम्पाजले क्रीडद्रथाङ्गमिथुनं मिथः ।
रहो जनकजां स्मृत्वा मुमूर्छ स्मरबिह्वलः ॥ ५४ ॥

जवेनोत्थापितः सोऽथ भ्रात्रा संदत्तचेतनः ।
स्मारं स्मारं मुहुः कान्तां प्रललाप विशीर्णधीः ॥ ५५ ॥

अये रथाङ्ग त्वमतीव धन्यः स्वकान्तया क्रीडसि यो निकामम् ।
न जातु कश्चित्तव सौख्यमध्ये विघ्नप्रदोऽभूद्दृशकण्ठतुल्यः ॥ ५६ ॥

वियुज्यसे यद्यपि मित्र कोक्या दिनव्यपायेपरमार्तिहेतौ ।
तथापि मध्ये युवयोर्नतावदस्त्यन्तरं यावदिहावयोस्तत् ॥ ५७ ॥

अथो रवावस्तमिते रघूणां पतिः स पम्पापुलिने निषण्णः ।
शुश्राव विश्लेषजदुःखभाजो रथाङ्गयोः संततमार्तनादम् ॥ ५८ ॥

उवाच तौ कूजितमुक्तकण्ठौ प्रदोषकाले करुणं रटन्तौ ।
चक्रौ युवानौ नवविप्रयोगादजस्रकामज्वरकीलदग्धौ ॥ ५९ ॥

अहो युवां रोदिथ ईदृशं किं कारुण्यधारावहमार्तरावम् ।
प्रपश्यथोऽन्योन्यमवारपारप्रसूत्वराम्बुव्यवधौ सुखं स्थः ॥ ६० ॥

हा हन्त रामं चिरविप्रयुक्तं प्राणप्रियाया विधिवञ्चितं माम् ।
प्रायो न जानीथ इहेदृशं यो दधाति कालानलतापमन्तः ॥ ६१ ॥

अहो अपूर्वा ज्वलनस्य वृत्तिर्ज्वलामि भस्मापि च दृश्यते न ।
विधाय भस्म ज्वलनोऽन्य आशु निर्वततेऽसौ न निवृत्तिमेति ॥ ६२ ॥

इति प्रलपता तेन मुक्तास्थूलाश्रुवार्मुचा ।
नीतं पम्पासरस्तीरं प्रावृषीव किलार्द्रताम् ॥ ६३ ॥

रामस्य हृदि संतापं विज्ञाय विरहोद्भवम् ।
दध्यौ प्रतिक्षणं तत्र पद्मपत्राणि लक्ष्मणः ॥ ६४ ॥

शयनीयं च तैरेव कृत्वा तस्य विचक्षणः ।
काञ्चीकटकहारादि पद्मपत्रैरकल्पयत् ॥ ६५ ॥

क्वचित् पम्पातीरे तनुमभिनवाशोकलतिका
मुरोज प्रोत्तुङ्गस्तवकभरनम्रां रघुपतिः ।
विलोक्य प्राणेशीं प्रणयपरिरम्भोत्सुकमनाः
पतन् सास्रं भ्रात्रा कथमपि धृतो दोर्युगवृतः ॥ ६६ ॥

कदाचिदुद्यन्तमुदीक्ष्य चन्द्रं कलंकलेखामलिनान्तरं सः ।
कृतैणनाभीतिलकाङ्कराढ्यं प्रियामुखेन्दुं बुबुधे रुषाक्तम् ॥ ६७ ॥

उपालभत तं साधुरये जनकनन्दिनि ।
अकस्मात्कुप्यसि कथं कान्ते मयि निरागसि ॥ ६८ ॥

देहि मे चुम्बनं तन्वि दूरे किं परिधावसि ।
भाले ते राजतेऽत्यर्थं कस्तूरीतिलकं प्रिये ॥ ६९ ॥

इति प्रलपितं श्रुत्वा तस्य सौमित्रिरब्रवीत् ।
अलं भ्रमेण चन्द्रोऽयमुदेति जगतां मुदे ॥ ७० ॥

इत्थं पम्पातीरनिवासां खिन्नः खिन्नः
कान्ताविश्लेषातिरुजार्तः श्रीरघुवीरः ।
भ्रात्रा शश्वत् सार्थचिरेण प्राहृतधैर्यो
निन्ये कानिचिदतिशयदीर्घतमानि दिनानि ॥ ७१ ॥

पम्पासरःस्नानविशुद्धचेतसां संगे मुनीनां क्वचिदात्तगोपनः ।
कुर्वन् स विज्ञानकथा मनोहराःकालं निनायातिवियोगदुःसहम् ॥ ७२ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे पम्पातीरनिवासो नाम त्रिषष्ट्यधिकशततमोऽध्यायः ॥ १६३ ॥

*

चतुःषष्ट्यधिकशततमोऽध्यायः

ब्रह्मोवाच

सुखयित्वा चिरं विप्रान् पम्पातीरनिवासिनः ।
निर्ययौ रघुशार्दूलस्ततोऽसौ सहलक्ष्मणः ॥ १ ॥

प्रणम्य भक्तिविनतो मुनीन् शीलवशीकृतान् ।
दक्षिणां दिशमारूढो गिरिकाननभीषणाम् ॥ २ ॥

कुर्वन्तौ विविधां वार्तामुभौ सज्यधनुर्धरौ ।
पथि घोरतरे प्राप्तौ सीतासम्प्राप्तिसत्वरौ ॥ ३ ॥

वसन्तौ गिरिदुर्गेषु वनेषु गहनेषु च ।
विश्रमन्तौ तरुतले सच्छायसुखदायिनी ॥ ४ ॥

क्वचित्तरुतले रामो मध्याह्नातपपीडितः ।
विश्रान्तिमभजद् भ्रात्रा भक्तेन सुनिषेवितः ॥ ५ ॥

विनीताध्वश्रमस्तेन पादसंवाहनादिभिः ।
उपधाय तदुत्सङ्गमशेत तरुमण्डपे ॥ ६ ॥

क्वचित्तरुभवैः पत्रैरातपत्रं विधाय सः ।
स भक्तिरार्यमभजद्गच्छन्तं तपनातपे ॥ ७ ॥

क्वचिदम्भोजिनीपत्रं पात्रीकृत्य महामतिः ।
सुदूरसरसस्तोयमानिनायार्यहेतवे ॥ ८ ॥

क्वचित्सकण्टकं मार्गमात्मचेलाञ्चलेन सः ।
ममार्ज निविडेऽरण्ये मार्जन्येव पदे पदे ॥ ९ ॥

क्वचित्पल्लवसंदोहं किरति स्म घने वने ।
सुतीक्ष्णाश्मकणव्याप्ते सुमित्रातनयोऽध्वनि ॥ १० ॥

क्वचिद्द्रुमहरित्पर्णविस्तीर्णव्यजनानिलैः ।
अध्वश्रमपरिश्रान्तमार्यमुच्चैरसेवत ॥ ११ ॥

भक्तिप्रह्वस्य तस्यासौ सेवयाशीलयुक्तया ।
अतुष्यद्रघुशार्दूलो वियोगज्वरितोऽपि सन् ॥ १२ ॥

शीलेनामृततुल्येन लक्ष्मणस्य रघूद्वहः ।
प्रियविश्लेषदग्धोऽपि नितरां परितोषितः ॥ १३ ॥

कदाचिन्निशिकाकुत्स्थश्चन्द्रे ज्योत्स्नाविसारिणि ।
उवाच लक्ष्मणं सद्यः प्रोद्भूतविरहज्वरः ॥ १४ ॥

कस्यचिद्वै तरोर्मूले सौमित्रे परिगृह्यताम् ।
मध्यं दिनगतो भानुस्तप्त्येष प्रचण्डरुक् ॥ १५ ॥

तमुवाच हसन्नेष श्रीभानुकूलभूषणः ।
रजन्यां का कथा भानोर्नन्त्वेव रजनीपतिः ॥ १६ ॥

तमूचे पुनरप्येष कथं विज्ञायतेऽनुज ।
भानुर्वा रजनीशो वा तुल्यस्तापोद्वयोरपि ॥ १७ ॥

उपलक्षय काकुत्स्थ कुरङ्गं रजनीकरे ।
इत्युक्तवति सौमित्रौ स्मृतकान्ताविलोचनः ॥ १८ ॥

विललाप रघुश्रेष्ठो हा कुरङ्गाक्षि जानकि ।
क्वासि क्वासीति सम्प्रोच्य मूर्छितः पतितः पथि ॥ १९ ॥

स तमुत्थापयामास प्रियाविरहविह्वलम् ।
धीरो भवेति बहुशो जल्पन् भक्तिकृताञ्जलिः ॥ २० ॥

एवमुच्चावचैर्वृत्तैः प्रव्यक्तं विरहव्यथः ।
मन्दं जगाम काकुत्स्थः कृत्वा भ्रातुः करे करम् ॥ २१ ॥

क्वचिद् घने वनेऽपश्यत्प्रियाचरणनूपुरम् ।
पतितं भुवि रत्नांशुसुप्रकाशीकृतस्थलम् ॥ २२ ॥

तमेष सहसाऽऽदाय करेण रघुनन्दनः ।
हृदा संगमयामास संतप्तेन वियोगतः ॥ २३ ॥

उदश्रुनयनो रामः प्रियाचरणनूपुरम् ।
उवाच विरहोत्तापविप्रलापमयं वचः ॥ २४ ॥

अयेनूपुररत्नांशुद्योतभूषितविग्रह ।
सखे तवापि संजाता ममेव विषमा दशा ॥ २५ ॥

तस्याश्चरणपद्मात्त्वं दूरगः किल सम्प्रति ।
अत एव सखे क्लिष्टो मौनं वहसि संततम् ॥ २६ ॥

क्व च ते तादृशा नादा अलिझाङ्कारमञ्जुलाः ।
नूनं विरहखेदेन सर्वं विस्मृतवानसि ॥ २७ ॥

अये तवेदं दौर्भाग्यं सखे कथमिवाजनि ।
येनैकान्तवने वासः सम्प्राप्तो मुनिक्त्वया ॥ २८ ॥

कदाचित् सोऽपि समयो भविष्यति सखे तव ।
यर्हि तच्चरणे लग्नः करिष्यसि मुदा ध्वनिम् ॥ २९ ॥

सखे स्वमान्तरं दुःखं कं नु ब्रूयां भवानिह ।
तिष्ठत्यह मिवात्यन्तमवाच्यविरहज्वरः ॥ ३० ॥

इति ब्रुवाणो जानक्या नूपुरं रत्नभूषितम् ।
हृदि संस्थापितं पश्यन् मुमूर्छ रघुनन्दनः ॥ ३१ ॥

तं संदधार सौमित्रिर्बाहुभ्यां परिरभ्य वै ।
हंतार्य धीरतामेहीत्यारोपितधृतिं वंदन् ॥ ३२ ॥

उवास घोरे विपिने प्रियेण भ्रात्रा समानीतफलादिभक्षः ।
निनायरात्रिंजनकात्मजाया विश्लेषदुःखेन नितान्तदीर्घाम् ॥ ३३ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे विरहरात्रिवासो नाम चतुःषष्ट्यधिकशततमोऽध्यायः ॥ १६४ ॥

*

पञ्चषष्ट्यधिकशततमोऽध्यायः

ब्रह्मोवाच

समुत्थाय ततोऽन्येद्युरुषस्युदितभास्करे ।
विरहेण दिशः पश्यन् घोरान्धतमसाऽऽवृताः ॥ १ ॥
दशकन्धरमाज्ञाय नितान्तं वध्यमात्मना ।
आततायी मुहुः पश्यन् धनुर्ज्यारूढमुद्धुरम् ॥ २ ॥
ततः प्रस्थातुकामोऽसौ सौमित्रिमिदमूचिवान् ।
कर्तुकामोऽनुषङ्गेण भक्तोद्धरणमन्तरा ॥ ३ ॥
अद्येदमद्भुतमं भिल्लानां वनमुत्तमम् ।
क्षेममध्यासिता स्वो वै सुखयन्तौ वनेचरान् ॥ ४ ॥
वनेऽस्मिन् मम भक्तैका विद्यते भिल्लसुन्दरी ।
यस्याः प्रेम्णा वशीभूतो मुनीन् विगणयाम्यहम् ॥ ५ ॥
एधते सहजं प्रेम तस्या मनसि मामवम् ।
मुनीनां वदनेभ्यो मे गुणा यदवधि श्रुताः ॥ ६ ॥
पूयन्तेऽखिलतीर्थानि तस्याश्चरण पांसुभिः ।
संततं मम भक्ताया मयि विन्यस्तचेतसः ॥ ७ ॥
त्रिलोक्यामपि कस्तुल्यो मम भक्तेन लक्ष्मण ।
न कामयेऽहं नितरां श्रियमप्यालयस्थिताम् ॥ ८ ॥
ब्रह्मा शेषः पशुपतिर्भक्त्यैव प्रियतां गताः ।
तेषां विभूतिमाहात्म्यं न मे प्रेमानुबन्धनम् ॥ ९ ॥
अतः सात्यन्तभक्ता मे सौमित्रे भिल्लजातिजा ।
पश्यतां मुनिवर्याणां माननीया विशेषतः ॥ १० ॥

वनजैः फलसंदोहैः सा नः सम्मानयिष्यति ।
तया भक्त्योपनीतं मे सुधातोऽप्यधिकं मतम् ॥ ११ ॥

न वर्णश्रेष्ठता न श्रीर्न कुलं न च बन्धुता ।
मम तोषाय सौमित्रे प्रीयेऽहं भक्तिमात्रतः ॥ १२ ॥

अवमत्य मुनिश्रेष्ठान् पश्यतः स्वालयागमम् ।
यास्ये भिल्लपुरन्ध्रीं तामूषितुं निशमेकिकाम् ॥ १३ ॥

त्वया मया च सौमित्रे तस्यै मानः प्रदीयताम् ।
पश्यत्सु मुनिवर्येषु मत्यक्ताश्रमसद्मसु ॥ १४ ॥

इत्युक्त्वा लक्ष्मणं राम उषः सुप्तोत्थितः प्रियः ।
अपश्यत्स्मितयुक्ताभ्यां दृग्भ्यां रघुकुलोद्वहः ॥ १५ ॥

ततोऽवधाय स्वात्मानं गुरुरूपं सनातनम् ।
प्रातः सुमङ्गलं कुर्वञ्शुश्राव पततां रवम् ॥ १६ ॥

पुरुषवर पुमर्थाः किं नु नः साधनीयाः
प्रणयभरपवित्रान्यैव काचिद्गतिस्ते ॥

जनकजनिविलासानन्दसम्भारभाजां
तवसविधसुखानां स्वात्मनो यत्र लाभः ॥ १७ ॥

इदमपरमुनीनां स्वात्ममानं मतंस्या-
न्मम तु मतमनङ्गानीकलावण्य मोषैः ॥

तव सहजवयस्याप्रेमवीचीनिषिक्तै-
स्तव सहजविलासैरात्मनः स्वात्मलाभः ॥ १८ ॥

प्रमुदवनविलासोल्लासलक्ष्मीनिधानं
त्वयि किल रमतान्नो मानसं रामचन्द्रे ॥

कृपयतु तव नित्यं संगिनी सा परा श्री-
रहमहह भवेयं नित्यलीलान्तरस्थः ॥ १९ ॥

परमसुखनिधानं कालमायाद्यपेतं
विलसतु तव नित्यं धाम तन्मन्मनःस्थम् ॥

यदि भुवि सुकृतीस्यात्कश्चिदुत्प्रेमसम्प-
द्भवति तदधिकृत्यै सोऽपि दूरादुपेत्य ॥ २० ॥

विधिसदनसुखान्तं सन्ति यावत्सुखानि ।
प्रणयसुखकलापास्तानि मात्रां भजन्ते ॥

इति ही समवधाय त्वज्जना राघवेन्दो
जहति न तव लक्ष्मीसंश्रितं पादपद्मम् ॥ २१ ॥

अधिकरसविलासैस्तावकीनै रमाया
हृदि किमपि वितीर्णक्षोभलोभक्षणेर्ष्यैः ।
वशय रघुपचित्तं मामकीनं कृपालो
भवति किल यतस्तत्संनिवृत्तान्यतर्षम् ॥ २२ ॥

मुहुरुपचितकामैरन्ययत्नप्रसक्तै
र्न हि सुलभमपीच्यं तावकं धाम राम ॥
इति सकलमपीदं सौख्यमाब्रह्म हित्वा ।
तव पदकमलान्तः साधुभृङ्गायितोऽहम् ॥ २३ ॥

तव पदमपदं यद्वाङ्मनोबुद्धिवृत्ते-
रतिशयरसभोगानन्दपुष्टिप्रकृष्टम् ।
कतम इह लभेत त्वत्प्रियायाः कृपादृक्
सुपरिचितमृतेऽन्यो यद्यपि ब्रह्मवित् स्यात् ॥ २४ ॥

एताः परमहंसानां शुकादीनां सुमेधसाम् ।
मुहुर्मुखोत्थिता गाथाः पक्षिभिर्घुष्टपूर्विकाः ॥ २५ ॥

श्रुत्वा रघूणां प्रवरः सीतया प्रियया युतः ।
मुमुदेऽतितरां ध्यायन् प्रमुद्वनविहारिणीः ॥ २६ ॥

अथोच्चचाल भगवान् पर्णकुट्याः श्रियान्वितः ।
सानुजो धृतसंनाहः खड्गी तूणी धनुर्धरः ॥ २७ ॥

मध्येवर्त्म समालोक्य रम्यां पुष्करिणीं प्रभुः ।
अवगाह्य जले तस्याः पूर्वां संध्यामुपास्त सः ॥ २८ ॥

तत प्रचलितो रामः प्रियाविरहितः पथि ।
लक्ष्मणेनानुगमिनो वनश्रीलग्नचक्षुषा ॥ २९ ॥

अथ तपति मयूखैर्भूरिमध्यंदिनार्के नभसि च परितो निःकूजकोयष्टिसार्थे ।
अपगतभुजिवेलः सानुजोऽयं वियोजी शबरवनमविक्षद्धाम यस्मिन् शवर्याः ॥ ३० ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे शबरीगृहोपगमने पञ्चषष्टयधिकशततमोऽध्यायः ॥ १६५ ॥

*

षट्षष्ट्यधिकशततमोऽध्यायः

ब्रह्मोवाच

तस्मिन् वने मुनिवराः सुदीप्तब्रह्मवर्चसः ।
सुदीर्घतपसः शुद्धाः श्रितवैखानसव्रताः ॥ १ ॥

तपस्यन्तस्तपो दीप्तं वानप्रस्थव्रते स्थिताः ।
अन्ये च गृहमेधीयैर्धर्मैरीशं यजन्ति ये ॥ २ ॥

अपरे निष्ठया नित्यं ब्रह्मचर्यमुपासते ।
इतरे यतिधर्मस्था ब्रह्मविद्वरसम्मताः ॥ ३ ॥

तथान्ये सांख्यपरमा योगाचार्यास्तथा परे ।
सर्वे प्राज्ञास्त्रिकालज्ञास्तपसा धूतकल्मषाः ॥ ४ ॥

नानाविधैर्व्रतैर्यज्ञैर्यजन्ते विधिभिर्द्विजाः ।
राममायान्तमालोक्य तस्थुस्ते विहितादराः ॥ ५ ॥

मद्गृहं राम आगत्य कतिचित्स्थास्यति क्षणान् ।
एवमाशासमायुक्ताः सर्वएव महर्षयः ॥ ६ ॥

पाद्यादिकं समायोज्य तस्थुः स्वस्वाश्रमे द्विजाः ।
सर्वेषां पश्यतां तेषां रामोऽगाच्छबरीगृहम् ॥ ७ ॥

यत्र सा भिल्लजातीया प्रकृत्या शुद्धमानसा ।
सर्वोपकरणैः सज्जा श्रीरामप्रेमविह्वला ॥ ८ ॥

आस्ते दूराद्वीक्ष्यमाणा रामस्यागमनं पथि ।
अकुण्ठोत्कण्ठ या पूर्णा पुलकाञ्चितविग्रहा ॥
क्षणं बहिः क्षणं मध्येवेश्म तिष्ठन्त्युदाशया ॥ ९ ॥

तयाऽऽहृतानि स्वगृहे वन्यानि विविधानि च ।
फलानि स्वादुभूरीणि संनिवेदयितुं प्रिये ॥ १० ॥

मधुराणि तथाम्लानि स्वादूनि वनजानि सा ।
आजहार पवित्राणि फलानि निजहस्ततः ॥ ११ ॥

स्वादु पीतानि रक्तानि पाकरम्याणि भूरिशः ।
संचितानि शुभामत्रेष्वनेकानि समंततः ॥ १२ ॥

मनोज्ञपत्रपात्रेषु रक्षितानि प्रयत्नतः ।
सुधारसमुरस्यानि मनःप्रेममितानिच ॥ १३ ॥

हरितानि मनोज्ञानि शाकानि विविधानि च ।
लवणाक्तानि परितः सज्जितानि सुभुक्तये ॥ १४ ॥

सुरभीणि सुभोज्यानि सुरसानि स्वभावतः ।
सुखावहानि भूरीणि भूरिप्रेमकराणि च ॥ १५ ॥
वनान्तादुपनीतानि श्रीरामाय प्रयत्नतः ।
सानुजाय सदाराय साधु भोजयितुं स्वयम् ॥ १६ ॥
स्वासनं वनपत्रौघैः शय्यां च वनपल्लवैः ।
पद्मैश्च पद्मपत्रैश्च चक्लृपेशबराङ्गना ॥ १७ ॥
पद्मानि चापि भूरीणि पुण्डरीकानि भान्ति च ।
इन्दीवराणि नव्यानि रक्तपद्मानि वृन्दशः ॥ १८ ॥
आनीतानि तया सम्यक् तथान्यतरुजानि च ।
कुसुमानि सुगन्धीनि नानावर्णानि भूरिशः ॥ १९ ॥
मालाकृतानि रम्याणि शय्यायां निहितानि च ।
अनुजाय च रामाय सुखार्थं संचितान्यलम् ॥ २० ॥
संविधाय समस्तानि तानि स्वालयमध्यतः ।
बहिर्द्वारप्रदेशे सा तस्थौ रामसमागमे ॥ २१ ॥
तां प्रेमबन्धपुलकाञ्चितगात्रयष्टिं स्वान्वीक्षणक्षणसुखावहितान्तरां च ।
भिल्लीं ददर्श कृपया रघुसार्वभौम आरात्तदीक्षणवशाद्विहितोत्सवाढ्यः ॥ २२ ॥
उवाच लक्ष्मण देवो दूराद्वीक्ष्य निजां हि ताम् ।
किंचित्स्मितमनोज्ञश्रीरुचिराननपङ्कजः ॥ २३ ॥
पश्य लक्ष्मण सैषा मे भक्ता शबरसुन्दरी ।
द्वारे स्थितानुपश्यन्ती मुहुरस्मत्समागमम् ॥ २४ ॥
पश्यास्या नयने भ्रातर्मद्दर्शनसलालसे ।
सुखयिष्यामि सुचिरमेनामहमनुग्रहात् ॥ २५ ॥
इत्युक्त्वा पश्यतां तेषां मुनीनां दीप्तवर्चसाम् ।
विवेश शबरीसद्म कृपायत्तो रघूद्वहः ॥ २६ ॥
आयान्तं रघुपुङ्गवं प्रियतमा युक्तं प्रभुं सानुजं
नव्येन्दीवरसुप्रसन्ननयनं पीताम्बरं सुन्दरम् ।
अंसन्यस्तधनुर्धरं कटियुगप्रोद्भासितूणीयुगं
खड्गाढ्यं जटया पिशंगमहसं भिल्ली ददर्शोच्चकैः ॥ २७ ॥
रामस्तस्याश्चक्षुषी पूरयाणः सान्द्रानन्दैर्दर्शनेन प्रभूतैः ।
पादन्यासैः पावयन् भूरितीर्थैर्विश्वाराध्यः प्राविशद्भावदर्शी ॥ २८ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे शबरीगृहागमनो नाम षट्षष्ट्यधिकशततमोऽध्यायः ॥ १६६ ॥

*

सप्तषष्ट्यधिकशततमोऽध्यायः

ब्रह्मोवाच

तमागतं सुन्दरमात्मनाथं विलोक्य सम्यक् शबरीक्षणाभ्याम् ।
अगाहतानन्दसमुद्रमन्तर्योगी यथा स्वात्मसुखानुभूत्या ॥ १ ॥

हृष्ट्वाथ सा किंमपि राघवयोर्विलोक्य प्रीतिं परां स्वविषयां ननु हेतुवर्याम् ।
भूरिप्रभूतपरमप्रणायार्द्रचित्ता स्मित्वाब्रवीद्वच इदं सरसार्णरुच्यम् ॥ २ ॥

एह्येहि जीवनधन प्रणयानुबन्ध याथार्थ्यकृद्रघुपते नयमाभिराम ।
त्वय्यागते त्रिभुवनाभिमते गृहं मे पूर्णा मनोरथततिर्निखिलार्थदातः ॥ ३ ॥

यत्संश्रुतोऽसि सुचिरं रघुसार्वभौम स्वप्नेषु यच्च कलितोऽसि मुहुः स्वयंत्वा ।
सर्वं तददद्य सफलं समभून्ममेश साक्षान्निरीक्षणपथं त्वयि यातमात्रे ॥ ४ ॥

यत्साधनैः सुवितते: सुकृतोर्जितैर्न लभ्यं कथंचन मुनिप्रवरैरपीश ।
तत्तावकीनममृतादधिकं कथं नु लब्धास्मि दर्शनमहं महनीयमौले ॥ ५ ॥

अचिन्त्य एष त्वदनुग्रहः प्रभो यतः कृतार्थत्वमहो गतास्म्यहम् ।
अहो अमीभिर्वचनोपचारकैरलं प्रकृत्यैव सुसौहृदेत्वयि ॥ ६ ॥

इत्युक्त्वा पुलकाच्छन्नवपुः शवरसुन्दरी ।
मध्येगृहं निनायामुं श्रीरामं सानुजं प्रभुम् ॥ ७ ॥

पाद्यार्घाचमनंस्नानं मधुपर्कादिसंविधाः ।
प्रेम्णैव कल्पयामास शबरी स्वात्मभर्तवे ॥ ८ ॥

ददौ मृद्वासनं तस्मै श्रीरामाय महात्मने ।
रघूणां पतयेयोगिवर्यमानसवासिने ॥ ९ ॥

सौमित्रये पृथगदादासनं तत्समीपतः ।
तरुपल्लवसंदोहपद्मपत्रोपकल्पितम् ॥ १० ॥

पादसंवाहनं चक्रे भीता राघवयोरियम् ।
नितान्तं तोषयामास वचोभिरमृतोपमैः ॥ ११ ॥

अथानयत्सा वनवृक्षपर्णद्रोणोपकल्पानि सुखावहानि ।
फलानि मूलानि दलानि चैव शाकानि नानाविधमञ्जुलानि ॥ १२ ॥

मधुराणि तथाम्लानि मधुराम्लानि भूरिशः ।
स्वादूनि फलमूलानि भर्त्रे भूयांस्युपाहरत् ॥ १३ ॥

पृथक् पृथग्द्रोणगतानि तानि स्वादूनि रुच्यानि रसावहानि ।
आमानि पक्वानि मनोहराणि सा तत्पुरुस्ताच्चकलृपे फलानि ॥ १४ ॥

तानि स्वयं स बुभुजे परमात्मा सनातनः।
यज्ञभुग् यज्ञपुरुषो महोदारः सहानुजः॥ १५॥

श्लाघे प्रतिकवलं रघुप्रवीरो भुञ्जानोऽमृतरसभाञ्जिसत्फलानि।
प्रेमाक्तान्यधिकरसावहानि तानि भक्तायाः स्वदितुमसौ परं प्रवीणः॥ १६॥

अम्लानि लवणाक्तानि बुभुजे रघुचन्द्रमाः।
स्वदमानो रसग्राही स्वादयंश्च प्रियानुजम्॥ १७॥

कन्दानि पावकभ्रष्टान्यनेकानि वनेचरी।
रसभेदप्रभिन्नानि कल्पयामास तत्पुरः॥ १८॥

कानिचिद्भुक्तप्रायाणि सूपप्रायाणि कानिचित्।
कानिचिद्वयञ्जनप्रायाण्यलमस्वदत स्वयम्॥ १९॥

फलानि कानिचित्तत्र प्रभवे मुग्धयानया।
परीक्षार्थं समास्वाद्य मिष्टानि जगृहेतमाम्॥ २०॥

तान्येष हृदि जानानः प्रेमाक्तानि स्वभावतः।
बुभुजेऽभ्यधिकप्रीतिरास्वादनविचक्षणः॥ २१॥

सस्वदेऽतितरां रामः श्लाघमानो मुहुर्मुहुः।
शबरीवदनोच्छिष्टान्यतिस्वादूनि हर्षितः॥ २२॥

शबरीवदनोच्छिष्टैः प्रेमपूतैः फलै रसौ।
आत्मानं तर्पयामास सर्वाभ्यधिकसारवित्॥ २३॥

इमानि मे किलात्यर्थं जनयन्ति मनोरुचिम्।
फलानि प्रायः केनापि स्वदितानि शुकेन वै॥ २४॥

नाहं तृप्यामि शबरि मन्त्रपूतै रसावहैः।
द्विजप्रदत्तैर्भूयोभिरन्नैः सुस्वादुभोजनैः॥ २५॥

यथा तृप्यामि मद्भक्तैर्भक्त्या समुपकल्पितैः।
पत्रैः शाकैः फलैर्मूलैर्यथावदुपसंचितैः॥ २६॥

अद्याहं खलु तृप्तोऽस्मि शबरि त्वद्गृहागतः।
पत्रशाकफलैरेतैस्त्वया प्रेम्णोपकल्पितैः॥ २७॥

सफलं ते वनं भूयात्संततं भूरिभूरुहम्।
भूरिपद्मसरोवारि भूरिकन्दप्रसूनकम्॥ २८॥

पर्यायेणर्तवः सर्वाः फलानि सुवतां सदा।
अल्पपर्जन्यफलदाः सन्तु ते वनवीरुधः॥ २९॥

अयत्नलभ्यफलदा भवन्त्वोषधियो वने।
अनामयाः सदा सन्तु वने ते पशुपक्षिणः॥ ३०॥

अव्याहता तव मतिः सर्वदा वर्ततां मयि ।
मनोरथास्ते सिद्ध्यन्तु यथेष्टविषयोन्मुखाः ॥ ३१ ॥

मानयन्तु सदैव त्वां पूज्यामिव महर्षयः ।
इह त्वं सुखमेधस्व विमुच्यस्व परत्र च ॥ ३२ ॥

इति रघुपतिः स्वादं स्वादं फलानि फलानि च
प्रकृतिमधुरास्वादान् कन्दाननेकविधानपि ।
रुचिरवचनैराशंसानः शुभान्यनुजान्वितः
किमपिमुमुदे तत्रासीनः सुखं शबरीगृहे ॥ ३३ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे शबरीगृहनिवासो नाम सप्तषष्ट्यधिकशततमोऽध्यायः ॥ १६७ ॥

*

अष्टषष्ट्यधिकशततमोऽध्यायः

ब्रह्मोवाच

ललज्जेऽतितरां सा तु तत्त्वज्ञानवती क्षणात् ।
स्वोच्छिष्टानिफलान्यस्य समर्प्यजगदीशितुः ॥ १ ॥

पूर्वं तु प्रेमरभसादविचारितमाचरत् ।
उत्पन्नतत्त्वधीः पश्चाच्छुशोच शबरी हृदि ॥ २ ॥

अहो मया कृतमिदं किं तु साक्षाज्जगत्पतौ ।
यदुच्छिष्टफलान्यस्मै समर्पितवती कुधीः ॥ ३ ॥

क्वायं महामहाराजमौक्तिकरत्नमरीचिभिः ।
नीराजिताङ्घ्रिकमलो रामस्त्रिभुवनेश्वरः ॥ ४ ॥

क्वाहं जात्याधमामूढा स्त्रीधर्मेण विदूषिता ।
अनुग्रहोऽस्यैव परो नीताहं येन पात्रताम् ॥ ५ ॥

अपराधमहं चक्रे स्वोच्छिष्टविनिवेदनात् ।
प्रेममत्तमतिः किंचिन्न विचारितवत्यपि ॥ ६ ॥

इति तामनुशोचन्तीं रामआत्माखिलात्मनाम् ।
उवाच तत्परप्रेमवशीभूतोऽखिलार्थदः ॥ ७ ॥

श्रीराम उवाच

त्वयाऽऽहृतानि स्वादूनि प्रेम्णैवानन्यवृत्तिना ।
खण्डितानिफलान्येतान्यखण्डानि मुदे मम ॥ ८ ॥

जाने प्रेमवनीवास्तुः कापि धन्यतमाशुकी ।
आस्वादयत् फलान्येतान्यतिमाधुर्यभाञ्जि यत् ॥ ९ ॥

अथ त्वमतिपुण्यासि भिल्लजातिरपि स्फुटम् ।
वेदविद्भ्योऽपि विप्रेभ्यो मदनुग्रहभाजनम् ॥ १० ॥

जातासि सपदि त्वं तु तीर्थपावनपावनी ।
परमेणमयि प्रेम्णा तवानेनातिभूयसा ॥ ११ ॥

श्रौतं स्मार्तं तान्त्रिकं वापि कर्म पुण्योपास्ति स्तद्विशुद्धं तपो वा ।
ज्ञानं ब्रह्मात्मैक्य संविद्विशुद्धं न मे दृष्ट्यै जायते भाग्यपूर्णे ॥ १२ ॥

प्रेमैवैकं मय्यसाधारणं यत् तैस्तैर्भावैः सुविशुद्धैरुपेतम् ।
स्वभावेनासोढविश्लेषलेशं तेनैवाहं स्यां वशीभूतचित्तः ॥ १३ ॥

सते प्रेमा वर्ततां मय्यत्न्यो विवेकविज्ञानविवर्जितोऽपि ।
विवेकविज्ञाननिधिर्महीयान् येनाहमासं त्वद्वशे भिल्लपत्नि ॥ १४ ॥

इत्युच्चैः प्रेममधुरं ब्रुवाणो रघुनन्दनः ।
भुक्तिं समापयामास सानुजः शबरीगृहे ॥ १५ ॥

शबरीसमुपानीतैः पानीयैः स्वादुशीतलैः ।
पीयूषविमलैः शुद्धैः स आत्मानमतर्पयत् ॥ १६ ॥

शबरीकरपद्मस्थपात्रधाराविनिर्गतैः ।
मुखमक्षालयद् रामः सानुजोऽमलवारिभिः ॥ १७ ॥

ताम्बूलमर्पयामास किराती क्रमुकान्वितम् ।
मुखरञ्जनकृच्चूर्णसंयुतं तत्र सानुजे ॥ १८ ॥

आदर्शं दर्शयामास साऽऽत्मनाथाय निर्मलम् ।
स दृष्ट्वदनोऽस्मार्षीज्जानकीं सम्मुमूर्छ च ॥ १९ ॥

चिरात्प्रत्याहृतप्राणो भ्रात्रासौमित्रिणा ततः ।
ऊचे शबरसुन्दर्या रामो जनकजापतिः ॥ २० ॥

शबर्युवाच

किं नु पुण्येषु मे नाथ कृतेषु बहुलेष्वपि ।
दूषणं समभूद्येन पश्यामि त्वां वियोगिनम् ॥२१॥

धन्यास्तेषां दृशोराम ये त्वां पश्यन्ति सर्वदा ।
श्रीमज्जनकराजेन्द्रसुतया रमयान्वितम् ॥२२॥

अन्यस्यां त्वमवस्थायां दृष्टोऽसि रघुनन्दन ।
कदा नु जानकीयुक्तो मदृशोरतिथिर्भवेः ॥२३॥

अन्यैव सा पराभिख्या विदेहसुतया तव ।
यां पिबन्ति जनाः केचिद्भूरिभाग्यान्विता भुवि ॥२४॥

दत्तोऽपि परमानन्दो मह्यमर्द्धायते प्रभो ।
तामर्द्धाङ्गहरां नाथ वव प्राणेश्वरीं विना ॥२५॥

श्रीराम उवाच

आगामिनि तु कल्पे वै त्वं मद्विहरणालये ।
प्रमुद्वने प्राप्तजनिर्मां द्रक्ष्यसि तया युतम् ॥२६॥

तावत् प्रेमरसानन्दसमुद्रलहरीभरैः ।
अवसिक्ततनुस्तिष्ठ परे ब्रह्मणि मत्पदे ॥ २७ ॥

मद्भक्तिरसपूतायास्तव नित्यं मदात्मनः ।
इहामुत्राथ वा लोके न विशेषोऽस्ति कश्चन ॥ २८ ॥

अनुजानीहि मां भद्रे गन्तुमग्रे वनान्तरम् ।
कर्तुमग्रेतनं कार्यमहं सज्येऽस्मि सम्प्रति ॥ २९ ॥

इत्यनुज्ञाप्य तां भक्तां भगवान् रघुनन्दनः ।
जगाम सानुजस्तस्यां पश्यन्त्यामेव सस्पृहाम् ॥ ३० ॥

तस्यै स इत्थं प्रससाद देवः प्रेमप्लुतस्वात्मधिये शबर्यै ।
महामुनीनामपि योऽस्त्यलभ्यः शोऽचिंतनीयः खलु तत्प्रसादः ॥ ३१ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे शबरीप्रसादो नामाष्टषष्टयधिकशततमोऽध्यायः ॥ १६८ ॥

*

एकोनसप्तत्यधिकशततमोऽध्यायः

ब्रह्मोवाच

गते तु रघुशार्दूले सानुजे शबरी गृहात् ।
मुनयो ब्राह्मणाश्चेत्थमूचुस्तद्वनवास्तवः ॥ १ ॥

अहो बुद्धिविपर्यासो महतामपि दृश्यते ।
प्रायोऽखिलक्षोभकृतः कालस्यैव विपर्ययात् ॥ २ ॥

यदेष सम्मतः शिष्टै रामो रघुकुलोद्भवः ।
शबर्या गृहमागच्छेदनादृत्यमुनीनपि ॥ ३ ॥

प्रायो हि श्रोत्रियस्यान्नं पुनाति सकुलं जनम् ।
दुर्लभं सर्वथा चेह तदभावे जलं पिबेत् ॥ ४ ॥

याचित्वापिजनैर्ग्राह्यं श्रोत्रियान्नं सुदुर्लभम् ।
येन भक्षितमात्रेण पूयते सकुलो जनः ॥ ५ ॥

ते वयं श्रोत्रिया विप्राः प्राप्तज्ञाना गुरोर्मुखात् ।
वेदे चाधीतिनः साङ्गे शुद्धकर्माण एव च ॥ ६ ॥

शिष्टसम्मतमाज्ञाय रामं रघुकुलोद्भवम् ।
सार्घहस्ता अतिष्ठाम पश्यन्तः स्वगृहागमम् ॥ ७ ॥

स एषोऽस्माननादृत्य सार्घहस्तान् द्विजन्मनः ।
सानुजोऽद्यातिथिर्भूत्वा विवेश शबरीगृहम् ॥ ८ ॥

सातिमन्दा दुराचाराधमा जात्या च कर्मणा ।
चकार कथमातिथ्यं रामे शिष्टौघसम्मते ॥ ९ ॥

अग्राह्यं जलमप्यस्याः का कथान्नस्य वाडवाः ।
अहो बुद्धिविपर्य्यासो राघवस्य बतेदृशः ॥ १० ॥

नास्मान् दृशाप्यसौ शिष्टोजग्राह क नु वाक्यतः ।
पश्यतोऽस्मानतिक्रम्य ययौ तस्या निकेतनम् ॥ ११ ॥

अहो शीलमहो प्रज्ञा अहो कुलमहो क्रिया ।
शबर्या अतिथीभूतरामचन्द्रप्रपूजने ॥ १२ ॥

धर्मः कृते चतुष्पादस्त्रेतायां त्रिपदात्मकः ।
द्वापरे च द्विपादेकपादश्चाग्रे भविष्यति ॥ १३ ॥

नष्टप्रायं वयं विद्मोऽद्धुनैवाग्रेऽस्य का कथा ।
यत्रेदृशः कुलीनोऽपि यातो बुद्धिविपर्ययम् ॥ १४ ॥

इत्थं विकत्थमानास्ते मुनयः श्रौत्रगर्विताः ।
निनिन्दुः शबरीं तस्या अतिथिं च रघूद्वहम् ॥ १५ ॥

हीयेतामुत्रिकं श्रेयो भगवन्मात्रनिन्दया ।
ऐहिकं चामुत्रिकं च श्रेयस्तद्भक्तनिन्दया ॥१६ ॥

क्षमेताप्यपराधं स्वं धीरोदात्तगुणो हरिः ।
भक्तप्रियो न क्षमते स्वभक्तस्यापराधनम् ॥ १७ ॥

शोणितौघवहा सद्यस्तेषामाश्रमगा सरित् ।
कृमिविद्भस्मबहुला चाभवदुर्गमा क्षणात् ॥ १८ ॥

अग्निहोत्रे स्थितश्चाग्निस्तत्क्षणात्प्रशमं ययौ ।
रामभक्तविनिन्दायाः फलं सद्यो व्यदृश्यत ॥ १९ ॥

निन्दयन्ते यत्र शुचयो रामभक्ता दृढव्रताः।
कुतस्तत्र भवेत् क्षेममापदश्च पदे पदे ॥ २० ॥

ततो हाहाकृतमभूत सर्वमाश्रममण्डलम्।
ब्राह्मणाश्च समुद्विग्ना बभूवुः स्वस्वसद्मनि ॥ २१ ॥

नित्यस्नानक्रियास्तेषां प्रतिबद्धास्तदाभवन्।
अकस्माद्रक्तवाहिन्यां जातायां सरिति क्षणात् ॥ २२ ॥

अभूज्जलं निपानेषुकृमिविड्भस्मभिश्चितम्।
ततश्च ब्राह्मणाः सर्वे शुशुचुः स्वस्वचेतसि ॥ २३ ॥

अहो किमेतत् संजातमकस्माद् विषमं फलम्।
उपस्थितो हि सर्वेषां धर्मनाशोऽसुसंक्षयः ॥ २४ ॥

एकदैव महत्पापं सर्वेषां समुपस्थितम्।
किं कुर्मः क्व नु गच्छामः कृच्छ्र ईदृग्विधोऽद्यनः ॥ २५ ॥

गोवधो ब्रह्महत्या वा पापमन्यदथापि वा।
संलग्नं न सुविषमं यस्येदं समभूत्फलम् ॥ २६ ॥

इतीव शोचयन्तस्ते ब्राह्मणा हीनदर्चसः।
नाधिजग्मुः स्वदुःखान्तं प्रतिबद्धक्रियाकुलाः ॥ २७ ॥

तेषामाविरभूदद्योगी भगवान् कुम्भसम्भवः।
ववन्दिरेतं सर्वेऽपि संक्षीणब्रह्मवर्चसाः ॥ २८ ॥

तानुवाच ततोऽगस्त्यो विषण्णमनसो द्विजान्।
अहो म्लानश्रियो जाताः कथं सर्वे द्विजोत्तमाः ॥ २९ ॥
त ऊचुस्तेन सम्पृष्टा मुनिना वाडवोत्तमाः।
उपजातं यथावृत्तमकस्मादाश्रमे निजे ॥ ३० ॥
श्रुत्वा तेषां तथा वृत्तमगस्त्यो योगचक्षुषा।
तत्कारणमपश्यद्वं अपराधं महीयसः ॥ ३१ ॥
ततस्तानुक्तवानेष भगवान् सर्वदर्शनः।
शृणुध्वं मुनयो यूयं महीयस्यपराधिनः ॥ ३२ ॥
महतो ह्यपराधेन किं किं दुःखं न जायते।
तदद्ययूयं ब्रूथ धर्मज्ञा यथा वृत्तमभूदिह ॥ ३३ ॥
कः स्विद्धि सुमहानत्र भवदाश्रममण्डले।
आगन्तुको वा स्थायी वा यूयं यदपराधिनः ॥ ३४ ॥

इत्थं वचः कुम्भयोनेर्निशम्य तेऽन्योन्यवक्त्रेक्षणकारिणो द्विजाः।
स्मृत्वाऽऽत्मना जातमज्ञानतस्तद् बभाषिरे ते महतोऽपराधनम् ॥ ३५ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे मुनिजनवलेशो नामैकोनसप्तत्यधिकशततमोऽध्यायः ॥ १६९ ॥

*

सप्तत्यधिकशततमोऽध्यायः

मुनय ऊचु

अपराद्धमिह ब्रह्मन् प्रायोऽस्माभिर्न कस्यचित् ।
एकं तु तव वक्ष्यामो भगवन् सर्वदर्शिनः ॥ १ ॥

वसत्यस्मिन् वने काचित्किराती भाग्यसम्भृता ।
अतिथिः समभूदस्या रामो रघुकुलोद्भवः ॥ २ ॥

श्रोत्रियान् ब्राह्मणश्रेष्ठान् सार्घहस्तान् कृतस्पृहान् ।
पश्यतोऽस्माननादृत्य ययौ तस्या निकेतने ॥ ३ ॥

शिष्ट एवं कथं कुर्यात्तेनास्माभिरमर्षतः ।
किराती सदनं गच्छन् विगीतो रघुपुङ्गवः ॥ ४ ॥

अधमा कर्मणा जात्या मांसगृध्नुः किरातजा ।
कथं सा योग्यतां प्राप्ता रामस्यातिथिदानतः ॥ ५ ॥

इति निन्दावचोऽस्माभिस्तथ्यं चेत्तस्य भाषितम् ।
नापराद्धं तदास्माभिरन्यथा त्वपराधिनः ॥ ६ ॥

श्रुत्वा कुम्भोद्भवस्तेषां वचनं तदकैतवम् ।
सर्वदर्शी मुनिश्रेष्ठ इदमाह द्विजोत्तमान् ॥ ७ ॥

हन्त द्विजवराः सम्यगपराधो बभूव वः ।
किराती रामभक्ता सा विगानं कथमर्हति ॥ ८ ॥

सोढव्यमेव रामेण विगानं स्वस्य कर्हिचित् ।
न तु रामः स्वभक्ताया विगानं सोढुमर्हति ॥ ९ ॥

तदेवानर्थमूलं वो जातमाश्रममण्डले ।
निन्दा हि महतो हन्ति विद्या वीर्यं यशः श्रियम् ॥ १० ॥

अतः समुपजाताः स्थ प्रक्षीणब्रह्मवर्चसाः ।
प्रोषिता श्रीर्गृहेभ्यो वो विपदश्च समागताः ॥ ११ ॥

रामस्य च परं तत्त्वं न जानीथ द्विजोत्तमाः ।
अतो विनिन्दनं तस्य कृतवन्तः स्थ मोहतः ॥ १२ ॥

स वै परात्परः साक्षाद् भक्तानामभयप्रदः ।
भुवो भारावतारार्थमवतीर्णो रघोः कुले ॥ १३ ॥

विना रामेण वै को नु हन्यादेकेन पत्त्रिणा ।
दृप्तासुरचमूसंघानजेयांस्त्रिदशैरपि ॥ १४ ॥

विचित्राण्यस्य वीर्याणि गुणाः संख्यातिगा विभोः ।
कर्माणि लोकपुराणानि कीर्तयः सर्वमङ्गलाः ॥ १५ ॥

स स्वयं भगवान् रामो मायेशो गुणवर्जितः ।
तथापि लोकदृष्ट्यैष गुणवानिव लक्ष्यते ॥ १६ ॥

न तत्र कालमायाद्याः प्रभवन्ति कुतः परे ।
यत्रास्य परमं धाम चराचरभुगव्ययम् ॥ १७ ॥

स्वयं भासातपत्येष विश्वसाक्षी सनातनः ।
अन्यानपेक्षो भगवान् विश्वसर्गादिषु स्थितः ॥ १८ ॥

गायन्त्येनं श्रुतिगणाः श्रयन्त्येनं महर्षयः ।
तापसाः शुद्धमनसो भजन्त्येनं समाहिताः ॥ १९ ॥

गतिर्मतिः प्रभुश्चैष विश्वात्मा विश्वदैवतः ।
स एष भगवान् रामः ककुत्स्थकुलसम्भवः ॥ २० ॥

रामतत्त्वं परं वित्त दुर्ज्ञेयं तन्महात्मभिः ।
श्रुतिमूर्द्धसु संरूढं गिरां यत्र समन्वयः ॥ २१ ॥

तदवज्ञानतो विप्राः कथं न स्थापराधिनः ।
तमेव शरणं यात तदा सुखमवाप्स्यथ ॥ २२ ॥

इतोऽविदूर एवासौ प्रायो गच्छति सानुजः ।
तं शीघ्रं शरणं यात स वो दुःखं हरिष्यति ॥ २३ ॥

साक्षाद्ब्रह्मण्यदेवोऽसौ द्विजधर्मत्रयीहितः ।
सर्वदेवोपकर्ता च यज्ञात्मा यज्ञभुक् स्वयम् ॥ २४ ॥

संजातमात्रे रघुवंशकेतौ यस्मिन् परस्मिन् पुरुषप्रकाण्डे ।
उच्चैरवाद्यन्त सुरालयेषु सहानकैर्दुन्दुभयः सुभव्याः ॥ २५ ॥

स रामचन्द्रःसुकृती गुणज्ञो महायशा विप्रसुरत्रयीणाम् ।
हिताय वर्त्स्यत्यवनौ चिराय कुर्वन् पवित्रं विपुलं चरित्रम् ॥ २६ ॥

इतीरितं कुम्भभवेनयोगिना श्रुत्वा सुसंजातधियो द्विजोत्तमाः ।
गन्तुं रघुश्रेष्ठसमीपगोचरे संकल्पयामासुरुदित्वरस्पृहाः ॥ २७ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डेऽगस्त्यकृत-श्रीरामतत्त्वप्रबोधो नाम सप्तत्यधिकशततमोऽध्यायः ॥१७०॥

★

एकसप्तत्यधिकशततमोऽध्यायः

ब्रह्मोवाच

ततोऽगस्त्यं पुरस्कृत्य मुनयः सर्व एव ते।
काकुत्स्थमन्वगुः शीघ्रं यान्तं घोरतरे पथि ॥ १ ॥

त आरादृष्यमूकाद्रिं प्राप्ता रामस्य संनिधिम्।
ववन्दे तानसौ दृष्ट्वा दूरादेव द्विजोत्तमान् ॥ २ ॥

कुम्भोद्भवपुरोगास्ते ददुस्तस्मै शुभाशिषः।
विहाय गमनं रामो मध्येमार्गं व्यतिष्ठत ॥ ३ ॥

तेऽर्घहस्ता तदुश्चार्घं तस्यार्घ्यस्य महात्मनः।
तानुवाचैष काकुत्स्थो युगपत्समुपागतान् ॥ ४ ॥

अहो महर्षयः सर्वे किमतीव त्वरायुताः।
युगपन्मामुपगताः कच्चिद्वः कुशलं वने ॥ ५ ॥

कच्चिन्न राक्षसैर्दुष्टैर्यूयमुद्वेजिता द्विजाः।
कच्चिन्न परचक्रोत्थं भयमाश्रमकानने ॥ ६ ॥

कच्चिद्वोऽग्निस्त्रयीसंस्थो यज्ञशालोऽस्ति भावुकः।
कच्चिद्व आश्रमसरिद्भूरिस्रोताः शुभोदका ॥ ७ ॥

कच्चिद्व आश्रमवने भूरुहाः फलशालिनः।
लूयन्ते नैव दुर्दान्तैः पौरजानपदैर्जनैः ॥ ८ ॥

कच्चिद्व आश्रमजुषो विशोकाः पशुपक्षिणः।
उद्वेज्यन्ते न भिल्लाद्यैर्नृशंसैर्मांसगृध्नुभिः ॥ ९ ॥

संहत्य युगपद्विप्रा ब्रूतागमनकारणम्।
उद्विजेऽहं भवद्धेतोः का वो भीर्मयि जीवति ॥ १० ॥

अथोचुर्ब्राह्मणाः सर्वे सूचिताः कुम्भयोनिना।
सर्वे त्वां रघुशार्दूल याताः स्म शरणं वयम् ॥ ११ ॥

येषां न आश्रमेष्वग्निर्यज्ञियः प्रशशाम ह।
अकस्माच्चैव संजाता शोणितौघवहा सरित् ॥ १२ ॥

कृमिविड्भस्मबहुला दुर्गमा पशुपक्षिभिः।
निपानानि तथैवासन् क्षीणं नो ब्रह्मवर्चसम् ॥ १३ ॥

तन्मूलं कृतमस्माभिर्विगानं ते रघूद्वह।
त्वद्भक्तायास्तथा तस्याः शबर्य्याः सुकृतान्मनः ॥ १४ ॥

तन्नः क्षमस्वनितरामपराधं कृपानिधे।
कोऽन्यस्त्वद्ब्राह्मणान् रक्षेद्वीर ब्रह्मण्यदैवत ॥ १५ ॥

इति श्रुत्वावचस्तेषां धर्मात्मा रघुपुङ्गवः ।
उवाच करुणासिन्धुः शोचंस्तस्य प्रतिक्रियाम् ॥ १६ ॥

श्रीराम उवाच

शान्तोऽग्निरग्निहोत्रीयः पुनः प्रज्वलतु द्विजाः ।
प्रदक्षिणाग्निः शुभकृद्भवतामाश्रमेषु सः ॥ १७ ॥

पुण्यस्रोतोवहा भूयाद्भवतामाश्रमे नदी ।
सदैवास्तु शुभं विप्रा भवतामप्रतिक्षतम् ॥ १८ ॥

मद्विगानं मया विप्राः सोढमेव न संशयः ।
तस्यास्तु मम भक्तायां विगानं सर्वनाशनम् ॥ १९ ॥

सैव क्षमापनीया वो गत्वा तस्या निकेतनम् ।
भिल्लजातिरितीयं वः शङ्कनीया न सोत्तमा ॥ २० ॥

सा धन्या भूरिभागा च महायोगा तपस्विनी ।
नमस्या सर्वदेवानां कथान्येषां तु का नृणाम् ॥ २१ ॥

नित्यं वशेस्म्यहं तस्या मत्प्रेमावहितात्मनः ।
कृपयिष्यति वो विप्रा नियतं सा कृपावती ॥ २२ ॥

तस्याः पादरजःस्पर्शादितीर्थं तीर्थतामियात् ।
अतो भूयः समाराध्या भवद्भिः सा किरातिनी ॥ २३ ॥

तस्या विगानतो जातमनिष्टं वो द्विजातयः ।
न मद्विगानतः शक्यं यदहं भवतां हितः ॥ २४ ॥

मां तु वित्त भवेदकदैवतं नित्यमेव भवदेकसंश्रयम् ।
युष्मदङ्घ्रिरजसा द्विजातयः पूय एव भृशमेष सान्वयः ॥ २५ ॥

ब्राह्मणाः सन्ति मे प्राणा दैवतं मम ब्राह्मणाः ।
ब्राह्मणैः शुभवानस्मि शपेऽहं यदतोऽन्यथा ॥ २६ ॥

न मत्कृतमनिष्टं वः शङ्कनीयं द्विजातयः ।
भवतामेव भव्यार्थं विचराम्येष भूतले ॥ २७ ॥

इति निगदय सतान् रघुपुङ्गतः प्रणतिभिः परितुष्टमतीन् द्विजान् ।
समुपदिश्य हितं शबरी नतिं कथमगस्त्यमुखान् विससर्ज तान् ॥ २८ ॥

ते वाडवा रघुपतेर्वचसा तदैव कुम्भोद्भवं मुनिवरं पुरतो निधाय ।
जग्मुः क्षणेन शबरी विपिनं समेता यत्रास्ति सा रघुवरस्य गुणान् गृणाना ॥ २९ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे शबरीगृहोपगमनो नामैकसप्तत्यधिकशततमोऽध्यायः ॥ १७१ ॥

*

द्विसप्तत्यधिकशततमोऽध्यायः

ब्रह्मोवाच

ततस्ते ब्राह्मणाः सर्वे प्रणम्य रामसेविकाम् ।
अमर्षरहितां शान्तां शबरीमिदमूचिरे ॥ १ ॥

हे देवि मातः शबरि रामभक्ते कृपावति ।
मनसा कृपयास्मभ्यं ब्राह्मणेभ्यः शुभेक्षणे ॥ २ ॥

तव भक्त्या वशीभूतो भगवान् रघुपुङ्गवः ।
अतस्त्वां जननि स्तोतुं गिरा नो पारयामहे ॥ ३ ॥

जग्राह त्वत्कृतातिथ्यं रामो भुवनदुर्लभः ।
काङ्क्षतोऽस्माननादृत्य ब्राह्मणान् श्रोत्रियानपि ॥ ४ ॥

अतस्त्वं श्रोत्रियेभ्योऽपि ब्राह्मणेभ्यो वरीयसी ।
त्वयोद्धृता निजकुले दश पूर्वे दशापरे ॥ ५ ॥

निवसन्त्या त्वया देवि वनमेतत् सुपावनम् ।
तीर्थभूतमभून्मातः का ते स्तुतिरतः परम् ॥ ६ ॥

अजानता जानता वा यत्ते केनापि किंचन ।
अपराद्धमभून्मातस्तत्त्वं क्षन्तुमिहार्हसि ॥ ७ ॥

पुरस्तात्तव पश्चाद्वा यत्किंचिदपराधजम् ।
मातस्त्वदनुकम्पातस्तन्न आगोऽपगच्छतु ॥ ८ ॥

जननि त्वं सदा पूता रामभक्तिप्रभावतः ।
त्वद्दर्शनेन पूयन्ते महापातकिनो जनाः ॥ ९ ॥

त्वया वशीकृतो रामः प्रेममात्रेण संततम् ।
मुनीनां शुद्धचित्तानां यो वै दूरतरेस्थितः ॥ १० ॥

धन्यं तव परं प्रेम धन्यं ते ज्ञानमूर्जितम् ।
धन्यं तवकुलं मातर्धन्या त्वं तत्र सम्भवा ॥ ११ ॥

विज्ञापनमिदं मातः श्रूयतां नस्त्वयाधुना ।
शोणितौघवहा जाता अस्मदाश्रमगा सरित् ॥ १२ ॥

तस्यां प्रक्षालय निजौ पादौ त्वं विश्वपावनौ ।
ततः सा पूतसलिला प्रकृतिस्था भविष्यति ॥ १३ ॥

विलुप्तस्नानाचमनाः प्रतिबद्धक्रिया वयम् ।
पूतायां तत्र वाहिन्यां भविष्यामः सुखान्विताः ॥ १४ ॥

आशिषस्ते प्रयोक्ष्यामो याभिस्तव रघूद्वहे ।
भविष्यति परा भक्तिर्भूयो वृद्धिमुपेयुषी ॥ १५ ॥

त्वत्पादरजसः स्पर्शात् पूयेरन् किल नो गृहाः ।
अग्निहोत्रस्थितो वह्निः स पुनः प्रज्वलिष्यति ॥ १६ ॥

प्रतिबद्धक्रियाः सन्ति स्वाश्रमेषु द्विजातयः ।
करिष्यन्ति च कर्माणि यथास्वं त्वदनुग्रहात् ॥ १७ ॥

त्वं शान्तधीर्हरेर्भक्ता कामक्रोधविवर्जिता ।
तथा कुरु यथा विप्राः प्राप्नुयुः सुखमाश्रमे ॥ १८ ॥

प्रभुर्ब्रह्मण्यदेवस्ते रामचन्द्रो दयानिधिः ।
तद्भक्ता त्वं तथैवाहा वर्त्तेथा इति नो मतिः ॥१९॥

इतीरितं साधुधियां द्विजन्मनां निशम्य लज्जानुगता किरातिनी ।
प्रणम्य तान् सार्घकरा यथाविधि प्रपूज्य सानन्दमिदं वचोऽब्रवीत् ॥ २० ॥

शबर्युवाच

अलं मे श्लाघया विप्रा अधमाहं च योनितः ।
अतीवेदमनर्हं च यन्मां यूयं नमस्यथ ॥ २१ ॥

यूयं हि श्रोत्रियश्रेष्ठा ज्ञानविज्ञान भाजनाः ।
तपोधनाः सर्ववर्णनमस्कार्या द्विजातयः ॥ २२ ॥

अपकृष्टतमे जन्तौ महद्भिर्विहिता नतिः ।
आयुः श्रियं यशो हन्ति तस्य नास्तीह संशयः ॥ २३ ॥

अहं दीनतमा लोकेऽधमा जात्याच कर्मणा ।
कथं नु योग्यतां याता यन्मां नमथ वाडवा ॥ २४ ॥

रामस्तु भगवान् साक्षादकिंचनजनप्रियः ।
स चेन्न दीने कृपयेद्गतिः स्यात्तस्य तर्हि का ॥ २५ ॥

अचिन्त्यैव कृपा तस्या रामस्य परमात्मनः ।
नापेक्षते कुलं शीलं धनं योग्यत्वमेव च ॥ २६ ॥

विपरीतमिदं मन्ये यत्पादरजसा मम ।
ब्राह्मणानां श्रोत्रियाणां शुद्ध्येयुः सदनानि वः ॥ २७ ॥

स्वत एव विशुद्धानि नित्यं सद्मानि वो द्विजा ।
यत्राभिगमनाज्जन्तुः सकुलः पूयतेतराम् ॥ २८ ॥

किं मां नयथ धर्मज्ञा उपहासं जगत्त्रये ।
भवदुच्छिष्टकवलेऽप्यनर्हा नीचयोनिजाम् ॥ २९ ॥

दत्तं च कृपया मह्यं युष्माभिर्दर्शनं द्विजाः ।
तद्ब्रूत भूरिशर्माणो हितं किं करवाणि वः ॥ ३० ॥

सर्वकर्मस्वनर्हाहं पुरैव विधिनाकृता ।
किं वो वदानि स्वाचारा अनुकम्पध्वमेव तत् ॥ ३१ ॥

इत्युक्त्वा शबरी दीना कुम्भयोनेर्महामुनेः ।
चरणावग्रहीद् दूरादस्पृश्यामीति शङ्कया ॥ ३२ ॥

ततस्तामाह भगवान् कुम्भयोनिर्महाशयः ।
हा रामभक्ते भवती कथंनुत्यास्ति न द्विजैः ॥ ३३ ॥

यस्याः प्रेम्णा वशीभूतो भगवान् रघुपुङ्गवः ।
साक्षात्परात्परः सैष यया ज्ञातश्च सेवितः ॥ ३४ ॥

उत्तिष्ठ देवि ते शीलं लोकोत्तरमुपेशलम् ।
किरातिनि शुभं भूयात्तव साधुतमाकृते ॥ ३५ ॥

यथावदन्त्यमी मातर्ब्राह्मणास्ते गृहागताः ।
तथैव क्रियतां देवि न विलम्ब स्व सम्प्रति ॥ ३६ ॥

त्वत्पादक्षालनाद् देवि शुद्धिमेष्यति सा सरित् ।
अमीषां चाश्रमस्थानं पुनीहि रामसेविके ॥ ३७ ॥

प्रतिबद्धक्रिया एते सर्व एव द्विजातयः ।
अनुतिष्ठन्तु कर्माणि तत्पुण्यं च लभस्वभोः ॥ ३८ ॥

इति निर्बन्धतस्तेषां रामभक्ता किरातिनी ।
सा तथैवाकरोत्साधुर्यथा तैरभिकाङ्क्षितम् ॥ ३९ ॥

ततस्ते तां पुरोधाय शबरीं रामसेविकाम् ।
जग्मुर्मुनिवराः सर्वे स्वीयमाश्रममण्डलम् ॥ ४० ॥

तस्यामागतमात्रायां मुनीनामाश्रमे मरुत् ।
अवहत् कोमलस्पर्शो निवृत्ताखिलचण्डिमा ॥ ४१ ॥

प्रादुरासीदपूर्वा श्रीर्वने च सुषमाभवत् ।
प्राकाशन्ताग्निहोत्रेषु प्रशान्ता अपि पावकाः ॥ ४२ ॥

पादप्रक्षालनात्तस्या यथापूर्वमभूत्सरित् ।
शीतस्वच्छोदकवहा फुल्लपङ्कजशालिनी ॥ ४३ ॥

निपानेष्वभवद्वारि सुगन्धि स्वादुशीतलम् ।
पूर्वाधिकतरा सम्पदाश्रमेषु व्यवर्त्तत ॥ ४४ ॥

फलिनः पुष्पवन्तश्च नवपल्लवपूरिताः ।
गुञ्जद्भ्रमरपुञ्जाढ्या व्यशोभन्ताश्रमद्रुमाः ॥ ४५ ॥

सरांसि फुल्लपद्मानि स्वच्छशीतोदकानि च ।
अवहन् परमां शोभां क्वणद्भी राजहंसकैः ॥ ४६ ॥

ततः सुरकरोन्मुक्तकल्पवृक्षप्रसूनजा ।
अपतच्छबरीमुर्द्धिन्न वृष्टिः कौतुकवर्द्धिनी ॥ ४७ ॥

माहात्म्यं रामभक्तायास्तस्यास्तत्प्रेक्ष्य वाडवाः ।
अत्यर्थविस्मितस्वान्ताः समंत्तात्तुष्टुवुस्तराम् ॥ ४८ ॥

सा स्तूयमाना मुनिभिः समंतादगस्त्यमुख्यैर्द्विजसत्तमैस्तैः ।
विलज्जमाना मनसा किराती ततो निजां पर्णकुटीं जगाम ॥ ४९ ॥

माहात्म्यं रामभक्तायाः शबर्याः सुमहात्मनः ।
य एतच्छृणुयानित्यं सोऽपि दुःखात् प्रमुच्यते ॥ ५० ॥

जात्या निषिद्धा क्रियायापि हीना किरातवंशप्रभवापि सा स्त्री ।
सीतापतेर्भक्तिभरप्रभावाद्बभूव मान्या नितरां मुनीनाम् ॥ ५१ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे शबरीमाहात्म्य-सूचनो नाम द्विसप्तत्यधिकशततमोऽध्यायः ॥ १७२ ॥

*

त्रिसप्तत्यधिकशततमोऽध्यायः

ब्रह्मोवाच

स आरादृष्यमूकाद्रीं बभूव रघुनन्दनः ।
सलक्ष्मणः प्रियतमाविश्लेषकृशविग्रहः ॥ १ ॥

कुर्वन्तौ विविधां वार्तां नीलनीरदसुन्दरौ ।
घोषयन्तौ धनुर्जीवां यान्तौ तौ भ्रातरौ पथि ॥ २ ॥

दूरान्निरीक्षितौ वीरौ कमनीयसुविग्रहौ ।
ऋष्यमूकाद्रिशिखरे निषण्णैः कपिपुङ्गवैः ॥ ३ ॥

सुग्रीवहनुमत्प्रमुखैः कावेताविति तर्कितौ ।
प्रेक्ष्यमाणौ च साशङ्कं स्वभावाच्चललोचनैः ॥ ४ ॥

तत्र वीरो रवे पुत्रः सुग्रीवो नाम वानरः ।
भ्रात्रा पराजितोऽत्यर्थं किष्किन्धाया विवासितः ॥ ५ ॥

मन्त्रयाणाश्चिरेणास्ते प्रच्छन्नः कपिभिः समम् ।
बालिनो वधमन्विच्छंस्ताराभोगाभिलाषुकः ॥ ६ ॥

नलोनीलोऽङ्गदश्चैव तुरीयो हनुमांस्तथा ।
कपयोऽमी महावीराः सुग्रीवस्य हिते स्थिताः ॥ ७ ॥

तेषां चिरादभून्मन्त्रस्तत्र वालिवधं प्रति ।
त्रैलोक्ये को नु पर्याप्तो हन्तुं तं बलिनां वरम् ।
अतः सर्वेऽपि कपयो मूढाः कर्तव्यकर्मणि ॥ ८ ॥

प्रच्छन्नास्तद्भयादेव ऋष्यमूके महीधरे ।
निलीय खलु सुग्रीव आस्ते कपिभटैः समम् ॥ ९ ॥

एतस्मिन्नन्तरे तौ तु दृष्टौ तैः कृततर्कणैः ।
राघवौ लोकरुचिरौ घोषयन्तौ धनुर्गुणम् ॥ १० ॥

ततः सुग्रीव आहेदं हनुमन्तं महाबलम् ।
अये कपिवरज्ञेयौ कौ चैतौ लोकसुन्दरौ ॥ ११ ॥

वीराधिवीरौ विमलौ पुण्डरीकविलोचनौ ।
तापसौ जटिलौ चीरवल्कलाजिनवाससौ ॥ १२ ॥

विभूतिधवलौ श्यामौ ज्वलन्तौ पावकोपमौ ।
धनुर्धरौ नराकारौ निर्जराविव तेजसा ॥ १३ ॥

सर्वावयवशोभाढ्यौ सिंहविक्रान्तिशालिनौ ।
अमानुषबलौपेतौ वीर्यवन्तौ दुरासदौ ॥ १४ ॥

प्रायस्तावेव खल्वेतौ श्रीमन्तौ रामलक्ष्मणौ ।
यौ पुरोदाहृतौ मह्यं मुनिभिः शैलवासिभिः ॥ १५ ॥

खरदूषणहन्तारौ त्रिशिरोवधकारकौ ।
एकबाणहतानेकसहस्रबलराक्षसौ ॥ १६ ॥

हृतशूर्पणखानासाश्रवणौ खड्गधारया ।
कृतरुद्रधनुर्भङ्गौ बालकावेव यौ पुरा ॥ १७ ॥

हृतभार्गवसंदर्पौ विश्वामित्रमखावनौ ।
ताडकामारणकरौ सुबाहुवधपण्डितौ ॥ १८ ॥

भुवि विख्यातयशसौ संस्तुतौ मुनिपुङ्गवैः ।
तावुभौ भ्रातरावेतौ मद्भाग्यान्न भविष्यतः ॥ १९ ॥

तयोर्ज्येष्ठस्तु यो रामः स वै पुरुषपुङ्गवः ।
स चेन्मद्भ्रातरं हन्यात् कृतार्थः स्यां तदा न किम् ॥ २० ॥

श्रूयतेऽपि च तद्भार्या रावणेन बलीयसा ।
हृता रक्षोधिनाथेन ततश्चिन्तातुरोऽप्ययम् ॥ २१ ॥

तस्य मे च गतिस्तुल्या ततो मैत्री न किं भवेत् ।
कृतकृत्यावुभौ स्यातां साहाय्यं चेत्परस्परम् ॥ २२ ॥

अतोऽहं वेत्तुमिच्छामि कावेतौ पुरुषोत्तमौ ।
तद्गच्छ हनुमञ्छीघ्रमानयोदन्तमेतयोः ॥ २३ ॥

इत्युक्तो हनुमांस्तेन ऋष्यमूकस्य मूर्धनि ।
प्रणम्य तं विनिर्यातो रामलक्ष्मणसंनिधौ ॥ २४ ॥

सोऽपश्यदागत्य पथि प्रयान्तौ धनुर्धरौ तौ पुरुषप्रवीरौ ।
परस्परं कोमलमालपन्तौ निशागमे स्थानपरिग्रहार्थम् ॥ २५ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे हनुमदागमनो नाम त्रिसप्तत्यधिकशततमोऽध्यायः ॥१७३॥

*

चतुस्सप्तत्यधिकशततमोऽध्यायः

ब्रह्मोवाच

वीराधिवीरौ तौ दूरात्तमायान्तमपश्यताम् ।
महाबलं महासत्त्वं हनुमन्तं कपीश्वरम् ॥ १ ॥

मेरुशृङ्गप्रतीकाशं तप्तहाटकवर्चसम् ।
गगनोच्छितलांगूलमाजानुभुजशोभितम् ॥ २ ॥

हारकुण्डलकेयूरकाञ्चीवलयभूषितम् ।
तेजःप्रदीप्तनयनं दीव्यत्प्रांशुतमाकृतिम् ॥ ३ ॥

रक्तवस्त्रसमाबद्धमल्लकच्छविभूषितम् ।
उदयत्पूर्णचन्द्राभमुखदीधितिशालिनम् ॥ ४ ॥

स आगत्य समीपे तौ ववन्दे कपिपुङ्गवः ।
एषोऽस्मि हनुमान्नाम वायुपुत्रोऽञ्जनीसुतः ॥ ५ ॥

वन्देवां पुरुषश्रेष्ठौ कौ युवां वदतं मम ।
सुग्रीवेण कपीन्द्रेण प्रेषितो भवदन्तिकम् ॥ ६ ॥

प्रवृत्तिं चापि युवयोर्ज्ञातुमिच्छामि तत्त्वतः ।
आधिज्यधनुषौ वीरौ युवां किं कर्तुमिच्छथः ॥ ७ ॥

जानामि युवयोर्मैत्रीमासाद्य कपिपुङ्गवः ।
विवासितोऽपि स्वस्थानात् सपत्नं जेतुमिच्छति ॥ ८ ॥

भवन्तौ खलुलक्ष्येते अप्रमेयबलौ भुवि ।
तेजसाप्रतिमौ वीरौ सिंहविक्रान्तिशालिनौ ॥ ९ ॥

मन्ये भवेऽस्मिन् युवयोः सादृश्यं नैव कुत्रचित् ।
युवां सेवितुमिच्छामि कायेन मनसा गिरा ॥ १० ॥

यौ तर्कितौ युवां दूरात्तावेव यदि निश्चितम् ।
सिद्ध एव कपीन्द्रस्य तदा साधुमनोरथः ॥ ११ ॥

निशम्य कपिमुख्यस्य तथा हनुमतो वचः ।
उवाच रघुशार्दूलो विहस्य प्रणयान्वितम् ॥ १२ ॥

महाबल महासत्त्व वायुसूनोऽञ्जनीसुत ।
एह्येहि त्वाहमिच्छामि परिरब्धुं सहानुजः ॥ १३ ॥

इत्युक्त्वा सानुजो रामः परिरेभेऽञ्जनीसुतम् ।
अथ द्रुमतले सम्यक् संनिषण्णास्त्रयोऽपि ते ॥ १४ ॥

तावुभौ पुरुषश्रेष्ठौ तृतीयः स कपीश्वरः ।
उवाच रघुशार्दूलस्तं सम्बोध्य कृतादरः ॥ १५ ॥

स्वागतं ते कपिश्रेष्ठ महाबलपराक्रम ।
त्वया मैत्रीमहं कर्तुमिच्छामि पुरुषर्षभ ॥ १६ ॥

विचरन्तं वने विद्धि सुतं दशरथस्य माम् ।
रामं भूरिपरिक्लिष्टं प्रियाविश्लेषदुःखतः ॥ १७ ॥

सुमित्रायाश्च तनयो लक्ष्मणोऽयं ममानुजः ।
न नु भाग्यवशादेव लब्धस्त्वं मित्रमावयोः ॥ १८ ॥

ननु रक्षोधिनाथेन प्रिया मेऽपहृता वने ।
रहःस्था चोरवृत्त्यैव जिघांसुस्तमहं द्रुतम् ॥ १९ ॥

बलान्निहत्य तं वीरं मम पत्न्यपहारकम् ।
आनिनीषुःप्रियामस्मि सहायाश्चेद्भवादृशाः ॥ २० ॥

श्रुत्वा रघुवतेर्वाक्यमाञ्जनेयो मुदान्वितः ।
उवाच स्मितसंशोभिवदनाम्बुरुहः स तम् ॥ २१ ॥

अहो राम रघुश्रेष्ठ विश्वाराम दयानिधे ।
वितर्कितं यथा तेन सुग्रीवेण महात्मना ।
तत्तथाभूतमेवैतदहोभाग्यं महद्धि नः ॥ २२ ॥

त्वां विना भुवने कोऽन्य ईदृशं तेज उद्वहेत् ।
अहो भाग्यं वनस्यास्य यस्मिन्नुपगतोभवान् ॥ २३ ॥

अहो भाग्यं कपीन्द्रस्य मैत्रीमिच्छतियस्त्वया ।
अहो भाग्यंममाप्यद्धा दास्यमिच्छामियस्तव ॥ २४ ॥

सुग्रीवस्य कपीन्द्रस्य भ्राता ननु महाबलः ।
वालीनाम बलात्तेन तस्य प्राणप्रिया हृता ॥ २५ ॥

विवासितश्च किष्किन्धानगर्याः स पराजितः ।
इत्येष तव साहाय्यमन्विच्छति कपीश्वरः ॥ २६ ॥

सपत्नं तस्य बलिनं पराभूप रणे भवान् ।
तं स्थापयति चेद्राज्ये तत्सिद्धोऽस्य मनोरथः ॥ २७ ॥

तदनेकमहापद्मवानराणां चमूस्तव ।
कार्यसिद्ध्यै व भवेन्नूनं प्राणैरपि रघूद्वह ॥ २८ ॥

एवं चेत्पुरुषश्रेष्ठ तदा रक्षोऽधिपः कियात् ।
निहन्य तं खलं शीघ्रमानेष्यसि निजप्रियाम् ॥ २९ ॥

प्रेषितोऽहं कपीन्द्रणे त्वत्सकाशमिहागतः ।
इच्छामि तेन भवतः सखित्वं गुणवत्तरम् ॥ ३० ॥

इत्युक्तः पवनसुतेन रामचन्द्रोभक्तिप्रह्वेणाशु संजाततोषः ।
तन्मैत्रीं समभिलसन् हृदा मनस्वी कान्ताहेतोः खिन्नचेता उवाच ॥ ३१ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे हनुमन्मेलनो नाम चतुस्सप्तत्यधिकशततमोऽध्यायः ॥ १७४ ॥

*

पञ्चसप्तत्यधिकशततमोऽध्यायः

श्रीराम उवाच

सुग्रीवेणाहमिच्छामि दृढां मैत्रीमसंशयम् ।
महाबले दशमुखे चिकीर्षुरभिषेणनम् ॥ १ ॥

भवांस्तत्र प्रतिनिधिः सखे भवितुमर्हति ।
यथास्य मयि मे चास्मिन् जायेत प्रत्ययो महान् ॥ २ ॥

सर्वेषां किल भावानां विश्वासो मूलकारणम् ।
मन्त्रो जपस्तपः सेवा मैत्री त्वेनं विना मुधा ॥ ३ ॥

मयि विश्वासमुत्पाद्य तस्य तत्र तथा मम ।
भवानपि मरुत्पुत्र सख्यं मयि करिष्यति ॥ ४ ॥

सख्यं हि मूलं सख्यस्य जयस्य यशसः श्रियः ।
विद्यायाश्चैव वीर्यस्य भुक्तेर्मुक्तेश्चमारुते ॥ ५ ॥

दुर्लभं महतः सख्यं लोके मारुतनन्दन ।
अन्योन्यमुपजातं यदन्योन्यं सुखयेत्तराम् ॥ ६ ॥

अकैतवं च हनुमन् भवेत् सख्यस्य कारणम् ।
सख्यं हेतुः प्रत्ययस्य स हेतुः कार्यसम्पदः ॥ ७ ॥

कामात् क्रोधाद्भयाल्लोभात्प्रतिष्ठातोऽर्थ गौरवात् ।
यद्भवेत् पुरुषे यस्मिन् न तत्सख्यं न स सखा ॥ ८ ॥

निरूपाधि तु यज्जातमन्योन्यमभिवर्द्धते ।
भूयो गुणानर्जयति तत्सख्यं सख्यमुच्यते ॥ ९ ॥

कार्यैव सज्जनैर्मैत्री निसर्गादुपकारिभिः ।
कृत्वा संवर्द्धनीया च परस्परसुखैषणैः ॥ १० ॥

गुणवानपि लोकेऽस्मिन्न कार्यो दुर्जनः सखा ।
दृश्यमाना गुणास्तस्य दोषा एव भवन्ति हि ॥ ११ ॥

निर्गुणाऽपि भृशं कार्यः सज्जनः सततं सखा ।
स्वभावो हि गुणस्तस्य किं कार्या अपरे गुणाः ॥ १२ ॥

दुर्लभः सज्जनो लोके निसर्गात् सुकृतस्पृहः ।
तस्य मैत्रीं जनो लब्ध्वा सततं सुखमश्नुते ॥ १३ ॥

मैत्री तु समयोरेव भवत्यत्र सुखावहा ।
सुखं वा यदि दुःखं वा सममेवार्यमाणयोः ॥ १४ ॥

न जातु मैत्री वैषम्ये लोके दृष्टचरी क्वचित् ।
पयोलवणयोर्यद्वद्वारिपावकयोरिव ॥ १५ ॥

दुःखी दुःखवतो मित्रं सुखी सुखवतस्तथा ।
न सुखी दुःखिनो मित्रं न दुःखी सुखिनोऽपि च ॥ १६ ॥

मूर्खपण्डितयोर्मैत्री दरिद्रधनिनोस्तथा ।
विषयिज्ञानिनोश्चैव लोके हास्याय जायते ॥ १७ ॥

राजा मित्रं भवेन्नैव नैव योगी च निःस्पृहः ।
एतेषां विदधन्मैत्रीं जनोयाति विडम्बनम् ॥ १८ ॥

मैत्रीं सप्तपदामाहुर्वनेऽपि चलतां सताम् ।
अकैतवं च सौहार्दं यत्र स्यादुपचायवत् ॥ १९ ॥

प्रतिष्ठाधनलिप्सुत्वमुपाचार उदासता ।
नैते समुपयुज्यन्ते यत्र मैत्री परस्परम् ॥ २० ॥

एकोऽपि सुजनो मित्रं हरत्येव विपद्गणम् ।
अनेकोऽपि सुसम्पृक्ता विज्ञेया दु[1]र्जना मुधा ॥ २१ ॥

देशे देशे च कार्याणि मित्राणि निरुपाधितः ।
न ज्ञायते कुत्र काले कःस्वित्समुपयुज्यते ॥ २२ ॥

अल्पीयानिति नो दास्यं मैत्रीमिच्छद्भिरात्मना ।
कालो हि समवैषम्यहेतुः किंस्वित्करिष्यति ॥ २३ ॥

---

१. भुवने-मथु०, अयो० ।

महानपि कृतं मित्रं लघुतां याति दैवतः ।
लघुश्चापि नरो मित्रं महत्त्वं यातिमारुते ॥ २४ ॥

मैत्र्याश्च परमं तत्त्वं को जानाति विशेषतः ।
सर्वो हि मित्रयोगेन दृश्यते सुखमश्नुवन् ॥ २५ ॥

भूमेर्जलधरो मित्रमनपेक्षितनिष्कृतिः ।
काले काले सुसंतप्तां यस्तां सिञ्चति वारिभिः ॥ २६ ॥

जलस्य कतमं मित्रमनपेक्षितनिष्कृति ।
स्वयं तत्पङ्कलिप्तोऽपि यस्तं निष्पङ्कतां नयेत् ॥ २७ ॥

वह्नेः समीरणो मित्रमनपेक्षितनिष्कृतिः ।
यः स्वयं लब्धतापोऽपि तमुद्दीपयितुं क्षमः ॥ २८ ॥

समीरस्य तरुर्मित्रमनपेक्षितनिष्कृतिः ।
यस्तेन दत्तकम्पोऽपि पुष्पैः सुरभपत्यमुम् ॥ २९ ॥

चकोरस्य शशी मित्रमनपेक्षितनिष्कृतिः ।
यस्तेनाचम्यमानोऽपि तं नन्दयति रश्मिभिः ॥ ३० ॥

अब्जस्य भास्करो मित्रमनपेक्षितनिष्कृतिः ।
यस्तमिस्त्रामपाकृत्य नित्यदा बोधयत्यमुम् ॥ ३१ ॥

शशी च कुमुदां मित्रमनपेक्षितनिष्कृतिः ।
दिनतापं निराकृत्य यस्तं नन्दयते करैः ॥ ३२ ॥

जलस्य च शरन्मित्रमनपेक्षितनिष्कृतिः ।
या वर्षापङ्कमुद्धृत्य निर्मलीकुरुते ह्रदः ॥ ३३ ॥

वस्त्रस्य च जलं मित्रमनपेक्षितनिष्कृति ।
यत्तन्मलं स्वयं धृत्वा स्वरूपस्थं करोत्यदः ॥ ३४ ॥

पुरुषस्य पटोमित्रमनपेक्षितनिष्कृतिः ।
स्वेदाद्यैर्दूष्यमाणोऽपि यस्तं रक्षति चात्मना ॥ ३५ ॥

सर्पस्य चन्दनं मित्रमनपेक्षितनिष्कृति ।
यत्तेनाक्रान्तमप्याशु सुखयत्यमुमात्मना ॥ ३६ ॥

घनस्यजलधिर्मित्रमनपेक्षितनिष्कृतिः ।
यस्तेन पीयमानोऽपिविभर्तिसलिलैरमुम् ॥ ३७ ॥

लताया भूरुहो मित्रमनपेक्षितनिष्कृतिः ।
यस्तयाऽऽक्रम्यमाणोऽपि तामुत्तुङ्गयतिध्रुवम् ॥ ३८ ॥

सरांसि सरितः कूपास्तरुगुल्मलतादयः ।
गिरिर्जलधरो नावः सूर्याचन्द्रमसौ मही ॥ ३९ ॥

सज्जनः पुरुश्चैते मित्राणि जगतः किल ।
वहन्त्यमी शरीराणिपरोपकृतिहेतवे ॥ ४० ॥

अवश्यं चैव कर्तव्यं निःस्पृहेणापि जन्तुना ।
मित्रमेकमपिप्राज्ञो यत्कृत्वा सुखमश्नुते ॥४१॥

दूषणानि च वक्ष्यामि मैत्रीभङ्गकराणि ते ।
निरस्य तानि सर्वाणि मैत्री कार्या सदा नरैः ॥ ४२ ॥

यः प्रत्यक्षं प्रियं वक्ति परोक्षे त्वप्रियं सदा ।
तेन साकं यदा मैत्री तदा किंस्वित्सुखं लभेत् ॥ ४३ ॥

यश्छिद्रान्वेषणं कुर्योदात्मच्छिद्राणि गोपयन् ।
तेन साकं यदा मैत्री तदा किंस्वित् सुखं लभेत् ॥ ४४ ॥

यः सदोपकृतिग्राही स्वयं चानुपकारकः ।
तेन साकं यदा मैत्री तदा किंस्वत् सुखं लभेत् ॥ ४५ ॥

यस्तुष्यत्युपचारेण स्वयं त्वनुपचारकृत् ।
तेन साकं यदा मैत्री तदा किंस्वित् सुखं लभेत् ॥ ४६ ॥

यः सत्यभाषणात् कुप्येत्तुष्येन्मिथ्योपचारतः ।
तेन साकं यदा मैत्री तदा किंस्वित् सुखं लभेत् ॥ ४७ ॥

यो न शिक्षयते मांगं कार्याकार्यविवेचनात् ।
तेन साकं यदा मैत्री तदा किंस्वित् सुखं लभेत् ॥ ४८ ॥

संकटे यस्तु सम्प्राप्ते नैव सार्थं ददाति च ।
तेन साकं यदा मैत्री तदा किंस्वित् सुखं लभेत् ॥ ४९ ॥

सुसंहतो यः क्षेमेषु विषमेष्वेत्युदासताम् ।
तेन साकं यदा मैत्री तदा किंस्वित् सुखं लभेत् ॥ ५० ॥

यो मूढः सर्वकार्येषु प्राज्ञः कर्तुं च योऽक्षमः ।
तेन साकं यदा मैत्री तदा किंस्वित् सुखं लभेत् ॥ ५१ ॥

यः परस्य मनो गृह्णन् मनः स्वस्य निगूहति ।
तेन साकं यदा मैत्री तदा किंस्वित् सुखं लभेत् ॥ ५२ ॥

यः सुतां भगिनीं भार्यां दोषान्मित्रस्य पश्यति ।
तेन साकं यदा मैत्री तदा किंस्वित् सुखं लभेत् ॥ ५३ ॥

चिबुके यस्य रोमाणि न वक्षसि न गण्डयोः ।
तेन साकं यदा मैत्री तदा किंस्वित् सुखं लभेत् ॥ ५४ ॥

अवेरिव दृशौ यस्य मेषस्येव च मारुते ।
तेन साकं यदा मैत्री तदा किंस्वित् सुखं लभेत् ॥ ५५ ॥

विड़ाल इव नेत्राभ्यां काणो ह्रस्वश्च यः पुमान् ।
तेन साकं यदा मैत्री तदा किंस्वित् सुखं लभेत् ॥ ५६ ॥

पुरुषेण स्त्रिया साकं मैत्री कार्या न कर्हिचित् ।
आरम्भे लाञ्छनं यत्र परिणामोऽस्य कीदृशः ॥ ५७ ॥

पुरुषस्य पुमान् मित्रं स्त्रीणां स्त्र्येव सुनिश्चितम् ।
साम्ये हि मैत्रीफलदा वैषम्ये निष्फलेव सा ॥ ५८ ॥

परोक्षे यः प्रियं ब्रूते समक्षेनापि चाप्रियम् ।
प्राणैरप्युपकर्त्ता च तद्वै मित्रस्य लक्षणम् ॥ ५९ ॥

क्षेमेषु पृथगप्यस्तु सङ्कटे संहतो भवेत् ।
संहते नाप्यपचयं तद्वै मित्रस्य लक्षणम् ॥ ६० ॥

मातरं भगिनीं मार्यां यः[1] पश्येत्स्वसुतादिवत् ।
समानसुखदुःखश्च समानोदयसंक्षयः ॥ ६१ ॥

अगृध्नुःपत्युपकारस्य स्वयं नित्योपकारवान् ।
दूरस्थोऽपि समीपे यः स वै मित्रं सुदुर्लभः ॥ ६२ ॥

एतद्विज्ञाय हनुमन् मैत्री कार्या विचक्षणैः ।
इह तेन सुखं प्राप्य परेत्य सुखमश्नुते ॥ ६३ ॥

अहं मैत्रीं करिष्यामि कपिराजेन धीमता ।
करिष्याम्यस्योपकारं स चेन्मोपकरिष्यति ॥ ६४ ॥

तदा तस्यैव शोभा सा मित्रप्रत्युपकारिणः ।
नो चेदकेतेवं श्रित्वा भुवने सुखमेधताम् ॥ ६५ ॥

इति रघुपतिवाक्यैर्मित्रतातत्त्वयुक्तैः सपदि सुखितचेता वीरवर्योहनूमान् ।
कपिपरिवृढभूपो भूतिकामः कथंचित् कलितमतिरवोचत् तेन मैत्रीं चिकीर्षुः ॥६६॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे मैत्रीतत्त्वविवेचनो नाम पञ्चसप्त्यधिकशततमोऽध्यायः ॥१७५॥

*

षट्सप्तत्यधिकशततमोऽध्यायः

हनुमानुवाच

यदाह रघुशार्दूल भवान् मैत्रीविवेकवित् ।
तत्तथैव दयानाथ जगन्मित्रमसि प्रभो ॥ १ ॥

त्वं त्रैलोक्योपकर्त्तासि कस्ते प्रत्युपकारकृत् ।
त्वं मित्रं गतो राम कस्ते मैत्रीं जनोऽर्हति ॥ २ ॥

यस्तु कश्चिन्महाभागस्त्वया मैत्रीं विधास्यति ।
ऐहिकामुष्मिकार्थेषु स निश्चिन्तो भविष्यति ॥ ३ ॥

१. सुतां यः स्वस्य रक्षति ।—मथु०, अयो० ।

समर्थोऽसि स्वयं राम सर्वकार्येषु केवलः ।
न तेऽपेक्षा सहायस्याप्रमेयबल शालिनः ॥ ४ ॥

भुवनोत्तारणायैव तवारम्भो रघूद्वह ।
न ते किमप्यवाप्तव्यं पूर्णकामस्य संततम् ॥ ५ ॥

समवाप्य त्वया मैत्रीं सुग्रीवो भाग्यवत्तमः ।
कपिपुङ्गवताशब्दं सार्थकं यातु राघव ॥ ६ ॥

अतो मामनुजानीहि गन्तुं सुग्रीवसंनिधिम् ।
आवेद्य तव वृत्तान्तं भूय आयाम्यहं द्रुतम् ॥ ७ ॥

त्वत्सकाशमिहानष्ये कपीन्द्रं सत्यवादिनम् ।
मैत्रीं च कारयिष्यामि त्वया तस्य वलीयसीम् ॥ ८ ॥

अनेकपद्मसंख्याताः कपिवर्य महाभटाः ।
चलन्तु तव सेनायां लङ्कानाथं जिगीषतः ॥ ९ ॥

तैर्युतः समरेषु त्वं कपिभिर्धृतकेतुभिः ।
मघवानिव पाथोदैर्नानावर्णैर्विराजभोः ॥ १० ॥

वाद्यन्तु वीरवाद्यानि निर्हृतानि कपीश्वरैः ।
हृत्कपाटविपाटीनि राक्षसानां बलीयसाम् ॥ ११ ॥

ते छत्रचामरद्वन्द्वपताकाध्वजधारिणः ।
भेरीनिःसानपटहवादकाः सन्तु ते पुरः ॥ १२ ॥

चालयन् धरणीं कृत्स्नां सरितः शोषयन् पथि ।
समी कुर्वन् गिरीन् वप्रान् प्रतिष्ठस्व त्वमाजये ॥ १३ ॥

त्वद्बाणपावकध्वस्तराक्षसानीक आतुरः ।
अह्नायैतु पतङ्गत्वं रावणस्त्वयि दीपके ॥ १४ ॥

कृतप्रतापो लङ्कायां कृतत्रैलोक्यकण्टकः ।
अयोध्याभिमुखो भूयास्त्वं राम विजयोर्जितः ॥ १५ ॥

भाग्यं कपिभटानां वै मया किमनुवर्ण्यताम् ।
येषां नाथः स सुग्रीवस्तव मित्रं कृपानिधे ॥ १६ ॥

अचिन्त्यैव च ते राम कृपाशश्वत्कृपानिधे ।
सुदुर्लभा या यत्तस्या मर्कटा अधिकारिणः ॥ १७ ॥

महतां मुनिवर्याणां मुखेभ्यो रामचन्द्रमः ।
अश्नौषमेवमेवाहं त्वत्तो बालिवधो यथा ॥ १८ ॥

स कालः किल सम्प्राप्त एष एव रघूत्तम ।
हत्वा बालिं बलात् संख्ये स तद्भ्रातानुगृह्यताम् ॥ १९ ॥

इत्युक्त्वा हनुमांस्तस्य कृत्वा पादाभिवन्दनम् ।
प्रतस्थे ऋष्यमूकाद्रिं यत्रास्ते कपिपुङ्गवः ॥ २० ॥

पथि विन्यस्तनयनो वर्जिताखिलसंकथः ।
मैत्रीं श्रीरामचन्द्रेण काङ्क्षमाणो निमग्नधीः ॥ २१ ॥

स तेन ददृशे वीरो वायुपुत्रो महामतिः ।
कृतकार्यो मुखोल्लाससंलक्षितमनोगतिः ॥ २२ ॥

तमेष सादरं धीमानग्रहीद्रविनन्दनः ।
सानन्दोल्लासिनयनः प्रत्युत्थानोद्गमादिभिः ॥ २३ ॥

तमुवाच मरुत्सूनुस्तर्कस्ते सफलोऽभवत् ।
राम एव स वीरेन्द्रो दूराद्यो वीक्षितस्त्वया ॥ २४ ॥

यो द्वितीयः स तस्यैव भ्राता ते न समोऽनुजः ।
सिद्धश्च ते मनःकामो मैत्रीं रामेण यास्यसि ॥ २५ ॥

जितं च विद्धि बलिनं बालिनं कपिपुङ्गवम् ।
भोक्ष्यसे किल किष्किन्धापुरीराज्यमकण्टकम् ॥ २६ ॥

अकैतवां रामचन्द्रे मैत्रीं समनुपालय ।
प्रायेण गुरवो देवाः सुहृदश्च न कैतवैः ॥ २७ ॥

भाग्यवानसि सुग्रीव रामेणाद्य मित्रताम् ।
दुर्लभं दास्यमप्यस्य तत्र मैत्री कुतस्तराम् ॥ २८ ॥

कृपादृष्ट्यैव तस्येदं सम्पन्नमिति विद्धिभोः ।
देवा अपि यतस्तस्य नित्यं दर्शनकाङ्क्षिणः ॥ २९ ॥

महाशयो महावीरो महसाप्रतिमश्च सः ।
तस्य मैत्रीं भवांल्लब्ध्वा किं किं नो लप्स्यते शुभम् ॥ ३० ॥

हनुमदुदीरितेन वचसा दिननाथसुतो रघु
पतिमित्रभावमभिलाषुक आर्तिहरम् ।
सपदि दिदृक्षयैव खलु तस्य सहर्षमना
इदमवदद्वचोऽमलमुदीक्ष्य समीरसुतम् ॥ ३१ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे हनुमदागमनो नाम षट्सप्तत्यधिकशततमोऽध्यायः ॥ १७६ ॥

*

सप्तसप्तत्यधिकशततमोऽध्यायः

सुग्रीव उवाच

एवं चेत्तर्हि हनुमन् सिद्ध एव मनोरथः।
मम दुष्टमतेर्भ्रातुर्हननं प्रतिवाञ्छतः॥ १॥

तदाशु तेन वीरेण मां संगमय मारुते।
दिदृक्षामि भृशं रामं तमेव रघुनन्दनम्॥ २॥

आनेष्यामि च तं बीरं सानुजं हर्षवर्द्धनम्।
वासयिष्यामि कतिचिद्दिनानीह महीधरे॥ ३॥

ऋष्यमूकगिरौ रम्ये मुनिमण्डलमण्डिते।
अनुरक्तमता वीरो निवत्स्यति मुदान्वितः॥ ४॥

ध्रुवमार्त्तिहरश्चैष मम रामो भविष्यति।
हता येनोद्धतखरत्रिशिरोदूषणादयः॥ ५॥

सुबाहुर्निहतो येन मारीचश्च निपातितः।
तथान्ये राक्षसवरा महाबलपराक्रमाः॥ ६॥

क्षणाद्येन विनिर्दग्धास्तीव्रेण शरवह्निना।
स कथं नैव तं दुष्टं धक्ष्यति स्वेन तेजसा॥ ७॥

स्मरामि हनुमन्नद्य यदुक्तं मुनिभिर्मम।
रामो वालि वधं कर्त्तुं समर्थो भुवनत्रये॥ ८॥

तेन मैत्रीमहं लब्ध्वा हतदुष्टसपत्नकः।
भोक्ष्यामि किं न किष्किन्धापुरीराज्यमकण्टकम्॥ ९॥

इत्युक्त्वा कपिशार्दूलो नलनीलादैः सह।
हनूमता च संयुक्तो ययौ रामदिदृक्षया॥ १०॥

स तं तरुतलासीनं सानुजं श्यामसुन्दरम्।
ददर्श रामं सुग्रीवः सीताविरहविह्वलम्॥ ११॥

ववन्दिरे रघुपतिं सर्वेकीशाः पृथक् पृथक्।
तान् रामचन्द्रो जग्राह दोर्भ्यामालिङ्ग्य सादरम्॥ १२॥

सस्मितप्रणयालापसादरप्रेक्षणादिभिः।
तोषिता रघुनाथेन सर्वे ते कपिपुङ्गवाः॥ १३॥

निषण्णाः परितो रामं महाभागाः कपीश्वराः।
तेषां मध्यगतो रेजे सुग्रीवो हृष्टमानसः॥ १४॥

श्रीराममुखसंदर्शविवृद्धसुखवारिधिः ।
ऊचे विहस्य सुग्रीवः प्रमोदकलया गिरा ॥ १५ ॥

स्वागतं ते रघुश्रेष्ठ सानुजस्य महात्मनः ।
प्रायः कृतार्थयंल्लोकान् विचरत्यवनीं भवान् ॥ १६ ॥

अद्य मे नयने राम भृशं सफलतां गते ।
सानुजस्य तव श्रीमन् दर्शनामृतलाभतः ॥ १७ ॥

स्वरूपेणैव रामेन्दो ददासि जगतां मुदम् ।
चरितैः पुनरत्यन्तं धवलीकुरुषे दिशः ॥ १८ ॥

अकार्षं किं नु सुकृतमनल्पं रघुपुङ्गवः ।
यद्भवानद्य संदृष्टो मुदा संफुल्लया दृशा ॥ १९ ॥

लोकोत्तरमिदं शीलं तव राम मुदावहम् ।
कपिजातिरपि श्रीमन्नहं येन कृतार्थितः ॥ २० ॥

न ते स्पृहा रामचन्द्र कस्यापि शुभवस्तुनः ।
सर्वभव्योपपन्नस्य लब्धसर्वार्थसम्पदः ॥ २१ ॥

तथापि मादृशान् दीनान् नानोपप्लवसम्प्लुतान् ।
कृतार्थीकर्तुमुचितो जनैः संगम्य ते भवान् ॥ २२ ॥

तव प्रसंगाद्रघुवंशकेतो ध्रुवं गमिष्यामि जयं दुरापम् ।
यशश्च मे भूरि भविष्यतीश पूर्णेन्दुशुभ्रं विपुलं त्रिलोक्याम् ॥ २३ ॥

एतावदेव किल दुर्लभमत्र लोकेयत्स्यात्त्वया सुकृति रघुदेव मैत्री ।
स्वर्गापवर्गसुखसंततिभूरिभोगा भूयो भवेयुरित एव न ते दुरापाः ॥ २४ ॥

भवानभ्यर्थितं दातुं कल्प दूत्यस्तु का स्तुतिः ।
अभ्यर्थिताधिकफलप्रदो जगतियद्भवान् ॥ २५ ॥

किं दुष्टराक्षसचमूहननेन राम कीर्त्ति तवाधिकतरां समुदाहरामः ।
मातङ्गकुम्भदलनोद्धतविक्रमस्य सिंहस्य किं नु मृगयूथवधात्प्रशंसा ॥ २६ ॥

भ्राता दुष्टेव वलिना बालिनाहं निराकृतः ।
किष्किन्धानगरी चापि त्याजिता भोगशालिनी ॥ २७ ॥

तेनास्मि दुःखितोराम निःश्रीकः सम्पराजितः ।
तन्मे दुःखं भवान् हर्तुं समर्थो रघुपुङ्गव ॥ २८ ॥

अप्रमेयबलं मन्ये त्वामहं रघुनन्दन ।
हता येनैकवाणेन तादृग्घोरनिशाचराः ॥ २९ ॥

ऋष्यमूकगिरावत्र सुहृदां सुखवर्द्धनः ।
त्वमास्व सानुजो राम मुनीनां रमयन् मनः ॥ ३० ॥

जहि मत्सार्थगो दुष्टं बालिनं बलदुर्मदम् ।
कीर्तिस्ते भुवने राम व्याप्स्यतीति न संशयः ॥ ३१ ॥

इति तेनाभिसंस्तूय तेजसं निधिरच्युतः ।
ऋष्यमूकगिरौ नीतो रामचन्द्रः सलक्ष्मणः ॥ ३२ ॥

रघुपतिरिह वास्तून् मोदयन् योगिवर्यान् ।
जनकनृपतनूजाविप्रयोगेन युक्तः ॥
अवसदचलवर्ये ऋष्यमूके सुमित्रा ।
सुतसहित उदारः सेव्यमानः कपीन्द्रैः ॥ ३३ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे ऋष्यमूकगिरि-निवासो नाम सप्तसप्तत्यधिकशततमोऽध्यायः ॥ १७७ ॥

*

अष्टसप्तत्यधिकशततमोऽध्यायः

ब्रह्मोवाच

आभूषणानि वैदेह्या निरस्तानि निजाङ्गतः ।
पतितानि गिरिद्रोण्यामानीतानि प्लवङ्गमैः ॥ १ ॥

तानि वानरराजेन सुग्रीवेण महात्मना ।
रामचन्द्रस्य पुरतः स्थापितानि ससम्भ्रमम् ॥ २ ॥

इमानि वल्लभायास्ते भूषणानि जगत्पते ।
तयैव नूनं क्षिप्तानि रक्षसा नीयमानया ॥ ३ ॥

लब्धानि किल काकुत्स्थ विचरद्भिर्बलीमुखैः ।
ऋष्यमूकस्य शिखरे रक्षितानि चिरं मया ॥ ४ ॥

गृहाण रघुशार्दूल संवीचितानि सुवाससा ।
महार्हाणि मनोज्ञानि भास्वन्ति मणिकान्तिभिः ॥ ५ ॥

तदेकपरिधार्याणि सावधानं निभालय ।
तावद्रक्ष महाबाहो यावदायाति जानकी ॥ ६ ॥

इत्युक्त्वा सुहृदा तेन कपीन्द्रेण महाधिया ।
समर्पितानि जगृहे भूषणानि रघूद्वहः ॥ ७ ॥

उन्मोच्य वसन ग्रन्थि तानि रामो ददर्श ह ।
हारकङ्कणकेयूरग्रैवेयकमुखानि वै ॥ ८ ॥

तेषां दर्शनमात्रेण मुमोह रघुपुङ्गवः ।
चिरं मूर्छामुपगतो दीप्ते विश्लेषपावके ॥ ९ ॥

चिराद्दृशौ समुन्मील्य विललाप सुदुःखितः ।
गलद्बाष्पजलस्रोतःसिक्ताद्रिशिखरावनिः ॥ १० ॥

हा तान्वि तासु रजनीषु समग्रचन्द्रज्योत्स्नाप्रकाशधवलासु विभूषिता यैः ।
आनन्दिनीममनो रमयाम्बभूव तानीदृशीं बत दशां तव भूषणानि ॥ ११ ॥

प्राप्तानि चन्द्रमुखि यां न सहे कथंचिद्द्रष्टुं ननु क्षणमपि प्रसृतातिशोकः ।
पश्याम्यमून्यपिचिराद्विरहाधिना ते भूमीरजोव्यतिकरान्मलिनानि शश्वत् ॥ १२ ॥

हा हा मणिस्तबकहार चिरेण तस्या वक्षोजकुम्भविरहाद् बत दुःखितोऽसि ।
भग्नश्च ते गुणगणोऽपि ततः सखेऽसौ किं रोदिषि प्रसृतकान्तिलवच्छलेन ॥ १३ ॥

ताटङ्कयुग्म तव कापि दशाद्य जाता तत्कर्णयोर्विरहदुःखभरेण भूयः ।
हा मित्र तन्निधुवनोत्सवकौतुकेषु क्वान्दोलनं तव गतं बहुसौख्यकारि ॥ १४ ॥

हा मालिके किमपि ते बतहेममय्याः सोढः स पावकजलान्तरतीव्रतापः ।
प्राप्तं फलं जनकजोरसि तस्य वासो लब्धस्तु केनविधिना वत विप्रयोगः ॥ १५ ॥

केयूर हा बत सखे ननु शोचनीयां प्राप्तो दशां त्वमसि तद्भुजविप्रयोगात् ।
विख्यातिरङ्ग तथापि च ते मुधाभूद्दूरे किलाद्य जितपद्मदलं तदङ्गम् ॥ १६ ॥

हा कङ्कण त्वमसि तद्भुजवल्लिसङ्गात्सौख्यप्रदादहमिवाद्भुतभागधेयः ।
दौर्भाग्यमेतदधुना किमु सम्प्रयुक्तं केनावनौलुठसियद्रजसा परीतः ॥ १७ ॥

हा मेखले तनुलतामवलम्ब्य तस्यास्तान्युद्धतानि कुरुषे सुरते रुतानि ।
तद्विप्रयोगविधुरा बत दैवयोगात्स्थानेऽधुना भजसि मौनमनूनखेदा ॥ १८ ॥

ग्रैवेयक क्व नु मनोभवजैत्रकम्बुसंकाश तद्रुचिरकण्ठसमीपलग्नः ।
कामप्यजस्रमपुषस्त्वमहो अभिख्यां क्वैतादृशी च बत मित्र दशा तवाद्य ॥ १९ ॥

हा हेमरत्नतिलक त्वमभूः प्रियाया भालस्थले किमपि दीप इवोग्रदीप्तिः ।
तद्विप्रयोगतमसाद्य बलाभिभूतो दैवे विपर्ययमिते न विपर्ययः कः ॥ २० ॥

हा रत्नवेणि भवती जनकाङ्गजायाः केशावलिग्रथितगुण्यसुवेशरूपा ।
कामप्युबाह गतिमद्भुतकान्तिपूरैर्जातासि सम्प्रति कथं विरहेण मन्दा ॥ २१ ॥

हा शीर्षरत्नकुसुमस्तबक त्वदीयं तत्सौभगं जनकजाशिरसः प्रसंगात् ।
किं भूतमद्य विरहाधिजदुर्दशायां यद्रोदिषीव सुचिरेण सखे यथाहम् ॥ २२ ॥

हा नूपुर क्वणितनिर्जितराजहंस न श्रावयस्यतिमृदुं किमिति ध्वनिं तम् ।
प्रायस्त्वमप्यहमिवाधिधरो वियोगान्मौनेन यापयसि कालमशेषमेव ॥ २३ ॥

हा वृश्चिकाभरण तच्चरणाङ्गुलीभिर्विश्लिष्य मित्र वहसे बहुखेदमन्तः ।
नो चेत्त्वयि श्रुतिमनोज्ञरवं दधाने रौति प्रमत्तचटकावलिरेवमेषा ॥ २४ ॥

हा भूषणानि निखिलानि विदेहजाया या तानि कामपि दशां स्ववियोगदुःखात् ।
आत्मानमत्र वसनाञ्चलगाढबद्धमेवं विधाय नयथार्तिभरेणकालम् ॥ २५ ॥

इति सम्बोध्य सर्वाणि प्रत्येकं तानि राघवः ।
विललाप वियोगेन भूषणानि विलोकयन् ॥ २६ ॥

मुक्तास्थूलाश्रुमोक्षं व्यरुददतितरां दीप्तविश्लेषवह्निः
स्मारं स्मारं रसार्द्रः कथमपि मिथिलाधीशपुत्रीविलासान् ।
दृष्ट्वा भूषाः प्रणयपरवशो भूरिरोमाञ्चशाली
स्तब्धःस्विद्यन् सकम्पो मुकुलितनयनोलीनसर्वेन्द्रियोऽभूत् ॥ २७ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे विभूषणदर्शन-सम्मोहवर्णनोनामाष्टसप्तत्यधिकशततमोऽध्यायः ॥१७८ ॥

*

एकोनाशीत्यधिकशततमोऽध्यायः

ब्रह्मोवाच

रुदन्तं राघवमनुक्लिष्टोऽश्रुनयनोऽनुजः ।
अखिद्यततरां चित्ते व्याप्तः शोकेन भूयसा ॥ १ ॥

तावनुप्लवगश्रेष्ठाः सर्वेऽप्यश्रुविलोचनाः ।
अखिद्यन्तभृशं चित्ते क्लेशसंक्षीणमानसाः ॥ २ ॥

ततः सर्वेऽपिरुरुदुः काकुत्स्थे परिदेवनम् ।
कुर्वाणे सति जानक्या विरहेणमहाधिना ॥ ३ ॥

तुल्यदुःखसुखैरेवं सुहृद्भिः प्लवगोत्तमैः ।
तन्वानः परमां मैत्रीं निन्ये सोऽहानि कानिचित् ॥ ४ ॥

सीताविरहसम्भूतः परमाधिर्यदा प्रभोः ।
अवर्द्धततरां चित्ते तदा सर्वे समब्रुवन् ॥ ५ ॥

लक्ष्मण उवाच

धैर्यमालम्ब्यतामार्य त्वय्येवं परिदेवनम् ।
कुर्वत्यजस्रमस्माकं मनोऽपि क्षीयतेतराम् ॥ ६ ॥

भवानानन्दजननः सुहृदां विहितोत्सवः ।
स कथं रघुशार्दूल शोकं वर्द्धयसेऽनिशम् ॥ ७ ॥

त्वयि सानन्दहृदये जगदानन्दितं भवेत् ।
अत आनन्दसिन्धो त्वं मा शुचं परिवर्द्धय ॥ ८ ॥

अधैर्यात् क्षीयते सत्त्वं सत्वहीने मतिक्षयः।
मतिक्षयाश्च सुहृदस्त्यजन्त्येनं चिरं श्रिताः॥ ९॥

त्यक्तः सुहृद्भिः स्वजनैः श्रियापि त्यजते जनः।
निःश्रीकः स्यान्मृतप्रायो जीवन्नेव न संशयः॥ १०॥

एतान्यधैर्यमूलानि तस्मात्तत्परिवर्जय।
वाञ्छानुरूपं च तव भवत्येव जगत्पते॥ ११॥

यद्यत्कामयसे राम तत्तत्तव करे स्थितम्।
जानासि सद्य एवेति मा शोचिष्ठाः प्रियाकृते॥ १२॥

गिरिं भित्त्वा भुवं छित्त्वा शोषयित्वापि वारिधीन्।
शमयित्वौर्वमप्यार्यं क्षिप्त्वापि कुलपर्वतान्॥ १३॥

कृत्वापि दुष्करं कर्म करिष्ये कामितं तव।
आत्मना च सुहृद्भिश्च धीरोभव ततः प्रभो॥ १४॥

तव प्रतापात् काकुत्स्थ जगच्छोको निवर्तते।
स कथं शोकसंदोहसंवीतोऽसि महामते॥ १५॥

अहं ते सेवको राम सहायाः कपिपुङ्गवाः।
वायुसूनुर्बली येषु तथायं रविनन्दनः॥ १६॥

कर्तुं धर्तुं सुसंहर्तुं समर्थाः सर्वमेव ते।
तैर्युक्तश्च भगवानार्यं शक्तोऽस्यखिलकर्मसु॥ १७॥

जगद्विध्वंसकः प्रायो रावणः सर्वतापनः।
कथं म्रियेत यद्येवं न स्यान्महदतिक्रमः॥ १८॥

इति लक्ष्मणवाक्येन शान्तेन नयवर्त्तिना।
स्वास्थ्यमालम्बततमां विरहाढ्योऽपि राघवः॥ १९॥

सुग्रीव उवाच

अलं दुःखेन वीरेन्द्र किमेवमनुशोचसि।
बलादानेष्यति भवान् जानकीं शत्रुवेश्मतः॥ २०॥

हत्वा तं दुर्विधिं घोरं राक्षसेन्द्रं महाबलम्।
जित्वा च सपरीवारं बालवृद्धावशेषितम्॥ २१॥

वाद्यैः सह सुरेन्द्राणां जयघोषैर्द्विजन्मनाम्।
आयास्यसि समादाय मैथिलीं त्वं रघूद्वह॥ २२॥

सहानेकमहापद्मसंख्यातैः कपिपुङ्गवैः।
संयोज्य वाहिनीं भव्यां भवान् प्रस्थास्यतेऽचिरम्॥ २३॥

पूर्वं तु मत्सपत्नं तं दुष्टं जहि शराग्निना।
मां स्थापय रघुश्रेष्ठ किष्किन्धाराज्यसम्पदि॥ २४॥

ततो मयाभ्यनुज्ञाताः कोटिशः कपिपुङ्गवाः ।
समवेष्यन्ति भवतः कार्याय कृतनिश्चयाः ॥ २५ ॥

रक्षसां नगरी सिन्धोर्मध्ये तिष्ठति दुर्गमा ।
कपयस्तां परिवार्य संस्थिताः सर्वतोदिशम् ॥ २६ ॥

प्राकारं रचयिष्यन्ति द्वितीयं हेमवर्ष्मभिः ।
ततस्तत्र गृहाट्टालहट्टापथगता नराः ॥ २७ ॥

रुद्धाः कपिभटैर्भूयो ध्रुवं शप्स्यन्ति रावणम् ।
ततः स सीतामादाय संगच्छेदपि तत्क्षणात् ॥ २८ ॥

अथो युद्धोद्यतोऽप्याशु संक्षयं संगमिष्यति ।
तव बाणनलैस्तीव्रैरिति मे निश्चयः प्रभो ॥ २९ ॥

इति तस्य गिरा सम्यक् शान्तः पीयूषदिग्धया ।
रामस्य शोकदहनः सीताविरहसम्भवः ॥ ३० ॥

हनुमानुवाच

सत्यसन्ध दयासिन्धो जगदानन्ददायकः ।
अलं विलप्यातिमात्रं धीरो भव महामते ॥ ३१ ॥

विवृद्धशोकः पुरुषः शत्रुभिः परिहस्यते ।
ततः को मतिमानेवं वर्धयेच्छोकमात्मनः ॥ ३२ ॥

जानामि जानकीहेतोर्मृत्युं तस्य दुरात्मनः ।
जगत्संतापकन्दस्य दशकण्ठस्य वैरिणः ॥ ३३ ॥

सानुजं सपरीवारं भवानेतं हनिष्यति ।
इतीव तस्य वीरेन्द्र जातो बुद्धिविपर्ययः ॥ ३४ ॥

नो चेत्परस्य दयितां कःस्विदात्मगृहं नयेत् ।
रक्षसां चापि सर्वेषां जातो भाग्यविपर्ययः ॥ ३५ ॥

जनयन्ति भुवो भारं राक्षसाः सुरवैरिणः ।
नाशयन्ति परं धर्मं वध्यास्ते सर्व एव ते ॥ ३६ ॥

नल उवाच

को भवत्सदृशो लोके पुमान् काकुत्स्थ दृश्यते ।
यो हन्याद्रावणं दुष्टं त्रैलोक्यपरितापदम् ॥ ३७ ॥

भवानेकोऽस्य हन्तासि[स्ति] ततस्तेन तव प्रिया ।
चोरितातीवपापेन विपरीतधिया भृशम् ॥ ३८ ॥

अचिरेणैव लङ्कायां तवोच्चैर्जैत्रदुन्दुभिः ।
ध्वनिष्यति सुगम्भीरसमुद्रध्वनिसुन्दरः ॥ ३९ ॥

विजित्य लङ्कां काकुत्स्थ निखाय विजयध्वजम् ।
उच्चैः सुरवरस्त्रीभिर्गापयित्वा यशोऽमलम् ॥ ४० ॥

त्रैलोक्यमेतदखिलं भवानानन्दयिष्यति ।
अतो धैर्यमुपालम्ब्य कतिचिद्वासरान नय ॥ ४१ ॥

न पुनस्तीव्रशोकेन मनः क्षीणतमं कुरु ।
महतामार्त्तिरप्याशु नश्यत्येव न संशयः ॥ ४२ ॥

नील उवाच

धेहि नो मूर्द्ध्न चरणौ भवान् कुलविभूषणः ।
त्वत्प्रतापाद्रघुपते करिष्यामोऽपि दुष्करम् ॥ ४३ ॥

लङ्घनीयः समुद्रोऽपि भेदनीयः कुलाचलः ।
उत्खाय मेरुरप्याशु निक्षेप्योऽष्टासु दिक्षु च ॥ ४४ ॥

किं किं न करवामोच्चैस्तवाज्ञा लब्धसिद्धयः ।
आस्फोटयामो भुवने बाहून् वयमनारतम् ॥ ४५ ॥

प्रसह्योद्धर्त्तुकामाः स्म सुमेरुमपि राघव ।
तवाज्ञावशगा एव तिष्ठामः खलु सम्प्रति ॥ ४६ ॥

अङ्गद उवाच

सत्यमेते प्रभाषन्ते कपिवीरा बलोर्जिताः ।
आज्ञायां कपिराजस्ते ध्रुवमेव नियोक्ष्यति ॥ ४७ ॥

दुष्करेऽप्यर्थविषये साधयिष्यन्त्यमी च तम् ।
तव प्रतापमात्रेण जातालौकिकसिद्धयः ॥ ४८ ॥

कपिप्रवीरो हनुमान् मनस्वी महाबलोऽयं महनीयवीर्यः ।
अयं च सूर्यस्य सुतो महौजाः सुग्रीवनामा भुवने तथैव ॥ ४९ ॥

एते वयं नलनीलाङ्गदाद्याः सर्वे तवाज्ञैकवशाः स्म सत्यम् ।
तथा करिष्यास उदारमौलेरोत्स्यामहे राम यथैव लङ्काम् ॥ ५० ॥

इति कपिभटैर्वीरं वारं गिरा परिणन्त्वितो ।
रघुपति रथ श्रीमत्प्रेक्ष्यानुजस्य मुखाम्बुजम् ।
इदमकथयत्किंचिच्चित्ते निवारितबिक्रियः
स्मितलवसुधासम्पृक्तास्यक्षपाकरमण्डलः ॥ ५१ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे श्रीरामपरिसान्त्वनो नामैकोनाशीत्यधिकशततमोऽध्यायः ॥१७९॥

*

अशीत्यधिकशततमोऽध्यायः

श्रीराम उवाच

अमी कपिभटाः सर्वे बलिनः समरोद्धताः ।
एतैः समेतः सौमित्रे भवानपि बलोर्जितः ॥ १ ॥

साधयित्वाजिमुखगः कार्यमत्याहितं मम ।
लप्स्यते चन्द्रविशदं भुवनेषु महद्यशः ॥ २ ॥

कायेन मनसा वाचा सर्वे सौहृदसंयुताः ।
समेत्य घातयन्त्यद्धा राक्षसांल्लोकदुःखदान् ॥ ३ ॥

अहं चापि वधिष्यामि राक्षसेन्द्रं दशाननम् ।
भवतामेव साहाय्यात् संजातबलपुष्कलः ॥ ४ ॥

कार्यमेतच्च त्वरितं साधनीयं महामते ।
जानकी नयति क्लेशात् क्षणमप्यब्दसम्मितम् ॥ ५ ॥

कुर्वे कपिपतेरस्य सुग्रीवस्य जयं रिपोः ।
शीघ्रमेव च मत्कार्यं करोतु कपिभिः सह ॥६ ॥

यावज्जीवतिलङ्केशः कुतस्तावन्नृणां शुभम् ।
अतस्तस्य बधो लोकसुखार्थेऽपि भविष्यति ॥ ७ ॥

इत ऊर्ध्वं तु यत्कार्यं तद् द्रुतं क्रियतां सखे ।
विलम्बे च रिपोः पक्षः प्रत्यहं परिवर्द्धते ॥ ८ ॥

इत्युक्तं रघुवर्येण वचः पीयूषसम्मितम् ।
कपयः शुश्रुवः सर्वे विनयानतकन्धराः ॥ ९ ॥

अथ भ्रातृवधं रामाद्विज्ञाय कपिपुङ्गवः ।
हनुमन्तमुवाचेदं कार्याकार्यविचक्षणः ॥ १० ॥

सुग्रीव उवाच

अये मरुत्सुत सखे जानामि रघुपुङ्गवम् ।
अप्रमेयबलं लोके वरेण्यं च धनुर्भृताम् ॥ ११ ॥

तथाप्यात्मबलं यावन्न पर्याप्ततमं भवेत् ।
तावन्नैव विरोद्धव्यं सपत्नेषु मनीषिणा ॥ १२ ॥

अनिश्चितबला ये तु सपत्नेष्वभिषेणनम् ।
कुर्वन्ति मोहाभिभूतास्ते गच्छन्ति पराभवम् ॥ १३ ॥

भवन्ति चोपहासाय लोकेषु बहुदुःखिताः ।
अतो बलं स्वं निश्चित्य कार्यं युद्धाभिषेणनम् ॥ १४ ॥

अस्त्येव बलवान् रामो येनानेके द्विषो हताः।
तथापि मर्त्यलिङ्गत्वात्प्रतीतिर्नोपजायते ॥ १५ ॥

उक्तं मे पूर्वमृषिभिः कबन्धं दुन्दुभेर्हि यत्।
यः क्षिपेदेकहस्तेन स हन्याद्वालिनं ध्रुवम् ॥ १६ ॥

महान्तमद्रिकूटाभमस्थिकूटं सुदुर्धरम्।
कः क्षिपेदेकहस्तेन ह्यप्रमेयबलं विना ॥ १७ ॥

सप्त तालद्रुमाश्चापि सन्ति वक्रप्ररोहिणाः।
पातालतलसन्मूला दुर्भेद्या येन केनचित् ॥ १८ ॥

तान् यो भेत्स्यत्यसरलात् बाणेनैकेन तत्क्षणात्।
स हन्याद्वालिनं वीरो मतिरेषा ध्रुवं मम ॥ १९ ॥

अतः पूर्वं प्रतीत्यर्थं दुन्दुभेरस्थि सुस्थिरम्।
उत्क्षेपणीयं रामेण भेद्यास्तालाश्च सप्त ते ॥ २० ॥

ततोऽहं जातविश्वासः किष्किन्धानगरीं द्रुतम्।
नेष्यामि ननु वीरेन्द्रं वालिनो वधहेतवे ॥ २१ ॥

हते तस्मिन् महादुष्टे किष्किन्धाराज्यसम्पदः।
भोक्ष्येऽहं तारया सार्द्धं गजेन्द्रगतिलीलया ॥ २२ ॥

ततोऽस्याज्ञापरवशः संयोक्ष्यामि महाचमूः।
कपीन्द्रबलसंव्यूढा ऋक्षराजबलोन्नताः ॥ २३ ॥

ततः क्रियान् सपत्नोऽस्य रावणो लोकरावणः।
सद्य एव रणेवध्यः परिवारगणैः सह ॥ २४ ॥

निशम्य सुग्रीववचो हनूमान् जहास विज्ञातबलोस्यभर्तुः।
तथेति तं प्रोच्य रघुप्रवीरं विज्ञापयामास यथोक्तमर्थम् ॥ २५ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे बालिवधोपक्रमणो नामाशीत्यधिकशततमोऽध्यायः ॥१८०॥

*

एकाशीत्यधिकशततमोऽध्यायः

हनुमानुवाच

वीरेन्द्र भवतः कृत्यं लोकोत्तरगुणोत्तरम्।
तथापि मर्त्यलिङ्गत्वाज्जनाः संदिहते हृदि ॥ १ ॥

मुनीनां वचनाद् राम वेद्मि त्वां पुरुषोत्तमम्।
अप्रमेयगुणाध्यक्षं सर्वदिव्यगुणाकरम् ॥ २ ॥

तेजोराशिं महोनीलं देवं रघुकुलोज्ज्वलम् ।
बले वीर्ये गुणैश्वर्ये भ्रमस्त्वयि न मे क्वचित् ॥ ३ ॥

यशःश्रीज्ञानवैराग्यनित्यचिद्धनशालिता ।
नित्यमुञ्जृम्भते राम त्वय्यद्भुतगुणाश्रये ॥ ४ ॥

स्वमाययैव संवृत्य स्वरूपं सुखचिद्धनम् ।
विक्रीडसि च काकुत्स्थ लोकवृत्तमनुव्रतः ॥ ५ ॥

अतस्ते विक्रमगुणा अलक्ष्याः प्राकृतैर्जनैः ।
ततः संदिहते ह्येते कपयो बालिनो वधम् ॥ ६ ॥

प्रत्यायकं च तस्यैते ज्ञातुकामा रघूद्वह ।
अतो भिन्धि प्रभो वक्रुरुहांस्तालमहीरुहान् ॥ ७ ॥

य एतानेकबाणेन प्रसुप्तभुजगाकृतीन् ।
भिन्द्यात् तालद्रुमान् सप्त वालिस्तेनैव हन्यते ॥ ८ ॥

कबन्धं दुन्दुभेश्चैव क्षिपेदेककरेण यः ।
महाद्रिकूटसंकाशं वालिस्तेनैव हन्यते ॥ ९ ॥

इति सुग्रीवमवदन् सर्वज्ञा ऋषयश्च ये ।
कृत्यं तद् द्वयमप्येतत् त्वय्यद्भुततमं न हि ॥ १० ॥

ततो वालिवधश्चास्य प्रत्याय्यः पशुचेतसः ।
मैत्री चानेन वर्ध्यैव कपिसेना महीयसा ॥ ११ ॥

इति श्रीमान् समाकर्ण्य काकुत्स्थो हनुमद्वचः ।
तथेति प्रतिशुश्राव सप्ततालप्रभेदनम् ॥ १२ ॥

उत्क्षेपं दुन्दुभेरस्थनः सत्यचारित्रविक्रमः ।
साभिप्रायाखिलकृतिः समुत्तोलितसायकः ॥ १३ ॥

भेत्स्यामि हनुमन्नेष सप्त तालमहीरुहान् ।
भेत्स्यामि शापदग्धं च तन्मूलस्थं भुजङ्गमम् ॥ १४ ॥

तेनासौ स्वं वपुः प्राप्य स्वर्लोकं यास्यति द्रुतम् ।
प्रहृत्य दुन्दुभेश्चास्थि तं वै निष्यामि सद्गतिम् ॥ १५ ॥

कार्यमेतद् द्वयं नाम मयैव करुणावशात् ।
अतस्तत्र गमिष्यामि निःशङ्कं कपिपुङ्गवैः ॥ १६ ॥

अलौकिकमदः कर्म करिष्ये ख्यातिहेतवे ।
पश्यन्तु युगपत्सर्वे कपिवीरा बलोन्मदाः ॥ १७ ॥

उररीकृतमीशेन कर्मद्वयमलौकिकम् ।
हनुमानवदत्सत्यं सुग्रीवकपिसंनिधौ ॥ १८ ॥

अथ ते राममादाय कपिवीराः सहानुजम् ।
तालावलीं वालिवधं प्रत्ययाय समाययुः ॥ १९ ॥

श्रीमान् रामश्च सौमित्रिः सुग्रीवो हनुमांस्तथा ।
नलो नीलोऽङ्गदश्चैव सप्ततालावलीं ययुः ॥ २० ॥
ददर्श रामस्तान् कृत्स्नान् सप्ततालाकृतीन् द्रुमान् ।
व्यचष्ट सर्वमायेशस्तत्तत्त्वं भेदने स्थितौ ॥ २१ ॥

प्रददेन समाक्रम्य सौमित्रेश्चरणद्वयम् ।
क्षणेन सरलीचक्रे सर्पं वक्रतया स्थितम् ॥ २२ ॥

अभूच्चटचटाशब्दस्त्रैलोक्यपरिपूरणः ।
सरलीभवतां तेषां सप्तानां तालभूरुहाम् ॥ २३ ॥
ततो बिभेद बलवान् बाणेनैकेन तान् द्रुमान् ।
स बाणस्तस्य तान् भित्त्वा परतो निर्जगाम ह ॥ २४ ॥

भूत्वा हं सतनुर्भूयस्तूणीरं प्रविवेश सः ।
तद्‌द्भुतमिवात्यर्थमभूत्सम्पश्यतां नृणाम् ॥ २५ ॥

श्रेणीभूतेषु तालेषु भिन्नेषु महतेषुणा ।
सप्तैव विवराण्यासन् पूर्यमाणानि वायुभिः ॥ २६ ॥

तन्मूलस्थश्च भुजगः शापदग्धो हतस्तदा ।
अवाप सद्‌गतिं भूयो रामेषुध्वस्तपातकः ॥ २७ ॥

भिन्नेषु सप्ततालेषु सुरपाणितलोद्‌गता ।
कल्पद्रुसुमनोवृष्टिः पपातामुष्य मूर्द्धनि ॥ २८ ॥

अथो जयजये त्युच्चैः कपयो धरणीतले ।
दिवि देव गणश्चैव हर्षपूर्णा बभाषिरे ॥ २९ ॥
सप्ततालद्रुमविलप्रोद्‌गीर्णैः सप्तभिः स्वरैः ।
उद्‌गायन्तीव मरुतो रामस्य विमलं यशः ॥ ३० ॥

ततस्ते दर्शयामासुः कबन्धं दुन्दुभर्महत् ।
महाद्रिकूटसंकाशंमस्थिमात्रावशेषितम् ॥ ३१ ॥
हिमानीचयसंकाशं शुभ्रं सुचिरसंस्थितम् ।
तद् दृष्ट्वा बलवानेष वामेनैव तु पाणिना ॥ ३२ ॥

उल्लास्य धनुषः कोट्या स्वनवद्‌भूरिवेगतः ।
चलितं व्योममार्गेण दीर्घान्तरमपातयत् ॥ ३३ ॥
तद् दृष्ट्वाद्‌भुतविक्रमस्य चरितं श्रीरामचन्द्रस्य वै
तालानां परिभेदनं खलु जवेनैकेन दिव्येषुणा ।
दुन्दुभ्यस्थिनिपातनं च धनुषः कोट्यैव लीलावशाद्
वामेनैव करेण वानरभटा युक्ता बभूवुर्मुदा ॥ ३४ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे सप्ततालविभेदन-दुन्दुभ्यस्थिक्षेपणो नामैकाशीत्यधिकशततमोऽध्यायः ॥ १८१ ॥

*

द्व्यशीत्यधिकशततमोऽध्यायः

ब्रह्मोवाच

श्रीरामचरणस्पर्शाद्दुन्दुभिर्नाम सोऽसुरः ।
भासयन् हरितः सर्वा द्रुतं स्वर्गपुरं ययौ ॥ १ ॥

सौमित्रिमाह शृण्वत्सु कपिवीरेषु राघवः ।
एष याति दिवं भ्रातर्दुन्दुभिर्लूनपातकः ॥ २ ॥

यस्य प्रकाशादखिला जाता वितिमिरा दिशः ।
दिवि संस्तुवतां चैव देवानामेष संरवः ॥ ३ ॥

लक्ष्मण उवाच

किमिति स्तूयते वीर दुन्दुभिर्नाम सोऽसुरः ।
व्रजन् स्वर्गपुरं देवैर्जिज्ञास्ये तस्यकारणम् ॥ ४ ॥

श्रीराम उवाच

मत्पादस्पर्शधूताघो दुन्दुभिर्नाम सोऽसुरः ।
देवदूतैर्नीयमानः सादरं स्वःपुरीमयम् ॥ ५ ॥

प्रकाशयति दिक्चक्रं महता पुण्यतेजसा ।
तदेष स्तूयते देवैराश्चर्यमसृणाशयैः ॥ ६ ॥

एष कल्पशतानि स्वर्भोक्ष्यते देवसम्पदः ।
ततश्चगन्ता विलयं ब्रह्मणा सह मत्पदे ॥ ७ ॥

किमनेन कृतं भद्रं किमनेन कृतं तपः ।
इति स्तुतिपरा देवा गृह्णन्त्येनं गृहागतम् ॥ ८ ॥

दिव्यं विमानमास्थाय स्वःकान्ताधूतचामरः ।
गत एष स्वर्गपुरीं पश्य लक्ष्मण दुन्दुभिः ॥ ९ ॥

इति वदन्तममुं कपिपुङ्गवाः प्रणयसौख्यससम्भ्रममानसाः ।
सजवमेत्य वचोभिरपूजयंस्तदतिश्रुभ्रयशोभरसौरभैः ॥ १० ॥

अथ सादरमानम्य सुग्रीवो वदतां वरः ।
उवाचेदं रघुश्रेष्ठं कार्यसाधनसत्वरः ॥ ११ ॥

जानामि राम सत्यं त्वामप्रमेयबलान्वितम् ।
भुवोभारापहृतयेऽवतीर्णं पुरुषं परम् ॥ १२ ॥

कस्त्वां विना रघुपते क्षणतो निरस्येदेकेन तावदिषुणा त्रिशिरःखरादीन् ।
उद्दामबाहुबलनिर्जितनाकनाथलक्ष्मीविभूषितमदालयराज्यबन्धून् ॥ १३ ॥

सत्त्वं तवैव विमलं विपुलं प्रशान्तं धामामनन्तिकवयः शुचिशुद्धबोधाः ।
आस्थाययद्रघुपते स्वमिदं शरीरं विश्वग् भवे विहरसेऽखिल वन्दिताङ्घ्रिः ॥ १४ ॥

श्रीरामनाम तव काममशेषकाम सम्पूर्तये जयति कामगवीसमानम् ।
यत्संस्मृतिर्हरति भूरि विसंकटेऽपि दुःखाकरं सुजनुषां भुवने जनानाम् ॥ १५ ॥

गायन्ति ये तव यशः शशिरश्मिशुभ्रप्रालेयपूरशिशिरं भवतापहन्तृ ।
तेषां महाकविनृणां वदनारविन्दे वाग् भाति सौरभवती सदने च लक्ष्मीः ॥ १६ ॥
उद्गीयतां तव यशो विशदं कवीनां पीयूष यूषपरिपोषितमानसानाम् ।
चिन्तामणित्रिदशपादपकामधेनु सम्भूतिभूमिविभवाः परितो भवन्ति ॥ १७ ॥

दारिद्र्यसंहृतिकरंदलितापमृत्यु संतापपापनसमुत्वरबद्धकक्षम् ।
प्रज्ञामनःकुटिलताघनिरासनं ते जागर्ति राम चरितं भरितं गुणौघैः ॥ १८ ॥

को वेत्ति सत्यगुणपौरुषसारवन्ति कर्माणि तेऽतिविमलानि निरस्तमाय ।
यानि त्रिलोकजनशर्मकराण्यनन्यसाधारणानि जगतां तिमिरापहानि ॥ १९ ॥
एतत्त्वदीयमतुलं धनुरुद्धतेषु संग्रामभीमभुवि कुण्डलितं सदुच्चैः ।
मार्तण्डमण्डलमिव ग्रसतेतमांसि रक्षांसि धर्मपथमुद्रणदीक्षितानि ॥ २० ॥

योऽसौ परीक्षणविधिःस्तव पामराणा मस्माकमेव ननु तत्त्वमजानतां ते ।
अज्ञानमावहति सोऽखिलचित्तसाक्षिन् जानाति कः खलु भवन्तमिहाप्रमेयम् ॥ २१ ॥

त्रैलोक्यबन्धवर कल्पतरुस्वभाव भव्याङ्घ्रिपद्मकमलाकरलालितस्य ।
तस्याप्रमेयपुरुषस्य तवातिमन्दैः कोऽसौ परीक्षणविधिः पशुभिः कुधीभिः ॥ २२ ॥
ब्रह्माण्डकोटिकलनामयकालचक्रं चेष्टावतस्तव विभो पुरुषोत्तमस्य ।
श्रीराघवस्य निगमैरनिरूपितस्य नास्माभिरस्ति कपिभिः पशुभिः परीक्षा ॥ २३ ॥

भृत्योऽस्मि ते रघुपते मम सम्प्रतीश यातैव कापि विपदुद्धतशत्रुजन्या ।
तत्प्रार्थनोऽपि मुखरीभवदाननस्य मौढ्यं ममैव रघुवीर वताविरस्ति ॥ २४ ॥
इति संस्तूयमानोऽसौ सुग्रीवेण दयानिधिः ।
उवाच तमथ श्रीमान् स्मितसम्भूषिताननः ॥ २५ ॥

अलमियति लघिष्ठे कर्मणि स्तोत्रवादैरहमहह सुमित्रासूनुरेते च यूयम् ।
समरभुविसमेत्यप्रोज्ज्वलान्यर्जयामो रजनिचरवधोत्थान्येतदूर्ध्वं यशांसि ॥ २६ ॥

तव सुकृतभरेण त्वं विवर्द्धस्व लोके विनिहतरिपुसार्थः सत्यधर्मेण युक्तः ।
बलिनमथ विपक्षं दर्शयाजौ स्वकीयं तमहमहह हन्यामेकवाणप्रयोगात् ॥ २७ ॥

किष्किन्धापुरमेत्य विद्विषि मया दग्धे त्वमेकेषुणा
राज्यं शाधि कपिप्रवीर कतिचिद् घस्रान् युतस्तारया ।
भुञ्जानश्च चिराभिलाषरुचिरां राज्यश्रियं तामपि
क्लिष्टं यां वनवासदारहरणाद्यैस्तत्र नो विस्मरेः ॥ २८ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे सुग्रीवश्रीराम-संवादो नाम द्व्यशीत्यधिकशततमोऽध्यायः ॥१८२॥

*

त्र्यशीत्यधिकशततमोऽध्यायः

ब्रह्मोवाच

इति काकुत्स्थवचसा प्रोत्साहितमनाः कपिः ।
सत्यमेकं पुरस्कृत्य तमुवाच रघूद्वहम् ॥ १ ॥

येनाहं विपदः सर्वास्तरिष्यामि रिपून्द्भवाः ।
राज्यं प्राप्स्यामि च महत्किष्किन्धापुरभोगदम् ॥ २ ॥

चिराभिलषितां तां च कान्तां चतुरचेतसम् ।
अलमासादयिष्यामि यस्य विक्रमतेजसा ॥ ३ ॥

निःसपत्नां च भोक्ष्यामि किष्किन्धानगरीधराम् ।
यस्यैव च प्रसादेन निरायासेन राघव ॥ ४ ॥

तमहं विस्मरिष्यामि यदि त्वां पुरुषोत्तम ।
पापमेवाश्रयिष्यामि पशुरेव न संशयः ॥ ५ ॥

सत्यं हि पशवो राम विस्मरन्ति विचेतनाः ।
मातरं पितरं चापि भ्रातरं भगिनीमपि ॥ ६ ॥

भुञ्जते मातरं चापि भगिनीं तनयामपि ।
पितरं भ्रातरं घ्नन्ति तनयं भक्षलोभतः ॥ ७ ॥

पशूनां पक्षिणां चापि प्रवृत्तिरियमीदृशी ।
तथापि भवता राम जाताः स्मोऽद्यानुकम्पिताः ॥ ८ ॥

कथं नु विस्मरिष्यामि त्वामहं जीवितप्रदम् ।
भवतां रघुवीरेन्द्र प्राप्तज्ञानाः पशुष्वपि ॥ ९ ॥

इति सुग्रीव आभाष्य श्रीरामं करुणानिधिम् ।
महत्तस्य बलं चैष समाश्रित्य कपीश्वरः ॥ १० ॥

आजगाम जवात्तस्य वालिनो बलिनः पुरीम् ।
किष्किन्धां नाम परिखाप्राकारवलयान्विताम् ॥ ११ ॥

बृहद्गोपुरसम्बद्धकपाटोत्कीलभृङ्खलाम् ।
प्रासादशिखराकीर्णपताकाविपुलध्वजाम् ॥ १२ ॥

अयस्ताम्रादिधातूत्थबृहत्प्राकारदुर्गमाम् ।
विन्यस्तलोहान्नियन्त्रकोट्टकूटमहोन्नताम् ॥ १३ ॥

समंतात्परिणाहाढ्यां महाजननिषेवितां ।
अनेकपद्मसंख्यातकपीन्द्रकुलसंकुलाम् ॥ १४ ॥

परिखाप्राप्तसलिला नादेयस्रोतसान्विताम् ।
सुभोज्यसंयुतां नित्यं सुपेयसुरसोदकाम् ॥ १५ ॥

फलपत्रप्रसूनाढ्यबृहदारामरोपितैः ।
पादपैः पूर्णं भ्रमरैः समंताज्जातसौरभाम् ॥ १६ ॥

मणिचत्वरकास्तीर्णहेमास्तरणसंस्तराम् ।
विश्रान्तवानरश्रेणीपरिपीतरसासवाम् ॥ १७ ॥

गृहेष्वापानगोष्ठीषु सोत्फालकपिपुङ्गवाम् ।
दिग्जैत्रेन्द्रसुतानीतसर्वदिग्विभवोन्नताम् ॥ १८ ॥

भीमैः किलकिलाशब्दैर्वाह्वोः स्फोटनकुट्टनैः ।
तलताडनशब्दैश्च पर्युच्छलनवेगजैः ॥ १९ ॥

शब्दैश्च वानरेन्द्राणां वीरवर्यरसाकुलाम् ।
नित्यं संग्रामवार्ताभिरुत्कटापितवानराम् ॥ २० ॥

स्वर्णवर्णैरक्तवक्त्रैरुच्छलत्पुच्छगुच्छकैः ।
आरक्तलोचनैः कीशैरहर्निशमुदित्वराम् ॥ २१ ॥

कीशान्तःपुरनारीणां वानरीणां स्वभावतः ।
दिव्यरूपसुसम्पन्नशरीराणां महात्विषाम् ॥ २२ ॥

जातरूपप्रकाशाङ्गलतानां जितविद्युताम् ।
कमनीयपटीभूषाशृङ्गारोपेतवर्ष्मणाम् ॥ २३ ॥

रक्तोष्ठीनां सुकण्ठीनां सुकेशीनां समंततः ।
सुदतीनां सुनेत्राणां केलिलीलाविशारदाम् ॥ २४ ॥

धर्मिष्ठैर्ज्ञानविज्ञानसम्पन्नैः साधुविक्रमैः ।
सत्यशीलैः क्षमोपेतैर्दयावद्भिर्विचक्षणैः ॥ २५ ॥

त्यागवद्भिर्दिवंयद्भिः संवदद्भिः सुरैः सह ।
दिव्यदृष्टिभिरुत्सिक्तैः सुधीभिर्वंशसुन्दरैः ॥ २६ ॥

नाम्नैव पशुभिः किन्तु पुरुषैर्वीर्यवत्तरैः ।
देवावतारैः कपिभिः श्रीरामालोकनोत्सवैः ॥ २७ ॥

कपिराजैर्वालिबलमुख्यवीरैर्बलोर्जितैः ।
दिग्जैत्रैः स्वामिहितकृच्छीलैः सततमावृताम् ॥ २८ ॥

नित्यं निधिकुलावासां रक्षोभिर्दुर्गमां च ताम् ।
वालिदिग्जैत्रयात्रायां पराजितदशाननाम् ॥ २९ ॥

अजेयस्वामिकां लोके रक्षोभिः किन्नरैः नरैः ।
रमणीयतमां लोकैरीक्षणीयतमश्रियम् ॥ ३० ॥

नानाचतुर्युगीराज्यसमेधिततमां च ताम् ।
चिरात्संजातविजयां राजधानीं कपीशितुः ॥ ३१ ॥

सेवनीयतमां वर्णैश्चतुर्भिस्त्यक्तकैतवाम् ।
नीतिनाथशुभाचारवालिराज्यासनोर्जिताम् ॥ ३२ ॥

यत्रानुसवनं वाद्यज्जयदुन्दुभिघोषिताम् ।
प्रासादभवनं तस्य वालिनोऽग्र्यं कपीशितुः ॥ ३३ ॥

यद्राजा बलवान् वाली दिग्जैत्रो विभवोर्जितः ।
नानाचतुर्युगीजातदीर्घायुर्मृत्युदुर्गमः ॥ ३४ ॥

कृतं येन तपो भूरि शकश्चाराधितो मुहुः ।
ततो लब्धवरोयश्च पृथिवीजयशक्तिमान् ॥ ३५ ॥

नरकन्या नागकन्या रक्षःकिन्नरकन्यकाः ।
भुङ्क्ते यः सुरते स्वैरं बलवांल्लोकनिर्जयी ॥ ३६ ॥

यश्च दृप्यन्तमाबध्य रावणं वलिनां वरः ।
एकस्यामेवकक्षायां धृत्वा श्वपुरमानयत् ॥ ३७ ॥

यत्समानबलो लोके नान्यो नृमृगपक्षिषु ।
रक्षःकिन्नरयक्षेषु नागेषु नगवास्तुषु ॥ ३८ ॥

यो जित्वा हरितः प्रमथ्य हरितां भूमीपतीनां बला
न्यानैषीन्नगरीं निजां ननुनिधींस्तान् यक्षराजस्य ये ।

यस्तारां समपाहरन्निज वलान्मत्तश्च सुग्रीवगां
येनाबध्यत संगरे दशमुखोऽसावेककक्षान्तरे ॥ ३९ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे किष्किन्धागमनो नाम त्र्यशीत्यधिकशततमोऽध्यायः ॥१८३॥

*

चतुरशीत्यधिकशततमोऽध्यायः

ब्रह्मोवाच

तस्याः परिसरेस्थित्वा गाढमास्फोट्य दोर्द्वयम् ।
कृत्वा सिंहनिनादं स आपूर्यध्वनिभिर्दिशः ॥ १ ॥

कृत्वा किलकिलाशब्दं मुखेनापूरयन् नभः ।
आजुहावाग्रजं युद्धे संरम्भादाततायिनम् ॥ २ ॥

अयुध्यतां मिथोयुक्तौ ताबुभावाततायिनौ ।
दोर्दण्डविहितास्फोटो संरब्धौ युद्धदुर्मदौ ॥ ३ ॥

कृतान्योन्यसुनिर्घातौ नानाबन्धविशारदौ ।
मल्लकक्षस्फुरज्जङ्घौ साक्षाद्वीररसाविव ॥ ४ ॥

आरक्तनयनद्वन्द्वौ भ्रुकुटीभङ्गभीषणौ ।
अन्योन्यजीवितान्तेच्छू अन्योन्योद्घोषकारिणौ ॥ ५ ॥

मुष्टीमुष्टिकृताघातौ दन्तादन्ति नखानखि ।
हस्ताहस्तिकृतोत्क्षेपौ पादापादिप्रहारिणौ ॥ ६ ॥

दण्डादण्डिकृतावेगप्रहारौ वीर्यवत्तमौ ।
शक्तीशक्तिप्रहरणो शूलाशूलि गदागदि ॥ ७ ॥

हलाहलिदृढाघातं युध्यमानौ परस्परम् ।
खड्गाखड्गिखराघातं ताडयन्तौ महाबलौ ॥ ८ ॥

नागायुतबलोपेतौ तलशब्दप्रहारिणौ ।
दर्शयन्तावुभौयुद्धे ह्यन्योन्यप्लुतिलाघवम् ॥ ९ ॥

परस्परं घातयन्तावुत्क्षिपन्तौ परस्परम् ।
परस्परं घोषयन्तौ दिशः किलकिलारवैः ॥ १० ॥

अङ्गैर्वीरावेशशोणैः पुलकौघविसंस्थुलौ ।
वलन्तौ विचलन्तौ च कुर्वन्तौ भूर्युपक्रमम् ॥ ११ ॥

एह्येहि दुष्ट दुर्ग्रीव त्वं मया युद्धमिच्छसि ।
तारां च राज्यलक्ष्मीं च भोक्तुकामोऽसि लोलुप ॥ १२ ॥

तत्ते दूरे द्वयमपि मत्तो मृत्युस्तु संनिधौ ।
अतस्त्वं मर्त्तुकामो मां सम्प्राप्तो दर्पगर्वितः ॥ १३ ॥

किं किंन कुर्वते प्रायोमर्त्तुकामा जना इह ।
अतौ विमूढहृदयः संजातोऽस्यधुना रिपो ॥ १४ ॥

एकेनैव प्रहारेण त्वां नयामि यमक्षयम् ।
इत्युक्त्वा बलवान् बालिः प्रजह्रे गदयैव तम् ॥ १५ ॥

सोऽपि वेगात् समुत्तोल्य गदां सुमहतीं रिपोः ।
जघान वक्षसि क्रुद्धः सास्य पुष्पमिवाभवत् ॥ १६ ॥

ततोऽन्योन्यं गदाघातैः समरे तावयुद्धयताम् ।
अध ऊर्ध्वं समंताच्च दर्शयन्तौ गदे उभे ॥ १७ ॥

परस्परप्रहारैस्ते चूर्णतामागते गदे ।
ततः शक्त्यृष्टिशूलासिभुशुण्डीपरिघादिभिः ॥ १८ ॥

परश्वधप्रासकुन्तनोमरादिभिरायुधैः ।
प्रजह्रतुस्तावन्योन्यं रोषावेशप्रहारिणौ ॥ १९ ॥

भग्नेष्वायुधपूगेषु तरुशैलशिलादिभिः ।
अयुद्धयतां मिथोरक्षो रोषावेशवशं गतैः ॥ २० ॥

तयोः प्रहरतोर्गाढं शिलाभिस्तरुभिस्तथा ।
निर्घातघोषः समभूद्गर्जतोर्घनयोरिव ॥ २१ ॥

शिलाश्च भग्नतां नीताः काठिन्यादङ्गयोस्तयोः ।
समूलोत्पाटितास्तुङ्गास्तरवश्चत्रुटद्रुजाः ॥ २२ ॥

ताभ्यां वज्रप्रहारिभ्यां गर्जद्भ्यां घोरनिःस्वनम् ।
समंतात्संक्षयं नीता अद्रिकूटा महोन्नताः ॥ २३ ॥

भञ्जिताश्चैव तरवः स्कन्धैर्थे गगनस्पृशः ।
ततोऽवतीर्णौ समरे मुष्टीमुष्टि प्रहारिणौ ॥ २४ ॥

तयोर्मुष्टिप्रहारैस्तै[1]रतिघोरैर्घनारवैः ।
कम्पिता धरणीकृत्स्ना शब्दायितमभून्नभः ॥ २५ ॥

कोटिवज्रनिपातोत्थैरारवैरिव सर्वतः ।
अरौद्धां रोदसी शब्दैर्मुष्टामुष्टिप्रहारजैः ॥ २६ ॥

तलप्रहारैः प्रखरैर्मुष्टिभिश्चातिदारुणैः ।
जङ्घाबाहुप्रहारैश्च रोदसी सर्वतो वृते ॥ २७ ॥

उपर्यधश्चमथ्नन्तौ तावन्योन्यस्य वर्ष्मणी ।
मोटयन्तौ क्षिपन्तौ च युधि भूरि प्रजह्रतुः ॥ २८ ॥

मल्लयुद्धेन युद्धयन्तौ प्रहारापातदारुणौ ।
अन्योन्याङ्गकृताक्षेपावन्योन्यपरिमर्दनौ ॥ २९ ॥

अन्योन्याङ्गकृतः क्रान्ती अन्योन्यजयकाङ्क्षिणौ ।
अन्योन्यमूर्द्धहरणामिच्छन्तौ बद्धवैशसौ ॥ ३० ॥

एकरूपावेकवेशावेकशीलपराक्रमौ ।
युध्यमानौ मिथो युद्धे रामेणैवं वितर्कितौ ॥ ३१ ॥

अहो ममेह को मित्रमनयोर्युद्ध्यमानयोः ।
द्वयोः प्लवगयोर्मध्ये समाननुरूपयोः ॥ ३२ ॥

किं च मित्रस्य चिह्नं स्यादिति मे मुह्यते मनः ।
इत्येवं तर्कमाणेऽस्मिन्मर्त्यलीलानुकारिणि ॥ ३३ ॥

रामे दाशरथौ देवे बलिना तेन वालिना ।
इन्द्रस्य तनयेनायं सूर्यसूनुः पराजितः ॥ ३४ ॥

---

१. घोर०–मथु०, अयो० ।

वीर्यौधभाजा बलिनां वरेणतेनायमुच्चैर्युधि युध्यमानः ।
मुष्टिप्रहारैः सपदि प्रसह्य विद्रावितः सङ्गरतोऽर्कसूनुः ॥ ३५ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे बालिसुग्रीवसंग्रामे सुग्रीवपराजयो नाम चतुरशीत्यधिकशततमोऽध्यायः ॥ १८४ ॥

*

पञ्चाशीत्यधिकशततमोऽध्यायः

ब्रह्मोवाच

मुष्टिप्रहारविध्वस्तः शस्त्रघातपरिक्षतः ।
क्षरद्रुधिरदिग्धाङ्गः कपिर्भ्रष्टपराक्रमः ॥ १ ॥

मुहुर्विनिःश्वसन् श्रान्तो धावनश्रमवेगतः ।
पलायनसलज्जोऽसौ रामस्यान्तिकमागतः ॥ २ ॥

मुहुर्विचकितस्तत्र शत्रोरागमशङ्कया ।
विवृत्य वदनं पश्चात् पश्यन् सत्रासमानसः ॥ ३ ॥

तं प्रणम्यात्मसुहृदं तर्जन्यग्रेण निर्दिशन् ।
उपालेभे पराभूतो वाक्यैरुच्चावचैर्मुहुः ॥ ४ ॥

अहो रघुकुलोत्तंस वञ्चितो भवतास्म्यहम् ।
विध्वस्तः संगरे युद्ध्वा बलिना तेन वालिना ॥ ५ ॥

जानाम्यात्मबलं तस्मिन्नपर्याप्ततमं रिपौ ।
तव विश्वासमाश्रित्य युक्तोऽहं तेन संगरे ॥ ६ ॥

सोऽहं सम्यक् त्वया मित्र नीतस्तेन पराजयम् ।
यद्यहं न पलायेय हत सवाद्य तेन तत् ॥ ७ ॥

प्राणान् गृहीत्वा कथमप्यागतोऽस्मि तवान्तिकम् ।
क एवं सुहृदो हन्याद् विश्वासं रघुसत्तम ॥ ८ ॥

पुरैवाहं हतबलस्तस्माद्भीतः पलायितः ।
ऋष्यमूकगिरेः शृङ्गमाश्रित्य रहसि स्थितः ॥ ९ ॥

त्वद्बलं तु समाश्रित्य पुनः सोत्साहमानसः ।
युक्तोऽहं तेन समरे द्राक् सम्प्राप्तश्च तत्फलम् ॥ १० ॥

इदं तेऽनुचितं वीरयन्मित्रपरिवञ्चनम् ।
महोजसोऽतिमहतो धार्मिकस्य यशस्विनः ॥ ११ ॥

किमहं कृतवान् राम तव विश्वासमात्मना ।
आगन्तुकस्य का मैत्री किं दुःखं मे पराजये ॥ १२ ॥

सोऽहं स्वच्छतमं शत्रुं विप्रकृत्य सुनिर्बलः ।
कथं स्थास्यामि लोकेऽस्मिन् सक्षेमो जीवितान्वितः ॥ १३ ॥

अत्राप्यागमनं शङ्के तस्य दुष्टस्य विद्विषः ।
प्रहर्तुमुद्यते तस्मिन् को मे त्राता भविष्यति ॥ १४ ॥

इति तस्य गिरो रामः श्रुत्वाऽऽत्मसुहृदस्तदा ।
सानुकम्पमनाश्चक्रे हस्तस्पर्शेन लालनम् ॥ १५ ॥

वालिनो मुष्टिघातेन शस्त्रघातेन चापि सः ।
परिक्षताखिलतनुः क्षतजौघपरिप्लुतः ॥ १६ ॥

रामस्य हस्तस्पर्शेन भृशं पीयूषवर्षिणा ।
अगदेनेव सुग्रीवस्तत्क्षणात्सुखितोऽभवत् ॥ १७ ॥

तमुवाच रघुश्रेष्ठो लालयित्वा भृशं प्रभुः ।
न मे दोषोऽस्ति वै मित्र युवां ननु रणाङ्गणे ॥ १८ ॥

युध्यमानौ मया दृष्टावेकरूपवपुर्धरौ ।
अतो मम वितर्कोऽभूत को मे मित्रं भवेदिति ॥ १९ ॥

चिह्नं नैव मया दृष्टं मित्रस्य तवयुध्यतः ।
अतः कथमहं हन्यां विशिखेनानिवर्तिना ॥ २० ॥

हत्वा प्रमादतो मित्रं कथं स्यां पापभागहम् ।
इष्टेन च वियुज्येय ततः कालः प्रतीक्षितः ॥ २१ ॥

मयाऽऽशु नैकवाणेन तव शत्रुर्निपातितः ।
अधुना पुनरेवत्वं प्रयाहि रिपुमात्मनः ॥ २२ ॥

सत्यं वदामि ते मित्र हनिष्ये तं महेषुणा ।
इत्याख्याय रघुश्रेष्ठः सुग्रीवं सुहृदं निजम् ॥ २३ ॥

चिह्नाय तस्य ग्रीवायां मालां कुसुमनिर्मिताम् ।
निदधावात्महस्तेन करुणारसवारिधिः ॥ २४ ॥

भूयोऽप्येष स्वामिना राघवेण दत्ताश्वासो लालितश्चैव कीशः ।
युद्धं कर्त्तुं वालिना वीर्यभाजा किष्किन्धाख्यां नगरीं संजगाम ॥ २५ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे सुग्रीवसमाश्वासनो नाम पञ्चाशीत्यधिकशततमोऽध्यायः ॥ १८५ ॥

षडशीत्यधिकशततमोऽध्यायः

ब्रह्मोवाच

पुनः सुग्रीव आगत्य किष्किन्धापुरसन्निधौ ।
जगर्ज कलिताटोपो रामस्य बलमास्थितः ॥ १ ॥

आरक्तलोचनः कोपादास्फोटितभुजद्वयः ।
चक्रे सिंहनिनादं च दर्पनिर्व्यूढमानसः ॥ २ ॥

तस्य गर्जितमाकर्ण्य वालिः शुद्धान्तसंस्थितः ।
आः स एव पुनर्मूढः प्राप्तो मां युद्धकामुकः ॥ ३ ॥

नाधुना मोचनीयोऽसौ वध्य एव मया खलः ।
यदनादृत्य संत्यक्तस्तत्फलं पुनरागतः ॥ ४ ॥

कस्य वीर्यमुपाश्रित्य गर्जत्येष मयि स्थिते ।
ननु मूढोऽयमधुना नोपेक्ष्यः खलवृत्तिभृत् ॥ ५ ॥

खला हि जीवनार्थाय भवन्ति नतवृत्तयः ।
जीविताः पुनरुन्नम्रा जायन्ते वेतसा इव ॥ ६ ॥

शत्रुर्नोपेक्षणीयः स्यात् प्रमादाच्चेदुपेक्षितः ।
सम्प्राप्ते वसरे स्वीये पुनर्मूलं निकृन्तति ॥ ७ ॥

अतोहन्तुमिमं शत्रुं प्रयाम्येष विनिश्चितम् ।
इत्थं कृतमतिर्वालिरन्तःपुरसुखस्थितः ॥ ८ ॥

ततः प्रचलितुं वीरश्चकमे क्रोधमूर्छितः ।
आज्ञां ययाचे भार्यां स बद्ध्वा परिकरं दृढम् ॥ ९ ॥

तस्य भार्या तु सा तारा राज्यश्रीरिव सुन्दरी ।
युद्धाय सज्जं दयितं वारयामास यत्नतः ॥ १० ॥

दृष्ट्वापशकुनान्यद्धा भर्तुः कुशलमिच्छती ।
नैतस्यां नाथ वेलायां युक्ता सम्प्रस्थितिर्युधे ॥ ११ ॥

पश्यैताः खलु फेरव्यो रटन्ति तव सम्मुखे ।
सूचयन्त्येव सहसा दुर्निमित्तं निपातुकम् ॥ १२ ॥

दिग्दाहं चापि पश्यामि रजसेवार्कमावृतम् ।
कम्पतीव मनोऽत्यर्थं त्वग्दह्यतइवाद्य मे ॥ १३ ॥

वामं स्फुरति चक्षुर्मे भुजमूलं च दक्षिणम् ।
प्रलयत्येष पापात्मा काकः कटुरटन्मुहुः ॥ १४ ॥

भवन्त्यन्यानि भूयांसि दुर्निमित्तानि चापि ते।
प्रस्थानं वारयन्त्येवेदानीं नावसरो युधः ॥ १५ ॥

मनो नोत्सहते वीर मामकं प्रस्थितौ तव।
अतः कालान्तरे युद्धं क्रियतां शत्रुणा सह ॥ १६ ॥

सन्मुहूर्त्तमुपाश्रित्य यद्धि कार्यं प्रवर्त्यते।
भवेदविहतं तद्वैनेतरद् बलिनामपि ॥ १७ ॥

सम्पन्नोऽपि बलेनोच्चैः प्रतीक्षेत विधेर्बलम्।
अनुकूले विधो सर्वमनुकूलं यतो भवेत् ॥ १८ ॥

यस्तु कालवशं प्राप्तस्तस्य बुद्धिर्विचाल्यते।
ध्रुवं चलितबुद्धीनां विध्वंसो जायते भुवि ॥ १९ ॥

न जातु चावमन्येत प्रज्ञावन्तं जनं नृपः।
साध्यते प्रजया कार्यं न तद्बलशतैरपि ॥ २० ॥

बन्धूनां च हितं वाक्यं नोच्छेद्यं साधुबुद्धिना।
उपचारं हि कुर्वन्ति सन्त्युदासीनवृत्तयः ॥ २१ ॥

उपेक्षेतरिपुंकापितुदन्तमपिवाक्शरैः ।
नोपेक्षेत क्वचित्तं वै भाषमाणमपि प्रियम् ॥ २२ ॥

देशं कालं बलं देवमाश्रित्य विधिवन्नरः।
अप्रमत्तः स्वकार्याणि साधयेज्जयकाङ्क्षया ॥ २३ ॥

विहीनमेकमप्यङ्गं राज्यं विकलयेद्ध्रुवम्।
सर्वाङ्गसंयुतं राज्यं शासद्भूपः सुखी भवेत् ॥ २४ ॥

प्रमादः किल सर्वेषां कार्याणां मूलनाशकः।
अप्रमत्तधियो भूपा राज्यं शासति शर्मणा ॥ २५ ॥

तदयं संगतः शत्रुर्गर्जन्नपि न वै त्वया।
योद्धव्योऽस्मिन् दुर्निमित्तसूचके समये प्रिय ॥ २६ ॥

प्रेष्यन्तां कतिचिद्वीराः कपयः कपिनायकाः।
योत्स्यन्ते तेऽमुना सार्द्धं तावत्त्वमपि यास्यसि ॥ २७ ॥

ज्योतिर्विदः शाकुनिकाः पृच्छ्यन्तामितरेऽपि ते।
सूचयिष्यन्ति सम्पृष्टास्तव राजन् शुभाशुभम् ॥ २८ ॥

इति भार्यावचः श्रुत्वा वालिः प्रहरतां वरः।
प्रहस्य समुवाचैनामात्मनो हितकाङ्क्षिणीम् ॥ २९ ॥

अलं भिया तव प्राणप्रिये सन्ति स्वभावतः।
भीरवो हि स्त्रियो लोके त्वं पुनर्वीरपत्न्यसि ॥ ३० ॥

प्रसादं कुरु मे कान्ते प्रहस्यासि ममार्पय।
हरामि येन तस्याशु विपक्षस्य शिरो रणे ॥ ३१ ॥

अलं ते कातरतया मपि वीरे मनस्विनि ।
दिशो मया जिताः सर्वाः कोऽयं सुग्रीव आतुरः ॥ ३२ ॥

मया विनिर्जितः पूर्वं द्रावितश्चैव संगरात् ।
मृत्युनाप्रेरितो नूनं मामयं पुनरागतः ॥ ३३ ॥

हनिष्यामि ध्रुवं सुभ्रु तमियं रिपुमात्मनः ।
नायं खलोमयोपेक्ष्य इदानीं रुष्ट चेतसा ॥ ३४ ॥

गच्छत्यवसरस्तन्वि तद्वधस्यायमुत्तमः ।
हसित्वा देहि मे खड्गं येनास्य कमपाहरे ॥ ३५ ॥

विलम्बं सहते नायस्तापितं घटने यथा ।
रोषावेशवशं चित्तं तथैवास्य वधे मम ॥ ३६ ॥

किं बिलम्बयसे मूढे मामस्य हननोद्यतम् ।
यत्पूर्वमस्मिन् रक्तासीस्तेनैव सदयासि किम् ॥ ३७ ॥

न विघ्नयतमां कान्ते मामस्य विजयोद्धुरम् ।
प्रसीद देहि मे खड्गं जेतुं गच्छामि विद्विषम् ॥ ३८ ॥

अकृत्वास्य वधं वालिनैंव द्रक्ष्यति ते मुखम् ।
इति मे सत्यवचसो नितरामाहितः पणः ॥ ३९ ॥

पुरीपरिसरे तावदेष गर्जति बालिशः ।
विस्फारितासिर्नो यावद्दर्शयाम्यैनभक्षिणी ॥ ४० ॥

अयं गर्जति दर्पेण पुरीपरिसरे मम ।
अहं पश्येय शकुनान्यहो कातरता भृशम् ॥ ४१ ॥

यो दूराद्रिपुमालक्ष्य पतति श्येनवन्न च ।
नासौ वीरसभामध्येऽवस्थातुमुचितो जनः ॥ ४२ ॥

देशं कालं सहायांश्च बलं स्वपरपक्षयोः ।
यो विचारयते संख्येनासौ वीरः स कातरः ॥ ४३ ॥

अलं शकुनवार्ताभिर्द्वयोरेकं विनिश्चितम् ।
मां हनिष्यति सुग्रीवस्तमहं वा वरानने ॥ ४४ ॥

इत्थं करालतमकालवशं गतोऽसौनिर्धूयदुःशकुनवृन्दमुदग्रबुद्धिः ।
उक्त्वा वचः सपदियावदुपाददीताक्षिप्यप्रियामसिमवोचत तावदेषा ॥ ४५ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे तारावालिसंवादो नाम षडशीत्यधिकशततमोऽध्यायः ॥१८६॥

*

सप्ताशीत्यधिकशततमोऽध्यायः

तारोवाच

बलवांस्त्वमसि मत्तो यद्याच्छिद्य ग्रहीष्यसि ।
कस्ते निरोद्धां तत्कार्ये तथाप्येतद्वचः शृणु ॥ १ ॥

आप्तेन साधु वक्तव्यं मन्तव्यं चापि साधुना ।
किं कर्तव्यं न मनुते यदि भाग्यविपर्ययात् ॥ २ ॥

सन्ति ते बहवो वीराः कपयो रणदुर्मदाः ।
तेषांमेकतमं प्रेयः किं नाज्ञापयसे युधे ॥ ३ ॥

तस्मिन्विनिर्जिते तेन प्रेषयान्यं महाभटम् ।
तस्मिन्नपि जिते त्वन्यं प्रेषयिष्यसि वै भटम् ॥ ४ ॥

अन्यथागतिमापन्नेत्वयि दुःशकुनैः प्रिय ।
कोऽन्यो विजेता सुग्रीवं ततो मा गच्छ दुःक्षणे ॥ ५ ॥

न ज्ञायते कालबलाद् दुर्बलोऽपि बली भवेत् ।
अन्धायते दिवाफेरुर्निशि गृध्रश्च सुष्ठुदृक् ॥ ६ ॥

कालस्य बलमाश्रित्य विजय स्व पुना रिपुम् ।
अस्मिन् काले गते सोऽन्यः शुभ एव भविष्यति ॥ ७ ॥

इति ब्रुवाणां तां भार्यामनादृत्य बलोन्मदः ।
अगृह्णादसिमाछिद्य वालिः कालवशं गतः ॥ ८ ॥

अन्तःपुरवधूवृन्दस्तं जयेत्यब्रवीत्ततः ।
प्रतस्थौ बलसंदृप्तो युद्धाय सहसोद्धुरः ॥ ९ ॥

विस्फारितदृगुत्सिक्तो बलदुर्मदमानसः ।
दुर्निमित्तानि निर्धूय प्राचलत्कपिराट् ततः ॥ १० ॥

रटन्ति कटुलं काका दिवि गृध्रा भ्रमन्ति च ।
रोदितीव घनो व्योम्नि मुमूर्षौ वासवाङ्गजे ॥ ११ ॥

तमभिश्रवणोद्वेगं निनादं दधते शिवाः ।
दिवा रुवन्ति निःशङ्कं फेरुकाः सम्मुखा रवेः ॥ १२ ॥

रुवन्ति पक्षिणः क्रूरं तरुकोटरवासिनः ।
वामेऽशुभा अगुर्दक्षे वामेऽगुर्दक्षतः शुभाः ॥ १३ ॥

अभूत्पुरः सधूमोऽग्निः काष्ठं दग्धं वनाग्निना ।
भिषजो विधवाश्चापि पुर एत्य बभाषिरे ॥ १४ ॥

तान् सर्वान् स विनिर्धूय प्रातिष्ठत गुहाङ्गणात् ।
बद्ध्वा परिकरं वालिर्वाचालो बलदुर्मदः ॥ १५ ॥

इत्थं हठाद्विनिर्यति प्रेयसि स्वालयाद् भृशम्।
शुशोच तत्क्षणे तारा दुर्निमित्तानि जानती ॥ १६ ॥

तानि दुःशकुनान्यस्य शकुनान्येव तत्त्वतः।
लयमेष्यति कीशेन्द्रो यदयं रामतारके ॥ १७ ॥

योगिनामपि यत्संगो दुरापस्ता दृशक्षणे।
स लब्धस्तेन कीशेन जानेऽस्य सुकृतं कियत् ॥ १८ ॥

सोऽयुङ्क्त समरेगत्वा सुग्रीवेण बलोद्धतः।
ददर्श रामश्च ततस्तावन्योन्यमुपागतौ ॥ १९ ॥

आस्फोटयन्तौ दोर्दण्डमण्डलानि पृथक् पृथक्।
मृगेन्द्रनादिनौ संख्ये रोषादारक्तलोचनौ ॥ २० ॥

घोषयन्तौ दिशः सर्वाः प्रावृषीव पयोधरौ।
अन्योन्यविजयाकाङ्क्षारोपिताटोपकोपनौ ॥ २१ ॥

ज्येष्ठानुजौ युधि युतौ दृष्ट्वा रामः कृपानिधिः।
सुग्रीवपक्षमाश्रित्य तस्थौ गुल्मान्तरे तदा ॥ २२ ॥

अदृष्टकायः संलीय धृतधन्वा करद्वये।
संहितेषुरमेयात्मा पश्यन् वृत्तं रहस्तयोः ॥ २३ ॥

अथास्फोटयभुजौ गाढं वालिः संग्रामभूमिगः।
आजुहाव रिपुं योद्धुं सीतेशसुहृदं कपिम् ॥ २४ ॥

सोऽपि रामस्य विश्वासादास्फोटय निजदोर्युगम्।
विजितोऽप्यमुना योद्धुं रणाङ्गणमवातरत् ॥ २५ ॥

वालिर्विकाशखड्गेन यावदस्य हरेच्छिरः।
तावद् रामो मुमोचास्मिन् बाणं प्राणहरं दृढम् ॥ २६ ॥

कृत्याकृत्यमचिन्तयन् रघुपतिः स्वैश्वर्यमेवास्थितो
मध्येसंगरमेतयोर्निजनिजोत्कृष्टैः बलाद् युध्यतोः।
एकस्मिन् स्वसुहृत्तया सकरुणः श्रीमान् रघूणां पति-
र्वाणं प्राणहरं प्रयुज्य धनुषान्यस्मिन् मुमोच क्षणात् ॥ २७ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे वालिहननो नाम सप्ताशीत्यधिकशततमोऽध्यायः ॥ १८७ ॥

*

अष्टाशीत्यधिकशततमोऽध्यायः

ब्रह्मोवाच

वाली रामस्य बाणेन विद्धो हृदयमर्मणि ।
पपातसहसाभूमौ हा हतोऽस्मीति संब्रुवन् ॥ १ ॥

रटति स्मरणाङ्गणे कपीन्द्रः पतितः सम्प्रति मुक्तजीविताशः ।
अहमत्र परेण युध्यमानो ननु केनापि नरेण हा हतोऽस्मि ॥ २ ॥

रटतोऽस्य रवं श्रुत्वा करुणो रघुनन्दनः ।
विनिन्दन्नात्मनः कर्म तत्रैव समुपागमत् ॥ ३ ॥

निरीक्ष्य विद्धमर्माणमात्मबाणेन वालिनम् ।
संतेपेऽनुचितं कृत्वा रामोधर्मभृतां वरः ॥ ४ ॥

हा मया किमयं वीरः सुग्रीवेण रणाङ्गणे ।
युध्यमानो हतो मोहाद्विना मन्तुमकारणम् ॥ ५ ॥

नापराद्धं ममानेन किंचिदप्यमितौजसा ।
सुग्रीवस्यैव शत्रुश्च वध्यस्तेनैव नान्यथा ॥ ६ ॥

अहं तु व्यर्थमेवास्य वधं कृत्वानुतप्तवान् ।
एतन्मेऽनुचितं कर्म विनिन्दिष्यन्ति धार्मिकाः ॥ ७ ॥

इति शोचन्मुहुरयं काकुत्स्थः करुणानिधिः ।
तैरेव सान्वितः साम्ना सुग्रीवानुजवालिभिः ॥ ८ ॥

कपिभिश्चापिहनुमन्नलनीलाङ्गदादिभिः ।
अये त्वं रघुशार्दूल हृदा किमनुशोचसि ॥ ९ ॥

अकारणमसौ वीरो हत इत्यनुशोच मा ।
सुग्रीवेण सहाबद्धा मैत्र्येव ननु कारणम् ॥ १० ॥

तव मित्रं हि सुग्रीवस्तमसौ समराङ्गणे ।
पराबभूव दृप्तात्मा तस्येदं कर्मणः फलम् ॥ ११ ॥

अवाय स्वयमेवायं हतो यद्भवतेषुणा ।
किमकार्षीत्तपश्चायं म्रियमाणो ददर्श यत् ॥ १२ ॥

त्वां दुर्लभं योगिवरैः सद्यो मुक्तिमवाप्स्यति ।
हा हा रघुपते मूर्द्ध्ना धेह्यस्य चरणौ निजौ ॥ १३ ॥

नायं मृतो भाग्यनिधिः सुचिरं जीवितः प्रभो ।
त्वदीक्षाधौतशमलो यदन्ते त्वां गमिष्यति ॥ १४ ॥

अहो अस्य कपेर्भाग्यं त्वद्बाणस्पर्शमाप यत् ।
तेनैष धौतशमलो ध्रुवं यास्यति ते पदम् ॥ १५ ॥

हा काकुत्स्थकुलोत्तंस कोमलौ चरणाविमौ ।
निधेहि मम हृन्मूर्द्धनेत्रेषु कृपया प्रभो ॥ १६ ॥

हृद्येतौ मम संतापं भवसंज्ञं हरिष्यतः ।
मूर्द्धिन मे रत्नजोत्तंसशोभायै च भविष्यतः ॥ १७ ॥

नेत्रयोर्मम रामेन्दो सुधावृष्टि विधास्यतः ।
मम मृत्युरपि श्लाघ्यमिमां प्राप्तवतो दशाम् ॥ १८ ॥

एकं तु तव पृच्छामि यदि नाथ न कुप्यसि ।
सुग्रीवमैत्रीहेतुस्ते को नाम रघुपुङ्गव ॥ १९ ॥

जानामि राम सुग्रीवहेतोर्मामवधीः स्फुटम् ।
शोचसीत्थं हृदा यस्मादितिमे वद निश्चितम् ॥ २० ॥

श्रीराम उवाच

प्रिया मेऽपहृता वाले रावणेन महौजसा ।
चिकीर्षुस्तद्वधं यत्नान्मित्राण्यन्वेषयाम्यहम् ॥ २१ ॥

एकमासादितं मित्रं सुग्रीवाख्यमिदं मया ।
यद्धेतोस्त्वं हतो वालिन् सहस्रगजदोर्बलः ॥ २२ ॥

स्थापयिष्याम्यहं चैनं किष्किन्धा राज्यसम्पदि ।
रावणस्य वधे चैष ममोपकृतिमेष्यति ॥ २३ ॥

अनेकपद्मसंख्यातकपीनामधिपोह्ययम् ।
सेनासंघटनं तैश्च मम सम्यग्विधास्यति ॥ २४ ॥

इत्यस्य मैत्रीहेतुस्ते मया सम्यङ्निरूपितः ।
त्वद्वधस्य च वै हेतुरेष एव न संशयः ॥ २५ ॥

इति रामोदितं श्रुत्वा कपीनामधिभूर्वचः ।
प्राहसन्म्रियमाणोऽपि हेलागणितरावणः ॥ २६ ॥

अहो एतावन्तमर्थं पुरस्कृत्य रघूद्वह ।
सुग्रीवमैत्रीहेतोर्मामवधीः कि दयानिधे ॥ २७ ॥

योऽयं निजैककक्षायां निधाय दशकन्धरम् ।
आनैषमात्मभवने स्त्रीणां क्रीडनकोपमम् ॥ २८ ॥

तमहं रघुशार्दूल त्वदाज्ञामात्रतो बलात् ।
किं नानेष्यं निबध्यैव व्यर्थस्तत्र परिश्रमः ॥ २९ ॥

श्रुत्वा रघुपतिस्तस्य वचोऽतिबलसूचकम् ।
विसिस्मिये हृदात्यर्थं दृष्ट्वा भूर्यनुजाननम् ॥ ३० ॥

अथरघुपतिपादस्पर्शधौताखिलाघः कपिपरिवृढ उच्चैः संविशुद्धान्तरात्मा ।
तदमलमुखचन्द्रालोकपीयूषधारा सुहितनयनपद्मस्तेषु पश्यत्सु बालिः ॥ ३१ ॥

बहिर्दशोद्भूतप्रणयपरिपुष्टामलमनाः क्षणादन्तर्ध्यानप्रभवसुखधारास्वदनकृत् ।
समीपस्थः सीतारमणपदयोः क्षेमपदयोः परपुंसप्रेम्णा पटुतरमयुङ्क्त स्वहृदयम् ॥३२॥

अथन्यमीलन्नयने क्षणेन श्रीरामचन्द्रे पुरुषोत्तमेऽस्मिन् ।
निलीनसर्वेन्द्रियवृत्तिरेष प्राप्तः पदं योगिसुदुर्लभं तत् ॥ ३३ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे वालिवधविमोचनो नामाष्टाशीत्यधिकशततमोऽध्यायः ॥ १८८ ॥

*

एकोननवत्यधिकशततमोऽध्यायः

ब्रह्मोवाच

अथ सुग्रीवमानीय मङ्गलध्वनिपूर्वकम् ।
किष्किन्धानगरीराज्ये स्थापयामासराघवः ॥ १ ॥

तोयैः कपिवरानीतैर्नानातीर्थसमुद्भवैः ।
अभिषेकं समातेने सुग्रीवस्य रघूद्वहः ॥ २ ॥

पताकाध्वजकेतूनां वासोभिर्बहुवर्णकैः ।
तोरणैर्नवपर्णालि कुसुमस्रक्समुद्भवैः ॥ ३ ॥

विचित्रवर्णैर्वसनखण्डश्रेणिविराजितैः ।
रम्भास्तम्भैः पूर्णकुम्भैः फलपल्लवशालिभिः ॥ ४ ॥

मार्जनैश्चन्दनालेपसुगन्धिजलसेचनैः ।
तूर्यनिःसानघोषैश्च वेदघोषैर्द्विजन्मनाम् ॥ ५ ॥

शृङ्गारितैर्नरैर्नारीनिकरैर्हर्षसंयुतैः ।
किष्किन्धानगरी सर्वा तदानीं समलङ्कृता ॥ ६ ॥

निनाय सानुजं रामं पूर्वं कपिकुलाग्रणीः ।
विचित्रक्षोयपद्याभिर्मणिकाञ्चनवर्षणैः ॥ ७ ॥

जयघोषैश्च परितः सूतमागधवन्दिनाम् ।
निर्मञ्छनैर्बहुविधैर्मणिमाणिक्यहेमभिः ॥ ८ ॥

रामं सौमित्रिमेवापि जग्राह परमाहृतः ।
अभ्यर्हणैः पृथग्दत्तैः पाद्यार्घ्यादिभिरुत्तमैः ॥ ९ ॥

तारा तमग्रतोभूय नित्ये शुद्धान्तमध्यतः ।
दासीसखीगणैर्युक्ता भूयः पर्यचरच्च तम् ॥ १० ॥

उवाच हृष्टहृदया सानुजं तं गृहागतम् ।
अद्य मे परमं भाग्यं प्रभो त्वन्मुखदर्शनात् ॥ ११ ॥

यत्पुरा वाञ्छितमभूच्चिरेण रघुपुङ्गव ।
तदद्य चक्षुषा लब्धं श्रीराम तव दर्शनम् ॥ १२ ॥

अयं चानुगृहीतस्ते सख्येन कपियूथपः ।
सर्वकल्याणनिधिना सर्वसौख्यविधायिना ॥ १३ ॥

अहो अत्यद्भुतं भाग्यं किष्किन्धायाः प्रियाकृते ।
या त्वत्पदाङ्कनिबहैर्भूषिता तीर्थपावनैः ॥ १४ ॥

पुण्यक्षेत्रमभूदेषा तवागमनमात्रतः ।
स्नाने दाने जपे होमे सर्वत्राक्षयपुण्यदा ॥ १५ ॥

अहो कपीनां रघुप किं भाग्यमनुवर्ण्यते ।
ये पश्यन्ति दिवारात्रं त्वामानन्दवपुर्घनम् ॥ १६ ॥

अहो वानरकान्तानां भागधेयमनुत्तमम् ।
निर्मञ्छयन्ति याः प्राणान् संततं सानुजे त्वयि ॥ १७ ॥

त्वयासौ रोपितो राज्ये श्रीराम कपिनायकः ।
अनश्वरं पदं प्रायः प्राप्त इत्यनुलक्षये ॥ १८ ॥

त्वया भृतानां रामेन्दो केन स्याद्रिक्तता भुवि ।
त्वया रिक्तीकृताश्चापि म्रियेरन् केन राघव ॥ १९ ॥

दासः सखा सुहृद्भक्त इत्यादिभिरभीष्टदैः ।
आख्यानैरङ्किता लोका भवन्ति तव निर्भयाः ॥ २० ॥

त्वत्पादपद्मं ये राम प्राप्ताः शरणमञ्जसा ।
कायेन मनसावाचा तवास्मीति विजानते ॥ २१ ॥

मृत्योरपि न ते प्रायो विभ्यतीश भवे नराः ।
इति ते को न शरणं प्राप्नुयाद्रामचन्द्रमः ॥ २२ ॥

इत्युक्तवत्यां वै तस्यां देवः स्मितमुखाम्बुजः ।
अब्रवीत् करुणाधारः श्रीमान् कमललोचनः ॥ २३ ॥

सुखं संवर्द्धते तारे त्वमनिन्दितगामिनि ।
तव श्रिया पुरमिदं सश्रीकमिति मन्महे ॥ २४ ॥

भजैनं चञ्चलापाङ्गि यः पुरा देवरस्तव ।
त्वदर्थे राज्यादधिकं सुचिरेणाभिलाषुकः ॥ २५ ॥

मा शुचस्तं पतिं तन्वि परेतं दैवयोगतः ।
आगमापायिनो भावान् संततं समनुस्मर ॥ २६ ॥

अनेन सह राज्येऽस्मिन्नजस्रंसमधिष्ठिता ।
रञ्जयस्व प्रजाः सर्वाः शिक्षय स्वजनान् नयम् ॥ २७ ॥

त्वया महिष्या महिते राज्येऽस्मिन् वीतकण्टके ।
स्थितोऽयमस्तु सुग्रीवो नयधर्मानुपालकः ॥ २८ ॥

नित्यं समनुमोदन्तां कपयो ज्ञातयश्च वः ।
भातु प्रतिदिनं चैषा किष्किन्धा कपिराज्यभूः ॥ २९ ॥

एनं बोधय रम्भोरु त्वं किल ज्ञानकोविदा ।
यथा राज्यमदोन्मत्तो न मां सम्प्रति विस्मरेत् ॥ ३० ॥

सुग्रीवं द्रुतमभिषिच्य राम इत्थं किष्किन्धाह्वयनगरीनिरीतिराज्ये ।
चातुर्मास्यमुपगतं निरीक्ष्य सद्यः शैलेन्द्रं समुपजगाम माल्यवन्तम् ॥ ३१ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे सुग्रीवराज्याभिषेको नामैकोननवत्यधिकशततमोऽध्यायः ॥ १८९ ॥

*

नवत्यधिकशततमोऽध्यायः

ब्रह्मोवाच

अथ दीर्घदरीरन्ध्रं विस्फुरद्घोरगह्वरम् ।
विततोपत्यकाभूमिविरूढसरलद्रुम् ॥ १ ॥

उन्नताधित्यकारूढतरुमण्डपमण्डितम् ।
नानावर्णशिलासंघसंशोभिकटकोन्नतम् ॥ २ ॥

अनेकगण्डशोभाढ्यं परिणाहिशिलागिरम् ।
संफुल्लतरुकुञ्जाढ्यं लतामण्डपशोभितम् ॥ ३ ॥

नारिकेलद्रुमवनसंछन्नमभितो दिशम् ।
नागपुन्नागचाम्पेयजम्बूपनसशोभितम् ॥ ४ ॥

रसालद्रुमसंछन्नप्रियालगहनावृतम् ।
[1]क्रमुकद्रुमसंवीतं समंतान्निर्झरावृतम् ॥ ५ ॥

भृगुसंदेहनिपतन्नदीपातमनोहरम् ।[1]
निरन्तरपयःसेकप्रत्यग्रकदलीवनम् ॥ ६ ॥

१–१. नास्ति–ब्रङ्गो०

लासैर्मनोरमं नित्यं मेघानाददानुलासिनाम् ।
प्रमत्तकोकिलालापप्रतिध्वनिसमन्वितम् ॥ ७ ॥

सरोभिः फुल्लराजीवरजः पिञ्जरितोदकैः ।
क्वणत्कादम्बनिबहैश्चक्रवाककुलाकुलैः ॥ ८ ॥

मत्तक्वणद्राजहंस चञ्चूद्भिन्नमृणालकैः ।
उपर्यधः समंताच्च शोभमानं सुशीतलम् ॥ ९ ॥

मरुल्लहरि निध्वानमहाकीचककाननम् ।
अरण्यमहिषानीकद्वन्द्वयुद्धकृतारवम् ॥ १० ॥

मत्तैणकुलसंयुद्धशृङ्गाघातरवान्वितम् ।
मुस्तोत्खननसावेशमत्तकोलकुलाकुलम् ॥ ११ ॥

सर्वर्तुफलितैस्तुङ्गनानाजातिमहीरुहैः ।
पुष्पस्तवकशोभाढ्यैर्लतामण्डपमण्डितैः ॥ १२ ॥

विश्रान्तविहगश्रेणीकलनादकुतूहलैः ।
ललत्पल्लवसंदोहैः सुच्छायैर्वारितातपैः ॥ १३ ॥

समंतादावृतं चारू सानुसाहस्रसुन्दरम् ।
दिशो भुवं नभो व्याप्य संस्थितं स्वेन वर्ष्मणा ॥ १४ ॥

सिद्धकिन्नरगन्धर्ववसतिं बहुकालतः ।
नानौषधिज्वलद्दीप्तिदीपिकादीपितं निशि ॥ १५ ॥

वनवारणसंदोहगण्डकण्डूतिघट्टितैः ।
सरलैर्विक्षतत्वग्भिः प्रस्रवद्दुग्धविन्दुभिः ॥ १६ ॥

अधऊर्ध्वं समंताच्च सुगन्धिततटावनिम् ।
तरुच्छायसमासीनगायद्गन्धर्वकन्यकम् ॥ १७ ॥

दीर्घघोषैर्दरीद्वारविलम्बिभिरनारतम् ।
जलभारनतैर्मेघैः समन्तात् सुनिषेवितम् ॥ १८ ॥

केतकीकाननोद्भूतपरागरजसावृतम् ।
तमालतालहिंतालसालजालसमावृतम् ॥ १९ ॥

सर्वर्तुसुखभोगाढ्यं नानाकन्दसमुद्भवम् ।
नानाफललताकीर्णं नानाशाकसमन्वितम् ॥ २० ॥

नानामुनिगणाकीर्णं नानाश्रमनिकेतनम् ।
सरित्सरःप्रस्रवणसुमिष्टसलिलोद्भवम् ॥ २१ ॥

माल्यवन्तं गिरिं नाम्ना सानुजोऽधिवसन् प्रभुः ।
वार्षिकांश्चतुरो मासान् निनाय विरहज्वरी ॥ २२ ॥

स पश्यन् गगनं सान्द्रनवमेघघटावृतम् ।
उपतेपे प्रियातीक्ष्णविरहव्याधिबाधितः ॥ २३ ॥

न सेहे गर्जितरवं नवमेघसमुद्भवम्[1] ।
विद्युतां च चमत्कारं चतुर्दिक्तटभासुरम् ॥ २४ ॥

कदम्बकुसुमान्येष हेमवर्णानिभूरिशः ।
स्मरस्य गुलिकाबाणान् मेने विरहकातरः ॥ २५ ॥

केतकानां मनोज्ञानि पत्राणि रघुपुङ्गवः ।
चेतसः करपत्राणि जजान विरहापदि ॥ २६ ॥

दिवि मेघघटाघोरसंघट्टमयमातुरः ।
अमंस्त कामभूपालसेनामिव समंततः ॥ २७ ॥

विद्युत्पताका रुचिरा गजा इव घना घनाः ।
वलाकापङ्क्तिदन्ताढ्या यत्र गर्जन्ति संततम् ॥ २८ ॥

क्वणन्ति चातका यत्र सेनासंसज्जका इव ।
सज्जमानामथ चमूं श्लाघन्ते केकिनो मुहुः ॥ २९ ॥

सूतमागधवन्दित्वे वर्तमाना कृतारवाः ।
दीप्यन्ते शक्तयो यत्र कैतवात्तडितामपि ॥ ३० ॥

दृश्यन्ते लोहयन्त्राणि नैव ध्वान्तघने पथि ।
तान्येव चानुमीयन्ते खद्योतैरग्निवर्त्तिभिः ॥ ३१ ॥

भटाश्च परितः सज्जा यत्र तापिच्छभूरुहाः ।
नवपल्लववर्माढ्याः कुसुमैर्निभृतालिभि ॥ ३२ ॥

बाणपूगभृतास्तूणीर्बिभ्रतो मदनानुगाः ।
विटपैर्बाहुसदृशैः पल्लवैरङ्गुलीसमैः ॥ ३३ ॥

तर्जयन्त इव स्वान्तं नित्यं विरहिणां नृणाम् ।
तुदन्ति वाक्शरैर्यत्र कोकिलाश्च महाभटाः ॥ ३४ ॥

पश्यन्नेवमिमां चमूं रतिपतेः संसज्जमानां मनो-
धैर्यध्वंसनहेतवे समुदितां रामः समंताद् गिरौ ।
सीतासह्यवियोगभूरिविपदि प्राणाय हारोन्मुखीं
सौमित्रिं सहसाब्रवीन्ननु रहः संगम्य सम्बोध्य च ॥ ३५ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे माल्यवद्गिरिनिवासो नाम नवत्यधिकशततमोऽध्यायः ॥ १९० ॥

*

१. नीलघनोद्भवम्–मथु०, अयो० ।

एकनवत्यधिकशततमोऽध्यायः

श्रीराम उवाच

पश्य लक्ष्मण शैलेऽस्मिन् परितः प्रावृषः श्रियम् ।
दिवि भूमितले दिक्षु शोभमानां प्रसृत्वरीम् ॥ १ ॥

लिम्पन्ति गगनं कान्त्या नीलरत्नमनोज्ञया ।
वेल्लद्बलाकावलयो दरीद्वारविलम्बिनः ॥ २ ॥

अधित्यकासु शृङ्गेषु कटकेषु समंततः ।
बद्धा इव घनाः सान्द्रगर्जितध्वनिभीषणाः ॥ ३ ॥

सृजन्तो घोरतिमिरं विद्युतां निकषोपलाः ।
धाराभिर्धरणीं कृत्स्नां सिञ्चन्तः शाद्वलावृताम् ॥ ४ ॥

गर्जितैस्तर्जयन्तीव सततं मम मानसम् ।
वक्रेन्द्रचापभ्रूभङ्गैर्भीषयन्ति दिवानिशम् ॥ ५ ॥

विद्युन्नयनविस्फोरेरधीरं कुर्वते मनः ।
वेधयन्तीव हृदयं बिन्दुभिर्मार्गणैरिव ॥ ६ ॥

वान्ति सीकरिणो वाता धुन्वन्तः कदलीवनम् ।
शीतला अपि चात्यर्थं दीपयन्तीव पावकम् ॥ ७ ॥

प्रत्यङ्गं तापयन्तीव जानक्या विरहेऽद्य माम् ।
पयोदसुहृदां केका भिन्दन्तीव मनो मम ॥ ८ ॥

कामं कठोरहृदयो वज्रादप्यस्मि लक्ष्मण ।
कदम्बगुलिकाबाणैर्वक्षो यस्य न दीर्यते ॥ ९ ॥

पश्य केतकपत्राणि करपत्राणि साम्प्रतम् ।
परागैर्धूलयन् हस्तं प्रहरत्यद्य मन्मथः ॥ १० ॥

तमालकाननं भ्रातः सुस्निग्ध तिमिरोपमम् ।
गाढमोहमयीं मूर्छामातनोति प्रतिक्षणम् ॥ ११ ॥

शिलीन्ध्रपुष्पमासाद्य भ्रमरी भ्रमरान्विता ।
यथा क्रीडति सौमित्रे तथासूयामि संततम् ॥ १२ ॥

नवशाद्वलसंदोहैराचितं धरणीतलम् ।
इन्द्रगोपगणैर्नित्यमलङ्कृतमिवाधुना ॥ १३ ॥

चातकानां कलो नादो मेघमण्डलसंनिधौ ।
उद्वेजयति मां नित्यं प्रियाविरहविह्वलम् ॥ १४ ॥

कलमालपते नित्यं कोकिलावलिरुन्मदा ।
यशांसीव जगज्जिष्णोः स्मरसंज्ञस्य भूपतेः ॥ १५ ॥

यूथीकुसुमसौरभ्यसंजातमदविह्वलाः ।
कुर्वन्ति कलझाङ्कारनादं मधुपराजयः ॥ १६ ॥

नद्यो नवघनासारभरितस्रोतसोऽधुना ।
सजवं यान्ति कामार्त्ता इवात्मपतिमम्बुधिम् ॥ १७ ॥

गर्जितैर्घनसंघस्य तोयभारविलम्बिनः ।
गर्जतीवोग्रदर्पेण गिरिरेष गुहामुखैः ॥ १८ ॥

स्रवन्ति निर्झरा भ्रातः सोद्रेकाः परितो गिरिम् ।
मत्तः करीव समये मदधाराः समंततः ॥ १९ ॥

स्वयं जनितमूष्माणं स्वयमेव निरस्यति ।
कृपयेव नृणां मेघो धारासम्पातवर्षणः ॥ २० ॥

अभ्राणि स्पृष्टमात्राणि तडिज्ज्वलनवर्त्तिभिः ।
गर्जन्ति लोहयन्त्राणि प्रायः स्मरमहीपतेः ॥ २१ ॥

तिरोदधति मण्डूका ध्वनिभिर्धीरदूरगैः ।
शब्दान्तरं परगुणं साभ्यसूया बुधा इव ॥ २२ ॥

मध्येरजनि गर्जन्तो वारिदा व्योममण्डले ।
विलुम्पन्ति सखे निद्रां विरहोद्बोधपण्डिताः ॥ २३ ॥

पातयन्ति मुहुर्घोषैरयोघनमिवोरसि ।
घनौघा मम जानक्या विरहेऽतीव निर्घृणाः ॥ २४ ॥

सर्वं सहामि सौमित्रे सोऽहं कठिनमानसः ।
कथं भविष्यति पुनर्वैदेही विरहात्सदा ॥ २५ ॥

अये कमलपत्राक्षि शिरीषसुमकोमले ।
अभूतपूर्वं विरहं वैदेहि सहसे कथम् ॥ २६ ॥

रामः कठोरहृदय ईदृशीं विरहापदम् ।
सहतां सुदति स्थाने तव सम्प्रति का दशा ॥ २७ ॥

हा देवि धीरा भवितुमर्हसि जनकात्मजे ।
अहो अधीरहृदयो रामः किं नु करोत्वयम् ॥ २८ ॥

मद्दृशां को नु कथयेद्वैदेहि तव संनिधौ ।
हा हा जनकपुत्रि त्वं कथं नु ज्ञास्यसे प्रिये ॥ २९ ॥

आत्मनो जीवितेनैव त्वं जीवसि कथंच न ।
इति मेऽनुमितं देवि किं तु कास्विदृशा तव ॥ ३० ॥

अये मरुत्सखे तत्र गच्छ यत्रास्ति मैथिली।
स्फुटं कथय तस्यै त्वं मद्दशां निखिलामपि ॥ ३१ ॥
अथ तस्या दशां मित्र कृत्स्नां मम निवेदय।
नास्य त्वदुपकारस्य निष्कृतिर्मम विद्यते ॥ ३२ ॥

इति स्मारं स्मारं जनकतनयां प्राणदयितां
रघुश्रेष्ठः प्रावृट्समुदयसमुद्दीप्तविरहः।
स्वदुःखं सौमित्रे स्फुटमभिदधन्मुग्धहृदयो
मुमूर्च्छान्तर्लीनाखिलकरणनिश्चेष्टिततनुः ॥ ३३ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे प्रावृड्वर्णनो नामैकनवत्यधिकशततमोऽध्यायः ॥ १९१ ॥

*

द्विनवत्यधिकशततमोऽध्यायः

ब्रह्मोवाच

सम्मार्ज्य तस्य वदनं सहसा सुमित्रासूनुः पयोभिरमलैर्नगनिम्नगायाः।
ईषत्समुन्मिषितसुस्थिरनेत्रपद्म संदृश्य रागविभवं तमथाभ्युवाच ॥ १ ॥

हा हन्त विरहेणार्तो यदाह निभृतं भवान्।
तत्तथैवास्ति किंत्वार्य धीरतामेहि सम्प्रति ॥ २ ॥

अस्य दुःखसमुद्रस्य गम्भीरस्य महीयसः।
आरुह्य धैर्यतरणीं पारं प्राप्तुं त्वमर्हसि ॥ ३ ॥

अधैर्यं दृषदं नाथ कथं वहसि चात्मना।
विरहक्लेशपाथोधिमध्यस्थोऽतिविचक्षणः ॥ ४ ॥

न वै जनकपुत्र्यास्ते सम्भाव्यो विरहः क्वचित्।
वधाय रावणस्यायं लोके सम्भावनां गतः ॥ ५ ॥

विपरीतमपि स्वामिन् जायते दैवयोगतः।
भाविनार्थेन निर्बद्धमिति मे जायते मतिः ॥ ६ ॥

सुरासुरमर्त्ये ह्यस्मिन् भवे रावणशातनः।
को भवन्तं विना नाथ तदर्थं चैतदप्यभूत् ॥ ७ ॥

मायामात्रं तु जानामि मैथिल्या विरहं तव।
ज्योत्स्नयेव शशाङ्कस्य प्रभया तरणेरिव ॥ ८ ॥

प्रमथ्य शीघ्रं लङ्केशं प्रियाविरहकैतवात् ।
भवांस्त्रैलोक्यसंतापं स्ववीर्येण हरिष्यति ॥ ९ ॥

अथोवाच रघुश्रेष्ठो दैन्यं प्रकटयन् मुहुः ।
संकोच्य नासिकाग्रं स्वं म्लानधीर्दुःखकोटिभिः ॥ १० ॥

शृणु लक्ष्मण वक्ष्यामियथाहं म्लानमानसः ।
अलं मम मुधास्तोत्रैरित्थं ह्याजन्मदुःखिनः ॥ ११ ॥

किं मया ननु जातेन मातुः क्लेशदजन्मना ।
तोषितौ पितरौ चैव पोषिता न च बन्धवः ॥ १२ ॥

यः स्वयं दुर्भगो दीनः कोटिदुःखैकभाजनम् ।
स कथं सुखयेदन्यान् सोऽहमस्मि च तादृशः ॥ १३ ॥

[1]अनपत्यौ च पितरावभूतां खलु मे पुरा ।
तयोरहं सुसंजातो दैवप्रार्थनया सखे ॥ १४ ॥

मदर्थं प्रार्थिता विप्रा मम पित्रा धृतार्थिना ।
तैश्च सम्प्रार्थितो देवस्तेन दत्तस्ततश्चरुः ॥ १५ ॥

जातास्तेन वयं भ्रातश्चत्वारो भ्रातरः क्रमात् ।
एवं प्रयासाज्जातोऽहं शुचे पित्रोस्थतात्मनः ॥ १६ ॥

मदर्थं शोचता तेन मम पित्रा महीभृता ।
असवः सहसा त्यक्ता अनाथाश्चाभवन् प्रजाः ॥ १७ ॥

मद्धेतोर्मत्प्रसूर्दीना नितरां क्लिश्यते च सा ।
न यस्याः श्रवणे प्राप्तं परदुःखमपिक्वचित् ॥ १८ ॥

अहो मे बन्धवो दीना मम हेतोः शुचार्पिताः ।
अजस्रमश्रुसम्पातैर्व्याकुलीकुर्वते दृशः ॥ १९ ॥

न मया तोषितस्तातो न मातुर्निष्कृतिः कृता ।
न भ्रातरोऽनुजाः सौम्याः सम्पद्भिः सुखिताः क्वचित् ॥ २० ॥

मदर्थं त्वमपि भ्रातरात्मानं क्लेशयस्यहो ।
भरतश्च जटाधारी बल्कलाजिनवाससी ॥ २१ ॥

बिभ्राणो यतचित्तात्मा यतेन्द्रियगणश्च सः ।
कष्टेन कालं नयति त्यक्तभोगपुरःस्थितिः ॥ २२ ॥

तमनुव्रत एवास्ति शत्रुघ्नोऽप्यरिमर्दनः ।
इत्थं सर्वकुटुम्बस्य दुःखायाजनि मज्जनिः ॥ २३ ॥

पिता मे वत्सलत्वेन राज्यभाराभिषेचनम् ।
कर्त्तुमैच्छत्तदाप्यासीन्मम भाग्यविपर्ययः ॥ २४ ॥

---

१. १४ आरभ्य १७ पर्यन्ताः श्लोका मथुरापाठे निष्कासिताः ।

अन्तरायः कृतः सद्यः कैकेय्या राज्यलुब्धया ।
वनवासस्ततश्चासीत्पत्न्या सह मनोज्ञया ॥ २५ ॥

यस्याः शिरीषकुसुमकोमलौ चरणौ सखे ।
अटवीं गाहमाना सा मत्सार्थे व्यचरत्प्रिया ॥ २६ ॥

वर्षवातातपहिमैः कायक्लेशं दिवानिशम् ।
बिभ्राणा मिथिलाधीशपुत्री चरति कानने ॥ २७ ॥

पत्न्या अपि सुखं येन न जातु रचितं क्वचित् ।
सोऽहं किमन्यबन्धुभ्यः सुखं दास्यामि लक्ष्मण ॥ २८ ॥

रक्षसा हारिता सापि दुःखेऽपि सुखमानिनी ।
क्व नः कुलं सुविमलं क्व चेदं लाञ्छनं महत् ॥ २९ ॥

तस्या एव कृते सम्यगुपयुक्तवपुश्च यः ।
मृतः स मित्रं तातस्य वर्षीयान् विहगोत्तमः ॥ ३० ॥

न तस्य निष्कृतिर्लभ्या जन्मकोटिशतैरपि ।
अधर्माच्च हतो वालिर्बलवान् कपिपुङ्गवः ॥ ३१ ॥

इति जन्मत आरभ्य दुःखानि गणयन्नहम् ।
नान्तं गच्छामि सौमित्रे ततः खिद्येतमां मुहुः ॥ ३२ ॥

विरहविधुर इत्थं पूर्वदुःखानुदर्शी स्वमथबहु वीजानन्साम्प्रतं दुःखमग्नम् ।
यदि यदिगणयानः स्वाशुभान्यस्तहर्षो रघुपरिवृढ आसीद्दीनचेता[1] नितान्तम् ॥ ३३॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे द्विनवत्यधिकशततमोऽध्यायः ॥ १९२ ॥

*

त्रिनवत्यधिकशततमोऽध्यायः

ब्रह्मोवाच

तमनुशयानं दृष्ट्वा सौमित्रिर्द्विगुणदुःखनिहितमनाः ।
मृदुनैव सान्त्वयिष्यन् वचसा सप्रणयमप्रवीज्ज्येष्ठम् ॥ १ ॥

किमार्य भाषसे दीनं मर्त्यानुकरणाद्भवान् ।
मनो मे वचनैरेभिरुच्चैर्मोहयसीव भोः ॥ २ ॥

कारणेनैव मर्त्यत्वमङ्गीकृत्य करोत्यलम् ।
तादृदृशीं विपुलां लीलां दुष्करायाखिलैरपि ॥ ३ ॥

---

१. ग्लान०–मथु०, अयो० ।

धर्मस्य स्थापनं लोके चिकीर्षुर्यद्भवान् प्रभो ।
करोषि भुवने लीलां तस्यास्तत्त्वं सुदुर्गमम् ॥ ४ ॥

इदानीमपि लोकस्य कण्टकोऽयं दशाननः ।
त्ययैव वध्योवीरेन्द्र तदर्थं ह्येष उद्यमः ॥ ५ ॥

जगद्विध्वंसकाः क्रूरा राक्षसा घोरदर्शनाः ।
कति नो भुवि हन्तासि भूष्णुस्त्रैलोक्यसौख्यदः ॥ ६ ॥

मैवं वादीः प्रभोदीनं जगदुत्साहवर्द्धनः ।
एवंविधेन वचसा हीयते मामकं मनः ॥ ७ ॥

युङ्क्त्वा कपिबलैर्ऋद्धां वाहिनीं दुर्जयां परैः ।
नखदन्तायुधां घोरां सर्वान् ज्येष्यामहे रिपून् ॥ ८ ॥

जित्वा रिपून् वादयित्वा सिन्धुगम्भीरदुन्दुभिम् ।
त्रैलोक्ये स्थापयतमां यशः कर्पूरनिर्मलम् ॥ ९ ॥

न जातु भवतश्चित्ते सम्भाव्यो[1] धैर्यविपर्ययः ।
न पुनः कुरु काकुत्स्थ वाक्यैरेभिः शुचं मम ॥ १० ॥

त्रैलोक्याभयदानाय भुवि कल्पतरूपमः ।
न पुनर्जनयेः स्वामिन् वाक्यैरेभिर्भयं मम ॥ ११ ॥

दुःखाकरोति यश्चार्यं त्वां सर्वजगतः सुखम् ।
स खलः स्वेन पापेन यास्यति क्षयमञ्जसा ॥ १२ ॥

इत्थं स सन्त्वितो वाग्मिरनुजस्य रघूद्वहः ।
निन्येकृच्छ्रेण विरही चातुर्मास्यं भयावहम् ॥ १३ ॥

अथो जगाम वर्षर्तुरवसानं ततो घनाः ।
सान्द्रकर्पूरधवलाः परितो व्यचरन् दिवि ॥ १४ ॥

वितीर्णसलिलास्तेन लघीयांसो बलाहकाः ।
बभुः श्वेतपटाकारा हरितां शाटिका इव ॥ १५ ॥

विजगाल मयूराणां सहसैव मनोमदः ।
षड्जस्वरवतीः केकाः पुरावृत्ता इवाभवन् ॥ १६ ॥

अस्तं जगाम वर्षाभूर्नादकोलाहलोत्करः ।
ववृधे खञ्जनरवः परितो वनराजिषु ॥ १७ ॥

विच्छिन्नेषु पयोदेषु प्रादुरासन् रवेः कराः ।
गतेषु पातकेष्वन्तः प्रमोदनिकरा इव ॥ १८ ॥

जजागार विधुज्योस्ना निर्मले नभसिस्फुटम् ।
निरञ्जानतमस्यन्तःकरणे स्वात्मधीरिव ॥ १९ ॥

---

१. पादेऽस्मिन्नक्षराधिक्यमार्षः ।

तत्क्षणाल्लब्धरुचयः समदीप्यन्त तारकाः ।
ब्राह्मणा इव धर्मेण सम्प्राप्तब्रह्मवर्चसाः ॥ २० ॥

सप्तपर्णप्रसूनानि सौरभ्यैः समपूरयन् ।
दिशो मदनमातङ्गमदाम्भोवासिता इव ॥ २१ ॥

अशाम्यत्पूर्णपूराणां नदीनां प्रबलो जवः ।
प्राप्तपूर्णधियां यद्वद्विदुषां मोहजो रयः ॥ २२ ॥

मल्लीवनानि परितो विकासीनि वभुस्तमाम् ।
मनांसि सप्रसादानि प्राज्ञानामिव कालतः ॥ २३ ॥

पथि पङ्कभरोऽशुष्यत्सवितुः किरणाहतः ।
प्रजासु दुर्नय इव राज्ञः करगणैः क्षतः ॥ २४ ॥

असंगतेषु नादेषु मयूराणां समं ततः ।
राजहंसरवाः सद्यः समश्रूयन्त दिक्ष्वलम् ॥ २५ ॥

तमोमयी ययौ वर्षा सुप्रकाशमयी शरत् ।
प्राकाशततमां लोके श्रीपतेर्या प्रबोधिनी ॥ २६ ॥

सप्तपर्णप्रसूनस्पृग्ववौ वायुः शनैः शनैः ।
गजाः प्रोत्फालमातेनुः प्रतिद्विरदशङ्किनः ॥ २७ ॥

कुमुदानि त्रियामासु दिनेषु नलिनानि च ।
विकासैर्व्यरुचन्नन्तःकासारसलिलेष्वलम् ॥ २८ ॥

जुगुञ्जुर्मत्तमधुपाः फुल्लपङ्कजवासिनः ।
अवाद्यद् वल्लकीवोच्चैः कामभूपसमागता ॥ २९ ॥

कलहंसकलध्वानैश्चक्रवाककुलस्वनैः ।
राजहंसावलीनादैश्चमत्कारोऽभवद्गिरौ ॥ ३० ॥

असिच्यामतमे व्योम्नि रुरुचुर्बद्धपङ्क्तयः ।
राजहंसा हरेर्वक्षःस्थले मुक्तास्रजो यथा ॥ ३१ ॥

सरांसि सरितः सर्वा विवभुर्विमलोदकाः ।
शरत्कालप्रभावेण ध्वस्ते रजसि कृत्स्नशः ॥ ३२ ॥

रजस्तमश्चाभिभूय सत्वं शुभ्रं स्वभावतः ।
प्रकाशकं भवेत्कृत्स्ने प्रादुरास समं ततः ॥ ३३ ॥

शरदममलसूर्याचन्द्रचञ्चत्प्रकाशां विकचकमलराजीकैरवश्रेणिरम्याम् ।
रघुपतिरवलोक्याभ्यस्तसुग्रीवसख्यो नतशिरसमवोचल्लक्ष्मणं वाक्यमित्थम् ॥ ३४ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे शरदागमो नाम त्रिनवत्यधिकशततमोऽध्यायः ॥ १९३ ॥

*

चतुर्नवत्यधिकशततमोऽध्यायः

श्रीराम उवाच

शरदं पश्य सौमित्रे प्रसृतां परितो भुवि ।
वनेषु फुल्लमल्ली या जलेषूत्फुल्लपङ्कजा ॥ १ ॥

प्राप्तोऽभिषेणनंकर्त्तुं कालोऽयं लोकसौख्यदः ।
तुल्यशीतोष्मविभवस्तुल्यरात्रिदिनोदयः ॥ २ ॥

इदानीमेव च प्रायो राजानः कुर्वतेतराम् ।
दिग्जैत्रयात्राप्रस्थानं सुकरं सुखसाधनम् ॥ ३ ॥

प्राप्तश्च नेह सुग्रीवो विश्वास्य वचनेन माम् ।
तत्रैव तस्थौ भुञ्जानः किष्किन्धाराज्यसम्पदम् ॥ ४ ॥

न तं विना भवेज्जातु सेनासंघटनं मम ।
कथमायाति चेदानीं स दोषाद्विस्मृतो नु किम् ॥ ५ ॥

मित्रं स्वच्छतया यो वै शीलयेच्छुद्धमानसः ।
तस्यायं च परो लोकः सर्वर्द्धिसुखसम्पदः ॥ ६ ॥

यदि मां वञ्चयित्वैष तिष्ठेन्निजपुरे कपिः ।
तदश्य किमहं कुर्यां परदेशकृतागमः ॥ ७ ॥

पस्य लक्ष्मण विश्वासात्तस्याहं माल्यवद्गिरौ ।
एतावत्कालमत्रासं चातुर्मास्यं च यापितम् ॥ ८ ॥

स च मां नोपपातोऽत्र किं कार्यमधुना मया ।
न चेह मत्स्थितौ हेतुः सेनासंघटनात्परः ॥ ९ ॥

नूनं राज्यमदाविष्टः सुग्रीवः कपिपुङ्गवः ।
किष्किन्धानगरीभोगसुखासक्तः क्व मां स्मरेत् ॥ १० ॥

मातरं पितरं मित्रं भ्रातरं बान्धवानपि ।
विस्मरन्ति मदाविष्टा यदुक्तं पूर्वमात्मना ॥ ११ ॥

तस्य राज्यमदो भूयान्निःसपत्नां पुरीमिमाम् ।
शासतो विविधान् भोगान् भुञ्जानस्य निरन्तरम् ॥ १२ ॥

तारया रूपवत्या स चिराभिलषितया तया ।
कुर्वाणोऽतितरां भोगान्न मां स्मरति वानरः ॥ १३ ॥

स राजा कपिकोटीनां बलवान् दुर्गसंस्थितः ।
भुङ्क्ते भोगान् सदा मत्तः किं मत्तोऽस्य प्रयोजनम् ॥ १४ ॥

अकैतवः सखा भूमौ सज्जनश्चातिदुर्लभः ।
मां वञ्चयन् स्फुटमसौ भुङ्क्तेराज्यमकण्टकम् ॥ १५ ॥

इत्यार्यस्य वचः श्रुत्वा सौमित्रिः क्रोधवान् कपौ ।
उवाच धनुरुद्यम्य तदङ्घ्रिनिहितेक्षणः ॥ १६ ॥

गत्वाहमार्य किष्किन्धां त्वत्प्रतापेन निर्भयः ।
तं बद्ध्वा सद्य आनेष्ये मित्रवञ्चनकारकम् ॥ १७ ॥

स पापो येन मित्रस्य विश्वासो घातितः प्रभो ।
क्व तस्य भाग्ये तद्राज्यं तस्मिन् वालिनि जीवति ॥ १८ ॥

स्फुटं विद्रावितो युद्धात्स तेन बलशालिना ।
त्वयैव कृपया नाथ प्रापितस्तादृशं पदम् ॥ १९ ॥

न त्वां स्मरति दुष्टश्चेद्राज्यभोगमदेन सः ।
तदद्य नूनं हन्तव्यो वद्ध्वाऽऽनेयस्त्वदन्तिकम् ॥ २० ॥

क्व तानि वचनान्यस्य क्व तद्दैन्यं क्व सा मतिः ।
सर्वं विस्मृत्य वीरेन्द्र मुग्धो राज्यमेदन सः ॥ २१ ॥

इत्युक्तवति सक्रोधं सुमित्रानन्दने स्फुटम् ।
उवाच रामः सौम्यत्वं दर्शयन् बुद्धिसागरः ॥ २२ ॥

गच्छ लक्ष्मण किष्किन्धां तमानय कृतादरः ।
साम्नैव सिध्यतो भ्रातस्तुर्योपायो न योज्यताम् ॥ २३ ॥

नूनमायास्यति मम स्नेहबद्धः कपीश्वरः ।
बोधनीयः पुनरयं यत्तेन मयि भाषितम् ॥ २४ ॥

स्मृत्वा प्रतिज्ञामात्मीयां नूनमेष महामतिः ।
समुद्बुद्धतमस्नेहो न स्थास्यति निजे पुरे ॥ २५ ॥

प्रियावियुक्तं क्लिश्यन्तं विद्नं वनवासतः ।
कृतोपकारं मामेष तत्क्षणादुपयास्यति ॥ २६ ॥

न पुनर्भवता कार्यस्तस्मिन् मित्रे निरागसि ।
लेशोऽपि कोपस्य सखे यावत्साम्ना प्रसीदति ॥ २७ ॥

सहैव तेन सौमित्रे त्वमायास्यसि मामिह ।
अन्ये च ये कपिभटा अनुगास्तस्य तैरपि ॥ २८ ॥

इति रघुपतिमतमेष गृहीत्वा परिणतमनिरथ तेन विसृष्टः ।
पदसरसिजयुगमस्य च नत्वा कपिपरिवृढसविधं स जगाम ॥ २९ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे लक्ष्मणकिष्किन्धागमने नाम चतुर्नवत्यधिकशततमोऽध्यायः ॥ १९४ ॥

*

पञ्चनवत्यधिकशततमोऽध्यायः

ब्रह्मोवाच

गते तु लक्ष्मणे वीरे किष्किन्धां नगरीं रामः ।
उद्धर्तुकामो लङ्केशं वंदीयाता मृगीदृशः ।। १ ।।

सुवेलगिरिसुस्निग्ध गह्वरान्तरकाननम् ।
अनेककुञ्जपुञ्जाढ्यमगमद्रघुपुङ्गवः ।। २ ।।

लङ्कायां तत्र ता रुद्धाः कन्यास्त्रिजगदोकसः ।
नरनागनगोद्भूताः सुरकिन्नरसम्भवाः ।। ३ ।।

नानादेशमहीपानां कन्याश्च हरिणेक्षणाः ।
दिक्पतीनां पुरभवास्तथान्य हरिणीदृशः ।। ४ ।।

अभुक्ता रावणेनापि श्रीरामनिहिताशयाः ।
रत्नभूता मृगदृशः स्त्रीणां कामकलाकुलाः ।। ५ ।।

अभ्युद्धार ताः सर्वाः सीतया सहितो विभुः ।
आरामे राक्षसपतेः शतयोजनविस्तृते ।। ६ ।।

तत्राशोकतरोर्मूले जानकीं विरहाकुलाम् ।
आजुहाव प्रियस्तत्र यत्र ताभिररीरमत् ।। ७ ।।

विस्तार्य रजनीं दिव्यां पूर्णचन्द्रकरोज्ज्वलाम् ।
प्रमुद्वनश्रियं तस्यामाविर्भाव्य निजेच्छया ।। ८ ।।

सहजानन्दिनीसीतासम्पर्कसुखिताशयः ।
मोदयामास ताः सर्वाः कन्यास्त्रिजगदोकसः ।। ९ ।।

प्रभुः कृतार्थयामास स्वरूपानन्ददानतः ।
ततः समाययौ देवो लक्ष्मणागमनक्षणे ।। १० ।।

रम्ये माल्यवति क्ष्मामृत्यखिलर्तुमनोहरे ।
भूतिलिप्तो जटाधारी वल्कलाजिनवाससा ।। ११ ।।

कैलासनाथसदृशो रामः कारणमानुषः ।
तमभिप्रययौ श्रीमान् कृतकार्यश्च लक्ष्मणः ।। १२ ।।

भुशुण्ड उवाच

कथं सुमित्रातनयः किष्किन्धानगरीमगात् ।
कथं च सत्कृतस्तत्र सुग्रीवाद्यैः कपीश्वरैः ।। १३ ।।

ब्रह्मोवाच

आर्येणादिष्टमात्रोऽसौ लक्ष्मणः परवीरभित् ।
बद्धतूणो धनुष्पाणिः किष्किन्धानगरीमगात् ॥ १४ ॥

पालितां तेन वलिना सुग्रीवेण महौजसा ।
राजधानीं कपीन्द्राणां सर्वसौख्यसमन्विताम् ॥ १५ ॥

परिस्फुरद्गृहारामकोष्ठाट्टालकगोपुराम् ।
हट्टापथस्थितानेकसम्पद्भरसमाकुलाम् ॥ १६ ॥

आस्फोटयद्भिर्दोर्दण्डान् सुग्रीवबलबन्धिभिः ।
वारुणीपानमत्तैश्च कपीन्द्रैः सेवितां सदा ॥ १७ ॥

विशालपरिखान्तःस्थदृढप्राकारसंवृताम् ।
महाप्रासादमौलिस्थवैजयन्तीविभूषिताम् ॥ १८ ॥

अलंकृतैः सदा हृष्टैर्नरनारीगणैर्वृताम् ।
राजद्वारसदावाद्यद्दीर्घदुन्दुभिनादिताम् ॥ १९ ॥

तत्रार्यस्य निदेशेन गत्वा द्रुततरं ततः ।
कपिराजस्य भवनं जगामं धृतकार्मुकः ॥ २० ॥

करालतोमरकरः कट्योस्तूणीयुगान्वितः ।
कपिराजसभां प्राप वृद्धैः कपिवरैर्युताम् ॥ २१ ॥

तत्रोपविष्टांस्तानुच्चै रामानुज उवाच ह ।
अहो रे वानरा ब्रूत क्व सुग्रीवः स नः सखा ॥ २२ ॥

विश्वास्य वचनैरार्यं स्त्रीवियुक्तं वनालयम् ।
योऽननुध्यातमैत्रीको विषयान् सेवते पुरे ॥ २३ ॥

क ईदृशः सुहृन्मैत्रीं विहन्याद्वचसोर्जिताम् ।
अज्ञातमित्रसंक्लेशः साधितस्वप्रयोजनः ॥ २४ ॥

प्रायोऽन्तःपुर एवास्ति स सुखी तारया सह ।
विस्मृत्य सुहृदं रामं भुङ्क्ते भोगान् यथेप्सितान् ॥ २५ ॥

तद् ब्रूत त्वरितं गत्वा मदागमनकारणम् ।
नियुक्तो राघवेन्द्रेण प्राप्तोऽहं तस्य संनिधौ ॥ २६ ॥

आकारणार्थं राज्यश्रीभोगमत्तस्य सम्प्रति ।
स चेत्त्वरितमागच्छेद् रामचन्द्रस्य सन्निधौ ॥ २७ ॥

तदा भवेच्छुभं नो चेद्जन्तासौ वालिनो गतिम् ।
विस्मृत्य तादृशं मित्रं पुरोपकृतिकारिणम् ॥ २८ ॥

ब्रह्मोवाच

अथ ते कपिपुङ्गवाः समस्तास्त्वरितं भक्तिभरेण तं प्रणम्य ।
भ्रुकुटीकुटिला ननं च भीताः कृतभूरिप्रणिपातमेतदूचुः ।। २९ ।।

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे लक्ष्मणकपिराज-सभाप्रवेशो नाम पञ्चनवत्यधिकशततमोऽध्यायः ।। १९५ ।।

*

षण्णवत्यधिकशततमोऽध्यायः

कपय ऊचुः

स्थीयतामिह विश्रम्य श्रीरामानुज सादरम् ।
प्राप्तोऽसि स्वस्य भवनमिति चेतसि चिन्तय ।। १ ।।

यावत्स बुध्यते सुप्तः स्वामी नो भवतां सखा ।
किष्किन्धानगरीराजः सुग्रीवः कपिराट् प्रभो ।। २ ।।

श्रीराममात्मनो मित्रं कथमेषोऽतिवर्त्स्यति ।
यदाज्ञापयिता देवः कर्तासौ स्वयमेव तत् ।। २ ।।

यस्मिन् प्रसादो विहितो भवद्भिः सिंहविक्रमैः ।
तस्मिन् कृपापराधेऽपि न क्रोधं कतुमर्हथ ।। ४ ।।

सर्वे वयं कपिभटा भवदीयाः स्म लक्ष्मण ।
आज्ञया रामचन्द्रस्य नापेक्षन्ते ह्यसूनपि ।। ५ ।।

कश्च युष्मासु कुर्वीत कैतवं सौहृदापहम् ।
निष्कैतवेषूपकृतिप्रमोदितसुहृत्सु च ।। ६ ।।

शीघ्रं विजित्य तं पापं रक्षसांमधिपं खलम् ।
राघवेन्द्रस्त्रिभुवने यशो विस्तारयिष्यति ।। ७ ।।

इति रामानुजं कीशाः सान्त्वयित्वा महाधियः ।
तारायै कथयामासुस्तदागमनमञ्जसा ।। ८ ।।

ज्ञात्वा सा वारुणीमत्तं सुग्रीवं कपिभूपतिम् ।
कपिभिः कारयामास सौमित्रेः सत्कृतिं मुहुः ।। ९ ।।

अथ सा सुमहाप्राज्ञा पतिं शुद्धान्तसंस्थितम् ।
उपयातवती तारा वचनं चेदमब्रवीत् ।। १० ।।

सावधानो भव प्राज्ञ प्राप्तस्ते सुहृदोऽनुजः ।
सुमित्रातनयो वीरो लक्ष्मणः शुभलक्षणः ।। ११ ।।

सौमित्रिमागतं श्रुत्वा सुग्रीवः कपिराट् ततः ।
अजहात् तत्क्षणेनैव सुगाढं वारुणीमदम् ॥ १२ ॥

सहर्षोत्फुल्लनयनो लक्ष्मणस्य दिदृक्षया ।
सम्मार्ज्य सलिलेर्भूयः शीतलैर्नयने मुखम् ॥ १३ ॥

सावधानोऽथ सुग्रीवः सभामण्डपमाविशत् ।
यत्र स्थितः स वीरेन्द्रो लक्ष्मणः स्वामिकार्यकृत् ॥ १४ ॥

प्रह्वः स तच्चरणयोः प्रणनाम कृतादरः ।
बद्धाञ्जलिपुटो धोमांस्तस्थौ तस्य पुरोगतः ॥ १५ ॥

उपवेश्याथ सौमित्रिस्तं भक्तिभरसंततम् ।
सभ्रूभङ्गमिदं पश्चादुवाचार्यनिदेशतः ॥ १६ ॥

यस्य पादाम्बुजद्वन्द्वसेवनात्त्वामुपाययौ ।
किष्किन्धापुरराज्यश्रीः सति वालिनि दुर्लभा ॥ १७ ॥

तस्मिन्नार्येण निहते बलशालिनि वालिनि ।
सेवते तामविरतं राज्यश्रियमकण्टकाम् ॥ १८ ॥

भुङ्क्षे तारां च पद्माक्षीं सह राज्यश्रिया तया ।
विस्मृतश्च स वीरेन्द्रः कानने निवसंस्त्वया ॥ १९ ॥

विप्रयुक्तः स्वप्रियया त्यक्तराज्यो गुरोर्गिरा ।
जिघांसुः स्वामिनीचोरं तं पापं दशकन्धरम् ॥ २० ॥

एतत्तेऽनुचितं प्राज्ञ यत्तद्विश्वासघातनम् ।
मित्रे कैतवमालम्ब्य को नु प्राप्नोतु मङ्गलम् ॥ २१ ॥

आपद्गतः सखा यस्य दुःखैः सीदति संततम् ।
स भुङ्क्ते चेत्स्वयं भोगां स्तदधिक् तद्भोग भोजनम् ॥ २२ ॥

लक्ष्मणोदीरितमिदं वाक्यमाकर्ण्य कीशराट् ।
हसित्वा परिरेभे तं रामानुजमकैतवः ॥ २३ ॥

निनाय तमथो धीरः शुद्धान्तःपुरमात्मनः ।
तत्र योषिद्गणैः सार्द्धमुपतस्थौ तमूर्जितम् ॥ २४ ॥

तारा तारापतिमुखी हर्षोत्फुल्ल विलोचना ।
तुष्टाव भूरिविक्रान्ति सुमित्रातनयं सती ॥ २५ ॥

आनर्च विविधैर्दिव्यैरुपचारैरुदारधीः ।
तस्याः प्रीत्या सुसंतुष्ट आसीद् रामानुजो यथा ॥ २६ ॥

उवाच च महाप्राज्ञा प्रसादसुमुखं ततः ।
सुस्वागतं ते सौमित्रे सुखमास्ते रघूद्वहः ॥ २७ ॥

गिरौ माल्यवति श्रीमान् भृशमानन्दयन् मुनीन् ।
प्रसाददृष्टिरस्मासु कच्चिदस्ति यथा पुरा ॥ २८ ॥

इत्थं स शुद्धान्तगतः कपीशितुस्तेनार्चितः सादरया च तारया ।
उवास तां रात्रिमभीष्टयोजनस्तत्रैव सख्येन भृशं प्रमोदितः ॥ २९ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे सुग्रीवान्तःपुरनिवासो नाम षण्णवत्यधिकशततमोऽध्यायः ॥१९६॥

*

सप्तनवत्यधिकशततमोऽध्यायः

ब्रह्मोवाच

अथ प्रातः समुत्थाय तावुभौ कृतमङ्गलौ ।
शिबिकामारुरुहतुः कपिराजरघूद्वहौ ॥ १ ॥

अग्रेसरैः कपिवरैः सार्द्धं सुविहितोत्सवैः ।
विप्राणां जयघोषैश्च दीर्घदुन्दुभिनिःस्वनैः ॥ २ ॥

अन्तःपुरचरीभिस्तौ कान्ताभिस्तारया सह ।
कृतप्रस्थानतिलकौ मुक्ताक्षतयुतालिकौ ॥ ३ ॥

अन्तःपुरचरस्त्रीणां जयघोषैः कृतोत्सवौ ।
जालमार्गनिषिक्ताभि र्वीक्ष्यमाणौ च सादरम् ॥ ४ ॥

प्रचेलतुः प्रमुदितौ राजमार्गगतौ च तौ ।
विक्षितौ पुरकान्ताभिः सादरं पुरुषर्षभौ ॥ ५ ॥

दधिदूर्वाक्षतंक्षेपकृतप्रस्थानमङ्गलौ ।
तूर्यस्वनकृतोत्साहौ चामरद्वयवीजितौ ॥ ६ ॥

अनुयायिकपिप्रकीरहस्तोद्धृतसत्काञ्चनमौक्तिकातपत्रौ ।
पुरवासिभिरात्तमङ्गलार्थैः शकुनावेक्षणमोदमानचित्तौ ॥ ७ ॥

ताराद्यन्तःपुरस्त्रीणामुत्तीर्णौ नयनाध्वनः ।
विदापयन्त्यवनुगान् सुस्निग्धान् पुरवासिनः ॥ ८ ॥

महता कपिसैन्येन साकं संहृष्टमानसौ ।
ततो जग्मतुरध्वानं माल्यवद्गिरियायिनम् ॥ ९ ॥

गाहमानौ पथि गिरीन् वनानि गहनानि च ।
सेनासंचारतुच्छोदा नदीश्च क्षतरोधसः ॥ १० ॥

लङ्घमानौ कृतजवौ शृण्वन्तौ पक्षिणां रुतम् ।
वीक्षमाणौ पुष्करिणीः संफुल्लाम्बुजकाननाः ॥ ११ ॥

हंससारसचक्राह्वनिनादमुदिताशयौ ।
विश्रमन्तौ क्वचित्पुण्यस्रोतसां सरितां तटे ॥ १२ ॥

क्वचिद्द्रुमतले चारुशीतलच्छायशालिनि ।
जवात्पन्थानमुत्तीर्य माल्यवन्तमुपेयतुः ॥ १३ ॥

यत्रास्ते जगदीशानः स्वयं रघुकुलेश्वरः ।
प्रतीक्षमाणः सौमित्रेर्मार्गं विनिहितेक्षणः ॥ १४ ॥

तत्र सर्वेऽप्युयाजग्मुः कपयो जातकौतुकाः ।
श्रीरामदर्शनश्रद्धापुलकाञ्चितविग्रहाः ॥ १५ ॥

स तत्र नीलोत्पलचारुविग्रहः समाश्रितः कोमलदर्भसंस्तरे ।
पर्यङ्कबद्धासन आत्मयोगभृत् स्वस्थो दधद्वल्कलचीरवाससी ॥ १६ ॥

सुफुल्लराजीवसमानलोचनो नितान्तमाजानुविशालदोर्युगः ।
अलंकृतस्तापसवेशसुश्रिया तडित्पिशङ्गाभजटाकलापभृत् ॥ १७ ॥

तुङ्गोत्तमाङ्गाहितवन्यपल्लवप्रसूनराजीमुकुटो मनोहरः ।
कैलासनाथोपमितौऽप्रमेयसद्गुणाढ्य आस्ते रघुवंशकेसरी ॥ १८ ॥

तं दृष्टवन्तः सकलाः कपीश्वराः सुग्रीवमुख्या विहिताञ्जलीपुटाः ।
सौमित्रिणा ते च सहात्मबन्धुना प्रणम्य येतुः किलदण्डवद्भुवि ॥ १९ ॥

पुनः समुत्थाय पुरो जगत्पतेस्तथैव बद्धाञ्जलयः प्लवंगमाः ।
आदेशसापेक्षतया कति क्षणान् सर्वेऽपि तस्थुर्विहितादरोत्सवाः ॥ २० ॥

जवाद् रामोऽथ सुग्रीवं परिरभ्य सुहृत्तमम् ।
लक्ष्मणं च यथास्थानं कपीन् समुपवेशयन् ॥ २१ ॥

तत्र श्रीरामसुग्रीवावेकासनमधिष्ठितौ ।
अङ्गदश्चात्मनिकटं स्थापितो रघुमौलिना ॥ २२ ॥

कृतार्थं मन्यमानाः स्वं सर्वेऽपि कपिसत्तमाः ।
ददृशुश्चिरसोत्तर्षा मुखचन्द्रं जगत्प्रभोः ॥ २३ ॥

अन्योन्यसंकथाभ्याससुखितान्योन्यमानसौ ।
कपीश्वररघुश्रेष्ठौ विप्रयुक्तौ चिरेण तौ ॥ २४ ॥

सानन्दमासाञ्चक्राते वीक्षमाणौ परस्परम् ।
परस्परगुणश्लाघाप्रमोदितपरस्परौ ॥ २५ ॥

अथ लक्ष्मणमाहेदं रामः संफुल्ललोचनः ।
आनीतः साधु सौमित्रे सुग्रीवोऽयं सखा मम ॥ २६ ॥

त्वां विना क इदं कार्यं कर्त्तुं शक्तो महामते ।
आनन्दितस्त्वयास्म्यद्य मन्मित्रमुखदर्शिना ॥ २७ ॥

चक्रवर्ती पुनरयं कपीनां भूरितेजसाम् ।
विक्रमी बलवांस्त्यागी सखा मे सुमहोन्नतः ॥ २८ ॥

यस्याज्ञावशगाः कीशाः कोटिशो यूथपेश्वराः ।
किष्किन्धापुरराजोऽसौ क्व मां स्मरतु तापसम् ॥ २९ ॥

वनवासिनमा पत्सु मग्नं घोरतरास्वयम् ।
यदि मां संस्मरेज्जातु कृतार्थः स्यामसंशयम् ॥ ३० ॥

स चेदयं स्वयं प्राप्तः कृपया मम कीशराट् ।
तर्हि जानामि सौमित्रे निकटेऽभ्युदयो मम ॥ ३१ ॥

इति वादिनमाक्षिप्य रामचन्द्रं कपीश्वरः ।
उवाच संस्मृताशेषतत्कृतोपकृतिर्बुधः ॥ ३२ ॥

अजापि दुर्लभा यस्य स ते करुणया प्रभो ।
द्वारोपान्ते घूर्णमानमत्तमातङ्गमण्डलः ॥ ३३ ॥

चिरं जयति वीरेन्द्र साम्राज्यपदभोगभुक् ।
निदर्शनं तु तत्रायमहमेव न संशयः ॥ ३४ ॥

स्पर्द्धते भवता यस्तु दैवापहृतचेतनः ।
आरात्कृतान्तमहिषघण्टाघोषं शृणोति सः ॥ ३५ ॥

निदर्शनं तु तत्राभून्मम ज्येष्ठः स दुर्मतिः ।
त्वद्दासस्य विपक्षोऽपि किं पुनस्ते रघूद्वह ॥ ३६ ॥

अयमहमिह संगतोऽस्मि दासस्तव रघुपुङ्गव साकमात्मवर्ग्यैः ।
त्रिजगति किल यच्चिकीर्षितं ते द्रुततरमादिश तन्ममाद्य कर्त्तुम् ॥ ३७ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे सुग्रीवसमागमो नाम सप्तनवत्यधिकशततमोऽध्यायः ॥ १९७ ॥

*

अष्टनवत्यधिकशततमोऽध्यायः

ब्रह्मोवाच

सुग्रीवस्य गिरं श्रुत्वा रघुवंशविभूषणः ।
मुमुदेऽतितरं चित्ते सख्येनाकैतवेन च ॥ १ ॥

अथ लङ्कापतिं दुष्टं जिघांसति रघूद्वहे ।
तदाज्ञया कपिश्रेष्ठ आजुहावकपीनिह ॥ २ ॥

ये केपिभूमिवलये स्थिता दिक्षु विदिक्षु च।
पुरग्रामगिरिद्रोणीवनोपवनवासिनः ॥
आहूताः कपिराजेन कपयः सर्व एव ते ॥ ३ ॥

नानादेशनिवासस्था नानागिरिनिवासिनः।
नानाविपिनवास्तव्यास्तत्र सर्वेऽप्युपाययुः ॥ ४ ॥

नानावर्णाः कपिभटा नानाजातिसमुद्भवाः।
नानापरिकरोपेताः कपिराजनिदेशतः ॥ ५ ॥

सर्वे ते संगतास्तत्र श्रीमद्रघुपतेः पुरः।
बद्धाञ्जलिपुटाः सौम्याः स्थिता आगत्य वानराः ॥ ६ ॥

श्वेतारक्ताः पिशंगाभा नीलवर्णाश्च मेचकाः।
श्वेताः पीताः कर्बुराश्च नानावर्णघनोपमाः ॥ ७ ॥

स्थूलाः स्थूलतराश्चैव तेभ्यः स्थूलतमा अपि।
गिरीन्द्रसदृशास्तुङ्गा गिरीन्द्रशिखरोपमाः ॥ ८ ॥

मत्तेभराजसदृशाः संग्राममखदीक्षिताः।
आस्फोटयन्तो दोर्दण्डान् विचित्रगुणविक्रमाः ॥ ९ ॥

कालास्या अरुणास्याश्च कर्बुरास्याश्च केचन।
पीतास्याः पिङ्गलाक्षाश्च नानावर्णविलोचनाः ॥ १० ॥

विचित्रवेगाः कपयो लाङ्गूलातपवारणाः।
विशाललंकेशकुलमूलोत्खननदीक्षिताः ॥ ११ ॥

आबद्धबन्धुजीवाभरक्तकच्छोटकाम्बराः।
मल्लातिमल्लाः प्रबलाः प्रतिमल्लविचूर्णनाः ॥ १२ ॥

पतङ्गा इव कार्यार्थे स्वामिनस्त्यक्तजीविताः।
त्यक्तप्राणास्त्यक्तगृहा आस्फोटितभुजोरवः ॥ १३ ॥

उच्चैः किलकिलाशब्दैर्भीषयन्तो भयानकाः।
उत्कूर्दमानाः सजवा दोर्घाहङ्कारपूरिताः ॥ १४ ॥

संग्रामाङ्गणसम्मत्ताः प्रतिसैन्यनिरासकाः।
निर्भयाश्चण्डमतयः सर्वे युद्धविशारदाः ॥ १५ ॥

देवांशाः श्रीहरांशाश्च निदेशाद्ब्रह्मणो भुवि।
श्रीरामचन्द्रं परया भक्त्या सेवितुमागताः ॥ १६ ॥

सर्वेऽपि तेजसातुल्या ज्वलन्तः पावका इव।
दिशां जैत्राः समरभूताण्डवातुल्यशक्तयः ॥ १७ ॥

घनवद्गर्जमानाश्च सिंहविक्रान्तिशालिनः।
वोढुं भूमिभृतां भारं समर्थाः सुमहाबलाः ॥ १८ ॥

हीरहारभृतो मुक्तामालाभूषितवक्षसः ।
कर्णमौक्तिकशोभाढ्या हेमहारविभूषणाः ॥ १९ ॥

सहानुगाः सहसुताः सहपौत्राः सबन्धवः ।
सकुटुम्बा निष्कपटा योद्धुमाबद्धबुद्धयः ॥ २० ॥

उत्तुङ्गतनवः स्थूला दीर्घदोर्दण्डशालिनः ।
शिलावृक्षप्रहरणा नखरायुधयोधिनः ॥ २१ ॥

दशनायुधयोद्धारो दोर्दण्डपरिघायुधाः ।
चपेटापातचतुराश्चण्डविक्रमशालिनः ॥ २२ ॥

सर्वमल्लकलायुद्धप्रवीणा घोरयोधिनः ।
राक्षसान्तकराः क्रूराः प्रहारविधिपण्डिताः ॥ २३ ॥

शिलाचूर्णननिर्घाता घोरशब्दप्रहारिणः ।
कृतनानादेशजयाः संग्रामोर्जिततेजसः ॥ २४ ॥

प्रसर्पन्तः प्रतिबलेषून्मत्ता युधि भीषणाः ।
बद्धाञ्जलिपुटाः सर्वे रामस्य पुर आययुः ॥ २५ ॥

अत्युद्दामाः समरसरसीगाहनात्युग्रवीर्याः ।
सुग्रीवस्यप्लवगनृपतेराज्ञया ते समेताः ॥

तत्राजग्मुर्वनगिरिगुहाग्रामगेहाधिवासा ।
सर्वेऽप्यष्टादशमितमहापद्मसंख्याः कपीन्द्राः ॥ २६ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे कपिसेनासमागमो नामाष्टनवत्यधिकशततमोऽध्यायः ॥ १९८ ॥

*

नवनवत्यधिकशततमोऽध्यायः

ब्रह्मोवाच

कपयस्ते महाप्राज्ञा वरेण्या बलशालिनाम् ।
महाबुद्धिमतां श्रेष्ठा विक्रान्ताः सुमहौजसः ॥ १ ॥

महाघोररणोद्युक्ताः स्वामिनो हितकारिणः ।
तेषां केचित्कपिवराः सुग्रीवस्य निदेशतः ॥ २ ॥

कृत्वा प्रणामं रामस्य यत्ताः सीतावलोकने ।
मासैकमवधिं कृत्वा ययुरन्वेषणोद्यताः ॥ ३ ॥

तानाह वानरश्रेष्ठान् सभ्रूभङ्गं कपीश्वरः ।
अहो कपिवराः सम्यक् शृणुतेदं वचोमम ॥ ४ ॥

अन्विष्यतां जनकजा भवद्भिर्यत्नतत्परैः ।
एकमासोऽवधिर्दत्तो युष्माकं तत्र वै मया ॥ ५ ॥

मासात्परमुपागम्य रामं न प्रणमिष्यथ ।
तद्यूयं दण्डनीयाःस्थ वचनं मेस्मरिष्यथ ॥ ६ ॥

इत्युक्त्वा प्रेषिताः कीशाः सुग्रीवेण महात्मना ।
सीतामन्वेषयामासुर्दशदिक्षु प्रचारिणः ॥ ७ ॥

जाम्बवान्नाम ऋक्षेशो नलो नीलश्च मारुतिः ।
अन्ये चापि कपिश्रेष्ठास्तेषां मुख्यतमोऽङ्गदः ॥ ८ ॥

कपयो दशकोट्यश्च कृत्वा तेषामधीश्वरम् ।
याम्यां दिशि कपीन्द्रेण प्रेषितो जानकीकृते ॥ ९ ॥

तेऽन्वेषयन्तो जनकेन्द्रपुत्रीं सुनैपुणीदत्तदृशोऽतिविज्ञाः ।
वनेषु शैलेषु गुहासु गह्वरेष्वनेकदेशेषु चिरं विचेरूः ॥ १० ॥

लब्धा न तैः कापि गवेषयद्भिर्मृगाङ्कवक्त्रा जनकेन्द्रपुत्री ।
नलंङ्घिरे मासकृतावधिं ते प्राप्तास्ततस्तीरभुवं पयोधेः ॥ ११ ॥

महेन्द्रपर्वते तत्र संगताः कपयोऽखिलाः ।
सुग्रीवस्य कपीन्द्रस्य दण्डभीत्या समाकुलाः ॥ १२ ॥

त्यक्तात्मजीवितव्यास्ते आसीनाः कुशसंस्तरे ।
स्थिताः प्रायोपवेशेन मुहुश्चिन्तासमाकुलाः ॥ १३ ॥

तत्र नानाजगामाथ सम्पतिर्नाम वै खगः ।
स पृष्टस्तैः कपिवरैराचख्यौ जनकेन्द्रजाम् ॥ १४ ॥

लङ्केशोपवनेऽशोकवाटिकायां निवासिनीम् ।
राक्षसीयूथमध्यस्थां प्रियविश्लेषकातराम् ॥ १५ ॥

सम्पातिवचसा तां तु विनिश्चित्यल्पवंगमाः ।
प्रायोपवेशनं त्यक्त्वा पुनर्जीवितमागताः ॥ १६ ॥

बभूवुः स्वस्थमनसः सर्वेऽपि रहिताः शुचाः ।
तानाजगाम हनुमांस्तत्रैव कृतविक्रमः ॥ १७ ॥

दग्ध्वा लङ्कापुरीं कृत्स्नां लांगूलानलचालनात् ।
तेन व्यावर्तिताः सर्वे कपयो रामसंनिधौ ॥ १८ ॥

भुशुण्ड उवाच

कथं जगाम हनुमांल्लङ्कां वारिधिमध्यगाम् ।
कथं च तां ददाहैष गोपितां राक्षसोत्तमैः ॥ १९ ॥

ब्रह्मोवाच

भुशुण्ड शृणु वक्ष्यामि चरित्राणि हनूमतः ।
महाबलो महाकायो यथा लङ्कापुरीं गतः ॥ २० ॥
श्रीरामस्य निदेशेन हनूमान् स्वामिसेवकः ।
अवेक्षणाय जानक्या गन्तुमैच्छत् स तां पुरीम् ॥ २१ ॥
अथापश्यत्पयोराशिं दुस्तरं सर्वमानुषैः ।
अगाधं पयसां राशिमुत्तरङ्गमनारतम् ॥ २२ ॥
अनिरीक्षितपारं च प्रचण्डमरुतान्वितम् ।
गर्जमानं महादर्पं सर्वलोकभयानकम् ॥ २३ ॥
नदीनामाव्रजन्तीनां सर्वतः सजवाम्भसाम् ।
स्रोतोभिरापूर्यमाणमक्षोभितपयोभरम् ॥ २४ ॥
समंतात्पूर्णमाघूर्णल्लहरीकोटिताण्डवम् ।
प्रचण्डमारुतावेगगम्भीरध्वनिभीषणम् ॥ २५ ॥
विस्तीर्णद्वीपधरणिवसज्जनपदव्रजम् ।
मणिमाणिक्यबहुलं मुक्तास्फोटगणाकरम् ॥ २६ ॥
प्लवच्छङ्खकुलव्याप्तं यादोगणभयानकम् ।
पिबतां वारि मेघानां घटाकोटिभिरावृतम् ॥ २७ ॥
प्रवालभूरुहव्याप्तद्वीपपर्यन्त मञ्जुलम् ।
हरिद्रत्नशिलाकोटिव्याप्तद्वीपावनिं क्वचित् ॥ २८ ॥
क्वचिच्छ्रीखण्डविटपिसुगन्धिततटावनिम् ।
क्वचित्कल्पतरुच्छायाविश्रान्तसुरकिन्नरम् ॥ २९ ॥
क्वचिल्लवङ्गवल्लीभिर्व्याप्यमानतटावनिम् ।
सहस्रयोजनायामैः शतयोजनविस्तृतैः ॥ ३० ॥
अत्युग्रतनुभिर्ग्राहैर्दंष्ट्राकोटिभयानकैः ।
उत्क्षिप्तसलिलोत्तुङ्गं नानाजातीयजन्तुभिः ॥ ३१ ॥
आकुलीकृतनीरौघं निमज्जच्चन्द्रभास्करम् ।
अत्युच्छ्रितं महीपृष्ठादत्युद्भटपयोघटम् ॥ ३२ ॥
राक्षसै राक्षसीभिश्च कृतकेलिभरं क्वचित् ।
महामकरविक्षिप्तसलिलोर्मिसमाकुलम् ॥ ३३ ॥
वडवापावकज्वालाप्लुष्यमाणजलाशयम् ।
उच्चैरनेकसाहस्रयोजनायामशालिभिः ॥ ३४ ॥
महेन्द्रपाणिकुलिशाक्षतपक्षतिभिस्ततैः ।
नानामहीध्रनिवहैः सावकाशकृतस्थितिम् ॥ ३५ ॥

वेलावनावलीभीमं निःसीमसलिलाकरम् ।
अनेककौतुकागारं सुरकिन्नरराक्षसैः ॥ ३६ ॥

समंततः सेव्यमानं नानाजनपदाश्रयम् ।
उन्नम्रमेघसंघाममहोर्मिनिबहाचितम् ॥ ३७ ॥

महागम्भीरनिर्घोषतिरोभूतेतरध्वनिम् ।
गम्भीरमप्रमेयं च हरेः शयनमन्दिरम् ॥ ३८ ॥

लक्ष्म्याश्च जनकं साक्षाद्रत्नानामाकरं च तम् ।
महोत्तुङ्गं महावेगं महायामं महोद्भटम् ॥ ३९ ॥

वरुणस्यालयं घोरं महाप्रलयकारणम् ।
आज्ञया देवदेवस्य मर्यादालम्बिनं सदा ॥ ४० ॥

तं दृष्ट्वा पवनसुतो नभःस्पृशोर्मिरामाज्ञापरवशधीर्महातरस्वी ।
लङ्घित्वा गगनपथेन यातुकामो जग्राहोतलवनकृतोमहागिरीन्द्रम् ॥ ४१ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे समुद्रदर्शनो नाम नवनवत्यधिकशततमोऽध्यायः ॥ १९९ ॥

*

द्विशततमोऽध्यायः

ब्रह्मोवाच

ततो बलवतां श्रेष्ठो भृत्यो रघुपतेः स्वयम् ।
हनुमानारुरोहोच्चैस्तीरगं लवणोदधेः ॥ १ ॥

उत्तुङ्गशिखरं शैलं बद्धकच्छारुणाम्बरः ।
आस्फोटितभुजद्वन्द्वस्तलप्रहतशैलभूः ॥ २ ॥

अथ पुच्छं शिरःकृत्य प्रोच्छलद्गुच्छसंनिभम् ।
तेजोराशिर्ज्वलन्दीप्त्या हेमशैल इव त्विषा ॥ ३ ॥

उत्प्लुत्य तुङ्गशैलाग्राद्वातचक्रं सृजन् जवात् ।
हुंकारगर्भगम्भीरनिर्घोषभरभीषणः ॥ ४ ॥

महाभरोद्भूतिदशयोजनप्रस्खलद्गिरि ।
उत्पफालतरां व्योम्ना सजयं मारुतिर्बली ॥ ५ ॥

तं काचिद्राक्षसीघोरा दंष्ट्राकोटिभयानका ।
क्रीडन्ती लवणाम्भोधौ योजनायामिभिर्झषैः ॥ ६ ॥

महानना महाकाया ज्वलत्पावकलोचना ।
विकीर्णोच्चैः पिशङ्गाभजटापटलभीषणा ॥ ७ ॥

रुन्धतीबाहुभिस्तुङ्गा वीचीर्लवणवारिधेः ।
तरन्ती चापि गम्भीरे गाधयन्ती मुहुर्जलम् ॥ ८ ॥

अहो आः कोऽयमुघाति नभसा तेजसो निधिः ।
नूनमेष कपिः कश्चिदिति निश्चित्य चेतसा ॥ ९ ॥

छायामेवास्य जग्राह प्रतिष्टब्धश्च मारुतिः ।
विस्मितश्चापि मनसा ज्ञातुकामोऽस्य कारणम् ॥ १० ॥

ततः प्रतिष्टम्भसमिद्धमन्युः स वायुपुत्रः प्रवलो हनूमान् ।
अधो ददर्शाहितलोचनो वै तां राक्षसीं ग्रासविलोलजिह्वाम् ॥ ११ ॥

रोषावेशादथ पवनजो घोरदंष्ट्राकरालां
पीडित्वा तां कलितरभसः कौणपींग्रस्तुकामाम् ।
वेगोन्मुक्तः शर इव पपातोच्चकैरुत्तरोष्ठे
पादन्यासप्रहतवदनोद्देश उच्चेर्विवृद्धः ॥ १२ ॥

अधराहनुमाक्रम्य उत्तराहनुमुद्वहत् ।
ववृधे बलवान् वीरोयथा वक्त्रं व्यदीर्यत ॥ १३ ॥

कृत्स्नां विदारयामास राक्षसीं पवनात्मजः ।
मध्ये लवणपाथोधेर्महाबलपराक्रमः ॥ १४ ॥

तथैव मकरीं कांचिच्छतयोजनविस्तृताम् ।
छायाग्राहां कृतग्रासां विददार समीरजः ॥ १५ ॥

शतयोजनविस्तीर्णमुल्लङ्घ्य जलधेर्जलम् ।
लङ्कां जगाम वीरोऽसौ हनूमानात्मनो जवात् ॥ १६ ॥

सोऽदृश्यं रूपमसुरैर्विधाय कपिपुङ्गवः ।
रात्रावालोकयामास रक्षोभिर्गोपितां पुरीम् ॥ १७ ॥

विशालहेमप्राकारां परिखाप्राप्तवारिधिम् ।
प्राकारकूटविषमामग्नियन्त्रसमाकुलाम् ॥ १८ ॥

स्थाने स्थाने महाघोरै राक्षसैरावृतां पृथक् ।
विशालकनकाट्टालविन्यस्तध्वजलाञ्छिताम् ॥ १९ ॥

हेमप्रासादबहुलां हट्टापथविराजिताम् ।
प्रतिहट्टपथं रूढैश्चन्दनद्रुममण्डपैः ॥ २० ॥

शोभितां पारिजातैश्च मन्दारैः कल्पभूरुहैः ।
हरिचन्दनसुच्छायसमाश्रितपुरीजनाम् ॥ २१ ॥

स्वर्गङ्गाकमलारण्यशोभितद्गृहदीर्घिकाम् ।
दशाननगृहोपान्तन्यस्तकैलाससानुनि ॥ २२ ॥

शिवस्य भालचन्द्रांशुजातैर्वितिमिरीकृताम् ।
रक्षोजनैराक्षसीभिर्नानारूपाभिरन्विताम् ॥ २३ ॥

अगस्त्यस्य मुनेः सम्यक् तपस्तेजःप्रकाशिताम् ।
पठद्भिः साङ्गनिगमान् कुमारैर्यातुधानजैः ।
सर्वतो योषितां भूयो होमधूमसुगन्धिताम् ॥ २४ ॥

जातरूपमयैर्गेहैर्गृहस्थानां धनालिभिः ।
सर्वतोदीपितां भूरि चत्वराजिरशोभिताम् ॥ २५ ॥

नभःस्पृशगृहशृङ्गामुत्तुङ्गानेकगोपुरैः ।
द्वारपालैः कौणपैश्च विश्वतो भीषणां च ताम् ॥ २६ ॥

रम्योत्फुल्लगृहारामां श्रीखण्डविपिनावृताम् ।
अनेकरचनारम्यां रमणीयतमां त्विषा ॥ २७ ॥

भित्तिभी रत्नजटितविस्फुरज्जालपङ्क्तिभिः ।
रथ्यापथौश्चबहुलैः सर्वतः सुसमाकुलाम् ॥ २८ ॥

उत्तुङ्गवलभीगेहेभवनाग्रविराजिताम् ।
स्फाटिकैश्चैवभवनैर्नानावर्णमणिप्रभैः ॥ २९ ॥

सायंतनघनाकारैः सर्वतो गहनां क्वचित् ।
करालकाहलोद्भूतघोरकोलाहलान्विताम् ॥ ३० ॥

पर्वसूत्सवकृत्येषु वाद्यद्भिः पटहैः प्लुताम् ।
निःसानघोररावैश्च प्रतिशब्दितरोदसीम् ॥ ३१ ॥

सुबेलशैलशिखरैस्त्रिकूटाचलसानुभिः ।
मलयाचलशृङ्गैश्च गृहैरिव समाचिताम् ॥ ३२ ॥

मृदङ्गघोषमधुरैर्गृहैः किन्नररक्षसाम् ।
स्थाने स्थाने भवद्भूरिसुमहामङ्गलस्वराम् ॥ ३३ ॥

विवाहादिभवद्भूरिशुभकृत्य निनादिभिः ।
गन्धर्वपाणिप्रहृतैर्वाद्यैर्नानाविधैरपि ॥ ३४ ॥

शब्दायितामजस्रं तां हेमजालकमण्डितै. ।
गवाक्षैः पौरगेहानां सर्वतः शोभितां सदा ॥ ३५ ॥

चन्द्रमण्डलवक्त्राभिस्तारामण्डलकान्तिभिः ।
दीपिकाकारतनुभिर्मायाकल्पितवर्ष्मभिः ॥ ३६ ॥

सुन्दरीभिर्मनोज्ञाभिर्मृगाक्षीभिर्दिवानिशम् ।
विषमाभिश्च भीमाभिर्विकटाभिर्जटालिभिः ।
राक्षसीभिरनेकाभिर्जात्यारूपैश्च विग्रहैः ॥ ३७ ॥

आकुलीक्रियमाणां च राक्षसैरतिभीषणैः ।
सर्वसम्पत्समुदितां दशकन्धरपालिताम् ॥ ३८ ॥

नानादिग्भ्यः समानीतैः समृद्धिनिवहैर्युताम् ।
तुङ्गानेकपुरद्वारवाद्यद्दुन्दुभिघोषिताम् ॥ ३९ ॥

स्नानपानाशनायासनानाव्यापारतत्परैः ।
रक्षोभिः सेवितां नित्यं क्रीडद्राक्षसवल्लभाम् ॥ ४० ॥

पुष्पकादिविमानाग्र्यतेजोवृन्दप्रकाशिताम् ।
प्राकारोपान्तसम्मूर्छत्तुङ्गसागरवीचिकाम् ॥ ४१ ॥

रात्रौ तां दशकन्धरस्य नगरीं कृत्स्नामसौ पर्यटन्
पाश्चात्येप्रहरे विभीषणगृहं दृष्ट्वा स तुष्टाशयः ।
श्रीरामार्चनपूर्णभक्तितुलसीसौरम्यमुष्टान्तरः
सम्प्राप्तो दशकन्धरस्य परमोद्याने धृतान्वेषणः ॥ ४२ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे हनुमतो लङ्कागमनो नाम द्विशततमोऽध्यायः ॥ २०० ॥

*

एकाधिकद्विशततमोऽध्यायः

ब्रह्मोवाच

स ददर्श दशास्यस्य वनं सुविपुलं ततः ।
अन्वेषयत् जनकजां तत्र तत्र तरौ तरौ ॥ १ ॥

दृष्ट्वा वनस्य शोभां स प्रहृष्टहृदयोऽभवत् ।
जगाह च वनं कृत्स्नं गह्वरं तरुवल्लिभिः ॥ २ ॥

नानाजातिलतारूढतुङ्गवृक्षसहस्रकम् ।
पुष्पसौरभ्यभरितं वहत्त्रिविधमारुतम् ॥ ३ ॥

सुबेलाद्रिगुहागेहविरूढमलयद्रुमैः ।
सर्वतः सौरभव्याप्तलतामण्डपगह्वरम् ॥ ४ ॥

त्रिकूटशैलनिपतन्निर्झरानिलशीतलम् ।
पुष्पाकरमिवोत्फुल्लनानाजातिलताद्रुमम् ॥ ५ ॥

चन्दनामोदमधुरं पङ्कजामोदिमारुतम् ।
हेमरत्नसमाबद्धसरोवापीमनोरमम् ॥ ६ ॥

अनेकजातिविहगनिकाणसुनिनादितम् ।
हंसश्रेणीघनरवप्रतिशब्दसमाकुलम् ॥ ७ ॥

गायद्गन्धर्वनिकरं भ्रमरौघकृतस्वनम् ।
प्रमत्तकोकिलालापकोलाहलकलस्वरम् ॥ ८ ॥

रसालमञ्जरीपुञ्जधूलीधारान्धकारितैः ।
प्रावृतैर्लवलीजालैर्माधवीवल्लिमण्डपैः ॥ ९ ॥

प्रतिस्थलं राजमानं नवपल्लवशालिभिः ।
अनोकुहैररुणितं संध्यातपमिवान्तरम् ॥ १० ॥

क्वचित्पीतं च चाम्पेयैस्तमालैर्मेचकप्रभम् ।
विचित्रवर्णकुसुमकर्बुरीकृतमन्तरा ॥ ११ ॥

नानाजातिपशुव्रातनिवासं भूरिभूरुहम् ॥ १२ ॥

तस्मिन् वने ददर्शाथ कंकेलितरुवाटिकाम् ।
वृक्षैर्मञ्जरितैर्युक्तां समंतादरुणप्रभाम् ॥ १३ ॥

हेमप्राकारकलितां लीलाभूमिं मनोभुवः ।
चित्तस्य क्षोभजनिकां दर्शनात्तत् क्षणेन च ॥ १४ ॥

सुरम्यनिलसंव्याप्तां निर्झरानिलशीतलाम् ।
सुवर्णवेदिकारत्नबद्धपद्यां मनोहराम् ॥ १५ ॥

तत्रैकतमकंकेलितरुमूलमुपाश्रिताम् ।
प्रलपन्तीं रामनाम वियोगविकलाशयाम् ॥ १६ ॥

उन्मुक्तमूर्द्धजां वक्षः सिञ्चतीमश्रुबिन्दुभिः ।
अनुतापशते मग्नां संतापग्लपिताशयाम् ॥ १७ ॥

अधोमुखीं मुद्रिताक्षीं दुष्प्रेक्ष्यदशयान्विताम् ।
विरहाख्यतमःस्पर्शादभिभूतैरिवानिशम् ॥१८॥

तनुप्रकाशसंदोहैर्भासिताशेषकाननाम् ।
अशोकवाटिकावेदिसुस्थिरां चपलामिव ॥ १९ ॥

ज्योत्स्नामिव तमोग्रस्तां घनैः सूर्यप्रभामिव ।
दीपिकामिव लोकस्य कालरात्रितमोवृताम् ॥ २० ॥

धूमसंदोहमलिनां दीप्तां वह्निशिखामिव ।
कषाणदृषदुल्लीढामिव सद्रत्नमञ्जरीम् ॥ २१ ॥

द्यामिवानुदितार्केन्दुप्रभामलिनविग्रहाम् ।
महीमिव तपस्तिग्मसूर्यदीधितितापिताम् ॥ २२ ॥

सरसीमिव चात्यर्थं ग्रीष्मार्ककरशोषिताम् ।
लतामिव परिप्लुष्टां वनपावककीलया ॥ २३ ॥

वनीमिव परिम्लानां वारिसेकविनाकृताम् ।
परिभ्रष्टतनुद्योतां परिम्लानमुखश्रियम् ॥ २४ ॥

सुरश्रेणीमिवानेकदानवौद्यनिपीडिताम् ।
गृहश्रियमिवापुत्रां सद्विद्यामिव शूद्रगाम् ॥ २५ ॥

त्रिजटाराक्षसीवक्त्रोत्थितरामकथामृतैः ।
शनैरीषत्सिच्यमानां सुस्थीकृतहृदं च ताम् ॥ २६ ॥

ददर्श हनुमान् सीतामार्योदन्तं च तां मुहुः ।
पृच्छन्तीं विरहव्याधिशमनं श्रवणेन वै ॥ २७ ॥

रामनामगुणाख्यानैर्निश्चिकाय मरुत्सुतः ।
जनकेन्द्रसुतां धीरामसह्यविरहां सतीम् ॥ २८ ॥

दृष्ट्वा रहःस्थां जनकेन्द्रपुत्रीमुत्तीर्यकंकेलितरोर्हनूमान् ।
कृत्वा प्रणामं शिरसा पुरोऽस्था बद्धाञ्जलिर्भक्तिभरेण तस्थौ ॥ २९ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे सीताहनुमत् दर्शनो नामैकाधिकद्विशततमोऽध्यायः ॥ २०१ ॥

*

द्व्यधिकद्विशततमोऽध्यायः

ब्रह्मोवाच

अथाम्ब मातर्जननीति तामसौ सम्बोध्य नीचैर्हनुमानवोचत ।
प्राप्तोऽस्म्यहं देविनमस्तवान्तिकं रामस्य दूतो रघुवंशभास्वतः ॥ १ ॥

पतिस्ते लोकजननि राघवेन्द्रो जगत्पिता ।
माल्यवन्तं नाम गिरिमध्यास्ते सानुजोऽधुना ॥ २ ॥

सुग्रीवेण कपीन्द्रेण मैत्री तस्याभवद् दृढा ।
तवोदन्तं विजिज्ञासुः स आस्ते कपिभिः समम् ॥ ३ ॥

तस्यानेकमहापद्मकपिवीरवरूथिनी ।
इदानीं खलु सज्जास्ति दुष्टारिहननं प्रति ॥ ४ ॥

शब्दायन्ते कपिभटा आस्फोटितभुजद्वयाः ।
साहंकाररवाः सर्वे प्रभोराज्ञाप्रतीक्षणाः ॥ ५ ॥

एकैकः कपिवीरोऽत्र महाबलपराक्रमः ।
पर्याप्तो राक्षसानीकमथने स्वामिनो गिरा ॥ ६ ॥

राघवेन्द्रोऽपि भगवान् सानुजः सज्जकार्मुकः ।
सोत्साहः शरदा कर्तुं विपक्षेष्वभिषेणनम् ॥ ७ ॥

अलं तदतिमात्रं ते शोकेन जनकात्मजे ।
अचिरेणैव जित्वारिं त्वा मितो नेष्यति प्रभुः ॥ ८ ॥

अङ्गुलीयकमेतत्ते प्रभुणैव समर्पितम् ।
समाश्वसिहि मातस्त्वं दर्शनादस्य सम्प्रति ॥ ९ ॥

इत्युक्ता जानकी तेन कपीन्द्रेण महाधिया ।
शनैरुन्मीलयामास चक्षुषी विरहालसे ॥ १० ॥

रक्षोमायाभ्रमात्किंतु न किं चित्तमवोचत ।
ततः स आह तां भूयो भृत्यो रघुपतेः कपिः ॥ ११ ॥

मातर्मृत्योऽस्मि नियतं साक्षाद्रघुपतेरहम् ।
भृशं तच्चरणाम्भोजद्वन्द्वलाञ्छितमस्तकः ॥ १२ ॥

नाहमन्यद्विजानामि राघवेन्द्राज्जगत्त्रये ।
एकमेव निजे मूर्द्धि विधाय सुखितोऽस्म्यहम् ॥ १३ ॥

ये ते भरतसर्वस्वे पातकौद्यापहारके ।
त्रैलोक्यमण्डने तस्य पादुके शरणं मम ॥ १४ ॥

जपामि रामनामाहं स्मरामि रघुपुङ्गवम् ।
भजामि नित्यं काकुत्स्थं वीक्षे दशरथात्मजम् ॥ १५ ॥

न रामात्परतस्तत्त्वं जानामि भुवनत्रये ।
राममेवाश्रये नित्यमिति मे व्रतमाहितम् ॥ १६ ॥

इदं गृहाण ते पत्या दत्तमप्रतिमं शुभम् ।
सुवर्णमाणिक्यमयं निजाङ्गुलिविभूषणम् ॥ १७ ॥

अनर्घ्यदिव्यरत्नांशुजालैः सर्वतमोपहम् ।
आश्वासनाय ननु ते कृच्छ्रादन्तिकमागतम् ॥ १८ ॥

यत्सोढो विरहोऽनेन प्रभुणा दत्तपाणिना ।
तवैवार्थे जनकजे इति निश्चितु चेतसा ॥ १९ ॥

इत्युक्तमात्रे जनकेन्द्रपुत्री समाददौ तस्य करात् सहर्षम् ।
तदङ्गुलीयं प्रियपाणिपद्मस्पर्शानुभूतिक्षममद्वितीयम् ॥ २० ॥

आदाय मुद्रां पृथुलोचनाश्रुधाराजलैस्तां सुचिरं निषिच्य ।
संयोज्य दृग्भ्यां शिरसोरसा च सुविस्मितभ्रूरथ तां बभाषे ॥ २१ ॥

मुदं रातीति मुद्रा ते यथार्थं नाम मुद्रिके ।
यन्मे वियोगमग्नाया अपि त्वत्तोऽभवन्मुदः ॥ २२ ॥

दुःखं मुद्रयसीति त्वं मुद्रैवासि ततोऽपि मे ।
क्षणं वियोगदुःखस्य मुद्रणाद्रत्नमण्डिते ॥ २३ ॥

बाह्यमाभ्यन्तरं चापि मुद्रे नाशयसे तमः ।
प्रकाशितं वनंकृत्स्नं चित्तं मे च प्रसादितम् ॥ २४ ॥
चक्षुषोर्निहिता वाष्पैर्लिप्यसे सान्द्रपातिभिः ।
मूर्द्धिन चक्षुःपथाद्वाह्यां न सहे त्वामतिप्रियाम् ॥ २५ ॥
अथोरसि सुसंतप्ते विरहानलरश्मिभिः ।
प्रियपाणिसुखस्पृश्यां किं नु त्वां निदधाम्यहम् ॥ २६ ॥
अतस्त्वामीशविरहं सोढापीह समागताम् ।
निदध्यां क्व नु हे मुद्रे मत्प्राणगणजीवनीम् ॥ २७ ॥
अपि पाणिग्रहाद्भूर्तुः सपत्न्यप्यसि मे परम् ।
त्वं नाम मुद्रिके भाति सौजन्यं तदपीह ते ॥ २८ ॥
यन्मदर्थे पतिं त्यक्ता सिन्धो पारमुपागता ।
तन्मयापि त्वदर्थेऽयमात्मा नित्यं समर्पितः ॥ २९ ॥
अथोवाच हनूमन्तं जानकी प्रभुसेवकम् ।
अपि मन्नाथभृत्यत्वं सुखमागतवानिह ॥ ३० ॥
मध्ये लवणपाथोधेः राक्षसौघसमाकुले ।
दुर्गमे विषमे देशे सर्वप्राणिभयंकरे ॥ ३१ ॥
अथो मम दशां विद्वन् प्रभोर्मे कथयिष्यसि ।
वाच्यः कथं वा संदेशस्तस्य मेऽध्यात्मसाक्षिणः ॥ ३२ ॥
अन्तरात्मगतिं कृत्स्नां यदि वेत्ति स मे प्रभुः ।
तदलं मम संदेशैस्तस्मिन् प्रियतमे मुहुः ॥ ३३ ॥
एकं तु मम संदेश्यं वचो रघुपतेस्त्वया ।
मा जातु विस्मरेर्नाथ विशाला सहजावशः ॥ ३४ ॥
भृत्यास्मि तव दास्यस्मि पादपद्मद्वये भृशम् ।
या ते निर्मञ्छनायेश तत्पराशश्वदात्मना ॥ ३५ ॥
राक्षसेन गृहीतां मां द्रुतं मोचय सम्प्रति ।
वीरेन्द्र करुणासिन्धो न विस्मर कदाचन ॥ ३६ ॥
इदं च हनुमन् ग्राह्यं मम मूर्द्धिन्नविभूषणम् ।
चूडारत्नं मदीशस्य निधेयं करपङ्कजे ॥ ३७ ॥
शीघ्रं च मोचनीयास्मिन् गिरिवम्लेच्छहस्तगा ।
वन्दीकृतातिदुष्टेन वध्येन स्वामिना मम ॥ ३८ ॥

ततः समाश्वास्य चिरं विदेहजां मरुत्सुतोऽस्याश्च शिरोविभूषणम् ।
प्रगृह्य नत्वा च स तां विनिर्गतो दशानने रोषभरेण लोहितः ॥ ३९ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे सीतासमाश्वसनो नाम द्व्यधिकद्विशततमोऽध्यायः ॥ २०२ ॥

*

त्र्यधिकद्विशततमोऽध्यायः

ब्रह्मोवाच

अथ तद्राक्षसेन्द्रस्य वनं सान्द्रघनोपमम् ।
सुमनोहरमानीललतामण्डपमण्डितम् ॥ १ ॥

अनेकैरपि रक्षोभिर्गोपितं भूरिभूरुहम् ।
लङ्केशकेलिभवनं स्रवन्निर्झरशोभितम् ॥ २ ॥

आज्ञावशैः षड्ऋतुभिः सेवितं स्वस्वसम्पदा ।
फुल्लवृक्षलतावृन्द विचित्रखगनादितम् ॥ ३ ॥

स्वर्गपद्मवनाढ्याभिर्दीर्घिकाभिरलंकृतम् ।
सरोभिः क्वणितानेकराजहंसैः समन्वितम् ॥ ४ ॥

दृष्ट्वा बली मरुत्सूनुरमर्षपरिपूरितः ।
आचकांङ्क्ष प्रमथितुं रावणस्य सुखं च सः ॥ ५ ॥

अथास्फोटयभुजं द्वन्द्वं जङ्घानिर्घातभीषणः ।
उत्पफाल वने तस्मिन् हनूमान् विक्रमोर्जितः ॥ ६ ॥

सीतयाधिष्ठितां त्यक्त्वा कंकेलितरुवाटिकाम् ।
ममाथ सकलं वीरो वनं रक्षोधिपस्य तत् ॥ ७ ॥

तरून् बभञ्ज विटपस्कन्धमूलसमन्वितान् ।
उच्चैर्नभःस्पृशो दीर्घानाधूयाधूय वेगतः ॥ ८ ॥

प्रजहार बली पद्भ्यां कांश्चिदारभ्य मूलतः ।
कांश्चिदुत्पाटयामास दोर्भ्यामाधूय भूरुहान् ॥ ९ ॥

तस्य वेगोद्भवो वातः कम्पयामास सर्वतः ।
वनं तद्घोरकल्पान्तसमीरणहतं यथा ॥ १० ॥

कांश्चिद्विदारयामास मूलादारभ्य सोऽग्रतः ।
बभञ्ज विनताः शाखा घोरपादप्रहारतः ॥ ११ ॥

तदङ्गसंभवैर्घोरैः पवनैः संततोद्धतैः ।
आरामभूरुहाः सर्वे भयेनैव चकम्पिरे ॥ १२ ॥

प्रहारैः पादतलजैर्जवेनेव व्यदीर्यत ।
आरामभूमिरखिला कम्पमाना सह द्रुमैः ॥ १३ ॥

जगाहे भूरिवेगेन वनं तदखिलं बली ।
यथ वृक्षा व्यशीर्यन्त लतामण्डपमण्डिताः ॥ १४ ॥

वृक्षान् विटपशश्चक्रे विपटान् पर्णशस्तथा ।
पर्णानि तिलशश्चक्रे प्रहारैः पाणिपादजैः ॥ १५ ॥

वापीर्विध्वंसयामास हेमरत्नविनिर्मिताः ।
अपः कलुषयामास वापीनां सरसामपि ॥ १६ ॥

पादप्रहारविध्वस्ता उड्डीयन्ते स्म भित्तयः ।
तथा रत्नशिला दीर्घाः कणशः कृतवान् वली ॥ १७ ॥

नखैर्विदारयामास वल्लरीवृन्दमण्डपान् ।
समूलमुत्पाटितवान् दीर्घशाखावतो द्रुमान् ॥ १८ ॥

तरूणां भज्यमानानां पततां च महीतले ।
समभूद्दारुणः शब्दो निर्घातरवभीषणः ॥ १९ ॥

दशदिक्षु प्रचिक्षेप भङ्क्त्वा भङ्क्त्वा महीरुहाम् ।
शाखा फलदलोपेताः कुसुमस्तवकाचिताः ॥ २० ॥

आकीर्णा सा मही पुष्पस्तवकैः पल्लवैः फलैः ।
द्यौश्च द्रुमवनोड्डीनैः पक्षिभिर्घोरनादिभिः ॥ २१ ॥

तरुभ्यो भज्यमानेभ्यः कम्पितेभ्यो हनूमता ।
उदडीयन्त विहगाः स्थानभ्रंशसुदुःखिताः ॥ २२ ॥

रटन्तः कटुनिर्घोषमपश्यन्तश्च विश्रमम् ।
छत्राकारतयोपेता बभ्रमुर्व्योम्नि संततम् ॥ २३ ॥

अथोदतिष्ठन्त ततो राक्षसा वनरक्षकाः ।
अक्षादयस्तीव्ररोषलोहिताक्षाः परः शताः ॥ २४ ॥

आः कोऽयमखिलं वेगान्मथ्नाति बिपुलं वनम् ।
अस्मासु किल जीवत्सु स्वामी येषां दशाननः ॥ २५ ॥

किं नो वक्ष्यति भग्नेऽस्मिन् वनेसुविपुले प्रभुः ।
हेलानिर्जितदिक्चक्रो बली लङ्कापुरीश्वरः ॥ २६ ॥

अहो अयं कपिः कश्चिल्लुनाति खलु नो वनम् ।
नानाजातिलतावातसंवीततरुपुष्कलम् ॥ २७ ॥

अहो इयमभूद्धानिर्महती स्वामि नोऽस्य नः ।
महायासेन निष्पन्नं महा द्रविणेन च ॥ २८ ॥

ह्रीयते सर्वमेतद्वै कपिनाऽऽलोडितं वनम् ।
संतानकल्पमन्दारपारिजातद्रुमान्वितम् ॥ २९ ॥

हरिचन्दनसंशोभिस्वर्गानीतेन्द्रवैभवम् ।
रोपितं बहुकालेन नश्यतीदं किलाधुना ॥ ३० ॥

अहो रे राक्षसभटाः सर्वैः संहत्य नन्वसौ ।
वध्यतां वध्यतामाशु कपिरालोडितारविः ॥ ३१ ॥

इत्युक्त्वाक्षमुखा वीरा राक्षसास्तेऽतिरोषणाः ।
निषेतुः संहताः सर्वे वायुसूनौ महाबले ॥ ३२ ॥

आत्तातिदीर्घपरिघाः खड्गहस्तास्तथापरे ।
अन्ये मुद्गरहस्ताश्च धनुर्बाणधराः परे ॥ ३३ ॥

नानाशस्त्रप्रहरणाः समुत्तस्थुर्यथास्थिताः ।
निपेतुः कपिराजोऽस्मिन् स्वामिभीता निशाचराः ॥ ३४ ॥

आलोडितं वनं कृत्स्नं तावत्तेन बलीयसा ।
उत्प्लुत्योत्प्लुत्य विटपश्रेणीषु परिपातिना ॥ ३५ ॥

यत्रैवायान्ति रक्षांसि तत उत्प्लुत्य सत्वरम् ।
अन्यतोभूय निखिलान् बभञ्ज वनभूरुहान् ॥ ३६ ॥

श्रुत्वा वनस्य कदनं दारुणाज्ञो दशाननः ।
अक्षादिभ्यो राक्षसेभ्यश्चुकोप क्षुभितान्तरः ॥ ३७ ॥

हन्यतां हन्यतामेष हतो या तु न चाक्षतः ।
इत्यादिदेश तानक्षप्रमुखान् वनरक्षकान् ॥ ३८ ॥

ते स्वामिनादिष्टतमा निशाचरा बलोद्धता भूरितमास्त्रघातिनः ।
प्रजन्हुरेनं परिघैश्च मुद्गरैः सतोमरैश्चापि शरैः करेरितैः ॥ ३९ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे रावणवनमथनो नाम त्र्यधिकद्विशततमोऽध्यायः ॥ २०३ ॥

*

चतुरधिकद्विशततमोऽध्यायः

ब्रह्मोवाच

स तान् प्रहरतो दृष्ट्वा राक्षसान् घोरकर्मणः ।
चुकोपबलवान् वीरो वायुसूनुर्महोर्जितः ॥ १ ॥

ततो जघान तरुभिः स तानापततोऽसुरान् ।
समूलोत्पाटितैस्तुङ्गैर्दीर्घशाखाशिफान्वितैः ॥ २ ॥

महाशैलशिलाभिश्च कठिनाभिः सहस्रशः ।
तीक्ष्णाग्राभिर्महावेगपातिनीभिर्नभस्तलात् ॥ ३ ॥

कांश्चित्पाणिप्रहारेण पादघातैस्तथापरान् ।
पाणिपादनखैः कांश्चिद्दंष्ट्राभिश्चैव कांश्चन ॥ ४ ॥

उत्पत्याक्रमणैः कांश्चित्कांश्चिद्भ्रूमिविपोथनैः ।
कांश्चिद्दृषत्प्रहारैश्च प्रजघान निशाचरान् ॥ ५ ॥

पतिताः पुनरुत्तस्थुः प्रहारैरतिदारुणैः ।
क्षरत्क्षतजसम्पृक्ता राक्षसा घोरनादिनः ॥ ६ ॥

घूर्णायन्तेस्म धरणौ पतिताः केऽपि राक्षसाः ।
वातपुत्रेण बलिना मर्मणि प्रसभं हताः ॥ ७ ॥

महाशैलशिलाघातप्रहताः कोऽपि राक्षसाः ।
वमन्तोरुधिरं वक्त्राद् घूर्णन्ति स्म धरातले ॥ ८ ॥

मूर्छामापेदिरे तेन यातुधानाः सुनिर्हताः ।
जवेरिताभिः प्रसभं चपेटाभिर्बलीयसा ॥ ९ ॥

उत्पाद्योत्पा तरुभिर्जघान बलिनोऽसुरान् ।
इत्थं सर्वं वनमपि क्षपितं तेन वेगिना ॥ १० ॥

हताश्च राक्षसाः सर्वे महागर्वभराकुलाः ।
पतङ्गा इव दीपेऽस्मिन् नाशं जग्मुः समंततः ॥ ११ ॥

भक्षमुख्येषु रक्षःसु पातितेषु हनूमता ।
क्रव्यादाः शतशस्तस्मात्पलायाञ्चक्रिरेतराम् ॥ १२ ॥

पलायितेषु रक्षःसु पातितेषु च तेष्वथ ।
चुकोप लङ्काधिपतिः सर्वेभ्यः सूनुना सह ॥ १३ ॥

अथास्याभिमुखं प्राप्तो योद्धुं लङ्कापतेः सुतः ।
इन्द्रजिन्नाम बलवान् निर्जिताशेषदिक्पतिः ॥ १४ ॥

तेनासौ युयुधे धीमानप्रमेयबलः कपिः ।
शिलाभिस्तरुभिस्तुङ्गैर्निर्घातरवभीषणैः ॥ १५ ॥

युद्ध्यमानो युधि बली हनूमांस्तेन रक्षसा ।
ब्रह्मास्त्रेण समाबद्धः स्वेच्छाचारः सुनिर्भयः ॥ १६ ॥

ततः स्वभवनं नीतो विस्मितै राक्षसैर्वृतः ।
यूथैश्च नरनारीणां दृश्यमानो बलाधिकः ॥ १७ ॥

तमुद्दिश्य दशस्कन्ध इत्याह तनयं निजम् ।
ज्वाल्यतामेष दुश्चेष्टः कपीनामधमः खलः ॥ १८ ॥

हनुमानब्रवीत् क्रुद्धान् राक्षसान् मापिनां वरः ।
कामं प्रज्वाल्य एवास्मि पुच्छेवह्निं नियुज्य मे ॥ १९ ॥

तदर्थं तूलसम्भारैः कर्पटैश्चापि कोटिशः ।
पुच्छमावेष्ट्यतामाशु मम तैलैर्निषिच्य च ॥ २० ॥

अग्निर्नियुज्यतां तस्मिन्निति यास्याम्यहं क्षयम् ।
ज्वलिते किल लाङ्गूले सर्वाङ्गज्वालितः क्रमात् ॥ २१ ॥

पुच्छमेवातिविततं मम ज्वालयतासुराः ।
इत्युक्ते च तथा चक्रुः कुधियो राक्षसाः खलाः ॥ २२ ॥

अथ तैलद्रवैः सिक्ते लाङ्गूलपरिवेष्टिते ।
तूलकर्पटसम्भारे उत्पपात मरुत्सुतः ॥ २३ ॥

अध ऊर्ध्वं च गेहानां दिक्षु सर्वासु संचरन् ।
सकलां ज्वालयामास पुच्छज्वालैः स तां पुरीम् ॥ २४ ॥

यत्र यत्र जगामासौ प्रज्वलत्पुच्छपावकः ।
तत्र तत्रैव जज्वाल गृहाट्टावलिसंहतिः ॥ २५ ॥

जज्वलुर्भवनान्युच्चैर्हैमानि विपुलानि च ।
कोष्ठानि चाट्टावलयो हट्टापथगृहा अपि ॥ २६ ॥

प्रासादा वणिजां वेश्मान्यापणाः पण्यवीथिकाः ।
अमात्यभवनान्युच्चैर्देवागाराणि भूरिशः ॥ २७ ॥

अध ऊर्ध्वं तथा मध्ये दिक्षु सर्वासु च ज्वलन् ।
पावको ज्वालयामास तत्क्षणात् सकलां पुरीम् ॥ २८ ॥

आसनानि महार्हाणि सुखासनवराणि च ।
सिंहासनानि चारूणि वसनानि वराणि च ॥ २९ ॥

वासनानि विचित्राणि शयनानि शुभानि च ।
भाजनान्यन्नभाण्डानि घृतभाण्डानि भूरिशः ॥ ३० ॥

हैयंगवीनभाण्डानि तैलभाण्डानि कोटिशः ।
मुक्तादामविलम्बीनि वितानानि सहस्रशः ॥ ३१ ॥

वातायनानि हैमानि ज्वलन्ति प्रज्वलन्ति च ।
प्रससार चतुर्दिक्षु पावकः कपिपुच्छजः ॥ ३२ ॥

रामचन्द्रप्रतापेन सीताशापोपतापतः ।
जज्वलुः कनकावासास्तृणपूलकुटीरवत् ॥ ३३ ॥

आरावः समभूद्भूयान् राक्षसानां गृहे गृहे ।
अहो रे सेवकास्तूर्णं धावत प्रतिधावत ॥ ३४ ॥

निष्कासयत भाण्डानि सम्भालयत कोष्ठकान् ।
हा जलं हा जलं चेति कोलाहलरवोऽभवत् ॥ ३५ ॥

हा हा ज्वलन्ति वस्त्राणि दह्यन्ते भूषणानि च ।
किं किं निष्कासयामोऽद्य पतिताः का इहापदः ॥ ३६ ॥

अहो सर्वस्वनाशो नः कुतोऽयं समुपस्थितः ।
बालान् वृद्धांश्च दारांश्च सम्भालयत सत्वरम् ॥ ३७ ॥

हा हा निर्मोचयत गा गोष्ठे लग्नः किलानलः ।
हा हन्त वायुरप्यद्य सत्यमग्निसखोऽभवत् ॥ ३८ ॥

वायुना प्रेरितो वह्निः प्रसरत्ययमुद्भटः ।
दग्धा एव गृहाः सर्वे कोष्ठाट्टालकसंयुताः ॥ ३९ ॥

आः कोऽयं कुत आयातः कपिवेशः कृतान्तकः ।
किं वैशसममुष्यात्र त्रैलोक्येशे दशानने ॥ ४० ॥

वध्यतां बध्यतामेष कूर्दमानोऽखिले पुरे ।
अहो लङ्कापतेरद्य कोऽयं भाग्यविपर्ययः ॥ ४१ ॥

अस्तंगत इवाभाति प्रतापोस्य जगत्पतेः ।
यदियं कपिमात्रेण दह्यते निखिला पुरी ॥ ४२ ॥

इति संक्रोशतां तेषां राक्षसां प्रतिमन्दिरम् ।
जज्वाल पावको दीप्तश्चतुर्दिक्षु प्रसृत्वरः ॥ ४३ ॥

प्रताप इव रामस्य ज्वालामालातिभीषणः ।
क्रोधाग्निरिव सीतायाः परिणामसुनिष्ठुरः ॥ ४४ ॥

दग्ध्वा कृत्स्नां दशमुखपुरीं दीर्घलाङ्गूललग्नै-
र्वह्निज्वालासमुदयभरैः संगतेः प्रत्यगारम् ॥
हेलाव्यालोडितदशमुखारण्य उच्चैर्हनूमानु-
त्प्लुत्याब्धौ तनुदहननिर्वापणार्थं पपात ॥ ४५ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे लङ्कादहनो नाम चतुरधिकद्विशततमोऽध्यायः ॥ २०४ ॥

*

पञ्चाधिकद्विशततमोऽध्यायः

ब्रह्मोवाच

पश्यतां रक्षसां तेषां दाहव्याकुलितात्मनाम् ।
दग्ध्वा लङ्कापुरीं कृत्स्नां लाङ्गूलानलचालनात् ॥ १ ॥
व्यालूय नखरैः क्रुद्धो रावणस्य मुखं जवात् ।
पुच्छस्पृशि शुचौ तूर्णं पपाताम्भोधिपाथसि ॥ २ ॥
उदस्य पुच्छसंलग्नं तूलकर्पटपावकम् ।
क्रीडितश्चिरमम्भोधिलहरीषु सुशीतलः ॥ ३ ॥

शनैः प्राप महेन्द्राद्रिमुत्पत्य व्योमवर्त्मना ।
हरीणां पुरतः सर्वं कथयामास वृत्तकम् ॥ ४ ॥

ततस्ते हरयः सर्वे सिद्धार्था वायुसूनुना ।
व्यावर्तिता हनुमता प्रययू रामसंनिधम् ॥ ५ ॥

मार्गे मधुवनं कृत्स्नं कीशैरालोडितं हठात् ।
रम्यमापानभूमिर्या रक्षसां घोरकर्मणाम् ॥ ६ ॥

निहता वनपालाश्च राक्षसाः सुमहोद्धताः ।
कपिभिर्हनुमद्युक्तैर्नखदन्तवरायुधैः ॥ ७ ॥

अथ तैः कपिभिः साकं हनुमानुग्रकर्मकृत् ।
ददर्श श्रीरघुवरं गिरौ माल्यवति स्थितम् ॥ ८ ॥

ददौच तत्प्रयत्नेन सीतामूर्द्धविभूषणम् ।
चूड़ारत्नं महाहंतदाददौ तत्करात् प्रभुः ॥ ९ ॥

तन्निधाय स्वहृदये चूडारत्नं मृगीदृशः ।
मुमोह भगवान् राम उद्दीप्तविरहानलः ॥ १० ॥

चिरं मूर्छामवापैष सीतासंगतचेतनः ।
ततः सम्मार्ज्य वदनं लक्ष्मणेनैव सान्त्वितः ॥ ११ ॥

अथ प्रतस्थौ भगवांल्लङ्केशजयकाङ्क्षया ।
अष्टादशमहापद्मकपिसैन्यसमन्वितः ॥ १२ ॥

सरितो गाधयन् सर्वाः समीकुर्वंश्च भूतलम् ।
भारैराकुलयञ्शेषं कपिसैन्यसमुद्भवैः ॥ १३ ॥

प्रचेलुः कपिमातङ्गाः पुरोऽस्य गिरिसम्मिताः ।
आस्फोटयन्तो दोर्दण्डान् दीर्घाहंकारसंयुताः ॥ १४ ॥

जाम्बवान् नाम ऋक्षेशो महतर्क्षबलेन सः ।
प्रचचाल प्रभोरग्रे भारैराकुलयन् भुवम् ॥ १५ ॥

मार्गशीर्षसिताष्टम्यां भास्करेशिरसि स्थिते ।
ऋक्षे चोत्तरफाल्गुन्यां मुहूर्ते विजयाभिधे ॥ १६ ॥

चक्रे प्रयाणं श्रीरामो जयाय जयिनां वरः ।
महता कपिसैन्येन चतुर्दिक्षु प्रसारिणा ॥ १७ ॥

सुग्रीवो हनुमांश्चैव नलो नीलोऽङ्गदस्तथा ।
अन्ये च कपयः शूराः प्रभूकार्यविधित्सया ॥ १८ ॥

चालयन्तो भुवं कृत्स्नां प्रचेलुः सैन्यभीषणाः ।
रामलक्ष्मणदोर्दण्डबलेनोत्साहसंयुताः ॥ १९ ॥

ते सप्तभिर्दिनैः प्राप्तास्तीरं लवणनीरधेः ।
तत्र सा महती सेना यथास्थानं निवेशिता ॥ २० ॥

तीरे नीरनिधेः श्रीशः पौषस्याद्यं दिनत्रयम् ।
निविष्टः कपिसैन्येन सार्द्धमाकुलयन् भुवम् ॥ २१ ॥

चतुर्थे दिवसे प्राप्तः शरणेऽस्य विभीषणः ।
उत्प्लुत्य व्योममार्गेण बद्धाञ्जलिपुटः पुरः ॥ २२ ॥

तं ददर्श रघुश्रेष्ठः करुणालोललोचनः ।
आगत्य भक्तिमांस्तस्य पपात पदयोश्च सः ॥ २३ ॥

सुतो विश्रवसः पौत्रः पुलस्त्यस्य रघूद्वह ।
नाम्ना विभीषणः सोऽहं नतोऽस्मि त्वां जगत्पते ॥ २४ ॥

ज्येष्ठः स मे दशमुखो येन पापं महत्कृतम् ।
ध्रुवमात्मकृतस्यैष फलं प्राप्स्यति सत्वरम् ॥ २५ ॥

इत्युक्ते रक्षसा तेन श्रीरामस्तस्य मूर्द्धनि ।
निदधौ करपद्मं स्वं विश्वाभयधृतव्रतम् ॥ २६ ॥

अथो तमुत्थापयति स्म राघवो धरानतं पादसरोरुहस्पृशम् ।
सुशीतलच्छायकरावदाननः प्रत्यङ्गजाग्रत्पुलकाङ्कुराञ्चितम् ॥ २७ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे सेनानिवेशविभीषणागमो नाम पञ्चाधिकद्विशततमोऽध्यायः ॥ २०५ ॥

*

षडधिकद्विशततमोऽध्यायः

ब्रह्मोवाच

स तं तापसवेशाढ्यं जटामुकुटमण्डितम् ।
विभूतिधवलं श्यामं वल्कलाजितवाससम् ॥ १ ॥

कुशाजिनासनासीनं योगिनं करुणानिधिम् ।
सानुजं हनुमत्सौरिकपीन्द्रपरिवारितम् ॥ २ ॥

तीरे नीरनिधेस्तत्र निविष्टं मार्गकाङ्क्षिणम् ।
ददर्श भक्तिमान् रामं बद्धाञ्जलिपुटो भृशम् ॥ ३ ॥

स तं तदैव विदधौ लङ्कानाथं सुनिर्भयम् ।
शीर्षेऽभिषिच्य पयसा स्वयमेव रघूद्वहः ॥ ४ ॥

रामस्य करुणादृष्ट्या सुधासिक्त इवाभवत् ।
आनन्दाश्रुयुतो जाग्रत्पुलको रावणानुजः ॥ ५ ॥

पोषस्य कृष्णपञ्चम्यामथ रामः कपीश्वरैः ।
सहितोमन्त्रयामास लङ्घितुं पयसां निधिम् ॥ ६ ॥

उवाच लक्ष्मणं विद्वान् विद्वांसं चिन्तयान्वितम् ।
कपीन्द्रांश्चैव सुग्रीवनलनीलाङ्गदादिकान् ॥ ७ ॥

हे लक्ष्मण महाबुद्धे हे सुग्रीव कपीश्वरः ।
नलनीलाङ्गद श्रीमन् मरुत्सुत महाबल ॥ ८ ॥

सर्वे भवन्तः कुशलाः सर्वकर्मसु कोविदाः ।
महाबला महाकाया महाशूरा महाधियः ॥ ९ ॥

पश्यन्तु वानरानेता नेतावत्कृतविक्रमान् ।
उद्गीर्णं जलधिं दृष्ट्वा निरुत्साहा इवाभवन् ॥ १० ॥

गणयन्त इवामुष्य लहरीः पर्वतोपमाः ।
निर्निमेषाहितदृशो दृश्यन्ते मुषिता इव ॥ ११ ॥

स्थगिता इव संजाता अन्योन्यमुखदर्शिनः ।
एषां भग्न इवोत्साह इदानीं दृश्यते मया ॥ १२ ॥

किं च कुर्युरमी कीशा अगाधे पयसां निधौ ।
महोत्तुङ्गोर्मिनिबहे दुस्तरे सुरकिन्नरैः ॥ १३ ॥

नरैः पतङ्गैः पशुभिः किं पुनः स्तोकवानरैः ।
किमत्र खलु कर्त्तव्यं कथं वर्त्मेह लभ्यताम् ॥ १४ ॥

भवतां बलमाश्रित्य प्रस्थितोऽहं कृतोद्यमः ।
जगज्जैत्रस्य बलिनो रावणस्य वधं प्रति ॥ १५ ॥

यस्य पाथोधिमध्यस्था पुरी लङ्का सुदुर्गमा ।
अनेकरक्षसानीकवृत्ता सर्वभयानका ॥ १६ ॥

कथं पुनर्मया तत्र गन्तव्यं सेनयानया ।
इति मन्त्रयत प्राज्ञाः सर्व एव समन्विताः ॥ १७ ॥

अथो सुमित्रातनयः प्रत्युवाच महामतिः ।
अनुमत्य कपीन् . सर्वानार्यस्य प्रियकारकः ॥ १८ ॥

अनुपायोऽत्र जलधेः समुल्लङ्घनकर्मणि ।
अगाधस्याप्यसंख्यातयोजनायतयादसः ॥ १९ ॥

अलौकिक उपायस्तु भवेद्वस्तुन्यलौकिके ।
इति मत्ससम्मतेनैष आराध्यो वरुणालयः ॥ २० ॥

उपवासपरैस्तावद्बद्धाञ्जलिपुटैस्तथा ।
अस्माभिर्भृशमाराध्यो यावदेष प्रसीदति ॥ २१ ॥

दद्यादपि प्रसन्नोऽयं मार्गमस्माकमम्बुधिः ।
वरुणस्यालयो देवो यादसां पतिरम्बुराट् ॥ २२ ॥

सुमित्रातनयेनोक्तमनुमेने रघूद्वहः ।
ततः सौमित्रिसुग्रीवनलनीलाङ्गदादयः ॥ २३ ॥

हनूमानृक्षराजश्च राक्षसेन्द्रो विभीषणः ।
येऽन्ये कपिचमूनाथ महाधीरा महाधियः ॥ २४ ॥

अब्धिमाराधयाञ्चक्रुर्बद्धाञ्जलिपुटाः स्थिताः ।
निराहाराः स्तुतिपरा यावद्दिनचतुष्टयम् ॥ २५ ॥

त्वं ददासि पयोदेभ्यो भूरि वारिनिधे जलम् ।
ततस्ते परिपुष्णन्ति जगदेतच्चराचरम् ॥ २६ ॥

आर्द्रता द्रवता शैत्यं जगत्तर्पणकारिता ।
आप्यायनं त्रिजगतां त्वदधीना इमे गुणाः ॥ २७ ॥

पीत्वा तव पयः सिन्धो भारपूर्णाः पयोधराः ।
समीपतरमभ्येत्य सिञ्चन्ति धरणीमिमाम् ॥ २८ ॥

ततः प्रसूयते सैषा भूतधात्री महौषधीः ।
ताभिरन्नानि जायन्ते तेभ्यश्च पुरुषोह्ययम् ॥ २९ ॥

इति त्वन्मूलमखिलं जगदेतत्पयोनिधे ।
कस्त्वां स्तोतु भवे मर्त्यो वरुणस्यालयं परम् ॥ ३० ॥

शरण्यस्त्वं महीध्राणां त्रासभाजां दिवस्पतेः ।
पक्षच्छेदोद्यतात् क्रुद्धान्निर्भया वसतिर्ह्यसि ॥ ३१ ॥

त्वां प्राप्यशरणं शैलाः शक्रतुल्ये विरोधिनि ।
अजातपक्षसंछेदा अद्यापि सुखमासते ॥ ३२ ॥

त्वं देवभूरुहां तेषां पञ्चानामपि जन्मभूः ।
ये कामवरदातारो भुजैर्भूरिफलाञ्चितैः ॥ ३३ ॥

तत्ते गम्भीर्यमम्भोधे मग्नोऽभूद्यत्र मन्दरः ।
उद्दधार ततः कूर्मः सावकाशकृतस्थितिः ॥ ३४ ॥

न दृष्टा तव केनापि लोकेऽस्मिन् परपारभूः ।
प्रचण्डेनापि मरुता न क्षोभ्योऽसि त्वमम्बुधे ॥ ३५ ॥

इदानीं देहि नो मार्गं जगतः कुशलाय भोः ।
जिगीषति रघुश्रेष्ठो रावणं लोकरावणम् ॥ ३६ ॥

देवतात्मा भवानब्धे सुप्रसन्नमना यदि ।
किं किं न कुर्याज्जगतोऽसम्भाव्यमपि मङ्गलम् ॥ ३७ ॥

इति स्तुतिभृतां तेषां भक्तिसुप्रह्ववर्ष्मणाम् ।
बद्धाञ्जलीनां नमतामुपोषणविधायिनाम् ॥ ३८ ॥

चत्वार ईयुर्दिवसास्ततश्च स्वैश्वर्यमेवाश्रित आत्तलीलः ।
चुकोप तस्मै मनसा नितान्तं पत्ये जलानां रघुवंशकेतुः ॥ ३९ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे समुद्रसंयमनो नाम षडधिकद्विशततमोऽध्यायः ॥ २०६ ॥

*

सप्ताधिकद्विशततमोऽध्यायः

ब्रह्मोवाच

ततो भ्रूभङ्गदुर्दर्शमुखमार्तण्डदीधितिः ।
अन्तःक्रोधसमुद्रेकाद् दशनैर्दष्टदत्पटः ॥ १ ॥

आताम्रभीमवदनः संहितारुणलोचनः ।
ललाटतटनिर्बद्धकुटिलभ्रूपुटः क्षणात् ॥ २ ॥

सावेशमभ्युवाचेदं लक्ष्मणाय विशङ्किने ।
त्यक्तपाथोधिस्तुतये स्वमभिप्रह्ववर्ष्मणे ॥ ३ ॥

आनयानय सौमित्रे सत्वरं मामकं धनुः ।
अहमद्यैकवाणेन शोषये पयसां निधिम् ॥ ४ ॥

इत्युक्ते स तदानीतधनुषा श्रवणस्पृशा ।
संयोज्य तीव्रं विशिखं निर्मोक्तुमुपचक्रमे ॥ ५ ॥

ततः शराग्निसम्पर्कादन्तर्दाहोऽम्बुधेरभूत् ।
क्षणेन पयसां राशिः कथ्यमान इवाग्निना ॥ ६ ॥

उत्पफाल भृतोवाष्पैर्धूमैरिवविसृत्वरैः ।
उत्क्रान्तयादसां संघः परिप्लोषरुजातुरः ॥ ७ ॥

बभ्रमुर्मकरास्तत्र प्लुष्यमाणाः शराग्निना ।
मूर्छिताः परितो ग्राहमकरीमकरादयः ॥ ८ ॥

कथ्यमाने जलस्तोमे मीनाः पर्वतसंनिभाः ।
पाठीना रोहिताः कूर्मास्तथान्ये जलजन्तवः ॥ ९ ॥

उत्तेरुरुज्झितप्राणाः प्लुष्टा रामशराग्निना ।
आरावः सुमहानासीद्दह्यमानस्य पाथसः ॥ १० ॥

आपातालतलस्पर्शि गम्भीरमुदधेः पयः ।
क्षणेन प्लुष्टमभवद् वाडवेनेव वर्द्धता ॥ ११ ॥

सम्भ्रान्तास्तिमयः स्थूलाः शतयोजनविग्रहाः ।
सन्तश्चैव मूर्छन्तो दह्यन्ते स्म समंततः ॥ १२ ॥

नगा नागाश्च मातङ्गाः खगा अन्तर्जलेचराः ।
निर्दग्धाः सम्प्रसरता क्षणाद् रामशराग्निना ॥ १३ ॥

और्वमप्यदहद् वह्निः श्रीमद्रामशरोद्भवः ।
इति विस्मित आलोक्य निजे चेतसि सागरः ॥ १४ ॥

अश्मसारमयाः पक्षा गिरीणां जलवासिनाम् ।
दन्दह्यमानाः क्षणतो वह्निज्वालाकदम्बकैः ॥ १५ ॥

अधाक्षीद्धृदयं सिन्धोः रामबाणानलः स्पृशन् ।
वरुणस्यालयः कृत्स्नस्तत आकुलितोऽभवत् ॥ १६ ॥

अदह्यततमां सिन्धोर्नगरी बाणवह्निना ।
नक्रा ग्राहा झषाः कूर्माः समदह्यन्त तत्क्षणात् ॥ १७ ॥

मुञ्चन्ति स्म विनिःश्वासान् शतयोजनविस्तृताः ।
यादोवराः पयोराशेर्मूर्छन्तः शरवह्निना ॥ १८ ॥

सुहृदो बान्धवाः पत्न्यः सुताश्च पयसां निधेः ।
दन्दह्यन्ते स्म रामस्य विशिखानलकीलया ॥ १९ ॥

गङ्गाद्याः सरितः सर्वाः क्षणेन जलधेः प्रियाः ।
अदह्यन्ते हृदि प्रोता राघवेन्द्रशराग्निना ॥ २० ॥

तमुवाच प्रिया तस्य दह्यमाना तनौ भृशम् ।
हा नाथ केयमापत्ते क्षणादुदयमागता ॥ २१ ॥

त्वदाश्रिता अमी जीवा ग्राहकूर्मझषादयः ।
दह्यन्ते नाथ पश्यैतानकस्मात्प्राप्तसंक्षयान् ॥ २२ ॥

एते भूमिभृतो नाथ त्वयि मग्नाः समंततः ।
दह्यन्ते स्मानलज्वालादग्धपक्षतयो भृशम् ॥ २३ ॥

मृताश्च मूर्छिताश्चैव सर्वे यादोगरणास्तव ।
हृदयं ते नदी नाथ दग्धप्रायं महाग्निना ॥ २४ ॥

दावानलो वा प्रलयानलो वा कोपोऽथवा दैवकृतस्त्वयीश ।
प्रत्यङ्गदग्धास्तव पत्न्य एता भृशं विषीदन्ति न वेत्सि किं त्वम् ॥ २५ ॥

संरक्ष मां चाग्निभरेण दग्धामत्याकुलां स्वं च नितान्तदग्धम् ।
निःसृत्य शीघ्रं बहिरम्बुपूरात्पश्येश जातोऽस्ति कुतोऽयमग्निः ॥ २६ ॥

इत्युक्तमात्रो जलधिः स्वपत्न्या तत्कारणं दिव्यदृशा ददर्श ।
आकर्णकृष्टायतबाणमीशं रामं ततश्चाग्निभरं प्रजातम् ॥ २७ ॥

ततः प्रियामाह स वारिराशिः पश्य प्रिये कारणमस्य वह्नेः ।
प्राप्तोऽयमीशो रघुवंशकेतुः परात्परः सम्प्रति रामनामा ॥ २८ ॥

स मार्गमाकाङ्क्षति रावणस्य जयाय लङ्कानगरीं यियासुः ।
नाज्ञानतोऽसौ विदितो मयायं विधक्षतेऽतो विशिखाग्निना माम् ॥ २९ ॥
अतो निबद्धाञ्जलिरेष भक्त्या प्रयाम्यहं तं शरणं शरण्यम् ।
सोपायनस्तस्य पदारविन्दे निवेद्य चात्मानमहं सुखी स्याम् ॥ ३० ॥
तस्मै पुनः सपदि सेतुविधिं प्रदर्श्य सानुग्रहस्य चरणौ शिरसा प्रणम्य ।
तत्स्वीकृतोरुमणिरत्नगणोपदश्च क्षेमान्वितः पुनरहं गृहमभ्युपैता ॥ ३१ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे समुद्रान्तःशोषणो नाम सप्ताधिकद्विशततमोऽध्यायः ॥ २०७ ॥

*

अष्टाधिकद्विशततमोऽध्यायः

ब्रह्मोवाच

इत्युक्त्वा जलधिः पत्नीमाविरास जलाद्बहिः ।
सोपायनः सपत्नीकः ससुहृज्जनबान्धवः ॥ १ ॥
महातरङ्गदोर्दण्डः पृथुवक्षा महाशिराः ।
महामीनस्फुरच्चक्षुर्मौक्तिकाभरणश्रवाः ॥ २ ॥
आवर्तविस्फुरन्नाभिर्लहरीत्रिवलीधरः ।
महाशैलनितम्बस्पृग्नदीस्रोतःसिताम्बरः ॥ ३ ॥
मुक्ताहारलताधारी महारत्नौघभूषणः ।
प्रवालविटपभ्राजत्कराङ्गुलिमनोहरः ॥ ४ ॥
माणिक्यनखरद्योतरोचमानकराङ्घ्रिकः ।
रत्नानामाकरत्वेन रत्नान्युपनयन् भृशम् ॥ ५ ॥
महाम्बुनिबहास्तस्य बभूवाग्रेसरः सरन् ।
तमन्वगुर्महानद्यो महास्रोतस उत्वराः ॥ ६ ॥
चालयन् पयसां स्तोमं पादन्यासैर्मुहुर्मुहुः ।
महामकरसंदोहैः पुरः पश्चाच्च संयुतः ॥ ७ ॥
तमायान्तमसौ वीक्ष्य रामः कारुणिकेश्वरः ।
तत्क्षणादुपसंजह्रे बाणं शोषणमम्भसाम् ॥ ८ ॥
स दण्डवत् स्पृशन् भूमिमाययौ सरितां पतिः ।
निवारयन्ननुचरानेकाकी श्रीपतेः पुरः ॥ ९ ॥

अन्वाययुस्तं तत्पत्न्यः सरितो याः सहस्रशः ।
बद्धाञ्जलिपुटाः सौम्या दिदृक्षन्त्यो रघूद्वहम् ॥ १० ॥

पूर्वं जलघटाभारः प्रादुरासीत्समंततः ।
अभ्रंकषोर्मिसंदोहचालितानेकभूधरः ॥ ११ ॥

महानदीनां बहवो वारिपूरास्तदग्रतः ।
आयान्तीनां प्रादुरासुः कल्पान्त इव भीषणाः ॥ १२ ॥

शमं गतेषु परितः पयःपूरेषु भूरिषु ।
उदस्थात्पयसां नाथः स्वगुणैरुपलक्षितः ॥ १३ ॥

सम्भावयन् प्रणतिभिः श्रीमन्तं रघुपुङ्गवम् ।
उपाजगाम कपिभिः समुद्रोऽयमितीक्षितः ॥ १४ ॥

तमागतं नदीनाथमभ्युत्तस्थौ रघूद्वहः ।
कुलवृद्धोऽय मस्माकमिति सादरमानसः ॥ १५ ॥

स आलिलिङ्ग बाहुभ्यां शीतलं पयसां निधिम् ।
आसने स्थापयामास स्वयं चोपविवेश ह ॥ १६ ॥

सानुजं सपरीवारं नत्वा नत्वा नदीपतिः ।
ददावुपायनत्वेन रत्नभाराननेकशः ॥ १७ ॥

उवाच राघवेन्द्रं स रुष्टान्तःकरणं विभुम् ।
शोषणायोद्यतं स्वस्य शान्ति नेतुं च सामभिः ॥ १८ ॥

क्षमस्व जगतामीश यन्न त्वं विदितो मया ।
तदज्ञानवशादेव मर्त्यलीलामुपाश्रित ॥ १९ ॥

विदितोऽस्यधुना राम साक्षात्परात्परः स्वयम् ।
भूभारहरणाय त्वं भूतले समवातरः ॥ २० ॥

अलंकृतं रघुकुलं त्वया सद्गुणराशिना ।
सुखं च जनितं भूरि श्रुतिदेवद्विजन्मनाम् ॥ २१ ॥

साक्षाद्ब्रह्मण्य देवस्त्वं धर्मो येनाभिरक्षितः ।
रक्षोभिर्नाशिता यज्ञाः पुनरेव प्रवर्तिताः ॥ २२ ॥

कस्त्वां जानातु लोकेऽस्मिन् जीवधर्ममुपाश्रितः ।
निगमत्रयसंगीतलोकातीतगुणालयम् ॥ २३ ॥

शेषाद्या अपि वागीश न त्वां सम्यग्विदन्ति यत् ।
तदहं कोऽल्पविज्ञानः स्वरूपाकलने तव ॥ २४ ॥

जय विश्वेश विश्वात्मन् विश्वसृष्ट्यन्तकारक ।
विश्वाधार गुणाधीश विश्ववन्द्यङ्घ्रिपङ्कज ॥ २५ ॥

यदि त्वं न सीतानाथ स्वरूपं गोपयेर्भुवि ।
लोकोत्तररसालेयं तर्हि लीला न सिद्ध्यति ॥ २६ ॥

प्रकृतिं स्वामवष्टभ्य निर्गुणाप्यगुणाश्रयाम् ।
विश्वसर्गविसर्गाद्यैस्त्वं क्रीडसि जगद्गुरुः ॥ २७ ॥

इच्छयैवाखिलं कर्तुं शक्नोषि यदपि प्रभो ।
अनुग्रहाय भक्तानां तदपि प्रकटोऽभवः ॥ २८ ॥

निर्मञ्छनाय ते राम रत्नान्येतान्युपानयम् ।
गृहाण करुणासिन्धो मयि वर्षं कृपामृतम् ॥ २९ ॥

निवेदितोऽयमात्मा ते मया बाणेन शुष्यता ।
स्वकीय इति विज्ञाय रक्षिष्यति यतो भवान् ॥ ३० ॥

त्वत्कार्यं च त्वदीयं च सर्वमेव जगत्पते ।
त्वदीय एवार्पयिता गृह्णासि तदपीश यत् ॥ ३१ ॥

तदार्जवं तवैवैतज्जगत्पत्यद्भुतं हरे ।
येन भक्त इति ख्यातिं प्रयान्ति मनुजा भवे ॥ ३२ ॥

नमामि जगतां नाथ श्रुतिगोद्विजरक्षकम् ।
अप्रमेयगुणारामं राम त्वां पुरुषोत्तमम् ॥ ३३ ॥

क्षामयामि मुहुः स्वामिन्नपराधमहं मम ।
निजमैश्वर्यमालम्ब्य भक्तेषु त्वं दयां कुरु ॥ ३४ ॥

इति स्तुतिवचोभिः स सान्त्वितो वारिराशिना ।
ईषद्विहस्य भगवानुवाच रघुवल्लभः ॥ ३५ ॥

चिरमाराधितः सिन्धो भवान् मार्गाभिलब्धये ।
मया सपरिवारेण हृदा तदपि ना द्रवः ॥ ३६ ॥

ततः संक्षुब्धमनसा नान्योपायवता मया ।
शोषणाय तवाम्भोधे प्रयुक्ते विशिखानलः ॥ ३७ ॥

इदानीं देहि मे मार्गं लङ्कामभियियासतः ।
उपसंहृतोऽपि बाणाग्निर्नो चेत्पुनरुदेष्यति ॥ ३८ ॥

किं करोमि नदीनाथ हार्य एव मया रिपुः ।
अभिगम्यैव लङ्का च शोष्य एव त्वमन्तरा ॥ ३९ ॥

इत्युक्तो रघुवीरेण कम्पितः पयसां पतिः ।
सान्त्वयन् पुनराहेदं शोषभीत्या भृशाकुलः ॥ ४० ॥

अत्यर्थमनुयायोऽयं लङ्कागमनवर्त्मनः ।
यन्मां शोषयसि प्राज्ञ विशिखेनानिवर्तिना ॥ ४१ ॥

यतः शुष्कोऽप्यहं स्वामिन्नापातालतलावधिः ।
अपथायैव भवतो भवितास्मि न संशयः ॥ ४२ ॥

उपायान्तरमेवात्र प्रभो सम्यग्विधीयताम् ।
उत्तरेयुरनायासं कपथो येन तावकाः ॥ ४३ ॥

बहुलायामिभिः शैलैर्मपि सेतुर्विरच्यताम् ।
विधिहृष्ट उपायोऽयं तव लङ्कां यियासितः ॥ ४४ ॥

आनेष्यन्ति गिरीनत्र कथयोऽमी महाभुजाः ।
सुग्रीवहनुमन्मुख्या नलनीलाङ्गदादयः ॥ ४५ ॥

अयं ते मार्ग उद्दिष्ये लङ्कामभियियासतः ।
नास्त्युपायशतेनापि सैन्यस्योत्तरणं तव ॥ ४६ ॥

सिन्धुनोदीरितं यत्नमनुमेने रघूद्वहः ।
तथैव कपयः सर्वे साधु साध्वित्यपूजयन् ॥ ४७ ॥

इति रघुपतिमब्धिः सम्प्रदृश्याभ्युपायं
दशवदननगर्याः प्राप्तये मार्गलब्धौ ।
चिरमथ कपिवर्यैर्विस्मितैर्वीक्षमाणो
निजभवनमगच्छत्प्राप्त भूरिप्रमोदः ॥ ४८ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे सेतूपायविधिप्रदर्शनो नामाष्टाधिकद्विशततमोऽध्यायः ॥ २०८ ॥

*

नवाधिकद्विशततमोऽध्यायः

ब्रह्मोवाच

अथ रामो हनूमन्तं सुग्रीवं च महाबलम् ।
आदिदेश महाशैलैः सेतुबन्धनकर्मणे ॥ १ ॥

महाबल मरुत्पुत्र सुग्रीव कपिनायक ।
आदिश्यन्तामम्मी सर्वे कपयो भूरिविक्रमाः ॥ २ ॥

आनयन्तु महाशैलान् क्षिपन्तु पयसां निधौ ।
सेतुर्विरच्यतामत्र लङ्कागमनहेतवे ॥ ३ ॥

महान्तो लघवश्चैव यावन्तो भुवि पर्वताः ।
आनीयन्तामभीभिस्ते दूरतो वासमीपतः ॥ ४ ॥

वोढुं निजबलैः शक्या यावन्तः कपिपुङ्गवैः ।
गिरयो योजनायामा योजनद्वयविस्तृताः ॥ ५ ॥

त्रिचतुःपञ्चषट्सप्तयोजना अष्टयोजनाः ।
नवयोजनविस्तीर्णादशयोजनविस्तृताः ॥ ६ ॥

एकादशद्वादशादियोजनाः शतयोजनाः ।
उत्पाद्योत्पाद्य ते शैला आनीयन्तां महोदधौ ॥ ७ ॥

अप्रमेयबलो लोकैर्वायुपुत्र महाबल ।
येऽन्यैर्न वोढुं शक्यास्तानानय त्वं महीधरान् ॥ ८ ॥

उच्चावचैस्तैगिरिभिः समीकृत्य विरच्यताम् ।
महासेतुः पयोराशौ यावत्सा रक्षसां पुरी ॥ ९ ॥

इत्यादेशं रघुपतेः शिरसाऽऽदाय वानराः ।
सज्जाः सर्वेऽपिशैलानां समानयनकर्मणे ॥ १० ॥

सुग्रीवेण कपीन्द्रेण समादिष्टा वनेचराः ।
अष्टदिक्षु प्रचलिताः शैलानानेतुमुत्वराः ॥ ११ ॥

तेषां वायुसुतो वीरः श्रीमान् भूरिपराक्रमः ।
आदेशाद्रघुनाथस्य गिरीनानेतुमव्रजत् ॥ १२ ॥

रक्तकक्षोटकधरो महामल्ल इवोद्धुरः ।
उत्पाट्य नानादेशेभ्य उवाह महतो गिरीन् ॥ १३ ॥

स्रवन्निर्झरधाराढ्याः शृङ्गवन्तः सगह्वराः ।
सकन्दराः सगहनाः शिलासंघविचित्रिताः ॥ १४ ॥

नानाधातुरसोपेताः सानुभिर्गगनस्पृशः ।
अनेकयोजनायामाः सवृक्षवनकाननाः ॥ १५ ॥

नानानिकुञ्जसहिता नानाधातुरसाकराः ।
समूलोत्पाटिताः शैला आनीयन्ते स्म वातिना ॥ १६ ॥

सकृन्निर्धूम बाहुभ्यां महीध्रान् गगनस्पृशः ।
आदित्यरथचक्रेण निर्धृष्टाग्राननेकशः ॥ १७ ॥

उवाह शिरसांसाभ्यां कक्षाभ्यां ककुदा तथा ।
पाणिभ्यां चापि हनुमान् महाबलपराक्रमः ॥ १८ ॥

पतन्निर्झरधाराभिः शमितोष्मपथिश्रमः ।
मूलक्षरद्धातुरसनानावर्णविचित्रितः ॥ १९ ॥

अनेकभूरुहच्छायाभिन्नसूर्यकरातपः ।
उड्डीय व्योममार्गेण त्वरितं स समाययौ ॥ २० ॥

अलौकिकं बलं तस्य परिच्छेत्तुं क ईश्वरः ।
गच्छतस्त्वरमाणस्य गीरीनुत्पाट्य बिभ्रतः ॥ २१ ॥

आगच्छतो निक्षिपतो यथास्थानं पयोनिधौ ।
अहो तस्य बलं भूरि रामकार्यविधित्सया ॥ २२ ॥

अनेकयोजनायामानवाह्यान् वानरैः परैः ।
नदीनिर्झरसंयुक्तान् कान्तारवनभूषितान् ॥ २३ ॥

नानादुर्गाचितांस्तुङ्गान् नानावर्णशिलान्वितान् ।
अनेकयोजनैर्मूलैरन्तर्मग्नान् महीतले ॥ २४ ॥

समूलोत्पाटनोद्भूत महानिःस्वनभीषणान् ।
वित्रस्तसिंहशार्दूलानान्दोलितवनद्रुमान् ॥ २५ ॥

क्षुभितानेकसत्त्वाढ्यान् दरीगह्वरदुर्गमान् ।
उड्डीनशरभोलूकगृध्रश्येनकदम्बकान् ॥ २६ ॥

महावराहमहिषतरक्षुगणसेवितान् ।
उत्थाप्यैककरेणैव महाद्रीन् सोऽवहद्बली ॥ २७ ॥

एवं तेनोह्यमानेभ्यो व्योममार्गेण गच्छता ।
शैलेभ्यो विक्षताः खण्डाः पतिता अन्तराध्वनि ॥ २८ ॥

गण्डशैला चरतास्तेभ्यः केचिद्योजनविस्तृताः ।
धरण्यां चूर्णयामासुर्नानादेशवनद्रुमान् ॥ २९ ॥

सानवः कटकाश्चैव शिलाः काश्चन विस्तृता ।
पतिताः पर्वताग्रेभ्यो भूमिभागानचूर्णयन् ॥ ३० ॥

आबद्धरक्तकक्षोटो वहन्शैलवरान् दिवि ।
शुशुभेऽनेकशिखरः सांध्य मेघ इवोन्नतः ॥ ३१ ॥

अन्येऽपि कपयः शूरा महाबलपराक्रमाः ।
अन्योन्यविक्रमोत्साहा गर्जन्तः सुमहोद्धताः ॥ ३२ ॥

उन्मुखद्विविदोद्दामश्वेतनीलाङ्गदादयः ।
स्वस्वयूथ्यैः समुदिताः सर्वेऽपि सुमहाबलाः ॥ ३३ ॥

महाभुजा महाकाया महोत्साहकृतोद्यमाः ।
उत्पाट्य नानादेशेभ्य आनयन् पर्वतोत्तमान् ॥ ३४ ॥

गिरयो ये समीपस्थास्त आनीता महाबलैः ।
ततो दूरात्समानीताः सुमहाजवशालिभिः ॥ ३५ ॥

अवहन् शिरसा सर्वे गिरीनुच्चावचान् बहून् ।
रामदत्तबलोपेता जविनो वानरोत्तमाः ॥ ३६ ॥

ऋक्षेशो जाम्बवान्नाम महाकाया महाबलः ।
वृद्धोऽपि स्वामिनः कार्येयुवेव स निरीक्ष्यते ॥ ३७ ॥

प्रावृषेण्यघनाकारस्निग्धश्यामलविग्रहः ।
आत्मयूथ्यैर्महाऋक्षैः सहितोऽद्रो नुपानयत् ॥ ३८ ॥

दिगन्तेभ्यः समानिन्युः पर्वतान् सुमहायतान् ।
नानासानुदरीवेश्मगह्वरेद्रुमसंकुलान् ॥ ३९ ॥

धरणीं रञ्जयामासुस्तेभ्योऽखण्डनिपातिभिः ।
गैरिकाद्यैः सुनिविडैर्महाधातुगणाद्रवैः ॥ ४० ॥

नानावर्णाः कपिवरा लिप्ताः पर्वतधातुभिः ।
सांध्या इवाभ्रनिवहाः पर्यशोभन्त वर्त्मनि ॥ ४१ ॥

प्रावृषेण्यघनश्यामा ऋक्षमल्ला महाजवाः ।
सांध्यैरिवार्ककिरणैर्लिप्ताः पर्वतधातुभिः ॥ ४२ ॥

पर्यशोभन्त गगने संचरन्तो महाबलाः ।
अनायासोद्वोढमहाशैलभाराः सहस्रशः ॥ ४३ ॥

गच्छतामागच्छतां च वहतां धरणी धरान् ।
सिन्धौ निक्षिपतां वेशात्तथैव प्रतिगच्छताम् ॥ ४४ ॥

शैलान् समुत्पाट्यतां व्याधूप पृथुदोर्बलैः ।
सम्मर्दः सुमहानासीत्कपीनामनुगर्जताम् ॥ ४५ ॥

सम्भ्रमः सुमहानासीत्तेषामथ परस्परम् ।
अहं पूर्वमहं पूर्वमिति वर्त्मनि धावताम् ॥ ४६ ॥

आमूलोत्पाट्यमानेभ्य आधूयाधूय वानरैः ।
चलायमानशृङ्गेभ्यो म्रियमाणेभ्य उच्चकैः ॥ ४७ ॥

आकम्पितवनश्रेणिधुतवृक्षेभ्य एव च ।
पर्वतेभ्यो निपतिताः समंतादवनीतले ॥ ४८ ॥

फलानां च दलानां च पुष्पाणां दृषदामपि ।
महाधातुरसानां च वृष्टयः परितो दिशम् ॥ ४९ ॥

महौषधीनां दिव्यानां ज्वलन्तीनां निशागमे ।
मणिमाणिक्यरत्नानां सरिन्निर्झरपाथसाम् ॥ ५० ॥

आच्छादितं महीपृष्ठं ताभिर्वर्त्मनि वर्त्मनि ।
पशवः पक्षिणश्चैव भ्रममाणाः क्षतौकसः ॥ ५१ ॥

आक्रन्दं चक्रिरे भूरि सुमहारवभीषणाः ।
समूलोत्पाटितानां च पर्वतानां सहस्रशः ॥ ५२ ॥

अन्त्राणीव व्यदृश्यन्त मूललग्नानि कोटिशः ।
धातुद्रवजलान्यद्धा क्षरन्ति प्रक्षरन्ति च ॥ ५३ ॥

केचिच्च पर्वतवराः समूलोत्पाटनक्षताः ।
दरीमुखेभ्यः ससृजुर्महान्तं भीममारवम् ॥ ५४ ॥

असह्योत्पाटनोद्भूतपीडासंव्याप्तविग्रहाः ।
चकम्पिरे गिरिवराः शिरोभिरिव सानुभिः ॥ ५५ ॥

आकल्पस्थितिसंवासयमुमुक्षव आतुराः ।
क्रन्दन्तः पीडया भूरि दरीमुखकृतारवाः ॥ ५६ ॥

उत्पाटिता हठात्तेऽपि वलाढ्येन हनूमता ।
क्षरत्क्षतजसम्पृक्ता निर्यद्धातुरसद्रवाः ॥ ५७ ॥

जवादुत्पाट्यमानानां केषांचिदवनीभृताम् ।
सजीवानां समभवत्त्रैलोक्यव्यापनो रवः ॥ ५८ ॥

आनीता बलिभिः कीशैः पर्वताः कोटिसानवः ।
लिखन्तः सानुभिर्व्योम मूलैः पातालसंस्पृशः ॥ ५९ ॥

आनीतान् सुमहावेगैस्तैर्गिरीन् गगनोक्षितान् ।
आदायैककरेणैव न्यक्षियन्नीरधौ नलः ॥ ६० ॥

यथा कारुः यदुतरो यथास्थानं शिलागणान् ।
तथैव पर्वतांस्तुङ्गान् शतयोजनविस्तृतान् ॥ ६१ ॥

यथास्थानं युनक्त्येष समादायैकपाणिना ।
परेण पाणिना कांश्चिदधिकान्निरकृन्तत ॥ ६२ ॥

यथादेशं यथास्थानं यथाभागं यथायुति ।
बबन्ध पर्वतैः सेतुं नलो नाम कपीश्वरः ॥ ६३ ॥

प्रददौ हनुमांस्तस्मै शैलान् सूर्यरथस्पृशः ।
तदीयतुरगोत्कीर्णशृङ्गाग्रान् दृषदो यथा ॥ ६४ ॥

अनायासं समुद्धृत्य करेणैकेन मारुतिः ।
स तान् युयोज जलधौ तथैवादाय पाणिना ॥ ६५ ॥

दक्षेण पाणिना चैव छित्त्वा छित्त्वाधिकांशकान् ।
चतुरस्रान् समीकृत्य निचिक्षेप पयोनिधौ ॥ ६६ ॥

पूर्वं तु कतिचित् क्षिप्ताः पर्वताः सुमहोन्नताः ।
न्यमज्जन् नीरधेनीरे आयातालतलस्पृशि ॥ ६७ ॥

ततश्चिन्तामवायैष नलो नाम कपीश्वरः ।
हनूमन्तमुवाचाथविषण्ण इव चेतसा ॥ ६८ ॥

कियद्यावदहं शैलैः पूरयामि पयोनिधिम् ।
निक्षिप्तमात्रा लीयन्ते यदिहानेकपर्वताः ॥ ६९ ॥

कतिभिः पर्वतैरेष सिन्धुर्यास्यति पूर्णताम् ।
मन्ये भूरि गभीरोऽयमापातालतलावधिः ॥ ७० ॥

ततोऽस्य पूरणे यत्नः कथं कार्यो मरुत्सुत ।
सुहुरित्थं विषीदामि कथं सेतुश्च सेत्स्यति ॥ ७१ ॥

इति तस्य वचः श्रुत्वा हनूमानाह सत्वरम् ।
किंचिद्विहस्य सप्रेम रामनामप्रभाववित् ॥ ७२ ॥

सत्यं गभीरः पयसां निधानभूतोऽयमब्धिर्ध्रुवमप्रमेयः ।
पाताललोकावधिसप्तलोकनिधानभूता धरणी किलास्मिन् ॥ ७३ ॥

न भूमिमाश्रित्य समुद्र एष समुद्रमाश्रित्य परिस्थिता भूः ।
अगाधमेतज्जलमप्रमेयमेकत्वमाप्तं सरयूजलेन ॥ ७४ ॥

न पर्वतेरेष हि पूरणीयो नलास्य विद्धित्व ममेयमम्भः ।
कः पूरयेत्कल्पशतेन सिन्धुं ततो भवेद्वयर्थतमः प्रयत्नः ॥ ७५ ॥

एकं तु निश्चित्य वदाभ्युपायं शीघ्रं विरच्येत यथैव सेतुः ।
प्रयोजनं नो नहि सिन्धुपूर्तौ सेतोर्विधाने वयमात्तयत्नाः ॥ ७६ ॥

इदं सुगोप्यं भवते वदामि प्रसंगतः सेतुनिबन्धनेऽस्मिन् ।
न वाच्यमेतद्भुवता परस्मै भक्त्योपसन्नाय तु वाच्यमेव ॥ ७७ ॥

रामेति मन्त्रं कवयो वदन्ति यद् द्व्यक्षरं नाम रघूद्वहस्य ।
अस्मत्प्रभोरस्य महामहिम्नो मनुष्यलिङ्गस्य परस्य पुंसः ॥ ७८ ॥

तदेव सम्यग्विलिखोरुबुद्धे प्रत्यद्रिपाषाणशिलासु तावत् ।
भवाम्बुधिं येन जनास्तरन्ति किं तारणं दुष्करमस्य तेषाम् ॥ ७९ ॥

ग्राव्णां गणेभ्योऽपि जनस्य पापान्यतीव भारेण समाकुलानि ।
लघूक्रियन्ते मनुजा यदेतैर्भृशं विलुप्तैरिह तन्न चित्रम् ॥ ८० ॥

इदं मतं मे भृशमाददानः संतारय ग्रावगणान् पयोधौ ।
ततो विनिर्माय सुखेन सेतुं लङ्कां परिप्रापय रामसेनाम् ॥ ८१ ॥

सद्यस्तव प्रत्यय एष भूयान्नल स्वमुक्त्यै च परस्य मुक्त्यै ।
अज्ञानसंज्ञां हृदयस्य गाढां ग्रन्थिं विनिर्भिद्य सुखं प्रयाहि ॥ ८२ ॥

इति स तदुपदिष्टं वाक्यमाकर्ण्य सद्यो मनसि कपिवरेण्यो विस्मितः सम्बभूव ।
रघुपरिवृढनाम्नो भूरि जिज्ञासमानः किमपि स महिमानं भूय एनं बभाषे ॥ ८३ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे सेतुबन्धनो नाम नवाधिकद्विशततमोऽध्यायः ॥ २०९ ॥

*

दशाधिकद्विशततमोऽध्यायः

नल उवाच

साधु भोः साधु हनुमन् भवान् यदुपदिष्टवान् ।
जगत्संतारणं नाम रामस्य करुणानिधेः ॥ १ ॥

सत्यमस्मत्प्रभुरयं नराकारो नरोत्तमः ।
कोऽस्य स्वरूपं जानीयात्त्वामृते विदुषां वर ॥ २ ॥

भूयस्त्वां परिपृच्छामि वैयात्येनैव मारुते ।
क्षमस्व तन्ममात्यन्तं बहुधा मूढचेत सः ॥ ३ ॥

भवस्याम्भोनिधेश्चापि त्वया पारं प्रदर्शितम् ।
विस्तरेण पुनर्ब्रूहि रामनाम्नोऽस्य वैभवम् ॥ ४ ॥

शृण्वन्नस्मत्प्रयोर्नाममाहात्म्यामिदमद्भुतम् ।
न तृप्यामि मरुत्सूनो कथयस्व ततो मम ॥ ५ ॥

श्रीहनुमानुवाच

श्रूयतां सावधानेन रामनामफलं त्वया ।
यच्छ्रुत्वा सर्वपापेभ्यो मुच्यते नात्र संशयः ॥ ६ ॥

एकतः सकला मन्त्रा एकतो ज्ञानकोटयः ।
एकतो नाम रामस्य तदपि स्यान्न तैः समम् ॥ ७ ॥

देशकालक्रियाज्ञानाद्यनपेक्षं स्वरूपतः ।
अनन्तकोटिफलदं नाममन्त्रं जगत्पतेः ॥ ८ ॥

गङ्गास्नानसहस्रेण यशान्तस्नानकोटिभिः ।
या न शुद्धिर्भवेज्जातु सा रामेत्यर्णकीर्तनात् ॥ ९ ॥

अन्यदेव फलं ज्ञाने श्रवणे चान्यदेवतत् ।
कीर्तने चान्यदेवाश्य अन्यदावर्तनफलम् ॥ १० ॥

ये जानन्ति जनास्तत्त्वं रामनाम्नो महीयसः ।
न ते दुष्कृतसंदोहैर्लिप्यन्ते जन्मकोटिजैः ॥ ११ ॥

शिव एवास्य जानाति सरहस्यं स्वरूपकम् ।
उपदिश्य सकृज्जीवान् यस्तारयति मोहतः ॥ १२ ॥

अन्यदाराधनशतैर्मन्त्रं फलति नाथवा ।
गृहीतमात्रं फलदं रामनामस्वरूपतः ॥ १३ ॥

न शौचनियमाद्यत्र न सिद्धारिविचारणम् ।
कल्पवृक्षस्वरूपत्वाज्जनानां रामनामकम् ॥ १४ ॥

सकृज्जप्तं धुनोत्याशु पायमाजन्मसम्भवम् ।
द्विरावृत्त्या पुनर्जप्तं कोटियज्ञफलप्रदम् ॥ १५ ॥

त्रिरावृत्त्या तु तज्जप्तं स्वरूपस्थं करोत्यमुम् ।
चतुरावृत्तिजप्तं तु ऋणीभवति राघवः ॥ १६ ॥

चिन्तामणिः कल्पतरुः कामधेनुश्च वै नृणाम् ।
अनल्पफलसंदोहभवनं रामनाम वै ॥ १७ ॥

नास्य रूपं विजानन्ति ब्रह्माद्या अपिदेवताः ।
वाग्वल्लीबीजमेतद्वै रामनाम सीतापतेः ॥ १८ ॥

अमृतस्याकरं विद्यादेतदेवमहोर्जितम् ।
सर्वलोकमहामोहतिमिरौघनिवारणम् ॥ १९ ॥

अनन्तकोटिसूर्येन्दुवह्निदीधितिदीप्तिमत् ।
बाह्याभ्यन्तरसंछन्नतमोवृन्दनिरासकम् ॥ २० ॥

ज्ञानधारामृतरसैरात्मनः स्नपनं भवेत् ।
हृत्पद्मभवने नित्यं दीप्तिकृद्दीपकोपमम् ॥ २१ ॥

सर्ववेदान्तविद्यानां सारमेतदुदीरितम् ।
रामनामाखिलाज्ञानरजनीभेदभास्करम् ॥ २२ ॥

पुरा कृतयुगे केचिज्जनाः सुकृतिनो नल ।
सरहस्यं रामनाम सकृदासाद्य सद्गुरोः ॥ २३ ॥

भित्त्वाज्ञानतमोराशिं कृत्वा स्वात्मप्रकाशनम् ।
परे ब्रह्मणि संलीनाः सिद्धिं प्राप्ता विना श्रमम् ॥ २४ ॥

ततः परं साधनानि बभूवुः कोटिशो नृणाम् ।
मुनीनां मतभेदेन येष्वायासो महान् भवेत् ॥ २५ ॥

कलावशक्यानुष्ठानात्तेषां सिद्धिर्न विद्यते ।
अतो भूयोऽपि रामस्य नामैव शरणं मतम् ॥ २६ ॥

ध्यानतो रामचन्द्रस्य रामचन्द्रस्य भक्तितः ।
रामचन्द्रस्य यजनान्नाम्ना रामस्य मुच्यते ॥ २७ ॥

नामैव यस्य बहिरान्तरपापकोटिनिर्वासनैककरणं शरणं जनानाम् ।
कस्तस्य कोसलपुराधिपराजसूनोरन्यावतारनिबहस्तुलनां प्रयातु ॥ २८ ॥

यावन्ति नामानि रघूत्तमस्य तेषामिदं मुख्यतमं प्रदिष्टम् ।
यज्ज्ञानमात्रेण विमुक्तबन्धः स्वरूपनिष्ठां लभतेऽधमोऽपि ॥ २९ ॥

प्रारब्धकर्मापहृतिप्रवीणं रामेतिनामैवबुधैर्निरुक्तम् ।
यज्ज्ञानमात्रादधमा किराती मुनीन्द्रवृन्दैरभवन्नमस्या ॥ ३० ॥

अज्ञानेन्धननिर्दाहो ज्ञानदीप प्रदीपनम् ।
एकदैव मतं नाम्नि रामेतिद्व्यक्षरात्मके ॥ ३१ ॥

जिह्वाग्रे यस्य लिखितं रामेति द्व्यक्षरं महः ।
कथं स्पृशन्ति तं दूता यमस्य क्रोधभीषणाः ॥ ३२ ॥

रामनामाङ्किता मुद्रा प्रत्यङ्गं येन वै धृता ।
आबद्धं तेन कवचं मोहशत्रुचमूजये ॥ ३३ ॥

जाग्रतिष्ठन् स्वपन् क्रीडन् विरहन्नाहरन्नपि ।
उन्मिषन्निमिषंश्चैव रामनाम सदा जपेत् ॥ ३४ ॥

पापं कृत्स्नं विधूयाशु मुक्तभारः स मानुषः ।
अनायासेन मोहाख्यं सिन्धुं तरति दुस्तरम् ॥ ३५ ॥

कस्तेन तुल्यः सुकृती भवेऽस्मिन् कस्तेन तुल्यश्च सदा प्रकाशः ।
कस्तेन तुल्यश्च विशोकमोहो यो नाम रामेति जपेदजस्रम् ॥ ३६ ॥

एतन्मया सम्परिपृच्छते ते भूयः प्रदिष्टं परमं रहस्यम् ।
हृदावधार्य स्वयमेव विद्धि वाच्यं त्व जिज्ञासति नो परस्मिन् ॥ ३७ ॥

इति श्रीसदाशिवरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे श्रीरामनामस्वरूपाख्यानो नाम दशाधिकद्विशततमोऽध्यायः ॥ २१० ॥

*

एकादशाधिकद्विशततमोऽध्यायः

ब्रह्मोवाच

एतद्धनुमता प्रोक्तं रामनामरहस्यकम् ।
श्रुत्वा नलः प्लवंगेशस्तत्तथैव चकार सः ॥ १ ॥

लिखित्वा दृषदां मध्ये नाम सीतापतेर्मुहुः ।
निचिक्षेप पयोराशौ बहूनुच्चावचान् गिरीन् ॥ २ ॥

संतरन्ति स्मदृषदो रामनामाङ्किता जले ।
तद् दृष्ट्वा वानराः सर्वे बभूवुर्विस्मृता भृशम् ॥ ३ ॥

बबन्ध नैर्महाशैलैर्युक्त्या विनिहितैर्नलः ।
सेतुं महान्तमम्भोधौ यावत्सा रक्षसां पुरी ॥ ४ ॥

बद्ध्यमानं महासेतुं स्वस्मिन् वीक्ष्य पयोनिधिः ।
विसिस्मियेतरां चित्ते रामनामप्रभावतः ॥ ५ ॥

भारव्याकुलितं तस्य हृदयं नामवत्तदा ।
रामनामाङ्कितैः शैलैः सुखमाप भृशं यतः ॥ ६ ॥

सुग्रीवाद्याः कपिवराः सौमित्रिः पयसां निधिः ।
जाम्बवान्नाम ऋक्षेशः सर्वाण्यृक्षकुलानि च ॥ ७ ॥

श्रीरामनाममाहात्म्यं जज्ञुः सर्वेऽपि तत्तथा ।
ससुरासुरमर्त्येषु लोकेष्वास सुविस्मयः ॥ ८ ॥

अहो तरन्ति पाथोधौ महीयांसो महीधराः ।
इतिविस्मितचित्तानां जनानां विस्मयोऽभवत् ॥ ९ ॥

बद्ध्यमानं नलेनोच्चैर्दृष्ट्वा सेतुं पयोनिधौ ।
निश्चयोऽभूत्कपिकुले दशकन्धरनिर्जये ॥ १० ॥

दशकन्धर आकर्ण्य रामभ्रूभङ्गमात्रतः ।
पयोनिधिवशीभूतं विषसाद निजे हृदि ॥ ११ ॥

मनुष्येणाल्पमात्रेण महान्नियमितोऽम्बुधिः ।
अहो दैवगतिः कापि न जाने भावि किं मम ॥ १२ ॥

किं वानेन निबद्धेन भीरुणा जलराशिना ।
मनुष्यमात्रं नो भक्ष्यं सुखमायातु राघवः ॥ १३ ॥

अहो अस्य चमूः साधुः समेता दैवयोगतः ।
हस्तचालनमात्रेण भीतिशीलैः प्लवंगमैः ॥ १४ ॥

अनायासेन यातूनां भक्ष्यमेतदुपस्थितम् ।
किं शोचित्वातिमात्रं मे रिपावस्मिल्लघीयसि ॥ १५ ॥

इत्यनादृत्य मनसा रामस्यागमनं प्रति ।
तस्थौ विचिन्तहृदयो वीरमानी दशानन ॥ १६ ॥

निवद्ध एव सेतुस्तु नलेनाहितयुक्तिना ।
उच्चावचैः क्षितिधरैः पङ्क्त्याकारो महोदधौ ॥ १७ ॥

समान् समैः सुसंयोज्य विषमान् विषमैरपि ।
जलेबद्धो महासेतुर्नलेनातिपटीयसा ॥ १८ ॥

ददृशे सुमहाच्छायो घनसंहतिमेचकः ।
नलबद्धो महासेतुर्मध्ये वारिनिधेर्महम् ॥ १९ ॥

दशयोजनविस्तीर्णो दैर्घ्येण शतयोजनः ।
महोच्छ्रितो महासेतुर्दृदृशेऽब्धौमहादृढः ॥ २० ॥

यद्येव सरसो मध्ये सेतुरन्तः पयोनिधेः ।
बद्धो नलेन कीशानां जयोत्साहविवर्द्धनः ॥ २१ ॥

सुघट्टितमहाशैलदृषद्दृढनिबन्धनः ।
शृङ्गाग्ररूढविटपिघनच्छायसुशीतलः ॥ २२ ॥
सरिन्निर्झरसंदोहविनिबद्धैरनेकशः ।
कासारैरक्षयाम्भोभिः सर्वत्रसुगमायनः ॥ २३ ॥
उच्चैरुभयतः सिन्धुलहरीगणसंगतः ।
तुङ्गैर्जलघटाभारैरनवाप्यस्थितिर्महान् ॥ २४ ॥
शेषाहिरिव पातालादुन्मग्नो रामवर्त्मकृत् ।
स्थितः पातुमिवाम्भोऽब्धेर्महामेघघटागणः ॥ २५ ॥
स्वामिने मार्गदानाय भूमिभाग इवागतः ।
नानावर्णशिलाजालैर्भूरिचित्रविचित्रितः ॥ २६ ॥
सिन्धुमुक्तास्फोटकम्बुसमाचिततटद्वयः ।
महामकरदंष्ट्राग्रपीडनाधःशिलागणः ॥ २७ ॥
रघुवंशाधिभूकीर्तिलेखपट्ट इवा यतः ।
नलहस्तमहायुक्तिपटिम्नः परिसूचकः ॥ २८ ॥
उद्योग इव रामस्य दशवक्त्रजयं प्रति ।
महीयान् कपिसैन्यस्य प्रोत्साह इव मूर्तिमान् ॥ २९ ॥
राक्षसाधीशहृदयनिर्दार इव दारुणः ।
वेलावनावलिश्यामः सुघट्टितशिलास्थितिः ॥ ३० ॥
नीरन्ध्रोदृढबन्धश्च कपिसैन्यभरक्षमः ।
अत्यायतोऽतिदीर्घश्च महोच्छ्रायो महीतलात् ॥ ३१ ॥
अभङ्गनार्हो रक्षोभिरमानुषविनिर्मितिः ।
पौलस्त्यवंशदहनस्थिति वेदिरिवोद्गतः ॥ ३२ ॥
राक्षसानीकहृदयमहाभारप्रदायकः ।
सीतारघूद्वहमनःप्रेमसूत्रसमाकृतिः ॥ ३३ ॥
उभयत्र सुसंलग्नो मनोरथ इवोभयोः ।
राक्षसस्तोमसंहारकालदण्ड इबायतः ॥ ३४ ॥
लङ्कापुरीमहादुर्गपरिप्राप्तिपथो महान् ।
रावणस्यायुषो लक्ष्म्याश्चापसारपथोपमः ॥ ३५ ॥
अभूतपूर्वनिर्माणस्त्रैलोक्यजनविस्मयः ।
विनिर्मितो रामचन्द्रस्याज्ञया कपिपुङ्गवैः ॥ ३६ ॥

पौषस्य कृष्णदशमीदिवसे कपीन्द्रैरारब्ध एष सुमहोद्यमकारिभिस्तैः ।
सिद्धश्चतुर्भिरथ यो दिवसैः समस्तः सेतुश्चिरं विजयते स रघूद्वहस्य ॥ ३७ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे सेतुविनिर्माणो नामैकादशाधिकद्विशततमोऽध्यायः ॥ २११ ॥

*

द्वादशाधिकद्विशततमोऽध्यायः

ब्रह्मोवाच

दृष्ट्वा सेतुं महोच्छ्रायं पारावारविनिर्मितम् ।
मुमुदेऽतितरां रामः प्राप्तां मेने च जानकीम् ॥ १ ॥

कृत्वा सेतुविनिर्माणं सुग्रीवः कपिनायकः ।
हनूमांश्च नलो विद्वानन्ये च कपिपुङ्गवाः ॥ २ ॥

प्रणेमुः श्रीरघुश्रेष्ठं प्रसीदन्तं मुहुर्मुहुः ।
स च ताननुजग्राह दृक्प्रसादेन भूयस ॥ ३ ॥

त ऊचुरञ्जलीन् बद्ध्वा विनयानतकन्धराः ।
अयं ते निर्मिता सेतुः दृश्यतां रघुपुङ्गव ॥ ४ ॥

अनेन गम्यतां नाथ सुखं शत्रुजिगीषया ।
सुखं संतारयविभो कपिसैन्यानि कोटिशः ॥ ५ ॥

तव प्रभावात्सिद्धोऽयं श्रीमद्रघुकुलाग्रणीः ।
नास्माकमस्ति सामर्थ्यमेतस्य खलु निर्मितौ ॥ ६ ॥

येन बद्धो महासेतुर्मध्ये लवणवारिधेः ।
स एव रावणानीकं क्षणात्त्वं चूर्णयिष्यसि ॥ ७ ॥

इत्युक्तो रघुशार्दूलः कपिभिर्नतकन्धरैः ।
सोत्साहहृदयो लङ्कां प्रस्थातुमुपचक्रमे ॥ ८ ॥

[1]स तत्र प्रतिष्ठापयामास देवं शिवं चन्द्रचूडं शुभं विश्ववन्द्यम् ।
सदा सन्निधानं स्वयं व्यक्तमीशं परं ज्योतिराद्यं भवानीसमेतम् ॥ ९ ॥

गन्धैः पुष्पैस्तथा धूपैर्दीपैर्नैवेद्यराशिभिः ।
ईश्वरं पूजयामास लोकवृत्तमुपाश्रितः ॥ १० ॥

अघोरं वामदेवं च सद्योजातं महेश्वरम् ।
सतत् पुरुषमीशानं पूजयामास भक्तितः ॥ ११ ॥

पञ्चवक्त्रं च सम्पूज्य कालिकां समपूजयत् ।
बलिभिर्धूपदीपैश्च उपहारैरनेकशः ॥ १२ ॥

नत्वा स्तुत्वा क्षमाप्याथ स देवौ लोकमातरौ ।[1]
प्रययौ सेतुमार्गेण लङ्कानाथ जिजगीषया ॥ १३ ॥

कपीनुत्तारयामास चतुर्दश्यां कृतार्चनः ।
सर्वे त्रिभिश्च दिवसैरुत्तीर्यं जलधेर्जलम् ॥ १४ ॥

१-१. नास्ति–बड़ो०

पारं प्रयाताः कपयो रामबाहुबलाश्रयाः ।
गर्जन्तो निनदैर्भूरि निशाचरपुरीं प्रति ॥ १५ ॥

मर्दनाय कृतास्फोटाः साटोपं सुमहोद्धताः ।
कृतत्वराश्च साक्षेपं रक्षोनाथविमर्दने ॥ १६ ॥

अहं पूर्वमहं पूर्वमिति संरम्भ भीषणाः ।
उच्चैः किलकिलाशब्दैर्नादयन्तोऽखिला दिशः ॥ १७ ॥

व्याप्नुवन्तो नभो भूमिं सुसंकटगतिक्रमाः ।
कुर्वन्तो वर्त्मसम्बाधं धारानुकृतियायिनः ॥ १८ ॥

निनदै राक्षसेन्द्राणां स्फोटयन्तः शिरः श्रुतिम् ।
निर्दारयन्तो हृदयं मानसोत्साहभञ्जनाः ॥ १९ ॥

उत्तार्य तन्महासैन्यं रामवीरो महाभुजः ।
कृत्स्नं निवेशयामास सुवेलगिरिमूर्ध्नि ॥ २० ॥

एवं निरुद्धय लङ्काया हृदयं वानरोद्भवैः ।
तस्थौ सुवेलशिरसि राक्षसानां यथान्तकः ॥ २१ ॥

वानरास्ते दशग्रीवपुरीप्राकारमुन्नतम् ।
आक्रम्य नितरां तस्थुर्गर्जन्तो दर्पसंयुताः ॥ २२ ॥

कोष्ठान्यट्टालकांश्चैव गोपुराणि सहस्रशः ।
शिखराणि समारुह्य स्थिताः केचिन्महोद्भटाः ॥ २३ ॥

संचूर्णयन्तो हृदयं रावणस्य रवैर्मुहुः ।
एकैकः कपिवीरस्तेष्वेकैकस्माद्बलाधिकः ॥ २४ ॥

सर्वे जगर्जुगम्भीरं कृतास्फोटाश्चुकूर्दिरे ।
महाबाहुबलोत्सिक्ताः कृतदोर्जङ्घताडनाः ॥ २५ ॥

निर्दारयन्तो लङ्काया हृदयं सुमहोद्भटाः ।
गिरीन्द्रा इव कायैस्ते रक्षसामतिभीषणाः ॥ २६ ॥

सोज्जृम्भवदनाः सर्वे लङ्काया ग्रासहेतवे ।
रामदत्तबलोन्मत्ता आज्ञामात्रप्रतीक्षणाः ॥ २७ ॥

आमोटयन्तः स्वाङ्गानि सोद्रेका रणहेतवे ।
बाहुकण्डूप्रहाणेच्छाः प्रोद्धुरा रणवाञ्छकाः ॥ २८ ॥

बलात्पिपतिषन्तश्च राक्षसानां बलोपरि ।
अन्योन्यमनपेक्षन्तः सर्वे भूरिबलाधिकाः ॥ २९ ॥

तेऽष्टभिर्दिवसैस्तत्र संवेष्ट्य परितः पुरीम् ।
स्थापिता रघुनाथेन यथास्थानं कपीश्वराः ॥ ३० ॥

रामस्य तद्बलममेयमसंख्यसंख्य संवीक्षितुं दशमुखेन ततो नियुक्तौ ।
प्राप्तौ मदाद्धरिदिने शुकसारणाह्वौ चारौ निरीक्ष्य निखिलं च विमोहितौ च ॥३१॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे सेनासन्निवेशो नाम द्वादशाधिकद्विशततमोऽध्यायः ॥ २१२ ॥

*

त्रयोदशाधिकद्विशततमोऽध्यायः

ब्रह्मोवाच

उवाच सारणं वीक्ष्य शुको रघुपतेबलम् ।
इह सारण पश्यैतान् महाबाहुबलान् कपीन् ॥ १ ॥

मनुष्यमात्रादपि येविभीयुर्वानराः किल ।
ते गर्जन्त्यद्य लङ्केशपुरीमथनकांक्षिणः ॥ २ ॥

रामस्य दोर्बलोद्रिक्ता अमी वानर कुञ्जराः ।
रक्षोगणांस्तृणीकृत्य गर्जन्त्येते महोद्धताः ॥ ३ ॥

एतैर्वारिनिधौ बद्धः सेतुः शैलगणैर्महान् ।
अमानुषमिदं कृत्यं हरते नः प्रभोर्मदम् ॥ ४ ॥

अपि भूभङ्गमात्रेण बद्धो रामेण वारिधिः ।
इदमप्यस्य सुमहत्कर्मज्ञेयतमं मुहुः ॥ ५ ॥

छन्ना एव दिशः पश्य परितो मर्कटव्रजैः ।
को नाम शक्नुयादेतान् संख्यातुं सुमहोद्धतान् ॥ ६ ॥

अमीभिः कनकच्छायैरसंख्यैः कपिकुञ्जरैः ।
द्वितीय इव लङ्कायाः प्राकारो निर्ममेतराम् ॥ ७ ॥

मुहुगर्जन्ति कूर्दन्ते माद्यन्ति सुमहाबलाः ।
आस्फोटयन्ति दोर्दण्डान् कथ्यन्ते चात्मपौरुषम् ॥ ८ ॥

नृणीकुर्वन्ति दर्पान्धास्त्रिजगद्वर्तिनो भटान् ।
निर्दारयन्ति निनदैर्हृदयानि च रक्षसाम् ॥ ९ ॥

उत्क्षिप्तुमवनीमेतामुत्सहन्ते बलोन्नताः ।
नखदन्तायुधैर्योद्धुं शिलाभिर्भूरुहैस्तथा ॥ १० ॥

सज्जन्ते राक्षसैरेते समरेष्वनिवर्तिनः ।
जिता येन दिशः सर्वाः सकुलं तं दशाननम् ॥ ११ ॥

एषां ग्रसितुकामानामयमाटोप ईक्ष्यते ।
मन्येऽसौ कोऽपि सम्प्राप्ताः कालस्यैव विपर्ययः ॥ १२ ॥

अभूततममेवाद्य भवतीति विनिश्चिनु ।
तन्न जानाति लङ्केशो मन्ये भाग्यविपर्ययात् ॥ १३ ॥

नो चेत्तरेयुः सलिले कथं नाम शिलोच्चयाः ।
मनुष्यश्च कथं हन्यांद्राक्षसान् निजभक्षकान् ॥ १४ ॥

कपयश्च कथं कुर्युराटोपं रक्षसां जये ।
सोदरश्च कथं नाम त्यजेत्काल उपस्थिते ॥ १५ ॥

इह रामो रघुपतिर्मुहुरालोकयन् धनुः ।
आस्तेऽसावुत्तरद्वारि लङ्काया विजयोद्यतः ॥ १६ ॥

असौ सौमित्रिरनुजस्तस्यैवाहितलक्षणः ।
संधाय बाणं धनुषिमोक्तुकामोऽस्ति लक्ष्यदृक् ॥ १७ ॥

अमी कपिमहावीरास्तेषां सुग्रीव ईश्वरः ।
बली वालिकपेर्भ्राता जल्पन्नास्ते रणोद्यमम् ॥ १८ ॥

अयं स मारुति वीरो हनूमानतिकोपनः ।
आस्ते युद्धकृतोत्साहो नगरीं यो ददाह च ॥ १९ ॥

अस्यां दिशि करालोऽसौ जाम्बवान्नाम ऋक्षराट् ।
आस्ते बाहुयुगं पश्यन् वृद्धो युद्धविशारदः ॥ २० ॥

अमी च कपयः शूरा नलनीलाङ्गदादयः ।
परामृशन्तः संग्रामं जल्पन्ति स्वस्वपौरुषम् ॥ २१ ॥

अमीषां कर्तुं संख्यानं पारयामि न सारण ।
स्वस्वयूथाधिपतये एते सन्ति महाबलाः ॥ २२ ॥

यतो यतः प्रसार्येते दृशौ दिशि ततस्ततः ।
दृश्यन्ते कपिसैन्यानि बलोन्नद्धानि कोटिशः ॥ २३ ॥

अमीभिर्वेष्टिता लङ्का ग्रस्तप्रायैव दृश्यते ।
इतोऽपि किल नो वेत्ति स्वामी नो भाविनो वशात् ॥ २४ ॥

इति संकथयन् वार्तां शुकाख्यः सारणं प्रति ।
विचचार रघुश्रेष्ठसैन्ये छन्नचतुर्दिशि ॥ २५ ॥

विचेरतुस्तौ कुटिलौ चारौ लङ्कापुरेशितुः ।
तस्मिन् कपिबले सर्वैर्विदितौ राक्षसाविति ॥ २६ ॥

अथ तौ कपिभिर्बद्ध्वाऽऽनीतौ श्रीरामसंनिधौ ।
लङ्कातः किल सम्प्राप्तौ राक्षसौ शत्रुपक्षगौ ॥ २७ ॥

तानादिदेश भगवान् रघुवंशमणिः कपीन्।
त्वरितं प्रतिमुच्येतां दशाननचराविमौ ॥ २८ ॥

एताभ्यामिव बद्धाभ्यां मारिताभ्यामथापि वा।
नहि नोऽभीष्टसंसिद्धिर्दशास्यं विजिगीषताम् ॥ २९ ॥

इति रामकृतादेशान्मुक्तौ तौ कपिभिः खलौ।
ईयतुः प्राणानादाय त्वरितं शुकसारणौ ॥ ३० ॥

श्री मानथ द्वादशिकादिने पुरद्वारेषु सर्वेषु महाबलान् कपीन्।
आदिश्य सेनापतिभिः पृथक् पृथग् द्वारे स्वयं च प्रभुरुत्तरे स्थितः ॥ ३१ ॥

इति श्री मदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे शुकसारणमोक्षणो नाम त्रयोदशाधिकद्विशततमोऽध्यायः ॥ २१३ ॥

*

चतुर्दशाधिकद्विशततमोऽध्यायः

ब्रह्मोवाच

अथ रामचमूं द्रष्टुं चतुर्दिक्षु निवेशिताम्।
आगतोऽट्टालकशिरस्यधिरूढो दशाननः ॥ १ ॥

दशभिः शिखरैर्युक्तो महानद्रिरिवोन्नतः।
विंशत्या बाहुभिर्दीर्घैश्छादयन् हरितोऽखिलाः ॥ २ ॥

पाण्डुरेणातपत्रेण व्यक्तं समुपलक्षितः।
अनुगै राक्षसवरैः स्थितैः सविनयं वृतः ॥ ३ ॥

बद्धाञ्जलिपुटैः कैश्चिद् दूरात्समुपवीक्षितः।
बीज्यमानश्चोभयतश्चामराभ्यां प्रतिक्षणम् ॥ ४ ॥

ददर्श तं रघुश्रेष्ठो दूरादरुणलोचनः।
एष वैरी ममेत्युच्चैः सामर्षहृदयो भृशम् ॥ ५ ॥

ततः संधाय धनुषा सोऽर्द्धचन्द्रमितं शरम्।
आकर्णाकृष्टसुदृढज्यागुणो बलवत्तरः ॥ ६ ॥

चिच्छेद तस्यशिरसि स्थितं शतशलाककम्।
मुक्ताजालयुतं छत्रं पूर्णचन्द्रमहोज्ज्वलम् ॥ ७ ॥

छिन्नमात्रे तु तच्छत्रे रक्षोवीराः शशङ्किरे।
अहो रामस्य बाणेन छिन्नं लङ्काधिपस्य तत् ॥ ८ ॥

त्रैलोक्यवर्तिवीरेन्द्रमाननीयं महोज्ज्वलम् ।
समस्तराक्षसैर्वन्द्यं मुक्तामालिमनोहरम् ॥ ९ ॥

छत्रं स्वर्णमयं लङ्काराजधान्या विभूषणम् ।
छिन्नप्रायं त्वस्य शिरा दैवेनैव सुरक्षितम् ॥ १० ॥

अधुनापि न जानाति प्रभावं राघवस्य चेत् ।
अहो कालेन धीरस्य विपरीतं बभूव तत् ॥ ११ ॥

इति प्रजल्पतां तेषां राक्षसानां वचांसि सः ।
आकर्ण्य रावणः क्रुद्धः साक्षेपमयमूचिवान् ॥ १२ ॥

अलं भयेन वो भीता राक्षसा इयतैव किम् ।
अतः परं न सोढव्यस्तापसस्यास्य दुर्नयः ॥ १३ ॥

अयं पतङ्गवत्प्राप्तो मयि दीपे मुमूर्षुकः ।
द्रक्ष्यथ श्वो मम बलं दुर्नयस्यास्य निग्रहे ॥ १४ ॥

यदसौ भीषयति मां छत्रच्छेदेन मानुषः ।
लप्स्यते तत्फलं शीघ्रं मयि याते रणाङ्गणम् ॥ १५ ॥

अथवालं प्रयातेन मयास्य दमनाय वै ।
पर्याप्ता एव मे वीराः क्रीडादत्तारिनिग्रहाः ॥ १६ ॥

यदसौ मां न जानाति हेलादत्तेन्द्रनिग्रहम् ।
तदात्मनाशस्योपायं संचिनोत्पत्न्यवैभवः ॥ १७ ॥

किं छत्रेण निकृन्तेन हेमदण्डेन मेऽमुना ।
ज्ञास्यतेऽसौ मम बलं राक्षसैरेव मद्भटैः ॥ १८ ॥

भक्ष्यं चोपस्थितमिह ह्यनायासेन रक्षसाम् ।
एतैः कपिपलग्रासैस्तृप्तिं यास्यन्ति मामकाः ॥ १९ ॥

इमौ च तापसौ मर्त्यौ भक्षणार्थं न आगतौ ।
अनायासेन तुष्टेन दैवेनैवोपसादितौ ॥ २० ॥

इत्थं विकत्थमानेऽसौ राक्षसेन्द्रो महामदः ।
न हृदा गणयामास छत्रभङ्गादमङ्गलम् ॥ २१ ॥

तावत्तत्संनिधिं प्राप्तौ मुक्तौ रामेण बन्धनात् ।
दृष्टकृत्स्नकपिस्तोमबलौ तौ शुकसारणौ ॥ २२ ॥

तावर्णयतां तस्य सविधे विहिताञ्जली ।
बलं श्रीरामचन्द्रस्य यथा दृष्टं तथैव तत् ॥ २३ ॥

दृष्टं रक्षःपतेऽस्माभिर्बलमेतदशेषतः ।
इह वीरा असंख्याताः कपीन्द्राः पर्वतोपमाः ॥ २४ ॥

जृम्भयन्ति मुखैरेते लङ्काग्रासार्थमुद्धुराः ।
एकैकशो तुल्यबला गर्जन्ति मुहुरुन्मदाः ॥ २५ ॥

स उन्मुखो नाम कपिर्महाबलपराक्रमः ।
त्वामीक्षतेऽति संक्रुद्ध इतः पश्य शनैः प्रभो ॥ २६ ॥

दृश्यतामेष संक्रुद्धो द्विविदो नाम वानरः ।
ग्रसन्निव पुरीमेनां विदीर्णमुखकन्दरः ॥ २७ ॥

अयं नीलाह्वयः पश्य कपीन्द्रोऽमितविक्रमः ।
[1]प्रहस्तमवृणोद्धन्तुं हरीणां पुरतो रणे ॥ २८ ॥

अयं कपिर्नलो नाम महाबलपराक्रमः ।[1]
बद्धः पयोनिधौ येन महासेतुर्महीधरैः ॥ २९ ॥

अयमङ्गदनामात्र कपीन्द्र इत ऊर्ध्वदृक् ।
स्वपित्रा वलिना तुल्यबलः शौर्येण भूषितः ॥ ३० ॥

आरुरुक्षुरिवोत्तुङ्गं प्राकाराग्रं विलोक्य नः ।
अस्ते बाहुबलोन्नद्धो मथितुं नः कृतोद्यमः ॥ ३१ ॥

अयमृक्षेश्वरो वीरः स्वयूथमधितिष्ठति ।
बलवान् बुद्धिमांश्चैव वृद्धो युद्धविशारदः ॥ ३२ ॥

जाम्बवान्नाम सुमहानद्रिकूटसमुच्छ्रितः ।
निजदोर्दण्डयुगलं पश्यन्नास्ते बलोद्धतः ॥ ३३ ॥

एकैकोऽप्रतिमश्चात्र दोर्बलेन कपीश्वरः ।
पर्याप्त उर्वीमुद्धर्तुं का लङ्का तृणपुञ्जवत् ॥ ३४ ॥

मर्कटा इति ते बुद्धिर्मा भूच्च दशकन्धर ।
सर्वे ह्येतेऽतुलबलाः सर्वे देवपराक्रमाः ॥ ३५ ॥

सर्वे रघुपतेराज्ञामाकाङ्क्षन्ति कपीश्वराः ।
लङ्कापुरीप्रमथनं कर्तुमुद्यतबाहवः ॥ ३६ ॥

इतो निरीक्ष्यतां देव रामोऽयं रघुपुङ्गवः ।
सुग्रीवोत्संगनिहितमस्तको धरणीशयः ॥ ३७ ॥

योऽक्षहा हनुमान् वीरस्तदङ्कनिहिताङ्घ्रिकः ।
त्वत्सोदरोक्तिनिचयदत्तश्रुतिरमेयधीः ॥ ३८ ॥

आस्ते हेममृगस्याधश्चर्माध्यासितवांश्च यः ।
भ्रात्रा सौमित्रिणाऽऽनीतं धनुरालोकयन् मुहुः ॥ ३९ ॥

१-१ नास्ति-बड़ो०

तव वंशविनाशाय किंचिदारक्तलोचनः ।
दृष्ट्वा तस्यबलं कृत्स्नमावां शीघ्रमिहागतौ ॥ ४० ॥

दातुं तवोचितां बुद्धिमिदानीमपि चेतया ।
भवान् विहितान् गर्ह्यं कर्मेदं रक्षसां पते ॥ ४१ ॥

पीतमात्मविनाशाय ध्रुवं हालाहलं विषम् ।
सम्प्रति त्यज्यतां लङ्का जानकी च पराङ्गना ॥ ४२ ॥

यदि ते जीवितुं वाञ्छा सकुटुम्बस्य विद्यते ।
उदितोऽयं धूमकेतुर्नाशाय तव रक्षसाम् ॥ ४३ ॥

पश्य पश्यान्धहृद्दृग्भ्यां रक्षैतान् सर्वराक्षसान् ।
रामबाणाग्निनादग्धान् नो चेद्यास्यन्ति संक्षयम् ॥ ४४ ॥

तस्माच्छीघ्रतरं याहि साद्धं खलुनिजाङ्गजैः ।
प्रसादत्वेन दत्ता ते भ्रातुर्लङ्काभिधा पुरी ॥ ४५ ॥

रामेणवीरवर्येण शरणागतरक्षिणा ।
येन कैशौरवयसि हता स्त्री ताडकाभिधा ॥ ४६ ॥

विनिकृत्तघ्राणकर्णा तथा तेऽवरजा कृता ।
ह्रिया तव पितुस्त्यक्ता स्त्रीत्वेन निहता न सा ॥ ४७ ॥

कृत्वा तस्यापराधं को जीवेत दशकन्धर ।
एते रामशरप्लुष्टाः क्षयं मास्यन्ति राक्षसाः ॥ ४८ ॥

इत्येवं शुकसारणोक्तवचनैर्हेलापरो रावणः
प्रोन्मत्तो दशभिर्मुखैः प्रहसितो दिक्चक्रमारावयन् ।
आहूयाथ समस्तराक्षसचमूनाथान् प्रसंख्यापर-
स्तत्तत्स्थानदिशामुखेषु निखिलानाज्ञात आरोपयत् ॥ ४९ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे छत्रभङ्गादिकथनो नाम चतुर्दशाधिकद्विशततमोऽध्यायः ॥ २१४ ॥

*

पञ्चदशाधिकद्विशततमोऽध्यायः

ब्रह्मोवाच

आरभ्य राक्षसाधीशः पौषकृष्णत्रयोदशीम् ।
यावत्कुहूदिनं सर्वान् राक्षसांश्च चमूपतीन् ॥
तत्तत्स्थानेषु युद्धार्थं संख्यां कृत्वाध्यरोपयत् ॥ १ ॥

प्राच्यवाचीप्रतीचीषु तथोदीच्यां च राक्षसाः ।
रोपितास्तेन बलिना युद्धार्थं कपिसैनिकैः ॥ २ ॥

तस्य चार्द्धाङ्गिनी साध्वी नाम्ना मन्दोदरी तु या ।
अब्रवीत्सा सविनयमागत्य विहिताञ्जलिः ॥ ३ ॥

पश्यपश्य चमूमेनां रामस्य प्राणवल्लभ ।
यावत्प्रकाशो हरितां तावद् दृष्टीः प्रसारय ॥ ४ ॥

पश्यावकाशमाकाशे क्वापि पश्यन्ति नो जनाः ।
पुरीनिवासिनः सर्वेसाश्चर्या एव सम्प्रति ॥ ५ ॥

मज्जन्ति ये मज्जयन्ति तेऽपि प्रस्तरराशयः ।
पयःपृष्ठस्थिताः कान्त तरन्ति खलु सम्प्रति ॥ ६ ॥

करप्रचालनेनापि ये त्रस्यन्ति भृशं नृणाम् ।
तैरियं वेष्टिता कृत्स्ना ग्रासाय कपिभिः पुरी ॥ ७ ॥

यद्भूच्यं राक्षसानां स्यात्तौ मर्त्याविह संगतौ ।
क्षयाय राक्षसेन्द्राणां हेलाजितचतुर्दिशाम् ॥ ८ ॥

यत्सीमापि न गीर्वाणैर्लङ्घिता साद्य वानरैः ।
लङ्घ्यते नगरी लङ्का जातः कालविपर्ययः ॥ ९ ॥

रिपोरन्त्यं गतो नाथ सोदरोऽपि तवाहितः ।
अद्य दैवविपर्यासाद्विपर्यस्तमिवाखिलम् ॥ १० ॥

शत्रुश्च तेऽतिप्रबलो न कथं शङ्क्यते मुहुः ।
येनैकेन हताः सम्यग्वीर्यवन्तः खरादयः ॥ ११ ॥

त्वत्तोऽप्यधिकवीर्यास्ते तस्य हृत्वा प्रियां भवान् ।
आगतः कृतवानेतदनर्हं कर्म तद्भृशम् ॥ १२ ॥

दुर्गान्तःस्थापिता सापि दग्धा शोकाग्निना भृशम् ।
शपति त्वामविरतं विनाशाय सहात्मजैः ॥ १३ ॥

विधाय स महासेतुं जलधौ धरणीधरैः ।
प्राप्तस्त्रिकूटमचलं कथं नाथ न पश्यसि ॥ १४ ॥

कथमन्धायसे श्रीमन् विंशत्यापि विलोचनैः ।
तव शीर्षावलीं मुक्त्वा विच्छेद छत्रमण्डलम् ॥ १५ ॥

रामः पुलस्त्यवंशे तदाऽविश्वके दयां पराम् ।
कृतं निरवशेषं यदेद्यैव खलु नामुना ॥ १६ ॥

सम्प्रत्य वसरोऽस्त्येक कर्तुं संधिं तव प्रभो ।
समर्पय श्रीरामस्य प्रियां जीवन्तु राक्षसाः ॥ १७ ॥

जानासि वालिनो बाह्वोर्बलं च त्वमशेषतः ।
अलं प्रकथ्य तद्वार्तामनुभूय स्थितो ह्यसि ॥ १८ ॥

सोऽपि श्री रामभुक्तेन मार्गेण निहतः क्षणात् ।
तस्य प्रियतमां हृत्वा कुबुद्धयैव महात्मनः ॥ १९ ॥

भवान् कथं सुखं शेते नूनमन्धापितो विभो ।
आत्मनः कुलनाशाय जाने कृत्या त्वयार्जिता ॥ २० ॥

इति मन्दोदरीवाक्यमाकर्ण्य दशकन्धरः ।
उवाच भीरुरित्यन्तरवज्ञान परो भृशम् ॥ २१ ॥

अलं भयेन ते तन्वि न जानासि बलाधिकान् ।
लङ्काधिवासिनो वीरान् रक्षोवर्यान् परः शतान् ॥ २२ ॥

किमेतैः कपिभिः प्राप्तैः संछन्नैः परितो दिशम् ।
भक्ष्या एव किलास्माभिरेते दैवोपसादिताः ॥ २३ ॥

अमीभिर्हृष्टपुष्टाङ्गैः कोटिसंख्यैः कपीश्वरैः ।
सम्यक् पुष्टिं प्रयास्यन्ति क्षुधिता मम राक्षसाः ॥ २४ ॥

प्रसारयाम्यहं यावद् दृशस्तावद्विलोकये ।
मांसभारांश्चतुर्दिक्षु भक्ष्यान् दैवोपसादितान् ॥ २५ ॥

नाशायात्मन एवैतैर्वर्द्धः सेतुः पयोनिधौ ।
पलायिता अपि रणान्नामो मोच्या निशाचरैः ॥ २६ ॥

वेष्टयन्तु पुरीमेतां सुखेन खलु मर्कटाः ।
यावन्नावतरन्त्येते मम वीरा रणांगणम् ॥ २७ ॥

ये ग्रस्तुकामा नगरीं मम मर्कटयूथपाः ।
ग्रसनीयास्त एवामी क्षुधितैर्मम राक्षसैः ॥ २८ ॥

एषां दैवं विपर्यस्तं स्वयमेवागता यतः ।
मर्तुकामा राक्षसानामङ्केषु विपुलक्षुधाम् ॥ २९ ॥

यदेतैर्मशकप्रायैर्लङ्घिता नगरी मम ।
तत्किं भिया सुनयने दुर्जयाः किल राक्षसा ॥ ३० ॥

यच्छत्रोरन्तिकं यातो भीरूरेष विभीषणः ।
तत्फलं यास्यति ध्वस्तसपत्ने मयि भामिनि ॥ ३१ ॥

किमस्य बलमाश्रित्य जितवानहमाजिषु ।
नानाशस्त्रप्रहरणान् दिक्पतीन् वासवादिकान् ॥ ३२ ॥

संगच्छतामयं द्वेष्यैर्भयशीलो विभीषणः ।
निद्रातु कुम्भकर्णोऽपि क्रीडन्त्विन्द्रजिदादयः ॥ ३३ ॥

शक्तोऽहमात्मनैवैकस्तापसंस्यास्यदुर्धियः ।
प्रसभं सम्प्रमथने भ्रूभङ्गनियताम्बुधेः ॥ ३४ ॥

वानराणां प्रमथने शक्ताश्च मम राक्षसाः ।
अलं भयेन ते कान्ते पश्य तावत्कुतूहलम् ॥ ३५ ॥

किं शङ्कनीयः खल्वेश मानुषः सोऽपि तापसः ।
किं दैवान्निहतैश्चापि शापदग्धैः खरादिभिः ॥ ३६ ॥

किमहं कृतवान् गर्ह्यं जानकीं यदिहानयम् ।
येन वन्दीकृताः कान्ते देवनार्यः परः शताः ॥ ३७ ॥

यद्यं तापसो मोहाच्चिछेद मम मूर्द्धगम् ।
छत्रं त्रैलोक्यराज्यश्रीविश्रामस्थानमुद्यतम् ॥ ३८ ॥

तदात्मनो विनाशाय नियतं विद्धि सुन्दरि ।
पतङ्ग इव पक्षाभ्यामाक्षिपन् दीपगां शिखाम् ॥ ३९ ॥

अयमन्धायते कामं मानुषः सोऽपि तापसः ।
आत्मानं पातयन्नङ्के रक्षसां घोरकर्मणाम् ॥ ४० ॥

नियतं नार्पयिष्यामि जानकीमस्य भामिनि ।
ध्रुवमङ्केऽर्पयिष्यामि [1]हत्वा रामं महाहवे ॥ ४१ ॥

दैवेन निहतो वालिर्वृद्धः संजीर्णविग्रहः ।
किमहं तेन भेष्यामि जगज्जेता दशाननः ॥ ४२ ॥

स्वप्स्यामि सुखमेवाहं यावन्मे राक्षसोत्तमाः ।
महाबला महाकाया जेष्यन्ति समरे रिपून् ॥ ४३ ॥

नाहं विभीषणो भीरुर्यः कुर्यात्समरं विना ।
संधिर्विपक्षैः संगम्य नन्वहं दशकन्धरः ॥ ४४ ॥

शिरांसि येन गिरिशस्यांघ्रिपद्मद्वये प्रभोः ।
उपहारीकृत्य लब्धास्त्रैलोक्यविजयश्रियः ॥ ४५ ॥

कान्ते ननु मयाऽज्ञाता महावीर्या निशाचराः ।
भक्षयिष्यन्ति सपदि यूथशो मर्कटानमून् ॥ ४६ ॥

---

१. मथित्वामुम्—मथु० ।

प्रिये किं मां न जानासि हेलयैव जिगाय यः ।
त्रैलोक्यवर्त्तिनो वीरान् सस्त्रीसुतधनश्रियः ॥ ४७ ॥

किमात्मतनयं वीरं मेघनादं न वेत्सि च ।
येन लब्धेन्द्रजित्ख्यातिः संख्ये जित्वा पुरन्दरम् ॥ ४८ ॥

किं बिभेषि मुहुः कान्ते दृष्ट्वेमाः कपिवाहिनीः ।
भक्ष्या राक्षसवीराणामेकैककवलक्रमात् ॥ ४९ ॥

इति समधिकदर्पोद्दामधीर्यत्तचेतास्त्रिभुवनजयकारी सम्पदा मुह्यमानः ।
दिनकरकुलकेतावासुरीं बुद्धिमात्तो मृगदृशमभिधाया तिष्ठदालिङ्ग्य दोर्भिः ॥५०॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे मन्दोदरीसमाश्वासनो नाम पञ्चदशाधिकद्विशततमोऽध्यायः ॥ २१५ ॥

*

षोडशाधिकद्विशततमोऽध्यायः

ब्रह्मोवाच

अथादिदेश भगवान् रामो वालिकपीशितुः ।
अङ्गजं वदतां श्रेष्ठमङ्गद नाम वानरम् ॥ १ ॥

गच्छाङ्गसभ्य तस्यान्ते रक्षोराजस्य सत्वरम् ।
मद्वाक्यं ब्रूहि तत्रैत्य यदिदं कथयाम्यहम् ॥ २ ॥

भवान् रहसि मद्भार्यां जहार रभसेन यत् ।
तदिदं कृतवान् गर्हमात्मनाशाय रावण ॥ ३ ॥

सोऽयं ते दुर्नयो भूपान् मया क्षान्ततमो भृशम् ।
धर्मद्वारपथो दत्तस्तव [1]निर्गमनाय च ॥ ४ ॥

गच्छं तेन पथा शीघ्रं सबान्धव सुहृत्पशुः ।
लङ्काधिपत्ये तु मया स्थापितोऽयं विभीषणः ॥ ५ ॥

यो मे शरणमायातः पूर्वमेव महामतिः ।
सोऽभिषिक्तो मयाप्येष लङ्काराज्येऽनुजस्तव ॥ ६ ॥

तवायमेव समयो यथोक्तं कर्त्तुमस्ति वै ।
नो चेन्मद्बाणवह्नेस्त्वं गमिष्यसि पतंगताम् ॥ ७ ॥

---

१. राक्षसनायक–मथु० ।

मा देहि राक्षसश्रेष्ठ ब्रह्महत्यामिमां मम ।
आततायिवधे दोषो नास्तीति मुनिभिर्मतम् ॥ ८ ॥

पुलस्त्यस्य मुनेर्वंशे जागर्ति करुणा मम ।
मा विलोपयतासि तां मदन्तःकरणेस्थिताम् ॥ ९ ॥

जीवन्तु राक्षसाश्चापि तवैते कोटियूथपा ।
नो चेत्सर्वेऽपि निधनं गमिष्यन्ति ममेषुभिः ॥ १० ॥

इत्यादिष्टः स रामेण वालिनस्तनयोऽङ्गदः ।
माघशुक्लप्रतिपदि ययौ रक्षःपतेः सभाम् ॥ ११ ॥

महास्तम्भ शतोपेतां दीव्यन्तीं सर्वतस्त्विषा ।
तलशब्दनिनादेन प्रतिशब्दायितां मुहुः ॥ १२ ॥

मणिरत्नमहास्तम्भ प्रतिबिम्बितमूर्तिभिः ।
रक्षोधिपैर्महाकायैः सर्वतः समलंकृताम् ॥ १३ ॥

नानावर्णैर्मणिगणैर्विचित्रविपुलाजिराम् ।
सुवर्णभित्तिप्रत्युप्तरत्नमाणिक्यदीपिताम् ॥ १४ ॥

सर्वतो विपुलादर्शजटितायतभित्तिकाम् ।
हेमरत्नसुनिर्बद्धगवाक्षशतभूषिताम् ॥ १५ ॥

नानावर्णैर्मणिशिलाजालैर्निर्मिततोरणाम् ।
गगनस्पृङ्महास्तम्भरचिता यततोरणाम् ॥ १६ ॥

देहलीबद्धरत्नांशुच्छादितद्वारशोभिताम् ।
समंतादास्तृतानेकविपुलास्तरणान्विताम् ॥ १७ ॥

विचित्रकम्बलास्तीर्णगृहभित्तिमनोरमाम् ।
ऊर्ध्वं चित्रपटच्छन्नां समंताच्च विचित्रिताम् ॥ १८ ॥

रत्नस्तम्भसुनिर्बद्धमुक्तादामबिलम्बिभिः ।
सांध्यमेकसमाकारैर्बहुवर्णविचित्रितैः ॥ १९ ॥

गमनोच्छ्रायिभिर्भूरिवितानैः समलंकृताम् ।
कृत्रिमैः पटवृक्षैश्च विचित्रकुसुमान्वितैः ॥ २० ॥

समंताच्छोभितां तद्वद्धस्त्यश्वपुरुषव्रजैः ।
करालैः सुमहोद्दण्डैर्महाकायैर्महाभुजैः ॥ २१ ॥

साभिमानै रणोत्साहरोमांञ्चितसुविग्रहैः ।
नानावर्णैर्महाभीमैः कौणपेन्द्रैः समन्विताम् ॥ २२ ॥

राक्षसेन्द्राधिष्ठितोच्चरत्नसिंहासनोर्जिताम् ।
महाशब्दप्रतीहारनिवेदितसमागमैः ॥ २३ ॥

अनेकराक्षसाधीशविनयार्जवशोभिताम् ।
हेलावश्यनमन्मौलिनाकपालादिसेविताम् ॥ २४ ॥
सीताविरोगसंक्लिष्टदशास्यभयमौनितैः ।
रक्षोगणैः समंताच्च चित्रलेखायितामिव ॥ २५ ॥
त्रैलोक्यवैभवश्रीभिः कृतस्थानां महोर्जिताम् ।
तां विवेश स निःशङ्कं कौतुकी वालिनः सुतः ॥ २६ ॥
स तत्र रक्षोधिपतेः पुरस्तान्महार्हसिंहासनमास्थितस्य ।
समेत्य निःशङ्कमना यदुक्तं रामेण तत्सर्वमुवाच तस्मै ॥ २७ ॥

इति श्रीमदादिरामायणे ब्रह्मभृशुण्डसंवादे दक्षिणखण्डेऽङ्गदरावणसभा-प्रवेशो नाम षोडशाधिकद्विशततमोऽध्यायः ॥ २१६ ॥

*

सप्तदशाधिकद्विशततमोऽध्यायः

ब्रह्मोवाच

श्रुत्व लङ्काधिपः क्रुद्धस्ताः कर्णकटुका गिरः ।
महामानी महावीर्यो राक्षसानिदमादिशत् ॥ १ ॥
अहो रे राक्षसश्रेष्ठास्तनयो मम विद्विषः ।
मत्सपत्नस्य दूतश्च वध्यतां वध्यतामसौ ॥ २ ॥
भाषते दुर्विनीतोऽयं यत्किंचिदयथातथम् ।
क्षन्तव्यो नैव दुर्बुद्धिरसमाजोचितं वदः ॥ ३ ॥
इत्युक्तास्तेन बलिना बलिनो राक्षसोत्तमाः ।
निग्रहीतुं तमुद्दण्डं प्रयत्नमतिचक्रिरे ॥ ४ ॥
स तान् रक्षःसभामुख्यान् प्रसभं निग्रहोद्यतान् ।
अङ्घ्रिप्रहारैर्बलवानाजघान समंततः ॥ ५ ॥
ते तस्याङ्घ्रिप्रहारोत्थसुनिर्घातसमाहताः ।
निपेतू राक्षसाः सर्वे राक्षसाधिपतेः पुरः ॥ ६ ॥
चुक्रोधं तेभ्यो लङ्केशः प्रहृतेभ्यस्तथामुना ।
आदिदेश मुहुर्वक्रैर्वध्यतांवध्यतामिति ॥ ७ ॥
तूर्णं स तानधिक्षिप्य पादोत्क्षेपसुनिर्हतान् ।
आलूय राक्षसपतेर्नखरैः कर्णनासिकम् ॥ ८ ॥

भित्त्वा राजशिरोवेश्म गर्जन् गगनवर्त्मना।
निर्गत्यशनकैर्वीरः प्राप्तोरघुपतेः पुरः ॥ ९ ॥

तस्मै निवेदयामास यथावृत्तं कपीश्वरः।
दुर्नयं राक्षसपतेर्बलाच्च स्वविनिर्गमम् ॥ १० ॥

[[1]अथ रावणवाक्येन राक्षस्यो घोरचेतसः।
जानकीं वञ्चयामासू रावणाभीष्टसिद्धये ॥ ११ ॥

सीते राक्षसराजस्य भृत्येन घोरकर्मणा।
अन्तर्हितेन ते पत्युः शिरश्छित्त्वा समागतः ॥ १२ ॥

इति घोरतरं वाक्यं वज्रादपि सुनिष्ठुरम्।
श्रुत्वा मुमूर्छ सा देवी वित्रस्तहृदयेक्षणा ॥ १३ ॥]

ततश्च प्राप्य चैतन्यं विललाप सुदुःखिता।
किं जातमद्य नन्वेतद्विपरीतमभाग्यतः[1] ॥ ११ ॥

धिङ्मे प्राणान् दृशौ चापि धिक् च माँ गर्हजीविताम्।
पतितोऽथं मदुपरि को नाम सुमहाशनिः ॥ १२ ॥२०

दग्धे मम दृशौ सम्प्रत्याशाबन्धगते चिरात्।
न लब्धं दर्शनं किं वा वाञ्छाफल विधायिनोः ॥ १३ ॥२१

[वज्रदंष्ट्रं समाहूय राक्षसं घोरमायिनम्।
जानकीं मोहनार्थाय चाज्ञापयत रावणः ॥ ११ ॥

अहो रक्षोवर भवान् राक्षस्या घोरमायया।
सीतापुरः प्रक्षिपत रामलक्ष्मणयोरुभे ॥ १२ ॥

शिरसी सम्प्रति यथा वस्त्रालङ्कारसंयुते।
तद्दर्शनादियं मोहं यास्यति ध्रुवमञ्जसा ॥ १३ ॥

इत्यादिष्टः स तेनोग्रः कौणपस्तत्तथाकरोत्।
दृष्ट्वा च जानकी देवी शिरसी रघुनाथयोः ॥ १४ ॥

हा हतामीति बहुशश्चक्रन्द मनसाहता।
हा नाथ हा रघुपते हा वीरवर हा पते ॥ १५ ॥

अनाथां मां वने त्यक्त्वा क्व गतोऽसि महामते।
हा लक्ष्मण महावीर हा सुमित्राङ्कभूषण ॥ १६ ॥

हा देवर गुणागार कथं जातोऽसि सम्प्रति।
श्रृण्वन्ती वां समुत्कर्षं किमहं विधिना हता ॥ १७ ॥

१–१ नास्ति–बड़ो० ।

[1]त्रैलोक्यजेता वीरेन्द्र सर्वलोकैकशासक ।
कथं मां त्यक्षते वीर भ्रातुः पत्नीं गरीयसीम् ॥ १८ ॥

सम्बोधय रघुश्रेष्ठं विद्यया गारुड़ाख्यया ।
जहि शीघ्रमिमं वीर रावणं लोककण्टकम्[1] ॥ १९ ॥

निराशैवाद्य किमहं ध्रुवं यास्यामि पञ्चताम् ।
दीर्घायुषोवां किमयमायुर्नाशोमया कलिः ॥ २० ॥
हा देवता हा मुनयः काशिषो भवतां गताः ।]

हा वीरेन्द्र हतोवालिः सुग्रीवश्च कृतः सखा ।
बद्धश्च वारिधौ सेतुः समुत्पाद्य महीधरैः ॥ १४ ॥

रुद्धं च लंकाहृदयमित्याद्यान् भवतोर्गुणान् ।
शृण्वन्त्येवाद्य किहहं दग्धा शोकेन भूयसा ॥ १५ ॥

त्रायस्व मां रघुपते पतितां शोकसागरे ।
मा चूर्णय मनः शोकमहाशनिनिपातनात् ॥ १६ ॥

हा हा दशरथातुच्छतपः सिद्धिफलं प्रभो ।
किमियं राक्षसी माया स्वप्नो वा सम्प्रदृश्यते ॥ १७ ॥२५

किमसम्भाव्यमेतन्मे दृश्यते पुरतः प्रभो ।
कथं जीवेयमद्येश पश्यन्तीदृग्विधां तव ॥ १८ ॥

कस्ते मारयिता वीर भवेऽस्मिन् सचराचरे ।
किमकस्मादिदं जातं विपरीततमं प्रभो ॥ १९ ॥

इत्यादि विलपन्तीं तां रावणस्याथ चेटिकाः ।
राक्षस्यो वीतकरुणा वोधयन्ति स्म जानकीम् ॥ २० ॥

किं विलप्यातिमात्रं ते भूतं तु ननु भावि यत ।
वृथा शोकेन किं चेतः खेदयस्यब्जलोचने ॥ २१ ॥

निवारयतमां तन्वि वाष्पाणि परितो मुखम् ।
पूर्णेन्दुसुन्दरं ह्येतद् ग्लपयन्ति निरर्थकम् ॥ २२ ॥

प्रसीद लङ्कानाथस्य नूनमूर्द्धाङ्गिनी भव ।
प्रणिपातपरोऽयं ते त्रैलोक्येशो दशाननः ॥ २३ ॥

स्वर्गादुत्पाड्य वीरेण रोपितानां निजाङ्गणे ।
कल्पद्रुमाणां छायासु विहरानेन भामिनि ॥ २४ ॥

नमदिन्द्रादिदेवौघ शिखामणिमरीचिभिः ।
नीराजिताङ्घ्रिपद्मस्य तस्य त्वं महिषी भव ॥ २५ ॥

१-१ नास्ति-बड़ो० ।

नित्यं परिचरन्तु त्वां शयनासनभुक्तिषु ।
बन्दीकृत्य समानीता वीरेन्द्रेण सुराङ्गनाः ॥ २६ ॥

त्वादृशी रूपसर्वस्वशालिनी मधुरस्मिता ।
किमेदं खिद्यते तन्वि स्वल्पेनानेन हेतुना ॥ २७ ॥

मर्त्यः सोऽपि तयोदग्धस्तमेनमनुशोचसि ।
हेलाजितयमो भोगी हृदि नानीयते कथम् ॥ २८ ॥

त्रैलोक्यवर्तिवीरेन्द्रः स्वर्लक्ष्मीभोगभाजनम् ।
वाञ्छति त्वां दशमुखः किं सौभाग्यमतः परम् ॥ २९ ॥

पश्येमे शिरसी कृत्ते पतिदेवरयोस्तव ।
अधुनापि पतित्वेन वृणुष्वैनं दशाननम् ॥ ३० ॥

निवारयैनं निष्प्रतिभं वितथक्लेशदायिनम् ।
भजस्वाम्भोजनयने प्रेम्णा दशमुखं पतिम् ॥ ३१ ॥

अथ न स्वेच्छया चेत्त्वं वरमेनमुपैष्यसि ।
बलान्नेयासि तत्पार्श्वं भग्नमाना निशाचरैः ॥ ३२ ॥

यावत्प्रसीदेद्भ्रुवती स्वयमेवास्य भुक्तये ।
केशेष्वाकृष्य गृह्णाति न तावन्मानदः प्रभुः ॥ ३३ ॥

अपि त्वहिरहेणैष चिरात् सीदति भामिनि ।
त्रैलोक्यराज्येऽप्यलसः शय्यामालिङ्ग्य संस्थितः ॥ ३४ ॥

नयते यमिनीः कृच्छ्रादतनुज्वरपीडितः ।
तवाधरसुधापानसोत्कण्ठो दशकन्धरः ॥ ३५ ॥

प्रेम्णा समुपसन्नास्ताः स्वर्लोकवरयोषितः ।
नेक्षते त्वद्वियोगार्तिभग्नचेता दशाननः ॥ ३६ ॥

निवेदितान् प्रतीहारैर्नमतो राक्षसेश्वरान् ।
दृक्प्रसादैर्न गृह्णाति त्वद्गृहीतमना असौ ॥ ३७ ॥

नान्यां पश्यति नो वक्ति न शृणोति न गच्छति ।
न प्रशंसति लङ्केशस्त्वन्मात्रनिहिताशयः ॥ ३८ ॥

हरिचन्दनच्छायासु संस्थितश्चन्दनानिलैः ।
वीज्यमानोऽपि नो शैत्यं याति त्वद्विरहानले ॥ ३९ ॥

स्वर्गाङ्गनागणस्थोऽपि रमते न तरामसौ ।
सीते त्वन्नयनालोकसाभिलाषतमान्तरः ॥ ४० ॥

वर्तनावर्तनैरेष शय्याः पद्मदलास्तृताः ।
मृद्नाति शतशो रात्रौ महासंतापशोषितः ॥ ४१ ॥

त्रैलोक्यराज्यलक्ष्मीस्तं न मोदयति सम्प्रति ।
त्वां विना पद्मपत्राक्षि भजमानाप्यनादृता ॥ ४२ ॥

इति दशमुखपक्षस्थायिरात्रिंचरीणां वचनरचनयासौ संततं बोध्यमाना ।
सरुषमरुणनेत्राधोमुखीभूय तस्थौ प्रतिवचनमलब्धानादृतास्ताश्च जग्मुः ॥ ४३ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे राक्षसीजनकृत सीताप्रबोधनो नाम सप्तदशाधिकद्विशततमोऽध्यायः ॥ २१७ ॥

*

अष्टादशाधिकद्विशततमोऽध्यायः

ब्रह्मोवाच

अथ तां त्रिजटा नाम राक्षसी करुणाशया ।
शोकादसून्मुमुक्षन्तीमिदं वचनमब्रवीत् ॥ १ ॥

त्रिजटोवाच

अये विदेहतनये रामपत्नि सतीवरे ।
त्यज मोहमिम सीते राक्षस्या घोरमायया ॥ २ ॥

लङ्काधिपतिनाऽऽज्ञप्तो मायावी कोऽपि राक्षसः ।
इदं ते दर्शयामास त्रासार्थं मस्तकद्वयम् ॥ ३ ॥

न मोहेन त्यज प्राणान् सुखेन किल जीवतः ।
दीर्घायुषौ धृतक्षेमौ चिरं ते पतिदेवरौ ॥ ४ ॥

कपिकुञ्जरसेनाभिर्महतीभिः समायुतः ।
लङ्काया हृदयं रुद्ध्वा स्थितस्ते पतिरूर्जितः ॥ ५ ॥

तस्यानुजः स सौमित्रिः क्रोधादरुणलोचनः ।
आस्ते रावणवंशस्य छेदाय विहितोद्यमः ॥ ६ ॥

स्वल्पैरेव दिनै स्तौ तु सकुटुम्बं दशाननम् ।
यमलोकातिथिं कृत्वा यास्यतस्तव दृक्पथम् ॥ ७ ॥

मा शुचः संनतापाङ्गि सुखं प्राप्स्यसि नो चिरात् ।
आयातस्ते पतिः साध्वि रावणान्तकरोऽधुना ॥ ८ ॥

इति त्रिजटया देवी शान्तिनीता वचोऽमृतैः ।
उवाच तामथो रामवियोगानलतापिता ॥ ९ ॥

सीदामि त्रिजटे दृग्भ्यां पश्यन्ती वृत्तमीदृशम् ।
दह्यन्ते मे त्वचोऽङ्गानि विगलन्तीव सम्प्रति ॥ १० ॥

सत्यं किमाह भवती मत्प्राणपरिरक्षिका ।
निर्मञ्छ्यामि ते वाचि स्वात्मानं त्रिजटेऽधुना ॥ ११ ॥

राक्षसानां कुले धन्या सम्प्रजाता भवादृशी ।
या मां रक्षति वर्षन्ती वचःपीयूषमाननात् ॥ १२ ॥

ददामि किमहं तेऽद्य मातर्मत्प्राणरक्षिके ।
ध्रुवं तव करिष्यामि प्रशंसां प्रियसन्निधौ ॥ १३ ॥

दास्यति त्वेष वीरेन्द्रस्तवाभीष्टानि भूरिशः ।
यैरुपेता भवे मातर्भवती भास्यतेतराम् ॥ १४ ॥

भूयः सौख्यं शुभं पुण्यं स्वर्गं मोक्षं तथेप्सितम् ।
सम्पादयिष्यतितरां रघुवंशशिरोमणिः ॥ १५ ॥

अद्य मे राक्षसीं मायां पश्यन्त्यास्त्रिजटेऽधुना ।
असवो निर्गतप्राया भवत्या परिरक्षिताः । १६ ॥

इयति राक्षसबर्बुरकानने त्वमभवास्त्रिदशद्रुमवल्लरी ।
मदसुरक्षणकर्मविचक्षणा विजयसे निरुपाधिकृपानिधिः ॥ १७ ॥

इति प्रसादपीयूषैः संसिच्य त्रिजटां सती ।
तूष्णीमास तथा भूयो विमोहीकृतमानसा ॥ १८ ॥

अथाश्रौषीन्महारावं रक्षोवानरसैन्ययोः ।
दोर्दण्डचण्डनिर्घातमन्योन्यं युद्धयमानयोः ॥ १९ ॥

तमाकर्ण्याब्रवीद्भूयस्त्रिजटामेव जानकी ।
क एष श्रूयते शब्दः कल्पान्तघनघर्घरः ॥ २० ॥

मथ्यमानस्य पाथोधेरिव तूर्णमुदित्वरः ।
अनेन त्रिजटे घोरसंरावेण बिभेम्यहम् ॥ २१ ॥

तामुवाचाथ त्रिजटा बिभ्यतीं जनकात्मजाम् ।
कपिराक्षससैन्यानामेष संयुध्यतां रवः ॥ २२ ॥
निर्दिष्टानि दशास्येन रक्षांसि कपिकुञ्जरैः ।
यूथशो मुष्टिनिर्घातैर्युध्यन्ते देवि सम्प्रति ॥ २३ ॥

सीतोवाच

प्रवृत्त एव त्रिजटे कलहः कपिरक्षसाम् ।
दशाननस्य दुर्बुद्ध्या बहुवीरक्षयंकरः ॥ २४ ॥

त्रिजटोवाच

तूनं प्रवृत्तः कलहः कपीनां निशाचराणां च महान् स एषः ।
अन्योन्यदोर्दण्डबलाभिमानाद् घ्नतामिहान्योन्यचमूभटौघान् ॥ २५ ॥

सीतोवाच

एतद्युद्धमपूर्वकौतुककरं पत्या रघूणां मम
प्राणेशेन सहान्वितस्य बलिनो दुष्टस्य लङ्केशितुः ।
त्वं ब्रूहि त्रिजटे ममान्तिकगता दिव्यां दृशं ते ददे
साक्षात्कृत्यतयोपवर्णय मम श्रोतुं स्पृहा वर्त्तते ॥ २६ ॥

भर्तुर्यच्चरितं रणाङ्गणगतस्यामानुषं धन्विनः
सौमित्रेरपि यद्भवेद्धनुमतः पत्युः कपीनामपि ।
यन्नीलस्य नलस्य वालितनयस्यर्क्षेशितुश्चापि यत्
तत्सर्वं सह राक्षसै रणमुखे मह्यं सखि श्रावयः ॥ २७ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे कपिरक्षःसंग्रामोपक्रमो नामाष्टादशाधिकद्विशततमोऽध्यायः ॥ २१८ ।

*

एकोनविंशाधिकद्विशततमोऽध्यायः

ब्रह्मोवाच

इत्थं सीतासमापृष्टा राक्षसी त्रिजटाह्वया ।
साक्षात्कृत्याब्रवीत् सर्वं रामरावणसंयुगम् ॥ १ ॥

त्रिजटोवाच

माघशुक्लतृतीयातो रक्षोराघवसैन्ययोः ।
वैशाखकृष्णभूतान्तमेतद्युद्धं भविष्यति ॥ २ ॥

तत्तेऽहं कथयिष्यामि जानकि श्रूयतां त्वया ।
यद्यस्य यत्र चरितं तत्र तत्तस्य वर्णये ॥ ३ ॥

रामबाहुबलोत्सिक्ताः कपिवीरा महोद्भटाः ।
लङ्केशदोर्बलोत्सिक्तैर्युध्यते पश्य राक्षसैः ॥ ४ ॥

अमी मदोद्धता वीराः कपयः प्रहरन्त्यमून् ।
शिलाभिर्भूरुहैश्चापि राक्षसान् प्रहृतान् पुरा ॥ ५ ॥

वृष्टिः कपिकरोन्मुक्ता ग्राववृक्षमयी घना ।
पतत्यस्त्रपदेहेषु मेघवृष्टिरिवाद्रिषु ॥ ६ ॥

छन्ना एव कपिव्रातै राक्षसाग्रावभूरुहैः ।
दृष्ट्वा दृष्ट्वातिशोकार्ता राक्षस्योऽप्यरुदन्ति हि ॥ ७ ॥

अहो बलं कपीन्द्राणां येषां करचपेटया ।
पतन्ति राक्षसा युद्धे महापर्वतसम्मिताः ॥ ८ ॥

एकैको वानरो वीर एकैकं रजनीचरम् ।
अयोधयद्रणे घोरे कुर्वाणो भूरिविक्रमम् ॥ ९ ॥

सेनाधिपतयः सर्वे रामस्यातिबलोर्जिताः ।
कपियूथान् प्रेरयन्तो गर्जन्ति बहुशो रणे ॥ १० ॥

मुष्टीमुष्टियुताः केचिद् वृक्षावृक्षि परे युताः ।
शिलाशिलियुताश्चान्ये राक्षसैः सह वानराः ॥ ११ ॥

हस्ताहस्ति परे युक्ताः पादापादि तथा परे ।
दन्तादन्ति युताश्चान्ये नखानखि परे युताः ॥ १२ ॥

राक्षसैः सह युद्धयन्ते वानराः सुमहोद्धताः ।
गर्जन्तश्चैव धावन्तः कुर्वन्तो घोरविक्रमान् ॥ १३ ॥

आबद्धभ्रुकुटीतरङ्गविकटा विस्फारभीमानना
रक्ताक्षाः करपाददन्तनखरक्रूरप्रहारोद्धुराः ।
गर्जन्तः समराङ्गणे किलकिलाशब्दैर्भृशं दारुणै-
र्युध्यन्ते रजनीचरैः कपिभटा आबद्धकक्षोटकाः ॥ १४ ॥

पेतुर्भुवि कपीन्द्राणां प्रहारैरतिदारुणैः ।
वमन्तो रौधिरां धारां मुखेभ्यो रजनीचराः ॥ १५ ॥

मुष्टि प्रहारैः कठिनै रक्षसां घोरकर्मणाम् ।
पतन्ति कपयोऽप्याजौ युद्धयन्ते पुनरुत्थिताः ॥ १६ ॥

निपोथयन्ति रक्षांसि समरे कपिसैनिकान् ।
तद् दृष्ट्वा चापरे कोरा न क्षमन्ते कपीश्वराः ॥ १७ ॥

प्रेरितस्वस्वयूथाश्च युध्यन्ते कपियूथपाः ।
नानाविधैः प्रहरणैः शिलावृक्षनखादिभिः ॥ १८ ॥

राक्षसैर्युध्यमानानां कपीनां सम्प्रहारजः ।
सुमहानारवो युद्धं व्याप्नोति धरणीं नभः ॥ १९ ॥

मृगेन्द्राः किं नु गर्जन्ति गह्वरेषु महीभृताम् ।
प्रलयाम्भोधरघटा घोषयन्त्यथ वा दिशः ॥ २० ॥

देवदानवयुद्धोत्थः सुमहानारवः किमु ।
अन्योन्यं किं नु संघट्टो गिरीणां घर्घरायते ॥ २१ ॥

किं वा देवासुरैर्युक्तैर्मथ्यते जलधिः पुनः ।
दीर्यते वाथ धरणिर्नृसिंहो वापिगर्जति ॥ २२ ॥

इत्थमाशङ्कमानानां जगतां विस्मयोऽभवत् ।
कपीन्द्रेषु च रक्षःसु प्रहरत्सु परस्परम् ॥ २३ ॥

रक्षसां विक्रमं दृष्ट्वा सुग्रीवः कपिसैन्यराट् ।
शिलावृक्षप्रहारौघैर्युध्यते घोरविक्रमः ॥ २४ ॥

हनूमान् घनवद्गर्जन् रक्षोयूथेषु रोषणः ।
पपात वज्रसम्पातचपेटापातभीषणः ॥ २५ ॥

प्रहरत्यद्रिभिस्तुङ्गैरद्रितुल्यान् निशाचरान् ।
ते तत्प्रहारविध्वस्ता निपेतुः शतशो रणे ॥ २६ ॥

हनूमतः प्रहारेण विक्षताङ्गा निशाचराः ।
क्षरन्तो रौधिरीर्धाराः सांध्यमेघा इवारुणाः ॥ २७ ॥

बभ्रमुः समरे भूयः सृजन्तो घोरमारवम् ।
केचिन्मूर्छायिताः पेतुर्धरण्यां पर्वतोपमाः ॥ २८ ॥

राक्षसाः केऽपिनिहता नलेन बलशालिना ।
छादयन्तो महीपृष्ठं निपेतुर्निद्रिता इव ॥ २९ ॥

नीलदोर्वेगचलितशिलावृक्षप्रहारजैः ।
आघातैः पतिताः केचिदपुनर्जागरा रणे ॥ ३० ॥

करप्रहारैर्बलिनो वालिपुत्रस्य राक्षसाः ।
वमन्तो रुधिरं युद्धे निपेतुर्धरणीतले ॥ ३१ ॥

प्रहारैरुन्मुखकपे राक्षसाः पर्वतोपमाः ।
शिश्यिरे धरणीपृष्ठमालिङ्ग्य गतजीविताः । ३२ ॥

द्विविदस्य कपीशस्य पाणिपादनिपोथनैः ।
संत्यक्तजीविताः केचित्स्वपन्ति धरणीतले ॥ ३३ ॥

ऋक्षेशोबलवांस्तत्र वृद्धो युद्धविशारदः ।
राक्षसान् सुबहून् युद्धे पातयामास विक्रमी ॥ ३४ ॥

स्वयूथ्यान् बलिनः शूरान् प्रेरयन्नृक्षपुङ्गवान् ।
समरे शुशुभेचासौ कालमेघ इवोन्नतः ॥ ३५ ॥

पाणिपादप्रहारैश्च जाम्बवान् सम्मुखागतान् ।
अपुनर्योधिनश्चक्रे बलिनो रजनीचरान् ॥ ३६ ॥

एवं सप्तदिनान्यासीद्रक्षोवानरसैन्ययोः ।
अतीव संकुलं युद्धं सुघोरं रोमहर्षणम् ॥ ३७ ॥

तस्मिन् रणेऽतितुमुले त्रिजगद्विस्मयावहे ।
रक्षोभिर्वानरैश्चैव भूमिरातस्तरेतराम् ॥ ३८ ॥

संत्यक्त मृत्युभव भूरिभियो गृहीतस्वामिव्रताः कपिभटा युधि गर्जमाना ।
चक्रुर्निशाचरचमूकदनं समंतात्ते पाणिपादनखदन्तभवैः प्रहारैः ॥ ३९ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे रक्षोवानरसैन्य-संग्रामो नामैकोनविंशाधिकद्विशततमोऽध्यायः ॥ २१९ ॥

*

विंशाधिकद्विशततमोऽध्यायः

ब्रह्मोवाच

वर्णितं त्रिजटयैतदाहवं राक्षसौघकपिसंघयोर्मिथः ।
संनिशम्य जनकात्मजा मुहुस्तामथो वचनमेतदब्रवीत् ॥ १ ॥

सीतोवाच

अस्मिन् घोरतमे युद्धे वीरेन्द्रः प्राणवल्लभः ।
चकार सानुजो यत्तन्मह्यं समुपवर्णय ॥ २ ॥

त्रिजटोवाच

वीक्ष्य विक्रमतो युद्धे कपिवीरान् महोत्कटान् ।
आस्फाल्य धनुषी तत्र वीरेन्द्रावभितस्थतुः ॥ ३ ॥

पश्य रामधनुर्मुक्तैर्वाणैः सान्द्रनिपातिभिः ।
भिद्यन्ते रक्षसां यूथाः शलभा इव कण्टकैः ॥ ४ ॥

एकैको विशिखस्तस्य शतशः शतशो रणे ।
निर्भिद्यराक्षसानीकं निपातयति भूतले ॥ ५ ॥

रामवाणबलोद्रिक्ताः कपयो रजनीचरैः ।
युध्यन्ते समरे धीरं भक्ष्येरन्नन्यथा न किम् ॥ ६ ॥

भ्रातरौ रघुकुलाद्रि भास्करौ प्रावृषेण्यघनसुन्दराबुभौ ।
आत्तघोरतरकार्मुकौ रणे राक्षसान् क्षपयत शरोत्करैः ॥ ७ ॥

प्रेषिता दशवक्त्रेण येऽसंख्याता निशाचराः ।
ते रामवाणनिर्दग्धाः शेरते धरणीतले ॥ ८ ॥

रघुवीरवरेण्याभ्यां विशिखानलकीलया ।
रक्षसां कदनं चक्रे तदालोक्य दशाननः ॥ ९ ॥

चुक्रुधे तनयं स्वं च मेघनादं समादिशत् ।
पश्येन्द्रजिदनेनाद्य हन्यन्ते मम राक्षसाः ॥ १० ॥

भवता क्षम्यते किं नु मर्त्यः सोऽप्येष तापसः ।
गच्छाशु धनुरादाय विक्रमं स्वं प्रदर्शय ॥ ११ ॥

त्वयि जाग्रति रे पुत्र वरिष्ठेऽखिलधन्विनाम् ।
किमेष कुरुते मर्त्यो वैयात्यं नामदुर्नयम् ॥ १२ ॥

तदेनं जहि युद्धेऽस्मिन् सुघोरैर्निजमार्गणैः ।
यैस्त्वया समरे पुत्र वासवोऽपि विनिर्जिताः ॥ १३ ॥

जानामि नितरां पुत्र भवांल्लज्जायते न किम् ।
अस्मिन् वानरसंदोहबहुले संयुगेऽधमे ॥ १४ ॥

तथाप्ययं मर्त्यमात्रो लघीयान् रिपुरूर्जितः ।
मूढो मामपि लोकेऽस्मिन्नजानन्नतिवर्त्तते ॥ १५ ॥

अतस्त्वमेनं दर्पान्धं कपिराजबलोर्जितम् ।
निजदोर्दण्डवीर्येण जहि शक्रबलार्दन ॥ १६ ॥

अल्पवीर्यानिमान् कीशान् दर्पात्प्रोच्छलतो लघून् ।
महता शरजालेन रुन्धि भोः शफरानिव ॥ १७ ॥

यावन्न तापसावेतौ रक्षसां कदनोद्यतौ ।
भवता न निवार्येते तावच्छाम्यन्ति नो इमे ॥ १८ ॥

कपयो बद्धकक्षोटामल्ला इव मदोद्धताः ।
निशाचरैर्युध्यमाना दुर्विनीताः सहस्रशः ॥ १९ ॥

इति पितुर्वचनेन स नोदितस्त्रिदशराज जयोर्जितमानसः ।
सपदि पाणिगृहीत धनुर्धरः कटिनिबद्धनिषंगयुगोययौ ॥ २० ॥

तमनुप्रययुः क्रुद्धा नानाशास्त्रास्त्रपाणयः ।
राक्षसाः कलिताटोपा गर्जमानाः सहस्रशः ॥ २१ ॥

योद्धुं युधि क्षपितराक्षसयूथपेन रामेण निर्गतवतीन्द्रजिति प्रसह्य ।
रात्रिंचरा मदविघूर्णितलोहिताक्षाः सर्वे जितं जितमिति प्रसभं जगर्जुः ॥ २२ ॥

अथ राक्षसयूथेषु पणवानकगोमुखाः ।
भेरीदुन्दुभिढक्काद्या अवाद्यन्त समंततः ॥ २३ ॥

तूर्यत्रिकभवो घोषः कल्पान्तघनघर्घरः ।
व्यानशे रक्षसां सैन्ये धरणीगगनान्तरम् ॥ २४ ॥

पुरोगास्तस्य बलिनो राक्षसाः सुमहोद्धताः ।
शस्त्राण्यस्त्राणि चात्यन्तं वर्षन्तः सुसमाययुः ॥ २५ ॥

गदाभिमुशलैः शूलैः शक्तिभिश्चपरश्वधैः ।
भुशुण्डीभिश्च परिघैर्मुद्गरैरसिपट्टिशैः ॥ २६ ॥

समंताच्छादयामासुर्विक्रमाढ्या निशाचराः ।
तान्यस्त्राणि च शस्त्राणि राक्षसानां प्रगर्जताम् ॥ २७ ॥

समंतात्पतमानानि वीक्ष्य वानरसैनिकाः ।
तत्रसुर्हृदयैराशु तुमुले रणदुर्दिने ॥ २८ ॥

लीलयैव तु चिच्छेद रामो निजशरोत्करैः ।
ततः क्रुद्धाः खड्गहस्ता निपेतुः कौणपव्रजाः ॥ २९ ॥

स तानायततो वीक्ष्य खड्गहस्तान् निशाचरान् ।
चिच्छेद रामो विशिखैर्वज्रसम्पातदारुणैः ॥ ३० ॥

शायिताः कोटिशस्तेन प्रोत्पतन्ती निशाचराः ।
रामेणैकैकबाणेन छित्त्वा छित्त्वा रणाङ्गणे ॥ ३१ ॥

अथ चुक्रोध बलवान् मेघनादो धनुर्धरः ।
रामबाहुबलेनोच्चैर्वीक्ष्य विक्रमतः कपीन् ॥ ३२ ॥

रणाङ्गणगतो वीरो मेघगम्भीरगर्जनः ।
अधिज्यं धनुरादाय लक्ष्य दृक् संहिताशुगः ॥ ३३ ॥

इदमूचे महादर्पः क्रोधेन प्रज्वलन्निव ।
शृण्वत्सु वीरयूथेषु मध्यस्थः सेनयोर्द्वयोः ॥ ३४ ॥

रे रे नितान्तचपलाः कपयो लघुविग्रहाः ।
सुखं विक्रमता वध्या यूयं ननु मया रणे ॥ ३५ ॥

क्षुद्रास्त्यजत संत्रासं सुखं प्रोच्छलतोच्चकैः ।
न मच्छरेभ्यस्तीक्ष्णेभ्यो युष्माकं भयमण्वपि ॥ ३६ ॥

अमीषां कपिदेहेषु पततां महती त्रपा ।
येषां प्रमत्तशक्रेभकुम्भनिर्दारणं लघु ॥ ३७ ॥

ससुरासुरमर्त्येषु जगत्सु ननु रेऽल्पकाः ।
को मद्बाणप्रहरणं सोढुं शक्तो भवेत्पुमान् ॥ ३८ ॥

अमीभिर्वज्रसम्पातभीषणैर्मम मार्गणैः ।
विबुधाधिपतेर्वीर्यं मया प्रमथितं रणे ॥ ३९ ॥

अलं तवापि सौमित्रे भिया मम शरोत्करैः ।
भवानापि न मद्बाहुदण्डविक्रमभाजनम् ॥ ४० ॥

अत्यर्थमभ्युपेतोऽस्मि योद्धुं रामेण तन्वहम् ।
भ्रूभङ्गलीलया येन निबद्धः पयसां निधिः ॥ ४१ ॥

अथवा किं निबद्धेन सिन्धुना जलरूपिणा ।
तीक्ष्णाः खलु ममोद्दण्डदोर्दण्डविशिखानलाः ॥ ४२ ॥

इत्युक्त्वा युधि कर्णान्तकुण्डलीकृतकार्मुकः ।
राघवेन्द्रमभिक्रुद्धो मुमोच विशिखान् दश ॥ ४३ ॥

तानापतत एवाशु रामो निजमहेषुणा ।
चकर्त्त ते च नभसि द्विधाभूता पराययुः ॥ ४४ ॥

ततस्तयोस्तिग्मतरप्रहारिणोः परस्परं [1]घोरतरेरणाजिरे ।
महेन्द्रजिद्राघवयोः शरोत्करैर्बभूवयुद्धं तुमुलं जयैषिणोः ॥ ४५ ॥

रामस्य विशिखान् यावन्मेघनादो निकृन्तति ।
तावत्सौमित्रिराकर्णाकृष्टात्यायतकार्मुकः ॥ ४६ ॥

अताडययमुं घोरैर्मार्गणैस्तनुमर्मसु ।
ततोऽसौ चुक्रुधे वीरो लक्ष्मणायात्तधन्वने ॥ ४७ ॥

द्वाभ्यां द्वाभ्यां शराभ्यां तौ ताडयामास मर्मणि ।
रामस्तावपि चिच्छेद लक्ष्मणश्चैतदन्तरे ॥ ४८ ॥

अताडयत्तं विशिखैः सुघोरैर्मर्मपातिभिः ।
ततः स आह संक्रुद्धो युद्धि क्रूरतरं वचः ॥ ४९ ॥

हे राम हे लक्ष्मणो नैवमेतद्युक्तं रणेऽस्मिन् युवयोर्नयोद्रितम् ।
यदेक एवाहमिषुप्रयोगैर्युध्यामि चान्योन्यबलाश्रयौ युवाम् ॥ ५० ॥

नैतद्वीरस्य संश्लाघ्यं युवाभ्यां क्रियते रणम् ।
इति श्रुत्वा रघुश्रेष्ठः सौमित्रिमिदमब्रवीत् ॥ ५१ ॥

अन्यतो युध्यतां वीर भवानहमिहामुना ।
एक एव करिष्यामि युद्धं वीरवरोचितम् ॥ ५२ ॥

ततश्च लक्ष्मणो वीर आज्ञप्तः स्वामिना तथा ।
अन्यानेव प्रचिच्छेद शरैः कौणपयूथपान् ॥ ५३ ॥

आर्यस्य पार्श्वगः क्रूरान् बलादापततोऽस्रपान् ।
चिच्छेदैकैकबाणेन शतशः शतशो रणे ॥ ५४ ॥

सम्पूर्णं नवमीदिनं समभवद् युद्धं महासंकुलं
वीरेणेन्द्रजिता रघुप्रवरयोस्तत्पृष्ठगैश्चास्त्रपैः ।
तत्राधिज्यधनुर्धरेण बलिना सौमित्रिणा कोटिशो
बाणैरेव हता निशाचरवराः क्षोणीतले शिश्यिरे ॥ ५५ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे रामलक्ष्मणेन्द्र-जित्संग्रामो नाम विंशाधिकद्विशततमोऽध्यायः ॥ २२० ॥

---

१. घोरतरं प्रगर्जतोः—मथु० ।

एकविंशाधिकद्विशततमोऽध्यायः

ब्रह्मोवाच

अथास्तमगमद् भानुस्तयोः समिति राक्षसैः ।
युध्यतोर्वर्षतोर्बाणान् रामलक्ष्मणवीरयोः ॥ १ ॥

ततो रात्रिरमूच्छुक्लनवमी चन्द्ररश्मिभिः ।
प्रकाशमाना तौ तस्यां युयुधाते निशाचरैः ॥ २ ॥

भ्रातरौ सज्यधनुषौ भूरिसंरम्भभीषणौ ।
प्रहरन्तौ [1]शरैस्तीक्ष्णैः पातयन्तौ च राक्षसान् ॥ ३ ॥

रामस्य धनुरुन्मुक्तैः सायकैरतिदारुणैः ।
इन्द्रजिच्छिन्नभिन्नाङ्गो विरराम न संयुगात् ॥ ४ ॥

सौमित्रिणा शरव्रातैः पतितान् युधि कोटिशः ।
संवीक्ष्य राक्षसान् भूमौ मेघनादश्चुकोप ह ॥ ५ ॥

क्षरद्रुधिरदिग्धाङ्गैराक्रोशद्भिः समंततः ।
उत्पतद्भिः पतद्भिश्च भ्रमद्भिः क्षतवेदनैः ॥ ६ ॥

जवनिर्यत्सरिद्वारिनादिप्रवहदस्त्रकैः ।
भूरेणुभूरिदिग्धाङ्गैः कण्ठोद्यच्छासनिःस्वनैः ॥ ७ ॥

एकबाह्वक्षिचरणैर्द्विधाभूतैः क्षतार्दितैः ।
अधोनिपतितैः कैश्चिदुद्बाहुभिरुदङ्घ्रिभिः ॥ ८ ॥

आघूर्णमाननतनुभिर्विपर्यस्तैश्च कैश्चन ।
उड्डीनपाददोःशीर्षैर्मध्यमात्रावशेषितैः ॥ ९ ॥

विदीर्णमस्तकैः कैश्चिद्विदीर्णहृदयैरपि ।
विदीर्णोदरकोष्ठैश्च निर्गतान्त्रकदम्बकैः ॥ १० ॥

कैश्चिद्विधाभूतभालैः शरप्रोतेश्च कैश्चन ।
कैश्चिद्ध्वस्त कपालैश्च रणतल्पावलम्बिभिः ॥ ११ ॥

भांकाररावकण्ठैश्च कैश्चिदस्वस्थशायिभिः ।
शिवागणोत्कृत्तमांसैर्विचेष्ट[2]द्भिरितस्ततः ॥ १२ ॥

विकीर्णचिकुरैः कैश्चिद् घूर्णमानविलोचनैः ।
आतस्तरे मही कृत्स्ना सौमित्रिशरताडितैः ॥ १३ ॥

दशकन्धरपुत्रस्य पुरोगैः पार्ष्णिगैरपि ।
रक्षोभिः समरोत्साहसमायातैः सहस्रशः ॥ १४ ॥

---

१. घोरैः—मथु० ।

२. स्तरद्भिः शोणिताम्भसि—मथु० ।

चन्द्रज्योत्स्नावलक्षायां निशि प्रेतनिशाचरान् ।
विचिन्वन्तः पिवन्तश्च शोणितं पिशिताशनाः ॥ १५ ॥

जत्कुर्वन्तश्च संतृप्ताः शोणितार्द्रैः शिरोगणैः ।
गुंफन्तोऽत्रगुणोतैर्मुण्डमालाः सहस्रशः ॥ १६ ॥

चण्डीरुद्रगणास्तत्र विचेरुर्घोरनिःस्वनाः ।
रामलक्ष्मणयोः श्रेय आशिषाना समंततः ॥ १७ ॥

चर्वयन्त्यो मृदून्यस्थीन्यश्नन्त्यः पिशितानि च ।
पिबन्त्यो रौधिरीर्धाराः कण्ठेभ्यो रात्रिचारिणाम् ॥ १८ ॥

सद्यः सौमित्रिविशिखैर्निकृत्तेभ्यः कवोष्णिकाः ।
उद्गारयन्त्योऽसृक् शेषं विचेरुः शतशः शिवाः ॥ १९ ॥

एवं घोरे रणे वृत्ते राक्षसौघक्षयंकरे ।
कपिसैन्योत्साहकरे रामलक्ष्मणदोर्बलात् ॥ २० ॥

क्रोधाक्तरक्तनयनः शक्रजिन्निशि विक्रमन् ।
हतदर्पोययौ लङ्कां मोहितो रामविक्रमैः ॥ २१ ॥

[1]पुनरागत्य दुर्वृत्तः समरे क्रोधमूर्छितः ।
चकार सुमहत्कर्म वीरविस्मयकारकम्[1] ॥ २२ ॥

नागपाशैर्बबन्धाजौ सुदृढं मन्त्रवित्तमः ।
कपीन्द्रांश्चापि सुग्रीवनलनीलाङ्गदादिकान् ॥ २३ ॥

तस्यमन्त्रप्रभावेण महामायाविनो रणे ।
बद्धौ तौ भ्रातरौ घोरैर्नागपाशैः समन्ततः ॥ २४ ॥

बद्धानि कपि सैन्यानि युद्धयमानानि राक्षसैः ।
बभूवुस्तत्क्षणादेव निश्चेष्टानि महानिशि ॥ २५ ॥

सुप्तप्रायं तु तत्सैन्यं रामस्य परितोऽखिलम् ।
विलोक्य राक्षसाः सर्वे हृदा मुमुदिरेतराम् ॥ २६ ॥

तैस्तैर्महाविषज्वाला विषमैर्घोरफूत्कृतैः ।
फणिभिः कालमेघाभैरुत्फणैरतिभीषणैः ॥ २७ ॥

विषाग्निविष्फुलिङ्गौघान् मुञ्चद्भिर्लोचनाध्वना ।
प्रचण्डपवनाटोपं सृजद्भिः सुमहाजवैः ॥ २८ ॥

बल्लिभिः कालसूत्राभैः क्रूरदंष्ट्राङ्कुरोद्भटैः ।
ललत्सुघोररसनैर्वमद्भिर्गरलोत्करान् ॥ २९ ॥

सहस्रधा च शतधा वेष्टितैर्भीमचेष्टितैः ।
कालाञ्जनचयप्रख्यैः शिरोमणिविभूषणैः ॥ ३० ॥

१-१ नास्ति-बड़ो० ।

तस्यमन्त्रबलाद्भूतैर्मेघनादस्य मायिनः ।
नागैर्नानाविधैः स्थूलैः फणामण्डलराजिभिः ॥ ३१ ॥

नागपाशवतावद्धा रामलक्ष्मणसैनिकाः ।
निपेतुर्धरणीपृष्ठे निश्चेष्टा मूर्च्छिता इव ॥ ३२ ॥
स्वयं च सुमहावीरौ युद्धन्तावेव तत्क्षणात् ।
नागपाशैः समावद्धौ पेततुर्धरणीतले ॥ ३३ ॥
अथेन्द्रजिन्मुदायुक्तो वीक्ष्य तादृग्विषधांश्चतान् ।
उवाचोद्धतया वाचा राक्षसान् पार्श्ववर्तिनः ॥३४॥
अहो रे राक्षसास्त्रस्तानेतान् परिपश्यत ।
हस्तग्राह्यशिरोवेष्टान् निश्चेष्टान् पतितान् रणे ॥ ३५ ॥

पश्यतामुं रघुपतिं रामं भुवि सहानुजम् ।
पतितं नागपाशौर्घैर्निबद्धं दृढबन्धनैः ॥ ३६ ॥
अशक्तं चेष्टितुमपि हस्तात्स्खलितकार्मुकम् ।
बहवो मे हता आभ्यां राक्षसा समराङ्गणे ॥ ३७ ॥
इदानीं क्वानयोर्वीर्यं दोर्बलं क्व च विक्रमः ।
मर्त्यौ भूत्वा मया साकं स्पर्द्धमान इमां दशाम् ॥ ३८ ॥
प्राप्तोऽसौ पश्यतरणे पतितं गतचेष्टितम् ।
अमी कपिभटाः सर्वे पतिता धरणीतले ॥ ३९ ॥
मूर्छिता इव निश्चेष्टा नागपाशैर्दृढं सिताः ।
विक्रमं पश्यतामीषामिदानीं दोर्बलं च तत् ॥ ४० ॥
मया सह धृतस्पर्द्धाः प्राप्नुवन्तीदृशीं दशाम् ।
किमत्रचित्रं त्रैलोक्ये एकवीरोऽस्म्यहं यतः ॥ ४१ ॥

को मे प्रतिभटो लोके कृत्स्नेऽस्मिन् सचराचरे ।
अवस्थां पश्यतामीषां पतितानां रणाङ्गणे ॥ ४२ ॥

एवं वदति सोत्साहं मेघनादे मुदान्विते ।
उदस्थाज्जयनिर्घोषो निशाचरचमूगतः ॥ ४३ ॥

भेरीदुन्दुभिनिःसानपटहानकगोमुखैः ।
शङ्खतूर्यमृदंगाद्यैर्निशाचरकराहतैः ॥ ४४ ॥

समभूद्भूरिनिर्घोषो जयवादित्रसम्भवः ।
जितं जितमिति स्वैरं राक्षसाः समवादिषुः ॥ ४५ ॥

ततो जयोत्साहविवृद्धमानसः समुत्क्षिपन् बाहुयुगं मदेन सः ।
सुरेन्द्रजिद्रात्रिचरैः [1]सुहर्षितैर्विवेश लङ्काधिपतेर्निकेतनम् ॥ ४६ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे नागपाश-बन्धनो नामैकविंशाधिकद्विशततमोऽध्यायः ॥ २२१ ॥

---

१. रभिष्टुतो—मथु० ।

द्वाविंशाधिकद्विशततमोऽध्यायः

ब्रह्मोवाच

अथ सस्मार भगवान् नरलीलाकुतूहली ।
नागान्तकरणं तार्क्ष्यं बलिनं निजवाहनम् ।। १ ।।

तस्मिन्नेवान्तरे धाता नागारिमिदमादिशत् ।
गच्छे नागान्तकेदानीं तूर्णं मद्वचसेरितः ।। २ ।।

रामरावणयोर्युद्धं यत्र रामो रघूद्वहः ।
नागपाशैः समावद्धो मेघनादेन संयुगे ।। ३ ।।

सानुजो धरणौ शेते नरलीलाकुतूहली ।
कपिसैन्यं च निखिलं निश्चेष्टं मूर्छितोपमम् ।। ४ ।।

नागपाशैर्दृढं बद्धं शेतेऽद्य धरणीतले ।
तद्वीक्ष्य राक्षसाः सर्वे गर्जन्ति मुदिताशयाः ।। ५ ।।

कत्थ ते विक्रमं स्वस्य शक्रजित्सुरतापनः ।
हाहाभूतं च भुवनं रामस्यालोक्य तां दशाम् ।। ६ ।।

जयाशा सकलैस्त्यक्ता ये के च सुरपक्षगाः ।
व्यामोह इव संजातः सर्वेषां त्रिदिवौकसाम् ।। ७ ।।

रामे रघुकुलाधीशे श्रुतिगोद्विजरक्षके ।
मूर्छिते पतिते भूमौ नागपाशौघवेष्टिते ।। ८ ।।

जयाशा यत्र देवानां दशास्यापहृतश्रियाम् ।
एकबाणजितानेकसहस्रबलराक्षसे ।। ९ ।।

स चेत्तादृग् दशां प्राप्तः कोऽन्यो जेष्यति रावणम् ।
त्रैलोक्यकण्टकं दुष्टं श्रुतिगोद्विजतापिनम् ।। १० ।।

अस्वस्थमिव मन्योऽद्य त्रैलोक्यमतिखिद्यते ।
भवानपि प्रभुं तादृग्दशंनैव सहिष्यति ।। ११ ।।

अतः प्रयाहि त्वरितं यत्र रामो जगत्पतिः ।
तत्क्षणाद् दृष्टिमात्रेण नागपाशान्निवारय ।। १२ ।।

तव पक्षोद्भवं वातमाकर्ण्य भुजगाः किल ।
तत्क्षणात्तूर्णमुड्डीय गमिष्यन्ति न संशयः ।। १३ ।।

इति स ब्रह्मणोवाक्यमाकर्ण्य पतगाधिपः ।
आययौ त्वरितं तत्र यत्र रामो रणाङ्गणे ।। १४ ।।

आयातमात्रे गरुडे नागान्तकरणोद्धते ।
चण्डपक्षयुगोद्भूतमरुदावर्त्तभीषणे ॥ १५ ॥

तत्क्षणाद् दुःसहा नागाः पाशवत्यरिवेष्टिताः ।
प्रोड्डीय प्रसभं जग्मुरुत्तस्थौ च रघूद्वहः ॥ १६ ॥

सानुजः सहसैन्यश्च धूतनिद्र इवोत्स्थितः ।
ततः किलकिलाशब्दं कृत्वा कपिमहाभटाः ॥ १७ ॥

उत्तस्थुः शत्रुसैन्यानां वितन्वन्तो महाभयम् ।
रामस्ताक्ष्यं पुरो वीक्ष्य भक्तिप्रह्वशिरोधरम् ॥ १८ ॥

प्रसादपरमो देवो दृष्ट्वा समनुतोषयन् ।
इदमाह स विश्वात्मा विनिबद्धाञ्जलीपुटम् ॥ १९ ॥

साधु भोः पतगोत्तंस स्वस्त्यस्तु तव संततम् ।
मुक्ताःस्म नागपाशेभ्यस्त्वदागमनमात्रतः ॥ २० ॥

कृतं च वीर भवता देवकार्यमिदं महत् ।
कृतं साधुतमं ह्यद्य स्मृतमात्रो यदागतः ॥ २१ ॥

इति लब्धप्रसादोऽसौ तमाह जगदीश्वरम् ।
जानामि त्वां जगन्नाथ साक्षात्पुरुषमव्ययम् ॥
नारायणं रमाकान्तं भूभारहृतिहेतवे ॥ २२ ॥

अवतीर्णं रघोर्वंशे नरलीलानुकारिणम् ।
या याः करोषि भगवन् लीला इह मनोहराः ॥ २३ ॥

तासां तत्त्वं प्रविज्ञातुं कः शक्नोति पुमान् भुवि ।
स्वस्वरूपं स्वलीलाश्च वेत्तुमेको भवान् प्रभो ॥ २४ ॥

आद्याचित्प्रकृतिर्यास्ति स्वरूपानन्दविग्रहा ।
सैव ते जानकी सीता माया त्रैलोक्यकारिणी ॥ २५ ॥

तया त्वं भगवन्नित्यं स्वप्नेऽपि न वियुज्यसे ।
लीलामात्रं तु भवतो भूभारहरणाय तत् ॥ २६ ॥

जहि त्वरितमेवामुं दुष्टं त्रैलोक्यकण्टकम् ।
श्रुतिगोद्विजधर्मघ्ननिधानं दशकन्धरम् ॥ २७ ॥

उपसंहर विश्वेश राक्षसान् प्रबलानिमान् ।
भूभारभूतान् दुःसत्त्वान् धनुर्मुक्तैर्महेषुभिः ॥ २८ ॥

हर वीरेन्द्र साधूनां भक्तानां च महद्भयम् ।
स्वीयां प्रकृतिमास्थाय रमस्व करुणानिधे ॥ २९ ॥

रक्ष धर्मपथं वीर यत्र देवाः प्रतिष्ठिताः ।
अविलम्बितमेवैतत्समापय महद्रणम् ॥ ३० ॥

उच्चैरभिष्टुत्य स इत्थमेनं मुहुः प्रणम्य प्रणतां सयुग्मः ।
बद्धाञ्जलिस्तेन पुनर्विसृष्टो जगामधामस्वमथो खगेन्द्रः ॥ ३१ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे मेघनादपराजयो नाम द्वाविंशाधिकद्विशततमोऽध्यायः ॥ २२२ ॥

*

त्रयोविंशाधिकद्विशततमोऽध्यायः

ब्रह्मोवाच

हृतदर्पो मेघनादो जगाम दशमीदिने ।
वासस्थानमगद्रामो मुदितो वानरैः सह ॥ १ ॥

कुर्वन् किलकिलारावं शत्रूणां हृद्विभेदनम् ।
आस्फोटयंश्च दोर्दण्डान् सोत्साहमुखपङ्कजः ॥ २ ॥

अग्रतः कपिसैन्यस्य हनुमान् सुमहाबलः ।
सुग्रीवश्च नलो नीलस्तथा वालिसुतो बली ॥ ३ ॥

आजग्मुः कपयः सर्वे स्वस्वावासस्थलीं प्रति ।
निर्मुक्तकवचो राम उपसंहृतकार्मुकः ॥ ४ ॥

स्नात्वा नित्यक्रियां कृत्वा देवर्षिपितृतर्पणम् ।
विधाय श्रद्धया युक्तो धर्मसीमाभिरक्षकः ॥ ५ ॥

ददौ दानानि विप्रेभ्यो गोभूमिकनकादिकम् ।
इत्थं युद्धावहारोऽभूदेकादश्यां द्वयोरपि ॥ ६ ॥

सर्वे हरेर्व्रतं चक्रुर्वैष्णवाः कपिसैनिकाः ।
जाम्बवांश्चापि धर्मात्मा भक्तिमांश्च विभीषणः ॥ ७ ॥

सीतारामचन्द्रौदेवौ सम्पूज्य सुसमाहिताः ।
तुलसीं चापि सम्पूज्य तत्पत्रैश्च सीतापतिम् ॥ ८ ॥

शङ्खघण्टादिनिर्घोषैरारात्रिकपुरःसरम् ।
कथयन्तो रामकथां जन्मकर्मादि निर्मलम् ॥ ९ ॥

रात्रौ जागरणं चक्रुः समवेताः परस्परम् ।
तदोपसृत्य सुग्रीवो रामं त्रिभुवनेश्वरम् ॥ १० ॥

इदमूचे विनीतात्मा कपीनां शृण्वतां सुधीः ।
रघुदेव सुराराध्यचरणद्वन्द्वपादुक ॥ ११ ॥

अमीषां स्वस्वसैन्येषु पृथगाज्ञारवं जनाः ।
घोषयन्ति जयादौ वा शपथे वा नयादिषु ॥ १२ ॥

नैतद्युक्तं जगन्नाथ भवानेकोयदीश्वरः ।
सर्वेषामपि सैन्यानां तदेते सर्वदा जनाः ॥ १३ ॥

तवाज्ञां घोषयन्त्वद्धा दण्ड्या इतरथा यदि ।
शृण्वन्त्वेतेऽखिलानाथ यूथपालाः समंततः ॥ १४ ॥

वदन्त्वेते जनान् स्वान् स्वान् हितमेतदृतः परम् ।
सुग्रीवस्य वचः श्रुत्वा न्याय्यमेतन्मनोरमम् ॥ १५ ॥

सर्वेऽपिकपिसामन्ताः साधु साध्वित्यपूजयन् ।
अनुमत्य तथोवाच राक्षसेन्द्रो विभीषणः ॥ १६ ॥

साधूक्तं कपिशार्दूल सर्वेषां नो हितावहम् ।
कस्याज्ञा घोष्यतां सैन्ये रघुनाथं प्रभुं विना ॥ १७ ॥

सर्वे पृथक् पृथगिह सामन्ताः सन्ति कोटिशः ।
तेषामेकः प्रभुरसौ रामो यो जगतः प्रभुः ॥ १८ ॥

मह्यं लङ्कामुना दत्ता वदान्य गणमौलिना ।
किमहं घोषयिष्यामि स्वाज्ञां तत्र विमूढधीः ॥ १९ ॥

मत्प्रभोरेव रामस्य नित्यमाज्ञा भविष्यति ।
जगत्त्रयेऽपि यस्याज्ञा तस्याज्ञात्रापि मे शुभा ॥ २० ॥

इत्युक्त्वा राक्षसेन्द्रे तु तूष्णीं भूते कपीश्वरः ।
सुग्रीवः परिपप्रच्छ कौतुकान् संशयं त्विमम् ॥ २१ ॥

राम राम महाबाहो वदान्यानां सुरद्रुम ।
निजपाणितलच्छाया रक्षिताशेषविष्टपः ॥ २२ ॥

विभीषणाय वीरेन्द्र लङ्का दत्ता त्वया ध्रुवम् ।
न तत्र मम संदेहो यद्भवान् सर्वशक्तिभृत् ॥ २३ ॥

एकस्तु मम सन्देहस्तं भवान् छेत्तुमर्हति ।
यदि जातु विनीतात्मा लङ्केशो दशकन्धरः ॥ २४ ॥

यायात्ते शरणं देव शरणागतरक्षिणः ।
तत् किमस्मै भवान् दद्यादस्य मे कथयोत्तरम् ॥ २५ ॥

इत्युक्तः कपिराजेन रघुदेव उवाच तम् ।
अविचार्यैव सपदि स्मितद्योतितदिङ्मुखः ॥ २६ ॥

यदि मां शरणं यायात्सुग्रीव दशकन्धरः ।
अस्ति मे तर्हि साकेतपुरी याप्रतिमा भुवि ॥ २७ ॥

तामहं सहसा दद्यां तस्मै शरणमीयुषे ।
इति श्रुत्वा वचस्तस्य वदान्यानां शिरोमणेः ॥ २८ ॥

सर्वेऽपि विस्मिताः सन्तो धन्यं धन्यमुदब्रुवन् ।
इत्थं तेस्तैर्वाग्विनोदैस्तद्दिनं तैः समापितम् ॥ २९ ॥

अपरेद्युः समुत्थाय सर्वे कृत्वा यथोचितम् ।
आजग्मुः समरोद्युक्ताः सुघोरां रणभूमिकाम् ॥ ३० ॥

पटहान् गोमुखांश्चैव वादयन्तो रणोन्मुखाः ।
युक्ताः सर्वे कपिभटा राक्षसैः सह संयुगे ॥ ३१ ॥

सानुजो राघवेन्द्रः स्वमास्फाल्य कठिनं धनुः ।
बाणैर्वह्निशिखाकारै रक्षो बलमदाह्वयत् ॥ ३२ ॥

पुरस्तात्कपिसैन्यस्य हनुमान् रक्तलोचनः ।
सिंहनादं विधायोच्चैर्युक्तवान् युधि राक्षसैः ॥ ३३ ॥

तस्य नादेन वित्रस्ताः केचिद्राक्षससैनिकाः ।
पलायाञ्चक्रिरेतूर्णं संत्यज्य समराङ्गणम् ॥ ३४ ॥

केचिच्च रक्षसां मुख्या वीर्यवन्तो दुरासदाः ।
आययुः सम्मुखे तस्य कपिवीरस्य गर्जतः ॥ ३५ ॥

गदापाणय आकृष्ट धनुर्ज्यामुक्तमार्गणाः ।
आकृष्टखड्गाः परशुहस्ताः शूलकराः परे ॥ ३६ ॥

नानाविधप्रहरणा नानाविक्रमशालिनः ।
लङ्केशस्याज्ञया वीराः प्राणान् हुत्वा युधि स्थिताः ॥ ३७ ॥

दर्शयन्तो विक्रमं स्वं परस्परमसूयया ।
निपेतुः कपिसैन्येषु वायुपुत्रो रुरोध तान् ॥ ३८ ॥

वेलेव यवनोदीर्णान् जलधेः पयसां भरान् ।
समेत्य तेऽतिबलिनो मारुतिं समवेष्टयन् ॥ ३९ ॥

स तान् पादप्रहारेण पाणिक्षेपैर्विपोथनैः ।
प्रसह्याक्रमणैश्चैव ममर्द रजनीचरान् ॥ ४० ॥

तेषां मुख्यः कोऽपि धूम्राक्षनामा घोराकारो राक्षसः क्रूरकर्मा ।
आकृष्टासिर्वेगवान् धावमानो युद्धायागाद्धनुमन्तं बलाढ्यः ॥ ४१ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे धूम्राक्षागमनो नाम त्रयोविंशाधिकद्विशततमोऽध्यायः ॥ २२३ ॥

*

चतुर्विंशाधिकद्विशततमोऽध्यायः

ब्रह्मोवाच

आजुहाव हनूमन्तं युद्धे धूम्राक्षराक्षसः ।
अरे रे कपिपोत त्वं मदेनोदीर्णमानसः ॥ १ ॥

उत्प्लुत्योत्प्लुत्य समरे कदर्थयसि राक्षसान् ।
न मे प्रतिबलो योद्धुं लघीयान् विक्रमोद्यतः ॥ २ ॥

तथापि स्वामिना तेन लङ्केशेन महौजसा ।
योद्धुं नियुक्तो लघुभिर्भवद्भिः कपिसैनिकैः ॥ ३ ॥

सोऽहं त्वाद्य हनिष्यामि दर्पोद्धतमनारतम् ।
उत्प्लुवन्तं रणभुवि भुजङ्ग इव दर्दुरम् ॥ ४ ॥

अस्थाने संनियुक्ताः स्मो वयं वीरा निशाचराः ।
किं कुर्मः सम्प्रति कपे भर्तुराज्ञा गरीयसी ॥ ५ ॥

वयं जयेम युष्मांश्चेत् का नः श्लाघा महीयसाम् ।
यैः समुत्पाटिता दन्ताः क्रोधाद्दिग्दन्तिनामपि ॥ ६ ॥

पराजीयेमहि पुनर्युष्माभिर्लघुमात्रकैः ।
तदा त्वतीव नो हानिर्वीर्यस्य यशसस्तथा ॥ ७ ॥

तथाप्यागच्छ युद्धेय त्वयाहं भर्त्तुराज्ञया ।
प्रसह्य च नयामि त्वामचिराद्यमशासनम् ॥ ८ ॥

इत्युदीर्य स धावित्वा प्रजहारासिना दृढम् ।
हनूमन्तं हृदि रणे वज्रेणेव गिरिं वृषा ॥ ९ ॥

पुष्पप्रहारवच्चास्य स प्रहारोऽतिदारुणः ।
अभवद्राक्षसकरप्रेरितासिसमुद्भवः ॥ १० ॥

ततश्च चुक्षुभेरोषाद् धूम्राक्षो नाम राक्षसः ।
पुनरुत्तोल्य तं खड्गं प्रहर्त्तुं तमधावत ॥ ११ ॥

स च पाणितलोत्क्षेप सम्भवाद् दृढघाततः ।
तमसिं पातयामास हनूमान् रक्षसः करात् ॥ १२ ॥

पपात बज्रवन्मेघादवनीं कम्पयन्नसिः ।
राक्षसः पतितेखड्गे लज्जमानमना अभूत् ॥ १३ ॥

ततस्त्रिशूलमादाय तं प्रहर्तुमधावत ।
बलादाच्छिद्य तद्धस्ताद्धनुमान् दूरमक्षिपत् ॥ १४ ॥

ततः स क्रोधताम्राक्षो मुष्टिमुद्यम्यमारुतिम् ।
वक्षसि प्रजहारोच्चैर्जगर्ज च यदोद्धुरः ।। १५ ।।

अभून्मुष्टिप्रहारोत्थो वज्रनिर्घोषदारुणः ।
त्रुट्यन्महीध्रशिखरस्येवातिविषमोरवः ।। १६ ।।

न विव्यथे च हनुमान् स तेनाण्वपि मुष्टिना ।
पुनरुद्यम्य दोर्दण्डं धूम्राक्षो रोषसंयुतः ।। १७ ।।

यावत्तं प्रहरेदुच्चैर्वज्रतुल्येन मुष्टिना ।
तावत्स्वयं मरुत्सूनुर्मुष्टिमावध्य सत्वरम् ।। १८ ।।

प्रजहारास्य शिरसि गिरिकूटसमुन्नते ।
तेनास्य शतधा शीर्षं छिन्नभिन्नमिवाभवत् ।। १९ ।।

मुष्टिप्रहारविध्वस्तशिरा रुधिरमुद्वमन् ।
स पपात महीपृष्ठे धूम्राक्षो नाम राक्षसः ।। २० ।।

चालयन्नवनीं कृत्स्नां साब्धिद्वीपां सपर्वताम् ।
तस्मिन्निपतिते भूमौ राक्षसास्तस्य पृष्ठगाः ।। २१ ।।

शस्त्राण्यादाय शतशो हनूमन्तमभिद्रुताः ।
तानेष बलवान् वीरो मरुत्पुत्रो रणे स्थिरः ।। २२ ।।

कांश्चिन्मुष्टिप्रहारेण कांश्चित्पादप्रहारतः ।
कांश्चित् परस्परशिरोघट्टनस्फोटनक्रमात् ।। २३ ।।

कांश्चिद्विपोथनैः पद्भ्यां कांश्चिदाक्रमणेन च ।
कांश्चित्पदा समाक्रम्य गाढं तच्चरणौ बली ।। २४ ।।

हस्तेन मत्तगजवद्द्विधा कृत्वा व्यपाटयत् ।
निनाय कालनगरीं राक्षसानखिलानपि ।। २५ ।।

अथ तेन त्रयोदश्यां चक्रनामा निशाचरः ।
योद्धुं बाहुबलोत्क्षिप्तो रणाङ्गणमुपाययौ ।। २६ ।।

ध्रुवं तमप्येष बली हनूमांश्चिरेण वीरं युधि योधयित्वा ।
एकं समाक्रम्य पदा द्वितीयं विपाटयामास पदं कराभ्याम् ।। २७ ।।

तत्पृष्ठगा ये च मदाभिनद्धाः पतङ्गवत्तं प्रसभं समीयुः ।
तानप्यसौ मल्ल इवातिवीर्यो निपातयामास वियोध्य भूमौ ।। २८ ।।

ये शस्त्र हस्तास्तमभिप्रयाता रणाङ्गणे रात्रिचराः सहस्रम् ।
तानेष कृत्वा प्रसभं विशस्त्रान्निपातयामास चपेटपातैः ।। २९ ।।

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे धूम्राक्षचक्रवधो नाम चतुर्विंशाधिकद्विशततमोऽध्यायः ।। २२४ ।।

पञ्चविंशाधिकद्विशततमोऽध्यायः

ब्रह्मोवाच

अथ भूतादिनाम्नीलः प्रहस्तं वासरैस्त्रिभिः ।
विक्रमन्तं रणो घोरमवधीन्मल्लयुद्धकृत् ॥ १ ॥

इत्थं विक्रमतो वीक्ष्य कपीन् रक्षःक्षयंकरान् ।
महाबलो दशमुखः स्वयं योद्धुमुपागमत् ॥ २ ॥

तस्मिन् विनिःसृते योद्धुं लङ्कातो भूरिराक्षसैः ।
पुरोगैः पृष्ठगैश्चापि सार्द्धं बहुमदोद्धते ॥ ३ ॥

जयनिःसानपटहभेरीदुन्दुभिगोमुखैः ।
समभूत् काहलः शब्दो व्याप्नुवन् रोदसी दिशः ॥ ४ ॥

स दधद्विंशतिं दोष्णां महाधन्वा महाबलः ।
पङ्क्त्या शिरोभिः शैलस्य कूटैरिव भयानकः ॥ ५ ॥

क्रोधादग्निकणान् मुञ्चन् विंशत्यालोचनैरपि ।
कम्पयन् धरणीं कृत्स्नां पादन्यासैर्मदोद्धतः ॥ ६ ॥

शस्त्रास्त्रमन्त्रनिपुणो हेलानिर्जितवासवः ।
मेघनिर्घोषया वाचा तत्तत्स्थानेषु राक्षसान् ॥ ७ ॥

आज्ञया स्थापयन् क्रुद्धः सामन्तांश्च च भूपतीन् ।
प्रसभं निर्दिशन् युद्धे स्थेमानमपलायनम् ॥ ८ ॥

इदमूचे महावीर्यो नगरान्निःसृतो बहिः ।
अहो रे राक्षसभटा अद्याहं योद्धुमुद्यतः ॥ ९ ॥

ममाप्रतिबलेनापि रामेण युधितिष्ठता ।
अहो मेघातिता येन बहवो राक्षसा भटाः ॥ १० ॥

अतो द्रष्टव्य एवायं मया समिति राघवः ।
बद्धो येन च पाथोधिर्दृशा कोपकषायया ॥ ११ ॥

तमहं विशिखैरद्य मम बाहुबलेरितैः ।
सर्वथा छिन्नभिन्नाङ्गं दर्शयिष्यामि रक्षसाम् ॥ १२ ॥

अद्य पश्यत मे बाहुबलं तस्मिन् विघातके ।
अथवा किं बलेनास्मिन् मर्त्यमात्रे लघीयसि ॥ १३ ॥

आनेष्यामि जवाद्वद्ध्वा तमहं शरजालगम् ।
इत्थं विकत्थमानोऽसौ निश्चक्राम पुराद्बहिः ॥ १४ ॥

सहैव रक्षसां यूथैर्नानाशस्त्रास्त्रपाणिभिः ।
जयनिर्घोषसहितो नानाशस्त्रास्त्रसंयुतः ॥ १५ ॥

स आगत्य रणेऽतिष्ठत् कपिसैन्यैर्निरीक्षितः ।
दशभिः शिखैर्युक्तो महानद्रिरिवोन्नतः ॥ १६ ॥

दोर्दण्डनिबहोद्भूतसरलद्रुमदण्डभृत् ।
विभ्रद्दृष्टीस्त्विषा दीप्ता ज्वलन्तीरोषधीरिव ॥ १७ ॥

उत्तुङ्गस्कन्धकूटोच्चः पादशैलभयानकः ।
उरःपृथुशिलाशाली पृष्ठाधित्यकयाञ्चितः ॥ १८ ॥

मुखनासाश्रुतिदरीगह्वरद्वारभीषणः ।
अदृश्यत रणे साक्षाद्भीमकर्मा दशाननः ॥ १९ ॥

तं वीक्ष्य केचित् कपयो वित्रस्ता इव तत्क्षणात् ।
विस्मिताश्चा भवन् केचिदहो एष स रावणः ॥ २० ॥

भीताः केचिच्चापरितो दिङ्मुखेषु पलायितुम् ।
समादधौ तानाश्वास्य भगवान् रघुपुङ्गवः ॥ २१ ॥

अहो अस्मान्न भेतव्यं दुःसत्त्वान्मे महाभटाः ।
मयि तिष्ठति संग्रामे का वो भीतिरितो भवेत् ॥ २२ ॥

पश्यतैनं रणमुखाद् द्रावयामि शरैरहम् ।
बाणैर्वह्निशिखादीप्तैर्नासौ स्थास्यति मत्पुरः ॥ २३ ॥

इत्युक्ताः कपयो रामवीरेण धृतधन्वना ।
समाहितान्तराः सर्वे तस्थुर्युधि रिपोः पुरः ॥ २४ ॥

सोऽभिवीक्ष्य रणे रामं तिष्ठन्तं सज्यकार्मुकम् ।
मुमोच वीरः पञ्चभ्यो धनुर्भ्यः पञ्चसायकान् ॥ २५ ॥

सतानापततो घोरान् पञ्चभिः सायकैर्निजैः ।
चकर्त्त मध्येगगनं तदद्भुतमिवाभवत् ॥ २६ ॥

भूयो मुमोच रघुपेसायकान् दशकन्धरः ।
तानप्यसौ द्विधा चक्रे मध्येमार्गं निजैः शरैः ॥ २७ ॥

इत्थं स तेन बलिना विनि[1]र्मुक्ताञ्छरोत्करान् ।
बिभेद सायकैस्तीक्ष्णैस्ततश्चुक्रोध रावणः ॥ २८ ॥

---

१. मुक्तान् मुक्तान्–मथु० ।

राक्षस्या मायया भूत्वा शतधा च सहस्रधा ।
आवृणोत् परितो रामं मायावी राक्षसेश्वरः ॥ २९ ॥

ववर्ष च शरव्रातान् सानुजे रघुपुङ्गवे ।
महानीलगिरौ वारिवृष्ठीरिव पुरन्दरः ॥ ३० ॥

जवेन शरवृष्टिं तां रामो निर्धूय सायकैः ।
उदस्थाद्भानुमालीव रश्मिवृन्दैः कुहेलिकाम् ॥ ३१ ॥

स शरैस्ताडयामास यावत्प्रतिकृतिद्विषम् ।
रावणस्तं चाभ्यवर्षच्छतधा च सहस्रधा ॥ ३२ ॥

ततस्तयोरभूद् युद्धं तुमुलं रोमहर्षणम् ।
पश्यद्विबुधगन्धर्वनरविस्मयवर्धनम् ॥ ३३ ॥

यावद्दिनत्रयं निर्यन्निरन्तरशरोत्करम् ।
शिञ्जमानधनुर्जीवारवपूरितदिङ्मुखम् ॥ ३४ ॥

आच्छादितनभोभूमिपथं घोरतरारवम् ।
अन्योन्यजयवाञ्छाढ्यं मेघयोरिव गर्जतोः ॥ ३५ ॥

उभयोर्धनुषी ते तु मण्डलाकारतां गते ।
सृजन्ती इव दृश्येते निरन्तरशरोत्कारान् ॥ ३६ ॥

तूणात् समभ्युद्धरणं रोपणं चापि धन्वनि ।
क्षेपणं लक्ष्यहननं पुनरुद्धरणं तथा ॥ ३७ ॥

बह्वीरपि क्रिया राम एकरूपा व्यदर्शयत् ।
रक्षोधिपोऽपि समरे तद्वद्विक्रममातनोत् ॥ ३८ ॥

चतुर्थीदिवसे रामो रावणस्य निजेषुणा ।
धनुर्मौर्वीं बभञ्जाजौ सोऽन्यांधनुषि संदधे ॥ ३९ ॥

ततो मौर्वीं धनुश्चापि तस्य रामो व्यखण्डयत् ।
शरेणैकेन चान्येन मध्यशीर्षावतंसकम् ॥ ४० ॥

ततः स क्षुब्धहृदयो धनुरन्यदुपाददे ।
ततः करान् सधनुषः समाहत्य दृढैः शरैः ॥ ४१ ॥

धनूंषि पातयामास करेभ्यस्तस्य राघवः ।
एकेन चातिगाढेन शरेणोरस्यताडयत् ॥ ४२ ॥

स शरस्तस्य हृदयं प्रविवेश जवेरितः ।
अपसारयितुं तस्मान्मोहमानमदानिवः ॥ ४३ ॥

पपौ च रुधिरं तत्र ततो मूर्छामवापसः ।
पुनश्चैतन्यमासाद्य घूर्णमानः स संयुगे ।। ४४ ।।

भुशुण्डीं प्राहिणोद् रामे ज्वलन्तीं तडिदुज्ज्वलाम् ।
तामप्यर्धपथप्राप्तां चकर्त्त रघुपुङ्गवः ।। ४५ ।।

शतधा निजबाणेन ततः शक्तिं मुमोच सः ।
तामप्यस्य द्विधा मध्येव्योमाभिमुखपातुकीम् ।। ४६ ।।

ततः खड्गांश्च मुशलान् मुद्गरप्रासतोमरान् ।
शक्तीः परश्वधाञ्छूलान् परिघान् कुन्तपट्टिशान् ।। ४७ ।।

मुमोच घोरमायावी परितो रघुपुङ्गवे ।
अप्राप्तानेव तान् रामः शस्त्रपूगान् सहस्रशः ।। ४८ ।।

सहमध्यधनुर्मुक्तैर्निजबाणैरखण्डयत् ।
रामस्य मार्गणैरित्थं शस्त्रास्त्राणि च विद्विषः ।। ४९ ।।

परायेतुर्निकृन्तानि तमेव समताडयन् ।
ततो वह्निशिखादीप्तैर्बाणैर्बाहुजवेरितैः ।। ५० ।।

जघान रावणं रामस्तेषु चैकेन वक्षसि ।
दशभिश्च भ्रुवोर्मध्ये दशभिश्चिबुकेषु च ।। ५१ ।।

दशभिश्चास्य दीप्तानि चूडारत्नान्यपाहरत् ।
शराणां विंशतिं चास्य दोर्मूलेषु सवर्मसु ।। ५२ ।।

निचखान रघुश्रेष्ठस्तत्क्षणात् करलाघवात् ।
प्रक्षरद्रुधिरौघोऽसौ प्रत्यङ्गक्षतविक्षतः ।। ५३ ।।

महेन्द्रवज्रप्रहतस्खलद्धातुरिवाचलः ।
आघूर्णमानो भूयस्या शरवेदनया खलः ।। ५४ ।।

न स्थातुमशकत्तत्र पुरो रामस्य संयुगे ।
ताड्यमानस्ततश्चासून् समादाय त्वरान्वितः ।। ५५ ।।

स्रवद्रुधिरदिग्धाङ्गः पलायत रणाङ्गणात् ।
ततो जयजपेत्युच्चैः कपयो राममब्रुवन् ।। ५६ ।।

इत्थं खलु त्रिभिरहोभिरुदग्रदर्पो लङ्केश्वरः समिति वीरवरेण तेन ।
रामेण दीप्ततरवह्निशिखोपमानैर्विद्रावितो निजशरैः समरात्सलज्जम् ।। ५७ ।।

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे रावणविद्रावणो नाम पञ्चविंशाधिकद्विशततमोऽध्यायः ।। २२५ ।।

षड्विंशाधिकद्विशततमोऽध्यायः

ब्रह्मोवाच

आरभ्य पञ्चमीं कृत्स्नां चतुर्भिर्दिवसैस्ततः ।
बोधितस्तेन निद्राणः कुम्भकर्णो निजानुजः ॥ १ ॥

तावद्युद्धावहारोऽभूद् रामरावणसेनयोः ।
यावत्प्रबोधितः कृच्छ्रात्कुम्भकर्णो महाबलः ॥ २ ॥

विद्रावितस्तु रामेण संग्रामाद् दशकन्धरः ।
व्रीडाकलङ्कितमुख इदमाह स्वसेवकान् ॥ ३ ॥

अरे रे राक्षसाः कोऽयं कालस्यैव विपर्ययः ।
उपस्थितो ममेदानीं यन्मर्त्योऽपि स तापसः ॥ ४ ॥

कपिसेनापरीवारो भ्रात्रैकेन द्वितीयवान् ।
धनुर्मात्रसहायश्च हिनस्तीहैव राक्षसान् ॥ ५ ॥

धिङ्मे बलं च वीर्यं च प्रतापोन्नतिमेव च ।
कपिभिर्वेष्टिता यस्य त्रैलोक्यजयितः पुरी ॥ ६ ॥

किमिदानीं च कर्तव्यं मम लब्धजयोन्नतेः ।
त्रैलोक्येऽप्येकवीरस्य क नु सम्भाव्यते रिपुः ॥ ७ ॥

सोऽपि मर्त्यः स चाप्येकः सोऽपि तापस वेशभृत् ।
सोऽप्यत्रैव स्थितो हन्ति पुरीपरिसरे मम ॥ ८ ॥

रक्षोयूथपतीन् वीरानसंख्यातान् दिने दिने ।
हन्ति स्वयं घातयति रक्षोवीरान् स मामकान् ॥ ९ ॥

इति चिन्तापरं नित्यं निद्रा संत्यज्य मां गता ।
अहो शेते कुम्भकर्ण इदानीमपि निद्रया ॥ १० ॥

जितः स्त्रिया चतुरया कामीव स ममानुजः ।
शेते विमूढहृदयो बाह्यं वेद न चान्तरम् ॥ ११ ॥

बोधनीयो द्रुतं यत्नैर्यथा जागर्तिसोऽधुना ।
क्षयं नीताः किलानेन तापसेन निशाचराः ॥ १२ ॥

तानेष दृष्ट्वा सपदि रुषाविष्टो भविष्यति ।
भक्षयिष्यति चा[1]प्येतौ भ्रातरौ मम विद्विषौ ॥ १३ ॥

---

१. किं नैतौ–मथु० ।

अतः प्रबोध्यतां भृत्याः कुम्भकर्णो ममानुजः ।
सुस्निग्धश्च मयि प्रेम्णा हितं मेऽद्धय करिष्यति ॥ १४ ॥

धिग् धिग्विभीषणसमं भ्रातृरूपं विरोधिनम् ।
यस्त्यजेत्संकटे प्राप्ते सम्पत्सु सह भुक्तवान् ॥ १५ ॥

नेदृशः कुम्भकर्णोऽस्ति भ्राता मेऽतिप्रियो हि सः ।
सुप्तः किल चिरेणासौ व्यप्यह्वीश्चतुर्युगीः ॥ १६ ॥

बोधनावसरे चास्मिन् बोधनीयः स राक्षसाः ।
किं त्वस्य चिरसुप्तस्य क्षुधा बह्वी भविष्यति ॥ १७ ॥

अतो भोजनसामग्री पूर्वं तस्य विधीयताम् ।
कार्यानानाविधैर्मांसै राशयः पर्वतोपमाः ॥ १८ ॥

भ्रियन्तां रुधिरौघैश्च कासारास्तस्य तुष्टये ।
कार्या नानाविधैरन्नैरामैः पक्वैश्च राशयः ॥ १९ ॥

पूर्यन्तां वापिकाः कूपाः सरस्यो विविधै रसैः ।
घृतैरिक्षुरसैः प्राज्यैर्माक्षिकैर्मधुभिस्तथा ॥ २० ॥

दधिदुग्धसुराद्यैश्च मांसाक्तैश्च तथा रसैः ।
कुण्डानि परिपूर्यन्तां तस्य वीरस्य तुष्टये ॥ २१ ॥

नानाविधा चोत्कटा च तस्य कादम्बरी सुरा ।
प्रवाह्यतां नदीरूपा यां पीत्वा स सुखी भवेत् ॥ २२ ॥

दृष्ट्वा स तत्क्षणादेतद् बालभोगं करिष्यति ।
ततो माध्याह्निकीं बेलां प्राप्यान्यद्भोक्ष्यते बहु ॥ २३ ॥

इदं सद्यो हिमद्राक्ष्यात्पूर्वमेव विधीयताम् ।
अन्यथा सोऽतिक्षुधिताश्चिरेण परिनिद्रितः ॥ २४ ॥

अदृष्टभक्ष्यसम्भारः क्षुब्धचित्तो भविष्यति ।
भक्षणं हि वृतं तेन त्रैलोक्यस्य विधेः पुरा ॥ २५ ॥

ततो विरञ्चिर्भगवांश्चिन्तयाह सरस्वतीम् ।
वरकालेऽस्य वदनं त्वं देवि प्रविश ध्रुवम् ॥ २६ ॥

नो चैन्मत्तो लब्धवरस्त्रैलोक्यं भक्षयेदयम् ।
सरस्वती विधेर्वाक्याद्विवेशास्य मुखं तदा ॥ २७ ॥

भक्षयिष्यामीति न स स्वप्स्यामीत्यवृणोद्विषिः ।
तदारभ्य स्वपित्येष मत्तोऽप्यधिकविक्रमः ॥ २८ ॥

इति रक्षसामधिपतेर्गिरा ततो रजनीचरा विविधभोज्यसंविधाः ।
प्रविधाय पूर्वममुना यथोदिताः प्रणताः पुरोऽस्य निखिलं न्यवेदयन् ॥ २९ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे कुम्भकर्णप्रबोधनाज्ञायनो नाम षड्विंशाधिकद्विशततमोऽध्यायः ॥ २२६ ॥

सप्तविंशाधिकद्विशततमोऽध्यायः

राक्षसा ऊचु

यथैव भवतादिष्टं तथास्माभिः कृतं प्रभो ।
विहिता भोज्यसम्भाराः कुम्भकर्णस्य भुक्तये ॥ १ ॥

आमैः पक्वैश्च पललैः कृता दशमहीधराः ।
अन्नैर्नानाविधैः पक्वैरामैश्च विहिता दश ॥ २ ॥

तिलैर्मुद्गैस्तण्डुलैश्च कृताः कूटाः पृथक् पृथक् ।
पत्रैः शाकैः फलैश्चैव विहिता राशयो दश ॥ ३ ॥

रसालजम्बूपनस वदरामलकेङ्गुदैः ।
फलैःर्नाना विधैः स्निग्धैर्मधुरै राशयः कृताः ॥ ४ ॥

रोटिकापूपद्विदलशष्कुलीतण्डुलादिभिः ।
पृथक् पृथक्कृतास्तत्र राशयो रक्षसां पतेः ॥ ५ ॥

घृताक्तैः शर्करापूर्णैर्दधिदक्षीरमधूक्षितैः ।
पायसैराज्यसंयुक्तैः शर्करापूरपूरितैः ॥ ६ ॥

असंख्यातानि कुण्डानि पूर्णानि सुमहांति च ।
दधिमध्वाज्यपूर्णानि कुण्डानि च पृथक् पृथक् ॥ ७ ॥

तद्वदिक्षुरसैर्गाढमावर्त्तितपयोभरैः ।
पूर्णानि दश कुण्डानि कर्पूरैलादिवासितैः ॥ ८ ॥

माहेयैः स्वादुभिर्गाढैर्विहितानि तवाज्ञया ।
अत्युत्कटसुरास्रोतोवाहिनी च कृता सरित् ॥ ९ ॥

वाप्यश्च पशुसंदोहरुधिरैः सम्भृता भृशम् ।
गाढैः स्निग्धमयैर्हृद्यैः कृता मांसाद्रिसंनिधौ ॥ १० ॥

नानाविधाश्च सम्भारा भोज्यवस्तूपकल्पिताः ।
आमोदवन्तः स्वादिष्ठा निर्मलाः सुखदाः कृताः ॥ ११ ॥

दृष्टिप्रसाददानेन तान् गृह्णातु भवान् प्रभो ।
सुखमेष्यति तान् दृष्ट्वा कुम्भकर्णस्तवानुजः ॥ १२ ॥

आदायादाय हस्तेन भोक्ष्यते च यथारुचि ।
पात्रमात्रावशिष्टांश्च करिष्यति स तत्क्षणात् ॥ १३ ॥

इति श्रुत्वा वचस्तेषां राक्षसेन्द्रो दशाननः ।
उवाच राक्षसानन्यान् सोत्साहं दशकन्धरः ॥ १४ ॥

अतः परं कुम्भकर्णं बोधयन्तु निशाचराः ।
नयन्तु तत्र करिणो महतः पर्वतोपमान् ॥ १५ ॥

स्यन्दनान् वाहनैराढ्यांस्तुरगान् वृषभानपि ।
अन्यानपि महासत्त्वांस्तैर्मर्दयत तद्वपुः ॥ १६ ॥

यथा निद्रां विहायाशु चिरात्सुप्तः स बुध्यते ।
तथा कुरुत हे प्राज्ञाः पादसंवाहनामिव ॥ १७ ॥

हृदये जानुनोर्बाह्वोरंसयोस्तस्य पीनयोः ।
मर्दनं कुरुतेतुङ्गगजेन्द्रचरणक्रमैः ॥ १८ ॥

शिलाभिः स्थूलमूलाभिर्दृढं ताडयतोरसि ।
तस्यातिपीवरे यद्वत्कन्दुकैस्तूलपूरितैः ॥ १९ ॥

इत्यादाय प्रभोराज्ञां तथा चक्रुः समेत्य ते ।
तथाप्येष्य महानिद्रश्चिरसुप्तो न बुध्यते ॥ २० ॥

प्रत्युताधिकमस्वाप्सीत्पादसंवाहनाद्यथा ।
मर्दनं तैः कृतं तस्य सुखसुप्त्यै बभूव तत् ॥ २१ ॥

आरण्यमहिषैः शृङ्गैर्दन्तिनां दन्तपातनैः ।
खुरक्षेपैस्तथाश्वानां सुखनिद्रानुकूल्यतः ॥ २२ ॥

मेने कण्डूयनमिव स किञ्चित्कोमलैर्नखैः ।
घोरघण्टानिनादेन मिश्रितः करिणां तथा ॥ २३ ॥

अश्वानां च रथानां च गच्छतां प्रतिगच्छताम् ।
नृणामालयतां चैव गम्भीरध्वनिकारिणाम् ॥ २४ ॥

स तादृकाहलः शब्दः कोलाहलरवोद्धुरः ।
नास्य निद्राविनाशाय पर्याप्तोऽप्यवपिसोऽभवत् ॥ २५ ॥

ततो लङ्केश्वराज्ञप्ता राक्षसास्तस्य कर्णयोः ।
घ्राणयोश्चापि बहुशः सत्त्वानुच्चावचानपि ॥ २६ ॥

सहस्रशो गा महिषीर्गवयाञ्छूकरान् मृगान् ।
छागीश्छागाश्च मेषाविशशमार्जारकुक्कुरान् ॥ २७ ॥

बलीमुखान् गौरखराजन्यांश्च विविधान् पशून् ।
पक्षिणः श्येनगृध्रादींश्चाषतित्तिरिवायसान् ॥ २८ ॥

विविधान् पर्वतगुहाप्रतिमेन बिलाध्वना ।
अन्तः प्रवेशयामासुः प्रविशंस्ते च सत्वरम् ॥ २९ ॥

अन्तर्यथा ब्रह्मरन्ध्रं परिप्रायुस्ततश्च ते ।
क्षुतिं संजनयामासुस्तस्य सुप्तस्य रक्षसः ॥ ३० ॥

अन्तःक्षुतिसमुद्भूतिमरुद्वेगसमाहताः ।
सर्वे ते बहिराजग्मुः पशवः पक्षिणोऽपि च ॥ ३१ ॥

तथापि न स संसुप्तः प्राबुध्यतमनागपि ।
ततस्तस्यैव वचनं सस्मार दशकन्धरः ॥ ३२ ॥

उक्तं ह्यनेनयत्पूर्वं स्वापस्यादौ महीयसः ।
अहं स्वपिमि लङ्केश लब्धनिद्रावरो विधेः ॥ ३३ ॥

नाचिरेण प्रबोधो मे भविष्यति दशाननः ।
नानाचतुर्युगीर्व्याप्य स्वप्स्यामि रहितः शुचा ॥ ३४ ॥

यदि त्वावश्यके कार्ये परिप्राप्ते तवार्यक ।
अवश्यं बोधनीयः स्यां तर्हियत्नोऽयमुच्यते ॥ ३५ ॥

दिव्याङ्गनाजनोद्गीतैः सरसैः सप्तभिः स्वरैः ।
मूर्छनाग्रामसंयुक्तैः सतालैर्नर्तनक्रमैः ॥ ३६ ॥

पादमञ्जीरमधुरझणत्कारैः सुखावहैः ।
मेखलादामझङ्कारैर्बलयानां च निक्वणैः ॥ ३७ ॥

करतालैः कांस्यतालैः क्वणन्मड्डुकझर्झरैः ।
मृदङ्गमुरजोद्घोषैर्वीणापणवमर्दलैः ॥ ३८ ॥

ध्वनद्भिः परितो नाट्यगाननृत्यमहारवैः ।
तत्क्षणान्मुक्तनिद्रः स्यां तौर्य्यात्रिकभवैरवैः ॥ ३९ ॥

शङ्खदुन्दुभिभेर्याद्यैर्वाद्यद्भिः सुमहारवैः ।
मन्द्रैस्तारैश्च निर्घोषैर्मधुरैः श्रोत्रपूरकैः ॥ ४० ॥

निद्रात्ययो मे भ्रातःस्यान्नान्यथा यत्नकोटिभिः ।
विधिनामे वरो दनो निद्रैव च वृता मया ॥ ४१ ॥

सुखं स्वप्स्यामि सततं शयनीये मनोरमे ।
उक्तस्ते बोधने यत्नोत्पाहिते कार्यं आगते ॥ ४२ ॥

त्रैलोक्यं त्वं तु निर्जित्य विधाय स्ववशे भृशम् ।
सदेवासुरगन्धर्वयक्षराक्षसमानुषम् ॥ ४३ ॥

कुरुष्व राज्यमव्यग्रः स्थितो लङ्कापुरीमधि ।
परिखायितपाथोधि हेमप्राकारदुर्गमाम् ॥ ४४ ॥

भुङ्क्ष्व भोगान् यथाकामं लभमानो महत्सुखम् ।
मां च भो अनुजानीहि चिराय सुखसुप्तये ॥ ४५ ॥

इत्युक्तं मह्यमेतेन स्मरामि प्रयतोऽधुना ।
तं करिष्यामि वै यत्नं स्वयमेवामुनोदितम् ॥ ४६ ॥

इति संचिन्त्य मनसा राक्षसान् स तथादिशत् ।
ते तदादेशमादाय तथा चक्रुर्निशाचराः ॥ ४७ ॥

गायकान्नर्तकीश्चैव वादकान् लासकानपि ।
मार्दङ्गिकान्-मौरजिकान् दुन्दुभीवादने पटून् ॥ ४८ ॥

अन्यांश्च वाद्यनिपुणान् नानाविद्याधरानपि ।
जवादाहूय तत्पार्श्वेमहोद्घोषमकारिषुः ॥ ४९ ॥

ततानां वितानां च सुषिराणां तथैव च ।
घनानां भूरिभेदानां वाद्यानां परिवाद्यताम् ॥ ५० ॥

अभूद्घोषो महास्तत्र यज्ञ शेते स राक्षसः ।
निद्राणो महतः कालात्त्रयोदश चतुर्युगीः ॥ ५१ ॥

कृच्छ्रान्निद्रां विनिर्धूय प्रोन्मीलितविलोचनः ।
जजागार क्षणो नैष कुम्भकर्णो महाबलः ॥ ५२ ॥

तमाह रावणो भूयो निमीलन्नयनालसम् ।
भ्रातर्जागृहि नो स्वापकालः सम्प्रति वर्त्तते ॥ ५३ ॥

प्राप्तोऽयं तापसः कश्चिदिह भूरिचमूवृतः ।
अहर्निशं क्षपयति राक्षसान् वाणवह्निना ॥ ५४ ॥

बहवो मे हता वीरा अनेन परिपन्थिना ।
शून्यप्रायमभूत् पश्य परितो नगरं त्विदम् ॥ ५५ ॥

कृच्छ्रेण बोधितस्त्वं तु स्मृतत्वद्वच सा मया।
किं निमीलयसे नेत्रे भूयोऽप्यलसयच्चमणी ॥ ५६ ॥

तस्मिन् प्रबुद्धमात्रे तु राक्षसानां कदम्बकाः।
जितं जितं रावणेनेत्यवोचन् वीक्ष्य शात्रवान् ॥ ५७ ॥

स रक्तनिद्रालसतुन्दिलेक्षणो विकीर्णकेशौघभयानकाननः ।
स जृम्भमामोटितदीर्घविग्रहो गिरिर्यथा तुङ्गतयोदतिष्ठत ॥ ५८ ॥

अथ क्षणेनोत्थितमात्र एष विलोक्य वीरः पुरतो दशास्यम्।
सुप्तश्चिराद्भोक्तुमना बभाषे क्षुधाकुलोऽस्मीति गभीरघोषः ॥ ५९ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे कुम्भकर्णप्रबोधो नाम सप्तविंशाधिकद्विशततमोऽध्यायः ॥ २२७ ॥

अष्टाविंशाधिकाद्विशततमोऽध्यायः

ब्रह्मोवाच

स तद्वाक्यं समाकर्ण्य कृतयत्नो दशाननः।
उवाच तं क्षुधात्यार्तं कुम्भकर्णं निजानुजम् ॥ १ ॥

चतुर्भिर्दिवसैर्वीर यत्नेन त्वं प्रबोधितः।
भक्षयैतान् भोज्यभारान् नानान्नाव्यञ्जनान्वितान् ॥ २ ॥

पश्य मांसौघकूटानि क्लृप्तानि तव तृप्तये।
अन्नराशीनिमान् पश्य पृथक्[1] सम्यग्रसान्वितान् ॥ ३ ॥

भक्ष्यचोष्यान् लेह्यपेयान् पश्य स्वादूंश्चतुर्विधान्।
इह नानाविधा भक्ष्याः शष्कुलीरोटिकादयः ॥ ४ ॥

रसा नानाविधाश्चापि दधि दुग्धं सुरामधु।
तैर्भृताः कूपिका वाप्यः सरस्योऽथापि दीर्घिकाः ॥ ५ ॥

सुखेन भक्षय भ्रातस्त्वमिमा भोज्यसंविधाः।
आपीय मदिरां घोरां मांसभारानशेषय ॥ ६ ॥

पिब रक्तमयान् कुण्डानि क्षुद्रवमयांस्तथा।
सर्वांश्च भोज्यसम्भारान् भुङ्क्ष्व भूरिमदान्वितः ॥ ७ ॥

---

१. पृथग्व्यञ्जनसंयुतान्-मथु० ।

इत्थं विनीय त्वं वीर क्षुधां सुचिरसम्भवाम् ।
जहि शत्रुन् रणे वीर स्वानां प्रमुदमावहन् ॥ ८ ॥

रणाङ्गणं त्वयि गते नूनं भक्ष्याश्च वानराः ।
[[1]तापसावपि तौ मर्त्यौ चूर्णनीयौ मदाज्ञया[1] ॥]

यौ रामलक्ष्मणावेताविति लोके श्रुतिं गतौ ॥ ९ ॥

न जानाति भवान् वीर संजातौ स्वपिति त्वयि ।
ततश्च कुम्भकर्णोऽसौ निर्दिष्टास्तेन ताः किल ॥ १० ॥

अन्नव्यञ्जनमांसादिसंविधाः सकला अपि ।
बभक्ष क्षुधायान्तःस्थपावकज्वालमालया ॥ ११ ॥

अचर्वयत मांसास्थीन्यामांसास्थीनि सर्वतः ।
सस्वदे च सुपक्वानि मांसानि विविधान्यपि ॥ १२ ॥

अन्नकूटांश्चरवादोच्चैर्भूरिव्यञ्जनसंयुतान् ।
भर्जितानि च धान्यानि बहूनि समचर्वयत् ।
पीत्वा कादम्बरीं रस्यां मत्तो राक्षससत्तमः ॥ १३ ॥

सर्वं निपातयामास यत्किञ्चिदिह कल्पितम् ।
भक्ष्यलेह्यादि विविधं रावणेन प्रयत्नतः ॥ १४ ॥

पपौ रसभृतान् कूपान् सरसीर्वापिकास्तथा ।
क्रमेण विपुलाहार आदायादाप पाणिना ॥ १५ ॥

भुक्त्वा निरवशेषं तत् सर्वमाहारसंचयम् ।
जगर्ज मदिरायत्तः किंचित्तृप्तिमुपागतः ॥ १६ ॥

तस्य गर्जारवो घोरो रोदसी पर्यघोषयत् ।
तं श्रुत्वा कपयस्त्रस्ता मुदिताश्चापि राक्षसाः ॥ १७ ॥

भुक्त्वा सोऽथ स्वस्थमनाः पर्यपृच्छत रावणम् ।
क एष ते रणोद्योगः किमर्थं वा दशाननः ॥ १८ ॥

केन वा सह जातस्ते विरोधो भुवनेष्वलम् ।
किमर्थं रक्षसां यूथान् रणेक्षपयसि स्वयम् ॥ १९ ॥

आज्ञावशंवदास्तेऽमी निपतन्ति पतङ्गवत् ।
समरेषु महावेगा रक्षोवीरास्तवोद्भटाः ॥ २० ॥

इति पृष्टः प्रबुद्धेन कुम्भकर्णेन रावणः ।
उवाच तं यथावृत्तं जानकीहरणादिकम् ॥ २१ ॥

१-१-नास्ति-रीवां ।

ततश्च रामगमनं सेतुबन्धपुरःसरम् ।
कारणं सर्वमेवैतत्तेन युद्धस्य सोऽवदत् ॥ २२ ॥

इत्थं प्रबोध्य लङ्केशः कुम्भकर्णं महाजवम् ।
जगाम स्वगृहं तूर्णं यत्र मन्दोदरी स्थिता ॥ २३ ॥

तमन्तःपुरस्थाः स्त्रियः कुम्भकर्णप्रबोधोत्सवं ज्ञापन्त्यः सहर्षाः ।
जयाशंसनाद्दत्तदृष्टिप्रसादं वचोगुंफनैर्मोदयामासुरुच्चैः ॥ २४ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे कुम्भकर्णभोजनो नामाष्टाविंशाधिकद्विशततमोऽध्यायः ॥ २२८ ॥

एकोनत्रिंशाधिकद्विशततमोऽध्यायः

ब्रह्मोवाच

अथायुक्तं मन्यमानः कर्म तद्भ्रातुरात्मनः ।
पुनः पुनर्विचार्यासौ कुम्भकर्णो महाबलः ॥ १ ॥

व्यषीददात्मनो मृत्युं मन्यमानो रणाङ्गणे ।
तथा सपुत्रपौत्रस्य रावणस्यापि राघवात् ॥ २ ॥

आजगाम ततो वीरो विषण्ण इव चेतसा ।
सभामण्डपमध्यस्थं भ्रातरं दशकन्धरम् ॥ ३ ॥

तमायान्तमसौ दूराज्जग्राह परमादृतः ।
महाबल इति ज्ञात्वा न्यस्तयुद्धभरं हितम् ॥ ४ ॥

महासभामण्डपान्तस्तावेकासनसंस्थितौ ।
सप्रश्रयेक्षणप्रश्नप्रतिवाक्यादिभिर्मुदा ॥ ५ ॥

मिथः प्रेमकथालापैः सुप्रीतौ तौ बभूवतुः ।
ततो बली कुम्भकर्णो रावणं प्राणसम्मितम् ॥ ६ ॥

आभाष्य चापि सम्बोध्यप्रियभ्रातरमात्मनः ।
एतदूचे वचो न्याय्यं निश्चित्य विदुषां गिरा ॥ ७ ॥

हन्त भ्रातस्त्वया किं नु कृतमेतज्जुगुप्सितम् ।
तद्धि सन्तः प्रकुर्वन्ति यन्न्यायाद नपोदितम् ॥ ८ ॥

सत्यं वयं क्रूरतमा राक्षसाः सत्ववर्जिताः ।
तमोमात्रलयाः क्वापि विरले रजसि स्थिताः ॥ ९ ॥

तथापि भ्रातर्जानीहि पुलस्त्यस्य मुनेः कुलम् ।
यस्मिन् वयं सुसंजाता अनुरूपा भवेम चेत् ॥ १० ॥

तदा नो भुवने श्लाघा नो चेन्निन्दैव सत्सु नः ।
साम्प्रतं भवता वीर परजाया रहोगता ॥ ११ ॥

हृता बलेन तत्कर्म न युक्तमिति मन्महे ।
को नाजनि वली लोके को न शक्तश्च सर्वथा ॥ १२ ॥

न्याय्यामेवाचरन् सर्वे दुर्नयान्नश्यते यतः ।
इति ज्ञात्वा नयं भ्रातरिदानीमपि विद्धि भोः ॥ १३ ॥

पराङ्गनामिमां दूराद्विषवल्लीमिव त्यज ।
यां स्पृशन् म्रियते जन्तुः परत्रेह च निन्दिताम् ॥ १४ ॥

इति नीतिमुपादाय यदि वर्त्स्यति वै भवान् ।
भविष्यति चिरञ्जीवी पुत्रपौत्रादिभिः सह ॥ १५ ॥

नो चेत्समेतः सर्वैस्त्वं नाचिराद्यास्यशि क्षयम् ।
विचार्येत्थं मुहुर्भ्रातरिदानीमपि चेतय ॥ १६ ॥

त्रैलोक्यश्रीमदाविष्टं चेतोनिजमतन्द्रितः ।
जीवन्तु चापि समराच्छेषा अपि निशाचराः ॥ १७ ॥

प्रतिकूलगिरस्तस्य गिरमित्थं निशम्य सः ।
दर्योत्क्षिप्तभुजोद्दण्डः प्रत्युवाच विहस्य तम् ॥ १८ ॥

अहो कृच्छ्रेण यद्भ्रातर्मया त्वं सम्प्रबोधितः ।
तत्साधु समरे शत्रुं कुम्भकर्णं जिगाय भोः ॥१९ ॥

अपि मे मानसोत्साहमित्थं वाग्भिर्विलोपयन् ।
प्रतिकूलवृत्तिः समये सुप्त एव भवान् वरम् ॥ २० ॥

यः क्षिणोति मनोवृत्तिं कार्यकाल उपस्थिते ।
न स भ्राता च बन्धुश्च सुहृन्मित्रं सखापि वा ॥ २१ ॥

स शत्रुरेव विज्ञेयः शत्रोरीप्सितमाचरन् ।
तमिमं यूथवृत्तघ्नं दूरतः परिवर्जयेत् ॥ २२ ॥

तस्माद्भ्रातरहं मन्ये भावानपि बलीमुखैः ।
वित्रासित इवात्यन्तं दृश्यतेऽद्य विना रणम् ॥ २३ ॥

कामं भक्षय मांसानामन्नानां च महीधरान् ।
किं ते रणेन सोत्साहं मपि तिष्ठति सम्प्रति ॥ २४ ॥

कामं स्वपिहि भुक्त्वा च यथेच्छं भूरिवत्सरान् ।
अपि मैवं पुनर्वादीर्मानसोत्साहतक्षणम् ॥ २५ ॥

कृतवानहमेतावत्त्रयोदश चतुर्युगीः ।
एतल्लङ्कापुरीराज्यं तव बाहुबलेन किम् ॥ २६ ॥

अहं शक्रपुरीं भ्रातर्विजेतुमधिरूढवान् ।
आत्मनैव तदापि त्वं साहाय्यं कृतवान्नु किम् ॥ २७ ॥

अपि मे भवता भ्रातः कदा किमपि यत्कृतम् ।
स्मर तत्सुमहानिद्रानीताखिलजनुःफलम् ॥ २८ ॥

जीवन्तु मे महावीरा महोत्साहा निशाचराः ।
ये प्राणनैरपेक्ष्येण पुरोगा मम संयुगे ॥ २९ ॥

येषां बाहुबलोद्भूताः सुग्रीवाद्याः प्लवंगमाः ।
त्यक्तुमिच्छन्ति सपदि संग्रामाङ्गणमातुराः ॥ ३० ॥

तेषां मदर्थे बहवस्त्यक्तप्राणा दिवं गताः ।
बहवश्च विलोक्यन्ते बद्धकक्षाः परान् प्रति ॥ ३१ ॥

अमी नरान्तकमुखास्त्रैलोक्यविजयोद्धुराः ।
येषां बाहुबलेनाहं कुम्भकर्ण सुखं स्वपे ॥ ३२ ॥

इमौ कुम्भो निकुम्भश्चाप्युभौ राक्षससत्तमौ ।
याभ्यां बलात्समानीता बन्दीकृत्य सुरश्रियः ॥ ३३ ॥

उत्पाटिताश्च रदना दिग्गजानामपि ध्रुवम् ॥ ३४ ॥

अमेयवीर्यौ मनुजै राक्षसानां यशस्करौ ।
ताविमौ जीवतो वीरौ किं भ्रातः खिद्यसे वृथा ॥ ३५ ॥

एषोऽतिकायो बलवान् रक्षोवीरः प्रतापवान् ।
यद्बलं विबुधैर्दृष्टं विद्रुतैर्युधि तत्क्षणात् ॥ ३६ ॥

द्वीपेषु जलधेर्यस्य गिरिदुर्गेषु चातुलः ।
जागर्ति चण्डदोर्दण्डप्रतापः सुरतापनः ॥ ३७ ॥

मकराक्षो नाम महानेष रक्षोगणेश्वरः ।
यस्य गीर्वाणगेहेषु विमानाबलिशालिषु ॥ ३८ ॥

सर्वस्वलुण्ठनोद्रिक्तः प्रतापाग्निस्तपत्यहो ।
हेमाद्रिशिखरद्रावसूचितो यस्य तेजिमा ॥ ३९ ॥

अलमेषां बाहुबलं कथयन्नाम रक्षसाम् ।
मम संततिरेवोग्रा जीवताच्छरदां शतम् ॥ ४० ॥

यस्यामेकैक उद्दामो हेलाध्वस्तेन्द्रवैभवः ।
त्रैलोक्यमथने शक्तः सुखं स्वपिहि कुत्रचित् ॥ ४१ ॥

अयमिन्द्रजिदुद्दामो महाबाहुर्महाबलः ।
गीर्वाणगणनिग्राही परदाही रणेषु यः ॥ ४२ ॥

कार्या मद्विषये चिन्ता त्वया भ्रातर्न जातुचित् ।
कुम्भकर्ण सुखं भुङ्क्ष्व भोज्यभाराननेकशः ॥ ४३ ॥

सुखं स्वपिहि कल्पान्तं विधिना तेऽर्पितो वरः ।
मा पुनर्मन्मनोधैर्यं निकृन्तेथा महामते ॥ ४४ ॥

इति नयभाषितेन सरुषोऽभिहिताधिकरूक्षवादिनो,
दशवदनस्य तानि परूषाणि वचांसि निशम्य सोदरः ।
घन इव कुम्भकर्ण इदमाह नितान्तगभीरभाषणो,
विहसितदीर्यमाणमुखगह्वरदृष्टसुदीर्घदंष्ट्रकः ॥ ४५ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे रावणकुम्भकर्ण-संवादो नामैकोनत्रिंशाधिकद्विशततमोऽध्यायः । २२९ ॥

त्रिंशाधिकद्विशततमोऽध्यायः

कुम्भकर्ण उवाच

नाहं करोमिते ज्येष्ठ मानसोत्साहभञ्जनम् ।
प्रबुद्धोऽहं रणे भ्रातर्मथितुं तव शात्रवान् ॥ १ ॥

न वा योद्धुं ममालस्यं सम्प्रबुद्धस्य सम्प्रति ।
निर्दारयेयं धरणीं भञ्जयेयं गिरीनपि ॥ २ ॥

त्वं मे प्राणप्रियो भ्राता न चाहं तेऽरिपक्षगः ।
न चापि मम वित्रासो वानरेभ्यः कदाचन ॥ ३ ॥

अमी हि मे सदा भक्ष्या एकैककवलोपमाः ।
भविष्यन्ति विनाऽऽयासं तृप्त्यै मम सहस्रशः ॥ ४ ॥

यथा तवान्ये सुभटा राक्षसाः कोटिशो रणे ।
अयं तथाहमप्येकः कृपां कुरु सदा मपि ॥ ५ ॥

अनुजे स्वस्य नितरामाज्ञापालनतत्परे ।
नाहं विभीषणो ज्ञेयो यः शत्रुमधितिष्ठति ॥ ६ ॥

धिक्तं कातरचित्तत्वाद्धीर्येण परिवर्जितम् ।
येषां मनः सदा धीरं सम्पत्सु च विपत्सु च ॥ ७ ॥

एकरूपं त एवाशु जयन्ति लोकमीप्सितम् ।
अव्यवस्थित चित्तास्तु पतन्त्युभयलोकतः ॥ ८ ॥

अपियेऽङ्गीकृतं सन्तः शुभं वा यदि वाशुभम् ।
न त्यजन्त्यात्मनो धैर्यस्तेषां लोकः सनातनः ॥ ९ ॥

जय एव सदास्माकं त्वत्पक्षमधितिष्ठताम् ।
रणेऽपि त्यक्तप्राणानामुभौ लोकौ यशोज्ज्वलौ ॥ १० ॥

अथो जयेम यच्छत्रून् पुरःस्थानाततायिनः ।
तदापि नः सदा क्षेममुभौ लोकौ यशोऽमलौ ॥ ११ ॥

अथास्मिन् यर्हि विपुलकार्यकाल उपस्थिते ।
भिद्येम यर्हिवाज्ञां ते नानुतिष्ठाम तर्हि नः ॥ १२ ॥

अयं चैवापरो लोक उभावपि गतौ द्रुतम् ।
जनुश्चाकीर्तिमलिनं जातमेव जुगुप्सितम् ॥ १३ ॥

नीतियुक्तं तु ते पूर्वं मया किंचिन्निवेदितम् ।
तद्भवान् यदि नागृह्णात्कि तर्हि क्रियतां मया ॥ १४ ॥

यदभावि न तद्भावि भावि चेन्न तदन्यथा ।
इति मत्वा स्थितोऽस्म्येष त्वदाज्ञातत्परो मुहुः ॥ १५ ॥

श्रुतं ह्येतन्मया पूर्वं प्राक्तनेभ्यो दशानन ।
सर्वज्ञेभ्यो मुनीन्द्रेभ्यो न भावि च तदन्यथा ॥ १६ ॥

इदमेव निमित्तंनो नाशस्याकलितं मया ।
पुरा सर्वज्ञकल्पेभ्यो महर्षिभ्यो यथातथम् ॥ १७ ॥

कोऽन्यथा नाशयेदस्मान् कृतान्तस्यापि भीषकान् ।
दर्पोत्पाटिततद्वाहमहिषोग्रविषाणकान् ॥ १८ ॥

यद्येवं न निमित्तं स्यात्तदार्य भुवनत्रये ।
कस्त्वां नाशयितुं शक्तो यक्षो रक्षोऽमरो नरः ॥ १९ ॥

अपि नाम परः साक्षात् पुरुषोऽयं सनातनः ।
आद्यन्तमध्यशून्यश्च प्राप्तस्ते नगरान्तिकम् ॥ २० ॥

रामो रघुपतिः श्रीमान् न यत्तत्त्वं विजानते ।
ब्रह्मविष्णुशिवा देवाः कोऽन्यः शक्नोतु वेदितुम् ॥ २१ ॥

अहं जानामि पूर्वेभ्यो मुनिभ्यः श्रुततद्गुणः ।
भवान् परं न जानाति काले भाग्यविपर्ययात् ॥ २२ ॥

जानाम्यहं तथाप्यस्मिन् द्वेष्यबुद्धिः सदैव मे ।
इति तस्यैव मायेयं यथा सम्मोहितं जगत् ॥ २३ ॥

त्यक्त्वा लोकं सुप्रकाशं सुखं यत्र निरन्तरम् ।
लीयामहे च तमसि बुद्धिमोहो न ईदृशः ॥ २४ ॥

स्वर्गापवर्गलोकेशः साक्षादेष परः पुमान् ।
ते द्विष्मो मनसा रामं स्वार्थे मूढा अहो वयम् ॥ २५ ॥

इत्याकर्ण्य स्य वाक्यं समितिः कृतमतेः कुम्भकर्णस्य भूयः,
प्रेम्णा युक्तो दशास्यः शिरसि भृशमुपाघ्राय चालिङ्ग्यदोर्भ्याम् ।
पुंसु भ्रान्ति प्रदर्श्य क्षपितमुनिवचो मानईशं विनिन्द्य,
प्रोच्याहोभिश्चतुर्भिर्विरतिमथ युधे प्राहिणोत्तं महोग्रम् ॥ २६ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे कुम्भकर्णविसर्जनो नाम त्रिंशाधिकद्विशततमोऽध्यायः ॥ २३० ॥

एकत्रिंशाधिकद्विशततमोऽध्यायः

ब्रह्मोवाच

अथ नानाविधैः शस्त्रैरस्त्रपूगैश्च दारुणैः ।
असज्जत महावीर्यो योद्धुं रामेण संयुगे ॥ १ ॥

महोग्रपर्वताकारः कुम्भकर्णो महाबलः ।
प्रणम्य भ्रातरं ज्येष्ठं प्रययौ कृतमङ्गलः ॥ २ ॥

तमाहमुदितस्तत्र लङ्केशो लोकभीषणः ।
स्वस्त्यस्तु ते रणे शीघ्रं सपत्नं जहि राघवम् ॥ ३ ॥

जयोऽस्तु ते कुम्भकर्ण पुनरायाहि वीतभीः ।
हर्षयन् सुहृदो बन्धून् विश लङ्कापुरीं पुनः ॥ ४ ॥

गच्छाधुना महावीर्यं हन्तुं शत्रूमदोद्धतान् ।
तव बाहुबलायत्त इदानीं विजयो मम ॥ ५ ॥

इत्युक्त्वा विससर्जासौ भ्रातरं प्राणसम्मितम् ।
तं प्रयान्तं रणे योद्धुमनुजग्मुर्निशाचराः ॥ ६ ॥

सर्वे गृहीतनिस्त्रिंशा आबद्धकवचा भटाः ।
महाजबा महाकायाः प्रावृषेण्या घना इव ॥ ७ ॥

गर्जन्तो मदसम्पन्ना आस्फोटितभुजद्वयाः ।
निर्ययुस्तमनुक्रुद्धाः कोटिशो बद्धवैशसाः ॥ ८ ॥

स तेषां पुरतो गच्छन् कुम्भकर्णो महोद्धतः ।
स्तूयमानो यातुधानैर्महासंरम्भभीषणः ॥ ९ ॥

गदापाणिर्महोद्दण्ड आशंसितजयो निजैः ।
शुशुभे बद्धकवचस्तडित्वानिव वारिदः ॥ १० ॥

अतिष्ठत् पर्वताकारः प्रविश्य समराङ्गणे ।
तंवीक्ष्य वानरभटा वित्रस्त्राः परितोऽभवन् ॥ ११ ॥

स पपातमहाभीमो वानराणां कदम्बके ।
आदायादाय हस्ताभ्यां मुखे चिक्षेप वानरान् ॥ १२ ॥

दंष्ट्राभ्यां चूर्णयामास भक्षयामास तान् बहून् ।
सहस्रशो मुखे न्यस्ताश्चर्व्यन्ते कपयोऽमुना ॥ १३ ॥

तेषां द्वित्रा मुखाद्भ्रष्टाः कूर्दित्वा यान्ति हस्ततः ।
तेऽपि क्रुद्धाः कपिभटाः परितो वेष्टयन्ति तम् ॥ १४ ॥

नखदन्तायुधैरुग्रैर्लूयन्तेऽङ्गानि तैर्भृशम् ।
आदायादाय सोऽत्युग्रस्तान् बमक्ष सहस्रशः ॥ १५ ॥

केचित्तस्य नखैर्दन्तैर्मुखमामोटयन्ति च ।
केचिदघ्राणद्वयं केचित्कर्णौ केऽपि विलोचने ॥ १६ ॥

केऽपि दोर्मूलयुगलं केऽपि वक्षस्थलं पुनः ।
तानधिक्षिपते चायं लुवतः परितो वपुः ॥ १७ ॥

हस्ताभ्यां चैव पादाभ्यां विध्वंसयति वानरान् ।
ते ध्वंस्यमाना अपि तं न त्यजन्ति महोद्भटाः ॥ १८ ॥

महाद्रिकन्दराकारं दीर्णं तस्य मुखं रणे ।
महोग्रदंष्ट्राविकटं वीक्ष्य भीताः प्लवंगमाः ॥ १९ ॥

कपीनां चर्व्यमाणानां कुम्भकर्णेन रक्षसा ।
आसीत्कटकटाशब्दश्चूर्ण्यमानास्थिसम्भवः ॥ २० ॥

लग्नास्तद्दशनान्तरेषु कतिचित् संचूर्णितैर्मस्तकैः
केचिच्छिन्नविभिन्नसर्ववपुषस्तद्दीर्घदंष्ट्राङ्कुरैः ।
चर्व्यन्ते कतिचिच्चपर्पणनिभास्तेन प्लवंगा रणे
नीयन्ते यमसादनं कवलवज्जग्धाः सहस्रं शतम् ॥ २१ ॥

विदार्णघोराननकन्दरोदरः परिस्रुतासृग्प्रसरज्जिताधरः ।
सुदीर्घदंष्ट्रो भ्रुकुटीभयानको रणे स तिष्ठन् ददृशेऽन्तकोपमः ॥ २२ ॥

कल्पान्तमेघौघकरालविग्रहो गर्जन् मुहुः शोणितबिन्दुरञ्जितः ।
धातुद्रवैः शैलद्रवातिचित्रितस्तस्थौ रणेसौ भुजवीर्यदर्पितः ॥ २३ ॥

दर्पोद्धतान् कोटिसंख्यान् प्लवंगान् हस्तभ्यां स प्रक्षिपन् वक्त्ररन्ध्रे ।
आरक्तौष्ठो वहमानैस्सृग्भिर्गर्जन् दृष्टः कालमेघोपमानः ॥ २४ ॥

महाशैलोत्तुङ्गकायेन तेन क्षयं नीताः कोटिसंख्या प्लवंगाः ।
विलोक्यैतत्कदनं युद्धभूमौ प्राहोच्चकैर्लक्ष्मणो रामचन्द्रम् ॥ २५ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे कुम्भकर्णविक्रमो नामैकत्रिंशाधिकद्विशततमोऽध्यायः ॥ २३१ ॥

द्वात्रिंशाधिकद्विशततमोऽध्यायः

लक्ष्मण उवाच

पश्य पश्याद्य समरे रक्षसानेन कोटिशः ।
भक्षिता वानरभटाः कृतं शून्यं रणाङ्गणम् ॥ १ ॥

जह्येनं राक्षसश्रेष्ठं रावणावरजं रणे ।
भक्षयन्तं कपिभटान् मुखे निक्षिप्य कोटिशः ॥ २ ॥

विशिखैः शीघ्रगमनैर्दारुणैर्वज्रपातिभिः ।
छित्त्वावयवशः कृत्स्नं पातयैनं रणाङ्गणे ॥ ३ ॥

अनेन बहुविक्रान्तं घोरकायेन रक्षसा ।
इदानीं नैव सोढव्य एषोऽस्मानतिवर्त्तते ॥ ४ ॥

कपीन् भक्षयते घोरो गर्जत्येष भयानकः ।
दृष्ट्वा दृष्ट्वा रणोत्साहः सर्वेषां परिहीयते ॥ ५ ॥

इति यावदसौ प्राह रामं युधि धनुर्धरम् ।
तावत्कक्षेऽङ्गदन्यस्य कुम्भकर्णोऽव्रजद्रणात् ॥ ६ ॥

स तस्य निहितः कक्षे वालिसूनुर्महाबलः।
विमोच्य तरसाऽऽत्मानं विलूय श्रुतिनासिकम् ॥ ७ ॥

ययौ जवात् समुत्पत्य ततश्चुक्रोध राक्षसः।
अहोऽस्य कपिडिम्भस्य बलं यन्मम कक्षतः ॥ ८ ॥

मोचयित्वा तनुं स्वीयां प्रययौ वेगसंयुतः।
विरूपं चापि मां चक्रे विलूय श्रुतिनासिकम् ॥ ९ ॥

इदानीं किमहं यामि विलूनश्रुतिनासिकः।
हासाय लङ्कावास्तूनां भविष्यामि न खल्वहम् ॥ १० ॥

इति निश्चित्य मनसा स परावव्रते रणे।
ददर्श तं रघुश्रेष्ठः परावृत्ततमं तदा ॥ ११ ॥

आनुहाव ततो रामं योद्धुं राक्षसपुङ्गवः।
अन्तकं स्वस्य मन्वानो जन्मान्तरकृतस्मृतिः ॥ १२ ॥

एह्येहि मां रघुश्रेष्ठ युद्धं मे देहि सम्प्रति।
कण्डूयेते मम भुजौ सुप्तस्य सुचिरं हरे ॥ १३ ॥

कोऽन्यो वीरस्त्वादृशो राघवेन्द्र बद्धर्धः सेतुर्येन सिन्धौ स्वशक्त्या।
श्लाघ्योऽहं स्यां यदि तु त्वां जयेयं त्वं चेन्मां वै विजेथास्तथापि ॥ १४ ॥

इत्युक्त्वा प्राहिणोतस्मिन् गदां स्वां तडिदायताम्।
हुंकारेणैव तां रामः पातयामास भूतले ॥ १५ ॥

रामस्य हुंकाररवेण तस्यां पराहतायां प्रसभं गदायाम्।
चुक्षोभ चित्तेन स कुम्भकर्णो महाबलस्तं प्रजिघाय खड्गम् ॥ १६ ॥

रामः खड्गं विधा चक्रे तीक्ष्णेन स्वमहेषुण।
ततोऽस्त्रपूगान् विविधान् प्राक्षिपद् रघुपुङ्गवे ॥ १७ ॥

खड्गशूलगदाचक्रभुशुण्डीप्रासतोमरैः ।
शक्तिमुद्गरकुन्ताद्यैः पर्शूपरिघपट्टिशैः ॥ १८ ॥

बाणैश्च धनुरुन्मुक्तैः सानुजं तमवाकिरत्।
वर्षासु धारासम्पातैस्तडित्वानिव पर्वतम् ॥ १९ ॥

शस्त्रास्त्रपूगैर्विविधैः कुम्भकर्णस्य रक्षसः।
अन्येषां रक्षसां चैतत्तत्पृष्ठे परितिष्ठताम् ॥ २० ॥

आच्छन्नं रघुशार्दूलं सानुजं वीक्ष्य वानराः।
वित्रस्ताः स्वेन मनसा चिन्तामापुः क्षणं रणे ॥ २१ ॥

ततो रामो धनुर्मुक्तैः सायकैरतिदारुणैः ।
नानाशस्त्रास्त्रपूगानि कुम्भकर्णस्य गर्जतः ॥ २२ ॥

अच्छिनत्तान् क्षणेनैव भास्वानिव हिमोच्चयम् ।
आविरास ततश्चैष सानुजोधृतकार्मुकः ॥ २३ ॥

ततस्तयोरभूद्घोरं तुमुलं रोमहर्षणम् ।
परस्परविनिर्मुक्तसायकच्छन्नदिक्तटम् ॥ २४ ॥

रामबाणप्रहारेण कुम्भकर्णस्य विग्रहात् ।
महाद्रिकूटकठिनादुदतिष्ठन्महारवः ॥ २५ ॥

व्याप्तास्तेन रवेणात्र घोरेण सकला दिशः ।
यद्वदिन्द्रकरोन्मुक्तवज्रेण त्रुटितो गिरेः ॥ २६ ।

एवं पञ्च दिनान्याजौ सुस्थिरोपमसंयुगे ।
युयुधे कुम्भकर्णाख्यो रावणावरजोऽनघः ॥ २७ ॥

षष्ठे दिने चतुर्दश्यां कृष्णायां रघुपुङ्गवः ।
अवधीत्तं महाघोरं मार्गणैः शीघ्रगामिभिः ॥ २८ ॥

आकर्णाकृष्टचापं प्रचलदिषुगणैर्घोरनिर्घातघोषै-
र्वेगादगच्छद्भिरिन्द्रप्रबलतरविनिर्मुक्तवज्रप्रपातैः ।
छित्त्वा छित्त्वा रघूणांपतिरवयवशःकुम्भकर्णस्य गात्रं
संग्रामे तुङ्गभूमीधरशिखरनिभं पातयामास भूमौ ॥ २९ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे कुम्भकर्णबधो नाम द्वात्रिंशाधिकद्विशततमोऽध्यायः ॥ २३२ ॥

त्रयस्त्रिंशाधिकद्विशततमोऽध्यायः

ब्रह्मोवाच

तस्मिन्निपतिते वीरे भ्रातरि प्राणसम्मिते ।
शोकार्दितो दशमुखः सुभृशं विललाप ह ॥ १ ॥

हा भ्रातः प्राणदयित हा वीर परभीषण ।
हा बन्धुजनसर्वस्व प्राप्तस्त्वमपि पञ्चताम् ॥ २ ॥

यस्मिल्लघुरुषाविष्टे त्यक्त्वा सद्भानि निर्जराः ।
पलायन्ते स्मृतिभृतं लीयन्ते गिरिकुक्षिषु ॥ ३ ॥

न यत्प्रतिबलो लोके दृष्टो वाप्यथवा श्रुतः ।
सुरकिन्नरमार्गेषु कुतो मर्त्येषु दृश्यताम् ॥ ४ ॥

स त्वमद्य खलु भ्रातर्मदर्थेः त्यक्तजीवितः ।
सुप्तो रणाङ्गणगतो न पुनर्बोधमेष्यसि ॥ ५ ॥

हा रणाङ्गणदुर्वार हा शत्रुबलकम्पन ।
हा प्रतापोदयगिरे केन त्वं युधि पातितः ॥ ६ ॥

स महावीरविख्यातस्त्रैलोक्यविजयोर्जित ।
यमोऽपि त्वां कथं नाम करिष्यति गृहातिथिम् ॥ ७ ॥

यस्त्वां युधि समालोक्य पुरा वासवपक्षगः ।
तूर्णं महिषमारुह्य पलायत दिशो दश ॥ ८ ॥

हा भ्रातर्मे जयोत्साहो नूनं त्वदवधि स्थितः ।
इदानीं शत्रुविजयः कृतोऽपि खलु मे वृथा ॥ ९ ॥

हा भ्रातः कुम्भकर्णाद्य त्वां विना रक्षसां कुलात् ।
प्रोषिताः श्रीयशोवीर्यजयोत्साहमदादयः ॥ १० ॥

हा वीर त्वां रणमुखे घातयित्वाद्य दुर्भगः ।
अहं जीवामि लोकेऽस्मिन् धिङ्मामनुचितायुषम् ॥ ११ ॥

इत्यादि बहुशो वाग्भिर्विलपन् दशकन्धरः ।
अरोदीद्विवशस्वान्तो दिशो मुखरयन् दश ॥ १२ ॥

तमन्वरोदिषुः सर्वे राक्षसानां वधूजनाः ।
अन्तःपुरनिवासिन्यः स्त्रियो मन्दोदरी मुखाः ॥ १३ ॥

सुमहान् पतितः शोको राक्षसानां गृहे गृहे ।
कुम्भकर्णे हते तेषां जयाशापि हताभवत् ॥ १४ ॥

अमायां फाल्गुने मासि कुम्भकर्णविलापिनम् ।
रक्षसां रावणादीनां जगदासीत्तमोमयम् ॥ १५ ॥

युद्धावहारः समभूत्तस्मिञ्छोकभये दिने ।
न क्वापि श्रूयते घोषो जयोत्साहविवर्द्धनः ॥ १६ ॥

सुप्तेवासीत् पुरी कृत्स्ना सर्वैःशोकपरायणैः ।
मूकगोमुखनिःसानदुन्दुभीपटहा रवाः ॥ १७ ॥

लुप्तध्वजपताकश्रीर्विलुप्तजयनिःस्वना ।
कृतमौननिराटोपैर्निरास्फोटैश्च राक्षसैः ॥ १८ ॥

अथ लङ्केश्वरः शोकात् प्रविश्यान्तःपुरं रुदन् ।
बन्धुस्त्रीजनमध्यस्थो विललाप चिरं बहु ॥ १९ ॥

ततः समादधौ वाग्भिः स्वयमेव स पण्डितः ।
रुदन्तीः शोकनिर्मग्नाः कुम्भकर्णस्य योषितः ॥ २० ॥

येनासौ निहतो युद्धे भ्राता मे प्राणसम्मितः ।
तमहं निहनिष्यामि नचिरात् संख्यमूर्द्धनि ॥ २१ ॥

किं करोमि न शोकान्तं पश्यामि विलपन्मुहुः ।
सोदरं तादृशं वीरं कुम्भकर्णं प्रियं मम ॥ २२ ॥

किंतु दैवं श्रिये यद्धि सर्वेभ्यो वलवत्तरम् ।
दैवं सर्वं प्रविन्यस्य पुनर्योत्स्यामि संयुगे ॥ २३ ॥

जानामि रामं नाशाय सर्वेषां नः समागतम् ।
जानाम्यधर्मं तत्पत्न्या हरणं लोकगर्हितम् ॥ २४ ॥

तथापि दैववशगः सर्वमेव करोम्यहम् ।
सर्वमेतज्जगद्येन चक्रवद्भ्राम्यते यतः ॥ २५ ॥

इति मत्वातिशोकं मा कुरुतान्तःपुरावलाः ।
चिकीर्षतोऽग्रिमं कार्यमुत्साहं मे न कृन्तत ॥ २६ ॥

अहं जीवामि चेल्लोके सर्वशत्रुवधोद्यतः ।
तदेतदुत्खनिष्यामि शल्यं वः शत्रुनिर्मितम् ॥ २७ ॥

इति विविधवचोभिर्बन्धुमातृस्नुषास्त्री
प्रमुखमखिललोकं किंचिदाश्वास्य धीरः ॥
बहिरगमदनेकान् राक्षसेषु प्रधानान्
गमयितुमभियोद्धुं राघवेन्द्रेण युद्धे ॥ २८ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्ड रावणविलापो नाम त्रयस्त्रिंशाधिकद्विशततमोऽध्यायः ॥ २३३ ॥

चतुस्त्रिंशाधिकद्विशततमोऽध्यायः

ब्रह्मोवाच

ततश्च फाल्गुने शुक्लप्रतिपद्दिवसादनु ।
यावच्चतुर्थीदिवसं विख्याता भुवनत्रये ॥ १ ॥

नरान्तकमुखाः पञ्चराक्षसा घोरविक्रमाः ।
नानाशस्त्रप्रहरणा नानायुद्धविशारदाः ॥ २ ॥

आज्ञया स्वामिनस्तस्य लङ्केशस्य महाबलाः ।
गर्जन्तो मध्यसमरे युद्धवन्तोऽतिकर्कशाः ॥ ३ ॥

हताश्च विभुना सर्वेलोककण्टकनाशिना ।
रामेण निशितैर्बाणैर्वज्रनिर्घातरविभिः ॥ ४ ॥

पतिता भुवि पञ्चापि महाद्रिशिखरोपमाः ।
छित्त्वा छित्त्वा वयवशो दत्ताश्च बलयोदिशम् ॥ ५ ॥

पञ्चम्यामथ सम्प्राप्तो रावणस्य महाभटः ।
अतिकायो नाम महान् राक्षसो घोरविक्रमः ॥ ६ ॥

नाना शस्त्राणि चास्त्राणि वर्षन् युद्धे महाभुजः ।
त्रासनः कपिसैन्यानां भ्रुकुटीभङ्गभीषणः ॥ ७ ॥

दंष्ट्राविकटघोरास्यो रोषविस्फुरिताधरः ।
युयुधे रघुवीरेण दिनानि त्रीणि कर्वशः ॥ ८ ॥

सोऽपि छित्त्वा शरैर्घोरैर्वज्रसम्पातभीषणैः ।
पातितो मेदिनीं कृतस्नां कम्पयन्नङ्गगौरवात् ॥ ९ ॥

अष्टम्यामथ सम्प्राप्तौ राक्षसौ रणदारुणौ ।
उभौ कुम्भनिकुम्भाख्यौ भ्रातरौ सहयोधिनौ ॥ १० ॥

वीरौ लङ्केशपतेर्घोरौ त्रैलोक्यमथनक्षमौ ।
नानाशस्त्रास्त्रसंदोहप्रहारविधिपण्डितौ ॥ ११ ॥

दर्शयन्तौ रणमुखे सुघोरं स्वं पराक्रमम् ।
त्रासयन्तौ कपिभटान् महावीर्यौ दुरासदौ ॥ १२ ॥

कृत्वा पञ्च दिनान्युच्चैः संग्रामं रोमहर्षणम् ।
निहतौ रामवीरेण मार्गणैर्जवत्तरैः ॥ १३ ॥

छिन्नभिन्नाखिलतनू निर्भिन्नकवचौ च तौ ।
पातितौ शत्रू वज्रेण छिन्नपक्षाविवाचलौ ॥ १४ ॥

मकराक्ष इति ख्यातस्ततश्च रजनीचरः ।
सुघोरं विक्रमं कुर्वन् नानाशस्त्रास्त्रवर्षणः ॥ १५ ॥

चतुर्भिर्दिवसैर्युद्धे हतो वानरपुङ्गवैः ।
इत्थं राक्षसमुख्येषु हतेषु बहुषु क्रमात् ॥ १६ ॥

जगर्जुर्वानरभटाः सूचयन्तो रणे जयम् ।
गोमुखान् वादयामासुर्दुन्दुभीन् पटहानपि ॥ १७ ॥

श्रुत्वैषां जयनिर्घोषं तदा लङ्कापतेरुरः ।
निर्ददार द्विषत्पक्षं जयशल्यगणाहतम् ॥ १८ ॥

ततश्चेन्द्रजितं वीरं सस्मार प्रहितुं रणे ।
अहो रे राक्षसा ब्रूत क्व सम्प्रति स शक्रजित् ॥ १९ ॥

किं करोति गृहे तिष्ठन् यातु योद्धुं महाबलः ।
गर्जन्त्येते कपिभटा लघवः क्षुल्लका अपि ॥ २० ॥

आस्फोटयन्ति दोर्दण्डान् महोत्साहपरायणाः ।
इदं सोढुं कथं शक्यं मयामर्षणचेतसा ॥ २१ ॥

एतेऽद्य बिभ्रति मदं निहतेषु तेषु वीरेषु पञ्चसु नरान्तकसम्मुखेषु ।
रक्षोऽनिकायमुखकुम्भनिकुम्भमुख्येष्वत्युद्भटेषु मकराक्षमुखेषु चाजौ ॥ २२ ॥

नास्त्यद्य कुम्भकर्णश्च य एतान् भक्षयेत्क्षणात् ।
एषां भाग्यान् स मद्भाग्यविपर्यासाच्च सम्प्रति ॥ २३ ॥

पूर्वमेव गतः स्वर्गं कृत्वा युद्धं सुदारुणम् ।
गृहीत्वा विजयाशां मे महावीरो महाभुजः ॥ २४ ॥

योद्धव्यमिति योद्धव्यं तथापि खलु शत्रुभिः ।
इति शक्रजितं गत्वा ब्रूत मद्वचसेरिताः ॥ २५ ॥

किं करोषि महाबाहो ताडयैतान् मदोद्धतान् ।
वानरान् गर्जतो हर्षाज्जहि रामं च लक्ष्मणम् ॥ २६ ॥

इति तस्याज्ञया केचिद्राक्षसा प्रययुस्तदा ।
यत्रेन्द्रजिन्महामन्त्रं साधयित्वा जयोर्जितः ॥ २७ ॥

सोऽग्निं संतर्प्यमन्त्राहुतिभिरविरतं देवतोयास्तिशीलो
लब्ध्वा दिव्यं च तस्माद्रथमतुलतरं दिव्यशस्त्रास्त्रयुक्तम् ।
ज्वालामालापरीतं गगनचरमथो वर्म दिव्यं च वीरः
सज्जो युद्धाय गर्जन् निर्गदितविजयाशीर्द्विजेन्द्रैः प्रतस्थौ ॥ २८ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे इन्द्रजिदुद्यमो नाम चतुस्त्रिंशाधिकद्विशततमोऽध्यायः ॥ २३४ ॥

पञ्चत्रिंशाधिकद्विशततमोऽध्यायः

ब्रह्मोवाच

अथ कृष्ण द्वितीयायामिन्द्रजिद्घोरनिःस्वनः ।
प्राप्तो रथस्थितो योद्धुं महावीर्यमदोद्धतः ॥ १ ॥

तमायान्तमभिप्रेक्ष्य रामः शस्त्रभृतां वरः ।
इदमाहानुजं वीरस्तस्य विक्रमसारवित् ॥ २ ॥

पश्य लक्ष्मण साटोपमयमेति महेन्द्रजित् ।
रथस्थो घोषयन्नाशाः शास्त्रपूगप्रवर्षणः ॥ ३ ॥

अनेन खलु सौमित्रे देवतोपास्तिशालिना ।
लब्धो रथोऽयं शस्त्रास्त्रदिव्यवर्मविभूषितः ॥ ४ ॥

अशक्योऽयं रणे जेतुमद्यवानरकोटिभिः ।
पश्याद्य कौतुकं युद्धे युक्तैर्हनुमदादिभिः ॥ ५ ॥

अथ त्वयैव वध्योऽयं समरे रावणाङ्गजः ।
सुलोचना यस्य वधूः शेषनागसुता सती ॥ ६ ॥

अथैनं दीर्घनिर्घोषस्यन्दनोपस्थमास्थितम् ।
सुग्रीवहनुमत्प्रमुखाः कोटिशः कपियूथपाः ॥ ७ ॥

आवेष्टयन् शैलतरुनखदन्तायुधोद्यताः ।
सुरेन्द्रजिच्छरैर्दिव्यैश्चकार वितथोद्यमान् ॥ ८ ॥

कपिवीरकरोन्मुक्तांस्तुङ्गपर्वतपादपान् ।
अपातयद्द्विधा कृत्वा ततस्ते परिचुक्रुधुः ॥ ९ ॥

निपेतुर्युगपत्कीशा अभिशक्रजितं रणे ।
तानेष निशितैर्बाणैराजघान समंततः ॥ १० ॥

तस्य वज्राधिकरयैः शरैर्वह्निशिखोपमैः ।
भिद्यन्ते स्म कपीन्द्राणामङ्गानि प्रसभं रणे ॥ ११ ॥

रथादविरलस्रोतोविनिपातिभिरुद्धतैः ।
शरवर्षैः शक्रजितो विद्रुताः कपयोऽखिलाः ॥ १२ ॥

कुर्वन्तोऽपि महाघोरं विक्रमं कपिपुङ्गवाः ।
रणाङ्गणे पदं किंचिन्नारोपयितुमीशते ॥ १३ ॥

विद्राविताः शरैराशु भग्नयानाः कपीश्वराः ।
आवासस्थानमाजग्मुर्यत्र रामोऽनुजान्वितः ॥ १४ ॥

आगच्छतः कपिकुलप्रवरान् समंताद्भग्नोद्यमान्मलिनवक्त्ररुचीन् विषण्णान् ।
सम्भग्नदर्पनिवहानधिकं विवर्णान् भूरिक्षरत्क्षतजदिग्धतनून् ददर्श ॥ १५ ॥

अथाह लक्ष्मणं रामः पश्य लक्ष्मण सम्प्रति ।
आगच्छतां कपीन्द्राणामवस्थां विषमामिमाम् ॥ १६ ॥

नास्फोटयन्ति दोर्दण्डान् नाटोपं कुर्वते मुहुः ।
न बिभ्रति प्रसन्नानि मुखानि च यथा पुरा ॥ १७ ॥

अधोमुखा भग्नमानास्तूष्णींभूय स्थिता अपि ।
न गर्जन्ति न वल्लन्ते नोत्क्षियन्ति शिरोधरान् ॥ १८ ॥

क्षरत्क्षतजदिग्धाङ्गाः स्तब्धा इव सवेदनाः ।
सशोका इव लक्ष्यन्ते कपयोऽद्य महाबलाः ॥ १९ ॥

तत्किमेषामभूदद्य भग्नं शीलं नु केनचित् ।
भग्नव्रता वा नितरां किं वा भग्नपराक्रमाः ॥ २० ॥

न पूर्ववदहंकारं कपयो हृदि बिभ्रति ।
न संरम्भं च नोत्साहं न वा जयमहारवम् ॥ २१ ॥

रुदन्त इव चक्षुर्भिः स्खलन्त इव विग्रहैः ।
विचलन्त इवात्यन्तं स्वान्तेऽतुच्छशुचार्पिते ॥ २२ ॥

जिज्ञासस्व किलामीषामवस्थामद्य लक्ष्मण ।
कथं नु मम वीराणामियं कश्मलताभवत् ॥ २३ ॥

इति वदति रघूद्वहे कपीन्द्राः सरभसमेत्य ततः प्रभुं प्रणेमुः ।
अवनतवदनाः प्रभूतलज्जावशविवशार्त्तहृदश्चिराय तस्थुः ॥ २४ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे कपिसैन्यपराजयेन्द्रजिदपराजयो नाम पञ्चत्रिंशाधिकद्विशततमोऽध्यायः ॥ २३५ ॥

षट्त्रिंशाधिकद्विशततमोऽध्यायः

ब्रह्मोवाच

ततस्तान् रघुशार्दूलः सुग्रीवहनुमन्मुखान् ।
कपीन् शालीननयनानुवाचोदीर्णसंशयम् ॥ १ ॥

कथमद्य विलोक्यन्ते भवन्तो विमनायिताः ।
किं नु प्रतिज्ञाहीनाः स्थ कस्मिंश्चिन्महति स्थले ॥ २ ॥

किं वाधिः कोऽपि संजातः सर्वेषां वो महौजसाम् ।
किं वा व्याधिः सुसंजातो युगपद् दुर्निवारणः ॥ ३ ॥

किं वा पराजिता यूयं केनापि समराङ्गणे।
किं वा किमप्यनिष्टं वः समुत्पन्नं महत्तरम् ॥ ४ ॥

किं वा दूरेस्थितः कोऽपि सुहृत् पञ्चत्वमागतः।
शोकस्य कारणं युष्मान् पृच्छामि कपिपुङ्गवाः ॥ ५ ॥

न गर्जथ कृतास्फोटाः पुरेव कथमद्य वै।
निर्जित्य राक्षसानीकं स्वस्वावासान् यदापुरा ॥ ६ ॥

भवन्त उपगच्छन्ति गर्जनं कुर्वते तदा।
आस्फोटयन्ति दोर्दण्डान् महाटोपं च तन्वते ॥ ७ ॥

वर्द्धयन्ति च मञ्चिते महोत्साहं महाभटाः।
तदद्य लक्षणं सर्वं युष्माकं प्रोषितं क्व नु ॥ ८ ॥

महाशोकाब्धिनिर्मग्ना नूनं व्याकुलयन्ति माम्।
तस्य कारणमापृच्छे ब्रुवन्तु सकला मम ॥ ९ ॥

इति रामेण सम्पृष्टास्ते सर्वे कपियूथपाः।
ऊचुः परस्परमुखं संप्रेक्ष्य कलितत्रपाः ॥ १० ॥

अद्य वीरेन्द्र सर्वेऽपि वयं समरमध्यगाः।
जिताः शक्रजिता तेन लङ्काधिपतिसूनुना ॥ ११ ॥

शरैः सुतीक्ष्णैर्वज्राभैर्हत्वा विद्राविता निशि।
ततो विषण्णवदनाः सर्वेऽपि वयमागताः ॥ १२ ॥

अग्निं संतर्प्य सुचिरं मन्त्राहुतिभिरूर्जितः।
दिव्यं रथं परिप्राप्य शस्त्रास्त्रैरणसंकुलम् ॥ १३ ॥

आबद्धकवचो वीरः समरे योद्धुमाययौ।
वयं पराजितास्तेन नानाशस्त्रास्त्रवर्षिणा ॥ १४ ॥

अजेयः सर्वदेवानां यक्षकिंनररक्षसाम्।
सोऽद्य संदृश्यते वीरस्ततश्चिन्तातुरा वयम् ॥ १५ ॥

इति श्रुत्वा वचस्तेषां कपीन्द्राणां स दैन्यवित्।
सौमित्रिमुखमालोक्य जगाद रघुपुङ्गवः ॥ १६ ॥

सत्यमिन्द्रजितो वीर्यमीदृगेव न संशयः।
देवोऽसुरो मनुष्यो वा न तं योधयितुं क्षमः ॥ १७ ॥

अखण्डितं तपस्तस्य वीर्यमप्रतिमं तथा।
तेन प्रतिबलो लोके द्वितीयो नावलोक्यते ॥ १८ ॥

येन द्वादश वर्षाणि कृतं व्रतमखण्डितम् ।
ब्रह्मचर्येण नियतं स तं जेष्यति संयुगे ॥ १९ ॥

[1]येन द्वादशवर्षाणि जितानिद्रा निरन्तरम् ।
कृतश्च निर्जने वासः स तं जेष्यति संयुगे ॥ २० ॥

न सामान्यजनेनायं विजेयो बलवत्तरः ।
लङ्केशस्य सुतोवीरो धीरः परविमर्दनः ॥ २१ ॥

तादृशोऽयं मम भ्राता सुमित्राङ्कविभूषणः ।
साधुलक्षणसम्पन्नो लक्ष्मणः सत्यभाषणः ॥ २२ ॥

एतस्याप्रतिमं मन्ये तपो वीर्यं बलं यशः ।
अयमेव क्षमो जेतुं रणे शक्रजितं रिपुम् ॥ २३ ॥

पुरैव विधिना चैतल्लिखितं भालपट्टयोः ।
उभयोरपि सौमित्रिवीरलङ्केशपुत्रयोः ॥ २४ ॥

एष इन्द्रजितो जेता स वध्योऽनेन निश्चितम् ।
इतिमत्वा कपिश्रेष्ठाश्चिन्तां त्यजत तज्जये ॥ २५ ॥

इति रामः कपीनुक्त्वा सुमित्रासूनुमादिशत् ।
जहि लक्ष्मण तं दुष्टं नाम्ना शक्रजितं रिपुम् ॥ २६ ॥

त्रैलोक्ये वीरवर्यत्वं लभस्व विपुलं यशः ।
इन्द्रजित्सूदनो भूयाः सुखयेन्द्रादिकान् सुरान् ॥ २७ ॥

स तदाज्ञां समादाय प्रणनाम महामनाः ।
आर्यं सत्यगिरं भूयः प्रसादसुमुखं च तम् ॥ २८ ॥

युद्धावहारः समभूत्ततश्च दिनानि पञ्चैव तयोश्चमूषु ।
इतः कपीन्द्रा बलिनस्ततस्ते रक्षोवराः स्थैर्यमवाप्य तस्थुः ॥ २९ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे कपिसैन्यपराभवो नाम षट्त्रिंशाधिकद्विशततमोऽध्यायः ॥ २३६॥

---

१. मपि दत्तम्—रीवाँ ।

सप्तत्रिंशाधिकद्विशततमोऽध्यायः

ब्रह्मोवाच

अथाष्टमीदिने वीरो मेघनादः सुरेन्द्रजित् ।
देवीं निकुम्भ[भि]लां नाम वरदामाराध ह ॥ १ ॥

तस्या आराधनादेष लप्स्यते वरमुत्तमम् ।
ससुरासुरमर्त्येषु लोकेषु न हि केनचित् ॥ २ ॥

शक्यो जेतुमिति ज्ञात्वा रामभक्तो विभीषणः ।
बोधयामास तं वृत्तं बद्धाञ्जलिपुटः पुरः ॥ ३ ॥

अद्य प्रभो स दुष्टात्मा मेघनादोऽतिदारुणः ।
आराधयति लङ्कायाः पूर्वद्वारान्तिके रहः ॥ ४ ॥

महाघोरे वनोद्देशे नानादुःसत्त्वसंकुले ।
निकुम्भ[भि]लां नाम देवीं वरदां सुप्रसादिनीम् ॥ ५ ॥

शीघ्रसाध्यवरां चैव ततो लब्ध्वा महावरम् ।
दुर्जेय एव भविता त्रैलोक्येऽपि सुरासुरैः ॥ ६ ॥

इति ज्ञात्वा रिपोस्तस्य देव्याराधनकर्मणि ।
हनुमत्प्रमुखैर्वीरैर्विघ्न एव विधीयताम् ॥ ७ ॥

वध्यश्चैष सुघोरात्मा त्वरितं लोककण्टकः ।
इति रक्षःपतेर्वाक्यं श्रुत्वा रामो महामतिः ॥ ८ ॥

हनुमत्प्रमुखान् वीरानादिदेश च लक्ष्मणम् ।
रे रे कपिवरा अद्य देवीं नाम्ना निकुम्भ[भि]लाम् ॥ ९ ॥

आराधयत्यसौ दुष्टो घोरकर्मा सुरेन्द्रजित् ।
मन्त्राहुतिभिरत्यर्थं संतर्प्यार्गिन स मन्त्रवित् ॥ १० ॥

दत्त्वा पूर्णाहुतिं यावल्लभते न महावरम् ।
तावत्तयाखिला यूयं गत्वा कुरुत विघ्नकम् ॥ ११ ॥

नो चेल्लब्धवरो भूयः स्यादजेयः सुरासुरैः ।
त्वं च तत्र द्रुतं गत्वा सौमित्रे जहि तं रिपुम् ॥ १२ ॥

बाणैर्वज्रनिभैस्तीक्ष्णैरर्द्धचन्द्रसमैर्भृशम् ।
निकृत्य समरेऽङ्गानि भुवि पातय विद्विषम् ॥ १३ ॥

इत्यादाय प्रभोराज्ञां कपीन्द्रा बलवत्तराः ।
हनुमत्प्रमुखाः सर्वे प्रचेलुर्बद्धकक्षकाः ॥ १४ ॥

रामस्यामृतसंस्रावैः करस्पर्शनलालनैः ।
पूर्वक्षतानि सर्वेषां प्रत्यङ्गं प्रथमं ययुः ॥ १५ ॥

तेषां पुरश्च सौमित्रिः प्रणम्य रघुवल्लभम् ।
लब्धप्रसादस्तस्याशु विजेतुं शत्रुमाहवे ॥ १६ ॥

सद्यः पर्यंचलद्धीर आबद्धकवचो बली ।
धनुर्धरः कटिद्वन्द्वबद्धतूणीर उद्धतः ॥ १७ ॥

तेषां निर्गच्छतां घोरघनवत्प्रतिगर्जताम् ।
संरम्भः सुमहानासीन्मेघनादवधोचितः ॥ १८ ॥

अथ सुग्रीवहनुमन्नलनीलाङ्गदादयः ।
कपीन्द्राः सुमहावीराः कोटिकोटिबलैर्युताः ॥ १९ ॥

सह लक्ष्मणवीरेण सोत्साहा धावनोद्धताः ।
सर्वे तत्र परिप्रापुर्वनोद्देशेऽतिदारुणे ॥ २० ॥

यत्राराधयते देवीं घोरकर्मा सुरेन्द्रजित् ।
जपैर्होमैः स्तुतिगणैर्वलिदानैः सहस्रश ॥ २१ ॥

धूपदीपादिविधिभिः पृथङ्नैवेद्यराशिभिः ।
यावत्पूर्णाहुतिं दत्त्वा लभते न महावरम् ॥ २२ ॥

प्रत्यक्षीकृत्य तां देवीमाशुतोषां कुम्भ[भि]लाम् ।
तावदेते महोद्दामवीर्याः सर्वे कपीश्वराः ॥ २३ ॥

सौमित्रिणा सह प्राप्ताः कर्मविध्वंसनोद्धुराः ।
ते द्वारपालान् प्रसभं राक्षसानतिदारुणान् ॥ २४ ॥

निजघ्नुर्घोरनिर्घोषान् नानाशस्त्रप्रहारिणः ।
शिलावृक्षादिभिः सर्वे युगपत्कृतसम्मताः ॥ २५ ॥

ते राक्षसाः सुसंक्रुद्धा यथास्थानं मनीषिणा ।
स्थापितास्तेन बलिना मेघनादेन निर्भयाः ॥ २६ ॥

प्राप्तान् वीक्ष्य कपीन्द्रांस्तान् बलात्प्रहरतोऽखिलान् ।
उच्चैः संचुक्रुशुर्घोराः परित्रस्ताः समंततः ॥ २७ ॥

तेषामाक्रोशतां भूयो द्वारेषु द्वाररक्षिणाम् ।
शुश्राव निनदं घोरं मेघनादोऽन्तरस्थितः ॥ २८ ॥

किमेतदित्यादिदेश पार्श्वं स्थान राक्षसोत्तमान् ।
ते धावमानाः परितो द्वारदेशं समाययुः ॥ २९ ॥

यत्र वानरसैन्यौघैर्हन्यन्ते द्वाररक्षकाः ।
राक्षसाः कोटिसंख्याता गृहीतविविधायुधाः ॥ ३० ॥

अथ तूर्णं समागत्य केचिदिन्द्रजितोऽन्तिकम् ।
ऊचिरे राक्षसास्त्रस्ताः सौमित्रिविशिखोत्करैः ॥ ३१ ॥

महाराजकुमार त्वं निश्चिन्तो वर्तसे किमु ।
हन्यन्ते द्वारदेशे ते राक्षसाः कोटिशः परैः ॥ ३२ ॥

सर्वेऽप्येते द्वारपाला यथास्थानं निवेशिताः ।
सप्तव्यूहान् विनिर्भिद्य प्राप्तप्राया इहापि तैः ॥ ३३ ॥

तेषां पुरः स सौमित्रिर्धृतधन्वा यथान्तकः ।
वर्षञ्छरोत्करान् भूयो भिनत्ति रजनीचरात् ॥ ३४ ॥

तत इन्द्रजिताऽऽज्ञप्ताः केचिद्राक्षसयूथपाः ।
अहो वीरा बलीमुख्या इमान् स्तम्भयत द्विषः ॥ ३५ ॥

मुहूर्तं युध्यमानांस्तान् विलम्बयत यात भोः ।
यावत्कर्म समाप्याहमुत्तिष्ठेयं धृतायुधः ॥ ३६ ॥

इत्यादिष्टा निशिचरा घोरा रावणसूनुना ।
समेत्य तैर्युयुधिरे सौमित्रिबलवानरैः ॥ ३७ ॥

शस्त्राण्यस्त्राणि घोराणि वर्षन्तो वानरान् प्रति ।
ते लक्ष्मणेन निशितैः शरैर्विद्राविताः क्षणात् ॥ ३८ ॥

हनूमान् बद्धकक्षोटः क्रोधताम्रविलोचनः ।
आक्रम्य पोथयामास राक्षसान् धरणीतले ॥ ३९ ॥

केचिद् द्विधा कृता भूमौ राक्षसास्तेन पातिताः ।
सुग्रीवबाहुनिर्मुक्तशिलाभूरुहकोटिभिः ॥ ४० ॥

चूर्णिताः शेरते भूम्यां यातुधानाः सहस्रशः ।
भ्रामयित्वा परे दिक्षु बालिपुत्रेण पातिताः ॥ ४१ ॥

नलनीलादिभिः केचिद्गदापातैर्विचूर्णिताः ।
दुर्मुखोद्विविदो मैन्दः कुमुदः कपिकुञ्जरः ॥ ४२ ॥

राक्षसांश्चिक्षिपुः सर्वे कपयः शीघ्रकारिणः ।
लक्ष्मणस्य शितैर्बाणैर्वज्रनिर्घातराविभिः ॥ ४३ ॥

सहस्रशो हता भूमौ निपेतुः कौणपोत्कराः ।
इत्थं संहृत्यबलिनो रक्षोव्यूहाननेकशः ॥ ४४ ॥

अन्तः प्रविविशुर्यत्र मेघनादः क्रियाकुलः ।
पूर्णाहुतावदत्तायां कीशास्तं पर्यवेष्टयन् ॥ ४५ ॥

बभञ्जुः केऽपि पात्राणि केचिन्मण्डपमक्षिपन् ।
केऽप्यग्निं शमयामासुः केऽप्यघ्नन् कर्म ऋत्विजः ॥ ४६ ॥

ततः स कुपितो वीरो ध्वस्तकर्मा सुरेन्द्रजित् ।
दृष्ट्वा सौमित्रिमुत्तस्थौ संहितेषुर्धनुर्धरः ॥ ४७ ॥

ततस्तयोरभूद्युद्धं सौमित्रिबलभिज्जितोः ।
परस्परं प्रहरतोर्विशिखानतिदारुणान् ॥ ४८ ॥

गर्जतोः संतर्जयतोरन्योन्य विजयैषिणोः ।
अन्योन्यस्य शरव्रतानन्योन्यं विनिकृत्ततोः ॥ ४९ ॥

अन्योन्यमर्मंतुदतोर्विचित्ररणदक्षयोः ।
अन्योन्यमारावयतोः प्रहारैः सकला दिशः ॥ ५० ॥

गिरीनिवोज्जासयतोर्वज्रेरिवशरोत्करैः ।
यावद्दीनानि यद्घोरं युद्धं समभवत्तयोः ॥ ५१ ॥

षष्ठेऽह्नि सम्प्रहरतस्तत्य घोरैः शिलीमुखैः ।
अर्द्धचन्द्रेषुणाकृन्तत् सौमित्रिर्भुजमुद्धतम् ॥ ५२ ॥

जविना तस्य बाणेन कृतः शक्रजितो भुजः ।
उड्डीय व्योममार्गेण ययो यत्र सुलोचना ॥ ५३ ॥

सखीनिबहमध्यस्था कीर्तयन्तो गुणोत्करम् ।
रक्षोराजकुमारस्य भर्त्तरर्द्धाङ्गगामिनी ॥ ५४ ॥

महासती महाचारा महासौन्दर्यशालिनी ।
तस्याः पाणितलं बाहुः पपात विपुलाङ्गदी ॥ ५५ ॥

अथ सा निजपल्यङ्कादुत्तीर्य विपुलेक्षणा ।
विललाप भुजं पत्युरालिङ्ग्य प्रेमकातरा ॥ ५६ ॥

हा वीर हा गुणागार हा मत्प्राणैकजीवन ।
हा परानीकमथन कृत्तः केन भुजस्तव ॥ ५७ ॥

अयं विकर्षन् मम मेखलागुणं दधत्सुपीनस्तनकुड्मलार्द्रनम् ।
मिलन् सुनाभीजघनोरुवर्ष्मभिर्बलेन नीवीं श्लथयन् करस्तव ॥ ५८ ॥

कदा नु मां वीरवराग्प्रभोक्ष्यते गतश्च सद्यः किमिवेदृशीं दशाम् ।
कङ्कदा नु नाकेशपुरीकपाटयोः प्रभञ्जनं कौतुकतः करिष्यते ॥ ५९ ॥

कदा नु नाकप्रमदाः कचोत्करे प्रगृह्य कर्षिष्यति वीर कौतुकात् ।
कदा पलायत्सुरकिंनरश्रियो जवाच्च वेणीमिव तां कृपाणिकाम् ॥ ६० ॥

इत्थं विलप्य सा बाला रुदन्ती करुणस्वरम् ।
मूर्छितां न्यपतद्भूमौ सखीसंदोहमध्यगा ॥ ६१ ॥

अथ तस्य रणे क्रुद्धो लक्ष्मणः परदर्पहा ।
द्वितीयमपि चिच्छेद भुजमत्यर्थकर्कशम् ॥ ६२ ॥

कृत्ते भुजद्वये तस्य कार्मुकं न्यपतद्भुवि ।
द्रुतं सहैव लङ्केशराज्यश्रीभोगमङ्गलैः ॥ ६३ ॥

अथ तस्य शिरः कूटमहाद्रिग्रावकर्कशम् ।
अर्द्धचन्द्रमितैर्भल्लैर्निरकृन्तत लक्ष्मणः ॥ ६४ ॥

तथापि नापतद्भूमौ कृतालीढपदस्थितिः ।
रुण्ड एव बलेनास्थान्महासत्त्वो निशाचरः ॥ ६५ ॥

तस्य प्राणानिलाः कण्ठान्निर्यान्तो वेगवत्तराः ।
भांकारभूरिनिर्घोषैः पूरयाञ्चक्रिरे नभः ॥ ६६ ॥

छिन्नमूर्द्धाप्यसौ भीम उपगन्तुं न शक्यते ।
करिष्यत इवात्यर्थं पुनरप्युग्रविक्रमम् ॥ ६७ ॥

ततो जयजयेत्युच्चैर्दिवि देवाः सवासवाः ।
कल्पवृक्षप्रसूनौघै रामानुजमवाकिरन् ॥ ६८ ॥

त्रैलोक्यकण्टको ह्येष यथा क्षिप्तः शरैस्तव ।
तथास्य जनकोऽप्युच्चै रामेण क्षिप्यतां रणे ॥ ६९ ॥

देवदुन्दुभिजो घोषः परितो व्यानशे दिवि ।
हर्षिताश्च सुराः सर्वे तस्मिन् दुष्टे क्षयं गते ॥ ७० ॥

दिशां प्रसादः समभूत् स्वयमेव समंततः ।
हृष्टाश्च कपयः सर्वे नलनीलाङ्गदादयः ॥ ७१ ॥

हनुमत्सुग्रीवमुखास्तुष्टुवुस्तं धनुर्धरम् ।
राघवेन्द्रानुजं वीरं शक्रजिद्विनिषूदनम् ॥ ७२ ॥

तत आदाय तच्छीर्षं देवीं तां च निकुम्भ[भि]लाम् ।
सोपहारामिव प्रीतामाजग्मुर्विजयोर्जिताः ॥ ७३ ॥

सर्वे कपिवरास्तुष्टाः कृत्वा रामानुजं पुरः ।
सप्रावृषेण्यजलदा उदीच्याः पवना इव ॥ ७४ ॥

रामावासस्थलीं प्राप्ताः साटोपाः सोत्सवाननाः ।
गर्जन्तो जयनिर्घोषैः केचित्पूरितगोमुखाः ॥ ७५ ॥

तेषां मध्यस्थः सुमित्रातनूजो रामस्योच्चैर्घोषयन् जैत्रनादम् ।
बिभ्रद्दोष्णोः कार्मुकज्याकिणाङ्कान् [1]हृष्टो दराद्रामचन्द्रेण वीरः ॥ ७६ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे इन्द्रजिद्वधो नाम सप्तत्रिंशाधिकद्विशततमोऽध्यायः ॥ २३७ ॥

अष्टात्रिंशाधिकद्विशततमोऽध्यायः

ब्रह्मोवाच

श्रुत्वेन्द्रजिद्वधं कृष्णचतुर्दश्यां दशाननः ।
गाढशोकभरेणाशु संरुद्धहृदयो भृशम् ॥ १ ॥

मुमोह मूर्छितो भूमौ निपपात सुविह्वलः ।
निकृत्तमूलो विपुलः क्षोणीरुह इवोन्नतः ॥ २ ॥

चिरेण चेतनां लब्ध्वा रुरोदोच्चैस्तरामसौ ।
दरीमिव प्रतिध्वानैर्दिशो मुखरयन् रवैः ॥ ३ ॥

करुणस्वरसंजातसुहृद्वन्धुदयोदयः ।
विललाप चिरं तस्य स्मारं स्मारं गुणोत्करम् ॥ ४ ॥

हा पुत्र हा महावीर हा वत्स गुणमन्दिर ।
हा बन्धुजनसर्वस्व किमभूत्किमभूदिदम् ॥ ५ ॥

हा पुत्र तद्दिनं यत्र जित्वा स्वर्गपुरीपतिम् ।
भवान् लब्धेन्द्रजित्ख्यातिरागतोऽभूदिमां पुरीम् ॥ ६ ॥

वीर त्वं लीलया जैषीः सुरसद्मानि कोटिशः ।
बन्दीकृत्य सुरश्रेणीः कशाघातैरताडयत् ॥ ७ ॥

वत्स त्वं समरे शत्रून् जित्वा जित्वा जगत्त्रये ।
चक्रे मम समुत्कर्षं लङ्कांराज्यपदस्थितौ ॥ ८ ॥

त्वयाहं राजराजत्वं गमितो भुवनत्रये ।
प्रतिभूपशिखारत्नरोचिनीराजिताङ्घ्रिकम् ॥ ९ ॥

स त्वमद्य विपर्यासान्मम भाग्यस्य पुत्रक ।
शेषे संग्रामधरणौ पुनर्जागरणोज्झितः ॥ १० ॥

---

१. दृष्टो—इति पाठः समीचीनः ।

विमाय यस्य विशिखैर्यमोऽपि समराङ्गणे ।
सम्भ्रान्तो दिक्षु वित्रस्तोऽविशन्मेरुगुहागृहान् ॥ ११ ॥

स त्वां कथं नु जग्राह दण्डभृद् हृष्टचेतनः ।
गृहागतिकृपाशीलं नावैत्कि वा भयानकम् ॥ १२ ॥

हा हाद्य दुर्नयः कोऽयं कामं जीवति रावणः ।
मृतश्चेवेन्द्रजित्पुत्र इत्युपश्रुत्य उत्कटाः ॥ १३ ॥

दुःश्रवा धक्ष्यन्ते स्वान्तं मामकीनं मुहुर्मुहुः ।
इह ते बान्धवाः पुत्र त्वां विना सर्वसौख्यद ॥ १४ ॥

जीविष्यन्ति कथं नाम येषां शय्यासनादिषु ।
त्वमेकः प्राणवर्गस्य मानदः स्थितिसाधनम् ॥ १५ ॥

इत्यादि विलपञ्छोकशल्यविक्षतमानसः ।
हा हेति चूर्णितमनाश्चक्रन्द सुचिरं हतः ॥ १६ ॥

युद्धावहारमकरोत्तद्दिने भृशदुःखितः ।
बहिरन्तश्चतुर्दिक्षु पश्यन् विश्वं तमोमयम् ॥ १७ ॥

विविशान्तःपुरमथ क्लान्तपद्मवनाननः ।
यत्र मन्दोदरीमुख्या रुदन्त्यः सुभृशं हताः ॥ १८ ॥

अन्योन्यबन्धवो बन्धूनालिङ्ग्या लिङ्ग्य दुःखिताः ।
उत्पतन्त्यः पतन्त्यश्च राक्षस्यो गतचेतनाः ॥ १९ ॥

लोचनाम्बुपरीवाहैः सृजन्त्योऽनेकवाहिनीः ।
दृष्टैवनं भूरिसंतप्ता महिषी व्यलपत्तराम् ॥ २० ॥

हा मर्त्तस्तव निबन्धाज्जातो रामेण संगरः ।
ईदृग्विधानि रत्नानि हूयन्ते यत्र वै त्वया ॥ २१ ॥

त्वदर्थे त्यक्तजीवोऽयं मदङ्कमणिरुत्तमः ।
यमस्य शासनं यातः क्व पुनर्दृश्यतां मया ॥ २२ ॥

हितं त्वदीयं लङ्केशः कृतिधा नोदितं मया ।
नाविशत्ते मनो नाथ भाविनार्थेन हीदृशा ॥ २३ ॥

अवशिष्टमिदानीं मे मानसौभाग्यभूतिषु ।
न किंचिद्राक्षसाधीश गते शक्रजिति क्षयम् ॥ २४ ॥

इत्यादिभिर्विलपनैर्मन्दोदर्याः सहस्रशः ।
अर्पितानीव शल्यानि दशवक्त्रस्य चेतसि ॥ २५ ॥

तस्मिन् मुहूर्ते सोत्साहं नाम्ना देवी सुलोचना ।
भर्त्तारमनुयास्यन्ती श्वशुरौ सा व्यजिज्ञपत् ॥ २६ ।

आज्ञां मे कुरुतं सत्यमनुयास्यामि वां सुतम् ।
भर्त्तारं प्राणदयितमागो मे क्षन्तुमर्हथः ॥ २७ ॥

यन्मयाभिहितं किंचित्कृतं वा सदसच्च वा ।
तत्सर्वं बान्धवजनैः साकं मे क्षन्तुमर्हथः ॥ २८ ॥

याति मे समयः कश्चिदविलम्बार्हं उत्तरः ।
तदाज्ञामेव दत्तं मे श्वशुरौ दैवतौ मम ॥ २९ ॥

नमामि चरणौ मातर्मन्दोदरि महासति ।
अनुज्ञां देहि मे सत्यं न विलम्बक्षणो ह्ययम् ॥ ३० ॥

नमस्ते रक्षसां पत्ये लङ्कानाथाय धीमते ।
महामानैकविधये महोग्राय महीयसे ॥ ३१ ॥

इत्युक्त्वा साचलद्देवी शेषकन्या महामनाः ।
रूदतीस्ताः स्त्रियः सर्वा मुहूर्तं संन्यवारयत् ॥ ३२ ॥

तस्याः सत्वं समालोक्य सर्वं अन्तः पुरस्त्रियः ।
अस्तभ्नुः शोकवाष्पाणि यावत्सा संनिधौ स्थिता ॥ ३३ ॥

सा गत्वा रणभूमिमातुरमना दृष्ट्वा विशीर्षं पतिं
शोकार्त्तास्य शिरोऽर्थिनी रघुपतेः सैन्यं प्रसह्याव्रजत् ।
प्रत्यङ्गद्युतिचन्द्रिकासमुदयैरच्छप्रकाशं दिशां
कुर्वन्ती शतपूर्णिमा मयमधात्तत्कृष्णभूतादिनम् ॥ ३४ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे रावणविलापादिवर्णनो नामाष्टात्रिंशाधिकद्विशततमोऽध्यायः ॥ २३८ ॥

एकोनचत्वारिंशाधिकद्विशततमोध्यायः

ब्रह्मोवाच

तामायान्तीं तडित्कान्तिं पूर्णचन्द्रनिभाननाम् ।
परितः संदिदिहिरे कपिसैन्यानि चेतसि ॥ १ ॥

नूनं किमेषा जनकेन्द्रपुत्री मुक्ता दशास्येन हिमांशुवक्त्रा ।
अशोकवाटीं सहसा विहाय पर्येतिशीघ्रं रमणं रमेव ॥ २ ॥

विहाय नाकं त्रिदशाङ्गना वा काचित्प्रभुंराघवं सार्वभौमम् ।
द्रष्टुं समेतीयमखण्डलश्रीस्तनुप्रकाशैः परितः स्फुरन्ती ॥ ३ ॥

साक्षादयं भानुकुलेऽवतीर्णो रामः परः पूरुष एक आद्यः ।
तमीक्षितुं वा कमला समुद्रादियं समागच्छति कान्तियुक्ता ॥ ४ ॥

तारापथाद्वा समुपैति तारा पूर्णेन्दुबिम्बादपि चन्द्रिका वा ।
प्रभा रवेवापि रविं विहाय जवादहो कास्विदितः समेति ॥ ५ ॥

केचित्तां वीक्ष्य कपयः सीताबुद्ध्यामहाप्रभाम् ।
अवाङ्मुखदृशस्तस्थुश्चित्रेषु लिखिता इव ॥ ६ ॥

केचित्सकृत्समालोक्य कान्तिपूरेण भूयसा ।
आच्छन्ननयनाः कीशा न पुनर्वीक्षितुं क्षमाः ॥ ७ ॥

केचित्सौन्दर्यमालोक्य विपुलं तदलौकिकम् ।
शिरांसि कम्पयामासुः कपयो जातविस्मयाः ॥ ८ ॥

केऽपिश्लाघां वितन्वानाः कपयः शुद्धबुद्धयः ।
न वै वर्णयितुं शक्ता अभवन् जातकौतुकाः ॥ ९ ॥

इत्थमाच्छिद्य सर्वेषां नेत्राणि च मनांसि सा ।
श्रीरामसविधं प्राप यत्र भर्त्तुः शिरोधृतम् ॥ १० ॥

श्लाघते यत्र सौमित्रिं हस्तस्पर्शनलालनैः ।
आमृशन् परितोऽङ्गानि रामो नित्वानिमागतम् ॥ ११ ॥

आस्फोटितभुजा यत्र हनुमत्प्रमुखा भटाः ।
सोत्साहवदनाः कामं वीक्ष्यन्ते रघुभानुना ॥ १२ ॥

यत्र श्लाघापरस्तेषां रामो वीक्ष्य महच्छिरः ।
लक्ष्मणस्य शरान् स्तौति गिरिनिर्दलनक्षमान् ॥ १३ ॥

तत्र प्रविश्य सा बाला पूर्णेन्दुवदनोज्ज्वला ।
अस्तौत् प्रणम्य श्रीमन्तं राघवेन्द्रं सुलोचना ॥ १४ ॥

नमस्ते पुरुषश्रेष्ठ ऋग्यजुसामसंस्तुत ।
समस्तत्रिदशाधीश पूर्णसर्वकलानिधे ॥ १५ ॥

जानामि त्वामवतीर्णं धरायां भारापनोदाय परं पुमांसम् ।
विरञ्चिना प्रार्थितः सूर्यवंशे आविष्कृतानन्तपूर्णस्वरूपम् ॥ १६ ॥

विपर्यासाद्भागधेयस्य रक्षो नाज्ञासीत्त्वां श्वशुरो मे दशास्यः ।
स तत्फलं प्राप साक्षात्त्वयेश क्रोधादीषत्संहृतं तत्कुलं यत् ॥ १७ ॥

स मत्पिता नागराट् शेषसंज्ञो गृणाति दिव्यैर्नामभिस्त्वामजस्रम् ।
तत्राश्रौष्ठं नाम धाम स्वरूपं तव श्रीमन् विश्वतोऽनन्तकीर्त्तेः ॥ १८ ॥

त्वमेव राम प्रमुदाटवीस्थः करोषि लीलाः सहजानन्दिनीश ।
श्रीमति सरय्वाः पुलिने त्वमेव नित्यं विहरस्यप्रमेयप्रभाव ॥ १९ ॥

त्वां गोपिकाः श्रुतिदेवर्षिरूपा भजन्तेऽन्तः कामतत्त्वेन पूर्णाः ।
प्राप्ताहं त्वं शरणं तद्वदेव त्रायस्व मां न त्यज प्राणनाथ ॥ २० ॥

एतद्धुत्वा पञ्चभूतप्रभूतं शरीरं मे ह्यासुरं भावमाप्तम् ।
चितानले दीप्तशिखे क्षणेन प्राप्तास्मि त्वामात्मनः प्रेष्ठमीशम् ॥ २१ ॥

न जातु मे त्वत्पदाम्भोजभक्तिविच्छेदः स्यादिति सम्प्रार्थयामि ।
अमोघसेवाभजनप्रकारं त्वामीश को नाम भजेन्न विद्वान् ॥ २२ ॥

अयं च मे देहसम्बन्धनिष्ठः पतिस्तवैवास्तु जन सदेशः ।
मत्संगतोऽस्यासुरभावनाशे भावस्त्वदीयः प्रकटोऽस्त्वस्य चित्ते ॥ २३ ॥

इत्यनेन शरीरेण सहयुक्तामुना प्रभो ।
ज्वलिष्यामि समिद्धेऽग्नौ भविष्यामि सहैव च ॥ २४ ॥

आवामुभौ करिष्यास्तव दास्यं रघूद्वह ।
जन्मान्तरं परिप्राप्य निवृत्तासुरभावनौ ॥ २५ ॥

देहि शीर्षमिदं नाथ येनाहं सहितानले ।
दहेयं देहमेतं वै लब्धुं दिव्यतरं वपुः ॥ २६ ॥

इति तस्या स्तवैरेभिः प्रससाद रघूद्वहः ।
पुनर्जीवयितुं तस्या भर्तारकमकरोन्मतिम् ॥ २७ ॥

तावद्धनूमानुत्थाय बद्धाञ्जलिपुटः सुधीः ।
पुरो विज्ञापयामास सुप्रसन्नं रघूद्वहम् ॥ २८ ॥

अयं प्रभो महावीरः समरे संचरन्मुहुः ।
कृच्छ्रेण लक्ष्मणेनैव दिनैः षड्भिर्नियातितः ॥ २९ ॥

तदलं सम्प्रसादेन पुनर्जीवय मा रिपुम् ।
जन्मान्तरे तु देह्यस्यै यदसौ याचते सती ॥ ३० ॥

इति श्रुत्वा हनुमतो वचः शत्रुनिषूदनः ।
शिरोऽस्यै प्रददौ भर्तुर्गृहीत्वा सा प्रणम्य तम् ॥ ३१ ॥

जगाम पावके दीप्ते मलयैधाकदम्बकैः ।
आज्योक्षितैश्चितामध्ये आरुरोह सुलोचना ॥ ३२ ॥

शेषपुत्र्याः प्रभावेण स पुनर्भविता किल ।
प्रयुद्वने तया सार्द्धं सुमुखो नाम गोपतिः ॥ ३३ ॥

तद्वधूस्तत्र सुलोचनैव नाम्ना प्रसिद्धा प्रमुदाटवीस्था ।
श्रीरामवंशीरवमाकलय्य तदन्तिकं प्राप्स्यति सा विलासे ॥ ३४ ॥

इति **श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे सुलोचना-सहगमनो नामैकोनचत्वारिंशाधिकद्विशततमोध्यायः ॥ २३९ ॥**

चत्वारिंशाधिकद्विशततमोऽध्यायः

ब्रह्मोवाचः

अथ चैत्रस्य कृष्णायां पञ्चदश्यां दशाननः ।
युद्धाय राक्षसैः सार्धं प्राप्तो रोषसमन्वितः ॥ १ ॥

कोटिशो राक्षसास्तस्य पुरोगाः पृष्ठगास्तथा ।
गृहीतनानाशस्त्रास्त्रा मृत्यवे हुतजीविताः ॥ २ ॥

तेषां समरसं रम्भं वीक्ष्य रामस्य सैनिकाः ।
कोटिशः कपयो वीराः संयुक्ताः सहसा युधे ॥ ३ ॥

तेषामन्योन्यमभवत् सुमहद्युद्धताण्डवम् ।
शिलावृक्षप्रहरणैः करदन्तनखायुधैः ॥ ४ ॥

बलिनो बलिभिः साकं संयुताः संप्रहारिणः ।
वानराः शौर्यसम्पूर्णाश्चक्रिरे घोरमाहवम् ॥ ५ ॥

अथ रावण आधूय तडिद्दीप्ताः कृपाणिकाः ।
कुपितो निजघानाजौ वानरान् सोऽतिनिर्दयः ॥ ६ ॥

यूथशो वानरान् खड्गैर्वज्रनिष्पातभीषणैः ।
द्विधाकृत्य तनुं युद्धे जघान दशकन्धरः ॥ ७ ॥

हतैस्तेन रुषान्धेन कपिभिस्तैः सहस्रशः ।
नितान्तपीनतनुभिर्भूमिरातस्तरेतराम् ॥ ८ ॥

कपीनां कदनं वीक्ष्य चुक्रोध रघुपुङ्गवः ।
चैत्रशुक्लाद्यदिवसादारभ्य पञ्चभिर्दिनैः ॥ ९ ॥

आस्फाल्य धनुरुद्दीप्तबाणपूगैः सहस्रशः ।
क्षयं निनाय निखिलान् रक्षोयूथपतीन् रणे ॥ १० ॥

उद्धताः कृतसंरम्भाः प्राप्य रामं निशाचराः ।
पतङ्गा इव दीप्तार्चिं क्षयं याता मदाविलाः ॥ ११ ॥

तैरद्रिकूटसंकाशैः पतितैर्बाणताडितैः ।
उच्चावचाभवद्भूमिरगम्या सकलैरपि ॥ १२ ॥

आस्तृता परितो घोरं युद्धं कृत्वा प्रदारुणैः ।
निर्बाणैः कौणपवरैर्भीमा संग्राममेदिनी ॥ १३ ॥

शोणितौघवहास्वन्तर्नदीषु गिरिकूलवत् ।
पतिता रक्षसां कायाः स्यन्दमानाः समंततः ॥ १४ ॥

रामबाणाविदीर्णानां राक्षसानां द्विधा वपुः ।
चलितं रोषवेगेन चेष्टते स्म भुजङ्गवत् ॥ १५ ॥

रक्षोधिपेषु सर्वेषु क्षयं नीतेषु संयुगे ।
महा पार्श्वादयो वीरा युध्यन्ते स्म सुविक्रमैः ॥ १६ ॥

तेऽपि षष्ठीं समारभ्य यावत् स्यादष्टमीदिनम् ।
युद्धं कृत्वा महत्संख्ये घातिताः शेरते भुवि ॥ १७ ॥

अथ रावणनिर्मुक्तशक्त्या वज्रनिपातया ।
लक्ष्मणो हृदि निर्भिन्नः पपात सहसा भुवि ॥ १८ ॥

ततो हाहाकृतमभूद् रामसैन्यं विषादतः ।
राघवेन्द्रोऽपि भगवान् नरलीलानुकारकः ॥ १९ ॥

मुमोचाश्रूणि नेत्राभ्यां विषण्णहृदयो भृशम् ।
लक्ष्मणे शक्तिनिर्भिन्नं वीक्ष्य चिन्तासमन्वितः ॥ २० ॥

अथोवाच हनूमन्तं त्वरितं गच्छ मारुते ।
अस्ति द्रोणाचले दिव्या विशल्यकरणौषधिः ॥ २१ ॥

तामानय बलात्सद्यो यस्याः स्पर्शनमात्रतः ।
विशल्यः स्यान्मम भ्राता मूर्छितः पतितो भुवि ॥ २२ ॥

इत्यादिष्टो मरुत्सूनुर्जगाम द्रोणपर्वतम् ।
तावन्नवम्यां रामेण संताड्य निशितैः शरैः ॥ २३ ॥

रोषाद्विद्रावितो युद्धात्प्राणानादाय रावणः ।
जगाम लङ्कानगरीं महामानी ज्वलन् रुषा ॥ २४ ॥

अथ प्राप मरुत्सूनुर्दिव्यं द्रोणमहीधरम् ।
तत्रापश्यद्दीप्यमानाः सर्वा एव महौषधीः ॥ २५ ॥

ततो बलात्समुत्पाट्य द्रोणाद्रिं व्योमवर्त्मना ।
आजगाम त्वरायुक्तो यत्र रामो विषण्णधीः ॥ २६ ॥

समागतं हनूमन्तमालोक्य रघुपुङ्गवः ।
प्रससाद भृशं तस्मिन्नसंख्यातोपकारिणि ॥ २७ ॥

द्रोणाद्रेः सहसाऽऽदाय विशल्यकरणौषधिम् ।
स्पर्शयामास सौमित्रेर्विशल्यः सोऽभवत्तथा ॥ २८ ॥

उत्तस्थौ तत्क्षणादेव सुहृदां हर्षमावहन् ।
युद्धावहारः समभूद्दशमी दिवसे तदा ॥ २९ ॥

अथ रात्रौ कपिभटाः कृतास्फोटाः सगर्जनाः ।
प्रविश्य लङ्कानगरीं ज्वालयामासुरुत्कटाः ॥ ३० ॥

तत्राभवद्युद्धमतीव तेषां शाखामृगाणां बलिभिः सपत्नैः ।
अवीवधन् दन्तनखप्रहारैः शिलाद्रुमाद्यैश्च रिपून् हरीन्द्राः ॥ ३१ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे द्रोणाद्रिनयनो नाम चत्वारिंशाधिकद्विशततमोऽध्यायः ॥ २४० ॥

एकचत्वारिंशाधिकद्विशततमोऽध्यायः

ब्रह्मोवाच

अथेन्द्रः प्रेषयामास रथं मातलिसारथिम् ।
पद्भ्यां चरन्तं विज्ञाय रामं त्रिभुवनेश्वरम् ॥ १ ॥

रावणं च रथोपस्थमास्थितं मदशालिनम् ।
ततो मातलिरागच्छदेकादश्यां महारथम् ॥ २ ॥

नीत्वा श्रीरामचन्द्राय चण्डविक्रमशालिने ।
द्वादश्यां रथमास्थाय काकुत्स्थः सज्यकार्मुकः ॥ ३ ॥

ययौ दशमुखं हन्तुं क्रूरं त्रैलोक्यकण्टकम् ।
तयोः प्रतिदिनं युद्धं द्वादशीदिवसादभूत् ॥ ४ ॥

यावद्वैशाखमासस्य भवेत्कृष्णचतुर्दशी ।
सुरकिन्नरसिद्धानां पश्यतां विस्मयावहम् ॥ ५ ॥

स रथः पवनोत्तालवाजिवाहनसंयुतः ।
स्वर्गङ्गावीचिपवनव्याधूतविपुलध्वजः ॥ ६ ॥

मातुलेः करचातुर्यान्नीयमानो जयावहः ।
गम्भीरघननिर्घोषः शुशुभे समराङ्गणे ॥ ७ ॥

तमारूढश्च शुशुभे साक्षाद्भूमिपुरन्दरः ।
रामः शस्त्रभृतां श्रेष्ठः सज्यकार्मुकमण्डलः ॥ ८ ॥

देवसूतसमानीतं माहेन्द्रकवचं महत् ।
बिभ्राणः पुष्पवद्यत्र भवन्त्यसुरमार्गणाः ॥ ९ ॥

तावन्योन्यं संगतौ तत्रयुद्धे जयैषिणौ सुमहोत्साहयुक्तौ ।
चिरात्परिप्राप्तपराक्रमक्षणौ श्रीराघवेन्द्रक्षणदाचरेन्द्रौ ॥ १० ॥

दोष्णां विंशतिसंख्यानां दशानां शिरसामपि ।
रावणो गैरवं विभ्रद्ददृशे मदसंवृतः ॥ ११ ॥

हेलाजितमहेन्द्रादिसुरलक्ष्म्येकभोगिनम् ।
बलान्निकृत्तशीर्षौघपूजितेशाङ्घ्रिपङ्कजम् ॥ १२ ॥

स्वदोर्दण्डमदोत्क्षिप्तकैलासगिरिगौरवम् ।
रामो रावणमालोक्य योग्यं रिपुममन्यत ॥ १३ ॥

अथास्फाल्य धनुः क्रोधाद्भ्रुकुटीभङ्गभीषणः ।
रामस्य दक्षिणे दोर्ष्णि रावणो बाणमाक्षिपत् ॥ १४ ॥

स बाणस्तस्य दोर्मूलमप्रविश्यापतद्भुवि ।
न विवेद क्षणं रामः सीतासोत्कण्ठमानसः ॥ १५ ॥

रामेण वेगनिर्मुक्तो बाणः कुलिशदारुणः ।
रावणस्याशु हृदयं विवेश भृशकर्कशम् ॥ १६ ॥

अन्योन्यबाणभल्लाग्रनिकृत्तान्योन्यमार्गणौ ।
तौ मुहूर्तमयुध्येतामक्षतावेव संगरे ॥ १७ ॥

अन्योन्यं लक्ष्यनिर्भग्नसुतीक्ष्णान्योन्यसायकौ ।
युयुधाते मुहूर्तं तावनिर्मुक्तशराविव ॥ १८ ॥

रामस्य बाणापूगेन समच्छन्नोऽथ रावणः ।
रावणस्य च रामोऽपि ततोऽसूयाभवत्तयोः ॥ १९ ॥

आविरास्तामथो बाणैरुत्क्षिप्य शरजालकम् ।
विनिरस्तहिमानीकौ द्वौ भास्वन्मण्डलाविव ॥ २० ॥

अन्योन्यरणसंरम्भस्तयोस्तुल्यो व्यदृश्यत ।
परस्परस्य सादृश्याद्युध्यतो वै परस्परम् ॥ २१ ॥

परस्परजयाकाङ्क्षानिर्मुक्तशरसंघयोः ।
तयोरुपरि निस्तुल्यविक्रमप्रीतमानसाः ॥ २२ ॥

सुराश्चैवासुराश्चक्रुः पुष्पवृष्टीरनुक्षणम् ।
शुशुभाते भृशं ताभिस्तौ नितान्तप्रपूजितौ ॥ २३ ॥

अथ रावण आक्षिप्य रामं दुर्वचसां भरैः ।
दक्षेण पाणिनोत्तोल्य शतघ्नीं वेगवत्तराम् ॥ २४ ॥

लोहशंकुशतव्याप्तां वज्रसम्पातभीषणाम् ।
प्राक्षिपत्तरसा वीरो जितमित्यसुरा जगुः ॥ २५ ॥

सा यावत्स्यन्दनोपान्तमप्राप्ता विद्युदुज्ज्वला ।
तावत्तां रघुशार्दूलः सोऽर्धचन्द्रमुखैः शरैः ॥ २६ ॥

चिच्छेद शतधा व्योम्नि रम्भामिव सुकोमलाम् ।
भूत्वा च खण्डशो भूमौ पपात वितथैव सा ॥ २७ ॥

अथ रामः समादाय शरमेकं महोर्जितम् ।
ब्रह्मास्त्रमन्त्रितं कृत्वा वीरो धनुषि संदधे ॥ २८ ॥

अमोघः स तडिद्वृन्ददीप्तिर्दीपितदिग्गणः ।
दशधा ददृशे व्योम्नि पश्यद्भिः सुरकिन्नरैः ॥ २९ ॥

फणादशकविस्फारवदनो भोगिवानिव ।
युयुजे दशकण्ठस्य कण्ठेषु सहसैव सः ॥ ३० ॥

अज्ञातक्षतपीडस्य रावणस्य शिरांसि सः ।
दशापि पातयामास दशास्यो राममार्गणः ॥ ३१ ॥

छिन्नेषु तस्य कण्ठेषु दशस्वपि स तत्क्षणात् ।
पपात राक्षसपतिः कम्पयन् धरणीतलम् ॥ ३२ ॥

अथ जय जय राम श्रीपते राघवेन्द्र त्रिभुवनजनचेतःकण्टकोच्चासशील ।
इति विरचितभूयःसंस्तुतीनां सुराणां तदुपरि करवृन्दात्पुष्पवृष्टिः पपात ॥ ३३ ॥

एवं स वैशाखचतुर्दशीदिने कृष्णे त्रिलोकीजनचित्तकण्टकः ।
पपात रामस्य शरैर्विनिर्हतः कीशावली भूरिजयेत्यवोचत् ॥ ३४ ॥

स्वर्लोकानकदुन्दुभि ध्वनिरभूदुच्चैर्जगर्जुस्तरां
सुग्रीवप्रमुखाः कपीन्द्रकरिणस्त्रैलोक्यमासीत्तदा ।
रामोत्कर्षभवप्रमोदविसरव्याप्तं हते कण्टके
तस्मिन् दुःखकरे दुरात्मनि दशग्रीवाभिधे राक्षसे ॥ ३५ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे रावणवधो नामैकचत्वारिंशाधिकद्विशततमोऽध्यायः ॥ २४१ ॥

द्विचत्वारिंशाधिकद्विशततमोऽध्यायः

ब्रह्मोवाच

अथाभवदमावास्यादिने युधि निपातिनाम् ।
दहनं रावणादीनां काष्ठैर्मलयसम्भवैः ॥ १ ॥

ये ये रामशरैर्हताः सुबलिनो युद्धोद्धता राक्षसा-
स्तेषां तद्दिनदह्यमानविपुलाङ्गेभ्यो महत्सौरभम् ।
श्रीखण्डाधिकमुच्चचार परितो घ्राणेन्द्रियार्तिप्रदं
येनाहूतमदोत्यतन्मधुलिहो व्यासास्ततोऽष्टौ दिशः ॥ २ ॥

अथ रामे रणभुवः सार्द्धं वानरपुङ्गवैः ।
अपसृत्य शनैः किंचित्सुवेलाचलमव्रजत् ॥ ३ ॥

वन्द्यमानः सुरस्तोमैर्गीयमानश्च किन्नरैः ।
स्तूयमानः कृतोत्साहैः सिद्धगन्धर्वचारणैः ॥ ४ ॥

वाद्यद्भिर्जयवादित्रैर्दुन्दुभीमुरजानकैः ।
तौर्यत्रिवैर्दीर्घघोषैर्मोदमानमनाः प्रभुः ॥ ५ ॥

मङ्गलध्वनिभिर्गीतैर्वादित्रोत्सवनिःस्वनैः ।
देवानां विविधैः स्तोत्रैः सुवेलमचलं ययौ ॥ ६ ॥

ततश्च प्रेषयामास जानक्यानयनेऽनुजम् ।
विभीषणं च रक्षोभिः सार्द्धं राज्याभिषिक्तये ॥ ७ ॥

अथाह प्रणिपत्यासुं बद्धाञ्जलि पुटद्वयः ।
विभीषणो रामचन्द्रं नतिस्तुतिपुरःसरम् ॥ ८ ॥

विद्यमाने त्वयिविभो त्रैलोक्यजनताधिपे ।
कोऽहं राज्याभिषेकाय लघीयान् पादसेवकः ॥ ९ ॥

नित्यं परिचरिष्यामि पादपद्मद्वयं तव ।
प्रसादतुलसीपत्रं भोक्ष्यामि रघुपुङ्गव ॥ १० ॥

न मे राज्यस्पृहा नाथ सेवां देहि दयानिधे ।
वाञ्छन्ति यामविरतं श्रीशेषसनकादयः ॥ ११ ॥

यस्मै कृपयसे नाथ तस्मै सेवां ददासि च ।
अतस्तां दुर्लभां लोके वाञ्छामि करुणानिधे ॥ १२ ॥

कामक्रोधमदासूयामोहमात्सर्यवर्द्धनम् ।
कथं काङ्क्षेय राजेन्द्र राज्यं नाम निरर्थकम् ॥ १३ ॥

इति श्रुत्वा वचस्तस्य भक्तस्य रघुपुङ्गवः ।
उवाच करुणासिन्धुः स्मितमञ्जु मुखाम्बुजः ॥ १४ ॥

कुरु मद्वचनाद्राज्यं रक्षसामिदमुन्नतम् ।
न ते कामादिविकृतिर्भविष्यति मदाज्ञया ॥ १५ ॥

मां स्मरन्नतिभावेन कुर्वन् राज्यमपि ध्रुवम् ।
विभीषण न कश्चित्त्वं मोहमेष्यसि जन्मनि ॥ १६ ॥

भविष्यसि चिरंजीवी मार्कण्डेयो यथा मुनिः ।
यथा द्रोणिवलिव्यासहनुमत्कृपभार्गवा ॥ १८ ॥

तेषां त्वमष्टमो भूयाश्चिरंजीवी दृढव्रतः ।
कुर्वन् रक्षः पुरीराज्यं मां स्मरन् मोहवर्जितः ॥ १८ ॥

इत्युक्त्वा विससर्जामुं शुक्ले स द्वितये दिने ।
कृताभिषेका विधिवद्राज्यं पर्यगृहीन्मुदा ॥ १९ ॥

अशोकवाटिकां गत्वा लक्ष्मणो भक्तिसंनतः ।
सीतां दृष्ट्वा नमश्चक्रे रामविश्लेषदुर्बलाम् ॥ २० ॥

सादरं तामुपानिन्ये रामस्यान्तिकमञ्जसा ।
तृतीयायां च सा देवी पश्यतां स्वर्गवासिनाम् ॥ २१ ॥

पुरोऽग्नौ प्राविशद्यत्र स्थिता सीताधिदैविकी ।
अथ सा स्वयमापन्ना स्वरूपं लोकमङ्गलम् ॥ २२ ॥

उद्बभौ तेजसा तस्या वह्निश्च प्रशमं गतः ।
अङ्गारनिचयोऽथासीत्फुल्लपद्ममयस्तदा ॥ २३ ॥

स्वर्गस्था देवतावृन्दास्त्रयस्त्रिंशतिकोटयः ।
यक्षाः किंपुरुषा नागाः सिद्धगन्धर्वचारणाः ॥ २४ ॥

नागा नगाः खगा नद्यो मूर्तियुक्ताश्च सिन्धवः ।
राजा दशरथश्चापि साक्षाद्भूत्वा दिवि स्थितः ॥ २५ ॥

ते सर्वे दिव्यया वाचा विमानस्थाः समब्रुवन् ।
सीता शुद्धा मुहुः शुद्धा शुद्धा देवी शुचाविति ॥ २६ ॥

स तया सहितो रघुप्रवीरः शुशुभे वासवरत्ननीलकान्तिः ।
तडितेव समन्वितस्तडित्वानिति सर्वेऽपि जनाः प्रहर्षमापुः ॥ २७ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे सीतासमागमो नाम द्विचत्वारिंशाधिकद्विशततमोऽध्यायः ॥ २४२ ॥

त्रिचत्वारिंशाधिकद्विशततमोऽध्यायः

ब्रह्मोवाच

अथ रामो रमायुक्तो हनुमत्प्रमुखैर्वृतः।
शुशुभे चन्द्रिकापूर्णः शशीवोडुगणैर्यृतः॥ १॥

दृष्ट्या चामृतवर्षिण्या जीवयामास तान् कपीन्।
ये ये मृता महाघोरै राक्षसैः सह संगरे॥ २॥

ते पुरो राममालोक्य सीतया संगतं तदा।
ववन्दिरे मुदा युक्ता निद्रां हित्वोत्थिता इव॥ ३॥

अथो विसर्जयामास नानादेशागतांश्च तान्।
कपीनमरसंकाशान् रक्षःपतिजयोर्जितान्॥ ४॥

हनूमांश्चैव सुग्रीवो नलनीलाङ्गदादयः।
एतैः कपिवरैः सार्द्धं सीतालक्ष्मणसंयुतः॥ ५॥

अयोध्यां स प्रतिष्ठासुर्देव्या स इदमीरितः।
एषा मे त्रिजटा नाम राक्षसी हितकारिणी॥ ६॥

दशग्रीवस्य विपिने वसन्तीं मां सुदुःखिताम्।
त्वद्विश्लेषभरां नाथ नितान्तकृशविग्रहाम्॥ ७॥

साधु पर्यचरद्यत्र राक्षस्यो विकटाननाः।
नानामायाविनश्चैव राक्षसाः पर्यखेदयन्॥ ८॥

कापि मां हलसंकाशै रदनैः पर्यभीषयत्।
कापि मां कटुभिर्वाक्यैरतुदत् कण्टकैरिव॥ ९॥

काचिद्भ्रुकुटिघोरास्या दृग्भ्यां रोषारुणानना।
अभीषयत्तरां घोरा राक्षसी दुष्टमानसा॥ १०॥

कापि तस्यातिदुष्टस्य नियुक्ता भृशमाज्ञया।
लोभयन्ती मनो वाक्यैर्नितरामुदवेजयत्॥ ११॥

एवं ते राक्षसा घोरास्तुतुर्दुर्नितरां मनः।
राक्षस्या माययानर्थं दर्शयन्तो भयावहम्॥ १२॥

एकदा तु भयात्प्राणांस्तितिक्षन्तीं जवेन माम्।
इयां तां राक्षसीं मायां बोधयामास बन्धुवत्॥ १३॥

ततोऽहं जीविता नाथ सख्या त्रिजटयानया।
अतः प्रत्युपकारोऽस्यास्त्वरितं प्रविधीयताम्॥ १४॥

इति श्रुत्वा तु सा वाक्यं जानक्या जातिराक्षसी ।
उवाच त्रिजटा नाम रामं रघुकुलेश्वरम् ॥ १५ ॥

नाहं वाञ्छामि सततं बाह्यं पदमपि स्फुटम् ।
नैहिकं भोगमत्यल्पमपवर्गमपि प्रभो ॥ १६ ॥

त्वत्स्वरूपैकनिष्ठां तु वाञ्छामि रघुपुङ्गव ।
त्वयि च प्रेमदास्यं तद् यत्रानन्दोऽतिगह्वरः ॥ १७ ॥

धर्मार्थकाममोक्षाद्याः सर्वेऽपि लघुवत्ततः ।
अतस्तां देहि राजेन्द्र भक्तिं ते वीतकल्मषाम् ॥ १८ ॥

तयैवं प्रार्थितो रामः प्रियया सह तत्क्षणे ।
दृष्ट्या स्वानन्दवर्षिण्या कृतार्थीकुरुते स्म ताम् ॥ १९ ॥

अथ पुष्पकमास्थाय विमानवरमीश्वरः ।
चतुर्थीदिवसे सीतालक्ष्मणाभ्यां समन्वितः ॥ २० ॥

अग्रेसरैः कपिवरैरुदीर्णजयमङ्गलः ।
विभीषणेन भक्तेन सानुरागेण संयुतः ॥ २१ ॥

ऋक्षेश्वरेण बलिना वृद्धेन च समन्वितः ।
अयोध्यां व्योममार्गेण प्रतस्थौ रघुपुङ्गवः ॥ २२ ॥

चतुर्दश समा वासं वने कृत्वा गुरोर्गिरा ।
निस्तीर्य विपदं कृत्स्नां लोकानुकृतिलीलया ॥ २३ ॥

दण्डकारण्यमत्येत्य प्रियायै दर्शयन् शुभाः ।
नित्यलीलास्थलीस्तास्ताः पुष्पकाग्रमधिश्रितः ॥ २४ ॥

क्वचिज्जलदराजीषु मिलन्मरकतद्युतिः ।
दामिन्या प्रियया युक्तो द्वितीय इव वारिदः ॥ २५ ॥

महायशा महातेजा महादातृशिरोमणिः ।
कपिसैन्यैः समायुक्तो जयद्भिर्गुणमानसैः ॥ २६ ॥

स्तूयमानः सुरगणैर्गीयमानश्च किंनरैः ।
आकाशगङ्गालहरीमरुल्लहरिवीजितः ॥ २७ ॥

क्वचित्तडिल्लतासूत्रैर्विमानान्तःप्रसृत्वरैः ।
क्षणे क्षणे व्योमपथि चमत्कृतविलोचनः ॥ २८ ॥

विमानस्थैः सुरवरैर्नभोविपुलवीथिषु ।
वन्द्यमानः प्रतिपदं जयघोषपुरःसरम् ॥ २९ ॥

महान्तं नभसो मार्गमतिक्रम्य महायशाः ।
भरद्वाजाश्रमं प्राप पञ्चम्यां रघुपुङ्गवः ॥ ३० ॥

विमानाग्रात्समुत्तीर्य कपिभिर्जयशब्दितः ।
ददर्श मुनिशार्दूलं सीतासौमित्रिसंयुतः ॥ ३१ ॥

नमस्कृत्य स्थितो वीरो बभाषे मुनिना ततः ।
चिरं वर्धस्व वीरेन्द्र निरस्ताखिलकण्टक ॥ ३२ ॥

श्रुतिगोद्विजधर्माणां पालनेऽतिविचक्षण ।
आनन्दय निजान् नित्यं काकुत्स्थकुलभूषण ॥ ३३ ॥

इत्याद्याशीर्गिरा तेन तोषितो रघुनन्दनः ।
आतिथ्यविधिना भूयः सत्कृतः सपरिच्छदः ॥ ३४ ॥

अथ तं भरतः श्रुत्वा भरद्वाजाश्रमागतम् ।
संयोज्य महतीं सेनामाययौ दर्शनोत्सुकः ॥ ३५ ॥

नन्दिग्रामस्थितो गोपः सुखितेन्द्रस्तमागतम् ।
उपश्रुत्य सगोपौघः परमानन्दवानभूत् ॥ ३६ ॥

षष्ठीदिने स भरतेन जटाकलाप वल्काजिनाम्बरधरेण तपःकृशेन ।
भस्माङ्गरागधवलेन सुसंगतोऽभूत् तं सस्वजे च मुदितो गुरुवन्दनान्ते ॥ ३७ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्ड संवादे दक्षिणखण्डे भरद्वाजाश्रमभरत-संगमो नाम त्रिचत्वारिंशाधिकद्विशततमोऽध्यायः ॥ २४३ ॥

चतुश्चत्वारिंशाधिकद्विशततमोऽध्यायः

ब्रह्मोवाच

प्रवृद्धश्मश्रुसंदोहसंजातमुखविक्रियान् ।
मन्त्रिवृद्धान् जटायुक्तान् निजविश्लेषदुःखितान् ॥ १ ॥

अनुजग्राह वीरेन्द्रो दृष्ट्या सामृतवर्षया ।
मधुराक्षरया वाचा पादप्रणतितत्परान् ॥ २ ॥

सुग्रीवं च हनूमन्तं भरताय महाशयः ।
दर्शयामास नितरां प्रशंसावाक्यपूर्वकम् ॥ ३ ॥

ऋक्षेश्वरं च बलिनं सोपकारं रणाङ्गणे ।
विभीषणं च भक्तेन्द्रं गुणश्लाघापुरःसरम् ॥ ४ ॥

दुःखैकबान्धवानेतान् विद्धि मे कार्यसाधकान् ।
अहं पूर्वमहं पूर्वमिति यैः प्रहृतं रणे ॥ ५ ॥

आर्योक्त्या तानसौ नत्वा परिरम्भणपूर्वकम् ।
प्रणानाम ततः पश्चाल्लक्ष्मणं जयिनां वरम् ॥ ६ ॥

मेघनादप्रहरणव्रणकर्कशमक्षतम् ।
वक्षःस्थलं लक्ष्मणस्य परिरेभे शनैश्च सः ॥ ७ ॥

ततो मैथिलराजस्य तनयां भक्तिसंनतः ।
कृच्छ्रादभ्युद्धृतां सीतामार्येण प्रणमनाम सः ॥ ८ ॥

अथाज्ञया प्रभोः सर्वे कपिसेनाधिनायकाः ।
मानुषं रूपमास्थाय तुङ्गजारुरुहुर्गजान् ॥ ९ ॥

निदेशाद् राघवेन्द्रस्य भक्तिदृष्टो विभीषणः ।
रथमध्यास्त विपुलं पताका चित्रिताम्बरम् ॥ १० ॥

रामः सौमित्रिभरतमण्डितोभयपार्श्वकः ।
मध्ये सीतासमायुक्तो विमानवरमास्थितः ॥ ११ ॥

प्रजाजनानुबन्धेन मन्दं मन्दमवाहयत् ।
विमानं बहुभूमिस्पृग्लघुव्योमपथेऽचरत् ॥ १२ ॥

ततः शत्रुघ्नविहितविचित्रानेकसंविधम् ।
अयोध्योपवनं रामो वीक्ष्य तस्मादवातरत् ॥ १३ ॥

तत्र भार्तृव्ययात्पुत्रविश्लेषाच्चातिदुःखिते ।
अपश्यतां जनन्यौ स्वे गत्वा श्रीरामलक्ष्मणौ ॥ १४ ॥

प्रणेमतुस्तौ कौसल्यासुमित्रे निजमातरौ ।
आशीर्भिर्नन्दितौ ताभ्यां ध्वस्तत्रैलोक्यकण्टकौ ॥ १५ ॥

पुत्रौ ददृशतुर्दृग्भ्यां नते आनन्दजाश्रुभिः ।
स्पर्शसौख्योपलम्भेन परं मुमुदतुर्भृशम् ॥ १६ ॥

रावणेन्द्रजिदाद्यस्त्रैरार्द्रक्षतवती तयोः ।
अङ्गे स्पृशन्त्यौ प्रस्रवाव्रभूतां सदये भृशम् ॥ १७ ॥

भर्तुर्दुःखावहास्मीति शालीननयना वधूः ।
जानकी प्राणमच्छ्वश्वावेकभक्तितया ह्यभे ॥ १८ ॥

सुचिरं सुभगा भूया इत्याशिषमुदीर्य ते ।
वत्से तवैव वृत्तेन तीर्णः कृच्छ्राणि मे सुतः ॥ १९ ॥

इत्थं प्रशस्य सुचिरं सुवृत्तां तां निजस्नुषाम् ।
स्थापयामासतुः पार्श्वे उत्थाप्य चरणद्वयात् ॥ २० ॥

अथर्क्षरक्षःकीशेन्द्रैराहृतैस्तीर्थकोटितः ।
अभिषिच्य जलैर्मूर्ध्नि मन्त्रिणाः सप्तमोदिने ॥ २१ ॥

महिष्या सीतया सार्द्धं चक्रुस्तं राज्यदीक्षितम् ।
आनर्चुर्ब्राह्मणश्रेष्ठा मन्त्राशीर्निबहाक्षतैः ॥ २२ ॥

सोऽदाद् दानानि भूरीणि तेभ्यो भूधेनुकाञ्चनैः ।
राजतैर्मणिभिर्वस्त्रैरलङ्कारैरनेकशः ॥ २३ ॥

तपस्विवेषतोऽप्यासीज्जटावल्काजिनादिभिः ।
अत्यन्तरमणीयो यस्तस्य राजेन्द्रभूषणैः ॥ २४ ॥

द्विरुक्तेवाभवल्लक्ष्मीर्लक्ष्मीरमणशालिनः ।
राज्याभिषेकसमये सम्प्रसाधितवर्ष्मणः ॥ २५ ॥

अथ तूर्यस्वनैर्गीतनृत्यवादित्रनिःस्वनैः ।
नानामङ्गलनिर्घोषैर्विप्रमन्त्राशिषां गणैः ॥ २६ ॥

बृंहितैश्च गजेन्द्राणां हेषाभिर्वरवाजिनाम् ।
रथानां चैव निर्घोषैः पुरोगानां जयस्वनैः ॥ २७ ॥

अष्टम्यां प्राविशद्वीरो नगरीं स्वामलंकृताम् ।
चिरोत्कण्ठावशोत्सिक्तनरनारीगणाकुलाम् ॥ २८ ॥

मौलर्क्षरक्षःकपिभिर्विमिश्रां तां चतुर्विधाम् ।
तस्य सेनां जना वीक्ष्य प्रशशंसुः सुविस्मिताः ॥ २९ ॥

तस्यादृतौ जगृहतुर्बालव्यजनयुग्मकम् ।
उभौ सौमित्रिशत्रुघ्नौ भरतश्चातपत्रकम् ॥ ३० ॥

रथस्थः शुशुभे रामः सीतया सह संयुतः ।
पुरुहूत इवेन्द्राण्या प्रावृषेण्यघनस्थितः ॥ ३१ ॥

श्वश्रूजनैरतिस्निग्धैः शृङ्गारितसुविग्रहाम् ।
रघुनाथप्रियां सीतां पश्यन्त्यो जालमार्गतः ॥ ३२ ॥

रथस्थां प्रणमन्ति स्म साकेतपुरयोषितः ।
वह्नितोऽप्यतिशुद्धायै सीतायै नो नमोऽस्त्विति ॥ ३३ ॥

अनसूयावितीर्णं तं प्रभामण्डलमण्डितम् ।
बिभ्रती शाश्वतं भव्यमङ्गरागं रराज सा ॥ ३४ ॥

स्यन्दनादवतीर्याथ सुहृद्भिः सह राघवः ।
विवेश राजभवनं यत्र सिंहासनं पितुः ॥ ३५ ॥

दत्त्वा सपारिबर्हाणि सुहृद्भ्यो भवनानि सः ।
पश्चात्स्वयं विवेशान्तः पितुः श्रीमति वेश्मनि ॥ ३६ ॥

पितुश्चरणमालोक्य सवाष्पनयनो विभुः ।
ववन्दे हि प्रेम्णा रामः श्रीमान् रघुकुलोद्वहः ॥ ३७ ॥

तमुवाच रघुश्रेष्ठो वाष्पगद्गदया गिरा ।
तवाङ्कं पितरास्थाय किं नास्माभिः कृतं सुखम् ॥ ३८ ॥

लाल्यमानाः पोष्यमाणास्तातेन करुणावता ।
प्रापिता यां च सम्प्रीतिं साधुना प्राप्यते त्वया ॥ ३९ ॥

क्रीडमानानङ्कगतान् मूर्द्धन्युपाघ्राय नः सदा ।
यथा लालित वांस्तात तथान्यो लालयेत कः ॥ ४० ॥

इति ब्रुवाणं वीरेन्द्रं जननी भरतस्य सा ।
लज्जायमाननयना न सम्मुखदृगाययौ ॥ ४१ ॥

तामुवाचैषधर्मात्मा कृत्वा पादाभिवन्दनम् ।
तवैव सुकृतान्मातः पिता नः सत्यतोऽच्युतः ॥ ४२ ॥

कृतवान् दुष्करं कर्म हीति का तेऽस्तु संस्तुतिः ।
यतो भर्तृहिता एव साध्व्यो रघुकुलस्त्रियः ॥ ४३ ॥

इत्युक्त्या रघुवीरस्य केकयी भरतप्रसूः ।
अभ्युद्धृता त्रपा सिन्धोः सम्मुखीभूयतस्थुषी ॥ ४४ ॥

राज्यस्थानं विलोक्याथ प्रभोस्त्रिभुवनेशितुः ।
ऋक्षरक्षः कपिवराः सर्वे मुदमवाप्नुवन् ॥ ४५ ॥

उपाचरत् स तान् रामः संविधाभिरनेकशः ।
वस्त्रभोज्यप्रसादादिददानः प्रीतिवर्द्धनम् ॥ ४६ ॥

मुनींश्च पूजयामास वदान्यसुरपादपः ।
तेऽस्मैहतारिवर्गाय सफला ददुराशिषः ॥ ४७ ॥

विप्रा धनानि भूरीणि गोभूस्वर्णाम्बराणि च ।
आदाय चाशिषो दत्त्वा संतुष्टाः स्वगृहान् ययुः ॥ ४८ ॥

सोऽर्द्धमासं महासौख्यादज्ञातरजनीदिनान् ।
स्थापयित्वा कपीन्द्रांस्तान् विससर्ज ततो विभुः ॥ ४९ ॥

पुष्पकाख्यं विमानं तत्कुबेरस्य महात्मनः ।
अनुमेने प्रभुर्गन्तुं यथास्थानं यथागतम् ॥ ५० ॥

वनवासापदं तीर्त्वा प्राप्तराज्य इति प्रभुः ।
पालयानस्त्रिवर्गं स समं भ्रातृष्ववर्त्तत ॥ ५१ ॥

रामः सर्वासु मातृष्वविरतमवृतन्निर्विशेषं प्रजासु
श्रीनप्यर्थान् दधानो भृशमनुपहतो येषु तुर्यः पुमर्थः ।
भोगान् भुञ्जन् विदेहाधिपदुहितृयुतो वेदगोविप्ररक्षा-
दक्षः श्रीमानयोध्याभिधमधुरपुरोमीश्वरोऽध्यास्त नित्यम् ॥ ५२ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे अयोध्यागमनो नाम चतुश्चत्वारिंशाधिकद्विशततमोऽध्यायः ॥ २४४ ॥

पञ्चचत्वारिंशाधिकद्विशततमोऽध्यायः

ब्रह्मोवाच

[राज्यावाप्तिदिने देवो द्विचत्वारिंशवार्षिकः ।
देवी विदेहतनया त्रयस्त्रिंशतिवार्षिकी ॥ १ ॥

अथास्यास्तद् दिनादासीन्मासि भाद्रपदे तिथौ ।
नवम्यां जानकीदेव्या गर्भं कुलविवर्द्धनम् ॥ २ ॥

अतीते सप्तमे मासि चैत्रे द्वादशिकादिने ।
आदेशतो रघुपतेर्जानकीं लक्ष्मणो रथम् ॥ ३ ॥

आरोप्य राजभवनाद् वाल्मीकीयतपोवने ।
नीत्वा सत्वरमत्याक्षीत्सा रुरोद भृशं···· ॥ ४ ॥

दर्शित्वा मुनिशार्दूलं समाधाय चिरं वने ।
निनाय स्वाश्रमं सार्द्धं तापसगणैः···· ॥ ५ ॥

आवात्सीत् सुचिरं तत्र पुण्यचारित्रशालिनी ।
कालेनासूत तनयौ विशुद्धौ समतेजसौ ॥ ६ ॥

जन्मसंस्कारमकरोत्तयोरतुलतेजसोः ।
वाल्मीकिर्मुनिशार्दूल आदद्यं कविपदं दधत् ॥ ७ ॥

तावपश्यल्लवणहा वाल्मीकेराश्रमं गतः ।
नाचख्यौ रघुनाथस्य वाल्मीकेरेव शासनात् ॥ ८ ॥

सुवर्णतनुमाधाय सीतामेव स्ववामतः ।
रघुनाथः समकरोदश्वमेधान् महामखान् ॥ ९ ॥

शतानि नव वर्षाणि षट् च माससुतानि सा ।
वाल्मीकेराश्रमेऽवात्सीत्सपुत्रा तापसीयुता ॥ १० ॥

समर्प्य तनयौ भर्त्रे सीता नित्याङ्गसंगिनी ।
पश्यतामेव लोकानां प्रविष्टा धरणीतलम् ॥ ११ ॥

भूमौ विनिर्गतायां तु तस्यामात्मसमाकृतौ ।
वर्षाणामयुतं रामो बुभुजे भुवमेव सः ॥ १२ ॥

आदावन्ते तथा मध्ये न चास्य विरहं प्रभोः ।
अन्यैव तस्य सा लीला लोकोत्तरमुपैधिताः ॥ १३ ॥

ततः स्वतनयौ रामो राज्ये संस्थाप्य बन्धुभिः ।
सहितः स्वप्रकृतिभिः पौरैश्च पुरुषोत्तमः ॥ १४ ॥

[१]लीलामानवमुत्सृज्य पुनर्नित्ये समाविशत् ।
अन्तः प्रमोदविपिने सीतया सहितः स्वराट्[१] ॥ १५ ॥]

रमते सखिभिः सार्द्धं रामो नित्यं प्रमुद्वने ।
शक्तिश्च सहजानन्दा माङ्गल्यासुखितावपि ॥ १६ ॥

नित्या गोपाश्च गोप्यश्च नित्या गावः खगा मृगाः ।
लीला रासविलासाद्या बाल्यकैशोरयोः क्रमात् ॥ १७ ॥

यत्र दिव्या च सरयूः केलिकल्लोलमालिनी ।
वनान्युपवनान्युच्चैर्गुञ्जन्मधुकराणि च ॥ १८ ॥

कुञ्जानि च निकुञ्जानि यत्र नित्यानि सर्वदा ।
सर्वशक्तिमयीं तत्र सहजानन्दिनीं प्रियाम् ॥ १९ ॥

आदाय चिन्मयानन्दस्वरूपः सर्वशक्तिभृत् ।
रमते स्वात्मरमणो रामो रासादिकेलिभिः ॥ २० ॥

रत्नाद्रेः परितो निकुञ्जभवने भूयोऽपि रामस्ततः
कृत्वा स्वेच्छतरं मुहुर्विहरणं कर्माणि दिव्यानि सः ॥
यान्युद्गीय जनो विधूतकलुषः स्वं रूपमासादयेद्
भूयो नैव च कल्पते भवभयप्राप्त्यै विमुक्तश्चिरम् ॥ २१ ॥

---

१. १ नास्ति—बड़ो० ।

इत्येतत्प्रमुदाटवीविहरणस्वच्छन्दसौख्यात्मनो
रामस्यामितसद्गुणौघजलधेर्जन्मामलं कर्म च ॥
भक्त्या संशृणुते स मानववरो जीवन् विमुक्तश्चरेत्
स्वानन्दामृतलाभपुष्टहृदयो भूयो भवे नोद्भवेत् ॥ २२ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे दक्षिणखण्डे प्रमोदवनलीलाकथनं नाम पञ्चचत्वारिंशाधिकद्विशततमोऽध्यायः ॥ २४५ ॥[1]

शुभम्

१. समाप्तश्चाय दक्षिणखण्डः ।

संवत् १७७९ लिषतं लालदास मथुरामद्धे, श्रीकृष्णाय नमः, श्रीसहजासुखितनन्दनो विजयेतेतराम्—बड़ो० ।

श्री गणेशाय नमः । श्रीरामोजयति[1] ।

श्रीमदादिरामायणम्

पश्चिमखण्डः

प्रथमोऽध्यायः

ब्रह्मोवाच

एकदा भरतः श्रीमाञ्छ्रीमन्तं लक्ष्मणं प्रभुम् ।
शेषं संकर्षणं वीरं सुखासीनं शुचिस्मितम् ॥ १ ॥

श्रीमत्सीतानुजाकान्तं श्रीरामभ्रातृसुन्दरम् ।
त्रैलोक्यसारं सुभगं[2] गौरं हलधरं वरम् ॥ २ ॥

एकांस[3]धृतभूभारं श्रीरामपदसेवकम् ।
प्रावृषेण्यघनश्यामं मधुरोज्ज्वलविग्रहम् ॥
एकान्ते समुपागम्य भक्त्या नम्रोऽब्रवीदिदम् ॥ ३ ॥

भरत उवाच

स्वच्छन्दलील सर्वेश[4] लक्ष्मण भ्रातृसत्तम ।
समस्ताधिकसौभाग्य नाममाहात्म्यपावन ॥ ४ ॥

एकान्तरामभक्तेश पृच्छामि त्वां महामते ।
सर्वतत्त्वं परं ब्रह्म परमानन्दलक्षणम् ॥ ५ ॥

त्रयीतत्त्वं सर्वगुह्यं श्रीराम इति कीर्तितम् ।
तस्यैव सकला लीलां विश्वसर्गादिलक्षणाः ॥
तत्प्रेमपात्रं परमं भवानेव न संशयः ॥ ६ ॥

न त्वां विना रमति जल्पति नो कदाचिन्नो वा क्वचिद्वसति तिष्ठति वा सजोषम् ।
शय्यासनाशनविहारविलासकादौ श्रीमान् विभाति भवतैव युतः प्रभुनः ॥ ७ ॥

त्वां मन्त्रयत्यविरतं पतिते विचारे प्राणाधिकस्त्वमसि तस्य सुहृत् सखा च ।
त्रैलोक्यभारमखिलं त्वयि न्यस्य रामः शेते सुखं जनकजासहितो विलासी ॥ ८ ॥

यत्कर्मवीर्यमतुलं त्रिजगत्सु वेत्तुं कः कल्पते मुनिसुरासुरमानुषेषु ।
तस्य स्वरूपमखिलं खलु तत्त्वतस्त्वं जानासि राघवकुलोद्वह वीर बाहो ॥ ९ ॥

---

१. ' ' नास्ति-रीवां । २. शुभगं-रीवां । ३. एकांश-रीवां । ४. शर्वेश-रीवां ।

सर्वे सहोदरपदस्य जुषो वयं स्म तस्योत्तमस्य पुरुषस्य रमेश्वरस्य।
भूयस्तथापि भवतैव वशीकृतात्मा विक्रीड़ितुं[1] वितनुते भुवि राघवेन्द्रः॥ १०॥
तत्कारणं किमपि लक्ष्मण भिन्नमेवं भाग्याधिकं प्रभुकृपाभरभाजनं यत्।
किंवा पुरा त्रिभुवनोत्तमसंविधाभिराराधितः स भगवान् रघुवंशरत्नः॥ ११॥

लक्ष्मण उवाच

एवमेव यदात्थ त्वं भरत प्राणसम्मित।
श्रीरामस्य दयापात्रमहमेव विशेषतः॥ १२॥

अयं हि भगवान् साक्षाद्विश्वबीजप्रदः प्रभुः।
स्वयंशक्तिः स्वयंज्योतिः पूर्णपूर्णः परात्परः॥ १३॥

[2]तस्याहं परमः प्रेयान् मित्रं चैव सखा सुहृत्।
सर्वातिगः सर्वगुप्तः सर्वात्मा विश्वतः स्थितः॥ १४॥

प्रमोदवनलीलासु पर्याप्तोऽन्यरसालसः।
तस्य सर्वासु लीलासु सदा तिष्ठामि सन्निधौ॥ १५॥

लीलैव ममसर्वस्वं लीलैव मम जीवनम्।
अहं लीलारसाभिज्ञो जानकी हनुमाञ्छिवः॥ १६॥

भवांश्च भरत प्राज्ञ शत्रुहा च विभीषणः।
यावान् यस्याधिकारः स्यात्तावत्तस्य प्रदर्शयन्॥ १७॥

अवतारचरित्राणि मूलचारित्रमेव च।
कुरुते जानकीकान्तः स्वाच्छन्द्यरसनिर्भरः॥ १८॥

तत्राहमस्य परमः सचिवः सुहृच्च मित्रं जनश्च सुजनश्च दयालयश्च।
तत्कारणं जगति केवलमेतदेव श्रीजानकीचरणपङ्कज रेणुमात्रम्॥ १९॥

श्रीरामस्य प्रियाभक्तिर्भावरूपा सतां गतिः।
तद्रूपिणी स्वयं सीता सहजानन्दरूपिणी॥ २०॥

सा सैव परमा तस्य रमा त्रैलोक्यसुन्दरी।
भक्तानां वैष्णवानां च सा गुरुः समुदीर्यते॥ २१॥

न तां विना भवेद्दीक्षा रामतत्त्वविभाविनी।
तया संसृज्यते लोकः पाल्यते ह्रियतेऽपि च॥ २२॥

सैव स्वयं राम इति भेदेन समुदीर्यते।
राममेव परात्परं परं ब्रह्म रसात्मकम्॥ २३॥

सीताराम इति ख्यातं त्रिषु वेदेषु कीर्तितम्।
न ब्रह्मा न भवो नेन्द्रो नान्ये च त्रिदिवौकसः॥ २४॥

---

१. विक्रीडितं-मथु०, रीवां।

२. तस्या हं वै प्रेयान्मित्रो सखाहं हि सुहृत्तथा-मथु०, बद्दी०।

तस्य तत्त्वं विजानन्ति इदमित्थंतया प्रभोः ।
स्वच्छन्द एव लीलासु सर्वासु युगलात्मकः ॥ २५ ॥

युग्मनामा युग्मकेलिर्युग्मभावविनोदवान् ।
युग्मभूषाविलासाद्यो युग्मस्थानविलासकः ॥ २६ ॥

युग्मजन्मा युग्मजल्पो युग्मप्रेक्षाविधायकः ।
प्रभुरेष विलासीनः सदानन्दपयोनिधिः ॥ २७ ॥

तन्नामामृतपानेन स्वस्थचित्ताः सनातनाः ।
ऋषयः परमहंसाश्च बहवस्त्यक्तबान्धवाः ॥ २८ ॥

श्रद्धावन्तो भक्तिवन्तो रामपादनिषेवकाः ।
मुक्तिं गताः सद्गुरुभिर्ज्ञाततत्त्वाः सुकोविदाः ॥ २९ ॥

स वै प्रपत्तिमात्रेण जनान् मोचयते भवात् ।
शत्रुस्तवास्मीति वदन् मत्समः क्रियतेऽचिरात् ॥ ३० ॥

प्रारब्धक्लेशहरिणी तस्य भक्तिर्निगद्यते ।
न तच्चरणपाथोजप्रपत्त्या विशते विना ॥ ३१ ॥

परे ब्रह्मणि स्वानन्दलीलारसविनोदिनि ।
तल्लीलास्मृतिमात्रेण नरो भवति पावितः ॥ ३२ ॥

कोटिगङ्गादितीर्थौघवाजपेयादिभिर्मखैः ।
सा तस्य सहजानन्दविग्रहा स्वैरकेलिनी ॥ ३३ ॥

नित्यलीला विनोदा च सुखप्राग्भारसम्पदा ।
तस्याश्चरणपद्मोत्थप्रसादारुणरेणुभिः ॥ ३४ ॥

पूतात्मा लभते रामं सच्चिदानन्दलक्षणम् ।
रामभक्तिः स्वयं सीता तद्भक्तं विद्धि मामथ ॥ ३५ ॥

तद्भक्तं हनुमन्तं च जानीहि पवनाङ्गजम् ।
एवं प्रवर्तिता भक्तिर्भुवने रामतोषिणी ॥ ३६ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे पश्चिमखण्डे[1] भरतलक्ष्मणसंवादे प्रथमोऽध्यायः ॥ १ ॥

१. पूर्वखण्डे (?) ब्रह्मभुशुण्डसंवादे—बड़ौ० ।

द्वितीयोऽध्यायः

भरत उवाच

कदा साऽऽराधिता देवी जानकी भवता प्रभो ।
यस्याः पदाम्बुजरजःप्रसादेन त्वया मुहुः ॥ १ ॥

अनन्यभक्तिः रामस्य प्राप्ता यानन्यगामिनी ।
अनन्यकरुणा चैव प्राप्ता यानन्यगामिनी ॥ २ ॥

लक्ष्मण उवाच

प्रमोदविपिने रामश्चिक्रीडे रासलीलया ।
ब्रह्मकल्पसहस्राणि स्वच्छन्दो निरवग्रहः ॥ ३ ॥

तावत्त्रैलोक्यभारं च मयि दध्रे स्वसम्मिते ।
तामसानसुरान् सर्वान् दैत्यांश्चैवापि दानवान् ॥ ४ ॥

श्रीरामकेलिप्रत्यूहानहं जघ्ने तदाज्ञया ।
रामेण पाल्यमानाश्च धेनू रक्षितवानहम् ॥ ५ ॥

ता वै चतुर्वेदऋचो ज्ञानकर्मादिसाधिकाः ।
भक्तिरूपं वनं सद्यो विविशू रामपालिताः ॥ ६ ॥

तदाहं तस्य देवस्य लीलैकरसवर्तिनः ।
परिचर्यामकार्षं वै शयनासनभोजने ॥ ७ ॥

यथा यथा प्रभुस्तुष्येत्तथा कार्यं मया शनैः ।
प्रमोदवनलीलेशी सहजेयं तदाभवत् ॥ ८ ॥

या देवी जानकीत्यत्र कीर्तिता शुभनामिनी ।
कदाचिद्रासवलयेक्रीडन्तं व्रजशक्तिभिः ॥ ९ ॥

दृष्ट्वा प्रियतमं देवी मानतप्ता बभूव ह ।
इतश्च श्रीरामचन्द्रो विरहव्याधिपीडितः ॥ १० ॥

तदाहं ऋतुराजस्य रूपं दध्रे मनोहरम् ।
रसालमञ्जरीयत्तमत्तभ्रमरनादितम् ॥ ११ ॥

मनोज्ञकोकिलालापकूजत्पुंस्कोकिलाकुलम् ।
मलयानिलसौरभ्यसम्पर्किद्रुमराजितम् ॥ १२ ॥

अनेनद्रुमसंदोहमञ्जरीरजसाकुलम् ।
कुञ्जमण्डपसानन्दनिकूजच्छुकसारिकम् ॥ १३ ॥

प्रसन्नसलिलोत्फुल्लपङ्कजालिसुगन्धिकम् ।
हंससारसचक्राह्वकादम्बप्रमदाकरम् ॥ १४ ॥

कुलाङ्गनामनोमानभञ्जनोद्धुरशक्तिकम् ।
अनेकपुष्पसंदोहरजोभिश्चनिशायितम् ॥ १५ ॥

स्मरलीलावहः हेमकेतकीधूलिधूसरम् ।
तत्काललसितोद्यानरामणीयकरोचितम् ॥ १६ ॥

नवपल्लवलौहित्यसूर्यातपतिभासितम् ।
फुल्लर्त्किशुकवृक्षौघलोहितीकृतदिक्तटम् ॥ १७ ॥

अथोदियाय पूर्णेन्दुः प्राचीदिङ्मुखमण्डनः ।
फुल्लत्कुवलयारण्यकरसंचारकोविदः ॥ १८ ॥

चकोरकामिनीचारुचञ्चूपुटविकासकः ।
तदा सा सहजानन्दा कलहान्तरिताभवत् ॥ १९ ॥

ईशश्च सुतरां तावद्विरहाकुलमानसः ।
प्राप्ताः प्रियासखीर्वीक्ष्य केलीमण्डपमागमत् ॥ २० ॥

तत्रैतयोः सुभगयोः प्रपञ्चोत्तरकामिनोः ।
समागमः समभवत्परमानन्दकारकः ॥ २१ ॥

आकालिकं वसन्तं च दृष्ट्वासौ भक्तवत्सलः ।
मयि पूर्णां कृपा चक्रे ज्ञातसारोऽखिलेश्वरः ।
सन्तुष्ट इदमाहासौ मम भाग्यैकवर्धनः ॥ २२ ॥

श्रीराम उवाच

भ्रातर्धन्योऽसिधन्योऽसि मम दुःखनिवारकः ।
त्वं हि मे लीलया नित्यं सन्तुष्टो भक्तिभावितः ॥ २३ ॥
एवमेव सदा तिष्ठ मम लीलैकवीक्षकः ।
गुप्ताश्च प्रकटाश्चैव यावत्यो मम केलयः ॥ २४ ॥
तावतीनां त्वमेवैकः साक्षी भव महामते ।
दृष्ट्वा प्रभोः कृपापात्रं जानकी प्राह मां ततः ॥ २५ ॥
इयं हि परिचर्या ते मम संतोषवर्द्धिनी ।
अनया परितुष्टाहं ददामि कामितं वरम् ॥ २६ ॥
यथा स्वं मम भक्तोऽसि तथेशस्यापि वै भव ।
अनन्यगामिनीयं मे कृपा भवति वर्द्धताम् ॥ २७ ॥

इति दत्तवरं मां सा वनरक्षानियोजितम् ।
विसृज्य सहजानन्दा रेमे स्वप्रेयसा सह ॥ २८ ॥
तदावधि तयोर्भूरिकृपयाऽऽनन्दितोऽस्म्यहम् ।
एतत्ते कारणं प्रोक्तं रामानुग्रहवस्तुनि ॥ २९ ॥

अचिन्त्यैव कृपा तस्य युग्मलीलाविनोदिनः ।
न कर्मभिर्न तपसा न ज्ञानेन न चेज्यया ॥ ३० ॥

सुलभा तत्कृपा क्वापि फलरूपादि सा यतः ।
तस्यां च परिलब्धायां न लभ्यान्तरमिष्यते ॥ ३१ ॥

तथापि कर्मभिर्दिव्यैः पूतात्मानं परायणम् ।
ज्ञानसंशुद्धचित्तं च भक्तिद्रुतसुधान्वितम् ॥ ३२ ॥

श्रीपादपद्मरजसा स्वाभिषिक्तं शुभोदयम् ।
सोऽनुगृह्णाति वै भक्तं नित्यलीलान्तवैभवम् ॥ ३३ ॥

ब्रह्मादयोऽपि यस्यान्तं न ययुर्दुर्लभात्मनः ।
अनायासेन सुलभः स लीलारसभावनात् ॥ ३४ ॥

एवं शुकादयः सर्वे प्रेमभक्तिविभाविताः ।
प्रवेशिताः स्वात्मरसे तेनैव प्रभुणा सखे ॥ ३५ ॥

सर्वसाधारणोऽप्येष स्वभक्तानां विशिष्यते ।
नेतावतास्य वैषम्यं लीलैकरसनिर्वृतेः ॥ ३६ ॥

स यदा ब्रह्मभावेन वर्तते ज्ञानवेदितः ।
तदा सर्वापि मर्यादा विद्यते तस्य नान्यदा ॥ ३७ ॥

एक एव द्विधा जातो भगवान् भावभावितः ।
ब्रह्म ब्रह्मेतिज्ञानेन ईश ईशेतिभक्तितः ॥ ३८ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे पश्चिमखण्डे[1] भरतलक्ष्मणसंवादे द्वितीयोऽध्यायः ॥ २ ॥

तृतीयोऽध्यायः

ब्रह्मोवाच

इति श्रुत्वा स भरतः परमोत्कण्ठमानसः ।
ज्ञानस्य चापि भक्तेश्च विशेषं परिपृच्छति ॥ १ ॥

भरत उवाच

किं ज्ञानं का च सा भक्तिर्यया स वशतां व्रजेत् ।
एतन्मे कथय भ्रातरुभयोस्तत्त्वनिश्चयम् ॥ २ ॥

---

१. पूर्वखण्डे (?)-बड़ौ० ।

लक्ष्मण उवाच

कर्मणा सत्कुले जातः संस्कारैः पावितस्तथा ।
कर्माणि तावत्कुर्वीत रामार्पणदृशाखिलान् ॥ ३ ॥

ततश्चेतसि संशुद्धे समुपासीत तत्परम् ।
प्रतीकविधिना चैव ब्रह्मास्मीतिधिया पुनः ॥ ४ ॥

ततः सगुणमाकारं भावयेत्त्रिगुणातिगम् ।
सहस्राननपादोरुं सहस्रेक्षणनासिकम् ॥ ५ ॥

सहस्रकर्णदोःपार्णि सहस्रोरः सहस्र भम् ।
विश्वतो धामनिलयं विश्वतो भासुरं परम् ॥ ६ ॥

ततस्तद्भावनाशीलो निर्गुणं परिशीलयेत् ।
निरीहं निर्गुणं शान्तं नित्याकारं निरञ्जनम् ॥ ७ ॥

निर्लेपं निष्क्रियं धाम मनोवाग्म्यामगोचरम् ।
ततस्तदाकारवृत्त्या तदाकारो भवेद् ध्रुवम् ॥ ८ ॥

ज्ञानं यत्सत्त्वजं प्राहुस्ततस्तस्योदये सति ।
समुदेति परो मोक्षे ह्यविद्याया विनाशतः ॥ ९ ॥

इति ते ज्ञानमुद्दिष्टं परं तत्त्वं सनातनम् ।
ज्ञानी साक्षात् स्वयं रामो ज्ञानं तस्य निदर्शकम् ॥ १० ॥

ज्ञानिभ्यः स्वस्वरूपं स ददात्येव न संशयः ।
विना ज्ञानं न वै मोक्षो ह्यविद्यायाः प्रभावतः ॥ ११ ॥

विना ज्ञानं न वै भक्तिः परब्रह्मनिदर्शिका ।
तस्माज्ज्ञानार्थमनिशमुद्योक्तव्यं च धीमता ॥ १२ ॥

ज्ञाने हि लभते भक्तिं नात्र कार्या विचारणा ।
अथ भक्तिं प्रवक्ष्यामिसाध्यसाधनरूपिणीम् ॥ १३ ॥

पूर्वोक्तज्ञानवांस्तात श्रवणादिपरो भवेत् ।
रामलीलानित्यरसास्वादैकपरिवाञ्छकः ॥ १४ ॥

रामलीलागुणाख्यातिं नामसप्रेममानसः ।
राम धाम च पूर्वोक्तं निर्गुणं ब्रह्म वै विदन् ॥ १५ ॥

रामलीलालोकरूपाद्यखिलं तन्मयं विदन् ।
रामभक्तिं प्रकुर्वाणो रामभक्तिपरो भवेत् ॥ १६ ॥

रामप्रेमपरो भूत्वा रामसायुज्यमाप्नुयात् ।
एषा ते भक्तिरुद्दिष्टा तल्लक्षणमथोच्यते ॥ १७ ॥

क्वचिद्गच्छेत्क्वचित्तिष्ठेत् क्वचिद्धावेत्क्वचिद्धसेत् ।
क्वचित् क्रीडेत्क्वचिज्जल्पेत् क्वचिन्निन्देत् क्वचित्सुखेत् ॥ १८ ॥

नित्यलीलारसानन्दी नित्यलीलैकभावकः ।
हंसः परमहंसश्च परब्रह्ममयो हि सः ॥ १९ ॥

महाभक्तराजः साक्षात्परः श्रीरामोपासकः ।
श्रीर्नामसीता सहजा स्वनन्दानन्दरूपिणी ॥ २० ॥

रामसम्पन्मयी शेषा शेषाशेषरसात्मिका ।
सा यत्र गुरुतां गच्छेत् ते वै श्रीरामोपासकाः ॥ २१ ॥

समस्तवैष्णवाग्र्याश्च सर्वदैवतपूजिताः ।
न तेषां तुलया कश्चित् ससुरासुरमानवे ॥ २२ ॥

तं दृष्ट्वा प्रणमन्त्येव सकला दैवतोत्तमाः ।
तद्गात्रच्छायया स्पृष्टाः पूयन्ते देवता अपि ॥ २३ ॥

तदागमनमात्रेण पूयन्ते यज्ञकोटयः ।
तदुच्छिष्टाशनात्सद्यो ब्रह्मज्ञो जायते नरः ॥
यत्र देशे स्थिताह्येते स देशो गाङ्गपावितः ॥ २४ ॥

ब्रह्मादयस्तं स्पृहयन्ति सर्वे शक्रादयस्तस्य दासानुदासाः ।
ईशादयो ह्यस्य तुलां कथंचिद् वाञ्छन्ति धर्तुं पुरुषोत्तमस्य ॥ २५ ॥

भरत उवाच

स्वयं स भगवान् रामः परब्रह्मस्वरूपधृक् ।
कथं दशरथस्यैष सदने समवातरत् ॥ २६ ॥

अप्राकृतः प्राकृताकारो ह्यस्मभिः सकलैःसह ।
इति संचोदितो भ्रात्रा लक्ष्मणः प्रत्यवोचत[1] ॥ २७ ॥

पूर्वं प्रमोदवन एव विभाति देवो देव्या स्वयं परमया रमया मया च ।
युक्तः समस्तगुणमङ्गलशीलमूर्तिः स्वानन्दसिन्धुरसराजितदिव्यलीलः ॥ २८ ॥

सरय्वाः पारद्वयोर्यद्धि ब्रह्मत्रिगुणातिगम् ।
श्रीराममहसा व्याप्तं ब्रह्मानन्दरसात्मकम् ॥ २९ ॥

तदाधारीकृत्य महाप्रेमानन्दरसात्मकः ।
श्रीरामलोक इति स विख्यातः श्रीमहोमयः ॥ ३० ॥

सहजालोक इति च ख्यातः कामरसात्मकः ।
यत्र प्रमोदविपिनं सर्वर्तुकुसुमाकरम् ॥ ३१ ॥

सर्वर्तुफलशोभाढ्यं सर्वर्तुसुखसंयुतम् ।
सर्वर्तुरसभोगाढ्यं सर्वर्त्तुगुणभूषितम् ॥ ३२ ॥

यत्र कामदुघा नीरैः सरयू रसपूरिता ।
रामभक्तिप्रदा साक्षात्सुरसैव तरंगिणी ॥ ३३ ॥

---

१. प्रत्युवाच तम्–बड़ौ० ।

तस्यास्तरंगकल्लोलपूरितः सर्वतोदिशम् ।
पवनः कुरुते लोकान् मूर्खानपि चतुर्भुजान् ॥ ३४ ॥

श्रीरामरमणीरम्यकुचचन्दनभाविनी ।
तरंगचन्दनालेपकर्त्री श्रीसरयू सरित् ॥ ३५ ॥

यत्र रत्नाद्रिरुदयत्सानुकान्तिमनोहरः ।
सौवर्णै राजतैश्चापि[1] माणिक्यसुभगैः पुनः ॥ ३६ ॥

शिखरैर्भाजते शैलो रामक्रीडारसालपः ।
तस्मिन् सहजया युक्तो निभृतं रामचन्द्रमाः ॥ ३७ ॥

कुञ्जाभ्यन्तरकुञ्जेषु नित्यं क्रीडति विभ्रमैः ।
तत्कन्दरासु सततं मणिदीपोज्ज्वलास्वपि ॥ ३८ ॥

पुष्पशय्यासु सुरतं सेवते रामचन्द्रमाः ।
तस्य तुङ्गेषु शृङ्गेषु संध्यातपपिशंगिषु ॥ ३९ ॥

सहजारामयुगलं राजते काञ्चनोज्ज्वलम् ।
तस्य छायाश्रयान्नित्यं सरयू शीतलोदका ॥ ४० ॥

तद्रत्नशिखरच्छाया व्याप्नुते नाकमण्डलम् ।
तस्य गुह्यासु वीथीषु सीतारामौ विराजतः ॥ ४१ ॥

यत्र साकेतनगरी प्रेमानन्दरसात्मिका ।
तस्यां दशरथो राजा रामवात्सल्यवासितः ॥ ४२ ॥

प्रमोदविपिनोच्छिष्टप्रेमभाजनभावितः ।
यत्र सा काञ्चनी भूमिर्माणिक्योपलनिर्मिता ॥ ४३ ॥

यत्र रामसरो नाम विविधोत्पलसुन्दरम् ।
मत्तभ्रमरगुञ्जाढ्या यत्र ताः कुञ्जभूमयः ॥ ४४ ॥

एवं सहजसौन्दर्यं प्रमोदवनमुत्तमम् ।
स्वयं स भगवांस्तत्र सीतयापि मयापि च ।
भाति लीलारसं बिभ्रद् रामः परमसुन्दरः ॥ ४५ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे पश्चिमखण्डे[2] भरतलक्ष्मणीये तृतीयोऽध्यायः ॥ ३ ॥

---

१. चारु—बड़ौ० ।
२. पूर्वखण्डे (?)—बड़ौ० ।

चतुर्थोऽध्यायः

भरत उवाच

कथं लीलारसं तेने प्रमोदवनचन्द्रमाः ।
एतन्मम समाचक्ष्व श्रीरामप्रिय लक्ष्मण ॥ १ ॥

कथं च सहजादेव्या चिक्रीडे रामसुन्दरः ।
किमेकरूपो बहु वा प्रमोदविपिने रसः ॥ २ ॥

आविर्भावि कथं चात्र प्रमोदविपिनान्तरे ।
स्वैरस्य पूर्णकामस्य निष्कामपदभागिनः ॥ ३ ॥

किमेष सगुणो वोत निर्गुणः पुरुषः परः ।
विश्वात्मा विश्वकर्त्ता च रामो विश्वातिगो गुणैः ॥ ४ ॥

एवं प्रियकथाः शृण्वन्न तृप्यामि प्रियस्य मे ।
स्वयं भगवतो भ्रातुः सुहृदः सख्युरात्मनः ॥ ५ ॥

लक्ष्मण उवाच

साधु पृष्टं त्वया भद्र साधु संस्मारितोऽस्मि तत् ।
प्रमोदनविश्रान्तिलीलाविलासिते सखे ॥ ६ ॥

श्रीरामनित्यसंसर्गी सर्वं चानुबभूविथ ।
तथापि तन्मायया त्वं न स्मरस्यद्भुतं हि तत् ॥ ७ ॥

नित्यमस्ति स्वयं रामः प्रमोदविपिने वसन् ।
तथापि ते प्रवक्ष्यामि कालेनाविर्भवं विभोः ॥ ८ ॥

रामस्यैव कलाव्यूहः श्रीमान् नारायणः प्रभुः ।
रमावैकुण्ठनिलयो रमया नित्यसेवितः ॥ ९ ॥

सहजांशस्वरूपिण्या प्रमोदविपिनांशके ।
वैकुण्ठे चिदचिद्रूपस्वरूपानन्दविग्रहः ॥ १० ॥

हरिः संतोषयामास ब्रह्मण्यो ब्राह्मणोत्तमान् ।
ततः सानुशयास्ते वै प्रोचुर्ज्ञानतानना: ॥ ११ ॥

सनकाद्या ऊचुः

अहो अनार्यमस्माकं कर्मैतद् दुष्टचेतसाम् ।
यदीश तावकौ दिव्यौ शप्तौ पार्षदसत्तमौ ॥ १२ ॥

इहापि चागत्य कुभाव एष रोषाधोनामीशसेवातिगानाम् ।
न यत्र माया च मदो न मत्सरो न क्षुल्लकानां गमनं च दृश्यते ॥ १३ ॥

तत्रागता वयं तावच्छ्रीकृपाभाजनत्वतः ।
अनुगृह्यापि नाविद्या श्रीमतापहृता कुतः ॥ १४ ॥

श्रीभगवानुवाच

द्वारपावेव विप्रेन्द्रा इमौ दुर्मदपीडितौ ।
स्वशापहेतुतां यातौ स्वयमेव न संशयः ॥ १५ ॥

ममैवाभिमतार्थाय शाप एष भविष्यति ।
काले करिष्यत इमौ वीरलीलारसं मम ॥ १६ ॥

जन्मभिस्त्रिभिरेतौ वै विशुद्धौ च भविष्यतः ।
त्रिभिश्चैवावतारैर्मे वीरकेली भविष्यति ॥ १७ ॥

इति प्रसाद्य भगवान् महर्षीन् व्यसृजद्विभुः ।
हिरण्यकशिपुर्वीरो हिरण्याक्षस्तथापरः ॥ १८ ॥

अभूतां भुवने तौ च देवराज्यापहारकौ ।
सर्वत्रैलोक्यदुर्धर्षौ तपोघोरतयोल्बणौ ॥ १९ ॥

यज्ञभागाशिनौ ब्रह्मविष्णुभागादिलोपिनौ ।
स्वयं सूर्यौ स्वयं चन्द्रौ स्वयमिन्द्रौ स्वयं विधी ॥ २० ॥

स्वयं विष्मू स्वयं रुद्रौ स्वयं वह्निप्रजापती ।
स्वयं यमौ स्वयं श्रोदौ स्वयं वरुणतां गतौ ॥ २१ ॥

स्वयं ग्रहौ स्वयं राशी स्वयं ज्योतिःकदम्बकौ ।
लोकपालौ दिशः पालौ देवप्रत्यधिदैवतौ ॥ २२ ॥

स्वर्भूपातालराज्येशौ ब्रह्माण्डक्षयकारकौ ।
तौ च पश्चाद्भगवता निहितौ युद्धकेलिभिः ॥ २३ ॥

एकः श्रीमद्वराहेण नकेसरिणापरः ।
कल्पद्वयं च युयुधे हिरण्याक्षेन केशवः ॥ २४ ॥

षष्टिवर्षसहस्राणि दिव्यानि युयुधे हरिः ।
हिरण्यकशिपुना सार्द्धं वलिना वलिनां वरः ॥ २५ ॥

ततस्तौ पातितौ हत्वा निस्तुलेनस्वतेजसा ।
अवापतुः पुनर्जन्म कुम्भकर्णदशाननौ ॥ २६ ॥

यौ तौ लङ्काभटौ ख्यातौ वलवीर्यातिदर्पितौ ।
आर्येणैव निहन्तव्यौ कालौ धारापणधनौ ॥ २७ ॥

अथ पुत्रः पुलस्त्यस्य मुनेः परमतेजसः ।
कालेन ववृधे श्रीमानसुरो घोरतेजसा ॥ २८ ॥

घोरघोरं तपश्चक्रे द्वीपेषु लवणोदधेः ।
सिन्धुतीरे तपश्चक्रे पुण्यारण्येषु चापि सः ॥ २९ ॥

रेवातीरे च गौतम्यास्तीरे सीमातटे तथा ।
काबेरीपुलिने कृष्णातटे गङ्गातटे तथा ॥ ३० ॥

यमुनायास्तटे चापि पुण्यशैलतटेषु च ।
चण्डीशं समुपासीनो देव्या चण्डिकया सह ॥ ३१ ॥

वेदाभ्यासं प्रकुर्वाणस्त्रैलोक्य भयदोऽसुरः ।
आजहार महायज्ञान् वहून सोऽध्वरदीक्षितः ॥ ३२ ॥

त्रैलोक्यं तापयामास तपस्तेजोभिरुद्धतैः ।
लक्षवर्षाणि विषमं स तेपे दुश्चरं तपः ॥ ३३ ॥

शम्भुलब्धवरः प्रायः लङ्काराज्यं महोदयम् ।
त्रैलोक्यं करदीकृत्य जृम्भते राक्षसेश्वरः ॥ ३४ ॥

स याति हरसेवार्थं कैलासे नित्यमूर्ध्वगः ।
लङ्कायाः परतश्चापि देवी श्रीवरदेश्वरी ॥ ३५ ॥

सुवर्णपर्वते भाति तत्सेवार्थं च नित्यशः ।
प्रयाति लोकराज्येन्द्रो रावणो लोकरावणः ॥ ३६ ॥

कदाचिदलसोभूत्वा स इत्थं समचिन्तयत् ।
शंकरं चाम्बिकां देवीमेकीकृत्य क्षणादुभौ ॥ ३७ ॥

स्वगृहे वासयिष्यामि बलादानीय पर्वतम् ।
इत्युक्त्वा सहसोत्थाय कैलासं शिखरं बली ॥ ३८ ॥

लङ्कामागन्तुमारेभे ततः क्रुद्धोऽभवद्धरः ।
किमेष गृहचालोऽद्य नन्दिन् हेतुर्विलोक्यताम् ॥ ३९ ॥

क्रुद्धं हरं समालोक्य नन्दी पर्यचलद्धये[1] ।
ततस्तयोः समभवत् संग्रामो भृशदारुणः ॥ ४० ॥

परस्परप्रजविनोर्नन्दिनो रावणस्य च ।
पाषाणैश्च तथोल्काभिर्वज्रपोतैश्च दारुणैः ॥ ४१ ॥

द्रुमैः शिलाभिः परिधैर्नानायुधनिपातनैः ।
मूर्ध्नां वहन् गिरेः शृङ्गं रावणो युयुधे बली ॥ ४२ ॥

ततः पराजितो नन्दो रावणेन महौजसा ।
महाप्रहारिणा भूयो रणदुर्मदबाहुना ॥ ४३ ॥

भृशं निष्पीडितो नन्दी मूर्छितो न्यपतद्भुवि ।
पृथिव्यां पतितं प्राह मिषन्तं नन्दिनं बली ॥ ४४ ॥

---

१. ह्यमिति वेगवाचकम् ।

रावण उवाच

कपेरिव मुखं विभ्रत्समायातोऽसि मां युधे ।
किमर्थं पतितो वत्स प्रहारश्लथविग्रहः ॥ ४५ ॥

नन्द्युवाचः

यदा त्वां कपयो वीराः समायास्यन्ति दुर्मदाः ।
तदैव ते वधो भूयाद्यदि सत्यो गुरुः शिवः ॥ ४६ ॥

इति शप्त्वा गते तस्मिन् हरः पर्यंकरोद्धुरम् ।
येनातिदुर्भरं शैलं सद्यस्तत्पाज रावणः ॥ ४७ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे पश्चिमखण्डे भरतलक्ष्मणीये रामजन्मोपाख्याने चतुर्थोऽध्यायः ॥ ४ ॥

पञ्चमोऽध्यायः

लक्ष्मण उवाच

लब्धशापो निववृते रावणः स्वपुरीं गतः ।
त्रैलोक्यराज्यसम्मत्तो भुजवीर्यबलोन्मदः ॥ १ ॥

कदाचित्तस्य वै दूतौ दुष्टौ सुमुखदुर्मुखौ ।
अपश्यतां सिन्धुतीरे तपस्यन्तीं सुलोचनाम् ॥ २ ॥

तडित्काञ्चनगौराङ्गीमीषद्धास विराजिताम् ।
रोचयन्तीं दिशश्चाष्टौ गौरीमिव रमामिव ॥ ३ ॥

चन्द्राननां सुनासाढ्यां भालभाग्यविभूषिताम् ।
साक्षात्कालभुजङ्गीव वहन्तीं वेणिकां पराम् ॥ ४ ॥

हेमकुम्भस्तनीं देवीं कमलाधिकसौरभाम् ।
गम्भीरकूपान्तर्नाभिर्निम्नरोमावलीलताम् ॥ ५ ॥

वलित्रयतरंगाढ्यामद्भुतां सरसीमिव ।
गण्डयोर्मुकुराकारां बाह्वोः कल्पबिसोपमाम् ॥ ६ ॥

ऊर्वोश्च हेमकदलीं पदयोः पद्मकोमलाम् ।
नखेषु चन्द्रकलिकामङ्गुलीषु प्रवालभाम् ॥ ७ ॥

सर्वावयवशोभाढ्यां विलसन्तीं शुभैर्गुणैः ।
तौ वीक्ष्य रावणायामूमाचरव्यतुरनन्तरम् ॥ ८ ॥

दूतावूचतुः

प्रभो काचन देवी वा राक्षसी मानुषी च वा।
गान्धर्वी नागकन्या वा शैली वा वनदेवता ॥ ९ ॥

सागरस्यसुतावापि सिन्धुद्वीपे तपस्यति ।
न तस्यास्तुलया काचिदृष्टा वापि श्रुताभवे ॥ १० ॥

सर्वोपमा सुरूपाङ्गी सर्वावयवसुन्दरी।
सर्वसौन्दर्यपाथोधिवाङ्मनोगोचरप्रभा ॥ ११ ॥

सहस्रचन्द्रज्योत्स्नेव तस्या वदनचन्द्रिका।
कोटिरत्नप्रभातुल्या तस्याः पादनखच्छविः ॥ १२ ॥

कोटिनक्षत्रमालेव तस्याः सर्वाङ्गगा छविः।
विभाति चञ्चलापाङ्गी तपस्यन्त्यपि सागरे ॥ १३ ॥

नैतछपं विजानीमः किमिच्छन्ती तपस्यति।
प्रायो नास्याः समः कश्चित्त्रिषु लोकेषु वै वरः ॥ १४ ॥

ब्रह्मा द्विजो वराकश्च कर्मकाण्डपरश्च सः।
विष्णुर्वैराग्यशाली च ज्ञानी जगति निःस्पृहः ॥ १५ ॥

रुद्रः श्मशानचारी च तपस्वी भस्मधूसरः।
भूतसंगी त्रिनेत्रश्च जटी प्रकृतिभोषणः ॥ १६ ॥

अत्ये वराकाः किं देवास्त्वद्योग्या केवलं हि सा।
त्वयैव गृह्यतां नाथ पाणिग्रहविधानतः ॥ १७ ॥

योषिद्रत्नं वरं दिव्यं न त्व संत्यज्यतां प्रभो।
इत्युक्तो रावणस्ताभ्यां पातस्तत्र स्मरोद्धुरः ॥ १८ ॥

यत्र सा सुन्दरी देवी सिन्धुमध्ये तपस्यति।
तद्रूपदर्शनोद्भूतस्मरनाराचपीडितः ॥
तामादातुं यतितवानतिदुर्धर्षविग्रहाम् ॥ १९ ॥

रावण उवाच

का त्वं तपस्यसे सुभ्रु किमर्थं च वरानने।
कश्च ते जनकः ख्यातः किमर्थं भजसे न माम् ॥ २० ॥

त्वादृशी सुन्दरी देवि मम शोभिष्यसे गृहे।
अहं त्रैलोक्यनाथोऽस्मि लङ्काया अधिपः स्फुटम् ॥ २१ ॥

त्वामहं हि ग्रहीष्यामि पाणिग्रहणलीलया।
कोऽन्यो मयि स्थिते भूमौ भविता च पतिस्तव ॥
इत्युक्ता तेन सा क्रुद्धा सक्रोधमिदमब्रवीत् ॥ २२ ॥

स्त्र्युवाच

स्वयं लक्ष्मीरहं तावत्तपस्यामि गरीयसे ।
वराय विष्णवे सर्वत्रैलोक्यस्थितिहेतवे ॥ २३ ॥

न हि तस्मात्परो भावः श्रुतो दृष्टोऽथवा क्वचित् ।
त्रिजगज्जनितं तस्मात् पाल्यते तेन लीलया ॥ २४ ॥

तेनैव ह्रियते भूयः स्वच्छन्दनिजकेलिना ।
न तत्समश्चाभ्यधिकश्चिषु लोकेषु विद्यते ॥ २५ ॥

स्वयं स भगवान् साक्षात् पूर्णः स्वगुणमङ्गलः ।
कल्याणरूपो भक्तानामभक्तानां निषूदनः ॥ २६ ॥

असुराणां दानवानां दैत्यानां च निषूदनः ।
विश्वाधारोऽतिगम्भीरो समुद्रश्च पिता मम ॥ २७ ॥

योऽसौ तव पुरीरक्षां करोति परिखायतः ।
त्वं चासुरो नीचबुद्धिः प्रकृत्या राक्षसः खरः ॥ २८ ॥

तत्रापि विमुखो विष्णोर्वेदब्राह्मणलोपकः ।
क्व तत्र गण्यसे यत्र ब्रह्माद्या अप्यनादृताः ॥ २९ ॥

मा मैवं संस्पृश रिपोभावदुष्टेन पाणिना ।
इत्युक्तो रावणः क्रुद्धः प्रत्युवाच समुद्रजाम् ॥ ३० ॥

अये भ्रान्ताशये नूनं केन त्वमसि वञ्चिता ।
त्रैलोक्येशमनादृत्य दीनं स्पृहयसे वरम् ॥ ३१ ॥

एवं चेत्तर्हि सुमुखि मद्देशे किं तपस्यसि ।
आब्रह्मस्तम्बपर्यन्तं जगन्मम वशानुगम् ॥ ३२ ॥

यदि त्वमेका न वशे तर्हि शोच्यासि सम्प्रति ।
त्वां बलेनैव नेष्यामि रुदन्तीं स्वात्मदोषतः ॥ ३३ ॥

स्त्रीणां खलु दृढो दोषः पुरुषेण निवार्यते ।
ततस्तमाह सा देवी निःश्वसन्ती रुषारुणा ॥ ३४ ॥

दुष्ट त्वं मां तपस्यन्तीं निवारयसि किं वृथा ।
कुतो न वारयसि तान् सप्तर्षीन् हि तपस्यतः ॥ ३५ ॥

ये त्वां दहेयुः सहसा धर्मकर्मैकलोपिनम् ।
किं चाप्यजनिता कश्चित्तव प्राणनिषूदनः ॥ ३६ ॥

स एव भविता देवो मम लोकोत्तरो वरः ।
मा ज्वालीर्गुरुगर्वेण तामसेनान्ध तामस ॥ ३७ ॥

इत्युक्त्वा वचनं देवी तिरोभूता तदग्रतः ।
प्रमोदविपिने रम्ये प्रादुर्भावं तदाकरोत् ॥ ३८ ॥

आनन्दिनी नन्दनाख्यगोपराजस्य वै गृहे ।
राजिका गोपमहिषी गर्भरत्नमहोदया ॥ ३९ ॥

माघे मासि सिते पक्षे पञ्चम्यां शुभवासरे ।
अश्विनीशुभनक्षत्रे शुभयोगे शुभोदये ॥ ४० ॥

ततः प्रसन्नमखिलं जगदासीत् समंततः ।
रावणारिपराभूताः सुराश्चासन् सुनिर्वृताः ॥ ४१ ॥

ववृषुः पुष्पवर्षाणि जगुर्गन्धर्वनायकाः ।
देवदुन्दुभयो नेदुर्ननृतुश्चाप्सरोगणाः ॥ ४२ ॥

तदाधिदैविकः कालः प्रादुर्भावितवान् गुणान् ।
विकासं लेभिरे सद्यो लतास्तरव एव च ॥ ४३ ॥

सरांस्युत्फुल्लपद्मानि सुगन्धिसलिलानि च ।
दिदीपिरेऽग्नयश्चैव यज्ञशालासु दक्षिणम् ॥ ४४ ॥

ववुः सुगन्धयो वाताः सरयूवीचिशीतलाः ।
एवं जगत्प्रमोदाय तज्जन्मदिवसोऽभवत् ॥ ४५ ॥

नन्दनस्य गृहे साक्षात्स्वयं लक्ष्मीर्यदाभवत् ।
तदा समृद्धिरभवद् गोकुले रम्यसम्पदि ॥ ४६ ॥

व्रजः सर्वश्रिया युक्तः सर्वसम्पत्समृद्धिमान् ।
माङ्गल्यासुखितपोश्चापि भाविमाङ्गल्यसूचकः ॥ ४७ ॥

सा संजाता व्रजे स्वांशैर्व्रजस्त्रीभिरनेकधा ।
उभयोस्तीरयोर्ग्रामेष्वाभीराणां गृहे गृहे ॥ ४८ ॥

गोप्यः कमलपत्राक्ष्य ऊढाश्चैवापि कन्यकाः ।
रामलीलाविनोदार्थं देवानां च तथाङ्गनाः ॥ ४९ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे पश्चिमखण्डे भरतलक्ष्मणीये रामजन्मोपाख्याने पञ्चमोऽध्यायः ॥ ५ ॥

षष्ठोऽध्यायः

लक्ष्मण उवाच

एवमेव मया पृष्टः श्रीरामो रसवर्द्धनः।
यदाह तत्ते वक्ष्यामि रहस्यं रसवर्द्धनम् ॥ १ ॥

राम उवाच

नित्यं स्थितोऽप्यहं तात प्रमोदविपिनान्तरे।
अधुनाऽऽविर्भविष्यामि भक्तानां कार्यसिद्धये ॥ २ ॥

अवतारार्थसिद्धये च साकेतपुरकेलये।
इत्युक्त्वा रघुवंशेऽस्मिन् प्रादुर्भूत्तोऽद्य सम्प्रति।
अस्माभिः सहितो भाति प्रमोदवनचन्द्रमाः ॥ ३ ॥

पूर्वं जातो दशरथगृहे रावणस्याथ भीत्या
श्रीमाङ्गल्या सुखितसदने रक्षितोऽस्याविशेषम्।
स्नेहार्द्राभ्यांवसतिमधुरो भूरिभावेन ताभ्या
माभीरीभिः प्रणयखचितो भूरिभावोपयुक्तः ॥ ४ ॥

आनन्दाब्धिर्नटवरवपुर्नन्दनापत्यरत्नं
दृष्ट्वा जोवनप्रकृतिसहजां श्रीमतीं मोदिनीं ताम्।
अन्यां लीलां स्वजनसुखदां कर्त्तुमिच्छुः स्वशक्त्या
भर्त्तेदानीं दशरथगृहे शोभते प्राप्तएषः ॥ ५ ॥

अस्यानुरोधात्सहजापि देवी प्राप्ता निजांशेन निमेश्च वंशे।
राजाधिराज्ञोजनकस्यगेहे सुलोचनागर्भमनोज्ञरत्नम् ॥ ६ ॥
रम्यातिरम्ये मिथिलाख्यदेशे सुवर्णभूमौ खलु यज्ञवेद्याम्।
माणिक्यदिव्यत्कलशान्तरालतः समुद्गता कोटितडिच्छदेव ॥ ७ ॥
अथाविरासन् सरितो नव शीतसुधोदकाः।
त्रियुगा कमलेशी च गण्डक्यप्यद्यवारिणी ॥ ८ ॥

द्युम्ना घोषवती चैव वनघोषा च सप्तमी।
अष्टमी च स्वयं लक्ष्मीः कौशिकी नवमो स्मृता ॥ ९ ॥

सुवर्णहलकृष्टायां भूमौ वेद्यां मखस्य च।
सुवर्णकलशोमध्याज्जलधारा विनिर्ययुः ॥ १० ॥

तासां मध्ये विस्फुरन्ती कोटिचन्द्रार्कदीधितिः।
सद्यः प्रादुरभूद्देवी सहजा जनकालये ॥ ११ ॥

रामप्रिया या प्रथमं प्रमोदवनकुञ्जगा।
नवभिर्दिव्यधाराभिरभिषिक्ता समंततः ॥ १२ ॥

रत्नपीठस्थिता लोकमहासाम्राज्यभाजनम् ।
तस्यामभ्युदितायां तु मुमुदे जनको नृपः ॥ १३ ॥

राज्ञी सुनयना वापि हर्षोत्फुल्लाननाभवत् ।
याज्ञवल्क्यश्च भगवान् दारास्तस्य महौजसः ॥ १४ ॥

अरुन्धती वशिष्ठश्चाप्यहल्या गौतमस्तथा ।
शतानन्दश्च योगीशो नव योगीश्वरास्तथा ॥ १५ ॥

निवसन्तो नित्यमेव जनकस्यालये चिरात् ।
ददृशुस्ते शुभं तस्या जन्म कर्म गुणान्वितम् ॥ १६ ॥

धवले माधवे मासि नवम्यां मङ्गले दिने ।
शुभे भद्राख्यनक्षत्रे शुभयोगे च जानकी ॥ १७ ॥

ऊर्मिलापि ततो रत्नकलशाच्चक्र उद्भवम् ।
माण्डवीश्रुतकीर्तिश्च वामदक्षिणपार्श्वयोः ॥ १८ ॥

अथो जनकराजस्य सदने दुन्दुभिरवाः ।
पटहध्वनियश्चापि वितेनुर्महतीं मुदम् ॥ १९ ॥

देवदुन्दुभयश्चापि नेदुरव्याहतक्रमाः ।
सर्वं जगत्सुखमासीदानन्दामृतवर्षणात् ॥ २० ॥

कल्पद्रुमाः पल्लविताः समंततो वसन्तलक्ष्मी समवातरद्भुवि ।
समञ्जरीकैस्तरूभी रसालैश्चम्पेयाद्यैर्विभरे पुष्पराशिः ॥ २१ ॥

धरणी सहसाऽऽगम्य पृथ्वीलोका स्मिताननाः ।
सुवेशं रूपमास्थाय जनकस्यापुरःस्थिता ॥ २२ ॥

रत्नपर्यङ्किकामध्यनिवषण्णां स्वसुतां पराम् ।
कमलामर्पयन्त्यस्मैप्रोवाच मुनिमण्डले ॥ २३ ॥

धरण्युवाच

भूरहं भगवत्पादकमलस्पर्शजाङ्कुरा ।
ममेयं हृदयात्सारभूता प्रेममयाकृतिः ॥ २४ ॥

समुद्गता नाम सीता मया तुभ्यं प्रदीयते ।
इयं श्रीः श्रीरामप्रेमभाजनं रक्ष्यतां त्वया ॥ २५ ॥

अनया ज्ञानगम्यस्य प्रेम्णा पारंगतो भवान् ।
प्राप्स्यसे तत् परंब्रह्म सच्चिदानन्दविग्रहम् ॥ २६ ॥

श्रीरामचन्द्रं रसिकं सर्वावतारसागरम् ।
स समायास्यति वै हि भगवान् पुरुषोत्तमः ॥ २७ ॥

चतुर्भिरंशैः संजाता तेनेयं परमेश्वरी ।
रक्ष्यतां जनकाधीश कलधौततनुः सुता ॥ २८ ॥

इत्यर्पयित्वा जनकाय मेदिनी तिरोबभूव द्रुतमेव देवी ।
नैम्यः पुनर्भूमिपतिः प्रियायै समर्यंथामास सुलोचनायै ॥ २९ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे पश्चिमखण्डे सीताजन्मोपाख्याने षष्ठोऽध्यायः ॥ ६ ॥

सप्तमोध्यायः

लक्ष्म ण उवाच

ततः सुनयना देवी सम्प्राप्य नृपतेः करात् ।
कन्यारत्नं प्रमुदिता बभूव महिषोवरा ॥ १ ॥

ततस्ताः सहजासख्यः सहर्षाः सरितो नव ।
ऊचुर्जनकराजानं सीतासंगमलालसाः ॥ २ ॥

त्रियुगोवाच

अहमस्याः सखी नित्यं निवसामि च सन्निधौ ।
अस्याः पिता त्वं संवृत्तो ममापि च तथैव हि ॥ ३ ॥

कमलेश्युवाच

अहं मन्दरशैलस्य कन्या या कमलेश्वरी ।
सहजाया नियसखी प्रादुर्भूता सहानया ॥
यथा स्याः साम्प्रतं तद्वन्ममापि त्वं पिता भव ॥ ४ ॥

गण्डक्युवाच

सालिग्रामशिलाक्षेत्रे गण्डक्यस्मि महानदी ।
सहजायाः सखी तेन ममापि त्वं पिता नृप ॥ ५ ॥

अघवारोवाच

अहमस्याः सखी काचिदघवाराभिधा सरित् ।
तव कन्याहमधुना मत्सखी सहजा पितः ॥ ६ ॥

द्युम्नोवाच

अहं द्युम्ना नदी तात सहजायाः परा सखी ।
यथा त्वमस्या जनको ममापि जनको भव ॥ ७ ॥

घोषवत्युवाच

अहं तपनशैलस्य सुता घोषवती नदी ।
सहजायाः सखी तेन ममापि त्वं पिता भव ॥ ८ ॥

वनघोषोवाच

अहमुत्तरशैलस्य तनया वनघोषिणी ।
एतस्यास्तु पिता तद्वन् ममापि त्वं पिता भव ॥ ९ ॥

स्वयं लक्ष्मीरुवाच

अहं सीतांशभूतास्मि सदा संनिधिवर्तिनी ।
आवयोर्विदितः स्वामी श्रीरामो रघुकुलप्रियः ॥ १० ॥

तदाज्ञया भूतलेऽस्मिन्नवतीर्णे निवेदय ।
यथा त्वं जनकश्चास्या ममापि च तथा भव ॥ ११ ॥

कौशिक्युवाच

अहं कुशिकराजस्य तनया कौशिकीति सा ।
अवतीर्णानया साकं ममापि त्वं पिता भव ॥ १२ ॥

जनक उवाच

कदा वः संगमो जातो राघवप्रियमानया ।
क च वः प्रेमसंवृद्धं भवतीनां पणो यतः ॥ १३ ॥

एकत्रैव निवासोऽभूद्विश्लेषो न कदाचन ।
किं कृतं सुकृतं चापि येन श्रीसख्यमीदृशम् ॥ १४ ॥

श्रीर्नाम ब्रह्मणो धर्मः परस्यानन्दविग्रहः ।
ब्रह्मानन्दस्वरूपेयं क प्राप्या प्राकृतैर्जनैः ॥ १५ ॥

यथा रामस्तथैवेयमित्याह धरणी च माम् ।
इत्युक्ता जनकेनैताः सरितो नव शीतलाः ॥
ऊचुर्जनकराजाय कथानकमनुत्तमम् ॥ १६ ॥

त्रियुगोवाच

पितॄणां मानसी कन्या मेनाया अग्रजास्म्यहम् ।
मेना हिमाद्रिं चकमे जाताहं च तपस्विनी ॥ १७ ॥

वर्षवातातपक्लेशसहा मुनिषु मानिनी ।
कायक्लेशं प्रकुर्वाणा चचार परमं तपः ॥ १८ ॥

मदुग्रतपसा राजन् सर्वे देवाश्चकम्पिरे ।
त्रैलोक्यं तापितमभूत्ततो ब्रह्मा समागतः ॥ १९ ॥

ब्रह्मोवाच

किमर्थमित्थं चार्वङ्गि चरसे दुस्तरं तपः ।
ब्राह्मं वाप्यैन्द्रमथवा पदं कामयसे किमु ॥ २० ॥

तदहं ब्रह्मणो वाक्यं श्रुत्वा प्रोन्मीलितेक्षणा ।
उक्तवत्युत्तरं राजन् यथा ब्रह्मा प्रसादितः ॥ २१ ॥

नाहं ब्राह्मं तथैवेन्दूं कामयेऽन्यस्य वा पदम् ।
रामस्य पदमिच्छन्ती यदगम्यं मुनेरपि ॥ २२ ॥

इत्युक्ते सहसा ब्रह्मा प्रसन्नोऽभूज्जगत्पतिः ।
तपोऽस्त्वित्याशिषं दत्त्वा जगाम निजमालयम् ॥ २३ ॥

वटुवेशधरो विष्णुरन्ततो मामुपागतः ।
कृष्णाजिनधरो दण्डी प्रोवाच स्थिरवद्वचः ॥ २४ ॥

वटुरुवाच

अये कमलपत्राक्षि कलधौततनुप्रभे ।
कोकस्तनि सुजघने किं कामा चरसे तपः ॥ २५ ॥

त्वादृशी हंसगमना शिरीषदलकोमला ।
कस्यचिद्धरणीशस्य योग्यासि महिषीपदे ॥ २६ ॥

यत्र ते चन्दनाढ्येन काश्मीरगुरुसौरभी ।
निर्वर्तयति संतापं (क) ते वपुर्धूलिधूसरम् ॥ २७ ॥

हंत कृष्णाजिनच्छेदो न दुःखाकुरुते किमु ।
शरीरं ते सरोजासि शिरीषादपि कोमलम् ॥ २८ ॥

हन्त ते तपनस्पर्शो ग्रीष्मकालाति दुःसहः ।
बाधते न शरीरं किं कमलादपि कोमलम् ॥ २९ ॥

हंत ते अक्षिणी धर्मव्याकुलत्वमुपागते ।
कस्य सामन्त राजस्य विषयत्वं करिष्यतः ॥ ३० ॥

अहो अधरबिम्बस्ते दिनपातातिमेचकः ।
बाहू च कृष्णाजिनतो दूषितौ किणभूषितौ ॥ ३१ ॥

हंत ते वेणिका रम्यकुसुमस्तबकोचिता ।
भस्मस्तोमेन ग्रथिता कस्य नो कुरुते व्यथाम् ॥ ३२ ॥

ईदृशं दुश्चरं घोरं सुरासुरजनाद्भुतम् ।
तपश्चरसि वामाक्षि न ते कामोऽभिलक्ष्यते ॥ ३३ ॥

ब्रह्मेन्द्रादिसुरौघास्ते आज्ञायावशवर्तिनः ।
कस्य देवस्य सापेक्षा चरसे दुश्चरं तपः ॥ ३४ ॥

एतत्स्वरूपायोग्यं ते तन्वि तीव्रतरं तपः।
यस्य प्रिया त्वं भविता तस्य श्रीर्भविता गृहे ॥ ३५ ॥

अहं मुनिरुदासीनस्तपसा तेऽस्मि चालितः।
इति श्रुत्वा वढोर्वाक्यमहमुक्तवती वचः ॥ ३६ ॥

नाहमिन्द्रादिपदवीं न वा तन्महिषीपदम्।
कामये किंतु गोविन्दचरणाब्जरजो भृशम् ॥ ३७ ॥

ब्रह्मादिभिः सहेशानैर्देवैरपि सुदुर्लभम्।
ततो मां स वटुः प्राह प्रहसन् रम्यया गिरा ॥ ३८ ॥

वटुरुवाच

हंत ते हृदयं तन्विस्वाराज्यसुखभागिनाम्।
महिषीत्वमनादृत्य विष्णुं कामयते कथम् ॥ ३९ ॥

स्त्रीणां हि स्वपतिर्विष्णुर्येन पाणिग्रहो भवेत्।
लब्ध्वा तं सर्वतः शुद्धं किं कार्यं विष्णुना स्त्रियः ॥ ४० ॥

एकान्तचारी विषयैर्वियुक्तो विरक्तचित्तो यतिभिः सम्परीतः।
तत्रापि लोलां स्त्रियमेकां दधानः किं ते प्रियत्वे सुतनु विष्णुरर्हः ॥ ४१ ॥

यः साम्राज्यपदं याति धरणीमण्डलेश्वरः।
अष्टादशद्वीपपतिः स्मरसुन्दरविग्रहः ॥ ४२ ॥

कौतुकी स्त्रीप्रियाचारो वेशालंकारभूषितः।
प्रेमानुरागनिपुणः स ते भर्तृपदोचितः ॥ ४३ ॥

साम्प्रतं ब्रह्मणः सृष्टौ देवासुरमनुष्यकैः।
गन्धर्वैर्ज्योतिषां चक्रैश्चन्द्रसूर्यादिभिस्तथा ॥ ४४ ॥

अहिभिर्भोगशोभाढ्यैर्मणिभूषितमस्तकैः ।
राजन्यैः क्षत्रियश्रेष्ठैर्वर्णैर्विप्रादिभिः पृथक् ॥ ४५ ॥

महती रचिता शोभा तेष्वेकं वृणु कंचन।
वरुणं च वरं प्राप्य सुन्दरं जलदैवतम् ॥ ४६ ॥

रत्नमालाविभूषाढ्यं नित्यं मोदिष्यसे चिरम्।
इन्द्रं वापि वरं प्राप्य सर्वदेवगणेश्वरम् ॥ ४७ ॥

ऐरावते समासीना मेघमण्डलगामिनी।
द्वितीया दामिनीवत्त्वं भविष्यसि महाप्रभा ॥ ४८ ॥

हवींषि श्रोत्रियागारेष्वहर्निशमवाप्स्यसि।
यथा त्वं यास्यसि प्रेम्णा न तथास्य प्रिया शची ॥ ४९ ॥

अग्नेश्चेत्त्वं वधूर्भूत्वा यास्यसि प्रेमपात्रताम्।
तदा स्वाहास्वधातोऽपि श्रेष्ठैव त्वं भविष्यसि ॥ ५० ॥

अथवा चेत् कुबेरस्य पत्नीभावं गमिष्यसि ।
तदा गन्धर्ववर्याणां स्वरानाकर्णयिष्यसि ॥ ५१ ॥

स सखा भालचन्द्रस्य शंकरस्य महात्मनः ।
तेन सार्धं च कैलासं गन्तासि मृगलोचने ॥ ५२ ॥

तत्र द्रक्ष्यसि वैकुण्ठादधिकं रामणीयकम् ।
अथवा शङ्करस्यैव पत्नी चेत्त्वं भविष्यसि ॥ ५३ ॥

तदा गङ्गामृडानीभ्यां भविता प्रेयसी परा ।
सूर्यं वापि ग्रहाधीशं चन्द्रं वा तारकापतिम् ॥ ५४ ॥

वरं सम्प्राप्य भवती प्राप्स्यसे परमं सुखम् ।
एषामन्यतमं चैव वरं वृणु सुलोचने ॥ ५५ ॥

भोगेषु चेत् सुकामत्वं नो चेद्विष्णुं वरिष्यसि ।
इत्युक्त्वा विरते तस्मिन् बभाषेऽहं वटुद्विजम् ॥ ५६ ॥

नाहं वटो भविष्यामि क्षरेषु निरता क्वचित् ।
आब्रह्मस्तम्बपर्यन्तं क्षरमेव न संशयः ॥ ५७ ॥

अक्षरं तत्परं ब्रह्म गणितानन्दमेव तत् ।
तस्मादगणितानन्दं परं ब्रह्माभिकामये ॥ ५८ ॥

तत्पुनः कृष्णरामाख्यगोविन्देति परं महः ।
अर्वाग्यतः प्रपञ्चोऽयं नामरूपफलात्मकः ॥ ५९ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे पश्चिमखण्डे सीताजन्मनि सप्तमोऽध्यायः ॥ ७ ॥

अष्टमोऽध्यायः

त्रियुगोवाच

इत्युक्ते तु मया वाक्ये भगवान् कमलेक्षणः ।
प्रादुरासीद्वटुः साक्षादादिनारायणो हरिः ॥ १ ॥

शङ्खचक्रगदापद्मधारीशार्ङ्गविभूषितः ।
पल्लवारुणापादाब्जनखचन्द्रमरीचिभाः ॥ २ ॥

मणिमाणिक्यमञ्जीरराजहंसनिषेवितः ।
सरत्नकिंकिणीजालनतगुल्फयुगान्वितः ॥ ३ ॥

सुसूक्ष्मकटिनिर्वद्धपीताम्बरसमावृतः ।
रत्नकाञ्चीगुणोन्नद्धकटिसूत्रविराजितः ॥ ४ ॥

सरिदावर्तगम्भीरनाभीपङ्कजभूषितः ।
वलित्रयसुशोभाढ्यः सिंहविक्रमणोदरः ॥ ५ ॥

रामेराजिलताशालिचित्रभः सोदरोदरः ।
श्रीवत्सवक्षाः श्रीसंगवामपार्श्वविराजितः ॥ ६ ॥

भृगुपादमहोराशिमहापादविभूषितः ।
कण्ठासक्तमहाज्योतिःकौस्तुभाख्यविराजितः ॥ ७ ॥

पीताम्बरपरीधानो वनमालाविभूषितः ।
मधुरस्नेहविस्मरपूर्णचन्द्रसमाननः ॥ ८ ॥

करुणार्णवकल्लोलदृक्तरङ्गप्रभावितः ।
रत्नमाणिक्यकुन्दादिपराभवरदप्रभः ॥ ९ ॥

सुवर्णसूत्रोपवीती स्फुरन्मकरकुण्डलः ।
परिणद्धवृषस्कन्धस्तालप्रांशुर्महाप्रभुः ॥ १० ॥

कुण्डलच्छविसंदोहचुरिताच्छकपोलभाः ।
बिम्बाधरप्रभाशोणदशनेन्दुसितप्रभः ॥ ११ ॥

राकानिशागमद्योतपराभवपरायणः ।
रत्नमालासमाबद्धधम्मिलमधुराकृतिः ॥ १२ ॥

स्फुरन्मकरिकापत्रललाटार्धनिशाकरः ।
नासामणिमनोज्ञश्रीर्भूंचापशरलोचनः ॥ १३ ॥

प्रसन्नः पुण्रीकाक्षो वामाङ्गश्रीविभूषितः ।
मुक्ताहारसमालम्बी वैजयन्तीभरान्वितः ॥ १४ ॥

मलयागुरुकाश्मीरचन्दनालेपसुन्दरः ।
ईदृशं तं समालोक्य कोटिकन्दर्पसुन्दरम् ॥ १५ ॥
मोहिता कामभावेन नाहं वक्तुं क्षमाभवम् ।
ततो मां भगवानूचे स्मयमान इदं वचः ॥ १६ ॥
एष ते दुर्घटो भूरि मनोभिलषितो वरः ।
यन्मां कामयसे तन्वि वरत्वेन श्रियः पतिम् ॥ १७ ॥
ब्रह्मादयोऽपि मां देवा दास्यत्वेन भजन्ति च ।
श्रियोऽन्या स्त्री कथं सक्ता लब्धुमीदृग्विधं वरम् ॥ १८ ॥
कथं च निष्फलो भूयान्मयि सम्प्रार्थितो वरः ।
तस्मात्सारस्वते कल्पे त्रिंशे त्रेताभिधे युगे ॥ १९ ॥
रामावतारे सम्प्राप्य कृतकृत्या भविष्यसि ।
इयं मे सहजा लक्ष्मीः साक्षाद्वामाङ्गसङ्गिनी ॥ २० ॥

तया सहितया[1] भूत्वा मम तोषं करिष्यसि ।
अस्याः सख्यं परिप्राप्य मम सङ्गमवाप्स्यसि ॥ २१ ॥

इत्युक्त्वान्तर्दधे विष्णुः स्वयमन्तर्दधे विभुः ।
यत्र यत्र भवत्येषा तत्र तत्र भवाम्यहम् ॥ २२ ॥

प्रमोदविपिने चैषा सहजानन्दिनी स्वयम् ।
प्रमोदविपिने नाहं नन्दिनी नाम तत्सखी ॥ २३ ॥

इदानीं त्रियुगा नाम जातास्याः सख्यहं नृप ।
रक्षणीया त्वया भद्र कन्यावन्निमिभूपते ॥ २४ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे पश्चिमखण्डे सीताजन्मोपाख्यानेऽष्टमोऽध्यायः ॥ ८ ॥

नवमोऽध्यायः

कमलेश्युवाच

पुरा प्रमोदविपिने गोपराजसुता त्वियम् ।
तत्र रामेण कामेन रतिवन्मोदतेतराम् ॥ १ ॥

रमणीयः सदा रामो रमणीनां रमापतिः ।
भजते कोटिरूपेण या साक्षात्सहजेश्वरी ॥ २ ॥

इयं हि सहजा नाम रामस्यात्मा चिदाकृतेः ।
सामरस्यानन्दसिन्धुलहरीगणनिर्वृता ॥ ३ ॥

सम्पूर्णपुरुषो देवः पुरुषोत्तम ईश्वरः ।
प्रमोदविपिने कुञ्जे शृङ्गारसुरपादपः ॥ ४ ॥

तेनाहं संगता तद्वच्छ्रूयतां राजपुङ्गव ।
अहं शातातपमुनेः संगवो नाम बालकः ॥ ५ ॥

अश्रौषं रामचारित्रं गीयमानं पुरातनैः ।
कपिलो देवलो व्यासो वसिष्ठः पुलहः क्रतुः ॥ ६ ॥

अत्रिश्चाङ्गिरसः कण्वश्च्यवनो नारदो भृगुः ।
अष्टावक्रः पुलस्त्यश्च कुम्भजः शंकरो रविः ॥ ७ ॥

---

१. महानया इति पाठभेदः ।

स्वयंभूर्वै तथा ब्रह्मा तथैवान्ये प्रजेश्वराः ।
पृथक् पृथक् संहिताभिरेकं राममधीयते ॥ ८ ॥

तेषां ताः संहिताः श्रुत्वा रामे मतिरजायत ।
ऋक्सामयजुषामन्तेष्वेको रामः प्रतिष्ठितः ॥ ९ ॥

पदैर्वाक्यैर्महावाक्यैर्ग्रन्थेन च समंततः ।
श्रीरामः केवलं ब्रह्म समासव्यासतः स्मृतः ॥ १० ॥

इत्येवं जायमाना सा श्रीरामविषया मतिः ।
परं प्रेमाणमासाद्य व्यजृम्भत हृदन्तरे ॥ ११ ॥

ततो वियोगात् परमस्य पुंसः पत्युर्वियोगादिव सुन्दरीणाम् ।
दशा ममाजायत भावपूर्णा प्रमोदकुञ्जैकविहारशीला ॥ १२ ॥

ततस्तपःसमाधिभ्यां कर्मभिर्ज्ञानसम्पदा ।
रहितो विच्युतः स्वस्य वर्णाश्रमविधेरपि ॥ १३ ॥

अभ्रमं पृथिवीं सर्वां जडोन्मत्तपिशाचवत् ।
व्यचरं नाचरं किंचित् सदसद्वा स्खलन्मतिः ॥ १४ ॥

श्रीमत्प्रमोदकुञ्जस्थः श्रीरामप्रेमविह्वलः ।
आयुःशेषं वीक्षमाणो रामनामपरायणः ॥ १५ ॥

रत्नशैलैकदेशे तु मुक्तवान् पाञ्चभौतिकम् ।
ततो मन्दरशैलस्य कन्यात्वं समुपेयिवान् ॥ १६ ॥

तत्र दृष्टवती रामं क्रीडन्तं शिखरोत्तमे ।
कदाचित् स्वपितुर्मूर्द्ध्नि क्रीडन्तोदिव्यविग्रहा ॥ १७ ॥

उद्दामकौस्तुभविराजितकण्ठदेशं भाले स्फुरन्मृगमदा मकरीमनोज्ञम् ।
सीतासहायमनुजेन निषेवितांसं पीताम्बरं मधुरमेचकमेघवर्णम् ॥ १८ ॥

उत्फुल्लपङ्कजदलायतलोचनान्तर्निर्यत्कटाक्षशरपातविदीर्णधैर्यम् ।
माद्यत्पुलिन्दशवराचरभिल्लभार्यामध्यस्थितकृतमदामृगयाविनोदम् ॥ १९ ॥

तं वीक्ष्यचकमे पश्चात् कामतत्त्वेन कामिनम् ।
स मां कामश्लथां दृष्ट्वा अन्तरज्ञो महाशयः ।
उवाच वचनं देवः स्मयमानः शनैः शनैः ॥ २० ॥

श्रीराम उवाच

अहं जानामि ते भावं भावज्ञोऽखिलचेतसाम् ।
न पुनः सुलभोऽयं ते मनसा कामितो वरः ॥ २१ ॥

पुरा यत्ते कृतं मह्यं कीर्तनश्रवणादिकम् ।
तत्प्रभावादिदं प्राप्तं मद्दर्शनमनुत्तमम् ॥ २२ ॥

ब्रह्मादयोऽपि यत्प्राप्त्यै तेपिरे दुःसहं तपः।
इयं हि सहजानन्दा मम वामाङ्गसङ्गिनी ॥ २३ ॥

सीता रावणवाणाद्या मुमुहुर्यद्विलोकनात्।
नेतां विना रमे क्वापि कामतत्त्वेन योषिति ॥ २४ ॥

इयं परब्रह्मणो मे परब्रह्मस्वरूपिणी।
एकमेव द्विधा रूपं क्रीडया विद्धि मां परम् ॥ २५ ॥

इत्युक्त्वान्तर्दधे रामः प्रियया सह तत्क्षणात्।
अन्तर्हिते परे पुंसि बभूव महती व्यथा ॥ २६ ॥

रिक्तयामास च मयि तूणीरं पञ्चसायकः।
कामबाणोद्भवां पीडां बिभ्राणा मूर्छितापतम् ॥ २७ ॥

ततो मां पर्वतपतिर्विचिन्वन् मन्दरो गतः।
यत्राहं संस्थिता घोरे कानने शिखरोत्तमे ॥ २८ ॥

तत्र मां पतितां भूमौ निःश्वसन्तीं सुमूर्छिताम्।
उत्थाप्य दोर्भ्यां दीर्घाभ्यां परिरेभे दयातुरः ॥ २९ ॥

मूर्ध्नाऽऽघ्राप सुधाविन्दून् पातयामास मत्तनौ।
संजातचेतना भूयः पितरं वीक्ष्य लज्जिता ॥ ३० ॥

ततो गद्गदकण्ठेन पिता प्रोवाच मन्दरः।
किमर्थं मूर्छिता तन्वि धर्षिता वासि केनचित् ॥ ३१ ॥

दष्टा वा भुजगेनासि भोषिता वासि केनचित्।
सम्मोहिता वा विजने रहिता स्वसखीजनैः ॥ ३२ ॥

त्रासिता हसिता वापि तथा किंवापमानिता।
इमामवस्थां सम्प्राप्ता किमर्थमसि पुत्रिके ॥ ३३ ॥

न हि ते दुर्लभं किंचिन्मम पुत्र्या जगत्त्रये।
ये देवास्त्रिदशश्रेष्ठास्ते मच्छिखरवासिनः ॥ ३४ ॥

पुरा समुद्रमथने वृत्तोऽहं दण्डतां गतः।
मन्थदण्ड इति ख्यातस्त्रिषु लोकेष्वहं ततः ॥ ३५ ॥

मम मूलोपमूलानि सुधाक्तानि समंततः।
दत्तश्च मे सुरैर्भागः पूर्णकुण्डं सुधामयम् ॥ ३६ ॥

अहं पादैः क्षितितलं शिखरैश्च नभस्तलम्।
व्याप्य तिष्ठामि सततं कर्मपृष्ठैकसंश्रयः ॥ ३७ ॥

यत्ते मनोऽभिलषितमहं पूरयितास्मि तत्।
तदाहं पितरं साक्षादेवमुक्तवती वचः ॥ ३८ ॥

मम श्रीरामचन्द्रेण लोकानन्देन कामिना ।
आदिनारायणेनैव दर्शनं दत्तमुत्तमम् ॥ ३९ ॥

वामाङ्गसङ्गिनीं तस्य श्रियं दृष्ट्वा मनोहराम् ।
स्त्रीस्वभावेन चकमे कामतत्त्वेन कामिनम् ॥ ४० ॥

प्राग्जन्मतपसा दृष्टः प्रभुरन्तर्हितोऽधुना ।
तददर्शनमोहोत्थमहादुःखेन मूर्छिताम् ॥ ४१ ॥

जानीहि मां शैलराज किं तत्र त्वं करिष्यसि ।
नहि रामस्तपोध्यानकर्मज्ञानसमाधिभिः ॥ ४२ ॥

सुलभो विद्यते तात तेनाहं वञ्चितास्मि भोः ।
वञ्चितास्मि च तेनाहं रूपेणा प्रतिमेन च ॥ ४३ ॥

मन्दर उवाच

या श्रीर्वामाङ्गसंस्थास्यतामाराधय सुव्रते ।
ततस्तस्याः प्रसादेन लप्स्यसे रामसंनिधिम् ॥ ४४ ॥

रामो हि परमं ब्रह्म कालमायाक्षरातिगम् ।
सम्पूर्णमक्षरातीतं पुरुषोत्तमशब्दितम् ॥ ४५ ॥

इत्युक्त्वा सान्त्वयित्वा च मां निनाय गृहं गिरिः ।
ततः कालेन चाल्पेन नारदोऽभ्याययौ ततः ॥ ४६ ॥

यत्राहं संस्थिता कन्या पितुः पार्श्वे दृढव्रता ।
पूजितो नारदः पित्रा ततः प्रोवाच मत्कृते ॥ ४७ ॥

शृणु शैलेन्द्र पुत्री ते महाभागा यशस्विनी ।
साक्षाच्छ्रीरामजायायाः सखीभावमुपैष्यसि ॥ ४८ ॥

तदर्थं तद्व्रतं कर्तुमुचितेयं शुचिस्मिता ।
इत्येवमुक्त्वा प्रोवाच व्रतराजं मनोहरम् ॥ ४९ ॥

साक्षाच्छ्रीसहजानन्दाश्रीरामप्रियकारकम् ।
भाद्रशुक्लाष्टमीं प्राप्य यावदाश्विनकृष्णगाम् ॥ ५० ॥

अष्टमीं विधिवत्कुर्याद्व्रतं संकल्पपूर्वकम् ।
श्रीसीतारामतुष्ट्यर्थं भुक्तिमुक्तिप्रदायकम् ॥ ५१ ॥

ताम्रपट्टे लिखित्वा तु मूर्तिं सीताभिरामयोः ।
पाद्यार्घाचमनीयाद्यैः पूजयेद्विधिपूर्वकम् ॥ ५२ ॥

जानक्यै रामचन्द्राय सहजायैप्रियाय च ।
सीतायै रघुनाथायनित्यमेव नमो मम ॥ ५३ ।

जानक्यै विद्महे दिव्यै सहजायै च धीमहि ।
तन्नः सीते प्रचोदयात् संध्यामन्त्रोऽयमीरितः ॥ ५४ ॥

रामचन्द्रायधीमहि पुनःप्रियाय धीमहि ।
त्रिसंध्यं प्रजपेत्तनो रघुनाथः प्रचोदयात् ॥ ५५ ॥

एताभ्यां राजते पात्रे निधाय घुसृणादिकम् ।
कर्पूरचन्दनं तोयमर्घं दद्यात्प्रयत्नतः ॥ ५६ ॥

ततः पद्मपलाशान्तः कल्पयेन्मिष्टपिण्डिकाः ।
ताः सप्तैव द्विजे दत्त्वा स्वयमश्नीत सप्त च ॥ ५७ ॥

सीतासूक्तिं जपित्वा च दद्यात्पुष्पाञ्जलित्रयम् ।
तिलपायसपद्माक्षधृतैश्च जुहुयाच्छतम् ॥ ५८ ॥

दिने दिने गृणेद्गाथाः सीतारामप्रियस्तवाः ।
एवं पञ्चदशाहेन व्रतेन परितुष्यति ॥ ५९ ॥

श्रीसीतारामयुगलं दुर्लभं घटयेत्तराम् ।
इत्याभाष्य पितुः पार्श्वं बभूवान्तर्हितो मुनिः ॥ ६० ॥

तच्छ्रुत्वानुष्ठितवती व्रतराजमहं पुनः ।
समाप्ते व्रतराजे तु साक्षान्मे दर्शनं ददौ ॥ ६१ ॥

सीतारामाख्ययुगलं रतिकाम युगं यथा ।
दत्त्वा मां दिव्यदेहं तु स्वलीलारसमण्डले ॥ ६२ ॥

स मां प्रवेशयामास भौतिकं चाद्रवद्वपुः ।
द्रवीभूय नदी भूत्वा नित्यं प्रवहतेतराम् ॥ ६३ ॥

मदात्मा तु स्वयं तस्याः सखीत्वं समुपेयिवान् ।
प्रमोदवनकुञ्जेषु रमे सहजया सह ॥ ६४ ॥

यत्रेयं गोपराजस्य तनया सहजाभिधा ।
तत्राहं कमला नाम सहजायाः प्रिया सखी ॥ ६५ ॥

इदानीमवतीर्णेयं प्रभुं ज्ञात्वावतारिणम् ।
तत्सार्द्धंमहमप्याशु प्रादुर्भूतास्मि कुम्भतः ।
यथेयं ते प्रिया कन्या तथाहमपि गृह्यताम् ॥ ६६ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे पश्चिमखण्डे भरतलक्ष्मणीये सीताजन्मोपाख्याने कमलेश्वरीप्रादुर्भावो नाम नवमोऽध्यायः ॥ ९ ॥

दशमोऽध्यायः

गण्डक्युवाच

अहं ब्रह्मतनोर्जाता गण्डकी नाम या नदी।
ममास्याः संगमो नित्यं प्रभुपादनिषेवणे ॥ १ ॥

पुरा श्रीपुष्पदन्तस्य गन्धर्वेन्द्रस्य कन्यका।
ईशं परिचरन्त्यास्मिंस्तत्रैवाहं चिरं स्थिता ॥ २ ॥

रामतारकमन्त्रस्य पठ्यमानस्य शम्भुना।
श्रुत्वा पारायणं राजन् बभूवाहं समुत्सुका ॥ ३ ॥

सर्वथा वर्तमानापि बाल्ये वयसि मुग्धवत्।
स्वबुद्ध्याहं धृतवती रामेऽनन्यात्मिकां मतिम् ॥ ४ ॥

तया मत्या दृढप्रज्ञा ज्ञातसारा शिवाननात्।
राममेकं प्रभुं बुद्ध्वा सेवां तस्य व्यधासिषम् ॥ ५ ॥

प्रतिसंचरसम्प्राप्तौ तत्संस्कारैकसंस्कृता।
अत्रेर्ब्रह्मसुताज्जज्ञे तुंडिला नाम कन्यका ॥ ६ ॥

जन्मप्रभृति रामस्य प्रियलीलाविनोदवित्।
तदर्थं तपसा ज्ञानात् कर्मणा च समाधिना ॥ ७ ॥

नित्यं हिमवतः पृष्ठे चरन्ती व्रतमुत्तमम्।
अन्वभूवं घनश्यामं कदाचित्कोमलं परम् ॥ ८ ॥

श्रीरामं कौस्तुभमणिभासितोरस्कमीश्वरम्।
व्यचलत् कामभावेन मनो मे तदनन्तरम् ॥ ९ ॥

ततः सोऽन्तर्हितो भूत्वा सकृद्दर्शननिष्ठुरः।
आकाशवाण्या मां प्राह न मामेवमवाप्स्यसि ॥ १० ॥

विषयासक्तचित्तानां मायया विकृतात्मनाम्।
न वै गम्योऽहमेवापि सदसत्परमः प्रभुः ॥ ११ ॥

किंतु मे परमा काचित्प्रेयसी सहजाभिधा।
आराधनीया सततमेवं सिद्धिर्भविष्यति ॥ १२ ॥

तच्छ्रुत्वा दिव्यवागर्थं तथैवाकरवं पुनः।
ततश्चिरेण सा देवी प्रसन्ना सहजेश्वरी ॥ १३ ॥

वरेण छन्दयामास मन्मनोरथसिद्धिदा।
सारस्वते नाम्नि कल्पे रमिष्यामि प्रमुद्वने ॥ १४ ॥

प्रकटा रामचन्द्रेण रमणाय रमावता ।
तत्राहं नन्दनाख्यस्य गोपस्य तनया सती ॥ १५ ॥

रमयिष्ये रामचन्द्रं तत्र त्वं मत्सखी भव ।
ततोऽहं भौतिकं देहं द्रवीकृत्य जडात्मकम् ॥ १६ ॥

संत्यज्य स्वात्मना प्राप्ता प्रमोदविपिने जनिः ।
लीलावती नाम सखी सहजासन्निधौ स्थिता ॥ १७ ॥

इदानीं पुनरुत्पन्ना विभाव्य जनकालये ।
जातास्मि रत्नकलशीमध्यभागात्तया सह ॥ १८ ॥

यथा च पालनीये ते तथाहमपि पाल्यताम् ।
साहं पर्वतशृङ्गाग्रा नदीरूपेण प्रस्थिता ॥ १९ ॥

विष्णुशैलं विनिर्भिद्य प्रवाहजलगामिनी ।
शालग्रामं परिप्राप्य सुप्रतिष्ठितमा भुवि ॥ २० ॥

यद्यप्यन्येष्वपि स्थानेष्वपलब्धिः श्रिता हरेः ।
शालग्रामे चक्रतीर्थे ग्राह्य एव न संशयः ॥ २१ ॥

इत्येवं विधिना मन्तो गृह्यते श्रीशिलातनुः ।
रघुनाथराघवेन्द्रसीतारामादिभेदतः ॥ २२ ॥

जनकस्यालये नित्यं वसामि च सुपावने ।
ततस्त्वं जनको राजन् कृपया परिपालय ॥ २३ ॥

विष्णोर्विराट्स्वरूपस्य गण्डदेशे स्थिता त्वहम् ।
ततश्च गण्डकीनाम्ना विख्यातास्मि जगत्त्रये ॥ २४ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे पश्चिमखण्डे भरतलक्ष्मणीये सीताजन्मोपाख्याने गण्डकीऽसम्भवो नाम दशमोऽध्यायः ॥ १० ॥

एकादशोऽध्यायः

अघवारोवाच

पुराहं सोमपीथस्य भार्गवस्य मुनेः सुता ।
तपश्चरन्ती विपुलं विषयैर्निःस्पृहान्तरा ॥ १ ॥

पर्वते विपुलेऽरण्ये सुनासीरध्वजे वने ।
पित्रा कदाचिदुक्ताहं भवेः परिणयोन्मुखी ॥ २ ॥

विगणय्य पितुर्वाक्यं स्थिताहं तेन मे पिता।
शशाप जलरूपैधि सततं त्वमचेतना ॥ ३ ॥

भूत्वा ततोऽम्मयी नित्यं प्रवहामि तदाश्रमे।
अथ दीर्घेण कालेन साध्यमानः स्वभार्यया ॥ ४ ॥

अनुकलितः स मे मात्रा तुतोष तां प्रति क्वचित्।
तुष्टं विज्ञाय योगीन्द्रं तमृषिं शंशितव्रतम् ॥ ५ ॥

मदर्थं शापमुक्त्यर्थं ययाचे भार्गवं द्विजम्।
तामाह भार्गवः साक्षाज्जनकस्य गृहे प्रथाः ॥ ६ ॥

आद्या सीता स्वयं प्रीता तदा त्वं मोक्ष्यसेऽमुतः।
पूर्वंकल्पे त्वियं जाता प्रमोदविपिने क्वचित् ॥ ७ ॥

क्रीडन्ती तत्र कान्तेन गवेन्द्रस्य च सूनुना।
ततस्तव गृहे जातां विभाव्यैनां महीपते ॥ ८ ॥

जातास्मि साकमनया तव कन्यास्मि साम्प्रतम्।
अघवारेति मन्नाम तद्धेतुः श्रूयतां प्रभो ॥ ९ ॥

भार्गवस्य पितुः साक्षादाश्रमे प्रवहज्जला।
नित्यं तिष्ठामि राजर्षे कदाचित्समजायत ॥ १० ॥

ब्राह्मणस्य पितुर्गेहे सोमो नाम ममाध्वरः।
तस्मिन् मखे द्विजश्रेष्ठा नावादेशनिवासिनः ॥ ११ ॥

आर्षेणः समुपागच्छन् भार्गवाश्चैव भूरिशः।
यज्ञे तत्र समेतेषु बहुष्वेव द्विजातिषु ॥ १२ ॥

स्वान् गणान् समुपादाय ब्राह्मणास्तस्थिरेऽध्वरे।
पश्चालम्भनकार्येषु गौतमा ब्राह्मणाः स्थिताः ॥ १३ ॥

तानाविश्य हविर्जक्षे दुकुक्षिर्नाम राक्षसः।
जग्धेषु यज्ञपशुषु भार्गवो द्विजसत्तमः ॥ १४ ॥

शशाप रक्षसा साकं विप्रान् गौतमगोत्रजान्।
यावन्ति पशुदेहेषु रोमाणि प्रतिभान्ति वै ॥ १५ ॥

ब्राह्मणाः काकतां यात तावत्सहस्रकं समाः।
ततस्ते रक्षसा साकं ब्राह्मणा वेदपारगाः ॥ १६ ॥

काकयोनिमवाप्यैव तस्थुर्मुनिवराश्रमे।
अथो चिरेण कालेन मम कूले बिलेशयः ॥ १७ ॥

केनचिद्दीर्घशृङ्गेण महोक्षेणातिगजता।
निहतः स तु दुष्टात्मा क्षणात्तेषां प्रपश्यताम् ॥ १८ ॥

शिवो भूत्वा समारूढो वृषभं नन्दिरूपिणम् ।
वृतो गणसमूहेन कैलासं समगात्ततः ।। १९ ।।

तदृष्ट्वा गौतमा विप्राः काकयोनिमवापिताः ।
ममज्जुर्मज्जले दिव्ये तत्क्षणादघहारिणि ।। २० ।।

कोटिवर्षोपभोग्यं तं शापं मुक्त्वा तु गौतमाः ।
पुनः स्वरूपतां प्रापुस्तद् दृष्ट्वा भार्गवो मुनिः ।। २१ ।।

सम्भ्रमाविष्टचित्तस्तु नाम चक्रे तदा मम ।
अघं वारयते सद्यो दर्शनस्पर्शनादिभिः ।। २२ ।।

अघवारेति नामासौ भविष्यति जगत्त्रये ।
तेनाहमघवारेति प्रसिद्धास्मि सरिद्वरा ।। २३ ।।

मृगयां विहरन् रामः कदाचिदनया सह ।
क्षुत्क्षामादिपरिक्लान्तो मम तीरमुपागतः ।। २४ ।।

अहं हि दिव्येन वेशेन वेशयित्वा निज वपुः ।
चिरं परिचचारास्मै रामाय च महात्मने ।। २५ ।।

बिसैर्जलरुहैः कन्दैर्मधुरेणाम्बुना तथा ।
वन्यैः फलैः सुपक्वान्नैः स्वेच्छाशक्तिसमुद्भवैः ।। २६ ।।

चिरमाराधितो रामस्तुतोष रमया सह ।
सम्यग्भक्तासि मे स्तुत्या चिरमाराधितस्त्वया ।। २७ ।।

क्षुच्छ्रामौ च विनीतौ मे भृशं तुष्टोऽस्मि कूलिनि ।
आगामिनि महाकल्पे सारस्वतसमाह्वये ।। २८ ।।

सर्वोद्धारार्थमनघे भवितास्मि रघोः कुले ।
इयं च भवितासीता मिमिवंशे त्वयोनिजा ।। २९ ।।

भूत्वा तत्रानया साकं मम सांनिध्यमेष्यसि ।
इत्युक्त्वा प्रययौ रामो रामया सहितो वनम् ।। ३० ।।

साहं कालं प्रतीक्षन्ती जातास्मि जनकाधुना ।
अनया सह गन्तास्मि पुरुषोत्तमसंनिधिम् ।। ३१ ।।

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे पश्चिमखण्डे भरतलक्ष्मणीये सीताजन्मोपाख्याने अघवारासम्भवोनामैकादशोध्यायः ।। ११ ।।

द्वादशोऽध्यायः

द्युम्नोवाच

सुकलो नाम गोपालः प्रमोदविपिने महत्।
कुलं रूपं च बिभ्राणो धनं चाभिजनं तथा ॥ १ ॥

रामं नटन्तं संश्रुत्य प्रमोदविपिनान्तरे।
गणैः स्त्रीणां मृगाक्षीणां प्रत्येकं श्लिष्टबाहुभिः ॥ २ ॥

बभूव गोपवंश्यस्य हृदये परमा स्पृहा।
ईदृशाय मनोज्ञाय नायकाय महात्मने ॥ ३ ॥

सुन्दरी चेद्भवेत्पुत्री ध्यात्वा सोयपतिं भजेत्।
तदा तस्याः प्रसंगेन वयं यास्याम धन्यताम् ॥ ४ ॥

अयं हि पूर्णपुरुषो रामः कमललोचनः।
कामतत्त्वैकलीलाभिः सेवते स्वात्मसम्पदम् ॥ ५ ॥

इति विज्ञाय रामस्य सहजं गोपराट् स्वयम्।
रामलीलामुपासीन आरराध परां श्रियम् ॥ ६ ॥

परा श्री रामसौन्दर्यमोहितापूर्वमेव सा।
उद्यमाद्गोपराजस्य तपोव्रतसमाधिभिः ॥ ७ ॥

तोषिता त्वरिता प्राह भूत्वा साक्षात्त्वमिन्दिरा।
अहमेव भविष्यामि गोपराज गृहे तव ॥ ८ ॥

वशीकृत्य तथा रामं दास्यामि करयोस्तव।
ततः सर्वसुखोपेते समये स्त्रीग्रहोदये ॥ ९ ॥

अजायत सुता तस्य गोपवर्यस्य वेश्मनि।
वामाङ्गी विद्युदाकारा प्रभापुञ्जनिभाकृतिः ॥ १० ॥

उत्फुल्लपद्मवदना तथेन्दीवरलोचना।
तस्यां संजातमात्रायां रक्तबिम्बाधरत्विषा ॥ ११ ॥

प्राची रागो दिशां जातः प्रमोदश्च व्यवर्द्धत।
द्युम्नेति नाम चक्रेऽस्याः स्वयं तत्रप्रजापतिः ॥ १२ ॥

दिने दिने वर्धमाना व्यपुषाकान्तिधोरणी।
सहजेनैवदेहेन व्यधोतन्त दिशोऽखिलाः ॥ १३ ॥

दुन्दुभीनां निनादश्च देवलोके व्यजायत।
कदाचित्सप्तमं वर्षमतीत्याष्टममागता ॥ १४ ॥

ईषद्विभक्तावयवा दृष्टा रामेण संसदि ।
मूर्छितोन्यपतद् रामो मुग्धवद्धरणीतले ॥ १५ ॥

सुखितस्य गवेन्द्रस्य कुमारं रूपसुन्दरम् ।
धावित्वा गोकुलात्सद्यः पर्यरक्षन्मुनीश्वराः ॥ १६ ॥

सुखितश्चैव माङ्गल्या गोपीनां च तथा गणाः ।
धनं निर्मञ्छयांचक्रुः स्वात्मानमपि दुर्लभम् ॥ १७ ॥

केनचिद्भौतिकी छायाभूतावेशेति केनचित् ।
दृष्टिप्रचारेति परैः कूटमुष्टीति केनचित् ॥ १८ ॥

बहुधा तर्कयामासुः प्रभौ मायामयी गतिम् ।
यस्यादिदं समुद्भूतं तत्र केचन जज्ञिरे ॥ १९ ॥

ततः पूर्वानुरागाख्यं प्रेम संववृधेतराम् ।
बाल्यशेषं समुल्लङ्घ्य वर्तमानौ दिने दिने ॥ २० ॥

कैशोर्ये लोकसुखदे सर्वानन्दौ बभूवतुः ।
अहो द्युम्नाख्यया गोपकन्यया हृदयं हृतम् ॥ २१ ॥

रामस्य स्वाभिरामस्येत्येवं स मुमुदेतराम् ।
सुकलोनामगोपालोमन्यमानो जनुः फलम् ॥ २२ ॥

इति श्रुत्वा तु सहजा न सेहे व्यभिचारिताम् ।
रामस्य विश्वारामस्य द्युम्नां दग्धुं मनो दधे ॥ २३ ॥

ततः कदाचिन्निविदे निकुञ्जे द्युम्नावतीं रामसहप्रसक्ताम् ।
श्रुत्वा सपत्नीं स्वसखीमुखेभ्यो जवेन तं देशमुपाजगाम ॥ २४ ॥

अये त्वमस्यत्प्रियमीड्यरूपं भूपं यथा श्रीःपरराजधानी ।
का त्वं वशीकृत्य रहोऽभिभुक्षे व्यक्तं तवेदं प्रबभूव चौर्यम् ॥ २५ ॥

इत्युदीर्य रुषारक्ता संरब्धा सहजेश्वरी ।
स्थावरीं योनिमायद्यस्वेत्येवं सहसाशयत् ॥ २६ ॥

अहं च तस्याः सौन्दर्यं सहजानन्दिनी श्रियः ।
संवीक्ष्य द्रवतांयाता नदीरूपा ततोऽभवम् ॥ २७ ॥

कदाचिन्मज्जले शीते चन्द्रचन्दनसौरभे ।
ग्रीष्मे समाप्लुतो रामः प्रससाद चिरं स्थितम् ॥ २८ ॥

रामं प्रसन्नमालक्ष्य समुत्थाय नदीजलात् ।
अहं पुरःस्फुरद्रूपा प्रार्थयामास तं प्रभुम् ॥ २९ ॥

राम राम गुणाराम स्वाराम सुखसम्पदाम् ।
विरामय स्थावरत्वं मदीयमिदमीश्वर ॥ ३० ॥

श्रीराम उवाच

व्यक्तं गता स्थावरता तवेयं स्त्रीरूपमासाद्य पुरो विभासि ।
महार्हमाणिक्यमयीं विशालां मालां समंतादुरसा वहन्ती ॥ ३१ ॥
तदाहं रामसौन्दर्यसंदोहप्रवशीकृता ।
प्रत्युवाच प्रभुं स्मित्वा लोकोत्तरगुणाकृतिम् ॥ ३२ ॥
त्वमेव पूर्ववद् राम कान्तो भव ममानिशम् ।
प्रमोदवनवीथीषु रस्यावो दिव्यरंतिभिः ॥ ३३ ॥

श्रीराम उवाच

इदं तु सहजानन्दा प्राणेशी वेत्ति सर्वशः ।
विना तस्या अनुमतिं प्रतिजानामि नैव च ॥ ३४ ॥
यावत्सारस्वतं कल्पं सहजाऽऽराध्यतां त्वया ।
प्राप्ते सारस्वते कल्पे कृतकृत्या भविष्यसि ॥ ३५ ॥
साहमेतावदाराध्य प्रमोदवनकेलिनीम् ।
सहजां साधितवती रामकान्तवराप्तये ॥ ३६ ॥
इदानीं श्रीव्रजेशानीसहजाकरुणादृशा ।
रामं कान्त समासाद्य गमिष्यामि कृतार्थताम् ॥ ३७ ॥
दानेन ज्ञानकर्मभ्यां ध्यानेन तपसा तथा ।
समाधिनार्पणेनापि रामे भक्तिः प्रसाध्यते ॥ ३८ ॥
सिद्धायां फलभक्तौ तु स्वयं रामोऽपि साधितः ।
तेनाहं सहजामन्दासार्धं जनक ते गृहे ।
अवतीर्णास्मि कन्येति पालनीयास्मि साम्प्रतम् ॥ ३९ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे पश्चिमखण्डे भरतलक्ष्मणीये सीताजन्मोपाख्याने द्युम्नासम्भवो नाम द्वादशोऽध्यायः ॥ १२ ॥

त्रयोदशोऽध्यायः

घोषवत्युवाच

अस्ति सांतपनः शैलो रत्नसानुसमाकृतिः ।
नानाद्रुमवनाकीर्णो लतामण्डपमण्डितः ॥ १ ॥
रामनामाङ्कितशिलो महाप्रस्तरदुस्तरः ।
अनेकरत्नधात्वादिविचित्रितदरीगृहः ॥ २ ॥

पारिजातद्रुमलतामण्डपैर्गहनाकृतिः ।
गायद्गन्धर्ववनितावि लासरहःसंस्थलः ॥ ३ ॥

स्रवन्निर्झरसंदोहसंसिक्तदृषदुत्थयः ।
पदे पदे स्खलन्मुक्तामणिसिंहपदाङ्कितः ॥ ४ ॥

मदेभमारणोद्युक्तमृगाधिपनिकेतनः ।
देवदारुद्रुमवनी कूजत्कोकिलकाहलः ॥ ५ ॥

कोलाहलितवर्हीकयाचिताम्भोदघर्घरः ।
कश्यपस्य मुनीन्द्रस्य तनूजः पर्वताकृतिः ॥ ६ ॥

सुमेरोस्तनयां हैमीमुपयेमे नगेश्वरः ।
विजहार तया सार्द्धं सुमेरुगिरिकन्यया ॥ ७ ॥

धनुर्बाणादिभगवच्चिह्नमण्डितगात्रया ।
स्वयं च भगवच्चिह्नमण्डिताखिलविग्रहः ॥ ८ ॥

महाभागवतः शैलो विजहे बहुमङ्गलैः ।
तस्य चैवं विहरतो भोगैः संसरणात्मकैः ॥ ९ ॥

तस्यामेव धर्मपत्न्यां गर्भं शुद्धोऽभ्यजायत ।
तस्मिन्नेव तु कालेऽहं क्रीडन्ती सहजालिभिः ॥ १० ॥

रसालकुञ्जविपिने मदमत्ता व्यचीचरम् ।
तदैव त्रिदशानीकैः पौलस्त्यभयविप्लुतैः ॥ ११ ॥

उपासांचक्रे भगवान् विष्णुः क्षीरपयोनिधौ ।
स्तुतिभिः पुष्कलाख्याभिः संहिताक्रमसूक्तिभिः ॥ १२ ॥

स्तुतोऽनिरुद्धो भगवान् प्रादुरास स्वयं हरिः ।
शङ्खचक्रगदाशार्ङ्गविभूषितकराम्बुजः ॥ १३ ॥

नीलनीरदनीलाभो मकरीचन्दनोक्षितः ।
पीताम्बरपरीधानः प्रद्युम्न इव कान्तिभिः ॥ १४ ॥

कमलाभूषितोरस्कोऽरुणपङ्कजलोचनः ।
गम्भीरनाभिसंस्थानस्त्रिवलीललितोदरः ॥ १५ ॥

श्रीरत्नमेखलाकूजत्किंकिणीगणसंकुलः ।
शृङ्गारपादपनिभः कुसुमाकृतिसुस्मितः ॥ १६ ॥

वैजयन्तीयुतोरस्को वृहत्कौस्तुभमण्डितः ।
सोद्रेकं स्निग्धया वाचा प्रोवाच संस्मिताननः ।
ब्रह्मादींश्चैव मृगादीन् देवांश्चैव मुनींस्तथा ॥ १७ ॥

श्रीभगवानुवाच

ज्ञातं वोऽग्रे हितं देवाः पौलस्त्यौः पीडितात्मनाम् ।
विरंचिना च रुद्रेण पौलस्त्यास्तपसोर्जिताः ॥ १८ ॥

प्रतिलब्धवराः सर्वे ननिर्जेया रामं विना ।
सोऽहं वः प्रविधास्यामि हितं देवत्वमीयुषाम् ॥ १९ ॥

प्रमोदविपिनं गत्वा साकेतस्य समंततः ।
रामधाम परं गुह्यं नित्यं तज्जनमण्डितम् ॥ २० ॥

तत्राहं विक्रमं कृत्वा करिष्ये वो हितं महत् ।
देवद्रुहां धर्मरुजां त्रयीप्रोज्झितवर्त्मनाम् ॥ २१ ॥

सतां च स्थापनं कार्यं करिष्यामि न संशयः ।
रामस्य सम्मुखे स्थित्वा करिष्ये विनयं बहु ॥ २२ ॥

इत्युक्त्वा भगवान् विष्णुर्ब्रह्ममृग्वादिकान् गणान् ।
विसृज्य त्रिदशान् सर्वान् प्रमोदविपिनं गतः ॥ २३ ॥

विधिमेकं पुरस्कृत्य परं धाम व्रजालयम् ।
दधिमन्थन दण्डोत्थनिर्घातमधुरध्वनिम् ॥ २४ ॥

अदृष्टपारं वेदेष्वप्यखिलागमवेदिभिः ।
श्रीरामचन्द्रपूर्णेन्दुचन्द्रिकोदयनिर्भरम् ॥ २५ ॥

संयोगविप्रयोगाख्यसुधाविषमहामृतम् ।
खेलच्छजजनानेकरत्नपुञ्जसुमञ्जुलम् ॥ २६ ॥

उद्यद्भावोर्मिलहरीप्रेमवीचीविराजितम् ।
समुद्रमिव दुर्धर्षं रामस्यालयमुत्तमम् ॥ २७ ॥

गवेन्द्रसुखितानन्दं नित्यं माङ्गल्यकासुखम् ।
श्रीरामप्रेमव्याघूर्णद्गोपगोपीजनाञ्चितम् ॥ २८ ॥

श्रीरामप्रियसख्युक्तकलवाक्यदिमाञ्चितम् ।
दूतदूतीसखिसखीनायकाख्यरसाकरम् ॥ २९ ॥

क्वचित्सरोवगाहाख्यदिव्यकेलीकलालयम् ।
क्वचिद्वसन्तसमयश्रीविलासविभूषितम् ॥ ३० ॥

क्वचिल्लसत्प्रावृषेण्यं रसमत्तशिखावलम् ।
क्वचिद्रामगुणोद्गानमन्त्रगोपवधूगणम् ॥ ३१ ॥

यत्र कामः कदाचित् स्वं क्रीणीतुमातुमतुलं वपुः ।
आगतः स पुनर्नैव दासेनापि व्यगण्यत ॥ ३२ ॥

यत्र सूर्यश्च चन्द्रश्च वेशयित्वा निजं वपुः ।
दिव्येन मणिवेशेन न मूल्यमलभन्तमाम् ॥ ३३ ॥

माङ्गल्यकारमादासीपादाब्जनखनिर्जितः ।
प्रपञ्चरचनातीतं यत्र शिल्पं विधेर्न च ॥ ३४ ॥

चिदानन्दमयं धाम तदृष्ट्वा चकितावुभौ ।
रसालकुञ्जविपिने क्रीडन्तीं मां विलोक्य तौ ॥ ३५ ॥

क्व रामः पुण्डरीकाक्षः सहजानन्दिनीसखः ।
इत्यूचतुः सविनयं नत्वा च व्रजभक्तितः ॥ ३६ ॥

अहं श्रीरामसत्प्रेमरसोन्मत्ता व्रजाङ्गना ।
न किंचिदुत्तरितवत्येतौ विनयतत्परौ ॥ ३७ ॥

तदा तु रजसा ब्रह्मा प्राविर्भूतरुषान्वितः ।
स्थावरत्वं प्रपद्यस्वेत्येवं शापमदात्प्रभुः ॥ ३८ ॥

शापोद्यतं विधिं दृष्ट्वा विष्णुः क्षोभं तदाकरोत् ।
ब्रह्मन्नत्यन्तमज्ञोऽसि न जानासि व्रजस्थितिम् ॥ ३९ ॥

कोटयो ब्रह्मणां यत्र लुटन्ति रजसाप्लुताः ।
कोटयश्चापि विष्णूनां यत्र मुह्यन्ति विभ्रमैः ॥ ४० ॥

कोटयश्चैव रुद्राणां यत्र नृत्यन्ति मत्तवत् ।
का कथेतरदेवानां पलालप्रायताजुषाम् ॥ ४१ ॥

कस्त्वं वराकः कश्चाहं यतः शब्दो निवर्तते ।
न च यत्र मनोवृत्तिस्तदानन्दपदं हि तत् ॥ ४२ ॥

तदिदं धाम रामस्य चिदानन्दस्य मूर्तिमत् ।
इयं रामप्रेममत्ता गेपिका कापि भाविनी ॥ ४३ ॥

आवां कौ चेति जानाति कौ चावां चिन्मये पदे ।
एतद्ध्यनुचितं ब्रह्मन् यच्छापोऽभूदिमां प्रति ॥ ४४ ॥

अपूज्यत्वं प्रयाहि त्वमस्मान्महदतिक्रमात् ।
इति शप्त्वा स्वयं विष्णुर्ब्रह्माणं लोकपूजितम् ॥ ४५ ॥

अगात्ततस्तेन सार्धं श्रीरामं पुरुषोत्तमम् ।
[1]दृष्ट्वा रामं व्रजपतिं मोहितो ब्रह्मणा सह[1] ॥ ४६ ॥

आज्ञामादाय भगवान् स्वयं विष्णुरुदारधीः ।
[2]सखीभावं समाश्रित्य ज्ञातयं वितवान् स्वयम्[2] ॥ ४७ ॥

तत्राविष्टः स्वयं रामो रसिकः पुरुषोत्तमः ।
सहजानन्दिनी चापि तत्प्रियार्थमवातरत् ॥ ४८ ॥

एव लीलारसानन्दः स्वाधतां प्रतिपद्यते ।
अहं च स्थावरं भावं नदीरूपं मनोहरम् ॥ ४९ ॥

१., २. नास्ति-बड़ौ० ।

समास्थाय सुताजाता तपनाद्रेस्तनूद्भवा ।
साहं शापविमोकस्य कालं प्राप्य तवान्वये ॥ ५० ॥

स्वात्मानं प्रकटीकृत्य जाता सीताभितुष्टये ।
एवं नदीरूपमेत्यततोऽपि सहजासखी ।
पुनर्जातास्मि राजर्षे कन्यावत्परिपाहि माम् ॥ ५१ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे पश्चिमखण्डे भरतलक्ष्मणोये सीताजन्मोपाख्याने घोषवतीसम्भवोनाम त्रयोदशोऽध्यायः ॥१३॥

चतुर्दशोऽध्यायः

वनघोषोवाच

शाण्डिल्यस्य महर्षेस्तु सुताहं गुणवत्तमा ।
श्रियं समराधयतःसंजाता श्रीकलाभिधा ॥ १ ॥

अनुत्तमानवद्याङ्गी कामयाना (रमा) सीतापतिम् ।
तमेकाग्रेण मनसा श्रीरामं पर्यतोषयम् ॥ २ ॥

कर्मणा ज्ञानयोगेन ध्यानेन यजनेन च ।
तपसा भक्तियोगाभ्यां दृढमभ्यासमाचरम् ॥ ३ ॥

एवं दिवानिशं देवः प्रपत्रैः परिशीलितः ।
स्त्रीस्वभावादविज्ञातमाहात्म्य पतिभावतः ॥ ४ ॥

नित्यमाराधयामास नाविर्भूतो रमापतिः ।
ततो मां मुनिशार्दूलः शाण्डिल्यः स पिता मम ॥ ५ ॥

आगत्य तपसा क्लिष्टामिदमाह दयाप्लुतः ।
दुश्चरं च रसित्वं वै तपो वत्सेऽतिदारुणम् ॥ ६ ॥

किमर्थमतिकष्टेन देहं नेक्षितवत्यसि ।
कस्ते हृदिस्थः कामश्च न तं जानामि पुत्रिके ॥ ७ ॥

मत्प्रभावाच्च सकलः कामस्ते भवितानघे ।
सूर्याद्वापि यमाद्वापि शक्राद्वा वरुणादपि ॥ ८ ॥

पावकाद्वा कुबेराद्वा वरं कामयसे किमु ।
किं वा सुरगणेशानाद्विष्णोः कामयसे वरम् ॥ ९ ॥

सोऽपि मत्तपसो वीर्याज्जानोहि करसंस्थितः ।
निवर्तस्वातितपसां क्लेशेभ्यः शर्मवत्यसि ॥ १० ॥

इत्युक्ता च ततः पित्रा प्रोवाचाहं च तं प्रति ।
नाहं देवगणत्तात देवाद्वा पुरुषोत्तमात् ॥ ११ ॥

कामये कंचन वरं विषयान् वापि लौकिकान् ।
राममेव रमानाथं कामयेऽहं निजं वरम् ॥
कन्यकारूपमास्थाय तेनाहं व्यचरं तपः ॥ १२ ॥

शाण्डिल्य उवाच

ऋषेः कुशसमित्पाणेः कन्यका त्वं तपस्विनी ।
कामयस्व ऋषेः कंचित्कुमारं सुतपस्विनम् ॥ १३ ॥

सहजापदमिच्छन्ती लज्जसे किं न पुत्रिके ।
तस्याः प्रसादात्सम्प्राप्ता कथं तामतिवर्तसे ॥ १४ ॥

ततस्त्वं रामपत्नीत्वभावं मा कुरु भाविनि ।
सहजा हि स्वयं सीता रामपत्नी मनोरमा ॥ १५ ॥

कथमन्या हि तत्साम्यं प्राप्तुं प्रकुरुते मनः ।
इति श्रुत्वा पितुर्वाक्यं लज्जमाना मुहुर्मुहुः ॥ १६ ॥

न किंचिदूचे पितरं ज्ञातसारा प्रयोजने ।
निर्वन्धं च विदित्वा मे शाण्डिल्यो मुनिपुङ्गवः ॥ १७ ॥

प्रयातः शनकैस्तस्मात् थानात्स्वाश्रममुत्तमम् ।
प्रयाते मुनिशार्दूले प्रादुरासीत्ततो रामः ॥ १८ ॥

धनुर्वाणधरो रामो द्विभुजो मधुराकृतिः ।
श्रीवत्समण्डितोरस्को वनमाली सकौस्तुभः ॥ १९ ॥

पीताम्बरपरीधानो रक्तपङ्कजलोचनः ।
नीलमेघनिभाकारो वैजयन्तीविभूषितः ॥ २० ॥

चूडामणिसमुद्भासिबृहच्चूडाविराजितः ।
मनोमोहनमाधुर्यो मन्मथस्यापि मोहनः ॥ २१ ॥

विलोक्य स्वपतिं चाहं किंचिदुक्तवती वचः ।
विस्मृता कुत्र कमला कामुकी कमलापते ॥
या ते वक्षःस्थले लग्ना त्रैलोक्यस्यापि मोहिनी ॥ २२ ॥

श्रीराम उवाच

कमला तव रूपेण निर्जिता श्रीकले ततः ।
लज्जिता सम्मुखे नैति भग्नमानेच भामिनी ॥ २३ ॥

अहं चोक्तवती मानान्मा मृषा वद हे प्रभो ।
अर्द्धाङ्गसङ्गिनो सा ते साम्राज्यश्रीनिकेतन ॥ २४ ॥

श्रीराम उवाच

भक्त्यानया ते दृढया चिरं प्रीतोऽस्मि भामिनि ।
आत्मानं दुर्लभं चापि तुभ्यं दास्ये मनोरथम् ॥ २५ ॥

भाविन्यनन्तरे काले प्रमोदविपिनेश्वरी ।
भविता वै स्वयं सीता जनकस्यालये सती ॥ २६ ॥

अहं सुखिनमोपस्य रामो नित्यं महामनाः ।
भविष्यामि प्रियस्तस्याः सर्वसौन्दर्यभूषितः ॥ २७ ॥

त्वं च तत्र सखी भूत्वा सहजायाः प्रिया मम ।
अवतीर्यं मया सार्द्धं समेष्यसि प्रमुद्वने ॥ २८ ॥

रूपं चाप्रतिमं तत्र प्राप्स्यसि त्वं मदाज्ञया ।
इत्युक्त्वान्तर्हिते नाथे तदालोकनमात्रतः ॥ २९ ॥

स्त्रीस्वभावाहतैवाहमुत्तराद्रेः सुताभवम् ।
अधुनाहं प्रविज्ञाय सावतीर्णाभवद्गृहे ॥ ३० ॥

सहजासीताप्रियार्थमवतीर्णास्मि ते गृहे ।
यथेयं तावकी कन्या तथाहमपि भूपते ।
एतस्या अविशेषेण पालनीयास्मि ते सदा ॥ ३१ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे पश्चिमखण्डे भरतलक्ष्मणीये सीताजन्मोपाख्याने वनघोषासम्भवो नाम चतुर्दशोऽध्यायः ॥ १४ ॥

पञ्चदशोऽध्यायः

स्वयं लक्ष्मीरुवाच

इयं चाहं च भेदेन सा द्विधा प्रोच्यते बुधैः ।
ज्ञानभक्तिस्वरूपाहं प्रेमभक्तिमयी त्वियम् ॥ १ ॥

कर्मभिः शुद्धचित्तस्य ज्ञानसंसाधितात्मनः ।
भवेद्भक्तिरसश्चित्ते कस्यचित्पुण्यभागिनः ॥ २ ॥

ममैव सा कला काचिद्भक्तिरित्युच्यतेतराम् ।
कुलं शीलं स्वरूपं च क्रियाशुद्धिविशुद्धयः ॥ ३ ॥

अप्रकाशः प्रकाशश्च विवेको ज्ञानमेव च ।
वैराग्यं च वशीकारो विज्ञानभाव एव च ॥ ४ ॥

भक्तिः प्रेमेति विज्ञेयाः कलाः षोडश मे श्रियः ।
ज्ञाने तु ब्रह्म मर्यादं निर्मर्यादं तु भक्तितः ॥ ५ ॥

ब्रह्मधर्मान् परित्यज्य यदा तु प्रकटो हरिः ।
लौकिकं स्वीकरोत्येव काममोहादिभावगम् ॥ ६ ॥

निर्मर्यादं तदा ज्ञेयं शुद्धभावविभावनात् ।
विभावैश्चानुभावैश्च व्यभिचरिभिरेव च ॥ ७ ॥

समुद्धर्ता रसाकारः परब्रह्मेति शब्दितः ।
स एव कीर्त्यते सर्वैभक्तिर्मम विशारदा ॥ ८ ॥

एकीकरोम्यहं ज्ञानाज्जीवांस्तु ब्रह्मणा सह ।
समुद्र आपः संविष्टा एकीभूता न संशयः ॥ ९ ॥

एकीभूप परे शान्ते मोदन्ते जीवराशयः ।
इयं तु सहजानन्दा प्रेमभक्तिप्रकाशिनी ॥ १० ॥

चिद्घनानन्दिनी भोगैर्भक्तान् संयोजयत्यहो ।
तातेति भातृपुत्रेति कांतेति स्वीकृतो हरिः ॥ ११ ॥

परिपोष्यरसं तं च प्रपञ्चं हरति ध्रुवम् ।
निष्प्रपञ्चं समासज्य स्वरूपानन्दसागरे ॥ १२ ॥

रसरूपं चिरं भोगैर्विनोदयति सेवकान् ।
कदाचिदात्मारामत्वं स्वीकरोति यदा हरिः ॥ १३ ॥

तल्लयो हि प्रपञ्चस्य जायते चतुरानने ।
सृष्ट्यादयः परेशस्य लीला एव न संशयः ॥ १४ ॥

ताभिर्लीलाभिराबद्धो रसिकः क्रीडति स्वयम् ।
मुक्तिलीलाक्रमं प्राप्त आत्मारामेति कीर्त्यते ॥ १५ ॥

देवो निरोधलीलायां वशीकृत्य हितान्निजान् ।
प्रेमसर्वस्वदानेन भुङ्क्ते भोगै रसात्मकः ॥ १६ ॥

मुक्तिलीलामनुप्राप्तः स्वस्मिन् वेशयति ध्रुवम् ।
पुनः स्वाविर्भावकाले तानाविर्भावयत्यसौ ॥ १७ ॥

तैरेव नित्यलीलानां स्थिरैः परिकरैः स्फुटैः ।
भुङ्क्ते भोगावलीमीशः पूर्वोक्तां रसविग्रहः ॥ १८ ॥

प्रवेशे निर्गमे चैव भक्तेषु रमते प्रभुः ।
ज्ञानप्राप्तांस्तु वै जीवान् प्रवेशयति केवलम् ॥ १९ ॥

न तु निर्गन्तुमुचिता भोक्तुं वा भोगराशिभिः ।
स्वाविर्भावस्यावसरे स्वस्मिन्नेव स्थिताः परम् ॥ २० ॥

तेषां निराकारमिति मासते ब्रह्म सत्त्वतः ।
कदाचित्साकारतायां वस्तुबुद्धिर्न वेशिवत् ॥ २१ ॥

ज्ञानमज्ञाननाशाय स्वरूपस्फुरणाय च ।
तथैवान्तः प्रवेशाय न तु लीलारसाप्तये ॥ २२ ॥

सेयमिच्छैव पूर्णस्य चिदानन्दस्य साकृतेः ।
ज्ञानेन मोक्षं दास्यामीत्येवं ह्यर्हि व्यवस्यति ॥ २३ ॥

तदा तथैव घटयेत्साधने न च फलं तथा ।
[1]ज्ञानमुक्तेः साधनं ज्ञानं फलं चान्तःप्रवेशनम् ॥ २४ ॥

सत्त्वात्संजायते तच्च सत्त्वं चित्तविशुद्धिजम् ।
हरेराविर्भावजं वाऽऽविर्भावः स्वेच्छया पुनः ॥ २५ ॥

एवं प्रमेयबलतो नूनं ज्ञानेऽपि मुच्यते ।
अव्यक्तासक्तिजं कष्टं शुद्धस्य भजनं परम् ॥ २६ ॥

कर्मण्यायासबहुले यद्वत्तद्वदिहापि च ।
उपासनाविभूतीनां भजनं परमेशितुः ॥ २७ ॥

कालकर्मस्वभावादिदेवताविग्रहास्तथा ।
स्फुटमक्षरपर्यन्तं परस्येव विभूतयः ॥ २८ ॥

विष्णुश्च प्रकृतिर्ब्रह्मा प्राणानां चापिदैवतः ।
ब्रह्माणी भारती चैव चन्द्रशेषो मृडस्तथा ॥ २९ ॥

स्त्रियः षट्प्रवरा विष्णोः सौपर्णी वारुणी तथा ।
पर्वतेन्द्र सुता चेन्द्रः कामस्तत्प्राण एव च ॥ ३० ॥

अनिरुद्धो रतिमनू गुरुर्दक्षः शची तथा ।
एतास्वपि विभूतीषु समाविष्टो रमापतिः ॥ ३१ ॥

प्रपञ्चे क्रीडति स्वैरं नित्यमक्लिष्टकर्मभाक् ।
देवान् समाश्रिता लोका देवा रुद्रं समाश्रिताः ॥ ३२ ॥

ब्रह्माणं संश्रितो रुद्रो ब्रह्मा मामाश्रितोऽनिशम् ।
अहं समाश्रिता श्रीमत्सहजानन्दिनीपदम् ॥ ३३ ॥

कोमलं कमलप्रख्यं प्रेमभक्त्यैकदायकम् ।
सहजानन्दिनी श्रीमद्रामचन्द्रपदाश्रिता ॥ ३४ ॥

तस्मात्सर्वं परित्यज्य स्वरूपपरमो भवन् ।
कर्मोपास्तिज्ञानफलमहिमानः परावरे ॥ ३५ ॥

शुद्धं भजनमन्विच्छन् प्रेमभक्तिपरो भवेत् ।
यावन्न जायते भावस्तावद्भुक्तिः कुतो भवेत् ॥ ३६ ॥

---

१. पोदऽस्मिन्नक्षराधिक्यमार्षः ।

यावन्न ज्ञानसंस्पर्शस्तावद्भावः कथं भवेत् ।
यावन्न शुद्धं करणं तावज्ज्ञानं न दीप्यते ॥ ३७ ॥

तस्मात्करणशुद्ध्यर्थं श्रवणादिपरो भवेत् ।
श्रवणादीनि तान्येव कर्माणि कर्ममार्गिणाम् ॥ ३८ ॥

ज्ञानानि ज्ञानमार्गे तु सोपास्तौ स्युरुपास्तयः ।
भक्तौ भक्तिमयान्येव प्रेम्णि प्रेममयानि च ॥ ३९ ॥

यथा जलेऽखिलं रूपं तत्तत्संगेन जायते ।
फले फलात्मकानि स्युः साधने साधनात्मिका ॥ ४० ॥

कदाचिदेकैव रमे स्वामिना सह सोत्कला ।
कदाचित्प्रेमभक्त्याहं रमे पत्या करम्बिता ॥ ४१ ॥

उभे अपि प्रभुर्ये ये गृह्णतां वा सुलोचनः ।
ज्ञानिनां चैव भक्तानां ददाति विपुलंफलम् ॥ ४२ ॥

य एतत्सकलं वेत्ति ज्ञानभक्तिरहस्यकम् ।
स लब्ध्वा परमं ज्ञानं भक्तिमप्याशु वै लभेत् ॥ ४३ ॥

यं लाभमुत्तमं लब्ध्वा लब्धव्यं नावशिष्यते ।
इति श्रीमच्चिदानन्दस्वरूपस्थानसम्प्रदम् ॥ ४४ ॥

मार्गद्वयमनुप्राप्य कृतकृत्यो भवेन्नरः ।
प्रमोदवनमालासु सहजानन्दिनीप्रभुः ॥ ४५ ॥

अवतारार्थचारित्रं स्वयंलक्ष्मीरहं प्रभुः ।
अमर्यादमयी लीला प्रमोदवनमध्यतः ॥ ४६ ॥

भृशं मर्यादया युक्ता सावतारार्थकारिणी ।
अस्यामाविश्य क्रीडामि प्रमोदवनकुञ्जगा ॥ ४७ ॥

मयाऽऽविश्य क्रीडतीयं साकेत राज्यभोगदा ।
अविनाभावः प्रभुणा नित्यमेव मयानया ॥ ४८ ॥

अस्यां तु मय्याविष्टायां प्रमोदवनवीथिषु ।
रसानुकूला मर्यादा सद्भिर्ग्राह्या समंततः ॥ ४९ ॥

आविष्टायां तु मय्यस्यां मर्यादा शुद्धिमागता ।
अतएव प्रभुस्तत्र मर्यादापुरुषोत्तमः ॥ ५० ॥

एवमुक्त्वास्वयंलक्ष्मीः सहजानन्दिनीतनौ ।
प्राविशत् परमोदारा एकैवाभूत्ततस्तु सा ।
साकेतलीलावसरे भूय आविर्भविष्यति ॥ ५१ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे पश्चिमखण्डे भरतलक्ष्मणीये सीता-जन्मोपाख्याने स्वयंलक्ष्मीसम्भवो नाम पञ्चदशोऽध्यायः ॥ १५ ॥

षोडशोऽध्यायः

कौशिक्युवाच

कुशिको नाम राजाभून्मान्धातृकुलभूषणः ।
पृथिवीं पालयामास धर्मेण नयविक्रमी ॥ १ ॥

चिरेण लब्ध्वा तनयं विषयेषु व्यरज्यत ।
तपस्येव मनश्चक्रे सहस्राणि समा दश ॥ २ ॥

अन्तर्वृत्तिरुपासीनो ब्रह्माक्षरमहर्निशम् ।
विशुद्धपाणिपादाङ्गोजितवाक्कायमानसः ॥ ३ ॥

शारीरं केवलं कर्म कुर्वाणो योगतत्परः ।
तपः संचरतस्तस्य भूपतेर्मुनिवर्त्मनि ॥ ४ ॥

तपस्तेजःप्रभावेण तापितं विश्वतो जगत् ।
तत इन्द्रश्चिन्तयान्तर्भयकम्पितमानसः ॥ ५ ॥

स्थानभ्रंशं शङ्कमानो मन्त्रयामाससंस्थितः ।
ततस्तु भगवान् जीवो वाचस्पतिरुदारधीः ।
मन्त्रमूचे महेन्द्राय शङ्कमानाय भूरिशः ॥ ६ ॥

बृहस्पतिरुवाच

मा भैषीः सुरशार्दूलकुशिकान्मुनिसत्तमात् ।
एष हि ब्रह्मनिष्ठोऽस्ति नितान्तं तपसि स्थितः ।
प्रत्यूह्यतां तपश्चास्य त्वमेधि च निरामयः ॥ ७ ॥

इन्द्र उवाच

मयास्मै प्रोषितास्तात तपःप्रत्यूहसिद्धये ।
देवकन्याः स्मरोन्मत्ताः प्रवराप्सरसस्तथा ॥ ८ ॥

कुरंगाक्ष्यश्चन्द्रमुख्यः स्मितपूर्वाभिभाषिणीः ।
राजहंसाभगतयो जङ्घाकाण्डविराजिताः ॥ ९ ॥

दिव्याम्बरधरा देव्यो दिव्यगन्धानुलेपनाः ।
पारिजातप्रसूनाढ्यमाल्यभूषणभूषिताः ॥ १० ॥

दिव्याः सुलाञ्छना नार्यो वशमोहनकारिणीः ।
कम्बुकण्ठ्यः शातकुम्भकुम्भस्तनमनोहराः ॥ ११ ॥

उर्वशी तुर्वशी रम्भा मेनका पुंजिकस्थली ।
तिलोत्तमा घृताचीचेत्याद्यास्ता वामलोचनाः ॥ १२ ॥

तत्र गत्वा वनोद्देशे स वै यत्र तपस्यति ।
नृत्यगीतास्मितालापैश्चक्रिरे तस्य मोहनम् ॥ १३ ॥

न चचाल स तैर्भावैः पवमानैरिवाचलः ।
ततस्ता विफलायासा भूत्वायुर्मम संनिधौ ॥ १४ ॥

जातश्चैव ततोऽत्यर्थं चिन्तयाहं समाकुलः ।
नूनं स्थानं मे कुशिको ग्रहीष्यति तपोबलात् ॥ १५ ॥

बृहस्पतिरुवाच

काम आमन्त्र्यतां शीघ्रमस्मिन् कार्ये मनोभवः ।
रतिश्चैव वसन्तश्च तवाज्ञावशगा ह्यमी ॥ १६ ॥

यदा तस्मिन् वने रम्ये वसन्तः कुसुमाकरः ।
आत्मानमादधीतोच्चैस्तदा कामोविजृम्भताम् ॥ १७ ॥

रतिर्भगवती देवी स्वं रूपं काममोहनम् ।
पृथक कृत्य निजांशेन दर्शनं यातु तं प्रति ॥ १८ ॥

क्रीडतात्संनिधौ तस्य शमिष्टस्य तपस्विनः ।
हावभावानुभावाद्यैर्मोहयत्वत्तरं मुनेः ॥ १९ ॥

एवं कृते तपोविघ्नाद्भविष्यति हितं तव ।
इत्युक्तो देवगुरुणा देवराजः प्रतापवान् ॥ २० ॥

सस्मार रहसि स्थित्वा स्मरं प्रकृतिमोहनम् ।
स्मृतमात्रः स कन्दर्पः आजगाम सुराधिपम् ।
ववन्दो शिरसा शक्रं प्राञ्जलिः पुरतः स्थितः ॥ २१ ॥

काम उवाच

धन्योऽस्म्यनुगृहीतोस्मि यदहं भवता स्मृतः ।
तदेवभाग्यं भृत्यानां प्रभूणां यदपेक्षिता ॥ २२ ॥

आज्ञाप्यतां प्रभो मह्यं मदहं यत्प्रयोजनम् ।
प्रायस्तव प्रसादेन देवेषु सायुधोऽप्यहम् ।
त्वदाज्ञावशगो भूत्वा करिष्ये विश्वतो जयम् ॥ २३ ॥

इन्द्र उवाच

अहं हि शङ्कमानोऽस्मि कुशिकस्य तपोबलात् ।
अत्युग्रं हि तपस्तस्य मदासनमभीप्सतः ॥ २४ ॥

शतं क्रतूनां यः कुर्यात्ततः शङ्केतरामहम् ।
एवंविधस्तपस्वी यस्ततः शङ्केतमां स्मर ॥ २५ ॥

प्रायः सम्प्रेषितास्तत्र कति चाप्सरसो मया ।
कुशिकस्य तपोविघ्नसिद्धये धृतचेतसः ॥ २६ ॥

ततस्ता विफलायासा भूत्वा प्राप्ता मदन्तिकम् ।
तदर्थं त्वं स्मृताऽस्यद्य स्मरस्त्रैलोक्यजयी ॥ २७ ॥

भवान् विदितः पूर्वं रुद्रो येन विनिर्जितः ।
शरीरं दाहयित्वापि देवकार्यं प्रसाधितम् ॥ २८ ॥

तस्मात्त्वं कुशलः कामः कार्ये चैवंविधे मम ।
तारकाख्यः पुरा दैत्यः कार्तिकेयेन निर्जितः ॥ २९ ॥

तदर्थं कार्तिकेयस्योत्पत्यै गौरी प्रयोजिता ।
स एव त्वं भवान् वीरो मत्कार्यं परिसाधकः ॥ ३० ॥

अधुना ह्यस्य राजर्षेश्चित्तं मोहय दर्पक ।
इतो गत्वाऽऽश्रमं तस्य राजर्षेः सत्तपस्विनः ॥ ३१ ॥

मधुराज्ञापनीयस्ते विकासाय महीरुहाम् ।
लतामण्डपगुञ्जानां द्रुमगह्वरवेश्मनाम् ॥ ३२ ॥

विकासितेषु वृक्षेषु मधुना मधुरश्रिया ।
गुञ्जत्सु मत्तभृंगेषु प्रवाति मलयानिले ॥ ३३ ॥

कोकिलेषु च कूजत्सु फुल्लत्सु कमलेषु च ।
मञ्जरीषु लसन्तीषु वासन्तीषु च निर्भरम् ॥ ३४ ॥

रतिस्तत्र निजांशेन तव भार्या प्रदीव्यतु ।
संनिधौ तस्य राजर्षेर्विविधोत्सवकारिणी ॥ ३५ ॥

वेशयित्वा निजात्मानं क्रीडतां चित्तमोहिनी ।
त्वं च तस्मिन्नेव काले सज्जीकृत्य निजं धनुः ॥ ३६ ॥

एकदैवाखिलान् बाणान् मुञ्चेथाः श्लक्ष्णकोपतः ।
एवं कृते तपोविघ्नो भवितास्य तपस्विनः ॥ ३७ ॥

भविता च हितं मह्यं त्वत्कृतं मनसोद्भवम् ।
ओमित्युक्त्वा ततः कामः कुशिकस्य तपस्विनः ॥ ३८ ॥

आश्रमं प्रययौ वीरो रत्या च मधुना सह ।
मधुमाज्ञापयामास विकासाय महीरुहाम् ॥ ३९ ॥

ववासिरे पलाशानि शोणितानि समंततः ।
मृगेन्द्रनखसंकाशद्वितीयाचन्द्रकान्तिभिः ॥ ४० ॥

केतकीकाननान्युच्चैः पुष्पितानि समंततः ।
तदीयरजसोद्भूतोववौ वायुः सुधूसरः ॥ ४१ ॥

मलयानिलसंस्पर्शाज्जना मुमुदिरे भृशम् ।
जुगुञ्जुर्भ्रमरा मत्ताश्चुकूजुश्चैव कोकिलाः ॥ ४२ ॥

शुकसारिकहंसाद्याः प्रमत्ताः परितोऽभवन् ।
सरांसि फुल्लपद्मानि प्रसन्नोदकभांजि च ॥ ४३ ॥

चञ्चरीकचयक्षिप्तरजांसि कमलानि च ।
सहकारद्रुमवती सद्यो मञ्जरिताभवत् ॥ ४४ ॥

माधवो विकसत्पुष्पसौरभ्यरजसाञ्चिता ।
कुशिकाश्रमवीथीषु प्रववौ वातघोरणी ॥ ४५ ॥

मृगाः खगा वराहाश्च मातंगाश्च मृगाधिपाः ।
स्वस्वकान्ताः समालिङ्ग्य वने सुखमशेरत ॥ ४६ ॥

एवं सम्प्रसृते मधौ रतिपतिः स्वांशेन मायां रतिं
तत्रैवावतरीतुमद्भुततमामाज्ञापयामास ताम् ।
सात्यर्थं विपुलस्तनोन्नतिमती मन्दं चरन्ती मुनेः
पार्श्वे भावतरंगिणी समलसत्क्रीडामनोज्ञाकृतिः ॥ ४७ ॥

कामश्चावततार सज्यधनुषा संवीज्य पञ्चाशुगां
स्तत्रत्यान् कुशिकाश्रमोपवनगान् विप्रान् मुनीन् मारयन् ।

तत्साहाय्यवशादभूद्रतिरपि प्रव्रीडनम्रेक्षणा
वक्त्रेन्द्रीकलितावगुण्ठनपटा साकूतमन्दस्मिता ॥ ४८ ॥

ततो मुनिः पूर्णितमानसोऽभवत्कन्दर्पं वाणाहतमर्मचञ्चलः ।
कथं कथंचित्प्रविधाय निग्रहं शेके न कर्तुं मनसः प्रतिक्रियाम् ॥ ४९ ॥

ततः समुन्मूल्य धृतिं धृतीश्वरो दृशौ समुन्मील्य रतिं व्यलोकयत् ।
पुरः स्फुरत्काञ्चनविद्युदाकृतिं साक्षान्मनोमोहनमञ्जुलोज्ज्वलाम् ॥ ५० ॥

दृष्ट्वा तपस्वी स तु पर्यतप्यत प्रभूतयश्चेषुविनोदविह्वलः ।
धृतिं विधातुं न शशाक पंकिलो रसेन रागेण च रंजितो बलात् ॥ ५१ ॥

ऊचे शनैस्तां सुभगाऽमनिन्दितां वालां मनोज्ञाऽचरितां तडिल्लताम् ।
कासि त्वमम्भोजदलायतेक्षणेमदक्षिकपूर्ररजीविमोक्षिणी ॥ ५२ ॥

अनेन तव रूपेण तत्क्षणात्कवलीकृतम् ।
धैर्यं मम वराभोगे तपश्च प्रविनाशितम् ॥ ५३ ॥

पुनरङ्कुरिता नेवे भविष्यति मतिर्मम ।
हावैर्भावैस्तव ग्रस्ता दवदग्धा लता यथा ॥ ५४ ॥

कृपय कृपय मह्यं कासि चार्वङ्गि भूयाः
किमपि सुखवती त्वं भूरिकल्याणिनी च ।
इह हि तव पदाभ्यां शोणिताभ्यां किलाभ्यां
मम गृहवसुधेयं मार्जिता रञ्जिता च ॥ ५५ ॥

कलय-कलय कामिन्युत्कलां दृष्टिमेतां
मयि गगनसुमध्ये कुम्भवक्षोजकुम्भे ।
दलय दलय भामिन्यातुरत्वं मदीयं
परिहर मम दुःखं मान्मथं दुश्चिकित्सं ॥ ५६ ॥

तनुरियमनवद्या तावकी कोमलाङ्गि
स्फुटममिततपोभिः क्वापि दुष्प्रापरूपा ।
मम जनुषि समस्ते नानुभूतेदृशीयं
मधुरिमपरिसम्पत्कम्बुकण्ठित्रपाढ्ये ॥ ५७ ॥

इह हि तव मनोज्ञायत्रपा पद्मपत्रप्रतिमसुनयनन्यक्कारिणी नो तदर्हा ।
जहिहि जहिहि कान्ते नूनमेनां विमोघां प्रविश ननु मदङ्कं वर्ष्मणा कोमलेन ॥ ५८ ॥

एवं वदन् मुनिस्तत्र चस्खाल निजवीर्यतः ।
ततस्तया चिरं रेमे साक्षाद् रत्या स्मरो यथा ॥ ५९ ॥

चिरेण रममाणस्य विधूतस्यतयोबलात् ।
बहुशोऽगुः समास्तस्य राजर्षेः प्रतिभावतः ॥ ६० ॥

तयोः संयोगतो जाता कन्यैका रतिरूपिणी ।
जातमात्रां तु तां न्यस्य रतिरन्तर्दधौ ततः ॥ ६१ ॥

साहं कुशिकराजस्य कन्या जनकभूपते ।
मतृहीनां तु मां दृष्ट्वा स मुनिः पर्यपालयत् ॥ ६२ ॥

दिने दिनेऽहं ववृधे वर्तमाना तदाश्रमे ।
कदाचित्प्रौढ वयसि स्थिताहं दिव्यरूपिणी ॥ ६३ ॥

अपश्यमग्नितनयांस्तदाश्रमसमीपतः ।
सहजापरितोषाय चिरेणैव तपस्यतः ॥ ६४ ॥

अमी अग्निकुमारा हि षष्टिसाहस्रसंख्यकाः ।
रामरासपरिप्राप्त्ये सहजाराधनोत्सुकाः ॥ ६५ ॥

तानपृच्छं ततो गत्वा के यूयमिति बालकान् ।
ते मामूचुः कृपावन्तो भक्तवत्सलमानसाः ॥ ६६ ॥

रामरासपरिप्राप्त्यै कुर्मः श्रीसहजास्तवम् ।
तच्छ्रुत्वाहं च राजेन्द्र तदुक्ते साधने रता ॥ ६७ ॥

पञ्चवर्षसहस्राणि पर्यतोषयमीश्वरीम् ।
सहजानन्दनीं नाम रामशक्तिं मनोहराम् ॥ ६८ ॥

क्रमेण सा ततस्तुष्टा प्रत्यक्षा दर्शनं ययौ ।
शवरीरूपमास्थाय चरन्ती गहने वने ॥ ६९ ॥

गुंजाहारवृतोरस्का शिखिपिच्छावतंसिनी ।
राङ्कवं निर्मलं चर्म वसाना सुभगाकृतिः ॥ ७० ॥

मृगपोतं गुणैर्बद्धं वहन्ती शुकशालिनी ।
सुवर्णमञ्जरीरत्नमञ्जरीगुंफितालका ॥ ७१ ॥

रसालमञ्जरीमञ्जुकर्णाभूषणभूषिता ।
श्रीरामसख्यनिरता मृगयाक्रीडयत्परा ॥ ७२ ॥

फलपुष्पलतापत्रसर्वस्वैर्मण्डिताकृतिः ।
मां निरीक्ष्य स्मयन्ती सा द्रुमशाखावलम्बिनी ॥ ७३ ॥

श्रीसहजोवाच

रामरासपरिप्राप्तिर्दुर्लभा तव भामिनि ।
तथापि मां समाराध्य तुलभा भविता तव ॥ ७४ ॥

भाविन्यनन्तरे यर्हि गोपः श्रीनन्दनाभिधः ।
तस्य पत्न्यां तु राजिन्यां भवितास्मि न संशयः ॥ ७५ ॥

रामरासविनोदाय तर्हि त्वं मामुपैष्यसि ।
कौशिकी मत्सखी भूत्वा रमयिष्यसि रामिणम् ॥ ७६ ॥

अभिरामं रामचन्द्रं रामा भूत्वा सीतापतिम् ।
इत्युक्त्वान्तर्दधे सद्यः श्रीमती सहजेश्वरी ॥ ७७ ॥

तद्रूपदर्शनोद्भूतकन्दर्पविवशाकृतिः ।
अहं च द्रवतां याता नदीरूपेण संस्थिता ॥ ७८ ॥

सहजानन्दिनीशक्तिक्रीडास्थानं महावनम् ।
क्षालयन्ती भुजाकौरस्तरंगैर्वायुनेरितैः ॥ ७९ ॥

त्रिसंध्यं मुनिशार्दूलं तोषयन्ती क्रियाविधौ ।
चिरमेवं स्थिता राजन् कुशिकस्याश्रमं प्रति ॥ ८० ॥

तस्माददहं श्रीसहजाख्यशक्तेः सखीचिरं रामरसात्यभिज्ञा ।
इमामिहोत्तीर्णवतीं विचिन्त्य गृहेऽवतीर्णास्मि तव क्षितीन्द्र ॥ ८१ ॥

नूनमेतदभेदेन पालनीयास्मि वत्सल ।
श्रीरामानन्दरसिका सार्थिनी सहजासखी ॥ ८२ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे पश्चिमखण्डे भरतलक्ष्मणीये सीताजन्मोपाख्याने कौशिकीसम्भवो नाम षोडशोऽध्यायः ॥ १६ ॥

सप्तदशोऽध्यायः

लक्ष्मण उवाच

यस्माद्रत्नकलशादियमजनि परा लक्ष्मीः सहजा नाम तत एव तिस्रोऽन्यास्तादृग्रूपवयोवैशशीलगुणस्वभावास्तादृश्य एव प्रादुरासुः। नवशीतसुधोदकानां धाराजवोत्क्षिप्तरत्नपर्यङ्किलायां मध्ये द्वे एवसीता चोर्मिला च तयोर्वामदक्षिणायोर्माण्डवी श्रुतिकीर्तिश्चाभवत् ॥

जातमात्रा एव ताः (चतस्रः कन्यकाः) सद्यः प्रादुर्भूय धरणी सोत्साहसाकूतसानन्दमन्दमधुरस्मितदशनदीधितिद्योतदीपितदिक्चक्रवालामहतो विवरान्तरालतः प्रसृत्वरमाणानां सीताजन्ममहोत्सवावसरकौतुकविलोकनं समागतभोगिशिखामणिकिरणकदम्बकानां छटाभिश्छुरिता छविग्रहा कति कति नरेन्द्रगणैरुपभुज्यमानोपभुक्तोपभोक्ष्यमाणापि तेषां जनन्येव महामधुरतारुण्याञ्चित तनुरपि पुराणानां पुराणातमा जरोयसी शनैर्लाघवेन जवाद्रत्नकलशोद्भूतपर्यङ्किकामादायदोर्भ्यं जनकनरेन्द्राय प्रददौ।

तस्यामेव रत्नपर्यङ्किकायांपरितोऽमूश्चतस्रः प्रावृत्य नवापि ताः सरिद्वराः स्थिताः। तेषां मध्य एका स्वयंलक्ष्मीर्नाम या सा पूर्वमेवास्यास्तनुमाविष्टवर्ता। अष्टौ शेषास्तस्याः सखीभावमङ्गीकृत्याख्यातनिजनिजस्वरूपास्तस्य राज्ञो निकेतनं मण्डयांचक्रुः। एवं प्रसूतायां तस्यां जनकनरेन्द्रराजधानी मधुरचन्द्रिकायां राज्ञी सुनयना सुप्राप्तसमस्तमनोरथफला पुत्रजन्मोत्सवादधधिकमुत्सवं चकार ॥

स्थानं तन्मिथिलानामसर्वर्तुविटपिसम्पन्न प्रभूतपत्रपुष्पफलसम्पत्सुशोभाद्यं कमलेश्वरीजलसमास्वादप्रभूतधिषणैजनैराकीर्णं नानाशास्त्रार्णवापारपारीणविद्वज्जन मण्डलीमण्डितं निखिलगुणगणाकीर्णं सो(दुहिता) ताजन्ममहोत्सवप्रमुदितसिद्धविद्याधरोरगाप्सरोगन्धर्वगीतिध्वनिपेलवं स्थाने स्थाने समाहन्यमानानां पटहानां दुन्दुभीनां मृदंगानां घोषैरापूर्यमाणं दिने दिने समुज्जायमानानेकमङ्गलप्रकरणं प्रसन्नान्तःकरणानां जनानां कदम्बकैराकीर्णं प्रतिक्षणपल्लवप्रसवोद्गममनोहारिगृहारामाटवीनिकुञ्जमहोरुहसंस्पर्शमन्दमलयद्रुमसंस्पर्शसुगन्धिनिर्मलसरोजजलसंस्पर्शशीतलमधुरमारुतोपसेवितं वेदशास्त्रपुराणोपनिषद्रहस्यप्रपाठप्रवणमुनिजनखंजनमिथुननिधुवननिर्णीतनिधिस्थानं निरतिशयतपोबल समुत्सारितकालप्रभावैर्निजरैर्जानपदैराकीर्णं राज्ञो नैम्यचन्द्रस्य धर्मातिशयेन निरीतितमं सुधर्माभोगवतीप्रख्यं समस्तसुखसम्पदाद्यं-महामणिमाणिक्यमुक्तागणजटितकाञ्चनेष्टिकामथैर्नृत्यत्सुराङ्गनाकरतालध्वनिसमुद्भूत-प्रतिध्वनितैर्जलदैरिवोन्नतैर्लेहलहायमानपताकाध्वजपटावकीर्णशिरोभिः प्रासादगणैः शोभितं नवनिधिकदम्बकाधिकप्रथितद्रविणराशिसनाथनैगमजनप्रमोदपणनकोलाहलितहलहलायमानहट्टागणाकीर्णमहापणपथं त्रैलोक्यलक्ष्म्यैकनिधानं तया नितरां शुशुभे ॥

तत्रावतीर्णां सहजानन्दिनीं रहसि सुनयनादेव्याः । प्रासादे रत्नपल्यंकिकाया-मान्दोल्यमानां जातमात्रामेव विधिरागत्यास्तौषीत् ।

ब्रह्मोवाच

नमस्ते सहजानन्दिन्यै श्रीरामरामेश्वर्यै प्रमोदवनवीथीनिकुञ्जान्तराविहरणानन्द-स्वरूपायै निखिलनिगमोपनिषद्गोपगीतचरित्रायै पूर्णनिशाकरमण्डलमण्डली-विजयप्रभूततमज्योत्स्नाजालविभासितमुखचंद्रमन्दमधुरस्मितलवनिरसितव्रजसीमन्तिनी सौभाग्यगर्वाङ्कुरायै निजमहामन्त्रसाधनप्रसादसुलब्धनिजचरणकमलपरायण-नानामुनिजन मनोरथपूरणार्थप्रदत्तनिजरमणनित्यलीलान्तः प्रवेशायै प्रमुद्वनकुन्द-वनकुमुद्वनसुधावरूढनवशाद्वलविलग्नचरणालक्तककनिरीक्षणप्रभूतपञ्चेषुविकारावसन्नराधा चन्द्रावलीप्रभृतिगोपवालिकाहृदयविरहहुताशनोद्दीपिकायै श्रीमद्रत्नगिरिदरीसानु-मध्योपत्यकानिकुञ्जाटवीनिर्झराभिषेकनिर्मलविग्रहविचित्रितानेकधातुद्रवशोभितायै रत्न-मुक्तावतंसाग्रलग्नमहामणिमरीचिमालामहोद्योतितनिविडतमालकाननतिमिरतिरस्कार-कारिण्यै । कोटितड़िच्छटावभासिविग्रहायै कन्दर्पकोटिलावण्यलक्ष्मीमुषो रामचन्द्रस्य मनोमोहिन्यै श्रीमज्जनकनरेन्द्रनन्दिन्यै ॥

यः सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्ततोऽपि परः पुरुषोत्तमो नाम सच्चिदानन्दैकरसनिजनित्यलीलाशालिविग्रहः स एव प्रभुः स्वरूपानन्दमयतादृश-लीलाप्रसाधनाय रामचन्द्रो दृश्यते गवेन्द्रस्यश्रीसुखितनाम्नो गोपराजस्य भवने श्रीमाङ्गल्यकायां स्वयं च भवती च व्रजेन्द्रस्य श्रीनन्दननाम्नो गोपराजस्य भवने श्रीराजिन्याम् ।

अविनाशिभूतमेवेदं मिथुनं तस्यैव सहजासीतारामचन्द्रयुगलस्यांशांशो मन्दरे च श्वेतद्वीपे चक्रावस्थाने च सूर्यमण्डले च रमावैकुण्ठे च गोलोके च व्यापिनि वैकुण्ठे च गोवर्द्धने च वृन्दावने च गोकुले च नन्दग्रामे च संकेतरटे च मथुरायां च द्वारावत्यां च साकेतपुरे च मिथिलायां च चित्रकूटे च स्फटिकशिलायां च द्वादशवनेषु च प्रमोदवने च स्वयमेव सहजारामचन्द्रौनित्यकेलिनौ रमेते

नमस्ते प्राणोपजीव्याय प्रावृषेण्य निविडजलवाहपटलप्रकटाभिरामाय रामाय

नमश्च ते तस्य प्राणोपजोव्यायै संभूय प्रकटीभूतकोटितडित्पुञ्जमाञ्जुल्पहारि-स्वरूपायै निजरमणवर्ष्मनिकेषोपलघर्षणनितान्तमधुरसुवर्णरेखायमाणलावण्यसहजायै श्रीसहजायै ।

वाङ्मनसयोरप्यगम्यं युवयोर्माहात्म्यं युवामेव जानीथो यत्र विधिशिवादयो वागीशा अपि मन्दप्रज्ञां बभूवुः । एवंविधेऽपियुवयोर्माहात्म्ये छन्दनाय वाग्मिरूपचरतो मम न किं हास्यास्पदता तथापि श्रद्धा भक्तिश्च प्रह्वान्तःकरणता च तावकी निरूप-धिकृपा च समर्थयिष्यत्येवेति महालम्बनं स्तुति पदार्थस्य स्तव्वैकविषयस्य ।

नमस्ते पूर्णारूपायै सच्चिदानन्दवर्ष्मणे ।
सहजानन्दरूपिण्ये प्रमोदवनदेवते ॥ १ ॥

रासलीलापरौ नित्यं परं ब्रह्म सनातनम् ।
सहजानन्दिनीं रामं कामं वन्देतरामहम् ॥ २ ॥

नमो लीलारसानन्दरूपिण्यै नित्यरूपिण्यै ।
माधुर्यरसमाधुर्यरूपायै पररूपायै ॥ ३ ॥

लीला रूपं गुणाः स्थानं चरित्रं नाम धाम च ।
मायासंयोगराहित्यात् सर्वमप्राकृतं तव ॥ ४ ॥

औत्पत्तिकः स्वभावोऽयं वस्तुतः खलु वास्तवः ।
यत्स्वयं निर्गुणं नाम तादृग्लीलारसात्मकम् ॥ ५ ॥

विभावैरनुभावैश्च तथा संचारिभिः सह ।
रसो वै स इति प्राह सर्वशास्त्रप्रमा श्रुतिः ॥ ६ ॥

अद्यापि विधि शर्वाद्यास्त्वदूपंदेवतोत्तमाः ।
केदं कुतः क केनेति सगुणा नैव जानते ॥ ७ ॥

अनुभूतिः स्मृतिश्चैव त्वमेव सकलोत्तमे ।
प्रमाविपर्ययश्चैव विकल्पो निद्रया सह ॥ ८ ॥

विश्वसर्गविसर्गादौ त्वमेवाखिलरूपिणी ।
वैषम्यं चापि नैर्घृण्यं त्वयि तन्नोपपद्यते ॥ ९ ॥

सामरस्यानन्दरसो युवयोः समुपास्यते ।
सामन्तैर्ब्रह्मशक्राद्यैर्विश्वपाधारभूतये ॥ १० ॥

ज्ञानं यत्तद्विशुद्धात्मविषयं प्राकृतेतरम् ।
उपचारक्रमेणैव त्वद्रूपमवलम्बते ॥ ११ ॥

माधव्यास्ताः शुभा वाचो विस्मयं किमु तन्वते ।
तवैव प्रेरणामात्रान्मनसि प्रकटीकृताः ॥ १२ ॥

स्तुतिश्चेदन्यविषया गुणानामवलम्बिनी ।
तदप्यसौ त्वद्विषया निर्गुणैव भवेत्तमाम् ॥ १३ ॥

गुणातीते नित्यपदे सच्चिदानन्दरूपिणी ।
रमसे त्वं नित्याकारे स्वेनैव सहजाभिधा ॥ १४ ॥

निजलीलारसानन्दानुभवार्थं विरहिणौ(विहारिणोः?)।
द्वन्द्वो वां नित्यकैवल्यं सहजेति त्वमीश्यतः ॥ १५ ॥

प्रपञ्चोऽपि भवन्निष्ठो नित्यनिष्केवलात्मकः ।
न संसार इवाभाति जीवनिष्ठो हि संस्मृतः ॥ १६ ॥

कदाचिदात्मनिरतौ युवयोः सहजात्मनोः ।
लीयते स प्रपञ्चोऽपि नामरूपचिदात्मकः ॥ १७ ॥

सत्कारणमसत्कार्यमेक एके विपर्ययम् ।
कार्यकारणकर्त्रेक आहुर्नित्यं भवद्वपुः ॥ १८ ॥

गुणातीततयास्तव्यं प्राकृतप्रतियोगि यत् ।
गुणानां प्राकृतत्वं तु न स्यादप्रतियोगिनाम् ॥ १९ ॥

जातमात्रोऽहमैश्वर्यं न किंचिद्वेद कस्यचित् ।
न हि जीवस्य मे मानं स्वाश्रयं खलु युज्यते ॥ २० ॥

अथ मुक्तिरपि प्रायः स्वाश्रया नैव युज्यते ।
न ह्यणोरस्य महिमा स्वेमहिम्न्यमहीयत ॥ २१ ॥

अतः श्रुतिर्विप्रतिषिध्य सर्वं यद्दृश्यजातं वरिवर्ति लोके ।
दृङ्मात्रशेषं परमं स्वरूपमापादयन्ती फलगोचराभूत् ॥ २२ ॥

स्वरूप एव भ्रमसंशयादिवृत्याकुलैः परतन्त्रैश्च जीवैः ।
न ह्यीश्वरे त्वय्युपपन्नमन्य दृते कर्तुं न मनाच्चैव लापात् ॥ २३ ॥

अतो नतोऽस्मि प्रयतोभूय भक्त्या श्रद्धासम्पत्संजनिताखिलार्थः ।
त्वां च त्वदीशं च रसात्मकं तल्लीलावपुर्नित्यनितान्तकान्तम् ॥ २४ ॥

इत्यभिष्टूय पुरुषीं सहजानन्दरूपिणीम् ।
अवाङ्मनोगोचरत्वाद्विरंचिर्विरराम ह ॥ २५ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे पश्चिमखण्डे भरतलक्ष्मणीये सीताजन्मोत्सवे सप्तदशोऽध्यायः ॥ १७ ॥

अष्टादशोऽध्यायः

श्रीनारायण उवाच

नतोऽस्मि नित्यं जगदीश्वरेश्वरि त्वदङ्घ्रिसंतानकपुष्पयुग्मकम् ।
चिरं यदाखाद्य रसोऽप्यहं सदा भवामि नित्योदयि दिव्यचेष्टितः ॥ १ ॥

असौ विधिः सर्गविसर्गयोः क्षमस्तथाहमेतत्परिपालनप्रभुः ।
हरस्तथा संहरणेऽस्य कोविदस्तदेतदाराधनमीशि तावकम् ॥ २ ॥

अथ तत्रैत्य भगवान् नारायण उदारधीः ।
निजांशिनीं श्रीसहजां तुष्टाव परमेश्वरीम् ॥ ३ ॥

विभासि नित्यैव च चरित्रधोरणीविचिन्वतां वेदपथेषु वास्तवीम् ।
वितन्वती ब्रह्मशिवादिचिन्तनप्रमोददां नित्यमुदारमानसे ॥ ४ ॥

अचिन्त्यरूपापि तथा गुणातिगाप्यवाच्यरूपापि गिरामधीश्वरैः ।
विचिन्तनीयासि गुणैर्मनोरमाप्यहो स्वभक्तैर्नितरां प्रगीयसे ॥ ५ ॥

संख्यातुमर्हाणि न ते जगन्नुते नामानिरूपाणि च विश्वपाविनि ।
यज्ज्ञानमात्रेण भृशं जनोऽश्नुते त्रिवर्गलभ्याधिकमर्थमुज्ज्वलम् ॥ ६ ॥

आदिस्त्वमेवासि च मध्यमस्थ वै त्वमेव चान्तस्त्रिदशाधिपाधिये ।
त्वत्तोऽखिलं विश्वमिदं त्वयि स्थितं त्वय्यैव च ब्रह्मणि सम्प्रलीयते ॥ ७ ॥

त्वमेव लोकेश्वरिभासि सर्वगा त्वमेव चाहं धिषणैकगोचरः ।
त्वमेव वित्तिस्त्वमहंपदार्थयोः सशब्दशब्दार्थपरिच्छिदाकृतिः ॥ ८ ॥

यान्येव नामानि खिलस्य वस्तुनस्तान्येव ते सर्वपदार्थरूपिणि ।
न हि त्वदन्यं कलयन्ति कोविदाः शब्देन चार्थेन च भावितात्कृतिः ॥ ९ ॥

उपासनं ते जगदीशि कर्मभिर्ज्ञानेन भक्त्या च विशुद्धरूपया ।
यस्त्वां भवे द्वेष्टि समस्तरूपिणीं सर्वं परादादमुतो हि तत्त्वतः ॥ १० ॥

अतस्त्वमेवाखिलवर्त्मसु स्थिता करोषि कल्याणकदम्बकं भवे ।
तेजःसु यद्वत्सकलेषु संस्थितो विभाति भासा रविरेव केवलः ॥ ११ ॥

माया प्रधानं प्रकृतिस्तथैव चाव्यक्तकल्पेत्यादिपदार्थरूपिणीम् ।
ब्रुवन्ति ये त्वां जगदीशि तेऽबुधा न तत्त्वतस्त्वां किमपोह जानते ॥ १२ ॥

ब्रह्मेति ये त्वां प्रवदन्ति निर्गुणं तेऽप्यञ्जसा नैव विदन्ति वस्तुतः ।
यतः प्रतिष्ठासि परस्य तस्य चिन्मात्रस्यसच्चित्सुखधर्मधर्मिणि ॥ १३ ॥

सर्वं खलुत्वय्युपपन्नमञ्जसा गुणांश्च नैर्गुण्यमपि प्रभावितम् ।
यथा घने सैन्धवखण्ड उज्ज्वले बहिस्तथाभ्यन्तरमेकवस्तुता ॥ १४ ॥

त्वमेव धर्मस्य प्रसरस्य धर्मिणी न भेदतोऽस्ति त्वयि धर्मधर्मिता ।
अथापि चेदस्तु यतोऽखिलात्मके भिदा पदार्थोऽपि न भिद्यते परम् ॥ १५ ॥

त्वयीदृशेवस्तुनि सच्चिदात्मके विरुद्धभावप्रसरोऽपि नेष्यते ।
अस्त्युष्णता तेजसि वार्यनुष्णता समुच्चितं त्वय्युभयं निरीक्षते ॥ १६ ॥

ध्वनिश्च वर्णश्च पदं च सुप्तिङौ वाक्यं महावाक्यमथागमोऽखिलः ।
त्वमेव हि व्यासर्समासरूपतः प्रपञ्च्यमे वाक्प्रसरेण विश्वतः ॥ १७ ॥

अनादिरेष द्रुम उद्ययौ यतो न मृग्यते मूलममुष्य तत्क्वचित् ।
त्वां तु प्रविज्ञाय विनिश्चितं भवेद्यत्रानिशं सन्दिहते बुधा अपि ॥ १८ ॥

साक्षात्कदाचित्कुरुषेऽखिलं स्वयं त्वं पूरुषद्वारतया कदाचन ।
निजैच्छयैवेशि कदाचिदन्यथा कदाचिदात्मैव समस्तमाबभौ ॥ १९ ॥

वितत्य सर्वं च कदाचिदात्मना करोषि मातस्त्वमनुप्रवेशनम् ।
इत्थं प्रपञ्चे रमसे स्वनिर्मिते यतः समस्तो रमणार्थमेव ॥ २० ॥

तवैव चेष्टात्मक एष एधते कालः कलाकोटिकदम्बकप्रभुः ।
ये वस्तुमात्रोपरि लेढि त तद्गुणान् स लिह्यते चित्कलया किल त्वया ॥२१॥

अथ स्वरूपेण चरित्रधोरणीमधिप्रमोदाटवि यद्वितन्वती ।
अत्युद्भुतैः क्रीडसि विश्वमङ्गलैर्गुणैर्महोदारतरैः परात्परैः ॥ २२ ॥

विजृम्भतेसा करुणात्मता तव स्वभक्तवर्गेषु तदेकजीविषु ।
विचिन्तयेयुः खलु ते किमन्यथाभवापवर्गेच्छुतया विरक्ताः ॥ २३ ॥

(युग्मं) कालः स्पृशत्येव न ते विचेष्टितं सच्चित्सुखैकात्मतया परात्परम् ।
अतोऽस्य मूर्द्धिन स्वपदं निधाय ते क्रीडन्ति सर्वस्वभुजो भवज्जनाः ॥ २४ ॥

नमामि ते रूपमदभ्रविभ्रमं कर्णावतंसीकृतरत्नमञ्जरि ।
महाच्छनासामाणीशोभिताननं स्फुरत्कपोलालकवल्लिमञ्जुलम् ॥ २५ ॥

परार्द्धरत्युत्कटरूपसम्पदा विरोचमानाङ्घ्रिनखप्रभाभरम् ।
लीलालसालोलगतिक्रमोद्भवत्रपाविनम्रीकृतराजहंसकम् ॥ २६ ॥

सकेलिकूजन्मणिनूपुरध्वनिच्छात्रीकृतोद्यत्कलहंसनिक्वणम् ।
मञ्जीरिकाधोऽञ्चितहेमकिङ्किणीगणोपधिस्वैरवगुञ्जषट्पदम् ॥ २७ ॥

मन्दानिलान्दोलिदुकूलकान्तरप्रसृत्वरज्योतिरुदग्रपीडिकम् ।
ताम्बूलिकामत्रमनोजघुण्टिकानिरीक्षणोन्मादितमन्मथान्तरम् ॥ २८ ॥

करीन्द्रशुण्डाकदलीकलामुषोः सुजङ्घयोः कान्तिभरेण चिन्तयत् ।
वासोत्तरीयं तनुसूत्रनिर्मितं हेमाम्बुनिर्णिक्तमिवाच्छमद्भुतम् ॥ २९ ॥

नितम्बबिम्बद्वितयद्युतिच्छटाविनिर्जितार्केन्दुसुपूर्णमण्डलम् ।
अधस्तरोयाम्बरपट्टदोरिकाविलम्बिगुच्छाकृतिमौक्तिकव्रजम् ॥ ३० ॥

गम्भीरनाभीह्रदमाधुरीरसप्रमग्नरामेन्दुरसीन्द्रमानसम् ।
तदुद्भवानेकबलीतरंगिणीतरंगनीरोत्तरलीकृतान्तरम् ॥ ३१ ॥

रोमावलीतद्गतशैवलावलीविलीनहृच्छ्रीरसिकेन्द्रपक्षिराट् ।
तनूदरस्थाननितान्तसंशयज्ञानस्थदोलादुलिताखिलाशयः ॥ ३२ ॥

उत्तुङ्गवक्षोरुहभारभावितश्रीविग्रहात्यन्तविनम्रतारुचि ।
अनेकमुक्तामणिहारभासुरग्रीवाविलग्नत्रिसरातिसौभगम् ॥ ३३ ॥

पञ्चाशुगोद्भावितलोकनिर्जयध्वानोद्भवव्यञ्जनकण्ठकम्बुमत् ।
अनेककोटिस्फुटचन्द्रमण्डलश्रीचौरवक्त्रच्छविसारभासुरम् ॥ ३४ ॥

मुखेन्दुपूर्णमयसर्ववासरप्रमोददृक्चारुचकोररोचितम् ।
धमिल्लमल्लीसुमनोऽभिगुंफितमधुव्रतासादितमाधुरीरसम् ॥ ३५ ॥

तदेतसीमन्तितदिव्यमौक्तिकप्रकृष्टतारावलिकान्तकीर्तिमत् ।
अमन्दवेणीमणिचन्द्रचन्द्रिकाप्रकाशसन्तोषितनेत्रकैरवम् ॥ ३६ ॥

दन्तावलिद्योतविमिश्रनिर्मलश्रीमन्दहासामलमञ्जुकान्तिमत् ।
दोर्वल्लिवल्गुस्फुरितांसयुग्मकप्रकाण्डनित्योद्भुरताविराजितम् ॥ ३७ ॥

नखौघमारभ्यशिखान्तमुच्चकैरेकैकमेभिर्नयनैरुपासितम् ।
कटाक्षसंजीवितसर्वमारितस्मरप्रवीरप्रवरप्रमोददम् ॥ ३८ ॥

यद्यप्यदोङ्गं तव सर्वमद्भुतं तथापि मन्मानसबन्धनाय ते ।
सदास्तु पादाम्बुजयुग्ममुल्लसन्नखौघकिंजल्कसमूहरञ्जितम् ॥ ३९ ॥

ध्यानाय गानाय च भक्तचेतसां प्रमोददानाय च नित्यमेधताम् ।
तवेदृशं सौभगमङ्गमाधुरीविमिश्रमत्यर्थमनोहरं प्रभोः ॥ ४० ॥

प्रमोदनामाङ्कितमद्भुतं वनं लीलालयं मे हृदये विराजताम् ।
यदंशमात्रेव विभाति माधुरी वैकुण्ठवृन्दावनगह्वरादिषु ॥ ४१ ॥

लीलाधामविशिष्टमद्भुततमं श्री सम्पदां मन्दिरं
सच्चिद्रूपमनन्तमक्षरमयं यद्व्यापकं विश्वतः ।
तत्ते धाम विराजतां मम हृदि श्रीरामरामेरमे
प्रेमानन्दमयं मनश्च वचनं सुश्रून्निवृत्तं यतः ॥ ४२ ॥

लीलास्तास्तव राससंनिधिमिता भक्ताखिलास्वादिता
व्यक्ताव्यक्ततया प्रमोदविपिने संजायमानाः पराः ।
भक्तानां हृदयैकचिन्तनरसप्रेमप्रवृद्धप्रदा
भूयासुर्ममजीवनाय सहजानन्दे गुणग्रामणीः ॥ ४३ ॥

परं ब्रह्म रामचन्द्रः सच्चिदानन्दमात्रकः ।
यदीदृशं न प्रभवेद्भक्तानां जीवनं कथम् ॥ ४४ ॥

प्रमोदपात्रीकृतभक्तमानसं ब्रह्मादिदेवैरपि सृष्टु भावितम् ।
लीलारसानन्दत्रयं विराजितं समेधतां मद्धृदयैकजीवनम् ॥ ४५ ॥

नमः श्रीनन्दनाख्याय गोपराजाय धीमते ।
नमस्तथा श्रीराजिन्यै याभ्यां त्वं नित्यलालिता ॥ ४६ ॥

नमस्तदावेशयुङ्भ्यां वात्सल्यरसपुष्टाभ्याम् ।
भाग्यवदभ्यां त्रिभुवनसौख्यकाभ्यां निरन्तरम् ॥ ४७ ॥

दशरथकौसल्याभ्यां सुखितश्रीमाङ्गल्यकाभ्यां च ।
त्रिभुवन सौराज्यपदप्रभाविताभ्यां नमो नित्यम् ॥ ४८ ॥

नमस्ते नित्यपूर्णाये लीलायै मधुरश्रिये ।
यदावेशवशादेतन्मिथुनं नित्यं भासते ॥ ४९ ॥

इति स्तुत्वास्फुरल्लीलारसावेशितया मुहुः ।
रोमाञ्चिततनुर्विष्णुर्दण्डवत्प्रापतद्भुवि ॥ ५० ॥

मुहुर्मुहुः स्तुतिं कृत्वा नतिं कृत्वा मुहुर्मुहुः ।
कृतार्थीकृत्य चात्यानं स्वधाम समगात्ततः ।। ५१ ।।

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे पश्चिमखण्डे भरतलक्ष्मणीये सीताजन्मोत्सवेऽष्टादशोऽध्यायः ।। १८ ।।

एकोनविंशोऽध्यायः

महादेव उवाच

अहं हरिः पद्मभवस्तथान्ये देवा पदाङ्घ्रिद्वितयं प्रपन्नाः ।
भवन्ति लोके महतामपीशास्तां रामरामां प्रणतोऽस्मि नित्यम् ।। १ ।।

गुह्यं च ते नाम यदास्ति नित्यं गृह्णन्ति यद्वै सहजेति वेदाः ।
मातः स्फुटं तत्प्रतिपाद्यरूपां त्वां देवतां कामपि संश्रयामि ।। २ ।।

वनं प्रमोदाख्यमनन्तकोटिश्रीजुष्टमानन्दमयं समंतात् ।
त्वद्वल्लभो यत्र च रामचन्द्रो विभाति कन्दर्पपरार्ध्यवेषः ।। ३ ।।

भक्त्या प्रयुक्तं तदहं श्रयामि भूत्वा कदाचित् खलु कोऽपि गोपः ।
चिरं यदानन्दसमुद्रमग्नो ब्रह्माक्षरं वेद न किंचिदेतत् ।। ४ ।।

तव स्वरूपं श्रुतिभिर्विमृग्यं ब्रह्मादिदेवैरपि नैव गम्यम् ।
अधिप्रमोदाटविकुञ्जवीथिष्वदो विसर्पत्यभितः पदाभ्याम् ।। ५ ।।

शृङ्गारनामा रसराज उच्चैस्तवैव देहे कलिनप्रतिष्ठः ।
यदंशमात्रेण जगत्समस्तं विमोहित स्थावरजंगमाढ्यम् ।। ६ ।।

लक्ष्मीः स्वयं या हरिसंगमेन प्रमोदयन्ती हृदयं विभाति ।
सा त्वत्कटाक्षामृतभूरिवर्षैः प्रभाविनीति ध्रुवमेव वेद्मि ।। ७ ।।

विना त्वदङ्घ्रिप्रभवप्रभावं कुतो भवेद्दृद्धिरिति प्रतीतम् ।
यतस्त्वदाराधनवञ्चितानां भवोदधौ दुःखपरम्परैव ।। ८ ।।

दिने-दिने यत्र तवोदयेच्छुः सखीसमूहो यतते त्वदीशम् ।
वशे विधातुं बहुभावदूत्यैः स ते विलासो हृदये ममास्ताम् ।। ९ ।।

यथा पुमर्थाः पुरुषाय भोगा यच्छन्ति चत्वार उदीर्णरूपाः ।
तथा स्वतन्त्रः खलु ते विलासः फलात्मकश्चैव फलार्पकश्च ।। १० ।।

तवैव नित्यं वशवर्तिनी सा मायाभिधा शक्तिरनन्तरूपा ।
यथाखिलं मोहितमेतदुच्चैर्जगत्स्वरूपं परतन्त्रमेव ।। ११ ।।

अचिन्त्यरूपा करुणा भवत्याः शक्ता समुद्धर्तुमुदेतिजीवान् ।
नो चेत्कथं दुस्तरमोहजालं विभिद्य पारं परमं प्रयान्ति ॥ १२ ॥

पितामहो यद्वितनोतिविश्वं रक्षन् हरिर्द्रावयते च दैत्यान् ।
अहं तथा संहरणं करोमि तदेतदाभाति भवत्प्रसादः ॥ १३ ॥

यतोऽभवद्वाङ्मनसं निवृत्तं यदाप्यनावाप्यमिहास्ति किंचित् ।
यदेव सर्वेमुनिभिर्गृहीतं तदेव रूपं परमं भवत्याः ॥ १४ ॥

अनन्तशक्तिप्रभवप्रभावमनन्तसंख्याकापुमर्थमूलम् ।
अनन्तकालक्षपणाक्षयं ते विचेष्टितं मे हृदये चकास्तु ॥ १५ ॥

तडिल्लतावच्च सुवर्णवर्णं रामाभ्रसम्पर्कसदामनोज्ञम् ।
ध्यातं न यैस्ते जननि स्वरूपं तेषां भवेऽस्मिन् जनुरेव मोघम् ॥ १६ ॥

तावन्मुखे जाड्यमुदेति भूयस्तावद्दरिद्रो भवतीह लोकः ।
तवन्न कान्तिप्रसरोऽस्मिन् देहे यावन्न तेऽजायत दृष्टिपातः ॥ १७ ॥

अधिप्रमोदाटविकुञ्ज मध्ये श्रीरामयोगेन सदा स्फुरन्ती ।
इन्दीवरश्यामललोचनां त्वां सम्पत्तिसंवित्तिकृते भजामि ॥ १८ ॥

यद्वाग्भवं नाम निरूढ़वीजं परात्मकं वेदसमूलमूलम् ।
तत्तद्वपुः संनिहितं समस्ततन्त्रैषु मन्त्रात्मतया भजामि ॥ १९ ॥

कदाचिदुन्मीलितमानभावोन्नतै भ्रुवौ मन्मथचापचारू ।
श्रीरामचन्द्रैकरसीन्द्रभाव्ये भजामि ते मुक्तकृपाकटाक्षे ॥ २० ॥

वेदान्तवाक्येषु निगूढमुच्चैर्यत्तत्परं ब्रह्म चिदेकमात्रम् ।
तस्यापि चेत्थं परमाप्रतिष्ठा तदा कथं वाग्विषयत्वमेषि ॥ २१ ॥

नित्ये महिम्नि प्रथितप्रतिष्ठा त्वेके महागाथगुणेकजुष्टा ।
अगोचरा ब्रह्मशिवादिभिस्त्वमधिप्रमोदाटवि दृश्यसे वै ॥ २२ ॥

कदापि पञ्चत्वमियाद्विरंचिस्तथा विरामं भजते रमेशः ।
भजाम्यहं चैव विनाशभावं तदा त्वमीशः स्वयमेव चासि ॥ २३ ॥

त्वदङ्घ्रिपङ्केरुहगर्भधूलीं त्रिवेदमल्लीसुमनोमधूलीम् ।
विचिन्वतां ज्ञानयथेष्वगम्यामधिप्रमोदाटवि किं न लप्स्ये ॥ २४ ॥

वेदान्तविज्ञानविनिश्चितार्थैर्योगेन कष्टेन गृहीतमन्यैः ।
तत्त्वत्स्वरूपं प्रमुदाटवीनामाभीरकन्याभिरहो सुखापम् ॥ २५ ॥

यथाकथंचिद्विषयैर्विमुक्ता नृपां मनोवृत्तिरुदीर्णरूपा ।
त्वामप्रमेयामविलभ्य सीते कदर्थनीया किमु मुक्तिमार्गे ॥ २६ ॥

ये स्वाश्रयां च प्रवदन्ति मुक्तिं तेषामहंभाविनष्टमात्रा ।
ब्रह्मास्त्रिरूपाखलु चित्तवृत्तिरत्यर्थमेवप्रविभाति मोघा ॥ २७ ॥

ये त्वत्पदाब्जं प्रभजन्ति सन्तस्तेषां परानुग्रहमात्रवश्या ।
स्वं ब्रह्मधर्मं प्रविहाय मातः करोषि साश्चर्यचरित्रचर्याम् ॥ २८ ॥

रजांसि भूमेः प्रमिमातु कश्चित्तथा तरंगान् जलधेर्बिभर्तुं ।
तथापि मातस्तव दिव्यकेलीगुणान् न संख्यातुमसौ समर्थः ॥ २९ ॥

नमस्त्रिवेदीशिरसि स्थितायै ततोऽपि दौर्लभ्यतमान्वितायै ।
स्वभक्तिमात्रैकसुलभात्मने ते श्रीसच्चिदानन्दपदोन्नतायै ॥ ३० ॥

प्रमोदवनवीथीषु सहजानन्दिनी तु या ।
सा त्वं जनकभूपस्य गृहे मातः समागता ॥ ३१ ॥

भक्तानुग्रहकारिण्याः को जानाति तव क्रियाम् ।
फलानुमेयमात्रत्वात्तथापि खलु गीयते ॥ ३२ ॥

इत्युच्चार्यं शिवः स्तोत्रं सीतायाः परमश्रियः ।
सानन्दाश्रुमिलन्नेत्रं दण्डवन्न्यपतद्भुवि ॥ ३३ ॥

इति श्री मदादिरामायणे ब्रह्मभुशुण्डसंवादे पश्चिमखण्डे भरतलक्ष्मणीये सीताजन्मस्तुतावेकोनविंशोऽध्यायः ॥ १९ ॥

विंशोऽध्यायः

इन्द्र उवाच

मदाधिपत्यं कियदेतदस्ति यस्मिन्नहं नाम तथापि मातः ।
सेयं भवत्याः सुदुरन्तमाया नो चेत्कथं वै प्रभजामि न त्वाम् ॥ १ ॥

ब्रह्मादयो लोकपालाः समग्रास्त्वदङ्घ्रिपङ्केरुहधूलिधूसराः ।
लुठन्ति ते धाम्नि शुभे प्रमुद्वने गवां पुरीषेषु रजःसु चैव ॥ २ ॥

तत्रापि मातः प्रविभासि नित्यं प्रमोदवल्लीवनगह्वरेषु ।
अत्रापि चांशेन ततोऽवतीर्णारामेण साकं रमितुं रमाभिः ॥ ३ ॥

यान्या अपि ब्रजभुवि प्रमदाः सहस्रं श्रीरामचन्द्ररमणोत्सवलब्धकामाः ।
तास्त्वत्प्रसादमधिगम्य न चेदभूषां केदं सुखं हरिविरंचिशिवाद्यलभ्यम् ॥ ४ ॥

व्यक्ता विभाति सततं बहुमूर्तिता ते एकैव यद्रमसि रामरसेन्द्रयुक्ता ।
कुमुद्वने प्रमुदवीथिषु नित्यधाम्नि संकेतकुञ्जमिथिलापुरि कोसलायाम् ॥ ५ ॥

श्रीराधिकासिकिलकीर्तिसुतेतिगीतासीतासिकोसलपुरेमिथिलापुरे च ।
व्यक्तं तदंशसहिता सहजेति चासि श्रीमत्प्रमोदवनवीथिषु पुर्णरूपा ॥ ६ ॥

पूर्णैव सर्वविषयेषु वितीर्णदृष्टिर्नित्यं तथापि रमसे रसिकेन्द्रयुक्ता ।
श्रीमत्प्रमोदवनवीथिषु नित्यमग्ना स्वानन्दसिन्धुलहरीगणसंगमेषु ॥ ७ ॥

साकेतधाम्नि सुभगे सरयूतटान्तरिंगन्तरंगशिशिरोपवनाभिरामे ।
नत्यं स्थितैव जगतोऽन्तकरणाय मातर्भूयोऽपि सम्प्रकटितासि निजांशुभासा ॥ ८ ॥

कल्याणिनी सुखदकल्पलता जनानां स्वाङ्घ्रिप्रसादभवभव्यसमूहभाजाम् ।
भक्तिं तनोषि कृपया खलु रामचन्द्रहस्तग्रहं विदधती भवसिन्धुमध्ये ॥ ९ ॥

न स्यास्त्वमीशि यति दत्तकरावलम्बा भक्तावलेर्विदधतीकुशलानि नित्यम् ।
श्रीमन्महारसिकराजवरोऽपि किं तु कुर्वीत तेषु करुणामरुणाङ्घ्रिपद्मे ॥ १० ॥

स्वरूपभूता तव या प्रकाशशक्तिः परं सा सुविशुद्धसत्त्वा ।
उदीर्णबोधा विरजस्तमस्का न यत्र मायागुणसम्भूतओघः ॥ ११ ॥

अज्ञानिनां ये गमकास्ते न सन्ति लोभादयस्तव देहानुबन्धाः ।
तथापि दर्पं शमयस्यासुराणां धर्मावगुप्तिं कुरुषे च स्वभावात् ॥ १२ ॥

त्वं कालरूपा त्वमसि श्रीः सुधा त्वं माता पिताजगतस्त्वं हि तेषु ।
लीलावतारैर्जयसि क्रीडसि त्वं नानास्वरूपैः सह पत्या रमेत ॥ १३ ॥

त्वं भक्तिरूपाखिलजीवजुष्टा प्रवर्तयस्यार्यपथं कृपाढ्ये ।
वेदार्थसारज्ञबुधावलीभिः प्रायः प्रपन्ना निजरूपलब्धये ॥ १४ ॥

ब्रह्माण्डवर्गे मद्विधाः कोटिशस्ते गायन्ति कीर्तिं विपुलप्रणादम् ।
दृष्ट्वा विभूतिं तव भूरिभाग्ये न कस्य जायेत हि मानभङ्गः ॥ १५ ॥

आविर्भवन्ती भुवने भ्राजसे त्वं शमाय दैतेयजभूभरस्य ।
तथैव पादाम्बुजमाधुरोजुषां भवायवर्गाय सतां मुनीनाम् ॥ १६ ॥

तुभ्यं नमो भगवत्यै पुरुष्यै श्रीजानक्यै श्रीसहजाधिकायै ।
अप्राकृतं सत्वमुपाददाना या क्षेममेतस्य करोषि तस्यै ॥ १७ ॥

यः कृष्णनामा भगवान् यशोऽदागर्भैकरत्नं भविता द्वापरान्ते ।
सोऽपि त्वदंशेन समृद्धकामो भवायवर्गं स्वजुषां संविधाता ॥ १८ ॥

श्रीरामचन्द्रोऽजनि राजमौलेरघुप्रवीराद्दशवक्त्रादिहन्ता ।
सो वै त्वदीयाधरपीयूषधारावशीकृतः क्रोत एव त्वयाम्ब ॥ १९ ॥

स्वच्छन्दलीलावपुषे विशुद्धविज्ञानमूर्त्यै करुणात्मिकायै ।
सर्वात्मिकायै सर्वबीजप्रदायै नमो नमः सर्वभूतात्मने ते ॥ २० ॥

न ज्ञायते ते जनैर्न स्वरूपमस्मादृशैस्तव भाव्यानुबद्धैः ।
तेषां कृपाहेतव एतदेव प्रकाशितं निजरूपं भवत्या ॥ २१ ॥

त्वयानिजानुग्रहभाजनीकृताः सुरेश्वरा मादृशाः कोटिशोऽद्य ।
न चेत्कथं दृश्यरूपास्यमीभिर्निरंजना निर्गुणा त्वं निरीहा ॥ २२ ॥

त्वं जानकी जनकस्यालयेऽद्य त्वं श्रीः परा सहजा त्वं कलेश्वरी ।
स्वयोगशक्त्या बहुधा त्वं विभासि त्वया सनाथा वयमद्धा समस्ताः ॥ २३ ॥

त्वमीश्वरीदेवि चराचरस्य त्वं नः पतीनां पतिरप्रमेया ।
धराधर्मश्रुतिकोविप्रदेवरक्षाकरी जयतात्केवलैव ॥ २४ ॥

लक्ष्मण उवाच

इत्युक्त्वा देवराजस्तां सुरभीस्तननिर्गतैः ।
अभ्यषिञ्चत्सरभसं पयोभिरमृतोपमैः ॥ २५ ॥

ऐरावतकरानीतव्योमगङ्गापयोभरैः ।
मन्दारकुसुमस्तोममकरन्दसुगन्धिभिः ॥ २६ ॥

सौराज्यं चैव साम्राज्यं सर्वैश्वर्यमहापदम् ।
आधिराज्यं महाराज्यं दत्त्वा तस्यैपरश्रिये ॥ २७ ॥

तदीयचरणाम्भोजमकरन्दसुनिर्वृतः ।
कृतार्थं मन्यमानं स्वं निजलोकमुपाव्रजत् ॥ २८ ॥

इति श्रीमदादिरामायणे ब्रह्मभृशुण्डसंवादे पश्चिमखण्डे भरतलक्ष्मणीये सीताजन्मोत्सवे विंशोऽध्यायः ॥ २० ॥

एकविंशोऽध्यायः

अग्निरुवाच

तव नखरुचिद्योत्तैः पारेपरार्द्धरविप्रभा भवति सततं मन्दीभूता प्रमोदवनेश्वरि ।
अथ यदि भवत्कारुण्याब्धेरुतञ्चतिवीचिका शिथिलप्रायप्राणोऽप्यशोभत सूर्यवत् ॥१॥

जननि मयका प्राप्तं तेजस्त्वदीयनखत्विषस्त्रिभुवनमहाराज्यमप्यणुमासते ।
यदिदमखिललोके पूर्णं महः प्रविलोक्यते तदपि तव चेद् दृष्टं रूपं भवत्यणुमात्रकम् ॥२॥

दिनमणिः स्वो मुक्तामाणिक्यहीरमाणिप्रभा हिमकरकलाकान्तिस्तोमः सुवर्णमरीचयः ।
यदिहभुवने दिव्यं भौमं तथा करजं महः सकलमपि तन्मन्ये तावन्मदङ्गकलोद्भवम् ॥३॥

मयि पुनरदस्तेजोमात्रं त्वदीयतनुप्रभा वितरणभव मातः का ते रुचामियतीस्तुतिः ।
परमपुरुषप्राणप्रेयस्तमे भवतीपरं कलयसि कलाकलापं यत्सत्त्वं तदूर्जितमात्मना ॥४॥

इयतिविभवे तासां भासामहो सुमहापदे जयति भवती सीतेमूर्द्धाभिषिक्त पदागमैः ।
तदपि च न ते दृष्टःक्वापिध्रुवंमनसिस्मयो न भवति यतःकाचित्कोटिर्भवत्प्रतियोगिनी॥५॥

प्रमुदविपिनक्रोडक्रीडापरा परपूरुषप्रणयपदवीसीमा सामानुग्रहभाजनम् ।
कलयकलयप्रेम्णा श्रीमत्यदाम्बुजयोः परं विधिहरिहरश्रीशेषेन्द्राद्युपासितमात्रयोः ॥६॥

परमपुरुषार्थस्ते लीलारसात्मकविग्रहेप्रमुदविपिनान्तश्रीः संयोगविप्रयुजात्मिका ।
विधिहरिहराद्यन्तर्निष्ठैः सुरैः समुपासिता प्रकृतिमधुराकारा धारामृतद्रवरूपिणी ॥७॥

रसिकमणिना युक्ता रामेन्दुनाप्रमुदाटवी प्रकटविलसद्रूपा गोपालिकापटुवोशिनी ।
उदयसिकलाकोटिज्योत्स्नामयीमधुराकृतिर्निजरसमहामग्नानन्दोदधेःस्वसखीगणैः ॥८॥

तव हि रमणः प्रोक्तः श्रीरामचन्द्र इति श्रुतौ तदुदयपदंश्रीर्मायाख्या श्रुताभवतीपुनः ।
त्वपि सतिभवेत्सद्बुद्धिश्चेज्जनो न विमुच्यतेनियतमथ तज्जायेतज्ञानंयदीश्वरगोचरा ॥९॥

नमो महाचिदानन्दिनीशक्तिसमेताय विश्वोदयस्थितिसंहरणामितलीलाशालिने महाभागैकरसिकाय प्रमोदवनविलासिने प्रमोदवननिकेतनचमत्कारकस्वानन्दभयनित्यनिरवधिविलासप्रेमास्पदस्वरूपाय रामाय ॥ १० ॥

तुभ्यं च नमस्तदेकविहारिण्यै ब्रह्मानन्दैकप्रतिष्ठायै संयोगसुधातरङ्गिण्यै वियोगहुताशकवलीकृताशेषव्यतिरिक्तभावायै ज्वालामालिन्यै प्रज्वलन्महाभावानलज्वालानुरागरसिकायै गोपश्वर्यै जनकनरेन्द्रतनयायै तत्र श्रीनन्दनदुहित्रे श्रीराजिनीगर्भैकमहांशु मालिमाणीक्यमालायै श्रीसुखितगवेन्द्रनन्दनप्रेमैकभाजनायै श्रीमाङ्गल्यकालालनललितविग्रहायै निरवग्रहानुग्रहपात्रीकृतनिजजनपरिवेष्टितयै परमपुरुषीरूपप्रकटिताशेषपुमर्थधोरिण्यै सुधारसद्रवशीतायै सीतायै ॥ ११ ॥

इत्थमुक्त्वा स्तुतिं तस्यास्त्रिवेदीरूढसत्पदाम् ।
दण्डवन्न्यपतश्चाग्निराधिदैविकरूपधृक् ॥ १२ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे पश्चिमखण्डे सीताजन्मोत्सवे देवस्तुतावेकविंशोऽध्यायः ॥ २१ ॥

द्वाविंशोऽध्यायः

धर्मराज उवाच

नमोऽस्तु ते धर्मवसुन्धरायै धर्मात्मिकायै धर्मफलात्मिकायै ।
समस्तधर्मातिगदैत्यवंशमूलच्छिदे रामपरप्रियायै ॥ १ ॥

समस्तजीवाभ्युदयैकहेतुर्धर्मः परस्त्वं फलदा च तस्य ।
विभासि चेत्तस्य प्रतियोगिनी त्वं तदा भवेददुःखततिर्जनानाम् ॥ २ ॥

समासतो व्यासत एव चापित्वमेव धर्मः श्रुतिलक्षणो यः।
सर्गाय विश्वस्य तनोषि रूपं मर्यादाख्यं यत एवास्य बन्धः॥ ३॥

प्रवाहमार्गोऽप्यखिलस्त्वयीशि प्रतिष्ठितो यत्र भवः पुनः पुनः।
निजेच्छया रामरमे कदाचिदनुग्रहं चेत्कुरुषे विमुक्त्यै॥ ४॥

कर्त्ता क्रिया कर्मगणः समस्तस्त्वयीशि सर्वं करणप्रतिष्ठितम्।
सर्वस्याधिष्ठानमयैकशक्त्या विचिन्त्य भोगेच्छतयास्त्वधोजुषे॥ ५॥

कुतर्कमोहोपहतस्वभावाः कुतः क वा नेति वदन्ति विश्वम्।
अध्यात्मविद्याकुशलाः पुनस्त्वां सर्वस्य मूलं परमामनन्ति॥ ६॥

दण्डं भवे धारयाम्युग्रमद्धा पापात्मसु त्वत्स्वरूपद्रुहेषु।
सोऽहं यदा स्यां परमोशमानी तदा मयि त्वं विदधासिदण्डम्॥ ७॥

लिखाम्यहं सदसच्चेतरेषां भवप्रवाहोपगतात्मनां नृणाम्।
न तु त्वदीयोन्नतपादपद्मपरायणानां पुरुषेश्वराणाम्॥ ८॥

कदाचिदानेतुमभूत्प्रवृत्तो मद्भूतवर्गः प्रमुदाटवीस्थम्।
कंचित्त्वदीयं जनमात्ममोहाद्बहिः कदाचित्कलितात्यधर्मम्॥ ९॥

तथा ह्यम्ब काश्चिदन्त्यजः पापाचार आजन्मकृतमांसाशनो मदिरामत्तो मत्स्यान् घनन् संततत्पिशितैकपरिपोषितनिजकुटुम्बः शिश्नोदरपरायणः केनचित्कर्मणा प्रमोदाटव्यां चातुर्मास्यप्रसङ्गे समागतानां परमहंसानां मुनीनां श्रीरामभक्तानामङ्ग-सङ्गिनं पवमानं सेवमानः स्वपत्न्याऽऽनीतं तदुच्छिष्टं जुषाणः श्रीहरिचरणसरोज-संगितुलसीदलसौरभमम्भः पिबन् कालमतिवाहयामास। ततः कदाचिन्मृगयां गतो वराहान्महिषान्मृगांश्चोद्वेजयमानः केनचित्केसरिणाकालितः प्राणात्यपमगात्। ततस्तमानेतुं यमदूतास्तीक्ष्णदंष्ट्राः करालवदनाः सुदीर्घनासा भयानकाः कल्माष-विग्रहाः पिशंगोग्रोर्ध्वप्ररूढकेशाः कठिनकशाभिघातिन उच्चावचदशनाः प्रेता इव संयमनीं नेतुं प्रवृत्ताः।

तांश्चार्द्धपथ एव तर्जयन्तस्तर्जयन्तइव सधनुर्वाणाम्बुजकराः
पीतवाससो वेत्रधराः श्रीरामराघवेन्द्रस्य दूता मिलिताः।
ते च तैः पराभूतामन्निदेश्या असमर्था इव जाताः।
किमर्थंमसकौवर्णाधमो धर्मविमुख आजन्मयचितपिशितो मृगाशनः
श्रीरामचन्द्र दूतैः श्रीरामपार्श्वमेव नीयत इति
शोचमानास्ततः परावृत्ता बभूवुरागत्य च मामूचुः॥ १०॥

यमदूता ऊचु

भगवन् वैवस्वत श्राद्धेऽव कश्चिन्दन्त्यजः प्रमोदवनस्य पार्श्वे लुब्धको भूत्वा विचरन् केशरिणाहतः। सोऽस्मयात्केरभ्य आच्छिद्य श्रीरामचन्द्रदूतैः श्रीरामपार्श्वमेव मीयत इति महदाश्चर्यं नः संवृतं यतोऽयं दुराचारः पापिष्ठतमोऽन्त्यजः सन्यासिनामूर्द्धरे-

तसां योगीश्वराणामात्मज्ञानामपि दुरापं रामपदं केन कर्मातिशयेन नीयत इति भवानेव वेदेति । तानहं विमृश्य तस्याचिन्त्यगतितामवोचम् ॥ ११ ॥

अहो दूता न ज्ञायत एष भवद्भिः प्रमोदवनैकतिष्ठन्सकलभाग्यवतां मूर्द्धानमधिरूढस्तत्र खलु कदाचिद्रामभक्ताः परमहंसा मुनयोऽभ्युपेतास्तेषामुच्छिष्टमनेन भक्षितमभूत्सारवं चाम्बुश्रीचरणसुगन्धितुलसीतरुमञ्जरीमञ्जुलसोवहं स्फुटमाजन्म पीयूषतमभूत्तदङ्गसङ्गीशीतलमन्दसुगन्धिः पवमानश्चसेवितमस्तेन कर्मणाध्वस्तरजस्तमोमलः सुविशुद्धमानसोऽयं देहात्यये रामदूतैरेव नीयते श्रीकुञ्जाख्यंधाम नातः परमीदृग्विधोऽप्यन्योऽपि भवद्भिरिहानीयतां तत्रैता गाथाः स्मर्तव्याः येषां प्रमोदवनवासजुषां जनानां पापात्मनामपि सुखार्थमतीतमायुः । स्वेच्छाक्रियाश्च हरिनामपराङ्मुखाश्च तान्नैव संस्पृशत दूतवरा मदीयाः ॥ १२ ॥

ये सारवं सलिलमिन्दुसुधावलक्षं श्रीपादसंकलितमञ्जलिभिः पिबन्ति ।
तत्तीरऽभूरुहगतातपगात्रतापास्तान्नैव संस्पृशत दूतवरा मदीयाः ॥ १३ ॥

येषां च कुक्षिगतमन्नमतीव पूतमुच्छिष्टभूतममृतोपममेकसिक्थम् ।
श्रीरामचन्द्रमधुराधरसंगमिष्टं तान्नैव संस्पृशत दूतवरा मदीयाः ॥ १४ ॥

श्रीरामसेवककेरेर्विपुलप्रसादेरुच्छिष्टदत्तममृतोपमिष्टमन्त्रम् ।
ये भक्षयन्ति नितरामपि नीचजातास्तान्नैव संस्मृशत दूतवरामदीया ॥ १५ ॥

ये रामचन्द्रचरणाम्बुजलग्नचारुनित्योल्लसत्तुलसिकारजसाभिषिक्ताः ।
श्रीरामनामगदनैर्वदने पवित्रास्तान्नैव संस्पृशत दूतवरा मदीयाः ॥ १६ ॥

चाण्डालयोनिपतिता अपि येऽन्तकाले श्रीमत्प्रमोदवनभूतुलसीतरूणाम् ।
मूलोद्भवां कर्हिचिन्मृदमुद्वहन्ति तान्नैव संस्पृशत दूतवरा मदीयाः ॥ १७ ॥

ये चित्रकूटरमणाद्रिशिलातलोत्थां मृत्स्नामतीवरुचिरां च समुद्वहन्ति ।
मन्दाकिनीपुलिनधूलिसुधूसराङ्गास्तान्नैव संस्पृशत दूतवरा मदीयाः ॥ १८ ॥

ये कोसलानगरराजपवित्रवीथीधूलीसुपूक्तवपुषो मनुजा म्रियन्ते ।
आजन्म पातककृतोऽपि नृशंसयोऽपि तान्नैव संस्पृथत दूतवरा मदीयाः ॥ १९ ॥

येषां प्रमोदवनवीथिषु काककोलपेर्वादयः कवलयन्ति वपुः कदाचित् ।
पिण्डादिकर्मरहितानपि चातिपापांस्तान्नैव संस्पृशत दूतवरा मदीयाः ॥ २० ॥

ये कोसलापरिसरत्सरयूतरङ्गासम्पृक्तमारुतसमागममात्रपूताः ।
देशेषु तेषु निवसन्ति च मानवा ये तान्नैव संस्पृशत दूतवरा मदीयाः ॥ २१ ॥

इत्येवमुक्तास्ते मदीया अत्युग्रयातनाकारिणोऽपि दूता कोसलापुरोपान्तभूमिषु प्रमोदवनवीथिषु चित्रकूटपरितः प्रदेशेषु सरयूतीरप्रदेशेषु तदुपान्तदेशेषु च मृतान्नैवाधुनाऽऽनयन्ति पक्षिणो मृगान् मशकान् कीटानपि किमुत मानवान् । सोऽयं तवैव महिमा श्रीमज्जनकनरेन्द्रनन्दिन्याः साकेतपुराधीशमहिष्या मिथिलापुरकुमारिकायाः । प्रमोदवननित्यवासिन्याः श्रीप्रमुदाटवीसाम्राज्यसुखितश्रीराघवचन्द्र-

चन्द्रिकायाः श्रीनन्दननन्दिन्याः श्री सहजानन्दिन्यास्त्रिभुवनसुखसमूहंबितरणाय नित्यं मुज्जृम्भतेस्म। ॐ नमस्तस्यै सुवर्णहलाकृष्टजनकनरेन्द्रयज्ञावनीयावनीकरणप्रवणायै रत्नसिंहासनपरिसरपृसृत्वरनवनवीननदीतरङ्गच्छटाचाखीज्यमानाद्भुतविग्रहायै ऊर्मिला माण्डवीश्रुतकीर्तिमण्डितमहामहासनप्रतिष्ठितायै धरणीदेवताकरकमलवितीर्णयैजनक-नरेन्द्रसादरगृहीतायैसुनयनादेवीनयनानन्दिचन्द्रिकायैचलच्चकोरीनयनाञ्जलिनिपीतमुख-चन्द्रसुधायै श्रीसहजानन्दिन्यै ॥ इत्युक्त्वा वैवस्वतो भगवान् मुहुर्मुहुरूपहृतोपढौकनीय-कृतनिजविग्रहः साष्टाङ्गं प्रणम्योपरराम ॥ २२ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे पश्चिमखण्डे भरतलक्ष्मणीये सीताजन्मोपाख्याने यमकृतजानकीस्तुतिर्नाम द्वाविंशोऽध्यायः ॥ २२ ॥

त्रयोविंशोऽध्यायः

निर्ऋतिरुवाच

अभूदधर्मप्रसरः पुरा यत् पापात्मिका सृष्टिरभूत्तराम,
ततोऽपि संरक्षित आत्मनो जनस्तस्मै नमस्तेऽखिलधर्ममूर्तये ॥ १ ॥

कलिः कलंकी कठिनः कलाहरः सर्वात्मना पापरुचिर्जनुष्मताम्।
यन्नामनोदेन विलुप्तवैभवस्तस्मे प्रमोदावनिसुश्रिये नमः ॥ २ ॥

भावाश्चये काममदादयोऽनिशं महोर्जिताश्चेव महाबला नृषु।
त्वकीर्तंतस्ते विफलात्मतामगुस्तस्मै समस्तोद्धरणात्मने नमः ॥ ३ ॥

नमो नमस्ते जनकेन्द्रनन्दिनी प्रमोदकुन्दावनकुञ्जवासिनि।
नमो नमस्ते रसिकेन्द्रसंगते स्फुरन्महाभोगसमूहभोगिनि ॥ ४ ॥

शृङ्गारमूर्तेः स्मर आधिदैवकः श्रीरामचन्द्रस्य मनोविमोहनः।
तदंशमात्रा स्फुटमुद्गतो भवे चक्रे मुनीनां महतां विमोहनम् ॥ ५ ॥

एवं त्वदीयाखिल लोलारसार्थं सम्पुष्टरूपाः क्रोधमोहादिभावाः।
तेषामंशा विषयानन्दयोगाज्जनं निबध्नन्तिनिजेन कर्मणा ॥ ६ ॥

पञ्चेन्द्रियाणां खलु याश्चवृत्तयस्त्वद्भक्तिभाजामकूलतां दधुः।
ता एव लग्ना विषयेषु भूयसिश्वभ्रे लोकं पातयित्वा प्रवृद्धाः ॥ ७ ॥

त्वं शैशवे जानकीति प्रगीता सीतेति चाद्यैः कविभिः सुधीभिः।
तारुण्यमभ्येत्य च मोदिनीति प्रमोदारण्ये सहजानन्दिनीति ॥ ८ ॥

एकैकं ते नाम सर्वेषु वेदेष्वाख्यातं चेदेष लोको गृणाति।
तस्यानुभावाद्याति भावं परं ते प्रेमाख्यं यः कोटिजन्मातिपूतः ॥ ९ ॥

यज्ञैर्दानैस्तपसाचातिमात्रैर्वृतः सुपुण्यातिशयेन कश्चित् ।
त्वत्पादाब्जं भजते देवि सीते तस्य क्षणात्सुलभो रामचन्द्रः ॥ १० ॥

शेषो रविर्वायु पुत्रोऽथ रुद्रः साक्षात्स्वयंभूर्भगवान् विरञ्चिः ।
इन्द्रश्चन्द्रः सनकाद्याश्च सर्वे जानन्ति त्वांमीशि भजन्ति भक्त्या ॥ ११ ॥

ज्ञानात्मको भगवान् श्रीहयास्यस्त्वद्भक्तिमात्रादुत्युलकः सदैव ।
गृणाति त्वां कुम्भजाप प्रसादाद्यत्कुभजस्त्वां भजते नित्यमेव ॥ १२ ॥

स्वायंभुवो मनुराख्यातधर्मः सर्वं ते चाब्रूत राद्धान्तमेकम् ।
त्वद्भक्त्याख्ययेनरामः प्रसन्नो नित्यानन्दं स्वपदं संददाति ॥ १३ ॥

नान्यः पन्था विद्यते स्वात्मलब्ध्यै नान्यो भावो विद्यते चापि लोके ।
नान्यजानं विद्यते सर्ववेदेष्वेकं सीतानाममात्रं विहाय ॥ १४ ॥

ज्ञानं सीतानामतुल्यं न किंचिच्छास्त्रं सीतानामतुल्यं न किंचित् ।
कृत्यं सीतानामतुल्यं न किंचिद्वेधं सीतानामतुल्यं न किंचित् ॥ १५ ॥

एकं शास्त्रं गीयते यत्र सीता एका लोके देवता चापि सीता ।
एको मन्त्रश्चापि सीतेति नाम कर्माप्येकं पूज्यते यत्र सीता ॥ १६ ॥

सर्वे देवा यत्पराः सम्बभूवुः सर्वे यज्ञा यत्पराः सम्बभूवुः ।
सर्वे मार्गा यत्पराः सम्बभूवुः सा त्वं सीतानाम लोके प्रसिद्धा ॥ १७ ॥

सीता नित्या जानकी मोदिनीति प्रेमा क्षेमा सहजानन्दिनीति ।
ध्यायञ्छृण्वन् संगिरन् कीर्तयंश्च जन्तुर्नित्यं मुच्यते सर्वबन्धात् ॥ १८ ॥

पाहि त्राहि त्रिभुवनमिदं स्वाश्रयं नित्यसिद्धे
पाहि त्राहि त्रिभुवनजनान् स्वाश्रयान् देवि सीते ।
पाहि त्राहि स्वरमणकरं रामचन्द्रस्थ लोकं
भूयो भूयो जगति भवती भ्राजतां नित्यमेव ॥ १९ ॥

जगत्स्वामिनी भामिनी कामिनी त्वं जगत्तोषिणी पोषिणी रामयो वा ।
जगद्वन्दिता नन्दिता नन्दिनीत्वं चिरं देवि दीप्यत्स्वभक्तानवन्ती ॥ २० ॥

अये रामचन्द्रप्रिये पूर्णरूपे परा चेन्दिरा त्वत्कटाक्षोप्यरूपा ।
परा भारती भ्राजमानाभवे त्वं प्रिया रामचन्द्रस्य नित्यं रमस्व ॥ २१ ॥

स्वाराज्यसाम्राज्यराज्याधिदेवी स्वानन्दसम्पत्समूहाधिराज्ञी ।
प्रेमानुभावप्रभावप्रसन्नाक्रोडस्व नित्यं जनानां मनस्सु ॥ २२ ॥

चिदानन्दाकारं तव वपुरशेषागमगणैः स्तुतं वन्द्यं ब्रह्मादिभिरतुलभक्तिप्रवणताम् ।
प्रयातैः संसेव्यं गुणरहितया प्रेमकलया चिरं चित्ते मातः स्वयमुपरमेद्येन च भवः ॥२३॥

त्वदीयं लावण्यं निखिलनिगमैरादिकविभिः
प्रगीतं यल्लेशोऽभ्युदयतिशशाङ्कप्रभृतिषु ।
श्रिया जुष्टेषूच्चैः प्रकृतिषु जगद्वस्तुषु यतो
जनानां दृङ्मोहो भवति भवतो विस्मृतिरपि ॥ २४ ॥

अहो भाग्यं नरेन्द्रस्य जनकस्य यदालये ।
प्रमोदवनतोऽभ्येत्य परा लक्ष्मीर्विराजते ॥ २५ ॥

किं भाग्यं मिथिलापुरीगृहजुषां भावोद्धुराणां नृणां
येषां दृष्टिपथं प्रयाति सुषमा लोकोत्तरं तावकी ।
ब्रह्माद्यरपि वा स्मृता क्षणमपि स्वाराज्यलक्ष्मीमदं
दूरीकृत्य तनौ तनोति पुलकान् प्रेमाङ्कुरं चेतसि ॥ २६ ॥

अद्यापि त्वं प्रमुदविपिने क्रीडसि स्वैर्विलासै
स्तेनैवाविर्भवसि वपुषा दृश्यसेऽत्रापि चैवम् ।
कुन्दारण्ये कलयसितरां चैव लीलां विशालां
तेनैवासि श्रुतिषु गदिता व्यापिका ब्रह्मरूपा ॥ २७ ॥

अहो ईदृशी श्रीरिहाभून्नपूर्वं स्फुटं याजनि व्यक्तमेवावतारे ।
पुरे चापि देशे वने वीथिकासु प्रभाते यथा सूर्यरोचिःप्रसंगात् ॥ २८ ॥
तमो विनष्टं सकलंभवेऽस्मिन् प्रफुल्लतां मानसपङ्कजानि ।
सातामगुः सम्प्रति तद्द्रुहां च शिरोऽवतंसान्यपतन् पृथिव्याम् ॥ २९ ॥

आब्रह्मलोकं जगदेतदद्धा प्रसन्नतां यन्नितरां जगाम ।
तेनैव भावानि सुमङ्गलानि महानुभावैर्विदितानि लोके ॥ ३० ॥

जय जय जाह्नवीविमलकीर्तिकदम्बरी जय जय सज्जनावलिमनोज्ञशुभाचरिता ।
जय जय भावनामयसुमङ्गलादिव्यतनो जय जय जानकीत्वममिताद्भुतमाङ्गलिके ॥३१॥

पाहि पाहि जगत्सर्वं रमय स्वामिकं निजम् ।
श्रीरामं चिद्घनानन्दं लीलां विस्तारयामुना ॥ ३२ ॥

यथा पूर्वं रमयसि प्रमोदविपिनान्तरे ।
तथाधुनापि रमय रामचन्द्रं रमापतिम् ॥ ३३ ॥

प्रमोदविपिने यस्ते लीलापरिकरोऽखिलः ।
अधुनापि स एवात्र जायतां मनसो मुदे ॥ ३४ ॥

एवं स्तुत्वा निर्ऋतिर्देवतात्मा तस्या अग्रेन्यपतदण्डवत्सः ।
भूयो भूयस्तनुसंजातरोमा नत्वानत्वाहृदि हर्षं चकार ॥ ३५ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे पश्चिमखण्डे भरतलक्ष्मणीये सीताजन्मोत्सवे निर्ऋतिकृतस्तुतिर्नाम त्रयोविंशोऽध्यायः ॥ २३ ॥

चतुर्विंशोऽध्यायः

वरुण उवाच

कूप्याः सरस्याः सरितां यथायः समुद्रमेव प्रविशन्ति सर्वाः ।
उच्चावचास्त्वयि सर्वेऽपि भावाः प्रविश्यास्तं यान्ति नित्यस्वरूपे ॥ १ ॥

यथा जलोत्थं मलमातृणोति जलस्वरूपं सर्वतः सम्प्लुतं यत् ।
त्वदुद्भवा देवि तथैव माया त्वामावृणीते व्यापिकां ब्रह्मरूपाम् ॥ २ ॥

क्षारांस्तथा मधुराः सत्य आपो न माधुर्यं कचन व्यभिचरन्ति ।
एवं भावाः सदसद्रूपिणोऽपि न ते सत्तां व्यभिचरन्ति कुत्रचित् ॥ ३ ॥

स्वतन्त्रं च ते धाम नित्याव्ययं यत् सत्त्वान्तःस्थं भाति सर्वावतारे ।
तदेवेदं भासते शुद्धसत्त्वमन्तर्हितं तावकं शुद्धरूपम् ॥ ४ ॥

त्वमात्मभूता जगतामन्तरङ्गा माया गुणैर्लक्ष्यसे नो पृथक्त्वम् ।
एकत्वे सद्विदुषां ज्ञानगम्या प्रकाशसे बहिरङ्गेऽपि चार्थे ॥ ५ ॥

विशन्नयोगोलकमन्तरानलः स्वरूपशक्तिं वितरति लोहपिण्डे ।
तथा त्वमन्तः प्रविशन्ती जनानां स्वावेशेन स्फुरमाणं करोषि ॥ ६ ॥

त्वदाविष्टं मानसं सज्जनानां कल्याणैस्त्वद्गुणावर्गैरुपैति ।
त्वया विवर्ज्यं हृदयं दुर्जनानां मायागुणैराक्रमितं भवेच्च ॥ ७ ॥

कारुण्यं ते प्रकृतिः सर्वजीवेष्टाभद्रहृद्भाति सामान्यतोऽपि ।
तथाप्यमी दुखस्थां भजन्ते स्वकर्मभिः सदविद्याविलासाः ॥ ८ ॥

निर्गुणा सगुणा च त्वं निष्क्रिया चापि सक्रिया ।
असौम्या चापि सौम्या त्वमेकैवानेकरूपिणी ॥ ९ ॥

परा त्वं च पश्यन्तिका मध्यमा त्वं त्वं वैखरी सृष्टिरनन्तरूपा ।
त्वं वर्णरूपा पदवाक्यार्थरूपा त्वं तद्वृत्तिः स्फोटरूपा त्वमेका ॥ १०॥

यथा नभो दूरतौ नीलवर्णं शुद्धादर्शे प्रतिबिम्बत्वमेति ।
तथैव त्वं प्रविकर्षेण दृष्टेर्मायागुणेषु प्रतिरूपं करोषि ॥ ११ ॥

त्वद्बोधकं वाक्यमेकं वदन्ति ओंतत्सदित्युच्चकैः सम्प्रयुक्तम् ।
तेनाशेषा वेदयज्ञाः क्रियाद्याः सद्वस्तुवर्गाः प्रभवन्त्यर्थदाने ॥ १२ ॥

जयं तपश्चापि यज्ञादिकाः क्रियाः प्रकुर्वतां फलवाञ्छापराणाम् ।
श्रद्धारूपा त्वं मनस्यभ्युपैषि यथा शेषः सिध्यति कार्यवर्गः ॥ १३ ॥

जीवन्नैवासौ परेतो मनुष्यो यस्त्वद्रूपं क्वापि जानाति नैव ।
यज्ञैर्दानैस्तपोभिरनाशकाद्यैर्यस्यांभक्तिं स्पृहयन्ति प्रवीणाः ॥ १४ ॥

निन्दावादस्तावको यत्र मातः संजायेताज्ञानिनामासुराणाम् ।
ततो गच्छेद्देवि कर्णौ पिधाय तिष्ठेद्वापि स्वामिनं यस्त्वदीयः ॥ १५ ॥

त्वन्नामनादामृतसिन्धुमध्ये कृतावगाहो मनुजः श्रद्धया यः।
तमुग्रसंसारसमुद्र एष सदोत्तरंगोऽपि न संस्पृशव्यहो ॥ १६ ॥

सर्वानु धर्मान् ये परित्यज्य मातस्त्वदङ्घ्रिपोतं संश्रयन्तीह भक्तधा।
ते संसाराब्धि शनकैरुत्तरन्ति ते वै जना ज्ञातशास्त्रैकसाराः ॥ १७ ॥

यावन्न ते जायते सम्प्रपत्तिर्हस्तग्राहं नैव तावत्करोषि।
त्वयाङ्गीकृतमेनं मनुष्यं श्रीरामोऽपि प्रभुरुत्तारयेत्किम् ॥ १८ ॥

विश्वास एवाश्रयिणां ते जनानां संसाराब्धौनावमज्जाम एव।
यज्ज्ञानकीचरणसरोजयुग्मे आत्मोपहारीकृत आदाय सर्वम् ॥ १९ ॥

भारोऽप्य शेषस्त्वयि चेत् समर्पितो यो वैदिको लोकिकश्चाप्यशेषः।
न वै तेषामिह चामुत्र किंचित्कर्तव्यं स्याज्जनकनरेन्द्रकन्ये ॥ २० ॥

नृपोऽप्यसौ भाग्यवतां शिरोमणिर्न ज्ञायते किं कृतवान् पुण्यजातम्।
यदालयालंकरणाय जातया लोकत्रयं शश्वदलंकृतं त्वया ॥ २१ ॥

अहो मातर्वयमिन्द्रादिदेवास्त्वत्सेवकानां नितरामिन्द्रियाणि ;
प्रविश्य नित्यं निभृतं पिबामस्त्वदीयलीलाश्रवणादिकाः सुधाः ॥ २२ ॥

अहो इयं मिथिलानामभूमेरनन्यशोभाकरणी वभूव।
आविर्भूता यत्र रामस्य रामा त्वं वै साक्षात्प्रकृतेः पुरुषात्परा ॥ २३ ॥

कीर्तिस्त्वदीया जनकेन्द्रसम्भवे गङ्गादितीर्थावलिपावनोचिता।
येषामन्तः सम्प्रविष्टा जनानां त आवलीपावनपावनास्युः ॥ २४ ॥

यस्याः कटाक्षस्पृशिमात्रेण लक्ष्मीर्नारायणस्याङ्गगा सम्भूवः।
ब्रह्माणी च ब्रह्मण उमा शिवस्य तां त्वां श्रयामः सर्वसौभाग्यलक्ष्मीम् ॥ २५ ॥

एकैव त्वं बहुधाऽऽकारयुक्ता रामेन्दुना रमसे रासमध्ये।
तां त्वां परां भक्तियुक्ताः प्रपद्य स्वात्मानमत्यर्थकृताश्च यामः ॥ २६ ॥

त्वदाननेन्दुप्रभवज्योत्स्नया वयं यद्वत्प्रमोदाटविगाश्चकोराः।
स्वानन्दसम्पत्तिसमुद्रगमग्नाः शश्वत्कृतार्थाः सुभगे देवि सीते ॥ २७ ॥

अधिप्रमोदाटवि देवि यद्वदद्विरेफमाला सुखिताङ्गसौरभैः।
तथा मदीयेन्द्रियवृत्तिराजी त्वद्भक्ति सम्पृक्तयास्तु मोदिनी ॥ २८ ॥

इदं परं संतते कामयामो वयं निजं स्थानमभ्येत्य मा क्वचित्।
दर्पाचिताः किंचिदभूम यत्त्वत्पराङ्मुखा क्वापि न स्याम सीते ॥ २९ ॥

सहजानन्दिनीं तां त्वां प्रयत्नाः शरणं वयम्।
ब्रह्माण्डानां कोटयोऽपि यस्यां शात्पुरुषाद्वभुः ॥ ३० ॥

इत्युक्त्वा वरुणस्तात दण्डवत्प्रायतद्भुवि।
रोमाञ्चिताशेषतनुर्भक्तिपीयूषपूरितः ॥ ३१ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे पश्चिमखण्डे भरतलक्ष्मणीये सीताजन्मस्तुतौ वरुणस्तुतिर्नाम चतुर्विंशोऽध्यायः ॥ २४ ॥

पञ्चविंशोऽध्यायः

वायव ऊचु

कल्पान्ते यत्कलितसुमहा वृद्धयो वेगवन्तः
सप्ताकूपारगजलभरं क्षोभयामः समंतात् ।
सम्प्रेरयामो नवजलधरान् पुष्करावर्तकान्
सोऽयंमातस्तव बलभरः कीदृशो वर्णनीयः ॥ १ ॥

स्थैर्यं तावत्कनकगिरिणा यत्प्रकाशीकृतं सद्
यस्मिन् वाति प्रलयसमये स्वैरमेवास्तमेति ।
जालान्तस्तेऽप्यणुकणसमास्सन्ति चोड्डीयमानाः
सोंऽयं वेगो न किमपि भवेद्रूपितायां भवत्याम् ॥ २ ॥

पापस्तोमप्रलयकरणी विश्वमेतत्पुनीते
यद्वज्ञानं विषयरहितं जीवमज्ञं चिरेण ।
सा ते शक्तिः पवनमसकौ शब्दिता स्पर्शहेतो
र्यस्याभावाच्छव इति धृता शौचमुक्तं श्मशाने ॥ ३ ॥

गङ्गाद्यास्ते चरणरजस्योद्भूतमाहात्म्यभाजो
यच्चैतन्यं तदपि परमं प्राणनेनैव मर्त्याः ।
इत्थं मातस्तव गुणगणः कीर्त्यमानस्त्रिवेद्यां
सोऽपि श्रुत्या श्रवणपुटयोः कल्मषं निर्धुनीते ॥ ४ ॥

जनकनरेन्द्रनन्दिनि भवत्प्रणयैकवशः ।
सुखितगवेन्द्रधाम्न्युदियाप स ते रमणः ।
अथ रतिखिन्नं सुप्तमदृकं मिथुनं भवतोः
क्वचिदपि बीजयाम सरयूजलसंगमिनः ॥ ५ ॥

नमो युवाभ्यां ताभ्यां यौ सहजासुखितात्मजौ ।
तयोरेका त्वमत्रासि द्वितीयो दशरथालये ॥ ६ ॥

तवावगाहनक्रियावितीर्णतीर्यता मया-
त्यचिन्त्यशक्तिभाविते प्रसज्य साखोदके ।
महाघनष्टचेतनं नितान्तकल्मषाकृतिं
समस्तमुक्तमुच्चकैर्नरं प्रपावयामहे ॥ ७ ॥

मातः सम्प्रति चित्रकूटशिखरिश्रेष्ठप्ररुढान् वयं
सच्छिद्रान्तरवेणुभूरुहवरानापूर्य निष्कामिणः ।
मन्द्रध्वानकणाः सदैव निभृतं गायामहे त्वद्गुणान्
श्रीमन्नन्दनराजिनीसुजनिते येऽधिप्रमोदाटवि ॥ ८ ॥

त्वद्भक्तिवर्जितहृदां भववेदनाभः संतप्तसर्ववपुषां सुमहोष्मरूपैः ।
अन्तः प्रविश्य निभृतं वयमाश्वसन्तः प्रज्वालयाम भवदुःखहुताशराशिम् ॥ ९ ॥

वयमेकोनपञ्चाशन्मातस्त्वच्चरणाब्जयोः ।
रजांस्यादायशिरसा लोकेषु विकिरामहे ॥ १० ॥

भक्त्यर्थं भविकार्थं च भूत्यर्थं भूपमानिनाम् ।
भक्तानामभ्युदयार्थं दाहार्थं चाप्यद्वेषसाम् ॥ ११ ॥

त्वत्कीर्तिपुण्डरीकेभ्यो वयमादाय सौरभम् ।
प्रसादयामः सर्वत्र पूतं येन जगद्भवेत् ॥ १२ ॥

त्वद्विलासाटवीमम्ब वयं तेऽनन्यसेवकाः ।
शोभाविशेषसम्पत्त्यै मन्दमान्दोलयामहे ॥ १३ ॥

सम्प्रेरयामः सरयूतीरभूमीतलस्पृशौ ।
परस्परादत्तहस्तौ युवां वैयत्र तिष्ठथः ॥ १४ ॥

कदा मातस्तीरत्रिदशतरुपुष्पप्रकारिणीं
सरय्वभोवेणीं मधुरमकरन्दद्रववतीम् ।
ददामः पाद्यार्घाचमनमधुपर्कैस्तपनधीः ।
युताः शुद्धात्माने वयमिह युवाभ्यां सविनयम् ॥ १५ ॥

अयोध्याप्रासादोपरि विहरतोरम्ब युवयोः
प्रकामं दम्पत्योर्विहृतिभवसस्वेदवपुषोः ।
वहन्तः सौरभ्यं त्रिभुवनजनोन्मादनकरं
कृतार्था यास्यामः क नु परित्यज्य सविधम् ॥ १६ ॥

वयं वै तिष्ठामः प्रगुणवति तत्रैव सविधे
वने वा हर्म्ये वा यदि यदि युवां यत्र भवथः ।
नमस्यन्तो नित्यं कृतमति युवाभ्यां फलभरै
र्नमद्भिः श्रीखण्डप्रभृतितरुभिर्मूर्द्धवपुषा ॥ १७ ॥

इति निगद्य समीरणपुङ्गवा जनकभूपसुताचरणाब्जयोः ।
जगृहुरुद्गतभक्तिविशेषजप्रणयवन्मनसो विनयोन्मुखाः ॥ १८ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे पश्चिमखण्डे भरतलक्ष्मणीये सीताजन्मोत्सवे वायुकृतस्तुतौ पञ्चविंशोऽध्यायः ॥ २५ ॥

षड्विंशोऽध्यायः

कुबेर उवाच

धनाधिपतिरस्म्यहं जननि भक्तवर्यस्य ते-
सखा हृदिनिरन्तरं किमपि भावयानः स्थितः।
कदा खलु भवत्यहो जनकभूपतेर्मन्दिरे
शुभैरवतरेत्तरां भवति यन्निधीनां फलम् ॥ १ ॥

गायकेभ्यो नर्तकेभ्यस्तथैव च स्तावकेभ्यस्तथा।
स्वस्तिवाचकेभ्यो ददे निधीन् ॥ २ ॥

अथ जन्मोत्सवदिने मातस्तव फलं गताः।
आकरेषु चिरं रुद्धा निधयो मम हस्तगाः ॥ ३ ॥

भवत्या ये पत्यावुदयमुपयायाते दशरथ
क्षितीन्द्रस्यागरे व्यपितपरिशिष्टा विनिहिताः।
निधीन् संस्कुर्वे तानहमधिकमद्य त्वदुदये
जगन्मांगल्यार्थे गुणवति वितीर्यं द्विजगणे ॥ ४ ॥

अद्यास्माकमहोभाग्यं यक्षाणां बहुकालतः।
सुसाध्यस्थापिता विद्याः करिष्यामः फलान्विताः ॥ ५ ॥

ता एव विद्याश्च गुणास्त एव तान्येव रत्नानि धनानि चैव।
येषां खलु स्यादुपयोगयोगः प्रभौ प्रसादोन्मुखतामुपेते ॥ ६ ॥

अद्याहं रिक्तयिष्यामि निधिस्थानान्यशेषतः।
तव जन्मोत्सवं प्राप्य दानैर्मानैश्च बन्धुषु ॥ ७ ॥

पुनस्तव विवाहादिकौतुके समुपस्थिते।
त्वद्भाण्डागाराधिकारिमहद्भूतं भरिष्यति ॥ ८ ॥

न खल्वक्षयवस्तूनां विनाश उपपद्यते।
भृतं भृतं रिच्यतेऽथो रिक्तं रिक्तं पुनर्भरेत् ॥ ९ ॥

सकुटुम्बोऽद्यनृत्येयं गायेयं च गुणांस्तव।
विहरेयं हरेयं स्वं दद्यामद्यामथादपे ॥ १० ॥

त्रिभुवनमङ्गलकारि त्वदीयमिदमद्भुतं।
जन्मनो चेत्कथमव्यक्तं भवति व्यक्तं परं ब्रह्म ॥ ११ ॥

नमो निष्करणोपाधिकरुणारसवारिधे।
तुभ्यं त्रिभुवनोद्भासि कीर्तये ब्रह्ममूर्तये ॥ १२ ॥

नमश्चैतन्यसाक्षिण्यै स्वानन्दवपुषे भृशम्।
स्वप्रकाशस्वरूपायै नीरूपायै सुरूपिणि ॥ १३ ॥

भक्तचेतश्चमत्कारिप्रेमानन्दैक मूर्तये।
भुवनोद्भासिभाग्योद्यभरितायै नमो नमः ॥ १४ ॥

स्वैरलीलाविनोदिन्यै वशिताधिकमूर्तये ।
तत्संगामृतपानेनाप्यतृप्तमनसे नमः ॥ १५ ॥

श्रीभूलीलाद्यनन्तप्रकटगुणगणाख्यानरूपात्मिकायै ।
साक्षाच्छ्रीरामचन्द्रामितरतिसुखितस्वादितस्वान्तरायै ।
भक्तैकानुग्रहार्थंप्रसृमरविमलापूर्णकारुण्यलक्ष्म्यै
जानक्यै जन्मवत्यै खलु भुवि सहजायै परब्रह्मणे ते ॥ १६ ॥

इत्युक्त्वा पदयोः पपातः भगवान् राजाधिराजः प्रभु-
र्भूयोवैश्रवणः स्थितः सविनयं बद्ध्वा तदग्रेञ्जलिम् ।
पद्माद्यैर्निधिभिः कृताञ्जलिपुटैर्जन्मोत्सवे सम्भ्रमं
कर्तुं भूरि समागतैः सहयुतः श्रीमैथिलेन्द्रालये ॥ १७ ॥

एवं सर्वे सुरौद्याः स्तुतिमतुलतरां श्रौतवाक्यैः प्रमाणै
र्निर्मायानन्तकोटिप्रचुरगुणगणाख्यायकैर्भूरि वारम् ।
ब्रह्मेशानौ रमेशं सुरपतिमपि चोच्चैः पुरस्कृत्य याताः
प्रेमानन्दाब्धिवीचिसमुदयनिभृतोद्भूतचित्तावगाहाः ॥ १८ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे पश्चिमखण्डे भरतलक्ष्मणीये सीताजन्मोत्सवे कुबेरकृतस्तुतौ षड्विंशोऽध्यायः ॥ २६ ॥

सप्तविंशोऽध्यायः

लक्ष्मण उवाच

ततो गतेषु देवेषु स्तुत्वा कृत्वा च कौतुकम् ।
जन्मोत्सव निमित्तं तत्तत्रावर्तत मङ्गलम् ॥ १ ॥

प्रावर्तत महोत्साहो जनकक्षितिपालये ।
कन्यारत्ने प्रजातेऽस्मिन् भाविसीतेतिनामनि ॥ २ ॥

विप्रानामन्त्रयांचक्रे विधिज्ञान् जनको नृपः ।
पुत्रवच्चोत्सवं चक्रे जातकर्मपुरःसरम् ॥ ३ ॥

पुरग्रामव्रजादौ सा मिथिला समलंकृता ।
काश्मीरचन्दनरसैः सिक्ताश्च पुरवीथयः ॥ ४ ॥

प्रासादसौधशिखरेषु विचित्रवस्त्रचञ्चत्पताकरुचिरध्वजकेतुमाल्यैः ।
शोभातुलाजान सुमन्दसमीरलौलैर्जन्मोत्सव प्रमुदितौरिव नैम्यपुत्र्याः ॥ ५ ॥

द्वाःसु प्रभूततरकाञ्चनकुम्भयुग्मैः शोभा च काप्यजनि सा प्रतिवेश्म नृणाम् ।
पूर्णामृतोदकसपल्लवपञ्चरत्नदध्यक्षतक्रमुकद्रुर्वसनारिकेलैः ॥ ६ ॥

स्तम्भैः प्रभूतकदलीप्रभवैः सुपत्रैः सत्पत्रपुष्पफलतोरणवस्त्रमाल्यैः ।
आमोदिभिर्मलयजैर्दहनप्रदग्धैः कालागुरुप्रभवधूमघनाघनैश्च ॥ ७ ॥

कस्तूरिकाकहिमबालुकया प्रदिग्धैः श्रीचन्दनाक्तहरिचन्दनपङ्कभारैः ।
[1]अन्योन्यमतिमहोत्सवमुक्ष्यमाणैरभ्युद्गतैश्च जलयन्त्रजचन्दनोदैः ॥ ८ ॥

उत्साहिभिश्चटुलनागरलोकजल्पैः सम्मर्दिभिश्चनटमागधवन्दिसूतैः ।
उद्गायकैश्च गुणवद्भिरतिप्रवीणैर्वीणामृदंगपणवानकतालवाद्यैः ॥ ९ ॥

जन्मोत्सवः स गुणवान् प्रबभूव तस्याः सानन्दनर्तनसगानसतूर्यघोषः ।
यद्वत्पितुर्दशरथस्य सुते प्रजाते कौसल्यया जनविलोचनचारुचन्द्रे ॥ १० ॥

रामे वरे रसिकरत्नशिरोऽवतंसे ब्रह्माक्षरप्रकृतिकालगुणातिगायिनि ।
रामो दिवाकरकुले रघुवीरसंज्ञः सहजा पुनिमिकुले खलु जानकीति ॥ ११ ॥

सेयं श्रीरामचन्द्रप्रतिमगुणवयोनामरूपप्रभाव
प्रेमानन्दस्वभावप्रभुविभुपटिमालं कृतिश्लोकशीला ।
लीलालावण्यलक्ष्मीर्लयनिभृतदृशां योगिनामप्यचिन्त्या
नित्यंसंचिन्तनीया जनकजसहजाशक्तिसीतेति नाम्ना ॥ १२ ॥

अथ जनकनृपः प्रमोदमत्तः प्रणयरसप्लुतधीः सकण्टकाङ्गः ।
अतिसुवितीर्णवान् जनेभ्यो भुवि तदपत्यभवोत्सवागतेभ्यः ॥ १३ ॥

अलंकृताः काञ्चनरत्नमालादुकूलमुक्ताभरणाङ्गरागैः ।
ताम्बूलवल्लीदलवीटिकाभिः संतोषिता भोजनपान[2]शक्त्या ॥ १४ ॥

समुज्जगुः सुस्वरमुक्तकण्ठाः सुगायनाः कोकिलवच्चुकूजुः ।
सुवाद्यशब्दैर्नमृतुः परे जनाः समुद्यदानन्दसमुद्रमग्नाः ॥ १५ ॥

चकार जातकर्मास्या ब्राह्मणैर्विधिपारगैः ।
नालच्छेदावसाने स कृत्तश्मश्रुरशोभत ॥ १६ ॥

स पुत्रिणामग्रगण्यं स्वमात्मानममन्यत ।
योगी जनकराजेन्द्रो दृष्ट्वापत्यमुखाम्बुजम् ॥ १७ ॥

प्रेमानन्दसमुद्रान्तर्मग्नो राजेन्द्रसत्तमः ।
ब्रह्मानन्दं व्यगणयदनर्हं षोडशीं कलाम् ॥ १८ ॥

संतोष्य ब्रह्मक्षत्रादीन् निजबन्धून् नृपोत्तमः ।
तेषां करेभ्य आदाय दूर्वादलफलाक्षतान् ।
अलंकृत्य सुसम्भाष्य चक्रे प्रस्थापयां ततः ॥ १९ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे पश्चिमखण्डे भरतलक्ष्मणीये सीता-जन्मोत्सवे सप्तविंशोऽध्यायः ॥ २७ ॥

---

१. पादेऽस्मिन् न्यूनाक्षरमार्षः ।

२. भक्त्या—मथु० ।

अष्टाविंशोऽध्यायः

भरत उवाच

श्रुत्वेदं श्रीप्रजावत्याः सहजायाश्चिदाकृतेः ।
श्रीरामचन्द्रप्रेयस्याः परमं जन्ममङ्गलम् ॥ १ ॥

प्रेमप्रमादसंयुक्तः संजातो मे महोत्सवः ।
एको मे संशयो जातस्त्वं च तं छेत्तुमर्हसि ॥ २ ॥

भ्रातर्लक्ष्मण भोगीन्द्र श्रीरामप्रियकारक ।
यतीन्द्र जगदाराम पराक्षर चिदाकृते ॥ ३ ॥

सर्वं जानासि तत्त्वं त्वं सीतारामचन्द्रयोः ।
यथा तथा स्वरूपं यदेकधानेकधा स्फुरत् ॥ ४ ॥

भूमेः सुताभवत्सीता हेमलांगलसीतया ।
कथं तस्यां निमिश्चक्रे पुत्रिप्रेमविवर्द्धनम् ॥ ५ ॥

राज्ञी सुनयना चापि कन्यारत्ने परोद्भवे ।
अनन्यतनयप्रेम प्रेयसी निमिभूपतेः ॥ ६ ॥

एतद्बीजं ममाचक्ष्व भ्रातरग्रजनेऽक्षर ।
कौतुकाविष्टचित्तस्य त्वद्भाषितसुधामनु ॥ ७ ॥

लक्ष्मण उवाच

शृणु भ्रातः प्रवक्ष्यामि प्रणयिन् भरत प्रभो ।
सावधानमना भूत्वा यथावदवधारय ॥ ८ ॥

सीतायाः समभूज्जन्म जनकस्य गृहे यथा ।
पूर्वं तु जनकस्यैव गेहेऽभूत्सा लक्ष्मीभिधा ॥ ९ ॥

प्रेयसी रामचन्द्रस्य स्फुरन्ती तडिदाकृतिः ।
देवी सुनयनागर्भरत्नं मूर्तिमती रमा ॥ १० ॥

या पूर्वक्षीरपाथोधेस्तनया विष्णुसंगता ।
रुचेः ख्यात्यां च या जाता ततोऽन्येष्वपि जन्मसु ॥ ११ ॥

द्वारकायां रुक्मिणी या वैकुण्ठे च तथा रमा ।
अविनाभावसम्बन्धात्तेन सर्वत्र योगिनी ॥ १२ ॥

सा तु संजातमात्रैव जनकस्यालये पुरा ।
दिशः प्रकाशयामास दीधितिर्भास्वतो यथा ॥ १३ ॥

चन्द्रानना चकोराक्षी गण्डमण्डलभास्वरा ।
विशालभालसंशोभिभूरिभाग्यार्णवोपमा ॥ १४ ॥

शरदिन्दोश्चन्द्रिकेव सुधास्नपितविग्रहा ।
चाम्पेयनिर्जयितनुः कल्पवल्लीव चेतना ॥ १५ ॥

सद्यः प्रसूतमात्रापि प्रभामण्डलमण्डिता ।
कुमुद्वतीनाथकोटिसुप्रकाशस्मितानना ॥ १६ ॥

सर्वाश्चर्यकरी साक्षात्कल्याणगुणभूषिता ।
तस्या मुखेन्दुं नेत्राभ्यां पिबन् जनकभूपतिः ॥ १७ ॥

योगानन्दाधिकं योगी परानन्दमवाप सः ।
तस्मिन्नेव क्षणे तत्र सुवर्णहलकर्षिते ॥ १८ ॥

यज्ञवेदीस्थले सद्यः प्रादुर्भूता वराङ्गना ।
त्रैलोक्यातीतलावण्या रूपमाहात्म्यमञ्जुला ॥ १९ ॥

यथोक्तसुसमुद्भासिरत्नसिंहासनस्थिता ।
सरिद्रूपसखीवृन्दस्तूयमानगुणोत्करा ॥ २० ॥

चामराभ्यां वीज्यमाना महासिंहासनोपरि ।
चन्द्रमण्डलसंदोहसुवर्णच्छत्रशोभिता ॥ २१ ॥

स्वाकारसदृशाकाररूपलावण्यमूर्तिभिः ।
तिसृभिर्वरयोवाभिः सौभाग्यासनमण्डिता ॥ २२ ॥

मूर्तिमद्भिश्च निगमैः सशब्दं समुपासिता ।
तन्त्रैश्चतुःषष्टिसंख्यैः स्तूयमाना समंततः ॥ २३ ॥

अनन्तकोटिमन्त्रैश्च तात्पर्येण सुसंस्तुता ।
ब्रह्मविष्णुशिवाद्यैश्च दैवतैः समुपासिता ॥ २४ ॥

स्मथमानमुखाम्भोजमहासौरभ्यसंगतैः ।
मत्तभ्रमरसंदोहैर्दूरतः पर्युपासिता ॥ २५ ॥

मूर्तिमद्भिश्च निधिभिर्महापद्मादिभिश्चिरम् ।
अन्वीयमाना सुमुखी सुदती च सुलोचना ॥ २६ ॥

कर्पूरसौरभोद्गारिताम्बूलोदलचर्विणी ।
श्यामा षोडशवर्षीया पूर्णतारुण्यभूषिता ॥ २७ ॥

नारीभिः पन्नगीभिश्च देवीभिश्च समंततः ।
सिद्धगन्धर्वपत्नीभिर्नागराजसुतादिभिः ॥ २८ ॥

अनन्तकोटिसंख्याभिः शक्तिभिः समुपासिता ।
महासाम्राज्यसम्पद्भिरविकम्पमुपासिता ॥ २९ ॥

अनेककोटिब्रह्माण्डप्रसन्नश्रीभराश्रिता ।
एका नित्यापि बहुधा जायमानेव लक्षिता ॥ ३० ॥

तां पूर्वोक्तप्रकारेण राजा समुपलभ्य तु ।
अनिनाय गृहे स्वस्य महिष्यै तां समर्पितुम् ॥ ३१ ॥

ततः सम्पश्यतां तेषां देवगन्धर्वरक्षसाम् ।
मनुष्याणां मुनीनां च बभूवातीव कौतुकम् ॥ ३२ ॥

पूर्वं जाता तु सा तस्यां सद्य एव व्यलीयत ।
सा चासीदद्य संजाता शिशुरूपा मनोहरा ॥ ३३ ॥

एतच्चरित्रमतुलं निरीक्ष्य जनको नृपः ।
अतीव विस्मयाविष्टो बभूव सुमहामतिः ॥ ३४ ॥

जनक उवाच

किमिदं खलु संजातं दैवतं चरितं महत् ।
उभे अपि परे दृष्टे रूपसारविभूषिते ॥ ३५ ॥

अन्यूनानतिरिक्तश्रीसम्भावितवपुर्लते ।
एका विवेश चैतस्यां साप्येषा समभूच्छिशुः ॥ ३६ ॥

अहो अत्यद्भुतं दृष्ट्वा मनो मे विस्मयाकुलम् ।
चिरं समाधिनाप्येनामहं ज्ञातुं न पारये ॥ ३७ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे पश्चिमखण्डे भरतलक्ष्मणीये सीताजन्मोत्सवे ऽष्टाविंशोऽध्यायः ॥ २८ ॥

एकोनत्रिंशोऽध्यायः

लक्ष्मण उवाच

एवं चिन्तयतस्तस्य मुनीन्द्रः समुपागतः ।
शुकः सर्वार्थतत्त्वज्ञो वैयासकिरुदारधीः ॥ १ ॥

तमपृच्छत्ततो राजा तद्देवचरितं स्मरन् ।
प्रजातामनुजातायां लीनां तस्याश्च शैशवम् ।
स्मारं स्मारं बभूवासौ विमूढ इव योगवित् ॥ २ ॥

राजोवाच

जाता मे परमा कन्या देवतात्मा कलानिधिः ।
तस्याः प्रकाशमात्रेण निस्तमस्कमभूज्जगत् ॥ ३ ॥

नूनमेषा स्वयं लक्ष्मीर्या विष्णोरुरसि स्थिता ।
किंचित्कारणमासाद्यप्राकट्यं समुपागता ॥ ४ ॥

अहो अत्यद्भुतं चास्या रूपं तत्सुमनोहरम् ।
पायं पायं दृशा ब्रह्मन्नहं मग्नः सुखोदधौ ॥ ५ ॥

ब्रह्मानन्दादपि महदन्वभूवमहं सुखम् ।
अथान्या देवता जाता तस्मिन्नेव क्षणे मुने ॥ ६ ॥

सुवर्णहलकृष्टायां यज्ञवेदीमहाभुवि ।
तरुणी तरुणेन्द्राभा साक्षाच्छ्रीरिव रूपिणी ॥ ७ ॥

सर्वावयवशोभाढ्या तेजःसद्मानुभाविनी ।
उत्फुल्लपङ्कजमुखी कोटिचन्द्रप्रभातनुः ॥ ८ ॥

तां गृहीत्वाहमायातो ब्रह्मघोषपुरःसरम् ।
तडिच्चन्द्रार्कतुल्याभां यावद्राज्ञै समर्पये ॥ ९ ॥

तावत् सम्पश्यतां नृणां तत्क्षणेनैव पूर्वजा ।
स्वयं भुव्यनुजातायां समाविश्य व्यलीपत ॥ १० ॥

रुदन्ती भूमिगा कन्या सा चासीदद्य जातवत् ।
अजातनालच्छेदा सा जातकाख्येन कर्मणा ॥ ११ ॥

महान्तमुत्सवं कृत्वा पुत्रवत् संस्कृता मया ।
तत्किमेतन्मुनिश्रेष्ठ संजातं चरितं तपोः ॥
पूर्वजानुजयोर्मातृगर्भरत्नस्वयंभुवोः ॥ १२ ॥

एतच्छ्रुत्वा वचो राज्ञो योगीन्द्रः शुकनामकः ।
उवाच जनकं भूपं तपोर्याथात्म्यसारवित् ॥ १३ ॥

श्रीशुक उवाच

शृणु राजन् प्रवक्ष्यामि याथात्म्यं कन्ययोस्तयोः ।
एकैव सा महालक्ष्मीर्या परा परमा कला ॥ १४ ॥

अविनाभावसम्बन्धान्नित्यमेव प्रतिष्ठिता ।
हरौ लीलारसानन्दसर्वसाम्राज्यभाजने ॥ १५ ॥

सा तु पूर्णस्वरूपेण प्रमोदवनमध्यगा ।
पूर्णं नित्यं परं ब्रह्म रसरूपं निजं वपुः ॥ १६ ॥

रामाख्यं चिद्घनानन्दं रमपत्येय भायिनी ।
नित्यप्रेममयैः केलिरसैः कौतुककारिभिः ॥ १७ ॥

क्रीडनैश्चरितैः सर्वकल्याणगुणयोगिभिः ।
तत्र प्रमोदविपिनं तस्याः स्थानं मनोरमम् ॥ १८ ॥

रामवैकुण्ठमुद्दिष्टं सीतावैकुण्ठमद्भुतम् ।
कालाक्षरातिगं मायागुणसंदोहदुर्गमम् ॥ १९ ॥

अप्राकृतं चिदाकारं प्रेमानन्दरसात्मकम् ।
नायिका तस्य स्थानस्य नाम्ना श्रीसहजेश्वरी ॥ २० ॥

वशीकृत्य निजैर्नित्यैः प्रेमानन्दमयैर्गुणैः ।
नित्यं स्वरमणं रामं रमते सा निरन्तरम् ॥ २१ ॥

यथा रामस्तथैवेयं तथा रामो यथा ह्यसौ ।
उभयोर्नैव मेदोऽस्ति विदुषां तत्त्वदर्शिनाम् ॥ २२ ॥

मुमुक्षूणां च मुक्तानां साधकानां परायणम् ।
युगलं नाम तद्ब्रह्म परात्परमुदाहृतम् ॥ २३ ॥

स भूमा पुरुषोऽस्यांशः किमुतान्ये सुरादयः ।
सर्वावतारमूलं तत्कालमायागुणातिगम् ॥ २४ ॥

अस्यैव कीर्तिताः सर्वे आविर्भावा अनेकधा ।
देवताः पितरश्चैव सिद्धविद्याधरोरगाः ॥ २५ ॥

मनुष्याः पशवश्चान्ये समूद्भूता इतोंऽशतः ।
किं बहूक्तेन सर्वोऽपि प्रपञ्चो निमिभूपते ॥ २६ ॥

इत एवोदयं प्राप्तस्तथैवास्मिन् प्रलीयते ।
अस्मिंश्च तिष्ठते नित्यं कोटिब्रह्माण्डरूपतः ॥ २७ ॥

समासव्यासयोगेन समस्तो निगमः स्फुटम् ।
अमुमेव सदा गायत्यन्तस्तत्त्वसमाख्यया ॥ २८ ॥

उद्गायोद्गाय बहुधा नेतिनेतीत्युवाच ह ।
लक्ष्मीरस्याः प्रभूतोंऽशो या वैकुण्ठे विराजते ॥ २९ ॥

श्रीमन्नारायणयुता सर्वभक्तेष्टदायिनी ।
नारायणोऽपि रामांशः शङ्खचक्रगदाब्जभृत् ॥ ३० ॥

चतुर्भुजस्वरूपेण वैकुण्ठे च प्रकाशते ।
सीतारामौ नित्यलीलौ रमेते श्रीप्रमुद्वने ॥ ३१ ॥

प्रमोदवनमभ्येत्य महावैकुण्ठमुत्तमम् ।
पूर्णरूपे तिरोभूय लीलाः सम्भावयिष्यति ॥ ३२ ॥

तदर्थं पूर्णरूपेण प्रादुर्भूतेयमद्भुता ।
प्रमोदवनलीलानां सिद्धये परमा रमा ॥ ३३ ॥

अवतारमयी लीला साकेतनगरे पृथक् ।
मूलरूपमयी लीला प्रमोदवनमध्यगा ॥ ३४ ॥

अयं भेदः समुद्दिष्टो रूपद्वयविभावने ।
प्रमोदविपने चैषा नित्यमेव हि क्रीडति ।
श्रीराजिन्यां गोपवध्वां गोपाच्छ्रीनन्दनाभिधात् ॥ ३५ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे पश्चिमखण्डे भरतलक्ष्मणोये सीताजन्मोत्सवे एकोनत्रिंशोऽध्यायः ॥ २९ ॥

त्रिंशोऽध्यायः

जनक उवाच

प्रमोदवनवैकुण्ठं यदुद्दिष्टं त्वया प्रभो ।
तन्मे वद विशेषेण कीदृग्रूपं परं पदम् ॥ १ ॥

श्रीशुक उवाच

कथयामि तव प्राज्ञ निमिवंशविभूषण ।
प्रमोदवनरूपं यद् रामवैकुण्ठमुच्यते ॥ २ ॥

अतीत्य कालमायादीनक्षरानन्दमध्यगम् ।
प्रेमानन्दमयं धाम नित्यस्थानं मनोहरम् ॥ ३ ॥

चिदानन्दौ शवलितौ तदाकारसमर्पकौ ।
अतः साकारमुद्दिष्टं रामवैकुण्ठमद्भुतम् ॥ ४ ॥

सर्वर्तुसंफुल्ललसत्कुसुमामोदकाननम् ।
आमोदमत्तभ्रमरराजीगुञ्जितमञ्जुलम् ॥ ५ ॥

कल्पद्रुमसमानेकद्रुमवाटीमनोहरम् ।
रत्नमाणिक्यसोपानवापिकाकूलशोभितम् ॥ ६ ॥

मायादिदोषासम्बन्धि महाशीतलमारुतम् ।
रसालमञ्जरीवृन्दपरागभरमेदुरम् ॥ ७ ॥

नवपल्लवशोभाढ्यविटपारुढकोकिलम् ।
हरिन्मणिमयाकाररामणीयकपत्रकम् ॥ ८ ॥

मकरन्दामृतस्राविप्रसूनभरसंकुलैः ।
सपल्लवोत्तुङ्गशाखावलम्बिबहुवल्लिभिः ॥ ९ ॥

पीयूषपाकमधुरैः फलैरानमुमूर्तिभिः ।
वृक्षवंहुविधैश्छन्नं बहुकुञ्जमनोहरम् ॥ १० ॥

माधुरीवल्लरीछन्नतुङ्गभूरुहशोभितम् ।
लतामन्दिरविश्रान्तनिकूजच्छुकसारिकम् ॥ ११ ॥

नृत्यन्मयूरनिवहं तापिच्छतरुशोभितम् ।
लवंगलतिकाच्छन्नकुञ्जव्यापिमहीरुहम् ॥ १२ ॥

कचित्कनकपत्राढ्यैः कचिन्नीलदलान्वितैः ।
कचित्कचिच्च सिन्दूररागरञ्जितपत्रकैः ॥ १३ ॥

कचिन्नीलदलैः कापि यावकोद्भासिपत्रकैः ।
कचिद्विचित्रपत्रैश्च भूरुहैः परिशोभितम् ॥ १४ ॥

वसन्तचित्रकारेण चित्रशालीकृतं यथा ।
अनेकरत्नकूलाभिः सरसीभिर्विराजितम् ॥ १५ ॥

फुल्लत्कमलिनीवृन्दजुष्टानेकसरोजलम् ।
कमलोत्पलसंसर्गिसौरभाञ्चितमारुतम् ॥ १६ ॥

अनेकवनसंशोभिरामकेलीरसास्पदम् ।
प्रमोदमानलोकाढ्यं प्रमोदवनमुत्तमम् ॥ १७ ॥

उज्जागरं प्रभाभोरेः सूर्येन्दुकोटिभासुरम् ।
यत्र सौगन्धिको नाम पर्वतः सुमहोन्नतः ॥ १८ ॥

सुगन्धजलसंस्रावनिर्झरान्वितकन्दरः ।
सुगन्धभूरुहवृतः सुगन्धलतिकाञ्चितः ॥ १९ ॥

सुगन्धधातुप्रसवः सुगन्धरजसाञ्चितः ।
सुगन्धयाषाणतलनिषादिविहगव्रजः ॥ २० ॥

यत्र चोद्भाति सततं नाम्ना रत्नगिरिर्गिरिः ।
मणिमाणिक्यरत्नौद्यमयूखगणसंवृतैः ॥ २१ ॥

शिखरैर्गगनस्पृग्भिर्व्याप्नुवन् सकला दिशः ।
अधित्यकावनतरुनिषादिपिकनादितः ॥ २२ ॥

श्रीरामकेलीभवनकन्दराशतशोभितः ।
उपत्यकाशिलावेदिनिषण्णहरिणीकुलः ॥ २३ ॥

सदावर्तितरोमन्थमत्तशंवरशोभितः ।
भाभिरुज्जागरीकुर्वन् गगनं दीर्घसानुनः ॥ २४ ॥

यत्र प्रवहते नित्यं विलोचनजला नदी ।
रत्नबद्धोभयतटविश्रान्तमुनिसत्तमा ॥ २५ ॥

गोपिकाकुचकाश्मीरकर्पूरमलयद्रवैः ।
कस्तूरीचन्दनरसैः क्षोदैः कालागुरूद्भवैः ॥ २६ ॥

विचित्रितजला नित्यं सुगन्धिततरंगवाट् ।
राजहंसकुलच्छन्ना कलहंसकलक्वणा ॥ २७ ॥

मत्तकारण्डवकुलचक्रवाकचयान्विता ।
शीतलाम्भःसुधासारा शीतलानिलसंगिनी ॥ २८ ॥

पाविनी सर्वलोकानां गङ्गातोऽप्यधिका गुणैः ।
वसिष्ठमुनिसंसेव्या वासिष्ठीति श्रुता भुवि ॥ २९ ॥

रामगङ्गा चमत्कारिनीरा प्रेमस्वरूपिणी ।
तमसाकलिता नित्यं द्विर्वहा द्विप्रवाहिका ॥ ३० ॥

पावयन्ती नाममात्रात्सहस्रयोजनोपरि ।
तरंगसंसर्गिमरुत्पूतजानपदावलिः ॥ ३१ ॥

यत्र चोत्सवदं नित्यं विशालं कामिकावनम् ।
संदीपनं नाम वनं यस्यान्तः सुमनोहरम् ॥ ३२ ॥

सर्वर्तुद्रुमशोभाढ्यं नानाघोषमनोहरम् ।
मन्थानशब्दमधुरप्रभूताभीरपल्लिकम् ॥ ३३ ॥

यत्र गावो दीर्घशृङ्गाश्चन्द्रवर्णा मनोहराः ।
ऊधोभारनताः साक्षात्कामधेनव उद्धुराः ॥ ३४ ॥

यासां खुररजोभारैर्भूषिता व्रजमेदिनी ।
क्रीडनार्हा रमेशस्य सुखिताभीरवासभूः ॥ ३५ ॥

यत्र श्रीसुखितग्रामः सदा लक्ष्मीनिवासभूः ।
श्रीनन्दनमहागोपप्रासादवरसुन्दरः ॥ ३६ ॥

श्रीराजिन्या च तत्पत्न्या साक्षादभिनवश्रिया ।
मात्रा श्रीसहजेशान्या शोभमानो दिवानिशम् ॥ ३७ ॥

कूर्दद्वत्सतरव्रातः कूर्दद्वत्सतरीयुतः ।
नन्दीश्वरसमानेकमहावृषभशोभितः ॥ ३८ ॥

यत्र क्रीडापरो रामो लक्ष्मणेन सदा हरिः ।
सच्चिदानन्दरूपोऽसौ परब्रह्मरसाकृतिः ॥ ३९ ॥

विश्वामित्रनिदेशेन चारयन् गा वने वने ।
आर्भारकन्यकाचक्रचन्द्रचारुचकोरदृक् ॥ ४० ॥

नित्यलीलारसानन्दी नित्यरासरसोत्कटः ।
शारदैश्चैव वासन्तैर्विहारैर्विहरन् सदा ॥ ४१ ॥

महाश्रीसद्व्रजानन्दारतिकेलीपरायणः ।
कोटिकल्पावसानेऽपि अविश्रान्तमहारतिः ॥ ४२ ॥

सहजानन्दिनी यत्र क्रीडति स्ववनेऽनिशम् ।
युक्ता नर्मसखीवृन्दै श्रीनन्दन सुनन्दिनी ॥ ४३ ॥

माङ्गल्याभाग्यविभवौ यत्र दिव्यकिशोरकौ ।
तावेव नित्यं रेमाते रमणैः प्राकृतैरिव ॥ ३४ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे पश्चिमखण्डे भरतलक्ष्मणीये सीताजन्मोत्सवे त्रिंशोऽध्यायः ॥ ३० ॥

एकत्रिंशोऽध्यायः

जनक उवाच

अथाख्याहि मम ब्रह्मन् सरय्वाः सम्भवं शुभम् ।
कथमेषा समुत्पन्ना केनचेति वद प्रभो ॥ १ ॥

कथं विलोचनजला नामास्याः प्रवदन्ति च ।
किं स्वरूपेयमुद्दिष्टा सरयूः सरितां वरा ॥ २ ॥

श्रीशुक उवाच

पुरा भूम्नः पुरुषस्याग्रतोऽभूल्लोकालोकात्यरतऽ संस्थितस्य ।
जिज्ञासूनां ब्रह्मविदां मुनीनां तत्त्वार्थस्यागोचरत्वात्प्रवादः ॥ ३ ॥

कर्मेति केऽपि जगदुःखलु कालमन्ये ।
केऽपि स्वभावमपि कोऽपि तथैव दैवम् ।
केऽप्यक्षरं प्रकृतिपूरुषभेदभिन्नं केऽप्यूचुरन्दुतचरित्रकरीं तदिच्छाम् ॥ ४ ॥

केचिन्नारायणं पूर्णमूचुः सत्त्वैकविग्रहम् ।
परे शिवं शंकराख्यं केचिदन्ये स्वयंभुवम् ॥ ५ ॥

अपरे तद्रूपमयं सर्वोपादानरूपिणम् ।
महापुरुषमभ्यूचुर्वेदतात्पर्यगोचरम् ॥ ६ ॥

आचरव्युः केऽपि वेदार्थं संक्षेपव्यासयोगतः ।
इत्थं तेषां प्रवादेषु जायमानेषु संसदि ॥ ७ ॥

सनत्कुमारो भगवानाजगाम महामुनिः ।
बालवेषधरो योगी सर्ववेदार्थसारवित् ।
तमूचुर्मुनयः सर्वे संदिहानाः परस्परम् ॥ ८ ॥

ऋषय ऊचु

ब्रह्मणो मानसाः पुत्रास्तेषां त्वं प्रवरो मतः।
तपसा विद्यया चैव शीलेन च मनीषया ॥ ९ ॥

ज्ञानेन कर्मणा चैव भक्त्या च श्रद्धया तथा।
बालोऽपि बहुकल्पज्ञस्त्वमनूचानपुङ्गवः ॥ १० ॥

आम्नायसकलोपेतः करामलकवत्स्फुटः।
तत्र त्वया किं निर्णीतं समासव्यासयोगतः ॥ ११ ॥

वदैकं दैवतं लोके यत्र वेदः प्रवर्तकः।
नृणां मुनीनां देवानां वरेण्यानां विशेषतः ॥ १२ ॥

किमेकं सेवनीयं च जप्यं स्मर्तव्यमेव च।
सिद्धान्तितं यद्भवता तन्नो ब्रूहि सुनिश्चितम् ॥ १३ ॥

इति तेषां मुनीन्द्राणां श्रुत्वा सुविमलं वचः।
सनत्कुमारो भगवान् प्रत्युवाच मुदान्वितः ॥ १४ ॥

श्रीसनत्कुमार उवाच

साधु पृष्टं महाभागा मुनयो लोकमङ्गलाः।
यतो वितत आम्नाये ज्ञातुमेतन्न शक्यते ॥ १५ ॥

यदेकं परमं सारं तद्वो वक्ष्ये यथामति।
रामेति द्व्यक्षरो मन्त्रः सर्वकल्याणदायकः ॥ १६ ॥

वेदानां सारभूतोऽसौ स्वात्मचैतन्यदीपकः।
उद्गीथः सर्ववेदानां सर्वोपनिषदां निधिः ॥ १७ ॥

दहनः सर्वपापानां पावकार्चिर्यथैधसाम्।
पावनः सर्वतीर्थानां भावनः शुभकर्मणाम् ॥ १८ ॥

दूषणो दुरदृष्टानां भूषणो जनचेतसाम्।
जननः श्रुतिसौख्यानां मोक्षाणां च प्रदायकः ॥ १९ ॥

वरेण्यं सर्वधर्माणां रामनामानुकीर्तनम्।
कोट्यश्वमेधफलदं सद्यः प्रत्ययदायकम् ॥ २० ॥

आसुरैः पाप्मभिः कामक्रोधाद्यैरुपतापिते।
सतां चित्ते रामनाम सर्वशान्त्यै सुधोपनम् ॥ २१ ॥

एतत्सारं विनिर्दिष्टं वैदिकीनां गिरा मयि।
स्वाद्यंहृद्यं च रस्यं च गेयं पेयं च साधुभिः।
मायामोहमदादीनां शमनं समनन्तरम् ॥ २२ ॥

श्रीरामनाम्ना सदृशं न तीर्थं श्रीरामनाम्ना सदृशं न पुण्यम् ।
श्रीरामनाम्ना सदृशं न कर्म श्रीरामनाम्ना सदृशं तपो न ॥ २३ ॥

श्रीरामनाम्ना सदृशो न योगः श्रीरामनाम्ना सदृशो न भोगः ।
श्रीरामनाम्ना सदृशो न मोदः श्रीरामनाम्ना सदृशो न मोक्षः ॥ २४ ॥

श्रीरामनाम्ना सदृशी न भक्तिः श्रीरामनाम्ना सदृशी न शक्तिः ।
श्रीरामनाम्ना सदृशी न सेवा श्रीरामनाम्ना सदृशी न चार्चा ॥ २५ ॥

इदमेकं हि सर्वस्वं भक्तानां योगिनां सताम् ।
कर्मिणां ज्ञानिनां चैव तथोपास्तिमतां नृणाम् ॥ २६ ॥

यज्ञे दाने तथा तीर्थे स्वाध्याये च तपःसु च ।
रामनाम गृणन् सर्वं साङ्गं कुर्याद्विचक्षणः ॥ २७ ॥

सकलाङ्गैः साधितमप्यनल्पद्रव्यदक्षिणम् ।
अरामनामकं कर्म व्यङ्गमेव न संशयः ॥ २८ ॥

निरङ्गमल्पहृतकमत्यल्पद्रव्यदक्षिणम् ।
रामनामयुतं कर्म साङ्गमेव न संशयः ॥ २९ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे पश्चिमखण्डे भरतलक्ष्मणीये सीताजन्मोत्सवे एकत्रिंशोऽध्यायः ॥ ३१ ॥

द्वात्रिंशोऽध्यायः

ऋषय उचुः

रामस्य यत्परं तत्त्वं वेदेभ्यः सारमुद्धृतम् ।
तन्नो ब्रूहिमहायोगिन् यच्छ्रुतं विश्वमङ्गलम् ॥ १ ॥

किं रूपं किं च तद्धाम क्व चाविर्भाव ईरितः ।
एतन्नः श्रद्दधानानां ब्रूहि ब्रह्मन्नशेषतः ॥ २ ॥

श्रीसनत्कुमार उवाच

श्रूयतां तत्परं तत्त्वं रामस्य परमात्मनः ।
यत्सारं सर्ववेदानां शास्त्राणं च विशेषतः ॥ ३ ॥

चिदानन्दमयं रूपं महः प्रावृड्घनच्छवि ।
वामाङ्गे सहजानन्दाविद्युल्लेखासमन्वितम् ॥ ४ ॥

सौनासीरमणिप्रख्यं प्रकाशं तिमिरोपमम् ।
फुल्लारविन्दपत्राक्षं करुणामृतवर्षणम् ॥ ५ ॥

पीताम्बरप्रभातप्ततपनीयसुनिर्मलम् ।
गण्डमण्डलसंक्रान्तस्फुरन्मकरकुण्डलम् ॥ ६ ॥

श्रीवत्साङ्कधरोरस्कं महाकौस्तुभभूषितम् ।
रत्नाङ्गदलसद्बाहुस्वर्णकङ्कणभूषितम् ॥ ७ ॥

विशालवनमालाद्यं रत्नग्रैवेयकान्वितम् ।
चूडामणिश्शिरोभासि नासामौक्तिकभूषितम् ॥ ८ ॥

स्वर्णसूत्रसमालम्बिकिङ्किणीमध्यभूषितम् ।
गम्भीरनाभिललितं त्रिवलीपिहितोदरम् ॥ ९ ॥

रोमराजीसमुद्भासि नीलरत्नच्छविच्छटम् ।
निर्णिक्तमुकुराकारकपोलालकसंकुलम् ॥ १० ॥

कदम्बकिंजल्कनिभं कौशेयपरिवीतिमत् ।
षट्कपद्मासनं देवं तत्त्वमुद्राधरं हृदि ॥ ११ ॥

कटाक्षैर्लोलनयनं सुवृत्तास्यं सुनिश्चलम् ।
योगमुद्राधरं वीरमुरोविष्टम्भभूषितम् ॥ १२ ॥

रत्नसिंहासनासीनं भक्तानामभयंकरम् ।
योगिनां ध्यानपथगमगम्यं च कुयोगिनाम् ॥ १३ ॥

परेपरार्द्धकन्दर्पलावण्यामृतसागरम् ।
उज्जागरप्रभावृन्दमुखेन्दुसुविराजितम् ॥ १४ ॥

मन्दस्मितरुचिज्योत्स्नाजालद्योतितदिक्तटम् ।
कमलायाङ्गवीक्षैकसंसेव्यसुभगाकृतिम् ॥ १५ ॥

ऊर्ध्वरेखादिसच्चिह्नचरणोद्भासितासनम् ।
दीनदारिद्रशमनं साक्षात्कल्पद्रुमोपमम् ॥ १६ ॥

एकं निरसिकं शुद्धं कालमापाद्यगोचरम् ।
एवं रूपं महो नीलं महामहिमवैभवम् ।
यो ध्यायेच्चित्तकमले स स्वयं परमेश्वरः ॥ १७ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे पश्चिमखण्डे भरतलक्ष्मणीये सीताजन्मोत्सवे द्वात्रिंशोऽध्यायः ॥ ३२ ॥

त्रयस्त्रिंशोऽध्यायः

श्रीसनत्कुमार उवाच

अथास्य देववर्यस्य वक्ष्ये धाम मनोहरम् ।
यद्गत्वा वेदितव्यान्ते निवर्तन्ते न योगिनः ॥ १ ॥

धामैतदीयं शृणुताऽमहर्षयस्तत्कालमायागुणलौकिकातिगम् ।
नित्यं परं निष्प्रतिमं निरञ्जनं सच्चित्सुखाकारमनन्तमद्भुतम् ॥ २ ॥

यत्केवलानुभवानन्दमात्रं पराक्षरब्रह्मविबोधमध्यगम् ।
पुराविदां वाङ्मनसाद्यगोचरं समंततो व्यापकमद्वितीयकम् ॥ ३ ॥

यत्र कल्पद्रुमैर्भाति प्रमोदवनमद्भुतम् ।
अन्यैः कामदुघैर्वृक्षैः परीवीतं सुवाटिकम् ॥ ४ ॥

रम्यानेकनिकुञ्जाढ्यं सर्वर्तुकुसुमाकरम् ।
फलप्रसूनपत्रर्द्धिरामणीयकमन्दिरम् ॥ ५ ॥

चतुर्विंशतिसंख्याकमुख्यदिव्यवनान्वितम् ।
यत्र रत्नाद्रिरुद्भाति रत्नसानुमनोहरः ॥ ६ ॥

अनेकनिर्झरस्रावि सुगन्धिजलपूरितः ।
अनेकरत्नरुचिरो नानाधातुगणश्रयः ॥ ७ ॥

सुवर्णशिखरश्रीमान् राजहंसनिनादितः ।
सहजानन्दिनीकेलिसरसीसमलंकृतः ॥ ८ ॥

कूजत्कारण्डवकुलचक्राह्वयसमाकुलः ।
कुञ्जपुञ्जमनोहारिगह्वरान्तर्निरातपः ॥ ९ ॥

तथा सौगन्धिको नाम गिरिर्यत्र मनोहरः ।
श्रीखण्डद्रुमसंशोभी मलपाद्रिरिवोन्नतः ॥ १० ॥

यत्र पीयूषसलिला सरयूः सरिदुज्ज्वला ।
सुवर्णकूलिनी दिव्यमणिसोपानमण्डिता ॥ ११ ॥

राजहंसकुलोन्नादिसंगीतसुयशोगणा ।
प्रेमभक्तिमहायोगिसमुपासितसरित्तटा ॥ १२ ॥

कुमुद्वती कमलिनी फुल्लत्कोरकपूजिता ।
पद्मकह्लारसौगन्धिफुल्लत्कोकनदोत्करा ॥ १३ ॥

यत्र श्रीसहजानन्दासयूथ्यावज्रयोषितः ।
विहरन्तिपदोर्नादिमञ्जीरास्ता इतस्ततः ॥ १४ ॥

रामरासरसोल्लासिप्रेममत्तान्तराः परम् ।
नित्यं षोडशवार्षिक्यः पूर्णचन्द्रनिभाननाः ॥ १५ ॥

कुरङ्गनयनाः सर्वाः सर्वकेलिकलाविदः ।
लास्यताण्डवनृत्यादिसंगीतकविशारदाः ॥ १६ ॥

श्रीरामचन्द्रवदनचन्द्रचारुचकोरिकाः ।
तासां मण्डलमध्यस्थो माङ्गल्यानेत्रनन्दनः ॥ १७ ॥

श्रीरामचन्द्रमाः श्रीमद्राजदशरथात्मजः ।
नटवेशधरो मुग्धः श्रीरामो रासमण्डले ॥ १८ ॥

विहरत्यनिशं साक्षात्परब्रह्मरसाकृतिः ।
कन्दर्पकोटिदर्पघ्नः सहजानन्दिनीसखः ॥ १९ ॥

चरणाम्भोजदिव्याङ्कैः कुर्वन् भूमिं सुपावनीम् ।
किशोराकृतिरानन्दी नित्यलीलाविशारदः ॥ २० ॥

यस्यांशमात्रविभवः श्रीमन्नारायणः स्वयम् ।
यस्यांशांशाः प्रजायन्ते अवतारा ह्यनेकधा ॥ २१ ॥

भूमापि पुरुषो यस्य सहस्रवदनः स्वराट् ।
अंश एव प्रकथितो विष्णुर्ब्रह्माण्डविग्रहः ॥ २२ ॥

उत्पद्यन्ते विलीयन्ते ब्रह्मणां कोटयः किल ।
न तु रामविहारस्य तिरोभावो भवेत् क्वचित् ॥ २३ ॥

इदं श्रीरामवैकुण्ठं नित्यं धाम प्रकीर्तितम् ।
सहजानन्दिनीलोको व्यापकश्चित्सुखाकृतिः ॥ २४ ॥

रक्षकाः परितस्तस्य कोटयश्चक्रधारिणः ।
चतुर्मुखाः कोटयश्च कोटयश्चैव शंकराः ॥ २५ ॥

पञ्चाननाः शूलकरा विभान्ति परितः स्थिताः ।
सरसीव महापद्मं लोकोऽयंधरणीतले ॥ २६ ॥

न तु भूमितलस्थार्थैः संस्पर्शोप्यस्य विद्यते ।
कालमायोद्भवैर्दोषैः संस्पर्शो नास्य विद्यते ॥ २७ ॥

तद् रामस्य परं स्थानं धिया पश्यन्ति सूरयः ।
अतिसूक्ष्मार्थदर्शिन्या भक्तियोगविशुद्धया ॥ २८ ॥

चिदानन्दस्य रामस्य चिदानन्दमयं वपुः ।
चिदानन्दमयी लीला चिदानन्दमयोऽखिलः ॥ २९ ॥

लीलापरिकरो ज्ञेयश्चिदानन्दमयं पदम् ।
एवं यो वेद तद्धाम प्रमोदवननामकम् ॥ ३० ॥

स विमुच्येत मनुजो रामभक्तिपरायणः ।
स्मरंल्लोकममुं तत्स्थं भावयेद् रामदैवतम् ।
जीवन्मुक्तः स विज्ञेयो दधत्प्रेममयं वपुः ॥ ३१ ॥

न तस्य कृत्यान्तरमस्ति लोके सदा विमुक्तस्य नरोत्तमस्य ।
श्रीरामचन्द्रे रसिके स्थितोजनोभक्त्योकयुक्तो हृदि नित्ययुक्तः ॥ ३२ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे भरतलक्ष्मणीये सीताजन्मोत्सवे श्रीरामचन्द्रप्रमोदवनपरत्वर्णनं नाम त्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥

चतुस्त्रिंशोऽध्यायः

श्रीसनत्कुमार उवाच

आविर्भावमथो वक्ष्ये श्रीरामस्य विशेषतः ।
मुख्यः प्रमोदविपिने तस्याविर्भावईरितः ॥ १ ॥

ततः परमयोध्यायामाविर्भावोऽस्य सर्वदा ।
चित्रकूटमहाशैले नित्याविर्भाव उच्यते ॥ २ ॥

वर्षे किंपुरुषाख्ये च नित्याविर्भूत उच्यते ।
तथैव वेंकटगिरौ सांनिध्यं तस्य सर्वदा ॥ ३ ॥

पञ्चवट्यां जनस्थाने दण्डकारण्य एव च ।
कष्किन्धायां रामगिरौ तथा हनुमदालये ॥ ४ ॥

एष्वन्येषु च देशेषु नित्याविर्भूतता प्रभोः ।
सेतुबन्धेश्वरो नाम यत्र रुद्रः सनातनः ॥ ५ ॥

तथा श्रीशैलमध्ये च सान्निध्यं सर्वदा प्रभोः ।
जनकस्य पुरे चैव विश्वामित्राश्रमे तथा ॥ ६ ॥

वसिष्ठाश्रम एवापि नित्यं भाति रघूद्वहः ।
सुमित्रातनयो देवो यत्र यत्र प्रतिष्ठितः ॥ ७ ॥

तथैव वायुपुत्रश्च तत्र तत्र रघूत्तमः ।
मथुरायां च मायायां काश्यामुज्जयिनीपुरि ॥ ८ ॥

द्वारवत्यां च काञ्चयां च नित्यं रामःसुसंस्थितः ।
स्वर्गे मर्त्ये च पाताले सर्वक्षेत्रेषु सर्वदा ॥ ९ ॥

न तत्स्थानं प्रपश्यामि यत्र रामो न विद्यते ।
यत्र रामायणं नाम गीयते शास्त्रमुत्तमम् ॥ १० ॥

तत्र रामः सदा भाति श्रीमज्जनकजान्वितः ।
सहजानन्दिनी यत्र गीयते विविधैर्गुणैः ॥ ११ ॥

तत्र रामः सदा तिष्ठेन्नात्र कार्या विचारण ।
रामेति द्व्यक्षरो मन्त्रो यत्र संकीर्त्यते बुधैः ॥ १२ ॥

तत्राविर्भूय श्रीरामः सर्वदुःखं विनाशयेत् ।
सीतया सहितं यत्र रामनाम प्रकीर्त्यते ॥ १३ ॥

न तत्र कलिदोषाणां प्रवृत्तिः स्यात्कथंचन ।
साङ्गाः सरहस्याश्च पठिता वेदराशयः ॥ १४ ॥

कृताश्च सकला यज्ञा येन रामेति कीर्तितम् ।
कृतानि कोटिपुण्यानि व्रतानि च तपांसि च ॥ १५ ॥

सुस्नातानि च तीर्थानि येन रामेति कीर्तितम् ।
अज्ञानतिमिरोद्भेदं कोटिसूर्येन्दुभासुरम् ॥ १६ ॥

ज्ञानामृतपयोवाहं रामनाम सदा जपेत् ।
कलिदोषापहं नित्यं गङ्गास्नानातिपावनम् ॥ १७ ॥

मनसस्तापशमनं राम नाम सदा जपेत् ।
किं कार्यं वैदिकैः शब्दैः किं वा मन्त्रैश्च तान्त्रिकैः ॥ १८ ॥

किं कर्मणा च ज्ञानेन किमन्यैस्तपसां श्रमैः ।
स्मर्तव्यं रामनामैकं श्रोतव्यं चैव सर्वदा ॥ १९ ॥

पठितव्यं कीर्तितव्यं श्रद्धायुक्तैर्दिवानिशम् ।
विधिरुक्तः सदैवास्य न निषेधः क्वचिद्भवेत् ॥ २० ॥

सर्वदेशे सर्वकाले सर्वैश्च नरजातिभिः ।
इदमेकं सदा कार्यं यदीच्छेच्छुभमात्मनः ॥ २१ ॥

चतुर्वर्गप्रदानेऽपि समर्थो रघुपुङ्गवः ।
ध्यानाद्गानाच्च सततं नाममात्रस्य कीर्तनात् ॥ २२ ॥

इत्युक्तं वः प्रियं सर्वं मया देवर्षिपुङ्गवाः ।
नातो विवदितव्यं स्याद्भुक्तां तत्त्वमीयुषाम् ॥ २३ ॥

सिद्धान्तः सर्वशास्त्राणां भवतां समुदाहृतः ।
श्रुत्वैतत्कृतकृत्यः स्यान्नात्र कार्या विचारणा ॥ २४ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे पश्चिमखण्डे भरतलक्ष्मणीये सीताजन्मोत्सवे चतुस्त्रिंशोऽध्यायः ॥ ३४ ॥

पञ्चत्रिंशोऽध्यायः

श्रीशुक उवाच

इत्थं सनत्कुमारस्य मुखादाकर्ण्य सर्वशः ।
श्रीमतो राघवेन्द्रस्य महिमानं महाद्भुतम् ॥ १ ॥

नाम धाम स्वरूपं च लोकोत्तरमुदीरितम् ।
तस्य भूम्नः पुरुषस्य विष्णोर्ब्रह्माण्डवर्ष्मणः ॥ २ ॥

संजातः सुमहान् प्रेमा उत्तरंग इवाम्बुधिः ।
महाभावः सुसम्पन्नः सीतारामैकगोचरः ॥ ३ ॥

ततः सुस्रुवतुस्तस्य नयने प्रेमजं जलम् ।
ब्रह्मणश्चैव रुद्रस्य ब्रह्मर्षीणां तथैव च ॥ ४ ॥

देवर्षीणां च सर्वेषां तत्रस्थानां सभासदाम् ।
ब्रह्मणो मानसानां च सनकादिमहात्मनाम् ॥ ५ ॥

सहजानन्दिनीरामगुणलीलानुवादतः ।
परमेणोत्तमप्रेम्णा दृशौ तेषां पृथक् पृथक् ॥ ६ ॥

विरहार्त्या सुस्रुवतुः साक्षात्प्रेममयं जलम् ।
तावत्तेषां वपुरभूत्प्रेमसंस्तब्धमुच्चकैः ॥ ७ ॥

स्वेदोदकैः समापूर्णं रोमाञ्चप्रकरावृतम् ।
स्वरभङ्गश्च सर्वेषामभूद्गद्गदकण्ठतः ॥ ८ ॥

वेपथुश्च प्रादुरभूत्तत्क्षणाद्विह्वलात्मनाम् ।
विवर्णता च संजाता विरहार्तिमतां सताम् ॥ ९ ॥

क्षणं ते मुग्धवच्चासन् विलीनेन्द्रियवृत्तयः ।
रामप्रेमाविष्टचित्ता बभूवुर्मत्तमत्तवत् ॥ १० ॥

तेषां संरुदतां प्रेम्णा पुरुषस्य सदःसदाम् ।
अश्रुजैर्वारिरभूत् सुविशालतमं सरः ॥ ११ ॥

तस्मादाविरभूदेषा सरयूर्विश्वपावनी ।
पीयूषवर्णसलिला शरज्ज्योत्स्नेव भास्वती ॥ १२ ॥

योगीन्द्रमानसमुदे प्रेमानन्दमयोदका ।
धर्मार्थकाममोक्षाणां दायिनी सुखदायिनी ॥ १३ ॥

ब्रह्मद्रवस्वरूपा च द्रवद्रव्यमयी परा ।
वारुणी देवता दिव्या सर्वतीर्थमहानिधिः ॥ १४ ॥

तस्माज्जलसमूहात्तु समुद्भूता वराङ्गना ।
सुधासुवर्णवसना चन्द्रकोटिसुशीतला ॥ १५ ॥

चन्द्रास्या पङ्कजमुखी नीलनीरजलोचना ।
चम्पकाङ्गी तडित्कान्तिः सर्वावयवसुन्दरी ॥ १६ ॥
स्वर्णदोलासमारूढा स्मयमानमुखाम्बुजा ।
गङ्गया चैव कालिन्द्या पार्श्वद्वयविराजिता ॥ १७ ॥
सरस्वत्या धृतच्छत्रा स्वर्णदण्डावलम्बया ।
गायत्र्या चैव सावित्र्या चामरद्वयवीजिता ॥ १८ ॥
प्रेमानन्दमयी साक्षाद् रामलीलाविशारदा ।
तां जातमात्रां प्रययुर्लोपामुद्रादयस्तदा ॥ १९ ॥
अरुन्धती च गार्गी च मैत्रेयी चैव योगिनी ।
पार्वती च महालक्ष्मी रतिश्चैव तथा शची ॥ २० ॥
अनसूया भगवती दितिश्चैवादितिस्तथा ।
देवहूतिश्च मेधा च प्रभा विद्या च धीमती ॥ २१ ॥
प्रीतिः कीर्तिश्च कान्तिश्च तुष्टिःपुष्टिस्तथैव च ।
दिव्यैः स्तवैः स्तुवन्त्यस्ताः परितोऽस्याश्चकासिरे ॥ २२ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे पश्चिमखण्डे भरतलक्ष्मणीये सीताजन्मोत्सवे सरयूत्पत्तिर्नाम पञ्चत्रिंशोऽध्यायः ॥ ३५ ॥

षट्त्रिंशोऽध्यायः

श्रीशुक उवाच

सान्नवीज्जातमात्रैव भूमानं पुरुषं ततः ।
रामप्रेमोद्गमोद्भूतरोमाञ्चव्याप्तविग्रहम् ॥ १ ॥

सरयूरुवाच

किं नु कुर्यामहे भूमन् किं च मे नाम निश्चितम् ।
भवत्पार्श्वेऽथवान्यत्र कुत्र मेऽवास्थितिर्भवेत् ॥ २ ॥

पुरुष उवाच

रामप्रेमोद्भवानन्दात्सुस्रुर्नेत्राणि नः पृथक् ।
तुदत्थवाष्पवारिभ्यः सम्भूता त्वं तरंगिणी ॥ ३ ॥
सरयूरिति ते नाम तस्मान्निश्चितमेव मे ।
नयनोत्थैर्जलैर्जाता तस्मान्नेत्रजलेति च ॥ ४ ॥

वसिष्ठश्च भवत्तीरे तपसा सिद्धिमेष्यति ।
वासिष्ठीति भुवि ख्यातं तव नाम भविष्यति ॥ ५ ॥

साकेतनगरे गत्वा रामस्य सुखवर्द्धिनी ।
रामगङ्गेति ते नाम भुवि ख्यातं भविष्यति ॥ ६ ॥

पूर्वं तु तमसा जाता ऐरावतरदाहतात् ।
महाशैलस्य शिखरात्पश्चात्त्वं विश्वपाविनी ॥ ७ ॥

द्विर्वहेति च ते नाम लोके ख्यातं भविष्यति ।
प्रेमानन्दात्समुद्भूतां तस्मात्प्रेमजलेति च ॥ ८ ॥

अथ तेऽहं प्रवक्ष्यामि नामसाहस्रकं शुभम् ।
यस्य श्रवणमात्रेण प्रेमानन्दः प्रवर्द्धते ॥ ९ ॥

सरयूः प्रेमसरयूः प्रेमानन्दसरोजला ।
प्रेमपूर्णा प्रेममयी प्रेमतोया महोदका ॥ १० ॥

रामगङ्गा रामनदी रामप्रेमा महानदी ।
सुधावर्णा चन्द्रवर्णा धनसाररसोदका ॥ ११ ॥

रसात्मिका रसमयी रसपूर्णा रसोदका ।
रसा रसप्रिया रस्या रसारम्या रसावहा ॥ १२ ॥

सुधामा वसुधा लक्ष्मीर्वसुधामा वसूद्भवा ।
सरिद्वरा सरिच्छ्रेष्ठा सरिद्रूपा सरोमयी ॥ १३ ॥

रामकेलिकरी रामा रामचित्तप्रसादिनी ।
लोकसंतापहरिणी हनुमत्सेवितोदका ॥ १४ ॥

मरीचिर्मरुदाराध्या रामचन्द्रतनुप्रभा ।
द्रवदव्यमयी देवी दोलारूढामृतद्रवा ॥ १५ ॥

द्राविणी द्रविणावासा द्रवामृतमयी सरित् ।
सरणी सारिणी सारा साररूपा सरोवरा ॥ १६ ॥

पुरुषाश्रुमयी मोदा प्रमोदवनवाहिनी ।
कल्लोलिनी कलिहरा कल्मषघ्नी कलाधरा ॥ १७ ॥

कलामयी कलापूर्णा चन्द्रिका रामचन्द्रिका ।
वैकुण्ठवाहिनी वर्या वरेण्या वारिदेवता ॥ १८ ॥

गुडूची गुडसुस्वादुर्गौडी गुडसमुद्भवा ।
वासिष्ठी च वशिष्ठश्रीर्वसिष्ठाराध्यदेवता ॥ १९ ॥

वसिष्ठावशिनी वश्या वश्याकर्षणकारिणी ।
सुवर्णा चैव सौवर्णीसुवर्णसिकतावहा ॥ २० ॥

सुवर्णतटिनी चैव सुवर्णस्रवणोदका ।
विधिनेत्रजला वैधी विधिप्रेमा विधिप्रिया ॥ २१ ॥

उत्तरंगा च तरला तारकापतिनिर्मला ।
तमसा तामसहरा तमोहर्त्री तमोवहा ॥ २२ ॥

तीक्ष्णा तीक्ष्णगतिस्तुङ्गा तुङ्गवीचिर्विनोदिनी ।
तुङ्गतीरा तुङ्गभवा तुङ्गतीरप्रसारिणी ॥ २३ ॥

तुङ्गतोया तुङ्गवहा तुङ्गगा तुङ्गगामिनी ।
तडित्प्रभा तडिद्रूपा तडिद्वीचिस्तडिज्जला ॥ २४ ॥

तप्तोदका तप्ततनुस्तापहा तापसाश्रया ।
तपःसिद्धिकरी तापी तपनातापहारिणी ॥ २५ ॥

तापसंतापहरिणी तपनोत्था तपोमयी !
तापिनी तपनाकारा तपर्तुः सुखकारिणी ॥ २६ ॥

तरंगिणी तरलिनी तरणी तारिणी तरिः ।
स्थेमा स्थिरगतिः स्थात्रीस्थावरोत्था स्थिरोदका ॥ २७ ॥

स्थैर्यकर्त्री स्थिराकारा स्थिरा स्थावरदेवता ।
पूता पूतगतिः पूतलोकपावनकारिणी ॥ २८ ॥

पाविनी पवनाकारा पवमानगुणप्रदा ।
शीतला शीतसलिला शीतलाकृतिवाहिनी ॥ २९ ॥

मन्दा मन्दगतिर्मन्दा मन्दलस्वरपूरणी ।
मन्दाकिनी मदाघूणी मन्दमन्दगमोदका ॥ ३० ॥

मीनाढ्या मीनसुखदा मीनकेलिविधायिनी ।
महोर्मिमालिनी मान्या माननीयमहागुणा ॥ ३१ ॥

मरुत्सेव्या मरुल्लोला मरुत्तनृपसेविता ।
इक्ष्वाकुसेवितततटा ईक्षाकृतमहोत्सवा ॥ ३२ ॥

ईक्षणीया इक्षुमती इक्षुखण्डरसोदका ।
कर्पूरनीरा कर्पूरा कर्पूरधवलोदका ॥ ३३ ॥

नागकन्या नगारुढा नगराजविभेदिनी ।
पातालगङ्गा पूताङ्गी पूजनीया परापरा ॥ ३४ ॥

पारावारैकनिलया पारावारविहारिणी ।
पारंगता परप्रेमा परप्रीतिविवर्द्धिनी ॥ ३५ ॥

फल्गूजलाफल्गुजला फाल्गुनस्य वरप्रदा ।
फेनावृता फेनसिता फेनोद्गमनकारिणी ॥ ३६ ॥

फलकारा फलकरी फलिनी फलपूजिता ।
फणोन्द्रफणसंसेव्या फणिकङ्कणभूषिता ॥ ३७ ॥

खराकारा खरतरा खरराक्षसहारिणी ।
खगेन्द्रभजनीया च खगवंशविवर्द्धिनी ॥ ३८ ॥

खगारुढाखगैः स्तुत्या खगजा च खगामिनी ।
[1]खसाराध्या खसवृता खसवंशैकजीवना ॥ ३९ ॥

खेलागतिः खलहरा खलतापरिहारिणी ।
खदिनी खादिनी खेद्या खेदहा खेलकारिणी ॥ ४० ॥

गणनीया गणैः पूज्या गाणपत्यमहाफला ।
गणेशपूजिता गण्या गणदुःखनिवारिणी ॥ ४१ ॥

गुणाढ्या गुणसम्पन्ना गुणगुंफितविग्रहा ।
गुणनीया गुरुगुणा गुरुपूज्या गुरुद्रवा ॥ ४२ ॥

गुर्वी गीष्पतिसंसेव्या गिराचार्या गिराश्रया ।
गिरीन्द्रकन्दरावासा गिरीशसेवितोदका ॥ ४३ ॥

कोटिचान्द्रमसज्योतिः कोटिचान्द्रिमहोज्ज्वला ।
कटाहभेदनपरा कठोरजवगामिनी ॥ ४४ ॥

कठशाखापाठरता काठकानां वरप्रदा ।
काष्ठापरा काष्ठभेदा काष्ठाष्टकविनोदिनी ॥ ४५ ॥

करवीरप्रसूनाढ्या करवालसितिच्छविः ।
कम्बुश्वेता कम्बुकण्ठा कम्बुभृत्प्राणवल्लभा ॥ ४६ ॥

धर्माढ्या धर्मशमनी धर्मपाठविनोदिनी ।
धर्मयोगसुसंतुष्टा घटाकारा घटोदका ॥ ४७ ॥

घट्टिनी घट्टसुखदा घट्टपालवरप्रदा ।
घटकोटिसुसम्पन्ना घटाटोपजलोर्मिभृत् ॥ ४८ ॥

चाञ्चल्यदारिणीन्द्राणी चाण्डालगतिदायिनी ।
चण्डातपक्लेशहरा चण्डा चण्डिममण्डिता ॥ ४९ ॥

चाम्पेयकुसुमप्रीता चपला चपलाकृतिः ।
चम्पूग्रन्थविधानज्ञा चञ्चूपुटहृतोदका ॥ ५० ॥

चंक्रमा चंक्रमकरी चमत्कारविवर्द्धिनी ।
चर्मकारकुलोद्धारा चर्मा चर्मण्वती नदी ॥ ५१ ॥

भूमेक्षणसमुद्भूता भूगता भूमिपापहा ।
भूतलस्था भयहरा विभीषणसुखप्रदा ॥ ५२ ॥

भूतप्रेतपिशाचघ्नी दुर्गतिक्षयकारिणी ।
दुर्गमा दुर्गनिलया दुर्गाराधनकारिणी ॥ ५३ ॥

---

१ खसाः = पार्वतीयाः – बड़ौ० ।

दुराराध्या दुःखहरा दुर्गभूमिजयप्रदा ।
वन्या वनप्रिया वाणी वीणारवविनोदिनी ॥ ५४ ॥

वाराणसीवासरता वासवी वासवप्रिया ।
वसुधा वसुधामा च वसुदात्री वसुप्रिया ॥ ५५ ॥

वसुतेजा वसुपरा वसुवासविधायिनी ।
वैश्वानरी विश्ववन्द्या विश्वपावनकारिणी ॥ ५६ ॥

वैश्वानररुचिर्विश्वा विश्वदीप्तिर्विशाखिनी ।
विश्वासना विश्वसना विश्ववश्यत्वकारिणी ॥ ५७ ॥

विश्वावसुप्रियजला विश्वामित्रनिषेविता ।
विश्वाराध्या विष्णुरूपा वषट्काराक्षरप्रिया ॥ ५८ ॥

पानप्रिया पानकर्त्री पातकौघप्रहारिणी ।
नानायुधा नवजला नवीनगतिभूषिता ॥ ५९ ॥

उत्तरंगगतिस्तारा स्वस्तरुप्रसवार्चिता ।
तुहिनाद्रिसमुद्भूता तुहिना तुहिनोदका ॥ ६० ॥

कूलिनी कूलमिलिता कूलपातनतत्परा ।
कालातिगामिनी काली कालिका कालरूपिणी ॥ ६१ ॥

कीलालिनी कीलहरा कीलिताखिलपातका ।
कमला कमलाकारा कमलार्चितविग्रहा ॥ ६२ ॥

करालकमलावेशा कलिकोल्लासकारिणी ।
करिणी कारिणी कीर्णा कीर्णरूपा कृपावती ॥ ६३ ॥

कुलीना कुलवन्द्या च कलनादा कलावती ।
खगेन्द्रगामिनि खल्या खलीना खलतापहा ॥ ६४ ॥

स्खलद्गतिः खमार्गस्था खिलाखिलकथानका ।
खेचरीमुद्रिकारूपा खखेगातिगामिनी ॥ ६५ ॥

गङ्गाजला गीतगुणा गीता गुप्तार्थबोधिनी ।
गीयमानगुणग्रामा गीर्वाणा च गरीयसी ॥ ६६ ॥

ग्रहापहा ग्रहणकृद्गृह्या गृह्यार्थदायिनी ।
गेहिनी गिलिताघौघा गवेन्द्रगृहगामिनी ॥ ६७ ॥

गोपीजनगणाराध्या श्रीरामगुणगायिनी ।
गुणानुबन्धिनी गुण्या गुणग्रामनिषेविता ॥ ६८ ॥

गुहमाता गुहान्तस्था गूढा गूढार्थबोधिनी ।
घर्घरारावमुदिता घर्घराघटनाकृतिः ॥ ६९ ॥

घटीबन्धैकनिलया घटा घंटालविग्रहा ।
घनाघनस्वना घोरा घनसारसमाकृतिः ॥ ७० ॥

घोषा घोषवती घुष्या घोषेश्वरसुतप्रिया ।
घोराघनाशनकरी घर्मातिभयहारिणी ॥ ७१ ॥

घृणाकरी घृणिमती घृणिर्घ्राणेन्द्रियप्रिया ।
घ्राता घर्मांशुदुहिता घातिताघा घनाघना ॥ ७२ ॥

चान्द्री चन्द्रमती चन्द्रा चन्द्रिका चन्द्रिकाकृतिः ।
चन्द्रका चन्द्रकाकारा चन्दनालेपकारिणी ॥ ७३ ॥

चन्दनद्रवसंशीता चमत्कृतजगत्त्रया ।
चित्ता चित्तहरा चित्या चिन्तामणिसमाकृतिः ॥ ७४ ॥

चिन्ताहरा चिन्तनीया चराचरसुखप्रदा ।
चतुराश्रमसंसेव्या चतुराननसेविता ॥ ७५ ॥

चतुरा चतुराकारा चीर्णव्रतसुखप्रदा ।
चूर्णा चूर्णौषधसमा चपला चपलाकृतिः ॥ ७६ ॥

छलिनो छलहर्त्री च छलिताशेषमानवा ।
छद्मिनी छद्महरिणी छद्मसद्मविधायिनी ॥ ७७ ॥

छन्ना छन्नगतिश्छिन्ना छिदाकर्त्री छिदाकृतिः ।
छन्नाकारा छन्नजला छन्नपातकहारिणी ॥ ७८ ॥

जयघोषा जयाकारा जैत्रा जनमनोहरा ।
जन्मिनी जन्महरिणी जगत्त्रयविनोदिनी ॥ ७९ ॥

जगन्नाथप्रिया लक्ष्मीर्जम्बूद्वीपसुखप्रदा ।
जम्बालिनी जवगतिर्जपाकुसुमसुन्दरी ॥ ८० ॥

जम्बीररससंतुष्टा जाम्बूनदविभूषणा ।
जटाधरा च जटिला जम्भारिकरपूजिता ॥ ८१ ॥

जंगमा जितदैतेया जित्वरा जयवर्द्धिनी ।
जीवान्तरगतिर्जीव्या जीवाकर्षणतत्परा ॥ ८२ ॥

ज्यानिनादैकमुदिता जरानाशनतत्परा ।
जलाश्रया जलकरी जालिनी जालवर्तिनी ॥ ८३ ॥

जीमूतवर्षिणी जारा जारिणी जारवल्लभा ।
झञ्झारवा झणत्कारा झर्झरारावकारिणी ॥ ८४ ॥

झिल्लीनिनादमुदिता झल्लरीनादतोषिणी ।
झरी झर्झरिकारूपा झांकाररवकारिणी ॥ ८५ ॥

टांकारिणी टंकहस्ता टापिनी टापगामिनी ।
टंटंनिनादमुदिता ठंठंशब्दप्रबोधिनी ॥ ८६ ॥

ठकुरा ठक्कुराज्ञा च ठंठंनिनदकारिणी ।
डमरूवादनपरा डकाडांकारकारिणी ॥ ८७ ॥

डाकिनी डामराचार्या[1] डमडुमरवोत्कटा ।
ढक्का ढक्कारवाढ्या च ढुंढाढुंढरवासिनी ॥ ८८ ॥

ढुंढिपूरणदक्षा च ढुंढिराजप्रपूजिता ।
तत्तातता महाताता तेजिनी तेजसान्विता ॥ ८९ ॥

तोयान्विता तोयकरी तटपातनकारिणी ।
तरुणी तरुसंछन्ना तलशीतलनीरिणी ॥ ९० ॥

तुलसीसौरभाढ्या च तुलारहितरूपिणी ।
तन्वी तवममाकारा तपस्या तपसि स्थिता ॥ ९१ ॥

थेईथेईशब्दरता थंथुंशब्दसुखावहा ।
दयावती दुःखहरा द्राविणी द्रवदेवता ॥ ९२ ॥

दीनदारिद्र्यहरिणी दमिनी दमकारिणी ।
दूरागता दूरगता दूरिताशेषपातका ॥ ९३ ॥

दुर्वृत्तघ्नो दैत्यहरा दारिणी दावहारिणी ।
देवदारुवनप्रीता दोषघ्नी दीक्षिकारिणी ॥ ९४ ॥

दीपमाला द्वीपचारा दुरिता दुरितापहा ।
धन्या धनवती धीरा धीमती धेनुमण्डिता ॥ ९५ ॥

धयिनी धारिणी धात्री धात्रीतरुफलाशिनी ।
धाराधारा धराकारा धराधरविचारिणी ॥ ९६ ॥

धाविनी धावनकरी धनेश्वरवरप्रदा ।
धर्मप्रदा धर्मरता धार्मिका धार्मिकप्रिया ॥ ९७ ॥

धर्मार्थकाममोक्षाख्या धमनी धमनीगतिः ।
धत्तूरफलसम्प्रीता धृताध्यानपरा धृतिः ॥ ९८ ॥

धारणा धीर्धराधीशा धीगम्या धारणावती ।
नम्या नमोनमःप्रीता नर्मा नर्मगतिनर्वा ॥ ९९ ॥

नीरजाक्षी नीरवहा निम्नगा निर्मलाकृतिः ।
नारायणी नरप्रज्ञा नारी नरकहारिणी ॥ १०० ॥

नवीना नवपद्माभा नाभीष्टगतिदापिनी ।
नगोद्भवा नगारूढा नागलोकातिपाविनी ॥ १०१ ॥

---

१. डामरस्तन्त्रविशेषः टि०–बड़ौ० ।

नन्दिनी नादिनी नादा निन्दानादविवर्जिता ।
नागरी नागरप्रीता नागराजप्रपूजिता ॥ १०२ ॥

नागकेसरमालाढ्या नागेन्द्रमदगन्धिनी ।
पूर्णिमा परमाकारा परापर विवेकिनी ॥ १०३ ॥

प्रभातिनी प्रभावन्धा (न्ध्या) प्रभासा पुरुषेष्टदा ।
पुरुषार्थप्रदा पूता पंक्तिपावनकारिणी ॥ १०४ ॥

फलाढ्या फलदात्री च फणीन्द्रवरदायिनी ।
फालिनी फलपुष्पाङ्का फाल्गुनस्फीतकीर्तिदा ॥ १०५ ॥

बलिपूज्या बलिहिता बलदेवप्रपूजिता ।
बाला बालरविप्रख्या बालरामगुणप्रदा ॥ १०६ ॥

बलाकिनी बहुलगा बहुला बहुलाभदा ।
बाहुक्रीडामहोर्मिश्च बह्वीबाहुलमासगा ॥ १०७ ॥

भाविता भाबुककरी भर्मदा भर्गपूजिता ।
भवहर्त्री भवप्रीता भवानी भुवनोद्धता ॥ १०८ ॥

भूतिकर्त्री भूतिहर्त्री भूतिनी भूतसेविता ।
भूधरा भूधरोद्भेदा भूतनाथार्चितोदका ॥ १०९ ॥

भूरितोया भूचरी च भूपतिप्रियकारिणी ।
मनोरमा महोत्साहा महनीया महात्मिका ॥ ११० ॥

माहात्म्यवर्द्धिनी मोहा मोदिनी मोहनाशिनी ।
मुग्धा मुग्धगतिर्मध्या मध्यलोकप्रियावहा ॥ १११ ॥

मधुरा मधुरालापा मधुरापतिवल्लभा ।
माधुर्यवारिधिर्माध्वी माध्वीककुसुमोत्कटा ॥ ११२ ॥

मधूकपुष्पमुदिता मदिरारसघूर्णिता ।
मादिनी मालतीमालामल्लीमाल्यप्रपूजिता ॥ ११३ ॥

मन्दारपुष्पपूज्या च मन्दा मन्दाकिनीप्रिया ।
मन्दराचलसंस्थाना मन्दिरान्तरमोदिनी ॥ ११४ ॥

यवसावलिसम्भिन्ना यमुनाजलकेलिनी ।
यमभीतिप्रशमिनी यमिनीयमिनां हिता ॥ ११५ ॥

योगमार्गप्रदा योग्या योगाचार्य प्रपूजिता ।
योक्त्री योगबलप्रीता यौगिकार्थप्रकाशिनी ॥ ११६ ॥

यादवेन्द्रमनोरम्या यादोवरविभूषिता ।
यत्तत्पदार्थरूपा च यास्काचार्यहितप्रदा ॥ ११७ ॥

यस्या यशःप्रदा यम्या यज्ञा यज्ञविवर्द्धिनी ।
रमा रामा रता रम्या रमणी रमणीयभूः ॥ ११८ ॥

रामणीयकराशिश्च राशीशरुचिदायिनी ।
रामप्रिया रामरता रामरामा रमारुचिः ॥ ११९ ॥

रुच्या रुचिप्रदा रोचिप्रदा रोचितविग्रहा ।
रूपिणी रूपनिरता रूपकार्थसुखावहा ॥ १२० ॥

रञ्जिनी रजनीरूपा रजताचलसुन्दरी ।
रजोगुणवती रक्षा रक्षोघ्नी राजसी रतिः ॥ १२१ ॥

लावण्यकृल्लवणहा लक्ष्मीर्लक्ष्यानुबन्धिनी ।
लक्ष्मणस्य प्रीतिकरी लक्ष्मणा लक्ष्मणाश्रया ॥ १२२ ॥

ललामा लोचनभवा लोला लोलोर्मिमालिका ।
लीलावती लाभकरी लोभनीयगुणावहा ॥ १२३ ॥

लज्जावती लोकवती लोकालोकपरस्थिता ।
लोकनीया लोकहिता लोकेशवरदायिनी ॥ १२४ ॥

लालित्यकारिणी लीला लोपामुद्रासुखप्रदा ।
वनजा वनरम्या च वानीरवनगामिनी ॥ १२५ ॥

वानरेश्वरसुप्रीता वाग्वती विन्ध्यवासिनी ।
वाराणसीपुण्यकरी वारिगा वारिवाहिनी ॥ १२६ ॥

वारिवाहगणश्यामा वारणेन्द्रसुखप्रदा ।
वातरंहा वातगतिर्वामाराज्यसुखप्रदा ॥ १२७ ॥

वलिता वनिता वाणी वाणील्लभवल्लभा ।
वाहिनी वहनौद्धत्या वदावदविवादभूः ॥ १२८ ॥

शमिनी शामिनी श्यामा श्यामायाम प्रबोधिनी ।
शमीकमुनिसंसेव्या शमीवृक्षोद्भवा शमा ॥ १२९ ॥

शनैश्चरा शनिहरा शनिग्रहभयापहा ।
शमनार्तिहरा शम्पा शतह्रदहविलासिनी ॥ १३० ॥

शेषाशेषगतिः शोष्या शेषपुत्री शशिप्रभा ।
श्मशानचारिणी शून्या शून्याकाशनिवासिनी ॥ १३१ ॥

शरार्तिहा शरीरार्तिहारिणी शरभेश्वरी ।
शल्यापहा शलभहा शलदानवनाशिनी ॥ १३२ ॥

षण्मुखी षण्मुखहिता षडक्षीणा षडङ्गभूः ।
षष्ठीशनाथसंसेव्या षष्ठीपूजनकारिणी ॥ १३३ ॥

षड्वर्गजायिनी षट्का षड् वषट्कप्रपूजिता ।
सिता सीता सुता सूता सतां पूज्या सतां गतिः ॥ १३४ ॥

सदाहास्यक्रिया सत्या सती सत्यार्थदायिनी ।
सरणिः सरयूः सीरा सलिलौघप्रवाहिनी ॥ १३५ ॥

सद्धर्मचारिणी सूर्मिः सूपास्या सूपपादिता ।
सुलभा सुखदा सुग्रा संग्रामभयहारिणी ॥ १३६ ॥

सूत्तरा सुतरा सोमा सोमनाथप्रपूजिता ।
सामिधेनी समित्प्रीता समिधा च समेधिनी ॥ १३७ ॥

समा समाना समगा सम्मत्ता सुमता सुभा ।
सुमार्च्या सुषुमाधारा सरोजाबलिपूजिता ॥ १३८ ॥

हरिप्रिया हिमवहा हिमानी हिमतोयगा ।
हरिदष्टकसंकीर्त्या हरिदश्वप्रपूजिता ॥ १३९ ॥

हंभारवैकसुप्रीता हिन्दोलाकेलिकारिणी ।
हिंसादोषप्रशमिनी हिंस्रमुक्तिप्रदायिनी ॥ १४० ॥

हारिणी हरसंस्तुत्या हकाराक्षरसंस्तुता ।
हत्याहरा हठरिपुर्हरचापप्रभञ्जिनी ॥ १४१ ॥

क्षेम्या क्षेमकरी क्षेमा क्षुधाक्षोभविनाशिनी ।
क्षुण्णा क्षोदा क्षीरनिधिः क्षीरसागरवासिनो ॥ १४२ ॥

क्षीवा क्षुतिक्षुरप्रख्या क्षिप्रा क्षिप्रार्थकारिणी ।
क्षोणिः क्षोणिहिता क्षामा क्षपाकरनिभोदका ॥ १४३ ॥

क्षारा क्षाराम्बुनिधिगा क्षपासंचारकारिणो ।
अमला अम्लसलिला अदःशब्दार्थरूपिणी ॥ १४४ ॥

अकाराक्षररूपा च ह्याकाराक्षररूपिणी ।
आर्द्राम्बरा आमजला आषाढी आश्विनात्मिका ॥ १४५ ॥

आग्रहायणरूपा च आतुरत्वविनाशिनी ।
आसुरी आसुरिसुता आशुतुष्टा इलेश्वरी ॥ १४६ ॥

इन्द्रिया इन्द्रसम्पूज्या इषुसंहारकारिणी ।
इत्वरी इनसंसेव्या इरा इनवरेन्दिरा ॥ १४७ ॥

ईश्वरी ईतिहन्त्री च ईरिणी ईस्वरूपिणी ।
उदकौघप्रवहिणी उत्तङ्कमुनिपूजिता ॥ १४८ ॥

उत्तराद्रिसुता उन्ना उत्तीर्णा उत्तरप्रदा ।
उत्तप्तकाञ्चननिभा ऊहिनी ऊहकारिणी ॥ १४९ ॥

ऊषरा ऊषरक्षेत्रा ऊतिरूपी ऋभूस्तुता ।
ऋतप्रवर्तिनी ऋक्षा ऋक्षेन्द्रकुलपूजिता ॥ १५० ॥

ॠकाराक्षररूपा च ॠकारी ॠस्वरूपिणी ।
ऌतका ऌतकाचार्या ऌकाराक्षरवासिनी ॥ १५१ ॥

एषा एषितवेदार्था एवमेवार्थरूपदा ।
एवकारार्थगम्या च एतच्छब्दार्थरूपिणी ॥ १५२ ॥

एता ऐता ऐकृतिश्च ऐन्द्री ऐंकाररूपिणी ।
ओता ओकाररूपा च औषधीशप्रपूजिता ॥ १५३ ॥

औन्नत्यकारिणी अंबा अंबिका अंकवर्जिता ।
अंतकप्रेयसी अंक्या अंतका अंतवर्जिता ॥ १५४ ॥

अःकारमुदिता चैव सर्वर्णस्वरूपिणी ।
सर्वशास्त्रार्थरूपा च सर्वकल्याणकारिणी ॥ १५५ ॥

इदं श्रीसरयूदेव्या नामसाहस्रमुत्तमम् ।
मया निगदितं श्रुत्वा सर्वपापैर्विमुच्यते ॥ १५६ ॥

बहूनि तव नामानि अनन्तान्येव सर्वशः ।
त्वं गङ्गा यमुना चैव गोदा चैव सरस्वती ॥ १५७ ॥

नर्वदा चैव कावेरी भीमा कृष्णा च पार्वती ।
सिन्धुः सिन्धुसुता चैव सर्वदेवस्वरूपिणी ॥ १५८ ॥

यस्त्वां स्मरति वै नित्यं मनुजो रामसेवकः ।
सर्वविघ्नहरा तस्य भविष्यसि न संशयः ॥ १५९ ॥

प्रातरुत्थाय च नरो योऽवगाहेत वै त्वयि ।
तस्य सर्वाघहन्त्री त्वं रामभक्तिं प्रवर्तयेः ॥ १६० ॥

दर्शनात्स्पर्शनाच्चैव स्मरणान्नामकीर्तनात् ।
रामप्रेमप्रदा नित्यं त्वं सर्वशुभकारिणी ॥ १६१ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे पश्चिमखण्डे सीताजन्मोत्सवे प्रमोदवनवर्णने सरयूनामसहस्रकं नाम षट्त्रिंशोऽध्यायः ॥ ३६ ॥

सप्तत्रिंशोऽध्यायः

पुरुष उवाच

ये मज्जनं करिष्यन्ति तव प्रेममये जले ।
तेषां रामपदाम्भोजे भवित्री रतिरुत्तमा ॥ १ ॥

गच्छ त्वं रामनगरीमयोध्यारव्यां शुभान्विताम् ।
पावयन्ती शुभान् देशात् निजवारिसमीरणी ॥ २ ॥

गङ्गया सह भूपस्त्वं लवणोदं गमिष्यसि ।
ब्रह्माण्डाधारवासिन्या बिरजायाः शुभं जलम् ॥ ३ ॥

एकीकृत्य निजैस्तोयैर्गमिष्यसि महीतलम् ।
उपरिस्थमहाव्योमब्रह्माण्डद्वारमार्गतः ॥ ४ ॥

ब्रह्मलोकं समागत्य ब्रह्माणं स्नपयिष्यसि ।
तपोलोके सतीर्मातॄस्तापसान् सिद्धपुङ्गवान् ॥ ५ ॥

[1]पावयित्वा पितॄन् सर्वान् जनकलोकमुपैष्यसि ।
जनलोके पावयित्वा तत्रस्थान् देवतागणान् ॥ ६ ॥

महर्लोके ध्रुवस्थाने पूजितौत्तानपादिना ।
सप्तर्षिमण्डले भूपो वन्दिता तैर्मुनीश्वरैः ॥ ७ ॥

अरुन्धत्या स्तुता चैव स्तुत्वाचत्वमरुन्धतीम् ।
परस्परं सुखंभूपस्तत्र नित्यं करिष्यथः ॥ ८ ॥

ततः स्वर्लोकमागत्य देवैर्देवीभिरीडिता ।
पूजिता देवराजेन भुवर्लोकमुपैष्यसि ॥ ९ ॥

तत्र दिव्यैर्देवगणैः सिद्धविद्याधरोरगैः ।
पूजिता संस्तुता चैव भूर्लोकं प्लावयिष्यसि ॥ १० ॥

दिव्ये हिमालयवने विचरन्ती समंततः ।
आश्रमान् मुनिवर्याणां विशेषात्प्लावयिष्यसि ॥ ११ ॥

दिव्यवर्षसहस्रं तु विशिष्टेन तपस्विना ।
आराधिता ततो देवि मर्त्यलोकमुपैष्यसि ॥ १२ ॥

अयोध्यानगरे रम्ये तव वासो भविष्यति ।
नित्य संनिहिता तत्र कामान् सम्भूरयिष्यसि ॥ १३ ॥

इदं ते कार्यमुच्छिष्टं स्थानं चैव शुभान्वितम् ।
आविर्भावस्तव सदा शुभाय धरणीतले ॥ १४ ॥

नृणां श्रीरामभक्तानां विशुद्धमनसां सताम् ।
अन्येषां चापि लोकानां पावनी त्वं सदा मता ॥ १५ ॥

---

१. इतः परं यावत् नास्ति—बड़ौ० (तत्रलिखितं ६०-६१ मूल पुस्तकेनास्तीति)

आपदो विपदश्चैव दारिद्र्यमशुभं तथा।
कुष्ठाद्याश्च महरोगा दुश्चिकित्स्या भिषग्वरैः ॥ १६ ॥
अभिचारा ग्रहाः कृत्याः संक्षये यान्ति तत्क्षणात्।
पश्यतां स्मरतां चैव मज्जतां तव वारिणि ॥ १७ ॥
इत्थं शुभाय मर्त्यानां प्रकटा त्वं महीतले।
भविष्यसि वसिष्ठस्य तपसा सुखकारिणी ॥ १८ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे पश्चिमखण्डे सीताजन्मोत्सवे प्रमोदवनवर्णने सरयूत्पत्तौ सप्तत्रिंशोऽध्यायः ॥ ३७ ॥

अष्टात्रिंशोऽध्यायः

श्रीशुक उवाच

इत्यादिष्टा सरयू पुरुषेण भूम्ना तत्रस्थैर्महा योगिभिश्च भूयो।
भूपो वन्दिता गङ्गया च कालिन्द्या चाप्यर्चिता दिव्यभावैः ॥ १ ॥
तामुवाच ततो गङ्गा श्रीमद्विष्णुपदोद्गता।
प्रश्रयावनता भूत्वा विनयेन कृताञ्जलिः ॥ २ ॥

गङ्गोवाच

धन्यासि भवती मातः श्रीरामप्रेमरूपिणी।
ये च त्वयि निमज्जन्ति तेऽपि धन्या नरा भुवि ॥ ३ ॥
त्वमयोध्यापुरे स्थित्वा प्रमोदवनमण्डिते।
रामलीलारसं नित्यं द्रक्ष्यसि प्रतिवासरम् ॥ ४ ॥
त्वं चेन्मां निजसार्थेन कृपयिष्यसि भाविनी।
तदाहमपि वै रामलीलां दृष्टास्मि चिन्मयीम् ॥ ५ ॥

यमुनोवाच

नमस्ते सरयूरूपे श्रीरामप्रेमसम्पदे।
त्वत्संगादहमप्यवगन्तास्मि परमं पदम् ॥ ६ ॥
यदामनन्ति मुनयः प्रमोदवनसंज्ञकम्।
चिदानन्दमयं नित्यं रामलीलामहास्पदम् ॥ ७ ॥
तन्मां दर्शय कारुण्यान्निजसंगं च देहि मे।
यथाहमपि पश्येयं रामलीलां मनोहराम् ॥ ८ ॥

सरस्वत्युवाच

प्रेमानन्दमयी साक्षाद् रामलीलाविशारदा ।
प्रसीद मपि मातस्त्वं सरयूर्विश्वपाविनी ॥ ९ ॥

निज सार्थं स्थापयास्मान् यथा पश्येम तत्पदम् ।
रामलीलारसागारं प्रमोदवनमुत्तमम् ॥ १० ॥

कथं तद् दृश्यतां मातर्विना त्वत्करुणाभरम् ।
तस्माद्यत्र स्थास्यसि त्वं तत्रस्थास्यामहे वयम् ॥ ११ ॥

गायत्र्युवाच

अहं वै छन्दसं माता वाञ्छामि तव संनिधिम् ।
प्रमोदविपिने रामलीलारससुखाप्तये ॥ १२ ॥

सावित्र्युवाच

यत्ते विज्ञापितं मातर्गायत्र्या सुरसेव्यया ।
तदेव मम विज्ञाप्यं श्रूयतां करुणावति ॥ १३ ॥

अरुन्धत्युवाच

असारं जगदेवेदं सारं ब्रह्मपरं महः ।
तच्च रामस्वरूपं तत्प्रेममात्रेण लभ्यते ॥ १४ ॥

तत्प्रेम चित्सुखाकारं भवत्याः परमं वपुः ।
तस्मात्त्वत्सार्थगा नित्यं निवत्स्यामि महोदके ॥ १५ ॥

लोपामुद्रोवाच

अहं जानामि ते रूपं रामप्रेमैकविग्रहम् ।
तस्मात्त्वां न विहास्यामि साररूपां सनातनीम् ॥ १६ ॥

प्रमोदवनमभ्येत्य स्थास्यामि तव संनिधौ ।
द्रक्ष्यामि तां प्रभोर्लीलां श्रीरामस्य परात्मनः ॥ १७ ॥

गार्ग्युवाच

अहं भर्तुः प्रसादेन ब्रह्मानन्दमहोदधौ ।
निमग्ना त्वत्प्रसादेन प्रेमानन्द प्रकामये ॥ १८ ॥

मैत्रेय्युवाच

कृपयस्व परं मातर्यथाहमपि संततम् ।
श्रीरामप्रेमपाथोधेर्लभे किमपि विप्रषः ॥ १९ ॥

पार्वत्युवाच

अहं वंशीरवं श्रुत्वा रामस्य सुमनोहरम् ।
पत्युः शिवस्याङ्कस्थापि जहामि मनसो धृतिम् ॥ २० ॥

तदहं द्रष्टुमिच्छामि रामं त्रैलोक्यसुन्दरम् ।
त्वत्सार्थेन गमिष्यामि प्रमोदवनमुत्तमम् ॥ २१ ॥

लक्ष्मीरुवाच

अहं वैकुण्ठगा नित्यं विष्णोर्वक्षसि संस्थिता ।
तथापि कामये रामं लीलानन्दरसात्मम् ॥ २२ ॥
तस्मात्त्वत्सार्थगा भूत्वा यास्यामि प्रमुदाटवीम् ।
कृपया मां निरीक्षस्व श्रीरामप्रेमसिद्धये ॥ २३ ॥

रतिरुवाच

अहं ते दासिका काचित्पादाब्जपरिचारिका ।
न मां त्वं त्यक्तुमर्हसि रामप्रेमाभिलाषुकाम् ॥ २४ ॥

शच्युवाच

यथा रतिस्तथैवाहं दासी ते प्रेमरूपिणी ।
न मां वैरोचते लोको यत्रैन्द्रयदभूतयः ॥ २५ ॥
नय मां निजसार्थेन प्रमोदवनभूमिकाम् ।
अगम्यामितरैर्लोकैः श्रीरामरतिवर्जितैः ॥ २६ ॥

अनसूयोवाच

भर्ता मे भगवान् साक्षाच्चित्रकूटे यदाश्रमः ।
श्रीरामप्रेमसंयुक्तस्तस्याहं परमा प्रिया ॥
त्वत्संनिधौ स्थातुमर्हा न मां त्वं त्यक्तुमर्हसि ॥ २७ ॥

दित्यादिती ऊचतुः

आवां प्रजापतेर्भार्ये देवतासुरमातरौ ।
तव संगेन वै मातर्भविष्यावो हरौ रते ॥ २८ ॥
तस्मादावां नेष्यसि त्वं कृपया श्रीकृपावती ।
प्रमोदवनमत्यर्थं रामलीलामनोहरम् ॥ २९ ॥

देवहू तिरुवाच

अहं कपिलदेवस्य जननी कर्दमस्य च ।
प्रजापतेः प्रिया भार्या रामप्रेमाभिलाषुका ॥ ३० ॥
तदर्थं त्वामहं प्राप्ता यास्यामि प्रमुदाटवीम् ।
हस्तावलम्बं वितर त्वं परप्रेमरूपिणी ॥ ३१ ॥
मेधाद्या दशपीठस्थाः शक्तयः सरयूं प्रति ।
ऊचिरे वचनं सर्वाः सानुरागाः पृथक् पृथक् ॥ ३२ ॥

मेधाघा ऊचुः

पावत्यो देवता दिव्या विष्णुरुद्रादिरूपिणीः ।
तासां वयं पीठशक्तिरूपेण खलु संस्थिताः ॥ ३३ ॥
अधुना त्वामभ्युपेताः श्रीरामप्रेमकामुकाः ।
दोलान्तसंस्थिता नित्यं याने पीठान्तसंस्थिताः ॥ ३४ ॥
नित्यं त्वां सेवयिष्यामो यत्र यत्र गमिष्यसि ।
प्रमोदवनमभ्येत्य स्थास्यामस्तव संनिधौ ॥ ३५ ॥
इति विज्ञाप्य सरयूं सकलास्ताः पृथक् पृथक् ।
द्रवरूपेण सम्भूय विविशुस्तन्महोदके ॥ ३६ ॥
गङ्गा च यमुना चैव तथा देवी सरस्वती ।
द्रवरूपं समास्थाय विविशुः सरयूजले ॥ ३७ ॥
अन्याश्च देवताः सर्वा लोपामुद्रादयस्तदा ।
द्रवीभूय सरय्वां ता विविशुः सुखितान्तराः ॥ ३८ ॥
ततः सा सरयूर्दृप्ता महाकल्लोलनिःस्वनैः ।
तरंगबाहुसाहस्रैर्लिम्पती कनकावनीम् ॥ ३९ ॥
सुसंगता विरजया ब्रह्मनघा महोर्जया ।
ततश्च तामभिप्राप्ता सरयू प्रेमरूपिणीम् ॥ ४० ॥
अभिजग्राह विरजा ब्रह्मलोकमहानदी ।
अत्यादरेण मिलिता सम्मुखीभूय सा ततः ।
तरंगबाहुप्रसरैरालिलिङ्ग सरिद्वरा ॥ ४१ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे पश्चिमखण्डे सीताजन्मोत्सवे प्रमोदवनवर्णने सरयूसम्भवे ऽष्टात्रिंशोऽध्यायः ॥ ३८ ॥

एकोनचत्वारिंशोऽध्यायः

श्रीशुकउवाच

तया सम्मानिता देवी सरयूर्विश्वपाविनी ।
विश्रान्ता तन्तटे सार्धं मेधाघाभिश्च शक्तिभिः ॥ १ ॥
तां दृष्ट्वा मुनयः सर्वे भक्तिमन्तो भवार्चिताः ।
जाताः प्रसन्नमनसो विरजापारवासिनः ॥ २ ॥

तत्र तद्भाति परमं ब्रह्माक्षरमनुत्तमम् ।
पुरुषोत्तमस्य यद्दिव्यं कीर्तितं पदमुच्चकैः ॥ ३ ॥
स लोकस्तस्य विमलश्चिन्तामणिमयी मही ।
कल्पद्रुमा द्रुमाः सर्वे पूर्णपीयूषकं सरः ॥ ४ ॥
ज्ञानिनां तत्त्विराकारं निरीहं निर्गुणं तथा ।
तदेव भक्तैः साकारं दृश्यते सगुणं महत् ॥ ५ ॥
तत्र प्रवर्तयामास[1] रामभक्तिमनुत्तमाम् ।
सरय्वाः सलिलं पीत्वा तत्रत्यास्ते महर्षयः ॥ ६ ॥
श्रीरामभक्तिसम्पन्ना बभूवुर्हृष्टचेतसः ।
ततस्तां विरजा देवी प्रोवाच विगतस्मया ॥ ७ ॥
दर्शनेनैव हृष्टात्मा सद्यः प्रेमवती सती ।

विरजोवाच

इह ब्रह्मैव परमं गीयते श्रुतिकोटिभिः ।
ज्ञानगम्यं सदा ज्ञेयं रूक्षवद्भाति तत्सुखम् ॥ ८ ॥
अधुना तु परं प्रेम भवत्या प्रकटीकृतम् ।
श्रीरामचन्द्रविषयं ब्रह्मानन्दाच्छताधिकम् ॥ ९ ॥
सहस्रलक्षकोट्यंशैः स्फुरदभ्यधिकाधिकम् ।
त्वं गुरुः परमास्माकं श्रीरामप्रेमशिक्षणे ॥ १० ॥
सदास्माकं गृहेतिष्ठ ब्रह्माक्षरमहायदे ।
अत्र स्थित्वा ज्ञानवतां मुनीनां ब्रह्मवर्चसाम् ॥ ११ ॥
प्रवर्तय परांभक्तिं रसास्वादैकहेतवे ।
नामी विदन्ति प्रेमाणं परब्रह्मरसोत्तरम् ॥ १२ ॥
व्यर्थमेषां ततो ज्ञानं गणितानन्दभागिनाम् ।
मानुषेभ्योऽधिकानन्दाः सम्राजः शतसंख्यया ॥ १३ ॥
सम्राड्नोयक्षगन्धर्वाः कर्मदेवास्ततोऽपि च ।
देवाश्च कर्मदेवेभ्यस्तेभ्य इन्द्रस्तथैव च ॥ १४ ॥
इन्द्राच्छताधिकानन्द आङ्गिरस उदारधीः ।
आङ्गिरसाधिको ब्रह्मा ब्रह्मणो ब्रह्म चाधिकम् ॥ १५ ॥
एषाऽऽनन्दस्य गणना श्रुत्या मीमांसितापुरा ।
तस्मादगणितानन्दं परं ब्रह्म प्रकीर्तितम् ॥ १६ ॥
अक्षरात्परतः स्थानं यत्र श्रीपुरुषोत्तमः ।
परं ब्रह्म तदेवोक्तं साकारं रसरूपधृक् ॥ १७ ॥

---

१. इतः पूर्वं खण्डितः पाठः—बड़ौ. ।

परं ब्रह्म प्रेमगम्यं प्रेमा भक्तिरुदाहृता।
सोऽत्र प्रवर्तितो मातस्त्वया प्रेमस्वरूपया ॥ १८ ॥

तस्मात्तवात्र संस्थानं सततं कामयेऽस्मि च।
नो चेद्यत्र प्रयासि त्वं तत्र मां नय सार्थगाम् ॥ १९ ॥

सरयूरुवाच

अहं निदेशात्पुरुषस्य भूम्नस्तत्र प्रयास्यामि विभाति यत्र।
पुरो परानन्दपदव्ययोध्या श्रीरामसीतारसकेलिपात्रम् ॥ २० ॥

तत्र प्रमोदवनमध्यगता सदाहं स्थास्यामि नित्यमुदयं दधती शुभोच्चैः।
सत्या महावनिविहारकरी सदैव वर्ते प्रमुद्वनभुवि प्रमुदं दधाना ॥ २१ ॥

विरजोवाच

नय मामपि तत्रैव प्रमोदवनमद्भुतम्।
अयोध्यापुरपर्यन्तस्थानमानन्दमन्दिरम् ॥ २२ ॥

गायन्ती त्वद्गुणांस्तत्र स्थास्यामि तव सन्निधौ।
श्रीरामकेलीसम्भूतपरमानन्दभाजनम् ॥ २३ ॥

श्रीशुक उवाच

तथेत्युक्त्वा सरयूस्तां स्वसार्थे सरिद्वरां विरजां जातसख्याम्।
कृत्वा ततः साः प्रययौ मन्दमन्दं संश्रृण्वती स्तवं स्वस्यपुण्यम् ॥ २४ ॥

मुनय ऊचुः

नमो नमस्ते सरयू प्रकामं निजैस्तरंगैर्भुवनं पावयन्त्यै।
संस्पर्शनाद्दर्शनाच्चाम्बुपानादनेकवक्रेक्षणतांददासि ॥ २५ ॥

त्वं देवि मायाविषमज्वरघ्नी सुधारसादभ्यधिकं गुणाढ्या।
अशोकतामातनुषे जनानां भवायवगं स्वभिलाषुकाणाम् ॥ २६ ॥

तवाम्बुसंस्पर्शनतो भवन्ति पुण्यानि यानि प्रभवं गतानि।
न सोमपानां न च वाजपेयिनां न वाश्वमेधावभृथाप्लुतात्मनाम् ॥ २७ ॥

समीरसंगात्तव पाथसः कणैर्गत्वा सुदूरं पशुपक्षिभूरुहाः।
विधीयन्ते ब्रह्मभूयाय योज्याः किं वाच्यस्ते महिमा स्नानजन्यः ॥ २८ ॥

पायं पायं चुलुकैस्तावकीनं पीयूषाभं वारिनिर्णिक्तरूपम्।
तृप्तो ब्रह्माणं तृणवन्मन्यमानः स्वस्थः शेते तीरदेशे तवैव ॥ २९ ॥

न तस्य मृत्युर्न तथापमृत्युर्न कामदीप्तिर्न च माया मदश्च।
यस्ते पाथस्यवगाहं तनोति सुधासवर्णे सर्वतापामयघ्ने ॥ ३० ॥

द्रुतो भूया पुरुषो रामचन्द्रः प्रेमद्रवः सोऽभवदिन्दुवर्णः।
तस्यावगाहाज्जनिभाजो भवन्ति प्रेमप्लुताः सहजानन्दिनीशे ॥ ३१ ॥

त्वं रामगङ्गा भवमुक्तिहेतुः समस्तकल्याणपरं परात्मा ।
शुभाय लोके प्रकटत्वमागाः श्रीरामभक्त्येकजुषां जनानाम् ॥ ३२ ॥

नमोऽम्ब रामगङ्गायै तुभ्यं कल्याणमूर्तये ।
वासिष्ठ्यै प्रेमगङ्गायै पावयन्त्यै जगत्त्रयम् ॥ ३३ ॥

इति स्तुवन्तो मुनयः सरयूं विश्वपावनीम् ।
मुक्ता अपि जना जाताः प्रेमभाजोरघूद्वहे ॥ ३४ ॥

ततः सा स्वर्गभूमीषु तत्रस्थैर्विहितस्तवा ।
प्लावयन्ती शुभान् स्वर्गान् क्रमेणागाद्धिमालयम् ॥ ३५ ॥

हिमाद्रेः पूर्वशिखरे संस्थिता शुभरूपिणी ।
स्तूयमाना देवसंघैर्यक्षगन्धर्वपुङ्गवैः ॥ ३६ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे पश्चिमखण्डे सीताजन्मोत्सवे सरयूसम्भवे एकोनचत्वारिंशोऽध्यायः ॥ ३९ ॥

चत्वारिंशोऽध्यायः

श्रीशुक उवाच

ततो वसिष्ठो योगीन्द्रस्तपश्चक्रे पुरा महत् ।
तपसा तेन संतुष्टा सरयूरागता महीम् ॥ १ ॥

जनक उवाच

कथं मुनिस्तपश्चक्रे वसिष्ठः सरयूकृते ।
एतन्मे वद योगीन्द्र रामगङ्गा यथाऽऽगता ॥ २ ॥

श्रीशुक उवाच

शृणु राजन् प्रवक्ष्यामि सरयूत्पत्तिमुत्तमाम् ।
अयोध्यायाश्च निर्माणं पूर्वं वैवस्वतान्मनोः ॥ ३ ॥

वक्ष्ये प्रसंगतः प्राप्तां वैवस्वतमनोः कथाम् ।
पावनीं श्रवणादेव चित्तशुद्धिविधायिनीम् ॥ ४ ॥

वैवस्वतो मनुरभूद् भगवान् सर्वदर्शनः ।
मनीषी चैव सर्वज्ञः प्रजाकर्मण्यतन्द्रितः ॥ ५ ॥

पारगः सर्ववेदानां सर्वदैवतपूजितः ।
आज्ञया ब्रह्मणो नित्यं भुवमेतां शशास सः ॥ ६ ॥

स इदं प्रथमं चक्रे ब्रह्मक्षत्रमनारतम् ।
ततश्चैव तु विट्शूद्रं स्वे स्वै कर्मणि संस्थितम् ॥ ७ ॥

वृत्तीश्च प्रथमं चक्रे लोकयात्राविधायिकाः ।
कालं कर्म स्वभावं च समाश्रित्य सनातनम् ॥ ८ ॥

भगवान् सर्वहेतुत्वात्स्वयं तद्वशगः स्थितः ।
दिव्येन चक्षुषा सर्वमपश्यद्भगवान् स्वयम् ॥ ९ ॥

भूतं भवच्च भव्यं च स्थावरं चैव जङ्गमम् ।
सरहस्यां साङ्गगणां सोत्तरां सपदक्रमाम् ॥ १० ॥

सशाखाभाविविस्तारं बीजरूपां व्यवस्थिताम् ।
त्रयीं सोऽधिजगे देवः सेतिहासपुराणकाम् ॥ ११ ॥

ससंहिता सतन्त्रां च सकाण्डाध्यायविस्तराम् ।
विवस्वतो भगवतश्चिकीर्षत इद जगत् ॥ १२ ॥

सर्वं विज्ञातवान् विश्वं शब्दरूपेण संस्थितम् ।
शब्दो नामा परं ब्रह्म परमे व्योम्नि संस्थितम् ॥ १३ ॥

वेदो नारायणः साक्षात्स्वयंभूर्ब्रह्मकारणम् ।
तस्याज्ञया पितुश्चैव नियोगाच्छ्रीविवस्वतः ॥ १४ ॥

पृथक्तन्त्रां वेदमयीं वाचं विज्ञातवान् स्वयम् ।
सोऽग्लासीत्प्रथमं सर्गे प्रजाकर्मण्युपारतः ॥ १५ ॥

रुद्रस्यैवोपदेशेन प्रजासंहारकारिणः ।

जनक उवाच

भगवानीश्वरो रुद्रः कथं तमुपदिष्टवान् ।
येन ग्लानोऽभवद्देवः प्रजासर्गे मनुः स्वयम् ॥ १६ ॥

श्रीशुक उवाच

एतत्तेऽहं प्रवक्ष्यामि शृणु राजर्षिसत्तम ।
वैवस्वतो मनुः पूर्वं पित्रा युक्तः प्रजाकृतौ ॥ १७ ॥

अकरोदखिलं विश्वं संक्षेपेण यथोदितम् ।
चातुर्वर्ण्यं गुणांश्चैव कर्माणि च विभागशः ॥ १८ ॥

पृथक् पृथक् प्रवृत्तीश्च यज्ञं पर्जन्यकारणम् ।
संस्थाश्चापि पृथक् चक्रे यज्ञस्य ब्रह्मकर्मणः ॥ १९ ॥

पशूंश्चापि पृथक् चक्रे वायव्यानग्निदैवतान् ।
वारुणानिन्द्रदैवत्यां स्तथाग्नी वोमदैवतान् ॥ २० ॥

मैत्रावरुणदैवत्यान् सर्वदैवत्यकांस्तथा ।
प्राजापत्यांश्च बहुशो यैर्यज्ञः सम्प्रवर्तते ॥ २१ ॥

देशं कालं तथा द्रव्यं मन्त्रं कर्तृंश्च भेदशः ।
अङ्गानि चापि भूरीणि क्रियाश्चापि विधिक्षमाः ॥ २२ ॥

आवायं च तथोद्वायं तन्त्राणि च पृथक् पृथक् ।
जुह्वादीनि च यात्राणि तथावभृथमुत्तमम् ॥ २३ ॥

अपूर्वाणि च भिन्नानि साङ्गोपाङ्गस्य कर्मणः ।
ततः प्रववृते लोको यज्ञात्संवत्सरादिकात् ॥ २४ ॥

इष्टवान् भगवान् देव भगवन्तं महेश्वरम् ।
ईशः पर्जन्यरूपेण महीमाप्लावयद्रसैः ॥ २५ ॥

रसाप्लुता मही चापि बीजानि सुषुवे पृथक् ।
संजात ओषधीभारः प्रजावृत्तिप्रकल्पकः ॥ २६ ॥

अन्नं ब्रह्म स्वयं भूत्वा पालयामास वै जगत् ।
ततः प्रववृधे लोकश्चातुर्वर्ण्यसमाह्वयः ॥ २७ ॥

पूर्वपूर्वक्रमात्सर्व उत्तरोत्तरतोऽधिकः ।
प्रजायतेः कश्यपस्य द्वे अभूतां वरस्त्रियौ ॥ २८ ॥

दितिश्चैवादितिश्चैव तयोर्देवासुरोऽभवत् ।
स्वरसान्मानुषः सर्गः सर्व एव व्यवर्धत ॥ २९ ॥

एवं प्रवृद्धे सकले प्रपञ्चे लोकसंज्ञनि ।
लोकैरुद्वेजितो रुद्रो भगवांस्तपसि स्थितः ॥ ३० ॥

प्रजासंहारनिरतो वरदो वरलब्धये ।
ततो रोषं स्वयं चक्रे संजातो भैरवः स्वयम् ॥ ३१ ॥

रुद्ररोषसमुद्भूतो भैरवो भीषणः प्रभुः ।
विध्वंसयन् जगत्सर्वं व्यचरत् पावको यथा ॥ ३२ ॥

ततो वैवस्वतमनोर्जनकेन विवस्वता ।
प्रार्थितो भैरवो देवः स्तवेनानेनसंस्तुतः ॥ ३३ ॥

विवस्वानुवाच

नमस्ते भगवन् रुद्ररोषतेजःसमुद्भव ।
लोकसंहारनिपुण नीलपिङ्गलवर्चसे ॥ ३४ ॥

नमस्ते धूमधूम्राय नीलजीमूतरोचिषे ।
जटापिंगलरूपाय विरूपाक्षाय भीष्णवे ॥ ३५ ॥

क्रोधाय क्रोधरक्ताय क्रोधरक्तेक्षणाय च ।
क्रोधसंहाररूपाय भैरवाय नमो नमः ॥ ३६ ॥

क्रोधभैरवभूतेश सम्पूर्णजगदन्तक ।
तीक्ष्णदंष्ट्राग्रदुष्प्रेक्ष महाकाल नमोऽस्तु ते ॥ ३७ ॥

तडित्पिशंगप्रोद्भासिकपर्दकविभीषण ।
शूलभ्रमणवित्रासिन् भैरवाय नमोऽस्तु ते ॥ ३८ ॥
खड्गशूलधरायोर्ध्वं वरदाभयपाणये ।
चतुर्भुजाय भीमाय भैरवाय नमोऽस्तु ते ॥ ३९ ॥
उल्कासहस्रविस्रस्तजगत्त्रयभयालवे ।
ज्वालामालाकरालाय भैरवाय नमोऽस्तु ते ॥ ४० ॥
दीप्ताय दीप्तनेत्राय विद्युद्दीधितिदीप्तये ।
प्रदीप्तवह्निज्वालाय जटिलाय नमोऽस्तु ते ॥ ४१ ॥
व्यालमालापरीताय धूलिधूसरवर्ष्मणे ।
गिरीन्द्रशिखरोच्चाय महोग्राय नमोऽस्तु ते ॥ ४२ ॥
पादप्रहारविध्वस्तसप्तपातालभूमये ।
किरीटोल्लिखिताभ्राय विशालाय नमोऽस्तु ते ॥ ४३ ॥
दिगम्बराय वीराय श्मशानामिषभोजिने ।
शोणितारक्ततुण्डाय प्रचण्डाय नमोऽस्तु ते ॥ ४४ ॥
चण्डाय चण्डवीर्याय चण्डविक्रमकारिणे ।
भूतान्तकरणोग्राय त्र्यम्बकाय नमोऽस्तु ते ॥ ४५ ॥
वेतालौघपरीताय डाकिनीतृप्तिहेतवे ।
चण्डिकागुणयुक्ताय भीषणाय नमोऽस्तु ते ॥ ४६ ॥
अत्युद्भटजटाटोपक्षोभिताम्बुदमण्डल ।
विकराल महाकाल चन्द्रभाल नमोऽस्तु ते ॥ ४७ ॥
एतत्तव जगत्सर्वं कृपादृष्ट्याभिवीक्ष्यताम् ।
न त्वस्य ध्वसनं युक्तं विनैवावसरं प्रभो ॥ ४८ ॥
अन्य एव स कालोऽस्ति यत्र संहरसे जगत् ।
सृष्टिकालोऽयमधुना कृपां विस्तारय प्रभो ॥ ४९ ॥
विष्णोराज्ञा भगवतो महापुरुषसंज्ञिनः ।
काले काले यतोऽस्यामिः क्रियते विश्वमीदृशम् ॥ ५० ॥
तस्य नाभिस्थलोद्भूतपद्मभूर्भगवान् विधिः ।
अरीरचज्जगत्सर्वं नियुज्यास्यांश्चतुर्दश ॥ ५१ ॥
तस्मै त्वं कृपयास्मासु मा द्रुह क्रोधभैरव ।
त्वया विध्वंस्यमानं तन्नङ्क्ष्यते नष्टमेव च ॥ ५२ ॥
करोषि ताण्डवं यर्हि भुजौ सम्भ्रामयन् मुहुः ।
पातालं पादन्यासेन स्वर्गो मुद्धर्ना च भज्यते ॥ ५३ ॥

इदं ते ताण्डवं भीमं विश्वसंहरणक्षयम् ।
संवर्तावसरे योग्यं न सर्गावसरे क्वचित् ॥ ५४ ॥

इत्थं विवस्वता भूयः संस्तुतः क्रोधभैरवः ।
प्रत्युवाच प्रसन्नात्मा बलिभिर्धूपदीपकैः ॥ ५५ ॥

क्रोधभैरव उवाच

स्तवेनानेन तेऽत्यर्थं प्रसन्नोऽस्मि ततोभृशम् ।
वरं वृणीष्वभद्रं ते विवस्वन् दैवतोत्तम ॥ ५६ ॥

विवस्वानुवाच

विश्वसंहरणादेव विरमस्वाधुना प्रभो ।
एष एव वरो देयः क्रोधं संहर भैरव ॥ ५७ ॥

स्तवेनानेन ये नित्यं स्तोष्यन्ति त्वां भवे जनाः ।
तेषां त्वं सुखदो भूपा एष चापि वरोऽस्ति मे ॥ ५८ ॥

श्रीशुक उवाच

तथास्त्विति वरं दत्त्वा प्रणताय विवस्वते ।
प्रजगाम प्रशान्तात्मा कैलासाख्यं निजास्पदम् ॥ ५९ ॥

तमागतमभिप्रेत्य भगवान् रुद्र ईश्वरः ।
आज्ञाविघातदोषेण चुक्रोध हृदये भृशम् ॥ ६० ॥

श्रीमहादेव उवाच

कस्मान्न ध्वंसितं विश्वं मदाज्ञा विहता कुतः ।
अव्यवस्थितचित्ताय तुभ्यं कुप्यामि भैरव ॥ ६१ ॥

मत्तोऽसि क्षणतुष्टोऽसि विहितं न वचो मम ।
तस्मात्सर्वेषु देवेषु कुत्सितस्त्वं भविष्यसि ॥ ६२ ॥

सुरामांसप्रियो लोके भविष्यसि विशेषतः ।
पुरुषाणां बलीन् खादन् पुरुषादो भविष्यसि ॥ ६३ ॥

न खलु त्वां भजिष्यन्ति सात्त्विका अपि राजसाः ।
तामसाः क्रूरकर्माणः सततं त्वामुपासते ॥ ६४ ॥

ततो निर्गच्छ मत्पार्श्वात् सात्त्विकं पदमीदृशम् ।
गच्छ त्वं तामसांल्लोकान् यत्र मांससुराबलिः ॥ ६५ ॥

इत्थं निर्भर्त्सितस्तेन देवदेवेन भैरवः ।
जगाम रक्षसां लोकान् महातामसरूपिणः ॥ ६६ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे पश्चिमखण्डे सीताजन्मोत्सवे सरयूत्पत्तौ वैवस्वतोपाख्याने चत्वारिंशोऽध्यायः ॥ ४० ॥

एकचत्वारिंशोऽध्यायः

श्रीशुक उवाच

शिवस्तु दुःसहं मत्वा प्रज्ञासर्गमनारतम् ।
वैवस्वताय यनवे ज्ञानं वक्तुमुपागतः ॥ १ ॥

ब्रह्मचारी यथा भूत्वा धृताषाढो मृगाजिनी ।
धौतोज्ज्वलाम्बरधरः सुपूतः सुदृढव्रतः ॥ २ ॥

महार्हंराज्यासनगं देवं वैवस्वतं मनुम् ।
अभ्यगच्छन्नभोदेशादवतीर्य लसद्द्युतिः ॥ ३ ॥

तं सूर्यप्रतिमं दृष्ट्वावतरन्तं नभस्तलात् ।
उत्तस्थौ स्वासनं हित्वा भक्त्या वैवस्वतो मनुः ॥ ४ ॥

सर्वदाभ्यागतः पार्श्वे ब्रह्मचर्यनिधिर्द्विजः ।
वैवस्वतो विस्मितोऽभूद्दृष्ट्वा तद्ब्रह्मवर्चसम् ॥
प्रत्युत्थाय ननामास्त्रै मूर्ध्ना नम्रेण धार्मिकः ॥ ५ ॥

स तं प्रयुज्याशिषमद्भुतां मुनिर्विमुक्तिमार्गं सहसा व्रजेति भोः ।
निशम्य तस्याशिषमेष निर्वृतः संसारचक्रभ्रमणाह्लानचित्तः ॥ ६ ॥

पाद्यादिभिः प्रपूज्यैनं कृत्वा च बहुलादरम् ।
महार्हमासनं दत्त्वा शिरश्चरणयोर्न्यधात् ॥ ७ ॥

स तस्य शिर उत्सार्य महामुकुटमण्डितम् ।
प्रसन्नहृदयो भूत्वा प्रोवाच मनुजेश्वरम् ॥ ८ ॥

ब्राह्मण उवाच

धन्योऽसि धारणीपाल प्रजापालनतत्परः ।
विविधाश्च प्रजाः कृत्वा कृतकृत्योऽसि साम्प्रतम् ॥ ९ ॥

पारं प्राप्तोऽसि वेदानां समस्तानां महामते ।
साङ्गानां सरहस्यानां सोत्तराम्नायभूयसाम् ॥ १० ॥

अधीत्य साङ्गमाम्नायं पितुर्देवाद्विवस्वतः ।
किमेतत्कृतवान् यत्त्वं भूयः समसृजः प्रजाः ॥ ११ ॥

न हि प्रवृत्तिरुदिता वेदेषु निखिलेष्वपि ।
निवृत्त्येकपरा वेदा ब्रह्मैकं ज्ञापयन्तिहि ॥ १२ ॥

समासतो व्यासतश्च वेदैरेकोऽर्थ ईर्यते ।
बह्वर्थत्वे वाक्यभेदः सर्वाम्नाये प्रसज्यते ॥ १३ ॥

पूर्वकाण्डे यज्ञमात्रं परत्र ब्रह्म केवलम् ।
आम्नायेन च सर्वेण तस्य ज्ञानमुदीर्यते ॥ १४ ॥

पूर्वकाण्डोदितो यज्ञश्चितश्शुद्ध्यर्थमिष्यते ।
कथं ज्ञानकलोदेति शुद्ध्यभावे तु चेतसः ॥ १५ ॥

विचार्यं भवतैवैतद्यतः स्वस्य स्वयं गुरुः ।
प्रवृत्तिर्वा निवृत्तिर्वा किमशोकं पदं दिशेत् ॥ १६ ॥

प्रवृत्तिः खलु भूतानां बन्धनैकसप्रसाधिनी ।
निवृत्त्या विरजोभूत्वा लभते शाश्वतं पदम् ॥ १७ ॥

वैराग्यं चैव विज्ञानं स्वात्मज्ञानैकसाधनम् ।
प्रवृत्तिस्तत्प्रातिकूल्ये निवृत्तिरनुकूलता ॥ १८ ॥

अशान्तिदमशान्तं च कामक्रोधमदावहम् ।
असारूपं संसारमशुभं क उपासते ॥ १९ ॥

सदारं धनपुत्रादिलालसाशोकसम्भृतम् ।
परिणामैकविरसं कः संसारं प्रवर्तयेत् ॥ २० ॥

बहुभिर्भुज्यते भोग एकः खलु निबध्यते ।
ईदृशं गृहमुत्सृज्य स्वात्मानं किं न साधयेत् ॥ २१ ॥

दूरेण खलु तत्तत्त्वं यल्लब्धं त्यक्तगृह्यकैः ।
गृहिणां गृहकृत्येन व्यग्राणां ग्राम्यवृत्तिभिः ॥ २२ ॥

भवेषु क्लिश्यमानानामपूर्णोदरचेतसाम् ।
दधतां महतीं चिन्तां ग्लानिः कस्मान्न जायते ॥ २३ ॥

ग्लायतामपि दुःखेन क्रोशतां भववेदनैः ।
न जायते निवृत्तिर्वै हन्तेयं मूर्खता नृणाम् ॥ २४ ॥

कालं न विश्वसेज्जातु भीषणं क्षणचापलम् ।
वर्द्धयित्वा हरेज्जन्तुं तत्क्षणादेव पश्यतः ॥ २५ ॥

हरितः पुष्पितः पूर्णः फलितो ज्वलितो वने ।
भस्मान्तं च गतो भूमौ मिलितोऽङ्कुरितः पुनः ॥ २६ ॥

अहो कालस्य लीलेयं बलिनोऽखिलभेदिनः ।
निजशक्तिं प्रविस्तार्यं विश्वं विपरिणामयत् ॥ २७ ॥

क्रीडते संततं कालो गुणक्षोभं समाश्रितः ।
दिनमासर्तुवर्षादिप्रलयान्तो महोर्जितः ॥ २८ ॥

निगृह्णीयान्मनो नित्यं विषयेषु न चोत्सृजेत् ।
विमुक्तानिग्रहे चित्ते पुरुषः स्यात्कदर्थितः ॥ २९ ॥

प्रकृतेः परिणामित्वादनेकधा गुणोद्भवः ।
पुरुषः सुखदुःखानि भुङ्क्तेऽयं यत्समाश्रयः ॥ ३० ॥

गुणप्रवाहपतितो यत्र यत्रानुधावति ।
ततस्ततो निगृह्णीयाद्यदीच्छन्मुक्तिमात्मनः ॥ ३१ ॥

अथाधुना ब्रह्मचर्यं श्वो गार्हस्थ्यं भविष्यति ।
ततो वानप्रस्थमथो ग्रहीष्ये दण्डमुत्तमम् ॥ ३२ ॥

एवं क्रमेण मुक्तोऽहं भविष्यामि ततः परम् ।
इत्थमाशावशो लोको लीयते कालवक्त्रगः ॥ ३३ ॥

श्वःसाधनीयमर्थं तु विद्वानद्यैव साधयेत् ।
कालेन बलिना तत्र दीर्घसूत्री विहन्यते ॥ ३४ ॥

यावदिन्द्रियसामर्थ्यं यावदूर्जस्वलं वपुः ।
तावत्कुर्यान्नरो धीमान् संसृतेरात्मसाधनम् ॥ ३५ ॥

देहं न विश्वसेज्जातु निगीर्णं कालशक्तितः ।
अचेतनं भौतिकं तत्केन चैतन्यमाप्यते ॥ ३६ ॥

परमात्मा चिदानन्दो यस्य जीवा वशे स्थिताः ।
स द्विधेयं जगद्वृक्षमाविश्य क्रीडते पृथक् ॥ ३७ ॥

तत्संयोगाद्भूतमयं चेतनं वपुरुच्यते ।
तेन प्रसाधयेत् कार्यं शाश्वतं हितमात्मनः ॥ ३८ ॥

जगद्विनश्वरं सर्वं तत्स्थोऽयं चापि तादृशः ।
इति विज्ञाय न नरो विषयेषु प्रसज्जते ॥ ३९ ॥

विषयासंगयुक्तस्य रागस्तेषु प्रजायते ।
स्वरूपानन्दसंदोहस्तेन नित्यं तिरोहति ॥ ४० ॥

अयं ते दोष आख्यातः प्रजासर्गसमुद्भवः ।
तस्मादतो निवर्तस्व यदीच्छसि शुभं मनो ॥ ४१ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे पश्चिमखण्डे सीताजन्मोत्सवे सरयूत्पत्तौ वैवस्वतोपाख्याने दोषनिरूपणं नामैकचत्वारिंशोऽध्यायः ॥ ४१ ॥

द्विचत्वारिंशोऽध्यायः

जनक उवाच

इत्युक्तः शंकरेणासौ देवो वैवस्वतो मनुः ।
नियुक्तोऽपि प्रजासर्गे सद्य एव व्यरज्यत ॥ १ ॥

वैराग्यवशगं चित्तं कृत्वा वैवस्वतस्य वै ।
उवाच रुद्रो भगवान् स्मयन् मधुरया गिरा ॥ २ ॥

ब्राह्मण उवाच

भवादृशा हि बहवो राजन् प्राक् संस्कृतान्तराः ।
आत्मतत्त्वं प्रविज्ञाय ब्रह्मसाधर्म्यमागताः ॥ ३ ॥

तस्मादेव ते नृपते विशुद्धकुलयोनये ।
श्रद्धालवे च विदुषे प्रोक्तवानिदमस्म्यहम् ॥ ४ ॥

सारं वेदान्तवाक्यानामात्मतत्त्वैकदीपकम् ।
गुह्यं ज्ञानमिदं प्रोक्तं सावधानोऽवधारय ॥ ५ ॥

श्रवणं श्रवणं नैव श्रवणाभ्यां तु यच्छ्रुतम् ।
तदेव मननान्तं चेच्छ्रवणं परिकीर्तितम् ॥ ६ ॥

तस्मान्मदुक्तं मनसा नरेन्द्र निश्चित्य भूयो मननं कुरुष्व ।
ततो निदिध्यासनमेव कृत्वा कृतार्थमात्मानमवेहि राजन् ॥ ७ ॥

पूर्वं जगत् सुसंयम्य पश्चात्कर्मफलं त्यज ।
ततः कर्माणि संन्यस्य ब्रह्मतत्त्वं विभावय ॥ ८ ॥

अचिरान्मनस्येकाग्रे ब्रह्मतत्त्वं परिस्फुरेत् ।
प्रकाशिते परे तत्त्वे कृतकृत्यः प्रजायते ॥ ९ ॥

विमुक्तो जीवन्मुक्तश्च विनिर्धूतपुनर्भवः ।
तादृशस्त्वं भव नृप सिद्धानां नः शुभाशिषा ॥ १० ॥

अङ्गसैवागतग्लानिः प्रजासर्गं च संत्यज ।
अनुजानीहि मां भद्र यथेच्छं तपसे गिरिम् ॥ ११ ॥

हिमालयं महोत्तुङ्गं स्पृहणीयं तपस्विनाम् ।
इत्युक्त्वा प्रगते देवे महादेवे महेश्वरे ॥ १२ ॥

वैवस्वतो मनुरभूत्संनिवृत्तः प्रजाकृतेः ।
यदभूत्तदभूत्पूर्वं संनिवृत्तं ततो जगत् ॥ १३ ॥

अयाल्पमानं तेनाथ विरक्तेन महात्मना ।
दिने दिने क्षीयमाणं बभूव च ततो जगत् ॥ १४ ॥

प्रजासर्गादुपरतं मनुं दृष्ट्वा विशेषतः ।
विवस्वान् भगवानेत्य प्रोवाच मधुरं वचः ॥ १५ ॥

कस्माद्वत्स प्रजासर्गात्सम्प्रत्युपरतो भवान् ।
वयं हि परमेशस्य विष्णोर्मायापतेर्हरेः ॥ १६ ॥

निदेशकारिणः सर्वे तदुक्तं कुर्महे वयम् ।
स आदौ भगवानस्मान् प्रजासर्गे नियुक्तवान् ॥ १७ ॥

तस्य नाभिह्रदादासीद्ब्रह्मा वेदविदां वरः ।
स तस्थ हृदये स्थित्वा परां प्राचोदयद्धरिम् ॥ १८ ॥

सा जाता तत्क्षणादेव निगमागमरूपिणी ।
तस्यां खलु प्रजातापां शब्दमय्यां हि संसृतौ ॥ १९ ॥

तेभ्य एव च शब्देभ्यः सृष्टिर्जातार्थरूपिणी ।
अनुवर्तामहे सर्वे तामेव भगवत्कृतिम् ॥ २० ॥

यथा तदिच्छा समभूत्तथा सर्वं भविष्यति ।
भवान् कस्य निदेशेन प्रजासर्गाद्युपारतः ।
प्रतिकूलमिदं पुत्र देवदेवस्य शार्ङ्गिणः ॥ २१ ॥

वैवस्वत उवाच

आत्मनो बन्धुरात्मासौ गुरुश्चैव सखा सुहृत् ।
किं कृतं तेन पापेन येनात्मैवैष वञ्चितः ॥ २२ ॥

तस्याद्धि सर्वोपायेन जनः स्वात्मानमुद्धरेत् ।
कालं नैव प्रतीक्षेत यस्य वैराग्यमुत्कटम् ॥ २३ ॥

यावन्न जायते जन्तोर्वैराग्यं भवखेदतः ।
तावत्प्रसज्जता सर्गे न तु जातु विरक्तिमान् ॥ २४ ॥

कोऽर्थः प्रसाधितोऽनेन देहं प्राप्य कुबुद्धिना ।
सामर्थ्ये सति यद्देवो नेश्वरः समुपासितः ॥ २५ ॥

इति विज्ञाय सततं समुपासीत तं परम् ।
नो चेदात्मैव सततममुना वञ्चितः स्वयम् ॥ २६ ॥

यथा ममगुरुस्तात पृच्छ्यते चेत्त्वया विभो ।
तमहं ते प्रवक्ष्यामि न तस्मै द्रोग्धुमर्हसि ॥ २७ ॥

योऽसौ देवो हरिः साक्षात्त्रिलोकमहितो विभुः ।
स एव गुरुरूपेण सर्वत्र प्रकटः स्वयम् ॥ २८ ॥

यस्मै कृपयते देवो बुद्धिरूपस्तदाशये ।
प्रकटीभूय कुरुते तत्त्वार्थस्योपदेशनम् ॥ २९ ॥

कश्चित् खलु द्विजवरो मुनिराड् विजितेन्द्रियः ।
स मह्यमूचिवान् गुह्यमात्मयोगमुदारधीः ॥ ३० ॥

निःस्पृहो ब्राह्मणवरो वेदवेदाङ्गपारगः ।
भवदुःखेनखिद्यन्तं ज्ञात्वा मामुपदिष्टवान् ॥ ३१ ॥

उक्त्वा गुह्यतरं ज्ञानं द्विजो यातो हिमालयम् ।
यत्र नित्यं तपस्यन्ति मुनयः शुद्धबुद्धयः ॥ ३२ ॥

सोऽहं तत्रैव यास्यामि तपस्तप्तुं हिमालये ।
आत्मानमात्मयोगेन साधयिष्याभियूयसा ॥ ३३ ॥

इत्युक्त्वा विरते तस्मिन् पुत्रे वैवस्वते मनौ ।
उवाच दीर्घं निःश्वस्य विवस्वान् भगवान् विभुः ॥ ३४ ॥

इति श्रीमदादिरामायणे ब्रह्मभूशुण्डसंवादे पश्चिमखण्डे सीताजन्मोत्सवे सरयूत्पत्तौ वैवस्वतोपाख्याने वैवस्वतोपरमो नाम द्विचत्वारिंशोऽध्यायः ॥ ४२ ॥

त्रिचत्वारिंशोऽध्यायः

विवस्वानुवाच

नैवं त्वं कर्तुमर्होऽसि परेच्छाप्रातिकूल्यतः ।
निदेशकारिणः सर्वे वयमत्र न संशयः ॥ १ ॥
प्रातिकूल्यस्य करणात्कुप्येदीशः कदापि चेत् ।
अस्मानधः पातयित्वा अन्यानेव नियोजयेत् ॥ २ ॥
तदिच्छानुकूल्यकरणादीश्वरश्चेत्प्रसीदति ।
भवदुःखभवोद्वेगो नैव बाधिष्यते तदा ॥ ३ ॥
तदुक्तमेव कर्तव्यं प्रतिकूलं च नाचरेत् ।
तेनैव नृणां कल्याणं भवतीति विनिश्चयः ॥ ४ ॥
इति विज्ञाय वत्स त्वं प्रजासर्गं प्रवर्तय ।
इदं प्रवर्तितं चक्रमादावीशेन केनचित् ॥ ५ ॥
नोल्लङ्घितुं वयं शक्तास्तन्मायाप्रोतविग्रहाः ।
अहो बलवती तस्य माया सर्वविमोहिनी ॥ ६ ॥
तपःस्थं चालयेत्कश्चिद्गृहस्थमपि संत्यजेत् ।
नूनं सर्वेष्वाश्रमेषु गार्हस्थ्यं प्रवरं मतम् ॥ ७ ॥
मोचयत्याशु बन्धेभ्यस्तत्सम्यक् प्रतिपालितम् ।
न्यायागतधनो नित्यं दैवे पित्र्ये च तत्परः ॥ ८ ॥
भुञ्जानो यज्ञशिष्टान्नं गृहस्थः किं न मुच्यते ।
सर्वेषामाश्रमाणां च गृहमेधी समाश्रयः ॥ ९ ॥
तदभावे न सुलभं ब्रह्मचर्यं च भिक्षुता ।
गृहस्थानां मनो नित्यं वेजितं भववेदनैः ॥ १० ॥
वैराग्यमेवाश्रयते ऐहिकामुत्रिकार्थगम् ।
यतीनां च मनो नित्यं शीतवातातपादिभिः ॥ ११ ॥

उद्वेजितं संश्रयेत तृष्णां भोग्यार्थवस्तुषु ।
द्रागेव न त्यजेद्गेहमभुक्तविषयव्रजः ॥ १२ ॥

[1]कदाचिदनिग्रहं चित्तं चलेद्भोग्यार्थदर्शनात् ।
भुक्तभोगोगृहं त्यक्त्वा न पुनस्तत्र वाञ्छति ॥ १३ ॥

वान्ताशिता महादोषं मन्यमानो विरक्तिमान् ।
अत्युत्कटेऽपि वैराग्ये न त्यजेज्जातुचिद्गृहम् ॥ १४ ॥

स्वात्मानं साधयत्येष इहैवाप्रतिकूलके ।
गृहं संन्यस्य मनसा कर्मणां च फलस्पृहाम् ॥ १५ ॥

प्रजासर्गं प्रकुर्वाणः केन पापेन हन्यते ।
तस्मात् सर्वात्मना पुत्र नित्यं वर्तस्व मन्मते ।
उपदिष्टे भगवता साक्षात्कथयता स्वयम् ॥ १६ ॥

वैवस्वत उवाच

कदोपदिष्टं भगवन् भवते शार्ङ्गपाणिना ।
एतन्मे तात कथय येन स्यां मुक्तसंशयः ॥ १७ ॥

विवस्वानुवाच

अहं यथा भवान् पुत्र ग्लानः पूर्वं प्रजाकृतौ ।
संनिवृत्तोऽभवं सर्गान्नियुक्तोऽपि विरंचिना ॥ १८ ॥

अकस्माद्गृहमुत्सृज्य वैराग्याविष्टमानसः ।
सर्वसंन्यसनापाहमुद्युक्तो पतिनांकुले ॥ १९ ॥

उपदिष्टोऽपि विधिना देवेनाम्भोजयोनिना ।
प्रजासर्गमनादृत्य सम्प्रवृत्तो यतिव्रते ॥ २० ॥

तदा मां पुण्डरीकाक्षो भगवान् दर्शनं ददौ ।
पीताम्बरधरः श्रीमान् वनमालाविभूषितः ॥ २१ ॥

श्रीवत्सभासितोरस्कः कौस्तुभी सुभगाकृतिः ।
मुखचन्द्रसमुद्भासिमधुरस्मितदीधितिः ॥ २२ ॥

द्विभुजो वै समुद्भासिधनुर्बाणधरो विभुः ।
महामारकतश्यामो नीलनीरदसुन्दरः ॥ २३ ॥

करुणालोलनयनः पुरुषो भक्तवत्सलः ।
हनुमदादिभिर्दिव्यपार्षदैः परिवेष्टितः ॥ २४ ॥

स्वभावोदारचरितो रत्नाभरणभूषितः ।
दिव्येन वपुषा नित्यं भ्राजमान उदारधीः ॥ २५ ॥

---

१. पादेऽस्मिन्नक्षराधिक्यमार्षः ।

श्रवणस्थसमुल्लासिश्रीमन्मकरकुण्डलः ।
सरलाङ्गददोर्दण्डो लसत्कङ्कणभासुरः ॥ २६ ॥

काञ्चीगुणसमुद्बद्धपीताम्बरविभूषितः ।
गुडालकावृतमुख उदारसदयेक्षणः ॥ २७ ॥

चरणाब्जनखद्योतनिर्मञ्छननिशापतिः ।
कोटिसूर्येन्दुकिरणविनिर्जैत्रतनुप्रभः ॥ २८ ॥

तस्यालोकनमात्रेण निर्वृतोऽहं विशेषतः ।
तमस्तौषं ततो देवं विज्ञाय परमेश्वरम् ।
सद्यः संजातधिषणो विविधैर्वैदिकैः स्तवैः ॥ २९ ॥

नमस्तुभ्यं पुरुषाग्राय रामचन्द्र श्रीमन् भगवन् राघवेन्द्र ।
तवैव शक्त्या दृश्यसे देवदेव न त्वस्माकं दृष्टिशक्त्या पराच्या ॥ ३० ॥

यत्त्वद्रूपं सर्वतःपाणिपादं सर्वात्मकं सर्वतोमूर्द्धनेत्रम् ।
सर्वप्रभाविस्फुरच्चातिदिव्यं तद्विश्वरूपं कवय आमनन्ति ॥ ३१ ॥

माया तवाशेषविश्वप्रसूत्यै बीजात्मिका तामधिश्रित्य शश्वत् ।
भेदात्मिकां तनुषे जीवदृष्टिं तया सर्वो जायतेऽसौ प्रपञ्चः ॥ ३२ ॥

यथा नटो मोहयंल्लोकदृष्टिमनेकधा क्रीडमानो विभाति ।
एवं त्वमीश त्रिजगन्मोहयानो विभासि नैतच्चित्रमालम्बते त्वाम् ॥ ३३ ॥

शुद्धो बुद्धो निर्गुणस्त्वं निरीहस्तथापि विश्वं तनुषे नाथ चित्रम् ।
स्वमायपानेकरूपप्रसक्त्या स्वास्पर्शिन्या तमसेव प्रकाशे ॥ ३४ ॥

कोऽहं कस्मै कुत आगतश्च क स्थास्यामि त्रिजगत्संहृतौ च ।
इत्येवं ते मायया व्याकुलोऽहं दृष्ट्वाद्य त्वां निर्वृतोऽस्म्येष राम ॥ ३५ ॥

जीवोऽहं ते क्रीडनार्थं प्रजातस्त्वत्तः पूर्णाद्ब्रह्मणस्त्वत्प्रतिष्ठः ।
इत्थं ज्ञात्वा मुच्य चिन्तां दुरन्तां कृपादृष्टिं तावकीं संविभर्मि ॥ ३६ ॥

नमः सहस्राननपादबाहवे सहस्रशीर्षश्रुतिनासिकादृशे ।
सहस्रधोद्भासितदिव्यमूर्त्तये सहस्रजीवात्मगताय ते नमः ॥ ३७ ॥

इति स्तुवन्तं प्रणतं दीनचित्तमनन्यभक्तं भक्तवात्सल्यवार्धिः ।
ईषत्स्मितद्योतितवक्त्रचन्द्रो दयादृष्ट्या वीक्ष्यमां सम्बभाषे ॥ ३८ ॥

श्रीभगवानुवाच

विवस्वन् भवता विश्वं क्रियतां सचराचरम् ।
नियुक्तोऽसि पुरैव त्वं मयैतत्कार्यहेतवे ॥ ३९ ॥

भवतो हि न खल्वेषा मम माया प्रबाधते ।
दयादृष्ट्या वीक्षितस्य मया भक्तदयालुना ॥ ४० ॥

अकस्मात्संनिवृत्तोऽसि विश्वसर्गविसर्गतः ।
नैतत्तवोचितं देव मम मुख्याधिकारिणः ॥ ४१ ॥

विवस्वानुवाच

एषा माया गुणमयी सृष्टिर्दुःखैककारणम् ।
इति विज्ञाय भगवन् ग्लानोऽहं लोकसर्गतः ॥ ४२ ॥

श्रीभगवानुवाच

त्यक्त्वा सर्वत्र संसक्तिं प्रजासर्गं प्रवर्तय ।
इत्येवं वर्तमानं त्वां मम माया न बाधते ॥ ४३ ॥

विवस्वानुवाच

कथं प्रवर्तमानेन ततः शक्यं निवर्तितुम् ।
त्याज्या कथं च संसक्तिरेतन्मे वद राघव ॥ ४४ ॥

श्रीभगवानुवाच

यथा प्रवर्तमानोऽपि प्रवृत्त्यो नैव सज्जते ।
असंसक्तिश्च भवति तथा चोपदिशाम्यहम् ॥ ४५ ॥

जीवो नाम ममैवांशश्चित्तवृत्त्याभिवेष्टितः ।
न तस्य कापि संगोऽस्ति गौणीभिश्चित्तवृत्तिभिः ॥ ४६ ॥

एतज्जीवस्य जीवत्वं यदन्तःकरणे स्थितिः ।
करणं वृत्तिवृन्देन छादयत्येनमद्भुतम् ॥ ४७ ॥

यथा गोलस्थितं चक्षुरिन्द्रियं देवतात्मिकम् ।
न तस्य कामलासंगो गोलमेवोपहन्यते ॥ ४८ ॥

यथा च मेघपटलैर्लोकदृष्टिर्विहन्यते ।
न त्वर्कमण्डलं दूरे तथा जीवोऽपि वृत्तिभिः ॥ ४९ ॥

मायावृत्तिरविद्याख्या स्वरूपाज्ञानरूपिणी ।
देहेन्द्रियप्राणमनःस्वात्माध्यासात्तथाज्ञता ॥ ५० ॥

तस्मादध्यास एवास्याः स्वरूपं मुख्यमुच्यते ।
तं वर्जयेद्विशेषेण सर्वत्र स्वात्मभावनात् ॥ ५१ ॥

शनैः शनैः शब्दनिष्ठः स्वात्मयोगं समभ्यसेत् ।
वृत्तिरोधनमार्गेण कुर्याच्चित्तं सुनिश्चलम् ॥ ५२ ॥

आत्मनिष्ठे तु मनसि वृत्तिरोधः प्रजायते ।
निर्वृत्तिकः सदा तिष्ठेज्जाग्रत्येव सुषुप्तिवत् ॥ ५३ ॥

अथान्तर्हृदयाम्भोजे मत्स्वरूपं विभावयेत् ।
यादृशं रोचते यस्य तादृशं स विभावयेत् ॥ ५४ ॥

यतो यतश्चलेच्चित्तं निरुध्येत ततस्ततः ।
मद्भावनापरं कुर्याद्भवेद्बुद्धं यथा यथा ॥ ५५ ॥

वृत्तिरोधनमार्गोऽयं मया तुभ्यं प्रकीर्तितः ।
एवं स्थितं तु पुरुषं मम माया न बाधते ॥ ५६ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे पश्चिमखण्डे सीताजन्मनि सरयूत्पत्तौ वैवस्वतोपाख्याने वृत्तिनिरोधनो नाम त्रिचत्वारिंशोऽध्यायः ॥ ४३ ॥

चतुश्चत्वारिंशोऽध्यायः

श्रीभगवानुवाच

योगो बहुविधः प्रोक्तो योगिनामात्मसिद्धये ।
कर्मयोगः प्रथमतो ज्ञानयोगस्ततः परम् ॥ १ ॥

ततश्च भक्तियोगाख्यो योगोत्तम उदाहृतः ।
पूर्वपूर्वापेक्षया तु श्रेष्ठमुत्तरमुत्तरम् ॥ २ ॥

नैव कर्माणि संत्यज्य योगी त्यागफलं लभेत् ।
त्यक्तानि तेन कर्माणि यः फलं नाभिकाङ्क्षति ॥ ३ ॥

विरुद्धान्येव कर्माणि त्यक्तव्यानि मनीषिभिः ।
विहितानि तु कर्माणि कुर्याच्चित्तस्य शुद्धये ॥ ४ ॥

स्वाध्यायो नित्यमध्येयः कार्यं कर्म तदीरितम् ।
नित्यं नैमित्तिकं चापि निरपेक्षतया मुहुः ॥ ५ ॥

पञ्चसंस्थातमो यज्ञः कार्यं एव मदात्मकः ।
पूर्वकाण्डोदितं सर्वं परकाण्डान्वितं स्मरेत् ॥ ६ ॥

अनन्वितं तु वेदार्थं यो ब्रूयाद्देववञ्चितः ।
तस्य कर्माणि सर्वाणि निरर्थानि भवन्ति वै ॥ ७ ॥

यावन्न शुद्ध्यते चित्तं तावत्कर्म समभ्यसेत् ।
श्रुद्धेऽपि चित्ते तत्कार्यं लोकसंग्रहमिच्छता ॥ ८ ॥

अन्यदेव हि तत्कर्म येनाविष्टो निबध्यते ।
फलाकाङ्क्षाकृतं भूपो विरुद्धं वेदवाक्यतः ॥ ९ ॥

वेदोक्तं विमलं कर्म यो ज्ञानेन विघातयेत् ।
तस्य तज्ज्ञानमखिलं भवेत्सर्वं निरर्थकम् ॥ १० ॥

असंसक्तः सदा कर्म कुर्यात्संशुद्धमानसः ।
भावयेत् सततं विद्वान् क्रियमाणान् गुणैर्गुणान् ॥ ११ ॥

असक्तं नित्यमात्मानं भावयेत्प्राकृतैर्गुणैः ।
वीचीतरंगन्यायेन ह्यारभन्ते गुणान् गुणाः ॥ १२ ॥

किमर्थं सज्जते तत्र पुमान् संगविवर्जितः ।
एवं लक्षणयुक्तानि यः कर्माण्यभिमन्यते ॥ १३ ॥

सोऽन्येनापि कृतं पापं किमात्मनि न मन्यते ।
असंगः सर्वदा तिष्ठेत्पुत्रदारग्रहादिषु ॥ १४ ॥

गुणावेशं न कुर्वीत निर्गुणः पुरुषः स्वयम् ।
इत्येवं कर्मणां तत्त्वं तुभ्यमुक्तं मया मुहुः ॥ १५ ॥

एतद्विज्ञाय पुरुषः प्रवृत्तोऽपि निवर्तते ।
अथ तेऽहं प्रवक्ष्यामि ज्ञानयोगं निबोध मे ॥ १६ ॥

येन युक्तः प्रसन्नात्मा गृहस्थोऽपि विमुच्यते ।
यथोपनिषदोख्यातमात्मतत्त्वमतीन्द्रियम् ॥ १७ ॥

तथा श्रद्धासमायुक्तः शृणुयाच्छ्रीगुरोर्मुखात् ।
प्रपन्नो गुरुपादाब्जं विरक्तो भवरोगतः ॥
यथा यथा संशृणुयादाद्रियेत तथा तथा ॥ १८ ॥

यथा यथाद्रियमाणः शृणोति तथा तथा चित्ततापं क्षिणोति ।
ततः श्रुत्वा मननं तस्य कुर्यादेकान्तेऽसौ संस्थितः शुद्धवृत्त्या ॥ १९ ॥

यत्र यत्र श्रुतमर्थं स्वयुक्त्या मन्येतासौ विप्रयत्नं तु किंचित् ।
तत्र तत्र श्रीगुरोः संनिकर्षे संशोधयेत्संशयोच्छेदनाय ॥ २० ॥

एवं निश्चितमात्मानं मनमेना ववुध्य च ।
अभ्यासयोगनिष्ठाभिरभ्यसेत्तत्समाधये ॥ २१ ॥

समाहिते स्वात्मनि ध्यानयोगाद्विशुद्धया धारणयाभ्युपेतः ।
भवेन्निदिध्यासनपूर्वनिष्ठया समाधिमान्निर्विकल्पो नितान्तम् ॥ २२ ॥

तदास्य जायते कश्चिदात्मानन्दः समृद्धिमान् ।
तस्य भोगमनादृत्य भूपो योगं प्रवर्तयेत् ॥ २३ ॥

वियोजयेत्प्रकृतितः पुमांसं चित्सुखात्मकम् ।
सुखभोगे प्रवृत्तस्तु योगी लुब्ध इतीर्यते ॥ २४ ॥

विविक्तः प्रकृतिं पश्येद्गुणसाम्यात्मिकां पुमान् ।
तदास्य सकलः कालो भवेद्दृष्टिपथे स्फुटम् ॥ २५ ॥

कुण्डलीभूतभोगीन्द्रभोगतुल्योऽतिमेचकः ।
कलाम्भोधरसंकाशो महाशब्दो महामदः ॥ २६ ॥

सर्वाणि चापि भूतानि कालयन् कलनात्मकः ।
सोऽपि तस्यात्मचेष्टावद्भासते कालसंचयः ॥ २७ ॥

निश्चेष्टस्येव कर्माणि स्मर्यमाणानि भूरिशः ।
ततः परं परं ब्रह्म स्वात्मभेदेन भावयेत् ॥ २८ ॥

ब्रह्मविद् ब्रह्म भवति श्रुतमर्थं विचिन्तयन् ।
अंशाशिनोरभिन्नत्वाद्ब्रह्मैवायं प्रजायते ॥ २९ ॥

विस्फुलिङ्गो यथा वह्नेः सम्प्राप्य महदिन्धनम् ।
तथैवात्मा चितिं लब्ध्वा व्यापको जायते क्षणात् ॥ ३० ॥

दृढमूलात्मानुभवप्रसादेन विशुद्धधीः ।
न पुनर्जायते ज्ञानी भवबन्धाय कश्चन ॥ ३१ ॥

प्रपञ्चो विद्यमानोऽपि नामुं बध्नाति पूर्ववत् ।
अहंताममताशून्यं ध्वस्ताज्ञानमनोमलम् ॥ ३२ ॥

स्वाभाविकी व्यापकता निरुद्धा मनसास्य ताम् ।
भूपः प्राप्य मनश्छेदाधोगी ब्रह्मैव जायते ॥ ३३ ॥

यत्सुखं दिव्यरामायाः प्रसंगे सुरतोद्भवम् ।
ततः कोटिगुणं प्राप्य योगी नात्रापि सज्जते ॥ ३४ ॥

पुंप्रकृत्योर्युतिर्यावत्तावद्भोगः प्रवर्तते ।
वियुक्ते पुरुषे शुद्धः स्वात्मानन्दोऽवशिष्यते ॥ ३५ ॥

अप्रतर्क्योऽप्रमेयश्च व्यापको विश्वतः स्फुटम् ।
विश्वोपसंहृतिकरो विशिष्टः सुखराशितः ॥ ३६ ॥

यत्र सर्वे महानन्दा एकीभूता भवन्ति वै ।
स्रोतांसीव समस्तानि विपुले सागरेभृशम् ॥ ३७ ॥

ज्ञानानि च समस्तानि एकीभूतानि तत्र वै ।
तत्परं विमलं स्थानं शब्दब्रह्मातिगं ध्रुवम् ॥ ३८ ॥

केवलानुभवानन्दमात्रमक्षरसंज्ञितम् ।
यत्प्राप्य न निवर्तन्ते योगिनो मुक्तबन्धनाः ॥ ३९ ॥

तद्धामशाश्वतं दिव्यं मामकं विद्धि नित्यशः ।
अथान्यच्छृणु विज्ञानं परमं यन्मयोदितम् ॥ ४० ॥

यथावरकमध्यस्थो दीप आवरकं रुचा ।
भासतत्यखिलं तद्वद्देहमात्मा स्वसंविदा ॥ ४१ ॥

यश्चोभयं भासयते सोऽन्तरात्मा निगद्यते ।
भूतान्यहं महच्चैवमिन्द्रियाणि च गोचराः ॥ ४२ ॥

सुखं दुःखं तथा मोह इच्छाद्वेषादयोऽपि च ।
चतुष्टयान्तः करणमिति लिङ्गप्रविस्तरः ॥ ४३ ॥

भासकस्तस्य सर्वस्य स्वयमात्मा चिदात्मकः ।
मानं दम्भं मदं हिंसामक्षान्ति कुटिलात्मताम् ॥ ४४ ॥

अशौचमव्रतां संगो लौल्यमिन्द्रियवश्यता ।
संसक्तिरिन्द्रियार्थेषु मनोऽहंकार एव च ॥ ४५ ॥

संसारदुःखाज्ञानं च दोषाणां चात्मनोऽबुधिः ।
अलब्धिपरितापश्च पुत्रदारधनस्पृहा ॥ ४६ ॥

वैषम्यं चापि चित्तस्य स्वकीय परकीययोः ।
तथेष्टानिष्टविषये रागद्वेषमतिः क्रमात् ॥ ४७ ॥

मम चाननुसंधानं गाढदुःखेऽपि विस्मृतिः ।
विषयासेविनां संगोविरक्तिर्मज्जनेषु च ॥ ४८ ॥

वाह्यार्थमात्रनिष्ठत्वं लौकिकार्थावमर्शनम् ।
एतदज्ञानमुदितं सकार्यं भवते मया ॥ ४९ ॥

येनास्य जायते भ्रंशः स्वात्मानन्दमहायदात् ।
तद्विरोधि भवेज्ज्ञानं स्वात्मसंसिद्धिकारणम् ॥ ५० ॥

अनादिरस्य सम्बन्धः प्रकृत्या गुणरूपया ।
गुणाश्चैव विकाराश्च तदुत्थाः सर्व एव हि ॥ ५१ ॥

सर्वत्र प्रकृतिः कर्त्री भोक्ता पुरुष उच्यते ।
साक्षी सर्वस्य लोकस्य स्वात्मचैतन्यदीपकः ॥ ५२ ॥

स एकोऽपिद्विधा जातो जीवान्तर्यामिभेदतः ।
एवं यो वेद देहेऽस्मिन् वर्तमानं महेश्वरम् ॥ ५३ ॥

मायामोहसमुद्भूता न तस्य भववेदना ।
केचित्तु ध्यानयोगेन ज्ञानयोगेन चापरे ॥ ५४ ॥

अन्ये च कर्मयोगेन पश्यन्त्यात्मानमात्मनि ।
विनश्वराणि भूतानि विषमाणि परस्परम् ॥ ५५ ॥

समं स्थिरं च सर्वत्र तत्तत्त्वमविनश्वरम् ।
शब्दात्संजायते ज्ञानं ब्रह्मात्मैक्यैकगोचरम् ॥ ५६ ॥

तत्परोक्षं स्वानुभवादपरोक्षदशां नयेत् ।
गुणानुबन्धिनः पश्येत् सर्वानेव गुणान् पृथक् ॥ ५७ ॥

प्रकृत्यैव च संजातान् सोऽकर्ता सर्ववस्तुषु ।
पृथग्भूतान्यनेकानि यर्ह्येकत्वं प्रयान्ति हि ॥ ५८ ॥

एकत्वाच्चापि पार्थक्यं तर्हि ब्रह्मात्मदर्शनम् ।
अनादिमव्ययं चैव निर्गुणं प्रकृतेः परम् ॥ ५९ ॥

आत्मानमनुसंधाय किमर्थमनुशोचसि ।
रञ्जनच्छेदनादीनि कर्माणि व्योम्नि सन्ति न ॥ ६० ॥
सूक्ष्मत्वात्सर्वगत्वाच्च तथात्मन्यपि सन्ति न ।
प्रकाशानां प्रकाशो यः सुखानां सुखमुत्तमम् ॥ ६१ ॥

तमात्मानमभिज्ञाय कृतार्थः किं न जायसे ।
जाते स्वात्मावबोधे तु संन्यासः किं करिष्यति ।
भोगानपि प्रभुञ्जानो ज्ञानी तैर्नैव लिप्यते ॥ ६२ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे पश्चिमखण्डे सीताजन्मोपाख्याने सरयूत्पत्तौ वैवस्वतोपाख्याने आत्मविवेको नाम चतुश्चत्वारिंशोऽध्यायः ॥ ४४ ॥

पञ्चचत्वारिंशोऽध्यायः

श्रीभगवानुवाच

अथ तेऽहं प्रवक्ष्यामि ज्ञानमुत्तमशासनम् ।
यच्छ्रुत्वाभूतसर्गेषु व्यामोहं नैव यास्यति ॥ १ ॥
प्रलये मयि संलीनमविद्याकामकर्मभिः ।
जीवं सानुशयं सृष्टिर्वपुषा योजायते पुनः ॥ २ ॥
तदर्थं त्रिगुणां मायां सर्वभूतादिकारणम् ।
तामीक्षाणाख्यसंकल्पविषयीकुरुते चिता ॥ ३ ॥
चिदाभासाभिधं रेतःसेकं सम्प्राप्य सा ततः ।
महान्तं गर्भमाधत्ते आकाशादिधरान्तकम् ॥ ४ ॥
ततो हिरण्यगर्भाद्याः सम्भवन्ति पृथक् पृथक् ।
देवाश्च पितरश्चैव मनुष्याः पशवो मृगाः ॥ ५ ॥
जरायुजाण्डजोद्भिज्जस्वेदजादिशरीरिणः ।
विलक्षणाश्च विविधानेकसंस्थानमूर्तयः ॥ ६ ॥
तत एवोद्भवं प्राप्य जायते भवविस्तरः ।
विस्तरो गुणनिर्माणं गुणाः सत्त्वं रजस्तमः ॥ ७ ॥
अन्योन्यमिश्रितास्ते चाप्यभूवन् बहुधात्मकाः ।
तेषामेव परीवर्तः संसारः सकलो ह्ययम् ॥ ८ ॥

विश्राम्यतिगुणेष्वेव तदेवं कर्तृताखिला ।
ततः परमकर्तारं पश्येदात्मानमात्मना ॥ ९ ॥

सोऽविद्यामखिलां हित्वा परं ब्रह्माधिगच्छति ।
तावज्जन्मजरामृत्युदुःखदोषानुशीलनम् ॥ १० ॥

यावन्नित्यमकर्त्तारमात्मानं नावबुध्यते ।
सर्वाणि गुणकार्याणि सम्प्रवृत्तानि यो नरः ॥ ११ ॥

मिथ्यात्वनिश्चयात्स्वप्नवद्यो वेत्ति स पण्डितः ।
न रज्यति न वा द्वेष्टि स्वस्वरूपैकसंस्थितः ॥ १२ ॥

जानानः सुखदुःखादिपरिणामं गुणात्मकम् ।
स्वयंज्योतिःस्वभावत्वादात्मानं परमार्थतः ॥ १३ ॥

द्वेषशून्यं निर्विकारं सत्यं निश्चित्य निर्गुणम् ।
यः स्वरूपेऽवतिष्ठेत स ज्ञानीत्युच्यते बुधैः ॥ १४ ॥

स्वप्रकाशं चिदानन्दं केवलं सर्वसंश्रयम् ।
यः पश्यति स्वमात्मानं पारं प्राप्तः स मानवः ॥ १५ ॥

तावच्छृणोति शास्त्राणि वेद्यमन्वेषयत्यपि ।
स्वप्रकाशचिदानन्दं यावन्नात्मानमृच्छति ॥ १६ ॥

निवृत्ताखिलतर्षोऽसौ यावत्रैव प्रजायते ।
आत्मतत्त्वं न जानाति तावद्यत्नान्वितोऽप्यसौ ॥ १७ ॥

सर्वभ्रममयी माया ब्रह्म तन्मूलमुच्यते ।
येऽन्ये हिरण्यगर्भाद्याः कार्योपाधय एव ते ॥ १८ ॥

ततः सम्प्रसृतं विश्वं नश्वरं ज्ञायते बुधैः ।
तस्मिन्नाचरति ब्रह्म साक्षिवत्संगवर्जितः ॥ १९ ॥

आत्यन्तिकस्तदुच्छेदो ज्ञानेनैवप्रजायते ।
तत आत्मगतिं बुद्ध्वा पुनरावर्तने न च ॥ २० ॥

एतज्ज्ञानं मया प्रोक्तं सरहस्यं परंतप ।
निश्चित्य हृदये स्वीये मा ग्लासीस्त्वमतः परम् ॥ २१ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे पश्चिमखण्डे सीताजन्मनि सरयूत्पत्तौ वैवस्वतोपाख्याने ज्ञानयोगो नाम पञ्चत्वारिंशोऽध्यायः ॥ ४५ ॥

षट्चत्वारिंशोऽध्यायः

श्रीभगवानुवाच

भक्तियोगमथो वक्ष्ये मत्स्वरूपैकसंश्रयम् ।
सर्वशास्त्रसमूहेभ्यः सारभूतं समुद्धृतम् ॥ १ ॥

पूर्वप्रोक्तमिमं योगं कुर्यान्मद्रूपसंश्रयम् ।
यथानुरज्यते चित्तं मन्नामश्रवणादिषु ॥ २ ॥

तथा कुर्यान्मदासक्तिं वृद्धिगामुत्तरोत्तरम् ।
कर्मणां चोपासनानां योगस्य तपसां तथा ॥ ३ ॥

भक्तेश्चापि सुभिद्धाया ज्ञानानां चाप्यदः फलम् ।
मत्स्वरूपैकपरया यदासक्तिर्भवेद्ध्रुवम् ॥ ४ ॥

यया सद्यः प्रसीदामि वशीभूत इवध्रुवम् ।
यदक्षरं पुरा प्रोक्तं ब्रह्मोपादानमव्ययम् ॥ ५ ॥

कारणं सर्वजगतस्तस्य चाप्यहमाश्रयः ।
भवं मदाश्रयं विद्धि मुक्तिं चापि मदाश्रयाम् ॥ ६ ॥

अहं पूर्णं परं ब्रह्म माया यस्य वशे स्थिता ।
मयि स्थिताः सर्व एव भावाः प्रकृतिसम्भवाः ॥ ७ ॥

आविर्भावस्तिरोभावो मयि तेषां स्वरूपतः ।
गुणमय्या श्रमसृजा मायया मम मोहिताः ॥ ८ ॥

ततः परं चिदानन्दविग्रहं मां न जानते ।
अनेकैर्जन्मभिः शुद्धा यज्ज्ञानं समुपाश्रिताः ॥ ९ ॥

मत्स्वरूपैकलाभाय भजन्ते मां दृढव्रताः ।
अपरे वैदिकं चार्थं नयन्ते स्वधियान्यथा ॥ १० ॥

ते विघ्निता दुश्चरितैः स्वीयैरेव भ्रमाविला ।
न मां जानन्ति परमं भजन्ते चापि न क्वचित् ॥ ११ ॥

अनेकदेवतोपास्तिपरा अकृतनिश्चयाः ।
प्रवाहमार्गपतिता न तत्त्वं ते विदन्ति हि ॥ १२ ॥

मायागुणैः कृष्यमाणाः केचित्कर्माणि कुर्वते ।
केचित्तपोरताश्चापि केचिद्योगांश्च युञ्जते ॥ १३ ॥

केचिद्भुवायवर्गाय स्वात्मज्ञानमुपासते ।
अपरे शुद्धसत्त्वेन मामेवैकं विजानते ॥ १४ ॥

तेषामपिभवेन्मुक्तिः सात्त्विकी न तु निर्गुणा ।
एवं बहुविधैर्मार्गैरात्मानं खेदयन्ति ते ॥ १५ ॥

शुद्धेन भक्तियोगेन न तु मां समुपासते ।
मत्स्वरूपैकसम्बद्धा भक्तिर्मत्प्रेमलक्षणा ॥ १६ ॥

तया मां स्ववशे कृत्वा कश्चित् साक्षात्करोत्यपि ।
यावतीर्देवता लोकैरूपास्यन्ते गुणात्मिकाः ॥ १७ ॥

तासामहमधिष्ठाता स्वाधिदैविकरूपतः ।
मूले सिक्ते सुसिक्तैः किं पत्रशाखादिभिः पृथक् ॥ १८ ॥

असिक्ते चापि सिक्तैः किं पत्रशाखादिभिः पृथक् ।
इति ज्ञात्वा भजेन्नित्यं मामेवैकं विशेषतः ॥ १९ ॥

विशुद्धात्मिकया भक्त्या मत्स्वरूपैक संस्थया ।
विशुद्धचित्तसंस्कारैर्जातश्रद्धो विरक्तिमान् ॥ २० ॥

ब्रह्मानन्दपदे स्थित्वा ज्ञानी नाद्रियते ततः ।
उत्कृष्टं पूर्णपाथोधिं दुर्लभं दैवतैरपि ॥ २१ ॥

भक्तिमात्रैकलभ्यं च काश्चित्प्रेमाणमाप्नुयात् ।
ज्ञानं चैवापि वैराग्यं भक्तेः पूर्वाङ्गमिष्यते ॥ २२ ॥

अथवा पूर्वसंस्कारादकस्मात्सम्प्रजायते ।
कुतोऽपि परितुष्टेन मया दत्ता प्रसादवत् ॥ २३ ॥

पूर्वभक्तिः पराभक्तिसाधनात्मामुपेयुषी ।
स्वात्मानं नाशयित्वापि कार्यमस्य प्रसाधयेत् ॥ २४ ॥

माहात्म्यज्ञानयोगार्थं भक्तेरुद्बोधसिद्धये ।
मत्स्वरूपं विजानीयाद्वेदानामप्यगोचरम् ॥ २५ ॥

अक्षरोपादेयमिदमखिलं विश्वमण्डलम् ।
मन्निमित्तं विजानीहि लीलावेशवशान्मनो ॥ २६ ॥

एताः सर्गविसर्गाद्या मम लोलाविनिश्चिताः ।
ताभिर्युक्तः सदा जीवानधिष्ठाय भुनज्म्यहम् ॥ २७ ॥

अधिभूतं तथाध्यात्ममाधिदैविकमेव च ।
त्रीणि त्रीणि स्वरूपाणि सर्वंस्येति विनिश्चितम् ॥ २८ ॥

अहमेवास्मि सर्वेषु तेषु नास्त्यत्र संशयः ।
तस्मात्सर्वत्र मामेव नित्यं संस्मर संस्मर ॥ २९ ॥

मनश्चभक्तियोगेन मय्येव विनिवेशय ।
अनन्यगं यदा चित्तमभ्यासेन प्रजायते ॥ ३० ॥

तदा मामभ्युपैत्येव पूर्णं श्रीपुरुषोत्तमम् ।
सर्वेशं सर्ववशिनं सर्वज्ञं सर्वरूपिणम् ॥ ३१ ॥

ज्ञानक्रियोभययुतं सर्वस्याधारमव्ययम् ।
विश्वतोमुखमानन्दमनन्तं चित्प्रकाशिनम् ॥ ३२ ॥

अणुं महान्तमचलमव्यक्तं प्रकृतेः परम् ।
एवं ध्यानं समभ्यस्य चित्तं कुर्याद्विशे सदा ॥ ३३ ॥

अन्तकालेऽपि च ततो मामुपैति न संशयः ।
जीवशक्तिं सुसंहृत्य जीवं ध्यायेच्चिदुज्वलम् ॥ ३४ ॥

रामेति राममन्त्रेण परे ब्रह्मणि योजयेत् ।
परं ब्रह्म यथोक्तं मत्स्वरूपं भावयन् सदा ॥ ३५ ॥

विशते शुद्धभावेन प्रेमाख्येनोपबृंहितः ।
एवं मयि सुसंगम्य पुनर्जन्म न चाप्नुयात् ॥ ३६ ॥

ततो दुःखालयो घोरः संसारो विनिवर्तते ।
ब्रह्मलोकात्परं स्थानं यतो नावर्तते पुनः ॥ ३७ ॥

तत्स्थानं समुपैत्येष भक्तियोगप्रभावतः ।
द्विपरार्द्धं विधेरायुस्तदन्तेभूतभौतिकाः ॥ ३८ ॥

महाभूते विलीयन्ते तच्च मय्यहमव्ययः ।
जागर्मि सर्वदा भानः सदानन्दपदस्थितः ॥ ३९ ॥

तस्य मे प्राप्त्युपायस्तु भक्त्यन्यो नैव विद्यते ।
तपःस्वाध्याययोगाद्यैर्भक्तिः साध्यास्ति केवलम् ॥ ४० ॥

भावशुद्धया भवेद्भक्तिस्तस्माद्भावं विशोधयेत् ।
अपरे त्वासुरे सर्गे सम्भूतास्ततामसा जनाः ॥ ४१ ॥

मत्स्वरूपं न जानन्ति तस्मान्नैव भजन्ति ते ।
मूढा वितथकर्माणो वितथाज्ञानवैभवाः ॥ ४२ ॥

विज्ञाय सगुणाकारमात्मौपम्येन मामपि ।
अवज्ञावञ्चितात्मानो न विजानन्ति तत्त्वतः ॥ ४३ ॥

ते वै दूरतरा मत्तो न कदाचिद्भवाम्बुधेः ।
मुक्ता भवन्त्यपसदाः सदेवासुरयोनयः ॥ ४४ ॥

देवाश्चैवासुराश्चैव जीवाः सामान्ययोनयः ।
तत्र देवाः सदा मुक्ताः सामान्याः साधनव्रजैः ॥ ४५ ॥

आसुरा नैव मुच्यन्ते जन्मकोटिशतैरपि ।
तस्माद्विवस्वन् मुक्तोऽसि देवसृष्ट्येकसम्भवः ॥ ४६ ॥

मान्वशोचः कदापि त्वमनुतिष्ठमतं मम ।
इदं ते ज्ञानमतुलमुपदिष्टं परन्तप ॥ ४७ ॥

एतद्विज्ञाय सततं कुरु सृष्टिं मदाज्ञया ।
न भविष्यति ते मोहः प्रजासर्गं प्रवर्तय ॥ ४८ ॥

इति ते प्रतिजानेऽहं मा ग्लासीस्त्वंमनागपि ।
मां विद्धिशुद्धभावेन मयि बुद्धिं निवेशय ॥ ४९ ॥

मामुपात्स्व च मय्यास्स्व मयि सर्वं विचिन्तय ।
कर्माणि मयि सन्यस्य ज्ञानं कुरु मदाश्रयम् ॥ ५० ॥

मामेव यजमानस्त्वं वीतशोको भविष्यसि ।
इदं शास्त्रं मया पूर्वं ब्रह्मणे प्रतिबोधितः ॥ ५१ ॥

ब्रह्मा प्राह प्रसादेन सनकादीन् महामुनीम् ।
सनत्कुमारो भगवान् नारदायोपदिष्टवान् ॥ ५२ ॥

एवं परम्परायातमिदं ज्ञानं सनातनम् ।
त्वं चापि निजपुत्राय मनवे शुद्धचेतसे ॥ ५३ ॥

सरहस्यमिदं ज्ञानं काले समुपदेक्ष्यसि ।
स आकर्ण्याखिलं त्वत्तो विमलं मन्मतं प्रभो ।
भवानिव यथेदानीं चित्ते निर्वृतिमेष्यति ॥ ५४ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे पश्चिमखण्डे सीताजन्मोत्सवे सरयूत्पत्तौ वैवस्वतोपाख्याने ज्ञानोपदेशो नाम षट्चत्वारिंशोऽध्यायः ॥ ४६ ॥

सप्तचत्वारिंशोऽध्यायः

विवस्वानुवाच

उपदिश्य परं गुह्यमिदं ज्ञानं मयाच्युतः ।
ज्ञात्वा मां गतसंदेहं तत्रैवान्तरधीयत ॥ १ ॥

इदं ते सनिगदितं रहस्यं वैष्णवं मतम् ।
हृदि निश्चित्य न पुनः शोकमेवं प्रयास्यसि ॥ २ ॥

निर्भयो वीतशोकश्च प्रवर्तय विशेषतः ।
प्रजासर्गमिमं तात यथेच्छा पारमेश्वरी ॥ ३ ॥

नह्यसौ बाधकः कश्चिज्ज्ञानिनः शुद्धचेतसः ।
ब्रह्मण्यारोप्यमाणत्वाद्बाधितः स्वयमेव तत् ॥ ४ ॥

पुराऽऽज्ञा मम संजाता देवदेवस्य वै हरेः।
सदा मां भज भावेन प्रजाश्च विविधाः सृज ॥ ५ ॥
माया भगवतः सा वै ज्ञानिनां नैव बाधिका।
कुतस्तरां तदीयानां भक्तानां तन्मयात्मनाम् ॥ ६ ॥

श्रीशुक उवाच

स्वपितुर्मतमाज्ञाय यथोक्तं हरिणा पुरा।
प्रावर्तयत्प्रजासर्गं देवो वैवस्वतो मनुः ॥ ७ ॥
वीतशोको गतग्लानिर्गार्हस्थ्यधर्ममाश्रितः।
मनो निवेश्य परमे ब्रह्मणि क्षतसंशयः ॥ ८ ॥
यज्ञानुष्ठानपरमो ज्ञानवान् भक्तिसंश्रितः।
तपस्वी विजितस्वान्तः प्रजासर्गमचीकरत् ॥ ९ ॥
तमागत्याब्रवीद्वेधा राज्यसंस्थानमद्भुतम्।
क्षात्रवंशसमुत्पत्तिं राजधर्मं च भूरिशः ॥ १० ॥

ब्रह्मोवाच

वैवस्वत मनुश्रेष्ठ धन्योऽसि त्वं जगत्प्रभुः।
दिष्ट्या ते विगता ग्लानिः पितुरेव निदेशतः ॥ ११ ॥
पिता ते भगवान् साक्षादादिदेवस्त्रयीमयः।
विवस्वान् रविरादित्यस्तपत्येष सदैव यः ॥ १२ ॥
मण्डलेऽर्चिषि चात्मन्युद्भासते सततं प्रभुः।
सामर्ग्यजुःस्वरूपेण क्रमाद्वेदात्मकः स्वयम् ॥ १३ ॥
तेन त्वमुपदिष्टोऽसि विशुद्धं भगवन्मतम्।
यदाह भगवांस्तस्मै पुरा रामः स्वयं प्रभुः ॥ १४ ॥
आत्मयोगप्रभावेण नैष मुह्यति कञ्चन।
यस्यान्तः सर्वदैवास्ति देवो रामः स्वयं हरिः ॥ १५ ॥
पद्मासने संनिविष्टः कनकाङ्गदभूषितः।
द्विभुजो वै धनुर्वाणवनमालाविराजितः ॥ १६ ॥
कुण्डली पीतवसनो रत्नकङ्कणभासुरः।
मेघश्यामः पुण्डरीकनेत्रो दिव्य किरीटवान् ॥ १७ ॥
पितापि ते तत्स्वरूपः कालात्मा भगवानसौ।
तस्य त्वं तनयः साक्षाद्देवो वैवस्वतो मनुः ॥ १८ ॥
लोकयात्राप्रवृत्यर्थमाविर्भूतः स्वयं हरिः।
धर्मात्मा धर्मनिपुणो धर्मकर्मप्रवृत्तिकृत् ॥ १९ ॥

अतः परं मे सकलं चिकीर्षितं बभूव तावत्सफलं मनूत्तम ।
प्रवर्तितं यद्भवताखिलं जगद्विवृद्धिमेष्यत्युरुवीर्यवर्चसा ॥ २० ॥

अयोध्याख्या पुरी पुण्या तव स्थानं भविष्यति ।
पृथिव्यां भारते वर्षे परं क्षेत्रं भविष्यति ॥ २१ ॥

रामचन्द्रस्य पाणिस्थ कमलं निपतिष्यति ।
सा धन्या नगरी भूमावयोध्याख्या भविष्यति ॥ २२ ॥

नान्यैर्योधयितुं शक्या ब्रह्मक्षत्रविडादिभिः ।
ऊर्जस्वलैर्बलोपेतैरयोध्या तेन सा मता ॥ २३ ॥

अत्युत्तमा योगमयी ध्यानगम्या पुरी तु सा ।
तेनाप्ययोध्येति भवे कीर्तिता सा भविष्यति ॥ २४ ॥

तत्र ते पुत्रपौत्रादिक्रमाद्वृद्धिगतेऽन्वये ।
देवो रामचन्द्रः साक्षादाविर्भूतो भविष्यति ॥ २५ ॥

तं हि ये भुवने लोकाः प्रपत्स्यन्तेऽग्रया धिया ।
तेषां तापत्रयं दृष्ट्या तत्क्षणेन हरिष्यति ॥ २६ ॥

ततः परं च विततते वंशे तव महीभृतः ।
पुण्यश्लोका भविष्यन्ति भूयांसः सत्यविक्रमाः ॥ २७ ॥

एवं त्वं क्षत्रवंशस्य बीजरूपोऽसि वै मनो ।
अतस्त्वां मानयिष्यन्ति क्षत्रबीजं मनीषिणः ॥ २८ ॥

इक्ष्वाकुनामा तनयो भवतः सम्भविष्यति ।
ततः प्रसूत्वरो वंशः क्षत्रियाणां भविष्यति ॥ २९ ॥

एवमुक्त्वा गतो देवो भगवान् कमलासनः ।
वैवस्वतस्तपश्चक्रे प्रजासृष्ट्यर्थमुत्तमम् ॥ ३० ॥

वर्षवातातपहिमैः कायक्लेशसहो मुनिः ।
ऊर्ध्वबाहुरुपासीनो भगवन्तं दिनेश्वरम् ॥ ३१ ॥

अङ्गुष्ठाग्रेण धरणीं स्पृशन्नेकाग्रमानसः ।
जितेन्द्रियो जिताहारो जितश्वासो दृढव्रतः ॥ ३२ ॥

शुष्कपर्णाशनोऽब्भक्षो वायुभक्षो महातपाः ।
दिव्यवर्षसहस्रं स बभूवातीव निश्चलः ॥ ३३ ॥

कामपानः प्रजासर्गं स्वस्माद्वैवस्वतो मनुः ।
निवासं चात्मनोऽत्यर्थं पुण्यक्षेत्रमनुत्तमम् ॥ ३४ ॥

ब्रह्मावर्ताभिधे देशे चकार शुचिमानसः ।
ततस्तपस्यतस्तस्य राम आविरभूत्पुरः ॥ ३५ ॥

भगवान् पुण्डरीकाक्षो धनुर्बाणधरो विभुः ।
वरं ब्रूहीति वचसा स तं प्रोवाच सादरम् ॥ ३६ ॥
मनुरुन्मील्य नयने ददर्श राममग्रतः ।
भक्त्या नतशिरा राजन् स तं तुष्टाव वत्सलम् ॥ ३७ ॥

मनुरुवाच

नमस्त्रिभुवनेशाय रामचन्द्राय राघव ।
निजमायागुणैरात्तस्वैरकेलिविनोदिने ॥ ३८ ॥

त्वामक्षरं वेदविदो वदन्ति सर्वस्य लोकस्य निधानभूतम् ।
स्वकालशक्त्यामितया त्रिलोकीं सृजस्यवस्यत्सि च देवदेव ॥ ३९ ॥

त्व वै महद्भूतमनन्तमादौ भूतानि सर्वाणि पृथक् करोषि ।
स्वस्माद्विहर्तुं निजशक्तिरूपैरुच्चावचैर्जीवनदेश जीवैः ॥ ४० ॥

प्रसृत्वरं तत्तम एकमासीत्ततो भवान् पूर्णनिजप्रकाशः ।
आदित्यवर्णः स निजांशुरूपान् जीवाननेकान् व्यचसर्ज[1] भूम्याम् ॥ ४१ ॥

त्वमादिजीवः पुरुषःपुराणः सृष्टीच्छयानेककृतप्रकाशः ।
विहृत्य भूपः खलु तान् स्वरूपे प्रवेशयस्यद्भुतभद्रशीलः ॥ ४२ ॥

चतुर्दशामी वयमीश काले काले निदेशात्तव कुर्म एतत् ।
जगत्ततं स्थावरजंगमोद्यैस्त्वं तस्य जीवातुरुदारकर्मा ॥ ४३ ॥

ओजः सहो बलं तेजस्त्वं धामायुश्च देहिनाम् ।
ततो मे देहि सामर्थ्यं यथेदं सम्प्रवर्तये ॥ ४४ ॥

न हि त्वत्करुणादृष्टिं विना कापि महेश्वर ।
अमुष्मिन् कान्तिलेशोऽस्ति पाञ्चभौतिकविग्रहे ॥ ४५ ॥

यत्कथंचित्कचिद्वापि चाकचक्यं विलोक्यते ।
तत्तवैवांशसंयोगादिति मे निश्चिता मतिः ॥ ४६ ॥

पिता ममैष तपति प्रभावात्तव राघव ।
इन्द्रश्चन्द्रो वसुः श्रीदः श्रीमान्नाथ तव श्रिया ॥ ४७ ॥

इति स्तुतः स मनुना रामो वैवस्वतेन वै ।
प्रत्युवाच प्रसन्नात्मा वरं दित्सुरुदारधीः ॥ ४८ ॥

श्रीराम उवाच

ददामि तव सामर्थ्यं प्रजासर्गप्रवर्तने ॥ ४९ ॥
उत्पादयोच्चावचमूतसर्गंत्रैलोक्यनिर्माणविवृद्धिशक्तः ।
न ते प्रजासर्गविधौ विमोहो भविष्यति त्वं हि विधेः सहायः ॥ ५० ॥

---

१. छान्दसः प्रयोगः ।

इदं मदीयं करसंस्थमब्जं क्षिपामि भूमौ विषये पुनीते।
इहैव साकेतपुरी महापुरीनिवासहेतुस्तव सा भविष्यति ॥ ५१ ॥

पुण्यातिधन्या खलु कोटितीर्थश्रितामिता साथ दिनेशयोजनैः।
नाम्ना त्वयोध्या मम यत्र संनिधिर्नित्यं कलेर्यत्र न च प्रभावः ॥ ५२ ॥

मम धाम परं नित्यं प्रमोदवनसंज्ञितम्।
सच्चिदानन्दरूपं वै तेत्रैवाभातिनिर्मलम् ॥ ५३ ॥

परं ब्रह्म स्वयं रामः सहजानन्दिनीयुतः।
यस्मिन् विहरते नित्यं गोपगोपीगणैर्वृतः ॥ ५४ ॥

सुखितस्य गवेन्द्रस्य यत्र घोषः सनातनः।
माङ्गल्यामितसौभाग्यरञ्जिताखिलगोष्ठभूः ॥ ५५ ॥

गोवत्सकूर्दितेर्यत्रगवां हंभारवैस्तथा।
दधिमन्थाननिर्घोषैः श्रीरपूर्वा प्रपूर्यते ॥ ५६ ॥

सर्वाणि तत्र तीर्थानि यावन्ति वसुधातले।
सप्तद्वीपपते सन्ति निवत्स्यन्ति मदाज्ञया ॥ ५७ ॥

एवं सा परमा पुरी मम कराम्भोजस्वरूपा भुवि
ख्यातियास्यति कोटितीर्थकलिता श्रीमत्ययोध्यामिधा।
यस्यामुग्रतरैर्वसिष्ठतपसां भूपः प्रभावैः सरि
न्नाम्नाश्रीसरयूरुपैष्यतितरामाप्लावयन्ती महीम् ॥ ५८ ॥

इत्युक्त्वा भगवान् विष्णुः पाणिस्थं कमलं निजम्।
तत्र प्राप्त्यपुरीं चक्रेनाम्नायोध्येतिकीर्तिताम् ॥ ५९ ॥

नालं तस्याव्रजदधो ब्रह्माण्डाधारवासिनीम्।
विरजाख्यां नदीं तेन कल्पान्तेऽपि न शीर्यति ॥ ६० ॥

परितश्चापि तत्पुर्या रक्षणाय सुदर्शनम्।
आदिदेश निजं चक्रं ज्वालामालातिभीषणम् ॥ ६१ ॥

असम्पृक्तैव सा भाति तेन भूम्यां नगर्यसौ।
न तत्र कलिदोषाणां प्रवेशश्चापि विद्यते ॥ ६२ ॥

उत्साद्यन्तेऽखिला दोषा बाणराजस्य दर्शनात्।
ब्रह्मा विष्णुश्च रुद्रश्च ये देवाः सुरसत्तमाः ॥ ६३ ॥

स्वं स्वं वैभवमादाय तां पुरीं समुपासते।
रत्नोपलौधखचिता यस्यां स्वर्णमयी मही ॥ ६४ ॥

सुवर्णमणिनिर्व्यूढाः सप्तप्राकारभूमयः।
गोपुराणि विशालानि चिन्तामणिमयानि च ॥ ६५ ॥

स्वर्णप्रासादशृङ्गाणि रत्नमाणिक्यभानुभिः ।
भास्वराणि विमान्त्युच्चैः स्फटिकैश्चापि भित्तपः ॥ ६६ ॥

मन्दारपारिजाताद्यैर्नित्यसंफुल्लभूरुहैः ।
विराजिता गृहारामा गायत्कोकिलषट्पदाः ॥ ६७ ॥

वाप्यो विमलपीयूषसलिलैः पूरिताशयाः ।
सुवर्णरत्नसोपानजातशोभा मनोहराः ॥ ६८ ॥

आपणानामुभयतो वीथयश्चातिमञ्जुलाः ।
यत्र मूर्तिधरा वेदाः श्रीरामगुणगायनाः ॥
गन्धर्वा इव राजन्ति तथोपनिषदां गणाः ॥ ६९ ॥

इत्यद्भुतातिरचनैकमयोमयोध्यां श्रीराघवस्यकरपद्ममयीं मनोज्ञाम् ।
वैवस्वतो मनुरुदीक्ष्य नितान्तहृष्टश्चक्रे निवासविधये निजराजधानीम् ॥ ७० ॥

तत्र स्थितः स धरणीवलयं जुगोप धर्मेण नीतिकलितेन समस्तलोकान् ।
पुण्यान् परं च भजमान उदारचेताः श्रीराघवं सकलकल्मषनाशनोग्रम् ॥७१ ॥

पौरोहित्येन स ततोवरीतुं विधिवित्तरः ।
वसिष्ठं प्रार्थयांचक्रे निजवंश शुभप्रदम् ॥ ७२ ॥

वैवस्वत उवाच

प्राजापत्यो मुनिश्रेष्ठस्तपस्वी नियतव्रतः ।
जितेन्द्रियो मन्त्रयोगी वेदविद्याविशारदः ॥ ७३ ॥

भवांस्तपोधनः श्रेष्ठः पौरोहित्ये ममोचितः ।
यतः पुरोधसमृते यजमानस्य नो शुभम् ॥ ७४ ॥

पुरोहिते कुलं सर्वं क्षेमं चापि पुरोहितः ।
यशो धनं च वृद्धिश्च यज्ञाश्चापि पुरोहितः ॥ ७५ ॥

तस्मात्पुरोहिते सर्वमैहिकामुष्मिकं फलम् ।
प्रतिष्ठिततमं वेद्मि ततः कुर्वे पुरोहितम् ॥ ७६ ॥

यस्मिन् कुले मन्त्रनिष्ठो विद्यते न पुरोहितः ।
नष्टप्रायं कुलं तद्धि विना नौरिव नाविकम् ॥ ७७ ॥

यज्ञैर्यजयते श्रौत्रं रक्षति त्रायते कुलम् ।
आपद्भ्यस्तारयत्येव पौरोहित्यमिदं स्मृतम् ॥ ७८ ॥

स्वाध्यायवर्जितं पुंसां कुलं नष्टमिति स्थितिः ।
स्वाध्यायाध्ययने हेतुः पुरोधा एव केवलः ॥ ७९ ॥

मन्त्रज्ञो विनयी दक्षो वैदिकाचारतत्परः ।
कुलीनः सुकृती धीरः पापकृत्या पराङ्मुखः ॥ ८० ॥

शूरो विधिज्ञःप्रवणः सुहृद्दान्तः शमी यमी ।
प्रसिद्धो देशकालज्ञः प्रभुवत् फलसाधकः ॥ ८१ ॥

सर्वोपायविधानज्ञ आपद्ध्वस्तारणक्षमः ।
वेदशास्त्रार्थविज्ञाता समर्थः सर्ववस्तुषु ॥ ८२ ॥

ईतिदोषप्रतीकर्ता प्रजाहितकरः सदा ।
स वै पुरोहितः प्रोक्तो राज्ञा सेव्यो विशेषतः ॥ ८३ ॥

यदीच्छेद्विपुलां भूतिं दीप्तिं चापि श्रियं तथा ।
तदा राजा प्रथमतः कुर्यात्कांचित्पुरोहितम् ॥ ८४ ॥

तादृशस्त्वं मया लब्धो भ्रमता धरणीतले ।
भाग्येनैव तपोराशे कुलं तारय नः प्रभो ॥ ८५ ॥

कुलमेतद्भगवतः प्रसादात्प्रभविष्णु च ।
तेनैव त्वं मया लब्धो वृणे च त्वां पुरोहितम् ॥ ८६ ॥

इत्युक्त्वा विधिवद्वव्रे वसिष्ठं मुनिपुङ्गवम् ।
सोऽप्युरीकृतवांस्तस्य पौरोहित्यं महामुनिः ॥ ८७ ॥

कश्यपस्य प्रियां कन्या मुपयेमे मनूत्तमः ।
सत्कृतिं नाम वै तस्यामिक्ष्वाकुमुदया दयत् ॥

ततः प्रवर्तितो वंशः सूर्यस्य कृपयाञ्चितः ॥ ८८ ॥

कदाचिदूचे मनुराजो वसिष्ठं प्रसन्नचित्तं विनयेनाशुतुष्टम् ।
कृताञ्जलिर्यजमानप्रवीरः पुरोधसं सर्वलोकेष्टदक्षम् ॥ ८९ ॥

मनुरुवाच

भगवन् भवतो नित्यं प्र[1]सादादासादिता मया ।
अपूर्वा धनसम्पत्तिः पुत्रपौत्रादियोगिनी ॥ ९० ॥

मही चाप्यखिला ब्रह्मन् धर्मतः पाल्यते मया ।
सृष्टाश्च विविधाकाराः प्रजाः श्रीशनिदेशतः ॥ ९१ ॥

पुरी चापि मया प्राप्ता रमणीयतमा भुवि ।
भाविनां भूमिपालानां राजधानीं मनोहरा ॥ ९२ ॥

नातः परतरो देशः सम्पत्सुमुदयाञ्चितः ।
पृथिव्यां भारते वर्षे रत्नरूपा पुरी ह्यसौ ॥ ९३ ॥

एका मे प्रार्थना ब्रह्मन् गङ्गामत्रानय प्रभो ।
अयोध्याख्या पुरी त्वेषा प्रवाहेण विवर्जिता ॥ ९४ ॥

---

१. पादेऽस्मिन्नक्षराधिक्यमार्षः ।

तस्मादिह स्वतपसा नदीमानेष्यसि प्रभो ।
इत्युक्तस्तेन मनुना वसिष्ठो भगवान् मुनिः ॥ ९५ ॥

उवाच मनुशार्दूलं दिव्यदर्शी तपोनिधिः ।
अहो ते मनुशार्दूल सम्यग्जातास्ति वै स्पृहा ॥ ९६ ॥

पुरा खलु विधेः सर्गे योग एष सनातनः ।
अयोध्यासरयूनद्योर्विश्वालंकारभूतयोः ॥ ९७ ॥

अस्ति वै सरयूर्नाम सरित् त्रैलोक्यपावनी ।
दर्शनाच्चैव यत्स्पर्शान्महामाङ्गल्यशेवधिः ॥ ९८ ॥

रामप्रेमवशाद्भूमा पुरुषः स सहस्रदृक् ।
सहस्रशोऽश्रुधाराभिः सुस्राव प्रेमजं जलम् ॥ ९९ ॥

ब्रह्मा विष्णुश्च रुद्रश्चत्रिदशश्च सवासवाः ।
सुस्रुवुः प्रेमसलिलं रामप्रेमवशाः पृथक् ॥ १०० ॥

तत एषा समुद्भूता सरयूः सुरसा सरित् ।
तीर्थानां कोटयश्चास्यां विविशुः सहसोत्सुकाः ॥ १०१ ॥

गङ्गाद्याः सरितश्चास्यां विविशुः स्वस्वरूपतः ।
मेधाद्या ब्रह्मविद्याश्च सावित्र्याद्याः श्रियस्तथा ॥ १०२ ॥

द्रवरूपं समास्थाय तस्यां विविशुरुत्सुकाः ।
सा वै विरजया पश्चात्सुसंगम्य महोर्जया ॥ १०३ ॥

आस्तेऽधुना हिमगिरौ दिव्यरूपधरासरित् ।
हिमाद्रेः पूर्वशिखरे कैलासगिरिनामनि ॥ १०४ ॥

विचरन्ती सिद्धवने सिद्धगन्धर्वपूजिता ।
तामिहागमयिष्यामि सुधातोयां महानदीम् ॥ १०५ ॥

यावद्वर्षसहस्रं तु तपः कृत्वा सुदुष्करम् ।
आराध्य श्रीरामं विभुं तपसा खलु भूरिणा ॥ १०६ ॥

तं वै प्रसन्नं याचिष्ठे सरयूं शीतलोदकाम् ।
त्रिधासंतापहरणीं साक्षात्कामदुघां नृणाम् ॥ १०७ ॥

अथाय खलु सा नित्यं सूक्ष्मरूपेण संस्थिता ।
रामवद्रामगङ्गापि तथाप्याविर्भविष्यति ॥ १०८ ॥

नित्यायोध्या सरयूश्चापि नित्या नित्या प्रमोदाटविरत्र यूयः ।
नित्योऽयमादिव्रज ईशलीलास्थानं तथेशो नित्य एवात्र रामः ॥१०९ ॥

आविर्भावः क्रमेणैषां नित्यानामपि वस्तुतः ।
अतोऽहमत्रनेष्यामि सरयूं लोकमङ्गलाम् ॥ ११० ॥

मुनीनामपि सर्वेषामत्रत्यानां मनूत्तम् ।
भवेदिष्टमिदं भूयः सरयूसरितागमात् ॥ १११ ॥
कोटितीर्थाश्रया पुण्या विश्वमङ्गलरूपिणी ।
पुरैव खलु पूरेषा सरय्वा तु विशेषतः ॥ ११२ ॥
इत्युक्त्वा मुनिशार्दूलो देवं वैवस्वतं मनुम् ।
सरय्वानयनार्थाय प्रतस्थावुत्तरां दिशम् ॥ ११३ ॥
तत्र गत्वा तपस्तेपे कैलासाचलसन्निधौ ।
जिताहारो जितायासो नित्यं मौनव्रते स्थितः ॥ ११४ ॥
मुष्टिमात्रतिलप्राशी शीर्णपर्णाशनस्ततः ।
पयोव्रतोवायुभक्षस्ततस्तिग्मव्रतं चरन् ॥ ११५ ॥
कृच्छ्रातिकृच्छ्रसुमहागहनव्रततत्परः ।
प्राणायामपरो योगी त्यक्तसर्वाशनस्ततः ॥ ११६ ॥
शुष्ककायोऽतिमांसास्थिशेषः सुकृशविग्रहः ।
रामचन्द्राराधनकृदास्थितः कठिनं तपः ॥ ११७ ॥
तपसा तस्य संतुष्टो भगवान् पुरुषः परः ।
प्रत्यक्षं समनुप्राप्य प्रोवाच विमलं वचः ॥ ११८ ॥
अयि श्रीमुनिशार्दूल कठिनं ते परं तपः ।
निरीक्ष्य निजधाम्नोऽहं चलितः करुणान्वितः ॥ ११९ ॥
वरं ब्रूहि प्रसन्नोऽहं यत्ते समभिकांक्षितम् ।
अपि यद्दुर्लभं लोके दास्ये तदपि साम्प्रतम् ॥ १२० ॥
वशीभूतोऽस्मि तपसा वद किं नाम याचितम्[1] ।
इत्युक्तो वै भगवता वसिष्ठो वश्यमानसः ।
उवाच मौनमुत्सृज्य निजचेतोऽभिवाञ्छितम् ॥ १२१ ॥

वसिष्ठ उवाच

[2]अहं तपस्यामि श्रीराम सरयूप्राप्तये तपः ।
अयोध्यायां मुक्तिपुर्य्यां सा नित्यं प्रवहेदिति ॥ १२२ ॥
नदीप्रवाहरहिता न हि सा शोभते पुरी ।
रामप्रेमद्रवमयी सरयूर्विश्वपाविनी ॥ १२३ ॥
अयोध्यायाः समुचिता रामपुर्याः शुभाकृते ।
इति मे वाञ्छितं नाथ त्यक्तः कमललोचन ।
विना त्वत्कृपया देव सा लभ्या मनुजैर्न च ॥ १२४ ॥

---

१. नास्ति-बड़ौ० । २. पादेऽस्मिन्नक्षराधिक्यमार्षः ।

श्रीराम उवाच

अस्त्वेवं मुनिशार्दूल मयाप्येतन्मतं ध्रुवम् ।
इत्युक्त्वा भगवान् रामो वसिष्ठं प्रति वत्सलः ।
प्रेरयामास सरयूं तस्यां गमनहेतवे ॥ १२५ ॥

श्रीभगवानुवाच

गच्छ देवि महापुण्यामयोध्यां मुक्तिरूपिणीम् ।
तत्रस्था जगतां देवि पशुपक्ष्यन्त्यजात्मनाम् ॥ १२६ ॥
स्थावराणां द्रुमलतादीनां त्वद्वारिसंगिनाम् ।
मुक्तिं कुरु शुभां नाम मत्स्थानप्राप्तिलक्षणाम् ॥ १२७ ॥
ओमित्युक्त्वाथ सरयूर्गन्तुं समुपचक्रमे ।
तावद्यमो धर्मराजः प्राप्य संयमिनीं पुरीम् ॥ १२८ ॥
उवाच कमलाकान्तमिदं वचनमादृतः ।
किमर्थमधिकारोऽयं मयि नाथ निवेशितः ॥ १२९ ॥
न ह्यस्यां धरणिस्थायां पापं स्थास्यति देहिनाम् ।
अस्यास्तरङ्गासम्पृक्तो यत्र वाति समीरणाः ॥ १३० ॥
देशे तत्र मदीयानां संचारो नैव विद्यते ।
अस्याश्च नाममात्रेण मुक्तिमेष्यन्ति मानवाः ॥ १३१ ॥
तोयपानाच्च वै सद्यो रामभक्तिर्विवर्द्धते ।
इति तस्य वचः श्रुत्वा रामः प्रोवाच सस्मितम् ॥ १३२ ॥
कीकटेषु त्रिशंकोश्च छायादेशस्थभूमिषु ।
धन्वदेशेषु च तथा म्लेच्छप्रायेषु चान्तक ॥ १३३ ॥
विषयेषु मम स्तोत्रपूजावर्जितभूमिषु ।
अन्येषु चाशुचिस्थानेष्वपुण्येषु च ये नराः ॥ १३४ ॥
म्रियन्ते सुदुराचाराः सूतिकास्थाश्च याः स्त्रियः ।
दुर्वासनाश्च ये जीवा महापातककारिणः ॥ १३५ ॥
रामभक्तेश्च विमुखा विष्णुनिन्दापराश्च ये ।
शिवनिन्दापराश्चैव दुर्गानिन्दापराश्च ये ॥ १३६ ॥
अन्ये च येऽतिपिशुना देवनाद्विजगोद्रुहः ।
परोपकारहिंस्राश्च परवृत्तिविघातकाः ॥ १३७ ॥
तेषां पातकिनां नृणां दण्डधारणहेतवे ।
जागरूकः सदा तिष्ठ न त्वस्यास्तटवासिनाम् ॥ १३८ ॥
इत्यादिश्य यमं रामः स्वं धाम प्रत्यपद्यत ।
ततश्च सरयूर्देवी वसिष्ठान्तिकमागमत् ॥ १३९ ॥

उवाच मुनिशार्दूलं दिव्यवेशधरा सरित् ।
आदिष्टाहं भगवता विष्णुना करुणावता ॥ १४० ॥

अयोध्यां प्रति यास्यामि रामचन्द्रमहापुरीम् ।
तत्रैव चापि वत्स्यामि रामचन्द्रस्य सनिधौ ।
उत्तिष्ठ मुनिशार्दूल सम्पूर्णस्ते मनोरथः ॥ १४१ ॥

श्रीशुक उवाच

अथोदतिष्ठत् तत्स्थानाद् वसिष्ठो भगवान् मुनिः ।
तमनुप्रययौ देवी सरयूर्लोकपावनी ॥ १४२ ॥

प्लावयन्ती शुभान् देशान् निजतोयघटाभरैः ।
लिम्पन्ती धरणीं तुङ्गैस्तरंगैश्चन्दनैरिव ॥ १४३ ॥

कुर्वन्ती लोलकल्लोलैः केलीमिव समंततः ।
भिन्दन्ती निजमार्गस्थान् विकटांश्चापि भूधरान् ॥ १४४ ॥

अम्भोजवेन गच्छन्ती पुण्यसेनेव पापभित् ।
तत्र तत्र मिलन्ती च नदीभिर्मार्गमध्यतः ॥ १४५ ॥

घोषयन्ती दिशः सर्वाः प्रवाहजवकाहलैः ।
स्तूयमाना तत्र तत्र वसिष्ठेन महर्षिणा ॥ १४६ ॥

अन्यैश्च सिद्धगन्धर्वैर्मुनिवर्यैश्च संस्तुता ।
उच्चावचान् शुभान् देशानेकोकृत्य महोर्मिभिः ॥ १४७ ॥

शोभयन्ती निःसरन्ती काप्यस्तब्धौघवाहिनी ।
अयोध्याभिमुखी देवी बभूव सरयूस्तदा ॥ १४८ ॥

योजनैस्त्रिभिरभ्येत्य जग्राहामितभक्तिमान् ।
महर्षिणा साकमेनां राजा वैवस्वतो मनुः ।
ततः स पूर्वमस्तौषीद्वसिष्ठं स्व पुरोधसम् ॥ १४९ ॥

मनुरुवाच

नमो महर्षये तुभ्यं प्राजापत्याय योगिने ।
अबन्ध्यकर्मणे दीर्घतपसे ब्रह्मणे नमः ॥ १५० ॥

त्वत्प्रसादादहं ब्रह्मन् कृतकृत्योऽस्मि सद्गुरो ।
तारितं मे कुलं सर्वं भासितं च ननु त्वया ॥ १५१ ॥

यदा यदा कुलेऽस्माकं भवेत्कार्यंममानुषम् ।
तदा तदा सहायस्त्वमधुनेव भविष्यसि ॥ १५२ ॥

तापितं भगवन् कृत्स्नं त्रैलोक्यं तपसा त्वया ।
येन स्थानात्प्रचलितो विष्णुस्त्रैलोक्यपूजितः ॥ १५३ ॥

इति स्तुतस्तेन ततो वसिष्ठः प्रोवाच तस्मै विहितप्रसादः ।
पाद्यार्घपूजादिभिरेवमेनां गृहाण राजन् सरयूं समेताम् ॥ १५४ ॥
स्तुवीहिचैनां स्तुतिभिः तत्पराभिः श्रीरामप्रेमद्रवैकस्वरूपाम् ।
इत्थं हि ते पुरलक्ष्मीर्भवित्री तरंगिणी सततं पुण्यरूपा ॥ १५५ ॥

इत्याज्ञप्तो वसिष्ठेन मनुर्वैवस्वतः स्वयम् ।
तुष्टाव सरयूरूपां श्रीरामप्रेमसम्पदम् ॥ १५६ ॥

मनुरुवाच

प्रेमद्रवे नमस्तुभ्यमयोध्याभिमुखद्रवे ।
महापुण्ये सूर्यवंश्यराजसम्पत्प्रदायिनी ॥ १५७ ॥
अनेककल्पावधिसंस्थितोदके मार्कण्डेयाद्यैर्मुनिभिः स्तव्यरूपे ।
प्रेमामृते ब्रह्मसुखातिगामिसुखप्रदे श्रीसरयु प्रसीद ॥ १५८ ॥
वसिष्ठतपसाऽऽनीते गङ्गाजलमनोहरे ।
वासिठ्यै रामगङ्गायै नित्यं तुभ्यं नमोऽम्ब मे ॥ १५९ ॥
प्रायो मत्कुलसंस्थानां सदा कल्याणकारिणी ।
स्थाने समागता मातर्नित्यमास्स्व पुरे मम ॥ १६० ॥
इति स्तुत्वा चकारोच्चैः पूजां पाद्यार्घसम्मुखैः ।
उपचारैः षोडशमिरानयत्स्वपुरे ततः ॥ १६१ ॥
अभ्यागतां तां पुरवासिनो जनाः सपर्यया भूरितमोपचारया ।
प्रत्यग्रहीषुः स्तुतिभिश्च भूरिशः समङ्गलोपायनपाणयो भृशम् ॥ १६२ ॥
ततः प्रभृत्येव पुरी महोत्तमा बभूव सात्यन्तरुचिप्रवर्द्धिनी ।
श्रियान्विता रत्नतटद्वयत्विषा विराजमाना सरयूप्रसंगतः ॥ १६३ ॥
तस्याः पुर्यास्तलतो वाहिनी सा चक्राह्वकारण्डवराजहंसयुक् ।
अनेकरूपैर्मुनिभिः पक्षिरूपैर्निषेवितातीव रराज सुश्रिया ॥ १६४ ॥
पीयूषद्रववाहिनी मुनिवरश्रीराजहंसान्विता ।
रत्नाबद्धतटद्वयातिसुषमा संफुल्लपद्माकरा ।
सौवर्णोज्ज्वलसैकता शुभमणिस्वर्णाक्तनिःश्रेणिका ।
रामारोहणसारणीव सरयूस्तस्यां विरेजेतराम् ॥ १६५ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे पश्चिमखण्डे सीताजन्मनि प्रमोदवनवर्णने सरयूसम्भवो नाम सप्तचत्वारिंशोऽध्यायः ॥ ४७ ॥

अष्टचत्वारिंशोऽध्यायः

श्रीशुक उवाच

इति तेऽभिहितं राजन् यथाभूत्सरयूः पुरा ।
भूयश्च कथयाम्यस्याः समुत्पत्तिं वसिष्ठतः ॥ १ ॥

कदाचिद्भगवान् वेधाः सत्यलोके सुरेवृतः ।
सभामध्यास्त महतीं लोकेशो वेदनायकः ॥ २ ॥

उपासांचक्रिरे देवा देवर्षिनिवहाश्च तम् ।
चित्ररथाद्या गन्धर्वाश्चक्रुस्तदुपवीणनम् ॥ ३ ॥

तत्र केचिदृचः पेठुर्ऋषयश्चार्थकोविदाः ।
केचिद्यजूंषि जगदुराध्वर्यवविशारदाः ॥ ४ ॥

केचिज्जगुः स्वरैर्जुष्टं साम संतन्य भूरिशः ।
केचित्पदानि वै चक्रुः केचित्क्रममुदैरयन् ॥ ५ ॥

केचिज्जटानामभ्यासं चक्रुरन्ये शनैः शनैः ।
महोपनिषदः पेठुरन्येऽङ्गन्यभ्युदैरयन् ॥ ६ ॥

केचिच्छास्त्रानुगां दृष्टिपवलम्ब्य तपोधनाः ।
चक्रुः परस्परं वादं सिद्धान्तज्ञानसाक्षिणः ॥ ७ ॥

एवमन्ये महामन्त्रकल्पान् समुदचारयन् ।
ऋषिच्छन्दोदेवताभिः साकं यद्वच्च बह्वृचा ॥ ८ ॥

तत्रान्योऽन्यं प्रवादेषु जायमानेषु भूमिप ।
महर्षिरत्रितनयो दुर्वासा नाम रोषणः ॥ ९ ॥

[1]द्वितीयेनोपयन्तुनाम्ना कोविदेन महर्षिणा ।
सहभूतः साम गायन्नन्येन परमर्षिणा ॥ १० ॥

कलहायमानो रोषेणात्यन्धीभूतविलोचनः ।
विस्वरं रवमातेने गीयमानेषु सामसु ॥ ११ ॥

ततः श्रीसरयूदेवी तीर्थशक्त्योधमण्डले ।
ब्रह्मणो दक्षिणे पार्श्वे गङ्गादीनां पुरः स्थिता ॥ १२ ॥

अबद्धं तस्य तद्गानमत्रिसूनोर्महारुषः ।
समाकर्ण्य कटाक्षेण सरस्वत्यै न्यवेदयत् ॥ १३ ॥

तया निवेदितं चास्य स्खलितं सामगानगम् ।
श्रुत्वा सरस्वती देवी प्रोवाच सरयूं प्रति ॥ १४ ॥

---

१. पादेऽस्मिन्नक्षराधिक्यमार्षः ।

सम्यग्ज्ञातं भगवति त्वयास्मिन् भूरिमण्डले ।
जायमाने महाशब्दे वादप्रवादगोचरे ॥ १५ ॥

रोषणस्यात्रिपुत्रस्य स्खालित्यं सामगानगम् ।
इति श्रुत्वा सरस्वत्या वाचं श्रीसरयूः पुनः ॥ १६ ॥

हसन्ती तामन्वहसन्निरीक्ष्य वदनं मुनेः[1] ।
ततो मुनिर्ददौ शापं मर्त्यलोकगतिं प्रति ।
गर्भवासमनुप्राप्य फलं हास्यस्य वेत्स्यसि ॥ १७ ॥

विधिरुवाच

मा ग्लासीः सरयूदेवि कच्चित्वं विश्वमङ्गला ।
त्वां निरीक्ष्य प्रजायन्ते विशोकाः सकला जनाः ॥ १८ ॥

शपोऽयं ते महादेवि केवलं लोकमङ्गलः ।
मर्त्यलोकेऽपि जाता त्वं मनुष्यान् सुखयिष्यसि ॥ १९ ॥

गङ्गादिपुण्यतीर्थेभ्यः सहस्रगुणमुत्तमा ।
भविष्यसि त्वं सरयूः सत्यं सत्य न संशयः ॥ २० ॥

यः कुर्यात्पुण्यतीर्थेषु यात्रां पृथ्वीप्रदक्षिणाम् ।
त्वयि यावन्न च स्नाति तावत्तस्य न तत्फलम् ॥ २१ ॥

इत्यादरस्ते विपुलो मर्त्यलोके भविष्यति ।
श्रीरामनगरीनाम्ना यायोध्येति प्रकीर्तिता ॥ २२ ॥

साक्षाद्वैकुण्ठनगरी तस्यां स्थास्यति निश्चला ।
ब्रह्महापि दुराचारः सुरापयोति परार्थहृत् ॥ २३ ॥

गुरुतल्पगमोऽपि त्वय्येकस्नानाद्विशुद्धयति ।
न त्वत्समं मर्त्यलोके तीर्थमन्यद्भविष्यति ॥ २४ ॥

गर्भवासादपि परं मा ग्लासीस्त्वं सुदेवते ।
वसिष्ठस्य शुभा भार्या नाम्ना या देव्यरुन्धती ॥ २५ ॥

योगैकतानहृदया लक्ष्मीतुल्याप्युमासमा ।
तस्या गर्भे जनिं लब्ध्वा विश्वमानन्दयिष्यसि ॥ २६ ॥

ततः प्रमोदविपिने रामलीलां मनोहराम् ।
निरीक्ष्य निजनेत्राभ्यां परां प्रीतिमवाप्स्यसि ॥ २७ ॥

ततः परं रामचन्द्रे लोकानन्दसुधानिधौ ।
कोटिकन्दर्पलावण्य रता देवि भविष्यसि ॥ २८ ॥

---

१. अत्र बहुस्खलितम् – बड़ौ० ।

ब्रह्मपुत्रीं हि मन्वानो रामो न त्वां वरिष्यति ।
उत्तराचलवर्यस्य नाम्ना पद्मगिरेस्ततः ॥ २९ ॥

कन्यात्वं प्राप्य भावेन रामेन्दुं वरयिष्यसि ।
शारदीषु मनोज्ञासु रात्रिषु स्मरमोहिता ॥ ३० ॥

रामेण रमणं प्राप्य कृतार्थत्वमुपैष्यसि ।
नित्यरासविलासस्था महाभावैकभाजनम् ॥ ३१ ॥

रसिकेन्द्रं रामचन्द्रं सीतावद्रमयिष्यसि ।
एवं दुर्वाससः शापस्तव लोकस्य चेष्टदः ।
नानुतापाय कञ्चित्ते तस्मात्किमनुशोचसि ॥ ३२ ॥

श्रीशुक उवाच

इति श्रुत्वा तु सरयूः पितामहवचः शुभम् ।
अन्तरानन्दजलधौ ममज्ज विगतज्वरा ॥ ३३ ॥

ततो वशिष्ठस्यगृहे नियोगात्प्रजापतेः सावतार देवी ।
अरुन्धतीगर्भजदिव्यरत्नं बभूव माङ्गल्यकरीह लोके ॥ ३४ ॥

जनक उवाच

पूर्वभवोत्तराद्रेः सा कन्यात्वं नागता कथम् ।
एक[1]जन्मनि सम्प्राप्ता व्यवधानं कुतो हि सा ॥ ३५ ॥

तेनैव जनुषा ब्रह्मन् रामेन्दुं नामिलत्कुतः ।
एतन्मे छिन्धि संदेहं सरयूसम्भवोद्भवम् ॥ ३६ ॥

श्रीशुक उवाच

उक्तमेतत्पुरा राजन् यथा वैवस्वतो मनुः ।
पौरोहित्ये वसिष्ठस्य तीर्थाय प्रार्थनां दधौ ॥ ३७ ॥

ततस्तप्तं वसिष्ठेन दुश्चरं परमं तपः ।
ततश्च सा वसिष्ठाय हिमाद्रौ दर्शनं ददौ ॥ ३८ ॥

कन्याहं ते भविष्यामीत्युवाच सरितां वरा ।
ततः कन्यात्वमापन्ना संतुष्टा तपसा मुनेः ॥ ३९ ॥

श्रीमत्यां कुलभार्यायामरुन्धत्यामजोजनत् ।
ततो वसिष्ठस्तां कन्यां गृहीत्वागान्मनोः पुरीम् ॥ ४० ॥

पश्चात्प्रवाहरूपापि साभ्युपेता सुधोज्ज्वला ।
सा कन्या मुनिना दत्ता ऋषये सोमशर्मणे ॥ ४१ ॥

---

१. (अत्र X चिह्नंदत्त्वा "From this to x this mark up to page 208 seems to be a द्विरुक्ति in the original copy) – बड़ौ० ।

सोमशर्मा भृगोर्वंश्यो ज्ञानवैराग्यभूषितः ।
तौ दम्पती वीतरागौचक्रमाते न च प्रजाम् ॥ ४२ ॥

तपसा सोमशर्मा तु त्यक्त्वा तद्भौतिकं वपुः ।
ज्ञानेन मुक्तिपदवीमियाय मुनिपुङ्गवः ॥ ४३ ॥
सा तु प्रमोदविपिने रामस्य मुरलीध्वनिम् ।
आरादाकर्ण्य सहसा मोहिताभूत् स्मरातुरा ॥ ४४ ॥

रासकेलि समालोक्य नितान्तं विहरद्वने ।
ततः कदाचिद्विपिने क्रीडन्तं रघुपुङ्गवम् ॥ ४५ ॥

एकान्ततः समालोक्य जलान्तादुदतिष्ठत ।
दिव्यवेषधरा भूत्वायोषिद्रतिमनोहरा ॥
उवाच पुरतो रामं कोटिमन्मथमोहनम् ॥ ४६ ॥

स्त्र्युवाच

वृणीष्व मां रसिकेन्द्र प्रेम्णासक्तां चिरात्त्वयि ।
अमुना तव रूपेण मोहिताहं वशीकृता ॥ ४७ ॥

श्रीराम उवाच

कासि त्वमम्भोजदलायताक्षि मनोहरापाङ्गि मनोज्ञरूपा ।
किं कामरामास्युत देववामा किं वा रमा सर्वगुणाभिरामा ॥ ४८ ॥

स्त्र्युवाच

भृगोः कुले सोमशर्माद्विजेन्द्रो यस्याङ्गनाहं तपसि स्थितस्य ।
वसिष्ठपुत्री विषयेभ्यो निवृत्ता वशीकृता ते मुरलीनिनादैः ॥ ४९ ॥

त्वं कोऽपि पूर्णः पुरुषः पुराणः स्वकेलिभिर्मोहितसर्वलोकः ।
जाने त्वदासक्तिवतां जनानां न विद्यतेऽसौ गुणसम्प्रवाहः ॥ ५० ॥

यं योगिनश्चेतसि चिन्तयन्ति समाधिवश्येऽखिलवृत्तिरिक्ते ।
स त्वं प्रभो राम परोऽसि पूरुषस्तथापि रत्या किल कामये त्वाम् ॥ ५१ ॥

अङ्गीकुरुष्वैव ततः शरण्य स्मरार्दितां मामनुभूतभोगाम् ।
नो चेद्वियोगज्वलनज्वालया ते दन्दह्यमाना परिमोक्ष्यामि वर्ष्म ॥ ५२ ॥

श्रीराम उवाच

अहं राजन्यतनयस्त्वं ब्राह्मणसुता भृशम् ।
कथमङ्गीक्रिये स त्वां विरुद्धं लोकवेदयोः ॥ ५३ ॥

भवान्तरे भविष्यामि तवाभीष्टार्थसिद्धये ।
इति मत्त्वा कुरु तपः शोषयन्ती कलेवरम् ॥ ५४ ॥

अनर्थकमिमं देहम् तपोऽर्थे विनियोजय ।
तेन पुण्यप्रभावेण मामेष्यसि भवान्तरे ॥ ५५ ॥

इति श्रुत्त्वा प्रभोर्वाक्यं सातप्यत् परमं तपः ।
जितेन्द्रिया निराहारा प्रेमानलविशोषिता ॥ ५६ ॥

योगानलेन तं दग्ध्वा पञ्चभूतात्मकं वपुः ।
ततः पद्मगिरेभार्या जन्मसम्प्राप सा वरम् ॥ ५७ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे पश्चिमखण्डे सीताजन्मनि सरयूसम्भवेऽष्टचत्वारिंशोऽध्यायः ॥ ४८ ॥

एकोनपञ्चाशत्तमोऽध्यायः

श्रीशुक उवाच

तस्यां संजातमात्रा सा दिव्यदेहविभूषिता ।
शुक्ले पक्षे चन्द्रिकेव व्यवर्धत दिने दिने ॥ १ ॥

तस्या रूपं सुसंजातं मनोहारि हरेरपि ।
लक्ष्मीपयोधरालेषपरमानन्दनिर्वृतेः ॥ २ ॥

चरणो जघने चैव मध्यनाभिस्थलोदरम् ।
त्रिवली रोमराजिश्च वक्षोजौ कण्ठमाननम् ॥ ३ ॥

नासिके लोचने कर्णौ भालं मूर्द्धा कचोत्कराः ।
एकमेकं वपुस्तस्य हृष्टमन्यदिवाजनि ॥ ४ ॥

यौवनाख्यमहाशिल्पिसम्पादितसुमंजिम ।
क्वचिद्रक्तं क्वचिच्छ्यामं क्वचिच्छ्वेतं क्वचिच्छिति ॥ ५ ॥

क्वचिद्गौरं वपुस्तस्या भृतं रंगकृतेव तत् ।
अणिमा लघिमा चैव महिमा गरिमा तथा ॥ ६ ॥

प्राप्तिः प्राकाम्यमीशित्वं वशित्वं चापि तत्तनौ ।
अणिमा मध्यदेशेस्यात्लघिमा पुष्पवत्तनौ ॥ ७ ॥

महिमा दृश्यते तस्याः सततं दृङ्नितम्बगः ।
गरिमा कुचयोः प्राप्तिर्देवानामपि दुर्लभा ॥ ८ ॥

प्राकाम्यमीशता चास्यास्तनावुज्जृम्भते पृथक् ।
वशित्वं दृष्टिमात्रेण यूर्ना वश्यत्वकारणात् ॥ ९ ॥

प्रथमे यौवने तस्याश्चाङ्गमङ्गं व्यरोचत ।
निर्णिक्तमुकुराकारं निर्मेघशशिबिम्बवत् ॥ १० ॥

तस्यां स्मरमहीपालो निजाज्ञामातनोत्तदा ।
विजित्येव विपक्ष्येभ्यो नगर्यां मधुराकृतौ ॥ ११ ॥

कियद्वाच्यमदो रूपं पुष्टं यौवनकारुणा ।
रामचन्द्ररसीन्द्रेण भोगार्हं भूय एव तत् ॥ १२ ॥

तां विलोक्य गिरिर्बालां काले परिणयोन्मुखीम् ।
त्रैलोक्ये तद्वराभावादन्वतप्यत मानसे ॥ १३ ॥

निरीक्ष्य चाकचक्योघं चमत्कारितलोचनम् ।
अन्वेत्येव चकोरीणामप्यदो वालिनां हृदि ॥ १४ ॥

तदङ्गमपुषत्कांचिद्रूपसम्पदमीक्षताम् ।
नारदस्तत्पितुः पार्श्वे कदाचिदगमन्मुनिः ॥
स तमभ्यर्च्य विधिवद्दावुत्तममासनम् ॥ १५ ॥

गिरिरुवाच

अद्य मे सफलं जन्म भवत्पादाब्जवन्दनात् ।
अतीव कोमलं हृद्यं प्राप्तं ते दर्शनामृतम् ॥ १६ ॥

जाता पुण्यवती सम्यगद्यास्मत्कुलसंतत्तिः ।
धन्यं मेरोः कुलं चाद्य युष्मदागमनात्प्रभो ॥ १७ ॥

गृहिणां गृहकृत्येषु व्यग्राणां दुर्भगात्मनाम् ।
अनुधावति युष्माकं दर्शनं सौभगावहम् ॥ १८ ॥

क्व नो दुश्चरितं ब्रह्मन्नहन्ताममताकुलम् ।
क्व च वो दर्शनमिदं योगिनामुचितं मुने ॥ १९ ॥

गोदोहमात्रं विरमेद्यत्र भाग्यवशाद्भवान् ।
तत्र स्यादचला सम्पत् स मे किं नु करिष्यति ॥ २० ॥

श्रीनारद उवाच

गिरिराज सुधन्योऽसि मेरोः पुत्रो महायशाः ।
इदं ते शीर्षमुत्तुङ्ग सरयू पात सुन्दरम् ॥ २१ ॥

इयं ते परमा कन्या सिन्धोरिव सुता रमा ।
उभयोस्तुल्यं सौभाग्यमुभे अपि हि पद्मजे ॥ २२ ॥

इमां दाशरथी रामः समये परिणेष्यति ।
अतो न देया कस्मैचिन्नार्हः सिंहबलिं गजः ॥ २३ ॥

निश्चिन्तोभवशैलेन्द्र वराय त्वमतःपरम् ।
नदीयं तादृशं कान्तं विनान्यं जनमर्हति ॥ २४ ॥

इत्युक्त्वा प्रययौ योगी महाभागवतो मुनिः ।
गायन् रामयशः पुण्यं क्वणन् वीणां मनोहराम् ॥ २५ ॥

स इयाय पुरीरत्नमयोध्यां रामभूषिताम् ।
तद्वत्सम्मानितो राजन् रामेणाचारकोविदा ॥
ततः प्रसन्नो देवर्षिरुवाच मधुरं वचः ॥ २६ ॥

अहो इदं राम जगत् समस्तं त्वयाभिगुप्तं कुशलैर्विभाति ।
यद्वद्विनाथयुतं प्राभिर्नयःपरीतं दिवसे समंतात् ॥ २७ ॥

पाल्यन्ते साधवः सम्यक् सांह्रयन्ते दुराशयाः ।
यदर्थं चावतीर्णोऽसि तत्त्वया क्रियतेस्फुटम् ॥ २८ ॥

अथ विज्ञाप्यमस्त्येकं वेत्सि यद्यपि तत् स्वयम् ।
तथापि सेवकाः कुर्युः स्वधर्मं भूतिमिच्छवः ॥ २९ ॥

अस्ति पद्मगिरिर्नाम मेरोः पुत्रौ महायशाः ।
गन्धमादनपुत्री यं लेभे भर्तारमुत्सुका ॥ ३० ॥

नाम्ना कुमुदिनी नाम सरयूस्तस्य कन्यका ।
बोढुमर्हसितां राम चिरात्त्वयि धृताशयाम् ॥ ३१ ॥

इत्युक्त्वा नारदे याते रामस्त्रैलोक्यसुन्दरः ।
जलावगाहनकृते सरयूमुपजग्मिवान् ॥ ३२ ॥
सावरोधजनः सार्धं भातृभिऽलक्ष्मणादिभिः ।
स एकान्ततमे स्थाने निष्क्रम्य नगराद्बहिः ॥ ३३ ॥

यत्रारामो महानस्ति रामणीयकमञ्जुलः ।
रसालमञ्जरीवृन्दरजसाञ्चितमारुतः ॥ ३४ ॥
सदा वसन्तवसतिर्जलयन्त्रमनोहरः ।
अनेकवृक्षगहनः फुल्लत्पुष्पकदम्बकः ॥ ३५ ॥
कल्पवृक्ष द्रुमलतामहामण्डपमण्डितः ।
मणिसौधो मनोहारी सरयूतीरभूस्थितः ॥ ३६ ॥

तत्र रामो रुचिं तन्वन् रेमेजनकजान्वितः ।
भ्रातरो लक्ष्मणाचाश्च स्वस्वपत्नीसमन्विताः ॥ ३७ ॥

चिक्रीडुः सरयूतीरे विविधैः सम्भ्रमैर्युताः ।
स्थले विहृत्य रमणः पुष्पावचयनादिभिः ॥ ३८ ॥
वनेषु विजहारोच्चैः सरयूतीरभूमिषु ।
ततः श्रान्तवपुः श्रीमान् प्रियया सह राघवः ॥ ३९ ॥

जले विहर्तुं राजेन्द्रतनयोऽवततार सः ।
करीव करिणीयुक्तो विहृत्य स च निर्भरम् ॥ ४० ॥

जानक्या सहितोऽवात्सीत्तत्रैव निशि नायकः ।
ततो रात्रौ प्रजातायां पारिजातसुगन्धिना ॥ ४१ ॥

वीजितः पवनेनासौ मल्लीकुसुमसंगिना ।
एकाकी विचरन् पूर्णचन्द्रज्योत्स्नाप्रकाशिते ॥ ४२ ॥

सरय्वाः पुलिने रामः स्त्रियमेकां ददर्श सः ।
नवीनयौवनोल्लासमण्डितावयवश्रियम् ॥ ४३ ॥

श्रियं यथा विस्फुरन्तीं चञ्चलानां छटामिव ।
कुर्वन्तीं देहदीप्तीनां वृन्दैर्वितिमिरा दिशः ॥ ४४ ॥

अङ्गरागातिसौरभ्यसम्भारसुरभीकृते ।
कानने विस्फुरन्तीं च स्वाभाविकतनुत्विषा ॥ ४५ ॥

पल्लवारक्त चरणां रम्भोरुं हंसगामिनीम् ।
रक्तांशुकपरीधानां संध्यापूर्णातिथेरिव ॥ ४६ ॥

निम्ननाभिसरोरम्यं त्रिवलीललितोदराम् ।
रोमराजीसमुद्भासिमध्यां मध्यां च सुन्दरीम् ॥ ४७ ॥

उत्तुङ्गस्तनकुम्भाक्तकाश्मीरागुरुसौरभाम् ।
मुक्ताहारलतारत्नमालासंशोभितोरसम् ॥ ४८ ॥

ग्रैवेयकमहारत्नदीधितिद्योतिकाननाम् ।
मन्दस्मितमनोहारिमुखचन्द्रोत्थचन्द्रिकाम् ॥ ४९ ॥

चारुनासां चकोराक्षीं कपोलादर्शभासुराम् ।
रत्नताटंकसम्पन्नश्रवणद्वयमञ्जुलाम् ॥ ५० ॥

विशालभालफलकभूतसौभाग्यभासिनीम् ।
सीमन्तरत्नपदान्तर्गुप्तसिन्दूररेखिकाम् ॥ ५१ ॥

श्यामां रजनिसंशोभिवेणीमौक्तिकतारकाम् ।
सर्वाभरणसम्पन्नां सर्वसौन्दर्यसंयुताम् ॥ ५२ ॥

सर्वसौभाग्यभवनां सर्वत्रैलोक्यमोहिनीम् ।
जाम्बूनदमयीं मालां दधानां करपङ्कजे ॥ ५३ ॥

वरणार्थं प्रियस्यास्य बहुलोत्कलिकाकुलाम् ।
तां दृष्ट्वा रघुशार्दूलः प्रोवाच वचनं ततः ॥ ५४ ॥

कासि त्वं विपुलश्रोणि चरन्ती निर्जने वने ।
नारी वा किंनरी वापि देवी वा वनदेवता ।
नागी वा नगकन्या वा धन्या सौभाग्यसंयुता ॥ ५५ ॥

स्त्र्युवाच

अहं पद्मगिरेः पुत्री सरयूर्नामतः प्रिय।
चिराय त्वां कामयन्ती ध्रुवं प्राप्तास्मि सम्प्रति ॥ ५६ ॥

कच्चित्स्मरसि मां नाथ पूर्वजन्मनि संगताम्।
अरुन्धत्या समुत्पन्नां वसिष्ठान्मुनिपुङ्गवात् ॥ ५७ ॥

ब्रह्मपुत्रीति मात्याक्षीस्तदा कामेन संयुताम्।
अधुना तु प्रपन्नां मां स्वाश्रयामुररीकुरु ॥ ५८ ॥

श्रीराम उवाच

स्मरामि त्वां पूर्वभवे संगतां मम काङ्क्षया।
ब्रह्मपुत्रीति संत्यक्तामधुना तु मदाशयाम् ॥ ५९ ॥

प्राप्तामुरीकरिष्यामि त्वामहं पद्मशैलजे।
प्रमोदवनमध्ये तु सुखितस्यालये शुभे ॥ ६० ॥

आदिव्रजे सदानन्दे विहरन्तं महोत्सवैः।
गोपीरासविलासाद्यैस्तत्र त्वं मामुपैष्यसि ॥ ६१ ॥

स्मरक्रीडारसे मग्नो विहरिष्याम्यहं त्वया।
त्वत्कामं पूरयिष्यामि यथान्यासां मृगीदृशाम् ॥ ६२ ॥

रासमण्डलमध्ये तु गोपीनां प्रेमलीलया।
वशीकृतस्ते साक्षात्त्वं गमिष्यामि मृगेक्षणे ॥ ६३ ॥

व्रजप्रेमोचिता त्वं हि तत्र मां समुपैष्यसि।
जाम्बूनदमयीं मालां मम कण्ठेऽर्पया प्रिये ॥ ६४ ॥

इति निशम्य रमा रमणस्य सा वचनमर्थवदर्थविशारदा।
रसवती सरयूः ससुखं न्यधात् प्रियगले मणिहेममयीं स्रजम् ॥ ६५ ॥

स गान्धर्वविधानेन रमणीमुदवोढ ताम्।
ततो रतिं तया सार्द्धं प्रावर्तयदुदारधीः ॥ ६६ ॥

इत्थं सा रमणी तस्य व्रजप्रेमानुशालिनी।
प्रमोदविपिने नित्यं लीलारसमवर्द्धयत् ॥ ६७ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे पश्चिमखण्डे सीताजन्मनि सरयूसम्भवो नामैकोनपञ्चाशत्तमोऽध्यायः ॥ ४९ ॥

पञ्चाशत्तमोऽध्यायः

श्रीशुक उवाच

ततश्चिरात्सुसंगम्य रामो जनकनन्दिनीम् ।
अतोषयन्महाकेलिसमुत्थैर्विविधै रसैः ॥ १ ॥

एवं ते सरयूत्पत्तिरुक्ता पातकनाशिनी ।
य एनां शृणुयाद् भक्त्या नरः सोऽपि विमुच्यते ॥ २ ॥

प्रमोदवनरूपं च समाहात्म्यमुदाहृतम् ।
इदं तस्याः परं धाम सहजायाश्चिदात्मकम् ॥ ३ ॥

प्रमोदवनकेलीनामधिष्ठात्री परात्परा ।
रामेणापि सहैवैषा संजातार्द्धाङ्गसङ्गिनी ॥ ४ ॥

दृष्टा दशरथेनैव सपत्नीकेन धीमता ।
[1]ततोऽन्तर्द्धानमगात्तूर्णं तद्रूपं युगलात्मकम् ।
रुरोदसूतिकास्थाने रामः प्राकृतबालवत् ॥ ५ ॥

जनक उवाच

काकुत्स्थवंशसम्बन्धः कथं देव्या भवेन्मुने ।
एतद्वयनुचितं तस्या [2]जायाया रघुपतेः स्वयम् ॥ ६ ॥

श्रीशुक उवाच

असौ राजा पुरा कल्पे कश्यपाख्यः प्रजापतिः ।
अदितिस्तद्वधूर्देवी कौसल्या याभवत्पुनः ॥ ७ ॥

तौ दम्पती पुरा धात्रा नियुक्तौ सृष्टिकर्मणि ।
वैराग्याविष्टचित्तत्वान्न चक्राते प्रजासृजिम् ॥ ८ ॥

ततो ब्रह्मा स्वयमेत्याब्रवीत्तौ कथं वां नो कुरुथो विश्वसर्गम् ।
उत्पादितावेतदर्थं परेण तदिच्छातः प्रतिकूलं किलैतत् ॥ ९ ॥

इत्युक्तावपि तौ तेन विरक्तौ कश्यपादिती ।
ऊचतुर्वचनं तस्मै सत्यमर्थवदीश्वरौ ॥ १० ॥

तावूचतुः

यदि नौ स स्वयं साक्षाद्भूत्वा देवः परः पुमान् ।
वक्ष्यते विश्वसर्गाय करिष्यावस्तदा प्रजाम् ॥ ११ ॥

इत्युक्त्वा विधये साक्षाच्चतुराननमूर्तये ।
चक्राते संततं तीव्रं मुनिभिर्दुश्चरं तपः ॥ १२ ॥

---

१. पादेऽस्मिन्नक्षराधिक्यमार्षः । २. पादेऽस्मिन्नक्षराधिक्यमार्षः ।

अजुष्टविषयौ वीतरागावनभिकाङ्क्षिणौ ।
त्यक्तसर्वजनासंगौ वनवाससमाश्रयौ ॥ १३ ॥

समाहितौ ध्यानसक्तौ तुच्छीकृतजगद्रसौ ।
आत्मानन्दैकनिरतौ चित्तवृत्तिविजित्वरौ ॥ १४ ॥

दिव्यवर्षायुतं तौ तु तपोनिष्ठौ बभूवतुः ।
ततः साक्षात् स भगवानादिदेवो रमापतिः ।
प्रददौ दर्शनं ताभ्यां रमाजुष्टार्धविग्रहः ॥ १५ ॥

पीताम्बरो मञ्जुलवन्यमालाविभूषितो वाणधनुर्धरो वै ।
श्रवःस्फुरत्कुण्डलमण्डितास्यो गुडालकालीकमनीयमूर्तिः ॥ १६ ॥
स्मितोज्ज्वलद्योतितदीपिताष्टदिशास्तुवत्पार्षदवर्यजुष्टः ।
सकौस्तुभः कन्दलितानुकम्पामनोज्ञदर्शो घननीलकान्तिः ॥ १७ ॥

तं वीक्ष्य सीतारमणं धनुर्धरं तौ दम्पती प्रोल्लसितोत्सवाढ्यौ ।
दृग्भिः पिबन्तौ मधुरामृताब्धिं प्रसन्नचित्तौ जगतुः स्तुतिं वै ॥ १८ ॥

तावूचतुः

यदर्थं तप आचीर्णं तत्रौ जातमदः फलम् ।
यद्युवां दर्शनं यातौ सीतारामौ परौ दृशाम् ॥ १९ ॥

आनन्दमय मूर्त्योर्वां कतयोऽर्हः कृपामृते ।
ईदृशं दर्शनं लब्धुं परार्थरतिकामयोः ॥ २० ॥

नमो वां करुणार्द्राभ्यां दम्पतिभ्यां सीतापते ।
एको ब्रह्मपरं पूर्णं ब्रह्मानन्दमयी परा ॥ २१ ॥

अहो वां करुणा काचिदनिर्वाच्यैव विस्तरात् ।
अद्य भक्तध्वङ्कुरे जाते प्रादुर्भूतस्तपोऽवधिः ॥
अलमतः परं नाथ नस्तपःखेदवेदनैः ॥ २२ ॥

संगते फले स्फुटमदः पदाम्भोजलब्धये परमभक्तिमभ्यर्थयामहे ।
न सुलभा तव प्रेमरूपिणी भक्तिरच्युता श्रीपते हरे ॥ २३ ॥

तपस्विपूरिते वर्षपूगकैः प्रकटिता भवेन्नाथ वा कचित् ।
इयमहो सुधास्वादुमाधुरीविजयिनी प्रभो भक्तिरस्तु नौ ॥ २४ ॥

या शिवादिभिः प्रार्थ्यतेऽनिशं परसमाधिभिः साधिते हृदि ।
विरहजारुजो नैव सेहिरे श्रीपतेतवावेशभाविताः ॥ २५ ॥

कथमिमाः सहिष्यावहे विभो तव जनाविभौ प्रेमपोषितौ ।
इत्युदीपादितियुतः कश्यपः सुसमाधिभिः ॥
शुद्धान्तःकरणो नीचैरयतत्पदयोः प्रभोः ॥ २६ ॥

पादाब्जपतितौ तौ तु समुत्थाप्य रमापतिः।
उवाच वचनं स्मित्वा भक्तिभाव प्रतोषितः॥ २७॥

श्रीभगवानुवाच

अस्तिन्नेव स्वरूपे मे युवामासक्तमानसौ।
भवान्तरेप्यदः साक्षाल्लप्स्येथे सुमनोरथौ॥ २८॥

भवान् दशरथो नाम राजा लोके भविष्यति।
सूर्यवंशे रघोर्वंशे परमोदारमानसः॥ २९॥

इयं देवी तु कौसल्या तस्य भार्या भविष्यति।
सीतारामौ परात्परौ तत्रावां दम्पती खलु॥ ३०॥

दर्शयिष्यावहे श्रीमद्विग्रहं द्विभुजात्मकम्।
अन्यत्सर्वसमं तत्र विद्युन्मेघसमाकृती॥ ३१॥

कद्रूश्च विनता चैव तत्र त्वामुपयास्यतः।
एका तु केकयी भूत्वा सुमित्राख्या परा वधूः॥ ३२॥

इत्युक्त्वान्तर्दधे देवो रमया सह राघवः।
जन्मान्तरे भावि सर्वं संसूच्य करुणानिधिः॥ ३३॥

एतत्ते कारणं प्रोक्तं यथा दशरथस्य तौ।
दर्शनं ददतुः प्रीत्या सीतारामौ परौ निजम्॥ ३४॥

यस्य भक्तस्य यः कामस्तस्य तं चेन्न पूरयेत्।
न्यूनतैव भवेत्पूर्णे साक्षाच्छ्रीपुरुषोत्तमे॥ ३५॥

एतद्धि तद्दर्शनमत्र दुर्लभं सीतायुतस्य श्रीराघवस्य यत्।
तादृग्विद्यां भक्तिमृतेभवान्तरे प्रेमात्मिकां वैधविधानमिश्रिताम्॥ ३६॥

तावन्मात्रां दृशि दत्त्वा यावद्वाञ्छास्य संस्थिता।
ततोऽन्तर्द्धिमगात्तूर्णं रमया सह राघवः॥ ३७॥

अद्य जातशिशुर्भूत्वा प्रादुरासीत्तदग्रतः।
देवदेवो नटवरो रामचन्द्र उदारधीः॥ ३८॥

वात्सल्यविभ्रमाविष्टो राजा दशरथस्ततः।
सद्यो विस्मृतवान्नैश्यं तस्य देवस्य शार्ङ्गिणः॥ ३९॥

महान्तमुत्सवं चक्रे जाते पुत्रे तु तादृशे।
नीलरत्नवरश्यामे पुण्डरीकनिभेक्षणे॥ ४०॥

उत्सवो वां समानोऽभूद्यथा पुत्र्यास्तव प्रभो।
तथा पुत्रस्य जनने काकुत्स्थस्य महोत्सवः॥ ४१॥

अवाद्यन्देववाद्यानि यथा पुत्र्यास्तव प्रभो ।
तथा पुत्रस्यजनने काकुत्स्थस्यापि भूरिशः ॥ ४२ ॥

स तस्त तनयो राजन् साक्षाद्देवो रमापतिः ।
इयं ते तनया चापि साक्षाच्छ्रीसहजामिधा ॥ ४३ ॥

अनयोः संततं योगः क्रीडासुन्दररूपयोः ।
भविता त्वद्गृहे राजन् महता सम्भ्रमेण सः ॥ ४४ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे पश्चिमखण्डे सीताजन्मोत्सवे श्रीशुकजनकसंवादे पञ्चाशत्तमोऽध्यायः ॥ ५० ॥

एकपञ्चाशत्तमोऽध्यायः

श्रीशुक उवाच

अथानयोरहं वक्ष्ये तत्त्वं लोकोत्तरं तु यत् ।
चिदानन्दैकवपुषोः जानकीरघुनाथयोः ॥ १ ॥

चिद्रूपा जानकी देवी परानन्दः स राघवः ।
अनया वीक्षितः सद्यश्चेतन्यायैव कल्पते ॥ २ ॥

पुरा तत्त्वानि सृष्ट्यादौ ब्रह्माण्डारम्भहेतवे ।
वीर्याधानार्थमेनं हि तुष्टुवुर्ब्रह्मरूपिणम् ॥ ३ ॥

तत्त्वान्यूचु

नमोऽस्तु ब्रह्मणे तस्मै पूर्णाय परमात्मने ।
निजानन्दप्रकाशाय साक्षिणेऽध्यक्षमूर्तये ॥ ४ ॥

वदन्ति यत्तत्त्वविदः परं तत्त्वं सनातनम् ।
तस्मै वेदशिरोरुढवर्ष्मणे ब्रह्मणे नमः ॥ ५ ॥

समासव्यासरूपेण सर्वोपनिषदां गिरः ।
समन्वयन्ति यत्रैव तस्मै कस्मैचिदो नमः ॥ ६ ॥

अव्यक्ताय निरीहाय निर्गुणाय परात्मने ।
निराभासाय शुद्धाय परस्मै ब्रह्मणे नमः ॥ ७ ॥

समस्ततत्त्वबीजाय तत्त्वातीताय साक्षिणे ।
सर्वाध्यक्षस्वरूपाय तस्मै ते ब्रह्मणे नमः ॥ ८ ॥

सृष्ट्यारम्भार्थमुद्युक्ता तत्त्वसृष्टिः सनातनी ।
विफलानुग्रहमृते यस्य तस्मै नमो नमः ॥ ९ ॥

नालं भूतगणोऽस्त्यपि च मनो नाहं न वा वैमह-
न्नोबुद्धिः प्रकृतिर्न वा कलयितुं ब्रह्माण्डनिष्पादनम् ।
यस्यानुग्रहवर्जितानि नितरां तत्त्वानि संसुप्तव-
न्नोजाग्रत्यखिलानुभावमहसे तस्मै परस्मै नमः ॥ १० ॥

सर्वेऽपि यस्य मुखवीक्षणतत्परो यः कस्यापि नैव मुखवीक्षणतत्परश्च ।
जीवातुरेक इह तत्त्वगणस्य सोऽयं जागर्तु संततमधीश्वरः श्रीरामः ॥ ११ ॥

श्रीशुक उवाच

इति संस्तुवतां तेषां तत्त्वानामाह यावताम् ।
आकाशवाक् सुसम्बोध्य तत्त्वानि निखिलानि सा ॥ १२ ॥

किं भोस्तत्त्वानि स्तुवत ब्रह्मशून्यं यथा नभः ।
अक्रियं निर्विशेषं च सृष्टये नित्यमक्षमम् ॥ १३ ॥

तस्य शक्तिं परां देवीं सृष्टिस्थित्यन्तकारिणीम् ।
प्रकाशिनीं विमर्शाख्यां शुक्लरक्तां स्तुवीत भोः ॥ १४ ॥

तां मायां नैव जानीत चैतन्यरहिता हि सा ।
इयं तु नित्यचैतन्यरूपिणी सुखरूपिणी ॥ १५ ॥

विवेक बुद्धिविकला मायेत्येके वदन्ति ताम् ।
कथं स्फुरेद्ब्रह्म तस्यामनिच्छायां स्वभावतः ॥ १६ ॥

तस्मात्परां चित्कलां तां जानीत ननु चेतसा ।
ब्रह्माभेदस्वरूपेण संस्थितां ब्रह्मणः कलाम् ॥ १७ ॥

चन्द्रस्य चन्द्रिका यद्वद्ब्रह्मणः सा प्रभात्मिका ।
यया संवीक्षितं ब्रह्म चैतन्याय प्रकल्पयेत् ॥ १८ ॥

यथा सुषुप्तिगो जीवो नैव किंचित् क्षमो भवेत् ।
तथा ब्रह्म तया हीनं दीनप्रायमुदाहृतम् ॥ १९ ॥

विधातुः सैव सावित्री गायत्री च सरस्वती ।
नारायणे स्वयं लक्ष्मीरुमाख्या सैव शंकरे ॥ २० ॥

सीताख्या श्रीरामचन्द्रे रामाख्या सहजा परा ।
यत्र यत्र प्रभुर्याति तत्र तत्रास्य संगिनी ॥ २१ ॥

परा श्रीश्चेतनाकारा चेतयित्री च सा सताम् ।
तां यूयं समुपासध्वं स्तुतिभिर्बहुमूर्तिकाम् ॥ २२ ॥

इयं प्रसन्ना भवतामभीष्टं साधयिष्यति ।
स्वेच्छामात्रेण संवीक्ष्य चिन्मयं ब्रह्मशब्दितम् ॥ २३ ॥

चेतयिष्यति सा देवी ततः कार्यं भविष्यति ।
इत्युदीर्यं महारावं तूष्णीमासान्तरिक्षगीः ।
तत्त्वानि तुष्टुवुस्तां च ब्रह्मशक्तिं परात्पराम् ॥ २४ ॥

तत्त्वान्यूचुः

नमस्तेऽम्ब पराशक्त्यै वस्तुसौन्दर्यमूर्तये ।
सकलारभ्भसाफल्यजीवातुतममूर्तये ॥ २५ ॥

अमूर्तायै समूर्तायै सहजस्फूर्तये नमः ।
कलाकाष्ठामुहूर्तायै कालशक्त्यै च ते नमः ॥ २६ ॥

कालशक्त्यै क्रियाशक्त्यै स्वभावशक्तिमूर्तये ।
अवस्तुवस्तुरूपायै ब्रह्मचित्यै नमो नमः ॥ २७ ॥

कलायै चित्कलायै ते निष्कलायै कलात्मने ।
सकलायै सरूपाये परशक्त्यै नमोऽस्तु ते ॥ २८ ॥

भेदाभेदविहीनायै विस्फुरन्त्यै परात्मनिः ।
आधाराधेयरूपायै ब्रह्मशक्त्यै नमो नमः ॥ २९ ॥

कर्ता कर्माथ करणमाधारः सम्प्रदानकम् ।
उपादानमपादानं यद्रूपं सकलं जगत् ॥ ३० ॥

वयं चैवापि यद्रूपास्तथा क्षरमथाक्षरम् ।
प्रकृतिश्च गुणाश्चैव ब्रह्मशक्तिं नताः स्म ताम् ॥ ३१ ॥

आह्लादिनी शक्तिरपारवीर्या सृष्टिस्थितिध्वंसकरी समग्रा ।
तस्मिन् परे ब्रह्मणि विस्फुरन्ती ज्ञेया कथं सा तदभिन्नरूपा ॥ ३२ ॥

आश्रयो विषयश्चैव सैवैका निर्विकल्पिका ।
अनाद्यनन्तरूपा च प्रत्यक्चित्तिरुदीर्यते ॥ ३३ ॥

ताम्राश्रिताः स्मः परमात्मरूपिणीमुदारवीर्याममृतात्मरूपिणीम् ।
गुणावसाने मुनयः समाधिभिः संविन्दन्ते या सुविशुद्धसत्त्वगाम् ॥ ३४ ॥

इति संस्तुवतां तेषां प्रसन्ना साभवत्क्षणात् ।
तपा संवीक्षितं ब्रह्मचिन्नभः शून्यमप्युत ॥ ३५ ॥

ईक्षांचक्रे स्वमात्मानंस्फुरन्तं सर्वतोमुखम् ।
तमसः परमालोकप्रकाशात्मानमद्भुतम् ॥ ३६ ॥

अथाविरासीत्पुरुषो यः षोडशकलात्मकः ।
सहस्रशीर्षनयनः सहस्राननबाहुकः ॥ ३७ ॥
सहस्रपादचरणः सहस्रश्रुतिनायकः ।
सहस्रमूर्तिरुद्दीप्तः स्रष्टा स महतोऽप्यभूत् ॥ ३८ ॥

तत आविरभूद्ब्रह्मा देवः शब्दमयः स्वराट् ।
हिरण्यगर्भो भगवांस्ततोऽण्डं समवर्तत ॥ ३९ ॥

ततो विराडभूद्दीप्तः पुरुषः सर्वशंश्रयः ।
एवं प्रववृत्ते विश्वं यदनुग्रहतः पुरा ॥ ४० ॥

सेयं जनक पुत्रीत्वं तव प्राप्ता न संशयः ।
इयं हनिष्यतितरां दैत्यान् भुवनभीषकान् ॥ ४१ ॥

इयं करिष्यतितरां केलीमन्यैरगोचराम् ।
स्वानन्दमात्रसम्पत्तिरसिकानन्दरूपिणी ॥ ४२ ॥

इयं भक्तिमयी भूत्वा भावुकान् रञ्जयिष्यति ।
इयं सयन्मयी भूत्वा भुवनं भूषयिष्यति ॥ ४३ ॥

रघोर्वंशं निमेर्वंशं स्वभावात्यावयिष्यति ।
यावन्ति चरितान्यद्धा राघवेन्द्रः करिष्यति ॥ ४४ ॥

तेषामियमधिष्ठात्री भविष्यति न संशयः ।
गास्यन्ति चास्याश्चरितं गङ्गाजलसुपावनम् ॥ ४५ ॥

महौषधंभवातीनां नारदाद्याः सुरर्षयः ।
रामस्य नाम्नि या शक्तिर्भुवनत्रयपावने ॥ ४६ ॥

सैवास्या नामसम्बन्धाद्यथावदवधार्यताम् ।
यज्ञदानतपस्तीर्थंस्वाध्यायाध्यात्मबोधतः ॥ ४७ ॥

कोटिसंख्यं रामनाम्नि पावित्र्यं वर्तते नृपः ।
ततः कोटिगुणं पुण्यमस्या नाम सनातनम् ॥ ४८ ॥

इति मत्वा भजन्त्येनां मुनयो नारदादयः ।
यावन्न कीर्तयेदस्या नाम कल्मषनाशनम् ॥ ४९ ॥

अनेककोटिजप्तोऽपि न रामः फलसाधकः ।
सरय्वाः पारद्वये हि रामधाम प्रतिष्ठितम् ॥ ५० ॥

रामधामोपरि स्पष्टं तव पुत्र्याः परं पदम् ।
यत्र रामोऽपि भगवान् पूर्णः श्रीपुरुषोत्तमः ॥ ५१ ॥

स्त्रीवेशेन निजात्मानं वेषयित्वा प्रयात्यहो ।
इयं हि सहजानन्दा तल्लोकस्याधिराज्यभाक् ॥ ५२ ॥

श्रीनन्दनाख्यगोपस्य दुहिता ब्रह्मरूपिणी ।
श्रीराजिमातृगर्भस्य रत्नमद्भुतमाधुरी ॥ ५३ ॥

ऊढा राघवेन्द्रेणैव रससाम्राज्यमूर्तये ।
रमिता रामचद्रेण राजरूपेण भोगिना ॥ ५४ ॥

रसभावमये सौधे दूतीसख्यावलीवृता ।
रसस्यैष परः पन्था नात्र कार्या विचारणा ॥ ५५ ॥

विचारकः पतेदाशु प्रभोर्द्वेषी भवेच्च सः ।
न हीदृशे महाभावे कस्याप्यनाधिकारिता ॥ ५६ ॥

अनेकभवसंशुद्धवीतकमल्षमानसः ।
कोटिष्वपि मनुष्याणां भावकः स्यादसंशयः ॥ ५७ ॥

तस्यैषा चिन्मयी लीला सहजानन्दिनीशितुः ।
भावनापथमभ्येत्य भवदुःखं विनाशयेत् ॥ ५८ ॥

कामानुग्राहिका लीला निष्कामं कुरुते जनम् ।
जन्मान्तरसहस्रेण शुद्धे भक्तिपथे स्थितम् ॥ ५९ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे पश्चिमखण्डे भरतलक्ष्मणीये श्रीशुकजनकोपगीतसीताजन्मोपाख्याने एकपञ्चाशत्तमोऽध्यायः ॥ ५१ ॥

द्विपञ्चाशत्तमोऽध्यायः

श्रीशुक उवाच

यद्धि मायामयं विश्वं तदर्वाक् सम्प्रतिष्ठितम् ।
नित्यं चिदानन्दमयं सरयूतीरभूमिगम् ॥ १ ॥

अरूपवच्च तत्सर्वं ज्ञानिनामप्यगोचरम् ।
तथापि खलु भक्तानां दृश्यते रूपसुन्दरम् ॥ २ ॥

तेजोमयं रसमयं भक्तिप्रेमोपबृंहितम् ।
इच्छया रामचन्द्रस्य परस्य ब्रह्मणः खलु ॥ ३ ॥

सर्वे तन्मयता याता नामधामवपुर्गुणाः ।
लीलादिकं तत्र विश्वं परं ब्रह्मैव केवलम् ॥ ४ ॥

एतद्धि सहजानन्दामनोरथस्य पूर्तये ।
आदावेव स्वयं रामो रमते वै प्रमुद्वने ॥ ५ ॥

यत्र कल्पद्रुमारामवेष्टितं पुरमुत्तमम् ।
अयोध्याख्यं परं स्थानं रत्नप्रासाददीपितम् ॥ ६ ॥

प्राकृताकाररहितैरप्राकृतगुणान्वितैः ।
सर्वभावगुणैराढ्यं कल्याणगुणमन्दिरम् ।
न तं ज्ञानेन पश्यन्ति कुतः कर्मभिरन्विताः ॥ ७ ॥

भक्त्यैकलभ्यमिदमद्भुतमस्य नित्यं धामाद्वितीयममलद्युतिदीप्यमानम् ।
चिल्लोकशब्दितमपारमनन्तमाद्यंप्रत्यग्दृशैकविषयातिगं च ॥ ८ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे पश्चिमखण्डे भरतलक्ष्मणीये सीताजन्मोत्सवे श्रीशुकजनकसंवादे महाधामवर्णनं नाम द्विपञ्चाशत्तमोऽध्यायः ॥ ५२ ॥

त्रिपञ्चाशत्तमोऽध्यायः

श्रीशुक उवाच

अयोध्यां परितो राजन् सरय्वाः कूलयोर्द्वयोः ।
प्रमोदवनसंज्ञं तत्परं धाम निशामय ॥ १ ॥
तदष्टकोणमाख्यातं महामण्डलमुत्तमम् ।
उत्फुल्लपङ्कजाकारं कर्णिकायां पुरी स्वयम् ॥ २ ॥
तन्मध्ये विमलं भाति श्रीमद्दाशरथं गृहम् ।
अनेकरत्नप्रत्युप्तसुवर्णमयमुज्ज्वलम् ॥ ३ ॥
कक्षासप्तकसम्पन्नं वृहद्गोपुरसंयुतम् ।
विशालतरसौवर्णवप्रमितिप्रभासुरम् ॥ ४ ॥
तेजःपुञ्जमयं साक्षात्कोटिसूर्येन्दुजित्वरम् ।
सुवर्णरत्नसंकल्पैरट्टालैर्गगनस्पृशम् ॥ ५ ॥
उत्तुङ्गवलभीदीव्यद्वातायनशतान्वितम् ।
सर्वर्तुसुखदैर्भूरिवेश्मभिः परिशोभितम् ॥ ६ ॥
मणिकुट्टिमसंक्रान्तखेलच्चन्द्रमुखीगणम् ।
जलयन्त्रसुसम्पन्नवेश्माभ्यन्तरवेश्मकम् ॥ ७ ॥
अनेकस्थानिकायुक्तं लोकोत्तरकलामयम् ।
तत्र सम्प्राणमद्दारजो राजा दशरथाभिधः ॥ ८ ॥
दीक्षितः सर्वमेधानां देवतातिथिपूजकः ।
राज्यं कुर्वन् सदा भाति रामवात्सल्यवारिधिः ॥ ९ ॥

तस्य पत्नी सदादीक्षा तदाहितमनोगतिः ।
कौसल्या श्रीमती ज्येष्ठा केकयी तदनन्तरम् ॥ १० ॥

सुमित्रा च ततः पश्चात्तिस्त्रोऽप्यस्यातिसौख्यदाः ।
तस्य पुत्रः स्वयं रामः श्रीमांश्चन्द्राननस्तु यः[1] ॥ ११ ॥

एष एव स्वलीलाभिर्मर्यादापुरुषोत्तमः ।
अनुकूलः सदा सीतास्वाधीनपतिकारतः ॥ १२ ॥

अनन्यप्रेयसीकान्तः श्रुतिधर्मपथेश्वरः ।
प्रमोदवनवासी तु परमः पुरुषोत्तमः ॥ १३ ॥

विशुद्धप्रेमभक्त्यैकप्राप्यरूपो महाप्रभुः ।
सर्वोत्तमः सदा सेव्यो हृदि भावैकवेदिभिः ॥ १४ ॥

यस्य लीला रसमयी सर्वात्माभावभूषिता ।
ब्रह्मधर्मस्य मर्यादा सर्वा यत्र विवर्जिताः ॥ १५ ॥

निःसाधनपथस्थानां पराविर्भावकारणम् ।
प्रमोदवनमात्रैकविश्रान्तसुखवारिधिः ॥ १६ ॥

प्रमोदवनसामग्री प्रेमभक्तिमयी सदा ।
सहजानन्दिनी तत्र मोदिनी चापि विश्रुता ॥ १७ ॥

आह्लादिनी परा शक्तिः सर्वलोलाधिदेवता ।
अनेककोटिलक्ष्मीनामंशिनी परदेवता ॥ १८ ॥

परलक्ष्मीः परब्रह्मरूपिणी परमेश्वरी ।
स एतया सुसम्पन्नः प्रमोदवनचन्द्रमाः ॥ १९ ॥

क्रीडति क्रीडनैर्दिव्यैः परमानन्दसिन्धुभिः ।
वासन्तैः शारदैश्चैव तथान्यै ऋतुरञ्जितैः ॥ २० ॥

सुखितस्य गृहे साक्षात्कल्याणगुणमण्डितः ।
माङ्गल्यायाः सुतः श्रीमान् ज्ञानिनामप्यगोचरः ।
कुतस्तरां कर्मजुषां भक्त्यैकसुलभः प्रभुः ॥ २१ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे पश्चिमखण्डे भरतलक्ष्मणीये सीताजन्मोत्सवे श्रीशुकजनकसंवादे त्रिपञ्चाशत्तमोऽध्यायः ॥ ५३ ॥

१. खण्डितं – बड़ौ० ।

चतुष्पञ्चाशत्तमोऽध्यायः

जनक उवाच

कोऽयं सुखितना मास्तिमहाभागो महोन्नतः ।
यद्गृहे भगवान् रामः पूर्णः श्रीपुरुषोत्तमः ।
नित्यं विहरति स्वच्छैर्विलासैर्बुद्धयगोचरैः ॥ १ ॥

का च माङ्गल्यका देवी महोदारा मनस्विनी ।
यद्गर्भरत्नमभवद्रामो राजीवलोचनः ॥ २ ॥

श्रीशुक उवाच

तावेतस्यैव पितरौ परब्रह्मस्वरूपिणः ।
ययोर्गृहे करोत्येष रसलीलामयीं क्रियाम् ॥ ३ ॥

अन्यावेतस्य पितरौ [1]कौसल्यादशरथामिधौ ।
यश मर्यादामालम्ब्य भवत्येष सुखप्रदः ॥ ४ ॥

एतौ त्वमर्यादरसलीलासुखरसेशितुः ।
पितरौ खलु गोपालौ माङ्गल्यासुखिताभिधौ ॥ ५ ॥

कर्दमो देवहूतिश्च पुरा कल्पे बभूवतुः ।
ययोः कपिलरूपेण साक्षाद्विष्णुरवातरत् ॥ ६ ॥

योगाचार्येण तेनैतौपरां सिद्धिमवापितौ ।
विरजापरपारस्थौ परब्रह्मरसस्पृशौ ॥ ७ ॥

मुक्तौ लीलातनुं धृत्वा पितृभावेन भावितौ ।
जुषेते परमं सौख्यं माङ्गल्यासुखिताभिधौ ॥ ८ ॥

तत्रैतयोः कदाचित्स स्वं रूपं मङ्गलालयम् ।
प्रभुर्दर्शितवान् रामो निजलोकप्रतिष्ठयोः ॥ ९ ॥

प्रमोदवनमध्यस्थं नोलनीरदविग्रहम् ।
द्विभुजं चरणाम्भोजरणन्नूपुरमण्डितम् ॥ १० ॥

मुखचन्द्रपरिभ्राजदलकावलिवेष्टितम् ।
बिम्बोष्ठं चारुनयनं मञ्जुलं बालकेलिभिः ॥ ११ ॥

रूपमत्यद्भुतं दृष्ट्वा दम्पती तौ सलालसौ ।
बभूवतुरतीवास्य स्वपुत्रत्वाय कर्हिचित् ॥ १२ ॥

तदा सोऽन्तर्हितो भूत्वा व्योमवाण्या जगाद ह ।
ज्ञातो वां मयका तावद् दुर्घटोऽसौ मनोरथः ॥ १३ ॥

---

१. पादेऽस्मिन्नक्षराधिक्यमार्षः ।

अपि[1] पूर्वजन्मनि पुत्रो जातो वां कपिलाह्वयः।
ज्ञानशक्त्यैव सम्पन्नो न त्वनेन स्वरूपतः॥ १४॥
ज्ञानक्रियोभययुतं स्वरूपमिदमद्भुतम्।
कथं वां पुत्रभावेन प्राप्नुयादितरार्भवत्॥ १५॥
अयमप्युदितो भावो वैकल्पमपि नैष्यति।
तस्मादागन्तुके कल्पे युवां सारस्वताभिधे॥ १६॥
अपि मां पुत्रभावेन प्राप्स्यथः पुरुषोत्तमम्।
मुक्तौ लीलातनुं धृत्वा पितृभावेन भावितौ॥ १७॥
प्राप्स्यथः परमं सौख्यं माङ्गल्यासुखिताभिधौ।
तावद्युवां परं भावं वात्सल्यरसरञ्जितम्॥ १८॥
मयि जुष्टं वितनुतामेतद्वां परमं तपः।
अनेन भावरूपेण तपसानन्यगामिना॥ १९॥
अचिरादेव वै पूर्णो भविता वां मनोरथः।
इति दत्त्वा वरं तत्र दम्पत्योर्मुक्तयोस्तयोः॥ २०॥
प्रभुः पुत्रत्वमगमन्माङ्गल्यासुखिताख्ययोः।
इत्थं ते कारणं प्रोक्तं तपोः पुत्रोऽभवद्यथा॥ २१॥
वस्तुतस्तस्य साकेते नित्यः परिकरोऽखिलः।
नित्यः श्रीसुखितो गोपो नित्य माङ्गल्यका च सा॥ २२॥
नित्या गावश्च गोपाश्च नित्या श्रीसहजेश्वरी।
आविश्यतां तमत्यर्थं विशुद्धं मुक्तिरूपिणम्॥ २३॥
कंचिज्जीवं समुद्यंति कल्पे कल्पे युगे युगे।
यथैव सुभगा नाम काचिद्ब्राह्मणकन्यका॥ २४॥
ब्रह्मावर्त्ते जनिं लब्ध्वा वैधव्यं समुपागता।
सा जाता रामभक्त्यैव सहजानन्दिनीसखी॥ २५॥

जनक उवाच

कथमेषा कथा ब्रह्मन् श्रोतुं त्वत्तोऽभिकामये।
सहजानन्दिनीसख्या जन्मप्रस्तावनामयी॥ २६॥

श्रीशुक उवाच

आसीन्मालवके देशे सूत्रकारस्य कन्यका।
परचक्रोपद्रवेण वेश्याहस्ते गता तु सा॥ २७॥

---

१. पादेऽस्मिन्नक्षराधिक्यमार्षः।

बान्धवा निधनं प्राप्तास्तस्याः कालक्रमेण वै ।
पितृभ्रातृमुखाः सर्वे सानूढ़ैव वयोन्विता ॥ २८ ॥

वेश्याभिस्तु कृता वेश्या नित्यमुद्विग्नमानसा ।
शोचन्ती स्वकुलं भूयः परहस्तगतावशा ॥ २९ ॥

अहो मे क्व गता माता क्व च योनिप्रदः पिता ।
क्व वा भ्रात्रादयः सर्वे हा धात्रा भ्रंशितास्म्यहम् ॥ ३० ॥

किं करोमि क्व गच्छामि वेश्याहस्तगतावशा ।
अपि मे क्वापि भूयोऽपि लप्स्यते कुलमुज्ज्वलम् ॥ ३१ ॥

धिगीदृशीमवस्थां मे देह्यन्तश्च कथं भवेत् ।
इति चिन्तासमायुक्ता सोद्वेगतरमानसा ॥ ३२ ॥

अकुर्वंती जनैः संगं स्वरविद्यामशिक्षयत् ।
गन्धर्वैः कुशलैस्तत्र नानादेशसमागतैः ॥ ३३ ॥

नृत्यविद्यामशिक्षच्च गायनैर्नृत्यकारिभिः ।
इत्येवं वर्त्तमाना सा पुरुषैः संगवर्जिता ॥ ३४ ॥

तां विद्यां जीवनीकृत्य निजवृत्तिमकल्पयत् ।
कुलस्त्रीणां गतिं दृष्ट्वा तुतोष च मुमोद च ॥ ३५ ॥

ततः कालवशात्सा वै जरती पञ्चतां गता ।
ब्रह्मावर्ते समभवत् कन्यका नन्दशर्मणः ॥ ३६ ॥

आख्यया सुभगा नाम रामभक्तिपरायणा ।
अतीवरूपलावण्यवेशालंकारभूषिता ॥ ३७ ॥

तस्या मातोर्जला नाम महोर्जितवती तु सा ।
ताभ्यां पितृभ्यां सा नित्यं पाल्यमाना दिने दिने ॥ ३८ ॥

ववृधे रूपलावण्यवयःशीलगुणान्विता ।
तस्या लोकोत्तरं रूपं तेजश्चातिमनोहरम् ॥ ३९ ॥

विलोक्य मातापितरौ चिन्तायुक्तौ बभूवतुः ।
अहो इयं वरतमा कन्या कस्मै प्रदीयताम् ॥ ४० ॥

नास्या रूपसमो भर्ता लभ्यते धरणीतले ।
इति चिन्तासमायुक्तौ निद्रां न समुपेयतुः ॥ ४१ ॥

सा तु चन्द्रमुखी कन्या स्वभावादेव सुव्रता ।
रामभक्तिपरा नित्यमेकादश्यामुपोषिणी ॥ ४२ ॥

कार्तिकव्रतिनी चैव माघवैशाखसंयमा ।
औत्पत्तिकज्ञानयुक्ता शुचिः प्रयतमानसा ॥ ४३ ॥

राम रामेति जल्पन्ती श्रीपते राघवेति च।
जगद्भर्तास्तु मे भर्ता काङ्क्षन्तीति मुहुर्मुहुः ॥ ४४ ॥

वयोऽन्वितापि न तरां चक मे प्राकृतं नरम्।
वरचिन्तातुरौ दृष्ट्वा पितरावभिकाङ्क्षती ॥ ४५ ॥

साक्षाल्लक्ष्मीपतिं कान्तं स्वभावादेव तत्त्ववित्।
अथ तस्याः पिता चक्रे काले पाणिग्रहोत्सवम् ॥ ४६ ॥

सुपर्वाख्येन विप्रेण भार्गवेण निरायुषा।
विवाह्य विधिवत्तां तु कन्यकां नन्दशर्मणः ॥ ४७ ॥

पथि स्वसदनं गच्छन् दष्टः कृष्णाहिना मृतः।
सा सुन्दरी तथा वीक्ष्य तमुत्क्रान्तासुमातुरा ॥ ४८ ॥

अनुगन्तुं मतिं चक्रे तावदाहान्तरिक्षगीः।
अलं शोकेन ते तन्वि नासौ भर्ता तवात्मनः ॥ ४९ ॥

भज श्रीरामचरणं त्वं जीवस्व म्रियस्व मा।
यावदायुः प्रवर्तस्व साधुभिः सेविते पथि ॥ ५० ॥

भजन्ती परया भक्त्या स्वात्मभर्तारमच्युतम्।
इति श्रुत्वा व्योमगिरं संनिवृत्ताभवत्ततः ॥ ५१ ॥

पत्युस्तस्यानुगमनात् सुभगा भजनोत्सुका।
विलप्य लोकरीत्या सा मृतं भर्तारमादरात् ॥ ५२ ॥

आनीता स्वपितुर्गेहं भ्रातृभिः पुनरेव सा।
तत्रस्था सा रामं भेजे प्रेम्णा लोकोत्तरेण च ॥ ५३ ॥

उपदिष्टा नारदेन वैष्णवप्रवरेण सा।
षडक्षरं राममन्त्रमुपासांचक्र उच्चकैः ॥ ५४ ॥

वैष्णवं कर्म कुर्वाणा तत्सेवौपायिकं भृशम्।
कायेन मनसा वाचा चक्रे सा वैष्णवं तपः ॥ ५५ ॥

तीर्थेष्वायतनेष्वन्येष्वतिपुण्यतमेषु च।
कुर्वती विविधां भक्तिं चचारसुभगाह्वया ॥ ५६ ॥

वैष्णवाख्येन तपसा शोषयामास सा तनुम्।
सदाचाररता भक्ता विशुद्धहृदया च सा ॥ ५७ ॥

भक्त्या वशीकृत्य रामं वर्तमाना शुभे पथि।
कदाचित्स्वप्नमध्ये सा ददर्श निजवल्लभम् ॥ ५८ ॥

रामं सहजया युक्तं प्रमोदवनमध्यगम्।
नवीननीलमेघाभं पीताम्बरसमुज्ज्वलम् ॥ ५९ ॥

सुवर्णसूत्रकटककुण्डलादिविभूषितम् ।
अत्युदारमुखं रुच्यं स्वभावमधुराकृतिम् ॥ ६० ॥

तस्य वामाङ्गसंसक्तां सहजानन्दिनीं प्रियाम् ।
कमलाद्यकरां देवीं स्मयमानां गुणोज्ज्वलाम् ॥ ६१ ॥

सयो निर्मुक्तनिद्रा सा प्रोत्थिता तदनन्तरम् ।
अस्मार्षीद् वल्लभं रामं यथोक्तमधुराकृतिम् ॥ ६२ ॥

सहजानन्दिनीप्रेमभक्तिक्रीतं प्रियं तु सा ।
विज्ञाय शुभगा चक्रे सहजाराधने मतिम् ॥ ६३ ॥

भक्त्या समाराध्य तु सा सहजां रामवल्लभाम् ।
रामभक्तिं परां लेभे सुभगा सुभगाकृतिः ॥ ६४ ॥

अन्यदत्यद्भुतं राजंस्तस्या भक्तिस्वरूपके ।
उपलब्धे महारत्ने प्रकाश उपजायते ॥ ६५ ॥

रामभक्तेर्विशुद्धायाः श्रीभक्तेश्च विशेषतः ।
श्रीभक्तौ रामभक्तिश्च भक्तिद्वयमुदाहृतम् ॥ ६६ ॥

सहजानन्दिनीरक्तिः श्रीभक्तिरिति शब्दिता ।
श्रीमद्रामचन्द्रे भक्तिः सा वै रामविशेषिता ॥ ६७ ॥

रामभक्तेर्हेतुभूता श्रीभक्तिः प्रेमरूपिणी ।
प्रेमरूपा स्वयं साक्षात्सहजानन्दिनी प्रिया ॥ ६८ ॥

तस्माद्भक्तिं ददात्येषा सहजाऽऽराधिता भृशम् ।
रसिकेन्द्रवरो रामः पुरुषोत्तमशाब्दितः ॥ ६९ ॥

कल्याणगुणसम्पन्ना आदिलक्ष्मीरतिप्रदः ।
तदालिङ्गितवल्ली सा तद्वश्यत्वप्रदायिनी ॥ ७० ॥

यावन्नाराधिता सा वै कथं रामः प्रसीदति ।
अतः श्रीरामवश्यार्थं सहजांराधयेद्भृशम् ॥ ७१ ॥

या प्रसन्ना सती सद्यः स्वात्मैकत्वं ददात्युत ।
यथा श्रीसहजा देवी सुभगा प्रीतिवत्सला ॥ ७२ ॥

स्वात्मैकत्वमदात्तस्यै सुभगायै स्वरूपतः ।
सुप्रसन्ना कदाचित्सा आदिलक्ष्मीः परा स्वयम् ॥ ७३ ॥

सुभगायाः परप्रेम्णा प्रत्यक्षा समभूत्ततः ।
अशोकवनमध्यस्था श्रीरामानन्दरूपिणी ॥ ७४ ॥

चन्द्रानना तडिद्गौरी वामे कमलधारिणी ।
दक्षिणेऽभयदानाढ्या सानन्दकलहासिनी ।
मधुरालापिनी रामा वरं ब्रूहीति सादरम् ॥ ७५ ॥

श्रीसहजोवाच

सहजाहं प्रेमरूपा श्रीरामार्द्धाङ्गरूपिणी ।
प्रेम्णानेन तव प्रीता स्वात्मैक्यं दातुमुत्सहे ॥ ७६ ॥

धन्यासि सुभगे देवि त्वं मद्रूपासि भाविनि ।
मया सम्प्रीतया वत्से दत्तं स्वात्मैक्यमेव ते ॥ ७७ ॥

अधुना सुभगेत्याख्या त्वामालम्ब्य भविष्यति ।
या पूर्वं सुभगा नाम सुभगा सैव भामिनी ॥ ७८ ॥

श्रीशुक उवाच

इत्थं श्रीः स्वस्य माहात्म्यं दत्वा तस्यै कृपान्विता ।
आगामिनि भवे सैव सुभगाख्या भविष्यति ॥ ७९ ॥

एवं सुखितगोपोऽपि तथा माङ्गल्यका प्रसूः ।
नित्ये धाम्नि स्वरूपेण तिष्ठतः सर्वदा प्रभोः ॥ ८० ॥

परितुष्टः प्रभुस्ताभ्यां भक्त्यात्यन्तविशुद्धया ।
दत्तवान् पितृदात्म्यं [1]देवहूत्यै कर्दमाय च ॥ ८१ ॥

एवं सर्वोऽपि लीलाया नित्यः परिकरः किल ।
आविर्भावतिरोभावैः क्रीडति प्रभुणा सह ॥ ८२ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे पश्चिमखण्डे भरतलक्ष्मणीये श्रीशुकजनकसंवादे चतुष्पञ्चाशत्तमोऽध्यायः ॥ ५४ ॥

पञ्चपञ्चाशत्तमोऽध्यायः

श्रीशुक उवाच

प्रत्यक्चितिः परानन्दा सहजानामशब्दिता ।
रामभक्तिः शुभगुणा न तां स्तोतुमहं क्षमः ॥ १ ॥

अनेकनामरूपात्मा स्वानन्दरसकेलिनी ।
चिन्मये परमे धाम्नि प्रमोदवनसंज्ञिनि ॥ २ ॥

---

१. पादेऽस्मिन्नक्षराधिक्यमार्षः ।

नानाभावमयैर्भोगैः क्रीडत्येषा दिवानिशम् ।
रामेण स्वानुकूलेन चिदानन्दाह्वयात्मना ॥ ३ ॥

अप्राकृतानुभावेन स्वरूपानन्दलीलया ।
सा कदाचिद्दधौ मानं रहःकेलीरसोदये ॥ ४ ॥

क्रीडन्त्येव मनोरम्ये रसकुञ्जे रसात्मिका ।
अन्तर्दधौ सखीलोकैः सार्द्धं लीलामनस्विनी ॥ ५ ॥

ततस्तद्विरहेणैव दूयमानहृदुन्मदः ।
छन्नो विरहजैर्भावैः सात्त्विकैश्च स्खलन्मनाः ॥ ६ ॥

चलितुं नाशकत्कुञ्जात्कृती स रसवित्तमः ।
सान्तर्धाय ततः कुञ्जाच्छ्रीनन्दनगृहेऽभवत् ।
राजिन्यां गोपतेर्वध्वां प्रसादसुमुखाकृतिः ॥ ७ ॥

जनक उवाच

कस्माच्छ्रीनन्दनगृहे सहजानन्दिनी गता ।
एषा खलु परालक्ष्मीः प्रत्यग्ज्योतिश्चिदात्मिका ।
एतं मे संशयं छिन्धि त्वं श्रीशुक महामुने ॥ ८ ॥

अहो भाग्यं गोपवंश्यस्य तस्य श्रीनन्दस्य ग्रामवास्तोर्जनस्य ।
श्रीराजिन्याश्चैव मातुः परायास्तस्याः श्रीमदादिलक्ष्म्याः स्वयं वै ॥ ९ ॥

किं ताभ्यां सुकृतं तादृक्कृतं लोकोत्तरं तपः ।
कर्म वा दुश्चरं किंचिद्येनैषा कन्यतां गता ॥ १० ॥

श्रीशुक उवाच

विवस्वान् भगवान् देवः प्रभा चैव महामनाः ।
तौ दम्पती प्रचक्राते सहस्रं शरदां तपः ॥ ११ ॥

मन्दाकिन्यास्तटे शुद्धे सुमेरुशिखरोपरि ।
कल्पवृक्षवने रम्ये तस्थतुस्तौ तयोरतौ ॥ १२ ॥

अन्येन च स्वरूपेण भास्वन्मण्डलमूहतुः ।
तयोर्मण्डलवर्ती यो वैकुण्ठसदनेश्वरः ॥ १३ ॥

लक्ष्मीनारायणो देवो युगलात्मा तडिद्घनः ।
तस्याप्यंशी परो देवः श्रीरामः सहजासखः ।
स एव भावितस्ताभ्यां योगयुक्तेन चेतसा ॥ १४ ॥

जनक उवाच

ताभ्यां केनोपदिष्टौ वै श्रुत्यगोचरविग्रहौ ।
परौ श्रीसहजारामौ तडिद्घननिभाकृती ॥ १५ ॥

चिदानन्दघनं ब्रह्म प्रभाभूतं हि यत्तनोः ।
तदेव सहजारामयुग्ममित्थं त्वयोदितम् ॥ १६ ॥

श्रीशुक उवाच

स्वयंभूरेष भगवान् ब्रह्मा लोकपितामहः ।
येन वेदः पुरा सृष्टः शब्दब्रह्ममयोऽखिलः ॥ १७ ॥

स एव भगवानेतं सृष्टवांल्लोकविस्तरम् ।
साक्षात्परम्पराभेदादेकोऽनेकश्च कारणम् ॥ १८ ॥

स एवाण्डं ससर्जेदमपायन्तः स्ववीर्यधृक् ।
तासु गर्भमभूद्धूयो ब्रह्माण्डं यदनन्तकम् ॥ १९ ॥

ब्रह्माण्ड्यप्सु निहितमापस्तद्विश्वतेजसि ।
स वैश्वतेजसो वह्निः संस्थितः परमानिले ॥ २० ॥

परमानिल आसीनः परमे व्योम्नि कार्यशः ।
एतद्विश्वत उद्भूतं महामनस उद्भवात् ॥ २१ ॥

तन्महाहंकृतौ व्याप्तं महा महति सा तता ।
महा महन्महामाया महाप्रकृतिसंज्ञके ॥ २२ ॥

अव्यक्ताख्ये परे व्योम्नि प्रधाने सर्वकारणे ।
अव्यक्तमन्तरंगायां महाशक्तौ परात्मनः ।
परमात्माक्षरं ब्रह्म वेदानां स्थानमुत्तमम् ॥ २३ ॥

समन्वयो यत्र गिरां पराणां वेदाख्यानामुपनिषदाह्वयानाम् ।
तदक्षरं ब्रह्मविदो वदन्ति यद्वेत्तारस्तं परमाप्नुवन्ति ॥ २४ ॥

परमः पुरुषो रामो भगवान् पुरुषोत्तमः ।
यतो भुवनमुद्भूतं यस्मिन् परिसमाप्यते ॥ २५ ॥

यतो वेदाश्च सम्भूतास्तद्ब्रह्मास्य प्रभामयम् ।
इति ज्ञात्वा स भगवान् ब्रह्मा लोकपितामहः ॥ २६ ॥

तदंशभूतः सकलं सृष्टवान् भुवनं विधिः ।
यः सोऽण्डं व्यसृजत्पूर्वं तत्र जातः स्वयं च यः ॥ २७ ॥

विवस्वानेष भगवान् द्योतमानस्त्रयीमयः ।
स्वयंभूर्भगवान् सर्वमुवाचैवं विवस्वते ॥ २८ ॥

विशिष्टं ब्रह्मणस्तत्त्वं साङ्गोपाङ्गरहस्यकम् ।
तस्मै तन्त्रं समाचख्यौ कृत्स्नं सकर्मपद्धतिम् ॥ २९ ॥

ततश्चोपनिषत्सारं ज्ञानयोगं तपोयुतम् ।
भक्तिशास्त्रं रसमयं सोपासनमुदाहृतम् ॥ ३० ॥

तत्त्वं निदर्शयामास करामलकवत्स्फुटम् ।
सोंऽशः साक्षात्स्वयं रामस्यांशो देवस्त्रयीमयः ॥ ३१ ॥

स्वयं चाधिजगे सर्वं विवस्वान् सकलाः श्रुतीः ।
साङ्गाः सहरहस्याश्च पृथक्संस्थाक्रियामयीः ॥ ३२ ॥

शब्दब्रह्माखिलं ज्ञात्वा दृष्टिं चक्रेऽर्थगोचराम् ।
समासव्यासतो जज्ञे रामं सर्वार्थरूपिणम् ॥ ३३ ॥

यावन्तो वै मताः शब्दास्ते सर्वे रामवाचकाः ।
रामो विशुद्धतत्त्वं तद्रामाख्यं धाम शर्मभृत् ॥ ३४ ॥

राममुष्य[1] तपश्चक्रे विवस्वान् प्रभया सह ।
निराहारौ जितात्मानौ जितेहामुष्मिकस्पृहौ ॥ ३५ ॥

सहस्रवर्षपर्यन्तं तपोनिष्ठौ बभूवतुः ।
तयोराविर्बभूवासौ रामः सहजया सह ॥ ३६ ॥

तौ विलोक्य प्रभासूर्यौ लोकोत्तरगुणाकरौ ।
प्रेम्णा श्रीसहजारामौ शृङ्गाररसविग्रहौ ।
तयोरासीन्मतिर्भूयः पुत्र ईदृग्भवेत नः ॥ ३७ ॥

श्रीभगवानुवाच

इमं मनोरथं प्रादामदित्यै कश्यपाय च ।
इयं तु सहजा देवी प्रिया मम रसात्मिका ॥ ३८ ॥

भवित्री युवयोः कन्या पराश्रीर्विश्वतैजसी ।
अहं चेश्वरभावेन प्राप्स्यामि भवतोः कुलम् ।
भूत्वा जामातृरूपेण गुप्तो जारव्रते स्थितः ॥ ३९ ॥

विवस्वानुवाच

भूत्वापि प्रकटोऽस्मासु जारभावेन किं प्रभो ।
भविष्यसि श्रीसहजा यतस्तव सदा वधूः ॥ ४० ॥

भवता लालितां देवीं नित्यं परमभूषिताम् ।
कं स्वादं लप्स्यसे राम नित्यसिद्धास्वरूपतः ॥ ४१ ॥

श्रीराम उवाच

अधिकोऽत्र रसानन्दो भावे स्नेहरसात्मके ।
दौर्लभ्यं नाम स्पृहाया वर्द्धनं परमं मतम् ॥ ४२ ॥

स्पृहा संचारिणी स्नेहे पूर्णभावविभाविनी ।
अतोऽयं रसभावो वै भविता वां गृहेषु नौ ॥ ४३ ॥

---

१. उपसर्गरहितल्यबन्तशब्द आर्षप्रयोगः ।

इत्युक्त्वा सप्रसादेन गते रामे स्वरामया ।
पूर्णचित्तौ निववृतुस्तपसस्तौ च दम्पती ॥ ४४ ॥
प्रेमाणं समुपाश्रित्य मनोनिर्वृतिमीयतुः ।
अतोऽस्मिन्नन्तरे रामा सहजा सुविलासिनी ॥ ४५ ॥
श्रीरामे रमणे मानमाते ने रसवर्द्धनम् ।
तस्मिन् माने स्वस्वरूपान्तधाय व्रजेश्वरी ॥ ४६ ॥
अधिकानन्दरतये लुभ्यमानमनाः सदा ।
नन्दनस्यगृहे जाता देवस्य श्रीविवस्वतः ॥ ४७ ॥
विवस्वान् भगवानेष गोपः श्रीनन्दनाह्वयः ।
प्रभा च राजिनी माता तद्गृहे सहजाभवत् ॥ ४८ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे पश्चिमखण्डे भरतलक्ष्मणोये-सीताजन्मनि श्रीशुकजनकसंवादे पञ्चपञ्चाशत्तमोऽध्यायः ॥ ५५ ॥

षट्पञ्चाशत्तमोऽध्यायः

श्रीशुक उवाच

सारस्वतेऽन्तरे प्राप्ते विवस्वान् भगवान् स्वयम् ।
आसीच्छ्रीनन्दनो गोपो राजिनी च प्रभाभवत् ॥ १ ॥
तयोर्गृहमलंकर्तुं बभूव परमा रमा ।
अशेषरूपलावण्य माधुर्यगुणवारिधिः ॥ २ ॥
रामाश्यामाप्रभृतिभिः [1]सखीषोडशभिरन्विता ।
शुक्लायां माघपञ्चम्यामेके तज्जन्म संजगुः ॥ ३ ॥
परे वैशाखशुक्लायामपरे फाल्गुनस्य च ।
ज्येष्ठा चापि कनिष्ठापि उभे मार्धुयभूषिते ॥ ४ ॥
लक्ष्म्यादिसेविते नित्यं ब्रह्मादिसुरवन्दिते ।
सारस्वतेऽन्तरे तस्याः पूर्णं रूपं जगुर्बुधाः ॥ ५ ॥
तदा वसन्तपञ्चम्यामेषा जनिमती व्रजे ।
जातमात्रैव सा रेजे श्रीनन्दनगृहे शुभा ॥ ६ ॥

१, पादेऽस्मिन्नक्षराधिक्यमार्षः ।

प्रभामण्डललक्ष्येण अनुभावेन भूषिता ।
अस्यां संजातमात्रायां क्षितिरासीच्छुभान्विता ॥ ७ ॥

जलानि सुप्रसन्नानि सुज्वालश्चहुताशनः ।
शुभस्पर्शस्तथा वायुर्वाति त्रिविधसुन्दरः ॥ ८ ॥

मनांसि परभक्तानां श्रीरामस्य पदस्पृशाम् ।
आसन्नतिप्रसन्नानि ब्रह्मबोधोदयाद्यथा ॥ ९ ॥

केचन ननृतुर्गोपाः केचिद्गोपालका जगुः ।
केचिच्च चिक्षिपुर्भूयो दध्यक्षतशुभाञ्जलीन् ॥ १० ॥

गोपिकाः स्वस्वगेहेभ्यः सदूर्वादलपाणिकाः ।
सामत्राः साक्षतकरा आजग्मुः समलंकृताः ॥ ११ ॥

गावः शृङ्गारिता गौपैर्वासोऽलंकारधातुभिः ।
वृषा वत्सावत्सतर्यः सर्वा एव महीपते ॥ १२ ॥

आयान्तीनां च यान्तीनां गायन्तीनां च यूथपा ।
नृत्यन्तीनां वाद्यतीनां गोपीनामुत्सवोऽभवत् ॥ १३ ॥

तस्मिन् मङ्गलभूयिष्ठे समाजे व्रजयोषिताम् ।
इन्दिरा व्यचरत् साक्षात्स्वयं निर्मञ्छनीकृता ॥ १४ ॥

रत्नकाञ्चनराशीनां मिषेण परितश्च सा ।
आत्मानमुपदीकृत्य परितः पर्युपस्थिता ॥ १५ ॥

आगच्छन्त्यो व्रजमृगदृशो नन्दनाख्यस्य गेहे-
मार्गे कूजद्वलयरसनानूपुरद्वन्द्वघोषैः ।
श्रीराजिन्या अविरतमलचक्रिरे द्वारवेशं-
सम्पद्देव्याः किमपि चतुरंगाख्यसेना इवोग्रा ॥ १६ ॥

दिशां प्रसादेन मनोहरेण सितांशुकोटिद्युतिदीपितानाम् ।
जगज्जनेनानुमितानि तस्याः सौभाग्यभाग्योद्भवनानि भूयः ॥ १७ ॥

तदुत्सवे समायाता ब्रह्मविष्णुमहेश्वराः ।
पृथक् पृथग् जगुर्गाथा इमास्तत्र विचक्षणाः ॥ १८ ॥

ब्रह्मोवाच

जय जय लीललिते गुणगणकल्याणयुते ।
कृपय सुभव्ये सहजे मयि भवसर्गाकुलिते ॥ १९ ॥

व्रजवसुधासंपदियं प्रकटितरूपा भवति ।
वितरतु भक्तिं सहजे परमरमा रामवधूः ॥ २० ॥

रसमयदेहार्द्धजुषं किमपि परब्रह्ममयीम् ।
रघुवररामस्य रमां रमणवतीं तां कलये ॥ २१ ॥

चिरमुदयस्वाभरणा सुखितगवेन्द्रस्य भुवः ।
कचन भवित्रीं जनके जगदुदथायाम्युदिता ।। २२ ।।

वाण्युवाच

परधामतः प्रमुदकाननाज्जयन्ति संगता त्वं नन्दनालयम् ।
परमशोभया शोभनैर्गुणैः किमपि मण्डपस्युच्चकैर्जगत् ।। २३ ।।

विधिपयोधिजाः पुष्टिकान्त यस्तदनुकीर्तिस्तुष्टिरिला चोर्जिका ।
तदनु विधिका परीचायाविधिका परिलसन्ति माया च ते शक्तयः ।। २४ ।।

निजसुशक्तिभिः संगता पराश्रयगुणान्विता स्वामिनी प्रभोः ।
स्नपयसिप्रियं लोचनाम्भैर्विरहवेदनारुद्धमानसे ।। २५ ।।

किमपि जन्मनि गोपकुले सरसलीलया राममञ्चितुम् ।
त्वमथ राजसे रासराज्येश्वरी परमभावकानप्रेम दापितुम् ।। २६ ।।

महादेव उवाच

आविर्भावं प्राप्य महेशी ब्रह्मभूमौ श्रीराजिन्या-
गर्भमणित्वं प्रतिपद्य सम्यङ्मानो व्यरचि भवत्या
श्रीरामस्य छन्दक्रीडां खलु सहजानन्दात्वम् ।
कर्मेत्येके कालमथैःके निगदन्ति दैवं चान्ये
स्वाभावमपरे प्रवदन्ति ब्रह्मविद्वांसो मे सद्यः ।। २७ ।।

सुमुखीः त्वां जानन्त्येके निर्गतकालाभिपाशाः
श्रीमत्सहजानन्दा श्रीराजिनीगवेन्द्र-
प्रेमानन्दस्तोममयी परमाद्या यस्मै मातः
कृपयसि सुलभस्तस्येशः ।
योगीन्द्राणां चेतसिदुर्लभतरस्त्वेष मातः
परमं प्रमोदविपिनं तव धाम स्वेच्छानन्दावसे रसानन्दागारं
तत्र क्रीडन्तीं त्वां सुखितात्मजसंगे ये सेवन्ते तेषां मुक्तिस्तृणतुल्या ।। २८ ।।

इत्थं गाथाः प्रगायन्तो नन्दतुर्जातसम्भ्रमाः ।
ब्रह्मा विष्णुस्तथा रुद्रो ये चान्ये देवतोत्तमाः ।। २९ ।।

सर्वे स्त्रीवेशिनो भूत्वा ननृतुर्नन्दनाङ्गणे ।
श्रीनन्दनः प्रसन्नात्मा तेभ्योऽदात् पटभूषणे ।। ३० ।।

भोजनं चापि विविधं परमान्नं सुपेशलम् ।
ते तृप्ता मानितास्तुष्टाः प्रायुञ्जन् शुभदाशिषः ।। ३१ ।।

चिरं रमय रामेन्दुं चिरं कुरु यशो नवम् ।
अलंकुरुपितुर्गेहं श्रीनन्दनमहात्मनः ।
चिरं श्रीराजिनीमातुरङ्कयाभूषय त्विषा ॥ ३२ ॥

यागोचरा योगिमनोविहंगैर्यागोचरा कविजनप्रयोगैः ।
श्रीनन्दमूर्तिः सहजाभिधाना निःसाधना त्वं सुलभा भवेति ॥ ३३ ॥

अथ त्रयोदशे ह्यस्या नन्दनो जातसम्भ्रमः ।
ब्रह्मादिभिर्योगिवर्यैर्नामोत्सवमकारयत् ॥ ३४ ॥

एषा रमयतो चित्तं तेन रामेति कीर्तिता ।
सहैव जाता महसा तेनैषा सहजा मता ।
एवमादीनि नामानि सुगायन्ति पुराविदः ॥ ३५ ॥

सा जातमात्रा गुणनित्यलीलाविभूतिसंस्फूर्तितरूपमाधुरी ।
लोकान्प्रमोदैः पूर्णान् कुर्वती हुदिने दिने सा ववृधे स्वभावतः ॥ ३६ ॥

प्रकुर्वती नित्यसखीभिरन्विता नानाविधान् शैशवकेलिसंकुलान् ।
आह्लादयन्ती च तरून्खगान्मृगान्सावासिधेः शारदचन्द्रिकेव ॥ ३७ ॥

जन्मोत्सवं समाप्येत्वं स्वं स्वं विष्टपमाययुः ।
ब्रह्मादयो हर्षिताश्च स्तुवन्तः सहजेश्वरीम् ॥ ३८ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे पश्चिमखण्डे भरतलक्ष्मणीये सीताजन्मोत्सवे श्रीशुकजनकसंवादे षट्पञ्चाशत्तमोऽध्यायः ॥ ५६ ॥

सप्तपञ्चाशत्तमोऽध्यायः

श्रीशुक उवाच

एवं यः शृणुयान्नित्यं सीताजन्मोत्सवं परम् ।
स भवेज्जीवन्मुक्तो वै सएव राघव प्रियः ॥ १ ॥

एकधा नन्दनगृहे द्विधा च भवतो गृहे ।
विज्ञाय सहजोत्पत्तिं कृतकृत्यः प्रजापते ॥ २ ॥

सा चैवं राजहंसी ब्रजजननयनानन्दसंदोहदात्री ।
सीतेत्याख्या प्रसिद्धा नृपवर सहजानन्दिनीति प्रगीता ।
श्रीनन्दनस्य प्रमुदवनपरा नित्यलक्ष्मीरनन्ता ।
चित्ते संचिन्तनीया सपदि सुमहती या प्रसिद्धा चिकीर्षोः ॥ ३ ॥

नित्यधाम च माहात्म्यं प्रमोदवनसंज्ञितम् ।
यः शृणोति नरस्तस्य कल्याणमुपजायते ॥ ४ ॥

सहजां शृणुयाद्यश्च नामलीलागुणान्विताम् ।
सहजानन्दिनीनाथं तथा रघुकुलोद्वहम् ॥ ५ ॥

नामलीलागुणैर्युक्तं जीवन्मुक्तः स वै भवेत् ।
सुखितस्य च माहात्म्यं पूर्णस्नेहस्य गोपतेः ॥ ६ ॥

माङ्गल्यायाश्च पुण्याया महिमार्णवो वै महान् ।
ययोस्तनयतां प्राप्तः श्रीरामो रमणोसखः ॥ ७ ॥

नित्यलीलासमायुक्तः प्रमोदवनचन्द्रमाः ।
सहजानन्दिनीसीतापार्श्वद्वयसुशोभितः ॥ ८ ॥

रासमण्डलमध्यस्थः सखीभिः परिवारितः ।
सरयूपुलिने रम्ये रासलीलां करोति वै ॥ ९ ॥

अत्र विष्ण्वादयः सर्वे सखीभावसमन्विताः ।
पश्यन्ति सादरं प्रेम्णा राघवेन्द्रं परात्परम् ॥ १० ॥

हर्षिताः स्वस्वचेतसि ते रोमाञ्चितविग्रहाः ।
लुठन्ति राघवेन्द्रस्य चरणोपान्तविह्वलाः ॥ ११ ॥

मुहुर्मुहुर्नतिं कृत्वा स्तुतिं कृत्वा मुहुर्मुहुः ।
दण्डवत् प्रणताः सर्वे राघववं रसिकोत्तमम् ॥ १२ ॥

पुनरुत्थाय ते सर्वे ब्रह्माद्याः सुरसत्तमाः ।
सपर्यां राघवेन्द्रस्य चक्रुः प्रेमसुविह्वलाः ॥ १३ ॥

कृतार्थं मन्यमानाः स्वं ब्रह्माद्याः सुरसत्तमाः ।
दर्शनाद् राघवेन्द्रस्य अयोध्यायाश्च दर्शनात् ॥ १४ ॥

सरयूदर्शनाच्चैव प्रमोदवनदर्शनात् ।
प्रेमविह्वलिताः सर्वे बभूवुः सहसा क्षणत् ॥ १५ ॥

एवं ब्रह्मादयो देवा ये चान्ये सुरसत्तमाः ।
लीलां श्रीराघवेन्द्रस्य प्रेम्णा पश्यन्ति प्रत्यहम् ॥ १६ ॥

इमां प्रेममयीं लीलां महोदरान् गुणांस्तथा ।
शृणुते राघवेन्द्रस्य प्रेमभक्तिं लभेत सः ॥ १७ ॥

सहजायां रतिं प्राप्य जीवन्मुक्तो भवेत्स्वयम् ।
ययोर्गृहे राजते नित्यं प्रेमानन्दमयी परा ॥ १८ ॥

सहजानन्दिनीनाम्नी लक्ष्मीकोटिगुणान्विता(धिका) ।
महालक्ष्मीः श्रीरामस्य रमणी रमणीयमाः ॥ १९ ॥

कस्तयोस्तुल्यतां यायाद्राजिनीनन्दनयोर्वै ।
सहजानन्दिनीस्पर्शलालनात्तीर्थभूतयोः ॥ २० ॥

तव नृप सदने च श्रीमदाद्येन्दिराया जनुरितिश्रुणुप्राज्ञो हर्षवित्तैकचित्तः ।
स भवति परलीलाप्रेमजनान्दसिन्धुप्रविततलहरीणां वृन्द आप्लुत्य तुष्ट :॥२१॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे पश्चिमखण्डे भरतलक्ष्मणीये सीताजन्मोत्सवे श्रीशुकजनकसंवादे सप्तपञ्चाशत्तमोऽध्यायः ॥ ५७ ॥

अष्टपञ्चाशत्तमोऽध्यायः

जनक उवाच

अथाश्रावय मे ब्रह्मंल्लीलां रसमयीं पराम् ।
प्रमोदवनराज्ञ्याः श्रीसहजायाः सनातनीम् ॥ १ ॥

मानस्य हेतुमाख्याहि परे धाम्नि विलासिनोः ।
येनान्तर्द्विमगादेषा द्वैतीयिकभावावधिः ॥ २ ॥

एनां हि श्रृण्वतो नाम मम श्रीसहजाश्रयाम् ।
कथामद्भुतरूपां वै औत्कण्ठ्यं वर्द्धतेऽनिशम् ॥ ३ ॥

श्रीशुक उवाच

मानस्य[1] कारणं वक्ष्ये सहजाया विशेषतः ।
इयं रहस्यगा लीला गोपनीया प्रयत्नतः ॥ ४ ॥

कदाचित्सहजानन्दा प्रमोदवननायिका ।
उत्फुल्लमालतीमल्लीमाधुरीमधुरे मधौ ॥ ५ ॥

अत्युत्कण्ठावशात्कान्ते प्रेषयामास दूतिकाम् ।
सा तं कुन्दवने स्थाप्य समेता सहजान्तिके ॥ ६ ॥

---

१. नास्ति बड़ौ० ।

दूतिकोवाच

अहमानीय रामेन्दुं कान्तं कुन्दवने तव ।
स्थापयित्वा समायाता सहजेऽस्मि त्वदन्तिके ॥ ७ ॥

त्वमिदानीं व्रज स्वैरं कामुकं रामवल्लभम् ।
त्वदागमनकाङ्क्षाभिरनिमेषविलोचनम् ॥ ८ ॥

तत्र गत्वा कुन्दवने स्वैरं विहर कामिनम् ।
इदानीं मा विलम्बिष्ठाः श्रीरामस्तत्रसीदति ॥ ९ ॥

त्वदाननं समालोक्य सद्यो वितिमिरीकृताः ।
दिशो निभालयन्नास्ते चकोरीकृतलोचनः ॥ १० ॥

तत्र तं सहसा गत्वा रमयस्व रमत्मिके ।
त्वयैकरमणाकाङ्क्षापरिसक्ताखिलग्रहम् ॥ ११ ॥

इति दूतीवचः श्रुत्वा प्रिया गन्तुमसज्जत ।
सहजानन्दिनी साक्षाद्रतिकटि गुणाधिका ॥ १२ ॥

अथावर्तनमातेनुस्तस्याः सख्यो मुदान्विताः ।
कुकुंमैः कालागुरुभिः कस्तूरीभिः सचन्दनैः ॥ १३ ॥

ततस्तां स्नपयांचक्रुः स्नानकर्मविचक्षणाः ।
सुगन्धिभिः सुमधुरैः स्रोतोभिः साखोदकैः ॥ १४ ॥

तस्याः स्नान्त्याः सुरभिसलिलान्युद्गतानि प्रणाल्पा-
सौरभ्योद्गारिभिरतितरां भूरिवर्णैः प्रवाहैः ।
चक्रुस्तृप्तिं बहुविधां तस्याः स्नान्त्या मार्गेषु गत्वा-
चित्तेष्वन्तः सकलसुखमयीं प्रेमवृत्तिं प्रसार्य ॥ १५ ॥

स्नातायां धूपयामासुर्धूपैः कालागुरूद्भवैः ।
तस्याः केशानार्द्रवरान् सख्यो धूपनपण्डिताः ॥ १६ ॥

सुधूपिताश्चिकुराः श्यामवर्णाः स्निग्धच्छायाः सहजाया विरेजुः ।
मुखाम्बुजोद्गारिणिसौरभौघैः सुसंगता भ्रमराणामिवाल्पः ॥ १७ ॥

अथैनां भूषयामासुः सख्यो भूषणदक्षिणाः ।
यावकं पदयोर्धृत्वा विचित्राकारतावहम् ॥ १८ ॥

साङ्गुष्ठमङ्गुलिगणं मण्डयांचक्रुरुच्चकैः ।
चटकध्वानिनी भूषा निधाय विविधवत्स्त्रियः ॥ १९ ॥

तुलाकोटीर्निधापाङ्घ्र्योः किङ्किणी पर्यभूषयन् ।
मञ्जरीकाश्चः संलग्नाः कलहंसनिनादिनीः ॥ २० ॥

मध्ये च मेखलांधृत्वा पर्यबध्नन् गुणेन ताम् ।
मुक्तासरं मणिसरं तथा काञ्चनमालिकाम् ॥ २१ ॥
उच्चैःस्तवकहारं च तथान्याश्चैव मालिकाः ।
उरोजयोर्न्यधुस्तस्यास्तथा कण्ठसराधिकम् ॥ २२ ॥
सौभाग्यसूत्रमेवापि कण्ठे कम्बुसमत्विषि ।
करयोर्वलयान् प्रास्य भुजयोरङ्गदे न्यधुः ॥ २३ ॥
नसिभूषां प्रविन्यस्य श्रुत्येर्भूषागणं व्यधुः ।
तारकागुणसंशोभिमुक्ताफलगुणेन ताः ॥ २४ ॥
आननं मण्डयांचक्रुस्तस्याः सख्या विचक्षणाः ।
कबरीं गुंफयामासुः पट्टसूत्रान्तरस्थितैः ॥ २५ ॥
मणिभिर्मौक्तिकैश्चैव गजमुक्ताफलैस्तथा ।
सीमन्तं पूरयामासुर्युक्तं सिन्दूररेखया ॥ २६ ॥
गजमुक्ताफलैःस्थूलैः संध्याभ्रमिव तारकैः ।
ललाटं मण्डयांचक्रुस्तस्याः कुंकुमपत्रकैः ॥ २७ ॥
कस्तूरी विंदुना चैव महाभाग्यैकमन्दिरम् ।
तदोष्ठं रञ्जयामासुर्यावकैः पल्लवोयमम् ॥ २८ ॥
कञ्चुकीमर्पयामासुः कुचयोः सौरभान्विताम् ।
ताम्बूलबीटिकां दत्त्वा रञ्जयामासुराननम् ॥ २९ ॥
तां परीधापयामासुश्चीरं सुमहदुज्जवलम् ।
सोत्तरीयं महारत्नमौक्तिकस्तबकाञ्चितम् ॥ ३० ॥
एवं विभूषमाणायामस्यामालार्जनैभृशम् ।
अगच्छन्यधुयामिन्या याम एकः क्षणाधिकः ॥ ३१ ॥
तावत्तत्र स्थितो रामो विषण्णः कामसायकैः ।
युवावसन्तसंफुल्लमाधवीसौरभाविलैः ॥
उद्वेजितमनाः श्रीमान् सहसा पर्यचिन्तयत् ॥ ३२ ॥
दूतो तत्र गता न वा गुणवतो याताथवा मानिनो
शुद्धा वापि विलम्बिताङ्गवसनालङ्काररागादिभिः ।
प्राप्ता वातिघनेप्रमोदविपने प्राप्ता मुहुः सम्भ्रमं-
हंहो हंत हतः कथं नु सहजानन्दाद्यमां संगता ॥ ३३ ॥
व्योमाधूमो दृश्यतेऽघ प्रभातनुरुचवो जाग्रतोविस्फुलिङ्गः-
हन्तेदं चन्द्रबिम्बं ज्वलति हुतवहश्चन्द्रिका तस्य कीला ।
यूनः प्राणा हवींषि स्वरति पिकवाक् पञ्चमालापमन्त्रैः-
कालोऽयं साधु यज्वा कुसुमसरविधिश्चन्दनोत्था नीलत्विक् ॥ ३४ ॥

हा सीते सहजे सितासिततमे साकेतलक्ष्मीपरे-
पूर्णे चिन्मयचित्तचन्द्रकिरणश्रेणीचमत्कारिणीः ।
दत्तप्रेमरसावलम्बनमहो कान्ते जनं मादृशं-
कामक्रूरकठोरसायकहतिं कृत्वा भृशं मा कुरु ॥ ३५ ॥

गुणवति तावकीने मधुहासविशिष्टमुखेन्दुरुचिप्रसरे-
मधुसमयेऽपराधरहिते प्रणवैकपराजितके रमणे ।
वितथमियतमीश्वरि विलम्बमिमं न कुरुष्व कदापि परं-
न सहितिकालशक्तिरतिमात्रवियोगभवं परितापमिमम् ॥ ३६ ॥

इत्थं प्रलयमानस्य तस्य पूर्णमहेशितुः ।
कालशक्तिः स्वानुचरी प्रभुं साक्षादुवाच ह ॥ ३७ ॥

कालशक्तिरुवाच

अहं कृष्ण सखी नाम तावकीना गुणोदया ।
त्वमिच्छसि यमानन्दं तं साक्षादुपसादये ॥ ३८ ॥

कालशक्तिरहं कृष्णा ज्ञानशक्तिस्तु जानकी ।
क्रियाशक्तिः कला नाम प्रेमशक्तिश्च मोदिनी ॥ ३९ ॥

अन्याश्च शक्तयोऽनन्ता योषिद्रूपमुपाश्रिताः ।
प्रभुं गुणनिधिं कान्तं भवन्तं पर्युपासते ॥ ४० ॥

सर्वासां रञ्जनं कार्यं प्रभुणा भवता प्रभो ।
एतद्धि सौष्ठवं नाथ स्वामिनः स्वामिनीष्वपि ॥ ४१ ॥

इति ब्रुवाणां तां कृष्णं कोटिचन्द्रावलिप्रभाम् ।
इन्द्रनीलमणिप्रख्यनीलमेघतनुद्युतिम् ॥ ४२ ॥

ज्योत्स्नायतीं तडिल्लेख्यां स्वर्णकोटितनुप्रभाम् ।
सर्वावयवशोभाढ्यां हसन्तीं कामुकीं प्रियाम् ॥ ४३ ॥

वीक्ष्य कान्तः स्थितो दृग्भ्यां सद्यः कामविमोहितः ।
अविध्यत चलैस्तस्याः कटाक्षैः काममार्गणैः ॥ ४४ ॥

ततस्तयातिकामुक्या समयुज्यत कामुकः ।
रन्तुमेकान्ततः स्वैरं सुखैर्निधुवनोद्भवैः ॥ ४५ ॥

कालशक्तिः स्वयं साक्षात् सा तु कृष्णा गुणोदया ।
अदृश्यमकरोत्कुञ्जं तस्मिन् कुन्दवने महत् ॥ ४६ ॥

दिव्यं तमः समसृजत् क्रीडास्थानं न्यगूहयत् ।
तत्र रेमे तया रामश्चिदानन्दगुणाकरः ॥ ४७ ॥

नवं निधुवनं प्राप्य कृष्णायां रामकामुकः ।
तद्गुणैः सहजां गौरीं त्रिसस्मार वशंवदः ॥ ४८ ॥

अथ श्रीसहजानन्दा दूतीवचनलोभिता ।
कृताङ्गविविधाकल्पा रन्तुं पर्यचलद् गृहात् ॥ ४९ ॥
सखीभिः सहिता साक्षात्सहजानन्दिनी स्वयम् ।
विवेश विपिनं घोरं प्रमोदवनगह्वरम् ॥ ५० ॥

न प्राप तिमिरच्छन्नं कुन्दकुञ्जवनं महत् ।
मधुचन्द्रोदयज्योत्स्नागोचरं यावदीक्षितम् ॥ ५१ ॥
तावदन्वेषितं भूयः प्रमोदविपने तया ।
सखीभिः सहिता साध्वी सहजानन्दिनी स्वयम् ॥ ५२ ॥

बभ्राम विपिनं तत्र पृच्छन्ती खलु तांस्तरून् ।
अथ तत्र तृषार्ता सा पीत्वा श्रीसरयूजलम् ॥
विलोक्य दिव्यया दृष्ट्या प्रोवाच वचनं सखीः ॥ ५३ ॥

श्रीसहजोवाच

कियद्यावदिदं घोरं वनमद्य गवेषितम् ।
गौर्या मया ततो ज्ञातं रामः कृष्णामुपासते ॥ ५४ ॥

कृष्णा च जानकी चैव कला चैव हि मोदिनी ।
एताः पिबन्ति कान्तास्यसारं प्रेमसुधारसम् ॥ ५५ ॥

इत उत्थाय सख्यश्चदीपिकापाणयोऽग्रतः ।
यात कुन्दवनं सर्वा ध्रियतां कामुकाधयः ॥ ५६ ॥

धृत्वा बद्ध्वा समानीय दण्ड्योऽयं वश्यकामुकः ।
इत्युत्साहवती गोपीरनुयुज्यस्वयं च सा ॥ ५७ ॥

अनुकुन्दवनं सद्यः सहजा पर्यगच्छत ।
अथ कृष्णा भयत्रस्ता सहजायाः समागमात् ॥
उवाच रमणं वाक्यं दृढबन्धरतिस्थिता ॥ ५८ ॥

कृष्णोवाच

इदं कुन्दवनं नाम सहजाया विहारभूः ।
स्थातव्यं नो चिरमिह स्वस्थानस्थोऽखिलः शुभः ॥ ५९ ॥

संहजायाः सखीनां वै आयान्तीनामितस्ततः ।
मञ्जीरकिङ्किणीघोषैर्व्याप्ता कुन्दवनस्थली ।
नात्रास्थातुमितो युक्तं पारक्ये कुन्दकानने ॥ ६० ॥

श्रीराम उवाच

मनोऽभिलषितं देशं तमेव नय मां प्रिये।
इत्युक्तः स तया रामो नीतः स्वस्थानमादरात् ॥ ६१ ॥

योगशक्त्या स्वया तत्र निभृतं योगरूपया।
दृढबन्धस्थितावेवैतौ कृष्णारामकामुकौ ॥ ६२ ॥

विकसद्भूरिमन्दारं कृष्णावनमुपेयतुः।
अथ श्रीसहजानन्दा दूती निर्दिष्टवर्त्मना ॥ ६३ ॥

अगात् कुन्दवने कुञ्जेयत्रामः पुरा स्थितः।
कामुक्या कृष्णया युक्तः कुर्वाणः सुरतोत्सवम् ॥ ६४ ॥

तत्र गत्वा सखीवृन्दैः साकं श्रीसहजेश्वरी।
व्यचष्ट रतिचिह्नानि मध्ये कुञ्जेयथोदिते ॥ ६५ ॥

नवकिसलयशय्या मर्दिता दृश्यतेऽसौ निधुवनपरिवर्तावर्तं संवर्तनर्तैः।
विलुठति मणिमाला मेखलायुक्तसूत्राविगलितवलयार्धं चाप्यहोकुञ्जधूलौ ॥६६ ॥

मुहुरिति विमनस्का भूपउद्वीक्ष्य दूत्या-
मुखमवनतमुच्चैर्लज्जया धिग् धिगाह।

अधवति ननु धिङ्मां त्वन्मृषोद्यायि यातां-
धिगधरमणमेनं योषां वृषल्पं जगामु ॥ ६७ ॥

केयं दैवहतस्याहो युवती विहितस्पृहा।
इहापि सहजाधाम्नि या महोद्धतमानसा ॥ ६८ ॥

एवमादीनि बहुधा वचांस्यभ्युज्जगाद सा।
कृष्णासक्तं प्रियं वीक्ष्य बहुरोषरसाविला ॥ ६९ ॥

भूषणं वसनं रागं हारान् कुसमालिकाः।
विदधाना सदाङ्गेभ्यो वेपमानाधरा रुषा ॥ ७० ॥

सहजोवाच

न तथान्यरतिं वीक्ष्य विद्रूपे सुखवर्जिता।
यथा मद्वञ्चनं वीक्ष्य विद्रूपेऽहं निजे हृदि ॥ ७१ ॥

य एवं रमते नित्यं रसिकेन्द्रो हि धूर्तधीः।
तस्याहं कैतवं महाधूर्तस्य योगतः ॥ ७२ ॥

इति प्रीतिपणं कृत्वा सहजा स्त्रीस्वभावतः।
सरय्वा वै तटे सद्यः स्रोतोरूपा बभूव ह ॥ ७३ ॥

विख्याता सा स्वयं लक्ष्मीस्त्रिषु लोकेषु पुण्यवाट्।
इत्थं मानवती भूत्वा सहजा स्वालिभिः सह ॥ ७४ ॥

प्रमोदवनमभ्येत्य पालीग्रामे बभूव सा।
मानस्य कारणं प्रोक्तं सहजायाः पुराणगम् ॥ ७५ ॥

एवं सा नन्दनगृहे बभूव सहजेश्वरी।
रामः कृष्णारतिं भुक्त्वा सहजाकुञ्जमागमत् ॥ ७६ ॥

तत्र श्रुत्वा यथावृत्तं सहजायास्तथा गतिम्।
आसीद्विषण्णहृदयस्तदेकसुखमानसः ॥ ७७ ॥

ज्ञात्वावतीर्णां सहजां श्रीनन्दनगृहे प्रियाम्।
स्वयमप्यवतीर्णो वै सुखितस्य गृहे प्रभुः ॥ ७८ ॥

स्वयं रामो नदो भूत्वा सरयूं प्रति संगतः।
नदीरूपेण रेयाते तत्र तौ दिव्यविग्रहौ ॥ ७९ ॥

इदं यः सहजेशान्याः शृणुयान्मानकारणम्।
प्रादुर्भावं चापि तस्याः श्रीनन्दनगृहे पुनः ॥ ८० ॥

तस्य भक्तस्य सहजा करोति कुशलं स्वयम्।
प्रेमाणं रामपदयोर्वर्द्धिष्णुं प्रतिवासरम् ॥ ८१ ॥

लभते नियतं मर्त्यो नात्र कार्या विचारणा।
इदं रहस्यमखिलं मद्भक्तेभ्यः प्रगोपयेत्।
कृष्णायाश्चैव रामस्य सहजायाः कथानकम् ॥ ८२ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे पश्चिमखण्डे भरतलक्ष्मणीये श्रीशुकजनकसंवादे सीताजन्मोत्सवे सहजामानकरणे अष्टपञ्चाशत्तमोऽध्यायः ॥ ५८ ॥

एकोनषष्टितमोऽध्यायः

श्रीशुक उवाच

इतः सा ववृधे पूर्णा कलाभिः सहजेश्वरी।
ततश्च ववृधे रामः प्रमोदवनचन्द्रमाः ॥ १ ॥

कलाः समग्राः प्रबभूव रेतयोलोकोत्तरं श्री सहजानन्दिनीशयोः।
यथा नभस्यद्भुतशारदात्विषः पूर्णेन्दुसान्द्रद्युतिकीमुदीरुचोः ॥ २ ॥

सरय्वाः पुलिने रम्यौ घोषावुत्तरदक्षिणौ ।
उत्तरे नन्दनो राजा दक्षिणे सुखिताभिधः ॥ ३ ॥

व्रजेश्वरौ गोपराजौ भुवंजुगुपतुर्व्रजे ।
समृद्धपशुपालश्रीसंदोहसमुपासितौ ॥ ४ ॥
लोकेशसम्पदुत्कर्षसावमर्शश्रियान्वितौ ।
व्रजस्त्रीजनासंचारप्रैधमानपुरश्रियौ ॥ ५ ॥

नन्दिग्रामः सुखितस्याभवद्वै स्थानं सम्पत्संयुता राजधानी ।
पालीग्रामो योजनार्धेन तस्यस्थनं तद्वै नन्दनस्य प्रसिद्धम् ॥ ६ ॥

सरयूसुरसां वातैः सेव्यमानावुभौ व्रजौ ।
पुण्यतीर्थमहास्थानौ गोपीजनसुखास्यदौ ॥ ७ ॥

मध्ये मंजुवटो नाम योजनोच्छ्रायमण्डितः ।
योजनार्द्धार्द्धमायामबहुपादविराजितः ॥ ८ ॥

हरिन्मणिलसत्पर्णो नवमाणिक्यपल्लवः ।
रत्नवर्षी मधुसुधाधारारञ्जितमूलकः ॥ ९ ॥

सुवर्णविटपस्तोमः सुच्छायः श्रीभरान्वितः ।
त्रिविधानिलसंसेव्यबहुशोभाकुटीगृहः ॥ १० ॥

ज्योतिर्गणेश्वरो नाम लिङ्गं यन्मूलसंश्रितम् ।
यस्योपरि न तिष्ठन्ति पक्षिणश्च समंततः ॥ ११ ॥

दिव्यदैवत रूपोऽसौ सिद्धिदाता महावटः ।
वनं तु परितस्तस्य कुञ्जपुञ्जसुमञ्जुलम् ॥ १२ ॥

वनोपवनसंदोहवेष्टितौ तावुभौव्रजौ ।
इतो निर्गच्छति पुरा ततः श्रीसहजेश्वरी ॥ १३ ॥

मध्ये मंजुवटस्तत्र नित्यं द्वा वापि खेलतः ।
यावद्बाल्यदशारभ्य स्वस्वदिव्यसखीयुतौ ॥ १४ ॥

कुमारौ संविहरतो नानाकेलिकलाकुलौ ।
अतीते बाल्यभावे तु सहजारामसुन्दरौ ॥ १५ ॥

परस्परालोकलीलारसं पुपुषतुर्भृशम् ।
एकासने चैकदेशे एकपात्रस्थभुक्तिषु ॥ १६ ॥

एकशय्याभिशयने संगतौ तौ बभूवतुः ।
सखीभिः सहिता लोला ललामा सहजेश्वरी ॥ १७ ॥

विजहार वने फुल्लकुसुमावचयादिभिः ।
इति गोचारणाद्यैस्तु छायाविश्रमणादिभिः ॥ १८ ॥

विचचार वने रामो मकराकारकुण्डलः ।
पीताम्बरोऽरविन्दाक्षो वनमालाविभूषितः ॥ १९ ॥
पौगण्डवेशरुचिरः सर्वस्य हृदयंगमः ।
आयुधेषुक्रियाः शिक्षन् वीरेभ्यो राजधर्मतः ॥ २० ॥
श्रीनन्दनस्य नन्दिन्यामासक्त्या गोदुहोऽभवत् ।
तामासक्तिमहं वक्तुं न क्षमोऽस्मि विवेचितुम् ॥ २१ ॥
नित्यप्रेमरसानन्दानन्दिनोः सहजेशयोः ।
एक एव परः प्रेमा विभक्त इव चाभवत् ॥ २२ ॥
श्रीरामालम्बनो ह्येकः सहजालम्बनः परः ।
सहजा सेविता नित्यमादिलक्ष्म्यातितुष्टया ॥ २३ ॥
तेन प्रेमस्वरूपा सा संजाता गोदुहां कुले ।
प्रेमभक्तेःपूर्णरूपा श्रीमतीसहजाभवत् ॥ २४ ॥
अतएव प्रियाश्रेष्ठा रामस्य प्रणिगद्यते ।
स्वाभाविकस्तयोः प्रेमा प्रत्यहं बहुवृद्धिमान् ॥ २५ ॥
पौगण्डे रामचन्द्रस्य प्राकट्यं तु समागतः ।
बालो वृद्धो युवा चापि चकोरश्चन्द्रमाश्रयः ॥ २६ ॥
तथा प्रेमवतीनेत्रं रामकायिवरराश्रयम् ।
बाल्य एवक्षणे तस्या रामचन्द्रदृशि विना ॥ २७ ॥
अभूतामतिविग्लाने पद्मे ग्रीष्माकुले इव ।
इत्थं क्रमेण तद्वद्धं प्रेमास्याः सहजाश्रियः ॥ २८ ॥
आचकर्ष बलाद्रामं विसस्मारेतरं यथा ।
एकदा पाञ्चवार्षिक्यां सहजायां रघूद्वहः ॥ २९ ॥
मात्रा शृङ्गारितो रामः षड्वार्षिक उदारधीः ।
वत्सान् सम्पालयन् नित्यं ययौ मंजुवटं प्रति ॥ ३० ॥
तत्र तां दृष्टवान् सर्वभूषणस्तोमभूषिताम् ।
सहजामनवद्याङ्गीं बालकेलीविशारदाम् ॥ ३१ ॥
शारदस्य विधोः पूर्णां चन्द्रिकामिव सोदयाम् ।
धात्रीपार्श्वे विराजन्तीं स्मयमानां मुदावहाम् ॥ ३२ ॥
उदारगुणसंदोहां वर्द्धिष्णुतनुमाधुरीम् ।
यथावपोवेशभूषावासोवैशिष्ट्यभूषिताम् ॥ ३३ ॥
सापि तं नीलमेघाङ्गं दिव्यरत्नावतंसिनम् ।
उद्दामरूपसौभाग्यं ददर्श प्रियमादरात् ॥ ३४ ॥

मुमोह सहजा देवी प्रियदर्शनमात्रतः ।
स्तब्धा वटतरोर्मूलमवलम्ब्य कृताश्रया ॥ ३५ ॥

खिन्नगात्राभवत्सद्यः पुलकौघविसंष्ठुला ।
कम्पमाननतनुस्तन्वी घूर्णमाना पुनः पुनः ॥ ३६ ॥

विवर्णवदना भूत्वा साश्रुनेत्राभवत्ततः ।
मूर्छामिव सुसम्पन्ना प्रलीनसकलैन्द्रिया ॥ ३७ ॥

मग्ना रामसुधासिन्धाबुत्थातुमपि चाक्षमा ।
एवं भावसुसम्पन्नां सहजां वीक्ष्य मातरः ॥ ३८ ॥

धात्रीभावगताः सर्वा विस्मिता अभवन् स्त्रियः ।
अङ्कमारोप्य तां निन्युः पालीग्रामं मनोहरम् ॥ ३९ ॥

रामं च तत्सखायस्ते कथं कथमपि द्रुमात् ।
मूर्छायितं गृहान्निन्युः सुखितस्य व्रजं प्रति ॥ ४० ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे पश्चिमखण्डे भरतलक्ष्मणीये श्रीशुकजनकसंवादे सहजोपाख्याने एकोनषष्टितमोऽध्यायः ॥ ५९ ॥

षष्टितमोऽध्यायः

श्रीशुक उवाच

अथास्याः शोभना नाम धात्री विस्मितमानसा ।
श्रीराजिन्यैसमाचख्यौवृत्तं वटतले यथा ॥ १ ॥

शोभनोवाच

अहो प्रेमातिपुत्र्यास्ते बाल्य एव मुमोह या ।
रामे सर्वगुणारामे दृगानन्दे कलानिधौ ॥ २ ॥

अतः परं किं नु सखि कुर्याद्वयसि संस्थिता ।
विनैव वयउद्भावमेतावान् प्रेमवारिधिः ॥ ३ ॥

रामेन्दुमस्याः पश्यन्त्याश्चक्षुः साश्रुकलोदयम् ।
वपुः सकम्परोमाञ्च प्रलीनेन्द्रियकं मनः ॥ ४ ॥

कथंचिदपि हायाता स्वाङ्कमारोप्य ते सुताम् ।
तत्स्थानादानिनायाहं यत्र दृष्टवती तु ताम् ॥ ५ ॥

इयं हि पतितैव स्यात्प्रेमाघूर्णा महीतले ।
हस्ते वटतरोः शाखामवलम्ब्य सुसंस्थिता ॥ ६ ॥

अस्मिन् वयसि नेदृग्वै प्रेमा दृष्टोऽथवा श्रुतः ।
रसिकेयं दर्शनस्य रसिकाख्या भविष्यति ॥ ७ ॥

एकं जाने गोपपत्नि मा चिन्ते विस्मिता भव ।
अनयोः पूर्वभविकः सम्बन्धः खलु दृश्यते ॥ ८ ॥

अनुरूपवपोवेशरूपालंकारयुक्तयोः ।
इति धात्रीवचः श्रुत्वा सोत्कण्ठा राजिनी स्वयम् ॥ ९ ॥

द्रष्टुकामा तयोः प्रेम राममानय तद्गृहात् ।
तामेव शोभनां नाम प्रेषयामास तं व्रजम् ॥ १० ॥

सुखितस्य गृहं यत्र राजते सकलर्द्धिमत् ।
संध्यायाः पूजनं सायं करोति सहजा स्वयम् ॥ ११ ॥

तत्रोत्सवे समागच्छ मातः सुखितगेहिनि ।
सुतं चानय रामेन्दु त्वं निजाङ्कविभूषणम् ॥ १२ ॥

इति धात्र्योदिता देवी माङ्गल्यातियशस्विनी ।
विहस्यामन्त्रणं मेने कृत्वा शृङ्गारमादरात् ॥ १३ ॥

पालिग्रामं प्रचलितवतीं वस्त्रभूषादियुक्ता
श्रीमाङ्गल्या परममुदिता रामचन्द्रस्य याता ।
तत्साथेऽसौ नव इव घनो नीलपङ्केरुहाङ्गो
रामः साक्षान्मदनविजयी जग्मिवान् सप्रमोदः ॥ १४ ॥

अग्रे पुरस्कृत्य शुभाः पुरन्ध्रीर्माङ्गल्यका सम्प्रविवेश पालीम् ।
सा द्वारपर्यन्तमुपेत्य सम्यक् सम्मानिता नन्दनगोपपत्न्या ॥ १५ ॥

अथाभिसायं कुसुमावचायं कर्तुं समस्तालिजनैः समेता ।
वनं जगाम प्रमुदाभिधानं विभूषताङ्गी सहजा सखीभिः ॥ १६ ॥

तत्रालिवर्गैः सहजा प्रसूनान्यवाप्तशोभावविचाय बाला ।
अनेकजातिद्रुमवल्लिजैस्तैरामण्डिता चाप्तमहासखीभिः ॥ १७ ॥

तत्रान्तरे च रामोऽपि कृत्वा रूपान्तरग्रहम् ।
सखीवेशेन तत्पार्श्वमगमत् कौतुकान्वितः ॥ १८ ॥

पूर्वं तु तासां चपलोज्ज्वलानां निभाल्य कुञ्जान्तरितः सुकेलीः ।
अथाभ्यगच्छन्मुदितो विलासी कुतूहलाक्तः सहजां वनान्ते ॥ १९ ॥

तां वीक्ष्य कृष्णां सहजां मनोज्ञां सलीलसर्वावयवाढ्यरूपाम् ।
विचित्रकेलीभिरदृष्टपूर्वां पप्रच्छमन्दस्मितरञ्जितोष्ठी ॥ २० ॥

कासि त्वमम्भोजदलायताक्षी साक्षाद्रतिस्पर्द्धस एव दीनाम् ।
तवैव रूपेण विचित्रिता मे सखीसमात्यन्तविचक्षणापि ॥ २१ ॥

सोवाच मन्दस्मितशोभितास्या गोपालकन्याहमिह प्रसिद्धा ।
व्रजे खलु श्रीसुखितेन्द्रगेहे वसामि सर्वर्द्धिसमूहयुक्ते ॥ २२ ॥

इच्छाम्यहं दीर्घदृशा त्वयैकं सख्यं सखीवृन्दसमन्वितापि ।
तत्त्वामुपेतास्मि सखीं वयस्यां गृहाण मां सादरमिन्दुवक्त्रे ॥ २३ ॥

इतीरिता सापि तया सुसख्या प्रत्यग्रहीत्तां समरूपवेशाम् ।
तस्यास्ततोंऽसे स्वभुजं निधाय वनान्तरे सातिचचार तत्र ॥ २४ ॥

कृष्णा सखी त्वं मम हृद्यरूपा त्वां वीक्ष्य यातास्मि यथाभिलाषम् ।
तथैव धात्रा विहितं च सख्यं सदैव नौ चात्र प्रमुद्वनेऽस्मिन् ॥ २५ ॥

एकं तु विज्ञाप्यमतीव मे त्वयि ग्रामं न यामः सुखितस्य सम्प्रति ।
त्वामन्नवस्त्राञ्जनलेपनक्रियाविभूषणैः स्वे गृह एव सेवये ॥ २६ ॥

कृष्णोवाच

समागमो नौ वन एव संगतो न चान्यथा नागरिनन्दनालये ।
केयं कुतो वेति विमर्शिता पुनः स्थास्याम्यहं तत्र कथं नु सुन्दरि ॥ २७ ॥

सहजोवाच

एवं चेद्वन एवात्र दर्शनं दास्यसि प्रिये ।
यथा न नौ विप्रयोगो भवेत्क्वापि कलावति ॥ २८ ॥

श्रीशुक उवाच

इत्थं विरच्य सत्यानि तया श्रीसहजाह्वया ।
वनान्निववृते कृत्वा पुष्पावचयनक्रियाम् ॥ २९ ॥

कृष्णा सखी ददौ तस्यै निजरत्नाङ्गुलीयकम् ।
यस्य धारणमात्रेण वियोगो नैव बाधते ॥ ३० ॥

सापि कृष्णा नाम सखी पालीग्रामस्य पार्श्वतः ।
ययौ सहजया सार्द्धमग्रेऽन्तर्द्धिमगात्ततः ॥ ३१ ॥

तद्वीक्ष्य सर्वधात्रीणामभूच्चेतसि विस्मयः ।
गवेषयन्त्योऽपि च तां समंतान्नैववलेभिरे ॥ ३२ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे पश्चिमखण्डे भरतलक्ष्मणोये-श्रीशुकजनकसंवादे सहजोपाख्यानेषष्टितमोऽध्यायः ॥ ६० ॥

एकषष्टितमोऽध्यायः

श्रीशुक उवाच

अथ तां सायमार्तिक्यविधिना परमादृता ।
जग्राह राजिनीमाता वनात्सद्यः समागताम् ॥ १ ॥

आलिङ्ग्य संचुम्ब्य निवृत्तमार्गश्रमामिमां प्राणसमां सुतां सा ।
संध्यार्चनोत्साहमहोत्सवेन प्रवर्तयामास मनोज्ञकेलौ ॥ २ ॥

श्रीमाङ्गल्यातिनिपुणा विरच्य विधिवत्स्वयम् ।
गोमयैः कामधेनोर्वै संध्यामत्यद्भुताकृतिम् ॥ ३ ॥

चन्दनालिप्तभित्तिस्थां पञ्चवर्णप्रसूनकैः ।
प्रत्यङ्गभूषितां देवीं वरदां समपूपुजत् ॥ ४ ॥

गन्धैः पुष्पैस्तथाधूपै दीपंनैवेद्यकल्पनैः ।
पूजान्ते मनसा रामं तस्याः पतिमयाचत ॥ ५ ॥

महतासम्भ्रमेणैवं संध्यार्चन महोत्सवम् ।
विधाय राजिनीदेवी नन्दिग्रामगताः स्त्रियः ॥ ६ ॥

पुरन्ध्रीः श्रीमन्माङ्गल्याप्रभृतीः पर्यपूजयत् ।
वसनैर्भूषणैर्भोज्यैः सिन्दूरपूरणादिभिः ॥ ७ ॥

तां रात्रिं जागरं चक्रे पुरन्ध्रीभिः सह स्वयम् ।
गायन्त्यः सकला गोप्यः संध्यादेवीं शुभैः स्वरैः ॥ ८ ॥

सुखं समाययांचक्रुरेवं कलितमुत्सवम् ।
तस्मिन् समाजे माङ्गल्यासुतस्य सहजां प्रति ॥ ९ ॥

सद्रजायाश्च माङ्गल्यासुतं प्रति विशेषतः ।
प्रणयं राजिनीदेवीपर्यैक्षत महाशया ॥ १० ॥

अथ प्रभाते सम्प्राप्ते विसृज्य परमादरात् ।
माङ्गल्यां तत्सखीश्चापि तथान्याश्चोत्सवागताः ॥ ११ ॥

एकान्ते राजिनी देवी नर्मसख्या सह स्वयम् ।
समचिन्तयदत्यार्ता पुत्र्या परिणयं प्रति ॥ १२ ॥

राजिन्युवाच

हन्तलोकोत्तरगुणारामोरामोरघूद्वहः ।
त्रैलोक्येऽप्यस्य तुलया नान्यः कश्चिन्महान् वरः ॥ १३ ॥

अजानन्त्या मया पूर्वं कान्तमेनं गुणोत्तरम् ।
पुत्री गुणवती चैषा कथमन्येन योजिता ॥ १४ ॥

वाचा दत्तेपमन्यस्मै गोपाय कुलशालिने ।
माङ्गल्यातनये रामे वरे समुदिते सति ॥ १५ ॥
एतद्वचनुचितं मास्तु यतः कन्या स्वयंवरा ।
यमेव वृणुयात्स्वेच्छा स एव खलु तद्वरः ॥ १६ ॥
अनालोचितमित्येतन्मया गोपेश्वरेण तम् ।
अनुतापः समुदभूत्तस्य तद्विषमं फलम् ॥ १७ ॥
परावर्तयितुं शक्या कथमेषाधुना सखि ।
व्रतं पूगीफलं यस्याः सुकुलीनाय गोदुहे ॥ १८ ॥
प्रेमास्याः सहजं रामे किं तु पूर्वभवं महत् ।
रूपेणापीयमतुला रामेणैव महोचिता ॥ १९ ॥
वर्द्धिष्णुः प्रणयाम्भोधिः सहजारामयोर्व्रजे ।
कुलं शीलं तथा भूमिच्छादापितुमुद्यतः ॥ २० ॥
तथा ह्यस्मिन् समाजे च पर्यैक्षत मपानयोः ।
धात्रीभिर्वर्णितः पूर्वं प्रेमामृतमहोदधिः ॥ २१ ॥
यथा मंजुवटे दृष्टो मोहमूर्छामदावधिः ।
पूर्वसंस्कारजः प्रेमा प्रतीतः स मयापि च ॥ २२ ॥
किं न्वस्मिन् विषये कार्यं धर्मसंकटरूपिणि ।
अहो अत्यद्भुतो धाता कथमेवं करिष्यति ॥ २३ ॥
सहजारूपलावण्यमनिमालकृता गिरः ।
रामेतरेण गोपेन भविष्यन्ति कथं नु ताः ॥ २४ ॥
स्नुषामेनां साभिलाषां माङ्गल्यापि यशस्विनी ।
सुखितस्य गवेन्द्रस्य भार्योदारा महाकुला ॥ २५ ॥
इत्येवं महती चिन्ता जायते मम चेतसि ।
तां निवारयितुं शक्तो विधिरेव हि केवलम् ॥ २६ ॥

श्रीशुक उवाच

इत्येवं राजिनीदेवी दीर्घचिन्तासमाकुला ।
रात्रि दिवं समुद्विग्ना निद्रां न लभते क्वचित् ॥ २७ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवदे पश्चिमखण्डे भरतलक्ष्मणीये श्रीशुकजनकसंवादे सहजोपाख्याने एकषष्टितमोऽध्यायः ॥ ६१ ॥

द्विषष्टितमोऽध्यायः

श्रीशुक उवाच

एवं स्थितायां राजिन्यां शंकरः समुपागतः ।
जटाजूटधरो रुद्रः कृत्तिवासास्त्रिलोचनः ॥ १ ॥

चन्द्रभालः शूलधरः शान्तवेशधरो वटुः ।
तमाराध्य सपर्याद्यैर्गोपपत्नी शुचिव्रता ॥ २ ॥

प्रसादयामास साध्वी ज्ञात्वा देवं सदाशिवम् ।
प्रसन्नो भगवान् शम्भुः श्रीराजिन्यै उवाच ह ।
रहस्यं सहजेशान्या यतश्चिन्ताकुला ह्यसौ ॥ ३ ॥

शिव उवाच

सीमा ते रसराजस्य कथ्यते गोपभामिनि ।
आशावदः स्वभावो ह नात्र कार्या विकल्पना ॥ ४ ॥

रसमात्रैकभोगाय श्रीपतेरवतारिता ।
स रसो रसराजाख्यः शृङ्गारः श्रीपतेर्वपुः ॥ ५ ॥
रसो वै स इति प्राह सर्वार्थालोकिनी श्रुतिः ।
श्रुत्युक्तः स रसः शुद्धः शृङ्गार इति कीर्तितः ॥ ६ ॥

आलम्बनमुद्दीपनमनुभावस्तथैव च ।
संचारिणस्तथा भावा इत्येषा रससंस्थितिः ॥ ७ ॥

भावैरेवानुभाव्योऽसौ स्वाद्यश्चैव निरन्तरम् ।
तादृग्रसविशिष्टं तच्छ्रीरामस्य परं वपुः ॥ ८ ॥

ध्येयं गेयं च पेयं च रसविद्भिर्निरन्तरम् ।
श्रीरामस्य गुणैः पूर्णः परमानन्दविग्रहः ॥ ९ ॥

नित्यलीलारसानन्दी कोटिकन्दर्पमोहनः ।
साकेतलक्ष्मीनिलयः सहजानन्दिनीसखः ॥ १० ॥

पुरुषोत्तमशब्दैकवाच्योऽसौ रसविग्रहः ।
तथैव सहजानन्दा रसरूपा विलासिनी ॥ ११ ॥

प्रमोदवनराज्ञी च नित्यलीला विशारदा ।
नानयोस्ते मिदा कार्या कर्हिचिद्गोपभामिनि ॥ १२ ॥

सदा परे नित्यधाम्नि साकेताख्ये मनोहरे ।
एवमेव सदा ह्येतौ स्वरूपेण विराजतः ॥ १३ ॥

नित्यो नित्यानन्दमयौ नित्यक्रीडाविलासिनौ ।
तावेतौ भवतोर्गेहे ह्यवतीर्णौ स्वरूपतः ॥ १४ ॥

इयं च सहजा नाम तव पुत्री गुणैर्युता ।
सामान्यदृष्ट्या नो वीक्ष्या वीक्षणीया विशेषतः ॥ १५ ॥

यावन्तो वै सुरा ह्यस्यै शिरसा प्रणमन्त्यहो ।
अहं ब्रह्मा च शेषश्च श्रीरीशस्त्रिजगत्प्रभुः ॥ १६ ॥

अस्याश्चरणजान् रेणून् वहन्ति शिरसानिशम् ।
रामे च सहजायां च न कार्या भेदकल्पना ॥ १७ ॥

चतुर्वर्गाधिकं सौख्यं दातुमेतौ क्षमाविह ।
आत्मस्वरूपलाभार्थमनयोः समुपासना ॥ १८ ॥

न विना सहजां रामो भक्तायाशु प्रसीदति ।
तस्माच्छ्रीरामतुष्ट्यर्थमाराध्या सहजेश्वरी ॥ १९ ॥

चिदानन्दघना साक्षात्प्रेमानन्दस्वरूपिणी ।
हस्तालम्बं दिशेद्यस्मै स भक्तो जायतेतराम् ॥ २० ॥

अहं ब्रह्मादयश्चापि देवाः सर्वे निजात्मना ।
समाराध्य परामेनां सहजां सत्कृतिं ययुः ॥ २१ ॥

आदिलक्ष्मीरियं ज्ञेया श्रीमद्रामचन्द्राश्रिता ।
इहावतीर्णौ सहजारामौ विज्ञाय भामिनि ॥ २२ ॥

यत्प्रमोदवनंधाम सर्वधामशिरोमणि ।
तथैवान्यः परिकरः प्रादुर्भूतोऽत्र सर्वशः ॥ २३ ॥

इति विज्ञाय विबुधा ब्रह्माद्या अपि संततम् ।
भवद्गृहद्वारदेशं निभृतं पर्युपासते ॥ २४ ॥

अस्यास्त्वं मातृभावेन पितृभावेन नन्दनः ।
ब्रह्मादिदिविषट्वृन्द वन्दितुं पदमीयतुः ॥ २५ ॥

भवतां भवने नित्यं लक्ष्मीर्वैकुण्ठवासिनी ।
हस्ते पद्ममुपादाय मार्जनं कुरुते भृशम् ॥ २६ ॥

यत्र यत्र च ते पुत्री दधाति सहजा पदम् ।
तत्र तत्र प्रमाष्ट्यैषा पद्मा पद्मेन राजिनि ॥ २७ ॥

माहात्म्यमस्या जानीहि श्रीराजिनि परात्परम् ।
यत्रोपनिषदां दृष्टिरपि मूढायते भृशम् ॥ २८ ॥

नास्याः स्वरूपं जानन्ति तत्त्वेन निगमा अपि ।
अतस्ते नेति नेतीति ब्रुवाणा अवतस्थिरे ॥ २९ ॥

लक्ष्मीर्गौरी गिरां देवी गङ्गा गायत्र्यधीश्वरी ।
अस्या एव कलाः सर्वाः सहजानन्दिनीश्रियः ॥ ३० ॥

समासव्यासयोगेन गायन्त्येनां श्रुतेर्गिरः ।
प्रेमानन्दमयी ज्योत्स्नां परब्रह्मस्वरूपिणीम् ॥ ३१ ॥

अंशैः कलाभिश्च विभूतिभिश्च क्रीडत्यसावेकपरप्रतिष्ठा ।
अनेकनामाकृतिरूपयुक्ता नित्या विशुद्धा खलु नित्यमुक्ता ॥ ३२ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे पश्चिमखण्डे भरतलक्ष्मणीये श्रीशुकजनकसंवादे सहजोपाख्याने द्विषष्टितमोऽध्यायः ॥ ६२ ॥

त्रिषष्टितमोऽध्यायः

श्रीराजन्युवाच

आख्याहि भगवन्मह्यं सहजायाः शुभान् गुणान् ।
येषु संश्रुतमात्रेषु प्रमोद उपजायते ॥ १ ॥

यदि नित्या नित्यधामा सहजा राघवप्रिया ।
मम गेहे कथं जाता संशयोऽयं महेश्वर ॥ २ ॥

अनादिनिधना सेयंकस्मात्समुपजायते ।
इमं मे संशयानायाः संशयं छिन्धि शंकर ॥ ३ ॥

श्रीशिव उवाच

इत्थं श्रीराजिनीदेवि किमु विस्मृतवत्यसि ।
त्वयैवाराधिता पूर्वं सह भर्त्रा शुचिव्रते ॥ ४ ॥

कृपयैवावतीर्णेयं परा श्रीर्युवयोर्गृहे ।
त्वं प्रभासि पुराजन्मन्ययं श्रीनन्दनो रविः ॥ ५ ॥

कोटिकल्पयुगाध्यक्षौ भगवन्तौ युवामिमौ ।
अनेकवर्षपर्यन्तं भवती रविणा सह ॥ ६ ॥

आराध्य सहजाराममीदृशं भाग्यमाप ह ।
अन्याश्चापि प्रिया विष्णोस्तत्रैतस्याः शुभाः कलाः ॥ ७ ॥

व्रजे च यावत्यो गोप्यस्ता अस्याः सुप्रभावजाः ।
प्रमोदवनसौभाग्यं मया वक्तुं न शक्यते ॥ ८ ॥

आविर्भावान्तराण्यस्य बैकुण्ठादीनि राजिनि ।
वैकुण्ठं चापि गोलोको मथुरा द्वारकापि च ॥ ९ ॥

ध्रुवस्थानं भ्रुवोर्मध्यं सूर्यमण्डलमेव च ।
श्रीमद्वृन्दावनं धाम सर्वमेतत्प्रभात्मकम् ॥ १० ॥

इदं हि सहजं धाम परं ब्रह्ममयं स्फुटम् ।
सहजायाश्च रामस्य रसलीलाविलासभूः ॥ ११ ॥

एतत्स्थानमधिष्ठाय सहजानन्दिनी स्वयम् ।
रमतेऽप्राकृतैर्भावैर्भावभुक्तिचिदात्मिका ॥ १२ ॥

अस्याः सेवनमात्रेण निर्बन्धो जायते नृणाम् ।
न मन्त्रो नापि चैवार्चा न जपो न तपस्तथा ॥ १३ ॥

प्रेमसेवामपेक्ष्यैषा मोचयेद्भवबन्धनात् ।
इयं निःसाधना मुक्तिर्मया तुभ्यं निगद्यते ॥ १४ ॥

नामैवास्याः कोटितीर्थस्वधिकं गोपभामिनि ।
ध्यानमस्याः प्रवक्ष्यामि यज्ज्ञात्वा मुच्यते जनः ॥ १५ ॥

भावयेच्चित्तकमले प्रमोदवनमद्भुतम् ।
विपुलं सच्चिदानन्दं कोटिकल्पद्रुमाश्रितम् ॥ १६ ॥

हेममारकतीं भूमिं रत्नाङ्गणसुविस्तराम् ।
अनेककोटिसूर्येन्दुप्रकाशां मण्डलाकृतिम् ॥ १७ ॥

वनानि तत्रभास्वन्ति वल्लीतरुमयान्यहो ।
कल्पद्रुमा यत्र लता यत्र कल्पलताः शुभाः ॥ १८ ॥

हेमदण्डमयाः स्तम्भा विटपा रत्नविस्तराः ।
हरिन्मणिमयाः पर्णाः कोटिरत्न प्रसूनिनः ॥ १९ ॥

अमिताः फलसंदोहाः सद्यः स्वादामृतोपमाः ।
अगोचरो रसो येषां मोक्षानन्दरसाधिकः ॥ २० ॥

तद्रसामृतसम्पृक्तां सुरसां सरयूमिह ।
ज्योत्स्नावर्णप्रवाहाढ्यां मुक्तामाणिक्यकूलिनीम् ॥ २१ ॥

राजहंसकुलच्छन्नां कल्हारोत्पलगन्धिनीम् ।
स्नास्यद्गोपिगणाकीर्णरत्ननिःश्रेणिशोभिताम् ॥ २२ ॥

सिद्धचारणगन्धर्वस्नानकालसुखप्रदाम् ।
सुवर्णपङ्कजाकीर्णां गोपराजप्रपूजिताम् ॥ २३ ॥

तत्कूलयोरुभययोः कुञ्जपुञ्जसुमञ्जुलम् ।
प्रमोदविपिनं ध्यायेद्रत्नपर्वतशोभितम् ॥ २४ ॥

महौषधीज्वलत्सानुकन्दरोपत्यकादिकम् ।
रत्नस्फटिकमाणिक्यसानुव्याप्तदिगम्बरम् ॥ २५ ॥

रत्नाद्रिं कामगहनं सौगन्धिकगिरिं तथा ।
अनेकोपवनारामकुञ्जशोभाढ्यमुत्तमम् ॥ २६ ॥

महावैकुण्ठात्परं तद् रामवैकुण्ठसंज्ञितम् ।
तत्र श्रीसहजानन्दावनं सर्ववनोपरि ॥ २७ ॥

अशोकवनमुत्फुल्लसर्वर्तुकुसुमाकरम् ।
यत्र कामोद्भवः शोकस्तथा विरहसम्भवः ॥ २८ ॥

शान्ति नीतोऽनया तस्मादशोकवनमीरितम् ।
लतामण्डपमाञ्जुल्यं वहत्त्रिविधमारुतम् ॥ २९ ॥

सर्वानन्दमयं धाम रामकामप्रपूरणम् ।
तत्र धाम्नि स्थितां ध्यायेदालीभिः परिशीलिताम् ॥ ३० ॥

लवंगमञ्जरीरूपमञ्जरीरतिमञ्जरी ।
आनन्दमञ्जरीप्रेममञ्जरीरसमञ्जरी ॥ ३१ ॥

कर्पूरमञ्जरीरंगमञ्जरीरुचिमञ्जरी ।
माधुर्यमञ्जरीत्याद्याः सर्वाः शीलगुणोत्तराः ॥ ३२ ॥

रूपोत्तराः सौकुमार्याः सौभाग्यगुणगाह्वयाः ।
रामनायकसौन्दर्य सुधास्वादचकोरिकाः ॥ ३३ ॥

अन्याश्च ललिताद्यास्ताः सीमाः सौभाग्यवारिधेः ।
सहजानन्दिनीरामप्रेममत्ताः समन्ततः ॥ ३४ ॥

ताभिः समेतां सुभगां सुकुमारीं सुमाधुरीम् ।
सुपाय्वां सुपाण्डित्यां सुलास्यां च सुविग्रहाम् ॥ ३५ ॥

सुलीलां सुदतीं सूर्मि सुकपोलां सुहासिनीम् ।
सुलापां सुकवित्वाख्यां सुभाग्यां सुमनोहराम् ॥ ३६ ॥

सखीनां पद्महस्तानां मध्ये पद्मैकहस्तिनीम् ।
विद्युल्लताचमत्कारसर्वतोगात्रभास्वराम् ॥ ३७ ॥

नीलशाटीपरीधानां तप्तकाञ्चनविग्रहाम् ।
नीलतोयदमध्यस्थां विद्युल्लेखामिवोद्वताम् ॥ ३८ ॥

सद्यः प्रसादसुमुखीं स्मयमानमुखाम्बुजाम् ।
पद्मिनीकोटिसौरभ्यवशीकृतमधुव्रताम् ॥ ३९ ॥

मधुगन्धमदोन्मत्तैर्मधुपैरुपसेविताम् ।
प्रत्यङ्गसौरभोल्लासमधुमादविकामयीम् ॥ ४० ॥

अधस्तात्कल्पवृक्षस्य श्रीरत्नवेदिकोपरि ।
रत्नसिंहासनासीनां सेवितामप्सरोगणैः ॥ ४१ ॥
धृताची मेनका रम्भा उर्वशी पुंजिकस्थली ।
तिलोत्तमा मंजुघोषा सुकेसी मदनोत्सवा ॥ ४२ ॥
इत्याद्याभिः सुवर्ग्याभिर्दिव्याभिरुपवीणिताम् ।
कयाचिद्धृतरत्नौघवर्षणच्छत्रमण्डलाम् ॥ ४३ ॥
काम्यांचिच्चारुचन्द्रांश्रुचामरद्वन्द्ववीजिताम् ।
काभ्यांचित्स्फाटिके पीठे संवाहितपदाम्बुजाम् ॥ ४४ ॥
रत्नभूषणहस्ताभिरन्याभिरुपसेविताम् ।
ताम्बूलवीटिकारत्नकरंजयुतपाणिभिः ॥ ४५ ॥
रामाभिरामरामाभिः समंतात्पर्युपासिताम् ।
पुष्पहारसनाथाभिस्याभिः समुपासिताम् ॥ ४६ ॥
मन्दोद्योतिस्मतज्योत्स्नाविधूनिततमोगुणाम् ।
मूर्तिमद्भिश्च निधिभिः समंतादुपसेविताम् ॥ ४७ ॥
सरस्वत्या यमुनया गङ्गाया च निषेविताम् ।
पाञ्चजन्येन शङ्खेन चक्रेण[1] सुदर्शनेन च ॥ ४८ ॥
कौमोदक्या च गदया पद्मेन भुवनात्मना ।
शार्ङ्गेण चैव धनुषा दिव्यैरन्यैस्तथाऽऽयुधैः ॥ ४९ ॥
अप्राकृतैस्तथा सर्वैः पदार्थैरुपसेविताम् ।
कालेन मायया चापि विद्यपाविद्यया तथा ॥ ५० ॥
गुणैः सत्त्वादिभिश्चैव तत्त्वैर्दैवतविग्रहैः ।
ईषद्दृगंशसंपातप्रसादवरकाङ्क्षिभिः ॥ ५१ ॥
परिचारकसंदोहैर्दूरतः पर्युपासिताम् ।
प्रेमसाम्राज्यमहिषीं प्रमोदवननायिकाम् ॥ ५२ ॥
महापुरुषधौरेयपर्युपास्यपदाम्बुजाम् ।
ब्रह्मादिसुरकोटीशैः सेव्यमानां समंततः ॥ ५३ ॥
एवंविधां तां सहजां चिदानन्दपदेश्वरीम् ।
योध्यायेद्राजिनीं देवीं तस्य कार्यं न विद्यते ॥ ५४ ॥
सहजानन्दिनीभक्तिः प्रारब्धस्यापहारिणी ।
कर्मज्ञानादिकं सर्वं तत्तुल्यं नैव विद्यते ॥ ५५ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे पश्चिमखण्डे भरतलक्ष्मणीये श्रीशुकजनकसंवादे सहजोपाख्याने त्रिषष्टितमोऽध्यायः ॥ ६३ ॥

---

१. पादेऽस्मिन्नक्षराधिक्यमार्षः ।

चतुःषष्टितमोऽध्यायः

श्रीशिव उवाच

कदाचिदेषा सहजा स्वयमात्मरतिं गता।
लयं कृत्वा प्रपञ्चस्य भोक्तुकामैव केवलम् ॥ १ ॥

निःशेषयित्वा निखिलं द्वन्द्वातीता बभूव ह।
तदा भक्तान् स्वयं भुक्तान् प्रवेशितवती तनौ ॥ २ ॥

ततः पूर्वमनावृष्टिर्जाताद्वादशवार्षिकी।
अतपश्च रविश्चण्डो मण्डलद्वादशात्मकः ॥ ३ ॥

तेन शुष्कं जगत्सर्वं सहस्थावरजंगमम्।
कालजीमूतसंघातस्ततः प्रावर्षतोच्चकैः ॥ ४ ॥

तत एकार्णवे जाते वसिष्ठाद्या महर्षयः।
मज्जमाना महात्रासादेनां तुष्टुवुरञ्जसा ॥ ५ ॥

ऋषय ऊचुः

नमो ब्रह्मस्वरूपिण्यै स्वानन्दघनमूर्तये।
व्यक्ताव्यक्तातिवर्तिन्यै स्वप्रकाशचिदात्मने ॥ ६ ॥

गिरां देव्यै च नित्यायै शब्दार्थाखिलमूर्तये।
सप्रपञ्चाप्रपञ्चायै स्वतन्त्रायै नमो नमः ॥ ७ ॥

महाकालकलावत्यै परिणामैकहेतवे।
नमस्ते स्थूलसूक्ष्मादिजगद्विधारणात्मने ॥ ८ ॥

गुणातीते गुणाधारे जीवशक्त्यङ्कुरात्मिके।
वाचातीते परे मातः सहजे पाहि सेवकान् ॥ ९ ॥

यर्ह्येवेदं जगत्कर्तुमिच्छा प्रादुरभूत्सती।
तर्ह्येव तत्क्षणादेतद् दृश्यजातमदृश्यत ॥ १० ॥

सच्चिदानन्दरूपा त्वं व्यापिका परमात्मिका।
अंशानंशा विशिष्टांशा स्वरूपगुणरूपिका ॥ ११ ॥

त्वमुपादानमेतस्य निमित्तं त्वं परा चितिः।
एकधानेकधा चापि विद्वद्भिः परिगीयसे ॥ १२ ॥

त्वं शक्तिस्त्वं शक्तिमती त्वं धर्मश्चासि धर्मिणी।
सर्वाभिन्नस्वरूपत्वाद्देवि ब्रह्मेति गीयसे ॥ १३ ॥

ये त्वां समाश्रितामर्त्या मृत्युत्रासवशीकृताः।
तेषाममृतरूपासि किमन्यत्कथयामहे ॥ १४ ॥

क्षयेऽपि विश्वस्य चराचरस्य त्वदीयमानन्दमयं पुराणम् ।
जागर्ति तद्धाम प्रमुद्वनाख्यं यत्र प्रकृत्या नु गुणा भवन्ति ॥ १५ ॥

त एव भाग्यैर्विधुरा मनुष्याः श्रीसद्गुरूपास्तिपराङ्मुखाश्च ।
ये मातरद्धा निगमैर्निरूढां न वै तवाङ्घ्रयोः पदवीं श्रयन्ते ॥ १६ ॥

सम्प्राप्य च त्वच्चरणारविन्दं परामृतस्राविमहामरन्दम् ।
न कर्मणां ज्ञानपथस्य वापि पश्यन्ति नो वान्यसुरौघवक्त्रान् ॥ १७ ॥

ये ब्रह्मभूताः सहसा प्रसन्ना विशोकवाञ्छाः समसर्वभूताः ।
सम्प्राप्य ते त्वच्चरणाम्बुजस्थां भक्तिं सुधां वीततृषो भवन्ति ॥ १८ ॥

तावन्न ते धामनि मोदमाना माद्यन्ति तैस्तैरमृताधिभोगैः ।
यावन्न ते पादसरोजयुग्मे नैसर्गिकी जायत एव भक्तिः ॥ १९ ॥

ये वैष्णवं भूष्णुतमाः पदं तन्महामहाभागवतप्रधानाः ।
ते पूर्वमद्धा भवतीं भजन्ते परां रमांवै श्रियमादिलक्ष्मीम् ॥ २० ॥

अस्मिन् महाब्रह्मपुरे प्रकाम यत्पुण्डरीकं दहरं सुवेश्म ।
तस्मिंश्चिदात्मा दहराभिधोऽन्तराकाश एतत्तव धाम नित्यम् ॥ २१ ॥

यदस्ति किंचिदिह यच्च नास्ति तत्सर्वमत्रैव परं प्रतिष्ठितम् ।
सर्वे च कामा विषयाश्च सर्वे परामृतानन्दमया विभान्ति ॥ २२ ॥

तत्त्वं तदन्विष्य तव स्वरूपं जिज्ञासमाना मुनयो विमानाः ।
भवन्ति मुक्ताः कतिचित्प्रपद्य नातः परं ते पुनरावृतन्ते[1] ॥ २३ ॥

सम्प्रत्यस्मान् कालवेगेन मूढान् नष्टप्रायान् नष्टहृद्बुद्धिवृत्तीन् ।
त्वं त्रायस्व त्राणकर्तेह नान्यो यस्मादेषा त्वत्समुत्थैव भीतिः ॥ २४ ॥

इति तेषां प्रपन्नानां मज्जतां सागरोदके ।
सद्यः समुद्धृतिं कर्तुं दिव्यां नावं ससर्ज सा ॥ २५ ॥

तस्यामारोप्य नौकायां महापद्मदलीकृतौ ।
स्वयं च वाहिका भूत्वा प्रलयाब्धेरतारयत् ॥ २६ ॥

नक्षत्रग्रहताराद्यैः स्तूयमाना महर्षिभिः ।
पोतवाहस्वरूपेण स्वयं च शुशुभेतराम् ॥ २७ ॥

इत्थमेषा सुविक्रान्ता स्वतन्त्रा च महोर्जिता ।
महाप्रलयपाथोधेर्मुनिवर्यानतारयत् ॥ २८ ॥

तदस्याश्चरितं दृष्ट्वा महर्लोकस्थिताः सुराः ।
अवाकिरन् कल्पवृक्षप्रसूनैः सहजेश्वरीम् ॥ २९ ॥

---

१. पुनरावर्तन्ते–इत्यर्थः ।

आब्रह्मभुवनात्सर्वे देवाश्च शरणं गताः ।
तेऽपि संतारिताः काले प्रादुर्भूय स्वविक्रमैः ॥ ३० ॥

इदं स्तोत्रं वसिष्ठाद्यैर्मुनिभिः कीर्तितं तु यत् ।
यः पठेत् सततं प्रातस्तस्य श्रीर्वरदा स्वयम् ॥ ३१ ॥

यस्त्रिसंध्यं पठेत् स्तोत्रं तस्य श्रीसहजेश्वरी ।
सद्यः प्रसन्ना कुरुते निश्चलां धनसम्पदम् ॥ ३२ ॥

सद्यस्तारपते मृत्योर्ददाति प्रेमसम्पदम् ।
श्रीरामचरणाम्भोजे करोति च सुनिर्वृतिम् ॥ ३३ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे पश्चिमखण्डे भरतलक्ष्मणीये श्रीशुकजनकसंवादे सहजोपाख्याने चतुषष्टितमोऽध्यायः ॥ ६४ ॥

पञ्चषष्टितमोऽध्यायः

श्रीशिव उवाच

अस्याः श्रीसहजेशान्यास्त्वत्पुत्र्या गोपभामिनि ।
महिमानमिमं वक्तुं क्षमो देवि कियानहम् ॥ १ ॥

इयं कालस्वरूपेण सततं पर्युपस्थिता ।
ग्रहनक्षत्रतारादीन् सततं चालयत्युत ॥ २ ॥

यावन्तः कालावयवास्तेऽस्य विग्रहसंश्रयाः ।
शैशुमारमिदं चक्रं कालमूर्तेः शरीरकम् ॥ ३ ॥

यत्र नक्षत्रताराणां मण्डलं पर्यवस्थितम् ।
उन्मज्जन्ति निमज्जन्ति घटीयन्त्रवदी दृशाः ॥ ४ ॥

कालस्य सूक्ष्मावयवा व्यापकाः सर्वभूतगाः ।
पार्थिवा अम्मयाश्चैव तैजसा वायवास्तथा ॥ ५ ॥

नाभसा मानसाश्चैव व्यापकाः कालविग्रहाः ।
स्थिरं स्थिरचरं चैव चरं चैवाचरं तथा ॥ ६ ॥

स्थिरं चैव चरं चैव क्रमतः परिकीर्तिताः ।
शुक्लपक्षप्रतिपदि पूर्वं सूर्योदयात्किल ॥ ७ ॥

षष्ठिदण्डप्रमाणेन पार्थिवादीन् विभावयेत् ।
उषः पार्थिवकं ज्ञेयं नाभसं चारुणोदये ॥ ८ ॥

मन्दं मन्दतरं चैव तथा मन्दतमं भवेत् ।
अतिमन्दं मन्दमन्दं घटिकाः पार्थिवाश्रयाः ॥ ९ ॥

धौतं धौततरं चैव तथा धौततमं भवेत् ।
अतिधौतं धौतधौतं घटिका आप्यसंश्रयाः ॥ १० ॥

ज्वलितं प्रज्वलितकं सुप्रज्वलितकं तथा ।
अतिप्रज्वलितं चैव ज्वलिताज्वलितं तथा ॥ ११ ॥

पञ्चपञ्च इमा ज्ञेयास्तैजसात्मकसंश्रयाः ।
वेगं वेगतरं चैव तथा वेगतमं तथा ॥ १२ ॥

अतिवेगं महावेगं घटिका वायवाश्रयाः ।
आकाशं चावकाशं च महाकाशं विकाशकम् ॥ १३ ॥

अत्याकाशमिति ज्ञेया घटिका नाभसाश्रयाः ।
संकल्पं च विकल्पं च निवृत्तं च प्रवर्तकम् ॥ १४ ॥

अतिवृत्तकं च ज्ञेया घटिका मानसाश्रयाः ।
षष्ठिदण्डात्मकः काल इति तुभ्यं प्रकीर्तितः ॥ १५ ॥

एतन्मूलमिदं विश्वं बाह्याभ्यन्तरभेदतः ।
बाह्यं सर्वमिदं विश्व ब्रह्माण्डात्मकमीरितम् ॥ १६ ॥

आभ्यन्तरं तदेवेदं ब्रह्माण्डरचनात्मकम् ।
इडा वामवहा नाडी पिंगला दक्षिणाश्रया ॥ १७ ॥

तयोर्मध्यगता सूक्ष्मा सुषुम्णेति प्रकीर्तिता ।
सूर्यचन्द्राग्नयस्तासु प्रतिष्ठिततमा मताः ॥ १८ ॥

स्थूलसूक्ष्मप्रभेदेन पञ्चभूतानि चैव हि ।
तेषां मात्रा इन्द्रियाणि देवा इन्द्रादयस्तथा ॥ १९ ॥

दिशोऽन्तरिक्षमरुतः समुद्रा गिरयस्तथा ।
नद्यो भूतगणाश्चैव स्वस्वस्थानसमाश्रयाः ॥ २० ॥

तत्रैव संश्रिता लोकाः सप्ताधः सप्त चोपरि ।
मूलाधारं समारभ्य षट् चक्रास्तत्र संश्रिताः ॥ २१ ॥

मूलाधारे स्थितः श्रीमान् शेषो नारायणः स्वयम् ।
स ब्रह्मा स शिवः सेंद्रः सोऽक्षरः परमः स्वराट् ॥ २२ ॥

गणेशो वाक्पतिश्चैव सर्वदेवमयात्मकः ।
तस्यैव शक्तयः सर्वाः प्रसूता देवतागणाः ॥ २३ ॥

चतुर्दलं स्थानयस्य मूलाधारे प्रकीर्तितम् ।
गणराजस्वरूपेण स्वयं तत्र प्रतिष्ठितः ॥ २४ ॥

लेखनीपुस्तकधरः सरस्वत्याभिमर्षितः ।
स्वाधिष्ठानं षट्दलं च तत्र ब्रह्मा प्रतिष्ठितः ॥ २५ ॥

विद्याकमण्डलुधरो निगमत्रय भूषितः ।
स्वशक्त्या वेदरूपिण्या गायत्र्या चाभिमर्षितः ॥ २६ ॥

मणिपूरं दशदलं तत्र विष्णुः श्रिया युतः ।
शङ्खचक्रगदापद्मभूषितः शुद्धसत्त्वभाक् ॥ २७ ॥

अनाहतं रविदलं चक्रं सम्परिकीर्तितम् ।
तत्र रुद्रः स्वशक्त्या च पार्वत्या भाति भूषितः ॥ २८ ॥

विशुद्धं षोडशदलं पुरुषोऽत्र प्रतिष्ठितः ।
प्राणेश्या जीवशक्त्या स नित्यमेवाभिमर्षितः ॥ २९ ॥

सहस्राननदृक्कर्णः सहस्रपदबाहुकः ।
जागर्ति सर्वजीवानामधिष्ठाता स्वयं प्रभुः ॥ ३० ॥

आज्ञाचक्रं च द्विदलं परमात्मात्र संस्थितः ।
चिच्छक्त्यालिङ्गितः साक्षाच्छब्दार्था नामगोचरः ॥ ३१ ॥

तदूर्ध्वं तत्परं स्थानं सहस्रदलकाननम् ।
तत्कर्णिकास्थितश्चन्द्रस्तत्र हंसः प्रतिष्ठितः ॥ ३२ ॥

तत्र ब्रह्म परं दिव्यं क्षराक्षर पदातिगम् ।
नरीहं निर्गुणं साक्षान्नित्याकारं सुरञ्जनम् ॥ ३३ ॥

वेद्यं वेदातिगं चापि सर्वोपादानकारणम् ।
यत्प्राप्य नातिवर्तेत तन्मयो भवति ध्रुवम् ॥ ३४ ॥

बाह्यमाभ्यन्तरं चैवं मया तुभ्यं प्रकीर्तितम् ।
सहजानन्दिनीशक्त्या सर्वमेतद्विजृम्भितम् ॥ ३५ ॥

ब्रह्मापि तन्मयं विद्धि यत्पूर्णममृताव्ययम् ।
रामेति यस्य वै नाम तद्रूपं वापि यन्मयम् ॥ ३६ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे पश्चिमखण्डे भरतलक्ष्मणीये श्रीशुकजनकसंवादे सहजोपाख्याने पञ्चषष्टितमोऽध्यायः ॥ ६५ ॥

षट्षष्टितमोऽध्यायः

श्रीशिव उवाच

अस्याः साम्राज्यपदवी प्रमुद्वने प्रतिष्ठिता ।
तत्रस्था कालमायादीनाज्ञापयति राजवत् ॥ १ ॥

अस्याः कटाक्षमात्रेण कोटिब्रह्माण्डनिर्मितिः ।
कोटयश्च विरचीनां विष्णूनां चैव कोटयः ॥ २ ॥

कोटयश्चैव रुद्राणां शक्राणां चैव कोटयः ।
उत्पद्यन्ते विकुर्वन्ति विलीयन्ते ततस्तथा ॥ ३ ॥

एकं सृजति ब्रह्माण्डमेकं स्थापयते तथा ।
एकं संहरेत चैषा कटाक्षक्षेपमात्रतः ॥ ४ ॥

जानन्ति काल इत्येनां केचिद्वेदार्थकोविदाः ।
केचित्कर्मेति जानन्ति स्वभावमिति चापरे ॥ ५ ॥

केचित्पुरुष इत्येनां जगुरन्येऽक्षरात्मकाम् ।
केचित्तत्त्वात्मिकामेनां जगुर्ब्रह्मेति चापरे ॥ ६ ॥

केचित्पूर्णं परं ब्रह्म पुरुषोत्तमशब्दितम् ।
स्वतन्त्रेच्छं गुणाधीशं कल्याणगुणभूषणम् ॥ ७ ॥

वदन्त्येनां वेदवाक्यैः सहजानन्दिनीश्वरीम् ।
नास्याः पारं विजानन्ति ब्रह्मविष्णुमहेश्वराः ॥ ८ ॥

श्रीराम एव जानाति तत्त्वमस्या यथातथम् ।
कदाचिदेषा सहजा स्वात्मलीलामुपाश्रिता ॥ ९ ॥

सम्मोहयति तं चापि श्रीशमं किमुतेतरम् ।
अस्या लीलावशाद् रामो मानुषं भावमाश्रितः ॥
लोके मूढ इवाभाति किमुतान्यस्य वै कथा ॥ १० ॥

श्रीराजिन्युवाच

अस्या माहात्म्यमुदितं भवता यत्त्रिलोचन ।
न तत्र मम संदेहो पदात्थ भगवन् स्फुटम ॥ ११ ॥

रामोऽप्यस्या महिमानं न वेत्ति यत्तु प्रोक्तंभवता पार्वतीश ।
तन्मे चित्ते संशयोऽभून्निताान्तं यस्मादेषा तदभिन्नस्वरूपा ॥ १२ ॥

श्रीशिव उवाच

तदभिन्नस्वरूपेयं सत्यमेव न संशयः ।
तदप्येषा क्वचित्स्वेच्छामात्रा तं चापिमोहयेत् ॥ १३ ॥

प्रवक्ष्याम्यत्र ते दिव्यमाख्यानं गोपभामिनी ।
अवतारकथारूपं सहजाया महाद्भुतम् ॥ १४ ॥

आसीन्निमिकुले राजा जनको नाम धार्मिकः ।
सत्यसंधो दयानिष्ठो ब्रह्मज्ञो योगवित्तमः ॥ १५ ॥

सर्वानुकूलधिषणः सर्वस्य कमनीयधीः ।
विक्रमी शूरहृदयो याजको वेदवित्तमः ॥ १६ ॥

पूर्वोत्तरार्थकुशलः सिद्धान्तयज्ञो महामतिः ।
विवेचकः कृतश्रद्धो जितेन्द्रिय उदारधीः ॥ १७ ॥

दानकृच्छास्त्र निर्णेता निर्विकल्पो महामनाः ।
लोकोपास्तिपरः क्षान्तो विजयी तत्त्वदर्शनः ॥ १८ ॥

आस्तिकस्त्यागशीलश्च लक्ष्मीवान् दिव्यलक्षणः ।
शस्त्रास्त्रविद्यानिपुणः सर्वधर्मविशारदः ॥ १९ ॥

देवतातिथिनित्यार्चातत्परो विदितार्थकः ।
प्रमाणज्ञः सदा वीरः परदुःखनिवारकः ॥ २० ॥

रामभक्तिपरो राजा प्रजारञ्जनतत्परः ।
अनिन्दकः सुवदनः प्रसन्नः परिणामवित् ॥ २१ ॥

ईतिहर्ता वीतशोकः कालधर्मप्रचारणः ।
विचारपरमो वेत्ता अप्रमत्तः प्रतापवान् ॥ २२ ॥

सर्वभूतदयाशीलो हयमेधविशारदः ।
इन्द्रासनस्याधिष्ठाता द्यावाभूम्येकमण्डनः ॥ २३ ॥

कुलभारोद्वहनकृद्धरित्रीभरणक्षमः ।
विप्रार्चनसदाचारो महालक्ष्मीप्रसादनः ॥ २४ ॥

आत्मज्ञो वीतरागश्च ग्राम्यधर्मपराङ्मुखः ।
सत्याचारपरो नित्यं प्रत्यक्षस्वात्मदर्शनः ॥ २५ ॥

महायोगीन्द्रसंसर्गी योगचर्चापरायणः ।
महोपनिषदर्थज्ञः सर्वत्र समदर्शनः ॥ २६ ॥

तस्य पालयतः पृथ्वीं मैथिलेन्द्रस्य धीमतः ।
नाधार्मिकोऽभूज्जगति नाकृतिज्ञो न नास्तिकः ॥ २७ ॥

नासत्यवाङ् नालसश्च नावर्णाश्रमपालकः ।
नाशूरो नापि दुष्टात्मा न शठो नाजितेन्द्रियः ॥ २८ ॥

स ऊढवान् महावंश्यां राज्ञी सुनयनाह्वयाम् ।
तया सह धरित्र्या च मुमुदे राजपुङ्गवः ॥ २९ ॥

राज्ञी सुनयना देवी महालक्ष्मीप्रपूजने ।
अविच्छिन्नमतीर्जाता भर्त्रा सह नृपेण च ॥ ३० ॥

प्रसन्ना श्रीः स्वयं साक्षाच्चतुर्धा तद्गृहेऽभवत् ।
स्वयं श्रीसहजादेवी ह्येषा जाता स्वरूपतः ॥ ३१ ॥

सा सीतेति समाख्याता द्वितीया चोर्मिलाभवत् ।
तृतीया माण्डवीत्याख्या श्रुतकीर्तिश्चतुर्थिका ॥ ३२ ॥

एवं दशरथगेहे जातो रामचन्द्रः स्वयम् ।
त्रिभिर्वैलक्ष्मणाद्यैरंशैश्च कार्यविधित्सया ॥ ३३ ॥

अथो जनकराजस्य कन्यास्ता वयसान्विताः ।
जाताः स्वयंवरोद्युक्ता अप्राकृतगुणान्विताः ॥
अथ श्रीनारदोऽभ्येत्य प्रोवाच जनकं प्रति ॥ ३४ ॥

श्रीनारद उवाच

एतास्ते कन्यका राजन् साक्षाल्लक्ष्मीस्वरूपिणीः[1] ।
अप्राकृतैरेव परैः पुरुषैः पुरुषर्षभैः ॥ ३५ ॥

ऊह्याः पाणिग्रहेणेति पणं कुरु महीपते ।
इत्युक्त्वा प्रगते स्वर्गं देवर्षौ नारदाभिधे ॥ ३६ ॥

पणं चक्रे स्वयं राजा कठिनं सुविचक्षणः ।
न्यस्तं मम गृहे साक्षाद्धनुः शम्भोर्दुरासदम् ॥ ३७ ॥

य एतद्रोपयेद्वीरः स एता उद्वहिष्यति ।
इति ढक्कारवं लोके वादयामास मैथिलः ॥ ३८ ॥

ततो देशाधिपाः सर्वे राजानः समुपागताः ।
पूर्वदक्षिणपाश्चात्या उत्तरत्रनिवासिनः ॥ ३९ ॥

स्वयंवरे तु सीताया जातः कोलाहलो महान् ।
आगच्छद्भिर्महीपालैर्नानादेशनिवासिभिः ॥ ४० ॥

महान्तं रवमाकर्ण्य मिथिलायां स्वयंवरे ।
महोत्सवं च भूपानां राजा दशरथोऽब्रवीत् ॥
रामं त्रिभुवनारामं गुणरत्नमहाकरम् ॥ ४१ ॥

---

१. आर्षप्रयोगः ।

राजोवाच

उपस्थितोऽयं सुमहानुत्सवो मिथिलापुरे ।
वीरस्वयंवरोत्साहे सीतायाः सुमनोहरे ॥ ४२ ॥

यूयं रविकुलोद्भूता रघुवंश्याः कुमारकाः ।
कथं न गच्छत परं तत्र सीतास्वयंवरे ॥ ४३ ॥

वीरकृत्यमिदं तावज्जगत्यां पर्युपस्थितम् ।
शिवचापारोपणाय जनकेन कृतः पणः ॥ ४४ ॥

मैथिली तत्र लाभो वै जनकेन्द्रसुता परा ।
श्रूयते सहजा देवी चतुर्धाजनि तद्गृहे ॥ ४५ ॥

ब्रह्मादीनां सुरेन्द्राणां मुखेभ्यो यन्मया श्रुतम् ।
चतुर्धा श्रीःस्वयं जाता जनकेन्द्रस्य वेश्मनि ॥ ४६ ॥

चतुर्धा मद्गृहेऽप्यद्धा जातो रामचन्द्रः स्वयम् ।
भवानेकः स्वयं रामस्त्रयोऽमी लक्ष्मणादयः ॥ ४७ ॥

एतद्युक्तमं मन्ये विधिनैवोपपादितम् ।
मन्ये जातमिदं कार्यं रघुवंशसुमङ्गलम् ॥ ४८ ॥

अत्र प्रयतनीयं वै भवद्भिः कृतनिश्चयैः ।
एवंविधे वै विषये शूराणां सुमहोत्सवः ॥ ४९ ॥

तत्र गत्वा समारोप्यहरकार्मुकमुत्तमम् ।
कण्ठे निक्षेपय श्रीमन् सीतास्वयंवरस्रजम् ॥ ५० ॥

इत्थं नृपतिना रामस्तत्क्षणे प्रतिबोधितः ।
अङ्गीचकार सहसा मुखदाक्षिण्यमात्रतः ॥ ५१ ॥

किन्तु संस्मार तां नित्यां स्वात्मशक्तिमनन्यधीः ।
प्रमोदवनलीलानामीश्वरीं सहजेश्वरीम् ॥ ५२ ॥

इयं वृत्तं समाकर्ण्य सा मे किं नु वदिष्यति ।
तस्याः कटाक्षवशगो वेपामि स्वात्मना ह्यहम् ॥ ५३ ॥

हृदये मम सा नित्यं वसत्येव न संशयः ।
अद्य प्रमोदविपिने सा मे किं नु करिष्यति ॥ ५४ ॥

इति चिन्तासमाविष्टो न सुष्वाप दिवानिशम् ।
अन्येद्युः सरयूपारे स्वरहस्यस्थलीं प्रति ॥ ५५ ॥

जगाम यत्र सहजां नित्यं रमयति स्वयम् ।
एतद्धि वृत्तं रामस्य नापोध्यावासिभिर्जनैः ॥ ५६ ॥

ज्ञायते सखिभिश्चापि ऋते श्रीलक्ष्मणं प्रभुम् ।
तत्रासौ रममाणेऽपि दृष्टः सहजया स्फुटम् ॥ ५७ ॥

उद्विग्न इव चित्तेन पितुराज्ञां स्मरन् मुहुः।
तदा सहजया प्रोक्तः सविलासमुदारया ॥ ५८ ॥

उद्विग्न इवहे कान्त लक्ष्यसेऽद्य कुतो मया।
आविष्ट इव शोकेन केनापिधार्षितो यथा ॥ ५९ ॥

एतद्धचनुचितं भर्तुः स्वतन्त्रेच्छस्य ते प्रभोः।
एतन्मूलमहं नाथ पृच्छामि त्वां विशेषतः ॥ ६० ॥

श्रीराम उवाच

अहं त्वद्वशगो नित्यं सहजानन्दिनीश्वरि।
सीतास्वयंवरं गन्तुमुक्तः पित्रा न संशयः ॥ ६१ ॥

आवयोश्च रहःप्रेमज्ञायते नेतरैर्जनैः।
प्राकृतैर्लोकधर्मज्ञैप्राकृतमनुत्तमम् ॥ ६२ ॥

अतोऽहमुन्मना वृत्तः पितुराज्ञानपायिनी।
अनपायि च ते प्रेम कथमन्यां समुद्वहे ॥ ६३ ॥

स्वप्नेऽपि नेतरां जाने त्वां विना सहजेश्वरी।
पाशारज्जु रुभयतः पतिता मे न संशयः ॥ ६४ ॥

इति श्रुत्वा प्रियवचः सहजा प्रत्युवाच तम्।
ईषत्स्मितरुचिज्योत्स्नादीपिताक्रीडमण्डपा ॥ ६५ ॥

श्रीसहजोवाच

जनकस्य गृहे साक्षादहमेवाजनि प्रभो।
कर्तुं बहुतरा लीलास्त्वया साकं रघूद्वह ॥ ६६ ॥

त्वं चेत्प्रमोदविपिनादवतीर्णो रघोः कुले।
अवतीर्णाहमपि वै निमिचन्द्रकुले तदा ॥ ६७ ॥

उपासकः स मे राजा महिष्या सह योगवित्।
पुत्रीभावमतः प्राप्ता चतुर्धा तद्गृहेस्म्यहम् ॥ ६८ ॥

प्रथमां तु भवान् वोढा द्वितीयां लक्ष्मणः स्वयम्।
तृतीयं भरतः श्रीमाश्चतुर्थीं शत्रुसूदनः ॥ ६९ ॥

इत्येवमात्मनोंऽशैस्त्वं चतुर्भिर्भूरिविक्रमैः।
कर्ता पाणिग्रहं नाथ तन्ममैव सुमङ्गलम् ॥ ७० ॥

न जातु कश्चिदन्यस्तां वोढा सीतां स्वयं श्रियम्।
अवतीर्णां विलासार्थं मदभिन्नस्वरूपिणीम् ॥ ७१ ॥

स वै राजा निमेर्वंश्यो ज्ञान निष्ठो दृढव्रतः ।
योगी ब्रह्मविदां श्रेष्ठो भक्तिकामो बभूव ह ॥ ७२ ॥

तस्य भक्तिकलां पूर्णां कर्तुं प्रमुदकाननात् ।
अवतीर्णा स्वयमहं स्वांशनैव स्वरूपतः ॥ ७३ ॥

इति विज्ञायभगवन् सीतामुद्वह निश्चितम् ।
रमयिष्याम्यहं तेन स्वरूपेण सदा प्रिय ॥ ७४ ॥

प्रमोदकानने चाहं स्वरूपेण व्यवस्थिता ।
स्वयं श्रीसहजानाम्ना रासलीलारतास्मि च ॥ ७५ ॥

रामचन्द्ररसिकेन नित्यं साकेतगास्मि च ।
इति निश्चित्य मां कान्त सर्वत्र त्वत्स्वरूपगाम् ॥ ७६ ॥

लीलां विस्तारय स्वैरं न वै शङ्कितुमर्हसि ।
इत्थं प्रबोधितो रामो लीलामध्ये स्वयं श्रिया ॥ ७७ ॥

सीतासमुद्वाहविधौशङ्का तत्याज राघवः ।
ततः साकेतनगरे स मागत्य स्वयं प्रभुः ॥ ७८ ॥

सोत्कण्ठोऽतितरां जातो जानक्यास्तत्स्वयंवरे ।
अथाजगाम राजर्षिर्विश्वामित्रो महातपाः ॥ ७९ ॥

श्रीरामं यज्ञरक्षायै नेतुं स्वाश्रमकाननम् ।
स विज्ञाप्य महाराजं स्तुत्या दशरथं मुनिः ॥ ८० ॥

निन्ये सलक्ष्मणं राम स्वाश्रमयज्ञवाटिकाम् ।
रामं स शिक्षयामास विद्यां शस्त्रास्त्रगोचराम् ॥ ८१ ॥

धनुर्वेदं सहोपाङ्ग सरहस्यं समन्त्रकम् ।
सप्रयोगं ससंहारं सक्रमं समशिक्षयत् ॥ ८२ ॥

वायव्यं वारुणं दिव्यमाग्नेयं रौद्रमेव च ।
बाह्यं नारायणं चास्त्रं सर्वमेवोपपादयत् ॥ ८३ ॥

तमाचार्यमनुप्राप्य स्वयं रामः सलक्ष्मणः ।
वीरः शस्त्रास्त्रविद्यानां पारगामी बभूव सः ॥ ८४ ॥

एवं शिक्षितसर्वास्त्रं राममक्षुण्णविक्रमम् ।
नियोज्य यज्ञरक्षायै यज्ञौधान् समपूरयत् ॥ ८५ ॥

स जघान मखे विघ्नान् दैत्यरूपान् दुरासदान् ।
महोद्धतान् सुविक्रान्तान् दैत्यमायाविशारदान् ॥ ८६ ॥
तान् घातयित्वा गाधेयोरामेण धन्वपाणिना ।
इष्ट्वा बहुविधैर्यज्ञैः कृतकार्यो बभूव ह ॥ ८७ ॥

सा निन्ये मिथिलां रामं सीतावीरस्वयंवरे ।
जनकस्यालयो यत्र विभाति श्रीमरोन्नतः ॥ ८८ ॥

विलोक्य मिथिलालक्ष्मीं मुमुदेह सहलक्ष्मणः ।
रामः स्वयं तदा जज्ञौ रमाया नित्यसंनिधिम् ॥ ८९ ॥

पद्मोत्पलसुगन्धीनि सरांसि विपिनानि च ।
गुञ्जद्भ्रमरजुष्टानि पुष्पितद्रुमभाञ्जि च ॥ ९० ॥

राजमार्गा विपणयः प्रासादा धनिनां गृहाः ।
स्वर्णमाणिक्यरत्नौघनिर्मिता गृहदीर्घिकाः ॥ ९१ ॥

मदोद्धताश्च मातंगारणद्घण्टानिनादिनः ।
शिक्षकैः सुविनीताश्च हया नाद्यविनोदिनः ॥ ९२ ॥

इत्यादि श्रीभरैर्नद्धा मनोमोदविधायिनी ।
नैम्यस्य शुशुभेऽत्यर्थं राजधानी दिवानिशम् ॥ ९३ ॥

मुमुदाते च तां वीक्ष्य भ्रातरौ रामलक्ष्मणौ ।
गाधिसूनुमनुश्रुत्य जनकः पुरमागतम् ॥ ९४ ॥

अग्रहीदभिसंगम्य पदानि खलु भूरिशः ।
वने चोपवने पुर्यां राजमार्गेषु वेश्मषु ॥ ९५ ॥

सीतास्वयंवरोत्साहो मूर्तिमान् समदृश्यत ।
नवापि निधपस्तत्रे मूर्तिमन्तः सुसंगताः ॥ ९६ ॥

त्रैलोक्ये विततता लक्ष्मीरेकत्रैव व्यदृश्यत ।
तत्तत्कुतूहलं राजा गाधेपाय प्रदर्शयन् ॥ ९७ ॥

प्रवेशयामास गृहं कुमारौ च सुलक्षणौ ।
तौ विनीततमौ नत्या किशोरौ लोकमञ्जुलौ ॥ ९८ ॥

चिरं जीव तमित्यूचे मन्मनोरथपूर्तये ।
इमौ रघुकुलोत्तंसौ राज्ञो दशरथस्य हि ॥ ९९ ॥

कुमारौ नयनानन्दौ चतुर्णां द्वौ शिरोमणी ।
इतोऽनुजौ यौ श्रीमन्तौ भरतारिनिषूदनौ ॥ १०० ॥

[1]तावलंकुरुते देशं यत्र राजा रघूद्वहः ।
इमौ मन्मखरक्षायां प्रवीणौ सुधनुर्धरौ ॥ १०१ ॥

आगतौ तव भाग्येन अस्मिन् वीरस्वयंवरे ।
इत्युक्त्वा गाधितनयो याज्ञवल्क्यादिकान् मुनीन् ॥ १०२ ॥

---

१. आर्षप्रयोगः ।

सभास्तारान् पृथङ्नत्त्वा विश्रातो जनकालये ।
जनको राममालोक्यनवेन्दीवरकोमलम् ॥ १०३ ॥

रुद्रचापसमारोपे संदिहान इवाभवत् ।
रामः प्रदर्शयामास माधुर्यं स्वस्वरूपगम् ॥ १०४ ॥

जनकाय नरेन्द्राय लोकोत्तरगुणाकरः ।
स तस्य रूपमाधुर्यं सौन्दर्यगुणशीलताम् ॥ १०५ ॥

वीक्ष्य मेने स्वकन्याया योग्यं वरमनुत्तमम् ।
तावद्रामो गुरोराज्ञां गाधेयस्य महामुनेः ॥ १०६ ॥

अनुप्राप्य धनुःशम्भोरारोपयितुमुद्यतः ।
यावदारोपयेद् धन्वा तावद्बाहुबलोर्जितः ॥ १०७ ॥

बभञ्ज रघुशार्दूलश्चण्डीपतिशरासनम् ।
तस्य सम्भज्यमानस्य धनुषो विकटारवः ॥ १०८ ॥

दिक्कुंजराणां कर्णेषु विश्रान्तोऽतिभयानकः ।
शब्दव्याकुलिते लोके उत्पात इव चाभवत् ॥ १०९ ॥

सीतारामवरप्राप्त्या मङ्गलं चाभवत्पुनः ।
ततः सीता सखी वृन्दमध्यगा हर्षनिर्भरा ॥ ११० ॥

अवृणोद् रामभर्तारं कण्ठे जाम्बूनदस्रजा ।
यावन्तो वसुधापाला महाराजन्यपुङ्गवाः ॥ १११ ॥

समंताज्जनकागारं बाणरावणपूर्वगाः ।
तावन्तोविफलायासा बभूवुः शिवधन्वनि ॥ ११२ ॥

अलम्भि चैव रामेण कन्याकीर्तिर्जयस्तथा ।
उवाह विधिवद् रामः सीतां सहपरिच्छदाम् ॥ ११३ ॥

दत्तां जनकराजेन पाणिग्रहणकर्मणा ।
तत्राभ्युपेतो राजेन्द्रो राजा दशरथः स्वयम् ॥ ११४ ॥

तनयौ सुसमादाय भरतारिनिषूदनौ ।
ततः प्रसन्नो जनकः कन्यास्तिस्रः सुलोचनाः ॥ ११५ ॥

प्रददौ लक्ष्मणादिभ्यो मनोवाञ्छानिराकुलः ।
एवं सम्प्राप्तसर्वार्थो बभूव जनको नृपः ॥ ११६ ॥

विवाहोत्सवयोग्यानि वसूनि बहु दत्तवान् ।
यथा कीर्तिं जगुर्देवा औदार्यान्निभिभूपते ॥ ११७ ॥

भूतानि चैव भावीनि यावन्ति भुवनत्रये ।
विवाहोत्सवयोग्यानि वर्तमानानि चैव हि ॥ ११८ ॥

सीताविवाहसौख्यस्य कलां नार्हन्ति षोडशीम् ।
देवा गन्धर्वपतयो नागाश्चैव नगास्तथा ॥ ११९ ॥

नरा नार्यश्च सौख्येन बभूवुः पूर्णमानसाः ।
राजा दशरथः पुत्रान् दौरः संयोज्य सभ्रमी ॥ १२० ॥

बहुलक्ष्मीसमायुक्तः साकेतपुरमागमत् ।
धनुर्भङ्गरुषाक्रान्तं भार्गवं रामचन्द्रमाः ॥ १२१ ॥

हृत्वा स्वांशं शुद्धसत्त्वं नाभयामास जीववत् ।
तदद्भुततमं नास्ति पूर्णे श्रीपुरुषोत्तमे ॥ १२२ ॥

ज्योतींषि न प्रकाशन्ते यथाह्नि महसां पतौ ।
तथैवांशाः कलाश्चैव पूर्णे सर्वकलाश्रये ॥ १२३ ॥

सहजानन्दिनीनाथे स्वानुभावं न बिभ्रति ।
भूमितलं भूषयति रामे सर्वकलाश्रये ॥ १२४ ॥

श्रीमान् वैकुण्ठनाथोऽपि निष्प्रयोजनतां गतः ।
सर्वं प्रयोजनं चक्रे राम एव स्वयं प्रभुः ॥ १२५ ॥

स एवेन्द्रो यमश्चापि वरुणश्च कुबेरकः ।
ईशो ब्रह्मा रविश्चापि सर्वदेवमयोऽभवत् ॥ १२६ ॥

सर्वेषां कार्यमातेने स्वयमेव रघूद्वहः ।
सर्वसत्तामयी सत्ता राम एव प्रतिष्ठिता ॥ १२७ ॥

एवं नित्यश्रिया साक्षात् सीतयासहितः प्रभुः ।
आजगाम स्वबन्धूनामानन्दं जनयन् पुरीम् ॥ १२८ ॥

राजा महामनाश्चक्रे महान्तं भृशमुत्सवम् ।
गृहप्रवेशसमये वरबध्वोः सुभावहम् ॥ १२९ ॥

सिद्धगन्धर्ववर्येभ्यश्चारणेभ्यः समंततः ।
नर्तकेभ्यो गायकेभ्यो धनं बहुतरं ददौ ॥ १३० ॥

महाशया महाराज्ञी कौसल्या विहितोत्सवा ।
केकयो च सुमित्रा च पुत्रोद्वाहमहोत्सवे ॥ १३१ ॥

पुरन्ध्रीभ्योऽथ बन्धुभ्यः संगताभ्यः समंततः ।
परमानन्दमातेने वासोभूषणभोजनैः ॥ १३२ ॥

आशिषस्ताः स्त्रियः साध्व्यः प्रायुञ्जन् गुणवत्तराः ।
प्रसन्नचित्ताः प्रययुः स्वानि स्वानि गृहाणि च ॥ १३३ ॥

चतुर्लक्ष्मीस्वरूपा सा रेजे जनकनन्दिनी ।
नवोद्वाहमहोत्साहमहामाङ्गल्यभूषिता ॥ १३४ ॥

चत्वारो भ्रातरस्ताभिः श्रीभिः शोभान्विता बभुः ।
यथा कल्पद्रुमवराः कल्पवल्लीभिरन्विताः ॥ १३५ ॥
जगदानन्दनिधयः कल्याणगुणभूषिताः ।
अलंचक्रुः पितुर्गेहान् श्रीरामाद्याः स्वरूपतः ॥ १३६ ॥

तास्वागतासु लक्ष्मीषु साकेतनगरी भृशम् ।
रराजारण्यराजीव[1] वसन्तसमयश्रिया ॥ १३७ ॥
द्यौरिवेन्दुरुचा रेजे राज्यलक्ष्मीर्महीपतेः ।
सर्वसम्पन्मयं सद्म राज्यलक्ष्म्या न तादृशम् ॥ १३८ ॥
यादृशं शुशुभे ताभिः साक्षाल्लक्ष्मोभिरन्वितम् ।
ततो दिनेषु गच्छत्सु सर्वसाम्राज्यसम्पदि ॥ १३९ ॥

यौवराज्यपदे रामं स्थापयामास भूपतिः ।
समेतो भ्रातृभिः सर्वैर्युवराजपदे स्थितः ॥ १४० ॥
पितुः सर्वं राज्यधुरमवहज्जानकीपतिः ।
सर्वाः प्रजामुदिरे सर्वर्द्धिफलसंयुताः ॥ १४१ ॥
यौवराज्यस्थितेरामे नवीना श्रीरवर्तत ।
त्रैलोक्यमवहद्दीप्तिं विभूतिं परमां श्रियम् ॥ १४२ ॥

सीतादृष्टिप्रसादेन बभौ सर्वत्र मङ्गलम् ।
यावती श्रीस्त्रिजगति सर्ववस्तुसमाश्रया ॥ १४३ ॥
एकत्र संस्थिता दृष्टा साकेतनगरे तु सा ।
वर्षपूगे ततो जाते रामे रञ्जयति प्रजाः ॥ १४४ ॥
वाञ्छा दशरथभ्रास्यान्निजराज्याभिषेचने ।
ईदृशी महिषी भाग्यैर्लब्धा सीतास्तियादृशी ॥ १४५ ॥
त्रैलौक्यस्यैव भाग्येन रामो राजा भवेदिति ।
अथेकान्ते समासाद्य रामं राजीवलोचनम् ॥
उवाच वचनं प्रीतो राजा दशरथः स्वयम् ॥ १४६ ॥

राजोवाच

राम राम महाबाहो पितृपैतामहीं धुरम् ।
राज्यं श्रियं च परमां त्वं पालयितुमर्हसि ॥ १४७ ॥

प्रजानामेव भाग्येन दत्तस्त्वं वेधसा मम ।
न हीदृशोरघोर्वंशे भूतो वाथ भविष्यति ॥ १४८ ॥

---

१. °रण्यानीव–बड़ी० ।

सर्वे गुणास्त्वयि प्राप्ताः स्वत एव समुन्नतिम् ।
श्रियं च परमां प्राप्तुमसाधारण्यमेव च ॥ १४९ ॥

नेत्रानन्दसमूहाय प्रजानां भुवनत्रये ।
महामाङ्गल्यसंघाय त्वं हि राजा भविष्यति ॥ १५० ॥

अंतस्त्वामभिषेक्ष्यामि राज्येपैतामहेऽतुले ।
यौवराज्य एव भवान् सर्वा भूमिमरक्षयत् ॥ १५१ ॥

भाग्येन चैव सौभाग्यैः प्रजेशस्त्वं भविष्यसि ।
युक्ताज्ञैर्भातृभिः सार्द्धं कृत्स्नं पाहि महीतलम् ॥ १५२ ॥

अहं स्वात्मरतिं राम तवार्थं परिसाधये ।
भवादृशे वंशधुर्येसुमग्नो रूपसागरे ॥ १५३ ॥

अहो भाग्यं सदास्माकं रघोर्वंशमुपेयुषाम् ।
यद्वार्द्धकेऽपि सुखैर्वै गृहे स्वात्मजदर्शनम् ॥ १५४ ॥

इत्युक्तः प्रीतियुक्तेन राज्ञा दशरथेन सः ।
उवाच वदतां वर्यो रामः सुमधुरं वचः ॥ १५५ ॥

श्रीराम उवाच

वयं सनाथा भवता राजराजेन भूभृता ।
जननीमेव पश्येम महीमेतां महीपते ॥ १५६ ॥

तव प्रसादान्नृपते यौवराज्ये स्थितोऽस्म्यहम् ।
रञ्जयाम्येष जगतीं किं मे राज्यं ततोऽधिकम् ॥ १५७ ॥

वयं राजकुमाराः स्म भवान् पालयतु क्षितिम् ।
इतोऽधिकं सुखं नास्ति राज्यं भारः परं मम ॥ १५८ ॥

इन्द्रं यमं तथैवापि वरुणं च धनाधिपम् ।
ईशानं चैव ब्रह्माणं तथान्यांल्लोकपालकान् ॥ १५९ ॥

यः स्यात् त्वदाज्ञारहितस्तमहं नामये क्षणत् ।
विक्रान्त्या त्वत्प्रसादाच्च शक्तोऽहं सर्वसाधने ॥ १६० ॥

भूयोऽश्वमेधं वितनु यज्ञान् कुरु सनातनान् ।
वर्षे वर्षे महाराजन् सुनु सोममुदारधीः ॥ १६१ ॥

पाहि प्रजा महीपाल विपद्भ्यः पुरुषाधिप ।
एवं नो वर्द्धय सुखं किं राज्येन ततोऽधिकम् ॥ १६२ ॥

इत्युक्तः स महीपालो रामेणाक्षुण्णबुद्धिना ।
शशास कानिचिद्वर्षाण्यवनीं धर्मवित्तमः ॥ १६३ ॥

ततो मुनीनामाज्ञातो देवेन्द्रस्य च धीमतः।
रामराज्याभिषेकाय मतिं चक्रे महिपतिः ॥ १६४ ॥

शुभे मुहुर्ते त्रिदशैः सकलै सुमोदितः।
श्वोभाविनोऽभिषेकस्य पूर्वं चक्रेऽधिवासनम् ॥
यदा सा केकयसुता सख्या मन्त्रं चकार ह ॥ १६५ ॥

केकय्युवाच

सखि जानामि रामोऽयं सर्वलोकैकरञ्जनः।
प्रियो ममात्यन्तमेव मत्पुत्राद्भरतादपि ॥ १६६ ॥

प्रजाश्चानुरताः सर्वाअस्मिन्नेव गुणालये।
माधुर्यं चापि सौन्दर्यं गाम्भीर्यं वीर्यमेव च ॥ १६७ ॥

औदार्यं सौकुमार्यं च सौशील्यं कान्तिरेव च।
रामे लोकोत्तरं सर्वं पश्यामि जनरञ्जनम् ॥ १६८ ॥

मत्सुतो भरतोऽप्यस्य नित्याज्ञापरिपालकः।
अस्य भक्तिरसेनासौ किङ्करीकृतविग्रहः ॥ १६९ ॥

तृणवन्मन्यते सर्वं राज्यं स्वात्मानमेव वा।
तथापि चानुतप्येऽहं रामराज्याभिषेचने ॥ १७० ॥

विना मत्तनयं कुर्यात् कौसल्यातनयः कथम्।
राज्यं सर्वस्य लोकस्य सपत्नीवृद्धिदुःखतः ॥ १७१ ॥

तत्प्रतीकारमसकृन्नित्यं चित्ते विचारये।
रामस्वभावमाधुर्यात्किं तु नोपलभे सखि ॥ १७२ ॥

इत्युक्ता केकयाधीशकन्यया सा प्रिया सखी।
स्मारयामास वै चित्ते वरं कालान्तरे वृतम् ॥ १७३ ॥

सख्युवाच

किं न स्मरसि वै राज्ञि यद्राज्ञोऽङ्गुलिपर्वणि।
वेदना महती जाता सद्यस्त्वं तामुपाचरः ॥ १७४ ॥

तदा राज्ञा वरो दत्तस्तुभ्यं केकयि दुर्लभः।
इदानीं सखि याचस्व समयोऽयमुपस्थितः ॥ १७५ ॥

राज्याभिषेकं भरते वने निर्वासनं तथा।
रामस्येति वचोबद्धं याचस्व नृपतिं हठात् ॥ १७६ ॥

इति संस्मारिता सख्या केकयी भरतप्रसूः।
तथैवायाचत नृपं वरं कालान्तरे वृतम् ॥ १७७ ॥

नृपः सत्यवचोबद्धः श्रुत्वा तत्केकयीवचः।
भृशमुद्वेजितोऽप्यासीत्तूष्णीं शून्य इवान्तरे॥ १७८॥

दृष्ट्वा चिन्तातुरं भूपं रामः संतुष्टमानसः।
तदभिप्रायमाज्ञाय राजानं सुसमादधौ॥ १७९॥

श्रीराम उवाच

राजन् सत्यवचा भूपाः किं मे राज्येन भूयसा।
गृहे वापि वने वापि तुल्यं प्रीतिसुखं मम॥ १८०॥

इत्येवं भूरिवाक्यौघैः संतोष्य नृपतिं हठात्।
रामः प्रस्थातुमारेभे वनं भ्रात्रा स्त्रिया सह॥ १८१॥

राज्ञो मातुश्चाप्रियं तत्सत्यवाक्स्थितिहेतवे।
चकार भगवान् रामः सर्वत्र समदर्शनः॥ १८२॥

राज्यं त्यक्त्वा पुराद्यातो वनं रामः सलक्ष्मणः।
सीतया धर्मचारिण्या सहितो धर्मपालकः॥ १८३॥

यावत्त्रिरात्रं ते चक्रुर्जलमात्राशनं वृतम्।
चतुर्थे दिवसे प्राप्ते त्रयश्चक्रुः फलाशनम्॥ १८४॥

पञ्चमे दिवसे गङ्गा समुत्तीर्य रघूद्वहः।
चित्रकूटाचले चासं चक्रे परमधार्मिकः॥ १८५॥

भ्रातुः समागमभयात् कुर्वन् सत्यां गिरं पितुः।
ततः प्रतस्थौ भगवान् सीतालक्ष्मणसंयुतः॥ १८६॥

पृष्ठबद्धमहातूणो धनुष्पाणिः कृपाणभृत्।
महासौन्दर्यकलितो वनचारिभिरीक्षितः॥ १८७॥

प्रविश्य घोरं विपिनं विराधाद्यान् प्रमर्दयन्।
महापराक्रमो रामः प्राप्तः पंचवटीवनम्॥ १८८॥

ततो गोदावरीतीरे रक्षन्नाश्रममण्डलान्।
रक्षन् मुनींश्च दैत्येभ्यो रक्षोभ्यस्तत्र चावसत्॥ १८९॥

सार्द्धद्वादशवर्षेषु व्यतीतेषु वनस्थितौ।
रक्षोनाथस्य भगिनीं चक्रे विग्नां च विश्रुतिम्॥ १९०॥

तत्पृष्ठगान् राक्षसांश्च खरादीन् हतवान् सुधीः।
क्षेमं च दण्डकारण्यं कृतवान् भुजवीर्यतः॥ १९१॥

चिक्रीडे दण्डकारण्ये सीतया सहितः प्रभुः।
लक्ष्मणं वनरक्षायां नियुज्य परमोत्सवी॥ १९२॥

चक्रे रासविलासादीन् रामोगुप्ततया निशि ।
प्रमोदवनसामग्रीमाविर्भाव्य विशेषतः ॥ १९३ ॥

ततो दसमुखः क्रुद्धः श्रुत्वा शूर्पणखादशाम् ।
मानुषेणैव रामेण किमिदं समनुष्ठितम् ॥ १९४ ॥

इति संचिन्य सातङ्को बभूव रक्षसां प्रभुः ।
ततस्तस्य प्रतिकृतिं कर्त्तुं हर्तुं च तत्प्रियाम् ॥ १९५ ॥

मारीचेन समं यातो मायादीर्घरथस्थितः ।
माघशुक्लचतुर्दश्यां वीक्ष्य शून्यं तमाश्रमम् ॥ १९६ ॥

रावणस्तापसवपुर्भूत्वा भिक्षार्थमागतः ।
तं मायाविनमाज्ञाय सीता देवी मनस्विनी ॥ १९७ ॥

विवेश गार्हपत्याग्नौ रावणस्तमधर्षयत् ।
अग्निः सीतानुभावेन् भूत्वा संवर्तकाग्निवत् ॥ १९८ ॥

अतिमात्रं महाघोरस्वरूपो भक्षितुं स्थितः ।
दग्धुमुद्यन्तमनलं वीक्ष्य दुद्राव रावणः ॥ १९९ ॥

सीताछायां समादाय जगाम गगनाध्वना ।
सा राक्षसकुलं दग्धुं कृत्यारूपव्यवस्थिता ॥ २०० ॥

छायारूपा समुद्भूय गता लङ्कां निजेच्छया ।
अथ रामस्तु मारीचं हत्वा भायिनमासुरम् ॥ २०१ ॥

समुपेत्य ततो वीरौ वीक्ष्य शून्यं तमाश्रमम् ।
वायसैश्चैव कङ्कैश्च तीक्ष्णतुण्डैः समावृतम् ॥ २०२ ॥

विहीनं सीतया साध्या शोकाविष्टौ बभूवतुः ।
मूर्छितः प्रापतद्रामो धरण्यां गतचेतनः ॥ २०३ ॥

पय आनीय च ततो लक्ष्मणेन प्रबोधितः ।
भगवान् हेतुमनुजो रामः श्रीपुरुषोत्तमः ॥ २०४ ॥

अज्ञातचेष्टोमनुजैः प्राज्ञैरपि सुदुर्गमः ।
क्वचिज्ज्ञानी क्वचिन्मूढः क्वचिच्छोकसमावृतः ॥ २०५ ॥

तूणी सम्बद्ध्य वाणी च सज्जीकृत्य दृढं धनुः ।
सीतालोकाय बहुशो बभ्राम भ्रातृणा सह ॥ २०७ ॥

तरूंल्लताश्च गुल्मांश्च घनराजीन् वनस्पतीन् ।
पृच्छन् मुर्छन् मुहुर्वीरो बभ्रामबहुशोऽटवीम् ॥ २०७ ॥
दृष्टो जटायुरग्रे च कृतयुद्धोऽति रक्षसा ।
सीतार्थं रहितप्राणः कण्ठजीवः पितुः सुहृत् ॥ २०८ ॥

ततो वृत्तं समाकर्ण्य प्रियाचौरस्य रक्षसः।
भ्रातृभ्यां विहितो दाहो मृतस्य वयसोऽस्य च ॥ २०९ ॥

चक्रे तस्यान्तिकं कर्म तातेति च रूरोद सः।
हा तात ! हा पितृसखमदर्थं मृतवानसि ॥ २१० ॥

अथातितायिनौ वीरौ भ्रातरौ सुहृदौ च तौ।
रावणेन रणोद्युक्तौ बभूवतुरुदायुधौः ॥ २११ ॥

कुपितो लक्ष्मणं राम उवाच विरहातुरः।
जाया मे जीवति यदा तदा जीवतु वै जगत् ॥ २१२ ॥

ने चेत्सेश्वरं लङ्केशं भस्मीकर्तुमहं क्षमः।
समुद्रं शोषयिष्यामि धक्ष्यामि धरणीमिमाम् ॥ २१३ ॥

त्रैलोक्यं नाशयिष्यामि सदेवासुरमानुषम्।
इत्थं भयानकवचा ब्रूते रामः सदा वने ॥ २१४ ॥

लक्ष्मणस्तमुवाचाथ प्रणयाद्विहिताञ्जलिः।
आर्यैवं भवतो वाक्यं श्रुत्वाहं सभयोऽस्मि च ॥ २१५ ॥

भूमिः प्रचलिता सद्यो जलधिश्च समुत्थितः।
मेरुश्च कम्पितोऽत्यर्थं देवताश्च चकम्पिरे ॥ २१६ ॥

मान्धाता सगरश्चैव तथा राजा भगीरथः।
रघुस्तथाम्बरीषादद्या यावन्तो जनकः स्वयम् ॥ २१७ ॥

तावत्सम्पालिता भूमिर्यथा प्रित्रा स्वपुत्रकाः।
तेषां कुले भवान् जातः कीर्तिवर्द्धनकारकः ॥ २१८ ॥

सूर्यवंशोद्भवः श्रीमान् धर्मात्मा सर्वपालकः।
एकस्याविनयाद् राम हन्तुं नार्हसि वै जगत् ॥ २१९ ॥

श्रीशिव उवाच

भक्तस्य लक्ष्मणस्येत्थं वचनैः प्रससाद सः।
स्नेहेन परिरभ्यामुं भ्रातरं प्राणसम्मितम् ॥ २२० ॥

स्मित्वाऽऽघ्राय शिरस्तस्य जगाम किल सत्वरम्।
तेनैव सहितो भ्राता लक्ष्मणेन मनीषिणा ॥ २२१ ॥

उच्चावचेषु शैलेषु शिखरेषु च भूरिषु।
गह्वरेषु गुहास्वेवं गुल्मेषु च वनेषु च ॥ २२२ ॥

निकुञ्जेषु च कुञ्जेषु पर्यन्तेषु धनेषु च।
आरोहेष्ववरोहेषु भ्रातरौ खिन्नविग्रहौ ॥ २२३ ॥

परिश्रान्तौ संचरन्तौ समेषु विषमेषु च ।
पश्यन्तौ जानकीस्तेयं कबन्धालयमागतौ ॥ २२४ ॥

तद्बाहुवीर्यवशिनौ रण्डस्य तुण्डसंनिधिम् ।
दृष्ट्वा वनचरान् नीत्वा ग्रसन्तं वदनेन तम् ॥ २२५ ॥

अत्यर्थदीर्घदोर्दण्डं खड्गाभ्यां विनिकृत्य तौ ।
पातयामासतुर्भूमौ स त्यक्त्वा वपुरात्मनः ॥ २२६ ॥

बभूव दिव्यो गन्धर्वः प्रणम्य भ्रातरावुभौ ।
सीतां दिशन् गतः स्वर्गं वयुसौन्दर्यभासुरः ॥ २२७ ॥

तेनोदिष्टेन मार्गेण क्रामन्तौ दुर्गपर्वतान् ;
सज्जीकृत्य धनुर्बाणौ मन्दं मन्दमुपेयतुः ॥ २२८ ॥

ततः पम्पासरः प्राप्तौ स्नात्वा विश्रम्य तत्तटे ।
प्रणम्य मुनिसंदोहं दण्डकारण्यवासिनम् ॥ २२९ ॥

ततः प्रचलितौ पश्चात् कुर्वन्तौ विविधाः कथाः ।
मार्गे घोरतरे भूरि घोषयन्तौ धनुर्गुणम् ॥ २३० ॥

दूरस्थौ व ततो दृष्ट्वावृष्यमूकनिवासिभिः ।
शाखामृगैः पञ्चभिस्तौ वीरेन्द्रौ चललोचनौ ॥ २३१ ॥

सुग्रीवस्यनिदेशाच्च प्राप्तः पवनजोऽन्तिकम् ।
ततो मधुरया वाण्या संवादः समभूत्तयोः ॥ २३२ ॥

तदुक्तं तत्स्वरूपं च सम्यग्विज्ञाय राघवः ।
चक्रे सख्यित्वं तेनासौ कपीन्द्रेण समं दृढम् ॥ २३३ ॥

ऋष्यमूकस्य शिखरे जानक्या भूषणानि तैः ।
आनीय कपिभिर्दत्तान्यादेशात् कपिभूपतेः ॥ २३४ ॥

रामहस्तेऽर्पितान्यद्धा सख्या सौहार्ददर्शिना ।
भूषादर्शनमात्रेण मुमोह रघुपुङ्गवः ॥ २३५ ॥

सुग्रीवः कपिभिः सार्कं दुःखाभिभवमाप्तवान् ।
कृतोपकरणैः पश्चाद्विनोदः कपिभिः कृतः ॥ २३६ ॥

सर्वे बालिवधोत्साहप्रतीतिजनिकां ततः ।
तालावलीं समाजग्मुः सप्तदर्वीकराकृतिम् ॥ २३७ ॥

रामो दृष्ट्वा स्थितिं तेषां सप्तानां मर्मवित्स्वयम् ।
सज्जीकृत्य धनुर्वीरः संधाय विशिखं बली ॥ २३८ ॥

वेगेन ताडयामास सरलां तालराजिकाम् ।
बाणस्तन्मूलसंसुप्तं शापदग्धं भुजङ्गमम् ॥ २३९ ॥

हत्वा हंसवपुः कृत्वा तूणं रघुपतेर्ययौ ।
चक्रुः स्वर्गस्थिता देवाः पुष्पवृष्टिं मुदान्विताः ॥ २४० ॥

श्रीराममूर्द्धनि प्रायः पुष्पवृष्टिः सुशोभना ।
कपिभिर्दर्शितं रामः कबन्धं दुन्दुभेर्भृशम् ॥ २४१ ॥

वामेनैव करेणासौधनुष्कोट्या व्युदासितम् ।
उड्डीयाम्बरतो भूमौ दीर्घान्तरतयापतत् ॥ २४२ ॥

सोऽतिहृष्टैः कविभटैर्चितः सादरं रघुः ।
अथ सुग्रीव आश्रित्य बलं रघुपतेर्महत् ॥ २४३ ॥

बालिनो राजधानीं तां किष्किन्धापुरमागतः ।
गत्वा परिसरे गाढमास्फोट्य सुदृढं करौ ॥ २४४ ॥

कृत्वा सिंहनिनादं च मुखेनापूरयन्नभः ।
आततायिनमाहूय स्वाग्रजं तावयुध्यताम् ॥ २४५ ॥

तयोः स्वरूपसादृश्यात्तर्को रघुपतेरभूत् ।
उभयोरनयोर्मध्ये को मित्रो मम चिह्नतः ॥ २४६ ॥

इत्येवमुग्धहृदये रामे सूर्याङ्गजो रणे ।
इन्द्राङ्गजेन बलिनाऽऽताड्य विद्राविताद्भुतम् ॥ २४७ ॥

स भ्रष्टविक्रमः प्राप्तो रामस्यान्तिकमानतः ।
तर्जन्योपालभद्रामं श्वासोच्छ्वासाकुलो भृशम् ॥ २४८ ॥

पश्यन् विचकितो भूयः शत्रोरागमशङ्कया ।
विवृत्याननमुद्भ्रीतो भ्रात्रा युद्धे पराजितः ॥ २४९ ॥

आश्वासितः स रामेण हस्तस्पर्शतलालनैः ।
अभीतिदैश्च वचनैः स्वामिना भयहारिणा ॥ २५० ॥

उक्तं च भवतः साम्यान्न मया मारितो रिपुः ।
सत्यं मे व्याहृतं याहि पुनरेव निजं रिपुम् ॥ २५१ ॥

हनिष्याम्यधुना शीघ्रमित्युक्तः स्वामिना ततः ।
जगाम कलहायासौ किष्किन्धां बालिनः पुरीम् ॥ २५२ ॥

सुग्रीवमागतं ज्ञात्वा गर्जन्तं पुरसन्निधौ ।
रोषाद्वधं विनिश्चित्य सुग्रीवस्य स विक्रमी ॥ २५३ ॥

शुद्धान्तात्सम्प्रचलितो निषिद्धोऽपि च भार्यया ।
विनिर्धूतापशकुनान् बाली हठसमावृतः ॥ २५४ ॥

ततो ज्येष्ठानुजौ युद्धे दृष्ट्वान्योन्यमुपागतौ ।
रामोहृष्टतनुर्भूत्वा करे कृत्वा धनुर्वरम् ॥ २५५ ॥

स्थित्वा गुल्मान्तरे वीरः कृत्याकृत्यमचिन्तयन् ।
साक्षात्स भगवान् देवो रामः कारणकारणः ॥ २५६ ॥

बाणं प्राणहरं क्षिप्त्वा बालितं हृदयेऽवधीत् ।
यत्रासौ पतितो बाणविद्धो वानरभूपतिः ॥ २५७ ॥

रामस्तत्रागतो वीक्ष्य सदयं कर्म चात्मनः ।
संतप्तोऽनुचितं कृत्वा सान्त्वितः सामभिस्ततः ॥ २५८ ॥

सुग्रीवेणानुजेनापि बलिना च प्लवंगमैः ।
श्रीरामदृष्टिनिर्धूतसमस्तशमलः कपिः ॥ २५९ ॥

बाली रामे विलीनात्मा जगाम परमं पदम् ।
ततो राज्याभिषेकेन सुग्रीवश्चाभिषेचितः ॥ २६० ॥

ततो वार्षिकमासेषु शृङ्गे माल्यवतो गिरेः ।
उवास भातृसहितः सीताविरहकर्षितः ॥ २६१ ॥

भूयः शोकं चकारासौ तत्र संतप्तमानसः ।
अहो राज्याभिषेके मे तादृग्विघ्नो बभूव ह ॥ २६२ ॥

आजन्म सुखिनो जातं ततो मे वनसेवनम् ।
तत्राप्यभून्मे जानक्या विरहः प्राणशोषणः ॥ २६३ ॥

सीतार्थं च मृतं तातमित्रं तत्तादृशं वयः ।
अधर्माच्च हतोबाली किं नु दुखःमतः परम् ॥ २६४ ॥

इत्येवं गणयन् दुःखं चातुर्मास्यं चकर्त सः ।
अथ रामाज्ञया शीघ्रं किष्किन्धां लक्ष्मणो ययौ ।
चापतोमरभृद्वीरो भ्रूभङ्गेन तमादिशत् ॥ २६५ ॥

लक्ष्मण उवाच

यत्पादाब्जप्रसादेन प्राप्तं राज्यमकण्टकम् ।
भोगं करोषि साम्राज्यलक्ष्म्याः सुग्रीव भूरिशः ॥ २६६ ॥

सोऽरण्ये निवसन् रामो हृदयेन विदूयते ।
तवाग्रजरिपुः साक्षाद्विस्मृतो भवता स किम् ॥ २६७ ॥

तेनाख्यातमिदं श्रुत्वा जहास कपिपुङ्गवः ।
श्रीरामानुजमाश्लिष्य निन्ये शुद्धान्तमादृतः ॥ २६८ ॥

तत्रासौ तारयान्याभिर्योषिद्भिश्च प्रपूजितः ।
शिविकां तावथारुह्य पुरोगैः कपिभिर्युतौ ॥ २६९ ॥

आजग्मतुस्त्वरायुक्तौ यत्रास्ते रघुपुङ्गवः ।
कुशसंस्तरमध्यासबद्धपद्मासनः प्रभु ॥ २७० ॥

नीलोत्पलदलश्यामः स्वस्थो वल्कलचीरभूत् ।
सुलोचनः सुवदम आजानुदीर्घबाहुकः ॥ २७१ ॥

अलङ्कृतो वपुर्लक्ष्म्या बिभ्रद्भ्रुरुचोजटाः ।
तुङ्गोत्तमाङ्गशिखरः कैलासाधिपतिर्यथा ॥ २७२ ॥

तं दृष्ट्वा रघुशार्दूलं सुग्रीवाद्याः प्लवंगमाः ।
लक्ष्मणेन समं सर्वे प्रणेमुर्दण्डवद्भुवि ॥ २७३ ॥

कृताञ्जलिपुटा ऊर्ध्वमुत्थिता देशकारिणः ।
परिरेभेऽथ सुग्रीवं रामो राजीवलोचनः ॥ २७४ ॥

समुपावेशिताः सर्वे रामेण कपिपुङ्गवाः ।
अन्योन्यविक्रमं दृष्ट्वा तावेकासनसंस्थितौ ॥ २७५ ॥

अङ्गदश्चात्मनिकटे रामेण स्थापितो भृशम् ।
सम्मानितश्च नितरां सादरैर्वचनादिभिः ॥ २७६ ॥

ततः कथय आहूता यावन्तो भूमिमण्डले ।
समाययुस्ते पुरतो हरिणा चक्रवर्त्तिना ॥ २७७ ॥

सुग्रीवस्यादेशकरा नानाजातय उद्धता ।
श्वेता रक्ताः पिङ्गाश्च नीलाः कृष्णाश्चकर्बुराः ॥ २७८ ॥

स्थूलाः स्थूलकराः शैलसदृशाः कुञ्जरोपमाः ।
अरुणास्याः कालमुखाः पिङ्गाक्षा बहुवर्णकाः ॥ २७९ ॥

विकित्रवेगाः कपयो लाङ्गलातपवारणाः ।
आययुः कोटयस्तत्र लङ्केशकुलनाशनाः ॥ २८० ॥

बद्धकक्षोरकाः क्रूरा आत्मीयोज्झितजीविताः ।
स्वामिनोऽर्थे पतङ्गाभाः सर्वेयुद्धविशारदाः ॥ २८१ ॥

कृतास्फोटाः कपिवरा मुक्तौकस उपागताः ।
दिनेशवंशतिलकस्यार्थे प्रसभमुद्यताः ॥ २८२ ॥

संग्रामाङ्गणगाः शक्ता हन्तुं प्रतिबलं क्षमाः ।
देवांशा हरयः सर्वे हरीशसहितास्तथा ॥ २८३ ॥

विधेराज्ञाकराः सर्वे रामं सेवितुमागताः ।
रामाभिधं परं साक्षात् पूर्णश्रीपुरुषोत्तमम् ॥ २८४ ॥

एतेषां गणना प्रोक्ता महापद्मनवद्वयम् ।
ततोऽपि चाधिका वीराः समायाताः प्लवंगमाः ॥ २८५ ॥

धीमन्तो बलिनश्चैव बुद्धिविक्रमशालिनः ।
श्रेष्ठाः स्वामिहिताश्चैव सुग्रीवस्य निदेशतः ॥ २८६ ॥

कृत्वा प्रणामं रामस्य सर्वे तत्र समाययुः ।
अथ केचित्कपिश्रेष्ठाः सीतालोकसमुत्सुकाः ॥ २८७ ॥

मासैकमवधिं कृत्वा ययुस्ते सर्वतो दिशम् ।
मासाधिकं व्यतिक्रान्ता दण्ड्याः स्युर्नात्र संशयः ॥ २८८ ॥

नलनीलमरुत्पुत्रप्रमुखा ऋक्षपुङ्गवाः ।
वृत्वेशमङ्गदं ते वै कपयो दशकोटयः ॥ २८९ ॥

याम्यां दिशिगताः सर्वे सीतालोकनतत्पराः ।
मासावधिर्लङ्घितस्तैः प्राप्तास्ते कपयस्ततः ॥ २९० ॥

महेन्द्रमचलं नाम तीरे नीरनिधेर्भृशम् ।
प्रायोपवेशमास्थाय संस्थिताः कुशसंस्तरे ॥ २९१ ॥

सम्पतिर्माम विहगस्तत्र तैः सङ्गतोऽभवत् ।
कपिभ्यस्तेन कथितं सीतावृत्तं यथातथम् ॥ २९२ ॥

लङ्केशोपवने सीता शोकाविष्टा वियोगिनी ।
अशोकस्य तरोर्मूले वसतीति निबोधत ॥ २९३ ॥

तन्निवेदितमाकर्ण्य दशमे मासि मार्गके ।
दशम्यां विहितोत्साहो हनूमान् हरिवासरे ॥ २९४ ॥

संध्यायामन्तरायाणि हत्वा पथि पयोनिधेः ।
शतयोजनविस्तीर्णं पय उल्लङ्घ्य विक्रमी ॥ २९५ ॥

लङ्कां ययौ सूक्ष्मवपुरदृश्यात्मा महासुरैः ।
रात्रेः पाश्चात्यप्रहरे ददर्श नगरीं ततः ॥ २९६ ॥

तस्मिन्नुपवने सीता[1]मशोकतरुसमाश्रिताम् ।
प्रलपन्तीं रामनाम महाविरहदुःखिताम् ॥ २९७ ॥

[2]ददर्शावतीर्य विटपात्तदन्तिकमुपागतः ।
मूर्ध्ना कृतप्रणामोऽस्यै निबद्धाञ्जलिरब्रवीत् ॥ २९८ ॥

हनुमानुवाच

अम्बाम्ब मातर्जनकि भक्तो रघुपतेरहम् ।
अङ्गुलीयकमेतद्धि प्रभोस्तुभ्यं समर्पये ॥ २९९ ॥

१–२. पादेऽस्मिन्नक्षराधिक्यमार्षः ।

इति प्रत्यर्प्य हनुमान् श्रीरामस्याङ्गुलीयकम् ।
तस्याः शिरोभूषणं तच्चूडारत्नं प्रगृह्य सः ॥ ३०० ॥

पुनराश्वास्य तां देवीं ततो वीरः सुनिर्गतः ।
भग्नं तेन त्रयोदश्यां रावणस्योत्तमं वनम् ॥ ३०१ ॥

क्रव्यादाः शतशस्तेन घातिता भुजविक्रमाः ।
स आबद्धश्चेन्द्रजिता ब्रह्मास्त्रेण भृशं रणे ॥ ३०२ ॥

चतुर्दश्यां ततः पुच्छे नियुक्तासुच्छपावकैः ।
प्रज्वालिता तेन लङ्का परिभूतः पुलस्त्यजः ॥ ३०३ ॥

महेन्द्रमचलं प्राप्तो राकायां पवनात्मजः ।
कपीनां पुरतस्तेन सर्वं चरितमीरितम् ॥ ३०४ ॥

सिद्धार्था हरयः सर्वे महेन्द्रगिरितः पुनः ।
व्यावर्तिताः पञ्चदिनैरागताः पथि सत्वराः ॥ ३०५ ॥

षष्ठेऽह्नि तैर्मधुवनं सर्वमालोडितं मुहुः ।
सप्तम्यां च मरुत्सूनुः सीतामस्तकभूषणम् ॥ ३०६ ॥

ददौ रघुपतेस्तच्च हृदये निदधे प्रभुः ।
मुमोह विरहेणतंस्ततोऽष्टम्यां शिरःस्थिते ॥ ३०७ ॥

सूर्ये प्रयाणमातेने उत्तराफाल्गुनीयुते ।
जयाय जयिनां श्रेष्ठो रामः कपिबलैर्वृतः ॥ ३०८ ॥

अधाज्जलनिधेस्तीरे स्कन्धावारनिवेशनम् ।
सिन्धोस्तीरे स्थितिरभूत्पौषस्यादद्यं दिनत्रयम् ॥ ३०९ ॥

चतुर्थीदिवसे प्राप्तः शरणं च विभीषणः ।
तदैव रघुनाथेन कृतोलङ्काधिपश्च सः ॥ ३१० ॥

अभिषिच्य स्वयं तावत् पयसा तस्य मूर्द्धनि ।
सिन्धोरुल्लङ्घने मन्त्रः सप्तम्यां तैः कृतस्तः ॥ ३११ ॥

रामश्चलक्ष्मणश्चैव सुग्रीवश्च विभीषणः ।
हनुमान् कपयश्चान्ये निबद्धाञ्जलयोऽखिलाः ॥ ३१२ ॥

सिन्धुं ययाचिरेमार्गं यावद्दिनचतुष्टयम् ।
भूत्वा निरशताः सर्वे याचन्तः सरितां पतिम् ॥ ३१३ ॥

अथ क्रुद्धोऽब्रवीद् रामः सौमित्रे धनुरानय ।
अहमेकेन बाणेन जलधिं खलु शोषये ॥ ३१४ ॥

रामं कुपितमालोक्य वेपमानः सरित्पतिः ।
सद्यएवाविरभवत् प्रियोपायनसंयुतः ॥ ३१५ ॥

शान्ति निनाय शनकैः सामभी रघुपुङ्गवम् ।
सप्रश्रयैश्च वचनैः सेतूपायमदर्शयत् ॥ ३१६ ॥

साश्चर्यैः कपिशार्दूलैर्वीक्ष्यमाणो जगाम सः ।
सहर्षो निलयं प्राप्तो मुदिताः कपयोऽभवन् ॥ ३१७ ॥

ते सर्वे कपयः स्वीयशिरसा सर्वपर्वतान् ।
उच्चैः शृङ्गान् गण्डशैलसहितान् गगनोन्नतान् ॥ ३१८ ॥

नीत्वाक्षिपंस्तोयनिधौ रामनामाङ्कमण्डितान् ।
ते युक्तिपूर्वं निहिता नलहस्तेन वारिधौ ॥ ३१९ ॥

दशम्यां सेतुरारब्धस्त्रयोदश्यां प्रपूरितः ।
दशयोजनविस्तीर्णः शतयोजन लम्बितः ॥ ३२० ॥

तेनोत्तीर्णाः कपिभटाः सर्वे भूतादिने क्रमात् ।
न्यवेशयद् रघुपतिः सुवेलपर्वते बलम् ॥ ३२१ ॥

निरुद्धय लङ्काहृदयं स्थितो रामो यथान्तकः ।
पूर्णादिनाख्यिभिर्घस्रैः सर्वे ते कपिसंचयाः ॥ ३२२ ॥

सिन्धोर्जलं समुत्तीर्यं पारंजग्मुः समंततः ।
गर्जन्तो भीषणैर्नादैस्त्रासयन्तो रिपून् स्थिताः ॥ ३२३ ॥

लङ्काप्राकारमाक्रम्य कोष्टाट्टालकगोपुरान् ।
शिखरांश्च समारुह्य संस्थिताः परितः पुरीम् ॥ ३२४ ॥

तृतीयां तु समारभ्य दशम्यन्तदिनाष्टकम् ।
लङ्कायाः परितो जाता प्लवंगानां बलस्थितिः ॥ ३२५ ॥

एकादश्यां कपिबलप्रेक्षार्थं रावणेरितौ ।
शुकश्च सारणश्चैव प्राप्तौ बद्धौ च वानरैः ॥ ३२६ ॥

द्वादश्यां सर्वद्वारेषु कृत्वाशाखामृगान् प्रभुः ।
सेनापतींस्तथादिश्योत्तरे द्वारि स्वयं स्थितः ॥ ३२७ ॥

तत्राट्टालक आगत्य सच्छत्रो रावणः स्थितः ।
अर्द्धचन्द्रेषुणा रामस्तस्य छत्रं समाच्छिनत् ॥ ३२८ ॥

अथ मन्दोदरी नाम तस्यार्द्धाङ्गनिवेशिनी ।
अब्रवीद्वचनं तथ्यं हितं चामृतसम्मितम् ॥ ३२९ ॥

मन्दोदर्युवाच

पश्याधीश दिशो यावत् तावद्रघपतेश्चमूम् ।
[1]पश्याम्येतत्प्रातिकूल्यं नो ये मज्जन्तिजले क्षणात् ॥ ३३० ॥

---

१. पादेऽस्मिन्नक्षराधिक्यमार्षः ।

तरन्तितेऽपि पाथोधौ प्रस्तराः शैलरूपिणः ।
करचालनमात्रेण ये यस्यन्ति मुहुर्मुहुः ॥ ३३१ ॥

तैरियं नगरी नाथ वेष्टिता सर्वतोदिशम् ।
भक्ष्यं यद्रक्षसां तौ च प्राप्तौ क्षयकरौ रिपू ॥ ३३२ ॥

यत्सीमा नामरैर्लङ्घ्या लङ्घिता सापि वानरैः ।
यः सोदरः सोऽपि यातः संगं त्यक्त्वा द्विषोऽन्तिकम् ॥ ३३३ ॥

मन्ये तदधुना जातः कोऽपि कालविपर्ययः ।
येनैकेन हताश्चान्ये राक्षसा ये खरादयः ॥ ३३४ ॥

वाली च निहतो येन ते त्वद्वीर्यबलाधिकाः ।
तस्यापश्यत एवास्य प्रियां हृत्वा त्वमागतः ॥ ३३५ ॥

सोऽयं सेतुं विधायाब्धौ त्रिकूटाचलमागतः ।
कथमन्धायसे नाथ पश्यन् विंशतिलोचनैः ॥ ३३६ ॥

मुक्त्वा शिरांसि भवतश्चिच्छेद छत्रसंहतिम् ।
मन्ये पुलस्त्यवंशेऽस्मिन् रामेण वै कृता कृपा ॥ ३३७ ॥

एकस्तेऽवसरोऽद्यापि संधिं कर्तुं महात्मना ।
समर्पय प्रियतमां रामस्यास्य पतिव्रताम् ॥ ३३८ ॥

जीवन्तु राक्षसाः सर्वे लङ्कापुर्याः शमस्तु च ।
जानासि नाथ सकलं बाह्वोर्यद्बालिनोबलम् ॥ ३३९ ॥

एकेन मार्गणेनैष रामेण निहतः क्षणात् ।
तस्य प्रियां च रामस्य हृत्वा त्वं कुधियागतः ॥ ३४० ॥

उत्पादितेयं भवता कृत्या रक्षःकुलक्षये ।
इति मन्दोदरी प्रोच्य विरता कुधियोऽन्तिके ॥ ३४१ ॥

अथ तौ वानरैर्वद्धौ शुकसारणसंज्ञकौ ।
रामस्यादेशतोमुक्तौ प्राप्तौ तौ रावणान्तिकम् ॥ ३४२ ॥

तावूचतुः कपिपते रूपं विस्फूर्जितं महत् ।
जृम्भन्ते वानरवरास्त्वत्पुरोग्रासहेतवे ॥ ३४३ ॥

मैन्दं पश्य प्रभो क्रुद्धस्त्वां पश्यति स उन्मुखः ।
द्विविदोऽयं पुरीमेतां ग्रसन्निव मुखे स्थितः ॥ ३४४ ॥

नीलोऽयं वानरपतिः प्रहस्तमवृणोच्च यः ।
हन्तुं कपीनां पुरतः संग्रामविजयी बली ॥ ३४५ ॥

नलोऽयं वानरवरः सेतुर्येन विनिर्मितः ।
एष चाङ्गद ऊर्ध्वाक्षस्तातेन सदृशो बली ॥ ३४६ ॥

अयं ऋक्षेश्वरो वीरो जाम्बवान् बुद्धिमान् बली ।
निजसेनास्थितो भाति वृद्धो युद्धविशारदः ॥ ३४७ ॥

एकैकोऽप्रतिमो ह्येषां वीर्येण च बलेन च ।
शक्त उर्वीं समुद्धर्तुं का लङ्का तृणपुञ्जवत् ॥ ३४८ ॥

तव चित्ते मतिर्मा भूदेते वानरमर्कटाः ।
आदेशाद्राघवपतेः कोट्यन्तः परितः स्थिताः ॥ ३४९ ॥

एते कपिवरा नाम सर्वदेवपराक्रमाः ।
निरीक्षतां मया चापि रामो वीरः स्वयं स्थितः ॥ ३५० ॥

अक्षहावानरपतेरुत्संगे कृतमस्तकः ।
त्वत्सोदरोक्तं श्रृण्वानस्तस्याङ्कस्थपदाम्बुजः ॥ ३५१ ॥

आस्ते सुवर्णहरिणचर्माध्यास्य समास्थितः ।
पश्यंस्त्वद्वंशनाशाय विशिखं लक्ष्मणाहृतम् ॥ ३५२ ॥

तस्माद्भवान् गर्हं कर्म कृतवान् नात्र संशयः ।
निधनायात्मनः पीतं विषं हालाहलं त्वया ॥ ३५३ ॥

जानकीं देहि लङ्का च यदि वाञ्छसि जीवितुम् ।
उदितोऽयं धूमकेतुः क्षयाय ननु रक्षसाम् ॥ ३५४ ॥

तस्माच्छीघ्रं सुतैः सार्द्धं प्रयाहि स्वयमन्यतः ।
विज्ञायास्य बलं धीमान् भ्राता ते शरणं गतः ॥ ३५५ ॥

तस्मै लङ्का प्रसादेन दत्ता नैवात्र संशयः ।
किशोरेण हतायेन ताडका नाम राक्षसी ॥ ३५६ ॥

मुक्ता तेऽवरजा येन ह्रिया तव पितुर्मुनेः ।
निष्कृन्त्य नासिकाकर्णं वीरेन्द्रेण महात्मना ॥ ३५७ ॥

कस्तस्याप्यनयं कृत्वा जीवेत खलु राक्षसः ।
शिरःश्रेणी क्षितिं गन्ता तव दाशरथेः शरैः ॥ ३५८ ॥

तयोरित्थं वचः श्रुत्वा प्रहस्य खलु रावणः ।
आहूय सकलान् रक्षश्चमूनाथान् सुनिश्चितम् ॥ ३५९ ॥

त्रयोदशीं समारभ्य यावत्पर्वकुहूदिनम् ।
तावत्संख्यां विधायैषां यथास्थानमरोपयत् ॥ ३६० ॥

माघस्याद्यदिने प्राप्तो रामस्यादेशतोऽङ्गदः ।
दूतो भूत्वा महाबुद्धिः सभां रक्षःपतेर्ययौ ॥ ३६१ ॥

उवाच तत्र साक्षेपं रावणस्यपुरो वचः ।
धर्मद्वारेणमार्गेण सबान्धवपशु व्रज ॥ ३६२ ॥

शृणु रावणलङ्कायां स्थापितोऽत्र विभीषणः ।
श्रीरामेण महावीरः शिरोमुकुटभूषिणा ॥ ३६३ ॥

इति कर्णकटून्यद्धा वचांस्याकर्ण्य रावणः ।
कुद्धोऽङ्गदस्य बन्धाय राक्षसानादिदेश ह ॥ ३६४ ॥

हत्वा बालिसुतः सर्वान् बलेन बलिनो रिपून् ।
भित्त्वा राजांशरोवेश्म गर्जन् यातो नमोऽध्वना ॥ ३६५ ॥

माघे शुक्लद्वितीयातः सप्तम्यवधि चा भवत् ।
अतीव संकुलं युद्धं रक्षोवानरसैन्ययोः ॥ ३६६ ॥

युद्धावहारः समभूत् ततस्तत्र दिनद्वयम् ।
द्वादश्यां हनुमान् जह्रे धूम्राक्षंनाम राक्षसम् ॥ ३६७ ॥

तेनैव निहतश्चक्रत्रयोदश्यां निशाचरः ।
चतुर्दशीं समारभ्य नीलेन दिवसैस्त्रिभिः ॥ ३६८ ॥

बलवान् निहतो युद्धे प्रहस्तो नाम राक्षसः ।
ततस्त्रिभिर्दिनैर्यावच्चतुर्थी दिन मुल्बणैः ॥ ३६९ ॥

बाणैर्विद्रावितो युद्धे रामेण खलु रावणः ।
पञ्चमीदिवसाद्धस्तैश्चतुर्भिरनुजो बली ॥ ३७० ॥

कुम्भकर्णः सुनिद्राणो रावणेन प्रबोधितः ।
तदा युद्धावहारोऽभूदन्योन्यं सेनयोर्द्वयोः ॥ ३७१ ॥

षड्भिर्दिनैः कुम्भकर्णो रामेण निशितैः शरैः ।
छित्त्वावयवशो युद्धे धरण्यां विनिपातितः ॥ ३७२ ॥

अस्मिन् युद्धे तु बहवो भक्षिताः कपिसंचयाः ।
श्रुत्वा सहोदरवधं रावणः शोकपीडितः ॥ ३७३ ॥

विललाप महादुःखी कृष्णे पञ्चदशीदिने ।
तदा युद्धावहारोऽभूद्विलापे रावणस्य तु ॥ ३७४ ॥

फाल्गुनादथदिनारभ्य चतुर्थीदिवसावधि ।
नरान्तकमुखाः पञ्च घातिता वीरराक्षसाः ॥ ३७५ ॥

पञ्चमीदिवसाद्धस्तैरतिकायस्त्रिभिर्हतः ।
अष्टम्यां निहतौ कुम्भनिकुम्भौ पञ्चभिर्दिनैः ॥ ३७६ ॥

मकराक्षश्च कपिभिश्चतुर्भिर्दिवसैर्हतः ।
संतर्प्याग्निमथ प्राप्य नभश्चरमहारथम् ॥ ३७७ ॥

कृष्णाद्वितीयादिवसे रात्रौ शक्रजिता जितम् ।
ओषध्यानयनैर्यावत्तृतीयासप्तमीदिनम् ॥ ३७८ ॥

पञ्चाहं कृतवान् रामो युद्धावहरणं पुनः ।
अष्टमीदिवसात्षड्भिर्दिवसैर्विचरन् रणे ॥ ३७९ ॥

लक्ष्मणेन युद्धं कुर्वन्निन्द्रजिद्विक्रमी हतः ।
ततो [1]भूतादिने शोकाद् रुरोद खलु रावणः ॥ ३८० ॥

युद्धावहारः समभूद्दिनमेकं सुदुःखतः ।
पञ्चदश्यां ततः प्राप्तो रावणो राक्षसैः सह ॥ ३८१ ॥

युद्धाय वानरान् निघ्नन् कुर्वन् विक्रममुल्बणम् ।
चैत्रादद्यदिवसात्पञ्चदिवसे राक्षसाधिपाः ॥ ३८२ ॥

क्षयं नीताः शरै रामलक्ष्मणाभ्यां सुदारुणाः ।
षष्ठीदिवसतोऽष्टम्यां महापार्श्वादयोहताः ॥ ३८३ ॥

लक्ष्मणो हृदि निर्भिन्नः शक्त्या रावणमुक्तया ।
मूर्छितोन्य पतद्भूमौ नितरां शक्तिपीडितः ॥ ३८४ ॥

व्यद्रावयद्रणाद्रामो दशास्यं नवमी दिने ।
विशल्यकरणीं दिव्यामौषधिं हनुमांस्ततः ॥ ३८५ ॥

द्रोणाद्रेरानयत्तस्याः स्पर्शादासीद्विशल्यकः ।
युद्धावहारः समभूत्ततश्च दशमीदिने ॥ ३८६ ॥

रात्रौ युद्धमभूद्भूयः प्रविश्य कपिभिस्ततः ।
लङ्का प्रज्वालिता स्वर्गाद्रथं मातलिरानयत् ॥ ३८७ ॥

तमास्थाय ततो रामो हन्तुं दशमुखं ययौ ।
द्वादश्या दिवसाद् यावद्भूतामष्टादशैर्दिनैः ॥ ३८८ ॥

रामरावणयोर्युद्धे रामेण रावणो हतः ।
इत्थं त्रिजगतां शल्यः कण्टकोऽमरराड्जयी ॥ ३८९ ॥

अन्तं नीतो दशमुखः श्रीरामेण महौजसा ।
ततो देवगणाः सर्वे हर्षसम्भृतमानसाः ॥ ३९० ॥

कुसुमैः कल्पतरुजैः श्रीरामं समवाकिरन् ।
माघशुक्लद्वितीयातो यावद्भूतादिनं मधोः ॥ ३९१ ॥

सप्ताशीति दिनान्यासीद् युद्धं पञ्चदशैर्विना ।
वानस्पत्यदिनेष्वासीत्तेषां दाह क्रिया ततः ॥ ३९२ ॥

वैशाखादद्यदिने रामः सुवेलं नाम पर्वतम् ।
जगाम वानरैः साकं जित्वा लङ्काधिपं सुधीः ॥ ३९३ ॥

---

१. चतुर्दशी टि०–बड़ौ० ।

वादित्रगीतमाङ्गल्यैर्लङ्कापुर्यां विभीषणः।
राज्याभिषेकविधिना स्थापितो रामसेवकः ॥ ३९४॥

आनीता च पुरात् सीता श्रीमत्सौमित्रिणा सती।
अशोकवनिकामध्याद् रामविश्लेषकर्षिता ॥
तृतीयादिवसे रामः सीतां शुद्ध्यर्थमूचिवान् ॥ ३९५ ॥

श्रीराम उवाच

जानामि नित्यसंशुद्धां त्वामहं जनकात्मजे।
न ते लीलां विजानन्ति ब्रह्मादद्या अपि देवताः ॥ ३९६ ॥

इमां लीलां त्वमकरोर्भूभारक्षयहेतवे।
राक्षसा वानराश्चैव संख्यातीता मह्रीतले ॥ ३९७ ॥

त्वया कृतः क्षयस्तेषां रावणाहरणच्छलात्।
धर्मस्य स्थापनार्थाय भक्तिपुष्ट्यर्थहेतवः ॥ ३९८ ॥

तथापि जगदज्ञानान्मा नो निन्द्यात् कदाचन।
अतस्त्वां शोधयिष्यामि दीप्तेऽग्नौ गार्हपत्यके ॥ ३९९ ॥

इति पत्युर्वचः श्रुत्वा पाणौ पार्णि प्रगृह्य च।
निनाय सा सुवेलादेर्महागह्वरकाननम् ॥ ४०० ॥

विमानं तत्र वै दिव्यमाजगाम महोज्ज्वलम्।
तमारुरुहतुस्तौ च दम्पती ललनाज्ञया ॥ ४०१ ॥

रामो विमानमारुह्य ललनां न व्यलोकत।
विमानवर्यं तद्दिव्यं जगाम व्योमवर्त्मना ॥ ४०२ ॥
सीताकुञ्जं सरय्वां वै रमणीयं प्रतिष्ठितम्।
यत्र सा काञ्चनीभूमिर्मणिरत्नमहोज्ज्वला ॥ ४०३ ॥

प्रमोदविपिनं नाम वनं यत्र मनोरमम्।
अनेककुञ्जपुञ्जाढ्यं गुञ्जद्भ्रमरसंकुलम् ॥ ४०४ ॥

कूजत्कोकिलमानन्दि कौककेलिगणावृतम्।
अनेककल्पवृक्षाढ्यमनर्घ्यरामणीयकम् ॥ ४०५ ॥

यत्र श्रीसहजानन्दरूपेणैषा व्यवस्थिता।
कल्याणगुणसंदोहा प्रेमानन्दस्वरूपिणी ॥ ४०६ ॥

ब्रह्मानन्दं तृणीकुर्वद्भक्तसंदोहभूषिता।
दिव्यप्रासादवरगा कल्पवृक्षतलस्थिता ॥ ४०७ ॥

मणिवेदीलसत्स्वर्णरत्नसिंहासनस्थिता ।
महारत्नासनवरस्थितानेकसखीवृता ॥ ४०८ ॥

तत्प्रमोदवनं तस्याः कोणाष्टकसमन्वितम् ।
पूर्वं कृष्णवनं नाम ततो राधावनाभिधम् ॥ ४०९ ॥

तृतीयं वापि वैकुण्ठं रमावैकुण्ठकं ततः ।
ततः श्रीरामवैकुण्ठं षष्ठं सीतानिकेतनम् ॥ ४१० ॥

सप्तमं सुखितागारमष्टमं सहजास्पदम् ।
तन्मध्ये तन्महारम्यं प्रमोदवनमुत्तमम् ॥ ४११ ॥

यत्र श्रीसहजारामौ युग्मत्वेन व्यवस्थितौ ।
महासाम्राज्यगुणभृ नित्यलीलारसास्पदौ ॥ ४१२ ॥

पर्यन्ततः सखीवृन्दं स्वस्वकुञ्जप्रतिष्ठितम् ।
रामा श्यामा च सापत्न्यौ श्रीरामरतिनन्दिते ॥ ४१३ ॥

प्रमोदविपिने ताभ्यां रमते रामचन्द्रमाः ।
पूर्णः सर्वगुणाधीशः शरत्पूर्ण इवोडुपः ॥ ४१४ ॥

तं कुञ्जं स समासाद्य विमानादवतीर्य च ।
दिव्यं श्रीसहजानन्दासदनं वीक्ष्य विस्मितः ॥ ४१५ ॥

तस्याः सखीजनैर्हृष्टैः श्रीरामोऽन्तः प्रवेशितः ।
प्रविश्य सीताकुञ्जेऽसौ महासौभाग्यमण्डिते ॥ ९१६ ॥

अपश्यत्तत्र तस्याश्च महासाम्राज्यसम्पदम् ।
कालशक्तिं समादिश्य माया शक्तिं च वश्यगाम् ॥ ४१७ ॥

सृजति स्थापयत्यत्ति सहजानन्दिनी स्वयम् ।
मूलं सर्वावताराणां स्वयमेव प्रतिष्ठिता ॥ ४१८ ॥

अशेषगुणसंदोहवशीकारविधायिनी ।
ब्रह्माणश्चापि विष्णेश्च रुद्रस्य च विधायिनी ॥ ४१९ ॥

कटाक्षक्षेपमात्रेण कोटिब्रह्माण्डकारिणी ।
सप्तस्वर्गमहास्थानं सप्तपातालसंस्थितिः ॥ ४२० ॥

चिदानन्दकलापूर्णा गुणातीता गुणेश्वरी ।
कारणं कारणानां च साधिपाधिपरूपिणी ॥ ४२१ ॥

उपादानं निमित्तं च सर्वाधिष्ठानरूपिणी ।
आधेय विश्वरूपा च रामणीयकविग्रहा ॥ ४२२ ॥

शृङ्गाररसमाधुर्यमयी प्रेमसुखाकृतिः ।
एकापि सा द्विधाभूत्वा सहजा रामरूपिणी ॥ ४२३ ॥

रमणं रमयत्यन्तर्महाभावरसोदधिः ।
तादृशीं तां स्वयं वीक्ष्य सहजानन्दिनीश्वरीम् ॥ ४२४ ॥

विस्मितोऽभूद् रामचन्द्रः क्षणं निर्निमिषेक्षणः ।
समुत्थाय ततः सा तं स्वासनात्सहजेश्वरी ॥ ४२५ ॥

अस्थायपद्दक्षभागे स्मितशोभिमुखाम्बुजा ।
उवाच रमणं रामं रमणी नित्यसंगता ॥ ४२६ ॥

कान्त त्वयाहं सततं संगता नित्यकेलिनी ।
प्रमोदवनमध्यस्था रमामि वनकेलिभिः ॥ ४२७ ॥

न मां रक्षोऽधिपोजह्रे नाहं लङ्कां गताविभो ।
न च मे विरहो जातो न च मां नीतवान् भवान् ॥ ४२८ ॥

भवान् किं नैव जानाति प्राणनाथ स्वकां गतिम् ।
मानुषीं गतिमाश्रित्य मूढवत्किनु दृश्यसे ॥ ४२९ ॥

भूमेर्भारविनाशाय प्रमोदवनमध्यतः ।
अंशेनास्म्यवतीर्णाहं चतुर्धा जनकालये ॥ ४३० ॥

त्वमयीश रामचन्द्रः स्वयं दशरथालये ।
अवतीर्णोऽसि भगवान् पुराणपुरुषोत्तमः ॥ ४३१ ॥

आवयोर्विविधां लीलां जनागास्यन्ति भूतले ।
मुक्तये सर्वभूतानां साधूनां चानुरक्तये ॥ ४३२ ॥

अत्रस्थावपि चावां वै कुर्वहे कोसलापुरे ।
लीलां सर्वस्य सुखदां तथान्यत्र निजालये ॥ ४३३ ॥

न चैवानुप्रपन्नं नौ किमपीहात्मकेलिनोः ।
नित्यात्मनोर्व्यापकयोः परब्रह्मस्वरूपिणोः ॥ ४३४ ॥

अथापि भवतोक्तं यत्प्रिय मामकशुद्धये ।
तत्रावजाने भगवंल्लोकलीलानुरोधतः ॥ ४३५ ॥

भवान् पुराणधर्मज्ञो मर्यादापुरुषोत्तमः ।
उपासीनो लोकमेव मा मे कुत्सां करोत्विति ॥ ४३६ ॥

श्रीशिव उवाच

इति तस्या वचः श्रुत्वा रामस्तत्वविदां पतिः ।
उवाच परमं सीतां सहजानन्दकुञ्जगाम् ॥ ४३७ ॥

न ते स्वरूपमाहात्म्यं वेदानामपि गोचरः ।
यत्र देवा विमुह्यन्ति शब्दः किं तत्र शक्नुयात् ॥ ४३८ ॥

स्वात्मैकमात्रवेदद्यासि सहजानन्दिनी स्वयम् ।
यल्लीलागुणकर्माणि जगद्विस्मापयन्ति हि ॥ ४३९ ॥

लोके विहरसि स्वैरं स्वमायागुणसंवृता ।
भक्तानामनुकम्पार्थं मुक्तयेस्वानुभूतये ॥ ४४० ॥

क्षमस्व सहजानन्दे स्वरूपं ते न गोचरः ।
मयापि किमुतान्येषां पादोपास्तिरतात्मना ॥ ४४१ ॥

किं चिकीर्षसि वै नित्यं किं करोषि किमीप्स्यसि ।
इति ते स्वमतं लोके ज्ञातुं कोऽपि न हि क्षमः ॥ ४४२ ॥

परावाग्रूपिणी भूत्वा सम्प्रवर्तयसे बुधान् ।
फलाकाङ्क्षायुतास्तत्र पतन्त्यभ्युद्धृताः परे ॥ ४४३ ॥

बुद्धिस्वरूपिणी भूत्वा प्रभा चाप्यप्रमा ह्यसि ।
पूर्वा तारयसे विश्वमधो नयसि चापरा ॥ ४४४ ॥

सर्वस्वरूपिणी साक्षात् परब्रह्मस्वरूपिणी ।
त्वं लक्ष्मीस्त्वं रतिर्गीस्त्वं प्रीतिस्त्वं कीर्तिरेव च ॥ ४४५ ॥

शान्तिस्त्वं तुष्टिरेवापि पुष्टिस्त्वं नात्र संशयः ।
मेधा प्रज्ञा प्रभा च त्वं विदद्या त्वं धीर्धृतिः स्मृतिः ॥ ४४६ ॥

बुद्धिर्विदद्याप्यविदद्या च सर्वविदद्येश्वरी च सा ।
सर्वशक्तिमयी देवी सर्वमन्त्रेश्वरी च सा ॥ ४४७ ॥

त्वं नित्या चित्कला शान्ता शान्त्यतीता पराकुला ।
निष्कला च कलाभासा सकला चापि निष्कला ॥ ४४८ ॥

एकानेका व्यापिका च परब्रह्मेति गीयसे ।
न हि त्वं रावणग्राह्या व्यापकब्रह्मरूपिणी ॥ ४४९ ॥

क्षयाय राक्षसौद्यस्य तथा लीलां चकार हि ।
सदसद्वधक्तये चैव साधूनां पालनाय च ॥ ४५० ॥

त्वमेव सर्वं कुरुषे मम मूर्द्धन्न निधाय च ।
नाहं कर्त्ता ह्युदासीनः कर्त्रीत्वं सर्वदा प्रिये ॥ ४५१ ॥
भक्तिमार्गमधिष्ठाय भक्तेषु त्वं कृपावती ।

ममापि करुणारूपा तथैव च नियोजिका ।
किं बहूक्तेन सहजे सर्वं त्वं मत्स्वरूपिणी ॥ ४५२ ॥

इत्युक्ता रामचन्द्रेण सहजानन्दिनी स्वयम् ।
प्रोवाच स्मितरम्यास्या प्रसादसुमुखी प्रिया ॥ ४५३ ॥

श्रीसीतोवाच

गच्छाधुना महाभाग कुरु कार्यं महीतले।
कृत्वा भूभारहरणं व्यवस्थाप्य तथा वृषम् ॥ ४५४ ॥
साधूनां चामराणां च पूरयित्वा मनोरथम्।
इदं पुनः स्वकं धाम समुपेष्यसि राघवः ॥ ४५५ ॥

श्रीराम उवाच

न त्वां विनाहं यास्यामि क्षणमप्यवनीतले।
अशक्तो निष्प्रभावोऽहं त्वया विरहितः प्रिये ॥ ४५६ ॥

श्रीसीतोवाच

यत्रैवान्तर्हिता कान्त विमानारोहण क्षणे।
तत्रैवाहमुपेष्यामि याहि निःशङ्कमित्यतः ॥ ४५७ ॥
देवानां च मुनीनां च ब्राह्मणानां तथा पुरः।
अहमग्नौ प्रवेक्ष्यामि स्वरूपस्य विशुद्धये ॥ ४५८ ॥
गार्हपत्याग्निमाविष्टा रावणाहरणक्षणे।
मम छाया हृता तेन मायारूपेव रक्षसा ॥ ४५९ ॥
प्रवेक्ष्यति पुनः साग्नौ करिष्याम्यहमुद्भवम्।
प्रदर्शनाय लोकानां मम लीला भविष्यति ॥ ४६० ॥
इत्युक्तः प्रियया रामो विमानं भास्करोपमम्।
आरुह्य शीघ्रं प्रमुद्वना[1]दा जगाम लङ्कापुरम् ॥ ४६१ ॥
यस्मिन् वने महाघोरे सीतान्तर्धानमागता।
तत्रैव स समागत्य यानादवरुरोह च ॥ ४६२ ॥
अपश्यत्तद्वने तां च पुष्पावचयकारिणीम्।
सहजानन्दिनीं सीता श्रीरामानन्यवल्लभाम् ॥ ४६३ ॥
ततस्तौ सहितौ भूत्वा तस्मात् स्थानादुपेयतुः।
पश्यतां सर्वदेवानां मुनीनां च द्विजन्मनाम् ॥ ४६४ ॥
अन्येषां चापि भूतानां लक्ष्मणस्य च पश्यतः।
समिद्धे गार्हपत्येऽग्नौ रामः सीतामशोधयत् ॥ ४६५ ॥
एषा परस्य सदनं प्रविष्टा स्त्रीस्वभावतः।
यदद्यदुष्टा भवेत्सीता त्वमग्ने साक्षितां व्रज ॥ ४६६ ॥
अथ सीता स्वयं देवी पातिव्रत्यपरायणा।
मुक्ताहारयुता भूत्वा सवस्त्रा मृदुविग्रहा ॥ ४६७ ॥

---

१. पादेऽस्मिन्नक्षराधिक्यमार्षः।

निपपात समिद्धेऽग्नौ तदाग्निः शीतलोऽभवत् ।
अङ्गाराः पद्मतां जग्मुर्ज्वालाधारा सुधाभवत् ॥ ४६८ ॥

भगवान् गार्हपत्याग्निः श्रीयज्ञः पुरुषः स्वयम् ।
स्वाहास्वधाभ्यां संयुक्तो वामदक्षिणपार्श्वयोः ॥ ४६९ ॥

रत्नसिंहासनासीनां चामरद्वयवीजिताम् ।
अव्याहताङ्गवसनामव्याहतसुमौक्तिकाम् ॥ ४७० ॥

अव्याहतालकां देवीं करे संस्थाप्य जानकीम् ।
स्वात्मानं दर्शयामास ववन्दे तं च राघवः ॥ ४७१ ॥

अथ व्योम्नि स्थिता देवास्तथा ब्रह्मर्षयोऽखिलाः ।
देवर्षयो नारदाद्या ये चान्ये ऋषिसत्तमाः ॥ ४७२ ॥

राजा दशरथश्चैव देवयानमुपाश्रितः ।
जनकश्चैव योगीन्द्रोऽन्ये च राजर्षयोऽखिलाः ॥ ४७३ ॥

ब्रह्मा विष्णुश्च रुद्रश्च शक्राद्याश्चैव निर्जराः ।
ब्राह्मणा भूमिसंस्थाश्च कपीन्द्राश्चातिधार्मिकाः ॥ ४७४ ॥

वासुकिप्रमुखा नागा ये चान्ये तत्र संगताः ।
ऊचुर्वचनमभ्येत्य श्रीरामं धर्मवित्तमम् ॥ ४७५ ॥

कर्मणा मनसा वाचा सीतानन्यप्रतिव्रता ।
शुद्धा शुद्धा पुनः शुद्धा माशङ्किष्ठा रघूद्वह ॥ ४७६ ॥

अस्याः स्वरूपं माहात्म्यं गुणांश्चैव रघूद्वह ।
सर्वं जानासि मनसि स्वयमेव विशेषतः ॥ ४७७ ॥

अथ दुन्दुभयो नेदुर्दिवि देवनिनादिताः ।
सीताविशुद्धिवृत्तान्तं जगुर्गन्धर्वकिन्नराः ॥ ४७८ ॥

प्रणम्य गार्हपत्यं च सीतामादाय राघवः ।
मुमुदे विश्वदयितो राक्षसौघविनाशकृत् ॥ ४७९ ॥

गार्हपत्यस्तमेकान्ते यथावृत्तं निवेदय च ।
सीताप्रवेशनं स्वस्मिंश्छायाया हरणं तथा ॥ ४८० ॥

स्तुतोऽभिवन्दितस्तेन यथास्थानं जगाम सः ।
ततो रामः पुष्पकाग्रमध्यासीनः स्वकां पुरीम् ॥ ४८१ ॥

गन्तुं प्रस्थितवान् व्योम्नि सीतालक्ष्मणसंयुतः ।
चतुर्थीदिवसे भूयः कृतमङ्गलकौतुकः ॥ ४८२ ॥

भक्तैः कपिवरैः साकं महत्या मुदया युतः ।
इत्थं विधाय वै वासं वने वर्षाश्चतुर्दश ॥ ४८३ ॥

ततोऽसौ दण्डकात्प्राप्तो भारद्वाजाश्रमं प्रभुः ।
पञ्चम्यां तेन मुनिना रामो वै सत्कृतश्च सः ॥ ४८४ ॥
भरतेन समं षष्ठ्यां नन्दिग्रामनिवासिना ।
आसीत्समागमस्तस्य परमानन्दवर्द्धनः ॥ ४८५ ॥
वन्दितो भरतेनासौ मुदितस्तं च सस्वजे ।
सप्तम्यां संगतैः पौरैः परमोत्सवपूर्वकम् ॥ ४८६ ॥
श्रीरामः सीतया साकमयोध्यायां प्रवेशितः ।
महासाम्राज्यपदवीं प्राप्तोऽसौ सम्यगर्चितः ॥ ४८७ ॥
अथ भाद्रपदे मासि नवम्यां श्रीविदेहजा ।
अधत्त गर्भं मार्तण्डवंशविस्तारकारणम् ॥ ४८८ ॥
इति रामायणं शास्त्रं त्वदग्रे कथितं मया ।
चरितं सहजादेव्या रामस्य च महात्मनः ॥ ४८९ ॥
यावन्ति चरितान्यत्र रामस्य परमात्मनः ।
तानि सर्वाणि बोध्यानि सहजायश्चिदाकृतेः ॥ ४९० ॥
सहजायाश्चरित्राणि गीतानि सुमनीषिभिः ।
पावनानि त्रिजगतां ध्यातव्यानि विशेषतः ॥ ४९१ ॥
स्वयं श्रीसहजादेवी श्रीराजिनि तवाङ्गजा ।
जनकस्यालये जाता चकार चरितावलीः ॥ ४९२ ॥
केकयीवाक्स्वरूपेण स्वयमेवाविरास च ।
विहर्तुं स्वैरमीशेन जगाम विपिनं घनम् ॥ ४९३ ॥
तत्र द्वादशवर्षान्ते रक्षसां क्षयहेतवे ।
रक्षोनाथस्य कुमतेर्बुद्धिरूपा व्यवर्ततः ॥ ४९४ ॥
अन्यथा रामो भगवान् ब्रह्मण्यो धर्मपालकः ।
कथं हन्यात्पुलस्त्यस्य तनयं सकुलं युधि ॥ ४९५ ॥
कथं च रावणोऽप्यद्धा सर्ववेदप्रवर्तकः ।
हरेत् परस्त्रियं मोहास्त्रैलोक्यविजयी हठात् ॥ ४९६ ॥
सर्वं श्रीसहजादेव्याश्चरित्रमिदमद्भुतम् ।
ततश्च सहजं धाम प्रमोदवनसंज्ञितम् ॥ ४९७ ॥
प्राप्तुं निजस्वरूपेण विहर्तुं त्वरितोऽभवत् ।
तस्मादस्याश्चरित्राणि तव पुत्र्याश्चिदाकृतेः ॥ ४९८ ॥
न तत्त्वतो विजानामि किमुतान्ये सुरादयः ।
इति विज्ञाय सततं राजिनि त्वं महामते ॥ ४९९ ॥
आनुकूल्येन वर्तस्व प्रातिकूल्याद्विनङ्क्ष्यसि ।
नास्याश्चिकीर्षां प्रभवन्ति विज्ञातुं सुरेश्वराः ॥ ५०० ॥

यथेयं कुरुते लीलां तथा गायन्ति तत्त्वतः।
ध्यायन्त्येनां विशेषेण भक्तिमन्तो मुमुक्षवः ॥ ५०१ ॥

तरन्ति भवपाथोधिमस्याः सकरुणेक्षणात्।
सीतागाद्रावणगृहं तत्रान्यत्कारणान्तरम् ॥ ५०२ ॥

त्रैलोक्यविजयी वीरः पुलस्त्यमुनिनन्दनः।
रक्षोधिनाथः परभित् प्रविजित्य जगत्त्रयम् ॥ ५०३ ॥

सर्वसम्पद्धरान् गेहे स्थापयामास सर्वतः।
स्वर्गेऽपि याति रत्नानि यानि रत्नानि भूतले ॥ ५०४ ॥

पाताले यानि रत्नानि तानि स्थापितवान् गृहे।
आब्रह्मभुवनं याश्च सम्पदः श्रीविभूतयः ॥ ५०५ ॥

ताः सर्वाः स्थापितास्तेन महावीरेण रक्षसा।
आरामं जलदास्तस्य सिञ्चन्ति प्रतिवासरम् ॥ ५०६ ॥

सुवेलाद्रिगुहा रत्नैः पूरिता धनदेन च।
मन्दं तपति सूर्योऽस्य हेमन्तशिशिरर्तुगः ॥ ५०७ ॥

वसन्ते वाति सेवायै त्रिविधो मारुतः स्वयम्।
चन्द्रो मुञ्चति गेहेऽस्य किरणान्नित्यपूर्णिमः ॥ ५०८ ॥

हेमन्ते शिशिरे चास्य हसंतीस्थोऽनलः स्वयम्।
ग्रीष्मे चामुष्य सेवायै हिमवर्षी मरुत्स्वयम् ॥ ५०९ ॥

आरामे रोपितास्तेन नन्दनस्था महाद्रुमाः।
गेहे षड्ऋतवस्तस्य रूपवन्तः स्वयं स्थिताः ॥ ५१० ॥

यथाज्ञापालनं नित्यं सेवन्ते राक्षसेश्वरम्।
नेन्द्रस्य तादृशी भूतिर्नाग्नेश्च वरुणस्य च ॥ ५११ ॥

कुबेरस्य निधीशस्य न च कस्यापि भूपतेः।
तादृशी सम्पदेतस्य सम्राजो भुवनेशितुः ॥ ५१२ ॥

इति व्यवस्य मनसा जानकी रामवल्लभा।
विहर्तुं स्वैरकामा सा लीलांकृतवती स्फुटम् ॥ ५१३ ॥

रावणाहरणव्याजाल्लङ्कां गतवती स्वयम्।
गार्हपत्ये तिरोभूय तत्रागात् सहजेश्वरी ॥ ५१४ ॥

यत्र लक्ष्मीभराः सर्वे प्रादुर्भूतास्तथैव ते।
जानकी रासलीलार्थं यत्रलक्ष्मीः स्वयं स्थिता ॥ ५१५ ॥

श्रीराजिन्युवाच

रामं विना कथं राज्ञो भवेदस्यास्तथाविधः।
एमद्वेदितुमिच्छामि कथं रामोऽत्र संगतः ॥ ५१६ ॥

श्रीशिव उवाच

रावणस्य वने तत्र प्रादुर्भूता महेश्वरी ।
दिव्यरूपधरा साक्षात् कोटिलक्ष्मीकलानिधिः ॥ ५१७ ॥

दिने त्वशोकवृक्षस्य अधस्ताद्विरहातुरा ।
रात्रौ निजसखीवृन्दैः सा रेमे सहजेश्वरी ॥ ५१८ ॥

लोभया च त्रिजटया सेव्यमाना प्रतिक्षणम् ।
इन्द्राण्या च तथा देव्या पीयूषफलहस्तया ॥ ५१९ ॥

उमया च महेशान्या तथा नदद्यष्टकेन च ।
जनकस्य गृहे जाताः सख्यः कमललोचनाः ॥ ५२० ॥

कमलेशीप्रभृतयः सेवार्थं तत्र संगताः ।
दिव्यदेहाः स्वरूपेण तथा देव्यो रमामुखाः ॥ ५२१ ॥

उपचारसमूहैस्तां सेवितुं सुसमाययुः ।
विभीषणस्य पत्न्या सा सेव्यमाना प्रतिक्षणम् ॥ ५२२ ॥

रतिप्रीत्यादिभिश्चैव दिव्यशक्तिकदम्बकैः ।
उपास्यमाना सा देवी चित्ते चिन्तामकल्पयत् ।
स्वयं लक्ष्मीं पुरस्कृत्य प्रोवाच वचनं सती ॥ ५२३ ॥

श्रीसीतोवाच

अहो अत्यद्भुततमं वनमेतन्मनोरमम् ।
न रोचते मे सततं विरहातुरचेतसः ॥ ५२४ ॥

गुञ्जन्ति मत्तभ्रमरा गायन्त इव मत्प्रभुम् ।
विध्यन्ति कामविशिखैर्विरहे मम मानसम् ॥ ५२५ ॥

सुस्वरं पञ्चमालापैः कूजन्ति पिकवल्लभाः ।
अरुन्तुदा गिरस्तासां दारयन्ति मनो मम् ॥ ५२६ ॥

एता रसालमञ्जर्यो मञ्जुला रजसाञ्चिताः ।
अग्निं विरहनामानं दीपयन्ति मदन्तरे ॥ ५२७ ॥

अशोकमञ्जरी रम्याः पश्यन्ती ज्वलिता इव ।
दहामि हृदयेऽत्यर्थं तीक्ष्णेनविरहाग्निना ॥ ५२८ ॥

किं नु कुर्यामहं तावत्स्वयं लक्ष्मीः पराङ्मुखी ।
सुवर्णकेतकीधूलिभरैर्व्योम्नान्धकारिते ॥ ५२९ ॥

पद्माकरसमुद्भूतपरागपटलो मरुत् ।
एषोऽन्धयति चक्षूंषि दृष्टिपातनिरोधकः ॥ ५३० ॥

वासन्तीपुष्पमधुभिर्वासिताः सकला दिशः ।
मन्ये मदनभूपस्य भूयसा यशसाञ्चिता ॥ ५३१ ॥

एषा वसन्तसम्पत्तिर्व्याप्नोति सकलं जगत् ।
नहि मे रोचतेऽत्यर्थं स्वयं लक्ष्मीः सुखप्रदा ॥ ५३२ ॥

स्वयं लक्ष्मीरुवाच

तव लीलाविनोदार्थमहमत्र स्वयं स्थिता ।
रावणस्य वने रम्ये प्रादुर्भूय स्वरूपतः ॥ ५३३ ॥

यावती भुवने भूतिः सा मदंशस्वरूपिणी ।
साहमत्र स्वरूपेण प्रादुर्भूतास्मि जानकि ॥ ५३४ ॥

दिशां च पतयः सर्वे परितः सेवका इव ।
तव लीलासुखार्थाय भूतिरत्रेदृशी सखी ॥ ५३५ ॥

अतिमात्रमियं रम्या शोभात्र सततं स्थिता ।
न खल्विन्द्रस्य लोकेऽपि दृश्येयं दैवतैरपि ॥ ५३६ ॥

रोचितस्तेऽत्र विरहः स्वयमैश्वर्यभावितः ।
या नित्यं रमते भूयः प्रमोदवनवासिनी ॥ ५३७ ॥

आज्ञापय विनोदार्थमिच्छासिद्धिं वशेस्थिताम् ।
यथा रासरसोल्लासो भवेदत्र तथाविधः ॥ ५३८ ॥

यथा प्रमोदविपिने ससामग्रीक उत्तमः ।
सफलोऽयं भवेत्तेन मम लीलार्थमुद्यमः ॥ ५३९ ॥

श्रीसीतोवाच

राघवेन्द्रो विजानाति सर्वं सखिविनोदवान् ।
सर्वैश्वर्यनिधिर्देवस्त्वयीगायति यत्परम् ॥ ५४० ॥

न हि मे विरहस्तेन क्वचित्कालत्रयेऽपि च ।
सर्वं जानामि कान्तस्य परमैश्वर्यमीदृशम् ॥ ५४१ ॥

स्वयं लक्ष्मीरुवाच

रामोहि ब्रह्म परमं सच्चिदानन्दविग्रहम् ।
अलौकिकं महत्तेजस्तस्य सूर्यादिषु स्थितम् ॥ ५४२ ॥

किं जानन्ति स्वरूपं ते ब्रह्मशेषशिवादयः ।
भक्तानामनुकम्पार्थं लीलारूपं समाश्रिता ॥ ५४३ ॥

नित्यं रमयसे रामं परब्रह्म यथोदितम् ।
एतद् रामस्य रामत्वं रमणं यत्त्वया सह ॥ ५४४ ॥

त्वयानुकम्पिता भक्ताः श्रीरामेणानुकम्पिताः ।
इति ज्ञात्वा भजन्ते त्वां ब्रह्मशेषशिवादयः ॥ ५४५ ॥

अनेकधा च रमसे त्वं रामेण सहेश्वरि ।
श्रीभूलीलास्वरूपेण नित्यपर्यङ्कगामिनी ॥ ५४६ ॥

त्वं भूः सत्तास्वरूपेण निश्चलास्य परिक्रिया ।
युगे युगे त्वमाचार्यरूपेण प्रकटा स्वयम् ॥ ५४७ ॥

स्वस्वरूपं ज्ञापयितुं कुरुषे यत्नमुत्तमम् ।
नान्यथा त्वां प्रपद्येरन् भक्तास्ते सनकादयः ॥ ५४८ ॥

आचार्यः प्रथमो ब्रह्मा द्वितीयाः सनकादयः ।
तृतीयः शेष एवासौ चतुर्थश्च शिवः स्वयम् ॥ ५४९ ॥

समस्ताचार्यवार्याणां त्वमाचार्योपदेशिका ।
या स्वयं श्रीस्वरूपेण सा प्रमोदवनेश्वरी ॥ ५५० ॥

इति ते रूपमुदितं यथाविज्ञानवैभवम् ।
इच्छासिद्धिमथाज्ञाप्य कुरुलीलारसोदधिम् ॥ ५५१ ॥

यस्मिन् परमहंसानां संचारः स्यात् सुखावहः ।
उत्तरङ्गो हावभावैः सरस्वान् प्रेमपाय सः ॥ ५५२ ॥

सम्भोगविप्रलम्भाभ्यां कूलद्वयसुविस्तृतः ।
तीव्राभिलाषचिन्ताद्यैरुद्दीप्तमणिमौक्तिकः ॥ ५५३ ॥

गुरुलज्जावाडवाग्निर्मनोभूमकराञ्चितः ।
क्षुद्रानन्दनदीपूरः सुगम्भीररसामृतः ॥ ५५४ ॥

अन्यभावविषोदर्को महाभावमहोर्जितः ।
त्वत्कीर्तिचन्द्रिकापूर्णो भक्तौघराजहंसकः ॥ ५५५ ॥

उद्वेलो नित्यमेवासौ लोकवेदाद्यगोचरः ।
प्रोद्भाति सहजानन्दे तव लीलारसोदधिः ॥ ५५६ ॥

यत्र शेते तु भवती श्रीरामरमणान्विता ।
पुष्पशय्यागता नित्यं ब्रह्मानन्दान्तरस्थिता ॥ ५५७ ॥

सर्वलोकेशसाम्राज्यमहासौभाग्यभाजनम् ।
इत्थं तयोः समालापं कुर्वन्त्योः सुवयस्ययोः ॥ ५५८ ॥

माल्यवत्यचले रामो लक्ष्मणं प्रत्युवाच ह ।
गच्छ लक्ष्मण किष्किन्धां सुग्रीवं राज्यसंगतम् ॥ ५५९ ॥

भुञ्जानं च महाभोगान् मद्वाञ्छाविस्मृतान्तरम् ।
तं च मद्वचसा ब्रूयाः स यथात्रागतो भवेत् ॥ ५६० ॥

सुग्रीव रामवीर्येण प्राप्तराज्यमकण्टकम् ।
त्वं नित्यं तत्प्रभुञ्जानो नास्मान् विस्मर्तुमर्हसि ॥ ५६१ ॥

त्वं राज्यभोगं कुरुषे वने सीदामहे वयम् ।
शीघ्रमागम्यतां वीर मम कार्यं प्रवर्त्यताम् ॥ ५६२ ॥

इति स्नेहान्वितैर्वाक्यैस्तमिहानय लक्ष्मण ।
इति सम्प्रेष्य किष्किन्धां राजधानीं कपिशितुः ॥

लक्ष्मणं रघुशार्दूले योगचर्यामुपाश्रितः ॥ ५६३ ॥

जटाधरो वल्कलचीरवासा मृगाजिनस्थः कुशविष्टरस्थः ।
एकान्ततो माल्यवतो गुहायां समाधिमासाद्य सुनिर्वृतोऽभूत् ॥ ५६४ ॥

ततः स सर्वभूतात्मा सर्वयोगेश्वरेश्वरः ।
चिदानन्दघनाकारः सीतायादर्शनं ययौ ॥ ५६५ ॥

एकेन वपुषा तत्र गिरौ माल्यवति स्थितः ।
परेणैव स्वरूपेण लीलाविग्रहरूपिणा ॥ ५६६ ॥

भक्तानामनुकम्पार्थं दिव्योपवनमन्वगात् ।
भक्तास्तास्तत्र लङ्कायां निरुद्धा रावणेन याः ॥ ५६७ ॥

तासामुद्धरणार्थाय सद्यः प्रादुरभूद्विभुः ।
देवानां कन्यका याश्च याश्चैवाप्सरसोऽद्भवाः ॥ ५६८ ॥

पितॄणां मानसोद्भूता ब्रह्मणो मानसोद्भवाः ।
देवानां कन्यका याश्च लक्ष्म्या सह विनिःसृताः ॥ ५६९ ॥

दिव्यगन्धर्वकन्याश्च नानादेशनृपात्मजाः ।
सरितश्चाद्भुताकारा विरजाद्याः सुमङ्गलाः ॥ ५७० ॥

नानानसुदताश्चैव नानाद्वीपेश्वरात्मजाः ।
पर्वतानां चैव कन्या दिव्यरूपधराः स्त्रियः ॥ ५७१ ॥

रक्षसां कन्यकाश्चैव कामरूपधराः स्त्रियः ।
महेन्द्रलोकगाः कन्या अद्याप्युद्वाहवर्जिताः ॥ ५७२ ॥

अग्निलोकस्थिता याश्च श्रीमद्वैश्वानरात्मजाः ।
यमस्य वरुणस्यापि लोकगा नित्यकन्यकाः ॥ ५७३ ॥

वायुलोकस्थिताः कन्याः कुबेरस्य च लोकगाः ।
कैलासगिरिवासिन्यो या दिव्याः कन्यकावराः ॥ ५७४ ॥

अन्याश्च दैव्या मानुष्यो गन्धर्व वरकन्यकाः ।
अकृतोद्वाहसम्बन्धा बलादाकृष्य रक्षिताः ॥ ५७५ ॥

नागानां कन्यकाश्चैव रूपसारविभूषिताः ।
पद्मिन्यश्चित्रिणीश्रेष्ठा हस्तिन्यः शङ्खिनीवराः ॥ ५७६ ॥

नानाजातिस्त्रीवरेण्याश्चन्द्रवक्त्रा मृगेक्षणाः ।
जातरूपसमानाङ्ग्यः पद्मपत्रातिकोमलाः ॥ ५७७ ॥

तडिल्लेखासमानाङ्ग्यः शिरीषदलकोमलाः ।
सर्वावयवशोभाढ्या महासौभाग्यभूषिताः ॥ ५७८ ॥

कमनीयप्रभास्तन्व्यो यौवनोद्भेदमञ्जुलाः ।
जातरूपघटीस्तन्यः सर्वालङ्कारभूषिताः ॥ ५७९ ॥

रूपलावण्यरुचिराः कन्दर्पबलवर्द्धिनीः[1] ।
रावणेन हृतास्तास्तु त्रैलोक्यजययात्रया ॥ ५८० ॥

दिग्जैत्रयात्रासमये तासां पितृभिरर्पिताः ।
कन्याभावेनैव युता अदृष्टपुरुषाननाः ॥ ५८१ ॥

तासां मनो रामचन्द्रे सुचिरेण व्यवस्थितम् ।
मनसेव तपस्यन्त्यो रामचन्द्रहृताशयाः ॥ ५८२ ॥

अनेकजन्मसंसिद्धा रागिन्यो वामलोचनाः ।
कर्मज्ञानोपासनाभिराजन्मशुभसंयुताः ॥ ५८३ ॥

शुद्धान्तकारणाः सर्वा भक्त्यङ्कुरसमन्विताः ।
सीतादर्शनमात्रेण जातप्रारब्धसंक्षयाः ॥ ५८४ ॥

उत्तमप्रेमकलिताः श्रीरामस्नेहविह्वलाः ।
रामस्य विरहेणैव चिरोत्कण्ठासमन्विताः ॥ ५८५ ॥

सीतास्वरूपलावण्यध्वस्तरूपाभिमानिकाः ।
रामलीलागुणं श्रुत्वा चिराय दर्शनोत्सुकाः ॥ ५८६ ॥

तासां मण्डलमध्यस्था जानकी रामवल्लभा ।
तारकामण्डलगता पौर्णमासीव शारदा ॥ ५८७ ॥

अभिवीक्ष्य प्रियं राममभिरामगुणाकरम् ।
उत्तस्थौ स्वासनात्तूर्णं प्राणप्राप्तिसमुत्सुका ॥ ५८८ ॥

तामुत्थितामनूत्तस्थुः सर्वास्ता वामलोचनाः ।
तासां दृग्गोचरो रामः सद्य एव व्यजायत ॥ ५८९ ॥

सरत्नकिंकिणीकमञ्जुनूपुरद्वयोपदः-
सुवर्णघण्टिकावलीसनादपादगुल्फभूः ।
नटोचिताच्छमल्लकच्छचित्रवर्णचारुता-
चमत्कृताभकच्छिकासुदर्शनीयवेषभाक् ॥ ५९० ॥

---

१. आर्षप्रयोगः ।

उदारहारभासुरप्रसर्पिवक्षसाञ्चितः-
सुरूपगौञ्जहारभृत्कपोलदर्पणद्युतिः ।
विराजमाननासिकाविभूषणप्रभाधरः-
कलाकलापपेशलः सुराङ्गनाविमोहनः ॥ ५९१ ॥

स्फुरन्मयूरपिच्छकावतंसमध्यविस्फुर-
त्सहस्रचन्द्रिकावलीसुसक्तरत्नमण्डलः ।
विशालभालविस्फुरत्कुरङ्गनाभि पत्रिका-
विचित्रवक्तुचन्द्रमाः सुमन्दहाससुन्दरः ॥ ५९२ ॥

पदस्फुरन्नखप्रभाजितार्कचन्द्रकोटिकः-
कुतूहलात्तकामकेलिचातुरीकलाञ्चितः ।
त्रिकासिरासमण्डलीविलासलासभासितः-
प्रमोदकुञ्जकौतुकी महाद्भुतो नटो यथा ॥ ५९३ ॥

प्रमोदवनसामग्री सर्वा तत्र व्यदृश्यत ।
रामस्योपवने रम्ये परार्द्धललानाञ्चिते ॥ ५९४ ॥

ता एव सख्यश्चतुरास्ता एव च शरन्निशाः ।
ता एव वल्लीप्रवरास्ता एवाखिलसम्पदः ॥ ५९५ ॥

ता एव संगीतकलासुशिक्षिता मृदङ्गवीणा मुरजादिपाणयः ।
सझर्झरास्तालधरा वरस्त्रियः प्रादुर्भवन्त्यो गणशश्चकासिरे ॥ ५९६ ॥

कलाविदुष्यः शशिमण्डलाननाः संगतीभङ्गीप्रथनापटीयसीः ।
नियोजयामास सखीः समंततः स्वे स्वे विधाने सहजेश्वरी स्वयम् ॥ ५९७ ॥

आसी मण्डलमध्यस्थं सहजारामयोर्युगम् ।
परितो मण्डलान्यासुस्तयोस्तत्र यथोचितम् ॥ ५९८ ॥

यथोचितं यथामानं यथास्थानं यथागुणम् ।
यथाधिकारं विन्यस्ता मण्डलेषु सखीगणाः ॥ ५९९ ॥

शरच्चान्द्रीमयः कालस्तदानीं समजातय ।
रत्नाङ्गणमयो देशः प्रभामय्योऽखिला दिशः ॥ ६०० ॥

स्वरा मूर्तिधरास्तत्र प्रादुरासुः सजातयः ।
रागास्तथैव रागिण्यो रामरासरसोत्सुकाः ॥ ६०१ ॥

शुशुभे तच्च विपिनं रत्नाङ्गणसमुज्जवलम् ।
त्रिविधानितलीलाभिः सेवितं सुषुमाञ्चितम् ॥ ६०२ ॥

अथोज्जगौ मुरलिकां रामो रमणपण्डितः ।
मोहयन् सकला रामाः स्वयं कुन्दवने यथा ॥ ६०३ ॥

मुरलीनादमाकर्ण्य प्रमोदवनगोपिकाः ।
सर्वास्तत्र समाजग्मुर्लीलाविस्तारणोचिताः ॥ ६०४ ॥

एवं समाजः सुमहानासीत्तत्र मृगीदृशाम् ।
रामरासरसक्रीड़ासमुत्कण्ठितचेतसाम् ॥ ६०५ ॥

नित्या नैमित्तिकाश्चैव ललनास्तत्र सङ्गताः ।
अन्योन्यप्रेमसम्पन्ना रामप्रेमवशीकृताः ॥ ६०६ ॥

अथ श्रीसहजानन्दा मन्दमन्दोपसर्पं च ।
ईषन्मानमनोजाक्षी सावगुण्ठपटानना ।
यावत् किंचिन्न च ब्रूते तावदाह स्वयं प्रभुः ॥ ६०७ ॥

श्रीराम उवाच

प्राणप्रिये किं वक्तव्यं सर्वं वेत्सि हृदि स्थिता ।
तथापि खलु मे प्रेम्णा वक्तुमत्युत्सुकं मनः ॥ ६०८ ॥

आश्चर्या तव लीलासौ यत्प्रमोदवनान्तरे ।
जनकस्य गृहे भूत्वा प्राप्ता मां त्वं निजेच्छया ॥ ६०९ ॥

राज्याभिषेकं मे कर्तुं किं जातं नृपतेर्मनः ।
तत्रापि केकयीमातुः कथं सा धीरवर्ततः ॥ ६१० ॥

कथं च तादृशी वाणी वक्त्रे तस्या ह्यवर्तत ।
कथं भरतमायान्तं संलक्ष्याहमुदासधीः ॥ ६११ ॥

चित्रकूटं परित्यज्य लक्ष्मणं चागतो वने ।
भवती च कथं लुब्धा दृष्ट्वा मायामयं मृगम् ॥ ६१२ ॥

कथं चाहं गतस्तस्य पृष्ठलग्नो घनं वनम् ।
कथं च भवती वीरं लक्ष्मणं प्राणसम्मितम् ॥ ६१३ ॥

दुर्वचोविशिखैर्विद्ध्वा देवरं निरवासयत् ।
कथं वा तत्क्षणादेव रक्षो दग्धवती न च ॥ ६१४ ॥

कथं वा लाक्ष्मणीं दिव्यां धनुर्लेखमलङ्कथाः ।
कथं च लक्ष्मणः स्निग्धस्त्वद्दुर्वाचममन्यत ॥ ६१५ ॥

जटायुनापि वीरेण तादृशेन न मोचिता ।
एतद्दैवकृतं मन्ये दैवं च प्रबलं कथम् ।
एतन्मे महदाश्चर्यं मनो बाधयतेतराम् ॥ ६१६ ॥

इति पत्युर्निशम्यासौ साकूतं मधुरं वचः ।
उवाच स्मितरुच्या सा द्योतमाना रदत्विषा ॥ ६१७ ॥

श्रीसीतोवाच

दैवं नामामहेवास्मि कालश्चाहं दुरत्ययः ।
लीला चाहं भक्तगेया तत्साधनमहं पुनः ॥ ६१८ ॥

भूत्वोभयस्वरूपाहं रमामि भवता सह ।
रक्षश्चातिबलं तद्वै न हन्तुं शक्यमन्यथा ॥ ६१९ ॥

यस्य श्रौतं बलं दिव्यं तथा कर्मबलं बहु ।
शिवस्योपासको वीरस्त्रैलोक्यविजयी बलात् ॥ ६२० ॥

यस्य बाहुबलं भूयो भवतः पार्षदो वरः ।
लीलावेशस्तथैवायं किं न स्मरसि वल्लभ ॥ ६२१ ॥

पौलस्त्यतनयो विप्रो ब्रह्मण्यस्यतवावधः ।
गृहे गृहेऽग्निहोत्राणि शिवपूजा गृहे गृहे ॥ ६२२ ॥

प्रतापितं जगद्येन तपोवीर्येण भूयसा ।
मायायां मथुरायां च काश्यां चोज्जयिनीपुरे ॥ ६२३ ॥

अस्थिचर्मावशिष्टोऽसौ चकार विपुलं तपः ।
अगस्त्योऽस्य विदां वर्यो मुनिरस्ति गृहोपरि ॥ ६२४ ॥

दक्षिणे ध्रुव इत्युक्तो ज्योतिर्विद्भिः पुरातनैः ।
स कथं शक्यते हन्तुं विनेहशमति क्रमम् ॥ ६२५ ॥

कथं पुनरिमाः कन्यास्त्वदेकहृदयाः स्त्रियः ।
उद्धृताः स्युश्च धर्मज्ञ दुस्तराद्भवसागरात् ॥ ६२६ ॥

इति विज्ञाय वीरेन्द्र न विकल्पितुमर्हसि ।
रमस्व रसयुक्ताभिः कन्याभिरिह कामिवत् ॥ ६२७ ॥

ईदृशीं सम्पदं कान्त सफलीकर्तुमर्हसि ।
एकत्रैव जगल्लक्ष्मीर्दृश्यतामिह वल्लभ ॥ ६२८ ॥

इदं विपिनमालूनं कपीन्द्रेण महौजसा ।
पुनः पल्लवितं पश्य वसन्तसमयश्रिया ॥ ६२९ ॥

भवित्री राजधानीयं विभीषणमहामतेः ।
वैष्णवप्रवरस्यास्य सततं हितवर्तिनः ॥ ६३० ॥

सुवेलाद्रिगुहा रम्या निकुञ्जवरशोभिता ।
इमाश्च किंकरीस्तत्र नित्यं रमय सुव्रत ॥ ६३१ ॥

यथा भवांश्च रत्नाद्रौ प्रमोदविपिनेऽन्तरा ।
तथेह रन्तुमर्होऽसि लीलानटवरः प्रभो ॥ ६३२ ॥

इत्युक्तः प्रियया रामो प्रोवाच विशदस्मितः ॥ ६३३ ॥

श्रीराम उवाच

अहं त्वदेकपत्नीकः कथमेताः समुद्वहे ।
मोचनं चान्यथैवासां करिष्याम्येव जानकि ॥ ६३४ ॥

श्रीजानक्युवाच

यस्य जीवस्य यो भावस्तेन गम्योऽसि राघव ।
भावसंछेदनं न स्याद्व्रतस्य छेदनं भवेत् ॥ ६३५ ॥

अपि चेमा देवकन्या मयाऽविर्भाविताः स्वतः ।
सिन्धोर्विनिःसृताः काश्चिन्मया सह वरस्त्रियः ॥ ६३६ ॥

अन्याश्च विपुलश्रोण्यश्चिरं त्वयि धृताशयाः ।
एतासां रमणं कार्यं महत्कौतूहलं कुरु ॥ ६३७ ॥

हर त्रिभुवनस्त्रीणां मानं सौन्दर्यजं मदम् ।
ब्रह्मणो मोहनं कार्यं महतीं रजनीं सृज ॥ ६३८ ॥

उमादयाश्च महालीलां वीक्ष्य चित्ते विलक्षिताः ।
भविष्यन्ति गलद्दर्पास्त्वदेकचरणाश्रिताः ॥ ६३९ ॥

श्रीशिव उवाच

इत्युत्साहितचित्तोऽसौ प्रियया प्राणतुल्यया ।
रामो लीलारसं कर्तुमारेभे रसिकाग्रणीः ॥ ६४० ॥

सद्यो विगतमर्यादो रसराजो व्यवर्तत ।
स लीलाकौतुकाविष्टो वामदक्षिणपार्श्वयोः ॥ ६४१ ॥

कृत्वा वृन्दं वरस्त्रीणां निनाय गहनं वनम् ।
तत्र प्रमोदविपिनं सर्वासां समदर्शयत् ॥ ६४२ ॥

सरय्वाः पुलिनं रम्यं निकुञ्जवरसेवितम् ।
विविक्तं कोकिलालापगुञ्जद्भ्रभरनादितम् ॥ ६४३ ॥

एकान्तलीलोपयिकं रसकेलीनिकेतनम् ।
अनेकदिव्यसदनं रसराजप्रबोधनम् ॥ ६४४ ॥

महासमरसानन्दं स्त्रीणामतिमनोरमम् ।
उत्फुल्लपद्मकल्हारसरसीशतसेवितम् ॥ ६४५ ॥

हेमवल्लीवनागारं रत्नपुष्पवरद्रुमम् ।
मृदुस्वर्णमणिस्वच्छवालुकामयमङ्गणम् ॥ ६४६ ॥

तत्र ताः स्वोत्तरीयाणि विस्तार्य विहितासनाः ।
परिवव्रुः समंतात्तं रसिकेन्द्रशिरोमणिम् ॥ ६४७ ॥

स्वस्वयूथेषु मुख्याभिः सुवर्णमणिमालिकाः ।
कान्तस्य वरणार्थाय रोपिताः कण्ठदेशतः ॥ ६४८ ॥

स ताभिः स्वर्णमालाभिर्वृतः कान्तोव्यराजत ।
महामुकुटशोभाढ्यो नवपाणिग्रहोचितः ॥ ६४९ ॥

तस्मिन्नुद्वाहसंदोहकौतूहलमहोत्सवे ।
रामपार्श्वे उभे सख्यावर्ततां मुदान्विते ॥ ६५० ॥

आसीत्पिकीकलालापो मञ्जुलस्वरगानकृत् ।
झाङ्कारगानमिलितो भ्रमरीणां समंततः ॥ ६५१ ॥

कोकीरवश्च केकाभिर्भेरीभाङ्कारसुन्दरः ।
तरङ्गिण्याश्च कल्लोलाः सिन्धुगम्भीरनादिनः ॥ ६५२ ॥

मृदङ्गमङ्गलरवो व्यजृम्भत नभःस्पृशः ।
तूर्यत्रिकं ननादाथ कालशक्त्याभिनादितम् ॥ ६५३ ॥

स्वर्णतालीवनध्वान आसीन्मारुत लीलया ।
इत्येवं सम्पदाविष्टमभूदुद्वाहकौतुकम् ॥ ६५४ ॥

सम्पन्नोद्वाहविधयः सर्वास्ता हरिणीदृशः ।
नवीनमन्मथाक्रीडाजितं बल्लभमब्रुवन् ॥ ६५५ ॥

स्त्रियऊचुः

अद्य नः सफलं जन्म भवतैव कृतं प्रभो ।
अद्राक्ष्म जीवलोकस्य सुखमद्य रमापते ॥ ६५६ ॥

रूपसारं च नो दत्तं त्वदाज्ञातो विरंचिना ।
अद्यैव सफलं जातं भवत्संगमशोभया ॥ ६५७ ॥

सौभाग्यं विपुलं दत्तं भृतं तं च त्वया विभो ।
एतद्धि दुर्लभतरमुमादीनां महत्फलम् ॥ ६५८ ॥

अपीदृशं नित्यमेव भूयाद्रमणजं सुखम् ।
प्रमोदवनसंपत्तिर्दृष्टा वल्लभ तादृशी ॥ ६५९ ॥

वैकुण्ठभवनेऽप्येषा प्रायो नैव भविष्यति ।
धन्या वयं रमाकान्त मुदितास्तव संगमात् ॥ ६६० ॥

जानीमहे परप्राण भवान्नारायणादपि ।
लीलारसविधानेन वरेण्यः पुरुषोत्तमः ॥ ६६१ ॥

रूपं तव सदा पेयं जीवं जीवैरिवेक्षणैः ।
अहोऽतिकेलिचातुर्यं मन्मथस्यापि मोहनम् ॥ ६६२ ॥

तृषा अपि मुहुर्नाथ वयं नित्यमतृप्नुमः ।
चिरेण विरहाक्रान्ता भृशमानन्दिताः प्रभो ॥ ६६३ ॥

दग्धा इव लता भूयो वयं पल्लवितास्त्वया ।
निर्वापितोऽङ्गतापश्च स्मरजश्चित्तमूर्च्छनः ॥ ६६४ ॥

वैदग्धं भवतोऽत्यर्थं वशीकृत्य च नःस्थितम् ।
एषा तवाधरसुधा नित्यं पेया वधूजनैः ॥ ६६५ ॥

माङ्गल्यातनयो राम भवानद्भुतकौतुकी ।
इमे व्रजजना धन्यास्त्वन्मुखेन्दुनिरीक्षकाः ॥ ६६६ ॥

धन्यं प्रमोदविपिनमाकीटपशुपक्षिकम् ।
मुरलीनादसुधया नित्यमाप्यायितं त्वया ॥ ६६७ ॥

धन्या व्रजस्य धरणी दूर्वारोमाञ्चिता सदा ।
विमुक्तपादुकाभ्यां ते चरणाभ्यां सदाङ्किता ॥ ६६८ ॥

किं वर्णनीयमस्माभिः सर्वाश्चर्यमयो भवान् ।
एते निकुञ्जरसिकाः कोकिला मधुपैः सह ॥ ६६९ ॥

उद्गायन्ति तव श्लोकं निगमा इव चागमैः ।
वसिष्ठवामदेवाद्या याज्ञवल्क्यशुकादयः ॥ ६७० ॥

तत्तत्पक्षिस्वरूपेण निवसन्तोह संततम् ।
तव लीलारसास्वादहेतवे सुखसेतवे ॥ ६७१ ॥

अमीषां प्रेमज सौख्यं ब्रह्मानन्दसुखाधिकम् ।
अहो अत्यद्भुता रीतिः प्रमोदविपिनान्तरे ॥ ६७२ ॥

अहो कुटिलता प्रेम्णो गरिमा यत्र लाघवम् ।
लाघवं गरिमा तत्र यत्राधर्मोऽपि धर्मवत् ॥ ६७३ ॥

अधर्मवदधत्र धर्मस्तथाऽऽर्जवमकैतवम् ।
अनार्जवं कैतवं च यत्र ते च ह्युभे च ते ॥ ६७४ ॥

एतद्विस्मयनीयं च महदेवात्र दृश्यते ।
यदक्षरात्परं ब्रह्म पुरुषोत्तमशब्दितम् ॥ ६७५ ॥

तदत्र नीलमाधुर्यमहसा समलङ्कृतम् ।
दृश्यते मुग्धवामानां करक्रीडनकोपमम् ॥ ६७६ ॥

भवानत्यद्भुतं वेशं कृत्वा क्रीडति कामिवत् ।
अहो ते दुर्लभं धाम ब्रह्मादीनां त्रयीजुषाम् ॥ ६७७ ॥

प्रेमैकलभ्यं भगवन्नस्मादृङ्मुग्धचेतसाम् ।
तव प्रसादपात्रत्वादधुनाऽऽस्म भवातिगाः ॥ ६७८ ॥

इति प्रेम्णा वदन्तीस्ताः सर्वाः प्रत्येकमङ्गनाः ।
रमयामास रामेन्दुर्लीलया रसवित्तया ॥ ६७९ ॥

एकान्ततः परिप्राप्य तमेके तरुणीजनाः ।
तुष्टुवुर्विमलैः स्तोत्रैर्वैकुण्ठे श्रुतयो यथा ॥ ६८० ॥

स्त्रियऊचुः

नमः श्रीरामाय नित्यरमणकोविदाय नित्यमधुरमूर्तये श्रीरामाविलासरसिकाय महापुरुषायाविर्भावितविशुद्धसत्त्वाय तिरोभाविरजस्तमोमयाखिलभावायानादिभक्तिमार्गजीवातुप्रपत्तिवशीकृतचित्ताय भक्तजनवित्ताय नित्यनिरवधिप्रसादकल्पतरवे भजनार्थप्रदत्तलीलाविग्रहशिवसनकशेषशुकादिमुनिगणकमनीयविचित्र चरित्रभवनायाष्टकोणवैकुण्ठायतप्रमोदवनमाधुरीमधुव्रताय श्रीनन्दननन्दिनीश्रीसहजानन्दिनीश्रीप्रमोदिनीनित्यनिजशक्तिसमेताय मधुरमेचकनित्यसमुन्नतसुधाजलधराय ब्रह्मविद्वरिष्ठमानसराजहंसाय नित्यकिशोराय नित्यानन्दपदमहासाम्राज्यभाजनाय परब्रह्मणे निस्तुलायाप्रमेयाय कर्मोपास्तिनागम्यस्वरूपवैभवाय परमपुण्यलोकश्लोक्याय नामरूपविभिन्नप्रपञ्चरचनातीतनामरूपाय निखिलप्रपञ्चसमवायिनिमित्ताय श्रीमते रसिकरामचन्द्राय ॥ ६८१ ॥

अन्यास्ताः किंकरीभूय नित्यस्वाम्यवशीकृताः ।
उचुः सुपेशला वाचश्चरणाहितचेतसः ॥ ६८२ ॥

स्त्रियऊचुः

नमस्ते नित्यनिरवधिनिरुपमनिर्भरानुकम्पासमुद्धृताखिलजीवराशये कदुदञ्चत्कृपाकटाक्षसमुद्बोधितचिरविस्मृतस्वरूपाय शिवविरञ्चिरमान्वेषितचरणपरागरजःकणायविमलकौस्तुभाङ्कुरितकृपाकन्दाय श्रीमत्प्रमोदवनकुञ्जाधिपतये विमलगुण भूमिसमुन्मूर्छितश्रुतिगणगन्धर्वगानाय नेतिनेतिवचसोऽप्यगोचराय रुचिररोचिष्णुचिदानन्दमयमूर्तिमहोमहनीयमहापौरुषविस्फूर्जिताय श्रीरामायाभिरामाय ॥ ६८३ ॥

अहो खलु वयं दास्यो भवतः पुरुषर्षभ ।
सहजानन्दिनींयुक्तं नित्यं परिचरामहे ॥ ६८४ ॥

अध्यारोढुमिदं न चित्सुखमहासाम्राज्यसिंहासनमर्हा नाथ वयं विधातुमुचिताः कैङ्कर्यमेकान्ततः ।
यत्र त्वं रमयस्यखण्डविलसत्सौभाग्यकां स्वामिनीं
ताम्बूलाहरणादिकामपचितिं तत्राचरिष्यामहे ॥ ६८५ ॥

अस्मिन्नेव रसे निविष्टनिपुणस्वान्ता वयं नित्यशो
ब्रह्मानन्दपदं ततोऽपि तृणवत्कृत्वा समुद्वेलिताः ।
अक्षुब्धं निजदास्यभावपदवीसौख्यं त्वया प्रापिताः
श्रीमन्नित्यमिदं प्रमोदविपिनं द्रक्ष्यामहे लोचनैः ॥ ६८६ ॥

इति केङ्कर्यभावेन भाविताश्चास्ताश्च भामिनीः ।
विविधैर्भावसंदोहैररीरमत वल्लभः ॥ ६८७ ॥

श्रीराम उवाच

भवतीनां परो भावो ब्रह्मादिसुरदुर्लभः ।
मासां मदेकविषयं मनः सुदृढयन्त्रितम् ॥ ६८८ ॥

अहो अत्यद्भुतं प्रेम्णो महिमा किमु वर्ण्यताम् ।
येनाहं वश्यतां यातो वेदवाचामगोचरः ॥ ६८९ ॥

गोप्यः प्रमोदवनवासनिरुद्धचिन्तास्तासां वदाम्बुरुहरेणुकणप्रसादात् ।
एषोर्जिता परतरा मम भक्तिरागाद्युष्माकमन्तरपथे नरराजकन्याः ॥ ६९० ॥

धन्याः स्थ यूयमनुरागजुषो मयीति युष्मास्वहं सहजयाविनियुक्त एव ।
रंस्ये रमावदितराननुवर्तनीयः कीर्तिश्च वस्त्रिभुवनं वलयिष्यतीशाः ॥ ६९१ ॥

रत्नाचले यथा स्वयं प्रमोदविपिनेऽप्यहम् ।
तथेह खलु युष्माभिरहं नित्यविलासवान् ॥ ६९२ ॥

को जानातीदृशीमिच्छां सहजाया रसावहाम् ।
लोकापवादं सोद्वापि यथा केलिः प्रयोजिता ॥ ६९३ ॥

किं मां नमत तदद्यूयं सहजावश्यतां गतम् ।
इमामेव तु जानीत समुद्धाट्य निजंमनः ॥ ६९४ ॥

नाहमस्याः प्रभावज्ञो वर्ते लीलासु चावशः ।
योऽस्याः करावलम्बी स्यात् स मया तारितो भवात् ॥ ६९५ ॥

अत्र चोदाहरिष्यामि पुरावृत्तं यथा भवत् ।
कदाचिदैच्छद्गिरिशो मम लीलावलोकनम् ॥ ६९६ ॥

श्रुत्वा भक्तैः प्रकथितां मम लीलां रसोर्जिताम् ।
स आगाद्भगवान् रुद्रः प्रमोदवनमन्तरा ।
तुतोष सर्वतो वीक्ष्य माधुरो वनमद्भुतम् ॥ ६९७ ॥

चिन्तामणिप्रवरभूमिरुदञ्चदंशुव्याप्तान्तरिक्षधरणीहरिदन्तरालम् ।
सम्पन्नविस्फुरदनेकविचित्रकुञ्जमाधुर्यधुर्यरचनामयकामशालम् ॥ ६९८ ॥

नित्योल्लसन्मधुविराजितवृक्षराजीभ्राम्यन्मधुव्रतकदम्बनिषेव्यमाणम् ।
कूजत्पिकीरवविकरवरसुस्वराढ्यं धन्यंप्रमोदवनमीक्ष्य ययौ न तृप्तिम् ॥ ६९९ ॥

कैलासादागतः श्रान्तः सहजानन्दिनीसरः ।
अवगाह्य शिवस्तत्र तत्क्षणात् प्रमदाभवत् ॥ ७०० ॥

सात्यर्थरूपलावण्यशालिनी प्रमदा नवा ।
प्राग्दशां नैव सस्मार विस्मिते वाभवत्तदा ॥ ७०१ ॥

आचम्य च पयस्तस्य सरसः स्वादुशीतलम् ।
शिवोऽहं प्रमदाभूत इति चैतन्यमाप सः ॥ ७०२ ॥

निरीक्ष्य स्वस्य सौन्दर्यविशेषं गर्विता च सा ।
अहो न मत्समा काचिद्व्रजेऽप्यस्ति वराङ्गना ॥
श्रीरामं वशयिष्यामि तत्क्षणादेव दर्शनात् ॥ ७०३ ॥

मद्रूपलावण्यमुदीक्ष्य रामो ममैव वश्यो भवितैष सद्यः ।
श्रीनन्दनस्यात्मजयाप्यलभ्यं सौभाग्यमेष्यामि कथं न साहम् ॥ ७०४ ॥

इत्थं मनोराज्यमियं कुर्वती प्रमदा नवा ।
व्यचष्ट मालतीकुञ्जान्माधुरीकुञ्जमेष्यतीम् ॥ ७०५ ॥

कांचित् सखीं चम्पकाङ्गीं सहजामान्यहारिणीम् ।
तस्या रूपं विलोक्यैषा भग्नमाना बभूव च ॥ ७०६ ॥

अथ तां वक्तुमारेभे कासि त्वं कुत्र यास्यसि ।
धन्यासि रूपसारेण केवलेन विनिर्मिता ॥ ७०७ ॥

त्रैलोक्यललनारत्नमोहनं रूपमीदृशम् ।
सातिधन्यतमाकान्ता यस्यास्त्वं माल्यहारिणी ।
एतत्तवाद्भुतं रूपं मदं हरति योषिताम् ॥ ७०८ ॥

इति तस्य वचः श्रुत्वा नोत्तरं दत्तवत्यसौ ।
जगाम तूष्णीं च ततः स्वामिनीसेवनोत्सुका ॥ ७०९ ॥

इति तदीरितमश्रुतकेन सा प्रणिविधूय ततो विचचाल ह ।
निधुवनान्तविमाल्यनिजेश्वरीं ननु तुतोषयिषुर्वरिवस्यया ॥ ७१० ॥

ततः सा भग्नहृदया तत्पृष्ठमनुयायिनी ।
जगाम माधुरीकुञ्जसप्तमद्वारकक्षिकाम् ॥ ७११ ॥

कलावती तु तत्रागाद् यथा कार्यं ममेशितुः ।
तत्र वेत्रच्छटाहस्तप्रतीहारीनिवारिता ॥ ७१२ ॥

पप्रच्छ तां करुणया परिपूर्णा कलावती ।
कासि त्वमिह रम्भोरु किमर्थं चेह संगता ।
अविज्ञाप्य प्रभुं नेह प्रवेशं लप्स्यसे ध्रुवम् ॥ ७१३ ॥

नवप्रमदोवाच

प्रमदाहं भग्नदर्पा भवतीनां तनुत्विषा ।
प्राप्तास्मि सहजारामलीलालालित्यदृष्टये ॥ ७१४ ॥

ततः कलावती गत्वा स्वामिनोश्चरणान्तिकम् ।
उवाच सदयं स्निग्धं यथावृत्तं नवस्त्रियः ॥ ७१५ ॥

ततो मयेरिता सद्यो नवयोषित्प्रवेश्यताम् ।
गत्वा कलावती तां च प्रवेशयितुमानयत् ॥ ७१६ ॥

कक्षान्तरे त्वथ मुहुरनया वेत्रहस्तया ।
निरुद्धा यायिनी संगे कलावत्या नवाङ्गना ॥ ७१७ ॥

ततः कलावती भूयो मत्पार्श्वं समुपागता ।
उवाच सदयं वाक्यं तस्या हितचिकीर्षया ॥ ७१८ ॥

कलावत्युवाच

प्रभो पञ्चमकक्षायां निरुद्धा वेत्रहस्तया ।
नान्तःप्रवेष्टुं दत्ता सा नवस्त्री दर्शनार्थिनी ॥ ७१९ ॥

ततः सम्प्रेषिता तावन्मया चरणदासिका ।
तत्संगयायिनी सा सु रुद्धा कक्षान्तरे पुनः ॥ ७२० ॥

सहजाज्ञैककारिण्या अन्यया वेत्रहस्तया ।
ततश्चरणदासी सा मत्पार्श्वं समुपागता ।
उवाच तस्यास्तद्वृत्तं यथा रुद्धानवाङ्गना ॥ ७२१ ॥

चरणदासिकोवाच

प्रभो सप्तमकक्षायां रुद्धा सा वेत्रहस्तया ।
एषा श्रीसहजानन्दामुखादाज्ञा प्रतीक्षते ॥ ७२२ ॥

ततोऽहं सहजानन्दामुखं तूष्णीं विलोकयन् ।
न किंचिदूचे वचनं न स्वतन्त्रोऽस्मि तद्वशः ॥ ७२३ ॥

ततः श्रीसहजानन्दा प्रेषयामास चेटिकाम् ।
तस्या आनयनार्थाय प्राप्तायां नवयोषितः ॥ ७२४ ॥

ततः प्रवेशिता सान्तर्नवयोषित् समुत्सुका ।
यत्रासौ सहजा देवी मया सह विराजिता ॥ ७२५ ॥

यत्र ताम्बूलिकाहस्तो देवीं परिचराम्यहम् ।
भक्षयामि च भक्षामि तद्दत्तां पर्णवोटिकाम् ॥ ७२६ ॥

वीक्ष्य तां सहजा देवी जहास मृदुहासिनी ।
तस्या रदत्विषा कुञ्जभवनं तत् प्रकाशितम् ॥ ७२७ ॥

यथा शारदचन्द्रांशुद्योतैः कुमुदिनीवनम् ।
गवाक्षनिर्गतैरंशुसन्दोहैस्तरुवल्लिकाः ॥ ७२८ ॥

सद्यश्चकाशिरे सर्वाः श्रीकुञ्जभवनान्तरे ।
सा नवप्रमदा वीक्ष्य सहजामुखचन्द्रिकाम् ॥ ७२९ ॥

सदयः सम्भ्रान्तचित्ताभून्मूर्छिता निपपात च ।
अथो कथं कथमपि तां परिप्राप्तचेतनाम् ॥ ७३० ॥

देवी श्रीसहजोवाच लीलाकौतुककारिणी ।
कस्य गोपस्यकन्येयं किं नामेति तु पृच्छ्यताम् ॥ ७३१ ॥

सत्यं वदतु सा चैषा नैवानृतमिह स्थितम् ।
नो चेत् कालान्तरेऽप्यस्या नागमोऽत्र भविष्यति ॥ ७३२ ॥

ततश्च कम्पमानेव प्रोवाच वचनं सती ।
शिवोऽस्म्यहमिह प्राप्तो लीलादर्शनलालसः ॥ ७३३ ॥

इति तस्या वचः श्रुत्वा सहजा स्वयमब्रवीत् ।
एतत्प्रमोदविपिनं मम लीलानिकेतनम् ॥ ७३४ ॥

पुरुषाभिमतिर्भूत्वा कथमत्र समागतः ।
लोकेऽन्यस्यापि वै राज्ञो याति नान्तःपुरं पुमान् ॥ ७३५ ॥

किमुताखिललोकेशमहाराजस्य मत्प्रभोः ।
इहैक एव पुरुषः सर्वास्तस्य च योषितः ॥ ७३६ ॥

इति विज्ञाप्य सख्योऽसौ दूरे सम्यग्विधीयताम् ।
नास्मै क्रोधं करोम्यद्धा मत्स्वाम्यङ्घ्रिरजोजुषे ॥ ७३७ ॥

पुरुषाभिमतिश्चास्य नाधुनापि निवर्त्तते ।
शिवा नाम सखी भूत्वा पातुकालान्तरे त्विह ॥ ७३८ ॥

ततः प्रणम्य सहजानन्दिनीं मां च शङ्करः ।
भूयो वलक्षवदनस्तस्मात्स्थानाद्विनिर्गतः ॥ ७३९ ॥

प्रमोदविपिनस्यैकदेशेऽद्यापि तपस्यति ।
व्रजभक्तपदाम्भोजरजोधूसरविग्रहः ॥ ७४० ॥

सहजानन्दिनीलीलागुणगानपरायणः ।
प्रेमानन्दसमुद्भूतवाष्पसिक्तकलेवरः ॥ ७४१ ॥

रोमाञ्चितवपुः स्तब्धः सरयूपुलिनाङ्गणे ।
यो मञ्जुवट इत्युक्तो जटासंकुलविग्रहः ॥ ७४२ ॥

आगामिद्विपरार्द्धान्ते मम लीलां प्रवेक्ष्यति ।
इत्युक्तोऽस्याः प्रभावोऽयं सख्यः सम्यग् विचिन्त्यताम् ॥ ७४३ ॥

तस्माद्भवत्यः सततं सहजायाः कृपावशात् ।
लब्ध्वा पदमिमं रामाः कृतार्था नात्र संशयः ॥ ७४४ ॥

इत्युक्त्वा भगवान् रामः कोटिकन्दर्पमोहनः ।
दिव्ये लङ्कावने तत्र रासमारब्धवान् मुदा ॥ ७४५ ॥

ततस्तत्परिवस्तासां मण्डलानि चकाशिरे ।
फुल्लानां हेमपद्मानां मध्यइन्दीवरं यथा ॥ ७४६ ॥

रराज भगवान् रामो रासक्रीडनकौतुकी ।
विधाय तावद्रूपाणि सहजानन्दिनी स्वयम् ॥ ७४७ ॥

रेमे श्रीपतिना सार्द्धं तावद्रूपवपुर्जुषा ।
चक्रे नटवरो दिव्यां नाट्यकेलीं मनोहराम् ॥ ७४८ ॥

तासां शिक्षागुणव्यूहं प्रेक्षमाण उदारधीः ।
ततानि विततान्येव घनानि सुषिराणि च ॥ ७४९ ॥

षट्त्रिंशद्भेदयुक्तानि प्रत्येकं समवादयत् ।
तास्ता मनोरमारामा यथामानं यथाक्रमम् ॥ ७५० ॥

यथास्थानं यथागानं यथानृत्यं यथोदितम् ।
सर्वासां रागजातीनां गह्वरः समवर्तत ॥ ७५१ ॥

सर्वासां स्वरजातीनामहमहमिकाभवत् ।
सर्वासां वाद्यजातीनामेकं रूपमदृश्यत ॥ ७५२ ॥

सर्वासां नृत्यजातीनां संकरः समपद्यत ।
ताण्डवं पृथगेवासीन्नृत्यं चाप्यभवत्पृथक् ॥ ७५३ ॥

श्रीरामहृदयानन्दः सर्वाभिः समवर्धत ।
सुखकोलाहलो जातः क्षोणीगगनपूरणः ॥ ७५४ ॥

सुवेलाद्रिगुहाश्चापि प्रतिध्वानैः प्रपूरिताः ।
मन्दं मन्दं जलनिधिरन्वगर्जन्मृदङ्गवत् ॥ ७५५ ॥

मृदङ्गानां मुरजानां झर्झराणां महाध्वनिः ।
सहजारामरासेऽस्मिन्नश्रूयत समंततः ॥ ७५६ ॥

श्रीराममुरलीनादमोदिताः सरितोऽखिलाः ।
निजं वेगं परित्यज्य जाताः सिन्धुपराङ्मुखाः ॥ ७५७ ॥

वृक्षाणां विटपस्कन्धपत्रेभ्यश्चामृतस्रवः ।
समजायत लङ्कायां पशुपक्षिमुदावहः ॥ ७५८ ॥

शिवः समाधिं तत्याज ब्रह्मा स्वाध्यायमप्युत ।
अनादीच्च महान् कालः सर्वभूतमनोरमः ॥ ७५९ ॥

स्थगितश्चौषधीनाथः सार्द्धंतारावधूगणैः ।
मुनयस्त्यक्ततपसः सदय आसन् सुनिर्वृताः ॥ ७६० ॥

कदाचित्प्रकटा तासु कदाचिच्च तिरोहिता ।
सहजानन्दिनी साक्षात्युपोष रसकौतुकम् ॥ ७६१ ॥

तडिल्लतामण्डलमञ्जुलानां चलन्महाहेमलतोपमानाम् ।
विलोलचिन्तामणिमालिकानां ज्वलाच्छिखावह्निविदीपितानाम् ॥ ७६२ ॥

मुदान्वितानां नटनोद्धुराणां वादद्यत्पदाम्भोरुहनूपुराणाम् ।
स्विदद्यत्तनूनां प्रचलाञ्चलानां श्रीरामनृत्योत्सवचञ्चलानाम् ॥ ७६३ ॥

शब्दायमानोद्धुरिकिंकिणीनां स्वान्दोलशोभामणिमालिकानाम् ।
चलाधरीयोद्भटघूर्णिकानां विलोलकान्तालकमञ्जरीणाम् ॥ ७६४ ॥

ऊर्ध्वं विलोलद्भुजवल्लरीणामधः समुदद्यत्करपङ्कजानाम् ।
तनुत्विषा रञ्जितकाननानां स्वेदाञ्चितेषद्धसिताननानाम् ॥ ७६५ ॥

भ्रमत्तरङ्गाभुकुटीलतानां कटाक्षनिक्षेपभृतेक्षणानाम् ।
तत्थेइतत्थेइरवोन्मदानां भावोद्धुराकुञ्चितनासिकानाम् ॥ ७६६ ॥

कण्ठस्वरैस्तर्जितकोकिलानां वेणीभ्रमैर्भीषितपन्नगीनाम् ।
त्विषां गणैर्निर्जितह्रादिनीनां तासां चमत्कारभरः स कोऽप्यभूत् ॥ ७६७ ॥

झणज्झणध्वानरवाः समंततो बभूवरासां तनुभूषणोद्भवाः ।
सताननुप्रादुरभून्मृदङ्गजो वीणाविमिश्रः सुमनोहरध्वनिः ॥ ७६८ ॥

कदाचिन्नृत्यमेवासीत्ताण्डवं च कदाचन ।
कदाचिद्भावसंदर्शि समजायत तत्स्वयम् ॥ ७६९ ॥

तोषयामास ताः सर्वाः सुविचित्रकलापटुः ।
रामो गायन्नटन्नृत्यन् पृथक् संगीतभेदवित् ॥ ७७० ॥

अभवत्पौरुषंनाट्यं स्त्रैणं चातिमनोरमम् ।
परस्परस्य संतोषि सुविभिन्नं परस्परम् ॥ ७७१ ॥

कांचिन्नृत्यकलामांशिक्षत महालीलारसावेशवान्-
श्रीरामः स्वयमादरेण विविधाक्रीडाक्रियाकौतुकी ।
कांचिन्नाट्यकलामशिक्षयत तास्तृष्णातुराःकामिनीः-
शिष्याचार्यपदस्पृशामिति परं तासामभूत क्रीडनम् ॥ ७७२ ॥

अन्यामालिङ्गति स्वैरमन्यां चुम्बति राघवः ।
अन्यां संस्पृश्य रमतेचान्यां सम्पीड्य तिष्ठति ॥ ७७३ ॥

अन्यां प्रसादयत्येष भामिनीं भावकोविदः ।
अन्यां विमोहयत्येष रतिकेलिविनोदनः ॥ ७७४ ॥

अन्यां पिबत्यधरतश्चान्यां मिलति वेगतः ।
अन्यां धावति वेगेन अन्यां सम्पीड्य गच्छति ॥ ७७५ ॥

अन्यां रदैः खण्डयति कपोलस्थलमण्डले ।
अन्यामर्पयति स्वाङ्के अन्यां दशति नखक्षतैः ॥ ७७६ ॥

अन्यां नितम्बयोर्विध्यत्यन्यां वक्षसि कौतुकी ।
अन्यामाकर्षति कचेष्वन्यां तुदति जङ्घयोः ॥ ७७७ ॥

अन्यामासज्जति हठादन्यां मृशति कक्षयोः ।
अन्यां चुम्बति गण्डाभ्यामन्यां चुम्बति नेत्रयोः ॥ ७७८ ॥

अन्यां नाभिस्थले मृश्य करोति मदनोन्मदाम् ।
सहजानन्दिनीचित्तमनस्तर्पणहेतवे ॥ ७७९ ॥

करीव गाहतेऽत्यर्थं तरुणीपद्मिनीवनम् ।
अन्यां स्खलयति स्वैरमन्यां क्षोभयते भृशम् ॥ ७८० ॥

अन्यामञ्चलमाकृष्य निवारयति [1]गच्छतीम् ।
इत्थमाक्रीडरसिको रेमे प्रतिवधूजनम् ॥ ७८१ ॥

रममाणस्य तस्याभून्मन्मथः प्रीतिवर्द्धनः ।
आस्फालितधनुःसूत्रभ्रूयुगैर्हरिणीदृशाम् ॥ ७८२ ॥

आविद्धो रामहृदयो ममाद रसिकाङ्गणे ।
एकैककामिनीः कान्तो निन्ये कुञ्जकुटीगृहे ।
रतवान् विविधैर्बन्धैर्नवैर्निधुवनोत्सवैः ॥ ७८३ ॥

ताः सम्भोगेमृदितवसनालंकृतिव्यस्तवेशाः-
स्विन्नै रङ्गैः पुलकतनुतोत्कम्पभावादियुक्ताः ।
स्वस्वालीभिः समुपहसिताः सेर्ष्यसासूयनेत्रा-
मन्दं मन्दं द्विरदगतयो निर्ययुः केलिकुञ्जात् ॥ ७८४ ॥

पुनर्भूषाः संविधाय वासोरञ्जनमालिकाः ।
उपतस्थुर्वल्लभं तं रुचिरैरासमण्डले ॥ ७८५ ॥

रासोत्सवः पुनरभूत्पूर्णकामकलाभृतः ।
संगीतभेदविदुषो रामस्याद्भुतकर्मणः ॥ ७८६ ॥

काश्चिन्मानवतीस्तत्र दूतिसम्प्रेषणादिभिः ।
रामः प्रसादयामास पादयोः पतनेन च ॥ ७८७ ॥

काश्चिदुत्कण्ठिता रामाः श्रीकान्तः समतोषयत् ।
एकान्तकुञ्जलीलाभिरत्यासक्तिप्रदर्शनः ॥ ७८८ ॥

काश्चित्सप्रेमकलहादन्तरायमुपागताः ।
सम्प्रेषितसखीदूतीर्जगाम रसिकाग्रणीः ॥ ७८९ ॥

काश्चिद्रूपमहामाना नरनागेन्द्रकन्यकाः ।
स्वाधीनपतिका भावैर्मानयामास राघवः ॥ ७९० ॥

---

१. आर्षप्रयोगः ।

काश्चित्प्रत्यक्षविरहा अतिभूयोऽभिलाषिणीः ।
अविश्रान्तसुखस्तोमदायकः समतोषयत् ॥ ७९१ ॥
सर्वासां हरिणाक्षीणां मानदो रघुनन्दनः ।
अरीरमत रासेऽस्मिन् श्रीरामो बहुशक्तिमान् ॥ ७९२ ॥

कामलौल्यं विलोक्यास्य कुटिला हरिणीदृशः ।
तिरोहितैश्वर्यदृशस्तमन्यन्त लौकिकम् ॥ ७९३ ॥

काश्चित्स्त्रियो देवकन्याः शुद्धज्ञानावलोकिनीः ।
कश्चितपुरुषशार्दूलममन्यन्त रमा पतिम् ॥ ७९४ ॥

काश्चित्स्थूलदृशः कान्ता रतिलीलारसोन्मदाः ।
अमन्यन्त शठं धृष्टं परब्रह्मस्वरूपिणम् ॥ ७९५ ॥

प्रेमानन्दस्वरूपोऽत्र मन्मथः समवर्तत ।
स्वयमेव रामचन्द्रो रसलीलाभिरासये ॥ ७९६ ॥

ताः पिबन्त्योऽस्य सौन्दर्यरूपसारसुधारसम् ।
अतृप्तहृदया आसुरनिमेषैर्विलोचनैः ॥ ७९७ ॥

उत्फुल्लकमलामोदवह शीतलमारुतः ।
सिषेवे रघुशार्दूलं रतिलीलामहोत्सवे ॥ ७९८ ॥

चित्राः सुवेलाद्रिदरीर्मणिमाणिक्यदीपकैः ।
केलिगृहं कल्पयित्वा रेमे राजीवलोचनः ॥ ७९९ ॥

महीरुहलताकुञ्जपिहितान् गिरिगह्वरान् ।
मलयद्रुमसौरभ्यशीलितान् शीतनिर्झरान् ॥ ८०० ॥

तुङ्गानि गिरिशृङ्गाणि विपुलास्तदधित्यकाः ।
उपत्यकाश्च रुचिराश्चक्रे केलिरसस्थलीः ॥ ८०१ ॥

तासां तनुत्विषा सर्वं रञ्जितं केलिकुञ्जकम् ।
सचम्पकाकीर्णमिव विरेजे च समंततः ॥ ८०२ ॥

अन्यतो रामचन्द्रस्य तनुद्योतैर्मनोहरैः ।
तदिन्द्रनीलरत्नांशुवृन्दाञ्चितमिवाबभौ ॥ ८०३ ॥

झणज्झणितभूषाणां कूजितैः सकुतूहलैः ।
कामिनीनां कलालापैः कोकिलास्वरनिर्जयैः ॥ ८०४ ॥

सुवेलाद्रिदरी वेश्म व्याप्तं प्रतिरवोर्जितैः ।
ओषध्ये दीपकप्रायास्तत्रासन् केलिकौतुके ॥ ८०५ ॥

मत्ती सा निशा चासीदखण्डविधुचन्द्रिका ।
मध्यंदिवगतो रेजे शशाङ्कः पूर्णमण्डलः ॥ ८०६ ॥

कोटिचन्द्रसमुद्भासी एक एव व्यदृश्यत ।
महानिद्रावशं प्राप्ता मोहिताश्च निशाचराः ।
निभृतं राघवो रेमे सम्पन्ने रक्षसां पुरे ॥ ८०७ ॥

आविर्भाववशात् प्रमोदविपिनस्याङ्घ्रिप्रसादात्तथा-
तस्य श्रीरघुपुङ्गवस्य पतितव्यूहैकसंतारिणः ।
आसीदासुरभावतो विरहितं स्थानं विशुद्धं ततः-
केलीभाजनतां गतं कमलया संशोभिवैकुण्ठवत् ॥ ८०८ ॥

त्रैलोक्यं स्थगितं बभूव सहजारामस्य रासोत्सव-
क्रीडायां ववृधे महारसमयप्रेमप्रमोदार्णवः ।
तस्यैवोच्छलिताः कणाः कतिपये व्याप्ता समंतात् पर
ब्रह्मानन्दमयाः सुरासुरवरव्यालात्मविद्द्योतिषु ॥ ८०९ ॥

स्वस्वस्थानस्थिता देवा असुराश्चापि तादृशाः ।
नरा भुजङ्गमाश्चैव पातालतलवासिनः ॥ ८१० ॥

ज्ञानिनो योगिनश्चापि तथा पश्वादियोनयः ।
निवृत्ताखिलव्यापाराः सर्वेन्द्रियलयं गताः ॥ ८११ ॥

अकस्मात् सम्मुमुदिरे येषां गोत्रभवाश्च ताः ।
इत्येवं परमानन्दः सर्वविस्मारणो नृणाम् ॥ ८१२ ॥

अकस्माद्धृदि संजातास्त्रैलोक्यस्थानवासिनाम् ।
केचिद्भक्तवरास्तत्र नारदाद्याः सुरर्षयः ॥ ८१३ ॥

प्राप्ताः सुविपुलोत्कण्ठा अन्तरिक्षपथे स्थिताः ।
कौतूहलसमाविष्टा ददृशुः केलिनिर्भरम् ॥ ८१४ ॥

एवं तास्त्रिजगद्रामाः कृत्वा पूर्णमनोरथाः ।
तासां मनः समाकृष्य स्वात्मैकविषयं स्थिरम् ॥ ८१५ ॥

केलीसरोवरे स्नात्वा दत्त्वा रतिसुखं महत् ।
अन्योन्यमुक्षणं कृत्वा सुधानिर्मलपाथसा ॥ ८१६ ॥

स्थले केलीवने केलीं विधाय विपुलां विभुः ।
वितीर्य विविधं ताभ्यो मनोऽभिलषितं वरम् ॥ ८१७ ॥

सुप्रभातोन्मुखीं रात्रिं निरीक्ष्य भगवान् स्वयम् ।
सर्वा आज्ञापयामास यथास्थानं निवेशितुम् ॥ ८१८ ॥

काश्चिदत्युत्सुका रामा विलीनास्तस्य रश्मिषु ।
आविर्भावः पुनस्तासां प्रमोदवनकेलये ॥ ८१९ ॥

काश्चित् सीतासखीभूय तस्याः पार्श्वेषु संस्थिताः ।
काश्चिल्लतास्वोषधीषु संलीय निभृतं स्थिताः ॥ ८२० ॥

अनुज्ञाय प्रियां रामो माल्यवन्तमुपागमत् ।
अथ सुग्रीवमादाय सुमित्रातनयः स्वयम् ।
किष्किन्धायाः संनिवृत्तः कृत्तिकायां महामतिः ॥ ८२१ ॥

चरित्रमिदमद्भुतं किमपि राघवेन्द्रस्य यः-
शृणोति भवमङ्गलं रसविलासरासाभिधम् ।
स याति परमां मुदं जगति भक्तिमासादये-
दयथा रघुवरः स्वयं भजति वश्यतां तद्धृदि ॥ ८२२ ॥

त्रैलोक्यवरकन्यानां समुद्धारं महाद्भुतम् ।
सहजायाश्च प्राकाम्यं भक्तेषु करुणां तथा ॥ ८२३ ॥

लीलां श्रीरामचन्द्रस्य स्वप्रियायाश्च वश्यताम् ।
यो जानाति नरश्चित्तेसन मुह्येत् कदाचन ॥ ८२४ ॥

एकैव परमा लक्ष्मीः प्रमोदवनचन्द्रिका ।
सहजानन्दिनी साक्षाद्रमते रामसंगिनी ॥ ८२५ ॥

सैव श्रीजानकी सीता नित्यमद्भुतकेलिनी ।
नाम धाम स्वरूपं च तस्या वेदाद्यगोचरम् ॥ ८२६ ॥

विपुलं च यशस्तस्या गीतं कविवरैर्मुहुः ।
यस्तां संसेवते प्रेम्णा नित्यानुकूल्यवृत्तिना ॥ ८२७ ॥

स धन्यः स पुमांल्लोके पुरुषार्थनिकेतनः ।
स एव सर्ववेदानां रहस्यं वेत्ति नापरः ॥ ८२८ ॥

तस्मात् सर्वात्मना सैव सर्वभावेन चानघे ।
संसेवनीया लोकेऽस्मिन् सहजानन्दरूपिणी ॥ ८२९ ॥

अनन्तनामरूपा सा चरित्रैः सर्वमङ्गला ।
रामानन्दनिधिः साक्षाद्विचित्रगुणगुंफिता ॥ ८३० ॥

सैव श्रीराजिनि तव पुत्रीयं सुभगोत्तमा ।
सर्वासां रामलीलानां स्वेच्छयैव प्रवर्तिनी ॥ ८३१ ॥

सहजा मोदिनी सीता नामत्रयसमन्विता ।
मयाप्युपास्यते नित्यमेषा श्रीरामसंयुता ॥ ८३२ ॥

इत्युक्त्वा राजिनीं गोपीं शिवस्तदभिपूजितः ।
कैलासं जग्मिवान् देवो विमरोहीकृत्य गोपिकाम् । ८३३ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे पश्चिमखण्डे भरतलक्ष्मणीये
शिवराजिनीसंवादे रामायणचरितोक्तौ शिवगीते
षट्षष्टितमोऽध्यायः ॥ ६६ ॥

सप्तषष्टितमोऽध्यायः

श्रीशुक उवाच

इत्थं शिवस्य वचसा विज्ञाय परमार्थतः।
स्वरूपं सहजेशान्या ननन्द खलु गोपिका ॥ १ ॥

सहजारामयोर्लीलां पश्यन्ती रसरञ्जिता।
परमानन्दपाथोधिं विजगाह दिने दिने ॥ २ ॥

सौगन्धिकगिरौ रम्ये रत्नाद्रौ च मनोरमे।
कन्दरासु च शृङ्गेषु दरीगह्वरवेश्मसु ॥ ३ ॥

कुञ्जेषु च निकुञ्जेषु सर्वर्तुसुखदायिषु।
भूरूहेषु च वल्लीषु घनेषु विपिनेषु च ॥ ४ ॥

प्रासादशिखरेष्वेवं विमलादर्शवेश्मसु।
आरामेषु मनोज्ञेषु चतुःशालविराजिषु ॥ ५ ॥

विप्रकृष्टेषु रम्येषु वनेषु विविधेषु च।
लतापिहितवृक्षेषु गुल्मराजीघनाध्वसु ॥ ६ ॥

संनिकृष्टेषु कान्तारगहनेषु समंततः।
गृहवापीषु रम्यासु पद्मोत्पलसुगन्धिषु ॥ ७ ॥

सरसीषु सुगन्धासु मदान्धकलहंसकैः।
संनिनादितमध्यासु कुमुदोत्पलहल्लकैः ॥ ८ ॥

समंततः सुगन्धासु पिशङ्गजलवीचिषु।
परागरागव्याप्तासु छायाशीततलास्वपि ॥ ९ ॥

मृगोषु च कपोतीषु राजहंसकेषु केलिभिः।
मयूरीषु कोकिलासु कोकीषु लक्ष्मणासु च ॥ १० ॥

नानाविधासु क्रीडासु नानानुकरणात्मसु।
तलनादमनोज्ञेषु मन्दिरेषु मुदान्वितौ ॥ ११ ॥

क्रीडन्तौ विविधाः केलीः कलाकौशलशालिनौ।
विचित्रवेषालङ्कारौ विचित्रवनमालिनौ ॥ १२ ॥

वसन्ते वनकेलीभिः पुष्पावचयलीलया।
रसगाथास्वरोद्गानैर्डफाभुरजवादनैः ॥ १३ ॥

मुरलीवल्लकीघोषैर्यूथगालीविनोदनैः।
ग्रीष्मे जलविहारैश्च नौकाजलविरहणैस्तथा ॥ १४ ॥

सेतुबन्धविधानैश्च सरसीजलमध्यतः ।
वापीहिन्दोलनैश्चैव सरितां तरणैस्तथा ॥ १५ ॥

स्निग्धच्छायावस्थितिभिः कल्लोलानिलसेवनैः ।
चन्दनद्रवसंदोहस्निग्धकर्पूरसेवनैः ॥ १६ ॥

व्यजनानिलसंस्पर्शैर्जलयन्त्रनिषेवणैः ।
चन्द्रज्योत्स्नादर्शनैश्च सायं स्नाननिषेवणैः ॥ १७ ॥

वर्षासु नीपकुञ्जेषु सौरभानिलसेवनैः ।
घनाम्बुदघटारम्यबलाकातनिदर्शनैः ॥ १८ ॥

कृष्णाभिसारविधिभिस्तडिल्लेखाकुतूहलैः ।
इन्द्रचापचमत्कारवीक्षणैर्घनविन्दुभिः ॥ १९ ॥

रक्तवस्त्राभिरुचिभिः शाद्वलासनकौतुकैः ।
मयूरनादश्रवणैर्घनधारानिरीक्षणैः ॥ २० ॥

प्रासादशिखरारोहैश्चातकध्वनिशीलनैः ।
मल्लाररागबन्धैश्च सरिद्वृद्धिनिभालनैः ॥ २१ ॥

प्रमत्तकोकिलालापै रसालफलसौरभैः ।
मयूरताण्डवकलादर्शनैः कलनिःस्वनैः ॥ २२ ॥

घनव्यूहसमारोहकौतुकाम्बरवीक्षणैः ।
घनान्धकारनिविडतमालतरुसेवनैः ॥ २३ ॥

पर्णच्छत्रतलावासैः कदलीवनसेवनैः ।
शिलीन्ध्रशोभाकुतुकैरपराजित[1]दर्शनैः ॥ २४ ॥

अनेकवल्लिकारोहकौतुकोत्सवदर्शनैः ।
दर्दुरध्वनिहासैश्च केकिनादाभिनन्दनैः ॥ २५ ॥

कन्दरागृहवासैश्च गिरिशृङ्गाधिरोहणैः ।
गिरिशाद्वल भूमीनां निभालन कुतूहलैः ॥ २६ ॥

विचित्रविन्दुवसनपरिधानकुतूहलैः ।
हिन्दोलाकुतुकैश्चैव गोपीगानकुतूहलैः ॥ २७ ॥

विचित्रवसनारम्भकौतुकैर्ललनागणैः ।
शरत्सु श्वेतजलदव्योमनैर्मल्यदर्शनैः ॥ २८ ॥

सप्तच्छदसुमोल्लासकुतूहलनिभालनैः ।
कैरवोल्लासकलनैश्चान्द्रोनैर्मल्यकौतुकैः ॥ २९ ॥

---

१. अपराजितः पुष्पजातिविशेषः ।

तारकागणशोभाभिर्मुनिद्रुमसुकोरकैः ।
मल्लिकावल्लिकुसुमविकासोद्गारिसौरभैः ॥ ३० ॥

जलनैर्मल्यशोभाभिः सरित्पुलिनदर्शनैः ।
विकासिकाससशोभाढ्यदिगनन्तपरिदर्शनैः ॥ ३१ ॥

तुषारकणसम्पातमौक्तिकक्षणदर्शनैः ।
नित्यभोजनसंतोषपितृब्राह्मणदर्शनैः ॥ ३२ ॥

नवदुर्गार्चनोत्साहैर्विजयादशम्युत्सवैः ।
कार्तिकस्नानमिलितनरनारीसुसङ्गमैः ॥ ३३ ॥

प्रत्यूषसमयोन्निद्रस्तनसंगतकाहलैः ।
प्रकाशदीपमालानां शोभादर्शनकौतुकैः ॥ ३४ ॥

सितमन्दिरशोभाभिर्दीपावलिमहोत्सवैः ।
द्यूतकेलिविनोदैश्च तुलसीवनपूजनैः ॥ ३५ ॥

अन्नकूटोत्सवसुखै रत्नाचलसमर्चनैः ।
सरयूसलिलस्नानसंगताप्सरसां गणैः ॥ ३६ ॥

कुञ्जमन्दिरशोभाभिर्नृत्यगीतविनोदनैः ।
स्वयं रासविलासैश्च गानतालविधानकैः ॥ ३७ ॥

हरिप्रबोधकुतुकैः किन्नरीगणनर्तनैः ।
सर्वतोभद्रपद्मादिमहामण्डमण्डनैः ॥ ३८ ॥

पञ्चभीष्मविधानोत्थनृत्यवाद्यादिदर्शनैः ।
दम्पतिव्रजपूजाभिः सुन्दरीगणदर्शनैः ॥ ३९ ॥

प्रातःस्नानसमायातस्निग्धगोपीनिभालनैः ।
अनेकमिषसम्प्राप्तपट्टाम्बरधराद्भुतैः ॥ ४० ॥

गोपीगणैः कृतानेकहावभावनिरीक्षणैः ।
नवीनशीतसमयप्रादुर्भूतकुतूहलैः ॥ ४१ ॥

कर्पासशीलनैः शोभिविचित्रपटधारणैः ।
हेमन्तेषु वसन्तीभिर्गृहाभ्यन्तरवेश्मभिः ॥ ४२ ॥

कूर्पासकञ्चुकवरशीलनैर्धर्मशीलनैः ।
ताम्बूलभोजनैर्भूरिघृसृणान्तरिताशनैः ॥ ४३ ॥

दीपिकाभासितगृहान्तःकालागुरूधूपनैः ।
सुगन्धितैलाभ्यङ्गैश्च सूर्यांशुस्पर्शशीलनैः ।
हेमन्तोक्तैर्महाभोगैः शिशिरेऽपि निषेवणैः ॥ ४४ ॥

क्रीडन्तौ सहजारामौ जनयामासतुर्मुदम् ।
त्रैलोक्यमङ्गलभरं सुखं पुपुषतुश्च तौ ॥ ४५ ॥

श्यामां चैव तथा रामां समस्नेहेन मोदयन् ।
रामानुगत एवासौ ववृते केलिकोविदः ॥ ४६ ॥

मुक्ताहारधरः किरीटतटयोः प्रोद्बद्धमुक्तासरः-
क्रीडानाट्यकरः कलापटुतरः कैशोरवेशोत्तरः ।
बद्धाधोनटकच्छसुन्दरवरः प्रोल्लासिपीताम्बरः-
श्रीरामः शुशुभेतरां त्रिजगतामेकानुकम्पाकरः ॥ ४७ ॥

प्रमोदवनचन्द्रमाः सकलसत्कलाभूषितः-
समस्तसुखितव्रजप्रवणगोपिकासौख्यदः ।
अनेकपरिलालनप्रचयकारिमाङ्गल्यका निकेतन-
महामणिर्विजयते रघूणांपतिः ॥ ४८ ॥

शृङ्गारस्यैष सीमा परममधुरताधोरिणीनां धुरीणः-
श्रीमान् श्रीमत्प्रियायाः प्रणयरसधुनीस्रोतसिस्नानशीलः ।
पूर्णानन्दव्रजेन्दुस्त्रिजगति वितरन् भक्तिपीयूषपानं-
श्रीमन्माङ्गल्यका यास्त नय इतिमुदं राघवेन्द्रो त्रिधत्ते ॥ ४९ ॥

इत्यहं राघवेन्द्रस्य रामस्य परमात्मनः ।
तवपुत्र्याश्च सीतायाः स्वरूपमिदमुक्तवान् ॥ ५० ॥

इयं श्रीसहजा साक्षाच्छ्रीरामानन्दरूपिणी ।
सततं भाव्यतां राजन् जन्मबन्धहृतीच्छया ॥ ५१ ॥

कर्माण्यस्यां समर्प्यथ छिन्नकर्माशयो नृप ।
नित्यब्रह्मभयो भूत्वा मा शोचस्त्वं कृताकृते ॥ ५२ ॥

इदं ते गोपनीयं च सहजाकेलिकौतुकम् ।
अभक्तेभ्यो निन्दकेभ्यो नैष्कृतेभ्यस्तथा नृप ॥ ५३ ॥

प्रकाशनीयं रसवर्त्मवेदिने भक्ताय रामाद्भुतकेलिशालिने ।
निवृत्तमायासदमोहबुद्धये रामं परब्रह्म सदा भजिष्णवे ॥ ५४ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे पश्चिमखण्डे भरतलक्ष्मणीये-
श्रीशुकजनकसंवादे सप्तषष्टितमोऽध्यायः ॥ ६७ ॥

अष्टषष्टितमोऽध्यायः

जनक उवाच

तव प्रसादान्मुनिवर्य तत्त्वं ज्ञातं मया सहजायाः परं यत् ।
इयं चिदानन्दघनासनातनी पूर्णा कला योगविदामगोचरा ॥ १ ॥

ब्रह्मतत्त्वं परं यत्तदक्षरं परमं पदम् ।
सर्ववेदान्तवाक्यानां स्थानमेकं निरूपितम् ॥ २ ॥

समासव्यासयोगेन शब्दब्रह्म प्रतिष्ठितम् ।
यत्र दिक्कालसम्बन्धरहिते परमात्मनि ॥ ३ ॥

तदेव सर्वभूतानामन्तर्यामितया स्थितम् ।
अवतारकलानां च स्रोतसामिव तत्सरः ॥ ४ ॥

अनवद्यं पदं पूर्णं मायासम्बन्धवर्जितम् ।
प्रकृतिं पुरुषं चापि यदतीत्य व्यवस्थितम् ॥ ५ ॥

पूर्णं चिदानन्दमयं नभश्च यद्योगीश्वराणां धिषणाभिरस्पृशम् ।
सर्वक्ष साम्येन युतं निरन्तरं क्षरातिगं च प्रतियोगिशून्यम् ॥ ६ ॥

ततः परं तत्पुरुषोत्तमाख्यं परं तत्त्वं सहजारामशब्दितम् ।
अर्वाग् यतो ब्रह्म यदक्षरं तद्दीपस्य यद्वच्च विभा प्रसृत्वरी ॥ ७ ॥

इति त्वदाख्यातगिरां मुनीन्द्र सर्वस्वमेतन्मयका न्यबोधि ।
अतोऽहमग्रेतनयोगसंविदां संशीलनादस्मि सुमन्थरादरः ॥ ८ ॥

विहाय कर्माणि च तत्त्वसंविदां परिश्रमोक्ताश्च हिता उपासाः ।
श्री श्रितोऽस्मि सर्वस्य फलं स्वरूपतः प्रमाणमेकं सहजारामसंस्थम् ॥ ९ ॥

धन्यास्ते भक्तिभावैर्निजहृदि सहसा रामलीलानुभावे
हृष्यन्तो मुक्त्यतीते पथि परमतमानन्दपूर्णे प्रतिष्ठाः ।
रोमाञ्चस्वेदसंस्तम्भननयनजलोद्भावकम्पादियुक्ता
मुक्ताः संसारदुःखैरहमिह सततं दासदासोऽस्मि तेषाम् ॥ १० ॥

येषां रामे सहजासंगयुक्ते श्रीमत्प्रमोदाटविवासहृष्टे ।
नित्यं मनः प्रेमसमाधिमग्नं तेऽसि धन्या यूयमेते मुनीन्द्राः ॥ ११ ॥

इमां चिदानन्दकलां स्वयंभुवं स्वरूपतः श्रीसहजात्मिकामहम् ।
विज्ञाय पूर्णेश्वरतागुणाक्तां धियं किमु स्नेहपथे निवेशये ॥ १२ ॥

ऐश्वर्यमस्याः स्मरतः प्रतिक्षणं कथं नु वात्सल्यरसो भविष्यति ।
इत्यस्मि चिन्ताकुलितोऽधुना मुने त्वयोपदिष्टे निभृते प्रेममार्गे ॥ १३ ॥

श्रीशुक उवाच

अस्याः काचित् परामाया या लीलाङ्गोपयोगिनी ।
तयैव विस्मृतैश्वर्यवात्सल्येनु भविष्यसि ॥ १४ ॥

पुत्रीस्नेहमयीं बुद्धिं प्राप्य ब्रह्मरसातिगाम् ।
लीलानुभवसानन्दः कृतकृत्यो भविष्यसि ॥ १५ ॥

अनुग्रहो मयीशस्य रामस्य परमात्मनः ।
यल्लीलानुभवं दातुमुद्यतोऽसौ भवादृशे ॥ १६ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे पश्चिमखण्डे भरतलक्ष्मणीये सीताजन्मोत्सेव श्रीशुकजनकसंवादेऽष्टषष्टितमोऽध्यायः ॥ ६८ ॥

एकोनसप्ततितमोऽध्यायः

लक्ष्मण उवाच

इत्युदीर्य शुको नाम योगीन्द्रः परमोहभित् ।
द्योतयन् हरितः कान्त्या जगाम जनकालयात् ॥ १ ॥

तमनुप्रययुः केचिन्मुनयस्तत्त्वदृष्टयः ।
आसाकेतपरं धाम व्रजत्येष महामुनिः ।
आ च शेषालयमधो जगत्कल्याणदायकः ॥ २ ॥

तदानतात्परिज्ञाय रामतत्त्वं परात्परम् ।
कृतकृत्योऽभवद्राजा नेमिचन्द्रः समात्मवित् ॥ ३ ॥

भुवमप्सु समावेश्य तास्तेजसि मरुत्सु तत् ।
मरुतो व्योमनि व्योम मनस्तत्त्वे प्रवेश्य च ॥ ४ ॥

मनो बुद्धौ च बुद्धितामहंकृतिगतां स्मरन् ।
अहंकृतिं स्मरेच्चित्ते चित्तं विज्ञानगं स्मरन् ॥ ५ ॥

विज्ञानं महति प्राप्य महत् प्रकृतिगं स्मरन् ।
प्रकृतिं बहिरङ्गायां मायाशक्तौ प्रवेश्य च ॥ ६ ॥

मायाशक्तिं च पुरुषे पुरुषं चाक्षरे परे ।
अक्षरं चित्स्वरूपायां सहजायां परात्मनि ॥ ७ ॥

सहजां भावयन् रामे पुरुषोत्तमशब्दिते ।
परमे ब्रह्मणि सदा पूर्णानन्दे विपश्चिता ॥ ८ ॥

तद्भावभाविताभावात्सदा तद्भावभावितः ।
ततः सप्रमोदवनगुहायां निहितं च तत् ॥ ९ ॥
भावयानः परं ब्रह्म भूयो न व्युदतिष्ठत ।
गच्छञ्जल्पञ्जगत् पश्यन् बाधिताकारमात्मनि ॥ १० ॥

कुर्वन् विविधकर्माणि लोकयात्रावहान्यपि ।
जिघ्रंश्च रसयन्नश्नन् स्पृशन्निन्द्रियगोचरात् ॥ ११ ॥

न व्यवच्छिद्यत ततो वस्तुनः परमार्थिकात् ।
निर्दिष्टं यच्छुकेनास्मै सहजानन्दिनीपदम् ॥ १२ ॥

ध्यानधारणयोगेन यच्चानेन स्थिरीकृतम् ।
आत्मनीषच्चिदानन्दसम्पर्कानुमितं बलात् ॥ १३ ॥

ईक्षाञ्चक्रे तदप्येष प्रकटं दिव्यचक्षुषा ।
एकदा क्षुधिता बाला मातुस्तन्यपिपासया ॥ १४ ॥

न गृहीता जवादेत्य मात्रा गौर्यर्चनस्थया ।
तावज्जनक आगत्य स्वापत्यस्नेहकातरः ॥ १५ ॥
उत्थाप्यैनां निजाङ्कस्थां कर्तुं समकरोन्मतिम् ।
तावत्प्रदर्शयामास परमैश्वर्यमात्मनः ॥ १६ ॥

यत्रानेकरवीन्दुमण्डलचयं वह्नित्रयं दृष्टवा
निन्द्राद्यान्दशदिक्पतींश्च बहुधा ब्रह्मादिकांल्लोकपान् ।
अन्यान् स्थावरजङ्गमस्थविषयग्रामान् जगच्चाखिलं-
स्थूलं सूक्ष्ममथो परं च सकलं तस्याः शरीरस्थितम् ॥ १७ ॥
अपश्यत्तामेव कचन पुरुषं पीतवसनं
परं सुद्विभुजं धनुर्बाणधरं किरीटिनम् ।

अलौकिक्या कान्त्या त्रिभुवनपरिव्याप्ततमया
तपन्तं श्रीरामाह्वयमयमथो तां च महिषीम् ॥ १८ ॥
कदाचित्पुरुषाकारं स्त्र्याकारं च कदाचन ।
दृष्ट्वा महो विचित्रं तन्निश्चेतुं नाशकन्नृपः ॥ १९ ॥

उज्ज्वलोज्ज्वलमत्यर्थं प्रसृत्वरमनन्तकम् ।
विश्वव्यापकमात्मैकं महस्तदतिनिर्मलम् ॥ २० ॥

त्रयस्त्रिंशत्कोटिसंख्यत्रिदशालयसंश्रयम् ।
अपूर्वमपराबाह्यमनन्तरमनश्वरम् ॥ २१ ॥

चिदेकाकारविस्फूर्जदूर्जस्वलमुदित्वरम् ।
विश्वक्प्रवाहरूपत्वं प्रत्यग् वीक्ष्य मुमोद सः ॥ २२ ॥

आसीच्च विस्मितप्रायो भूयो भूयो विलोक्य सः ।
कालोऽस्यास्तनावैक्षिष्ट संवर्तः प्रलयात्मकः ॥ २३ ॥

महच्च भूतमतुलमुदग्रसर्वसाम्यवत् ।
पञ्चभूतान्यहंकारो मात्राश्चैव पृथक् पृथक् ।
समष्टिं चैव व्यष्टिं च सविशेषमुदैक्षत ॥ २४ ॥

वेदांश्च चतुरस्तत्र स्तुवतः शब्दरूपिणः ।
परं चैवापरं विश्वं विलोक्यैष विसिस्मिये ॥ २५ ॥

यावतीधीर्विकल्पाख्या शब्दार्थव्याप्तिगोचरा ।
तावती सं बभूवास्य स्फुटमेनां प्रपश्यतः ॥ २६ ॥

ततो विस्मृतयोगोऽसौ बहिःप्रत्ययभाङ् नृपः ।
चिदानन्दं परं धाम ज्ञात्वा तुष्टाव तुष्टिमान् ॥ २७ ॥

जनक उवाच

त्वं वै न देवा न च मर्त्यतिर्यङ् न स्त्री न षण्ढो न पुमान्न जन्तुः ।
नायं गुणः कर्म न सन्न चासन्निषेधशेषा जयतात्पराचित् ॥ २८ ॥

इदं महन्मूलमशेषबीजं सत्यं चिदानन्दमयं चकास्ति ।
विष्वक्समुद्भासि महोऽत्युदग्रं गुणाद्भुतं चापि गुणातिगं च ॥ २९ ॥

एतत्समालम्बितुमस्त्यनर्हा मच्चितवृत्तिर्विषयानुशीला ।
अदर्शि यच्चापि तया स्फुटं तदेवानुकम्पा दयनीयजन्तौ ॥ ३० ॥

यस्यास्तनौ संततमेतदोतं प्रोतं च विश्वं प्रतिभाति सम्यक् ।
प्रत्यक् चितिं तां जगदेककर्त्रीं भर्त्रीं च हर्त्रीं प्रणतोऽस्मि नित्यम् ॥ ३१ ॥

यदाह मेऽसौ भगवान् मुनीन्द्रः शुकोऽखिलाचार्यगुरुर्गुरुर्मे ।
व्यलोकि तत्सर्वमिहाप्रमेयमूर्तौ चिदानन्दपदे तथैव ॥ ३२ ॥

किमत्र शक्यं करणीयमन्यदस्मादृशैर्जीवितमैर्विधातुम् ।
इति प्रविज्ञाय नतोऽस्मि नित्यं प्रेमैकवश्येत हृदा प्रपन्नः ॥ ३३ ॥

सहजानन्दिनीमेतां श्रीरामाभिन्नमूर्तिकाम् ।
मुहुः परमया भक्त्या नतोऽस्मि प्रणतोऽस्मि च ॥ ३४ ॥

न यस्यादिर्न वा मध्यं नान्तं कुत्रापि दृश्यते ।
तदहं प्रणतोऽस्म्येतच्चिदानन्दमयं महः ॥ ३५ ॥

न कर्म न तपो ज्ञानं न वा योगस्तथा व्रतम् ।
सा धनं खलु सम्पूर्णं फलेनैवानुमीयते ॥ ३६ ॥

अथवैककृपामात्राद् दृश्यते मे दृशा महः ।
निःसाधनानां स्वीकारे हीदमेव निदर्शनम् ॥ ३७ ॥

[1]लक्ष्मण उवाच

इति स्तुवत एवास्य प्रणिपत्य मुहुर्मुहुः ।
तद्रूपमुपसंजह्रे सहजानुग्रहात्मकम् ॥ ३८ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे पश्चिमखण्डे भरतलक्ष्मणीये सीताजन्मोत्सवे एकोनसप्ततितमोऽध्यायः ॥ ६९ ॥

सप्ततितमोऽध्यायः

लक्ष्मण उवाच

ततस्तां बालवेशेन शोभयन्तीं स्वमालयम् ।
विलोक्य जनको राजा अपत्यस्नेहकातरः ॥ १ ॥

तत्क्षणाद्विस्मृतैश्वर्यो बभूव प्रीतमानसः ।
बाल्यक्रीडनकैः सा तु क्रीडमाना स्वमातृभिः ॥ २ ॥

लाल्यमाना गृहे राज्ञ्या अङ्कभृशमभूषयत् ।
शिक्यस्था दोल्यमाना सा तात तातेति भाषती[2] ॥ ३ ॥

उद्वर्तनेन संस्निग्धा साञ्जनाञ्जनबिन्दुभिः ।
डाकिनीनां दृष्टिदोषादुत्तरारसवैभवात् ॥ ४ ॥

डाकिनी पूतना या तु कूष्माण्डा भैरवादयः ।
बालां तामुपसंयातास्तेजसागुः पराहताः ॥ ५ ॥

इत्थमैश्वर्यकलिता गुणसंदोहभाविता ।
तयोर्मनसि दम्पत्योः प्रेमपुष्टिं ततान सा ॥ ६ ॥

तज्जन्मदिवसादेव राज्ञो जनकभूपतेः ।
मन्दिरं सर्वशोभाढ्यमवर्तत रमालयम् ॥ ७ ॥

वैकुण्ठमिव भूमिष्ठं जनकस्य पुरं बभौ ।
भूरभूत् काञ्चनमयी तत्क्षणात् पश्यतां नृणाम् ॥ ८ ॥

---

१. नास्ति–बड़ौ० । २. आर्षप्रयोगः ।

कमलेशी घोषवती साक्षादमृतवाहिनी ।
जातरूपमहाकूला जनकस्य पुरे वभौ ॥ ९ ॥

शिवलिङ्गानि दिव्यानि तत्र तत्र चकाशिरे ।
सद्यः पूजयतां नृणां मनसः कामदानि च ॥ १० ॥

श्रीमन्नारायणस्तत्र श्रीरामस्य कलांशकः ।
निवासं तत्र कृतवान् यथा वैकुण्ठगः स्वयम् ॥ ११ ॥

इतः प्रमोदविपिनं जनकस्य पुरं ततः ।
मध्ये ब्रह्मादिदेवानां वासस्थानं बभूव तत् ॥ १२ ॥

सर्वर्तुसुखशोभाढ्यं चन्दनानिलसेवितम् ।
जनकस्य पुरं रम्यमयोध्यासदृशं वभौ ॥ १३ ॥

निवासः सर्वसिद्धानां योगसिद्धेः सदैव तत् ।
जनकेन्द्रपुरं नित्यं तत्क्षणेन व्यरोचत ॥ १४ ॥

सरांसि फुल्लत्कमलानि नित्यं मादद्यन्महाराजहंसीकुलानि ।
रत्नोप्तहेमोज्ज्वलकल्पपुष्पनिःश्रेणिकाशोभितनिर्मलानि ॥ १५ ॥

वनानि वल्गुस्फुरितच्छदानि संफुल्लपुष्पाणि फलान्वितानि ।
गुञ्जत्प्रमत्तभ्रमरावलीभिर्मुहुः समास्वादद्य मधुश्रवाणि ॥ १६ ॥

देशः स तावन्मिथिलेति संज्ञो मिथः प्रमोदाः खलु यत्र लोकाः ।
नार्यश्च सर्वाः सुभगा रमाभा भास्वन्मणिद्योतितहैमभूषाः ॥ १७ ॥

सीताजनुर्भूरिमहोत्सवेन व्याप्तान्तरा याज्ञवल्क्यादयोऽपि ।
विस्मृत्य चित्तेषु समाधियोगं प्रेमैकमग्ना मुनयो बभूवुः ॥ १८ ॥

स्थले स्थलेऽभूत कमलाविलासो विलासिनीनां मतिविभ्रमेषु ।
वीथीषु यत्रस्फुटहेमयूथीसवर्णभासां प्रमदोत्तमानाम् ॥ १९ ॥

पर्यङ्कपुष्पास्तरणान्वितेषु शुद्धान्तसौधेषु सुमङ्गलानि ।
गीतानि वीणास्वरवादनीनां स्त्रीणां महासौभगभूषितानाम् ॥ २० ॥

स्खलद्गतीनां मदमन्थराणां मधूत्तमास्वादसुविह्वलानाम् ।
कटाक्षनिक्षेपभुजोन्नतिश्रीवश्या बभूवुः [1]कमनाप्रियाणाम् ॥ २१ ॥

बाला युवानश्च तथैव वृद्धाः सर्वे जनाः सोत्सवपूर्णचित्ताः ।
सीताजनौ जातमुदो विरेजुर्यथैव साकेतपुराधिवासाः ॥ २२ ॥

कलाकलापाः सहसाऽविरासुर्विलासभूमौ जनकेन्द्रपुर्याः ।
दिने दिने शैशवमुत्तरन्ती केशोरमेषा वयसा प्रपेदे ॥ २३ ॥

---

१. कमनाः—कामुकाः ।

कैशोरमारभ्य रघूत्तमस्य संश्रृण्वती साथ गुणान् मनोज्ञान् ।
रोमाञ्चसंदोहचिताङ्गयष्टिः प्रकम्पमाना ददृशे सखीभिः ॥ २४ ॥

नवं प्रमोदप्रचुरं वयः सा कैशोरमासाद्य विराजमाना ।
अत्यर्थमादौ सुरभेर्बभूव सपल्लवा काञ्चनवल्लरीव ॥ २५ ॥

अथास्याश्चरितं वक्ष्ये मुक्तिदानक्रियात्मकम् ।
ये जीवा वेदशास्त्राणां निन्दका गुरुनिन्दकाः ॥ २६ ॥

अभ्यागतार्चारहिताः शुद्धकायाश्च पुण्यतः ।
ते जीवा जानकीजन्मत्युत्पन्नाः कर्मयोगतः ॥ २७ ॥

वृक्षगुल्मलतारूपाः पशुपक्ष्यादिरूपिणः ।
तद्वीक्षणक्षणेनैव धूतपापकदम्बकाः ॥ २८ ॥

जीवन्मुक्ता बभूवुर्वै येषां मक्तिश्च नान्यतः ।
ये जीवाः कार्मिकाश्चैव यज्ञकर्मपरायणाः ॥ २९ ॥

शुद्धान्वयोद्भवा दैवादयोध्यारामनिन्दकाः ।
सीमानः कर्मनिष्ठानां भक्तिनिष्ठाविदूषकाः ॥ ३० ॥

सीतोपासननिन्दायां प्रसक्ता भवदूषकाः ।
तेषामासुरनिष्ठानां जीवानां मूढचेतसाम् ॥ ३१ ॥

सीताजन्मोद्भवानां वै वृक्षगुल्मादिरूपिणाम् ।
पशुपक्ष्यादिदेहानां विमुक्तिर्दर्शनात्तदा ॥ ३२ ॥

रामेण मोचिता ये न ये न ज्ञानेन मोचिताः ।
दृढपाशैः कर्मभिर्ये बद्धाः सांसारिकाः जनाः ॥ ३३ ॥

सीता जन्मप्रसंगेन तांस्तारयति निश्चितम् ।
इममर्थं पुरस्कृत्य प्रादुर्भूतेयमद्भुता ॥ ३४ ॥

नान्यथा मोचनं तेषां जानक्या दर्शनं विना ।
अयमेवानुभावोऽस्या आनन्दिन्याश्चिदाकृतेः ॥ ३५ ॥

स्वरूपेणैव सामर्थ्याद्यन्मोचयति चेतनान् ।
दर्शनात् स्पर्शनाल्लापात्पादनिक्षेपणात्तथा ॥ ३६ ॥

अङ्गप्रसंगिनो वातात्तारिता बहवस्तया ।
एतद्धि शैशवं कर्म तस्याः सामर्थ्यसंयुतम् ॥ ३७ ॥

मूढभावानुकरणे मर्यादात्रयलङ्घिता ।
मूढभावं समुत्तीर्य कैशोरे सा व्यवस्थिता ॥ ३८ ॥

मुनीनां ज्ञानिनां चित्ते योगिनां च विशेषतः ।
निजदर्शनमात्रेण प्रेमाणं साध्यवर्द्धयत् ॥ ३९ ॥

ततः प्रेमप्रभावेण बभूवुर्भक्तिसंयुताः ।
एतत्कैशोरकं कर्म तस्या लीलानुभावनम् ॥ ४० ॥

श्रोतव्यं स्मरणीयं च रामलीलारसाधिकम् ।
अन्यत्त्वापि वयस्तस्या नित्यलीलाचिदाकृतेः ॥ ४१ ॥

अवस्थारूपनियतं चरित्रैर्जन्मतारकम् ।
लीला गुणाश्चरित्रं च तस्याः संसारतारकम् ॥ ४२ ॥

अस्या जनिस्त्वेतदर्थं विज्ञेयाखिलकोविदैः ।
तारयन्ती जनांस्तांस्तात् स्वलीलारसरञ्जिता ॥ ४३ ॥

ववृधे जानकी गेहे पितुरानन्दकारिणी ।
बाललीलारसं भूयः शीलयन्ती स्वभावतः ॥ ४४ ॥

कैशोरं जुषमाणापि ददृशे बाल्यशालिनी ।
रूपं तस्याः समुद्वीक्ष्य त्रैलोक्यवरयोषिताम् ॥ ४५ ॥

व्यगलत्सौन्दर्यमदः सदय एव समंततः ।
तन्मायामोहिताः केचिच्चित्ते च कमिरे जनाः ॥ ४६ ॥

रावणस्तां समाकर्ण्य त्रैलोक्येऽनन्यसुन्दरीम् ।
वाणश्चापि महावीरश्चुक्षोभ हृदये स्वके ॥ ४७ ॥

अथो जनकराजेन पणीचक्रे स्वके हृदि ।
य इदं शाम्भवं चापं समाकृष्याधिरोपयेत् ॥ ४८ ॥

स मेकन्यां समुद्वाह्य पाणिग्रहविधानतः ।
लोकोत्तरगुणारामो यास्यते मम मान्यताम् ॥ ४९ ॥

सर्वे वितथसंरम्भा बभूवुश्चापरोपणे ।
जातः स्वयंवरारम्भेस्तस्याः षड्वार्षिके[1] वये ॥ ५० ॥

विश्वामित्रेण मुनिना कृतदिव्यपराक्रमः ।
दत्ताखशस्त्रसंदोहस्तत्रार्यो नीत एव सः ॥ ५१ ॥

स भङ्क्त्वा शाम्भवं चापं महावीर्यं दुरासदम् ।
पश्यतां सर्ववीराणामुद्वाह स्वयं प्रियाम् ॥ ५२ ॥

आद्वीपान्तस्थितो भूपाः सर्वे ये तत्र संगताः ।
गतमानास्तनुं पूजां समादाय गृहान् ययुः ॥ ५३ ॥

संजाता महती पूजा तत्रार्यस्य स्वयं वरे ।
कथमन्यस्य सा चार्हा सिंहस्येव बलिः पशो ॥ ५४ ॥

---

१. आर्षप्रयोगः ।

तत्र स्वयंवरे पूर्वं संगतौ वाणरावणौ ।
भग्नमानौ ततौ भूत्वा हरचापाधिरोहणे ॥
ययतुः स्वगृहे तौ च श्रीरामासूययाञ्चितौ ॥ ५५ ॥

समासाद्य प्रियां रामः स्वयं श्रीपुरुषोत्तमः ।
जनकस्य गृहे रम्ये मुमोद परया मुदा ॥ ५६ ॥

इति श्रीमदाविरामायणे ब्रह्मभुशुण्डसंवादे पश्चिमखण्डे भरतलक्ष्मणीये श्रीशुकजनकसंवादे सीताजन्मोत्सवे सप्ततितमोऽध्यायः ॥ ७० ॥

पश्चिमखण्डः समाप्तः ॥

श्रीमदादिरामायणम्

(भुशुण्डरामायणम्)

उत्तरखण्डः

प्रथमोऽध्यायः

ब्रह्मोवाच

एकदा विबुधाः सर्वे सुखिता रावणे हते।
मघवन्तं पुरस्कृत्य ब्रह्मलोकमुपाययुः ॥ १ ॥
तत्र गत्वा स्वयं देवं परमेष्ठिनमीश्वरम्।
रावणस्य वधादेशादूचुः स्वकृतकृत्यताम् ॥ २ ॥

देवा ऊचुः

कृतकृत्याः स्म भगवान् स हतो राक्षसेश्वरः।
रामेण देवदेवेन [1]रसिकेन लोकरञ्जिना ॥ ३ ॥
स्वर्गे वयं स्वस्वपदानि[2] सर्वे लभेम दुःखं विनिवारितं ततः।
स्वाहास्वधाकारकृतानि हव्यकव्यानि संस्थामगमन् स्वकीयाम् ॥ ४ ॥
एवं त्रिलोकस्य निवारितं तमस्तत्पापसंज्ञं हरचण्डीवरोत्थम्।
लङ्काधिराज्ये चाभिषिक्तोः वरेण्यो विभीषणो वैष्णवः स्वस्य भक्तः ॥ ५ ॥
त्रयी च[3] धर्मश्च चिरेण नष्टौ संस्थापितौ गोद्विजविप्रभक्तिः।
स्वीया च भक्तिस्त्रिदशैरप्यलभ्या प्रसादनाम्नोर्महिमा वैष्णवानाम् ॥ ६ ॥
कृतानि कर्माणि तथा विचित्राण्यानन्ददानिस्वेषु दुःखं परेषु।
तीर्थानि सीताचरणाङ्कितानि विनिर्मितानि स्वपदैरङ्कितानि ॥ ७ ॥
नामानि देवेन सुमङ्गलानि स्फुटीकृतान्यद्भुतपावनानि।
चाण्डालहूँणोत्खसपुष्कसाद्यैः स्मृतानि सद्यो निजसायुज्यदानि ॥ ८ ॥
कृतानि रामेण नरोत्तमेन पुण्यस्थलानिस्वपदानिभूम्याम्।
सीतासुमित्रातनयाभ्यां हनूमता युक्तः स्वयं यत्र सदावतिष्ठते ॥ ९ ॥

---

१. पादेऽस्मिन्नक्षराधिक्यमार्षः।
२. 'सर्वे' नास्ति–बड़ौ०।
३. 'च' नास्ति–बड़ौ०।

विक्रीडितं प्रमुदकाननमध्यगेन माङ्गल्यकासुखितयोः सदने परेण ।
आभीरबालवनितावधितन्निजस्य वैकुण्ठधाम नयता निशि सुप्तलोकम् ॥ १० ॥

विक्रीडितं दशरथस्य गृहे तथोच्चैरीशेन दिव्यवपुषा पुरुषोत्तमेन ।
स्वांशैः समं भरतलक्ष्मणशत्रुसूदैर्देव्या स्वयं कमलया च युतेन नित्यम् ॥ ११ ॥

तच्चित्रकूटगिरिवर्यचरित्रमीशकः स्तोस्तुमीष्ट इति किं भगवन्नवेत्सि ।
यत्रार्यपादरजसाशतशः स्थलेषु भक्तिप्रदं प्रतिपदं खलु कोटितीर्थम् ॥ १२ ॥

यद्दण्डकावनभुवि प्रभुणानुजेन विक्रान्तमेवमितरेषु च काननेषु ।
तत्तत्र तत्र विपुलं स यशो दधार पुण्याश्रमेषु च महत्कुशलं मुनीनाम् ॥ १३ ॥

शत्रुर्हतश्च जगतां सगणः सवर्गः सद्यः प्रसादसुमुखेन विभीषणश्च ।
राज्ये सुनिश्चलतरे वचसाभ्यषिञ्चद्दूरीकृतश्च दयिताविरहोऽविषह्यः ॥ १४ ॥

भूर्यध्वमेधमखमङ्गलदीक्षितेन यूपाङ्किताः सरयुकूलभुवः कृताश्च ।
अभ्युद्धृताश्च भवसागरतो मनुष्या आपामरा अपिशठा अधिकारहीनाः ॥ १५ ॥

रामेति नाम रसनेन सकृद्गृमन्तः पक्ष्यन्त्यजा अपिजयन्त्युररीकृताश्च ।
जाता वयं च कृतकार्यसमस्तकृत्या भूमिः सनाथमभवद्बहुलक्ष्यवल्लिः ॥ १६ ॥

को वर्णयेदपि सहस्रमुखो गिरीशो नामानि तस्य चरितानि गुणांश्च भर्तुः ।
नायं प्रभुः स्पृहयते भुवि राज्यलक्ष्मीं वैकुण्ठनाथप्रतिपूजितपादपद्मः ॥ १७ ॥

किं तु स्वभक्तजनदुःखनिवारणायसम्भूय भूरि वितनोति शुभं चरित्रम् ।
सम्पन्नमद्य तदशेषमनन्तकीर्त्तेर्भूयोऽद्भुतैर्भुजबलैः प्रबलैर्निजांशैः ॥ १८ ॥

स्वं धाम सर्वजनगुह्यमतोऽभ्युपैतु देवः परात्परवरः परमस्त्र्यधीशः ।
जातंसदा भुवनमङ्गलमीशितुश्च ते तेंऽशकाः स्वनिलयेषु वहन्तु राज्यम् ॥
ये येऽधुना समुदिताः पुरुषे परस्मिन् स्वयं भगवति स्पृहणीयमूर्त्तौ ॥ १९ ॥

नारायणो हरो ब्रह्मा शक्राद्यास्त्रिदिवालयाः ।
सहस्रशीर्षा भगवान् महानारायणस्तथा ॥ २० ॥

सर्वेषामंशसंव्यूहो रामे लीनोऽद्य तिष्ठति ।
न च विद्योतितुं शक्तो दिवसे तेजसामिव ॥ २१ ॥

तस्मात्स्वयं स भगवान् निजधामैतु सम्प्रति ॥
अर्घषितप्रभावाश्च राजन्तु दिवि देवताः ॥ २२ ॥

इत्थं निगद्य विरतेषु सुरेश्वरेषु देवोऽब्रवीदखिलधातृपतिः सुरौघान् ।
स्वयं सुशीलाचरितोभगवांस्तदर्थमभ्यर्थनीय इव वेत्ति च सर्वमेषः ॥ २३ ॥

कालात्मना कलयते सकलं सदीश एतस्य नाविदितमग्रविधेयकार्यम् ॥
प्रार्थ्यस्तथापि भजनीयगुणः सएतत्कालेन कालकलनः किल कालकालः ॥ २४ ॥

इत्युक्त्वा सकलान् देवान् विरंचिर्विससर्ज ह ।
भगवन्तं कालमीशं सस्मार च महामतिः ॥ २५ ॥

स्वस्यापि यः कलयता मघोनः शङ्करस्य च ।
सृष्टिस्थितिलयाधारः स कालः समुपाययौ ॥ २६ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे उत्तरखण्डे [1]कालदमनोपाख्याने प्रथमोऽध्यायः ॥ १ ॥

द्वितीयोऽध्यायः

ब्रह्मोवाच

वेधास्तमागतं वीक्ष्य कालं लोकभयङ्करम् ।
श्यामं कठिनसर्वाङ्गं लेलिहानं समंततः ॥ १ ॥
घोरास्यं दीर्घनिःश्वासं घोरनासातिभीषणम् ।
विद्युद्द्योतिरसनं तीव्रचित्तं ज्वलन्मुखम् ॥ २ ॥
ज्वलन्तं सर्वतो वक्त्रं गृह्णन्तमिव पावकम् ।
सहस्रवदनं घोरं सहस्राक्षशिरोधरम् ॥ ३ ॥
सहस्रपादोरुभुजं कोटिजिह्वाभयानकम् ।
करालभ्रुकुटीयुग्मं दुष्प्रेक्षं त्रिदशैरपि ॥ ४ ॥
समुत्तुङ्गतनुं दीर्घं महान्तं विपुलं गुरुम् ।
तीक्ष्णदंष्ट्राकरालास्यं विमुञ्चन्तं स्फुलिङ्गकान् ॥ ५ ॥
महोल्कारोमकूपाढ्यं महावायुसुवेगिनम् ।
धावन्तं विश्वतोदीप्तं ग्रासीकृतजगत्त्रयम् ॥ ६ ॥
विरूपसर्वावयवं कोटिव्याघ्रभयानकम् ।
महावेगनदीपूरजविनं जरया युतम् ॥ ७ ॥
महाकालसर्पनिभं गम्भीरवनसंनिभम् ।
दंष्ट्राकरालविपुलं शब्दब्रह्माण्डभेदिनम् ॥ ८ ॥
ऊर्ध्वकेशातिजटिलं दुष्पूरजठरं सदा ।
ब्रह्माण्डैकग्रासकरं विकटं विद्युदाननम् ॥ ९ ॥
ऊर्ध्वग्रीवं ज्वलद्वक्त्रं विद्योतन्तं[2] दिशो दश ।
तमाह भगवान् वेधाः कालं भुवनभीषणम् ॥ १० ॥

---

१. कालदमने उत्तरखण्डे–बड़ौ० ।

२. आर्षप्रयोगः ।

विधिरुवाच

गच्छ त्वं काल साकेतनगरे भुविभूषणे ।
यत्र रामः स्वयं भाति सीतया भ्रातृभिः सह ॥ ११ ॥
जानकीशः समस्तेशः परमात्मा स्वयं प्रभुः ।
तवापि स नियन्तेति प्रार्थनीयस्त्वया विभुः ॥ १२ ॥
अवतारचरित्राणि कृतानि भगवंस्त्वया ।
अतः परं निजं धाम प्रमोदविपिनाभिधम् ॥ १३ ॥
अभ्यायाहि महाराज न हिते व्यक्तिरन्यथा ।
भृतस्त्वया त्रयीधर्मो रक्षिता द्विजदेवताः ॥ १४ ॥
किमर्थमधुना देव स्थीयते भवता प्रभो ।
न हिते समवस्थानं प्रकटं भुवि सर्वदा ॥ १५ ॥
धर्मसंस्थापनार्थाय व्यक्तिस्तव युगे युगे ।
कृतानि देवकृत्यानि समस्तानां हितानि च ॥ १६ ॥
प्रमोदवनमागच्छ राम त्वमधुना प्रभो ।
निवारय व्रजस्त्रीणां वेदनां विरहोद्भवाम् ॥ १७ ॥
पुत्रस्नेहातिवश्याया माङ्गल्यायाः सुखं कुरु ।
सुखितस्य गवेन्द्रस्य दुःखं हर वियोगजम् ॥ १८ ॥
इति सम्प्रार्थ्य संस्तूय रामं त्रिभुवनेश्वरम् ।
यथाऽऽज्ञापयते देवस्तथा कुरु च सत्वरम् ॥ १९ ॥
इत्युक्तः स जगत्कालः प्रणम्य वेधसं प्रभुम् ।
अयोध्यामागमद्यत्र रामस्तत्र विभीषणः ॥ २० ॥
ददर्श तत्र प्रासादे रामं सिंहासनोपरि ।
कोटिकालाग्निदुर्धर्षं कोटिकालार्कवर्चसम् ॥ २१ ॥
कोटिकालघनश्यामं कोटिकालाब्धिभीषणम् ।
कोटिकालातिदुर्धर्षं कोटिदंष्ट्राभयानकम् ॥ २२ ॥
कोटिभ्रूपुटकौटिल्याद्भमन्तं कालकूटकम् ।
कोटिजिह्वाज्वलद्वक्त्रं कोटिज्वालाजटाधरम् ॥ २३ ॥
संवर्त्तानलसंदोहविस्फुलिङ्गकणानि च ।
मुञ्चन्तं कोटिनयनं दुर्धर्षं दुःसहप्रभम् ॥ २४ ॥
करालविग्रहं चोग्रं कोटिरुद्रातिकोपनम् ।
ज्वालामाला परिव्याप्तत्रैलोक्यस्थिरजङ्गमम् ॥ २५ ॥
कालकालं भीमभीमं घोरघोरतमं नृणाम् ।
कोटिब्रह्माकृतग्रासं कोटिनारायणाशिनम् ॥ २६ ॥

कोटिरुद्रभुजं कोटिवसिष्ठादिविनाशकम् ।
कोटिदेवेन्द्रविलयं कोटिदेवभवं तथा ॥ २७ ॥

आधिदैविकमध्यात्ममाधिभौतिकमेव च ।
अक्षरं त्रिगुणातीतं त्रिभवं त्रिभवातिगम् ॥ २८ ॥

त्रिविष्टपेशसम्पूज्यं ब्रह्मरुद्रादिभीषणम् ।
एवंविधं प्रभुं रामं दृष्ट्वा कालो व्यकम्पत ॥ २९ ॥

न्यमीलयद् दृशौ भीत्या द्रष्टुं नाशकदीश्वरम् ।
स्थातुं च नाशकत् स्थानेऽपलायत दिशो दश ॥ ३० ॥

ततः सौम्यतरो भूत्वा कथंचित्पुनरायथौ ।
धैर्यं बद्ध्वा दृढं धीरो निदेशं ब्रह्मणः स्मरन् ॥ ३१ ॥

स्फुटीचकार सहजानात्मनः सकलान् गुणान् ।
सिषेच पुरवीथीश्च शीतलैश्चन्दनोदकैः ॥ ३२ ॥

प्रफुल्लकुमुदाम्भोजमकाण्डमभवत्सरः ।
अकाले चाग्निहोत्राणि हव्यगन्धानि जज्वलुः ॥ ३३ ॥

ववुर्वाताः सुखस्पर्शाः सुनक्षत्रमभून्नभः ।
ऋतुराजः प्रादुरासीत्प्रोत्फुल्लकुमुदाकरः ॥ ३४ ॥

केकीशुकपिकध्वानचकोरीध्वनिमञ्जुलः ।
श्रियमाकालिकीं वीक्ष्य मेने कालकृतं विभुः ॥ ३५ ॥

अद्य कालः समायास्यन् कुरुते मे प्ररोचनम् ।
फलस्तावितदेहे च कर्मकाण्डेऽतिदुष्करे ॥ ३६ ॥

ततः पार्श्वस्थितं शेषं लक्ष्मणं लोकमङ्गलम् ।
प्रतिहारपदं दत्त्वा स्थापयद् द्वारि राघवः ॥ ३७ ॥

तत एकान्तगं दूरे रामं भुवनभूषणम् ।
आजगाम स्वयं कालः कालकालं कृपानिधिम् ॥ ३७ ॥

अतिसौम्यं वपुः कृत्वा कोटिचन्द्रसुशीतलम् ।
सुवेशं सुमुखं स्वक्षं सुरूपं सुन्दरोत्तमम् ॥ ३९ ॥

सोऽपश्यन्मणिपीठस्थं रामचन्द्रं जगद्धितम् ।
प्रावृषेण्यघनश्यामं सुधावर्षिणमद्भुतम् ॥ ४० ॥

फुल्लेन्दीवरसंकाशं मनोज्ञकरणेक्षणम् ।
कोटिकन्दर्पलावण्यं कौस्तुभोद्भासितं गले ॥ ४१ ॥

पादाङ्गुलिनखद्योतपराभूतेन्दुमण्डलम् ।
शृङ्गारमिव मूर्त्याढ्यं प्रेमाणमिव भासुरम् ॥ ४२ ॥

साक्षाच्छ्रीसहजाकान्तं पादपङ्कजकोमलम् ।
दूरादेव प्रभुं दृष्ट्वा साष्टाङ्गं प्रणनाम ह ॥ ४३ ॥
तुष्टाव चाञ्जलिं बद्ध्वा भक्त्या नमितमस्तकः ॥ ४४ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे उत्तरखण्डे कालदमनोपाख्याने द्वितीयोऽध्यायः ॥ २ ॥

तृतीयोऽध्यायः

काल उवाच

त्वमादिकालः पुरुषः पुराणो ममापि कालः स्वजनैकबन्धो ।
अहं ग्रसामि त्रिजगत्समस्तं त्वां यः प्रपन्नस्तमृते विचक्षणम् ॥ १ ॥

नतोऽस्मि ते नाथ पदारविन्दं न यत्प्रपद्याश्वशुभं लभन्ते ।
भयं मदीयं विषहं दुरन्तं पादावधिस्तम्बमुपात्तविक्रयम् ॥ २ ॥

तवाज्ञया नाथ शशिनं कुवेरं ब्रह्माणमुच्चैरधरेऽप्यनन्तम् ।
हरामि वेगेन निजेन दुर्धरो महानदीपूरजवातिगामी ॥ ३ ॥

कृत्यं ममैतद्विहितं त्वयैव यद्भूतमात्रग्रसनं जवेन ।
न मां निरोद्धुं प्रभवन्ति केचिन्महामुनीन्द्रा अपि योगसिद्धाः ॥ ४ ॥

दुर्वारवेगोऽस्मि तवाज्ञया प्रभो त्वदीहितं संघटयामि नित्यम् ।
भिन्दामि शैलान् प्रहरामि वज्रं हरामि लोहालयमध्यगानपि ॥ ५ ॥

भवत्कृपा यत्र च राम तं जनं विहाय दूरे विचरामि भीतवत् ।
न यत्र माया प्रभवेद् दुरत्यया कथं नु तत्र प्रभवामि वर्त्तितुम् ॥ ६ ॥

त्वमेक ईशोऽसि ममाप्यधीश्वर ब्रह्मादयो मद्वशगाः समंततः ।
तमीशितारं मम विष्टपानां गच्छामि त्वां नाथ शरणं शरण्यम् ॥ ७ ॥

किं तु प्रभो ब्रह्मशक्रादिभिः कृतां विज्ञप्तिमेकां विनिवेदयामि ।
स्वेच्छा समग्रैकवशो भवांस्तथाप्यर्वितुमर्होऽसि विभो रघूद्वह ॥ ८ ॥

त्वं भूमिभारसंहृत्यै सम्प्राप्तोऽसि रघोः कुले ।
रचितानि चरित्राणि लौकिकालौकिकानि च ॥ ९ ॥

उद्धृताश्च निजा भक्ताः पादच्छायावलम्बिनः ।
विपदो नाशितास्तेषां दृप्तराक्षसनाशनात् ॥ १० ॥

देवानां च हितं यच्च यच्च वै मानुषं हितम् ।
त्रैलोक्यस्य हितं यच्च तत्त्वया रचितं प्रभो ॥ ११ ॥

ज्यास्फालनेन धनुषो वीरेन्द्रेण त्वया जिताः ।
सुबाहुमारीचमुखा राक्षसा अतिमायिनः ॥ १२ ॥

बहुबाहुप्रहरणा बहुयुद्धविशारदाः ।
बहुमायाविनो धूर्ता रात्रियुद्धेषु कोविदाः ॥ १३ ॥

उल्कामुखा अग्निमुखा विकटाङ्गा विलोचनाः ।
करालदर्शना घोरा भूतसैन्यसहायकाः ॥ १४ ॥

रुद्रदत्तवरास्तीव्रास्तीव्रप्रहरणास्तथा ।
ईदृग्विधाः सुसंरब्धास्त्वया दैत्या निवारिताः ॥ १५ ॥

ते चापि रिपवो राम त्वया स्वात्मनि वेशिताः ।
मोचिता घोरसंसारक्लेशाद्भक्तपदं गताः ॥ १६ ॥

इदमद्भुतमाहात्म्यं तव राम निशामय ।
राक्षसा अपि यन्मुक्तिं गमिताः स्वपदाङ्किताम् ॥ १७ ॥

किं तु भक्ताः स्वपादाब्जसेवकाः साधुवर्त्मगाः ।
मोचिता भवदुःखेभ्यो नाथेनामिततेजसा ॥ १८ ॥

अतः परं प्रभो श्रीमन् विश्वस्याभ्युदयोऽभवत् ।
तवैव कृपया नाथ राम सुभगवर्ष्मणः ॥ १९ ॥

न ते योनिं विदुर्देवा न मर्त्या नापि ये परे ।
त्वमेकान्तस्वधाम्न्येव रममाणोऽसि नित्यशः ॥ २० ॥

न ते गुणांस्तथा कर्माण्यन्याचरितान्यपि ।
विदन्ति ते सूक्ष्मदृशो ये मायां कालमत्यगुः ॥ २१ ॥

त्वमेव स्वात्मनः स्थानं जानासि रघुनन्दन ।
न ते व्यक्तिः क्वापि भवे दृश्यते भूयतेऽपि वा ॥ २२ ॥

त्वं सूर्यस्त्वं शशाङ्कश्च त्वं सर्वे ग्रहतारकाः ।
जङ्गमं स्थावरं चापि त्वमेव रघुपुङ्गव ॥ २३ ॥

स्वच्छन्दं क्रीडतो नाथ तव लीलारसात्मनः ।
बहूनि कोटिवर्षाणि व्यतीतानि रमापते ॥ २४ ॥

रुद्धो यमपुरीमार्गस्त्वयि जाग्रति भूतले ।
विधेश्च सृष्टिवैषम्यसामर्थ्यं प्रविलोपितम् ॥ २५ ॥

सर्वे मनुष्याः सुखिनः सर्वे भाग्येन पूरिताः ।
सर्वे पूर्णायुषो राम सर्वे स्वेच्छैकमृत्यवः ॥ २६ ॥

यत्र यत्र पदाम्भोजस्पर्शो जातस्तव प्रभो ।
तत्र तत्र न पश्यामि दौर्भाग्यमपि दुर्गतिम् ॥ २७ ॥

एते त्वयैवाधिकृताः सुरेश्वरा व्यर्थाधिकारा अभवन् समस्ताः ।
सर्वं जगद् राम त्वयाभिपाल्यमानं सुखाम्भोनिधिमग्नमस्ति ॥ २८ ॥
नित्योत्सवो नित्यमहोदयश्च नित्यं शुभं नित्यसुखं गृहे गृहे ।
राज्यं भवे कुर्वति राघवेन्द्र त्वयि गृहाः सर्वसुखाय चाभवन् ॥ २९ ॥
एवं कृत्वा जगत्सर्वं मङ्गलायतनं प्रभो ।
अभ्युपेहि परं दिव्यं स्वंधाम त्रिगुणातिगम् ॥ ३० ॥
न यत्र वाङ् नैव मनःप्रसारो न कालमायादिगुणप्रवेशः ।
तदेव ते धाम प्रमुद्वनं हि लीलालयं दिव्यदिव्यं परात्परम् ॥ ३१ ॥
नित्यरासविलासाय सरयूपुलिनस्थितम् ।
ब्रह्मशक्रादयो देवा ईक्षन्ते बहुभाग्यतः ॥ ३२ ॥
इति विज्ञापितो नाथ ब्रह्मणा लोकभर्त्तृणा ।
तन्निशम्य यथा स्वेच्छं क्रियतां कोविदेश्वर ॥ ३३ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे उत्तरखण्डे कालदमनोपाख्याने ततीयोऽध्यायः ॥ ३ ॥

चतुर्थोऽध्यायः

श्रीराम उवाच

एवमेतत्त्वया काल यथोक्तं ब्रह्मणो वचः ।
सम्पादितं मया कार्यं देवानां च तथा नृणाम् ॥ १ ॥
नाधुना मम कर्त्तव्यं त्रिषु लोकेषु विद्यते ।
उज्जासिता यद्रिपवो महान्तो राक्षसाधिपाः ॥ २ ॥
तथापि ब्रह्मणो वाच्यं त्वया मद्वचनादिदम् ।
कालमायातिगां लीलां कथं तौ वर्जयिष्यतः ॥ ३ ॥
किं चतुर्दश लक्ष्याणि किमायुर्ब्रह्मणोऽपि च ।
किं कल्पाः कोटिकल्पाश्च पुरुषश्चायुरेव च ॥ ४ ॥
किं कालस्य च माहात्म्यं किं कालकलनापि च ।
न मे भवेत्परिच्छेदो ब्रह्मकल्पशतैरपि ॥ ५ ॥
कथं त्वया ज्ञातमिदं विरञ्चे चतुर्दश प्रययुर्वर्षपूगाः ।
भवादृशाः कोटिविरञ्चयोगता विक्रीडतो मे सहजं प्रमुद्वने ॥ ६ ॥

वर्षाण्यतीतानि चतुर्दशेति त्वयोदितं नोभयथापि संगतम् ।
निमेषमात्रं मम तु प्रयातं स्वच्छन्दलीलस्य सलक्ष्मणस्य ।। ७ ।।
निजवर्षप्रमाणेन न मे वर्षाणि वै विधे ।
नाहं पर्यनुयोगार्हस्तव वान्यस्य कस्यचित् ।। ८ ।।
इति वक्तव्यमसकृद्ब्रह्मणे मूढबुद्धये ।
उक्त्वा च पुनरागच्छ मन्त्रः कार्यस्त्वया सह ।। ९ ।।
तथेत्युक्त्वा विभुं भक्त्या प्रणम्य च मुहुर्मुहुः ।
ब्रह्मलोकेऽगमत्कालः साष्टाङ्गं च प्रणम्य तम् ।
उवाच तत्समस्तं यत् प्रभुराह रघूद्वहः ।। १० ।।

ब्रह्मोवाच

एवमेव स वै नाथः कालमायागुणेश्वरः ।
स्वच्छन्दलीलः स्वच्छन्दः सच्चिदानन्दविग्रहः ।। ११ ।।
श्रीमान् सहजशोभाढ्यो गुणी च गुणनायकः ।
कस्तं निरोद्धुं प्रभवेद्भगवन्तं सनातनम् ।। १२ ।।
स्वयं लक्ष्मीपतिं वीरं स्वयं सर्वशुभाकरम् ।
यथा तस्य प्रभोरिच्छा तथा कार्यं करोतु च ।
वयं सर्वे वशे तस्य न तस्येशश्च कश्चन ।। १३ ।।

काल उवाच

मया प्रदर्शितं घोरं स्वरूपं कालमेधसे ।
साधारणं नरं ज्ञात्वा पुरुषं पुरुषोत्तमम् ।। १४ ।।
तस्य रूपं च परमं मत्तोऽप्यतिभयानकम् ।
घोरघोरतरं दृष्ट्वा पलायनपरोऽभवम् ।। १५ ।।
भयेन प्रस्खलत्पादः प्रस्खलन्मूर्द्धजावलिः ।
पदे पदे कम्पमानो नाहं धैर्यधरोऽभवम् ।। १६ ।।
ततः सौम्यं वपुः कृत्वा गतोऽहं प्रभु संनिधौ ।
गृहीत्वा तस्य पादौ तु तूष्णीमास भयानतः ।। १७ ।।
ततोऽतिकृपया पूर्णः प्रभुर्मां स ददर्शह ।
कृपया मां स विज्ञाप्यं त्वदुक्तं च न्यवेदयम् ।। १८ ।।
तच्छ्रुत्वा भगवान् राम इदमूचे कृपानिधिः ।
न मे लीला परिच्छेद्या ब्रह्मणा च त्वयापि च ।। १९ ।।

ब्रह्मोवाच

महानविनयो जातो यद् रामस्य विभीषिकाम् ।
कर्तुं प्रदर्शयामास स्वस्वरूपं भवान् प्रभोः ।। २० ।।

तेनैव निर्मितस्त्वं वै अहं चान्ये तथा सुराः ।
कस्तं भीषयितुं शक्तो रामदेवं जनार्दनम् ॥ २१ ॥

यस्य घोरतरं रूपं दृष्ट्वा सद्यः पलायते ।
भवान् भवस्य सर्वस्य भीषणो भूरि विक्रमः ॥ २२ ॥

यस्य घोरं वपुर्दृष्ट्वा राक्षसा ब्रह्मराक्षसाः ।
कूष्माण्डभूतवेताला धावन्ति हरितोदश ॥ २३ ॥

यस्य घोरं वपुर्दृष्ट्वा विघ्नौघाश्च विनायकाः ।
दुर्दर्शना घोररूपा धावन्ति कृतभीतयः ॥ २४ ॥

तं भीषयितुमीशानं प्रवृत्तो यदि वै भवान् ।
तदापराधः संजातः प्रभावविनयात्मकः ॥ २५ ॥

तस्यापराधस्य शमं विधातुं प्रभोः समीपं तु पुनः प्रया हि ।
शीघ्रप्रसादो भगवान् राघवेन्द्रोऽचिरात् प्रसन्नो भविता न संशयः ॥ २६ ॥

इत्युक्त्वा भगवान् ब्रह्मा कालं सद्यो व्यसर्जयत् ।
स च नत्वा विधिं पश्चाद् रामसंनिधिमागमत् ॥ २७ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे उत्तरखण्डे कालदमनोपाख्याने चतुर्थोऽध्यायः ॥ ४ ॥

पञ्चमोऽध्यायः

ब्रह्मोवाच

आयातं कालमाज्ञाय रामस्त्रिभुवनेश्वरः ।
स्वजन विसर्जयामास प्रातीहार्ये च लक्ष्मणम् ॥ १ ॥

सहजानन्दिनीं देवीं जानकीं स्वस्वरूपिणीम् ।
सिंहासने समास्थाप्य स्वयमन्तर्दधे विभुः ॥ २ ॥

कालस्त्रैलोक्यमहिषीं प्रमोदवननायिकाम् ।
नत्वा दूरात्सविनयं यावत्प्रैक्षत राघवम् ॥ ३ ॥

तावत्सापि परालक्ष्मीः स्वयमन्तर्दधे शनैः ।
तौ दिव्यकेलिरसिकौ प्रमोदवनमीयतुः ॥ ४ ॥

सहजारामचन्द्रौ च रासलीलां वितेनतुः ।
कुञ्जमन्दिरमध्यस्थौ सखीकोटिनिषेवितौ ॥ ५ ॥

तुल्यतारुण्यकौ शूरौ रतियुद्धविशारदौ ।
सरयूमन्दपवनपरिश्रान्तातिवीजितौ ॥ ६ ॥

दाम्पत्यप्रेमरसिकौ चन्द्रिकायास्तमन्मथौ ।
वेतसीवनविश्रान्तौ वर्षतावद्रिसेविनौ ॥ ७ ॥

रत्नाद्रिशिखरोत्तुङ्गमञ्जुकुञ्जविहारिणौ ।
चित्राद्रिस्फटिकशिलागङ्गास्रोतोविलासिनौ ॥ ८ ॥

न यत्र कालगमनं न मायागमनं तथा ।
यत्रानन्दमयी भूमिर्यत्रानन्दमयी सरित् ॥ ९ ॥

यत्रानन्दमयः शैलो यत्रानन्दमयं सरः ।
सर्वं परब्रह्ममयं यत्र श्रीरामपत्तनम् ॥ १० ॥

एवं सिंहासनं शून्यं दृष्ट्वा कालः समंततः ।
त्रैलोक्ये मृगयामास सीतारामात्मकं युगम् ॥ ११ ॥

नैव लेभे ततो गन्तुं प्रमोदवनमागतः ।
यावत्प्रविशते तत्र तावत्तद्द्वार्यदृश्यत ॥ १२ ॥

सहस्रवदनो घोरः पुरुषोऽतिभयानकः ।
तमनादृत्य सोऽन्तः स्थो भवितुं प्रारभद्बलात् ॥ १३ ॥

स तेन वारितस्तत्र कालस्तं चाप्यपृच्छत ।
ममान्तर्गमनं देहि वनेऽस्मिन् घोरपूरुष ॥ १४ ॥

ततस्तमाह पुरुषो मां युद्धेन पराभव ।
ततस्त्वमस्मिन् विपिने प्रवेशं लप्स्यसे बलात् ॥ १५ ॥

ब्रह्मोवाच

ततस्तयोर्युद्धमभून्महाघोरतरं परम् ।
परस्परप्रहरणौ विदारितपरस्परौ ॥ १६ ॥

परस्परातिदुर्धर्षौ परस्परप्रकोपनौ ।
परस्परोच्चण्डवेगौ परस्परनिपातिनौ ॥ १७ ॥

एवं वर्षसहस्राणि तयोर्युद्धं परस्परम् ।
अभूदद्यत्र कियांल्लोकस्त्वन्यां प्रकृतिमागतः ॥ १८ ॥

ततः पराजितः कालः पुरुषेणामितौजसा ।
मूर्छितो न्यपतद्भूम्यां वाताहत इव द्रुमः ॥ १९ ॥

पतितो धरणौ तं च सोऽपृच्छच्छनकैर्गिरा ॥ २० ॥

काल उवाच

कस्त्वं पुरुषशार्दूल कच्चिद्भक्तोऽसि मत्प्रभोः ।
न चेदेवं विक्रमस्ते कथमेवंविधो भवेत् ॥ २१ ॥

पुरुष उवाच

अहं रामस्य भक्तोऽस्मि प्रमोदवनरक्षकः ।
कोऽन्तःप्रवेष्टुमर्होऽस्ति व्रजभक्तजनं विना ॥ २२ ॥

ततः कालः पराभूतोन्यवर्तत दिवं प्रति ।
मध्येपथं तु सविधे वसिष्ठस्याश्रमे शुचौ ॥ २३ ॥

निर्वाणे गण्डकीगङ्गासंगमे ह्यतिपावने ।
तत्र दिव्यवने रामं ददर्श स किरातिनम् ॥ २४ ॥

मृगयाभिरतं वीरं सीतासंशोभिविग्रहम् ।
खेलन्तं मृगयूथेन मृगराजमिवोद्धुरम् ।
उपरिष्टाच्छ्वेतहये पर्यारूढं घनोपमम् ॥ २५ ॥

तं दृष्ट्वा प्रणनामैष प्रभुं त्रैलोक्यनायकम् ।
पपात पादयोः पश्चात्परिपूर्णदयानिधेः ॥ २६ ॥

पूर्वापराधशमनाय विधेर्नियोगात् तुष्टाव राघववरं करुणासमुद्रम् ।
उन्निद्रपुष्करदलायतलोचनान्तं दृष्ट्वामितामृतकृपारसभूरिधारम् ॥ २७ ॥

नमस्ते करुणासिन्धो नमस्ते भक्तवत्सल ।
नमस्ते दीनलोकाप्त क्षमस्व मम दुर्नयम् ॥ २८ ॥

नमस्ते राम राजीवनेत्र लालितविग्रह ।
भक्तौघनयनानन्द क्षमस्व मम दुर्नयम् ॥ २९ ॥

नमस्ते कालमायादिगुणवश्यैकवारक ।
स्ववश्य कमलाकान्त क्षमस्व मम दुर्नयम् ॥ ३० ॥

नमस्ते त्रिजगन्नाथ ब्रह्मरुद्रादिदैवत ।
मायाधीश हि सर्वेश क्षमस्व मम दुर्नयम् ॥ ३१ ॥

भीषणानां भीषणस्त्वं सुन्दराणां च सुन्दरः ।
सौम्यानां च तथा सौम्यः कठोराणां कठोरकः ॥ ३२ ॥

मृदूनां मृदुलश्चासि पृथूनां त्वं पृथुः प्रभो ।
नियन्तृणां नियन्ता च लोकेशो लोकरक्षिणाम् ॥ ३३ ॥

प्रचण्डानां प्रचण्डस्त्वमुद्धतानां तथोद्धतः ।
यद्वस्तु यद्यादृशं च तस्य रूपं त्वमेव हि ॥ ३४ ॥

आधिदैविकमध्यात्ममधिभूतमथापि च ।
तस्यते नाथ मत्तोऽपि भीषणस्य मदीशितुः ॥ ३५ ॥

विभीषिकार्थं यदहं निजरूपमदर्शयम् ।
स एव मेऽपराधोऽभूत्प्रभो दुर्विनयात्मकः ॥ ३६ ॥

तस्यापराधस्य शमाय राम तवाङ्घ्रिमूलं शरणं प्रपद्ये ।
स्वानामभीतिप्रदमात्मदीयं निवृत्तमायागुणमीशवन्द्यम् ॥ ३७ ॥

तस्यापराधस्य शमाय राम भजामि ते नामपदार्णयुग्मम् ।
एकं तु मायेन्धनदाहनेन्धं परं पदं नाथपरं पदं ददत् ॥ ३८ ॥

तस्या पराधस्य शमाय राम पश्यामि रूपं तव योगिमृग्यम् ।
यदीहते द्रष्टुमनन्तनामा शेषः स्वयं श्रीश्च परापरेशा ॥ ३९ ॥

तस्या पराधस्य शमाय राम करोमि ते भक्तिमपारवीर्याम् ।
यदाश्रयातः प्रियतामुपागताः श्रीमच्छुकव्यासपराशराद्याः ॥ ४० ॥

एवं स्तुत्वा स्थिते तस्मिन् प्रणते दीनदीनवत् ।
उवाच प्रहसन् रामः करुणारस वारिधिः ॥ ४१ ॥

श्रीराम उवाच

कुत्र कुत्र गतः काल मदन्वेषणकारकः ।
तत्र तत्र च किं वृत्तं ज्ञातं मे किन्तु वैभवम् ॥ ४२ ॥

काल उवाच

गतः साकेतनगरे तत्र त्वां समलोकयम् ।
अदर्शनं प्रभो स्मृत्वां रमादेवीमलोकयम् ॥ ४३ ॥

ततो राम रमादेवी तिरोधानमुपागमत् ।
ततस्तद्युगलान्वेषी बभ्रामाहं त्रिलोकगः ॥ ४४ ॥

ततः प्रमोदविपिनं गन्तुमारब्धवानहम् ।
तद्द्वाःस्थेनातिघोरेण पुरुषेण महौजसा ॥ ४५ ॥

सहस्रवदने नाहं युद्धं कृत्वा पराजितः ।
ततो विवर्णवदनो यातुं ब्रह्मगृहं प्रति ॥ ४६ ॥

इयेषाहं मध्यपथे भाग्याच्च तव दर्शनम् ।
प्राप्तवान् रघुशार्दूल गतश्चाहं कृतार्थताम् ॥ ४७ ॥

श्रीराम उवाच

अत्राप्यस्मि च तत्रास्मि साकेतनगरोत्तमे ।
प्रमादविपिने वास्मि सर्वत्रास्मि निजे वशः ॥ ४८ ॥

अधुना गच्छ तत्रैव यत्र सिंहासनं मम ।
साकेतनगरस्थाने शुभेप्रासाद वेश्मनि ॥ ४९ ॥

ततो नत्वागमत्कालः साकेतनगरीं प्रति ।
यत्र सिंहासनं रम्यं नित्यं रामस्य राजते ॥ ५० ॥

प्रासादतलवेश्मस्थं सौवर्णरत्ननिर्मितम् ।
अधस्थदिव्यसौवर्णमणिमत्पादुकायुगम् ॥ ५१ ॥

दिव्यातपमच्छायाढ्यं स्थिते चामरराजितम् ।
महास्फटिकपीठेन राजितं रत्नशोभितम् ॥ ५२ ॥

अनेकमणिसौवर्णकिंकिणीजालमण्डितम् ।
त्रैलोक्यव्याप्तपरमप्रभासंदोहभूषितम् ॥ ५३ ॥

सुवर्णरत्ननिःश्रेणीछत्रदिव्यदुकूलकम् ।
दिव्यवस्त्रपरीधानं स्वाराज्यपदभाजनम् ॥ ५४ ॥

ब्रह्मशक्रादिमुकुटमणिघृष्टान्तभागकम् ।
स्वयंलक्ष्मीनिजस्थानं साम्राज्यस्थानमुत्तमम् ॥ ५५ ॥

अनन्यसाधारणपरं श्रीमच्चरणाङ्कितम् ।
सहजानन्दिनीपादपद्माङ्कित मनोहरम् ॥ ५६ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसम्वादे उत्तरखण्डे कालदमनोपाख्याने पञ्चमोऽध्यायः ॥ ५ ॥

षष्ठोऽध्यायः

ब्रह्मोवाच

तत्र गत्वा ददर्शासौ रामं त्रैलोक्यसुन्दरम् ।
ननाम दण्डवद्भूमौ प्रीतः पुलकविग्रहः ॥ १ ॥

उवाच रघुशार्दूलस्तं प्रपन्नतरं पुनः ॥ २ ॥

श्रीराम उवाच

काल त्वं ममभक्तोऽसि मदीहितकरस्तथा ॥ ३ ॥

सम्पादितं देवकार्यं मया तावत् समंततः ।
अधुना रन्तुमिच्छामि प्रमोदविपिने सुखम् ॥ ४ ॥

सत्यं ब्रह्मवचः कर्तुं त्वदीयं च तथा हितम् ।
तेन त्वां मन्त्रयाम्यद्य स्वसामर्थ्यं प्रसारय ॥ ५ ॥

अन्यथा कुरुलोकं त्वं स्वबलावेशधारणात् ।
मदाज्ञया तु वै तावत्तवशक्तिर्व्यजृम्भत ॥ ६ ॥

मदाज्ञयैवाधुना त्वं निजां शक्तिं प्रसारय।
वसुधां वसुभिः पूर्णां संकोचय बलादिमाम् ॥ ७ ॥

मणीनामाकरेष्वङ्ग सौवर्णेष्वाकरेषु च।
कन्दरासु निधिस्थानेष्वनन्यश्रीप्रदायिषु ॥ ८ ॥

बनेषु च फलाढ्येषु रत्नशैलेषु भूरिषु।
प्रत्यक्षलक्ष्मीस्थानेषु प्रसारय निजं बलम् ॥ ९ ॥

सरःसु पद्मपूर्णेषु परागौघसुगन्धिषु।
राजहंसकलध्वानमनोहारिषु वीचिषु ॥ १० ॥

रत्ननिःश्रेणिकाशोभामण्डितेषु महत्सु च।
समुद्रतुल्यरूपेषु दिव्यरत्नाकरेषु च ॥ ११ ॥

मुक्तामाणिक्यशोभाढ्येष्वनन्तगुणवत्सु च।
देवाङ्गनादेवयानमानसादिषु भूरिशः ॥ १२ ॥

श्रीसंकोचकरं तेषु प्रसारय निजं बलम्।
अग्निहोत्रेषु विप्राणां यज्ञस्थानेषु कोटिशः ॥ १३ ॥

प्रत्यक्षवह्निस्थानेषु धर्मकर्मालयेषु च।
ब्रह्मादिषु च देवेषु रुद्रशक्रादिकेषु च ॥ १४ ॥

श्रीविद्यादिषु विद्यासु महाविद्यासु सर्वशः।
चिन्तामणिपराढ्येषु मन्त्रेष्वद्वयवाचिषु ॥ १५ ॥

द्वयवात्रिषु चाग्र्येषु महासाम्राज्यदायिषु।
नृसिंहे च हयग्रीवे श्रीमद्गोपालमन्त्रके ॥ १६ ॥

स्वयंलक्ष्म्याश्च मन्त्रेषु मन्त्रशक्तिबलासु च।
स्वयं कामकलायां च बहुशक्तिषु वस्तुषु ॥ १७ ॥

स्वयंसिद्धेषु चार्थेषु रत्नभेषजवस्तुषु।
गुटिकायक्षवेतालचेटकेषु च सर्वशः ॥ १८ ॥

महोषधिषु सर्वासु कल्पवृक्षादिशाखिषु।
लतासु देवताख्यासु शिलासु दैवतात्मसु ॥ १९ ॥

प्रत्यक्षशक्तिसिद्धेषु पदार्थेष्वेषु भूरिषु।
तिरोभावकरं कार्यं स्वसामर्थ्यं प्रसारय ॥ २० ॥

इति सम्मन्त्र्य कालेन रघूणां वल्लभो नृपः।
यावत्ताम्बूलिकामस्मै ददाति निजपाणिना ॥ २१ ॥

रत्नाङ्गुलीयकगणैर्भूषितेनामितौजसा ।
यावद्विसर्जयेत्तं च कालं त्रैलोक्यभीषणम् ॥ २२ ॥

सिंहासनान्तपार्श्वस्थं निरुक्ताज्ञाकरं प्रभोः ।
तावदत्रेः सुतो योगी दुर्वासा मुनिसत्तमः ॥ २३ ॥

प्रकृत्या कोपनोऽशान्तः शापमूर्त्तिरुपागतः ।
तं दृष्ट्वा लक्ष्मणो द्वाःस्थः सद्य एवोदतिष्ठत ॥ २४ ॥

प्रणनाम महीं स्पृष्ट्वा यावत्पाद्यार्चनादिभिः ।
गृह्णाति मुनिशार्दूलं तावदाह मुनिः स्वयम् ॥ २५ ॥

दुर्वासा उवाच

गच्छ लक्ष्मण यत्रास्ति रामस्त्रैलोक्यवल्लभः ।
मदागमनमेतस्मै निवेदय च सत्वरम् ॥ २६ ॥

ततः स चिन्तयाविष्टो लक्ष्मणः प्रत्युवाच तम् ।
एवमेव करिष्यामि क्षणं विश्रम्यतां मुने ॥ २७ ॥

यावत्कार्यान्तरे व्यग्रं रामदेवं जगत्प्रभुम् ।
यास्यामि यत्प्रतीहार्ये स वै मामभ्यषेंचयत् ॥ २८ ॥

दुर्वासा उवाच

रघूणां राजवर्याणां ग्रहे रीतिः सनातनी ।
मुनयोऽवारितद्वारा विशन्त्यन्तःपुरेष्वपि ॥ २९ ॥

त्वं चेदद्य समायान्तं मां तस्मै न वदिष्यसि ।
सद्यो लक्ष्मण शप्स्यामि कोपेन विकटाकृतिः ॥ ३० ॥

ततः स लक्ष्मणो वीरश्चिन्तामाप महत्तराम् ।
शापभीतो मुनेः किं नु गच्छामि भ्रातुरन्तिकम् ।
ततो भ्राता भवेत् क्रुद्धः प्रातिहार्यव्यतिक्रमात् ॥ ३१ ॥

अथ चेन्नैव गच्छामि तदा शापं ददात्ययम् ।
आत्रेयः कोपनो विप्रो विलम्बासहनो मुनिः ॥ ३२ ॥

इति चिन्ताद्वयाविष्टो जगाम भ्रातु रन्तिकम् ।
समं कालेन यत्रासौ भगवान् मन्त्रयन् स्थितः ॥ ३३ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे उत्तरखण्डे कालदमनोपाख्याने षष्ठोऽध्यायः ॥ ६ ॥

सप्तमोऽध्यायः

ब्रह्मोवाच

ततः सुमित्रातनयो दर्शं तौ भीषणौ राघवरामकालौ ।
अवर्षकालाम्बुदकालरूपौ ज्वालावलीकोटिपरीतकालौ ॥ १ ॥

जगद्ग्रसन्तौ ससुरासुरं स्वैर्मुखैर्वमद्भिः प्रलयाग्निकीलम् ।
कोट्यर्कसंदोहकराल दंष्ट्राजिह्वाग्रविद्युत्ललनातिभीमौ ॥ २ ॥

अनेकबाहूदरवक्त्रनेत्रौ नक्षत्रताराग्रहचित्रदेहौ ।
व्रजप्रपातप्रसभोद्धताक्षिकोणप्रभाशोणधरान्तरिक्षौ ॥ ३ ॥

परिज्वलन्तौ प्रलयाग्नितुल्यौ सुघोरनिर्ह्रादगम्भीरघोषौ ।
दंष्ट्राग्रलग्नाधिकचूर्णिताङ्गब्रह्मादिशक्रादिसुरोघरावौ ॥ ४ ॥

अनेकदंष्ट्रातपनोग्रतेजोनिवारिताशेषभवान्धकारौ ।
महस्तपन्तौ तपनीयभासा करालदुर्दर्शशरीरभासौ ॥ ५ ॥

तयोः शरीरे पुनरेषोऽभ्यपश्यत् पञ्चाशकोटिप्रमितां धरित्रीम् ।
सकाननां साब्धिजलाद्रिकुञ्जां सद्वीपवर्षां सपुरग्रामदेशाम् ॥ ६ ॥

वरुणास्यालयं चैव तथैव यमसादनम् ।
नरकान् विविधांश्चैव स्वर्गांश्चैवातिसुन्दरान् ॥ ७ ॥

देवानां च तथा लोकान् गन्धर्वाणां गृहांस्तथा ।
इन्द्रस्याप्यालयं दिव्यं ब्रह्मरुद्रालयांस्तथा ॥ ८ ॥

अथोभागात्समस्तांश्च वलिसद्म तथैव च ।
सर्वाश्चर्यमयं विश्वं तयोर्देहे व्यलोकयत् ॥ ९ ॥

उभौ च समरूपौ तावुभौ तुल्यपराक्रमौ ।
एकं जगत्पालयन्तं ग्रसन्तं च परं विभुम् ॥ १० ॥

कालः पापच्यते विश्वं ग्रसते राम ईश्वरः ।
अत्ता चराचरस्यापि महाभोगरसोत्सुकः ॥ ११ ॥

एवंविधौ तौ द्वष्ट्वाथ महतीं भीतिमागतः ।
अदृष्टपूर्वं रामस्य स्वरूपं सद्वितीयकम् ॥ १२ ॥

विलोक्य लक्ष्मणो भूरि संशयं च जगाम ह ।
अनयोः को रामचन्द्रः किं वा कोऽपि न राघवः ॥ १३ ॥

ईदृशो न मया दृष्टो रावणस्य वधेऽपि सः ।
न वा सुबाहुसंग्रामे न वापि ताटकावधे ॥ १४ ॥

न छायासुरसंग्रामे नान्तकालेऽपि चेदृशः ।
अन्यादृशो मम भ्राता कथमद्य विलोक्यते ॥ १५ ॥

द्वितीयश्च तथा कोऽयं रुद्रो वान्तक एव वा।
इत्थं चिन्तासमाविष्टो लक्ष्मणः स्तिमितो भिया ॥ १६ ॥

मूर्च्छामाय ततः सद्यो निजेनेत्रे न्यमीलयत्।
तावत्तथैव पुरतो रामचन्द्रो व्यदृश्यत।
यथा पूर्वं स्थितो दृष्टः सिंहासनवरे नृपः ॥ १७ ॥

कालश्च प्रभुणा दत्तां ताम्बूलदलवीटिकाम्।
प्रसादत्वेन संगृह्य जगाम निजसादनम् ॥ १८ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे उत्तरखण्डे कालदमनोपाख्याने सप्तमोऽध्यायः ॥ ७ ॥

अष्टमोऽध्यायः

ब्रह्मोवाच

य इदं शृणुयात् पुण्यं श्रीरामचरितान्वितम्।
आख्यानं कालदमनं तस्य कालोऽतिदूरतः।
पठेद्वा पाठयेद्वापि न स कालवशे भवेत् ॥ १ ॥

य इदं प्रपठेद्यज्ञे हव्यकव्यादिभोजने।
तस्य देवाश्च पितरस्तृप्ता वर्षाणि भूरिशः ॥ २ ॥

यः कालदमनं नाम पठेदाख्यानमादरात्।
कृतानि तेन धर्म्याणि कर्माणि बहुशो द्विज ॥ ३ ॥

भुशुण्ड उवाच

ब्रह्मन् कालेगते पश्चात्किं वृत्तम भवत्तयोः।
रामलक्ष्मणयोस्तत्र वीरयोरितरेशयोः ॥ ४ ॥

दुर्वासश्चैव किं वृत्तं मुनेरात्रेयशर्मणः ॥ ५ ॥

ब्रह्मोवाच

रामभक्त भुशुण्ड त्वं शृणु ह्येतत् कथानकम्।
रामस्य चरितं पुण्यं सर्वपापौघनाशनम् ॥ ६ ॥

लक्ष्मणो रघुशार्दूलं मुनिं प्राप्तं न्यवेदयत्।
ततो रामः समुत्थाय स्वर्णसिंहासनोत्तमात् ॥ ७ ॥

द्वारपर्यन्तमागत्य मुनिमन्तर्न्यवेशयत् ।
पाद्यादिभिस्तथा दिव्यैरुपचारैश्च सोऽग्रहीत् ॥ ८ ॥
स्वयं लक्ष्मीश्च सा देवी सहजानन्दिनी प्रिया ।
शनैः पर्यचरत्तत्र मुनिपूजाविधौ सति ॥ ९ ॥

दुर्वासा उवाच

सत्य प्रभो त्वं पुरुषः सनातनः समागतोऽद्धाभुबने स्वधामतः ।
साकेतनाथः कृपया जनानामत्यातिभाजामसुराणां भयेन ॥ १० ॥
सा तेषामार्तिरत्युग्रा तथैव दिवि वासिनाम् ।
रावणारिविद्रुतानां निरस्ता निजलीलया ॥ ११ ॥
नहि तेऽन्यत् कचित्कार्यमव्यक्तस्यात्मलिङ्गिनः ।
कृते परं देवकृत्यं भक्तानां च मनीषितम् ॥ १२ ॥
स त्वं भक्तजनोद्धारणायैव धरणीतले ।
अवतीर्णः स्वयं राम धनुर्बाणाधरः प्रभुः ॥ १३ ॥
तं त्वां परेशमाज्ञाय प्राप्तोऽस्मि मधुसूदन ।
ब्रूहि गुह्यतमं ज्ञानं येन मर्त्यो भवं तरेत् ॥ १४ ॥
अस्यात्मनो गतिं ब्रूहि विश्वाधारस्य च प्रभो ।
किं कार्यं मर्त्यलिङ्गानां कथं स्वात्मानमुद्धरेत् ॥ १५ ॥
जानीयात् त्वां परात्मानं त्रैलोक्यस्थितिकारकम् ।
कथं च गुरुपादाब्जमुपसीदेद्भवाम्बुधौ ॥ १६ ॥
किं गुरोर्लक्षणं राम संसारोद्धारकारणम् ।
किं ज्ञानं च ततः शिक्षेत्प्रपन्नः शिष्यसत्तमः ॥ १७ ॥
शिष्यस्य लक्षणं ब्रूहि प्रपन्नस्य मनीषिणः ॥ १८ ॥

श्रीराम उवाच

सम्यक् ते बुद्धिरुत्पन्ना मुनेरात्रेयशर्मणः ।
यदध्यात्मगतिं ज्ञातुमेवं व्यवसितोऽसि भोः ॥ १९ ॥
एकमेव परं ज्ञानं परब्रह्मात्मकं मुने ।
येन विज्ञातमात्रेण जनोऽञ्जो भवसागरम् ॥ २० ॥
समुत्तरति शोकाढ्यं दुस्तरं ज्ञानिनामपि ।
यथा वृक्षो भवेत्स्तम्भः शखाश्च प्रतिशाखिकाः ॥ २१ ॥
पत्राणि चैव पुष्पाणि फलानि च फलान्तरम् ।
त्वचश्च विविधाकारा एक एव तरुर्भवेत् ॥ २२ ॥

वृक्षत्वेन न भेदोऽस्ति स्तम्भत्वादिकृता भिदा ।
एवं जगदिदं सर्वं ब्रह्मैवेति न संशयः ॥ २३ ॥

पञ्च भूतानिमात्राश्च चित्तं बुद्धिस्तथा मनः ।
अहंकृतिर्महत्तत्त्वं प्रकृतिश्च सनातनी ॥ २४ ॥

प्रत्येकं भेदनियतमभिन्नं ब्रह्मसर्वतः ।
अचलं चैव कूटस्थं भेदाभेदोपयोगि तत् ॥ २५ ॥

अवाच्यं सर्वतोऽतीतमुच्चैः स्थानं परं पदम् ।
तस्यविद्या च महती विद्या चापि तदात्मिका ॥ २६ ॥

अविद्यया न जानाति विद्यया वेत्ति तत्परम् ।
विद्याविद्ये अतिक्रम्य परमं सुखमश्नुते ॥ २७ ॥

न यत्र भेदसम्बन्धो नाभेदश्च परस्परम् ।
न बन्धो यत्र विषमो न मुक्तिश्च समात्मिका ॥ २८ ॥

यथा राजा भवेत्कश्चित् समस्ते भूमिमण्डले ।
स लोकैर्ज्ञायते राजा वाङ्मनोव्यवहारतः ॥ २९ ॥

स नित्यं नैव जानाति राजास्मीति निरन्तरम् ।
एवं स्वरूपं प्राप्तस्य ब्रह्मास्मीति मुहुर्मुहुः ॥ ३० ॥

चित्तवृत्तिर्नाशमेति तदेव परमं पदम् ।
क्षीरनीरवदैक्यं स्याल्लवणोदकवत् पुनः ।
एकमेव च तज्ज्ञानं ज्ञातव्यं मुक्तिमिच्छता ॥ ३१ ॥

नानाज्ञानानि बालानां प्रबोधाय समंततः ।
निबन्धेषु निबध्यन्ते वस्तुतो नैव तत्र हि ॥ ३२ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे उत्तरखण्डे[1] श्रीरामात्रेयसंवादे अष्टमोऽध्यायः ॥ ८ ॥

नवमोऽध्यायः

आत्रेय उवाच

यदिदं ज्ञानमाख्यातं भवता रघुपुङ्गव ।
उपयोगी न बालानां क्षुद्राणामल्पचेतसाम् ॥ १ ॥

---

१. नास्ति बड़ौ० ।

ये क्षुद्रा निस्तितीर्षन्ति भवसागरजं भयम् ।
तेषां करुणया राम वद गुह्यतरं वचः ॥ २ ॥

श्रीराम उवाच

बालाः सुमन्दमतयो भवाब्धि निस्तितीर्षवः ।
सगुणं समुपासीरन् ज्ञानं ज्ञेयं च यत्पदम् ॥ ३ ॥

गुरोरधीत्य छन्दांसि सरहस्यानि सर्वतः ।
अनुत्कटे तु वैराग्ये गृहमेधीयमाचरेत् ॥ ४ ॥

अग्निहोत्रमुपासीत विधिवत्पूतमानसः ।
दर्शं च पौर्णमासं च पशुबन्धक्रतुं तथा ॥ ५ ॥

चातुर्मास्यानि सत्कृत्य पिबेत् सोमं महामखे ।
रामार्पणधिया सर्वं कर्म कुर्यादतन्द्रितः ॥ ६ ॥

फलभोगेच्छुना कर्म कृतं फल समर्पकम् ।
तत्फलं नश्वरं विन्द्यादैहिकामुत्रिकं तथा ॥ ७ ॥

फलं हि परमानन्द ऐहिकः पारलौकिकः ।
पूर्णानन्दसमुद्रस्य मम मात्रास्तु ताः किलः ॥ ८ ॥

न मां लोकाः कामयन्ते पूर्णानन्दपयोनिधिम् ।
मम मात्राः कामयानाः क्षुद्रास्ते क्षुद्रचेतसः ॥ ९ ॥

मां प्राप्य नान्यकामेषु सज्जन्ते भूरिबुद्धयः ।
उदाराः सर्वतः कामा निष्कामा भवसागरे ॥ १० ॥

मोक्षकामाः कृतधियो गुरूपास्तिफलोत्सुकाः ।
छर्दितान्नसमं सर्वं पश्यन्तो ब्रह्ममप्युत ॥ ११ ॥

कष्टं कर्मापि कुर्वन्तो विनाशायाल्पमेधसः ।
विना मदर्पणधियं कर्मदोषापहारिणीम् ॥ १२ ॥

प्रयाजाद्यखिलाङ्गानि साधनानि च सर्वशः ।
सुगादीनि समेतानि दध्याज्यादीनि वै तथा ॥ १३ ॥

मद्रूपाणि समस्तानि भावयेत् सुविचक्षणः ।
तथा यज्ञं मत्स्वरूपं भावयेत् कर्मदीक्षितः ॥ १४ ॥

नित्यं नैमित्तिकं काम्यमेवं कुर्यादतन्द्रितः ।
कर्मरूपस्य च मम पदाभिव्यक्तिरुद्भवेत् ॥ १५ ॥

[1]परापरविभेदेन सुखं तद्द्विविधं मतम् ।
तदा कर्तुर्ज्ञानवतो मुक्तिः सा क्रमतो भवेत् ॥ १६ ॥

---

१. सुखं तद् द्विविधं प्रोक्तं परापर विभेदतः—बड़ौ० ।

ज्ञानाभावे स्वर्गसुखं लभते मूढमानसः।
परं नियतलोकाख्यं वाक्यशेषेण गद्यते ॥ १७ ॥

श्रद्धा चैव तथासूया दुःखानि विविधानि च।
स्वर्गिणामपि जायन्ते तथान्यैश्च पराभवः ॥ १८ ॥

प्रवृत्तिमार्गनिष्ठा हि ध्रुवाधस्तात् स्थिता अमी।
न ध्रुवोपरि वै तेषां स्वर्गिणां गतिरिष्यते ॥ १९ ॥

न च स्वर्गेषु लोकेषु वाक्यशेषोदितं सुखम्।
नित्यमात्मसुखं तद्धि सत्त्ववृद्धया प्रजायते ॥ २० ॥

शुद्धे सत्वगुणे चैव स्वर्गः सत्त्वभवो भवेत्।
कामाभावेऽपि तन्मुख्यं फलमुक्तं न संशयः ॥ २१ ॥

सार्वकामिकमेतद्धि फलं वेदे निगद्यते।
यागस्य मत्स्वरूपत्वान्मुक्तिरेव फलं भवेत् ॥ २२ ॥

परोक्षकथनद्वारा तदेवाह गिरां पतिः।
अलसा अनुशास्यन्ते प्ररोचनगिरा मुहुः ॥ २३ ॥

यजेत पशुबन्धेन स्वर्गलोकफलाप्तये।
अक्षय्यं सुकृतं लब्धुं चातुर्मास्यैर्यजेन्नरः ॥ २४ ॥

आत्मानन्दस्वरूपं तदक्षयं समुदीर्यते।
तदेव सर्वलोकाख्यं वेदेषु च निगद्यते ॥ २५ ॥

सर्वे लोकाः स्वयं ह्यात्मा सच्चिदानन्दलक्षणः।
आदित्यानां च विश्वेषां वसूनां वरुणस्य च ॥ २६ ॥

अग्नीनां तु चितानां च भास्वराणां दिवौकसाम्।
मरुतां चैव साध्यानां रुद्राणां गणपां तथा ॥ २७ ॥

कुबेरस्य ब्रह्मणश्च तथैवानन्तसंज्ञिनः।
सर्पाणां देवजनानां देवानां च विशेषतः ॥ २८ ॥

देवानां कर्मदेवानां ये ये लोकाः सनातनाः।
सच्चिदानन्दरूपाश्च तत्तद्भोगभयास्तथा ।
सर्वेपरिसमाप्यन्त आत्मन्येव न संशयः ॥ २९ ॥

आत्मा स्वयंज्योतिरजः सनातनः सच्चित्सदानन्दमयः स्वयं प्रभुः।
अनन्यतन्त्रः कुशलैकभाजनं स्वभासकः सन् परभासकश्च सः ॥ ३० ॥

स्वर्ग एव फलं नित्यं नान्यत्क्वापि श्रुतेर्मतम्।
पश्वादिकं तु विकृतौ फलमुक्तं मदात्मकम् ॥ ३१ ॥

मदात्मकं तद्धि तथा मद्रूपं नियतं श्रुतौ।
नित्यकर्माणि पोष्यन्ते काम्यकर्माद्युदीरणात् ॥ ३२ ॥

अभावे पशुपुत्रादिबहुवित्तस्य संसृतौ ।
नित्यकर्म कथं सिद्धेद्बहुवित्तव्ययोर्जितम् ॥ ३३ ॥
सर्वोपायगिरा वेदो नित्यमेव प्रसाध्यते ।
नित्यं कर्म सदा कार्यमनित्यं न कथंचन ।
एतद्धि नियतं लोके मत्स्वरूपं विभावयेत् ॥ ३४ ॥
ध्यानेन धारणाभिश्च समाधिभिरथापि च ।
परमात्मा यथा नृणामभिव्यक्तो भवेद्ध्रुवम् ॥ ३५ ॥
एवमाधानप्रमुखैः कर्मभिर्वेदबोधितैः ।
यज्ञरूपश्च भगवान् अभिव्यक्तो भवेद्ध्रुवम् ॥[1]
अहं यज्ञस्वरूपात्मा यज्ञकर्ताहमच्युतः ।
यज्ञभोक्ता यज्ञकर्ता यज्ञसाधनमप्यहम् ॥ ३६ ॥
अहं यज्ञे सम्प्रदानमपादानमहं मुने ।
अहं च यज्ञशेषोऽपि शेषी यज्ञोऽहमुत्तमः ॥ ३७ ॥
यज्ञाधारोऽहमतुलो यज्ञो वै मामकी तनुः ।
इति ज्ञात्वा यज्ञपरो भवेदस्मिन् बुधोऽपसन् ॥ ३८ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे उत्तरखण्डे श्रीरामात्रेयसंवादे आत्रेयबोधितश्रीरामगीतायां नवमोऽध्यायः ॥ ९ ॥

दशमोऽध्यायः

श्रीराम उवाच

पुरुषार्थपरो नित्यं तत्त्वज्ञः पुरुषो भवेत् ।
व्यासतस्ते तु चत्वारो द्वावेव तु समासतः ॥ १ ॥
धर्मार्थकाममोक्षाख्याः क्रमशः परिकीर्तिताः ।
द्वौ च वेदे निगद्येते दुःखाभावसुखात्मकौ ॥ २ ॥
दुःखाभावस्तु मोक्षः स्यात्परः कामोऽपि सम्भवेत् ।
तयोरङ्गं भवेद्धर्मः स च भूयोऽर्थसाधितः ॥ ३ ॥
अहमेव फलं वेदे तस्य साधनमप्यहम् ।
नामरूपप्रपञ्चात्मा नित्य एवाहमच्युतः ॥ ४ ॥

१. भ्रमाद्विलिखितं–बड़ौ० ।

रूपप्रपञ्चाशक्तानां कर्तुर्नामप्रपञ्चके ।
अहं चक्रे श्रुतिं दिव्यां भूतभव्यानि यत्र वै ॥ ५ ॥
आत्मप्रसादकरणीं जगौ तां भगवान् विधिः ।
स च दिव्यःश्रुतेरर्थः सात्त्विकानां हृदि स्फुरन् ॥ ६ ॥
समन्वयेनाविरोधाद्वेदार्थं च समर्थयेत् ।
त्रिविधोजीवसंघातो देवदानवमानवाः ॥ ७ ॥
सर्वेऽपि ते वेदविदो ब्राह्मणा वेदपारगाः ।
स्वभावगुणभेदेन वेदार्थस्यैव वर्णकाः ॥ ८ ॥
बुद्धिवैचित्र्यतस्तेषां वेदार्थो बहुधास्फुटः ।
केचिद्वेदविदो विप्राः स्वीचक्रुः कर्म मात्रकम् ॥ ९ ॥
कर्मैव सारोवेदानां न ज्ञानं नापि वेश्वरः ।
ज्ञानमेवाहुरपरे भक्तिमेव तु मामकाः ॥ १० ॥
कर्मापि मत्प्रभावेणसूते फलमुदारवत् ।
ज्ञानं चापि मदाधारस्वरूपं बोधयत्यहो ॥ ११ ॥
तस्मान्मत्सेवका लोका भक्तिं कुर्युर्मदात्मिकाम् ।
अपुनर्जन्मनिष्कामां निषेधः कर्मणि श्रुतः ॥ १२ ॥
अन्यथा पुनरुत्पत्तिक्षयिष्णुकर्मणां भवेत् ।
भवेषु वै नोत्पद्यन्ते प्रपाता अर्चिरादिना ॥ १३ ॥
धूमादिना प्रयातानां नियतः पुनरुद्भवः ।
एकमेव भवेत् कर्म प्रकाशस्तस्य भूरिशः ॥ १४ ॥
एक एव च वेदोऽपि नित्या सामतनुर्यतः ।
लौकिकानामात्मधियां जनानां भवजन्मिनाम् ॥ १५ ॥
न पाठशक्तिर्नैवापि ज्ञानशक्तिरनन्तदृक् ।
ततो मदात्मको व्यासश्चातुर्होत्रविभागतः ॥ १६ ॥
व्यस्तवान् सकलं वेदं ततस्तत्प्रेरितैर्मुने ।
तच्छिष्यैर्भेदिताः शाखाः कृत्स्नं तन्त्रं वदन्ति ताः ॥ १७ ॥
कर्मणां जैमिनिस्तत्त्वं जानाति स महामुनिः ।
सर्वज्ञो भगवान् व्यासो ज्ञाननिर्णयमुक्तवान् ॥ १८ ॥
मुनिद्वयनिबन्धार्थैः सर्ववेदार्थनिर्णयः ।
बहुभिर्ऋषिभिर्वादैः कृत्स्नं तन्त्रं प्रकोपितम् ॥ १९ ॥
वेदराशिमुपासीत पुरुषं तन्मनीषया ।
करौ पादौ शिरो वक्ष एवं वै पुरुषो मतः ॥ २० ॥

शिरस्तत्परमं ब्रह्म यदौपनिषदं ह्यदः ।
पञ्चसंस्थात्मको यज्ञोऽपराङ्गानि निबोधय ॥ २१ ॥
वेदस्यानुगतो ह्यर्थः स्मृतिरित्युच्यते मुने ।
पूर्वानुभूतवस्तूनां स्मरणं चोच्यते स्मृतिः ॥ २२ ॥
पारम्पर्याचारतः सालोकतापि मता क्वचित् ।
क्वचिन्न्यात्क्वचिन्नित्यानुमेयश्रुतिमूलतः ॥ २३ ॥
श्रुतिस्मृती उभे एव धर्मस्य परिपोषिके ।
जातानां जन्मना पूर्वं गर्भाधानादिकाः क्रियाः ॥ २४ ॥
तथैव सन्ध्योपास्यापि नित्यश्राद्धादिकाः क्रियाः ।
पाकयज्ञादिकं चापि प्रायश्चित्तं तथैव च ॥ २५ ॥
इत्येष पञ्चधा धर्मः संगृहीतः पुरातनैः ।
अयं नित्य इति प्रोक्तः परमो वेदमूलकः ॥ २६ ॥
व्रतं तीर्थं तथा सर्वं नित्यकार्यमिति स्मृतम् ।
पारम्पर्यवशात्प्राप्तं सद्भिरेव समादृतम् ॥ २७ ॥
पुराणमूलकं चापि तदनुष्ठेयमुच्चकैः ।
शुद्धिरेव तु संस्कारः कर्म त्रैवर्णिकस्य यत् ॥ २८ ॥
स चापि बहुधा प्रोक्तो देशकालादिभेदतः ।
दैशिकः कालिकश्चापि तथा च द्रव्यकृन्मतः ॥ २९ ॥
कर्त्तृतो मन्त्रतश्चापि कर्मतश्चापि कीर्तितः ।
षोढा संस्कारमित्याहुः कर्माङ्गं तन्निगद्यते ॥ ३० ॥
वेदतुल्यं पुराणं च प्रमाणत्वे स्मृतं बुधैः ।
पुराणानां विभागश्च वेदशाखाविभागवत् ॥ ३१ ॥
सात्त्विकादिविभेदेन पुराणमपि भिद्यते ।
योगसांख्ये अपि तथा मद्रूपे सत्त्वसाधिके ॥ ३२ ॥
तत्सत्त्वं सनकादीनां नित्यमेव निगद्यते ।
तद्वेदोपनिषद्भागफलभूतमुदाहृतम् ॥ ३३ ॥
सत्त्वतः सम्भवेज्ज्ञानं यत्तदात्मनिदर्शकम् ।
उभयोश्चफलं भक्तिर्भावरूपा महोदया ॥ ३४ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे उत्तरखण्डे श्रीरामात्रेयसंवादे आत्रेयबोधित श्रीरामगीतायां दशमोऽध्यायः ॥ १० ॥

एकादशोऽध्यायः

आत्रेय उवाच

अथो रघुकुलोत्तंस ब्रूहि भक्तिं निजां पराम् ।
ययानुष्ठितया लोकस्त्वत्सम्बन्धमवाप्नुयात् ॥ १ ॥

श्रीराम उवाच

आत्रेय शृणु वक्ष्यामि मम भक्तिं मदात्मिकाम् ।
कर्मभिः शुद्धचित्तत्वादात्मज्ञो जायते नरः ॥ २ ॥

आत्मज्ञे स परो भावः समुदेति मदात्मकः ।
मन्निष्ठेऽभ्युदिते भावे नान्यत्प्राप्तव्यमिष्यते ॥ ३ ॥

सोत्कण्ठो जायते नित्यं मत्पुण्यचरितश्रुतौ ।
मन्नामस्मरणोद्भूतपरमानन्दनिर्भरः ॥ ४ ॥

मदाधारपरो भूत्वा नान्यत्स्पृहयति क्वचित् ।
मृत्योर्मूर्द्धिन्न पदं दत्त्वा विहरेत समंततः ॥ ५ ॥

ऐहिकामुष्मिके लोके विरक्तो मत्पदाश्रयः ।
नित्यं मम वने तिष्ठेत् प्रमोदवनसंज्ञिनि ॥ ६ ॥

ततो मां पश्यते तत्र निर्भरप्रेमसम्प्लुतः ।
खेलन्तं सहजानन्दासंगसंगतमङ्गलम् ॥ ७ ॥

विचित्रवंशीरवगायनोद्धुरं विचित्रवेषं मणिरत्नमण्डितम् ।
मृदुस्मितापूरितचन्द्रमण्डलप्रभामुखं मोदवतीविहारिणम् ॥ ८ ॥

विचित्ररत्नाद्रिदरीस्थधातुभिर्विचित्रितोरस्कमनन्यसुन्दरम् ।
मुक्तावतंसप्रविभूषितस्फुरत्तृङ्गोत्तमाङ्गं स्मर मां रामचन्द्रम् ॥ ९ ॥

ततो मामीदृशं पश्यन् बद्धप्रेमा भवेन्मयि ।
प्रेमाणमाशु लभते मत्प्रसादादनन्यधीः ॥ १० ॥

न हिमत्प्रेमणि प्राप्ते प्राप्तव्यान्तरमस्ति च ।
ईदृशा रसिका भक्ता वैष्णवाः प्रेमभागिनः ॥ ११ ॥

अति दुर्लभसम्बन्धाः कथं लभ्याः शुभं विना ।
तेषां चरणपाथोजनिषेवणकृतां सताम् ॥ १२ ॥

सुलभोभगवत्प्रेमा क्षेमाकर उदग्रभाः ।
तेषां वाक्यागमेनैव शुद्धता मनसो भवेत् ॥ १३ ॥

[1]तत्कृपालेशमात्रेण निस्तरेद्भवसागरम् ।
तदुच्छिष्टान्नभोज्येन सर्वज्ञत्वमवाप्नुयात् ।
तेषां स्वरूपं त्रिदशैरज्ञेयं विष्णुवेदिभिः ॥ १४ ॥

---

१ तत्कृपालेशमात्रेण—बड़ौ० ।

ते दृश्यमाना अपि चक्षुषा मुने साक्षात्स्वयं मत्तनवः प्रकीर्तिताः ।
वशीकृतो यैरहमप्रमेयः परापरज्ञः परमप्रेमभाग्भिः ॥ १५ ॥

ते मद्भक्ता मत्स्वरूपज्ञातारो मम केलिषु ।
दत्तप्रज्ञाः दत्तगिरो दत्तश्रवस उद्भटाः ॥ १६ ॥

सर्वेषु व्यवहारेषु मामेवाखिलरूपिणम् ।
नित्यं व्यवहरन्तस्ते ब्रह्मज्ञा इति कीर्तिताः ॥ १७ ॥

नान्ये मनुष्या ब्रह्मज्ञा भवन्तीह कदाचन ।
मन्नामरूपलीलानां ऋते ज्ञानादनुत्तमात् ॥ १८ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे उत्तरखण्डे श्रीरामात्रेयसंवादे आत्रेयबोधितश्रीरामगीतायामेकादशोऽध्यायः ॥ ११ ॥

द्वादशोऽध्यायः

आत्रेय उवाच

त्वय्यर्पितमनोबुद्धिरैहिकामुष्मिकादिभिः ।
स्वरूपज्ञैर्ब्रह्मविद्भिः कथं स्थेयं वदस्व तत् ॥ १ ॥

किं कर्त्तव्यं किमध्येयं सगुणं निर्गुणं च वा ।
किं वक्तव्यं किमुन्नेयं किं प्राप्यं राम सत्यते ॥ २ ॥

तदेतत् कृपया नाथ ममाख्याहि सतां गते ॥ ३ ॥

श्रीराम उवाच

आत्रेय शृणु वक्ष्यामि भक्तानां प्रीतिभागिनाम् ।
मय्यर्पिताखिलानां च या चर्या तां विशेषतः ॥ ४ ॥

संक्षेपतस्ते पूर्वोक्तामनुभावस्वरूपिणीम् ।
भक्तिर्नाम परो भावश्चर्या तस्याणुभावका ॥ ५ ॥

सा तेषां स्थितिरत्युग्रा ह्यसिधारापथानुगा ।
स्ववर्ग्यान्नं तु भुञ्जीत समर्प्यं श्रीराममपि ॥ ६ ॥

समर्पणं त्रिविधं प्राहुर्मम मूर्तौ समक्षकम् ।
परोक्षं मानसं प्रोक्तं तृतीयं वैष्णवाग्रतः ॥ ७ ॥

भुञ्जीत तस्यावशिष्टं प्राणस्य स्थापनं मितम् ।
नामानि च गृणीतैवं प्रेम्णा मम दिवानिशम् ॥ ८ ॥
नृत्यगायनवादित्रैस्तोषयेन्मां विशेषतः ।
मत्प्रसादोपलब्धं च धारयेदम्बरादिकम् ॥ ९ ॥
तुलसीदलमालां च धारयेत्कण्ठदेशतः ।
काले शुष्कतमां शाखां तुलस्यासितमेचकाम् ॥ १० ॥
गृहीत्वा मणिसंदोहं सच्छिद्रं रचयेन्नरः ।
तैर्निर्मितां महामालां धारयेदुपवीतवत् ॥ ११ ॥
शिखायां वैष्णवो भाले कण्ठे बाह्वोश्च हस्तयोः ।
सर्वतो धारयेन्मालास्तुलसीकाष्ठसम्भवाः ॥ १२ ॥
धनुर्बाणं परं श्रेष्ठं मन्नामानिच धारयेत् ।
चक्रात् कोटिगुणं प्रोक्तं मन्नामानि च वै क्रमात् ॥ १३ ॥
धनुर्बाणौ परात्परौ मन्नामानि च वा पुनः ।
आयुधैः सकलैर्बाह्वोर्मन्नाम परिवेष्टयेत् ॥ १४ ॥
बाणं च वेष्टयेत् सर्वैरायुधैवक्षसः स्थले ।
भालेन धारयेन्नाम मन्नामानि च भूरिशः ॥ १५ ॥
सर्वत्र धारयेद्वाणं शरीरे तत्परात्परम् ।
काश्मीरेण समायुक्तं श्वेतचन्दनमुत्तमम् ॥ १६ ॥
यावकेन समायुक्तं पुण्ड्रयेदूर्ध्वतः सुधीः ।
त्रिपुण्ड्रं नैव कुर्वीत विशेषेण विवर्जयेत् ॥ १७ ॥
अङ्गवस्त्रमपिस्नाने न तिर्यग्धारयेद्बुधः ।
यत्प्रमोदवने रम्ये रत्नाद्रितट भूमिषु ॥ १८ ॥
पीतपाण्डुरकं रम्यं रजस्तद्धारयेत्तनौ ।
वशीकुर्यात्स मां भक्त्या यो वहेत्तद्धनं रजः ॥ १९ ॥
पवित्रं सहजानन्दाश्रीचारुचरणाङ्कितम् ।
सहजप्रेमदं सर्वकामदं शशिमङ्गलम् ।
ममापि सा प्रियाधूलिस्तद्विन्दुं मूर्द्धिन धारयेत् ॥ २० ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे उत्तरखण्डे श्रीरामात्रेयसंवादे आत्रेयबोधितश्रीरामगीतायां भक्तचर्याकथनं नाम द्वादशोऽध्यायः ॥१२॥

त्रयोदशोऽध्यायः

श्रीराम उवाच

नोष्णीषं धारयेद्भक्तः पुरुषाहंकृतिं तथा।
श्मश्रूणि कंचुके चैव[1] पूर्वनाम च यद्भवेत् ॥ १ ॥
वर्णाश्रमादिचिह्नानि सोपवीतां शिखां पुनः।
ऋगादिसर्वभागांश्च सर्ववेदायतोऽस्य हि ॥ २ ॥
सर्ववेदसमं तद्धि यत्प्राप्तं मामकं पदम्।
स्मार्तानि च निषिद्धानि स्वविरोधेन पालयेत् ॥ ३ ॥
दहेच्च भुजयोर्युग्मं मामकैर्धनुवीरुधैः।
कुर्याच्च सर्वगात्रेषु संस्कारं पुण्ड्रकाभिधम् ॥ ४ ॥
पवित्रं धारयेन्नाम रामदासादिरूपभाक्।
तदुच्चारणमात्रेण पूतो भवति मानवः ॥ ५ ॥
यथा रामभगवतो नामोच्चारणतो मम।
तथा पावयति ब्रह्मन् नाम सम्बन्धिनोऽपि मे ॥ ६ ॥
तादृशानि तु नामानि यान्ति लौकिकतां न च।
तन्नामयोगमात्रेण मदीयो जायते नरः ॥ ७ ॥
यदात्मा मत्पदं प्राप्तः साक्षान्मद्दासतां गतः।
तादृशं यस्य नामास्ति न तस्य गृहकल्पनम् ॥ ८ ॥
रामो देवः सदा येषां राम एव च तारकः।
राम एव तथा कर्त्ता वैष्णवान् पूजयेत् सदा ॥ ९ ॥
तन्नामवति वै भक्ते न भवेद्यमयातना।
तस्माल्लौकिकनामानि परित्यज्य सदा नरः ॥ १० ॥
तादृशं धारयेन्नाम यादृशं वैष्णवोचितम्।
ततः स रामदासाख्यः श्रीगुरुं सततं भजेत् ॥ ११ ॥
स तं करुणया ब्रह्मन् दिव्यमन्त्रमुपादिशेत्।
मन्त्रश्च द्विविधः प्रोक्तो द्वयश्चाद्वय एव च ॥ १२ ॥
देशिकोक्तप्रकारेण तं मन्त्रं प्रजपेन्नरः।
मन्त्रजापीभवेत्पूतो मन्त्रजापीभवेन्मुनिः ॥ १३ ॥
मन्त्रजापी भवेद्दिव्यस्तस्मान्मन्त्रं सदा जपेत्।
बीजमन्त्रं जपेद्वापि नाममन्त्रं जपेन्मुने ॥ १४ ॥

---

१. जन्मनाम–टि० बडौ०।

बीजमन्त्रं चिरात्सिध्येन्नाममन्त्रं तु तत्क्षणात् ।
रामरामादिकं नाम बीजं मायारसादिकम् ॥ १५ ॥
बीजचैतन्यसाक्षात्त्वे बीजं सिध्यति तत्क्षणात् ।
तत्तु दूरतरं लोकं भावनावसचेतसाम् ॥ १६ ॥
कोटिबालार्कसंकाशं कोटिचन्द्रसमप्रभम् ।
कोटिविद्युत्प्रतीकाशं चमत्कारकलानिधिम् ॥ १७ ॥
भावयेन्मन्त्रचैतन्यं स्वात्माभेदेन साधकः ।
तत्प्रभापुञ्जसंजातहस्तपादादिविग्रहम् ॥ १८ ॥
भावयेन्मन्त्रदेवं च रामचन्द्रं परात्परम् ।
या यस्य भावनासक्तिः सा मूर्तिस्तस्य विस्फुरेत् ॥ १९ ॥
साक्षात्कृतो देवदेवो दत्ते कामपरं पुरः ।
आचारपूततां ब्रह्मा विष्णुः श्रियमनश्वराम् ॥ २० ॥
ऐश्वर्यं भगवानीशो बलं तु मघवा हरिः ।
सूर्यस्तेजः शशी चायुरग्निरोजः प्रयच्छति ॥ २१ ॥
सरस्वती सरस्वतीमुमादेवी पराक्रमम् ।
कुबेरश्च धनं भूरिं वायुर्दत्ते बलोद्भवम् ॥ २२ ॥
वरुणः शान्तिमतुलां यमो धर्मबलोदयम् ।
निर्ऋतिः कुरुते वृद्धिमन्ये देवास्तथा वरान् ॥ २३ ॥
अहं पुनरभीतिं च प्रपन्नेभ्यो ददामि वै ।
एवं मन्त्रं समाराध्य कृतकृत्यो भवेन्नरः ॥ २४ ॥
नहि मन्त्रेण सदृशं शीघ्रोपायेषु विद्यते ।
नामोपात्रस्ततः शीघ्रः प्रवक्ष्यामि च तं मुने ॥ २५ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे उत्तरखण्डे श्रीरामात्रेयसंवादे आत्रेयबोधितश्रीरामगीतायां त्रयोदशोऽध्यायः ॥ १३ ॥

चतुर्दशोऽध्यायः

श्रीराम उवाच

नामैव मम जीवातुर्भक्तानां दृढचेतसाम् ।
नामैव तारकं ब्रह्म भवाब्धेरतिदुस्तरात् ॥ १ ॥

नामश्रीनामसंयुक्तं मम वित्तैकपारकम् ।
तारकं पारकं ब्रह्म यो जानाति स पण्डितः ॥ २ ॥

स एत्व वैष्णवो भक्तः प्रेमसत्कृतमानसः ।
स एव सर्वदर्शी च स एव मम बल्लभः ॥ ३ ॥

नामामृतमुदारं मे मोहध्वान्तविनाशकम् ।
ब्रह्मानन्दाधिकं नाम रामचन्द्रपदात्मकम् ।
प्रेमानन्दमयं ज्ञेयं रामेति द्व्यक्षरं पुनः ॥ ४ ॥

ग्रह्णन्ति रामेति च नाम नित्यं भक्ता भवाब्धेस्तरणाय तावत् ।
रामेति मे नाम पुनर्गृणन्तः प्रेमामृतं भूरितरं पिबन्ति ॥ ५ ॥

रामेति रेफोऽनलकीलयोगो मकारचन्द्रः स्रवतेऽमृतानि ।
संस्नाति यस्तत्र नरोऽतिधन्यः स मे प्रियो वैष्णवभक्त राजः ॥ ६ ॥

प्रणवादपि मन्नाम मद्रूपत्वप्रदायकम् ।
अधिकं खलु विज्ञेयं साक्षान्मद्रूपबोधनात् ॥ ७ ॥

अन्तरङ्गात्मिका सृष्टिर्नामरूपात्मिका मम ।
उभे अपि सदा नित्ये अविनाभाववत्यपि ॥ ८ ॥

नामसृष्टिः समस्तापि रामेत्यत्र समाप्यते ।
रूपसृष्टिस्तथा सर्वा श्यामे धाम्नि समाप्यते ॥ ९ ॥

मन्नाम द्व्यक्षरं ब्रह्मन् ममापि प्रीतिदायकम् ।
रमेऽहमपि मे धाम्नि श्यामे परमसुन्दरे ॥ १० ॥

आकाशमतसीपुष्पं तापिच्छद्रुम कोरकम् ।
ममाङ्गतुलनाप्राप्तं लोके धन्यतमं खलु ॥ ११ ॥

मद्धर्मबोधकं नाम यद्राम इति गोपितम् ।
तद् गृणंल्लभते तादृक् स्वरूपं सहजोज्ज्वलम् ॥ १२ ॥

मद्रूपमविनाभूतं ध्यायन् मुच्येत पातकात् ।
अमुनाद्व्यक्षरेणैव रामेति रुचिरात्मना ॥ १३ ॥

रामेति द्व्यक्षरं नाम गोपयेन्निजचेतसि ।
उपांशुना जपेन्नित्यं स्फोरयेन्न गलाध्वना ॥ १४ ॥

उच्चैःशब्देनापि नियमेकान्ते राममुच्चरेत् ।
एवं मां नामरूपाभ्यां भावयेत्सुसमाहितः ॥ १५ ॥

मन्नित्यलीलासम्बन्धं प्रमोदविपिने लभेत् ।
तस्मान्नामपरो नित्यं भवेदेकान्तवैष्णवः ॥ १६ ॥

नामशक्त्याशया जातु न कुर्यात्पातकं जनः ।
नामग्रहणगर्वं च न कुर्याद्भक्तसंसदि ॥ १७ ॥

नामोद्धारं न कुर्वीत गृह्णीयात्प्रयतः सदा ।
अन्यदेवस्य यन्नाम मन्नाम्ना तुलयेन्न तत् ॥ १८ ॥
स्वरूपे सविधे चापि न कुर्यान्नामभूरिताम् ।
न परश्रवणार्थं च नामकीर्त्तनमाचरेत् ॥ १९ ॥
अविश्वासेनापिनामग्रहणं परिवर्जयेत् ।
तथान्यदेवतानामजापो नैमित्तिकादिषु ॥ २० ॥
तथा पुत्रादिकं नाम मन्नाममहिमाङ्कितम् ।
न कुर्यात् किंतु तदा सनामाङ्कं कुरुते पुनः ॥ २१ ॥
नान्त्यजाया दिशेन्नाम श्रद्धादिरहिताय च ।
न द्विजायापि मन्नामविश्वासरहिताय च ॥ २२ ॥
न श्रावयेन्नीचकर्णे न विक्रीणीत लोभतः ।
न वृत्त्योयदि शेत्कापि नाचार्यख्यापनाय च ॥ २३ ॥
न जपेदशुचित्वेऽपि न रुद्राक्षादिभिर्जपेत् ।
तुलसीकमलाक्षाणां मणिमालिकया जपेत् ॥ २४ ॥
यद्वान्तर्मालिकां धृत्वा जपेन्मन्नाममन्त्रकम् ।
जाग्रत्स्वयंस्तथा जिघ्रन् पश्यन् गच्छंल्लपञ्श्वसन् ॥ २५ ॥
भुञ्जानो जृम्भमाणश्च शयानो विसृजत् रुजन् ।
क्षुवन्नमान्नुन्नमंश्च तिष्ठन् कुर्वन् स्पृशन्नपि ॥ २६ ॥
सर्वेषु व्यवहारेषु मम नामपरो भवेत् ।
वसनं वासनं भूषामुष्णीषं कंचुकं तथा ॥ २७ ॥
उत्तरीयं चाङ्गुलीयं मन्नामाङ्कितमुद्वहेत् ।
पत्नीः पुत्रांश्च पुत्रीश्च तथा दासजनं निजम् ॥ २८ ॥
मन्नामाङ्कितदासाख्यान् कुर्यात् प्राकारकादिषु ।
नाम गायेन्नाम रटेन्नामैव भृशमाश्रयेत् ॥ २९ ॥
ब्रह्मयज्ञादिकालेषु नामैवाध्ययनं चरेत् ।
अनुध्यानं प्रकुर्वीत नामस्वाध्यायमाचरेत् ॥ ३० ॥
पातकं हरते विष्णोर्नाम दैत्यवधाङ्कितम् ।
[1]मुक्तिं ददाति गोविन्दो मुकुन्दादिस्वभावतः ॥ ३१ ॥
आयुधैरङ्कितं नाम ददात्यभयमेव च ।
आनन्द वर्धयेन्नाम ह्यवतारक्रियाङ्कितम्[1] ॥ ३२ ॥

---

१. १ बड़ौदा ।

श्रीनामाङ्कितमन्नाम मत्स्वरूपं ददाति च ।
तत्रापि सहजानन्दासम्बद्धं मम नाम यत् ।
तत्सुगोप्यतमं साक्षात्प्रेमसायुज्यदायकम् ॥ ३३ ॥

अन्यत्कृष्णमकुन्दादिनाममाहात्म्यं वर्त्तते ।
रामनामस्वरूपं तु मयापि किमु वर्ण्यताम् ॥ ३४ ॥

न चत्वारोऽपि वै वेदाः समन्त्राः सप्तकोटयः ।
न यज्ञा अश्वमेधाद्यास्तीर्थानां चापि कोटयः ॥ ३५ ॥

न मेरुतुल्यदानानि न योगाश्च तपांसि च ।
रामेति नाममात्रस्य तुलां यान्ति महामने ॥ ३६ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे उत्तरखण्डे श्रीरामात्रेयसंवादे आत्रेयबोधितश्रीरामनामाख्यगीतायां चतुर्दशोऽध्यायः ॥ १४ ॥

पञ्चदशोऽध्यायः

श्रीराम उवाच

उपचारैर्बहुविधैर्मां यजेत विधानतः ।
एककालं द्विकालं वा त्रिकालं वा विशेषतः ॥ १ ॥

प्रातर्गुरुपदं ध्यात्वा ध्यात्वा हृत्कमले च माम् ।
देहकृत्यं विनिर्वर्त्य मन्त्रस्नानं समाचरेत् ॥ २ ॥

गृहीत्वा मूलमन्त्रेण मृदमस्त्राभिमन्त्रिताम् ।
विशोध्य शिखया गात्रं मूलेनैव विसर्जयेत् ॥ ३ ॥

सम्मुखीकरणं कृत्वा प्राणरोधनपूर्वकम् ।
नाभिदघ्ने जले स्थित्वा प्राणायामं विधाय च ॥ ४ ॥

षडङ्गं परिकल्प्याङ्गे चक्राकारं जलं स्मरेत् ।
उपकल्प्यजले तीर्थं सूर्याद्यावाहयेत् सुधीः ॥ ५ ॥

अङ्कुशेन च सम्भिद्य एकीकुर्याज्जलेन च ।
तत्र मत्पादसलिलं बुद्ध्वामज्जेत् पुनः पुनः ॥ ६ ॥

देवं संतर्प्य निर्मज्ज्य स्कन्धे वक्षसि मूर्द्धनि ।
धौताम्बरेपरीधाय संध्यातर्पणमाचरेत् ॥ ७ ॥

गृहीत्वा देवसलिलं यागभूमिमथाविशेत् ।
धौताङ्घ्रिपाणिराचम्य सामान्यार्घं विधाय च ॥ ८ ॥

गन्धपुष्पोदकैः सर्वाः पूजयेद्द्वारदेवताः ।
सिंहासनं समापूज्य पात्राणि स्थापयेत्सुधीः ॥ ९ ॥

पाद्यार्घ्याचमनादीनि नैवेद्यान्तानि च क्रमात् ।
देवमावाह्य विधिवत् पूजयेत् सुसमाहितः ॥ १० ॥

आवाहनं स्थापनं च संनिधापनमेव च ।
संनिरोधनमप्युक्तं सकलीकरणं तथा ॥ ११ ॥

अवगुण्ठनमप्युक्तममृतीकरणं तथा ।
आप्यायनं च परमीकरणं जलबिन्दुभिः ॥ १२ ॥

गन्धं पुष्पं तथा धूपं नैवेद्यारार्तिके तथा ।
आचमनं ततो दत्त्वा वैजयन्तीं समर्पयेत् ॥ १३ ॥

तुलस्याः सुदलैर्माला पञ्चवर्णप्रसूनकैः ।
ग्रथिता पादपद्मान्ता वैजयन्ती निगद्यते ॥ १४ ॥

भूषयेच्चैव भूषाभिर्मूर्तिप्रतिकृतौ पुनः ।
शालग्रामशिलायां मे पूजनं नित्यमुत्तमम् ॥ १५ ॥

ततोऽप्युत्तमकं यन्त्रे परिवारगणान्विते ।
यन्त्रादप्युत्तमं मूर्तौ स्थापितायां विधानतः ॥ १६ ॥

अचलायां महामूर्त्तौ तत्रा[1]प्युत्तमपक्षता ।
रङ्गनाथे वेंकटे च श्रीमद्विठ्ठलवल्लभे ॥ १७ ॥

जगन्नाथे बदर्यां च दिव्यपूजाफलं भवेत् ।
अन्यासु चापि दिव्यासु प्रतिमासु विशेषतः ॥ १८ ॥

काले काले यजेद्भूरिसंविदाभिरुदारधीः ।
वसन्ते पूजयेन्नित्यं पुष्पैर्दमनकोद्भवैः ॥ १९ ॥

रसालपल्लवैर्लग्नमञ्जरीकैः प्रपूजयेत् ।
चम्पकैर्बकुलैश्चापि माधुरीलतिकोद्भवैः ॥ २० ॥

अन्यैश्च विविधैः पुष्पैः कुसुमाकरसम्भवैः ।
अतियुक्तैर्मल्लिपुष्पैर्हस्वशाखासिकोद्भवैः ॥ २१ ॥

ग्रीष्मे चन्दनलेपैश्च तथैव व्यजनानिलैः ।
शीतोदकैश्च नैवेद्यैरेलाकर्पूरगन्धिभिः ॥ २२ ॥

वैशाखस्य सिते पक्षे तृतीया या भवेद्दिवा ।
तस्यां चन्दनयात्रायां चन्दनैर्मां विलेपयेत् ॥ २३ ॥

---

१. नास्ति—बड़ौ० ।

चैत्रे च दोलयेद्धरिं दक्षिणाभिमुखं हि माम् ।
तं ये पश्यन्ति मनुजास्तेषां न पुनरूद्भवः ॥ २४ ॥

रसालमञ्जरीपत्रपुष्पाच्छादितदोलके ।
आरूढं मां न पश्यन्ति किं ते धन्या नरा भुवि ॥ २५ ॥

ज्येठाभिषेकं कुर्वीतं ज्येष्ठपूर्णादिने पुनः ।
सुवर्णं धर्ममित्याद्यैर्यजुःपुरुषसूक्तकैः ॥ २६ ॥

ब्राह्मणान् वैष्णवान् भक्तांश्चन्दनादिभिरर्चयेत् ।
ततो रथोत्सवः कार्यो रथारूढे हरौमयि ॥ २७ ॥

रथारूढं च ये भक्ताः पश्यन्ति श्रद्धया युताः ।
न तेषां जायते जन्म संसारे दुःखसागरे ॥ २८ ॥

ततः श्रावणके मासि नद्यां हिन्दोलयेच्च माम् ।
हरितावनिभागेषु निकुञ्जेसु च कालतः ॥ २९ ॥

हरितत्वं प्रयातेषु स्थापयेत् प्रियया सह ।
नीलापराजितापुष्पैः कदम्बकुसुमैस्तथा ॥ ३० ॥

ग्रथितां कारयेन्मालां तां मह्यं विनिवेदयेत् ।
पवित्रारोपणं कुर्यान्मन्त्रविद्भिर्द्विजैः सह ॥ ३१ ॥

श्रावणस्य सिते पक्षे एकादश्यां शुभे दिने ।
रामं गुरुं च मृद्वीभिः पवित्राभिः प्रपूजयेत् ॥ ३२ ॥

ब्राह्मणैः कारयेद्देवे रक्षाबन्धनकर्म च ।
जन्माष्टमीव्रतंकुर्यादुत्सवं च विशेषतः ॥ ३३ ॥

कृष्णो ममांशतां जातो देवकीवसुदेवयोः ।
रामोऽहं रघुशार्दूलः श्रीमद्दशरथाङ्गजः ॥ ३४ ॥

प्रयातः सुखिताख्यस्य गोपराजस्य गोपतेः ।
रावणस्यैव दुर्बुद्धेर्वञ्चनाय न संशयः ॥ ३५ ॥

अहं पूर्णं परब्रह्म सेवनीयो निरन्तरम् ।
भक्तैर्भवभयंघोरं तत्क्षणान्निस्तितीर्षुभिः ॥ ३६ ॥

अनन्तस्य व्रतं चैव पूजनं च समाचरेत् ।
एतदावश्यकं कार्यमनन्यैरपि मज्जनैः ॥ ३७ ॥

विजयां दशमीं प्राप्य कुर्यादुत्सवमुत्तमम् ।
मत्सम्बन्धाद्विशेषेण मम भक्तैः सुकोविदैः ॥ ३८ ॥

ततो बाहुलके मासि कर्त्तव्यं मम सेवनम् ।
दीपैश्च धूपगन्धाद्यैः सुगन्धाक्तैर्दिवानिशम् ॥ ३९ ॥

पीतवासकपुष्पैश्च दिव्यहारं प्रकल्पयेत् ।
भक्त्या निवेदयेन्मह्यं हेममालार्पणादिकम् ॥ ४० ॥

हरिप्रबोधिनीं यावत्कुर्याद्दीपगणार्पणम् ।
दीपमालाविशेषेण पूरयेन्मम मन्दिरे ॥ ४१ ॥

तुलसीसविधे चैव गवां गोष्ठे द्विजन्मनाम् ।
अन्नकूटोत्सवे चापि पूजयेन्मम गोकुलम् ।
सौगन्धार्द्रि च रत्नाद्रिमन्नकूटैः प्रपूरयेत् ॥ ४२ ॥

मदग्रतो गवां क्रीडा चान्नकूटं मदग्रतः ।
मदग्रतो दीपमाला हन्ति पापं त्रिजन्मजम् ॥ ४३ ॥

पञ्चभीष्मव्रतं कुर्याद्यावत्पूर्णादिनावधि ।
कार्तिकादधिकं पुण्यं मार्गशीर्षे निरूपितम् ॥ ४४ ॥

यत्र मां गोपिकाः प्रापुर्वरत्वेनात्य भीप्सितम् ।
हेमन्ते प्रोज्ज्वलाङ्गारहसन्तीर्मम मन्दिरे ॥ ४५ ॥

स्थापयेद् दिव्यधूपेन धूपिताश्च सुगन्धिताः ।
तूलवस्त्रपरीधानं सेवयेन्मां श्रिया सह ॥ ४६ ॥

एवमात्मानुरागेण सेवते सां सदैव यः ।
स याति मम सायुज्यमात्मारामो न संशयः ॥ ४७ ॥

एवं यः सततं भक्तो देशकालानुसारतः ।
सेवते मां स्वशक्त्या च स मे प्रियतमः सदा ॥ ४८ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे उत्तरखण्डे श्रीरामात्रेयसंवादे आत्रेयबोधितश्रीरामगीतायां पञ्चदशोऽध्यायः ॥ १५ ॥

षोडशोऽध्यायः

श्रीराम उवाच

बाह्ययागेष्वशक्तश्चेदान्तरं यजनं चरेत् ।
सहस्रदलमध्यस्थं दिव्यं ज्योतिः परं पदम् ॥ १ ॥

हृत्यङ्कजे समानीय भावयेत्साधकोत्तमः ।
श्यामं पीताम्बरं देवं पुण्डरीकाक्षमच्युतम् ॥ २ ॥

धनुर्धरं कौस्तुभाढ्यं श्रीवत्साङ्कितवक्षसम् ।
स्मितरञ्जितबिम्बोष्ठं कमलासेवितं सदा ॥ ३ ॥

स्वर्णोपवीतसंवीतं स्वर्णरत्नविभूषितम् ।
स्फुरन्मकरिकाकारकुण्डलद्वयभूषितम् ॥ ४ ॥

लम्बालकलताशोभिवदनाम्भोजसुन्दरम् ।
सर्वावयवशोभाढ्यं त्रिवलीराजितोदरम् ॥ ५ ॥

गम्भीरनाभिसंस्थानं सूक्ष्ममध्यस्थलं तथा ।
द्विभुजं मां बालकेलिं स्मरेद्दशरथालये ॥ ६ ॥

सुखितस्य गृहे चापि क्रीडन्तं मोदकानने ।
सहजानन्दिनीकान्तं कुञ्जकेलिविशारदम् ॥ ७ ॥

मानसैरूपचारैश्च तोषयेद्भूरिभोगदैः ।
न मानससमा सेवा न मानससमा क्रिया ॥ ८ ॥

न मानससमा भक्तिर्न मानससमा मतिः ।
तस्मान्मानसरूपाभिः संविधाभिः प्रपूजयेत् ॥ ९ ॥

आसनं वसनं चैव पाद्यार्घाचमनादिकम् ।
गन्धादिकं सनैवेद्यं तथैवारार्तिकादिकम् ॥ १० ॥

बालभोगादिकं चापि मनसैव प्रकल्पयेत् ।
कुर्याच्च मनसा गानं मनसा नृत्यमाचरेत् ॥ ११ ॥

प्रादक्षिणं च मनसा दण्डवत्प्रणतिस्तथा ।
यावन्न जायतेऽभ्यासो मानसे कर्मणि स्फुटम् ॥ १२ ॥

तावद्बाह्यानि कर्माणि कुर्वीत प्रयतो नरः ।
अभ्यस्ते मानसेकर्मण्यलं बाह्येनकर्मणा ॥ १३ ॥

शतवर्षकृतं कर्म भगवत्सेवनादिकम् ।
तत् क्षणे मानसंकर्म न तुलां याति तस्य तत् ॥ १४ ॥

ब्रह्माण्डगोलकं भित्वा दृढज्ञानासिना नरः ।
एकं प्रपूरयेत् क्षीरैरन्यं भूरिसिताभरैः ॥ १५ ॥

आहवनीयेन सम्पाच्य पायसं दिव्यतण्डुलैः ।
एकीकृत्य सिताभारान् विभवे मह्यमर्पयेत् ॥ १६ ॥

एव माननसेवासु सौकर्यं भूरितापि च ।
तस्मात्को नाम न नरो मानसं कर्त्तुमर्हति ॥ १७ ॥

मानसे सुलभा दिव्या गन्धपुष्पादिसम्पदः ।
मानसे सुलभो देवः सच्चिदानन्दविग्रहः ॥ १८ ॥

तस्मान्मानसकर्मैव कुर्यान्नित्यमतन्द्रितः ।
मम सेवां विधायादौ परिवारं ममार्चयेत् ॥ १९ ॥

श्रीमद्दशरथं तातं कौसल्यायाश्च मातरः ।
भ्रातरं लक्ष्मणं शेषं परौ कीरौ च तत्स्त्रियः ॥ २० ॥

जानकीं हनुमन्तं च कपिवर्गं च मे प्रियम् ।
प्रत्येकमुपचारौघैर्माङ्गल्यां सुखितं तथा ॥ २१ ॥

प्रमोदविपिनं दिव्यमर्चेत्परिकरैः सह ।
एवं पूजां समाचर्य कृतकृत्यो भवेन्नरः ॥ २२ ॥

ऐहिके चामुष्मिके च कर्त्तव्यं नावशिष्यते ।
प्रेम्णायुतोऽखिलं कुर्यात्तदभावे तु मध्यमम् ॥ २३ ॥

ज्ञानाभावे प्रेमसत्त्वे नैव मध्यमता भवेत् ।
तस्मात् प्रेम पुरस्कृत्य सर्वसेवादिकं चरेत् ॥ २४ ॥

यथा स्त्रियो विना भूषां भोजनं च घृतं विना ।
भाग्यं विना च पुरुषस्तथा प्रेम विना कृतम् ॥ २५ ॥

अयं रसो भक्तिरूपो भावरूपः सनातनः ।
तद्वन्तो रसिका ज्ञेया रसभावविदो जनाः ॥ २६ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे उत्तरखण्डे श्रीरामात्रेयसंवादे आत्रेयबोधितश्रीरामगीतायां षोडशोऽध्यायः ॥ १६ ॥

सप्तदशोऽध्यायः

श्रीराम उवाच

चैत्रे मासि सिते पक्षे नवम्यां शुभवासरे ।
मम जन्मोत्सवं कुर्याद्बहुवित्तव्ययादिभिः ॥ १ ॥

विपुलं मण्डपं कुर्यात् पुष्पमाल्याम्बरादिभिः ।
वासितं पटवासाद्यैः कर्पूरद्युसृणादिभिः ॥ २ ॥

कुर्यान्नव शुभान् दिव्यघटान् नीरप्रपूरितान् ।
ममाभिषेकं कुर्वीत कुम्भैः शङ्खकुशोदकैः ॥ ३ ॥

उद्वर्त्य घुसृणक्षोदैः स्नानं पञ्चामृतैस्ततः ।
शुद्धोदकेन संस्नाप्य जातकोत्सवमाचरेत् ॥ ४ ॥

यथैव दुर्लभे पुत्रे वार्धके वयसि स्थिते ।
जाते कुर्यादुत्सवं च तथैवोत्सवमाचरेत् ॥ ५ ॥

मिष्टान्नभोजनान्युच्चैर्दद्यान्मत्प्रीतिहेतवे ।
वैष्णवेभ्यो ब्राह्मणेभ्यो मम भक्तेभ्य एव च ॥ ६ ॥

कुण्डले मुद्रिकावस्त्रे दद्यान्मत्प्रीतिहेतवे ।
महान्तमुत्सवं कुर्वन् मृदङ्गध्वनिपूर्वकम् ॥ ७ ॥

जातस्य मम संवृद्ध्यै विप्रेभ्यो भूरिदक्षिणाः ।
एवं वैशाखमासेऽपि नवम्यां शुक्लपक्षके ॥ ८ ॥

सहजायाः शुभं कुर्याज्जन्मोत्सवमुदारधीः ।
सुवासिनीभ्यः कन्याभ्यो दद्याद्भूषणमम्बरम् ॥ ९ ॥

अलंकृत्य स्नानलेपसौरभार्पणभूषणैः ।
भोजयेद्भूरि भक्त्यैव सहजाप्रीतिहेतवे ॥ १० ॥

प्रमोदविपिनग्रामे राजिनीनन्दनालये ।
उत्पन्ना सहजालक्ष्मीर्मम रासविनोदिनी ॥ ११ ॥

तस्मिन् दिने व्रतं कुर्यादुत्सवं च विशेषतः ।
माघशुक्ले च पञ्चम्यामवतीर्णा पुनः प्रिया ॥ १२ ॥

जनकस्य गृहे यज्ञवेद्यां मङ्गलशालिनी ।
तत्रापि चोत्सवं कुर्याद्भक्त्या मत्प्रीतिहेतवे ॥ १३ ॥

ततः प्रदोषसमये दोलयेद्दोलया प्रियाम् ।
मत्सार्धं सहजानन्दां गोपितां भुवनत्रये ।
रत्नभूषणवासांसि नर्तकेभ्यः प्रदापयेत् ॥ १४ ॥

एवं यो वार्षिकं दिव्यमुत्सवं कुरुते नरः ।
स याति मत्पदं दिव्यं यत्र याताः शुकादयः ॥ १५ ॥

अबन्ध्यं तद्दिनं कुर्यान्मत्कथाश्रवणादिभिः ।
वैष्णवान् पूजयेद्भक्त्या मम प्राणा हि ते मताः ॥ १६ ॥

ममापराधं जनितं क्षमेऽहं न वैष्णवानामपराधलेशम् ।
विनाचतद्वैष्णवसेवयाहं गृह्णामि सेवां न कदापि लोके ॥ १७ ॥

यत्र मद्वैष्णवा लोकाः कुपिता यान्ति कारणात् ।
तं देशं सहसा त्यक्त्वा व्रजामि खलु दुर्भगम् ॥ १८ ॥

अपि नाम महापापकारी मल्लक्षणाङ्कितः ।
न दूष्यो वैष्णवीलोकैः पक्षपातोममेदृशः ॥ १९ ॥

तवास्मीति वदेद्यो मां सकृदप्यसकृच्च वा ।
कृतान्तेनापि घोरेण स वै नेतुं न शक्यते ॥ २० ॥

तवास्मीत्यक्षरं लोके मामुद्दिश्य समीरितम् ।
मदीय एव स नरो नात्र कार्या विचारणा ॥ २१ ॥

किमर्थं बहुनामानि किमर्थं बहुमन्त्रकान् ।
किमर्थं बहुशास्त्राणि कण्ठशोषकराणि च ॥ २२ ॥

गृणन्ति च किमर्थं वै स्वाध्यायान् भूरिकष्टदान् ।
मामुद्दिश्य तवामीति सकृज्जल्पेद्दिने नरः ॥ २३ ॥

अयमेव महायागो ह्ययमेव महान् जपः ।
अयमेव महान् योगस्तवास्मीति यदुच्चरेत् ॥ २४ ॥

ममैव निहितं तिष्ठेन्नान्यस्य कस्यचिद्भवेत् ।
देवानां वा पितॄणां वा मनुष्याणामथापि वा ॥ २५ ॥

असंगः सर्वदातिष्ठेत्तथा वर्णाश्रमादिषु ।
अहमेव तस्य वर्णोऽप्यहमेवाश्रमस्तथा ॥ २६ ॥

अहमेव तथाऽऽधार ऐहिके पारलौकिके ।
मामेव सर्वविश्वासादाश्रयेद्भवसागरे ॥ २७ ॥

तमहं मोचयाम्यद्धामयि भारसमर्पिणम् ।
अहंकारोऽयमेव स्यादैहिकादिभरः स्वतः ॥ २८ ॥

मयि संन्यस्य तं भारं सुखी तिष्ठेत मत्परः ।
सर्व एव भरो विष्णौ (रामे) मयि ब्रह्माण्डरक्षके ।
तमात्मनि शठः पश्यन् बन्धनं याति मानवः ॥ ३९ ॥

एवं भक्तिपथः प्रोक्तो मया तुभ्यं महामुने ।
उत्तमः सर्वधर्माणां शरीराणां यथा शिरः ॥ ३० ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे उत्तरखण्डे श्रीरामात्रेयसंवादे आत्रेयबोधितश्रीरामगीतायां सप्तदशोऽध्यायः ॥ १७ ॥

अष्टादशोऽध्यायः

श्रीराम उवाच

अथ योगं प्रवक्ष्यामि शृणु ह्येकमना मुने ।
येन विज्ञातमात्रेण नरैः कैवल्यमश्नुते ॥ १ ॥

कर्मिणां कर्मयोगः स्याज्ज्ञानिनां ज्ञानमेव सः ।
भक्तिमान् भक्तियोगेन निरुध्याच्चित्तमात्मनः ॥ २ ॥

मूलाधारस्थितं ज्योतिः कुण्डल्यामाविर्भावयेत् ।
प्रणवाख्येन दण्डेन नादरूपेण चालयेत् ॥ ३ ॥

नादोद्भूतः प्राणवायुरपाने बलवत्तरः ।
पराधारंनुदेदग्निं तच्छिखा कुण्डलीं स्पृशेत् ॥ ४ ॥

तया प्रचोदितं तीव्रं कुण्डल्याख्यं परं महः ।
व्याप्य सूक्ष्माणि मार्गाणि हृद्देशं गच्छति द्रुतम् ॥ ५ ॥

तत्र जीवात्मना सार्द्धं विद्युत्तेजःप्रभासुरम् ।
भ्रूपुटे सद्य आगत्य परं चैतन्यमाप्नुयात् ॥ ६ ॥

तदूर्ध्वं रोधिनीं भित्त्वा सहस्रदलमश्नुते ।
ब्रह्मानन्दसमुद्रस्य वेला सा रोधिनी भवेत् ॥ ७ ॥

अन्यथा वृद्ध एवासौ सर्वतः प्लावयेज्जगत् ।
सर्वेऽपि च विमुक्ताः स्युः पशुपक्ष्यन्त्यजा अपि ॥ ८ ॥

तान् रुणद्धि ततो विद्या त्रिगुणा रोधिनी हि सा ।
तदूर्धं ब्रह्मलोकोऽस्ति मत्प्रभात्माक्षरात्मकः ॥ ९ ॥

तं प्राप्य मुक्तिसाम्राज्यं सद्यः प्राप्नोति मानवः ।
न तत्र कालकलना न मायाकृतविस्मृतिः ॥ १० ॥

न जरा नापि दुःखाद्यास्त्रिगुणप्रसूतिस्तथा ।
योगी तस्य प्रविश्यान्तस्तुरीयामश्नुते कलाम् ॥ ११ ॥

निमेषोन्मेषरहितां साक्षाद्ब्रह्मस्वरूपिणीम् ।
तस्य हेतुर्बोधमयी दीक्षा सद्गुरुगोपिता ॥ १२ ॥

शक्तिसंचारतो लभ्या सद्य एव प्रजायते ।
परमेश्वरसंतोषाच्चिरमेव प्रजायते ॥ १३ ॥

तदर्थं भूरिकर्माणि योगाङ्गानि प्रसाधयेत् ।
पूर्वजन्माभ्यासवशाद् वैराग्ये स्थिरतां गते ॥ १४ ॥

अथ ज्ञानकलोदेति सापि योगो निगद्यते ।
द्विविधोऽपि च योगोऽयं स्वाश्रया मुक्तिरुच्यते ॥ १५ ॥

पराश्रया भवेन्मुक्तिर्भक्तियोगेन चात्रिज ।
परो नाम सदानन्दो राम एवाहमच्युतः ॥ १६ ॥

क्षराक्षरावतिक्रम्य भासमाने निजे पदे ।
तदाश्रया तु या मुक्तिर्दुर्लभा मत्कृपां विना ॥ १७ ॥

ऐक्यसायुज्यभेदेन सा द्विधा परिकीर्तिता ।
पूर्वतोऽप्यधिकानन्दा द्वितीया सातिदुर्लभा ॥ १८ ॥

मल्लोकनित्यलीलाख्यमद्भोगानन्दरूपिणी ।
सांख्येऽप्ययं समुद्दिष्टो योगो मद्योगकारकः ॥ १९ ॥

सर्वेषामपि योगानां भक्तियोगो विशिष्यते ।
अल्पायासो बहुफलो मत्स्वरूपप्रदस्तथा ॥ २० ॥

योगो योग इति ग्रन्थेष्वसंदेहान्निरूपितः ।
केचिदेव मुनिश्रेष्ठास्तं जानन्ति मदात्मकम् ।
नास्माद्व्युत्तिष्ठते योगी मद्भक्तो मयि संगतः ॥ २१ ॥

तस्मादेनं द्विजश्रेष्ठ नित्यमभ्यस्य चेतसा ।
चित्तेऽपि खण्डशो जातमखण्डं कुरु यत्नतः ॥ २२ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे उत्तरखण्डे श्रीरामात्रेयसंवादे आत्रेयबोधितश्रीरामगीतायामष्टादशोऽध्यायः ॥ १८ ॥

एकोनविंशोऽध्यायः

श्रीराम उवाच

सत्त्वं रजस्तमश्चैव त्रिगुणाः परिकीर्तिताः ।
पुरुषः प्रकृतिश्चैव महांश्चाहंकृतिस्तथा ॥ १ ॥

शब्दस्पर्शौ रूपरसौ गन्धो मायाश्च पञ्चकाः ।
खं वायुर्ज्योतिरापो भूः पञ्चभूतानि च क्रमात् ॥ २ ॥

ज्ञानेन्द्रियाणि पञ्चैव श्रोत्रत्वग्घ्राणदृग्रसाः ।
पञ्च कर्मेन्द्रियाण्येव वाद्गोर्मेढाङ्घ्रिपायवः ॥ ३ ॥

तथैव सर्वसंयोगिषड्ज्ञानकरणं मनः ।
आध्यात्मिकस्तु यो वर्गः सोऽसावेवाधिदैविकः ॥ ४ ॥

आधिभौतिकवर्गश्चएकत्रैवप्रतिष्ठितः ।
मदंशाधिष्ठिताः सर्वे भासन्तेऽमी प्रदीपवत् ॥ ५ ॥

माया गुणानां सम्भेदादेकैव बहुरूपिणी ।
कालस्तु भगवान् साक्षान्मद्रूपो नित्य एव सः ॥ ६ ॥

सूत्रं चैव महान् प्राणो बुद्धिश्चाहंस्वरूपिणी ।
परमात्मा च सर्वाद्यः प्रकृतिः पुरुषस्तथा ॥ ७ ॥

एक एव द्विधाजातस्तदेवाक्षरमुच्यते ।
मद्रूपं परमानन्दस्तिरोभूयात्र तिष्ठति ॥ ८ ॥

सत्त्वस्य व्यवधानेन मुख्यजीवः स ईरितः ।
सृष्टोच्छावशगोभूतः सोऽहमेव न संशयः ॥ ९ ॥

अयमेव च कूटस्थो ब्रह्माव्यक्तादिशब्दितः ।
अण्डानि कोटिशस्तस्य प्रतितिष्ठन्ति विग्रहे ॥ १० ॥

अक्षरं ब्रह्म तद्धाम ममैव ज्ञानिनां गतिः ।
अहं प्रभुर्भक्तिगम्यो मम लोकोऽयमक्षरः ॥ ११ ॥

पादो मे सर्वभूतानि त्रिपाद् ब्रह्मेदमक्षरम् ।
ब्राह्मणश्च ममांशोऽस्य परस्य पुच्छमुच्यते ॥ १२ ॥

ज्ञानात्तस्योपासनया तन्मयो जायते नरः ।
भक्त्या ममोपासनया मन्मयो भवति ध्रुवम् ॥ १३ ॥

एतदेव ज्ञानमार्गे सेव्यमक्षरमुत्तमम् ।
अहं ततोऽधिको ज्ञेयः पूर्णानन्दैकविग्रहः ॥ १४ ॥

चिदानन्दौ तिरोभाव्य सत्त्वांशव्यक्तिमात्रतः ।
रूपान्तरं चाक्षरस्य कालः सकलसम्भवः ॥ १५ ॥

तत्र नित्या क्रियाशक्तिः प्राधान्येन प्रतिष्ठिता ।
सर्वोत्पत्त्यन्तकरणी चिच्छक्तिर्विकृतौ स्फुटम् ॥ १६ ॥

काले पुनर्यदैश्वर्यं तन्ममैव न संशयः ।
अत एवेश्वरः कालः सर्वस्यान्तर एव च ॥ १७ ॥

आसुरस्तमुपासीत कालरूपं मदात्मकम् ।
तत्रैव लीनतां गच्छेन्महातमसि भीषणे ॥ १८ ॥

ममाधिकारिणां मुख्यः काल एव न संशयः ।
यथाहं साम्यवैषम्यात्तथासौ फलदायकः ॥ १९ ॥

तद्भेदाः सूर्यगतय आधिभौतिकरूपकाः ।
एवमेव भवेत्कर्ममद्रूपं नियतं फले ॥ २० ॥

अग्रपश्चाद्भावभेदाद्द्विधैव प्रकटं च तत् ।
एवं स्वभावोऽपिभवेन्मत्तनुः सर्ववस्तुगः ॥ २१ ॥

आविर्भावतिरोभावैः परिणामस्तु तत्कृतः ।
अक्षरं वासुदेवश्च कालः संकर्षणो हि वै ॥ २२ ॥

कर्म प्रद्युम्न एवास्ति स्वभावश्चानिरुद्धकः ।
एवं चतुर्व्यूहतनुः प्रकटः सर्वो ममांशतः ॥ २३ ॥

अष्टाविंशतिरेव स्युस्तत्त्वानि मेकलक्षतः ।
तद्रूपं विधिना ज्ञेयं ममसायुज्यसिद्धये ॥ २४ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे उत्तरखण्डे श्रीरामात्रेयसंवादे आत्रेयबोधितश्रीरामगीतायामेकोनविंशोऽध्यायः ॥ १९ ॥

विंशोऽध्यायः

आत्रेय उवाच

कथं तत्त्वात्मकं राम त्वां ध्यायन् मुच्यते नरः ।
एतन्मे रघुशार्दूल कृपया कथय प्रभो ॥ १ ॥

श्रीराम उवाच

पद्भ्यामाजानुपर्यन्तं भूतधात्री प्रतिष्ठिता ।
चतुरस्रा पीतवर्णा स्ववीर्यसहितापि च ॥ २ ॥

तत्र चित्तं शनैः स्थित्वा तन्मयं जायते ध्रुवम् ।
तन्मात्रां च ग्रसित्वा तदपां मण्डलमाविशेत् ॥ ३ ॥

जानुभ्यां नाभिपर्यन्तमपां मण्डलमुत्तमम् ।
शुक्लवर्णं स्ववीर्येण युक्तं वरुणदैवतम् ॥ ४ ॥

तत्र चित्तं शनैः स्थित्वा तन्मयं जायये ध्रुवम् ।
तन्मात्रां च ग्रसित्वा तत्तेजोमण्डलमाविशेत् ॥ ५ ॥

नाभेर्हृदयपर्यन्तं तेजोमण्डलमुत्तमम् ।
रक्तवर्णं त्रिकोणं च वह्निदैवतवीर्यभाक् ॥ ६ ॥

तत्र चित्तं शनैः स्थित्वा तन्मयं जायटे ध्रुवम् ।
तन्मात्रां च ग्रसित्वा तद् वायुमण्डलमाविशेद् ॥ ७ ॥

हृदयात्कण्ठपर्यन्तं वायुमण्डलमुत्तमम् ।
षट्कोणं च हरिद्वर्णं स्ववीर्यसहितं सदा ॥ ८ ॥

तत्र चित्तं शनैः स्थित्वा तन्मयं जायते ध्रुवम् ।
तन्मात्रां च ग्रसित्वा तन्नभोमण्डलमाविशेत् ॥ ९ ॥

कण्ठाद्भ्रूमध्यपर्यन्तं नभोमण्डलमुत्तमम् ।
शुद्धस्फटिकसंकाशं वर्तुलं वीर्यसंयुतम् ॥ १० ॥
तत्र चित्तं शनैः स्थित्वा तन्मयं जायते ध्रुवम् ।
तन्मात्रां च ग्रसित्वा तन्मनःस्थानं समाविशेत् ॥ ११ ॥
संकल्पं च विकल्पं च तद्वृत्तिं निरसेद्ध्रुवम् ।
ततो बोद्धव्यरूपं तन्निश्चितं जायते मनः ॥ १२ ॥
बोद्धव्यं बुद्धिविज्ञानं जायते तच्चवै ध्रुवम् ।
विज्ञानं हीनविषयं चैतन्यं जायते ततः ॥ १३ ॥
मनो बुद्धिश्च विज्ञानं चित्तं चाहंकृतिस्तथा ।
भवेत् पञ्चात्मकमिदमन्तःकरणशब्दितम् ॥ १४ ॥
ततो भ्रूदेशतश्चोर्द्ध्वं सहस्रदलतोऽप्यधः ।
अहमस्मीति संवित्या शुद्धात्मानं च लक्षयेत् ॥ १५ ॥
अहंतायां निवृत्तायामस्मीतिद्योतते विभुः ।
अस्मितायां निवृत्तायां स्वरूपमवभासते ॥ १६ ॥
ज्ञातृज्ञेयाख्य सम्बन्धे ततः शान्तिमुपागते ।
गुणातीत पदं गत्वा न ततो विनिवर्त्तते ॥ १७ ॥
यतो निवर्त्तते नैव यत्रोच्चैः सुखमश्नुते ।
यत्र चात्येति त्रिपथं गुणातीतपदं हि तत् ॥ १८ ॥
एषा ते तत्त्वसंदोहसंस्था प्रोक्ता मया मुने ।
रहस्यं योगिनामेतज्ज्ञानिनां च विशेषतः ॥ १९ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे उत्तरखण्डे श्रीरामात्रेयसंवादे आत्रेयबोधितश्रीरामगीतायां विंशोऽध्यायः ॥ २० ॥

एकविंशोऽध्यायः

श्रीराम उवाच

अथतेऽहं प्रवक्ष्यामि ज्ञानं सिद्धान्तशब्दितम् ।
मार्गस्त्रेधापिपूर्वोक्तः फलसिद्धयै भवेद्ध्रुवम् ॥ १ ॥
कर्मोपास्तिज्ञानरूपस्तेषु भक्तिर्विशिष्यते ।
कर्मज्ञाने पृथक् तेन काण्डद्वये निबोधिते ॥ २ ॥

विशिष्ट रूपो वेदार्थो ह्यहमेव न संशयः ।
तत्साधनं भवेत्प्रेम तस्य साधनमीर्यते ॥ ३ ॥

तेषां वक्ता स्वयं देवोऽभ्यासपूर्वं निषेवितः ।
भक्तिशास्त्रेषु सर्वेषु तदेव प्रतिपाद्यते ॥ ४ ॥

तेषां वक्ता स्वयमहं मत्कलाश्च विशेषतः ।
भगवांश्च हयग्रीवो मत्स्यः श्रीकपिलस्तथा ॥ ५ ॥

वेदव्यासस्तथाऽत्रेयो भगवानृषभस्तथा ।
नारायणो रमाशेषौ ब्रह्मा चैव सनातनः ॥ ६ ॥

सनत्कुमारो भगवान् नारदश्च सुदर्शनः ।
इत्याद्या भक्तिशास्त्रस्य ह्याचार्याश्च प्रवर्त्तकाः ॥ ७ ॥

ममांशा मन्मतविदो भक्तप्रीतिविवर्द्धनाः ।
एतेषां मतमाज्ञाय श्रवणादिपरो भवेत् ॥ ८ ॥

मोहशास्त्राणि सर्वाणि तदाचारांश्च वर्जयेत् ।
छलयोगस्तथा सांख्यं वामं शाक्तं तथैव च ॥ ९ ॥

सिद्धान्तः कौलमार्गश्च कर्मासक्तश्च वैदिकः ।
इत्यादीन् वर्जयेन्मार्गान् लोकव्यामोहकारकान् ॥ १० ॥

मार्गोऽयं सर्वमार्गाणामुत्तमः परिकीर्तितः ।
यत्र पातभयं नास्ति प्रायश्चित्तं तथैव च ॥ ११ ॥

मोचकः सर्वथैवाहं सप्रमेयफलात्मकः ।
यत्र वर्णाश्रमाचाराः सर्वे नश्यन्ति कालतः ॥ १२ ॥

तत्र धर्मः कथं सिद्धयेत्कथं वा भवमोचनम् ।
तस्मात्सर्वेषु धर्मेषु वैदिके तान्त्रिकेऽपि च ॥ १३ ॥

विश्वासं चादरं त्यक्त्वा मम भक्तिं समाश्रयेत् ।
भक्तौ वापि विशेषेणमत्प्रपत्तिपरो भवेत् ॥ १४ ॥

नास्मिन् विरुद्धकरणं प्रकृत्या न विरुद्धयते ।
अहं प्रमाणं चैवात्र भवेन्मार्गः क्व चेदृशः ॥ १५ ॥

परन्तु मत्कृपाहीनः सर्वथा सुतरामपि ।
मार्गेऽस्मिन्नन्तरं[1] तस्मान्मत्कृपाहेतुतत्परः ॥ १६ ॥

भवेद् विद्वान् घोररूपं भवं यो निस्तितीर्षति ।
मत्सेवातत्परं प्राज्ञं रम्भादिदोषवर्जितम् ॥ १७ ॥

भक्तिशास्त्रैकतत्वज्ञं भजेत्सद्गुरुमादरात् ।
तदभावे च मन्मूर्त्तिं कृत्वा भावपरायणः ॥ १८ ॥

---

१ अन्तरम्–विघ्नबाहुल्यम्–टि० बड़ौ० ।

नित्यं परिचरेद्भक्त्या मद्रूपाभेदभावनात् ।
साकारं व्यापकं ब्रह्म मन्त्रस्यापि च वैभवम् ॥ १९ ॥

तस्मात्प्रपूजयेन्मूर्त्तिमुपचारैर्विधानतः ।
वस्त्रैर्विभूषणैश्चापि कृत्वा सुन्दरतां नयेत् ॥ २० ॥

अलंकुर्वीत सप्रेम स्थानतश्च स्वरूपतः ।
अनुकूलांश्च भार्यादीन् परिचर्यां प्रकारयेत् ॥ २१ ॥

उदासीनेषु वा तेषु स्वयं कार्यं स्वभावतः ।
प्रतिकूलेषु वा तेषु गृहमेव परित्यजेत् ॥ २२ ॥

तत्त्यागे दूषणं नास्ति यतोरामपराङ्मुखाः ।
असौकार्यं जीविकाया एकं यामं तथा नयेत् ॥ २३ ॥

याममात्रकृता सेवा कुर्याद्दिनभबन्ध्यकम् ।
सहेत परुषं सर्वं सर्वेषां मत्प्रयत्नतः ॥ २४ ॥

वैराग्यं परितोषं च सर्वथा न परित्यजेत् ।
एतद्देहावसाने च कृतार्थः स्यान्न संशयः ॥ २५ ॥

इति निश्चित्य मनसा स मां परिचरेत्सदा ।
सर्वापेक्षां परित्यज्य कृत्वा चैव मतिं स्थिराम् ॥ २६ ॥

दृढविश्वासतो युक्त्या यथा सिध्येत्तथा चरेत् ।
वृथाऽऽलापं वृथा ध्यानं सर्वथैव परित्यजेत् ॥ २७ ॥

आत्मनो यत्प्रियं लोके तन्महयं विनिवेदयेत् ।
भक्तिश्रद्धोपपन्नं च दृढं निर्वृत्तिकारि च ॥ २८ ॥

उदकाहरणं वस्त्रक्षालनं मार्जनं तथा ।
लेपनं परिकर्मेत्यादिभिः सेवकर्मभिः ॥ २९ ॥

देह सम्बन्धिभिः स्वेशं नित्यं परिचरेन्नरः ।
प्रातर्मध्याह्नसायाह्नेष्वादरात्परिपूजयेत् ॥ ३० ॥

एवं स्वधर्मं कुर्वीत न निवर्त्तेत् स्वधर्मतः ।
इन्द्रियाणि निगृह्णीयात् स्वविरोधि परित्यजेत् ॥ ३१ ॥

धर्मार्थकाममोक्षेभ्यो भक्तिं चैव विशेषयेत् ।
एवं स्वधर्मनिष्ठेषु मदावेशो भवेद् ध्रुवम् ॥ ३२ ॥

तथा साधनवर्गेषु भूयो निष्ठाविवर्द्धनम् ।
मयि सर्वात्मके नित्यं स्वस्व दैन्यं विभावयेत् ॥ ३३ ॥

विवर्जयेदहंकारं प्रतिष्ठां स्पृहयेन्न च ।
मद्गुणान् मम नामानि रूपकर्माङ्कितानि च ॥ ३४ ॥

चरित्राणि च भूरीणि नित्यं संकीर्तयेन्नरः।
जनानां च समक्षं वै शैवशास्त्रपरेःष्वपि ॥ ३५ ॥
निर्भयः स्वेन भावेन गृणन्मामेव मत्परः।
न कस्यापि स्पृहां कुर्यात् सर्वभूमिपतेरपि ॥ ३६ ॥
रामेति जनसर्वस्वं मम नाम सदा वदेत्।
स्वीयं करोमि चैकेन द्वितीयेन सदा ऋणी ॥ ३७ ॥
यावन्तो ब्रह्मणोवक्त्रान्निर्गता वेदराशयः।
ते च सर्वेऽप्यधीताः स्युर्नाम्निनारायणात्मके ॥ ३८ ॥
नारायणस्य यावन्ति पुराणेष्वागमेषु च।
दिव्यनाम्नां सहस्राणि कीर्त्तयन् यत्फलं भवेत् ॥ ३९ ॥
ततः कोटिगुणं पुण्यं फलं दिव्यं मदात्मकम्।
लभते सहसा ब्रह्मन् सकृद् रामेति कीर्तनात् ॥ ४० ॥
ममातिवल्लभतमं मम नाम मदात्मकम्।
ततोऽपि वल्लभतमं सहजेति प्रियं वचः ॥ ४१ ॥
सहजानन्दिनी सीता सीता श्रीर्मोदिनी रमा।
स्वयंलक्ष्मीर्जानकीति नामाष्टकमुदीरयेत् ॥ ४२ ॥
मन्नामतोऽप्यतिफलं नरः प्राप्नोति वै मुने।
आविर्भावे चावतारे मयैव सह जन्मतः ॥ ४३ ॥
सहजानन्दिनीत्याख्यां गता सीता प्रिया मम।
सीता नाम्ना ततो व्याप्ता मयि मद्धर्मरूपिणी ॥ ४४ ॥
यथा हलस्यपद्धतिस्ततः सीतेति कीर्तिता।
सीता सुधारसमयीधारारूपरसात्मिका ॥ ४५ ॥
आनन्दयति विश्लेषात् सन्तप्तं भावरूपिणी।
श्रीः समाश्रीयतेसैव श्रुतिभिः स्मृतिभिस्तथा ॥ ४६ ॥
आगमैर्निगमैर्देवैर्मया च ब्रह्मणापि च।
सनातनेन धर्मेण छन्दोभिः प्रणवेन च ॥ ४७ ॥
तेन सा श्रीरिति प्रोक्ता सहजानन्दिनी प्रिया।
आविर्भावे स्फुटं नित्यं तिरोभावेऽपि चास्फुटम् ॥ ४८ ॥
कैशोरादिषु रूपेषु नित्यं मोदयते हिमाम्।
ततः सा मोदिनी शक्तिः सहजैव प्रकीर्तिता ॥ ४९ ॥
आनन्दरूपिणी नित्यं रमते ब्रह्मणि स्थिता।
तथा रमयते तं च सा रमा कीर्त्तिता बुधैः ॥ ५० ॥

लक्ष्योऽहं सर्वशास्त्राणां स्वयं सा लक्ष्मणं मम ।
तेन चोक्ता स्वयं लक्ष्मीर्महालक्ष्मीश्च मे प्रिया ॥ ५१ ॥
जानाति सैव मे रूपमक्षरात्परतः स्थितम् ।
तेन सा जानकी नाम प्रोच्यते ब्रह्मकोविदैः ॥ ५२ ॥
इति नामाष्टकं दिव्यं निरुक्तं तुभ्यमत्रिज ।
य एतद्धारयेद् भक्त्या स मे श्रीरसिको मतः ॥ ५३ ॥
मन्नाम कीर्त्तयेन्नित्यमेतैर्नामभिरङ्कितम् ।
रामेति रामचन्द्रेति माङ्गल्यातनयेति च ॥ ५४ ॥
प्रमोदवनचन्द्रेति रामेति रमणेति च ।
तथा कुञ्जविहारीति रत्नाद्रिरसिकेति च ॥ ५५ ॥
एतान्यपि च नामानि नित्यमष्टौ प्रकीर्तयेत् ।
किं तस्य बहुभिश्चान्यैः साधनैः फलदायकैः ॥ ५६ ॥
एतन्मुख्यतमं लोके साधनं नामकीर्तनम् ।
अवृत्तिदर्परहितो विश्वस्तो भक्तिसंयुतः ॥ ५७ ॥
आलस्यरहितो नित्यं नामकीर्तनमाचरेत् ।
धनुर्बाणाङ्कितो भूत्वा पूजां नित्यं समाचरेत् ॥ ५८ ॥
पद्माक्षतुलसीमालां ऊर्ध्वपुण्ड्रं सदा वहेत् ।
एतद्धि विप्रलिङ्गं यदुपवीतादिधारणम् ॥ ५९ ॥
एतद्वैष्णवलिङ्गं यदूर्ध्वपुण्ड्रादिधारणम् ।
एकादशीव्रतं चैव तथा जन्माष्टमीव्रतम् ॥ ६० ॥
श्रीगुरोरुत्सवं चैव रामस्य नवमीं च मे ।
जयन्तीं नरसिंहस्य तथा श्रीवामनव्रतम् ॥ ६१ ॥
वर्जयेत्पूर्वसंयुक्तं मम संतोषसिद्धये ।
अन्येऽपि चोत्सवा नित्यं कर्त्तव्या मम तुष्टिदाः ।
एवं धर्मैर्गृहस्थानां प्रसीदामि द्रुतं मुने ॥ ६२ ॥
वर्णाश्रमानामन्येषां नैष्ठिकब्रह्मचारिणाम् ।
एष मुख्यतमो धर्मो नित्यं मत्प्रीतिकारकः ॥ ६३ ॥
सिद्धः सर्वेषु वेदेषु तन्त्रेषु च शुभाध्वसु ।
आचार्याणां सद्गुरूणामृषिष्वमृतसूक्तिषु ॥ ६४ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे उत्तरखण्डे श्रीरामात्रेयसंवादे आत्रेयबोधितश्रीरामगीतायांमेकविंशोऽध्यायः ॥ २१ ॥

द्वाविंशोऽध्यायः

श्रीराम उवाच

यतिश्च श्रद्धया युक्त एवमुक्तं समाश्रयेत् ।
धर्माणां परमो धर्मो यस्ते पूर्वं निरूपितः ॥ १ ॥

तस्य तीर्थविशेषेषु भवेत् पर्यटनं वरम् ।
एकस्थानाश्रयादेव विक्षेपो मनसो भवेत् ॥ २ ॥

भजने प्रतिबन्धश्च जनानामाग्रहस्तथा ।
परपीडादिकं चापि तेन पर्यटनं शुभम् ॥ ३ ॥

यथा यज्ञास्तथा तीर्थान्युपक्लृप्तानि विष्णुना ।
तदन्नान्नाधिकं भैक्षं प्रतिगृह्णीत सद्यतिः ॥ ४ ॥

नामानि च चरित्राणि पठेन्नित्यं गतत्रपः ।
एकाकी निःस्पृहः सन्तो मोहाहंकारवर्जितः ॥ ५ ॥

कुर्यात्पर्यटनं नित्यं मत्परो वीतकल्मषः ।
देहपातनपर्यन्तमव्यग्रं पर्यटेत्सदा ॥ ६ ॥

उत्तमोत्तमधर्मोऽसौ पूर्वमुत्तमं ईरितः ।
गृहं सर्वात्मना त्याज्यं संसृतिं निस्तितीर्षुभिः ॥ ७ ॥

न शक्यते चेत् संत्यक्तुं तन्मदर्थं निवेदयेत् ।
अहं हि घोरसंसारमोचको गृहमेधिनाम् ॥ ८ ॥

त्यजेत्सर्वात्मना चार्थं स चेत्त्यक्तुं न शक्यते ।
मदर्थं सम्प्रयुञ्जीत सर्वानर्थनिवारणात् ॥ ९ ॥

न्यासिनां कठिनो धर्मः प्रतिकूलस्तथा क्वचित् ।
अतश्च सर्वदा भाव्यं भक्तेन गृहमेधिना ॥ १० ॥

इन्द्रियाणि हरन्त्येनं घनौघमिव वायवः ।
अतश्च सर्वदा भाव्यं वैष्णवैर्गृहमेधिभिः ॥ ११ ॥

पत्नीपुत्रास्तथापत्यं बान्धवाः सुहृदस्तथा ।
यत्र सर्वेऽपि मद्भक्ता ईदृशं दुर्लभं गृहम् ॥ १२ ॥

गृहमेध्याश्रमेतत्र तिष्ठन् मद्भक्तितत्परः ।
कर्माण्यपि प्रकुर्वाणो ह्यञ्जसा तरते नरः ॥ १३ ॥

सात्त्विकादिप्रभेदेन तेषां कर्माणि च त्रिधा ।
सात्त्विकं कर्मकुर्वाणे यथाश्रुतफलोत्सुकः ॥ १४ ॥

साधयेत्स्वर्गलोकं वा विमानस्त्रीसुखात्मकम् ।
पुण्ये क्षीणे पुण्यशेषं समादाय धरातले ॥ १५ ॥

समीचीनेषु लोकेषु जायते स्वेन कर्मणा ।
राजसं कर्मकुर्वाणो मेर्वादिषु सुखं लभेत् ॥ १६ ॥

तामसं कर्म कुर्वाणः पातालेषु सुखी भवेत् ।
राजसं सात्त्विकं कुर्वन् दैत्यस्वर्गानवाप्नुयात् ॥ १७ ॥

राजसं कर्म कुर्वाणश्चन्द्रलोके महीयते ।
पुण्यशेषे ततो वृष्टिद्वारा भूत्वात्र रूपभाक् ॥ १८ ॥

रेतोरूपं समास्थाय रेतोजन्मसु जायते ।
तामसं कर्म कुर्वाणो गन्धर्वेषु प्रजायते ॥ १९ ॥

तामसं सात्त्विकं कुर्वन् गन्धर्वप्रवरोभवेत् ।
क्षीणे पुण्ये पुनर्भूत्वा वृष्टिद्वारा स जन्मभाक् ॥ २० ॥

तामसं कर्म कुर्वाणः सर्पादिषु सुखी भवेत् ।
एवं त्रयी धर्मपराः पुनरावृत्तिमाप्नुयुः ॥ २१ ॥

देवताश्चेदुपासीत आजन्म नियतव्रतः ।
तत्तत्सायुज्यमात्रं तु तस्य स्यात्परमं फलम् ॥ २२ ॥

एवं कर्मगतिर्ब्रह्मन् ब्रह्मणोऽपि दुरत्यया ।
दुर्बोधा चैव सर्वेषां फले चाल्पत्वकारिणी ॥ २३ ॥

मदर्पितं पुनः तत् स्यान्मद्भक्त्यङ्गं न संशयः ।
ज्ञानस्य कर्मणश्चापि तथोपास्तेरवद्यताम् ॥ २४ ॥

भक्तिर्हरतिमन्निष्ठा सद्य एव न संशयः ।
तत्तत्सर्वं प्रकुर्वाणोऽप्याश्रयेन्मामनन्यधीः ॥ २५ ॥

केवलं कर्मनिष्ठानां प्रवाहपतनं भवेत् ।
तस्मादुद्धर्तुमात्मानं मत्प्रेमपरमो भवेत् ॥ २६ ॥

इति श्रीमदादिरामायणे ब्रह्मभृशुण्डसंवादे उत्तरखण्डे श्रीरामात्रेयसंवादे-
आत्रेयबोधितश्रीरामगीतायां द्वाविंशोऽध्यायः ॥ २२ ॥

त्रयोविंशोऽध्यायः

आत्रेय उवाच

त्वमेव परमं ब्रह्म सदसत्परमव्ययम् ।
प्रकृतेः परमो दिव्यः पुरुषश्च ततः परम् ॥ १ ॥

अक्षरं ब्रह्म यत्पूर्णं तत्ते धाम परं पदम् ।
ततोऽपि परमः पूर्णस्त्वमेव पुरुषोत्तमः ॥ २ ॥

त्वत्तः परतरो नान्यः पूर्णानन्दैकविग्रहात् ।
रसात्मकं त्वत्स्वरूपं रस आनन्द ईरितः ॥ ३ ॥

परन्तु मानुषं रूपं राजलीलां च पालयन् ।
न ज्ञायते परं ब्रह्म पुरुषैः प्राकृतैरिह ॥ ४ ॥

केचिद्द्विषन्ति कलयन्ति परं सखाय-
मन्ये यितेति च विदन्ति परे सुतेति ।
कान्तेति केऽपि कलयन्त्यबला जनास्त्वा-
मित्थं भवे रमसि मानुषभावमेत्य ॥ ५ ॥

तस्य ते रूपमानन्दमात्रं सुन्दरविग्रहम् ।
नेति नेति पुराविद्भिर्गदितं ब्रह्मणः परम् ॥ ६ ॥

कथं ज्ञेयं रामचन्द्र दृष्ट्वाद्धानुभवात्मकम् ।
न हि प्राकृतजीवैस्त्वं याथातथ्येन दृष्यसे ॥ ७ ॥

श्रीराम उवाच

अहं महद् ब्रह्मणि वीक्षणात्मकं बीजं निधायाद्यममोघरूपम् ।
गर्भं दधाम्यस्य प्रभवस्ततोऽभूच्चराचरस्याखिलभौतिकस्य ॥ ८ ॥

ममांशशक्त्या पुरुषः परोऽभून्नारायणः शङ्खगदादिपाणिः ।
सहस्रमूर्द्धा पुरुषस्ततोऽभूद्यन्नाभिपद्मे भगवान् विरंचिः ॥ ९ ॥

प्रादुरासीत्ततो मेधा वैदिकी ब्रह्मणो हृदि ।
स जगाद ततो वेदांश्चतुरः प्रणवादिकान् ॥ १० ॥

शब्दब्रह्ममयी सृष्टिः प्रादुरासीत्तदात्मिका ।
नामरूपप्रपञ्चोऽभूत्ततोऽतिविपुलः स्फुटः ॥ ११ ॥

अहं यज्ञः क्रतुरहमहं सूर्याग्निचन्द्रमाः ।
अहं विद्युदहं वर्षमहं वायुर्घनाशनः ॥ १२ ॥

अहं स्वाहा स्वधाकारश्चाहमेव दिवौकसः ।
अहमेव पितृणां च गणो घृताज्यपायिनाम् ॥ १३ ॥

अहं विधिर्नामध्येयान्यहं मन्त्रगणः पृथक् ।
अर्थवादश्चाहमेव प्रयोगोऽहं क्रियात्मकः ॥ १४ ॥

अहं विश्वमहं चैव विश्वेशो विश्वकारकः ।
अहं विश्वस्य संहर्ता कल्पोऽहं प्रतिसर्गकः ॥ १५ ॥

उपादानं निमित्तं वाप्यहमेव सदा मुने ।
अक्षरात्मा ह्युपादानं निमित्तं पुरुषोत्तमः ॥ १६ ॥

अक्षरेण ततां सृष्टिं क्रीडयाम्यहमिच्छया ।
मम देहे ततं विश्वं प्रकृतिः पुरुषस्तथा ॥ १७ ॥

ब्रह्माद्याः पुरुषांशाश्चशब्दोऽर्थश्च विशेषतः ।
आदित्या वसवो रुद्रा विश्वेदेवाश्च देवताः ॥ १८ ॥

एवं मम शरीरान्तः पश्यन्तो दिव्यचक्षुषा ।
भीषणं मां प्रपश्यन्ति कलिकालं परात्परम् ॥ १९ ॥

भीषया चैव वर्तन्ते ममैवाज्ञा वषानुगाः ।
सामन्ता लोकसामन्तास्तथा कल्पायुषः सुराः ॥ २० ॥

केचित्तु कालरूपं मां पश्यन्ति पुरुषं परे ।
अमृतं मृत्युमेवापि बिभ्रच्छक्त्या स्वविग्रहे ॥ २१ ॥

अपरे लीलया पूर्णं रसानन्दैकविग्रहम् ।
पश्यन्ति रसकेलीनामाश्रयं पुरुषोत्तमम् ॥ २२ ॥

एवं यथायथं स्वेच्छावशगो लोकलोचनः ।
मद्भक्तांश्च विशेषेण रमयामि रमामि च ॥ २३ ॥

मय्यात्माशमतां याते प्रपञ्चस्य लयो भवेत् ।
अन्तरङ्गस्य शक्त्यैव तदा ब्रह्मन् रमाम्यहम् ॥ २४ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे उत्तरखण्डे श्रीरामात्रेयसंवादे आत्रेयबोधितश्रीरामगीतायां त्रयोविंशोऽध्यायः ॥ २३ ॥

चतुर्विंशोऽध्यायः

आत्रेय उवाच

प्रयच्छमे परं चक्षुस्त्वत्स्वरूपैकदर्शकम् ।
दिव्यं ज्ञानमयं राम कृपया पुरुषोत्तम ॥ १ ॥

प्रपन्नं मां विजानीहि पादयोस्तव राघव ।
यथा त्वां परिपश्येयं तथा कुरु रमापते ॥ २ ॥

त्वत्तोऽन्यस्त्वत्स्वरूपस्य ज्ञापको नैव विद्यते ।
तेन त्वां शरणं यातो भीतो घोरभवार्णवात् ॥ ३ ॥

अयं हि कालो दुर्वेगो विना त्वच्छरणागतिम् ।
प्रणाशयत्यतो मां त्वं त्रायस्व निर्जकिंकरम् ॥ ४ ॥

पुरा वसिष्ठादिषु संगतेषु ब्रह्मर्षिवर्येषु विरंचिलोके ।
अन्योन्यवादे खलु जायमाने रामेति सारं परमश्रौषमुच्चैः ॥ ५ ॥

ततस्त्वमेवासि परावरेश्वरो विभुश्चिदानन्दमयैकविग्रहः ।
पश्यामि येन परमं स्वरूपं तदेव मे दिव्यचक्षुः प्रदेहि ॥ ६ ॥

ब्रह्मोवाच

इत्थं विज्ञापितो रामो भुशुण्ड परमर्षिणा ।
स्वरूपं दर्शयामास सर्वश्रुतिशिरोगतम् ॥ ७ ॥

श्रीराम उवाच

पश्य मे मुनिशार्दूल स्वरूपं दिव्यचक्षुषा ।
मया तुभ्यं प्रपन्नाय दत्तेन ज्ञानरूपिणा ॥ ८ ॥

पुरुषं च परं चैव पुरुषादपि पश्य माम् ।
सर्वाश्चर्यमयं ब्रह्मन् प्रपञ्चं यत्र द्रक्ष्यसि ॥ ९ ॥

ततोऽसौ रामचन्द्रस्य शरीरे सर्वमपश्यत् ।
भूतधात्रीं साब्धिवर्षद्वीपपर्वतकाननाम् ॥ १० ॥

वियच्च विस्तृतं लोकैर्ब्रह्मादिसुरसंश्रयैः ।
ज्योतिश्चक्रं वसून् वायूनग्नीन् वरुणमेव च ॥ ११ ॥

स्वस्वलोकसमेतांश्च सर्वान् देवगणानपि ।
शेषं पातालभागांश्च दैत्यस्वर्गान् पृथग्विधान् ॥ १२ ॥

कालं दश दिशश्चैव प्रकृतिं पुरुष स्तथा ।
एवं विधाश्च पुरुषाः शरीरे यस्यकोटिशः ॥ १३ ॥

स तं पुरुषधौरेयं रामदेहे व्यपश्यत् ।
सहस्रशिरसं देवं तपन्तं विश्वतोमुखम् ॥ १४ ॥

किरीटिनं कुण्डलरत्नभासा सहस्रसूर्येन्दुगणं जयन्तम् ।
पीताम्बरं शङ्खचक्रे गदाब्जे दधानमीशं कमलासखायम् ॥ १५ ॥

सहस्रबाहुं च सहस्रनेत्रं सहस्रपादोदरवक्त्रकर्णम् ।
शब्दार्थसृष्टिप्रभवं पुराणं सहस्रशाखागणवेदगानम् ॥ १६ ॥
संस्तूयमानं मुनिभिः सुरौघैरणीच्यवर्णं घनसंघवर्णम् ।
तथेन्दुवर्णं महसा विभक्तं कूटं परं ब्रह्मविदेकरूपम् ॥ १७ ॥

कूटस्थमुग्रं विपुलं च कालं करालकायं विलसत्कोटिदंष्ट्रम् ।
प्रभूततेजो विशदाकृतिं विभुं विभासितं ज्वालमालापरीतम् ॥ १८ ॥
विरजां च नदीं पूर्णां ब्रह्माण्डगणकोटिभिः ।
अपश्यत्तस्य देवस्य दण्डेन खलु कालितैः ॥ १९ ॥

कालग्रस्तानि तत्रैव भुवनानि चतुर्दश ।
अपश्यच्च ततोऽप्युच्चैरक्षरं परमं पदम् ॥ २० ॥

पूर्णानन्दघनं धाम ज्ञानगम्यं सुयोगिभिः ।
त्रिपाद्ब्रह्मेति निर्दिष्टं सगुणं निर्गुणं तथा ॥ २१ ॥
स्थूलं सूक्ष्मं विभुं परं श्रीराममहसाञ्चितम् ।
अवतारांस्तथा सर्वांश्चतुर्विंशदशादिभिः ॥ २२ ॥
अनेकधा ह्यसंख्यातान् दिव्यलीलाविनोदिनः ।
अक्षरात्परतोऽपश्यदवतारेभ्य एव च ॥ २३ ॥

रामं त्रैलोक्यसुभगं सहजानन्दिनीयुतम् ।
प्रमोदवनमध्यस्थं दिव्यकान्ताकदम्बकैः ॥ २४ ॥
क्रीडन्तं रासलीलाभिर्नटवेशं किरीटिनम् ।
बर्हिरत्नावलीभूषामुद्रामणिविभूषितम् ॥ २५ ॥
युगलं कामिनीवृन्दमध्यमण्डलवर्तिनम् ।
नटवेशोचितमहारङ्गकच्छविरोचिभिः ॥ २६ ॥
काञ्चीगुणैर्भासमानं दिव्यवेणुरवामृतम् ।
वर्षन्तं प्रावृषेण्याभं विद्युत्पीताम्बरावृतम् ॥ २७ ॥

पीताम्बरप्रभामध्योच्छनच्छ्रोप्रभया युतम् ।
प्रमोदवनमानन्दस्वरूपं पर्यपश्यत ॥ २८ ॥
रत्नाद्रिं सरयूं चैव रामकुण्डं मनोहरम् ।
सहजायास्तथा कुण्डं तथा रामवनं महत् ॥ २९ ॥

चतुर्विंशवनालीं च रामकुञ्जं तदन्तरे ।
तत्र दिव्यसखीयूथं गायन्तं रामसद्गुणान् ॥ ३० ॥
आभीरराजं सुखितं प्रसन्नां माङ्गल्यकां पितरौ गोकुलेन्दोः ।
अनेकगोपेन्द्रसमूहजुष्टं श्रीनन्दनं राजिनीं चैव देवीम् ॥ ३१ ॥

चरित्राणि च भूरीणि नित्यं संकीर्तयेन्नरः।
जनानां च समक्षं वै शैवशास्त्रपरेःष्वपि ॥ ३५ ॥
निर्भयः स्वेन भावेन गृणन्मामेव मत्परः।
न कस्यापि स्पृहां कुर्यात् सर्वभूमिपतेरपि ॥ ३६ ॥
रामेति जनसर्वस्वं मम नाम सदा वदेत्।
स्वीयं करोमि चैकेन द्वितीयेन सदा ऋणी ॥ ३७ ॥
यावन्तो ब्रह्मणोवक्त्रान्निर्गता वेदराशयः।
ते च सर्वेऽप्यधीताः स्युर्नाम्निनारायणात्मके ॥ ३८ ॥
नारायणस्य यावन्ति पुराणेष्वागमेषु च।
दिव्यनाम्नां सहस्राणि कीर्त्तयन् यत्फलं भवेत् ॥ ३९ ॥
ततः कोटिगुणं पुण्यं फलं दिव्यं मदात्मकम्।
लभते सहसा ब्रह्मन् सकृद् रामेति कीर्तनात् ॥ ४० ॥
ममातिवल्लभतमं मम नाम मदात्मकम्।
ततोऽपि वल्लभतमं सहजेति प्रियं वचः ॥ ४१ ॥
सहजानन्दिनी सीता सीता श्रीर्मोदिनी रमा।
स्वयंलक्ष्मीर्जानकीति नामाष्टकमुदीरयेत् ॥ ४२ ॥
मन्नामतोऽप्यतिफलं नरः प्राप्नोति वै मुने।
आविर्भावे चावतारे मयैव सह जन्मतः ॥ ४३ ॥
सहजानन्दिनीत्याख्यां गता सीता प्रिया मम।
सीता नाम्ना ततो व्याप्ता मयि मद्धर्मरूपिणी ॥ ४४ ॥
यथा हलस्यपद्धतिस्ततः सीतेति कीर्तिता।
सीता सुधारसमयीधारारूपरसात्मिका ॥ ४५ ॥
आनन्दयति विश्लेषात् सन्तप्तं भावरूपिणी।
श्रीः समाश्रीयतेसैव श्रुतिभिः स्मृतिभिस्तथा ॥ ४६ ॥
आगमैर्निगमैर्देवैर्मया च ब्रह्मणापि च।
सनातनेन धर्मेण छन्दोभिः प्रणवेन च ॥ ४७ ॥
तेन सा श्रीरिति प्रोक्ता सहजानन्दिनी प्रिया।
आविर्भावे स्फुटं नित्यं तिरोभावेऽपि चास्फुटम् ॥ ४८ ॥
कैशोरादिषु रूपेषु नित्यं मोदयते हिमाम्।
ततः सा मोदिनी शक्तिः सहजैव प्रकीर्तिता ॥ ४९ ॥
आनन्दरूपिणी नित्यं रमते ब्रह्मणि स्थिता।
तथा रमयते तं च सा रमा कीर्त्तिता बुधैः ॥ ५० ॥

लक्ष्योऽहं सर्वशास्त्राणां स्वयं सा लक्ष्मणं मम ।
तेन चोक्ता स्वयं लक्ष्मीर्महालक्ष्मीश्च मे प्रिया ॥ ५१ ॥
जानाति सैव मे रूपमक्षरात्परतः स्थितम् ।
तेन सा जानकी नाम प्रोच्यते ब्रह्मकोविदैः ॥ ५२ ॥
इति नामाष्टकं दिव्यं निरुक्तं तुभ्यमत्रिज ।
य एतद्धारयेद् भक्तया स मे श्रीरसिको मतः ॥ ५३ ॥
मन्नाम कीर्त्तयेन्नित्यमेतैर्नामभिरङ्कितम् ।
रामेति रामचन्द्रेति माङ्गल्यातनयेति च ॥ ५४ ॥
प्रमोदवनचन्द्रेति रामेति रमणेति च ।
तथा कुञ्जविहारीति रत्नाद्रिरसिकेति च ॥ ५५ ॥
एतान्यपि च नामानि नित्यमष्टौ प्रकीर्तयेत् ।
किं तस्य बहुभिश्चान्यैः साधनैः फलदायकैः ॥ ५६ ॥
एतन्मुख्यतमं लोके साधनं नामकीर्तनम् ।
अवृत्तिदर्परहितो विश्वस्तो भक्तिसंयुतः ॥ ५७ ॥
आलस्यरहितो नित्यं नामकीर्तनमाचरेत् ।
धनुर्बाणाङ्कितो भूत्वा पूजां नित्यं समाचरेत् ॥ ५८ ॥
पद्माक्षतुलसीमालां ऊर्ध्वपुण्ड्रं सदा वहेत् ।
एतद्धि विप्रलिङ्गं यदुपवीतादिधारणम् ॥ ५९ ॥
एतद्वैष्णवलिङ्गं यदूर्ध्वपुण्ड्रादिधारणम् ।
एकादशीव्रतं चैव तथा जन्माष्टमीव्रतम् ॥ ६० ॥
श्रीगुरोरुत्सवं चैव रामस्य नवमीं च मे ।
जयन्तीं नरसिंहस्य तथा श्रीवामनव्रतम् ॥ ६१ ॥
वर्जयेत्पूर्वसंयुक्तं मम संतोषसिद्धये ।
अन्येऽपि चोत्सवा नित्यं कर्त्तव्या मम तुष्टिदाः ।
एवं धर्मैर्गृहस्थानां प्रसीदामि द्रुतं मुने ॥ ६२ ॥
वर्णाश्रमानामन्येषां नैष्ठिकब्रह्मचारिणाम् ।
एष मुख्यतमो धर्मो नित्यं मत्प्रीतिकारकः ॥ ६३ ॥
सिद्धः सर्वेषु वेदेषु तन्त्रेषु च शुभाध्वसु ।
आचार्याणां सद्गुरूणामृषिष्वमृतसूक्तिषु ॥ ६४ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे उत्तरखण्डे श्रीरामात्रेयसंवादे आत्रेयबोधितश्रीरामगीतायांमेकविंशोऽध्यायः ॥ २१ ॥

द्वाविंशोऽध्यायः

श्रीराम उवाच

यतिश्च श्रद्धया युक्त एवमुक्तं समाश्रयेत् ।
धर्माणां परमो धर्मो यस्ते पूर्वं निरूपितः ॥ १ ॥

तस्य तीर्थविशेषेषु भवेत् पर्यटनं वरम् ।
एकस्थानाश्रयादेव विक्षेपो मनसो भवेत् ॥ २ ॥

भजने प्रतिबन्धश्च जनानामाग्रहस्तथा ।
परपीडादिकं चापि तेन पर्यटनं शुभम् ॥ ३ ॥

यथा यज्ञास्तथा तीर्थान्युपकल्पितानि विष्णुना ।
तदन्नान्नाधिकं भैक्षं प्रतिगृह्णीत सद्यतिः ॥ ४ ॥

नामानि च चरित्राणि पठेन्नित्यं गतत्रपः ।
एकाकी निःस्पृहः सन्तो मोहाहंकारवर्जितः ॥ ५ ॥

कुर्यात्पर्यटनं नित्यं मत्परो वीतकल्मषः ।
देहपातनपर्यन्तमव्यग्रं पर्यटेत्सदा ॥ ६ ॥

उत्तमोत्तमधर्मोऽसौ पूर्वमुत्तमं ईरितः ।
गृहं सर्वात्मना त्याज्यं संसृतिं निस्तितीर्षुभिः ॥ ७ ॥

न शक्यते चेत् संत्यक्तुं तन्मदर्थं निवेदयेत् ।
अहं हि घोरसंसारमोचको गृहमेधिनाम् ॥ ८ ॥

त्यजेत्सर्वात्मना चार्थं स चेत्यक्तुं न शक्यते ।
मदर्थं सम्प्रयुञ्जीत सर्वानर्थनिवारणात् ॥ ९ ॥

न्यासिनां कठिनो धर्मः प्रतिकूलस्तथा क्वचित् ।
अतश्च सर्वदा भाव्यं भक्तेन गृहमेधिना ॥ १० ॥

इन्द्रियाणि हरन्त्येनं घनौघमिव वायवः ।
अतश्च सर्वदा भाव्यं वैष्णवैर्गृहमेधिभिः ॥ ११ ॥

पत्नीपुत्रास्तथापत्यं बान्धवाः सुहृदस्तथा ।
यत्र सर्वेऽपि मद्भक्ता ईदृशं दुर्लभं गृहम् ॥ १२ ॥

गृहमेध्याश्रमेतत्र तिष्ठन् मद्भक्तितत्परः ।
कर्माण्यपि प्रकुर्वाणो ह्यञ्जसा तरते नरः ॥ १३ ॥

सात्त्विकादिप्रभेदेन तेषां कर्माणि च त्रिधा ।
सात्त्विकं कर्मकुर्वाणे यथाश्रुतफलोत्सुकः ॥ १४ ॥

साधयेत्स्वर्गलोकं वा विमानस्त्रीसुखात्मकम् ।
पुण्ये क्षीणे पुण्यशेषं समादाय धरातले ॥ १५ ॥

समीचीनेषु लोकेषु जायते स्वेन कर्मणा ।
राजसं कर्मकुर्वाणो मेर्वादिषु सुखं लभेत् ॥ १६ ॥

तामसं कर्म कुर्वाणः पातालेषु सुखी भवेत् ।
राजसं सात्त्विकं कुर्वन् दैत्यस्वर्गानवाप्नुयात् ॥ १७ ॥

राजसं कर्म कुर्वाणश्चन्द्रलोके महीयते ।
पुण्यशेषे ततो वृष्टिद्वारा भूत्वात्र रूपभाक् ॥ १८ ॥

रेतोरूपं समास्थाय रेतोजन्मसु जायते ।
तामसं कर्म कुर्वाणो गन्धर्वेषु प्रजायते ॥ १९ ॥

तामसं सात्त्विकं कुर्वन् गन्धर्वप्रवरोभवेत् ।
क्षीणे पुण्ये पुनर्भूत्वा वृष्टिद्वारा स जन्मभाक् ॥ २० ॥

तामसं कर्म कुर्वाणः सर्पादिषु सुखी भवेत् ।
एवं त्रयी धर्मपराः पुनरावृत्तिमाप्नुयुः ॥ २१ ॥

देवताश्चेदुपासीत आजन्म नियतव्रतः ।
तत्तत्सायुज्यमात्रं तु तस्य स्यात्परमं फलम् ॥ २२ ॥

एवं कर्मगतिर्ब्रह्मन् ब्रह्मणोऽपि दुरत्यया ।
दुर्बोधा चैव सर्वेषां फले चाल्पत्वकारिणी ॥ २३ ॥

मदर्पितं पुनः तत् स्यान्मद्भक्त्यङ्गं न संशयः ।
ज्ञानस्य कर्मणश्चापि तथोपास्तेरवद्यताम् ॥ २४ ॥

भक्तिर्हरतिपन्निष्ठा सद्य एव न संशयः ।
तत्तत्सर्वं प्रकुर्वाणोऽप्याश्रयेन्मामनन्यधीः ॥ २५ ॥

केवलं कर्मनिष्ठानां प्रवाहपतनं भवेत् ।
तस्मादुद्धर्तुमात्मानं मत्प्रेमपरमो भवेत् ॥ २६ ॥

इति श्रीमदादिरामायणे ब्रह्मभृशुण्डसंवादे उत्तरखण्डे श्रीरामात्रेयसंवादे-
आत्रेयबोधितश्रीरामगीतायां द्वाविंशोऽध्यायः ॥ २२ ॥

त्रयोविंशोऽध्यायः

आत्रेय उवाच

त्वमेव परमं ब्रह्म सदसत्परमव्ययम् ।
प्रकृतेः परमो दिव्यः पुरुषश्च ततः परम् ॥ १ ॥

अक्षरं ब्रह्म यत्पूर्णं तत्ते धाम परं पदम् ।
ततोऽपि परमः पूर्णस्त्वमेव पुरुषोत्तमः ॥ २ ॥

त्वत्तः परतरो नान्यः पूर्णानन्दैकविग्रहात् ।
रसात्मकं त्वत्स्वरूपं रस आनन्द ईरितः ॥ ३ ॥

परन्तु मानुषं रूपं राजलीलां च पालयन् ।
न ज्ञायते परं ब्रह्म पुरुषैः प्राकृतैरिह ॥ ४ ॥

केचिद्द्विषन्ति कलयन्ति परं सखाय-
मन्ये यितेति च विदन्ति परे सुतेति ।
कान्तेति केऽपि कलयन्त्यबला जनास्त्वा-
मित्थं भवे रमसि मानुषभावमेत्य ॥ ५ ॥

तस्य ते रूपमानन्दमात्रं सुन्दरविग्रहम् ।
नेति नेति पुराविद्भिर्गदितं ब्रह्मणः परम् ॥ ६ ॥

कथं ज्ञेयं रामचन्द्र दृष्ट्वाद्धानुभवात्मकम् ।
न हि प्राकृतजीवैस्त्वं याथातथ्येन दृष्यसे ॥ ७ ॥

श्रीराम उवाच

अहं महद् ब्रह्मणि वीक्षणात्मकं बीजं निधायाद्यममोघरूपम् ।
गर्भं दधाम्यस्य प्रभवस्ततोऽभूच्चराचरस्याखिलभौतिकस्य ॥ ८ ॥

ममांशशक्त्या पुरुषः परोऽभून्नारायणः शङ्खगदादिपाणिः ।
सहस्रमूर्द्धा पुरुषस्ततोऽभूद्यन्नाभिपद्मे भगवान् विरंचिः ॥ ९ ॥

प्रादुरासीत्ततो मेधा वैदिकी ब्रह्मणो हृदि ।
स जगाद ततो वेदांश्चतुरः प्रणवादिकान् ॥ १० ॥

शब्दब्रह्ममयी सृष्टिः प्रादुरासीत्तदात्मिका ।
नामरूपप्रपञ्चोऽभूत्ततोऽतिविपुलः स्फुटः ॥ ११ ॥

अहं यज्ञः क्रतुरहमहं सूर्याग्निचन्द्रमाः ।
अहं विद्युदहं वर्षमहं वायुर्घनाशनः ॥ १२ ॥

अहं स्वाहा स्वधाकारश्चाहमेव दिवौकसः ।
अहमेव पितॄणां च गणो घृताज्यपायिनाम् ॥ १३ ॥

अहं विधिर्नामध्येयान्यहं मन्त्रगणः पृथक् ।
अर्थवादश्चाहमेव प्रयोगोऽहं क्रियात्मकः ॥ १४ ॥

अहं विश्वमहं चैव विश्वेशो विश्वकारकः ।
अहं विश्वस्य संहर्ता कल्पोऽहं प्रतिसर्गकः ॥ १५ ॥

उपादानं निमित्तं वाप्यहमेव सदा मुने ।
अक्षरात्मा ह्युपादानं निमित्तं पुरुषोत्तमः ॥ १६ ॥

अक्षरेण ततां सृष्टिं क्रीडयाम्यहमिच्छया ।
मम देहे ततं विश्वं प्रकृतिः पुरुषस्तथा ॥ १७ ॥

ब्रह्माद्याः पुरुषांशाश्चशब्दोऽर्थश्च विशेषतः ।
आदित्या वसवो रुद्रा विश्वेदेवाश्च देवताः ॥ १८ ॥

एवं मम शरीरान्तः पश्यन्तो दिव्यचक्षुषा ।
भीषणं मां प्रपश्यन्ति कलिकालं परात्परम् ॥ १९ ॥

भीषया चैव वर्तन्ते ममैवाज्ञा वशानुगाः ।
सामन्ता लोकसामन्तास्तथा कल्पायुषः सुराः ॥ २० ॥

केचित्तु कालरूपं मां पश्यन्ति पुरुषं परे ।
अमृतं मृत्युमेवापि बिभ्रच्छक्त्या स्वविग्रहे ॥ २१ ॥

अपरे लीलया पूर्णं रसानन्दैकविग्रहम् ।
पश्यन्ति रसकेलीनामाश्रयं पुरुषोत्तमम् ॥ २२ ॥

एवं यथायथं स्वेच्छावशगो लोकलोचनः ।
मद्भक्तांश्च विशेषेण रमयामि रमामि च ॥ २३ ॥

मय्यात्माशमतां याते प्रपञ्चस्य लयो भवेत् ।
अन्तरङ्गस्य शक्त्यैव तदा ब्रह्मन् रमाम्यहम् ॥ २४ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे उत्तरखण्डे श्रीरामात्रेयसंवादे आत्रेयबोधितश्रीरामगीतायां त्रयोविंशोऽध्यायः ॥ २३ ॥

चतुर्विंशोऽध्यायः

आत्रेय उवाच

प्रयच्छमे परं चक्षुस्त्वत्स्वरूपैकदर्शकम् ।
दिव्यं ज्ञानमयं राम कृपया पुरुषोत्तम ॥ १ ॥

प्रपन्नं मां विजानीहि पादयोस्तव राघव ।
यथा त्वां परिपश्येयं तथा कुरु रमापते ॥ २ ॥

त्वत्तोऽन्यस्त्वत्स्वरूपस्य ज्ञापको नैव विद्यते ।
तेन त्वां शरणं यातो भीतो घोरभवार्णवात् ॥ ३ ॥

अयं हि कालो दुर्वेगो विना त्वच्छरणागतिम् ।
प्रणाशयत्यतो मां त्वं त्रायस्व निर्जकिंकरम् ॥ ४ ॥

पुरा वसिष्ठादिषु संगतेषु ब्रह्मर्षिवर्येषु विरंचिलोके ।
अन्योन्यवादे खलु जायमाने रामेति सारं परमश्रौषमुच्चैः ॥ ५ ॥

ततस्त्वमेवासि परावरेश्वरो विभुश्चिदानन्दमयैकविग्रहः ।
पश्यामि येन परमं स्वरूपं तदेव मे दिव्यचक्षुः प्रदेहि ॥ ६ ॥

ब्रह्मोवाच

इत्थं विज्ञापितो रामो भुशुण्ड परमर्षिणा ।
स्वरूपं दर्शयामास सर्वश्रुतिशिरोगतम् ॥ ७ ॥

श्रीराम उवाच

पश्य मे मुनिशार्दूल स्वरूपं दिव्यचक्षुषा ।
मया तुभ्यं प्रपन्नाय दत्तेन ज्ञानरूपिणा ॥ ८ ॥

पुरुषं च परं चैव पुरुषादपि पश्य माम् ।
सर्वाश्चर्यमयं ब्रह्मन् प्रपञ्चं यत्र द्रक्ष्यसि ॥ ९ ॥

ततोऽसौ रामचन्द्रस्य शरीरे सर्वमपश्यत् ।
भूतधात्रीं साब्धिवर्षद्वीपपर्वतकाननाम् ॥ १० ॥

वियच्च विस्तृतं लोकैर्ब्रह्मादिसुरसंश्रयैः ।
ज्योतिश्चक्रं वसून् वायूनग्नीन् वरुणमेव च ॥ ११ ॥

स्वस्वलोकसमेतांश्च सर्वान् देवगणानपि ।
शेषं पातालभागांश्च दैत्यस्वर्गान् पृथग्विधान् ॥ १२ ॥

कालं दश दिशश्चैव प्रकृतिं पुरुष स्तथा ।
एवं विधाश्च पुरुषाः शरीरे यस्यकोटिशः ॥ १३ ॥

स तं पुरुषधौरेयं रामदेहे व्यपश्यत् ।
सहस्रशिरसं देवं तपन्तं विश्वतोमुखम् ॥ १४ ॥

किरीटिनं कुण्डलरत्नभासा सहस्रसूर्येन्दुगणं जयन्तम् ।
पीताम्बरं शङ्खचक्रे गदाब्जे दधानमीशं कमलासखायम् ॥ १५ ॥

सहस्रबाहुं च सहस्रनेत्रं सहस्रपादोदरवक्त्रकर्णम् ।
शब्दार्थसृष्टिप्रभवं पुराणं सहस्रशाखागणवेदगानम् ॥ १६ ॥

संस्तूयमानं मुनिभिः सुरौघैरणीच्यवर्णं घनसंघवर्णम् ।
तथेन्दुवर्णं महसा विभक्तं कूटं परं ब्रह्मविदेकरूपम् ॥ १७ ॥

कूटस्थमुग्रं विपुलं च कालं करालकायं विलसत्कोटिदंष्ट्रम् ।
प्रभूततेजो विशदाकृतिं विभुं विभासितं ज्वालमालापरीतम् ॥ १८ ॥

विरजां च नदीं पूर्णां ब्रह्माण्डगणकोटिभिः ।
अपश्यत्तस्य देवस्य दण्डेन खलु कालितैः ॥ १९ ॥

कालग्रस्तानि तत्रैव भुवनानि चतुर्दश ।
अपश्यच्च ततोऽप्युच्चैरक्षरं परमं पदम् ॥ २० ॥

पूर्णानन्दघनं धाम ज्ञानगम्यं सुयोगिभिः ।
त्रिपाद्ब्रह्मेति निर्दिष्टं सगुणं निर्गुणं तथा ॥ २१ ॥

स्थूलं सूक्ष्मं विभुं परं श्रीराममहसाञ्चितम् ।
अवतारांस्तथा सर्वांश्चतुर्विंशदशादिभिः ॥ २२ ॥

अनेकधा ह्यसंख्यातान् दिव्यलीलाविनोदिनः ।
अक्षरात्परतोऽपश्यदवतारेभ्य एव च ॥ २३ ॥

रामं त्रैलोक्यसुभगं सहजानन्दिनीयुतम् ।
प्रमोदवनमध्यस्थं दिव्यकान्ताकदम्बकैः ॥ २४ ॥

क्रीडन्तं रासलीलाभिर्नटवेशं किरीटिनम् ।
बर्हिरत्नावलीभूषामुद्रामणिविभूषितम् ॥ २५ ॥

युगलं कामिनीवृन्दमध्यमण्डलवर्तिनम् ।
नटवेशोचितमहारङ्गकच्छविरोचिभिः ॥ २६ ॥

काञ्चीगुणैर्भासमानं दिव्यवेणुरवामृतम् ।
वर्षन्तं प्रावृषेण्याभं विदयुत्पीताम्बरावृतम् ॥ २७ ॥

पीताम्बरप्रभामध्योच्छनच्छ्रोप्रभया युतम् ।
प्रमोदवनमानन्दस्वरूपं पर्यपश्यत ॥ २८ ॥

रत्नाद्रिं सरयूं चैव रामकुण्डं मनोहरम् ।
सहजायास्तथा कुण्डं तथा रामवनं महत् ॥ २९ ॥

चतुर्विंशवनालीं च रामकुञ्जं तदन्तरे ।
तत्र दिव्यसखीयूथं गायन्तं रामसद्गुणान् ॥ ३० ॥
आभीरराजं सुखितं प्रसन्नां माङ्गल्यकां पितरौ गोकुलेन्दोः ।
अनेकगोपेन्द्रसमूहजुष्टं श्रीनन्दनं राजिनीं चैव देवीम् ॥ ३१ ॥

सहजां तत्सुतां रामां श्रीभूलीलादिरूपिणीम् ।
समस्तगुणसम्पन्नां राधिकां रासकेलिनीम् ॥ ३२ ॥
लीलापरिकरं सर्वं नित्यरूपे व्यवस्थितम् ।
एकं रामं च वै पूर्णं दृष्ट्वास्तौषीन्महामुनिः ॥ ३३ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे उत्तरखण्डे श्रीरामात्रेयसंवादे आत्रेयबोधितश्रीरामगीतायां चतुर्विंशोऽध्यायः ॥ २४ ॥

पञ्चविंशोऽध्यायः

आत्रेय उवाच

नमो नमस्ते पुरुषात्मने विभो तस्यापि धौरेयमथो नमाम्यहम् ।
तस्याश्रयं चापि भवन्तमीश्वरं स्तवैः सुकल्पैर्वचनैश्चपौरुषैः ॥ १ ॥

धन्योऽस्म्यहं नाथ तवात्यनुग्रहाद्धन्या कृपा ते करुणार्णवस्य ।
यया स्वरूपं तव रामचन्द्र द्रष्टास्म्यहं ब्रह्मशिवादयदृश्यम् ॥ २ ॥

अहो विचित्रं भगवंस्तेवदृशं स्वरूपमद्धा परितः प्रकाशते ।
अवाङ्मनोगोचरमिच्छयैव ते प्रमोदलीलाधिप दृश्यतां गतम् ॥ ३ ॥

अमी सहस्रार्कमरीचिभासो वर्षन्ति पीयूषमहो दृशोर्मे ।
न चेदृशी क्वापि पुरा परा मे दृष्टा प्रभा तेन विचित्रितोऽस्मि ॥ ४ ॥

अमी प्रभो ते बहवोऽवताराः शरीरतो राम समुल्लसन्ति ।
अनन्ततां तेन तवाप्रमेय प्रत्येमि लीलारसरञ्जितस्य ॥ ५ ॥

रामप्रमोदविपिनाय नमो नमस्ते रत्नाद्रये च सरयूपुलिनावनीभ्यः ।
त्वद्रासकेलिसविलाससमस्तगोपी भूषामणिक्वणितकुञ्जदरीगृहाभ्यः ॥ ६ ॥

किं मे तपः किं विज्ञानं का भक्तिः पदयोस्तव ।
केवलं करुणा राम त्वदीया साधनं मम ॥ ७ ॥

किं ते विधेयमथ न ह्यतिरिक्तमीश पूर्णस्य पूर्णशुभदानसदाकरस्य ।
किं तु प्रपत्तिमनयोः पदपद्मयोस्ते भक्त्या प्रणम्य जगदीश सकृत्करोमि॥८॥

कैवल्यदाननिरतस्य तव स्वभावो भक्तिप्रदानविषये विरलोऽस्ति राम ।
ब्रह्मादिकेष्वसुलभा फलवृन्दभूमा सा वै कृपा रघुपतेमयितेऽवतीर्णा ॥ ९ ॥

किं रावणादद्यसुरकोटिजयेन राम त्वद्वीर्यवृद्धिममरा परितो गृणन्ति ।
यस्याक्षरं परमधाम पदं चकास्ति यस्यांशभाज इतरे परपूरुषौघाः ॥ १० ॥

परात्परस्त्वमसि राम परोपरेशो साकेतराज्यपदभासितपूर्णलीलः ।
श्रीलोचनान्तसुखलालितवक्त्रपद्मलोलालकावलिविनिर्जितकोटिकामः ॥११॥

त्वत्कोमलाङ्घ्रिकमलप्रभवैः परागैः पूर्णैर्विलिप्ततनुरङ्गुलिशोणभाभिः ।
धन्यो जनो रसिकराजशिरोमणिःस यो वै सदैव तव रूपविलोककारी ॥१२॥

यस्येदृशस्य तव राम रसालशीला लीलाललामललनाः पशुवृत्तयोऽपि ।
नित्यं जयन्ति सर्वोपरि वर्तमाना नामैव ते भुवनभूषण मङ्गलाढ्यम् ॥१३॥

रूपं पुनर्नयनदुर्लभमप्सराणां धन्या इमे वत जनास्तव भक्तमुख्याः ।
साकेतवासिमनुजाश्च मुहुर्गृणन्ति किं ते स्तुतिर्निगममानसराजहंस ॥१४॥

किं तेऽर्चनं विविधभोगरसोत्सवाढ्यं यद्दर्शनेन करुणासुलभेन राम ।
स्वानन्द सिन्धुलहरीषु विशामितावद् राम प्रपन्नजनकामदपारिजात ॥१५॥

लीलारसं तवनिभाल्य विमोहितोऽस्मि नातः परं प्रिय कदापि पुनः सहिष्ये ।
श्रीमत्पदाम्बुजवियोगमसह्यदुःखं या कापि राम तव दिव्यसखी भवेयम् ॥१६॥

इच्छामि ते विरहजं भय मदय मोक्तुं नो चेदतीव विरहानलतापतप्तः ।
स्थास्यामि किं नु करुणारसवारिराशे..... .....॥ १७ ॥

इत्थं स्तुत्वा पुनः स्तुत्वा पादयोश्च पुनः पुनः ।
निपत्य च निपत्यासौ वाष्पधाराभिषेचितः ॥ १८ ॥

पुनः पुनः समुत्थाय ववन्दे दैवतोत्तमम् ।
रूपसंहरणार्थाय प्रार्थयामास भीतवत् ॥ १९ ॥

आत्रेय उवाच

दृष्टं परं स्वरूपं ते श्रीराम करुणानिधे ।
अतः परं चक्षुषी मे दृष्टुमेतन्न शक्नुतः ॥ २० ॥

कोटिसूर्यप्रभाधारचाकचक्यप्रभासुरे ।
चरणाङ्गुष्ठनखरे मीलतोमम चक्षुषी ॥ २१ ॥

तस्मादिदं संहर नाथ पूर्ववत्तदेव मे दर्शय राम रूपम् ।
शान्तं स्वसाकेतपुरीगृहस्थं प्रमोदलीलारसरञ्जितं च ॥ २२ ॥

श्रीराम उवाच

मा मेरिदं करुणया मम दृष्ट्वास्त्वं रूपं व्यतीतगुणसंसृतिकालमायम् ।
नातः परं तव मुने भविता प्रवाहो मन्नित्यधामनि पुनः सततं रमेथाः ॥२३॥

ब्रह्मोवाच

इत्युक्त्वा देवदेवेशो रामस्त्रैलोक्यसुन्दरः ।
तथैवासीत् प्रथमवत् स्वर्णसिंहासनस्थितः ॥ २४ ॥

य एतां रामचन्द्रेण गीतामात्रेयसंनिधौ ।
संहितां पाठते मर्त्यस्तं देव कृपयेत् स्वयम् ॥ २५ ॥

दुर्वाससश्च संवादं रामस्य च प्रभोरिमम् ।
योऽधीयीत द्विजः प्राज्ञः स ज्ञानी भवति ध्रुवम् ॥ २६ ॥

भक्तिमान् भक्तिवृद्धिं च लभते नात्र संशयः ।
तथा कर्मफलं दिव्यं सद्यो: प्राप्नोति मानुषः ॥ २७ ॥

धर्मार्थकाममोक्षार्थी पुरुषार्थांस्तथा लभेत् ।
विस्तृतोऽष्टादशाध्यायैः प्रबन्धोऽयं महामखः ॥ २८ ॥

नैतत्प्रकाश्यमप्राज्ञे रामभक्तिविवर्जिते ।
शास्त्रं श्रीरामगीताख्यं दिव्यं सर्वोपरि स्थितम् ॥ २९ ॥

पठनीयं प्रयत्नेन श्रीरामेभक्तिमिच्छता ।
परब्रह्मणि सर्वेशे सर्वोपास्यशिरोमणौ ॥ ३० ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे उत्तरखण्डे श्रीरामात्रेयसंवादे आत्रेयबोधितश्रीरामगीतायां पञ्चविंशोऽध्यायः ॥ २५ ॥
समाप्तेयमष्टादशाध्यायी श्रीरामगीता ॥

षड्विंशोऽध्यायः

ब्रह्मोवाच

मुनेर्निर्बन्धमाज्ञाय वियोगासहने पुनः ।
रामः प्रोवाच करुणो भगवान् भक्तवत्सलः ॥ १ ॥

श्रीराम उवाच

मम नित्यं परं धाम प्रमोदवनमुत्तमम् ।
अत्रैव विहरिष्यामि नृणामव्यक्तमद्भुतम् ॥ २ ॥
अन्तर्हिते मयि ततो निजधाम्नि महामुने ।
अनुयास्यन्ति मामेव सर्वे श्रीलक्ष्मणादयः ॥ ३ ॥

साकेतपुरसंस्था ये ये च कोमलदेशगाः ।
प्रमोदवनसंस्था ये ये च रत्नाद्रिवासिनः ॥ ४ ॥

मल्लीलास्थानसंस्था ये ये च श्रीचित्रकूटगाः ।
ते सर्वे नरनार्यश्च पशुपक्ष्यन्त्यजाअपि ॥ ५ ॥

पिपिलिका मक्षिका या दंशाश्च मशकादयः ।
जन्तवः स्थूलसूक्ष्मादया योगिनो ब्राह्मणा अपि ॥ ६ ॥

सर्वे चतुर्भुजा भूत्वा व्याधव्याघ्रादिका अपि ।
अनुयास्यन्ति मामेव क्रीडन्तं निजधामनि ॥ ७ ॥

प्रमोदवनलीला च नित्यान्तर्हितमेष्यति ।
प्रमोदवनमेतच्च अन्तर्भाव्यपरांश्रियम् ॥ ८ ॥

स्थास्यति क्षमातले नित्यं मत्पदाङ्कैर्नृपावनम् ।
प्रमोदवनकेलीश्च तथा साकेतलीलितम् ॥ ९ ॥

तथा[1] सरयूतटे रम्ये नित्यं रासे च खेलितम् ।
अवतारचरित्राणि नित्यानि चरितानि नः ॥ १० ॥

श्रद्धया भक्तिभावाभ्यां कीर्तयिष्यन्ति ये जनाः ।
तेषां कालभयं नैव भविष्यति कदाचन ॥ ११ ॥

स्थानानि ये च द्रक्ष्यन्ति मल्लीलाभवनानि च ।
प्रमोदवनरत्नाद्रिप्रभृतीनि पदानि च ॥ १२ ॥

ते यास्यन्ति नराभक्तिं स्नानदानार्चनादिभिः ।
अयोध्यादर्शनेनॄणां पलायन्तेऽघकोट्यः ॥ १३ ॥

रामकुण्डे नरः स्नात्वा तथा दशरथोदके ।
स्नात्वा दशरथस्थाने तस्य सायुज्यमाप्नुयात् ॥ १४ ॥

अश्वमेधस्थलीं दृष्ट्वा दृष्ट्वावेदिस्थलीं पुनः ।
कोटिजन्मकृतं पातं धुनुते नात्र संशयः ॥ १५ ॥

प्रमोदविपिनं दृष्ट्वा गत्वा कुञ्जरहस्यके ।
सहजाया वने स्नात्वा नरो मद्योगमाप्नुयात् ॥ १६ ॥

रत्नाद्रिं त्रिः परिक्रम्य कृत्वोत्सवमुदारधीः ।
वैशाखेभोजयेद्विप्रांस्तस्य पुण्यं न गण्यते ॥ १७ ॥

चतुर्विंशतिसंख्यानि वनानि मम यानि च ।
श्रावणे तानि पश्येत ह्यपुनर्जन्मसिद्धये ॥ १८ ॥

---

१. पादेऽस्मिन्नक्षराधिक्यमार्षः ।

एवमेतानि तीर्थानि शुभानि सुखदानि च।
न गच्छेन्मम भक्तो यस्तं च नित्यं त्यजाम्यहम् ॥ १९ ॥

मम पादतलस्पर्शाज्जातानि धरणीतले।
बहूनि खलु तीर्थानि पावनानि विशेषतः ॥ २० ॥

नामभिस्तारयिष्यामि जनान् मद्भक्तिसंयुतान्।
कर्मभिर्मत्परैर्भावैः सेवया भजनेन च ॥ २१ ॥

नाहं च सुलभः क्वापि कदाचिल्लोकजन्मिनाम्।
इच्छयामद्भक्तिलाभात् कुर्वन्ति सुलभं च माम् ॥ २२ ॥

सोऽहमन्तर्हितोभूत्वा नित्यभाव्यां निजां तनुम्।
स्थास्यामि तेषां चित्तेषु ये मे प्रियतमा जनाः ॥ २३ ॥

त्वं च मे दर्शितं नित्यं स्वरूपं सर्वदा स्मरन्।
उन्मत्तवद्भावयुक्तो भवस्वात्रेय भूतले ॥ २४ ॥

मम स्थानेषु पुण्येषु प्रमोदविपिनादिषु।
रत्नाद्रे रुपत्यकासु दिव्यश्रीव्रजभूमिषु ॥ २५ ॥

आभीरराजग्रामेषु दिव्येषु ममधामसु।
पुण्यलीलावटस्थाने सरयूपुलिनेषु च ॥ २६ ॥

तिलोत्तमासरित्संगे सरयूपुण्यभूमिषु।
पूर्वपश्चिमयोर्मध्ये दक्षिणोत्तरयोस्तथा ॥ २७ ॥

अयोध्याद्वयकोट्योश्च मातृवात्सल्यभूमिषु।
कौमारलीलास्थानेषु सरित्कुञ्जदरीषु च ॥ २८ ॥

कैशोरकेलिस्थानेषु मम नामगणं जपन्।
मद्भावभक्तियुक्तात्मा सहजाभावतत्परः ॥ २९ ॥

सहजां नित्यमाराध्य मामेव फलमाप्नुवन्।
आत्रेय सुमहायोगिन् न य कालं तपश्चरन् ॥ ३० ॥

तीव्रेण मम भावेन मामेव त्वमवाप्स्यसि।
न ते बाधिष्यते ब्रह्मन् दुःसहो विरहो मम ॥ ३१ ॥

आगामिनि तु योगीन्द्र कल्पे सारस्वताभिधे।
मन्नित्यलीलासम्बन्धमवाप्स्यसि ततः क्रमात् ॥ ३२ ॥

सहजायाः सखी काचिच्चन्द्रचूडा भविष्यसि।
यस्याश्चूडागतश्चन्द्रः सुखमिष्यति मीरते ॥ ३३ ॥

[1]एवं न ते मद्विश्लेषो भविष्यति महामुने।
वंशस्था ऋषयः सर्वे वेदरूपा न संशयः ॥ ३४ ॥

---

१. नास्ति–बड़ौ०।

ते यूयं मत्प्रियतमाः सर्वेमुनिजना भुवि ।
प्राप्तावतारास्तपसा मामेव समवाप्स्यथ ॥ ३५ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे उत्तरखण्डे षड्विंशोऽध्यायः ॥ २६ ॥

सप्तविंशोऽध्यायः

ब्रह्मोवाच

रामाज्ञां समनुप्राप्य मुनिरत्रेस्तनूजनिः ।
कृताभिवन्दनस्तेन श्रीमता विश्वमूर्तिना ॥ १ ॥

प्रणम्य तं चाथ मुहुराश्लिष्य च मुहुर्मुहुः ।
व्यलप्य च मुहुर्योगी गलद्बाष्पनिषेचितम् ॥ २ ॥

प्रयास्यन् स्वाश्रमपदमिदमुच्चैः समुज्जगौ ।
चतुःश्लोकीं रामगीतामात्रेयमुनिवर्णिताम् ॥ ३ ॥

जय जय रामचन्द्र तव भक्तिरनन्तगुणा-
परमफलात्मिका जयतु मे हृदि नित्यमसौ ।
प्रमुदवनव्रजाधिपभवन्तमिहेन्दुमुखं
द्विविदिविदृक्चकोरयुगलेनपिवामि सदा ॥ १ ॥ ४ ॥

तव सहजाप्रियाचरणपद्मपरागभरैरह-
मभिषिक्तदिव्यतनुरश्रुकलाञ्चितदृक् ।
अनुसवमब्जलोचन भजे भवतोः सविधं-
विधिशिवनारदादिपरिवाकमलभ्यतमम् ॥ २ ॥ ५ ॥

अपि हृदयेशशेषविधिशक्रशिवादिषु-
यत्किमपि कलांशमात्रमहसां विभवो जयति ।
स इह तव प्रमोदविपिने पशुपालवधू-
पदकमलैर्विमर्दितद्रवस्फुट्यावरसैः ॥ ३ ॥ ६ ॥

जयतु सदैव भक्तमनुजेषु भवत्करुणा भवजल वीचिलोलितमनः ।
सुविषैर्विषयै[1]र्भवति यथा प्रपत्तिरपि ते
पदपङ्कजयोरसुलभंनन्ततप सां प्रचयेन विभो ॥ ४ ॥ ७ ॥

---

१. विषतुल्यैरित्यर्थः टि०–बड़ौ० ।

इति गानमसौ कृत्वा मुनि. प्रणयविह्वलः ।
श्रीरामपदयोर्न्यस्य हृदयं स्वाश्रमं ययौ ॥ ८ ॥

रामस्य गुणसंदोहं गायन् कौमारकादिषु ।
तदेव संस्मरन्नित्यं रूपं भुवनमङ्गलम् ॥ ९ ॥

चरित्राणि गृणन्नुच्चैः प्रियाणि सरसानि च ।
रामलीलारसोन्मत्तो मन्मनास्तृणवज्जगत् ॥ १० ॥

नन्दिग्रामे गोकुले च सुखितस्यालये तथा ।
सौगन्धिगिरौ रत्नाद्रौ प्रमोदवनमण्डले ॥ ११ ॥

श्रीमज्जनकपुर्यां च चित्रकूटे महागिरौ ।
उद्यानेषु च दिव्येषु भरतादिस्थलेषु च ॥ १२ ॥

श्रीलक्ष्मणस्य चावासे ब्रह्मावर्त्ते तथैव च ।
रामक्रीड़ामनोज्ञेषु स्थानेषु विविधेषु च ॥ १३ ॥

रामचन्द्रं ध्यायमानो व्यचरन्मूर्खमत्तवत् ।
तत्र तत्र महर्षीणां मण्डलेषु वदत्सु यः ॥ १४ ॥

शृण्वानो रामचरितं प्रमत्तवदघूर्णत ।
वर्षवातातपक्लेशान् सहमानस्तपोनिधिः ॥ १५ ॥

पुण्यं पापं सुखं दुःखं शापं चानुग्रहं तथा ।
जयाजयादिकं चैव लाभालाभादिकं तथा ॥ १६ ॥

तुल्यमेतन्मन्यमानो ज्ञानवैराग्यबृंहिताम् ।
रामभक्तिं प्रकुर्वाणः श्रुतश्रोतव्यपारगः ॥ १७ ॥

न्यवर्तत स सर्वेभ्यो धर्मेभ्यः सर्ववर्जितः ।
यावत्सारस्वतं कल्पं मुनिवेशमुपाश्रितः ॥ १८ ॥

कल्पे सारस्वते प्राप्ते रामचन्द्ररसोत्सुकः ।
ततः स भविता योगी चन्द्रचूडाह्वया सखी ॥ १९ ॥

एवं वेदर्षयः सर्वे भवितारः सखीपदम् ।
श्रीरामकृपया प्राप्तं रसभोगफलात्मकम् ।
दुर्लभं भुवनेष्वन्यैर्देवदानवमानवैः ॥ २० ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे उत्तरखण्डे सप्तविंशोऽध्यायः ॥ २७ ॥

अष्टाविंशोऽध्यायः

श्रीराम उवाच

एवं वसिष्ठो भविता वसिष्ठा नाम या सखी ।
चन्द्रं यथा चकोरो हि द्रक्ष्यते युगलं वपुः ॥ १ ॥

अहर्निशं तु पार्श्वस्था चामरव्यजनादिभिः ।
सेवयिष्यति सम्प्रीत्या सहजारामचन्द्रयोः ॥ २ ॥

कौण्डिन्यो मुनिशार्दूलः प्रेमोर्जितमहोदयः ।
लप्स्यते सहजारामसहजानन्दपात्रताम् ॥ ३ ॥

वामदेवो महायोगी मनोऽभिलषितं वरम् ।
प्राप्स्यति श्रीरामहिता वामा नाम सखीपदम् ॥ ४ ॥

वामभावं शिक्षयन्ती स्वाधीनपतिका प्रिया ।
प्रेम्णः कौटिल्यविषये निपुणा भावभूषिता ॥ ५ ॥

याज्ञवल्क्यो महायोगी श्रुतिसार रहस्यवित् ।
याज्ञवल्क्या सखी नाम भविता रामकेलिनी ॥ ६ ॥

पयःसारदधिक्षीरनवनीतघृतादिकम् ।
समर्पयन्ती युगलं नित्यं पर्यंचरिष्यति ॥ ७ ॥

भारद्वाजो मुनिश्रेष्ठो भक्तिभूषणभूषितः ।
भविता प्रमोदवने भारती नाम तत्सखी ॥ ८ ॥

कवितां या शिक्षयन्ती सहजायै तु शैशवे ।
येन प्रवीणतां याति रामलीलाविनोदिनी ॥ ९ ॥

वात्स्यायनो मुनिर्देवः शृङ्गाररसपोषकः ।
भरतश्च कलाकान्तो भवितारौ सखीपदम् ॥ १० ॥

कला कलावती चैव तयोः सर्वकलागुरुः ।
व्यासश्च भविता रामसखी प्रेमविचक्षणा ॥ ११ ॥

शमादिभिरुपायैर्या मानं मोचयितुं क्षमा ।
रामलीलागुणालापपूर्वस्मरविवर्धिनी ॥ १२ ॥

श्रीसखी वासिनी नाम व्रजलीलारसोत्सुका ।
शुकश्च सुखदा नाम भविता श्रीप्रियासखीः ॥ १३ ॥

[1]सर्वोपायेन या नित्यं तयोः प्रणयसंगमम् ।
वाञ्छन्ती कुञ्जदेशेषु पुष्पतल्पं तनोति वै ॥ १४ ॥

---

१. नास्ति–बड़ौ० ।

अगस्त्यो नाम योगीन्द्रो रामभक्तिप्रभावतः।
अगस्त्या नाम कुञ्जस्था भविता सत्सखी तयोः॥ १५॥

यया प्रसादितं नित्यं व्रजस्त्रीणां मनोजलम्।
दृष्ट्वापराधे कान्तेऽपि रामेसर्वगुणाकरे॥ १६॥

गौतमो मुनिरभ्यर्च्य तपसा परमेश्वरम्।
तत्प्रसन्नेन रामेण मालाकारीपदं व्रजे।
लब्ध्वा श्रीरामसहजां वैजयन्तीसमर्पिणी॥ १७॥

आंगिरसो महायोगी सहजारामसन्निधौ।
आङ्गी नाम सखी रम्या भविता वेत्रधारिणी॥ १८॥

माण्डव्यो नाम योगीन्द्रो महावैखानसार्चितः।
भविता मण्डनी नाम सखी श्रीराममण्डिनी॥ १९॥

आथर्वणो महायोगी भविता सहजासखी।
व्यजने चैव ताम्बूले महावैदग्ध्यभूषिता॥ २०॥

वत्स्यो नाम मुनिश्रेष्ठः श्रीरामकृपया पुनः।
भविता वत्सला नाम सखी वात्सल्यको विदा॥ २१॥

बौधायनश्च गार्ग्यश्च भवितारौ सखीयुगम्।
एका दर्पणधारिणी परा पानीयपायिका॥ २२॥

आपस्तम्बो मुनिश्रेष्ठः पाककारी भविष्यति।
सूपौदनादिसम्भारे श्रीरामप्रभुसेविनी॥ २३॥

शाण्डिल्यो भगवान् नित्यं भगवद्भक्तिभावतः।
कुञ्जस्था शाण्डिला नाम सत्सखी भविता तयोः॥ २४॥

कठकौथुमकौशीतिमादिसांख्यायनादयः।
सर्वे पृथक् पृथग् जाताः सख्यः श्रीरामसन्निधौ॥ २५॥

असंख्याता मुनिश्रेष्ठाः सख्य एव न संशयः।
यथाधिकारं लब्धारः सखीस्थानानि चैतयोः॥ २६॥

एषा हि परमा मुक्तिर्यल्लीलापदसंगमः।
अर्वाक् पदं ततः सर्वं ब्राह्ममक्षरमव्ययम्॥ २७॥

सर्वेऽप्यानन्दसंदोहास्तत एव विनिर्गताः।
विश्रामस्थानमेकं तं निःसीमानन्दवत्पदम्॥ २८॥

मात्रानन्दरतानां तु तल्लोकप्राप्तिरीप्सिता।
महानन्दरता भक्ताः प्राप्तुमर्हन्ति तत्पदम्॥ २९॥

श्रीरामाख्यं परं प्राप्य फलभूमानमव्ययम् ।
शुद्धभक्त्या परिप्राप्य नाप्तव्यान्तरमिष्यते ॥ ३० ॥

श्रीरामेति च रामेति रमापतिमुदीरयन् ।
श्रीरामसन्निधौ भक्तो मोदते नात्र संशयः ॥ ३१ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसम्वादे उत्तरखण्डेऽष्टा-विंशोऽध्यायः ॥ २८ ॥

एकोनत्रिंशोऽध्यायः

भुशुण्ड उवाच

दुर्वाससि मुनिश्रेष्ठे गते स्वाश्रममुत्तमम् ।
किं कृतं रामचन्द्रेण तद्वदस्व मम प्रभो ॥ १ ॥

ब्रह्मोवाच

प्रतिहारिपदे भ्रात्रा नियुक्तस्तद्व्यतिक्रमात् ।
भीतवल्लक्ष्मणः प्राह प्रणतो रामसंनिधौ ॥ २ ॥

लक्ष्मण उवाच

भगवन् सर्वदेवेश स्वच्छायावशगो हरिः ।
आदिमूर्तिस्त्वमेवासि कालस्यापि नियोजकः ॥ ३ ॥

एतन्मे दर्शितं रूपं कृपयैवातिभीषणम् ।
प्राय एतद्भयेनैव वशगास्ते सुरासुराः ॥ ४ ॥

कोऽसौ द्वितीयः कालात्मा भीषणो भीमविग्रहः ।
पाचको भवदन्नस्य भवान् भोक्तेव लक्ष्यते ॥ ५ ॥

किं चैकं प्रार्थयाम्यद्धा करुणाजलधावपि ।
त्वयि सर्वंकलाधीशे भ्रातर्यपि भयानके ॥ ६ ॥

त्वया प्रतीहार्यपदे नियुक्तस्तद्व्यतिक्रमात् ।
सापराधोऽस्मि संवृत्तस्तेन दण्ड्योऽस्मि साम्प्रतम् ॥ ७ ॥

दण्डनीयतमो लोके प्रभुणा करुणेन वा ।
सापराधो दासजन इत्याज्ञा नृपशासने ॥ ८ ॥

त्वमेव जगतां नाथः सागसां दण्डकारकः।
तेन मां दण्डय स्वामिन् सागसं ते व्यतिक्रमात् ॥ ९ ॥
इत्येवं प्रार्थितो रामो लक्ष्मणेन विशेषतः।
प्रोवाच करुणः श्रीमांल्लीलाकारणमानुषः ॥ १० ॥

श्रीराम उवाच

असौ यः सेवकः कालो मदाज्ञापरिपालकः।
मया सह स्वकार्यार्थं प्रभुणा मन्त्रयन् स्थितः ॥ ११ ॥
स एषो मम भोगार्थं त्रैलोक्यं पाचयन् प्रभुः।
करोति सर्वभोगार्थं मह्यं फलसमर्पकः ॥ १२ ॥
तेन सम्मन्त्रयन् कार्यं भीषणेनातिभीषणः।
दृष्टस्त्वया लक्ष्मणेत्थं मा भैः संश्रद्धितोऽसि मे ॥ १३ ॥
मदीयनित्यलीलायां नित्यमेव सुसंगतम्।
मदीयभ्रातरं पूर्णं मद्वत्सर्वगुणोत्करैः ॥ १४ ॥
प्रतीहार्याद्व्यतिक्रान्तो नैव दण्ड्योऽसि मे सखे।
लीलाकालक्रमेणैव सर्वं सम्पाद्यमेव च ॥ १५ ॥
प्रमोदवनलक्ष्मीश्च प्रकाशयति भूतलम्।
कृतानि देवकार्याणि रक्षिता वेदराशयः ॥ १६ ॥
रक्षितश्च परोधर्मो गोवैष्णवद्विजन्मनाम्।
रक्षिताश्च मखा नित्या रक्षिता मम मूर्त्तयः ॥ १७ ॥
प्रवृत्तो भक्तिमार्गश्च कर्मज्ञानोपबृंहितः ॥ १८ ॥
नातः परं न करणीयमात्रं त्रैलोक्यरक्षा विहिता समंतात्।
प्रमुद्वनं धाम परं व्रजामः समस्तमर्वाग्यत एतदस्ति ॥ १९ ॥
अव्यक्तमुख्यैः परमं पदं तदयत्रानिशं तात वयं रमामः।
अव्यक्तरूपाभिरपारलीलासुशक्तिभिर्नित्यविलासिनीभिः ॥ २० ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे उत्तरखण्डे एकोनत्रिंशोऽध्यायः ॥ २९ ॥

त्रिंशोऽध्यायः

ब्रह्मोवाच

इति श्रुत्वा प्रभोर्वाक्यं लक्ष्मणो भ्रातुरोजसः ।
हर्षदैन्यावेगचिन्तासमाविष्टो बभूव ह ॥ १ ॥

अहो वयं गमिष्यामः प्रमुद्वनमनुत्तमम् ।
यदानन्दस्य मात्राभिरूपजीवन्ति लोकगाः ॥ २ ॥

इति हर्षो बभूवास्य श्रुत्वा प्रियसुहृद्वचः ।
अहो अतः परं कासावयोध्या सरयूतटम् ॥ ३ ॥

क्व रत्नाद्रिसुखं क्वासौ प्रियभातृसुहृत्पदम् ।
क्वैतच्च नगरीसौख्यं ब्रह्मादिसुरदुर्लभम् ॥ ४ ॥

क्वेतत्प्रभोः श्याममणीन्द्रमेचकं दृश्यं वपुः प्रेमजुषा दृशा भगैः ।
क्वानन्द एष प्रियसंगजातः संदर्शनाद्यो जनकात्मजायाऽ ॥ ५ ॥

इति दैन्यं महज्जातं लक्ष्मणस्यापि चेतसि ।
भ्रातुः प्रियस्य लीलानां ज्ञातुः पारङ्गतस्य च ॥ ६ ॥

आवेगश्च महान् जातो भीरोर्विश्लेषदुःखतः ।
चिन्ता च महती जाता लीलादर्शनकारणात् ॥ ७ ॥

लीलारसः प्रियो यस्माल्लक्ष्मणस्य प्रियात्मनः ।
नित्यं जनकजारामरम्यरूपरसस्पृहः ।
दुर्मना इव संजातो भातुः स्वे दण्डकारिणः ॥ ८ ॥

एवं दुर्मनसं वीक्ष्य लक्ष्मणं प्राणसम्मतम् ।
रामचन्द्रः प्रसन्नात्मा प्रोवाच रुचिरं वचः ॥ ९ ॥

श्रीराम उवाच

दण्डोऽभियाचितोऽद्यैव त्वयेन्द्रारिनिषूदन ।
तेनैतद्गदितं तात कथं वृत्तोऽसि दीनवत् ॥ १० ॥

न मया दण्डनीयस्त्वं प्राणस्यापि व्यतिक्रमात् ।
को दण्ड्यः को दण्डयिता सर्वथैक्ये द्वयोरपि ॥ ११ ॥

आवयोर्नैव भेदोऽस्ति त्वमक्षरमहं परः ।
शेषः संकर्षणः साक्षाद्यदंशो मेदिनीधरः ॥ १२ ॥

शेषरूपः परिकरो भाष्यकर्ता मदागमे ।
आचार्यः परमो नित्यो वैष्णवप्रियकारकः ॥ १३ ॥

सर्वावतारमूलश्च ईश्वरः प्रकृतेः परः ।
त्वया विना न चैवाहं लीलासु पुरुषोत्तमः ॥ १४ ॥

त्वं साक्षात्पुरुषो विष्णुर्निश्चिन्तोऽहं त्वया विभो।
सृजस्यवसि भूतानि हंसि कालो दुरासदः॥ १५॥

अहं कदाचिद्वटपत्रशायी स्वाङ्गुष्ठपादास्वदने रसज्ञः।
माङ्गल्यकाश्रीजननीपयोऽर्थे रुदन् रमे बालमुकुन्दनामा॥ १६॥

कदाचित् प्रमोदाटवीकुञ्जभूमौ समुद्भासिरत्नाद्रिभूगह्वरस्थः।
रमे रामनामा सदारामकुञ्जे स्वयम्भूः स्वयं शक्तिलक्ष्मीपरीतः॥ १७॥

कदाचिद्रमे चित्रकूटान्तराले शिलां स्फाटिकां तामधिश्रित्य तिष्ठन्।
प्रियानेत्रलास्यानुकारीणि पश्यन् कृपापूर्णदृष्ट्या कुरङ्गीकुलानि॥ १८॥

एत्य कदाचिद्दक्षिणमधुरां कृष्णातटेऽधिगोवर्द्धनगिरि।
ताम्रपर्णीसागरसंगमविप्रसखैर्मुनिभिश्चरन् रमामि॥ १९॥

त्वं करोष्यवतारार्थं गोद्विजधर्मपालनम्।
असुराणां निरसनं मम सौख्यविशारदः॥ २०॥

तस्मात्कालत्रयेऽपि त्वं न मे कोपश्य भाजनम्।
किंतु द्विर्भाषणं कुर्वे नाहं लक्ष्मण किंचन। २१॥

नियुक्तस्त्वं प्रतीहार्ये तद्व्यतिक्रमकारणात्।
न दण्ड्यसे चेन्मयका मर्यादा मे विनङ्क्ष्यति॥ २२॥

इति लोकजने वादो भविता वेदविप्लवी।
तेन लीलातिरोधानं मम दण्डो भविष्यति॥ २३॥

कस्मात्त्वं विमना जातो दुर्मनाश्चिन्तयाकुलः।
आविग्नो मूढवद्भ्रान्तो विरहातुरभीरवत्॥ २४॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे उत्तरखण्डे त्रिंशोऽध्यायः॥ ३०॥

एकत्रिंशोऽध्यायः

लक्ष्मण उवाच

दृष्टाते विविधा लीलाः समस्तरससंगताः।
रसो नाम भवद्रूपं ब्रह्मैवेदं न संशयः॥ १॥

शृङ्गारवीरकरुणारौद्राद्यास्तस्य चात्मथम्।
एकस्य चापि नित्यस्य स्थायिनश्चित्सुखाकृतेः॥ २॥

अन्तःकरणवृत्तीनां भेदतस्तस्य वै भिदा ।
त्वं शृङ्गारी परानन्दरूपिणीं सहजामनु ॥ ३ ॥

प्रमोदविपने चैव चित्रकूटे मनोहरे !
कोटिकन्दर्पसुभगः क्रीडसे त्वं रमायुतः ॥ ४ ॥

एतदर्थमेव भुवि प्रकटोऽभूः सनातनः ।
सहजानन्दिनी चापि प्रमोदवनसुन्दरी ॥ ५ ॥

अनेकरूपिणी भूत्वा त्वां वै रमयति प्रभो ।
सोऽयं लीलारसानन्दो दृढतां समुपागतः ॥ ६ ॥

तस्य साक्षी त्वहं ब्रह्म त्वत्प्रकाशमयोऽक्षरः ।
तत्र तत्र नियुक्तोऽहं त्वया रमणकोविद ॥ ७ ॥

तत्तद्रूपमुरीकृत्य लीलापरिकरोऽभवम् ।
अहं रसालविपिने रसालद्रुमवाटिका ॥ ८ ॥

अशोकविपिने चाहमशोकद्रुमवाटिका ।
तन्मञ्जरीमधुकराः पल्लवाश्चारुणप्रभाः ॥ ९ ॥

शीतलः सुरभिर्मन्दः समीरश्चन्दनस्पृशः ।
कीरकोकिलकेक्याद्याः पक्षिणो मधुरस्वराः ॥ १० ॥

ऋतवस्ते वसन्ताद्याश्चन्द्रचन्दनचन्द्रिकाः ।
अहं सर्वस्वरूपेण त्वन्नियोगादिहाभवम् ॥ ११ ॥

स कथं तव विश्लेषं सहिष्ये रघुपुङ्गवः ।
पूर्वमाचान्तममृतमधुना विषमुल्वणम् ॥ १२ ॥

आत्रमिष्यामि भगवन् त्वद्विग्नोऽहं ततः प्रभो ।
सर्वं जानाति भगवान् कार्याकार्यविवेचनम् ॥ १३ ॥

वीरश्चापि भवानक्षणो रददात्परमां मुदम् ।
वैश्वामित्रे यज्ञवाटे तथा भार्गवसंगमे ॥ १४ ॥

सुबाहुमथने चापि सहस्रारामरूपधृक् ।
लङ्कायां राक्षसहतौ वीरो भूत्वा व्यरीरमः ॥ १५ ॥

राक्षसेन्द्रमहोद्दण्डतरङ्गगणमार्जिते ।
सिन्धोर्मध्ये दुर्गमे त्वां न व्यमुञ्चमहं क्वचित् ॥ १६ ॥

अहं वाणाधनुश्चैव रथः पत्तिर्हयास्तथा ।
कंबलः कवचं चापि तत्र तत्राभवं ह्यहं ॥ १७ ॥

स कथं मोक्तुमिच्छेयं तव सार्थं रमापते ।
किमर्थं तादृशो स्वादे पूर्वमस्मि नियोजितः ॥ १८ ॥

नियोजितश्चेत्प्रभुणा न वियोज्योऽस्मि सम्प्रति ।
तस्मात्तद् हृदयं भ्रातः स्फुटतीव च मामकम् ॥ १९ ॥

विशीर्यन्ति ममाङ्गानि तापश्चापि प्रजायते ।
शून्या दिशः प्रपश्यामि न विन्दामि धृतिं हरे ॥ २० ॥

प्रत्यङ्गं ज्वलति वपुर्ममदीयमङ्गं स्मारं स्मारमतिबिसह्यमेतदुच्चैः ।
अग्रे भाव्यं न भवन्नागतमे कीदृग्जातं देहजं दुःखमस्तिमह्यम् ॥ २१ ॥

एतत्तेऽनुचितं राम भक्तेर्मे दुःखदर्शनम् ।
तदप्यशनिपातोत्थवेदना मे दिवानिशम् ॥ २२ ॥

दूरादेव वितर्कयामि भवतः संयोगजं यत्सुखं-
यादृग्विस्तृतमस्ति निस्तुलतरं भक्तानुभूत्यास्पदम् ।
दुःखं चापि तु तादृगेव भविता विस्तारि सर्वोत्तम-
प्रेमोत्थं खलु कोटिजन्मनिबहैर्भोग्यं यदैकक्षणे ॥ २३ ॥

तदहमिह सहिष्ये नैव मत्तः कदाचित्-
परममशनिपाताच्चापि काठिन्ययुक्तम् ।
वितर रघुपते हा राम कारुण्यकोणां-
दृशमसदृशं तां पापसंघातहर्त्रीम् ॥ २४ ॥

सर्वथा दण्डनीयोऽहमपराधे महत्यथ ।
चरणाम्भोजसंसर्गादत्रापि त्वपयातु नः ॥ २५ ॥

अस्तु नाथ महान् दण्डः संगतस्यैव मे त्वया ।
असंगतस्य तु स्वामिन् महानन्दोऽपि मास्तु मे ॥ २६ ॥

पशुपक्षिलतागुल्मवृक्षादिजनिमाप्नुयाम् ।
तत्र तत्र भवेयं ते चरणाम्भोजसंगमी ॥ २७ ॥

प्रमोदवनलीला च दृष्टा संस्मर्यतेऽधुना ।
तत्रैव देहि रामेन्दो यां कांचिज्जनिमद्भुताम् ॥ २८ ॥

प्रमोदवनलीला चे दृष्टा प्रेमाङ्कुरस्पृशी ।
उच्चैर्वितर संस्थानमधो वापि प्रवेशय ॥ २९ ॥

न पुनस्तव विश्लेषो भूयान्मम मनागपि ।
वज्रादपि ह्यसह्यं यदात्मपातादपि द्रुतम् ॥ ३० ॥

सर्वमस्तु प्रभो दण्डाद् दुःखं परमदुःसहम् ।
मा ते लीलोपसंहारो भवतु श्रीरमापते ॥ ३१ ॥

लीलैवहि ममाधारो लीलैव मम जीवनम् ।
लीलैव मम सर्वस्वं लीलैव मम लोचनम् ॥ ३२ ॥

मच्छरीरसुरक्षायै लीलारक्षा विधीयताम् ।
लीलाभावे महदुःखं मम राम भविष्यति ॥ ३३ ॥

तुलसीमालिका नाम चरणाम्भोजचिन्तनम् ।
नित्यं लीलारसानन्द एतद्भक्तस्य जीवनम् ॥ ३४ ॥

धनुर्बाणाङ्कितततू राममन्त्रं सदा जपन् ।
तव लीलारसानन्दी भूयासं नित्यमीश्वरा ॥ ३५ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे उत्तरखण्डे एकत्रिंशोऽध्यायः ॥ ३१ ॥

द्वात्रिंशोऽध्यायः

ब्रह्मोवाच

श्रीमत्संकर्षणाख्यस्य लक्ष्मणस्य वचस्त्विदम् ।
आर्त्या विक्लिवतं श्रुत्वा प्रोवाच सहजापतिः ॥ १ ॥

श्रीराम उवाच

नाभावो मम लीलानां लक्ष्मण क्वापि विद्यते ।
कालमायागुणादीनामस्पृश्योऽहं निरूपितः ॥ २ ॥

मद्रूपं नित्यमेवेदं यद्यद् भक्तैः प्रतीयते ।
तथैव मम लीलानां नित्यता विनिरूपिता ॥ ३ ॥

मया च तव विश्लेषो न कदाचन विद्यते ।
पुरुषोत्तमसंज्ञं तल्लीला वै शिष्यभोगिना ॥ ४ ॥

द्विविधा मम सा लीला ज्ञेया नित्यापि लक्ष्मण ।
प्रकटाप्रकटा चापि कालमायागुणातिगा ॥ ५ ॥

पूर्वावतारकालीना तिरोभूता परा मयि ।
अहं हि सहजानन्दी प्रमोदवनकेलिभृत् ॥ ६ ॥

निमित्तं किंचन प्राप्य भक्तसम्पालनादिमत् ।
युक्तो लीलापरिकरैः प्रादुर्भूय प्रदर्शये ॥ ७ ॥

सहजाकेलिरसिकं निजरूपं मनोहरम् ।
मय्येवाहं तिरोभूय तिष्ठामि प्रथमं सखे ॥ ८ ॥

ततो महन्महिम्नोऽहं मत्स्वरूपाच्चिदात्मनः ।
आविर्भवामि लोकानामभ्युद्धरणहेतवे ॥ ९ ॥

आत्मानाहं निजात्मानं विसृजामि निजात्मनः ।
अहमेव ममाधारो निलयश्चाहमेव हि ॥ १० ॥

मयैव मत्परिच्छेदो निश्चयेन विभाव्यते ।
तदाकालश्च देशश्च स्वरूपं च मदात्मकम् ॥ ११ ॥

कोसलाख्यं पुरं नित्यं कोटिकल्पावसानगम् ।
कालस्यापि च कालोऽहं यत्र नित्यं प्रतिष्ठितः ॥ १२ ॥

भवांश्च न स्वस्वरूपं वेद मत्प्रेममोहितः ।
मत्परोक्षे निजैश्वर्यं प्रकाशयसि लक्ष्मण ।
मयि स्थिते मम प्रेमसुधासिन्धौ निमज्जसि ॥ १३ ॥

भवांश्च हनुमान् वीरो लक्ष्मीः प्रद्युम्न एव च ।
अनिरुद्धश्च भगवान् अमी ईशाः पृथक् पृथक् ॥ १४ ॥

मयि स्थिते न वः शक्तिरभ्युपैति प्रकाशताम् ।
पुरुषोत्तम ता सेयं मम सर्वोत्तमाकृतेः ॥ १५ ॥

अक्षरं चापि यद्ब्रह्म कालमायातिगं बृहत् ।
तदेतन्मत्प्रकाशत्वान्न स्वातन्त्र्यमिहार्हति ॥ १६ ॥

लीला सृष्टिविलासित्वं स्वातन्त्र्यं नाम कीर्तितम् ।
अक्षरस्य द्विधा भावः प्रकृतिः पुरुषश्च सः ॥ १७ ॥

ज्ञानमार्गं उपास्यं यत् स्वरूपं तन्निगद्यते ।
न तस्यलीलाकारित्वं मदावेशेन तु स्फुटम् ॥ १८ ॥

अहं च त्वामधिष्ठाय क्रीडामि पुरुषोत्तमः ।
प्रकाशश्चैव सूर्यश्च यथैवाव्यभिचारिणौ ॥ १९ ॥

त्वयैवाव्यभिचारेण तथैवाहं प्रतिष्ठितः ।
दृश्यसे मदभिन्नोऽपि त्वं भिन्नइवलक्ष्मण ॥ २० ॥

सेयं लीलाश्रया शक्तिर्ममैव विनिरूप्यताम् ।
अयमज्ञानजो मोह इतरेषु विभाव्यते ॥ २१ ॥

ये जीवा मम मायाभिर्मोहिता अज्ञसंज्ञकाः ।
न तु त्वपि महाप्राज्ञे देवदेवे जगद्गुरौ ॥ २२ ॥

मत्स्वरूपान्यूनकक्षे श्रीविष्णौ परमेश्वरे ।
अवतारास्तु वै चैते मत्स्यकूर्मादयोऽखिलाः ॥ २३ ॥

अवतारी त्वमेवैकोऽस्यवतारी तथाप्यहम् ।
भ्रातस्त्वमेव शेषोऽसि मम धाम सनातनम् ॥ २४ ॥

यस्यांशो धरणीं सर्वां शिरस्यादाय तिष्ठति ।
कल्पान्ते त्वन्मुखोद्गीर्णो महावह्निः प्रचण्डभाः ॥ २५ ॥

तापयिष्यंस्त्रिभुवनं समिधोऽभून्निरिन्धनः ।
शोषयित्वा जगत्सर्वं ज्वालयत्येव निश्चितम् ॥ २६ ॥

ततः कालघनो भूत्वा वर्षिष्यति महज्जलम् ।
एकार्णवां भुवं कृत्वा रुद्रग्रासायितां सखे ॥ २७ ॥

शमं यास्यसि मे तल्पो भूत्वा निद्रासुखं महत् ।
मह्यं दास्यसि भोगेन कोमलेन स्ववर्ष्मणा ॥ २८ ॥

इदं ते परमं रूपं मम लीलासुखाय च ।
लीलापरिकरः सर्वस्त्वमेव विनिरूपितः ॥ २९ ॥

[1]त्वमेवोपादानरूपश्च सर्वस्य जगतः प्रभो ।
तस्मादेवं मनोमोहं न त्वं कर्त्तुमिहार्हसि ॥ ३० ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे उत्तरखण्डे द्वात्रिंशोऽध्यायः ॥ ३२ ॥

त्रयस्त्रिंशोऽध्यायः

लक्ष्मण उवाच

परब्रह्मस्वरूपस्त्वं राम राजीवलोचन ।
त्वमेव परमं धाम जीवानां त्वं परा गतिः ॥ १ ॥

न हि ते भगवंस्तत्त्वं विदन्ति विबुधा अपि ।
न वेदा नापि योगाङ्गैः साधितात्मान ईश्वराः ॥ २ ॥

त्वमेव ते परं तत्त्वं जानासिदितिजार्दन ।
तव भक्त्या त्वत्स्वरूपं भक्ताः केचन जानते ॥ ३ ॥

---

१. पादेऽस्मिन्नक्षराधिक्यमार्षः ।

तवैवानुग्रहे हेतुर्विद्वत्ता नोपयुज्यते ।
शब्दः खलु भवद्रूपमुपदेष्टुमथार्हति ॥ ४ ॥
सोऽपि तात्स्थ्यभावेन न स्वरूपेण कर्हिचित् ।
लक्ष्मणं तव नास्त्येव लक्ष्यरूपात् परं प्रभो ॥ ५ ॥

लक्ष्यलक्षणयोरैक्यं त्वत्स्वरूपनिरूपणे ।
मयि लीलारसानन्दोभूयान् विस्तारितस्त्वया ॥ ६ ॥
तेनैव प्रसृतं प्रेम विश्लेषभयवर्द्धनम् ।
स्वरूपाकलनेनैतत्स्थिरंमयि विधेहि भोः ॥ ७ ॥

अपि नाम यदानाथ तव लीला रसात्मिका ।
प्राकट्यमभ्युपैत्येषा तदा संस्थास्ति कालतः ॥ ८ ॥
अप्राकट्यं यदा नाथ प्रयासि लीलया सह ।
तदा चकास्ति संस्थानो रामैतत्प्रतिबोधय ॥ ९ ॥
नहि नो भगवन् राम वासनान्या विजृम्भते ।
ऋते त्वच्चरणाम्भोजधूलिधूसरतां तनोः ॥ १० ॥

एतावदेव नः प्रार्थ्यं नाथ जन्मनि जन्मनि ।
श्रीराम तव पादाब्जतललग्ना वयं सदा ॥ ११ ॥
श्रीश्च शेषश्च ब्रह्मा च रुद्रश्चेन्द्रश्चयत्स्पृहाम् ।
नित्यं कलयते राम तादृशं नेतरत्सुखम् ।
मुक्त्यानन्दादिकं सर्वमिहैवान्तर्विशत्यहो ॥ १२ ॥

[1]एतस्मादतिरिक्तं यत्पारमेष्ठ्यं महेन्द्रताम् ।
सार्वभौमपदं वापि न वयं स्पृहयामहे ॥ १३ ॥
वयं नित्यं भवत्संगे कथं नाथ रमामहे ।
ऐक्याद्वा भेदतो वापि संस्थानो वक्तुमर्हसि ॥ १४ ॥

श्रीराम उवाच

भूमेर्भारं परिज्ञाय क्लेशं च स्वर्गवासिनाम् ।
भक्तानां च महद् दुःखं स्वेच्छया च विशेषतः ॥ १५ ॥
प्रेमभक्तेः प्रपोषार्थं भूयस्तत्साधनाय च ।
विहरामि स्वेमहिम्नि प्रमोदवनसंज्ञिनि ॥ १६ ॥

प्रादुर्भवामि चेद्भ्रातः सहैव भवदादिभिः ।
भवाञ्छेषोऽशेषसंज्ञः श्रीश्च शक्तिः सुखप्रदा ॥ १७ ॥

---

१. नास्ति–बड़ौ० ।

लीलापरिकराश्चान्य इत्येते भवदादयः ।
सर्वत्र माययाच्छन्नः स्वेच्छामात्रेण तां पुनः ॥ १८ ॥

[1]विभिद्य भित्त्याद्यावरणमपसार्य यथा नभः ।
प्रादुर्भूतः सर्वमुक्तिस्तिरोधाय नराकृतिः ॥ १९ ॥

यावदिच्छाप्रसारो मे तावन्मायाप्रसारणम् ।
तदा सर्वे प्रपश्यन्ति मां सच्चित्सुखरूपिणम् ॥ २० ॥

दितिजा दनुजाश्चापि राक्षसास्तामसा जनाः ।
पशवः पक्षिणः कीटा अन्ये च विविधा जनाः ॥ २१ ॥

तेषु येषामहं स्वेच्छामात्रेण परमोहिनीम् ।
दूरीकरोमि तां मायां लोके मामुपयान्तिते ॥ २२ ॥

मदिच्छामात्रमाश्रित्य न भवेन्मुक्तिसाधनः ।
अव्यक्तत्वात्सखे तस्याः प्रयतेत्किल्विषैरिह ॥ २३ ॥

एतत्कार्यं बुद्धिमता प्रशस्तं कर्म यद्भवेत् ।
वैराग्यं चित्तसंशुद्धिर्नामानिमम भावनम् ॥ २४ ॥

सद्गुरोराश्रयश्चैव विश्वासो नामकीर्तने ।
एवं कुर्वन् नरः सर्वकर्माण्यतितरेद्ध्रुवम् ॥ २५ ॥

यावत् प्रारब्धशेषं पु तिष्ठेदायुः परिक्षिपन् ।
आयुरन्ते व्रजेन्नित्यं मम धाम मदाश्रयः ॥ २६ ॥

लक्ष्मण उवाच

भगवन् रघुशार्दूल तव भक्तिर्मलापहा ।
यथैव सर्वकर्माणि क्षिणोति शतजन्मनाम् ।
प्ररब्धान्यपि कर्माणि तथा किं न क्षिणोति सा ॥ २७ ॥

श्रीराम उवाच

सत्यं लक्ष्मण मद्भक्तिः प्रारब्धमपि धावति ।
अनुद्दीप्ता न तु सखे समुद्दीप्तैव सा तथा ॥ २८ ॥

महाभावं परिप्राप्ता समुद्दीप्तेति वर्ण्यते ।
प्रेमानन्दरसाकाराधिका मुक्तिपदादपि ॥ २९ ॥

तस्यां तु सम्प्रजातायां वशीभूतो भवाम्यहम् ।
स्वर्गापवर्गगतिदे स्वस्वरूपप्रदेऽपि च ॥ ३० ॥

---

१. पादेऽस्मिन्नक्षराधिक्यमार्षः ।

वशीभूते मयि पुंसां किमशक्यं नु विद्यते ।
साधनावधिसंजाता साधनेऽप्यूनवृत्तिका ।
अनुद्दीप्तेति सा प्रोक्ता नित्यमेव फलोन्मुखी ॥ ३१ ॥

किं तु कर्मध्वंसकरी ज्ञानमार्गाद्गरीयसी ।
साधनानां च सर्वेषामेका मुख्यतमा त्वियम् ॥ ३२ ॥

सर्वाण्येव च कर्माणि भस्मीकुर्यादियं तथा ।
हित्वा प्रारब्धकर्मैकं भोगनाश्यं यतोहितत् ॥ ३३ ॥

इदं ते सर्वमाख्यातं मत्प्राकट्यप्रयोजनम् ।
प्राकट्यान्ते तथैवाहमप्राकट्यं व्रजामि च ॥ ३४ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे उत्तरखण्डे त्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥

चतुस्त्रिंशोऽध्यायः

श्रीराम उवाच

यत्र[1] पूर्वं स्थितश्चान्तर्हितो लीलाप्रवर्त्तकः ।
यत एवोपगच्छामि जनदृग्गोचरत्वकम् ॥ १ ॥

तत्रैवाहं पुनर्यामिव्यापके निजधामनि ।
इह तत्रामुत्र सदा सर्वत्र प्रतिभाति सत् ॥ २ ॥

ज्ञानिनां चापि भक्तानां नित्यलीलारसात्मकम् ।
आदाय[2] परिकरं सर्वं कार्यान्ते प्रविशाम्यहम् ॥ ३ ॥

आत्मन्येव वियोगेन चात्मानं संहराम्यहम् ।
निर्गुणं सच्चिदानन्दं कालमायातिरस्करम् ॥ ४ ॥

प्रमोदवनसंज्ञं तन्मम धाम विराजते ।
गमनं गगनाकारं सुविशालं मनोहरम् ॥ ५ ॥

कल्याणगुणसम्पन्नं नित्यरूपं सनातनम् ।
सर्वर्तुसुखसंयुक्तं नाना भोगविशारदम् ॥ ६ ॥

---

१. प्रमोदवने–टि० बड़ौ० । २. पादेऽस्मिन्नक्षराधिक्यमार्षः ।

नानालक्ष्मीविलासोत्थकोटिब्रह्मसुखोत्तरम् ।
तुच्छीभवन्महायोगनिरन्तरमहत्सुखम् ॥ ७ ॥

पीयूषद्रवनिर्जेत्रमहामधुरिमास्पदम् ।
अनन्तगुणसम्बद्धं सर्वदोषविवर्जितम् ॥ ८ ॥

अनेककौतुकागारं समस्तरसरञ्जितम् ।
ऊधोभारभराक्रान्तैः पयःपीयूषसंस्रवैः ॥ ९ ॥

हरिच्छाद्वलमध्यस्थैः सवत्सैः शृङ्गमञ्जुलैः ।
चन्द्रवर्णैतर्घनश्यामैः स्वर्णवर्णैर्मनोहरैः ॥ १० ॥

अयुतप्रयुतातीतगणसौहार्दवारिभिः ।
[1]एकवर्णसमाकारमुख्यपृष्ठगतापरैः ॥ ११ ॥

गवेन्द्रसुखिताधीशसर्वस्वार्पितसद्व्रतैः ।
गोकुलैः क्रोडनोत्साहैर्नेचिकीचक्रमण्डलैः ॥ १२ ॥

वत्सैर्वत्सतरीभिश्च तथा वत्सतरैः शुभैः ।
ललाटोदितचन्द्राङ्कैः साक्षाल्लक्ष्मीमहोदयैः ॥ १३ ॥

इतस्ततः कूर्दमानैर्गोष्ठाङ्गणमहोत्सवैः ।
हंभारवतिमधुरस्वरैर्मण्डितमद्भुतम् ॥ १४ ॥

हेमाद्रिदिव्यरत्नाद्रिसानुच्छायावनावृतम् ।
आनन्दपर्वतानेकशृङ्गच्छायावनान्वितम् ॥ १५ ॥

सहजानन्दिनीनित्यंकेलिपर्वतमञ्जुलम् ।
विरजाख्यसदानन्दासरयूनीरसेविभिः ॥ १६ ॥

महाचन्द्रसरस्तोयसम्बन्धतुहिनोपमैः ।
सततं पवनाक्रान्तिपरागपटलाञ्चितैः ॥ १७ ॥

कदम्बवनसम्बन्धान्महामधुरसौरभैः ।
सहजासहजेशानप्रसादसमवासकम् ॥ १८ ॥

वहद्भिरिव माङ्गल्यभाजनं पीतमम्बरम् ।
रणन्मधुकरारावकिंकिणीजालमालिभिः ॥ १९ ॥

समीरणैः सुमधुरैरितस्तत उदीरितम् ।
नानारासरसोल्लासिगुणवन्मत्तगोपिकम् ॥ २० ॥

गोपालबालकेलीनामाश्रयं सर्वसुन्दरम् ।
अनेककौतुकोत्कण्ठ्यप्रेमानन्दकलाकुलैः ॥ २१ ॥

---

१. एकवर्णास्तुल्याकाराः मुख्याः पृष्ठरक्षकाश्चपरे गोपालापेषु तानितैः टि०–बड़ौ० ।

निरन्तरोत्साहवद्भिर्नागरैर्विविधैर्जनैः ।
साम्यैरपिधृतानेकनगराचारकोविदैः ॥ २२ ॥

सदा मण्डयिष्यमाणं मण्ड्यमानं च मण्डितम् ।
गोपैश्च गोपिकाभिश्च नागरीभिर्निषेवितम् ॥ २३ ॥

अलंकाराङ्गरागादिशृगाररचनामयम् ।
वस्त्रभूषणवैविध्यविधिक्रान्तं गृहे गृहे ॥ २४ ॥

श्रीरामरमणीवृन्दकृतकन्दर्पकेलिकम् ।
मानप्रसादनोद्युक्तश्रीरामरमणान्वितम् ॥ २५ ॥

हरिनामाधारपरैर्वैष्णवैः प्रेमपालिभिः ।
सखीदूत्यादिविविधसमाचारनिरन्तरैः ॥ २६ ॥

सहजारामसंयोगरसास्वादपरायणैः ।
विप्रयोगरसस्वादपरितप्तैः क्वचित् क्वचित् ॥ २७ ॥

आकीर्णं रसिकैर्जीवैर्विशुद्धैर्नित्यनिर्गुणैः ।
सांसारिकजनोद्धारकरुणापाङ्गभङ्गिभिः ॥ २८ ॥

मुग्धाप्रगल्भादिभेदकान्ताजनसमावृतम् ।
रामप्रेमसमाचारमाङ्गल्यावत्सलोत्तमम् ॥ २९ ॥

श्रीरामगुणसंश्रावपरायणसखीजनम् ।
स्वाधीनपतिकाश्रीमत्सहजानन्दिनीकृतैः ॥ ३० ॥

लीलाचरित्रकलनैरुद्भूतयशसाऽचितम् ।
आधिदैविककालोत्थसर्वदिव्यगुणन्विताम् ॥ ३१ ॥

श्रीरामप्रेमकीर्तिभ्यां मण्डितं प्रतिमन्दिरम् ।
विस्तीर्णपणविन्यस्तनवनिध्यधिकैरपि ॥ ३२ ॥

अनेकरूपसंचारिश्रीमद्दिव्यरमाञ्चितम् ।
कोकिलामधुपारावावसन्तश्रीविराजितम् ॥ ३३ ॥

नृत्यन्मत्तमयूरश्रीशोभाप्रावृड्घनद्युति ।
श्रीरामरूपमाधुर्यसहजातनुकान्तिभिः ॥ ३४ ॥

एकतः प्रावृषाकारं परतः शरदाञ्चितम् ।
चकोरचञ्चूपुटकाचान्तरामेन्दुचन्द्रिकम् ॥ ३५ ॥

सर्वोत्तमगुणावास सर्वोत्तमशुभान्वितम् ।
सर्वोत्तमरसाभ्यक्तं महाभावविभावितम् ॥ ३६ ॥

हावभावकलामूलं कुसुमाकरशोभितम् ।
सर्वनित्यपुरीवासं मथुरादिपुरीगणैः ॥ ३७ ॥

मूर्तिमद्भिर्महोदाररामानन्दैकहेतवे ।
उपास्यमानं नितरां महासौभाग्यकाङ्क्षिभिः ॥ ३८ ॥

खेलत्खञ्जननिर्जैत्रसहजालिविलोचनम् ।
किशोरीकोटिपादाब्जनूपुरध्वनिनादितम् ॥ ३९ ॥

नित्यकाम[1]दुधोत्फुल्लमहावृक्षकदम्बकम् ।
लतानित्यनिकुञ्जाढ्यं संकेतस्थलमञ्जुलम् ॥ ४० ॥

अनेकवल्लीविपिननृत्यत्केकिगणावृतम् ।
मनोज्ञकुञ्जपुञ्जाढ्यं सकलर्तुसुखावहम् ॥ ४१ ॥

अनेकपर्वतवरस्रवन्निर्झरनादितम् ।
रत्नधातुमयानेकशिखरोतुङ्गमन्दिरम् ॥ ४२ ॥

दरीमन्दिरविश्रान्तश्रीरामरमणीगणम् ।
कूजत्पक्षिगणस्थानवृक्षशाखाविराजितम् ॥ ४३ ॥

निर्मलाम्बुसरिद्वीचीक्षालितानेकसत्तरूम् ।
विचित्ररत्नसोपानयुक्तानेकसरोवरम् ॥ ४४ ॥

हंसकारण्डवाद्याभिः पक्षिराजीभिराचितम् ।
बहुरासविलासादिकेलीनित्यरसोत्तरम् ॥ ४५ ॥

माङ्गल्यकाकीर्तिगानमत्तानेकपुरन्ध्रिकम् ।
कदम्बवनमध्यस्थवीणावेणुनिनादितम् ॥ ४६ ॥

अवाङ्मनससंस्कारं निर्गुणं च निरञ्जनम् ।
चिन्मात्रमानन्दमयमक्षरब्रह्ममध्यगम् ॥ ४७ ॥

आविर्भावावतारांशकलाव्यूहप्रसूतिदम् ।
नित्याविर्भावललिताभवतारिपदालयम् ॥ ४८ ॥

निरंशंनिष्कलंशान्तं सर्वोपनिषदीडितम् ।
अप्राकृतमवाच्यं चाप्रमेयमभिधातिगम् ॥ ४९ ॥

नित्यैः परिकरैर्युक्तं नित्यलीलारसात्मकम् ।
नित्यानन्दस्वरूपं च नित्यविग्रहशोभितम् ॥ ५० ॥

सर्वावतारमूलं यदविद्यैकतिरोहितम् ।
विद्यामात्राधिकारेण भक्तिमात्रस्फुरत्वकम् ॥ ५१ ॥

प्रमोदविपिनं नित्यं रामलीलासमाकुलम् ।
यस्य धाम सुप्रकाशं नित्यमेव प्रतिष्ठितम् ॥ ५२ ॥

---

१. आर्षप्रयोगः ।

सर्वकामफलैर्भोगैराक्रीडत्स्वजनैः सह ।
श्रीरामोऽहंसदाऽऽस्तेवै नित्यं क्रीडन्ति तेन ते ॥ ५३ ॥

मन्मयास्तत्परं स्थानं ततोऽहं प्रकटोऽभवम् ।
तत्र रमामि लीलाभिः सर्वाभिः परितोऽव्यथः ॥ ५४ ॥

लीलापरिकराश्चापि ततो मे प्रकटा इह ।
सर्वानुभवसिद्धयर्थं साधूनां भाव्यसिद्धये ॥ ५५ ॥

दुःखस्य हरणार्थं च भक्तानां सानुवर्त्मनाम् ।
स्थापयित्वा पदाम्भोजं नौकावद्ध्रुवसागरे ॥ ५६ ॥

प्रमोदविपिने नित्यं विहरामि परात्परम् ।
सीता लोकेति विख्यातं सहजानन्दिनीपदम् ॥ ५७ ॥

न हि मे लौकिकी व्यक्तिः परस्य ब्रह्मणः सखे ।
लीलापरिकराः सर्वे भवदाद्याः प्रकीर्तिताः ॥ ५८ ॥

तत्र मां सहजाकेलिसक्तं चित्सुखविग्रहम् ।
स्तुवन्त्यप्राकृतैः शब्दैर्वेदा मूर्तिधराः सखे ॥ ५९ ॥

सहजानन्दिनीं पूर्णां परां लक्ष्मीं सनातनीम् ।
आलिङ्ग्य नित्यविपिने प्रमोदवनसंज्ञिनि ॥ ६० ॥

रमामि रमणैर्नित्यैः शरन्माधव सम्भवैः ।
सोऽयं मम परो लोकोऽस्म्यक्षरान्दमध्यगः ॥ ६१ ॥

प्रेमानन्दमयः साक्षान्नित्यनित्यः परात्परः ।
एवं मे सम्भवं नित्यं प्रमोदवनलोकतः ॥ ६२ ॥

यो वेत्ति स नरः साक्षान्मम भक्तिं परां लभेत् ।
मम रूपं च लोकं च नाम लीलां च मत्कृताम् ॥ ६३ ॥

लीलापरिकरांश्चापि वेत्ति नित्यतया तु यः ।
स लभेन्नित्यलीलायां प्रवेशं नित्यधामगः ॥ ६४ ॥

एवं यो वेत्ति मद्भावं तव संस्थां च मानवः ।
स लभेन्मे प्रेमभक्तिं प्रेमानन्दस्वरूपिणः ॥ ६५ ॥

एतत्ते सर्वमाख्यातं प्राकट्यं यत एव मे ।
अप्राकट्यं च यत्राहं रमामि समये सखे ॥ ६६ ॥

समयश्चापि मद्रूपः कालः परमभीषणः ।
आधिदैविकाध्यात्मिकाधिभौतिकसुविस्तरः ॥ ६७ ॥

सेवकः परमोऽयं मे विश्वं विपरिणामयन् ।
यथाहं फलसंसिद्धौ हेतुस्तद्वदयं सखे ॥ ६८ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे उत्तरखण्डे चतुस्त्रिंशोऽध्यायः ॥ ३४ ॥

पञ्चत्रिंशोऽध्यायः

ब्रह्मोवाच

एवं समाहितो भ्राता रामेण प्रभुणा स्वयम् ।
लीलातिरोधानभवं संक्लेशं विरहात्मकम् ॥
मुमोच लक्ष्मणः सद्यो बहुधा सम्प्रबोधितः ॥ १ ॥

सहजानन्दिनीं शक्तिं ज्ञात्वास्य परमात्मनः ।
सर्वां लीलां नित्यतया मन्यमानः सुनिर्भयः ॥ २ ॥

तदिच्छामात्रतश्चास्यास्तिरोभावं विदन्नभूत् ।
सर्वत्र विगताशङ्कस्तदेकाश्रयतत्परः ॥ ३ ॥

लक्ष्मण उवाच

सत्यं तव परा लीला कालमायातिगा प्रभो ।
सैवास्ति जीवनं नाथ भक्तानां प्रेमचेतसाम् ॥ ४ ॥

गतं विरहकातर्यं त्वत्स्वरूपप्रबोधनात् ।
नित्यमेव भवत्सङ्गे रमयामि च राघव ॥ ५ ॥

एकान्तिनो वयं दासा भवत्सङ्गे रमामहे ।
नित्यानन्दसुखे मग्ना निर्भयाः स्म प्रभो सदा ॥ ६ ॥

लीलापरिकरैः साकं सदैव रमसेऽनिशम् ।
विशिष्टमेव रूपं ते प्रमुद्वनमहीतले ॥ ७ ॥

इत्युक्त्वा लक्ष्मणो रामं सरयूतीरमाश्रितः ।
निजप्रासादवर्ये स रेमे परमनिर्वृतः ॥ ८ ॥

आमन्त्र्य रामं भ्रातरं स्वपुरं समगात्ततः ।
सुवर्णरत्नप्रासादप्रभाद्योतितदिक्तटम् ॥ ९ ॥

अनेकवापिकावारिफुल्लेन्दीवरपङ्कजम् ।
गुञ्जद्भ्रमरसंदोहसम्बद्धकुसुमाकरम् ॥ १० ॥

अनेकवाटिकावृन्दविकासिबहुभूरुहम् ।
अनेकलक्ष्मीप्रसरं गायत्किन्नरसुन्दरम् ॥ ११ ॥

गन्धर्वललनागीतगम्भीरध्वनिमञ्जुलम् ।
चलत्कुरङ्गनयनामञ्जीरध्वनिनादितम् ॥ १२ ॥

नर्तकीनृत्यवलितं विलासशतसंकुलम् ।
ऊर्मिलाभोगललितं कोकिलाकुलनादितम् ॥ १३ ॥

विचित्रचित्ररचनारामणीयकसंयुतम् ।
त्रैलोक्यलक्ष्मीशोभाढ्यं बहुसम्पद्विराजितम् ॥ १४ ॥

सारिकावदनोत्थेन रामनाम्ना निनादितम् ।
स्थले स्थले कणद्वीणासम्बद्धरामनामकम् ॥ १५ ॥

रत्नप्रासादकिरणप्रकाशितदिगन्तरम् ।
मणिकुट्टिमसंक्रान्तलक्ष्मणप्रतिमाकुलम् ॥ १६ ॥

नित्यंवसन्तसदनं नित्यवर्षासुखप्रदम् ।
आराम नृत्यत्प्रमदमयूरगण संकुलम् ॥ १७ ॥

लक्ष्मणः स्वपुरं गत्वा विरेजे रामसेवकः ।
यथा भोगवतीमध्ये वासुकिर्नाम सर्पराट् ॥ १८ ॥

तत्र श्रीरामसहितो रेमे भोगैरनेकधैः ॥ १९ ॥

लीलामहारसालं त भावयानः प्रतिक्षणम् ।
किंचित्समुद्विग्नमना राम सांनिध्यनिर्वृतः ॥ २० ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे उत्तरखण्डे पञ्चत्रिंशोऽध्यायः ॥ ३५ ॥

षट्त्रिंशोऽध्यायः

ब्रह्मोवाच

कदाचिद्रघुशार्दूलं रामं त्रैलोक्यसुन्दरम् ।
प्रभाविणं विक्रमिणमुत्त[1]रौत्तरगुणाकरम् ॥ १ ॥

---

१. पादेऽस्मिन्नक्षराधिक्यमार्षः ।

ज्ञात्वा पुरुषवर्यं तं साक्षाद् रामं परं विभुम् ।
अयोध्यास्था जनाः सर्वे ऊचिरेऽन्योन्यमादृताः ॥ २ ॥

जना ऊचुः

अहो अयं कोऽपि महान् वरेण्यो रामः कलाकोटिधरोऽवतारी ।
आजन्मतोऽद्यावधि सर्वमुत्तमं चक्रे चरित्रं परदुःखवारणः ॥ ३ ॥

तथा ह्यनेन प्रसभं निपातिता दैतेयवंशाः कति नो धरण्याम् ।
येषां बलं शक्रमुखैः सुरैरपि प्रभावयुक्तैरपि दुर्निवार्यम् ॥ ४ ॥

अनेन बालेन हता जिघांसुः सा राक्षसी द्वित्रिमासोद्भवेन ।
याभूद् बहुक्रोशमितोग्रविग्रहा शैलेन्द्रवक्षोजवतीव पूतना ॥ ५ ॥

हतः स खट्वामधिशय्य तिष्ठता खट्वासुरो नामपरः शिशुग्रहः ।
अदृश्यरूपः खलुरावणस्य यो हितप्रदः कुञ्जरकोटिविग्रहः ॥ ६ ॥

हतः स वात्या प्रचयात्मना चरन् महासुरो बालकेलीपरेण ।
येनान्तरिक्षेऽप्युपात्तवेगिना बलाधिकेन प्रसभं हारकेण ॥ ७ ॥

यः कावपि क्षितिरुहौ गगनस्पृशाङ्गौ-
शाखाभुजैरपि गतौ घनमण्डलान्तम् ।
स्पृष्ट्वा पदाम्बुजयुगेन च शापजातौ-
कौचित्सुरौ समुदपाटयदात्तलीलः ॥ ८ ॥

येनातिवेगा दुदपाटि भूरुहौ माङ्गल्य कामात्तृनिबद्धदाम्ना ।
ततो विनिर्गम्य च केनचित्स्तुतः पुंसा सुवेशेन कृताञ्जलेन ॥ ९ ॥

साक्षान्महाविष्णुरिति प्रतीयते भाग्येन तेनामितवैभवाढ्यः ।
यः कुञ्जरैरप्यतिविक्रमोद्धुरैर्न भञ्जनीयोऽप्यतियत्नेन तावत् ॥ १० ॥

यः कालमेघामितवृष्टिवेपितं संलक्ष्य लोकं निजमातपत्रम् ।
विस्तारयामास दशैकयोजनच्छायाकरं गोपतिगोधनोपरि ॥ ११ ॥

यस्मिंश्च सापश्यदशेषविश्वकं माङ्गल्यका श्रीजननी समंततः ।
सपर्वतं साब्धिजलं सकाननं विचित्ररूपं सर्वमेकत्र संस्थम् ॥ १२ ॥

वितर्कयामास प्रथमं ततस्तं लोक धात्रा सहितं सभूधरम् ।
कदाचित्कतुं श्रीभगवान् राघवेन्द्रः परीक्षणं समवेक्ष्य विचित्रलीलः ॥ १३ ॥

योऽयं ततः सम्भवत्सकलस्वरूपः स्वांशके न हि रचिताखिलसत्प्रपञ्चः ।
दृष्ट्वा च यस्य बहुरूपताया व्रजान्तरत्यद्भुतां भवनशक्तिमनन्तशक्तेः ॥ १४ ॥

धाता पदाम्बुरुहयोर्न्यपतत्प्रभग्न लोकेशमानविभवोन्नतिरात्तदास्यः ।
गावश्च येन परतः खलु पाल्यमानाः साक्षान्महोपनिषदश्च तदेकदेशाः ॥ १५ ॥

शाखाः पयश्च परमाः खलु भक्तिरासोत्तद्दोहनं विहितवान् ननु यः परोक्षः ।
गोपाश्च ते वै गुरवः सम्प्रतीता वेदाचार्याः केवलं दिव्यरूपाः ॥ १६ ॥

गोप्यस्तथा भक्तितन्व्यः प्रतीतास्तावत्प्रतीता भुवने सन्ति नान्याः ।
पश्चेन्द्रयागविभवैर्निजवैष्णावानां पूजां विधापयितवान्नृपतिं समर्थः ।
तेनोद्दुःखं च सुरराजमपीपतद्यो लोकेशगर्वगुरुशैलभरात्प्रमत्तम् ॥ १७ ॥

यो रासभाकृतिधरं खलु राक्षसेन्द्रं सद्यो व्यनाशयदनन्तबलः प्रमत्तः ।
पश्चादहिं च निरकाशयदुद्धमन्तं ज्वालाविषं व्रजगवामहितं सरव्वाः ॥ १८ ॥

यश्च द्विजेषु कृतयाचनकोऽन्नहेतोर्यागक्रियाविवशमूढसमस्तधीषु ।
तेषां बधूश्च परमान्नकृतोपहाराअभ्युद्दधार पतिभिः सह दिव्यकेलिः ॥ १९ ॥

माङ्गल्यकापतिमथो सुखिताख्यगोपं नीतं यमेन निजसादनमुग्रशक्तिः ।
पश्चान्निनाय च स्वयं विहितात्मपूजावित्रासयन् प्रसभमन्तुमनन्तसारः ॥२०॥

यश्चस्वसौन्दर्यविमोहिताभ्यो व्रजाङ्गनाभ्यो व्रतकर्शिताभ्यः ।
ददौ स्वरूपं जनकेन्द्रपुत्रो प्रसादकाले प्ररमप्रसन्नः ॥ २१ ॥

दुर्वास सादापयदात्मलब्धये यो जानकीमन्त्रवरं तथाभ्यः ।
आविष्ट रूपाश्च तया तथैता रासप्रसंगेऽरमयत् प्रवीणः ॥ २२ ॥

यश्च व्रजान्तर्निवसन्गवेन्द्रं माङ्गल्यकां चैव विमुक्तभेदौ ।
तौ पुत्रभावेन पुपोष पूर्णप्रेमामृतेनातिसुदुर्लभेन ॥ २३ ॥

यश्च स्वरूपं विधिशेषलक्ष्मीरुद्रादयलभ्यं परमं ब्रह्मसंज्ञम् ।
वितीर्णवांञ्छीपशुयाङ्गनाभ्यः प्रेमप्रवृत्तिं भुवि दर्शयानः ॥ २४ ॥

यः प्रायशो लभ्यत एव नागमैर्न योगदृष्टिप्रसरैस्तपोभिः ।
न ज्ञानमार्गेण न कर्मणा च प्रेमाख्यभक्तिप्रियतामभ्युपेतः ॥ २५ ॥

यो मोहयन् मुरलीनाददिव्य पीयूषधाराभिरनङ्गगर्वभित् ।
नागीर्नरीश्चैव नारीः सुरीश्च गन्धर्वयक्षोत्तमकन्यकाश्च ॥ २६ ॥

योऽपाद्वानलमनल्पमुदग्ररूपं संशुष्कतिन्दुकवनीतरुजातलग्नम् ।
उज्ज्वालजिह्वमपिधाय नभोग्रसन्तं गोसंघगोपतिसमूहकृतासुरक्षः ॥ २७ ॥

इच्छामात्रेण यश्चक्रे बाण प्रेरणया परम् ।
लङ्केशसैन्यकदनं लङ्केशं च न्यपातयत् ॥ २८ ॥

यो तौ शरौ प्रहितौ राघवेण तौ भूत्वा च स्वं रूपमङ्गीकृतवन्तौ ।
गोदावरीतीरमुपेत्य चक्रेतु दिव्यां केलिं सीतया सार्द्धमुच्चैः ॥ २९ ॥

इत्यादयनेकानि दधच्चरित्राण्युपागतो राघवेन्द्रस्य गेहे ।
कौसल्याया दृष्टिसुखं वितन्वन्नेको रामः सम्प्रतीतश्चतुर्धा ॥ ३० ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे उत्तरखण्डे
षट्त्रिंशोऽध्यायः ॥ ३६ ॥

सप्तत्रिंशोऽध्यायः

जना ऊचुः

अहो अतः श्रीरघुवर्यगेहे श्रीमत्ययोध्यानगरे तदैव ।
अत्यद्भुताः सम्पद आविरासुर्यास्ताः प्रमोदाख्यवने प्रसिद्धाः ॥ १ ॥

ऋतुर्वसन्तोऽत्र समावसत्सदा गुञ्जद्द्विरेफावलिरुत्कणात्मिकः ।
गृहे गृहे चात्र समृद्धयोऽभवन् साक्षाद्रमावल्लभवासयोग्याः ॥ २ ॥

कदाचिदेष प्रभुरात्मनः पितुश्चक्रे गृहादानयनं प्रचेतसः ।
दधत्स्रजं चापि तदोपढौकितां महार्हरत्नप्रकरैरुपेताम् ॥ ३ ॥

रमन् वसन्तोत्स्तवजैर्विलासैः समागतश्चारुसाकेतपुर्याम् ।
छायामयं संन्यवधीन्महासुरं शरेण रुद्रादिसुरानिवार्यम् ॥ ४ ॥

वसन्नयोध्यानगरे यदीशः करोति विश्लेषरुजां निवारणम् ।
आभोरिकाणां हृदयेषु नित्यं जगत्त्रयव्यापकरूपसारः ॥ ५ ॥

प्राणाधारश्च यस्यापि प्रायः प्रमुदकाननम् ।
विना तेन क्षणमपि वर्त्तते घनसुन्दरः ॥ ६ ॥

व्रजं दृष्ट्वा व्रजतः प्रेममग्नं यः स्वात्मदूतप्रवरान् कुमारान् ।
संस्थापयामास निजैकपार्श्वे तत्रैव संदर्श्य व्रजं समस्तम् ॥ ७ ॥

विश्वामित्रेण तौ ज्ञात्वा पूर्णौ श्रीपुरुषोत्तमौ ।
नीतवान् स्वगृहं यज्ञविघ्नराक्षसहन्तवे ॥ ८ ॥

न ह्यन्येन विना रामं भगवन्तं रमापतिम् ।
विश्वामित्रयज्ञरक्षां कर्त्तुं शक्या स्ववीर्यतः ॥ ९ ॥

मैथिलीं चोपयेमे यो सह भ्रात्रा रमां प्रियाम् ।
साक्षात्परां स्वयं लक्ष्मीं चतुर्धा शर्मसंगिनीम् ॥ १० ॥

निन्ये सुबाहुप्रमुखानसुरान् यमसादनम् ।
यज्ञं प्रवर्त्तयामास यज्ञभुक्प्रवरः स्वयम् ॥ ११ ॥

विश्वामित्रस्य तुष्टाव यज्ञऋक्सामसूक्तिभिः ।
भङ्क्त्वाहरधनुः सद्यः प्रचलद्बाहुलीलया ॥ १२ ॥
मैथिल्या च स्वयंलक्ष्म्या शोभयामास सुन्दरः ।
अजयत्समरे पश्चाद् भार्गवं स्वांशमूर्जितम् ॥ १३ ॥

न ह्यन्योऽपि विधातुंस्याच्छक्त ईदृशं कर्म तत् ।
येन त्रिःसप्तकृत्वो भूद्विजेभ्यः प्रतिपादिता ॥ १४ ॥
लतारूपास्ततो नारीर्विधिमानससम्भवाः ।
स्वाङ्घ्र्याब्जधूलिसंस्पर्शमुदिता ऊढवान् विभुः ॥ १५ ॥

इदं चापि ऋते साक्षाद् रामचन्द्रं करोति कः ।
परस्तात् प्राकृतं सर्गमनादृत्य स्थिताश्चिरात् ॥ १६ ॥
अप्राकृतं मनोहारि दृष्ट्वा रूपं रमापतेः ।
मोहिताः कामतश्चैता विधिमानसजाः श्रियः ॥ १७ ॥
कदाचिद्भ्रगवाञ्छेषो साकेतं श्रीहरेः पदम् ।
ययौ तत्र च भूरीणि दृष्ट्वा सिंहासनानि सः ॥ १८ ॥

अपश्यत्तेषु निखिलानवतारांश्च मध्यतः ।
दिव्ये सिंहासने पश्चादमुमेव वरं प्रभुम् ॥ १९ ॥
अन्यांश्च रामवदने दत्तदृष्टीन् व्यलोकत ।
ततः क्षणेन सर्वांस्तान् विलीनान् रामविग्रहे ॥ २० ॥

दृष्ट्वा प्रमुदितः शेषः पूर्णमेनममन्यत ।
इदमद्भुतचारित्रमस्य पूर्णत्वबोधकम् ॥ २१ ॥

सीतापतेः श्रीरामस्य भगवत्त्वं च शुश्रुम ।
पितुश्चाप्यश्वमेधांश्च गन्धर्वान् प्रविजित्य यः ॥ २२ ॥
समानिन्ये हयांश्चान्यान् गान्धर्वीश्चापिकन्यकाः ।
ताभ्यः स्वरूपं समदाद् भक्ताभ्यः पूर्वजन्मनि ॥ २३ ॥

इदमस्य श्रीरामस्य चरित्रं परमाद्भुतम् ।
भुवि कर्त्तुं क्षमः कः स्याद्विनाश्रीपुरुषोत्तमम् ॥ २४ ॥

अग्नींश्चैष समानिनाय भगवान् यत्रेति कोऽन्यस्ततः-
श्रीनारायणधामतः परमम् दृष्ट्वा च नारायणः ।
तुष्टाव प्रणवाधिदैवतवरः पूर्णः पुरा पुरुषं
प्राप्यानन्यनिजाधिदैवततया प्रेमप्रमोदालयम् ॥ २५ ॥

एतान्यस्य चरित्राणि सकलान्यनुशुश्रुम ।
ऋषेभ्यः पुराणेभ्यो वेदविद्भ्यो वयं सदा ॥ २६ ॥

तदत्रं भगवान् साक्षात्पूर्णः श्रीपुरुषोत्तमः ।
सर्वावताराणां मूलभूतः श्रीराम उच्यते ॥ २७ ॥

रामेति द्व्यक्षरं मन्त्रं जपतां पठतां सदा ।
संसारातपसंतापः शान्तिमेति निरन्तरम् ॥ २८ ॥

धन्या ह्यस्य पदाम्भोजं भजन्ते प्रकृतेः परम् ।
विशुद्धं सच्चिदानन्दरूपमक्षरतः परम् ॥ २९ ॥

नाम्नां श्लोकेन रूपस्य ध्यानेन भगवान् स्वयम् ।
विमोचयति संसारादित्येवमनुभूयते ॥ ३० ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे उत्तरखण्डे सर्वप्रबोधे सप्तत्रिंशोऽध्यायः ॥ ३७ ॥

अष्टात्रिंशोऽध्यायः

जना ऊचुः

अहो अयं पश्यतां नो मनांसि दृष्टीः समाकर्षति नित्यमेव ।
पारेपरार्द्धेन्दुविभासिनीभिरनल्पश्रीविग्रहमाधुरीभिः ॥ १ ॥

कदाचिद्ध्रुवसंतप्ता नाम चेदस्य जिह्वया ।
गृह्णीमस्तद्ध्रुवत्येव मनःपीयूषशीतलम् ॥ २ ॥

रूपेण कान्त्या वयसा माधुर्येण स्वभावतः ।
गुणैश्चारित्रकैर्लीलासौन्दर्यैः सर्वमोहनः ॥ ३ ॥

नात्र संदेहलेशोऽस्ति साक्षादेष स्वयं रामः ।
कारणं द्विजगोभूमिरक्षणं प्राप्य दृश्यते ॥ ४ ॥

लीलामानुषनाट्योऽसौ परब्रह्म स्वरूपतः ।
शरणं गृह्यता मेष गृह्यतां च दृढं प्रभुः ॥ ५ ॥

श्रद्धया भक्तितो मर्त्याः सर्वस्वं क्रियते निजम् ।
तथा ह्यनेन कार्याणि कृतप्रायाणि सर्वशः ॥ ६ ॥

अधुना रमतेपारं निजं धाम परात्परम् ।
अक्षरं कालमायादि समतीत्य तदूर्जितम् ॥ ७ ॥

तदाकारं न जानन्ति ह्यासुरं भावमाश्रिताः ।
तैरात्मा वञ्चितः स्वस्य भवसागरजैर्भ्रमैः ॥ ८ ॥

केचिदेनं वदन्तीह मानुषं भावमाश्रितम् ।
नहि कापि परं ब्रह्म दृश्यरूपं यदक्षरम् ॥ ९ ॥

केचिदेनं जगुर्लोकाः पुरुषं प्रवरं भुवि ।
न तु रामचन्द्रं साक्षान्मोहितास्तस्य मायया ॥ १० ॥

केचिदनं परब्रह्म प्रवदन्ति स्वबुद्धितः ।
अनुभावविशेषेण विस्फुरन्तं निजैर्गुणैः ॥ ११ ॥

ते सर्वे दुरदृष्टेन वञ्चिताः प्रभुमायया ।
कृतार्था न भवन्त्येव दैवोपहतमानसाः ॥ १२ ॥

वयं त्वेनं भजिष्यामो ज्ञात्वा श्रीपुरुषोत्तमम् ।
अनादिनिधनं साक्षात्सच्चिदानन्दविग्रहम् ॥ १३ ॥

वयं हि ज्ञातवन्तोऽस्य स्वरूपं परमेशितुः ।
अभाग्यास्तंमृतयो वै ह्यधुना न भजेम चेत् ॥ १४ ॥

को विशेषः पशुभ्यो नो ज्ञात्वैनं संत्यजाम चेत् ।
अयं श्रीभगवानस्मानुद्धर्त्ता दुःखसागरात् ॥ १५ ॥

य एनं भेजिरे पूर्वे त्यक्त्वाहंभावमात्मनः ।
मोचितास्तेऽनेकजन्मसंचिताद् दुःखसागरात् ॥ १६ ॥

कर्मणापि ह्यमुं देवं भेजिरे सनकादयः ।
ततः पक्वकषायास्ते स्वात्मबोधमवाप्नुवन् ॥ १७ ॥

अमुमेव ज्ञानमार्गं ये विदुःशुद्धचेतसः ।
वामदेवप्रभृतयस्तेऽपि चैनमवाप्नुवन् ॥ १८ ॥

तथा हि वामदेवेन प्रतिपेदे स्वतेजसि ।
अहं हि मनुरभवं लोकमर्यादपालकः ॥ १९ ॥

स्वस्वरूपाखिलान् देवान् जानामि ज्ञानचक्षुषा ।
आत्मोपादानकं विश्वमात्मन्येव प्रलीयते ॥ २० ॥

मृदुपादानका अर्थाः प्रलीयन्ते यथा मृदि ।
आदावन्ते च मध्ये च मृद्रूपेण महीयते ॥ २१ ॥

तथानादिः कालमानरहितोऽहं न संशयः ।
देशतः कालतश्चापि स्वरूपाच्च न मे त्विमाः ॥ २२ ॥

इत्येवं प्रतिपन्नः स बभूवामृतरूपकः ।
आत्मन्येव तथा ह्येनमुपासीत विचक्षणः ॥ २३ ॥

न ह्येतस्मात्परः कश्चिदुपासा विधिगोचरः ।
भक्तिस्तु सुतरामस्मिन् क्रियमाणा शुभप्रदा ॥ २४ ॥

चातुर्विध्येन मार्गस्य साधयन्ति प्रयोजनम् ।
स्वकं स्वकं जनाः सर्वे ह्यधिकारप्रभेदतः ॥ २५ ॥

तद्यूपमस्मिन् मनुजा यथारुचिप्रभेदतः ।
आसंजयन्तु हृदयं नित्यं फलमवाप्स्यथ ॥ २६ ॥

अथवा प्रकटे देवे साक्षाच्छ्रीपुरुषोत्तमे ।
सर्वान् मार्गान् परित्यज्य कायमानसदुःखदान् ॥ २७ ॥

कुर्वन्तु भजनं शुद्धं समाधाय मनःसुखम् ।
शृण्वन्त्वेवं कथास्वन्तः कीर्तयन्तु तथा मुहुः ॥ २८ ॥

[1]अभिवादयन्तु शिरसा कुर्वन्तु पादसेवनम् ।
अर्चन्तु चोपचारौघैः स्मरन्तु नामरूपतः ॥ २९ ॥

तथा शरणीकुर्वन्तु मैत्रीं कुर्वन्तु चामुना ।
निवेदयन्तु चात्मानममुष्मिन्नेव दैवते ॥ ३० ॥

अङ्गीकरिष्यति परं युष्मानेष महाप्रभुः ।
ततस्तरिष्यथ जना दुस्तरं भवसागरम् ॥ ३१ ॥

न कालो ग्रसते कच्चिदेनमाश्रित्य तिष्ठताम् ।
कालस्यापि परं कालं श्रीमन्तं भवतारकम् ॥ ३२ ॥

इदानीं व्यक्ततां यात एतदर्थमयं जनाः ।
साधूनां च मुमुक्षूणां भक्तानां च विशेषतः ॥ ३३ ॥

सर्वदुःखप्रहारार्थं प्रकटः परमार्थतः ।
य एनं निर्गुणं मायारहितं सुनिरञ्जनम् ॥ ३४ ॥

वदन्ति वेदविद्वांसो विदद्यागम्यस्वरूपकम् ।
अविद्यानाशद्वारेण स्वरूपेण प्रकाशितम् ॥ ३५ ॥

मुख्यं कार्यमिदं ह्यस्य प्राकट्ययुतवर्ष्मणः ।
अप्राकट्यं निजे धाम्नि कर्तृसंज्ञमगोचरम् ॥ ३६ ॥

तदा स्वेच्छैकमात्रेण ह्यवितर्केण मानवैः ।
जनं यमनुगृह्णीयात्तस्यैव सम्प्रकाशकः ॥ ३७ ॥

---

१. पादेऽस्मिन्नक्षराधिक्यमार्षः ।

अन्यस्य तु फलं राति प्रभुर्मर्यादमास्थितः ।
अनुग्रहस्य रीतिः स्यादमर्यादा यथा भवेत् ॥ ३८ ॥

मर्यादापोषणं चेति रीतिद्वयमुदाहृतम् ।
अप्राकट्ये भगवतः प्राकट्ये च परादरात् ॥ ३९ ॥

ब्रजेदेनं स्ववाञ्छातस्तं गृह्णातीति निश्चितः ।
यथा सर्वं परित्यज्य प्राप्तः श्रीमान् विभीषणः ॥ ४० ॥

सकृदेव प्रपद्येत यस्तवास्मीति भाषया ।
तस्मै राघवशार्दूलो ददात्येवाभयं पदम् ॥ ४१ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे उत्तरखण्डे सर्वप्रबोधेऽष्टात्रिंशोऽध्यायः ॥ ३८ ॥

एकोनचत्वारिंशोऽध्यायः

ब्रह्मोवाच

इति सर्वे मतिं कृत्वा साकेतपुरवासिनः ।
ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्चैव समंततः ।
ज्ञातस्वरूपाः सकला उपसेदुर्मुमुक्षवः ॥ १ ॥

जना ऊचुः

ज्ञातोऽसि राम परमार्थत आत्मनां त्वमात्मासि सर्वविषयाव्यभिचारिसत्त्वः ।
आकाशवद्ध्रुवसि नित्यममेयरूपस्तं त्वाममी शरणदं शरणं प्रपन्नाः ॥ २ ॥

एकोऽसि पूर्वमथ तद्वहुधासि जातः कल्पावसानसमये पुनरेक एव ।
स्वे नित्य एव महिमन्यसि संस्थितस्त्वं तं त्वाममी शरणदं शरणं प्रपन्नाः ॥३॥

भक्तोद्धृतिक्षममनेकमनन्तपारमाविर्भवत्स्वमतनो सततं भवेऽस्मिन् ।
मायागुणव्यतिकृतप्रचुरस्वरूपं तं त्वांममी शरणदं शरणं प्रपन्नाः ॥ ४ ॥

आचार्यतां प्रतियुगं वितनोषि वेदं वाक्यार्थसारविनिरूपणलब्धदीक्षः ।
वैद्योऽसिभूरि भवरोगनिवारणाय तं त्वाममी शरणदं शरणं प्रपन्नाः ॥ ५ ॥

ब्रह्मादयोऽपि तव रूपमपारमेतत्त्वन्मायया विततयाप्रतिरुद्धबोधाः ।
जानन्ति नैव भुवनेश्वर मानिनस्ते तं त्वाममी शरणदं शरणं प्रपन्नाः ॥ ६ ॥

चेष्टात्मकस्तव विभो ननु काल एष ब्रह्माण्डकोटिघटनापटुरप्रमेयः ।
यस्मिन् गताः प्रलयमब्जभुवोऽतिसंख्यास्तं त्वाममी शरणदं शरणं प्रपन्नाः ॥७॥

ब्रह्माक्षरं तव विभो प्रवदन्ति लिङ्गं पूर्तिं गता यदवधि श्रुतिवाक्समूहाः ।
त्वां न स्पृशन्ति पुरुषोत्तमभ्रनीलं तं त्वाममी शरणदं शरणं प्रपन्नाः ॥ ८ ॥

हंहो विचित्ररचनाप्रविधानदक्षं कर्मेति यत्तव वपुः फलदायि नृणाम् ।
यज्ञैस्तदिज्यमिति प्रविदन्ति केचित्तत्वाममी शरणदं शरणं प्रपन्नाः ॥ ९ ॥

भक्तेषु राम वितनोषि परानुकम्पामन्येषु कर्मसदृशं फलमादधानः ।
अप्यासुरान् हरसि ते च खलुस्वभावस्तं त्वाममो शरणदं शरणं प्रपन्नाः ॥१०॥

अप्येधतां जगति कामलवापवेषामापाततः किमशुभं त्वदुपाश्रितानाम् ।
त्वद्दिव्यरूप करुणामृतसेचितानां तं त्वाममी शरणदं शरणं प्रपन्नाः ॥ ११ ॥

कालस्य सर्वकवलीकरणोग्रमूर्ते मूर्ध्निपदं च प्रविधाय निवृत्तशोकाः ।
क्रीडन्ति तावकदृशामृतसिक्तगात्रास्तं त्वाममी शरणदं शरणं प्रपन्नाः ॥ १२ ॥

नेष्टेषु धर्म निवहेषु कलौ जनानां संतारणाय तव नाम परं समर्थम् ।
उच्चारणेन मखकोटिफलप्रदं यत्तं त्वाममी शरणदं शरणं प्रपन्नाः ॥ १३ ॥

नाम्नैव यो बत समस्तजनाघिहन्ता वाच्यः स्वरूपमहिमा किमु तावकीनः ।
निर्विघ्नसाधनशताधिककीर्तनं च तं त्वाममी शरणदं शरणं प्रपन्नाः ॥ १४ ॥

संतारिताः कति न राघव सार्वभौमपापाजनाः खसकिरातपुलिन्दहूणाः ।
माहात्म्यबोधविमुखा अपि काननस्थास्तं त्वाममी शरणदं शरणं प्रपन्नाः ॥१५॥

आनन्दसारमनवद्यमहोमहिम्ना लोकान्धकारविनिवर्तनसाधुशक्तिम् ।
स्वच्छन्दलोलममृताणवमध्यदर्शं तं त्वाममी शरणदं शरणं प्रपन्नाः ॥ १६ ॥

उज्जागरद्युतिमुदारमनोज्ञहासभासा पराजितशरद्विधुरश्मिवृन्दम् ।
कर्णस्फुरन्मकरकुण्डलदीपितास्यं तं त्वाममी शरणदं शरणं प्रपन्नाः॥ १७ ॥

त्वत्पादपङ्कजपरागपवित्रतायाः साकेतपत्तनभुवो महिमाप्यवाच्यः ।
यज्जन्मिनां तु सुगमश्चतुरर्थलाभस्तं त्वाममी शरणदं शरणं प्रपन्नाः ॥ १८ ॥

दामोदराच्युतमुकुन्दमुरारिराम श्रीराघवप्रभुजनार्दनबाणपाणे ।
श्रीरामराजकुलचन्द्ररघूत्तमेति तं त्वाममी शरणदं शरणं प्रपन्नाः ॥ १९ ॥

प्रारब्धहारि भजनं तव राघवेन्द्र ज्ञानं च कर्म च भवेत् किमु तेन तुल्यम् ।
मायागुणव्यतिकृतैकविशुद्धभक्त्या तं त्वाममी शरणदं शरणं प्रपन्नाः ॥ २० ॥

सत्त्वेन ते व्यवहितं तव रामरूपमेतच्चिदेकमयमद्भुतमद्वितीयम् ।
अन्यावतारतुलया न हि वर्णनीयं तं त्वाममी शरणदं शरणं प्रपन्नाः ॥ २१ ॥

दृष्टिप्रमोदमनुभूय जगत्यनन्यं त्वां तर्कयन्ति मनुजाः पुरुषप्रकाण्डम् ।
भक्त्योपयान्ति न मुमुक्षुतया प्रकामं तं त्वाममी शरणदं शरणं प्रपन्नाः ॥२२॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे उत्तरखण्डे सर्वप्रबोधे
एकोनचत्वारिंशोऽध्यायः ॥ ३९ ॥

चत्वारिंशोऽध्यायः

ब्रह्मोवाच

तत्र केचिज्जना धन्याः प्रमोदवनवासिनः ।
अयोध्यास्थं रामचन्द्रं भजमाना अनन्यवत् ॥ १ ॥

ऊचिरे वचनं तुष्ट्या तेषु नित्योपसत्तयः ।
कृतार्थं मन्यमानाः स्वं पुरुषोत्तमदर्शिनः ॥ २ ॥

जना ऊचुः

ईश प्रमोदविपिने नटवेषवेषी गोपाङ्गनावलयरासविलासकादीन् ।
यत्त्वं चकार मणिरत्नकिरीटशाली तत्किं मुहुः स्मरसि राघव राजसूनो ॥३॥

यच्चित्रकूटगिरिकन्दरगह्वरेषु त्रैलोक्यराजनरदेवकुमारिकाभिः ।
त्वं भूरि दुष्करविलासभरैररंसीस्तत्किं मुहुः स्मरसिराघव राजसूनो ॥ ४ ॥

यत्त्वं मनोज्ञसरयूपुलिनाङ्गणेषु चान्द्रीः क्षपाः क्षपितसर्वजगत्तमिस्राः ।
साकं श्रिया विहरसे परयानुरक्त्यातत्किं मुहुः स्मरसि राघव राजसूनो ॥५॥

सामानि ऋग्यजुरथर्वऋचः स्ववश्याधेनूः शुभाः सुखकदम्बभृताः सवत्साः ।
यत्त्वं वने किमपि चारितवान् सजोष तत् किं मुहुः स्मरसि राघव राजसूनो ॥६॥

यत्त्वं प्रमोदवनमध्यगतो विशालप्रासाददिव्यशिखरे व्रजसुन्दरीभ्यः ।
हारान् ददौ मधुपुरी मथ कोसलां च तत्किं मुहुः स्मरसि राघव राजसूनो॥ ७ ॥

यद्राजसूनुपदवीमभिपद्य धन्या माभीरराजसुतभावकरीं चकार ।
स्वच्छन्दकेलिकलयातिसुखं चकार तत्किं मुहुः स्मरसि राघव राजसूनो ॥ ८ ॥

साकेतधामवसतेर्महिषीं परांतां विज्ञाय पूर्णतमसर्वकलाधिराज्ञीम् ।
आनन्ददो व्रजवधूवलये समस्ते तत्किं मुहुः स्मरसि राघव राजसूनो ॥ ९ ॥

यद्दिव्यसाधननिशासु निकुञ्जभूमौ यावद्व्रजाम्बिरुचिराणि वपूंषि धृत्वा ।
योगीवयोगकलया सहितोऽतिरेमे तत्किं मुहुः स्मरसि राघव राजसूनो ॥ १० ॥

यत्त्वं प्रमोदवनविघ्नकरम्बभूतान् दैत्यानजीघनदहो निशि लक्ष्मणेन ।
ब्रह्मायुषोऽपि परतो विचकार केलिं तत्किं मुहुः स्मरसि राघव राजसूनो ॥११॥

कृत्वा व्रजे निमिषमात्रमितं स्वकालं चक्रे प्रमोदविपिने युगकोटिकेलीः ।
तद्वीक्ष्य विस्मितमना अभवद्विरंचि स्तत्किं मुहुः स्मरसि राघव राजसूनो॥१२॥

यत्त्वं वनेष्वनुदिनं खलु चारयन् गागोपाकृतः पशुविहङ्गगणाभिरामः ।
वेणुं क्वणन् जगदमोहयदात्ममूर्त्या तत्किं मुहुः स्मरसि राघव राजसूनो ॥ १३ ॥

वेणुं करे दधदनङ्गपराद्धवेशो दिव्यः स कोऽपि नटराज इवातिमुग्धः ।
यत्त्वं पशूनपि खगान् वशयांश्चकार तत्किं मुहुः स्मरसि राघव राजसूनो ॥१४॥

यत्ते वियोगभववह्निपरिप्रदीप्तं तापं वने विहरतो मिलतः प्रदोषे ।
गोपाङ्गनामुखविलोकनतो व्यमुञ्च तत्किं मुहुः स्मरसि राघव राजसूनो ॥१५॥

यन्नोवियोगभयभुग्नहृदो निरीक्ष्य सम्मूर्छतः सुखितगोपपतिव्रजस्थान् ।
आनीतवानसि पणं कमपीह कृत्वा तत्किं मुहुः स्मरसि राघव राजसूनो ॥१६॥

नास्माकमत्रभवतः सविधे स्थितानांकश्चित्प्रमोदवनविश्लिषजोऽनुतापः ।
भूयः कदापि सुखितव्रजभूमिपालमाङ्गल्यकादृशिसुखं वितनिष्यसित्वम् ॥१७॥

ते ते सखाय उदयाद्विरहातुरास्ते तास्तेप्रिया विलुलितास्तव विप्रयोगात् ।
ते च प्रमोदवनपक्षिगणास्तमोन्धास्तान् किं मुहुर्नसुखयिष्यसि राघवेन्द्र ॥१८॥

त्वद्विप्रयोगदशया प्रमुदाटवीस्थानैव स्मरन्ति किमपि स्वमपि प्रभावम् ।
उन्मत्तवद्विनिगदन्ति चलन्तिभान्तिपश्यन्तिसन्तिविवलन्ति परिभ्रमन्ति॥१९॥

तेषां त्वमप्रतिमहृच्छयवेदनार्त्तिं स्वास्येन्दुदर्शनसुधारससेचनेन ।
भूयो हरिष्यसि कथं न परानुकम्पावश्यात्मनां त्वमसि यत्खलु सार्वभौमः ॥२०॥

[1]इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे उत्तरखण्डे सर्वप्रबोधे
चत्वारिंशोऽध्यायः ॥ ४० ॥

१. नास्ति–बड़ौ० ।

एकचत्वारिंशोऽध्यायः

ब्रह्मोवाच

इति तेषां वचः श्रुत्वा जनानां स्वाश्रितात्मनाम् ।
पूर्वं प्रभुरयोध्यास्थान् बभाषे रघुनन्दनः ॥ १ ॥

श्रीराम उवाच

शृण्वन्तु भोः अयोध्यास्थाः जनाः सर्वे हि मामकाः ।
अनायासेन वो मुक्तिर्भविता न च संशयः ॥ २ ॥

यूयं हि नित्यमुक्ताः स्थ मत्सान्निध्ययुजः सदा ।
मद्दर्शनकथालापश्रवणादिषु तत्पराः ॥ ३ ॥

दूरतोऽपि च ये मर्त्या मन्नामग्रहणे स्थिताः ।
तेषामप्यहमुद्धर्ता भवदुःखरयात्सदा ॥ ४ ॥

यूयं त्वयोध्यापुरवासमायात्सद्भृतान्तःकलुषाःपुनीताः ।
श्रीसारवाम्भःपरिपानपूताः किमिच्छथान्यां बत मुक्तिमुच्चैः ॥ ५ ॥

एतावज्जनिसाफल्यं जनानामत्र विद्यते ।
अयोध्यामण्डले वासः सरयूवातवीजिते ॥ ६ ॥

अमुष्मिन् मण्डले मर्त्या रवियोजनसम्मिते ।
पशुपक्षन्त्यजानामप्यतिमुक्तिः सनातनी ॥ ७ ॥

यत्र क्वचिद्द्वादशयोजनात्मके मन्मण्डले ये निवसन्ति मानवाः ।
तेषामहं देहावसानकाले ददामि पक्षीन्द्रसुवाहनत्वम् ॥ ८ ॥

मण्डलानामुत्तमेऽस्मिन् मण्डले देवपूजिते ।
प्रवेशो यमदूतानां न कदाचन विद्यते ॥ ९ ॥

पशवः पक्षिणश्चैव ह्यन्त्यजाः श्वपचादयः ।
चर्तुर्भुजत्वमापन्ना व्रजन्ति मम धामनि ॥ १० ॥

दुष्पीतिर्नाम चाण्डालः पुरास्मिन्मण्डले वसन् ।
मृगयाचारनिरतो दुर्दान्तो जीवहिंसकः ॥ ११ ॥

आजन्मपातकभृतः सर्वभक्षः स्वभावतः ।
अधमां योनिमापन्नस्तत्रापि बहुपातकी ॥ १२ ॥

तमन्तकाले सम्प्राप्ते निन्युर्दूता यमक्षयम् ।
तच्छ्रुत्वा दिवि चुक्रोध गरुडो मम वाहनः ॥ १३ ॥

ययौ संयमनीं क्रुद्धो यमस्य नगरीं प्रति ।
ज्वालाः सृजन् पक्षतिभ्यां दग्धुकामो यमालयम् ॥ १४ ॥

प्रबलानिलमुत्पाद्य स तां कम्पितवान् पुरीम् ।
कल्पान्तवह्निज्वालाभिर्यमालयमवेष्टयत् ॥ १५ ॥

ततो विनिर्गता दूता योद्धुकामा अनेन ते ।
खड्गशक्त्यृष्टिमुशलदण्डमुद्गरपाणयः ॥ १६ ॥

भूशुण्डीपरिघाशूलपाशहस्ताः समंततः ।
निपेतुर्गरुडस्योच्चैरङ्गमाच्छाद्य सत्वरम् ॥ १७ ॥

कृत्वा प्रचण्डनादं ते पिष्टान्तै रदनै रदान् ।
महाकिलकिलाशब्दं कुर्वन्तस्तेऽतिवेगिनः ॥ १८ ॥

स्वानि स्वान्यस्त्रवर्याणि मुमुचुर्गरुडोपरि ।
गरुडोऽपि तदस्त्राणि बभञ्ज क्षणमात्रतः ॥ १९ ॥

लीलामात्रेण तान् सर्वान् यमदूतानपोथयत् ।
पक्षतुण्डनखाघातैरहनद्विक्रमी स तान् ॥ २० ॥

रुधिराणि वमन्तस्ते पतिताः पृथिवोतले ।
परे च दुद्रुवुर्दूता यमस्य सर्वतो दिशम् ॥ २१ ॥

महाकालाग्निज्वालाभिर्वेष्टितां स्वपुरीं यमः ।
विलोक्य सर्वतो भीतः किमेतदिति चिन्तयन् ॥ २२ ॥

पक्षीन्द्राभिमुखं सद्य आजगाम ततः परम् ।
आः किमेतदिति क्रुद्धः उक्त्वा वचनमग्रतः ॥ २३ ॥

नानाविधैरस्त्रशस्त्रैर्गरुडं समयोधयत् ।
पराजितः स तेनासौ तुण्डाघातैर्नखक्षतैः ॥ २४ ॥

पक्षोद्भूवैर्महावातैः स कृतान्तमभीषयत् ।
महावज्रसमैः पत्रैस्तदङ्गं किंचिदस्पृशत् ॥ २५ ॥

वित्रासितस्तेन ततो गरुडेन कृतान्तकः ।
पक्षाहतोऽस्य महिषो दुद्राव भयसंवृतः ॥ २६ ॥

ग्रैवेयकमहाघण्टानादघोषितदिङ्मुखः ।
कृत्वा घोरं महानादं पातयित्वा यमं भुवि ॥ २७ ॥

ततो दण्डे प्रभग्नेऽसौ तुण्डघातैः खगेशितुः ।
निःश्वसंश्छिनकैः प्राह खगेन्द्रं रणदुर्मदम् ॥ २८ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे उत्तरखण्डे सर्वप्रबोधे एकचत्वारिंशोऽध्यायः ॥ ४१ ॥

द्विचत्वारिंशोऽध्यायः

यम उवाच

नागान्तक खगाधीश कथं क्रुद्धोऽसि मत्कृते ।
महाकालानलज्वालाभिर्व्याप्तो हि समंततः ॥ १ ॥

संवेष्टिता संयमिनी ह्यकस्मात्केन हेतुना ।
तव पक्षानिलोद्धूता उड्डीयन्ते गृहा मम ॥ २ ॥

पृथिव्यां शेरते दूतास्तव तुण्डनखक्षताः ।
पीडिताङ्गा वमन्तस्ते शोणितानि भुवि स्थिताः ॥ ३ ॥

निःश्वसन्तो ह्यतीवार्ताः कदर्थीकृतविग्रहाः ।
केचित्पलायिता दिक्षु वेपमाना भयातुराः ॥ ४ ॥

कृतं संयमनीपुर्याः कदनं केन हेतुना ।
भवान् हि सर्वदेवानामतीव प्रियकारकः ॥ ५ ॥

अहं च स्थापितो दण्डाधिकारित्वेन विष्णुना ।
त्वं च तद्वाहनो नित्यं किमित्येवं चकार ह ॥ ६ ॥

एतत्तेऽनुचितं तार्क्ष्य यद्विष्णोरधिकारिणाम् ।
उज्जासनं बलवता त्वया यत् कृतमेव तत् ॥
एतस्य करणं ब्रूहि प्रच्छामि त्वां खगाधिप ॥ ७ ॥

तार्क्ष्य उवाच

शृणु वैवस्वत यतो हेतोस्ते कदनं मया ।
कृतं च तव दूतानमत्यर्थं परिपीडिनम् ॥ ८ ॥

पृथिव्यां भारते खण्डे भारते नामनिश्चयम् ।
आर्यावर्त्ते पुण्यभूमौ नानातीर्थगुणाश्रये ॥ ९ ॥

अस्त्ययोध्यानाम पुरी विस्तीर्णा रवियोजनैः ।
सर्वर्त्तुगुणशोभाढ्या नानाकल्पद्रुमाकुला ॥ १० ॥

स्वर्णचिन्तामणिमयी यत्र भूमिर्विराजते ।
सुवर्णरत्नसोपानमण्डिता यत्र वापिकाः ॥ ११ ॥

शोभिताः परितः फुल्लसुवर्णसरसीरुहैः ।
मकरन्दरसस्रावाः स्वच्छशीतामृतोदकाः ॥ १२ ॥

गुञ्जद्भ्रमरपुञ्जाढ्याः कलहंसकलस्वनाः ।
सरस्यो यत्र राजन्ते रत्नसोपानशोभिताः ॥ १३ ॥

कोककारण्डवध्वानमिश्रसारसनादिताः ।
राजहंसकलकाणमुखरीकृतदिङ्मुखाः ॥ १४ ॥

फुल्लत्कमलकह्लारहल्लका[1]मोदमेदुराः ।
उपकूलमहीरूढकुञ्जद्रुममनोहराः ॥ १५ ॥

मुक्ताशुक्तिपुटोद्भूतिनानारत्नगणेद्भवाः ।
यत्र रत्नाचलो नाम सीतारामविहारभूः ॥ १६ ॥

महारत्नमयानेकशिखरद्युतिदीपितः ।
नाशिताशेषदिक्कूलतमःपटलरात्रिकः ॥ १७ ॥

यत्र सा सरयू र्नाम सरित्पानीयनिर्मला ।
मणिबद्धो भय तटी दधती हेमवालुकाः ॥ १८ ॥

परमानन्ददा नित्यं निजकूलजुषां नृणाम् ।
तपस्विनां मुनीन्द्राणां विरक्तानां भवेत् पुनः ॥ १९ ॥

रिंगत्तरङ्गरुचिरा क्षालयन्ती तटावनीम् ।
पूज्यमाना सुरव्रातैः पारिजातभवैः सुमैः ॥ २० ॥

पुराणपुरुषप्रेमसमुद्भूताश्रुसम्भवा ।
क्वचिच्छनैः क्वचिद्वेगाद्गच्छन्ती मधुरस्वना ॥ २१ ॥

जनाश्चतुर्भुजा यत्र रामप्रेमावघूर्णिताः ।
जनकेन्द्रसुताकीर्तिगाननिर्धूतकल्मषाः ॥ २२ ॥

चतुराश्रमसंशुद्धाश्चतुर्वर्णक्रियाजुषः ।
प्रेमानन्दपरीपाकसुस्थिरीकृतमानसाः ॥ २३ ॥

अनादृतज्ञानकर्मोपासनासाधनान्तराः ।
श्रीरामचरणाम्भोजे सुविश्वस्ताः समंततः ॥ २४ ॥

प्रपत्तिमार्गशरणाः सर्वे विमलबुद्धयः ।
देवतायतनैर्यत्र सस्वर्णघटमस्तकैः ॥ २५ ॥

पताकाध्वजवस्त्राढ्यैस्तोरणाद्यैरलङ्कृतैः ।
स्थूलैः स्थूलैः कृता शोभा गगनस्पर्शिमूर्द्धभिः ॥ २६ ॥

प्रासादैर्भूभुजां यत्र शोभा चमत्कृतीकृता ।
विततश्चापणे यत्र विकीर्णमणिधोरणिः ॥ २७ ॥

नवभिर्निधिभिर्युक्ता मोदन्ते यत्र नैगमाः ।
उत्सवांश्च प्रतिगृहं प्रत्यहं यत्र बिभ्रति ॥ २८ ॥

---

१. 'हल्लकं रक्तसन्ध्यकम्' टि०–बड़ौ० ।

तूर्यत्रिकसमाघोषो यत्रास्ते प्रतिमन्दिरम् ।
ईदृग्विधगुणैर्युक्ता ह्ययोध्यानगरी भुवि ॥ २९ ॥

यस्यां दशरथो राजा नित्यमेव विराजते ।
महाराजकुमारश्च यत्र श्रीरामसंज्ञकः ॥ ३० ॥

चतुर्धामूर्त्तिसंयुक्तो नित्यं खलु विराजते ।
परब्रह्म परं धाम परमात्मा परात्परः ॥ ३१ ॥

नित्यलीलारसानन्दी प्रमोदवनचन्द्रमाः ।
सहजानन्दिनीनामनित्यशक्तिविभूषितः ॥ ३२ ॥

वनैर्यत्र द्वादशभिः प्रमोदवनमेधते ।
श्रिया परमया युक्तं परब्रह्मसुखालयम् ॥ ३३ ॥

गवेन्द्रसुखिताख्यस्य यत्र गोष्ठं विभाति तत् ।
ऊधोभारविनम्राभिर्धेनुभिः समुपासितम् ॥ ३४ ॥

कूर्दमानकुरङ्गाभवत्सवत्सतरीयुतम् ।
रामप्रेमवशीभूतगोपगोपीजनावृतम् ॥ ३५ ॥

प्रत्यूषे दधिनिर्मन्थघोषमङ्गलपूरितम् ।
श्रीमद्रामगुणोद्गानपूर्वकं निर्वृतात्मना ॥ ३६ ॥

मथ्नन्त्या दधिपाथोधिं श्रीमन्माङ्गल्यया युतम् ।
इति भव्यगुणोदीर्णमयोध्यामण्डलं महत् ।
साक्षात्परमधामैव श्रीरामस्थानमद्भुतम् ॥ ३७ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे उत्तरखण्डे सर्वप्रबोधे द्विचत्वारिंशोऽध्यायः ॥ ४२ ॥

त्रिचत्वारिंशोऽध्यायः

गरुड उवाच

अयोध्यामण्डले कश्चिद्दुष्पीतिर्नाम पातकी ।
जात्यापि खलु चाण्डालो वर्णानामधमोऽन्त्यजः ॥ १ ॥

समृतः खलु पूर्वेद्युः सरयूपुलिनाङ्गणे ।
तत्तोयवातसंस्पृष्टं शरीरं तस्य जम्बुकैः ॥ २ ॥

लुञ्चितं लुण्ठितं तावत्खण्डशः कृन्तितं मुहुः ।
तटान्ते प्रापितं चापि तरङ्गैर्लोलितं मुहुः ॥ ३ ॥

तं दण्डधर दूतास्ते निन्युः संयमिनीमिमाम् ।
तदानयनकार्यार्थमहमत्रागतो रुषा ॥ ४ ॥

कृतं प्रत्युत दूतैस्तै महद्युद्धं मया सह ।
दुष्पीतिर्नाम चाण्डालो न तु तैरुपढौकितः ॥ ५ ॥

इह नानेतुमर्होऽयमयोध्यामण्डले मृतः ।
अहं हि प्रभुणा पूर्वमुक्तोऽस्मि बहुधा यमः ॥ ६ ॥

य एतस्मिन् महापुर्या मण्डले म्रियते जनः ।
तस्य त्वं वाहनो भूत्वा प्रापयेथा मदन्तिके ॥ ७ ॥

प्रमोदविपिने तार्क्ष्य नित्यमेव वसाम्यहम् ।
महा[1]वैकुण्ठात्परमिदं विज्ञेयं धाम मामकम् ॥ ८ ॥

न यत्रकालः प्रभवत्यनन्तो मायाथवा तद्गुणसम्प्रवाहः ।
न चापि कर्म व्यभिचारिरूपं न चापि दैवं न मनःप्रवृतिः ॥ ९ ॥

अथैतन्मण्डलं नित्यं योजनद्वादशात्मकम् ।
अक्षरं ब्रह्मानन्दमत्प्रेमानन्दमयोर्जितम् ॥ १० ॥

न कालकर्ममर्यादाप्यत्र सम्बाधते नृणाम् ।
नानेन सदृशं तीर्थं नानेन सदृशं तपः ॥ ११ ॥

नानेन सदृशं क्षेत्रं त्रिषु लोकेषु विद्यते ।
नानेन सदृशी गङ्गा नानेन सदृशी गया ॥ १२ ॥

गङ्गाद्वारादितीर्थानि गङ्गासागरसङ्गमः ।
मुक्तिक्षेत्रं तथा काशी तथा चामरकण्टकम् ॥ १३ ॥

गोदावरी नर्मदा च व्यासगङ्गा सरस्वती ।
कृष्णा च यमुना चापि कावेरी भीमशाङ्करी ॥ १४ ॥

चन्द्रभागा शतद्रुश्च तद्वच्चान्ये सुपावनाः ।
पुष्करादीनि तीर्थानि तीर्थराजस्तथैव च ॥ १५ ॥

पुरुषोत्तमाख्यं क्षेत्रं क्षेत्राण्येतानि षोडशी ।
तीर्थानि च पवित्राणि यावन्ति धरणीतले ॥ १६ ॥

तानि सर्वाण्ययोध्यायाः कलां नार्हन्ति षोडशीम् ।
प्रकटाश्चैव गुप्ताश्च यावन्तस्तीर्थराशयः ॥ १७ ॥

---

१. पादेऽस्मिन्नक्षराधिक्यमार्षः ।

तावन्तः सर्व एवैतन्मण्डलं समुपासते ।
जले चैव स्थले चैव नास्ति भेदोऽत्र कश्चन ॥ १८ ॥

स्नानाद्दानाद्विधानाच्च वपनात्पिण्डदानतः ।
होमाज्जपाद्दीक्षणाच्च यत्रनाद्देवतार्चनात् ॥ १९ ॥

विवाहाद्व्रतबन्धाच्च यात्रया च प्रदक्षिणात् ।
निवासाद्दर्शनाच्चैव स्मरणाच्चाभिवन्दनात् ॥ २० ॥

कथनात्स्तवनाच्चैव मरणाद्दाहनात्तथा ।
इत्येवं द्वाविंशतिधा ह्ययोध्यामण्डलं नृणाम् ॥ २१ ॥

मोचयत्युग्रपापेभ्यो मुक्तिं चापि प्रयच्छति ।
यदद्यद्वाञ्छति तत्सर्वं ददात्यत्र न संशयः ॥ २२ ॥

प्रतितीर्थमयोध्यायां धनुर्मात्रमिते स्थले ।
विदद्यन्ते कोटितीर्थानि पुष्करादद्यानि संततम् ॥ २३ ॥

वक्त्रकोटिशतेनापि जिह्वाकोटिशतेन च ।
अयोध्यायास्तु माहात्म्यं क्षमो वक्तुं नरः कथम् ॥ २४ ॥

तस्मादत्र प्रजातानामागन्तूनां तथान्यतः ।
मृतानां चापि गरुड सद्यस्त्वं वाहनो भव ॥ २५ ॥

इत्येवं भगवान् रामो मां प्रबोधितवान् पुरा ।
ततश्च मामनादृत्य दूतास्ते रविनन्दन ॥ २६ ॥

आनिन्युस्तं किमिति च मृतं दुष्पीतिमन्त्यजम् ।
अपि चेत्पातकी दुष्टो यावज्जन्मविहिंसकः ॥ २७ ॥

दुराचारः क्रूरकर्मा रोऽप्ययोध्यापुरे मृतः ।
सद्यो मत्पृष्ठमारुह्य रामधाम व्रजेन्नरः ॥ २८ ॥

तस्मादेनं विमुञ्च त्वं नाम्ना दुष्पीतिमन्त्यजम् ।
स्मरन् प्रतिज्ञां रामस्य स्वाधिकारं यदीच्छसि ॥ २९ ॥
न रामो द्विर्वचो ब्रूते नाभयं द्विर्ददाति च ।
द्विशरं नाभिसंधत्ते न द्विरङ्गीकरोति च ॥ ३० ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे उत्तरखण्डे सर्वप्रबोधे त्रिचत्वारिंशोऽध्यायः ॥ ४३ ॥

चतुश्चत्वारिंशोऽध्यायः

यम उवाच

नागान्तक खगाधीश सुपर्ण हरिवाहन ।
अजानद्भिः प्रमादेन कृतं कार्यमिदं खलु ॥ १ ॥

मम दूतैस्तस्य फलं प्राप्तमेतावदाततम् ।
अतः परं क्षमस्वेनमपराधं मम प्रभो ॥ २ ॥

अयोध्यामण्डलस्थोऽयं यदानीतो विजानता ।
अतः परं पुनरपि न कार्यं कृत्यमीदृशम् ॥ ३ ॥

गृह्यतामेष भगवन् साकेतं नियतां पुनः ।
अयोध्यामण्डले तस्मिन् रवियोजनसम्मिते ॥ ४ ॥

यः कश्चिन्निश्चयतां नाम पशुपक्ष्यन्त्यजोऽपि वा ।
स दूतैर्मम नानेयः प्रतिजानेऽस्मि सत्यतः ॥ ५ ॥

इत्युक्त्वा सन्निवेदयोच्चैर्गरुडाय तमान्त्यजम् ।
कृताञ्जलिर्नमस्कृत्य गरुत्मन्तं व्यसर्जयत् ॥ ६ ॥

गरुडः पृष्ठमारोप्य मम धाम निनाय तम् ॥ ७ ॥

श्रीरामचन्द्र उवाच

एवमेतन्मया प्रोक्तमयोध्यावैभवंजनाः ।
इह संवसतां नृणां सर्वथा मत्फलं भवेत् ॥ ८ ॥

किं पुनः शुद्धचित्तानां शास्त्रमार्गानुयायिनाम् ।
वर्णाश्रमाचारवतां मद्भक्तिकलितात्मनाम् ॥ ९ ॥

तस्मादत्रयं विमुक्ताः स्थ नात्र कार्या विचारणा ॥ १० ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे उत्तरखण्डे सर्वप्रबोधे चतुश्चत्वारिंशोऽध्यायः ॥ ४४ ॥

पञ्चचत्वारिंशोऽध्यायः

श्रीराम उवाच

अथान्यदपि वक्ष्यामि महात्म्यमिह सम्भवम् ।
चैत्रे जन्मोत्सवं कुर्याद्विधिना मम यः सदा ॥ १ ॥

नित्यं पाप्नोति मत्पित्रोः प्रेमानन्दं स मानुषः ।
वैशाखे मासि यः कुर्याच्चन्दनैश्चार्चनं मम ॥ २ ॥

स लभेद्भवसंतापशान्तिं नैवात्र संशयः ।
ज्येष्ठे मासि च यः कुर्याच्चन्दनागुरुमिश्रितैः ॥ ३ ॥

जलयन्त्रोद्भवैस्तोयैर्ज्योत्स्नाभिर्मम तोषणम् ।
विषयेषु वितृष्णत्वं स लभेन्नियतं नरः ॥ ४ ॥

आषाढे मासि यः कुर्याच्छीतलान् व्यजनानिलान् ।
भवतायोद्भवा बाधा तस्य नो जायते क्वचित् ॥ ५ ॥

श्रावणे मासि कुर्वीत हिन्दोलैः परिदोलनम् ।
वामे श्रीसहजानन्दायुक्तस्य मम सर्वदा ॥ ६ ॥

विचित्रवस्त्राभरणैः पवित्रारोपणैस्तथा ।
शाद्वलैर्हरिते कुञ्जे हरिद्भूरुहमञ्जुले ॥ ७ ॥

इन्द्रगोपीघयुक्तायां भुवि वर्षति वारिदे ।
तस्याहं सर्वदा तुष्टः प्रयच्छामि परां मुदम् ॥ ८ ॥

भाद्रे मासि च यः कुर्यात्प्रमोदविपिनस्य मे ।
वनैर्द्वादशभिः साकं यात्रां चैव प्रदक्षिणाम् ॥ ९ ॥

तस्य किं नु फलं वाच्यमश्वमेधसहस्रकैः ।
वाजपेयमखैर्लक्षैः सोमकोटिभिरेव च ॥ १० ॥

न पुण्यं समतां याति जलस्थानावगाहनात् ।
आश्विने शुक्लपक्षे तु दशम्यां विजयोत्सवम् ॥ ११ ॥

यः कुर्यात्तु विधानेन स लभेद्विजयं भुवि ।
शमीपूजनवेलायां रथारूढं तु मां स्मरेत् ॥ १२ ॥

स्वस्तिवाचनमन्त्रादयैर्जयघोषैश्च भूरिशः ।
प्रस्थापयेन्मां महत्या वेष्टितं कपिसेनया ॥ १३ ॥

भक्तैः प्रतिकृतिं कुर्यात् सर्वामन्यूनभावतः ।
कृत्वा च गोमयैर्लङ्कां ध्वंसयेद्गजवाजिभिः ॥ १४ ॥

संस्कुर्याच्च ध्वजपटानुत्तुङ्गास्तरणादिभिः ।
इदं कृत्यं महीपानामावश्यकमुदाहृतम् ॥ १५ ॥

कार्तिके दीपमालाभिरन्नकूटोत्सवेन वा ।
कृत्वा मत्तोषणं मर्त्यः कोटियज्ञफलं लभेत् ॥ १६ ॥

नित्यं रासविलासाद्यै रमयेच्चन्द्रिकामये ।
देवोत्थानविधानेन तत उत्थापयेच्च माम् ॥ १७ ॥

कृत्वैवं शारदीं पूजां मत्प्रेम लभते नरः।
हेमन्ते शिशिरे चैव तूलवस्त्रैर्विशेषतः॥ १८॥

गर्भालयसमावेशैर्हसन्तीभिश्च भूरिशः।
उष्णोदकैरुष्णभोज्यैर्नानाभोगविधानतः॥ १९॥

कालागुरुप्रधूपैश्च ताम्बूलीवीटिकार्पणैः।
सेवते मां सदा भक्त्या तस्य पुण्यं न गण्यते॥ २०॥

अथ प्राप्ते वसन्ते च वसन्तोत्सवरीतिभिः।
सेवयेन्यां सदाभक्त्या दोलादिपरिदोलनैः॥ २१॥

एष वो विधिरुद्दिष्ट ऋतुसेवनपूर्वकम्।
अनेन विधिना नित्यं तोषयेन्मां समाहितः॥ २२॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसम्वादे उत्तरखण्डे सर्वप्रबोधे पञ्चचत्वारिंशोऽध्यायः॥ ४५॥

षट्चत्वारिंशोऽध्यायः

श्रीराम उवाच

अथ यूथमयोध्यास्थाः सर्वे वै मामका जनाः।
मम लीलायां नित्यायां [1]यूयं प्राप्ताः सदैव हि[1]॥ १॥

प्रारब्धध्वंसमागत्य नेष्ये वः स्वान् स्वधामनि।
तस्मिन् काले परिप्राप्ते आगमिष्यन्ति मद्गिरा॥ २॥

दिव्यानि चैव भास्वन्ति विमानानि सहस्रशः।
लक्षशः कोटिशश्चैव ह्यनेकानि समंततः॥ ३॥

तेष्वास्थाय प्रयास्यन्ति मदीये नित्यधामनि।
पशवः पक्षिणश्चापि तथान्ये नीचजातयः॥ ४॥

कुविन्दकुम्भकारादया आचाण्डालमथान्त्यजाः।
किं पुनर्यूयमात्मस्था वर्णाश्रमसुसंस्थिताः॥ ५॥

ब्राह्मणाः क्षत्रिया वैश्याः शूद्राः स्त्रीयोनिसम्भवाः।
सर्वथैव परिप्राप्ताः परमे मम धामनि॥ ६॥

---

१. नास्ति – बड़ौ०।

यूयं रंस्यथ केलीभिः सुखरूपाभिरुच्चकैः ॥ ७ ॥

जना ऊचुः

अयोध्यापि परं धाम तव चेत्यनुशुश्रुम ।
किमर्थमेनां संत्यज्य भवान् यास्यसि तत्पदम् ॥ ८ ॥

श्रीराम उवाच

अहो जना अत्र सदा मम स्थितौ युगप्रवृत्तिर्नभवेदितोऽन्यथा ।
सर्वेऽपि जीवा भुवि मुक्तिभाजो भवेयुरुत्सीदति[1] चैव लोकः ॥ ९ ॥

ततोऽहमव्यक्तमशेषलोकैः स्वं नित्यधामाद्वयचित्सुखैकम् ।
अविद्या सर्वजनानुभूतेरगोचरं सम्प्रति सम्प्रयास्ये ॥ १० ॥

चतुष्पथस्थितं वस्तु यथा गृह्णन्ति पामराः ।
अपामराश्च सर्वेऽपि प्रतिबन्धो भवेत् कथम् ॥ ११ ॥

तेन तद्गोपनीयं चेत्सज्जनैरधिकारिभिः ।
केवलं खलु गृह्येत नेतरैः पामरैरपि ॥ १२ ॥

एवं ममाविर्भावस्य काले सर्वजगद्दृशाम् ।
गोचरत्वं भवत्येवेत्यन्तर्धानं करोम्यहम् ॥ १३ ॥

अनायासाद्विमुच्येत य एवोपव्रजेत माम् ।
प्रकटं हि मदैश्वर्यं कस्य नो भाति दृग्वतः ॥ १४ ॥

तस्मात्सर्वेषु कालेषु यूयं सर्वेमपि स्थिताः ।
सदा मया सह परं धाम रमण मज्जनाः ॥ १५ ॥

निर्गुणं निष्क्रियं शान्तं निर्विकारं निरञ्जनम् ।
मायासम्बद्धरहितं निर्मलं निष्कलं तथा ॥ १६ ॥

आत्मानन्दाकारयुक्तं सर्वतः पादपाणिकम् ।
सर्वतोऽक्षिश्रुतिघ्राणं सर्वतोमङ्गलालयम् ॥ १७ ॥

सर्वतो भासमानंतद्विरजाया परे तटे ।
त्रिपाद्ब्रह्मासनी कृत्य संस्थितं मत्परं पदम् ॥ १८ ॥

तस्यापि सारभूतं यद् बृहतोऽपि बृहत्तमम् ।
गणितागणितानन्दभेदेन सुनिरूपितम् ॥ १९ ॥

अवशा मे परा लीला तथा क्रीडामि नित्यशः ।
भवन्तोऽपि मया साकं क्रीडिस्यन्ति तदन्तरे ॥ २० ॥

इति नैश्चिन्त्यमालम्ब्य तिष्ठध्वं मामका जनाः ।
तावत्पूर्वोक्तविधिना मम सेवां करिष्यथ ॥ २१ ॥

---

१. 'रिक्तोभवेत्' टि०–बड़ौ० ।

इत्युक्तास्ते जनाः सर्वे पादावस्याभिवाद्य च ।
नमस्कृत्य च संतुष्टास्तद्विसृष्टा गृहान् ययुः ॥ २२ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे उत्तरखण्डे सर्वप्रबोधे षट्चत्वारिंशोऽध्यायः ॥ ४६ ॥

सप्तचत्वारिंशोऽध्यायः

ब्रह्मोवाच

गतेषु तेषु लोकेषु प्रमोदवनवासिनः ।
कांश्चिज्जनान् स्वपार्श्वस्थानब्रवीद्गोपरूपिणः ॥ १ ॥

श्रीराम उवाच

हंहो गोपाः सर्वमहं स्मरामि तत् पुरा कृतम् ।
यत् प्रमोदवने जातं दिव्यं मे केलिकौतुकम् ॥ २ ॥

को विस्मरेत्तादृशमद्भुतं सुखं माङ्गल्यकायाः सदनेऽनुभूतम् ।
तद्वात्सल्यं सुखितगवेन्द्रश्रीमन्माङ्गल्यानिरुपमसौख्यदापि ॥ ३ ॥

कथं गोपाः प्राप्य गृहं दाशरथ्यं साम्राज्यलक्ष्मीमपि विस्मरेयम् ।
त्रैलोक्यराज्यं यत्र निर्मञ्छनं स्यात् साम्राज्यलक्ष्मीर्नातदर्हापि स्यात् ॥ ४ ॥

कथं गोपास्तादृशीं प्रेमवृद्धिं तदानन्दं वाप्यहं विस्मरेयम् ।
तेते विलासा वनवीथीषु शश्वत् केलीकुञ्जाभ्यन्तरेषु प्रसंगाः ॥ ५ ॥

तत्तत्पयोदधिहैयंगवीनैर्मिष्टं स्वेष्टं प्राशनं काननेषु ।
स्वैरं स्वैरं तांश्चकेलीविलासान् भ्रामं भ्रामं त्तानि चौद्धत्यकानि ।
गायं गायं ते च रसौघास्वादाः स्मारं स्मारं यानहं मूर्छितोऽस्मि ॥ ६ ॥

अहो अत्यद्भुतं तत्तत्प्रमोदवनवीथिषु ।
खेलनं वेल्लनं नृत्यं चलनं वलनं तथा ॥ ७ ॥

तद्वै प्रमोदविपिनं ता रम्याः कुञ्जभूमयः ।
गुंफनं गुञ्जाहाराणां सा पुष्पाभरणक्रिया ॥ ८ ॥

संगे गोपालबालानां तत्तत्क्रीडनमद्भुतम् ।
क्रीडने च रसोल्लासे मधुरं वेणुवादनम् ॥ ९ ॥

नर्तनं तन्मयूराणां मदङ्गमुदितात्मनाम् ।
प्रमोदवटमूले तद्गानं चापि कलैः स्वरैः ॥ १० ॥

इत्येवमनिशं गोपाश्चित्ते भावयतो मम ।
दृशोरायाति तत्साक्षात् सर्वं विहरशां मम ॥ ११ ॥

तत्रापि कांचित्परमां सहजानन्दिनीश्रियम् ।
स्मारं स्मारं केवलं मे हृदयं न विदीर्यते ॥ १२ ॥

[1]तत्कारणं प्रायशोमन्ये एकमेव सुनिश्चितम् ।
अद्य श्वस्तत्र यास्यामीन्याशाबन्धेन रक्षणम् ॥ १३ ॥

तावद्गोपालबाला वः समाश्वास्य समागतः ।
पणं कृत्वा झटित्येव यास्यामि प्रमुदाटवीम् ॥ १४ ॥

अधुना खलु जानीत सैष कालः समागतः ।
सर्वशः कृतमत्रैत्यावतारार्थप्रयोजनम् ॥ १५ ॥

तथा हि रक्षिता देवा यज्ञाश्चापि सुरक्षिताः ।
त्रयी च रक्षिता नूनं पापेभ्यो धर्मरक्षणात् ॥ १६ ॥

साधवो रक्षिता नूनं भक्ताः स्वानन्यरक्षणाः ।
ब्राह्मणानां परो धर्मश्चालितश्चैव पालितः ॥ १७ ॥

हता देवद्रुहोऽशेषा भूमिर्निष्कण्टका कृता ।
पित्रोर्भक्तिमतोश्चित्ते बहुजन्मावधिस्फुटः ॥ १८ ॥

अभिलाषः सफलतां नीतः संगमताचिरम् ।
अयोध्यास्थः परिकरः सकलश्च प्रमोदितः ॥ १९ ॥

एतावदेव सकलमत्रागमनकारणम् ।
जातप्रायं तु तत्सर्वमयोध्यास्थजनान् प्रति ॥ २० ॥

अतः परं प्रयास्यामि प्रमोदवनमेवतत् ।
असंशयं स सफलो भवत्सु मामकः पणः ॥ २१ ॥

भवद्भिरपि दृष्टेयमयोध्या नाम मे पुरी ।
अनन्तकौतुकं दृष्टं तत्र यास्याम्यतः परम् ।
धैर्यमालव्य तिष्ठध्वं सत्यवाग् जनितोऽस्म्यहम् ॥ २२ ॥

अव्यक्तां गतिमापन्नो गत्वा प्रमुदकानने ।
भवद्भिः सह क्रीडिष्येऽव्यक्तां च गतिमागतौः ॥ २३ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे उत्तरखण्डे सर्वप्रबोधे सप्तचत्वारिंशोऽध्यायः ॥ ४७ ॥

१. पादेऽस्मिन्नक्षराधिक्यमार्षः ।

अष्टचत्वारिंशोऽध्यायः

ब्रह्मोवाच

एवं समाधाय मनः सतां प्रियः[1]श्रीमत्प्रमोदाटविवासिनां नृणाम् ।
शुश्राव दूरात्स्तुतिमातुरस्य खिगस्य नाम्नाघट्ट जनस्य ॥ १ ॥

ततो विसृज्य भक्तास्तान् प्रमोदवनवासिनः ।
करुणादग्धहृदयस्तमुद्धर्तुमधावत ॥ २ ॥

स वै ऋजीषाख्य ऋषिस्तपस्वी भक्तापराधादन्त्यजत्वं प्रयातः ।
तत्रापि चान्धो विषयानुसेवया प्रमत्तचित्तैर्वितथं नीतकालः ॥ ३ ॥

अन्यां गतिमदृष्ट्वा स विना श्रीरामसंश्रयम् ।
प्रपन्नः शरणं तं वै प्रभुं कारुण्यसागरम् ॥ ४ ॥

भुशुण्ड उवाच

कोऽयं विप्र ऋजीषाख्यः कथं वै चान्त्यजोऽभवत् ।
कथं च शरणं यातो रामं करुणयाप्लुतम् ॥ ५ ॥

ब्रह्मोवाच

प्रमोदवनपार्श्वस्थ ऋजीषो नाम वै मुनिः ।
निन्दया व्रजभक्तानामन्तकत्वमुपेयिवान् ॥ ६ ॥

ततो व्रजसरःस्नानाद्विहाय शौकरं वपुः ।
अन्त्यजत्वमवाप्यैष स्तुतवान् राघवोत्तमम् ॥ ७ ॥

नारदस्योपदेशेन ज्ञात्वैनं पुरुषं परम् ।
अपि नाम तपस्वी वा ज्ञानी वा सुकृती च वा ॥ ८ ॥

अहंकारं यः कुरुते स प्राप्नोत्यधमां गतिम् ।
पूर्वं चेदुत्तमः कश्चित्संस्कारो यदि वर्तते ॥ ९ ॥

तदा लभेत् पुनरपि ज्ञानं नो चेद्गतो हि सः ।
ततोऽस्य प्राग्भवं ज्ञानं संस्कारेण स्मृतिं गतम् ॥ १० ॥

त्यक्त्वा यच्छौकरं कायं मनाग् यातः कृतार्थताम् ।
तस्मादेवं नरः कुर्याद्यथा संस्कारवान् भवेत् ॥ ११ ॥

ऋजीषः स्खलितोद्योगाद्भुक्त्वा पशुमयीं गतिम् ।
अन्त्यजानां कुलेभाग्यान्मानवीं योनिमाप सः ॥ १२ ॥

भुञ्जानो भूरिविषयान् कुटुम्बासक्तमानसः ।
उत्तरोत्तरभोगेऽपि वैतृष्ण्यं नाप दुर्मतिः ॥ १३ ॥

---

१. नास्ति-बड़ौ० ।

जायारतः पुत्ररतो धनसंचयतत्परः ।
ततः कालेन महता जाया तस्य मृतिं गता ॥ १४ ॥

कुटुम्बं सकलं चास्य पुत्रपौत्रादिकं महत् ।
विनष्टं चोरितं स्तेनैर्वसुधान्यगवादिकम् ॥ १५ ॥

ततोऽसौ वसुभिर्हीनो मृतपुत्रबधूसुहृत् ।
तत एष स्वतोजातविषयाभावहेतुना ॥ १६ ॥

भूत्वा वितृष्णहृदयो विवेश विपुलं वनम् ।
तत्र द्वित्रैर्दिनैरेष कंचित्प्राश्य वनस्पतिम् ॥ १७ ॥

अन्धत्वं प्राप झटिति ततोऽभूद्बहुदुःखितः ।
स तस्मिन्निर्जनेऽरण्ये विलपन् करुणागिरा ॥ १८ ॥

किमप्यशक्नुवन् कर्तुं देहकृत्येऽपि चाक्षमः ।
सस्मार प्रभुमेकं तं भगवन्तमधोक्षजम् ॥ १९ ॥

करुणासागरं देवं दीनानां बन्धुमीश्वरम् ।
श्रद्धयावनतो भूत्वा तुष्टाव प्रयताञ्जलिः ॥ २० ॥

अन्त्यज उवाच

श्रीराम राम सुखद प्रतिबोधमूर्ते प्रत्यङ्गरङ्गमयमङ्गलवृन्दमूर्त्ते ।
चञ्चन्महामधुरिमामृतसारमूर्त्ते मां पाहि सम्प्रति गतं चरणाब्जमूले ॥२१॥

त्रैलोक्यरक्षणकलैकलसत्कृपाढ्य भक्तश्रुतिद्विजवराभयदानदक्ष ।
भूभारहारमिषदिव्यनवाव तारिन् मां पाहि सम्प्रति गतं चरणाब्जमूले ॥२२॥

ब्रह्माण्डकोटिघटनोद्घटनस्वतन्त्र शक्तिप्रसारनिरवध्यमितात्मलील ।
अत्यद्भुतप्रचुरमानुषभावनाढ्य मां पाहि सम्प्रति गतं चरणाब्जमूले ॥ २३ ॥

कालात्मना सृजसि पालयसि प्रभोऽन्ते तेनैव संहरसि सर्वमिमं प्रपञ्चम् ।
दृङ्मात्रशेषपरिदृश्यनिधान नित्यं मां पाहि सम्प्रति गतं चरणाब्जमूले ॥२४॥

मायात्मना प्रकटमप्यखिलात्मसाक्षिन् सम्मोहयस्यविरतं प्रतिरुद्धबोधान् ।
तेनैव संततनिगूढनिजात्मभावं मां पाहि सम्प्रति गतं चरणाब्जमूले ॥ २५ ॥

सूर्यो यथोदयगिरिं समुपेत्य सर्वं लोकान्धकारशमने प्रगृहीतदीक्षः ।
देवस्तथा रघुकुलं त्वमपि प्रतीतो मां पाहि सम्प्रति गतं चरणाब्जमूले ॥ २६ ॥

जीवस्य कृत्यमियदेव यदुत्तमाङ्गं त्वत्पादपद्मसविधे प्रमुदावनाम्यम् ।
तन्मात्रभक्तिगुणवश्यतमो भवांस्तु मां पाहि सम्प्रति गतं चरणाब्जमूले ॥२७॥

रामेति नाम तव योगकलाधिकं स्याद्यत्कष्टसंततिमृते कलयेद्विमुक्तिम् ।
किं नाम नात्मसुखलाभकृते गृणीते मां पाहि सम्प्रति गतं चरणाब्जमूले ॥२८॥

भीता भवाब्धिवततोर्मिभिरत्यनल्पैर्नान्यत्र सुस्थमनसो मनुजा भवन्ति ।
एकं विहाय भगवन्तमृते भवन्तं मां पाहि सम्प्रति गतं चरणाब्जमूले ॥ २९ ॥

कालोऽयमुग्रकलनः कलयत्यनल्पां शक्तिं जगत्सु खलु भूरिभयातुरेषु ।
न त्वाश्रितेषु भवतश्चिरमङ्घ्रिपद्मं मां पाहि सम्प्रति गतं चरणाब्जमूले ॥३०॥

त्वामाश्रिता गतभयाः शरणागतैक श्रीवज्रपंजरविभो करुणैककन्द ।
खेलन्ति कालशिरसि स्वपदं निधाय मां पाहि सम्प्रति गतं चरणाब्जमूले ॥३१॥

मुग्धा भवन्ति बहुजल्पितमागमं ये संलब्धये तव मुहुर्मृगयन्ति विप्राः ।
न त्वां स्पृशन्ति निजभक्ति कलैकलाभम् मां पाहि सम्प्रति गतं चरणाब्जमूले ॥३२॥

दीनं तथातुरमनेकभवोर्मिनष्टप्रज्ञं व्यतीतकुशलं बहुदुःखमग्नम् ।
मूढं विशालविषयावलिकृष्टचित्तं मां पाहि सम्प्रति गतं चरणाब्जमूले ॥ ३३ ॥

स्तब्धंकदाप्यकृतसत्परिचर्यमुग्रबुद्धिं निजात्महतिजातकदर्थनं च ।
व्यर्थव्यतीतजनुरायुषमात्रदोषं मां पाहि सम्प्रति गतं चरणाब्जमूले ॥ ३४ ॥

उच्चैरबद्धबहु जल्पनशीलमन्तः कामावसन्नमनुदीरितनामजाप्यम् ।
पापं समस्तविपरीतकरं कुशीलं मां पाहि सम्प्रति गतं चरणाब्जमूले ॥ ३५ ॥

नामोद्धृताखिलजगज्जनसौख्यदायी स्वानन्दसिन्धुलहरीपरियोजितस्वः ।
अत्युन्नतस्वविभवोचित भव्यकारी मां पाहि सम्प्रति गतं चरणाब्जमूले ॥३६॥

आयुः प्रयाति विफलं सकलेष्टदायिं स्तत्ते स्मृतिं विद्धतो मनुजस्य नित्यम् ।
साफल्यमेति जगतीति विचिन्त्य सन्तं मां पाहि सम्प्रपि गतं चरणाब्जमूले ॥३७॥

ब्रह्मोवाच

एवं कृत्वा स्तुतिं भूयः खिंगो नामान्त्यजः प्रभोः ।
तस्थौ कृताञ्जलिर्दीनो विफलीभूतलोचनः ॥ ३८ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे उत्तरखण्डेऽन्त्यजस्तुतिर्नामाष्ट-चत्वारिंशोऽध्यायः ॥ ४८ ॥

एकोनपञ्चाशत्तमोऽध्यायः

ब्रह्मोवाच

ततः स लोचनं लेभे रामभक्तिप्रभावतः ।
संजातलोचनोऽथाग्रे ददर्श पुरुषं परम् ॥ १ ॥

निविडाम्बुधरं श्यामं श्रीमद्राजीवलोचनम् ।
आकाशनीलवपुषं तुङ्गनासाविराजितम् ॥ २ ॥
केयूरिणं प्रविलसत्कटकं मणिमालिनम् ।
माणिक्यरत्नमुकुटं स्फुरन्मकरकुण्डलम् ॥ ३ ॥
करुणाचपलापाङ्गं पीताम्बरविराजितम् ।
श्रीवत्सवक्षसं भूरिगम्भीरावर्तनाभिकम् ॥ ४ ॥
सुन्दरं सिंह विक्रान्तं मृगराजोदरद्युतिम् ।
रत्नकाञ्चीसमाबद्धपीताम्बरसुवासिनम् ॥ ५ ॥
श्रीरत्नपादुकान्यस्तचरणाम्बुरुहद्वयम् ।
चरणाब्जनखद्योतिविजितादित्यवर्चसम् ॥ ६ ॥
मन्दस्मितामितरुचिरञ्जिताधरबिम्बकम् ।
चन्द्राननं चमत्कारिमाधुर्यरसवारिधिम् ॥ ७ ॥
खिगो नामान्त्यजो दृष्ट्वा मुहुरूचे कृताञ्जलिः ॥ ८ ॥

खिग उवाच

अहो अत्यद्भुतं रूपं रामस्य करुणानिधेः ।
विषयासक्तचित्तेन मया नीताश्च वासराः ॥ ९ ॥
नैतावद्यातमतुलं रूपमेतन्मनोहरम् ।
प्रायो लक्ष्मीरिदं दृष्ट्वा रूपमत्यद्भुतं प्रभोः ॥
अभूच्चरणदासीति वयं समनुशुश्रुम ॥ १० ॥
व्रजाङ्गनाश्च प्रमुदाटवीस्था माधुर्यमत्यद्भुतमेतदेव ।
दृष्ट्वा वशीभूतहृदो निपेतुः पदाब्जयोरस्य सुपूरुषस्य ॥ ११ ॥
विहायलोकं त्रपितं गुरूणां कुटुम्बभीतिं प्रणयावकृष्टाः ।
भेजुर्भवन्तं भगवन्त मद्धा प्रत्यर्प्यचित्तं विषयांस्तनूश्च ॥ १२ ॥
एतावदासीन्मम भाग्यमेव स्फुटं यदन्तर्विषयावसन्तम् ।
सम्मूढधीः को विषमत्ति जानन् विहाय पीयूषनदीमनर्घ्याम् ॥ १३ ॥
इत्युक्त्वा प्रसभं खिगः पपात पदयोः प्रभोः ।
स्रवल्लोचनधाराभिः सेचयानो मुहुर्मुहुः ॥ १४ ॥

श्रीराम उवाच

उत्तिष्ठ खिग जातोऽसि मम सेवकसत्तमः ।
निर्भयः कालमायादेर्विमुक्तोस्त्यधुना भवान् ॥ १५ ॥
ये मामुपगता दीना जना निष्किचना अपि ।
तेषामहमभीत्यर्थं भवामि प्रकटः स्वयम् ॥ १६ ॥

लिंग उवाच

जन्मान्तरे परं पुण्यं जनैर्यैर्वा सुसत्कृतम् ।
तेषां त्वं गोचरो भूत्वा हरसे भवसंततिम् ॥ १७ ॥

अहं तु जनुरारभ्य पापाचारः सुनिन्दितः ।
विषयाकृष्टहृदयो भ्रष्टो ज्ञानविवर्जितः ॥ १८ ॥

न कर्म कृतवान् किंचिन्न ज्ञानेन च निर्मलः ।
नोपासनापरः शश्वच्चरणाब्जबहिर्मुखः ॥ १९ ॥

तत्केन सुकृतेनाहं लब्धवान्छुभमीदृशम् ।
साक्षात्तव रमेशस्य यदेतत् खलु दर्शनम् ॥ २० ॥

अवितर्क्यार्थ वा राम करुणैव तव प्रभो ।
मुनीनां योगनिष्ठानां नित्यं निर्मलचेतसाम् ॥ २१ ॥

ज्ञानिनां तत्त्वनिष्ठानां सततोपासनावताम् ।
जन्मान्तरसहस्रैश्च निभृतं साधितात्मनाम् ॥ २२ ॥

अलभ्यं मङ्गलमिदं यत्स्वरूपप्रकाशनम् ।
तन्मया लब्धमेवाद्धा न पश्यामि च कारणम् ॥ २३ ॥

श्रीराम उवाच

ऋजीषो नाम योगीन्द्रो भवांस्तपसि निष्ठितः ।
प्रमोदवनपार्श्वस्थो मम भक्तिविवर्जितः ॥ २४ ॥

श्रुत्वा गोपीः कामवतीर्मर्त्यस्वरूपं मनोहरम् ।
लोकोक्त्या कृतवान्निन्दां लोकवेदपराङ्मुखः ॥ २५ ॥

ऋजीष उवाच

अहो एताः काममत्ताः कस्मिंश्चित्पुरुषे रताः ।
लोकवेदौ परित्यज्य रताः किमिति दुर्मदाः ॥ २६ ॥

कुटुम्बं वर्जयत्यासां स्वतन्त्राणां मनोगतिम् ।
नैताश्च खलु मन्यन्ते मोहिता विष्णुमायया ॥ २७ ॥

गतिरासां तु भविता केति जानामि न क्वचित् ।
इति मे विप्रियं जातं त्वया खलु सुयोगिना ॥ २८ ॥

विफलं ते तयो जातं मद्भक्तानां विनिन्दया ।
भक्तेष्वपि च ता मुख्या आभीर्यो मम वल्लभाः ॥ २९ ॥

प्रमोदवनवासिन्यो यासां पादभवं रजः ।
ब्रह्मादयः कामयन्ते विद्वांसस्ते त्रयीविदः ॥ ३० ॥

ततस्त्वं शूकरो जातः प्रमोदवनसन्निधौ ।
क्रूरो विपिनसंचारी तामसीं योनिमागतः ॥ ३१ ॥

प्रमोदवनमध्ये तु कासारः कोऽपि निर्मलः ।
तत्र दैववशादेत्य मज्जनं कृतवांस्तुवै ॥ ३२ ॥

तत्र व्रजजना केचित्स्नाताः पूर्वं मम प्रियाः ।
तेषां पादरजो लग्नं तवाङ्गे मज्जतो मुहुः ॥ ३३ ॥

अङ्गसंगि च तत्तोयं लग्नं तेषां तवाङ्गके ।
मुक्तस्तेन प्रभावेण महाशूकरयोनितः ॥ ३४ ॥

तत्क्षणं स्मृतिमापन्नः स्मृतवान् पूर्वजन्म च ।
अहो अहं तपस्वी स ऋजीषो नाम वै मुनिः ॥ ३५ ॥

केन दुष्कृतयोगेन प्राप्तवाञ्छौकरीं गतिम् ।
अनर्हं ईदृशीं योनिं तपस्विकुलजो मुनिः ॥ ३६ ॥

इति चिन्तयतस्तस्य नारदो मुनिरागतः ॥ ३७ ॥

नारद उवाच

अये मुनिकुलोत्पन्न मुने तापससत्तम ।
दिष्ट्या निर्मुक्तवानद्य भवाञ्छूकरयोनितः ।
महतां खलु पापानामिदं फलमभूत्तव ॥ ३८ ॥

ऋजीष उवाच

किं मया दुष्कृतं पूर्वं कृतं देवर्षिसत्तम ।
तपस्यता योगनिष्ठमानसेन सुचेतसा ॥ ३९ ॥

नारद उवाच

भवान् निन्दितवान् पूर्वं गोपीः श्रीरामवल्लभाः ।
कृतोऽसह्यापराधोऽयं रामस्य त्रिजगत्पतेः ॥ ४० ॥

स्वस्यापराधं भगवान् कदाचित्क्षमते प्रभुः ।
न तु स्वीयापराधस्य क्षान्तिर्भगवतः क्वचित् ॥ ४१ ॥

तेन दोषेण हि भवाञ्छौकरीं योनिमागतः ।
तासां चरणपद्मोत्थधूलिधोरणिसंगमात् ॥ ४२ ॥

व्रजकासारसंस्नानान्मुक्तवान् योनिमेतकाम् ।
अतः परं पुनरपि नैव कर्तव्यमीदृशम् ॥ ४३ ॥

असह्यं रामदेवस्य नितरामपराधनम् ।
एता हि भगवद्रूपा भगवत्प्रियकारिकाः ॥ ४४ ॥

न ह्यासां सदृशो ब्रह्मा न शेषो नापि चेन्दिरा ।
अतः परं भजस्व त्वं ता गोपोरेव भक्तितः ॥ ४५ ॥

तासां चरणपद्मोत्थधूलिधूसरविग्रहः ।
प्राप्स्यसे त्वं पुनरपि रामसायुज्यमद्भुतम् ॥ ४६ ॥

एकं तु जन्म भविता तदसह्यापराधतः ।
अन्त्यजेषु जनुः प्राप्य पुनर्मुक्तो भविष्यसि ॥ ४७ ॥

इत्युक्त्वा नारदो नाम देवर्षिरगमद्दिवि ।
भवांश्चैव पुनर्जातः साकेतनगरेऽत्र च ॥ ४८ ॥

विषयानन्दसम्मग्नः पूर्वजन्मापराधतः ।
नारदस्य मुनेः संगात्कासारस्नानतोऽपि च ॥ ४९ ॥

रामाङ्घ्रिनापदाम्भोजरजोमहात्म्यतोऽपि च ।
पुनर्मद्भक्तियोगेन स्तुत्वा मां भक्तवत्सलम् ॥ ५० ॥

अन्धत्वं समतिक्रम्य प्राप्तवान् मम दर्शनम् ।
अतः परं पुनर्जन्म न भविष्यति संसृतौ ॥ ५१ ॥

सम्प्राप्तो मत्पदाम्भोजे निर्भयोऽद्य निराकुलः ।
तपसां कर्मणां चैव ज्ञानानां चापि सर्वशः ।
फलं प्राप्तोऽस्येकदैव कृतार्थोऽसि विशेषतः ॥ ५२ ॥

मन्नामसंस्मरणकृन्मम भक्तियुक्तो मल्लोकसंगतिपरो मदुपासनस्थः ।
मत्स्थानमेष्यसि विमुक्तसमस्तमोहो भूयोऽप्यृजीषमुनिरेव भविष्यसि त्वम् ॥५३॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे उत्तरखण्डे
एकोनपञ्चाशत्तमोऽध्यायः ॥ ४९ ॥

पञ्चाशत्तमोऽध्यायः

ब्रह्मोवाच

पुत्रौ कुशलवौ नाम रामो रघुकुलेश्वरः ।
कुशावत्यामवन्त्यां च स्थापयामास पार्थिवौ ॥ १ ॥

उर्मिलाकुक्षिसम्भूतौ तनयौ शुभलक्षणौ ।
कारापथनृपौ चक्रे लक्ष्मणो रामशासनात् ॥ २ ॥

तथा पुष्करनामानौ माण्डवीकुक्षिसम्भवौ ।
तनयौ भरतश्चक्रे तदाख्यविषयेश्वरौ ॥ ३ ॥

श्रुतिकीर्तेः समुद्भूतः सुबाहुश्चबहुश्रुतः ।
उभौ चकार शत्रुघ्नो मथुराविदिशेश्वरौ ॥ ४ ॥

रामलक्ष्मणशत्रुघ्नभरतैः सह वासिभिः ।
चिरं सम्प्रीणिताः कृत्स्नाः साकेतनगरीप्रजाः ॥ ५ ॥

दिने दिने गवां पूजा ब्राह्मणानां विशेषतः ।
दानानि यज्ञाः स्वाध्याया व्रतानि विविधानि च ॥ ६ ॥

सम्बभूवुरयोध्यायां रामे शासति मेदिनीम् ।
श्रुतिगोद्विजधर्माणां स्वयं संरक्षके प्रभौ ॥ ७ ॥

अतिथीन् पूजयानस्य रामस्य करपङ्कजात् ।
पाद्यार्घजलवाहिन्यः सरय्वा सह संगताः ॥ ८ ॥

यज्ञहोमभवो धूमः श्रीरामस्य निकेतनात् ।
उद्बभूव विमानस्थानन्धीकुर्वन् सुपर्वणः ॥ ९ ॥

शुभाशिषः प्रयुञ्जानाद्विजन्मानो मुदान्विताः ।
पूजिता रघुनाथेन स्वानि स्वानि गृहाण्यगुः ॥ १० ॥

प्रावर्त्ततरां धर्मश्चतुष्पादिव मूर्त्तिमान् ।
चतुर्भ्यस्तत्र भ्रातृभ्यो लब्धसम्पद्दिवानिशम् ॥ ११ ॥

अश्वमेधाः कृतास्तेन महाधार्मिकमौलिना ।
प्राग्वंशवर्त्तिना हैम्या जनकाङ्गजया समम् ॥ १२ ॥

अजस्रं वासितः शक्रस्त्याजयित्वा सुरालयम् ।
इन्द्राणीविरहोत्तापतान्तनन्दनभूरुहम् ॥ १३ ॥

अर्चिते प्रतिभूपालमौलिरत्नमरीचिभिः ।
रामस्य चरणाम्भोजे वाञ्छाधिकफलप्रदे ॥ १४ ॥

केषांचिद्दर्शयन् स्वस्य मैथिल्या सह संततम् ।
संयोगं सर्वकालीनं सुखभोगसमन्वितम् ॥ १५ ॥

केषांचिद्दर्शयन् दृष्ट्या बहिरङ्गदृशां पुनः ।
वियोगं सर्वकालीनयोगसेवनतत्परः ॥ १६ ॥

केषांचिद्दर्शयन् देव एकपत्नीमहाव्रतम् ।
आनुकूल्यं दृढं नाम यत्रनान्यवधूरतिः ॥ १७ ॥

केषांचिद्दर्शयन् पद्मां विशालाक्षीं रतिं पराम् ।
सहजानन्दिनीं रामां निर्भरासक्तिमेव च ॥ १८ ॥

वनेष्वन्यां पुरे चान्यां लीलां सम्भावयन् मुहुः ।
यया कया च रीत्या वै भक्तानानन्दयन् विभुः ॥ १९ ॥
लीलाधिष्ठानमितरं सर्वलोकविलक्षणम् ।
देशं कालं तथा द्रव्यं कृत्स्नं परिकरं तथा ॥ २० ॥
अन्तरङ्गदृशां लोके केषांचिद्विदितात्मनाम् ।
नित्यं संदर्शयन् मोहसमुच्छित्यै कृपावशात् ॥ २१ ॥
आसुराणां पुर्नित्यमधोगतिनिनीषया ।
लोकानुगतमात्मानं दर्शयन् विश्वमोहनः ॥ २२ ॥
चिरं तस्थौ रघुपतिर्योगमायामुपाश्रितः ।
रञ्जयन् प्रकृतीः सर्वा नृत्यन् नट इवाद्भुतः ॥ २३ ॥
भुवो भारं हरन् कृत्स्नं धर्मं संस्थापयन् विभुः ।
भक्तिं प्रवर्तयंल्लोके द्विधाभावविभावनीम् ॥ २४ ॥
स्वरूपं च प्रकटयंश्चिदानन्दाद्वयात्मकम् ।
लीलां च तादृशीं कृत्स्नां लोके संदर्शयन् विभुः ॥ २५ ॥
रेमे चिराय भगवान् प्रवरो रघूणामक्लिष्टकर्मकरणैकपटुर्महात्मा ।
लोकेषु मौलिमुकुटाग्रमणीन्द्ररोचिर्नीराज्यमानचरणाम्बुजदिव्यपीठः ॥ २६ ॥
ऐश्वर्यमद्भुतमखण्डमजस्रमेव वीर्यंयशः श्रियमनन्तगुणप्रतिष्ठः ।
ज्ञानं विरक्तिमपि विश्वविलक्षणात्मा संदर्शयंश्चिरमरञ्जयदात्मभृत्यान् ॥ २७ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे उत्तरखण्डे पञ्चाशत्तमोऽध्यायः ॥ ५० ॥

एकपञ्चाशत्तमोऽध्यायः

ब्रह्मोवाच

अथ स्वशक्त्या रममाण एवं स्वांशैः स्वभक्तैरपि सेव्यमानः ।
प्राकट्यकार्यं निखिलं विधाय रामोऽखिलाव्यक्तपदं जगाम ॥ १ ॥

भुशुण्ड उवाच

कथमव्यक्ततां यातः प्रमोदवनचन्द्रमाः ।
एतन्मे ब्रूहि सर्वज्ञ तस्य लीलान्तरं महत् ॥ २ ॥

ब्रह्मोवाच

विधिना प्रेषितः कालः प्रार्थयामास यत्प्रभोः ।
तद्विधित्सुः स्वयं रामो लक्ष्मणं प्रत्युवाच ह ॥ ३ ॥

मयाऽऽज्ञप्तोऽसि सौमित्रे गच्छ त्वं सरयूवनम् ।
अनन्तरमहं चापि गन्तास्मि स्वपदं महत् ॥ ४ ॥

लक्ष्मण उवाच

कीदृशं ते पदं दिव्यं यत्र त्वं नित्यविग्रहः ।
नित्यलीलाविनोदेन क्रीडस्यनिशमीश्वर ॥ ५ ॥

श्रीराम उवाच

एतदेव मम स्थानं यत्राहं नित्यविग्रहः ।
प्रमोदविपिनं नाम क्रीड़ास्थानमनुत्तमम् ॥ ६ ॥

अष्टचत्वारिंशदेव योजनान्यष्टकोणवत् ।
मध्येप्रमुद्वनं यत्र सहजाया निकेतनम् ॥ ७ ॥

अशोककलिकावेश्मगुञ्जद्भ्रमरमण्डितैः ।
भूरुहैर्विविधैर्भाति सौरभ्यकुसुमाकरम् ॥ ८ ॥

सदा मञ्जरितैराम्रैरशोकैश्च समाकुलम् ।
कूजत्कोकिलसंदोहकाकलीललितस्वनम् ॥ ९ ॥

परितस्तस्य गोपानां मम लीलाविनोदिनाम् ।
स्थानानि सुबहून्येव साक्षाद्वै रत्नकुञ्जवत् ॥ १० ॥

धाम यत्सुखितेन्द्रस्य नन्दनस्य महात्मनः ।
माङ्गल्यकाराजिनीभ्यां शोभमानं मनोरमम् ॥ ११ ॥

तत्र रासविलासादिलीलालोलुपमानसः ।
अहं क्रीडामि सततं कामिनीकोटिमण्डले ॥ १२ ॥

तन्मण्डलेश्वरी नित्या सहजानन्दिनी प्रिया ।
चिदानन्दमयी शक्तिः सर्वत्र सर्वरूपिणी ॥ १३ ॥

अत्रैवाव्यक्तामेत्य स्थास्यामि सततं त्वहम् ।
धैर्यमालम्ब्य वर्त्तस्व तद्ध्यानज्ञानतत्परः ॥ १४ ॥

न पुनर्मद्वियोगार्त्ति भवान् यास्यति कुत्रचित् ।
सिद्धोऽसि कृतकृत्योऽसि मत्प्रसादेन लक्ष्मणा ॥ १५ ॥

इत्युक्तः प्रभुणा सद्यो लक्ष्मणस्तच्चिकीर्षितम् ।
विद्वान् प्रणम्य तत्पादपद्मयोधीरमानसः ॥ १६ ॥

जगाम सरयूतीरं वहत्त्रिविधमारुतम् ।
आरामकुञ्जशोभाढ्यं हेमरत्नमयावनिम् ॥ १७ ॥

तत्र गत्वा चिरं दध्यौ मायातीतं परं महः ।
स तन्महसि चाद्राक्षीरयोध्यां भुवनोत्तराम् ॥ १८ ॥
वनोपवनशोभाढ्यां सरयूतीरभूमिगाम् ।
गोपलीलाराजलीलालीलाद्वयमनोरमाम् ॥ १९ ॥

अपश्यदुभयत्रापि राममानन्दविग्रहम् ।
सहजानन्दिनीसीताशक्तिद्वयविराजितम् ॥ २० ॥
सेवितं प्रेममर्यादाभक्तिभ्यां च निरन्तरम् ।
सर्वलीलारसोपेतं सर्वैः परिकरैर्युतम् ॥ २१ ॥

स्वात्मादीन् पार्षदांश्चापि तत्रापश्यद्यथास्थितान् ।
तद्ध्यानपरमानन्दलहरीमग्नमानसः ॥ २२ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे उत्तरखण्डे लक्ष्मणपरोभावो नामैकपञ्चाशत्तमोऽध्यायः ॥ ५१ ॥

द्विपञ्चाशत्तमोऽध्यायः

ब्रह्मोवाच

अथ लोकजनैः सार्द्धं यातुकामः प्रमुद्वनम् ।
भगवान् घोषयामास दुन्दुभिं कोसलापुरे ॥ १ ॥
अद्य गन्तास्म्यहं स्वीयं प्रमोदविपिनं परम् ।
आयान्तु ये जनास्तत्र यातुकामा मया सह ॥ २ ॥
स्नात्वा सरय्वाः सलिले दत्त्वा दानानि भूरिशः ।
प्रविशन्तु परं रन्ध्रं सरयूतीरभूमिगम् ॥ ३ ॥
गच्छन्तु सर्वे प्रमोदविपिनं धाम मामकम् ।
न यत्र कालमायाद्याः कुतोऽन्यद्वस्तु तद्वशम् ॥ ४ ॥
तत्र नित्यं मया सार्द्धं मोदन्तां नित्यलीलया ।
अमन्दानन्दसंदोहभूजो भूरिसुमङ्गलाः ॥ ५ ॥

इति दुन्दुभिनिर्घोषमाकर्ण्य पुरवास्तवः ।
दारापत्यसुहृद्बन्धुमित्रभृत्यादिभिः सह ॥ ६ ॥

आगोपमा च श्वपचमापण्डितवरद्विजम् ।
आकीटपशुपक्ष्यादि गृहीतधिषणा जनाः ॥ ७ ॥

सद्यः समुद्भूतबोधाः स्वरूपबलतो हरेः ।
संजातात्मप्रकाशाश्च स्वाराज्यपदगन्तुकाः ॥ ८ ॥

आययुः सरयूं नाम नदीं विश्वविमोक्षिणीम् ।
हंससारसचक्राह्वकादम्बकुलकेलिनीम् ॥ ९ ॥

हेमरत्नसमाबद्धकान्तोभयतटान्विताम् ।
मन्दारपारिजातादितरुमालोपवीतिनीम् ॥ १० ॥

मन्दानिलसमुत्क्षिप्ततरङ्गशतसंकुलाम् ।
पूजितां सुरगन्धर्वयक्षराक्षसकिन्नरैः ॥ ११ ॥

पीयूषोज्ज्वलपानीयां राजहंसनिषेविताम् ।
तत्रैत्य ददृशुः सर्वे रामंरघुकुलोद्वहम् ॥ १२ ॥

विश्वग्घनूमत्सुग्रीवनलनीलाङ्गदादिभिः ।
कपीन्द्रैः सेवकश्रेष्ठैः सेव्यमानं मुदान्वितम् ॥ १३ ॥

युतं सौमित्रिभरतशत्रुघ्नैर्भ्रातृभिर्निजैः ।
श्रीमज्जनकपुत्र्या च विस्फुरद्वामविग्रहम् ॥ १४ ॥

अपि पद्माविशालाभ्यां वीजितोभयचामरम् ।
पुरस्ताच्चापि भारत्या स्तुतं वीणाख्यहस्तया ॥ १५ ॥

गीयमानं च गन्धर्वैर्वेदमूर्तिधरैरिव ।
सर्वतो जयशब्देन संवर्द्धितयशोभरम् ॥ १६ ॥

तार्क्ष्यविष्वक्सेनमुखैः पार्षदैरपि सेवितम् ।
शेषादिभिः स्तूयमानं वाचस्पतिभिरुन्मुखैः ॥ १७ ॥

तत्र वाद्यत्सु वाद्येषु जयनिर्घोषशालिषु ।
भेरीमृदङ्गनिस्स्वानझर्झरीपटहादिषु ॥ १८ ॥

मुखरीक्रियमाणेषु दिङ्मुखेषु समंततः ।
तौर्यत्रिकनिनादेन नभस्याकुलिते सति ॥ १९ ॥

वर्षत्सु देववर्येषु कल्पद्रुकुसुमोत्करम् ।
उत्साहसंयुतेष्वद्धास्तुवत्सु प्रवरर्षिषु ॥ २० ॥

नत्वा नत्वा विभुं रामं सम्प्रयुक्तास्तदाज्ञया ।
मज्जुर्मानवाः सर्वे सरयूसलिलेऽमले ॥ २१ ॥

अथ प्रविविशुः शुद्धा रामकुञ्जमनुत्तमम् ।
सदारापत्यसुहृदः सभृत्यसखिबन्धवः ॥ २२ ॥

ब्राह्मणाः क्षत्रिया वैश्याः शूद्रा अवरयोनिजाः ।
वर्णसंकरजाश्चापि चाण्डालाः श्वपचादयः ॥ २३ ॥

भिल्लाः खसाः पुलिन्दाश्च हूणाश्चान्ध्राः सहस्रशः ।
वधिका यवनाश्चापि नानाजात्याधमा अपि ॥ २४ ॥

पशवः पक्षिणः कीटा यूकादंशघुणादयः ।
जन्तवोऽनेकजातीया एकद्वित्रीन्द्रिया अपि ॥ २५ ॥

ते सर्वे दिव्यवपुषो भूत्वा सपदि तत्क्षणात् ।
पश्यतामेव देवानां भासयन्तो दिशोऽखिलाः ॥ २६ ॥

आरुह्य देवयानानि गीयमानाश्च किन्नरैः ।
प्रययुः प्रमोदवनं दिव्यं तत्तमसः परम् ॥ २७ ॥

न यत्र मायाखिललोकमोहिनी न कालशक्तिः कलनात्मिका तथा ।
न कर्मजन्यैश्च फलैः प्रसंजनं यदेकरूपं सदसत्परं जगुः ॥ २८ ॥

यत्सच्चिदानन्दमशेषमद्भुतं विशेषहीनं तमसः परं पदम् ।
प्रभावतः श्रीरघुवल्लभस्य तद्गता अनर्हा अपि साधनैर्विना ॥ २९ ॥

एवं विधाय सकलानपि तान् पुरस्ताज्जीवान् पुरीपरिसरेऽपि वसन्ति येऽन्ये ।
पश्चात्स्वयं स भगवानखिलात्मभूतः सीतापतिः परिकरैः सहितो जगाम ॥३०॥

आसीद्यावद्दिनं तत्सकलमपि रवः काहलः श्रीसरय्वा-
स्तोयेसम्मज्जतां श्रीरघुपतिमयतां गच्छतां रामकुञ्जम् ।
शश्वतेषां जनानामपि सकलदिशो भासितास्तद्विमानै-
र्नक्षत्रैर्व्याप्यमाना इव किमपि बभुर्विश्वतो ध्वान्तवर्जाः ॥ ३१ ॥

रामस्तेषां वास्तवे दिव्यरूपां विश्वस्योच्चैर्निर्ममौ स्वां पुरीं ताम् ।
या वै साक्षादियमेवास्त्ययोध्या सुप्राकारा परिखाश्रेणियुक्ता ॥ ३२ ॥

तस्या ईशः स्वयमानन्दमूर्तिर्नित्यं लीलारससंदोहमग्नः ।
नीत्वा तस्यामखिलान् जीवसंघान् दत्त्वाऽऽनन्दं वासयामास नित्यम् ॥ ३३ ॥

अन्तर्हिते कोसलायां चराचरपतौ तदा ।
तेनैवपरमाज्ञप्ता ज्ञाततत्त्वाः स्वरूपतः ॥ ३४ ॥

व्रजमाजग्मुरुदारचित्ताः सुन्दरनन्दननीललालामाः ।
राजकुमारवराः सुकुमारा ददृशुर्गोपीगोपसमूहम् ॥ ३५ ॥

तत्र गोपीजनगिरा सद्यः संत्यक्तसंशयाः ।
विचेरुर्धरणीं कृत्स्नां कृतकृत्यात्मयोगिनः ॥ ३६ ॥

जनानुपदिशन्तस्ते रामभक्तिं रसोत्तराम् ।
जगत्कृतार्थयामासुर्लीलारसविशारदाः ॥ ३७ ॥

भुशुण्ड उवाच

अन्तर्हिते कोसलायां रामे रमणशालिनि ।
गोपिकाः किं विधा आसन् गोपाश्च गुणवत्तमाः ॥ ३८ ॥

ब्रह्मोवाच

यर्हि वाव तेजोमयान् विशिखान् धनुषि संधाय तत्र च स्वात्मज्योतिरारोप्य भगवानपीच्यतमश्रीविग्रहः सानुजः सभार्यो दक्षिणां दिशमगात्ततश्च विराधादि वधं कृत्वा पुनः साकेतोपगमराज्यशासनान्तां राजलीलां तेनैव श्रीविग्रहेणावतारप्रयोजन मूलभूतेनाकार्षीत् ॥ ३९ ॥

तर्ह्येव दिवसमारभ्य रमणीय कलाकलापपेशलो मधुरस्मितमंजिममण्डित-मुखचन्द्रचन्द्रिका प्रकाशधोरणीवशिताखिलस्वीयजनमानसोऽनुदिनवर्द्धमानलीलारसम-जुषद्व्रजवासिजननितम्बिनीषु ॥ ४० ॥

ततश्चेतरजननयनागोचरतया चित्रकूटाचलाखेटककालीनकपटविरहसत्यतानुसं-धानलक्षणनिजमायाकार्यं प्रकटयन्नतिशयविषम वेदनासमुद्भूतसंतापसंततिं स्वाप्निकीमि-वानुभाव यन्नपि तदसत्यतानुसंधान लक्षणनिरुपधिनिजकृपाकार्यं स्वरूपानन्दसंदोहमनु-भावयामास तासाम् ॥ ४१ ॥

ततश्च समाप्ते निजाविर्भावप्रयोजनेऽन्तर्कुभूषुर्भगवान् कमलबन्धुकुल कमलबा-न्धवो मान्धातृसगरभगीरथदिलीपरघुप्रमुखभूमीधवल कीर्तिकौमुदीकुमुदबन्धुर्जानकी-कल्पलतालिङ्गितकल्पतरुश्रीविग्रहो भक्तजननयनानन्ददानायैव चिरं तस्थौ ॥ ४२ ॥

अथ सर्वतः स्वांशान् स्वस्मिन् समावेश्यनिखिलपरिकरसहित एव प्रमोदवन-मिथाय कोसलेन्द्रः । राघवेन्द्रनन्दनो वै तथैव केलिकलाकौशलशाली माङ्गल्यादि भालभागधेयपुञ्जः श्रीनन्दन श्रीराजिनीपरमान्यो निखिलगोप सीमन्तिनीसमाजसुख-समूहसंतानकः सहजेश्वरीनयनसर्वस्वभूतः प्रमोदवनविहरणाविश्रान्तमति रेवं चिरं जयति ॥ ४३ ॥

जयति जयति रामो राघवेन्द्रः स नित्यं प्रमुदवनविलासी भक्तसर्वस्वराशिः ।
अवतरति निजांशैर्यो महीभारहारी द्विजनिगमनिजार्थान् साधयन् पूरुषाग्र्याः ॥४४॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे उत्तरखण्डे लीलाविस्तारणोनाम द्विपञ्चाशत्तमोऽध्यायः ॥ ५२ ॥

त्रिपञ्चाशत्तमोऽध्यायः

ब्रह्मोवाच

इति ते सर्वमाख्यातं भुशुण्ड क्रमतो मया ।
आदिरामायणं नाम श्रीरामचरितं शुभम् ॥ १ ॥

एतत्कल्पभवं चापि कल्पान्तरभवं तथा ।
समाधावुपलब्धं यत्सारं सारं विमृश्य च ॥ २ ॥

इदं ते गुप्तवद्धार्यं न प्रकाश्यं कथंचन ।
प्रभोरेवाज्ञया प्रोक्तं रामस्य करुणाम्बुधेः ॥ ३ ॥

रामेण कथितं पूर्वं स्वप्रियायै प्रमुद्वने ।
तया सौमित्रये प्रोक्तं तेन प्रोक्तं निजानुजे ॥ ४ ॥

क्वचिद्धनूमता लब्धं श्रीरामस्य मुखाम्बुजात् ।
तत एव मया लब्धं हयग्रीवाच्च योगिना ॥ ५ ॥

लब्धं कुम्भोद्भवेनापि मुनिभ्यस्तेन कीर्तितम् ।
तदेव ते मयाऽऽख्यातं रहस्यं चरितं प्रभोः ॥ ६ ॥

पठनीयं सदैवैतत् पवित्रं चित्तशोधनम् ।
मङ्गलं विघ्नकोटिघ्नं सुखदं भक्तिवर्द्धनम् ॥ ७ ॥

आयुष्यमारोग्यकरं धनसम्पद्विवर्द्धनम् ।
संकटेषु च कृच्छ्रेषु सर्वापद्विनिवारणम् ॥ ८ ॥

श्रावणीयं च भक्तेभ्य एकान्तिभ्यो विशेषतः ।
रसज्ञेभ्यः प्रेमवद्भ्यो रासलीलाविशेषितम् ॥ ९ ॥

यानि यानि चरित्राणि पवित्राणि सीतापतेः ।
रासलीलागोपलीलाभेदवित्तानि भूरिशः ॥ १० ॥

तेषां श्रवणमात्रेण दृढाभक्तिः प्रजायते ।
यावन्न विश्वामित्रेण नीतौ स्वाध्वरगुप्तये ॥ ११ ॥

सुखितस्य गृहे तावदूषतू रामलक्ष्मणौ ।
चक्राते कुतुकोपेतौ गोपलीलां रसोत्तराम् ॥ १२ ॥

चक्रे रासविलासाद्याः सर्वालीलाः शुभान्विताः ।
धात्रीपतिरपि प्रायः पुत्रवच्चान्ववर्त्तत ॥ १३ ॥

तौ चापि लीलारसिकौ भ्रातरौ रामलक्ष्मणौ ।
माङ्गल्यां सुखितं चैव मेनाते जनकौ निजौ ॥ १४ ॥

तयोश्चरितमत्रैव गोपलीलानुकारिणोः ।
प्रतिश्लोकं चोपबद्धं श्रोतव्यं भक्तिभावतः ॥ १५ ॥

मोचनं भवबन्धेभ्यो रोचनं मनसः परम् ।
गोचरं सद्विशेषाणां सामान्यानामगोचरम् ॥ १६ ॥

चैत्रस्य शुक्लपक्षे तु प्रतिपद्दिवसादितः ।
यावज्जन्मदिनं श्राव्यं रामस्य रसिकेशितुः ॥ १७ ॥

दिने दिने महत्पुण्यमश्वमेधशतोद्भवम् ।
तुष्यत्याशु रमाकान्तां रामो राजीवलोचनः ॥ १८ ॥

भूमौ स्वस्तिकमालिख्य सर्वतोभद्रमेव वा ।
मण्डलं विपुलं तत्र स्थापयेज्जानकीपतिम् ॥ १९ ॥

दीपराजं च संस्थाप्य विधिवत्तस्य संनिधौ ।
मण्डपं कारयेत्तत्र चतुर्द्वारं मनोहरम् ॥ २० ॥

वाचयेत्तत्र विधिवद्ग्रन्थमेनं समाहितः ।
अनन्यभक्त्या श्रोतव्यं सर्वदा रामसेवकैः ॥ २१ ॥

गोभूहिरण्यवस्त्रादयैस्तथाश्वरथकुञ्जरैः ।
यथाशक्त्या च वसुभिस्तोषयेद्वाचकं द्विजम् ॥ २२ ॥

लिखित्वा पुस्तकं चैतद्दक्षिणाहेमसंयुतम् ।
रामभक्ताय योददयाद् ब्राह्मणाय सुयज्वने ॥ २३ ॥

तस्य पुण्यफलं चापि वक्तुं नो शक्यते मया ।
अश्वमेधसहस्राणि राजसूयशतानि च ॥ २४ ॥

लभते भक्तिमान् मर्त्यः कथाश्रवणमात्रतः ।
असंख्यं लभते पुण्यं कीर्तनाच्च दिने दिने ॥ २५ ॥

ब्रह्मोवाच

इति मत्तः समाश्रुत्य भुशुण्डो रामसेवकः ।
प्रोद्भूतपूर्वसंस्कार इदमूचे स मां सुराः ॥ २६ ॥

भुशुण्ड उवाच

धन्योऽहं कृतकृत्यश्च त्वत्प्रसादाद् विधो मम ।
सद्यो विगलितो मोहः संजाता पूर्वजन्मधीः ॥ २७ ॥

अहं हि रामभक्तोऽस्मि धातर्जन्मनि जन्मनि ।
इदानीं ते प्रसादेन भक्तिर्मेऽभूद्दृढीयसी ॥ २८ ॥

द्वीपेऽस्मिन् पर्वते चात्र निवत्स्यामि शुभान्वितः ।
रामभक्तिसुधां पीत्वा सदा मत्तः प्रसन्नधीः ॥ २९ ॥

इदं श्रुतं ते वदनारविन्दादद्यशोऽमलं श्रीरघुपुङ्गवस्य ।
सदैव पद्योद्भव कीर्त्तनीयं मया पुरो भक्तिमतां सुराणाम् ॥ ३० ॥

रहः स्मरिष्यामि च सद्रहस्यं निधेयमन्तर्निधिसारभूतम् ।
स्वस्त्यस्तु ते गच्छ विधे स्वलोकं लोकेश लोकाधिकृतिं प्रशाधि ॥ ३१ ॥

इत्युक्त्वा मां स वै देवाः पूजयित्वा यथाविधि ।
विससर्ज स्वलोकाय भक्तिनम्रः कृताञ्जलिः ॥ ३२ ॥

एतत्सुरगणाः कृत्स्नं गुणग्रथनमीशितुः ।
आकर्ण्य कृतकृत्याः स्थ न श्रोतव्यान्तरं च वः ॥ ३३ ॥

श्रुतं यशश्चेद्रघुपुङ्गवस्य किमन्यकीर्त्या श्रुतया जनस्य ।
गीता गुणाश्चेद्रघुनन्दनस्य पीतापि सा तर्हि सुधा मुधा स्यात् ॥ ३४ ॥

स जयति राजवेषरमणीय उदारगुणः
प्रमुदवनावनीन्दुरखिलप्रमुद्वासिहितः ।
स्मितसहजेश्वरीवदन चन्द्रचकोरयुगं नयन-
युगं निजेषु निदधद् राघवेन्द्रसूनुः ॥ ३५ ॥

इति श्रीमदादिरामायणे ब्रह्मभुशुण्डसंवादे उत्तरखण्डे ग्रन्थमाहात्म्यादि-निरूपणं नाम त्रिपञ्चाशत्तमोऽध्यायः ॥ ५३ ॥

समाप्तमिदमादिरामायणम् ॥

१ संवत् १८९९ के श्रावण सुदि १४ मङ्गलेकः लिखा सारदादीन मिश्र
मुकाम पुरवामध्ये विश्वनाथसिंह राज्ये ।

संवत् १७१९ वर्षे आश्विनशुक्ल त्रयोदश्यां लिखापितमिदं रामर्षिणा
श्रीस्वामि बालकृष्णानुजीविना विदुषा ।
(श्रीरामगोपालो जयति)